श्रीनारायणपण्डिताचार्य्यविरचितं

सङ्ग्रहरामायणम्

[श्रीविश्वपतितीर्थकृतया भावार्थदीपिकया,
आचार्यगोविन्दकृतया सङ्ग्रहचन्द्रिकया च भूषितम्]

[प्रथमो भागः]

संशोधकः-सम्पादकः
डा. बन्नञ्जे गोविन्दाचार्यः

प्रकाशनम्
श्रीपेजावराधोक्षजमठः, जगद्गुरुश्रीमध्वाचार्यमहासंस्थानम्
उडुपी
२०१९

SANGRAHA-RAMAYAṆAM [Samskṛtam], First part,
by Śrī Nārāyaṇa Paṇḍitācārya, with commentaries: Bhāvārtha dipikā of Viśvapati Tithra and Saṇgraha cahndrikā of Dr. Bannañje Govindācārya.

Critically Edited by : **Dr. Bannañje Govindācārya**
Vidyāvācaspati, Vidyāratnākara, Padmashri awardee.

Published by : **Śrī Pejāvara Adhokṣaja Maṭha**
Jagadguru Śrī Madhwācārya Mahā Samsthāna
Udupi
Karnātaka, India
Mob : 9 8 4 5 4 6 8 5 0 8

First Edition : **2 0 1 5**, (**Copies** :**5 0 0**)

Pages : **7 2+7 6 0**

Price : **₹1 5 0 0 (complete set)**

Typeset : **Kaddi S. Badarinarayanachar**
Poornaprajna Vidyapeetha
E-Mail : bnkaddi@gmail.com

Printed at **Sri Anirudh Creations**
#144, 6th main, Gururaja Layout
Behind Vidyapeetha, Bengaluru-560028
Cell: 9880077876
E-Mail : srikanth.nsil@gmail.com:



कृष्णं वन्दे जगद्गुरुम्



प्रणतवान् प्राणिनां प्राणभूतं
प्रणतिभिः प्रीणये पूर्णबोधम् ॥

H.H. Sri Vishveshatirtha Swamiji
Sri Pejavara Adhokshaja Matha
Jagadguru Sri Madhwacharya Maha Samsthana
Udupi-576101, Karnataka
Mob : 98454 68508

श्रीश्रीविश्वेशतीर्थश्रीपादाः
श्रीपेजावराधोक्षजमठः
जगद्गुरुश्रीमध्वाचार्यमहासंस्थानम्
उडुपि-५७६१०१, कर्णाटक

आशीर्वचनम्

जगद्गुरुः आचार्यमध्वगुरुवर्यः महाभारतस्य अद्भुतं संशोधनात्मकं महाभारत-तात्पर्यनिर्णयाभिधानं महोन्नतं ग्रन्थं व्यरीरचत् । विभिन्नप्रदेशगतान् मूलग्रन्थान् परिशील्य यथाह भगवान् व्यासः तादृशमधिकृतं महाभारतमन्विष्य तदनुसारेण महाभारतनिरूपितं वास्तवमितिहासं महाभारततात्पर्यग्रन्थरूपेण न्यरूरुपत् । संशोधनक्षेत्रे आचार्यमध्वप्रदत्तमिदमपूर्वमुपायनमिति निस्सङ्कोचं सङ्कथयामः । एवं भगवदवतारस्य श्रीरामस्य तथा श्रीकृष्णस्य विविधपुराणेतिहासेषु समीरितानि चरितानि परिशील्य श्रीरामकृष्णयोः वास्तवचरित्रचित्रणमप्यत्र ग्रन्थे समावेशितवान् श्रीमदाचार्यः ।

श्रीमदाचार्यवर्यात्यन्तप्रियान्तेवासिनः पण्डिताचार्यत्रिविक्रममहोदयस्य प्रियपुत्रः मध्व-विजयाभिधसुमधुरसुमहितमन्त्रसमानग्रन्थरचयिता पण्डिताचार्यः नारायणमहाभागः तात्पर्यनिर्णयग्रन्थमनुसृत्य सङ्ग्रहरामायणाभिधानं काव्यमिदं निबबन्ध । श्रीमदाचार्यकृतमध्वरामायणस्य विस्तरणं वाल्मीकिरामायणस्य सङ्ग्रहणं च विधायोभयोरपूर्वसमायोजनं समावेश्य विरचितं रुचिरललितं मधुररसधारास्यन्दि काव्यमिदम् । अस्य च हृद्यपद्यशैली सुन्दरपदबन्धुरता समावर्जयति समेषामपि मानसम् । अस्मत्पूर्वाचार्यश्रीविश्वपतितीर्थगुरुवरेण अस्य सरलसुन्दरव्याख्याऽपि समारचिता । सङ्ग्रहरामायणमध्वविजयादिबहुग्रन्थव्याख्यानेन विश्वपतितीर्थगुरुवर्यः सज्जनानां महान्तमुपकारं व्यतनोत् । तत्रतत्र स्खालित्यमप्यस्तीति पण्डितः बन्नञ्जे गोविन्दाचार्यः प्रतिपादयति । तस्य चर्चाऽत्र न मया विधीयते । तस्य विमर्शं

समयान्तरे वितनुमः । अस्माकं विशेषाभिमानभाजनीभूतः संशोधन-लेखन-प्रवचनादिष्वप्रतिमप्रतिभाशाली निरन्तरं ज्ञानसेवानिरतः आचार्यबन्नञ्जे गोविन्दमहाशयः सङ्ग्रहरामायणसंशोधनेन साकं तस्य नूतनां व्याख्यामपि विरचय्य विशेषतः मध्वमाधवसेवामतनोदिति तं सानन्दमभिनन्दामः ।

इतः पूर्वमप्यनेकैः सङ्ग्रहरामायणप्रकाशनं व्यधायि । समीचीनमूलकोशालाभेन तत्र केचन दोषा अपि सम्भवेयुः । अत्र मयाऽधिकचर्चा न विधीयते । एतादृशप्रकाशनैः ग्रन्थपरिरक्षणं कृतमिति तानप्यभिनन्दामः । सर्वथा शुद्धपाठसङ्ग्रहे आचार्य-गोविन्दपरिश्रमं तदीयसेवां च मुक्तकण्ठं प्रशंसामहे । तदीयज्ञानसेवा निरन्तरं निरन्तरायं प्रचलत्विति भगवन्तं सम्प्रार्थयामहे ।

एतान्मुद्रणकार्ये विशेषसहकारिणं अस्मात्प्रियशिष्यं कड्डीबदरीनारायणाचार्यम्, अस्मत्पियशिष्यान् विजयसिंह-कृष्णराज-हयवदनानपि तथा मुद्रणालयाध्यक्षं कल्याणिश्रीकान्तमपि भगवाननुगृह्णातु ॥

इत्यनेक नारायणस्मृतयः

श्रीश्रीविश्वेशतीर्थश्रीपादाः

विषयानुक्रमणिका

बालकाण्डम्

पञ्चमः सर्गः रामलक्ष्मणाभ्यां ब्राह्माद्यस्त्रदानम् । सिद्धाश्रमगमनम् । अत्र वामनावतार-कथनम् । विश्वामित्रयज्ञारम्भः । मारीचद्रावणम् । सुबाह्वादीनां संहारः । विदेहगमनम् । गङ्गावतरणेतिहासः ॥

षष्ठः सर्गः विशालराजचरितम् । वैशाल्यां सुमतिना सत्कारः । अहल्यावृत्तान्तः । अहल्याशापमोचनम् । जनकस्य यज्ञवाटं प्रति गमनम् । जनकपृष्टेन विश्वामित्रेण रामलक्ष्मणयोः परिचायनम् । शतानन्देन विश्वामित्रप्रशंसा ॥

सप्तमः सर्गः यागार्थं भूकर्षणे सीताप्राप्तिकथनम् । शिवधनुःप्राप्तिकथनम् । रामेण धनुर्भङ्गः । सीतया रामांसे मालार्पणम् ॥

अष्टमः सर्गः दूतमुखेन वार्तां श्रुत्वा दशरथस्याऽगमनम् । तत्परेद्युः कुशध्वजानयनम् । वर-वधूवंशवर्णनम् । नान्दीश्राद्धम् । भरतमातुलस्य युधाजित आगमनम् । चतुर्णां रघुकुमाराणां विवाहः । विश्वामित्रनिर्गमनम् । जनकेन परिबर्हदानम् । गृहेगृहे रामाभिनन्दनम् । दशरथेन स्नुषाभिः सह स्वपुरप्रस्थानम् । परशुरामागमनम् । रामेण वैष्णवधनुरारोपणम् । अतुलसंहारः । राज्ञः पुरीप्रवेशः । अयोध्यायां सीतारामयो रमणम् ॥

अयोद्ध्याकाण्डम्

प्रथमः सर्गः रामाभिषेकसन्नाहः । प्रजाभिनन्दनम् ॥

द्वितीयः सर्गः अभिषेकसम्भारसम्पादनम् । रामाय राज्ञा स्वाशयनिवेदनम् । रामाभ्यनुज्ञा । अमङ्गलनिरासाय व्रतदीक्षार्थमादेशः । रामेणोपोषणपूर्वं दर्भशय्याशयनम् ॥

तृतीयः सर्गः मन्थराया अभिषेकवार्ताधिगमः । तया कैकेयीचित्तचालनम् । वरद्वयवरणार्थं चोदनम् । कैकेय्या क्रोधागारे शयनम् । दशरथेन तस्याः सान्त्वनम् । तया रामवनगमनार्थं भरताभिषेकार्थं च वरद्वययाचनम् । दशरथमोहः । वराग्रहत्यागार्थ-मभ्यर्थना । कैकेय्या हठः । एवं विवदमानयोस्तयोः जाता प्रभाता निशा ॥

द्वादशः सर्गः तैलद्रोणीगतं पितुर्देहं दृष्ट्वा भरतशोकः।अन्त्यसंस्कारः। रामानयनार्थं सपौरस्य भरतस्य प्रस्थानम्। भरतस्य शुद्धभावं विज्ञाय गुहेन गङ्गातारणम्। भरद्वाजाश्रमे सर्वेषां सत्कारः। यमुनां तीर्त्वा चित्रकूटगमनम्। रामसमागमः। भरतेन पितृ-मरणनिवेदनम्। रामेण जलाञ्जलिदानम्। पुरं प्रत्यागमनार्थं सपौरेण भरतेन मातृभिश्चानुरोधः। चतुर्दशवत्सरानन्तरमागमिष्यामीति रामेण दृढवचनम्। पादुकाप्रदानार्थं वसिष्ठनिवेदनम्। पादुकां सिंहासने निधाय भरतेन नन्दिग्रामे वासः। चित्रकूटे रामेण काकनेत्रनिग्रहः॥

अरण्यकाण्डम्

प्रथमः सर्गः विश्रवसो जननम्। कुबेरजननम्। विद्युत्केशसन्ततिः। तया लोकपीडा। विष्णुना मालिवधः। सुमालिपुत्र्यां कैकस्यां विश्रवसः सकाशाद् रावणादिजननम्। रावणस्य ब्रह्मणाऽवध्यत्ववरदानम्। विभीषणेन भगवद्भक्तिवरणम्। कुम्भकर्णेन निद्रावरणम्। रावणेन लङ्काक्रमणम्। तस्य मण्डोदर्यां मेघनादजननम्। कुम्भकर्णस्य विद्युज्जिह्वया विवाहः। विभीषणस्य सरमया। रावणस्य वेदवती-शापः। अनरण्यशापः। रावणदिग्विजयः। कार्तवीर्यार्जुनेन रावणबन्धनम्। बलिना तत्पराजयः। बलिगृहे हरिणा तन्निरासः। रावणेन त्रिलोकसुन्दरीणामप-हारः। तस्मिन् रामस्य कोपः। तदर्थं दण्डकारण्यगमनम्॥

द्वितीयः सर्गः रामेणात्रेराश्रमं प्रति गमनम्। सीतानसूयासंवादः। दण्डकारण्यप्रवेशः। शर-भङ्गाश्रमगमनम्। शरभङ्गमुक्तिः। विराधमोचनम्। राक्षसार्दितानां मुनीनां शरणागतिः। जानकीरामयोर्लीलाविवादः। विविधाश्रमेषु वासः। अगस्त्याश्रम-गमनम्। तेन वैष्णवकोदण्डादिसमर्पणम्। पञ्चवट्यां जटायुदर्शनम्। पर्णशाला-निर्माणम्॥

तृतीयः सर्गः शूर्पणखामुखभङ्गः। चतुर्दशराक्षसानां रामेण हननम्। ततश्चतुर्दशसहस्राणां हननम्। दूषणवधः॥

किष्किन्धाकाण्डम्

षष्ठः सर्गः हनुमता सुग्रीवबोधनम् । रामप्रेषितेन लक्ष्मणेन किष्किन्धागमनम् । तारया सौमित्रिसान्त्वनम् । कपीनामानयनम् । सुग्रीवेण रामप्रपदनम् ॥

सप्तमः सर्गः रामसन्निधौ कपीनां समवायः । चतुर्दिक्षु कपीनां प्रेषणम् । दक्षिणां दिशं प्रति हनुमत्प्रेषणम् । रामेण हनुमद्धस्ते सीताप्रत्ययायाङ्गुलीयकदानम् । इतरदिग्गतानां मासान्ते पुनरागमनम् । अङ्गदेन मारीचपुत्रहननम् । हनुमत्पुरोगानां मय-गुहाप्रवेशः । स्वयम्प्रभया तेषां सत्कारः । तत्सहायेन गुहाया निर्गमनम् । अङ्गदनैराश्यम् । मारुतिना प्रबोधनम् ॥

अष्टमः सर्गः दक्षिणोदधितीरे कपिभिः प्रायोपवेशनिर्णयः । तै रामकथावर्णनम् । जटायुषो मरणं श्रुत्वा सम्पातिप्रश्नः । कपिभिः स्ववृत्तान्तकथनम् । जातपक्षेण सम्पातिना सीतास्थितिकथनम् । वानरैः समुद्रलङ्घने स्वस्वसामर्थ्यप्रकटनम् । जाम्बवता हनुमति लङ्घनार्थं विज्ञापनम् । हनुमता तदङ्गीकारः ॥



सङ्ग्रहरामायणपीठिका....

अथ कलावस्मिन् भीमावतारसमाप्त्यनन्तरं चतुर्षु सहस्रेषु त्रिषु च शतेषु संवत्सराणामतिगतेषु, पञ्चत्रिंशे शतके, भगवान् श्रीमध्वोऽवततार, तौळवमण्डले, श्रीभार्गवनिर्मिततीर्थचतुष्टयपरिगते दुर्गाधिष्ठित-विमानगिरिपरिशोभिते पवित्रे पाजकक्षेत्रे । दिष्ट्या तस्मिन्नेव पुण्यतमेऽनेहसि, लिकुचान्वयजातः, अत एव **'ಏಜಜಾಡ್ತಾಯ'**पदोपाह्वस्तौळवविपश्चित्, पवमानोपसेवनार्थमागतस्त्रिनयनइव त्रिविक्रमपण्डितः परिमण्डितपण्डितमण्डलः सम्प्रति **'कासरगोडु'** इति व्यवह्रियमाणे **'कबेनाडु'**विषये तौळवमण्डलाधिपतेः श्रीजयसिंहभूपतेरास्थानविद्वान् राजकविरास ।

स किल सप्ताष्टानि (सप्त वा अष्टौ वा) दिनानि श्रीमध्वेन सह वादं कृत्वा, उन्मीलितान्तर्नयनः स्वपूर्वतनै-रनुसृतं मायावादं विहाय श्रीमध्वान्तेवासी भूत्वा तत्ववाददीक्षां बबन्ध । तस्य त्रयः पुत्राः । तृतीयोऽस्य सङ्ग्रहरामायणाख्यस्य पुराणकाव्यस्य प्रबन्धा नारायणपण्डितः । स्वजनकइव कविषु कविः, वेदान्तिषु वेदान्ती । समग्रः कुडुम्बोऽप्याचार्यमध्वानुग्रहपात्रम् । पण्डितः संसारः । तदनुग्रहस्यैव स्वादु फलमिदं सङ्ग्रहरामायणम् ।

श्रूयते भगवता श्रीवाजिवदनेन गदितं मूलरामायणमिति महारामायणमिति शतकोटिग्रन्थात्मकमासी-दिति–**'मूलरामायणं चैव शतकोटिप्रविस्तरम्'** इति । सम्प्रत्ययं ग्रन्थो नोपलब्धः । प्रायो नष्ट एवापुनर्दर्शि-नाय । अथाप्यस्य प्रबन्धुः पिता त्रिविक्रमपण्डिताचार्यः परिचितमूलरामायणस्तत्र विहरन्नासेति चास्मादेव ग्रन्थाद् विज्ञायते–**'सूक्तिरत्नाकरे रम्ये मूलरामायणार्णवे । विहरन्तो महीयांसः प्रीयन्तां गुरवो मम'** (सं.रा.१.१.६) इति । अत्र गुरव इति स्वपितृनिर्देश इति सर्वेषामैककण्ठ्यम् । तेनोह्येत यदयमपि प्रबन्धा मूलरामायणार्णवे कृतस्नान इति ।

मूलरामायणस्य सङ्ग्रहो वाल्मीकिरामायणम् । उभयोः सारसङ्ग्रहो श्रीमहाभारततात्पर्यनिर्णयगतं मध्वरामायणम् । वाल्मीकिरामायणस्य मध्वरामायणस्य च सेतुबन्धः श्रीनारायणपण्डिताचार्यकृतमिदं सङ्ग्रहरामायणं नाम । मूलरामायणस्य वाल्मीकिरामायणस्य च सङ्क्षेपोऽयम् । सङ्ग्रहेण रामायणमिति सङ्ग्रहरामायणम् । सम्यक् गृह्यते अवबुद्ध्यते रामायणं मध्वरामायणं चानेनेति च सङ्ग्रहरामायणम् ।

तदिदं कथाविस्तराय वाल्मीकिरामायणमनुकरोति । वाल्मीकिरामायणेऽप्यस्फुटे चरितांशे प्रायो मूलरामायणम् । सन्दिग्धेषु च स्थलेषु येषु रामायणं महाभारतं पुराणानि च परस्परविरुद्धानीव भासन्ते तत्र निर्णयाय च मध्वरामायणम् ।

आचार्यमध्वेन किल भारतकथानिर्णयाय महाभारततात्पर्यनिर्णयः प्राणायि । तत्रैव च सङ्क्षेपतो रामायणकथा च निरणायि । तद्विस्तरोऽयं रामायणतात्पर्यनिर्णयः सङ्ग्रहरामायणं नाम ।

श्रूयते किंवदन्ती– दृष्ट्वा चेदं पौराणिकं महाकाव्यं स्वयमाचार्यमध्वः परं सन्तुतोषेति, सन्तुष्य च 'अहो सर्षपे कूष्माण्डप्रवेशोऽयम्' इति प्रशशंसेति । तेनाऽचार्यमध्वः प्रबन्धमिममवलोक्य प्रीत्या प्रबन्धारमनुजग्राह स्वयमाशीर्वचनैरिति ज्ञायते । तदिदमस्य ग्रन्थस्य प्रामाण्यं द्रढयति, प्रबन्धुश्चाऽप्तमत्वम् ।

श्रीविश्वपतितीर्थस्तु आचार्यमध्वाभिमत्यैव पण्डिताचार्यो ग्रन्थमिमं प्रणिनायेत्याह–**'श्रीमदानन्दतीर्थानामभिमत्या वाल्मीकिरामायणस्य तात्पर्यार्थं वक्तुं प्रवृत्तो नारायणपण्डिताचार्यः'** इति, **'वाल्मीकेर्गौः–'**(१.१.७) इति श्लोकव्याख्यानावतरणिकायाम् ।

केचिदिदं नारायणपण्डिताचार्यस्य प्रथमा कृतिरित्यभिप्रयन्ति । तथाहि वैश्वनाथिर्नारायणाचार्यः शिवस्तुतिटीकायाम्–

'श्रीरामायण-पारिजातहरण-श्रीमध्वचारित्रिकाऽ-
ख्यानं काव्यगणं विधाय विदधे दिव्यां शिवस्य स्तुतिम्' इति ।

एतदनुसारेण सङ्ग्रहरामायणं प्रथमं व्यरीरचत् । ततः पारिजातहरणं नाम यमककाव्यम् । ततः श्रीमध्वविजयाभिधं श्रीमध्वचारित्रिकाख्यानम् । ततः मणिमञ्जरीशुभोदयप्रमुखं रामगीत्यादिकं यमकस्तोत्रात्मकं च खण्डकाव्यगणं विधायान्ते शिवस्तुतिं चकार । शिवस्तुत्या ग्रन्थरचनोपसंहारमनिच्छन् सर्वान्ते च श्रीनरसिंहस्तुतिं निबबन्धेति भाति ।

स्यान्नाम । शिवस्तुतिनरसिंहस्तुत्योरनुपमा प्रौढा शैली प्रबन्धुरपि प्रौढं वयः सूचयतीव । एवं सङ्ग्रह-रामायणेऽपाणिनीयानां छान्दसानां प्रयोगाणां प्राचुर्यं प्रबन्धुराचार्यप्रयोगानुकरणोत्साहं प्रदर्शयत् तस्य तरुणतां विवृणोतीव । एवं महाभारततात्पर्यनिर्णयेन सञ्जातस्फूर्तिः सङ्ग्रहरामायणं व्यरचयत् । महाभारततात्पर्येण (यमकभारतमिति प्रथितेन) प्राप्तस्फूर्तिः पारिजातहरणं व्यरचयत् । ततश्च यत्कृतिभ्यां जातस्फुरणः स्वयमेव प्रबन्धद्वयं प्रणिनाय, यत्प्रवचनमाधुरीमास्वादमास्वादं गलितगर्वः स्वतातः परम्परागतमद्वैतसम्प्रदायं विहाय मध्वस्यान्तेवासी बभूव, बभूव च तत्ववादबद्धदीक्षः, तस्य श्रीमध्वस्य जीवनवृत्तमद्भुतं गाढमभ्यस्य श्रीमध्वचरितं प्रबबन्धेत्यतिसुन्दरम् ।

एतया चापूर्वतमया गुरुसपर्यया परिचर्यया च पितेव पुत्रोऽपि भगवत्पादपरमानुग्रहभाजनं बभूवेति युक्त-मुत्पश्यामः । प्रायः सन्न्यासिशिष्येभ्योऽप्यधिकतरा सेवा पुनरेताभ्यां पितापुत्राभ्यां कृता ।

भगवत्पादकृतस्य श्रीमद्ब्रह्मसूत्रभाष्यस्यानुपमा व्याख्या तत्वप्रदीपाख्या श्रीत्रिविक्रमपण्डिताचार्यरचिता भाति माध्ववाङ्मयस्य कोटीरतामाटीकमाना । अथच श्रीब्रह्मसूत्रानुव्याख्यानस्य टीका नयचन्द्रिका, श्रीविष्णुतत्वनिर्णयस्य टीका तत्वमञ्जरी चेति द्वे कृतिरत्ने तत्ववादकर्णपूरायिते राराज्येते तत्तनयकृते । अनुव्याख्यानसम्बन्धदीपिका न्यायविवरणसम्बन्धदीपिका च केयूरायिते शङ्करपण्डिताचार्यकृते । एवं सर्वशास्त्रार्थसङ्ग्रहाख्यस्य सङ्ग्रहभाष्यस्य टीका नारायणपण्डिताचार्यतनयेन वामनपण्डिताचार्येण रचिता आनन्दमाला ग्रैवेयकायते, या पुनरध्यात्मचिन्तकानामानन्दमालैव । तदेवं गतं सूत्रप्रस्थानम् ।

अथचोपनिषत्प्रस्थाने षण्णामुपनिषद्भाष्याणां वामनपण्डिताचार्यकृताष्टीका वैदिकवाङ्मयस्यैवापूर्वतमा उपदाः । षड्यष्टिः कण्ठे मुक्तावलीव, पारिहार्याणीव करकमलयोः । भगवत्पादानुग्रहलब्धमपूर्वं वेदार्थ-परिज्ञानं लिकुचकुलजानाम् । तदेवं गतमुपनिषत्प्रस्थानम् ।

यद्यपि षण्णामेवोपनिषद्भाष्याणां टीकास्त्रैविक्रमार्यदासेन वामनपण्डितेन रचिताः सम्प्रत्युपलब्धाः । न दशानामपि । सम्भाव्यते पितामहस्य पितुश्चाऽज्ञया दशानामप्युपनिषद्भाष्याणां टीकास्तेन विरचिताः स्युरिति । किन्तु षडेव साम्प्रतमुपलभ्यन्ते । तावतैव सन्तोष्टव्यम्– यदाचार्याभिमतोऽपूर्वो वैदिकः पन्था-स्तेनाऽविष्कृत इति । मन्यामहे यदयमपि प्राय आचार्यमुखादेव बाल्ये श्रुतोपनिषत्कः स्यादिति । यदि तदीयमुपनिषद्व्याख्यानं नोपालप्स्यत दुष्करमेव तर्ह्यभविष्यदाचार्यमध्वाभिमतस्य वेदान्तरङ्गस्य चिन्तनम् । अधमर्णा वयं तत्रभवतस्त्रैविक्रमार्यदासस्य वामनपण्डिताचार्यस्य ।

प्रायः श्रीपद्मनाभतीर्थनरहरितीर्थाभ्यां स्फुटं विवृतचरमिति न लिकुचवंशीयैः गीताप्रस्थानविवरणाय प्रयतितमिति भाति । तदयं लिकुचवंशीयानां कृतिसङ्ग्रहः–

त्रिविक्रमपण्डिताचार्यस्य

१. उषाहरणम् (कौमार एव रचितं महाकाव्यम्)

२. तत्वप्रदीपः (अपूर्वा चानुत्तरा च ब्रह्मसूत्रभाष्यटीका)

३. विष्णुस्तुतिः (अपूर्वमाशुकाव्यम्)

४. वायुस्तुतिः ('' '')

५. पूर्णबोधस्तोत्रम् (चतुर्दशस्तोत्रेषु अष्टमं स्तोत्रम्)

६. मध्वाष्टकम्

पूर्णबोधस्तोत्रं कल्याणीदेवीरचितमिति केचित् । भगवती भ्रान्तिरेवेयेम् । **'प्रणतवान् प्राणिनां प्राणभूतम्'** इति ध्रुवपदे पुल्लिङ्गेनाऽत्मनो निर्देशात् । श्रीविश्वपतितीर्थः स्तोत्रकृतो नाम न निर्दिदेश । अथापि **'कविवर्याः'** इति सबहुमानं व्याहरति । तेन कविकुलतिलकस्य त्रिविक्रमपण्डितस्य कृतिरियमिति निर्धार्येत ।

नरसिंहस्तुतिरप्येतत्कृतेति बहवो व्याख्यातारः । अथापि बहुप्रतनकोशानुसारेण तौळवदेशसम्प्रदायतश्च नारायणपण्डिताचार्यस्येयं कृतिरिति विज्ञायते ।

शङ्करपण्डिताचार्यस्य

१. अनुव्याख्यानटीका सम्बन्धदीपिका ।

२. अनुव्याख्यानन्यायमाला-न्यायविवरण-सम्बन्धदीपिका ।

द्वौ शङ्करार्यौ लिकुचवंशोद्भवौ श्रीमध्वशिष्यौ श्रूयेते । तयोः कतरोऽनयोर्ग्रन्थयोः प्रणेतेति न स्फुटम् । तयोरेकः त्रिविक्रमपण्डितस्यानुजः श्रीमध्वगुरोर्ग्रन्थपाल आसीत् । प्रायः स एवानयोः प्रणेता स्यादिति सम्भाव्यते ।

अपूर्वा चेयं सम्बन्धदीपिकाख्या व्याख्यासरणिः । अनुव्याख्यानसम्बन्धदीपिकायां पूर्वोत्तरश्लोकयोरवतरणिकया केवलं सम्बन्धं दीपयति । न श्लोकान् व्याख्याति । एवमपरो ग्रन्थः केवलमनुव्याख्यानन्यायमालाया

न्यायविवरणस्य च परस्परं सम्बन्धं दीपयित्वा विरमति । विदुषां रसायनमिदं व्याख्यानं स्वप्रकाशनावकाशं निरीक्षमाणमास्ते ।

नारायणपण्डिताचार्यस्य

१. सङ्ग्रहरामायणम् (पौराणिकं महाकाव्यम्)

२. श्रीमध्वविजयः (चारित्रिकं महाकाव्यम्, सुमध्वविजय इति वदन्तो नामभ्रान्ताः ।)

३. भावदीपः (श्रीमध्वविजयस्यापूर्वा लघुटिप्पणी, यां भावप्रकाशिकेत्यप्याहुः)

४. प्रमेयनवमालिका (श्रीमध्वविजयकथासङ्ग्रहः । अणुमध्वविजय इत्यर्वाचीनाः । दिष्ट्या अणुसुमध्वविजय इति नाम न कृतं तैः ।)

५. पारिजातहरणम् (यमककाव्यम् । सकृन्मुद्रितम्, नातिशुद्धम् ।)

६. नयचन्द्रिका (अनुव्याख्यानटीका)

७. तत्वमञ्जरी (विष्णुतत्वनिर्णयटीका)

८. मणिमञ्जरी (विवादपदं चारित्रिकं खण्डकाव्यम्)

९. शुभोदयम् (पौराणिकं खण्डकाव्यम्)

१०. कृष्णमाला (कृष्णचरितानुक्रमः)

११. योगदीपिका (अनुष्ठानपद्धतिः)

१२. शिवस्तुतिः (प्रबुद्धं स्तोत्रकाव्यम्)

१३. नरसिंहस्तुतिः(’’ ’’)

१४. दाशरथ्यष्टकम् (चतुर्दशस्तोत्रेषु एकादशम्)

१५. रामगीत्यष्टकम् (’’ द्वादशम्)

क्वचित् प्राचीनकोशेषु एतदष्टकद्वयं विना नामनिर्देशं ‘पूर्वसूरिकृतम्’ इतीयदेव पठ्यते । बहुषु कोशेषु नारायणपण्डिताचार्यकृतमिति ।

तदीयत्वेन सम्भाविताः कृतयः

१६. ध्यानमाला (ध्यानप्रक्रिया)

१७. पूर्णबोधस्तुतिः (यमकस्तोत्रम्)

१८. गोविन्दस्तुतिः (,, ,,)

अन्यानि च बहूनि यमकपद्यानि ताळपत्रकोशेषु दृश्यन्ते– तत्रतत्र पत्रपूरणार्थं लिखितानि । शैलीपरिशीलनेन तान्यपि नारायणपण्डिताचार्यकृतानि स्युरिति भाति ।

ऐतिह्यविदो वदन्ति– यमकभारतमिति प्रथितस्य महाभारततात्पर्यस्यापि व्याख्या नारायण-पण्डिताचार्यकृताऽऽसीदिति । स्यादपि । स्वयं यमककाव्यकर्ता यमकप्रियः कविर्भगवत्पादकृतं यमककाव्यं व्याचख्याविति सुश्लिष्टम् । तेन विश्वसनीयेयं किंवदन्तीति भाति । तथाऽपि नैतावत्पर्यन्तमेकाऽपि तस्य हस्तलिखिता प्रतिकृतिर्दृष्टिपथमापपात ।

सुदिष्टमेतद् यत् स्वयं भगवत्पादमुखाच्छ्रुतयमकार्थस्य श्रीनरहरितीर्थस्य व्याख्या श्रीकृष्णप्रकाशिका सप्रति समुपलब्धा । तेन विश्वविस्मयस्य यमककाव्यस्य भगवत्पादाभिमता अपूर्वा अर्थाः सुरक्षिता अधुनाऽपि नः सुशक्यावगमा बभूवुः । अपव्याख्यानजम्बालजटिले अध्ययनपथकान्तारे पुनरियमेका मार्गदर्शिनी दीपाटिकेव दीप्यते । अथापि **'देवानां पतयो नित्यं नो मतं यस्य जानते'** इति पद्ये कं बन्धविशेषं निबबन्धाऽचार्य इत्यस्फुटमेव । यदि नारायणपण्डिताचार्यस्य व्याख्यानमुपालप्स्यत नूनं स्फुटमभविष्यत् कोऽयमपूर्वो बन्ध इति ।

अन्ये त्वाहुः– मिथ्यात्वानुमानखण्डनस्य टीका पद्यमयी नारायणपण्डिताचार्यकृता श्रीपेजावरमठीयग्रन्थालये समुपलब्धेति । अदृष्टमूलकोशानामज्ञाततौळवलिपीनां भ्रमविलसितमेतत् ।

पेजावरमठीयग्रन्थालये समुपलब्धेति तथ्यम् । नारायणपण्डिताचार्यकृतिरिति न तथ्यम् । तस्याष्टीकाया रचयिता ग्रन्थादौ पद्मनाभतीर्थं प्रणमति । त्रिविक्रमपण्डिताचार्यस्योल्लेखोऽपि न दृश्यते । नायं लिकुचवंशीयानां सम्प्रदायः । तेन सा प्रतनाऽपि न लिकुचकुलजानां कृतिरिति निश्चीयेत । शैली च न लिकुचकवि-संवादिनी । प्रायः श्रीपद्मनाभतीर्थस्यान्तेवासिष्वन्यतमेन रचिता स्यात् ।

कृष्णामृतमहार्णवटीकाऽपि नारायणपण्डिताचार्यकृताऽऽसीदिति श्रूयते किंवदन्ती । स्यात् तथ्यम्, नवा स्यात् । अनुपलब्धेर्न किमपि निर्णेतुं शक्यम् ।

अन्ये च केचन ग्रन्था नारायणपण्डिताचार्यरचिता इति वृथा केचिदाचक्षते । ते चेमे– १. अणुभाष्यटीका, २. मध्वामृतमहार्णवः, ३. अंशावतारः, ४. मध्वकवचम्, ५. अणुवायुस्तुतिः, ६. तारतम्यस्तोत्रम्, ७. महालक्ष्मीस्तुतिः– इति ।

नैते ग्रन्थाः पण्डिताचार्यकृताः । सङ्ग्रहभाष्य(अणुभाष्य)टीका त्रैविक्रमार्यदासेन नारायणपण्डिताचार्यतनयेन वामनपण्डिताचार्येण रचिता वर्वर्ति । नचैकं ग्रन्थं विना विशेषकारणं पितापुत्रावुभावपि व्याचिख्यासतः । अपिच भिन्नस्त्रैविक्रमार्यदासानुसृतः पाठः । भिन्नश्च नारायणपण्डिताचार्यकृतत्वेन कैश्चिदभिमतायां टीकायामुद्धृतः पाठः । नहि पितापुत्रयोर्मूलपाठे विवाद आसीदिति युक्तं वक्तुम् । मूलपाठानुगुणश्च त्रैविक्रमार्यदासपाठः । सर्वात्मना तद्विरुद्धश्चान्यपाठः । तेन निर्विवादं निश्चीयेत नेयं टीका नारायणपण्डिताचार्यकृतेति । तेनास्य ग्रन्थस्य प्रणेता वैश्वनाथिर्नारायणाचार्य इति विमर्शकानां मतमेव सुश्लिष्टतरम् । नह्यविमृश्य वदन्तो विदन्तो भवन्ति ।

मध्वामृतमहार्णवस्त्वसह्या कृतिः । अवमाननमिदं लिकुचकुलकवेः यदस्याप्रबुद्धस्य ग्रन्थस्य तत्कृतत्वकल्पनम् ।

अथांशावतारः । अत्र बहवो भाषादोषाः । छन्दोदोषाश्च । अत्रोदितानि कानिचन प्रमेयाणि महाभारततात्पर्यनिर्णयापरिज्ञानमूलानीति श्रीपलिमारुमठीयतत्वसंशोधनसंसदा प्रकाशितस्य म.भा.ता.निर्णयस्य पीठिकायां द्वितीयसम्पुटे विशदं विवृतमस्माभिः । अथापि ग्रन्थोऽयं समग्रतया म.भा.ता.निर्णयानुगुण इति रटन्तोऽद्भुता एव । क्षमतां पण्डिताचार्यस्तान् ।

अत्र सन्ति पददोषाः । सन्त्यर्थदोषाः । अस्ति च्छन्दोभङ्गः । अस्ति पुनरुक्तिः । अस्ति च व्यर्थपदता । न केवलं शास्त्रप्रमेयेषु, शब्दरूपेष्वपि यः स्खलति स कथं लिकुचान्वयः स्यात्? एवं स्थितेऽपि येंऽशावतारं लिकुचान्वयेन सम्बध्नन्ति तैः प्रथमं शब्दरूपावलिः प्रायोऽभ्यसनीया भवति ।

यच्चान्यत् पुनरगादि– बहुषु स्वसङ्गृहीतेषु हस्तलिखितेषु कोशेषु–'लिकुचनारायणपण्डितानां कृतिः' इत्येवोपसंहारवाक्यं पठ्यते, तेन लिकुचान्वयस्य नारायणपण्डिताचार्यस्यैवेयं कृतिरिति । नन्विदं गर्ते पतिष्यतः कुशकाशावलम्बनम् । यत्र मूलमेव सर्वमसङ्गतं तत्र का कथा अव्युत्पन्नजनलिखितस्य उपसंहारोल्लेखस्य । लिपिकृतामकृतमुखानां प्रमाद एवायम् । यथा मङ्गलाष्टकं श्रीवादिराजयतिकृतमिति । यथा

वाऽणुभाष्यव्याख्यानं लिकुचान्वयनारायणपण्डिताचार्यकृतमिति । नहि शतं लिपिकृतोऽलिखन्निति अतथ्यं तथ्यं भवति । नहि शतकृत्व आवर्तनेऽपि मिथ्या पुनरमिथ्या भवति । सर्व एते पिण्डीशूरा एव ।

आदौ तावदेको लिपिकारः प्रमाद्यति । अन्येऽक्षरजीवनास्तमनुसरन्ति । एवं कायस्थानां प्रमादपरम्परैव परप्रत्ययनेयबुद्धीनां विमर्शकम्मन्यानां प्रमाणपदवीं याति । दुरन्तं दिष्टमेतद् विमर्शनक्षेत्रस्य, यदेभिः शुद्धः सम्प्रदायो महता प्रयत्नेन प्रतनैः संरक्षितः क्षणेन कच्चरीक्रियते ।

सत्यधर्मतीर्थादिभिर्यथा स्वदृष्टहस्तलिखितकोशेषूपलब्धं तथैवोल्लिखितम्, न तत्र विशिष्य विमर्शने प्रयतितमिति तदप्यनिर्णायकम् । हस्तलिखितकोशाः प्रायोऽव्युत्पन्नैर्लिखिता इति तत्रापि कः साधुः कोऽसाधुरिति विम्रष्टव्यं भवति । तथाहि–**'नारायणं नमस्कृत्य–'** इत्येतद् भारताद्यपद्यमिति बहुकोशसंवादः । **'नारायणं सुरगुरुम्–'** इति कतिषुचिदेव कोशेषु । अथापि स एव मूलपाठ इत्याचार्यवचनादवसीयते ।

उक्तं चाऽचार्यैः मूलपाठनिर्णये सदा जागरूकैर्भाव्यमिति–**'क्वचिद् ग्रन्थान् प्रक्षिपन्ति क्वचिदन्तरितानपि । कुर्युः क्वचिच्च व्यत्यासं प्रमादात् क्वचिदन्यथा'** इति । यदि बहुषु हस्तलिखितकोशेषूपलब्धिरेव मानत्वे निर्णयनी तर्हीदमाचार्यवचनं निर्विषयमापद्येत ।

मध्वकवचमनिश्चितकर्तृकम् । अणुवायुस्तुतिरेका कल्याणीदेवीकृतेति प्रथा । अपरं च नन्दसूनुस्तोत्रं त्रिविक्रमपण्डिताचार्यशिष्येण केनचित् कृतमिति विश्वपतितीर्थः । स्यादपि नारायणपण्डिताचार्यकृतिः ।

तारतम्यस्तोत्रं च स्यान्नारायणाह्वेन केनचित् पण्डितेन रचितम् । न लिकुचकविना । तत्रेदमेकं स्फुटं गमकम्– सुपर्णस्य पत्नी सुपर्णीति सर्वत्र प्राचीनप्रयोगेष्वैककण्ठ्यम् । न क्वापि प्राचीनग्रन्थेषु सौपर्णीति प्रयोगो दृश्यते । दृश्यते च तारतम्यस्तोत्रे–**'सौपर्णी वारुणी पर्वतपतितनया'** इति । **'वरनिरृतिनामा'** इति च्छन्दोभङ्गः । तस्मान्नेयं लिकुचपण्डितकृतिरिति निश्चीयेत ।

क्वचिद् व्याख्यातारोऽपि भ्राम्यन्ति । यथा **'पान्त्वस्मान्–'** इत्यादेः पद्यद्वयस्य नखस्तुतितां वदन्तः । यथा वायुस्तुतेः समग्राया अपि विष्णुपरतां वदन्तः । एतेन महालक्ष्मीस्तुतिं पण्डिताचार्यकृतां वदन्तोऽपि व्याख्याताः । वैश्वनाथेः नारायणाचार्यस्य कुलदेवता महालक्ष्मीः । तामयं तुष्टावेति स्फुटम् ।

एवमेतेषु बहवो ग्रन्थाः वैश्वनाथिना नारायणाचार्येण रचिता इति सम्प्रति निरणायि । सर्वत्रापि नारायणाचार्य इति नामसाम्यं विमर्शनप्रज्ञावैधुर्यं च भ्रममूलम् । तत्रापि नारायणाचार्यपदश्रवणे सर्वेषां माध्वानां

प्रथमप्रतिपत्तिः पण्डिताचार्यस्यैव । तस्मात् सर्वमिदं संशोधनप्रज्ञाविधुराणामप्रबुद्धं भ्रान्तिलसितम् । युक्तमिदं पाश्चात्यानामाभाणकम्–

'if a blind man follows another blind man both of them will fall into a pit'.

नारायणपण्डिताचार्याग्रजस्य

१. रमेशगीतिः (चतुर्दशस्तोत्रेषु द्वितीयं स्तोत्रम्)

अस्या रचयितुर्नाम नोपलब्धम् । गीत्यन्ते चैवं पठ्यते–**'लिकुचकविनन्दनः सन्नुपान्त्यः'** इति । निरुपपदो लिकुचकविस्त्रिविक्रमपण्डिताचार्य एव । तस्य त्रयः पुत्राः । तृतीयो नारायणपण्डिताचार्यः । अयमुपान्त्य इति द्वितीयः पुत्र इति स्फुटम् । एतमागूर्य नान्यत् किमपि ज्ञायते । नामधेयमपि । तत्कृतित्वेन लब्धा चेयमेकैव स्तुतिः ।

वामनपण्डिताचार्यस्य

नारायणपण्डिताचार्यः स्वकृतनयचन्द्रिकादिष्वात्मानं त्रैविक्रमार्यमाह । तत्तनयोऽयं वामनपण्डिताचार्यः पितुरेव पद्धतिमनुसरन्नात्मानं त्रैविक्रमार्यदास इत्येव टीकासु निर्दिशति । तस्य च सप्त टीकाः उपलब्धाः–

१. याज्ञीयमन्त्रभाष्यटीका
२. काठकोपनिषद्भाष्यटीका
३. तलवकारोपनिषद्भाष्यटीका
४. षट्प्रश्नोपनिषद्भाष्यटीका
५. आथर्वणोपनिषद्भाष्यटीका
६. माण्डूकोपनिषद्भाष्यटीका
७. आनन्दमाला (सङ्ग्रहभाष्यटीका)

अथचैका स्तुतिः (चतुर्दशस्तोत्रेषु प्रथमं स्तोत्रम्) वासुदेवगीतिरिति प्रथिता । तत्र **'लिकुचतिलकात्मजानां प्रसादादवरजनिना कृता'** इति श्रूयते । कोऽयमवरजनिरिति न स्फुटम् । लिकुचतिलकात्मजेषु त्रिषु योऽवरः नारायणपण्डिताचार्यः, तेन जन्यत इति व्याख्याने इयमपि वामनपण्डिताचार्यकृतिः स्यात् । एवं नृसिंह-गीतिरपि (चतुर्दशस्तोत्रेषु तृतीयं स्तोत्रम्) नारायणपण्डिताचार्यस्यान्तेवासिष्वन्यतमेन वा, तत्तनयेन वामन-पण्डिताचार्येण वा कृता स्यादिति भाति ।

कल्याणीदेव्याः

एवं चतुर्दशस्तोत्रेषु पञ्चमं (अणुवायुस्तुतिः), षष्ठं (गोविन्दस्तोत्रम्), सप्तमं (मुकुन्दस्तोत्रम्) च कल्याणी-देवीरचितानीत्यैतिह्यम् । एवमैतिह्ये द्वे कल्याणीदेव्यौ श्रूयेते । एका श्रीमध्वभगिनी । अपरा लिकुचान्वयजा

त्रिविक्रमपण्डिताचार्यभगिनी । अनयोः कतरा पुनरेतानि जग्रन्थेति न स्फुटम् । प्रायः प्रायपाठात् लिकुचान्वयजैव स्यादिति भाति ।

एतावन्तः सम्प्रत्युपलब्धा लिकुचान्वयानां ग्रन्थाः । कालगर्भे निलीय घुणभुक्ताः प्रनष्टाः कियन्त इति न जानीमः । अथापि, सम्प्रत्युपलब्धा एतावन्त एव तत्ववादे लिकुचान्वयानां मूर्धन्यत्वं स्फुटमवगमयति । ऋते चैतेषामध्ययनात् न मध्वहृदयं शक्यं स्फुटमवगन्तुमिति ।

पौराणिकमैतिहासिकं महाकाव्यम्: सङ्ग्रहरामायणम्

अस्ति तावद् रामायणसङ्गतं महाकाव्यं महाकविना काळिदासेन ग्रथितं रघुवंशं नाम । नूनं रमणीयं काव्यम् । अथापि तत्र रामकथाऽतिसङ्क्षिप्ता । क्वचिदननुगुणा च रामायणस्य । तथाहि तद्वचनम्–

स तेजो वैष्णवं पत्न्योर्विभेजे चरुसञ्ज्ञितम् ।
द्यावापृथिव्योः प्रत्यग्रमहर्पतिरिवार्णवम् ॥

अर्चिता तस्य कौसल्या प्रिया केकयवंशजा ।
अतः सम्भावितां ताभ्यां सुमित्रामैच्छदीश्वरः ॥

ते बहुज्ञस्य चित्तज्ञे पत्न्यौ पत्युर्महीक्षितः ।
चरोरर्धार्धभागाभ्यां तामयोजयतामुभे ॥ (१०.५४-६)

इमं ग्रन्थभागं व्याख्यान् मल्लिनाथोऽप्याह–**'अयं च विभागो न रामायणसंवादी । किन्तु पुराणान्तरसंवादी द्रष्टव्यः'** इति ।

भरतो रामादनन्तरः । ततो लक्ष्मणशत्रुघ्नौ यमौ जाताविति बहूनां रामायणव्याख्यातॄणां भगवान् भ्रमः । काळिदासोऽपि नापवादः । अत आह–

सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रा सुषुवे यमौ । (१०.७१)

***

अथ भोजराजकृतं लक्ष्मणसूरिकृतयुद्धकाण्डोपेतं चम्पूरामायणं वाल्मीकीयं रामायणमविकलमनुकरोति । चित्रमेतत्, यत् पायसविभागे सोऽपि बभ्रामैव । तथाहि तद्वचनम्–

कौसल्यायै प्रथममदिशत् भूपतिः पायसार्धं
प्रादादर्धं प्रणयमधुरं केकयेन्द्रस्य पुत्र्यै ।
एते देव्यौ तरळमनसः पत्युरालोच्य भावं
स्वार्धांशाभ्यां स्वयमकुरुतां पूर्णकामां सुमित्राम् ॥ (१.२३)

व्याख्याता रामचन्द्रार्यश्चाऽह–

'अयं विभागो न रामायणसम्मतः । तत्र चरोरर्धं कौसल्यायै, अवशिष्टार्धं सुमित्रायै, शिष्टार्धं कैकेय्यै, शिष्टं पुनः सुमित्रायै– इत्यभिधानात् । किन्तु पुराणान्तरसंवादो द्रष्टव्यः । उक्तं च नरसिंहसंहितायाम्– 'ते पिण्डप्राशने काले सुमित्रायै महामती । पिण्डाभ्यामल्पमल्पं तु स्वसपत्न्यै प्रयच्छतः' इति । एवमन्यत्रापि सति विरोधे पुराणान्तरात् समाधातव्यम्' इति ।

* * *

अथ हनुमन्नाटकं महानाटकमिति च प्रसिद्धमनाटकं काव्यम्, दशकण्ठवधसेतुबन्धादीनि बहूनि रसभव्यानि महाकाव्यानि कवयः प्रणिजगदुः । भासस्य यज्ञफलमभिषेकनाटकं प्रतिमानाटकं च, दिङ्नागस्य कुन्दमाला, भवभूतेर्महावीरचरितमुत्तररामचरितम्, शक्तिभद्रस्याऽश्चर्यचूडामणिः, मुरारेरनर्घराघवम्, राजशेखरस्य बालरामायणम्, जयदेवस्य प्रसन्नराघवमित्यादीनि च रम्याणि रूपकाणि । तत्र काव्यत्वस्यैव प्राधान्यम्, नेतिहासस्य । भट्टिकाव्यं पुनर्व्याकरणभारभुग्नम् । न तस्य कवेः स्वकृतेरैतिहासिकत्वे रामायणादिमूलत्वे वा भरः । नापि तत्र सर्वत्र समग्रस्य रामायणस्य सङ्ग्रहश्चेतीदं पण्डिताचार्योपज्ञमधिरामायणं समग्रमर्थतः शब्दतश्च यथामूलमिति महदिदमन्वर्थं पौराणिकमैतिहासिकं चेति शास्त्रीयं महाकाव्यम् ।

सन्ति चान्यानि रामायणानि शेषरामायणमिति, अद्भुतरामायणमिति, आनन्दरामायणमिति, अध्यात्मरामायणमिति, पौराणिकत्वेन प्रसिद्धानि । योगवासिष्ठमिति, वासिष्ठरामायणमिति च प्रसिद्धं चतुर्विंशतिसहस्रश्लोकमयं रामायणान्तरं वाल्मीकिनैव रचितमिति किंवदन्ती । यद्यपि हृद्यानि । अथ पुराणगतान्यपि दर्शनभाषादिमयानि । अन्यानि च कानिचिद् वाल्मीकिरामायणादिविसंवादात् सन्दिग्धमूलानीति नान्ततः प्रमाणपदवीमर्हन्ति । वासिष्ठरामायणं तु केवलं वसिष्ठेन रामस्याद्वैतबोधनकथामयम् । नूनमद्वैतप्रसारायैव निर्मितो ग्रन्थः । चतुरः प्रबन्धा । न नूनं वाल्मीकिः । अर्वाक्तनोऽयं प्रबन्धा पुनराचार्यशङ्करादपि । यदि ततोऽपि प्रतनमिदमभविष्यत्, उदाहरिष्यदेव स्वमतसाधनाय प्रबलतमं प्रमाणमिदं **'मुनिवचनम्'** । नैकमपि पद्यमुज्जहार शङ्कराचार्यः । तेन ज्ञायते नेदं वासिष्ठं रामायणं तदानीमासीदिति ।

* * *

अथ काव्यमिति किमुच्यते? ननु कविकर्म काव्यम् । सत्यम् । अथापि न सर्वाणि कविकर्माणि काव्यानि भवितुमर्हन्ति । **'किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः'** । तत् काव्यमिति किमुच्यत इति? तदिदमुक्तमस्मत्कृतायां काव्यमीमांसायाम्–'शब्दबोध्यार्थप्रतिपादनद्वारा शब्दाबोध्यार्थद्योतकत्वं काव्यत्वम्' इति । मौनगर्भममौनमित्येत् । विस्तरस्तु तत्रैव द्रष्टव्यः ।

'ऐतिहासिकीं पौराणिकीं वा कथां विस्तारयत् शब्दतोऽर्थतश्च महत् काव्येषु महाकाव्यमित्युच्यते' इति च । अर्थतो महत्त्वमिति नायकत्वेन महापुरुषविशिष्टत्वम् । तदेतत् सर्वमत्र महाकाव्ये स्फुटम् ।

* * *

केचित्तु महाकाव्येऽष्टादश वर्णनीयानि परिगणयन्ति–

'नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः ।
'उद्यानसलिलक्रीडामधुपानरतोत्सवैः ॥

'विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः ।
'मन्त्रद्यूतप्रयाणाजिनायकाभ्युदयैरपि ॥

'एतैरुपनिबद्धं यत् तन्महाकाव्यमुच्यते ।
'एवमष्टादशानां यैःकैश्चिन्न्यूनमपीष्यते' इति ।

इदमप्यलक्षणम् । न्यूनमपीष्यते । अधिकमपीष्यते । गतमष्टादशत्वम् । महाकाव्ये वर्णनानि च सङ्ख्यया महान्ति भवन्तीत्येतावदेव ।

अथापि दृश्यन्ते कानिचन तान्यत्र । रामसीतयोर्महिमवर्णनलोलुपोऽयं कविः नगरादीनि वर्णयन्नपि क्वचित् श्लोकार्धेन, क्वचिदेकेन श्लोकेन द्वित्राभ्यां वा सङ्क्षेपत एव वर्णयति । न क्वापि वर्णनलौल्यम् । हितं मितं कथापूरकं च वर्णनम् । यथा बाणभट्टस्य कादम्बर्यामिव गहने वर्णनविपिने परिभ्रमन् मूलकथापथमेव न विस्मरेत् । यथा–

अर्णववर्णनम्– १.२.४४–६ तथा ५.१.१८.

सीतारामयोर्विवाहवर्णनम्–१.६.३१–६.

सीताविप्रयोगवर्णनम्– ३.६.३–१०

वर्षावर्णनम्– ४.५.४०.

शरद्वर्णनम्– ४.५.४५.

किष्किन्धावर्णनम्– ४.६.२१–४.

माहेन्द्रशैलवर्णनम्–५.१.९–१०.

लङ्कावर्णनम्–५.२.३५–६ तथा ५.२.४३–५.

मधुपान(शाला)वर्णनम्–५.३.१६–१७.

कपीनां मधुपानचापलम् ५.६.५९–६१.

रावणोद्यानवर्णनम्–५.३.३५–४०.

हनुमद्युद्धवर्णनम्– सुन्दरकाण्डे पञ्चमषष्ठसर्गयोः ।

युद्धवर्णनम्– युद्धकाण्डे तृतीयसर्गादारभ्य त्रयोदशसर्गपर्यन्तम् ।

युद्धार्थं लङ्कां प्रति प्रयाणम्– ६.१.६–१३.

रावणविभीषणमन्त्रालोचनम्– ६.१.३४–४५.

रामस्य कपिभिर्मन्त्रालोचनम्–६.२.४–२१.

समुद्रराजवर्णनम्– ६.२.४२–३.

रामाभिषेकाभ्युदयः–६.१६.

सीतारामयोः रतोत्सवः–७.१.१०–११ तथा ७.२.१८.

सूर्योदयवर्णनम्– ७.१.१७.

रामराज्यवर्णनम्–७.२.१७.

व्यङ्ग्यभङ्ग्या चन्द्रवर्णनम्–७.२.१९.

षडृतुवर्णनम्– ७.२.२१–२७.

श्रीरामस्य केशादिपादान्तवर्णनम्–७.७.१४–३३.

महाप्रयाणम्–७.७.३४–४७.

* * *

महाकाव्येऽत्र रामायण इव श्रीरामचन्द्रो नायकः। सीता नायिका । हनूमल्लक्ष्मणभरतशत्रुघ्ना उपनायकाः । रावणः प्रतिनायक इत्यादि सर्वं स्फुटम् । न महाभारत इव किमप्यत्र सम्मुग्धं सन्दिग्धं वा ।

✻ ✻ ✻

अथ कश्चात्र रसः? मोक्षार्थकाव्यत्वात् भक्तिरसः प्रधानः । हरिगुरू उभे अत्र प्रस्तुते राम इति हनुमानिति । तेन हरौ गुरौ च भक्तिः । अथ शान्तोऽपि समग्रकथानुस्यूतो रसः । भगवन्निष्ठैव हि मुख्यतः शान्तिर्नाम । तदर्थं बाह्यन्तःकरणयोर्विनिग्रहः । तेन निर्मलस्य मनसः पारदर्शकता, सर्वथाऽनुद्विग्नताजननी प्रसन्नता च ।

अथाष्टावप्यवान्तररसाः । सीतारामयोः शृङ्गारः, वियोगे विप्रलम्भशृङ्गारः । रामरावणयोर्युद्धे खरादिहनने हनुमत्पौरुषे च वीरः । कपिषु पक्षिषु श्वादिषु प्राणिमात्रे रामस्य करुणो रसः । कुम्भकर्णादिभिः कपीनां युद्धे रौद्रभयानकाद्भुताः । रामरावणयोर्युद्धेऽद्भुतश्च । हनुमता सागरतरणे छायाग्रहादिनिग्रहणे गन्धमादनानयने च । कुम्भकर्णकायात् कपीनामुत्पतने हास्यः । शूर्पणखाप्रसङ्गे हास्यश्च बीभत्सश्च । त्रिजटस्य गोदाने हास्यो रसः । एवं दशरसभरितं रामायणं नाम । सर्वमेतत् समानं मूलरामायणे च वाल्मीकिरामायणे च सङ्ग्रहरामायणे च ।

✻ ✻ ✻

अथाऽचक्षते रीतिरात्मा काव्यस्येति । अत्र प्रबन्धस्याऽत्मा का नाम रीतिः? रसानुगुणा पदसङ्घटना हि रीतिः । यां शैलीमाचक्षते । अपरुषपदबन्धा नातिदीर्घसमासा च श्लक्ष्णा वैदर्भी रीतिः । स्यादियं शृङ्गारादौ । वीररससन्दर्भे न वैदर्भी चमत्कुर्यात् । अथ गौडीसमासबहुला परुषाक्षरा तीक्ष्णा । स्यादियं वीरादौ । नतरां शृङ्गारादौ । तदुभयात्मिका पाञ्चाली सर्वरसानुकूला । यैव पाञ्चली सैव कार्णाटी च । तदेवं कार्णाटी रीतिरस्य काव्यस्याऽत्मा ।

क्वचित् श्लक्ष्णा यथा–

जयजय जगतां पते नमस्ते भवतु जयाङ्कुर एष कल्पवृक्षः ।
इति वददभिनन्दि नाकिवृन्दं कुसुमचयं प्रववर्ष राममौलौ (१.४.५४) इति ।

तीक्ष्णप्राया यथा–

लालाटीं भ्रुकुटीं बिभ्रद् भ्रमद्भूररुणेक्षणः ।
अमित्रघ्नोऽथ सौमित्रिः प्रोचे प्रेक्ष्यासिमात्मनः (२.५.२१) इति ।

यथा वा–

आखण्डलारातिशिरः प्रचण्डमुत्खण्डितं काण्डवरेण तेन ।

सम्मण्डितं कुण्डलमण्डलाभ्यां भूमण्डले भूधरवत् पपात (६.११.७०) इति ।

कार्णाटी रीतिर्यथा–

सम्भ्राम्यन्नक्रचक्रादिः सम्भ्राम्यन्नुदधिः स्वयम् ।

अर्हणं शिरसा बिभ्रद् रूपवान् प्रत्यदृश्यत' (६.२.४२) इति ।

इतिहासत्वेन सं.रामायणस्य निर्णिक्तता

यथामूलं तथैवैतन्न मनागप्यतिक्रमः । तथाऽप्यस्ति कश्चिद् विशेषः । रामायणे यदस्पष्टमिव, सन्दिग्धमिव, तदत्र स्फुटमुदितम् । यथा– लक्ष्मणभरतयोः को ज्यायानिति । बहवो भरत इति बभ्रमुः । अस्त्वन्येषां कथा । गोविन्दराजप्रभृतयः प्रायः सर्वेऽपि रामायणव्याख्यातारः भरतमेव ज्यायांसमाचक्षते । 'अस्त्येव मन्युर्भरताग्रजे मे' इति वदन् काळिदासोऽपि बभ्रामैवेत्युक्तम् । 'कौसल्ययाऽसावि सुखेन रामः प्राक् केकयीतो भरतस्ततोऽभूत्' इति वदन् भट्टिरपि ।

रामायणे वाल्मीकिराह–पुनर्वसुनक्षत्रे रामजननम्, पुष्ये भरतस्य, आश्लेषायां लक्ष्मणशत्रुघ्नयोरिति । तदिदं समेषां भ्रमकारणम् । नक्षत्रानुगुणं क्रमेण त्रिषु दिनेषु चतुर्णां जननमिति व्याख्यातारो बभ्रमुः । तेन लक्ष्मणशत्रुघ्नौ यमावित्यपरो भ्रममूलो भ्रमः । यदाह भगवत्पादः–'विपरीतज्ञानादपि विपरीतज्ञानान्तरं जायते' इति ।

लक्ष्मणजैष्ठ्यमिदमुपज्ञं भगवत्पादेन श्रीमहाभा.ता.निर्णये समार्थि । अथापि तद्वचनं नातीव स्फुटमिति तदेतत् सर्वमत्र स्पष्टमुदितं तात्पर्यनिर्णयानुसारेण लक्ष्मणो रामादनन्तरः, भरतस्तदनन्तर इति । तेनेदं विज्ञायते– न चतुर्णां क्रमेण त्रिषु दिनेषु जननम्, नापि सौमित्री यमाविति । कथमथ नक्षत्रव्यवस्था? ननु भोः नक्षत्राणि प्रतिमासं परिवर्तन्ते । तेन मेषे चैत्रे पुनर्वसौ रामजननम् । ततश्चतुर्थे मासि कर्काटके आषाढे आश्लेषायां लक्ष्मणजननम् । ततः पुष्यमासे प्रायो मकरे पुष्यनक्षत्रे, प्रायः पूर्णिमायां भरतजननम् । ततः परस्मिन् वत्सरे कर्काटके आश्लेषायां शत्रुघ्नजननमिति न कोऽपि विरोधः । तेन सौमित्री यमाविति भ्रान्तिरपि गर्भस्रावेण गलिता । तदुक्तं वाल्मीकिनाऽपि–**'राज्ञः पुत्रा महात्मानश्चत्वारो जज्ञिरे पृथक्'** इति । विवृतमेतद् विश्वपतितीर्थीयेऽस्मत्कृतव्याख्यायां च ।



यत्र रामायणे पाठश्चार्थश्च सन्दिग्धः, तत्र बहुषु स्थलेषु शक्यं निर्णेतुमनेन सङ्ग्रहकाव्येन, शुद्धः पाठश्चार्थश्च । तथाहि–रामायणे गजादिषु पञ्चसु वानरेष्वेकः शरभः पठ्यते–**'गजो गवाक्षो गवयः शरभो गन्धमादनः'** (४.६५.२) इति । नायं शरभः । किन्तु वृषभ इत्याह सङ्ग्रहकारः–**'गजो गवाक्षो गवयो वृषाख्यो गन्धमादनः'** (१.३.१९) इति । नहि शरभ इति वृषस्याऽख्या । किन्तु वृषभ इति । एवमुत्तरत्रापि– **'आबभाषे गजस्तत्र प्लवेयं दशयोजनम् । गवाक्षो योजनान्याह गमिष्यामीति विंशतिम् । शरभो वानरस्तत्र वानरांस्तानुवाच ह । त्रिंशतं तु गमिष्यामि योजनानां प्लवङ्गमाः । ऋषभो वानरस्तत्र वानरांस्तानुवाच ह । चत्वारिंशद् गमिष्यामि योजनानां न संशयः'** (६५.३-५) इति । स्फुटः पाठसङ्करः । अत्र गवयः शरभो बभूव । पूर्वं पञ्चस्वनुक्त ऋषभोऽत्र निरूपितः । तदिमां सर्वामसङ्गतिं परिहरिष्यन् सङ्ग्रहकार आह– **'योजनानि दश प्रोचे गजः प्लवनमात्मनः । विंशद्गवाक्षस्त्रिंशत्तु गवयो योजनान्यथ । चत्वारिंशच्च वृषभः'** (४.८.४८–९) इति । अन्यच्चेदं व्याहतमसङ्गतं वचनं रामायणे–**'सुषेणस्तु महातेजाः सत्ववान् कपि-सत्तमः । अशीतिं प्रतिजानेऽहं योजनानां पराक्रमे'** (९) इति । पूर्ववचनविरुद्धमेतत् । सुषेणो हि पश्चिमां दिशं जगाम । तदुक्तम्–**'–सुषेणं नाम वानरम् । तारायाः पितरं राजा श्वशुरं भीमविक्रमम् ।...प्रतीचीमदिशद् दिशम्'** (४.४२.१–५) इति । स कथमकस्मादिह दक्षिणां दिशमुत्पपात? सङ्ग्रहकारः शुद्धं पाठं दर्शयामास–**'सुषेणसूनुश्चाशीतिम्'** (४.८.५०) इति । नायं सुषेणः । किन्तु सुषेणसूनुस्तारः । तेन **'सुषेणस्तु महातेजाः'** इत्यसङ्गतः प्रचलितो रामायणपाठः । तामेतामसङ्गतिं प्रदर्श्य शुद्धपाठं सूचयामास पण्डिता-चार्यः । ततश्च **'सौषेणस्तु महातेजाः'** इति वा, **'सुषेणसूनुस्तु महासत्त्ववान्'** इति, **'तारस्तु सुमहातेजाः'** इति वा मूलपाठः स्यादिति विज्ञायते । एवं रामायणपाठे विद्यमानान् दोषान् प्रदर्श्य संशोधकानां सुपन्थानमाविष्कृतवतः पण्डिताचार्यस्याधमर्णाः सर्वेऽपि जिज्ञासवः ।

* * *

अयोध्याकाण्डे राममानेतुं भरतस्य वनप्रस्थाने चैवं पठ्यते–

'नव नागसहस्राणि कल्पितानि यथाविधि ।
'अन्वयुर्भरतं यान्तमिक्ष्वाकुकुलनन्दनम् ॥
'षष्टी रथसहस्राणि धन्विनो विविधायुधाः ।
'अन्वयुर्भरतं यान्तं राजपुत्रं यशस्विनम् ॥' (८३.३–४) इति ।

सङ्ग्रहे पुनरेवं पठ्यते–

'अयुतेभं लक्षहयं सरथाष्टसहस्रकम्' (१२.३०) इति ।

एतेन रामायणस्य प्राचीनः पाठः निर्धार्यते–

'दश नागसहस्राणि..........' इति ।

'अष्टौ रथसहस्राणि......' इति च ।

अधिकं सग्रहचन्द्रिकायां द्रष्टव्यम् ।

✻ ✻ ✻

क्वचिद् रामायणस्यार्थनिर्णये सङ्ग्रहकाव्यमिदं स्थाने सहकरोति ।

तथाहि रामायण एकं पद्यम्–

'तपसा दिवमारूढाः कपालशिरसा सह' (२.५४.३१)

अत्र **'कपालशिरसा सह'** इत्यस्फुटार्थम् । कपालप्रायशिरसा सहेति बहवो रामायणव्याख्यातारः । तस्य वास्तवमर्थं विववार पण्डिताचार्यः–

'कपालशिरआदीनां सिद्धिभूमिं तपस्विनाम्' (२.९.३१) इति ।

रामायणव्याख्यातॄणामज्ञातोऽयमर्थः कपालशिरा नाम कश्चनर्षिरासेति ।

✻ ✻ ✻

अन्यच्चेदं दशरथस्यान्त्येष्टिसंस्कारप्रसङ्गे–

'क्रौञ्चीनामिव नारीणां निनादस्तत्र शुश्रुवे ।
'आर्तानां करुणं काले क्रोशन्तीनां सहस्रशः' (रा.२.७६.२१) इति ।

अत्र नारीणां सहस्रमित्यस्फुटं वचनं स्फुटं व्याचख्यौ सङ्ग्रहे पण्डिताचार्यः–

'चतुर्दशशतस्त्रीभिः समं राजपरिग्रहैः ।
'मातॄर्विलोक्य क्रोशन्तीर्विललाप पुनश्च सः' (२.१२.९) इति ।

अत्र मातॄरिति पृथगुक्तेः परिग्रह इति न पत्नीवचनम् । तेन परिग्रहाः परिजनाः । सहस्रश इति चतुःशतोत्तरं सहस्रमिति स्फुटं विवृतम् ।

✻ ✻ ✻

इदमन्यद् रामायणगतं वचः–

'दशवर्षसहस्रं तु निराहारो दशाननः' (७.१०.१०) इति ।

रावणः १,४०,००,००० वर्षेभ्योऽप्यधिकं कालं जिजीवेति सम्प्रदायविदः ।

यदाह भवभूतिः शूर्पणखामधिकृत्य–

'अनेकयुगजीविन्यास्त्रेता यस्यास्त्रयोदशी' इति ।

तत्र दशवर्षसहस्राणीति पुनरत्यल्पो मासकल्पः कालः । नैतत् समीचीनं भाति । अत आह समीचीनां कालगणनां सङ्ग्रहे पण्डिताचार्यः–

'तपस्यतिष्ठन्नतनिष्ठवीर्याः सहोदरा दिव्यसमायुतं च' (३.१.१६) इति ।

तथाच दिव्यानि दशवर्षसहस्राणि, मानुषमानेन ३६,००,०००वर्षाणि, रावणादीनां तपश्चर्याकालः । तथाच स्वायुषश्चतुर्थांशमीषदधिकं तेऽतपस्यन्निति सुन्दरम् ।

ननु कुतो मूलादेवं पण्डिताचार्योऽपि निश्चप्रचमुवाच? स्वयं कृपया सञ्जग्राह कविः श्रुतानि भगवत्पादप्रवचनेषु, गतानि मूलरामायणे, पठितानि पुराणान्तरेषु ।

निदर्शनमात्रमेतत् । विस्तरस्तु सङ्ग्रहचन्द्रिकायां द्रष्टव्य इत्युपरम्यते ।

* * *

उत्तरकाण्डे सारमेयन्यायदानकथा प्रक्षिप्तेति पाश्चात्यै रामायणव्याख्यातृभिः परित्यक्ता । एतस्य सर्गस्य प्रक्षिप्तताविषये प्रायः सर्वेषामैककण्ठ्यम् । श्रीमहाभा.ता.निर्णयेऽपि कथेयमनुदितेति आचार्यमध्वस्यापि प्रक्षिप्तत्वं सम्मतमिति पाश्चात्यानां भायात् । परन्तु सप्तशतकेभ्यः पूर्वतनेऽपि रामायणकोशपाठे कथेयमुपलब्धा । अतः प्रबन्ध्रा पण्डिताचार्येण साऽपि कथाऽत्र सङ्गृहीता । तेन भगवत्पादस्यापि सम्मतोऽयं कथाभाग इति तस्य प्रक्षिप्ततां वदन्तो भ्रान्ता एवेति च निश्चीयेत । तदेतदनुसृतं श्रीराघवेन्द्रयतिभिः रामचारित्रमञ्जर्यामपि–**'आर्तश्वगदितकृत्'** इति ।

प्रक्षिप्तत्वं वदतामयमाशयः स्यात्–'कथं सारमेयो नरभाषया रामसभायां सम्भाषेत? न शक्यमेतत् । तस्मादवश्यं प्रक्षिप्तम्' इति । अहो, प्रायस्तैर्विस्मृतम्, यद्रामायणे कपयोऽपि व्याहरन्ति । पक्षी जटायुरपि व्याहरति । सम्पातिरपि । किमिति तपस्वी सारमेयो न व्याहरेत्?

ननु नायं व्याहरणमूलः प्रक्षिप्ततानिर्णयः । नरपतिसभायां नराणामेव न्यायनिर्णय इति साम्प्रतम् । नतु शुनां पशूनां वा । तदिदमपि निरस्तं रामचन्द्रेणैव कृतापराधं वानरं वालिनं शिक्षयता । स्यादपि नरपति-सभायामियं व्यवस्था । रामो न केवलं नरपतिः । किन्तु जीवजातपतिः । तदिदं तेनैवाऽविष्कृतम्– **'अश्वानां खादनेनाहमर्थी नान्येन केनचित्'** इति गुहं प्रति घोषयता, कुर्वता च जटायुषोऽपि संस्कारम् । ततो युक्ता रामस्य सभायां सारमेयस्य न्यायदानकथा ।

अपिच स्याद् वा, मा वा भूत् तस्यैतिहासिकता । अर्थवादत्वेनापि महतीं नीतिं बोधयन् स प्रसङ्गोऽवश्यं मूलगत इत्येव सुन्दरम् । भारतादिष्वपि श्रूयन्ते इतिसाहमध्ये तत्रतत्रार्थवादाः ।

✻ ✻ ✻

रामायणे कुक्कुरकथानन्तरमेकस्मिन्नध्याये गृध्रोलूकन्यायदानकथा पठ्यते । सेयं प्रक्षिप्तेति पण्डिताचार्यस्यापि सम्मतम् । अतः सा कथा ग्रन्थकृता परित्यक्ता । तदेवं रामायणस्य पाठशुद्धिनिर्णयेऽपि सङ्ग्रहरामायणं महदुपकरोतीति महानयं संशोधकानां लाभः ।

✻ ✻ ✻

एवं दभ्रातिदभ्रमपि प्रमेयं निरूपयन् पण्डिताचार्यः सीतापरित्यागकथां सर्वथा परितत्याजैव । रामचरिते महत्त्वपूर्णोऽयं प्रसङ्गः । किमिति सङ्ग्रहकारस्तमेतं न सञ्ग्राहेति विस्मयं नः परमादधाति प्रबन्धु-मौनम् । प्रायो जगन्मातुर्वियोगकथामतथ्यामपि निरूपयितुं नेयेष सर्वथा कविहृदयम् । अत्रानुक्तामपि कथां मणिमञ्जर्यां सञ्ग्राह–

> **'सुराणकांस्तमो नेतुं तत्याजेव स जानकीम् ।**
> **'व्याप्तत्वान्निरवद्यत्वात् तस्यास्त्यागः कथं भवेत्'** (२.२३) इति ।

✻ ✻ ✻

ग्रन्थेऽस्मिन्नुत्तरकाण्डे चरमः सर्गः प्रबन्धुर्नूनमपूर्वतमं चोपहरणम्– हनुमच्चरितेनोपसंहारः । न रामायणे कथितम् । किन्तु महा.भा.ता.निर्णये द्वित्रैः श्लोकैः सङ्क्षिप्य कथितं कैम्पुरुषं हनुमच्चरितं वितस्तार । यत्र हनुमतोपास्यानां भगवतोऽनन्तरूपाणामुल्लेखः, तेन चापूर्वाणां शास्त्रप्रमेयाणामाविष्करणम्, श्रवणयोर्मनसश्च रसायनम् । नूनं साधकसज्जनलोकः अस्मायुपकाराय पण्डिताचार्यस्य निरन्तरं प्रणयगर्भां कार्तज्ञ्यभूयिष्ठां प्रणाममालां पादयोरुपहरति ।

सं.रामायणे साङ्ख्यम्

महाकाव्येऽस्मिन् चतुःषष्टिः सर्गाः (बा.कां.८ सर्गाः; अयो.१२; अर.६; किष्कि.८; सुं.६; युद्ध.१६; उत्तर. ८; संहत्य ८+१२+६+८+६+१६+८=६४) । भगवत्यामृक्संहितायां चतुःषष्टिरध्यायाः । तदिदं सङ्ख्यासाम्यं रामायणस्य वेदतुल्यतां स्मारयतीव । तथाहि प्राचां वचनम्–

'वेदवेद्ये परे पुंसि जाते दशरथात्मजे ।
'वेदः प्राचेतसादासीत् साक्षाद् रामायणात्मना' इति ।

अत्र वेद इत्यृग्वेद एव । तत्र चतुर्विंशतिः शाखाः । चतुर्विंशतिसहस्राणि च ग्रन्था रामायणे । सप्तमे पुनर्वसुनक्षत्रे दशावतारेषु सप्तमो रामावतार इति सूचयदिव काण्डसप्तकं वाल्मीकिरामायणसङ्ग्रहरामायण-योरुभयोरपि समानम् ।

अत्र समग्रा पद्यसङ्ख्या च ३४५६ । तदिदं पुनरध्यात्मसङ्ख्यायामेव पर्यवस्यति ३+४+५+६=१८ । अष्टादशेति पुराणसङ्ख्या । महाभारतपर्वसङ्ख्या । गीताध्यायसङ्ख्या च । समग्राध्यात्मरहस्यसर्वस्वसङ्ग्रहणी च सङ्ख्या । पञ्चदश कलाः । षोडशः कलावच्छिन्नो जीवः । तदुक्तं षट्प्रश्ने–**'स प्राणमसृजत । प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नमन्नाद् वीर्यं तपो मन्त्राः कर्म लोका लोकेषु नाम च'** इति । **'षोडशी कला जीवस्वरूपम्'** इति त्रैविक्रमार्यदासवचनम् । सप्तदशी बन्धनी चित्प्रकृतिः । अष्टादशो मोचकः परमपुरुषो नारायण इति ।

सं.रामायणे छन्दोविलासः

अत्र त्रिविधाऽनुष्टुब् भवति–पथ्यावक्त्रं युग्मविपुला प्रमाणिका चेति । तथाहि पथ्यावक्त्रलक्षणम्–

'सर्वपादेषु न स्यातां नसावाद्याक्षरात् परम् ।
'अब्ध्यक्षरेभ्यो यगणो वक्त्रमाहुरनुष्टुभि ।
'युजोरब्धेर्जकारश्चेत् पथ्यावक्त्रमुदाहृतम्' इति ।

सर्वेषु पादेषु प्रथमाक्षरात् परं द्वितीयतृतीयतुरीयेष्वक्षरेषु नगणसगणौ न स्याताम् । एवं प्रथमतृतीययोः पादयोः चतुर्थाक्षरात् परं त्रिष्वक्षरेषु यगणः, द्वितीयतुरीययोः पादयोर्जगणश्च यदि स्यातां तत् पथ्यावक्त्रं नामानुष्टुप्प्रभेद इत्यर्थः ।

तथाच सर्वपादावच्छेदेन प्रथमाक्षरात् परं नगणसगणातिरिक्तगणोपेतत्वे सति समपादावच्छेदेन चतुर्थाक्षरात् परं जगणोपेतत्वे सति, विषमपादावच्छेदेन यगणोपेतत्वं पथ्यावक्त्रलक्षणमित्युक्तं भवति । यथाऽत्र–

मुख्यप्राणाय भीमाय नमो यस्य भुजान्तरम् ।
नानावीरसुवर्णानां निकषाश्मायितं बभौ ॥ (१.१.४)

इयमिह गणव्यवस्था–

मगणः यगणः तगणः जगणः

मु । ख्यप्राणा । यभीमा । य न । मोयस्य । भुजान्त । रम् ।

तगणः यगणः यगणः जगणः

ना । नावीर । सुवर्णा । नां नि । कषाश्मा । यितम्ब । भौ ।

यथा वा–

आहूता राजराजेन राजराजविभूतिना ।
उपायनान्युपानीय भूपा वैश्यवदाययुः ॥ (१.२.१४)

मगणः यगणः जगणः जगणः

आ । हूतारा । जराजे । न रा । जराज । विभूति । ना ।

रगणः यगणः तगणः जगणः

उ । पायना । न्युपानी । य भू । पावैश्य । वदाय । युः ।

अयुजोश्चतुर्थाक्षरात् परं यगणस्थाने भगणादिषु सत्सु युग्मविपुला नामानुष्टुप् । विषमपादावच्छेदेन यगणाति-रिक्तगणोपेतत्वमित्येतत् । विस्तरस्त्वस्मत्कृतच्छन्दोमीमांसायां द्रष्टव्यः ।

तद् यथा–

कवयन्तं रामकीर्त्या हनूमन्तमुपास्महे । (१.१.३)

यगणः रगणः तगणः जगणः

क । वयन्तं । रामकी । र्त्या ह । नूमन्त । मुपास्म । हे ।

अत्र चतुर्थाक्षरात् परं यगणस्थाने रगणः ।

यथा वा–

आत्मारामोऽपि रमया रममाणोऽभिरामया । (१.१.८)

मगणः नगणः यगणः जगणः

आ । त्मारामो । पिरम । या र । ममाणो । भिराम । या ।

अत्र यगणस्थाने नगणः ।

यथा वा–

सङ्कर्षणाख्यः संहारी जयाजानिरजन्यसौ । (१.१.१२)

रगणः मगणः तगणः जगणः

सं । कर्षणा । ख्यस्संहा । री ज । याजानि । रजन्य । सौ ।

अत्र यगणस्थाने मगणः ।

यथा वा–

मरीचिमुख्या मुनयः प्राणेभ्यः प्राणिनां गुरोः । (१.१.२५)

रगणः भगणः तगणः जगणः

म । रीचिमु- । ख्यामुन । यः प्रा । णेभ्यःप्रा । णिनाङ्गु । रोः ।

अत्र यगणस्थाने भगणः ।

ता इमा युग्मविपुला नामानुष्टुभः । एवमन्यत्रापि । तदिदं प्रकारद्वयमष्टाक्षरपादत्वेनैकीकृत्य अनुष्टुबिति श्लोक इति चैकयोक्त्या व्यवहरन्ति । अत्रापि तयोरेकत्वेनैव परिगणनं क्रियते । प्रमाणिका तु पृथक् परिगणिता । तस्या लक्षणमुपरिष्टाद् भवति ।

* * *

इन्द्रवज्रोपेन्द्रवज्रयोर्योगे उपेन्द्रमाला नामोपजातिः । त्रिष्टुप्प्रभेदोऽयम् । एकादशाक्षरपादत्वं त्रिष्टुप्त्वम् । ततजा गुरुद्वयं चेदिन्द्रवज्रा । जतजा गुरुद्वयं चेदुपेन्द्रवज्रा । सेयमुपजातिः पादव्यत्ययेन चतुर्दशभेदा भवति । विस्तरस्तु च्छन्दोमीमांसायाम् ।

यथाऽत्र–

तामापतन्तीमवलोक्य पुंसां स्वधर्ममार्गं भगवान् विधित्सुः ।
उरःकवाटं खलु ताटकायाः स्वपाटवात् पाटितवाञ्छरेण ॥ (१.४.५३)

अत्र प्रथमपादे इन्द्रवज्रा । ततस्त्रिषूपेन्द्रवज्रा–

त त. ज. गु. गु.

तामाप । तन्तीम । वलोक्य । पुं । साम् ।

ज. त. ज. गु. गु.

स्वधर्म । मार्गंभ । गवान्वि । धि-। त्सुः ।

उरःक । वाटंख । लुताट । का। याः ।

स्वपाट । वात्पाटि । तवाञ्छ । रे । ण ॥

यथा वा–

तां हारगौरीमतिचित्रयात्रां जह्नोश्च कन्यात्वमुपागतां सः ।
नीत्वा तदम्भःपरिषिक्तदेहं निनाय नाकं निजताततजातम् ॥ (१.५.५३)

अत्राऽदितस्त्रिषु पादेष्विन्द्रवज्रा । चरमे तूपेन्द्रवज्रा–

त. त. ज. गु. गु.

तांहार । गौरीम । तिचित्र। गा। त्राम्।

जह्नोश्च । कन्यात्व । मुपाग । तां । सः ।

नीत्वात । दम्भःप । रिषिक्त। दे । हम् ।

ज. त. ज. गु. गु.

निनाय । नाकंनि । जतात । जा । तम् ।

यथा वा–

सज्ज्ञानरूपे जगदेकदीपे नाज्ञानलेशोऽपि घटेत रामे ।
प्रकाशमूर्तावहिमप्रकाशे नहि क्वचिद् ध्वान्तलवोऽपि लक्ष्यः ॥ (१.६.५७)

अत्र पूर्वार्धे इन्द्रवज्रा । उत्तरार्धे चोपेन्द्रवज्रा–

त.   त.   ज.   गु. गु.
सज्ज्ञाज्ञान । रूपेज । गदेक । दी । पे ।
नाज्ञान। लेशोपि। घटेत । रा । मे ।

ज.   त.   ज.   गु.   गु.
प्रकाश । मूर्ताव । हिमप्र । का । शे ।
नहिक्व । चिद्ध्वान्त । लवोपि । ल। क्ष्यः ।

यथा वा–

ततः परस्मिन् दिवसे स राजा सराघवं कौशिकमात्मशालाम् ।
आनीय नत्वा परिपूर्णकामः सप्रश्रयो वाचमुवाच वाग्ग्मी ॥ (१.७.१)

अत्र पूर्वार्धे उपेन्द्रवज्रा । उत्तरार्धे इन्द्रवज्रा–

ज.   त.   ज.   गु.   गु.
ततःप । रस्मिन्दि । वसेस । रा । जा ।
सराघ । वंकौशि । कमात्म । शा । लाम् ।

त.   त.   ज.   गु.   गु.
आनीय । नत्वाप । रिपूर्ण । का । मः ।
सप्रश्र । योवाच । मुवाच । वा । ग्ग्मी ।

यथा वा–

यागाय गां गाधिज कर्षतो मे बभूव कन्या भुवनेषु धन्या ।
सीराग्रमार्गादत एव सीता महानिधिश्रीरिव निर्धनस्य ॥ (१.७.२)

अत्र विषमयोरिन्द्रवज्रा । समयोरुपेन्द्रवज्रा–

त. त. ज. गु. गु.

यागाय । गांगाधि । जकर्ष । तो । मे ।

ज. त. ज. गु. गु.

बभूव । कन्याभु । वनेषु । ध । न्या ।

त. त. ज. गु. गु.

सीराग्र । मार्गाद । तएव । सी । ता ।

ज. त. ज. गु. गु.

महानि । धिश्रीरि । वनिर्ध । न- । स्य ।

अत्र पादान्त्यस्य लघोरपि गुरुत्वविवक्षया 'स्य' इत्यस्य 'स्या' इतिवद् गुरुत्वम् ।

एवं पादभेदेनान्येऽपि प्रकाराः द्रष्टव्याः ।

✻ ✻ ✻

केवलेन्द्रवज्रा यथा–

आलोक्य केचिद् धनुराप्य केचिदन्ये परिस्पृश्य परे प्रचाल्य ।
वीरा अवीरत्वमवाप्य याताः केचिद् गतांस्तानवलोक्य भीताः ॥ (१.७.८)

केवलोपेन्द्रवज्रा यथा–

इदं धनूरत्नमलाभि शम्भोः प्रसादितान्नस्तपसा चिरेण ।
विना पिनाकास्त्रमचालनीयं विना यथा भूतळमादिकोलम् ॥ (१.७.४)

✻ ✻ ✻

अत्र प्रायः सर्गा अनुष्टुब्बद्धाः । प्रथमकाण्डे सप्तमः सर्गः, द्वितीयतृतीयतुरीयेषु प्रथमः, पञ्चमे प्रथमषष्ठौ, षष्ठे तुरीयाष्टमद्वादशचतुर्दशषोडशाः सर्गाः, सप्तमे च काण्डे प्रथमद्वितीयौ सप्तमाष्टमौ चेति पञ्चदश सर्गा उपजातिबद्धाः, मध्ये केवलयेन्द्रवज्रयोपेन्द्रवज्रया च संसृष्टाः ।

द्वितीयकाण्डे दशमः सर्गः स्वागतच्छन्दोबद्धः । स्वागतमिति त्रिष्टुप्प्रभेदः–**'स्वागतं रो नभगगाः पादमध्ये यतिर्नहि'** इति हि तल्लक्षणम् । तथाहि–

रामदेवविरहानलदूनास्तद्गुणान् जगुरथामृततुल्यान् ।
नागराः सवनिताः शिशुवृद्धा मातरोऽस्य जनकः स्वजनाश्च ॥ (२.१०.१)

र. न. भ. गु. गु.
रामदे । ववविर । हानल । दू । नाः ।

अवशिष्टा अष्टचत्वारिंशत् सर्गा अनुष्टुब्बद्धाः सर्गान्ते यथाकविसमयं भिन्नवृत्ताश्च । तत्रापि षष्ठे युद्धकाण्डे नवमैकादशौ सर्गावनुष्टुबुपक्रमावुपजात्युपसंहारौ । (९=अनु.६०+उप.२०; ११=अनु.५७+उप.१५.) ।

✻ ✻ ✻

एवमत्र बहुलमनुष्टुभो भवन्ति । द्वितीया उपेन्द्रमाला नामोपजातिः । तत इन्द्रवज्रा । ततः स्वागतम् । तत उपेन्द्रवज्रा सङ्ख्यानुक्रमेण पञ्चमी । ततः षष्ठी वसन्ततिलका । शक्करीप्रभेदोऽयम् । चतुर्दशाक्षरपादत्वं शक्करीलक्षणम् । **'वसन्ततिलका प्रोक्ता तभजा जगगा यदि'** इति वसन्ततिलकालक्षणम् । अस्या एव नामान्तराणि– सिंहोद्धता, सिंहोन्नता, मधुमाधवी, चेतोहारी चेति ।

यथाऽत्र–

यावन्न निर्दहति रावणनामवह्निर्विश्वं च दाशरथिरूपमुपेत्य तावत् ।
त्वं नाथ तं शमय वीर्यसमुद्रपूरैर्भक्ताननन्यशरणान् कुरु वीततापान् ॥ (१.२.५१)

त. भ. ज. ज. गु. गु.
यावन्न । निर्दह । तिराव । णनाम । व-। ह्निः ।

✻ ✻ ✻

ततो मालिनी भवति सप्तमी । **'मालिन्युक्ता नन्मयया शिवमूर्तिस्वरैर्यतिः'** इति तल्लक्षणम् । अतिशक्करीप्रभेदोऽयम् । पञ्चदशाक्षरपादत्वमतिशक्करीलक्षणम् । यथाऽत्र–

इति निजकनियोगान्मन्त्रिणाऽऽनीतमात्रान् नरपतिरवलोक्य ब्राह्मणान् ब्रह्मनिष्ठान् ।
अनमदनभिमानो भक्तिभारेण भूयो हृदि जगदभिरामं वासुदेवं दधानः ॥ (१.१.३७)

न. न. म. य. य.

इतिनि । जकनि । योगान्मं । त्रिणानी । तमात्रान् ।

शिवमूर्ति(८)स्वरै(७)र्यतिः–

इति निजकनियोगात् । मन्त्रिणानीतमात्रान् ।

मालिन्युपसंहारं चेदं काव्यम् । तथाहीदं चरमपद्यम्–

इति पवनसुताय श्रेष्ठभक्ताय रामो हसितसितगुबन्धून् प्रेमपीयूषसिन्धून् ।
भुवनभवनरक्षाभङ्गलीलाप्रसङ्गान् वितरति कमलायै दत्तशेषानपाङ्गान् ॥ (७.८.३०)

* * *

ततः प्रहर्षिणी भवत्यष्टमी । **'प्रहर्षिणी मनौ ज्रौ गो गङ्गाध्वककुभां यतिः'** इति च तल्लक्षणम् । अतिजगतीभेदोऽयम् । त्रयोदशाक्षरपादत्वमतिजगतीलक्षणम् । यथाऽत्र–

गीर्वाणैरिति नुतिमद्भिरर्थ्यमानः प्रत्यक्षीभवति पुरा पुराणमूर्तिः ।
बालार्कप्रकररुचिः पिशङ्गवासाः स्वाकल्पस्फुरितमणिर्मनोभिरामः ॥ (१.२.५२)

म. न. ज. र. गु.

गीर्वाणै । रितिनु । तिमद्भि । रर्थ्यमा । नः ।

गङ्गाध्व(३)ककुभां(१०) यतिः–

गीर्वाणै । रितिनुतिमद्भिरर्थ्यमानः ।

* * *

ततः पुष्पिताग्रा नामार्धसमवृत्तं नवमम् ।

सेयं प्रथमतृतीययोर्द्वादशाक्षरेति विषमपादयोर्जगती । द्वितीयतुरीययोस्त्रयोदशाक्षरेति समपादयोरतिजगती । तथाचेयं जगत्यतिजगत्योरुपजातिः । तथाहि लक्षयन्ति–**'पुष्पिताग्रा ननरया युक्ते तु नजजा रगौ'** इति । तथाह्यत्र–

जयजय जगतां पते नमस्ते भवतु जयाङ्कुर एष कल्पवृक्षः ।
इति वददभिनन्दि नाकिवृन्दं कुसुमचयं प्रववर्ष राममौलौ ॥ (१.४.५४)

न. न. र. य.
१. जयज । यजग । तांपते । नमस्ते ।
३. इतिव । ददभि । नन्दिना । किवृन्दम् ।

न. ज. ज. र. गु.
२. भवतु । जयाङ्कु । रएष । कल्पवृ- । क्षः ।
४. कुसुम । चयंप्र । ववर्ष । राममौ । लौ ।

✻ ✻ ✻

ततः स्रग्धरा भवति दशमी । **'मरभनया यौ मुनिमुनिमुनिभिः स्यात् स्रग्धरा विभिन्नाङ्गी'** इति च तल्लक्षणम् । प्रकृतिप्रभेदोऽयम् । एकविंशत्यक्षरपादत्वं प्रकृतिलक्षणम् । तथाह्यत्र–

श्वेतद्वीपे यथाऽयं विहरति रमया राजमाने विमाने
श्रीमद्भोगीन्द्रभोगे गुणनिधिरधिकं भासमाने समाने ।
जम्बूद्वीपेऽत्र पुर्य्यां जनकतनयया राजयन्त्या जयन्त्या
देव्या रामोऽभिरेमे वृषभइव जगद् रञ्जयन्त्या जयन्त्या ॥ (१.८.८१)

म. र. भ. न य. य. य.
श्वेतद्वी । पेयथा । यंविह । रतिर । मयारा । जमाने । विमाने ।

मुनि(७)मुनि(७)मुनिभि(७)र्विभिन्नाङ्गी–

श्वेतद्वीपे यथाऽयं । विहरति रमया । राजमाने विमाने ।

✻ ✻ ✻

तत इन्द्रमाला नामोपजातिर्भवत्येकादशी । वंशस्थेन्द्रवंशयोर्मेलनेनोपजातिरियम् । द्वादशाक्षरो जगती-प्रभेदोऽयम् । **'वंशस्थं स्याज्जतजरा गुहास्यऋतुभिर्यतिः'** इति, **'इन्द्रवंशा ततौ जरौ'** इति च तयो-र्लक्षणम् । यथाऽत्र–

सुमन्त्रतन्त्रेषु मखेषु कोविदान् सुमन्त्र हन्ताऽनय शीघ्रमृत्विजः ।
गुरुं वसिष्ठं च समेधयेद् ध्रुवं क्षत्रं खलु ब्रह्म यथाऽनिलोऽनलम् ॥ (१.१.३६)

अत्र पादत्रये वंशस्थम् । तुरीय इन्द्रवंशा–

ज. त. ज. र.

सुमन्त्र । तन्त्रेषु । मखेषु । कोविदान् ।

त. त. ज. र.

क्षत्रंख । लुब्रह्म । यथानि । लोनलम् ।

गुहास्य(६)ऋतु(६)भिर्यतिः–

सुमन्त्रतन्त्रेषु । मखेषु कोविदान् ।

क्षत्रं खलु ब्रह्म । यथाऽनिलोऽनलम् ।

एकैव चात्र केवलेन्द्रवंशा पठ्यते । छन्दःसङ्ख्यया द्वादशी । यथा–

सीताकृतिं दिव्यपरीक्षणच्छलात् सीतापतिर्हव्यवहे निधाय ताम् ।
कैलासशैलात् पुनरागतां प्रियां सीतां स्वयं प्रैक्षत पावकार्पिताम् ॥ (६.१४.४८)

वस्तुतः प्रचलितपाठे द्वितीयः पादः–**'सीतापतिर्हव्यवहे निधाय'** इत्येकादशाक्षरः पठ्यते । छन्दःशास्त्रानभिज्ञानां भ्रान्तिमूलोऽयं पाठः । अत एव **'तां रावणापहृतां सीताकृतिं सीताप्रतिकृतिम्'** इति तच्छब्दप्रतीकग्रहणपूर्वकं व्याचख्युर्विश्वपतितीर्थः श्रीनिवासाचार्यश्च ।

त. त. ज. र

सीताकृ । तिंदिव्य । परीक्ष । णच्छलात् ।

सीताप । तिर्हव्य । वहेनि । धायताम् ।

✻ ✻ ✻

ततो मन्दाक्रान्ता त्रयोदशी । **'मन्दाक्रान्ता मभ्नतास्तो गावब्धिषडगैर्यतिः'** इति तल्लक्षणम् । अत्यष्टिभेदोऽयम् । सप्तदशाक्षरपादत्वमत्यष्टिलक्षणम् । यथा मङ्गलपद्यम्–

वन्दे वन्द्यं विधिशिवमहेन्द्रादिवृन्दारकेन्द्रै-
र्व्यक्तं व्याप्तं स्वगुणगणतो देशतः कालतश्च ।
धूतावद्यं सुखचितिमयैर्मङ्गलैर्युक्तमङ्गैः
सानाथ्यं नो विदधदधिकं ब्रह्म नारायणाख्यम् ॥ (१.१.१)

म. भ. न. त. त. गु. गु.

वन्देवं । द्यंविधि । शिवम । हेन्द्रादि । बृन्दार । के । न्द्रैः ।

अब्धि(४)षड्(६)अगै(७)र्यतिः–

सानाथ्यं नो । विदधदधिकं । ब्रह्म नारायणाख्यम् ।

✻ ✻ ✻

ततः शालिनी चतुर्दशी । **'शालिनी मतता गौ च यतिः श्रुतितुरङ्गमैः'** इति तल्लक्षणम् । त्रिष्टुप्प्रभेदोऽ-यम् । यथाऽत्र–

रामाभ्याशं प्राप्य रामानुजन्मा साकं वायोः सूनुना तं ववन्दे ।
सान्द्रानन्दी मन्दहासी मुकुन्दस्तं सौमित्रिं लालयन्नालिलिङ्गे ॥ (६.११.७३)

म. त. त. गु. गु.

रामाभ्या । शंप्राप्य । रामानु । जन् । मा ।

यतिः श्रुति(४)तुरङ्गमैः(७)–

रामाभ्याशं । प्राप्य रामानुजन्मा ।

✻ ✻ ✻

ततो रथोद्धता पञ्चदशी । एकादशाक्षरा त्रिष्टुबेवेयम् । **'रथोद्धता रनरला गो यतिर्न पदान्तरे'** इति तल्लक्षणम् । यथाऽत्र–

गौतमात्मजगिरं स राघवः शुश्रुवानिति ददर्श कौशिकम् ।
तत्रतत्र हि कथाः शृणोत्यसौ सर्वविच्च जगतो विडम्बयन् ॥ (१.६.५६)

र. न. र. ल. गु.

गौतमा । त्मजगि । रंसरा । घ । वः ।

✻ ✻ ✻

ततो द्रुतविलम्बितं षोडशम् । द्वादशाक्षरतया जगतीप्रभेदोऽयम् । **'नभौ भरौ चेद् द्रुतविलम्बितं न यतिः पदि'** इति तल्लक्षणम् । यथाऽत्र–

इति वसिष्ठगरिष्ठसभाजनैरभिहितः स्थिररामसभाजनैः ।
दशरथस्तनयाय महीमतः प्रतिददौ सुनयाय महीमतः ॥ (२.१.३२)

न. भ. भ. र.
इतिव । सिष्ठग । रिष्ठस । भाजनैः ।

✻ ✻ ✻

ततः सप्तदशं शार्दूलविक्रीडितम् । अतिधृतिप्रभेदोऽयम् । एकान्नविंशत्यक्षरत्वमतिधृतिलक्षणम् । **'शार्दूलविक्रीडितं तु यत्र मः सजसाः पुनः । ततगाः सूर्यऋषिभिर्विरतिस्तत्र कीर्तिता'** इति च । यथाऽत्र–

रक्षोलक्षकुलाभिचारमखिलं त्रैलोक्यसौख्याकरं
भ्राम्यन् मन्दमनीषमण्डलमनोमोहार्णवोद्घूर्णनम् ।
तत्वज्ञानजुषां विडम्बनमहानाट्याग्ररङ्गं वचो
रामाणां परमा रमा स्वरमणं रामं बभाषे तदा ॥ (३.४.४४)

म. स. ज. स. त. त. गु.
रक्षोल- । क्षकुला । भिचार । मखिलं । त्रैलोक्य । रक्षाक । रम् ।

सूर्य(१२)ऋषि(७)भिर्विरतिः–

तत्वज्ञानजुषां विडम्बनमहा । नाट्याग्ररङ्गं वचः ।

✻ ✻ ✻

तत एका प्रमाणिकाऽष्टादशी । अनुष्टुप्प्रभेदोऽयम् । **'प्रमाणिका जरौ लगौ'** इति तल्लक्षणम् । अथवा– **'लगौ लगौ लगौ लगौ प्रमाणिका निगद्यते'** । यथाऽत्र–

खलावलेपखण्डनस्थिरावतारविभ्रमः ।
अवेक्षते स्म जानकीमुखेन्दुमिन्दिरापतिः ॥ (२.१२.१२०)

ज. र. ल. गु.
खलाव । लेपखं । ड । न- ।
स्थिराव । तारवि-। भ्र । मः ॥

✻ ✻ ✻

तथाचेदमत्र छन्दसां सङ्ख्यानं भवति–

१.	अनुष्टुप् (श्लोकः)	२७०६
२.	इन्द्रवज्रोपेन्द्रवज्राभ्यामुपजातिः	४८१
३.	इन्द्रवज्रा	१०७
४.	स्वागतम्	६१
५.	उपेन्द्रवज्रा	३०
६.	वसन्ततिलका	१६
७.	मालिनी	१५
८.	प्रहर्षिणी	८
९.	पुष्पिताग्रा	८
१०.	वंशस्थेन्द्रवंशाभ्यामुपजातिः	६
११.	स्रग्धरा	५
१२.	मन्दाक्रान्ता	४
१३.	शालिनी	३
१४.	रथोद्धता	२
१५.	द्रुतविलम्बितम्	१
१६.	शार्दूलविक्रीडितम्	१
१७.	प्रमाणिका	१
१८.	इन्द्रवंशा	१
	संहत्य	**३,४५६**

एवमत्र संहत्याष्टादश च्छन्दांसि भवन्ति । कुतूहलपदमिदम्, यद्वैदिकीमिमां सङ्ख्यां कविर्द्वेधा छन्दस्सु योजयामास । अत्रोपयुक्तानि छन्दांसि १८ । सर्वच्छन्दसां सङ्कलितसङ्ख्याऽप्यष्टादश (३+४+५+६ =१८) । तत्रापि अनुष्टुप्, उपजातिः, मध्ये क्वचिदिन्द्रवज्रा चोपेन्द्रवज्रा च, स्वागतमिति पञ्चैव छन्दांसि प्रधानानि सर्गबद्धानि । अवशिष्टानि ग्रन्थारम्भे सर्गान्ते च निबद्धानि ।

सं.रामायणे शब्दार्थालङ्काराः

उपमा रूपकं श्लेषः उत्प्रेक्षा स्वभावोक्तिरतिशयोक्तिरर्थान्तरन्यासो विरोधाभास इतीमे प्रधाना अर्थालङ्काराः । तत्प्रभेदाश्च शतशो भवन्ति । ते च सर्वेऽत्र यथासम्भवं निविष्टाः । विशेषतश्च प्रियश्लेषः कविरयं युवेव प्रियाश्लेषप्रियः ।

श्लेषगर्भोपमा यथा–

वाल्मीकेर्गौः पुनीयान्नो महीधरपदाश्रया ।
यद्दुग्धमुपजीवन्ति कवयस्तर्णकाइव ॥ (१.१.७)

श्लेषगर्भं रूपकं यथा–

स्वान्तस्थानन्तशय्याय पूर्णज्ञानसरार्णसे ।
उत्तुङ्गवाक्तरङ्गाय मध्वदुग्धाब्धये नमः ॥ (१.१.५)

श्लेषो यथा–

हाराणामिव शुभ्राणां भूपानां भूरितेजसाम् ।
सन्तत्यां नायकच्छायो राजा दशरथोऽभवत् ॥ (१.१.२८)

स्वभावोक्तिर्यथा–

नमो नागेन्द्रशय्याय नमो नानाविलासिने ।
नमोऽनाद्यन्तमध्याय नमो नारायणाय ते ॥ (१.२.४८)

उत्प्रेक्षा यथा–

अङ्गनानामनङ्गोऽयं त्वादृशानां तु किङ्करः ।
वैरिणां केवलं कालो योगिनां भगवान् हरिः ॥ (१.६.३४)

विरोधाभासो यथा–

औदार्यसौन्दर्यविलासपूर्वान् सर्वान् गुणान् कः कथयेत देव्याः ।
यान् प्रब्रुवाणश्चतुराननोऽपि कुतूहलेनाचतुराननोऽभूत् ॥ (१.७.३०)

अतिशयोक्तिर्यथा–

इत्थं लालप्यमानस्य कैकेय्या दारितात्मनः ।
सहस्रयामा तस्याऽसीत् सा त्रियामाऽपि शर्वरी ॥ (२.३.६७)

अर्थान्तरन्यासो यथा–

माद्यन् प्रमाद्येत् सुजनोऽपि नूनम् । (४.१.१२)

श्रेष्ठापराधा हि फलन्ति सद्यः । (४.१.१४)

न विक्रिया धीरधियां भवेद्धि । (७.७.७)

एवमन्येऽप्यलङ्कारप्रभेदा यथासम्भवमभ्यूह्याः । अधिकमस्मत्कृतायामलङ्कारमीमांसायाम् ।

* * *

अथ शब्दालङ्कराः । शब्दानामनुवर्तनेन प्रासनं शब्दानुप्रासः ।

तत्र अक्षरविशेषस्य आवृत्त्या वृत्त्यनुप्रासः । सोऽयं कविर्वृत्त्यनुप्रासप्रिय इति समग्रकाव्यव्यापी वृत्त्यनुप्रासो विराजते । यथा–

एको नारायणोऽग्रेऽभूत् पूर्णागण्यगुणार्णवः ।
आत्मारामोऽपि रमया रममाणोऽभिरामया ॥ (१.१.८)

निद्रामुद्राविलसितं भुक्त्वा विश्वमधीश्वरम् ।
तमवन्दन्त वेदान्ता नरेन्द्रमिव बन्दिनः ॥ (१.१.९)

तस्य तीरमधिष्ठाय कञ्जोद्भवभवादयः ।
तुष्टुवुस्तुष्टमनसो विष्टरश्रवसं सुराः ॥ (१.२.४७)

नमो नागेन्द्रशय्याय नमो नानाविलासिने ।
नमोऽनाद्यन्तमध्याय नमो नारायणाय ते ॥ (१.२.४८)

अयं पादादियमकोऽपि स्यात् । चतुर्ष्वपि पादेष्वादौ **'नमोना'** इत्यक्षरत्रयस्यानुवर्तनात् ।

उर्व्यां सर्वे समासाद्य चापं वीरा वृथा गताः ।
रामो राजीवनयनः कोदण्डं समखण्डयत् ॥ (१.८.४)

पुरा सुरासुररणे त्वां निशासु शरक्षतम् ।
अरक्षं ननु रक्षोभ्यो विद्यया विप्रदत्तया ॥ (२.३.३४)

कोदण्डं कालदण्डाभं त्वद्दोर्दण्डैकमण्डनम् । (३.२.४५)

अमित्राणाममित्रोऽयं सौमित्रे मित्रमेष नः ॥ (४.२.१३)

अद्रयः कन्दुकायन्ते सिन्धवस्तस्य चान्धवः । (४.३.६)

जयति जगति दिव्यश्रीतनूमान् हनूमानहितमवहितात्मा बाह्यमाभ्यन्तरं च ।
लसति वसतिभूते यस्य चित्ते विचित्रे भुवनभवनपूर्णे रामदेवः सदेति ॥ (५.१.२९)

हनुमन् भूरिमहिमन् हताः सर्वाहितास्त्वया ।
खेचराः खे चरिष्यन्ति त्वां गायन्तो भयं विना ॥ (५.२.२८)

जाज्वल्यमानोज्वलहेतिलीलो धूमायमानोद्धतधूलिधूम्रः ।
विसृत्वरः सैन्यमहौघसङ्घः सांवर्तको वह्निरिवोददीपि ॥ (६.१२.६)

पूर्ववत् पर्वतश्रेष्ठं सर्वौषधिनिधिं प्रभुः ।
आनिनाय महातेजा वायुजो वायुवेगवान् ॥ (६.१३.३८)

न जातु जातानि न नश्वराणि
न जातु दुःखीनि न दोषवन्ति । (७.८.२१)

आत्राऽदौ **'न जातु न जातु'** इति लाटानुप्रासोऽपि स्यात् । अर्थभेदे यमकम् । अर्थैक्ये लाटानुप्रास इति च भेदः ।

अन्यच्चेदं लाटानुप्रासस्य स्फुटमुदाहरणम्–

तत्रोत्सवे मणिगणो रुचिभिर्विरेजे तेनैव भूषणगणो विविधो विरेजे ।
रामोऽथ तेन सह वल्लभया विरेजे भूम्ना चराचरमिदं सकलं विरेजे ॥ (२.३.६९)

* * *

कर्णाटानां प्रियो द्वितीयाक्षरप्रासः । यथा–

मन्दचेष्टो महीं यातो वन्दमानोऽपि चेतसा ।
इन्द्रसूनुरुवाचेदमिन्दिरेशं पुरोगतम् ॥ (४.४.३५)

यथा वा–

ऋक्षवानरवीराणां वृक्षशैलप्रहारतः ।
लक्ष्मणस्य शरैश्चोग्रै रक्षसामभवत् क्षयः ॥ (६.११.२०)

सोऽयमनुप्रासः कर्णाटककविभिः कुमारव्यासलक्ष्मीशादिभिर्नियत्या समादृतः,कर्णानन्दकरश्चेति कर्णाटानुप्रासः कर्णानुप्रास इति वाऽन्वर्थाभिधानेनाभिधीयते ।

* * *

छेकानुप्रासोऽप्यत्र काव्यशोभाकृत् प्रचुरमुपलभ्यते । अव्यवधानेन समानवर्णद्वयस्य द्वित्राणां वा व्यञ्जनानामावर्तनं छेकानुप्रासः । छेका इति गृहशकुन्ता उच्यन्ते । **'गृह्याश्छेकाश्च गेहेषु संसक्ता मृगपक्षिणः'** इति वैजयन्ती । ते किलैकरूपं द्विस्त्रिः कूजन्ति चीश्चीमिति कुक्कुकू इति । तद्वदयमनुप्रास इति ।

विदग्धाश्छेका उच्यन्ते । तेषां प्रियोऽयमनुप्रास इति छेकानुप्रास उच्यते इति विश्वनाथः । **'अग्राम्ये सरळोदारविदग्धच्छेकदक्षिणाः'** इति वैजयन्ती । **'छेको विदग्धे गृह्ये च'** इति च । वस्तुतस्तूभयार्थविवक्षया छेकपदोपादानम् । अत एव गृह्यानुप्रास इति वा विदग्धानुप्रास इति वा न व्याजह्रुः ।

'कठोरेण कुठारेण वैकुण्ठः कण्ठसङ्गिना । (१.८.५२)
यान्तं यमन्वेति चमूश्चतुरं चतुरङ्गिणी । (२.६.३७)
अङ्के लङ्केश्वरो बिभ्रत् । (३.५.३७)
प्रतिभा प्रतिभाषते । (४.२.२)
अङ्गदो भङ्गदोऽरीणाम् । (४.७.८९)
लङ्कामलङ्कारवतीम् । (५.२.३५)

अत्र **'चतुरं चतुरङ्गिणीम्'** इति **'प्रतिभा प्रतिभाषते'** इति यमकमपि स्यात् । छेकानुप्रास इत्येव स्वरसम् ।

ससार सारं हृदये प्रसादं बभार भारं करुणारसानाम् ।
निनाय नायं हनुमन्तमारादुवाच वाचं च रघुप्रवीरः ॥ (७.७.२)

अत्रान्तिमे पद्ये वृत्त्यनुप्रासोऽपि ।

✻ ✻ ✻

अथ यमकम् । पादान्त्ययमकं यथा–

श्वेतद्वीपे यथाऽयं विहरति रमया राजमाने विमाने
श्रीमद्भोगीन्द्रभोगे गुणनिधिरधिकं भासमानेऽसमाने ।
जम्बूद्वीपेऽत्र पुर्यां जनकतनयया राजयन्त्या जयन्त्या
देव्या रामोऽभिरेमे वृषभइव जगद् रञ्जयन्त्या जयन्त्या ॥ (१.८.८१)

अत्र छेकानुप्रासोऽपि, वृत्त्यनुप्रासोऽपि ।

यथा वा–

इति वसिष्ठगरिष्ठसभाजनैरभिहिताः स्थिररामसभाजनैः ।
दशरथस्तनयाय महीमतः प्रतिददौ तनयाय महीमतः ॥ (२.१.३२) इत्यादि ।

पादैक्येन यमकं यथा प्रथमतृतीययोः–

प्रभाते जगदे कान्तस्सीताया मागधैरिति ।
प्रभा ते जगदेकान्तश्रिये राम रवेरिव ॥ (२.३.६८)

यथा वा–

को वानरेन्द्रस्य समानतायां वर्तेत यस्यानिल एव तुल्यः ।
को वा नरेन्द्रस्य समानतायां रामस्य यो भाति कृपालुतायाम् ॥ (५.१.२८)

यथा वा–

चतुरङ्गं तु कामं नो युद्धं स्यादिति गर्जितम् ।
चतुरं गन्तुकामं नो निद्रां सैन्यमवैक्षत ॥ (५.२.५८)

द्वितीयतुरीययोर्यथा–

स्तवः सकलनाथस्य सुमनोभिरलं कृतः ।
भगवांस्तैर्विकीर्णाभिः सुमनोभिरलङ्कृतः ॥ (७.४.४१)

पादान्त्ययोर्यथा–

प्राप्ता दिवस्तत्र विमानकोटीः
मणिप्रवेकैर्लसमानकोटीः ।
प्राप्ता अपश्यंश्चलचामराणां
वृन्दं वधूनामिह चामराणाम् ॥ (७.७.४६)

सर्वपादान्त्ययमकं यथा–

रामाननाभं हनुमानयं तं
खे वीक्ष्य पूर्णेन्दुममानयन्तम् ।
नाथं ह सस्मार समा नयन्तं
भक्तान् सुखेनैव स मानयन्तम् ॥ (५.२.५९)

यथा वा–

एवंविधायाखिलशिक्षणाय
रामाय चेतोनयनक्षणाय ।
स्वामिन् पदाब्जानतरक्षणाय
तुभ्यं नमः शोभनलक्षणाय ॥ (७.८.२४)

आद्यन्तयोः सङ्कीर्णतया यथा–

युद्धे रिपूणां मुसलायमानौ
मालायमानौ जनकात्मजांसे ।
सन्मण्डले कल्पलतायमानौ
सत्यं करौ तस्य हि निस्समानौ ॥ (७.७.२४)

यथा वा–

भासा नखा लज्जितबन्धुजीवाः
एवं च नो लज्जितबन्धुजीवाः ।
पुनर्नवत्वं दधुरीक्षकाणा-
मनादिपुंसो न पुनर्नवत्वम् ॥ (७.७.३०)

पादाद्यावृत्तियकमं यथा–

बद्धाञ्जलिर्मूर्धनि रञ्जितश्रीरामाय रामाय मनोरमाय ।
ब्रह्माऽथ वृन्दारकवृन्दजुष्टं तुष्टाव तुष्टावधिकं निमग्नः ॥ (७.७.४८) इत्यादि ।

✻ ✻ ✻

सं.रामायणे अपाणिनीयाः प्रयोगाः

साधवः शब्दा द्विविधा भवन्ति– पाणिनीया अपाणिनीयाश्च । अपाणिनीया इति पाणिनिना न निरूपिताः, व्याकरणान्तरसिद्धा इत्यर्थः । तेन पाणिनिनयोऽयमयोगव्यवच्छेदक एव । नान्ययोगव्यवच्छेदकः । तेन पाणिनीयाः प्रयोगाः साधव एवेति युक्तं वचः । नतु पाणिनीया एव साधव इति । श्रुतिपुराणादिषु प्रयोगदर्शनात्, व्याकरणान्तरसिद्धत्वाच्च । तानि च व्याकरणान्तराणि न सर्वाणि सम्प्रत्युपलभ्यन्ते । अतो वेदेषु वैदिकेषु च प्रयोगदर्शनादेव तेषां साधुत्वमवसीयते । अत एव विद्वद्भिस्तादृशाः प्रयोगाश्छान्दसा इत्येव परिगण्यन्ते ।

प्रबन्धा कविः पण्डिताचार्यः प्रचुरमत्रापाणिनीयानि पदानि प्रयुङ्क्ते । वाल्मीकिरपि रामायणे प्रयुङ्क्ते । भगवत्पादोऽपि मध्वरामायणे । एवं छान्दसप्रयोगे प्राचां मुनिपुङ्गवानां सरणिमनुसरन्नयं कविः स्वस्य छान्दसप्रयोगप्रियतामाघोषयतीव ।

अङ्कुरितश्मश्रुकूर्चः कविरयं प्रथमे वयसि प्रबन्धमिमं प्रणिनायेति प्रथाऽप्यत्र संवदते । यौवनोत्साहसहजं छान्दसप्रयोगलौल्यं कौतुकमादधाति तत्ववादरसिकानाम् । तेन वाल्मीकिरप्यनुसृतो भवति । भगवत्पादोऽप्यनुसृतो भवति । नार्थतः केवलम् । शब्दतोऽपि । वस्तुतः पुराणकाव्यानामियं छान्दसी परिभाषैव रुचिरा पुराणप्रियेभ्यो रोचते ।

पाणिनिमुग्धानां वैयाकरणपाशानामेतत् तथ्यमवगमयितुमेव च छान्दसं पन्थानमनुपपात पण्डिताचार्य इति च युक्तमुत्पश्यामः ।

तथाऽप्येकोऽश्रुतपूर्वः प्रयोगोऽस्माननिर्णये निमज्जयन् कौतुकमादधाति–

अपि त्रैलोक्यजयिनं वत्सा वत्स्यामि वो रिपुम् । (१.३.२)

मणिमञ्जर्यामपि–

वनं प्रति ययौ वत्स्यन्नशेषानपि राक्षसान् । (१.२७)

वत्स्यामीति किन्धातुरयं लकारः? वत्स्यन्निति कस्यायं धातोः शतुरागमः?

'वत्स्यामि हनिष्यामि' इति विद्याभूषणार्योऽर्थं वर्णयन्नपि धातुपाठं न पपाठ। **'वध सम्प्रहारे'** इति विश्वपतितीर्थीये काशीश्रीनिवासाचार्यकृतटीकायां च। अथापि न शङ्कापरिहारः। पाणिनिर्वधधातुमेव न पठति। तत्पक्षे हन्तेर्वधादेश एव। तदपि न लृटि। प्राचीना यद्यपि वधधातुं पेठुः। अथापि वधिष्यतीत्येव तद्रूपम्। न वत्स्यतीति। अथापि सर्वत्र हस्तलिखितकोशेषु टीकासु च 'वत्स्यामि' इत्येव पठ्यते। उपपत्तिर्मृग्या।

सम्प्रत्युपलब्धधातुपाठानुसारेण द्वयोर्धात्वोः 'वत्स्र्यति' इति लृटि रूपं भवति। 'वृतु वर्तने' इत्यस्य, 'वृधु वृद्धौ' इत्यस्य च। अथापि संहारार्थकत्वं दुरुपपादमेव। यद्यपि चुरादिषु पठितस्य वृधुधातोः संहारार्थकत्वं सम्भवति। **'वृधु वर्धने'** इति हि धातुपाठः। **'वर्धनं छेदने वृद्धौ'** इति यादवप्रकाशः। तस्य 'वर्धयिष्यामि' इत्येव लृटि रूपम्, न तु वत्स्र्यामीति। तस्मात् साम्प्रतं संशीतिरेव नः शरणं किन्धातुरयं लकार इति। अचुरादेरपि संहारार्थकत्वाङ्गीकारे 'वत्स्र्यामि' इति, 'वत्स्र्यन्' इति च मूलपाठः स्यादिति भाति।

* * *

अथाऽत्मनेभाषा धातवोऽत्र परस्मैभाषा भवन्ति। आवरणान्तर्निक्षिप्तानि पाणिन्याभिमतानि रूपाणि–

यूयं तत्रानुमोदत (१.२.२९) (अनुमोदध्वम्)

मुमुदुस्तौ प्रजा वीक्ष्य (१.४.२९) (मुमुदिरे)

योत्स्यामि वो रूिपन् (१.४.१९) (योत्स्ये)

कपीन्द्रौ प्रत्ययुध्यताम् (४.४.२७) (प्रत्ययुध्येताम्)

युयोध पक्षिराजस्तम् (४.८.१३) (युयुधे)

आस्तां हि मन्त्रो योत्स्यामः (६.५.१७) (योत्स्यामहे)

तदेतत् सर्वं सामान्यतः कविभिरभ्युपगतम्। बहुलमुपलभ्यन्ते पुराणेषु रामायणे भगवत्पादग्रन्थेषु चेदृशाः प्रयोगाः। अत एव च वदन्ति–'चन्द्रादयस्तु मन्यन्ते सर्वस्मादुभयं पदम्' इति।

तथाहि भगवत्पादप्रयोगाः–

मुमोद सम्प्राप्य च तां स रामः (म.भा.ता.नि.८.२२३)

तप्ता हि भोजपतिना मुमुदुर्नितान्तम् (१४.६)

मुमोद सत्यभामया (१७.२१७)

योत्स्याव तेन नृपतिप्रियकाम्ययाऽऽवाम् (१३.११८)

'योत्स्याव' इत्यपूर्वतमः प्रयोगः । **'अनेन प्रसविष्यध्वम्'** इति गीताप्रयोगवदयं लोलृट् ।

तदन्येन तु युध्यतोऽपतत् (१०.४४)

युध्यन्तमीक्ष्य च रिपुम् (१४.३७)

युयोध शक्तितो बली (१७.१९५)

युयोध मन्दमेव सः (१७.२०८)

युयोध सेनया युतम् (१७.२८८)

रामायणे च–

'गच्छ युध्येत्यनुज्ञातः' (अर.२०.६) इत्यादिः ।

✲ ✲ ✲

क्वचिच्च सेटमनिटमाह–

'रामाज्ञया व्यधात् तर्तुम्' (२.९.३४) । 'तरितुम्' इति, 'तरीतुम्' इति च पाणिनीयाः । तर्तुमित्येव प्रतनाः प्रयुञ्जते । वाल्मीकिरपि ।

शीघ्रं ननु शेष्यसे त्वम् (६.४.११) । 'शयिष्यसे' इति पाणिनीयाः ।

सेटं च पूर्वं स्वयमेव प्रयुयोज–**'शयिष्येऽहं निराहारः'** (२.१२.१५) इति ।

एवमहन्निति वक्तव्ये अहनदित्येव प्रायः प्रयुङ्क्ते वैदिकः कविः–'वृत्रं हनति' इति वैदिकीं वाचमिव स्मरन्–

सुग्रीवो न्यहनद् बली (६.५.१०)

सालेन न्यहनद् बली (६.५.१२)

सोऽङ्गदं गदयाऽहनत् (६.५.३५)

विभीषणोऽश्वान् न्यहनत् सुरारेः (६.११.६३)

न्यहनद् रावणानुगान् (६.१३.२९)

तत्तत् प्रत्यहनत् प्रभुः (६.१३.६४)

तदिदमपि भगवत्पादप्रयोगानुसरणलौल्यमेव । तथाहि प्रयोगास्तात्पर्यनिर्णये–

नैनमहनद् वचनाद्धरेश्च (५.३९)

तान्यहनच्च कंसः (१२.१४) इत्याद्याः ।

* * *

एवं रिरक्षिषां रिरक्षामाह–

पराद्रवन् प्राणरिरक्षयाऽथ (६.१४.१७)

भगवत्पादोऽप्याह ता.निर्णये–

तेनार्थितो यज्ञरिरक्षयैव (४.५)

स लोकधर्माभिरिरक्षया (१०.५६)

एष साक्षाद्धरेरंशो जातो यज्ञरिरक्षया (भाग.४.१५.३) इति च बादरायणप्रयोगः ।

* * *

इदमन्यदिह च्छान्दसम् । विंशतिरिति वक्तव्ये विंशादित्याह । 'विंशत्या' इति वक्तव्ये विंशद्भिरित्याह । तेन ज्ञायते विंशच्छब्दो दशन्शब्दवन्नित्यबहुवचनान्तस्त्रिलिङ्गः प्रतनानामभिमत आसीदिति– विंशत्, विंशत्, विंशद्भिः, विंशद्भ्यः, विंशद्भ्यः, विंशताम्, विंशत्स्विति । तथाहि–

विंशद् दशास्यस्य च लोचनानि रक्तानि दृष्ट्वा मदमन्युमन्ति ।
भुजांश्च विंशद् भुजगप्रकारान् कुतूहलं प्राप कुलं कपीनाम् ॥ (६.८.४)

अत्र हि विंशदिति द्वितीयाबहुवचनान्तं पदम् ।

विंशद्भिरप्यात्मभुजैः (६.८.२६)

षोडशाष्टौ च दश च विंशत् त्रिंशत् तथाऽपरान् । (६.९.३९)

अविध्यत् पञ्चविंशद्भिर्विशिखैरथ लक्ष्मणम् । (६.११.३७)

अत्र त्रिंशदित्यपि बहुवचनान्तं त्रिलिङ्गं पदं स्यादिति भाति । अपूर्वमिदमपाणिनीयमाविष्करणं प्रायो भगवत्पादमुखादधिगतनवव्याकरणनिष्पन्नरूपावतारम् ।

वाल्मीकिरप्येवमेवाऽह रामायणे–

षोडशाष्टौ च दश च विंशत् त्रिंशत् तथैव च । (६.६७.७) इति ।

क्वचिद् विंशतिं त्रिंशतिमिति च प्रयुङ्क्ते वाल्मीकिः–

विंशतिं त्रिंशतिं षष्टिं शतशोऽथ सहस्रशः । (६.१०७.४२)

एवं विंशत् विशतिर्विंश इत्यनियताः प्रतनानां प्रयोगा भवन्ति । तथाहि तात्पर्यनिर्णये–

स पञ्चविंशत् पुनरब्दकानामस्त्राणि चाभ्यस्य पतेर्भृगूणाम् । (११.४८)

अत्र पञ्चविंशदिति द्वितीयाबहुवचनान्तम् ।

अक्षोहिणीगणितमस्य बलं च विंशदासीत् (१३.१०९)

अत्र विंशदिति प्रथमैकवचनम् ।

अक्षोहिणीत्र्यधिकविंशयुतोऽतिवेलदर्पोद्धतः सपदि कृष्णपुरीं जगाम । (१४.१५)

अत्र विंशमिति विंशतिः ।

हत्वा सेनां विंशदक्षोहिणीं ताम् (१६.१९) इत्यादि ।

✻ ✻ ✻

क्वचित् भगवत्पादप्रयुक्तानि प्रतनान्येव रूपाणि प्रयुङ्क्ते। तद् यथा–

सङ्गपण्डितः (६.१०.११)

'एवमुक्त्वाऽर्जुनः सङ्ख्ये रथोपस्थ उपाविशत्' इति गीतायाम् ।

अक्षोहिणीनाम् (६.१२.४) ।

अक्षौहिणीनामिति पाश्चात्यम्, 'अक्षादूहिन्यां वृद्धिर्वक्तव्या' इति वार्तिको-पज्ञम् ।

एवमुल्बणं प्रतना उद्बणमिति प्रायः प्रयुञ्जते । पण्डिताचार्योऽपि–

उद्बणैः सर्ववानरैः (६.११.१)

त्रीन् बाणानुद्बणांस्तस्मै (६.११.३९)

उद्बणं बाणमादाय (६.१३.२६)

नागांश्चक्रे विषोद्बणान् (६.१३.६३)

* * *

इदमुपज्ञं शुद्धप्रायः पाठः

इतः पूर्वं सं.रामायणस्य पञ्चषाणि मुद्रणानि बभूवुरिति ज्ञायते । प्रथमं मुद्रणं १८१२तमे शा.शके (1890 A.D.) रामतत्वप्रकाशाह्वये मुद्रणालयेऽङ्कयित्वा रामचन्द्रसावन्तात्मजेन आबाजिसावन्तेन प्रकाशित-मभूत् । तस्मिन्नेव वत्सरे मम तातपादस्य जननमास । अतस्तस्मिन् प्रतनतमे प्रथमे मुद्रणे मम प्रीत्यति-शयः । मूलेन सह विद्याभूषणार्यरचिता सं.रा.टीकाऽपि तदुपक्रमं प्राकाशि ।

ततः दावणगेरेनगरे श्रीसर्वज्ञाचार्यसङ्घद्वारा सानुवादं बालकाण्डमात्रं प्रकाशितम् (1954 A.D) । तत्रानुवादकस्य नाम न निर्दिष्टम् । ततः बळ्ळारिनगरे श्रीमाध्वग्रन्थप्रकाशनद्वारा भीमसेनाचार्यकृतानुवादसहितं समग्रं सं.रामायणं प्रकाशितम् (1982 A.D.) ।

ततः परमतीवार्वाचीनं प्रकाशनद्वयं बेङ्गळूरुनगर एव प्रकाशितं व्यासमध्वसंशोधनप्रतिष्ठानद्वारा । एकं प्रभञ्जनाचार्यकृतकर्णाटकभाषानुवादेन सहितं कन्नडलिप्यां प्रकटितम् (2008 A.D.) । परस्मिन् वर्षे तदेव पुनर्मुद्रितम् (2009 A.D.) । अपरं च मूलमात्रं देवनागरीलिपिमयम् (2011 A.D.)।

सर्वमपपाठप्रचुरम् । नैकत्रापि शुद्धपाठे भरः । क्वचित् प्रक्षिप्ताः श्लोका अपि मूले निवेश्य मुद्रिताः । उदाहरणार्थमिमानि पर्याप्तानि (सुन्दरकाण्डे द्वितीयसर्गे ५५तमश्लोकादनन्तरं पठितानि) –

वैष्णवं विष्णुगायन्तं सदा सत्यरतं ततः । (?)
विभीषणं लोकहिते रतं मङ्गलमैक्षत ॥

दुरुश्वासं गाढनिद्रमुन्मत्तं पर्वतोपमम् । (?)
कुम्भकर्णं समालोक्य शिरो धुन्वन् स मारुतिः ॥

ततो विग्रां स भगिनीं राक्षसेन्द्रस्य दुष्कृतिम् ।
विवासिनीं राक्षसानां पलपानाशनैर्युताम् ॥ (?)

नग्नां स्रस्तशिरःकेशां पानादुन्मत्तचेतसा(ना)म् । (?)
गायन्तीं विस्वरं हास्यां(स्याद्) दुर्भगां श्लक्षणेतराम् ॥ (?)

करोभयेन शिरसा धुन्वता प्रभयङ्करीम् ।(?)
अत्यन्तमिव नृत्यन्तीं सहितां पिशिताशिभिः ॥

सर्वत्रापि एते श्लोकाः ईषत्पाठभेदेन मूलेन सह मुद्रिता इति विस्मयावहमिदम्। शब्दमञ्जरीपर्यन्तसंस्कृतभाषाभिज्ञोऽपि नेदृशानप्रबुद्धान् श्लोकान् रचयति । किमुत पण्डिताचार्यः । नैतानि पद्यानि विद्याभूषणार्यो व्याचख्यौ । न विश्वपतितीर्थः । नापि काशीश्रीनिवासाचार्यः । (तस्य शुद्धः पाठः मन्निकटे वर्तते ।) अथापि मूले निवेशयन्ति । हास्यास्पदमिदम् ।

व्यासमध्वसंशोधनप्रतिष्ठानप्रकाशनं तु रामतत्वप्रकाशे मुद्रितमशोधितमशुद्धिप्रचुरं पाठमेव प्रायोऽक्षरशोऽनुकरोति, तत्रत्यान् मुद्रणदोषानपि प्रायश्चक्षुषी निमील्य । तेन 'बेळगावि'प्रकाशनस्य पिपीलिकालिपिरियम् । तत्र येऽपपाठाः, प्रायस्तेऽत्रापि । तत्र ये मुद्रणदोषाः, प्रायस्तेऽत्रापि । तस्मात् पारायणार्थं शुद्धपाठमन्वेषमाणानामनुपयुक्तान्येव सर्वाण्येतानि प्रकाशनानि ।

इदं निदर्शनमात्रम् । एवं सर्वत्रापपाठस्यैव साम्राज्यम् । तदर्थमत्र शुद्धपाठनिर्णयाय बहुधा प्रयतितम् । मठेषूपलभ्यमानाः प्राचीनहस्तलिखितकोशा आलोडिताः । अतोऽत्र प्रायेण शुद्धः पाठः इदमुपज्ञमुपहारीक्रियते । अथापि सर्वात्मना शुद्धस्य मूलपाठस्यानुपलम्भात् क्वचित्क्वचिन्मूलपाठनिर्णयो दुःशक एव बभूव । तत्र साधुत्वेन सम्भावित एव पाठः समाद्रियत ।

स्पष्टत्वाय एकमुदाहरणं पर्याप्तम् । उत्तरकाण्डे अष्टमाध्याये सप्तदशं पद्यं बहुधा पेठुः–

'अपान्तरप्राज्ञतमपुरोगान्' इत्येके । अर्थदुष्टश्छन्दोदुष्टश्चायं पाठः । **'अपान्तरप्राज्ञतमःपुरोगान्'** इत्यन्ये । इदमप्यर्थतोऽसङ्गतम् । **'अपान्तरप्राग्र्यतमःपुरोगान्'** इत्यपरे । इदमपि नातिस्वरसम् । विश्वपतितीर्थीयेऽपि महान् पाठभेदः । लिपिकृतो बहुधा बभ्रमुः । विद्याभूषणभिक्षुव्याख्यायामपि तथा । काशीश्रनिवासाचार्यटीकायामपि तथा । सर्वत्राव्युत्पन्नानां लिपिकृतामेव साम्राज्यम् । अत्र तु **'अपान्तरप्राज्यतमःपुरोगान्'** इति सम्भावितः पाठोऽभ्यूह्य मुद्रितः । एवमन्यत्रापि ।

मूलपाठेन साकम्, व्याख्यानान्तरेषु, विशिष्य का.श्री. टीकासु येऽर्थविशेषा उक्ताः तेऽप्यत्राधष्टिप्पण्यां मुद्रिताः । सङ्ग्रहरामायणसम्बन्धि सर्वमत्र सङ्गृह्यैकत्र समावेशितम् । तथा यानियानि पाठान्तराण्युपलब्धानि, मुद्रितान्यमुद्रितानि च, तानि सर्वाण्यप्यत्र अधष्टिप्पण्यां सन्दर्शितानि । तेनाधिसङ्ग्रहरामायणं सर्वसङ्ग्रहोऽयम् ।

विश्वपतितीर्थीयानुसारी पाठः प्रायो मूलपाठतया स्वीकृत्य प्रकटितः । तदपि न सर्वथा । यत्र विश्वपतितीर्थादृतोऽपि पाठो नातिस्वरसोऽर्थतः, तत्र बहुव्याख्यानसम्मतः पाठः समादृत इति सुधीभिर्विभावनीयम् ।

सं. रामायणस्य टीकाः

सङ्ग्रहरामायणस्योपाष्टादशाष्टीका आसन्निति किंवदन्ती । सम्प्रति तिस्रष्टीका मम दृष्टिपथं गताः । तत्रैका भावरत्नप्रदीपाख्या विद्याभूषणभिक्षुरचिता । प्रायः सङ्ग्रहरामायणटीकासु प्रथमा प्रतना । १८१२मिते शा.शके, (1890 A.D.) बेळगाविनगरे, मुद्रयित्वा प्रकाशिता चेयम् । द्वितीया श्रीविश्वपतितीर्थविरचिता भावार्थदीपिका सम्प्रतीदमुपक्रमं प्रकाश्यमाना । तृतीया काशीश्रीनिवासाचार्यकृता, अमुद्रिता च । मातृका चेयं लिपिकृत्प्रमादबहुला ।

तत्र विद्याभूषणभिक्षुः स्वगुरुपरम्परां किञ्चिदिवाऽविश्चकार । तथाहि तस्य प्रास्ताविकं पद्यम्–

शोभ(?)न्त्यम्भोजनाभप्रवणवरधियो वादिराजाभिधानाः
श्रीमन्तं वेदगर्भं मनसि विदधतो वेदगर्भाभिधानाः ।
श्रेष्ठा गोपीशपूज्या इति मम गुरवः सज्जनव्रातवन्द्याः
सत्कारुण्यावलोकाः सततमपि शुभन्त्वञ्जसा(?) चाप्युदाराः ॥

अत्र प्रथमचरणे–**'शोभन्त्यम्भोज–'** इति सर्वथा लिपिकृत्प्रमादः । **'शुम्भन्त्यम्भोज–'** इति वा, **'शोभन्तेऽम्भोज–'** इति वा मूलपाठः स्यात् ।

सर्वथाऽसङ्गतश्चतुर्थचरणः । एवं तु स्यात् सम्भावितः शुद्धः पाठः–

सत्कारुण्यावलोकाः सुदृशमपि दिशन्त्वञ्जसा–' इति ।

अयं व्याख्याताऽऽत्मानं विद्याभूषणार्यः इत्येवोल्लिखति–

लिकुचककविवरार्यो मूलरामायणार्थानुदहरदथ विद्याभूषणार्योऽस्य टीकाम् ।
व्यधित बुधमनोज्ञां भावरत्नप्रदीप्तिम्– इति ।

तेनायं यतिर्वा गृहस्थो वेति मूले न स्फुटम् । यतिरासेति तु प्रथा । मुद्रितमुपसंहारवाक्यं च तदेवाऽह– **'श्रीमद्विद्याभूषणयतिशिरोमणिभिर्विरचितभावरत्नटीकायाम्...'** इति । अथाप्यस्य क्वापि मठे वेदान्तसाम्राज्येऽनभिषिक्ततया नाम्नि तीर्थपदं नास्ति । तस्माद् विद्याभूषणतीर्थ इति वचनं भ्रान्तिमूलम् ।

उपरितनपद्ये चायमात्मनस्त्रीन् गुरूनुल्लिलेखेति भाति– **वादिराजाभिधाना** इति, **वेदगर्भाभिधाना** इति **गोपीशपूज्या** इति च ।

प्रायोऽत्र वादिराजाभिधाना वेदगर्भाभिधानानां गुरवः, वेदगर्भास्तच्छिष्या इति श्लिष्टम् । माध्वगुरुपरम्पारासु चत्वारो वेदगर्भाभिधानाः श्रूयन्ते । श्रीविष्णुतीर्थसंस्थाने (कुम्भासिमठे, सम्प्रति सोदेमठ इति प्रथिते) चतुर्थः, श्रीरामतीर्थसंस्थाने (सम्प्रति काणियूरमठ इति प्रथिते) अष्टमः, श्रीनरहरि(सिंह)तीर्थसंस्थाने (सम्प्रति अदमारुमठ इति प्रथिते) द्वादशः, श्रीमदधोक्षजतीर्थसंस्थाने (सम्प्रति पेजावरमठ इति प्रथिते) च त्रयोदशः ।

एतेष्वयं वेदगर्भाभिधानः कतमः स्यात्, यो वादिराजाभिधानादनन्तरः? नैतेष्वेकोऽपि प्रसिद्धस्य श्रीवादिराजयतेरनन्तराः । सर्वेऽपि श्रीवादिराजयतेः प्रतनाः ।

तत एतत् सम्भाव्यते– श्रीमदधोक्षजतीर्थसंस्थाने श्रुतो वेदगर्भः वादीन्द्रयतेः शिष्य इति गुरुपरम्पराश्लोकादवगम्यते । प्रायः स वादीन्द्रयतिरेवात्र वादिराजपदेनोल्लिखितः स्यादिति । तदानीमेव श्रीमदुपेन्द्रतीर्थसंस्थाने (सम्प्रति पुत्तिगेमठ इति प्रथिते) गोपीनाथतीर्थ इति यतिवर आसीत् । प्रायः स एवात्र गोपीशपदेनोल्लिखितः ।

त एते त्रयो विद्याभूषणस्य गुरव इति सोऽयं क्रिस्तीये पञ्चदशशतक आसीदिति शक्यमभ्यूहितुम् ।

मितमिदं धावद् व्याख्यानम् । व्याकरणादिविशेषजिज्ञासाविषये दीर्घं मौनं वहति । केवलं प्रायस्तत्रतत्र क्लिष्टशब्दार्थनिर्वर्णनमात्रेण निर्वृतः । अर्थनिर्वर्णनेऽपि क्वचित् स्खलनं दृश्यते । तदेतदुपरिष्टात् स्फुटमधष्टिप्पण्याम् ।

अथापि क्वचिदवश्यं वक्तव्यानि सङ्क्षिप्यापि स्फुटमभिधत्ते । यथा लक्ष्मणजनने **'कुळीरेऽभ्युदितौ रवौ'** इत्यस्य व्याख्यानम्–**'रवौ कुळीरे कर्काटके राशावभ्युदिते सति, आषाढमास इत्यर्थः'** इति । समीचीनमाह विद्याभूषणार्यः । रामायणव्याख्यातारो गोविन्दराजादयस्तु दशम्यां भरतजननम्, एकादश्यां लक्ष्मणशत्रुघ्नयोर्जननमिति विभ्रान्ताः **'कर्काटके लग्ने, मध्याह्नकाले'** इत्येव व्याचख्युः ।

अथापि **'उच्चस्थे ग्रहपञ्चके'** इत्येतदसङ्गतं व्याचख्यौ–**'ग्रहपञ्चके अङ्गारकबुधगुरुशुक्रशनिनामके स्वोच्चस्थानस्थिते सति, मकरकन्याकर्काटकमीनतुलानामकराशिषु यथाक्रमं स्थिते सतीत्यर्थः'** इति । वि.प.तीर्थीयेऽप्येवम् । का.श्री.टीकायामप्येवम् । विचित्रमिदं यत् सर्वेऽपि बभ्रमुरिति । सूर्याङ्गारकगुरुशुक्रशनिषूच्चस्थेष्विति वक्तव्यम् । **'मेषं पूषणि सम्प्राप्ते'** इति सूर्यस्य स्वोच्चस्थत्वं मूल एवोक्तम् । तं विहाय पुनः पञ्चग्रहाणां परिगणने ग्रहषट्कस्योच्चस्थत्वं स्यात् । न युक्ता च बुधस्य स्वोच्चे कन्याराशौ स्थितिः । रवेर्मेषस्थत्वात्, बुधस्य सदा रविसन्निहितत्वात् । एतदनुपपत्तिपरिहाराय विश्वपतितीर्थीये प्रयतितमिव । तथाहि तद्वचनम्– **'नच ज्योतिःशास्त्ररीत्या तादृशः कालः कदाऽप्यसम्भवीति वाच्यम् । ईश्वराचिन्त्यशक्त्यैतादृशकालसम्भवात्'** इति । नैतन्मनसि लगति । न परिहृतश्च षण्णामुच्चत्वप्रसङ्ग इत्यलम् ।

* * *

ततः प्रायः वर्षाणां द्वे शते अतिगते । अथ विश्वपतितीर्थः व्याख्यां विरचयामास । अधोक्षजतीर्थसंस्थाने (श्रीपेजावरमठे) गुरुपरम्परायामेकविंशोऽयं यतिः ।

अयं ग्रन्थादौ नारायणं मध्वं स्वसम्प्रदायमूलगुरुमधोक्षजतीर्थं च प्रणम्य ततो जयतीर्थं प्रणमति । ततो विजयध्वजम् । ततः श्रीवल्लभयतिं सगौरवं स्मरति । न श्रीवल्लभ इति कोऽपि यतिः पेजावरमठीयगुरुपरम्परायां पठ्यते ।

तथाहि विश्वपतितीर्थान्ता तन्मठीयगुरुपरम्परा–

१. अधोक्षजतीर्थः	२. कमलाक्षतीर्थः	३. पुष्कराक्षतीर्थः
४. अमरेन्द्रतीर्थः	५. विजयतीर्थः[1]	६. महेन्द्रतीर्थः

१. क्वचिदयं यतिमालिकायां त्रयोदशत्वेन, विश्वेश्वरतीर्थस्य गुरुत्वेन पठ्यते । नैतत् समीचीनम् । यतोऽयं भागवततात्पर्यनिर्णयव्याख्याता विजयध्वजतीर्थस्य परमगुरुरित्येव विद्वत्सम्प्रदायः । स्मरति च विजयध्वजतीर्थभट्टारकस्तं स्वकृते भागवतव्याख्याने–**'अनन्ततीर्थविजयतीर्थौ प्रणम्य मस्करिवरवन्द्यौ । तत्कृतिमुपजीव्याहं प्रवच्मि भागवतपुराणम्'** इति ।

७. विजयध्वजतीर्थः	८. उत्तमतीर्थः[१]	९. चिन्तामणितीर्थः[१]
१०. दामोदरतीर्थः	११. वासुदेवतीर्थः	१२. वादीन्द्रतीर्थः
१३. वेदगर्भतीर्थः	१४. अणुप्रज्ञतीर्थः[२]	१५. विश्वप्रज्ञतीर्थः
१६. विश्वेश्वरतीर्थः	१७. विश्वभूषणतीर्थः	१८. विश्ववन्द्यतीर्थः
१९. विद्याराजतीर्थः	२०. विश्वमूर्तितीर्थः	२१. विश्वपतितीर्थः

तेन श्रीवल्लभोऽयं कश्चिदन्य एव यतिर्यो विश्वपतितीर्थस्य विद्यागुरुरासेति ज्ञायते ।

विद्याभूषणीये न प्रतिपदमर्थवर्णनम् । न प्रतिश्लोकं व्याख्यानम् । तत इयं मन्दोपकारिणी व्याख्या, यत्र प्रतिपदमर्थाः कथ्यन्ते, प्रतिश्लोकं विवरणं क्रियते । धातुपाठाः कोशाश्चोद्ध्रियन्ते । तदुक्तं तत्रभवता व्याख्यात्रैव–

लकारधातुलिङ्गानां विग्रहान्वययोस्तथा ।
प्रकाशनं हि क्रियते बालानां बोधसिद्धये – इति ।

यत्र क्रियासमभिहारेण एकस्यैव लकारस्य निर्देशः, यथा त्रिषु पद्येषु निरन्तरम्– अभूदिति प्रयोगे, भू सत्तायाम्, लुङ् इति त्रिरप्याम्रेडनं व्यर्थप्रायमिति तदिह परित्यक्तम् । तदर्थं टीकाकृतं क्षमां याचे ।

सत्यं बालानां बोधसिद्धय इयं टीका । अथापि क्वचित्क्वचित् प्रौढानामपि मनो रमयति । तथाहि– लक्ष्मणभरतयोः को ज्यायानिति विवदमानानाम्, भरत एव ज्यायानिति भ्रान्तानाम्, म.भा.ता.नि.टीकायां भावप्रकाशिकायां प्रक्षिप्तं भरतज्यैष्ठ्यवचनं वादिराजीयमिति परिमूढानामप्रबुद्धतमानां समग्ररामायणपर्यालोचनेन सम्यगुत्तरं व्यतारि, निरासि च भरतज्यैष्ठ्यभ्रमः सयुक्तिकम् । अपूर्वोऽयं ग्रन्थभागः श्रीविश्वपतितीर्थस्य बहुदर्शितां दर्शयति । तत्रतत्र पाणिनिनये च पाटवं प्रादर्शि ।

अथापि काव्यस्वारस्याविष्करणे नातीव सफलेयं टीका । क्वचित्क्वचित् श्लोकार्थकथने धातुपाठोद्धरणेऽपि स्खलनं दुःखाकरोतीव जिज्ञासूनां चेतः ।

---

१. उत्तमतीर्थचिन्तामणितीर्थयोर्नामनी क्वचित् परम्पराश्लोके प्रमादाल्लुप्ते ।

२. क्वचित् **'चारुप्रज्ञतीर्थः'** इति पठ्यते । स भ्रान्तिमूलः पाठः । **'चाणुप्रज्ञः'** (च+अणुप्रज्ञः) इति श्लोकपाठस्त्वनभिज्ञानां मुखे **'चारुप्रज्ञः'** बभूव ।

अथच बहुषु स्थलेषु विद्याभूषणभिक्षुव्याख्याया अधमर्णोऽयम् । क्वचिदपि तदीयामेव व्याख्यानसरणिमविकल-मुद्धरति । तत्रेदमेकमुदाहरणं पर्याप्तम् । उत्तरकाण्डे **'स्निग्धस्वराः–'** (१.१३) इति पद्यस्य विद्याभूषणीयं व्याख्यानम्–

'स्निग्धस्वराः रम्यस्वरवन्तः । स्निग्धत्वं नाम कण्ठगुणः । स्निग्धोऽरूक्षः, आर्द्रीभाववानित्यर्थः । तत्र स्वराः सप्त पूर्वोक्ताः । तत्र– 'षड्जं मयूरो वदति गावस्त्वृषभभाषिणः । अजाविकं तु गान्धारं क्रौञ्चः क्वणति मध्यमम् । पुष्पसाधारणे काले पिकः कूजति पञ्चमम् । धैवतं हेषते वाजी निषादं ब्रुवते गजाः' । पीडितपञ्चमाख्याः वशीकृतपञ्चमाख्यस्वरवन्तः । पञ्चमस्वरस्योषःकालानर्हत्वात् पञ्चमस्वरमल्पप्रयोगवन्तं कुर्वन्त इत्यर्थः । अत्र श्रुतिसमधिकत्वेनेत्यपि ग्राह्यम् । तत्र पञ्चमस्वरस्य श्रुतिसमधिकत्वं कथम्? इत्थम्–'षड्जश्चतुःश्रुतिर्ज्ञेय ऋषभस्त्रिश्रुतिः स्मृतः । द्विश्रुतिश्चापि गान्धारो मध्यमश्च चतुःश्रुतिः । चतुःश्रुतिः पञ्चमः स्याद् धैवतस्त्रिश्रुतिः स्मृतः । निषादो द्विश्रुतिश्चैव षड्जग्रामः स्वरान्तरम्' इति । तत्र यद्यपि षड्जमध्यमाभ्यां समानश्रुतित्वं पञ्चमस्य । तथाऽपि ऋषभगान्धारधैवतनिषादापेक्षया श्रुतिसमधिकत्वम् । ततादिवाद्यसहिततयेत्यपि ग्राह्यम् । चतुर्विधं तावद् वाद्यम्– ततमानद्धं घनं सुषिरमिति । ततं वीणादिकं वाद्यम् । आनद्धं मुरजादिकम् । घनं कांस्यतालादिकम् । सुषिरं वंशादिकम् । तद्युक्तं गायन्त इत्यर्थः । षड्जस्वरं षड्जनामकस्वरविशेषं भिन्नकतां स्वस्वरूपमात्रेणावस्थिततां नयन्तः प्रापयन्तः । तत्रायं विभेदः । त्रिप्रकारस्तावत् षड्जस्वरः– ऋषभरूपः, पञ्चमरूपः, स्वात्मरूपश्चेति । तत्र ऋषभरूपपञ्चमरूपे पृथक्कृत्य आत्मरूपेणैवावस्थितः षड्जो भिन्नक इत्युच्यते । षड्जं भिन्नकं कृत्वा, षड्जानुषक्तावप्यृषभपञ्चमौ त्यक्त्वा, स्वात्मरूपेण षड्जं प्रयुञ्जाना इत्यर्थः । अकाकितया श्रावकगुणयुक्तत्वेन चेत्यपि ग्राह्यम् । तत्र– 'श्रावकः कण्ठजो गुणः । यो दूराच्छ्रावयत्यन्ये त्वन्वर्थं मधुरादयः । काकीत्याद्याः कण्ठदोषास्तत्र काकी त्रिलिङ्गकः' इति वैजयन्ती । ऋषभाख्यं स्वरं विना तं त्यक्त्वा । अरुणोदयकाल ऋषभाख्यस्वरविशेषेण गानं कर्तुमनुचितत्वात् तं स्वरं च त्यजन्त इत्यर्थः । वन्दिगणाः स्तुतिपाठकसमूहाः । पुरान्ते अन्तःपुरे' इति ।

अथात्र विश्वपतितीर्थीयं व्याख्यानं दृश्यताम्–

'स्निग्धो मनोहरः स्वरो येषां ते तथा । स्निग्धत्वं नाम कण्ठगुणः, स्निग्धः अशुष्कः अरूक्षः, आर्द्रीभाववानित्यर्थः । स्वरास्तावत् सप्त प्रसिद्धाः षड्ज ऋषभो गान्धारो मध्यमः पञ्चमो धैवतो निषादश्चेति । 'षड्जं मयूरा ब्रुवते गावस्त्वृषभभाषिणः । अजाविकं तु गान्धारं क्रौञ्चः क्वणति

मध्यमम् ।पुष्पसाधारणे काले पिकः कूजति पञ्चमम् । धैवतं हेषते वाजी निषादं ब्रुवते गजाः' । तन्मध्ये पिण्डितः अल्पीकृतः पञ्चमाख्यः स्वरो यैस्ते तथोक्ताः । सम्पूर्णपञ्चमाख्यस्वरोच्चारणस्योषः-कालानर्हत्वात् पञ्चमस्वरमल्पप्रयोगवन्तं कुर्वन्त इत्यर्थः । अत्र श्रुतिसमधिकत्वेनेत्यपि ग्राह्यम् । तत्र कथं पञ्चमस्य श्रुतिसमधिकत्वम्? इत्थम्– 'षड्जश्चतुःश्रुतिर्ज्ञेय ऋषभस्त्रिश्रुतिः स्मृतः । द्विश्रुतिश्चापि गान्धारो मध्यमश्च चतुःश्रुतिः । चतुःश्रुतिः पञ्चमः स्यात् धैवतस्त्रिश्रुतिः स्मृतः । निषादो द्विश्रुतिश्चैव षड्जग्रामः स्वरान्तरम्' इति । तत्र यद्यपि षड्जमध्यमाभ्यां समानश्रुतित्वं पञ्चमस्य । तथाऽपि ऋषभगान्धारधैवतनिषादापेक्षया श्रुतिसमधिकत्वम् । ततादिवाद्यविशेषेण सहिततयेत्यपि ग्राह्यम् । चतुर्विधं तावद् वाद्यम् । ततमानद्धं घनं सुषिरमिति । ततं वीणादि । आनद्धं मुरजादि । घनं कांस्यताळादि । सुषिरं वंशादि । तत्र ततादियुक्तं गायन्त इत्यर्थः । षड्जस्वरं षड्जनामकं स्वरविशेषं भिन्नकतां स्वरूपमात्रेणावस्थिततां नयन्तः प्रापयन्तः । तत्रायं प्रभेदः । त्रिप्रकारस्तावत् षड्जस्वरः– ऋषभरूपः पञ्चमरूपः स्वात्मरूपश्चेति । तत्र ऋषभरूपं पञ्चमरूपं च पृथक्कृत्याऽत्मरूपेणावस्थितः षड्जो भिन्नक इत्युच्यते । षड्जं भिन्नकं कृत्वा षड्जानुषक्तावप्यृषभपञ्चमौ त्यक्त्वा स्वात्मरूपेण षड्जं प्रयुञ्जाना इत्यर्थः । न विद्यते काकिः कण्ठदोषो यस्य स तथा तस्य भावस्तत्ता तया । श्रावकादिगुणयुक्तत्वेन चेत्यपि ग्राह्यम् । 'श्रावकः कण्ठजो गुणः । यो दूराच्छ्रावयत्यन्ये त्वन्वर्था मधुरादयः । काकीत्याद्याः कण्ठदोषास्तत्र काकी नृलिङ्गकः' इति वैजयन्ती । ऋषभ इति आख्या यस्य स तथा तं स्वरं विना त्यक्त्वा । अरुणोदयकले ऋषभाख्यस्वरविशेषेण गानं कर्तुमनुचितत्वात् तं वर्जयित्वेत्यर्थः । वन्दिगणाः स्तुतिपाठकानां समूहाः, पुरस्य अन्तं मध्यं तस्मिन्, अन्तःपुर इत्यर्थः, ववन्दिरे । वदि अभिवादनस्तुत्योर्लिट् ।'

प्रायः प्रतनानामयं सम्प्रदायः, यत् किमप्यपूर्वं पूर्ववचनम्, तत् तथैव स्वप्रबन्धेषूज्जिहीर्षन्ति स्म । तदप्यनामनिर्देशम् । यत् ते मन्यन्ते स्म तदिदमुद्धरणं केवलम्, नापहरणमिति । अर्वाचीनास्तु उज्जिहीर्षा-मेवापजिहीर्षां मन्वानास्तदिदं कृतिचौर्यमाचक्षते ।

* * *

एवमाद्यं व्याख्यानद्वयं यतिभ्यां प्रणीतम् । अथ तृतीयं गृहस्थस्य काशीश्रीनिवासाचार्यस्य व्याख्यानम् । अदृष्टमुद्रणालयमेतत् । अस्य प्रबन्धुर्विषये सर्वमज्ञातम् । किङ्कालोऽयम्, किन्देशोऽयम्, किम्मठोऽयम्, किङ्गुरुरयम्, नैकमपि विज्ञायते । एकं देवनागरीलिपिबद्धं कोशमात्रमस्माभिरुपलब्धम् । तत्रोपसंहारे ग्रन्थकृदेवमाह–

सीतारामप्रसादेन श्रीनिवासेन सूरिणा ।
सङ्ग्रहाख्यस्य विवृतिरकारि श्रीशतुष्टये ॥

क्वचिदेवं पाठान्तरं दृश्यते –

सीतारामप्रसादेन श्रीनिवासो यथामति ।
सङ्ग्रहाख्यस्य विवृतिमकार्षीच्छ्रीशतुष्टये ॥

सर्वथा मौनमुवाह ग्रन्थकृत् स्वविषये । काशीश्रीनिवासाचार्य इति समग्रं नामापि समाप्तिवाक्यादेवावगम्यते–

श्रीमत्सङ्ग्रहरामायणस्य टीकायां काशीश्रीनिवासाचार्यविरचितायाम्....।

टीकानाम च सुन्दरकाण्डान्ते–**'इति श्रीमत्सङ्ग्रहरामायणटीकायां रामगुणरत्नप्रकाशिकायाम्.....'**

प्रायशोऽयं काश्यां समधिगतनवीनन्यायः । तेन काशीपदोपाह्वो बभूवेति भाति । अन्यत् सर्वं कालगर्भे निलीनम् । लिपिकृतामक्षरजीवनानामव्युत्पन्नतया तत्रतत्राशुद्धिबहुलः पाठः । सरळं व्याख्यानम् । प्रतिश्लोकं व्याख्याति । प्रायः प्रतिपदम् । समस्तपदेषु विग्रहवाक्यं दर्शयति । तेन बालोपकारिणी टीकेयम् ।

अथापि रमणीयं व्याख्यानम् । काव्यहृदयाविष्करणे पदानामर्थाविष्करणे व्याकरणविवरणे च व्याख्याताऽत्मनः कृतमुखत्वमवगमयति । स्यादयं परिचितपदवाक्यः । अथापि क्वचिद्रामायणाननुगुणं व्याख्याति । तद् यथा अरण्यकाण्डे–**'मधुं पुरस्कृत्य महच्चकार महेन्द्रमुख्यैरमरैः सुयुद्धम्'** (१.३०) इत्यत्र का.श्री.व्याख्यानम्– **'कार्यकारणयोरभेदोपचारान्मधुपुत्रो लवणासुरो मधुशब्देन गृह्यते'** इति । बालिशं व्याख्यनम् । न जानीमः, किमित्ययमधीती शास्त्रे, तत्रतत्र दर्शितप्रौढित्वोऽपि, साधुरपि युक्तायुक्तचिन्तने, अपठितरामायणकथ इवेत्थमहो विकत्थते । लवणपिता मधुरेव रावणेन साकं देवलोकं जिगीषुर्जगामेति स्फुटं रामायणे ।

अन्ते चाऽत्मनः चुचुन्दरीसाम्यमाह–

सीतार्थं सेतुनिर्माणे शाखा(टो) मूषको यथा ।
सङ्ग्रहस्य तथा सेवामकरोदिन्दिराश्रयः– इति ।

इन्दिराश्रय इत्यस्फुटं पदम् । प्रायो लक्ष्मीस्तस्य कुलदेवता स्यात् ।

नवीना टीका सङ्ग्रहचन्द्रिका

अध्यगामिषत प्राचीनटीकानां गुणाः । अध्यगामिषत च दोषाः । तदेवं सतीष्वेतासु टीकासु किमप्यपूर्णमिव, क्वाप्यसमग्रविवरणमिव, क्वाप्यनुद्घाटितहृदयमिव भाति सङ्ग्रहरामायणम् । अकृतप्रायैवापाणिनीयप्रयोगेषु

शब्दसाधुत्वचर्चा । यथा **'वत्सा वत्स्यामि'** इति । विद्याभूषणटीकायां को धातुरिति न स्फुटम् । **'वत्स्यामि हनिष्यामि, वध सम्प्रहारे लृट्'** इति विश्वपतितीर्थीयम् । श्रीनिवासाचार्योऽपि निमील्य चक्षुषी प्राचां वचनमेवानूवाच– **'वत्स्यामि हनिष्यामि । वध सम्प्रहारे लृट्'** इति । एतावताऽपि न शङ्कापरिहारः । वधधातुरेव पाणिनिनये न पठ्यते । यद्यपि प्राचीना वधधातुं पठन्ति । तत्पक्षेऽपि वधिष्यतीत्याद्येव रूपम्, न वत्स्यामीत्यादि । अतो न शङ्काशङ्कुपरिहारः । न स्पृष्टमेव छन्दोलक्षणादिकम् । क्वचिदस्पष्टमिव । क्वचिदस्वरसमिव । अतः काव्यहृदयस्पृक् छन्दोव्याकरणादिविश्लेषणपरा काव्यरसिकानां पुराणकृषिकाणां च हृदयङ्गमा काचिदन्यैव टीकाऽपेक्षितेति बहवो मामभ्यर्थयामासुः । मयि च स एव भावो जजागार । तदर्थमेकां नवीनां टीकां सङ्ग्रहचन्द्रिकां नाम विरचय्यात्र समयोजयम् ।

सङ्ग्रहरामायणान्ते च पारायणप्रियाणां कृते वाल्मीकिरामायणान्तर्गतं मन्त्रतुल्यमादित्यहृदयमप्यत्र न्यवेशि । तद्गतापूर्वार्थप्रकटनार्थं च तस्यैका मदीया टीका 'हृदयचन्द्रिका' च सहैव समयोजि, येन जिज्ञासूनां मन्त्रार्थावबोधः सुकरः स्यादिति ।

ग्रन्थान्ते च शोधकानां जिज्ञासूनां सौकर्याय रामायणपात्राणां परिचयः, श्लोकानामकाराद्यनुक्रमणिका च न्यबध्येतामित्यलम् ।

शोधनार्थमुपयुक्ता हस्तलिखितकोशाः

शुद्धपाठनिर्णयार्थं तालपत्रलिखिता आष्टौ मूलकोशाः परिशीलिताः । तिस्रो विश्वपतितीर्थटीकायाः । पञ्च मूलमात्रस्य ।

तिसृषु टीकामातृकासु एका श्रीपेजावरमठीयपुस्तकालयादानीता । अतिजीर्णं तालपत्रम् । अस्फुटान्यक्षराणि । प्रायः शुद्धः पाठः । आद्यन्तपत्राणि लुप्तानि ।

द्वितीया श्रीसोदेमठीया । समीचीना सुस्थितौ विद्यमाना । स्थूलान्यक्षराणि । तत्रतत्र लुप्तष्टीकाभागः । अशुद्धिबहुलः । विश्वपतितीर्थशिष्यो गोविन्दाचार्यनामा लिपिकार इत्यन्ते उल्लिखितम् ।

तृतीया कृष्णापुरमठीया । समीचीना सुरक्षिता । जनार्दनभट्टो लिपिकारः । शुद्धः पाठः । पाठभेदेषु शुद्धपाठनिर्णयाय बहुलमस्या एवावलम्बनं शरणमासीत् । सुखपठनीया रमणीया लिपिः । नातिस्थूला नातिसूक्ष्मा च ।

पञ्चसु च मूलमात्रमातृकासु द्वे श्रीपेजावरमठीये । एका श्रीसुब्रह्मण्यमठादानीता । द्वे पुनः श्रीसोदे-मठीये । अनयोरेका नागरीलिपिबद्धा । अन्याः सर्वास्तुळुलिपिबद्धाः ।

पेजावरमठीया सुब्रह्मण्यमठीया च मातृके पाठतः समाने । सोदेमठीयस्तुळुमातृकापाठः किञ्चिदिव भिन्नः । सोदेमठीया नागरीलिपिमातृका उत्तरकाण्डे भगवद्रूपवर्णनप्रसङ्गे विशेषतः समादृता । मुद्रितः पाठः सर्वात्मना भिन्नः । मुद्रिताः असङ्गताः प्रक्षिप्तश्लोका न क्वापि मातृकासु उपलब्धाः । परस्परं पाठभेदश्च तत्रतत्र क्वचिदेव । तेन शुद्धपाठनिर्णयाय बहूपकृतमाभिर्मातृकाभिः ।

मातृकाणां दानेन कृतमहानुग्रहेभ्यः सर्वेभ्योऽपि श्रीचरणेभ्यः सगौरवं नमोवाकं प्रशास्महे ।

मातृकातोलनादिना संशोधनकर्मणि दिवानिशं कृतपरिश्रमं श्रीमन्तं तोटन्तिल्लायकुलसम्भवं विजयसिंहाचार्यं श्रीरामचन्द्रश्चिरमनुगृह्णातु ।

अत्रोद्धृतानां रामायणश्लोकानां काण्डसर्गादिसङ्ख्या गोरखपुरे गीताप्रेसद्वारा प्रकटितपाठानुसारेण निरू-पिता । यद्यपि तत्र सन्ति पाठभेदाः । तदविवक्षित्वा केवलं सङ्ख्यामात्रमनुसृतमित्यवगन्तव्यम् ।

लिपिलेखनक्रमः

प्राचीनादर्शे, विशिष्य श्रीहृषीकेशतीर्थेन लिखिते ग्रन्थे, कश्चन विशिष्टो लेखनक्रमोऽनुसृतो दृश्यते । तमेव क्रममत्राप्यनुससृम । तत्रेदं किञ्चिद् वक्तव्यं भवति ।

पाणिनिः सूत्रयामास- **'अचो रहाभ्यां द्वे'** (८.४.४६) इति । तेन अच उत्तरौ यौ रेफहकारौ ताभ्यामुत्तरस्य यरो द्वे भवतः । तेन अर्क्कः, स्वर्ग्गः, अर्च्चनम्, अर्ज्जुनः, कर्ण्णः, पार्त्थः, अर्द्दनम्, अर्द्धम्, अर्प्पणम्, कर्म्म, सूर्य्यः, दुर्ल्लभः- इत्यादिरूपसिद्धिः ।

एवं हकारादुत्तरस्यापि । तेन ब्रह्मा ब्रह्म्मा भवति । वह्निः वह्न्निर्भवति । जाह्नवी जाह्न्नवी भवति ।

भागश एतदनुमतमाचार्यस्यापि । स रेफात् परस्य यरो द्विर्भावमनुमन्यते । तेन अर्क्कः, स्वर्ग्ग इत्यादि युक्तं रूपम् । अथापि हकारादुत्तरस्य यरो न द्वे भवतः । तेन ब्रह्मेत्येव । न ब्रह्म्मेति । वह्निरित्येव न वह्न्निरिति । जाह्नवीत्येव । न जाह्न्नवीति ॥

तथाच **'अचो राद् द्वे'** इत्येव पर्याप्तम् । तत्रापि क्वचिदपवाद इष्यते । वबयोर्भकारस्य च द्विर्भावो नेष्यते । तेन सर्वम्, अर्बुदम्, गर्भ इत्याद्येव साधु रूपम् । न सर्व्वम्, अर्ब्बुदम्, गर्ब्भ इत्यादि । तेन

‘ऋते बभाभ्यां वाच्य’ इति वक्तव्यम् । **‘शरोऽचि’** (८.४.४९) इति पाणिनिनैवोक्तम् । तेन कर्षति, कर्शयतीत्यादौ न द्विर्भाव इति स्थितम् ।

पुनश्च सूत्रयामास पाणिनिः–**‘अनचि च’**(८.४.४१) इति । अनच्परस्य अच उत्तरस्य यरो द्वे भवतः । तेन दध्यङ् आथर्वणो दद्ध्यङ् आथर्वणो भवति । मध्वो मद्ध्वो भवति । अनुमतमेतदपि तत्ववादाचार्यस्य । परन्त्वत्र वपरस्य धकारस्य द्विर्भावे तल्लेखनाय संयुक्तं मुद्राक्षरं नास्ति । तेन ‘मद्ध्वः’, ‘अद्ध्वा’ इत्येव लिखितव्यं भवति । तदा पठितॄणामस्ति भ्रमावकाशः । **‘सहस्रशीर्षम्’** इत्यादिवदिदमपि विश्लिष्य पठनीयमिति विभ्रम्यासुः । एवङ्कारं मा नाम पठितॄणां विभ्रमो भूदिति द्विर्भावं विनैवात्र प्रकटितम्- **‘मध्वः, साध्वत्र’** इत्यादिषु **सर्वत्र ।**

धन्यं मन्यतेऽयं जनः

आसीदाशा बलवती मम, यदशुद्धपाठैरसम्बद्धानुवादैश्च पङ्किलं सङ्ग्रहरामायणं नाम रामतीर्थं कतकक्षेपेण शोधनीयमिति । आसीदाशा, आसीत् तन्निर्वहणक्षमा प्रज्ञा, एवमुन्मीलितं चक्षुर्द्वयम् । अथापि क्रियाशक्तिरूपं तृतीयं चक्षुर्न विचकासामासैव । सम्प्रति स पुण्यकालः समुपस्थितः । श्रीमदधोक्षजतीर्थसंस्थानमारूढाः श्रीविश्वेशतीर्थश्रीचरणास्तृतीयमपि मे चक्षुरुदमीलयन्त । हन्त सिद्धं नः समीहितम् । करुणावरणाः श्रीचरणाः शुद्धपाठसंशोधने सव्याख्यानस्य ग्रन्थस्य सविमर्शं सम्पादने च दिष्ट्या मामेव न्ययोजयन् । श्रीपादानुग्रहभाजनमहमभवम् । पण्डितमूर्धन्यानां श्रीविद्यामान्यतीर्थश्रीचरणपरिचरणधन्यानां तत्ववादवदावदानां गुरुचरणानामाशीःपौरटकोटीरपरिमण्डितं मे पाण्डित्यम् । धन्योऽयं जनः ।

कृतज्ञतामर्पयामः

श्रीलः साधुशीलः पण्डितः कड्डी बदरीनारायणाचार्यः गणकयन्त्रेण लिप्यङ्कनं यथापूर्वमकल्पयत् । स्वयं निस्पृहः सन्नपि माध्वसमये बद्धस्पृहः श्रीविश्वेशतीथश्रीचरणानामन्तेवासी च । तस्यातुलायाः सन्ततसेवाया अपर्याप्तं नूनमस्माकं शब्दमात्रेण कार्तज्ञ्यसमर्पणम् ।

हस्तलिखतकोशानां परस्परं तोलनेन शोधयित्वा शुद्धपाठनिर्णये सपरिश्रमं बहु प्रयतितं विदुषा श्रीविजयसिंहेन । तथा मुद्रणे सम्भावितानां लिपिदोषाणां निवारणाय प्रत्यक्षरं चक्षुर्निक्षिप्य महता प्रयत्नेन परिशश्राम श्रीमान् कृष्णराजभट्टः, अनन्तशयनः, विशिष्य च श्रीहयवदनः । भगवतः सीताजानेरनुग्रहस्तेषां त्रयाणामपि रक्षाकवचमस्तु निरन्तरम् ।

हृद्यवर्णचित्ररेखाचित्राणां दानेन प्रकाशनस्यापूर्वां शोभामतिशाययामास चित्रकलापरिणतः स्वयं विदेशजोऽपि भारतमानसपुत्रः प्रीत्योरीकृततत्ववादपद्यः उक्रयीन् (**Ukraine**) देशसञ्जातः श्रील उज्ज्वलनीलमणिः । तमप्यनुगृह्णातां प्राणनारायणौ ।


मुद्रणकर्मणि सत्वरमोङ्कृत्य सुन्दरं मुद्रणकार्यं काले कृतवते 'अनिरुद्धक्रियेशन्स्' संस्थामधिकृताय कल्याणि-पदोपाह्वाय श्रीकान्तशर्मणे भूयोभूयः सहार्दं कार्तज्ञ्यमर्थयामः ।

इदमिदानीं तत्रभवतां सप्रश्रयमुपहरणम्–

मन्मथसं.चैत्र-शुक्ल-दशमी **डा. बन्नञ्जेपदोपाह्वः आचार्यगोविन्दः**

29.3.2015

बाल-काण्डम् : १



प्रथमः सर्ग्गः

ॐ ॥ वन्दे वन्द्यं [१]विधिशिवमहेन्द्रादिवृन्दारकेन्द्रै-
व्यर्क्तं व्याप्तं स्वगुणगणतो देशतः कालतश्च ।
धूतावद्यं [२]सुखचितिमयैर्म्मङ्गलैर्य्युक्तमङ्गैः
सानाथ्यं नो विदधदधिकं ब्रह्म नारायणाख्यम्[३] ॥ १ ॥

भावार्थदीपिका

श्रीरामं पूर्णकामं गुणमणिघृणिभी रञ्जिताशेषलोकं[४]
सीताप्रेमावलोकं सुरमुनिनिकरैः सेव्यमानाङ्घ्रियुग्मम्[५] ।
पूर्णप्रज्ञांश्च नत्वा सकलसुरवरान् वेदविद्याप्रणेतॄन्
श्रीविष्णोः प्रीतयेऽलं किमपि [६]विरचये तत्प्रसादावलम्बात् ॥ ✻ ॥

दुर्वादिमन्देहदुरन्तसन्ततिं विजित्य विष्णोः पदमाश्रितं सदा ।
अनाद्यविद्याविनिवर्तनक्षमं वन्दे सदाऽधोक्षजभास्करं विदे ॥ ✻ ॥

यः कृष्णसारथिर्ज्जिग्ये दुर्वादिनृपसन्ततिम् ।
अक्षयामोघगोभिस्तु तं जयार्यं नतोऽस्म्यहम् ॥ ✻ ॥

---

१. 'विधिभवमहे–' २. 'चितिसुखमयै–'

३. 'अस्य श्लोकस्यानेकार्थाः प्रतिपदमपि प्रतीयन्ते । सङ्गतिरपि प्रतिपदं नारायणपदव्याख्यानात्मिका च स्पष्टं प्रतीयते । तथाऽपि बालबोधनार्थं प्रवृत्तत्वात्, बहुकथनेन च बालानां व्याकुलचित्तत्वप्राप्तेर्न प्रपञ्चेन व्याख्यानं कृतम्' इति विद्याभूषणीयटीकायाम् ।

४. 'रक्षिताशेषलोकम्' इति क्वचित् पाठान्तरम् । ५. '–मानाङ्घ्रिपद्मम् ।' ६. 'हि रचये'

अञ्जनासूनुसान्निध्याद् विजयेन विराजितम्।
अजितप्रीतिजनकं भजेऽहं विजयध्वजम् ॥ ✻ ॥

श्रीवल्लभाख्यदुग्धाब्धिं वाक्तरङ्गोपशोभितम्।
गुणरत्नैरभिव्याप्तं सन्नदीसेवितं भजे ॥ ✻ ॥

वाजिवक्त्रपदाम्भोजयुग्मदुर्गं समाश्रितान्।
विद्याराजगुरून् वन्दे विजितारीन् स्वतेजसा ॥ ✻ ॥

श्रीविठ्ठलाङ्घ्रिसरसीरुहसक्तचित्तं श्रीवैष्णवाळिपरिसेवितपादपद्मम्।
श्रीमध्वशास्त्रनिरतं सदनुग्रहेशं श्रीविश्वमूर्त्तिगुरुमादरतो भजेऽहम् ॥ ✻ ॥

रामस्य सम्यक् स्मरणं हि सर्वदा धुनोति दोषानिति चिन्तयन्निदम्।
समारभे संस्मरणाय केवलं सन्तो हि तन्वन्त्वधिकां दयां मयि ॥ ✻ ॥

लकारधातुलिङ्गानां विग्रहान्वययोस्तथा।
प्रकाशनं हि क्रियते बालानां बोधसिद्धये ॥ ✻ ॥

अथ श्रीमान् नारायणभट्टारको निखिलेष्टसाधनतयाऽविगीतशिष्टाचारपरम्पराद्यवगतं श्रीमन्नारायणस्य स्तवन-वन्दनरूपं मङ्गलं निर्विघ्नेन ग्रन्थपरिसमाप्त्यादिस्वाभिमतार्थसिद्धये कृत्वाऽसन्निहितशिष्यशिक्षार्थं ग्रन्थादौ निबध्नाति– **वन्द** इत्यादिना। अहं ब्रह्म वन्द इत्यन्वयः। वन्दे नमामि स्तौमीति वा। वदि अभिवादनस्तुत्योरिति धातोर्लट्। 'ब्रह्माणि जीवाः सर्वेऽपि' इत्यादिश्रुतेः ब्रह्मशब्दस्य जीवेऽपि प्रसिद्धत्वात् तस्य वन्दनशङ्कां वारयितुमाह– **नारायणाख्यमि**ति। दोषारशब्दयोरेकार्थत्वान्नञश्च विरुद्धार्थत्वेनारविरुद्धा नारा गुणास्तेषा-मयनमाश्रयो नारायणः। नैकधेत्यादिवन्नसमासत्वान्नलोपाभावेन नुडभावः। 'पूर्वपदात्सञ्ज्ञायामगः' (अ.सू.८.४.३) इति णत्वम्। नारायण इति आख्या नाम यस्य ब्रह्मणस्तत्तथोक्तं तत्। वन्द्यत्वे हेतुभूतधर्मानाह– **वन्द्यमि**त्यादिना। वन्दितुं योग्यं वन्द्यम्। 'अर्हे कृत्यतृचश्च'(अ.सू.३.३.१६९) इत्यर्हार्थे ण्यः। कैर्वन्द्यमित्यत आह–**विधिशिवमहेन्द्रादिवृन्दारकेन्द्रैरि**ति। विदधातीति विधिर्ब्रह्मा। डु धाञ् (वि)धान[१] इति धातुः। स च, शङ्करत्वाच्छिवो रुद्रः स च, महांश्चासौ इन्द्रश्चेति वा महस्य यज्ञलक्षणोत्सवस्य इन्द्रः स्वामीति वा महेन्द्रः पुरन्दरश्च, ते आदयो येषां ते तथोक्ताः। शोभनं वृन्दं येषामिति वृन्दारका देवाः। 'शृङ्गवृन्दाभ्यामारकन्' (वार्तिकम्.५.२.१२२) इति प्रशंसालक्षणमत्वर्थे आरकन्। तेषामिन्द्राः

---

१. **'डु धाञ् दानधारणयोः'** इति क्षीरस्वाम्यभिमतः पाठः। **'धारणपोषणयोः'** इत्यन्यत्र।

स्वामिनो वृन्दारकेन्द्राः। ततो विधिशिवमहेन्द्रादयश्च ते वृन्दारकेन्द्राश्चेति कर्मधारयः, तैः। एतैर्वन्द्यमित्यनेन वन्द्यत्वोपयुक्तविशिष्टत्वोपपादनादितरदेवतापरित्यागेन नारायणस्य वन्दनं कुतो वा कर्तव्यमिति शङ्का परास्ता। व्यक्तमिति व्यापनक्रियाविशेषणम्। व्याप्तमित्युक्ते किंविशिष्टं व्यापनमित्याकाङ्क्षायां[१] व्यक्तमित्यपेक्ष्यमाणत्वात्। एवं च व्यक्तं स्पष्टं यथा भवति तथा मुख्यतयेत्युक्तं भवति। क्रियाविशेषणानां नपुंसकलिङ्गता द्वितीयैकवचनान्तता च वाच्येति वचनात् सर्वत्रापि क्रियाविशेषणानि नपुंसकलिङ्गानि द्वितीयैकवचनान्तान्येव द्रष्टव्यानि। उक्तं च वृत्तरत्नाकरव्याख्याने– 'सुखसन्तानसिद्ध्यर्थं सुखस्य सन्तानः प्रवाहस्तस्य सिद्धिरर्थः प्रयोजनं यस्मिन् तत्तथा। इदं नमनक्रियाविशेषणम्। किंविशिष्टं नमनमित्यपेक्षायां सुखसन्तानसिद्ध्यर्थमित्यपेक्ष्यमाणत्वात्। नमनक्रियाविशेषणभूतं तत्पदमपि नपुंसकलिङ्गं द्वितीयैकवचनान्तं च' इत्यादिना। ननु नारायणाख्यं ब्रह्म सिद्धं वा न वा? न द्वितीयः, असिद्धस्य वन्दनाद्ययोगात्। सिद्धिश्च लक्षणप्रमाणाभ्यां भवति। तत्रापि प्रमाणं 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिलक्षणमुखेनैव ब्रह्म साधयतीत्यत-स्तस्य प्रमाणं ब्रह्ममीमांसाशास्त्रम्। तद् ब्रह्ममीमांसाशास्त्राद्ध्यायद्वयार्थभूतं लक्षणमाह– **स्वगुणगणत** इत्यादिना। स्वगुणगणतः स्वस्य गुणाः ज्ञानशक्तिबलैश्वर्यवीर्यतेजःप्रभृतयः शुभधर्मास्तेषां गुणानां गणाः समूहास्तैरिति ततः, देशेनेति देशतः, कालेनेति कालतः। यद्यपि 'किंसर्वनामबहुभ्योऽद्व्या-दिभ्यः'(अ.सू.५.३.२) इति किमादिभ्य एव तसिल्प्रत्ययो विहितस्तथाऽपि 'सर्वप्रातिपदिकात् तसिल् इति केचित्' इति वचनाद्गुणादिशब्देभ्योऽपि सार्वविभक्तिकस्तसिल्। चशब्दः समुच्चये। व्याप्यत इति व्याप्तम्। कर्मणि क्तः। यद्वाऽत्र सर्वत्र द्वितीयार्थे तसिल्। तस्मिंश्च पक्षे व्यक्तं व्याप्नोतीति व्याप्तमिति गत्यर्थकत्वात् कर्तरि क्तः। 'गत्यर्थाकर्मक-श्लिष-शीङ्-स्थाऽऽस-वस-जन-रुह-जीर्यतिभ्यश्च' (अ.सू.३.४.७२) इत्यनुशासनात्। एवं च गुणतो व्याप्तत्वं नाम सर्वगुणपूर्णत्वम्। देशतो व्याप्तत्वं नाम सर्वगतत्वम्। कालतो व्याप्तत्वमनादिनित्यत्वम्। इयं च त्रिविधा व्याप्तिः श्रीनारायणस्यैव। तथाहि[२] श्रुतिः– 'देशतः कालतश्चैव गुणतश्च त्रिधा ततिः। सा समस्ता हरेरेव न ह्यन्ये पूर्णसद्गुणाः' इति। धूतावद्यं धूतानि निरस्तानि अनाद्यनन्तकालेऽप्य[३]स्पृष्टानीति यावत्, अवद्यानि अज्ञानपारतन्त्र्यकर्मलेपरागादिदूषणानि यस्मात् तत्तथोक्तं तत्। एताभ्यां च ब्रह्ममीमांसाशास्त्राध्यायद्वयार्थभूतलक्षणप्रतिपादकाभ्यां पदाभ्यां श्रीनारायणस्याधि-कृतत्वं च वन्द्यत्वोपयुक्तं दर्शितम्। व्यक्तमिति ब्रह्मविशेषणं वा। स्वभक्तान् प्रति व्यक्तं प्रत्यक्षविषयीभूत-मिति। ननु शरीररहितस्य ब्रह्मणः प्रत्यक्षविषयत्वमनुपपन्नम्, सशरीरत्वेऽनित्यत्वप्रसङ्ग इत्यत उक्तम्– **सुखचितीत्या**दिना। सुखचितिमयैः, सुखं च, चितिर्ज्ञानं सा च, तयोः स्वरूपाणि सुखचितिमयानि तैः। 'मयट् तद्रूप इति केचित्' इति वचनात् तत्स्वरूपार्थे मयट्। अत एव मङ्गलैः शोभनैः अङ्गैः

१. '–मित्याशङ्कायाम्' २. 'तथाच' ३. '–कालेभ्यः अस्पृष्टानीति'

हस्तपादाद्यवयवैः । 'अङ्गं प्रतीकोऽवयवः' इत्यमरः । युक्तम् अन्वितम् । तथाच सशरीरत्वात् प्रत्यक्षत्वं सम्भवति । सशरीरत्वेऽनित्यत्वप्रसङ्गो वा नास्ति । तस्य प्राकृतशरीरविषयत्वात्, भगवच्छरीरस्य तु दोष-गन्धविधुरपूर्णषाड्गुण्यरूपत्वात् । तथाहि श्रुतिः–'ज्ञानात्मक ऐश्वर्यात्मकः शक्त्यात्मकः' इत्यादिका । 'क्लेशकर्माद्यसंस्पृष्टपूर्णषाड्गुण्यविग्रहः' इत्यादिका स्मृतिश्च । नः अस्माकम् । अधिकमिति विधानक्रिया-विशेषणम्, अधिकं यथा भवति तथा, सानाथ्यम्, नाथेन स्वामिना सहिताः सनाथास्तेषां भावस्तत्त्वं तत्, विदधत् कुर्वाणम् । संसारे तप्यमानाननाथानस्मान् दृष्ट्वा केवलं कारुण्येनैवाभीष्टप्रदानेन सनाथान् कुर्वाणमिति भावः । अधिकं सर्वोत्कृष्टमिति ब्रह्मविशेषणं वा । 'अस्मद्युत्तमः' (अ.सू.१.४.१०७) इति सूत्रेणास्मद्युपपदे स्थानिन्यप्युत्तमपुरुषः स्यादित्युक्तत्वाद् वन्द इत्युत्तमपुरुषान्तप्रयोगादेवाहमिति कर्तृपदं लभ्यते । ननु 'कर्तृकरणयोस्तृतीया' (अ.सू.२.३.१८) इति[१] कर्तरि तृतीयाया विहितत्वात् कर्तृवाचकेन पदेन मयेति तृतीयान्तेन भाव्यम्, कथमहमिति प्रथमान्ततेति चेद् उच्यते । अत्र वदिधातोर्हि 'लः कर्मणि च भावे चाकर्मकेभ्यः'(अ.सू.३.४.६९) इति सूत्रेण कर्तरि लकारः, तस्य च 'तिप्-तस्-झि–' (अ.सू.३.४.७८)इत्यादिना तिबादयः । एवं च कर्तुस्तिङाऽभिधानात्, तिङाद्यनभिहिते च कर्त्रादौ तृतीया-विधानान्न तृतीयाप्राप्तिः । किं तर्हि 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा' (अ.सू.२.३.४६) इति प्रातिपदिकार्थमात्रे प्रथमैव । एवं प्रतिश्लोकं कर्तरिप्रयोग इयं रीतिर्द्रष्टव्या । अत एव हि कर्मणिप्रयोगे कर्तुस्तिङाऽनभिधानात् कर्तरि तृतीया सर्वत्र दृश्यते । कर्मणः 'कर्मणि द्वितीया'(अ.सू.२.३.२) इति सूत्रेण द्वितीया न दृश्यते कर्मणस्तिङाऽभिधानात् । कर्तरिप्रयोगे तु कर्मणि द्वितीया दृश्यते कर्मणस्तिङाऽनभिधाना-दिति । तथा चैवमन्वयः । अहं विधिशिवमहेन्द्रादिवृन्दारकेन्द्रैः वन्द्यम्, स्वगुणगणतः देशतः कालतश्च व्यक्तं व्याप्तम्, धूतावद्यम्, सुखचितिमयैः मङ्गलैः अङ्गैः युक्तम्, नः सानाथ्यं अधिकं विदधत्, नारायणाख्यं ब्रह्म वन्द इति । 'वन्देवं' इति त्रिगुरुत्वान्मगणः, भूमिर्देवता, ऐश्वर्यकरः । 'मद्ध्यान्ताद्यखिलेषु गा जसभमाः सूर्यानिलेन्दुक्ष्मा देवाः स्फीतरुगन्यदेशगमनप्रख्यातनामश्रियः । तद्वच्चेल्लघवोऽभवन् रतयना वह्न्यम्बराम्भोदिवो वृत्तादौ मृतिशून्यताजनसमृद्ध्यायूंषि ते तन्वते'[२] इत्युक्तेः । वृत्तं तु मन्दाक्रान्ता– 'मन्दाक्रान्ता जलधि-षडगैर्म्भौ नतौ ताद् गुरू चेत्' इत्युक्तेः ॥ १ ॥

---

१. बालानां व्युत्पत्तिशाणत्वाय केवलं व्याकरणविहरणमिदम् ।

२. अयमर्थः–मध्ये गो गुरुर्यत्र स जगणः । अन्ते चेत् सगणः । आदौ चेद् भगणः । अखिलेषु त्रिष्वपि गुरुश्चेन्मगणः । जगणस्य सूर्यो देवता । स्फीतरुग् रोगाधिक्यं फलम् । सगणस्यानिलो देवता । अन्यदेशगमनं फलम् । भगणस्य इन्दुर्देवता । प्रख्यातनाम नाम्ना ख्यातिः फलम् । मगणस्य भूमिर्देवता । श्रीः सम्पत्प्राप्तिः फलम् । तद्वत् मध्ये लघुश्चेद् रगणः । अन्ते लघुश्चेत् तगणः । आदौ चेद् यगणः । सर्वाण्यक्षराणि लघव-श्चेन्नगणः । रगणस्य वह्निर्देवता । मृतिः फलम् । तगणस्याऽकाशो देवता । शून्यता फलम् । यगणस्य जलं देवता । जनसमृद्धिः फलम् । नगणस्य द्यौर्देवता । आयुः फलमिति । वृत्तादौ यो गणस्तस्य वृत्तस्य ग्रन्थादौ प्रयोगे चैतानि फलानीति ।

सङ्ग्रहचन्द्रिका

ॐ ॥ नत्वा रघुपतिमीशं भुवनाचार्यं च दशधिषणम् ।
क्रियते ललिता सङ्ग्रहरामायणभावचन्द्रिका टीका ॥ ❋ ॥

ॐ ॥ मध्वरामायणवाल्मीकिरामायणयोः सेतुबन्धोऽयम्, सङ्ग्रहरामायणं नाम । कथं सङ्ग्रहरामायणम्? रामायणस्य सङ्ग्रहः सङ्ग्रहेण वा रामायणम् । अथ रामकथां सञ्जिघृक्षुः कविरिष्टदेवतामभिष्टवीति– वन्दे वन्द्यमिति । वृन्दारका इति सर्वे देवाः । तेषामिन्द्रास्तत्वमानिनो विधिशिवमहेन्द्रादयः । देशतः कालतः स्वरूपगुणतश्च व्याप्तमनन्तम् । ज्ञानिनां हृदि व्यक्तम् । सगुणत्वेन साक्षात्कृतम् । कथं तर्हि निर्गुणत्ववचनम्–'साक्षी चेता केवलो निर्गुणश्च' इति? आह– धूतावद्यम् । त्रिगुणमूलान्यवद्यानि । अयं त्रिगुणवर्जितः । अत एव निर्गुण उच्यते । ननु निराकारं ब्रह्मेत्याचक्षते । तत् कथं ज्ञानिभिः साक्षात्कृतम्? आह– सुखचितिमयैः । मङ्गळैः, 'यत् ते रूपं कल्याणतमम्' इति श्रुतिः, अङ्गैर्युक्तम् । 'अङ्गं वपुर्वर्ष्म पुरं च पिण्डम्' इति, 'आहुः प्रतीकमवयवमपघनमङ्गम्' इति चाभिधानम् । तेन सर्वे नाथवन्त इत्याह–सानाथ्यं नो विदधत् । तत् तु सर्वाधिकम् । ब्रह्म नारायणाख्यम् । 'तदेव ब्रह्म परमं कवीनाम्' इति श्रुतिः । 'नारायणः परं ब्रह्म' इति च । नारा निर्दोषा रमा । तस्या अयमयन इति मङ्गळदेवता रमाऽपि वन्दिता । आद्यं पद्यद्वयं मन्दाक्रान्ताबद्धम् । मभनतता गौ च मन्दाक्रान्ता ॥ १ ॥

भूषारत्नं भुवनवलयस्याखिलाश्चर्य्यरत्नं
लीलारत्नं जलधिदुहितुर्देवतामौलिरत्नम् ।
चिन्तारत्नं जगति भजतां सत्सरोजद्युरत्नं
कौसल्याया लसतु मम हृन्मण्डले पुत्ररत्नम् ॥ २ ॥

(भा.दी.) एतद्ग्रन्थप्रतिपाद्यं श्रीरामचन्द्रं प्रार्थयते– **भूषारत्नमिति** । भुवनवलयस्य भुवनानां वलयं मण्डलं तस्य, भुवनं वलयमिव कङ्कणमिव भुवनवलयं तस्येति वा । भूषाया अलङ्क्रियाया रत्नमिव भूषारत्नम् । 'भूषा च स्यादलङ्क्रिया' इत्यभिधानम्[१] । भूषार्थं विद्यमानं रत्नमिव भूषारत्नमिति वा । अखिलानां समस्तजनानाम् आश्चर्यरूपं रत्नमिव अखिलाश्चर्यरत्नम् । तादृशसौन्दर्यादिविशिष्टवस्त्वन्तराभावादिति भावः । जलधिदुहितुः, जलानि धीयन्तेऽत्रेति जलधिः समुद्रः, तस्य दुहिता सुता, तस्याः महालक्ष्म्याः सीताया इति यावत् । लीलायाः

१. 'इत्यभिधानात्'

क्रीडायाः रत्नमिव लीलारत्नम् । लीलार्थं विद्यमानं रत्नमिव लीलारत्नमिति वा । मौलेः शिरसो रत्नं (मौलिरत्नम्) । देवतानां मौलिरत्नमिव शिरोमणिरिव देवतामौलिरत्नम् । देवताश्रेष्ठमित्यर्थः । जगति लोके, भजतां सेवमानानाम्, जनानामिति शेषः । चिन्तायाः इच्छायाः पूरकं रत्नमिव चिन्तारत्नम्, चिन्तितार्थ-प्रदातृत्वाच्चिन्तामणिमिव वर्तमानमित्यर्थः । सन्तः सज्जना एव सरोजानि कमलानि तेषां बोधने द्युरत्नमिव सूर्य इव सत्सरोजद्युरत्नम् । 'द्युमणिस्तरणिर्मित्रः'[१] इत्यमरः । कौसल्यायाः कौसल्यादेव्याः पुत्ररत्नं पुत्राख्यं रत्नमिव, मम हृन्मण्डले हृदो हृदयस्य मण्डलं प्रदेशस्तस्मिन्, हृदयकमल इत्यर्थः । लसतु भातु क्रीडतु वा । लस श्लेषणक्रीडनयोः । लोट् ॥ २ ॥

(सं.चं.) इष्टं विशिष्टं ब्रह्मैव रामाख्यमजनीत्यधिकृततयाऽपि स्तौति । कौसल्यायाः पुत्ररत्नम् । रत्नशब्दः श्रेष्ठवचनः । श्रेष्ठः पुत्रः । भूषारत्नमित्यधिकं भूषणम् । आश्चर्यरत्नमित्याश्चर्यतमम् । जलधिदुहितुर्लीला-रत्नम् । रत्नाकरस्य दुहिता रमा स्वरमणाय रमणीयं स्वरमणं पुरुषरत्नं लेभ इत्यर्थः । 'रत्नं स्वजातिश्रेष्ठेऽपि मणावपि नपुंसकम्' इति मेदिनी । देवतानां मौलिरत्नमिवोपरि स्थितम् । सर्वदेवोत्तमम् । भजतां चिन्तामणिरिव चिन्तितार्थप्रदम् । सत्सरोजानां द्युरत्नमिव सूर्य इव विकासहेतुः । 'तिमिररिपुर्द्युमणिरंशु-मानंशुः' इत्यभिधानम् । अनेन ग्रन्थस्य विषयादिकमपि सूचयाम्बभूव । रामाख्यं ब्रह्म विषयः । सन्तोऽधिकारिणः । मोक्षाद्यभीष्टप्राप्तिः फलम् । हृन्मन्दिरे विकसनं साक्षात् फलम् । यथायोग्यं च दातृदेयादिः सम्बन्धः ॥ २ ॥

महाव्याकरणाम्भोधिमन्थमानसमन्दरम् ।
कवयन्तं रामकीर्त्या हनूमन्तमुपास्महे ॥ ३ ॥

(भा.दी.) अथ सकलसुरवरगुरोः श्रीमुख्यप्राणस्य रूपत्रयं क्रमेण प्रणमति– **महाव्याकरणे**त्यादिश्लोक-त्रयेण । वयं महत् यद् व्याकरणं व्याकरणशास्त्रं [२]तदेवाम्भोधिरिव तस्य मन्थः मन्थनदण्डायितः । 'मन्था मन्थश्च मन्थानः' इति हलायुधः । मानसमेव मन एव मन्दरो मन्दरपर्वतो यस्य स महाव्याकरणाम्बोधि-मन्थमानसमन्दरः, तम् । भगवता सङ्कर्षणेन कृतमूलव्याकरणशास्त्रार्थविचारपरमित्यर्थः । रामकीर्त्या श्रीरामस्य यशसा । [३]कवयन्तं कवित्वं कुर्वाणम् । कव शब्द इति धातोः । गायन्तमिति वा । श्रीरामस्य[४] कीर्तिप्रतिपादक-

१. **'–तरणिर्भानुः'** २. **'तदम्भोधिरिव'**

३. पाणिनीयाः कवधातुं न पठन्ति । **'कुङ् शब्दे'** इति पठन्ति । **'कु शब्दे'** इति च । सर्वत्रापि **'कावयति, कावयन्तम्'** इत्येव रूपमिति पाणिनिनयज्ञाः ।

४. **'श्रीरामकीर्तिप्रतिपादनपरमूलरामायणादिगान–'**

मूलरामायणगानपरमित्यर्थः । तनुतनूशब्दवद्धनुहनूशब्दौ पर्यायौ । एवं च हनुरस्यास्तीति हनुमान्, तम् । हनुशब्देन हन्ति चणकादिकमिति व्युत्पत्त्या कपोलयोः परभाग उच्यते । 'कपोलौ तत्परो हनुः' इत्यभिधानात् । हन्ति संसारमिति व्युत्पत्त्या ज्ञानं चोच्यते । 'हनुशब्दो ज्ञानवाची' इत्युक्तेः[१] । हनुमच्छब्दवद्धनूमच्छब्दोऽपि प्रसिद्धः । 'आञ्जनेयस्तु हनुमान् हनूमान् मारुतात्मजः' इत्यभिधानात् । उपास्महे सेवामहे । उपपूर्वादास उपवेशन इत्यस्माल्लट् । तद्विषयद्ध्यानादिकं कुर्म इत्यर्थः । ननु उपवेशनार्थस्यास्य धातोर्ध्यानार्थकत्वं कथमिति चेदुच्यते । धातूनामुपसर्गवशादनेकार्थत्वं प्रसिद्धम् । यथा आगच्छति अवगच्छति प्रभवति अनुभवति इत्यादिषु धातूनामनेकार्थत्वम् । उपसर्गास्तु तद्व्यञ्जकाः । यथा 'केशान् प्रशस्तान् करोति' इत्यर्थे 'केशान् करोति' इत्यादिषु । नचैवमर्थाव्यवस्था । 'धातवश्चोपसर्गाश्च निपाताश्चेति ते त्रयः । अनेकार्था इति ज्ञेयाः पाठस्तेषां निदर्शनम्' इति प्रयोगशरणैर्वैयाकरणैरेव समाहितत्वात् ॥ ३ ॥

(सं.चं.) यथा देवे तथा गुरावपि भक्तिः करणीयेति लोकगुरोः प्रथमावतारं स्तौति । रामायणस्योपनायकतया चायं नम्यः । महाव्याकरणाम्भोधेर्मथने यस्य मानसमन्दरो मन्थायते । मध्वरूपस्यापि समानमेतत् । 'सोऽयं नवव्याकरणार्थवेत्ता ब्रह्मा भविष्यति' इति वाल्मीकिवचनम् । रामकीर्त्या हेतुभूतया कवयन्तं गायन्तम् । कविवदाचरति कवयतीत्याचारार्थे क्विप् । हन्तीति हनुर्मतिरुच्यते । हन गतौ । गतिरवगतिः । तेन हनुमानिति मतिमानुच्यते । हनूमानिति दीर्घ आधिक्यवचनः । सर्वज्ञ इत्यर्थः । पाणिनीयास्तु 'शरादीनां च' (अ.सू.६.३.१२०) इति शरादित्वेन दीर्घमिच्छन्ति । तथाहि काशिका–'शरादीनां च मतौ दीर्घो भवति सञ्ज्ञायां विषये । शरावती । वंशावती । शर । वंश । धूम । अहि । कपि । मणि । मुनि । हनु । शरादिः' इति । अस्मिन् पक्षे सञ्ज्ञायां क्वचिद् दीर्घो नियतः । नहि शरावती शरवती भवति । न धूमावती धूमवती । अत्र तु न नियतः, यतः हनूमान् हनुमानपि भवति । उपास्महे शास्त्रोदितं तत्स्वरूपमभिज्ञाय ध्यायामः ॥ ३ ॥

मुख्यप्राणाय भीमाय नमो यस्य भुजान्तरम् ।
नानावीरसुवर्णानां निकषाश्मायितं बभौ ॥ ४ ॥

(भा.दी.) मुख्येति । यस्य भीमस्य भुजान्तरं भुजयोरन्तरं मध्यं वक्षस्थलमित्यर्थः । नानाविधा ये वीरास्त एव सुवर्णानि तेषां निकषाश्मायितम् । निकषस्य घर्षणस्य अश्मा तद्वदाचरतीति तथोक्तम्[२] । स्वर्णपरीक्षापाषाणायितं सदित्यर्थः । बभौ शुशुभे । भा दीप्तौ लिट् । मुख्यश्चासौ प्राणश्च तस्मै । मुख्यप्राण-

१. **'हनशब्दो ज्ञानवाची'** इति प्राचीनः पाठः ।
२. इतः परम्, **'पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत् इत्यमरः'** इति क्वचित् ।

स्वरूपायेत्यर्थः । यद्वा मुख्यः श्रेष्ठः प्राणो बलं यस्य स तथोक्तस्तस्मै । 'प्राणस्तु प्रणवे जीवे जीविते परमात्मनि । इन्द्रिये वायुभेदे च बलान्तर्यामिणोरपि' इति वैजयन्ती । यत्तदोर्नित्यसम्बन्धाद्यस्येति यच्छब्द-बलात्तस्मै इति लभ्यते । भृता मा भगवद्विषयिणी पञ्चरात्रादिविद्या येन स भीमस्तस्मै । यद्वा भृता मा विद्याभिमानिनी द्रौपदी येनेति वा । 'मा च विद्या हरेः प्रोक्ता' इति हरिवंशे माशब्दस्य विद्यायां प्रयोगात् । नमः, अस्त्विति शेषः ॥ ४ ॥

(सं.चं.) द्वितीयावतारं प्रस्तौति– मुख्यप्राणावताराय भीमाय । एतेनावताररूपेष्वपि पूर्णाभिव्यक्ति-माह । भुजयोरन्तरं वक्षः । निकषाश्मा सुवर्णपरीक्षणपाषाणः । 'निकषः शाणफलके' इति मेदिनी । वीराः सुवर्णानीव तेषां सत्वपरीक्षणे वक्षो निकषाश्मेव बभौ । हनुमद्रूपस्यापि समानमेतत् ॥ ४ ॥

स्वान्तस्थानन्तशय्याय पूर्ण्णज्ञानरसार्ण्णसे ।
उत्तुङ्गवाक्तरङ्गाय मध्वदुग्धाब्धये नमः ॥ ५ ॥

(भा.दी.) स्वान्तरिरिति । स्वस्यान्तः स्वान्तः । अन्तरित्यव्ययम् । स्वहृदयमध्य इत्यर्थः । स्वान्तस्तिष्ठतीति स्वान्तःस्थः । स्वान्ते मनसि तिष्ठतीति वा तथोक्तः । सर्वदा मनोविषयीभूत इत्यर्थः । अनन्तः शेषः शय्या पर्यङ्को यस्य स तथोक्तः । ततः स्वान्तस्थोऽनन्तशय्यः श्रीनारायणो यस्य सः स्वान्तस्थानन्तशय्यस्तस्मै । ज्ञानस्य रसः सारो ज्ञानरसः, श्रेष्ठं ज्ञानमित्यर्थः । 'रसः सारो वरश्चेति शब्दा एकार्थवाचकाः' इत्युक्तेः । पूर्णः इतरजीवेभ्योऽतिशयितो यो ज्ञानरसः स अर्ण इव उदकमिव यस्य स तथा तस्मै । उत्तुङ्गाः उन्नताः विष्णोः सर्वोत्कृष्टत्वाद्युन्नतार्थप्रतिपादिका या वाचस्ता एव तरङ्गा यस्य स तथोक्तस्तस्मै । मध्वित्या-नन्दस्य सञ्ज्ञा । वमिति तीर्थमुच्यते । 'मध्वित्यानन्द उद्दिष्टो वेति तीर्थमुदाहृतम्' इति वचनात् । तथाच मध्विति आनन्द इति वं तीर्थम् अवतारो[१] यस्य स मध्वः । यद्वा मधु आनन्दकरं वं तीर्थं शास्त्रं यस्मादिति तथोक्तः । 'तीर्थं मन्त्राद्युपाध्यायशास्त्रेष्वम्भसि वाचने । पात्रोपायावतारेषु' इति वैजयन्ती । यद्वा मधु-शब्देनेन्द्रियमुच्यते । 'मधुरिन्द्रियनामा' इति हरिवंशेऽभिधानात् । तथाच मधुनाम्ना चक्षुरिन्द्रियेण वाति सर्वदाऽपरोक्षतोऽवगच्छति भगवन्तमिति वा मध्वः । स एव दुग्धाब्धिस्तस्मै नमः । क्षीरसमुद्रोऽपि द्वीपे भगवतोऽवस्थितत्वेन स्वान्तस्थानन्तशय्यः, परिपूर्णक्षीरसागरमयोदकः, उत्तुङ्गतरङ्गश्च भवतीत्यत आनन्दतीर्थानां क्षीरसमुद्रत्वेनोत्प्रेक्षा युक्तैव ॥ ५ ॥

१. नेदं स्वरसम् । नहि यावन्तस्तीर्थपदार्थास्तावन्तः सर्वे वकारस्याप्यर्था इति वक्तुं शक्यम् । तीर्थशब्दश्च न भूमाववतारवाचकः । किन्तु जलावतारस्थानवाचकः । **'स्नानघट्ट'** इति भाषायाम् । **'मधु सुखकरं वं तीर्थं शास्त्रं यस्मात् सः । निरुक्तत्वात् मधुशब्दे उकारलोपः'** इति काशीश्रीनिवासाचार्यटीका ।

(सं.चं.) अथ तृतीयावतारं साक्षाद् गुरुं नमति । अनन्तशयनः स्वस्य दुग्धाब्धेरन्तर्मध्ये तिष्ठति । मध्वस्य स्वान्ते मनसि तिष्ठति । 'खर्परे शरि वा लोपो वक्तव्यः' (अ.सू.८.३.३६) इति वार्तिकवचनात् विसर्जनीय-लोपः । पूर्णो ज्ञानरसः पूर्णा प्रज्ञा । उत्तुङ्गा भगवत्पारम्यवचनादुन्नता वाचः । उद्वेलास्तरङ्गाः ॥ ५ ॥

सूक्तिरत्नाकरे रम्ये मूलरामायणार्ण्णवे ।
विहरन्तो महीयांसः प्रीयन्तां गुरवो मम ॥ ६ ॥

(भा.दी.) त्रिविक्रमार्यान् प्रार्थयते– **सूक्ती**ति । श्रीरामकथारूपत्वेन सु शोभना उक्तयस्ता एव रत्नानि तेषामाकर उत्पत्तिस्थानम्, आश्रय इत्यर्थः, तस्मिन् । 'आकरो निकरे खनौ' इति वैजयन्ती । रम्ये सतामति-मनोहरे । मूलम् आदिभूतं यद्रामायणम् । 'मूलं वशीकृतौ स्वीये शिफातारान्तिकादिषु' इति वैजयन्ती । तदेवार्णवस्तस्मिन् । विहरन्तः क्रीडन्तः तच्छ्रवणादिपरा इत्यर्थः । महीयांसः अतिशयेन पूज्याः मम गुरवः त्रिविक्रमपण्डिताचार्यनामका अस्मद्गुरवः पितरः प्रीयन्तां प्रीता भवन्तु । प्रीङ् प्रीणने लोट् ॥ ६ ॥

(सं.चं.) पितरं प्रीणयति– प्रीयन्तां गुरवस्त्रिविक्रमार्या ममेति । जनक इति ज्ञानद इति गौरवाद् बहु-वचनम् ॥ ६ ॥

वाल्मीकेर्ग्गौः पुनीयान्नो[१] महीधरपदाश्रया ।
यद्दुग्धमुपजीवन्ति कवयस्तर्ण्णकाइव ॥ ७ ॥

(भा.दी.) श्रीमदानन्दतीर्थानामभिमत्या वाल्मीकिरामायणस्य तात्पर्यार्थं वक्तुं प्रवृत्तो[२] नारायणपण्डिताचार्य-स्तद्रामायणरूपवाचं प्रार्थयते– **वाल्मीके**रिति । कवयः ज्ञानिनः यद्दुग्धं यस्या वाल्मीकिवाचो दुग्धं साररूपं क्षीरं तत्, वाल्मीकिरामायणतात्पर्यार्थमित्यर्थः । तर्णकाइव सद्योजातवत्साइव । 'सद्योजातस्तु तर्णकः' इत्यमरः । उपजीवन्ति अनुसृत्य जीवन्ति, श्रीरामचरितं यद्बलात् ज्ञात्वा काव्यादिकं कुर्वन्तीत्यर्थः । जीव प्राणधारणे लट् । महीं भूमिं धरतीति महीधरः सर्वजगद्धारकः श्रीरामरूपी हरिस्तस्य पदं पादः, पद्यते ज्ञानिभिर्ज्ञायत इति पदं स्वरूपं वा । तदाश्रयो यस्याः सा तथोक्ता । 'पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः । श्लेषार्थे तु महीधरः पर्वतस्तस्य पदं कटकादिस्थानमाश्रयो यस्याः सा तथोक्ता । वल्मीकादुत्पन्नो वाल्मीकिस्तस्य । रामायणग्रन्थरूपा गौः वाक् । 'दिग्-दृष्टि-दीधिति-स्वर्ग-वज्र-वाग्-बाण-वारिषु । भूमौ पशौ च गोशब्दः' इति हलायुधः । वः युष्मान् पुनीयात् पवित्रीकुर्यात् । पूञ् पवने लिङ् ॥ ७ ॥

१. '**पुनीयाद् वो–**' इति वि.ती.पाठः ।   २.'**प्रवृत्ता..चार्या..प्रार्थयन्ते**'

(सं.चं.) मूलग्रन्थकर्तारं स्मरति– वाल्मीकेः । गौरिति माहेयी । गौरिति वाणी । महीधरो नारायणः । मही हि तस्य महिळा रजोमानिनी । महीं च धत्ते वराहो भूत्वा । 'महीधरो महाभागः' इति विष्णुसहस्र-नामसु । तत्पादसङ्गिनी वाल्मीकिवाणी । क्षत्रियो भूत्वा महीं पालयामासेति रामोऽपि महीधरः । माहेयी च घासार्थं पर्वतप्रत्यन्तचारिणी । दुग्धं पयस्तुल्यमर्थजातम् । तर्णकाइव, वत्साइव । 'वत्सस्तु तर्णकः' इति वैजयन्ती । समस्तं चेदं पदम् । 'इवेन सह समासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम्' इति वार्तिकात् (अ.सू.२.२.१८) ॥ ७ ॥

एको नारायणोऽग्रेऽभूत् पूर्णागण्यगुणार्णवः ।
आत्मारामोऽपि रमया रममाणोऽभिरामया ॥ ८ ॥

(भा.दी.) एवं स्वेष्टदेवतागुरुवन्दनादिकं विधाय श्रीरामस्य चरित्रं वर्णयितुकामस्तदुपयुक्ततया सूर्यवंशं सङ्क्षेपतो वर्णयितुमुपोद्घातसङ्गत्याऽऽदिसृष्टिं वक्तुं श्रीनारायण एव सर्वस्याप्यादिकारणं नान्य इत्यभिप्रायेण तस्य सर्गाद्यकालेऽवस्थितिमाह– **एक** इति । पूर्णा निरवधिकाः, अगण्याः गणयितुमशक्याः, ये गुणाः ज्ञाना-नन्दादयस्तैरर्णव इवार्णवः । एकः नारायणः । नारा आपः अयनमाश्रयो यस्य स तथोक्तः । 'आपो नारा इति प्रोक्ता आपो वै नरसूनवः । अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः' इत्युक्तेः । आत्मारामः आत्मना स्वस्वरूपसुखेन आ सम्यक् रमत इति तथोक्तः । अपि तथाऽपि । अभिरामया मनोहरया रमया लक्ष्म्या रममाणः सन् क्रीडन् सन् । स्वयं स्वरमणत्वेन परानपेक्षोऽपि लक्ष्म्यां विद्यमानानुग्रहातिशयेन तया सह क्रीडन् सन्निति भावः । अग्रे आदिकाले । 'पुरोऽधिकमुपर्यग्राणि' इत्यमरः। अभूत् अवर्तत । भूसत्तायां लुङ् ॥८॥

(सं.चं.) अथ कथां प्रस्तौति– एकः । 'नारायणो वा इदमग्र आसीत्' इति श्रुतिः । 'लक्ष्मीभुजान्तरगतः स्वरतोऽपि चाग्रे' इति चाऽचार्यवचनम् ॥ ८ ॥

निद्रामुद्राविलसितं भुक्त्वा विश्वमधीश्वरम् ।
तमवन्दन्त वेदान्ता नरेन्द्रमिव वन्दिनः[1] ॥ ९ ॥

(भा.दी.) **निद्रे**ति । वेदान्ता उपनिषदः । विश्वं जगत् । 'विश्वं जगति सर्वस्मिन्' इति वैजयन्ती । भुक्त्वा संहृत्य । निद्रैव योगनिद्रैव मुद्रा चिह्नमात्रं[2] तया विलसितं विराजितम् । अधिकश्चासौ ईश्वरश्च तं हरिम् । वन्दिनः प्रबन्धस्तुतिपाठकाः नरेन्द्रमिव अवन्दन्त अस्तुवन् । वदि अभिवादनस्तुत्योः लङ् ॥ ९ ॥

१. **'बन्दिनः'**
२. **'निद्राया मुद्रा चिह्नम्, निमीलितनेत्रत्वादिकम्'** इति का.श्री.टीका।

(सं.चं.) विश्वं भुक्त्वा जठरे निधाय । भोजनान्ते निद्राणमनुकुर्वाणमिव निद्रामुद्राविलसितम् । नाट्यमुद्रेव च निद्रामुद्रा । निद्रामुद्राणां नेत्रनिमीलनादीनामनुकरणमात्रम् । न वास्तवी निद्रेत्यर्थः । वेदान्ताः । अन्त-शब्दः स्वरूपवचनः । वेदरूपा मन्त्राः । तन्मानिनी स्वयं प्रकृतिः । 'श्रीर्भूमिरिति रूपाभ्यां प्रकृतिर्विष्णुना सह । शेते श्रुतिस्वरूपेण स्तौति ब्रह्मलये हरिम्' इति हि स्मरन्ति । प्रळये तं श्रुतिगीताभिरवन्दन्त तुष्टुवुरित्यर्थः । कुतः? अधीश्वरत्वात् । प्रकृतेरपीश्वरो हि सः ॥ ९ ॥

कृतकृत्योऽपि भक्तानां भूतये भगवानयम् ।
सिसृक्षति स्म सकलं [1]सुरासुरनरादिकम् ॥ १० ॥

(भा.दी.) उपनिषद्भिः स्तुतिपूर्वकं सृज्यवर्गस्य सृष्टिः कर्तव्येत्यर्थितेन हरिणा स्वप्रयोजनाभावात् किमुपेक्षा कृता, नेत्याह– **कृते**ति । भग इति षड्गुणानां सञ्ज्ञा । 'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञान-वैराग्ययोश्चैव षण्णां भग इतीरणा' इत्युक्तेः । भगोऽस्यास्तीति भगवान् । 'तदस्यास्त्यस्मिन्निति मतुप्' (अ.सू.५.२.९४) । 'मादुपधायाश्च मतोर्वोऽयवादिभ्यः'(अ.सू.८.२.९) इत्यवर्णान्ताद् भगशब्दात् परस्य मतुपो मकारस्य वकारादेशश्च । अयं श्रीहरिः कृतं कृत्यं स्वप्रयोजनं येन स तथोक्तः । अपि तथाऽपि । भक्तानां ब्रह्मादीनां भूतये स्वरूपानन्दाविर्भावलक्षणसम्पदर्थम् । 'विभूतिर्भूतिरैश्वर्यम्' इत्यमरः । सुराः ब्रह्मादयस्ते च असुराश्च नराश्च त एव आदयो यस्य तथोक्तं तत् । 'शेषाद् विभाषा' (अ.सू.५.४.१५४) इति बहुव्रीहौ कप् । सकलं जगत् सिसृक्षति स्म स्रष्टुमैच्छत् । सृज विसर्गे लट् । तथाच 'सोऽयं विहार इह मे तनुभृत्स्वभावसम्भूतये भवति भूतिकृदेव भूत्याः' इत्युक्तेर्भगवतः स्वप्रयोजनाभावेऽपि सृष्ट्यादिके कृते सति (जीवाः) स्वस्वयोग्यसाधनसम्पत्त्या स्वस्वयोग्यमोक्षं प्राप्नुवन्त्यन्यथा तत्साधनाभावात् तेषां मोक्षो न स्यादित्यतः परप्रयोजनमुद्दिश्यैव भगवतः केवलं कृपापारवश्यादेव प्रवृत्तिरिति भावः ॥ १० ॥

(सं.चं.) कृतकृत्योऽपीति । 'स्वानन्दतुष्टवपुषोऽपि रमारमस्य । भूत्यै निजाश्रितजनस्य हि सृज्यसृष्टावीक्षा बभूव' इति भगवत्पादवचनम् ॥ १० ॥

वासुदेवोऽभवद् देवो मायया प्रियया युतः ।
सर्वमुर्वारुकमिव मोचयेद् यो निबन्धनात् ॥ ११ ॥

---

१. 'सकलं देवासुरनरादिकम्'

(भा.दी.) तत्र भगवत्स्वरूपाणामाविर्भावलक्षणसृष्टिमाह– **वासुदेव** इत्यादिना । देवः क्रीडादिगुणविशिष्टः श्रीहरिः मायया मायाख्यया प्रियया भार्यया युतः युक्तः, वसतीति वासुः, दीव्यतीति देवः, वासुश्चासौ देवश्च वासुदेवः, वासुदेवनामकः सन्नित्यर्थः । अभवत् प्रादुरभूत् । भू सत्तायां लङ् । तथाहि हरिवंशे नामनिर्वचनम्– 'वसनाद् देवनादेव वासुदेवेति शब्दितः' इति । अवतारकृत्यं सदृष्टान्तमाह–**सर्वमि**ति । यः वासुदेवः सर्वं मोक्षयोग्यं चेतनजातं तत्, नितरां बन्धनं निबन्धनं तस्मात् अनादिकालमारभ्य बन्धनभूतात् संसारादित्यर्थः । निबद्ध्यते फलमनेनेति निबन्धनं वृन्तं तस्मात् उर्वारुकमिव उर्वारुकपक्वमिवेति निबन्धनपदस्याऽवृत्त्या योज्यम् । 'इवेन नित्यसमासो विभक्त्यलोपश्च'[१] (अ.सू.२.२.१८) इत्युक्तेर्नित्यसमासोऽयम् । मोचयेत् मोचनं कुर्यात् । मुच्लृ मोचने लिङ् ॥ ११ ॥

(सं.चं.) चतुर्मूर्तेर्भगवत आद्या मूर्ती रामो बभूव । अपरास्तिस्रस्त्रिषु रामभ्रातृषु सन्निहिता अभवन्निति वक्ष्यति । कास्ताश्चतुर्मूर्तय इतीदानीमाह । तत्राप्यादौ निजमुक्तिपदप्रदं प्रथमं वासुदेवरूपमाह । यदा नारायणो वासुदेवो बभूव तदा रमाऽपि माया बभूव । 'उर्वारुकमिव बन्धनात्' इति श्रुतिः । उर्वारुकम्– 'ꣳ' इति भाषायाम् । सर्वं सात्विकं जनम् । नियतं बन्धनं निबन्धनं संसाराख्यम् । नीचं बन्धनं निबन्धनम् । दुःखबहुलत्वात् । नितरां बन्धनं निबन्धनम् । अनादित्वात् । योनिबन्धनादिति वा । योनिरूपं बन्धनम्, योनेर्वा बन्धनम्, तस्मात् । 'योनेः शरीरम्' (३.१.२८) इति वेदान्तसूत्रम् ॥ ११ ॥

सङ्कर्षणाख्यः संहारी जयाजानिरजन्यसौ ।
यत्रोरुज्वलनज्वाले जगदाज्यकणायितम् ॥ १२ ॥

(भा.दी.) समिति । असौ श्रीहरिः । संहर्तुं शीलं यस्याऽसौ संहारी । 'सुप्यजातौ णिनिस्ताच्छील्ये' (अ.सू.३.२.७८) इति णिनिः । ननु 'ताच्छीलिकणिनेः सुबुक्तिः प्रादिनिवृत्त्यर्था' इत्युक्तेः कथमेतदितिवाच्यम् । वैयाकरणैरेव तस्य निरस्तत्वात् । [२]प्रसिद्धश्च प्राद्युपपदत्वेऽपि णिनिः–'स बभूवोपजीविनाम्', 'अनुयायिवर्गः' इत्यादौ । यद्वा संहरणं संहारः सोऽस्यास्तीति संहारी । मत्वर्थे 'अत इनिठनौ' (अ.सू.५.२.११५) इतीनिः । संहारकर्तेत्यर्थः । 'नच 'एकाक्षरात् कृतो जातेः सप्तम्यां च न तौ स्मृतौ' इति निषेधादिनिप्रत्ययोऽपि कथं स्यादिति वाच्यम् । वैय्याकरणैरेव तस्य प्रायिकत्वाभ्युपगमात् । यद्वा 'बहुलमाभीक्ष्ण्ये' (अ.सू.३.२.८१)

१. **'इवेन सह समासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम्'** इति वार्तिकपाठो जयादित्यसम्मतः (अ.सू.२.२.१८) ।

२. **'सुपीति वर्तमाने पुनः सुब्ग्रहणमुपसर्गव्यावृत्त्यर्थम्'** इति काशिकाकारः । वार्तिकेऽप्येवम् । अत आह– प्रसिद्धश्चेति । अत्र भट्टोजिमनुसरति टीकाकारः । तथाहि तद्वचनम्– **'प्रसिद्धश्चोपसर्गेऽपि णिनिः । स बभूवोपजीविनाम् । अनुयायिवर्गः । पतत्यधो धाम विसारि । न वञ्चनीयाः प्रभवोऽनुजीविभिरित्यादौ'** इति ।

इत्याभीक्ष्ण्ये णिनिः । जया जयाख्या जाया भार्या यस्य स जयाजानिः । जायायाः 'जायाया निङ्' (अ,सू.५.४.१३४) इति निङादेशे सति, 'लोपो व्योर्वलि'(अ.सू.६.१.६६) इति यलोपश्च । सं सम्यक् कर्षति संहरतीति सङ्कर्षणः, सङ्कर्षण इत्याख्या यस्य स तथोक्तः सन् अजनि प्रादुर्भूतः । जनि प्रादुर्भावे लुङ् । संहर्तृत्वमेवोपपादयति– **यत्रे**ति । उरुरुत्कृष्टो यो ज्वलनोऽग्निस्तस्य ज्वालेव ज्वाला यस्य स तथोक्तस्तस्मिन् यत्र यस्मिन् सङ्कर्षणे । जगत्, गच्छति नश्यतीति कर्त्रर्थे 'द्युति-गमि-जुहोतीनां द्वे च' (अ.सू.३.१.१७८) इति वार्तिकेन क्विपि द्वित्वादिके सति निष्पन्नेन जगच्छब्देन कार्यजातमुच्यते। आज्य-कणायितम्, आज्यस्य घृतस्य कणो बिन्दुः । तद्वदाचरतीति तथोक्तम् ॥ १२ ॥

(सं.चं.) अथ संहारकारणं द्वितीयं रूपमाह– सङ्कर्षणाख्यः । तदा रमा जया भूत्वा तस्य जाया बभूव ॥ १२ ॥

कृतिप्रकृतिरप्यासीत् प्रद्युम्नः सर्वसृष्टये ।
अवैकृतोऽप्राकृतोऽपि चित्रं चरितमीशितुः ॥ १३ ॥

(भा.दी.) **कृती**ति । श्रीहरिः विकृतं विकारः, 'नपुंसके भावे क्तः' (अ.सू.३.३.११४) इति क्तः । विकृतमेव वैकृतम् । प्रज्ञादित्वात् स्वार्थेऽण् । न विद्यते वैकृतमुत्पत्तिविनाशादिविकारो यस्याऽसौ अवै-कृतः । प्राकृतं प्रकृतिविकारः गुणत्रयादि । 'तस्य विकारः' (अ.सू.४.३.१३४) इत्यण् । न विद्यते प्राकृतं प्रकृतिकार्यं सत्त्वादि यस्य सोऽप्राकृतः । अपि तथाभूतोऽपि, जन्मादिकारणीभूतप्रकृतिप्राकृतसम्बन्ध-रहितोऽपीत्यर्थः । कृतिः कृतिनाम्नी प्रकृतिर्महालक्ष्मीर्यस्य स तथोक्तः । महालक्ष्म्यवतारभूतकृत्याख्यभार्ययोपेत इत्यर्थः । प्रकृष्टं द्युम्नं पराक्रमो यस्य स तथोक्तः । प्रकृष्टं द्युम्नं धनं यस्य स तथेति (वा) । 'पराक्रमे धने द्युम्नम्' इति वैजयन्ती । सर्वसृष्टये, सर्वस्य स्रष्टुं योग्यस्य सृष्टिस्तस्यै आसीत् । अस भुवि लङ् । न तु लुङ् । लुङादौ 'अस्तेर्भूः' (अ.सू.२.४.५२) इति भू इत्यादेशविधानात् । ननु शरीरमात्रस्य प्राकृतत्वविकारित्वनियमात् तत्सम्बन्धरहितस्य वासुदेवादिरूपेण कथं प्रादुर्भाव इत्यत आह– **चित्रमि**ति । ईशितुः सर्वसमर्थस्य श्रीहरेः चरितं प्रादुर्भावादिलक्षणं चरित्रं चित्रमलौकिकम् । तथाच तस्य स्वतन्त्रत्वेनाचिन्त्यशक्तित्वादन्यत्रैवं नियमेऽपि तच्छरीरे नैतच्छङ्कावकाश इति भावः ॥ १३ ॥

(सं.चं.) सृष्टिकारणं तृतीयं रूपमाह– प्रद्युम्नः सर्वसृष्टये । तदा चित्प्रकृतिस्तस्य जाया कृतिर्बभूव । अवैकृतोऽप्यजनि । अप्राकृतोऽपि प्रकृतिजानिः ॥ १३ ॥

शान्तिकान्तोऽनिरुद्धोऽथ जगतः स्थितयेऽभवत् ।
एवं पञ्चात्मनोऽप्यस्य पञ्चत्वं नातिशङ्क्यताम् ॥ १४ ॥

(भा.दी.) शान्तीति । अथ प्रद्युम्नावतारानन्तरम्, श्रीहरिः शान्तिः शान्तिनाम्नी कान्ता भार्या यस्य स तथोक्तः । शान्तेः कान्तो भर्तेति वा । अनिरुद्धः, न निरुद्ध्यते शत्रुभिरित्यनिरुद्धनामकः सन्, जगतः चेतनाचेतनात्मकजगतः स्थितये पालनाय अभवत् अवतीर्णः । भू सत्तायां लङ् । प्रादुर्भूतानामेषां नाशोऽस्ति किम्? नेत्याह– **एवमि**ति । पञ्चात्मनः मूलरूपेण सह पञ्च आत्मानो रूपाणि यस्य स तथोक्तस्तस्य । 'आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च' इत्यमरः । अपिरभिव्याप्तौ । पञ्चरूपवतोऽपीत्यर्थः । अस्य हरेः पञ्चानां पृथिव्यादिपञ्चमहाभूतानां भावः पञ्चत्वं मरणमित्यर्थः । 'मरणं पञ्चत्वमत्ययः कालः' इति हलः । तत् नातिशङ्क्यतां सर्वथाऽपि न शङ्क्यताम् । शकि शङ्कायां लोट् ॥ १४ ॥

(सं.चं.) अथ स्थितिहेतुं चतुर्थं रूपमाह– शान्तिकान्तः । शान्तिरस्य कान्ताऽभवत् । कान्तश्चायं शान्तेः । 'पञ्चत्वं मरणं मृत्युः' इति यादवप्रकाशः ॥ १४ ॥

दशात्मा द्वादशात्माऽऽसीत् शतं दशशती च सः ।
एकोऽप्यनन्तश्चित्रं तद्योगैश्वर्य्यविजृम्भितम् ॥ १५ ॥

(भा.दी.) दशेति । सः श्रीहरिः एकोऽपि, (दशात्मा) दश आत्मानः स्वरूपाणि यस्य स तथोक्तः, मत्स्यादिदशरूप इत्यर्थः, आसीत् । अस भुवि लङ् । द्व्यधिका दश द्वादश, 'द्व्यष्टनः सङ्ख्यायामबहुव्रीह्यशीत्योः' (अ.सू.६.३.४७) इति द्विशब्देकारस्याकारादेशः । द्वादश आत्मानः स्वरूपाणि यस्येति तथोक्तः । केशवादिद्वादशरूप इत्यर्थः, आसीत् । शतं नारायणादिशतरूप इत्यर्थः, आसीत् । दशानां शतानां समाहारो दशशती । 'द्विगोः' (अ.सू.४.१.२१) इति ङीप् । विश्वादिसहस्ररूप इत्यर्थः, आसीत् । सः हरिः न विद्यते अन्तोऽवसानं सङ्ख्यातो यस्येत्यनन्तः, अजितादिरूपेणापरिमितसङ्ख्याकश्चेत्यर्थः, आसीत् । ननु परमार्थत एकस्वरूपस्य दशद्वादशादिरूपवत्त्वं विरुद्धमित्यतः किमनिर्वाच्यमायाकल्पितमिदम्? नेत्याह– **चित्रमि**ति । तस्य विष्णोर्योगैश्वर्यं योगसामर्थ्यम्, तस्य विजृम्भितं विकासः, प्रकटनमिति यावत् । चित्रमाश्चर्यभूतम् । तथाच परमार्थत एकस्वरूपस्यापि परमार्थत एव बहुरूपत्वमपि विष्णुस्वरूपभूतपारमार्थिका-चिन्त्यशक्तिविलासाद् युज्यते । ननु ब्रह्मव्यतिरिक्तानिर्वाच्यमायाशक्त्या । तत्र प्रमाणाभावात् । एवंविधविरुद्धार्थघटनार्थं ह्यनिर्वाच्यमाया कल्प्यते कैश्चित्, तस्याश्च पारमार्थिकब्रह्मरूपभूतशक्त्यैवोपपत्तौ

न तदतिरिक्तानिर्वचनीयमायाकल्पनासम्भावनाऽप्यस्ति । श्रुत्यादयश्चाचिन्त्यविष्णुशक्तित्वेनैवोपपन्ना इति भावः ॥ १५ ॥

(सं.चं.) चित्रमनीश्वराणाम् । भगवतस्तु न चित्रम् । योगैश्वर्यात् । तस्य योगैश्वर्यम् । तदिति भिन्नं वा पदम् । तद् एकस्याप्यनन्तरूपत्वम् । ज्ञाने कर्मणि च सर्वसमर्थता योगैश्वर्यम् । सर्वज्ञता सर्वकर्तृता च । योगेश्वरं हि कृष्णमामनन्ति– 'यत्र योगेश्वरः कृष्णः' इति । विजृम्भितं लीला ॥ १५ ॥

ज्ञानानन्दस्वतन्त्रत्वविश्वैश्वर्य्यादयो गुणाः ।
अत्रैगुण्यस्य चागण्याः सर्वे गात्रीभवन्ति हि ॥ १६ ॥

(भा.दी.) ननु प्रकृतितत्कार्यसम्बन्धरहितस्य कथं वासुदेवाद्यवतारेष्वतिसुन्दरशरीरेन्द्रियादिकमित्यत आह– **ज्ञाने**ति । ज्ञानं च, आनन्दश्च, स्वतन्त्रस्य भावः स्वतन्त्रत्वं तच्च, विश्वं परिपूर्णं यदैश्वर्यं तच्च, तानि आदयो येषां ते तथोक्ताः । 'पुंस्यादिः पूर्वपौरस्त्यप्रथमाद्या अथास्त्रियाम्' इत्यमरः । गणयितुं सङ्ख्यातुं योग्या गण्याः । गण्या न भवन्तीत्यगण्याः, सङ्ख्यातुमशक्या इत्यर्थः । सर्वे गुणा ज्ञानशक्त्यादयो धर्माः । त्रयश्च ते गुणाश्च त्रिगुणाः, त्रिगुणा एव त्रैगुण्यम् । 'चतुर्वर्णादिभ्यः स्वार्थे ष्यञ्'[1] इति चतुर्वर्णादिराकृतिगणत्वेन स्वार्थे ष्यञ् । न विद्यते त्रैगुण्यं यस्येति तथोक्तस्तस्य । चोऽप्यर्थे । सत्वरजस्तमोलक्षणत्रिगुणसम्बन्धरहितस्यापीत्यर्थः । गात्रीभवन्ति हि शरीराणि भवन्ति हि । अभूततद्भावे च्विः । वासुदेवाद्यवताररूपाणि भवन्ति हीत्यर्थः । भू सत्तायां लट् । हिशब्देन 'सद्देहः सुखगन्धश्च ज्ञानभाः सत्पराक्रमः । ज्ञानज्ञानः सुखसुखः स विष्णुः परमाक्षरः' इत्यादिश्रुतिप्रसिद्धिरुक्तार्थे दर्शिता ॥ १६ ॥

(सं.चं.) विश्वैश्वर्यं सर्वनियामकत्वम् । विश्वस्य तेन सानाथ्यम् । लोके किल गुणा गात्रे भवन्ति । अस्य तु गात्रीभवन्ति । अन्यत्राभूतस्य तस्मिन् भावश्च्वेरर्थः ॥ १६ ॥

क्लेशो नाशश्च वैवश्यं जन्मादिरपरोऽपि वा ।
नाऽदीनवोऽस्त्यदीनस्य तस्य क्वापि कथञ्चन ॥ १७ ॥

(भा.दी.) चिदानन्दात्मकशरीरत्वादेव क्लेशादिकमपि नाऽशङ्कनीयमित्याह– **क्लेश** इति । दीयते क्षीयत इति दीनः, दीनो न भवतीत्यदीनस्तस्य, अक्षीणस्येत्यर्थः । सर्वदैकप्रकारस्येति यावत्[2] । तस्य हरेः, क्लेशो

---

१. **'चातुर्वर्ण्यादीनां स्वार्थ उपसङ्ख्यानम्'** इति वार्तिकम् (अ.सू.५.१.१२४) । २. **'निर्दोषस्येति यावत्'**

दुःखम्, नाशो मृत्युः । 'नाशः पलायने मृत्यौ' इति वैजयन्ती । विवशस्य भावो वैवश्यम्, पराधीनत्वमित्यर्थः । जन्म जननमादिर्यस्य स तथोक्तः । अपरः अन्योऽपि वा । आदीनवः दोषः । 'दोष आदीनवः प्रोक्तः' इत्यभिधानम्[१] । क्वापि देशे काले वा । कथञ्चन केनापि निमित्तेन, स्वतो वा कर्मादिनिमित्तेन वेत्यर्थः, नास्ति ॥ १७ ॥

(सं.चं.) अपरोऽपि वा आदीनवस्तस्य नास्ति । 'दोषे त्वादीनवाश्रवौ' इत्यभिधानम् । कथमादीनवः? आदीनं दैन्यम् । दीङ् क्षये । आदीनं वाति गच्छत्यनेनेति । आशां द्यति इष्टं न वापयतीति वा । आदीनं सन्तं वाजयति विधूनयति वा । 'वा गतौ' इत्यस्य विधूननेऽर्थे जुक् । 'वो विधूनने जुक्' (७.३.३८) इति पाणिनिः । अत एव निर्वचनसाम्याद् रोषं क्लेशं च केचिदादीनवमाहुः । कुतो दोषो नास्ति? अदीनत्वात्, सदाऽप्यक्षीणगुणपूर्णत्वात् । दोषो हि दैन्यं जनयति ॥ १७ ॥

वेदवेदान्तसहिताः सपुराणेतिहासकाः ।
पञ्चरात्रसुतर्काद्या एतेष्वर्थेषु साक्षिणः ॥ १८ ॥

(भा.दी.) किमत्र प्रमाणमित्याशङ्कायामतीन्द्रिये भगवत्यसहायशूर आगम एव प्रमाणमित्याह– वेदेति । वेदा ऋगादयस्ते च, वेदान्ता उपनिषदस्ते च । तैः सहिताः, पुराणानि भागवतादीनि तानि च, इतिहासो भारतं स च, तैः सहिताः सपुराणेतिहासकाः । पञ्चरात्रं पञ्चरात्राख्यो मूलरूपिणा श्रीनारायणेन कृतः श्रुतिव्याख्यानात्मकः स च, एवं सुतर्को मूलरूपिणा श्रीनारायणेनैव कृतो ब्रह्मतर्काख्यः स च पञ्चरात्रसुतर्कौ, तौ आद्यौ प्रधानौ येषां ते तथोक्ताः । 'आद्यो मुख्ये धातृपूर्वेषु' इति वैजयन्ती । सर्वे सम्बद्धाः, एतेषु उक्तेषु अर्थेषु, (ये) हरेः क्लेशराहित्यादयोऽर्थास्तेषु, साक्षिणः साक्षिभूताः, उक्तार्थप्रतिपादका इत्यर्थः । वेदवेदान्तादिसकलसच्छास्त्रेषु विष्णोर्निर्दोषत्वविशिष्टगुणपूर्णत्वप्रतिपादनादिति भावः ॥ १८ ॥

(सं.चं.) वेदान्ता ब्रह्मसूत्राणि । इतिहासः महाभारतं मूलरामायणं च । वेदार्थनिर्णायको ब्रह्मतर्कः सुतर्कः ॥ १८ ॥

अव्यक्तोऽव्यक्तमसृजद् गुणान् विषमतां नयन् ।
महान्तमप्यहङ्कारं त्र्याख्यं भूतेन्द्रियामरान् ॥ १९ ॥

---

१. **'दोष आदीनवो मत इत्यभिधानम्'** इति वि.तीर्थश्रीनिवासाचार्यौ । अर्वाचीनास्तु रोषमादीनवं पठन्ति । क्लेशमपरे ।

(भा.दी.) भगवदवताराणां प्रादुर्भावलक्षणस्वरूपसृष्टिमभिधाय सदैवतानां चतुर्विंशतितत्वानामण्डात्[1] प्राक् सृष्टिमाह– **अव्यक्त** इति । व्यक्तो न भवतीत्यव्यक्तः । स्वानुग्रहमन्तरेणानपरोक्ष इत्यर्थः । श्रीहरिः, गुणान् सत्वरजस्तमोगुणान्, विषमस्य भावो विषमता ताम् । 'तस्य भावस्त्वतलौ' (अ.सू.५.१.११९) इति भावार्थे तल् । तदन्तशब्दस्य 'त्वान्तं क्लीबं तलन्तं स्त्रियाम्' इति वचनात् स्त्रीलिङ्गता । नयन् प्रापयन् सन् । गुणत्रयमद्ध्ये रजोगुणस्याधिक्यावस्थां प्रापयन्नित्यर्थः । गुणानां साम्यावस्था प्रळयो नाम । तेषां मद्ध्ये एकैकस्य वैषम्यावस्थायां सृष्ट्यादयो भवन्तीत्येतेन विषमतां नयन्नित्युक्तम् । अव्यक्तं जडप्रकृतिस्तत् असृजत् । सृष्ट्याद्यभिमुखमकरोत् । सृज विसर्गे लङ् । तत इति शेषः, ततः अव्यक्ततत्वात् महान्तं महत्तत्वमसृजत् । ततः महत्तत्वात्, तिस्रः वैकारिकस्तैजसस्तामस इत्याख्या नामानि यस्य स तम्, अहङ्कारम् अहङ्कारतत्वमपि असृजत् । ततस्त्रिविधाहङ्कारात् भूतानि पृथिव्यादिपञ्चमहाभूतानि तानि च, इन्द्रियाणि ज्ञानेन्द्रियकर्मेन्द्रियभेदेन दशेन्द्रियाणि तानि च, अमरा भूतेन्द्रियाभिमानिनो देवास्ते च, तान् असृजत् इति सम्बन्धः । पञ्चमहाभूतानि तामसाहङ्कारात्, मनोव्यतिरिक्तदशेन्द्रियाणि तैजसाहङ्कारात् , मनोलक्षणेन्द्रियं तत्वाभिमानिनां देहांश्च[2] वैकारिकाहङ्कारादिति विभागो द्रष्टव्यः । 'महत्तत्वादहङ्कारं ससर्ज शिवविग्रहम् । दैवान् देहान् मनः खानि खं च स त्रिविधात् ततः' इति स्वेनैवान्यत्र[3] स्पष्टमभिधानात् ॥ १९ ॥

(सं.चं.) अव्यक्तो भगवानव्यक्तं प्रधानमसृजत् । कथं नित्यस्य सृष्टिः? गुणसाम्यं हि प्रळयः । गुणवैषम्येण च सृष्टिः । त्रिगुणात्मकस्य प्रधानस्य गुणवैषम्येण रजसि सृष्ट्युन्मुखः कम्प एव प्रधानस्य सृष्टिः । महान्तं महत्तत्वशरीरं महत्तत्वमानिनं चतुर्मुखम् । अहङ्कारमानिनं शिवम् । अहङ्कारस्य गुणभेदेन तिस्र आख्याः । त्रीणि रूपाणि । तामसाहङ्कारो राजसाहङ्कारः सात्विकाहङ्कारश्चेति । चरमो वैकारिक इति चोच्यते । तामसाहङ्कारेण साभिमानिनां खादीनां पञ्चभूतानां सृष्टिः । राजसाहङ्कारेण ज्ञानकर्मणोरिन्द्रियाणि दश । वैकारिकाहङ्कारेण मनस इन्द्रियस्य, इन्द्रियमानिनामिन्द्रादीनाममराणां च देहसृष्टिः ॥ १९ ॥

सदैवतानि तत्वानि तानि सर्वाणि यत्नतः ।
अण्डसृष्टावपाण्डित्याच्छार्ङ्गिणं शरणं ययुः ॥ २० ॥

(भा.दी.) सदैवतानां चतुर्विंशतितत्वानां सृष्टत्वादण्डसृष्टिस्तेभ्य एव जाता किमित्यत आह– **सदैवतानी**ति । सदैवतानि, दैवतैः अभिमानिदेवताभिः सहितानि सर्वाणि तानि हरिसृष्टानि तत्वानि महदादीनि

१. **'–मण्डात् ब्रह्मसृष्टि–'** २. **'तत्वाभिमानिनो देवांश्च'** ३. अन्यत्र मणिमञ्जर्याम् (१.३) ।

तत्वानि । यत्नादिति यत्नतः, यत्नं कृत्वाऽपीत्यर्थः । अण्डसृष्टौ ब्रह्माण्डस्य सृष्टौ । पण्डितस्य समर्थस्य भावः पाण्डित्यम् । 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' (अ.सू.५.१.१२४) इति भावे ष्यञ् । न पाण्डित्यमपाण्डित्यं तस्मात् । असामर्थ्यादित्यर्थः । शार्ङ्गोऽस्यास्तीति शार्ङ्गी तम्, श्रीहरिं शरणं ययुः । या प्रापणे लिट् ॥ २० ॥

(सं.चं.) स्वप्रयत्नतः सृष्टावपाण्डित्यादसामर्थ्यात् । तत्वानि शरणं ययुरित्यालङ्कारिकं वचः । तत्वमानीनि दैवतानि शरणं ययुः ॥ २० ॥

आत्माविष्टैर्व्यधात् तत्वैः स आयतनमीदृशम् ।
परिपूर्णस्य नाथस्य करुणैवात्र कारणम् ॥ २१ ॥

(भा.दी.) अण्डसृष्टिमाह– **आत्मेति** । सः श्रीहरिः, आत्माविष्टैः, आत्मना स्वात्मना आविष्टानि प्रविष्टानि तैः, तत्वैः महदादितत्वैः, ईदृशं ब्रह्माण्डात्मकम् आयतनं देवानामावासस्थानम् । 'आयतनं देवानामन्येषां धनवतां हर्म्यम्' इति हलः । व्यधात् चकार । डु धाञ् धारणपोषणयोर्लुङ् । ननु श्रीहरिः सृष्ट्यादिकं प्रयोजनमुद्दिश्य करोत्यनुद्दिश्य वा? न द्वितीयः । 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति न्यायात् प्रयोजनानुद्देशे यत्किञ्चिद्विषयकप्रवृत्तेरेवायोगात् । प्रयोजनोद्देशे तु प्रयोजनस्य पूर्वमभावादपूर्णत्वप्रसङ्ग इत्याशङ्क्याऽह– **परिपूर्णस्येति** । परितः सर्वतः पूर्णस्य पूर्णकामस्य । तत्र हेतुः– **नाथस्येति** । सर्वाधीश्वरस्येत्यर्थः, श्रीहरेः, अत्र ब्रह्माण्डादिनिर्माणे करुणैव ब्रह्मादिषु विद्यमाना दयैव कारणं निमित्तम्, नत्वन्यत् प्रयोजनम् । सर्वदेशकालेषु सकलाभीष्टैः पूर्णस्य श्रीहरेः स्वप्रयोजनाभावेऽपि केवलं कृपापारवश्याद् ब्रह्माण्डसृष्ट्यादौ प्रवृत्तिरिति भावः ॥ २१ ॥

(सं.चं.) ईदृशं ब्रह्माण्डाख्यं स्वस्य देवतानां चाऽयतनम् ॥ २१ ॥

पुरुषः स [1]सहस्राक्षश्चतुरं चतुराननम् ।
स्रष्टारं सृष्टवान् सोऽपि सुरासुरनरादिकान्[2] ॥ २२ ॥

(भा.दी.) अण्डान्तः सृष्टिमाह– **पुरुष** इति । चतुरः जगत्सर्जने समर्थः । 'चतुरौ दक्षधीमन्तौ' इति वैजयन्ती । सहस्राङ्गः अत्र सहस्रशब्दोऽनन्तार्थकः । सहस्राणि अनन्तानि अङ्गानि शीर्षाद्यवयवा यस्य स

१. **'सहस्राङ्गश्चतुरश्चतु–'** इति वि.ती. सम्मतः पाठः । २. **'सोऽपि देवासुरनरान् व्यधात्'** इति, **'देवासुरनरादिकान्'** इति च क्वचित् ।

तथोक्तः । सहस्राक्ष इति पाठे सहस्राणि अक्षीणि यस्य स तथोक्तः । 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्' (अ.सू.५.४.११३) इति षच् । पूर्षु सर्वप्राणिशरीरेषु शेत इति पुरुषः । 'पूः स्यान्नगरदेहयोः' इति वैजयन्ती । नियमनार्थं सर्वप्राणिदेहेष्ववस्थित इत्यर्थः । सः श्रीहरिः, स्रष्टारं सृष्टिकर्तारम्, चत्वारि आननानि मुखानि यस्य स तथोक्तस्तं ब्रह्माणं सृष्टवान् । सोऽपि चतुर्मुखोऽपि सुराश्च असुराश्च नराश्च ते आदयो येषां ते तथोक्तास्तान् । बहुव्रीहौ कप् । सृष्टवान् ॥ २२ ॥

(सं.चं.) पुनश्चतुर्मुखद्वारा सृष्टिमाह । सहस्राक्षः । उपलक्षणमेतत् । अनन्तशिरआद्यवयवः । सृष्टिकर्मणि चतुरम् । सोऽपि चतुराननोऽपि सुरासुरनरादिकान् सृष्टवान् ॥ २२ ॥

सनकादीन् मुनीन् सृष्ट्वा योगिनोऽतिविरागिणः ।
सृष्टावनुद्यमान् दृष्ट्वा चुक्रोधोरुक्रमप्रियः ॥ २३ ॥

(भा.दी.) क्रुद्ध्यतश्चतुर्मुखाद् रुद्रो जात इति वक्तुं क्रोधनिमित्तमाह–**सनकेति** । उरवः क्रमाः पादविन्यासाः यस्य स उरुक्रमः (विष्णुः), तस्य प्रियः चतुर्मुखः । अत्यन्तं यो विरागः स एषामस्तीति (अतिविरागिणः) तान् । विषयभोगविरक्तानित्यर्थः । योगिनः हरिद्ध्यानपरानित्यर्थः । भक्तिलक्षणमोक्षोपायवत इति वा । 'योगः संनहनोपायध्यानसङ्गतियुक्तिषु' इत्यमरः । मुनीन् मननशीलान् । सनक आदिर्येषां ते सनन्दन-सनत्सुजातसनत्कुमरास्ते तथोक्तास्तान् । सृष्ट्वा, सृष्टौ सर्जनविषये न विद्यते उद्यमः प्रयत्नो येषां ते तथोक्तास्तान्, नैष्ठिकब्रह्मचारिण इत्यर्थः । दृष्ट्वा चुक्रोध । क्रुध कोपे लिट् । प्रजासर्जनार्थं सृष्टान् सनकादीन् तत्रानुद्यमान् दृष्ट्वा कोपो जात इति भावः ॥ २३ ॥

(सं.चं.) उरुक्रमस्य विष्णोः प्रियः पुत्रः । विष्णोरिच्छयैव चुक्रोधेत्येतत् ॥ २३ ॥

क्रुद्ध्यतो ध्यायतस्तस्य ललाटादुदभूत् सुतः ।
योऽभिमानमयो रुद्रः सर्ग्गमार्ग्गमबृंहयत् ॥ २४ ॥

(भा.दी.) ततः किं जातमित्यत आह– **क्रुद्ध्यत** इति । क्रुद्ध्यतः कोपं कुर्वतः, ध्यायतः तच्छान्त्यर्थं हरिध्यानं कुर्वतः, सृष्ट्युद्यमं ध्यायत इति वा । तस्य चतुर्मुखस्य ललाटं ललाटप्रदेशस्तस्मात् सुतः शिवः उदभूदुत्पन्नः । अभिमानेनाहङ्कारेण प्रधानोऽभिमानमयः । 'गर्वोऽभिमानोऽहङ्कारः' इत्यमरः । प्राधान्यार्थे मयट् । 'प्राधान्येऽपीत्येके' इत्युक्तेः । अहङ्कारतत्वाभिमानीत्यर्थः । यः रुद्रः, सर्ग एव यो मार्गस्तम्, अबृंहयत् अपूरयत् । बृहि वृद्धौ लङ् । चतुर्मुखाज्ञया यथेष्टं प्रजासर्जनं चकारेत्यर्थः ॥ २४ ॥

(सं.चं.) अभिमानमयोऽहङ्कारमानी । सर्गस्य मार्गं प्रक्रियाम्, अबृंहयत् विस्तारयामास ॥ २४ ॥

मरीचिमुख्या मुनयः प्राणेभ्यः प्राणिनां गुरोः ।
अजायन्त प्रजावृद्ध्यै बीजानीव वनस्पतेः ॥ २५ ॥

(भा.दी.) प्रजेश्वराणां सृष्टिमाह– **मरीची**ति । मरीचिनामको मुनिः मुख्यः प्रधानो येषां मुन्यादीनां ते तथोक्ताः, मुनयः– 'मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः । भृगुर्वसिष्ठो दक्षश्च दशमस्तत्र नारदः' इति प्रसिद्धा मुनयः । प्राणा एषां सन्तीति प्राणिनस्तेषाम्, समस्तजीवानामित्यर्थः, गुरोः पितुः । 'गुरू गीष्पति-पित्राद्यौ' इत्यमरः । गुरोः हितोपदेष्टुरिति वा, चतुर्मुखात्, प्राणेभ्यः इन्द्रियेभ्यः । 'प्राणस्तु प्रणवे जीवे जीविते परमात्मनि । इन्द्रिये वायुभेदे च' इति वैजयन्ती । वनस्पतिर्वृक्षस्तस्मात् बीजानीव । प्रजानां वृद्धिस्तस्यै । अजायन्त उत्पन्नाः । जनी प्रादुर्भावे लङ् ॥ २५ ॥

(सं.चं.) मरीचिमुख्याः । मरीचिरत्रिरङ्गिराः पुलस्त्यः पुलहः क्रतुर्वसिष्ठो भृगुर्दक्ष इति नव प्रजापतयः । प्राणिनां गुरोर्जनकस्य विद्योपदेष्टुश्च चतुर्मुखस्य प्राणेभ्यः इन्द्रियेभ्यः । 'दक्षोऽङ्गुष्ठात् स्वयम्भुवः । प्राणाद् वसिष्ठः सञ्जातो भृगुस्त्वचि करात् क्रतुः । पुलहो नाभितो जज्ञे पुलस्त्यः कर्णयोरृषिः । अङ्गिरा मुखतोऽ-क्ष्णोऽत्रिर्मरीचिर्मनसोऽभवत्' इति भागवते । तेन प्राणेभ्य इति प्राणोपलक्षितेभ्योऽवयवेभ्यः ॥ २५ ॥

मरीचेः काश्यपो जज्ञे बीजं सर्वजगत्तरोः ।
विवस्वांश्च ततोऽदित्यामरण्यामिव पावकः ॥ २६ ॥

(भा.दी.) तत्र ज्येष्ठपुत्रस्य मरीचेरन्वयमाह– **मरीचे**रिति । मरीचेः मरीचिमुनेः । सर्वं यज्जगद्देवासुर-नरादि तत्तरुरिव तस्य बीजं कारणीभूतः । 'हेतुर्ना कारणं बीजम्' इत्यमरः । काश्यपः काश्यपनामकः पुत्रः जज्ञे । जनी प्रादुर्भावे लिट् । ततः काश्यपात् अदित्याम् अदितिनाम्न्यां भार्यायां विवस्वान् सूर्यश्च अरण्याम् अग्निमथनकाष्ठे । 'निर्मन्थ्यदारुणि त्वरणिर्द्वयोः' इत्यमरः । पावक इव अग्निरिव जज्ञे ॥ २६ ॥

(सं.चं.) मरीचेः काश्यपो जज्ञे । यं मारीचमाहुः । कश्यप इति तस्यैव नामान्तरम् । 'पश्यकः कश्यपो भवति' इति श्रुतिः । काश्यं प्रकाश्यं पातीति काश्यपः । कश्यप एव वा काश्यपः । प्रज्ञादिषु पठनीयम् । 'निर्मन्थकाष्ठमरणिः' इत्यभिधानम् ॥ २६ ॥

श्राद्धदेवाह्वयो देवो मनुः सूनुर्विवस्वतः ।
इक्ष्वाकुमुख्या यत्तन्तौ नरेन्द्रमणयो बभुः ॥ २७ ॥

(भा.दी.) तद्वंशं वर्णयति–**श्राद्धेति** । श्राद्धदेव इति आह्वयो नाम यस्य स तथोक्तः । 'स्यादथाऽह्वयः । आख्याह्वे अभिधानं च' इत्यमरः । देवः क्रीडादिगुणविशिष्टः मनुः, विवस्वतः सूर्यस्य (सूनुः) सुतः अभवत् । यत्तन्तौ यस्य वैवस्वतमनोस्तन्तुः सन्ततिस्तस्मिन् । इक्ष्वाकुर्मुख्यः प्रधानो येषां ते तथोक्ताः, नरेन्द्रा राजान एव मणयः, नरेषु श्रेष्ठाः इत्यर्थः, बभुः अशोभन्त । भा दीप्तौ लिट् ॥ २७ ॥

(सं.चं.) मनुरेतन्मन्वन्तराधिपः । इक्ष्वाकुमुख्याः । अजान्ताः । यत्तन्तौ नरेन्द्रमणयो बभुः । तन्तौ प्रोता हि मणयो भवन्ति । नरेन्द्रमणयोऽपि मनुतन्तुप्रोताः । मणिशब्दः प्रधानवचनश्च । राजश्रेष्ठाः सम्राजः ॥ २७ ॥

हाराणामिव शुभ्राणां भूपानां भूरितेजसाम् ।
सन्तत्यां नायकच्छायो राजा दशरथोऽभवत् ॥ २८ ॥

(भा.दी.) एवं सङ्क्षेपतो वैवस्वतमनोर्वंशं वर्णयित्वा दशरथस्योत्पत्तिमाह– **हारेति** । हाराणामिव हारा मौक्तिकमणिसरास्तेषामिव शुभ्राणां शुद्धानाम् । भूरि बहु तेजः प्रभावो येषां ते तथोक्तास्तेषाम् । 'तेजः प्रभावे दीप्तौ च बले शुक्रेऽपि' इत्यमरः । भूपानां ककुत्स्थप्रभृतिपार्थिवानां सन्ततिर्गोत्रं तस्याम् । 'सन्ततिर्गोत्रजननकुलानि' इत्यमरः । नायकवत् हारमद्धचस्थरत्नवत्, 'हारमद्धचस्थितं रत्नं नायकम्' इति हलायुधः, च्छाया कान्तिर्यस्य स तथोक्तः । 'च्छाया सूर्यप्रिया कान्तिः' इत्यमरः । दशदिक्षु रथो यस्य सः, दशरथनामक इत्यर्थः । राजाऽभवत् । भू सत्तायां लङ् । यथा हारमद्धचे नायकमणिः श्रेष्ठस्तद्वत् सूर्यवंशोत्पन्नभूपानां मद्धचे श्रेष्ठो दशरथनामको राजा अजचक्रेश्वरादिन्दुमत्यामभवदिति भावः ॥ २८ ॥

(सं.चं.) एकैको नरेन्द्रो मणिरिव । ते ग्रथिता हारा बभूवुः । हाराणामिव । हाराः शुभ्रा धवळाः । भूपाः शुद्धचरिताः । हाराणां तेजः प्रभा । भूपानां प्रभावस्तेजः । पराक्रमस्तेजः । अधिक्षेपादेरसहनं तेजः । नायकच्छायः । हारमध्यमणिर्नायकः । स च्छाया उपमानं यस्य । नायकस्य मणेरिव छाया कान्तिरस्येति वा । खट्वाङ्गाद् दीर्घबाहुः । ततो रघुः । ततोऽजः । ततो दशरथोऽभवत् ॥ २८ ॥

अयोद्धयां नाम नगरीमद्धयुवास स पार्थिवः ।
अत्रायतैकच्छत्रो यः सप्तद्वीपवतीं महीम्[१] ॥ २९ ॥

---

१. '–वतीं भुवम्'

(भा.दी.) श्रीरामपितुः दशरथस्य कथां विस्तरतो वर्णयति– **अयोद्ध्यामि**त्यादिना । पृथिव्याः ईश्वरः पार्थिवः । 'तस्येश्वरः' (अ.सू.५.१.४२) इत्यण् । सः दशरथः । शत्रुभिर्योद्धुमशक्यत्वादयोद्ध्या । नामेत्यव्ययं प्रसिद्धार्थकम् । अयोद्ध्यां नाम अयोद्ध्येति प्रसिद्धामित्यर्थः । नगरीम् अद्ध्युवास न्यवसत् । 'उपान्वध्याङ्वसः' (अ.सू.१.४.४८) इति सूत्रेणाधिपूर्वस्य वसेरधिकरणस्य कर्मत्वानुशासनात् 'कर्मणि द्वितीया' (अ.सू.२.३.२) इति द्वितीया । वस निवासे लिट् । यः दशरथः, (सप्तद्वीपवतीम्), सप्त च ते द्वीपाश्च तेऽस्यां सन्तीति तथोक्ता तां, महीं भूमिम् । एकं छत्रं श्वेतच्छत्रं यस्य स तथोक्तः सन् । सर्वभूपानामधीश्वरः सन्नित्यर्थः । अत्रायत अपालयत । त्रैङ् पालने लङ् ॥ २९ ॥

(सं.चं.) पृथिव्या अयमीश्वरः पार्थिवः । पृथिव्यां सर्वत्र विदितः ख्यातः पार्थिवः । तथाहि पाणिनिः– 'तस्येश्वरः' (५.१.४२) इति, 'तत्र विदित इति च' (४३) इति च । एकमसाधारणं छत्रं राजचिह्नं यस्य । अविभक्तं यस्याऽधिपत्यम् ॥ २९ ॥

तस्मिन् पालयति क्षोणीमर्त्थकामविषाणवान् ।
धर्म्मश्चतुष्पाद् ववृधे साक्षान्मोक्षधुरन्धरः ॥ ३० ॥

(भा.दी.) तत्सौभाग्यं पालनं च वर्णयति–**तस्मिन्नि**ति । तस्मिन् दशरथे । क्षोणीं भूमिं पालयति सति । अर्थश्च कामश्च तावेव विषाणौ अस्य स्त इति तथोक्तः । चतुष्पात् चत्वारः पादाः, तपः शौचं दया सत्यमित्याख्यचरणा यस्य स तथोक्तः । 'सङ्ख्यासुपूर्वस्य' (अ.सू.५.४.१४०) इति सङ्ख्यापूर्वत्वात्पाद-शब्दान्तलोपः । साक्षात् प्रत्यक्षतः । 'साक्षात् प्रत्यक्षतुल्ययोः' इत्यमरः । मोक्ष एव धूर्भारस्तां धारयतीति[1] तथोक्तः । 'धूः स्याद् यानमुखे भारे' इति वैजयन्ती । 'सञ्ज्ञायां भृ-तॄ-वृजि-धारि-सहि-तपि-दमः'(अ.सू.३.२.४६) इति खचि सति, 'इच एकाचोऽम्प्रत्ययवच्च' (अ.सू.६.३.६८) इति पूर्वपदादम्-प्रत्ययः । धर्मः ववृधे अभिवृद्धोऽभूत् । वृधु वृद्धौ लिट् । दशरथकाले धर्मार्थ-काम-मोक्षाख्यचतुर्विध-पुरुषार्थानामप्यभिवृद्धिरभूदिति भावः ॥ ३० ॥

(सं.चं.) धर्मो वृष उच्यते । चतुष्पाद् वृषः । तेन धर्ममपि चतुष्पात्त्वेन रूपयति– धर्मश्चतुष्पादिति । 'कृते प्रवर्तते धर्मश्चतुष्पात् तज्जनैर्धृतः । सत्यं दया तपो दानमिति पादा विभोर्नृप' इति भागवते । वृषभोऽपि धुरं भारं यानमुखं वा धारयतीति धुरन्धर उच्यते । साक्षादनुपचारतः ॥ ३० ॥

---

१. 'धरतीति'

वदान्येन प्रवीरेण तेन कश्चिन्न लक्षितः ।
प्रतिग्रहार्त्थी विमुखो विग्रहार्त्थी तथोन्मुखः ॥ ३१ ॥

(भा.दी.) वदान्येनेति। दानशूरेण, 'वदान्यो वल्गुदात्रोः' इति वैजयन्ती। प्रवीरेण पराक्रमिणा तेन दशरथेन प्रतिग्रह आदानं तमर्थयितुं शीलं यस्य स प्रतिग्रहार्थी । 'प्रतिग्रहः क्रियाकारे चमूपृष्ठे पतद्ग्रहे । दानद्रव्ये स्वीकृतौ च' इति वैजयन्ती । कश्चित्पुरुषः, विमुखः पराङ्मुखः, न लक्षितः न दृष्टः । प्रतिग्रहापेक्षया कश्चिदागतश्चेत् तदपेक्षितं ददात्येवेति भावः । विग्रहं कलहमर्थयितुं शीलं यस्य स विग्रहार्थी युद्धार्थीत्यर्थः । 'सुप्यजातौ णिनिस्ताच्छील्ये' (अ.सू.३.२.७८) इति णिनिः । कश्चित्पुरुषः । तथा प्रतिग्रहार्थिवत् । उन्मुखः अभिमुखः न लक्षितो न दृष्टः । सर्वेषां मण्डलाधिपतीनां स्वाधीनत्वात् कोऽपि प्रतिपक्षभूतो राजा दशरथेन न दृष्ट इति भावः ॥ ३१ ॥

(सं.चं.) वदान्य इति दानशौण्ड उच्यते। वदान्य इति मधुरवागुच्यते। वीरेषु प्रमुखः प्रवीरः। प्रतिग्रहार्थी न विमुखः, वदान्यत्वात्। विग्रहार्थी च नोन्मुखः, प्रवीरत्वात् ॥ ३१ ॥

अपुत्रत्वं विना राज्ञः किञ्चिन्नावैक्षि दूषणम् ।
लोकाभिनन्दिनो यद्वच्छशाङ्कस्य शशं विना ॥ ३२ ॥

(भा.दी.) अपुत्रेति । राज्ञो दशरथस्य, न विद्यते पुत्रो यस्य स तथा, तस्य भावस्तत्त्वं तत्, पुत्राराहित्यमित्यर्थः। विना, लोकानभिनन्दयितुं शीलमस्यास्तीति लोकाभिनन्दी तस्य। शशस्य अङ्को लाञ्छनं यस्य स तथा, तस्य चन्द्रस्येत्यर्थः, शशः शशाकारो बिन्दुस्तं विना यद्वत् तथा किञ्चित् दूषणं दोषो न अवैक्षि अदर्शि, जनैरिति शेषः । ईक्ष दर्शनाङ्कनयोर्लुङ् ॥ ३२ ॥

(सं.चं.) लोकानभितः नन्दयत्यानन्दयतीति वर्धयतीति वा लोकाभिनन्दी राजा च शशाङ्कश्च । शशवदङ्कोऽस्येति शशाङ्कः । शशमङ्कं विना ॥ ३२ ॥

सोऽप्राप्य तन्तुं भार्य्यासु तिसृष्वप्यन्वचिन्तयत् ।
तत्वनिर्ण्णयमप्राप्य त्रय्यां मीमांसको यथा ॥ ३३ ॥

(भा.दी.) स इति। सः राजा, तिसृष्वपि भार्यासु कौसल्यासुमित्राकैकयीनाम्नीषु, तन्तुः सन्ततिस्तं पुत्रमित्यर्थः, अप्राप्य अन्वचिन्तयत्। चिन्तामवाप। चिति स्मृत्यां लङ्। तत्र दृष्टान्तमाह– **तत्वे**ति। त्रय्यां

वेदत्रये। 'त्रयो वेदास्त्रयी स्मृता' इति हलः। तत्वानां परापरतत्वानां निर्णयो निश्चयस्तम्, अप्राप्य मीमांसकः वेदार्थविचारकः पुरुषः यथा येन प्रकारेण तथा अन्वचिन्तयदित्यन्वयः । निर्णायकब्रह्मसूत्राद्यभावे यथा मीमांसकस्त्रय्यां विचारं कृत्वाऽपि भगवत्स्वरूपादिनिर्णयमप्राप्य केन वा वेदार्थनिर्णयो भवेदिति चिन्तयेत् तथा तिसृष्वपि भार्यासु पुत्रानप्राप्य केन कर्मणा पुत्रप्राप्तिर्भवेदिति मनसा विचारितवानिति भावः॥ ३३ ॥

(सं.चं.) तन्तुं पुत्रसन्तानम्। यस्तनोति वंशवृक्षम्। अन्वहं चिन्ताकुलो बभूव। अथच पुत्रप्राप्त्यनुकूलमुपायमचिन्तयत् आलोचयामास । यथा मीमांसकस्तत्वावगमानुगुणमर्थं पर्यालोचयति । यथा पूर्वमीमांसकस्त्रय्यामधीतायामपि भगवन्तमलब्ध्वा शोचनीयो बभूव, एवं दशरथस्तिसृष्वपि भार्यास्वधिगतासु पुत्रमलब्ध्वा शोकाकुलो बभूवेति ध्वनिः ॥ ३३ ॥

मन्त्रिणः स सुमन्त्रादीनाहूयेत्थममन्त्रयत् ।
[१]अपुत्रत्वज्वरोत्तप्तः सर्वत्रारुचिमान्नृपः ॥ ३४ ॥

(भा.दी.) विचिन्त्य किं कृतवानित्याह– **मन्त्रिण** इति। न विद्यते पुत्रो यस्य सोऽपुत्रस्तस्य भावस्तत्त्वं तदेव ज्वरस्तेन उत्तप्तः सन्तप्तः। अत एव सर्वत्र राज्यादौ रुचिः स्पृहा साऽस्यास्तीति रुचिमान्, रुचिमान्न भवतीत्यरुचिमान्, स्पृहारहित इत्यर्थः। 'रुचिः कान्त्यर्चिषोर्भासि तिन्त्रिणीके स्पृहाश्रियोः' इति वैजयन्ती। सः नृपः, सुमन्त्रः सुमन्त्रनामको मन्त्री आदिर्येषां ते तथोक्तास्तान् मन्त्रिणः आहूय। इत्थं वक्ष्यमाणप्रकारेण अमन्त्रयत् आलोचयामास। मन्त्र आलोचने[२] लङ् ॥ ३४ ॥

(सं.चं.) अमन्त्रयत्। यद्यपि मत्रिरात्मनेभाषः। तथाऽपि 'प्रार्थयन्ति शयनोत्थितं प्रियाः' इत्यादिवत् साधुत्वमवगन्तव्यम्। अथवा नामधातुरयम्– मन्त्रं करोति मन्त्रयति। मत्रि गुप्तभाषणे। सुमन्त्राद्यान् मन्त्रिणः। 'धृष्टिर्जयन्तो विजयः सिद्धार्थो ह्यर्थसाधकः। अशोको मन्त्रपालश्च सुमन्त्रश्चाष्टमोऽभवत्' (बा.कां.७.३) इति वाल्मीकीये। रुचिः प्रीतिः। रसग्रहणपाटवं च। ज्वरोत्तप्तः नष्टजिह्वारुचिः सर्वत्र भोज्येष्वरुचिमान् भवति। अपुत्रो राजा सर्वत्र भोगेष्वरुचिमान् बभूव ॥ ३४ ॥

अश्वमेधेन यक्ष्यामि विश्वनाथं सुताप्तये ।
ईश्वरे नः प्रसन्ने किं दुर्लभं भक्तवत्सले ॥ ३५ ॥

१. **'अपुत्रत्वज्वरात् तप्तः'**

२. वैय्याकरणास्तु **'मत्रि गुप्तपरिभाषणे'** इति धातुपाठं पठन्ति।

(भा.दी.) अश्वेति । अश्वमेधः अश्वमेधाख्ययज्ञः तेन विश्वनाथं सर्वजगत्स्वामिनं श्रीहरिम्, सुतानामवाप्तिः प्राप्तिस्तस्यै यक्ष्यामि यजनं करिष्यामि । यज देवपूजासङ्गतिकरणदानेषु लृट् । ननु 'पुत्रकामः पुत्रकामेष्ट्या यजेत' इति श्रुतेः पुत्रप्राप्त्यर्थं यागान्तरविधानात् किमश्वमेधेनेत्यत आह– **ईश्वर** इति । नः अस्माकम् ईश्वरे सर्वस्वामिनि, भक्तेषु वत्सलः स्निग्धस्तस्मिन् । 'स्निग्धस्तु वत्सलः' इत्यमरः । श्रीहरौ प्रसन्ने सति दुर्लभम् अलभ्यं वस्तु किमस्ति? न किञ्चिदपीत्यर्थः । तथा च विशेषत ईश्वरप्रसादस्यैवापेक्षितत्वात्, 'अश्वमेधः क्रतुश्रेष्ठः' इति स्मृत्या सर्वयज्ञाधिकतयाऽवगतो हरिप्रसादहेतुरश्वमेधस्तावत् क्रियत इति भावः ॥ ३५ ॥

(सं.चं.) अश्वमेधेनेश्वरप्रसादः । प्रसादेन पुत्रलाभः । त्रिषु पादेषु कर्णाटानां प्रियो द्वितीयाक्षरप्रासः ॥३५॥

सुमन्त्रतन्त्रेषु मखेषु कोविदान्
[1]सुमन्त्र हन्ताऽनय शीघ्रमृत्विजः ।
गुरुं वसिष्ठं च समेधयेद् ध्रुवं
क्षत्रं खलु ब्रह्म यथाऽनिलोऽनलम् ॥ ३६ ॥

(भा.दी.) सुमन्त्रेति । हे सुमन्त्र, मन्त्राः तत्तद्देवतोपस्थानमन्त्रास्ते च, तन्त्राणि यज्ञोपयुक्तव्यापारास्तानि च मन्त्रतन्त्राणि, शोभनानि मन्त्रतन्त्राणि येषां ते तथोक्तास्तेषु । 'तन्त्रं स्वराष्ट्रव्यापारे तन्तुवाने परिच्छदे । शास्त्रौषधान्त्रमुख्येषु प्रयोगेऽध्वरकर्मणाम्' इति वैजयन्ती । मखेषु यज्ञेषु कोविदान् कुशलान्, ऋत्विजः अध्वर्यूद्गातृहोतृप्रभृतीन् षोडश ऋत्विजः, शीघ्रं यथा भवति तथा, आनय आकारय । णीञ् प्रापणे लोट् । गुरुं स्वकुलगुरुं वसिष्ठं च आनय । हन्त हर्षे । क्षत्रियाभिवृद्धौ ब्राह्मणानामनुग्रह एव कारणमिति सदृष्टान्तमाह– **ब्रह्मे**त्यादिना । ब्रह्म ब्राह्मणकुलम्, क्षत्रं क्षत्रियकुलं कर्म । अनिलः वायुः अनलम् अग्निं यथा समेधयेदभिवर्द्धयेत् तथा (ध्रुवं) समेधयेदभिवर्धयेत् खल्वित्यन्वयः । एध वृद्धौ लिङ् ॥ ३६ ॥

(सं.चं.)कथानिरूपणे गद्यसमानयोगक्षेमयाऽनुष्टुभा कथामुपक्षिप्याथ छन्दोऽन्तरेण सर्गमुपसंहरति । सुविहितैर्मन्त्रैस्तन्त्रैश्च सम्पादितेषु मखेषु । तन्त्रमितिकर्तव्यता । शास्त्रोक्ता प्रक्रिया । ऋत्विज आनय । गुरुं वसिष्ठं चाऽनय । यतो ब्रह्मवर्णः क्षत्रवर्णं शक्तिसमेधितं कुर्यात् । यथाऽनिलोऽनलं वर्धयेत् । यद्यप्यनलः स्वयं परन्तपः । एवं क्षत्रियोऽपि । अथाप्यनिलस्तेजःप्रज्वलनेनानलं समेधयति । एवं ब्राह्मणः क्षत्रियमित्याशयः । जतौ जरौ वंशस्थम् । ततौ जराविन्द्रवंशा । उभयोरुपजातिः ॥ ३६ ॥

---

१. **'सुमन्त्र तानानय'**

इति निजकनियोगान्मन्त्रिणाऽऽनीतमात्रान्
नरपतिरवलोक्य ब्राह्मणान् ब्रह्मनिष्ठान् ।
अनमदनभिमानो भक्तिभारेण भूयो
हृदि जगदभिरामं[1] वासुदेवं दधानः ॥ ३७ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते
रामाङ्के सङ्ग्रहरामायणे बालकाण्डे प्रथमः सर्ग्गः ॥

—०—

(भा.दी.) दशरथस्य ब्रह्मण्यतां दर्शयति– **इती**ति । नरपतिः राजा दशरथः । इति निज एव निजकः, तस्मै स्वकीयो नियोग आज्ञा तस्मात् । मन्त्रिणा सुमन्त्रेण तदैव आनीता आनीतमात्रास्तान्, ब्रह्मणि वेदे निष्ठा आसक्तिर्येषां ते तथा तान्, वेदार्थविचारकानित्यर्थः । 'ब्रह्मा रुद्रेन्द्रभृग्वादिविप्रर्त्विग्यज्ञधातृषु' इति वैजयन्ती । ब्रह्मणि परिपूर्णे श्रीहरौ निष्ठा आसक्तिर्येषां ते तथा तानिति वा, तद्ध्याने तात्पर्यवत इत्यर्थः । तथाहि हरिवंशे– 'बृहत्त्वाद् बृंहणत्वाच्च तस्माद् ब्रह्मेति शब्दितः' इति । अथ ब्राह्मणान् ब्रह्म वेदं परं ब्रह्म वा अणन्ति जानन्तीति ब्राह्मणशब्दवाच्यान् वसिष्ठादीन् अवलोक्य । न विद्यतेऽभिमानोऽहङ्कारो यस्य स तथा सन् । एते तु मद्विषयवासिनोऽहं तु सार्वभौमो राजेत्यभिमानरहितः । जगत् अभिरमयति सुखयतीति जगदभिरामस्तम् । जगति अभिरामो मनोहरस्तमिति वा । वासुदेवम्, वाति अवगच्छति सर्वमिति वाः सर्वज्ञः । वाश्चासावसुश्च वासुः, सर्वज्ञो मुख्यप्राणः, तस्मिन् दीव्यतीति तथोक्तम् । मुख्यप्राणान्तर्यामिणमित्यर्थः । श्रीहरिं हृत् स्वहृदयं तस्मिन्, मुनीनां हृदय इति वा, दधानः सन्, सर्वान्तर्यामित्वेन स्मरन् सन्नित्यर्थः । भक्तेर्भारोऽतिशयस्तेन भक्तिभारेण । 'भारोऽतिशयभारयोः' इति रत्नमाला । भूयः पुनःपुनः, अनमत् नमश्चकार । णमु प्रह्वत्वे शब्दे च लङ् । स्वान्तर्यामितया श्रीहरिः स्वात्मना मुनीनां नमनादिसत्कर्मकारयिता, स्वाभिमतयज्ञादिकं च तैः कारयित्वा स्वाभीष्टप्रदाता चेत्यनुसन्धानपूर्वकं परमभागवतो दशरथो वसिष्ठादीन् ननामेति भावः । श्रीमन्नारायणपण्डिताचार्यः सर्गान्ते सर्वत्र श्रीरामनामाङ्कितश्लोककरणादात्मनोऽनवरतं श्रीरामचरणप्रवणान्तःकरणतां प्रकटयति ॥ ३७ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां
भावार्थदीपिकायां बालकाण्डे प्रथमः सर्गः ॥

—०—

१. 'जगदभिरामो'

(सं.चं.) निजकः स्वको नियोगः । मन्त्रिणा सुमन्त्रेण । साक्षात्कृतब्रह्माणो ब्राह्मणाः । ब्रह्मनिष्ठा नारायणपरायणाः । अनभिमानो गलिताहङ्कारः । हृदि वासुदेवं दधानः । अत एव वासुदेवो रामात्मनाऽव-ततार । 'जगदभिरामः' इति पाठे स्वयं सर्वजगतामभिरामो मनोज्ञः । ननमययैरियं मालिनी ॥ ३७ ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां बालकाण्डे प्रथमसर्गविवरणं समाप्तम् ॥

—०—

द्वितीयः सर्ग्गः

सुयज्ञो वामदेवश्च जाबालिरुत काश्यपः ।
वसिष्ठश्चाग्नयइव पञ्चैते तत्र रेजिरे ॥ १ ॥

(भा.दी.) श्रीरामपित्रा दशरथेन मानितान् मुनीन् सदृष्टान्तं वर्णयति– **सुयज्ञ** इति । सुयज्ञः सुयज्ञनामकः, वामदेवश्च, जाबालिरुत जाबालिनामकोऽपि, काश्यपः, वसिष्ठश्च इतीमे[१] मुनयः पञ्च गार्हपत्य-आहवनीय-अन्वाहार्य्यपचन-सभ्य-आवसथ्यनामकाः पञ्चसङ्ख्याकाः अग्नयइव तत्र सभायां रेजिरे अशोभन्त । राजृ दीप्तौ लिट् ॥ १ ॥

(सं.चं.) पञ्चाग्नयइव पञ्चैते तत्र रेजिरे । 'सुयज्ञं वामदेवं च जाबालिमथ काश्यपम् । पुरोहितं वसिष्ठं च ये चान्ये द्विजसत्तमाः' (१२.५) इति वाल्मीकीये ॥ १ ॥

तेषां[२] सपरिवाराणां प्राज्ञानामभ्यनुज्ञया ।
सम्बभाराथ सम्भारान् वाजिमेधस्य भूपतिः ॥ २ ॥

(भा.दी.) अथ दशरथेन किं कृतमित्यत आह– **तेषामि**ति । अथ भूपतिर्दशरथः, परिवाराः शिष्यगणास्तैः सहिताः सपरिवारास्तेषाम्, प्राज्ञानां ज्ञानिनाम्, तेषां सुयज्ञादिमुनीनामभ्यनुज्ञया वाजिमेधोऽश्वमेधस्तस्य सम्भारान् साधनद्रव्याणि सम्बभार सम्पादितवान् । भृञ् भरणे लिट् ॥ २ ॥

(सं.चं.) अन्ये द्विजसत्तमाः के? आह– तेषां सपरिवाराणाम् । परिवाराः परिजनाः शिष्यादयः । सम्भारान् सम्भरणीयानि द्रव्याणि । सम्बभार सञ्जग्राह ॥ २ ॥

---

१. 'एतदनुसारेण–'**पञ्चेमे तत्र रेजिरे**' इत्यपि मूलपाठः स्यात् ।

२. '**तेषां स समवेतानामृषीणामभ्यनुज्ञया**'

एकान्तेऽकान्तवदनं[1] राजानं पुत्रलालसम् ।
सुमन्त्रो मन्त्रतत्वज्ञः प्रणिपत्येदमब्रवीत्　　　　　　　　॥ ३ ॥

(भा.दी.) सुमन्त्रदशरथयोरेकान्तवृत्तामाख्यायिकामाह– **एके**ति । मन्त्रस्य आलोचनस्य यत्तत्वं रहस्यं तज्जानातीति तथोक्तः सुमन्त्रः । एकान्त एकान्तप्रदेशस्तस्मिन्, कान्तं मनोहरं वदनं यस्य स तथा तम्, पुत्रेषु लालसमौत्सुक्यं यस्य स तथा तम् । 'लालसे प्रार्थनौत्सुक्ये' इत्यमरः । पुत्रप्राप्तौ लोलुपमित्यर्थः । राजानं दशरथं प्रणिपत्य नमस्कृत्य इदं वक्ष्यमाणं वचः अब्रवीत् । ब्रूञ् व्यक्तायां वाचि लङ् । न तु लुङ् । 'ब्रुवो वचिः' (अ.सू.२.४.५३) इति लुङादौ वच्यादेशविधानात् ॥ ३ ॥

(सं.चं.) पुत्रे विषये लालसः लोलुपः । उत्सुक इत्येतत् । 'लोलुपे लोलुभो लोलो लम्पटो लालसोऽपि च' इति यादवप्रकाशः । लालसा प्रार्थना, लालसं वा । औत्सुक्यं च । तद्वान् लालसः । पुत्रे पुत्रदर्शने लालसमत एवाकान्तवदनं म्लानवदनम् । कदा पुत्रवदनं द्रक्ष्यामीति कातर्येण । मुनीनामभ्यनुज्ञया लब्धप्रत्ययतया कान्तवदनं वा । गुप्तं कर्तव्यचिन्तना मन्त्रः ॥ ३ ॥

अवधारय राजेन्द्र कत्थ्यमानां कथां मया ।
सनत्कुमारो भगवानाऽह स्म[2] मुनिसंसदि　　　　　　　　॥ ४ ॥

(भा.दी.) सुमन्त्रः किमाहेत्यत आह– **अवे**ति । हे राजेन्द्र राज्ञामीश्वर, 'इन्द्रो वृषात्मशक्रार्केष्वीश्वरे' इति वैजयन्ती । त्वम्, भगवान् पूज्यः, 'भगवान् बुद्धे पूज्ये हरे हरौ' इति वैजयन्ती । सनत्कुमारनामको मुनिः । मुनीनां संसत् सभा तस्यां यां कथां आह स्म अब्रवीत् । ब्रूञ् व्यक्तायां वाचि लट् । 'ब्रुवः पञ्चानामादित आहो ब्रुवः' (अ.सू.३.४.८४) इति आहादेशः । मया कथ्यमानां उच्यमानां तां कथां अवधारय सावधानतया शृणु । धृञ् धारणे लोट् ॥ ४ ॥

(सं.चं.) अवधारय अवधाय शृणु । धृञो णिचि रूपम् । इतिवृत्तं कथा । विष्णुपुत्रः काम एव ब्रह्मणा जातो जितकामः सनत्कुमारो बभूव । स एव शिवतनयः सेनानीः स्कन्दो बभूव । सनत्कुमारः पुनर्भगवदवतारेण सनत्कुमारेण विशेषत आविष्टश्चेति भगवानित्याह । भगवदनुग्रहभाग्यवान् लोकपूज्यो भगवानुच्यते ।

---

१. **'एकान्ते कान्तवदनम्'** इति वि.ती. पाठः। विद्याभूषणीयेऽपि तथा–**'कान्तवदनं प्रसन्नमुखम्'** इति। **'क्लान्तवदनम्'** इति का.श्री. पाठ इति भाति। तदपि रमणीयम्।
२. **'भगवान् यामाह मुनि–'**

सनत्कुमार एव च रामायणे भरतो भविष्यति । अत एव भाविकार्यसिद्धये सुमन्त्रं श्रावयामास । आह स्म जगाद ॥ ४ ॥

[1]विभाण्डकश्चण्डतपाः काश्यपस्यास्ति नन्दनः ।
भविष्यत्यृश्यशृङ्गोऽस्माच्छ्रीमानग्निरिवारणेः ॥ ५ ॥

(भा.दी.) मुनिसंसदि सनत्कुमारोक्तां कथामाह– **विभण्डक** इत्यादिना । चण्डं क्रूरं तपो यस्य स तथोक्तः, विभण्डकः विभण्डकनामको मुनिः, काश्यपस्य काश्यपाख्यस्य मुनेः नन्दनः पुत्रः अस्ति । अस भुवि लट् । अस्माद् विभण्डकात् । श्रीरस्यास्तीति श्रीमान् ऋश्यस्य एणस्य शृङ्गमिव शृङ्गं विषाणं यस्य स तथोक्तः । 'गोकर्णपृषतैणश्र्यरोहिताः' इत्यमरः । अत एव ऋश्यशृङ्गनामको मुनिः, अरणिः अग्निनिर्मन्थनकाष्ठं तस्मात् अग्निरिव भविष्यति । भू सत्तायां लृट् । विभण्डकेन चण्डतपस्यानुष्ठीयमाने सति तत्तपोभीतेनेन्द्रेण तद्विघातार्थं काञ्चनाप्सरसः प्रेषितास्तासां विलोकनेन मनोविकारे सति रेतः समीपस्थतीर्थे पपात । तच्च तेन उदकेन सह कयाचिन्मृग्या दैवयोगेन पीतमभूत् । अमोघत्वाच्च (मुनिरेतसो) मृग्या प्रसूतस्यास्य मुनेरेणशृङ्गवच्छृङ्गमभूदत एव तन्नामकोऽभवदिति हि पौराणिकी प्रसिद्धिः ॥ ५ ॥

(सं.चं.) अत्र द्वेधा पाठं पठन्ति –'विभण्डकश्चण्डतपाः' इति, 'विभाण्डकश्चण्डतपाः' इति । वाल्मीकीयेऽपि तथा– 'काश्यपस्य तु पुत्रोऽस्ति विभण्डक इति श्रुतः' (९.३) इति, 'विभाण्डक इति श्रुतः' इति च पाठान्तरम् । कश्यपः काश्यपो भवति । विभण्डको विभाण्डकः । विभण्डते इति विभण्डकः । 'भडि परि-भाषणे' । परितो भाषणं वादकथा । 'भडि परिहासे' इत्येके । विभण्डयतीति वा । भडि कल्याणे । पश्यतीति पश्यकः कश्यपः । कश्यप एव काश्यपः । दैर्घ्यमवधारणे । कश्यपस्यायं वंशजात इति च काश्यपः । ऋश्य इति हरिणप्रभेदः । ऋश्यस्येव शृङ्गमस्याऽसीदित्यृश्यशृङ्गः । विभाण्डकरेतसा हरिणीगर्भे जातः ॥ ५ ॥

ब्रह्मवर्चससम्पन्नं ब्रह्मचर्य्यरतं मुनिम् ।
लोमपादोऽङ्गराजस्तं स्वराज्यं प्रति नेष्यति ॥ ६ ॥

(भा.दी.) **ब्रह्मे**ति । अङ्गानां अङ्गविषयाणां राजा अङ्गराजः । 'राजाहस्सखिभ्यष्टच्' (अ.सू.५.४.९१) इति टच् । लोमपादः लोमपादनामको राजा, ब्रह्मवर्चसेन शुभवर्त्तनवेदाद्ध्ययनादिना सम्पन्नं युक्तम्, 'ब्रह्मवर्चसं वृत्ताद्ध्ययनर्द्धिः' इत्यमरः । ब्रह्मचर्ये समस्तेन्द्रियनिग्रहे रतमासक्तम् । 'ब्रह्मचर्यं बुधाः प्राहुः

१. **'विभण्डक–'** इति वि.ती.पाठः । **'विभाण्डक'** इत्येव विद्याभूषणश्रीनिवासाचार्यौ । तथैव च प्रचुरो व्यवहारः ।

समस्तेन्द्रियसंयमम्' इति हलायुधः । तं ऋश्यशृङ्गनामकं मुनिम् । स्वस्य यद्राज्यं तत् प्रति नेष्यति नेता । णीञ् प्रापणे लृट् ॥ ६ ॥

(सं.चं.) 'वृत्ताध्ययनसम्पत्तिरिष्यते ब्रह्मवर्चसम् । ब्रह्मचर्यं बुधाः प्राहुः समस्तेन्द्रियसंयमम्' इत्यभिधानम् । लोकमहितौ पादावस्येति लोमपादो नाम । नेष्यति वृष्ट्यर्थम् ॥ ६ ॥

सारङ्गशृङ्गमानेष्यन्त्यङ्गना मुनिवेषतः ।
संवञ्चयन्त्योऽत्र यदा तदा वृष्टिर्भविष्यति ॥ ७ ॥

(भा.दी.) केन प्रकारेण स्वनगरं प्रति तमृषिमानीतवान् । तदागमने च स्वस्य किं प्रयोजनमित्यत आह– **सारङ्गे**ति । अङ्गना वेश्यास्त्रियः, मुनीनां वेषोऽलङ्कारः तस्मादिति ततः, संवञ्चयन्त्यः सत्यः । यदा यस्मिन् काले, '–किंयत्तदोः[1] काले दा' (अ.सू.५.३.१५) इति दाप्रत्ययः, सारङ्गशृङ्गं ऋष्यशृङ्गमुनिं आनेष्यन्ति, तदा (अत्र अङ्गराज्ये) वृष्टिर्भविष्यति । अङ्गविषयाधीशो लोमपादाख्यो राजा स्वदेशे कस्माच्चिन्निमित्तादनावृष्टौ सत्याम्, सुवृष्टिः कथं भविष्यतीति मुनीन् प्रति विचारिते सति, ऋश्यशृङ्गं स्वदेशं प्रत्यानीय शान्ताख्यां तव सुतां यदि दास्यसि तर्हि सुवृष्टिर्भविष्यतीति तद्वाक्यं श्रुत्वा, तपस्येवाभिरतो मुनिः प्रार्थनादिना नाऽयास्यतीति मन्त्रिभिः सम्मन्त्र्य, यथाकथञ्चिदानयत इति वाराङ्गनाः प्रैषयत् । ताश्च, मुनिव्यतिरिक्तपुरुषाणां स्त्रीणां वाऽवलोकनं जन्मत आरभ्य तेन न कृतमिति जानन्त्यः शापभीताः मुनिवेषं धृत्वा, तद्विलोभनार्थमपूपभक्ष्यादिकं च गृहीत्वा, तदाश्रमं प्रति गतास्तेन च मुनिबुद्ध्या अर्घ्यादिना सम्भाविताः सत्यस्तस्मा इमान्यपूर्वाणि फलानीति दत्तवत्यस्तद्भुक्त्वाऽपूर्वफलानीमानि कुतो वर्तन्त इत्यनेन विचारिते सत्यस्मदाश्रम एतादृशफलान्यनवरतं सन्तीति ताभिरुक्ते, तर्हि मामपि तत्र नयतेति[2] तदनुज्ञयाऽङ्गदेशं प्रत्यानीतः, तत्समय एव तत्र सुवृष्टिरभूदिति हि पौराणिकी प्रसिद्धिः ॥ ७ ॥

(सं.चं.) तदेवाऽऽह– सारङ्गशृङ्गः । 'सारङ्ग ऋश्यः पृषतो रुरुश्च' इत्यभिधानम् । अङ्गैरेव विवृतैर्वशं नयन्ति पुरुषानित्यङ्गनाः । मुनिवेषेण स्वं रूपं सङ्गोप्य वञ्चनं संवञ्चनम् । सम्मोह्य वञ्चनं संवञ्चनम् ॥ ७–८ ॥

अनावृष्टिभयोद्विग्नो वृष्टिं लब्ध्वा ततो नृपः ।
दास्यत्ययं मूल्यमिव शान्तां नाम निजात्मजाम्[3] ॥ ८ ॥

---

१. **'सर्वैकान्यकिंयत्तदोः काले दा'** इति समग्रं सूत्रम् ।

२. **'तर्ह्यहमपि तत्र नेय इति'**

३. शान्ता वस्तुतः दशरथात्मजा । अनपत्याय लोमपादाय दत्ता । तेन सा लोमपादस्य दत्तपुत्री । तेनान्तत ऋश्यशृङ्गो दशरथस्यापि जामातेति वदन्ति । तथाहि भवभूतिः–**'कन्यां दशरथो राजा शान्तां नाम व्यजीजनत् । अपत्यकृतिकां तस्मै रोमपादाय तां ददौ'** इति । गोविन्दराजोऽपि **'दशरथस्यौरसी शान्ता । दत्ता रोमपादाय'** इत्याह ।

(भा.दी.) अनावृष्टीति । सम्यग्वृष्टिरावृष्टिः आवृष्टेरभावोऽनावृष्टिः । अनावृष्टेर्यद् भयम् , अनावृष्टिनिमित्तं भयमित्यर्थः, अनावृष्टिलक्षणं भयमिति वा । तेन उद्विग्नः खिन्नः, अयं लोमपादनामा नृपः । ततः ऋश्यशृङ्गागमनात् वृष्टिं लब्ध्वा, शान्तां नाम शान्तेति प्रसिद्धाम्, निजा स्वकीया या आत्मजा पुत्री ताम्, 'निजमात्मीयनित्ययोः' इति वैजयन्ती । मूल्यमिव वृष्टेर्वेतनद्रव्यमिव । 'मूल्यं वेतनवस्नयोः' इति वैजयन्ती । दास्यति दाता, डु दाञ् दाने लृट् ॥ ८ ॥

मुनिमेनमुपानीय राजा दशरथाभिधः ।
यक्ष्यत्यधोक्षजस्तस्य पुत्रो रामो भविष्यति ॥ ९ ॥

(भा.दी.) मुनिमिति । दशरथ इति अभिधा नाम यस्य स तथोक्तः राजा एनं मुनिं ऋश्यशृङ्गं उपानीय आकारयित्वा यक्ष्यति यज्ञं करिष्यति । यज देवपूजासङ्गतिकरणदानेषु लृट् । तस्य कृतयज्ञस्य दशरथस्य, अक्षेभ्य इन्द्रियेभ्यो जातानि अक्षजानि इन्द्रियजन्यज्ञानानि, अधःकृतानि अक्षजानि येन स तथोक्तः । स्वानुग्रहमन्तरा तत्वत इन्द्रियजन्यज्ञानाविषय इत्यर्थः । श्रीहरिः रामः रामनामकः पुत्रः भविष्यति ॥ ९ ॥

(सं.चं.) अधोक्षजो भगवान् राम इति पुत्रो भविष्यति ॥ ९ ॥

रमणीयतरस्तस्य राघवस्य यशोविधुः ।
निरसिष्यत्युरु तमो लोकानानन्दयिष्यति ॥ १० ॥

(भा.दी.) तस्य वैभवमाह– **रमणीये**ति । रघोर्गोत्रापत्यं पुमान् राघवस्तस्य । 'तस्यापत्यम्' (अ.सू.४.१.९२) इत्यण् । तस्य श्रीरामस्य रमणीयतरः अतिशयो रमणीयः । यश एव विधुश्चन्द्रः । 'विधुः सुधांशुः' इत्यमरः । कीर्तिलक्षणश्चन्द्र इत्यर्थः । उरु वरादिना उत्कृष्टं तमः रावणादिराक्षसरूपान्धकारस्तत् । यद्वा उत्कृष्टं तमः सतां पापं दुःखं वा तत्, 'तमो राहुस्तमोऽघम्' इति वैजयन्ती । निरसिष्यति संहरिष्यति । असु क्षेपणे लृट् । लोकान् सज्जनान् आनन्दयिष्यति सन्तोषयिष्यति । टु नदि हर्षे लृट् ॥ १० ॥

(सं.चं.) लोकानामुरु तमः रावणादिरक्षोजनितमुत्कटं शोकं निरसिष्यति । निरस्य लोकानानन्दयिष्यति । 'ध्वान्ते राहौ गुणे शोके तमः' इति मङ्खः । विधुस्तु ध्वान्तं निरसिष्यति ॥ १०–१२ ॥

इदं सनत्कुमारोक्तं देवगुह्यं श्रुतं मया ।
तस्मात् त्वं लोमपादस्य गेहादानय तं मुनिम् ॥ ११ ॥

(भा.दी.) सनत्कुमारेण मुनिसंसदि कथनवेलायां स्वेन श्रुतेतिहासकथनस्य प्रयोजनं तदुपसंहरन्नाह– **इदमि**ति । सनत्कुमारेण उक्तमभिहितम्, इदं देवानां गुह्यं रहस्यम्, 'रहस्योपस्थयोर्गुह्यम्' इत्यमरः, मया श्रुतम् । तस्मात् कारणात् त्वं तं मुनिं ऋश्यशृङ्गाख्यमुनिं लोमपादस्य लोमपादाख्यस्य राज्ञः, गेहं मन्दिरं तस्मात्, आनय स्वयं गत्वा आकारय । णीञ् प्रापणे लोट् ॥ ११ ॥

आकर्ण्य वर्णितं तेन वसिष्ठस्याभ्यनुज्ञया ।
कोसलेन्द्रः स्वयं गत्वा तं मुनीन्द्रं समानयत्[१] ॥ १२ ॥

(भा.दी.) दशरथश्च तथा चकारेत्याह– **आकर्ण्ये**ति । कोसलानां कोसलाख्यविषयाणामिन्द्रः स्वामी दशरथः तेन सुमन्त्रेण वर्णितं प्रोक्तं तत् देवगुह्यं आकर्ण्य, वसिष्ठस्य अभ्यनुज्ञया स्वयं दशरथः गत्वा मुनीन्द्रं तं ऋश्यशृङ्गं समानयत् । स्वमन्दिरं प्रत्यानीतवान् ॥ १२ ॥

क्षोणीं प्रदक्षिणीकृत्य समानीते तुरङ्गमे ।
सरय्वा उत्तरे तीरे स राजा समदीक्षत ॥ १३ ॥

(भा.दी.) **क्षोणीमि**ति । स राजा, तुरङ्गमे अश्वे, '–तुरङ्गाश्वतुरङ्गमाः' इत्यमरः, क्षोणीं भूमिं प्रदक्षिणीकृत्य प्रदक्षिणं कारयित्वा समानीते सति, सरसो यातीति सरयूस्तस्याः, कैलासे विद्यमानसरो हि सरयूनद्यास्तस्या मूलमिति पौराणिकी प्रसिद्धिः । उत्तरे उत्तरभागस्थिते, 'पूर्वादिभ्यो नवभ्यो वा' (अ.सू.७.१.१६) इति सर्वनामसञ्ज्ञाया अनित्यत्वात् नाऽश्रितेति भावः । तीरं तटं तस्मिन् समदीक्षत यज्ञदीक्षामकरोत् । दीक्ष मौण्ड्ययज्ञोपनयननियमव्रतादेशेषु लङ् ॥ १३ ॥

(सं.चं.)'सरय्वा उत्तरे तीरे स राजा समदीक्षत' इति सकारानुवर्तनेन श्रुतिसुभगोऽनुप्रासः । प्रायोऽनुप्रासप्रचुरोऽयं प्रबन्धः । 'सरय्वाश्चोत्तरे तीरे राज्ञो यज्ञोऽभ्यवर्धत' (१४.१) इति च ॥ १३ ॥

आहूता राजराजेन राजराजविभूतिना ।
उपायनान्युपानीय भूपा वैश्यवदाययुः ॥ १४ ॥

(भा.दी.) **आहूता** इति । राजराजस्येव वैश्रवणवद् विभूतिरैश्वर्यं यस्येति तथोक्तस्तेन । 'राजराजो धनाधिपः । किन्नरेशो वैश्रवणः' इत्यमरः । राज्ञां राजा राजराजस्तेन दशरथेन आहूताः यज्ञार्थमागन्तव्यमित्या-

१. 'मुनीन्द्रमुपानयत्'

कारिताः भूपाः । उपायनानि उपायनद्रव्याणि उपानीय परिगृह्य, वैश्यवत् वैश्या इव आययुः । या प्रापणे लिट् ॥ १४ ॥

(सं.चं.) राज्ञामपि राजा राजराजः सम्राट् । राजराजस्य कुबेरस्येव विभूतिरस्य । 'कुबेरो नरवाहनः । गुह्यको राजराजश्च' इत्यभिधानम् । गौरवेण प्रीत्या वा दीयमानमुपायनम् । **'ಉಡುಗೊರೆ, ಹೊರೆಕಾಣಿಕೆ'** इति भाषायाम् ॥ १४ ॥

आजग्मुर्य्यज्ञवाटं तं प्रजाः सर्वाः प्रजापतेः ।
महोत्सवोत्सुकदृशः प्रशंसन्त्योऽस्य विक्रमान् ॥ १५ ॥

(भा.दी.) आजग्मुरिति । महान् य उत्सवस्तस्मिन् उत्सुकाः कुतूहलयुक्ताः दृशो दृष्टयो यासां तास्तथोक्ताः । महोत्सवदर्शने कौतुकयुक्तदृष्टय इत्यर्थः । अस्य दशरथस्य विक्रमान् प्रशंसन्त्यः संस्तुवन्त्यः सर्वाः प्रजा जनाः, प्रजापतेः राज्ञः दशरथस्य, यज्ञस्य वाटः शाला तं आजग्मुः । गम्लृ गतौ लिट् ॥ १५ ॥

(सं.चं.) यज्ञवाटं यज्ञार्थं वृत्यादिना निर्मितं क्षेत्रम् । 'वाटो मार्गे वृतिस्थाने' इति मेदिनी । प्रजानां पालनात् प्रजापती राजा – प्रजाः पातीति । अस्य दशरथस्य विक्रमान् प्रशंसन्त्य आजग्मुः । न केवलं महोत्सवदिदृक्षया, किन्तु दशरथे गौरवगर्भया प्रीत्या चाऽजग्मुरित्यर्थः ॥ १५ ॥

आस्यतां भुज्यतां भूयः पीयतां परिधीयताम् ।
इत्यत्र सन्तताः शब्दा जातु नो दीयतामिति ॥ १६ ॥

(भा.दी.) आस्यतामिति । आस्यतामुपविश्यताम् । आस उपवेशने लोट् । भूयः पुनःपुनः भुज्यतां भोजनं क्रियताम् । भुज पालनाभ्यवहारयोः लोट् । पीयतां पानं क्रियताम् । पा पाने लोट् । परिधीयतां सुवस्त्रैराच्छादनं क्रियताम् । डु धाञ् धारणपोषणयोः लोट् । अत्र दशरथयज्ञे इति सन्तताः सार्वकालिकाः अव्युच्छिन्ना इत्यर्थः, शब्दा आसन् । जातु कदाचिदपि दीयतामिति प्रदीयतामिति शब्दः नो नाऽसीत् । डु दाञ् दाने लोट् । इदं मह्यं दातव्यमिति जनानां कथनापेक्षया पूर्वमेव यथेष्टं तदिष्टानां प्रदानाद् दीयतामिति शब्दस्तस्य यज्ञे न प्रवृत्त इति भावः । आदीयतामिति पदच्छेदे सन्धिकरणानुपपत्तेः । नो दीयतां न दीयतामिति शब्दो नो नाऽसीदित्यावृत्त्या वा योज्यम् ॥ १६ ॥

(सं.चं.) केनापि याचकेनोच्यमानो 'दीयताम्' इति शब्दः न जातु श्रुतः । जातु कदाचिदपि ॥ १६ ॥

पण्डितौ कर्म्मकाण्डेषु [1]वैभाण्डकविधातृजौ ।
ऋत्विग्भिर्ग्गुणसम्पन्नैः क्रतुराजं प्रचक्रतुः ॥ १७ ॥

(भा.दी.) पण्डिताविति । कर्मणां काण्डा वर्गास्तेषु, 'काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिषु' इत्यमरः, पण्डितौ कुशलौ, विभण्डकस्यापत्यं पुमान् वैभण्डकः स च, विधातुर्ब्रह्मणो जातो विधातृजः स च, तौ ऋश्यशृङ्गवसिष्ठावित्यर्थः । गुणाः शमादिगुणास्तैः सम्पन्ना युक्तास्तैः, ऋत्विग्भिर्याज्ञिकैः, 'ऋत्विजो याज्ञिकाश्च ते' इत्यमरः । सहेति शेषः । क्रतूनां राजा क्रतुराजस्तम्, क्रतुश्रेष्ठमश्वमेधमित्यर्थः, प्रचक्रतुः । डु कृञ् करणे लिट् ॥ १७ ॥

(सं.चं.) कर्मकाण्डेषु कर्मप्रतिपादकवेदभागेषु । कर्मप्रयोगेषु वा । विधातृजो वसिष्ठः । प्रचक्रतुः विधानानतिक्रमः समृद्धता च प्रकर्षः ॥ १७ ॥

मन्त्रतन्त्रोपकरणकर्त्तृवह्निषु केशवम् ।
देशे काले च मन्वानाश्चक्रुस्ते कर्म्म निर्म्मलम् ॥ १८ ॥

(भा.दी.) 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' इति श्रुतौ ज्ञानिकृतकर्मणो महाफलहेतुत्वावगमादिदं ज्ञानपूर्वकमासीदित्याह– **मन्त्रे**ति । मन्त्रा वेदमन्त्रास्ते च, तन्त्राणि अध्वरकर्मणां प्रयोगास्तानि च, उपकरणानि स्रुक्स्रुवस्फ्यकपालादिसाधनानि च, कर्तारः षोडश ऋत्विजस्ते च, वह्नयः आहवनीयगार्हपत्यादयस्ते च तेषु, देशो क्षेत्रं प्रदेशस्तस्मिन्, कालः उत्तमकालस्तस्मिंश्च । कश्च ईशश्च केशौ चतुर्मुखरुद्रौ वर्त्तयतीति केशवः तम् । 'को ब्रह्मेति समुद्दिष्ट ईशोऽहं सर्वजन्तुषु । आवां तवाङ्गसम्भूतौ ततः केशवनामवान्' इति हरिवंशोक्तेः । मन्वानाः सन्तः, मन्त्रादिषु प्रतिपाद्यत्वादिना स्मरन्तः सन्तः, अत एव निर्मलं निर्गतं मलं न्यूनातिरिक्ततादिदोषो यस्मात् तत्तथोक्तम्, तत् कर्म चक्रुः ॥ १८ ॥

(सं.चं.) तमेव प्रकर्षं स्फुटमाह– मन्त्रेति । तन्त्रमाहुतिक्रिया । उपकरणान्याज्यादीनि । कर्ता यजमानः । उक्तं हि भगवता–'ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम्' इति । सर्वत्र विष्णुदर्शनान्निर्मलम् ॥ १८ ॥

इष्टिभेदैः प्रवर्ग्यैश्च सोमानां सवनैस्त्रिभिः ।
देवा अमाद्यन् वाय्वाद्याः पशुभिर्विविधैरपि ॥ १९ ॥

१. **'वैभण्डक–'** इति वि.ती.पाठः ।

(भा.दी.) इष्टीति । वायुराद्यो येषां ते तथोक्ताः देवा इन्द्रादयः, प्रधानयज्ञाङ्गभूता यागविशेषा इष्टयस्तासां भेदाः प्रभेदास्तैः, प्रवर्ग्या प्रवर्ग्यनामकाहुतिविशेषास्तैश्च, सोमाः सोमलतारसाः, तेषां त्रिभिः सवनैः प्रातस्सवनमाद्ध्यन्दिनसवनसायंसवनाख्याहुतिभिश्च, 'अभिषवः सवनं सवः' इत्यमरः । विविधैः, विविधा अजादयो ये पशवस्तैरपि, अमाद्यन् हर्षं प्रापुः । मदी हर्षे लङ् ॥ १९ ॥

(सं.चं.) अश्वमेधाङ्गत्वेन क्रियमाणैरिष्टिभेदैः । 'ज्योतिष्टोमायुषी चैवमतिरात्रौ च निर्मितौ । अभिजिद् विश्वजिच्चैवमाप्तोर्यामो महाक्रतुः' (१४.४२) इति वाल्मीकीये । प्रवर्ग्यैश्च । प्रवर्ग्या नाम यज्ञस्य पूर्णाङ्गत्वाय क्रियमाणाः कर्मविशेषाः । यत्र देवानामन्नं घर्माख्यं हविः प्रव्रज्यते । अधिकमस्मत्कृतायां श्रीमध्वविजयतत्वचन्द्रिकायाम् । सोमानां सवनैस्त्रिभिः । सोममभिषुत्य हवनं सवनम् । तानि च त्रीणि भवन्ति त्रिसन्ध्यम्– प्रातःसवनम्, माध्यन्दिनं सवनम्, सायंसवनमाहो तृतीयं सवनमिति । देवा अमाद्यन् वाय्वाद्याः । सोमग्रहे त्रीनंशान् वायुर्भजति । चतुर्थमंशमिन्द्र इति सोमपेषु देवेष्विन्द्रादिषु वायोः प्राधान्यम् । विवृतं चैतदैतरेयब्राह्मणे–'देवा वै सोमस्य राज्ञोऽग्रपेये न समपादयन् । अहं प्रथमः पिबेयमहं प्रथमः पिबेयमित्येवाकामयन्त । ते सम्पादयन्तोऽब्रुवन् । हन्ताऽजिमयाम स यो न उज्जेष्यति स प्रथमः सोमस्य पास्यतीति । तथेति त आजिमयुः । तेषामाजिं यतामभिसृष्टानां वायुर्मुखं प्रथमः प्रत्यपद्यत । अथेन्द्रोऽथ मित्रावरुणावथाश्विनौ । सोऽवेदिन्द्रो वायुमुद् वै जयतीति । तमनु परापतत् सह नावथोज्जयाव हेति । स नेत्यब्रवीदहमेवोज्जेष्यामीति । तृतीयं मेऽथोज्जयावेति । नेति हैवाब्रवीदहमेवोज्जेष्यामीति । तुरीयं मेऽथोज्जयावेति । तथेति तं तुरीयेऽत्यार्जत । तत् तुरीयभागिन्द्रोऽभवत् । त्रिभाग् वायुः' इति । अधिकं मध्वविजयटीकायाम् । पशुभिर्विविधैरपि । 'शामित्रे तु हयस्तत्र तथा जलचराश्च ये । ऋत्विग्भिः सर्वमेवैतन्नियुक्तं शास्त्रतस्तदा । पशूनां त्रिशतं तत्र यूपेषु नियतं तदा' (१४.२९-३०) इति वाल्मीकीये ॥ १९–२० ॥

यजमानो दशरथो याजको ब्रह्मनन्दनः ।
रामोदयः फलं यस्य को नु तं वर्ण्णयेत् क्रतुम् ॥ २० ॥

(भा.दी.) यजेति । यस्य यज्ञस्य यजमानः यज्ञकर्ता, 'यष्टा च यजमानः स्यात्' इति हलायुधः, दशरथः, यस्य यज्ञस्य याजकः यज्ञकारयिता ब्रह्मनन्दनः, ब्रह्मणो नन्दनः पुत्रो वसिष्ठः, यस्य यज्ञस्य फलं साद्ध्यं रामोदयः श्रीरामप्रादुर्भावः, तं क्रतुं को नु वर्णयेत्, साकल्येन वर्णनं कुर्यात्, न कोऽपीत्यर्थः । वर्ण वर्णक्रियाविस्तारगुणवचनेषु लिङ् । कर्तृकारयितृसाद्ध्यप्रयोजनानामतिविशिष्टत्वादस्य वर्णनं को वा साकल्येन कुर्यात्? न कोऽपीति । मया किञ्चिन्मात्रवर्णनं कृतमिति भावः ॥ २० ॥

दिशः प्रत्यर्प्पिता दृष्ट्वा दत्ता अप्यात्मनाऽखिलाः ।
रुग्मार्बुदं स ऋत्विग्भ्यो गवां लक्षाणि चादिशत् ॥ २१ ॥

(भा.दी.) दिश इति । सः दशरथः, अखिलाः दिशः आत्मना स्वेन दत्ता अपि प्रदत्ता अपि, ऋत्विग्भिः प्रत्यर्पिताः परावृत्य दत्ताः दृष्ट्वा । तपस्स्वाध्यायाभिरतानामस्माकं किं राज्याधिपत्यक्लेशेन, राज्यं तवैवास्त्विति 'अस्माकं तु यागार्थं धनं देहि' इत्युक्त्वा दिशः परावृत्य दत्ता इति भावः । ऋत्विग्भ्यः षोडशयाजकेभ्यः रुग्मानां सुवर्णानामर्बुदं तत्, अर्बुदमिति सङ्ख्याविशेषः, 'शतं सहस्रमयुतं नियुतं प्रयुतं तथा । कोटिरर्बुद-बृन्दौघा ज्ञेया दशगुणोत्तराः' इत्युक्तेः । गावो धेनवस्तासां लक्षाणि च अदिशत् प्रददौ । दिश अतिसर्जने लङ् ॥ २१ ॥

(सं.चं.) दिशः प्रत्यर्पिता दृष्ट्वा । 'प्राचीं होत्रे ददौ राजा दिशं स्वकुलवर्द्धनः । अध्वर्यवे प्रतीचीं तु ब्रह्मणे दक्षिणां दिशम् । उद्गात्रे च तथोदीचीं दक्षिणैषा विनिर्मिता' (१४.४३–४) इति, 'ऋत्विजस्त्वब्रुवन् सर्वे राजानं गतकल्मषम् । भवानेव महीं कृत्स्नामेको रक्षितुमर्हति । न भूम्या कार्यमस्माकं नहि शक्ताः स्म पालने' (१४.४४–५) इति च वाल्मीकीये । रुग्मार्बुदम् । रुग्मरूप्यकाणामर्बुदं दशकोटयः । गवां लक्षाणि दश ॥ २१ ॥

वर्ण्णनाथः सुवर्ण्णेभ्यो दुर्वर्ण्णौघं चतुर्ग्गुणम् ।
प्रदाय प्रणनामोर्व्यां विष्णुर्न्नः प्रीयतामिति ॥ २२ ॥

(भा.दी.) वर्णेति । वर्णानां ब्राह्मणादिचतुर्वर्णानां नाथः स्वामी दशरथः, सुवर्णानि कनकानि तेभ्यः, चत्वारो गुणाः आवृत्तयो यस्य स तथोक्तस्तम्, 'गुणस्त्वावृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुषु' इति वैजयन्ती । दुर्वर्णौघम्, दुर्वर्णानि रजतानि, 'दुर्वर्णं रजतं रूप्यम्' इत्यमरः, तेषामोघं समूहम्, प्रदाय दत्वा, विष्णुः नः अस्माकं प्रीयतां प्रीतो भवतु, प्रीङ् प्रीतौ लोट्, इति बुद्ध्या उर्व्यां भूमौ प्रणनाम नमश्चकार । णमु प्रह्वत्वे शब्दे च लिट् ॥ २२ ॥

(सं.चं.) चतुर्वर्णनाथः । सुवर्णरूप्येभ्यश्चतुर्गुणं दुर्वर्णरूप्याणामोघं पुञ्जम् । दुर्वर्णमिति रजतम् । चत्वारिंशत्कोटिमितं दुर्वर्णरूप्यचयं ददावित्यर्थः । 'गवां शतसहस्राणि दश तेभ्यो ददौ नृपः । दश कोटीः सुवर्णस्य रजतस्य चतुर्गुणम्' (१४.४८)इति च ॥ २२ ॥

तदा राघवमेघेन कोटिहाटकवर्षिणा ।
तर्प्पितः[1] सकलो लोकः पुनर्न्नवइवाऽबभौ ॥ २३ ॥

(भा.दी.) तदेति । कोटिसङ्ख्याकानि यानि हाटकानि सुवर्णानि तानि वर्षितुं शीलमस्यास्तीति तथोक्तस्तेन, रघोर्गोत्रापत्यं पुमान् राघवो दशरथः स एव मेघइव,[2] तेन तर्पितः, सकलः समस्तः लोकः जनः । पुनः नवइव नूतनइव आबभौ आङ्पूर्वभा दीप्तौ लिट् । दशरथदत्तापूर्ववस्त्राभरणगवादिसमस्तवस्तुलाभात् पूर्वापेक्षया द्रष्टॄणां नूतनइवाऽबभाविति भावः । पुनर्न्नव इत्युक्तत्वादत्र नौषधिविशेषो दृष्टान्तत्वेन वक्तुमुचितः, तद्वाचिनो नित्यस्त्रीलिङ्गत्वात् ॥ २३ ॥

(सं.चं.) दशरथमेघेन । कोटिमितं हाटकं सुवर्णम् । 'जाम्बूनदं कोटिसङ्ख्यं ब्राह्मणेभ्यो ददौ तदा' (१४.५१)इति च । ब्राह्मणेभ्य इत्युपलक्षणम् । सर्ववर्णेभ्यश्च ददौ । नहि मेघोऽग्रहार एव वर्षति । अत एव वर्णनाथ इति पूर्वमुक्तम् । अतः सकलो लोकः पुनर्नवइवाबभौ । अपूर्वसम्पत्तिलाभेन नवं जीवनं प्राप्त इव ॥ २३ ॥

याचमानाय विप्राय दरिद्रायाङ्गदं ददौ ।
हसन्नुन्मुच्य राजा तं ब्रह्मण्यं जनताऽऽर्च्चयत् ॥ २४ ॥

(भा.दी.) याचमानायेति । राजा दशरथः दरिद्राय, अत एव याचमानाय याचनं कुर्वते विप्राय । अङ्गदं बाहुभूषणं तत्, उन्मुच्य त्यक्त्वा, हसन् मन्दहासं कुर्वन् सन् ददौ । दाण् दाने लिट् । जनानां समूहो जनता, जनसमूह इत्यर्थः । 'ग्रामजनबन्धुसहायेभ्यस्तल्' (अ.सू.४.२.४३) इति समूहार्थे तल् । ब्रह्मणि साधुः ब्रह्मण्यः, तम् । 'तत्र साधुः' (अ.सू.४.४.९८) इति साध्वर्थे यत् । ब्राह्मणप्रियमित्यर्थः । तं दशरथं आर्चयत् । अर्च पूजायां लङ् ॥ २४ ॥

(सं.चं.) याचमानाय विप्राय । 'दरिद्राय द्विजायाथ हस्ताभरणमुत्तमम् । कस्मैचिद् याचमानाय ददौ राघवनन्दनः' (१४.५४) इति च । 'केयूरमङ्गदं प्रोक्तं बाहुमूलविभूषणम्' इत्यभिधानम् । बाहुमूलादुन्मुच्य ददौ । दाणो दाञो वा लिट् । ब्रह्मण्यं प्रियब्राह्मणवर्णम् ॥ २४ ॥

---

१. **'तर्पिताः सकला लोकाः'** २. इतः परम्– **'उपमितं व्याघ्रादिभिः सामान्याप्रयोग इत्युपमानोत्तरपदसमासः'** इत्यधिकं क्वचित् ।

अश्वमेधाग्निनिर्दग्धपाप्मनः पार्त्थिवस्य ते ।
उदारस्य सदारस्य प्रणतस्याऽशिषोऽवदन् ॥ २५ ॥

(भा.दी.) अश्वेति । ते वसिष्ठाद्या मुनयः, अश्वमेधस्य योऽग्निस्तेन निर्दग्धः पाप्मा पापं यस्य स तथोक्त-स्तस्य । 'अस्त्री पङ्कं पुमान् पाप्मा' इत्यमरः । उदारस्य दानशीलस्य, 'उदारो दातृमहतोः' इत्यमरः । दारैर्भार्याभिः सहितः सदारस्तस्य, प्रणतस्य प्रह्वीभूतस्य, पार्थिवस्य राज्ञः दशरथस्य, आशिषः 'श्रीहरिः प्रसन्नः सन् सुपुत्रान् ददातु' इत्यादिशुभवाक्यानि ताः, 'आशीरुरगदंष्ट्रायां शुभवाक्याभिलाषयोः' इति वैजयन्ती, अवदन् । वद व्यक्तायां वाचि लङ् ॥ २५ ॥

(सं.चं.) ते ब्रह्मविदो ब्राह्मणाः । ऋत्विजो वा । उदारो वदान्यः ख्यातः सुकृती विदग्धो वा । 'उदारो महति ख्याते दक्षिणे दानशौण्डके' इति, 'उदारोदीर्णधन्यास्तु महात्मा सुकृतीति च' इति, 'अग्राम्ये सरळोदारविदग्धच्छेकदक्षिणाः' इति च यादवप्रकाशः ॥ २५ ॥

आथर्वशिरसैर्म्मन्त्रैरिष्टिं कर्म्मविमुक्तये ।
पुत्रीयां च क्षितीन्द्रस्य व्यधाद् [१]वैभाण्डको मुनिः ॥ २६ ॥

(भा.दी.) अत्यावश्यकतया प्रार्थनापूर्वमाकारितेन ऋश्यशृङ्गेण किमकारीत्यत आह– **आथर्वे**ति । विभण्डकस्या-पत्यं पुमान् वैभण्डकः मुनिः ऋश्यशृङ्गः, अथर्वशिरसि अथर्ववेदोपनिषदि विद्यमनाः आथर्वशिरसास्तैः मन्त्रैः क्षितीन्द्रस्य दशरथस्य पुत्रीयां पुत्रप्रदां इष्टिं इ(ष्ट्या)ख्ययागं (च) पुत्रप्राप्तौ प्रतिबन्धकीभूतं यत्कर्म तस्य विमुक्तिर्विनाशस्तस्यै व्यधाच्चकार । डु धाञ् धारणपोषणयोर्लुङ् ॥ २६ ॥

(सं.चं.) अध्यात्मप्रचुरत्वादथर्वणः शिर इव । अथर्वणः सारभूतो भागः । उपनिषद्वा । तत्रोक्ता आथर्वशिरसा मन्त्राः । 'इष्टिं तेऽहं करिष्यामि पुत्रीयां पुत्रकारणात् । अथर्वशिरसि प्रोक्तैर्मन्त्रैः सिद्धां विधानतः' (१५.२) इति च । पुत्रप्राप्तिप्रतिबन्धकात् प्राक्तनकर्मणो विमुक्तये ॥ २६ ॥

ऋश्यशृङ्गस्तदा योगी हविर्भागार्त्थमागतान् ।
सुरान् सवासवान् दृष्ट्वा प्राञ्जलिः प्रत्यभाषत ॥ २७ ॥

---

१. **'वैभण्डको–'** इति वि.ती.पाठः ।

(भा.दी.) **ऋश्ये**ति । योगः भगवति मनोयोगः अस्यास्तीति योगी, औत्पत्तिकयोगसामर्थ्यवानिति वा, ऋश्यशृङ्गः, तदा पुत्रेष्टियागकरणसमये, हविषो ये भागास्तेभ्य इति तदर्थम्, हविर्भागस्वीकरणार्थमित्यर्थः, आगतान् सवासवान् इन्द्रसहितान् सुरान् दृष्ट्वा, प्रकृष्टः अञ्जलिः निबद्धहस्तौ यस्य स प्राञ्जलिस्तथा सन्, 'तौ युतावञ्जलिः पुमान्' इत्यमरः, प्रत्यभाषत प्रोवाच । भाष व्यक्तायां वाचि लङ् ॥ २७ ॥

(सं.चं.) प्राञ्जलिः प्रबद्धाञ्जलिः । प्रत्येकमामन्त्र्याभाषत ॥ २७ ॥

[१]अयं राजा विधायेष्टिं मेधावी हयमेधकृत् ।
शरणं पुत्रकामो वः प्राप्तः प्रीयध्वमञ्जसा ॥ २८ ॥

(भा.दी.) देवान् प्रति किमाहेत्यत आह–**अयमि**ति । मेधा अवगतार्थधारणसमर्था बुद्धिरस्यास्तीति मेधावी । 'धीर्धारणावती मेधा' इत्यमरः । 'अस्-माया-मेधा-स्रजो विनिः' (अ.सू.५.२.१२१) इति मत्वर्थे विनिः । हयमेधाख्यं यागं कृतवानिति तथोक्तः । पुत्रेषु काम इच्छा यस्य तथोक्तः । 'इच्छामनोभवौ कामौ' इत्यमरः । अयं राजा इष्टिं इष्ट्याख्ययागं विधाय वः युष्मान् शरणं प्राप्तः । यूयं अञ्जसा सम्यक् प्रीयध्वं प्रीतिं कुरुध्वम् । प्रीङ् प्रीतौ लोट् ॥ २८ ॥

(सं.चं.) वो युष्मान् शरणमाश्रयं प्राप्तः । अञ्जसा आशु । 'अह्नाय सत्वरं च क्षिप्रं द्रुतमञ्जसा झटिति' इत्यभिधानम् ॥ २८ ॥

इच्छत्यसावनुपमान् पुत्त्रांस्त्रैलोक्यविश्रुतान् ।
देवकार्य्यस्य भावित्वाद् यूयं तत्रानुमोदत[२] ॥ २९ ॥

(भा.दी.) **इच्छती**ति । असौ दशरथः, त्रयो लोकास्त एव त्रैलोक्यम्, तस्मिन् विश्रुतान् प्रख्यातान्, अत एव न विद्यते उपमा येषां ते तथोक्तास्तान्, पुत्रान् इच्छति, इषु इच्छायां लट् । यूयं देवानां भवतां यत्कार्यं रावणादिहननलक्षणं प्रयोजनं तस्य भावित्वाद् भविष्यमाणत्वात् (?) । देवेन क्रीडादिगुणविशिष्टेन श्रीहरिणा कार्यस्य कर्तुं योग्यस्य रावणादिहननस्य भावित्वादिति वा । तत्र दशरथपुत्रजन्मनि अनुमोदत । अनुमतिं कुरुध्वम् । अनुपूर्वः मुद हर्षे लोट् ॥ २९ ॥

---

१. **'यजमानोऽयमिष्ट्वा वो मेधावी'**

२. **'भावित्वादपि तत्रानुमोद्यताम्'**

(सं.चं.) तदर्थं न केवलम्, किन्तु भवदर्थं च दशरथेन पुत्रवता भाव्यमित्याह मुनिः– देवकार्यस्य रावणवधादिरूपस्य भावित्वात् । देवानां कार्यम् । देवस्य वा नारायणस्य कार्यम् । स किल जयविजययोर्वरं ददौ– त्रिष्वपि जन्मसु मयैव वध्यौ भवतमिति । 'यूयं तत्रानुमोदत' इति परस्मैभाषा कशायते । सत्यं पाणिनीया मुदधातुमात्मनेभाषं भाषन्ते । कवयस्तूभयतोभाषम् । प्रार्थयतीत्यादिवन्मोदति, मुमोदेत्यादिप्रयोगदर्शनात् । 'मुमुदुस्तौ प्रजा वीक्ष्य विश्वामित्रानुयायिनौ' (४.२९) इति चोपरि । 'सर्वस्मादुभयं पदम्' इति तु सर्वत्र समं समाधानम् । 'अनुमोद्यताम्' इति केचित् पठन्ति । तदपि चिन्त्यम् । मुदधातोर्भावे 'मुद्यते' इति रूपं स्यात्, न मोद्यत इति । मोदयते रूपमिति कथञ्चिदुपपादनीयं स्यात् ॥ २९ ॥

प्रार्त्थिताः पार्त्थिवार्त्थं ते तापसेनेति निर्ज्जराः ।
वरं प्रदाय तं तस्मै ब्रह्मलोकमुपाययुः[1] ॥ ३० ॥

(भा.दी.) प्रार्थिता इति । तापसेन तपःस्थितेन ऋश्यशृङ्गेण पार्थिवायेति पार्थिवार्थम्, दशरथप्रयोजनार्थमित्यर्थः, इति एवमादिप्रकारेण प्रार्थिताः ते निर्जराः तं पुत्रावाप्तिलक्षणं वरं तस्मै दशरथाय प्रदाय ब्रह्मणश्चतुर्मुखस्य यो लोकस्तं उपाययुः । या प्रापणे लिट् ॥ ३० ॥

(सं.चं.) तस्मै पार्थिवाय दशरथाय । निर्जरा हविर्भागार्थमागताः सवासवाः सुराः । ब्रह्मलोकं सत्यलोकम् ॥ ३० ॥

जगदुस्ते जगद्योनिं नत्वा प्राञ्जलयः सुराः ।
नाथानाथाः प्रजाः पाहि रक्षोभ्यां[2] समुपद्रुताः ॥ ३१ ॥

(भा.दी.) ब्रह्मलोकं प्रति मिलित्वा किमर्थं गता इत्यत आह– **जगदुरि**ति । ते इन्द्राद्याः सुराः, जायते गच्छतीति जगत् स्थिरचरात्मकं समस्तम्, तस्य योनिः कारणं तम् । 'योनिः स्त्रीणां भगे स्थाने कारणे' इति वैज-यन्ती । नत्वा प्राञ्जलयः सन्तः, हे नाथ स्वामिन्, न विद्यते नाथो यासां ता अनाथाः, अत एव रक्षोभ्यां रावणकुम्भकर्णाख्यराक्षसाभ्यां समुपद्रुताः सम्यक् पीडिताः प्रजाः पाहि । पा रक्षणे लोट् । इति एवमादि प्रकारेण जगदुः प्राहुः । गद व्यक्तायां वाचि लिट् ॥ ३१ ॥

(सं.चं.) जगतो योनिः कारणं चतुर्मुखः । रक्षोभ्यां समुपद्रुताः । अथाप्यनाथा अपालकाः प्रजा रक्षोभ्यां रावणकुम्भकर्णाभ्यां पाहि ॥ ३१ ॥

१. 'ब्रह्मलोकमथो ययुः'
२. 'रक्षोभ्यः समुपद्रुताः'

सुतौ विश्रवसोऽश्रान्तं तपस्तप्त्वा प्रतापिनौ ।
वरं हि प्रापतुस्त्वत्तः सर्वलोकैरवद्ध्यताम् ॥ ३२ ॥

(भा.दी.) लोकपालत्वाद् भवद्भिः कुतो दानवा न वध्यन्त इत्यतः स्वावध्यत्वे हेतुभूतवरादिकं विज्ञापयन्ति– **सुतावि**त्यादिना । विश्रवसः विश्रवा इति नामवतः मुनेः सुतौ । प्रतापः पौरुषमनयोरस्तीति तथोक्तौ । 'प्रतापौ पौरुषातपौ' इति वैजयन्ती । रावणकुम्भकर्णौ, श्रान्तं मद्ध्ये विच्छिन्नं न भवतीत्यश्रान्तम्, निरन्तरमित्यर्थः, तपस्तप्त्वा, त्वत्तः सर्वे ये लोका जनास्तैः वद्ध्यो न भवतीत्यवद्ध्यः तस्य भावः तत्ता तां अवध्यत्व-लक्षणमित्यर्थः, वरम्, 'दैवाद् वृते वरः श्रेष्ठे त्रिषु' इत्यमरः । प्रापतुः लब्धवन्तौ हि । प्रपूर्वः आप्लृ व्याप्तौ लिट् ॥ ३२ ॥

(सं.चं.) विश्रवसः कैकस्यां जातौ सुतौ रावणकुम्भकर्णौ । कुम्भकर्णः पुरातने जन्मनि हिरण्याक्षत्वे वरं प्राप– 'अहं ब्रह्मसृष्टैरवध्यः सदा स्याम्' इति । स वरो जन्मान्तरेऽप्यन्ववर्तत । रावणस्तु तस्मिन्नेव जन्मनि । नरान् वानरांश्चर्ते सर्वलोकैः । प्रतापिनौ प्रतापवन्तौ । परानुत्थानहेतुः प्रतापः । परेषां तापकौ च ॥ ३२ ॥

कुम्भकर्णाग्रजोऽत्युग्रो रावणो लोकरावणः ।
दिशो दश दशास्योऽसावजयत् खलु लीलया ॥ ३३ ॥

(भा.दी.) कुम्भेति । कुम्भकर्णाग्रजः कुम्भकर्णज्येष्ठः, अत्युग्रः अत्यन्तं क्रूरः, लोकान् जनान् रावयति आक्रोशयतीति तथोक्तः । दश आस्यानि मुखानि यस्य स दशास्यः । असौ रावणः, रावयति आक्रोशयति सर्वान् जनानिति हेतोः रावणशब्दवाच्यः । दश दशसङ्ख्याकाः दिशः, दिक्ष्ववस्थितजनानित्यर्थः, लीलया अजयत् खलु । जि जये लङ् ॥ ३३ ॥

(सं.चं.) लोकान् रावयतीति लोकरावणः । दश दिशोऽजयत् । जनविजयं हि दिग्विजयमाचक्षते ॥ ३३ ॥

विंशद्भिर्बाहुमुसलैरवहत्य जघास सः ।
भयाग्निभर्जितान् देहिब्रीहीन् पृथुकवत् खलः[१] ॥ ३४ ॥

---

१. 'पृथुकवत् सदा'

(भा.दी.) **विंशदि**ति । खलः दुष्टः सः रावणः, भयमेवाग्निस्तेन भर्जितान् सन्तप्तान् देहिनः प्राणिन एव ब्रीहयस्तान्, विंशद्भिर्विंशत्सङ्ख्याकैः, विंशतिशब्दपर्यायोऽयं विंशच्छब्दः, बाहव एव मुसलास्तैः । 'अयोग्रो मुसलोऽस्त्री स्यात्' इत्यमरः । अवहत्य अवहननं कृत्वा पृथुकवत् पृथुकतण्डुलानीव जघास अभक्षयत् । अद भक्षणे लिट् । 'अदेर्घस्लृ' इति घस्लादेशः[१] ॥ ३४ ॥

(सं.चं.) विंशद्भिरिति । प्रत्नैराचार्यैर्विंशतिपदवत् विंशत्पदमपि प्रचुरं प्रयुज्यते । विवृतमेतदस्मत्कृतायां प्रत्नप्रयोगमीमांसायाम् । एवमपि स्यात्– कविना विंशत्या बाहुमुसलैरित्येव प्रायोजि । लिपिकृत्प्रमादेन पश्चात् विंशद्भिरिति पाठान्तरं जातमिति । उत्तरत्राप्येतादृशाः प्रयोगाः प्रचुरं दृश्यन्ते । मुसल इति तुषावहननहेतु-रयःशिरा दारुमयः साधनविशेषः । '**ಒನಕೆ**' इति भाषायाम् । पृथुकाश्चिपिटाः ।'**ಅವಲಕ್ಕಿ**' इति भाषायाम् । ब्रीहयो हि मुसलावहता अग्निभर्जिता पृथुका भवन्ति । जघास आद ॥ ३४ ॥

देवोपदेवभूदेवनरदेवानुतेतरान् ।
मारयन् दारयन्[२] भ्राम्यत्यहो सिंहो मृगानिव ॥ ३५ ॥

(भा.दी.) **देवे**ति । देवा इन्द्रादयस्ते च, उपदेवा गन्धर्वादयस्ते च, भूदेवा ब्राह्मणास्ते च, नरदेवाः पार्थिवास्ते च तान्, इतरान् उत मृगपक्ष्यादींश्च, मृगान् सिंह इव मारयन् संहरन् सन्, दारयन् विदारयन् सन्, भ्राम्यति सञ्चरति । अहो आश्चर्यम् । भ्रमु चलने लट् ॥ ३५ ॥

(सं.चं.) उपदेवाः, यक्षगन्धर्वादयः, येये देवानुपसेवन्ते । भूदेवा विप्राः । नरदेवाः क्षत्रियाः । इतरानपि मनुष्यान् स्त्रीबालादीन् पशूंश्च गवादीन् । भ्राम्यति देशाद् देशान्तरं चलति ॥ ३५ ॥

यद्यच्चारुतरं घोरः पश्येद् भुवनमण्डले ।
धनं जीवधनं वाऽपि तत्तल्लङ्कामयापयत् ॥ ३६ ॥

(भा.दी.) **यदि**ति । घोरः भयङ्करो रावणः, भुवनस्य मण्डलं प्रदेशस्तस्मिन्, अतिशयेन चारु चारुतरं तत् धनं रत्नादिरूपं धनम्, जीवरूपधनं जीवधनं तद् वाऽपि, गजाश्वादिकं वेत्यर्थः । यद्यद् वस्तु पश्येत् । दृशिर् प्रेक्षणे लिङ् । तत्तद् वस्तु लङ्कां प्रति अयापयत् प्रापयामास । या प्रापणे लङ् ॥ ३६ ॥

---

१. अदेर्धातोः '**लिट्यन्यतरस्याम्**' (अ.सू.२.४.४०) घस्लृ इत्ययमादेशो भवतीति वचनाद् घस्लादेश इत्यर्थः । अतोऽत्र '**अदेर्लिटि घस्लादेशः**' इत्येव स्वरसो मूलपाठः ।

२. '**मारयन् द्रावयन्**'

(सं.चं.) जीवरूपं धनं वनितादिकम् । आह भवभूतिरपि–'रत्नं चेत् क्वचिदस्ति तत्परिणमत्यस्मासु शक्रादपि' इति महावीरचरिते ॥ ३६–७ ॥

स्त्रीरत्नानां सरत्नानां नृशंसः पश्यतोहरः ।
दूषणं च कुलस्त्रीणां भूषणं स्वस्य मन्यते ॥ ३७ ॥

(भा.दी.) **स्त्री**ति। रत्नैः सहितानि सरत्नानि तेषाम्, स्त्रीषु रत्नानि तेषाम्, 'रत्नं स्वजातिश्रेष्ठेषु' इत्यमरः । पश्यतः हरतीति पश्यतोहरः, जनेषु पश्यत्स्वपि बलाद्धरतीत्यर्थः । '–वाग्दिक्पश्येभ्यो युक्तिदण्डहरेषु–'[१] इति षष्ठ्या अलुक् । नृशंसः क्रूरः रावणः सत्कुलप्रसूतस्त्रियः कुलस्त्रियस्तासां दूषणं पातिव्रत्यदूषणम्, तत् स्वस्य भूषणं आभरणम्, तत् मन्यते जानाति । मन ज्ञाने लट् ॥ ३७ ॥

तपःस्वाद्ध्याययज्ञानामन्तरायं निरन्तरम् ।
देवर्षिविप्रियापेक्षी दुराचारश्चरत्ययम् ॥ ३८ ॥

(भा.दी.) **तप** इति । दुष्ट आचारो यस्य स दुराचारः, अयं रावणः । देवा इन्द्रादयस्ते च, ऋषयो वसिष्ठाद्यास्ते च, तेषां यद्विप्रियमप्रियं तदपेक्षितुं शीलमस्यास्तीति तथोक्तः सन् । तपश्च स्वाध्यायो वेदश्च यज्ञाश्च तेषाम् । निर्गतमन्तरं व्यवधानं यथा भवति तथा निरन्तरम्, सर्वदेत्यर्थः । अन्तरायो विघ्नस्तम् । चरति आचरति, करोतीत्यर्थः । चर गतिभक्षणयोः लट् ॥ ३८ ॥

(सं.चं.) ब्रह्मचर्यादिकं तपः । गाढं तत्वचिन्तनं च तपः । स्वाध्यायो वेदाध्ययनम् ॥ ३८ ॥

लोकपालान् महेन्द्रादीनस्मान् विस्मयविक्रमः ।
अजान्[२] गजाधिपइव प्राद्रावयदतिद्रुतम् ॥ ३९ ॥

(भा.दी.) **लोके**ति । विस्मय आश्चर्यकरो विक्रमः पराक्रमो यस्य स तथोक्तः रावणः, महेन्द्रः पुरन्दरः आदिर्येषां ते तथोक्तास्तान् लोकपालान्, अस्मान्, अजान् छागान् गजाधिपइव गजश्रेष्ठइव अत्यन्तं द्रुतं यथा भवति तथा अतिद्रुतं प्राद्रावयत् । युद्धे पराजित्य व्यद्रावयत् । द्रु गतौ लङ् ॥ ३९ ॥

---

१. **'षष्ठ्या आक्रोशे'** (अ.सू.६.३.२१) इत्यत्रेदं वार्तिकम्–**'षष्ठीप्रकरणे वाग्दिग्पश्यद्भ्यो युक्तिदण्डहरेषु यथासङ्ख्यमलुग् वक्तव्यः'** इति ।

२. **'अजानजाधिपइव'**

(सं.चं.) विस्मयजनको विक्रमो यस्य । 'विस्मेयविक्रमः' इत्यपि मूलपाठः सम्भाव्यते ॥ ३९ ॥

वधोपायोऽनपायस्य यदि नास्य निरूप्यते ।
प्राप्यते प्रळयः स्वामिन् रुद्रकालान्तकान् विना ॥ ४० ॥

(भा.दी.) **वधेति** । स्वामिन् चतुर्मुख, त्वया, न विद्यते अपायो नाशो यस्य सोऽनपायस्तस्य, अस्य रावणस्य, वधे संहारे उपायः वधोपायः, यदि न निरूप्यते नोच्यते । निपूर्वः रूप रूपक्रियायां लट् । तर्हि रुद्रश्च, कालो मृत्युः स च, 'कालो मृत्यौ यमे च' इति वैजयन्ती, अन्तको यमः स च, तान् विना । प्रळयः सर्वनाशः, जगत इति शेषः, प्राप्यते । प्रपूर्वः आप्लृ व्याप्तौ लट् । रावणश्चेज्जीवति तर्हि संहर्तृत्वेन प्रसिद्धान् रुद्रादीन् विनाऽपि संहारः प्राप्यते । अतः तद्वधोपायोऽवश्यं निरूप्य इति भावः ॥ ४० ॥

(सं.चं.) अनपायस्य वरबलात् पराजयमरणाद्यपायरहितस्य । काला इति तन्नामानो मृत्युदेवताः । काल इति मरणकालो वा । अन्तको यमः ॥ ४० ॥

इति देववचः श्रुत्वा देवः स्मितमुखोऽब्रवीत् ।
यो योगक्षेमदाता नस्तेन हीदं[१] विधित्सितम् ॥ ४१ ॥

(भा.दी.) एवं प्रार्थिते ब्रह्मणा किं निरूपितमित्यत आह– **इतीति** । देवश्चतुर्मुखः, देववचः देवानामिन्द्रादीनां वचस्तत्, श्रुत्वा स्मितं मन्दहासोपेतं मुखं यस्य स तथा सन्, यः श्रीहरिः नः अस्माकम्, अप्राप्तस्य प्राप्तिर्योगः स च, प्राप्तस्य परिरक्षणं क्षेमं तच्च तयोर्दाता दानशीलः, तेन हरिणा इदं भवदुक्तं रावणहननलक्षणं कार्यं विधित्सितं विधातुमिष्टं हि इति अब्रवीत् । ब्रूञ् व्यक्तायां वाचि लङ् । अन्येषां तद्वधे सामर्थ्याभावात्तेनैवेदं कर्तव्यमिति भावः ॥ ४१ ॥

(सं.चं.) योगक्षेमदाता । आह हि भगवानेव–'योगक्षेमं वहाम्यहम्' इति । को योगः? अपूर्ववस्तुसंयोगो योगः । कः क्षेमः? अक्षीणो भोगः । 'जानीयान्मङ्गलं क्षेमं क्षेमं लब्धार्थरक्षणम्' इत्यभिधानम् । इदं तथा वरदानम्, तेन तस्य दौरात्म्यं चेतीदं सर्वं तेन भगवता विधित्सितम् । तदिच्छया विहितम् ॥ ४१ ॥

यस्मै बलिं हरामोऽङ्ग विश्वेऽपि विवशा वयम् ।
विद्धनासा यथा गावः स शार्ङ्गी शं विधास्यति ॥ ४२ ॥

१. **'नस्तेन हार्दं विधित्सितम्'**

(भा.दी.) अन्यैः कर्त्तुमशक्यमिदं कार्यं श्रीहरिः कथं वा कुर्यादित्यतस्तन्महिमानमाह– **यस्मा** इति । अङ्गेत्यव्ययं प्रियसम्बोधने । अङ्ग हे प्रियाः देवाः, वयं विश्वेऽपि सर्वेऽपि, विद्धा च्छिद्रीकृता नासा नासिका येषां ते तथोक्ताः, गावः यथा परवशाः तथा विवशाः परवशाः सन्तः यस्मै श्रीहरये बलिं करं पूजाम्, 'करोपहारयोः पुंसि बलिः' इत्यमरः । हरामः दद्मः समर्पयामो वा । हृञ् हरणे लट् । सः शार्ङ्गी श्रीहरिः शं सुखम्, 'शमव्ययं च सौख्यार्थे' इति रत्नमाला । विधास्यति करिष्यति । विपूर्वः डु धाञ् धारण-पोषणयोर्लृट् ॥ ४२ ॥

(सं.चं.) विद्धनासाः पाशबद्धनासाः । बलिः पूजा । पूजायां ह्रियमाणं हविरादिकं च । सुखं वा दुःखं वा तदधीनम् । नास्मद्वशं किमपि । सम्प्रति दुर्दिनान्यतीतानि । अतः स शं विधास्यति सुखं दास्यति । 'शर्म जोषं च शं सुखम्' इत्यभिधानम् ॥ ४२ ॥

एतावदुक्त्वा भगवान् सभवः कञ्जसम्भवः[१] ।
सवृन्दारकवृन्दोऽथ तीरं क्षीराम्बुधेर्य्ययौ ॥ ४३ ॥

(भा.दी.) एवमभिधाय किमकारीत्यत आह– **एतावदि**ति । अथ भगो भगवज्ज्ञानमस्यास्तीति भगवान्, 'भगो यत्ने यशोवीर्यार्कभूतिषु । कान्तीच्छाज्ञानवैराग्यधर्मैश्वर्यतपस्सु च' इति वैजयन्ती । भवेन रुद्रेण सहितः सभवः, पङ्कजात् श्रीहरिनाभिकमलाद् उद्भव उत्पत्तिर्यस्यासौ पङ्कजोद्भवः ब्रह्मा, एतावत् वचः उक्त्वा, वृन्दारकाणां देवानां वृन्दानि समूहास्तैः सहितः सवृन्दारकवृन्दस्तथा सन्, क्षीरमयानि अम्बूनि धीयन्ते पूर्यन्तेऽत्रेति क्षीराम्बुधिस्तस्य तीरं तटं तत् प्रति ययौ । या प्रापणे लिट् ॥ ४३ ॥

(सं.चं.) कञ्जसम्भवभवनेतृकं वृन्दावरकवृन्दम् । 'गीर्वाणा ऋभवोऽमराश्च मरुतो वृन्दारका निर्जराः' इत्यभिधानम् ॥ ४३ ॥

प्रतिबिम्बमिवापश्यन् भगवत्कीर्त्तिवारिधेः ।
पीयूषवारिधिं हारगौरं पीयूषभोजनाः ॥ ४४ ॥

(भा.दी.) समुद्रादिवर्णनस्य काव्यलक्षणत्वात् तं वर्णयति– **प्रतिबिम्बमिवे**त्यादिना । पीयूषममृतं भोजनं येषां ते तथोक्ताः देवाः, हारवत् मुक्तामणिमालावद् गौरः श्वेतः तम्, पीयूषमयानि क्षीरमयानि वारीणि धीयन्तेऽत्रेति पीयूषवारिधिस्तम् । 'पीयूषोऽभिनवं पयः' इत्यमरः । भगवतः श्रीनारायणस्य या कीर्तिः सैव

१. **'सभवः पङ्कजोद्भवः'** इति वि.ती.सम्मतः पाठः ।

वारिधिः समुद्रस्तस्य प्रतिबिम्बमिव प्रतिरूपमिव । 'प्रतिबिम्बं प्रतिरूपं प्रतिमानं प्रतिकृतिः' इति हलायुधः । अपश्यन्, दृशिर् प्रेक्षणे लङ् । क्षीरसमुद्रस्य श्वेतवर्णत्वात् कीर्तेश्च श्वेतत्वेन कविभिर्वर्ण्यमानत्वात् बिम्बप्रतिबिम्बभाव इति भावः ॥ ४४ ॥

(सं.चं.) पीयूषवारिधिः क्षीरसागरः । 'दुग्धं स्तन्यं पयश्च पीयूषम्' इति च । कीर्तिर्धवळेति कविसमयः । यशसा धवळिता दिश इत्याचक्षते । तेन धवळस्य क्षीरसागरस्य तत्प्रतिबिम्बत्वमुत्प्रेक्ष्यते । पीयूषभोजना इत्यमृताशनाः । 'अमृतं त्रिदशाहारः सुधा पीयूषमिष्यते' इति, 'अमृताशना अनिमिषा देवाः' इति च ॥ ४४ ॥

पुरायितं मुररिपोर्म्मणिराजिविराजितम् ।
सालायमानैरुत्तुङ्गैस्तरङ्गैरुपशोभितम्[1] ॥ ४५ ॥

(भा.दी.) **पुरेति** । मुरस्य मुरनामकदैत्यस्य रिपोः श्रीहरेः पुरवदाचरतीति पुरायितस्तम्, क्षीराम्बुधौ भगवतोऽवस्थानादिति भावः । मणीनां रत्नानां राजयः पङ्क्तयस्ताभिर्विराजितं शोभितम् । '[2]श्रेणी लेखास्तु राजयः' इत्यमरः । रत्नाकरत्वात् समुद्रस्येति भावः । सालवत्प्राकारवद्वर्तन्त इति सालायमानास्तैः, 'प्राकारो वरणः सालः' इत्यमरः, उत्तुङ्गैरुन्नतैः तरङ्गैरुपशोभितं पीयूषवारिधिं अपश्यन्निति पूर्वेणान्वयः ॥ ४५ ॥

(सं.चं.) उदधिः मुक्तामणिराजिविराजितः । पुरं तु मरतकादिसर्वविधमणिराजिविराजितम्, कन्यामणिभिश्च विराजितम् । स्वजातिश्रेष्ठं सर्वं रत्नमिति मणिरिति चोच्यते । 'अश्मगर्भं मरतकं हरिन्मणिरिति स्मृतम् । शोणाश्मा पद्मरागः स्याद् वैडूर्यं वाळवायजम् । स्फटिकः सूर्यकान्तः स्यादर्काश्मा दहनोपलः । रत्नं वसु मणिः सर्वम्' इति च । 'राजिः पङ्क्तौ' इति वैजयन्ती । सालः दुर्गप्राकारः ॥ ४५ ॥

गम्भीरस्तोत्रनिनदं लोलमन्तः कुतूहलात् ।
अत्यन्तमिव नृत्यन्तं भक्तं भक्तानुरागिणः ॥ ४६ ॥

(भा.दी.) **गम्भीरेति** । देवाः, गम्भीरमर्थतोऽगाधं यत् स्तोत्रं तद्वत् निनदो ध्वनिर्यस्य स तथोक्तस्तम् । 'ता वा एताः सर्वा ऋचः सर्वे वेदाः सर्वे घोषा एकैव व्याहृतिः' इति श्रुतौ समुद्रघोषादेरपि भग-

१. **'–स्तरङ्गैः परिशोभितम्'**

२. श्रेणीति पूर्वान्वयि –**'वीथ्यालिरावलिः पङ्क्तिः श्रेणी'** इति । **'लेखास्तु'** इति तुशब्देन पृथक्करणात् । तेन नेदमत्र स्वरसमुदाहरणम् ।

वद्गुणप्रतिपादकत्वोक्तेः भगवद्विषयकस्तोत्रस्यापि तद्गुणप्रतिपादकत्वात् तयोरुपमानोपमेयभाव इति भावः । अन्तः कुतूहलात् कौतुकादिव, 'कौतुकं तु कुतूलहम्' इत्यमरः, लोलं चञ्चलम् । भक्तपक्षे तु लोलं लोलुपम्, 'लोलं चले लोलुपे च' इति वैजयन्ती । अत एव अत्यन्तं नृत्यन्तमिव स्थितं क्षीरसमुद्रम्, भक्तेषु अनुरागो दया अस्यास्तीति तथोक्तस्तस्य, श्रीनारायणस्य भक्तमिव, अपश्यन्निति पूर्वेण समन्वयः ॥ ४६ ॥

(सं.चं.) भक्तः स्तोत्रेण निनदति । उदधेर्निनिद एव स्तोत्रायते । 'सर्वे घोषाः' इति समुद्रघोषादयोऽपि हि भगवद्गुणवाचकाः । अन्तरभिमानाज्जामातृविषयकात् कुतूहलादिव बहिर्लोलं पारिप्लवम् । उत्प्रेक्षैव ह्यपठ्यमानमपीवशब्दमावर्तयति । लोकेऽपि ह्यन्तः कुतूहलेन भ्रमन्मना बहिरपि तूष्णीकां स्थातुमप्रभवन्नितस्ततः परिभ्रमति । भक्तस्तु कुतूहलादेव पुनःपुनरधिकमधिकं भगवद्गुणजातं ज्ञातुं लोलः सतृष्णः । 'लोलश्चले सतृष्णे च' इति हैमः । अशक्यनियन्त्रणः कश्चनौत्सुक्यातिशयः, उत्प्लवनमिव मनसः काचिदुत्कता कुतूहलम् । परिप्लवैस्तरङ्गैरत्यन्तं पानमत्तमिव नृत्यन्तं वारिधिम् । इवेन समासस्य प्रायिकत्वादत्र 'अत्यन्तमिव' इति भिन्ने पदे । भक्तं च भक्तिविवशतयाऽत्यन्तमुत्प्लुत्योत्प्लुत्य नृत्यन्तम् । कस्य भक्तम्? भक्तानुरागिणो हरेः । भक्तवत्सलो हि भगवान् । अथ च भक्तानुरागिणः भगवद्भक्तेषु प्रीतिमन्तः सन्तः यथा भक्तं बहुमानेन पश्यन्ति तथा क्षीरवारिधिं देवा अपश्यन् ॥ ४६ ॥

तस्य तीरमधिष्ठाय कञ्जोद्भवभवादयः ।
तुष्टुवुस्तुष्टमनसो विष्टरश्रवसं सुराः ॥ ४७ ॥

(भा.दी.) **तस्येति** । [1]कादुदकाज्जायत इति कञ्जं कमलम्, तस्मादुद्भवो यस्य चतुर्मुखस्य स कञ्जोद्भवः, स च, भवो रुद्रः स च, तौ आदी येषां ते तथोक्ताः सुराः । तस्य क्षीरसमुद्रस्य तीरं तटं तत् अधिष्ठाय आश्रित्य, तुष्टं मनो येषां ते तथा सन्तः, विष्टरं व्यापनशीलं श्रवः कीर्तिर्यस्य स तथोक्तस्तं श्रीहरिं तुष्टुवुः स्तुतवन्तः । ष्टुञ् स्तुतौ लिट् ॥ ४७ ॥

(सं.चं.) तुष्टमनसः । तुष्टं प्रीतियुक्तं मनो येषां ते । विष्टरश्रवसम् । देवेष्विव दैत्येष्वपि विष्टो रमत इति श्रवः कीर्तिर्यस्य तम् । अन्तःस्थित्वा रमणकृदन्तरः । अन्तर्विष्ट्वा रमणकृद् विष्टरः । अथाप्याहुः– विष्टरो वृक्षः । 'पलाशी विष्टरः स्थिरः' इत्यभिधानात् । विष्टरे अश्वत्थवृक्षे श्रूयत इति विष्टरश्रवाः । 'अश्वत्थः सर्ववृक्षाणाम्' इति स्मरणात् । विष्टरो दर्भमुष्टिरिव श्रवसी कर्णावस्येति विष्टरश्रवा इत्यन्ये ॥ ४७ ॥

---

१. कमित्यव्ययम् । तेन **'कमुदकात्'** इति युक्तम् ।

नमो नागेन्द्रशय्याय नमो नानाविलासिने ।
नमोऽनाद्यन्तमद्ध्याय नमो नारायणाय ते　　　　　　　॥ ४८ ॥

(भा.दी.) स्तुतिप्रकारमाह–**नम** इत्यादिना । नागेन्द्रः शेषः शय्या पर्यङ्को यस्य स तथोक्तस्तस्मै नमः । अस्त्विति शेषः । नानाविधा ये विलासा सृष्ट्यादिरूपाः क्रीडास्तस्य सन्तीति तथोक्तस्तस्मै, ते तुभ्यं नमः । आदिरुत्पत्तिः स च, अन्तो विनाशः स च, मध्यं मध्यावस्था तच्च, न विद्यन्ते तानि यस्य स तथोक्तस्तस्मै, आद्यन्तयोरभावात् तन्निरूप्यं मध्यं च नास्तीति भावः, नमः । नराणां सम्बन्धि नारं ज्ञानं तस्य अयनमाश्रयो नारायणस्तस्मै, ज्ञानस्य विषयतया आश्रयायेत्यर्थः, ते नमः । अस्त्विति प्रत्येकं सम्बन्धः ॥ ४८ ॥

(सं.चं.) विलासो लीलाभिव्यञ्जनम् । 'सृष्टिसंहारलीलाविलासाततम्' इत्याचार्यवचनम् । स्वयमादिमध्यान्तरहितः । अनस्य प्राणतत्वस्याप्याद्यन्तमध्यः । अनोपलक्षितस्य सर्वस्य जगतः । भगवत आद्यन्तौ न स्त इति न मध्यं च । इतरत्र आद्यन्तयोरुत्पत्तिसंहारयोर्मध्यमिति स्थितिः । 'नान्तं न मध्यं न पुनस्तवादिं पश्यामि' इति गीतासु । 'त्वमादिरन्तो जगतोऽस्य मध्यम्' इति भागवते । नराणामिमे तत्वमानिन इति नाराः देवाः । तेषामयनः । नाराया रमाया अपि । क्षराक्षरपुरुषाभ्यामुत्तमायेत्येतत् ॥ ४८ ॥

विपत्त्युत्पत्तिनियतिस्थितिज्ञप्तिसमावृतीः ।
सृतिं मुक्तिं च जगतः[१] स्वामिन्नेकः करोत्यहो　　　　　　॥ ४९ ॥

(भा.दी.) **विपत्ती**ति । जगतः विपत्तिः संहारः सा च, उत्पत्तिः सृष्टिः सा च, नियतिः प्रेरणा सा च, स्थितिः पालनं सा च, ज्ञप्तिर्ज्ञानं सा च, समावृतिरज्ञानं सा च ताः, सृतिं संसारम्, मुक्तिं मोक्षं च, हे स्वामिन्, एकः भवान् करोति । डु कृञ् करणे लट् । अहो आश्चर्यम् ॥ ४९ ॥

(सं.चं.) विपत्तिः संहारः । समावृतिरज्ञानम् । करोति भवान् । 'करोष्यहो' इत्यापि मूलपाठः स्यात् । अहो त्वदृते कोऽन्यः प्रभवेत्? न कोऽपि ॥ ४९ ॥

नैकैकशोऽपि गणशस्तवानन्तान् गुणान् वयम् ।
समापयामः सततं गायन्तोऽप्यपरे कुतः　　　　　　　॥ ५० ॥

---

१. 'जगतां स्वामि–'

(भा.दी.) **ने**ति । एकं च एकं च एकैकशः । 'सङ्ख्यैकवचनाच्च वीप्सायाम्' (अ.सू.५.४.४३) इति शस् । एकैकगुणमपीत्यर्थः । गणशः समूहात्मकान्, गुणसमूहात्मकान् । गुणानां प्रत्येकं परिपूर्णगुणत्वादिति भावः । न विद्यते अन्तो विनाशो येषां ते तथोक्तान् । तव गुणान् वयं सततं गायन्तोऽपि वर्णयन्तोऽपि न समापयामः समाप्तिं न गच्छामः । समाङ्पूर्वः आप्लृ व्याप्तौ लट् । अपरे अस्मद्व्यतिरिक्ता ऋष्यादयः कुतः समापयेयुः? न कुतोऽपीत्यर्थः । ज्ञानादिगुणैरस्मत्तोऽवराणां तेषां गुणानां वर्णयित्वा समापनमत्यन्तमसम्भावितमिति भावः ॥ ५० ॥

(सं.चं.) एकैकशोऽप्यनन्तान् । गणशोऽप्यनन्तान् । 'मय्यनन्तगुणेऽनन्ते गुणतोऽनन्तविग्रहे' इति हि भागवते । गणशो गायन्तोऽपि । सर्वे वयं सम्भूय गायन्तोऽपि न समापयामः नान्तं गच्छामः । सम्पूर्व आपिः पूर्णतावचनः ॥ ५० ॥

यावन्न निर्दहति रावणनामवह्नि-
र्विश्वं च दाशरथिभूयमुपेत्य[1] तावत् ।
त्वं नाथ तं शमय वीर्य्यसमुद्रपूरै-
र्भक्ताननन्यशरणान् कुरु वीततापान् ॥ ५१ ॥

(भा.दी.) एवं भगवतः स्तुतिं कृत्वा स्वाभिप्रेतं निवेदयन्ति– **यावदि**ति । हे नाथ स्वामिन् हरे, त्वं यावत् यतः पूर्वं, रावण इति नाम यस्य स रावणनामा स चासौ वह्निश्च, सः । विश्वं जगत् न निर्दहति न भस्मीकरोति, न विनाशयतीत्यर्थः । दह भस्मीकरणे लट् । तावत् ततः पूर्वं दशरथस्यापत्यं पुमान् दाशरथिः तत्त्वेन भवनं दाशरथिभूयं तत्, दशरथपुत्रत्वमित्यर्थः । भूयमिति भावार्थे क्यप्प्रत्ययान्तो नपुंसकलिङ्गोऽयं शब्दः । उपेत्य सम्प्राप्य, वीर्यं बलम्, प्रभावो वा वीर्यम् । 'वीर्यं बले प्रभावे च' इत्यमरः । तदेव समुद्रस्तस्य पूरा उदकवृद्धयस्तैः । 'पूरः स्यादम्भसो वृद्धिः' इति हलायुधः । तं रावणाख्यं वह्निं शमय विनाशय । शमु उपशमे लोट् । न विद्यते अन्यः शरणं रक्षको येषां ते तथोक्तास्तान् । 'शरणं गृहरक्षित्रोः' इत्यमरः । भक्तान् अस्मान् । वीतो विहतस्तापो येभ्यस्ते तथोक्तास्तान् । कुरु च ॥ ५१ ॥

(सं.चं.) दाशरथेर्भावो दाशरथिभूयम् । दशरथपुत्रत्वम् । विश्वं च समग्रं विश्वम् । पूरैरुद्वेलैरम्भोभिः । 'पूरस्तु जलबृंहणम्' इति यादवप्रकाशः । तभजजैर्गाभ्यां च वसन्ततिलका ॥ ५१ ॥

---

१. 'दाशरथिरूपमुपेत्य'

गीर्वाणैरिति नुतिमद्भिरर्थ्यमानः
प्रत्यक्षीभवति पुरा पुराणमूर्त्तिः ।
बालार्कप्रकररुचिः पिशङ्गवासाः
स्वाकल्पस्फुरितमणिर्म्मनोभिरामः ॥ ५२ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे बालकाण्डे द्वितीयः सर्ग्गः ॥

—०—

(भा.दी.) ब्रह्मादिभिरेवमर्थितो भगवान् प्रत्यक्षोऽभूदित्याह– **गीर्वाणैरि**ति । इति एवमादिरीत्या नुतिः स्तुतिः एषामस्तीति नुतिमन्तस्तैः, स्तुतिं कुर्वद्भिरित्यर्थः, गीर्वाणैः देवैः इति अर्थ्यमानः प्रार्थ्यमानः, पुरा आदिकाले अनिति चेष्टत इति पुराणी प्रळयकालेऽपि विद्यमानेत्यर्थः, पुराणी मूर्त्तिः शरीरं यस्य स तथा । 'मूर्त्तिः काठिन्यकाययोः' इत्यमरः । बाला उद्यन्तो येऽर्काः सूर्यास्तेषां यः प्रकरः समूहस्तस्य रुचिरिव रुचिर्दीप्तिर्यस्य स तथोक्तः । पिशङ्गं पीतं वासो यस्य स तथोक्तः । शोभन आकल्पो भूषणं यस्य स तथोक्तः । स्फुरितः प्रकाशमानो मणिः कौस्तुभरत्नं यस्येति तथोक्तः । ततश्च स्वाकल्पश्चासौ स्फुरितमणिश्चेति कर्मधारयः । मनसोऽभिरामो मनोहरः । श्रीनारायणः प्रत्यक्षीभवति पुरा प्रत्यक्षोऽभूत् । 'यावत् पुरानिपातयोर्लट्' (अ.सू.३.३.४) इति भूतार्थे लट्[१] । 'अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्त्तरि च्विः' (अ.सू.५.४.५०) । तथा च पूर्वमप्रत्यक्षो भगवान् ब्रह्मादिभिः स्तुतिपूर्वकं रावणादिराक्षसहननं कर्त्तव्यमिति विज्ञापितः सन् तेषामाश्वसनार्थं प्रत्यक्षोऽभूदिति भावः ॥ ५२ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां बालकाण्डे द्वितीयः सर्गः ॥

—०—

१. यद्यपि सूत्रमिदं न भूतार्थे लड्विधायकम् । किन्तु भविष्यदर्थे । यदाह जयादित्यः– **'यावत्पुराशब्दयोर्निपातयोरुपपदयोर्भविष्यति काले धातोर्लट्प्रत्ययो भवति'** इति । तेन **'प्रत्यक्षीभवति पुरा'** इत्यस्य प्रत्यक्षीभविष्यतीत्यर्थः स्यात् । नतु **'प्रत्यक्षोऽभवत्'** इति । अथापि **'भविष्यति गम्यादयः'** (३.३.३) इति पूर्वसूत्रेण **'भविष्यति'** इति पदं यथाऽनुवर्तते तथा **'भूतेऽपि दृश्यन्ते'** (३.३.२) इति पूर्वसूत्रेण **'भूतेऽपि'** इत्यप्यनुवर्तनीयमिति ग्रन्थकृदाशयः । तथाच भूते भविष्यति च यावत्पुरानिपातयोरुपपदयोर्लट् प्रत्ययो भवतीति सूत्रार्थः । वस्तुतस्तु 'पुरि लुङ् चास्मे' (३.२.१२२) इति सूत्रस्य विषयोऽयम् । न 'यावत्पुरानिपातयोर्लट्' इत्यस्य ।

(सं.चं.) नुतिः स्तुतिः । प्रत्यक्षीभवति पुरा प्रत्यक्षीबभूव । 'पुरि लुङ् चास्मे' (३.२.१२२) इति पुराशब्द उपपदे भूतानद्यतनेऽर्थे विभाषा लुङ् लट् च प्रत्ययौ भवत इति विधानात् । स्वभावतः सर्वदाऽप्रत्यक्षो भगवान् गगनवदिति च्विः । 'आकाशशरीरं ब्रह्म' इति हि श्रुतिः । पुराऽपि नवः पुराणः । पिशङ्गं कपिलवर्णं वासोऽस्य । पिशङ्गे पीतस्याधिक्यात् तदेवात्र मुख्यत उच्यते । शोभनाकल्पः । 'आकल्पो मण्डनं वेषः' इत्यभिधानम् । तत्रापि विशिष्य वक्षसि स्फुरितकौस्तुभमणिः । 'स्वाकल्पः स्फुरितमणिः' इति भिन्ने पदे इत्येव सुन्दरम् । भिन्नपदत्वेऽपि 'स्वाकल्प स्फुरितमणिः' इति भवति सांहितं रूपम् । यथा गीतायाम्–'नित्यः सर्वगत स्थाणुः' इति । तथाहि वार्तिकम्–'खर्परे शरि वा लोपो वक्तव्यः' (अ.सू.८.३.३६) इति । मनजरगैः प्रहर्षिणीयम् ॥ ५२ ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां बालकाण्डे द्वितीयसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– ३७+५२=८९]

तृतीयः सर्ग्गः

मन्दहासेन्दुमहसा नन्दयन् देवता हरिः ।
साध्वसं साध्वशमयन्मेघगम्भीरया गिरा ॥ १ ॥

(भा.दी.). श्रीरामावतारार्थमर्थितेन हरिणा कृतानुग्रहप्रकारं दर्शयति– **मन्दहासे**त्यादिना । हरति सर्वानिष्टमिति वा, हरति आहरति सम्पादयति भक्ताभीष्टमिति वा हरिः श्रीनारायणः, मन्दः स्वल्पो यो हासः स एवेन्दुस्तस्य यन्महः कान्तिस्तेन, देवता देवान् नन्दयन् हर्षयन् सन्, मेघवन्मेघगर्जनवद् गम्भीरया गिरा साध्वसं भयं तत्, 'भीतिर्भीः साध्वसं भयम्' इत्यमरः, साधु सम्यक् यथा भवति तथा, अशमयत् शमनं चक्रे, शम उपशमे लङ् ॥ १ ॥

(सं.चं.) मन्दहास एव मुखेन्दोर्महः कान्तिश्चन्द्रिका । साधु सामस्त्येन । गम्भीरा या कर्णकुहरं निर्भिद्येव बलात् प्रविश्यान्तर्गर्भमालोडयति ॥ १ ॥

निर्ज्जरा विज्वराः स्वस्थाः स्वस्था भवत माचिरम्[१] ।
अपि त्रैलोक्यजयिनं वत्सा वत्स्यामि[२] वो रिपुम् ॥ २ ॥

(भा.दी.) वचनप्रकारमेव दर्शयति–**निरि**ति । वत्साः बालकाः । 'वत्सो ना कुटजे वर्षे तर्णके तनया-दिके । बाले च' इति वैजयन्ती । न विद्यते जरा येषां ते निर्जराः, निर्गता जरा येभ्य इति वा, हे देवाः, स्वस्थाः स्वास्थ्यवन्तः भवत, भुवो लोट् । अत एव विगतः ज्वरो मानसतापो येषां ते विज्वराः सन्तः स्वः स्वर्गेषु तिष्ठन्तीति स्वस्थाः । 'स्वरव्ययं स्वर्गनाक–' इत्यमरः । 'वा शरि' (अ.सू.८.३.३६) इति विसर्गलोपे[३]

१. वि.ती.पाठे **'मा चिरम्'** इति पदद्वयम् । २. **'वेत्स्यामि वो रिपुम्'** इति क्वचित् पठ्यते । साधुरयं शब्दः । अर्थस्तु नानुगुणः ।

३. **'वा शरि'** इति सूत्रविवरणाय प्रवृत्तेन **'खर्परे शरि वा लोपो वक्तव्यः'** इति वार्तिकेन विसर्गलोपे सतीत्यर्थः । विसर्गस्य लोपेन तत्स्थाने सकारादेशे **'स्वस्स्थाः'** इति रूपं सम्पद्यत इति वा ।

स्वर्लोकस्थिता इत्यर्थो भवति । चिरं विळम्बः मा माऽस्तु । 'दीर्घकाले चिराच्चिरम्' इति वैजयन्ती । अस्मत्पीडके रावणे जीवति सति कथं स्वास्थ्यमित्यत आह– **व** इति । वः युष्माकं रिपुं रावणम्, त्रैलोक्यं जेतुं शीलमस्यास्तीति त्रैलोक्यजयी तमपि, वत्स्यामि हनिष्यामि, वध सम्प्रहारे[१] लृट् ॥ २ ॥

(सं.चं.) 'वृन्दारका निर्जराः' इत्यभिधानम् । विज्वरा निश्चिन्ताः । स्वः स्वर्गे स्थिताः । अथच स्वस्थाः स्वे पदे स्थिताः, स्वेस्वे भावे च स्थिताः । स्वीय इन्द्रादिपदे स्थिताः स्वभावसहजं वर्तमानाः निर्भयं स्वकर्मनिरता भवतेत्यर्थः । माचिरं स्वस्था भवत । यतो माचिरमचिरेणैव वो रिपुं वो युष्माकमर्थे वत्स्यामि । वैयाकरणानामपरिचितमिदं पदं किम्मूलमिति मृग्यम् । 'वध सम्प्रहारे' इति धातोर्लृटि रूपमिति साम्प्रदायिकाः । न वधधातुं पाणिनीयाः पठन्ति । नतरां तस्यानिट्त्वं स्ये । अथापि वधधातुस्तावत् प्रतनैः पठ्यते । यदाहुः केशिनं वधतीति केशव इति । पाणिनेरप्येतत् सम्मतमवगम्यते –'जनिवध्योश्च' (अ.सू.७.३.३५) इति सूत्रे वधिधातोः स्फुटमुल्लेखात् । इदमिदानीं प्रतनानां वचनप्रामाण्यादभ्यूह्यते– यद् वधेः लृटि सेट्त्वं विभाषा भवतीति– तेन वधिष्यति वत्स्यति इति रूपद्वयम् । स यथा वृतुधातोः वर्तिष्यते वर्त्स्यतीति रूपद्वयम् । यथावा वृधुधातोर्वर्धिष्यते वर्त्स्यतीति । 'वर्त्स्यामि' इत्येव वा मूलपाठः स्यात् । 'वृधु वृद्धौ' इति धातुपाठः । 'छेदने च' इति पठनीयम् । 'छेदे वृद्धौ च वर्धनम्' इति यादवप्रकाशः । णिचि वर्धयति छिनत्तीति प्रसिद्धम् । अणिचि च स एवार्थः स्यात् ॥ २ ॥

आकर्ण्ण्य कर्ण्णपीयूषमुत्तमश्लोकजल्पितम् ।
कृतकृत्यास्ततो जग्मुस्त्रिदिवं त्रिदिवौकसः ॥ ३ ॥

(भा.दी.) आकर्ण्येति । त्रिदिवः स्वर्ग ओक आवासो येषां ते तथोक्ताः, देवाः । कर्णयोः पीयूषमिव कर्णपीयूषं तत्, अत्यन्तश्रवणीयमित्यर्थः । उत्तमः श्लोकः कीर्तिर्यस्य स तथोक्तस्तस्य जल्पितं वचनं तत् । उत्तमश्लोकेन जल्पितं प्रोक्तं वच इति वा । आकर्ण्य कृतं कृत्यं प्रयोजनं येषां ते तथा सन्तः, ततः क्षीराब्धेः, त्रिदिवः स्वर्गस्तम्, जग्मुः । गम्लृ गतौ लिट् ॥ ३ ॥

(सं.चं.) पीयूषममृततुल्यमानन्दावहम् । 'त्रिदशावासस्त्रिविष्टपं त्रिदिवम्' इत्यभिधानम् ॥ ३ ॥

राज्ञ इष्टिसमिद्धाग्नेर्न्नारायणनियोगतः ।
उदतिष्ठन्महद् भूतं[२] प्राजापत्यं रुचा ज्वलत् ॥ ४ ॥

---

१. सौत्रो धातुरयम् । केचिद् **'वध हिंसायाम्'** इति धातुपाठं पठन्ति । अधिकं सङ्कहचन्द्रिकायाम् द्रष्टव्यम् ।

२. **'उदतिष्ठन्महद् रूपम्'**

(भा.दी.) **राज्ञ** इति । राज्ञः दशरथस्य इष्टेः इष्टिनामकस्य यागस्य समिद्धः सम्यगभिवृद्धो योऽग्निस्तस्मात्, नारायणस्य नियोगो आज्ञा तस्मादिति ततः, प्रजापतेः सम्बन्धि प्राजापत्यम्, ब्रह्माख्यदेवताधिष्ठितमित्यर्थः, रुचा कान्त्या, ज्वलत् प्रकाशमानम्, महत् गिरिशृङ्गवदत्युच्चं पूज्यं वा, भूतं दैवम्, उदतिष्ठत् प्रादुर्बभूव । ष्ठा गतिनिवृत्तौ लङ् ॥ ४ ॥

(सं.चं.) पुत्रीयायामिष्टौ समिद्धाग्नेः । प्राजापत्यं प्रजापतिनिसृष्टम्, प्रजापतिदेवत्यं वा । 'साऽस्य देवता' (४.२.२४) इति पाणिनिः । महद् भूतम् । नारायणः प्रजापतिं नियुयोज । प्रजापतिर्भूतम् । महत् बृहदाकारम् । भूतमिति देवयोनिविशेषः पुरुषः । वस्तुतः 'महद् भूतम्' इति विष्णोरेव नाम । 'एको विष्णुर्महद् भूतम्' इति स्मृतेः । 'अस्य महतो भूतस्य' इति श्रुतेश्च । तद् व्यावर्तनाय प्राजापत्यमित्याह प्रजापतिना निसृष्टमिति । नारायणनियोगत इति च स्फुटम् । अथापि महतो भूतस्य विष्णोः विशेषसन्निधानयुक्तम् । अत एव रुचा देहदीप्त्या ज्वलदुज्ज्वलम् । 'रुक् स्याद् दीप्त्यभिलाषयोः' इति मङ्खः । 'ततो वै यजमानस्य पावकादतुल-प्रभम् । प्रादुर्भूतं महद् भूतं महावीर्यं महाबलम्' (१६.११) इति, 'प्राजापत्यं नरं विद्धि मामिहाभ्यागतं नृप' (१६.१६) इति च वाल्मीकीये । 'महद् भूतम्' इति श्रवणाद् विष्णुरेवाऽगत इति तिलककृत् । तदयुक्तमिति द्योतयितुं च नारायणनियोगत इत्याह ॥ ४ ॥

[१]सुवर्ण्णपात्रे सम्पूर्ण्णं पायसं पार्थिवाय तत् ।
दत्वेदं पुत्त्रीयमिति[२] तत्रैवान्तर्द्दधे द्रुतम्[३] ॥ ५ ॥

(भा.दी.) प्रादुर्भूतेन तेन किं कृतमित्यत आह– **सुवर्णेति** । तद्भूतं सुवर्णमयं यत्पात्रं तस्मिन् सम्पूर्णं तत् पायसं पार्थिवाय दशरथाय दत्वा, इदं पायसं पुत्रीयं पुत्रप्रदं इति, उक्त्वेति शेषः, तत्रैव इष्टयग्रा-वेव अन्तरधीयत तिरोहितमभूत् । अन्तःपूर्वाद् 'धीङ् आधारे' इत्यस्माल्लङ् । 'अन्तर्दधे द्रुतम्' इति वा पाठः ॥ ५ ॥

(सं.चं.) इदं पुत्रीयं पुत्रसन्तानदं पायसमित्युक्त्वा पायसं दत्वा । 'पुत्राच्छ च'(५.१.४०) इति पाणिनिः । तत्रैव तस्मिन्नेव समिद्धाग्नौ । पयसि पक्वमन्नं पायसम्, क्षीरान्नमित्येतत् ॥ ५ ॥

कौसल्यामथ कल्याणीमाहूय महिषीं प्रियाम् ।
परमान्नाद् ददावर्द्धं परं तस्यै नराधिपः ॥ ६ ॥

---

१. **'सुवर्णपात्रसम्पूर्णम्'** २. **'पुत्रियमिति'** इति केचित् । अपाणिनीयं तत् । ३. **'तत्रैवान्तरधीयत'** इति वि.ती.सम्मतः पाठः ।

(भा.दी.) अथ दशरथेन किमकारीत्यत आह– **कौसल्यामि**ति । अथ पायसलाभानन्तरम्, नराधिपः दशरथः कौसल्यां कौसल्यानाम्नीं कल्याणीं शोभनां महिषीं पट्टाभिषिक्ताम्, 'कृताभिषेका महिषी' इत्यमरः, प्रियां भार्यां आहूय तस्यै कौसल्यायै, परमान्नं पायसं तस्मात्, परं मुख्यम्, 'परं दूरान्यमुख्येषु' इति वैजयन्ती, अर्द्धं समांशस्तत्, 'पुंस्यर्द्धोऽर्धं समांशके' इत्यमरः, ददौ दाण् दाने लिट् ॥ ६ ॥

(सं.चं.) अथ पायसस्वीकारसमनन्तरमेव सम्भ्रमादविलम्बितम् । कल्याणीं भगवदवतारपात्रतासम्पादकशुभगुणभरिताम् । महिषीं पट्टाभिषेकसमये राज्ञा सहाभिषिक्ताम् । अत एव प्रियाम् । अस्यां युवराजो जनिष्यत इति प्रीतिविषयाम् । 'कृताभिषेका महिषी भट्टिन्य इतराः स्मृताः' इत्यभिधानम् । परं सन्ततिदानदक्षम् । परमान्नं क्षीरान्नम् । 'क्षैरेयं पायसं प्रोक्तं परमान्नं च सूरिभिः' इत्यभिधानम् ॥ ६ ॥

अर्द्धादर्द्धं ततो भक्तं विभक्तं भक्तिमान् हरौ ।
पवित्रं स सुमित्रायै सुस्मितायै ददावथ ॥ ७ ॥

(भा.दी.) **अर्द्धादि**ति । अथ हरौ भक्तिमान् सः दशरथः । ततः कौसल्यायै दत्तावशिष्टात् अर्द्धं समांशस्तस्मात् । विभक्तं द्विधा विभागीकृतम् । पवित्रं अर्द्धं भक्तं परमान्नरूपमन्नम् । 'अन्धः कूरं भक्तं दीदिविरन्नम्' इति हलायुधः । सु शोभनं स्मितं यस्याः सा तथा तस्यै सुमित्रायै सुमित्रानाम्न्यै द्वितीयमहिष्यै ददौ ॥ ७ ॥

(सं.चं.) ततस्तस्मात् अवशिष्टादर्धादर्धं चतुर्थांशम् । अर्धादर्धं यथा स्यात् तथा विभक्तमिति वा । भक्तमन्नम् । 'अन्धः कूरं भक्तं दीदिविरन्नं तथौदनं भिस्सा' इति च । पायसदानकालेऽपि हरिः प्रीयतामित्येव मनसि निधाय ददावित्याह– भक्तिमान् हरौ । अत एव हरावतिभक्तिमान् लक्ष्मणो जज्ञे । देवप्रेषितमिति पवित्रम् । यत्प्राशनेन राजदारा अपि पवित्रा बभूवुः । तेन दिव्यसन्ततिभरणयोग्या बभूवुः । यदा सपत्न्यौ कलहायेते तदापीयं ते सान्त्वयन्ती सुस्मितैव तस्थावित्याह–सुस्मिताया इति । अथ कौसल्यायै पायसदानानन्तरम् । नन्वथेत्यवक्तव्यम् । अनुक्तावप्यानन्तर्यं ज्ञायत एव । अस्ति किञ्चिद् वक्तव्यम् । बहवो विपश्चित एवमभिप्रयन्ति– दारेषु द्वितीया कैकेयी । अत एव तां मध्यमामाह वाल्मीकिः । तृतीया सुमित्रेति । एवं स्थिते कौसल्यायै दानानन्तरं कैकेय्यै दातव्यम् । अथापि क्रमं भङ्क्त्वा सुमित्रायै ददावित्यथेत्याह ॥ ७ ॥

तस्मादर्द्धादसावर्द्धं कैकेय्यै प्रतिदत्तवान् ।
परमर्द्धं सुमित्रायै पुनरेव प्रदत्तवान् ॥ ८ ॥

(भा.दी.) तस्मादिति । असौ दशरथः तस्मात् सुमित्रायै दत्तावशिष्टात् अर्द्धात् अर्द्धम्, परमान्नमिति शेषः, कैकेय्यै कैकेयीनाम्न्यै तृतीयमहिष्यै प्रतिदत्तवान् प्रदत्तवान् । परं कैकय्यै दत्तादन्यत् अर्द्धं परमान्नं सुमित्रायै पुनरेव (प्र)दत्तवानिति योजना ॥ ८ ॥

(सं.चं.) तस्मादवशिष्टादर्धात् चतुर्थांशादर्धमष्टमांशं कैकेय्यै प्रतिदत्तवान् । किमिदं प्रतिदानं नाम? तया पुनरितराभ्यामधिकं रतिसुखं दत्तम् । तत् प्रतिकर्तुं पायसस्याष्टमांशं ददौ । नतु तस्यामपि तनयो मे जायतामिति । यदि तस्यामपि तनयो जायेत, तस्यैव राज्यं दातव्यं प्रसज्यते । कैकेयीपरिणयप्रसङ्गे तत्तनयस्यैव राज्यदानप्रतिज्ञानात् । अतः विमना एव केवलमियं प्रणयपत्नीति, अन्यथा वृथा कुप्येदिति, तेन सर्वथा तत्प्रणयवश्चितः स्यामिति भिया ददौ । नचेदवशिष्टं सर्वं पायसं तस्या एवादास्यत् । किमिति पुनरष्टमांशमवशेषयामास । वाल्मीकिनाऽप्येतत् सूचितमिव । स्फुटमुपरिष्टात् । परमवशिष्टमर्धमित्यष्टमांशं सुमित्राया एव पुनः प्रदत्तवान्, तात्पर्यपूर्वं दत्तवान् । सर्वमेतत् स्फुटमगादि वाल्मीकिना– 'कौसल्यायै नरपतिः पायसार्धं ददौ तदा । अर्धादर्धं ददौ चापि सुमित्रायै नराधिपः । कैकेय्यै चावशिष्टार्धं ददौ पुत्रार्थकारणात् । प्रददौ चावशिष्टार्धं पायसस्यामृतोपमम् । अनुचिन्त्य सुमित्रायै पुनरेव महीपतिः' (१६.२७–८) इति । पुत्रार्थकारणादिति वाल्मीकेः साकूतं वचः– पुत्रलाभरूपोऽर्थः प्रयोजनम्, तस्मात् कारणादिति प्रातीतिकोऽर्थः । निवृत्तिवचनश्चार्थशब्दः पठ्यते । मा भूदस्यां पुत्र इत्यन्तराशया पुत्रनिवृत्तिकारणाद् ददाविति गुह्यम् । अत एवावशिष्टं सर्वमदत्वा तदर्धमेव ददौ । अर्धमात्रप्राशनेन राज्यानर्हो दुर्बलः पुत्रः पुत्री वा स्यादिति । पुनरनुचिन्त्य, कैकेय्या बलिष्ठपुत्रजननाद् वरं सुमित्रायाः पुत्रद्वयमित्यनुचिन्त्य, 'चत्वारस्ते सुता भविष्यन्ति' इत्यृश्यशृङ्गवचनं चानुचिन्त्य पुनरेव सुमित्रायै प्रददाविति ॥ ८ ॥

तान् पायसांशान् भुक्त्वा ता देव्यः शुशुभिरेऽधिकम् ।
मधुकालगुणान् भुक्त्वा माधव्यइव सल्लताः[१] **॥ ९ ॥**

(भा.दी.) तानिति । ताः कौसल्याद्याः देव्यः कृताभिषेकाः राजभार्याः । 'देवी कृताभिषेकायाम्' इत्यमरः । तान् दशरथदत्तान्, पायसांशान् भुक्त्वा, मधुनामककालो मधुकालः, वसन्तकाल इत्यर्थः, तस्य गुणान् धर्मभूतान् पुष्परसादीन् । 'मौर्व्यां द्रव्याश्रिते सत्वशौर्यसन्ध्यादिके गुणः' इत्यमरः । भुक्त्वा । मुदा हर्षेण

१. **'मुन्मनाः'** इति वि.ती.पाठः । अत्र महान् पाठभ्रंशः । **'माधव्यइव सल्लताः'** इति प्रचुरः पाठः । स्यादपि । परन्तु न केनापि व्याख्यात्रा समादृतोऽयंपाठः । **'माधव्यइव सन्मनाः'** इति क्वचित् । सर्वथाऽसङ्गतम् । **'माधव्यइव सन्मदाः'** इति क्वचित् । प्रायः **'सम्मदाः'** इति साधुः पाठ इति भाति । **'सन्तुष्टाः'** इति विद्याभूषणस्य काशी श्री. आचार्यस्य च व्याक्यानमेतमेव पाठं कटाक्षयति । **'माधव्यः भ्रमरस्त्रियः'** इति तु सर्वेषां व्याख्यातॄणामैककण्ठ्यम् । माधवी लतेति प्रसिद्धार्थं विहाय तथा व्याख्याने कारणं तु मृग्यम् ।

युक्तं मन आसामस्तीति मुन्मनाः सन्तुष्टा इत्यर्थः । 'तद्धिताः' (अ.सू.४.१.७६) इति मत्वर्थे घः(?) । अत एवाकारान्ताच्छब्दात् स्त्रीत्वविवक्षायां टाप् । माधव्यइव भ्रमरस्त्रियइव अधिकं यथा भवति तथा शुशुभिरे अशोभन्त । शुभ दीप्तौ लिट् ॥ ९ ॥

(सं.चं.) माधवी वासन्ती । मधुमासे वसन्ते पुष्यतीति । 'ಇರುವಂತಿಗೆ' इति भाषायाम् । सत्यः पुष्पवत्यो लताः । अनतिशीतः हितो मन्दश्च पवनः, क्रमेण प्रखरीभवन्नादित्यः, कोकिलानां कूजितम्, भ्रमराणां गुञ्जितं च मधुकालगुणाः । मधुमास इति विशिष्य चैत्रः । अत्र तु वसन्तमासः । 'सम्मदाः' इति पाठे भ्रमरगुञ्जनादिना सन्तुष्टाः फुल्लकुसुमा इत्येतत् ॥ ९ ॥

राघवान्निरघाद् गर्भं लेभिरे ता वरस्त्रियः[1] ।
पूर्वपक्षादिव दिशश्चन्द्रमानन्दकारणम्[2] ॥ १० ॥

(भा.दी.) राघवादिति । ताः कौसल्याद्याः वरस्त्रियः पातिव्रत्यादिना उत्तमाः स्त्रियः । निर्गतं अश्वमेधादि-सत्कर्मणा विनष्टं अघं पुत्रप्राप्तौ प्रतिबन्धकीभूतं कर्म यस्मात् स तथोक्तस्तस्मात् । राघवात् दशरथात् । गर्भम्, 'गर्भो भ्रूण इमौ समौ' इत्यमरः । लेभिरे डु लभष् प्राप्तौ लिट् । तत्र दृष्टान्तमाह– **पूर्वे**ति । पूर्वो यः पक्षस्तस्मात् शुक्लपक्षादित्यर्थः । आनन्दस्य कारणं हेतुभूतम् । नित्यनपुंसकत्वाच्चन्द्रविशेषणत्वेऽपि नपुंसकलिङ्गोऽयं शब्दः । चन्द्रम्, दिशः दिगभिमानिन्यो देवता इव, गर्भं लेभिर इत्यन्वयः ॥ १० ॥

(सं.चं.) निरघात् प्रतिबन्धकदुरितविरहेण निष्कल्मषात् । शुक्लपक्षोऽपि निरभ्रतया निरघः । गर्भोऽप्या-नन्दकारणम् । चन्द्रोऽपि ॥ १० ॥

अवगम्य गदापाणेरवतारं नृपालये ।
स्वयम्भूः स्वयमाहूय विबुधानिदमब्रवीत् ॥ ११ ॥

(भा.दी.) अवगम्येति । स्वयम्भूश्चतुर्मुखः स्वयम्, गदा पाणौ यस्य स तथोक्तस्तस्य श्रीहरेः, अवतारः प्रादुर्भावस्तम्, नृपस्य दशरथस्य आलयो गृहं तस्मिन्, अवगम्य ज्ञात्वा, विबुधान् इन्द्रादिदेवान् आहूय इदं वक्ष्यमाणं वचः अब्रवीत् । ब्रूञ् धातोर्लङ् ॥ ११ ॥

(सं.चं.) स्वयमेवाऽब्रवीत् सतात्पर्यम् । नतु दूतमुखेन ॥ ११ ॥

---

१. 'लेभिरेऽथ वरस्त्रियः' २. '–कारिणम्'

अपि पूर्ण्णोऽवतीर्ण्णो नः [१]प्रसादाय दयाकरः ।
सेवध्वं सेवनीयं तमवतीर्य्य भुवस्तळे   ॥ १२ ॥

(भा.दी.) तदेव दर्शयति– **अपीत्या**दिना । दयाकरः दयाया आकर आश्रयः श्रीहरिः पूर्णोऽपि पूर्णकामोऽपि, नः अस्माकं प्रसादोऽनुग्रहस्तस्मै अवतीर्णः अवतारं कर्तुमारब्धवान् । 'आदिकर्मणि क्तः कर्तरि च' (अ.सू.३.४.७१) इति कर्तरि क्तः । 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' (अ.सू.८.२.४२) इति तस्य नः । स्वप्रयोजनाभावेऽपि केवलं अस्मदनुग्रहपारवश्यादेवावतारार्थमुपक्रान्तवानित्यर्थः । तत्रास्माभिः किं कर्तव्यमित्यत आह– **सेवध्वमि**ति । यूयम्, भवत्यस्यां सर्वमिति भूस्तस्याः तळं प्रदेशस्तस्मिन् अवतीर्य स्वांशावतरणं कृत्वा, सेवितुं योग्यः सेवनीयस्तं श्रीहरिं सेवध्वं सेवां कुरुध्वम् । षेवृ सेवायां लोट् ॥१२॥

(सं.चं.) पूर्णोऽपि, भूमाववतारेण स्वप्रयोजनरहितोऽपि । कौसल्यागर्भे रूपविशेषेणावतीर्णः ॥ १२ ॥

उत्पादयध्वमृक्षीषु वानरीष्वपरासु च[२] ।
उत्पद्यध्वं स्वतनयाः स्वयमेव च सद्गुणाः   ॥ १३ ॥

(भा.दी.) देवगन्धर्वादिभ्यः पराजयो मा भूदिति गृहीतवराणां राक्षसानां वधार्थम्, दक्षाध्वरे हरानादरनिमित्तात् कपयो भवतेति नन्दीशदत्तशापमोक्षार्थं च कप्यादियोनौ भवद्भिरंशावतरणं कर्तव्यमित्याह– **उदि**ति । यूयं ऋक्षीषु ऋक्षस्त्रीषु, वानरीषु वानरस्त्रीषु, अपरासु च मनुष्यादिस्त्रीषु वा, देवादीन् उत्पादयध्वं जनयध्वम् । उत्पूर्वपद गतौ लोट् । स्वयमेव सन्तो गुणा येषां ते सद्गुणास्तथा सन्तः, स्वेषां तनयाः पुत्राः सन्तः, उत्पद्यध्वं उत्पन्ना भवत । तत एव लोट् ॥ १३ ॥

(सं.चं.) अपरासु मानुषीषु च । स्वयमेव स्वतनया भूत्वा चोत्पद्यध्वम् । क्वचित् 'उत्पत्स्यध्वम्' इति पठ्यते । न स्यान्मूलपाठः । अथापि रुचिरः प्रयोगः । पाणिनीयाः कुप्येयुः । अथापि वैदिकाः प्रीयन्ते । लृटा लोटः समागमेन लोलृडयम् । तथाहि प्रयोगो गीतासु– 'अनेन प्रसविष्यध्वम्' इति । भगवत्पादश्च लकारद्वययोगेन सम्पन्नान्येतादृशानि रूपाणि बहुधा प्रायुङ्क्त ॥ १३ ॥

जृम्भमाणस्य मे वक्त्राज्जाम्बवानुदपद्यत ।
ऋक्षो रक्षोविनाशार्त्थं धर्म्मो धर्म्मधरः पुरा   ॥ १४ ॥

---

१. 'वः प्रसादाय'   २. 'वानरीषु परासु च'

(भा.दी.) स्वपुत्रः कश्चन जात एवेत्याह– **जृम्भमाणस्ये**ति । धर्मं धारयतीति धर्मधरः । धर्मः यमः । 'धर्मोऽस्त्री सुकृते साम्ये स्वभावे ना तु सोमपे । न्यायाचारयमाहिंसासु' इति वैजयन्ती । पुरा जृम्भमाणस्य जृम्भणं कुर्वतो मे मम, उच्यतेऽनेनेति वक्त्रं मुखं तस्मात्, जाम्बवान् जाम्बवन्नामकः ऋक्षः सन्, रक्षसो विनाशस्तस्मै उदपद्यत उत्पन्नः । पद गतौ लङ् ॥ १४ ॥

(सं.चं.) धर्म इति यमस्यैव रूपान्तरम् । स एव पुनर्विवस्वता जातो वैवस्वतो यमो बभूव ॥ १४ ॥

उदपद्यन्त सद्यस्ते तं विधातुं विधेर्विधिम् ।
गोलाङ्गूलाः केचिदृक्षा वानरा अपरे नराः[1] ॥ १५ ॥

(भा.दी.) एवं ब्रह्मणा निरूपिते सति देवैस्तदाज्ञाऽनुष्ठितेत्याह– **उदपद्यन्ते**ति । ते देवाः । विदधातीति विधिश्चतुर्मुखः तस्य तं विधिं नियोगं विधातुं सद्यः उदपद्यन्त उत्पन्नाः । केचिद्देवाः गोलाङ्गूलाः कृष्णवर्णमुख-मर्कटाः, 'गोलाङ्गूल इति प्रोक्तः कृष्णवक्त्रस्तु मर्कटः' इति हलायुधः, आसन् । (केचिद्देवा ऋक्षा भल्लूकजातय आसन् ।) केचिद्देवाः वानरा आसन् । अपरे शेषादयो देवाः नरा आसन् ॥ १५ ॥

(सं.चं.) विधिमाज्ञां विधातुमनुष्ठातुम् । केचिद् गोलाङ्गूलाः । केचिद् वानराः । गोलाङ्गूला इति वानर-प्रभेदाः । गोर्लाङ्गूलमिवाग्रे लम्बमानवालपुञ्जं पुच्छं यस्य, कृष्णवर्णं चाऽस्यं यस्य, पिङ्गलोमावृतः स गोलाङ्गूलः । 'ಮುಜ್ಜು' इति भाषायाम् । अपरे नराः । नात्र सद्य इत्यन्वेति ॥ १५ ॥

बभूव हनुमान् नाम[2] मुख्यप्राणः प्रभञ्जनः ।
उत्तमश्लोकभक्तानामुत्तमो योऽखिलोत्तमः ॥ १६ ॥

(भा.दी.) एतदेव विशदयति– **बभूवे**ति । उत्तमः श्लोकः कीर्तिर्यस्य स तथोक्तस्तस्य ये भक्तास्तेषाम्, हरिभक्तानामित्यर्थः, मध्ये उत्तमः । अखिलैर्गुणैरुत्तमः । मुख्यानिन्द्रियाभिमानिनो देवान् प्रकर्षेण नयति प्रेरयतीति मुख्यप्राणः । मुख्यान् श्रेष्ठान् ज्ञानादिगुणान् प्रकर्षेण तत्तज्जीवेषु नयतीति वा मुख्यप्राणः । यः प्रभञ्जनः वायुः सः हनुमानिति नाम प्रसिद्धः वानरः बभूव ॥ १६ ॥

(सं.चं.) उत्तमश्लोकभक्तानां प्रभञ्जनः, संसारं प्रभनक्तीति । अत एव तेषां मध्ये उत्तमः श्रेष्ठः । अभक्तानां तमसि पातनेन सुखभञ्जनात् प्रभञ्जनः । अखिलजीवोत्तमः । देवतातारतम्यक्रमेणेदमुदितम् । न जननक्रमेण ॥

१. **'अपरे अन्ये नराः सन्त उदपद्यन्त । लक्ष्मणाद्यास्त्रय एव नरा रामादनन्तरमुत्पन्नाः । इतरे रामावतारात् पूर्वमेवोत्पन्ना इति ज्ञेयम्'** इति काशी.श्री. टीकायाम् ।
२. **'हनुमान् नाम्ना'**

वासवो वालिनामाऽऽसीदिन्दुस्तत्तनयोऽङ्गदः ।
रविः [1]सुग्रीवनामाऽभूदनलो नीलनामकः ॥ १७ ॥

(भा.दी.) वासव इति । वसून्यस्य सन्तीति वासवः, वालीति नाम यस्य स तथोक्तः आसीत् । इन्दुः तस्य वालिनः तनयः अङ्गदः अङ्गदनामक आसीत् । रूयते स्तूयते ज्ञानिभिरिति रविः । सुग्रीव इति नाम यस्य स तथोक्तः सन् अभूत् । अनलः अग्निः नील इति नाम यस्य स तथोक्तः अभूत् ॥ १७ ॥

(सं.चं.) वासव इन्द्रः, वसूनां देवानामयं पतिः । इन्दुश्चन्द्रः अङ्गदनामा वालितनय आसीत् । यद्यपि तारतम्यक्रमेणानलो वरुणादनन्तरः । अथापि सोमसूर्याग्नीनां ज्योतिषां सहोक्तिसौकर्याय क्रमव्यत्ययः । तेषु हि त्रिषु भगवानुपास्यः । 'अष्टपत्रे हृत्पद्ममध्ये सूर्येन्दुवह्निगम्' इति ओन्तत्सत्प्रणवकल्पे । पितापुत्रयोः सहोक्तिसौकर्यायाङ्गदस्य पूर्वमुक्तिः । सेनापतित्वाच्च नीलस्य सुग्रीवेण सहोक्तिः ॥ १७ ॥

वरुणश्च सुषेणोऽभूद् विश्वकर्म्मा नळोऽजनि ।
अभूतां मैन्दविविदावश्विनौ सेवितुं विभुम् ॥ १८ ॥

(भा.दी.) वरुणश्चेति । पाशैर्दैत्यान् वृणोतीति वरुणः । चः समुच्चये । विभुं समर्थं श्रीरामं सेवितुं सुषेणः सुषेणनामको वानरः अभूत् । विश्वकर्मा विश्वकर्मनामको देववर्धकिः नळः नळनामको वानरः सन् अजनि उदभूत् । जनी प्रादुर्भावे लुङ् । प्रशस्तावश्वौ अनयोः स्त इति अश्विनौ अश्विनामकौ देवौ । मैन्दश्च विविदश्च तौ, मैन्दविविदनामकावित्यर्थः, अभूताम् ॥ १८ ॥

(सं.चं.) यद्यपि विश्वकर्माणमश्विनोरनन्तरमेकान्नविंश्यां कक्ष्यायां पठन्ति । वस्तुतस्तु त्वष्टा किल विश्वकर्मा । 'विश्वकर्मा द्युवर्धकिः । त्वष्टा नाम स देवानाम्' इति यादवप्रकाशाचार्यः । स तु द्वादशादित्येष्वेकोऽष्टाविंश्यामेव कक्ष्यायां पठित इत्यश्विसमानकक्ष्य एव । तत्र वानरवर्धकिरिति विश्वकर्मणः पूर्वमुद्देशः । असुराविष्टाविति मैन्दविविदयोः पश्चात् । विश्वकर्मा देववर्धकिर्नळनामा कपिः सन्नजनि स्वयं स्वतनयो भूत्वा । सेवितुं विभुमिति सर्वत्रान्वेति ॥ १८ ॥

प्राणाद्याः पञ्च मरुतो धनदादत्र जज्ञिरे ।
गजो गवाक्षो गवयो वृषाख्यो गन्धमादनः ॥ १९ ॥

---
१. 'सुग्रीवनामाऽऽसीदनलो–'

(भा.दी.) प्राणेति । प्राण आद्यो येषां ते तथोक्ताः पञ्च मरुतः प्राणापानव्यानोदानसमानाख्या वायवः, धनं दयत इति धनदो वैश्रवणस्तस्मात् अत्र भूमौ गजः गजनामकः गवाक्षः गवाक्षाख्यः गवयः गवयाख्यः वृष इति आख्या यस्य स तथोक्तः, गन्धमादनः गन्धमादननामकः इति वानराः जज्ञिरे । जनी प्रादुर्भावे लिट् ॥ १९ ॥

(सं.चं.) प्राणाद्या अनुक्रमेण । अत्र भूमौ । धनदात् कुबेरात् । न स्वतनया एते । किन्तु धनदतनयाः । वृषाख्यो वृषभः । अष्टादशकक्ष्यागता एते ॥ १९ ॥

पनसाख्यः शतवलिर्ज्ञातौ[१] वस्वंशसम्भवौ[२] ।
[३]मरुच्छ्रेष्ठावजायेतां श्वेतसम्पातिनामकौ ॥ २० ॥

(भा.दी.) पनसेति । पनस इति आख्या यस्य स तथोक्तः शतवलिः शतवलिनामकः इति ज्ञातौ वानरौ वस्वंशसम्भवौ वसुनामकावतारौ जातावित्यर्थः । वसूनां मद्ध्ये प्रधानयोर्द्वयोरंशजाताविति वा । वस्वंशनामकदेवद्वयजाताविति वा । मरुत्सु एकोनपञ्चाशन्मरुत्सु श्रेष्ठौ द्वौ मरुतौ श्वेतश्च सम्पातिश्च[४] श्वेतसम्पाती (इति) नामनी ययोस्ताविति तथोक्तौ अजायेताम् । जनी प्रादुर्भावे लङ् ॥ २० ॥

(सं.चं.) पनसः शतवलिरित्युभावपि वस्वंशसम्भवौ । वसवोऽष्टौ श्रूयन्ते । इमौ तेषु कौ? प्रथमपरित्यागे कारणाभावात् द्रोणप्राणौ स्याताम् । भगवत्पादेन न स्फुटमुदितमिति पण्डिताचार्योऽपि तमनुससार । तथाहि निर्णये– 'शतवलिपनसाख्यौ तत्र वस्वंशभूतौ' इति । तस्मादनिर्णय एव शरणम् । अथेतस्तारतम्यक्रममपहा-याऽह । श्वेतसम्पातिनामकौ मरुच्छ्रेष्ठौ । कौ स्याताम्? 'पवनगणवरांशौ श्वेतसम्पातिनौ च' इति निर्णये । पण्डिताचार्योऽपि तथैव सम्मुग्धमाह– 'मरुच्छ्रेष्ठौ' इति । मरुत्सु प्रवरोऽहम्प्राणः केसरी । तदनन्तरो गणवर एकः प्रवहः । 'मरीचिर्मरुतामस्मि' इत्युक्तो मरीचिरपरः । उभावपि भूतवायुमानिनाविति तावत्र विवक्षितौ स्याताम् । अत्राप्यनिर्णय एव शरणम् । सम्पातिरिति जटायुभ्राता पतत्री । सम्पातीति कपिः ॥ २० ॥

बृहस्पतिर्बृहद्बुद्धिस्तारो नाम व्यजायत ।
शची महेन्द्रमहिषी तारा तारस्वसाऽभवत् ॥ २१ ॥

---

१. **'शतवलिर्ज्ञातौ'** इति. वि.ती. पाठः । **'शतबलिः'** इत्यपपाठः । शतं वलयो देहेऽस्येति हि शतवलिः ।

२. **'अष्टवसूनामंशेभ्यः सम्भूतौ'** इति स्वपक्षमुक्त्वा पक्षान्तरं चोल्लिखितं विद्याभूषणीये–**'वसु अंशनामकदेवद्वयजाताविति केचित् । वसूनां मध्ये प्रधानयोर्द्वयोरंशजातावित्यपरे'** इति । **'वस्वोरंशौ सम्भवौ उत्पादकौ ययोस्तौ'** इति का.श्री.आचार्यः ।

३. **'मरुच्छ्रेष्ठः वायूनां मध्ये प्रधानः, प्रभञ्जनातिरिक्तः कश्चित्'** इति विद्याभू. । **'एकोनपञ्चाशन्मरुतां मध्ये द्वौ प्रधानौ'** इति का.श्री. ।

४. **'श्वेतश्च सम्पाती च श्वेतसम्पातिनौ'** इति स्वरसम् ।

(भा.दी.) बृहदिति । बृहती बह्वर्थविषयिणी बुद्धिर्यस्येति तथोक्तः । बृहति परिपूर्णे ब्रह्मणि बुद्धिर्यस्य स तथेति वा । बृहतां महतां ब्रह्मर्षीणां बृहत्या वा पतिर्बृहस्पतिः । 'तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च'[1] इति सुडागमतलोपौ । तारो नाम तार इति प्रसिद्धः वानरः सन् व्यजायत । महेन्द्रस्य महिषी शची तारस्य स्वसा भगिनी तारा तारानाम्नी अभवत् ॥ २१ ॥

(सं.चं.) शची तारा नाम वानरी जाता । या ताराख्यस्य वानरस्य स्वसाऽभवत् । उभावपि नवमकक्ष्या-गतौ । मूलरूपे कक्ष्यासाम्यमवतारे समानजनकत्वं च सहोक्तिबीजम् । ॥ २१ ॥

वित्तपः कत्थनाख्योऽभून्निरृतिर्दुर्म्मुखाभिधः ।
मरुच्छ्रेष्ठः पूर्वमेव केसर्य्याख्यो व्यजायत ॥ २२ ॥

(भा.दी.) वित्तप इति । निधिरूपं वित्तं पातीति वित्तपः वैश्रवणः । कत्थन इति आख्या यस्य स तथा सन् अभूत्, भवतेर्लुङ् । निरृतिः दुर्मुख इति अभिधा यस्य स तथा सन् अभूत् । मरुत्सु एकोनपञ्चाशन्मरुत्सु श्रेष्ठः पूर्वमेव हनुमदवतारात् पूर्वमेव केसरीति आख्या यस्य स तथा सन् व्यजायत । जनी प्रादुर्भावे लङ् ॥ २२ ॥

(सं.चं.) वित्तपस्त्रयोदश्यां कक्ष्यायां पठितः । निरृतिः सप्तदश्याम् । अथ नवमकक्ष्यागतो मरुच्छ्रेष्ठः अहम्प्राण इति प्राचीनम् । ध्रुव इत्यन्ये । कोऽयं ध्रुव इति त एव प्रष्टव्याः ॥ २२ ॥

पर्ज्जन्यः शरभो जज्ञे प्रायस्ते स्वसुताः स्वयम् ।
ऋषिगन्धर्वसिद्धाद्या अपि जाताः सहस्रशः ॥ २३ ॥

(भा.दी.) पर्जन्य इति । पर्जन्यः पर्जन्यनामको देवः शरभः शरभनामकः सन् जज्ञे । जनी प्रादुर्भावे लिट् । देवाः प्रायः स्वसुताः स्वेषां सुताः, चन्द्रादिनिवृत्त्यर्थं प्राय इत्युक्तम्, जाताः । सहस्रशः सहस्रसङ्ख्याकाः ऋषयश्च गन्धर्वाश्च सिद्धाश्च ते आद्या येषां यक्षादीनां तथोक्ताः, तेऽपि वानरादिरूपेण जाताः ॥ २३ ॥

(सं.चं.) पर्जन्यो विंश्यां कक्ष्यायां पठितः । प्रायो बाहुल्येन स्वयमेव स्वसुतत्वेन जाताः । केचन न तथा । यथा प्राणादयो धनदाज्जाताः । अतः प्राय इत्याह ॥ २३ ॥

---

१. **'पारस्करप्रभृतीनि च सञ्ज्ञायाम्'** (अ.सू.६.१.१५७) इत्यत्र पठितं वार्तिकमिदम् ।

क्रुद्धा धरां ते [1]विभिन्द्युरुद्धरेयुर्धराधरान् ।
नखदन्तायुधा युद्धे नागायुतबलोद्धताः ॥ २४ ॥

(भा.दी.) एतेषां पराक्रममाह– **क्रुद्धा** इति । ते कपयः क्रुद्धाः सन्तः धरां भूमिं विभिन्द्युः विदारयेयुः । भिदिर् विदारणे लिङ् । धरां भूमिं धारयन्तीति धराधराः पर्वतास्तान् उद्धरेयुः उद्धरणं कुर्युः । हृञ् हरणे लिङ् । ते कपयः युद्धं सङ्ग्रामस्तस्मिन् नखाश्च दन्ताश्च त एव आयुधानि येषां ते तथोक्ताः । नागानां गजानां यद्युतं दशसहस्राणि तस्य सदृशं बलं तेन उद्धताः अभिवृद्धाः ॥ २४ ॥

(सं.चं.) 'क्रुद्धा धरां विभिन्देयुः' इति सार्वत्रिकः कोशपाठः प्रामादिकः । तथा पाठे 'ते' पदस्यानवसराच्चैतदवसीयते । व्याख्यातं च तद् विश्वपतितीर्थीये 'ते कपयः' इति । नखाश्च दन्ताश्च नखदन्तम् । तदेवाऽयुधं येषाम् । 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' (अ.सू.२.४.२) इति प्राण्यङ्गत्वादेकवद्भावः । केचिन्नखदन्तयोः स्थिराङ्गत्वाभावादेकवद्भावं नेच्छन्ति ॥ २४ ॥

नानायोनिषु सञ्जाता नानायुद्धविशारदाः ।
नानाविधमसेवन्त नानावीर्य्यं रमापतिम् ॥ २५ ॥

(भा.दी.) नानेति । नानाविधा ये योनयः ऋक्षादियोनयस्तासु सञ्जाताः, नानाविधानि यानि युद्धानि तेषु विशारदाः कुशलाः वानरादयः । नानाविधं वीर्यं प्रभावो यस्य स तथा तं रमापतिं श्रीरामम्, नाना अनेका विधा प्रकारो यथा भवति तथा, 'विधा विधौ प्रकारे च' इत्यमरः, असेवन्त । षेवृ सेवने लङ् ॥ २५ ॥

(सं.चं.) 'अनेकार्थे भवेन्नाना' इत्यभिधानम् । ऋक्षवानराद्यनेकयोनिषु । नानाविधमनेकधा । नानावीर्यमनेकवीर्यमनन्तवीर्यम् ॥ २५ ॥

अच्छिन्नपक्षैरपरैः पर्वतैरिव सर्वतः ।
घनाघनैरिव घनैस्तैः समस्कारि भूरियम् ॥ २६ ॥

(भा.दी.) अच्छिन्नेति । तैः वानरैः, छिन्ना न भवन्तीत्यच्छिन्नाः, तादृशाः पक्षाः पतत्राणि येषां ते तथा तैः, अपरैः पर्वतैरिव । घनैः निबिडैः घनाघनैरिव वर्षणशीलमेघैरिव, मत्तगजैरिवेति वा । 'घनाघनो मत्तगजे

---

१. **'क्रुद्धा धरां विभिन्येयुः'** इति, **'विभिन्देयुः'** इति च पठन्ति । पाठद्वयमपि भ्रान्तिमूलम् । **'भिदिर् विदारणे । भिन्देत्, भिन्देताम्, भिन्देयुः, लिङ्'** इति का.श्रीव्याख्यानमपि धातुपाठापरिज्ञानमूलम् । **'भिन्द्यात् भिन्द्याताम् भिन्द्युः'** इति हि भिदेर्लिङि रूपम् ।

वासवे वार्षुकाम्बुदे' इति वैजयन्ती । इयं भूः सर्वतः सर्वत्र समस्कारि अलङ्कृताऽभूत् । संपूर्वाड्डुकृञ् करणे इत्यस्माल्लुङ् । 'सम्पर्युपेभ्यः करोतौ भूषणे'(अ.सू.६.१.१३७) इति सूत्रेण 'अडभ्यासव्यवायेऽपि'[१] (अ.सू.६.१.१३६) इत्युक्तेरड्व्यवायेऽपि करोतेः सुट् ॥ २६ ॥

(सं.चं.) घ्नन्तीति घनाघनाः । हन्तेर्द्वित्वं घत्वं च । यदाह वार्तिककारः–'हन्तेर्घत्वं च' (वा.६.१.१२) इति । तैः निरन्तरं वर्षणशीलैः घनैर्मेघैरिव । तैः वानरादियोनिषु सञ्जातैर्देवयोनिभिः । समस्कारि अलमकारि । पर्वतैर्निम्नोन्नता हि भूमिः कामिनीव शोभते । मेघैश्च सस्यश्यामला । भुवि स्थितास्ते पर्वता इव । उपर्युत्प्लवमाना अप्यच्छिन्नपक्षाः पर्वताइव मेघाइव च ॥ २६ ॥

वैवस्वतेऽन्तरे प्राप्ते त्रेतायामुत्तरायणे ।
चैत्रे नवम्यां प्राक्पक्षे दिवा पुण्ये पुनर्वसौ ॥ २७ ॥

उदये गुरुगौरांश्वोर्लग्ने कर्कटकाह्वये ।
मेषं पूषणि सम्प्राप्ते स्वोच्चस्थे ग्रहपञ्चके[२] ॥ २८ ॥

(भा.दी.) वैवस्वत इति । वैवस्वतस्य मनोः सम्बन्धी वैवस्वतः, तस्मिन् । तस्येदमित्यण् । अन्तरे मन्वन्तरे प्राप्ते सति, त्रेतायां त्रेतायुगे, उत्तरायणमुदगयनं तस्मिन्, चैत्रः चैत्रमासस्तस्मिन्, प्राक् पूर्वो यः पक्षस्तस्मिन्, शुक्लपक्ष इत्यर्थः, नवम्यां तिथौ, पुण्ये अनेकसुयोगयुक्तत्वेन शोभने । 'पुण्यं धर्मे जले हेम्नि पुष्पेऽस्त्री सुन्दरे त्रिषु' इति वैजयन्ती । दिवा अहनि, पुनर्वसुः पुनर्वस्वाख्यनक्षत्रं तस्मिन्, गुरुर्बृहस्पतिः स च, गौरा अंशवो यस्य स गौरांशुश्चन्द्रः स च, तयोः उदयः उदयकालस्तस्मिन्, कर्कटक इति आह्वयो नाम यस्य तत्तथोक्तं तस्मिन्, लग्ने राश्युदये । 'राशीनामुदयो लग्नम्' इत्यमरः । पूषणि सूर्ये मेषो मेषराशिस्तं सम्प्राप्ते सति, ग्रहाणां[३] अङ्गारकबुधबृहस्पतिशुक्रशनिनामकानां यत्पञ्चकं तस्मिन् । स्वस्यस्वस्य यदुच्चं स्थानं तस्मिन् तिष्ठतीति स्वोच्चस्थं तस्मिन् सति, उक्तपञ्चकेषु मकरकन्याकर्कटकमीनतुलानामकराशिषु यथाक्रमं स्थितेषु

१. केचिदिदं वार्तिकवचनं मन्यन्ते ।

२. **'ग्रहपञ्चके अङ्गारकबुधगुरुशुक्रशनिनामके स्वोच्चस्थे सति मकरकन्याकर्काटकमीनतुलानामकराशिषु यथाक्रमं संस्थिते सति'** इति विद्याभू. । **'ग्रहाणामङ्गारकबुधबृहस्पतिशुक्रशनीनां पञ्चके स्वोच्चस्थे मकरकन्याकर्काटकमीनतुलानामकराशिषु यथाक्रमं स्थिते सति'** इति काशी.श्री. । सर्वमपि ज्योतिःशास्त्राननुगुणमिति नोपादेयम् । अधिकमुपरितनटिप्पण्याम् ।

३. नेदं सङ्गतम् । बुधस्य उच्चस्थत्वाभावात् । रवेरुच्चस्थस्यापरिग्रहाच्च । य उच्चस्थः स नोक्तः, यो नोच्चः स उक्त इति । एतामसङ्गतिं जानता टीकाकृता कथञ्चित् तत्परिहाराय ईश्वराचिन्त्यशक्त्या घटयितुं प्रायत्यत । स्वपूर्वव्याख्यातृभिस्तथा व्याख्यातत्वात् टीकाकृताऽपि तदनुसरणाय कथञ्चिदेवं व्याख्यायीत्यवगम्यते । अधिकं तु सङ्ग्रहचन्द्रिकायां स्फुटम् । अत्र यद् वक्तव्यं तत् पीठिकायां द्रष्टव्यम् ।

सत्स्वित्यर्थः । नच ज्योतिःशास्त्ररीत्या तादृशः कालः कदाऽप्यसम्भवीति वाच्यम् । ईश्वराचिन्त्यशक्त्यैतादृश-कालसम्भवात् । यथा भारतयुद्धसमयेऽनिष्टसूचकत्वेन त्रयोदश्या एव पञ्चदशीत्वम् । यथा वा श्रीकृष्णस्य कैलासे तपश्चरणविडम्बनसमये एकस्मिन्नेव दिने बृहस्पतेर्द्वादशराशिषु सञ्चारः, तद्वदेव श्रीरामस्यैतादृश-कालेऽवतरिष्यामि सज्जनरक्षार्थमिति सङ्कल्पवशादेवैतादृशः कालः सम्भवतीत्यनवद्यम् ॥ २७–८ ॥

(सं.चं.) अथ रामावतारमाह– वैवस्वतेऽन्तरे प्राप्ते । तत्रापि चतुर्विंश्यां त्रेतायाम् । प्राक्पक्षे नवम्यां शुक्लनवम्याम् । पुण्ये रामावतारपात्रत्वात् पूते च सुन्दरे च । 'पूतसुन्दरयोः पुण्यम्' इति ह्यभिदधति । पुनर्वसौ तुरीयपादे । आद्यस्य पादत्रयस्य मिथुनगतत्वात् । तेन चन्द्रः कर्कटे स्थित इत्याह– उदये गुरुगौरांश्वोर्लग्ने कर्कटकाह्वये । गौरांशुश्चन्द्रः । 'प्रालेयांशुः श्वेतरोचिः शशाङ्कः' इत्यभिधानम् । षष्टिघटिकात्मके दिवसे द्वादशराशयः क्रमेणोदयन्ते । अत्रोदयो नाम पूर्वाचलसंयोगः । मेषमास इति सूर्योदये मेषलग्नमिति स्फुटम् । तेन कर्कटके लग्न इति मध्याह्नकाल इत्युक्तं भवति । मेषं पूषणि सम्प्राप्ते । मेषो रवेरुच्चस्थानमिति सोऽप्युच्चस्थः । स्वोच्चस्थे ग्रहपञ्चक इति । सूर्यो गुरुश्चोच्चस्थाविति कथितम् । अपरे त्रयः के? न तावच्चन्द्रः । तस्य कर्कटे स्थित्युक्तेः । वृषभो हि तस्योच्चस्थानम् । नापि बुधः । तस्य सदा रविसन्निहिततयोच्च-स्थत्वासम्भवात् । मेषो हि रवेरुच्चस्थानम् । कन्या बुधस्य । तत्कथं रविसङ्गतो बुधः कन्यागतः स्यात् । अवशिष्टा अङ्गारकशुक्रशनैश्चरास्त्रयः । अङ्गारकस्य मकरः, शुक्रस्य मीनः, शनैश्चरस्य तुला चोच्चस्थानानि । तथाहि वाल्मीकीये–'ततो यज्ञे समाप्ते तु ऋतूनां षट् समत्ययुः । ततश्च द्वादशे मासि चैत्रे नावमिके तिथौ । नक्षत्रेऽदितिदेवत्ये स्वोच्चसंस्थेषु पञ्चसु । ग्रहेषु कर्कटे लग्ने वाक्पताविन्दुना सह । प्रोद्यमाने जगन्नाथं सर्व-लोकनमस्कृतम् । कौसल्याऽजनयद् रामं सर्वलक्षणसंयुतम्'(बाल.कां.१८.८–१०) इति । राममिति श्यामवर्णमित्यर्थः ॥ २७–८ ॥

आविरासीत् स्वकलया कौसल्यायाः परः पुमान् ।
दिव्यव्रतैर्विशुद्धायाः साक्षात् तत्वमतेरिव ॥ २९ ॥

(भा.दी.) परः सर्वोत्तमः पुमान् पुरुषः श्रीनारायणः स्वस्य कलया अंशेन दिव्यानि यानि व्रतानि पयोव्रतादीनि तैः विशुद्धायाः सुपुत्रावाप्तिप्रतिबन्धकदोषरहितायाः कौसल्यायाः, साक्षात् प्रत्यक्षम्, तत्वमतेरिव श्रीनारायणाख्य-तत्वविषयज्ञानादिव, आविरासीत् प्रादुर्बभूव । आविःपूर्वः अस भुवि लङ् ॥ २९ ॥

(सं.चं.) स्वकलया वासुदेवाख्येनांशेन । भगवतोंऽशा अपि पूर्णा एव । 'पूर्णमदः पूर्णमिदम्' इति श्रव-णात् । तत्वमतेः तत्वज्ञानाद् यथा परः पुमानाविर्भवति ॥ २९ ॥

सन्तोऽगच्छन् प्रसन्नत्वमसन्तोऽपि विषण्णताम् ।
जायमाने त्वजे तस्मिन्[1] जगदासीदनाकुलम् ॥ ३० ॥

(भा.दी.) सन्त इति । न जायत इत्यजस्तस्मिन्, उत्पत्तिरहित इत्यर्थः, तस्मिन् श्रीरामे जायमाने सति प्रादुर्भवति सति, सन्तः प्रसन्नत्वं मनःप्रसन्नतां अगच्छन् । गम्लृ गतौ लङ् । असन्तोऽपि दुष्टा अपि विषण्णतां भीतत्वं अगच्छन् । जगत् अनाकुलं असम्भ्रान्तम्, आसीत् । अस्तेर्लङ् ॥ ३० ॥

(सं.चं.) आकुलं दुर्जनपीडाव्याध्यादिभिर्व्याकुलं न भवतीत्यनाकुलम् ॥ ३० ॥

ब्रह्मादीनां सुरेन्द्राणां रम्याः कुसुमवृष्टयः ।
जयशब्दास्तूर्य्यशब्दा अप्ययोद्ध्यामपूरयन् ॥ ३१ ॥

(भा.दी.) ब्रह्मेति । ब्रह्मा आदिर्येषां ते तथा तेषां सुरेन्द्राणां रम्याः कुसुमवृष्टयः, जयजय इति शब्दा जयशब्दाः । तूर्याणां भेरीणां शब्दाः अपि अयोध्यां पुरीं अपूरयन् । पॄ पालनपूरणयोः लङ्[2] ॥ ३१ ॥

(सं.चं.) तूर्यते सत्वरमवगम्यते सन्तोषवार्ताऽनेनेति तूर्यम् । 'ಡಂಗುರ' इति भाषायाम् । तूरी गतित्वरणहिंसनयोः । तूर्यन्ते हिंस्यन्ते रिपवोऽनेनेति च । अयोध्यामपूरयन् । अयोध्यावासिभिर्जनैः स्फुटमश्रूयन्तेत्यर्थः ॥ ३१ ॥

अनन्तोऽनन्तपर्य्यङ्कः परिचर्य्यार्त्थमीशितुः ।
सर्प्पभेऽजनि सौमित्रिः कुळीरेऽभ्युदिते रवौ ॥ ३२ ॥

(भा.दी.) अनन्तेति । न विद्यतेऽन्तो देशकालगुणैः परिच्छेदो यस्य सोऽनन्तः श्रीहरिस्तस्य पर्यङ्कः शय्याभूतः अनन्तः शेषः, ईशितुः स्वामिनः श्रीरामस्य परिचर्यार्थं सेवार्थम्, सर्पस्य भं नक्षत्रं सर्पभं तस्मिन्, सर्पदेवत्ये नक्षत्रे, आश्लेषायामित्यर्थः । रवौ कुळीरे कर्काटकराशौ, 'स्यात् कुळीरः कर्कटकः' इत्यमरः । अभ्युदिते सति, आषाढमास इति यावत् । सुमित्राया अपत्यं पुमान् सौमित्रिः । 'बाह्वादिभ्यश्च' (अ.सू.४.१.९६) इत्यपत्यार्थे इञ् । लक्ष्मणः अजनि उत्पन्नः । जनी प्रादुर्भावे लुङ् ॥ ३२ ॥

(सं.चं.) सर्पदेवत्यं भं नक्षत्रमाश्लेषा । कुळीरेऽभ्युदिते रवौ । कर्काटकमासे । मेषे चैत्रे रामजननम् । ततश्चतुर्थे मासि लक्ष्मणजननम् । एतेन चैत्र एवैकादश्यां लक्ष्मणशत्रुघ्नयोर्जननमिति वदन्तो दत्तोत्तराः ॥३२॥

---

१. **'जायमाने जगन्नाथे'** २. **'पूरी आप्यायने'** इति वक्तव्यम् । पॄधातोः पाणिनीयाः **'अपारयन्'** इति रूपं पठन्ति ।

चक्रायुधस्य यच्चक्रं दैत्यचक्रविदारणम् ।
तत् कामरूपं कैकेय्याः पुष्ये पुत्रत्वमाययौ ॥ ३३ ॥

(भा.दी.) चक्रेति । चक्रमायुधं यस्य स तथा तस्य श्रीहरेः, दैत्यानां चक्रं समूहस्तद्विदारयतीति तथोक्तम्, कामस्य मन्मथस्य रूपं स्वरूपभूतम्, कामाभिमानिकमित्यर्थः । यत् चक्रं सुदर्शनं तत् । पुष्ये पुष्य-नक्षत्रे । 'पुष्यस्तिष्यः स्यात्' इति हलायुधः । कैकेय्याः पुत्रत्वं तत् आययौ । यातेर्लिट् ॥ ३३ ॥

(सं.चं.) पुष्ये नक्षत्रे, प्रायः पुष्ये मासि च । तेन पूर्णिमायामित्युक्तप्रायम् । 'पुष्यः कलियुगे स्मृतः । नक्षत्रमासयोर्भेदे' इति मेदिनी । लक्ष्मणजननाद् षण्मासानन्तरं भरतो जज्ञे । कामः प्रद्युम्न इति च यस्य रूपं तच्चक्रम् । भगवच्चक्रमानी प्रद्युम्नो भरतो बभूव ॥ ३३ ॥

देवद्विड्जनजन्यघ्नः पाञ्चजन्योऽप्यजन्यथ[1] ।
सुमित्रायाः सुतत्वेन स्वामिनः सेवनेच्छया ॥ ३४ ॥

(भा.दी.) देवेति । अथ देवान् द्विषन्तीति देवद्विषस्ते च ते जनाश्च दैत्यजना इत्यर्थः । तेषां जन्यं युद्धं तद्धन्तीति तथोक्तः । 'जन्यं स्यादभिसम्मर्दो विग्रहः कलहः स्मृतः' इति हलायुधः । पाञ्चजन्योऽपि पाञ्चजन्या-ख्यशङ्खोऽपि स्वामिनः श्रीरामस्य सेवनेच्छया सुमित्रायाः सुतत्वेन अजनि । जनी प्रादुर्भावे लुङ् ॥ ३४ ॥

(सं.चं.) देवद्विड्जना दैत्याः । जन्यो जननार्हो यो गर्भस्तमेव हन्ति । जाताः किल द्विष्युः । अयं जननमेव वारयति । तथाहि स्मरन्ति– 'गर्भा देवारिनारीणां विशीर्यन्ते सहस्रधा । तव नादेन पाताळे पाञ्चजन्य नमोऽस्तु ते' इति । पाञ्चजन्यः पाञ्चजन्यमानी अनिरुद्धः । सुमित्रायाः द्वितीयसुतत्वेन । 'सर्पभेऽजनि सौमित्रिः कुळीरेऽभ्युदिते रवौ' इति पूर्ववचनमत्राप्यनुवर्तते । अतो न न्यूनता । यस्मिन्नब्दे कर्कटमासे आश्लेषानक्षत्रे लक्ष्मणो जातः ततः परस्मिन्नब्दे तस्मिन्नेव मासे तस्मिन्नेव नक्षत्रे शत्रुघ्नो जात इति । 'पुष्ये जातस्तु भरतो मीनलग्ने प्रसन्नधीः । सार्पे जातौ तु सौमित्री कुळीरेऽभ्युदिते रवौ' (बा.कां.१८.१५) इति वाल्मीकीये । एतेन भरतो लक्ष्मणाग्रजः, लक्ष्मणशत्रुघ्नौ यमळाविति वदन्तो दत्तोत्तराः ॥ ३४ ॥

चतुर्म्मूर्त्तेर्म्मुकुन्दस्य मूर्त्तिराद्याऽग्रतोऽभवत् ।
अन्येषु त्रिषु तिस्रोऽन्या आविशन्निति सन्मतम् ॥ ३५ ॥

---

१. 'पाञ्चजन्योऽप्यजायत'

(भा.दी.) वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धाख्यविष्णुरूपाणि श्रीरामादिरूपेण चतुर्धाऽवतीर्णानीत्यर्थप्रतिपादक-प्रमाणान्तरस्य तात्पर्यमाह– **चतुरि**रिति । वासुदेवादिभेदेन चतस्रो मूर्तयः स्वरूपाणि यस्य स तथा तस्य, मुकुं मोक्षं ददातीति मुकुन्दस्तस्य श्रीहरेः । आदौ भवा आद्या वासुदेवमूर्तिः अग्रतः प्रथमतः श्रीरामावतार-त्वेनेत्यर्थः, अभवत् । भुवो लङ् । अन्येषु लक्ष्मणादिषु त्रिषु वासुदेवादन्याः तिस्रः सङ्कर्षणप्रद्युम्नानिरुद्धाख्या मूर्तयः आविशन् प्राविशन् । विश प्रवेशने लङ् । इति सन्मतं सतां देवर्ष्यादीनां मतं सिद्धान्तः । एवं च लक्ष्मणादयः शेषकामानिरुद्धाख्याः श्रीहर्यन्तरङ्गभक्ता देवा एव । तेषु च सङ्कर्षणादीनामावेशमात्राभिप्रायेण ग्रन्थान्तरे भगवदवतारत्वेनोक्तिरिति भावः । ननु वाल्मीकिरामायणादौ श्रीरामावतारानन्तरं भरतोत्पत्तिकथनात् तदनन्तरं च लक्ष्मणशत्रुघ्नयोरुत्पत्तिकथनाल्लक्ष्मणस्य भरतज्येष्ठत्वाङ्गीकारे तद्विरोध इति चेन्न । भिन्नमातृकयोः श्रीरामभरतयोरुत्पत्तिकथनानन्तरमेकमातृकयोः लक्ष्मणशत्रुघ्नयोरुक्तिसौकर्याय जननकथनेऽपि तथोत्पत्तिक्रमो न विवक्षित इति ज्ञायते । अन्यथा 'ततो लक्ष्मणमासाद्य वैदेहीं च परन्तपः । अभ्यवादयत प्रीतो भरतो नाम कीर्तयन्' इति युद्धकाण्डान्तिमभागस्थवाल्मीकीयवाक्येनैव विरोधात् । 'इति लोकसमाक्रुष्टः पादेष्वस्य प्रसादयन् । रामस्य निपतिष्यामि सीताया लक्ष्मणस्य च' (अ.कां.९९.१७) इत्ययोध्याकाण्डस्थभरत-वाक्यविरोधाच्च । लवणासुरहननार्थं गमनसमये श्रीरामलक्ष्मणभरतानां क्रमेण शत्रुघ्नकृतप्रणामलक्षण-वाल्मीकीयसिद्धलिङ्गविरोधाच्च । किञ्च यदि भरतो लक्ष्मणज्येष्ठः स्यात् तर्हि श्रीरामेण लक्ष्मणं प्रति युवराजो भवेत्यभिधाय तेन च त्वत्पादसेवनादन्यन्नाऽकाङ्क्षितमित्युक्ते सति कथं भरतोऽभिषिच्यते? नहि ज्येष्ठे सति कनिष्ठं प्रति तथा प्रश्नो युक्तः । लक्ष्मणप्रतिवचनं वा तथा युक्तम् । किञ्च पायसांशदानक्रमेणोत्पत्ति-र्वक्तव्या । पायसांशस्य च कौसल्यायै प्रदानानन्तरमेव सुमित्रायै दशरथेन प्रदत्तत्वाल्लक्ष्मणज्येष्ठत्वमवश्यम-भ्युपेयम् । उपक्रमोपसंहारानुसारेण मध्यस्थवाक्यार्थस्य निर्णेयत्वान्न वाल्मीकीयरामायणविरोधः । यत्तु दशरथेन पायसांशौ कौसल्यायै कैकेय्यै च साक्षाद् दत्तौ ताभ्यां चानन्तरमागतायै सुमित्रायै स्वांशौ विभज्यांशद्वयं दत्तमिति; तत्तु, 'कौसल्यायै नरपतिः पायसार्धं ददौ तदा । अर्धादर्धं ददौ चापि सुमित्रायै नराधिपः । कैकेय्यै चापि शिष्टार्धं ददौ पुत्रार्थकारणात् । प्रददौ चावशिष्टार्धं पायसस्यामृतोपमम्' (बा.कां.१६. २७–८) इति वाल्मीकीयाननुसार्येव । यच्च लक्ष्मणशत्रुघ्नौ यमळावित्यतो न भरतस्य ज्यैष्ठ्यमित्युच्यते तच्च, 'राज्ञः पुत्रा महात्मानश्चत्वारो जज्ञिरे पृथक् । गुणवन्तोऽनुरूपाश्च रुच्या प्रोष्ठपदोपमाः' (बा.कां.१८.१६) इति तत्रत्य-वाक्याननुसार्येव । न च लक्ष्मणस्य भरतज्येष्ठत्वे पुष्ये भरतजन्मोक्तिविरोधः । मासभेदेनोपपत्तेः । नच पृथग्-जन्मत्वे शत्रुघ्नस्य नक्षत्रानुक्तिदोषः । मासान्तराश्लेषायामेवोत्पन्न इत्युक्तिसम्भवात् । नचात्र ज्ञापकाभावः । 'सार्पे जातौ तु सौमित्री' (१८.१५) इत्युक्तेः । नचैवं 'वसिष्ठऋश्यशृङ्गाभ्यामनुज्ञानाद् ददौ हविः । कौसल्यायै सकैकेय्यै ह्यर्धमर्धं प्रयत्नतः । ततः सुमित्रा सम्प्राप्ता जगृहे पौत्रिकं चरुम् । कौसल्या तु स्वभागार्धं

ददौ तस्यै मुदान्विता । कैकेयी च स्वभागार्धं ददौ प्रीतिसमन्विता । दशमे मासि कौसल्या सुषुवे पुत्रमद्भयम् । कैकेयी चाथ भरतमसूत कमलेक्षणम् । सुमित्रायां यमौ जातौ पूर्णेन्दुसदृशाननौ' (अ.रा. बा.कां.३.३५–८) इत्यध्यात्मरामायणवाक्येन एतत्समानार्थपाद्मपुराणवाक्येन च विरोधो वाल्मीकीयवाक्यानामिति वाच्यम् । वाल्मीकीयोक्तस्यार्थस्य बहुकल्पानुसारित्वादन्यत्रोक्तस्यार्थस्य कल्पविशेषानुसारित्वादविरोध इति सर्वमनवद्यम् । एवञ्च ग्रन्थकारैराचार्यमतानुसारेण वाल्मीकीयरामायणानुसारेण यल्लक्ष्मणस्य भरतज्येष्ठत्वं बहुषु स्थलेषूच्यते तद् युक्तमेव[१] ॥ ३५ ॥

(सं.चं.) आद्या मूर्तिर्वासुदेवाख्या अग्रतो रामोऽभवत् । अन्येषु त्रिषु तिस्रोऽन्याः । हरिपर्यङ्कस्य सङ्कर्षणस्यावतारे लक्ष्मणे सङ्कर्षणाख्या भगवन्मूर्तिः । हरितनयस्य प्रद्युम्नस्यावतारे भरते प्रद्युम्नाख्या । अनिरुद्धावतारे शत्रुघ्ने चानिरुद्धाख्या । इत्येतत् सतां ज्ञानिनां मतम् ॥ ३५–८ ॥

[२]अपुत्रः प्राप्य सत्पुत्रान् मग्न आनन्दवारिधौ[३] ।
कृत्यान्तरं नृपो नावैन्निधिं लब्ध्वेव निर्द्धनः ॥ ३६ ॥

(भा.दी.) अपुत्र इति । न विद्यते पुत्रो यस्य सोऽपुत्रः, नृपः दशरथः, सन्तो ये पुत्रास्तान् श्रीरामादीन् प्राप्य लब्ध्वा, आनन्द एव वारिधिस्तस्मिन् मग्नः सन्, अन्यत् कृत्यं कृत्यान्तरं कार्यान्तरं तत्, न विद्यते धनं यस्य स निर्द्धनः पुरुषः निधिर्निहितद्रव्यं तं लब्ध्वेव, नावैत् न ज्ञातवान् । इण् गतौ लङ् ॥३६॥

पाल्यमानाः प्रजाः सर्वाः प्रजानाथेन पुत्रवत् ।
अवेत्य तन्तुमन्तं तं तुष्यन्ति स्म गृहेगृहे ॥ ३७ ॥

(भा.दी.) पाल्यमाना इति । प्रजानाथेन राज्ञा पुत्रा इव पुत्रवत् पाल्यमानाः रक्ष्यमाणाः सर्वाः प्रजाः, तं दशरथम्, तन्तुः सन्ततिरस्यास्तीति तन्तुमान् तम्, पुत्रवन्तमित्यर्थः, अवेत्य ज्ञात्वा, गृहेगृहे प्रतिगृहम्, 'गृहं भवनम्' इति हलायुधः, तुष्यन्ति स्म सन्तोषमगच्छन् । तुष तुष्टौ लट् ॥ ३७ ॥

---

१. सङ्ग्रहरामायणगता इमे च श्लोका अत्रानुसन्धेयाः– **'यापयामास भगवानग्रतो भरताग्रजम् । रामः स्वयं पृष्ठतोऽयाज्जानकी मध्यतो ययौ'** (९.३८) इत्ययोध्याकाण्डे । **'सीताया लक्ष्मणस्यापि ववन्दे चरणावसौ'** (१५.५२) इति युद्धकाण्डे । उत्तरकाण्डे च– **'शत्रुघ्नः प्राञ्जलिः प्रोचे प्रसीद पुरुषोत्तम । आर्यो मे मध्यमो धन्यस्त्वच्छुश्रूषां वनेऽकरोत् । भरतेन ममाऽर्येण मयि जीवति किङ्करे । चतुर्दश समास्तप्तं त्वत्प्रीत्यै भूमिशायिना । ब्रह्मघ्नं लवणं हत्वा त्वत्प्रसादेन केवलम् । सार्था शत्रुघ्नता स्यान्मे प्रोच्येति प्रणनाम सः'** (३.३२–४) इति च ।

२. इतः पूर्वमेकं पद्यमधिकं क्वचित् पठ्यते–**'शत्रुघ्नस्त्वनिरुद्धोऽसौ प्रद्युम्नो भरतोऽभवत् । 'सङ्कर्षणस्तु संहारी लक्ष्मणोऽभवदत्र च ॥ 'शत्रुघ्न अनिरुद्धोऽसौ'** इति तु सर्वथा संस्कृतानभिज्ञानां पाठः ।

३. **'आनन्दसागरे'**

नराणामुत नारीणामयोद्ध्यायां महोत्सवः ।
अभूदभूतपूर्वो[१]ऽत्र सेवका ननृतुर्ज्जगुः ॥ ३८ ॥

(भा.दी.) नराणामिति । नराणां पुरुषाणां नारीणामुत स्त्रीणामपि, अयोध्यायाम्, अत्र अस्मिन् काले, पूर्वं भूतो भूतपूर्वः, भूतपूर्वो न भवतीत्यभूतपूर्वः । पूर्वं कदाप्येवमजात इत्यर्थः । महोत्सवः अभूत् । भूधातोर्लुङ् । सेवका दशरथभृत्यजनाः । ननृतुः सन्तोषातिशयान्नर्तनमकुर्वन् । नृती गात्रविक्षेपे लिट् । केचिज्जगुः । गै शब्दे लिट् ॥ ३८ ॥

सुताननेन्दुरानन्दं निन्ये राज्ञीकुमुद्वतीः ।
मनोरथार्ण्णवं राज्ञः पूर्ण्णतां तूर्ण्णमानयत् ॥ ३९ ॥

(भा.दी.) सुतेति । सुतानां श्रीरामप्रभृतीनां यान्याननानि तान्येवेन्दुः । राज्ञ्यो राजभार्या एव कुमुद्वत्यः कुमुदाकराः, ता एव सरांसीत्यर्थः । ताः आनन्दः सन्तोषस्तं निन्ये प्रापयामास, णीञ् प्रापणे लिट् । राज्ञः दशरथस्य मनोरथ एवार्णवस्तं तूर्णं शीघ्रं यथा भवति तथा पूर्णतां आनयत् अगमयत् । णीञ् प्रापणे लङ् । श्रीरामादीनां मुखावलोकनेन कौसल्यादीनां सन्तोषातिशयोऽभूत् । राज्ञश्च कदा नु पुत्रा जायेरन्नित्यभिलाषः सफलोऽभूदिति भावः ॥ ३९ ॥

(सं.चं.) कुमुद्वत्यः कुमुदवत्यः सरस्यः । 'कुमुद्वती कुमुदिनी बुधैः कैरविणी मता' इत्यभिधानम् । राज्ञ्य एव कुमुद्वत्यः । सुताननमेवेन्दुः । इन्दुर्हि कुमुदबान्धवः । कुमुदम्–'ನೈದಿಲೆ' इति भाषायाम् ॥ ३९ ॥

जातान् कुमारानभ्येत्य पुराऽन्यालम्भतो नृपः ।
पुरोधसं पुरोधाय जातकर्म्माकरोच्छुचिः ॥ ४० ॥

(भा.दी.) जातानेति । नृपः शुचिः शुद्धः सन् जातान् कुमारान् बालकान् अभ्येत्य पुरोधसं वसिष्ठं पुरोधाय पुरस्कृत्य । अन्यालम्भतः अन्येन पुरुषेण आलम्भः स्पर्शस्तस्मादिति ततः । 'आलम्भः स्पर्शहिंसयोः' इति वैजयन्ती । पुरा पूर्वम्, जातस्य कर्म जातकर्म, जननानन्तरं क्रियमाणजातकर्माख्यकर्मेत्यर्थः, अकरोत् । डु कृञ् करणे लङ् । जननानन्तरं अन्यपुरुषस्पर्शात् पूर्वं जातकर्म कर्तव्यमिति स्मृतिसिद्धमित्यतोऽन्यालम्भतः पुरेत्युक्तम् ॥ ४० ॥

---

१. **'पूर्वं अभूतः अभूतपूर्वः । आहिताग्न्यादिवत् पूर्वनिपातः'** इति का.श्री. ।

(सं.चं.) अन्यैरालम्भः स्पर्शः । ततः पूर्वम् । 'आलम्भौ स्पर्शनवधौ' इति मङ्खः । तथाहि स्मरन्ति– 'कुमारं जातं पुराऽन्यैरालम्भात् सर्पिर्मधुनी हिरण्यनिकाशं हिरण्येन प्राशयेत्' इति । जातस्य जाते सति वा कर्म जातकर्म । तथाहि क्रममाचक्षते सम्प्रदायविदः– 'पुत्रे जाते पिता 'नाभिं मा कृन्तत, स्तनं च मा दत्त' इत्यभिधाय कृतस्नानः कृतवृद्धिश्राद्धः प्रक्षाळितशिलायां ब्रह्मचारिणा कुमार्या गर्भवत्या वा श्रुतस्वाध्यायशीलब्राह्मणेन वा अनावृतलोष्टपिष्टे ब्रीहियवौ वा दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां गृहीत्वा मन्त्रेण कुमारस्य जिह्वां मार्ष्टि । ततस्तथैव सुवर्णेन घृतं गृहीत्वा मन्त्रेण तथैव कुमारस्य जिह्वां मार्ष्टि । ततो 'नाभिं कृन्तत, स्तनं च दत्त' इति पिता ब्रूयात्' इति । विधिज्ञं पुरोधसं वसिष्ठं पुरोधाय । शुचिः कृतस्नानः ॥ ४० ॥

यथैवासङ्ख्यतां याता[१] विप्रैरुक्ताः सुताशिषः ।
तथैव राज्ञा दत्तानि वित्तानि ब्रह्ममण्डले ॥ ४१ ॥

(भा.दी.) यथेति । विप्रैः (उक्ताः) सुतानां रामादीनामाशिषः शुभवाचः 'आशीरुरगदंष्ट्रायां शुभवाक्याभिलाषयोः' इति वैजयन्ती । यथैव न विद्यते सङ्ख्या यासां ताः तथा, तासां भावस्तत्ता तां याताः प्राप्ताः । तथैव राज्ञा ब्रह्मणां ब्राह्मणानां मण्डलं समूहस्तस्मिन् दत्तानि वित्तानि असङ्ख्यतां यातानीति सम्बन्धः । असङ्ख्यातं वित्तं ब्राह्मणेभ्यो ददावित्यर्थः ॥ ४१ ॥

(सं.चं.) ब्रह्ममण्डले ब्राह्मणकुले ॥ ४१ ॥

सहितः स्वहितै राजा ब्राह्मणैर्ब्रह्मवादिभिः ।
अनन्तनाम्नश्चक्रेऽथ नाम नारायणस्य सः ॥ ४२ ॥

(भा.दी.) सहित इति । अथ जातकर्मानन्तरम्, स्वस्य हिता आप्तास्तैः, ब्रह्म वेदं वक्तुं शीलमेषामस्तीति वा, ब्रह्म परमात्मानं वक्तुं जगत्कर्तृत्वादिना प्रतिपादयितुं शीलमेषामस्तीति वा ब्रह्मवादिनस्तैः, ब्राह्मणैर्वसिष्ठादिभिः सहितः राजा, अनन्तानि असङ्ख्यानि नामानि यस्य स तथा तस्य श्रीरामरूपस्य नारायणस्य नाम चक्रे कृतवान् । डु कृञ् करणे लिट् ॥ ४२ ॥

(सं.चं.) ब्रह्मणा वेदेन परं ब्रह्मैव वदितुं शीलमेषामिति ब्रह्मवादिनः । अनन्तनाम्नः यस्यानामभूतं पदमेव नास्ति तस्य नाम चक्र इति विस्मयते ॥ ४२ ॥

---

१. '–तां प्राप्ता विप्रै–'

रामः सर्वाभिरामत्वादात्मारामत्वतोऽपि वा ।
देवो [१]मरतकश्याम इति वा रामनामकः ॥ ४३ ॥

(भा.दी.) पुत्राणां राम इत्यादिनामकरणे क्रमेण निमित्तान्याह– **राम** इत्यादिना । देवः श्रीरामरूपी हरिः सर्वान् सज्जनान् अभिरमयति अभितः सुखयतीत्यभिरामस्तस्य भावस्तत्त्वं तस्मात् रामः रामनामकः । अनेन रमयति सज्जनान् सुखयतीति राम इत्युक्तं भवति । आत्मना स्वस्वरूपेण आरमत इत्यात्मारामस्तस्य भावस्तत्त्वं तस्मादिति तत इत्यतोऽपि वा रामः । तथा च रमते स्वस्वरूपेणेति राम इत्युक्तं भवति । मरतकवत् मरतकरत्नवत् श्यामः श्यामलवर्ण इति वा इति हेतोर्वा राम इति नाम यस्य स रामनामकः । तथाच रामत्वाच्छ्यामलत्वाद् राम इत्युक्तं स्यात् । 'रामश्चारौ सितेऽसिते' इति वैजयन्ती ॥ ४३ ॥

(सं.चं.) रामः सर्वाभिरामत्वात् । सर्वानभीक्ष्णं रमयतीति रामः । आत्मारामत्वतोऽपि वा । स्वयमेव स्वस्मिन् रमत इति रामः । देवो मरतकश्याम इति हेतोर्वा रामनामकः । 'श्यामं तु श्यामलं रामम्' इत्यभिधानम् ॥ ४३ ॥

नित्यं रमाभिसम्बन्धाद् दानं श्रीस्तस्य हीति वा ।
रामाणां हृद्यभावाद्वा रामं तं सज्जना विदुः ॥ ४४ ॥

(भा.दी.) **नित्यमि**ति । सज्जनाः वसिष्ठाद्याः, नित्यं सर्वदा रमया लक्ष्म्याऽभिसम्बन्धः पतित्वादिना सम्बन्धस्तस्मात् तं रामं रामनामकं विदुः जानन्ति । विद ज्ञाने लट् । न तु लिट् । विदो लटि णलादेशविधानात् । अनेन रमाया अयमिति राम इति व्युत्पत्तिरुक्ता भवति । तस्येदमित्यण् । षष्ठ्यर्थश्च सम्बन्धो जायापतित्वादिरूपो द्रष्टव्यः । हि यस्मात् तस्य कुमारस्य दानं मोक्षादिप्रदानम्, मा श्रीः लक्ष्मीः इति वा रामं विदुः । एवं च रा दान इति धातोः सत्वात् राः मोक्षादिदानं मा श्रीः सम्पदस्येति राम इत्युक्तं भवति । रामाणां स्त्रीणां हृद्यस्य भावो धर्मस्तस्माद्वा, मनोहरत्वाद्वेत्यर्थः[२], रामं विदुरिति सम्बन्धः । अनेन रमणीयत्वाद् राम इत्युक्तं भवति । रामाणामिति योग्यतया सम्बन्धः कृतः ॥ ४४ ॥

(सं.चं.) नित्यं रमाभिसम्बन्धात् । रमाया अयं पती रामः । दानं श्रीस्तस्य हीति वा । 'रा दाने' इत्यतो राणं दानम् । आद्याक्षरग्रहणेन समस्तं पदं गृह्यते । तद्यथा अ इत्यज उच्यते । आ इत्यानन्द उच्यते । तेन राणं रा । मानं मा । 'सा हि श्रीरमृता सताम्' । 'वाचो मा मातरः स्मृताः' । रमा वा मा । रा

१. **'मरकतश्याम–'** इति भ्रान्तः पाठः ।
२. **'मनोहरत्वाचेत्यर्थः'**

च मा चास्य स्त इति रामः । भक्तानां सर्वाभीष्टदः, वेदवेद्यो रमापती राम इत्यर्थः । रामाणां हृद्यभावाद् वा । लोकोत्तरेण सौन्दर्येण रामाणामयं चित्तचोर इति च रामः । 'रामा वामा वामनेत्रा पुरन्ध्री नारी भीरुर्भामिनी कामिनी च' इत्यभिधानम् । रामाणामयं राम इत्येव विग्रहः ॥ ४४ ॥

साधुलक्ष्मगुणोपेतो लक्ष्मणो नामतोऽभवत् ।
सौमित्रिरग्रजो लोके शत्रुघ्नोऽवरजो मतः ॥ ४५ ॥

(भा.दी.) साध्विति । सुमित्राया अपत्यं सौमित्रिः अग्रजः ज्येष्ठः पुत्रः, यतः लोको भुवनं तस्मिन् साधूनां सात्विकानां लक्ष्मभूताश्चिह्नभूता ये गुणास्तैरुपेतो युक्तः, अतः नाम्नेति नामतः लक्ष्मणः अभवत् । भू धातोर्लङ् । अनेन, लक्ष्मणा सज्जनचिह्नभूतगुणजातेन नीयते प्राप्यत इति लक्ष्मण इत्युक्तं भवति । अवरजः लक्ष्मणानुजः सौमित्रिः शत्रुघ्नः शत्रूणां लवणादीनां हन्ता हननशीलस्तस्य भावस्तत्वं तस्मात्[१] । शत्रुघ्न इति सतां मतः सम्मतः अभवत् ॥ ४५ ॥

(सं.चं.) साधूनां यानि लक्ष्माणि लक्षणानि सौशील्यादयो गुणास्तदुपेतत्वाल्लक्ष्मणः । लक्ष्माण्यस्य सन्तीति लक्ष्मणः । मत्वर्थे नः । पाणिनीयास्तु लक्ष्मीरस्यास्तीति लक्ष्मण इति व्युत्पादयन्ति । तत्पक्षे लक्ष्म्या अत्वं नश्च । अग्रजः सौमित्रिर्लक्ष्मणः । अवरजः सौमित्रिः शत्रुघ्नः । मुखत एव स्फुटोऽर्थ इति न निरवाचि ॥४५॥

कैकेयीतनयं[२] प्राहुर्भरतं भरितं गुणैः ।
कुमारास्ते कुमाराभा एवं नामानि भेजिरे ॥ ४६ ॥

(भा.दी.) कैकेयीति । गुणाः शौर्यादयस्तैः भरितं पूरितं कैकयीतनयं सन्तं भरतं प्राहुः प्रवदन्ति । ब्रूञ् व्यक्तायां वाचि लट् । न तु लिट् । एवं गुणैर्भरितत्वात्पूर्णत्वाद् भरत इत्युक्तं भवति । कुमारस्य षण्मुखस्य आभेव आभा कान्तिर्येषां ते तथोक्ताः कुमाराः बालकाः । 'कुमारः स्याद् गुहे बाले' इति वैजयन्ती । एवं नामानि भेजिरे । भज सेवायां लिट् ॥ ४६ ॥

(सं.चं.) भक्तिं भरतीति भरतः । 'भृञ् भरणे' इत्यस्मादतच् । भरित एव वा भरतो वर्ण-विपर्ययेण । कुमाराभाः । कुमार इति देवसेनानीः स्कन्दः । पौरुषेण तत्सदृशाः ॥ ४६ ॥

---

१. शत्रूणां हन्तृत्वादिति पदं मूले न पठ्यते । वि.ती.पाठे श्लोकार्धमधिकं स्यादिति भाति । तच्चार्धमेवं स्यादपि–**'सौमित्रिरथ शत्रूणां हन्तृत्वाच्च सतामिति'** इति ।

२. **'कैकेयीनन्दनम्'** । **'कैकेय्या नन्दनं'** इति क्वचित् ।

संस्कारान् कारयामास ब्राह्मणैर्ब्रह्मपारगैः[१] ।
अप्यन्नप्राशनादीन् स नन्दनानां नराधिपः ॥ ४७ ॥

(भा.दी.) समिति । सः नराधिपः, ब्रह्मणो वेदस्य पारमवसानं गता इति तथोक्तास्तैः, साङ्गवेदज्ञै-रित्यर्थः, ब्राह्मणैः वसिष्ठादिभिः, नन्दनानां श्रीरामादीनाम्, अन्नप्राशनं अन्नप्राशनाख्यः संस्कार आदिर्येषां ते तथा तान् संस्कारानपि कारयामास अकारयत् । डु कृञ् करणे लिट् ॥ ४७ ॥

(सं.चं.) संस्कारान् । जातकर्म नामकरणं चोक्ते । उपनयनं वक्ष्यति । तेनात्र विवक्षिताः संस्काराः, अन्नप्राशनम्, उपनिष्क्रमणम्, चूडाकरणं च । नन्दनानां तनयानाम् । 'नन्दनं वासवोद्याने नन्दनो हर्षके सुते' इति मेदिनी ॥ ४७ ॥

उपनीता विनीतास्ते जगृहुः साङ्गमागमम् ।
अस्त्राणि च समस्तानि धनुर्वेदपराः कलाः ॥ ४८ ॥

(भा.दी.) उपेति । उपनीता कृतोपनयनाः, विनीताः विनयवन्तः, ते श्रीरामाद्याः, शिक्षा कल्पो व्याकरणं च्छन्दो ज्योतिषं निरुक्तमिति प्रसिद्धैः षडङ्गैः सहितः साङ्गस्तम्, आगमं वेदं जगृहुरधीतवन्तः । ग्रह उपादाने लिट् । समस्तानि अस्त्राणि ब्राह्माद्यस्त्राणि च जगृहुः । धनुर्वेदः परः श्रेष्ठः यासां तास्तथोक्ताः कलाः चतुःषष्टिकलाविद्याश्च जगृहुरित्यन्वयः ॥ ४८ ॥

(सं.चं.) अस्त्राणि मन्त्रप्रयोज्यानि ब्रह्मशिरआदीनि । धनुर्वेदः शस्त्रविद्या । स परोऽन्यासां कलानां नृत्तगीतादीनाम् ॥ ४८ ॥

शान्ता दान्ताः पराक्रान्ताः कान्तिमन्तो गुणाधिकाः ।
ह्रीमन्तः[२] कीर्त्तिमन्तश्च देवास्ते धरणीं गताः ॥ ४९ ॥

आत्मानइव[३] तातस्य गुरूणां किङ्कराइव ।
जगतामिव दैवानि मातॄणामिव बालकाः ॥ ५० ॥

---

१. 'ब्राह्मणैर्वेदपारगैः' २. 'श्रीमन्तः' ३. 'आत्मजाइव'

(भा.दी.) शान्ता इति । शान्ताः शान्त्योपेताः, विषयासक्तिरहिता इत्यर्थः, अत एव दान्ताः निगृहीतेन्द्रियाः, पराक्रान्ताः पराक्रमिणः, कान्तिरेषामस्तीति कान्तिमन्तः, गुणाधिकाः बलशौर्यादिगुणैरधिकाः, ह्रीर्लज्जा निषिद्धकरणेषु एषामस्तीति ह्रीमन्तः, कीर्तिरेषामस्तीति कीर्तिमन्तः । धरणीं गताः देवाः (ते) श्रीरामादयः तातस्य पितुः दशरथस्य आत्मानइव बहिश्चरप्राणाइव आसन् । गुरूणां वसिष्ठादीनां किङ्करा-इव आसन् । जगतां चतुर्दशजगतां दैवानीव देवता इव आसन् । मातॄणां कौसल्यादीनां बालका इव आसन्नित्यन्वयः ॥ ४९–५० ॥

(सं.चं.) शान्ता अध्यात्मनिष्ठाः । अक्रूरस्वभावा वा । दान्ता निगृहीतेन्द्रियाः । कान्तिमन्तः कमनीय-कायाः । वर्चस्विनो वा । अकार्यकरणे ह्रीमन्तः । कीर्तिमन्तः यद्गुणानेव जनाः सदा कीर्तयन्ति ।आत्मान इव । स्वस्यैव रूपान्तराणीव । 'आत्मा वै पुत्रनामाऽसि' इति हि श्रुतिः ॥ ४९–५० ॥

शयानमासीनमथ स्थितं गतं
प्रक्रीडितं [१]प्रस्तुतमग्रजं हरिम् ।
क्षणं च नामुञ्चत लक्ष्मणो गुरुं
शत्रुघ्न एवं भरतं निजाग्रजम् ॥ ५१ ॥

(भा.दी.) अनुजस्य ज्येष्ठानुवृत्तिप्रकारं दर्शयति– **शयानमि**ति । लक्ष्मणः शयानं शय्यायां कृतविश्रमणम्, आसीनं पीठादावुपविष्टम्, अथ स्थितं अवस्थितम्, गतं गच्छन्तम् । 'गत्यर्थ–' (अ.सू.३.४.७२) इत्यादिना कर्तरि क्तः । प्रक्रीडितं प्रकर्षेण क्रीडां कुर्वन्तम्, प्रस्नुतं स्तनपानं कुर्वन्तम्, गुरुं स्वस्य मुख्यगुरुम्, अग्रजं ज्येष्ठं हरिं श्रीरामं क्षणः क्षणकालः तं च । 'कालाध्वनोरत्यन्तसंयोगे' (अ.सू.२.३.५) इत्यधिकरणे द्वितीया, क्षणमात्रकालेऽपीत्यर्थः । न अमुञ्चत न मुक्तवान् । मुच्लृ मोक्षणे लङ् । शतुघ्नश्च एवं लक्ष्मणवत् निज आत्मीयोऽग्रजस्तम्, भरतमित्यर्थः । क्षणञ्च नामुञ्चतेति सम्बन्धः ॥ ५१ ॥

(सं.चं.) प्रस्तुतं कस्मिंश्चित् कार्यविशेषे प्रवृत्तम् । गुरुमग्रजम् । वंशस्थेन्द्रवंशाभ्यामुपजातिः ॥ ५१ ॥

लीलाभिः [२]स्मितलसितैरपाङ्गभृङ्गै-
र्वाणीभिः प्रमुषितवाणिनीमनोभिः ।

---

१. **'प्रस्नुतमग्रजम्'** इति वि.ती.पाठ इति भाति । **'प्रस्तुतं स्तवं कुर्वन्तम्'** इति वि.भू.,का.श्री. च । २. **'स्मितलळितै–'**

आनन्दं निजजनवृन्दमिन्दिरेशो
रामात्मा समगमयत् सुमङ्गलाङ्गः ॥ ५२ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे बालकाण्डे तृतीयः सर्ग्गः ॥

—०—

(भा.दी.) श्रीरामस्य बाललीलां सङ्क्षेपतो वर्णयति– **लीलाभि**रिति । सुमङ्गलानि अङ्गानि अवयवा यस्य स तथोक्तः, राम इति आत्मा स्वरूपं यस्य स तथोक्तः, इन्दिरेशः लक्ष्मीशः श्रीहरिः, लीलाभिः क्रीडाभिः, स्मितलसितैः मन्दहासेन शोभितैः, अपाङ्गा नेत्रान्ता भृङ्गा इव तैः, वाणीं वाचं नयति प्रेरयतीति वाणिनीः वागभिमानिनी सरस्वती, प्रमुषितं चोरीकृतं वाणिन्याः सरस्वत्याः मनश्चित्तं याभिस्तास्तथोक्तास्ताभिः, 'वाणिनीर्नर्तकीमत्ताविदग्धवनितासु च' इति विश्वः[१], वाणीभिः वाग्भिः, सरस्वतीचित्ताकर्षकत्वेन सरस्वतीवचनेभ्योऽप्यतिमनोहरवाग्भिरित्यर्थः[२] । निजाः स्वकीया ये भक्तजनास्तेषां वृन्दं समूहस्तत् आनन्दः सन्तोषस्तं समगमयत् सम्प्रापयामास । गम्लृ गतौ लङ् । 'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकानामणि कर्ता सणौ' (अ.सू.१.४.५२) इति सूत्रेणाण्यन्तगमिधातोः कर्तुः सण्यन्ततायां कर्मसञ्ज्ञाविधानात् द्विकर्मकत्वोपपत्तिः ॥ ५२ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां बालकाण्डे तृतीयः सर्गः ॥

—०—

(सं.चं.) प्रहर्षिण्योपसंहरति । स्मितस्य लसितं मोहको विन्यासविशेषः । 'ಮೋಡಿ' इति भाषायाम् । 'नयनोपान्तमपाङ्गः' इत्यभिधानम् । अपाङ्गा एव भृङ्गाः । 'अपाङ्गभङ्गैः' इति वा पाठः स्यात् । प्रमुषितं वाणिनीनां माद्यत्कामिनीनां मनो यैस्तैः स्मितविलसितैरपाङ्गभृङ्गैश्च । प्रमुषितं वाणिनीमनो यैस्ताभिः लीलाभिर्वाणीभिश्च । 'स्त्री विदग्धा च मत्ता च वाणिनीत्यभिधीयते' इति च । उक्तं च हि– 'रामाणां हृद्यभावाद् वा' इति । रामात्मा रामरूपेणावतीर्णः ॥ ५२ ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां बालकाण्डे तृतीयसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– ८९+५२=१४१]

---

१. प्रकृतार्थाननुगुणमिदं कोशवचनम् ।

२. वि.भू.का.श्री.टीकयोरप्येवम् । नातीव स्वरसम् ।

चतुर्थः सर्ग्गः

[१]अथो दशरथो राजा पुत्राणां पुत्रवत्सलः ।
चिन्तयामास दारार्थं सामात्यः स महीपतिः[२] ॥ १ ॥

(भा.दी.) श्रीरामस्य विश्वामित्ररक्षणाद्यवतारकथां वक्तुमुपोद्धातमारभते– **अथो** इति। अथो उपनयनाद्यनन्तरं पुत्रवत्सलः पुत्रेषु स्निग्धः, महीपतिः राजा सः दशरथः, अमात्यैर्मन्त्रिभिः सहितः सामात्यस्तथा सन्, पुत्राणां श्रीरामादीनां दारार्थं अनुकूलभार्यावाप्त्यर्थं चिन्तयामास विचारयामास । चिति स्मृत्यां लिट् ॥ १ ॥

(सं.चं.) अथो इति पूर्ववृत्तादानन्तर्यम्, उत्तरवृत्तस्य माङ्गलिकत्वं चाऽह । अत्र कश्चन पाठविप्लवो भाति– 'सामात्यः स महीपतिः' इति पठन्ति । तदा 'महीपती राजा दशरथः' इति पुनरुक्तमिव भवति । केचिदेवं व्याचक्षते–'महीपतिभिः खण्डेश्वरैः माण्डलिकैः सहितः समहीपती राजा दशरथः' इति। तदपि न श्लिष्यति । नहि महीपतिपदेन माण्डलिकाः क्वापि व्यपदिश्यन्ते । नहि कवयस्तथा प्रयुञ्जते । तर्हि– 'अथो दशरथो राजपुत्राणाम्' इति स्याद् वा? परिहृतं तु पुनरुक्तम् । अथापीदृशः प्रयोगो नातीव श्लिष्यति । तेन सम्भाव्यते–'सामात्यः स महामतिः' इति लिखितव्ये 'महीपतिः' इति लिखन्तो लिपिकृतः प्रायो बभ्रमुरिति ॥ १ ॥

चिरं चिन्तयता तेन समाजे समदृश्यत ।
विश्वामित्रः सतां मित्रं कार्य्यस्येव विनिर्ण्णयः ॥ २ ॥

(भा.दी.) चिरमिति। समाजः सभा तस्मिन् चिरं चिरकाले चिन्तयता विचारयता तेन राज्ञा सतां सज्जनानां मित्रं मित्रभूतः, विश्वामित्रः विश्वामित्राख्यो मुनिः, पुत्राणां भार्यावाप्तिलक्षणं यत्कार्यं तस्य विनिर्णयइव समदृश्यत। दृशिर् प्रेक्षणे लङ्। विश्वामित्रेण सह गतस्य श्रीरामस्य सीतावाप्तेर्भावित्वात् कार्यस्य विनिर्णय इवेत्युक्तम् ॥ २ ॥

---

१. **'अथो राजा दशरथो पुत्राणाम्'**

२. **'महीपतिभिः खण्डेश्वरैः सहितः समहीपतिः'** इति का.श्री.।

(सं.चं.) समाजे राजसदसि विश्वामित्रः समदृश्यत । 'समाजः संसदास्थानी सभा स्यात् परिषत् सदः' इत्यभिधानम् । अमात्यैः सह चिरं चिन्तयित्वाऽपि न निर्णय आस । तदा कार्यनिर्णय इव स्वयं विश्वामित्र आजगाम । स किल दारकार्यं विनिर्णेष्यति ॥ २ ॥

प्रत्युत्थाय नृपः प्रीतः प्रदाय परमासनम् ।
सवसिष्ठो मुनिश्रेष्ठमभिपूज्येदमब्रवीत् ॥ ३ ॥

(भा.दी.) प्रतीति । प्रीतः मुनिदर्शनात् सन्तुष्टः, सवसिष्ठः वसिष्ठसहितः, नृपः प्रत्युत्थाय परमुत्तमं यदासनं तत् प्रदाय, मुनिश्रेष्ठं विश्वामित्रं अभिपूज्य अर्घ्यादिना पूजयित्वा, इदं वक्ष्यमाणं वचः अब्रवीत् । ब्रुवो लङ् ॥ ३ ॥

(सं.चं.) अतिथेः स्वागतपूर्वमातिथ्यप्रतिपादनायोत्थानं प्रत्युत्थानम् । सादरं दानं प्रदानम् । परं परमं वाऽऽसनम् । अभिगम्य पूजनमभिपूजनम् । अभिमतं च पूजनमभिपूजनम् ॥ ३ ॥

भगवन् भगवद्भक्ताः परिपूर्णाः स्वभावतः ।
तथाऽपि वयमात्मार्थं कुर्म्मो वः कर्म्म वाञ्छितम् ॥ ४ ॥

(भा.दी.) भगवन्निति । हे भगवन् पूज्य विश्वामित्र, भगवद्भक्ताः श्रीहरिभक्ताः, स्वभावतः स्वे स्वतन्त्रे भगवति भावतो भक्तितः, यदृच्छालाभेनेति वा, परिपूर्णाः परिपूर्णमनोरथाः । तथाचार्थादीच्छया भवदागमनमसाम्प्रतं पश्याम इति भावः । निष्प्रयोजनप्रवृत्त्यनुपपत्तेः, भवदागमनेन यत्किञ्चित् प्रयोजनमस्तीत्यनुमीयते । तच्च स्वकीयकर्तव्यतयाऽवश्यं कुर्म इत्याह– **तथाऽपी**ति । तथाऽपि परिपूर्णाभीष्टत्वेऽपि वयं वः युष्माकं वाञ्छितम् अभीष्टं कर्म, आत्मार्थं स्वप्रयोजनार्थं कुर्मः । कृञो लट् ॥ ४ ॥

(सं.चं.) स्वभावतः स्वरूपभूतया योग्यतया । भक्त्यैव पूर्णकामाः नान्यत् किमपि वाञ्छन्ति स्वार्थम् । तथाऽप्यस्मदनुग्रहाय यदि किमपि कर्म वाञ्छितम्, तद् वः कुर्मः । स ह्यस्माकं महान् स्वार्थः ॥ ४ ॥

ननु नारायणपरास्तद्भक्तानुग्रहार्थिनः ।
जगत्यटन्ति नाऽत्मार्थं भास्कराइव भास्वराः ॥ ५ ॥

(भा.दी.) यद्वा आत्मप्रयोजनाभावेऽपि भगवत इव भगवद्भक्तानामपि केवलं कृपापारवश्यादेवास्मत्पावनाद्यर्थं प्रवृत्तिः सम्भवतीत्याह– **नन्वि**ति । नारायणः परः सर्वोत्तमो येषां ते तथोक्ताः, नारायणे परं तात्पर्यं येषां

ते तथेति वा, पुरुषाः, तस्य श्रीहरेर्ये भक्तास्तेषां योऽनुग्रहः स एवार्थः प्रयोजनम्, स एषामस्तीति तथोक्ताः सन्तः, जगति भास्वराः प्रकाशशीलाः, भास्कराइव अटन्ति सञ्चरन्ति ननु । अट गतौ लट् । आत्मार्थं स्वप्रयोजनार्थं न अटन्ति । यथा द्वादशाऽदित्याः क्रमेण प्रतिमासं परोपकारार्थमटन्ति न स्वप्रयोजनार्थं तथैव सज्जना अपीति भावः ॥ ५ ॥

(सं.चं.) भक्तानुजिघृक्षयैव केवलं जगत्यटन्ति । न क्वापि स्वप्रयोजनाय । भास्कराइव निःस्वार्थं लोक-भासकाः । आकाशे त्वेको भास्करः । भुवि भवादृशा बहवो भास्कराः ॥ ५ ॥

महीपालवचः श्रुत्वा महीदेवोऽभ्यभाषत ।
महावंश्यस्य महतो युक्तमेतत् तवोदितम् ॥ ६ ॥

(भा.दी.) महीति । मह्यां देवइव महीदेवः, ब्राह्मण इत्यर्थः, विश्वामित्रः, महीपालवचः दशरथवचः श्रुत्वा, महान् प्राज्यो यो वंशः इक्ष्वाकुवंशस्तस्मिन् भवो महावंश्यस्तस्य, महतः स्वरूपतो महाधिकारिणः तव, एतत् प्रोक्तं उदितं वचनम्, 'नपुंसके भावे क्तः' (अ.सू.३.३.११४) इति क्तः, अत एव तवेति नपुंसके भावे क्तस्य च योगे शेषविवक्षायां च षष्ठी, युक्तं न्याय्यम् ॥ ६ ॥

(सं.चं.) महीदेवो विश्वामित्रः । महावंश्यः महति ख्याते वंशे भवो न केवलम् । स्वयं च महान् । महामना महाभागः । महावंश्य इति तत्र भव इत्यर्थे 'दिगादिभ्यो यत्' (अ.सू.४.३.५४)इति यत् प्रत्ययः । वंशशब्दो दिगादिगण- पठितः । तदनुगुणं तवोदितम् ॥ ६ ॥

रक्षोभ्यामतिरूक्षाभ्यां विहता मे मुहुर्म्मुहुः ।
यज्ञास्तद्रक्षणोद्देशी त्वामहं शरणं गतः ॥ ७ ॥

(भा.दी.) इदानीमागमनप्रयोजनमाह– **रक्षोभ्यामि**त्यादिना । अत्यन्तं रूक्षे क्रूरे ताभ्यां रक्षोभ्यां रावणकुम्भकर्णाभ्यां मे यज्ञाः मुहुर्मुहुः बहुवारं विहताः नाशिताः । अहं तेषां यज्ञानां यद्रक्षणं तस्मिन् उद्देशः सङ्कल्पोऽस्यास्तीति तथा सन्, त्वां शरणं अरणं तत्, गतः प्राप्तः । अस्मीति शेषः ॥ ७ ॥

(सं.चं.) रक्षोभ्यां सुबाहुमारीचाभ्याम् । त्वामहं शरणं रक्षितारमाश्रयं वा गत आश्रितः । त्वमाश्रयं दत्वा रक्षेरित्याशयाऽऽगतः ॥ ७ ॥

अवद्ध्ययोः शम्भुवरादवद्ध्यानकृतोः सताम् ।
मच्छापोऽपि [1]तयोर्म्मोघः स्यादग्निर्ह्रदयोरिव ॥ ८ ॥

(भा.दी.) **अवद्ध्ययोरि**ति । शम्भ्वोर्ब्रह्मरुद्रयोर्यो वरस्तस्मात्, 'शम्भुर्ब्रह्मत्रिलोचनौ' इत्यमरः, अवद्ध्ययोः वधानर्हयोः, सतां सज्जनानां अवद्ध्यानमवज्ञां कुरुत इति तथोक्तौ, तयोः रावणकुम्भकर्णयोर्विषये मच्छापोऽपि ह्रदयोः अगाधजलाधारयोः जलाशययोः, 'जलाशयो जलाधारः' इत्यमरः, अग्निरिव मोघः निष्फलः स्यात् । अस्तेर्लिङ् ॥ ८ ॥

(सं.चं.) शम्भोरीशानस्य वरादवध्यः सुबाहुः । शम्भोर्विरिञ्चस्य वरादवध्यो मारीचः । 'सुबाहुमीशानगिरा विमृत्युम्' इति, 'शरेण मारीचमथार्णवेऽक्षिपद् वचो विरिञ्चस्य तु मानयानः । अवध्यता तेन हि तस्य दत्ता' (४) इति च निर्णये । 'शम्भुः स्वयम्भूर्द्रुहिणश्चतुर्वक्त्रः प्रजापतिः' इति , 'शर्वः शम्भुरुमापतिश्च गिरिशः' इति चाभिधानम् । अवध्यानमवहेळनम् । अवमन्तुं ध्यानमवध्यानम् । अवमतया ध्यानमवध्यानम् । सतामवमन्त्रोः । सतामवधीरणैव ययोर्जीवनधर्मः । शम्भुवरबलयोस्तयोर्मच्छापोऽपि मोघो विफलः । यथाऽगाधजलयोर्ह्रदयोर्निक्षिप्तस्तनुतरोऽग्निर्न ह्रदौ शोषयति । किन्तु स्वयमेव शाम्यति ॥ ८ ॥

ज्येष्ठं श्रेष्ठं तव सुतं रामं राजीवलोचनम् ।
नियुङ्क्ष्व तद्वधायाऽशु श्रेयस्ते भविता ध्रुवम् ॥ ९ ॥

(भा.दी.) तत्र मया किं कार्यमित्यत आह– **ज्येष्ठमि**ति । हे दशरथ, त्वं ज्येष्ठं श्रेष्ठं सर्वोत्तमम्, राजीववत् कमलवल्लोचने यस्य स तथा तम्, तव सुतं श्रीरामम्, तयोः रावणकुम्भकर्णयोर्वधस्तस्मै, आशु नियुङ्क्ष्व प्रेषय । युजिर् योगे लोट् । ते तव ध्रुवं शाश्वतं श्रेयः भविता भविष्यति । भू सत्तायां लुट् ॥ ९ ॥

(सं.चं.) तव ज्येष्ठं सुतम् । सर्वतः श्रेष्ठम् । रक्षसोर्वरदाभ्यां शम्भुस्वयम्भूभ्यामपि श्रेष्ठम् । तयोरवध्ययोर्वधाय ॥ ९ ॥

वेदाहं वेदसंवेद्यं तेजो राजन् सुतस्य ते ।
सुरासुरैरप्रधृष्यं वसिष्ठाद्याश्च ते द्विजाः[2] ॥ १० ॥

(भा.दी.) श्रीरामश्चेत् तद्वधे समर्थ इत्याशयेन तन्महिमानमाह– **वेदे**ति । हे राजन्, अहं ते तव सुतस्य श्रीरामस्य वेदैः सम्यक् वेद्यं सम्यग्वेत्तुमर्हं तत्, सुराश्च असुराश्च तैः अप्रधृष्यं प्रधर्षितुमशक्यम्, अभिभवितुम-

१. **'तयोः सुबाहुमारीचयोः'** इति का.श्री. ।
२. **'वसिष्ठाद्या इमे द्विजाः'** । **'ते तव सम्बन्धिनः वसिष्ठाद्याः'** इति का.श्री. ।

शक्यमित्यर्थः, तेजः सामर्थ्यं बलं वा, 'तेजो बले प्रभावेऽग्ने ज्योतिषि' इति वैजयन्ती, वेद जानामि । विद ज्ञाने लट् । न तु लिट् । न केवलमहमेव जानामि, किन्तु वसिष्ठाद्याश्च जानन्तीत्याह– **वसिष्ठे**ति । वसिष्ठ आद्यो येषां ते तथोक्ताः ते द्विजाश्च विदुरिति सम्बन्धः ॥ १० ॥

(सं.चं.) श्रेष्ठमित्युक्तं स्फुटं विवृणोति– वेदाहम् । तेजो दुष्टदलनदक्षं सत्वम् । पौरुषेयैरपौरुषेयैश्च वेदैः सतात्पर्यं वेद्यम् । 'पराऽस्य शक्तिर्विविधैव श्रूयते' इति, 'तेजस्तेजस्विनामहम्', 'महाक्रमो महातेजाः' इत्यादि च । ते तव, त्वदीयाः वसिष्ठाद्याश्च । यदि न ते मयि विस्रम्भः, पृच्छ वसिष्ठम् । 'अहं वेद्मि महात्मानं रामं सत्यपराक्रमम् । वसिष्ठोऽपि महातेजा ये चेमे तपसि स्थिताः' (१९.१४) इति च ॥ १० ॥

इति तस्य वचः श्रुत्वा मुमोह स महीपतिः ।
वित्रस्तो निजपुत्रस्य विरहानलशङ्कया ॥ ११ ॥

(भा.दी.) **इती**ति । महीपतिः सः दशरथः तस्य विश्वामित्रस्य इति एवमादि वचः श्रुत्वा, निजः स्वकीयो यः पुत्रस्तस्य श्रीरामस्य विरहो वियोगः स एव अनलोऽग्निस्तस्य शङ्कया, वित्रस्तः भीतः सन्, मुमोह मूर्च्छितोऽभूत् । मुह वैचित्ये लिट् ॥ ११ ॥

(सं.चं.) मुमोह कर्तव्यमूढः स्तब्धः स्थाणुरिव तस्थौ । विरहानलशङ्कयैव । का कथा विरहानले प्राप्ते सति ॥ ११ ॥

लब्धसञ्ज्ञो मुहूर्त्तेन मुहुरार्त्तो नरेश्वरः ।
विनिश्वस्य मुनिश्रेष्ठं दीनन्दीनमभाषत[१] ॥ १२ ॥

(भा.दी.) **लब्धे**ति । मुहूर्तो मुहूर्तकालस्तेन लब्धा सञ्ज्ञा प्रज्ञा येन स तथोक्तः, मुहुः भृशं आर्तः, नरेश्वरः राजा दशरथः, विनिश्वस्य शोकवशाद् दीर्घमुच्छ्वस्य, मुनिश्रेष्ठं विश्वामित्रं प्रति, दीनः खिन्नः यथा भवति तथा दीनम्, दीनः खिन्नः यथा भवति तथेत्युभयमपि (क्रिया)विशेषणम् । दीनं यज्ञानां विघातेन खिन्नमित्येकं विश्वामित्रविशेषणं वा, अभाषत । भाष व्यक्तायां वाचि लङ् ॥ १२ ॥

(सं.चं.) मुहूर्तेनेति न कालमानवचनम् । किन्तु साप्द्यवचनम् । सपदि लब्धसञ्ज्ञः । मुहुः पुनरप्यार्तः दुःखितः । राममहिमपरिज्ञानाददीनं मुनिश्रेष्ठं दीनन्दीनं अतितरां भयगद्गदं यथा स्यात् तथाऽभाषत । स्वीकारे रामविरहभयम् । अस्वीकारे मुनिकोपाद् भयमित्युभयतःपाशेयं कष्टा दशेत्याह– दीनन्दीनमिति ॥ १२ ॥

---

१. **'दीनोऽदीनमभाषत' 'दीनो दीनमभाषत'** इति केचित् पदं छिन्दन्ति । **'दीनन्दीनं अत्यन्तदैन्ययुक्तं यथा भवति तथा'** इति का.श्री. ।

सुकुमारं कुमारं मे सुतं सुखविवर्द्धितम्[१] ।
अनस्त्रज्ञमयुद्धज्ञं[२] न रामं नेतुमर्हसि[३] ॥ १३ ॥

(भा.दी.) वचनप्रकारं दर्शयति–**सुकुमारमि**ति ।सुकुमारं कोमळम्, कुमारं बालकम्, सुखेन विवर्द्धनं विवृद्धिर्यस्य स तथोक्तस्तम् । सुखविवर्द्धितमिति क्वचित्पाठः । युद्धज्ञो न भवतीत्ययुद्धज्ञस्तम्, अस्त्राणि जानातीत्यस्त्रज्ञः न भवतीत्यनस्त्रज्ञस्तम्, मे सुतं श्रीरामं नेतुं नार्हसि न योग्योऽसि । अर्ह पूजायां लट् ॥ १३ ॥

(सं.चं.) सुकुमारः कोमलाङ्गः । स कथं रूक्षै रक्षोभिर्युध्येत? महता यत्नेन लब्धं सुतम् । कथं तं विरहय्य जीवेयम्? सुखेन विवर्धितमदुःखज्ञम् । कथं तमहं रक्षःक्षपणसङ्कटे क्षिपेयम्? तत्रापि कुमारमप्राप्तवयसमनस्त्रज्ञमयुद्धज्ञं च । ते च राक्षसाः परिणतवयसः शस्त्रास्त्राभिज्ञा मायायुद्धकुशलाश्च ॥ १३ ॥

नववर्षसहस्राणि परितप्तः सुताशया ।
रामाननेन्दुनेदानीमहमानन्दितो मुने ॥ १४ ॥

(भा.दी.) नवेति । हे मुने विश्वामित्र, वर्षाणां सहस्राणि वर्षसहस्राणि । नव च तानि वर्षसहस्राणि च तानि । निरन्तरनववर्षसहस्रेष्वित्यर्थः । 'कालाध्वनोरत्यन्तसंयोगे' (अ.सू.२.३.५) इति द्वितीया । सुताशया सुतानां प्राप्त्याशया परितप्तः अहं इदानीं श्रीरामस्य यदाननं तदेवेन्दुस्तेन आनन्दितः सन्तोषितः अस्मि ॥१४॥

(सं.चं.) नववर्षसहस्राणि । सम्प्रति रामायणे तु पठ्यते–'षष्टिवर्षसहस्राणि जातस्य मम कौशिक । दुःखेनोत्पादितश्चायं न रामं नेतुमर्हसि' (२०.१०) इति । 'नववर्षसहस्राणि मम जातस्य–' इत्येव प्राचीनो रामायणपाठः । काळिदासोऽप्याह रघुवंशे–'पृथिवीं शासतस्तस्य पाकशासनतेजसः । किञ्चिदूनमनूनर्धेः शरदामयुतं ययौ' (१०.१) इति । सुताशया सुतनिरीक्षया । परितप्तः बहुविधैराधिभिः परिभूतः । सम्प्रति निरीक्षितं लब्धं बहोः कालात् । कथं तत् सहसा त्यजेयम् ॥ १४ ॥

सोऽहं मुहूर्त्तमप्येनं हित्वा न स्थातुमुत्सहे ।
मम प्राणानिव ब्रह्मन् तस्माद् रामो न नीयताम् ॥ १५ ॥

(भा.दी.) स इति । हे ब्रह्मन् ब्राह्मण, सः एवं सन्तोषं प्राप्तः अहम्, यतः कारणात् एनं श्रीरामं मम प्राणानिव हित्वा त्यक्त्वा मुहूर्तो मुहूर्तकालस्तमपि मुहूर्तकालेऽपीत्यर्थः, स्थातुं न उत्सहे न सोढुं शक्तोऽस्मि । षह मर्षणे लट् । तस्मात् श्रीरामः न नीयताम् । णीञो लोट् ॥ १५ ॥

---

१. **'सुखविवर्द्धनम्'** इति वि.ती.पाठः । २. **'अयुद्धज्ञमनस्त्रज्ञम्'** इति वि.ती.पाठः । ३. **'–ज्ञं रामं नेतुं नचार्हसि'**

(सं.चं.) मुहूर्तं लवकालमपि । नोत्सहे । उत्साहः सज्जीभवनम् । पुत्रं हातुं नाहं सज्जः सिद्ध इत्यर्थः । प्राणा इन्द्रियाणि । यदि रामं नयसि निरिन्द्रियो निश्चेष्टः स्याम् । एडमूकोऽन्धोऽमनाः । अथच प्राणा इति बहुवचनान्तं जीवचैतन्यवचनम् । यदि नयसि रामम्, नूनमुत्क्रामन्ति मे प्राणाः । न जीवेयं विना रामम् ॥ १५ ॥

मायिभी राक्षसैर्योद्धुं मां मुहुर्जितकाशिनम्[१] ।
चतुरं चतुरङ्गेण चक्रेण सहितं नय ॥ १६ ॥

(भा.दी.) मायिभिरिति । माया अदृश्यत्वादिशक्तिः एषामस्तीति मायिनस्तैः । व्रीह्यादित्वादिनिः । राक्षसैः योद्धुं मुहुः बहुवारं जितेन जयेन काशितुं प्रकाशितुं शीलमस्यास्तीति जितकाशी तम्, जितयुद्धमित्यर्थः, चतुरं निपुणम्, चत्वारि अङ्गानि गजतुरगरथपदातिलक्षणावयवा यस्य तत्तेन (चक्रेण सैन्येन) । 'चक्रं सैन्ये जलावर्ते रथाङ्गे चयराष्ट्रयोः' इति वैजयन्ती । सहितं मां नय । णीञ् प्रापणे लोट् ॥ १६ ॥

(सं.चं.) मायिभिः । 'व्रीह्यादिभ्यश्च' (अ.सू.५.२.११६) इतीनिः । तेन त्रीणि रूपाणि मायी,मायिकः, मायावान् । मायिभी राक्षसैः । 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' (अ.सू.६.३.१११) इति रलोपे पूर्वस्येकारस्य दीर्घः । मुहुरनेकवारम् । 'जितकाशी जिताहवः' इत्यभिधानम् । चतुरं प्रवीणं युद्धतन्त्रे । परिचितयुद्धतन्त्रोऽहम् । विजित्य च शत्रून् बहुधा लब्धानुभवः कृतहस्तोऽहम् । तस्मान्नय माम् । चक्रं चमूः । 'चक्रं सेनारथाङ्गयोः' इति मङ्खः । चत्वारि च चक्रस्याङ्गानि भवन्ति– पदातयः, अश्वाः, गजाः, रथा इति ॥ १६ ॥

यदि रावणमाश्रित्य युष्मान् निघ्नन्ति राक्षसाः ।
प्राप्तः सर्वविनाशो नो जगत् स्यादधरोत्तरम् ॥ १७ ॥

(भा.दी.) यदीति । यदि राक्षसाः खरादयः रावणं आश्रित्य युष्मान् निघ्नन्ति संहरन्ति । हन हिंसा-गत्योर्लट् । तर्हि नः अस्माकं सर्वविनाशः सर्वस्य नाशः प्राप्तः । न केवलं सर्वविनाशः । किन्तु जगत् अधरं च तदुत्तरं च अधरोत्तरम्, अव्यवस्थितमित्यर्थः, स्यात् । अस्तेर्लिङ् ॥ १७ ॥

(सं.चं.) अथापि यदि रावणमाश्रित्य निघ्नन्ति सुबाहुमारीचादयः न तर्हि जयाशा । नापि जीविताशा । भवन्तश्च वयं च सर्वे नष्टा भवेम । अधरमुत्तरम्, उत्तरं चाधरमिति सर्वं जगद् विप्लुतमस्तव्यस्तं स्यात् । '**ಅಡಿಮೇಲು**' इति भाषायाम् ॥ १७ ॥

---

१. '**मुहुर्जितमायिनम्**'

सवासवाः सुरगणा यन्नाम्नैव प्रदुद्रुवुः ।
वैरं स्वैरं कथं यामस्तेन तच्चानुचिन्त्यताम्[1] ॥ १८ ॥

(भा.दी.) **सवासवा** इति । सवासवाः सेन्द्राः सुरगणाः देवसमूहाः यस्य रावणस्य नाम तेनैव, नाम-श्रवणमात्रेणेत्यर्थः, प्रदुद्रुवुः पलायितवन्तः । द्रु गतौ लिट् । तेन रावणेन वयं वैरं विरोधस्तत्, स्वैरं स्वेच्छा यथा भवति तथा । 'मन्दस्वच्छन्दयोस्स्वैरम्' इत्यमरः । निष्कारणमिति यावत् । कथं यामः प्राप्नुमः । या प्रापणे लट् । तच्च तादृशरावणेन विरोधाचरणं च, अनुचिन्त्यतां त्वयैव विचार्यताम् । तादृशरावणेन विरोधा-चरणमस्माकं युक्तमयुक्तं वेति त्वयैव विचार्यतामिति भावः ॥ १८ ॥

(सं.चं.) नाम्नैव श्रुतेन । न दृष्ट्वा नतरां पुरः स्थित्वा । प्रदुद्रुवुः भीताः पलायन्त । सत्वरं गमनं द्रवणम् । भयेन धावनं प्रद्रवणम् । स्वैरं स्वेच्छया । स्वस्य ईरः इच्छा प्रेरणं वा यथा भवति तथा । 'स्वादीरेरिण्योर्वृद्धिर्वक्तव्या' इति वार्तिकम् (अ.सू.६.१.८९) । न तत्र जीविताशेति ज्ञात्वाऽपि तेन वैरकरणं मौर्ख्यस्य परा काष्ठेत्यर्थः । तच्च रावणेन सह विरोधस्यासम्भवात्, अनर्थसम्भवाच्चाप्रायोगिकत्वं च अनु सहैव चिन्त्यताम् । 'अनु हीने सहार्थे च' इति मेदिनी । एतत्सङ्कटनिवारणानुकूलं च किमपि चिन्त्यताम् । रावणवैरमन्तरा कथं यज्ञरक्षा स्यादिति ॥ १८ ॥

गोब्राह्मणार्थं देहोऽयं धार्य्यते क्षत्त्रबन्धुना[2] ।
तस्माद् यावन्मम प्राणास्तावद् योत्स्यामि वो[3] रिपून् ॥ १९ ॥

(भा.दी.)तर्हि जीवनेच्छुना त्वयाऽपि नाऽगम्यते किम्? नेत्याह– **गोब्राह्मणे**ति । यतः क्षत्त्रबन्धुना क्षत्त्रियेण, गावश्च ब्राह्मणाश्च तदर्थम्, गोब्राह्मणानां रक्षणार्थमित्यर्थः, अयं देहः धार्यते । धृञ् धारणे लट् । तस्मात् कारणात् मम यावत् यावत्कालपर्यन्तं प्राणाः सन्ति तावत् तावत्पर्यन्तं ते रिपून् राक्षसान् प्रति योत्स्यामि । युध सम्प्रहारे लृट् ॥ १९ ॥

(सं.चं.) गोब्राह्मणरक्षार्थम् । क्षत्रबन्धुना । क्षत्रयोनौ जातमात्रेण, क्षत्रियाधमेनापि । योत्स्यामि वो रिपून् । अकर्मको युधिः । आत्मनेभाषश्च । 'प्रति' इत्यध्याहारेण रिपून् प्रति योत्स्यामीति सकर्मकत्वं कथञ्चिद् योजयन्ति । मोदतीतिवत् युद्ध्यतीति बहुलं प्रयोगादुभयपदित्वविवक्षया परस्मैपदत्वमपि सङ्गमनीयम् ॥१९॥

---

१. **'याम तेन तत्रानुचिन्त्यताम्'** । **'यामस्तेन तत्रैव चिन्त्यताम्'** इति च क्वचित् । २. **'क्षत्रबन्धुना क्षत्रियाभासेन मया'** इति का.श्री. ।
३. **'ते रिपून्'** इति वि.ती.पाठः ।

इति तद्वचनाज्येन प्राज्वलत् तापसानलः ।
निशाचरापराधाख्यैः शुष्कवृक्षैः पुरा ज्वलन् ॥ २० ॥

(भा.दी.) **इती**ति । निशायां रात्रौ चरन्तीति निशाचराः राक्षसास्तेषां येऽपराधास्त इति आख्या नाम येषां ते तथोक्तास्तैः, शुष्कवृक्षैः नीरसवृक्षैः, पुरा पूर्वमेव ज्वलन् तापसो मुनिरेवाग्निः, विश्वामित्राख्याग्निरित्यर्थः, इति एवमादि तस्य दशरथस्य यद्वचनं तदेव आज्यं तेन प्राज्वलत् प्रजज्वाल । ज्वल दीप्तौ लङ् । पूर्वं रक्षसां यज्ञविघ्नाद्यपराधेन क्रुद्धः पुनः स्ववाक्यप्रतिकूलवचनं श्रुत्वाऽत्यन्तं क्रुद्धोऽभूदिति भावः ॥ २० ॥

(सं.चं.) शुष्कैः वृक्षैः वृक्णैर्वृक्षखण्डैरिन्धनैः जज्वाल पुरा । इदानीमाज्यसिक्तः प्रजज्वाल ॥ २० ॥

कोपाटोपं मुनेर्वीक्ष्य वसिष्ठो नृपमब्रवीत् ।
प्रतिश्रुतं त्वया राजन् कुर्य्यामिष्टमिति ध्रुवम् ॥ २१ ॥

(भा.दी.) **कोपे**ति । वसिष्ठः मुनेः विश्वामित्रस्य कोपस्य आटोपः सम्भ्रमस्तं वीक्ष्य, नृपं दशरथं प्रति, हे राजन् दशरथ, त्वया इष्टं मुन्यभीष्टं तत् कुर्याम् करवाणि, कृञो लिङ्, इति ध्रुवं निश्चितं यथा भवति तथा प्रतिश्रुतम्, इति अब्रवीत् । ब्रुवो लङ् ॥ २१ ॥

(सं.चं.) कोपस्याऽटोप आवेगः । औत्कट्यम् । यत् तवेष्टं तद् ध्रुवमविशङ्कितं कुर्यामिति त्वया प्रति-ज्ञातम् । नतु यदि शक्यं तर्हि कुर्यामिति । मा स्म प्रतिश्रुत्य वितथवचनो भवः ॥ २१ ॥

अभ्यागताय[१] विप्राय श्रोत्रियाय यियक्षवे ।
वैष्णवाय प्रतिश्रुत्य नाकर्त्तुं राघवार्हसि ॥ २२ ॥

(भा.दी.) ततः किमित्यत आह– **अभी**ति । राघव दशरथ, अभ्यागताय सम्प्राप्ताय, विप्राय ब्राह्मणाय, श्रोत्रियाय वेदाध्ययनशीलाय, यियक्षवे यष्टुकामाय, वैष्णवाय विष्णुभक्ताय विश्वामित्राय । प्रतिज्ञातार्थस्यावश्यं करणीयत्वे हेतुगर्भानीमानि विशेषणानि । प्रतिश्रुत्य त्वदभीष्टं करवाणीति प्रतिज्ञाय, अकर्तुं नार्हसि न योग्योऽसि । अर्ह पूजायां लट् ॥ २२ ॥

१. **'एकैकमपि विशेषणमकरणे प्रत्यवायापादकमिति ज्ञेयम्'** इति का.श्री. ।

(सं.चं.) अभ्यागताय यस्मैकस्मैचन प्रतिश्रुत्याकरणमेव दोषः। किमुत विप्राय। किमुत तेष्वपि श्रोत्रियाय। अथ किमुत यियक्षवे। उत्तरोत्तरमधिकाधिको दोषः। सर्वेषां शिखरायितं पुनर्वैष्णवत्वम्। विश्वामित्रे पुनरेतेषां सर्वेषां महागुणानामेकत्र समवायः। तस्मात् करोमीति प्रतिज्ञायाकर्तुं नार्हसि ॥ २२ ॥

महिमा हि महानस्य त्वत्पुत्रस्यास्ति संवृतः।
येनायं कुपितो लोकान्निर्दहेच्च[१] चतुर्दश ॥ २३ ॥

(भा.दी.) अयुक्तेऽनेनार्थिते सति कथं कुर्यामित्यतस्त्वत्पुत्रस्य राक्षसहनने महासामर्थ्यमस्तीत्यतोऽनेनायुक्तं नाभिहितमिति भावेनाऽह– **महिमे**ति। त्वत्पुत्रस्य अस्य श्रीरामस्य महान् महिमा संवृतः गूढः सन् अस्ति हि। अस्तेर्लट्। महत्त्वमेव दर्शयति– **येने**ति। येन महिम्ना अयं श्रीरामः कुपितः सन् क्रुद्धः सन्, चत्वार अधिका दश चतुर्दश, (तान्) लोकान् निर्दहेत्। दह भस्मीकरणे लिङ् ॥ २३ ॥

(सं.चं.) संवृतः पिहितः। चतुर्दश लोकानपि निर्दहेत्। हीति ज्ञानिलोकप्रसिद्धमेतदित्याह ॥ २३ ॥

विश्वामित्रोऽपि तेजस्वी नारायणपरायणः।
समर्थस्यापि ते सूनोः सहायत्वं गमिष्यति ॥ २४ ॥

(भा.दी.) विश्वामित्रमहिमानमप्याह– **विश्वे**ति। नारायण एव परं केवलमयनमाश्रयो यस्य स तथोक्तः, अत एव तेजः पराभिभवलक्षणसामर्थ्यमस्यास्तीति तेजस्वी, ब्रह्मवर्चस्वीति वा, विश्वामित्रोऽपि राक्षसहनने समर्थस्यापि ते सूनोः श्रीरामस्य सहायत्वं गमिष्यति। गम्लृ गतौ लृट् ॥ २४ ॥

(सं.चं.) विश्वामित्रोऽपि तेजस्वी। क्षात्रं ब्राह्मं चेत्युभयमपि तेजस्तस्मिन् हि सम्भृतम्। नारायणे परायणः तत्परः। नारायणः परायणं परमाश्रयो यस्येति च। नारायणपराणामप्ययमयनः। वैष्णवाग्रणीः। 'परायणमभिप्रेते तत्परे परमाश्रये' इति यादवप्रकाशः। नारायणः परायणः सर्ववेदार्थत्वेनाभिप्रेतो यस्येति वा। यज्ञरक्षकतयाऽभिमतो वा। सहायत्वं महिमाभिव्यक्तावुपकरणत्वम् ॥ २४ ॥

जयासुप्रभयोः पूर्वं जातं यद् दक्षकन्ययोः।
तदस्त्रशतकं वेद सोऽन्यच्चाग्रे महारथः[१] ॥ २५ ॥

---

१. **'निर्दहेच्च भस्मीकुर्यादेव'** इति का.श्री.।

१. **'महीसुरः'। 'महारथः–'आत्मानं सारथिं चाश्वान् रक्षन् युध्यति यो नरः। महारथ इति ज्ञेयः' इत्युक्तलक्षणः'** इति का.श्री.।

(भा.दी.) अनस्त्रज्ञः कथं युद्धसाहाय्यं करिष्यतीत्यत आह– **जये**ति । अग्रं पूर्वं तस्मिन्, विश्वामित्रस्य क्षत्रियत्वावस्थायामित्यर्थः, महान् रथो यस्य स तथोक्तः सः विश्वामित्रः, दक्षकन्ययोः दक्षप्रजेश्वरस्य पुत्र्योः, जया च सुप्रभा च तयोः, जयासुप्रभाख्ययोरित्यर्थः, यत् अस्त्राणां शतकं पूर्वं जातमुत्पन्नं तद् वेद जानाति । विद ज्ञाने लट् । अन्यच्च अस्त्रजातं वेदेति सम्बन्धः । दक्षकन्ययोः जयासुप्रभयोः अस्त्रशतकमुत्पन्नं तच्चायं विश्वामित्रो वेदेति रामायणे प्रसिद्धम् ॥ २५ ॥

(सं.चं.) ब्रह्मर्षित्वादग्रे पूर्वं स किल महारथः क्षत्रिय आस । जयासुप्रभयोरिति । 'जया च सुप्रभा चैव दक्षकन्ये सुमध्यमे । ते सुवातेऽस्त्रशस्त्राणि शतं परमभास्वरम् । पञ्चाशतं सुतान् लेभे जया नाम परान् पुरा । वधायासुरसैन्यानाममेयान् कामरूपिणः । सुप्रभाऽजनयच्चापि पुत्रान् पञ्चाशतं पुनः । संहारान् नाम दुर्धर्षान् दुराक्रामान् बलीयसः । तानि चास्त्राणि वेत्त्येष यथावत् कुशिकात्मजः । अपूर्वाणां च जनने शक्तो भूयः स धर्मवित्' (२१.१५–८) इति वाल्मीकीये । अन्यच्चापूर्वमस्त्रजातम् ॥ २५ ॥

तस्माद् रामेण राजेन्द्र गन्तव्यं मुनिना सह ।
हन्तव्यं राक्षसकुलं[1] त्रातव्यं यज्ञकर्म्म तत् ॥ २६ ॥

(भा.दी.) **तस्मादि**ति । हे राजेन्द्र दशरथ, तस्मात् श्रीरामस्यातिसमर्थत्वाद् विश्वामित्रसाहाय्याच्च श्रीरामेण मुनिना विश्वामित्रेण सह गन्तव्यम् । राक्षसकुलं राक्षससमूहः हन्तव्यम् । तत् विश्वामित्रसम्बन्धि यज्ञकर्म त्रातव्यं रक्षणीयम् ॥ २६ ॥

(सं.चं.) तस्मात् विश्वामित्रस्य नारायणपरायणत्वात्, रामस्य च नारायणत्वादित्यान्तरो हेतुः । त्वत्प्रतिज्ञातस्य कर्तव्यत्वात्, रामस्य समर्थत्वात्, अस्त्रशतकज्ञस्य विश्वामित्रस्य तत्सहायत्वाच्चेति बाह्यः । गन्तव्यम्, गत्वा च हन्तव्यम्, हत्वा च त्रातव्यं यज्ञकर्म । तत् विश्वामित्रेण चिकीर्षितम् ॥ २६ ॥

वासिष्ठं वाक्यमाकर्ण्य राघवो रामलक्ष्मणौ ।
प्रेषयामास सुप्रीतः कौशिकाय समर्प्पयन् ॥ २७ ॥

(भा.दी.) **वासिष्ठमि**ति । राघवः दशरथः, वसिष्ठेन प्रोक्तं वासिष्ठं तत् वाक्यं आकर्ण्य सुप्रीतः सन्, रामलक्ष्मणौ, कुशिकस्य कुशिकनाम्नो राज्ञो गोत्रे भवः कौशिकः, तस्मै समर्पयन् सन्, त्वदीयाविति तद्वशे ददत् सन् प्रेषयामास । ईष गतिहिंसादर्शनेष्वित्यस्माल्लिट्[2] ॥ २७ ॥

१. **'राक्षसबलम्'**

२. **'अप्रेषयत्'** इत्यादिप्रयोगदर्शनात् **'प्रेषृ गतौ'** इति च स्यात् ।

(सं.चं.) वसिष्ठवाक्यमाकर्ण्य जातविस्रम्भः, पूर्वं भीतः सम्प्रति सुप्रीतः संहृष्टः । समर्पयन् प्रेषयामास । प्रेषणाय समर्पयामासेत्यर्थः ॥ २७ ॥

दोर्दण्डार्प्पितकोदण्डौ शुभालापौ कलापिनौ ।
किशोरावपि शूरौ तौ सुस्मितौ मुनिमीयतुः ॥ २८ ॥

(भा.दी.) श्रीरामलक्ष्मणयोः विश्वामित्रेण सह गमनं वर्णयति– **दोरि**ति । दोषोर्हस्तयोर्दण्डौ[१] तयोरर्पिते निक्षिप्ते कोदण्डे धनुषी याभ्यां तौ तथोक्तौ, शुभः आलापः परस्परभाषणं ययोस्तौ तथोक्तौ, 'आलापो भाषणं मिथः' इत्यमरः, कलापौ इषुधी अनयोः स्त इति तथोक्तौ, किशोरावपि किशोरवयस्कावपि, नववर्षादारभ्य षोडशवर्षपर्यन्तं किशोरवय इत्युच्यते, शूरौ पराक्रमिणौ, सु शोभनं स्मितं ययोस्ताविति तथोक्तौ, तौ रामलक्ष्मणौ मुनिं विश्वामित्रं ईयतुः अनुजग्मतुः । इण् गतौ लिट् ॥ २८ ॥

(सं.चं.) मधुरालापौ । 'कार्मुकं तु चतुर्हस्तं कोदण्डं त्र्यङ्गुलं विना' इति यादवप्रकाशः । अत्र तु धनुःसामान्यवचनम् । कोदण्डं बाणसापेक्षमिति कलापिनावित्याह । अंसपृष्ठे निषङ्गिणौ । 'बाणाश्रयः कलापः' इत्यभिधानम् । अथच कलापिनौ कट्यां काञ्चीदामविभूषितौ । 'कलापः संहतौ बर्हे काञ्च्यां भूषण-तूणयोः' इति मेदिनी । अथच कलापो भूषणम् । कलापिनौ भूषणैरलङ्कृतौ । 'धनुष्पाणी स्वलङ्कृतौ' इति वाल्मीकीये । किशोरौ परिचतुर्दशौ । आषोडशं कैशोरमाहुः । 'ऊनषोडशवर्षो मे रामो राजीवलोचनः' (२०.२) इति च । अप्राप्तयौवनावपि शूरौ । सु सहजम्, नत्वाहितम्, अकृत्रिमं स्मितम् । 'ईषच्च हसितं स्मितम्' इत्यभिधानम् ॥ २८ ॥

मुमुदुस्तौ प्रजाः प्रेक्ष्य[२] विश्वामित्रानुयायिनौ ।
वागीशमनुगच्छन्ताविन्द्राविष्णूइवामरौ[३] ॥ २९ ॥

(भा.दी.) **मुमुदु**रिति । प्रजाः, विश्वामित्रं अनुयातुं अनुगन्तुं शीलमनयोरस्तीति तथौक्तौ तौ श्रीराम-लक्ष्मणौ । वागीशं बृहस्पतिं अनुगच्छन्तौ (अमरौ) देवौ इन्द्रश्च विष्णुश्च ताविव । 'देवताद्वन्द्वे च' (अ.सू.६.३.२६) इत्यानङ् । प्रेक्ष्य मुमुदुः । मुद हर्षे लट् ॥ २९ ॥

---

१. **'दोषौ भुजौ दण्डाविव'** इति का. श्री. । २. **'प्रजा वीक्ष्य'** ३. **'इवामलौ'**

(सं.चं.) प्रजा आयोध्यकाः । मुमुदुः । आत्मनेभाषमपि मोदतिं परस्मैभाषं बहुलं भाषन्ते कवयः । विश्वामित्रानुयायिनावपि तत उत्तमौ स्वरूपतः । तदेतद् दृष्टान्तेनावगमयति– वागीशमिति । स्वतोऽवरं वागीशं बृहस्पतिं देवगुरुत्वेनोपाधिनाऽनुगच्छान्ताविन्द्राविष्णूइव ॥ २९ ॥

अद्ध्यर्द्धयोजनाध्वानं गत्वा गतिविदां वरः ।
सरय्वा उत्तरे तीरे केशवं कौशिकोऽब्रवीत् ॥ ३० ॥

(भा.दी.) अधीति । गतिं मोक्षोपायं विदन्तीति गतिविदस्तेषां मध्ये, 'दशोपायगमे गतिः' इति वैजयन्ती, वरः श्रेष्ठः कौशिकः विश्वामित्रः । अधिकमर्द्धं यस्य तदध्यर्द्धम्, अध्यर्द्धं योजनं यस्य स तथोक्तः, स चासौ अध्वा च तं गत्वा, सरय्वाः सरयूनद्याः उत्तरं उत्तरदिक्स्थं तस्मिन् तीरे । प्रशस्ताः केशाः अस्य सन्तीति केशवस्तम्, 'केशाद्वोऽन्यतरस्याम्' (अ.सू.५.२.१०९) इति मत्वर्थे वः, श्रीरामं प्रत्यब्रवीत् । ब्रुवो लङ् ॥ ३० ॥

(सं.चं.) अर्धमधिकं यस्मिन् तदध्यर्धं योजनं यस्य तावन्तमध्वानं गत्वा । दुर्गमेऽपि बन्धुरेऽपि काननपथे सलीलं गच्छतीति गतिविदां वरः । सरय्वा उत्तरे तीरे । ननु रामायणेऽन्यथा पठ्यते– 'अध्यर्धयोजनं गत्वा सरय्वा दक्षिणे तटे । रामेति मधुरां वाणीं विश्वामित्रोऽभ्यभाषत' इति । युक्तं चैतत् । सरय्वा दक्षभागे ह्ययोध्या भवति । तथाहि मानसाचलकन्दराद् दक्षिणामभि दिशं सरन्ती सरयूर्गङ्गासङ्गता पूर्वा दिशमभिगच्छति । गङ्गासङ्गमात् पूर्वं दक्षिणवाहिन्याः सरय्वाः दक्षभागे गोमत्याः पूर्वतः पश्चिमतश्च सरय्वा अयोध्या प्रतिष्ठिता । तत् किमिदमुच्यते 'सरय्वा उत्तरे तीरे' इति? मुनेः प्रयाणपथापेक्षया उत्तरदिगवच्छिन्ने देश इत्यर्थः । स हि सरयूतीर एव उत्तरस्या दिशः दक्षिणाभिमुखं ययौ यावद् गङ्गासरयूसङ्गमनम् । 'सरय्वा दक्षिणे तीरे' इत्येव स्यादपि मूलपाठः । कथं सरयूः? मानसाचलकन्दरात् सरतीति । 'सर्तेरयूः' इति भोजकातन्त्रौ । 'सर्तेरयुः' इति तु दशपादिका । केशवं केशवावतारं प्रशस्तकेशवन्तं च रामम् । कौशिकः कुशिकपौत्रः । कुशिकस्य गाधिस्तनयः । गाधेर्विश्वामित्रः ॥ ३० ॥

तात मन्त्रौ प्रवक्ष्यामि बलामतिबलामपि ।
क्षुत्पिपासादिशमनौ ब्रह्मोक्तौ सर्वकामदौ ॥ ३१ ॥

(भा.दी.) तातेति । हे तात श्रीराम, क्षुत् क्षुधा सा च पिपासा पानेच्छा सा च ते आदी येषां श्रमादीनां ते तथोक्तास्तेषां शमनं शान्तिर्याभ्यां तौ तथोक्तौ, ब्रह्मणा उक्तौ उपदिष्टौ, सर्वे ये कामा अभीप्सितपदार्थाः

तान् दत्त इति तथोक्तौ, बलां बलाख्यां अतिबलामपि अतिबलाख्यामपि मन्त्रौ, ऋग्रूपमन्त्रौ प्रवक्ष्यामि उपदेक्ष्यामि । वच परिभाषणे लृट् ॥ ३१ ॥

(सं.चं.) तातेत्यनुकम्पामृदु सम्बोधनम् । 'तातोऽनुकम्प्ये जनके' इति मेदिनी । मन्त्रौ प्रवक्ष्यामीति । तथाहि वाल्मीकिः– 'मन्त्रग्रामं गृहाण त्वं बलामतिबलां तथा' (२२.१३) इति, 'बला त्वतिबला चैव सर्वज्ञानस्य मातरौ । क्षुत्पिपासे न ते राम भविष्येते नरोत्तम' (२२.१७–८) इति, 'पितामहसुते ह्येते विद्ये तेजःसमन्विते' (२२.१९) इति च । 'सर्वकामस्य मातरौ' इत्यपि ग्रन्थकृत्सम्मतो रामायणपाठः स्यात् । क्षुत्पिपासादिशमनौ । आदिपदेन श्रमज्वरादि । 'न श्रमो न ज्वरो वा ते न रूपस्य विपर्ययः' (२२.१३) इति च ॥ ३१ ॥

इति ब्रुवाणाद् विप्रेन्द्रान्मन्त्रौ शुश्राव राघवः[१] ।
सर्वज्ञः पूर्णकामोऽपि शिष्टाचारानुशिक्षकः ॥ ३२ ॥

(भा.दी.) इतीति । सर्वं जानातीति सर्वज्ञः राघवः श्रीरामः, पूर्णः कामो मनोरथो यस्य स तथाऽपि, शिष्टानां सत्पुरुषाणां य आचारः गुरुवचनानुपालनादिः तदनुशिक्षयतीति तथोक्तः, तथा सन् इति एवमादि वचः ब्रुवाणात् वदतः (विप्रेन्द्रात्) मुनीन्द्रात् विश्वामित्रात् मन्त्रौ प्रागुक्तमन्त्रौ शुश्राव । श्रु श्रवणे लिट् । सर्वज्ञत्वेनाज्ञातमन्त्रादेरभावेऽपि परिपूर्णमनोरथत्वेन मन्त्रलभ्यप्रयोजनाभावेऽपि शिष्येण सता गुरूपदिष्टेन भाव्यमिति लोकशिक्षार्थं मुनेर्मन्त्रौ जग्राहेति भावः ॥ ३२ ॥

(सं.चं.) 'शुश्राव माधवः' इति पाठे माः प्रमाः प्रमाणवचनानि च । मानां धवो माधवः । न विद्यतेऽन्यो धवोऽस्येति च । सर्वज्ञोऽपि सर्वेश्वरोऽपि विप्रेन्द्राच्छुश्राव । पूर्णकामोऽपि सर्वकामदौ शुश्राव । कुतः? शिष्टाचारानुशिक्षणाय । शिष्टचारस्येत्थम्भावशिक्षणमनुशिक्षणम् । 'अनु हीने सहार्थे च पश्चात्सादृश्ययोरपि । लक्षणेत्थम्भूताख्यानभागवीप्सास्वनुक्रमे' इति मेदिनी । पुनःपुनः शिक्षणं वाऽनुशिक्षणम् ॥ ३२ ॥

मुनिना लाळितौ कामं नरदेवकुमारकौ ।
निशां तां सरयूतीरे रेमाते रामलक्ष्मणौ ॥ ३३ ॥

(भा.दी.) मुनिनेति । मुनिना विश्वामित्रेण लाळितौ मानितौ, नरदेवस्य राज्ञो दशरथस्य कुमारकौ बालकौ श्रीरामलक्ष्मणौ तां निशाम्, तस्यां रात्र्यामित्यर्थः, सरय्वाः तीरं तटं तस्मिन् कामः इच्छा यथा भवति तथा कामं रेमाते । रमु क्रीडायां लिट् ॥ ३३ ॥

१. 'शुश्राव माधवः'

(सं.चं.) तां प्रथमां निशां सरयूतीरे तृणशयने सुप्तावपि रेमाते ॥ ३३ ॥

सान्ध्यं कृत्यं ततः कृत्वा प्रभाते सुप्रभा ययुः ।
आश्रमं सरयूगङ्गासङ्गमेऽनङ्गवल्लभम् ॥ ३४ ॥

(भा.दी.) सान्ध्यमिति । शोभना प्रभा येषां ते सुप्रभाः, श्रीरामाद्याः, प्रभाते प्रभातः कालस्तस्मिन्, सन्ध्यायाः सम्बन्धि सान्ध्यम्, प्रातःसन्ध्यायां कर्तव्यमित्यर्थः, कृत्यं कर्म तत् कृत्वा । ततः सरयूतीरात् सरयूश्च गङ्गा च तयोः सङ्गमः समागमः तस्मिन् स्थितमिति शेषः । अनङ्गस्य कामस्य वल्लभः प्रियस्तम्, आश्रमं मुनिस्थानम् । 'आश्रमोऽस्त्री मुनिस्थाने ब्रह्मचर्यादिके मठे' इति वैजयन्ती । ययुः । यातेर्लिट् ॥३४॥

(सं.चं.) ततः प्रभाते सान्ध्यं कृत्यं कृत्वा, तीर एव दक्षिणाभिमुखमागत्य सायं सरयूगङ्गासङ्गमे स्थितं कामदेवाश्रमं ययुः ॥ ३४ ॥

यत्र हैमवतीकान्तलोचनानलजिह्वया ।
अनङ्गोऽनङ्गतां प्राप्तस्तां रात्रिं तत्र तेऽवसन् ॥ ३५ ॥

(भा.दी.) यत्रेति । यत्र यस्मिन् आश्रमे अनङ्गः कामः, हिमवतोऽपत्यं स्त्री हैमवती गौरी, तस्याः कान्तो भर्ता रुद्रस्तस्य लोचनं तृतीयनेत्रं तस्य योऽग्निस्तस्य जिह्वा ज्वाला तया, 'जिह्वा वाग्रसनार्चिष्षु' इति वैजन्यती, न विद्यतेऽङ्गं शरीरं यस्यासावनङ्गस्तस्य भावस्तत्ता ताम्, भस्मीभावमित्यर्थः, प्राप्तः तत्राऽश्रमे, ते श्रीरामाद्याः तां रात्रिं तस्यां रात्र्याम्, अकर्मकधातुभिर्योगे देशकालस्वभावेभ्यो वा द्वितीयेति केचिदिति वचनादधिकरणे द्वितीया, अवसन् । वसेर्लङ् ॥ ३५ ॥

(सं.चं.) अत्रैव मदनो हरनेत्रदहनदग्धोऽनङ्गतामापेत्याह– यत्रेति । हैमवत्या उमायाः कान्तो हरः । तस्य लोचनानलस्य जिह्वया ज्वालया । अनलं हि सप्तजिह्वमाहुः । पूर्वमनङ्ग इति निरूढनामा सम्प्रत्यन्वर्थामनङ्गतां प्राप्तः । न विद्यतेऽङ्गं शरीरमस्येति । ननु सर्वाण्यपि रूढपदानि मूलतो योगवन्ति भवन्ति । सत्यमासीदेव योगार्थः पूर्वमपि नास्त्यङ्गमस्येति । अथापि न रूढार्थेन सम्बन्धः । अङ्गवन्तमेव ह्यनङ्गमाहुः, अदृश्याङ्गः सन् यूनः पीडयतीति । सम्प्रति वस्तुतोऽनङ्गो बभूवेति । अथच अनङ्गमिति मन उच्यते । 'अनङ्गो मदनेऽनङ्गमाकाशमनसोरपि' इति मेदिनी । तेनानङ्गं मनोऽस्य सदनमित्यनङ्गः । मनसिज इत्यर्थः । पूर्वं मनोजत्वादेनमनङ्गमाचक्षत । सम्प्रति त्वङ्गविरहादप्यनङ्गो बभूवेति ॥ ३५ ॥

कौतूहलेन महता महामुनिगणा हरिम् ।
अर्चयाश्चक्रिरे तत्र रामनामानमागतम् ॥ ३६ ॥

(भा.दी.) **कौतूहलेने**ति । तत्राऽश्रमे महान्तो ये मुनयस्तेषां गणाः, आगतम्, राम इति नाम यस्य स तथा तम्, श्रीहरिम्, महता कौतूहलं कौतुकं तेन अर्चयाश्चक्रिरे पूजितवन्तः । अर्च पूजायां लिट् ॥ ३६ ॥

(सं.चं.) महता भगवद्दर्शनजनितेनादम्येन कौतूहलेन आनन्दगर्भेण विस्मयेन । यद्दर्शनार्थं जन्मसुजन्मसु तपः क्रियते स इदानीं पुर आस्त इति ॥ ३६ ॥

मुनयो विनयोपेताः पश्यन्तो राघवाननम् ।
[1]सुप्रातं न इति प्रीताः सन्ध्योपास्तिं प्रचक्रिरे ॥ ३७ ॥

(भा.दी.) **मुनय** इति । विनयः प्रश्रयस्तेन उपेताः, राघवस्य यदाननं तत् पश्यन्तः मुनयः, नः अस्माकं एतद्दिनं सुप्रातं शोभनं प्रातः यस्य तत् तथोक्तम् । 'सुप्रात-सुश्व-सुदिव-शारिकुक्ष-चतुरश्र-एणीपद-अजपद-प्रोष्ठपदाः' (अ.सू.५.४.१२०) इति सूत्रे बहुव्रीहौ अच्प्रत्ययान्तत्वेन निपातनान्नपुंसकलिङ्गोऽयं शब्दः । इति प्रीताः सन्तः । सन्ध्याया उपास्तिरुपासनं तां प्रचक्रिरे । कृञो लिट् ॥ ३७ ॥

(सं.चं.) स्वभावतो विनयोपेताः । विशेषतो महामुनिना सह महापुरुषदर्शनेन । सुप्रातं न इति प्रीताः । राघवसमागमहेतुरिदं दिनं सुप्रातम्, दिवसः सुप्रातः, शोभनं प्रातरस्येति बहुव्रीह्यन्तोऽच् प्रत्ययः । 'सुप्रातादयो बहुव्रीहिसमासा अच्प्रत्ययान्ता निपात्यन्ते । अन्यदपि च टिलोपादिकं निपातनादेव सिद्धम् । शोभनं प्रातरस्य सुप्रातः । शोभनं श्वोऽस्य सुश्वः । शोभनं दिवाऽस्य सुदिवः' इति काशिका । प्रचक्रिरे । भगवत्पुरतः क्रियमाणा सन्ध्योपास्तिरियमिति प्रकर्षः ॥ ३७ ॥

उपस्थितामुपारुह्य[2] नावं नरवरात्मजौ ।
सविप्रौ तेरतुर्गङ्गां सस्वनां सरयूजलैः ॥ ३८ ॥

(भा.दी.) **उपे**ति । सविप्रौ विप्रेण विश्वामित्रेण सहितौ, नरवरस्य राज्ञः आत्मजौ पुत्रौ श्रीरामलक्ष्मणौ, उपस्थितां समीपस्थां नावं समारुँह्य, सरय्वाः जलानि तैः सस्वनां स्वनेन ध्वनिना सहिताम्, सरयूसङ्गता-मित्यर्थः, गङ्गां तेरतुः तरणं चक्रुः । तॄ प्लवनतरणयोः लिट् ॥ ३८ ॥

---

१. **'सुप्रभातमिति प्रीताः'** । **'सुभातं न इति प्रीताः'** **'सुप्रातर्न इति प्रीताः'** इति च । २. **'उपस्थितां समारुह्य'** इति वि.ती.पाठः स्यात् ।

(सं.चं.) मुनिभिः सराजपुत्रस्य विश्वामित्रस्योपयोगाय सज्जितां पुरःस्थितां नावम् । मुनिभिरुपचरित-योरारोहणमुपारोहणम् । सरयूजलैरुत्तरतः सङ्गताम् । अत एव जलसम्प्लवेन सस्वनां गर्जन्तीम् । तथाहि वाल्मीकीये– 'कैलासपर्वते राम मनसा निर्मितं सरः । ब्रह्मणा नरशार्दूल तेनेदं मानसं सरः । तस्मात् सुस्राव सरसः साऽयोध्यामुपगूहते । सरःप्रवृत्ता सरयूः पुण्या ब्रह्मसरश्च्युता । तस्यायमतुलः शब्दो जाह्नवीमभि-वर्तते । वारिसङ्क्षोभजो राम प्रणामं नियतः कुरु' (२४.८–१०) इति ॥ ३८ ॥

वनं दृष्ट्वा ततो घोरं गच्छन् पप्रच्छ राघवः ।
मुनिशार्दूल कस्येदं वनं घोरमहो इति ॥ ३९ ॥

(भा.दी.) **वनमिति** । ततः गङ्गातरणानन्तरं गच्छन् राघवः, घोरं भयङ्करं तत् वनं दृष्ट्वा, हे मुनिशार्दूल मुनिश्रेष्ठ, 'स्युरुत्तमपदे व्याघ्रपुङ्गवर्षभकुञ्जराः । सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः' इत्यमरः, विश्वामित्र, घोरं इदं वनं कस्य सम्बन्धि? अहो अद्भुतम् । इति एवमादि पप्रच्छ । प्रच्छ जिज्ञासायां लिट् ॥ ३९ ॥

(सं.चं.) गङ्गाया दक्षिणतीरे घोरं वनम् । श्वापदै रक्षोभिरभ्रङ्कषैर्वृक्षैश्च । कस्येदम्? केन रक्षितम्? केन वाऽधिष्ठितम्? अहो इति । घोरमिति न बिभाय । किन्तु कैशोरसहजं विस्मयं दर्शयामास ॥ ३९ ॥

इत्युक्तः प्रोक्तवान् विप्रो रामैते विषयाः पुरा ।
मलदाश्च करूशाश्च स्फीता इन्द्रप्रसादतः ॥ ४० ॥

(भा.दी.) ताटकावनमिति वक्तुमितिहासमाह– **इतीति** । इति श्रीरामेणोक्तः विप्रः विश्वामित्रः प्रोक्त-वान् । हे राम, पुरा इन्द्रस्य प्रसादोऽनुग्रहस्तस्मादिति ततः, स्फीताः पुष्टाः एते विषयाः मलदाश्च मलद-नामकाश्च करूशाश्च करूशनामकाश्च । इन्द्रेण वृत्रवधे कृते सति तन्निमित्तकमलस्यास्मिन् देशे मुनिभिर्देवैश्च कलशस्नापनपूर्वकं मार्जितत्वात् सन्तुष्टेनेन्द्रेण 'इमौ जनपदौ स्फीतौ ख्यातिं लोके गमिष्यतः । मलदाश्च करूशाश्च ममाङ्गमलधारिणौ' इति वरो दत्त इति रामायणे प्रसिद्धम् ॥ ४० ॥

(सं.चं.) विषया ग्रामाणां समुदायाः । 'विषयो ग्रामसञ्चयः' इत्यभिधानम् । स्फीता धनधान्यसमृद्धाः । स्फायी वृद्धौ । मलदाश्च करूशाश्च । इयमत्र रामायणे कथा– पुरा किल वृत्रं जघान सहस्राक्षः । तेन वृत्रहत्यामलेन करूशाख्यया क्षुधा चाऽविष्टं तं देवा ऋषयश्चात्र स्नापयामासुः । स्नापयित्वा चास्य मलं प्रामोचयन् । अकुर्वंश्च निष्करूशम् । निर्मलो निष्करूशः कृत इन्द्रः प्रीत इदमाह– 'इमौ जनपदौ स्फीतौ

ख्यातिं लोके गमिष्यतः । मलदाश्च करूशाश्च ममाङ्गमलधारिणौ' (२४.२२) इति । दत्तस्य मलस्याऽदानान्मलदाः । मलस्य खण्डनाद् वा । दो अवखण्डने । करूशमेषामासीदिति करूशाः कारूशा वा । 'यूष–शूष–अर्कलूष–कारूष–कोरदूष–आटरूष–शैलूषादयः' इत्यूषन् प्रत्ययान्तं कारूषशब्दं निपातयन् सरस्वतीकण्ठाभरणकारो बभ्राम । कथं तर्हि करूशम्? यत्प्रशमाय नराः करांसि कर्माणि उशन्ति चिकीर्षन्ति तत् करूशं बुभुक्षा । पुराऽयं करूशदेशः । रामायणकाले ताटकावनम् । पुनः पाण्डवानां काले करूशो देशो बभूव, यं दन्तवक्रो शशास, यं पुनरतः कारूशमुशन्ति ॥ ४० ॥

सुकेतुनाम्नो यक्षस्य ताटका तनया पुरा ।
अवद्धया ब्रह्मवरतो नागायुतबलाऽभवत् ॥ ४१ ॥

(भा.दी.) सुकेतुरिति । सुकेतुरिति नाम यस्य स तथोक्तस्तस्य (यक्षस्य) तनया । ब्रह्मणो यो वरस्तस्मादिति ततः अवध्या वधानर्हा । नागानां गजानां यदयुतं दशसहस्रं तस्य बलमिव बलं यस्याः सा तथोक्ता, ताटका ताटकानाम्नी यक्षिणी पुरा अभवत् । भुवो लङ् ॥ ४१ ॥

(सं.चं.) तानिमान् विषयान् ताटका नाशयामास । केयं ताटका नाम? आह– सुकेतुनाम्नः यक्षस्यानपत्यस्य ब्रह्मवरतस्ताटका तनया बभूव । सा च ब्रह्मवरत एव नागायुतबलाऽभवत् । 'ददौ नागसहस्रस्य बलं चास्याः पितामहः' (२५.६)इति प्रचलितो रामायणपाठः । 'दशनागसहस्रस्य' इति ग्रन्थकृत्सम्मतः पाठ इति भाति । 'वराद् विधातुस्तदनन्यवध्याम्' इति निर्णयवचनाद् ब्रह्मवरत एवावध्या च ॥ ४१ ॥

भार्य्या सुन्दस्य मारीचमाता साऽगस्त्यशापतः ।
रक्षस्त्वं ससुता प्राप्य नरानत्रात्ति निर्द्दया[१] ॥ ४२ ॥

(भा.दी.) भार्येति । सुन्दस्य सुन्दनाम्नो यक्षस्य भार्या, मारीचस्य मारीचनाम्नो यक्षस्य माता । सा ताटका । अगस्त्यस्य शापस्तस्मादिति ततः रक्षसो भावो रक्षस्त्वं तत्, सुतेन मारीचेन सहिता ससुता सती, प्राप्य (अत्र) अस्मिन् वने, निर्गता दया यस्याः सा तथा सती, नरान् अत्ति भक्षयति । अदेर्लट् । ताटकानाम्नी यक्षिणी दैवमोहिता सती अगस्त्यभक्षणार्थमुद्यता । तां दृष्ट्वाऽगस्त्येन राक्षसी भवेति शप्ता सती मारीचेन सह राक्षसी बभूवेति शापकारणं रामायणे प्रसिद्धम् ॥ ४२ ॥

---

१. 'नरानत्त्यतिनिर्दया'

(सं.चं.) अगस्त्यशापतः । 'सुन्दे तु निहते राम साऽगस्त्यं मुनिपुङ्गवम् । ताटका सह पुत्रेण प्रधर्षयितुमिच्छति । भक्षार्थं जातसंरम्भा गर्जन्ती साऽभ्यधावत । आपतन्तीं तु तां दृष्ट्वा अगस्त्यो भगवानृषिः । राक्षसत्वं भजस्वेति मारीचं व्याजहार सः । अगस्त्यः परमक्रुद्धस्ताटकामपि शप्तवान् । पुरुषादी महायक्षी विरूपा विकृतानना । इदं रूपं विहायाथ दारुणं रूपमस्तु ते' (२५.१०–१३) इति वाल्मीकिवचनम् ॥ ४२ ॥

पश्य गोब्राह्मणगणकपालास्थिकलापकम् ।
त्वादृशानां सुदुर्दर्शं मान्य किं मन्यते भवान् ॥ ४३ ॥

(भा.दी.) पश्येति । हे मान्य पूज्य श्रीराम, त्वमिव दृश्यन्त इति त्वादृशास्तेषां त्वादृशानामित्यर्थः, सुदुर्दर्शं अत्यन्तं द्रष्टुमनर्हम्, गावश्च ब्राह्मणाश्च तेषां गणः तस्य यानि कपालानि शिरःकपालानि अस्थीनि च तेषां कलापः समूहस्तं पश्य । दृशेर्लोट् । भवान् किं मन्यते निरूपयति । मन ज्ञाने लट् । किमत्र कर्तव्यं मन्यस इत्यर्थः । यद्वा भवान् मन्यते किं एतादृशताटकाकर्म मानयति किमिति वा योज्यम् ॥ ४३ ॥

(सं.चं.) कपालानि च, अन्यानि चास्थीनि । तेषां कलापको राशिः । 'शरीरस्यास्थि कङ्कालं तथा स्यादस्थिपञ्जरम् । शिरसोऽस्थि करोटिः स्यात् कपालं शकलं च तत्' इत्यभिधानम् । विशेषतो गोब्राह्मणगणस्य । 'गोब्राह्मणहितार्थाय जहि दुष्टपराक्रमाम्' (२५.१५) इति हि वाल्मीकिः । त्वादृशानां सुखवर्धितानां किशोराणाम्, सुतरां सर्वात्मना दुर्दर्शम् । अथापि क्षत्रियत्वात् युध्यमानानामनिवार्यतया सुदर्शं च । मादृशानामृषीणामसह्यमिति कनैवाऽह कलापकमिति । बालत्वेऽपि मयाऽपि मान्य मानार्ह । किं सा द्रष्टव्येति मन्यते भवान् । अथ च तामन्तरेण किं मन्यते भवान्? किमीदृश्यपि जीवितुं योग्येति मन्यते भवान्? ॥ ४३ ॥

उक्त्वेति मुनितां याते मुनौ मुनिजनप्रियः[१] ।
प्राविशत् सहितस्ताभ्यां ताटकाभवनं वनम् ॥ ४४ ॥

(भा.दी.) उक्त्वेति । मुनौ विश्वामित्रे इति एवमादि उक्त्वा मुनेर्भावो मुनिता ताम्, मौनमित्यर्थः, (याते) गते सति, ताभ्यां विश्वामित्रलक्ष्मणाभ्यां सहितः, मुनयश्च ते जनाश्च तेषां प्रियः श्रीरामः, ताटकाया भवनं गृहभूतं तत् वनं प्राविशत् । विश प्रवेशने लङ् ॥ ४४ ॥

१. 'मुनिगणप्रियः'

(सं.चं.) इत्युक्त्वा मननशीले मुनौ मुनितां मौनं याते आश्रिते सति । 'मुनिर्वाचंयमो मतः' इत्यभिधानम् । 'स मुनिर्भूत्वा समाचिन्तयत्' इति श्रुतिः । ताभ्यां सहागताभ्यां विश्वामित्रलक्ष्मणाभ्याम् । यद् वनं ताटकाया भवनमिव ॥ ४४ ॥

चापं चापधरश्रेष्ठे जृम्भयत्यदहत्[1] क्षणात् ।
स्फुलिङ्गवत् स विष्फारस्ताटकाकर्ण्णकोटरम् ॥ ४५ ॥

(भा.दी.) तात किं मन्यते भवानिति मुनिनाऽभिहिते सति सज्जनहितार्थं ताटकावधः कार्य इति मुन्यभिप्रायं हृदि निधाय तद्वधार्थं श्रीरामेण चापविजृम्भणमकारीत्याह– **चापमि**ति । चापं धरन्तीति चापधरास्तेषु श्रेष्ठे श्रीरामे चापं धनुस्तत् जृम्भयति सति विष्फारयति सति । सः विष्फारः धनुर्ध्वनिः । 'विष्फारो धनुषो ध्वनौ'[2] इत्यमरः । ताटकायाः कर्णः स एव कोटरं वृक्षबिलं तत् स्फुलिङ्गवत् अग्निकणवत् क्षणः क्षणकालस्तस्मात् अदहत् । दह भस्मीकरणे लङ् ॥ ४५ ॥

(सं.चं.) किं मन्यते भवानिति मुनिप्रश्नस्योत्तरं धनुष्टङ्कारेणैव ददौ राम इत्याह– चापम् । जृम्भयति दण्डमानम्य ज्यामारोप्याऽस्फालयति सति । स विष्फारो धनुषष्टङ्कारः । 'विष्फारो धनुषां ध्वनौ' इत्यभिधानम् । स्फुलिङ्गा अग्निकणा इव क्षणात् सपदि कर्णकुहरमदहत् । प्रविश्य तापं जनयामास । कोटरः कोटरमिति च महीरुहकुहरमुच्यते । तेन राक्षस्या अतिमात्रं गात्रं ध्वनयति ॥ ४५ ॥

यावद् विष्फारसन्त्रस्ता वने[3] मृगखगादयः ।
नोत्थिताः प्रोत्थिता तावदापपात[4] क्षपाचरी ॥ ४६ ॥

(भा.दी.) यावदिति । यावत् यतः पूर्वं विष्फारेण धनूरवेण सन्त्रस्ताः भीताः मृगाश्च खगाः पक्षिणस्ते च ते आदयो येषां ते तथोक्ताः, वने न उत्थिताः न संस्थिताः, तावत् ततः पूर्वमेव, प्रोत्थिता अपूर्वः शब्दः कुतो वा श्रुत इति सन्नद्धतया स्थिता, क्षपायां रात्रौ चरतीति क्षपाचरी, राक्षसीत्यर्थः, ताटका आपपात अभ्याजगाम । पत्लृ गतौ लिट् ॥ ४६ ॥

(सं.चं.) नोत्थिताः । भयादुच्चलितुमप्यप्रभवन्त उत्थातुं सन्निनत्सन्तीव । ततः पूर्वमेव स्वस्थानात् प्रसभमुत्थिता निशाचरी रामस्य पुर आजगाम ॥ ४६ ॥

---

१. **'जम्भयत्यगमत्'**
२. **'विस्फारो धनुषः स्वानः'** इति प्रचलितः अमरकोशपाठः ।
३. **'बनान्मृग–'**
४. **'प्रोत्थिता बेगादापपात'**

महाकायां महावीर्य्यां व्यात्ताननमहागुहाम् ।
अवेक्ष्योद्यतहस्तां तां रामस्तस्थावनाकुलः ॥ ४७ ॥

(भा.दी.) महेति । श्रीरामः, महान् कायः शरीरं यस्याः सा तथा ताम्, महद् वीर्यं बलं पराक्रमो वा यस्याः सा तथा ताम्, व्यात्तं विवृतं आननं महागुहेव यस्याः सा तथा ताम्, उद्यतौ प्रहर्तुं सन्नद्धौ हस्तौ यस्याः सा तथा तां ताटकां अवेक्ष्य, आकुलः सम्भ्रान्तो न भवतीत्यनाकुलः सन् तस्थौ । स्थाधातोर्ल्लिट् ॥४७॥

(सं.चं.) अवेक्ष्याऽप्यनाकुलोऽसम्भ्रान्तः ॥ ४७ ॥

वात्येवात्यन्तसंवेगा भूयः कोलाहलस्वना ।
राक्षसी रजसां वर्षं राजपुत्रे ववर्ष सा[1] ॥ ४८ ॥

(भा.दी.) वात्येति । वात्येव चक्रवातइव । 'वात्या वातस्य मण्डली' इति हलायुधः । अत्यन्तं संवेगो यस्याः सा तथा । भूयः पुनःपुनः कोलाहलः कलकलायमानः स्वनो ध्वनिर्यस्याः सा तथा । 'कोलाहलः कलकलस्तुमुलो व्याकुलो रवः' इति हलः । सा राक्षसी रजांसि पांसवस्तेषां वर्षं वृष्टिस्तत् राजपुत्रे श्रीरामे ववर्ष । वृष सेचने लिट् ॥ ४८ ॥

(सं.चं.) वात्या वृत्ताकारं भ्रमन् वातः । 'ஃ௦௬ठ௱௭' इति भाषायाम् । संवेग आटोपः । कोलाहलः कर्ण-कर्कशस्तुमुलः स्वनोऽस्याः ॥ ४८ ॥

पुनर्म्मायाविनीं दृष्ट्वा शिलाजालाभिवर्षिणीम् ।
चकर्त्तास्याः करौ घोरौ [2]पत्रिभिः पत्रिकेतनः ॥ ४९ ॥

(भा.दी.) पुनरिति । पत्री पक्षी गरुडः केतने ध्वजे यस्य स तथा श्रीरामः, माया तत्कालसर्जनशक्तिरस्या अस्तीति मायाविनी ताम् । 'मायाया विनिः'[3] इति मत्वर्थे विनिः । अत एव पुनः पांसुवर्षानन्तरं शिलानां पाषाणानां यज्जालं समूहस्तदभिवर्षितुं शीलमस्या अस्तीति तथोक्तां तां ताटकां दृष्ट्वा, अस्याः घोरौ करौ पत्रिभ्यां शरभ्याम्, 'पत्रिणौ शरपक्षिणौ' इत्यमरः, चकर्त अच्छिनत् । कृती च्छेदने लिट् ॥ ४९ ॥

---

१. **'राक्षसी सा रजोवर्षं राजपुत्रे ववर्ष ह'** । **'राक्षसी–'** इत्यत्र **'राजसी'** इति पाठं पठतः वि.भू.का.श्री च । **'राजसी रजोगुणसम्बन्धिनी'** इति वि.भू.टीकायाम् । का. श्री. टीकायां च–**'राजसी रजोगुणसम्बन्धिनी । ताटकाया उर्वशीत्वात्(?) राजसीत्युक्तम्'** इति व्याख्यातम् ।

२. **'पत्रिभ्यां पत्रिकेतनः'** इति. वि.ती.पाठः ।

३. **'अस्मायामेधास्रजो विनिः'** (५.२.१२१) इति समग्रं सूत्रम् ।

(सं.चं.) पत्रिभिः बाणैः करौ बाहू चकर्त पत्त्रिकेतनो गरुडध्वजः । 'शिलावर्षं महत् तस्याः शरवर्षेण राघवः । प्रतिहत्योपधावन्त्याः करौ चिच्छेद पत्त्रिभिः' (२६.१७) इति च ॥ ४९ ॥

सौमित्रिणा विवृक्णोष्ठनासिका कामरूपिणी ।
अन्तर्हिता साध्वहिता शस्त्रवृष्टिमवाकिरत्[1] ॥ ५० ॥

(भा.दी.) सौमित्रीति । सौमित्रिणा लक्ष्मणेन विवृक्णे च्छिन्ने ओष्ठश्च नासिका च ते यस्याः सा तथा, कामेन इच्छया रूपमपेक्षितस्वरूपमस्या अस्तीति तथोक्ता, अत एवान्तर्हिता अन्तर्द्धानं गता, अदृश्यतां प्राप्तेत्यर्थः, साधूनां सज्जनानां अहिता ताटका, शस्त्राणां गदाद्यायुधानां वृष्टिस्तां अवाकिरत् ववर्ष । किर विक्षेपे लङ् ॥ ५० ॥

(सं.चं.) क्षुरप्रेण विवृक्णं छिन्नं ओष्ठनासिकं यस्याः । व्रश्चू च्छेदने । कर्णयोरप्युपलक्षणम् । 'ततश्छिन्नभुजां श्रान्तामभ्याशे परिगर्जतीम् । सौमित्रिरकरोत् क्रोधाद् हृतकर्णाग्रनासिकाम्' (२६.१८) इति वाल्मीकीये । 'कर्णोष्ठनासिकाम्' इति ग्रन्थकृत्सम्मतो रामायणपाठः स्यात् । साधूनामहितकारिणी । शस्त्रवृष्टिमवाकिरत् । रामायणे तु 'अन्तर्धानं गता यक्षी मोहयन्तीव मायया । अश्मवर्षं विमुञ्चन्ती भैरवं विचचार ह' (२६.१९) इति पठ्यते । 'शस्त्रवर्षं विमुञ्चन्ती' इत्येव प्राचीनपाठः स्यात् ॥ ५० ॥

मुनिरूचे तदा रामं वनितावधलज्जितम् ।
वत्स सज्जनकृत्येयं हन्यतांहन्यतामिति ॥ ५१ ॥

(भा.दी.) मुनिरिरिति । तदा वनितायाः स्त्रियास्ताटकाया वधस्तस्मिन् लज्जितं सञ्जातलज्जम्, 'तदस्य सञ्जातं तारकादिभ्य इतच्' (अ.सू.५.२.३६) इति इतच् । श्रीरामं प्रति, हे वत्स श्रीराम, सज्जनानां कृत्येव सज्जनकृत्या, सज्जनमारिकेत्यर्थः, कृत्येति भूतविशेषः । एषा ताटका हन्यतां हिंस्यतां हिंस्यताम् । सम्भ्रान्तौ द्वे वाच्ये इति द्विरुक्तिः । इति (मुनिः) ऊचे । वच परिभाषणे लिट् ॥ ५१ ॥

(सं.चं.) वनितावधलज्जितम् । तथाहि रामायणे विश्वामित्रवचनम्–'नहि ते स्त्रीवधकृते घृणा कार्या नरोत्तम । चातुर्वर्ण्यहितार्थाय कर्तव्यं राजसूनुना' (२५.१७) इति । तथैव रामवचनं च– 'पितुर्वचननिर्देशात्

१. **'शस्त्रवृष्टीरवाकिरत्'** इति का. श्री. पाठः ।

पितुर्वचनगौरवात्। वचनं कौशिकस्येति कर्तव्यमविशङ्कया' (२६.२) इति। सज्जनानामियं कृत्या। मारयित्री दुष्टशक्तिः कृत्येत्युच्यते। हन्यतांहन्यतामिति हनने त्वरातिशयमाह ॥ ५१ ॥

चक्रवत् परिवृत्तां तां चक्रभृत् प्रहसन्निव ।
अप्रयासः क्षणेनैव चकार शरपञ्जरे ॥ ५२ ॥

(भा.दी.) चक्रवदिति। चक्रं बिभर्तीति चक्रभृत् श्रीरामः, चक्रवत् चक्रमिव परिवृत्तां परिभ्रमन्तीं तां ताटकाम्, प्रहसन्निव अपहसन्निव, न विद्यते प्रयासो यस्य स तथा सन्, क्षणः क्षणकालस्तेनैव शराणां पञ्जरः पेटी तस्मिन् चकार। कृञो लिट् ॥ ५२ ॥

(सं.चं.) चक्रवत् परितो रामं वृत्ताकारेण भ्रमन्तीम् ॥ ५२ ॥

तामापतन्तीमवलोक्य पुंसां
स्वधर्म्ममार्ग्गं भगवान् विधित्सुः ।
उरःकवाटं खलु ताटकायाः
स्वपाटवात् पाटितवाञ्छरेण ॥ ५३ ॥

(भा.दी.) तामिति। पुंसां सत्पुरुषाणां स्वकीयो यो धर्मः स एव मार्गस्तम्। 'स्वोऽस्त्री धने त्रिषु स्वीय आत्मनि स्वजने' इति वैजयन्ती। विधातुमिच्छति विधित्सति, विधित्सतीति विधित्सुः। 'सनाशंसभिक्ष उः' (अ.सू.३.२.१६८) इति सन्नन्तत्वात् ताच्छीलिक उप्रत्ययः। भगवान् श्रीरामः आपतन्तीं सर्वतः शरपञ्जरेण बद्धत्वादन्यतो गन्तुमशक्यत्वादभिमुखमागच्छन्तीम्, तां अवलोक्य, ताटकायाः उर एव कवाटं तत्, स्वस्य पाटवं कौशलं तस्मात्, शीर्यतेऽनेनेति शरस्तेन पाटितवान् विदारितवान्। यथा खलु केनापि दुष्टात्मना सन्मार्गे कवाटेन पिहिते सति कश्चित्पुरुषः परोपकारतत्परस्तत्कवाटं विवृणोति तद्वदयं श्रीरामोऽपि मुनीनां तीर्थागमनादिस्वधर्मलक्षणमार्गप्रतिबन्धकतया कवाटसदृश्यां राक्षस्यां उरसो विदारणमेव कृतवानिति भावः ॥ ५३ ॥

(सं.चं.) सतां धर्ममार्गनिरोधाय निहितं पिहितमिव कवाटम्। दुष्टदमने शस्त्रास्त्रविद्यायां च पाटवं कौशलम्। इन्द्रवज्रोपेन्द्रवज्राभ्यामुपजातिः। ततजैर्गाभ्यां प्रथमपाद इन्द्रवज्रा। जतजैर्गाभ्यामवशिष्टेषूपेन्द्रवज्रा ॥ ५३ ॥

जयजय जगताम्पते नमस्ते भवतु जयाङ्कुर एष कल्पवृक्षः[१] ।
इति वददभिनन्दि नाकिवृन्दं कुसुमकुलं प्रववर्ष राममौलौ ॥ ५४ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे बालकाण्डे चतुर्त्थः सर्ग्गः ॥

—o—

(भा.दी.) जयेति । जगतां भूतभविष्यद्वर्तमानचेतनाचेतनात्मकसर्वजगतां पते श्रीराम जयजय । उत्कृष्टतया वर्तस्ववर्तस्व । जि जये लोट् । आदराद् द्विरुक्तिः । ते तुभ्यं नमः । एषः रामाख्यः कल्पवृक्षः जय एव अङ्कुरो यस्य स तथोक्तः भवतु । भुवो लोट् । इति वदत् स्तुवत् । अभिनन्दितुं शीलमस्यास्तीति अभिनन्दि । ताटकाहननेन सन्तोषवदित्यर्थः । नाकिनां देवानां वृन्दं समूहः, श्रीरामस्य मौलिर्मूर्धा तस्मिन्, कुसुमानां कुलं समूहस्तत् प्रववर्ष । वृष सेचने लिट् ॥ ५४ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां बालकाण्डे चतुर्थः सर्गः ॥

—o—

(सं.चं.) ताटकावधरूपोऽयं रामविजयाङ्कुरः क्रमेण परिवर्द्धमानः कल्पवृक्षो भवतु । अभिनन्दनशीलं देववृन्दम् । मौलिरिति शिर उच्यते । मौलिरिति केशपाश उच्यते । मौलिरिति किरीटमुच्यते । अत्र मौलिरिति शिरः केशपाशो वा । प्रहर्षेण ववर्ष । प्रकामं ववर्ष । पुष्पिताग्रा च्छन्दः । अयुजि नौ रयौ । युजि नजौ जरौ गश्च ॥ ५४ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां बालकाण्डे चतुर्थसर्गविवरणम् ॥

—o—

[आदितः श्लोकाः– १४१+५४=१९५]

---

१. **'एषः प्रत्यक्षसिद्धः जयः ताटकापराभव एवाङ्कुरः कल्पवृक्षः कल्पस्थायी वृक्षो भवतु'** इति का. श्री. टीकायाम् ।

पञ्चमः सर्ग्गः

सानुजः स जगन्नाथो मानितो मुनिना भृशम् ।
उषितस्तत्र तां रात्रिं प्रभाते नियमं व्यधात् ॥ १ ॥

(भा.दी.) श्रीरामेणानन्तरं तत्र किमकारीत्यत आह– **सानुज** इति । मुनिना विश्वामित्रेण भृशं मानितः सत्कृतः, अनुजेन सहितः सानुजः, जगतां नाथः सः श्रीरामः, तत्र वने तां रात्रिं उषितः अवस्थितः सन्, प्रभातं प्रातःकालस्तस्मिन्, नियमं सन्ध्यावन्दनादिनियतकर्म, 'नियमो निश्चये व्रते' इति वैजयन्ती । व्यधात् चक्रे ॥ १ ॥

(सं.चं.) ताटकासंहारहृष्टेन मुनिना मानितो भृशम् । नियमं सान्ध्यं नित्यकर्म ॥ १ ॥

ऋषी रहसि रामाय[१] ददावस्त्राणि सर्वशः ।
वैष्णवं ब्राह्ममस्त्रं च शैवाग्नेयादिकानि च ॥ २ ॥

(भा.दी.) ऋषीति । ऋषिषु वर्यः श्रेष्ठः । (सः) विश्वामित्रः श्रीरामाय विष्णुर्देवता अस्येति वैष्णवं तत् । 'साऽस्य देवता' (अ.सू.४.२.२४) इत्यण् । ब्रह्मा देवता अस्येति ब्राह्मं तत्, शिवः देवता अस्येति शैवं तच्च, अग्निर्देवता अस्येत्याग्नेयं तच्च, ते आदी येषां तानि तथोक्तानि तानि । सर्वशः समस्तानि अस्त्राणि ददौ । दाणो लिट् । ऋषी रहसीति क्वचित्पाठः ॥ २ ॥

(सं.चं.) सर्वशः सर्वाण्यस्त्राणि ददौ ॥ २ ॥

[२]अपि संहाररूपाणि जृम्भकास्त्राण्युपादिशत् ।
स्वकीयकर्त्तव्यतया सर्वज्ञाय जगद्भृते ॥ ३ ॥

---

१. **'ऋषिवर्यः स रामाय'** इति वि.ती.पाठः ।

२. **'उपसंहाररूपाणि'**

(भा.दी.) अपीति । संहारः रूपं स्वभावो येषां तानि संहाररूपाणि । शत्रुसंहारेऽत्यन्तं प्रशस्तानीत्यर्थः[1] । 'रूपं शब्दे पशौ श्लोके श्रद्धावृद्धौ सितादिषु । सौन्दर्ये च स्वभावे च' इति वैजयन्ती । जृम्भयन्तीति जृम्भकाणि तानि च तान्यस्त्राण्यपि, शत्रूणां जृम्भणसम्मोहोन्मादादिकरणेऽत्यन्तं प्रशस्तानीत्यर्थः, सर्वज्ञाय जगत् बिभर्तीति जगद्भृत् तस्मै श्रीरामाय । स्वकीया स्वसम्बन्धिनी या कर्तव्यता तया[2] । सर्वज्ञस्यापि सर्वजगद्धारणपोषणकर्तुरपि श्रीरामस्य स्वकीया सेवा काचिल्लोकरीत्या भूयादित्यभिप्रायेणेति भावः । उपादिशत् उपदिष्टवान् । दिशेर्लङ् ॥ ३ ॥

(सं.चं.) अस्त्रप्रयोगमूलमन्त्रानुपदिश्य प्रयुक्तस्योपसंहारोपयुक्तानपि मन्त्रानुपदिदेशेत्याह– अपि । प्रयुक्तस्य प्रत्युपसंहाररूपाण्यपि । जृम्भयन्त्युपशमयन्तीति जृम्भकाण्यस्त्राणि । बहुवचनमाद्यर्थे वा । जृम्भकादीन्यस्त्राणि । तत्तद्देवतामन्त्रानिति यावत् । स्वकीयकर्तव्यतया। तादृशी भगवदिच्छा– अनेनोपदेष्टव्यम् । मया स्वीकर्तव्यम् । तेन तस्य भवतु महत् पुण्यमिति । सर्वज्ञोऽपि विश्वामित्रादस्त्रज्ञानमाप । जगतो रक्षिताऽपि अस्त्रैः स्वरक्षामचकाङ्क्ष । सेयं लीला भगवतः ॥ ३ ॥

[3]ब्रह्मादयोऽस्त्ररूपास्तं परिवार्य्यार्य्यसम्मतम् ।
प्रोचुः प्राञ्जलयः स्वामिन् [4]किङ्करास्ते वयं त्विति ॥ ४ ॥

(भा.दी.) ब्रह्मेति । अस्त्राणि रूपाणि अभिमन्यमानत्वात् स्वरूपाणि च येषां ते तथा ब्रह्मादयो देवाः । आर्यैः साधुभिः सम्यक् मतं ज्ञातम् । 'आर्यः साधुकुलीनयोः' इति वैजयन्ती । (तं) श्रीरामं परिवार्य, प्रकृष्टा अञ्जलयो येषां ते तथा सन्तः, हे स्वामिन्, वयं तु विशेषेण किङ्कराः स्मः भवामः । अस्तेर्लङ् । इति एवमादि वचः प्रोचुः । वचेर्लिट् ॥ ४ ॥

(सं.चं.) अस्त्ररूपा अस्त्रमानिनः । अस्त्राणि च तेषां रूपाणि प्रतिमाः । मूर्तिमत्योऽस्त्रदेवताः । आर्याणां ज्ञानिनां सम्मतम् । तेषां सम्यङ् मतमवगतं च ॥ ४ ॥

सौमित्रिरप्यमित्रच्छिद् विश्वामित्रादवाप्तवान् ।
समस्तानि महास्त्राणि ब्राह्मादीनि बृहन्मनाः[5] ॥ ५ ॥

---

१. **'संहाररूपाणि उपसंहाररूपाणि नाशकानीति वा'** इति का.श्री. ।

२. **'समर्थस्यापि ते सूनोः सहायत्वं करिष्यतीति वसिष्ठोक्तदिशा च स्वकीयकर्तव्यतयोपदिदेश'** इति का.श्री. ।

३. **'ब्रह्मादयो ह्यस्त्ररूपा परि–'** ४. **'किङ्कराः स्मो वयं त्विति'** ५. **'महामनाः'**

(भा.दी.) सौमित्रिरिति । अमित्राणि शत्रून् छिनत्तीति अमित्रच्छित् । बृहति पूर्णे विष्णौ मनो यस्य स तथा[1], मनस्वीति वा, सौमित्रिरपि, ब्रह्मा देवता अस्येति ब्राह्मं तदादिर्येषां तानि तथोक्तानि समस्तानि महास्त्राणि विश्वामित्रात् अवाप्तवान् जग्राह । नच तात्पर्यनिर्णये ताटकावधात् पूर्वमेवास्त्रग्रहणोक्तेस्त-द्विरोधः । तत्र बलातिबलाख्यमन्त्रोपदेशप्रसङ्गेनास्त्रोपदेशस्य तात्पर्यकथनार्थं युगपदुक्तत्वात् क्रमस्या-विवक्षितत्वाद्वा, आचार्योक्तेः बहुकल्पानुसारित्वाद् वा, वाल्मीकिरामायणानुसारिग्रन्थकारोक्तेश्च कल्पविशेषा-नुसारित्वेनैवोपपत्तेरिति ॥ ५ ॥

(सं.चं.) रामायणे स्फुटमनुक्तं प्रमेयान्तरमाह– सौमित्रिरपि । भगवदवतारकार्ये शत्रुक्षपणेऽङ्गतामाप्तुं तस्यापि ह्यपेक्षितान्यस्त्राणीत्याह– अमित्रच्छिदिति । 'अनुग्रहार्थं स ऋषेरवाप सलक्ष्मणोऽस्त्रं मुनितो हि केवलम्' (४.६) इति निर्णये ॥ ५ ॥

ताननुज्ञाप्य काकुत्स्थो गच्छन् पप्रच्छ सर्ववित् ।
पश्यन्नाश्रममारात् स कोऽयं देश इति द्विजम् ॥ ६ ॥

(भा.दी.) तानिनिति । ककुत्स्थगोत्रे भवः काकुत्स्थः श्रीरामः, तान् अस्त्ररूपान् ब्रह्मादीन्, अनुज्ञाप्य कार्यकाले प्रकटा भवत, इदानीं गम्यतामित्यनुज्ञां दत्वा, गच्छन् सर्ववित् आरात् समीपे आश्रमो मुनिवासस्तं पश्यन् सः श्रीरामः, अयं समीपस्थः देशः कः किन्नामकः इति एवमादिप्रकारेण द्विजं विश्वामित्रं प्रति पप्रच्छ । प्रच्छ जिज्ञासायां लिट् ॥ ६ ॥

(सं.चं.) सर्वविदपि पप्रच्छ ॥ ६ ॥

तमब्रवीत् गाधिसुतस्तातायं परमाश्रमः ।
अधिष्ठितः पुरा साक्षाद् विष्णुना प्रभविष्णुना ॥ ७ ॥

(भा.दी.) तमिति । गाधेः गाधिनाम्नो राज्ञः सुतः विश्वामित्रः । हे तात श्रीराम, प्रकृष्टतया अनाद्यनन्त-कालेऽप्येकप्रकारतया भवितुं शीलमस्यास्तीति प्रभविष्णुस्तेन, यद्वा शत्रून् पराभवितुं शीलमस्यास्तीति तथा तेन विष्णुना,(पुरा) साक्षात् प्रत्यक्षं अधिष्ठितः आवासीकृतः अयं देशः परमाश्रमः अत्युत्तमाश्रमः इति तं श्रीरामं अब्रवीत् । ब्रूञो लङ् ॥ ७ ॥

(सं.चं.) विष्णुना वामनरूपेण ॥ ७ ॥

---

१. **'बृहत् विशालं बह्वर्थविषयकं मनो यस्य सः'** इति का.श्री. ।

बह्वोऽत्र तपस्यन्तः सन्तः सिद्धत्वमाययुः ।
तस्मात् सिद्धाश्रमो नाम सिद्धेर्दाता ह्यधोक्षजः[1] ॥ ८ ॥

(भा.दी.) किमस्य नामेत्यतस्तत्प्रवृत्तिनिमित्तकथनपूर्वकं तन्नामाऽह– **बहव** इति । अत्र अस्मिन् आश्रमे तपस्यन्तः तपः कुर्वन्तः बहवः सन्तः सज्जनाः यस्मात् सिद्धत्वं तपःसिद्धिं आययुः । यातेर्लिट् । हि यस्मात् सिद्धेः तपःफलस्य दाता, अक्षमिन्द्रियमधःकृतं यैस्ते (अधोक्षाः काश्यपादयः), तेभ्यो जातः प्रादुर्भूतः इत्यधोक्षजः, अक्षजमिन्द्रियजन्यज्ञानमधःकृतं येनेति वा तथोक्तः, केवलप्रत्यक्षाविषय इत्यर्थः, श्रीहरिः, तस्मात् सिद्धाश्रम इति नाम प्रसिद्धः । एवं च सिद्धानां तपस्सिद्धानां मुनीनामाश्रम इति वा, सिद्ध्यत्यस्मात् फलमिति व्युत्पत्त्या तपःफलदातृत्वेन सिद्धशब्दवाच्यस्य विष्णोराश्रम इति वा व्युत्पत्तिरुक्ता भवति ॥ ८ ॥

(सं.चं.) तपस्यन्तः तपश्चरन्तः । तपःशब्दात् चरणार्थे क्यङ् । 'कर्मणो रोमन्थतपोभ्यां वर्तिचरोः' (अ.सू. ३.१.१५) इति हि पाणिनिः । 'तपसः परस्मैपदं च' इति वार्तिकम् । तेन तपश्चरति तपस्यति । सिद्धत्वं तपःसिद्धिमाययुः । तपसा साक्षात्कृतब्रह्माणो मुक्तिमाप्नुवन् । तस्मात् सिद्धानामयमाश्रम इति सिद्धाश्रमो नाम । सिद्धेर्दातुर्नित्यसिद्धस्याऽयमाश्रम इति च ॥ ८ ॥

बलेर्बलेन सन्त्रस्तैर्देवैरत्रार्थितो[2] हरिः ।
काश्यपेनापि तपसा[3] ततोऽदित्याः सुतोऽभवत् ॥ ९ ॥

(भा.दी.) बहवोऽत्र तपस्यन्त इत्युक्तं विशदयति– **बलेरि**ति । बलेः बलिचक्रवर्तिनः यद् बलं तेन सन्त्रस्तैः भीतैः देवैः, अत्राऽश्रमे अर्थितः बलिनिग्रहार्थमवतारः कर्तव्य इति प्रार्थितः हरिः, काश्यपेन मुनिना, कृतेनेति शेषः, तपसा अवतारार्थकतपोनिमित्तादपि, ततः काश्यपात् अदित्याः सुतः अभवत् । भुवो लङ् ॥ ९ ॥

(सं.चं.) कथं सिद्धस्यायमाश्रमः? बलेर्बलेन । देवैरर्थितः काश्यपेनापि तपसाऽर्थितः । अत्राऽश्रमेऽ-भवत् । ततोऽर्थितत्वादेव हेतोः काश्यपेनादित्याः सुतोऽभवद् वामन इति ॥ ९ ॥

वामनो वामनेत्रोऽसौ वाम एवामरद्विषाम् ।
अयाचत बलेस्त्रीणि पदानि किल लीलया ॥ १० ॥

१. **'यद्यपि अधोक्षजो नारायण एव सिद्धेर्मुक्तेर्दाता। तथाऽपि आश्रमं निमित्तीकृत्य सिद्धिदातृत्वादाश्रमस्यापि सिद्धिदातृत्वमुपचारेणोच्यत इति ज्ञातव्यम्'** इति का.श्री. ।

२. **'देवैरप्यर्थितो–'**

३. **'काश्यपेनात्र तपसा'**

(भा.दी.) वामन इति वामे मनोहरे नेत्रे यस्य स तथा, अमरान् द्विषन्तीत्यमरद्विषस्तेषां दैत्यानां वाम एव शत्रुरेव अभूत्। 'वामौ वल्गुप्रतीपयोः'[१] इत्यमरः। असौ वामनः बलेः सकाशात् त्रीणि पदानि लीलया अयाचत किल । याचृ याच्ञायां लङ् । किलेत्यपरमार्थे । सर्वाधीश्वरस्यान्यस्माद् याचनस्य लीलामन्तराऽसम्भवादिति भावः ॥ १० ॥

(सं.चं.) वामे चारुणी नेत्रे अस्य। 'वल्गु चारु सुषमं वामं शुभं पेशलम्' इत्यभिधानम्। चक्षुषि सन्निधाय वामस्य सौन्दर्यस्य नेतृत्वाच्च वामनेत्रः। सुरद्विषां वामः प्रतिकूलः। 'वामः प्रतिकूलेऽपि' इति च ॥१०॥

दत्तमात्रे बलीन्द्रेण भूतळे त्रिपदाह्वये ।
अणोरणीयान् महतो महीयान् भगवानभूत् ॥ ११ ॥

(भा.दी.) दत्तेति। बलीन्द्रेण, त्रीणि च तानि पदानि च त्रिपदानि त्रिपदानीति आह्वयो नाम यस्य तत्तथा तस्मिन् भूतळे भूप्रदेशे दत्तमात्रे केवलं दत्ते सति, अणुपरिमाणात् जीवात् अतिशयेन अणुरणीयान् भगवान् वामनरूपी विष्णुः महतः परममहत्परिमाणादाकाशादेः महीयान् अतिशयेन स्थूलः अभूत्। भुवो लुङ्॥११॥

(सं.चं.) त्रिपदाह्वये। भूतळे त्रीणि पदानीति नाममात्रम्। वस्तुतस्तु त्रयोऽपि लोकाः ॥ ११ ॥

तस्य त्रिविक्रमस्यायमाश्रमश्चित्रविक्रमः ।
वयं चान्ये च मुनयो वसामोऽत्र महामते[२] ॥ १२ ॥

(भा.दी.) तस्येति। त्रयो लोकाः विक्रमेषु पादविन्यासेषु यस्य स तथोक्तस्तस्य, तस्य वामनरूपिणो विष्णोः अयं आश्रमः, चित्र आश्चर्यभूतः विक्रमः शीघ्रं तपःसिद्धिहेतुत्वादिलक्षणसामर्थ्यं यस्य स तथोक्तः। महती स्वपरगताखिलविशेषविषयिणी मतिर्यस्य तत्सम्बुद्धिः, श्रीराम, अत्राऽश्रमे वयं वसामः, वस निवासे लट्। अन्ये च मुनयः वसन्तीत्यन्वयः ॥ १२ ॥

(सं.चं.) त्रयो विक्रमाः पादविक्षेपा यस्य। चित्रविक्रमः विश्वविस्मयावहमहिमाऽयमाश्रमः ॥ १२ ॥

इत्यालपन्तः स्वालापांस्ते[३] तमाश्रममाविशन् ।
उत्सवो मुनिनेत्राणि[४] भास्करोऽप्यब्धिमाविशत् ॥ १३ ॥

---

१. **'वामौ वल्गुप्रतीपौ द्वौ'** इति प्रचलितः पाठः। २. **'महीपते'** ३. **'स्वालापास्ते'** इति वि.ती.पाठः।

४. **'मुनिनेत्राणाम्'** इति क्वचित्। अस्वरसः पाठः। का.श्री.आचार्यस्तु–**'मुनिनेत्राणां उत्सवः सन्तोषः आसीत्'** इति यथाकथा च व्याख्याति। अप्रबुद्धं व्याख्यानम्।

(भा.दी.) **इती**ति । ते, शोभन आलाप आभाषणं येषां ते तथा । 'स्यादाभाषणमालापः' इत्यमरः । (इति एवमादिप्रकारेण) आलपन्तः सन्तः तं आश्रमं सिद्धाश्रमं आविशन् । विश प्रवेशने लङ् । तदा मुनीनां नेत्राणि तानि उत्सवः आविशत् । भास्करः सूर्योऽपि आपो धीयन्तेऽत्रेत्यब्धिः समुद्रस्तं आविशत् । सूर्यास्तमयश्चाजायत इत्यर्थः ॥ १३ ॥

(सं.चं.) भगवद्विषयत्वात् सु सुखकराः पूजनीयाः शोभनाश्चाऽऽलापाः । स्वस्य स्वतन्त्रस्य भगवतो वाऽऽलापाः । ते तमाश्रममाविशन् । मुनिनेत्राणि उत्सव आविशत् । तेषामागमनेन मुनीनां नेत्रोत्सवः समजनीत्यर्थः । भास्करोऽप्यब्धिमाविशत् । अस्तङ्गतः ॥ १३ ॥

सप्तर्षिभिः समेतोऽथ [1]षडहैः परिकल्पितम् ।
कौशिकः कोसलेन्द्रस्य यज्ञमारभताऽऽज्ञया ॥ १४ ॥

(भा.दी.) **सप्ते**ति । अथ कौशिकः विश्वामित्रः । सप्त च ते ऋषयश्च तैः । 'मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः । वसिष्ठश्च महातेजा एते सप्तर्षयः स्मृताः' इति प्रसिद्धसप्तर्षिभिरित्यर्थः । समेतः सहितः सन् । षट्सङ्ख्याकानि च तानि अहानि च तैः परिकल्पितो विहितस्तम्, षड्भिर्दिनैः परिसमाप्यमित्यर्थः, यज्ञम्, कोसलानां कोसलविषयाणामिन्द्रस्य स्वामिनः श्रीरामस्य आज्ञया आरभत प्रारम्भं चक्रे । आङ् पूर्वः रभि राभस्ये लङ् ॥ १४ ॥

(सं.चं.) षडहैः षड्भिर्दिनैः परिकल्पितम्, परिसमापनीयत्वेन विहितम्, षळहाख्यं यज्ञम् 'राजाहःसखिभ्यष्टच्' (अ.सू.५.४.९१) इति समासान्तष्टच् । कोसलेन्द्रस्याऽऽज्ञयेति वास्तवम् । अनुज्ञयेति व्यावहारिकम् । कोसलेन्द्रस्य यज्ञमिति च । स एव हि सर्वयज्ञाराध्यः । 'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च' इति हि भगवद्वचनम् ॥ १४ ॥

ततः षष्ठेऽह्नि भूयिष्ठे सम्प्रवृत्ते क्रतूत्तमे[2] ।
जज्वाल वेदिः सकला हाहाकारो महानभूत् ॥ १५ ॥

---

१. **'षडहःपरिकल्पितम्' इति, षडहं परिकल्पितम्' इति च क्वचित् । 'षडहोभिः परिकल्पितं षडहःपरिकल्पितम् । समासान्तविधेरनित्यत्वात् टच्प्रत्ययो नाऽऽश्रितः । षडहैः परिकल्पितमिति पाठे न क्लेशः'** इति का.श्री. ।

२. **'भूयिष्ठे प्रवृत्ते च क्रतूत्तमे'** इति वि.ती.पाठः स्यात् ।

(भा.दी.) तत इति । षट्त्वसङ्ख्यापूरणं षष्ठं तस्मिन् अह्नि दिने, भूयिष्ठे महत्तमे, क्रतुषूत्तमस्तस्मिन् यज्ञे प्रवृत्ते सति प्रवर्तमाने सति, सकला समस्ता, देवाः पूजां विन्दन्ति प्राप्नुवन्त्यत्रेति वेदिः संस्कृतभूमिः । 'वेदिः परिष्कृता भूमिः' इत्यमरः । जज्वाल । ज्वल दीप्तौ लिट् । तदा महान् हाहेति आकारः प्रकारो यस्य स तथोक्तः ध्वनिः अभूत् । भुवो लुङ् ॥ १५ ॥

(सं.चं.) परिकरभूयिष्ठे । वेदिर्यज्ञभूमिः सकला । नेदमनिष्टसूचकं शकुनम्[१] । किन्तु रक्षसां माया । हाहेति ध्वनिकरणम्, उच्चैर्विलपनमित्येतत्, हाहाकारः ॥ १५ ॥

आकर्ण्य खे कलकलं दृष्ट्वा धृष्टौ च राक्षसौ ।
उद्यच्छ लक्ष्मणेत्युक्त्वा चापमादत्त[२] राघवः ॥ १६ ॥

(भा.दी.) आकर्ण्येति । राघवः खे आकाशे । 'अनन्तं सुरवर्त्म खम्' इत्यमरः । (कलकलः) कलकल-ध्वनिः । 'कोलाहलः कलकलः' इति हलायुधः । तं आकर्ण्य, धृष्टौ राक्षसौ मारीचसुबाहुनामानौ दृष्ट्वा च । हे लक्ष्मण, उद्यच्छ सन्नद्धो भव । उत्पूर्वः यम उपरमे लोट् । इति वचः उक्त्वा चापो धनुस्तं आदत्त जग्राह । आङ्पूर्वः डु दाञ् दाने लङ् ॥ १६ ॥

(सं.चं.) धृष्टौ अकर्मकरणे निर्लज्जौ । उद्यच्छ । यम उपरमे । 'उपरमो निवृत्तिः' इति क्षीरस्वामी । उपसर्गयोगेनार्थान्तरम् । उद्यतो भव । प्रतिकर्तुं सज्जो भव ॥ १६ ॥

न प्रादूषयतां यावत् तौ शोणितवपाद्रवैः[३] ।
यज्ञं यज्ञेश्वरस्तावत् घोरं शरममुञ्चत ॥ १७ ॥

(भा.दी.) नेति । यज्ञेश्वरः यज्ञानां मुख्यतो भोक्तृत्वेन वा फलदातृत्वेन वेश्वरः श्रीरामः, तौ राक्षसौ, यावत् यतः पूर्वम्, शोणितं रक्तं तच्च, नाभिसमीपदेश उप्यत इति वपा वसा सा च, तयोः द्रवास्तैः । 'हृन्मेदस्तु[४] वपा वसा' इत्यमरः । तं यज्ञं न प्रादूषयतां नादूषयताम् । दुष वैकृत्ये लङ् । तावत् ततः पूर्वमेव घोरो भयङ्करस्तं शरं अमुञ्चत । मुच्लृ मोक्षणे लङ् ॥ १७ ॥

(सं.चं.) वपा मेदः । '**ಕೊಬ್ಬು**' इति भाषायाम् ॥ १७ ॥

---

१. **'वह्निमन्तरेण ज्वालायुक्तत्वं भाव्यनिष्टसूचकम्। 'अथापि यत्र भूमिं ज्वलन्तीमिव पश्येत् तदप्येवमेव विद्यात्' इति श्रुतिः'** इति का.श्री. ।

२. **'चापं चाऽदत्त'**

३. **'शोणितवसाद्रवैः'** । **'शोणितवपयोः द्रवाः बिन्दवः'** इति का. श्री. ।

४. हृदिति पूर्वान्वयि । तेनात्र न वक्तव्यम् । **'मेदस्तु वपा वसा'** इति पर्याप्तम् ।

राममुक्तेषुवीर्य्येण विद्रुत्य शतयोजनम् ।
मारितोऽस्मीति मारीचो ममज्ज लवणार्ण्णवे ॥ १८ ॥

(भा.दी.) रामेति । मारीचः, रामस्य शितो निशितो य इषुस्तस्य वीर्यं सामर्थ्यं तेन[१], शतानां योजनानां समाहारः शतयोजनं तत् विद्रुत्य विद्रावणं कृत्वा, मारितः घातितः, अस्मि इति, वदन्निति शेषः, लवणमयो योऽर्णवस्तस्मिन् ममज्ज । टु मस्जो शुद्धौ लिट् ॥ १८ ॥

(सं.चं.) मारितोऽस्मीति भीत्या मन्वानः । इषुवीर्येण पीडितो हतमेवाऽत्मानं मेने । दिष्ट्या न हतः । जीवन्नेवोन्ममज्ज लवणार्णवात् ॥ १८ ॥

ज्वलनज्वालमादाय स पुनः सायकान्तरम् ।
सुबाहुं च [२]महाबाहुर्न्निन्ये यमनिकेतनम्[३] ॥ १९ ॥

(भा.दी.) ज्वलनेति । सः श्रीरामः, (पुनः) ज्वलनस्य वह्ने(र्ज्वाले)व (ज्वाला)यस्य तत् तथा तत् सायकान्तरं आदाय, महान्तौ बाहू यस्य स तथा तम्, सुबाहुं सुबाहुनामकं राक्षसं च, यमस्य निकेतनं गृहं प्रति निन्ये, प्रेषितवान् । णीञो लिट् ॥ १९ ॥

(सं.चं.) ज्वलनी ज्वलन्ती, ज्वलनस्येव वा, ज्वाला यस्य तत् ज्वलनज्वालम् । अन्यः सायकः सायकान्तरम् ॥ १९ ॥

पुनश्चापातयद् बाणैः शिरांसि पिशिताशिनाम् ।
तालानामिव पक्वानि रामः केचित् पराद्रवन् ॥ २० ॥

(भा.दी.) पुनरिति । श्रीरामः, पिशितं मांसमत्तुं शीलमेषामस्तीति पिशिताशिनस्तेषाम्, राक्षसानामित्यर्थः, 'पिशितं तरसं मांसम्' इत्यमरः, शिरांसि, तालाः तालवृक्षास्तेषां पक्वानीव फलानीव, बाणयन्ति विरावयन्ति शत्रूनिति बाणास्तैः, पुनश्च अपातयत् । पत्ल् पतने लङ् । तत्र केचिद् राक्षसाः पराद्रवन् पलायनं चक्रुः । द्रु गतौ लङ् ॥ २० ॥

---

१. एवं व्याख्याने **'रामशितेषुवीर्येण'** इति पाठः स्यात् । तच्च न युक्तम्, छन्दोभङ्गात् । किन्तु विद्याभूषणीयेऽपि एवमेव पाठः पठ्यते– **'रामशितेषुवीर्येण रामनिशितबाणवीर्येण'** इति । न स्वरसमेतत् ।

२. **'महाबाहुं निन्ये'** इति वि.ती.पाठः ।

३. **'यमनिकेतनं यमपुरं नरकमिति यावत्'** इति का.श्री. ।

(सं.चं.) पिशिताशिनां सुबाहुमारीचानुयायिनाम् । 'मांसं पलं पिशितमामिषम्' इत्यभिधानम् । पक्वानि जीर्णफलानि । केचिद् रामपौरुषं दृष्ट्वैव भीताः पराद्रवन् ॥ २०–२ ॥

द्विज उद्वास्य यजनं[१] द्विजमण्डलसंवृतः[२] ।
प्रशशंस भृशं राममाशीर्भिरभिपूरयन्[३] ॥ २१ ॥

(भा.दी.) द्विज इति । द्विजः विश्वामित्रः यजनं यज्ञस्तत् उद्वास्य समाप्य, द्विजानां मण्डलं समूहस्तेन मण्डितः अलङ्कृतः सन्, श्रीरामं आशिषः शुभवाचस्ताभिः अभिपूरयन् सन्, भृशमत्यन्तं प्रशशंस तुष्टाव । शंसु स्तुतौ लिट् ॥ २१ ॥

तस्यां रात्र्यां व्यतीतायां मुनीन्द्रो मुनिसंसदि ।
सानुजं प्रत्युवाचेदं मधुरं मधुसूदनम् ॥ २२ ॥

(भा.दी.) तस्यामिति । मुनीन्द्रः विश्वामित्रः, तस्यां रात्र्यां व्यतीतायां अतीतायां सत्याम्, मुनीनां संसत् सभा तस्याम्, सानुजं अनुजेन सहितम्, मधुं मधुनामकदैत्यं सूदितवान् संहृतवान् इति मधुसूदनस्तं श्रीरामं प्रति, इदं वचः मधुरं मनोहरं यथा भवति तथा उवाच ॥ २२ ॥

स्वयंवरो वरो राम जानक्या भुवि घोष्यते ।
महोत्सवोत्सुकाः सर्वे विदेहान् यान्त्यहो जनाः ॥ २३ ॥

(भा.दी.) स्वयमिति । हे श्रीराम, जानक्याः जनकपुत्र्याः सीतायाः वरः श्रेष्ठः स्वयंवरः सर्वस्यां भुवि घोष्यते आघोष्यते । घुषिर् शब्दे लट् । तत्र ज्ञापकमाह– **महे**ति । महान् य उत्सवस्तस्मिन् उत्सुकाः आसक्ताः सर्वे जनाः विदेहान् विदेहविषयान् यान्ति । यातेर्लट् । अहो आश्चर्यम् ॥ २३ ॥

(सं.चं.) स्वयंवरो वरः । अयोनिजास्वयंवरत्वाद् वरः । शैवधनुरारोपणपणत्वाद् वा । घोष्यते । घोषयते रूपमिदम् । महोत्सवदर्शनोत्सुकाः ॥ २३ ॥

तामिच्छन्तो हि गच्छन्ति राजानो राजनन्दन ।
यास्यामो [३]वयमप्यत्र द्रक्ष्यामस्तं महोत्सवम् ॥ २४ ॥

---

१. **'उदवस्य द्विजो यज्ञम्'** इत्येके । **'उदवस्य समाप्य'** इति वि.भू. । का.श्री. च । किन्धातुकमिदं रूपमिति चिन्त्यम् ।

२. **'–मण्डलमण्डितः'** इति वि.ती.पाठः । ३, **'–रभिपूजयन्'** ४. **'अहं च त्वं च एते च वयम्'** इति का.श्री. ।

(भा.दी.) तामिति । हे राजनन्दन, राज्ञः पुत्र श्रीराम, तां सीतां इच्छन्तः राजानः गच्छन्ति हि । गम्लृ गतौ लट् । वयमपि यास्यामः तत्र गमिष्यामः । यातेर्लृट् । अत्र अस्मिन् विदेहदेशे तं महोत्सवं द्रक्ष्यामः । दृशेर्लृट् ॥ २४ ॥

(सं.चं.) राजानस्तामिच्छन्तो गच्छन्ति । वयं तु महोत्सवं द्रष्टुमिच्छन्तः । सीतारामविवाहमहोत्सवमित्यन्तरङ्गम् ॥ २४ ॥

एवमुक्त्वा मुनिवरो मुनिभिः परिवारितः ।
सरामलक्ष्मणः प्रायादुत्तरां दिशमुत्तमाम् ॥ २५ ॥

(भा.दी.) एवमिति । मुनिवरः मुनिश्रेष्ठः विश्वामित्रः एवमुक्त्वा मुनिभिः परिवारितः परिवृतः सन्, सरामलक्ष्मणः रामलक्ष्मणाभ्यां सहितः सन्, उत्तमां उत्कृष्टां उत्तरां दिशं प्रायात् । यातेर्लङ् ॥ २५ ॥

(सं.चं.) उत्तमाम् देवभूमित्वात् ॥ २५–७ ॥

नदराजस्य शोणस्य प्राप्य प्रान्तं महामुनिः ।
[1]उवास तत्र तां रात्रिं सह शिष्यैः सराघवः ॥ २६ ॥

(भा.दी.) नदेति । सराघवः राघवाभ्यां सहितः (महामुनिः) विश्वामित्रः, शिष्यैः सह । पुरुषदेवताकाः सरितो नदा इत्युच्यन्ते । नदानां राजा नदराजस्तस्य, 'राजाहस्सखिभ्यष्टच्' (अ.सू.५.४.९१) इति टच्, शोणस्य शोणनामकस्य नदस्य प्रान्तं समीपं तत् प्राप्य, तत्र शोणतीरे तां रात्रिं उवास निवासमकरोत् । वस निवासे लिट् ॥ २६ ॥

पुरा कुशिकपुत्त्राणां देशांस्तानवलोकयन् ।
कथां स कथनीयानां कथयामास तापसः ॥ २७ ॥

(भा.दी.) पुरेति । तापसो मुनिर्विश्वामित्रः, पुरा कुशिकस्य कुशिकनाम्नो राज्ञो ये पुत्रास्तेषां तान् शोणनदतीरस्थान् देशान् अवलोकयन् श्रीरामाय प्रदर्शयन् सन्, कथयितुं स्तोतुं योग्याः कथनीयास्तेषाम्, पुण्यकीर्तीनामित्यर्थः, कुशिकपुत्राणां कथां कथयामास । कथ वाक्यप्रबन्धे लिट् ॥ २७ ॥

---

१. 'उषितस्तत्र'

कुशनाभसुताद् भूपात् कुशपौत्रान्महाबलात् ।
गाधिनाम्नो निजं जन्म रामायाऽह स्म[१] कौशिकः ॥ २८ ॥

(भा.दी.) कुशेति । कुशिकस्य गोत्रोद्भवः कौशिकः विश्वामित्रः, कुशस्य कुशनाम्नो राज्ञो यः पौत्रस्तस्मात्, कुशनाभस्य कुशनाभाख्यभूपस्य सुतात्, महद्बलं यस्य स तथा तस्मात्, गाधिरिति नाम यस्य स तथा तस्मात् भूपात् निजं स्वकीयं जन्म उत्पत्तिं श्रीरामाय आह स्म अवदत् । ब्रूञो लट् । ननु कुशध्वजपुत्रो गाधिरिति भागवते कथनाद् विरोध इति चेन्न । कुशनाभकुशध्वजयोः सोदरत्वेन कुशध्वजपुत्रस्यापि गाधेः स्वपुत्रत्वेन कुशनाभपरिगृहीतत्वादिना तत्पुत्रत्वोपपत्तेरित्याद्यभिप्रायेण प्रवृत्तवाल्मीकिरामायणानुसारेणास्य ग्रन्थस्य प्रवृत्तत्वादिति ॥ २८ ॥

(सं.चं.) गाधिः कुशपौत्रः । कुशनाभस्य कुशिकापरनाम्नः पुत्रः । गाधेर्विश्वामित्रः ॥ २८ ॥

प्रातिष्ठन्त ततः प्रातर्ब्राह्मणा राघवान्विताः ।
अह्नाय जाह्नवीं प्राप्ता[२] मध्याह्ने विश्रमं ययुः ॥ २९ ॥

(भा.दी.) प्रातिष्ठन्तेति । राघवेण अन्विताः युक्ताः ब्राह्मणाः विश्वामित्राद्याः प्रातः प्रभाते ततः शोणनद-प्रान्तात् प्रातिष्ठन्त अगच्छन् । ष्ठा गतिनिवृत्तौ लङ् । ते च ब्राह्मणाः अह्नां मध्यं मध्याह्नस्तस्मिन् । जह्नोः जह्नुनाम्नो राजर्षेरपत्यं स्त्री जाह्नवी गङ्गा ताम्, अह्नाय वेगेन, 'शीघ्रार्थे झटिति प्राक् द्राक् मङ्क्ष्वह्नाय सपद्यपि' इति वैजयन्ती । प्राप्ताः सन्तः । विश्रमो विश्रमणं तम्, ग्लानिपरिहारार्थमवस्थानमित्यर्थः, ययुः । यातेर्लिट् ॥ २९ ॥

(सं.चं.) 'अह्नाय सत्वरं च क्षिप्रं द्रुतमञ्जसा झटिति' इति च । राघवाभ्यामन्विताः ॥ २९ ॥

सानुजस्तत्र काकुत्स्थो हविर्भुक्त्वाऽमृतोपमम् ।
जानंश्च पप्रच्छ मुनिं विज्ञानाय[३] सतां विभुः ॥ ३० ॥

(भा.दी.) सानुज इति । अनुजेन सहितः सानुजः, ककुत्स्थगोत्रोद्भवः काकुत्स्थः, विभुः श्रीरामः, तत्र गङ्गातीरे, अमृतस्य उपमा सादृश्यं यस्य तथा तत् हविः अन्नं भुक्त्वा, जानंश्च सर्वं जानन्नपि, सतां

१. **'स कौशिकः'** २. **'जाह्नवीं प्राप्य मध्याह्ने'**

३. **'ज्ञापनाय सतां विभुः'** इति वि.ती.पाठः । **'सतां प्रभुः'** इति, **'सतां पतिः'** इति च क्वचित् ।

सज्जनानां ज्ञापनं वक्ष्यमाणप्रमेयज्ञापनं तस्मै मुनिं विश्वामित्रं प्रति पप्रच्छ । प्रच्छ जिज्ञासायां लिट् । गङ्गोत्पत्त्यादिके स्वेन पृष्टे मुनिना चाभिहिते तत्रत्यैरन्यैर्मुनिभिः सम्यक् ज्ञातं स्यादित्यभिप्रायेण च कृपाळुना श्रीरामेण गङ्गोत्पत्त्यादिकं विश्वामित्रं प्रति विचारितम्, न त्वज्ञानेनेति भावः ॥ ३० ॥

(सं.चं.) यज्ञशिष्टं हविरन्नम् । 'प्राश्य चामृतवद् हविः' इति रामायणे । सतां विभुः सतां विज्ञानाय पप्रच्छ । तेऽपि सामान्यतो जानन्त्येव । विशेषज्ञानाय पप्रच्छ ॥ ३० ॥

इयं गङ्गा कुतो जाता गां जगाम कथं पुनः ।
राघवेणेत्यभिहितो हितायोचे सतामृषिः[1] ॥ ३१ ॥

(भा.दी.) इयमिति । इयं गङ्गा कुतः कस्मात् पुंसः जाता । पुनः गां भूमिं कथं जगाम । गम्लृ गतौ लिट् । राघवेण इति एवमादिप्रकारेण अभिहितः ऋषिः विश्वामित्रः सतां हितमिष्टं तस्मै ऊचे । वच परिभाषणे लिट् । सर्वज्ञेन श्रीरामेण सज्जनहिताय विचार्यत इति ज्ञात्वैव मुनिनाऽपि सज्जनहितार्थमेव गङ्गोत्पत्त्यादिकं श्रीरामं प्रति प्रोक्तमिति भावः ॥ ३१ ॥

(सं.चं.) गां गता गङ्गेति लोकप्रथामाश्रित्य पृच्छति– गां जगाम कथं पुनः? सतां हिताय इत्यभिहितः पृष्टः, सतां हितायैवोचे ॥ ३१ ॥

अभूतामद्भुतगुणे उभे हिमवतः सुते ।
गङ्गाऽगमद् द्युसिन्धुत्वमुमा गिरिशदारताम् ॥ ३२ ॥

(भा.दी.) अभूतामिति । अद्भुता आश्चर्यभूता गुणा ययोस्ते तथोक्ते, हिमं प्राचुर्येणास्मिन्नस्तीति हिमवान्, तस्य हिमवत्पर्वतस्येत्यर्थः, उभे सुते अभूताम् । भुवो लुङ् । तयोर्मद्ध्ये गङ्गा दिवः स्वर्गस्य सिन्धुर्नदी, तस्या भावस्तत्त्वं तत्, अगमत् । गम्लृ गतौ लुङ् । उमा पार्वती, गिरौ कैलासे शेत इति गिरिशो रुद्रस्तस्य दारा भार्या तेषां भावस्तत्ता ताम्, 'भार्या जायाऽथ पुम्भूम्नि दाराः' इत्यमरः । अगमदित्यन्वयः ॥ ३२ ॥

(सं.चं.) तयोर्ज्येष्ठा गङ्गाऽगमद् द्युसिन्धुत्वम् स्वर्णदीत्वम् । 'स्त्री नद्यां ना नदे सिन्धुः' इत्यभिधानम् ॥

शिवस्य शिवया सार्द्धं रतियोगोऽन्ववर्त्तत ।
दिव्यवर्षसहस्रं च नैकत्रापि पराजयः[2] ॥ ३३ ॥

---

१. 'सतां मुनिः'

१. 'पराभवः'

(भा.दी.) शिवस्येति। (शिवस्य) शिवया पार्वत्या सार्द्धं रतिलक्षणो रमणलक्षणो योगः सम्बन्धः रतियोगः अन्ववर्तत प्रावर्तत। वृतु वर्त्तने लङ्। दिवि भवं दिव्यं वर्षाणां सहस्रं तत्, निरन्तरं दिव्यवर्षसहस्र-मित्यर्थः, एकत्राऽपि शिवे शिवायां वा पराजयः वीर्यपातलक्षणः न जातः ॥ ३३ ॥

(सं.चं.) रतियोगो मैथुनम्। दिव्यवर्षसहस्रमिति। शतमिति न शतम्। सहस्रमिति न सहस्रम्। शब्दोऽयं प्रायो बहुत्ववचनः। तेन न विरोधः। नैकत्रापि शिवे शिवायामपि पराजयः। रिरंसैव ववृधे नोप-रिरंसेत्यर्थः ॥ ३३ ॥

तद्वीर्य्यभीरुभिर्द्देवैः सुरते विहते हरः।
विससर्ज्ज निजं वीर्य्यं जाह्नवीवह्निभूमिषु ॥ ३४ ॥

सर्वैरधार्य्यं तद्वीर्य्यं सम्भूतं[1] भूतिदं सताम्।
श्रीमान् कुमारः स्कन्दोऽभूच्छिवयोर्न्नन्दनः प्रियः ॥ ३५ ॥

(भा.दी.) तदिति। तस्य रुद्रस्य यद्वीर्यं रेतस्तस्माद् भीरुभिर्भयशीलैः, उमायास्तद्धरणविषये भयशीलै-रित्यर्थः, देवैः इन्द्रादिभिः, सुरतं सुरतिस्तस्मिन् विहते सति, वह्निं प्रेषयित्वा विघातिते सति। शिवायाः सुरतसमये तद्विघातार्थं देवैर्वह्निः प्रेषितः। स च तयोः समीपं जगाम। तं दृष्ट्वा लज्जितयोमया रमणं परित्यज्यावस्थितमिति पौराणिकी प्रसिद्धिः। हरः निजं स्वकीयं तत् वीर्यं रेतः, जाह्नवी गङ्गा सा च वह्निश्च भूमिश्च तासु विससर्ज विसृष्टवान्। सृज विसर्गे लिट्। **सर्वैरिति**। सर्वाणि समस्तभूतानि तैः अधार्यं धर्तुमशक्यम्, सतां सज्जनानाम्, सम्बन्धमात्रे षष्ठी, भूतिमैश्वर्यं ददातीति भूतिदम्, त्रिधा विभक्तं विभिन्नं तत् वीर्यम्, सम्भूतं सत् मिळितं सत्। श्रिया कान्त्या नित्ययुक्तः श्रीमान्। शिवश्च शिवा च शिवौ तयोः। 'पुमांस्त्रिया' (अ.सू.१.२.६७) इत्येकशेषः। प्रियः नन्दनः पुत्रः कुमारः (स्कन्दः) षण्मुखः अभूत्। भुवो लुङ् ॥ ३४–५ ॥

(सं.चं.) वीर्यं रेतः प्रभावश्च। शिवरेतःप्रभावभीतैः। शिवयो रतप्रभावभीतैर्वा। सुरते विहते। 'त्रैलोक्यहित-कामार्थं तेजस्तेजसि धारय' (रामा.३६.११) इति, देवैः प्रार्थितो हरः स्वरेतो भूमावुत्ससर्ज। तत्तेजसा भूमिर्जज्वाल। पुनर्देवैरर्थितो वह्निस्तत् स्वीचकार। पुनस्ते तमाहुः– जाह्नव्यामेतत् तेज उत्सृजेति।

---

१. **'सर्वैरधार्यं सम्भूतं विभक्तं भूतिदम्'** इति वि.ती.पाठः स्यात्।

गङ्गास्रोतोभ्यः प्रसृतमेकत्र सम्भूतं तत् तेजः श्रीमान् कुमारः स्कन्दोऽभूत् । स्कन्दनात् स्कन्दः । 'स्कन्द इत्यब्रुवन् देवाः स्कन्नं गर्भपरिस्रवात्' (३७.२७) इति च । षड्भिराननैः कृत्तिकानां पयः पीत्वा सुकुमारः कुमारो बभूव ॥ ३४–५ ॥

तं कार्त्तिकेयमाग्नेयं[१] गाङ्गेयं च प्रचक्षते ।
सेनापतिं सुरपतिर्य्यं कृत्वा न्यहनद्[२] रिपून् ॥ ३६ ॥

(भा.दी.) तमिति । ज्ञानिनः तं षण्मुखं कृत्तिकानामपत्यं पुमान् कार्त्तिकेयस्तम्, षट् कृत्तिकाभिः स्तनपानस्य कारितत्वात् कृत्तिकापुत्रम्[३] , अग्नेरपत्यं पुमानाग्नेयस्तम्, पार्वतीवियोजनेन क्रुद्धरुद्रेण स्ववदने निक्षिप्तरेतसो धारणासामर्थ्येन गङ्गायां निक्षेपादग्निपुत्रम्, गङ्गाया अपत्यं पुमान् गाङ्गेयस्तम्, अग्निना स्वस्मिन्निक्षिप्तवीर्यधारणासामर्थ्येन गङ्गया शरकानने प्रक्षेपाद् गङ्गापुत्रं च प्रचक्षते प्रवदन्ति । चक्षिङ् व्यक्तायां वाचि लट् । सुरपतिः पुरन्दरः यं षण्मुखं सेनायाः देवसेनायाः पतिं नायकं कृत्वा (रिपून्) तारकादिशत्रून् न्यहनत्[४] जघान । हन हिंसागत्योर्लङ् ॥ ३६ ॥

(सं.चं.) एवं तमाग्नेयं गाङ्गेयं कृत्तिकाभिः स्तन्यदानेन वर्धित इति कार्तिकेयमाहुः । सुरपतिर्यं तारकासुरसङ्ग्रामे सेनापतिं कृत्वा रिपूनसुरान् न्यहन् । कोशेषु सर्वत्र न्यहनदित्येव पठन्ति । कथं न्यहनत्? पुरातना मन्त्रद्रष्टार ऋषय एवं प्रायुक्षत । ततः कश्चित् कालं वैयाकरणैर्निराकृतम्, मैवं लोकाः प्रयुक्षतेति । ततः पुनः कतिचन धीराः परावरज्ञा एवं प्रयोक्तुमारेभिरे । स यथा– 'नैनमहनद् वचनाद्धरेश्च' इत्यादि । ततः परेऽपि तेन पूर्वाचार्य-प्रयोगेण प्रभाविताश्छान्दसा बुभूषवस्तमनुसस्रुरिति ॥ ३६ ॥

वासुदेवप्रसादाय शिवाभ्यां तपसि स्थितम् ।
एवंविधा महादेवी गङ्गावतरणं शृणु ॥ ३७ ॥

(भा.दी.) वासुदेवेति । शिवश्च शिवा च शिवौ ताभ्यां वासुदेवस्य प्रसादोऽनुग्रहस्तस्मै, तपसि तपोविषये स्थितं अवस्थितम् । महादेवस्य स्त्री महादेवी गौरी । महती च सा देवी चेति वा । एवं विधा प्रकारो यस्याः सा एवंविधा एतादृशमहिमोपेतेत्यर्थः । गङ्गायाः यदवतरणं स्वर्गाद् भुवं प्रत्यागमनम्, तत् शृणु । श्रु श्रवणे लोट् ॥ ३७ ॥

---

१. **'तं कार्तिकेयं गाङ्गेयमाग्नेयं च'**

२. **'न्यहनद् रिपून्'** इति । छान्दसप्रयोगोऽयम् ।

३. **'कृत्तिकापुत्रस्तम्'**

(सं.चं.) विहतमिदं सुरतम् । किं पुनरपि तौ सुरते निरतौ? नेत्याह– वासुदेवप्रसादाय । 'स गत्वा तप आतिष्ठत् पार्श्वे तस्योत्तरे गिरेः । हिमवत्प्रभवे शृङ्गे सह देव्या महेश्वरः' (३६.२६) इति रामायणे । एवम्प्रभावा महादेवजायोमा । उभयोर्हिमवतः सुतयोरेकस्याः कथा श्रुता । अथ ज्येष्ठसुताया गङ्गाया भूमाव-वतरणकथां शृणु यामपृच्छः ॥ ३७ ॥

पुरा पादोदकं गङ्गा चक्रिणो विक्रमत्रये ।
कुतश्चित्[1] कारणाज्जाता गिरेर्भूयो दिवं गता ॥ ३८ ॥

(भा.दी.) **पुरे**ति । पुरा पूर्वं विक्रमाणां पादविन्यासानां त्रयं तस्मिन् क्रियमाणे सति । चक्रमस्यास्तीति चक्री तस्य विष्णोः पादस्य दक्षिणपादस्य उदकं उदकभूता, विष्णुपादोत्पन्नेत्यर्थः, गङ्गा कुतश्चित् कस्माचित् कारणं निमित्तं तस्मात्, गिरेः हिमवतः जाता सती, कुतश्चित् कारणात् भूयः दिवं स्वर्गम्, 'द्यौर्दिवौ द्वे स्त्रियाम्' इत्यमरः, गता प्राप्ता ॥ ३८ ॥

(सं.चं.) पुरा पादोदकं गङ्गा । यदा विष्णुर्बलिनिग्रहाय त्रिविक्रमो बभूव । तदा चक्रिणा हरिणा पादन्यास-त्रये क्रियमाणे एकः पादो द्यामावृत्य ब्रह्माण्डकटाहं बिभेद । तत उद्गता गङ्गा विष्णुपादोदकमित्युच्यते । तथाहि भागवते– 'विष्णोर्विक्रमतो वामपादाङ्गुष्ठनखनिर्भिण्णोर्ध्वाण्डकटाहविवरेणान्तः प्रविष्टा या बाह्यजल-धारा तच्चरणपङ्कजावनेजनारुणकिञ्जल्कोपरञ्जिताऽखिलजगदघमलापहोपस्पर्शनाऽमला साक्षाद् भगवत्पदी-त्यनुपलक्षितवचोभिरभिधीयमानाऽतिमहता कालेन युगसहस्रोपलक्षणेन दिवो मूर्धन्यवततार' इति । ततः कुतश्चित् कारणात् भगवत्सङ्कल्परूपात् हिमवतो गिरेर्दुहिता जाता । पुनर्नदीरूपेण दिवं गता स्वर्गङ्गेत्येव प्रथामाप ॥ ३८ ॥

भूपोऽभूत् सगरो नाम नारायणपरायणः ।
पूर्वजो भवतां पूर्वं तपस्तेपे सुतेच्छया ॥ ३९ ॥

(भा.दी.) पुनः भुवं प्रति भगीरथेनाऽनीतेति वक्तुमुपोद्घातमाचरति– भूप इति । भवतां युष्माकम्, इदं श्रीरामं प्रति विश्वामित्रेणोच्यते, वंश इति शेषः, पूर्वमुत्पन्नः पूर्वजः, नारायण एव परायणं परमाश्रयो यस्य स तथोक्तः । 'परायणमभिप्रेते तत्परे परमाश्रये' इति वैजयन्ती । गर्भावस्थायां सपत्नीदत्तविषेण सहोत्पन्न-त्वात् सगर इति नाम प्रसिद्धः नृपः अभूत् । स सगरः पूर्वं सुतेषु इच्छया पुत्रोत्पत्तीच्छयेत्यर्थः, तपः तेपे चक्रे । तप सन्तापे लिट् ॥ ३९ ॥

---

१. **'कारणस्य रहस्यत्वात् कुतश्चिदित्युक्तम्'** इति का.श्री. ।

(सं.चं.) भवतां पूर्वजः सगरः, पूर्वं गङ्गावतरणादपि पूर्वम्, यदा भुवि न गङ्गाऽऽस, तपस्तेपे ॥ ३९ ॥

एकस्यां तस्य पुत्रोऽभूदेको वंश्योऽसमञ्जसः ।
अपरस्यां पराक्रान्तं पुत्त्रषष्टिसहस्रकम् ॥ ४० ॥

(भा.दी.) **एकस्यामिति** । तस्य सगरस्य एकस्यां केशिनीनाम्न्यां भार्यायां वंशं करोतीति वंश्यः, वंशप्रवर्तक इत्यर्थः, असमञ्जसः असमञ्जसनामकः एकः पुत्रः अभूत् । अपरस्यां अन्यस्यां सुमतिनाम्न्यां भार्यायां पराक्रान्तं पराक्रमयुक्तं षष्टीनां[1] सहस्राणां समाहारः षष्टिसहस्रम्, षष्टिसङ्ख्याकं सहस्रमिति वा । पुत्राणां षष्टिसहस्रम्, तदेव सहस्रकम्, अभूत् ॥ ४० ॥

(सं.चं.) तपसा तुष्टो नारायणो भृगुद्वारा वरं ददौ । तत एकस्यां ज्यायस्यां केशिन्याख्यायामेकः पुत्रोऽभूदसमञ्जसनामा ए भगवत्येव समञ्जस इति । यो वंश्यो वंशधरो बभूव । अपरस्यां कनीयस्यां भार्यायां सुमत्याख्यायां पुत्राणां षष्टिसहस्रकम् ॥ ४० ॥

स योगी सङ्गसंविग्नो नृशंसत्वं प्रकाशयन् ।
एकः[2] पुत्त्रो जातपुत्त्रः पित्रा त्यक्तोऽगमद् वनम् ॥ ४१ ॥

(भा.दी.) **स** इति । योगः भगवति मनोयोग अस्यास्तीति योगी, श्रीहरिध्यानशील इत्यर्थः[3] । अत एव सङ्गाद् विषयसंसर्गात् संविग्नो भीतः । विषयसंसर्गस्य संसारहेतुत्वात् तत्रानासक्त इत्यर्थः । जातः पुत्रो यस्य स तथोक्तः । एकश्चासौ पुत्रश्च एकपुत्रः सः असमञ्जसः, नृशंसस्य क्रूरस्य भावो नृशंसत्वं तत्, 'नृशंसो घातकः क्रूरः' इत्यमरः, प्रकाशयन् प्रकटयन् सन् । स्वस्य सत्स्वभावत्वेऽपि राज्यकोशादिकमनवरतं भगवत्स्मरणादेर्विरोधीत्यतः परित्यक्तव्यमिति मनीषया स्वात्मानं पित्रा परित्यक्तं कर्तुं नागरिकबालकानां नद्यां प्रक्षेपादिना स्वस्य क्रूरत्वं प्रकटितमिति भावः । अत एव स्वपुत्राभिप्रायानभिज्ञेन पित्रा सगरेण त्यक्तः, क्रूरकर्मकृदयं राज्यभाक् न भवतीति नगरान्निस्सारितः सन्, परं परमात्मानम्, 'परोऽरिः परमात्मा च' इति वैजन्यती, अगमत् । गम्ऌ गतौ लुङ् । निरन्तरभगवद्ध्यानेन सम्पादितपरमप्रसादेन श्रीनारायणलोकं प्रापेत्यर्थः ॥ ४१ ॥

---

१. **'षष्टेः सहस्राणाम्'** इति युक्तम् ।
२. **'एकपुत्रो जातपुत्रः पित्रा त्यक्तोऽगमत् परम्'** इति वि.ती.पाठः ।
३. **'योगी अणिमादियोगवान् । जातिस्मरणयोगवानिति वा'** इति का.श्री. ।

(सं.चं.) यः स एकः पुत्रो जातः । जातः अंशुमान्नाम पुत्रो यस्य । बालान् गृहीत्वा सरय्वा जले प्रक्षिप्य प्रहसन्, स्वस्य मृषैव नृशंसत्वं प्रकाशयन् । कुतः? यतः सङ्गसंविग्नः । विषयसङ्गात् संविग्नो भीतः । ओ विजी भयसश्चलनयोः । 'नृशंसः क्रूरकर्मकृत्' इत्यभिधानम् । केवलं भगवत्येव मनोयोगी ॥ ४१ ॥

अदीक्षताश्वमेधेन सगरः स कदाचन ।
शतक्रतुरदृश्योऽस्य मेध्यं हयमपाहरत् ॥ ४२ ॥

(भा.दी.) अदीक्षतेति । सः सगरः, कदाचन कस्मिंश्चित् काले, अश्वमेधोऽश्वमेधयज्ञस्तेन, अदीक्षत दीक्षामकरोत् । दीक्ष मौण्ड्येज्योपनयननियमव्रतादेशेषु लङ् । शतं क्रतवो यस्य स तथा इन्द्रः अदृश्यः सन् अस्य सगरस्य मेध्यो यज्ञीयस्तं[1] अश्वं शततमाश्वं अपाहरत् अपहृतवान् । हृञ् हरणे लङ् । यथेन्द्रः शतक्रतुरेवमहमपि शतक्रतुः स्यामित्यभिप्रायेण मखेषु क्रियमाणेषु शतक्रतुरिति स्वनामरक्षणार्थमन्तिममखाश्व इन्द्रापहृत इति भावः ॥ ४२ ॥

(सं.चं.) यागाङ्गतया मेध्यम् । 'शुचि मेध्यं पवित्रं च पुण्यं पावनमुच्यते' इति च ॥ ४२ ॥

मेध्यमश्वमभीप्सन्तः सागरा अखनन् भुवम्[2] ।
आ समुद्रादहो तस्मात् सागरः[3] सागरोऽभवत् ॥ ४३ ॥

(भा.दी.) मेध्यमिति । मेध्यो यज्ञीयस्तं अश्वं अभीप्सन्तः प्राप्तुकामाः सगरस्य अपत्यानि पुमांसः सागराः षष्टिसहस्रसङ्ख्याकाः पुत्राः समुद्रात् आ पर्यन्तं भुवं भूमिं अखनन् । खनु अवदारणे लङ् । अहो तस्मात् कारणात् सागरः समुद्रः सागरः सगरपुत्रः अभवत् । सगरो यज्ञार्थमश्वस्य भूप्रदक्षिणीकरणसमये समुद्रतीरेऽ-श्वमपहृतं श्रुत्वा स्वपुत्रैस्तं खानयामास । अतः सगरपुत्रकृतबहुप्रदेशवत्त्वात् सागरनामधेयः समुद्रोऽभूदिति हि पौराणिकी प्रसिद्धिः ॥ ४३ ॥

(सं.चं.) सागराः सगरपुत्राः षष्टिसहस्राणि । आ समुद्रात् समुद्रादारभ्य । भुवमखनन् । तेन समुद्रः पुनरपि विस्तृतो बभूव । तदेतत् सगरपुत्रैः खातत्वमेव सागरस्य सागरत्वम् ॥ ४३ ॥

कपिलाख्यं परंज्योतिरश्वचोरोऽयमित्यमी ।
अभिपेतुर्जिघांसन्तः पतङ्गाइव पावकम् ॥ ४४ ॥

---

१. **'मेध्यं पवित्रम् । मेधो यज्ञः । मेधस्य साधनं मेध्यम् । यज्ञसाधनमिति वा'** इति का.श्री. ।

२. **'अखनन्महीम्'**

३. **'सागरैः सागरोऽभवत्'**

(भा.दी.) कपिलेति । अमी सगरात्मजाः, कपिल इति आख्या यस्य स तथा तत् परं सर्वोत्तमं ज्योतिः तेजोरूपं ब्रह्म, अयं पुरुषः अश्वचोर इति बुद्ध्या जिघांसन्तः हन्तुकामाः सन्तः, पावकं वह्निं पतङ्गाइव शलभाइव अभिपेतुरभिजग्मुः । पत्लृ पतने लिट् ॥ ४४ ॥

(सं.चं.) खनित्वा भुवं रसातळं प्रविष्टाः सागरास्तत्र कपिलाख्यं वासुदेवमपश्यन्, तपस्यन्तमिव चक्षुषी निमील्य स्थितम् । नातिदूरे च मेध्यमश्वम् । तेनायमश्वचोर इति भ्रान्ताः ॥ ४४ ॥

वासुदेवस्य देवस्य लोचनोन्मीलनानलः ।
अदहत् तान्न तच्चित्रं सर्वसंहारिणो हरेः ॥ ४५ ॥

(भा.दी.) वासुदेवस्येति । देवस्य वासुदेवस्य कपिलाख्यस्य विष्णोः लोचनयोः यदुन्मीलनं विकसनं तस्मात् सञ्जातोऽनलोऽग्निः, तान् सगरपुत्रान् अदहत् । दह भस्मीकरणे लङ् । एतच्च न तस्य चित्रमित्याह– **न तदिति** । सर्वं संहर्तुं शीलमस्यास्तीति तथोक्तस्तस्य हरेः तत् नेत्रोन्मीलनमात्रेण किञ्चिद्रुषा षष्टिसहस्रसगरपुत्राणां भस्मीकरणम्, न चित्रमाश्चर्यम् । सगरपुत्राणां सकलजगन्मद्धये किञ्चिन्मात्रत्वादिति भावः ॥ ४५ ॥

(सं.चं.) कपिलवासुदेवस्य लोचनोन्मीलनेन प्रकटः कटाक्षानलः । सहुङ्कारः । 'रोषेण महताऽऽविष्टो हुङ्कारमकरोत् तदा । ततस्तेनाप्रमेयेन कपिलेन महात्मना । भस्मराशीकृताः सर्वे काकुत्स्थ सगरात्मजाः' (४०.३०) इति रामायणे ॥ ४५ ॥

अश्वान्वेषी गतः पाश्र्वमंशुमानासमञ्जसिः ।
ननाम तस्मै नाथाय क्षम्यतां भगवन्निति[१] ॥ ४६ ॥

(भा.दी.) अश्वेति । अश्वमन्वेष्टुं विचारयितुं शीलमस्यास्तीति तथोक्तः, असमञ्जसस्यापत्यं पुमानासमञ्जसिः, अंशुमान् अंशुमन्नामकः, पाश्र्वं कपिलसमीपं तत् गतस्सन्, हे भगवन् कपिल, क्षम्यतां क्षमा क्रियताम् । क्षमूष् सहने लोट् । इति वदन् सन् नाथाय सर्वस्वामिने (तस्मै) कपिलाय ननाम । णमु प्रह्वत्वे शब्दे च लिट् ॥ ४६ ॥

(सं.चं.) कपिलवासुदेवस्य पाश्र्वं गतः । आसमञ्जसिः, असमञ्जसस्यापत्यमंशुमान् ॥ ४६ ॥

अनुग्रहादनुग्रां गां करुणामृतवर्षिणीम् ।
ऊचे देवो हयस्तात यज्ञीयो नीयतामिति ॥ ४७ ॥

१. 'क्षम्यतांक्षम्यतामिति'

(भा.दी.) अन्विति । देवः कपिलः, अंशुमति योऽनुग्रहः तस्मात्, उग्रा न भवतीत्यनुग्रा ताम्, करुणैवामृतं तद्वर्षितुं शीलमस्या अस्तीति तथोक्ता ताम्, दयापूर्णामित्यर्थः, तात अंशुमन्, यज्ञसम्बन्धी यज्ञीयः हयः नीयताम्, इति गां वाचं ऊचे । वच परिभाषणे लिट् ॥ ४७ ॥

(सं.चं.) हितकरणेच्छा अनुग्रहः । अनुग्रां शान्तामक्रोधां गां वाचमूचे कपिलदेवः । किमिति– तात वत्स, यज्ञीयो हयो नीयतामिति ॥ ४७ ॥

आश्वानीय कुमारोऽश्वं पितामहमखं महान् ।
साधयामास शान्तात्मा [1]शमी हि स्यात् पराक्रमी ॥ ४८ ॥

(भा.दी.) आश्विति । कुमारः कुमारवयस्कः, शान्तः शमोपेत आत्मा मनो यस्य स तथोक्तः, महान् गुणतः श्रेष्ठः अंशुमान्, पूर्वमपहृतो योऽश्वस्तम्, आशु आनीय पितामहस्य पितुः पितुः सगरस्य यो मखस्तं साधयामास । राध साध संसिद्धौ लिट् । अंशुमतः यज्ञसाधकत्वे हेतुभूतमसाधारणगुणमाह– **शमी**ति । शमोऽस्यास्तीति शमी, क्षमावानित्यर्थः, पराक्रमोऽस्यास्तीति पराक्रमी, प्रारब्धकार्यपर्यवसानवानित्यर्थः, स्याद्धि भवेद्धि । अस्तेर्लिङ् । क्षमालक्षणगुणोपेतत्वादेव स्वपितामहयज्ञमश्वमानीय साधितवानिति भावः । शमी भगवद्ध्यानशील इति वा ॥ ४८ ॥

(सं.चं.) महान् देवतोषणेन महाकार्यसाधनात् । तत्रार्थान्तरं न्यस्यति– शमी हि स्यात् पराक्रमी । 'शमः क्रोधाद्यनुत्थितिः' इत्यभिदधति । अक्रुध्यन् हि पराक्रमी स्यात् । स हि पराक्रमी यः प्रतिकूलमपि प्रसङ्गं स्वानुकूलतया परिवर्तयति । क्रोधेन जनितशक्तिह्रासो दुर्बलः स्वकार्यसाधनेऽक्षमो भवति । शान्तमनाः सर्वं साधयति । क्रोधः सर्वं विपर्यासयति । एवं शमी पराक्रमी भवति । पराक्रमी च शमी ॥ ४८ ॥

स्वर्गमार्गं गमयितुं ब्रह्मदण्डहतान् पितॄन् ।
स द्विजेन्द्राज्ञया तेपे तपो गङ्गावतारणम् ॥ ४९ ॥

(भा.दी.) स्वर्गेति । सः अंशुमान् ब्रह्मणो ब्राह्मणस्य कपिलस्य यो दण्डः दण्डनलक्षणं शासनं तेन निमित्तेन हतान् । 'दण्डोऽस्त्री शासने राज्ञां हिंसायां लगुडे दमे' इति वैजयन्ती । कपिलद्रोहनिमित्तेन हतानि-

१. 'क्षमी हि स्यात् पराक्रमी'

त्यर्थः । पितॄन् स्वपितृभूतान् सगरपुत्रान् स्वर्गस्य मार्गस्तं गमयितुं प्रापयितुं द्विजानां पक्षिणामिन्द्रो गरुडस्तस्य आज्ञया, गङ्गाया अवतरणमागमनं येन तथोक्तं तत्, भुवं प्रति गङ्गावतरणहेतुभूतमित्यर्थः, तपस्तेपे चक्रे । तप सन्तापे लिट् । ब्रह्मदण्डहतानां तेषां जलक्रियां कर्तुकाम आश्रमे जलाशयं नापश्यत् । तदा– 'विसार्य निपुणां दृष्टिं ततोऽपश्यत् खगाधिपम् । पितॄणां मातुलं राम सुपर्णमचलोपमम् । स चैनमब्रवीद् वाक्यं वैनतेयो महाबलः । मा शुचः पुरुषव्याघ्र वधोऽयं लोकसम्मतः । कपिलेनाप्रमेयेन दग्धा हीमे महाबलाः । सलिलं नार्हसि प्राज्ञ दातुमेषां हि लौकिकम् । गङ्गा हिमवतो ज्येष्ठा दुहिता पुरुषर्षभ । तस्यां कुरु महाबाहो पितॄणां तु जलक्रियाम्'(४१.१६–१९) इत्यादिरामायणवाक्यमनुरुद्धच सुमतिपुत्राणां सागराणां मातुलेन गरुडेन गङ्गावतरणार्थं तपः कुर्वित्युक्तत्वावगमाद् द्विजेन्द्राज्ञयेत्यस्य गरुडाज्ञयेत्यर्थः । यद्वा 'अश्वोऽयं नीयतां वत्स पितामहपशुस्तव । इमे च पितरो दग्धा गङ्गाम्भोऽर्हन्ति नेतरत्' इति भागवतवाक्यानुसारेण द्विजेन्द्राज्ञया कपिलाज्ञयेति वाऽर्थः । अविरोधस्तु कल्पभेदेनैकत्रोभयानुक्त्या वेत्यवगन्तव्यम् ॥ ४९ ॥

(सं.चं.) ब्रह्मदण्डः कपिलकृता शिक्षा । द्विजेन्द्रस्य कपिलस्य वैनतेयस्य चाऽज्ञया । काश्यपतनया हि सुमतिर्वैनतेयभगिनी । तेन स मातुलोंऽशुमतः । सोऽपि स्वभागिनेयान् षष्टिसहस्राणि कपिलनेत्राग्निदग्धानुद्दिधीर्षुः कृपयांऽशुमन्तं तेषां तरणोपायं गङ्गावतरणमाचष्ट । गङ्गाम्भसा पितॄंस्तर्पयेति कपिलदेव उवाचेति पुराणेषु । वैनतेय इति रामायणे । उभयसङ्गमनाय द्विजेन्द्राज्ञयेत्याह । पक्षीन्द्र इति वैनतेयो द्विजेन्द्रः । कपिलोऽपि देवहूत्यां कर्दममुनेर्जात इति द्विजेन्द्रः । द्विजेन्द्रयोराज्ञया । उभावप्यूचतुः । तेन न विरोध इत्यर्थः । गङ्गामवतारयतीति तादृशं तपः ॥ ४९ ॥

कालधर्म्मं गते तस्मिन्नकृतार्थे नरेश्वरे ।
तत्सुते च दिलीपाख्ये तस्थौ तपसि तत्सुतः ॥ ५० ॥

(भा.दी.) कालेति । अकृतः अनिष्पादितः अर्थः गङ्गावतरणलक्षणं प्रयोजनं येन स तथा तस्मिन् नरेश्वरे राज्ञि अंशुमति, कालधर्मं मरणम्, 'स्यात्पञ्चत्वं कालधर्मो दिष्टान्तम्' इत्यमरः, गते सति, तत्सुते अंशमत्सुते दिलीपाख्ये च कालधर्मं गते सति, तस्य दिलीपस्य सुतस्तत्सुतः भगीरथः तपसि तस्थौ । स्थाधातोर्लिट् ॥ ५० ॥

(सं.चं.) नरेश्वरेंऽशुमति । अत तत्सुतो दिलीपो गङ्गावतारणं तपस्तेपे । तस्मिन्नप्यकृतार्थे कालधर्मं गते तत्सुतो भगीरथस्तपसि तस्थौ ॥ ५० ॥

प्रसादाद् ब्रह्मणो गङ्गां प्राप्य[१] राजा भगीरथः ।
तस्याः पतन्त्या भर्त्तारं त्रिलोक्यां नाभ्यपद्यत ॥ ५१ ॥

(भा.दी.) प्रसादादिति । भगीरथः भगीरथनामा राजा, ब्रह्मणश्चतुर्मुखस्य प्रसादोऽनुग्रहस्तस्मात्, गङ्गां प्राप्य, स्वर्गादधोऽवतरणलक्षणं वरं प्राप्येत्यर्थः, स्वर्गादधः पतन्त्याः तस्याः गङ्गायाः भर्तारं धारकं पुरुषं त्रिलोक्यां नाभ्यपद्यत न लब्धवान् । पद गतौ लङ् ॥ ५१ ॥

(सं.चं.) भर्तारं वेगं निरुध्य धारयितारम् ॥ ५१ ॥

विष्णुपद्या धृतौ योग्यं वैष्णवाग्रेसरं हरम् ।
तोषयित्वैव तपसा तामवातारयन्नदीम् ॥ ५२ ॥

(भा.दी.) विष्ण्विति । भगीरथः विष्णुपद्याः गङ्गायाः धृतौ धारणे योग्यम्, विष्णोर्भक्ताः वैष्णवास्तेषु अग्रेसरः श्रेष्ठस्तम्, 'अग्रेसरमुत्तमं सत्तमं च' इति हलः, हरं रुद्रम्, तपसा (एव) तोषयित्वा तां नदीं गङ्गां अवातारयत् स्वर्गादवतारयामास । तॄ प्लवनतरणयोः लङ् ॥ ५२ ॥

(सं.चं.) विष्णुपद्या गङ्गाया धृतौ धारणे । वैष्णवाग्रेसर एव हि विष्णुपादोदकं शिरसि धर्तुमलम् ॥५२॥

तां हारगौरीमतिचित्रयात्रां जह्नोश्च[२] कन्यात्वमुपागतां सः ।
नीत्वा तदम्भःपरिषिक्तदेहं निनाय नाकं निजतातजातम् ॥ ५३ ॥

(भा.दी.) तामिति । सः भगीरथः, हारवत् मुक्तामालेव गौरीं श्वेताम्, अत्यन्तं चित्रा आश्चर्यभूता यात्रा गतिर्यस्याः सा तथा ताम्, जह्नोर्जह्नुनामकस्य राजर्षेः, कन्यात्वं सुतात्वं च उपागतां तां गङ्गाम्, नीत्वा यत्र सगरपुत्राणां देहपातो जातस्तद्देशं प्रति प्रापयित्वा[३], तस्या गङ्गाया यदम्भस्तेन परिषिक्ताः प्लाविताः

---

१. **'अनेन भगीरथः प्रथमं तपः कृत्वा चतुर्मुखं प्रसाद्य तत्प्रसादात् गङ्गां प्राप्य 'त्वमागच्छ' इति गङ्गां प्रत्युक्तवान् । गङ्गायाश्चाधः पतन्त्याः 'मम धारकं पुरुषं सम्पादय' इत्युक्तं पुरुषं त्रिलोक्यां नाभ्यपद्यतेत्युक्तं भवति'** इति का.श्री. ।

२. अत्र वि.भू.च का.श्री चेत्युभावपि व्याचक्षते–**'भीमस्तु विजयस्याथ काञ्चनो होतृकस्ततः। तस्य जह्नुः सुतो गङ्गां गण्डूषीकृत्य योऽपिबत्'** (९.१३.३) **इति श्रीमद्भागवते राजवंशकथनसमये कथनात् जह्नुरिति ब्रह्मर्षिर्न भवत्येव'** इति। तेन, केनापि पूर्वव्याख्यात्रा ब्रह्मर्षिरिति कथितं स्यादिति भाति ।

३. **'प्रापय्य'** इति युक्तम् ।

देहा यस्य तत्तथा तत्, निजाः स्वकीयाः ये ताताः पितरस्तेषां जातम्, जातं समूहस्तत्, नाकः स्वर्गस्तं प्रति निनाय प्रेषयामास । नीञो लिट् । भगीरथेन स्वपितृपितामहाभ्यामारब्धं कार्यमवश्यं साधनीयमित्यभिनिवेशेन ब्रह्माणं प्रति महत्तपोऽकारि । ततो गङ्गावतरणलक्षणं वरं लब्ध्वा तस्याः पातेन यथा भूभेदो न स्यात् तथा गङ्गाधारणसमर्थं रुद्रं च प्रसाद्य रुद्रेण तद्धारणे कारिते सति तज्जटाजूटादधः पतन्ती प्रसभं भगीरथमनुससार । तदा सदश्वयुक्तेनातिशीघ्रगामिना रथेन भगीरथो जह्न्वाश्रमसमीपे जगाम । तदा स्वयज्ञवाटं गङ्गयोन्मज्यमानं दृष्ट्वाऽसहिष्णुना जह्नुना भगवदनुद्ध्यानजनितयोगसामर्थ्येन तत्पानमकारि । तदा भगीरथादिभिः प्रसादितो जह्नुः स्वदक्षिणकर्णेन[1] गङ्गां विसर्जितवानिति जह्नुकन्यात्वं प्राप्तेति पौराणिकी प्रसिद्धिः ॥ ५३ ॥

(सं.चं.) मुक्ताहारगौरीं धवळगङ्गाम् । जह्नोश्च कन्यात्वमुपागताम् । 'यतो भगरीथो राजा ततो गङ्गा यशस्विनी । जगाम सरितां श्रेष्ठा सर्वपापविनाशिनी । ततो हि यजमानस्य जह्नोरद्भुतकर्मणः । गङ्गा सम्प्लावयामास यज्ञवाटं महात्मनः । तस्यावलेपनं ज्ञात्वा क्रुद्धो यज्वा तु राघव । अपिबच्च जलं सर्वं गङ्गायाः परमाद्भुतम् । ततो देवाः सगन्धर्वा ऋषयश्च सुविस्मिताः । पूजयन्ति महात्मानं जह्नुं पुरुषसत्तमम् । गङ्गां चापि नयन्ति स्म दुहितृत्वे महात्मनः । ततस्तुष्टो महातेजाः श्रोत्राभ्यामसृजत् पुनः । तस्माज्जह्नुसुता गङ्गा प्रोच्यते जाह्नवीति च' (४३.३३–८) इति हि रामायणे । भस्मतामापन्नं देहम् । पादत्रये इन्द्रवज्रा । तुरीयपादे चोपेन्द्रवज्रेत्युपजातिश्छन्दः ॥ ५३ ॥

हरिचरणसरोजसङ्गिनीयं हरति महच्च मलं न चित्रमेतत् ।
श्रवणमननकीर्त्तनानि विष्णोः परमपदाय मनोभिराम राम ॥ ५४ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
बालकाण्डे पञ्चमः सर्ग्गः ॥

—०—

(भा.दी.) हरीति । मनसः अभिराम मनोहर, श्रीराम, हरेश्चरणः सरोजमिव तस्य सङ्गोऽस्या अस्तीति तथोक्ता, इयं गङ्गा, महत् (च) मलं पापम्, 'मलं किट्टाघयोश्चास्त्री' इति वैजयन्ती, हरति नाशयति । हृञो लट् । इति यत्, एतत् महापापहरणं[2] चित्रमाश्चर्यं न भवति । यतः विष्णोः श्रीनारायणस्य श्रवणं

१. **'जह्नुः ऊरुं भित्त्वा गङ्गां विससर्ज'** इति का.श्री. । २. **'–पापापहरणम्'**

तन्माहात्म्यश्रवणं तच्च, मननं तद्विचारणं[1] तच्च, कीर्तनं तन्नामादिकथनं तच्च तानि । परममुत्तमं यत्पदं स्थानं तस्मै, मोक्षायेत्यर्थः, भवन्तीति शेषः । अतो न चित्रमित्यन्वयः ॥ ५४ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां बालकाण्डे पञ्चमः सर्गः ॥

—०—

(सं.चं.) महच्च मलमान्तरम् । विष्णोर्गुणानां श्रवणमननकीर्तनानि । विष्णोः परमपदाय परमपदप्राप्तये साधनानि भवन्ति । इयं तु संसारमेव हरतीति हरेः चरणसङ्गिनी मलं हरतीति किमु चित्रम्? मनस्यभिमुखीभूय रमयतीति मनोभिरामः । पुष्पिताग्रा छन्दः ॥ ५४ ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां बालकाण्डे पञ्चमसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– १९५+५४=२४९]

---

१. 'तद्विचारः'

षष्ठः सर्ग्गः

इत्थं कथासङ्कथनैः पुण्यश्लोकानुवर्त्तिनाम् ।
क्षणदाऽभूत् क्षणसमा सरामाणां द्विजन्मनाम् ॥ १ ॥

(भा.दी.) श्रीरामसन्निधौ तद्भक्तकीर्त्यनुकीर्तनपराणामृषीणां सा रात्रिः क्षणसमा बभूवेत्याह–**इत्थमि**ति । पुण्यः शोभनः श्लोकः कीर्तिर्यस्य रामस्य स पुण्यश्लोकः, तमनुवर्तितुं शीलमेषामस्तीति तथोक्तास्तेषाम्, रामेण सहिताः सरामास्तेषाम्, द्विजन्मनां ब्राह्मणानाम्, इत्थं कथायाः गङ्गावतरणादिकथायाः सङ्कथनैः, क्षणदा रात्रिः, क्षणेन समा तुल्या अभूत् । समग्राऽपि सा रात्रिः कथासङ्कथनलोलुपानां क्षण इवातीतेति भावः ॥ १ ॥

(सं.चं.) पुण्यश्लोको भगवान् । तदनुवर्तिनां भगवद्भक्तानां कथासङ्कथनैः । ज्ञानसाधनं कथनं सङ्कथनम् । प्रसङ्गसङ्गतं कथनं सङ्कथनम् । पुण्यश्लोकानुवर्तिनां द्विजन्मनां विश्वामित्रादीनाम् । क्षणदा निशा । 'क्षपा त्रियामा क्षणदा निशीथिनी' इत्यभिधानम् ॥ १ ॥

नानामुनियुतौ नावा कोसलेन्द्रौ सकौशिकौ ।
उत्तरं तीरमुद्दिश्य तेरतुः सुरनिम्नगाम् ॥ २ ॥

(भा.दी.) **नाने**ति । नानाविधतपोयुक्तत्वान्नानाविधा ये मुनयस्तैः युतौ युक्तौ, सकौशिकौ विश्वामित्रसहितौ, कोसलानां कोसलविषयाणामिन्द्रौ श्रीरामलक्ष्मणौ, उत्तरं उत्तरभागस्थं तत् तीरं उद्दिश्य नावा द्रोण्या सुरनिम्नगां गङ्गां तेरतुः । तॄ प्लवनतरणयोर्लिट्[1] ॥ २ ॥

(सं.चं.) दक्षिणतीरादुत्तरतीरं गन्तुम् । पूर्ववाहिनीं गङ्गां तेरतुः ॥ २–३ ॥

वैशालीं नाम नगरीं विशालेन पुरा कृताम् ।
चारुशालां विशालां च विविशुस्ते महोदयाम् ॥ ३ ॥

---

१. 'तरतेर्लिट्'

(भा.दी.) वैशालीमिति । ते श्रीरामाद्याः, विशालेन विशालनामकभूपेन पुरा कृतां कारिताम्, चारवः शालाः गृहाणि यस्यां सा तथा ताम्, 'शाला वेश्म निवेशनोदवसिते प्रोक्ते' इति हलः, विशालाम्, महानुदयः ऐश्वर्याद्यभ्युदयो यस्यां सा तथा (ताम्), विशालेन कृतत्वाद्वैशालीं नाम प्रसिद्धां नगरीं विविशुश्च । विशतेर्लिट् ॥ ३ ॥

विशालस्य नृपस्याऽदिं राघवायाभ्यधान्मुनिः ।
तस्य वंशं च यद्वंश्यैर्वैशाली शुशुभे पुरी ॥ ४ ॥

(भा.दी.) विशालस्येति । मुनिः विश्वामित्रः, विशालस्य विशालनाम्नो नृपस्य, आदिः उत्पत्त्यादिपूर्वोदन्त-स्तम्, श्रीराघवाय अभ्यधात् अकथयत् । धाधातोर्लुङ् । तद्वंशकथनस्य का सङ्गतिरित्यत आह– **यदि**ति । यस्य विशालस्य वंशस्तस्मिन् भवाः यद्वंश्यास्तैः नृपैः, वैशाली वैशालीनाम्नी पुरी शुशुभे, शुभ दीप्तौ लिट्, तस्य विशालस्य वंशस्तं च अभ्यधात् । अभिपूर्वो धारणाद्यर्थकोऽपि कथनार्थकः ॥ ४ ॥

(सं.चं.) आदिमुत्पत्तिकथाम् ॥ ४ ॥

ममन्थुरम्बुधिं दौग्धं[1] पूर्वं सर्वे सुरासुराः ।
तत्राऽसीन्मन्दरो मन्था नेत्रं नेत्रश्रुतीश्वरः ॥ ५ ॥

(भा.दी.) विशालस्योत्पत्तिं वक्तुं तदुपयुक्तमितिहासमाह– **ममन्थु**रित्यादिना । पूर्वं सर्वे सुरासुराः दुग्धानां सम्बन्धी दौग्धस्तं अम्बुधिं ममन्थुः । मन्थ विलोडने[2] लिट् । तत्र मथनकर्मणि मन्दरः मन्दराख्यपर्वतः मन्थाः मथनदण्डः आसीत् । अस्तेर्लङ् । नेत्रं चक्षुरेव श्रुतिः श्रोत्रं येषां ते सर्पाः ते तथोक्तास्तेषामीश्वरः वासुकिः, 'श्रुतिर्वेदे श्रवस्यपि' इति वैजयन्ती, नेत्रं मथनदण्डपाशः, 'नेत्रं नाड्यां तरोर्मूले वस्त्रे दृशि मथो गुणे' इति च, आसीत् ॥ ५ ॥

(सं.चं.) नेत्रश्रुतयश्चक्षुःश्रवसः सर्पाः । तेषामीश्वरो वासुकिर्नेत्रं मन्थानरज्जुः । 'नेत्रं पट्टे मन्थगुणे तरुमूले विलोचने' इति मङ्खः ॥ ५ ॥

सहस्रहस्तो भगवान् स्थिरीचक्रेऽद्रिमुद्गतम् ।
अधस्तादपि गच्छन्तं कच्छपः करुणाकरः ॥ ६ ॥

१. **'–रम्बुधिं दोग्धुम्'**
२. मन्थतिर्भ्वादौ पठ्यते– **मन्थति । ममन्थ ।** क्र्यादावपि – **मथ्नाति । ममन्थ ।**

(भा.दी.) सहस्रेति । सहस्रसङ्ख्याका हस्ता यस्य स तथा भगवान् अजितनाम्नाऽवतीर्णो हरिः, ऊर्ध्वं गत उद्गतस्तम्, अद्रिं मन्दरं स्थिरीचक्रे । मथनसमये यथोर्ध्वदेशं न गच्छति तथा गृहीतवा-नित्यर्थः । अधस्तादपि अधोभागेऽपि गच्छन्तं मन्दरं करुणाया आकर आश्रयः श्रीहरिः कच्छपः कूर्मरूपी सन् स्थिरीचक्र इत्यन्वयः । देवेषु विद्यमानकरुणावशादेव कच्छपाद्यनेकरूपं धृत्वाऽद्रिवहनादिकं लीलया करोतीति भावः ॥ ६ ॥

(सं.चं.) सहस्रहस्तोऽनन्तबाहुर्नारायणोऽजितात्मा उपरि स्थिरीचक्रे । कच्छपोऽधस्तात् स्वपृष्ठे दधत् स्थिरीचक्रे ॥ ६ ॥

सुरासुरेषु श्रान्तेषु सङ्गृह्याहिमिहाजितः ।
मन्दरं [१]स ममन्थाथ चलत्कङ्कणकुण्डलः[२] ॥ ७ ॥

(भा.दी.) सुरेति । अथ इह मथनकर्मणि सुरासुरेषु श्रान्तेषु सत्सु, अजितः अजितनाम्नाऽवतीर्णः श्रीहरिः, अहिर्वासुकिस्तं सङ्गृह्य, कङ्कणानि करभूषणानि तानि च कुण्डले च कङ्कणकुण्डलानि चलन्ति तानि यस्य स तथा सन्, मन्दरं ममन्थ परिवर्तयामास । मन्थ विलोडने लिट् ॥ ७ ॥

(सं.चं.) अजितश्चाक्षुषमन्वन्तरीय उपेन्द्रः । स्वयमहिं सङ्गृह्य मन्दरं ममन्थ ॥ ७ ॥

चन्द्रेन्दिरादयो जाताः सरसोऽप्सरसां गणः[३] ।
हरिर्धन्वन्तरिस्तत्र सुधाकलशवानुदैत् ॥ ८ ॥

(भा.दी.) चन्द्रेति । चन्द्रश्च इन्दिरा च आदी येषां कामधेन्वादीनां ते तथा तत्र समुद्रे जाताः । रसेन रूपलावण्यादिना सहितः सरसः । 'शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः' इत्यमरः । अप्सरसां अप्सर-स्त्रीणां गणः समूहः जातः । 'गणाः' इति पाठे सरसः समुद्ररूपात् सरस इत्यर्थः । 'सरसामस्मि सागरः' इत्युक्तेः । समुद्रोदकादिति वा । 'सरोऽप्सु च' इति वैजयन्ती । हरति आहरति भक्ताभीष्टमिति हरिः श्रीनारायणः, सुधापूर्णो यः कलशः सोऽस्यास्तीति तथोक्तः धन्वन्तरिः धन्वन्तरिनामकः सन् उदैत् अव-तीर्णः । इण् गतौ लङ् ॥ ८ ॥

१. **'मन्दरं स ममन्थात्र'** इति **'मन्दरं च ममन्थाथ'** इति च क्वचित् । २. **'चलत्कङ्कणभूषणः'**
३. **'सरसोऽप्सरसां गणाः'** इति, **'सरसाप्सरसां गणाः'** इति च क्वचित् ।

(सं.चं.) सरसः शृङ्गारशीलोऽप्सरसां गणः । अथच सरसः सविषः अप्सरसां गणः । न केवलं चित्तमोहनोऽप्सरसां गणः । विषमपि तत एव जातम् । मोहकत्वसाम्यादप्सरोभिः सहोक्तिः । 'ब्रह्मपुत्रः शौक्लिकेयो दारदश्च प्रदीपनः । रसः सौराष्ट्रिकः क्ष्वेळस्तीक्ष्णश्च विषमुच्यते' इत्यभिधानम् ॥ ८ ॥

अमृतं हरतो मोहादसुरानसुरान्तकः ।
मोहयन् महिळारूपी हृत्वा स्वेभ्यो ददौ सुधाम् ॥ ९ ॥

(भा.दी.) अमृतमिति । असुराणामन्तको मृत्युः श्रीहरिः, अमृतं पीयूषं तत्, अमृतकलशमित्यर्थः, मोहो मौर्ख्यं तस्मात्, 'मोहाः क्रुन्मौर्ख्यमूढताः' इति वैजयन्ती, हरतः धन्वन्तरिहस्तादेव हरतः असुरान्, महिळायाः स्त्रियाः रूपं महिळारूपं तदस्यास्तीति तथोक्तः, नारायणीरूपेणावतीर्णः सन्नित्यर्थः, 'अबला महिळा ललना' इति हलः, असुरान् मोहयन् सन्, सुधां असुरेभ्यः हृत्वा अपहृत्य स्वे स्वकीया देवास्तेभ्यः ददौ । डु दाञ् दाने लिट् । अमृतकलशमन्यायेनापहृतं दृष्ट्वा श्रीहरिः स्त्रीरूपं बभार । तद्रूपं दृष्ट्वा मोहिताः सन्तः इदममृतं देवानामस्माकं च विभज्य परिवेषयेति स्वयमेव तद्वशे ददुः । सा च तामसप्रकृतीनां जरामरणहार्यमृत-पानमनुचितमिति मत्वा देवासुरान् पृथक् पङ्क्तिषु स्थापयित्वा देवानामेव परिवेषणं कृत्वाऽन्तर्दध इति हि पौराणिकी प्रसिद्धिः ॥ ९ ॥

(सं.चं.) मोहः स्वेयत्तापरिज्ञानवैधुर्यम्, युक्तायुक्तविवेचनशक्तिवैधुर्यं च । अमृतममृताश्रयं कलशम् । असुरेभ्यः कलशं हृत्वा आहृत्य स्वेभ्यः स्वभक्तेभ्यो देवेभ्यः सुधां ददौ ॥ ९ ॥

पुनः सुरासुररणे हतपुत्रा दितिः पतिम् ।
विलोभ्य गर्भं लेभे यं तं चकर्त्त च वज्रभृत् ॥ १० ॥

(भा.दी.) पुनरिति । सुरा इन्द्रादयस्ते च असुरा बल्यादयस्ते च तेषां यो रणस्तस्मिन् । 'रणोऽस्त्री युधि ना ध्वनौ' इति वैजयन्ती । हताः पुत्राः यस्याः सा तथा दितिः दैत्यमाता पतिं भर्तारं काश्यपं विलोभ्य वञ्चयित्वा, स्वकृतातिशयितसेवातुष्टेन काश्यपेनाभीप्सितं वरं प्रदद्यामिति प्रतिज्ञाते सति 'यदि मह्यं तुष्टोऽसि तर्हीन्द्रहणं पुत्रं देहि' इत्युक्तवरेण वञ्चयित्वेत्यर्थः, पुनः यं गर्भं लेभे, डु लभष् प्राप्तौ लिट्, तं गर्भं वज्रभृदिन्द्रः चकर्त च । कृती च्छेदने लिट् । दित्या उत्पत्स्यमानं पुत्रं वरबलात् स्वहन्तारं ज्ञात्वा तच्छेदनार्थं तन्निकटे ब्रह्मचारिस्वरूपेण तस्याः सेवां कुर्वन् पुरन्दरः, संवत्सरं चेन्मदुपदिष्टं वैष्णवं व्रतं निर्विघ्नं चरिष्यसि

तर्हीन्द्रहन्ता पुत्रो भविष्यतीति काश्यपोक्तं व्रतं चरन्त्याः कदाचिद् व्रतच्छिद्रं दृष्ट्वा गर्भं चिच्छेदेति भावः ॥ १० ॥

(सं.चं.) पुनः सुधावञ्चितैरसुरैः सम्प्रवृत्ते सुरासुररणे । स्त्रीसहजेन हावेन निरन्तरपरिचर्यया च पतिं काश्यपं विलोभ्य मृदुतया स्वानुकूलं कृत्वा । वज्रभृत् वज्रेण चकर्त गर्भम्, एकोनपञ्चाशच्छकलात्मना ॥ १० ॥

मा रोदीरिति सोऽवादीद् यद्गर्भदळनाद्धरिः[1] ।
तस्मात् ते मरुतो नाम महेन्द्रस्याभवन् प्रियाः ॥ ११ ॥

(भा.दी.) **मे**ति । (यत्) यस्मात् स हरिः इन्द्रः । 'अर्कमर्कटमण्डूकविष्णुवासववायवः । तुरङ्गसिंहशीतांशु-यमाश्च हरयो दश' इति हलः । गर्भस्य दळनात् विभागात्, मा+रोदीरिति पदच्छेदः, रोदनं मा कुरु । रुदिर् अश्रुविमोचने लुङ् । 'न माङ् योगे' (अ.सू.६.४.७४) इत्यडभावः । इति एवमादिप्रकारेण अवा-दीत् । वद व्यक्तायां वाचि लुङ् । तस्मात् रुत् रोदनं मा इत्युक्तत्वात् ते गर्भविदळाः मरुत इति प्रसिद्धाः । महेन्द्रस्य पुरन्दरस्य प्रियाः सन्तः अभवन् उत्पन्नाः ॥ ११ ॥

(सं.चं.) गर्भदळनाद्धेतोः मा रोदीरिति तं गर्भं हरिरिन्द्रोऽवादीत् सान्त्वयामास । मा न विद्यते रुत् रोदनं येषां ते मरुतो नाम । आद्यक्षरस्य ह्रस्वता । 'इन्द्रो दुश्च्यवनो हरिः सुरपतिः' इति च । हरिरिति मुख्यतो विष्णुरेव । 'हरिं हृषीकेशमुदाहरन्ति' इति ह्यभिदधति । तेनेन्द्रगतो विष्णुरेवैतच्चकारेति गम्यते । तदेतन्म-हेन्द्रपदेनाप्याह– विष्णोः सन्निधानविशेषेण महानिन्द्र इति ॥ ११ ॥

उत्तमश्लोकभक्तानामुत्तमाः स्युर्हि सम्पदः ।
अन्येषामन्यथा दृष्टा[2] दृष्टान्तास्तत्र हीदृशाः ॥ १२ ॥

(भा.दी.) दैत्यैरमृतार्थं यत्ने कृतेऽप्यमृतं न लब्धम्, इन्द्रेण दित्या गर्भच्छेदे कृतेऽपि ते पुनरिन्द्रप्रियाः सन्तो जाता इत्यत्र किं निमित्तमित्यत आह– **उत्तमे**ति । उत्तमः श्लोकः कीर्तिर्यस्य स तथा तस्य हरेर्ये भक्ता देवादयस्तेषां उत्तमाः सम्पदः स्युः भवेयुर्हि । अस्तेर्लिङ् । अन्येषां विष्णवभक्तानां अन्यथा अन्यप्रकारेण, फलानीति शेषः, स्युः । तत्र इत्येतस्मिन्नर्थे ईदृशाः एवंविधा दृष्टान्ताः निदर्शनानि दृष्टा हीत्यन्वयः । देवानां

१. **'गर्भदलनाद् गर्भविदारणात् रुदतः जीवान् 'मा रोदीः' इति प्रत्येकमवादीत्'** इति का.श्री. ।

२. **'दृष्टान्ताः निर्णीतस्थलानि'** इति च ।

विष्णुभक्तत्वात् दित्या चातियत्नेन वैष्णवव्रतस्य पत्युरनुज्ञया करणात् स्वाभीष्टावाप्तिर्जाता न दैत्यानामिति भावः ॥ १२ ॥

(सं.चं.) दित्यां जाता दैत्या स्युः । कथं देवा बभूवुः? इन्द्रेण गर्भदलनादिन्द्रशत्रवः स्युः? कथमिन्द्रप्रिया बभूवुः? भगवद्भक्तेषु सर्वं सङ्गच्छत इत्याह– उत्तमश्लोकभक्तानाम् ॥ १२ ॥

तासामप्सरसां मद्ध्ये रम्यामाहुरलम्बुसाम् ।
तस्यामयं विशालोऽभूदिक्ष्वाकोस्तव पूर्वजात् ॥ १३ ॥

(भा.दी.) प्रकृतमनुसरति– **तासामिति** । तासाममृतमथने उत्पन्नानां अप्सरसां मद्ध्यं मण्डलं तस्मिन् अलम्बुसां अलम्बुसानाम्नीं रम्यां आहुः, जना इति शेषः । ब्रूञ्धातोर्लट् । तस्यां अलम्बुसायां, हे राम, तव पूर्वमुत्पन्नः पूर्वजस्तस्मात् इक्ष्वाकोः इक्ष्वाकुनाम्नो राज्ञः अयं एतन्नगरकर्ता विशालः अभूत् ॥ १३ ॥
(सं.चं.) तासां दुग्धाब्धिमथने जातानामप्सरसां मध्ये । अलम्बुसायामिक्ष्वाकोर्जातोऽयं विशालः । न केवलमेतत् । अयं स देशो यत्रेन्द्रो दितिं परिचचार, यत्रैकोनपञ्चाशन्मरुतोऽजायन्त । अत एव मरुत्कथामपि सञ्जग्राह । विशालेन निर्मिता नगरी वैशाली ॥ १३ ॥

इत्थमालपतो दृष्ट्वा प्रविष्टान् पुरुषर्षभान् ।
सुमतिर्म्मतिमान् पुर्य्यां [1]वैशालिस्तानपूजयत् ॥ १४ ॥

(भा.दी.) इत्थमिति । विशालगोत्रभवो वैशालिः[2] मतिमान् ज्ञानी अत एव सुमतिः सुमतिनामको राजा इत्थं एवमादिप्रकारेण आलपतः, आभाषणं कुर्वतः, प्रविष्टान् स्वपुरीं प्रत्यागतान्, पुरुषर्षभान् पुरुषश्रेष्ठान्, तान् श्रीरामादीन् दृष्ट्वा पुर्यां अपूजयत्, अर्घ्याद्युपचारैः पूजितवान् । पूज पूजायां लङ् ॥ १४ ॥
(सं.चं.) वैशालिः विशालवंशजः सम्प्रति वैशालीपतिः सुमतिः ॥ १४ ॥

विजानन् विप्रवचनाद् राजा तौ[3] रामलक्ष्मणौ ।
अलाळयज्जगल्लाल्यौ[4] भूयो भुवनसुन्दरौ ॥ १५ ॥

---

१. **'वैशालस्तानपूजयत्'** २. **'वैशालः'** ३. **'राजानौ रामलक्ष्मणौ'**
४. **'लाल्यौ वाचा पूजनीयौ अलालयत् वाचा पूजयामास । 'लल पूजने'** इति का.श्री. ।

(भा.दी.) विजानन्निति । विप्रस्य विश्वामित्रस्य यद्वचनं तस्मात् विजानन् इमौ दशरथपुत्रावित्यादिप्रकारेण जानन् राजा सुमतिनामकः जगति लाल्यौ प्रशंस्यौ भुवने सुन्दरौ तौ श्रीरामलक्ष्मणौ भूयः पुनःपुनः अलाळयत् अमानयत् । लल ईप्सायां[१] लङ् ॥ १५ ॥

(सं.चं.) अलाळयत् प्रीत्योपचचार । लड लळ उपसेवायाम् । प्रीतिपूर्वं सेवनमुपसेवनम् ॥ १५ ॥

निर्वर्त्त्य शर्वरीं तत्र प्रभाते निर्ग्गतः पुरात् ।
मिथिलोपवनं मन्दपवनं प्राप राघवः ॥ १६ ॥

(भा.दी.) निर्वर्त्येति । तत्र तस्यां पुर्यां तां शर्वरीं निशां निर्वर्त्य निर्गमयित्वा[२], प्रभातः प्रातःकालस्तस्मिन् पुरं वैशालीनगरं तस्मात् निर्गतः निःसृतः श्रीराघवः, मन्दः स्वल्पः पवनो यस्मिन् तत्तथा तत्, मिथिलायाः जनकनगर्या उपवनं आरामम्, 'आरामः स्यादुपवनं कृत्रिमं वनमेव यत्' इत्यमरः, प्राप ॥ १६ ॥

(सं.चं.) मिथिलाया उप समीपे यद् वनम् । मिथिलाया उपवनमिव च ॥ १६ ॥

मिथिलोपवनप्रान्ते[३] दर्शयन्नाश्रमान्तरम् ।
गाधिसूनुरुवाचेदं मधुरं मधुसूदनम् ॥ १७ ॥

(भा.दी.) मिथिलेति । मिथिलाया उपवनं तस्य प्रान्तः समीपं तस्मिन्, अन्य आश्रम आश्रमान्तरं तत्, श्रीरामाय दर्शयन् गाधेः सूनुः विश्वामित्रः, मधुं मधुनामकदैत्यं सूदितवान् संहृतवानिति मधुसूदनस्तं श्रीरामं प्रति मधुरं यथा भवति तथा इदं वक्ष्यमाणं वचः उवाच । वच परिभाषणे लिट् ॥ १७ ॥

(सं.चं.) मधु रातीति मधुरमानन्ददम्, असतां मधु सूदयतीति मधुसूदनं मधुरमुवाच ॥ १७ ॥

अतिरिक्तं तपो हर्त्तुं गौतमस्याऽश्रमे त्विह[४] ।
सुरकार्य्यं सुरपतिः कुर्वन् भार्य्यां समस्पृशत् ॥ १८ ॥

(भा.दी.) अतीति । सुराणां कार्यं गौतमतपोहानिलक्षणं तत् कुर्वन् सुरपतिः पुरन्दरः गौतमस्य मुनेः स्वयोग्यतायाः अतिरिक्तं अधिकं तत् तपः, तु विशेषेण हर्तुं शापदापनेनापहर्तुं इह अस्मिन् आश्रमो मुनिवासस्तस्मिन् भार्यां अहल्यां समस्पृशत् धर्षितवान् । स्पृशतेर्लङ् ॥ १८ ॥

---

१. **'लड उपसेवायाम्'** इत्युचितम् । २. **'निर्गमय्य'** इति युक्तम् । ३. **'मिथिलोपवनस्यान्ते'** ४. **'गौतमस्याऽश्रमेऽरिहा'**

(सं.चं.) समस्पृशत् सम्बुभुजे ॥ १८ ॥

ऋषिराश्रममाश्रित्य[1] तज्ज्ञात्वा कुपितोऽशपत् ।
विफलः स्यादुपपतिरुपला[2] भव पुंश्चलि ॥ १९ ॥

(भा.दी.) **ऋषिरि**ति । ऋषिः गौतमः आश्रमं आविश्य (तत्) इन्द्रकृतं कर्म ज्ञात्वा कुपितः क्रुद्धः सन्, उपपतिः जारः इन्द्रः विगतं फलं वृषणलक्षणं बीजं यस्य स तथोक्तः स्यात् । अस्तेर्लिङ् । 'लाभनिष्पत्तिभोगेषु बीजे फाले धने फलम्' इति वैजयन्ती । हे पुंश्चलि व्यभिचारिणि अहल्ये, उपला शिला भव, इति अशपत् । शप आक्रोशे लङ् ॥ १९ ॥

(सं.चं.) आश्रित्य, आगत्य प्रविश्येति यावत् । तत् इन्द्रकृतं स्वदारधर्षणम् । उपपतिरहल्याजारः । 'जारो ह्युपपतिः स्मृतः' इति च । विफलो विगतवृषणः षण्ढः । 'शापमोक्षेण महता तपोऽस्यापहृतं मया' इति रामायणे । उपलीभव शिलीभव । अनुपलस्योपलवद् भाव उपलीभावः । अभूतस्य तद्भावो हि तद्भावो नाम । नहि पूर्वमभूतः पश्चात् स एव क्वापि भवति । नहि चेतनस्य जडता जडस्य चेतनता वा सम्भवति । विकारिभावस्तु स्यात् । यथा– घटीकरोति मृदम् । 'उपला भव' इति प्रायो लिपिकृतां प्रमादः । 'पुंश्चल्यसती कुलटेत्वरी' इति यादवप्रकाशः । बहुभिः पुम्भिः सह चलति क्रीडतीति पुंश्चली । चल विलसने । पुंसः पत्युः सकाशादन्यत्र चलति वा ॥ १९ ॥

रामावलोकनाद् रामा भवेति च कृपाकरः ।
शापमोक्षं स्वजायायै सोऽहल्यायै प्रदत्तवान् ॥ २० ॥

(भा.दी.) स्वकीयरूपधारिणेन्द्रेण वञ्चितामहल्यां ज्ञात्वा तयाऽर्थितेनानुग्रहश्च कृत इत्याह– **रामे**ति । कृपाया आकर आश्रयः सः गौतमः, श्रीरामस्य अवलोकनं दर्शनं तस्मात् रामा स्त्रीभावा भव, इति स्वस्य जायायै स्वभार्यायै अहल्यायै शापस्य मोक्षस्तं (च) प्रदत्तवान् ॥ २० ॥

---

१. **'–श्रममाविश्य'**

२. **'उपला भव'** इति सर्वत्रोपलब्धः पाठः । नहि शिला उपलेत्युच्यते । किन्तूपल इति । शर्करामुपलामाहुः । तस्मादयं पाठः प्रामादिक इति भाति । **'उपलीभव'** इत्येव साधुपाठः स्यात् । **'प्रधर्षणादिन्द्रकृताच्छिलीकृताम्'** इति निर्णयवचनं चानेन संवदते । का.श्री. टीकायां तु– **'यद्यप्युपलशब्दः पुल्लिङ्गः । तथाऽपि स्त्रीलिङ्गेऽप्युपलाशब्दोऽस्तीति 'उपला भव' इति पाठस्य साधुत्वम् । 'शिला भव च पुंश्चलि' इति पाठे तु न क्लेशः'** इत्युक्तम् । नातिरुचिरमेतद् विवरणम् ।

(सं.चं.) रामा रमणीया योषित् । प्रदत्तवान् । प्रेति विष्णुवचनम् । 'अकयप्र–' इत्यादिस्मरणात् । स्वस्मिन्नाविष्टेन विष्णुनैव प्रेरितो दत्तवान् ॥ २० ॥

पितृदेवाः सुरेन्द्राय ददुरुत्कृत्य योगतः ।
[१]निजमेषस्य वृषणं स मेषवृषणोऽभवत्[२] ॥ २१ ॥

(भा.दी.) **पित्रिति** । [३]पितरश्च देवाश्च पितृदेवाः, मेषोऽजस्तस्य निजं देहसम्बन्धि तत् वृषणं योगतः योगसामर्थ्यात् उत्कृत्य यतः सुरेन्द्राय ददुः, डु दाञ् दाने लिट्, ततः कारणात् सः शचीपतिः मेषस्य वृषणमेव वृषणं यस्य स तथा अभवत् ॥ २१ ॥

(सं.चं.) योगतः भगवति मनोयोगेन लब्धसिद्धिबलात् । '–पितृदेवाः समागताः । उत्पाट्य मेषवृषणौ सहस्राक्षे न्यवेशयन् । इन्द्रस्तु मेषवृषणस्तदाप्रभृति राघव' (४९.९–१०) इति रामायणे ॥ २१ ॥

महेन्द्रस्य मनःशल्यं त्वद्भक्तस्य समुद्धर ।
करुणां कुरु कल्याण्यां भवान् हि करुणाकरः ॥ २२ ॥

(भा.दी.) **महेन्द्रस्येति** । हे राम, त्वं तव भक्तस्त्वद्भक्तस्तस्य महेन्द्रस्य मनसः शल्यमिव मनःशल्यं तत्, मन्निमित्तमियं शिलाऽभूदहो इति मनोव्यथामित्यर्थः, समुद्धर विनाशय । [४]धृञ् धारणे लोट् । कल्याण्यां पातिव्रत्यादिगुणैः शोभनायां करुणां कुरु । करुणाशीलं त्वां प्रति बहुधा न विज्ञापनीयमित्याह– **भवानिति** । भवान् करुणाकरो हि ॥ २२ ॥

(सं.चं.) मन्निमित्तमहल्या शापमापेति मनःशल्यम् । कल्याण्यामशुभलेपरहितायाम्, तपसा क्षालिताघायां च । करुणाकरः । भवानेव हि मुनौ सन्निधाय तं कृपाकरं विधाय शापमेक्षं ददौ ॥ २२–३ ॥

कौशिकेनैवमुदितो मुदितो गत आश्रमम्[५] ।
प्रैक्षत प्रेक्षणीयेन तामपाङ्गेन शार्ङ्गभृत् ॥ २३ ॥

(भा.दी.) **कौशिकेनेति** । कौशिकेन विश्वामित्रेण एवं उदितः, तद्वचनं श्रुत्वा मुदितः सन्तुष्टः, गौतमस्य य आश्रमस्तं गतः, शार्ङ्गं बिभर्तीति शार्ङ्गभृत् श्रीरामः, प्रेक्षणीयेन मनोहरेण अपाङ्गो नेत्रान्तस्तेन तां शिलाभूतां अहल्यां प्रैक्षत । ईक्षतेर्लङ् ॥ २३ ॥

१. **'निजं मेषस्य वृषणं'** इति वि.ती.पाठः । २. **'मेषवृषणस्ततः'** इति च । ३. **'गौतमपितरश्च देवाश्च पितृदेवाः'** इति.का.श्री. ।
१. **'हृञ् हरणे'** इति समुचितम् । ५. **'गौतमाश्रमम्'**

सा तद्दर्शनमात्रेण कान्ता कान्तप्रिया बभौ ।
न तच्चित्रं हरौ विश्वं यद्भ्रूविभ्रमसम्भवम् ॥ २४ ॥

(भा.दी.) सेति । सा शिलाभूता अहल्या तस्य श्रीरामस्य दर्शनमात्रं तेन कान्तस्य भर्तुः प्रिया प्रीतिविषया कान्ता स्त्री सती बभौ । भातेर्लिट् । एतच्च श्रीरामस्य न चित्रमित्याह– **न तदिति** । विश्वं सकलं जगत् यस्य श्रीरामस्य भ्रूस्तस्या विभ्रमश्चलनं तेन सम्भवतीति तथोक्तम्, तस्मिन् श्रीरामे शिलाभूतायाः स्त्रीभावकरणं चित्रं न ॥ २४ ॥

(सं.चं.) सा शिलीभूताऽहल्या । कान्ता कमनीया बभौ । कान्तस्य शान्तकोपस्य गौतमस्य प्रिया च । विभ्रमो विलासः ॥ २४ ॥

उदारचरितं रामं सदारः पर्य्यपूजयत् ।
गौतमो भक्तिभरितो विश्वामित्रं च मानयन्[1] ॥ २५ ॥

(भा.दी.) उदारेति । भक्त्या भरितः पूरितः गौतमः, उदारमुत्कृष्टं चरितं चरित्रं यस्य स तथा तम्, श्रीरामं दारैर्भार्यया सहितः सभार्यस्तथा सन्, अहल्यासहितः सन्नित्यर्थः, विश्वामित्रं च मानयन् सन्, पर्यपूजयत् अर्घ्यादिनाऽपूजयत् । पूज पूजायां लङ् ॥ २५ ॥

(सं.चं.) तदैव तत्राऽगतो गौतमः रामं पर्यपूजयत् । माहात्म्यपरिज्ञानपूर्वकं परदेवतात्वेनापूजयत् । 'सम्यग् गुणगणज्ञानादुपासा पर्युपासना' इति गीतातात्पर्यनिर्णये । विश्वामित्रं च गौरवेण मानयन् सम्भावयन् ॥ २५ ॥

ततः प्रागुत्तरां प्राप्तो दिशं देशे विशङ्कटे ।
यज्ञवाटं स यज्ञेशो जनकस्य समैक्षत ॥ २६ ॥

(भा.दी.) तत इति । ततः गौतमाश्रमात् प्राच्याः पूर्वस्याः उत्तरस्याश्च अन्तराळा दिक् सा प्रागुत्तरा ताम्, ऐशानीमित्यर्थः, दिशं प्राप्तः यज्ञानां फलदातृत्वेनेशः यज्ञेशः (सः) श्रीरामः विशङ्कटे विशाले, 'विशङ्कटं पृथु बृहद् विशालम्' इत्यमरः, देशः प्रदेशस्तस्मिन् जनकस्य जनकनाम्नो राज्ञः, निमेर्देहमथनाज्जातत्वान्निमिपुत्रस्य, तद्वंशजानां जनका इति साधारणी सञ्ज्ञा, यज्ञस्य वाटः शाला तं समैक्षत । ईक्षतेर्लङ् ॥ २६ ॥

---

१. 'विश्वामित्रममानयत्'

(सं.चं.) 'विशङ्कटं विशालं स्यात्' इति च । यज्ञवाटो यज्ञार्थमावेष्टिता भूमिः । 'वाटो मार्गे वृतिस्थाने' इति मेदिनी । यज्ञेशो भगवान् रामः ॥ २६ ॥

जनतापरिपूर्णस्य यज्ञवाटस्य राघवः ।
नातिदूरे विविक्ते स्म स्थल आस्ते सकौशिकः ॥ २७ ॥

(भा.दी.) जनतेति । कौशिकेन विश्वामित्रेण सहितः सकौशिकः राघवः, जनानां समूहो जनता, तया परिपूर्णस्य, यज्ञस्य वाटः शाला तस्य, अतिदूरं न भवतीति नातिदूरं तस्मिन्, समीप इत्यर्थः, नसमासत्वान्नैकधेत्यादिवन्नलोपाभावः, विविक्ते जनसम्मर्दरहिते स्थले आस्ते स्म समास्थितः ॥ २७ ॥
(सं.चं.) विविक्ते निर्जने निर्मले च । 'विविक्तौ पूतविजनौ' इति मङ्खः ॥ २७ ॥

अपूर्वपुरुषोपेतं विश्वामित्रमुपागतम् ।
जनकोऽभिययौ श्रुत्वा शतानन्दादिभिर्युतः[1] ॥ २८ ॥

(भा.दी.) अपूर्वेति । पूर्वमदृष्टोऽपूर्वः स चासौ पुरुषश्च तेन उपेतं सहितम्, श्रीरामसहितमित्यर्थः । विश्वामित्रं उपागतं श्रुत्वा । शतानन्दः शतानन्दनामकमुनिरादिर्येषां ते तथा तैः (युतः) युक्तः जनकः, अभिययौ प्रत्युत्थानमकरोत् । यातेर्लिट् ॥ २८ ॥
(सं.चं.) अपूर्वो दुर्लभदर्शनः परमपुरुषो रामः । तेनोपेतम् । अथच अपूर्वाभ्यामदृष्टपूर्वाभ्यां पुरुषपुङ्गवाभ्यामुपेतम् । शतानन्देनाऽदिमद्भिरन्यैश्च ऋत्विग्भिः । अतिथ्यभिमुखं ययौ । तदिदमातिथ्यस्य प्रथममङ्गं यदभियानम् । 'ಎದುರುಗೊಳ್ಳುವುದು' इति भाषायाम् ॥ २८ ॥

[2]मखोत्सवमुपायाता नानाजनपदा[3] जनाः ।
द्रष्टुमभ्यापतन्[4] रामं सस्त्रीबालाश्च नागराः ॥ २९ ॥

(भा.दी.) मखेति । मखलक्षणो य उत्सवस्तं प्रति उपायाताः समागताः, नानाविधाः जनपदाः प्रसिद्धराष्ट्राणि येषां ते तथोक्ताः जनाः, श्रीरामं द्रष्टुं अभ्यापतन् अभितः प्रापुः । स्त्रियश्च बालाश्च तैः सहिताः सस्त्रीबालाः नगरे विद्यमाना नागराः जनाश्च अभ्यापतन् ॥ २९ ॥

---

१. **'शतानन्दादिभिर्वृतः'**
२. **'महोत्सव–'**
३. **'नाना जनपदाः क्षुद्रग्रामा येषां ते नानाजनपदाः'** इति. का.श्री. ।
४. **'द्रष्टुमभ्याययू रामम्'**

(सं.चं.) मखोत्सवं समीपत आस्वादयितुमागताः । नानाजनपदाः । कुरुपञ्चालादिभ्यः नानादेशेभ्यः आगताः । नागरा विदेहपुरवासिनश्च ॥ २९ ॥

परिपूज्य[१] यथान्यायं परिवारयुतं मुनिम् ।
लोकनाथं विलोक्येदं वाक्यमूचे मुनिं नृपः ॥ ३० ॥

(भा.दी.) परीति । नृपः जनकःस परिवाराः शिष्यजनास्तैर्युतं मुनिं विश्वामित्रम्, न्यायमनतिक्रम्य यथान्यायम्, यथोचितमित्यर्थः । 'युक्तं स्यादुचितं न्यायम्' इति हलः । परिपूज्य लोकनाथं श्रीरामं विलोक्य इदं वक्ष्यमाणं वचः मुनिं विश्वामित्रं प्रति ऊचे । वचेर्लिट् ॥ ३० ॥

(सं.चं.) परिपूज्य यथान्यायं लोकनीत्या यथोचितम् । शिष्यपरिवारयुतम् ॥ ३०–१ ॥

श्रीमान् मरतकश्यामः पद्मपत्रनिभेक्षणः ।
नवयौवनसम्पन्नः क एष पुरुषर्षभः ॥ ३१ ॥

(भा.दी.) श्रीमानिति । श्रिया कान्त्यादिना युक्तः श्रीमान् । नित्ययोगे मतुप् । मरतकवत् मरतकरत्नवत् श्यामः । पद्मस्य पत्रे तयोर्निभे सदृशे ईक्षणे चक्षुषी यस्य स तथा । नवं नूतनं यद् यौवनं तेन सम्पन्नः युक्तः, एषः त्वन्निकटस्थः, पुरुषर्षभः पुरुषश्रेष्ठः कः? कस्य पुत्रः किन्नामकः स्वरूपतः कश्च ॥ ३१ ॥

सिंहस्कन्धो महोरस्कः पूर्णचन्द्रनिभाननः ।
गम्भीरनाभिः को न्वेष कम्बुग्रीवो महाभुजः ॥ ३२ ॥

(भा.दी.) सिंहेति । सिंहस्य स्कन्धाविव स्कन्धौ यस्य स तथा, महदुन्नतं विशालं च उरो वक्षो यस्य स तथा, पूर्णो यश्चन्द्रः तस्य निभं समानमाननं यस्य स तथा, गम्भीरो निम्नो नाभिर्यस्य स तथा, कम्बुवत् मथितशङ्खवत् ग्रीवा यस्य स तथा, (महान्तौ भुजौ यस्य स तथा), एषः पुरुषर्षभः को नु को वा? ॥ ३२ ॥

(सं.चं.) स्कन्धः '**ஃகஸ்**' इति भाषायाम् । महद् विशालमुन्नतमुरोऽस्येति महोरस्कः । 'उरःप्रभृतिभ्यः कप्' (अ.सू.५.४.१५१) इत्युरोन्ताद् बहुव्रीहेः कप् प्रत्ययः । गम्भीरा निम्ना नाभिरस्य । 'रेखात्रयाङ्किता ग्रीवा कम्बुग्रीवेति कथ्यते' इत्यभिधानम् । 'कम्बुः शङ्खः क्षुल्लकाः क्षुद्रशङ्खाः शम्बूकास्ते स्युः कपर्दो वराटः' इति च । महाभुजः बाहुषाळी ॥ ३२ ॥

---

१. '**अभिपूज्य**'

अविस्मितः[१] स्मितमुखो गजराजगतिः कविः ।
मुने कोऽयं विनयवानमितार्थं मितं वदन् ॥ ३३ ॥

(भा.दी.) अवीति । न विद्यते विस्मितं विस्मयो यस्य स तथा । स्मितयुक्तं मुखं यस्य स तथा । स्वभावत एव हासोपेतमुख इत्यर्थः । गजानां राजा गजराजस्तस्य गतिरिव गतिर्गमनं यस्य स तथा, कविः सर्वज्ञः, विनयोऽस्यास्तीति विनयवान्, अमिता अनेका अर्था यस्य तत्तथोक्तं तत्, मितं अक्षरतः परिमितं वचः वदन्, अयं पुरुषर्षभः, हे मुने, कः? ॥ ३३ ॥

(सं.चं.) विस्मयदर्शनेऽप्यविस्मितः । असम्भ्रान्तः । कविर्विपश्चित् । 'बुधः सुधीः कृती कृष्टिः कविर्व्यक्तो विशारदः' इति च । यत्र रूपं गुणास्तत्रेति स्मरणादस्य लोकोत्तरं रूपमेव कवित्वं कथयतीति भावः । अथापि विनयवान् । नहि रूपमदेन कवित्वमदेन वा दृप्तः । विद्या ददाति विनयमित्यतश्च विद्वानयं गम्यते । तेन जानाति वक्तुम् । अथापि वाचंयमस्य मुनेः सहवासादिव मितं वदन् । मितं वदति, अथाप्यमितार्थं वदति, कवित्वादेव । कोऽयम्? किन्देशोऽयम्? कावस्य मातरपितरौ? ॥ ३३ ॥

अङ्गनानामनङ्गोऽयं त्वादृशानां तु किङ्करः ।
वैरिणां केवलं कालो योगिनां भगवान् हरिः[२] ॥ ३४ ॥

(भा.दी.) अङ्गनेति । अङ्गनानां स्त्रीणां अनङ्गः कामः, कामसदृश इत्यर्थः, त्वमिव दृश्यन्त इति त्वादृशास्तेषां त्वत्सदृशानां ज्ञानिनामित्यर्थः, ज्ञानिनां (तु) विशेषेण किङ्करः, भृत्यसदृश इत्यर्थः, वैरमेषामस्तीति वैरिणस्तेषां केवलं निरुपचारेण कालः मृत्युः, मृत्युसम इत्यर्थः, योगिनां सनकादीनां भगवान् हरिः श्रीनारायणः, अयं कस्य पुत्रः? ॥ ३४ ॥

(सं.चं.) अङ्गानामनङ्गइवायम् । स्फुटमेतच्चक्षुष्मताम् । त्वादृशानां साक्षात्कृतब्रह्मणां किङ्करइव । सिद्धमेतत् त्वदुपसेवनेन । वैरिणां केवलमसन्दिग्धं कालइव । 'वैवस्वतः कृतान्तः कालिन्दीसोदरः कालः' इत्यभिधानम् । स्पष्टमेतदाचष्टे कोदण्डवान् दोर्दण्डः । तेनाभ्यूहामहे नूनमयं योगिनामिष्टदेवता भगवान् हरिरिवेति । आहो किमयं प्रसन्नो भगवान् हरिरेव? ॥ ३४ ॥

---

१. **'न विद्यते विस्मितमाश्चर्यं यस्य सः । सर्वेषामपि स्वयमाश्चर्यकरः । तस्याऽश्चर्यकरं किमपि नास्तीति यावत्'** इति का.श्री. ।

२. **'अनेन, 'मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान् गोपानां स्वजनोऽसतां क्षितिभृतां शास्ता स्वपित्रोः शिशुः । मृत्युर्भोजपतेर्विधातृविहितस्तत्वं परं योगिनां वृष्णीनां कुलदेवतेति शुशुभे रङ्गं गतः साग्रजः' इति भागवतार्थ उक्तो भवति'** इति का.श्री. ।

सुकुमारः कुमारोऽयं जनानां नयनोत्सवः ।
पादपल्लवयोरस्य भूस्पर्शं न सहामहे ॥ ३५ ॥

(भा.दी.) सुकुमार इति । जनानां नयनानां उत्सवइव नयनोत्सवः, अत्यन्तं दर्शनीय इत्यर्थः, अयं कुमारः यतः सुकुमारः सुकोमळाङ्गः, तस्मात् अस्य पादौ पल्लवाविव तयोः भुवो यः स्पर्शस्तम्, पद्भ्यां गमनमित्यर्थः, न सहामहे न तितिक्षामहे । षह मर्षणे लट् ॥ ३५ ॥

(सं.चं.) सुकुमारः कोमलतरतनुः ॥ ३५ ॥

अस्य पार्श्वेऽपरः कोऽयमस्य सादृश्यवान् स्थितः ।
प्रतिबिम्बवदन्वेति बिम्बोष्ठो यमिमं सदा ॥ ३६ ॥

(भा.दी.) अस्येति । अस्य पुरुषर्षभस्य पार्श्वं समीपं तस्मिन् स्थितः, बिम्बवत् बिम्बपक्वदोष्ठौ यस्य स तथा, अत एव अस्य पुरुषर्षभस्य सादृश्यमस्तीति सादृश्यवान् अपरः अयं पुरुषः यमिमं पुरुषर्षभं प्रतिबिम्बवत् च्छायावत् अन्वेति अनुसृत्य वर्तते, इण् गतौ लट्, अयं क इति लक्ष्मणविषयकः प्रश्नः ॥ ३६ ॥

(सं.चं.) प्रतिबिम्बवत् छायेव । बिम्बं तुण्डी । '**ತೊಂಡೆ**' इति भाषायाम् ॥ ३६ ॥

पृच्छति स्वच्छहृदये राजन्येवं जनान्तरे ।
किञ्चित् स्मित्वाऽवदद् वाणीं प्रवीणो गाधिनन्दनः ॥ ३७ ॥

(भा.दी.) पृच्छतीति । स्वच्छं रागादिदोषरहितं हृदयं मनो यस्य स तथा तस्मिन्, राजनि जनके, जनानामन्तरं मद्ध्यम् तस्मिन्, (एवं) पृच्छति विचारयति सति, प्रवीणः प्रत्युत्तरदाने कुशलः गाधेर्नन्दनः कौशिकः किञ्चित् स्मित्वा वाणीमवदत् । वद व्यक्तायां वाचि लङ् ॥ ३७ ॥

(सं.चं.) स्वच्छो भगवान् हृदयेऽस्य । अत एव स्वच्छं च हृदयमस्य । अत एवायं भगवान् हरिरिति दर्शनमात्रेणास्य मनसि पुस्फोर । जनान्तरे परिवारजनमध्ये । दिदृक्षापरिगतजनमध्ये च । 'अन्तरं त्वन्यभेदयोः । अवकाशेऽवधौ मध्ये' इति मङ्खः । प्रवीणः समयोचितवचनचतुरः । 'दक्षः कुशलोऽभिज्ञो निष्णातः शिक्षितः प्रवीणश्च' इत्यभिधानम् । कुशान् लातीति कुशलवनचातुर्यं पदार्थः । चातुर्यमात्रे रूढिः । एवं वीणया प्रगायतीति वीणावादनचातुर्यं पदार्थः । चातुर्यमात्रे रूढिः ॥ ३७ ॥

अयं दशरथस्याङ्ग नन्दनः पुरुषोत्तमः ।
चिकीर्षुः सुरकार्य्याणि रामो नाम मनोरमः ॥ ३८ ॥

(भा.दी.) **अयमि**ति । हे अङ्ग, प्रिय जनक, अयं पुरुषर्षभः दशरथस्य नन्दनः पुत्रत्वेनावतीर्णः, सुराणां कार्याणि राक्षसहननादिकार्याणि तानि चिकीर्षुः कर्तुमिच्छावान्, मनोरमः मनोहरः, राम इति नाम प्रसिद्धः, पुरुषोत्तमः क्षराक्षरपुरुषाभ्यामुत्तमः श्रीहरिः इति कोऽयमिति प्रश्नस्य प्रत्युत्तरम् ॥ ३८ ॥

(सं.चं.) अङ्ग जनक । 'अङ्गेत्यामन्त्रणे हंहो भोभो इति च कथ्यते' इति च । अङ्गनन्दनः औरसः पुत्र इति वा । 'अङ्गादङ्गात् सम्भवसि हृदयादधिजायसे' इति हि श्रुतिः । 'भगवान् हरिः' इत्युक्तमनुमोदते– पुरुषोत्तम इति । क्षराक्षरपुरुषोत्तमः । 'यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः' इति हि गीतासु । 'उत्तमः पुरुषस्त्वन्यः परमात्मा–' इति च । सुरकार्याणि चिकीर्षुर्भुवमागतः । मिथिलां च । मनोरमत्वादन्वर्थं रामो नाम ॥ ३८ ॥

अयमस्यानुजः[1] प्रेष्ठो लक्ष्मणः शुभलक्षणः ।
अयोद्ध्याया मयाऽनीतावेतौ सिद्धाश्रमं प्रति ॥ ३९ ॥

(भा.दी.) **अयमि**ति । अयमपरः पुरुषः अस्य श्रीरामस्य प्रेष्ठः अतिशयेन प्रियः, शुभानि लक्षणानि अङ्गसम्पदो यस्य स तथा, अत एव लक्ष्मणः लक्ष्मणनामकः अस्य अनुजः । इदं च 'अस्य पार्श्वेऽपरः कोऽयम्' इत्यस्योत्तरम् । त्वया सहागमने को हेतुरित्यत आह– **अयोद्ध्याया** इति । एतौ अयोद्ध्यायाः मया विश्वामित्रेण सिद्धाश्रम इति प्रसिद्धो य आश्रमस्तं प्रति आनीतौ ॥ ३९ ॥

(सं.चं.) अस्य प्रेष्ठः प्रियतमोऽनुजः ॥ ३९ ॥

रक्षो निहत्य यज्ञं मे लीलयाऽयमपीपलत्[2] ।
अपाङ्गेन मुनेः शापादहल्यामप्यमूमुचत् ॥ ४० ॥

(भा.दी.) तत्र तत्कृतप्रयोजनमाह– **रक्ष** इति । अयं श्रीरामः रक्षः सुबाहुनामकं रक्षस्तत्, राक्षससमूहमिति वा । लीलया निहत्य मे यज्ञो यागस्तं अपीपलत् अरक्षत् । पाल रक्षणे लुङ् । गौतमाश्रमेऽपि महत्कर्म

१. 'अयं तस्यानुजः श्रेष्ठो–'
३. 'लीलयाऽयमपालयत्'

तेन कृतमित्याह– **अपाङ्गेने**ति । अपाङ्गो नेत्रान्तस्तेन । मुनेः गौतमस्य शापः अहल्यायै दत्तशापस्तस्मात्, अहल्यां अमूमुचदपि । मुच्लृ मोक्षणे लुङ् ॥ ४० ॥

(सं.चं.) रक्षो मारीचाख्यं निहत्य निरस्य । सुबाहुनामकं सपरिवारं निहत्य तमसि पातयित्वा । मुनेर्गौतमस्य शिलीभावशापात् ॥ ४० ॥

धन्विनामग्रणीरेष धनुस्तव दिदृक्षते ।
धानुष्कहाटकानां [1]तन्निकषाश्मायितं किल ॥ ४१ ॥

(भा.दी.) अत्राऽगमने निमित्तमाह– **धन्विनामि**ति । धनुरेषामस्तीति धन्विनः, तेषाम् अग्रणीः श्रेष्ठः एषः श्रीरामः तव धनुः दिदृक्षते द्रष्टुमिच्छति । दृशिर् प्रेक्षणे लट् । आरोपयितुमिच्छतीत्यर्थः । कुतोऽस्य धनुषः श्रीरामदर्शनविषयत्वमित्यतस्तत्सामर्थ्यमाह– **धानुष्के**ति । धानुष्का धनुर्धरा एव हाटकानि सुवर्णानि तेषाम्, तत् त्वत्सम्पादितं धनुः, निकषस्य य अश्मा तद्वदाचरतीति तथोक्तम्, स्वर्णपरीक्षापाषाणायितमित्यर्थः । किलेति परोक्षे ॥ ४१ ॥

(सं.चं.) एषः रामः । धानुष्का हाटकानीव हेमानीव । धनुश्च तत् तेषां सत्वपरीक्षणे निकषोपलायत इति किल वार्ता श्रूयत इत्यनुनयते । 'किलशब्दस्तु वार्तायां सम्भाव्यानुनयार्थयोः' इति मेदिनी ॥ ४१ ॥

समस्तगुणसम्पन्नमेनं[2] जामातरं कुरु ।
वीर क्षीराम्बुधिरिव पुराणपुरुषं पुरा ॥ ४२ ॥

(भा.दी.) सीताया अनादितः सिद्धो वरः श्रीराम एवेत्यतः श्रीरामाय सीता देयेत्याह– **समस्ते**ति । हे वीर जनक, समस्ता ये गुणाः शौर्यादयस्तैः सम्पन्नं युक्तं एनं श्रीरामम्, पुरा पूर्वम्, पुरा आदिकाले अनिति चेष्टत इति पुराणः स चासौ पुरुषश्च तम्, श्रीनारायणम्, क्षीराम्बुधिरिव जामातरं पुत्रीभर्तारं कुरु । डु कृञ् करणे लोट् ॥ ४२ ॥

(सं.चं.) 'महाधनुषि जिज्ञासां कर्तुमागमनम्' इति रामायणवचनभावमाह– एनं जामातरं कुरु ॥ ४२ ॥

गामित्थं गाधिपुत्रस्य श्रुत्वा गौतमनन्दनः ।
शतानन्दो महानन्दो रघुनन्दनमब्रवीत् ॥ ४३ ॥

१. '–हाटकानां च निकषा–'
२. '–सम्पूर्णमेनम्'

(भा.दी.) गामिति । गाधेः पुत्रस्य नन्दनस्य विश्वामित्रस्य इत्थं गां वाचं श्रुत्वा, महानानन्दो यस्य स तथा, शतानन्दः शतानन्दनामकः गौतमनन्दनः, रघून् रघुगोत्रभवान् नन्दयतीति रघुनन्दनस्तं श्रीरामं अब्रवीत् । ब्रूञ् धातोर्लङ् ॥ ४३ ॥

(सं.चं.) विश्वामित्रवचसा मातुः शापमोक्षस्य पित्रा समागमस्य च श्रवणेन, रामदर्शनेन च जनित-महानन्दः ॥ ४३ ॥

राम देव जगन्नाथ स्वागतं सानुजस्य ते ।
दिष्टया मे जीविता माता भवता करुणावता ॥ ४४ ॥

(भा.दी.) रामेति । जगन्नाथ (जगतां) स्वामिन्, देव हे राम, सानुजस्य ते स्वागतं शोभनागमनं अस्तु । करुणा अस्यास्तीति करुणावान् तेन, दयाशीलेनेत्यर्थः, भवता मे माता अहल्या जीविता उज्जीविता । इदं दिष्टया अत्युत्तममभूत् । 'दिष्टया स्यान्मङ्गळादिषु' इति वैजयन्ती ॥ ४४ ॥

(सं.चं.) रामदेवेति समस्तं वा पदम् ॥ ४४ ॥

मन्ये धन्यमिमं लोके विश्वामित्रं महामुनिम् ।
अन्तेवासिवदन्वेति [1]यद् भवान् पुरुषोत्तमः ॥ ४५ ॥

(भा.दी.) मन्य इति । (यत्) यतः पुरुषोत्तमः क्षराक्षरपुरुषाभ्यामुत्तमः भवान् । अन्ते समीपे वस्तुं शीलमस्यास्तीत्यन्तेवासी शिष्यस्तद्वत् । 'हलदन्तात् सप्तम्याः सञ्ज्ञायाम्'(अ.सू.६.३.९) इति सप्तम्या अलुक् । अन्वेति अनुगच्छति । इण् गतौ लट् । तस्मात् लोको भुवनं तस्मिन्, महामुनिं इमं विश्वामित्रं धन्यं पुण्यवन्तं मन्ये जानामि । मन ज्ञाने लट् ॥ ४५ ॥

(सं.चं.) धन्यः कृतकृत्यः । पुरुषोत्तमोऽपि अन्तेवासिवत् शिष्यवदन्वेति ॥ ४५ ॥

एष राजा पुरा राम गाधिसूनुर्म्महाबलः ।
वसिष्ठस्य वरिष्ठस्य गां कामदुहमाहरत् ॥ ४६ ॥

(भा.दी.) राजर्षिभूतस्य विश्वामित्रस्य ब्रह्मर्षित्वावाप्तिं श्रीरामं प्रत्यनुवर्णयति– **एष** इति । हे राम, गाधेः सूनुः, महत् बलं यस्य स तथा, पुरा राजा एषः विश्वामित्रः, वरिष्ठस्य मुनिश्रेष्ठस्य वसिष्ठस्य काम-

१. **'यं भवान् पुरुषोत्तमः'** इति, **'यं भवान् पुरुषोत्तम'** इति च क्वचित् ।

मभीष्टं दोग्धीति कामधुक् तां कामदुहम्, कामितार्थप्रदामित्यर्थः, गां कामधेनुं आहरत् आजहार। हृञ् हरणे लङ् ॥ ४६ ॥

(सं.चं.) ऋषिषु वरिष्ठस्य । कामदुहं गां कामधेनुम् ॥ ४६ ॥

शबला सा शकम्लेच्छयवनैर्वल्लवादिभिः ।
आत्मनोऽवयवोद्भूतैर्जघान नृपतेर्बलम् ॥ ४७ ॥

(भा.दी.) शबलेति । सा शबला कामधेनुः, 'घातयित्वा मुहूर्तेन यत्सैन्यं शबला बलात् । अन्तर्धानं गता देवी ययौ शक्रान्तिकं क्षणात्' इति पाद्मे शबलाशब्दः कामधेनौ प्रसिद्धः । आत्मनः स्वस्याः अवयवेभ्यः मुखपुच्छादिभ्यः उद्भूतैरुत्पन्नैः शकाश्च म्लेच्छाश्च यवनाश्च तैः, वल्लवाः गोपाला आदयो येषां ते तथा तैः, नृपतेः गाधिपुत्रस्य विश्वामित्रस्य बलं सैन्यं तत्, 'बलं रूपेऽस्थनि स्थौल्ये शक्तिरेतश्चमूषु च' इति वैजयन्ती, जघान। हन हिंसागत्योः लिट्। चतुरङ्गबलेन सह राजा गाधिपुत्रो देशान् सञ्चरन् कदाचिद् वसिष्ठाश्रमं जगाम। वसिष्ठेन च निमन्त्रितस्तत्र कामधेनुमहिम्ना राजतदमात्यादीनामतिविचित्रतत्तदुचितोपचारे कृते सति गोरत्नमिदं राजार्हं मह्यं देहि, तुभ्यं गवां कोटीर्दास्यामीति तेनोक्तेन वसिष्ठेन, 'तुभ्यमियं न दातुमुचिता, मुनीनां होमधेनुत्वेन श्रीहरिणा निर्मितत्वादस्याः' इति प्रत्युक्तो राजा तां बलादाहर्तुं सैन्यमाज्ञापयामास । तदानीं च कामधेनुः स्वाङ्गसम्भूतैः पुरुषैस्तद्बलं पराजित्य स्वमोक्षणं चकारेति पौराणिकी प्रसिद्धिः ॥४७॥

(सं.चं.) शबला चित्रवर्णा नन्दिनी । 'आजुहाव ततः प्रीतः कल्माषीं धूतकल्मषः । एह्येहि शबले क्षिप्रं शृणु चापि वचो मम' (५२.२०) इति हि वाल्मीकिः । 'कामधेनुं वसिष्ठोऽपि यदा न त्यजते मुनिः । तदाऽस्य शबलां राम विश्वामित्रोऽन्वकर्षत' (५४.१)) इति च । 'तस्या हुम्भारवोत्सृष्टा वल्लवाः शतशो नृप। नाशयन्ति बलं सर्वं विश्वामित्रस्य पश्यतः' (५४.१८) इति च। 'पह्लवाः शतशो नृप–' इत्यर्वाचीनाः पठन्ति। 'योनिदेशाच्च यवनाः शकृद्देशाच्छकास्तथा। रोमकूपेषु च म्लेच्छा हारीताः सकिरातकाः' (५५.३) इति च । शकादयो वर्णबाह्या अन्त्यजातयो भटाः ॥ ४७ ॥

नरदेवो महादेवं प्रसाद्यास्त्राण्यवाप्तवान् ।
सब्रह्मास्त्राणि सर्वाणि[1] वसिष्ठं तैर्य्युयोध सः ॥ ४८ ॥

---
१. 'सब्राह्माणि च सर्वाणि'

(भा.दी.) नरेति । नरदेवः राजा सः विश्वामित्रः, क्षिप्रप्रसादतया महान् पूज्यो यो देवस्तं रुद्रमित्यर्थः, तपसा प्रसाद्य प्रसन्नीकृत्य, ब्रह्मास्त्रेण सहितानि सब्रह्मास्त्राणि सर्वाणि अस्त्राणि अवाप्तवान् । तैः रुद्रलब्धैरस्त्रैः सः राजा वसिष्ठं युयोध । युध सम्प्रहारे लिट् ॥ ४८ ॥

(सं.चं.) महादेवं शिवं तपसा प्रसाद्य । 'महादेवप्रसादार्थं तपस्तेपे महातपाः' (५५.१२) इति च । ब्रह्मास्त्रसहितानि सर्वाण्यस्त्राणि । युयोध युयुधे ॥ ४८ ॥

ब्रह्मजो ब्रह्मदण्डेन वैष्णवेन तमभ्ययात् ।
अग्रसत् तानि सोऽस्त्राणि परब्रह्मप्रसादतः ॥ ४९ ॥

(भा.दी.) ब्रह्मेति । ब्रह्मणश्चतुर्मुखाज्जातो ब्रह्मजो वसिष्ठः । विष्णुर्देवता अस्येति वैष्णवस्तेन ब्रह्मदण्डेन ब्रह्मदण्डाख्यास्त्रेण तं गाधिसुतं अभ्ययात् युद्धे अभिजगाम । या प्रापणे लङ् । स वसिष्ठः, परं सर्वोत्कृष्टं यत् ब्रह्म विष्ण्वाख्यं तस्य प्रसादोऽनुग्रहस्तस्मादिति ततः, तानि गाधिसुतप्रयुक्तास्त्राणि अग्रसत् तिरश्चकार । ग्रसु ग्लसु अदने लङ् ॥ ४९ ॥

(सं.चं.) ब्रह्मजो वसिष्ठः । ब्रह्मदण्डेन । स्वहस्तगते दण्डकाष्ठे वैष्णवं मन्त्रमभिमन्त्र्य प्रयुयोजेत्यर्थः । सः ब्रह्मदण्डः । तानि विश्वामित्रप्रयुक्तानि । परं ब्रह्म नारायणाख्यम् । 'तदेव ब्रह्म परमं कवीनाम्' इति हि श्रुतिः ॥ ४९ ॥

वैष्णवेनैष[1] तपसा समर्थो गाधिनन्दनः ।
चण्डालितं च वासिष्ठैस्त्रिशङ्कुं स्वर्गमानयत् ॥ ५० ॥

(भा.दी.) वैष्णवेनेति । विष्णोः सम्बन्धि वैष्णवं तेन तपसा समर्थः एषः गाधेर्नन्दनः विश्वामित्रः वसिष्ठस्यापत्यं पुमांसो वासिष्ठास्तैः, वसिष्ठपुत्रैरित्यर्थः, चण्डालितं चण्डालावस्थां प्रापितम्, त्रिशङ्कुं त्रिशङ्कुनामकं राजानम्, स्वर्गः स्वर्गलोकस्तं आनयत् अगमयत् । णीञ् प्रापणे लङ् । त्रिशङ्कुर्हि सकायः सन् स्वर्गमारुहेयमिति सङ्कल्प्य तदर्थं यागः कर्तव्य इति स्वगुरुपुत्रान् वासिष्ठान् प्रत्यब्रवीत् । तैश्चेदमयुक्तमस्मत्तो न भवतीत्युक्ते तर्ह्यन्यं गुरुं वरिष्य इति त्रिशङ्कुनोक्ते सति, अयुक्तं सङ्कल्प्य पुनरस्मद्वचनमशृण्वंश्चण्डालो भवेति शप्तस्तत्क्षण एव काककृष्णवपुश्चण्डालो भूत्वाऽत्यन्तं खिन्नो विश्वामित्रं गत्वा स्वावस्थां न्यवेदयत् । स च तव यथा सकायस्य स्वर्गः स्यात् तथा यागं करिष्य इति प्रतिज्ञाय वासिष्ठव्यतिरिक्तब्राह्मणान्

१. 'वैष्णवेनैव'

बलादाहूय यज्ञे क्रियमाणे सति हविर्भागग्रहणार्थमनागतान् देवान् दृष्ट्वा क्रुद्धः सन् मदाज्ञयैव त्वं सकायः सन् स्वर्गमारोहेति वाङ्मात्रेणैव स्वर्गद्वारपर्यन्तं गतोऽथ देवैरुन्नमितशिराः सन् पतन् 'देवैः पातितोऽस्मि' इति रुराव। अथ तिष्ठतिष्ठेत्युक्तिमात्रेण यत्रस्थितस्तत्रैव स्वर्गान्तरं निर्माय तं स्थापयित्वा जगदन्तरमेव स्रक्ष्य इति सङ्कल्प्य स्रष्टुमारब्धे सति देवैः प्रसादितः उपररामेति पौराणिकी प्रसिद्धिः ॥ ५० ॥

(सं.चं.) वासिष्ठैः वसिष्ठपुत्रैः। चाण्डालितमिति पाठः सम्भाव्यते। चण्डालस्येदं कर्म भावो वा चाण्डालम्। तदस्य सञ्जातमिति चाण्डालितः। चण्डालितमिति पाठे चण्डालवदाचरतीति चण्डालति। भावप्रधानो वा निर्देशः। प्राप्तचण्डालत्वम्। इयमत्र कथा– त्रिशङ्कू राजा कुलगुरुं वसिष्ठमेत्य प्रार्थयामास– याजय माम्, येन सशरीरः स्वर्गं यायामिति। न शक्यं तदित्याह वसिष्ठः। अथच वसिष्ठपुत्रानेत्य प्रार्थयामास- भवतां तातेन प्रत्याख्यातः सम्प्रति भवतः शरणमागतः। याजयन्तु माम्, येन सशरीरः स्वर्गं याया-मिति। न शक्यं तदित्याहुस्तेऽपि, गुरुणा प्रत्याख्यातं कथमस्माभिश्चिकीर्षसीति। अथापि स हठादाह– तर्हि केनचिदन्येन पुरोहितेन मदीहितं सिषाधयिषामि, स्वस्ति वोऽस्त्विति। तदा कुपिता वसिष्ठपुत्रास्तं शेपुः– 'अनया गुर्ववज्ञया त्वं चण्डालत्वं गमिष्यसि' इति। स विश्वामित्रमेत्य प्रार्थयामास– याजय माम्, येन सशरीरः स्वर्गं यायामिति, प्रत्याख्यातोऽस्मि गुरुणा च गुरुपुत्रैश्चेति। स विश्वामित्रस्तं स्वतपस्तेजसा स्वर्गमनयत्। देवैः स्वर्गात् प्रच्याविते त्रिशङ्कौ स्वर्गमन्यं निर्माय तत्र तं स्थापयामासेति ॥ ५० ॥

मखे क्लृप्तं[1] पशुत्वेन शुनःशेपमपालयत्।
पुनश्चोरुतपस्तेपे वासुदेवमसौ स्मरन् ॥ ५१ ॥

(भा.दी.) मख इति। (असौ) मखो हरिश्चन्द्रयज्ञस्तस्मिन् पशुत्वेन क्लृप्तं सङ्कल्पितम्, शुनःशेपः शुनः-शेपनामकमुनिस्तं अपालयत्। पाल रक्षणे लङ्। पुनश्च वासुदेवं स्मरन् सन् उरु च तत्तपश्च तत् तेपे। तप सन्तापे लिट्। अनपत्यो हरिश्चन्द्रः पुत्रश्चेदुत्पत्स्यते तर्हि तेनैव त्वां यक्ष्यामीति वरुणं प्रार्थयित्वा[2] तदनुग्रहेण रोहिताख्यपुत्रे जाते सत्यनन्तरं पुत्रेण मां यजेति वरुणेन बहुवारमुक्तेऽपि पुत्रस्नेहादयाजिनं वरुणो महोदरव्याधिग्रस्तं चकार। तद् दृष्ट्वा प्राणप्रेप्सू रोहितो वनं जगाम। स्वनिमित्तेन च व्याधिग्रस्तं तातं ततो मोचयितुं नरमेधयज्ञार्थं स्वप्रतिनिधित्वेन शुनःशेपं भार्गवादजीगर्तात् गोशतसहस्रेण क्रीत्वा पितरमा-जगाम। स च हरिश्चन्द्रः शुनःशेपं यूपे निबबन्ध। तदा जीवनार्थं शुनःशेपप्रार्थितो विश्वामित्रः शुनःशेपेन इन्द्रोपेन्द्रादिदेवानां स्तुतिं कारयित्वा मोचित(वान्) इति हि पौराणिकी प्रसिद्धिः। रामायणे तु अम्बरीषयज्ञे

१. **'यज्ञे क्लृप्तम्'**

२.**'प्रार्थ्य'** इति युक्तम्।

इन्द्रेण पशावपहृते प्रतिनिधित्वेन शुनःशेपमृचीकाद् गृहीत्वा गमनसमये पुष्करक्षेत्रमाजगाम । तत्र च विश्वामित्रं दृष्ट्वा जीवनार्थं प्रार्थितो विश्वामित्रः शुनःशेपाय, अनेन देवान् स्तुहीति वेदमन्त्रमुपदिदेश। अनन्तरं स चाम्बरीषेण स्वयज्ञमागत्य यूपबद्धः सन् तेनेन्द्रादीनस्तौत्। तत्स्तुतिप्रसन्नैश्च सभाजित इति (यदुक्तं तत्) तु युगभेदेनेति ज्ञातव्यम् ॥ ५१ ॥

(सं.चं.) शुनःशेपमपालयत्। इयमत्र रामायणगता कथा– अयोध्यापतिरम्बरीषो यियक्षति स्म। सहस्राक्षस्तस्य पशुमपजहार। तं ह पुरोधा बोधयामास– महानिहायमन्तरायः। महच्चात्र प्रायश्चित्तं करणीयम्। तदर्थं कञ्चिन्नरमानय । यः पशुप्रतिनिधिः स्यादिति । स राजा पशुप्रतिनिधिं पुरुषमन्विष्यन् ऋचीकमाजगाम । अयाचत च तम्– तव तनयेष्वेकं दातुमर्हसि मह्यं मूल्येनेति । विदितपरावरः स ऋषिस्तेन विहरन्निवाऽह– ज्येष्ठो मम प्रेष्ठस्तं न दद्यामिति । विदितपतिभावा तज्जाया सत्यवत्यप्याह– कनिष्ठस्तु मम प्रेष्ठस्तमपि न दद्यामिति । मध्यमः शुनःशेपो राजानमाह– मध्यमोऽहम्, नयस्व मामिति । तेन ह सह प्रतस्थौ राजा । मध्ये पुनरध्वपरिश्रान्तः पुष्करक्षेत्रे विशश्राम । तत्र ह ददर्श स्वमातुलं विश्वामित्रं शुनःशेपः । तस्य जननी सत्यवती विश्वामित्रस्य हि ज्येष्ठभगिनी । मुनिकुमारस्तमापदस्त्राणाय ययाचे । विश्वामित्रः स्वतनयानाहूयोवाच– भागिनेयोऽयं बालः पुनरपि जिजीविषति । तद् यूयं तत्स्थाने पशुभूता अम्बरीषस्य यज्ञ उपहारीभवतेति। नेति होचुस्ते। अनुचितमात्मसुतांस्त्यक्त्वा परसुतरक्षणमिति। क्रुद्धो मुनिरनधिगतस्वाशयान् स्वतनयान् शशाप– जातिभ्रष्टा भवतेति। अहो भागधेयं शुनःशेपस्य। स किल विश्वामित्रान्मन्त्रदीक्षामवाप, यया तत्तनया वञ्चिता बभूवुः । स शुनःशेपाय द्वे गाथे मन्त्रभूते उपदिदेश, आदिदेश च– यूपबद्धः स्तुहि विष्णुमाभ्यां गाथाभ्याम्। तेन विमोक्ष्यस इति। तद्ध तथा चकार शुनःशेपः। स्तुतितर्पित इन्द्राविष्टो विष्णुः शुनःशेपाय दीर्घमायुर्ददौ । राजा च सहस्राक्षप्रसादेन प्रतिहतप्रत्यूहो यज्ञफलमवापेति । पुराणेषु च कथेयमन्यथा पठ्यते। तत्र यज्ञकर्ता हरिश्चन्द्रः। सुतं बलिदानाद् रक्षितुं शुनःशेपमाजहार। शुनःशेपश्च नाऽर्चीकः, किन्त्वाजीगर्तिः । बाह्वृच्येऽपि शतर्चिष्वेकः शुनःशेपः आजीगर्तिरित्येव पठ्यते । कल्पभेदेन व्यवस्थेत्याचक्षते । उभयविधकथासङ्ग्रहायैव प्रायः प्रबन्धा–'मखे पशुत्वेन क्लृप्तं शुनःशेपमपालयत्' इति सम्मुग्धमाह । असौ विश्वामित्रः प्राप्तवासुदेवप्रसादोऽपि पुनः प्रसादातिशयाय तपस्तेपे । ननु किमिदं महर्षयोऽप्येवमसभ्यं नामधेयं कुर्वते शुनःशेप इति शुनोलाङ्गूल इति? असभ्यं ते मनः, न नामधेयम् । श्वयतीति श्वा मातरिश्वा कथ्यते । तेन शिष्टे पथि पततीति शुनःशेपः । शुनः मातरिश्वनः लाङ्गूलमिव शुनोलाङ्गूलः । सदा प्राणतत्वमनुसरन् प्राणोपासकः । एवं शुनःपुच्छोऽपि । धन्यो मुनिरयं यदमङ्गलार्थप्रतिभासैः पदैः माङ्गलिकमर्थं स्फोरयन् पुत्राणां नाम चकार । वैदिकानामयं प्रतनः सम्प्रदायः, यत् सर्वैः पदैः प्राण-

नारायणयोः स्मरणम् । तद्यथा भगवान् । संसारिणः सर्वेऽपि भवन्ति स्वभार्याभगवन्तः । अथापि न तान् भगवत आचक्षते । किन्तु परमात्मानमेव भगवन्तमाचक्षते । 'शेपपुच्छलाङ्गूलेषु शुनः सञ्ज्ञायां षष्ठ्या अलुग् वक्तव्यः' इति वार्तिकम् । अलुगयं नाऽक्रोशे[१] । किन्तु प्रीत्यतिशये ॥ ५१ ॥

मेनकायां तु कामेन रम्भायां क्रोधतोऽप्यसौ ।
दैवेच्छया तपोनाशं प्राप्य तेपे पुनस्तपः ॥ ५२ ॥

(भा.दी.) मेनकायामिति । असौ विश्वामित्रः मेनकायां कामो रागस्तेन, रम्भायां क्रोधतोऽपि कोपेनापि, दैवस्य ईश्वरस्येच्छया तपसो नाशस्तं प्राप्य पुनः तपस्तेपे । तप सन्तापे लिट् । विश्वामित्रेण वसिष्ठसाम्येच्छया तपसि क्रियमाणे सति तत्तपोविघातार्थमिन्द्रेण प्रेषितां मेनकां दृष्ट्वा मोहितस्तया बहुकालं रममाणः सन् तपोहानिं जगाम । अथ च ततोऽप्युत्कृष्टे तपसि क्रियमाणे सति स्ववञ्चनार्थं प्राप्तां रम्भां दृष्ट्वा क्रोधवशात् दशवर्षसहस्रपर्यन्तं शिला भवेति शापदानेन तपोनाशं जगामेति हि प्रसिद्धिः ॥ ५२ ॥

(सं.चं.) वसिष्ठस्य ब्रह्मदण्डेन पराभूतो विश्वामित्रः पूर्वं सभार्यस्तपस्तेपे । तपसा तुष्टो ब्रह्मा 'त्वमनेन राजर्षित्वं प्राप्तः' इत्यूचे । पुनरतृप्तः पुष्करे तपस्यन् देवानतोषयत् । पुनरागतो विधिस्तमाह– 'इदानीमृषिस्त्वमसि' इति । विश्वामित्रो भूय एव तपस्तेपे । अथ कदाचिन्मेनकां पुष्करेषु स्नातुमुपक्रान्तामवालोकत । अवलोक्य च कन्दर्पवशमागतः । दशवर्षाणि स तया रेमे । मेनका शकुन्तळां सुषुवे । स चिन्तयामास– अहो मोहमुषिता मे शेमुषी सर्वं विस्मारयामास । नूनं सुराणां कापटिकं कर्मैतदिति । अथ स कृतनिश्चयो महामुनिस्तां सान्त्वपूर्वं विसृज्य पुनस्तपस्तेपे कौशिकीतीरे हिमवतः शृङ्गे । तपसा तुष्टो ब्रह्मा 'त्वमिदानीं महर्षिरसि' इत्याह । अतृप्तो मुनिः पुनस्तपस्तेपे । अथ सन्त्रस्तः सुरपती रम्भां सम्भाव्य प्रेषयामास मुनिं प्रलोभयेति, प्रलोभ्य तपसः प्रच्यावयेति । रम्भा भीतभीता तमुपससाद । आरादेव निशम्य रम्यं कोकिलकूजितं मुनिः शनैश्चक्षुषी उन्मीलयामास । ददर्श च पुरःस्थितां मोहपेटिकामिव रम्भाम् । जितेऽपि कामे क्रोधो विजजृम्भे । विज्ञाय तस्या भावं ज्वलितकोपस्तां शशाप– रम्भे स्तम्भीभव दश वर्षसहस्राणीति । पुनः क्रोधविजयाय तपस्तेपे । तस्याविचलां निष्ठां निरीक्ष्य परमेष्ठी परितुष्ट आगत्याऽचष्ट– त्वमिदानीं ब्रह्मर्षिरसि, वसिष्ठतुल्यो ब्रह्मिष्ठोऽसीति । तदेतत् सर्वं सङ्गृह्य श्लोकत्रयेणाऽह– मेनकायां तु कामेनेत्यादिना ॥ ५२ ॥

---

१. **'षष्ठ्या आक्रोशे'** (अ.सू.६.३.२१) इति सूत्रे पठितमिदं वार्तिकम् । अथापि वार्तिके **'आक्रोशे'** इति सूत्रपदं नानुवर्तनीयमित्यर्थः । अनाक्रोशेऽपि क्वचिदलुग् भवतीति सूचनाय हि वार्तिकप्रवृत्तिः ।

निराहारो निरुच्छ्वासो निरास्पन्दो निरामयः ।
वर्षायुतान्यनेकानि तपश्चक्रेऽथ चक्रिणे ॥ ५३ ॥

(भा.दी.) ब्रह्मर्षित्वाकाङ्क्षयाऽत्युत्कटं तपः पुनश्च चकारेत्याह– **निराहार** इति। अथ निर्गत आहारो यस्मात् स तथा। निर्गत उच्छ्वासो यस्मात् स तथा। योगसामर्थ्येन स्तम्भितश्वास इत्यर्थः। निर्गत आस्पन्दस्तनुचलनं यस्मात् स तथा। निर्गत आमयः क्षुद्बाधादिदोषो यस्मात् स तथा। विश्वामित्रः अनेकानि वर्षाणां अयुतानि दशसहस्राणि तानि, निरन्तरबहुवर्षसहस्रेष्वित्यर्थः, चक्रिणे श्रीहरये, तत्प्रीतिमुद्दिश्येत्यर्थः, तपश्चक्रे। कृञ् धातोर्लिट् ॥ ५३ ॥

(सं.चं.) निरास्पन्दो निश्चलः । भगवदनुग्रहबलात् तावन्तमपि महान्तमनेहसं निरामयः व्याध्यादिभिरनभिभूतः ॥ ५३ ॥

राजर्षित्वमृषित्वं च महर्षित्वं महाव्रतैः ।
ब्रह्मर्षिता च ब्रह्माद्यैः क्रमेणास्यान्वमोद्यत ॥ ५४ ॥

(भा.दी.) **राजे**ति। ब्रह्मा आद्यो येषां ते तथा तैः देवैः, महान्ति च तानि व्रतानि च तैः अनशनादिव्रतैरित्यर्थः । हेतौ तृतीया । अस्य विश्वामित्रस्य राजा चासौ ऋषिश्च राजर्षिस्तस्य भावस्तत्वम् । ऋषित्वं त्रिकालज्ञानित्वम् । ऋष ज्ञान इति धातुः । महांश्चासौ ऋषिश्च तस्य भावस्तत्त्वम् । ब्रह्मा चासौ ऋषिश्च ब्रह्मर्षिस्तस्य भावस्तत्ता सा च । क्रमो राजर्षित्वादिक्रमस्तेन अन्वमोद्यत अङ्गीकृतम् । अनुपूर्वको मुद हर्षे लङ् । तपोविशेषेण तुष्टैर्ब्रह्मादिभिः राजर्षित्वादिकं तस्मिन्नेव जन्मनि प्रदत्तमिति भावः ॥ ५४ ॥

(सं.चं.) ब्रह्माद्यैः कर्तृभिः । महाव्रतैः करणैः । मोदतेः भावे मुद्यत इति रूपम् । तेन 'ब्रह्माद्यैरन्वमुद्यत' इति वक्तव्यम् । निरङ्कुशाः कवयो नियोगपर्यनुयोगानर्हाः । मोदयतेर्वा रूपम् ॥ ५४ ॥

वासुदेवप्रसादोऽयमीदृशो यस्य विद्यते ।
ब्रह्मण्यस्य तवैतस्मिन् प्रणयो नातिविस्मयः ॥ ५५ ॥

(भा.दी.) **वासुदेवे**ति। यस्य विश्वामित्रस्य ईदृशः एवंवर्तितप्रकारः, अयं क्षत्रियजन्मन्येव ब्रह्मर्षित्वहेतुतया प्रत्यक्षफलकः, वासुदेवप्रसादो श्रीहर्यनुग्रहः विद्यते अस्ति। विद सत्तायां लट्। एतस्मिन् विश्वामित्रे, ब्रह्मणि

ब्राह्मणजातौ साधुर्ब्रह्मण्यस्तस्य ब्राह्मणप्रियस्येत्यर्थः, 'तत्र साधुः' (अ.सू.४.४.९८) इति ण्यः । हे राम, तव प्रणयः स्नेहः, अतिविस्मयः अत्याश्चर्यभूतः न भवति । अस्य ब्राह्मणाग्रेसरत्वादिति भावः ॥ ५५ ॥

(सं.चं.) ब्रह्मण्यस्य ज्ञानिषु वत्सलस्य तव रामस्य ॥ ५५ ॥

गौतमात्मजगिरं स राघवः शुश्रुवानिति ददर्श कौशिकम् ।
तत्रतत्र हि कथाः शृणोत्यसौ सर्वविच्च जनतां विडम्बयन् ॥ ५६ ॥

(भा.दी.) गौतमेति । गौतमस्य आत्मजः सुतस्तस्य गीस्ताम्, इति शुश्रुवान् श्रुतवान् सः राघवः कौशिकं विश्वामित्रं ददर्श सन्तोषातिशयेन तमभिवर्द्धयन् ददर्श । दृशिर् प्रेक्षणे लिट् । सर्वज्ञस्य श्रीरामस्य प्रश्नपूर्वकं शतानन्दादिभ्यः कथाश्रवणादिकं कथमुपपद्यत इत्यत आह– **तत्रे**ति । जनानां समूहो जनता ताम्, विडम्बयन् अनुकुर्वन् असौ श्रीरामः सर्वं वेत्तीति सर्वविच्च सर्वज्ञोऽपि तत्रतत्राऽश्रमेषु कथाः शृणोति (हि) । श्रु श्रवणे लट् ॥ ५६ ॥

(सं.चं.) सर्वविदपि अजानन्निव, अश्रुतपूर्वमिव शृणोति । गौतमात्मजः शतानन्दः । रनरा लगाविति रथोद्धता ॥ ५६ ॥

सज्ज्ञानरूपे[1] जगदेकदीपे नाज्ञानलेशोऽपि घटेत रामे ।
प्रकाशमूर्त्तावहिमप्रकाशे न हि क्वचिद् ध्वान्तलवोऽपि लक्ष्यः॥ ५७ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
बालकाण्डे षष्ठः सर्ग्गः ॥

—०—

(भा.दी.) नैतावता श्रीरामस्याज्ञानमित्येतत् सदृष्टान्तमुपपादयति– **सदि**ति । सत् निर्दुष्टं यत् ज्ञानं तदेव रूपं स्वरूपं यस्य स तथा तस्मिन्, जगत् रमाब्रह्मादिचेतनजातं एकतो मुख्यतो दीपयति प्रकाशयतीति तथा तस्मिन्, रमाब्रह्मादिज्ञानस्यापि दीपक इत्यर्थः । यद्वा एकश्चासौ दीपश्च एकदीपः । जगति एकदीप इव जगदेकदीपस्तस्मिन्, ज्ञानादिगुणैर्जगति दीपइव प्रकाशमान इत्यर्थः । श्रीरामे अज्ञानस्य लेशोऽप्येकदेशोऽपि, यत्किञ्चिद्विषयकाज्ञानमपीत्यर्थः । (न घटेत) । प्रकाशः मूर्तिः शरीरं यस्य स तथा तस्मिन् । अहिमोऽशीतः

१. 'सुज्ञानरूपे'

प्रकाशो यस्य स तथा तस्मिन् सूर्ये, क्वचित्काले ध्वान्तस्यान्धकारस्य लवोऽप्येकदेशोऽपि लक्ष्यः दृश्यः नहि नास्ति यद्वत् तद्वत् श्रीरामे अज्ञानं न किञ्चिदपि युज्यत इत्यर्थः। घट परिवर्तने लिङ्। एवञ्च मानुषलोकेऽवतीर्णः श्रीरामस्तत्रत्यजनवत् स्वयं च प्रश्नादिकं करोति शृणोतीव, न त्वज्ञानेनेति भावः ॥ ५७ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां
बालकाण्डे षष्ठः सर्गः ॥

—०—

(सं.चं.) अज्ञानासमानाधिकरणं सर्वङ्कषमनन्तं च ज्ञानं सज्ज्ञानम्। अर्थान्तरं न्यस्य स्ववचनं समर्थयते– प्रकाशमूर्ताविति । प्रकाशस्वरूपे । अहिमप्रकाशे उष्णतेजसि भास्करे । इन्द्रवज्रा पूर्वार्धे । उत्तरार्धे चोपेन्द्रवज्रेत्युपजातिः ॥ ५७ ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां
बालकाण्डे षष्ठसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– २४९+५७=३०६]

सप्तमः सर्ग्गः

ततः परस्मिन् दिवसे स राजा सराघवं कौशिकमात्मशालाम् ।
आनीय नत्वा परिपूर्ण्णकामः सप्रश्रयं[1] वाचमुवाच वाग्ग्मी ॥ १ ॥

(भा.दी.) श्रीरामं जामातरं कुर्विति विश्वामित्रोक्तो जनकः किमुक्तवानित्यत आह– **तत** इति । ततः श्रीरामशतानन्दयोः सम्भाषणानन्तरम्, परिपूर्णः कामो मनोरथः यस्य स तथा, स्वकन्योचितवरलाभेन पूर्णमनोरथ इत्यर्थः । प्रशस्ता वागस्यास्तीति वाग्ग्मी । 'वाचो ग्मिनिः'(अ.सू.५.२.१२४) इति प्रशंसालक्षणमत्वर्थे ग्मिनिः । स्वचित्तस्थप्रमेयप्रतिपादने पटुरित्यर्थः । राजा जनकः, परस्मिन् गमनदिनादन्यस्मिन्, दिवसो दिनं तस्मिन्, सराघवं श्रीरामसहितं कौशिकं विश्वामित्रम् आत्मनः शालां यज्ञशालां प्रति, आनीय आकारयित्वा, नत्वा नमस्कृत्य, प्रश्रयेण विनयेन सहितं यथा भवति तथा सप्रश्रयम्, वाचं उवाच । वच परिभाषणे लिट् ॥ १ ॥

(सं.चं.) उपजातिभिः सप्तमं सर्गमारभते । आत्मनः शालां सदनम् । 'शाला वेश्म निवेशनोदवसिते प्रोक्ते च सद्मौकसी' इति च । कौशिकं नत्वा । पूर्वार्धं उपेन्द्रवज्रा । उत्तरार्धं इन्द्रवज्रा । उपजातौ तावच्चतुर्दशप्रभेदा भवन्ति चतुर्षु चरणेष्विन्द्रवज्रोपेन्द्रवज्रयोः परिवर्तनेन । तथाह्युक्तम्–'कीर्तिर्वाणी माला शाला हंसी माया जाया बाला । आर्द्रा भद्रा प्रेमा रामा ऋद्धिर्बुद्धिर्नामान्यासाम्' इति । तत्रेयं माला नामोपजातिः । 'उपेन्द्रमाला' इति नाम सूक्तम् ॥ १ ॥

यागाय गां गाधिज कर्षतो मे बभूव कन्या भुवनेषु धन्या ।
सीराग्रमाग्र्गादत एव सीता महानिधिश्रीरिव निर्द्धनस्य ॥ २ ॥

(भा.दी.) यागायेति । गाधेर्जातो गाधिजः तत्सम्बुद्धिः, हे विश्वामित्र, यागो यज्ञस्तस्मै तादर्थ्ये चतुर्थी, गां भुवं मे मम कर्षतः सतः, सीरस्य हलस्य यदग्रं तस्य मार्गस्तस्मात्, लाङ्गलपद्धतेरित्यर्थः, भुवनानि

---

१. 'सप्रश्रयो वाच–'

जगन्ति तेषु धन्या रूपशीलगुणैरुत्तमा । 'यस्तु स्तुत्यैर्गुणैः कल्यः स धन्य इति कीर्तितः' इत्यभिधानम् । कन्या, न विद्यते धनं यस्य स तथा तस्य दरिद्रस्येत्यर्थः, महान् यो निधिर्निहितद्रव्यं तद्रूपा श्रीरिव सम्पदिव बभूव प्रादुरभूत् । भूधातोर्लिट् । अत एव लाङ्गलपद्धतिजातत्वादेव सीता सीतानाम्नी बभूव । 'सीता लाङ्गलपद्धतिः' इत्यमरः ॥ २ ॥

(सं.चं.) गाधिजेति तस्य क्षत्रियत्वं प्रीत्या स्मरति । त्वं ब्रह्मर्षिरभूः । अस्माकं तु क्षत्रियाणां त्वं क्षत्रियमूर्धन्य इत्येव प्रिय इति । यागाय भूशोधनार्थं गां भुवं कर्षतः । सीराग्रमार्गाज्जाता बभूव । अत एव सीरजाता सीतेति पप्रथे । महानिधिश्रीः । निधिवद् भूगर्भे पिहिता महती श्रीरिव । विषमयोरिन्द्रवज्रा, समयोरुपेन्द्रवज्रा । तेन भद्रा नामेयमुपजातिः ॥ २ ॥

पूर्णा यदा चन्द्रकलेव बाला तदा चिरं मां प्रविवेश चिन्ता ।
इमामयोग्याय कथं नु दद्यां त्रयीमिवान्त्याय कथञ्चनेति ॥ ३ ॥

(भा.दी.) पूर्णेति । बाला सा सीता । चन्द्रस्य कला षोडशांशः सेव । 'कला तु षोडशे भागे' इत्यमरः । यथा अमायामवशिष्टा चन्द्रकला पौर्णमास्यां सम्पूर्णा भवति तद्वत्, यदा पूर्णा यौवनव्यञ्जकस्तनाद्यवयवैः परिपूर्णा, तदा इमां सीतां अयोग्याय बलरूपादिगुणैरननुरूपाय पुरुषाय कथञ्चन सर्वथा कथं नु कथमेव, अन्ते अन्तिमवर्णे भवोऽन्त्यः शूद्रस्तस्मै त्रयीमिव वेदत्रयमिव दद्याम् । डु दाञ् दाने लिङ् । इति चिरं दीर्घकाले मां चिन्ता प्रविवेश । विश प्रवेशने लिट् ॥ ३ ॥

(सं.चं.) पूर्णा चन्द्रकला । पूर्णकलश्चन्द्र इत्यर्थः । बाला च पूर्णा सुव्यक्तयौवनलक्षणा । 'कथं न दद्याम्' इति पाठः साधुः । केन प्रकारेण कृते अयोग्याय न दद्याम्, अयोग्यदानप्रसङ्गो न घटेत तथा वर्तितव्यमिति चिन्तयामासेत्यर्थः । प्रथमपाद एवेन्द्रवज्रा । अन्त्येषु त्रिषूपेन्द्रवज्रा । तेन बुद्धिर्नामेयमुपजातिः ॥ ३ ॥

वरं[1] धनूरत्नमलाभि शम्भोः प्रसादितान्नस्तपसा चिरेण ।
विना पिनाकास्त्रमचालनीयं विना यथा भूतळमादिकोलम् ॥ ४ ॥

(भा.दी.) वरमिति । चिरेण बहुकालतः नः अस्माकं तपसा प्रसादितात् प्रसन्नीकृतात् शम्भोः रुद्रात्, भुवः तळं भूमण्डलम्, आदौ विद्यमानः कोलो वराहः आदिकोलस्तम्, आदिवराहमित्यर्थः, विना यथा

१. **'इदं धनूरत्नम्'** इति च पाठः ।

अचालनीयम्, तथा पिनाकः पिनाकनामकमस्त्रं धनुर्यस्य स तथा तं रुद्रम्, 'अस्त्रं धनुरिष्वासम्'[१] इति हलः, विना, चालनीयं न भवतीत्यचालनीयम्, चालयितुमशक्यमित्यर्थः, अत एव वरमुत्कृष्टं धनुष्षु रत्नं श्रेष्ठम्, 'रत्नं स्वजातिश्रेष्ठेऽपि' इत्यमरः, अलाभि लब्धम्, मयेति शेषः । डु लभष् प्राप्तौ लुङ् ॥ ४ ॥

(सं.चं.) शम्भोर्यदिदं धनूरत्नं तन्नस्तपसा प्रसादिताच्छम्भोरेवास्माभिरलाभि । पिनाकमजगवं यस्यास्त्रं धनुः स पिनाकास्त्रः शिवः । 'अस्त्रं धनुरिष्वासः' इत्यभिधानम् । ननु यदस्यते तदस्त्रम् । तत् कथं धनुरस्त्रम्? नेत्याह । यत्र निहिता बाणा अस्यन्ते तदप्यस्त्रम् । चतुर्ष्वपि पादेषूपेन्द्रवज्रा ॥ ४ ॥

दक्षाध्वरे पूर्वमनेन शर्वो नप्राप्य भागं त्रिदशांश्चकर्त्त ।
प्रसादितः क्षिप्रतरप्रसादः स्वाङ्गानि तेषामथ सन्दधे च ॥ ५ ॥

(भा.दी.) दक्षेति । शृणाति संहरति जगदिति शर्वः शिवः । (पूर्वं) पुरा दक्षस्य दक्षप्रजेश्वरस्याध्वरो यज्ञस्तस्मिन् भागो हविर्भागस्तम्, नप्राप्य अलब्ध्वा, अनेन मह्यं दत्तधनुषा त्रिदशान् देवान् चकर्त । कृती च्छेदने लिट् । अथ देवैः प्रसादितः प्रसन्नीकृतः, अत्यन्तं क्षिप्रः क्षिप्रतरः, तादृशः प्रसादो यस्य स तथा शिवः, तेषां च्छिन्नाङ्गानां देवानाम्, (स्वानि) अङ्गानि अवयवान्, सन्दधे च सन्धितवांश्च । सम्पूर्वः डु धाञ् धारणपोषणयोर्लिट् ॥ ५ ॥

(सं.चं.) आहुतिभागमप्राप्य कुपितः शर्वः । 'नप्राप्य' इति समस्तं पदम् । क्षिप्रप्रसादो हि विघ्नराजः । तत्पिता चायं क्षिप्रतरप्रसादः । कोपेन चकर्त । क्षिप्रं प्रसन्नः सन्दधे च । तृतीयचरण उपेन्द्रवज्रा । अवशिष्टेष्विन्द्रवज्रा । तेन शाला नामोपजातिः ॥ ५ ॥

आरोपयेच्चापमिदं[२] य एव तस्मै प्रदास्यामि सुतां ममेति ।
प्रतिश्रवो मे विससार लोके सहस्ररश्मेरिव रश्मिराशिः ॥ ६ ॥

(भा.दी.) आरोपयेदिति । य एव पुरुषः इदं चापं आरोपयेत् सज्यं कुर्यात् । रुह बीजजन्मनि प्रादुर्भावे च लिङ् । 'रुहः पोऽन्यतरस्याम्' (अ.सू.७.३.४३) इति पः । तस्मै पुरुषाय मम सुतां सीतां प्रदास्यामि । दाञ् दाने लृट् । इति मे प्रतिश्रवः प्रतिज्ञा । सहस्रं रश्मयो यस्य स तथा तस्य सूर्यस्य रश्मीनां राशिः समूह इव लोको भुवनं तस्मिन् विससार विसृतोऽभूत् । सृ गतौ लिट् ॥ ६ ॥

---

१. **'धनुरिष्वासः'** इति प्रचलितः पाठः ।

२. **'आरोपयेच्चापमिमम्'** । **'अस्त्रियौ चापधनुषौ'** इति वैजयन्तीवचनात् चापश्चापं वा । **'विकटोदरमस्तु चापम्'** इति भवभूतिः ।

(सं.चं.) आरोपयेत्, 'रू(रु)प उपरिभावे' इति प्राचीनो धातुपाठः । पाणिनीयास्तु रुहधातोरेव पकारादेशं मन्यन्ते । सूर्यरश्मिरिव सर्वत्र विसृतो मे प्रतिश्रवः । पूर्वार्ध इन्द्रवज्रा । उत्तरार्ध उपेन्द्रवज्रा । तेन रामा नामोपजातिः ॥ ६ ॥

विराजमाना इह राजपुत्राः सयक्षरक्षःप्रवराश्च दैत्याः ।
स्वयम्बरं[1] वीरवरा उपायन् पद्माकरं हंसवराइवाऽशु ॥ ७ ॥

(भा.दी.) विराजेति । विराजमानाः शोभमानाः वीरेषु वराः श्रेष्ठाः राजपुत्राः, यक्षाश्च रक्षांसि च तेषु प्रवराः श्रेष्ठास्तैः सहिताः सयक्षरक्षःप्रवराः दैत्याश्च, स्वयंवरः स्वयं वरणं तम्, पद्मानामाकर आश्रयस्तं सरोवर-मित्यर्थः, हंसवराइव हंसश्रेष्ठाइव इह मिथिलायां उपायन् उपाजग्मुः । इण् गतौ लङ् ॥ ७ ॥

(सं.चं.) इह भूमौ विराजमानाः प्रथितयशसः । स्वयम्बरम् । 'तदा विदेहेन सुतास्वयम्बरो विघोषितः' (४.९) इति निर्णये । अधिकं निर्णयचन्द्रिकायाम् । आदौ पादत्रये उपेन्द्रवज्रा । तुरीये चेन्द्रवज्रा । तेन माया नामोपजातिः ॥ ७ ॥

आलोक्य केचिद्धनुराप्य केचिदन्ये परिस्पृश्य परे प्रचाल्य ।
वीरा अवीरत्वमवाप्य याताः केचिद् गतास्तानवलोक्य भीताः ॥ ८ ॥

(भा.दी.) आगतानां तेषामवस्थां वर्णयति– **आलोक्ये**त्यादिना । केचित् वीराः आलोक्य वीरो न भवतीत्य-वीरस्तस्य भावस्तत्त्वं तत्, धनुष उद्धरणे असमर्थत्वमित्यर्थः, अवाप्य याताः स्वपुरं प्रति प्राप्ताः । केचित् धनुः आप्य भीताः सन्तः याताः । अन्ये तदुद्धर्तुं परिस्पृश्य भीताः सन्तो याताः । परे अन्ये वीराः धनुः प्रचाल्य भीताः सन्तो याताः । केचित् तान् भग्नदर्पतया परावृत्य गच्छतो वीरान् अवलोक्य भीताः सन्तो गताः ॥ ८ ॥

(सं.चं.) केचिद् दूरतो धनुरालोक्यैव भीताः । केचिद् धैर्येण समीपमाप्य गलितगर्वाः । अन्ये परिस्पृश्य आमूलचूळं परामृश्य कम्पितसर्वाङ्गाः । परे प्रसभं चालयित्वा दृढं स्थातुमप्रभवन्तः । केचिद् वीरानपि विफलतया प्रतिनिवृत्तानवलोक्यैव स्वयं भीता याताः । स्वतो गत्वा धनुरवलोकयितुमप्यपारयन्तः । समग्रेयमिन्द्रवज्रा ॥ ८ ॥

---

१. 'स्वयंवरम्'

उद्धर्त्तुकामा धनुरुद्धता ये स्विन्नाः क्षितौ ते पतिताः समूर्च्छाः[१] ।
दशाननाद्याश्च दशामगच्छन् शोच्यामशोच्याः किमुतान्यलोकः[२] ॥ ९ ॥

(भा.दी.) **उद्धर्तुकामा** इति । उद्धताः बलादिनोन्नद्धाः, धनुः उद्धर्तुं काम इच्छा येषां ते तथा ये पुरुषास्ते स्विन्नाः आयासेन स्वेदयुक्ताः सन्तः, समूर्च्छाः मूर्च्छया सहिताः सन्तः क्षितौ पतिताः । अशोच्याः शत्रुभिः शोचितुमशक्याः दशाननाद्याश्च स्वकीयैः शोच्यां दशां अवस्थाम्, मूर्छामित्यर्थः, अगच्छन् । गम्लृ गतौ लङ् । अन्यलोकः रावणादिभ्योऽन्यो जनः किमुत असमर्थ इति किं वक्तव्यम् ॥ ९ ॥

(सं.चं.) केचिदुद्धताः स्ववीर्येऽतिमानवन्तः । अशोच्या अपि शोच्यां दशामगच्छन् । रामायणानुदितेयं कथा । तृतीयपाद उपेन्द्रवज्रा । इतरेष्विन्द्रवज्रा । तेन शाला नामेयमुपजातिः पञ्चमवत् ॥ ९ ॥

शठा हठादप्यपहर्त्तुकामाः कन्यां न शेकुर्बलिनोऽपि मत्तः[३] ।
संवत्सरं संयति माऽभियाता बलं विरिञ्चस्य वरो वरो मे ॥ १० ॥

(भा.दी.) अधर्मशीलै रावणादिभिस्तर्हि बलात्कृत्य कुतो नापहृतेत्यत आह– **शठा** इति । शठाः वक्रबुद्धयः । 'निकृतस्त्वनृजुः शठः' इत्यमरः । हठादपि बलादपि । 'प्रसभं तु बलात्कारो हठोऽथ' इत्यमरः । कन्यां सीतां अपहर्तुं कामो येषां ते तथा । अत एव संवत्सरः संवत्सरकालस्तं संयत् युद्धं तस्यां मा मां प्रति अभियाताः आगच्छन्तः रावणाद्याः, (मत्तः) बलमेषामस्तीति बलिनः, तथाऽपि यतः मे मम विभिः पक्षिभी रिच्यते उह्यते इति विरिञ्चस्तस्य ब्रह्मणः वरः श्रेष्ठः वरः बलं तस्मात्, कन्यां अपहर्तुं न शेकुः, न समर्था बभूवुः । शक्लृ शक्तौ लिट् । कश्चिदपि बलात्कारेण तां कन्यकां न नेष्यति तेभ्यस्तव पराजयो वा नास्तीति ब्रह्मवरमहिम्नैव कन्या नापहृता । नतु मच्छक्त्येति भावः ॥ १० ॥

(सं.चं.) शठा धूर्ताः कापटिका जम्बुकप्रज्ञाः । हठो बलात्कारः । गर्हायामपिः । अपहर्तुं न शेकुः । मत्तः बलिनोऽपि । संवत्सरं संयति युद्धे । समग्रो वत्सर एवैतैर्युध्यमानस्य मेऽतीतः । अथापि न शेकुः । कुतः? विरिञ्चस्य वरः श्रेष्ठो वर एव मम बलम् । कन्यार्थे मा त्वां कश्चिदपि स्म धर्षयदिति विरिञ्चवरः । अयं सुरगणैर्दत्तो वर इति रामायणे । नहि ब्रह्मवरमत्तो रावण इतरदेवतावरेण शक्यो जेतुम् । अतो 'विरिञ्चस्य वरो बलं मे' इति । सुरगणैर्वृतो विरिञ्चो वरं ददाविति वाल्मीकेराशयः । 'पुरा हि मेऽदात् प्रभुरब्जजो वरम्' (४.२२) इति हि निर्णयवचनम् । आद्यन्तयोरुपेन्द्रवज्रा । मध्ययोरिन्द्रवज्रा । तेनेयमार्द्रा नामोपजातिः ॥१०॥

१. 'सुमूर्च्छाः' २. 'किमुतान्यलोकाः' ३. 'मत्ताः'

आरोपयेद् राघव एव चापमन्वेतु सीता पतिमेनमेव ।
सम्पूर्णचन्द्रं प्रति चन्द्रिकेव प्रभा प्रभानाथमिवानुरूपा ॥ ११ ॥

(भा.दी.) आरोपयेदिति । राघव एव चापो रुद्रधनुस्तं आरोपयेत्, सज्यं कुर्यात् । रुह बीजजन्मनि प्रादुर्भावे च लिङ् । सम्पूर्णचन्द्रं प्रति चन्द्रिकेव चन्द्रज्योत्स्नेव, प्रभानाथं सूर्यं प्रति प्रभेव अनुरूपा अनुगुणा सीता एनमेव श्रीराममेव (पतिं) भर्तारं अन्वेतु अनुगच्छतु । इण् गतौ लोट् ॥ ११ ॥

(सं.चं.) प्रभानाथं सूर्यमिव । तुरीयचरण उपेन्द्रवज्रा । अन्यत्रेन्द्रवज्रा । तेन बाला नामेयमुपजातिः ॥११॥

इति ब्रुवाणं नरनाथमेनमुदाहरद्[१] विप्र उदारचेताः ।
शरासनं वैरिनिरासनं तदानीयतां द्रागवनीश्वरेति ॥ १२ ॥

(भा.दी.) इतीति । उदारमुत्कृष्टं चेतो मनो यस्य स तथा विप्रः विश्वामित्रः, इति एवमादिप्रकारेण ब्रुवाणं वदन्तं नरदेवानां राज्ञां नाथम्[२], एनं जनकं प्रति, हे अवनीश्वर, भूप जनक, वैरिणां निरासनं निराकरणं यत् शरासनं धनुस्तत् द्राक् शीघ्रं आनीयताम् । णीञ् प्रापणे लोट् । इति उदाहरत् उवाच । उदाङ्पूर्वकात् हृञ् हरणे लङ् ॥ १२ ॥

(सं.चं.) नरनाथं जनकं विप्रो विश्वामित्र उदाहरत् उदैरयत् । शरासनं चापम् । तुरीयचरण इन्द्रवज्रा । अन्यत्रोपेन्द्रवज्रा सप्तमपद्यवत् । तेनात्रापि माया नामोपजातिः ॥ १२ ॥

[३]राजाज्ञयाऽथाऽचकृषेऽष्टचक्रमञ्जूषयाऽयःकृतयाऽभिगुप्तम् ।
वीरोत्तमैः पञ्चसहस्रसङ्ख्यैर्वराच्छिवस्यैव वरं शिवास्त्रम् ॥ १३ ॥

(भा.दी.) राजेति । अथ अयसा लोहेन कृतया । अष्टौ चक्राणि यस्याः सा तथोक्ता सा च सा मञ्जूषा तया । अनेन मञ्जूषाया अतिस्थूलत्वं दर्शितम् । अभिगुप्तं रक्षितं वरमुत्तमं शिवास्त्रम्, शिवस्य अस्त्रं धनुस्तत्, राज्ञो जनकस्याऽज्ञया, पञ्च च तानि सहस्राणि च पञ्चसहस्राणि तावन्ति सङ्ख्या येषां ते तथा

---

१. **'नरदेवमेन–'** । **'नरदेवनाथ मुदा–'** इति च ।

२. **'नराणां नाथं राजानम्'** इति युक्तः पाठः । **'नराणां देवं नाथम्'** इति वा टीकापाठः स्यात् । तदा तु **'नरदेवमेनम्'** इति मूलपाठः । **'नरदेवनाथम्'** इति पाठं पठतां पक्षे **'एनं जनकं प्रति'** इति न वक्तव्यम् ।

३. **'राजाज्ञयाऽथो चकृषे'**

तैः वीरोत्तमैः पुरुषैः, शिवस्य 'यत्रेदमाकर्षणीयं त्वदाज्ञया तत्राऽनेष्यन्ति' इति यो वरस्तस्मादेव आचकृषे आकृष्टमभूत् । न तु पुरुषशक्त्येत्यर्थः । कृष विलेखलने लिट् ॥ १३ ॥

(सं.चं.) आचकृषे आकृष्यत । 'नृणां शतानि पञ्चाशद् व्यायतानां महात्मनाम् । मञ्जूषामष्टचक्रां तां समूहुस्ते कथञ्चन' इति रामायणे । यद् रावणादयोऽपि नोद्धर्तुमैशत तत् कथमथ जनकभटैराकृष्यतेत्यत आह– वराच्छिवस्यैव । नेदमुदितं रामायणे । 'तद्वरतो हि किङ्कराः सहानसैवात्र कृषन्ति कृच्छ्रतः' (४.१८) इति हि निर्णये । तुरीयचरण उपेन्द्रवज्रा, अन्यत्रेन्द्रवज्रा, एकादशवत् । तेनेयमपि बाला नामोपजातिः ॥ १३ ॥

मुनिर्म्मुकुन्दं निजगाद वत्स रामेदमापूरय चापरत्नम् ।
इतीरितोऽयं नृपतेः कुमारो ब्रुवाण ओमित्युदतिष्ठदीशः ॥ १४ ॥

(भा.दी.) मुनिरिति । मुनिर्विश्वामित्रः, हे वत्स श्रीराम, चापेषु रत्नं श्रेष्ठम्, इदं धनुः आपूरय सज्यं कुरु । पूरी आप्यायने लोट् । इति मुकुन्दं श्रीरामं प्रति निजगाद । गद व्यक्तायां वाचि । इति विश्वामित्रेण ईरितः प्रोक्तः नृपतेः दशरथस्य कुमारः पुत्रः, ईशः अयं श्रीरामः, ओमिति तथाऽस्त्विति, 'ओं स्याद्ब्रह्मण्यनुज्ञायाम्' इति वैजयन्ती, ब्रुवाणः सन्नुदतिष्ठत् उत्तस्थौ । ष्ठा गतिनिवृत्तौ लङ् ॥ १४ ॥

(सं.चं.) नृपतेर्दशरथस्य कुमारः । ओमिति ब्रुवाणः । ओमित्यभ्युपगमे । द्वितीयचरण इन्द्रवज्रा । अन्यत्रोपेन्द्रवज्रा । ऋद्धिर्नामोपजातिः ॥ १४ ॥

रामं[1] चलत्कुण्डलचारुगण्डं लावण्यसिन्धुं धनुराव्रजन्तम् ।
लोकेशमालोक्य विलासनीनामन्योन्यमासीदिति तत्र वार्त्ता ॥ १५ ॥

(भा.दी.) राममिति । चलती ये कुण्डले ताभ्यां चारू मनोहरौ गण्डौ यस्य स तथा तम् । लावण्येन सिन्धुरिव लावण्यसिन्धुस्तम्, सौन्दर्यपूर्णमित्यर्थः, धनुः प्रति आव्रजन्तमागच्छन्तं लोकेशं श्रीरामं आलोक्य, विलासिनीनां पुरस्त्रीणाम्, तत्र मिथिलायां अन्योन्यमिति वक्ष्यमाणरीत्या वार्ता आसीत् ॥ १५ ॥

(सं.चं.) वार्ता परस्परमालापः । समग्रेयमिन्द्रवज्रा, अष्टमवत् ॥ १५ ॥

१. 'श्यामम्'

धन्या हि सा कोसलराजकन्या या सूनुमेनं सुषुवे सुवेषम् ।
स राघवो राजवरोऽपि धन्यस्तातेति यं तापहरोऽयमाह ॥ १६ ॥

(भा.दी.) वार्तामेव दर्शयति– **धन्ये**त्यादिना । या कौसल्या शोभनो वेषोऽलङ्कारो यस्य स तथा तम्, एनं श्रीरामाख्यं सूनुं पुत्रं सुषुवे सूतवती, कोसलानां राजा कोसलराजः, तस्य कन्या सुता सा कौसल्या धन्या हि पुण्यवती हि । तापान् आध्यात्मिकादितापान् हरतीति तथोक्तः, योऽयं श्रीरामः तात इति पितरिति यं दशरथं आह । ब्रूञ्धातोर्लट् । राजवरः राजश्रेष्ठः सः राघवोऽपि दशरथोऽपि धन्यः पुण्यवान् इति वार्ता आसीदिति सम्बन्धः ॥ १६ ॥

(सं.चं.) कोलसराजकन्या कौसल्या । कन्येति तनयोच्यते । सामान्यतो नारीवचनं च तत् । 'कन्या कुमारिकानार्योः' इति मेदिनी । दशरथसामन्तेष्वेकः कोसलराजः । वेष इत्याकारः आकल्पश्च । सुवेषं स्वभावतः सुन्दराकारम् । विषु सेचने । अथापि मण्डनैर्मण्डितं च । राघवो दशरथः । तृतीयचरण उपेन्द्रवज्रा । अन्यत्रेन्द्रवज्रा । शाला नामोपजातिः । पञ्चमवत्, नवमवच्च ॥१६॥

[१]सञ्चीय सौन्दर्य्यरसान् समस्तानिमं विधाता व्यधितेति मिथ्या ।
अकृत्रिमं प्रादुरभूद् भुवीदमाश्चर्य्यरत्नं जनहर्षणाय[२] ॥ १७ ॥

(भा.दी.) **सञ्चीये**ति । विधाता चतुर्मुखः समस्तान् समस्तलोकगतान् सौन्दर्याणां रसान् सारान् । 'रसः सारो वरश्चेति शब्दा एकार्थवाचकाः' इत्युक्तेः । सञ्चीय एकीकृत्य, इमं श्रीरामं व्यधित निर्मितवान् इति वाक्यं मिथ्या अनृतम् । विपूर्वः डु धाञ् धारणपोषणयोः लुङ् । किं तर्हि तथ्यमित्यत आह– **अकृत्रिम-मिति** । कृत्रिमं निर्मितं न भवतीत्यकृत्रिमम्, स्वाभाविकमित्यर्थः, इदं रामाख्यं आश्चर्यरूपं रत्नं जनानां हर्षणं हर्षस्तस्मै भुवि प्रादुरभूत् आविर्बभूव ॥ १७ ॥

(सं.चं.) 'सञ्चित्य' इति साधुः पाठः । सौन्दर्यसारान् सञ्चित्य एकत्र सङ्गृह्य । इदमकृत्रिमं सहजम् । न विधात्रा निर्मितम् । आश्चर्यरत्नमाश्चर्यतमम् । 'रत्नं स्वजातिश्रेष्ठेऽपि' इति मेदिनी । आद्यन्तयोरिन्द्र-वज्रा । मध्यत उपेन्द्रवज्रा । तेन जाया नामोपजातिः ॥ १७ ॥

---

१. **'सञ्चित्य सौन्दर्यरसान्'** इत्येव मूलपाठः स्यादिति भाति । मूले टीकायां च **'सञ्चीय'** इति पाठः प्रायो लिपिकृतां प्रमादजनितः ।

२. **'जनहर्षणीम्'**

सीता च सीरध्वजकन्यकेयं सामान्यनारी न हि लोकमान्या ।
यागप्रयोगे भुव आविरासीद् या देवमाया जलधेरिव श्रीः ॥ १८ ॥

(भा.दी.) सीतेति । लोकेषु मान्या पूज्या या देवस्य श्रीहरेर्माया लक्ष्मीः । 'माया नारायणीशाना' इति लक्ष्म्यां प्रयोगात् । षष्ठ्यर्थः भार्याभर्तृभावादिः द्रष्टव्यः । यागस्य प्रयोगः कर्मविधिस्तस्मिन् । 'प्रयोगो ग्राम्यधर्मे स्यात् कुसीदे कर्मणां विधौ' इति वैजयन्ती । यागोपयुक्तक्षेत्रकर्षणलक्षणकर्मणि क्रियमाणे सतीत्यर्थः । जलधेः समुद्रात् श्रीरिव भुवः आविरासीत् । तस्मात् सीरध्वजस्य जनकस्य कन्यका इयं सीता च सामान्यनारी लोकस्त्रीसाधारणस्त्री नहि न भवति हि ॥ १८ ॥

(सं.चं.) नहि सामान्या नारी । एका समुदाये । किन्तु लोकमान्या । देवस्य विष्णोर्माया मोहनी शक्तिः श्रीः । समग्रेन्द्रवज्रा, अष्टमवत् पञ्चदशवच्च ॥ १८ ॥

सीतैव रामस्य घटेत रामा तस्याश्च योग्यो ननु राम एव ।
यथेन्दिरैवास्ति मुकुन्दयोग्या मुकुन्द एवोचित इन्दिरायाः ॥ १९ ॥

(भा.दी.) सीतैवेति । मुकुन्दस्य योग्या रूपलावण्यादिना उचिता यथा इन्दिरैव रमैव अस्ति । इन्दिरायाः मुकुन्द एव यथा उचितः भर्ता । तथैव सीतैव श्रीरामस्य रामा भार्या घटेत युज्येत । घट परिवर्तने[1] लिङ् । तस्याः सीतायाश्च योग्यः पतिः श्रीराम एव ननु ॥ १९ ॥

(सं.चं.) रामा रमणी घटेत सम्भवेत् । भार्या भवितुं योग्येति यावत् । योग्यो भर्ता राम एव ननु? 'ननु प्रश्नेऽवधारणे' इत्यभिधानम् । 'ଓଲ୍ଲଣ?' इति भाषायाम् । पूर्वार्ध इन्द्रवज्रा । उत्तरार्ध उपेन्द्रवज्रा षष्ठवत् । रामा नामोपजातिः ॥ १९ ॥

सीतापतित्वं न परीक्षणीयं रामस्य राज्ञा धनुरानमेन ।
न हि प्रदीपेन परीक्षणीयं प्रभाकरस्य प्रभया युतत्वम् ॥ २० ॥

(भा.दी.) सीतेति । राज्ञा जनकेन श्रीरामस्य सीतायाः पतित्वं भर्तृत्वं धनुष आनमः आनमनमवनमनं तेन न परीक्षणीयं न विचारणीयम् । एतदेव सदृष्टान्तमुपपादयति– **नहीति** । प्रभाकरस्य सूर्यस्य प्रभया युतत्वं युक्तत्वम्, प्रदीपः प्रदीपिका तेन न परीक्षणीयं हि ॥ २० ॥

---

१. '**घट चेष्टायाम्**' इति प्रचलितो धातुपाठः ।

(सं.चं.) रामस्य सीतापतित्वं तद्योग्यत्वं राज्ञा कर्त्रा धनुरानमनेन करणेन न परीक्षणीयम् । अत्राप्येकोनविंशवत् षष्ठवच्च पूर्वार्धे इन्द्रवज्रा । उत्तरार्धे उपेन्द्रवज्रा । रामा नामोपजातिः ॥ २० ॥

नृपात्मजोऽयं जनकात्मजाया गृह्णातु पाणिं रमणो रमण्याः[१] ।
नारायणः साध्वनुमोदतां तच्छपामहे नः सुकृतेन सख्यः ॥ २१ ॥

(भा.दी.) **नृपे**ति । नृपस्य दशरथस्य आत्मजः पुत्रः अयं श्रीरामः, रमणः सीताभर्ता सन्, रमण्याः भार्यायाः जनकात्मजायाः, पाणिर्हस्तस्तम् गृह्णातु । ग्रह उपादाने लोट् । तत् सीतापाणिग्रहणं श्रीनारायणः साधु सम्यक् यथा भवति तथा, अनुमोदतां अनुमतिं कुर्यादिति स्वेष्टदेवं श्रीहरिं प्रति प्रार्थना । हे सख्यः, तत् श्रीरामस्य सीतापाणिग्रहणं नः सुकृतं पुण्यं तेन शपामहे प्रार्थयामहे । शप आक्रोशे लट् । अस्य धातोः प्रार्थनार्थकत्वं धातूनामनेकार्थत्वाद् युज्यते । अस्मत्सुकृतफलत्वेन तद्भवत्विति प्रार्थयामासुरित्यर्थः ॥ २१ ॥

(सं.चं.) सुकृतेन शपामहे । सुकृतं पणित्वा प्रतिजानीम इत्यर्थः । '[illegible]' इति भाषायाम् । मध्ययोरिन्द्रवज्रा । आद्यन्तयोरुपेन्द्रवज्रा । तेनेयमार्द्रा नामोपजातिः, दशमवत् ॥ २१ ॥

प्रजल्पितानीति पुराङ्गनानामाकर्ण्णयन् कर्ण्णसुखानि पुंसाम् ।
अविस्मितः[२] सुस्मित एत्य रामो वामेन दोष्णा धनुरुज्जहार ॥ २२ ॥

(भा.दी.) **प्रजल्पितानी**ति । पुंसां पुरुषाणां कर्णानां सुखं येभ्यस्तानि तथा तानि । अत्यन्तं श्राव्याणीत्यर्थः । पुरे विद्यमाना अङ्गनास्तासां इति प्रजल्पितानि अत्युत्तमभाषणानि आकर्णयन् शृण्वन् । न विद्यते विस्मितं यस्य स तथा, स्वयं हासमकुर्वन्नित्यर्थः, अथापि शोभनं स्मितं यस्य स तथा, स्वभावतः स्मेरमुखत्वादिति भावः, श्रीरामः धनुःसमीपं एत्य गत्वा, वामः सव्यस्तेन दोष्णा हस्तेन धनुः उज्जहार उद्दधार । उत्पूर्वात् हृञ् हरणे लिट् ॥ २२ ॥

(सं.चं.) प्रकृष्टानि जल्पितानि । पुरावासिनीनामङ्गनानाम् । अविस्मितः धनुरुद्धरणविषये स्वयमचकितोऽदृप्तश्च । 'चित्रे दर्पे च विस्मयः' इति यादवप्रकाशः । विषमयोरुपेन्द्रवज्रा, समयोरिन्द्रवज्रा । तेन हंसी नामेयमुपजातिः ॥ २२ ॥

---

१. 'रमायाः'

२. 'अविस्मयः सुस्मित–'

नृणां सहस्रे स्वमवेक्षमाणे[1] सस्वस्तिवादे नृपतौ मुनौ च ।
निजानुजे स्मेरमुखे सलीलमारोप्य चापं समपूरयत् सः ॥ २३ ॥

(भा.दी.) नृणामिति । नृणां मनुष्याणां यत् सहस्रं तस्मिन् स्वं स्वात्मानं अवेक्षमाणे पश्यति सति । नृपतौ जनके मुनौ विश्वामित्रे च स्वस्तीति वादो वचनं तेन सहितः सस्वस्तिवादस्तस्मिन् सति । निजः स्वकीयोऽनुजो लक्ष्मणस्तस्मिन् स्मेरं स्मितयुक्तं मुखं यस्य स तथा तस्मिन् सति । सः श्रीरामः, चापं धनुस्तत्, लीलया सहितं यथा भवति तथा सलीलम्, आरोप्य उन्नमय्य समपूरयत् सज्यं चकारेत्यर्थः । पॄ पालनपूरणयोर्लङ्[2] ॥ २३ ॥

(सं.चं.) आरोप्य उद्धृत्य समपूरयत् अवनमय्य शिञ्जिन्या संयोजयामास । पूर्ववद् विषमयोरुपेन्द्रवज्रा । समयोरिन्द्रवज्रा । तेनात्रापि हंसी नामोपजातिः ॥ २३ ॥

तालप्रमाणं परिकृष्यमाणं मद्ध्ये महाचापमभज्यताऽशु ।
विश्वाधिनाथेन विनैव यत्नं यथेन्द्रनागेन नवेक्षुदण्डः ॥ २४ ॥

(भा.दी.) तालेति । विश्वाधिनाथेन जगदीश्वरेण श्रीरामेण यत्नः प्रयत्नस्तं विनैव परिकृष्यमाणं आकृष्यमाणम्, तालस्य तालवृक्षस्य प्रमाणमिव प्रमाणं परिमितिर्यस्य तत् तथा, महाचापम्, इन्द्रस्य नागो गजस्तेन, ऐरावतेनेत्यर्थः, नवो नूतन इक्षुदण्डः यथा तथा, मध्यं मध्यप्रदेशस्तस्मिन् आशु अभज्यत भग्नमभूत् । भञ्जो[3] आमर्दने लङ् ॥ २४ ॥

(सं.चं.) तालप्रमाणं तालवत् महाप्रमाणम् । ज्याया दृढबन्धनार्थं परिकृष्यमाणं प्रसभमवनाम्यमानम् । इन्द्रस्य नागेन ऐरावतेन । नवः अप्रवृद्धतया कोमलः । 'यथेक्षुदण्डं शतमन्युकुञ्जरः' (४.२६) इति निर्णये । तुरीयचरण उपेन्द्रवज्रा, अन्यत्रेन्द्रवज्रा, एकादशवत्, त्रयोदशवच्च । तेनात्रापि बाला नामोपजातिः॥ २४ ॥

जगत्त्रये दूतइवातिवेगी ध्वनिर्द्धनुर्भङ्गभवः ससार ।
रामेण सीतोपगतेति वार्त्तामुद्घोषयन् व्यक्तमिवातिरम्याम् ॥ २५ ॥

---

१. **'समवेक्षमाणे'**

२. पूरणार्थस्य पॄधातोः पूरयतीत्येव साधु रूपं भाति । अथापि वैयाकरणाः पारयतीति रूपं पेठुः । तत्पक्षे **'पूरी आप्यायने'** इति धातुः पठनीयः– **'पूरी आप्यायने पूरणे च'** इति ।

३. **'भन्जो आमर्दने'** इति क्षीरस्वामी ।

(भा.दी.) जगदिति । धनुषो भङ्गो भञ्जनं तस्माद् भवतीति तथोक्तः । अत्यन्तं वेगः अतिवेगः, सोऽस्यास्तीति तथोक्तः । ध्वनिः श्रीरामेण सीता उपगता सम्प्राप्ता इति अतिरम्यां वार्त्तां व्यक्तं स्पष्टं यथा भवति तथा उद्घोषयन्निव आघोषयन्निव जगतां त्रयं तस्मिन् दूत इव ससार चचार, व्याप्तोऽभूदित्यर्थः । सृ गतौ लिट् । जगत्त्रये व्याप्तं धनुषो भङ्गध्वनिं श्रुत्वा श्रीरामेण सीता लब्धेति जना निश्चितवन्त इति भावः ॥ २५ ॥

(सं.चं.) उपगता उरीकृता, सङ्गता वा । व्यक्तमुद्घोषयन्निव । दूतोऽपि सपदि वार्ताश्रवणार्थमतिवेगी सरति । पूर्वार्ध उपेन्द्रवज्रा, उत्तरार्ध इन्द्रवज्रा, प्रथमवत् । तेन माला नामोपजातिः ॥ २५ ॥

छित्त्वैवमच्छेद्यमवश्यमन्यैस्तत् कार्म्मुकश्रेष्ठमुदारकर्म्मा ।
सलक्ष्मणः शोभनलक्षणोऽयं तस्थौ विलोक्यास्य मुनेर्म्मुखेन्दुम् ॥ २६ ॥

(भा.दी.) छित्वेति । उदारमुत्कृष्टं कर्म यस्य स तथा, शोभनानि लक्षणानि अङ्गसम्पदो यस्य स तथा, 'लक्षणं कार्षिके चिह्ने नाम्नि मुद्राङ्गसम्पदोः' इति वैजयन्ती, अयं श्रीरामः, श्रीरामादन्यैः पुरुषैरवश्यम् सर्वथाऽपि अच्छेद्यं च्छेत्तुमशक्यं तत् जनकसम्बन्धि कार्मुकश्रेष्ठम्, एवं छित्वा सलक्ष्मणः लक्ष्मणेन सहितः सन्[१] अस्य मुनेः विश्वामित्रस्य मुखमेवेन्दुस्तं विलोक्य तस्थौ । ष्ठा गतिनिवृत्तौ लिट् ॥ २६ ॥

(सं.चं.) नारायणादन्यैरवश्यमनम्यमच्छेद्यं च । शिववररक्षितमिति ततोऽवराणां न प्रसङ्गः, जनकं विना । तेनापि नम्यमेव, न च्छेद्यम् । शिवस्तु स्ववरं स्वयमेव भनक्तीति न साम्प्रतम् । ब्रह्मणो न भूमाववतार इति न तस्यापि प्रसक्तिः । अस्य विश्वामित्रस्य मुखेन्दुम् । यदर्थं राम इहाऽनीतस्तत् कार्यं सम्पन्नमिति मुनिमुखे व्यक्तां प्रसन्नतामिन्दुपदेनाऽह । तृतीयचरण उपेन्द्रवज्रा, अन्यत्रेन्द्रवज्रेति पञ्चमवत्, नवमवत्, षोडशवच्च शाला नामोपजातिः ॥ २६ ॥

अथाऽविरासीन्नरदेवकन्या[२]च्छलेन देवी स्वयमिन्दिरैव ।
अन्तःपुरान्निर्गतवत्युदारा[३] सा वेदगर्भादिव वेदवाणी ॥ २७ ॥

(भा.दी.) अथेति । अथ चापभङ्गानन्तरम् । च्छलं व्याजः, तेन नरदेवस्य राज्ञो जनकस्य कन्या, लौकिकप्रवादमात्रेण जनकसुतेत्यर्थः । स्वयं देवी क्रीडादिगुणविशिष्टा, उदारा महती, ब्रह्माद्यधीश्वरीत्यत्यर्थः । 'उदारो

१. **'लक्ष्मणसहितः सन्'**
२. **'–न्नरनाथकन्या–'**। वि.ती.पाठे **'नरदेवकन्या छलेन'** इति भिन्ने पदे।
३. **'–वत्युदारात् सा'**

महति ख्याते' इति वैजयन्ती । इन्दिरैव महालक्ष्मीरेव सा सीता वेदगर्भात् ब्रह्मणः वेदवाणीव वेदरूपा सरस्वतीव जनकस्य यदन्तःपुरं तस्मात् निर्गतवती बहिरागतवती आविरासीत्[1] । अस्तेर्लङ् । उदारादिति पाठे समृद्धादन्तःपुरादित्यर्थः ॥ २७ ॥

(सं.चं.) नरदेवकन्याच्छलेन । छलमपदेशः । 'ऩ्छ' इति भाषायाम् । जनकपुत्रीत्वं व्याजीकृत्य तदपदेशेन भूमाववतीर्णा स्वयमिन्दिरैव । वेदगर्भाद् बादरायणात्, हयग्रीवाद्वा वेदवाणीव । वेदगर्भात् चतुर्मुखाद् वा । वेदज्ञाद् विप्राद् वा । पूर्वार्ध उपेन्द्रवज्रा, उत्तरार्ध इन्द्रवज्रा । तेन प्रथमवत्, पञ्चविंशवच्च माला नामोपजातिः ॥ २७ ॥

मञ्जीरमञ्जुध्वनिपूरिताशा गतिश्रिया निर्जितराजहंसी[2] ।
पदेपदे रम्यरसा[3] पदाभ्यां सीताऽभिरामं शनकैर्जगाम ॥ २८ ॥

(भा.दी.) मञ्जीरेति । मञ्जीरयोः पादकटकयोः मञ्जुः मनोहरो यो ध्वनिस्तेन पूरिताः पूर्णा आशा यया सा तथा । गतेः पदविन्यासस्य श्रीः लावण्यादिरूपा सम्पत् तया निर्जिता राजहंसी राजहंसपक्षिणः स्त्री यस्याः सा तथा सती । पदेपदे प्रतिपादविन्यासमित्यर्थः, 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः । रम्यो रसो लावण्यादिरूपो यस्याः सा तथा सती (सीता) । पदे पादौ ताभ्याम्, अभिरामं मनोहरं श्रीरामं शनकैः शनैः जगाम । गम्ऌ गतौ लिट् ॥ २८ ॥

(सं.चं.) 'मञ्जीरं हंसकं स्त्रीणां चरणाभरणं स्मृतम्' इत्यभिधानम् । राजहंसस्य स्त्री । प्रतिपदन्यासमभिव्यज्यमानो रम्यो रामविषयो रसोऽनुरागो यस्याः । ललिताभ्यां पदाभ्यामभिरामं राममभिजगाम । आद्यन्तयोरिन्द्रवज्रा, मध्यत उपेन्द्रवज्रा । तेन सप्तदशवज्जाया नामोपजातिः ॥ २८ ॥

पुनर्निरीक्ष्याऽपि पुनर्नवा सा कान्त्या हसन्तीव विनाऽपि हासम् ।
दृष्ट्याऽऽलपन्तीव विनाऽभिलापं [4]महोत्सवोऽभूज्जनलोचनानाम् ॥ २९ ॥

(भा.दी.) पुनरिति । निरीक्ष्याऽपि पुनःपुनः नवा सौन्दर्यातिशयस्य द्रष्टुमशक्यत्वान्नूतनेव दृश्यमाना । हासो मन्दहासस्तं विनाऽपि कान्त्या मुखकान्त्या हसन्तीव मन्दहासं कुर्वन्तीव दृश्यमाना । आलापः भाषणं तं

१. 'या भुव आविरासीत् सा सीता अथ धनुर्भङ्गानन्तरं अन्तःपुरात् राजावरोधात् निर्गतवती बहिरागता' इति का.श्री. ।

२. '–श्रिया लज्जितराजहंसी' ३. 'रम्यतरा' ४. 'महोत्सवाऽभूज्जन–'

विनाऽपि दृष्ट्या चक्षुषा आलपन्तीव सम्भाषणं कुर्वन्तीव दृश्यमाना सा सीता जनानां लोचनानि चक्षूंषि तेषां महोत्सवः महोत्सवरूपा अभूत् ॥ २९ ॥

(सं.चं.) पुनर्नवा नित्यनूतना । आचक्षते हि–'दिनेदिने यन्नवतामुपैति तदेव रूपं रमणीयतायाः' इति । मध्यत इन्द्रवज्रा । आद्यन्तयोरुपेन्द्रवज्रा । तेन दशमवदेकविंशवच्च पुनरियमार्द्रा नामोपजातिः ॥ २९ ॥

औदार्य्यसौन्दर्य्यविलासपूर्वान् सर्वान् गुणान् कः कथयेत देव्याः ।
यान् प्रब्रुवाणश्चतुराननोऽपि [1]कौतूहलेनाचतुराननोऽभूत् ॥ ३० ॥

(भा.दी.) औदार्येति । देव्याः सीतायाः यान् गुणान् प्रब्रुवाणः प्रकृष्टतया विविच्य वदन्, चत्वारि आननानि यस्य स तथा, ब्रह्माऽपीत्यर्थः, कौतूहलं कौतुकं तेन चतुरं न भवतीत्यचतुरं तादृशमाननं यस्य स तथा, तद्गुणवर्णने चातुर्यरहित इत्यर्थः, अभूत् । भूधातोर्लुङ् । औदार्यं महिष्ठदातृत्वं तच्च, सौन्दर्यं (सुरूपता तच्च), विलासः (हावभेदः) स च ते पूर्वे येषां ते तथा तान्, देव्याः सर्वान् तान् गुणान् कः कविः कथयेत वर्णयेत? कथ वाक्यप्रबन्धे लिङ् । न कोऽपीत्यर्थः ॥ ३० ॥

(सं.चं.) चतुराननोऽप्यचतुरानन इति विरोधाभासः । सर्वगुणप्रकथनेऽचतुरमाननमस्येति परिहारः । समग्रेय-मिन्द्रवज्रा ॥ ३० ॥

लज्जानदीं क्षिप्रतरप्रवाहां न्यक्कुर्वती भक्तिमहार्ण्णवोघैः ।
शनैरपाङ्गेन सुमङ्गलाङ्गी[2] ददर्श देवी जगदेकनाथम् ॥ ३१ ॥

(भा.दी.) लज्जेति । सुमङ्गलमङ्गं शरीरं यस्याः सा तथा (देवी सीता) । 'अङ्गगात्रकण्ठेभ्यश्च'[3] इति ङीप् । अत्यन्तं क्षिप्रः क्षिप्रतरस्तादृशः प्रवाहो यस्याः सा तथा ताम् । लज्जैव नदी तां भक्तिरेव महान्तोऽ-र्णवास्तेषामोघाः समूहास्तैः । यद्वा भक्तिरेव महार्णवः तस्य ओघाः प्रवाहास्तैः । 'ओघो वृन्दोऽम्भसां रयः' इत्यमरः । न्यक्कुर्वती तिरस्कुर्वाणा सती, शनैः अपाङ्गो नेत्रान्तस्तेन जगदेकनाथं श्रीरामं ददर्श । दृशिर् प्रेक्षणे लिट् । भर्तृमुखनिरीक्षणे लज्जावत्यपि भक्तिवशाददृष्ट्वा स्थातुमशक्ता सती शनैरीषद् ददर्शेति भावः ॥ ३१ ॥

---

१. 'कुतूहलेनाचतु–' २. 'सुमङ्गलाङ्गं ददर्श देवं जग–'

३. **'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्'** (अ.सू.४.१.५४) इति सूत्रे पूरकतया पठितमिदं वार्तिकम् ।

(सं.चं.) भक्तिर्दिदृक्षां त्वरयति । लज्जा निवारयति । अन्ते भक्तिरेव जिगायेत्याह– लज्जानदीम् । लज्जानदीं भक्तिसागरेण सङ्गता तत्तरङ्गवेगपिहिता तिरोहिता बभूव । 'नयनोपान्तमपाङ्गः' इत्यभिधानम् । पूर्वार्ध इन्द्रवज्रा । उत्तरार्ध उपेन्द्रवज्रा । तेन षष्ठवत्, एकोनविंशवत्, विंशवच्च रामा नामोपजातिः ॥ ३१ ॥

प्रसन्नवक्त्रं सरसीरुहाक्षं श्यामं सुगन्धारुणचन्दनाक्तम् ।
शूरं किशोरं शरणं प्रजानां कान्तं विलोक्याऽभिननन्द कान्ता ॥ ३२ ॥

(भा.दी.) प्रसन्नेति । कान्ता मनोज्ञा सीता, प्रसन्नं वक्त्रं यस्य स तथा तम्, सरसीरुहवत् कमले इवाक्षिणी[१] यस्य स तथा तम्, श्यामम्, शोभनो गन्धो यस्य तत् सुगन्धम्, तादृशमरुणं रक्तं यच्चन्दनं तेन अक्तं लिप्तम् । समासान्तविधेरनित्यत्वादिप्रत्ययाभावः । शूरम्, किशोरं किशोरवयस्कम्, प्रजानां शरणं रक्षकम्, 'शरणं गृहरक्षित्रोः' इत्यमरः, कान्तं भर्तारं श्रीरामं विलोक्य अभिननन्द । नदि हर्षे[२] लिट् ॥ ३२ ॥

(सं.चं.) अरुणचन्दनमगरु । अभिननन्द जहर्ष । प्रथमचरण उपेन्द्रवज्रा । इतरत्रेन्द्रवज्रा । कीर्तिर्नामोपजातिः ॥ ३२ ॥

सीताऽथ[३] रामे नवचन्दनार्द्रां[४] हेमारविन्दस्रजमामुमोच ।
रामोऽपि देव्यां प्रणयामृतार्द्रां दृष्टिं मनोज्ञां [५]निदधे तदैव ॥ ३३ ॥

(भा.दी.) सीतेति । अथ सीता श्रीरामे नवं नूतनं यच्चन्दनं तेन अक्तां सिक्ताम्, हेममयानि अरविन्दानि तेषां स्रजं मालां आमुमोच समर्पितवती । मुच्लृ मोक्षणे लिट् । श्रीरामोऽपि तदैव देव्यां प्रणयः स्नेहरस एवामृतं तेन आर्द्राम्, स्नेहपूर्णामित्यर्थः, मनोज्ञां मनोहरां दृष्टिं निदधे निहितवान्, अपश्यदित्यर्थः । डु धाञ् धारणपोषणयोर्लिट् ॥ ३३ ॥

(सं.चं.) हेमवर्णान्यरविन्दानि । रामे तत्कण्ठे आमुमोच आबबन्ध । 'आबद्धः पुनरामुक्तः' इति यादवप्रकाशः । समग्रा चेयमिन्द्रवज्रा ॥ ३३ ॥

शम्भुशङ्करपुरन्दरादयः सुन्दरीयुतमवेक्ष्य सुन्दरम् ।
आत्मनां जनकमादिपूरुषं तुष्टुवुश्च तुतुषुश्च सानुगाः ॥ ३४ ॥

---

१. **'कमलवदक्षिणी'** २. **'टु नदि समृद्धौ'** इति तु धातुपारायणिकाः । ३. **'सीता च रामे'**
४ **'–चन्दनाक्ताम्'** इति वि.ती.पाठः । ५. **'मनोज्ञां विदधे'**

(भा.दी.) शम्भ्विति । अनुगैः भृत्यैः गन्धर्वादिभिः सहिताः सानुगाः, शं सुखं भवत्यस्मादिति शम्भुर्ब्रह्मा स च, शं सुखं करोतीति शङ्करः स च, शत्रूणां (पुराणि) नगराणि दारयतीति पुरन्दरः स च, ते आदयो येषां ते तथा देवाः । सुन्दर्या स्त्रिया सीतया युतम्, आत्मनां स्वेषां जनकं पितरम्, आदौ विद्यमानः पूरुष आदिपूरुषस्तम्, सुन्दरं श्रीरामं अवेक्ष्य तुष्टुवुश्च स्तोत्रं चक्रुश्च । ष्टुञ् स्तुतौ लिट् । तुतुषुश्च सन्तोषं प्राप्ताश्च । तुष तुष्टौ लिट् ॥ ३४ ॥

(सं.चं.) शम्भुः स्वयम्भूः । शङ्कर इति पृथग्वचनात् । 'शम्भुरर्हन् विधिः शिवः' इति मङ्खः । रथोद्धता च्छन्दः ॥ ३४ ॥

गन्धर्वगीतरुतमप्सरसां च नृत्तं देवीभिरर्प्पितमुरुद्युतरुप्रसूनम् ।
वाद्यस्वनं च निजपूजनमाकलय्य रामश्च रामरमणी च मुदं दधाते ॥ ३५ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
बालकाण्डे सप्तमः सर्ग्गः ॥

—०—

(भा.दी.) गन्धर्वेति । श्रीरामश्च रामरमणी श्रीरामभार्या सीता च गन्धर्वाणां तुम्बुरुप्रभृतीनां गीतरूपं गानरूपं यद् रुतं ध्वनिस्तत्, अप्सरसां उर्वशीप्रभृतीनां नृत्तं नर्तनं तच्च, देवीभिः देवतास्त्रीभिः अर्पितं अभिवृष्टम्, उरव उत्कृष्टा ये दिवः स्वर्गस्य तरवः पारिजाताद्यास्तेषां प्रसूनं तच्च, वाद्यानां भेर्यादीनां स्वनो ध्वनिस्तं च, निजं आत्मीयं यत्पूजनं तत्, आकलय्य दृष्ट्वा मुदं प्रीतिं दधाते सम्प्राप्तौ ॥ ३५ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां बालकाण्डे सप्तमः सर्गः ॥

—०—

(सं.चं.) द्युतरवः देवलोकद्रुमाः । कल्पतरवः । निजपूजार्थं कल्पितम् । आकलय्य अवमृश्य । तभौ जौ गौ चेति वसन्ततिलकेयम् ॥ ३५ ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां बालकाण्डे सप्तमसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– ३०६+३५=३४१]

१. 'गन्धर्वगीतरुतमाकलय्य श्रुत्वा, अप्सरसां नृत्तमाकलय्य दृष्ट्वा, द्युतरुप्रसूनं आकलय्य स्वीकृत्य, वाद्यस्वनं चाऽकलय्य श्रुत्वा' इति.का.श्री.।

अष्टमः सर्ग्गः

जनकं प्रति रामस्य जनकोऽथ जनेश्वरः ।
दूतान् प्रस्थापयामास[1] विश्वामित्रानुमोदितः ॥ १ ॥

(भा.दी.) श्रीरामे सीतया वृते सति जनकेन किमकारीत्यत आह– **जनकमित्या**दिना । अथ स्वयंवरानन्तरं जनेश्वरः राजा जनकः विश्वामित्रेण अनुमोदितः सम्मतीकृतः सन् श्रीरामस्य जनकं पितरं दशरथं प्रति दूतान् प्रस्थापयामास प्रेषयामास । प्रपूर्वः ष्ठा गतिनिवृत्तौ लिट् ॥ १ ॥

(सं.चं.) रामस्य जनकं प्रति । अनुमोदितः लब्धानुमतिः ॥ १ ॥

प्राप्य दूतास्त्रिरात्रान्ते[2] राघवेन्द्रनिवेशनम्[3] ।
संश्रान्ता विश्रमं जग्मुर्हंसाः प्राप्येव मानसम् ॥ २ ॥

(भा.दी.) प्राप्येति । तिस्रश्च ता रात्रयश्चेति त्रिरात्राणि । सङ्ख्यापूर्वरात्रिशब्दस्य क्लीबता वाच्येति वचनात्[4] क्लीबता । तेषामन्तोऽवसानं तस्मिन् चतुर्थदिन इत्यर्थः । (दूताः) राघवेन्द्रस्य दशरथस्य निवेशनं मन्दिरं तत् प्राप्य, बहुदूरगत्या संश्रान्ताः सन्तः, मानसं मानससरोवरं तत् प्राप्य हंसा इव विश्रमो विश्रमणं तं जग्मुः । गम्लृ गतौ लिट् ॥ २ ॥

(सं.चं.) तिस्रो रात्रयः समाहताः त्रिरात्रः । त्रिरात्रस्यान्ते चतुर्थदिवसे । 'त्रिरात्रमुषिता मार्गे तेऽयोध्यां प्राविशन् पुरीम्' (६८.१) इति रामायणे । राघवेन्द्रस्य निवेशनं पुरमयोध्याम् । पूर्वं निरन्तरयानेन गाढं श्रान्ताः । सम्प्रति विश्रमं श्रमाभावं जग्मुः । विशश्रमुरित्येके ॥ २ ॥

---

१. **'दूतान् सम्प्रेषयामास'** २. **'–रात्रेण राघ–'** ३. **'निवेशनमिति नगरम्'** इति वि.भू. ।

४. इदम्–**'सङ्ख्यापूर्वं रात्रं क्लीबम्'** इत्येकदेशिनां मतमनुसृत्योक्तम् । जयादित्यादयो नेदमभ्युपयन्ति । तथाहि काशिकायाम्–**'सङ्ख्याव्ययादेः खल्वपि । द्वे रात्री समाहृते द्विरात्रः । त्रिरात्रः । अतिक्रान्तो रात्रिम् अतिरात्रः । नीरात्रः'** इत्युक्तम्, **'अहःसर्वैकदेशसङ्ख्यातपुण्याच्च रात्रेः'** (अ.सू.५.४.८७) इति सूत्रविवरणावसरे । **'द्वयोः रात्र्योः समाहारः द्विरात्रम्'** इति वदन्तो भट्टोजिदीक्षितादय एव क्लीबतावादिनः । तत्पक्षेऽपि तिसृणां रात्रीणां समाहारस्त्रिरात्रमित्येव वक्तुमुचितमिति भाति ।

अथोचुस्ते दशरथं मन्त्रिभिः परिवारितम् ।
अञ्जसाऽञ्जलिमाबद्ध्य विदेहेशविवक्षितम् ॥ ३ ॥

(भा.दी.) अथेति । (अथ दशरथदर्शनानन्तरम्), ते दूताः मन्त्रिभिः सुमन्त्रादिभिः परिवारितं परिवृतं दशरथं प्रति अञ्जसा अञ्जलिं बद्धहस्तं आबद्ध्य, शिरसीति[१] शेषः, प्रणम्येत्यर्थः, विदेहानां विदेहविषयाणामीशो जनकस्तेन विवक्षितं वक्तुं निरूपितं कार्यं ऊचुः । वचधातोर्लिट् ॥ ३ ॥

(सं.चं.) अथेति माङ्गलिकमेतदित्याह । परिवारितं परिवृतम् । चुरादेः 'वृञ् आवरणे' इत्यस्येदं रूपम् । अञ्जसा सपदि, अयोध्यागमनसमनन्तरमेव, विलम्बमकृत्वा । विदेहेशेन जनकेन विवक्षितं वक्तव्यमित्या-दिष्टम् ॥ ३ ॥

उर्व्यां सर्वे समासाद्य चापं वीरा वृथा गताः ।
रामो राजीवनयनः कोदण्डं समखण्डयत् ॥ ४ ॥

(भा.दी.) उर्व्यामिति । उर्व्यां भूमौ विद्यमानाः सर्वे वीराः चापं रुद्रधनुस्तत् समासाद्य उद्धरणार्थमा-गत्य, वृथा व्यर्थम्, धनुरनुद्धृत्यैवेत्यर्थः, गताः स्वनगरं प्रति गताः । राजीववत् कमलवत् नयने यस्य स तथा श्रीरामः, कोदण्डं धनुस्तत् समखण्डयत् । खडि भेदे लङ् ॥ ४ ॥

(सं.चं.) उर्व्यां विद्यमानाः सर्वे वीराः । वृथा वितथप्रयत्नाः ॥ ४ ॥

सीता चात्रानुरक्ताऽऽसी[२]च्चिन्त्यतामित उत्तरम् ।
विश्वामित्रो भवन्मित्रं भवन्तं सम्प्रतीक्षते ॥ ५ ॥

(भा.दी.) सीतेति । सीता च अत्र श्रीरामे, अनुरक्ता अनुरागवती आसीत् । इतः जातकार्यात् उत्तरं भाविप्रयोजनं चिन्त्यतां त्वयाऽलोच्यताम् । चिति स्मृत्याम् लोट् । भवतः मित्रं मित्रभूतः विश्वामित्रः भवन्तं सम्प्रतीक्षते कदा द्रक्ष्यामीति सम्प्रतीक्ष्य वर्तते । ईक्ष दर्शनाङ्कनयोर्लट् ॥ ५ ॥

(सं.चं.) कोदण्डखण्डनेनानुरक्ताऽऽसीदिति लौकिकम् । सदाऽऽसीदिति वास्तवम् । इत उत्तरं करणी-यम् । सम्प्रतीक्षते सम्प्रति प्रतीक्षमाण आस्ते ॥ ५ ॥

---

१. 'शिरसेति'
२. '–रक्ताऽऽस चिन्त्यता–'

विवाहाय समायाहि नन्दनस्य[1] सबान्धवः ।
इति दूतोदितं श्रुत्वा परितुष्यन्नजात्मजः ॥ ६ ॥

गमनाय मतिं चक्रे मन्त्रिभिः सह मन्त्रयन् ।
तस्यां रात्र्यां व्यतीतायां मतिमान्[2] मानवेश्वरः ।
प्रागेव प्रेषयामास दूतान् सह महाधनैः[3] ॥ ७ ॥

(भा.दी.) विवाहेति । बान्धवैः बन्धुभिः सहितः सबान्धवः । विवाहः परिणयनं तस्मै नन्दनं श्रीरामं प्रति समायाहि आगच्छ । या प्रापणे लोट् । इति दूतैरुदितं तत् वाक्यं श्रुत्वा परितुष्यन् अजस्य अजनाम्नो भूपस्य आत्मजः पुत्रः दशरथः मन्त्रिभिः सह मन्त्रयन् कर्तव्यकार्यमालोचयन् सन् गमनं प्रयाणं तस्मै मतिं चक्रे। कृञ्धातोर्लिट्। **तस्यामि**ति। मतिमान् विवेकी मानवानां नृणामीश्वरः दशरथः तस्यां दूतैरागतदिनरात्र्यां व्यतीतायां सत्यां दूतान् स्वकीयदूतान्[4] महान्ति धनानि यानि तैः, विवाहोपयोगिधनैरित्यर्थः, सह प्रागेव स्वनिर्गमनात् पूर्वमेव प्रेषयामास । इष गतौ लिट् ॥ ६–७ ॥

(सं.चं.) तस्मात् नन्दनस्य विवाहाय समायाहि । अजस्य राज्ञ आत्मजो दशरथः मन्त्रिभिः सह मन्त्रयन् कर्तव्यमालोच्य यस्मिन् दिने दूता आगतास्तस्यां रात्र्यां व्यतीतायां गमनाय मतिं चक्रे गन्तव्यमिति निरधारयत् । मतिमान् कार्यज्ञः । प्रागेव स्वगमनात् । जनकप्रेषितान् दूतान् । महान्त्यकुप्यानि धनानि, तैः सह । प्राभृतमिति जनकस्य । उपढौकनमिति दूतानाम् ॥ ६–७ ॥

युयोज यानं त्वरितः[5] सुमन्त्रो राघवाज्ञया[6] ।
पुरो[7] निर्य्यापयामास चमूं च चतुरङ्गिणीम् ॥ ८ ॥

(भा.दी.) युयोजेति । सुमन्त्रः राघवाज्ञया दशरथाज्ञया त्वरितः वेगितः सन्, यानं ईयते गम्यतेऽनेनेति यानं रथस्तत् युयोज अश्वैर्बबन्ध, नियमितवानिति वा । युजिर् योगे लिट् । चत्वारि अङ्गानि गजरथाश्व-

१. **'नन्दनं हि सबान्धवः'** इति वि.ती.पाठः स्यात् ।
२. **'प्रीतिमान्'**
३. अर्थसौकर्याय अत्र सप्तमे, उत्तरत्र (२७) सप्तविंशे च श्लोके षट्चरणत्वं प्राचीनव्याख्यातृभिरभ्युपगतमिति भाति ।
४. **'दूतान् जनकभृत्यान्'** इति का.श्री. ।
५. **'त्वरितम्'**
६. **'राज्ञ आज्ञया'**
७. **'पुरान्निर्यापयामास'**

पदातिलक्षणावयवा यस्याः सा तथा ताम्, चमूं पुरः नगरात्, 'पूः स्त्री पुरीनगर्यौ द्वे' इत्यमरः, निर्यापयामास निर्गमयामास । या प्रापणे लिट् ॥ ८ ॥

(सं.चं.) यानं राजप्रयाणोचितं रथम् । युयोज समनह्यत । सज्जं चकारेत्येतत् । पुरः पूर्वमेव पुरो नगरान्निर्यापयामास । यथा सा सत्वरगमनं राजानमनुगच्छेत् । पत्तयोऽश्वा रथा गजा इति चत्वार्यङ्गान्यस्य इति चतुरङ्गिणी । चमूरिति सेनासामान्यवचनम्, विशेषवचनं च । अक्षोहिण्या दशमो भागोऽनीकिनी । तस्याः पुनस्तृतीयोंऽशश्चमूः । अत्र तु न विशेषविवक्षा । सेनासामान्यवचनमेतत् । तथाहि पठन्ति पदज्ञाः– पृतना सेना बलं सैन्यं चक्रं चमूरिति ॥ ८ ॥

मन्त्रिभिः सह विप्रैश्च सभार्य्यः सविधातृजः ।
रथेनाऽसौ[1] दशरथो जगाम जनकालयम् ॥ ९ ॥

(भा.दी.) मन्त्रीति । भार्याभिः सहितः सभार्यः, विधातुश्चतुर्मुखाज्जातो विधातृजो वसिष्ठस्तेन सहितः सविधातृजः, असौ दशरथः मन्त्रिभिः सुमन्त्रादिभिः विप्रैर्वामदेवादिभिश्च सह, रमन्ते धन्विनोऽत्रेति रथस्तेन, जनकस्य आलयो मन्दिरं तम् प्रति जगाम । गम्लृ गतौ लिट् ॥ ९ ॥

(सं.चं.) मन्त्रिभिः सुमन्त्रादिभिः । 'धृष्टिर्जयन्तो विजयः सिद्धार्थो ह्यर्थसाधकः । अशोको मन्त्रपालश्च सुमन्त्रश्चाष्टमोऽभवत्' (७.३) इति रामायणे । विप्रा वामदेवादयः । 'वसिष्ठो वामदेवश्च जाबालिरथ काश्यपः । मार्कण्डेयः सुदीर्घायुरृषिः कात्यायनस्तथा । एते द्विजाः प्रयान्त्वग्रे स्यन्दनं योजयस्व मे' (६९.४–५) इति च । विधातृजो वसिष्ठः । विप्रत्वेऽपि स विधातृज इति कुलगुरुरिति च पृथगुक्तः ॥ ९ ॥

प्रवेक्ष्यन्तं पुरीमाराद् भूपं दृष्ट्वाऽथ मैथिलः ।
शतानन्दादिभिः सार्द्धं सानन्दोऽभिययौ द्रुतम् ॥ १० ॥

(भा.दी.) प्रवेक्ष्यन्तमिति । अथ मैथिलो जनकः, आरात् किञ्चिद्दूरतः, पुरीं प्रवेक्ष्यन्तं प्रवेष्टुमिच्छावन्तं भूपं दशरथं दृष्ट्वा, शतानन्दो गौतमपुत्र आदिर्येषां ते तथा तैः मुनिभिः सार्द्धं सानन्दः सन् द्रुतं यथा भवति तथा अभिययौ अभिमुखतया जगाम । या प्रापणे लिट् ॥ १० ॥

(सं.चं.) आराद् दूरादेव । शतानन्दादिभिरित्यन्यैरृत्विग्भिश्च विश्वामित्रेण च ॥ १० ॥

---

१. 'रथेनाथो दश–'

पुरीं प्रवेश्य सम्पूज्य यथाशास्त्रं स शास्त्रवित् ।
राघवं[१] प्रावदद् राजा मुनीन्द्राणां च संसदि ॥ ११ ॥

(भा.दी.) पुरीमिति । शास्त्रं वेत्तीति शास्त्रवित्, सः राजा जनकः राघवं[२] दशरथं पुरीं प्रवेश्य मुनीन्द्राणां संसत् सभा तस्यां शास्त्रमनतिक्रम्य यथाशास्त्रम्, शास्त्रोक्तप्रकारेणेत्यर्थः[३], सम्पूज्य प्रावदत् प्रोवाच । वद व्यक्तायां वाचि लङ् ॥ ११ ॥

(सं.चं.) राघवं दशरथं राजा जनकः प्रावदत् प्रेम्णाऽवदत्, प्रथमं चावदत् ॥ ११ ॥

दिष्ट्या दृष्टोऽसि राजेन्द्र दुर्लभं प्रियदर्शनम् ।
दिष्ट्या मे[४] राघवश्रेष्ठैरभूद् बान्धवमीदृशम् ॥ १२ ॥

(भा.दी.) वचनप्रकारमेव दर्शयति– **दिष्ट्येत्या**दिना । यस्मात् प्रियस्य प्रेमविषयस्य पुंसः दर्शनं दुर्लभं तस्मात् हे राजेन्द्र दशरथ, त्वं दिष्ट्या दैवात् दृष्टः असि । अस्तेर्लट् । (मे) राघवेषु श्रेष्ठैः भवद्भिः सह ईदृशं बान्धवं बन्धुत्वं दिष्ट्या दैवादभूत् ॥ १२ ॥

(सं.चं.) दिष्ट्या दृष्टोऽसि । माङ्गलिकमेतत् तव दर्शनम् । महदिदं मोदस्थानं यद् दृष्टोऽसि । रामेण धनुर्भग्नमिति यदृच्छया दृष्टोऽसि । नूनं मयि देवाः प्रसन्ना यद् दृष्टोऽसि । 'दिष्ट्या स्यान्मङ्गलादिषु' इत्यभिधानम् । बान्धवं बन्धुभावः ॥ १२ ॥

रामाय लक्ष्मणायापि प्रदास्यामि सुते मम ।
अवसाय महायज्ञमहं सीतोर्म्मिळे ध्रुवम् ॥ १३ ॥

(भा.दी.) रामायेति । अहं महान् यो यज्ञस्तम्, अवसाय समाप्य, मम सुते सीता च ऊर्मिळा च ते, सीतोर्मिळाभिधे इत्यर्थः, श्रीरामाय लक्ष्मणायापि प्रदास्यामि । दाञ् दाणे लृट् । ध्रुवम् ॥ १३ ॥

(सं.चं.) अवसाय समाप्य । मम सुते सीतोर्मिळे । सीता सीरजाता सुता । ऊर्मिळा प्रसूता सुता ॥१३॥

---

१. 'राजानम्' २. 'राजानम्'
३. 'शास्त्रोक्तक्रमेणेत्यर्थः' ४. 'राघवैः श्रेष्ठैः–'

इत्युक्तो जनकेनोचे किञ्चित् स्मित्वा स राघवः ।
प्रतिग्रहो दातृवशस्तस्मादेवं भवेदिति[१] ॥ १४ ॥

(भा.दी.) इतीति । जनकेन इति एवमादिप्रकारेण उक्तः राघवः दशरथः सः किञ्चित् स्मित्वा मन्दहासं कृत्वा, यस्मात् प्रतिग्रहः दानद्रव्यम्, 'प्रतिग्रहः क्रियाकारे चमूपृष्ठे पतद्ग्रहे । दानद्रव्ये स्वीकृतौ च' इति वैजयन्ती, दातृवशः तस्मात्, एवं त्वदुक्तरीत्या भवेत्, इति ऊचे ॥ १४ ॥

(सं.चं.) 'प्रतिग्रहो दातृवशः श्रुतमेतन्मया पुरा । यथा वक्ष्यसि धर्मज्ञ तत् करिष्यामहे वयम्' (६९.१४)इति रामायणे ॥ १४ ॥

सानन्दो नन्दनैः सार्द्धं राजा वेश्मान्तरेऽवसत् ।
विश्वामित्रवसिष्ठाद्यैः साकं हरिकथापरैः ॥ १५ ॥

(भा.दी.) सानन्द इति । आनन्देन पुत्रदर्शनजन्यसन्तोषेण सहितः सानन्दः राजा दशरथः नन्दनैः श्रीरामाद्यैः सार्द्धं साकम्, हरेः कथा तस्यां परं तात्पर्यं येषां ते तथा तैः, हरिकथायां पराः रतास्तैरिति वा, विश्वामित्रश्च वसिष्ठश्च तौ आद्यौ येषां ते तथा तैः, मुनिभिः साकम्, अन्यद्वेश्म वेश्मान्तरं तस्मिन् अवसत् । वस निवासे लङ् ॥ १५ ॥

(सं.चं.) नन्दनैश्चतुर्भिः सार्द्धम् । रामलक्ष्मणौ विश्वामित्रेण सह पूर्वमेवाऽगतौ । भरतशत्रुघ्नौ पित्रा सहाऽगतौ ॥ १५ ॥

परेद्युर्भ्रातरं दूतैरुत्सवार्थं कुशध्वजम् ।
[२]वीरमिक्षुमतीतीरादानिनायाथ[२] मैथिलः ॥ १६ ॥

(भा.दी.) परेद्युरिति । अथ मैथिलः जनकः, परेद्युः द्वितीयदिवसे वीरं कुशध्वजं कुशध्वजनामानं भ्रातरं दूतैः उत्सवार्थं विवाहलक्षणोत्सवार्थं इक्षुमत्या इक्षुमतीनद्यास्तीरं तस्मात् आनिनाय आकारयामास । णीञ् प्रापणे लिट् ॥ १६ ॥

(सं.चं.) अथेति मङ्गलान्तरारम्भः । भ्रातरमनुजम् । इक्षुमतीतीरगतात् साङ्काश्यनगरात् । आनिनाय अनाययामास ॥ १६ ॥

---

१. **'भवत्विति'** ३. **'वीरमारब्धान्तगामिनम्'** इति का.श्री. । ३. **'–निनाय स मैथिलः'**

कुलाचार्य्यः कुलीनानां कुलधर्म्मं समाचरन्[१] ।
सभायां सन्निधौ राज्ञां वरवंशमवर्ण्णयत् ॥ १७ ॥

(भा.दी.) कुलेति । कुलस्य इक्ष्वाकुगोत्रस्य आचार्यः पुरोहितः वसिष्ठः, कुले भवाः कुलीनास्तेषां राज्ञां कुलस्य गोत्रस्य वरवंशवर्णनादिरूपो यो धर्मस्तं समाचरन् सन्, सभायां वरस्य वरभूतस्य श्रीरामस्य वंशस्तम्, राज्ञां सन्निधिः सम्मुखं तस्मिन् अवर्णयत् । वर्ण वर्णक्रियाविस्तारगुणवचनेषु लङ् ॥ १७ ॥

(सं.चं.) कुलाचार्यो वसिष्ठः । राज्ञां सन्निधौ । वरस्य उद्वक्ष्यतो रामस्य वरं वंशमवर्णयत् ॥ १७ ॥

यस्मिन्निक्ष्वाकुमान्धातृसगराः साम्बरीषकाः ।
रघ्वजाद्याः सार्वभौमा नारायणपरायणाः ॥ १८ ॥

(भा.दी.) यस्मिन्निति । यस्मिन् वंशे नारायणः परायणः परमाश्रयो येषां ते तथा, इक्ष्वाकुश्च मान्धाता च सगरश्च ते अम्बरीषेण सहिताः साम्बरीषकाः रघुश्च अजश्च तौ आद्यौ येषां ते तथा, सार्वभौमाः चक्रवर्तिनः, तं वंशमवर्णयदित्यन्वयः ॥ १८ ॥

(सं.चं.) वैवस्वतमनोः पुत्र इक्ष्वाकुः । सूर्यवंशस्य प्रथमो राजा । मान्धाता यौवनाश्वः । मान्धातुस्तनयोऽम्बरीषः । अन्यश्चेक्ष्वाकुभ्रातुर्नाभागस्य तनयोऽम्बरीषोऽस्ति । य एकादशीव्रतदक्षितः । गरेण सहितो जातः सगरः । सगरादंशुमान् । ततो दिलीपस्ततो भगीरथः । ततः क्रमेण रघोरजः । अजाद्दशरथः । आद्यपदेन पूर्वमनुक्ता उक्तानां मध्यपतिता दिलीपभगीरथादयः । रामायणे पुनरन्यथाऽन्यथा पठ्यते– 'नाभागस्य बभूवाजः अजाद् दशरथोऽभवत्' (७०.४३) इत्यादि । नाभाग इति रघोरेव नामान्तरमिति प्रतीयते । भागवताद्यनुसारेण सर्वं सङ्गमनीयम् ॥ १८ ॥

जनकश्च[२] वधूवंशं मुनीनामाज्ञयाऽवदत् ।
यस्मिन्निमिर्देवरातो ह्रस्वरोमादयो नृपाः ॥ १९ ॥

१. **'समाचरत्'**

२. **'जनकस्य वधूवंशम्' । 'शतानन्दः जनकस्य मैथिलस्य वधूवंशं सीतावंशं मुनीनामाज्ञयाऽवदत्'** इति का.श्री. । मूले शतानन्दपदं न पठ्यत इति मूलाननुगुणमेतत् । रामायणाननुगुणं च ।

(भा.दी.) जनक इति । जनकश्च यस्मिन् वंशे निमिः निमिनामकः देवरातः देवरातनामकः ह्रस्वरोमा ह्रस्वरोमनामक आदिर्येषां ते तथा नृपाः, तं वधूवंशं सीतावंशं मुनीनां वसिष्ठादीनां आज्ञया अवदत् अवर्णयत् ॥ १९ ॥

(सं.चं.) निमिरिक्ष्वाकुतनयो विकुक्षिभ्राता । निमेः षष्ठो देवरातः । यस्मिन् शैवं धनुर्न्यासभूतं शिवेन दत्तम् । ह्रस्वरोमा सीरध्वजपिता । ततः सीरध्वजकुशध्वजौ । सीतोर्मिळे सीरध्वजतनये । माण्ड(ल)वी-श्रुतकीर्ती कुशध्वजस्य ॥ १९–२१ ॥

रामरामानुजाभ्यां स वाग्दानं कन्ययोर्व्यधात् ।
विश्वामित्रवसिष्ठौ तावथ[1] मैथिलमूचतुः ॥ २० ॥

(भा.दी.) रामेति । सः जनकः रामश्च रामानुजो लक्ष्मणः स च ताभ्यामिति चतुर्थी, कन्ययोः सीतोर्मिळयोः वाग्दानं मत्सुते सीतोर्मिळे त्वत्पुत्राभ्यां रामलक्ष्मणाभ्यामवश्यं दास्य इत्यादिरूपवाचो दानं प्रदानं तत् व्यधात् चकार । डु धाञ् धारणपोषणयोः लुङ् । अथ विश्वामित्रवसिष्ठौ तं मैथिलं ऊचतुः॥ २० ॥

कुशध्वजस्य ते भ्रातुर्भ्राजमाने सुते उभे ।
दातव्ये भरतायाङ्ग शत्रुघ्नाय च शोभने ॥ २१ ॥

(भा.दी.) कुशेति । हे अङ्ग प्रिय जनक, कुशध्वजस्य कुशध्वजनामकस्य ते तव भ्रातुः अनुजस्य भ्राजमाने शोभमाने उभे सुते भरताय शत्रुघ्नाय च दातव्ये दातुमर्हे, इति मैथिलमूचतुरिति सम्बन्धः ॥ २१ ॥

ऋषीन्द्रयोर्वचः श्रुत्वा मैथिलावप्यथोचतुः[2] ।
अत्थ्र्यमस्माभिरेवेदं भवद्भ्यां व्याहृतं त्विति ॥ २२ ॥

(भा.दी.) ऋषीति । (अथ) मैथिलावपि सीरध्वजकुशध्वजावपि ऋषीन्द्रयोः तयोः वसिष्ठविश्वामित्रयोः वचः श्रुत्वा, अस्माभिरेव अर्थ्यं प्रार्थनार्हं इदं कन्याप्रदानलक्षणं कार्यं भवद्भ्यां व्याहृतमभिहितम् इति ऊचतुः ॥ २२ ॥

---

१. **'तं त्वथ मैथिल–'** इति वि.ती.पाठः स्यात् । **'तावेनं मैथिल–'** इति क्वचित् ।

२. **'मैथिलावपि चोचतुः'** इति **'मैथिलावथ चोचतुः'** इति च क्वचित् ।

(सं.चं.) मैथिलौ सीरध्वजकुशध्वजौ । अस्माभिरित्यावाभ्याम् । आत्मनि बहुवचनम् । यदस्माकं मनसि स्थितम्, अथाप्यधीरतया न व्याहृतम्, तदेव भवद्भ्यां व्याहृतमिति ॥ २२ ॥

अथ श्वोभाविनि महे नान्दीश्राद्धानि[1] राघवः ।
निमन्त्र्य ब्राह्मणांश्चक्रे चक्री नः प्रीयतामिति ॥ २३ ॥

(भा.दी.) अथेति । अथ राघवः दशरथः, महे विवाहलक्षणोत्सवे, 'मह उद्धव उत्सवः' इत्यमरः, श्वः परदिने भाविनि भविष्यति सति ब्राह्मणान् निमन्त्र्य आमन्त्र्य, नान्दीश्राद्धानि नान्दीश्राद्धाख्यकर्माणि, चक्रमस्यास्तीति चक्री श्रीहरिः नः अस्माकं प्रीयतां प्रीतो भवतु, प्रीञ् प्रीणने लोट्, इति बुद्ध्या चक्रे ॥२३॥

(सं.चं.) श्वोभाविनीत्येकं पदम् । पदद्वयं वा । श्वः परेद्यवि निर्वर्तिष्यमाणे महे विवाहोत्सवे । 'उत्सवः स्यान्महः क्षणः' इत्यभिधानम् । पूर्वेद्युरेव राघवो दशरथः चतुर्णामपि पुत्राणां नान्दीश्राद्धानि चक्रे ॥२३॥

चतुर्ण्णामपि पुत्राणां भूत्यै विप्रगणाय सः ।
गवां चतुःसहस्राणि ददौ सस्वर्ण्णवाससाम् ॥ २४ ॥

(भा.दी.) चतुरिति । सः दशरथः, चतुर्णां अपि पुत्राणां श्रीरामादीनां भूत्यै अभ्युदयाय, स्वर्णानि च वासांसि च तैः सहिताः सस्वर्णवाससस्तासां गवां चत्वारि च तानि सहस्राणि च, विप्राणां गणः समूहस्तस्मै ददौ ॥ २४ ॥

(सं.चं.) अथ चतुर्णामपि पुत्राणां भूत्यै क्षेमाय । उत्तरोत्तरमुन्नतये । एकैकस्य सहस्रमिति चतुर्णां चतुःसहस्राणि । सम्प्रति तु रामायणे–'गवां शतसहस्राणि चत्वारि' (७२.२३) इति पाठं पठन्ति । स्यादपि प्राचीनपाठः–'गवामथ सहस्राणि' इति । शृङ्गनद्धैः स्वर्णैः पृष्ठपिधानैर्वासोभिश्च सहितानां गवाम् । 'सुवर्णशृङ्गाः सम्पन्नाः सवत्साः कांस्यदोहनाः' (७२.२३) इति च ॥ २४ ॥

धनैरन्नादिभिश्चायं[2] यदा विप्रानतोषयत् ।
युधाजिदपि तत्राऽगात् तदा भरतमातुलः ॥ २५ ॥

---

१. **'श्रद्धया दीयमानानि श्राद्धानि । नान्दीदेवतामुद्दिश्य क्रियमाणानि नान्दीश्राद्धानि'** इति का.श्री. । २. **'धनै रत्नादिभिश्चायम्'**

(भा.दी.) धनैरिति । अयं दशरथः धनैः हिरण्यैः । 'वित्तं धनं हिरण्यं च' इति हलः । अन्नमादिर्येषां ते तथा तैश्च, यदा विप्रान् अतोषयत् तोषयामास । तुष तुष्टौ लङ् । तदा भरतस्य मातुलो मातुः सहोदरः युधाजिदपि युधाजिन्नामकोऽपि तत्र विवाहे आगात् सम्प्राप्तः । इण् गतौ लुङ् ॥ २५ ॥

(सं.चं.) युधाजित् केकयराजस्याश्वपतेस्तनयः कैकेयीभ्राता । तदा तस्मिन्नेव दिने 'यस्मिंस्तु दिवसे राजा चक्रे गोदानमुत्तमम् । तस्मिंस्तु दिवसे शूरो युधाजित् समुपेयिवान्' (७३.१) इति च ॥ २५ ॥

सबान्धवो दशरथः कृतस्वस्त्ययनो द्विजैः ।
भूषणैर्भूषयामास पुत्रान् स्वगुणभूषणान् ॥ २६ ॥

(भा.दी.) सेति । द्विजैः कृतं स्वस्त्ययनं मङ्गल्यवचनं यस्य स तथा, बान्धवैः बन्धुभिः सहितः सबान्धवः दशरथः, स्वेषां ये गुणा विनयादयस्ते भूषणानीव येषां ते तथा तान् पुत्रान्, भूषयन्तीति भूषणान्याभरणानि तैः भूषयामास अलञ्चक्रे । भूष अलङ्कारे लिट् ॥ २६ ॥

(सं.चं.) स्वस्त्ययनं स्वस्तिवाचनम्, पुण्याहवाचनमित्येतत् । स्वीयाः स्वरूपभूता वा गुणा एव भूषणानि येषाम् ॥ २६ ॥

यथा दशरथश्चक्रे स्वपुत्राणां महारथः ।
भूत्यै दानादि सत्कर्म्म चक्राते मैथिलौ तथा[१] ।
कन्यानां साधुकृत्यानि शतानन्दमते स्थितौ ॥ २७ ॥

(भा.दी.) यथेति । (महारथः) दशरथः स्वपुत्राणां श्रीरामादीनां भूत्यै अभ्युदयाय, यथा दानमादिर्यस्य तत्तथा तत् सत्कर्म चक्रे । कृञ्धातोर्लिट् । तथा शतानन्दस्य शतानन्दनामकस्वपुरोहितस्य मतमभिमतिस्तस्मिन्, स्थितौ मैथिलौ सीरध्वजकुशध्वजौ कन्यानां सीतादीनां साधुकृत्यानि शोभनविवाहहेतुभूतकर्माणि चक्राते ॥ २७ ॥

(सं.चं.) यथा दशरथश्चक्रे । अत्र द्वेधा पाठः । 'यथा दशरथश्चक्रे चक्राते मैथिलौ तथा । कन्यानां साधु कृत्यानि शतानन्दमते स्थितौ' इत्येकेषां मते । अन्येषां मते षट्चरणाऽनुष्टुप्– 'यथा दशरथश्चक्रे स्व-पुत्राणां महारथः । भूत्यै दानादि सत्कर्म चक्राते मैथिलौ तथा । कन्यानां साधुकृत्यानि शतानन्दमते स्थितौ'

---

१. क्वचित् पाठान्तरं चतुश्चरणं पठ्यते– **'यथा दशरथश्चक्रे चक्राते मैथिलौ तथा । कन्यानां साधुकृत्यानि शतानन्दमते स्थितौ ॥'**

इति । युक्तश्चायं षट्चरणः पक्षः । तेन पठितेन श्लोकार्धेन समग्र एकः श्लोकोऽधिको भवति । साधूनि कृत्यानि । साधूनि यथा स्युस्तथा च ॥ २७ ॥

उत्तराभ्यां स उद्वाहः फल्गुनीभ्यामभूत् तदा ।
प्राजापत्यमिदं कर्म्म यत्र शंसन्ति पण्डिताः ॥ २८ ॥

(भा.दी.) उत्तरेति । तदा उत्तराभ्यां फल्गुनीभ्यां उत्तरफल्गुनीमुहूर्त इत्यर्थः । उत्तरानक्षत्रस्य मण्डलद्वित्वविवक्षायां द्विवचनम् । क्वचिदेकवचनान्ततया प्रयोगस्तद्दैवतैक्यविवक्षयोपपद्यते । नैकधाऽप्यभियुक्तप्रयोगानां बहुलमुपलम्भात् । अधिकरणस्य करणत्वविवक्षया तृतीया । सः उद्वाहः विवाहः अभूत् । यत्र यस्मिन् मुहूर्ते पण्डिताः विद्वांसः प्रजापतिर्देवता अस्येति प्राजापत्यं इदं विवाहाख्यं कर्म शंसन्ति स्तुवन्ति । शंसु स्तुतौ लट् ॥२८॥

(सं.चं.) उत्तराभ्यां फल्गुनीभ्याम् । अवच्छेदकत्वं तृतीयार्थः । उत्तरफल्गुनीविशिष्टकालावच्छेदेन । तद्यथा– शाखया लम्बते, शाखावच्छेदेन लम्बते, शाखायां लम्बत इति यावत् । इदं वैवाहिकं कर्म प्राजापत्यं प्रजापतिव्रतं शंसन्ति तद्विदः– 'तद् ये हवै तत् प्रजापतिव्रतं चरन्ति ते मिथुनमुत्पादयन्ते' इति । उपस्थदेवता हि प्रजापतिः । यत्र उत्तरयोः फल्गुन्योः । 'फल्गुन्यामुत्तरे राजंस्तस्मिन् वैवाहिकं कुरु' (७१.२४) इति । 'उत्तरे दिवसे ब्रह्मन् फल्गुनीभ्यां मनीषिणः । वैवाहिकं प्रशंसन्ति भगो यत्र प्रजापतिः' (७२.१३) इति च ॥ २८–३१ ॥

राघवाणां चतुर्ण्णां च विवाहोऽयं जगत्प्रियः ।
आसीन्मुहूर्त्त एकस्मिन्[1] ब्राह्मणैः स्वस्तिवादिभिः[2] ॥ २९ ॥

(भा.दी.) राघवेति । चतुर्णां च राघवाणां रघुगोत्रभवानां श्रीरामादीनां जगत्प्रियः अयं विवाहः एकस्मिन् मुहूर्ते लग्नं तस्मिन् । स्वस्ति आशीर्वचः वक्तुं शीलमेषामस्तीति स्वस्तिवादिनस्तैः । 'स्वस्ति मङ्गळनिष्पापमोक्षेष्वाशीर्वचस्यपि' इति वैजयन्ती । ब्रह्मवादिभिरिति पाठे वेदवादिभिरित्यर्थः । ब्राह्मणैः सह आसीत् । अस्तेर्लङ् ॥ २९ ॥

सम्भारानथ सम्भृत्य कुलधर्म्मानुकूलतः ।
वसिष्ठोऽग्नौ[3] जुहावात्र विश्वामित्राभ्यनुज्ञया ॥ ३० ॥

---

१. **'एकस्मिन् मुहूर्ते मण्टपचतुष्टये'** इति का.श्री. । २. **'ब्राह्मणैर्ब्रह्मवादिभिः'**

३. **'वसिष्ठोऽपि जुहावाथ'** इति, **'वसिष्ठोऽग्निं जुहावाथ'** इति च क्वचित् ।

(भा.दी.) समिति । अथ वसिष्ठः सम्भारान् होमसाधनद्रव्याणि सम्भृत्य सम्पाद्य, विश्वामित्राभ्य-नुज्ञया, अत्र विवाहे कुलस्य गोत्रस्य यो धर्मस्तस्यानुसारस्तेनेति ततः, अग्नौ जुहाव । हु दानादानयोः[1] लिट् ॥ ३० ॥

चक्राङ्केन सरोजाङ्कं[2] सीतापाणिं स्वपाणिना ।
अरुणेनारुणं रामो जग्राह जगदीश्वरः ॥ ३१ ॥

(भा.दी.) चक्रेति । जगदीश्वरः श्रीरामः चक्रस्य अङ्कश्चिह्नमस्यास्तीति तथा तेन अरुणेन रक्तेन स्वपाणिना सरोजस्य कमलस्य अङ्कश्चिह्नं यस्य स तथा तं अरुणं सीतापाणिं जग्राह ॥ ३१ ॥

त्रिवारं परिणीयाऽथ सम्यक् सप्तपदानि च[3] ।
गमयित्वा क्रियाशेषमशेषं च समापयत् ॥ ३२ ॥

(भा.दी.) त्रिवारमिति । अथ पाणिग्रहणानन्तरं त्रिवारं त्रिःकृत्वः परिणीय अग्निप्रदक्षिणं कारयित्वा सम्यक् सप्त च तानि पदानि च तानि गमयित्वा, न विद्यते शेषो यस्य स तथा तं क्रियाशेषं च समापयत् समाप्तिमकरोत्[4] ॥ ३२ ॥

(सं.चं.) त्रिवारं परिणीय । पाणिं गृह्णीष्व पाणिनेति त्रिवारमुच्चार्य पाणिं ग्राहयित्वा, वधूवरौ सप्तपदानि गमयित्वा, समापयद् वसिष्ठः ॥ ३२ ॥

जनकं जगतां रामं जननीमपि जानकीम् ।
वधूवरत्वमायाताववैक्षन्त सुरोत्तमाः[5] ॥ ३३ ॥

(भा.दी.) जनकमिति । सुरेश्वराः देवश्रेष्ठाः[6] ब्रह्मादयः जगतां जनकं पितरं श्रीरामं जगतां जननीं मातरं जानकीमपि वधूश्च वरश्च तयोर्भावस्तत्त्वं तत्, भार्याभर्तृभावमित्यर्थः, आयातौ सम्प्राप्तौ अवैक्षन्त अपश्यन् । ईक्ष दर्शनाङ्कनयोः लङ् ॥ ३३ ॥

(सं.चं.) जगतां जननीमपि ॥ ३३ ॥

---

१. **'दानादनयोः'** इति क्षीरस्वाम्यादयः पठन्ति । दानं हविःप्रक्षेपः ।

२. **'चक्राङ्केन चक्ररेखावता । सरोजाङ्कं सरोजाकाररेखाचिह्नितम्'** इति का.श्री. ।

३. **'सप्तपदानि सः'**

४. **'समाप्तिमकारयत्'** । **'समाप्तमकरोत्'** इति युक्तम् ।

५. **'सुरेश्वराः'** इति वि.ती.पाठः ।

६. **'सुरश्रेष्ठाः'**

रत्नैर्देदीप्यमानानां विमानानामथाऽवळिः ।
अलश्चकार गगनं देवदेवानुगाकुलम्[१] **॥ ३४ ॥**

(भा.दी.) रत्नैरिति । अथ विवाहानन्तरम्, देवाः ब्रह्मादयस्ते च देवानुगा गन्धर्वादयस्ते च तैराकुला निबिडा, अधिष्ठितेत्यर्थः, रत्नानि माणिक्यादीनि तैः देदीप्यमानानां अतिशयेन प्रकाशमानानां विमानानाम्, 'व्योमयानं विमानं स्यात्'[२] इत्यमरः, आवळिः पङ्क्तिः गगनमाकाशं तत्, अलश्चकार अलङ्कृतमकरोत् ॥ ३४ ॥

(सं.चं.) देवैर्देवानुगैर्गन्धर्वाप्सरोभिश्चाऽकुला निबिडा विमानानामावळिः । 'गगनं देवदेवानुगाकुलम्' इति तु रमणीयः पाठः ॥ ३४ ॥

देववाद्यान्यवाद्यन्त[३] **गीतं गन्धर्वपुङ्गवैः ।**
प्रवृष्टानि प्रसूनानि प्रनृत्तं चाप्सरोगणैः ॥ ३५ ॥

(भा.दी.) देवेति । देववाद्यानि भेर्यादीनि अवाद्यन्त । वद सन्देशने लङ् । गन्धर्वपुङ्गवैः गन्धर्वश्रेष्ठैः गीतं गानमकारि । प्रसूनानि कुसुमानि प्रवृष्टानि । अप्सरसां गणाः समूहास्तैः प्रनृत्तं च प्रकृष्टतया नर्तन-मकारि ॥ ३५ ॥

(सं.चं.) देववाद्यान्यवाद्यन्त गन्धर्वैः । गीतं च । प्रसूनानि प्रवृष्टानि गन्धर्वैश्चाप्सरोभिश्च ॥ ३५ ॥

लोकानां लोचनानन्दाः सर्वाभरणभूषिताः ।
विचेरुः पुरि चार्वङ्ग्यो दिवि देव्यइवोत्सवे ॥ ३६ ॥

(भा.दी.) लोकानामिति । लोकाः जनास्तेषां लोचनानां चक्षुषां आनन्दो याभ्यस्तास्तथा, जन-लोचनानामानन्दकरा इत्यर्थः । सर्वाणि यान्याभरणानि तैर्भूषिताः । चारु मनोहरं अङ्गं यासां तास्तथा । अङ्गकण्ठगात्रेभ्यो ङीषिष्यते[४] इति ङीष् । स्त्रियः, दीव्यन्त्यस्यामिति द्यौस्तस्यां देव्यइव (देव)स्त्रियइव, उत्सवो विवाहोत्सवस्तस्मिन् पुरि मिथिलायां विचेरुः । चर गतिभक्षणयोर्लिट् ॥ ३६ ॥

(सं.चं.) विवाहोत्सवे । पुरि मिथिलायाम् ॥ ३६ ॥

---

१. **'देवदेवानुगाकुला'** इति. वि.ती. पाठः ।

२. **'विमानोऽस्त्री'** इति प्रचलितः कोशपाठः ।

३. **'देवैर्वाद्यान्यवाद्यन्त'**

४. **'अङ्गगात्रकण्ठेभ्य इति वक्तव्यम्'** इति वार्तिकपाठं जयादित्यः पठति ।

ऊर्म्मिळा लक्ष्मणस्याऽसीन्मालवी भरतस्य च ।
भार्य्याऽथ श्रुतकीर्त्तिश्च शत्रुघ्नस्याभवच्छुभा ॥ ३७ ॥

(भा.दी.) ऊर्मिळेति । अथ लक्ष्मणस्य ऊर्मिळा ऊर्मिळानाम्नी भार्या आसीत् । भरतस्य मालवी मालवीनाम्नी आसीत् । शत्रुघ्नस्य शुभा शोभना श्रुतकीर्तिश्च श्रुतकीर्तिनाम्नी च भार्या अभवत् ॥ ३७ ॥

(सं.चं.) रामायणे माण्डवी भरतभार्येति पठ्यते । सङ्ग्रहे तु 'मालवी भरतस्य च' इति सार्वत्रिक उपलब्धः पाठः । लिपिकृत्प्रमादः सम्भाव्यते । मालवराजतनया हि मालवीति प्रायः कथ्यते । इयं तु साङ्काश्यनाथस्य कुशध्वजस्य तनया ॥ ३७–८ ॥

पुरोहितान् वसिष्ठाद्यान्[१] वित्तैरुत्तमकल्पकैः ।
अमानयन्महीपालो ब्राह्मणानपरानपि ॥ ३८ ॥

(भा.दी.) पुर इति । महीपालः राजा जनकः वसिष्ठ आद्यो येषां ते तथा तान् पुरोहितान्, उत्तमः कल्पः अस्मिन् कर्मणि एतावद्द्रव्यं दातव्यमिति विधिर्येषां[२] तानि तथा तैः । 'कल्पो न्याये सुरद्रुमे' इति वैजयन्ती । उत्तमः कल्पः शास्त्रोक्तप्रकारो येषां तानि तथा तैरिति वा । वित्तैः अमानयत् अपूजयत् । मान पूजायां लङ् । अपरान् (ब्राह्मणान्) वसिष्ठादिव्यतिरिक्तमुनीनपि अमानयत् यथायोग्यं अपूजयत् ॥ ३८ ॥

आपृच्छ्यातुच्छहृदयं सवसिष्ठं महीपतिम् ।
विश्वामित्रो ययौ प्रातर्म्मुक्तः सास्रेण भूभृता ॥ ३९ ॥

(भा.दी.) आपृच्छ्येति । विश्वामित्रः, प्रातः प्रातःकाले, अतुच्छं बृहत् हृदयं मनो यस्य स तथा तम्, मनस्विनमित्यर्थः, वसिष्ठेन सहितः सवसिष्ठस्तं महीपतिं राजानं दशरथं आपृच्छ्य आमन्त्र्य, यात्रार्थमनुज्ञां प्राप्येति यावत्, आस्रेण प्रेमाश्रुणा सहितः सास्रः तेन भूभृता राज्ञा दशरथेन, मुक्तः सन् प्रेषितः सन्, ययौ । या प्रापणे लिट् ॥ ३९ ॥

(सं.चं.) गमनार्थमनुमतिपृच्छा आपृच्छा । महीपतिं दशरथम् । विरहासहतया, पूर्वं रामप्रेषणे स्वस्यानिच्छाप्रकटनमौढ्यस्य स्मरणेन प्रत्युपकर्तुमक्षमतया, तत्कृतरामोद्वाहकर्मणाऽऽनन्दतुन्दिलतया च सास्रेण भूभृता । एतावदेव विश्वामित्रस्य रामावतारे कृत्यम् । अतः कृतकृत्यो ययौ ॥ ३९ ॥

---
१. 'वसिष्ठादीन्' २. 'विधिर्विधानं येषाम्'

परिबर्हं[1] प्रबर्हं हि राघवेभ्यो ददौ नृपः ।
क्षौमाणि मणिराशींश्च कम्बळानम्बराणि च ॥ ४० ॥

(भा.दी.) परिबर्हमिति । नृपः जनकः, प्रबर्हं श्रेष्ठं तत्, परिबर्हं विवाहकाले वधूवरयोर्दीयमानं धनम्, राघवेभ्यः रघुगोत्रभवेभ्यः श्रीरामादिभ्यः ददौ । तदेव विशदयति– क्षौमाणीत्यादिना । क्षौमाणि कौशेयवस्त्राणि मणिराशींश्च रत्नसमूहांश्च कम्बळान् अम्बराणि (च) वस्त्राण्यपि ददौ ॥ ४० ॥

(सं.चं.) प्रबर्हमुत्तमं परिबर्हम्, राजयोग्यमुपायनम् । 'मुख्यं परार्ध्यं प्रवरं प्रबर्हम्' इत्यभिधानम् । 'परिबर्हो राजयोग्यद्रव्ये' इति मेदिनी । परिबर्हं गृहोपकरणद्रव्यजातमिति वा । 'तथोपकरणं प्रोक्तं परिबर्हः परिच्छदः' इत्यभिधानम् । क्षौमाणि वल्कलजानि । 'क्षौमं वल्कलजांशुके' इति मेदिनी । इतराण्यम्बराणि कार्पासानि कौशेयानि च । तेन चतुर्विधमपि वसनमुक्तं भवति । तथा ह्यभिधानम्–'चतुर्विधं तु विज्ञेयं त्वक्सूत्रक्रिमिरोमजम्' । इति क्षौमं त्वग्जम् । कार्पासं सूत्रजम् । कौशेयं क्रिमिजम् । रोमजाः कम्बळा इति ॥ ४० ॥

गवां लक्षाणि लक्ष्मीवान् चमूं च चतुरङ्गिणीम्[2] ।
नियुतं[3] च हिरण्यानि ददौ दासीश्च मैथिलः[4] ॥ ४१ ॥

(भा.दी.) गवामिति । लक्ष्मीरैश्वर्यमस्यास्तीति लक्ष्मीवान् । 'लक्ष्मीवान् लक्ष्मणः श्रीमान्' इत्यमरः । मैथिलः गवां लक्षाणि, चत्वारि अङ्गानि गजतुरगादीनि अस्याः सन्तीति तथा तां चमूं सेनां च, नियुतं शतसहस्रपरिमितानि हिरण्यानि, नियुतं दासीश्च ददाविति सम्बन्धः ॥ ४१ ॥

(सं.चं.) 'गवां शतसहस्राणि बहूनि' इति वाल्मीकिः । अत आह– गवां बहूनि लक्षाणीति । हिरण्यानि राजमुद्राङ्कितानि मूल्यत्वेन देयानि नियुतं लक्षमितानि ॥ ४१ ॥

दक्षिणेव प्रभुं यज्ञं दामोदरमिवेन्दिरा ।
जयन्तीवर्षभं देवं सीता राममुपागमत् ॥ ४२ ॥

---

१. **'पारिबर्हं हि जनको राघ–'**
२. **'चमूश्च चतुरङ्गिणीः'**
३. **'नियुतं विंशतिसहस्रपरिमितानि'** इति व्याख्यान्तश्चिन्त्याः ।
४. **'दासीः स मैथिलः'**

(भा.दी.) दक्षिणेति । प्रभुं समर्थं यज्ञं यज्ञनाम्नाऽवतीर्णं तं श्रीहरिं दक्षिणेव दक्षिणादेवीव, दाम जगत् उदरे यस्य स तथा तं श्रीहरिं इन्दिरेव लक्ष्मीरिव, देवमृषभं ऋषभनाम्नाऽवतीर्णं विष्णुं जयन्तीव जयन्तीदेवीव श्रीरामं सीता उपागमत् ॥ ४२ ॥

(सं.चं.) आकूतिसूनुं यज्ञनामानं भगवन्तं दक्षिणामानिनी तन्नाम्नाऽवतीर्णा रमेव । दमयति उदान् जीवान् रमयति चेति दामोदरो नारायणः । 'दमाद् दामोदरं विदुः' इति हि स्मरन्ति । द्वादशमूर्तिषु चरममिन्दिरानाम्नी लक्ष्मीरिव । ऋषभत्वेनावतीर्णं भगवन्तं देवी जयन्तीव ॥ ४२ ॥

न जरा न परिस्पन्दो न मलं विमलात्मनोः ।
अनयोः किल दम्पत्योरगण्यगुणपूर्णयोः ॥ ४३ ॥

(भा.दी.) विवाहकाले जातां जनानां वार्तां दर्शयति– **न जरे**त्यादिना । अनाद्यनन्तकालेऽपि रागादि-दोषासम्बन्धात् विमलः निर्मलः आत्मा मनो ययोस्तौ तथा तयोः, निर्दोषस्वरूपयोरिति वा, अगण्या ये गुणास्तैः पूर्णयोः अनयोः, जाया च पतिश्च दम्पती तयोः, जरा न । परिस्पन्दो कालनिमित्तकनिद्रादिविकारो वा न । मलं दुःखादिदोषो वा न किल नास्ति किल ॥ ४३ ॥

(सं.चं.) न्यूनतां पिधातुं याऽलङ्काररचना स परिस्पन्द उच्यते । प्रकृतिधर्मस्य प्रतिस्पन्दनं वा परि-स्पन्दः । 'परिस्यन्दः' इति वा पाठः । न स्वेदादिपरिस्यन्दः ॥ ४३ ॥

जगतां पितरावेतौ कमलाकमलेक्षणौ ।
नाथितौ[1] किल नाकीन्द्रैरवन्यामवतेरतुः ॥ ४४ ॥

(भा.दी.) जगतामिति । जगतां सर्वजगतां पिता च माता च पितरौ । 'पिता मात्रा' (अ.सू.१.२.७०) इति सूत्रेण पितृशब्दस्यावशेषः । कमला च कमलेक्षणश्च तौ श्रीलक्ष्मीनारायणावित्यर्थः । एतौ पितरौ सीतारामौ नाकिनां देवानामिन्द्रास्तैः देवश्रेष्ठैः नाथितौ प्रार्थितौ सन्तौ अवन्यां भूमौ अवतेरतुः किल, सीतारामरूपेण अवतारं चक्रतुः किल । अवपूर्वः तॄ प्लवनतरणयोर्लिट् ॥ ४४ ॥

(सं.चं.) भूमाववतीर्य दुष्टनिग्रहाय नाथितौ याचितौ ॥ ४४ ॥

किंवदन्तीति ववृते दम्पत्योश्च[2] गृहेगृहे ।
अपि त्रिलोक्यां पापघ्नी[3] निश्रेणी मुक्तिपद्धतेः ॥ ४५ ॥

---

१. **'अर्थितौ'** २. **'दम्पतीनाम्'** इति वि.ती.पाठः । ३. **'त्रैलोक्यपापघ्नी'**

(भा.दी.) किमिति । त्रयाणां लोकानां समाहारस्त्रिलोकी तस्याम् । पापानि हन्तीति पापघ्नी । मुक्ति-रेव पद्धतिर्मार्गस्तस्याः निश्रेणी सोपानायिता । इति किंवदन्ती वार्त्ता । 'किंवदन्ती जनश्रुतिः' इत्यमरः । जायाश्च पतयश्च दम्पतयस्तेषां गृहेगृहे प्रतिगृहम् । 'गृहं गेहोदवसित–' इत्यमरः । ववृते प्रवृत्ता । वृतु वर्तने लिट् ॥ ४५ ॥

(सं.चं.) दम्पत्योः सीतारामयोर्विषये । गृहेगृहे स्थितयोर्दम्पत्योर्वा । समुदायवचनम् । ववृते प्रावर्तत । या किंवदन्ती मुक्तिमार्गस्य निश्रेणी । 'ઝ૯ઙ' इति भाषायाम् । भगवद्गुणानुसन्धानरूपत्वात् ॥ ४५ ॥

अथानुज्ञाप्य जनकं द्विजैः सार्द्धं बलैरपि ।
ससूनुः सस्नुषो राजा सभार्य्यः स्वपुरं[1] ययौ ॥ ४६ ॥

(भा.दी.) अथेति । अथ विवाहानन्तरम्, भार्याभिः सहितः सभार्यः, सूनुभिः पुत्रैः श्रीरामादिभिः सहितः ससूनुः, स्नुषाभिः पुत्रभार्याभिः सीतादिभिः सहितः सस्नुषः, राजा दशरथः, जनकं अनुज्ञाप्य, द्विजैः वसिष्ठादिब्राह्मणैः, बलानि चतुरङ्गसैन्यानि, तैरपि सार्द्धं स्वपुरं अयोद्ध्यां प्रति ययौ ॥ ४६ ॥

(सं.चं.) बलैः सैन्यैरपि । 'सैन्यं चक्रं बलं सेना' इति यादवप्रकाशः ॥ ४६ ॥

निमित्तानि निमित्तज्ञः स निरीक्ष्य नराधिपः[2] ।
पदव्यां विपदाशङ्की हितमूचे पुरोहितम् ॥ ४७ ॥

(भा.दी.) निमित्तानीति । निमित्तानि शकुनानि जानातीति निमित्तज्ञः नृपाधिपः सः दशरथः । निमित्तानि शुभाशुभसूचकानि । 'निमित्तं हेतुलक्ष्ययोः' इति वैजयन्ती । निरीक्ष्य, पदव्यां मार्गे, विपदमापदमा-शङ्कितुं शीलमस्यास्तीति तथोक्तस्तथा सन्, हितं स्वहितं (पुरोहितं) वसिष्ठं प्रति ऊचे ॥ ४७ ॥

(सं.चं.) निमित्तानि शुभाशुभशंसीनि चिह्नानि । पदव्यामध्वनि । 'अयनं पदवी मार्गः' इत्यभिधानम् । हितं पुरोहितमूचे विपदाशङ्की हि इति शक्यं छेत्तुम् । अथापि पादादौ चवैतुहयो न प्रयोक्तव्या इति कविसमयः इति न तथा व्याख्यातम् । शास्त्रे तु हेः पादादित्वमपि न दोषाय ॥ ४७ ॥

शकुनानामयं शब्दश्चित्तं दारयतीव मे ।
प्रादक्षिण्येन कल्याणं शंसन्तीव[3] मृगाः कथम्[4] ॥ ४८ ॥

१. **'स्वपुरीं ययौ'**

२. **'नृपाधिपः'** इति वि.ती. पाठ इति भाति ।

३. **'शंसन्तीमे मृगाः'**

४. **'शकुनापशकुनयोः किं फलमिति तात्पर्यम्'** इति का.श्री. ।

(भा.दी.) शकुनेति । शकुनानां पक्षिणाम् । 'पक्षी शकुन्तशकुनद्विजाः' इत्यमरः । अयं श्रूयमाणः शब्दः मे चित्तं मनस्तत् दारयतीव । दॄ विदारणे लट् । प्रतियाता मृगाः एणाः प्रादक्षिण्यं प्रदक्षिणीकरणं तेन कल्याणं शुभं तत् शंसन्तीव सूचयन्तीव । शंस स्तुतौ लट् । प्रतीयन्ते । अनयोः फलं कथं इति मुनिं वसिष्ठं ऊच इति सम्बन्धः ॥ ४८ ॥

(सं.चं.) शकुनानां पक्षिणामशुभसूचकोऽयं शब्दः वाशितम् । 'पत्री शकुन्तिः शकुनः शकुन्तः' इति च । प्रादक्षिण्येन चरन्तो मृगाः शुभं सूचयन्तीव । तदुभयमेकत्र कथम्? ॥ ४८ ॥

वाणीमाकर्ण्य भूपस्य [1]वसिष्ठोऽविस्मितोऽब्रवीत्[2] ।
अस्ति नो भयमासन्नं शान्तिश्चास्य भवेदिति ॥ ४९ ॥

(भा.दी.) वाणीमिति । वसिष्ठः भूपस्य दशरथस्य वाणीं वाचं आकर्ण्य विस्मितः सन्, नः अस्माकं आसन्नं समीपस्थं भयं अस्ति, अस्य सम्प्राप्तस्य भयस्य शान्तिः शमनं च भवेत् इति अब्रवीत् ॥४९॥

(सं.चं.) आसन्नमनिष्टं सुखान्तं भविष्यतीति जानन्नविस्मितः। भयमासन्नम्। तेन शकुना विकृतं वाश्यन्ते । भयस्य शान्तिः सुखान्तता च भवेत् । तेन मृगाः प्रदक्षिणं धावन्ति ॥ ४९ ॥

ततः प्रादुरभूद् भूयस्तेजसां पुञ्जमद्भुतम् ।
प्रळयानलसङ्काशं[3] तद्[4] दृष्ट्वोचुर्म्महर्षयः ॥ ५० ॥

(भा.दी.) तत इति । ततः निमित्तदर्शनानन्तरम् । भूयः बहुलम्, 'बहुलं पुरु भूयिष्ठं स्फारं भूयश्च भूरि च' इत्यमरः । अद्भुतं आश्चर्यभूतम्, विलयस्य प्रळयकालस्यानलोऽग्निस्तस्य सङ्काश इव सङ्काशः प्रकाशो यस्य तत्तथोक्तम् । विलयानलस्य सङ्काशं समानमिति वा । 'निभसङ्काशनीकाश–' इत्यमरः । तेजसां पुञ्जं समूहः प्रादुरभूत् प्रादुर्बभूव । भू सत्तायां लुङ् । महान्तश्च ते ऋषयश्च ते वसिष्ठादयः तं परशुरामं दृष्ट्वा ऊचुः परस्परमवदन् । वच परिभाषणे लिट् ॥ ५० ॥

(सं.चं.) भूयः महत्तरम् । प्रळयानलस्य सङ्काशं सदृशम् । तत् पुरः स्थितं तेजसां पुञ्जम् ॥ ५० ॥

---

१. **'वसिष्ठो नृपमब्रवीत्'**

२. **'वसिष्ठः विस्मितः अब्रवीत्'** इति वि.ती. प्रतृण्णम् । का.श्री टीकायामपि तथा–**'विस्मितः विशेषस्मितयुक्तः सन्'** इति ।

३. **'विलयानलसङ्काशम्'** इति.वि.ती. पाठः ।

४. **'तं दृष्ट्वोचु–'** इति वि.ती.पाठः । **'तत् तेजःपुञ्जं दृष्ट्वा'** इति का.श्री.

त्रिस्सप्तकृत्वश्चक्रे[१] यः क्षमामक्षत्रियामिमाम्[२] ।
स एष भगवान् रामः कस्माज्जाज्वल्यतेऽधुना ॥ ५१ ॥

(भा.दी.) त्रिरिति । भगवान् यः परशुरामः इमां क्षमां भूमिं त्रिःसप्तवारं त्रिस्सप्तकृत्वः एकविंशतिवार-मित्यर्थः । निर्गताः क्षत्रियाः यस्याः सा तथा तां चक्रे । सः एतादृशमहिमोपेतः एषः अधुना कस्मात् किङ्कारणं जाज्वल्यते पुनःपुनः अतिशयेन वा ज्वलति । ज्वल दीप्तौ लट् । 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' (अ.सू.३.१.२२) इति यङ् ॥ ५१ ॥

(सं.चं.) अक्षत्रियां क्षत्रियरहिताम् । निःक्षत्रियामिति पाठे निष्क्रान्ता क्षत्रियेभ्यो निःक्षत्रिया ॥ ५१ ॥

कठोरेण कुठारेण वैकुण्ठः कण्ठसङ्गिना ।
चापेन[३] चाग्निवर्ण्णेन किं चिकीर्षुरिहाऽगतः ॥ ५२ ॥

(भा.दी.) कठोरेति । विकुण्ठाया अपत्यं पुमान् वैकुण्ठः श्रीहरिः, श्रीनारायणावतारात्मक इत्यर्थः, परशुरामः कठोरः कठिनस्तेन कुठारेण परशुना, कण्ठस्य सङ्गः सम्बन्धोऽस्यास्तीति तथोक्तः तेन, स्कन्धप्रदेश-निक्षिप्तेनेत्यर्थः, अग्नेर्वर्ण इव वर्णो यस्य स तथा तेन चापेन च, किं कर्म चिकीर्षुः कर्तुमिच्छावान् इह अत्र आगतः ॥ ५२ ॥

(सं.चं.) कठोरेण शत्रुदमने निर्दयेन । वैकुण्ठो नारायणात्मा परशुरामः ॥ ५२ ॥

रामाग्निर्न्न दहेत् कच्चित् क्षत्रगोत्रतृणं पुनः ।
कच्चित् त्रिलोकीं न दहेदिति तं मुनयोऽनमन्[४] ॥ ५३ ॥

(भा.दी.) रामेति । रामाग्निः परशुरामाख्याग्निः कच्चित् कर्हिचित् क्षत्राणां क्षत्रजातीनां गोत्रं कुलं तदेव तृणं न दहेत् न भस्मीकुर्यात्? दह भस्मीकरणे लिङ् । कच्चित् त्रिलोकीं न दहेत् इति आलपन्तः परस्परं सम्भाषणं कुर्वन्तः सन्तः (तं) परशुरामं मुनयः वसिष्ठाद्याः अनमन् नमश्चक्रुः । णमु प्रह्वत्वे शब्दे च लङ् ॥५३॥

(सं.चं.) 'कच्चित् स्यात् प्रश्नकामयोः' । इति शङ्कितास्तमनमन् ॥ ५३ ॥

---

१. **'त्रिःसप्तवारं चक्रे'** इति वि.ती.पाठः । २. **'क्षमां निःक्षत्रियामिमाम्'** इति च ।

३. **'बाणेन चाग्नि–'** ४. **'मुनयोऽवदन्'**

जामदग्न्य प्रसीदेति वसिष्ठाद्यैर्द्विजोत्तमैः ।
पूजितो राममासाद्य[1] रामो धीरमभाषत ॥ ५४ ॥

(भा.दी.) **जामदग्न्ये**ति । वसिष्ठ आद्यो येषां ते तथा तैः द्विजोत्तमैः मुनिभिः । जमदग्नेरपत्यं पुमान् जामदग्न्यस्तत्सम्बुद्धिः हे जामदग्न्य परशुराम, प्रसीद प्रसन्नो भव । प्रपूर्वः षदॢ् विशरणगत्यवसादनेषु लोट् । इति पूजितः परशुरामः धीरं श्रीरामं आभाष्य सम्बोध्य अभाषत ॥ ५४ ॥

(सं.चं.) धीरं रामं दाशरथिमासाद्य रामो जामदग्न्यः धीरं यथा स्यात् तथाऽभाषत ॥ ५४ ॥

चापरत्ने उभे राम लब्ध्वा हरिहरौ पुरा ।
जगत्पती जगत् ताभ्यां[2] जिग्यतुः ससुरासुरम् ॥ ५५ ॥

(भा.दी.) किमभाषतेत्यत आह– **चापे**ति । हे श्रीराम, जगतः पती स्वामिनौ हरिहरौ । उभे चापेषु रत्ने श्रेष्ठे लब्ध्वा ताभ्यां चापश्रेष्ठाभ्यां ससुरासुरं सुरासुरैः सहितं जगत् पुरा जिग्यतुः जितवन्तौ । जि जये लिट् ॥ ५५ ॥

(सं.चं.) जगत्पती हरिहरौ ताभ्यां चापरत्नाभ्यां जगज्जिग्यतुः ॥ ५५ ॥

ओजोजिज्ञासया देवैः प्रार्थितौ प्रार्थितप्रदौ ।
देवौ युद्धाय सन्नद्धौ तस्थतुस्तौ धनुर्द्धरौ ॥ ५६ ॥

(भा.दी.) **ओज** इति । देवैरिन्द्रादिभिः ओजसः हरिहरयोर्बलस्य जिज्ञासया ज्ञातुमिच्छया । 'ओजोऽवष्टम्भबलयोः' इति वैजयन्ती । प्रार्थितौ युद्धार्थमर्थितौ, प्रार्थितमभीष्टं प्रदत्त इति तथोक्तौ, धनुषी धारयत इति तथोक्तौ तौ देवौ युद्धं योधनं तस्मै सन्नद्धौ सन्तौ तस्थतुः । ष्ठा गतिनिवृत्तौ लिट् ॥ ५६ ॥

(सं.चं.) तयोः सर्वजयिनोः क ओजीयानिति जिज्ञासया । लोकानां जिज्ञापयिषयेति तु वास्तवम् । पराभिभवनशक्तिरोजः ॥ ५६ ॥

अहङ्कारमयं शर्वं[3] हुङ्कारेणैव[4] केशवः ।
क्षणेन स्तम्भयामास गरुडः पन्नगं यथा ॥ ५७ ॥

---

१. **'राममाभाष्य'** इति वि. ती. पाठः ।
२. **'जगत् जगत्पती ताभ्याम्'** इति, **'ताभ्यां जगत्प्रतीताभ्याम्'** इति च क्वचित् ।
३. **'अहङ्कारमयं रुद्रं हुङ्का–'**
४. **'हुङ्कारेणैव । न तु बाणमोचनेनेत्येवकारार्थः'** इति का.श्री. ।

(भा.दी.) **अहमि**ति । कश्च ईशश्च केशौ तौ वर्तयतीति केशवः श्रीहरिः, अहङ्कारेण प्रचुरोऽहङ्कारमयस्तम्, अहङ्कारतत्वाभिमानित्वादहङ्कारात्मकमिति वा, तं शर्वं रुद्रम्, हुङ्कारो हुङ्कृतिस्तेनैव, क्षणः क्षणकालस्तेन, गरुडः पन्नगः सर्पस्तं यथा तथा स्तम्भयामास स्तम्भितवान् । स्तम्भु रोधने[१] लिट् ॥ ५७ ॥

(सं.चं.) अयं केशवः । हेतुगर्भं विशेषणम् । अहङ्कारमयं तन्मानिनं शर्वम् । अहङ्कारमयमहङ्कारात्मकं शर्वमिति वा ॥ ५७ ॥

विजिष्णुं[२] विष्णुममरा ब्रह्माद्यास्तमथास्तुवन् ।
विश्वं यन्नियतं तस्य नेदं चित्रं हरेरिति ॥ ५८ ॥

(भा.दी.) **विजिष्णुमि**ति । अथ हरस्य पराजयानन्तरम्, ब्रह्मा आद्यो येषां ते तथा अमराः, विशेषेण जेतुं शीलमस्यास्तीति विजिष्णुस्तम्, विश्वं वेवेष्टि नियमार्थं विशतीति (वा) विष्णुः श्रीहरिस्तम्, विश्वं रमाब्रह्मादिसमस्तं जगत्, येन नियतं यन्नियतम्, यत्प्रेरितमित्यर्थः, तस्य हरेः इदं हरस्तम्भनं चित्रं न इति अस्तुवन् । ष्टुञ् स्तुतौ लङ् ॥ ५८ ॥

(सं.चं.) विजिष्णुं विजयशीलम् । इत्यस्तुवन् ॥ ५८ ॥

भवता ननु तद् भग्नं शङ्करस्य शरासनम् ।
तेन ते वितता कीर्त्ती रामोऽद्वन्द्वः पुमानिति ॥ ५९ ॥

(भा.दी.) स्वोक्तेतिहासस्य प्रकृतोपयोगं दर्शयति– **भवते**ति । हे श्रीराम, भवता शङ्करस्य तत् जनकसम्बन्धि जनकाय दत्तं शरासनं धनुः सीतास्वयम्बरे भग्नं ननु । तेन हरचापभङ्गेन, श्रीरामः न विद्यते द्वन्द्वः प्रतिवीरो[३] यस्य स तथा, असदृश इत्यर्थः, पुमान् पुरुषः इति ते तव कीर्तिः वितता विस्तृता अभूत् ॥ ५९ ॥

(सं.चं.) शङ्करशरासनभञ्जनमात्रेणाद्वन्द्व इति कीर्तिर्वितता ॥ ५९–६० ॥

इदं तद् वैष्णवं चापं[४] राघवाऽरोपयेर्य्यदि[५] ।
मम तुल्यबलो वीरः परमः पुरुषो भवान् ॥ ६० ॥

---

१. सौत्रोऽयं धातुः (अ.सू.३.१.८२) । अर्वाचीनास्तु **'ष्टभि प्रतिबन्धे'** इति धातुना रूपं निष्पादयन्ति । २. **'विजिष्णुं जिष्णु–'**
३. **'प्रतिभटो–'** ४. **'इमं च वैष्णवं चापम्'** ५. **'–रोपयेद् यदि'**

(भा.दी.) स्वस्य श्रीरामस्य च विष्णववतारत्वं सन्दिहाना (ये) सन्तस्तेषां संशयं च्छेतुमाह– **इदमि**ति । हे राघव, यदि तत् विष्णुना युद्धसमये धृतम्, इदं इदानीं मद्धस्तगतं विष्णोः सम्बन्धि वैष्णवं चापं आरोपयेः सज्यं करोषि । आङ्पूर्वः युप-रुप-लुप विमोहने[1] लिङ् । तर्हि मम तुल्यं समानं बलं यस्य स तथा वीरः भवान् परमः सर्वोत्तमः पुरुषः पूर्णषड्गुणः श्रीहरिः ॥ ६० ॥

इति गम्भीरवाचं तं भार्ग्गवं प्रेक्ष्य भूपतिः ।
सबाष्पगद्गदो दीनः प्रणिपत्येदमब्रवीत् ॥ ६१ ॥

(भा.दी.) इतीति । भूपतिः दशरथः इति गम्भीरा वाग् यस्य स तथा तम्, भृगुगोत्रभवो भार्गवस्तं परशुरामं प्रेक्ष्य बाष्पः अश्रु स च गद्गदं स्खलद्वचनं तच्च ताभ्यां सहितः सबाष्पगद्गदः सन्, दीनः खिन्नः सन्, प्रणिपत्य इदं वचनं अब्रवीत् ॥ ६१ ॥

(सं.चं.) गम्भीरा अनूह्यान्तरङ्गा वाक् । दीनो भीतः ॥ ६१ ॥

अरागद्वेषदोषो हि देवो नारायणो भवान् ।
रेणुकायां मुनेर्ज्जातो भूभारपरिभूतये ॥ ६२ ॥

(भा.दी.) अरागेति । रागश्च द्वेषश्च रागद्वेषौ तौ दोषौ न विद्येते यस्य स तथोक्तः, देवः नारायणः भवान्, भुवो यो भारस्तस्य परिभूतिः परिहारस्तस्यै, मुनेः जमदग्निमुनीश्वरात् रेणुकायां रेणुकादेव्यां जातः, प्रादुर्भूतो हि ॥ ६२ ॥

(सं.चं.) परिभूतये परिभवाय परिहाराय ॥ ६२ ॥

भक्तवत्सल भक्ताय मह्यं प्रवयसे प्रभो ।
न्यस्तशस्त्रेण भवता पुत्रभिक्षा प्रदीयताम् ॥ ६३ ॥

(भा.दी.) एवं स्तुत्वा स्वाभीष्टं प्रार्थयते– **भक्ते**ति । भक्तेषु वत्सल स्निग्ध, हे प्रभो श्रीपरशुराम, न्यस्तं शस्त्रं धनुर्येन स तथा तेन भवता, [2]प्रकृष्टं बहु वयो यस्य स तथा तस्मै वृद्धायेत्यर्थः, भक्ताय मह्यं पुत्रा एव भिक्षा अन्नम्, 'दीदिविरन्नं तथोदनं भिक्षा' इति हलायुधः, प्रदीयताम् ॥ ६३ ॥

---

१. वैयाकरणास्तु रुहधातोः णिचि **'रुहः पोऽन्यतरस्याम्'** (अ.सू.७.३.४३) इति पकारादेशेन रूपं निष्पादयन्ति । रुपधातोरुपरिकरणार्थकत्वं वैयाकरणा नानुमन्यन्ते । **'रूप उपरिभावे'** इति कश्चनापूर्वो धातुः भगवत्पादेनोल्लिखितः । **'रुप उपरिभावे'** इत्यपि पाठः । तदानुगुण्याय टीकाकारैरेवं व्याख्यातमिति भाति ।

२. **'प्रगतं वयो यस्य स प्रवयाः'** इति का.श्री. ।

(सं.चं.) स्वयं न्यस्तशस्त्रो भवान् । तन्नोचितं पुनः शस्त्रग्रहणम् । भक्तवत्सलो भवान् । तन्न युक्तं भक्तपीडनम् । तत्रापि प्रगतवयसो भक्तस्य । 'प्रवयाः स्थविरो वृद्धः' इति च । तेन पुत्ररूपा भिक्षा याचितोऽर्थः प्रदीयताम् । प्रीत्या करुणया वा दानं प्रदानम् ॥ ६३ ॥

प्रयाचमानमेवं तं प्रोवाच भृगुनन्दनः ।
पुत्रास्त्रयस्ते रामो मे प्रतिवीरो भवेदिति ॥ ६४ ॥

(भा.दी.) प्रेति । भृगून् भृगुगोत्रभवान् नन्दयतीति भृगुनन्दनः परशुरामः । एवं प्रयाचमानं तं दशरथं प्रति । ते तुभ्यं त्रयः पुत्राः लक्ष्मणादयः दत्ता इति शेषः । श्रीरामः मे मम प्रतिवीरः प्रतिभटः भवेत् इति प्रोवाच ॥ ६४ ॥

(सं.चं.) प्रश्रयेण याचमानम् ॥ ६४–५ ॥

राम राम गृहाणेति रामो रामेण चोदितः ।
ब्रह्मन् स्यादेवमित्युक्त्वा[1] चापं जग्राह सस्मितः[2] ॥ ६५ ॥

(भा.दी.) रामेति । हे राम, हे राम, चापं मया दीयमानं धनुस्तत्, गृहाण । ग्रह उपादाने लोट् । इति रामेण परशुरामेण चोदितः प्रेरितः श्रीरामः । हे ब्रह्मन् ब्राह्मण, एवं त्वदुक्तरीत्या स्यात् भवतु । अस्तेर्लिङ् । इति उक्त्वा सस्मितः समन्दहासः सन् चापं परशुरामधनुस्तत् जग्राह ॥ ६५ ॥

सज्योतिर्म्मण्डलं चापं सज्यं कृत्वा हसन्नयम् ।
राघवो लाघवेनैव क्षणाद् बाणं च सन्दधे[3] ॥ ६६ ॥

(भा.दी.) सज्योतिरिति । अयं राघवः श्रीरामः । ज्योतिषां तेजसां मण्डलं समूहस्तेन सहितं सज्योतिर्मण्डलं तत् चापम्, लाघवमनायासस्तेनैव, क्षणः क्षणकालस्तस्मात्, ज्यया धनुस्तन्तुना सहितं सज्यं तत्, कृत्वा हसन् मन्दहासं कुर्वन् सन्, बाणयति विरावयति शत्रुमिति बाणः शरस्तम्[4], सन्दधे सन्धितवान्[5] । डु धाञ् धारणपोषणयोर्लिट् ॥ ६६ ॥

---

१. **'स्याद् भार्गवेत्युक्त्वा'** २. **'सुस्मितः'** ३. **'क्षणाद् बाणेन सन्दधे'**
४. **'शरस्तेन'** ५. **'धि धारणे'** इत्यस्येदं रूपं सन्धितवानिति ।

(सं.चं.) लाघवेनैव, शस्त्राभ्यासपाटवेन अणुतरप्रयत्नेन सन्धाने क्षिप्रता लाघवम् । क्षणात् क्षिप्रम् बाणं धनुषि सन्दधे च ॥ ६६ ॥

देवोपदेवमुनयस्तयोराश्चर्य्यचर्य्ययोः[1] ।
क्रीडां दिदृक्षवः प्राप्ता अलश्चक्रुर्न्नभस्तळम् ॥ ६७ ॥

(भा.दी.) **देवे**ति । आश्चर्यं वीर्यं बलं ययोस्तौ तथोक्तौ तयोः । तयोः भार्गवराघवयोः क्रीडां लीलां दिदृक्षवः द्रष्टुकामाः, देवा ब्रह्मादयस्ते च उपदेवा गन्धर्वादयस्ते च मुनयश्च ते प्राप्ताः सन्तः नभसः तळं प्रदेशस्तत् अलश्चक्रुः अलङ्कृतवन्तः ॥ ६७ ॥

(सं.चं.) परस्परं भिन्नयोरिव, विरुध्यमानयोरिव आश्चर्या चर्या ययोः । उपदेवा गन्धर्वादयः ॥ ६७ ॥

परब्रह्मस्वरूपत्वान्न शरेणेश शीर्य्यसे ।
इत्युक्त्वाऽऽकृष्टबाणं तं राघवं भार्ग्गवोऽब्रवीत् ॥ ६८ ॥

(भा.दी.) **परे**ति । (हे ईश), परं परिपूर्णं यद्ब्रह्म विज्ञाप्यं[2] तस्य स्वरूपं तस्य भावस्तत्त्वं तस्मात् । शृणातीति शरस्तेन न शीर्यसे न नश्यसि । शृ हिंसायां लट् । इति उक्त्वा, आकृष्टो बाणो येन तथा तम्, तं श्रीरामं राघवं प्रति भार्गवः रामः अब्रवीत् । ब्रूञ्धातोर्लङ् ॥ ६८ ॥

(सं.चं.) हे ईश भार्गव । न शीर्यसे । तस्मादनेन बाणेन किं करणीयमिति ब्रूहीति । भार्गवमुक्त्वा ॥६८॥

कारणान्तरतो राम स्वेच्छयाऽन्तः कृतं मया ।
तपोमयं लोकमयं महेष्वा तं[3] हरासुरम् ॥ ६९ ॥

(भा.दी.) **कारणे**ति । हे श्रीराम, अन्यत्कारणं कारणान्तरं तस्मादिति ततः । कारणान्तरं च विष्णुतनुप्रवेश एव मोक्ष इति निश्चित्य अतुलनामकदैत्येन तदर्थं ब्रह्माणं प्रति तपसि कृते सति यावद् विष्णोः पराजयो न स्यात् तावत्पर्यन्तं तत्र तिष्ठेति वर इति भावः । मया स्वेच्छया शरीरान्तः कृतं स्थापितम् । तपसा प्रधानस्तपोमयस्तं बहुक्रूरतपोयुक्तमित्यर्थः । लोके व्याप्तो लोकमयस्तम् । तपःसन्तुष्टाद् ब्रह्मणो वराल्लोक-

---

१. **'–राश्चर्यवीर्ययोः'** इति वि.ती. पाठः ।
२. नेदमत्र सङ्गतम् । **'विष्णवाख्यम्'** इति पाठः स्यात् ।
३. **'महेष्वासम्'** इति वि.ती.पाठ इति भाति । का.श्री टीकायामपि तथा । **'महेष्वा तं हनासुरम्'** इति कचित् । **'महेष्वा महाबाणेन'** इति वि.भू. ।

व्याप्तमित्यर्थः । महदिष्वासं धनुर्यस्य स तथा तम्[१] । असुरं अतुलनामकमसुरं अनेन महता बाणेन हर संहर । हृञ् हरणे लोट् ॥ ६९ ॥

(सं.चं.) अतुलो नाम महासुर आस । स तपसा तुष्टस्य ब्रह्मणो वरेण लोकान् व्याप । तेन तपोमयो लोकमय उच्यते । स विष्णुतनुप्रवेशनं च वरं ययाचे तेनावध्यः स्यामिति । अथ ब्रह्मा तमाह–'यदा हरिर्जीयते तदा वध्यसे' इति । तेन कारणेन स्वेच्छया स्वान्तःकृतम् । तमसुरं महत्या इष्वा शरेण हर संहर ॥ ६९–७० ॥

वदत्येवं जामदग्न्ये स शरो राघवच्युतः ।
असुरं तरसा भस्मीचकारातुलनामकम् ॥ ७० ॥

(भा.दी.) वदतीति । जामदग्न्ये जमदग्निपुत्रे परशुरामे एवं वदति सति राघवेण च्युतः मुक्तः सः शरः अतुल इति नाम यस्य स तथा तमसुरं तरसा शीघ्रं भस्मीचकार ॥ ७० ॥

भार्ग्गवो भगवानूचे राम दाशरथेऽधुना ।
साक्षान्नारायणोऽसीति सम्यग् ज्ञातं जनैरिति ॥ ७१ ॥

(भा.दी.) यत्प्रकटनार्थं स्वयमागतस्तदाह– **भार्गव** इति । भार्गवः रामः । दाशरथे दशरथपुत्र । 'अत इञ्' (अ.सू.४.१.९५) इत्यपत्यार्थे इञ् । श्रीराम, त्वम् अधुना साक्षात् प्रत्यक्षं भगवान् श्रीनारायणः असि इति जनैः सम्यक् निस्संशयं ज्ञातम् । इति ऊचे ॥ ७१ ॥

(सं.चं.) इति भगवान् भार्गव ऊचे ॥ ७१ ॥

प्रदक्षिणीकृत्य मुदा दक्षिणं लक्ष्मणाग्रजम् ।
तेनैकीभूय भूयश्च माहेन्द्रं भार्ग्गवो ययौ ॥ ७२ ॥

(भा.दी.) प्रदक्षिणीति । भार्गवः रामः दक्षिणं समर्थं लक्ष्मणाग्रजं श्रीरामं मुदा प्रीत्या प्रदक्षिणीकृत्य तेन श्रीरामेण भूयश्च पुनश्च, लोकदृष्ट्या चेत्यर्थः, एकीभूय श्रीरामेणैक्यं सम्प्राप्य, माहेन्द्रो माहेन्द्रपर्वतस्तं प्रति ययौ । या प्रापणे लिट् ॥ ७२ ॥

(सं.चं.) 'सरळो दक्षिणो ज्ञेयः' इति च । प्रसङ्गनिर्वहणकुशलो कार्यदक्षो दक्षिणः । माहेन्द्रं पर्वतम् ॥७२॥

---

१. **'तथा सन्'** इति पाठः सम्भाव्यते । तेन **'महेष्वासो हरासुरम्'** इति वि.ती.पाठः स्यात् ।

लीलेयं रामयोः साक्षाद् विश्वरूपस्वरूपयोः ।
न हि भेदोऽनयोः कश्चिदित्युक्त्वा स्वर्य्ययुः सुराः ॥ ७३ ॥

(भा.दी.) **लीले**ति । सुराः, (साक्षात्) विश्वं पूर्णं रूपं यस्य स विश्वरूपः श्रीहरिस्तस्य स्वरूपे अवतार-रूपे तयोः, अनयोः श्रीरामयोः भार्गवराघवरामयोः हि यस्मात् भेदः (कश्चित्) स्वतोऽन्यतो वा प्रयुक्तः नास्ति तस्मात् इयं पुरुषान्तरेणेव स्वस्वरूपेण सम्भाषणादिः लीला क्रीडा । इति उक्त्वा, स्वः स्वर्गम् । 'स्वरव्ययं स्वर्गनाक–' इत्यमरः । ययुः ॥ ७३ ॥

(सं.चं.) विश्वरूपो नारायणः । विश्वं पूर्णमस्य रूपमिति । विश्वं रूपयतीति । विश्वमस्य रूपं प्रतिमेति च । साक्षादनुपचारतः ॥ ७३ ॥

शुचा नतं[1] मुखं राज्ञः प्रोत्फुल्लं[2] रामतेजसा ।
नैशाम्बुना शिथिलितं भानुभासेव पङ्कजम् ॥ ७४ ॥

(भा.दी.) **शुचे**ति । शुक् शोकस्तया नतं अवनतम्, राज्ञः दशरथस्य मुखम्, निशि विद्यमानं नैशं तच्च तत् अम्बु च तेन, हिमजलेनेत्यर्थः, शिथिलितं मुकुलितं यत् पङ्कजम्, भानोर्भास्तयेव, श्रीरामस्य तेजः सामर्थ्यं तेन प्रोत्फुल्लं सम्यक् विकसितं अभूत् ॥ ७४ ॥

(सं.चं.) शुचा शोकेन नतमवनतं हतप्रभम् । शिथिलितं श्लथितं कळाहीनम् । प्रोत्फुल्लमिति । 'ञिफला विशरणे' इत्यस्य क्तान्तं रूपं फुल्लमिति । तथाहि पाणिनिः–'अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः' (अ.सू.८.२.५५) इति । 'ञिफला विशवण इत्येतस्माद् धातोरुत्तरस्य निष्ठातकारस्य लकारो निपात्यते' इति वामनः । नन्वेतदनुपसर्गादित्युक्तम् । आह च वामनः–'अनुपसर्गादिति किम्? प्रफुल्लाः सुमनसः' इति । अत्र तु प्रेति उदिति द्वावुपसर्गौ भवतः । तस्मात् 'प्रोत्फुल्लं रामतेजसा' इति न वक्तव्यम् । अयि व्याकरणरूप, स्मरोत्तरं वार्तिकम्–'उत्फुल्लसम्फुल्लयोरिति वक्तव्यम्' इति । तस्मात् उत्सम्भ्यां सोपसर्गादपि लकारो निपततीत्यायातम्– उत्फुल्लमिति । अथ पुनः प्रेत्युपसर्गान्तरयोगे पूर्वं निपतितो लकार उपसर्गान्तरयोगमसहमानः किं पलायते? निपतितं निपतितमेव । न परापतति । तस्माद् युक्तं प्रोत्फुल्लमिति । वस्तुतस्तु प्रफुल्लमिति च बहुप्रयोगदर्शनात् 'प्रफुल्लस्येति च वक्तव्यम्' इति वार्तिके पूरणीयम् ॥ ७४–५ ॥

वसिष्ठाद्यैर्म्मुनिश्रेष्ठैः स राजा परिवारितः ।
सनन्दनो महानन्दः पुरीं प्रायाद् बलैर्य्युतः[3] ॥ ७५ ॥

---

१. **'शुचाऽऽहतम्'** इति **'शुचा हतम्'** इति च क्वचित् । २. **'प्रफुल्लम्'** ३. **'बलैर्वृतः'**

(भा.दी.) वसिष्ठेति । वसिष्ठ आद्यो येषां ते तथा तैः मुनिश्रेष्ठैः परिवारितः, नन्दनैः पुत्रैः सहितः सनन्दनः, महानानन्दो यस्य स तथा, बलानि सैन्यानि तैः युतः युक्तः, सः राजा दशरथः, पुरीं अयोध्यां प्रति प्रायात् । यातेर्लङ् ॥ ७५ ॥

अयोद्ध्यामाप[1] नगरीमयोद्ध्यामरिभिर्नृपः ।
सिक्तां पुष्पाक्षताकीर्ण्णां पताकाकेतुमालिनीम् ॥ ७६ ॥

(भा.दी.) अयोद्ध्यामिति । नृपः अरिभिः अयोध्यां योद्धुमशक्याम्, जलादिना सिक्ताम्, पुष्पाणि च अक्षताश्च तैराकीर्णाम्, पताकाश्च केतवो ध्वजास्ते च तेषां माला परम्परा सा अस्यामस्तीति तथोक्ता ताम्, व्रीह्यादित्वादिनिः, अयोद्ध्यां नाम अयोद्ध्येति प्रसिद्धां नगरीं प्रायात् ॥ ७६ ॥

(सं.चं.) अयोध्यामरिभिर्योद्धुं युध्वा जेतुमशक्यामयोध्यां नाम नगरीम् । सिक्तां वारिसेकेन शोधितां शीतलां च । सुगन्धिजलसेकेन परिमळितां च । पताका महती, केतवोऽणवः । केचिद् विपर्ययेणाऽहुः ॥ ७६ ॥

पूर्ण्णैः सुवर्ण्णकलशैर्न्नानावाद्यैश्च वादितैः ।
नरा नार्य्यश्चाभिययुर्वधूवरसमागमे ॥ ७७ ॥

(भा.दी.) पूर्णैरिति । अयोद्ध्यायां विद्यमानाः नरा नार्यश्च पूर्णैः रत्नादिपूर्णैः सुवर्णमया ये कलशास्तैः सह वादितैः वाद्यमानैर्नानाविधानि यानि वाद्यानि तैश्च सह वधूश्च वरश्च तयोः समागमः समागमनं तस्मिन्, श्रीसीतारामयोः समागमसमय इत्यर्थः, अभिययुः अभिमुखतया जग्मुः ॥ ७७ ॥

(सं.चं.) जलपूर्णैः सुवर्णकलशैः सह नरा नार्यश्च ॥ ७७–९ ॥

विवेशान्तःपुरं राजा पुरन्दरपुरोपमम् ।
मङ्गल्यसूक्तं[2] शंसद्भिर्ब्राह्मणैर्ब्राह्मणप्रियः ॥ ७८ ॥

(भा.दी.) विवेशेति । ब्राह्मणानां प्रियः प्रीतिविषयः राजा दशरथः, मङ्गल्यं (मङ्गल)करं सूक्तं मङ्गल्यसूक्तं श्रीसूक्तादि तत्, शंसद्भिः वदद्भिः ब्राह्मणैः सह, पुरन्दरस्य यत्पुरं अमरावती, तस्य उपमा यस्य तत्तथा तत्, अन्तःपुरं विवेश । विश प्रवेशने लिट् ॥ ७८ ॥

---

१. '**अयोध्यां नाम**' इति वि.ती.पाठः । २. '**माङ्गल्यसूक्तम्**'

रमणा रमणीभिस्ते लक्ष्मणाद्याः सुलक्षणाः ।
विरेजिरे त्रयस्तत्र शिखाभिरिव पावकाः ॥ ७९ ॥

(भा.दी.) रमणा इति । तत्र अन्तःपुरे लक्ष्मण आद्यो येषां ते तथा । शोभनानि लक्षणानि अङ्गसम्पदो येषां ते तथा । त्रयः ते रमणाः भर्तारः । 'रमणः प्राणाधिनाथोऽनुगः' इति हलः । रमणीभिः भार्याभिः शिखाभिः ज्वालाभिः पावका इव विरेजिरे अशोभन्त । राजृ दीप्तौ लिट् ॥ ७९ ॥

रेमेऽथ[१] रामो रमणीमवाप्य
सीतां जगन्मङ्गलमङ्गलात्मा[२] ।
श्रीरेव सीता गुणसम्पदेति
सत्यौपचारी न हि यत्र वाणी ॥ ८० ॥

(भा.दी.) रेम इति । अथ अन्तःपुरप्रवेशानन्तरं जगतां मङ्गलं यस्मात् स जगन्मङ्गलः, मङ्गलः शोभनः आत्मा स्वरूपं यस्य स तथा, अनन्तरं जगन्मङ्गलश्चासौ मङ्गलात्मा चेति कर्मधारयः । यद्वा जगति यानि मङ्गलानि वस्तूनि तेभ्यो मङ्गल आत्मा स्वरूपं यस्येति 'मङ्गलानां च मङ्गलम्' इत्युक्तः श्रीरामः । सीता गुणा एव सम्पत्तया श्रीरेव महालक्ष्मीरेव इति वाणी लोकसिद्धा वार्ता यत्र यस्यां सीतायां सत्यैव यथार्थैव, (औपचारी) उपचारेण गौणभावं प्राप्ता औपचारिकी नहीति । तां तादृशीं सीतां सीताख्यां रमणीं भार्यां अवाप्य रेमे ॥ ८० ॥

(सं.चं.) मङ्गलानां च मङ्गल आत्मा स्वरूपमस्य । गुणसम्पदा सीता साक्षात् श्रीरेवेति जनवाणी सत्यैवाऽस । न श्रीरिवेत्यर्थे औपचारिकी । नहि सादृश्यादभेदोपचारोऽयं सिंहो माणवक इतिवत् । किन्त्वभेदवचनमेव । अजानन्त्याऽपि जनतया दैवादुदितम् । इन्द्रवज्रा छन्दः ॥ ८० ॥

श्वेतद्वीपे यथाऽयं विहरति रमया राजमाने विमाने
श्रीमद्भोगीन्द्रभोगे गुणनिधिरधिकं भासमानेऽसमाने ।

---

१. 'रेजेऽथ'

२. **'जगन्मङ्गलमङ्गलाङ्गीम्'** । **'जगतो लोकस्य मङ्गलानि मङ्गलकराणि यानि कामधेनुकल्पवृक्षचिन्तामणिगङ्गादिवस्तूनि तेषां जगन्मङ्गलानां मङ्गलः मङ्गलकरः आत्मा स्वरूपं यस्य सः'** इति का.श्री. ।

जम्बूद्वीपेऽत्र पुर्य्यां जनकतनयया राजयन्त्या[१] जयन्त्या
देव्या रामोऽथ रेमे[२] वृषभइव जगद् रञ्जयन्त्या जयन्त्या ॥ ८१ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे बालकाण्डेऽष्टमः सर्ग्गः ॥

—०—

(भा.दी.) श्वेतेति । राम इति आत्मा स्वरूपं यस्य अयं श्रीरामात्मा[३] नारायणः श्वेताख्यो द्वीपः श्वेतद्वीपस्तस्मिन्, तत्रापि राजमानं प्रकाशमानं तस्मिन् विमाने दिव्यरत्नमण्डपाख्ये । अथ तत्रापि अधिकं यथा भवति तथा भासमाने शोभमाने, न विद्यते समानं सदृशं यस्य स तथा तस्मिन्, श्रीमान् यो भोगिनां सर्पाणामिन्द्रः शेषस्तस्य भोगः शरीरं तस्मिन् । 'अहेः शरीरं भोगः स्यात्' इति हलः । रमया लक्ष्म्या सह अधिकं यथा भवति तथा यथा विहरति, क्रीडां करोति, तथा अत्र भूमण्डले, तत्राऽपि जम्ब्वाख्यो यो द्वीपस्तस्मिन्, तत्रापि पुर्यां अयोद्ध्यापुर्याम्, गुणा निधीयन्तेऽत्रेति गुणनिधिः, सर्वगुणाश्रय इत्यर्थः, अयं श्रीरामः, राजयन्त्या शोभमानया, स्वार्थिको णिच्, जगत् रञ्जयन्त्या सन्तोषयन्त्या[४] जयन्त्या उत्कृष्टतया वर्तमानया जनकतनयया जनकसुतया देव्या सीतया, जयन्त्या जयन्तीनाम्नाऽवतीर्णया महालक्ष्म्या वृषभइव वृषभनाम्नाऽवतीर्णो हरिरिव रेम इत्यन्वयः ॥ ८१ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां बालकाण्डेऽष्टमः सर्गः ॥

—०—

(सं.चं.) राजमाने विमाने । 'विमानो व्योमयाने च सार्वभौमगृहेऽपि च' इति मेदिनी । भोगीन्द्रस्य शेषस्य भोगे । 'अहेः शरीरं भोगः स्यात्' इत्यभिधानम् । यथा श्वेतद्वीपे तथा जम्बूद्वीपे । अत्र अयोध्यायाम् । जगद् राजयन्त्या प्रकाशयन्त्या जयन्त्या सर्वोत्कृष्टया । भर्तारं रञ्जयन्त्या जयन्त्याख्यया जायया वृषभदेवइव रामोऽपि रेमे । मरभनैर्यानां त्रयेण च स्रग्धरा ॥ ८१ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां बालकाण्डेऽष्टमसर्गविवरणम् ॥


इति बालकाण्डं समाप्तम् ॥

[आदितः श्लोकाः– ३४१+८१=४२२]

---

१. **'रञ्जयन्त्या'** २. **'रामोऽभिरेमे'**

३. **'रामात्मा'** इति पदं मूले न पठ्यते । वि.ती.सम्मतो मूलपाठः कीदृश इति न ज्ञायते । **'रामात्माऽयं च रेमे'** इति स्यादपि । अथापि **'देव्या सीतया'** इति व्याख्यानं पुनः सन्देहं जनयति । ४. **'विकासयन्त्या'**



रामोऽखिलानन्दतनुः स एव
भीमोऽतिपापेषु दुरन्तवीर्य्यः ।
कामः स एवाजितकामिनीषु
सोमः स एवाऽऽत्मपदाश्रितेषु ॥

अयोद्धया-काण्डम् : २



प्रथमः सर्ग्गः

रामे रमण्या सह पूर्ण्णरूपे प्राप्तोदये चन्द्रिकयेव चन्द्रे ।
समृद्धिपूरैः परिपूर्य्यमाणो रराज राजा सरितामिवेशः ॥ १ ॥

(भा.दी.) अथ श्रीरामपितुर्दशरथस्यैश्वर्यातिशयं सदृष्टान्तं वर्णयति– **राम** इति । पूर्णं सर्वगुणपूर्णं रूपं यस्य स तथा तस्मिन् श्रीरामे, रमण्या भार्यया सीतया सह, चन्द्रिकया कौमुद्या सह चन्द्र इव, प्राप्तः उदयः ऐश्वर्याद्यभ्युदयो येन स तथा तस्मिन् सति, समृद्धय एव वित्ताद्यभिवृद्धय एव पूरा उदकाभिवृद्धय-स्तैः, परिपूर्यमाणः राजा दशरथः, सरितां नदीनां ईशः स्वामी समुद्र इव रराज । राजृ दीप्तौ लिट् । यथा चन्द्रोदयेन समुद्रोऽभिवर्धते तद्वदेव सीतारामयोः निवासनिमित्तेन, पूर्वापेक्षयाऽप्यतिशयेन सम्पदाद्यभिवृद्धयः सञ्जाता इति भावः ॥ १ ॥

(सं.चं.) पूर्णरूपे सम्पूर्णकले राकानिशाकरे प्राप्तोदये उदिते यथा तथा गुणपूर्णरूपे रामे प्राप्तोदये अभ्युदयं प्राप्ते । जलपूरैः सरितां पतिरिव सम्पत्समृद्धिभिर्दशरथो रराज ॥ १ ॥

मातामहस्यौकसि कैकयस्य[१] शत्रुघ्नयुक्ते भरते चिराय ।
विद्यागणाभ्यासिनि तस्य वार्त्तां श्रुत्वा नरेन्द्रोऽधिकमानन्द ॥ २ ॥

(भा.दी.) मातेति । मातामहस्य मातुष्पितुः[२] कैकेयीपितुरित्यर्थः, केकयस्य केकयविषयाधिपतेः अश्वपति-नाम्नः[३] ओको मन्दिरं तस्मिन् । शत्रुघ्नयुक्ते भरते, चिरायेत्यव्ययम्, अतिचिरकाले, विद्यानां चतुःषष्टिकलाविद्यानां

१. **'केकयस्य'** इति वि.ती.पाठः स्यादिति भाति । २. **'मातृपितुः'**

३. **'कैकयस्य केकयविषयाधिपतेः युधाजिन्नामकस्य'** इति वि.भू.व्याख्यानं सम्पातायातम् । कैकेयीभ्राता मातुलो हि भरतस्य युधाजित् । तेन **'अश्वपतिनाम्नः'** इत्येव साधु ।

गणाः समूहास्तानभ्यसितुं शीलमस्यास्तीति तथा तस्मिन् सति । नरेन्द्रः दशरथः । तस्य भरतस्य वार्तां श्रुत्वा अधिकं यथा भवति तथा आननन्द तुतोष । नदि हर्षे लिट् ॥ २ ॥

(सं.चं.) 'गृहं सद्माऽश्रयश्चौकः' इति मङ्खः । तस्य शत्रुघ्नयुक्तस्य भरतस्य विद्याभ्यासवार्ताम् ॥ २ ॥

सङ्कीर्त्तितै रामगुणैरगण्यैर्ज्जनैः सभावर्त्मगृहापणेषु ।
पूर्ण्णं विशालं विरराज राज्ञो हृन्मण्डलं विष्टपमण्डलं च ॥ ३ ॥

(भा.दी.) समिति । सभाः शालास्ताश्च वर्त्मानि मार्गास्तानि च गृहाणि च आपणाश्च तेषु जनैः (सं)-कीर्तितैः कथितैः, अगण्यैः श्रीरामस्य ये गुणास्तैः पूर्णं विशालं विस्तीर्णं राज्ञः दशरथस्य हृदो हृदयस्य मण्डलं प्रदेशः, विष्टपस्य लोकस्य मण्डलं च विरराज । राजृ दीप्तौ लिट् ॥ ३ ॥

(सं.चं.) 'सभा स्यात् परिषत् सदः' इत्यभिधानम् । गुणानुसन्धानेन पूर्णं भरितम्, हृन्मण्डलं च विष्टप-मण्डलं च । हृदयस्य वदान्यता गुणग्रहणशीलता च विशालता । देशतो विस्तृतिर्विष्टपमण्डलस्य ॥ ३ ॥

सुमन्त्रपूर्वैरथ मन्त्रिमुख्यैः सम्मन्त्र्य सन्मन्त्ररतैश्च[1] विप्रैः ।
रामाभिषेकाय समाहरत् स[2] सामन्तवर्य्यान् प्रकृतीश्च सर्वाः ॥ ४ ॥

(भा.दी.) सुमन्त्रेति । अथ सः दशरथः श्रीरामस्य अभिषेको यौवराज्याभिषेकस्तस्मै । तादर्थ्ये चतुर्थी । सुमन्त्रः पूर्वो येषां ते तथा तैः मन्त्रिषु मुख्याः श्रेष्ठास्तैः, सम्मन्त्र्य आलोचयित्वा[3] । सन्तो ये मन्त्राः गायत्र्यादयस्तेषु रता आसक्तास्तैः विप्रैश्च सम्मन्त्र्य, सामन्तेषु मण्डलाधिपतिषु वर्यान् श्रेष्ठान्, सर्वाः प्रकृतीश्च–'अमात्या मन्त्रिणो दूताः श्रेणयश्च पुरोहिताः । पुरं जनपदं चेति सप्त प्रकृतयस्त्विमाः'[4] इति प्रसिद्धसप्तप्रकृतीश्च समाहरत् आह्वापयामास । हृञो लङ् ॥ ४ ॥

(सं.चं.) अथ रामेऽभ्युदिते सप्तविंशतिहायने । सामन्ता राज्यस्य समन्तात् विद्यमाना अधीननृपतयः । प्रकृतयः प्रधानाः पौरजनपदाः । समाहरत् राजसभायां समावेशयामास । समाह्वयदिति वा पाठः ॥ ४ ॥

---

१. **'सम्मन्त्रयन् मन्त्ररतैश्च'** इति, **'सम्मन्त्र्य सन्मन्त्रयुतैश्च'** इति च क्वचित् । २. **'समाह्वयत् स-'**

३. **'आलोच्य'** इति पर्याप्तम् । लिपिकृत्प्रमादः स्यात् ।

४. **'सप्त प्रणिधयः स्मृताः'** इति मूलपाठः । तेन प्रणिधिशब्दार्थोऽयम्, न प्रकृतिशब्दार्थः । **'प्रणिध्युपात्तामनुजानुवर्तितः'** (भाग.१.१०.४) इत्यत्र श्रीभागवतात्पर्योदाहृतं ब्राह्मवचनमिदम् । नात्रातीव सङ्गतम् । विद्याभूषणयतिः काशीश्रीनिवासाचार्यश्च एतमेव श्लोकमुज्जह्रतुः । समेऽपि पाठभ्रान्ताः । सप्त प्रकृतयश्चोक्ता अन्यत्र– **'स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च । राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि च'** इति । तस्मादत्र प्रकृतय इति पौरा एवोच्यन्ते ।

दिवीव देवैः सह देवराजो व्योम्नीव ताराधिपतिः सतारः ।
सभातळे स्वैः परिवारवर्ग्गैः समाबभासे सहितो महीशः ॥ ५ ॥

(भा.दी.) **दिवी**ति । महीशः राजा, द्यौः स्वर्गस्तस्यां देवैः सह देवराज इव इन्द्र इव, विशेषेण अवति रक्षत्यवकाशदानेनेति व्योम गगनं तस्मिन् [१]तारैर्नक्षत्रैः सहितः सतारः ताराधिपतिरिव चन्द्र इव, सभायास्तळं प्रदेशस्तस्मिन् स्वैः स्वकीयैः परिवाराणां अमात्यादीनां वर्गाः समूहास्तैः । सहितः सन् समाबभासे । भासृ दीप्तौ लिट् ॥ ५ ॥

(सं.चं.) समाहृतो बभासे ॥ ५ ॥

उवाच वाचं नरदेवनाथो निगृह्य वेगं स्वमनोरथस्य[२] ।
सुतं युवानं युवराजमेनं कुर्म्मो मतं चेद् भवतां तदेवम्[३] ॥ ६ ॥

(भा.दी.) **उवाचे**ति । नरदेवानां राज्ञां नाथः दशरथः । स्वस्य यो मनोरथः श्रीरामयौवराज्याभिषेकेच्छा तस्य । 'वाञ्छा लिप्सा मनोरथः' इत्यमरः । वेगः कदा नु भविष्यतीति प्रसरस्तम्, निगृह्य वशी परिहृत्य । वयं युवानं एनं सुतं श्रीरामं युवा चासौ राजा च युवराजस्तम्, श्वस्तनराजमित्यर्थः, कुर्मः, तत् श्रीरामस्य यौवराज्येऽभिषेकाख्यं कर्म चेद्यदि भवतां सर्वेषामपि मतं अभिमतं अनुकूलमित्यर्थः । तर्हि तत्कर्म एवं भवन्मतानुसारेण अस्तु । इति वाचमुवाचेत्यन्वयः । वचधातोर्लिट् । तदेति क्वचित्पाठः । तदा तर्हीत्यर्थः ॥ ६ ॥

(सं.चं.) स्वः स्वीयो यो मनोरथः सपदि रामाभिषेकः कर्तव्य इति तस्य वेगं भरम् । '**ಒತ್ತಡ**' इति भाषायाम् । निगृह्य अप्रकाश्य । जनानां मनोरथभरेणैवाभिषेकः सम्पन्न इति प्रचिख्यापयिषया । युवराजं शौवस्तिकं राजानम् ॥ ६ ॥

रोमोद्गमोऽङ्गे प्रमदाश्रु नेत्रे रामश्च चित्तेऽञ्जलिरास मूर्ध्नि ।
मुखे विकासो वदने च वाणी तत् साधुसाध्वित्यखिलप्रजानाम् ॥ ७ ॥

---

१. '**उडु-दृङ्ध्ययोरक्षी**' इति वैजयन्तीवचनात् तार इत्यपि नक्षत्रवचनम् । '**ताराभिः नक्षत्रैः सहितः सतारः**' इति का.श्री. ।

२. '**स्वस्य मनोरथः, तस्य इदानीमेव रामाभिषेकः कर्तव्य इति वाञ्छाया वेगं रहः निगृह्य आच्छाद्य**' इति का.श्री. । '**तत् तर्हि एवं भवन्मतानुसारेण कुर्मः । वर्तमानसामीप्ये वर्तमानवद् वा**' (३.३.१३१) **इति भविष्यदर्थे लट्**' इति च ।

३. 'तदैवम्'

(भा.दी.) रोमेति । अखिलाः समस्ता याः प्रजास्तासां अङ्गं शरीरं तस्मिन् रोम्णामुद्गमो विकासः, नेत्रं लोचनं तस्मिन् प्रमदस्याऽनन्दस्य अश्रु, चित्तं मनस्तस्मिन् श्रीरामश्च, मूर्धा शिरस्तस्मिन् अञ्जलिः निबद्ध-हस्तः, मुखं वक्त्रं तस्मिन् विकासः । उच्यतेऽनेनेति वदनं वागिन्द्रियं तस्मिन् तत् श्रीरामाभिषेचनं साधु सम्यक् इति वाणी, आसेति प्रत्येकं सम्बन्धः । अस गतिहिंसादानेषु लिट् । विभक्तिप्रतिरूपकमव्ययं वा[१] ॥

(सं.चं.) चित्तेऽन्तरङ्गे रामः रामस्यैव स्मरणम् । 'चित्तं स्मरणकारणम्' । साधुसाध्वित्याम्रेडनेन रामाभिषेके प्रजानामुत्सुकता द्योत्यते ॥ ७ ॥

पौरे जने जानपदे च तस्मिन् सहान्तपालैरधिकं विवक्षौ ।
सपद्यभिप्रायविदः सभायां वृद्धाः समृद्धामथ गामवोचन् ॥ ८ ॥

(भा.दी.) पौर इति । अथ पुरि विद्यमानः पौरस्तस्मिन् जने, जनपदे प्रसिद्धराष्ट्रे भवो जानपदस्तस्मिंश्च जने । तस्मिन् श्रीरामाभिषेकविषये । तस्मिन् सभातळ इति वा । अन्तपालाः पर्यन्तदिङ्मण्डलाधिपतयस्तैः, अन्ते समीपे स्थित्वा पालयन्ति राजानमित्यन्तपाला अङ्गरक्षकास्तैरिति वा, सह । अधिकं यथा भवति तथा विवक्षौ प्रत्युत्तरं वक्तुमिच्छावति सति । सपदि अभिप्रायं विदन्तीत्यभिप्रायविदः, वयोज्ञानादिभिर्वृद्धेषु सत्स्वस्माभिः कथं राजवचसः प्रत्युत्तरं देयमिति जनाभिप्रायविद इत्यर्थः, सभायां विद्यमाना वृद्धाः[२], समृद्धां उदारां गां वाचं अवोचन् । वचधातोर्लङ् । अभिप्रायविदो दशरथाभिप्रायविद इति वा ॥ ८ ॥

(सं.चं.) अन्तपालैः सामन्तैः । सर्वेषां विवक्षितमभिप्रायं विदन्तो वृद्धाः । अर्थतः समृद्धाम्, महार्थाम् ॥

महाजनोऽयं मनसा च[३] वाचा करोति रामस्य सदाऽभिषेकम् ।
महाजनानामधिनाथ राजन् महाभिषेकं कुरु कर्म्मणैव ॥ ९ ॥

(भा.दी.) महदिति[४] । महान्तः पूज्याः ये जनास्तेषाम्, अधिनाथ अधीश्वर, हे राजन्, अयं मिळितः महाजनः मनसा वाचा च श्रीरामस्य सदा अभिषेकं करोति । कर्मणा श्रीरामाभिषेकस्य कर्तुमशक्यत्वान्मनसा आशास्ते, वाचा च प्रार्थयत इति भावः । त्वं तु कर्मणैव महान् यो यौवराज्याभिषेकस्तम् कुरु । तव पितृत्वेन कर्मणैवाभिषेकस्य कर्तुं योग्यत्वादवश्यं कुर्विति भावः ॥ ९ ॥

(सं.चं.) अयमत्र समाहृतः महाजनः जनसमुदायः । महत्त्वं सङ्ख्यया च योग्यतया च ॥ ९ ॥

---

१. **'धातुरूपत्वे–'अस्तेर्भूः'** (२.४.५२) **इति भू-आदेशे बभूवेति स्यात्'** इति का.श्री. ।

२. **'वृद्धाः ज्ञानेन वयसा च ज्येष्ठाः'** इति का.श्री । ३. **'मनसाऽपि वाचा'**

४. समासान्तप्रत्ययमविवक्षित्वा प्रतीकग्रहणमिदम् । **'महेति'** इति वा पठनीयम् ।

नैसर्ग्गिकैरेव गुणैरगण्यैः प्रजापते ते तनयः प्रजानाम् ।
मनांस्युपाकर्षति सत्वभाजामयांस्ययस्कान्तइव स्वगोभिः ॥ १० ॥

(भा.दी.) नैसर्गिकैरिति । हे प्रजापते राजन् । 'प्रजापतिः क्षत्त्रियो नृपः क्षत्रम्' इति हलः । ते तव तनयः श्रीरामः, निसर्गतः स्वभावतः सिद्धा नैसर्गिकास्तैरेव, स्वाभाविकैरेव न तु वरादिलब्धैरित्यर्थः, अगण्यैः गुणैः वीर्यतेजःप्रभृतिधर्मैः, सत्वं सात्विकगुणं भजन्तीति सत्त्वभाजस्तासां सात्विकप्रकृतीनामित्यर्थः, प्रजानां मनांसि । अयस्कान्तः अयस्कान्तनामको मणिः स्वस्य गावो रश्मयस्ताभिः अयांसीव काष्र्णायसानीव उपाकर्षति वशीकरोति । कृष विलेखने लट् ॥ १० ॥

(सं.चं.) उपाकर्षति स्वसमीपमाकर्षति । गोभिः कर्षणशीलैः किरणैः ॥ १० ॥

नारायणात्मा किल नन्दनस्ते परायणात्मा निखिलात्मनां च ।
अमुष्य को वा गणयेद् गुणौघान् रजांसि भूमेर्ग्गणयेत् कविश्च ॥ ११ ॥

(भा.दी.) नारायणेति । हे राजन्, ते नन्दनः श्रीरामः श्रीनारायणः आत्मा स्वरूपं यस्य स तथा, श्रीनारायणावतारात्मकः किलेत्यर्थः । अत एव निखिलाः समस्ता ये आत्मानो जीवास्तेषां परायणः मुख्याश्रयीभूतः आत्मा स्वरूपं यस्य स तथा । अत एव अमुष्य श्रीनारायणस्वरूपस्य श्रीरामस्य गुणौघान् गुणसमूहान् कः पुरुषः गणयेत् सङ्ख्यानं कुर्यात् । गण सङ्ख्याने लिङ् । कविश्च ब्रह्मा वा भूमेः रजांसि गणयेत् । अमुष्य गुणौघान् गणयेन्न कोऽपीति वाऽन्वयः[१] ॥ ११ ॥

(सं.चं.) नारायणात्मा साक्षान्नारायणः । निखिलजीवानां परायणः परमाश्रयः । आत्मा अन्तर्यामी च । को वा कविर्ज्ञानी, ब्रह्मा वा, यो भूमे रजांसि गणयेदपि । नतु नारायणस्य गुणान् । 'विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि' इत्यैतरेयी श्रुतिः । 'विष्णोर्नु वीर्यगणनां कतमोऽर्हतीह यः पार्थिवान्यपि कविर्विममे रजांसि' इति भागवते ॥ ११ ॥

अणोरणीयान् महतो महीयान् गुरोर्ग्गरीयांश्च लघोर्ल्लघीयान् ।
ईशः समस्तस्य च[२] सत्यकामः स्वतन्त्र ऐश्वर्य्ययुतोऽयमेवम्[३] ॥ १२ ॥

---

१. अनन्वितमिव टीकावाक्यम् । प्रायः कानिचन पदानि लुप्तानि ।
२. **'समस्तस्य स सत्यकामः'**
३. **'युतोऽयमेव'**

(भा.दी.) अणोरिति । अयं श्रीरामः अणोः अणुपरिमाणवतो जीवात् अतिशयेनाणुरणीयान् । महतः महत्परिमाणवतो गगनादेः महीयान् अतिशयेन महान् । गुरोः भारयुक्तात् पृथिव्यादेः गरीयान् अतिशयेन भारयुक्तः । लघोः भाररहितात् तेजःप्रभृतेः लघीयान् अतिशयेन लघुः । समस्तं सकलं तस्य जगतः ईशः स्वामी । सत्यः कामो यस्य स तथा, सत्यसङ्कल्प इत्यर्थः । स्वतन्त्रः परानपेक्षश्च[१] । अयमेवं उक्तरीत्या ऐश्वर्ययुतः परमैश्वर्ययुक्तः ॥ १२ ॥

(सं.चं.) रामं पुरुषड्गुणं पुरुषोत्तमं प्रतिपिपादयिषन्तः प्रथमं समग्रैश्वर्यमाहुः– अणोरणीयान् ॥ १२ ॥

सशम्भुशक्राणि जगन्ति रामो धातुं विधातुं सहसा पिधातुम्[२] ।
भ्रूविभ्रमेणैव खलु प्रभुः स्याद् वीरस्य[३] वीर्य्याणि हि तादृशानि ॥ १३ ॥

(भा.दी.) सेति । श्रीरामः । शम्भुर्ब्रह्मा शक्रश्च ताभ्यां सहितानि सशम्भुशक्राणि जगन्ति सहसा झटिति विधातुं स्रष्टुं धातुं पोषयितुम्, पालयितुमित्यर्थः, पिधातुं तिरोहितं कर्तुम्, संहर्तुमित्यर्थः, भ्रुवो विभ्रमो विलासस्तेनैव प्रभुः समर्थः स्यात् खलु । तत्र हेतुमाह– **वीरस्ये**ति । वीरस्य असहायशूरस्य श्रीरामस्य वीर्याणि सामर्थ्यानि तादृशानि हि जगत्स्रष्टृत्वादिमहिमोपेतानि हि ॥ १३ ॥

(सं.चं.) द्वितीयं समग्रं वीर्यमाहुः– सशम्भुशक्राणि । शम्भुरिति ब्रह्मा च शिवश्च । 'शम्भुरर्हन् विधिः शिवः' इति मङ्खः । शम्भुश्च शम्भुश्च शम्भू । धातुं धारयितुम् । विधातुं निर्मातुम् । पिधातुं संहर्तुम् ॥ १३ ॥

न केवलं यः कुमुदं विकासं नयत्यभीक्ष्णं हि दिवो मुदं च[४] ।
द्विपक्षपूर्णोऽस्तकलङ्कलेशः कीर्त्तीन्दुरस्यास्यति पूर्णमिन्दुम् ॥ १४ ॥

(भा.दी.) नेति । द्वौ यौ पक्षौ शुक्लकृष्णाख्यौ तयोः पूर्णः, सर्वदा परिपूर्ण इत्यर्थः । अस्तो निरस्तः कळङ्कस्य लाञ्छनस्य लेशो येन स तथा । 'कळङ्कोऽङ्कापवादयोः' इत्यमरः । अकीर्त्यमिश्रित इत्यर्थः । अस्य श्रीरामस्य यः कीर्तीन्दुः कीर्त्याख्यचन्द्रः केवलं कुमुदं कुमुदकुसुमं तत् विकासो विकसनं तम्, न नयति

१. **'स्वतन्त्रः स्वाधीनः । स्वसत्तादेः परानपेक्षः'** इति का.श्री. ।

२. **''पिधातुमित्यत्र–'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः' इत्यपेरकारलोपः'** इति च ।

३. **'वीरस्य अध्यवसायान्तगामिनः रामस्य'** इति च ।

४. **'दिवो मुदश्च'**

न प्रापयति । णीञ् प्रापणे लट् । 'अकथितं च'[१] (अ.सू.१.४.५१) इति सूत्रेण द्विकर्मकत्वादुभयत्र द्वितीया । किन्नाम कुमुदं कोर्भूमेर्मुत् सन्तोषस्तां च विकासं आभीक्ष्णं सम्यक् नयति । समस्तभूमण्डल-स्थानामपि सन्तोषमभिवर्धयतीत्यर्थः[२] । केवलं तावदेव न, किन्तु चन्द्रादत्यन्तमधिकत्वेन द्यौरन्त-रिक्षादिलोकस्तस्यापि मुदं हर्षं विकासं नयति । अन्तरिक्षादिलोकस्थानां देवादीनामपि सन्तोषमत्यन्तं वर्धयतीति हि यस्मात् तेन कारणेन पूर्णं इन्दुं प्रसिद्धचन्द्रं अस्यति निरस्यतीत्यर्थः । असु क्षेपणे लट् । श्रीरामकीर्तिः सर्वदैकप्रकारत्वान्निष्कळङ्कत्वात् सर्वजनसन्तोषजनकत्वात् पूर्वापरपक्षयोर्वृद्धिक्षयवन्तं कळङ्किनं कमलादिसन्तोषाजनकं चन्द्रं विजित्यातिशयेन वर्तत इत्यर्थः ॥ १४ ॥

(सं.चं.) तृतीयं समग्रं यश आहुः । इन्दुः शुक्लपक्ष एव पूर्णः । अस्य कीर्तिः द्वयोरपि पक्षयोः पूर्णा । स्वपक्षे परपक्षेऽपि । शत्रवोऽप्यस्य यशो गायन्ति । एवमिन्दुः शशाङ्कः । भगवद्यशो निष्कलङ्कम् ॥ १४ ॥

भित्त्वा भुवं राजसुताच्छलेन यल्लोभतः श्रीः स्वयमेनमाप ।
तां सर्वलोकानुपमामनन्तां रूपश्रियं त्वस्य निरूपयामः ॥ १५ ॥

(भा.दी.) **भित्त्वेति** । श्रयन्ते गुणा एनामिति वा, हरिं श्रयत इति वा श्रीः, महालक्ष्मीः । स्वयं स्वेच्छयैव, नतु श्रीरामापेक्षया । राज्ञो जनकस्य सुतेति छलं व्याजं तेन भुवं भूमिं भित्त्वा विदार्य यस्मिन् श्रीरामे लोभो भक्तिलक्षणो लोभस्तस्मादिति ततः एनं श्रीरामं आप प्राप । वयम्, सर्वो यो लोकस्तस्मिन् न विद्यते उपमा सादृश्यं यस्याः सा तथा ताम्, अनन्तां देशकालादितोऽपरिच्छिन्नां[३] तां सीतां अस्य श्रीरामस्य रूपेण स्वरूपेण वर्तमाना श्रीः सम्पद्रूपश्रीः ताम् । निरूपयामः जानीमः । रूप रूपवर्णक्रियाविस्तारगुणवचनेषु[४] लट् । सम्पदेव स्त्रीरूपेण समीपे सेवत इति जानीम इत्यर्थः । यद्वा रूपश्रियं रूपसम्पदमित्यर्थः । सीतायाः श्रीरामरूपश्रियश्च असदृशत्वानन्तत्वावियुक्तत्वादिना साम्यादिति भावः ॥ १५ ॥

(सं.चं.) चतुर्थीं समग्रां श्रियमाहुः– भित्त्वा भुवम् । तां त्रिभुवनरमणीयायाः श्रियोऽपि लोभनीयां रूपसम्पदं रामस्य निरूपयामः प्रतिपादयामः ॥ १५ ॥

---

१. तथाहि अकथितपदकथिताः षोडशेमे धातव इति वैयाकरणाः–**१. दुह प्रपूरणे, २. याचृ याच्ञायाम्, ३. पचष् पाके, ४. दण्ड दण्डनिपाते, ५. रुधिर् आवरणे, ६. प्रच्छ ज्ञीप्सायाम्, ७. चिञ् चयने, ८. ब्रूञ् व्यक्तायां वाचि, ९, शासु अनुशिष्टौ, १०. जि जये, ११. मथे विरोडने, १२. मुष स्तेये, १३. णीञ् प्रापणे, १४. हृञ् हरणे, १५. कृष विलेखने, १६. वह प्रापणे ।** अर्थनिबन्धनो धातुपाठः । तेन समानार्था धातवोऽपि ।

२. **'–वर्षयतीत्यर्थः'**

३. **'देशादिनाऽपरिच्छिन्नाम्'**

४. धातुपारायणिकास्तु– **'रूप रूपक्रियायाम् । वर्ण वर्णक्रियाविस्तारगुणवचनेषु'** इति धातुद्वयं पठन्ति ।

भावीनि भूतानि भवन्ति वाऽपि[1] समस्तवस्तूनि समं विशेषैः ।
यो हस्तहारेन्द्रवदेव वेत्ति ज्ञाने समो नाप्यधिकोऽस्य[2] भूम्नः ॥ १६ ॥

(भा.दी.) भावीति । यः श्रीरामः । भावीनि भविष्यन्ति समस्तवस्तूनि । भूतानि वा अतीतानि च समस्तवस्तूनि । भवन्ति अपि वर्तमानानि च समस्तवस्तूनि । विशेषा नानाविधाः प्रभेदास्तैः, तत्तद्धर्मविशेषैर्वा समं सह हस्तगतो यो हारेन्द्रो हारश्रेष्ठस्तद्वत् वेत्त्येव जानात्येव । विद ज्ञाने लट् । अत एव भूम्नः पूर्णज्ञानस्य अस्य श्रीरामस्य ज्ञानविषये समोऽपि सदृशोऽपि न । अधिकोऽपि पुमान्नेत्यन्वयः[3] ॥ १६ ॥

(सं.चं.) पञ्चमं सार्वज्ञ्यमाहुः– भावीनि भूतानि ॥ १६ ॥

अमन्दमानन्दमनिन्दनीयं निरन्तरं यन्निजमेव भुङ्क्ते ।
स्त्रीराज्यकोशादिषु तस्य तेन न रागरोगोपहता मनीषा ॥ १७ ॥

(भा.दी.) अमन्दमिति । यः श्रीरामः, यत् यस्मात्, मन्दः स्वल्पो न भवतीत्यमन्दस्तम्, परिपूर्णमित्यर्थः[4], निन्दनीयो न भवतीत्यनिन्दनीयस्तम्, निजं स्वरूपभूतं आनन्दमेव, निर्गतमन्तरं व्यवधानं यथा भवति तथा निरन्तरम्, सर्वदेत्यर्थः, भुङ्क्ते अनुभवति । भुज पालनाभ्यवहारयोः लट् । तेन कारणेन तस्य श्रीरामस्य मनीषा बुद्धिः, स्त्री च राज्यं च कोशश्च ते आदयो येषां ते तथा तेषु, राग एव इच्छैव रोगस्तेन उपहता विनाशिता कलुषितेत्यर्थः, न भवति ॥ १७ ॥

(सं.चं.) षष्ठं समग्रं वैराग्यमाहुः– अमन्दम् । 'असङ्गो ह्ययं पुरुषः' ॥ १७ ॥

गुणान् षडेतानथ [5]पञ्च भावांस्तिस्रः स्वशक्तीरुदयांश्च सिद्धीः ।
अर्थान् द्वयांश्चेति[6] बिभर्त्ति रामो वेदोदितान् नीतिपथोदितांश्च ॥ १८ ॥

(भा.दी.) गुणानिति । एतान् वेदादिशास्त्रे[7] प्रसिद्धान् । षट् षट्सङ्ख्याकान् गुणान् शुभधर्मान् । ते च सम्पूर्णैश्वर्यं सम्पूर्णवीर्यं सम्पूर्णं यशः सम्पूर्णश्रीः सम्पूर्णज्ञानं सम्पूर्णवैराग्यं चेत्येत एवोदिताः षड्

---

१. 'चापि' २. 'नास्त्यधिकस्य भूम्नः' ३. 'कालत्रयविषयकस्वपरगताशेषविशेषज्ञानवानिति फलितार्थः' इति का.श्री. ।

४. 'अमन्दमपरिच्छिन्नमवाङ्मनसगोचरमिति यावत् । 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इति श्रुतिः । यत आनन्दात् वागादयो निवर्तन्ते प्रतिपादयितुमसमर्थाः, तमानन्दमिति श्रुतावन्वयः । निन्दयितुमयोग्यमनिन्दनीयम् । दुःखासम्भिन्नमिति यावत्' इति च ।

५. 'पञ्चभावान्' इति समस्तं पदमिति वि.ती. । ६. 'अर्थद्वयांश्चेति' ७. '–शास्त्रे च प्रसिद्धान्'

गुणाः । 'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा' इत्युक्तेः । शत्रुभिः सन्धानात्मकः सन्धिश्च, दुर्बलशत्रुभिः सह कलहरूपो विग्रहश्च, अनम्रशत्रुपुराभिगमनलक्षणं यानं च, कालप्रतीक्षया शत्रुराज्यसमीपे चिरकालसंस्थितिरूपमासनं च, शत्रुषु द्वैधीभावकरणलक्षणो द्वैधीभावश्च, प्रबलशत्रुशरणप्राप्तिरूपः संश्रयश्चेति यथोदिताः षड् गुणाः । 'सन्धिं च विग्रहं चैव यानमासनमेव च । द्वैधीभावं संश्रयं च षड्गुणान् कवयो विदुः' इत्युक्तेः । अथ पञ्च च ते भावाश्च तान् । नारायण-वासुदेव-सङ्कर्षण-प्रद्युम्नानिरुद्धाख्यानि पञ्चरूपाणि वेदोदिताः पञ्चभावाः । कर्मप्रारम्भसमये उचित उपाय इत्येकम्, पुरुषसम्पत् द्रव्यसम्पदित्येकम्, अनर्थपरिहारात्मकं विनिपातप्रतीकार एकम्, देशकालपरीक्षात्मकमेकम्, कार्यसिद्धि-रित्येकमिति यथोदिताः पञ्चभावाः पञ्चाङ्गानि । तच्चोक्तम्–'कर्मारम्भोचितोपायः पुरुषद्रव्यसम्पदौ । विनि-पातप्रतीकारो देशकालावलोकनम् । कार्यसिद्धिरिति प्रोक्तमङ्गानां पञ्चकं बुधैः' इति । तिस्रः शक्तीश्च । ताश्च सृष्टिशक्तिः, स्थितिशक्तिः, संहारशक्तिरिति तिस्रो वेदोदिताः । उत्साहशक्तिर्मन्त्रशक्तिः प्रभुशक्तिरिति तिस्रः शक्तय इति नीतिपथोदिताः । त्रीन् उदयांश्च । ते च अरुणोदय उषउदयः सूर्योदय इति वेदोदिता उदयाः । मित्रोदयः, भूम्युदयः, कोशोदयश्चेति नीतिपथोदिताः[1] । वेदेषु उदितान् प्रोक्तान् । नीतेः पन्थाः नीतिपथः नीतिशास्त्रमित्यर्थः, तत्र उदितांश्च, इति उक्तप्रकारेण द्वयान् द्विप्रकारान् अर्थ्यन्ते ज्ञायन्ते वेदादि-भिरित्यर्था ऐश्वर्यादयो धर्मास्तान् । बिभर्ति भृञ् भरणे लट् । एवं च वेदोदितान् नीतिपथोदितांश्चेत्य-नयोर्विशेषणयोर्योग्यतया प्रत्येकं सम्बन्धः । तिस्र इत्यस्यापि योग्यतया सम्बन्धः । बिभर्तीत्यस्य द्वयार्थानि-त्यस्य च सर्वत्र सम्बन्धः । तथा चैवमन्वयः- श्रीरामः एतान् प्रसिद्धान् षट् गुणानिति द्वयान् अर्थान् धर्मान् बिभर्ति । अथ वेदोदितान् पञ्चभावान् नीतपथोदितांश्च पञ्चभावानिति द्वयान् अर्थान् बिभर्ति । वेदोदिताः तिस्रः शक्तीः नीतिपथोदिताः तिस्रः शक्तीरिति द्वयान् अर्थान् बिभर्ति । वेदोदितान् त्रीनुपायान् नीतिपथोदितान् त्रीन् उदयांश्चेति द्वयान् अर्थान् बिभर्ति । वेदोदिताः तिस्रः सिद्धीः नीतिपथोदिताश्च तिस्रः सिद्धीरिति द्वयान् अर्थान् बिभर्ति । तथाच श्रीरामस्यात्यन्तं राज्याभिषेकयोग्यत्वमस्तीत्युक्तं भवति ॥ १८ ॥

(सं.चं.) 'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा' इत्येवमेतान् पूर्वश्लोकेषु वर्णितान् षड्गुणान् । पञ्च भावान् प्रादुर्भावान् । नारायणाद्यनिरुद्धान्तान् । अथच पृथिव्या-

---

१. **'सिद्धीश्च तिस्रः'** इत्यस्य विवरणपरो व्याख्यानभागो लुप्तः । **'वेदपथोदितसिद्धीनामनन्तत्वात् तिस्र इति सिद्धीरित्यस्य न विशेषणम् । वेदपथोदिता अनन्ताश्च सिद्धीर्बिभर्ति । तिस्र इत्यस्य विशेषणत्वे उपलक्षणत्वेनानन्तसिद्धयो ग्राह्याः । अर्थसिद्धिः, स्थलसिद्धिः, समुद्रादिजलसिद्धिरिति नीतिपथोदितास्तिस्रः सिद्धीः बिभर्ति रामः'** इति का.श्री. । वि.भू.टीकायामप्येवम्–**'वेदपथोदितसिद्धीनामानन्त्यात् तिस्र इत्युपलक्षणम् । तथाच महिमा शौर्यं वीर्यमित्याद्या अनन्ताश्च सिद्धीर्बिभर्तीत्यर्थः । अर्थसिद्धिः, स्थलसिद्धिः, जलात् समुद्रादेः सिद्धिरिति तिस्रो नीतिपथोदिताः सिद्धयः'** इति । अस्वरसमुभयोरपि व्याख्यानम् । अन्ते पुनरेवमुपसञ्जहार वि.भू.–**'अत्र पुनरपि प्रतिपदमनेकेऽर्थाः प्रतीयन्ते । तथाऽपि ग्रन्थगौरवभयादुपरम्यते'** इति ।

पोऽग्निर्वायुराकाश इति पञ्च भावान् पदार्थान् बिभर्ति । अथ देवा ऋषयः पितरश्चक्रवर्तिनो मनुष्या इति पञ्चविधान् भावान् जीवान् मोक्षदानेन बिभर्ति । शक्तीश्च तिस्रः । ज्ञानशक्तिमिच्छाशक्तिं क्रियाशक्तिमिति । त्रिगुणात्मिका वा तिस्रः शक्तीः श्रीभूदुर्गाः । 'शक्यत्वाच्छक्तयो भार्याः' इति ह्यभिदधति । अथ सूर्यगताः प्रकाशनतापनाह्लादनाख्यास्तिस्रः शक्तीर्बिभर्ति । कालरूपी चायमुदयांस्त्रीन् बिभर्ति । अरुणस्योषसः सूर्यस्य चोदयास्त्रयः । सिद्धिरिति मुक्तिः । श्वेतद्वीपानन्तासनवैकुण्ठास्तिस्रः सिद्धीर्धत्ते । कर्मसिद्धीर्वा तिस्रः– यज्ञो दानं तप इति । ज्ञानसिद्धीर्वा तिस्रः श्रुतीः– ऋग् यजुः सामेति । यज्ञाध्ययनदानानि वा साधकानां ज्ञानभक्तिवैराग्याणि वा तिस्रः सिद्धीर्बिभर्ति । इतीमे वेदोदिता अर्थाः । तानेतान् वेदवेद्योऽयं बिभर्ति । अथ नीतिशास्त्रोदिताः क्षत्रियधर्माः । सन्धिविग्रहौ यानासने द्वैधीभावसंश्रयाविति षड्गुणाः । अथ च कामक्रोधलोभमोहमदमत्सराणां षण्णां दोषाणामभावाः षड् गुणाः । स्फुटं चैतदुपरिष्टात् । कर्मणामारम्भोपायः, पुरुषद्रव्यसम्पत्, विनिपातप्रतीकारः, देशकालावेक्षणम्, कार्यसिद्धिरिति पञ्च भावाः । उत्साहशक्तिर्मन्त्रशक्तिः प्रभुत्वशक्तिरिति तिस्रः शक्तयः । सेनाबलं देहबलं बुद्धिबलमिति च तिस्रः । मित्रभूकोशानामुदयास्त्रयः । उत्साहसिद्धिर्मन्त्रसिद्धिः प्रभुत्वसिद्धिरिति सिद्धयश्च तिस्रः । अस्त्रशस्त्रशास्त्राणां वा सिद्धयस्तिस्रः । आत्मविजयः, बन्धुविजयः, शत्रुविजय इति च तिस्रः । मातुः पितुराचार्यस्य चाऽशीरूपाश्च तिस्रः । धर्मार्थकामानां सिद्धयश्च । स्वयं क्षत्रकुलेऽवतीर्णो रामस्तानेतान् बिभर्ति । एवं वेदोदितान् नीतिपथोदितांश्चेति द्वयानप्यर्थान् बिभर्तीत्यर्थः ॥ १८ ॥

स्वं पारमेष्ठ्यं परमेष्ठिनो यदोजः पुरारेर्विभवो बलारेः ।
अन्ये गुणाश्चान्यगता गुणानां रामस्य सर्वे प्रतिबिम्बभूताः ॥ १९ ॥

(भा.दी.) स्वमिति । परमे उत्तमे ब्रह्मलोके तिष्ठतीति परमेष्ठी चतुर्मुखस्तस्य यत् स्वं स्वकीयं परमेष्ठिनो भावः पारमेष्ठ्यम्, परमोत्कृष्टत्वम्[1] । पुरारेः त्रिपुरशत्रोः शिवस्य यत् ओजः शत्र्वभिभवशक्तिः । बलारेर्बलनामकदैत्यशत्रोरिन्द्रस्य यः विभवः ऐश्वर्यम् । अन्येषु चतुर्मुखादीतरेषु बृहस्पत्यादिषु गताः ये अन्ये नीतिमत्त्वादयो गुणाश्च । ते सर्वे श्रीरामस्य गुणानां सर्वोत्तमत्त्वादीनां प्रतिबिम्बभूताः तत्सदृशत्वे सति तदधीनभूताः । ब्रह्मादिगतसर्वोत्कृष्टत्वादिगुणेभ्योऽप्यतिशयितसर्वोत्तमत्वादिगुणवानिति भावः । अन्ये गुणा अपि यदा तदधीनास्तदा श्रीरामस्य गुणवत्त्वं किं वक्तव्यमिति कैमुत्यद्योतकोऽयं श्लोकः ॥ १९ ॥

१. **'परमेष्ठित्वं सर्वजीवोत्तमत्वम्, सत्यलोकाधिपतित्वं वा । तत् रामगतपरमेष्ठित्वस्य (परमोत्कृष्टत्वस्य) प्रतिबिम्बभूतम् । रामगतपरमेष्ठित्वाधीनत्वे सति किञ्चित् तत्सदृशम्'** इति का.श्री. ।

(सं.चं.) जीवानां सर्वे गुणा भगवद्गुणप्रतिबिम्बभूता इत्याहुः– स्वं पारमेष्ठ्यम् ॥ १९ ॥

कामः स्वकान्तिं [१]परिशान्तिमिन्दुः प्रभां प्रभाकृद् धनितां धनेशः ।
क्षमां क्षमेयं रघुवंशकेतोर्दृष्ट्वा गुणान् स्वाननुशिक्षयन्ति ॥ २० ॥

(भा.दी.) काम इति । कामो मन्मथः, इन्दुः, प्रभाकृत् सूर्यः, धनेशो वैश्रवणः, इयं क्षमा भूमिः इत्येते । रघोर्यो वंशस्तस्मिन् केतुरिव ध्वज इव रघुवंशकेतुस्तस्य । 'उत्पातेऽङ्के ध्वजे केतुः' इति वैजयन्ती । गुणान् कान्त्यादिधर्मान् । दृष्ट्वा स्वस्य स्वात्मनः कान्तिं शोभाम्, 'कान्तिः शोभाभिकामयोः' इति वैजयन्ती, परिशान्तिं तापशमनम्, प्रभां द्युतिम्, धनितां धनवत्ताम्, क्षमां क्षान्तिम्, इत्येतान् । स्वान् स्वकीयान् गुणान् अनुशिक्षयन्ति श्रीरामकान्त्यादिवदस्माकं नाभूदिति मत्वा अनुसृत्य शिक्षयन्तीत्यर्थः । शिक्ष विद्योपादाने लट् ॥ २० ॥

(सं.चं.) 'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' इति श्रुतिः । 'अनुकृतेस्तस्य च' इति भगवद्वचनम् । अनुशिक्षयन्ति अनुकर्तुं प्रयतन्ते ॥ २० ॥

[२]औदार्य्यमाधुर्य्यसुधैर्य्यशौर्य्य[३]गाम्भीर्य्यचातुर्य्यमहार्य्यभावैः ।
गुणैरगण्यैरपरैश्च[४] पूर्ण्णः सुतस्त्रिलोकीतिलकस्तवायम् ॥ २१ ॥

(भा.दी.) औदार्येति । उदारस्य दातुर्भाव औदार्यं तच्च, मधुरस्य मनोहरस्य भावो माधुर्यं तच्च, शोभनं यद्धैर्यं तच्च, शौर्यं च तैः । गाम्भीर्यं च, चातुर्यं कौशलं तच्च, महान् य आर्यभावोऽतिपूज्यत्वं स च तैः । अगण्या गणयितुमशक्यास्तैः, स्वातन्त्र्यसार्वज्ञ्यादिगुणैश्च,[५] सदा अतिपूर्णः निरवधिकतया पूर्णः । तव सुतः अयं श्रीरामः त्रिलोक्यां तिलक इव त्रिलोकीतिलकः, त्रिलोकश्रेष्ठ इत्यर्थः ॥ २१ ॥

(सं.चं.) औदार्यं वदान्यता । मधुराऽऽकृतिः । मधुरं वचः । श्रवणसुभगं मनोहरं चेत्यर्थः । मधुरं मनः । प्रसन्नमक्रूरं च । विकारहेतावप्यविक्रिया धैर्यम् । तच्च द्विविधम्– दुष्टविषयं साधुविषयं च । प्रथमो दोषः । द्वितीयो गुण इति सुधैर्यमित्युक्तम् । सम्बाधेष्वविचलत्वं च सुधैर्यम् । शत्रुदमनदक्षता शौर्यम् ।

---

१. **'प्रतिशान्तिमिन्दुः'**

२. **'ननु ज्ञानेच्छाप्रयत्नसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागरूपाष्टगुणातिरिक्तगुणानामभावात् कथं रामस्यानन्तगुणत्वमित्यत आह–औदार्येति'** इति का.श्री. ।

३ **'–शौर्यैर्गाम्भीर्य–'** इति वि.ती.पाठः ।

४. **'–गण्यैश्च सदाऽतिपूर्णः'** इति वि.ती.पाठः । **'गुणैरसङ्ख्यैरप–'** इति च क्वचित् ।

५. **'स्वातन्त्र्यसर्वशक्तित्वादिगुणैश्च'**

चित्तस्य दुरूह्यता चाधृष्यता च गाम्भीर्यम्। सपदि प्रतिकूलविकटसङ्कटपरिहारपटुता चातुर्यम्। कर्मसु कौशलं च। ज्ञानवृद्धा आर्याः। महान् वृद्धानामपि मार्गदर्शी रामस्याऽर्यभावः ॥ २१ ॥

सर्वत्र सर्वानपि सर्वदाऽपि प्राप्नोति कामान् ननु सत्यकामः।
कामः कथं द्रुह्यति तेन जातु सीतापतिं विश्वपतिं सुतं ते ॥ २२ ॥

(भा.दी.) यत्र गुणास्तत्र दोषा इति नियमाद् रागादिदोषा अपि श्रीरामे सन्ति किमित्यतः सर्वेश्वरत्वान्नेत्याह– **सर्वत्रेत्या**दिना। सत्यः अमोघः कामः सङ्कल्पो यस्य स तथा यः श्रीरामः सर्वत्रापि सर्वस्मिन् देशेऽपि सर्वदाऽपि सर्वान् कामान् अभीप्सितान् प्राप्नोति (ननु)। आप्लृ व्याप्तौ लट्। येन हेतुना। तेन श्रीरामस्य परिपूर्णकामत्वेन कारणेन विश्वपतिं सकलजगत्पतिं विश्वस्य मुख्यप्राणस्य वा पतिम्। 'विश्वो हिरण्यगर्भः' इति श्रुत्या विश्वशब्दस्य मुख्यवायावपि प्रसिद्धेः। सीतापतिं ते सुतं कामः जातु कदाचिदपि कथं द्रुह्यति द्रोहं करोति? द्रुह जिघांसायां लट्। अपूर्णमनोरथानां पीडकः कामः। एतादृशमहिमानं श्रीरामं पीडयितुं समर्थः कथं भवेत्? न कथमपीति भावः ॥ २२ ॥

(सं.चं.) षड्गुणा उक्ताः। अथ षड्दोषाणामभावमाहुः। तत्र प्रथमं कामाभावम्। सत्यकामं कामः कथं द्रुह्येत् अपकुर्यात्? अत्र द्रोहस्य कोपमूलत्वाभावान्न सम्प्रदानसञ्ज्ञा। 'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः' (अ.सू.१.४.३७) इति हि पाणिनिः ॥ २२ ॥

प्रियस्य हानिर्न कदाचिदस्य प्रियेतरस्यापि न सम्भवः स्यात्।
क्रोधस्ततो लक्ष्मणपूर्वजस्य पराजितः पादरजांस्युपास्ते ॥ २३ ॥

(भा.दी.) **प्रियस्ये**ति। यस्मात् अस्य श्रीरामस्य कदाचित् कस्मिंश्चित् कालेऽपि प्रियं प्रीत्यास्पदं वस्तु तस्य यो हानिर्विनाशः सा न स्यात्। प्रियादितरदन्यत् तस्य अप्रियस्येत्यर्थः, सम्भवः उत्पत्तिरपि न स्यात्। ततः कारणात् पराजितः क्रोधः लक्ष्मणात् पूर्वस्मिन् काले जातस्य श्रीरामस्य पादरजांसि उपास्ते सेवते। आस उपवेशने लट्। लोके प्रियस्य हानौ वा प्रियस्यानुत्पत्तौ वा[1] खलु क्रोधो जायते। श्रीरामस्य तदुभयाभावान्न क्रोधसम्भव इति भावः ॥ २३ ॥

(सं.चं.) अथ क्रोधाभावमाहुः। लक्ष्मणपूर्वजस्य। एतेन भरतो लक्ष्मणपूर्वज इति भ्रमं वारयति ॥२३॥

१. **'अप्रियस्योत्पत्तौ वा'** इति वक्तुमुचितम्। स्याल्लिपिकृतां प्रमादः।

सन्त्यज्य साम्राज्यमिदं प्रभुः स्यात् वनं प्रयातुं सहसा प्रसन्नः ।
आत्मानमप्येष ददाति सद्भ्यो रामे न लोभो[१] लभतेऽवकाशम् ॥ २४ ॥

(भा.दी.) **सन्त्यज्ये**ति । एषः श्रीरामः यतः इदं सम्राजो भावः साम्राज्यं तत्, राज्याधिपतित्वमित्यर्थः, 'सम्राजोऽग्नीन्द्रविष्ण्वर्का यश्च स्यान्मण्डलेश्वरः । राजसूयेन येनेष्टं राज्ञः शास्त्याज्ञया च यः' इति वैजयन्ती । सन्त्यज्य प्रसन्नः मनःखेदरहितः सन् वनं तत् प्रयातुं प्रभुः समर्थः स्यात् । यतश्च भक्तानां प्रसन्नः सन् आत्मानमपि स्वत्मानमपि सहसा अविचार्यैव सद्भ्यः उत्तमेभ्यः पुरुषेभ्यः ददाति[२] । डु दाञ् दाने लट् । तस्मात् लोभः श्रीरामे अवकाशः अवस्थानार्थं प्रदेशस्तम्, न लभते न प्राप्नोति । डु लभष् प्राप्तौ लट् ॥ २४ ॥

(सं.चं.) अथ लोभविरहमाहुः– सन्त्यज्य । वनं प्रयातुम् । चित्रमिदं यत् सभायां वृद्धा अभ्यूहाम्प्रचक्रिरे तदेव भविष्यति सत्यं स्यादिति न तेऽपि स्वप्नेऽप्यचिन्तयन्निति । कवेः कल्पनाकौशलमिदम् । इतिहासप्रबन्धाऽपि मूलतः कविरयं लिकुचपण्डितः । आत्मानमप्येष ददाति । तदपि चकारैव स्वभक्तवचनं परमार्थीकुर्वन्– 'स्वात्मप्रदानमधिकं पवनात्मजस्य कुर्वन् समाश्लिषदमुं परमाभितुष्टः' (म.भा.ता.नि.७.५०) इति । तेन सद्भ्य इति प्राणावतारेभ्यो विशिष्य । 'सदिति प्राणः' इति श्रुतेः ॥ २४ ॥

आयान्ति[३] शान्तिं किल यत्प्रसादान्मोहाद्यवद्यानि कुतोऽस्य मोहः ।
यस्याहिमांशोरुदये व्यपैति[४] महान्धकारोऽत्र[५] कुतोऽन्धकारः ॥ २५ ॥

(भा.दी.) **आयान्ती**ति । यस्य श्रीरामस्य प्रसादोऽनुग्रहस्तस्मात्, मोहः मिथ्याज्ञानमादिर्येषां तानि तथोक्तानि, तानि च तानि अवद्यानि च, मोहादिदोषा इत्यर्थः, शान्तिं शमं आयान्ति किल प्राप्नुवन्ति किल । या प्रापणे लट् । नष्टा भवन्तीत्यर्थः । अस्य परमोहादिकमपहर्तुः श्रीरामस्य मोहः विपरीतज्ञानं कुतः? न कुतोऽपि । तत्र दृष्टान्तः– **यस्ये**ति । हिमविरुद्धा अहिमाः, उष्णा इत्यर्थः, तादृशा अंशवो यस्य स तथा तस्य, (यस्य) सूर्यस्य उदयः प्रादुर्भावस्तस्मिन् सति महान्धकारः निबिडान्धकारो व्यपैति[६] दूरादेव गच्छति । इण् गतौ लट् । अत्र एवंविधे सूर्ये अन्धकारः कुतः कथं घटेत? न कथमपीत्यर्थः ॥ २५ ॥

१. **'लोभः स्वस्य दानसामर्थ्ये विद्यमानेऽपि सत्पात्रे प्राप्तेऽपि द्रव्यत्यागेच्छाभावः'** इति का.श्री. ।

२. **'स्वयं भक्ताधीनो भवतीति यावत्'** इति का.श्री. । ३. **'प्रयान्ति'**

४. **'–रुदयेऽप्यपैति'** ५. **'–कारोऽस्य कुतो–'** ६. **'निबिडान्धकारोऽप्यपैति'**

(सं.चं.) अथ मोहविरहमाहुः–आयान्ति । मोहो ममकारः तन्मूलमयथाकल्पनं च । अहिमांशुः भास्वान् ॥

अविद्यमानात्मगुणाभिमानं मोहादहङ्कारमुशन्ति सन्तः ।
अविद्यमानो न गुणोऽस्ति रामे तस्मादहङ्कारलवोऽपि नास्य ॥ २६ ॥

(भा.दी.) अविद्यमानेति । सन्तः सत्पुरुषाः मोहो वस्तुविपरीतज्ञानं तस्मात् अविद्यमानाः स्वस्मिन्नवर्तमानाः ये आत्मनः स्वस्य गुणास्तेषामभिमानो मयि सर्वे गुणाः सन्तीति गर्वस्तम्, 'गर्वोऽभिमानोऽहङ्कारः' इत्यमरः, अहङ्कारं उशन्ति वदन्ति । वश कान्तौ लट् । यस्मात् अविद्यमानः गुणः शुभधर्मः श्रीरामे नास्ति । सर्वोऽपि गुणराशिस्तत्र वर्तत इत्यर्थः । तस्मात् सर्वगुणपूर्णत्वात् । अस्य एवंविधस्य श्रीरामस्य अहङ्कारस्य अविद्यमानगुणाभिमानस्य लवोऽप्यवकाशो नास्ति । तत्कारणस्य गुणैरपूर्णत्वस्याभावादिति भावः ॥ २६ ॥

(सं.चं.) अथ मदाभावमाहुः– गुणाभिमानमिति । आत्मन्यविद्यमाना ये गुणाः तेषामात्मगुणत्व-भ्रमेण मानश्चित्तसमुन्नतिः । तेन गुणाढ्योऽहमिति याऽस्मिता नाम शौटीर्यं सोऽहङ्कारः । अस्वतन्त्रो ह्यभिमन्यते । नहि स्वतन्त्रस्य क्वाप्यभिमानः सम्भवी । अविद्यमानस्योत्कर्षस्याऽत्मन्यस्तिताभ्रमः मदो नामाहङ्कारः । तस्य लवो लेशः ॥ २६ ॥

न मद्वशोऽसाविति चित्ततोदं मात्सर्य्यमार्य्याः समुदाहरन्ति ।
विश्वं च यद्वश्यमवश्यमेतत् स मत्सरी चेत् तुरगोऽपि शृङ्गी ॥ २७ ॥

(भा.दी.) नेति । आर्याः साधवः पुरुषाः । 'आर्यः साधुकुलीनयोः' इति वैजयन्ती । असौ पुरुषः, मद्वशः ममाधीनः न भवतीति यः चित्तस्य तोदश्चित्तव्यथा तं मात्सर्यं मात्सर्याख्यदोषस्तत्, समुदाहरन्ति कथ-यन्ति । एतत् विश्वं च सर्वमपि जगत् अवश्यं निश्चयेन सर्वदाऽपि यद्वश्यं यस्य श्रीरामस्य वशे स्थितम्, तदाज्ञया वर्तमानमित्यर्थः, सः एवंविधः श्रीरामश्चेद्यदि मत्सर अस्यास्तीति मत्सरी तर्हि तुरगोऽपि शृङ्गं अस्यास्ति इति शृङ्गी स्यादित्यर्थः, यथा लोके तुरगशृङ्गमत्यन्तमसत् तथा सर्वजगदीश्वरे श्रीरामेऽपि मात्सर्यं सदाऽप्यविद्यमानमेवेति भावः ॥ २७ ॥

(सं.चं.) अरिषड्वर्गे चरमस्य मात्सर्यस्याभावमाहुः– नेति । 'अप्रीतिर्मद्वशो नायमिति मत्सर ईरितः' इति ह्यभिदधति । 'अवश्यं तु निश्चिते' इति यादवप्रकाशः । तुरगोऽपि । 'वश्यमवश्यम्' इत्यालङ्कारिकं वचः । अशृङ्गं जन्तुजातं पदार्थः ॥ २७ ॥

मदप्रमादौ भयदुःखशोकाः[१] क्षुत् तृट् त्रिधातुप्रभवाश्च[२] दोषाः ।
न सन्ति रामे पठितः[३] श्रुतौ य 'आदित्यवर्ण्णं तमसः परस्तात्'[४] ॥ २८ ॥

(भा.दी.) मदेति । (मदः) विद्यामदादिः स च प्रमादो मनसोऽनवधानता स च तौ, भयं मृत्व्यादिभयं तच्च दुःखं च मोहश्च ते, क्षुत् क्षुधा, तृट् तृषा, त्रयो ये धातवो वातपित्तश्लेष्मनामानस्तेभ्यः प्रभव उत्पत्तिर्येषां ते तथा दोषाः ज्वरादिदोषाश्चेत्येते श्रीरामे न सन्ति । तत्र कारणमाह– **पठित** इति । श्रुतौ 'आदित्यवर्णं तमसस्तु पारे । सर्वाणि रूपाणि विचित्य धीरः' इत्यादिश्रुतौ यः श्रीरामः आदित्यवद्वर्णो यस्य स तथा, तेजोमय इत्यर्थः, सर्वज्ञ इति यावत्, तमसः अज्ञानात् परस्तात् परपारे स्थितः, अज्ञानादिसर्वदोषरहित इत्यर्थः, इति पठितः प्रतिपादितः । एवं च मदप्रमादादिदोषाणामज्ञानमूलत्वात् तदतीतत्वेन श्रुतिप्रतिपादिते श्रीरामे न मदादिदोषावकाश इति भावः ॥ २८ ॥

(सं.चं.) एवं कामादयः षण् मनोदोषा निराकृताः । तत्सामान्यादितरेषु तथात्वमित्याहुः– मदप्रमादौ । अहङ्कारजन्या वृद्धावज्ञा मदः । सर्वज्ञोऽहं किमन्येन पृष्टेनेति । किमेते जानन्ति यन्मयाऽविदितमिति । प्रमादश्चित्तस्य विक्षेपोऽनवधानं नाम । एते केवलं मानसाः । अथ भयदुःखशोका मानसा देहे विकारं जनयन्ति । स्फुटं मुखे व्यज्यन्ते । भयं दुःखस्य पूर्वावस्था । दुःखं अन्तर्वेदनानुभवः । साश्रुपातमुच्चै रोदनं शोकः । अनपेक्षितमापतितमिति चिन्ता च । क्षुधातृषे दैहिकमानसिके । कफवातपित्ताख्यत्रिधातुवैषम्यजा आमया दैहिकाः । 'आदित्यवर्णं तमसः परस्तात्' इति श्रुतौ निर्दोषत्वेन पठितः । अयमर्थः– आदित्ये यथा तसमोऽभावः तथाऽऽदित्यवर्णेऽपीत्याह– तमसः परस्तादिति । 'ज्योतिर्मयः पुरुषः' इति च श्रुतिः । तद्धि तमः यदन्धयति । अज्ञानावरणेन जगदन्धयन् त्रिगुणग्रामोऽत्र तम उच्यते । त्रिगुणप्रभवा हि दोषाः । तत् कथं त्रिगुणातीते सम्भवेत्? किं च आदिः सर्वकारणं त्यः ज्ञानानन्दरूपश्चेति भगवानादित्य इति वेदेषु वर्ण्यते । न हि सर्वकारणे ज्ञानानन्दमये दोषाः सम्भवन्ति । 'कर्तृत्वात् सगुणं ब्रह्म' इति ह्याचक्षते । यदि हृदि भगवान् नोदैष्यत् तदा ज्ञानिलोकमपि चापिधाय तम आन्धयिष्यत् ॥ २८ ॥

---

१. **'भयदुःखमोहाः'** इति वि.ती.पाठः । **'शोकः अश्रुमोचनम्'** इति का.श्री. । मोहो हि पूर्वमुदितः ।

२. **'क्षुत्तृट्त्रिधातुप्रभावाः'** इति समस्तं पदं मन्यते का.श्री. ।

३. **'रामे प्रथितः'**

४. **'श्रुतौ तमसः परस्तादित्युपलक्षणत्वेन सत्वरजस्तमसां परस्तात्, पश्चात्, तानतीत्य वर्तत इत्युक्त्या दोषकारणगुणत्रयाभावात् कार्यभूतदोषा अपि न सन्तीत्युक्तं भवति'** इति. का.श्री. ।

योयो गुणो नाम स एव रामे योयश्च दोषः स तु नैव तस्मिन् ।
नरेन्द्र किं वा बहुनोदितेन प्रत्यक्षयुक्तिश्रुतयोऽत्र मानम्[१] ॥ २९ ॥

(भा.दी.) य इति । यःयः गुण इति नाम प्रसिद्धम् स एव सर्वोऽपि, एवशब्दः कात्स्न्यर्थे, श्रीरामे अस्त्येव । यःयश्च दोषः दोष इति प्रसिद्धः स तु दोषः तस्मिन् श्रीरामे नैव नास्त्येव । हे नरेन्द्र दशरथ, बहुना उदितं कथनं तेन, 'नपुंसके भावे क्तः' (अ.सू.३.३.११४) इति क्तः, किं (वा) प्रयोजनम् । यद्वा श्रीरामरूपेण उदितेन अस्माभिः प्रतिपादितेन किं प्रयोजनम्? यतः अत्र श्रीरामस्य गुणपूर्णत्वे सर्वदोषराहित्ये च । प्रत्यक्षं ज्ञानिप्रत्यक्षं तच्च, युक्तिः विमतः पूर्णगुणः स्वतन्त्रत्वादित्याद्यनुमानं सा च, श्रुतयः 'एष सर्वेश्वरः' इत्यादयः ताश्च मानम् । अतः सर्वप्रमाणसिद्धेऽर्थे बहुप्रतिपादनं व्यर्थमिति भावः ॥ २९ ॥

(सं.चं.) प्रत्यक्षयुक्तिश्रुतयः । प्रत्यक्षमेतद् भगवति रामचन्द्रे यत् श्रुतिसहकृता युक्तयः श्रुतयश्चावदन् । रामः परब्रह्मस्वरूपः तथा श्रुतिगदितत्वात् । रामो निरवद्यो गुणपूर्णः परब्रह्मस्वरूपत्वादित्याद्या युक्तयः । 'आनन्दरूपो निष्परीमाण एष लोकश्चैतस्माद् रमते तेन रामः' इत्याद्याः श्रुतयः ॥ २९ ॥

क्षान्तः प्रशान्तः प्रियवाक् प्रसन्नो नित्यानृशंसोऽनुपमानुभावः ।
चराचराणामविपश्चितां च गुणाम्बुधिः सम्मत एव रामः ॥ ३० ॥

(भा.दी.) क्षान्त इति । क्षान्तः क्षमावान्, प्रशान्तः अक्रुद्धचन्, प्रिया वाग् यस्य स तथा, प्रसन्नः सुमुखः, नित्यमनृशंसोऽक्रूरो नित्यानृशंसः, न विद्यते उपमा यस्य स तथाऽनुपमः तादृश अनुभावो महिमा यस्य स तथा, गुणाम्बुधिः श्रीरामः चराणि च अचराणि च तेषाम्, स्थावरजङ्गमप्राणिनामित्यर्थः, विपश्चितः पण्डिता न भवन्तीत्यविपश्चितस्तेषां च, बालादीनामपीत्यर्थः, सम्मत एव युवराजत्वविषयेऽभिमत एव । उक्तगुणवत्तया सम्मत इति वा, एवकारेण स्वरूपत उत्तमस्य स्थावरजङ्गमात्मकनानायोनिगतस्यापि जीवजातस्य उक्तार्थे विवादाभावो दर्शितः ॥ ३० ॥

(सं.चं.) कतिचन गुणान् मुखत आहुः–क्षान्तः । अपराधसहिष्णुता क्षान्तिः । अचलत्वं मनसः शान्तिः । महत्यपि सङ्कटे तथात्वं प्रशान्तिः । परेषामहितचिन्तनेन वैक्लव्यं मनसः कालुष्यम् । अकालुष्यं प्रसन्नता । मनसः स्वाच्छचस्य प्रतिफलनं मुखे प्रसन्नता । स्मितशोभि निरञ्जनं मुग्धं मुखम् । अपराधिष्वप्य-

१. **'–श्रुतयः प्रमाणम्' । 'रामः सकलगुणपूर्णः तत्प्रभुत्वे सति तत्र शक्तत्वात् (?) व्यतिरेकेण चैत्रवत् रामः सकलदोषरहितः तज्जिहासुत्वे सति तत्र शक्तत्वात् । व्यतिरेकेण सम्मतवदिति युक्तिः'** इति का.श्री. ।

क्रौर्यमानृशंस्यम्, दयालुता। द्वेषमूला हिंसा, हिंसारतिर्वा क्रौर्यम्। अन्तर्लीनं सामर्थ्यमनुभावः। येन पुमानधृष्यो भवत्यभिगम्यश्च भवति। अविपश्चितामपि चराचराणाम्। कीटाः पशवः पक्षिणश्चराः। नराश्च मुग्धा बालादयः। अचरास्तरुगुल्माद्याः। किमुत विपश्चिताम्॥ ३०॥

रामाय राज्यं नरदेव देहि स्वभावपूर्णाय तवैव भूत्यै।
रत्नाकरायाम्बुधये यथाऽर्घ्यं त्रैलोक्यदीपाय यथा प्रदीपः ॥ ३१॥

(भा.दी.) स्वाभिमतं कण्ठत एव निवेदयन्ति– **रामाये**ति। हे नरदेव राजन् दशरथ, स्वभावेन स्वतः नतु वरादिनेत्यर्थः, पूर्णाय पूर्णगुणाय श्रीरामाय राज्यं तत् देहि। स्वभावपूर्णाय प्रदानं निष्फलमित्यत आह– **तवैव भूत्यै** सम्पद इति। श्रीरामाय राज्ये प्रदत्ते सति तेन तवैव मोक्षाद्यैश्वर्यं भवतीति भावः। तत्रानुगुणदृष्टान्तमाहुः– **रत्नाकराये**त्यादिना। रत्नानामाकर उत्पत्तिस्थानं तस्मै अम्बुधये यथा अर्घ्यं अर्घ्य-जलं तद्वत्। यथा त्रैलोक्यस्य दीप इव त्रैलोक्यदीपस्तस्मै सूर्याय प्रदीपः दीपिका यथा तथा देहीति सम्बन्धः। यथा रत्नाकरप्रभाकरयोः जलप्रदीपाभ्यां न किञ्चित्प्रयोजनमथापि स्वभूत्यर्थं जनैर्दीयते, तद्वदेव त्वत्प्रदत्तराज्येन न किञ्चित् परिपूर्णस्य प्रयोजनमथापि स्वभूत्यर्थमेव प्रदेहीति भावः॥ ३१॥

(सं.चं.) स्वभावत एव पूर्णाय। त्रैलोक्यं दीपयतीति त्रैलोक्यदीपः सूर्यः। सर्गेऽस्मिन्नुपजातिश्छन्दः। नवम उपेन्द्रवज्रा। द्वितीये पञ्चदशे एकान्नविंशे द्वाविंशे चेन्द्रवज्रा॥ ३१॥

इति वसिष्ठगरिष्ठसभाजनैरभिहितः[1] स्थिररामसभाजनैः।
दशरथस्तनयाय महीमतः[2] प्रतिददौ सुनयाय महीमतः ॥ ३२॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
अयोद्ध्याकाण्डे प्रथमः सर्ग्गः॥

—०—

(भा.दी.) इति जनैरभिहिते सति दशरथः किं चकारेत्यत आह– **इती**ति। स्थिरं रामस्य सभाजनं सम्भावना येषु ते स्थिररामसभाजनास्तैः। वसिष्ठः गरिष्ठः प्रधानो येषां ते तथोक्ताः, सभायामुपविष्टा जनाः सभाजनाः, ततो वसिष्ठगरिष्ठाश्च ते सभाजनाश्चेति कर्मधारयस्तैः, इति एवमादिप्रकारेण अभिहितः, महः उत्सव अस्यास्तीति मही, पुत्रगुणश्रवणमहोत्सवयुक्त इत्यर्थः। मतः सर्वलोकेषु प्रख्यातः दशरथः। शोभनो नयो

१. **'–जनैरभिहिते'**

२. **'मही मतः'** इति भिन्नपदत्वं वि.ती.टीकाभिमतम्।

रीतिर्यस्य स सुनयस्तस्मै । तनयाय श्रीरामाय अतः सभातळात्, श्रीरामाभिषेचनात् पूर्वं सर्वेषां जनानां पुरस्तादेवेत्यर्थः, महीं भूमिं प्रतिददौ सर्वथा श्रीरामस्यैवेदं राज्यमित्यादिवाचा दत्तवान् ॥ ३२ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायामयोध्याकाण्डे प्रथमः सर्गः ॥

—०—

(सं.चं.) वसिष्ठप्रमुखैः सभागतैर्जनैः । स्थिरं रामे दर्शितसभाजनैः । सभाजनं सौहार्दम् । इत्यभिहितः । मह्यां मतः सर्वाभिमतः दशरथः । अतः ऐककण्ठ्येन रामाभिषेकायानुमतिदानादेव कारणात् । महीं प्रतिददौ । प्रतिज्ञया ददौ । रामाय महीं दास्यामीति प्रतिजज्ञ इत्येतत् । पादान्त्ययमकम् । नभौ भरौ द्रुतविलम्बितम् ॥ ३२ ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायामयोध्याकाण्डे प्रथमसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– ४२२+३२=४५४]

द्वितीयः सर्गः

इति वाक्यस्य तस्यान्ते हृष्यतां तत्र नृत्यताम् ।
महाजनानां शब्दोऽभूत् परितः साधुसाध्विति ॥ १ ॥

(भा.दी.) श्रीरामे जनानुरागं दर्शयति– **इती**ति । इति तस्य दशरथप्रोक्तस्य वाक्यं वचस्तस्य अन्तोऽवसानं तस्मिन्, तत्र सभायां हृष्यतां सन्तोषं कुर्वताम्, अत एव नृत्यतां च, महान्तो ये जनास्तेषाम्, साधु सम्यक् साधु सम्यक् इति शब्दः परितः अभूत् ॥ १ ॥

(सं.चं.) तस्य वसिष्ठप्रमुखैः प्रोक्तस्य वाक्यस्य । दशरथप्रोक्तस्य वा । परितः सर्वत्र । साधुसाध्विति शब्दोऽभूत् ॥ १ ॥

पुत्रेऽनुरागमालोक्य जनानां स जनेश्वरः ।
हारैरिव बभौ पन्नैरानन्दास्रोदबिन्दुभिः ॥ २ ॥

(भा.दी.) पुत्र इति । जनेश्वरः सः, पुत्रे श्रीरामे, जनानां अनुरागः स्नेहस्तम् आलोक्य, पन्नैः पतितैः आनन्दस्य अस्रं अश्रु तस्य उदानि उदकानि तेषां बिन्दवस्तैः हारैरिव बभौ ॥ २ ॥

(सं.चं.) पन्नैः वक्षसि गलितैः आनन्देन जातैरास्रोदबिन्दुभिः, पन्नैः सूत्रात् प्रच्युतैः हारैः मुक्तामणिभिरिव बभौ ॥ २ ॥

स वरिष्ठान् वसिष्ठादीन् ब्राह्मणानिदमब्रवीत् ।
यौवराज्येऽभिषेक्ष्यामि रामं राजीवलोचनम् ॥ ३ ॥

(भा.दी.) स इति । सः दशरथः वरिष्ठान् श्रेष्ठान् वसिष्ठादीन् ब्राह्मणान् प्रति इदं वक्ष्यमाणं वचः अब्रवीत् । अहं राजीववत् कमलवल्लोचने यस्य तथा तं श्रीरामम्, युवा चासौ राजा च युवराजस्तस्य भावस्तत्वं तस्मिन्, श्वस्तनराजत्व इत्यर्थः, अभिषेक्ष्यामि अभिषेकं करिष्यामि । षिच सेचने लृट् ॥ ३ ॥

(सं.चं.) यौवराज्ये शौवस्तिकराजत्वे । अभिषेक्ष्यामि अभिषेक्तुमिच्छामि । सनर्थेऽपि लृडिष्यते ॥ ३ ॥

श्वोभूते [1]पुष्ययोगोऽयं चैत्रेऽस्मिन् मासि शस्यते ।
तत्राभिषेक्तुं सम्भारा[2] आदिश्यन्तां यथाविधि ॥ ४ ॥

(भा.दी.) श्व इति । चित्रायाः सम्बन्धी चैत्रस्तस्मिन् । यस्मिन् मासे पौर्णमास्यां चित्रानक्षत्रयोगः स चैत्र इत्युच्यते । अस्मिन् वर्तमाने मासि । 'पद्दन्नो–' (अ.सू.६.१.६३) इति मासशब्दस्य मासादेशः । श्वः श्वस्तने भूते जाते सति अयं पुष्ययोगः पुष्यनक्षत्रसम्बन्धः शस्यते शुभकर्मणि प्रशस्यते । शंस स्तुतौ लट् । तत्र तस्मिन् मुहूर्ते अभिषेक्तुं सम्भाराः साधनद्रव्याणि, विधिमनतिक्रम्य यथाविधि, शास्त्रोक्त-प्रकारेणेत्यर्थः, आदिश्यन्तां आज्ञाप्यन्ताम् । दिश अतिसर्जने लोट् ॥ ४ ॥

(सं.चं.) अद्य रामस्य जन्मर्क्षमिति श्वोभूते श्वस्तने दिने पुष्ययोगो भविष्यति । स च जन्मर्क्षतो द्वितीय इति रामस्य सम्पत्करतया प्रशस्यते । अतस्तत्राभिषेक्तुमपेक्षिताः सम्भाराः । आदिश्यन्ताम्, अधिकृतानादिश्य सङ्गृह्यन्ताम् ॥ ४ ॥

उक्तो दशस्यन्दनेन शतानन्दस्य नन्दनः[3] ।
आभिषेचनिकान् नानासम्भारानादिशद् द्रुतम् ॥ ५ ॥

(भा.दी.) उक्त इति । दशदिक्षु स्यन्दनो रथो यस्य स तथोक्तस्तेन उक्तः शतानन्दनन्दनः चतुर्मुखपुत्रः वसिष्ठः, अभिषेचनस्य सम्बन्धिनः आभिषेचनिकास्तान्, राज्याभिषेकयोग्यानित्यर्थः । नानाविधा ये सम्भाराः साधनानि तान्, द्रुतं यथा भवति तथा, आदिशत् । दिश अतिसर्जने लङ् ॥ ५ ॥

(सं.चं.) शतानन्दस्य चतुर्मुखस्य नन्दनो वसिष्ठः । आदिशत् सङ्ग्रहीतुमादेशं ददौ ॥ ५ ॥

वस्त्ररत्नानि[4] नूत्नानि मधु सर्वौषधानि च ।
शातकुम्भमयैः कुम्भैः शतं तीर्थोदकानि च ॥ ६ ॥

---

१. **'श्वोभूते परेद्युः प्रातःकाले, अयं प्रमाणप्रसिद्धः पुष्ययोगः पुष्यनक्षत्रेण चन्द्रमसः सम्बन्धः'** इति का.श्री. ।

२. **'तत्राभिषेकसम्भाराः'** । **'सम्भारानादिश्यन्ताम्'** इति लिपिकृत्प्रमादजः पाठः ।

३. **'–नेन स शतानन्दनन्दनः'** इति स्यादपि वि.ती.पाठः ।

४. **'नूतनानि वस्त्ररत्नानि वस्त्रश्रेष्ठानि'** इति च का.श्री. ।

(भा.दी.) वस्त्रेति । नूत्नानि नूतनानि वस्त्राणि रत्नानि च तानि, मधु क्षौद्रं तत्, सर्वाणि यानि औषधानि तानि च, कलशस्य कषायोदकौषधद्रव्याणीत्यर्थः । शातकुम्भस्य सुवर्णस्य विकाराः शातकुम्भमयास्तैः कुम्भैः कलशैः । शतं शतसङ्ख्याकानि तीर्थानां चतुःसमुद्रगङ्गादितीर्थानामुदकानि च ॥ ६ ॥

(सं.चं.) नूत्नानि वस्त्ररत्नानि । श्रेष्ठवस्त्राणि । राजार्हाणि । औषधानि उशीरमांसीकुष्ठह्रीबेरमुरादीनि । शातकुम्भमयैः कनकमयैः कलशैः । शतशब्दो बहुत्ववचनः । भाषायां 'ನೂರಾರು' इति यथा ॥ ६ ॥

यच्चान्यद् विविधं द्रव्यं वसिष्ठस्याऽऽज्ञया तदा ।
सर्वं सम्पादयामासुः पुरुषाः शीघ्रकारिणः ॥ ७ ॥

(भा.दी.) यदिति । विविधं यच्च अन्यत् द्रव्यं अभिषेकोपयोगि तत् सर्वं च शीघ्रकारिणः पुरुषाः वसिष्ठस्य आज्ञया तदा अभिषेककाले सम्पादयामासुः सम्पादितवन्तः । पद गतौ लिट् ॥ ७ ॥

(सं.चं.) अन्यच्च आभिषेचनिकम् । तदा पूर्वस्मिन्नेव दिने, वसिष्ठादेशसमनन्तरमेव सपदि ॥ ७ ॥

समानय सुमन्त्राऽऽशु रामं मम मनोरमम् ।
राज्ञ इत्याज्ञया मन्त्री रामधाम रथी ययौ ॥ ८ ॥

(भा.दी.) समिति । हे सुमन्त्र, मम मनः रमयतीति मनोरमस्तं श्रीरामम् आशु समानय । राज्ञ इति आज्ञया मन्त्री सुमन्त्रः, रथोऽस्यास्तीति रथी, रथारूढः सन्नित्यर्थः, श्रीरामस्य धाम गृहं तत् ययौ । या प्रापणे लिट् ॥ ८ ॥

(सं.चं.) इति राज्ञ आज्ञया । मन्त्री रथमारुह्य रामस्य धाम ययौ ॥ ८ ॥

प्राञ्जलिः कञ्जनाभाय पितुराज्ञां न्यवेदयत् ।
स यावत् तावदेवायं देवोऽध्यास्त रथं च तम् ॥ ९ ॥

(भा.दी.) प्राञ्जलिरिति । सः सुमन्त्रः यावत् यदा, प्रकृष्टः अञ्जलिर्यस्य स तथा सन्, कञ्जं कमलं नाभौ यस्य स तथा तस्मै, श्रीरामाय पितुः आज्ञां शीघ्रमागच्छतु भवानित्याज्ञारूपां वाचं न्यवेदयत् विज्ञापितवान् । 'विद चेतनाख्याननिवसनेषु'[१] लङ् । तावदेव तदैव, देवः अयं श्रीरामः, तं सुमन्त्रानीतं रथं

१. आत्मनेभाषोऽयं धातुः । तेन **'विद ज्ञाने'** इत्यस्य णिचि रूपमिति वक्तुमुचितम् ।

अध्यास्त आस्थितोऽभूच्च। आस उपवेशने लङ्। 'अधिशीङ्स्थासां कर्म' (अ.सू.१.४.४६) इत्यधिकरणस्य कर्मसञ्ज्ञायां कर्मणि द्वितीयेति द्वितीया । रथस्थितोऽभूदित्यर्थः ॥ ९ ॥

(सं.चं.) कञ्जनाभाय रामावताराय कमलनाभाय । प्राञ्जलिः प्रबद्धाञ्जलिः । पितुराज्ञां यावन्न्यवेदयत् तावदध्यास्त । तदैव पितुराज्ञाश्रवणसमकालमेव, अविलम्बेन । तेन पितरि गौरवातिशयमाह । तं च तमेव रथम्, यं सुमन्त्र आरुह्याऽजगाम । पुना रथान्तरानयनेन मा विलम्बो भूदिति ॥ ९ ॥

सार्वभौमः परीतोऽसौ सामन्तैः स्वैः[1] समन्ततः ।
प्रासादे सुप्रसन्नात्मा[2] ददर्शाऽयान्तमात्मजम् ॥ १० ॥

(भा.दी.) **सार्वभौम** इति । स्वैः स्वकीयैः सामन्तैः मण्डलाधिपतिभिः समन्ततः परीतः परिवृतः । सर्वभूमेरीश्वरः सार्वभौमः, चक्रवर्तीत्यर्थः । प्रासादे सौधे । 'गृहमिष्टकादिरचितं प्रासादो देवतानरेन्द्राणाम्' इति हलः । स्थित इति शेषः । सुप्रसन्न आत्मा मनो यस्य स तथा असौ दशरथः, आयान्तं आगच्छन्तं आत्मजं पुत्रं श्रीरामं ददर्श, दृशेर्लिट् । ॥ १० ॥

(सं.चं.) सर्वभूमेरीश्वरः सार्वभौमः । सर्वभूमौ विदितः सार्वभौमः । तथाहि पाणिनिः– 'तस्येश्वरः । तत्र विदित इति च' (अ.सू.५.१.४२–४३) इति । प्रासादे स्थितः ॥ १० ॥

इन्दीवरोदरप्रख्यमिन्दिरायाः प्रलोभनम्[3] ।
अमन्दचन्द्रवदनं मन्दहासं निसर्गतः ॥ ११ ॥

(भा.दी.) कीदृशं श्रीराममित्यत आह– **इन्दीवरोदरे**त्यादिना । इन्दीवरस्य नीलोत्पलस्य यदुदरं गर्भस्तस्य प्रख्यः समानस्तम् । 'इन्दीवरश्च नीलेऽस्मिन्' इत्यमरः । नीलोत्पलवत् श्यामळ इत्यर्थः । इन्दिरायाः प्रलोभनं मनोमुषम् । अमन्दः परिपूर्णो यश्चन्द्रस्तद्वद् वदनं यस्य स तथा तम् । निसर्गादिति निसर्गतः स्वभावतः, मन्दः (अल्पः) यो हासो यस्य स तथा तम्, श्रीरामं ददर्शेति सम्बन्धः ॥ ११ ॥

(सं.चं.) इन्दीवरोदरदलवन्नीलवर्णम्, इन्दिरायाश्चित्तचोरम् । अमन्दः पूर्णश्चन्द्रः । निसर्गतो मन्दहासम् । नतु बलादानीय प्रदर्शितः कृत्रिमो मन्दहासोऽस्य । नापि कदाऽपि विकटमट्टं हसति ॥ ११ ॥

सिंहसंहननं वीरं मत्तमातङ्गगामिनम् ।
उत्तमं सर्वलोकानां पद्मपत्रारुणेक्षणम् ॥ १२ ॥

१. **'सामन्तैस्तैः'** २. **'स प्रसन्नात्मा'** । **'प्रासादेषु प्रसन्नात्मा'** इति क्वचित् । ३. **'–मिन्दीवरविलोचनम् ।'**

(भा.दी.) सिंहेति । सिंहसंहननं अत्युत्तमाङ्गरूपोपेतम् । 'वराङ्गरूपोपेतो यः सिंहसंहननो हि सः' इत्यमरः । वीरम्, मत्तो यो मातङ्गो गजस्तद्वद्गन्तुं शीलमस्यास्तीति तथा तम्, सर्वे ये लोका जनास्तेषां सकाशात् उत्तमम् । पद्मस्य पत्रे दले तद्वदरुणे ईक्षणे यस्य स तथा तं ददर्श ॥ १२ ॥

(सं.चं.) सिंहवत् अपीवरं परिपुष्टं बलिष्ठं चास्य संहननं वपुरिति । पद्मपत्रारुणेक्षणं ददर्शाऽयान्तमात्मजमिति पूर्वेणान्वयः । अथवा इन्दीवरोदरप्रख्यमित्यादेः श्लोकपञ्चकस्य राजा सुतमैक्षतेत्युत्तरेणैकान्वयः ॥ १२ ॥

सर्वाभरणसम्पन्नं सर्वावयवसुन्दरम् ।
सर्वेन्द्रियसुखं पुंसां सर्वेश्वरमुपागतम् ॥ १३ ॥

(भा.दी.) सर्वेति । सर्वाणि यान्याभरणानि कटकमकुटादीनि तैः सम्पन्नं युक्तम् । सर्वे ये अवयवा हस्तपादादयस्तैः सुन्दरम् । पुंसां पुरुषाणां सर्वाणि यानीन्द्रियाणि तेषां सुखं यस्मात् स तथा तम्, दर्शनमात्रेण सर्वप्रीतिजनकमित्यर्थः । सर्वेश्वरं उपागतं सम्प्राप्तं श्रीरामं ददर्श ॥ १३ ॥

(सं.चं.) पुंसाम्। पुंस्त्वमविवक्षितम् । स्त्रीपुंसानाम् । सर्वाणीन्द्रियाणि सुखयतीति सर्वेन्द्रियसुखः । रूपेण नयने । मधुरया वाचा श्रोत्रे । दिव्यसौगन्ध्येन नासाम् । गुणानुवर्णने मुखरयन् वाचम् । परवशीकरणेन हृदयानि । प्रबुद्धतया मनांसि चित्तानि च । अत्र कर्णाटानां कर्णमधुरो द्वितीयाक्षरप्रासः ॥ १३ ॥

अपाङ्गैर्म्मङ्गलकृतं जय रामेत्युपेयुषाम् ।
मितभाषणमप्यारात् स्मितपूर्वाभिभाषिणम् ॥ १४ ॥

(भा.दी.) अपाङ्गैरिति । हे राम जय, जि जये लोट्, इति एवमादिप्रकारेण उक्त्वा उपेयुषां शरणागतानां अपाङ्गा नेत्रान्तास्तैः मङ्गलमभीष्टं करोतीति मङ्गलकृत् तम्, मितं अक्षरतः परिमितं भाषणमालापो यस्य स तथा तम् । स्मितं पूर्वं यथा भवति तथा भाषितुं शीलमस्यास्तीति तथा तम् । आरात् समीपे ददर्श ॥ १४ ॥

(सं.चं.) जयजय रामेति वादंवादं शरणमुपेयुषाम् । कटाक्षवीक्षणेनैव कृतमङ्गलाशंसनम् । अराद् दूरादेव जनतां दृष्ट्वा स्मितपूर्वाभिभाषिणम् ॥ १४ ॥

जनकं स्वजनौघानां कृतान्तमिव वैरिणाम् ।
परं[1] ब्रह्माऽत्मविदुषां सुतं राजा स ऐक्षत[2] ॥ १५ ॥

---

१. 'परब्रह्मात्म–'   २. 'राजा तमैक्षत'

(भा.दी.) जनकमिति । सः राजा, स्वस्य ये जना भक्तास्तेषामोघाः समूहास्तेषाम् जनकं पितरम्, वैरमेषामस्तीति वैरिणस्तेषां कृतान्तमिव यमसदृशम्, आत्मानं परमात्मानं विदन्तीति आत्मविद्वांसस्तेषां परं विलक्षणं उत्तमं वा ब्रह्म ब्रह्मभूतं सुतं श्रीरामम् ऐक्षत ॥ १५ ॥

(सं.चं.) जनकम् । 'उत्सवेषु च सर्वेषु पितेव परितुष्यति' इति हि रामायणे । कं जनयतीति च जनकः । परमात्मविदुषाम् ॥ १५ ॥

न राज्ञोऽतृप्यतां नाम नयने नळिनायते ।
रामलावण्यपीयूषं पायम्पायं सुदुर्लभम् ॥ १६ ॥

(भा.दी.) नेति । नळिनवत् कमलवदायते दीर्घे राज्ञः नयने अत्यन्तं दुर्लभं सुदुर्लभं श्रीरामस्य लावण्यमेव पीयूषममृतं तत्, पायम्पायं पीत्वापीत्वा । 'आभीक्ष्ण्ये णमुल् च' (अ.सू.३.४.२२) इति क्त्वाप्रत्ययस्य णमुलादेशे सति, 'नित्यवीप्सयोः'(अ.सू.८.१.४) इति द्विरुक्तिः[1] । न अतृप्यतां (नाम) तृप्तिमती नाभूतां किल । तृप प्रीणने ॥ १६ ॥

(सं.चं.) नयने नातृप्यतां न तृप्तिमाप्नुताम् । तृप्तिरलम्बुद्धिः । 'लक्ष्मीलावण्यपीयूषपानपात्रायितेक्षणः' इति पितुः काव्यमनुसरति कविरनेन पद्येन ॥ १६ ॥

स्यन्दनात् समवस्कन्द्य चारुं चलितकुण्डलम् ।
सन्नतं सौधमारुह्य सोऽभ्यनन्दत् स्वनन्दनम् ॥ १७ ॥

(भा.दी.) स्यन्दनादिति । स्यन्दनो रथस्तस्मात् । 'शताङ्गः स्यन्दनो रथः' इत्यमरः । समवस्कन्द्य अवरुह्य, चारुं मनोहरम्, चलिते कुण्डले यस्य स तथा तम्, सौधः प्रासादस्तं आरुह्य सन्नतं सम्यक् नम्रम्, नमः कुर्वन्तमित्यर्थः, स्वनन्दनं स्वपुत्रं श्रीरामं दृष्ट्वा सः दशरथः अभ्यनन्दत् तुतोष । नदि हर्षे लङ् ॥ १७ ॥

(सं.चं.) स्यन्दनादवरुह्य सौधमारुह्य शिरोऽवनम्य नमन्तमभ्यनन्दत् पिता सुतम् ॥ १७–८ ॥

पाणिभ्यामनुकुर्वद्भ्यां पारिजातस्य पल्लवम्[2] ।
ववन्दे स पितुः पादौ नामकीर्त्तनपूर्वकम् ॥ १८ ॥

---

१. **'आभीक्ष्ण्ये द्वे भवत इति वक्तव्यम्'** इति वार्तिकात् (८.१.१२) द्विरुक्तिरिति तु सुन्दरम् । २. **'पारिजातसुपल्लवम्'** ।

(भा.दी.) पाणिभ्यामिति । सः श्रीरामः, पारिजातः पारिजातवृक्षस्तस्य पल्लवः किसलयस्तं अनुकुरुत इत्यनुकुर्वन्तौ ताभ्याम्, तद्वदतिकोमळाभ्यामित्यर्थः, पाणिभ्यां पितुः पादौ, नाम्नः कीर्तनं नामकीर्तनं तत् पूर्वकं यथा भवति तथा, 'रामनामाऽहमभिवादये' इति नामकीर्तनपूर्वकमित्यर्थः, ववन्दे ॥ १८ ॥

वन्दनायाऽनतं[१] देवमक्रमापेक्षणो नृपः ।
कृत्वा निःसङ्गमुत्सङ्गे परिरेभे मुदा यदा[२] ॥ १९ ॥

(भा.दी.) वन्दनायेति । तदा वन्दनसमये क्रमस्यापेक्षणमपेक्षा न विद्यते क्रमापेक्षणं यस्य स तथा । आदावालिङ्गनमनन्तरमङ्कारोपणमिति क्रमं स्नेहपारवश्यादननुसरन्नित्यर्थः । यद्वा क्रमो न भवतीत्यक्रमः, युगपदित्यर्थः, अक्रमेण युगपदपेक्षणमपेक्षा यस्य स तथेति वा । आलिङ्गनमङ्कारोपणमित्युभयं युगपदपेक्षमाण इत्यर्थः । नृपः दशरथः वन्दनं नमनं तस्मै, तादर्थ्ये चतुर्थी, आनतं नम्रम् । देवं निर्गतः सङ्गो सङ्गादिदोष-सम्बन्धो यस्मादिति निस्सङ्गस्तं श्रीरामम् । उत्सङ्गो(ऽङ्क)स्तस्मिन् कृत्वा उपवेश्य मुत् सन्तोषस्तया परिरेभे आलिलिङ्गे । रभ राभस्ये लिट् ॥ १९ ॥

(सं.चं.) न क्रममपेक्षते । अवरैरभिवादे कृते उत्तमैः यः क्रमः सम्प्रदायागतः आशीर्वचनादिः, तं सम्प्रदायमुल्लङ्घ्य सम्भ्रमातिशयेन सपदि तमुत्सङ्गे कृत्वा परिरेभे । सङ्गान्निष्क्रान्तो निःसङ्गः ॥ १९ ॥

तदैवाऽनन्दजैर्बाष्पैरभिषिञ्चन् नृपः[३] सुतम् ।
सार्वभौमो भवेत्युक्त्वा कृतकृत्योऽभवद् ध्रुवम् ॥ २० ॥

(भा.दी.) तदैवेति । तदैव आलिङ्गनसमय एव, आनन्दाज्जाता आनन्दजास्तैः बाष्पैरश्रुभिः सुतं श्रीरामं अभिषिञ्चन् सन् (नृपः), सार्वभौमः चक्रवर्ती भव, इति एवमादिवचः उक्त्वा, कृतं कृत्यं कार्यं येन स तथा अभवत् । ध्रुवं निश्चितम् ॥ २० ॥

(सं.चं.) यदा परिरेभे तदैवेति पूर्वश्लोकेनान्वयः । तदैव बाष्पैरभिषिच्य सार्वभौमपदे स्थापयामासेति कृतकृत्यता । सर्वभूमेरीश्वरः सार्वभौमः ॥ २० ॥

आसीनः पितुरादेशादासने शुद्धकाञ्चने ।
जगन्नाथो जगद्दीपं जिगायोदयशैलगम् ॥ २१ ॥

---

१. **'वन्दनाय नतम्'** २. **'मुदा तदा'** इति वि.ती.पाठ इति भाति । ३. **'-रभ्यषिञ्चन्नृपः'**

(भा.दी.) आसीन इति । पितुः आदेश आज्ञा तस्मात् । शुद्धं च तत् काञ्चनं च तस्मिन्, निर्मलस्वर्णमय इत्यर्थः । आसने आसीनः जगन्नाथः श्रीरामः, उदयनामको यः शैलस्तं गच्छतीति तथा तम्, जगद्दीपयति प्रकाशयतीति जगद्दीपः सूर्यस्तं जिगाय जितवान् । जि जये लिट् ॥ २१ ॥

(सं.चं.) शुद्धकाञ्चने पुटपाकस्फुटिते उद्यद्भास्वद्धदीषल्लोहिते काञ्चननिर्मिते आसने । जिगाय कान्त्याऽ-त्यशेत ॥ २१ ॥

रामेन्दुना कृतानन्दान्नरेन्द्रकुमुदाकरात्[1] ।
वचःपरिमळो जज्ञे सभाजनसभाजितः ॥ २२ ॥

(भा.दी.) रामेति । रामेन्दुना श्रीरामाख्येन्दुना कृत आनन्दो यस्य स तथा तस्मात् । नरेन्द्र एव दशरथ एव कुमुदाकर इव कुमुदपुष्पाणामाश्रयीभूतः सर इव तस्मात् । सभायां विद्यमाना ये जनास्तैः सभाजितः सत्कृतः, वच एव वाक्यमेव परिमळः जज्ञे । जनी प्रादुर्भावे लिट् ॥ २२ ॥

(सं.चं.) कुमुदाकरात् सरोवरात् । सभागतैर्जनैः सभाजितः सम्मानितो वचःपरिमळः ॥ २२ ॥

यौवराज्यच्छलेन त्वां साम्राज्ये सद्गुणान्वितम् ।
अभिषेक्ष्यामि वत्साहमनुमोदस्व कर्म्म तत् ॥ २३ ॥

(भा.दी.) यौवराज्येति । हे वत्स श्रीराम, (अहं) सन्तो ये गुणा शौर्यादयस्तैरन्वितं युक्तं त्वाम् । युवा चासौ राजा च युवराजस्तस्य भावस्तत्त्वं तदेव च्छलं व्याजः तेन, श्वस्तनराजत्वव्याजेनेत्यर्थः । सम्राजो भावः साम्राज्यं तस्मिन्, सार्वभौमत्व एवेत्यर्थः, अभिषेक्ष्यामि अभिषेकं करिष्यामि । षिच सेचने लृट् । त्वं तत् अभिषेकाख्यं कर्म अनुमोदस्व अनुमतिं कुरु ॥ २३ ॥

(सं.चं.) आत्मानं वयोगतं मत्वा युवानं राजानं त्वां कुर्वन् तद्व्याजेन । युवराज इति व्यपदेशमात्रम् । वस्तुतस्त्वमेव राजा । अहं तु राजकार्यात् सर्वात्मना निवृत्तो भविष्यामीत्यर्थः ॥ २३ ॥

भारक्षमे त्वयि न्यस्य भारं भूभरणाह्वयम् ।
प्रवया मन्दयत्नोऽहं विश्रमिष्यामि नन्दन ॥ २४ ॥

---

१. **'यथा चन्द्रोदये जाते तेन विकसितकुमुदाकरात् परिमल उत्पद्यते तथा रामेन्दुना जातसन्तोषाद् दशरथाख्यकुमुदाकराद् वागाख्यपरिमलोऽभूदिति भावः'** इति का.श्री. ।

(भा.दी.) भारेति । हे नन्दन, भारक्षमे राज्यपरिपालनादिलक्षणभारस्य क्षमे वहनसमर्थे त्वयि भुवः भरणं रक्षणमिति आह्वयो नाम यस्य स तथा तं भारं न्यस्य निधाय । प्रगतं वयो यस्य स तथा वृद्ध इत्यर्थः । अत एव मन्दः स्वल्पः यत्नः प्रयत्नो यस्य स तथा अहं विश्रमिष्यामि विश्रमणं करिष्यामि । तपश्चरिष्यामीति वा । श्रमु तपसि खेदे च लृट् ॥ २४ ॥

(सं.चं.) भूभरणाह्वयम् भूलोकगतजीवजातरक्षणाख्यं भारं धुरम् । मन्दयत्नः समस्तभूभारवहने प्रयतमानोऽप्यप्रभवन् क्षीणसामर्थ्यः । प्रवयस्त्वादेव । अत एव विश्रान्तिमिच्छामि ॥ २४ ॥

इति तातगिरं रामो बाढमित्यभिनन्द्य ताम्[1] ।
प्राप स्वधाम राजाऽपि विवेशान्तःपुरं ततः ॥ २५ ॥

(भा.दी.) इतीति । श्रीरामः इति अभिहितां तातस्य पितुर्गीर्वाक् तां बाढमिति तथाऽस्त्विति अभिनन्द्य सन्तोष्य, अङ्गीकृत्येति वा । स्वस्य धाम मन्दिरं तत् प्राप । ततः राजाऽपि दशरथोऽपि पुरस्य मन्दिरस्य अन्तः अन्तःपुरं तत् । 'आगारे नगरे पुरम्' इत्यमरः । विवेश । विश प्रवेशने लिट् ॥ २५ ॥

(सं.चं.) अभिनन्द्य अभिनन्दनपूर्वकमङ्गीकृत्य–'अङ्गीक्रियते भवदुक्तं पितुर्वचनगौरवात्' इति । रामः स्वधाम प्राप । ततः रामेण स्वोक्तस्याभ्युपगमेन भृशं परितुष्टो राजाऽपि ॥ २५ ॥

दुर्न्निमित्तैर्न्निमित्तज्ञश्चिन्तामाप[2] महीपतिः ।
पुनश्च पुत्रमाहूय रहो राममभाषत ॥ २६ ॥

(भा.दी.) दुरिति । निमित्तानि शकुनानि जानातीति निमित्तज्ञः महीपतिः दशरथः दुष्टानि निमित्तानि दुर्निमित्तानि तैः चिन्तां आप । चिन्ताश्रान्त इति क्वचित्पाठः । पुनश्च पुत्रं श्रीरामं आहूय रहः एकान्ते अभाषत । भाष व्यक्तायां वाचि लङ् ॥ २६ ॥

(सं.चं.) मृतिसूचकैर्दुर्निमित्तैः ॥ २६–७ ॥

इष्टं दत्तं मया भुक्तं स्वधर्म्मश्च स्वनुष्ठितः ।
नूनं मे दुर्ल्लभं तात तत्फलं तेऽभिषेचनम् ॥ २७ ॥

१. **'बाढमित्यभ्यनन्दत'**

२. **'–श्चिन्ताश्रान्तो महीपतिः'** इति, **'चिन्तातान्तो महीपतिः'** इति च क्वचित् ।

(भा.दी.) श्रीरामं प्रति किमाहेत्यत आह– **इष्टमि**ति । हे तात श्रीराम, मया इष्टं यज्ञादिकमकारि । गोभूहिरण्यादिकं सत्पात्रे दत्तम् । भुक्तम् अनिषिद्धविषयजातमनुभूतम् । स्वधर्मश्च स्ववर्णाश्रमोचित-धर्मश्च स्वनुष्ठितः, सुष्ठु अनुष्ठितः आचरितः । तत्फलं तेषां यज्ञादीनां फलं फलभूतं ते तव अभिषेचनं दुर्लभं अलभ्यम् (नूनम्) ॥ २७ ॥

अमङ्गलनिमित्तानि[१] स्वाप्नजागरणानि[२] च ।
भवन्ति मृतिशंसीनि कार्य्यविघ्नकराणि च ॥ २८ ॥

(भा.दी.) कुत इत्यत आह–**अमङ्गले**ति । स्वप्ने स्वप्नावस्थायां भवानि स्वाप्नानि तानि च, जागरणं जागृद-वस्था तस्मिन् भवानि जागरणानि तानि च, मृतिं मरणं शंसितुं सूचयितुं शीलमेषामस्तीति तथोक्तानि तानि, कार्यस्य ये विघ्नास्तान् कुर्वन्तीति तथा तानि, अमङ्गलनिमित्तानि अशुभनिमित्तानि भवन्ति ॥ २८ ॥

(सं.चं.) अमङ्गलानि निमित्तानि शकुनानि । स्वप्नभवानि जागरणभवानि च ॥ २८ ॥

शान्ताः स्युरन्तराया मे वासुदेवप्रसादतः ।
सह वध्वा त्वया त्वद्य दीक्षा कार्य्योपवासिना ॥ २९ ॥

(भा.दी.) **शान्ता** इति । मे मम अन्तरायाः विघ्नाः, वासुदेवस्य प्रसादोऽनुग्रहस्तस्मादिति ततः, शान्ताः परिहृताः स्युः भवेयुः । उपवासः अनशनव्रतमस्यास्तीति तथा तेन त्वया तु वध्वा भार्यया सीतया सह । 'वधूर्जाया स्नुषा स्त्री च' इत्यमरः । अद्य दीक्षा व्रतसङ्ग्रहः कार्यः ॥ २९ ॥

(सं.चं.) विघ्ननिवारणाङ्गभगवत्पूजादीक्षा कार्या ॥ २९ ॥

इत्थं पित्रोपदिष्टः स मातुरन्तःपुरं गतः[३] ।
ददर्श तत्र कौसल्यां नारायणपरायणाम् ॥ ३० ॥

(भा.दी.) **इत्थमि**ति । इत्थं पित्रा उपदिष्टः प्रोक्तः, मातुः कौसल्यायाः अन्तःपुरं मन्दिरान्तस्तत्, गतः प्राप्तः सः श्रीरामः, तत्र अन्तःपुरे नारायणः परायणः परमाश्रयो यस्याः सा तथा तां श्रीनारा-यणाराधनेऽत्यन्तमासक्तामित्यर्थः, कौसल्यां ददर्श ॥ ३० ॥

---

१. **'अमङ्गलं प्रति निमित्तानि अमङ्गलनिमित्तानि'** इति का.श्री. । २. **'स्वप्नजागरणानि'** ३. **'–पुरं ययौ'** ।

(सं.चं.) स्वभावतः नारायणपरायणाम् । तदात्वे च नारायणपूजापरायणाम् ॥ ३० ॥

पुत्रस्याभ्युदयं श्रुत्वा पूजयन्तीमधोक्षजम् ।
देवीं सुमित्रासहितां स ववन्दे सलक्ष्मणः ॥ ३१ ॥

(भा.दी.) पुत्रस्येति । पुत्रस्य श्रीरामस्य अभ्युदयः यौवराज्याभिषेकलक्षणश्रेयस्तं श्रुत्वा अधोक्षजं श्रीहरिं पूजयन्तीं सुमित्रासहितां देवीं कौसल्यां सलक्ष्मणः लक्ष्मणसहितः स श्रीरामः ववन्दे ॥ ३१ ॥

(सं.चं.) सलक्ष्मणो ववन्दे । ससीतश्च । तथा हि वक्ष्यति । लक्ष्मणोऽपि सुमित्रासहितां देवीं ववन्दे । सीताऽपि ॥ ३१ ॥

तावत् सा वाग्यता देवी रामाभ्युदयकाङ्क्षिणी ।
अब्रवीद् बाष्पपूर्णाक्षी प्रेम्णा प्रियतमं सुतम् ॥ ३२ ॥

(भा.दी.) तावदिति । तावत् तदा वाक् यता नियमिता यया सा वाग्यता, मौनवतीत्यर्थः, श्रीरामस्य अभ्युदयः श्रेयः काङ्क्षितुं शीलमस्या अस्तीति तथोक्ता सा देवी कौसल्या बाष्पेण आनन्दाश्रुणा पूर्णे अक्षिणी यस्याः सा तथा सती, प्रेम प्रीतिस्तेन, अतिशयेन प्रियः प्रियतमस्तं सुतं श्रीरामं अब्रवीत् ॥ ३२ ॥

(सं.चं.) पूजानिमित्तं तावत्पर्यन्तं वाग्यता धृतमौना पुत्रं दृष्ट्वा प्रेम्णा मौनं भङ्क्त्वाऽब्रवीत् ॥ ३२ ॥

स्वस्ति वत्स[१] चिरं राम सतः पाह्यसतो जहि ।
जगतीनाथ[२] जगतीं पाहीमां पुत्रिकामिव ॥ ३३ ॥

(भा.दी.) स्वस्तीति । हे वत्स श्रीराम, तुभ्यं स्वस्ति मङ्गलं भूयात् । चिरं दीर्घकाले सतः सज्जनान् पाहि । पा रक्षणे लोट् । असतः असज्जनान् जहि शिक्षय । हन हिंसागत्योः लोट् । जगत्याः पृथिव्याः नाथ श्रीराम, इमां जगतीं भूमिं पुत्रिकामिव सुतामिव पाहि रक्ष ॥ ३३ ॥

(सं.चं.) स्वभावतस्त्वं जगतीनाथ इति न वक्तव्यमेतत् । अथापि पुत्रवात्सल्यं मुखरयतीत्याह ॥ ३३ ॥

इति पुत्राशिषः प्रोच्य चक्रे साऽभ्युदयक्रियाः ।
आमन्त्र्य लक्ष्मणं रामः ससीतः स्वगृहं ययौ ॥ ३४ ॥

---

१. 'स्वस्ति तेऽस्तु चिरम्' २. 'जगतां नाथ'

(भा.दी.) इतीति । सा कौसल्या इति पुत्रस्य आशिषः शुभवाक्यानि ताः प्रोच्य, अभ्युदयस्य श्रीरामस्य श्रेयसः साधनभूताः क्रियाः अभ्युदयक्रियास्ताः हर्यर्चनादीः चक्रे । ससीतः सीतासहितः श्रीरामः लक्ष्मणं आमन्त्र्य गृहगमनं प्रति अनुज्ञाप्य स्वगृहं स्वमन्दिरं तत् ययौ ॥ ३४ ॥

(सं.चं.) आमन्त्र्य स्वगृहगमनायानुज्ञां प्रदाय ॥ ३४ ॥

पुरोहितो ब्रह्मसुतस्त्वरितो राज्ञ आज्ञया ।
रमारमणधामाभं रामधामाभ्यपद्यत ॥ ३५ ॥

(भा.दी.) पुरोहित इति । राज्ञो दशरथस्य आज्ञया, पुरोहितः ब्रह्मणश्चतुर्मुखस्य सुतः वसिष्ठः त्वरितः वेगितः सन्, रमायाः रमणो भर्ता श्रीहरिस्तस्य धामवद् गृहवदाभा कान्तिर्यस्य स तथा तत् रामधाम राममन्दिरं प्रति अभ्यपद्यत जगाम । पद गतौ लङ् ॥ ३५ ॥

(सं.चं.) रमारमणधामाभं वैकुण्ठसदृशम् ॥ ३५ ॥

आसनात् सहसोत्थाय श्रीमान् विनयभूषणः ।
गुरुं जगत्त्रयगुरुः पूजयामास शास्त्रतः ॥ ३६ ॥

(भा.दी.) आसनादिति । श्रीमान् विनयो भूषणमलङ्कारो यस्य स तथा । 'विनयो धर्मविद्याधीशिक्षाचारप्रशान्तिषु' इति वैजयन्ती । जगतां त्रयं तस्य गुरुः श्रीरामः आसनं पीठं तस्मात् सहसा उत्थाय शास्त्रतः शास्त्रानुसारेण गुरुं वसिष्ठं पूजयामास अर्घ्याद्युपचारेण पूजां चक्रे ॥ ३६ ॥

(सं.चं.) जगत्त्रयगुरुरपि गुरुषु विनेयेन कथं वर्तितव्यमिति लोकशिक्षार्थम् ॥ ३६ ॥

आभिषेचनिकीं दीक्षां दक्षः प्राप्य विधानतः ।
प्रददौ कनकाकल्पमाचार्य्यायायुतं गवाम् ॥ ३७ ॥

(भा.दी.) आभीति । दक्षः समर्थः श्रीरामः आभिषेचनिकीं राज्याभिषेचनसम्बन्धिनीं दीक्षां व्रतपरिग्रहं विधानतः शास्त्रोक्तविधानेन प्राप्य, कनकमय आकल्प आभरणं कनकाकल्पस्तम्, गवां धेनूनां अयुतं दशसहस्राणि तच्च आचार्याय पुरोहिताय वसिष्ठाय प्रददौ ॥ ३७ ॥

(सं.चं.) कनकाकल्पं कनकमण्डितशृङ्गं धेनूनां वृषभाणां चायुतं दश सहस्राणि ॥ ३७ ॥

हुत्वा भुक्त्वा हविष्यान्नं सपत्नीक उपोषितः ।
दध्यौ रामः स्वमात्मानं[१] ज्योतिर्नारायणाह्वयम् ॥ ३८ ॥

(भा.दी.) हुत्वेति । सपत्नीकः सभार्यः उपोषितः कृतोपवासः श्रीरामः हुत्वा हवनं कृत्वा, हविष्यं यदन्नं तत् भुक्त्वा, स्वं स्वरूपभूतं आत्मानं सर्वस्वामिनं नारायण इति आह्वयो यस्य तत्तथा तत् ज्योतिः तेजः दध्यौ । ध्यै चिन्तायां लिट् ॥ ३८ ॥

(सं.चं.) प्रसादतया हविःशेषभक्षणादृतेऽन्याहारस्य वर्जनादुपोषितः । रामः स्वयं नारायणाह्वयं ज्योतिः । स स्वयं स्वात्मानमेव दध्यौ । ध्येयान्तरस्याभावात् । ध्यातव्यत्वाच्च लोकशिक्षार्थम् ॥ ३८ ॥

यतवाक् सह वैदेह्या स्वास्तृते दर्भसंस्तरे ।
स शिश्ये [२]शेषशयनस्तां निशामृषिवाक्यतः ॥ ३९ ॥

(भा.दी.) **यतवागिति** । यता नियमिता वाक् यस्य स तथा, मौनीत्यर्थः, शेषः पर्यङ्को शयनं यस्य स तथा सः श्रीरामः, वैदेह्या सीतया सह, सुष्ठु आस्तृतः प्रसारितः स्वास्तृतस्तस्मिन्, दर्भाणां संस्तरः प्रस्तरस्तस्मिन् । 'संस्तरौ प्रस्तराध्वरौ' इत्यमरः । दर्भमुष्टावित्यर्थः । ऋषेर्वसिष्ठस्य यद्वाक्यं तस्मादिति ततः, तां निशां तस्यां निशायाम्, अकर्मधातुभिर्योगे देशकाल(स्व)भावेभ्यो वा द्वितीयेति केचिदिति द्वितीया । शिश्ये शयनं चक्रे । शीङ् स्वप्ने लिट् ॥ ३९ ॥

(सं.चं.) दर्भसंस्तरे दर्भमय्यां शय्यायाम् । 'प्रस्तरः संस्तरः शय्या' इति यादवप्रकाशः । तां निशां शिश्ये । अत्यन्तसंयोगे द्वितीया ॥ ३९–४१ ॥

अभूदभूतपूर्वोऽस्यामयोध्यायां महोत्सवः ।
रामाभिषेकलोलानां लोकानां वदतां मिथः ॥ ४० ॥

(भा.दी.) **अभूदिति** । श्रीरामस्य योऽभिषेकस्तस्मिन् लोलाः लोलुपास्तेषां मिथः परस्परं वदतां सम्भाषणं कुर्वतां लोकानां जनानां अस्यां अयोध्यायाम्, पूर्वं भूतो भूतपूर्वः, भूतपूर्वो न भवतीत्यभूतपूर्वः, पूर्वमेवं न जात इत्यर्थः, (महान्) उत्सवः अभूत् ॥ ४० ॥

---

१. **'आत्मानं व्याप्तं स्वं स्वरूपभूतं ज्योतिः'** इति का.श्री. ।

२. **'शेषपर्यङ्कस्ताम्'** इत्यपि वि.ती.पाठः स्यात् ।

अर्कोदयेऽभिषेकः स्यात् कदा न्वर्क उदेष्यति ।
कदा नु रामं पश्यामः[१] ससीतमभिषेकिणम् ॥ ४१ ॥

(भा.दी.) तदेव विशदयति– **अर्के**ति । अर्कस्य उदयस्तस्मिन् अभिषेकः स्यात् । अर्कः कदा नु उदेष्यति उदयं प्राप्स्यति । इण् गतौ लृट् । ससीतं सीतासहितं अभिषेकोऽस्यास्तीति अभिषेकी तं श्रीरामं कदा नु पश्यामः ॥ ४१ ॥

इत्यादिवादिनस्तत्र पौरजानपदा[२] जनाः ।
सबालवृद्धवनिता रामवार्त्ताः स्म जाग्रति ॥ ४२ ॥

(भा.दी.) **इती**ति । इति आदिर्येषां तानि इत्यादीनि वाक्यानि तानि वक्तुं शीलमेषामस्तीति इत्यादिवादिनः, बालाश्च वृद्धाश्च वनिताश्च ताभिः सहिताः, पुरि भवाः पौरास्ते च, जनपदे राष्ट्रे भवा जानपदास्ते च जनाः रामस्य वार्ता येषां ते तथा सन्तः तत्र अयोध्यायां जाग्रति स्म जागरणं चक्रुः । जागृ निद्राक्षये लट् ॥ ४२ ॥

(सं.चं.) पौराः पुरगताः । जानपदाः नगराद् बहिर्गताः जनाः । रामस्य वार्तैव वार्ता येषामालापसर्वस्वम् ॥ ४२ ॥

प्रतिसद्म प्रतिसभं प्रतिवर्त्म प्रतिव्रजम् ।
महोत्सवोत्सुका राममस्तुवन् गणशः प्रजाः ॥ ४३ ॥

(भा.दी.) **प्रती**ति । महान् यः उत्सवस्तस्मिन् उत्सुकाः कौतुकयुक्ताः गणशः प्रजाः । सद्म सद्म प्रति प्रतिसद्म, सर्वगृहेष्वित्यर्थः । सभां सभां प्रति प्रतिसभम्, सर्वसभास्वित्यर्थः । वर्त्म वर्त्म प्रति प्रतिवर्त्म, सर्वमार्गेष्वित्यर्थः । व्रजं व्रजं प्रति प्रतिव्रजम्, सर्वगोष्ठेष्वित्यर्थः । अत्र सर्वत्राप्येवं वीप्सायां वर्तमानस्य प्रतीत्यस्याव्ययीभावसमासस्तत एवाव्ययता च । श्रीरामं अस्तुवन् ॥ ४३ ॥

(सं.चं.) सद्मनिसद्मनि प्रतिसद्म । एवं सभायांसभायां प्रतिभमित्यादि । गणशः सङ्घीभूय । प्रतिव्रजम् । व्रज इति सर्वपल्लीनामुपलक्षणम् । पल्लीस्था अपि जनाः प्रतिपल्लि स्वकर्म विस्मृत्य राममस्तुवन् ॥ ४३ ॥

---

१. **'रामं द्रक्ष्यामः'**
२. **'पौरा जानपदा–'**

मालाध्वजपताकाद्यैः सम्मार्ज्जैरुपलेपनैः ।
सार्वभौमाज्ञया सर्वामलञ्चक्रुः पुरीं नराः[1] ॥ ४४ ॥

(भा.दी.) मालेति । नराः तत्रत्यजनाः, मालाश्च ध्वजाश्च [2]पताकाश्च ता आद्या येषां विमानादीनां तानि तथोक्तानि तैः, सम्यक् मार्जाः भूमार्जनानि सम्मार्जाः तैः, भित्त्यादीनां यान्युपलेपनानि तैः सर्वां पुरीं सार्वभौमाज्ञया दशरथाज्ञया अलञ्चक्रुः अलङ्कारं कृतवन्तः । डु कृञ् करणे लिट् ॥ ४४ ॥

(सं.चं.) मालाद्यैरलङ्कारसाधनैः । रथ्यानां सम्मार्जनैः । भित्त्यादिषु विविधवर्णानामुपलेपनैः । कर्मस्वधिकृता नराः, पौराश्च ॥ ४४ ॥

रामानुरागामृतभोगतृप्ता न केवलं कोसलमण्डलस्थाः ।
त्रयोऽपि लोकाः सकलाः सपालास्त्रैलोक्यनाथो हि स कोसलेन्द्रः ॥ ४५ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
अयोद्ध्याकाण्डे द्वितीयः सर्ग्गः ॥

—०—

(भा.दी.) रामेति । [3]कोसलानां कोसलविषयाणां यन्मण्डलं प्रदेशस्तस्मिन् तिष्ठन्तीति तथोक्ताः जनाः । श्रीरामेऽनुरागो भक्तिः स एवामृतं तस्य भोगोऽनुभवस्तेन तृप्ताः तृप्तिमन्तः केवलं न । 'अमृतं व्योम्नि देवान्ने यज्ञशिष्टे रसायने' इति वैजयन्ती । किं तर्हि? पालयन्तीति पाला इन्द्रादिदिक्पालाः, तैः सहिताः सपालाः सकलाः त्रयो लोका अपि रामानुरागामृतभोगतृप्ताः आसन् । तत्र हेतुमाह– **स** इति । हि यस्मात् कोसलेन्द्रः सः श्रीरामः त्रैलोक्यनाथो हि । दशरथादिवदस्यापि कोसलमात्राधीशत्वे तत्रत्यानामेव सन्तोषो भवेत् नेतरेषाम् । अयं तु सर्वाधीश्वर इति हेतोस्तस्य राज्याभिषेके उपस्थिते सति सर्वलोकानां सन्तोषोऽभूदिति भावः ॥ ४५ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां
भावार्थदीपिकायामयोध्याकाण्डे द्वितीयः सर्गः ॥

—०—

१. **'पुरीं प्रजाः'**

२. **'पताका अणुध्वजाः'** इति का.श्री. ।

३. **'कोसलानां देशानां मण्डलं समूहः'** इति का.श्री. । कोसलदेश इत्येव साधु व्याख्यानम् ।

(सं.चं.) कुतस्त्रयोऽपि लोकाः? यतः स त्रैलोक्यनाथः । प्रथमतुरीययोरिन्द्रवज्रा, द्वितीयतृतीययोरुपेन्द्र-वज्रेत्युपजातिश्छन्दः ॥ ४५ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायामयोध्याकाण्डे द्वितीयसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– ४५४+४५=४९९]

तृतीयः सर्ग्गः

ज्ञातिदास्यथ कैकेय्या गृहे जाता सहोषिता ।
कुब्जा प्रासादमारूढा मन्थरा पुरमैक्षत ॥ १ ॥

(भा.दी.) श्रीरामपित्रा दशरथेन दृष्टानां दुर्निमित्तानां फलभूतं श्रीरामयौवराज्याभिषेकान्तरायं वक्तुमुपोद्घातमारचयति– **ज्ञाती**ति । अथ ज्ञातिर्बन्धुभूता च सा दासी चेति ज्ञातिदासी[१] । 'सगोत्रबान्धव-ज्ञातिबन्धुस्वस्वजनाः समाः' इत्यमरः । ज्ञातेर्बन्धुभूतायाः कैङ्कर्यैः[२] दासीति वा । कुब्जा ह्रस्वकाया, कैकेय्या गृहं भवनं तस्मिन् जाता, सह कैकेय्या साकं उषिता, मन्थरा मन्थरानाम्नी, प्रासादो हर्म्यं तम् आरुढा सती, पुरमयोध्यापुरं तत् ऐक्षत । ईक्ष दर्शनाङ्कनयोः लङ् ॥ १ ॥

(सं.चं.) ज्ञातिश्च सा दासी च । या बाल्ये धात्री बभूव कैकेय्याः । या कैकेय्या गृह एव जाता, कैकेय्या सहैवोषिता ॥ १ ॥

तुष्टपुष्टजनं[३] दृष्ट्वा नगरं समलङ्कृतम् ।
वाद्यमानमहावाद्यं[४] धात्रीं पप्रच्छ सा खला ॥ २ ॥

(भा.दी.) **तुष्टे**ति । खला स्वरूपतो दुष्टा[५] सा मन्थरा, तुष्टाश्च ते पुष्टाश्च तुष्टपुष्टाः[६], तादृशा जना यस्मिन् तत् तथोक्तं तत्, समलङ्कृतं सम्यगलङ्कृतम्, वाद्यमानानि महावाद्यानि यस्मिन् तत्तथोक्तं तत्, नगरं वीक्ष्य धात्रीं पूर्वं स्वस्य रक्षाकर्त्रीं काञ्चन स्त्रियम् । 'धात्री स्यादुपमाताऽपि' इत्यमरः । पप्रच्छ विचारितवती । प्रच्छ ज्ञीप्सायां लिट् ॥ २ ॥

---

१. **'कैकेय्याः सगोत्रत्वे सति दासीति यावत्'** इति का.श्री. ।
२. **'कैकेय्याः'** इति पाठः स्यात् ।
३. **'पुष्टहृष्टजनम्'** । **'पुष्टतुष्टजनम्'** इति च ।
४. **'वाद्यमानानि ताड्यमानानि वा महावाद्यानि यस्मिन्'** इति च ।
५. **'खला गूढद्वेषिणी ।** **'अतिदुष्टेति वा'** इति का.श्री. ।
६. **'पुष्टा ऐश्वर्यादियुक्ताः । तुष्टाः सन्तुष्टाः'** इति च ।

(सं.चं.) तुष्टाः तृप्ताः । पुष्टा आनन्दतुन्दिलाः । रामोऽभिषेक्ष्यत इत्यानन्दतुन्दिलाः । जीवितस्य महती आशा सम्पन्नेति तृप्ताः । महावाद्यानि दुन्दुभ्यादीनि । रामस्य धात्रीम् । कामपि राजगृहधात्रीं वा । यौवने धात्र्यः परस्तात् दास्यो भवन्ति । वृद्धा दासीति यावत् । पूर्वं स्वस्य धात्रीमिति सर्वे पूर्वव्याख्यातारः । तत्तु चित्ते न लगति । 'ದಾದಿ' इति भाषायाम् ॥ २–३ ॥

कोऽयं महोत्सवो भद्रे पुर्य्यामस्यां प्रवर्त्तते ।
राममात्रा कुतो वित्तं विप्रेभ्यो भूरि दीयते ॥ ३ ॥

(भा.दी.) क इति । हे भद्रे शोभने, अस्यां पुर्यां कः अयं महोत्सवः प्रवर्तते? राममात्रा कौसल्यया भूरि बहु वित्तं विप्रेभ्यः कुतः कारणात् दीयते? ॥ ३ ॥

पृष्टेति धात्री सन्तुष्टा नृत्यन्तीवेदमब्रवीत्[१] ।
रामोऽभिषिच्यते हन्त साध्वलङ्क्रियतामिति ॥ ४ ॥

(भा.दी.) पृष्टेति । इति मन्थरया पृष्टा विचारिता सन्तुष्टा धात्री उपमाता आनन्दातिशयात् नृत्यन्तीव । हे मन्थरे, श्रीरामः अभिषिच्यते, हन्त हर्षे, त्वया च साधु सम्यक् यथा भवति तथा, अलङ्क्रियतां अलङ्कारः क्रियताम् । इति इदं वाक्यमब्रवीत् ॥ ४ ॥

(सं.चं.) हन्तेति विस्मयते अनुकम्पने च । रामाभिषेकवार्ताऽपि न श्रुताऽनया मूढयेति ॥ ४ ॥

व्याळीव यष्टिसंस्पृष्टा व्याघ्रीव हृतपोतका ।
चुक्षोभामर्षताम्राक्षी मन्थरा नन्वमन्थरा ॥ ५ ॥

(भा.दी.) व्याळीवेति । अमन्थरा अमनोहरा, अतिकष्टेत्यर्थः, मन्थरा यष्ट्या दण्डेन संस्पृष्टा ताडिता व्याळीव कृष्णसर्पिणीव, हृताः अपहृताः पोतकाः शिशवो यस्याः सा तथा, व्याघ्रीव, अमर्षेण कोपेन (ताम्रे) रक्ते अक्षिणी यस्याः सा तथा सती चुक्षोभ ननु, कोपोद्रेकाच्चचाल हि । क्षुभ सञ्चलने लिट् ॥ ५ ॥

(सं.चं.) यष्टिसंस्पृष्टा दण्डाहता । व्याळी भुजगी । मृगयुभिरपहृतपोतका ॥ ५ ॥

---

१. 'नृत्यन्ती चेदमब्रवीत्'

साक्षादलक्ष्मीः क्षोणीस्था[1] कस्मिंश्चित् कारणान्तरे ।
रामेण चरणे क्षिप्ता जज्ञे रामैकवैरिणी ॥ ६ ॥

(भा.दी.) श्रीरामावतारकालेऽयोध्यायां पशुपक्षितरुगुल्मतृणपिपीलिकादीनामप्यतीतानन्तजन्मार्जित-पुण्यप्रचयातिशयेन चरमदेहं प्राप्तानां श्रीरामैकभक्तानां मध्ये इयमेकैवैवंविधकुत्सितस्वभावा कुतो जातेत्यत-स्तस्याः स्वरूपमाह– **साक्षादिति** । श्रीरामेण चरणं पादस्तस्मिन् । क्षिप्ता अपविद्धा । यद्यपि 'कर्तृकरणयो-स्तृतीया' (अ.सू.१.३.१८) इत्यनुशासनात् चरणेन क्षिप्तेति वाच्यम् । तथापि विवक्षातः कारकविभक्तयो भवन्तीत्युक्तेः 'कांस्यपात्र्यां भुङ्क्ते', 'कांस्यपात्र्या भुङ्क्ते' इत्यादिप्रयोगदर्शनाच्च करणस्याधिकरणत्वविवक्षया चरणे इत्युक्तम् । श्रीरामेणान्धतमः प्रापणीयेति सङ्कल्पितेत्यर्थः । कस्मिंश्चित् कारणस्यान्तरं विशेषस्तस्मिन्, निमित्तसप्तमीयम् । 'अन्तरः परिधानीयेऽबाह्ये स्वीयेऽन्तरात्मनि । क्ली तु मध्येऽवकाशे च तादर्थ्येऽवसरेऽ-वधौ । विशेषविवरान्तर्द्धिषु' इति वैजयन्ती । 'भूमावुत्पन्ना सती श्रीरामाभिषेकं विलुम्प, ततश्च स्वयोग्य-गतिर्भविष्यति' इति तपसाऽप्सरस्त्वं प्रयातामलक्ष्मीं प्रति यच्चतुर्मुखवचनं तल्लक्षणकारणविशेषादित्यर्थः । क्षोण्यां भूमौ तिष्ठतीति क्षोणीस्था । भूमौ मन्थरारूपेणोत्पन्नेत्यर्थः । साक्षात् प्रत्यक्षम् अलक्ष्मीः, एकं केवलं वैरं एकवैरं श्रीरामे एकवैरं तदस्या अस्तीति रामैकवैरिणी तथा सती जज्ञे । जनी प्रादुर्भावे लिट् ॥६॥

(सं.चं.) रामेण भगवता तमसि पातनार्थं प्रथमं तावत् चरणे भगवतश्चरणस्थानीयायां भूमौ क्षिप्ता । तत्रापि तस्याः पापपरिपाकार्थं केनचित् क्षुद्रकारणेन चरणे क्षिप्ता बालरूपेण रामेण चरणेन ताडिता । द्वेष्टुं मां तेन क्षिप्रं स्वगतिमेत्विति । तृतीयार्थे सप्तमी । साक्षात् स्वरूपत एवालक्ष्मीः कलिभार्या । नत्वावेशतः । राम एवैकं मुख्यं केवलं वा वैरमस्या इति रामैकवैरिणी जज्ञे बभूव । मन्थरात्वेन जातेति वा ॥ ६ ॥

दीर्घश्वासकृतायासा प्रासादादवरुह्य सा ।
गृहे शयानां कैकेयीं हा हताऽस्मीत्युपाद्रवत्[1] ॥ ७ ॥

(भा.दी.) **दीर्घेति** । दीर्घो यः श्वासस्तेन कृतः आयासः प्रयासो यस्याः सा तथा, सा मन्थरा, प्रासादो हर्म्यं तस्मात् अवरुह्य, गृहं मन्दिरं तस्मिन् शयानां कैकेयीं प्रति 'अहं हता विनष्टाऽस्मि' । हा विषादे । 'हा विषादशुगार्तिषु' इति वैजयन्ती । इति वदन्ती सती उपाद्रवत् उपाजगाम । द्रु गतौ लङ् ॥ ७ ॥

---

१. 'क्षोणिस्था'

१. '–ऽस्मीत्यन्यथाब्रवीत्'

(सं.चं.) उद्वेगजो दीर्घश्वासः, 'ನಿಟ್ಟುಸಿರು' इति भाषायाम् । तेन सह सत्वरमवरुह्य धावनादायासः, 'ಜಗ' इति भाषायाम् । हता हतभाग्या । इति क्रोशन्ती कैकेयीमुपलक्ष्याद्रवत् ॥ ७ ॥

तदुपश्रुत्य कैकेयीं सम्भ्रान्तां सहसोत्थिताम् ।
किमेतदिति पृच्छन्तीं कितवा[1] साऽभ्यभाषत ॥ ८ ॥

(भा.दी.) तदिति । तत् मन्थरावचः उपश्रुत्य सम्भ्रान्तां समाकुलाम्, अत एव सहसा उत्थिताम्, एतत् त्वद्विनाशनिमित्तं किमिति पृच्छन्तीं कैकेयीं प्रति कितवा कपटचित्ता सा मन्थरा अभ्यभाषत । भाष व्यक्तायां वाचि लङ् ॥ ८ ॥

(सं.चं.) उपश्रुत्य उपह्वरे श्रुत्वा, किमापतितमित्यज्ञात्वा सम्भ्रान्ताम् ॥ ८ ॥

रामोऽभिषिच्यते राज्ञा भूयो नो भयमागतम् ।
इत्युक्तवत्यै दास्यै सा प्रहृष्टा भूषणं ददौ ॥ ९ ॥

(भा.दी.) राम इति । राज्ञा दशरथेन श्रीरामः अभिषिच्यते यौवराज्येऽभिषिच्यते । षिच सेचने लट् । वर्तमानसामीप्ये वर्तमानवद्वेति वचनादभिषेकस्य समीपप्राप्तत्वेन वर्तमानार्थकप्रयोगः । ततः किमित्यत आह– **भूय** इति । नः अस्माकं भूयः भूयिष्ठम्, 'पुरहं पुरु भूयिष्ठं स्फारं भूयश्च भूरि च' इत्यमरः, भयं आगतं सम्प्राप्तम् । सा कैकेयी इति उक्तवत्यै दास्यै मन्थरायै प्रहृष्टा सती, श्रीरामाभिषेकवार्तां श्रुत्वा सन्तुष्टा सतीत्यर्थः । भूषणमलङ्कारस्तत् ददौ ॥ ९ ॥

(सं.चं.) भूयो बहुतरं भयम् । यस्य न प्रतिक्रिया ॥ ९ ॥

इमां च वाचमाचष्ट भद्रे भीरिह नास्ति नः ।
समौ मे रामभरतौ सुतौ राजसुतौ ध्रुवम् ॥ १० ॥

(भा.दी.) इमामिति । यतः राजसुतौ दशरथसुतौ रामभरतौ मे मम समौ समानौ सुतौ । तस्मात् हे भद्रे शोभने मन्थरे, इह श्रीरामयौवराज्याभिषेके सति नः अस्माकं भीः भीतिः नास्ति, ध्रुवं निश्चितम् । इति इमां वाचं (च) आचष्ट । चक्षिङ् व्यक्यायां वाचि लङ् ॥ १० ॥

(सं.चं.) रामभरतौ राजसुतौ न केवलम् । ममापि सुतौ । 'रामे वा भरते वाऽहं विशेषं नोपलक्षये' इति हि रामायणे ॥ १० ॥

---

१. 'कितवी'

वदान्यो लोकमान्योऽयं ज्येष्ठः श्रेष्ठो[1] नृपात्मजः ।
कथं मया परिद्वेष्यो भक्तिमान् मयि मातृवत् ॥ ११ ॥

(भा.दी.) श्रीरामभरतयोः पुत्रत्वेन साम्येऽपि गुणतो विशिष्टत्वात् तस्य द्वेष्यत्वं न सम्भवतीत्याह– **वदान्य** इति । वदान्यः दानशूरः, लोकैर्जनैर्मान्यः पूज्यः, ज्येष्ठः भरतापेक्षयाऽपि ज्येष्ठः, श्रेष्ठः सर्वोत्तमः, मयि मातृवत् मातरीव भक्तिमान् स्नेहवान्, नृपात्मजः दशरथात्मजः अयं श्रीरामः, कथं केन प्रकारेण, 'प्रकारेऽन्यथेतरथा कथम्' इति वैजयन्ती । मया परिद्वेष्यः परिद्वेषार्हः ॥ ११ ॥

(सं.चं.) ज्येष्ठः नृपात्मजः रामः, गुणतः भरतादपि श्रेष्ठः । सर्वस्मादपि । कथं स्नेहं परित्यज्य द्वेष्टुमर्हः? ॥ ११ ॥

इति ब्रुवन्त्यां कैकेय्यां तां च भूषां निरस्य सा ।
निर्भत्सयन्ती निर्भाग्या राज्ञीं पुनरभाषत ॥ १२ ॥

(भा.दी.) **इती**ति । कैकेय्यां इति ब्रुवन्त्यां सत्यां कैकेयीं निर्भत्सयन्ती कुत्सयन्ती, निर्गतं भाग्यं यस्याः सा तथा सा मन्थरा । तां कैकेयीदत्तां भूषां भूषणं च निरस्य तिरस्कृत्य, राज्ञः स्त्री राज्ञी तां कैकेयीं पुनः अभाषत ॥ १२ ॥

(सं.चं.) तां रामाभिषेकवार्ताश्रवणजनितेन हर्षेण कैकेय्या दत्ताम् । निरस्य कण्ठादवमुच्य भूमाववक्षिप्य ॥ १२ ॥

विनयादनयं प्राप्य व्यसने मज्जसि ध्रुवम् ।
सपत्नीपक्षिणा राज्ञा मूढेऽसि त्वं[2] विलोभिता ॥ १३ ॥

(भा.दी.) **विनया**दिति । हे मूढे कार्याकार्यानभिज्ञे, त्वं विनयात् प्रश्रयात्, धर्माद्वा । 'विनयो धर्मविद्याधीशिक्षाचारप्रशान्तिषु' इति वैजयन्ती । अनयोऽनीतिस्तं प्राप्य व्यसने विपदि । 'व्यसनं शक्तिविपदोः' इति च । (ध्रुवं) मज्जसि मग्नाऽसि । कुत इत्यत आह– **सपत्नी**ति । समाना पत्नी सपत्नी[3] कौसल्या तस्यां पक्षः पक्षपातः सोऽस्यास्तीति तथा तेन राज्ञा त्वं विलोभिता वञ्चिता असि ॥ १३ ॥

---

१. 'ज्येष्ठः प्रेष्ठो–' २. 'मूढे त्वं हि विलोभिता' ३. 'समानः एकः पतिर्यस्याः सा सपत्नी' इति का.श्री. ।

(सं.चं.) गुरुषु गौरवादपराधेऽप्यविक्रियं प्रसहनं नाम सौजन्यं विनयः । तेन स्वस्मिन्नापतितोऽन्यायोऽनयः । विनयात् तादृशस्यान्यायस्यानिराकरणात्, प्रत्युत तूष्णीं प्रसहनात् व्यसने महति सङ्कटे मज्जसि । यतः पुनरुन्मज्जनमसम्भवि । समानः पतिरस्या इति सपत्नी कौसल्या । तत्पक्षपातिना भूपतिना, कौसल्यानाथेन दशरथेन विलोभिता प्रतारिता, पुरतस्त्वत्पक्षपातीव वृथा नाटयन् त्वां वञ्चयामास । त्वं तु मूढा, मुग्धा चानभिज्ञा चेति तदपि न जानीषे ॥ १३ ॥

सानुजे भरते याते पश्य रामाभिषेचनम् ।
लक्ष्मणो राममन्वास्ते शत्रुघ्नो भरतं यथा ॥ १४ ॥

(भा.दी.) विलोभनं सम्भावयति– **सानुज** इति । अनुजेन शत्रुघ्नेन सहितः सानुजस्तस्मिन् । भरते याते विद्याभ्यासार्थं केकयगृहं प्रति गते सति रामस्य अभिषेचनं तत् पश्य । तर्हि लक्ष्मणः कुतोऽन्यत्र न प्रेषित इत्यत आह– **लक्ष्मण** इति । लक्ष्मणः, शत्रुघ्नः भरतं यथा तथा श्रीराममन्वास्ते अनुसृत्य वर्तते । आस उपवेशने लट् । तथाच त्वत्पुत्रमन्यत्र प्रेषयित्वाऽभिषेकोद्यमस्त्वत्पुत्रस्य राज्यं कदाऽपि मा भूदित्यभिप्रायेणेति भावः ॥ १४ ॥

(सं.चं.) अत एव भरतं सशत्रुघ्नं दूरं केकयदेशं प्रेष्य, तदसन्निधाने सत्वरं रामाभिषेकाय प्रावर्तत । यदि त्वं तस्य प्रिया, यदि च भरतशत्रुघ्नौ, किमिति तावनानाय्य, वार्तामपि तयोरश्रावयित्वा मङ्क्षु एकस्मिन्नेव दिने, अन्येषामालोचयितुमप्यवकाशमदत्वाऽभिषेकार्थमादिदेश– अद्य सायं निर्णयः श्वः प्रभातेऽभिषेक इति किमर्थमिदं महानाटकम्? ननु लक्ष्मणो न दूरं प्रेषितः? सत्यं न प्रेषितः, यतः स राममन्वास्ते, तेन न स रामाभिषेचनं निरोत्स्यतीति निश्चितम् ॥ १४ ॥

यदि रामोऽभिषिच्येत सपत्न्यास्तव नन्दनः ।
त्वया ससुतया दास्यं कौसल्याया विधीयताम् ॥ १५ ॥

(भा.दी.) व्यसनं चोपपादयति– **यदी**ति । तव सपत्न्याः कौसल्यायाः नन्दनः श्रीरामः यदि अभिषिच्येत । तर्हि ससुतया भरतसहितया त्वया । 'अव्ययास्मद्युष्मत्षट्सञ्ज्ञास्त्रिषु सरूपाः'[१] इत्युक्तेः

---

१. षट्सञ्ज्ञा इति । षान्ता नान्ता च सङ्ख्या इत्यर्थः । तथाहि पाणिनिः–**'ष्णान्ता षट्'** (अ.सू.१.१.२४) इति । **'षकारान्ता नकारान्ता च या सङ्ख्या सा षट्सञ्ज्ञा भवति । षकारान्ता तावत्– षट् तिष्ठन्ति । नकारान्ता–पञ्च । सप्त । (अष्ट ।) । नव । दश'** इति जयादित्यः ।

विशेष्यानुसारेण त्रिलिङ्गत्वादत्र स्त्रीलिङ्गः त्वयेति शब्दः। एवमन्यत्रापि द्रष्टव्यम्। कौसल्यायाः दासस्य भावो दास्यम्, विधीयताम्। धाञो धातोर्लोट्॥ १५॥

(सं.चं.) विधीयताम् क्रियताम्॥ १५॥

भरतस्यान्ववायोऽपि दास्यमेव प्रयास्यति।
नह्यराजसुतो राजा राजत्वं रामसन्ततेः ॥ १६॥

(भा.दी.) **भरतस्ये**ति। भरतस्य अन्ववायोऽपि वंशोऽपि दास्यमेव श्रीरामसन्ततेर्दासत्वमेव प्रयास्यति। या प्रापणे लृट्। हि यस्मात् राजसुतो न भवतीत्यराजसुतः राजा न भवति। रामसन्ततेः श्रीरामवंशस्य राजत्वं स्यात्॥ १६॥

(सं.चं.) न केवलं तव भरतस्य च दास्यम्। भरतस्यान्ववायोऽपि यावद् भरतसन्ततिः। यतः राजसुत एव राजा स्यात्। नाराजसुतः। तस्मात् राज्ञो रामस्य सन्ततेरेव सन्ततं राजत्वं भविष्यति॥ १६॥

निगूढवैरो वीरोऽयं[1] कालयेद् वा त्वदात्मजम्।
त्वं तु रामानुरागेण स्वपुत्रस्याहिते रता ॥ १७॥

(भा.दी.) श्रीरामस्याभिषेके सत्यन्ततस्त्वत्पुत्रस्य राज्येऽवस्थानं च दुर्घटमित्याह– **निगूढे**ति। निगूढं निगूहितं वैरं यस्य स तथा, वीरः अयं श्रीरामः तव आत्मजं पुत्रं भरतं कालयेद्वा देशादुच्चाटयेद्वा। कल विल क्षेपणे लिङ्। अनीतिं दर्शयति– **त्वं त्वि**ति। त्वं तु रामेऽनुरागः स्नेहस्तेन स्वस्याः पुत्रस्य भरतस्य अहितमनिष्टं तस्मिन् रता आसक्ता॥ १७॥

(सं.चं.) अयं रामः कालयेत् नाशयेत्, राज्यात् निष्कासयेद्वा। अथापि त्वं तु॥ १७॥

आदितेयान्[2] हि दैतेयास्तपोविद्याबलान्विताः।
छिद्रे छिन्दन्ति सत्येवं क्षत्रधर्म्मः सनातनः[3] ॥ १८॥

---

१. **'–वैरो रामोऽयम्'** २. **'दैतेया आदितेयान् हि तपोविद्या–'** इति, **'आदितेया हि दैतेयांस्तपोविद्यागुणाधिकान्'** इति च।

३. **'क्षत्रधर्माः सनातनाः'**। **'हे सति कैकेयि, एवं पूर्वोक्तप्रकारेण क्षत्रधर्मः सपत्नीपुत्रनाशनेन स्वराज्यपरिपालनरूपः क्षत्रियाणां धर्मः सनातनः स्वाभाविकः'** इति का.श्री.।

(भा.दी.) सपत्नीपुत्रत्वाच्छ्रीरामाभिषेकविघातो कार्य एव। न्याय्यश्च। पूर्वैरेतादृशकर्मणामाचरितत्वादित्याह– **आदितेयानि**ति। तपश्च विद्या च बलं च तैरन्विताः युक्ताः। दितेरपत्यं पुमांसो दैतेयाः दैत्याः। अदितेरपत्यं पुमांस आदितेयास्तान् देवान्। च्छिद्रं रन्ध्रं तस्मिन्। गुरुवैमनस्यादिच्छिद्रं प्रतीक्ष्येत्यर्थः। च्छिन्दन्ति नाशयन्ति। छिदिर् द्वैधीभावे लट्। हे सति साध्वि कैकेयि, एवं एवंविधः क्षत्रस्य क्षत्रियजातेर्धर्मः सनातनः प्रवाहतो नित्यः पूर्वैःपूर्वैराचरितत्वादिति भावः ॥ १८ ॥

(सं.चं.) तपोबलेन शुक्रशिक्षितविद्याबलेन सहजेन देहबलेन च। छिद्रे सति। कथञ्चिदवकाशे लब्धे सति भ्रातॄनप्यादितेयान् निर्दयं छिन्दन्ति। तथा त्वमपि भरतं पुरस्कृत्य रामं निष्कासय। यावता राम एव भरतं न निष्कासयेत् ॥ १८ ॥

कैकेयी कुब्जयेत्युक्ता कष्टभावेदमब्रवीत्।
सत्यमेतत् कथं कुब्जे राज्यं सूनोर्भवेन्मम ॥ १९ ॥

(भा.दी.) **कैकेयी**ति। कुब्जया ह्रस्वाङ्गया मन्थरया इति एवमादिप्रकारेण उक्ता, अत एव कष्टः भावः अभिप्रायो यस्याः सा तथा कैकेयी इदं वक्ष्यमाणं वचः अब्रवीत्। हे कुब्जे मन्थरे, एतत् त्वदुक्तं वचः सत्यम्। मम सूनोः राज्यं कथं केनोपायेन भवेत् ॥ १९ ॥

(सं.चं.) स्वयमदुष्टभावाऽपि कुब्जया दूषितान्तरा कष्टभावा बभूव। कष्टः कुलस्य क्लेशदः भावोऽस्या इति। त्वदुक्तमेतत् सत्यम् ॥ १९ ॥

नीतिमांश्च विनीतश्च रामोऽयं जनरञ्जनः।
पितुः प्राणसमो राज्यात् कया नीत्या प्रयाप्यते ॥ २० ॥

(भा.दी.) कयाचित्साधारणनीत्याऽस्य राज्यप्रच्यावनं दुर्घटमित्याह–**नीतिमानि**ति। अयं श्रीरामः नीतिरस्यास्तीति नीतिमान्, विनीतश्च विनयवांश्च, जनान् रञ्जयति स्वस्मिन् स्नेहयुक्तान् करोतीति जनरञ्जनः, पितुः दशरथस्य प्राणसमश्च, अत्यन्तं प्रिय इत्यर्थः। अतः कया नीत्या उपायेन राज्ञो विषयो राज्यं तस्मात् प्रयाप्यते प्रयातः कार्यते? राज्यप्रच्युतः कर्तुं शक्य इत्यर्थः। या प्रापणे लट्। आदन्तत्वात् पुक् ॥ २० ॥

(सं.चं.) कया नीत्या। कया अनीत्येति ध्वनिः ॥ २० ॥

इति ब्रुवाणां कैकेयीं सस्मिता स्माऽह[1] मन्थरा ।
वरौ किं विस्मृतौ मुग्धे पत्या [2]प्रत्तौ पुरैव ते ॥ २१ ॥

(भा.दी.) इतीति । मन्थरा इति ब्रुवाणां वदन्तीं कैकेयीं प्रति सस्मिता मन्दहासोपेता सती, हे मुग्धे मनोहरे कैकेयि[3], त्वया पुरैव पूर्वमेव पत्या दशरथेन (ते) तुभ्यं प्रत्तौ प्रदत्तौ वरौ विस्मृतौ किम्? इति आह स्म अवदत् किल । ब्रूञ्धातोर्लट् । न तु लिट् । वरदाननिमित्तं च । कदाचिदिन्द्रो देवासुरयुद्धे समुपस्थिते साहाय्यार्थं दशरथं वरयामास । दशरथश्च कैकेय्या साकं तत्समरप्रदेशं प्रति गत्वाऽसुरैः सह युद्धे क्रियमाणेऽसुरा दशरथस्य रथचक्रं बभञ्जुः किल । तदा कैकेयी तस्याग्रतो गत्वा द्वात्रिंशद्भिर्धैरायुधैर्विद्यावशाद्युद्धं कृत्वा तानजैषीत् । ततश्च तेन कर्मणा हृष्टो दशरथ इन्द्रेण समागम्य कैकेयीं प्रत्यभीष्टं वरं वृणीष्वेत्यवादीत् । एवमुक्ते साऽपि प्राञ्जलिरुवाच– समुचितकाले मदभीष्टं वृणे इति, दशरथेन च तथाऽस्त्वित्यनुमतमित्यवगन्तव्यम् ॥ २१ ॥

(सं.चं.) आगता मार्गे इति सस्मिता । किं हितं किमहितमिति निर्णेतुमक्षमा परप्रत्ययनेयबुद्धिमुग्धा । पुरैव पत्या प्रत्तौ वरौ । तथाहि रामायणे–'पुरा देवासुरे युद्धे सह राजर्षिभिः पतिः । अगच्छत् त्वामुपादाय देवराजस्य साह्यकृत् । दिशमास्थाय कैकेयि दक्षिणां दण्डकान् प्रति । वैजयन्तमिति ख्यातं पुरं यत्र तिमिध्वजः । स शम्बर इति ख्यातः शतमायो महासुरः । ददौ शक्रस्य सङ्ग्रामं देवसङ्घैरनिर्जितः । तस्मिन् महति सङ्ग्रामे पुरुषान् क्षतविक्षतान् । रात्रौ प्रसुप्तान् घ्नन्ति स्म तरसाऽऽसाद्य राक्षसाः । तत्राकरोन्महद् युद्धं राजा दशरथस्तदा । असुरैश्च महाबाहुः शस्त्रैश्च शकलीकृतः । अपवाह्य त्वया देवि सङ्ग्रामान्नष्टचेतनः । तत्रापि विक्षतः शस्त्रैः पतिस्ते रक्षितस्त्वया । तुष्टेन तेन ते दत्तौ द्वौ वरौ शुभदर्शने । स त्वयोक्तः पतिर्देवि यदेच्छेयं तदा वरौ । गृह्णीयामिति तत् तेन तथेत्युक्तं महात्मना । अनभिज्ञाऽसि तद्देवि त्वयैव कथितं पुरा । कथैषा तव तु स्नेहान्मनसा धार्यते मया । रामाभिषेकसम्भारान्निगृह्य विनि-वर्तय । तौ च याचस्व भर्तारं भरतस्याभिषेचनम् । प्रव्राजनं च रामस्य वर्षाणि तु चतुर्दश' (अयो.कां. ९.११–२०) इति । प्रथमं युद्धरङ्गादपवाह्य रक्षितः । ततो रात्रावपि विश्रान्तिशिबिरे पुनरसुरैराक्रान्तः ततोऽप्यपवाह्य रक्षित इति द्विवारं रक्षणाद् द्वौ वरौ ददाविति रामायणाशयः ॥ २१ ॥

---

१. **'सस्मिता प्राह'** इति, **'सुस्मिता स्माह'** इति च । २. **'पत्या दत्तौ'**

३. **'हे मुग्धे मूढे । 'मुग्धः सुन्दरमूढयोः' इत्यभिधानात्'** इति का.श्री. ।

वरद्वयं वृणीष्व त्वं वरमेतद् वरानने ।
साम्राज्यं भरतस्याऽऽशु प्राव्राज्यं जानकीपतेः ॥ २२ ॥

चतुर्द्दशसमा रामो वने यदि वसेद् व्रती[1] ।
छिन्नमूलो भवेद् व्यक्तं भरतो रञ्जयेज्जनम् ॥ २३ ॥

(भा.दी.) वरेति । वरमुत्तममाननं यस्याः सा तत्सम्बुद्धिः । कैकेयि, त्वं भरतस्य साम्राज्यं सार्वभौमत्वं तत्, जानकीपतेः प्राव्राज्यं प्रव्रजनं तत्, वनवासमित्यर्थः, इति[2] वरमुत्तमम् एतत् वरद्वयं दशरथात् वृणीष्व वरय । वृञ् वरणे लोट् । श्रीरामस्य वनवासवरणेन नः किं प्रयोजनमित्यत आह–**चतुर्दशे**ति । यदि श्रीरामः चतुर्दश च ताः समाश्च, चतुर्दशसंवत्सरानित्यर्थः । व्रतमस्यास्तीति व्रती, मुनिव्रतः सन्नित्यर्थः, वन्यते सेव्यते प्राणिभिरिति वनं तस्मिन् वसेत् । वस निवासे लिङ् । तर्हि श्रीरामः व्यक्तं यथा भवति तथा, सम्यगित्यर्थः । छिन्नं मूलं यस्य स तथा, राज्याधिपत्यं कदाप्यप्राप्त इत्यर्थः, भवेत् । भरतः जनं रञ्जयेत् स्वस्मिन्नासक्तं कुर्यात् । रञ्ज रागे लिङ् ॥ २२-२३ ॥

(सं.चं.) स्वेष्टसम्पादकत्वाद् वरमुत्तमं वरद्वयम् । तापसव्रती । छिन्नप्रजासम्बन्धमूलः । प्रजाभिर्विस्मृतो भवेदिति ॥ २२–३ ॥

कैकेयीत्थं समाकर्ण्य विलासं मन्थरामतेः ।
आशिश्लेष द्रुतं दासीं हसन्ती साधुसाध्विति ॥ २४ ॥

(भा.दी.) कैकेयी सत्स्वभावाऽपि दुष्टसंसर्गदोषाद् दैवयोगाच्च तदङ्गीकृतवतीत्याह– **कैकेयी**ति । कैकेयी मन्थरामतेः इत्थं तं विलासं विस्तारं समाकर्ण्य हसन्ती सती, साधु सम्यक् साधु सम्यक् इति वदन्ती सती, द्रुतं यथा भवति तथा, दासीं मन्थरां आशिश्लेष आलिलिङ्ग । श्लिष आलिङ्गने लिट् ॥ २४ ॥

(सं.चं.) विलासं चमत्कारम् । '[illegible]' इति भाषायाम् । साधुसाध्विति प्रशंसन्ती, सन्तोषभरेण हसन्ती ॥ २४ ॥

---

१. **'वनं यातु वसेद् व्रती'** इति क्वचित् । **'व्रती चीरधारणफलाहारादिनियमवान्'** इति का.श्री. ।

२. **'वरमभीष्टार्थं वरद्वयम्'** इति च ।

कुब्जायै कुण्डले दत्वा कैकेयी स्वे प्रहर्षिता[१] ।
क्रोधागारे द्रुतं शिश्ये मन्थराया मतेन सा ॥ २५ ॥

(भा.दी.) **कुब्जाया** इति । प्रहर्षिता उपायश्रवणेन सन्तुष्टा सा कैकेयी स्वे स्वकीये कुण्डले ताटङ्के । 'कर्णिका तालपत्रं स्यात् कुण्डलं कर्णवेष्टनम्' इत्यमरः । कुब्जायै दत्वा मन्थरायाः मतमनुमतिस्तेन, क्रोधे समागते सति शयनार्थं यत्क्लृप्तमगारं गृहं तस्मिन्, द्रुतं यथा भवति तथा शिश्ये स्वापं चक्रे ॥ २५ ॥

(सं.चं.) मन्थराया मतेन मतमाश्रित्य । तन्निर्देशानुसारेण ॥ २५ ॥

अभिषेकस्य सम्भारान् विभवांश्च प्रकल्प्य[२] सः ।
राजा राजीवनयनः कैकेयीभवनं[३] ययौ ॥ २६ ॥

(भा.दी.) **अभिषेकस्येति** । राजीववत् कमलवन्नयने यस्य स तथा, सः राजा अभिषेकः अभिषेचनं तस्य सम्भारान् साधनद्रव्याणि, विभवांश्च उत्सवं च प्रकल्प्य कैकेय्याः भवनं गृहं तत् ययौ ॥ २६ ॥

(सं.चं.) यदा कैकेयी क्रोधागारे शिश्ये तदा राजा राजीवनयनः कैकेयीदर्शनोत्सुकः । अभिषेकस्यापेक्षिताः सामग्रीः, विभवान् सभाचत्वराद्यलङ्करणानि च स्वयमेव प्रकटं कल्पयित्वा ॥ २६ ॥

संस्मरन्[४] सुस्मितां जायामनङ्गस्य वशं गतः ।
नापश्यच्छयनागारे रत्नदीपप्रदीपिते ॥ २७ ॥

(भा.दी.) गमने निमित्तमाह– **समिति** । शोभनं स्मितं यस्याः सा तथा तां जायां कैकेयीं संस्मरन्, अत एव अनङ्गस्य कामस्य वशोऽधीनता तं गतः दशरथः । [५]रत्नमेव दीपस्तेन प्रदीपितं प्रकाशितं तस्मिन् शयनस्य अगारे गृहे, भोगार्थं शयनीयमन्दिर इत्यर्थः, न अपश्यत् ॥ २७ ॥

(सं.चं.) सम्बुभुक्षया स्मरन् । भोगस्थाने शयनागारे नापश्यत् ॥ २७ ॥

कुत्र कान्तेति सम्भ्रान्तः क्रोधागारं प्रविश्य सः ।
ददर्श तरुणीं भार्य्यां शयानां केवलं भुवि ॥ २८ ॥

---

१. 'स्वे प्रहर्षतः' इति, 'सुप्रहर्षिता' इति च ।
२. 'विभवांश्चोपकल्प्य–'
३. **'कैकेय्या भवनम्'**
४. **'स स्मरन्'**
५. **'रत्नान्येव दीपाः'** इति का.श्री. ।

(भा.दी.) कुत्रेति । हे भार्ये कान्ते, कुत्र तिष्ठसि इति अतिसम्भ्रान्तः अत्यन्तं परिभ्रमणं कुर्वन्, कान्ता कुत्र तिष्ठतीति सम्भ्रान्त इति वा । सः क्रोधागारं क्रोधगृहं तत् प्रविश्य केवलं भुवि शयानां तरुणीं मनोहरां भार्यां कैकेयीं ददर्श ॥ २८ ॥

(सं.चं.) कान्ता कुत्रेति सम्भ्रान्तः । ददर्श तरुणीम्– 'स वृद्धस्तरुणीं भार्यां प्राणेभ्योऽपि गरीयसीम् । अपापः पापसङ्कल्पां ददर्श धरणीतळे' इति रामायणे । केवलमिति विरहय्य शय्याम् ॥ २८ ॥

तां पापनिश्चयां भूपो रमणीत्यभ्युपेयिवान् ।
भुजङ्गीं माल्यबुद्ध्येव परिरभ्येति[१] चाब्रवीत् ॥ २९ ॥

(भा.दी.) तामिति । भूपः, पापे पापकर्मणि निश्चयो यस्याः सा तथा तां कैकेयीम्, हे रमणि भार्ये, इति वदन् सन् अभ्युपेयिवान् सम्प्राप । भुजङ्गीं सर्पस्त्रियं माल्यमिति बुद्धिर्माल्यबुद्धिस्तयेव । 'माल्यं पुष्पे पुष्पदाम्नि' इति वैजयन्ती । परिरभ्य आलिङ्ग्य च इति अब्रवीत् ॥ २९ ॥

(सं.चं.) पापः निश्चयो यस्याः । ममानुकूलेयं रमणीति मन्वानः, 'रमणि, किमेवं शेषे' इति व्याहरन्न-भ्युपेयिवान् ॥ २९–३० ॥

त्यज शोकं विशालाक्षि मामालप शुकालपे ।
नोपयासि प्रिये त्वं[२] मां कथं स्मरशराहतम् ॥ ३० ॥

(भा.दी.) त्यजेति । विशाले अक्षिणी यस्याः सा तथा तत्सम्बुद्धिः । शुकवदालपतीति आभाषणं करोतीति शुकालपा तत्सम्बुद्धिः । (प्रिये) कैकेयि शोको दुःखं तं त्यज । त्यज विसर्गे लोट् । मां प्रति आलप सम्भाषणं कुरु । रप लप व्यक्तायां वाचि लोट् । त्वं स्मरस्य कामस्य यः शरस्तेन आहतं ताडितं मां कथं नोपयासि न प्राप्नोषि । या प्रापणे लट् ॥ ३० ॥

अवन्यां चतुरन्तायां कस्मिन् दण्डो निपात्यताम् ।
अब्राह्मणकुलं ब्रूहि देवि ते विहितागसम् ॥ ३१ ॥

(भा.दी.) अवन्यामिति । चत्वारः समुद्राः अन्तोऽवसानं यस्याः सा तथा तस्याम् । अवन्यां भूमौ कस्मिन् पुरुषे दण्डः शासनं निपात्यतां निक्षिप्यताम्? पत्ल् पतने लोट् । तवापकारिणं कं वा शासयामीत्यर्थः ।

१. **'परिस्पृश्येति'** इति, **'परिमृश्येति'** इति च । २. **'प्रियं त्वम्'**

हे देवि कैकेयि, ते तव विहितमाचरितमागोऽपराधो येन स तथा तम्, न विद्यते ब्राह्मणकुलं यस्य स तथा तम्, ब्राह्मणकुलोत्पन्नमात्रस्यादण्ड्यत्वात् तद्व्यतिरिक्तकुलोत्पन्नमित्यर्थः, ब्रूहि ॥ ३१ ॥

(सं.चं.) कस्मिन् दण्डो निपात्यताम् । 'अवध्यो वध्यतां को वा वध्यः को वा विमुच्यताम् । दरिद्रः को भवेदाढ्यो द्रव्यवान् वाऽप्यकिञ्चनः' इति रामायणे । तेन निपात्यतामित्युपलक्षणम् । कस्मिन् दण्डो न पात्यतामिति च ॥ ३१ ॥

प्रयच्छाम्यधुना सर्वं कृशोदरि[१] यदिच्छसि ।
कल्पवृक्षइवाहं ते स्मितेनोत्तिष्ठ सुस्मिते ॥ ३२ ॥

(भा.दी.) अभिमतस्य वस्तुनोऽप्रदानात् कोपश्चेत्तदपि दास्य इत्याह– **प्रयच्छामी**ति । कृशमुदरं यस्याः सा तथा तत्सम्बुद्धिः, सूक्ष्ममध्ये, त्वं यत् वस्तु इच्छसि । इषु इच्छायां लट् । तत्सर्वं वस्तु ते तुभ्यं अहं कल्पवृक्षइव अधुना प्रयच्छामि ददामि । यम उपयमे लट् । शोभनं स्मितं यस्याः सा तथा तत्सम्बुद्धिः, स्मितं मन्दहासस्तेन, मन्दहासपूर्वकमित्यर्थः, उत्तिष्ठ । ष्ठा गतिनिवृत्तौ लोट् ॥ ३२ ॥

(सं.चं.) यत् त्वमिच्छसि तत् ते प्रयच्छामि । यस्ययस्य यदिच्छसि तत्तत् तस्मै प्रयच्छामि । एतेन 'दरिद्रः को भवेदाढ्यः' इत्येतद् विवृतम् । अहं ते, तवाहं वशगः ॥ ३२ ॥

कान्तवाणीमिति श्रुत्वा कान्ता वाणीमभाषत ।
सत्यसन्धः सदा राजन् भव धर्म्मविदां वर ॥ ३३ ॥

(भा.दी.) **कान्ते**ति । कान्ता भार्या कैकेयी इति कान्तवाणीं भर्तुर्वाचं श्रुत्वा, धर्मं विदन्तीति धर्मविदस्तेषां मध्ये वर श्रेष्ठ हे राजन्, सदा सत्या सन्धा प्रतिज्ञा यस्य स तथा, 'सन्धाऽवधौ प्रतिज्ञायाम्' इति वैजयन्ती, भव, इति वाणीं अभाषत ॥ ३३ ॥

(सं.चं.) पूर्वं सत्यसन्ध आसीः । इदानीमपि भव ॥ ३३–४ ॥

पुरा सुरासुररणे त्वां निशासु शरक्षतम् ।
अरक्षं ननु रक्षोभ्यो विद्यया विप्रदत्तया ॥ ३४ ॥

---

१. **'सर्वं शातोदरि'** । **'शातं कृशमुदरं यस्याः सा शातोदरी'** इति का.श्री. ।

(भा.दी.) पुरेति । पुरा सुराश्च असुराश्च तेषां रणो युद्धं तस्मिन्, निशासु रात्रिषु शरक्षतं शरताडितं त्वां विप्रदत्तया ब्राह्मणदत्तया विद्यया[१] रक्षोभ्यः राक्षसेभ्यः अरक्षं ननु ॥ ३४ ॥

तदा प्रीत्या प्रदत्तौ मे वरौ नरवर त्वया ।
याचे तौ याचनीयं त्वां दीनाऽहं तव वल्लभा ॥ ३५ ॥

(भा.दी.) तदेति । हे नरवर नरश्रेष्ठ दशरथ, तदा त्वया प्रीत्या मे मह्यं यौ द्वौ वरौ प्रदत्तौ तौ वरौ, दीना खिन्ना तव वल्लभा प्रिया अहं याचनीयं प्रार्थनीयं त्वां प्रति याचे प्रार्थये । याचृ याच्ञायां लट् ॥३५॥

(सं.चं.) तव वल्लभा सत्यपि दीना दुःखिता ॥ ३५ ॥

इति तस्या वचो वीरो वक्राया मधुराक्षरम् ।
मृगो[२] गीतमिवाऽकर्ण्य विवशो वाक्यमब्रवीत् ॥ ३६ ॥

(भा.दी.) इतीति । वीरः दशरथः वक्रायाः कुटिलचित्तायाः तस्याः मधुराणि[३] मनोहराणि अक्षराणि यस्मिन् तत् तथा तत् वचः, गीतं गानं तत् मृग इव एण इव आकर्ण्य विवशः सन् मन्मथाधीनः सन्, वाक्यं वचस्तत् अब्रवीत् । यथा मृगयुना मृगवञ्चनार्थं रात्रौ दीपिकाधारणपुरस्सरं गाने कृते गानवशः सन् मृग आयाति तद्वदयं कर्णमधुरस्त्रीवचनश्रवणेन तद्वशो जात इति भावः ॥ ३६ ॥

(सं.चं.) यथा केनचिन्मृगयुना गीतं गानं श्रुत्वा गानमुग्धो मृगो जालबद्धो भवति । मृगयातज्ज्ञा वदन्ति यत् पुरा मृगयवो विशिष्टं गानं जानन्ति स्म । यस्मिन् गीयमाने हरिणा मन्त्रमुग्धा इव गानवशीकृतास्तं देशमागच्छेयुर्यत्र मृगयवो जालं वितत्य प्रत्यैक्षन्तेति । गीतमेतद् भाषायाम्–'**ಗೂ೯೦**' इत्याचक्षते ॥ ३६–८ ॥

वरौ वरानने दद्यामभीष्टौ सत्यमेव ते[४] ।
पुत्रेण मम रामेण[५] प्राणेभ्यः प्रेयसा शपे ॥ ३७ ॥

---

१. '**विद्यया मन्त्रेण**' इति का.श्री. । २. '**मृगी गीत–**' '**गीतं श्रुत्वा मृग इव**'
३. '**मधुराणि स्वादूनि श्राव्याणि**' इति का.श्री. । ४. '**सत्यमेव तौ**'
५. '**मम पुत्रेण रामेण**' । इति वि.ती.टीकायामुपरि–'**पुत्रेण मम रामेण**' (५.२) इति प्रतीकग्रहणेन तदभिमतः पाठो निर्णीयेत ।

(भा.दी.) वराविति । वरमुत्तममाननं यस्याः सा तथा तत्सम्बुद्धिः । कैकेयि, अभीष्टौ अभीप्सितौ वरौ, ते तुभ्यं दद्याम् । सत्यमेव नात्र वञ्चनमित्यर्थः । प्राणेभ्यः पञ्चप्राणेभ्यः प्रेयसा अत्यन्तं प्रियेण मम पुत्रेण श्रीरामेण शपे शपथं करोमि । शप आक्रोशे लट् ॥ ३७ ॥

राज्ञः प्रतिज्ञां तां श्रुत्वा किञ्चिदुत्फुल्ललोचना ।
वचोवज्रं ससर्ज्जासौ जगन्मङ्गलभङ्गदम् ॥ ३८ ॥

(भा.दी.) राज्ञ इति । राज्ञः तां प्रतिज्ञां श्रुत्वा किञ्चित् उत्फुल्ले सन्तोषेण विकसिते लोचने यस्याः सा तथा असौ कैकेयी जगति मङ्गलं शोभनमभिषेकाख्यं कर्म तस्य भङ्गो विघातस्तं ददातीति तथा तत्, वच एव वज्रं तत्, 'वज्रं कुलिशं च दम्भोळिः' इति हलः, ससर्ज । सृज विसर्गे लिट् ॥ ३८ ॥

तव राजन् प्रतिज्ञायाः साक्षिणो धर्म्मसाक्षिणः ।
रामः प्रियश्चेद् भवतो मह्यं देहि वराविमौ ॥ ३९ ॥

(भा.दी.) प्रार्थितवरयोरन्यथासिद्धिं यथा न कुर्यात् तथा पीठिकामारचयति– **तवे**ति । हे राजन्, चेद्यदि तव प्रतिज्ञायाः धर्मसाक्षिणः– 'आदित्यचन्द्रावनलानिलौ च द्यौर्भूमिरापो हृदयं मनश्च[१] । अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम्' इति धर्मसाक्षित्वेन प्रसिद्धाः सूर्यादयः साक्षिणः साक्षिभूताः, यदि च भवतः श्रीरामः प्रियः, तर्हि मह्यं इमौ वक्ष्यमाणौ वरौ देहि ॥ ३९ ॥

(सं.चं.) 'आदित्यचन्द्रौ–' (म.भा.आदि.९८.११) इति भारतोक्ताश्चतुर्दश धर्मसाक्षिणो देवाः साक्षिणः सन्तु । रामो यदि प्रियस्ते देहि तर्हि वराविमौ ॥ ४० ॥

अनेनैवोद्यमेनाद्य भरतोऽत्राभिषिच्यताम् ।
चतुर्द्दशसमा रामो याप्यतां च वनं प्रति ॥ ४० ॥

---

१. सम्प्रति भारते त्रिविधः पाठ उपलभ्यते–**'हृदयं यमश्च'** इति, **'हृदयं दिशश्च'** इति, **'हृदयं मनश्च'** इति च । **'यमश्च'** इति प्रचुरः पाठः । भूमिरापः, अनलानिलौ, द्यौराकाशश्चेति पञ्च भूतान्यभिहितानि । अभिमानिव्यपदेशोऽयम् । जडानां साक्षित्वासम्भवात् । हृदयनात् हृदयमिति प्राणनारायणौ । मन इति मनोमानी शिवः । पाठान्तरे स्फुटोऽर्थः । अरोरात्रमानिनौ मित्रावरुणौ । सन्ध्यामानिन्यौ सरस्वतीभारत्यौ । धर्म इति यमः, हस्तदेवता देवेन्द्रः, कर्ममानी पुष्करश्च ।

(भा.दी.) अनेनेति । अनेन इदानीं क्रियमाणेन, उद्यमः प्रयत्नस्तेनैव, अत्र[१] यौवराज्ये, भरतः अभिषिच्यताम् । श्रीरामः चतुर्दश च ताः समाश्च चतुर्दशसमाः चतुर्दशसंवत्सरानित्यर्थः, वनं तत्प्रति याप्यतां प्रेष्यताम् ॥ ४० ॥

(सं.चं.) अद्य निष्पन्नेनानेनैवोद्यमेन भरतः केकयादानीयाभिषिच्यताम् । चतुर्दश समा इति भिन्ने वा पदे ॥ ४०–१ ॥

वाक्यबाणेन तेनैव विदीर्ण्णहृदयो नृपः ।
पपात सहसा मह्यां छिन्नमूल इव द्रुमः ॥ ४१ ॥

(भा.दी.) वाक्येति । तेन कैकेयीप्रोक्तेन वाक्यमेव बाणस्तेनैव विदीर्णं हृदयं मनो यस्य स तथा । 'हृदयं तु मनस्यपि' इति वैजयन्ती । खिन्नमनस्क इत्यर्थः । नृपः सहसा सद्यः मह्यां च्छिन्नं मूलं यस्य स तथा द्रुम इव पपात ॥ ४१ ॥

[२]कैकेयीत्रिनताशक्त्या मुक्तो मन्थरया शरः ।
वाङ्मयोऽपातयद् भूपं दैत्येषुभिरपातितम् ॥ ४२ ॥

(भा.दी.) कैकेयीति । मन्थरया, कैकय्येव त्रिनता त्रिषु स्थानेषु नता धनुर्विशेषात्मिका यष्टिस्तस्याः शक्त्या सामर्थ्येन मुक्तः वाङ्मयः वाक्यात्मकः शरः, दैत्यानामिषवस्तैः अपातितं भूपं अपातयत् ॥ ४२ ॥

(सं.चं.) कैकेयीरूपा त्रिनता धनुर्यष्टिः । तच्छक्त्या करणेन मन्थरया कर्त्र्या मुक्तो वाङ्मयः शरः । कैकेयी च त्रिनता वक्षोजभरेण पुरतः, त्रिकभरेण पश्चादिति ॥ ४२ ॥

दुःखमोहपराभूतः स मुहूर्त्तं महीपतिः ।
सञ्ज्ञां कथञ्चित् सम्प्राप्य दीन आस्ते स्म भूतळे[३] ॥ ४३ ॥

(भा.दी.) दुःखेति । मुहूर्तो मुहूर्तकालस्तं दुःखं च मोहो मूर्छा स च ताभ्यां पराभूतः आक्रान्तः महीपतिः सञ्ज्ञाम् प्रबोधं कथञ्चित् सम्प्राप्य दीनः खिन्नः सन् भुवस्तळं तस्मिन् आस्ते स्म उपविष्टोऽभूत् । आस उपवेशने लट् ॥ ४३ ॥

---

१. **'अत्र अयोध्यायाम्'** इति का.श्री. । २. **'कैकेयीत्रिनताच्छक्त्या' 'कैकेयीत्रिनतात् कैकेयीरूपशार्ङ्गात्'** इति का.श्री. ।
३. **'दीन आस महीतळे'**

(सं.चं.) कैकेय्या वचःश्रवणेन दुःखम् । सौन्दर्यदर्शनेन मोहः । रामस्याप्यनिष्टं चिन्तयतीति दुःखम् । रामे च मोहो ममतातिशयः । एभिः सर्वैर्भावैः सङ्कीर्णश्च मोहश्चित्तविभ्रमः किङ्कर्तव्यमूढता, तन्मूलः सञ्ज्ञा-नाशश्च । मुहूर्तं लवकालं पराभूतः । पुनः कथञ्चित् सञ्ज्ञां सम्प्राप्यापि सङ्कटपरिहारोपायमपश्यन् दीनः दुःखितः, भाविनमनर्थं चिन्तयन् भीतो वा ॥ ४३ ॥

क्रोधशोकाभिसन्तप्तान्[१] बाष्पबिन्दून् महोष्मणः ।
निमृज्य दीर्घं निश्वस्य कैकेयीं वीक्ष्य सोऽब्रवीत् ॥ ४४ ॥

(भा.दी.) **क्रोधे**ति । सः राजा क्रोधश्च मोहश्च ताभ्यामभिसन्तप्ताः तान्, अत एव महोष्मणः अत्युष्णान् बाष्पबिन्दूनश्रुबिन्दून् निमृज्य पाणिना परिमृज्य, दीर्घं यथा भवति तथा निश्वस्य, दीर्घश्वासं मुक्त्वा, कैकेयीं वीक्ष्य अब्रवीत् ॥ ४४ ॥

(सं.चं.) राजगताभ्यां क्रोधशोकाभ्यां सन्तप्ता अश्रुबिन्दवः । सन्तापादेव महोष्मणः अतितरामुष्णान् ॥ ४४ ॥

धिग्धिग् बुद्धिविहीनां त्वां दुर्बुद्धौ बुद्धिमानिनीम् ।
शैलूषीमिव निःशङ्कां वाचाटां[२] टिट्टिभीमिव ॥ ४५ ॥

(भा.दी.) **धिगि**ति । बुद्ध्या सद्बुद्ध्या विहीनां रहिताम्, दुष्टा च सा बुद्धिश्च दुर्बुद्धिस्तस्यां बुद्धिरिति मानोऽभिमानः सोऽस्या अस्तीति तथोक्ता ताम्, शैलूषस्य नटस्य स्त्री शैलूषी तामिव । 'शैलूषा जायाजीवाः कृशाश्विनः । भरता इत्यपि नटाः ' इत्यमरः । निर्गता शङ्का वक्तव्यावक्तव्यविषयकशङ्का यस्याः सा तथा ताम् । नटभार्या हि सभायां किञ्चिदपि वक्तुं निर्लज्जा भवति । त्वं च तादृशीति भावः । टिट्टिभस्य स्त्री टिट्टिभी तामिव । वाचाटां बहुभाषिणीं त्वां धिक्धिक् ॥ ४५ ॥

(सं.चं.) शैलूषीं नटीमिव निःशङ्काम् । यथा निर्देशकेनाऽदिष्टं तथा निःशङ्कं हि नटी भाषते । टिट्टिभी हि सदाऽपि कर्कशं रटति । 'आलजाटजौ बहुभाषिणि' (५.२.१२५) इति पाणिनिः । 'कुत्सित इति वक्तव्यम्' इति वार्तिकम् ॥ ४५ ॥

१. **'क्रोधमोहाभिसन्तप्तान्'** इति वि.ती.पाठ इति भाति, उपलब्धपाठानुसारेण ।

२. **'वाचाटीं टिट्टिभीमिव'** । **'वाचालीम्'** इति कचित् ।

कृपाणीव कृपाहीना कोमलाऽपि [1]निसर्गतः ।
परैः कृष्टा सुवंशाऽपि मन्नाशायासि धारिता ॥ ४६ ॥

(भा.दी.) कृपाणीवेति । निसर्गतः स्वभावतः कोमलाऽपि शोभनाऽपि कृपाहीना । शोभनो वंशः कुलं यस्याः सा तथाऽपि परैः शत्रुभिः कृष्टा वशीकृता । त्वं खड्गापरनामिका कृपाणीव मम नाशो मरणं तस्मै धारिता धृता विधिनेति शेषः । अस्तेर्लट् । कृपाणी च निसर्गतः कोमला भवति, परैः शत्रुभिः प्रहरण-समये कोशादाकृष्टा च भवति । वंशात्मकग्रहणस्थलवती च भवतीति कैकेय्याः कृपाण्याश्च साम्यमिति भावः ॥ ४६ ॥

(सं.चं.) कृपाणी खल्वाराद् दृष्टा मनो हरन्ती स्वभावतः कोमला फळफळायते । अन्ततः कृपाहीनाऽ-सूनेव हरति । त्वमपि बहिःकोमलतनुरन्ततः कृपाहीना । सुदृढवंशनिर्मितत्सरुः, परैः बलादाकृष्य स्ववशी-कृता कृपाणी । त्वमपि सद्वंशजाता, अथाऽपि परैः दुष्टशक्तिभिराक्रान्तमनाः । केवलं मन्नाशाय मया धारिता ॥ ४६ ॥

गेहाद् रामं प्रयाप्य त्वं देहान्मामपि पापिनि ।
स्नेहात् त्वत्स्थाच्च[2] भरतं लोकांस्त्वं पातयस्यधः ॥ ४७ ॥

(भा.दी.) गेहादिति । पापमस्या अस्तीति पापिनी तत्सम्बुद्धिः । हे पापिनि कैकेयि, त्वं गेहं गृहं तस्मात् श्रीरामं प्रयाप्य वनं गमयित्वा, मामपि देहः शरीरं तस्मात् प्रयाप्य, स्वस्मिन् तिष्ठतीति स्वस्थ-स्तस्मात्, त्वयि विद्यमानादित्यर्थः, स्नेहाच्च प्रयाप्य निर्गमयित्वा । भरतं च अधोलोकान् नरकादीन् प्रति पातयसि गमयसीत्यर्थः । श्रीरामे वनं प्रति प्रेषिते सति तद्वियोगेन मम मरणमेव भवेत् । मम त्वयि स्नेहभङ्गश्च भवेत् । भरतस्य नरकादिश्च स्यादिति न कस्यापीदं हितसाधनमिति भावः ॥ ४७ ॥

(सं.चं.) मामपि देहात् प्रयाप्य । त्वत्स्थात् स्नेहाच्च भरतं प्रयाप्य । भरतं मातृस्नेहाद् विमोच्येत्यर्थः । अनेन निर्धारेण भरतोऽपि त्वद्विरोधी भविष्यतीत्यर्थः । 'कैकेयि नरकं गच्छ मा स्म भर्तुः सलोकताम्' इति हि भरतवचनं रामायणे । त्वं च स्वयमात्मानमधोलोकान् प्रति पातयसि । 'लोकान् स्वं पातयस्यधः' इत्यपि मूलपाठः स्यात् ॥ ४७ ॥

१. **'कोमला च निस–'** २. 'स्वस्थाच्च' इति वि.ती.पाठः ।

अहर्प्पतिं[१] विनेवाहर्विना वारीव वारिजम् ।
देहीवोक्थं विना रामं विनाऽहं नास्मि सर्वथा ॥ ४८ ॥

(भा.दी.) देहात् मामपीत्युक्तं विशदयति– **अहर्पतिमि**ति । अह्नां दिवसानां पतिरहर्पतिः सूर्यस्तं विना अहरिव दिनमिव, वारि उदकं विना वारिजमिव कमलमिव, उक्थो मुख्यप्राणस्तं विना देहीव जीवइव, अहं श्रीरामं विना सर्वथा नास्मि न भवामि ॥ ४८ ॥

(सं.चं.) अह्नः पतिः अहःपतिरहस्पतिर्वा । अथच अहरित्यव्ययम् । तदाऽहर्पतिरपि । उत्थापयतीत्युक्थः प्राणो नारायणो वा । नास्मि न जीवामि ॥ ४८ ॥

मया रामेण च त्यक्तां भरतो [२]नाऽवसेत् पुरीम् ।
प्राणजीवपरित्यक्तां तनूमिव मनः स्वयम्[३] ॥ ४९ ॥

(भा.दी.) मयेति । भरतः मया श्रीरामेण च त्यक्तां पुरीं अयोध्याम्, प्राणो मुख्यप्राणः स च जीवश्च ताभ्यां परित्यक्ताम्, तनूः शरीरं ताम् । मन इव स्वयं नाऽवसेत् नावतिष्ठेत् । वस निवासे लिङ् । मनस्व्ययमिति पाठे विशिष्टबुद्धिमानित्यर्थः ॥ ४९ ॥

(सं.चं.) प्राणेन भगवता वायुना वा, जीवेन च परित्यक्ताम् । मया पुर्या जीवेनेव । रामेण पुर्याः प्राणेनेवेति यथायोग्यं सम्बन्धः । पाठक्रमादर्थक्रमो हि बलीयान् । प्राणजीवमनांसि सहैव हि हृदि तिष्ठन्ति । मन इति मनोमानी शिवः । चेतनसाहचर्यात् ॥ ४९ ॥

भरतस्यासि जननी भार्य्या मेऽश्वपतेः सुता ।
त्रयाणामपि नः कीर्त्तिं धार्म्मिकाणां निकृन्तसि ॥ ५० ॥

(भा.दी.) भरतस्येति । भरतस्य जननी असि । मे मम भार्या असि । अश्वपतेः अश्वपतिनाम्नः केकयाधिपतेः सुता असि । धर्मं चरन्तीति धार्मिकास्तेषां त्रयाणामपि नः कीर्तिं निकृन्तसि नाशयसि । कृती च्छेदने लट् ॥ ५० ॥

---

१. **'अहस्पतिम्'**

२. 'केचित् **'न भवेत्'** इति पठित्वा **'अत्यन्तसंयोगे द्वितीया'** इत्याहुः ।

३. **'मनस्व्ययम्'** इति **'महस्व्ययम्'** इति च क्वचित् ।

(सं.चं.) धार्मिकस्य जननी, धार्मिकस्य भार्या, धार्मिकस्य सुता कथमधार्मिकाऽभवः। भरतश्च अश्वपतिश्च अहं च वयम्। तेषां नः ॥ ५० ॥

अनुक्तपूर्वं दुर्वाक्यमिदानीमुक्तवत्यसि।
सर्वेषामपि पूर्वेषां गुणानां दहनायितम् ॥ ५१ ॥

(भा.दी.) अन्विति। पूर्वमुक्तमुक्तपूर्वं उक्तपूर्वं न भवतीत्यनुक्तपूर्वम्, कदाऽप्यनुक्तमित्यर्थः। पूर्वेषां पूर्वं विद्यमानानां सर्वेषामपि गुणाः पातिव्रत्यादिधर्मास्तेषां दहनवदाचरतीति दहनायितम्, अत्यसह्यमित्यर्थः। दुष्टं निन्दितं च तत् वाक्यं च दुर्वाक्यं तत् (इदानीं) उक्तवती असि ॥ ५१ ॥

(सं.चं.) एकेन दोषेण समग्रोऽपि गुणसन्निपातो भस्मसाद् बभूवेत्याह– अनुक्तपूर्वम् ॥ ५१ ॥

सर्वभूताभिरामाय रामाय गुणसिन्धवे।
ऋजवेऽनभ्यसूयाय[1] को ह्यसूयति[2] कुत्रचित् ॥ ५२ ॥

(भा.दी.) सर्वेति। सर्वाणि यानि भूतानि प्राणिनस्तेषामभिरामाय मनोहराय। 'भूतं प्राण्यतीते समे त्रिषु' इत्यमरः। गुणैः सिन्धुरिव समुद्रइव तस्मै, गुणपूर्णायेत्यर्थः। ऋजवे अवक्रबुद्धये। नाभ्यसूयाय न विद्यते अभ्यसूया[3] गुणेषु दोषारोपो यस्य स तथा तस्मै। निषेधार्थकनकारसमासत्वान्नलोपाभावः। श्रीरामाय को हि क एव। 'हि हेताववधारणे' इत्यमरः। कुत्रचित् कस्मिंश्चिद्देशे काले वा। असूयति असूयां करोति। न कोऽपि सत्पुरुष इत्यर्थः ॥ ५२ ॥

(सं.चं.) को ह्यसूयति त्वामृते। परोत्कर्षासहनमसूया ॥ ५२ ॥

समौ मे रामभरतावित्यवादीः कथान्तरे।
भरताच्चातिशुश्रूषू[4] रामस्ते त्यज्यते कथम् ॥ ५३ ॥

(भा.दी.) समाविति। हे कैकेयि, त्वं मे रामभरतौ समौ स्नेहविषये समानौ इति कथाया अन्तरं विशेषस्तस्मिन्, कथामद्ध्य इति वा, अवादीः अकथयः। भरताच्च ते तव अतिशुश्रूषुः अत्यन्तं सेवाशीलः श्रीरामः कथं त्यज्यते ॥ ५३ ॥

---

१. **'ऋजवे नाभ्यसूयाय को ह्यसूयति'** इति वि.ती.पाठः। २. **'कोऽभ्यसूयति'**

३. **'गुणेषु दोषाविष्करणमसूया'** इति प्राचीनटीकयोः। ४. **'भरताच्चापि शुश्रूषू–'**

(सं.चं.) कथान्तरे सम्भाषणावसरे, अवादीः वदन्ती आसीः । कथमिदानीं स त्यज्यते । अपिच स ते भरतादप्यधिकं शुश्रूषाशीलः ॥ ५३ ॥

वनं गच्छेति वक्ष्यामि कथं राममनागसम् ।
कान्तत्यक्तां प्ररुदितां वधूं द्रक्ष्यामि वा कथम् ॥ ५४ ॥

(भा.दी.) वनमिति । न विद्यते आगः अपराधो यस्य स तथा तं श्रीरामं वनं तत्प्रति गच्छ इति कथं वक्ष्यामि । वच परिभाषणे लृट् । कान्तत्यक्तां भर्तृत्यक्तां अत एव सञ्जातः प्ररोदोऽस्या इति प्ररुदिता तां वधूं श्रीरामभार्यां सीतां कथं वा द्रक्ष्यामि ॥ ५४ ॥

(सं.चं.) पितुरादेशपालनाय वनं जिगमिषता कान्तेन गृह एव त्यक्तां वधूं जानकीम् ॥ ५४ ॥

सम्मता त्वं गुणैः सर्वैः[१] पौरजानपदेष्वपि ।
त्यजैकं बुद्धिदोषं तु सर्वदूषणकारणम् ॥ ५५ ॥

(भा.दी.) सम्मतेति । हे कैकेयि, त्वं पुरि भवाः पौरास्ते च जनपदे राष्ट्रे भवाः जानपदास्ते च तेषु, सर्वैर्गुणैः [२]शुभधर्मैर्युक्तेति सम्मता असि । तस्मात् सर्वाणि यानि दूषणानि तेषां कारणं हेतुं एकं बुद्धेर्यो दोषस्तं त्यज । श्रीरामो राज्यान्निर्वास्य इति मनोरथं मा कुर्वित्यर्थः ॥ ५५ ॥

(सं.चं.) सर्वगुणापाकरणकारणं रामनिर्वासननिर्णयरूपं बुद्धिदोषम् ॥ ५५–६ ॥

यद्यदिच्छसि वामोरु तत्तद् दास्यामि सर्वथा ।
वरावेतौ विना देवि प्रणम्य त्वां प्रसादये ॥ ५६ ॥

(भा.दी.) यदिति । वामौ मनोहरौ उरू यस्याः तत्सम्बुद्धिः । एतौ त्वदभिहितौ वरौ विना त्वं यत्यत् वस्तु इच्छसि अहं तत्तत् सर्वथा दास्यामि । हे देवि कैकेयि, त्वां प्रणम्य प्रसादये प्रसन्नीकरवाणि । षद्लृ विशरणगत्यवसादनेषु लोट् ॥ ५६ ॥

मम दीनस्य वृद्धस्य तव प्राणैः[३] समस्य च ।
लालप्यमानस्य भृशं शरणं भव भामिनि ॥ ५७ ॥

१. **'सन्मता सद्गुणैः सर्वैः'** २. **'हरिभक्त्यादिशुभधर्मैः'** इति क्वचित् । ३. **'तव प्रियतमस्य च'**

(भा.दी.) ममेति। दीनस्य श्रीरामवियोगशङ्कया खिन्नस्य, वृद्धस्य, तव प्राणैः समस्य, भृशं लालप्यमानस्य पुनःपुनर्विलापं कुर्वतश्च मम, भामिनि ललने कैकेयि, 'नारी भीरुर्भामिनी कामिनी च' इति हलः, त्वं शरणं रक्षिका भव ॥ ५७ ॥

(सं.चं.) शरणं रक्षित्री भव । 'शरणं गृहरक्षित्रोर्वधरक्षणयोरपि' इति मेदिनी ॥ ५७–९ ॥

विलपन्तं पतिमिति विलोठन्तं[१] महीतळे ।
विलोक्यानल्पदर्प्पा सा कैकेयी वाक्यमब्रवीत्[२] ॥ ५८ ॥

(भा.दी.) विलपन्तमिति। अनल्पो महान् दर्पोऽहङ्कारो यस्याः सा तथा सा कैकेयी। इति विलपन्तं विलापं कुर्वन्तं मह्यास्तळं प्रदेशस्तस्मिन् विलोठन्तं परिभ्रमन्तं पतिं दशरथं विलोक्य वाक्यं तत् अब्रवीत् । ब्रूञ् धातोर्लङ् ॥ ५८ ॥

अनेनासत्यवादेन यशोधर्म्मादयो गुणाः ।
स्फीता नश्यन्ति ते राजन् वरौ मे न ददासि चेत् ॥ ५९ ॥

(भा.दी.) अनेनेति। हे राजन्, चेत् (यदि) वरौ मत्प्रार्थितवरौ मे मह्यं न ददासि। तर्हि अनेन असत्यो यो वादो वचनं तेन, ते तव यशश्च धर्मश्च तौ आदी येषां ते तथा, स्फीताः प्रकाशमानाः, लोके प्रख्याता इत्यर्थः, गुणाः नश्यन्ति नाशं प्राप्नुवन्ति ॥ ५९ ॥

औशीनरादयः पूर्वे[३] सत्यार्त्थे देहमत्यजन् ।
त्वं च राज्यं प्रतिज्ञाय स्वपुत्राय न दास्यसि[४] ॥ ६० ॥

(भा.दी.) इममेवार्थमाख्यायिकयोपपादयति– **औशीनरादय** इति । पूर्वे पुरातनाः, उशीनरस्यापत्यं पुमानौशीनरः शिबिः, स आदिर्येषां ते तथा राजानः, सत्यायेति सत्यार्थे, स्वोक्तवचसोऽनन्यथात्व-सिद्ध्यर्थमित्यर्थः, देहः शरीरं तं अत्यजन् । त्वं प्रतिज्ञाय (च) प्रतिज्ञां कृत्वाऽपि स्वपुत्राय भरताय राज्यं तत् न दास्यसि । डु दाञ् दाने लृट् । इन्द्राग्नी श्येनकपोतौ भूत्वा शिबिनिकटं प्रति तद्धर्मपरीक्षार्थमागत्य श्येनभीतः कपोतः शिबिं शरणं जगाम । श्येनेन च ब्रह्मणा मज्जातेराहारत्वेन क्लृप्तं कपोतं त्यजेत्युक्ते

१. 'विलुण्ठन्तम्' २. 'वाक्यमाददे'
३. 'पूर्वम्' ४. 'प्रतिज्ञाय स्वपुत्राय त्वं राज्यं नच दास्यसि।

शरणागतपरित्यागानर्हत्वात् कपोतदेहसमं मद्देहादवकृत्य मांसं प्रयच्छामीत्युवाच । तेन च तथाऽस्त्वित्युक्ते तुलायां बहुशः स्वदेहमांसमवकृत्य स्थापनेऽपि कपोतेनासममवेक्ष्य स्वयमेव तुलायामारूढस्तस्य तद्धर्मसूक्ष्मावलोकनेन तुष्टा देवा इति पौराणिकी प्रसिद्धिः ॥ ६० ॥

(सं.चं.) औशीनरः शिविः । शिबिरित्यर्वाचीनाः । शितस्तीक्ष्णः सन् वेति याति आक्रामति वा शत्रूनिति वा शिविः । शिञ् निशाने । वी गत्यादिषु । शं सुखं वं ज्ञानं बलं वा विशिष्टमस्येति च शिविः ॥६०॥

रामं राज्येऽभिषिच्य त्वं रन्तुं कौसल्ययेच्छसि ।
शिष्टलक्षण दुष्टात्मन्नष्टोऽयं ते मनोरथः ॥ ६१ ॥

(भा.दी.) राममिति । शिष्टानां सत्पुरुषाणां लक्षणं यस्य स तथा तत्सम्बुद्धिः । दुष्ट आत्मा स्वभावो यस्य स तथा तत्सम्बुद्धिः । 'आत्मा जीवे धृतौ देहे स्वभावे परमात्मनि' इति वैजयन्ती । हे राजन्, त्वं श्रीरामं राज्यं साम्राज्यं तस्मिन् अभिषिच्य कौसल्यया सह रन्तुं क्रीडां कर्तुं इच्छसि । ते तव अयं मनोरथः ईप्सितार्थः, 'वाञ्छितार्थो मनोरथः' इति हलः, नष्टः ॥ ६१ ॥

(सं.चं.) शिष्टमिवाऽत्मानं लक्षयसि दर्शयसि । वस्तुतस्तु दुष्टात्मा त्वम् । अनेन वरदानेन ते मनोरथो नष्टो भविष्यति । निश्चितमेतदिति नष्ट इत्येवाऽह ॥ ६१ ॥

सपत्नीं मम कौसल्यां[१] मानिनीं[२] दीनतां गताम् ।
एकाहं[३] चेदवेक्षिष्ये गमिष्यामि कृतार्थताम् ॥ ६२ ॥

(भा.दी.) सपत्नीमिति । मम समाना पत्नी सपत्नी ताम् । मानः अभिमानः अस्या अस्तीति मानिनी ताम्, कौसल्यां चेद्यदि, एकं च तत् अहश्च, एकाहस्तमपि । 'रात्राह्नाहाः पुंसि' (अ.सू.२.४.२९) इति पुल्लिङ्गता । एकस्मिन् दिवसेऽपीत्यर्थः । दीनतां खिन्नतां गताम्, अहं अवेक्षिष्ये, तर्हि कृत अर्थः प्रयोजनं यस्याः सा तथा तस्या भावस्तत्ता ताम् गमिष्यामि ॥ ६२ ॥

(सं.चं.) एकाहमात्रं चेदपि दीनतां गताम्, दुःखितां गलितगर्वाम् ॥ ६२ ॥

---

१. **'सपत्नीं त्यज कौसल्याम्'** इत्यसङ्गतः पाठः ।
२. **'मानिनीम् अहमेव श्रेष्ठेत्यहङ्कारवतीम्'** इति का.श्री. ।
३. **'एकाहे चेद–'**

विषं पास्यामि विषमं[१] मरिष्यामि तवाग्रतः ।
न चेत् प्रतिज्ञां कुरुषे प्रोच्येति विरराम सा ॥ ६३ ॥

(भा.दी.) **विषमि**ति । प्रतिज्ञां भरताय राज्यदाने प्रतिज्ञां न कुरुषे चेत् तर्हि विषं तत् पास्यामि । पा पाने लृट् । तव अग्रतः विषमः यथा भवति तथा विषमम्, तव मरणात् पूर्वमेवेत्यर्थः, शस्त्रादिनेति वा, मरिष्यामि । मृङ् प्राणत्यागे लृट् । सा इति प्रोच्य विरराम तूर्ष्णीं बभूव ॥ ६३ ॥

(सं.चं.) विषममसहजं मरिष्यामि । इति प्रोच्य ॥ ६३ ॥

हा रामेति क्षितौ पन्नो मोहेन स महीपतिः ।
नानासान्त्वैरशान्तां तां पुनः क्रुद्धोऽब्रवीदिदम् ॥ ६४ ॥

(भा.दी.) **हा रामे**ति । हा राम इति वदन् सन्, मोहो मूर्च्छा तेन क्षितौ पन्नः पतितः, सः महीपतिः । नानाविधानि यानि सान्त्वानि सान्त्ववचनानि तैः अशान्तां तां कैकेयीं प्रति क्रुद्धः सन् पुनः इदं वचः अब्रवीत् ॥ ६४ ॥

(सं.चं.) गतसञ्ज्ञः पन्नः पतितः, पुनः कथञ्चिदुत्थितः । सान्त्ववचनैरशान्तामजातप्रत्ययामशिथिल-निर्णयाम् । अत एव क्रुद्धः ॥ ६४ ॥

पापे पाणिर्म्मया यस्ते[२] गृहीतो मन्त्रपूर्वकम् ।
तं त्यजामि ममायोग्यं[३] रामसन्त्यागकारणम् ॥ ६५ ॥

(भा.दी.) पापे इति । हे पापे दोषरूपे, सर्वथा, ते तव यः पाणिः, मन्त्रः पूर्वो यथा भवति तथा मन्त्रपूर्वकं विवाहकाले गृहीतः । श्रीरामस्य सन्त्यागः परित्यागस्तस्मिन् कारणम्, अत एव मम अयोग्यं तं पाणिं त्यजामि ॥ ६५ ॥

(सं.चं.) तं पाणिं त्यजामि । कुतोऽयोग्यम्? रामसन्त्यागकारणम् । यद्यपि न पाणिः स्वयं रामसन्त्या-गकारणम् । अथापि धर्मिनिष्ठो गुणक्रियादिर्धर्मेष्वप्युपचर्यते । यथा दण्डाः प्रवेश्यन्ताम् । अनेन पाणिना

१. **'विषमं मरणसाध्वसम्'** इति का.श्री. । २. **'यस्या गृहीतो–'**

३. **'त्वां त्यजामि ममायोग्याम्'**

गृहीतेन स्वस्य रामसन्त्यागः प्राप्त इति विशिष्य पाणावाक्रोशः । केचिदेतद्भयादेव पाठमन्यथा पठन्ति– 'त्वां त्यजामि ममायोग्याम्' इति ॥ ६५ ॥

श्रुत्वैव वरदानं मे रामः क्षिप्रं गमिष्यति ।
ऋजुर्म्मन्दस्य मेऽभीष्टां राज्यरक्षां न धास्यति ॥ ६६ ॥

(भा.दी.) श्रुत्वेति । ऋजुरवक्रबुद्धिः श्रीरामः मे मम वरस्य दानं प्रदानं तत् श्रुत्वैव क्षिप्रं यथा भवति तथा गमिष्यति । मन्दस्य अल्पभाग्यस्य मे मम अभीष्टां अभीप्सितां राज्यरक्षां न धास्यति न करिष्यति । डु धाञ् धारणपोषणयोः लृट् ॥ ६६ ॥

(सं.चं.) न धास्यति न विधास्यति, न निर्वक्ष्यति ॥ ६६ ॥

इत्थं लालप्यमानस्य कैकेय्या दारितात्मनः ।
सहस्रयामा तस्याऽसीत् सा त्रियामाऽपि शर्वरी ॥ ६७ ॥

(भा.दी.) इत्थमिति । इत्थं लालप्यमानस्य पुनःपुनर्विलापं कुर्वतः, कैकेय्या दारितो विशीर्ण आत्मा मनो यस्य सः तथा, तस्य दशरथस्य सा शर्वरी त्रयो यामाः यस्याः सा तथाऽपि, यामत्रयविशिष्टाऽपीत्यर्थः, तस्य दशरथस्य सहस्रं यामाः यस्याः सा तथा आसीत् । यथा शस्त्रेणात्यन्तं शीर्णदेहस्य कस्यचित् त्रियामाऽपि रात्रिः दुःखातिशयादलब्धनिद्रस्य सहस्रयामेव भवति, तद्वदस्याप्यासीदिति भावः ॥ ६७ ॥

(सं.चं.) सहस्रयामतुल्या ॥ ६७ ॥

प्रभाते जगदे कान्तः सीताया मागधैरिति ।
प्रभा ते जगदेकान्तश्रिये राम रवेरिव ॥ ६८ ॥

(भा.दी.) प्रभात इति । प्रभातः प्रातःकालस्तस्मिन् । 'उषःप्रत्युषसी अपि प्रभातम्' इत्यमरः । मागधैः स्तुत्या प्रबोधकारिभिः पुरुषैः, हे श्रीराम ते प्रभा तेजः, शक्तिरिति यावत्, रवेः प्रभेव कान्तिरिव, जगदेकान्तश्रिये जगतो भक्तजनस्य एकान्ततो मुख्यतो या श्रीः मोक्षलक्षणा सम्पत् तस्यै, भवतीति शेषेणान्वयः । यद्वा जगति एका मुख्या अन्तर्भूता स्वरूपभूता या श्रीस्तस्यै इति वा । 'अन्तोऽस्त्र्यवसिते मृत्यौ स्वरूपे निश्चयेऽन्तिके' इति वैजयन्ती । त्वदीयजगत्स्रष्टृत्वादिशक्तिर्भक्तैरसकृद्भाविता सती सकल-

सम्पदं सम्पादयतीति भावः । इति सीतायाः कान्तो भर्ता श्रीरामः जगदे स्तुतोऽभूत् । गद व्यक्तायां वाचि लिट् ॥ ६८ ॥

(सं.चं.) सीतायाः कान्तः मागधैः जगदे । किमिति? हे राम, रवेरिव तव प्रभा जगत एकान्तायै श्रिये भूयादिति । प्रथमतृतीयपादयोर्यमकम् ॥ ६८ ॥

तत्रोत्सवे मणिगणो रुचिभिर्विरेजे
तेनैव भूषणगणो विविधो विरेजे ।
रामोऽथ तेन सह वल्लभया विरेजे
भूम्ना चराचरमिदं[1] सकलं विरेजे ॥ ६९ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्क्षरामायणे
अयोद्ध्याकाण्डे तृतीयः सर्ग्गः ॥

—०—

(भा.दी.) तत्रेति । तत्र तस्मिन्, उत्सवो महस्तस्मिन् । मणिगणः रुचयः कान्तयस्ताभिः विरेजे । तेनैव तादृशकान्तिमन्मणिगणेनैव विविधः नानाविधः भूषणगणः विरेजे । अथ श्रीरामः वल्लभया प्रियया सीतया सह तेन तादृशमणिरञ्जितभूषणगणेन विरेजे । भूम्ना पूर्णगुणेन श्रीरामेण परं च अपरं च तत्, इदं सकलं जगत् विरेज इत्यन्वयः ॥ ६९ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्क्षरामायणव्याख्यायां
भावार्थदीपिकायामयोध्याकाण्डे तृतीयः सर्गः ॥

(सं.चं.) मणिगणः कान्तिभिर्विरेजे । भूषणगणः कान्तिमता मणिगणेन विरेजे । वल्लभया सह रामो भूषणगणेन विरेजे । भूम्ना पूर्णगुणेन रामेण चराचरात्मकमिदं सकलं जगद् विरेजे । वसन्ततिलका नाम च्छन्दः । तभाभ्यां जाभ्यां गाभ्यां च ॥ ६९ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्क्षरामायणटीकायां सङ्क्षचन्द्रिकायामयोध्याकाण्डे
तृतीयसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– ४९९+६९=५६८]

१. **'परापरमिदम्'** इति वि.ती.पाठः स्यात् ।

चतुर्थः सर्ग्गः

दिवाकरेऽथाभ्युदिते सुमन्त्रो मन्त्रिसत्तमः ।
सत्वरः सत्वसम्पन्नो नरेन्द्रान्तःपुरं ययौ ॥ १ ॥

(भा.दी.) श्रीराम एवं विराजमाने सति वृत्तां सुमन्त्रादीनां प्रवृत्तिं दर्शयति– **दिवाकर** इत्यादिना । अथ प्रभातानन्तरम्, दिवाकरे अभ्युदिते सति, मन्त्रिसत्तमः मन्त्रिषु श्रेष्ठः, सत्वेन सत्वगुणेन सम्पन्नो युक्तः, सात्विक इत्यर्थः, सुमन्त्रः त्वरया वेगेन सहितः सत्वरः सन्, नरेन्द्रस्य अन्तःपुरं तत् ययौ ॥ १ ॥

(सं.चं.) अथ निशापगमे । अभ्युदिते उदेतुमारब्धे सति । सत्वं साधुता । साधुरयमिति तस्यानिरुद्धमन्तः-पुरम् । सत्वं सामर्थ्यं च । तेन मन्त्रिषु सत्तमो बभूव ॥ १ ॥

प्रविश्यान्तःपुरं कान्तं मन्त्री द्वास्थैरवारितः ।
सुप्तं मत्वा नरपतिं बोधयन्नभ्यधादिदम्[१] ॥ २ ॥

(भा.दी.) **प्रविश्येति** । द्वारि तिष्ठन्तीति द्वास्थास्तैः अवारितः अनिवारितः मन्त्री सुमन्त्रः कान्तं मनोहरं तत् अन्तःपुरं प्रविश्य, नराधिपं दशरथं सुप्तं निद्रितं मत्वा, दुःखेन शयानमपि निद्रया शेत इति मत्वेत्यर्थः, बोधयन् सन् इदं वचः अभ्यधात् ॥ २ ॥

(सं.चं.) कैकेयी राज्ञीषु नितरां कान्ताऽऽस । तेन तस्या अन्तःपुरमपीतरापेक्षया निकामं कान्तम् । सुमन्त्रः साधुरिति विशिष्य राज्ञो विश्वासपात्रमिति द्वाःस्थैरवारितः । शयानं दृष्ट्वा सुप्तं मत्वा ॥ २ ॥

[२]स्वस्ति तेऽस्तु नृपोत्तिष्ठ प्रजाः सर्वाः प्रजापते ।
त्वयि निद्राति निद्रान्ति त्वयि जाग्रति जाग्रति ॥ ३ ॥

---

१. **'बोधयन्निदमब्रवीत्'** इति, **'बोधयामास संस्तवैः'** इति च क्वचित् । **'बोधयामास संसदि'** इत्यपपाठः ।

२. क्वचिदयमुत्तरश्च श्लोको न पठ्यते । न व्याख्यातं च का.श्री.टीकायाम् । धावद्व्याख्यानत्वाद् विद्याभूषणीयमनिर्णायकम् । अस्मिन् पक्षे सर्गेऽस्मिन् एकपञ्चाशदेव पद्यानि ।

(भा.दी.) स्वस्तीति । हे नृप, ते तुभ्यं स्वस्ति मङ्गळं अस्तु । शयनादुत्तिष्ठ । हे प्रजापते राजन्, त्वयि निद्रातीति निद्रान् तस्मिन्निद्राति, निद्रां कृत्वा स्थितवति सतीत्यर्थः, सर्वाः प्रजाः निद्रान्ति निद्रां कुर्वन्ति । कर्तव्यकार्ये उद्युक्ता न भवन्तीत्यर्थः । कर्तव्यकार्ये अलसा भवन्तीत्यर्थः । निपूर्वः द्रा कुत्सायां गतौ लट् । त्वयि जागर्तीति जाग्रत् तस्मिन् जाग्रति, जागरणं कुर्वति सति, सर्वाः प्रजाः जाग्रति जागरणं कुर्वन्ति । जागृ निद्राक्षये लट् ॥ ३ ॥

(सं.चं.) उत्तिष्ठ जागृहि । त्वयि निद्रां कुर्वति प्रजा अपि निद्रान्ति । त्वयि जाग्रति ता अपि जाग्रति । प्रजापतिर्हि भवान् । पतिर्यत् कुरुते तल्लोकोऽनुवर्तते । यथा राजा तथा हि प्रजाः ॥ ३ ॥

सामन्ता मन्त्रिपूर्वाश्च सर्वाः प्रकृतयस्तथा[१] ।
महोत्सवोत्सुका[२] हि त्वां प्रतीक्षन्ते सभातळे ॥ ४ ॥

(भा.दी.) सामन्ता इति । सामन्ता मण्डलाधिपतयः, मन्त्रिणः पूर्वे यासां तास्तथा सर्वाः प्रकृतयश्च अमात्यादिसप्तप्रकृतयश्च[३] महान् य उत्सवस्तस्मिन् उत्सुकाः कौतुकयुक्ताः सभायास्तळं प्रदेशस्तस्मिन् (त्वां) प्रतीक्षन्ते त्वदागमनं प्रतीक्ष्य तिष्ठन्तीत्यर्थः ॥ ४ ॥

(सं.चं.) समन्तायाः स्वपुराव्यवहितभूमेरिमे राजानः सामन्ताः अधीननृपाः । मन्त्रिपूर्वाः प्रकृतयः प्रजाः । रामाभिषेकमहोत्सवदर्शनोत्सुकाः । त्वां प्रतीक्षन्ते तवाऽगमनं प्रतीक्षन्ते ॥ ४ ॥

सर्वान् सम्भृत्य सम्भारानाभिषेचनिकानिह ।
वसिष्ठाद्याश्च मुनयस्त्वरन्ते ते हिते रताः ॥ ५ ॥

(भा.दी.) सर्वानिति । वसिष्ठ आद्यो येषां ते तथा, ते तव हितं यत्कार्यं तस्मिन् रता मुनयश्च, अभिषेचनस्य सम्बन्धिन आभिषेचनिकास्तान् सर्वान् सम्भारान् साधनानि सम्भृत्य सम्पादयित्वा[४], इह सभातळे त्वरन्ते अभिषेकविषयेऽवहिता भवन्ति । त्वर त्वरणे लट् ॥ ५ ॥

(सं.चं.) वसिष्ठाद्या मुनयश्च त्वां प्रतीक्षमाणास्त्वरन्ते । अभिषेचनौपयिकान् पदार्थान् सम्भृत्य सङ्गृह्य सज्जाः । तव हिते हि ते रताः ॥ ५ ॥

---

१. **'प्रकृतयस्तव'**

२. **'महोत्सवोत्सुकदृशः प्रतीक्षन्ते'**

३. **'प्रकृतयः प्रजा इति वक्तुमुचितम् ।**

४. **'सम्पाद्य'** इति पर्याप्तम् ।

कृतस्वस्त्ययनः श्रीमान् रामस्तव नियोगतः ।
अलङ्कृतः सपत्नीक आस्ते कार्य्यं कुरु द्रुतम् ॥ ६ ॥

(भा.दी.) कृतेति । तव नियोगतः आज्ञातः कृतं स्वस्त्ययनं मङ्गल्यवचनं यस्य स तथा, श्रीमान् अलङ्कृतः श्रीरामः पत्न्या सीतया सहितः सपत्नीकः सन् आस्ते । आस उपवेशने लट् । अभिषेकलक्षणं यत्कार्यं तत् द्रुतं यथा भवति तथा कुरु ॥ ६ ॥

(सं.चं.) विप्रैः कृतस्वस्तिपुण्याहवाचनः । तव नियोगतः सज्ज आस्ते । अतः यदनन्तरकरणीयं तत् कुरु । द्रुतम्, यथा न मुहूर्तातिपातः स्यात् ॥ ६ ॥

सचिवस्य वचः श्रुत्वा लज्जाशोकाकुले नृपे ।
अवाङ्मुखे मौनवति प्रोचे सा कैकयात्मजा[1] ॥ ७ ॥

(भा.दी.) सचिवेति । सचिवस्य भृत्यस्य सुमन्त्रस्य वचः श्रुत्वा, लज्जा च शोकश्च ताभ्यामाकुले व्याकुले, अत एव अवाक् अधो मुखं यस्य स तथा तस्मिन् दशरथे मौनवति सति, केकयस्य केकयविषयाधिपते-रश्वपतेरात्मजा पुत्री सा कैकेयी प्रोचे ॥ ७ ॥

(सं.चं.) सर्वेषु कार्येषु सचते समवेतो भवतीति सचिवः सहवर्ती सहायकः । श्रुत्वाऽपि अवाङ्मुखे मौनवति नृपे । कुतः? लज्जाशोकाकुलत्वात् । लज्जयाऽवाङ्मुखः । शोकेन वक्तुमप्रभवन् मौनी । केकयानां राजा कैकयः । 'जनपदशब्दात् क्षत्रियादञ्' (अ.सू.४.१.१६८) ॥ ७ ॥

रामहर्षेण राजेन्द्रो जागर्त्ति स्म निशामिमाम् ।
तस्मान्नूनं सनिद्रोऽसौ त्वं शीघ्रं राममानय ॥ ८ ॥

(भा.दी.) रामेति । राजेन्द्रः दशरथः रामस्य हर्षः रामहर्षस्तेन, श्रीरामस्य यौवराज्याभिषेकनिमित्तकहर्षेणेत्यर्थः, इमां निशां जागर्ति स्म अजागरीत् । जागृ निद्राक्षये लट् । तस्मात् असौ दशरथः नूनमिदानीं सनिद्रः निद्रया सहितः । त्वं श्रीरामं शीघ्रं यथा भवति तथा आनय ॥ ८ ॥

(सं.चं.) रामोऽभिषेक्ष्यत इति हर्षेण । रामेण यो हर्षः । रामस्य वा सम्बन्धी हर्षः । रामे वा विषये हर्षः । निशामिमाम् । अत्यन्तसंयोगे द्वितीया । समग्रां निशाम् । जागर्ति स्म अजागः । नूनमिति तर्के ।

१. **'केकयात्मजा'** इति वि.ती.पाठ इति भाति ।

तस्मादिदानीं जातनिद्र इति तर्कयामि । निश्चये वा । इदानीमित्यर्थेऽपि नूनमिति पदं पठन्ति वैदिकाः । निश्चितमिदानीं जातनिद्रः । तेन राममेवेह शीघ्रमानय ॥ ८ ॥

मन्त्री मत्वा वचः सत्यं तयेति समुदाहृतम् ।
निर्गतः प्रैक्षत द्वारि मन्त्रिणः सपुरोहितान् ॥ ९ ॥

(भा.दी.) मन्त्रीति । मन्त्री सुमन्त्रः तया इति समुदाहृतमुक्तं वचः सत्यं मत्वा, श्रीरामानयनोद्देशेन निर्गतः सन्, द्वारि द्वारे । 'स्त्रीर्द्वार्द्वारं प्रतीहारः' इत्यमरः । सपुरोहितान् वसिष्ठसहितान् मन्त्रिणः प्रैक्षत । ईक्ष दर्शनाङ्कनयोः लङ् ॥ ९ ॥

(सं.चं.) तया इति समुदाहृतं वचः सत्यं मत्वा । तया समुदाहृतं वचः सत्यमिति मत्वेति वा । सभा-द्वारि । अन्तःपुरद्वारि वा ॥ ९–१० ॥

उदेति देवः सविता सम्भारः सम्भृतोऽखिलः ।
आवेदयाऽशु राजानं स तैरित्यभ्यभाष्यत[१] ॥ १० ॥

(भा.दी.) उदिति । देवः सविता उदेति उदयं प्राप्नोति । इण् गतौ लट् । अखिलः सम्भारः अभिषेकसाधनद्रव्यं सम्भृतः सम्पादितः । आशु राजानं प्रति आवेदय विज्ञापय । विद ज्ञापनाख्याननिवासनेषु[२] लोट् । तैः मन्त्रिभिः सः सुमन्त्रः इति अभ्यभाष्यत । भाष व्यक्तायां वाचि लङ् ॥ १० ॥

ततः सुमन्त्रः सम्भ्रान्तः कालस्यात्ययशङ्कया ।
पुनरन्तःपुरं गत्वा स्तुवन्[३] भूपमबोधयत् ॥ ११ ॥

(भा.दी.) तत इति । ततः कालोऽभिषेकसमयस्तस्य अत्ययशङ्कया सम्भ्रान्तः सुमन्त्रः पुनः अन्तःपुरं गत्वा भूपं स्तुवन् सन् अबोधयत् । बुधिर् अवबोधने[४] लङ् ॥ ११ ॥

(सं.चं.) सम्भ्रमस्त्वरा । सम्भ्रमः साध्वसम् । कालोऽत्येतीति शङ्कया भीतः । अत एव सत्वरः ॥ ११ ॥

---

१. **'तैरित्यभिभाषितः'**

२. **'विद ज्ञाने'** इति वक्तुमुचितमित्युक्तम् ।

३. **'स्तुवन् नृपमबो-'**

४. **'बुध अवगमने'** इत्यपि शक्यम् वक्तुम् ।

महेन्द्रसख राजेन्द्र महासुरनिबर्हण ।
आयुष्मन् रामजनक क्षिप्रमुद्बुद्ध्यतां त्वया ॥ १२ ॥

(भा.दी.) महेति । महेन्द्रस्य सखा महेन्द्रसखस्तत्सम्बुद्धिः । सख्ये निमित्तमाह– **महे**ति । महान्तो ये असुरास्तान्निबर्हयति विनाशयतीति तथोक्तस्तत्सम्बुद्धिः । आयुः सम्पूर्णमायुरस्यास्तीति तथा तत्सम्बुद्धिः । रामजनक रामपितः, राजेन्द्र दशरथ, त्वया क्षिप्रं यथा भवति तथा उद्बुध्यतां प्रबोधः प्राप्यताम् । बुधिर् अवबोधने[1] लोट् ॥ १२ ॥

(सं.चं.) महेन्द्रप्रियार्थं कृते युद्धे महासुरनिबर्हणः । निबर्हयति नाशयतीति निबर्हणः । बर्ह हिंसायाम् । महेन्द्रः प्रिय इत्यसुरान् न्यबर्हयः । निबर्हणेन पुनस्तस्य प्रियः सखाऽभवः । आयुष्मन्निति सुमन्त्रस्य वयोज्येष्ठत्वमाह ॥ १२ ॥

सुमन्त्रस्तुतिवाक्यानि कैकेयीक्रूरवाक्यतः[2] ।
राज्ञोऽतिदुःसहान्यासन् रामविश्लेषशङ्किनः ॥ १३ ॥

(भा.दी.) सुमन्त्रेति । सुमन्त्रस्य स्तुतिरूपाणि वाक्यानि, कैकेय्याः यत् क्रूरं वाक्यं प्रागुक्तं तस्मादिति ततः, रामस्य विश्लेषो वियोगस्तमाशङ्कितुं शीलमस्यास्तीति तथा तस्य राज्ञः, अतिदुःसहानि अत्यन्तं श्रोतुमसह्यानि आसन् ॥ १३ ॥

(सं.चं.) क्रूरवाक्यादपि स्तुतिवाक्यानि दुःसहान्यासन् । स्तुतिरियं विफला भविष्यति निन्दान्ता च तथ्ये विदिते सतीति ॥ १३ ॥

महीशो मन्त्रिणं स्माऽह[3] मृतकं स्तौषि किं सखे ।
जीवन् क्षणं च पश्यामि राममानय मङ्क्षिति ॥ १४ ॥

(भा.दी.) महीति । महीशः दशरथः । हे सखे सुमन्त्र, मृतकं शवसमं मां किं किमिति स्तौषि स्तोत्रं करोषि? ष्टुञ् स्तुतौ लट् । क्षणः क्षणकालस्तं च जीवन् अहं श्रीरामं पश्यामि । मङ्क्षु क्षिप्रं श्रीराममानय आकारय, इति मन्त्रिणं आह स्म अब्रवीत् ॥ १४ ॥

---

१. **'बुध अवगमने'** इत्यपि शक्यं वक्तुम् । २. **'कैकेय्याः क्रूरवाक्यतः'** ३. **'मन्त्रिणं प्राह'**

(सं.चं.) मृतकं मृतकल्पम् । सादृश्यार्थे कन् । मङ्क्षु क्षिप्रम् । यावता जीवामि । जीवंश्च तं क्षणकालमपि पश्यामि ॥ १४ ॥

ततः किञ्चिदपक्रम्य[१] किमेतदिति दुर्म्मनाः ।
चिन्ताक्रान्तः[२] सुमन्त्रोऽथ[३] रामधाम द्रुतं ययौ ॥ १५ ॥

(भा.दी.) तत इति । ततः दशरथस्य समीपात् किञ्चित् अपक्रम्य परागागत्य एतत् एवं कथनं किं किन्निमित्तं इति दुःखयुक्तं मनो यस्य स दुर्मनाः, अत एव चिन्ताक्रान्तः सुमन्त्रः, अथ रामधाम प्रति द्रुतं यथा भवति तथा ययौ ॥ १५ ॥

(सं.चं.) अपक्रम्य अपसृत्य । राज्ञस्तामवस्थां द्रष्टुमपारयन् । 'प्रगृहीताञ्जलिः किञ्चित् तस्माद् देशाद-पाक्रमत्' इति रामायणे । किमेतत् सञ्जातमिति निश्चेतुमपारयन् दुःखितमनाः । किं करणीयमिति चिन्ता-क्रान्तः ॥ १५ ॥

हृष्टपुष्टजनं वप्रैः सौवर्ण्णैः सप्तभिर्य्युतम्[४] ।
पुरमिन्द्रपुराक्षिप्नु[५] वैकुण्ठोपममाविशत् ॥ १६ ॥

(भा.दी.) हृष्टेति । हृष्टाः सन्तुष्टाः । (पुष्टाः) स्वेष्टलाभेनाभिवृद्धा जना यस्मिन् तत्तथोक्तं तत् । सुवर्णस्य विकारभूतानि सौवर्णानि तैः सप्तभिः वप्रैः प्राकारैः युतं युक्तम् । पुरन्दरस्य पुरं मन्दिरं तदाक्षेप्तुं शीलमस्यास्तीति तथोक्तं तत् । 'अगारे नगरे पुरम्' इत्यमरः । अत एव वैकुण्ठस्य उपमा यस्य तत्तथा तत् । श्रीराममन्दिरं आविशत् ॥ १६ ॥

(सं.चं.) सर्वसाधनपूर्णं राजगृहं पुरम् । हृष्टाः सन्तुष्टाः । पुष्टाः समृद्धाः । सप्तभिर्वप्रैः प्राकारैर्युतम् । 'वप्रश्चाऽवरणे वृन्दे प्राकारे' इत्यभिदधति । इन्द्रपुरं स्वशोभया क्षिपति निराकरोति । बहवो वैयाकरणाः 'क्षिप्णु' इति पठन्ति । युक्तं च षात् परस्य णत्वम् । अथापि वृद्धाः 'क्षिप्नु' इत्येव पठन्ति । सुषुम्नेति-वत् । वैकुण्ठोऽपि सर्वथा हृष्टपुष्टजनः । भूरादिसत्यलोकान्तैः सप्तभिरावरणोपमैर्लोकैर्युतः । तेऽपि शास्त्रगतशोभनवर्णैः वर्णिता इति सौवर्णाः ॥ १६ ॥

---

१. '–दपाक्रम्य' २. 'चिन्ताभ्रान्तः' ३. 'सुमन्त्रोऽपि रामधाम'
४. 'सप्तभिर्वृतम्' ५. 'पुरक्षिप्नु'

ददर्श देवं सौवर्ण्णे पर्य्यङ्के[१] राङ्कवास्तृते ।
आसीनं चन्दनेनाक्तं वराहरुधिरत्विषा ॥ १७ ॥

(भा.दी.) **ददर्शेति** । सुवर्णस्य विकारः सौवर्णस्तस्मिन्, रङ्कुः हरिणस्तस्य सम्बन्धि राङ्कवं एणचर्म तेन आस्तृतस्तस्मिन् पर्यङ्के आसीनम्, वराहस्य रुधिरं रक्तं तद्वत् त्विट् कान्तिर्यस्य तत्तथोक्तं तेन चन्दनेन अक्तं लेपितं देवं श्रीरामं ददर्श ॥ १७ ॥

(सं.चं.) राङ्कवमूर्णादिकृतं कम्बलादिकम् । यद्यपि रङ्कुशब्दो मृगविशेषवचनः । अथापि यद्रोमभिः सूक्ष्म-वस्त्रादिकं वयन्ति स सर्वोऽपि मृगोऽत्र रङ्कुपदार्थ इति वैयाकरणाः । पर्यङ्के मञ्च आसीनम् । चन्दनस्य लौहित्यं वराहरुधिरेण शशरुधिरेण चोपमिमते कवयः ॥ १७ ॥

सीतया सेवितं देव्या चारुचामरहस्तया ।
द्रष्टुमिच्छति राजा त्वामित्यूचे स प्रणम्य तम्[२] ॥ १८ ॥

(भा.दी.) **सीतयेति** । सः सुमन्त्रः, चारु यच्चामरं तत् हस्ते यस्याः सा तथा तया सीतया देव्या सेवितं तं श्रीरामं प्रणम्य, हे राम, त्वां राजा दशरथः द्रष्टुं इच्छति इति एवमादिप्रकारेण तं श्रीरामं ऊचे ॥ १८ ॥

(सं.चं.) चामीकरदण्डतया चारु चामरम् । चमरीमृगपुच्छरोमगुच्छकं बालव्यजनम् । चामरहस्तया देव्या चारु सप्रणयं सभक्त्युन्मेषं सेवितमिति वा । प्रणम्य राजपुत्रोचितैः स्तुतिवचनैरभिनन्द्य । मनसा भक्तिपूर्वं प्रणम्य च ॥ १८ ॥

आरुरोह रथं रामः[३] प्रभाकरसमप्रभम् ।
अभिनन्द्याथ मैथिल्या अपाङ्गं विश्वमङ्गलम्[४] ॥ १९ ॥

(भा.दी.) **आरुरोहेति** । अथ श्रीरामः, मैथिल्याः सीतायाः, विश्वस्य जगतो मङ्गलं यस्मात् स तथोक्तस्तम्, अपाङ्गं अभिनन्द्य स्वविलासप्रदर्शनेन सन्तोषं जनयित्वा, प्रभाकरेण सूर्येण समा प्रभा यस्य स तथा तं रथम् आरुरोह । रुह बीजजन्मनि प्रादुर्भावे च लिट् ॥ १९ ॥

(सं.चं.) अपाङ्गं विश्वमङ्गलम् । 'विश्वस्थितिप्रळयसर्गमहाविभूतिवृत्तिप्रकाशनियमावृतिबन्धमोक्षाः । यस्या अपाङ्गलवमात्रत ऊर्जिता सा श्रीः' इत्याचार्यवचनम् ॥ १९ ॥

---

१. **'सौवर्णपर्यङ्के'** २. **'सम्प्रणम्य तम्'** ३. **'रामो दिवाकरसम–'** ४. **'अपाङ्गैर्विश्वमङ्गलैः'** इति भ्रान्तः पाठः ।

पुरात् पुरुषसिंहोऽयं महासिंहो बिलादिव[1] ।
निर्जगाम जगन्नाथो नानाभटगणैर्युतः[2] ॥ २० ॥

(भा.दी.) पुरादिति । पुरुषसिंहः पुरुषश्रेष्ठः जगन्नाथः नानाविधा ये भटास्तेषां गणास्तैः युतः अयं श्रीरामः । गुहात् गुहायाः । यद्यपि गुहाशब्दः स्त्रीलिङ्गः । तथाऽपि–'विनिर्गतौ गृहात् तस्मात् सिंहाविव महा-गुहात् । राजद्वारि स्थितं नागं हेमाद्रिशिखरोपमम्' इति पाद्मे प्रयोगात् पुल्लिङ्गोऽपि साधुः । बिलादिति क्वचित् पाठः । महासिंह इव, पुरं मन्दिरम् तस्मात् निर्जगाम निस्सृतोऽभूत् ॥ २० ॥

(सं.चं.) 'महासिंहो गुहादिव' इति पठन्ति । प्रायः पण्डिताचार्यो लोकेष्वप्रयुक्तानि पदानि न प्रयुङ्क्ते । तेन 'बिलादिव' इत्येव मूलपाठ इति युक्तम् । 'बिलं रन्ध्रे गुहायां च' इति हैमः । 'शूरो वीरश्च विक्रान्तो भटः' इति हलः । भटाः युद्धकुशलाः ॥ २० ॥

रम्याणि हर्म्याण्यारुह्य रामा रामं निरीक्ष्य च ।
परस्परमिति स्माऽहुः पुरुषाश्च समन्ततः[3] ॥ २१ ॥

(भा.दी.) रम्याणीति । रामाः स्त्रियः रम्याणि हर्म्याणि आरुह्य, श्रीरामं निरीक्ष्य च, पुरुषाश्च श्रीरामं निरीक्ष्य समन्ततः सर्वतः परस्परं इति आहुः स्म अवदन् । ब्रूतेर्लट् ॥ २१ ॥

(सं.चं.) रामाः पुरुषाश्च । परस्परं रामा रामाभिः पुरुषैश्च । पुरुषाः पुरुषै रामाभिश्च ॥ २१ ॥

सीमन्तिनी न सीतायाः समाऽस्ति भुवनत्रये ।
राघवं वल्लभं लेभे या मुकुन्दमिवेन्दिरा ॥ २२ ॥

(भा.दी.) सीमन्तिनीति । भुवनानां त्रयं तस्मिन् । सीतायाः समा, सीमन्त अस्या अस्तीति सीमन्तिनी, सभर्तृकस्त्रीत्यर्थः । 'सीमन्तः कथ्यते स्त्रीणां केशमध्ये तु पद्धतिः' इति हलः । नास्ति । अस्तेर्लट् । कुत इत्यत आह– **राघवमि**ति । या सीता, मुकुन्दं श्रीहरिं इन्दिरेव, वल्लभं भर्तारं राघवं श्रीरामं लेभे । डु लभष् प्राप्तौ लिट् ॥ २२ ॥

(सं.चं.) किमिति स्माऽहुः– सीमन्तिनी ॥ २२–३ ॥

---

१. **'गुहादिव'** इति वि.ती.पाठः । २. **'–गणैर्वृतः'** ३. **'–मिति प्राहुः पुरुषाश्च ततस्ततः'**

कौसल्यया नृपेणापि किन्नु तत् सुकृतं कृतम् ।
[१]रामं वत्सेति यावेनं समाश्लिष्याभिनन्दतः[२] ॥ २३ ॥

(भा.दी.) कौसल्ययेति। कौसल्या (राज्ञी) तया, नृपेण दशरथेनापि, तत् श्रीरामस्य पुत्रत्वहेतुभूतं सुकृतं पुण्यं किं नु किं वा कृतम्? को वाऽतिशयोऽनयोरित्यत आह– **रामे**ति। यौ कौसल्यादशरथौ भो राम, वत्स इति, एनं श्रीरामं समाश्लिष्य अभिनन्दतः सन्तोषं प्राप्नुतः ॥ २३ ॥

मानुषाइव पीयूषं धनं भूरीव निर्द्धनाः[३] ।
लब्ध्वा रामं सुराजानं हन्त[४] मोदामहेऽधुना ॥ २४ ॥

(भा.दी.) मानुषा इति । मानुषाः, पीयूषमिव अमृतमिव, न विद्यते धनं यस्य स निर्धनः पुरुषः धनं भूरीव बहुधनमिव, वयं शोभनश्चासौ राजा च सुराजा तम्, 'न पूजनात्'(**अ.सू.**५.४.६९) इति निषेधात् समासान्तप्रत्ययाभावः, श्रीरामं लब्ध्वा अधुना मोदामहे ॥ २४ ॥

(सं.चं.) मानुषाः पीयूषमिव निर्धना भूरि धनमिव वयं रामं सुराजानं लब्ध्वा। पूजार्थाभ्यां स्वतिभ्यां परस्य राजशब्दस्य टजभावः । 'पूजायां स्वतिग्रहणं कर्तव्यम्' इति वार्त्तिकम् (**अ.सू.**५.४.६९)। हन्तेति सम्प्रहर्षे सम्भ्रमे च ॥ २४ ॥

एवं विचित्रा मोदेन[५] वाचः प्रब्रुवतो जनान् ।
सस्मितेन कटाक्षेण लाळयन् प्रययौ प्रभुः ॥ २५ ॥

(भा.दी.) एवमिति । मोदः श्रीरामदर्शनजन्यसन्तोषस्तेन, एवं विचित्रा वाचः प्रब्रुवतः, जनान्, प्रभुः स्वामी, 'समर्थेऽधिपतौ प्रभुः' इति वैजयन्ती, श्रीरामः सस्मितेन स्मितसहितेन, कटाक्षेण अपाङ्गदर्शनेन, 'कटाक्षोऽपाङ्गदर्शनम्' इत्यमरः, लाळयन् मानयन् सन् प्रययौ ॥ २५ ॥

(सं.चं.) रामदर्शनजनितमोदेन विचित्रा वाचः। विचित्रेण वाऽऽमोदेन। लाळयन् प्रीत्याऽभिनन्दन् ॥२५॥

प्रविश्य राजभवनं देवराजगृहोपमम् ।
ववन्दे पितरं देवः[६] कैकेयीमपि मातरम् ॥ २६ ॥

१. **'राम वत्सेति'** इति वि.ती.पाठः । २. **'समाश्लिष्याभ्यनन्दताम्'** ३. **'निर्धनः'** इति वि.ती.पाठः।
४. **'सुराजानं वयं मोदामहे'** इति वि.ती.पाठः। ५. **'विचित्रमोदेन'** ६. **'पितरं रामः'**

(भा.दी.) प्रविश्येति । देवः श्रीरामः देवानां राजा देवराज इन्द्रस्तस्य यद्गृहं तस्य उपमा यस्य तत्तथोक्तं तत्, राजभवनं राजमन्दिरं तत्, प्रविश्य (पितरं) दशरथं मातरं कैकेयीमपि ववन्दे । वदि अभिवादनस्तुत्योर्लिट् ॥ २६ ॥

(सं.चं.) वैकुण्ठोपमं रामधामेत्युक्तम् । अतः देवराजगृहोपमं दशरथधामेत्याह ॥ २६ ॥

आयुष्मान् भव[१] वत्सेति विवक्षोरपि भूपतेः ।
वचनं नागलद् वक्त्रान्नेत्राभ्यामगलज्जलम्[२] ॥ २७ ॥

(भा.दी.) आयुरिति । हे वत्स, त्वं आयुष्मान् भव । भूधातोर्लोट् । वक्तुमिच्छतीति विवक्षति विवक्षतीति विवक्षुस्तस्य, वक्तुमिच्छावतोऽपीत्यर्थः, भूपतेः वक्त्रं मुखं तस्मात् वचनं न अगलत् न निःसृत-मभूत् । [३]गल अदने लङ् । नेत्रे चक्षुषी ताभ्यां जलं अस्रं अपतत् । पत्ऌ पतने लङ् ॥ २७ ॥

(सं.चं.) अगलत् अस्रवत् । कोऽयं धातुः? 'गल अदने' इति धातोरिदं रूपमिति वदन्ति । स्रवणे चेति वक्तव्यम् । उवाच हि क्षीरस्रामी–'गल अदने । स्रवणेऽपि । अनेकार्थत्वात्' इति ॥ २७ ॥

पितुस्तं शोकमालक्ष्य कैकेयीं पृच्छति स्म सः ।
जानंश्च सर्वं सर्वेशो लोकमेवं[४] विडम्बयन् ॥ २८ ॥

(भा.दी.) पितुरिति । सर्वेशः (सः) श्रीरामः, सर्वं[५] स्वपरगताखिलप्रमेयजातं तत्, जानंश्च जानन्नपि, एनं नरलोकस्थं लोकं जनं विडम्बयन् अनुकुर्वन् सन् । न त्वज्ञानेनेति भावः । पितुः दशरथस्य तं शोकं आलक्ष्य ज्ञात्वा कैकेयीं पृच्छति स्म अपृच्छत् । प्रच्छ ज्ञीप्सायां लट् ॥ २८ ॥

(सं.चं.) आलक्ष्य अवलोक्य । एवमज्ञलोकं विडम्बयन् मोहयन् । अथच लोकसङ्ग्रहाय स्वयमपि लोकाचार-मनुकुर्वन् ॥ २८ ॥

---

१. **'आयुष्मन् भव'** इति भ्रान्तः पाठः ।   २. **'–भ्यामपतज्जलम्'** इति वि.ती.पाठः ।

३. **'अगलत्' गॄ निगरणे इति धातोर्लङ् । अगरदित्यत्र रेफस्य लत्वे अगलदिति भवति'** इति का.श्री. । असङ्गतमिदम् । गॄधातोर्लङि अगिरदिति रूपम् । नत्वगरदिति । तेन रेफस्य लत्वे 'अगिलत्' इति रूपं स्यात् । नतु 'अगलत्' इति । 'गृ सेचने' इति तु स्यात् । तस्य लङि 'अगिरत्' इति रूपम् । लत्वे 'अगलत्' इति स्यात् ।

४. **'लोकमेनम्'** इति वि.ती.पाठः ।   ५. 'सर्वं कालत्रयवर्ति पदार्थजातम्' इति च ।

किमम्ब दुःखं तातस्य किमागो मयि पश्यति ।
किं त्वयाऽऽगः कृतं मानात् सत्यं ब्रूहि सुताय मे[१] ॥ २९ ॥

(भा.दी.) किमिति । हे अम्ब मातः, 'अम्बार्थनद्योर्ह्रस्वः'(अ.सू.७.३.१०७) इति ह्रस्वः । तातस्य पितुः दुःखं किं किन्निमित्तम्? मयि किं आगः अपराधस्तत् पश्यति? त्वया मानात्, भर्तुः प्रियाऽस्मीति यो मानो गर्वस्तस्मात्, किं आगः अपराधः कृतम्? सुताय मे मह्यं सत्यं वचः ब्रूहि । ब्रूञो लोट् ॥ २९ ॥

(सं.चं.) किमागः कमपराधं मयि पश्यति? अथ च मयि किमप्यागः पश्यति किम्? येन विमनायते । त्वया कृतं किमागः पश्यति? अथवा त्वया किमप्यागः कृतं किम्? आत्मसम्भावना मानः ॥ २९ ॥

वाणीमाकर्ण्य रामस्य शठा कठिणमानसा[२] ।
कैकेयी कैतवप्रज्ञा सस्मितं तमभाषत[३] ॥ ३० ॥

(भा.दी.) वाणीमिति । कैतवा कपटा प्रज्ञा बुद्धिर्यस्याः सा तथा, कठिनं मानसं मनो यस्याः सा तथा, कैकेयी श्रीरामस्य वाणीं आकर्ण्य । शठः शाठ्यं तस्मात् । भावप्रधानोऽयं निर्देशः । बुद्धिकौटिल्या-दित्यर्थः । स्मितेन सहितं यथा भवति तथा सस्मितम्, तं श्रीरामं अभाषत ॥ ३० ॥

(सं.चं.) मुखे गौरन्तर्व्याघ्रः कितव उच्यते । पिहिता वञ्चकता कैतवम् । कैतवोपेता प्रज्ञाऽस्याः । अत एव कठिणमानसा कठिणं परहिंसायामानन्ददृक् निर्दयं मानसमस्याः । अथापि सस्मितभाषणा । स्मितेन स्वकैतवं पिधायाभाषत । अयुक्तेन क्रूरेणापि विधानेन स्वकार्यसाधकता शाठ्यम् ॥ ३० ॥

न त्वयाऽऽगः कृतं पुत्र न मया नापरेण वा[४] ।
राजा मह्यं[५] वरौ दत्वा त्वद्भयादनुतप्यते ॥ ३१ ॥

(भा.दी.) नेति । हे पुत्र श्रीराम, त्वया आगः अपराधः न कृतम् । मया वा आगः न कृतम् । अपरेण वा पुरुषेण आगः न कृतम् । तर्हि दुःखे किं निमित्तमित्यत आह– **राजे**ति । राजा दशरथः मम, मह्यमिति क्वचित् पाठः, वरौ दत्वा, त्वत्तः भयं त्वद्भयं तस्मात्, त्वयि स्नेहभङ्गभयादित्यर्थः, अनुतप्यते अनुतापं प्राप्नोति । तप सन्तापे लट् दिवादिः ॥ ३१ ॥

---

१. **'सुताय ते'** २. **'शठात् कठिनमानसा'** इति वि.ती.पाठः । **'शठा गूढद्वेषिणी'** इति का.श्री. ।
३. **'सस्मितं समभाषत'** ४. **'नापरेण च'** ५. **'राजा मम वरौ'** इति.वि.ती.पाठः ।

(सं.चं.) त्वमङ्गीकरोषि वा नवेति भयात्। ननु दशरथस्य न तादृशी संशीतिरास। 'श्रुत्वैव वरदानं मे रामः क्षिप्रं गमिष्यति' इति ह स्माऽह। सत्यमाह तथा दशरथः। इदमिह तु कैकेयीवचनम्। सा रामविषये शङ्किता स्वामाशङ्कां दशरथेऽप्यारोपयामास। 'त्वद्वियोगभयात्' इति केचित्। सन्देहगर्भा प्रवृत्तावधीरता भयम्। 'ఉలుకు' इति भाषायाम्। अनुतप्यते पश्चात्तापेन अन्तर्दाहमनुभवति कुकूलमध्यपतित इव। तप दाहे॥ ३१॥

यदि तात स्वताते ते भवेद् भक्तिरकैतवा[१]।
धर्म्मकृच्छ्रादिमं पाहि वक्ष्ये त्वं चेत् प्रतिश्रवी ॥ ३२ ॥

(भा.दी.) यदीति। हे तात श्रीराम, यदि स्वताते स्वपितरि, ते तव, न विद्यते कैतवं कापट्यं यस्याः सा तथा भक्तिः भवेत्। अकैतवादिति पाठे निर्व्याजादित्यर्थः। तर्हि धर्मस्य कृच्छ्रं कथं कर्तव्यमिति सङ्कटं तस्मात् इमं दशरथं पाहि[२]। तौ वरौ वक्तव्यावित्यत आह– **वक्ष्य** इति। चेद्यदि त्वं प्रतिश्रवः प्रतिज्ञा अस्यास्तीति प्रतिश्रवी, तौ वरौ श्रुत्वा तथा करिष्यामीति प्रतिज्ञां करोषीत्यर्थः, तर्हि वक्ष्ये॥ ३२॥

(सं.चं.) तातेति प्रीतिपूर्वं सम्बोध्य राममावर्जयतीव। धर्मे कृच्छ्रं सङ्कटम्। इदमदो वा धर्मसम्मतमित्यनिर्णयः। त्वं प्रतिश्रवी चेत्, यदि पित्रोक्तं पालयिष्यामीति प्रतिजानासि, तर्हि वक्ष्ये॥ ३२॥

इत्युक्त ऊचे भगवान् न कुर्य्यां किं[३] पितुः प्रियम्।
पिबेयं कालकूटं वा[४] विशेयं ज्वलितानलम् ॥ ३३ ॥

(भा.दी.) इतीति। कैकेय्या इति उक्तः भगवान् श्रीरामः, चेद्यदि पितुः प्रियं कर्म न कुर्याम्। कृञ्धातोर्लिङ्। तर्हि कालकूटं विषं तत् पिबेयम्। ज्वलितोऽनलोऽग्निस्तं वा विशेयम्॥ ३३॥

(सं.चं.) पितुः प्रियं किमिति न कुर्याम्? कुर्यामेव। यदि पितुः प्रियं पिबेयं कालकूटम्। प्रविशेयं ज्वलन्तमनलम्। पित्रर्थे जीवितमपि जह्यामित्येतत्॥ ३३॥

---

१. **'भक्तिरकैतवात्'**

२. **'राजा यदि मह्यं वरौ दद्यात् तवाप्रियं भवति। यदि न दद्यात् तदा प्रतिज्ञाभङ्गो भवतीति पक्षद्वयेऽपि बाधकसत्त्वात् धर्मकृच्छ्रं द्रष्टव्यम्'** इति का.श्री.।

३. **'न कुर्यां चेत् पितुः प्रियम्'** इति वि.ती.पाठः।

४. **'–कूटं तु विशेयम्'**

मातः क्षमापय क्षिप्रं क्षमावन्तं क्षमापतिम् ।
पित्रा [१]प्रत्तौ वरौ तुभ्यं मया सत्यं प्रतिश्रुतम् ॥ ३४ ॥

(भा.दी.) मातरिति । हे मातः कैकेयि, क्षमा अस्यास्तीति क्षमावान् तम्, क्षमायाः भुवः पतिं दशरथम्, क्षिप्रं यथा भवति तथा क्षमापय मन्निमित्तकानुतापात् क्षमावन्तं कुरु । क्षमूष् सहने लोट् । वरविषये तु मया प्रतिज्ञायत इत्याह– **पित्रे**ति । पित्रा (तुभ्यं) प्रत्तौ प्रदत्तौ वरौ, मया सत्यं यथा भवति तथा प्रतिश्रुतं प्रतिज्ञातम् ॥ ३४ ॥

(सं.चं.) मदर्थे त्वमेव क्षमामभ्यर्थय । अकस्मात् तवानुतापहेतुश्चेदपि रामस्त्वया क्षन्तव्य इति सान्त्वय । स नूनं क्षमिष्यते । यतः स निसर्गतः क्षमावान् । मम पित्रा तुभ्यं वरौ दत्तौ । मया च सत्यं निष्कपटं प्रतिश्रुतम्, पित्राज्ञां पालयिष्यामीति । अत्र किञ्चित् पाठवैयाकुल्यमिव दृश्यते । 'पित्रा यौ तौ (द्वौ) वरौ दत्तौ' इति वा पाठः । पित्रा दत्तौ यौ वरौ तौ मया दत्ताविति गृहाण । नेदमौपचारिकं वचः । यतः सत्यं यथार्थमेव मया प्रतिज्ञातमिति ॥ ३४ ॥

प्रभुणैवं[२] प्रतिज्ञाते सा पापा व्याललाप तम्[३] ।
त्वत्पित्रा मे वरौ प्रत्तौ[४] पालितेन पुरा मया ॥ ३५ ॥

(भा.दी.) प्रभुणेति । प्रभुणा श्रीरामेण एवं प्रतिज्ञाते सति । पापा क्रूरा । 'पापः स्यात् क्रूरपाप्मनोः' इति वैजयन्ती । सा कैकेयी तं श्रीरामं प्रति, पुरा पूर्वं देवासुरयुद्धसमय इत्यर्थः, मया पालितेन रक्षितेन त्वत्पित्रा दशरथेन मे मह्यं वरौ प्रत्तौ इति व्याललाप प्रोवाच । रप-लप व्यक्तायां वाचि लिट् ॥ ३५ ॥

(सं.चं.) विषम आलापो व्यालापः । पुरा मे वरौ दत्तौ । पुरा मया पालितेन । दानवैः सह युद्धे रक्षितेन ॥ ३५ ॥

इदानीं तौ वरौ दातुमुचितौ याचितौ मया ।
स्वयं दत्वाऽप्यहो मे त्वां सौजन्यान्न वदत्यसौ ॥ ३६ ॥

---

१. 'पित्रा दत्तौ' इति, 'पित्रा यौ तौ (द्वौ) वरौ दत्तौ' इति च ।
२. 'प्रभुणेति प्रतिज्ञाते' ।
३. 'विललाप तम्' ।
४. 'वरौ दत्तौ'

(भा.दी.) इदानीमिति । इदानीं दातुम् उचितौ तौ वरौ मया याचितौ । असौ तदानीं वरदाता स्वयं राजा मे मह्यं वरौ दत्वाऽपि, त्वां सौजन्यं स्नेहस्तस्मात् न वदति, त्वां प्रति न ब्रवीति ॥ ३६ ॥

(सं.चं.) मे दत्वाऽपि त्वां न वदति । कुतः? सौजन्यात् । परेषां खेदासहिष्णुता, अकस्मात् खेदजननेऽपि चित्तसङ्कोचः सौजन्यम् । तदिदं पितुः पुत्रे सौजन्यमित्यहो ॥ ३६ ॥

वने वस त्वं तपसा वत्सरान् नव पञ्च च ।
भरतः पातु पृथिवीमेतद् राज्ञोऽनुशासनम्[१] ॥ ३७ ॥

(भा.दी.) कौ तौ वरौ त्वया याचितावित्यत आह– **वन** इति । हे श्रीराम, त्वं नव नवसङ्ख्याकान् पञ्च च पञ्चसङ्ख्याकांश्च वत्सरान् तपसा, इत्थम्भूतलक्षणे तृतीया, तपः कुर्वन्नित्यर्थः, वने वस आवासं कुरु । वस निवासे लोट् । भरतः पृथिवीं पातु । एतत् राज्ञः अनुशासनं आज्ञा ॥ ३७ ॥

(सं.चं.) किं तत् तेनानुदितम्? आह– वने वस त्वं तपसा । इत्थम्भावे तृतीया । तपश्चरन् । एतद् वरद्वयम् ॥ ३७ ॥

इत्युक्त ऊचे काकुत्स्थो वनं यास्याम्यहं सुखम् ।
आनीयतां च भरतो दूतैः साध्वभिषिच्यताम् ॥ ३८ ॥

(भा.दी.) इतीति । कैकेय्या इति उक्तः काकुत्स्थः ककुत्स्थगोत्रे भवः श्रीरामः, अहं वनं प्रति सुखं यथा भवति तथा यास्यामि गमिष्यामि, भरतश्च दूतैः केकयदेशात् आनीयताम्, साधु सम्यक् यथा भवति तथा अभिषिच्यताम्, इति ऊचे ॥ ३८ ॥

(सं.चं.) साधु यथोचितम् ॥ ३८ ॥

निःसङ्गाः स्मो वयं [२]मातर्न्न तु प्राकृतधर्म्मिणः ।
किन्तु कस्मादिदं तातः स्वयं नाऽज्ञापयत्यहो ॥ ३९ ॥

(भा.दी.) निःसङ्गत्वाद् यौवराज्यापगमेऽपि न स्वस्य काऽपि हानिरित्याह– **निरि**ति । हे मातः कैकेयि, वयं न विद्यते सङ्गो विषयासक्तिर्येषां ते निस्सङ्गाः स्मः भवामः । अस्तेर्लट् । प्राकृतस्य पामरजनस्य

१. **'–मेतद् राजानुशानम्'**

२. **'मातर्न स्मः प्राकृतधर्मिणः'** इति वि.ती.पाठः स्यात् ।

धर्मः स्वभावः स एषामस्तीति तथोक्ताः, न स्मः न भवामः । तर्हि वनं प्रति गन्तव्यमित्यत आह– **किन्त्विति** । किन्तु तातः पिता स्वयम्, इदं वनं प्रति व्रजनम्, कस्मात् न आज्ञापयति न निरूपयति । अहो आश्चर्यम् । सर्वदा सम्भाषणीयस्य ममासम्भाषणीयत्वमिदानीमाश्चर्यं हि ॥ ३९ ॥

(सं.चं.) निःसङ्गाः सङ्गान्निर्गताः स्मः । 'असङ्गो ह्ययं पुरुषः' इति श्रुतिः । नतु प्राकृतलोकइव ग्राम्य-धर्मनिरताः । न प्रकृतिनिर्मितधर्माश्रया इति तु वास्तवम् । अप्राकृतगुणो हि सः । तातोऽपि मद्विषये सङ्कोच-मनुबभूवेत्यहो इति विस्मयते ॥ ३९ ॥

इत्युक्ता[१] सा खला प्रोचे[२] तव मानधनः पिता ।
लज्जया त्वां न वक्तीह गूढो भावोऽस्य चोच्यते ॥ ४० ॥

(भा.दी.) इतीति । इति उक्ता खला सा कैकेयी, तव मानः सत्कार एव धनं यस्य स तथा, मनसा कर्मणा वाचा च तव सत्कारे तात्पर्यवानित्यर्थः, पिता लज्जया वनं याहीति वचः कथं वक्ष्यामीति ह्रिया । इह प्रव्रजनविषये न वक्ति । अस्य त्वत्पितुः गूढ गूहितः भावः अभिप्रायः मया उच्यते । इति प्रोचे इत्यन्वयः ॥ ४० ॥

(सं.चं.) अभिमानधनस्तव पिता । पुत्रेण मच्छासने निराकृते मम मानभङ्गः स्यादिति सन्देहजनितः सङ्कोच एवात्र लज्जा । कैकेयीकल्पनेयम् । इहास्मिन् सङ्कटे । तस्मान्मयोच्यते । अहमेव हि तस्य गूढभावग्रहण-चतुरा । इदमप्यपरं खलत्वम् । वस्तुतस्त्वयमस्य गूढः अभावः । नायं तस्य भावः । अपिच, अनेन हि कैकेयीवचनेन तस्याभाव एव हि भवति ॥ ४०–१ ॥

यावत् तिष्ठस्ययोद्ध्यायां तावन्नाश्नाति ते पिता ।
[३]शीघ्रं गच्छान्यथा हन्त गुर्वाज्ञामतिवर्त्तसे ॥ ४१ ॥

(भा.दी.) दशरथस्यात्यन्तमनभिप्रेतमभिप्रेतत्वेन परिकल्प्याऽह– **यावदिति** । हे राम, त्वं यावत् अयोध्यायां तिष्ठसि तावत्पर्यन्तम् ते पिता नाश्नाति न भुङ्क्ते । अश भोजने लट् । अतः शीघ्रं यथा भवति तथा अयोध्यायाः निर्गच्छ । अन्यथा गुर्वाज्ञां पित्राज्ञाम् अतिवर्तसे अतिक्रम्य वर्तसे । हन्त शोचने । 'शोचने सम्प्रहर्षे च हन्तशब्दः प्रयुज्यते' इति हलः ॥ ४१ ॥

---

१. 'इत्युक्ते' २. 'खला वक्ति तव' ३. 'शीघ्रं निर्गच्छ गुर्वाज्ञां राम त्वं नातिवर्तसे'

इत्थं काळ्यैव[१] कैकेय्या सर्वारुन्तुदयोदिते ।
धिक् कष्टमिति भूपालः स पपात मुमोह च ॥ ४२ ॥

(भा.दी.) इत्थमिति । काळ्यैव भद्रकाळ्यैव सर्वारूंषि सर्वमर्मप्रदेशान् तुदति व्यथयतीति सर्वारुन्तुदा तया कैकेय्या, यथा काळी स्वाट्टहासेन हृदयकम्पनजनकत्वेनारुन्तुदा तद्वदियं चात्यन्ताश्रवणीयवचनवक्तृत्वात् सर्वारुन्तुदेत्यर्थः । इत्थं उदिते उदीरिते सति सः भूपालः दशरथः धिक् कष्टं इति वदन् सन् दुःखवशात् पपात । मुमोह मूर्छां जगाम च । मुह वैचित्त्ये लिट् ॥ ४२ ॥

(सं.चं.) काळ्या कुलकालन्या । अरुन्तुदया दुर्वचनैर्मर्मभेदन्या । अम्बिकाललाटादुत्पन्ना क्रूरदेवता वा काळी चामुण्डा नाम । 'मर्मस्पृक् स्यादरुन्तुदम्' इति यादवप्रकाशः । 'झिल्लचेव' इति पाठे झिल्ली मर्मावित् कीटविशेषः । '**ಜೀರುಂಡೆ**' इति भाषायाम् । धिक् कष्टमितीयदेव वदन् । 'मिथ्या वदतीयं दुष्टा, नायं मम भावः' इति वक्तुमप्यप्रभवन्, दुःखोत्कर्षात्, दत्तवरभङ्गभयाच्च ॥ ४२ ॥

राम ऊचेऽथ कैकेयीं देवि द्रक्ष्यामि मातरम् ।
सीतां च सान्त्वयिष्यामि पुनर्य्यास्यामि तापसः ॥ ४३ ॥

(भा.दी.) राम इति । अथ श्रीरामः, हे देवि राजभार्ये कैकेयि, अहं मातरं कौसल्यां द्रक्ष्यामि । दृशेर्लृट् । सीतां च सान्त्वयिष्यामि । मद्वियोगाद् यथाऽऽर्ता न स्यात् तथा सान्त्ववचसा बोधयिष्यामि । षान्त्व सामप्रयोगे लृट् । तदनन्तरं तापसः मुनिवेषः सन् यास्यामि पुनः वनं प्रति गमिष्याम्येव । 'पुनरप्रथमे प्रश्ने व्यावृत्ताववधारणे' इति वैजयन्ती । इति कैकेयीं ऊचे । वचेर्लिट् ॥ ४३ ॥

(सं.चं.) मातरं सीतां च द्रक्ष्यामि । दृष्ट्वा सान्त्वयिष्यामि । पुनर्यास्यामि । पुनःशब्दः पश्चाद्वचनः । प्रथमं सान्त्वयिष्यामि, पश्चाद् यास्यामीत्यर्थः ॥ ४३ ॥

एतावत् क्षम्यतां मातस्त्वया राजर्षिजायया[२] ।
भरतः पातु पृथिवीं पितृशुश्रूषणे रतः ॥ ४४ ॥

(भा.दी.) एतावदिति । हे मातः कैकेयि, राजा चासौ ऋषिश्च राजर्षिर्दशरथः तस्य भार्यया त्वया एतावत् मातृदर्शनसीतासान्त्वनकालपर्यन्तं ममावस्थानं क्षम्यतां सह्यताम् । क्षमूष् सहने लोट् । पितुः शुश्रूषणं सेवा तस्मिन् रतः आसक्तः भरतः पृथिवीं पातु ॥ ४४ ॥

---

१. **'इत्थं झिल्लचेव'**
२. **'राजर्षिभार्यया'** इति वि.ती.पाठः स्यात् । जाययेति लुप्तं वा स्यात् । अर्थानुवादो वा ।

(सं.चं.) एतावत् एतावान् विलम्बः ॥ ४४ ॥

इति शुद्धां शुभां श्रुत्वा गिरं रामस्य पार्थिवः ।
हा राम राम वत्सेति मुक्तकण्ठो रुरोद सः ॥ ४५ ॥

(भा.दी.) इतीति । पार्थिवः (सः) दशरथः, इति शुद्धां निष्कपटां अत एव शुभां श्रीरामस्य गिरं श्रुत्वा । हा राम, हा राम, हा वत्स इति मुक्तोऽविभक्तः कण्ठो यस्य स तथा सन्, अत्युच्चैःस्वरः सन्नित्यर्थः, रुरोद ॥ ४५ ॥

(सं.चं.) मुक्तः स्वैरमुद्गतः कण्ठः कण्ठध्वनिर्यस्य । उच्चै रुरोद ॥ ४५–६ ॥

राज्ञस्तस्य विसञ्ज्ञस्य कैकेय्याश्च जगद्गुरुः ।
परिक्रम्याभिवाद्याङ्घ्री[1] निश्चक्राम निवेशनात् ॥ ४६ ॥

(भा.दी.) राज्ञ इति । जगद्गुरुः श्रीरामः, विगता सञ्ज्ञा प्रबोधो यस्य स तथा तस्य, मूर्च्छितस्येत्यर्थः, तस्य राज्ञः दशरथस्य कैकेय्याश्च अङ्घ्री पादौ अभिवाद्य, परिक्रम्य प्रदक्षिणीकृत्य, निवेशनं मन्दिरं तस्मात् निश्चक्राम निर्जगाम । क्रमु पादविक्षेपे लिट् ॥ ४६ ॥

आर्त्तस्वनो[2] महानासीन्महिषीणां महीभृतः ।
पितुरन्तःपुरात् तस्मात् प्रव्रजत्यखिलेश्वरे ॥ ४७ ॥

(भा.दी.) आर्तेति । पितुः महीभृतः राज्ञः तस्य दशरथस्य, तस्मात् अन्तः विद्यमानं पुरं मन्दिरमन्तःपुरं तस्मात्, अखिलेश्वरे श्रीरामे प्रव्रजति प्रव्रजनं कुर्वति सति, महिषीणां दशरथभार्याणां आर्तः आर्तियुक्तः स्वनः आर्तस्वनः, खेदजन्यध्वनिरित्यर्थः, (महान्) आसीत् ॥ ४७ ॥

(सं.चं.) महीभृतो महिषीणां राजभार्याणाम् । पञ्चाशदुत्तरस्य शतत्रयस्य । यद्यपि न सर्वा राजभार्या महिष्यः । राज्ञा सह कृताभिषेका महिषीत्युच्यते । तेन तिस्र एवात्र महिष्यः कौसल्या कैकयी सुमित्रा च । तेन चात्र महिषीशब्दो भार्यासामान्यवचनः । अभिदधति च– 'महिषी नृपयोषिति' इति ॥ ४७ ॥

१. **'–क्रम्याभिवन्दयाङ्घ्रिम्'** इति, **'–क्रम्याभिवन्द्याङ्घ्री'** इति च । **'–क्रम्याभिवन्द्याङ्घ्रीन्'** इति भ्रान्तः पाठः।

२. **'आर्तस्वरो महा–'**

सर्वभूतप्रियो रामः क्व नो वत्सो[1] गमिष्यति ।
कथं त्यजति राजानं मुहूर्त्तं विरहासहम्[2] ॥ ४८ ॥

(भा.दी.) सर्वेति । सर्वे ये भूताः[3] प्राणिनस्तेषां प्रियः, नः अस्माकं वत्सः बालकः श्रीरामः क्वनु कुत्र गमिष्यति मुहूर्तं मुहूर्तकाले यो विरहो वियोगस्तस्मिन् आतुरमशक्तं राजानं कथं त्यजति विसृज्य गच्छति ॥ ४८ ॥

(सं.चं.) मुहूर्तं क्षणकालमपि विरहासहम् ॥ ४८ ॥

इत्युच्चैः क्रन्दितं तासां सङ्घेसङ्घे निवेदितम् ।
सर्वत्राऽक्रन्दितं तेने बीजं बीजान्तरं यथा ॥ ४९ ॥

(भा.दी.) इतीति । तासां महिषीणां इति उच्चैर्यथा भवति तथा क्रन्दितं आक्रन्दनं सङ्घेसङ्घे समूहे-समूहे । '(प्रकर)गणौघसङ्घसङ्घातव्रातकुलोत्कराः स्मृताः' इति हलः । सर्वजनसमूहेष्वित्यर्थः । निवेदितं विज्ञातं सत् बीजं फलं अन्यत् बीजं बीजान्तरं तत् यथा तथा सर्वत्र देशे आक्रन्दितं आक्रन्दनं तत् तेने चक्रे । तनु करणे[4] लिट् ॥ ४९ ॥

(सं.चं.) सङ्घेसङ्घे सङ्घशः स्थितेषु मन्त्रिपुरोहितेषु, राजगृहाधिकृतेषु, दासदासीजनेषु, सामन्तेषु, सामाजिकेषु च निवेदितं विज्ञापितवार्तं सत् सर्वत्र सङ्क्रान्तमाक्रन्दितं तेने वितस्तार ॥ ४९ ॥

पूर्णानन्दस्य रामस्य पूर्णेन्दुनिभमाननम् ।
दृष्ट्वा राज्यच्युतस्यापि शोचन्ति स्म पुनः प्रजाः ॥ ५० ॥

(भा.दी.) पूर्णेति । प्रजाः पूर्ण आनन्दो यस्य स तथा तस्य श्रीरामस्य, राज्यात् च्युतो रहितस्तस्यापि सतः, पूर्णेन्दोर्निभं सदृशं तत् आननं दृष्ट्वा पुनः शोचन्ति स्म शोकं चक्रुः । शुच शोके लट् ॥ ५० ॥

(सं.चं.) राज्यच्युतस्यापि पूर्णेन्दुनिभं मधुरस्मितचन्द्रिकमाननम् । 'न वनं गन्तुकामस्य त्यजतश्च वसुन्धराम् । सर्वलोकातिगस्येव दृश्यते चित्तविक्रिया' इति रामायणे ॥ ५० ॥

---

१. **'वत्सः वात्सल्यविषयः'** इति का.श्री. ।
२. **'विरहातुरम्'** इति वि.ती.पाठः ।
३. **'सर्वाणि यानि भूतानि'** इत्युचितम् ।
४ . **'तनु विस्तारे'** इति धातुपारायणिकाः ।

लक्ष्मणः क्षुभितो लज्जाशोकक्रोधसमुच्चयात् ।
बद्धमौनो निजज्येष्ठं[1] निर्य्यान्तमनुनिर्य्ययौ ॥ ५१ ॥

(भा.दी.) लक्ष्मण इति। पिता स्त्रीजितो जात इति या लज्जा सा च, शोकः श्रीरामस्य यौवराज्यभ्रंशनिमित्तकदुःखं च, कैकेय्यां यः क्रोधः स च, तेषां समुच्चयः सम्मेळनं तस्मात् क्षुभितः मनःकालुष्यं प्राप्तः, तथाऽपि पितरं प्रति यत्किञ्चिद् वक्तुमनुचितत्वात् बद्धं मौनं येन स तथा लक्ष्मणः, निज आत्मीयो ज्येष्ठस्तं निर्यान्तं दशरथमन्दिरान्निर्गच्छन्तं श्रीरामं अनुनिर्ययौ अन्वगच्छत् ॥ ५१ ॥

(सं.चं.) तरुण्या जायायाः प्रियार्थं प्रियमपि तनयं पिता तत्याजेति वृद्धस्य पितुर्वर्तनेन लज्जा, रामचन्द्रस्य वनवास आपतित इति, जनताऽनाथा जातेति शोकः, एतादृशस्य दुरन्तस्य हेतुभूतायां कैकेय्यां क्रोधः। एषां त्रयाणामपि भावानां समुच्चयः सकृत् सन्निपातः। सत्सु महत्सु मया न प्रतिरोद्धव्यमिति बद्धमौनः। ज्येष्ठं भ्रातरं रामम् ॥ ५१ ॥

स जगज्जनको गत्वा जनन्या धाम धामवत् ।
वैष्णवव्रतनिष्ठां तामभ्यवन्दत सानुजः ॥ ५२ ॥

(भा.दी.) स इति। जगतः जनकः पिता सः श्रीरामः, जनन्याः कौसल्यायाः, धाम तेजः अस्यास्तीति धामवत् धाम गृहं गत्वा, विष्णोः सम्बन्धि वैष्णवं तादृशं यद् व्रतं तस्मिन् निष्ठा आसक्तिर्यस्याः सा तथा तां कौसल्यां सानुजः लक्ष्मणसहितः सन् अभ्यवन्दत। वदि अभिवादनस्तुत्योर्लङ्। जगज्जनक इत्युक्त्या मातृवन्दनादिकं लोकशिक्षणार्थमिति ज्ञापितम् ॥ ५२ ॥

(सं.चं.) धामवत् कान्तियुक्तं धाम गृहम्। 'गृहं देहस्त्विट् प्रभावो धाम' इति मङ्खः ॥ ५२ ॥

राज्ञी कनत्कनककङ्कणके प्रकोष्ठे न्यस्याक्षमाल्यमथ कम्पितकर्ण्णभूषा ।
आश्लिष्य राममवदत् प्रमदाश्रुपूर्ण्णा स्याद् यौवराज्यमधुनैव तवाऽत्मजेति
॥ ५३ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे अयोद्ध्याकाण्डे चतुर्त्थः सर्ग्गः ॥

---

१. 'निजं ज्येष्ठम्'

(भा.दी.) राज्ञीति । अथ राज्ञी राजभार्या कौसल्या, कनत् शोभमानं कनकमयं स्वर्णमयं कङ्कणं यस्मिन् स तथोक्तस्तस्मिन् । कनी दीप्तिकान्तिगतिष्विति धातुः । प्रकोष्ठे मणिबन्धप्रदेशे । 'प्रकोष्ठस्तस्य चाप्यधः' । अक्षमाल्यं अक्षमाला तत्, मन्त्रजपमालामित्यर्थः, न्यस्य निक्षिप्य, कम्पिते आलिङ्गनार्थमुत्थानसमये चलिते कर्णभूषे कर्णालङ्कारौ यस्याः सा तथा सती । श्रीरामं आश्लिष्य प्रमदात् सन्तोषादुत्पन्नं यदश्रु तेन पूर्णा सती, हे आत्मज पुत्र,[१] तव अधुनैव यौवराज्यं युवराजत्वं स्यात् भवतु इति श्रीरामं प्रति अवदत् ॥ ५३ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायामयोध्याकाण्डे चतुर्थः सर्ग्गः ॥

(सं.चं.) 'मणिबन्धः पाणिमूलं कपोणिः कूर्परः स्मृतः । तयोर्मध्यं प्रकोष्ठं स्यात् प्रकाण्डः कूर्परांसयोः' इत्यभिधानम् । अक्षमालां न्यस्य । उत्थानसम्भ्रमेण कम्पितकर्णकुण्डला । प्रमदाश्रुभिरानन्दाश्रुभिः पूर्णनयना । इत्याशीर्वचनमवदत् । वसन्ततिलका च्छन्दः ॥ ५३ ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायामयोध्काण्डे चतुर्थसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– ५६८+५३=६२१]

१. 'हे आत्मज सुत'

पञ्चमः सर्गः

लक्ष्मणं प्रेक्ष्य भगवान् सस्मितं स्माऽह[१] मातरम् ।
अम्ब नूनं न जानासि तवाप्रियमुपस्थितम् ॥ १ ॥

(भा.दी.) श्रीरामः स्वमातर्येवं निरूपयन्त्यां सत्यां स्वागमनप्रयोजनं निवेदयति– **लक्ष्मणमित्या**दिना । भगवान् श्रीरामः लक्ष्मणं प्रेक्ष्य, हे अम्ब मातः, तव उपस्थितं सम्प्राप्तं अप्रियमनिष्टं तत् (नूनं) न जानासि । ज्ञा अवबोधने लट् । इति मातरं प्रति सस्मितं स्मितसहितं यथा भवति तथा आह स्म अवदत् ॥ १ ॥

(सं.चं.) 'पश्य मातुर्मुग्धताम्' इति लक्ष्मणं प्रेक्ष्य । अभिप्रायगर्भमीक्षणं प्रेक्षणम् । सस्मितमित्यव्याकुलतामाह । अत एव 'तवाप्रियम्' इत्याह । न 'नोऽप्रियम्' इति ॥ १ ॥

समयेन[२] नृपं बध्वा कैकेय्या मे प्रचोदितः ।
वने चतुर्दश समा वासो राज्यं स्वसन्ततेः ॥ २ ॥

भा.दी.) किं तदित्यत आह– **समयेने**ति । समयः शपथस्तेन– 'वरौ वरानने दद्यामभीष्टौ सत्यमेव ते । पुत्रेण मम रामेण प्राणेभ्यः प्रेयसा शपे' (२.३.३७) इत्यादिप्रकारशपथेन, यद्वा समयेन सङ्केतेनेति वा, नृपं दशरथं बद्ध्वा वशीकृत्य, कैकेय्या मे मम चतुर्दश च ताः समाश्च ताः, निरन्तरचतुर्दशसंवत्सरेष्वित्यर्थः, वने वासः प्रचोदितः प्रोक्तः । स्वस्याः सन्ततिः पुत्रस्तस्याः । 'सन्ततिस्त्वन्ववाये स्यात् पारम्पर्ये सुतेऽपि च' इति वैजयन्ती । राज्यं प्रचोदितं आज्ञप्तम् ॥ २ ॥

(सं.चं.) समयः रघूणामाचारः सिद्धान्तो वा । वचनबद्धता । 'कालसङ्केतकाचारसिद्धान्ताः समयाः स्मृताः' इत्यभिधानम् । मे वने वासः प्रचोदितः प्रेरितः । स्वसन्ततेः राज्यं च प्रचोदितम् । मातुर्भावानुगुणेयं भाषा । अत एव कैकेय्येत्याह । न मध्यमाम्बयेति । स्वसन्ततेरित्याह । न भरतस्येति ॥ २ ॥

---

१. **'सस्मितं प्राह'**

२. **'कैकेय्या कर्त्र्या समयेन सङ्केतेन अहं यदा वरद्वयं याचिष्ये तदा वरद्वयं दातव्यमिति समयबन्धेन करणेन'** इति का.श्री. ।

इत्युपश्रुत्य कौसल्या निपपातावनीतळे[१] ।
उल्लूना पुष्पवल्लीव सारङ्गीव शराहता ॥ ३ ॥

(भा.दी.) इतीति । इति वाक्यं वचस्तत् उपश्रुत्य अतिविह्वला दुःखवशादत्यन्तं परवशा[२] कौसल्या । उल्लूना सञ्छिन्ना पुष्पवल्लीव पुष्पलतेव, शराहता शरताडिता सारङ्गीव मृगीव, अवन्यास्तळं प्रदेशस्तस्मिन् निपपात । पत्लृ पतने लिट् ॥ ३ ॥

(सं.चं.) उपपन्नं श्रवणमुपश्रुतिः । यच्छ्रोतव्यं तच्छ्रुतमित्येतत् उल्लूना उत्कृत्ता । सारङ्गी हरिणी । पुष्पवल्लीव कोमलाङ्गी । सारङ्गीव भयविह्वला गतसञ्ज्ञा ॥ ३–४ ॥

आलोक्य लोकनाथस्तां मूर्च्छितां भुव उद्धरन् ।
ममार्ज्ज पांसूंस्तद्गात्रात्[३] कराभ्यां करुणाकरः ॥ ४ ॥

(भा.दी.) आलोक्येति । लोकनाथः करुणाकरः श्रीरामः, तां मातरं मूर्च्छितां आलोक्य, करौ हस्तौ ताभ्याम्, भुवः उद्धरन् सन्, तस्या गात्रं तद्गात्रं तस्मात्, पांसून् ममार्ज मार्जनं चक्रे । मृजूष् शुद्धौ लिट् ॥ ४ ॥

मुहूर्त्तात् सा शनैः सञ्ज्ञां लब्ध्वा शोकाग्निशोषिता ।
दीना जगाद सास्रौघा दृष्ट्वा पुत्रमुखाम्बुजम् ॥ ५ ॥

(भा.दी.) मुहूर्तादिति । शोक एवाग्निस्तेन शोषिता शुष्कीकृता, अतिपीडितेत्यर्थः, अत एव दीना सा कौसल्या, मुहूर्तो मुहूर्तकालस्तस्मात् शनैः सञ्ज्ञां लब्ध्वा, पुत्रस्य रामस्य यन्मुखं तदम्बुजमिव तत् दृष्ट्वा, अस्राणामश्रूणामोघः समूहस्तेन सहिता सास्रौघा सती जगाद । गद व्यक्तायां वाचि लिट् ॥ ५ ॥

(सं.चं.) मुहूर्तात् कश्चित् कालमतीत्य । शोकाग्निशोषिता । अथापि सास्रौघा । आस्रमश्रु । अश्रुजलक्लिन्न-मुखी शनैर्जगाद ॥ ५ ॥

अस्वैरिणीं शुचिं दान्तां गुरुदेवार्च्चने रताम् ।
त्यक्तुं नार्हसि मां तात[४] मातरं त्वमनागसम् ॥ ६ ॥

---

१. **'निपपात महीतळे'**

२. **'अतिविह्वला'** इति पदं मूले न पठ्यते । तेन **'दुःखवशादत्यन्तं परवशा'** इति स्वपदवर्णनमिति वक्तव्यम् ।

३. **'पांसूंस्तस्याङ्गात्'** इति भ्रान्तः पाठः ।

४. **'त्यक्तुमर्हसि मा तात मातरं मामनागसीम्'** । **'मां निरागसीम्'** इति क्वचित् ।

(भा.दी.) अस्वैरिणीमिति । हे तात, (स्वैरिणी) पुंश्चली न भवतीत्यस्वैरिणी ताम्, पतिव्रतामित्यर्थः । अत एव शुचिं शुद्धाम् । दान्तां दमयुक्ताम् । गुरवश्च देवाश्च तेषामर्चनं पूजा तस्मिन् रतामासक्ताम् । न विद्यते आगः अपराधो यस्याः सा तथा तां मातरं मां त्यक्तुं नार्हसि न योग्योऽसि । अर्ह पूजायां लट् । मातुरपि स्वैरिण्यादिदोषोपेतत्वे परित्याज्यत्वमित्यतो हेतोस्तादृशदूषणाभावः स्वस्याः प्रतिपादितः ॥ ६ ॥

(सं.चं.) मातृत्वादेव न युक्तस्त्यागः । किं पुनः शुद्धचरितायाः ॥ ६ ॥

सपत्न्या मम कैकेय्याः[१] कलहाख्यानलोष्मणा ।
सन्तप्तां सुचिराय त्वं कथं त्यजसि धार्म्मिक ॥ ७ ॥

(भा.दी.) सपत्न्येति । मम सपत्न्या कैकेय्या कलह इति आख्या नाम यस्य स कलहाख्यः स चासावनलश्च तस्य ऊष्मा ज्वाला तेन सुचिराय बहुकालं सन्तप्तां माम्, धर्मं चरतीति धार्मिकस्तत्सम्बुद्धिः श्रीराम, कथं त्यजसि ॥ ७ ॥

(सं.चं.) कलहाख्यानलस्य ऊष्मणा ऊष्मेण घर्मेण । मम सन्तप्तत्वान्नाहं त्यागार्हा । तव धार्मिकत्वाच्च न त्वं मां त्यक्तुमर्हसि ॥ ७ ॥

नाप्रियाऽहं तव पितुर्न्नापि लोकैर्व्विनिन्दिता ।
किन्तु सा वक्रधीर्न्नाहं तस्मान्मम पराभवः[२] ॥ ८ ॥

(भा.दी.) नेति । अहं तव पितुः अप्रिया प्रीत्यविषया न । लोकैर्जनैर्विनिन्दिताऽपि न । तर्हि कैकेयीनिमित्त-कसन्तापः कस्मादित्यत आह– **किन्त्वि**ति । सा कैकेयी वक्रा कुटिला धीर्यस्याः सा तथा । अहं तथा कैकेयीवत् न । तस्मात् कारणात् मम पराभवः पराजयः । मयाऽस्मृतमपि यत्किञ्चित्कौटिल्यं मय्यारोप्य मत्सङ्कल्पितकार्यस्य विघातं करोतीत्यतस्तन्निमित्तकसन्तापो ममेति भावः ॥ ८ ॥

(सं.चं.) नाहं वक्रधीः । अवक्रतैव मे पराभवकारणम् । कुटिला जयन्ति । ऋजवो जीयन्ते ॥ ८ ॥

याः सप्तविंशतिसमास्त्वयि जात इमाः सुत ।
तवोदयं प्रतीक्ष्याहं स्थिताऽब्दमिव चातकी ॥ ९ ॥

---

१. **'कैकेय्या'** इति वि.ती.पाठः ।

२. **'पराजयः'** । **'–र्नाहं तथा तस्मात् पराभवः'** इति वि.ती.पाठः स्यात् । **'तस्मान्मम परो भव'** इति च ।

(भा.दी.) या इति। हे सुत, त्वयि जाते सति, इमाः अतीताः, याः सप्तविंशतिसङ्ख्याकाश्च ताः समाश्च ताः, सप्तम्यर्थे द्वितीया। तव उदयोऽभ्युदयस्तम्, चातकीव चातकनामिका पक्षिणीव, अब्दमिव वर्षणशील-मेघमिव। 'अब्दौ जीमूतवत्सरौ' इत्यमरः। प्रतीक्ष्य स्थिता, अस्मीति शेषः ॥ ९ ॥

(सं.चं.) सप्तविंशतिसमाः, अत्यन्तसंयोगे द्वितीया। अब्दं मेघमिव चातकी ॥ ९ ॥

वज्रात् खरतरं[1] नूनं हृदयं मम नन्दन।
त्वद्यात्रावाक्यवज्रेण यन्न भिन्नं सहस्रधा ॥ १० ॥

(भा.दी.) वज्रादिति। हे नन्दन पुत्र, मम हृदयं यत् यस्मात् कारणात् तव यात्राऽन्यत्रगमनं तस्याः यद्वाक्यं तदेव वज्रं तेन सहस्रधा न भिन्नम्। तस्मात् कारणात् वज्रं कुलिशं तस्मात् खरतरं कठिन-तरम्। नूनं निश्चयः ॥ १० ॥

(सं.चं.) यद् हृदयं न भिन्नं न विदीर्णम् वज्रमिन्द्रायुधं हीरकं वा। हीरकं हि कठिनान्यपि विदारयति, यानीतरसाधनैः सर्वथा न भेद्यानि ॥ १० ॥

पितुर्ग्गरीयसी माता न गच्छातो ममाऽज्ञया[2]।
यदि यास्यसि हास्यामि देहं त्वद्विरहाग्निना ॥ ११ ॥

(भा.दी.) एवं विलप्य स्वाभिप्रेतमाह– **पितुरिति**। यतः माता पितुः सकाशात् गरीयसी मान्यतायां श्रेष्ठतरा। अतः कारणात् मम आज्ञया न गच्छ। पित्रा गच्छेत्युक्तोऽपि मातुर्मान्यत्वेऽतिविशिष्टत्वान्ममाऽज्ञया न गन्तव्यमिति भावः। स्वाज्ञोल्लङ्घने बाधकमाह– **यदीति**। यदि वनं यास्यसि तर्हि तव विरहो वियोगः स एवाग्निस्तेन, देहः कायस्तं हास्यामि त्यक्ष्यामि। ओहाक् त्यागे लृट् ॥ ११ ॥

(सं.चं.) यदि यास्यसि उल्लङ्घ्य ममाऽज्ञाम् ॥ ११ ॥

स्वर्ग्गं यास्यति राजेन्द्रो निर्ग्गते त्वयि सर्वथा।
क्षणं त्वद्विरहाशक्तो[3] न जीवेयमभर्तृका ॥ १२ ॥

(भा.दी.) स्वर्गमिति। राजेन्द्रः त्वयि निर्गते सति क्षणं क्षणकालस्तं तव यो विरहो वियोगस्तस्मिन् अशक्तः सन् स्वर्गः स्वर्गलोकस्तम् सर्वथा यास्यति। न विद्यते भर्ता यस्याः सा तथोक्ता अहं न जीवेयम्।

१. **'परतरम्'** इति भ्रान्तः पाठः। २. **'मदाज्ञया'** ३. **'त्वद्विरहाशक्ता'** इति च भ्रान्तः पाठः।

जीव प्राणधारणे लिङ् । तथाच त्वया मद्वचनमुल्लङ्घ्य गते सति राज्ञो मम च मरणमेव भवेत् । त्वयि स्थिते चावयोर्जीवनं स्यादित्यतः परमधर्ममवेक्ष्य त्वया न गन्तव्यमिति भावः ॥ १२ ॥

(सं.चं.) त्वद्विरहं सोढुमशक्तो राजेन्द्रः ॥ १२ ॥

वयं[1] शाकेन जीवामः कैकेय्याः सन्तु सम्पदः ।
करुणां कुरु धर्म्मज्ञ न मां मुञ्च कथञ्चन ॥ १३ ॥

(भा.दी.) आवां च नेतव्यावित्याह– **वयमि**ति । वयं शाकः पक्वफलादिस्तेन जीवामः । जीव प्राण-धारणे लट् । राज्यादिरूपाः सम्पदः कैकेय्याः सन्तु । हे धर्मज्ञ श्रीराम, करुणां कुरु । मां कथञ्चन केनापि प्रकारेण न मुञ्च । मुच्लृ मोक्षणे लोट् ॥ १३ ॥

(सं.चं.) वयमिति आत्मनि बहुवचनम् । दशरथसाहित्येन वा । सीताऽपि सहाऽगता चेदपीति मनसि निधाय वाऽऽह । वने शाकेन जीवामः । 'मूलपत्रकरीराग्रफलकाण्डाधिरूढकम् । त्वक् पुष्पं कवचं चैव शाकं दशविधं स्मृतम्' । करीरं वंशाङ्कुरम् । '**ഭൂരി**' इति भाषायाम् । अग्रं किसलयम् । अधिरूढकाः अङ्कुराः । कवचं छत्राकमिति वदन्ति । मूलमिति कन्दस्याप्युपलक्षणम् ॥ १३ ॥

विलपन्तीमिमां वीक्ष्य क्षुभितं लक्ष्मणं भृशम् ।
नियम्य हेतुमद्वाक्यं जगाद जगतां पतिः ॥ १४ ॥

(भा.दी.) **विलपन्तीमि**ति । जगतां पतिः श्रीरामः विलपन्तीं परिदेवनं कुर्वन्तीं इमां मातरं वीक्ष्य, भृशं क्षुभितं कौसल्यादुःखं दृष्ट्वाऽसह्यतया क्रुद्धमित्यर्थः, लक्ष्मणं नियम्य अनुनीय, हेतुरस्यास्तीति हेतुमत्, पितुराज्ञानुष्ठाने हेतुप्रतिपादकमित्यर्थः, वाक्यं जगाद ॥ १४ ॥

(सं.चं.) लक्ष्मणं शान्तो भवेति नियम्य मातरं प्रति जगाद ॥ १४ ॥

माता गरीयसी मातः[2] सर्वस्माज्जगतोऽपि तु ।
आचार्य्याज्जनकाद् वाऽपि परं नास्ति हरिं विना ॥ १५ ॥

---

१. '**त्वं च अहं च अयंच (दशरथश्च)वयम् । शोकेन कन्दमूलफलादिना**' इति का.श्री. । २. '**मातर्गरीयसी मातः सर्व–**'

(भा.दी.) मातेति । हे मातः कौसल्ये, सर्वस्मात् जगतोऽपि आचार्यात् गुरोरपि जनकात् पितुरपि वा माता तु विशेषतः गरीयसी अतिशयेन श्रेष्ठा । हरिं विना मातुः सकाशात् परं मुख्यं साक्षान्मान्यतायां नास्ति ॥ १५ ॥

(सं.चं.) माता गरीयसी सर्वस्मादपि जगतः । नात्र सन्देहः । अथापि आचार्यात् जनकाद्वाऽपि हरिं विनाऽन्यत् परमुत्तमं वस्तु नास्ति । यौ मातुरपि पूजनीयौ । आचार्याज्जनकादपि माता गरीयसीति वा । हरिवचनं वेदपुराणादि प्रथमं पालनीयम् । तदविरोधे लोके मातुः प्रथमम् । ततो जनकस्य । तत आचार्यस्येति ॥ १५ ॥

मातरं मारयामास भार्ग्गवो भगवान् पुरा ।
आज्ञया पितुरेवाथ तत्प्रसादादजीवयत् ॥ १६ ॥

(भा.दी.) मातरमिति । भगवान् भृगुगोत्रे भवो भार्गवः परशुरामः पुरा पितुर्जमदग्नेः आज्ञयैव मातरं रेणुकां मारयामास जघान । मृङ् प्राणत्यागे लिट् । अथ तस्य पितुर्जमदग्नेः प्रसादः प्रसन्नता तस्मात् मातरं अजीवयत् उज्जीवयामास । जीव प्राणधारणे लङ् । कदाचिदुदकानयनार्थं गङ्गां प्रति गता रेणुका तत्र जलक्रीडां कुर्वन्तं गन्धर्वराजं चित्ररथं दृष्ट्वा तत्र जातस्पृहा सती कालात्ययं नाजानीत् । अथ मुनिशापभीता सती सहसाऽश्रमं प्रति जगाम । जमदग्निश्च तं मानसं व्यभिचारं योगबलात् ज्ञात्वा परशुरामं प्रति मातरं जहीत्यभिहिते तद्धननं कृत्वा स्वकृतकर्मणा सन्तुष्टेन पित्रा 'अपेक्षितं वरं तुभ्यं प्रयच्छामि' इत्युक्ते मातुर्जीवनमेव देहीति वरव्याजेन तामजीवयदिति पौराणिकी प्रसिद्धिः । एवं महद्भिः पितुराज्ञाया अनुल्लङ्घनात् मयाऽपि नोल्लङ्घनार्हेति भावः ॥ १६ ॥

(सं.चं.) सत्यमेतत् सर्वम् । तथाऽप्यस्य क्वचिदपवादोऽस्ति । महतामाचारदर्शनादित्याह– मातरं मारयामास । तदुक्तम्–'वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् । आचारश्चैव महताम्' इति । का तर्हि व्यवस्था ? किमनयोर्गरीयः ? मातुर्वचनमुत महतामाचरणेन पितुर्वचनम् ? विभाषैवात्र व्यवस्था । यत्र पितुर्निमित्तान्तरमाधिक्यं तत्र पितुर्वचनम् । अत्र दशरथः न पिता केवलम्, राजा च । राजवचनं मात्राऽपि पालनीयम् । अपिच भर्तृविरुद्धं न भार्या वक्तुमर्हति । तेन च दुर्बलं कौसल्यावचनमिति । तत्प्रसादादिति । तस्य पितुः प्रसादादेव । तेन पितृवचनं च पालितम् । मनोमालिन्यान्माता चोज्जीविता ॥ १६ ॥

कण्डुना पण्डितेनैव गौर्हता पितुराज्ञया ।
पित्रर्त्थे नन्वनुज्ञां मे देहि मातः प्रियोऽस्मि चेत्[1] ॥ १७ ॥

(भा.दी.) कण्डुनेति । कण्डुना कण्डुनामकेन मुनिना पण्डितेन प्राज्ञेन च सता पितुः आज्ञया गौर्हता । अतः महद्भिः पितुराज्ञाया अनुल्लङ्घनात्, चेद्यदि अहं ते तव प्रियः तर्हि पित्राज्ञायै (इति) पित्राज्ञार्थम्, तदाज्ञाकरणार्थमित्यर्थः, मे अनुज्ञां देहि । दाञ्धातोर्लोट् ॥ १७ ॥

(सं.चं.) पण्डितेन धर्माधर्मविदैव । 'ऋषिणा च पितुर्वाक्यं कुर्वता व्रतचारिणा । गौर्हता जानता धर्मं कण्डुनाऽपि विपश्चिता' इति रामायणे । तेन ज्ञायते– पितुराज्ञया क्वचिदकार्यमपि कुर्वन् न पातकी भवति । अनिषिद्धं च वनगमनम् । तस्मात् कार्यमेव । तत् भवती कर्तव्यकरणान्मां निरोद्धुमर्हतीति ॥ १७ ॥

पितुराज्ञामनुष्ठाय चतुर्दशसमास्वहम्[2] ।
निवर्त्तिष्ये प्रतीपं मा ब्रूहि प्राणैः शपे मम[3] ॥ १८ ॥

(भा.दी.) पितुरिति । अहं चतुर्दश च ताः समाश्च तासु, चतुर्दशसंवत्सरेष्वित्यर्थः, पितुः आज्ञां अनुष्ठाय कृत्वा निवर्तिष्ये वनात् परावृत्याऽगमिष्य एव । न चेत् नाऽगतश्चेत्, मां प्रतीपं विपरीतं त्वद्वचनोल्लङ्घिन-मित्यर्थः, ब्रूहि । मम प्राणैः पञ्चप्राणैः शपे शपथं करोमि ॥ १८ ॥

(सं.चं.) चतुर्दशसमास्वतीतासु निवर्तिष्ये । पितुर्वचनस्य प्रतीपं मा ब्रूहि । मम प्राणैः शपे । 'ನನ್ನಾಣೆ' इति भाषायाम् ॥ १८–९ ॥

अनुनीयेति जननीं रामो लक्ष्मणमब्रवीत् ।
दैवोपपादिते[4] कार्य्ये न तात क्रुद्ध्यतामिति ॥ १९ ॥

(भा.दी.) अन्विति । श्रीरामः जननीं कौसल्यां इति अनुनीय सान्त्वयित्वा, हे तात लक्ष्मण, दैवेनैवोपपादितं सम्पादितं तस्मिन् कार्ये त्वया न क्रुद्ध्यताम् । क्रुध कोपे लोट् । इति लक्ष्मणं प्रति अब्रवीत् ॥ १९ ॥

---

१. **'पित्राज्ञार्थमनुज्ञां मे देहि ते चेदहं प्रियः'** इति वि.ती.पाठः स्यात् । **'पित्रर्थं नन्वनुज्ञां मे देहि मातः प्रियाऽसि चेत्'** इति क्वचित् ।

२. **'–समास्त्वहम्'**

३. **'निवर्तिष्ये प्रतीपं मां ब्रूहि प्राणैः शपे न चेत्'** इति वि.ती.पाठः स्यात् ।

४. **'दैवोपसादिते'**

कैकेय्याः कैतवं सर्वं प्रजासङ्कटमुत्कटम् ।
आर्ज्जवं च प्रभोर्वीक्ष्य पुनश्चुक्रोध लक्ष्मणः ॥ २० ॥

(भा.दी.) कैकेय्या इति । लक्ष्मणः कैकेय्याः सर्वं कैतवं कापट्यं तत् वीक्ष्य, उत्कटं बहळं प्रजासङ्कटम्, श्रीरामयौवराज्याभिषेकविघातश्रवणनिमित्तकं प्रजानां सङ्कटं कष्टं तच्च वीक्ष्य, प्रभोः श्रीरामस्य ऋजोर्भाव आर्जवम्, अकुटिलहृदयत्वमित्यर्थः, तच्च वीक्ष्य पुनः चुक्रोध । क्रुध कोपे लिट् ॥ २० ॥

(सं.चं.) उत्कटमात्यन्तिकम् ॥ २० ॥

लालाटीं भ्रुकुटीं[१] बिभ्रद् भ्रमद्भ्रूररुणेक्षणः ।
अमित्रघ्नोऽथ सौमित्रिः प्रोचे प्रेक्ष्यासिमात्मनः ॥ २१ ॥

(भा.दी.) लालाटीमिति । अथ लालाटीं ललाटे भवां भ्रुकुटिं त्रिशिखां मूर्धरेखां ललाटसीरां बिभ्रत् । 'नाभ्यस्ताच्छतुः' (अ.सू.७.१.७८) इति नुमभावः । भ्रमन्त्यौ कोपवशाच्चलन्त्यौ भ्रुवौ यस्य स तथा, अरुणे रक्ते ईक्षणे यस्य स तथा, अमित्रान् शत्रून् हन्तीत्यमित्रघ्नः, सुमित्राया अपत्यं सौमित्रिः लक्ष्मणः, आत्मनः स्वस्य, अस्यते शत्रुशिक्षादावित्यसिः खड्गस्तं प्रेक्ष्य प्रोचे ॥ २१ ॥

(सं.चं.) भ्रकुटिः भ्रकुटी भ्रुकुटिः भ्रुकुटी भ्रूकुटिः भ्रूकुटी भृकुटी वा । भ्रूग्रन्थिगर्भो ललाटसङ्कोचः पदार्थः । '**ಹುಬ್ಬು ಗಂಟಿಕ್ಕು**' इति भाषायाम् ॥ २१ ॥

[२]यद् दैवं देवदेवेश स्यात् ते राज्यापनोदनम् ।
हन्यां पुरुषकारेण तत् प्रसन्ने सति त्वयि ॥ २२ ॥

(भा.दी.) दैवोपपादिते कार्ये न तात क्रुद्ध्यतामित्यस्योत्तरमाह– **यदि**ति । देवानामिन्द्रादीनां देवाः ब्रह्मादयस्तेषामीश श्रीराम, ते तव राज्यस्य अपनोदनं विघातो यस्मात् तथोक्तं तत्, यत् दैवं स्यात्, तत्

---

१. '**भ्रुकुटिम्**' इति वि.ती.पाठ इति भाति ।

२. '**यद्येवम्**' इति, '**तं प्रसन्ने**' इति च का.श्री.पाठः । तथाहि तद्व्याख्यानम्–'**हे देवदेवेश ब्रह्मादिस्वामिन्, यदि एवं प्रकारेण ते राज्यापनोदनं राज्यापहारः स्याद् भवेत् तर्हि त्वयि प्रसन्ने सति चतुर्दशसु लोकेषु यः पुरुषः ते तव श्रिये सम्पदे अभ्यसूयति असूयां करोति तं पुरुषमहं पुरुषकारेण स्वसामर्थ्येन हन्याम्**' इति । अत्र मूले '**श्रियै**' इति पाठं पठन्तो भ्रान्ताः ।

दैवं त्वयि प्रसन्ने सति, पुरुषकारः प्रयत्नः पराक्रमो वा, तेन हन्यां नाशये। हन हिंसागत्योः लिङ्। 'द्रव्यं कर्म च कालश्च स्वभावो जीव एव च। यदनुग्रहतः सन्ति न सन्ति यदुपेक्षया' इत्युक्तेः त्वदनुग्रहे सति त्वदधीनं दुरदृष्टादिकं नाशयेयमिति भावः ॥ २२ ॥

(सं.चं.) यद् दैवम्। 'अद्य मत्पौरुषहतं दैवं द्रक्ष्यन्ति वै जनाः' इति रामायणे। राज्यस्य अपनोदनमपनोदकं दैवं भागधेयम् ॥ २२–३ ॥

चतुर्द्दशसु लोकेषु श्रिये यस्तेऽभ्यसूयति।
कृपाणीयं कृपाहीना तस्य पास्यति शोणितम् ॥ २३ ॥

(भा.दी.) चतुरिति। चत्वारः अधिका दश चतुर्दश तेषु लोकेषु यः ते तव श्रिये सम्पदे अभ्यसूयति मात्सर्यं करोति तस्य पुरुषस्य शोणितं रक्तं तत्, कृपाहीना कृपया रहिता, इयं मत्करस्था कृपाणी खड्गः पास्यति पानं करिष्यति। पा पाने लृट् ॥ २३ ॥

कैतवेनैव कैकेयी वरावादत्त भूपतेः।
पश्चात्तप्तं च नः पित्रा कोऽत्र धर्म्मव्यतिक्रमः ॥ २४ ॥

(भा.दी.) कैतवेनेति। कैकेयी कैतवं कापट्यं तेनैव भूपतेः दशरथात् वरौ आदत्त गृहीतवती। दाञो लङ्। नः अस्माकं पित्रा पश्चात्तप्तं अनुतप्तम्। अत्र कैकेय्युक्तवचनाकरणे धर्मव्यतिक्रमः कः? न कोऽपि। कैकेय्या समयबन्धेन शपथं कारयित्वा वृतत्वात्, दशरथेन च वरं दत्वाऽनुतापस्य कृतत्वादेत-दुल्लङ्घनं न दोषायेति भावः ॥ २४ ॥

(सं.चं.) 'कैतवं कपटं कूटम्' इत्यभिधानम्। पूर्वदत्तवरवरणव्याजेन। कैकेयी कैतवेनैव वञ्चयामास भूपतिम्। तया वञ्चितो नः पिताऽपि तद्धवनिराकरणेन प्रमोदेतैव न केवलम्, सकालोऽपि लोकः। अपिच शठायां शाठ्यमेव धर्म इति धर्मज्ञा आमनन्ति। तस्मात् कोऽत्र धर्मव्यतिक्रमः? प्रत्युत महान् धर्मसमुच्चय एवायम् ॥ २४ ॥

अप्रियं सर्वभूतानां कृत्वा प्रव्रजनं त्वया।
क्षुद्राया नैव कैकेय्याः प्रियं नाथ विधीयताम् ॥ २५ ॥

(भा.दी.) अप्रियमिति । हे नाथ श्रीराम, सर्वे च ते भूताः[१] प्राणिनश्च तेषां अप्रियम्, प्रव्रजनम् राज्यादि-परित्यागेन वनं प्रति गमनं तत् कृत्वा । क्षुद्रायाः निकृष्टायाः । 'क्षुद्रो दरिद्रे कृपणे नृशंसेऽल्पनिकृष्टयोः' इति वैजयन्ती । कैकेय्याः प्रियमभीष्टम् । 'अभीप्सितं हृद्यं दयितं वल्लभं प्रियम्' इत्यमरः । त्वया न विधीयतां न क्रियताम् ॥ २५ ॥

(सं.चं.) केवलं क्षुद्रायाः कैकेय्याः प्रियम् । क्षुद्रा नृशंसा निकृष्टा च । 'क्षुद्रो दरिद्रे कृपणे नृशंसेऽल्पनिकृष्टयोः' इति यादवप्रकाशः ॥ २५ ॥

इत्युक्त ऊचे भगवान् क्व नो दुःखं क्व नो सुखम्[२] ।
पट्टनं च वनं चाङ्ग निःसङ्गानां समं मतम् ॥ २६ ॥

(भा.दी.) इतीति । इति लक्ष्मणेन उक्तः भगवान् श्रीरामः, नः अस्माकं दुःखं क्व कुत्र? न कुत्रापीत्यर्थः । नः सुखं प्राकृतसुखं वा क्व कुत्र? हे अङ्ग प्रिय लक्ष्मण, निर्गतः सङ्गो विषयासक्तिर्येभ्यस्ते तथोक्तास्तेषामस्माकं पत्तनं नगरम् । 'पत्तनं पुटभेदनम्' इत्यमरः । वनं च समं समानं यथा भवति तथा मतम् अभिमतम् ॥ २६ ॥

(सं.चं.) लक्ष्मणेन इत्युक्तः । इत्युक्ते वा । तं भगवानूचे । क्व नो दुःखम्? कुत्र दुःखं नास्ति? राज्येऽपि तदस्ति । क्व नो सुखम्? कुत्र सुखं नास्ति । वनेऽपि हि तदस्ति । द्वन्द्वात्मकं हि जगत् । न क्वाप्येकान्तं सुखं दुःखं वा । स्मरन्ति हि– 'सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम्' इति । अथापि मानसिके सुखदुःखे । यस्य दुष्टं मनः तस्य दुःखमेव सर्वत्र । यस्य प्रसन्नं मनः तस्य सर्वत्र सुखमेव । तदेतदाह– पट्टनं चेति । निःसङ्गानां पुरुषाणां पट्टनं च वनं च समं समानमिति सम्मतम् । 'पट्टनं पुटभेदनम्' इति प्रतनाः पठन्ति । 'जलस्थलायतिस्फीतं पट्टनं कीर्त्यते बुधैः' इति स्कान्दवचनं भागवततात्पर्ये । 'राज्यं वा वनवासो वा वनवासो महोदयः' इति रामायणे ॥ २६ ॥

पूर्णमस्मद्यशश्चन्द्रं कलङ्को न स्पृशेदयम्[३] ।
राघवो राज्यलोभेन तातं लङ्घितवानिति ॥ २७ ॥

---

१. **'सर्वाणि च तानि भूतानि'** इति युक्तमित्युक्तम् ।

२. **'क्व नः सुखम् । पत्तनं च'** इति वि.ती.पाठः । **'क्व नु दुःखं क्व नो सुखम्'** इति क्वचित् । ३. **'स्पृशत्यलम्'**

(भा.दी.) एवं स्वस्य शश्वदेकप्रकारत्वमभिधाय स्वाभिप्रेतमाह– **पूर्णमि**ति। पूर्णं सर्वदैकप्रकारम्, अस्माकं यद्यशस्तदेव चन्द्रस्तम्, राघवः श्रीरामः, राज्ये यो लोभस्तेन तातं पितरम्, तदाज्ञामित्यर्थः, लङ्घितवान् अतिक्रान्तवान् इत्ययं कलङ्कः अपवादः। 'कलङ्कोऽङ्कापवादयोः' इति वैजयन्ती। न स्पृशेत्। स्पृश आमर्शने लिङ्॥ २७॥

(सं.चं.) गुणदर्शी भवान्। जनस्तु दोषमेव मृगयतीत्याह- पूर्णम्। अपवादरूपः कलङ्कः॥ २७॥

पुण्यारण्यशरण्यानां कुर्वाणो निर्वृतिं सताम्।
वनेषु सञ्चरिष्यामि सन्त्यन्ये चाऽत्र हेतवः ॥ २८ ॥

(भा.दी.) पुण्येति। पुण्यानि यान्यरण्यानि तान्येव शरणान्येव शरण्यानि मन्दिराणि येषां ते तथा तेषाम्, पुण्यारण्यशरणवतामिति वा, सतां मुनीनां निर्वृतिं प्रीतिं कुर्वाणः सन् वनेषु सञ्चरिष्यामि। चर गतिभक्षणयोः लृट्। वनं प्रति गमने कारणान्तरं चास्तीत्याह– **सन्ती**ति। अत्र वनं प्रति गमनविषये अन्ये च पितृवचनानुष्ठानातिरिक्ताश्च हेतवः राक्षसहननलक्षणकारणविशेषाः सन्ति॥ २८॥

(सं.चं.) पुण्यानि पूतानि मनोहराणि च। शरणाय हितानि शरण्यानि॥ २८॥

मयि स्वभावभक्तस्य युक्तं प्रोक्तं[१] तवेदृशम्।
भरतेन समं [२]मातापितृशुश्रूषणं कुरु ॥ २९ ॥

(भा.दी.) मयीति। मयि स्वभावतो भक्तः स्वभावभक्तस्तस्य तव ईदृशं प्रोक्तम् उदितं वचनम्। भावे क्तः। 'विभाषा भावादिकर्मणोः' (अ.सू.७.२.१७) इति नेट्। युक्तमेव। स्वभावभक्तत्वात् तवैवं कथनं युक्तम्। मम पितुर्वचनोल्लङ्घनमयुक्तमिति भावः। तस्य कर्तव्यमाह– **भरतेने**ति। भरतेन मात्रा कौसल्यया च समं साकं पितुः शुश्रूषणं सेवा तत् कुरु॥ २९॥

(सं.चं.) प्रोक्तं वचनम्। मातॄणां पितुश्च शुश्रूषणं कुरु। 'मात्रा पितृशुश्रूषणम्' इति पाठे। मात्रा कौसल्यया सुमित्रया वा। शुश्रूषाशब्दः सेवार्थे रूढः। जिज्ञासाशब्दो यथा विचारार्थे॥ २९–३०॥

इति विश्वेश्वरेणोक्तं श्रुत्वा विश्वेश्वरानुजः।
शान्तकोपो ययौ शोकं स्वामिविश्लेषशङ्कया ॥ ३० ॥

१. **'युक्तमुक्तम्'**

२. **'मात्रा पितृ–'** इति वि.ती.पाठः।

(भा.दी.) इतीति । विश्वेश्वरस्य श्रीरामस्यानुजः इति एवमादिप्रकारेण विश्वेश्वरेण श्रीरामेण उक्तं वचः श्रुत्वा शान्तः कोपो यस्य स तथा सन्, स्वामिनः श्रीरामस्य विश्लेषो वियोगस्तस्य शङ्कया, शोको दुःखं तं ययौ ॥ ३० ॥

बद्धाञ्जलिर्बाष्पमुखश्चिन्तया शान्तविभ्रमः[१] ।
सेवोत्कण्ठो रुद्धकण्ठो राममाचष्ट[२] लक्ष्मणः ॥ ३१ ॥

(भा.दी.) बद्धेति । बद्धः अञ्जलिर्येन स तथा । बाष्पेण अश्रुणा युक्तं मुखं यस्य स तथा । चिन्तया तान्तः । शान्तो विभ्रमो विलासः शोभा वा यस्य तथा । 'विभ्रमः संशये भ्रान्तौ शोभायां च' इति वैजयन्ती । सेवायामुत्कण्ठा औत्सुक्यं यस्य स तथा । 'उत्कण्ठा स्यादुत्कळिका' इति हलः । रुद्धः दुःखातिशयान्निबद्धः कण्ठो यस्य स तथा लक्ष्मणः श्रीरामं आचष्ट अवदत् । चक्षिङ् व्यक्तायां वाचि लङ् ॥

(सं.चं.) पूर्वं 'अस्मिन् सङ्कटे आत्मना कथं वर्तितव्यम्' इति विभ्रमः वितर्क आसीत् । इदानीं शान्तविभ्रमः सन् स्वेनापि रामानुगमनं कर्तव्यमिति निर्दधार । 'शङ्का वितर्कः सन्देहः संशयो विभ्रमस्तथा' इत्यभिधानम् । अथापि रामस्य वनगमननिर्धारेण जनितया चिन्तया शान्तविभ्रमः विगतशोभो ग्लानमुखो बभूव । 'शोभार्थेऽपि प्रयुज्यन्ते लक्ष्मीश्रीकान्तिविभ्रमाः' इति च । चिन्तया बाष्पमुखो वा । बाष्पक्लिन्नं मुखं यस्य । निरन्तरानुध्यानजनिता मनसोऽप्रसन्नता चिन्ता ॥ ३१–३ ॥

नाथ ते यत्र यात्रा स्यात् तत्र त्वामनुयाम्यहम् ।
त्वत्सेवा मे वरा मुक्तेः किमुतेतरसम्पदः ॥ ३२ ॥

(भा.दी.) नाथेति । हे नाथ, ते यत्र यात्रा गमनं स्यात्, तत्र त्वां अहं अनुयामि अनुसृत्य गच्छामि । तव सेवा त्वत्सेवा मे मम मुक्तेः मोक्षादपि वरा श्रेष्ठा । इतरा मोक्षादन्या सम्पद् राज्यादिरूपा, तस्याः वरेति किमुत ॥ ३२ ॥

यदि यास्यसि मां त्यक्त्वा करुणाकर काननम्[३] ।
क्षुद्रं[४] देहमिमं त्यक्त्वा सेवेय त्वाऽन्यजन्मनि[५] ॥ ३३ ॥

---

१. **'–मुखश्चिन्तयाऽत्यन्तविभ्रमः'** २. **'रुद्धकण्ठो देवमाचष्ट'** । ३. **'करुणाकर मानद'**
४. **'क्षुद्रदेहमिम्'** ५. **'सेवे त्वामन्यजन्मनि'** । **'–मन्यजन्मना'** इति क्वचित् ।

(भा.दी.) यदीति । हे करुणाकर श्रीराम, मां त्यक्त्वा काननं वनं तत् यदि यास्यसि गमिष्यसि, तर्हि क्षुद्रं त्वत्सेवानुपयोगित्वेनापकृष्टम् इमं देहं त्यक्त्वा, त्वा त्वाम्, अन्यच्च तत् जन्म च तस्मिन्, सेवेय सेविष्ये । लिङः कालविशेषानुक्त्या सार्वकालिकत्वादत्र भविष्यदर्थे । षेवृ सेवने इत्यस्माल्लिङ् ॥ ३३ ॥

वेदाहं पुरुषं पूर्ण्णं प्रभुं[1] त्वां प्रकृतेः परम्[2] ।
यत्सेवया कृतार्थाः स्युर्ब्रह्मब्रह्मभवादयः ॥ ३४ ॥

(भा.दी.) वेदेति । पूर्षु सर्वप्राणिशरीरेषु नियामकतया सीदत्यन्तर्यामितया तिष्ठतीति पुरुषस्तम् । 'पूः स्यान्नगरदेहयोः' इति वैजयन्ती । पुरु भूयिष्ठं षं प्राणनं यस्य तमिति वा । 'णकारो बलं षकारः प्राण आत्मा' इति श्रुतेः । पूर्णं सर्वगुणपूर्णम्, विभुं सर्वसमर्थम्, प्रकृतेः परं विलक्षणम्, महालक्ष्म्या अपि उत्तममिति वा, वेद जानामि । विद ज्ञाने लट् । 'विदो लटो वा' (अ.सू.३.४.८३) इति णल् । सेवयाऽलमित्यत्र हेतुत्वेन श्रीरामसेवामहिमानमाह– **यदि**ति । ब्रह्मा च ब्रह्मभवो रुद्रः स च तौ आदी येषां ते तथा, देवगन्धर्वादयः, यस्य तव सेवया कृतः अर्थः प्रयोजनं येषां ते तथा स्युः । तं त्वां वेदेति पूर्वेण सम्बन्धः ॥३४॥

(सं.चं.) ब्रह्मभवः शिवः । सनकाद्या नारदश्च । तैरादिमन्तः सर्वे सन्ताः । कृतार्थाः कृतकृत्या मुक्ताश्च ॥ ३४ ॥

इति भागवताग्रण्यो भगवान् शुश्रुवान् वचः ।
सस्मितं[3] तमवेक्ष्योचे बाढमागम्यतामिति ॥ ३५ ॥

(भा.दी.) इतीति । भगवतो भक्ता भागवतास्तेषु अग्रणीः श्रेष्ठस्तस्य लक्ष्मणस्य इति वचः शुश्रुवान् श्रुतवान् भगवान् श्रीरामः, स्मितेन सहितं यथा भवति तथा सस्मितम्, तं लक्ष्मणमवेक्ष्य, त्वया वनं प्रति मया सह आगम्यताम्, बाढं अनुमतम् । 'बाढं त्वनुमते दृढे' इति वैजयन्ती । इति ऊचे ॥ ३५ ॥

(सं.चं.) बाढमिति सान्त्ववचनम् । अङ्गीकृता तेऽभ्यर्थना । निश्चितं त्वं मया सहाऽगमिष्यसीति । सस्मितमवेक्ष्येति भगवस्तस्मिन् प्रीतिकारुण्ययोः पूरमाह । यतः स भागवताग्रणीः ॥ ३५ ॥

---

१. **'पूर्णं विभुं त्वाम्'** इति वि.ती.पाठः ।

२. **'प्रकृतेः परं विलक्षणम् । प्रकृतिबन्धरहितमिति यावत् । पुरुषम्–'सहस्रशीर्षा पुरुषः' इति सूक्तप्रतिपाद्यम्'** इति का.श्री. ।

३. **'सस्मितस्तम–'**

पुत्रयात्रोद्यमं दृष्ट्वा[1] कौसल्या पुनरब्रवीत् ।
पुरातनानां वचनं मान्यं[2] चेच्छृणु नन्दन ॥ ३६ ॥

(भा.दी.) पुत्रेति । कौसल्या पुत्रस्य श्रीरामस्य यात्रा वनं प्रति गमनं तस्यामुद्यमः प्रयत्नस्तं दृष्ट्वा, हे नन्दन श्रीराम, पुरातनानां पूर्वजानां स्वायम्भुवमन्वादीनां वचनं स्मृतिरूपं वाक्यम्, चेद्यदि मान्यं प्रमाणत्वेन माननार्हं तर्हि तद्वाक्यं श्रुणु इति पुनः अब्रवीत् ॥ ३६ ॥

(सं.चं.) दृष्ट्वा अचाल्यं विदित्वा ॥ ३६ ॥

गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः ।
कामचारप्रवृत्तस्य[3] न कार्य्यं ब्रुवतो वचः ॥ ३७ ॥

(भा.दी.) तद्वाक्यं पठति– **गुरो**रिति । अवलिप्तस्य गर्वितस्य[4] । 'दर्पो मदोऽवलेपः' इति हलः । कर्तुमर्हं कार्यम्, विहितं कर्म तच्च, कार्यं न भवतीत्यकार्यम्, निषिद्धं कर्म तच्च कार्याकार्यम्, द्वन्द्वैकवद्भावः, अजानतः । अत एव कामेन इच्छया चार आचरणं तस्मिन् प्रवृत्तस्तस्य, गुरोः पितुर्विद्योपदेष्टुर्वा, ब्रुवतः स्वेच्छानुसारेण किञ्चिच्छास्त्रनिषिद्धं कर्तव्यतया वदतोऽपि सतः, वचः वाक्यं न कार्यं नाऽदरणीयम् ॥ ३७ ॥

(सं.चं.) पुरातनं स्मृतिवचनं प्रकृतोपयोगितयाऽर्थतोऽनुवदति– गुरोः । अकार्यं कर्तुं ब्रुवतः । रामायणे तु 'गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः । उत्पथं प्रतिपन्नस्य न्याय्यं भवति शासनम्' इति लक्ष्मणवचनत्वेन पठ्यते । कौसल्याऽपि लक्ष्मणोक्तमनूवादेति ग्रन्थकृदाशयः । 'भ्रातुस्ते वदतः पुत्र लक्ष्मणस्य श्रुतं त्वया' इति हि तत्र कौसल्यावचनम् । अवलिप्तस्य काममत्तस्य, अत एव कार्याकार्यविवेकमजानतः, अत एव च रामनिष्कासनाख्ये कामचारे प्रवृत्तस्य दशरथस्य वचो न कार्यमिति कौसल्याया आशयः ॥ ३७ ॥

मानवेन्द्रेण मनुना गाथेयं नन्वगीयत ।
तस्मात् त्वमभिषिच्यस्व राजाऽप्यत्रानुनीयताम् ॥ ३८ ॥

(भा.दी.) मानवेन्द्रेणेति । मानवानां मनुगोत्रभवानां राजर्षीणामिन्द्रेण स्वामिना मनुना स्वायम्भुवमनुना इयं श्लोकरूपा गाथा अगीयत अभिहिता । गै शब्दे लङ् । नन्विति गाथायाः प्रसिद्धिं सूचयति । यस्मात्

१. **'–यात्रोद्यमं ज्ञात्वा'** २. **'मानं चेच्छृणु'**
३. **'कामकारप्रवृत्तस्य'** इति, **'कामकार्यप्रवृत्तस्य'** इति क्वचित् । ४. 'अवलिप्तस्य स्त्रीजितस्य' इति वि.भू.

तस्मात् कारणात् दशरथेन अभिषिच्यस्व अभिषिक्तो भव । षिच सेचने लोट् । राज्ञाऽक्रियमाणत्वात् कथमभिषेकः स्यादित्यत आह– **राजे**ति । राजाऽपि दशरथश्च अत्र अभिषेकविषये अनुनीयताम् । येनकेनाप्युपायेनानुमतः क्रियताम् ॥ ३८ ॥

(सं.चं.) प्रतनं हितवचनं गाथा । 'ಗಾಥೆ' इति भाषायाम् । अनुनीयताम्, अनुनयेन यथाऽनुमन्येत तथा क्रियताम् ॥ ३८ ॥

मातुरेतद् वचः श्रुत्वा[१] प्रोवाच प्रहसन् प्रभुः ।
पितुः शान्तस्य दान्तस्य कार्य्यैवाऽज्ञा गुरोरिति ॥ ३९ ॥

(भा.दी.) मातुरिति । प्रभुः श्रीरामः, मातुः एतत् अभिहितं वचः श्रुत्वा, शान्तस्य भगवन्निष्ठबुद्धेः, दान्तस्य निगृहीतेन्द्रियस्य, गृणाति हितमुपदिशतीति गुरुस्तस्य, पितुः दशरथस्य आज्ञा कार्यैव इति प्रहसन् मन्दहासं कुर्वन् सन् प्रोवाच । वच धातोर्लिट् । तथाच दशरथस्य अवलेपादिदोषाभावात् प्रत्युत शमदमादिगुणोपेत-त्वादेतद्वाक्याविषयत्वेनाऽस्याऽज्ञाऽवश्यं कार्येति भावः ॥ ३९ ॥

(सं.चं.) पितुर्गुरोराज्ञा कार्यैव । पित्रन्यगुरुविषयकत्वात् स्मृतिवचनस्य अपिच नेदं पुत्रकार्यं यत् पितरि दोषारोपणम् । किमुत शमदमादिमति मतिमति पितरि । स किल लोकापवादभियैव वरौ ददौ । नतु काम-चारेण ॥ ३९ ॥

दीर्घश्वासकृतायासा[२] सन्तताश्रुजलाकुला ।
अनिवर्त्त्यं सुतं ज्ञात्वा कौसल्या विललाप सा ॥ ४० ॥

(भा.दी.) दीर्घेति । दीर्घो यः श्वासस्तेन कृत आयासः प्रयासो यया सा तथोक्ता, सन्ततमव्युच्छिन्नं यदश्रु-जलं तेन आकुला निबिडा, कौसल्या सुतं श्रीरामं वनयात्रायाः अनिवर्त्यं निवर्तयितुमशक्यं ज्ञात्वा विललाप परिदेवनं चक्रे । रप लप व्यक्तायां वाचि लिट् ॥ ४० ॥

(सं.चं.) विललाप विषीदन्ती बभाषे ॥ ४० ॥

सपत्न्या भक्ष्यमाणां[३] मां व्याघ्र्या गामिव दुर्बलाम् ।
तात सन्त्यज्य मा याहि नय मामपि काननम् ॥ ४१ ॥

१. 'मातुस्तद्वचनं श्रुत्वा' २. 'दीर्घश्वासा कृतायासा' ३. 'भीष्यमाणां माम्'

(भा.दी.) **सपत्न्ये**ति । हे तात, सपत्न्या कैकेय्या, व्याघ्र्या गामिव धेनुमिव, भक्ष्यमाणाम्, न विद्यते बलं यस्याः सा दुर्बला तां मां सन्त्यज्य मा याहि न गच्छ । अथापि गच्छसि चेत् मामपि काननं तत् प्रति नय ॥ ४१ ॥

(सं.चं.) भक्ष्यमाणां मर्मसु विध्यमानाम् । 'ಕಿತ್ತು ತಿನ್ನು' इति भाषायाम् । 'भीष्यमाणाम्क इत्यपि पाठः स्यात् ॥ ४१ ॥

इत्युक्त ऊचे भगवान् मातरेवं तु मा वद ।
पतिशुश्रूषणात्[1] स्त्रीणां परमात्मा प्रसीदति ॥ ४२ ॥

(भा.दी.) **इती**ति । इति कौसल्यया उक्तः भगवान् श्रीरामः, हे मातः, यस्मात् स्त्रीणां पत्युः शुश्रूषणं सेवा तस्मात्, परमः सर्वोत्तमः आत्मा श्रीहरिः, यद्वा परा सर्वोत्कृष्टा या मा लक्ष्मीस्तस्या आत्मा स्वामी श्रीनारायण इत्यर्थः, प्रसीदति प्रसन्नो भवति । तस्मात् एवं मा वद न ब्रूहि ॥ ४२ ॥

(सं.चं.) मा वद । माशब्दोऽयम्, न माङ् । मा याहीतिवत् । परमात्मा प्रसीदति । स्वयमात्मा च परं प्रसीदति । पतिरपि हि शुश्रूषितः प्रसादयति जायाम् ॥ ४२ ॥

भरतं मामिवेक्षस्व स च त्वां मद्वदर्चयेत् ।
सत्यमानन्दयिष्यामि वत्सरे त्वां चतुर्दशे ॥ ४३ ॥

(भा.दी.) स्ववियोगनिमित्तशोकापायोपायमाह– **भरतमि**ति । हे मातः, त्वं भरतम् मामिव ईक्षस्व । ईक्ष दर्शनाङ्कनयोः लोट् । स च भरतः त्वां मद्वत् अहमिव अर्चयेत् मानयेत् । अर्च पूजायां लिङ् । चत्वारो अधिका दश चतुर्दश । चतुर्दशत्वसङ्ख्यापूरकश्चतुर्दशस्तस्मिन् । 'तस्य पूरणे डट्' (अ.सू.५.२.४८) इति डट् । वत्सरे अहं त्वां आनन्दयिष्यामि । नदि हर्षे लृट् । इदं वचः सत्यं यथार्थम् ॥ ४३ ॥

(सं.चं.) मद्वत् अहमिव । वत्सरे चतुर्दशेऽतीते ॥ ४३ ॥

काकुत्स्थे कथयत्येवं सा देवी देवतोपमा ।
नियम्य नीत्या तं शोकं तस्य स्वस्त्ययनं व्यधात् ॥ ४४ ॥

---

१. **'पतिशुश्रूषया'** इति, **'पति शुश्रूषणाधर्मः'** इति, **'पतिशुश्रूषणं स्त्रीणाम्'** इति च कचित् ।

(भा.दी.) काकुत्स्थ इति । काकुत्स्थे ककुत्स्थगोत्रभवे श्रीरामे एवं कथयति सति देवतायाः उपमा सादृश्यं यस्याः सा तथा सा देवी कौसल्या तमुत्पन्नं शोकं नीत्या ज्ञानेन नियम्य तस्य श्रीरामस्य स्वस्त्ययनं मङ्गल्यवचनं तत् व्यधात् चक्रे ॥ ४४ ॥

(सं.चं.) 'अनुल्लङ्घनीया राजाज्ञा' इति, 'धर्मपथे पतन् पुत्रो न निवारणीयः' इति च राजनीत्या लोकनीत्या च निमित्तभूतया । तादृशनीत्यनुसन्धानेन शोकं नियम्येत्यर्थः । अवर्जनीये न शोकेन प्रयोजनमिति नीत्या वा । स्वस्त्ययनं स्वस्तिवाचनौपयिकं माङ्गलिकं कर्म ॥ ४४ ॥

रक्षोघ्नान्[१] सर्षपान् जप्त्वा बबन्ध तनुमद्ध्यमा ।
चक्राङ्के चक्रिणः पाणौ चक्री त्वां पालयेदिति ॥ ४५ ॥

(भा.दी.) रक्ष इति । तनु कृशं मध्यमं मध्यप्रदेशो यस्याः सा तथोक्ता कौसल्या, रक्षांसि हन्तुं शीलमेषामस्तीति रक्षोघ्नास्तान् सर्षपान् स्वेष्टदेवतामन्त्रेण जप्त्वा, चक्रस्य अङ्को यस्मिन् स तथा तस्मिन्, चक्रिणः श्रीरामस्य पाणौ, चक्रमस्यास्तीति चक्री श्रीहरिः त्वां पालयेत् । पाल रक्षणे लिङ् । 'पातेर्णौ लुगागमो वाच्यः' इत्युक्तेः[२] पा रक्षण इति वा धातुः । इति उद्दिश्य बबन्ध । बन्ध संयमने लिट् ॥ ४५ ॥

(सं.चं.) रक्षोघ्नान् सर्षपान्, रक्षामन्त्रं जप्त्वा बबन्ध । 'रक्षोघ्नैः सर्षपान्' इत्यपि साधुः पाठः । रक्षोघ्नैर्मन्त्रैः सर्षपान् जप्त्वा अभिमन्त्र्येति । 'घृतं श्वेतानि माल्यानि समिधः श्वेतसर्षपान् । उपसम्पादयामास कौसल्या परमाङ्गना' इति रामायणे । श्वेतसर्षपैः किं करणीयमिति रामायणे न स्फुटम् । तदिह कविराह । पालयेदित्युक्त्वा पाणौ बबन्ध 'यत्र रूपं तत्र गुणाः' इति महतां वचनं स्मारयन्नाह– तनुमध्यमेति । अत एव रामायणे परमाङ्गनेत्याह । गुणेन रूपेण च परमेत्यर्थः ॥ ४५ ॥

सर्वदा स्वस्तये सन्तु सर्वभूतानि तात ते ।
सर्वभूतान्तरात्मा च केशवः स्वस्तयेऽस्तु ते ॥ ४६ ॥

---

१. **'रक्षोघ्नैः सर्षपान्'**

२. वार्तिकमिदं बहुधा पठन्ति । **'लुगागमस्तु तस्य वक्तव्यः'** (अ.सू.७.३.३७) इति काशिकायामुद्धृतः पाठः । **'पातेर्णौ लुग् वक्तव्यः'** इति भट्टोजिः ।

(भा.दी.) सर्वदेति । हे तात श्रीराम, ते तव स्वस्तये मङ्गळाय । 'उपसर्गविभक्तिस्वरप्रतिरूपकाश्च'[१] इत्युक्तेर्विभक्तिप्रतिरूपकमव्ययमेतत् । सर्वभूतानि सर्वप्राणिनः सन्तु भवन्तु । सर्वभूतानामन्तरात्मा अन्तर्यामी केशवश्च ते स्वस्तये सर्वदा अस्तु ॥ ४६ ॥

(सं.चं.) स्वस्तये सन्ततसौख्याय 'सचस्वा नः स्वस्तये' इति हि श्रुतिः । सर्वभूतान्तरात्मानौ केशौ ब्रह्म-शिवौ । क इति वायुश्च । तानप्ययं वर्तयतीति केशवः ॥ ४६ ॥

[२]विनतेवाऽत्मतनयमुपेन्द्रमिव चादितिः ।
विष्णुप्रसादाद् द्रक्ष्यामि त्वां विक्रान्तमुपागतम् ॥ ४७ ॥

(भा.दी.) विनतेति । आत्मनः तनयं पुत्रं गरुडं विनतेव, अमृतहरणार्थं स्वर्गं प्रति गतं तद्धृत्वा पुनरागतं गरुडं विनतादेवीव, उपेन्द्रं अदितिरिव, बलेः सत्रं प्रति त्रिपदभूतळयाचनार्थं गतं ततश्च त्रिपदच्छलेन[३] त्रैलोक्यं हृत्वाऽऽगतं वामनं अदितिदेवीव, विक्रान्तं पराक्रमिणम्, उपागतं त्वां विष्णोः प्रसादोऽनुग्रहस्तस्मात्, द्रक्ष्यामि ॥ ४७ ॥

(सं.चं.) मातुर्दास्यविमोक्षार्थं स्वर्गादमृतमाहृत्य प्रत्यागतमात्मतनयं गरुडमिव विनता । बलियज्ञ-शरणात् प्रत्यागतमुपेन्द्रं वामनमिवादितिः । विक्रान्तं देवेषु दर्शितविक्रमं गरुडम् । विक्रान्तं दर्शितपदक्रमणं वामनम् । तथा रक्षःसु दर्शितविक्रमं रामम् ॥ ४७ ॥

पुरुषोत्तम भक्त्या मे पुनरेहि सलक्ष्मणः ।
इत्युक्त्वा मूर्ध्न्युपाघ्राय परिरेभे सुतं सती ॥ ४८ ॥

(भा.दी.) पुरुषोत्तमेति । हे पुरुषोत्तम श्रीराम, मे भक्त्या, मयि विद्यमानस्नेहेनेत्यर्थः, सलक्ष्मणः सन् पुनः एहि आगच्छ । इण् गतौ लोट् । सती पतिव्रता कौसल्या इति रामं प्रति उक्त्वा मूर्धा शिरस्तस्मिन् उपाघ्राय सुतं परिरेभे आलिङ्गितवती । रभ राभस्ये लिट् ॥ ४८ ॥

(सं.चं.) अयि पुरुषपुङ्गव, मे मयि विद्यमानया भगवद्भक्त्या मम सम्बन्धिन्या त्वयि विद्यमानया मद्भक्त्या निमित्तभूतया पुनरेहीति वा । पुरुषोत्तमे भगवति भक्त्येति समस्तं वा पदम् ॥ ४८–९ ॥

---

१. सप्तदशं गुणसूत्रमिदम् । (अ.सू.१.४.५७) इत्यत्रोद्धृतं काशिकायाम् । १.१.३७ तमे सूत्रे भट्टोजिना ।

२. '**विनतेव स्वतनयमुपेन्द्रमिव वाऽदितिः**' ३. '**त्रिपदव्याजेन**'

प्रसाद्य मातरं देवः परिक्रम्य प्रणम्य च ।
निर्ज्जगाम गृहात् तस्माल्लक्ष्मीवान् लक्ष्मणान्वितः[१] ॥ ४९ ॥

(भा.दी.) प्रसाद्येति । देवः मातरं कौसल्यां प्रसाद्य प्रसन्नीकृत्य, परिक्रम्य प्रदक्षिणीकृत्य, प्रणम्य च, तस्मात् मातृसम्बन्धिनः, गृहं मन्दिरं तस्मात्, लक्ष्मीः कान्तिरस्यास्तीति लक्ष्मीवान् सन्, मात्रादिवियोगे प्रसक्तेऽपि पूर्णानन्दमयत्वात् मुखवैवर्ण्यादिरहित इत्यर्थः, लक्ष्मणान्वितः सन् निर्जगाम ॥ ४९ ॥

रराज रामोऽतनुराजमार्ग्गे स श्यामधामा वियतीव मेघः ।
स्वदृष्टिवृष्ट्या परितापहारी मुहूर्त्तमार्त्तिं शमयन् प्रजानाम् ॥ ५० ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे अयोद्ध्याकाण्डे पञ्चमः सर्ग्गः ॥

—०—

(भा.दी.) रराजेति । श्यामं धाम तेजो यस्य स तथा, स्वस्य दृष्टिर्दर्शनं सैव वृष्टिस्तया प्रजा जनास्तासां परितापान् आध्यात्मिकादितापान् हर्तुं शीलमस्यास्तीति तथोक्तः । सः श्रीरामः मुहूर्तो मुहूर्तकालस्तं प्रजानामार्तिं शमयन् सन्, वियद् व्योम तस्मिन् मेघ इव । अतनुरसूक्ष्मो यो राजमार्गस्तस्मिन् रराज । राजृ दीप्तौ लिट् । श्रीरामस्य वनयात्रावार्ताश्रवणेनानुतप्ताः प्रजाः राजमार्गे गच्छन्तं श्रीरामं दृष्ट्वा मुहूर्तं परितापान् जहुरिति भावः ॥ ५० ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायामयोध्याकाण्डे पञ्चमः सर्गः ॥

—०—

(सं.चं.) उपजात्योपसंहरति– रराज । श्यामधामा मेघश्च रामश्च । स्ववनगमननिर्धारजनितामार्तिं मुहूर्तं स्वदर्शनेन शमयन् रामः परितापं अन्तर्वेदनां जहार रामः । निदाघजनितामार्तिं मुहूर्तं शमयन् वह्निस्तापं जहार मेघः । वियतीवअतनौ विशाले राजमार्गे ॥ ५० ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायामयोध्याकाण्डे पञ्चमसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– ६२१+५०=६७१]

१. 'लक्ष्मणाग्रजः'

षष्ठः सर्गः

महोत्सवोत्सुकजनं प्रविश्य स्वपुरं प्रभुः ।
अन्तःपुरान्तरगतां देवीमूचे चिकीर्षितम्[1] ॥ १ ॥

(भा.दी.) श्रीरामो राजमार्गेण कुत्र गतवानित्यत आह– **महे**ति । प्रभुः श्रीरामः, महान् यः उत्सवः तद्दर्शने उत्सुकः कौतुकयुक्तो जनो यस्मिन् तत्तथा तत्, स्वपुरं स्वमन्दिरं प्रविश्य, अन्तःपुरस्य यदन्तरं मध्यं तत् गतां देवीं सीतां प्रति, कर्तुमिष्टं चिकीर्षितं तत्, स्वकर्तव्यं वनं प्रति प्रव्रजनम् ऊचे ॥ १ ॥

(सं.चं.) रामाभिषेकाख्ये महोत्सवे उत्सुकाः, यतोऽज्ञातरामवनगमनवार्ता जना यत्र । स्वपुरं स्वमन्दिरम् । 'पुरं शरीरमित्याहुर्गृहोपरिगृहे पुरम् । पुरो गुग्गुलुराख्यातो नगरेऽपि पुरं पुरी' इति धरणिः । देवीं सीतां प्रति स्वचिकीर्षितं वनगमनमाह ॥ १ ॥

त्वया सह वनं यामि[2] देवेत्यूचेऽथ जानकी ।
पुर एवोष्यतां तावत्[3] त्वयेत्यूचे जगत्पतिः ॥ २ ॥

(भा.दी.) मयेति । अथ जानकी हे देव, त्वं मया सह वनं तत्प्रति याहि इति ऊचे । जगत्पतिः श्रीरामः तावत् मद्वनवासपर्यन्तं त्वया पुरं गृहं तस्मिन्नेव उष्यतां स्थीयताम्, वस निवासे लोट्, इति ऊचे ॥ २ ॥

(सं.चं.)त्वया सह । 'धर्मे चार्थे च कामे च नातिचरामि' इति प्रतिज्ञातम् । तावत् यावन्मम वनात् प्रत्या-वर्तनम् । मद्वचनपालनमेव हि वरं प्रत्यवायसङ्कटान्मया सह वनगमनात् ॥ २ ॥

समूदे सह तद्यात्रां कृच्छ्रेण किल केशवः ।
सदाऽप्येकधियोरेतद् देवदेव्योर्विडम्बनम् ॥ ३ ॥

---

१. **'अन्तःपुरगतां देवीमूचे किं ते चिकीर्षितम् ।'**

२. **'मया सह वनं याहि'** इति.वि.ती.पाठः ।

३. **'एवोष्यतां तन्वि त्वये–'** । **'हे तन्वि कोमले शरीरे'** इति का.श्री. ।

(भा.दी.) समिति । केशवः श्रीरामः, स्वेन सह तस्याः सीतायाः यात्रा तद्यात्रा ताम्, कृच्छ्रं निर्बन्धस्तेन समूदे किल, तथाऽस्त्विति संवादं चक्रे किल । वद व्यक्तायां वाचि लिट् । इदं च लौकिकदम्पत्यनुकरण-मात्रमित्याह– **सदे**ति । सदाऽपि अनाद्यनन्तकालेऽपि एका एकार्थविषयिणी धीर्ययोस्ते तथोक्ते तयोः, देवदेव्योः श्रीरामसीतयोः, एतत् विरुद्धधीदम्पतिवत् सम्भाषणादिकम्, विडम्बनं लौकिकदम्पत्यनुकरणमात्रम्, न तु भिन्न-मतित्वेनेति भावः ॥ ३ ॥

(सं.चं.) कृच्छ्रेण कथञ्चित् समूदे संवदते स्म । 'व्यक्तवाचां समुच्चारणे' (अ.सू.१.३.४८) इत्यात्मने-भाषा । व्यक्तवाचां मनुष्याणां समुच्चारणं सम्भाषणम् ॥ ३ ॥

वनवासविवादं तं राजराज्ञ्योः[१] प्रशुश्रुवान् ।
अन्तःपुरजनः सर्वो रुरोद विवशो भृशम् ॥ ४ ॥

(भा.दी.) वनेति । राजराज्ञ्योः रामसीतयोः, तं वने वासस्तस्मिन् विषये यो विवादस्तं प्रशुश्रुवान् प्रकृष्टतया श्रुतवान्, सर्वः अन्तःपुरे विद्यमानो जनः, विवशः शोकातिशयात् परवशः सन्, भृशमत्यन्तं रुरोद । रुदिर् अश्रुविमोचने लिट् ॥ ४ ॥

(सं.चं.) त्यक्तराज्योऽपि राम एव जनानामभिमतो राजा । राज्ञी च सीता । राममुखेनैव प्रकटं श्रुतवान् ॥ ४ ॥

लक्ष्मणं बाष्पपूर्णाक्षं पार्श्वे प्रह्वमुपस्थितम्[२] ।
ध्यायन्तमथ कर्त्तव्यं भगवान् समभाषत[३] ॥ ५ ॥

(भा.दी.) लक्ष्मणमिति । अथ भगवान् बाष्पेण अश्रुणा पूर्णे अक्षिणी यस्य स तथा तम्, पार्श्वमुपान्तं तस्मिन् अनुस्थितम्, प्रह्वं अवनतम्, कर्तुमर्हं कर्तव्यं तत्, अस्यामवस्थायां कर्तव्यकार्यं किमिति ध्यायन्तं आलोचयन्तं लक्ष्मणं समभाषत ॥ ५ ॥

(सं.चं.) लक्ष्मणस्य वनगमनं पूर्वमनुमतम्–'बाढमागम्यताम्' (५.३५) इति । अथापि तस्य मनोदार्ढ्यं परीक्षमाण इव पुनरपि भगवान् समभाषत कारणविशेषं विवक्षुः ॥ ५ ॥

---

१. **'तं रामदेव्योः'** २. **'प्रह्वमनुस्थितम्'** इति वि.ती.पाठः । ३. **'भगवांस्तमभाषत'**

कैकेय्या नियतो राजा मातरौ नौ न मानयेत् ।
भरतः श्रीमदान्धश्च तस्मादत्रोष्यतां त्वया ॥ ६ ॥

(भा.दी.) कैकेय्येति । कैकेय्या नियतः वरव्याजेन नियमितः, बद्ध इति यावत्, राजा दशरथः नौ आवयोः मातरौ कौसल्यासुमित्रे न मानयेत् न सत्कुर्यात् । मान पूजायां लिङ् । श्रीनिमित्तको यो मदस्तेन अन्ध इवान्धः, गर्वित इत्यर्थः, भरतश्च नौ मातरौ यस्मान्न मानयेत् तस्मात् कारणात् त्वया अत्र अयोध्यायां मातृमाननार्थं उष्यताम् । वस निवासे लोट् ॥ ६ ॥

(सं.चं.) नियतः नियन्त्रितः, वशीकृतः । भरतश्च श्रीमदान्धः स्यात् । सम्भावनोक्तिरियं केवलं लक्ष्मणस्य निर्धारं श्लथयितुम् । तदपि लोकविडम्बनम् । तेन सोऽपि नौ मातरौ कौसल्यासुमित्रे न मानयेच्च । चकारः सम्भावनायाम् ॥ ६ ॥

मज्जनन्या हि[1] शुश्रूषा मच्छुश्रूषैव नान्यथा ।
किञ्चित्क्लेशासहं[2] प्रेष्ठं त्वां वनं न नयाम्यहम् ॥ ७ ॥

(भा.दी.) त्वच्छुश्रूषाभावात् कथं स्थातव्यमित्यत आह– **मदिति** । मज्जनन्याः कौसल्यायाः शुश्रूषा मच्छुश्रूषैव मत्प्रीतिहेतुत्वान्मम सेवैव । अन्यथा अन्यसेवासदृशी न हि यस्मात् । 'हि हेतावधारणे' इत्यमरः । तस्मात् किञ्चित् स्वल्पो(ऽपि) यः क्लेशस्तं न सहत इति किञ्चित्क्लेशासहस्तं प्रेष्ठं प्रियतमं त्वां अहं वनं प्रति न नयामि ॥ ७ ॥

(सं.चं.) मज्जनन्याः शुश्रूषाऽपि मच्छुश्रूषैव हि । न केवलमेवम् । सम्प्रति तु मज्जनन्याः शुश्रूषैव मच्छुश्रूषा । अन्यथा जननीशुश्रूषामकृत्वा मया सह वनगमनेन मच्छुश्रूषा न कृता भवति हि । मदिष्टकरणं हि मच्छुश्रूषा । न त्वदिष्टकरणमिति । किञ्चिदितिकारणान्तरमनेनाह । वनं नीत्वा न क्लेशयामि । क्लेशासहत्वात् प्रेष्ठत्वाच्च मे ॥ ७–८ ॥

एवं ब्रुवाणे देवेऽस्मिंस्तूर्णं पादाभिवन्दनम् ।
कृत्वाऽऽर्य्यस्य तथाऽर्य्याया रुदन्नाचष्ट लक्ष्मणः ॥ ८ ॥

---

१. **'मज्जनान् पाहि'** इति भ्रान्तः पाठः । २. **'किञ्च क्लेशासहम्'**

(भा.दी.) एवमिति । (अस्मिन्) देवेशे श्रीरामे एवं ब्रुवाणे सति वदति सति, लक्ष्मणः तूर्णं यथा भवति तथा आर्यस्य स्वामिनः श्रीरामस्य तथा आर्यायाः साध्व्याः सीतायाः पादयोरभिवन्दनं तत् कृत्वा रुदन् आचष्ट ॥ ८ ॥

कौसल्या नैव शोच्या सा त्वद्वियोगं सहेत चेत् ।
यस्या ग्रामसहस्रं हि निसृष्टमुपजीवनम् ॥ ९ ॥

(भा.दी.) कौसल्येति । हि यस्मात् यस्याः कौसल्यायाः उपजीव्यतेऽनेनेत्युपजीवनम्, उपजीवनहेतुभूतमित्यर्थः, ग्रामसहस्रं दशरथेन निसृष्टं पूर्वमेव दत्तम् । तस्मात् कौसल्या चेद्यदि तव वियोगस्त्वद्वियोगस्तं सहेत । षह मर्षणे लिङ् । तर्हि सा नैव शोच्या, त्वद्वियोगव्यतिरिक्तशोककारणाभावाच्छोचितुमर्हा न ॥ ९ ॥

(सं.चं.) यदि कौसल्या त्वद्वियोगं सहेत तदा मादृशेन सेवकेन न किमपि प्रयोजनमित्याह– कौसल्या नैव शोच्या । 'कौसल्या बिभृयादार्या सहस्रमपि मद्विधान् । यस्याः सहस्रं ग्रामाणां सम्प्राप्तमुपजीवनम् । तदात्मभरणे चैव मम मातुस्तथैव च । पर्याप्ता मद्विधानां च भरणाय यशस्विनी' इति रामायणे ॥ ९ ॥

कौसल्यां च सुमित्रां च भरतस्त्वयि गौरवात् ।
पूजयेदधिकं मातुः कृत्यं नास्त्यत्र मे ततः ॥ १० ॥

(भा.दी.) कौसल्यामिति । भरतः त्वयि विद्यमानं यद्गौरवं बहुमानस्तस्मात् कौसल्यां च सुमित्रां च मातुः स्वमातुः कैकेय्याः अधिकं यथा भवति तथा पूजयेत् मानयेत् । पूज पूजायां लिङ् । ततः कारणात् अत्र अयोध्यायां कृत्यं कार्यं मे नास्ति ॥ १० ॥

(सं.चं.) तस्मादत्रायोध्यायां स्थित्वा मम किमपि करणीयं नास्ति ॥ १० ॥

प्रेष्ठोऽहं चेत् तव स्वामिन् कथं मां न नयस्यहो ।
त्वच्छुश्रूषोचितं साक्षात् प्रेष्यं[१] शिष्यं तवानुजम् ॥ ११ ॥

(भा.दी.) प्रेष्ठ इति । हे स्वामिन्, चेत् (यदि) तव अहं प्रेष्ठः अतिशयेन प्रियस्तर्हि साक्षात् मुख्यतः तव शुश्रूषायामुचितं योग्यम्, प्रेष्यं किङ्करम्, शिष्यं शिक्षणीयम्, तव अनुजं मां कथं न नयसि । अहो दुरदृष्टमत्याश्चर्यम् ॥ ११ ॥

---

१. **'प्रेष्यम् (प्र)एषयितुं योग्यम्। 'गुणोऽप्यत्रेति केचित्' इति केषाञ्चित्पक्षमात्रित्य प्रेष्यमित्युक्तम्।अन्यथा 'प्रादूहोढोढ्येषैष्येषु' इत्यनेन वृद्धौ सत्यां प्रैष्यमिति स्यात्'** इति का.श्री. ।

(सं.चं.) प्रेष्यो दासः । 'प्रेष्यः प्रोक्तः प्रतिस्कन्दः' इत्यभिधानम् । 'प्रैष्यः' इति साधु रूपमिति केचित् पाणि-नीयाः । तथाहि वार्तिकं पपाठ पतञ्जलिः–'प्रादूहोढोढ्येषैष्येषु' (अ.सू.५.१.८९) इति । वामनस्तु ऊहपदं परित्यज्य पपाठ–'प्रादूढोढ्येषैष्येषु वृद्धिर्वक्तव्या' इति । तेन प्र+एष्यः= प्रैष्य इति रूपमिति तेषां मतम् । अथापि 'ईष गतौ' इति धातोः प्रेष्य इति रूपनिष्पत्तिं तेऽभ्युपयन्ति–'प्र+ईष्यः' प्रेष्य इति । अथवा प्रेषृ धातुरेव हि पठ्यते । तथाच प्रेषयितुं योग्यः प्रेष्य इति स्वरसत एव रूपसिद्धौ किमनेन प्रादक्षिण्येन नासास्पर्शनेन? ॥ ११ ॥

देव त्वं सह वैदेह्या वने स्वैरं हि रंस्यसे ।
सकलः सफलः कालो युवयोः सेवयाऽस्तु मे[1] ॥ १२ ॥

(भा.दी.) **देवेति** । दे देव, त्वं वैदेह्या सीतया सह वने स्वैरं स्वेच्छानुसारेण रंस्यसे हि क्रीडिष्यसि हि । रमु क्रीडायां लृट् । (वां) युवयोः, दम्पत्योः जाया च पतिश्च दम्पती तयोः, सेवया सकलः कालः सफलः सार्थकः अस्तु ॥ १२ ॥

(सं.चं.) स्वस्य ईरः ईरणा प्रेरणा यथा तथा स्वैरं यथेच्छम् । 'स्वादीरेरिणोः' इति वार्तिकम् (अ.सू. ६.१.८९) ॥ १२–३ ॥

एवमुक्तवतस्तस्य भक्तिं तां भक्तवत्सलः ।
विज्ञाय प्रत्युवाचेदं लक्ष्मणं लक्ष्मणाग्रजः ॥ १३ ॥

(भा.दी.) **एवमिति** । भक्तेषु वत्सलः स्निग्धः लक्ष्मणाग्रजः श्रीरामः एवं उक्तवतः तस्य लक्ष्मणस्य तां भक्तिं विज्ञाय इदं वचः लक्ष्मणं प्रत्युवाच ॥ १३ ॥

वत्सैवं स्यात्[2] प्रसन्नोऽस्मि त्वमापृच्छ्य[3] सुहृज्जनम् ।
ये राज्ञे वरुणप्रत्ते धनुषी ते समानय ॥ १४ ॥

(भा.दी.) **वत्सेति** । हे वत्स, एवं त्वदुक्तरीत्या स्यात् भवतु । अस्तेर्लिङ् । अहं ते प्रसन्नः अस्मि । त्वं सुहृत् बन्धुभूतो यो जनस्तम् आपृच्छ्य अनुज्ञाप्य, राज्ञे दशरथाय वरुणेन प्रत्ते दत्ते ये धनुषी ते समानय ॥ १४ ॥

---

१. **'कालो दम्पत्योः सेवयाऽस्तु वाम्'** इति वि.ती.पाठः स्यात् । **'युवयोः सेवनेऽस्तु मे'** इति कचित् । २. **'तत् तव स्यात्'**
३. **'त्वमापृच्छ'** । **'त्वं सुहृज्जनं मात्राद्यं स्वजनं आपृच्छ्य पृष्ट्वा, तदनुज्ञां गृहीत्वेति यावत्, आगच्छ'** इति का.श्री. ।

(सं.चं.) गमनार्थमनुज्ञाग्रहणमापृच्छा । राज्ञे जनकाय वरुणेन दत्ते । तेन चोपायनत्वेन रामलक्ष्मणयोर्दत्ते । तथाहि रामायणे– 'ये च राज्ञो ददौ दिव्ये महात्मा वरुणः स्वयम् । जनकस्य महायज्ञे धनुषी रौद्रदर्शने । अभेद्यकवचे दिव्ये तूणी चाक्षयसायकौ । आदित्यविमलौ चोभौ खड्गौ हेमपरिष्कृतौ । सत्कृत्य निहितं सर्वमेतदाचार्यसद्मनि । स त्वमायुधमादाय क्षिप्रमाव्रज लक्ष्मण' इति । अथवा राज्ञे दशरथायैव दत्ते । तदा रामायणवचनस्यायमर्थः– जनकस्य महायज्ञे, सहैव निर्वृत्ते रामविवाहप्रसङ्गे, युक्ते काले रामलक्ष्मणयोर्दातव्ये इति स्वयं वरुणेन राज्ञो दशरथस्य दत्ते इति । अत एवैतावन्तमनेहसमाचार्यस्य वसिष्ठस्य सद्मनि निहितं विन्यस्तम् । वस्तुतस्तु 'ये च राज्ञे ददौ दिव्ये' इत्येव ग्रन्थकृदभिमतो रामायणपाठ इति भाति ॥ १४–५ ॥

अभेद्यं कवचं हृद्यमक्षयेषू तथेषुधी ।
खड्गौ चाऽनय विन्यस्तं सर्वमाचार्य्यसद्मनि ॥ १५ ॥

(भा.दी.) **अभेद्यमि**ति । आचार्यस्य कुलाचार्यस्य सद्मनि वेश्मनि विन्यस्तं निक्षिप्तम्, अभेद्यं शत्रुभिर्भेत्तुमशक्यम्, हृद्यं मनोहरं कवचम्, तथा अक्षयेषू अक्षया इषवो ययोस्तौ तथोक्तौ इषुधी तूणीरौ, खड्गौ चेति सर्वं समस्तम्, यद्वरुणदत्तं तत् आनय ॥ १५ ॥

इत्युक्तमात्रे[१] सौमित्रिः स्वमापृच्छ्य[२] सुहृज्जनम् ।
आचार्य्यसद्मनो हेतीर्हेमदीप्ताः समानयत् ॥ १६ ॥

(भा.दी.) **इती**ति । सौमित्रिः श्रीरामेण इति वचसि केवलमुक्तमुक्तमात्रं तस्मिन् सति, स्वं स्वकीयं सुहृद्बन्धुभूतो यो जनस्तम्, आपृच्छ्य अहं श्रीरामेण सह वनं प्रति गच्छामीत्यादियात्राप्रसङ्गमुक्त्वा, आचार्यसद्मनः कुलाचार्यगृहात् हेम्ना दीप्ताः हेमदीप्ताः, सुवर्णबन्धा इत्यर्थः, हेतीः आयुधानि समानयत् ॥ १६ ॥

(सं.चं.) **सुहृज्जनमि**ति । मुख्यतो मातरं सुमित्राम्, भार्यामूर्मिळां च । हेतीरायुधानि धनुषी, अभेद्ये कवचे, अक्षयेषू इषुधी, खड्गौ च ॥ १६ ॥

---

१. 'इत्युक्तमात्रः' २. 'तमापृच्छ्य'

पुनश्च देवस्याऽदेशात् स दानाय[1] समानयत् ।
सुयज्ञं च वसिष्ठस्य सूनुमन्यान् द्विजानपि ॥ १७ ॥

(भा.दी.) पुनरिति । सः लक्ष्मणः पुनश्च देवस्य श्रीरामस्य आदेशः सुयज्ञमाकारयेत्याज्ञा तस्मात् । वसिष्ठस्य सूनुं सुयज्ञं सुयज्ञनामानम्, अन्यान् द्विजानपि, दानं प्रदानं तस्मै समानयत् आकारयामास । णीञ् प्रापणे लङ् ॥ १७ ॥

(सं.चं.) देवस्य रामस्य । वसिष्ठस्य सूनुं सुयज्ञं सभार्यम् ॥ १७ ॥

कोटीरकाञ्चीकटककेयूरादिविभूषणम् ।
अनर्घं[2] राघवः प्रादात् सुयज्ञाय मणीनपि ॥ १८ ॥

(भा.दी.) कोटीरेति । राघवः । न विद्यते अर्घः मूल्यं यस्य तत्तथा तत् । कोटीरं किरीटं तच्च, काञ्ची मेखला सा च, कटको[3] वलयः स च, केयूरमङ्गदं तच्च तानि आदीनि यस्य तत् विभूषणं च तत् । मणीनपि रत्नान्यपि सुयज्ञाय वसिष्ठपुत्राय प्रादात् ॥ १८ ॥

(सं.चं.) 'आहुः किरीटमुष्णीषं कोटीरम्' इत्यभिधानम् । 'कलापः सप्तकी काञ्ची मेखला रशना तथा' इति च । **'ಉಡುದಾರ', 'ನೇವಳ'** इति भाषायाम् । कटकः हस्तभूषणं पादभूषणं च । 'आवापः परिहार्यः स्यात् कटको वलयस्तथा' इति । 'सिञ्जिनी पादकटकः' इति च । **'ಕಡಗ'** इति भाषायाम् । 'केयूरमङ्गदम्' इति च । **'ತೋಳುಬಂದಿ, ವಂಕಿ'** इति भाषायाम् । अनर्घं विभूषणजातम् । अनर्घान् मणीनपि ॥ १८ ॥

भूषणानि परार्द्ध्याणि वासांसि विविधानि च ।
सुयज्ञपत्न्यै प्रददौ रामपत्नी मुदाऽन्विता ॥ १९ ॥

(भा.दी.) भूषणानीति । रामपत्नी सीता, परार्ध्याणि अत्युत्तमानि भूषणानि, विविधानि वासांसि वस्त्राणि च, सुयज्ञपत्न्यै मुदा प्रीत्या अन्विता सती प्रददौ ॥ १९ ॥

---

१. **'स्वस्वत्वत्यागपूर्वकं परस्वत्वापादनं दानम्। 'तुभ्यमिदं सम्प्रददे' इति परस्वत्वापादनम्। 'न मम' इति स्वस्वत्वपरित्यागः'** इति का.श्री.।

२. **'अनर्घ्यान्'** । **'अर्घं मूल्यमर्हन्तीत्यर्घ्याः। न अर्घ्याः अनर्घ्याः।ताननर्घ्यान् मूल्यरहितान् मणीनमपि प्रादात्'** इति का.श्री. । **'अनर्घ्यम्'** इति च क्वचित् ।

३. **'कटकं हस्ताभरणं तच्च'**

(सं.चं.) पराद्धर्यमुत्कृष्टम् । 'मुख्यं पराद्धर्य प्रवरं प्रबर्हम्' इत्यभिधानम् । परस्मिन्नर्द्धे स्थाने भवमित्यर्थः । 'परावराधमोत्तमपूर्वाच्च' (अ.सू.४.३.५) इति यत् ॥ १९ ॥

मातुलेनाऽत्मने दत्तं नागं शत्रुञ्जयं[१] प्रभुः ।
हेमभूषं ददौ तस्मै सहस्रेण गवां सह ॥ २० ॥

(भा.दी.) मातुलेनेति । प्रभुः श्रीरामः मातुलेन जनकेन आत्मने स्वस्मै विवाहसमये दत्तं शत्रुञ्जयम् शत्रुञ्जयनामानं हेममयी भूषाऽलङ्कारो यस्य स तथा तम् नागं गजं गवां धेनूनां यत्सहस्रं तेन सह तस्मै सुयज्ञाय ददौ ॥ २० ॥

(सं.चं.) मातुलेन कौसल्याभ्रात्रा । मातुलशब्देन श्वशुरो गृह्यत इत्यपि व्याचक्षते । गवां सहस्रेण सह । एतेन 'नागः शत्रुञ्जयो नाम मातुलो यं ददौ मम । तं ते गवां सहस्रेण ददामि द्विजपुङ्गव' इत्येव प्रतनो रामायणपाठ इति निश्चीयेत । अर्वाञ्चस्त्वन्यथा पठन्ति– 'तं ते गजसहस्रेण' इति 'तं ते निष्कसहस्रेण' इति च ॥ २० ॥

ब्राह्मणेभ्यस्तथाऽन्येभ्यः सर्वेभ्योऽर्थिभ्य एव च ।
यथेष्टं प्रददौ वित्तं प्रीतास्ते चाऽशिषोऽवदन्[२] ॥ २१ ॥

(भा.दी.) ब्राह्मणेभ्य इति । श्रीरामः अन्येभ्यः सर्वेभ्यः ब्राह्मणेभ्यः, अर्थिभ्यः ब्राह्मणातिरिक्तयाचकेभ्यश्च वित्तं धनं तत्, इष्टमीप्सितमनतिक्रम्य यथेष्टम्, अभीष्टपूर्तिर्यथा भवति तथेत्यर्थः, प्रददौ । ते च ब्राह्मणाद्या प्रीताः सन्तः आशिषः शुभवाक्यानि ताः अवदन् ॥ २१ ॥

(सं.चं.) ब्राह्मणेभ्यः, अन्येभ्यः तदन्येभ्यश्च, इति सर्वेभ्यः अर्थिभ्यश्च । सुयज्ञादन्येभ्यो ब्राह्मणेभ्य इति वा । तदितरेभ्यश्च सर्वेभ्योऽर्थिभ्यः । यथेष्टमेव प्रददौ ॥ २१–३ ॥

ततः सौमित्रिमाहूय भगवानिदमब्रवीत् ।
धनराशिमिमं पश्य लक्ष्मणोत्तमलक्षण[३] ॥ २२ ॥

(भा.दी.) तत इति । ततः भगवान् श्रीरामः सौमित्रिं लक्ष्मणं आहूय उत्तमानि लक्षणानि अङ्गसम्पदो यस्य स तथा तत्सम्बुद्धिः, हे लक्ष्मण, इमं धनराशिं पश्य इति अब्रवीत् ॥ २२ ॥

१. 'शत्रुजयम्' २. 'प्रीतास्तेनाऽशिषोऽवदन्' ३. '–णोत्तमलक्षणम्'

द्विजाग्र्रेभ्यश्च भृत्येभ्यः[१] सुहृद्भ्यश्च प्रदीयताम् ।
योयो जनोऽधुना वित्तं यद्यदिच्छति तद् दिश ॥ २३ ॥

(भा.दी.) द्विजेति । द्विजेषु अग्र्याः श्रेष्ठास्तेभ्यश्च, भृत्येभ्यश्च, सुहृद्भ्यो बन्धुभ्यश्च त्वया वित्तं प्रदीयताम् । प्रदानप्रकारं दर्शयति– **य** इति । अधुना इदानीं यःयः जनः यत्‌यत् वित्तं इच्छति, तस्मैतस्मै तत्‌तत् वित्तं दिश प्रयच्छ । दिश अतिसर्जने लोट् ॥ २३ ॥

अगस्त्यं कौशिकमुनिं गार्ग्यं शाण्डिल्यमप्युत[२] ।
तैत्तिरीयं गुरुं चाऽशु तर्प्पयैतैर्म्महाधनैः ॥ २४ ॥

(भा.दी.) अगस्त्यमिति । अगस्त्यम्, कुशिकगोत्रे भवः कौशिकः सचासौ मुनिश्च तम्, गर्गस्य गोत्रे भवं गार्ग्यम्, शाण्डिल्यमपि, उत तैत्तिरीयम् तैत्तिरीयाख्यमुनिम्, गुरुं वसिष्ठं च, एतैः महान्ति च तानि धनानि च तैः आशु तर्पय प्रीणय । तृप प्रीणने लोट् ॥ २४ ॥

(सं.चं.) कौशिकमुनिं विश्वामित्रम् । तैत्तिरीयं गुरुं तैत्तिरीयशाखिनामाचार्यम् । 'आचार्यस्तैत्तिरीयाणामभिरूपश्च वेदवित्' इति रामायणे ॥ २४ ॥

सूतं च मे चित्ररथं बन्दिहासकमल्लकान् ।
तर्प्पयान्यांश्च शिल्पाद्यान्[३] रजकान्[४] श्मश्रुवर्द्धकान् ॥ २५ ॥

(भा.दी.) सूतमिति । चित्ररथं चित्ररथनामकं मे सूतं सारथिं च, वन्दिनः स्तुतिपाठकास्ते च, हासकाः परिहासकास्ते च, मल्लका मल्लास्ते च तान्, शिल्पाः शिल्पविद्यावन्तः कार्वादयस्तान्, अन्यांश्च रजकान् वस्त्रशोधकान्, श्मश्रुवर्धकान् क्षौरकृतश्च[५] वित्तैस्तर्पय ॥ २५ ॥

(सं.चं.) 'सूतश्चित्ररथश्चाऽर्यः सचिवः सुचिरोषितः' इति च । हासका विदूषकाः । शिल्पमेवाऽद्यमुपजीवनं येषां ते शिल्पाद्याः । श्मश्रुवर्धका नापिताः ॥ २५ ॥

कौसल्यायाः सुमित्रायाः प्रेष्यान्[६] भिक्षूंश्च तद्गृहे ।
द्वाभ्यान्द्वाभ्यां सहस्राभ्यां निष्काणां प्रतितर्प्पय ॥ २६ ॥

---

१. **'द्विजाग्रेभ्यस्तथाऽन्येभ्यः'** २. **'–मप्यथ'** ३. **'शिल्पांश्च'** इति वि.ती.पाठः स्यात् ।
४. **'याजकांश्च'** ५. **'क्षौरकर्तॄंश्च'** ६. **'प्रेष्ठान्'**

(भा.दी.) कौसल्येति । कौसल्यायाः सुमित्रायाश्च प्रेष्यान् भृत्यान्, तयोर्गृहं तद्गृहं तस्मिन् विद्यमानान् भिक्षूंश्च, निष्काणां सुवर्णानाम् । 'राः कल्याणं निष्कमष्टापदं च' इति हलः । यद्वा 'गुञ्जाष्टकं भवेन्माषः कर्षं माषचतुष्टयम् । चतुष्कर्षं तु निष्कं स्यात्' इत्युक्तनिष्कपरिमाणकसुवर्णानामित्यर्थः । यद्वा 'निष्कम-ष्टाधिकस्वर्णशतम्' इत्युक्तसङ्ख्यावत्सुवर्णानामित्यर्थः । द्वाभ्यांद्वाभ्यां सहस्राभ्यां प्रतितर्पय ॥ २६ ॥

(सं.चं.) भिक्षून् परिव्राजकान् । निष्कं राजमुद्राङ्कितं सुवर्णमयं रूप्यम् । प्रत्येकं तर्पय ॥ २६ ॥

मयि नाथे वनं याते नाऽस्माकः कोऽपि सीदतु ।
विश्राणय विशेषज्ञ निःशेषं मे ततो धनम् ॥ २७ ॥

(भा.दी.) मयीति । नाथे स्वामिनि मयि वनं प्रति याते सति, अस्माकं सम्बन्धी आस्माकः पुरुषः कोऽपि न सीदतु दारिद्र्येण न क्लिश्यतु । षद्लृ विशरणगत्यवसादनेषु लोट् । ततः तत्तत्पुरुषाणां विशेषं गुणविशेषं जानातीति विशेषज्ञस्तत्सम्बुद्धिः, लक्ष्मण, मे धनं द्रव्यं तत्, निर्गतः शेषो यथा भवति तथा निश्शेषं विश्राणय विभज्य देहि । श्रण दाने लोट् ॥ २७ ॥

(सं.चं.) विश्राणय विशेषज्ञत्वात् यस्य यावदिति विचार्य विज्ञाय विभज्य देहि ॥ २७–९ ॥

इत्यार्य्यस्य वचः श्रुत्वा तथा चक्रे स लक्ष्मणः ।
पुनश्च धनशेषं स्वं व्यङ्गादिभ्यो ददौ प्रभुः ॥ २८ ॥

(भा.दी.) इतीति । सः लक्ष्मणः आर्यस्य स्वामिनः इति वचः श्रुत्वा तथा श्रीरामोक्तप्रकारेण चक्रे । प्रभुः श्रीरामः स्वं धनस्य शेषोऽवशेषस्तम् । 'शेषस्त्रिष्वन्यस्मिन्नुपयुक्ततः' इति वैजयन्ती । विगतमङ्गं हस्ताद्यवयवा येषां ते व्यङ्गास्त आदयो येषां ते तथा तेभ्यः पुनश्च ददौ ॥ २८ ॥

अथ कश्चिद् द्विजो वृद्धो मलिनो मलिनाम्बरः ।
त्रिजटो नाम दुद्राव रामं दण्डावलम्बनः ॥ २९ ॥

(भा.दी.) अथेति । अथ मलिनः मलदिग्धः, मलिनं मलदिग्धमम्बरं वस्त्रं यस्य स तथा, अतिवृद्धत्वात् दण्ड एव अवलम्बनमाश्रयो यस्य स तथा, त्रिजटः त्रिजट इति नाम प्रसिद्धः कश्चिद् द्विजः श्रीरामं प्रति दुद्राव अतिशीघ्रमाजगाम । द्रु गतौ लिट् ॥ २९ ॥

स गार्ग्यो देवमाचष्ट राम मे तरुणी प्रिया ।
बह्वपत्या च[1] दारिद्र्यात् खिन्ना मे दीयतां धनम् ॥ ३० ॥

(भा.दी.) स इति । गर्गस्य गोत्रे भवो गार्ग्यः सः त्रिजटः । हे राम, बहूनि अपत्यानि पुत्राः यस्याः सा तथा, तरुणी सुन्दरी, मे प्रिया भार्या दरिद्रस्य भावो दारिद्र्यं तस्मात्, खिन्ना दुःखिता च । अतः मे मह्यं धनं दीयताम् । इति देवं श्रीरामं प्रति आचष्ट ॥ ३० ॥

(सं.चं.) गार्ग्यो गोत्रतः । तरुणी न स्वयमिव वृद्धा पलितकेशा । प्रथमे वयसि स्थितेति नार्थः । बह्वपत्येति वचनात् । अत एव 'वयसि प्रथमे' (अ.सू.४.१.२०) इति न ङीप् । किन्तु 'नञ्स्नञीकक्ख्युंस्तरुण-तलुनानामुपसङ्ख्यानम्' इति वार्तिकात् (अ.सू.४.१.१५) । एतेनैव च गमकेन तरुणीति न प्रथमवयोमात्रवचनमिति स्थितम् । अन्यथा वार्तिकवैयर्थ्यात् । अतोऽपलितत्वमेव तरुणशब्दार्थः । तरुणी युवतिरिति स्त्रीसामान्यवचनम्, कन्येतिवत् इत्यप्याचक्षते ॥ ३० ॥

इत्युक्त ऊचे भगवान् हास्यं लोके हसत्यमुम्[2] ।
इतो दण्डं क्षिपसि चेद् गोषु दास्यामि ता इति[3] ॥ ३१ ॥

(भा.दी.) इतीति । इति तेन उक्तः भगवान् श्रीरामः, लोको जनस्तस्मिन् हसति हासं कुर्वति सति, हे द्विज, त्वं चेद् यदि इतः अस्मात् प्रदेशात्, स्वेन गृहीतो दण्डः स्वदण्डस्तम्, सरयूनद्या उत्तरभागस्थितासु गोषु क्षिपसि निक्षिपसि । क्षिप प्रेरणे लट् । तर्हि गाः दास्यामि । इति हास्यं परिहासरूपं वचः अमुं द्विजं प्रति अब्रवीत् ॥ ३१ ॥

(सं.चं.) हास्यं हास्यरसोपेतं यथा स्यात् तथा ऊचे । परितो लोके हसति । यावतीषु गोषु क्षिपसि दण्ड-क्षेपपर्यन्तास्तावतीस्ता गा दास्यामीत्यूचे ॥ ३१ ॥

स शार्णीं[4] मलिनां कक्ष्यां वृद्धः संवेष्ट्य सम्भ्रमी ।
आविद्ध्य दण्डं चिक्षेप सर्वप्राणेन वेपितः ॥ ३२ ॥

---

१. '**–पत्या हि दारि–**' २. '**लोके प्रकाशयन्**' । '**हास्यं हासयोग्यम् अमुं त्रिजटं लोके जने हसति सति**' इति का.श्री. ।
३. '**स्वदण्डं क्षिपसीतश्चेद् गोषु दास्यामि गा द्विज**' इति वि.ती.पाठः । ४. '**स शाटीम्**'

(भा.दी.) स इति । सम्भ्रमः दण्डप्रक्षेपेऽत्यादरोऽस्यास्तीति सम्भ्रमी । 'सम्भ्रमोऽत्यादरे भये' इति वैजयन्ती । वेपितः जरया कुञ्चितः वृद्धः सः त्रिजटनामा विप्रः शणस्य शणवृक्षस्य सम्बन्धिनी शाणी ताम्, शणवृक्षतन्तुनिर्मितामित्यर्थः, मलिनां मलोपेतां कक्ष्यां मध्यबन्धनानुकूलां शाटीं संवेष्ट्य सम्यगाबध्य दण्डं आविध्य उद्यम्य सर्वः समग्रो यः प्राणो बलं तेन चिक्षेप । क्षिप प्रेरणे लिट् ॥ ३२ ॥

(सं.चं.) शाणीं शणतन्तुनिर्मिताम् । 'शाणी गोणी' इति यादवप्रकाशः । 'ಗೋಣಿ' इति भाषायाम् । कक्ष्या परिकरबन्धः । संवेष्ट्य परितः कटिदेशं वेष्टयित्वा । सम्भ्रमी सहर्षं त्वरमाणः । वेपितः जरसा कम्पमानः । सर्वप्राणेन सर्वत्राणेन आविध्य उत्क्षिप्य तोलयित्वा प्रचाल्य च ॥ ३२ ॥

स दण्डः सरयूं तीर्त्वा गोसहस्रे समापतत् ।
प्रशस्याऽऽश्लिष्य[1] तं विप्रं गोसहस्रं ददौ प्रभुः ॥ ३३ ॥

(भा.दी.) स इति । सः तेन निक्षिप्तः दण्डः सरयूं सरयूनदीं तीर्त्वा अतीत्य गवां सहस्रं तस्मिन् समापतत् । प्रभुः श्रीरामः तं विप्रं प्रहस्य आश्लिष्य च गवां सहस्रं तत् ददौ ॥ ३३ ॥

(सं.चं.) सरय्वा उत्तरतीरे स्थितस्य गोसहस्रस्यान्ते । कृतं परिहासं विस्मारयन्निव तं प्रशस्य प्रीत्याऽऽश्लिष्य च ॥ ३३ ॥

यियक्षवे पुनस्तस्मै कामं वित्तं प्रदत्तवान् ।
ब्रह्मण्यत्ववदान्यत्वे[2] प्रशशंसुः प्रजाः प्रभोः ॥ ३४ ॥

(भा.दी.) यियक्षव इति । श्रीरामः यष्टुमिच्छति यियक्षति यियक्षतीति यियक्षुस्तस्मै त्रिजटाय, पुनः काममभीप्सितं तत् वित्तं प्रदत्तवान् । प्रजाः तत्रत्यजनाः प्रभोः श्रीरामस्य ब्रह्मणि ब्रह्मजातौ साधुर्ब्रह्मण्यस्तस्य भावस्तत्वं तच्च, वदान्यत्वं दानशूरत्वं तच्च, प्रशशंसुः तुष्टुवुः ॥ ३४ ॥

(सं.चं.) ब्रह्मण्यत्वं ब्राह्मणप्रियत्वम् । कामं पर्याप्तम् । 'कामं निकामं पर्याप्तं प्रकामं च यथेप्सितम्' इति यादवप्रकाशः ॥ ३४–५ ॥

---

१. **'प्रहस्याऽऽश्लिष्य'** इति वि.ती.पाठ इति भाति । **'प्रशस्य स्तुत्वा'** इति का.श्री. ।

२. **'ब्रह्मण्यत्वं वदान्यत्वं प्रश–'**

इत्थं विभज्य विप्रेभ्यो[1] विश्वेशो वित्तमुत्तमम् ।
सानुजः सह जानक्या जनकं द्रष्टुमेयिवान् ॥ ३५ ॥

(भा.दी.) विश्वेश इति । विश्वेशः जगदीश्वरः श्रीरामः विप्रेभ्यः इत्थं वित्तं द्रव्यं तत् अञ्जसा विभज्य सानुजः सलक्ष्मणः सन् जानक्या सीतया सह जनकं पितरं द्रष्टुं एयिवान् जगाम ॥ ३५ ॥

वाच[2] ऊचुर्बहुविधाः शोकशङ्कुक्षतान्तराः ।
तत्र जानपदाः पौरा नरा नार्य्यो निरीक्ष्य तान् ॥ ३६ ॥

(भा.दी.) वाच इति । तत्र अयोध्यायां श्रीरामस्य वनयात्रोद्यमं दृष्ट्वा जनतायाः (यः) शोकः स एव शङ्कुः कीलकं तेन क्षतं अन्तरं चित्तं येषां ते, जनपदे राष्ट्रे भवा जानपदाः, पुरे भवाः पौराः नरा नार्यश्च, तान् श्रीरामसीतालक्ष्मणान्, निरीक्ष्य, बह्व्यो विधाः प्रकारा यासां ताः तथा ताः वाचः ऊचुः ॥ ३६ ॥

(सं.चं.) शङ्कुः कीलः । तेन क्षतान्तराः ॥ ३६ ॥

[3]यान्तं यमन्वेति च चमूश्चतुरं चतुरङ्गिणी ।
तमिमं सीतया साकमनुगच्छति लक्ष्मणः ॥ ३७ ॥

(भा.दी.) यान्तमिति । चत्वारि अङ्गानि यस्याः सा तथा चमूः सेना । चतुरं समर्थम् । 'चतुरौ दक्षधीमन्तौ' इति वैजयन्ती । यान्तं पितृसमीपं गच्छन्तं यं श्रीरामं पुरा अन्वेति अनुगच्छति । इण् गतौ लट् । तं तादृशं इमं श्रीरामं अद्य सीतया साकं लक्ष्मणः अनुगच्छति ॥ ३७ ॥

(सं.चं.) उत्तरश्लोकगः पुराशब्दोऽत्राप्यनुवर्तते । अन्वेति पुरा । अन्वगात् पुरा । 'पुरि लुङ् चास्मे' (अ.सू.३.२.१२२) । 'यं यान्तमनुयाति स्म चतुरङ्गबलं महत् । तमेकं सीतया सार्धमनुयाति स्म लक्ष्मणः' इति रामायणे ॥ ३७ ॥

या न शक्या पुरा द्रष्टुं सत्वैराकाशगैरपि ।
तामिमां राजमार्ग्गेऽस्मिन् वीक्षन्ते जानकीं जनाः ॥ ३८ ॥

---

१. **'विप्रेभ्यः । बहुवचनमाद्यर्थे । विप्रादिभ्यः'** इति का.श्री. । २. **'वाचमूचु–'** ३. **'यान्तमन्वेति च चमू–'**

(भा.दी.) येति । या सीता, पुरा आकाशे गच्छन्तीत्याकाशगास्तैः सत्वैः पक्ष्यादिप्राणिभिः । 'सत्वोऽस्त्री जन्तुषु क्लीबं व्यवसाये' इति वैजयन्ती । सर्वदाऽन्तःपुरगतत्वात् द्रष्टुं न शक्या । तामिमां जानकीं जनाः अस्मिन् राजमार्गो राजपथस्तस्मिन् वीक्षन्ते पश्यन्ति ॥ ३८ ॥

(सं.चं.) आकाशगैः सत्वैः खगादिभिः । अम्बरचरैर्यक्षगन्धर्वादिभिरपि । किमुत पृथिवीस्थैर्जनैः । 'या न शक्या पुरा द्रष्टुं भूतैराकाशगैरपि । तामद्य सीतां पश्यन्ति राजमार्गगता जनाः' इति च ॥ ३८ ॥

मुञ्चतीमां श्रियं प्राप्तामीश्वरोऽप्यखिलेश्वरः ।
कैकेय्या वाक्यमात्रेण पश्यतासङ्गितां प्रभोः[1] ॥ ३९ ॥

(भा.दी.) मुञ्चतीति । अखिलेश्वरः श्रीरामः कैकेय्या यद्वाक्यमात्रं तेन, प्राप्तामिमां श्रियम्, ईश्वरोऽपि कैकेयीवाक्यमुल्लङ्घ्य स्थातुं समर्थोऽपि मुञ्चति त्यजति । मुचेर्लट् । प्रभोः श्रीरामस्य न सङ्गोऽसङ्गोऽस्यास्तीत्यसङ्गी, तस्य भावस्तत्ता ताम्, राज्यादिषु निःस्पृहत्वमित्यर्थः, पश्यत ॥ ३९ ॥

(सं.चं.) असङ्गिताम् । 'असङ्गो ह्ययं पुरुषः' ॥ ३९ ॥

यदि रामो वनं याति यामः सर्वे वयं सह ।
नैनं विना हि जीवामो जलं जलचराइव ॥ ४० ॥

(भा.दी.) यदीति । यदि श्रीरामः वनं प्रति याति, तर्हि सर्वे वयं श्रीरामेण सह यामः गच्छामः । एनं श्रीरामं विना जलमुदकं तद् विना जलचराइव मत्स्याइव न जीवामो हि । जीव प्राणधारणे लट् ॥४०॥

(सं.चं.) जलं विना जलचरा इव ॥ ४० ॥

आर्त्तवाचमनार्त्तस्तां[2] शुश्रुवान् भगवानिति ।
प्रहसन्[3] प्राविशद् गेहं पितुर्न्नानाविलापिनः ॥ ४१ ॥

(भा.दी.) आर्तेति । इति तं आर्तानां जनानां वादो वाक्यं तं शुश्रुवान् श्रुतवान् । आर्तो न भवतीत्यनार्तः, स्वयं दुःखरहित इत्यर्थः, भगवान् श्रीरामः प्रहस्य, नानाविधो यो विलापः परिदेवनं सोऽस्यास्तीति तथा तस्य, पितुः दशरथस्य गेहं मन्दिरं तत् प्राविशत् ॥ ४१ ॥

---

१. **'–तासङ्गतां प्रभोः'** २. **'आर्तवादमनार्त्तस्तम्'** इति वि.ती.पाठः । ३. **'प्रहस्य प्रावि–'** इति च ।

(सं.चं.) बहुविधं प्रलपतः पितुः ॥ ४१ ॥

विज्ञाय राममायान्तं सुमन्त्रवचनान्नृपः ।
दारार्द्धसप्तशतकं[1] रामं द्रष्टुमुपाह्वयत् ॥ ४२ ॥

(भा.दी.) विज्ञायेति । नृपः सुमन्त्रस्य यद्वचनं श्रीराम आगच्छतीत्यादि तस्मात् आयान्तमागच्छन्तं श्रीरामं विज्ञाय, श्रीरामं द्रष्टुम्, [2]सप्तानां शतानां समाहारः सप्तशतकम्, अर्धं सप्तशतकं यस्मिन् तदर्धसप्तशतकम्, चतुर्दशशतकमित्यर्थः, दाराणां भार्याणामर्धसप्तशतकं चतुर्दशशतकं तत् । अर्धेन समांशेन सप्तशतकेन सहितं सप्तशतकमिति वा विग्रहः । 'चतुर्दशशतस्त्रीभिः समं राजपरिग्रहैः । मातॄर्विलोक्य क्रोशन्तीर्विललाप पुनःपुनः' (१२.९) इत्युत्तरत्रोक्तेर्दारार्धसप्तशतकमित्यस्योक्तव्युत्पत्त्या दाराणां चतुर्दशशतकमित्यर्थः । उपाह्वयत् अन्तःपुरादाह्वापयामास । ह्वेञ् स्पर्धायां शब्दे च लङ् ॥ ४२ ॥

(सं.चं.) दाराणामर्धसप्तशतकम् । 'अर्धसप्तशतास्तास्तु प्रमदास्ताम्रलोचनाः । कौसल्यां परिवार्याथ शनैर्जग्मुर्धृतव्रताः' (३४.१३) इति हि रामायणे । सप्तशतानामर्धं यासां सङ्ख्यापरिमाणं ता अर्धसप्तशताः त्रीणि शतानि पञ्चाशच्च प्रमदा इति सर्वेषां रामायणव्याख्यातॄणामैककण्ठ्यम् । प्राचीनटीकाकारास्तु अन्यथा व्याचक्षते– सप्तशती यासां परिमाणस्यार्धं ता अर्धसप्तशताः, चतुर्दशशतसङ्ख्याका इत्यर्थः । अवश्यं चैतदेवं व्याख्येयम् । अन्यथोपरिपठ्यमानं पण्डिताचार्यवचनं व्याहन्येत– 'चतुर्दशशतस्त्रीभिः समं राजपरिग्रहैः' इतीति । वस्तुतस्तु पञ्चाशदुत्तरा त्रिशत्येव राजदारा इति युक्तमिति भाति । तथाहि निरवकाशं वाल्मीकिवचनम्– 'त्रयश्शतशतार्धाश्च ददर्शावेक्ष्य मातरः'(३६) इत्येकोनचत्वारिंशे सर्गे । त्रीणि च तानि शतानि त्रयश्शतानि । त्रेस्त्रयस् । त्रयश्शतानि शतार्धं च यासां सङ्ख्यापरिमाणं तास्त्रयश्शतशतार्धा राममातर इति हि तदर्थः । तदनेन निरवकाशवचनेन अर्धसप्तशता इति यथाश्रुत एवार्थो युक्त इति । नन्वेकं सन्धित्सतः पुच्छमपरं च्यवते । कृतं रामायणसङ्गमनम् । अथ सङ्ग्रहवचनं कुप्यति– 'चतुर्दशशतस्त्रीभिः समं राजपरिग्रहैः' इति । तत्कथं सङ्गमयसि? शृणु । सावकाशमेतत् । न राजपरिग्रहा एव चतुर्दशशतस्त्रियः । किन्तु राजपरिग्रहैः सह चतुर्दशशतस्त्रिय इति । अधिकं तद्व्याख्यानावसरे ॥ ४२ ॥

व्याप्तेन शोकवनवह्निजवेन राज्ञ-
स्तातप्यमानसकलेन्द्रियसप्तधातोः ।

---

१. **'दारार्धसप्तशतकम् । पञ्चाशदधिकत्रिशतपरिमितमित्यर्थः'** इति वि.भू. ।

२. इत आरभ्य **'–चतुर्दशशतकमित्यर्थः'** इत्यन्तं वाक्यजातं का.श्री.टीकायामपि यथावदविकलं पठ्यते । न ज्ञायते कः कमुज्जहारेति ।

रामाननेन्दुहसितामृतपूरवर्षः[1]
सर्वाभितापशमनः सकृदाविरासीत् ॥ ४३ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
अयोद्ध्याकाण्डे षष्ठः सर्ग्गः ॥

—०—

(भा.दी.) व्याप्तेनेति । व्याप्तेन परिपूर्णेन, शोकः श्रीरामवियोगचिन्ताजन्यदुःखं स एव वनवह्निस्तस्य जवो वेगस्तेन, सकलानि यानि इन्द्रियाणि चक्षुरादीनि तानि च, सप्त ये धातवः त्वक्चर्मरुधिरमांसमेदोमज्जास्थि-नामकास्ते च, तातप्यमाना अतिशयेन तप्यमानाः सकलेन्द्रियसप्तधातवो यस्य स तथा तस्य, राज्ञः दशरथस्य सर्वे ये (अभि)तापा आध्यात्मिकादयस्तान् शमयतीति तथोक्तः, श्रीरामस्य यदाननं तदेव इन्दुः चन्द्रस्तस्य यद्धसितमेवामृतं मन्दहासामृतं तस्य पूराः अभिवृद्धप्रवाहास्तेषां वर्गः समूहः, सकृत् आविरासीत् आवि-र्बभूव । यथाभिवृद्धोऽपि वह्निरुदकपूरनिकरेण शान्तो भवति । तद्वद्दशरथशोकोऽपि श्रीरामदर्शनात् सकृच्छान्तोऽ-भूदिति भावः ॥ ४३ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां
भावार्थदीपिकायामयोध्याकाण्डे षष्ठः सर्गः ॥

—०—

(सं.चं.) वसन्ततिलकया सर्गार्थमुपसंहरति– व्याप्तेनेति । पुत्रविरहनिरीक्षया जातः शोक एव वनवह्नि-र्दवानलः । तस्य जवेन वेगेन तातप्यमानानि सकलेन्द्रियाणि सप्तधातवश्च यस्य तस्य राज्ञः । न केवलं मन-स्तापतप्तम् । अन्तर्गतान् रक्तमांसादिधातूनपि दाहन्दाहं शोकवह्निः क्षोभयामासेत्यर्थः । रामाननमेवेन्दुः । हसितमेवामृतपूरवर्षणम् ॥ ४३ ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायामयोध्याकाण्डे
षष्ठसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– ६७१+४३=७१४]

---

१. **'पूरवर्गः'** इति वि.ती.पाठः ।

सप्तमः सर्ग्गः

सिंहासनादुत्पपात राजा राममवेक्ष्य तम् ।
एह्येहि राम वत्सेति शोकोत्कण्ठापरिप्लुतः[1] ॥ १ ॥

(भा.दी.) श्रीरामदर्शनानन्तरं भावितद्वियोगचिन्तापारवश्येनानुवृत्तां दशरथावस्थां वर्णयति– **सिंहेति** । राजा तं श्रीरामं अवेक्ष्य हे वत्स श्रीराम, एहि-एहि आगच्छ-आगच्छ । इण् गतौ लोट् । इति वदन् शोकस्य या उत्कण्ठा उत्कलिका, अतिशय इति यावत्, तया परिप्लुतः अभिषिक्तः, अभिवृद्धः सन्नित्यर्थः, सिंहासनं भद्रासनं तस्मात् । 'नृपासनं च यद्भद्रासनं सिंहासनं च तत्' इत्यमरः । उत्पपात सहसोत्थितः ॥ १ ॥

(सं.चं.) रामाभिषेकभङ्गजनितेन शोकेन, उत्कण्ठया रामदर्शनार्थमदम्येन औत्सुक्येन च परिप्लुतः सम्पृक्तः । एह्येहि राम वत्सेति वदन्नुत्पपात ॥ १ ॥

परिरम्भपरो राजा पतन्नप्राप्य राघवम् ।
मामेति लोकनाथेन सहसा पर्य्यगृह्यत[2] ॥ २ ॥

(भा.दी.) **परीति** । परिरम्भे आलिङ्गने परं तात्पर्यं यस्य स तथा राजा दशरथः (राघवं) श्रीरामं अप्राप्य दुःखपारवश्यात् पतन् लोकनाथेन श्रीरामेण मा पत मा पत इति सहसा पर्यगृह्यत[1] ॥ २ ॥

(सं.चं.) मामा पप्तः पितरिति सम्भ्रमे द्विरुक्तिः । सहसा सपदि पतनात् पूर्वमेव ॥ २ ॥

परिरभ्य सुतं भूयः पर्य्यङ्के सन्निवेश्य सः ।
सीतां सौमित्रिमप्याराद् विवक्षुर्म्मूर्च्छितोऽपतत् ॥ ३ ॥

---

१. **'शोकात् कण्ठपरिप्लुतः'** इति भ्रान्तः पाठः । **'शोकश्च उत्कण्ठा दर्शनोत्कण्ठा च ताभ्यां परिप्लुतः युक्तः'** इति का.श्री. ।

२. **'सहसा समगृह्यत'**

(भा.दी.) परिरभ्येति । सः राजा सुतं श्रीरामं भूयः बहुवारं परिरभ्य, पर्यङ्कः शय्या तस्मिन् सन्निवेश्य (उपवेश्य) सीतां सौमित्रिं लक्ष्मणमपि आरात् समीपे उपवेश्य, वक्तुमिच्छतीति विवक्षति विवक्षतीति विवक्षुः, किञ्चिद् वचो वक्तुमिच्छावानित्यर्थः, दशरथः मूर्च्छितः सन् अपतत् ॥ ३ ॥

(सं.चं.) पर्यङ्को मञ्चः शय्या वा । आरात् मञ्चसमीपे स्वस्य च समीपे । सन्निवेश्य उपवेश्य ॥ ३ ॥

स्त्रीसहस्रस्य रावोऽभूत् करुणो राजसंसदि ।
राज्ञि मूर्च्छामुपायाते रामविश्लेषशङ्कया ॥ ४ ॥

(भा.दी.) स्त्रीति । राज्ञि श्रीरामस्य विश्लेषो वियोगः तस्य शङ्कया मूर्च्छामुपायाते सति, राज्ञः संसत् सभा तस्याम्, करुणः श्रोतॄणां कृपास्पदीभूतः स्त्रीणां सहस्रं तस्य रावः ध्वनिः अभूत् । भुवो लुङ् ॥ ४ ॥

(सं.चं.) राव आक्रन्दनम् ॥ ४ ॥

मुहूर्त्तात् प्राप्तसञ्ज्ञं तं प्रोवाच पितरं प्रभुः ।
तात मामनुजानीहि वनवासाभिकाङ्क्षिणम् ॥ ५ ॥

(भा.दी.) मुहूर्तादिति । प्रभुः श्रीरामः मुहूर्तः मुहूर्तकालस्तस्मात् प्राप्ता सञ्ज्ञा प्रबोधो येन स तथा तम्, पितरं दशरथं प्रति, हे तात, त्वं वने यो वासस्तस्मिन् अभिकाङ्क्षा (आकाङ्क्षा) सा अस्यास्तीति तथा तम्, मां अनुजानीहि अनुज्ञातं कुरु, ज्ञा अवबोधने लोट्, इति प्रोवाच ॥ ५ ॥

(सं.चं.) मुहूर्तादविलम्बेन ॥ ५–६ ॥

सीतेयं लक्ष्मणश्चायं वारितौ हेतुभिर्म्मया ।
अप्यन्वागच्छतस्ताभ्यां ततोऽनुज्ञा[1] प्रदीयताम् ॥ ६ ॥

(भा.दी.) सीतेति । इयं सीता अयं लक्ष्मणश्च मया हेतुभिर्लिङ्गवचनैः, वनं प्रति नाऽगन्तव्यमित्यत्र कारणप्रतिपादकैरित्यर्थः, वचोभिः मया वारितौ, अपि तथाऽपि अन्वागच्छतः मदनुगमनं कुरुतः । ततः कारणात् ताभ्यामपि अनुज्ञा प्रदीयताम् ॥ ६ ॥

---

१. **'तातेनाऽज्ञा'। ततः कारणात् ताभ्यां सहितस्य ममानुज्ञा प्रदीयताम्'** इति का.श्री. ।

इत्युक्त ऊचे राजेन्द्रः कितवायै वरावदाम्[१] ।
ततो मां शिक्षयित्वा ते युक्तं[२] राज्यस्य पालनम् ॥ ७ ॥

(भा.दी.) इतीति । इति श्रीरामेण उक्तः राजेन्द्रः हि यस्मात् कितव्यै कापट्ययुक्तायै वरौ अदां दत्तवानस्मि । दाण् दाने लुङ् । ततः कारणात् मां शिक्षयित्वा इदं स्त्रीतन्त्रत्वं तव युक्तं न भवतीत्यादिवचसा शिक्षयित्वा ते तव राज्यपालनं युक्तं न्याय्यम् । 'न्याय्यसंयुक्तयोर्युक्तम्' इति वैजयन्ती । इति ऊचे ।।७।।

(सं.चं.) कितवा धूर्ता । या बहिर्नवनीतमिव । अन्तः कर्तरीव । भस्माग्निकल्पा । शिक्षयित्वा – 'अयोध्यायां त्वमेवाद्य भव राजा निगृह्य माम् । छन्नया छलितश्चास्मि स्त्रिया भस्माग्निकल्पया' इति रामायणे ॥ ७ ॥

बत यास्यसि[३] तात त्वमथवा सर्वथा वनम् ।
नय मां नरवैडूर्य्य न जीवामि त्वया विना ॥ ८ ॥

(भा.दी.) बतेति । हे तात श्रीराम, अथवेति निपातसमुदायः (पक्षान्तरे) । वनं तत् सर्वथा अवश्यतया यास्यसि तर्हि नरेषु वैडूर्यमिव नरवैडूर्यं तत्सम्बुद्धिः, नरश्रेष्ठेत्यर्थः, त्वं मां वनं प्रति नय । अहं त्वया विना न जीवामि । जीव प्राणधारणे लट् । बत खेदे ॥ ८ ॥

(सं.चं.) नरवैडूर्य पुरुषरत्न । 'अश्मगर्भं मरतकं हरिन्मणिरिति स्मृतम् । शोणात्मा पद्मरागः स्याद् वैडूर्यं वाळवायजम्' इत्यभिधानम् । पाणिनीयास्तु वैदूर्यमिति पठन्ति । तथाहि सूत्रम्–'विदूराञ् ञ्यः' (अ.सू.४.३.८४) इति । 'विदूरात् प्रभवति वैदूर्यो मणिः' इति जयादित्यः । वस्तुतस्तु मणिरयं वाळवायपर्वते जायते । अत एव 'वाळवायजम्' इत्युच्यते । तत् कथं विदूरात् प्रभवति? तदेतत् समाहितं भाष्ये–'वालवायो विदूरं च प्रकृत्यन्तरमेव वा । न वै तत्रेति चेद् ब्रूयाज्जित्वरीवदुपाचरेत्' इति । इदमुक्तं भवति– वालवायशब्दस्य विदूरादेशः, ततो ञ्यः प्रत्ययः । तेन वैदूर्यमिति रूपसिद्धिरिति । अथवा विदूरशब्दोऽपि वालवायवत् पर्वतवाचकः । नवै तत्र पर्वते विदूरशब्दः प्रसिद्ध इति चेत् पूर्वपक्षी ब्रूयात्, तर्हि जित्वरीवदुपाचरेत्, यथा वणिक्समुदाये वाराणसी जित्वरीपदेन व्यपदिश्यत एवं वैयाकरणा वालवायमेवाद्रिं विदूरपदेन व्यपदिशन्तीति । सर्वमेतदर्वाचीनानां निर्वचनवैयाकुल्यम् । ये विडूरथं विदूरथमाचक्षते । मण्डोदरीं मन्दोदरीम् । वैडूर्यं वैदूर्यम् । तत्ववादिनस्तु मूर्धन्यमध्यमेव साधु पदं मन्यन्ते । वाळवायपर्वतस्यैव प्रतनं नाम विडूर इति

१. **'कितव्यै हि वरावदाम्'** इति वि.ती.पाठः । २. **'ते धर्मो राज्यस्य'** ३. **'यदि यास्यसि'**

च । विड्भिः वणिग्भिः मणिव्यवहारार्थमूरीकरणाद् विडूरः पर्वतः । तत्र भवं वैडूर्यमिति सर्वं सुन्दरम् । न जानीमः कुत एते वैयाकरणा अप्यपथेन वृथा पतन्तीति ॥ ८–९ ॥

इत्युक्त ऊचे रामस्तं नैवं[1] वक्तुं त्वमर्हसि ।
त्वमेव राजा भरतो युवराजो मदाज्ञया ॥ ९ ॥

(भा.दी.) **इती**ति । इति दशरथेन उक्तः श्रीरामः हे पितः, त्वं एवं वक्तुं नार्हसि न योग्योऽसि । अर्ह पूजायां लट् । राजा त्वमेव नान्यः । भरतः मदाज्ञया युवा चासौ राजा च युवराजः, श्वस्तनराज इत्यर्थः, इति दशरथं प्रति ऊचे ॥ ९ ॥

स्वर्गे वा नरके वाऽपि वने वा पट्टनेऽपि वा[2] ।
सुखमेव न मे दुःखं तस्मात् त्वं निर्वृतो भव ॥ १० ॥

(भा.दी.) त्वया वनवासनिमित्तकशोको मद्विषये न कार्य इत्याह– **स्वर्ग** इति । स्वः निरतिशयसुखं गम्यतेऽत्रेति स्वर्गस्तस्मिन् वा । नराः पापकर्मिणोऽस्मिन् कायन्ति रुवन्तीति नरकस्तस्मिन् वा । वन्यते गम्यते प्राणिभिरिति वनं तस्मिन् वा । पतन्ति सञ्चरन्त्यत्र जना इति पत्तनं नगरं तस्मिन् वा । यस्मात् मे सुखमेव । दुःखं मे न । तस्मात् त्वं निर्वृतः सुखी भव ॥ १० ॥

(सं.चं.) स्वः सुखं दुःखासम्भिन्नम् । तद् गमयतिततः पातपर्यन्तमिति स्वर्गोऽमर्त्यभवनम् । मोक्षे दुःखस्या-नवसरान्नात्र तद् ग्रहणम् । दुःखान्तो हि स्वर्गः । देवानां च भवति दुःखं दैत्यैः पराजितानाम् । वनन्ति स्तवन्ति कीचकाः शकुन्ताश्चात्रेति वनम् । ष्टन वन शब्दे । वनन्ति सेवन्ते विहारार्थमिदमिति वनम् । वन सम्भक्तौ शब्दे च । सेवन्ते तपस्यार्थमिति वा । न विद्यते रमणं कं सुखं चात्रेति नरको निरयः । पट्टाः चतुष्पथा अत्र सन्तीति पट्टनम् । मत्वर्थीयो नः । 'पट्टः पेषणपाषाणे व्रणादीनां च बन्धने । चतुष्पथे च' इति मेदिनी । निर्वृतो निश्चिन्तः ॥ १० ॥

राजा रामस्य निर्बन्धं ज्ञात्वा मन्त्रिणमब्रवीत् ।
सकोशरत्नस्त्रीरत्नं[3] बलं राममनुव्रजेत् ॥ ११ ॥

---

१. **'–स्तं मैवं वक्तुम्'** २. **'पत्तनेऽपि वा'** इति वि.ती.पाठः स्यात् । ३. **'सकोशरत्नं स्त्रीरत्नम्'** इति वि.ती.पाठः ।

(भा.दी.) राजेति । राजा श्रीरामस्य वनगमने यो निर्बन्ध आवश्यकता तं ज्ञात्वा, मन्त्रिणं सुमन्त्रं प्रति, कोश अर्थौघः स च, रत्नानि च तैः सहितम्, स्त्रीणां रत्नानि श्रेष्ठानि यस्मिन् तत् तथोक्तम्, बलं सैन्यं श्रीरामं अनुव्रजेत् अनुगच्छेत् इति अब्रवीत् ॥ ११ ॥

(सं.चं.) निर्बन्धम्, अचलं वनगमननिर्धारम् । कर्तव्ये निर्णयेन बद्धता प्रारब्धादचलनं नाम निर्बन्धः । कोशोऽर्थसञ्चयः, अमूल्यानि च रत्नानि मरतकादीनि, स्त्रीरूपाणि च रत्नानि यत्र तद् बलम् ॥ ११-२ ॥

कामं वने वसेद् रामो मम सर्वविभूतिभिः ।
निर्द्धनायामयोद्ध्यायां कैकेयीतनयो वसेत् ॥ १२ ॥

(भा.दी.) काममिति । श्रीरामः मम सर्वा या विभूतयः छत्रचामरादिराजसम्पदस्ताभिः सह वने कामः यथा भवति तथा कामं इच्छानुसारेणेत्यर्थः, वसेत् । वस निवासे लिङ् । निर्गतं धनं यस्यां सा तथा तस्यां अयोध्यायां कैकयीतनयः भरतः वसेत् ॥ १२ ॥

वयोज्येष्ठो गुणज्येष्ठः श्रेष्ठोऽयं सर्वदेहिनाम् ।
कथं रामो भवेच्छोच्यः कैकेयीकैतवार्दितः[१] ॥ १३ ॥

(भा.दी.) वय इति । वयोज्येष्ठः भरतापेक्षया वयसा ज्येष्ठः, गुणैर्बलादिधर्मैः ज्येष्ठः श्रेष्ठः, सर्वे ये देहिनो जीवास्तेषां सकाशात् श्रेष्ठः अयं श्रीरामः । इतः अस्मात् कैकेय्या कैतवं कापट्यं तस्मात् शोच्यः शोचितुमर्हः कथं भवेत्? न कथमपि । अतः सर्वा विभूतयः श्रीरामेण सह गच्छन्त्वित्यभिप्रायः ॥ १३ ॥

(सं.चं.) कैकेय्या कैतवेन धौर्त्येन अर्दितः पीडितः ॥ १३ ॥

इत्याकर्ण्ण्य गिरं पत्युः क्रुद्धा कैकेय्यभाषत ।
असमञ्जसवद् रामो ज्येष्ठोऽपि त्यज्यतामिति ॥ १४ ॥

(भा.दी.) इतीति । कैकेयी पत्युः दशरथस्य इति गिरं आकर्ण्य क्रुद्धा सती, ज्येष्ठोऽपि वयःप्रभृतिभिः भरताज्ज्येष्ठोऽपि श्रीरामः असमञ्जसवत् असमञ्जसनामकसगरपुत्रवत् त्यज्यतां राज्यार्हो न क्रियताम् । त्यज विसर्गे लोट् । इति अभाषत । भाष व्यक्तायां वाचि लङ् ॥ १४ ॥

(सं.चं.) सगरपुत्रोऽसमञ्जसः ज्येष्ठोऽपि पित्रा परित्यक्तः । तस्मादस्मद्वंश एवास्तीदृशः पूर्वसम्प्रदायः ॥१४॥

---

१. **'–कैतवादितः'** इति वि.ती.पाठः ।

धिग्धिक् पापीयसीमित्थमुक्त्वा राजन्यवाङ्मुखे ।
सिद्धार्थनामा प्रोवाच महामात्रो[1] नृपप्रियः ॥ १५ ॥

(भा.दी.) धिगिति । पापीयसीं अतिशयेन पापिष्ठां कैकेयीं धिग्धिक् (इत्थं) इति उक्त्वा राजनि दशरथे अवागधः मुखं यस्य स तथा, तस्मिन् सति । सिद्धार्थ इति नाम यस्य स तथा नृपस्य दशरथस्य प्रियः, महामात्रः कश्चन प्रधानपुरुषः । 'महामात्रः प्रधानः स्यादध्यक्षोऽधिपतिः स्मृतः' इति हलायुधः । प्रोवाच ॥ १५ ॥

(सं.चं.) महामात्रोऽमात्यः । 'महामात्रः समृद्धे चामात्ये' इति मेदिनी । । राज्याधिकृतो वा ॥ १५ ॥

सरय्वां प्राक्षिपद् बालानिति त्यक्तोऽसमञ्जसः ।
सगरेण पुरा राज्ञि[2] वद रामस्य दूषणम् ॥ १६ ॥

(भा.दी.) सरय्वामिति । हे राज्ञि राजभार्ये कैकेयि, पुरा सगरेण सगरनामकभूपेन असमञ्जसः बालान् नागरजनबालकान् सरय्वां सरयूनद्यां प्राक्षिपत् चिक्षेप । क्षिप प्रेरणे लङ् । इति निमित्तात् त्यक्तः राज्यान्निष्कासितः । श्रीरामस्य दूषणं दोषस्तत् वद ॥ १६ ॥

(सं.चं.) सरय्वां प्राक्षिपद् बालानिति । अत्र विशेषो भागवते–'असमञ्जस आत्मानं दर्शयन्नसमञ्जसम् । जातिस्मरः पुरा सङ्गाद् योगी योगाद् विचालितः । आचरन् गर्हितं लोके ज्ञातीनां कर्म विप्रियम् । सरय्वां क्रीडतो बालान् प्रास्यदुद्वेजयन् जनम्' इति । अत्रापि–'स योगी सङ्गसंविग्नो नृशंसत्वं प्रकाशयन्' (१.५.४१) इति । तथाच नासमञ्जसः स्वतो दुष्टः । स्वस्य राज्यानिच्छुतयाऽऽत्मानमसमञ्जसमिव दर्शयामास । तेन योग्योऽपि ज्येष्ठपुत्रः न राज्यमाप । एवं राज्यार्होऽपि रामोऽसमञ्जसदर्शितेन पथा वनं यात्विति कैकेय्या आशयः । योग्योऽपि लोकविरुद्धं चकार । तेन राज्यान्निर्वासितः । न तथा रामेण किमपि लोकविद्विष्टमाचरितमिति सिद्धार्थस्याऽशयः ॥ १६ ॥

निर्दोषं वृणुते नाथं सल्लोकोऽयं[3] गुणार्णवम् ।
विनीतं तं प्रियं रामं कथं राजा परित्यजेत् ॥ १७ ॥

---

१. **'महामात्यो नृपप्रियः'** इति क्वचित् । 'महामात्रः' इत्येव रामायणसम्मतः पाठः । **'महामात्रः गजपालकः'** इति वि.भू.का.श्री.टीकयोः । न स्वरसमेतत् । २. **'राज्ञि द्रक्ष्याम्यस्य न दूषमम्'**

३. **'त्रिलोकीयम्'। 'त्रिलोको यम् इति च । 'लोकत्रयं यं नाथं स्वामिनं वृणुते रामो नः स्वामी भूयादिति स्वीकरोति तं स्वामित्वेन लोकत्रयस्वीकारयोग्यम्' इति का.श्री.** ।

(भा.दी.) निर्दोषमिति । अयं सल्लोकः उत्तमजनः । 'त्रिलोकीयम्' इति क्वचित्पाठः । निर्गतो दोषो यस्मात् स निर्दोषस्तम्, गुणैरर्णव इव तं श्रीरामं नाथं स्वामिनं वृणुते, श्रीराम एवास्माकं राजा भवत्विति प्रार्थयते । वृञ् वरणे लट् । राजा विनीतं विनयोपेतं प्रियं तं श्रीरामं कथं परित्यजेत्? ॥ १७ ॥

(सं.चं.) अयं सल्लोकः । यं सल्लोकः नाथत्वेन वृणुते निर्दोषत्वादिति वा ॥ १७ ॥

महामात्रे[१] वदत्येवं कैकेयीं क्रूरवादिनीम् ।
शपमाने च राजेन्द्रे राघवः पुनरब्रवीत् ॥ १८ ॥

(भा.दी.) महेति । क्रूरं निष्ठुरं वचः वक्तुं शीलमस्या अस्तीति तथा तां कैकेयीम्, महामात्रे प्रधानपुरुषे एवं वदति सति, राजेन्द्रे दशरथे कैकेयीं शपमाने च सति, पुनः राघवः अब्रवीत् ॥ १८ ॥

(सं.चं.) शपमाने । शप आक्रोशे भ्वादिः । दिवादित्वे शप्यमाने इति रूपं स्यात् । शपनमत्र आक्रोशगर्भं भर्त्सनं निन्दनं वा ॥ १८ ॥

राजन् राजविभूत्या किं राज्यं त्यक्तवतो मम ।
गजं त्यक्तवतः पुंसः किं फलं गजकक्ष्यया[२] ॥ १९ ॥

(भा.दी.) राजन्निति । हे राजन्, राज्यं तत् त्यक्तवतः मम राजविभूत्या राजैश्वर्येण किं प्रयोजनम् ? तत्र दृष्टान्तमाह– **गजमि**ति । गजं त्यक्तवतः पुंसः गजकक्ष्यया गजमध्यबन्धनानुकूलया रज्ज्वा ।'कक्ष्या प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने' इत्यमरः । किं फलं किं प्रयोजनम् ॥ १९ ॥

(सं.चं.) गजकक्ष्या गजमध्यबन्धनी रज्जुः । 'रज्जुस्नेहेन किं तस्य त्यजतः कुञ्जरोत्तमम्' (३७.३) इति च रामायणे । न केवलं प्रत्युत भारश्च । उक्तं चान्यत्र–'विक्रीते करिणि किमङ्कुशे विवादः' इति ॥ १९ ॥

सर्वं दास्यामि कैकेय्यै चीराण्येव वृणे स्वयम् ।
खनित्रपिटके[३] चोभे सशिक्ये नरनायक ॥ २० ॥

---

१. **'महामात्ये'** २. **'गजकक्षया'**

३. **'खननार्थमनुकूलोऽयोदण्डः खनित्रम् । फलादिसङ्ग्रहार्थमनुकूलं पात्रं पिटकम्'** इति वि.भू.का.श्री.टीकयोः । **'पात्रस्थापनानुकूलं पाशकृतं शिक्यम्'** इति. वि.भू. । **'मोनेगुद्दलि, पुट्टि, शिक्यं नेलबु–इत्यपभ्रष्टभाषा'** इति .का.श्री. ।

(भा.दी.) सर्वमिति । अहं कैकेय्यै सर्वं राज्यादिकं दास्यामि । दाण् दाने लृट् । स्वयं अहं च चीराण्येव चेलान्येव वृणे आच्छादयामि । वृञ् वरणे लट् । हे नरनायक नरनाथ, पात्रादिस्थापनानुकूलं रज्जुविनिर्मितं शिक्यमित्युच्यते, तेन सहिते सशिक्ये । उभे खनित्रपिटके कन्दमूलादिखननानुकूलो दण्डः खनित्रं तच्च, फलादिग्रहानुकूलं पात्रं पिटकं तच्च, ते वृणे गृह्णामि ॥ २० ॥

(सं.चं.) 'कैकेय्यै' इति नामग्रहणेन तस्या असभ्यतामनुमोदमान इवाऽह । खनित्रं कन्दमूलादिखननसाधनम् । खन्यते भूरनेनेति खनित्रम् । 'खनु अवदारणे' । 'खनित्रमवदारणम्' इति यादवप्रकाशः । 'ಗುದ್ದಲಿ' अथवा 'ಪಿಕಾಸಿ' इति भाषायाम् । पिटकं पेटिका । शिक्यं विहङ्गिकाग्रयोरालम्बमानं जोळिकावद् याने भारनयनसाधनम् । 'भारयष्टिर्विहङ्गिका । शिक्यं तल्लम्बिकाचश्च पाथेयं शम्बलोऽस्त्रियाम्' इति च । 'ನೆಲವು' 'पेटकः पिटकः पेटा मञ्जूषा' इति च । अथवा 'ಬುಟ್ಟಿ' इति भाषायाम् ॥ २०–१ ॥

भगवत्युक्तवत्येवं निर्लज्जा कैकयात्मजा[1] ।
चीराणि परिधत्स्वेति ददौ रामाय संसदि ॥ २१ ॥

(भा.दी.) भगवतीति । भगेन भूत्यादिना नित्ययुक्तो भगवान् तस्मिन् श्रीरामे एवं उक्तवति सति । निर्गता लज्जा यस्याः सा निर्लज्जा केकयस्य केकयराजस्य आत्मजा पुत्री । चीराणि परिधत्स्व परिधानं कुरु । धाञो लोट् । इति उक्त्वा श्रीरामाय संसदि सभायां ददौ ॥ २१ ॥

अविचार्य्यैव[2] ते चीरे गृहीत्वा पर्य्यधात् प्रभुः ।
विहाय वाससी सूक्ष्मे प्रसन्नाननचन्द्रमाः ॥ २२ ॥

(भा.दी.) अविचार्येति । प्रभुः श्रीरामः, अविचार्यैव, अनया स्वेच्छया दीयमानमिदं ग्रहीष्यामि नवेति विमर्शमकृत्वैव, ते चीरे चैले गृहीत्वा, सूक्ष्मे लघुनी स्वेन धृते वाससी विहाय, प्रसन्नं यदाननं तच्चन्द्रमा इव यस्य स तथा सन् । अनेनाऽनन्दमयत्वेन प्राकृतवैलक्षण्यं दर्शितम् । पर्यधात् परिधानं चक्रे ॥ २२ ॥

(सं.चं.) अविचार्येति । धारणीयमुत नेति जिज्ञासां विना । निःशङ्कमित्यर्थः । तदेव स्फुटमाह– प्रसन्नाननचन्द्रमाः । 'न वनं गन्तुकामस्य त्यजतश्च वसुन्धराम् । सर्वलोकातिगस्येव दृश्यते चित्तविक्रिया' (१९.३३) इति हि रामायणे ॥ २२–५ ॥

---

१. **'केकयात्मजा'** इति वि.ती.पाठ इति भाति ।

२. **'अविचार्य च ते'**

[1]स्वनाथं जगतां नाथं दृष्ट्वा तं चीरधारिणम् ।
चीरे प्रदत्ते कैकेय्या पर्य्यधादाशु लक्ष्मणः ॥ २३ ॥

(भा.दी.) स्वेति । लक्ष्मणः जगतां नाथं विशेषतः स्वनाथं तं श्रीरामं चीरं धर्तुं शीलमस्यास्तीति तथा तं दृष्ट्वा कैकेय्या स्वस्मै प्रदत्ते चीरे आशु पर्यधात् ॥ २३ ॥

चीरे प्रदत्ते कैकेय्या मुग्धेवाऽदाय मैथिली ।
ग्रीवायामेकमाबद्धय रामं प्रेक्ष्येदमब्रवीत् ॥ २४ ॥

(भा.दी.) चीरे इति । मैथिली सीता, कैकेय्या प्रदत्ते चीरे आदाय, ग्रीवायां एकं चीरम् आबध्य श्रीरामं प्रेक्ष्य मुग्धेव अपरचीरधारणे मुग्धेव इदं वचः अब्रवीत् ॥ २४ ॥

मुनिवध्वो निबध्नन्ति कथं चीरमिदं प्रभो ।
इत्युक्त्वा चीरहस्ता सा तस्थौ लज्जावती[2] सती ॥ २५ ॥

(भा.दी.) मुनीति । हे प्रभो श्रीराम, मुनिवध्वः मुनिभार्याः इदमेतादृशं चीरं कथं निबध्नन्ति? बध बन्धने लिट् । इति उक्त्वा चीरं हस्ते यस्याः सा तथा सा सीता लज्जान्विता सती तस्थौ ॥ २५ ॥

सत्वरः[3] स त्वथोपेत्य कुशचीरं गृहीतवान् ।
[4]कौशेयोपरि सीताया रामस्तत् पर्य्यधापयत् ॥ २६ ॥

---

१. का.श्री.पाठेऽत्र श्लोकार्धं न पठ्यते । तथाहि तत्पाठः–**'स्वनाथं जगतां नाथं दृष्ट्वा तं चीरधारिणम् ।
चीरे प्रदत्ते कैकेय्या मुग्धेवादाय मैथिली ।
ग्रीवायामेकमाबध्य रामं प्रेक्ष्येदमब्रवीत् ॥**

व्याचख्यौ च–**'मैथिली सीता जगतां नाथं जगत्स्वामिनम्, स्वनाथं स्वपतिं तं रामं चीरधारिणं चणवस्त्रं बिभ्राणं दृष्ट्वा । कैकेय्या चीरे प्रदत्ते सति मेग्धेव मूढेव चीरमादाय गृहीत्वा एकं चीरं ग्रीवायां कण्ठ आबध्य वेष्टयित्वा'** इति । साधुरयमपि पाठः स्यात् । येनोत्तरत्र पठितं(३१) श्लोकार्धं समीकृतं स्यात् ।

२. **'लज्जान्विता सती'** इति वि.ती.पाठः । ३. **'सत्वरं स–'**

४. **'पूरणगुण-'** (अ.सू.२.२.११) **इति पाणिनिसूत्रेण कृदन्ताव्ययस्यैव समासनिषेधात् उपरिशब्दस्य कृदन्ताव्ययत्वाभावात् कौशेयोपरीति साधु । अत एवोक्तम्–'तदुपर्यपि बादरायणः सम्भवात्' इति'** इति का.श्री ।

(भा.दी.) सत्वर इति । अथ त्वरया सहितः सत्वरः सः श्रीरामः उपेत्य सीतासमीपं गत्वा कुशैर्निर्मितं चीरं कुशचीरं तत् गृहीतवान् । तत् चीरं श्रीरामः सीतायाः कौशेयोपरि कौशेयस्य उपरि पर्यधापयत् परिधानं चक्रे ॥ २६ ॥

(सं.चं.) कौशेयस्योपरि । 'चेलं च तच्चतुर्धा स्यात् त्वक्फलाक्रिमिरोमजम् । वाल्कं क्षौमादिके वस्त्रे फालं कार्पासबादरौ । कौशेयं क्रिमिकोशोत्थे राङ्कवं मृगरोमजे । पत्त्रोर्णं धौतकौशेयं महामूल्यं महाधनम्' इति यादवप्रकाशः । कौशेयं पीतीम्बरम् । 'ऌॡ' इति भाषायाम् । कुशनिर्मितं चीरं कुशचीरमिति वदन्ति । कुशवत् कर्कशस्पर्शं वा चीरं कुशचीरम् ॥ २६ ॥

देवीं चीरधरां दृष्ट्वा वीरनाथामनाथवत् ।
वसिष्ठे मन्युरुदभूच्चन्दनाग इवानलः ॥ २७ ॥

(भा.दी.) देवीमिति । वीरः श्रीरामो नाथो यस्याः सा तथा तां देवीं सीताम्, न विद्यते नाथो यस्याः सा तथा तद्वत्, चीरं धरतीति चीरधरा तां दृष्ट्वा वसिष्ठे मन्युः क्रोधः, चन्दनश्चासौ अगश्च तस्मिन्, चन्दनवृक्ष इत्यर्थः । 'शैलवृक्षौ नगावगौ' इत्यमरः । अनल इव आग्निरिव उदभूत् । परमशैत्ये चन्दनवृक्षे वह्निप्रादुर्भावो यथाऽपूर्वः एवं परमशान्त्युपेतेऽपि वसिष्ठे तदानीं कोपोऽभूदित्यर्थः ॥ २७ ॥

(सं.चं.) चन्दनागे चन्दनद्रुमे अनल इव परमशान्ते वसिष्ठे कोपः । 'सालो वनस्पतिरगो विटपी कुटश्च' इत्यभिधानम् ॥ २७ ॥

मामेति सीतां संवार्य्य कैकेयीमब्रवीन्मुनिः ।
अतिप्रवर्त्तसे पापे कैकेयि कुलदूषणि[१] ॥ २८ ॥

(भा.दी.) मामेति । मुनिर्वसिष्ठः सीतां चीरधारणं मा कुरु मा कुरु इति संवार्य, हे पापे, कुलं दूषितवतीति कुलदूषिणी तत्सम्बुद्धिः, कैकेयि, अतिप्रवर्तसे अत्यन्तं प्रवर्तसे । वृतु वर्तने लट् । इति कैकेयीमब्रवीत् ॥ २८ ॥

(सं.चं.) मामा चीरं परिधा ससम्भ्रमं वारयित्वा । सतामाचारमतिक्रम्य प्रवर्तसे ॥ २८–९ ॥

१. **'कुलदूषिणि'** इति वि.ती. पाठ इति भाति ।

त्वद्वरेणापि दुर्वृत्ते न गन्तव्यं हि सीतया ।
सीता रामशरीरार्द्धं[१] मेदिनीं पालयेत् पुरे ॥ २९ ॥

(भा.दी.) अतिप्रवर्तनमेव दर्शयति– **त्वदिति** । दुष्टं वृत्तं चरितं यस्याः सा तथा तत्सम्बुद्धिः, कैकेयि, तव यो वरस्तेनापि सीतया वनं प्रति न गन्तव्यं हि । सीतयाऽपि वनं प्रति गन्तव्यमिति त्वया राजानं प्रत्यकथनादिति भावः । तस्मात् रामस्य यच्छरीरं तस्यार्धमिव रामशरीरार्धम्, भार्येत्यर्थः । सीता पुरमयोध्या तस्मिन् स्थित्वा मेदिनीं पालयेत् । पाल रक्षणे लिङ् ॥ २९ ॥

सदारो याति चेद् रामो यामः सर्वे वयं वनम्[२] ।
भरतः सानुजो रामं चीरधार्य्यनुयास्यति ॥ ३० ॥

(भा.दी.) सदार इति । दारैः सहितः सदारः, सीतासहित इत्यर्थः, श्रीरामः चेद्यदि वनं प्रति याति । तर्हि सर्वे वयं दशरथादयः वनं यामः गच्छामः । ततः किमित्यत आह– **भरत** इति । भरतः सानुजः शत्रुघ्न-सहितः सन् श्रीरामं चीरं धर्तुं शीलमस्यास्तीति चीरधारी सन् वनं प्रति अनुयास्यति अनुगमिष्यति । ध्रुवं निश्चितम् ॥ ३० ॥

(सं.चं.) भरतोऽपि सानुजः सशत्रुघ्नः कैकेयीमपहाय राममेवानुयास्यति । 'भरतश्च सशत्रुघ्नश्चीर-वासा वनेचरः । वने वसन्तं काकुत्स्थमनुवत्स्यति पूर्वजम्' (३७.२७) । नह्यदत्तां महीं पित्रा भरतः शास्तु-मर्हति । त्वयि वा पुत्रवद् वस्तुं यदि जातो महीपतेः' (३७.३०) इति हि रामायणे ॥ ३० ॥

शून्यामयोद्ध्यामद्ध्यास्व त्वं काळीव कलिप्रिये ।
वदत्येवं वसिष्ठे स्वं[३] धिक्कुर्वाणे जने नृपः[४] ।
धर्म्माशां जीविताशां च चिच्छेद विरहे प्रभोः[५] ॥ ३१ ॥

(भा.दी.) शून्यामिति । कलिः कलहस्तस्मिन् प्रिये प्रीतियुक्ते । 'कलहेऽन्त्ययुगे कलिः' इति वैज-यन्ती । कैकेयि, त्वं शून्यां सत्पुरुषैर्हीनां अयोध्यां काळीव अलक्ष्मीरिव भद्रकाळीवेति वा । अध्यास्व

१. **'–शरीरार्धा मेदिनीम्'** २. **'वयं ध्रुवम्' इति वि.ती.पाठः स्यात् ।**

३. **'वसिष्ठेऽस्मिन् धिक्–'** । **'अस्मिन् पूर्वोक्ते प्रसिद्धे वा वसिष्ठे एवम्, अतिप्रवर्तसे' इत्यादिप्रकारेण (वदति) जने लोके कैकेयीं धिक्कुर्वाणे सति'** इति का.श्री. ।

४. **'जनेश्वरः'** । ५. सम्प्रत्युपलब्धपाठानुसारेण षट्पदी अनुष्टुबियम् ।

सन्तिष्ठ । आस उपवेशने लोट् । वसिष्ठे कैकेयीं प्रति एवं वदति सति, जने स्वं स्वात्मानं धिक्कुर्वाणे ईदृशं वरं कथं ददावित्यादिरीत्या धिक्कुर्वति सति, नृपः दशरथः प्रभोः श्रीरामस्य विरहो वियोगस्तस्मिन् सति, धर्मविषयिणी आशा धर्माशा ताम्, धर्मं करिष्यामीत्याशामित्यर्थः, जीविते जीवने आशा जीविताशा तां च, जीविष्यामीत्याशामित्यर्थः, चिच्छेद तत्याज । छिदिर् द्वैधीभावे लिट् । अनेन वरदानेन मम धर्म-जीवितयोर्हानिर्जातेति निश्चिकायेत्यर्थः ॥ ३१ ॥

(सं.चं.) प्रभोः रामस्य विरहे सन्निहिते । धर्मेण वर्तितव्यमित्याशाम् । जीवितव्यमित्याशां च । त्यक्तरामस्य का धर्माशा? का च जीविताशा? ॥ ३१ ॥

रामस्यैकस्य पापिष्ठे वनवासो वरस्तव[१] ।
सीतालक्ष्मणयोः कस्माच्चीरमित्यवदन्नृपः ॥ ३२ ॥

(भा.दी.) रामस्येति । हे पापिष्ठे कैकेयि, एकस्य श्रीरामस्य यस्मात् वनवासः वनवासलक्षणः वरः तव दत्तः, तस्मात् सीतालक्ष्मणयोः चीरं कस्मात् प्रदत्तं इति नृपः अवदत् ॥ ३२ ॥

(सं.चं.) तव त्वया वृतो वरः । कस्माच्चीरं प्रादा इत्यवदन्नृपः ॥ ३२ ॥

सर्वमाकुलमालोक्य रामो राजानमब्रवीत् ।
मत्स्नेहादपि[२] पाहीमां जननीं जनकाधुना ॥ ३३ ॥

(भा.दी.) सर्वमिति । श्रीरामः सर्वं सज्जनजातं तत् आकुलं सम्भ्रान्तं आलोक्य, हे जनक हे पितः, मयि स्नेहो मत्स्नेहस्तस्मादपि वा इमां जननीं कैकेयीं अधुना पाहि । पा रक्षणे लोट् । इति राजानं अब्रवीत् ॥

(सं.चं.) मयि स्नेहान्निमित्तात् । यदि त्वं मयि स्निह्यसि ॥ ३३ ॥

[३]यत्कृपालुतयाऽऽकृष्टं निःसङ्गमपि मे मनः ।
तस्यां मातरि मे तात कृपणायां कृपां कुरु ॥ ३४ ॥

(भा.दी.) यदिति । हे तात, मे मनः निर्गतः सङ्गो यस्मात् तथा तत्, स्वकीये स्नेहादिलक्षणसङ्गरहित-मपीत्यर्थः, यस्यां विद्यमाना कृपा यत्कृपा सैव लता तया, आकृष्टं आकृष्यत । मे मम कृपणायां तस्यां

१. **'वरस्ततः'** २. **'न केवलं भार्यात्वेनेत्यपेरर्थः'** इति का.श्री. । ३. **'यत्कृपालतया'** इति वि.ती.पाठः ।

मातरि कैकेय्यां कृपां कुरु । कृञो लोट् । अपकारिण्यामप्येतस्यामियं तु मद्वनगमननिमित्तमात्रमिति मम मनो न कुण्ठितं यस्मात् तस्मात् त्वयाऽपि परित्यागमकृत्वा पूर्ववत् परिग्रहः कार्य इत्यर्थः ।। ३४ ।।

(सं.चं.) निःसङ्गमपि मे मनः कृपावशंवदतया आकृष्टं सत् तस्यां सकरुणम् । कृपणा दयनीया ।। ३४ ।।

निशम्यैवं निगदितं राजा रामस्य गच्छतः[1] ।
मुक्तकण्ठो रुरोदोच्चैः प्रियैर्भार्य्याशतैर्य्युतः[2] ।। ३५ ।।

(भा.दी.) निशम्येति । राजा वनं गच्छतः श्रीरामस्य एवं निगदितं प्रोक्तं वचः निशम्य प्रियैः प्रीतिविषयैः भार्याणां शतानि चतुर्दशशतानि तैः युतः सन्, मुक्तो विभक्तः कण्ठो यस्य स तथा सन्, उच्चैर्यथा भवति तथा रुरोद । रुदिर् अश्रुविमोचने लिट् ।। ३५ ।।

(सं.चं.) मुक्तकण्ठः, राजा सन् प्राकृत इव सर्वजनसमक्षं कथं रुद्यामिति स्थानमानादिव्यवस्थामगणयित्वा यथेच्छं रुरोद ।। ३५–६ ।।

चिरं विलप्य राजेन्द्रः कैकेयीं गर्हयन् मुहुः[3] ।
रामं पदातिमेष्यन्तं ज्ञात्वा सूतमभाषत[4] ।। ३६ ।।

(भा.दी.) चिरमिति । कैकेयीं मुहुः गर्हयन् राजेन्द्रः चिरं दीर्घकाले विलप्य श्रीरामं पदातिं एष्यन्तं ज्ञात्वा मन्त्रिणं सुमन्त्रं प्रति अब्रवीत् ।। ३६ ।।

सुमन्त्र मम यानेन नन्दनं मे वनं नय ।
मात्रा पित्रा च निर्यास्यः पुत्रो [5]नन्वेवमीदृशः ।। ३७ ।।

(भा.दी.) सुमन्त्रेति । हे सुमन्त्र, त्वं मे नन्दनं श्रीरामं मम यानं रथस्तेन वनं तत् नय प्रापय । श्रीरामं वनं प्रति नयेति वचनमत्यन्तावाच्यमित्याशयेन कैकेयीमात्मानं च विनिन्दयन् साक्षेपमाह– **ईदृश** इति । ईदृशः एवंगुणविशिष्टः पुत्रः श्रीरामः मात्रा कैकेय्या पित्रा मया च एवं चीरधारणादिकं कारयित्वा रथेन निर्वास्यो

---

१. **'रामस्य पश्यतः ।' 'रामस्य पश्यतः सतः रामे पश्यति सतीति यावत्'** इति.का.श्री. ।

२. **'–शतैः सह ।'**

३. **'गर्हयन् पुनः ।'**

४. **'ज्ञात्वा मन्त्रिणमब्रवीत्'** इति वि.ती.पाठः ।

५. **'नत्वेवमीदृशः'** इति भ्रान्तः पाठः ।

ननु विवासयितुमर्हो ननु । एतादृशगुणविशिष्टो निर्वास्यो न भवत्येव । अथापि मन्दभाग्याभ्यामावाभ्यां निर्वास्यत इति भावः ॥ ३७ ॥

(सं.चं.) ईदृशः सर्वगुणाढ्यः सुतो निर्वास्यो नन्विति व्यङ्ग्योक्तिः ॥ ३७–८ ॥

इति राज्ञा समादिष्टः सारथी रथमानयत् ।
सीतां दृष्ट्वा रुदन् भूपः कोशाद्ध्यक्षमभाषत ॥ ३८ ॥

(भा.दी.) **इती**ति । राज्ञा इति समादिष्टः आज्ञप्तः सारथिः सुमन्त्रः रथः स्यन्दनस्तम् आनयत् । सीतां दृष्ट्वा रुदन् भूपः कोशस्यार्थौघस्याध्यक्षोऽधिपतिस्तं पुरुषं प्रति अभाषत । भाष व्यक्तायां वाचि लङ् ॥ ३८ ॥

वरीयांसि च वासांसि पराद्ध्र्याभरणानि च ।
[१]समाः सङ्ख्याय देह्याशु स्नुषायै मे यथेप्सितम् ॥ ३९ ॥

(भा.दी.) **वरीयांसी**ति । वरीयांसि श्रेष्ठानि वासांसि, पराध्यानि अत्युत्तमानि यान्याभरणानि तानि च, समाः संवत्सरान् सङ्ख्याय गणयित्वा मे स्नुषायै पुत्रभार्यायै सीतायै ईप्सितमनतिक्रम्य यथेप्सितं यथेष्टमित्यर्थः । आशु देहि । चतुर्दशसंवत्सरेषु धारयितुं यावन्ति वस्त्रादीन्यपेक्षितानि तानि सर्वाणि देहीत्यर्थः । इत्यभाषतेत्यन्वयः ॥ ३९ ॥

(सं.चं.) वनवाससमाः सङ्ख्याय तावत्पर्यन्तं यावन्त्याभरणानि वासांसि चापेक्षितानि तावन्ति मे स्नुषायै यथेच्छं देहि ॥ ३९–४० ॥

इति राज्ञा नियुक्तेन[२] राजामात्येन तत्क्षणात्[३] ।
दत्तैराकल्पवासोभिर्विरेजे वीरवल्लभा ॥ ४० ॥

(भा.दी.) **इती**ति । राज्ञा नियुक्तेन आज्ञप्तेन राजामात्येन दशरथमन्त्रिणा, स चासौ क्षणस्तस्मिन् दत्तैः, आकल्पा आभरणानि ते च वासांसि च तैः वीरवल्लभा श्रीरामप्रिया सीता विरेजे । राजृ दीप्तौ लिट्॥

१. **'समादाय प्रदेह्याशु'** । **'सममासङ्ख्याय देहि स्नुषायै'** इति च । **'समं यथा तथा आ सङ्ख्याय गणयित्वा द्वन्द्वशो गणयित्वेति यावत् । यथेप्सितम्, ईप्सितमाप्तुमिष्टमनतिक्रम्य देहि । सा यद्यदिच्छति तत्तद् देहीति भावः'** इति. का.श्री. ।

२. **'राजनियुक्तेन'** ३. **'तत्क्षणे'** इति वि.ती.पाठः स्यात् ।

स्नुषामुवाच कौसल्या लाळयन्ती[१] सुतामिव ।
माऽवमंस्था मुनिं रामं वत्से साध्वी भवेरिति ॥ ४१ ॥

(भा.दी.) स्नुषामिति । कौसल्या स्नुषां पुत्रभार्यां सीतां सुतामिव लाळयन्ती मानयन्ती सती, हे वत्से, मुनिं मुनिव्रतं श्रीरामं माऽवमंस्थाः अवज्ञातं मा कुरु । मनु अवबोधने लुङ् । 'न माङ्योगे' **(अ.सू.६.४.७४)** इत्यडभावः । साध्वी पतिव्रता भवेः । इति उवाच ॥ ४१ ॥

(सं.चं.) मुनिं स्वीकृतमुनिवृत्तिम् ॥ ४१ ॥

कान्ते त्रैलोक्यकान्ते मे[२] स्थिरा भक्तिर्गुणार्ण्णवे ।
आर्य्ये न प्राकृतस्त्री[३] स्यामिति सीताऽभ्यभाषत ॥ ४२ ॥

(भा.दी.) कान्त इति । हे कान्ते मनोहरे, आर्ये साध्वि कौसल्ये, गुणार्णवे त्रयाणां लोकानां समाहारः त्रैलोक्यं तस्मिन् एकान्तमनोहरे श्रीरामे मे भक्तिः स्थिरा । अहं प्राकृता च सा स्त्री च प्राकृतस्त्री, पामरस्त्रीसदृशीत्यर्थः, न स्यां न भवामि । अस्तेर्लिङ् । पामरस्त्रिया हि भर्तरि क्षीणे तत्सेवायामौदासीन्यं क्रियते । नाहं तादृशीत्यर्थः । इति सीता अभ्यभाषत ॥ ४२ ॥

(सं.चं.) त्रैलोक्यकमनीये मे कान्ते भर्तरि रामे । आर्ये पूज्ये इति कौसल्यां प्रति सम्बोधनम् । रामविशेषणं वा । 'आर्यः साधुकुलीनयोः' इति, 'पतिस्त्वर्य आर्यपुत्रः' इति च यादवप्रकाशः ॥ ४२–३ ॥

सीतामाश्लिष्य बाष्पाक्षी कौसल्या राममब्रवीत् ।
पुत्र सीतां च सौमित्रिं त्वां च[४] पाहि वनेष्विति ॥ ४३ ॥

(भा.दी.) सीतामिति । बाष्पेण युक्ते अक्षिणी यस्याः सा तथा कौसल्या सीतां आश्लिष्य, हे पुत्र, श्रीराम, सीतां च सौमित्रिं च त्वां च वनेषु पाहि । इति श्रीरामं अब्रवीत् । ब्रूञो लङ् ॥ ४३ ॥

परिभावी[५] न मे मातस्त्रैलोक्ये ससुरासुरे ।
शीघ्रमेष्यामि चैताभ्यां प्रसीदेत्यब्रवीत् प्रभुः ॥ ४४ ॥

---

१. 'लालयन्ती' २. '–कान्ते ते स्थिरा' ३. 'प्राकृता स्त्री' ४. '–मित्रिं स्वं च'

५. 'पराभवो न' । 'पराभावी न' इति च । **'मे पराभावी तिरस्कर्ता मा जयन्नित्यर्थः । प्रतिभटो वा नैवास्ति । पराभव इति पाठे तिरस्कारो नास्ति'** इति का.श्री. ।

(भा.दी.) परीति । प्रभुः श्रीरामः, हे मातः कौसल्ये, सुराश्च असुराश्च तैः सहितं तस्मिन्, त्रैलोक्ये (मे) मम परिभावयति पराजयति शत्रुमिति परिभावी पराजयकर्तेत्यर्थः, प्रतिभट इति वा, न नास्ति । एताभ्यां सीतालक्ष्मणाभ्यां सह शीघ्रं यथा भवति तथा एष्यामि चतुर्दशवर्षानन्तरमागमिष्यामि । इण् गतौ लृट् । त्वं प्रसीद प्रसन्ना भव । अयं सीतालक्ष्मणाभ्यां सहितः कथमायास्यतीति मद्विषयकमनःक्षोभरहिता भव, प्रसादं कुर्विति वा । इति अब्रवीत् ॥ ४४ ॥

(सं.चं.) परिभावी पराजेता ॥ ४४ ॥

रामोऽर्द्धसप्तशतकं मातॄणामभ्यवन्दत ।
[1]संवासे क्षम्यतामागः साध्वनुज्ञायतामिति[2] ॥ ४५ ॥

(भा.दी.) राम इति । श्रीरामः मातॄणां सप्तानां शतानां समाहारः सप्तशतकं अर्धेन समांशेन सहितं सप्तशतकं अर्धसप्तशतकं चतुर्दशशतकमित्यर्थः, तत्प्रति संवासः सहवासस्तस्मिन् कृतं यत्किञ्चित् आगः अपराधः क्षम्यताम् । क्षमूष् सहने लोट् । साधु यथा भवति तथा वनवासार्थं अनुज्ञायतां अनुज्ञाप्यताम्, ज्ञा अवबोधने लोट् । इति वदन् सन् अभ्यवन्दत ॥ ४५ ॥

(सं.चं.) सप्तशतकस्यार्धम् । संवासः सहवासेनातिपरिचयः । 'ಸಲುಗೆ' इति भाषायाम् । संवासनिमित्तम् । 'संवासात् परुषं किञ्चिदज्ञानाद्वाऽपि यत् कृतम् । तन्मे समनुजानीत सर्वाश्चाऽमन्त्रयामि वः' (३९.३८) इति रामायणे ॥ ४५ ॥

क्रौञ्चीनामिव देवीनां करुणे[3] क्रन्दिते सति ।
रामलक्ष्मणजानक्यो राजानं चाभ्यवादयन् ॥ ४६ ॥

(भा.दी.) क्रौञ्चीनामिति । देवीनां कृताभिषेकाणां राजभार्याणाम् । 'देवी कृताभिषेका या' इत्यमरः । क्रौञ्चीनामिव क्रौञ्चपक्षिस्त्रीणामिव, करुणे कृपास्पदे, क्रन्दितमाक्रन्दितं तस्मिन्, सति वर्तमाने सति, रामलक्ष्मणजानक्यः राजानं अभ्यवादयन् ॥ ४६ ॥

(सं.चं.) देवीनामिति न कृताभिषेकाणाम् । कौसल्याद्यास्तिस्र एव हि पट्टमहिष्यः । तेन देवस्य राज्ञः स्त्रिय इत्येव ॥ ४६ ॥

---

१. **'संवादः क्षम्यतां मातः'** इति, **'संवादे क्षम्यतामागः'** इति च । २. **'साध्वनुज्ञाप्यतामिति'**

३. **'करुणे श्रोतॄणां दयाजनके'** इति का.श्री. ।

परिक्रम्य महीपालं धर्म्मशिक्षणलक्षणाः[1] ।
कौसल्यां च सुमित्रां च क्रमेणैवाभ्यवादयन् ॥ ४७ ॥

(भा.दी.) परीति । धर्मस्य यच्छिक्षणमेवं कार्यमिति प्रदर्शनम्, तदेव लक्षणं लिङ्गमेषामस्तीति तथोक्ताः श्रीरामाद्याः । महीपालं दशरथं परिक्रम्य प्रदक्षिणीकृत्य, कौसल्यां सुमित्रां च क्रमेण अभ्यवादयन् । वदिधातोर्लङ् ॥ ४७ ॥

(सं.चं.) धर्मशिक्षणमेव लक्षणं स्वभावो येषाम् । अथापि कैकेयीमहो नाभ्यवादयन्निति भाति । तदनुक्तेः । रामायणेऽपि तथा । तेन तस्या असभ्यतामाघोषयन्तीव ॥ ४७ ॥

सुमित्रोचे प्ररुदिता[2] वन्दमानं स्वनन्दनम् ।
पुत्र सत्पुत्रवत्यस्मि त्वया पुत्रेण साधुना ॥ ४८ ॥

(भा.दी.) सुमित्रेति । प्रमुदिता पुत्रस्य ज्येष्ठानुगमनदर्शनेन सन्तुष्टा सुमित्रा वन्दमानं नमस्कुर्वन्तं स्वस्याः नन्दनं पुत्रं लक्ष्मणं प्रति, हे पुत्र, साधुना पुत्रेण त्वया अहं संश्चासौ पुत्रश्च सोऽस्या अस्तीति तथोक्ता अस्मि, इति ऊचे ॥ ४८ ॥

(सं.चं.) स्वः स्वीयो नन्दनः । स्वस्य वा नन्दनः । 'स्वोऽस्त्री धने त्रिषु स्वीय आत्मनि स्वजने तु ना' इति यादवप्रकाशः ॥ ४८ ॥

तरुणीं रमणीं त्यक्त्वा मां च यद् यासि[3] राघवम् ।
तात रामः ससीतस्ते जगन्नाथः परा गतिः ॥ ४९ ॥

(भा.दी.) कुत इत्यत आह– **तरुणीमि**ति । हे तात लक्ष्मण, तरुणीं सुन्दरीं रमणीं भार्यामूर्मिळाम्, मातरं मां च त्यक्त्वा राघवं हि यस्मात् यासि अनुगच्छसि । यातेर्लट् । तस्मात् ससीतः, सीतासहितः ससीतः, जगन्नाथः श्रीरामः ते तव परा उत्कृष्टा गतिः आश्रयः ॥ ४९ ॥

(सं.चं.) तरुणीं प्राप्तयौवनाम्, उपाष्टादशाम् ॥ ४९–५० ॥

---

१. **'वयसा न्यूनैः वयोवृद्धानां नमनं कर्तव्यमिति धर्मस्य शिक्षणं लक्षणमसाधारणधर्मो येषां ते'** इति का.श्री. ।

२. **'प्रमुदिता'** इति वि.ती. पाठः । **'तं वन्दमानं रुदती माता सौमित्रिमभ्यधात्'** (४०.४) इति रामायणे । ३. **'मां च यास्यसि'**

एतावदुक्त्वा सौमित्रिं सुमित्रा राममब्रवीत् ।
तातानुजस्तव प्रेष्यो[1] लक्ष्मणः पाल्यतामिति ॥ ५० ॥

(भा.दी.) एतावदिति । सुमित्रा सौमित्रिं लक्ष्मणं एतावत् वचः उक्त्वा, हे तात श्रीराम, तव अनुजः प्रेष्यः किङ्करः, प्रेष्ठ इति वा पाठः, अतिशयेन प्रिय इत्यर्थः, लक्ष्मणः पाल्यताम् । पाल रक्षणे लोट् । इति श्रीरामं अब्रवीत् ॥ ५० ॥

एवमेवेति देवेशे ब्रुवाणे भास्वरं रथम् ।
इङ्गितज्ञ उपानिन्ये सुमन्त्रो देशकालवित् ॥ ५१ ॥

(भा.दी.) एवमिति । देवेशे श्रीरामे एवमेवेति त्वदुक्तप्रकारेण करिष्याम्येवेति ब्रुवाणे सुमित्रां प्रति वदति सति । इङ्गितं श्रीरामाभिप्रायं जानातीति तथोक्तः । देशश्च कालश्च तौ वेत्तीति तथोक्तः । तद्देशकालयोः कर्तव्यकार्यविदित्यर्थः । सुमन्त्रः भास्वरः प्रकाशमानस्तं रथं उपानिन्ये श्रीरामसमीपमानयत् ॥ ५१ ॥

(सं.चं.) आकारेणैव हृद्गतं जानन्निङ्गितज्ञ उच्यते । 'आकारस्त्विङ्ग इङ्गितम्' इति यादवप्रकाशः ॥५१॥

सानुजो रथमारुह्य सीतामारोपयत् प्रभुः ।
करं करेण सङ्गृह्य करेणुं करिराडिव ॥ ५२ ॥

(भा.दी.) सानुज इति । सानुजः सलक्ष्मणः प्रभुः श्रीरामः रथः स्यन्दनस्तं आरुह्य । करः सीताहस्तस्तं करेण स्वपाणिना सङ्गृह्य करेणुर्हस्तिनी तां करिराडिव गजश्रेष्ठइव सीतां आरोपयत् रथमारोपयामास । रुह बीजजन्मनि प्रादुर्भावे लङ् ॥ ५२ ॥

(सं.चं.) करिराट् करेणुमिव ॥ ५२ ॥

[2]अद्ध्यास्त तद्युगपदेव युगं च योग्यं रुच्या ततं दशमुखाक्रमणे प्रसिद्धम् ।
अत्यायतं सुमनसां सुमनोरथं च दिव्यं तदा दशरथस्य रथं स रामः ॥ ५३ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
अयोद्ध्याकाण्डे सप्तमः सर्ग्गः ॥

---

१. 'प्रेष्ठो लक्ष्मणः–'

२. 'ग्रन्थकारः, रामो दशरथस्य रथं देवानां मनोरथं च सकृदारुरोहेत्याह– अध्यास्तेति' इति का.श्री. ।

(भा.दी.) अध्यास्तेति । श्रीरामः तदा योग्यं स्वारोहणार्थमुचितम् । रुच्या दीप्त्या ततं व्याप्तम् । दश मुखानि यस्य स दशमुखो रावणस्तस्य आक्रमणमतिक्रमस्तस्मिन् विषये प्रसिद्धम् । रावणस्य विनाशः कदा नु भविष्यतीति सञ्चिन्तया प्रसिद्धमित्यर्थः । इदं देवानां मनोरथपक्षे । रथपक्षे तु दशानां दशादिशां मुखानि । सुमनसां (देवानाम्), 'सुमनाः पुष्पमालत्योः स्त्री देवबुधयोः पुमान्' इति वैजयन्ती । सुमनोरथं शोभनो यो मनोलक्षणरथस्तम्, दशरथस्य रथं चेति तत् युगं च तत् द्वयमपि युगपदेव अध्यास्त । आरुरोहेत्यन्वयः । आस उपवेशने लङ् । यदा श्रीरामः सुमन्त्रादानीतं रथमारुरोह वनं प्रति गन्तुम्, तदा देवा रावणादिराक्षसनिग्रहोऽपि रणे भविष्यतीति प्रसन्नमनसो भूत्वा श्रीरामं मनसा व्यचिन्तयन्निति भावः ॥ ५३ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां
भावार्थदीपिकायामयोध्याकाण्डे सप्तमः सर्गः ॥

(सं.चं.) वसन्ततिलकयैव सर्गार्थमुपसंहरति– दशरथस्य रथं सुमनसां मनोरथं चेत्येतत् युगं द्वयमपि युगपदेवाध्यास्त । अस्मन्मनोरथपूर्तिकालः सम्प्राप्तः इति देवैः सामोदं चिन्तितो बभूवेत्यर्थः । सुमनोरथं चेति पुष्पकविमानं स्मारयतीव । उभयमपि रामेणारोढुं योग्यम् । रुचिरभिलाषः, रावणो रामेण हन्तव्य इति । तेनाऽततो व्याप्तो निबिडो मनोरथः । रुच्या शोभया ततो रथः । दशमुखस्याऽक्रमणे प्रसिद्धः प्रसक्तो मनोरथः । दशदिङ्मुखानां आ समन्तात् क्रमणे प्रसिद्धो रथः । अत एव हि तं दशरथमाहुः । बहुतररक्षःसंहारादिनिरीक्षयाऽत्यायतो मनोरथः । सुविशालो रथः । दिव्यो जयशीलो मनोरथश्च रथश्च ॥ ५३ ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायामयोध्याकाण्डे
सप्तमसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– ७१४+५३=७६७]

अष्टमः सर्ग्गः

चोदितोऽचोदयद् भूम्ना तं रथं सारथिर्य्यदा ।
सबालवृद्धवनिताः प्रजास्तमनुदुद्रुवुः ॥ १ ॥

(भा.दी.) श्रीरामकृपयाऽनन्तजन्मार्जितसुकृतातिशयाच्चरमशरीरं प्राप्तानां प्रजानां श्रीरामे प्रवृत्तिं दर्शयति– **चोदित** इत्यादिना । भूम्ना परिपूर्णमनोरथेन श्रीरामेण चोदितः शीघ्रं वनं प्रापयेति प्रेरितः सारथिः सुमन्त्रः यदा तं रथं अचोदयत् प्रेरितवान् । चुद प्रेरणे लङ् । तदा बालाश्च वृद्धाश्च वनिताश्च ताभिस्सहिताः प्रजाः तं श्रीरामं अनुदुद्रुवुः पृष्ठतोऽगच्छन् । द्रु गतौ लिट् ॥ १ ॥

(सं.चं.) भूम्ना गुणपूर्णेन रामेण चोदितः ॥ १ ॥

तृषार्त्ताइव तोयौघं भवार्त्ताइव माधवम् ।
भयार्त्ताइव पातारं शोकार्त्ता राममन्वगुः ॥ २ ॥

(भा.दी.) **तृषार्ता** इति । तोयानामोघः समूहः, प्रवाह इति वा, तं तृषार्ताइव तृषया आर्ताइव माधवं श्रीहरिं भवे संसारे आर्ताइव, पातारं रक्षितारं पुरुषं भयार्ताइव, श्रीरामं शोकार्ताः पीडिताः सन्तः अन्वगुः अन्वगच्छन् । इण् गतौ लुङ् ॥ २ ॥

(सं.चं.) तृषार्ताइव तोयौघम् । तोयस्य ओघः पूगो यत्र तं जलाशयम् । 'ततः सबालवृद्धा सा पुरी परमपीडिता । राममेवाभिदुद्राव घर्मार्त्ता सलिलं यथा' (४०.३०) इति च । अगुः । 'इणो गा लुङि' (अ.सू. २.४.४५) ॥ २ ॥

सारथे स्थीयतां किञ्चिच्छनैर्वा नीयतां रथः ।
रामाननेन्दुं पश्यामो द्रक्ष्यामस्तं कदा पुनः ॥ ३ ॥

(भा.दी.) सारथ इति । हे सारथे सुमन्त्र, किञ्चित् स्थीयताम् । रथः शनैर्नीयतां वा । वयं श्रीरामस्य यदाननं तदिन्दुरिव तं पश्यामः । दृशेर्लट् । पुनः तं श्रीरामं कदा द्रक्ष्यामः ॥ ३ ॥

(सं.चं.) किञ्चिदल्पकालम् । इदानीं न पश्यामश्चेत् तं पुनः कदा द्रक्ष्यामः ॥ ३ ॥

धन्याऽसि देवि सीते त्वं धन्योऽसि त्वं च लक्ष्मण ।
श्रेयः स्वर्गापवर्गाभ्यां यद् वां स्याद् रामदर्शनम् ॥ ४ ॥

(भा.दी.) धन्येति । हे देवि सीते, त्वं धन्या पुण्यवती असि । हे लक्ष्मण, त्वं च धन्यः असि । कुत इत्यत आह– **श्रेय** इति । यत् यस्मात् स्वर्गश्च अपवर्गो मोक्षः स च ताभ्यां श्रेयः अतिप्रशस्तं तत् । 'श्रेयोऽत्यन्तप्रशस्ते स्यात् कल्याणे धर्ममोक्षयोः' इति वैजयन्ती । श्रीरामदर्शनं वां युवयोः स्यात् ॥ ४ ॥

(सं.चं.) यत् श्रेयः श्रेष्ठं रामदर्शनम्, यत् यस्मात् युवयोः स्यात् । तस्मात् धन्याऽसि । धनं लब्ध्री धन्या । लब्धा धन्यः । रामदर्शनमेव सर्वाधिकं धनम् । 'धनगणं लब्धा' (अ.सू.४.४.८४) इति पाणिनिः । स्वर्गापवर्गाभ्याम् । स्वर्गादपि मोक्षादप्यधिकं प्रशस्यम् । 'प्रशस्यस्य श्रः' (अ.सू.५. ३.६०) ॥ ४ ॥

जनेषु प्रवदत्स्वेवं[1] राजा स्त्रीभिरनुद्रुतः[2] ।
रामं पुनर्दिदृक्षेऽहमित्युक्त्वा पुनराद्रवत्[3] ॥ ५ ॥

(भा.दी.) जनेष्विति । जनेषु एवं प्रवदत्सु[4] स्त्रीभिः स्वभार्याभिः अनुद्रुतः अनुगतः राजा दशरथः । अहं पुनः श्रीरामं दिदृक्षे द्रष्टुमिच्छामि । इति उक्त्वा पुनः आव्रजत् । शीघ्रमन्वगच्छत् । व्रज गतौ लङ् ॥५॥

(सं.चं.) स्त्रीभिर्भार्याभिः । आद्रवत् आधावत् ॥ ५ ॥

धावतोः स्खलतोर्भूयो बाष्पैरन्धीकृताक्षयोः[5] ।
मातापित्रोः प्रवयसोर्ईदृशा कं न कृपां नयेत् ॥ ६ ॥

(भा.दी.) धावतोरिति । धावतोः पृष्ठतो धावनं कुर्वतोः, भूयः पुनःपुनः स्खलतोः दुःखवशात् स्खलनं कुर्वतोः, बाष्पा अश्रूणि तैः अन्धीकृते अक्षिणी ययोस्तौ तयोः, प्रगतं वयो ययोस्तौ तयोः, वृद्धयोरित्यर्थः,

---

१. **'प्ररुदत्स्वेवम्'** २. **'स्त्रीभिः समावृतः'** ३. **'पुनराव्रजत्'** इति वि.ती.पाठः ।
४. **'प्ररुदत्सु'** ५. **'अन्धीकृते दर्शनासाधनत्वं प्राप्ते अक्षिणी ययोस्तयोः'** इति का.श्री. ।

माता च पिता च मातापितरौ तयोः कौसल्यादशरथयोः दशाऽवस्था कं पुरुषं प्रति कृपां न नयेत् न प्रापयेत्? सर्वस्यापि कृपां जनयत्येवेत्यर्थः ॥ ६ ॥

(सं.चं.) वेगेन सरन्तौ धावन्तौ । वेगितायां गतौ सृधातोर्धावादेशः । एतेन धावु गतिशुद्ध्योरित्यर्वाचीनो धातुपाठः, 'धावु शुद्धौ' इत्येव प्रतनः इति ज्ञायते । प्रगतं वयो यौवनं ययोः प्रवयसोः । 'प्रवयाः स्थविरो वृद्धः' इत्यभिधानम् । मातापित्रोः कौसल्यादशरथयोः । 'आनङ् ऋतो द्वन्द्वे' (अ.सू.६.३.२५) इति पाणिनिः ॥ ६–७ ॥

हा राम राम वत्सेति हा सीते लक्ष्मणेति च ।
मातापित्रोः समाक्रन्दस्त्रैलोक्यकरुणोऽभवत् ॥ ७ ॥

(भा.दी.) हा रामेति । हा राम राम वत्स इति । हा सीते इति । हा लक्ष्मण इति च । मातापित्रोः कौसल्या-दशरथयोः समाक्रन्दः आर्तनादः त्रैलोक्यस्य करुणः कृपास्पदीभूतः अभवत् ॥ ७ ॥

तिष्ठतिष्ठेति राजेन्द्रो याहियाहीति राघवः ।
सुमन्त्रमभितोऽब्रूतां सुमन्त्रो [1]विक्लबोऽभवत् ॥ ८ ॥

(भा.दी.) तिष्ठेति । राजेन्द्रः तिष्ठतिष्ठ इति । राघवः श्रीरामः याहियाहि गच्छगच्छ इति । इति सुमन्त्रं अभितः उभयतः । 'समीपोभयतःशीघ्रसाकल्याभिमुखेऽभितः' इति वैजयन्ती । अब्रूताम् । सुमन्त्रः विक्लबः केन वा प्रोक्तं कर्तव्यमिति परवशः अभवत् ॥ ८ ॥

(सं.चं.) राजेन्द्रो दशरथः । राघवो रामः । अभितः उभयतः परितो वा । विक्लबः किङ्कर्तव्यतामूढः । 'विक्लबे विह्वलः स्मृतः' इत्यभिधानम् । 'तिष्ठेति राजा चुक्रोश याहियाहीति राघवः । सुमन्त्रस्य बभूवाऽत्मा चक्रयोरिव चान्तरा' (४०.४६) इति च ॥ ८ ॥

नाश्रौषमिति राजेन्द्रं सुमन्त्र ब्रूहि सङ्गमे ।
इति रामोदितः सूतो रथं निन्ये कृताञ्जलिः ॥ ९ ॥

१. **'विक्लबः मनःखेदयुक्तः'** इति का.श्री. ।

(भा.दी.) **ने**ति । हे सुमन्त्र, सङ्गमः पुनरागत्य दशरथेन सह समागमस्तस्मिन् जायमाने सति, त्वद्वचनं नाश्रौषं न श्रुतवानस्मि । श्रु श्रवणे लुङ् । इति राजेन्द्रं दशरथं प्रति ब्रूहि इति रामोदितः सूतः सारथिः सुमन्त्रः कृतः अञ्जलिर्येन स तथा सन् रथं वनं प्रति निन्ये ॥ ९ ॥

(सं.चं.) सङ्गमे, मां वने विसृज्य प्रतिनिवृत्तस्य ते दशरथेन समागमे सति । 'नाश्रौषमिति राजेन्द्रमुपालब्धोऽपि वक्ष्यसि' (४०.४७) इति च ॥ ९ ॥

यं पुनर्द्रष्टुमन्विच्छेन्न तं दूरमनुव्रजेत् ।
नृप एवं वसिष्ठाद्यैर्वारितोऽध्वन्युपाविशत् ॥ १० ॥

(भा.दी.) **यमि**ति । यः पुरुषः यं पुरुषं पुनः द्रष्टुं अन्विच्छेत् । इषु इच्छायां लिङ् । तं पुरुषं दूरं नानुव्रजेत् नानुगमनं कुर्यात् । एवं वसिष्ठ आद्यो येषां ते तथा तैः मुनिभिः वारितः नृपः अध्वा मार्गः तस्मिन् उपाविशत् ॥ १० ॥

(सं.चं.) यं पुनः । 'यमिच्छेत् पुनरायान्तं नैनं दूरमनुव्रजेत् । इत्यमात्या महाराजमूचुर्दशरथं वचः' (४०.५०) इति च ॥ १०–३ ॥

प्राणिदेहादिव प्राणे सेतुबन्धादिवाम्भसि ।
रामे निर्गच्छति पुरात् सर्वमासीदमङ्गलम् ॥ ११ ॥

(भा.दी.) **प्राणी**ति । प्राणिनो देहः शरीरं तस्मात् प्राण इव, सेतुरूपो बन्धः सेतुबन्धस्तस्मात् अम्भसीव, पुरमयोध्या तस्मात् श्रीरामे निर्गच्छति सति सर्वं पुरं अमङ्गलं आसीत् । यथा मुख्यप्राणे निर्गते शरीरममङ्गलं भवति यथा वा सेतोर्भेदेनोदके गते सति तत्प्रदेशोऽमङ्गलं भवति तद्वदेवायोध्याऽपि श्रीरामे निर्गतेऽभूदिति भावः ॥ ११ ॥

स्थावराणां तिरश्चां च शोकवह्निमदीपयत् ।
रामदेवस्य विरहो मानवानां तु[१] किम्पुनः ॥ १२ ॥

१. 'मानवानां च किम्पुनः'

(भा.दी.) स्थावराणामिति । रामश्चासौ देवश्च रामदेवस्तस्य विरहः वियोगः, स्थावराणि वृक्षादीनि तेषाम्, तिर्यञ्चस्तिर्यक्प्राणिनो गजादयस्तेषां च, शोक एव वह्निस्तम् अदीपयत् अभ्यवर्धयत् । दीपी दीप्तौ लङ् । मानवानां तु पुनः शोकवह्निं अदीपयदिति किं वक्तव्यम् ॥ १२ ॥

शोचतः पततो राज्ञो मामेति सहसा सती ।
कौसल्या दक्षिणं बाहुं कैकेयी वाममग्रहीत् ॥ १३ ॥

(भा.दी.) शोचत इति । सती साध्वी कौसल्या शोचतः दुःखं कुर्वतः, दुःखोद्रेकादेव पततः, राज्ञः दशरथस्य दक्षिणं बाहुं मा पत मा पत इति सहसा अग्रहीत् । कैकेयी च वामं बाहुमग्रहीत् ॥ १३ ॥

(सं.चं.) मा पप्तः, मा च शोचीरिति ॥ १३ ॥

कैकेयीमवलोक्याथ क्रुद्धो दशरथोऽब्रवीत् ।
कर्म्मणा चण्डि चण्डेन चण्डालि[१] त्वं न मां स्पृश ॥ १४ ॥

(भा.दी.) कैकेयीमिति । अथ क्रुद्धः दशरथः कैकेयीमवलोक्य, हे चण्डि क्रूरे, चण्डेन क्रूरेण कर्मणा श्रीरामाभिषेकविघातापरलक्षणकर्मणा चण्डालि चण्डालीसदृशे कैकेयि, त्वं मां न स्पृश । स्पृश आमर्शने लोट् । इति अब्रवीत् ॥ १४ ॥

(सं.चं.) चण्डेन क्रूरेण कर्मणा । जन्मना क्षत्रियाऽपि कर्मणा चण्डाली ॥ १४ ॥

त्वया छलादवच्छिन्नं[२] राज्यं चेद् भरतो भजेत् ।
न तेन दत्तमुदकं प्रेतस्यापि प्रियं मम ॥ १५ ॥

(भा.दी.) त्वयेति । त्वया च्छलं कैतवं तस्मात् आच्छिन्नं अपहृतं तत् राज्यं चेद्यदि भरतः भजेत् । भज सेवायां लिङ् । तर्हि इह भूमौ तेन भरतेन दत्तं उदकं प्रेतस्यापि प्रेतभूतस्यापि मम प्रियं न भवति ॥ १५ ॥

(सं.चं.) भजेत् स्वीकुर्यात् । अधिकारं निर्वहेत् । छलं कपटमाश्रित्यावच्छिन्नं बलादपहृतम् ॥ १५–६ ॥

१. **'चण्डाली त्वम्'**
२. **'छलादिहाऽच्छिन्नम्'** इति वि.ती.पाठः स्यात् ।

तस्यैवं ब्रुवतो राज्ञो[1] राममेवान्वगच्छताम् ।
स्वभावायतनेत्रस्य नेत्रे अत्यायते तदा ॥ १६ ॥

(भा.दी.) तस्येति । एवं ब्रुवतः स्वभावात् आयते दीर्घे नेत्रे यस्य स तथा तस्य, राज्ञः तस्य दशरथस्य तदा श्रीरामस्य गमनसमये अत्यायते दर्शनौत्सुक्येनातिविशाले नेत्रे श्रीराममेव अन्वगच्छताम् ॥ १६ ॥

चक्षुराद्यैरुपरतं रामेऽक्ष्यविषये[2] सति ।
रतमस्मिन् मनोवाग्भ्यां भूपतेर्योगिनो यथा ॥ १७ ॥

(भा.दी.) चक्षुरिति । श्रीरामे अक्ष्यविषये सति चक्षुषोऽगोचरे सति । भूपतेः दशरथस्य चक्षुराद्यं येषां तानि तैः त्वगादीन्द्रियैः उपरतं निवृत्तम् । मनश्च वाक् च ताभ्याम् । योगिनः मनोवाचौ यथा तथा । अस्मिन् श्रीरामे रतं रमणमकारि । यथा योगी भगवदनपरोक्षदशायां मनसा वाचा च भगवत्स्मरणानुकीर्तनाभ्यां रमते तद्वद्रामसचक्षाणो दशरथोऽपि तदनुस्मरणादिपरोऽभूदिति भावः ॥ १७ ॥

(सं.चं.) मनोवाग्भ्याम् । राममेव चिन्तयामास मनः । रामगुणानेव कीर्तयामास वाक् ॥ १७ ॥

राममातुर्नयत मां कौसल्याया निवेशनम् ।
रामपादारविन्दाङ्के भूतळे स्वस्ति मे भवेत् ॥ १८ ॥

(भा.दी.) रामेति । मन्त्रिणः, राममातुः कौसल्यायाः निवेशनं गृहं तत् प्रति मां नयत प्रापयत । श्रीरामस्य यौ पादौ तावरविन्दे इव तयोरङ्को यस्मिंस्तत्तथा तस्मिन् भूतळे मे मह्यं स्वस्ति क्षेमः भवेत् ॥ १८ ॥

(सं.चं.) नयत मामिति परिजनान् प्रत्युक्तिः । सम्प्रति रामपादारविन्दाङ्कितं भूतळमेव शरणम् । यतो मे स्वस्ति भवेत् निर्वृतिर्भवेत् ॥ १८ ॥

एवं[3] निगद्य सुचिरं विलप्य च महीपतिः ।
कौसल्यालयमापेदे दिवाकर इवाम्बुदम्[4] ॥ १९ ॥

१. 'ब्रुवतस्तस्य राम–' २. 'रामे त्वविषये' ३. 'इत्थं निगद्य' ४. 'इवाम्बुधिम्'

(भा.दी.) एवमिति । महीपतिः एवं निगद्य, सुचिरं दीर्घकाले विलप्य परिदेवनं कृत्वा (च), कौसल्यायाा आलयो गृहं तम्, अम्बुदो मेघस्तं दिवाकर इव सूर्य इव आपेदे प्राप । पद गतौ लिट् ॥ १९ ॥

(सं.चं.) दिवाकरोऽम्बुदं मेघमिव । मेघान्तर्लीनो भानुरिव कळाहीनो राजा । 'विलपन् प्राविशद् राजा गृहं सूर्य इवाम्बुदम्' (४२.२४) इति च । 'दिवाकर इवाम्बुधिम्' इति क्वचित् । मधुरः पाठः । तदात्वे तु 'गृहं सूर्य इवाम्बुधिम्' इत्येव रामायणपाठोऽपि स्यात् ॥ १९ ॥

राजा राममिहापश्यंश्चुक्रोशोद्बाहुरुच्चकैः ।
हा राम क्वाऽसि सीते त्वं लक्ष्मणेति पुनःपुनः ॥ २० ॥

(भा.दी.) राजेति । इह कौसल्यागृहे श्रीरामं अपश्यन् राजा दशरथः । हा राम, त्वं क्व कुत्र असि । हे सीते, त्वं क्व असि । हे लक्ष्मण, त्वं क्व असीति पुनःपुनः उच्चकैः, ऊर्ध्वौ बाहू यस्य स उद्बाहुस्तथा सन्, चुक्रोश रुरोद । क्रुश आह्वाने रोदने च लिट् ॥ २० ॥

(सं.चं.) उद्बाहुः उच्छ्रितबाहुः । उच्चकैः मुक्तकण्ठम्, चुक्रोश नामग्राहं रुरोद ॥ २०–१ ॥

शयानः शयने तत्र मग्नः शोकमहार्ण्णवे ।
रामलीलां स्मरन्नेव सकलं कालमत्यगात् ॥ २१ ॥

(भा.दी.) शयान इति । तत्र कौसल्यागृहे, शय्यतेऽत्रेति शयनं शय्या तस्मिन् शयानः, शोक एव महार्णवस्तस्मिन् मग्नः, दशरथः रामलीलां स्मरन्नेव सकलः समस्तस्तं कालं अत्यगात् निनाय । इण् गतौ लुङ् ॥ २१ ॥

अनुयातुमशक्तत्वाल्ललनाः[१] सह बालकैः ।
स्मरन्त्यो राममुद्बाष्पा न्यवर्त्तन्त गृहान् प्रति ॥ २२ ॥

(भा.दी.) अन्विति । ललना नागरस्त्रियः, बालका बालास्तैः सह, श्रीरामं अनुयातुं अशक्तत्वात् श्रीरामं स्मरन्त्यः सत्यः, उत् उत्कृष्टः बाष्पः अश्रु यासां तास्तथा सत्यः, गृहान् प्रति । 'गृहाः पुंसि च भूम्न्येव' इत्यमरः । न्यवर्तन्त परावृत्य जग्मुः ॥ २२ ॥

(सं.चं.) पुरवासिन्यो ललनाः । उद्गतबाष्पाः ॥ २२ ॥

---

१. '–मशक्यत्वाल्ललनाः'

हा राम[1] क्व प्रयासि त्वं सीतयेत्युरुरोदनाः ।
अन्वधावन् समं पौरैः सर्वाः प्रकृतयः प्रभुम् ॥ २३ ॥

(भा.दी.) हा रामेति । सर्वाः प्रकृतयः अमात्यादिसप्तप्रकृतयः, पुरि विद्यमानाः पौरास्तैः जनैः समं सार्धम्, हा राम, त्वं सीतया सह क्व कुत्र प्रयासि गच्छसि, इति उरु उत्कृष्टं रोदनं येषां ते तथाभूताः सन्तः, प्रभुं श्रीरामं अन्वधावन् अन्वगच्छन् । धावु गतिशुद्ध्योः लङ् ॥ २३ ॥

(सं.चं.) उरु उच्चैः रोदनं यासां प्रकृतीनाम् । प्रकृतयः राज्याधिकृताः पुरुषाः, जानपदाश्च ॥ २३–४ ॥

आधावतो रुद्धकण्ठान् प्राञ्जलीनश्रुलोचनान् ।
जनांस्तान् मेघगम्भीरं प्रोवाच करुणाकरः ॥ २४ ॥

(भा.दी.) आधावत इति । करुणाकरः श्रीरामः, आधावतः, स्वपृष्ठत आधावनं कुर्वतः, रुद्धः दुःखातिशयनिरुद्धः कण्ठो येषां ते तथा तान्, प्रबद्धः अञ्जलिर्येषां ते तथा तान्, अश्रुपूर्णे लोचने येषां ते तथा तान्, तान् आगतान् अमात्यादिजनान् प्रति मेघगर्जनवद्गम्भीरं यथा भवति तथा मेघगम्भीरं प्रोवाच ॥ २४ ॥

निवर्त्तध्वं च वर्त्तध्वं भरतस्यानुशासने ।
स मे भक्तोऽनुजो राजा तन्मे शुश्रूषणं प्रजाः ॥ २५ ॥

(भा.दी.) निवर्तध्वमिति । हे प्रजाः, यूयं निवर्तध्वम् । अयोध्यां प्रति परावृत्य गच्छत । वृतु वर्तने लोट् । भरतस्य अनुशासनमाज्ञा तस्मिन् वर्तध्वं प्रवर्तध्वम् । त्वद्विरोधिनोऽनुज्ञया कथं वर्तनीयमित्यत आह– **स** इति । यस्मात् अनुजः राजा सः भरतः मे भक्तः तस्मात् तत् भरताज्ञानुसारेण वर्तनं मे शुश्रूषणं सेवा ॥ २५ ॥

(सं.चं.) तत् तस्मात् । तत् भरतानुवर्तनं मे शुश्रूषणम् । न मदनुवर्तनम् ॥ २५ ॥

इत्युक्ता अपि ते सर्वे तमेवान्वाद्रवन्[2] द्रुतम् ।
विप्रा मार्ग्गालसाः प्रोचुस्त्रयीवेदान्तपारगाः ॥ २६ ॥

---

१. 'हा नाथ क्व'

२. '–मेवान्वद्रवन्'

(भा.दी.) इतीति । श्रीरामेण इति उक्ता अपि ते सर्वे जनाः द्रुतं यथा भवति तथा तमेव श्रीराममेव अन्वाद्रवन् अन्वगच्छन् । द्रु गतौ लङ् । त्रयी वेदत्रयं सा च, वेदान्ता उपनिषदः, वेदानामन्तो निर्णयो यस्मादिति व्युत्पत्त्या वेदान्तशास्त्रं वा तच्च, तयोः पारं परमावधिस्तत् गता इति तथोक्ताः । 'अन्तोऽत्यवसिते मृत्यौ स्वरूपे निश्चयेऽन्तिके' इति वैजयन्ती । विप्राः मार्गे अलसाः आलस्योपेताः मार्गालसाः बहुदूरं धावनेनाऽलस्योपेताः सन्त इत्यर्थः, प्रोचुः ॥ २६ ॥

(सं.चं.) सुदूरं मार्गक्रमणेन न लसन्तीत्यलसाः श्रान्ता म्लानमुखाः । वेदान्तो वेदार्थनिर्णायकं शास्त्रम् ॥

हे जात्या वाजिनोऽस्माकं स्वामी नो नीयतां वनम् ।
पुरमानीयतामेनं व्रजन्ति शरणं प्रजाः ॥ २७ ॥

(भा.दी.) हे इति । जातौ भवाः जात्याः हे वाजिनः, सदश्वजातौ जाता मानुषाइव विवेकिनो भवन्तीत्यतो जात्या इत्युक्तम् । भवद्भिः अस्माकं स्वामी श्रीरामः वनं प्रति नो नीयतां न नीयताम् । श्रीरामः पुरमयोध्यापुरं प्रति आनीयताम् । प्रजाः एनं श्रीरामं शरणं तत् व्रजन्ति ॥ २७ ॥

(सं.चं.) रामः स्वप्रार्थनां नानुमन्यत इति विज्ञाय विप्रा वाजिनः प्रत्याहुः, तद्व्याजेनापि रामः स्वाशय-दार्ढ्यमवगच्छत्विति । हे जात्या अश्वजातिषु श्रेष्ठाः, उक्तग्रहणदक्षा वाजिनः । 'कुलीनश्रेष्ठयोर्ज्जात्यम्' इत्यभिधानम् । अनन्यशरणा एनं रामं शरणं व्रजन्ति । तस्मात् तं पुरं नयत । न वनम् । 'वहन्तो जवना रामं भोभो जात्यास्तुरङ्गमाः । निवर्तध्वं न गन्तव्यं हिता भवत भर्तरि' (४५.१४) इति च ॥ २७ ॥

पदातीनां द्विजातीनामिति श्रुत्वाऽऽर्त्तभाषितम् ।
अवतीर्य्य रथाद् रामो ययौ मन्दं दयानिधिः[१] ॥ २८ ॥

(भा.दी.) पदातीनामिति । दयानिधिः दयाश्रयः श्रीरामः । पद्भ्याम् अतन्ति गच्छन्ति इति पदातयस्तेषां द्विजातीनां ब्राह्मणानां इति आर्तनादोपेतं यद्भाषितं भाषणं तत्, आर्तानां भाषितमिवाऽर्तभाषितं तदिति वा, श्रुत्वा रथः स्यन्दनस्तस्मात् अवतीर्य मन्दं यथा भवति तथा ययौ ॥ २८ ॥

(सं.चं.) पादाभ्यामेवातन्तीति पदातयः पादचारिणः । पादशब्दस्य पद इत्ययमादेशः–'पादस्य पदाज्याति-गोपहतेषु' (अ.सू.६.३.५२) इति । केचित् पादस्य पद्भावमाहुः । तन्नाऽऽदृत्यम् । तथात्वे पद्ग इति स्यान्न पदग इति । पदुपहत इति स्यान्न पदोपहत इति । आर्तं दुःखपूर्णं भाषितम् ॥ २८–९ ॥

१. 'दयाकरः'

विप्राः प्राञ्जलयः प्रोचू रामं राजीवलोचनम् ।
निवर्त्तस्व पुरं वत्स पालयास्मान् कृपालय ॥ २९ ॥

(भा.दी.) विप्रा इति । विप्राः प्राञ्जलयः सन्तः, हे कृपालय कृपाश्रय, वत्स श्रीराम, त्वं पुरमयोध्यां तत्प्रति निवर्तस्व । अस्मान् पालय । इति राजीववत् कमलवत् लोचने यस्य स तथा तं श्रीरामं प्रोचुः ॥ २९ ॥

पश्येमान् प्रणतान् भूमौ[१] हंसशुक्लशिरोरुहान् ।
मुनीन् भागवतश्रेष्ठान् वाजपेयादियाजिनः[२] ॥ ३० ॥

(भा.दी.) पश्येति । भूमौ प्रश्रितान् संस्थितान्, हंसवत् हंसपक्षिवत् शुक्लाः शिरोरुहाः केशा येषां ते तथा तान्, वृद्धानित्यर्थः, भागवतेषु भगवद्भक्तेषु श्रेष्ठान्, वाजपेयः वाजपेयाख्ययज्ञ आदिर्येषां ते वाजपेयादयः, तैः यष्टुं भगवन्तं पूजयितुं शीलमेषामस्तीति तथा तान् इमान् मुनीन् पश्य ॥ ३० ॥

(सं.चं.) पश्येमान् । 'याचितो नो निवर्तस्व हंसशुक्लशिरोरुहैः । शिरोभिर्निभृताचार महीपतनपांसुलैः' (४५.२७) इति च ॥ ३० ॥

पश्याग्नीननुयातांस्त्वां[३] वेदांश्चाङ्गानि चाधुना ।
पश्येदं ब्राह्मणकुलं पर्य्याकुलमनाकुल[४] ॥ ३१ ॥

(भा.दी.) पश्येति । अधुना त्वां अनुयातान् अनुसृत्य गतान् अग्नीन् आहवनीयाद्यग्नीन् पश्य । अनुयातान् वेदांश्च पश्य । अङ्गानि च व्याकरणादिशास्त्राणि च पश्य । न विद्यते आकुलं राज्यादित्यागेन क्लेशो यस्य स तथा तत्सम्बुद्धिः । हे अनाकुल श्रीराम, इदं ब्राह्मणकुलं ब्राह्मणसमूहम्, पर्याकुलं त्वद्वियोगेन क्लिष्टं पश्य ॥ ३१ ॥

(सं.चं.) पश्याग्नीन् । स्कन्धारूढाग्नि वेदवेदाङ्गपारगं ब्राह्मणकुलं त्वामनुयातं पश्येत्यर्थः ॥ ३१ ॥

१. **'प्रश्रितान् भूमौ'** इति वि.ती.पाठः ।

२. क्वचिदिदं पद्यमन्यथा पठ्यते । यथा– **'पश्य भागवतश्रेष्ठान् वाजपेयादियाजिनः । मुनीनिमान् भूप्रणतान् हंसशुक्लशिरोरुहान्'** इति ।

३. **'पश्याग्नीननुयातान् स्वान्'** इति, **'पश्येमाननुयातान् स्वान्'** इति च ।

४. **'पर्याकुलमनाकुलम्'** । **'पर्याकुलं व्याप्तम्, तव सन्निधावनाकुलं आकुल(ता)रहितम् । यद्वा पुरे अनाकुलम्, इदानीं परितः आकुलं तव गमनेन दुःखितमिदं ब्राह्मणकुलं पश्य'** इति का.श्री. ।

नानास्तम्बलतोपेता रुद्धपादा[१] हि पादपाः ।
अनुयातुमशक्तास्त्वामनुशोचन्ति शोभन ॥ ३२ ॥

(भा.दी.) नानेति । स्तम्बाः गुल्मास्ते च लताश्च स्तम्बलताः, नानाविधा याः स्तम्बलतास्ताभिरुपेताः, रुद्धाः भूलग्नाः पादा येषां ते तथा, पादपाः वृक्षाः, हे शोभन श्रीराम, त्वां अनुयातुमशक्ताः सन्तः अनुशोचन्ति हि । शुच शोके लट् । तरुगुल्मादयोऽप्यनुगमने समर्थाश्चेदनुगच्छेयुरेव । तत्रासामर्थ्यादिव कीदृश-मस्मज्जन्मेत्यनुशोचन्तीत्यर्थः ॥ ३२ ॥

(सं.चं.) नानास्तम्बलतोपेताः । स्तम्बा वीरुधः । 'ಪೊದರು' इति भाषायाम् । 'अनुगन्तुमशक्तास्त्वां मूलैरुद्धतवेगिनः । उन्नता वायुवेगेन विक्रोशन्तीव पादपाः' (४५.३०) इति च ॥ ३२–३ ॥

तिर्य्यश्चः कीटपर्य्यन्ता हन्तेमे मृगपक्षिणः ।
भक्तवत्सल दृश्यन्तां खिन्ना भक्ताश्चराचराः ॥ ३३ ॥

(भा.दी.) तिर्यश्च इति । हे भक्तवत्सल श्रीराम, कीटः पर्यन्तोऽवसानो येषां ते तथोक्ताः, भक्ताः तिर्यश्चः तिर्यक्प्राणिनः इमे त्वामनुगताः मृगपक्षिणः त्वया दृश्यन्ताम् । एवं चराश्च अचराश्च चराचराः प्राणिनः त्वद्वियोगेन खिन्नाः, हन्त ॥ ३३ ॥

एकच्छत्रोचितो लोके त्वमच्छत्रो हि गच्छसि ।
वयं[२] त्वां वाजपेयोत्थैः श्वेतच्छत्रैरुपास्महे ॥ ३४ ॥

(भा.दी.) एकेति । लोको भुवनं तस्मिन्, एकं यच्छत्रं श्वेतच्छत्रं तस्य उचितः त्वम्, न विद्यते च्छत्रं यस्य स तथा सन् गच्छसि हि । वयं त्वां वाजपेयेन वाजपेययज्ञेन उत्थानि उत्पन्नानि तैः, वाजपेय-यागकरणनिमित्तेन प्राप्तैरित्यर्थः । वाजपेययाजिनां हि श्वेतच्छत्रार्हता स्मृतिसिद्धा । श्वेतच्छत्रैः उपास्महे सेवामहे । आस उपवेशने लट् ॥ ३४ ॥

(सं.चं.) 'वाजपेयसमुत्थानि छत्राण्येतानि पश्य नः । अनवाप्तातपत्रस्य रश्मिसन्तापितस्य ते । एभिश्छायां करिष्यामः स्वैश्छत्रैर्वाजपेयिकैः' (४५.२२–३) इति च । 'तस्माद् वाजपेययाजी न कश्चन प्रत्यवरोहेत् । श्वेतच्छत्री भवति' इति प्रसिद्धं वाजपेययाजिनां श्वेतच्छत्रत्वम् ॥ ३४ ॥

---

१. 'बद्धपादा हि' २. 'हन्त त्वाम्'

प्रययौ भगवांस्तूर्ष्णीं शृण्वंस्तेषां[१] सरस्वतीम् ।
सन्ध्यायां प्राप्तवान् नाम्ना तमसां च सरस्वतीम् ॥ ३५ ॥

(भा.दी.) प्रययाविति । भगवान् श्रीरामः तेषां विप्राणां सरस्वतीं वाचं शृण्वन्, तूर्ष्णीं यत्किञ्चिदवदन् प्रययौ । सन्ध्यायां सन्ध्याकाले नाम्ना तमसां सरस्वतीं नदीं । 'कूलङ्कषा शैवलिनी सरस्वती' इति हलः । प्राप्तवांश्च ॥ ३५ ॥

(सं.चं.) सरस्वतीं वाणीं शृण्वन् तमसां सरस्वतीं नदीं प्राप्तवान् । सरस्वतीं सरस्वतीमित्यभङ्गश्लेष-यमकम् ॥ ३५ ॥

फलमूलोदकैर्वृत्तिरद्य प्राप्ता गृहं स्मरन् ।
नोत्कण्ठां कुरु तातेति रामः सौमित्रिमब्रवीत् ॥ ३६ ॥

(भा.दी.) फलेति । हे तात लक्ष्मण, अद्य अद्यप्रभृति फलानि च मूलानि च उदकं च तैः अस्माकं वृत्तिः जीवनं प्राप्ता । त्वं गृहं मन्दिरं तत् स्मरन् सन् उत्कण्ठां शोकम्, कठि शोक इति धातुः, न कुरु । श्रीरामः इति सौमित्रिं अब्रवीत् ॥ ३६ ॥

(सं.चं.) उत्कण्ठां गृहे रतिम् । 'स्यादायल्लकमौत्सुक्यमुत्कण्ठोत्कलिका रतिः' इति यादवप्रकाशः ॥३६॥

रामाज्ञया सुमन्त्रोऽश्वान् विमुच्य यवसं ददौ ।
स सौमित्रिः शुभां शय्यां[२] चक्रे च मृदुलैर्दलैः ॥ ३७ ॥

(भा.दी.) रामेति । सुमन्त्रः रामाज्ञया अश्वान् विमुच्य । यवसं तृणं तत् । 'यवसं तृणमर्जुनम्' इत्यमरः । ददौ । दाण् दाने लिट् । अथ सः सौमित्रिः मृदुलैः, दलानि पत्राणि तैः, शुभां शय्यां चक्रे (च) ॥ ३७ ॥

(सं.चं.) यवसम्, अश्वानां प्रियमदनीयं तृणं ददौ । 'घासस्तु यवसः शरिः' इति यादवप्रकाशः ॥ ३७ ॥

अनन्तशय्यस्तां शय्यामध्यासामास सीतया ।
[३]सौमित्रिस्त्वनयोस्तूर्ण्णं चक्रे पादावनेजनम् ॥ ३८ ॥

---

१. 'शृण्वन्नेषाम्' २. 'शिवां शय्याम्' ३. 'सौमित्रिस्तु तयो–'

(भा.दी.) अनन्त इति । अनन्तः शेषः शय्या यस्य तथा श्रीरामः सीतया सह तां शय्यां अध्यासामास । आस्थितोऽभवत् । आस उपवेशने लिट् । सौमित्रिस्त्वनयोः सीतारामयोः पादानामवनेजनं प्रक्षाळनं तत् तूर्णं यथा भवति तथा चक्रे ॥ ३८ ॥

(सं.चं.) पादावनेजनं पाद्यम्, पादक्षाळनम् ॥ ३८ ॥

स तस्मिंस्तमसातीरे विमले गोकुलाकुले[1] ।
सन्ध्यामुपास्य शिश्येऽत्र पर्य्यङ्के सीतया समम् ॥ ३९ ॥

(भा.दी.) स इति । सः श्रीरामः विमले, गवां कुलं समूहस्तेन आकुलं निबिडं तस्मिन्, तस्मिन् सम्प्राप्ते, तमसातीरे तमसानदीतीरे सन्ध्यां उपास्य, अत्र लक्ष्मणरचिते, पर्यङ्कः शय्या तस्मिन्, सीतया समं साकं शिश्ये शयनं चक्रे । शीङ् स्वप्ने लिट् ॥ ३९ ॥

(सं.चं.) गोकुलाकुले । 'गोकुलाकुलतीरायास्तमसाया विदूरतः । अवसत् तत्र तां रात्रिं रामः प्रकृतिभिः सह' (४६.१७) इति च ॥ ३९–४० ॥

सौमित्रिश्च सुमन्त्रश्च देवदेव्योरदूरतः ।
मनोरमान् रामगुणान् वर्ण्णयन्तौ स्म तिष्ठतः ॥ ४० ॥

(भा.दी.) सौमित्रिरिति । सौमित्रिश्च सुमन्त्रश्चाप्युभौ देवदेव्योः अदूरतः समीपे मनोरमान् मनोहरान् रामगुणान् वर्णयन्तौ तिष्ठतः स्म अतिष्ठताम् ॥ ४० ॥

रामोऽर्द्धरात्र उत्थाय सौमित्रिमिदमब्रवीत् ।
पश्य पौरानिमान् सुप्तान् वनेषु भवनेष्विव ॥ ४१ ॥

(भा.दी.) राम इति । श्रीरामः रात्र्या अर्धं अर्धरात्रस्तस्मिन्, 'रात्राह्नाहाः पुंसि' (अ.सू.२.४.२९) इति पुल्लिङ्गता, उत्थाय हे लक्ष्मण, वनेषु भवनानि गृहाणि तेष्विव सुप्तान् निद्रितान् इमान् पौरान् जनान् पश्य । इति इदं वचः सौमित्रिं प्रति अब्रवीत् ॥ ४१ ॥

(सं.चं.) अर्धरात्रो निशीथः । 'क्लीबे सङ्ख्यापरं रात्रमर्धान्ता' इति यादवप्रकाशः । 'सङ्ख्यापूर्वं रात्रं क्लीबम्' इति मतमनुसृत्येदमुदितम् । 'द्विरात्रः त्रिरात्रः चतूरात्रः' इति तु जयादित्यः ॥ ४१–२ ॥

१. 'कोकिलाकुले'

पुत्रमित्रकळत्राणि क्षेत्रवित्तगृहाणि च ।
त्यक्त्वा मद्भक्तिसम्पूर्णा मां योगिनइवान्वगुः ॥ ४२ ॥

(भा.दी.) पुत्रेति । पुत्राश्च मित्राणि च कळत्राणि भार्यास्तानि च, क्षेत्राणि च वित्तानि च गृहाणि च (तानि) त्यक्त्वा, मम भक्तिस्तया सम्पूर्णाः पूर्णमनोरथाः सन्तः, मां योगिनइव सनकादयइव, अन्वगुः । इण् गतौ लङ् ॥ ४२ ॥

अस्मिन् यामे वयं यामः सुप्तेष्वेतेषु सत्वरम् ।
दुःसहो विरहो ह्येषां किं वा लक्ष्मण मन्यसे ॥ ४३ ॥

(भा.दी.) अस्मिन्निति । हे लक्ष्मण, अस्मिन् वर्तमाने, यामः यामसञ्ज्ञकः कालस्तस्मिन्, एतेषु जनेषु सुप्तेषु सत्सु, वयं त्रयः सत्वरं त्वरया सहितं यथा भवति तथा यामः गच्छामः । किमर्थमेवं गन्तव्यमित्यत आह– **दुःसह** इति । एषां भक्तजनानां विरहः अपरोक्षतो मद्वियोगः । दुस्सहो हि असह्यो हि । हे लक्ष्मण, त्वं किं वा कार्यं मन्यसे निरूपयसि? मन ज्ञाने लट् ॥ ४३ ॥

(सं.चं.) अस्मिन् निशायाश्चरमयामे । यामो नाम प्रायः सार्धसप्तघटिकापरिमितः कालः ॥ ४३ ॥

इत्युक्त्वा सूतमूचेऽसौ पौरव्यामोहनाय हि[१] ।
नयोदीचीं रथं क्षिप्रं निवर्त्तस्व पुनस्त्विति[२] ॥ ४४ ॥

(भा.दी.) इतीति । असौ श्रीरामः लक्ष्मणं प्रति इति उक्त्वा, हे सुमन्त्र, पौराणां यद् व्यामोहनं श्रीरामोऽयोध्यां प्रति गत इति प्रतीतिजननं तस्मै, उदीचीं उत्तरां दिशं प्रति रथं क्षिप्रं यथा भवति तथा नय । पुनस्तं निवर्त्य परावृत्य नय । इति सूतं सुमन्त्रं प्रति ऊचे । अयोध्यायाः दक्षिणदिगवस्थिततमसातीरं प्रति सहाऽगता इमे जनाः उत्तरां दिशं प्रति निशीथसमय एव रथे नीते सति श्रीरामः अस्मासु विद्यमानकृपया परावृत्यायोध्यां प्रति गत इति मन्वाना अयोध्यां प्रत्येव गमिष्यन्ति । ततश्च दूरं गतानस्मान्नानुव्रजिष्यन्तीत्याशयेनैवमुक्तम् ॥ ४४ ॥

(सं.चं.) प्रथममयोध्याभिमुखं गच्छन्निवोदीचीं नय । ततः निवर्त्य पुनरिमं देशमानय ॥ ४४ ॥

१. **'पौरव्यामोहनाय हि पौराणां विपरीतज्ञानोत्पादनायैव'** इति का.श्री. ।

२. **'निवर्त्य च पुनर्नय'** इति वि.ती.पाठः । **'पुनस्तु पुनरेव निवर्तस्वेति सूतमूचे'** इति का.श्री. ।

सुमन्त्रोऽथ[१] तथा कृत्वा रथं भूम्ने न्यवेदयत् ।
आरुरोह रथं रामः ससीतालक्ष्मणस्ततः ॥ ४५ ॥

(भा.दी.) सुमन्त्र इति । अथ सुमन्त्रः रथं केवलस्यन्दनं तथा श्रीरामोक्तप्रकारेण कृत्वा भूम्ने पूर्णगुणाय श्रीरामाय न्यवेदयत् स्वकृतं कर्म विज्ञापितवान् । विद चेतनाख्याननिवासनेषु लङ् । ततः श्रीरामः ससीतालक्ष्मणः सन् रथं आरुरोह । रुह बीजजन्मनि प्रादुर्भावे च लिट् ॥ ४५ ॥

(सं.चं.) तथा कृत्वा रथमुत्तराभिमुखं नीत्वा पुना रामसमीपमानीय । भूम्ने पूर्णानन्दाय रामाय ॥ ४५ ॥

रथमारुह्य तरसा तमसामतितीर्य्य सः ।
तेनैव रात्रिशेषेण[२] दीर्घमध्वानमत्यगात् ॥ ४६ ॥

(भा.दी.) रथमिति । सः श्रीरामः रथं तरसा झटिति आरुँह्य तमसां तमसानदीम् अतितीर्य तेनैव अवशिष्टेन रात्रेश्शेषस्तेन दीर्घं अध्वानं अत्यगात् । इण् गतौ लुङ् ॥ ४६ ॥

(सं.चं.) तमसां अयोध्यायाः पश्चिमादिभागमगाम् ॥ ४६–७ ॥

प्रभाते सति पौरास्ते मन्वाना नगरं गतम् ।
रामं लोकाभिरामं तं प्रहृष्टा नगरं ययुः ॥ ४७ ॥

(भा.दी.) प्रभात इति । ते पौराः जनाः, प्रभातः प्रातःकालस्तस्मिन् सति, तं लोकाभिरामं श्रीरामं नगर-मयोध्यापुरं तत् प्रति गतं प्राप्तं मन्वानाः विजानन्तः सन्तः नगरं प्रति प्रहृष्टाः सन्तः ययुः ॥ ४७ ॥

अतिगच्छन्[३] बहून् ग्रामान्[४] कोसलान्[५] कोसलेश्वरः ।
वेदस्मृतिं नाम नदीं गोमतीं चात्यवर्त्तत ॥ ४८ ॥

(भा.दी.) अतीति । बहून् कोसलान् कोसलनामकान् ग्रामान् अतिगच्छन् अतिक्रम्य गच्छन् कोसलेश्वरः श्रीरामः वेदस्मृतिं वेदस्मृत्याख्याम् नाम प्रसिद्धां नदीं गोमतीं च गोमत्याख्यनदीं च अत्यवर्तत अतिक्रान्त-वान् । वृतु वर्तने लङ् ॥ ४८ ॥

---

१. **'सुमन्त्रोऽपि तथा'** २. **'येन रात्रिशेषेण पौरव्यामोहेनं कृतं तेनैव रात्रिशेषेण'** इति का.श्री । ३. **'इति गच्छन्'**
४. **'बहुग्रामान्'** ५. **'कोसलान् कोसलदेशे विद्यमानान् बहून् ग्रामानत्यवर्तत'** इति का.श्री. ।

(सं.चं.) कोसलान् कोसलविषयगतान् बहून् ग्रामान् । वेदस्मृतिं नाम नदीम् । 'ततो वेद श्रुतिं नाम शिववारिवहां नदीम्' (४९.१०) इति प्रचलितो रामायणपाठः ॥ ४८ ॥

दक्षिणाभिमुखं यान्तं दक्षिणं[१] सरयूनदीम् । (?स्यनिदकां नदीम्)
तरन्तं कोसलाद्यास्तं[२] सर्वे जानपदा ययुः ॥ ४९ ॥

(भा.दी.) दक्षिणेति । दक्षिणां दक्षिणदिशं प्रति अभिमुखं आभिमुख्यं यथा स्यात् तथा यान्तम्, दक्षिणं समर्थम्, सरयूं नदीं तरन्तं तं श्रीरामम्, कोसलाः कोसलविषयस्था जना आद्या येषां ते तथा, सर्वे जनपदे राष्ट्रे भवा जानपदाः जना ययुः ॥ ४९ ॥

(सं.चं.) दक्षिणाभिमुखं यत्र गङ्गासङ्गमः । गङ्गातीरे च शृङ्गिबेरपुरम् । न सरयूतीरे । सरयूनदीं तरन्तमिति पठन्ति । तीर्णगोमतीनां ततो गङ्गाभिमुखं दक्षिणां दिशमभिपततां न सरयूतरणावकाशः । अयोध्यातः पूर्वस्यां हि दिशि सरयूः । पश्चिमायां गोमती । स्फुटं लिपिकृतां प्रमादोऽयम् । तेषां प्रमादेन व्याख्यातारोऽपि प्रामाद्यन् । एकः प्रमादः प्रमादान्तरं जनयामास । ततो रामायणानुगुणम्, 'दक्षिणं स्यन्दिकां नदीम्' इति पठितव्यम् । तथाहि रामायणे– 'ततो वेदश्रुतिं नाम शिववारिवहां नदीम् । उत्तीर्याभिमुखः प्रायादगस्त्याध्युषितां दिशम् । गोमतीं चाप्यतिक्रम्य राघवः शीघ्रगैर्हयैः । मयूरहंसाभिरुतां ततार स्यन्दिकां नदीम्' (४९.१०;१२) इति । तमसा वेदश्रुतिर्गोमती स्यन्दिका चेतीमा नद्यो वसन्तग्रीष्मयोः स्तोकसलिला इति रथेनैव ततार । न नावा ॥ ४९–५१ ॥

दीनानश्रुमुखान् दृष्ट्वा भक्तांस्तान् विरहासहान् ।
भूमा भुजं भुजङ्गाभमुद्यम्येदमभाषत ॥ ५० ॥

(भा.दी.) दीनानिति । भूमा पूर्णसुखः श्रीरामः दीनान् श्रीरामस्य राज्यवियोगं दृष्ट्वा खिन्नान्, अश्रु मुखे येषां ते तथा तान्, विरहं वियोगं न सहन्त इति विरहासहाः तान्, भक्तान् तान् जनान् दृष्ट्वा भुजङ्गवत् सर्पवदाभा कान्तिर्यस्य स तथा तम्, भुजं हस्तं उद्यम्य उद्धृत्य इदं वचः अभाषत ॥ ५० ॥

वेदाहं भवतां भक्तिं भवनं प्रति गम्यताम् ।
इत्युक्तास्ते ययुर्नत्वा वर्ण्णयन्तो गुणार्ण्णवम् ॥ ५१ ॥

---

१. 'यातं दक्षिणां सरयू–'

२. 'कोसलाद्यास्ते सर्वे'

(भा.दी.) वेदेति । अहं भवतां मयि भक्तिं वेद जानामि । विद ज्ञाने लट् । भवनं गृहं तत्प्रति भवद्भिर्गम्यताम् । इति श्रीरामेणोक्तास्ते जनाः गुणार्णवं श्रीरामं नत्वा वर्णयन्तः तद्गुणवर्णनं कुर्वन्तः सन्तः ययुः ॥ ५१ ॥

द्विजसङ्घैः सदा सेव्यां भजतामघनाशिनीम्[१] ।
गच्छन्नाप त्रिपथगां गङ्गां रामस्त्रयीमिव ॥ ५२ ॥

(भा.दी.) द्विजेति । द्विजानां पक्षिणां ब्राह्मणानां वा ये सङ्घाः समूहास्तैः सदा सेव्याम्, भजतां स्नानादिना सेवमानानां जनानाम्, अघं पापं हन्तुं शीलमस्या अस्तीति तथा ताम्, त्रयश्च ते पन्थानश्च त्रिपथास्तेषु गच्छतीति तथोक्ता ताम् । स्वर्गभूमिपाताळाख्यत्रिलोकव्याप्तामित्यर्थः । गङ्गां गच्छन् श्रीरामः त्रयीमिव वेदत्रयीमिव आप । आपॢ् व्याप्तौ लिट् । वेदत्रयस्यापि द्विजसङ्घैस्सेव्यत्वात्, भजतां पापहारित्वात्, 'त्रयोऽर्थाः सर्ववेदेषु' इति स्मृतेः अर्थत्रयप्रतिपादकत्वेन [२]त्रिमार्गगत्वाच्चेत्युपमानोपमेयभावः ॥ ५२ ॥

(सं.चं.) गङ्गा द्विजसङ्घैः पक्षिसङ्घैर्मुनिसङ्घैश्च सदा सेव्या । त्रयी वेदाध्ययनरतानां विप्राणां सङ्घैः । स्नानेन भजतामघघातिनी गङ्गा । अध्ययनानुष्ठानाभ्यां भजतां त्रयी । गङ्गा त्रिपथगा । त्रीन् पथो गच्छतीति । त्रयाणां पथां समाहारस्त्रिपथम् । त्रिपथेन गच्छति वा । 'क्षितौ तारयते मर्त्यान् नागांस्तारयतेऽप्यधः । दिवि तारयते देवांस्तेन त्रिपथगा स्मृता' इति पुराणं वचः । त्रिभिः पथिभिरधिगम्यत इति त्रयी च त्रिपथगा । तद् यथा 'अग्निमीळे' इत्यग्निमानिनं वैश्वानरम्, प्राणाग्निम्, अग्निनारायणं च प्रतिपादयति । अधिभूतमध्यात्ममधिदैवमिति वा त्रयः पन्थानः ॥ ५२ ॥

ससीतं सानुजामात्यमिङ्गुदीवृक्षमूलगम् ।
प्रणनाम प्रभुं प्राप्य निषादाधिपतिर्गुहः ॥ ५३ ॥

(भा.दी.) ससीतमिति । निषादाधिपतिः गुहः गुहनामकः निषादः ससीतं सीतासहितम्, अनुजश्च अमात्यः सुमन्त्रः स च ताभ्यां सहितः सानुजामात्यस्तम्, इङ्गुदीवृक्षस्तापसवृक्षस्तस्य मूलं गत इति तथोक्तस्तम् । 'इङ्गुदी तापसतरुः' इत्यमरः । 'इङ्गळ' इत्यपभ्रष्टसञ्ज्ञा । प्रभुं श्रीरामं प्राप्य प्रणनाम । णमु प्रह्वत्वे शब्दे च लिट् ॥ ५३ ॥

---

१. **'–मघघातिनीम्'** इति वि.ती.पाठः । २. **'त्रिपथगाम्, ऋगादिमार्गत्रयगताम्'** इति का.श्री. ।

(सं.चं.) गङ्गाकूले निषादपतेर्गुहस्य राज्यमापेत्याह– ससीतम् । इङ्गुदीवृक्षः । **‘ಇಂಗಳ’** इति, **‘ಗಾರೆಮರ’** इति च भाषायाम् । ‘निषादो व्याळादिवधाद् यवनः कुञ्जरग्रहात्’ इति यादवप्रकाशः । निषादानामेव प्रभेदः शबरो भिल्लः पुलिन्दः किरात इति ॥ ५३ ॥

तवेदं सपुरं राज्यं देव दासा वयं तव[1] ।
निवसात्रैव नाथेति गुहो राघवमब्रवीत् ॥ ५४ ॥

(भा.दी.) तवेति । हे देव श्रीराम, पुरेण सहितं सपुरं इदं राज्यं तव विद्यमानम्, वयं तव दासाः भृत्याः, तस्मात् हे नाथ, त्वं अत्रैव मन्नगर एव निवस आवासं कुरु । वस निवासे लोट् । गुहः इति राघवं प्रति अब्रवीत् ॥ ५४ ॥

(सं.चं.) पुरं शृङ्गिबेरपुरम् ॥ ५४ ॥

वनवासेन देवस्य भक्तः खिन्नो मुहुर्गुहः[2] ।
सान्त्वितस्तेन यवसं रामाश्वेभ्यो ददौ तदा ॥ ५५ ॥

(भा.दी.) वनेति । देवस्य श्रीरामस्य वने यो वासस्तेन मुहुः खिन्नः भक्तः गुहः तेन श्रीरामेण सान्त्वितः सन् श्रीरामस्य ये रथाश्वास्तेभ्यः यवसं तृणं तत् तदा ददौ ॥ ५५ ॥

(सं.चं.) तेन रामेण सान्त्वितः । ‘अश्वानां खादनेनाहमर्थी नान्येन केनचित्’ (५०.४५) इति च ॥५५॥

देवदेव्योः स सौमित्रिः पर्ण्णपर्य्यङ्कयातयोः ।
पादावक्षाळयद् धन्यो रवावस्तमुपेयुषि[3] ॥ ५६ ॥

(भा.दी.) देवेति । धन्यः सः सौमित्रिः लक्ष्मणः, पर्णमयो यः पर्यङ्कस्तं यातौ गतौ तयोः देवदेव्योः श्रीराम-सीतयोः, रवौ अस्तं अस्तगिरिस्तम् उपेयुषि सति प्राप्ते सति, सायङ्काल इत्यर्थः, पादौ अक्षाळयत् । क्षळ शौचकर्मणि लङ् ॥ ५६ ॥

(सं.चं.) पर्णमयं पर्यङ्कं यातयोः । पर्यङ्के उपविष्टयोः । सः भ्रातृशुश्रूषारतः सौमित्रिः । ससौमित्रिर्गुहो वा । ‘उदयस्तूदयाद्रिः स्यादस्तस्त्वस्तमयाचलः’ इति, यादवप्रकाशः । ‘अस्तमदर्शने’ इति चाव्ययपर्याये ॥५६॥

---

१. **‘इदं राज्यमयं देशस्तव त्वदधीनम् । एते चाहं च वयं तव दासाः’** इति का.श्री. । २. **‘मुहुर्मुहुः’**

३. **‘अस्तमित्यव्ययम् । अस्तमदर्शनमुपेयुषि प्राप्ते सति’** इति का.श्री. ।

सन्ध्यायां समतीतायां देवदेव्योः शयानयोः[१] ।
तिष्ठन्तं लक्ष्मणं वीक्ष्य[२] गुह ऊचे धनुर्द्धरम्[३] ॥ ५७ ॥

(भा.दी.) समिति । सन्ध्यायां समतीतायां सत्याम्, देवदेव्योः शयानयोः सत्योः, धनुर्धरतीति धनुर्धरस्तम्, तिष्ठन्तं लक्ष्मणं वीक्ष्य गुहः ऊचे ॥ ५७ ॥

(सं.चं.) धनुर्धारयति धरते वा । धनुर्धरं तिष्ठन्तम् । अशयित्वा जागरितारम् ॥ ५७ ॥

वीर विश्रम्यतां किञ्चित् किङ्करो भवतामहम् ।
आर्य्ययोः पालने युक्त[४] इत्युक्तो लक्ष्मणोऽब्रवीत् ॥ ५८ ॥

(भा.दी.) वीरेति । हे वीर लक्ष्मण, त्वया किञ्चित् विश्रम्यतां विश्रमणं क्रियताम् । श्रमु तपसि खेदे च लोट् । भवतां किङ्करः अहं आर्ययोः स्वामिनोः देवदेव्योः पालनं रक्षणं तस्मिन् युक्तः सन्नद्धः अस्मि । इति गुहेन उक्तः लक्ष्मणः तं प्रति अब्रवीत् ॥ ५८ ॥

(सं.चं.) आर्ययोः सीतारामयोः । 'ಅಯ್ಯ' इति भाषायाम् । अहमेव युक्तः समञ्जसः । 'युक्तौ श्लिष्टसमञ्जसौ' इति मङ्खः ॥ ५८ ॥

वीक्ष्येमं[५] पर्ण्णपर्य्यङ्कं प्रासादेऽनर्घशय्ययोः[६] ।
आर्य्ययोर्दूयते मे धीर्गुह किं गूहयामि ते ॥ ५९ ॥

(भा.दी.) वीक्ष्येति । प्रासादो हर्म्यं तस्मिन्, न विद्यते अर्घो मूल्यं यस्याः सा अनर्घा, तादृशी शय्या ययोस्तौ तथोक्तौ तयोः, आर्ययोः स्वामिनोः सीतारामयोः इमं मद्रचितं पर्णमयो यः पर्यङ्कस्तम् वीक्ष्य मे धीः मनः दूयते । दूञ् परितापे लट् । हे गुह, ते किं गूहयामि आच्छादयामि । गुहू संवरणे लट् । परमेष्टत्वात् त्वां प्रति न किञ्चिदवक्तव्यमित्यर्थः ॥ ५९ ॥

(सं.चं.) पर्णमयीं शय्यां वीक्ष्य ॥ ५९ ॥

---

१. **'शयानयोः योगनिद्रां प्राप्तयोः'** इति का.श्री. ।
२. **'लक्ष्मणं प्रेक्ष्य गुह–'**
३. **'धनुर्धरः'**
४. **'पालने यत्त–'**
५. **'संवीक्ष्य पर्ण–'**
६. **'प्रासादेऽनर्घ्यशय्ययोः'**

हा रामेति [१]विलोठन्तावनाथौ स्थविरौ भुवि ।
पितरौ स्मरतो मेऽङ्ग निद्रा विद्राविता शुचा ॥ ६० ॥

(भा.दी.) **हे**ति । भुवि हा राम इति विलोठन्तौ परिभ्रमन्तौ, न विद्यते नाथो ययोस्तौ, तथोक्तौ । श्रीरामस्यात्राऽगतत्वादेव रक्षकरहितावित्यर्थः, स्थविरौ वृद्धौ माता च पिता च पितरौ कौसल्यादशरथौ स्मरतः मे, [२]शुचा शोकेन, हे अङ्ग, इह प्रदेशे[३] निद्रा विद्राविता, दुःखातिशयान्निद्रैव नाऽयातीत्यर्थः ॥ ६० ॥

(सं.चं.) भुवि विलोठन्तौ मातापितरौ । लुठ उपघाते विलोडने वा ॥ ६० ॥

गुहसौमित्रिसूतानामित्थं रामप्रसङ्गिनाम् ।
जाग्रतामेकभावानां[४] सा व्यतीयाय शर्वरी ॥ ६१ ॥

(भा.दी.) **गुहे**ति । इत्थं रामस्य प्रसङ्गः कथा एषामस्तीति तथा तेषाम्, जाग्रतां अनिद्रितानाम्, केवलं भक्ता एकभक्तास्तेषाम्, गुहश्च सौमित्रिश्च सूतः सुमन्त्रश्च तेषां सा शर्वरी रात्रिः व्यतीयाय । इण् गतौ लिट् ॥ ६१ ॥

(सं.चं.) एकभावानामेकाभिप्रायाणाम् ॥ ६१ ॥

करेण ताम्रेण मनोहरेण स्पृष्टं मनाक् सुस्मितमुल्ललास ।
रामेण देव्या वदनारविन्दं सूर्य्येण तुल्यं[५] तरुणारविन्दम् ॥ ६२ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
अयोद्ध्याकाण्डेऽष्टमः सर्ग्गः ॥

—०—

(भा.दी.) **करेणे**ति । श्रीरामेण, ताम्रेण रक्ततळेन मनोहरेण करो हस्तस्तेन । 'कर्तृकरणयोस्तृतीया' (अ.सू. २.३.१८) इत्युभयत्र तृतीया । मनाक् ईषत्, स्पृष्टं देव्याः सीतायाः वदनमेवारविन्दं वदनारविन्दम् । सूर्येण

---

१. **'विलोटन्तावनाथौ'** २. **'शुक् शोकस्तया'** ३. **'इह'** इति पदं मूले न पठ्यते ।
४. **'जाग्रतामेकभक्तानाम्'** इति वि.ती.पाठः । ५. **'सूर्येण सान्ध्यं तरुणा–'**

ताम्रेण स्वर्णभासा मनोहरेण करेण किरणेन मनाक् स्पृष्टं तरुणारविन्दं नूतनारविन्दं चेत्युभयं तुल्यं समकालं यथा भवति तथा सुशोभनं स्मितं मन्दहासो विकासो यस्य तत्तथा सत् उल्ललास शुशुभे । लस श्लेषण-क्रीडनयोः लिट् ॥ ६१ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायामयोध्याकाण्डे भावार्थदीपिकायामष्टमः सर्गः ॥

—०—

(सं.चं.) उपजात्योपसंहरति– करेण । रामकरेण स्पृष्टं देव्याः सीताया वदनारविन्दम् । सूर्यकिरणेन स्पृष्टं तरुणारविन्दं च तुल्यं समानयोगक्षेममुल्ललास ॥ ६२ ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायामष्टमसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– ७६७+६२=८२९]

नवमः सर्ग्गः

रामाज्ञयाऽथ सौमित्रिः प्लवायाचोदयद् गुहम् ।
गुहश्चोपानयन्नावं स्वरित्रां[1] किङ्करैर्दृढाम्   ॥ १ ॥

(भा.दी.) श्रीरामो वनवासव्याजेन भक्तानुग्रहकारी सन् तत्तदृष्याश्रमेषु चचारेति वक्तुमुपक्रमते– **रामाज्ञये**त्या-दिना । अथ सूर्योदयानन्तरम्, सौमित्रिः लक्ष्मणः रामाज्ञया गुहं प्लव उडुपस्तस्मै अचोदयत् प्रेरयामास । चुद प्रेरणे[2] लङ् । गुहश्च सु शोभनं अरित्रं नावं प्रेरयितुमन्ते वृक्षखण्डेन बद्धो दण्डो यस्याः सा तथा ताम् । 'अरित्रं केनिपातनम्' इत्यमरः । दृढां नावं किङ्करैः उपानयत् आनाययामास ॥ १ ॥

(सं.चं.) सुदृढानि अरित्राणि यस्याम् । 'अरित्रं कोटिपत्रं स्यात्' इत्यभिधानम् । **'ಹುಟ್ಟುಗೋಲು', 'ಜಲ್ಲೆ'** इति भाषायाम् । दृढां गङ्गारयःसहनसमर्थाम् ॥ १ ॥

राघवो निरघं सूतं सुमन्त्रं प्रत्यमन्त्रयत् ।
याहि सौम्याधुनाऽयोद्ध्यां पाहि तातं शुचाऽर्दितम्   ॥ २ ॥

(भा.दी.) राघव इति । राघवः निर्गतमघं दोषो यस्मात् स तथा तं सूतं सारथिं सुमन्त्रं प्रति । हे सौम्य मनोहर, अधुना अयोध्यां प्रति याहि गच्छ । शुक् मद्वियोगजनितशोकस्तया अर्दितं तातं दशरथं पाहि सान्त्ववचनेन रक्ष । पा रक्षणे लोट् । इति अमन्त्रयत् अकथयत् । मत्रि गुप्तपरिभाषणे लङ् ॥ २ ॥

(सं.चं.) निरघं सौत्ये साचिव्ये च कदाचिदप्यकृतापराधम् ॥ २ ॥

कैकेयीं नावमन्यध्वं कुरुध्वं[3] भरतं नृपम् ।
पितुराज्ञां तनुध्वं[4] मे सर्वथैवं[5] प्रियं मम   ॥ ३ ॥

---

१. **'–न्नावं सारित्राम्'**   २. **'चुद सञ्चोदने'** । तथैव प्रचिलितो धातुपाठश्च ।   ३. **'–मन्यध्वं तनुध्वम्'**
४. **'पितुराज्ञां कुरुध्वम्'**   ५. **'सर्वथैव प्रियम्'**

(भा.दी.) कैकेयीमिति । यूयं कैकेयीं नावमन्यध्वम्, मद्राज्यविघातिनीत्यवज्ञातां न कुरुध्वम् । मन ज्ञाने लोट् । भरतं नृपं युवराजं कुरुध्वम् । मे पितुः दशरथस्य आज्ञां तनुध्वम् कुरुध्वम् । तनोतेर्लोट् । एवं अनेन प्रकारेण वर्तनं सर्वथा सर्वप्रकारेण मम प्रियं प्रीत्यास्पदम् ॥ ३ ॥

(सं.चं.) पितुराज्ञां तनुध्वम् । अनुल्लङ्घनमेवात्र तननम् ॥ ३ ॥

तातं सान्त्वय[1] सान्त्वज्ञ मम दीनां च मातरम् ।
वसिष्ठादींश्च सर्वांस्त्वं नानुशोचन्तु मामिह[2] ॥ ४ ॥

(भा.दी.) तातमिति । सान्त्वं शोकशमनप्रकारं जानातीति सान्त्वज्ञस्तत्सम्बुद्धिः, हे सुमन्त्र, त्वं मम तातं सान्त्वय । षान्त्व सामप्रयोगे लोट् । दीनां दुःखितां (मम) मातरं च सान्त्वय । सर्वान्, वसिष्ठ आदिर्येषां ते तथा तांश्च, सान्त्वय । इह वने मां प्रति नानुशोचन्तु न दुःखं कुर्वन्तु । शुच शोके लोट् ॥ ४ ॥

(सं.चं.) वसिष्ठादींश्च सान्त्वय । इह विपिने ससीतानुजो रामः कथं वा जीवतीति नानुशोचन्तु । अन्येषां शोकमनुचिन्त्य शोचनमनुशोकः ॥ ४ ॥

एवमुक्ते भगवता लक्ष्मणः कुपितोऽब्रवीत् ।
राजा कृतार्थः कैकेय्या रामं नानुस्मरेदिति ॥ ५ ॥

(भा.दी.) एवमिति । भगवता श्रीरामेण एवं वचसि उक्ते सति, लक्ष्मणः कुपितः सन्, कैकेय्या कृतः निष्पादित अर्थः प्रयोजनं यस्य स तथा, राजा दशरथः श्रीरामं नानुस्मरेत्, नानुध्यायेत् । स्मृ आध्याने लिङ् । इति अब्रवीत् ॥ ५ ॥

(सं.चं.) कृतार्थः लब्धपुरुषार्थः । नहि रामस्मरणेन तस्य कश्चिदर्थः ॥ ५ ॥

इत्युक्त ऊचे भगवान्[3] सूत मैवं नृपं वद ।
श्रुत्वा क्रोधोक्तमस्येदं पिता जह्यादसूनिति ॥ ६ ॥

(भा.दी.) इतीति । इति लक्ष्मणेन उक्तः भगवान् श्रीरामः, हे सूत सुमन्त्र, नृपं दशरथं प्रति एवं लक्ष्मणेनैवमुक्तमिति मा वद । क्रोधोक्तं क्रोधादुक्तं अस्य लक्ष्मणस्य इदं वचः श्रुत्वा दशरथः असून् प्राणान् जह्यात् परित्यजेत् । ओ हाक् त्यागे लिङ् । इति ऊचे ॥ ६ ॥

---

१. **'सान्त्वय दुःखं मा कुर्विति वद'** इति का.श्री. । २. **'मामिति'** ३. **'इत्युक्त ऊचे भगवान् सूत'**

(सं.चं.) एवंविधं लक्ष्मणोक्तं कटुवचनं पितरं प्रति मा वद ॥ ६ ॥

याहीति चोदयन्तं तं सुमन्त्रः कलिताञ्जलिः ।
मुक्तकण्ठो [१]रुदन्नुच्चैस्तन्निगृह्येदमब्रवीत् ॥ ७ ॥

(भा.दी.) याहीति । याहि इति चोदयन्तं श्रीरामं प्रति कलितः सम्बद्ध अञ्जलिर्येन स तथा मुक्तो दुःखाद्दीर्णः कण्ठो यस्य स तथा उच्चैर्यथा भवति तथा रुदन् सः सुमन्त्रः तत् रोदनं निगृह्य इदं वचः अब्रवीत् ॥७॥

(सं.चं.) मुक्तः कथमहं राजा सर्वेषां पुरतो रुद्यामिति सङ्कोचेन मुक्तः रहितः कण्ठो रवः । 'कण्ठो गलेऽन्तके शब्दे' इति यादवप्रकाशः ॥ ७ ॥

हतवीरामिव चमूं निर्वीरामिव सुन्दरीम् ।
त्वद्विहीनां रथधुरं कथं नेष्यामि ते पुरम्[२] ॥ ८ ॥

(भा.दी.) हतेति । हतः वीरो नायको यस्याः सा तथा तां चमूमिव, निर्वीरां पतिसुतरहिताम् । 'निर्वीरा[३] निष्पतिसुता' इत्यमरः । सुन्दरीमिव स्त्रियमिव । त्वया हीनां रहितां रथधुरं रथस्य धूर्भारस्ताम् । 'धूः स्याद्यानमुखे भारे' इति वैजयन्ती । ते तव पुरीं अयोध्यां प्रति कथं नेष्यामि ॥ ८ ॥

(सं.चं.) निर्वीरा पतिविधुरा, पतिपुत्रविधुरा वा । 'पतिपुत्रवती वीरा' इति नाममाला । रथधुरं रथनिर्वहण-भारम् । 'रथधुराम्' इति साधुः पाठः ॥ ८ ॥

पितरौ किं नु वक्ष्यामि पौरांश्च पथि पृच्छतः[४] ।
अयि[५] देव दयाळो त्वं तव सेवां प्रशाधि[६] मे ॥ ९ ॥

(भा.दी.) पितराविति । माता च पिता च पितरौ । कौसल्यादशरथौ प्रति किं नु किं वा 'श्रीरामः कुत्र' इत्याद्युक्ते वक्ष्यामि? परिपृच्छतः विचारयतः पुरे भवाः पौरास्तांश्च, किं नु वक्ष्यामि? अयि देव हे देव? दयाळो दयाशील श्रीराम, त्वं मे मह्यं तव सेवां प्रशाधि शासनं कुरु । इतः अयोध्यां गत्वा दशरथादीनां क्लेशावलोकनादेः कर्तुमशक्यत्वान्निकट एव तव सेवां कृत्वा स्थास्यामीति भावः ॥ ९ ॥

---

१. **'रुरोदोच्चैः–'** २. **'ते पुरीम्'** इति वि.ती.पाठः । ३. **'अवीरः निष्पतिसुता'** इत्यमरपाठः ।
४. **'परिपृच्छतः'** इति वि.ती.पाठः । ५. **'अपि देव'** ६. **'प्रसीद मे'**

(सं.चं.) प्रशाधि आज्ञापय । तव सेवां कुर्वन्निहैव यथा स्याम् ॥ ९ ॥

इत्युक्त ऊचे भगवांस्त्वयि याते[1] वने रतम् ।
मां प्रत्येष्यति कैकेयी सेवेयं मे भवेदिति[2] ॥ १० ॥

(भा.दी.) इतीति । इति सुमन्त्रेण उक्तः भगवान् श्रीरामः, हे सुमन्त्र, त्वयि याते सति अयोध्यां प्रति गते सति, मां वनमरण्यं तस्मिन् रतमासक्तम्, स्थितमित्यर्थः, कैकेयी प्रत्येष्यति, प्रत्ययं यास्यति, रामो वनं गतः सन्देहो नात्रेति विश्वासं यास्यति, गमिष्यतीत्यर्थः । इण् गतौ लृट् । मे मम इयं कैकेयीविश्वासकरणरूपा सेवा भवेत् । इति ऊचे इति सम्बन्धः ॥ १० ॥

(सं.चं.) वने रतं विहरन्तम् । अभ्यस्तवनवासम् । प्रत्येष्यति विश्वसिष्यति । 'नगरीं त्वां गतं दृष्ट्वा जननी मे यवीयसी । कैकेयी प्रत्ययं गच्छेदिति रामो वनं गतः' (५२.६१) इति च । पुरगमनेन कैकेयीप्रत्यायनमेव सम्प्रति त्वया कर्तव्या मम सेवा, नात्र स्थित्वा शुश्रूषणमिति ॥ १० ॥

सान्त्वयित्वा तथा सूतं रामदेवेन चोदितः[3] ।
वटक्षीरं जटाः कर्तुमुपानिन्ये गुहो बहु ॥ ११ ॥

(भा.दी.) सान्त्वयित्वेति । सूतं सुमन्त्रं तथा उक्तरीत्या सान्त्वयित्वा, अयोध्यां गन्तुमनुमतिं कारयित्वा, रामदेवेन चोदितः[1] प्रेरितः गुहः, बहु बहळं वटक्षीरं वटस्य वटवृक्षस्य क्षीरं तत् जटाः कर्तुं उपानिन्ये आनीतवान् ॥ ११ ॥

(सं.चं.) वटक्षीरम् । 'जटाः कृत्वा गमिष्यामि न्यग्रोधक्षीरमानय । तत्क्षीरं राजपुत्राय गुहः क्षिप्रमुपाहरत् । लक्ष्मणस्याऽत्मनश्चैव रामस्तेनाकरोज्जटाः' (५२.६८–९) इति च ॥ ११ ॥

लक्ष्मणस्याऽत्मनश्चाथ[4] जटाश्चक्रे[5] जगद्गुरुः ।
जटाभिस्तौ विरेजाते नरनारायणाविव ॥ १२ ॥

(भा.दी.) लक्ष्मणस्येति । अथ जगद्गुरुः श्रीरामः आत्मनः स्वस्य लक्ष्मणस्य च जटाः चक्रे । तौ श्रीरामलक्ष्मणौ जटाभिः नरनारायणाविव विरेजाते शुशुभाते । राजृ दीप्तौ लिट् ॥ १२ ॥

---

१. '–स्त्वय्यायाते' २. 'इयं पुरीं प्रति गमनमेव मे मम सेवा भवेदित्यूचे । सेवाशब्दापेक्षया इयमिति स्त्रीलिङ्गनिर्देशः' इति का.श्री. ।
३. 'रामदेवेन नोदितः' ४. '–त्मनश्चापि जटा–' ५. 'जटां चक्रे'

(सं.चं.) नरनारायणाविव। 'अशोभतामृषिसमौ' (५२.७०) इति रामायणवचनस्य सुन्दरमिदं व्याख्यानम् ॥ १२ ॥

गुहसूतावनुज्ञाप्य विनीतावनुनीय च ।
विचित्रारित्रसम्पन्नां नावं प्रापदनामयः[1] ॥ १३ ॥

(भा.दी.) गुहेति । न विद्यते आमयो यस्य स तथा, जटाकरणेऽपि पूर्णसुखरूपत्वेन मनःखेदादिदोषरहित इत्यर्थः, श्रीरामः विनीतौ विनयोपेतौ गुहसुमन्त्रौ अनुनीय सान्त्वयित्वा अनुज्ञाप्य च, विचित्रं यदरित्रं अन्ते दारुबन्धबद्धो दण्डविशेषस्तेन सम्पन्नां युक्तां नावं प्रापत् जगाम । आप्लृ व्याप्तौ लुङ् ॥ १३ ॥

(सं.चं.) नौपृष्ठे कर्णधारहस्तगतं कर्णाख्यमरित्रम् । पार्श्वयोः स्थितानां पुलिन्दानां हस्ते क्षेपण्याख्यान्यरित्राणि भवन्ति । तानि च विविधवर्णैरलङ्कृतानि भवन्तीति विचित्रारित्रमित्याह । विशेषतश्च रामसेवार्थं सीताविनोदार्थं च उत्सवादिषूपयुज्यमानानि विचित्राण्यरित्राणि गुहः संयोजयामासेत्यर्थः । अनुनीय सस्नेहं सान्त्वयित्वा च ॥ १३ ॥

देवदेवाज्ञया देवीं नावमारोप्य वीर्य्यवान् ।
लक्ष्मणः स्वयमारूढः पश्चाल्लक्ष्मणपूर्वजः ॥ १४ ॥

(भा.दी.) देवेति । वीर्यं पराक्रमोऽस्यास्तीति वीर्यवान् लक्ष्मणः, देवानां ब्रह्मादीनां देवः श्रीरामस्तस्याऽज्ञया देवीं सीतां नावं आरोप्य स्वयं आरूढः । 'गत्यर्थाकर्मक–' (अ.सू.३.४.७२) इत्यादिना कर्तरि क्तः । पश्चात् लक्ष्मणपूर्वजः लक्ष्मणज्येष्ठः श्रीरामः आरूढः ॥ १४ ॥

(सं.चं.) देवानामपि देवस्य पूज्यस्य रामस्याऽज्ञया 'आरोप्य मैथिलीं पूर्वमारुरोहाऽत्मवांस्ततः । अथारुरोह तेजस्वी स्वयं लक्ष्मणपूर्वजः' (५२.७६) इति रामायणे । आत्मवानिति वाल्मीकिवचनं वीर्यवानिति व्याचख्यौ ॥ १४ ॥

तारकैस्तार्य्यमाणा[2] सा देवी देवान्तिके स्थिता ।
तां गङ्गामवलोक्याथ मङ्गलाङ्गीदमब्रवीत् ॥ १५ ॥

---

१. **'प्राप दयामयः'** । **'अनामयः रोगोपलक्षितसर्वदोषरहितः'** इति का.श्री. ।
२. **'नाविकैस्तार्यमाणा'**

(भा.दी.) तारकैरिति । अथ तारयन्तीति तारकास्तैः, नदीतारकपुरुषैरित्यर्थः, तार्यमाणा तरणं कार्यमाणा, देवस्यान्तिकं समीपम् तस्मिन् स्थिता, मङ्गलानि अङ्गानि अवयवा यस्याः सा तथा देवी तां गङ्गां अवलोक्य इदं वचः अब्रवीत् ॥ १५ ॥

(सं.चं.) तारकाः नाविकाः । ये नावा नदीं तारयन्ति ॥ १५ ॥

हे विष्णुपदि धन्या त्वं ब्रह्मलोकादिहागता[1] ।
देवे वनान्निवृत्ते त्वां पूजयिष्यामि[2] जाह्नवि ॥ १६ ॥

(भा.दी.) हे **विष्ण्विति** । हे विष्णुपदि गङ्गानदि, ब्रह्मणश्चतुर्मुखस्य यो लोकः सत्याख्यः तस्मात् इह भुवि आगता त्वं धन्या प्रख्यातगुणवती असि । जह्नुः (राजर्षिः) तेन जाता जाह्नवी तत्सम्बुद्धिः । हे जाह्नवि, त्वां देवे श्रीरामे वनमरण्यं तस्मात् निवृत्ते सति, परावृत्याऽगच्छति सति, पूजयिष्यामि ॥ १६ ॥

(सं.चं.) हे विष्णुपदि गङ्गे । 'भागीरथी सुरसरिद् विष्णुपदी जाह्नवी तथा गङ्गा' इत्यभिधानम् । विष्णुः पदं स्थानमस्या इति । विष्णोः पदं पदं स्थानमस्या इति वा । तेन विष्णुपदपदीं परोक्षप्रिया विष्णुपदीमाचक्षते । विष्णोस्त्रिविक्रमस्य वामपादाङ्गुष्ठनखनिर्भिण्णोर्ध्वाण्डकटाहविवरादन्तःप्रविष्टा ब्रह्मलोकं गता तत इहाऽगता ॥ १६ ॥

एवं ब्रुवन्त्यां[3] वैदेह्यां परं पारं प्लवोऽगमत् ।
अवरुह्य प्लवात् तस्माद् रामो लक्ष्मणमब्रवीत् ॥ १७ ॥

(भा.दी.) एवमिति । वैदेह्यां सीतायाम् एवं ब्रुवन्त्यां सत्यां प्लवः परं अन्यत् पारं तीरं तत् अगमत् । श्रीरामः तस्मात् प्लवात् अवरुँह्य लक्ष्मणं प्रति अब्रवीत् ॥ १७ ॥

(सं.चं.) परं पारमपरतीरम्, दक्षिणकूलम् ॥ १७ ॥

अग्रतो गच्छ सौमित्रे सीता त्वामनुगच्छतु ।
अनुयास्याम्यनायासी त्वां च[4] सीतां च पालयन् ॥ १८ ॥

---

१. **'–लोकादुपगता'**
२. **'पूजयिष्यामीति लोकानुकरणायाब्रवीत्'** इति का.श्री. ।
३. **'इत्युक्तवत्याम्'** इति, **'एवं वदन्त्याम्'** इति च कचित् ।
४. **'त्वां वै सीतां च'**

(भा.दी.) अग्रत इति । हे सौमित्रे लक्ष्मण, अग्रे इत्यग्रतः, पुरत इत्यर्थः, गच्छ, सीता त्वां अनुगच्छतु अनुसृत्य गच्छतु, आयास अस्यास्तीत्यायासी, स न भवतीत्यनायासी, यत्किञ्चिद्विषयकक्लेशरहित इत्यर्थः, अहं त्वां च सीतां च पालयन् सन् अनुयास्यामि ॥ १८ ॥

(सं.चं.) त्वामनु तव पृष्ठतः । अहं युवयोरनन्तरं यास्यामि सर्वपृष्ठतः । अनुयानं नानुचरतया । किन्तु त्वां च सीतां च पालयन् । 'अग्रतो गच्छ सौमित्रे सीता त्वामनु गच्छतु । पृष्ठतोऽहं गमिष्यामि त्वां च सीतां च पालयन्' (५२.९५) इति च । त्रैलोक्यपालनेऽप्यनायासी । आयासः श्रमः ॥ १८ ॥

इत्येवं व्रजतोः स्वैरं रामरामानुजन्मनोः ।
सुमद्ध्यमा ययौ मद्ध्ये करेणुः करिणोरिव ॥ १९ ॥

(भा.दी.) इत्येवमिति । एवमिति एवमादिवचः, 'इति हेतुप्रकरणप्रकारादिसमाप्तिषु' इत्यमरः । उक्त्वेति शेषः । स्वैरं स्वेच्छया व्रजतोः रामश्च रामादनु अनन्तरं जन्म यस्य लक्ष्मणस्य स च तयोः, मध्यं मध्यप्रदेशस्तस्मिन्, सु शोभनं मध्यमं मध्यदेहो यस्याः सा तथा सीता, करिणौ गजौ तयोर्मध्ये करेणुरिव गजीव ययौ ॥ १९ ॥

(सं.चं.) सुमध्यमा कृशोदरी । 'अवलग्नवलग्नौ तु मध्यमो मध्यमस्त्रियाम्' इति यादवप्रकाशः । करेणुः करिणी । 'करेणुर्गजहस्तिन्योः' इत्यभिधानम् । 'मातङ्गयोर्मध्यगता शुभा नागवधूरिव' (५५.२९) इति च ॥ १९ ॥

ते गत्वा दीर्घमध्वानं प्राविशन्नद्भुतं वनम् ।
न्यग्रोधमूलमासाद्य तत्र वासमकल्पयन् ॥ २० ॥

(भा.दी.) त इति । ते रामाद्याः दीर्घं बहुयोजनं अध्वानं मार्गं गत्वा, अद्भुतमाश्चर्यरूपं तत् वनं प्राविशन् । तत्र वने न्यग्रोधस्य वटवृक्षस्य मूलं तत् आसाद्य, वास आवासस्तम्, अकल्पयन् अकुर्वन् । क्ळृपू क्ळृप्तौ लङ् ॥ २० ॥

(सं.चं.) अद्भुतमदृष्टपूर्वं द्रुमनिबिडम्, यत्र सूर्यातपोऽपि दुष्प्रवेशः । 'वासाय काले ययतुर्वनस्पतिम्' (५२.१०२) इति, 'ते तु तस्मिन् महावृक्षे उषित्वा रजनीं शुभाम्' (५४.१) इति चाऽह वाल्मीकिः । कोऽयं महावृक्ष इति जिज्ञासायां वाल्मीकेर्मौनं व्यंसयति पण्डिताचार्यः– न्यग्रोधमूलमिति ॥ २० ॥

सीतालक्ष्मणयो रामो दर्शयामास पद्मिनीम् ।
सुदर्शनां[१] नाम ततः पद्मान्यादत्त लक्ष्मणः ॥ २१ ॥

(भा.दी.) सीतेति । श्रीरामः सीतालक्ष्मणयोः सुदर्शनां नाम सुदर्शनेति प्रसिद्धाम्[२], पद्मानि अस्यां सन्तीति पद्मिनी तां सरसीं दर्शयामास । ततः सरसः लक्ष्मणः पद्मानि आदत्त । दातेर्लङ् ॥ २१ ॥

(सं.चं.) पद्मिनीं पद्मवतीं सरसीम् ॥ २१ ॥

[३]पदपद्मोपमं पत्युः पद्ममादाय मैथिली ।
विरराजान्तिके[४] भर्तुः सुन्दरीवेन्दिरा स्वयम् ॥ २२ ॥

(भा.दी.) पदमिति । मैथिली सीता पत्युः भर्तुः श्रीरामस्य पदं पादस्तदेव पद्मं तस्य उपमा यस्य तत्तथा तत् पद्मं आदाय भर्तुः अन्तिकं समीपं तस्मिन् सुन्दरी मनोहरा स्वयं स्वस्वरूपभूता इन्दिरेव श्रीरिव, (वि)रराज । राजृ दीप्तौ लिट् ॥ २२ ॥

(सं.चं.) सुन्दरीवेन्दिरा । इन्दिरेव सुन्दरी । पद्महस्ता हि रमा स्तूयते–'पद्मद्वयाभयवरोद्यतपद्महस्ताम्' इति । रामायणानुक्तेयं कथा, प्रायो मूलरामायणगता इदमुपज्ञमाविष्कृता ॥ २२ ॥

ते त्रयोऽत्र त्रिरात्रान्ते मृणालादनतर्प्पिताः ।
अवसंस्तत्र तां रात्रिं नानासङ्कथनैः सुखम् ॥ २३ ॥

(भा.दी.) त इति । तिस्रो या रात्रयस्त्रिरात्रास्तेषामन्तोऽवसानं तस्मिन् अत्र वटमूले मृणालानां बिसानामदनं भक्षणं तेन तर्पिताः सन्तुष्टाः ते त्रयः श्रीरामप्रभृतयः नानाविधानि यानि सङ्कथनानि सम्भाषणानि तैः तां रात्रिं तत्र वटमूले सुखं यथा भवति तथा अवसन् ॥ २३ ॥

(सं.चं.) ते त्रयोऽत्रेति । 'ते त्रयोऽथ' इति मूलपाठः स्यात् । तिस्रो रात्रयस्त्रिरात्रः । तस्यान्ते । तिस्रो रात्रीः न्यग्रोधमूले न्युष्य, अथ तां चतुर्थीं रात्रिं तत्र पद्मिनीतटाके मृणालादनतर्पिता सुखमवसन् । मृणालं

---

१. **'सुदर्शनं नाम'**
२. **'सुदर्शनं नाम सुदर्शनमिति प्रसिद्धाम्'** ।
३. **'पादपद्मो–'**
४. **'विललासान्तिके'**

कमलकन्दः । एतेन वनवासकाले यज्ञार्थादृते न राम आमिषं स्वीचकारेति ज्ञायते । रामायणे तु–'तौ तत्र हत्वा चतुरो महामृगान् वराहमृश्यं पृषतं महारुरुम् । आदाय मेध्यं त्वरितं बुभुक्षितौ वासाय काले ययतु-र्वनस्पतिम्' (५२.१०२) इति पठ्यते । प्रायः भगवत्पाददर्शितान्मूलरामायणादियं मृणालादनकथा ग्रन्थकृता समुद्धृता स्यात् । रामायणं तु गुह्यभाषामयमिति । अत एव रामायणवचनं शिरोमणिकार एवं व्याचष्ट–'तत्र वासदेशे वराहादींश्चतुरो महामृगान् हत्वा खेलनार्थं सन्ताड्य बुभुक्षितौ रामलक्ष्मणौ मेध्यं व्रतिभिर्भोक्तव्यं जलादिकमित्यर्थः, आदाय गृहीत्वा वनस्पतिं वृक्षसमीपं ययतुः' इति । अथवा पुनरेवं व्याख्येयम्–'हन शब्दो ज्ञानवाचीति शास्त्रेषु प्रसिद्धम् । तेन चतुरो महामृगान् तत्र हत्वा विहरतो ज्ञात्वा मञ्जुलमृगकुलसङ्कुलोऽयं कमनीयो विपिनविभाग इति तत्र वासाय निश्चिकाय' इति । वराहः कन्दमूलाशनो भूदारः । तेन तत्र कन्दमूलसमृद्धिरवगम्यते । ऋष्यो मृदुशृङ्गो हरिणः । पृषतो बिन्दुमान् हरिणः । महारुरुः कृष्णसारः । एतैर्मृगैर्मृगनयना रममाणा सीता मोदेतेति च तत्रोवासेति च गुह्यभाषाहृदयमवगन्तव्यम् ॥ २३ ॥

प्रभाकरे प्रभातेऽथ प्रतस्थुस्ते ततो वनात् ।
बहून् बहुविधान् देशान् पश्यन्तः शीघ्रगामिनः ॥ २४ ॥

(भा.दी.) प्रभाकर इति । (अथ) प्रभाकरे सूर्ये प्रभाते सति प्रकाशमाने सति शीघ्रं गन्तुं शीलमेषामस्तीति तथा ते त्रयः ततः वनात् बह्व्यः विधाः प्रकारा येषां ते तथा तान् बहून् देशान् पश्यन्तः सन्तः प्रतस्थुः जग्मुः ॥ २४ ॥

(सं.चं.) प्रभाकरे प्रभाते भातुं प्रवृत्ते सति पञ्चमे दिने । सर्वमिदं रामायणानुदितम् । रामायणे तु न्यग्रोधमूल एकां रजनीमुषित्वा ततः प्रयागाभिमुखं ययावितीयदेवोक्तम्–'ते तु तस्मिन् महावृक्ष उषित्वा रजनीं शुभाम् । विमलेऽभ्युदिते सूर्ये तस्माद् देशात् प्रतस्थिरे । यत्र भागीरथीं गङ्गां युमुनाऽभिप्रवर्तते' (५४.१–२) इति । प्रायः 'उषित्वा रजनीः शुभाः' इति ग्रन्थकृत्सम्मतो रामायणपाठः स्यात् ॥ २४ ॥

अल्पावशेषे दिवसे रामो जायानुजान्वितः ।
सङ्गमं गतवान् पुण्यं गङ्गायमुनयोः[1] प्रभुः ॥ २५ ॥

(भा.दी.) अल्पेति । जायानुजाभ्यां अन्वितः सहितः प्रभुः श्रीरामः दिवसो दिनं तस्मिन् अल्पः अवशेषो यस्य स तथा तस्मिन् सति । अपराह्णकाल इत्यर्थः । गङ्गा च यमुना च तयोः । पुण्यं पुण्यसाधनं सुन्दरमिति

१. 'गङ्गायमुनयोः शुभम्'

वा । 'पुण्यं धर्मे जले हेम्नि पूतेऽक्ष्णोः सुन्दरेऽर्थवत्' इति वैजयन्ती । सङ्गमः सङ्गमप्रदेशस्तं प्रयाग-मित्यर्थः । गतवान् ॥ २५ ॥

(सं.चं.) गङ्गायमुनयोः सङ्गमं प्रयागाख्यम् ॥ २५ ॥

ऋषिर्बृहस्पतिसुतो भरद्वाजो जगत्प्रभुम् ।
तस्यैव वचनाज्ज्ञात्वा पूजयामास भक्तिमान् ॥ २६ ॥

(भा.दी.) ऋषिरिति । बृहस्पतिसुतः भरद्वाजः भरद्वाजनामकः ऋषिः, तस्य श्रीरामस्य यद्वचनं तस्मादेव, को भवानिति पृष्टे सति दशरथपुत्रः श्रीरामोऽहमस्मीत्यभिहितवचनादेवेत्यर्थः, जगतां प्रभुं स्वामिनं श्रीहरिं ज्ञात्वा, साक्षाद् विष्णुरेवायमिति ज्ञात्वेत्यर्थः, भक्तिमान् सन् पूजयामास ॥ २६ ॥

(सं.चं.) तस्य रामस्यैव वचनात्–'पुत्रौ दशरथस्याऽवां भगवन् रामलक्ष्मणौ । भार्या ममेयं वैदेही कल्याणी जनकात्मजा' (५४.१४) इत्यादि । तं जगत्प्रभुं देवदेवं पुरुषोत्तमं ज्ञात्वा । रामरूपो नारायणोऽयमागत इति विज्ञाय ॥ २६ ॥

तं सजायानुजं देवमर्घ्यमूलफलादिभिः ।
परिपूज्य जगत्पूज्यमासीनमृषिरब्रवीत् ॥ २७ ॥

(भा.दी.) तमिति । ऋषिः भरद्वाजः, जाया च अनुजश्च ताभ्यां सहितम्, सर्वजगति पूज्ये, आसीनं स्वाश्रमेऽवस्थितम्, देवं तं श्रीरामम्, अर्घ्यं मूलं फलं च अर्घ्यमूलफलानि तानि आदीनि येषां तानि तथा तैः परिपूज्य अब्रवीत् ॥ २७ ॥

(सं.चं.) 'हस्तावनेजनं त्वर्घ्यं पाद्यं पादावनेजनम्' । भक्तिपरिपूर्णा पूजा परिपूजा ॥ २७ ॥

उत्तमश्लोक सुचिरात् त्वां दिदृक्षामहे वयम् ।
त्वद्दर्शनान्तः सन्तापः सन्ततोऽपि हि[१] देहिनाम् ॥ २८ ॥

(भा.दी.) उत्तमेति । उत्तमः श्लोकः कीर्तिर्यस्य तत्सम्बुद्धिः, श्रीराम, वयं त्वां सुचिरात् दीर्घकालात्, अव्ययमेतत्, दिदृक्षामहे द्रष्टुमिच्छामः । अस्मद्दर्शनाकाङ्क्षानिमित्तं किमित्यत आहुः– **त्वदि**ति । हि यस्मात्

१. 'सन्ततोऽपीह देहिनाम्'

देहिनां प्राणिनां सन्तापः संसारनिमित्तकखेदः, सन्ततोऽपि अनादिकालमारभ्य वर्तमानोऽपि, तव दर्शनं त्वद्दर्शनम्, तदन्तोऽवसानं यस्य स तथा, तस्मात् त्वां दिदृक्षामह इत्यर्थः ॥ २८ ॥

(सं.चं.) त्वद्दर्शनान्तः त्वद्दर्शनावसानः । त्वद्दर्शनेनान्तो नाशो यस्येति वा ॥ २८ ॥

इदं क्षेमकरं क्षेत्रं क्षेत्रज्ञ[१] स्वैरमावस ।
[२]तन्वानोऽतनुमानन्दमस्माकं क्षेत्रवासिनाम् ॥ २९ ॥

(भा.दी.) **इदमि**ति । क्षेत्रं प्रकृत्यादिकं जानातीति क्षेत्रज्ञः तत्सम्बुद्धिः, श्रीराम, त्वम्, क्षेत्रे प्रयागक्षेत्रे वस्तुं शीलमेषामस्तीति तथा तेषामस्माकम्, अतनुरनल्पस्तं आनन्दं तन्वानः कुर्वाणः सन्, क्षेमं करोतीति क्षेमकरम्[३], इदं क्षेत्रम्, स्वैरं स्वेच्छानुसारेण आवस आवासं कुरु । वस निवासे लोट् ॥ २९ ॥

(सं.चं.) क्षेत्रज्ञ नारायण । 'क्षेत्रज्ञं चापि मां विद्धि' इति भगवद्वचनात् । क्षेत्रं पिण्डाण्डं ब्रह्माण्डं च जानन् क्षेत्रज्ञः । क्षेमकरम् । 'क्षेमो न प्राप्तरक्षायां मोक्षेऽप्यस्त्री तु मङ्गले' इति यादवप्रकाशः । अतनुम-मन्दमानन्दम् । क्षेत्रमावस 'उपान्वध्याङ् वसः' (अ.सू.१.४.४८) इति द्वितीया ॥ २९ ॥

इत्युक्तो भगवानूचे प्रेक्षका हि जना[४] इह ।
ससीतं मां संव्रजेयुरेकान्तं मे वदेरिति ॥ ३० ॥

(भा.दी.) **इती**ति । इति भरद्वाजेन उक्तः भगवान् श्रीरामः, हि यस्मात् प्रेक्षकाः निरीक्षकाः जनाः पौरजनाः इह क्षेत्रे ससीतं सीतया सहितं मां संव्रजेयुः, प्रयागे श्रीरामस्तिष्ठति किल तं द्रक्ष्याम इत्यनुव्रजेयुः । व्रजेर्लिङ् । तस्मात् मे एकान्तमेकान्तस्थलं वदेः वद । वदेर्लिङ् । इति ऊचे । वचेर्लिट् ॥ ३० ॥

(सं.चं.) तस्मात् किञ्चिदेकान्तं स्थानं मे वदेः । 'आगमिष्यति वैदेहीं मां चापि प्रेक्षको जनः । अनेन कारणेनाहमिह वासं न रोचये । एकान्ते पश्य भगवन्नाश्रमस्थानमुत्तमम्' (५४.२५–६) इति च ॥ ३० ॥

कपालशिरआदीनां सिद्धिभूमिं तपस्विनाम् ।
ततस्त्रियोजनाभ्याशे चित्रकूटं द्विजोऽब्रवीत् ॥ ३१ ॥

---

१. **'इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयत इत्यत्र 'शीर्यते नित्यमेवास्माच्छरीरं जगदीदृशम्' इति प्रमाणात् शरीरशब्देन जगदपि गृह्यते'** इति का.श्री । २. **'तन्वन्नतनु–'** ३. **'क्षेमकरं मुक्तिदायकम्'** इति का.श्री ।

४. **'प्रेक्षका जनाः कैकेय्याः गूढपुरषाः'** इति का.श्री. । नातिस्वरसमिदम् । गूढपुरुषाश्चित्रकूटमप्यागच्छेयुरेव । **'भगवन्नित आसन्नः पौरजानपदो जनः'** (५४.२४) इति वाल्मीकिवचनाननुगुणं च ।

(भा.दी.) कपालेति । द्विजः भरद्वाजः, कपालशिरइतिनामको मुनिरादिर्येषां ते तथा तेषां तपस्विनां सिद्धिभूमिम्, सिद्धेर्भूमिराश्रयस्ताम् । 'भूमिः क्षितौ स्थानमात्रे च' इति वैजयन्ती । चित्राणि कूटानि शृङ्गाणि यस्मिन् स तथा तम्, चित्रकूटाख्यपर्वतमित्यर्थः, ततः प्रयागात्, त्रीणि च तानि योजनानि च त्रियोजनानि तेषामभ्याशं समीपं तस्मिन् । 'तथाऽभ्यर्णमभ्यग्रमभ्याशमाहुः' इति हलायुधः । अब्रवीत् ॥ ३१ ॥

(सं.चं.) त्रीणि योजनानि यस्य स त्रियोजनः । त्रियोजनपथे, अत एवाभ्याशे अनतिदूरे । चित्रकूटं पर्वतं वासयोग्यमेकान्तस्थानं द्विजो भरद्वाजोऽब्रवीत् । 'दशक्रोश इतस्तात गिरिर्यस्मिन्निवत्स्यसि । चित्रकूट इति ख्यातो गन्धमादनसन्निभः । ऋषयस्तत्र बहवो विहृत्य शरदां शतम् । तपसा दिवमारूढाः कपालशिरसा सह' (५४.२८–२९;३१) इति च । धन्वन्तरसहस्रं क्रोशः । **'ಕೂಗಳತೆ'** इति भाषायाम् । क्रोशद्वयं गोरुतं गव्यूतं नाम । गोरुतद्वयं योजनमित्याहुः । कपालशिरा नाम कश्चिदृषिः । बहवो रामायणव्याख्यातारोऽत्र भ्रान्ताः । कतककार एवं व्याचख्यौ– 'दुर्भिक्षमृतकपालवत् पलितं शुक्लं शिरस्तथा । मध्यमपदलोपी समासः । तादृशेन शिरसा सह । एवमतिवृद्धदशायामपि तपश्चरन्तः' इति । 'कपालशिरसा सह दिवमारूढाः, तपश्चरणेन निरन्तरकपालासनेन प्रक्षीणत्वक्छिरोरुहतया कपालावशिष्टशिरसा सह दिवमारूढा इत्यर्थः । कपालशिरसेत्येतत् शरीरोपलक्षणम् । सशरीराः स्वर्गं गता इत्यर्थः । यद्वा कपालशिरा इति कस्यचिदृषेः सञ्ज्ञा । कपालशिरसा कपालरूपशिरोयुक्तेनेत्यध्याहृतशरीरविशेषणमित्येके । कपालमात्रावशिष्टं शिरो यस्मिन्निति तपोविशेषणमित्येके' इति गोविन्दराजः स्वविभ्रमविलासं बहुधा व्याततान, वास्तवमर्थं निरूप्यापि स्वस्मिन्नेव स्वयमप्रत्ययः । 'कपालशिरसा त्वद्दर्शनफलकनित्यस्थितिमच्छिवेन सह शरदां शतं विहृत्य दिवं प्रमोदविशेषमारुढाः प्राप्ताः । एतेन शिवस्य रामानुरागिश्रेष्ठत्वं व्यञ्जितम्' इति शिरोमणिः । एवं व्याख्यातॄणामिव रामायणपाठकानामपि मा विभ्रमो भूदिति कृपया पण्डिताचार्य आह– कपालशिरआदीनां तपस्विनामिति । गलितकेशतया कपालशिराः । यो वार्धकेन खल्वाटीकृतः । सिद्धिभूमिं मुक्तिस्थानम् ॥ ३१ ॥

तस्यां रात्र्यां व्यतीतायां रामो जायानुजान्वितः ।
अभिनन्द्य मुनीन्द्रं तं[1] पश्चिमाभिमुखो ययौ ॥ ३२ ॥

(भा.दी.) तस्यामिति । जायानुजान्वितः श्रीरामः तस्यां रात्र्यां व्यतीतायां सत्यां मुनीन्द्रं मुनिश्रेष्ठं तं भरद्वाजं अभिनन्द्य तोषयित्वा पश्चिमां दिशं प्रत्यभिमुखं यस्य तथा सन् ययौ ॥ ३२ ॥

(सं.चं.) यस्यां सन्ध्यायां रामो भरद्वाजाश्रममागतः तस्यां रात्र्यां व्यतीतायाम्, परे द्यवि प्रगे ॥ ३२ ॥

१. **'मुनीन्द्रं च पश्चिमा–'**

यामुनाद्रिमथ प्राप्य यमुनां प्रभुरैक्षत ।
सप्तसप्तेरिवाश्वालिं[1] सत्वरां श्यामलश्रियम् ॥ ३३ ॥

(भा.दी.) यामुनेति । (अथ) प्रभुः श्रीरामः यमुनायाः सम्बन्धी यामुनः स चासौ अद्रिश्च तं यमुनातीरस्थ-पर्वतमित्यर्थः, प्राप्य, सप्तसप्तेः, सप्त सप्तयोऽश्वा यस्य स तथा तस्य, सूर्यस्येत्यर्थः, 'हयसैन्धवसप्तयः' इत्यमरः । अश्वानामाळिः समूहस्तामिव सत्वरां त्वरया सहितां सूर्यस्याश्वा यथा शीघ्रगामिनः तद्वद्वेगवती-मित्यर्थः । श्यामळा श्रीः कान्तिर्यस्याः सा तथा तां यमुनामैक्षत ॥ ३३ ॥

(सं.चं.) यामुनाद्रिम् । रामायणेऽनुक्तोऽयमद्रिः । श्यामलश्रियम् । अत एव सप्तसप्तेः सूर्यस्य अश्वाळिमिव भासमानाम् । श्यामलाश्वो हि सूर्यः । 'हरिदश्वः सप्ताश्वः प्रभाकरो भानुमान् भानुः' इत्यभिधानम् । 'अर्वा गन्धर्वोऽश्वः सप्तिर्वाजी तुरङ्गमस्तुरगः' इति च । सत्वरैरुत्तरङ्गैः स्रोतोभिः कलिता यमुना सत्वरं धावतां सूर्यतुरगाणां पङ्क्तिरिवाशोभतेत्यर्थः ॥ ३३ ॥

खण्डयित्वाऽथ[2] खड्गेन लक्ष्मणो नळवेतसान् ।
रामाज्ञया व्यधात् तर्तुं[3] सङ्घाटं[4] वेत्रबन्धनैः ॥ ३४ ॥

(भा.दी.) खण्डेति । अथ लक्ष्मणः रामाज्ञया नळवेतसान् वेणुगुल्मविशेषान्, खड्गोऽसिस्तेन खण्डयित्वा, वेत्राणां तत्र तत्र बन्धनानि तैः, सङ्घाटः नदीतरणानुकूलवेणुसङ्घट्टनविशेषः, तं तर्तुं यमुनातरणार्थं चक्रे ॥३४॥

(सं.चं.) 'नळवेतसान्' इति पठन्ति । 'जलवेतसान्' इत्येव प्रतनः पाठः स्यादिति भाति । नदीतीरे रोहन् वानीरापरनामा हि वेतसो जलवेतस उच्यते । वेणुदण्डवत् प्लवनिर्माणायोपयुज्यमानः प्रफुल्लकुसुमस्तरु-विशेषः । 'इह समदशकुन्ताक्रान्तवानीरमुक्तप्रसवसुरभिशीतस्वच्छतोया वहन्ति' इति भवभूतिः । वाति प्लवतां गच्छतीति वेतस इति निर्वदन्ति । **'ಹಚ್ಚೆಯ ಮರ'** इति भाषायाम् । वेतसान् आस्तरणेन संयोज्य रज्जुस्थानी-याभिः वेत्रलताभिस्तान् दृढं बध्वा, एवं काष्ठैः सङ्घटितं जलयानयोग्यं सङ्घाटं नाम प्लवं व्यधात् । **'ತೆಪ್ಪ'** इति भाषायाम् । वेत्रलता– **'ಬೆತ್ತದ ಬಳ್ಳಿ'** इति भाषायाम् । 'तौ काष्ठसङ्घाटमथो चक्रतुः सुमहाप्लवम् । शुष्कैर्वंशैः समास्तीर्णमुशीरैश्च समावृतम् । ततो वेतसशाखाश्च जम्बूशाखाश्च वीर्यवान् । चकार लक्ष्मणश्छित्वा सीतायाः

१. **'अश्वाळिकमिवेति वेगे च श्यामलत्वे चोपमा'** इति का.श्री. ।
२. **'खण्डयित्वा तु खड्गेन'**
३. **'यद्यपि तॄ-प्लवनतरणयोरिति धातुः ॠकारान्तत्वात् सेट् । तथाऽपि आगमशास्त्रमनित्यमिति ह्रस्वोऽपि पिपर्तिरस्तीतिवत् ह्रस्वोऽपि तरतिरस्तीति वा तर्तुमित्युक्तम् । अत एवोक्तम्–'साम्पराये तर्तव्याभावात्' इति'** इति का.श्री. ।
४. **'तर्तुं नावं वै तत्र'**

सुखमासनम्' (५५.१४–५) इति च। तरितुमिति वक्तव्ये 'तर्तुम्' इति प्रयुञ्जानः कविः 'तर्तुं सागरगामिनीम्' इति तरतिमनिटं प्रयुञ्जानं वाल्मीकिमनुससार। भद्रा ह्येषां प्राचामाचार्याणां वाचि लक्ष्मीर्निषक्ता। अत एव छान्दसप्रयोगप्रचुरमिदं काव्यम्। कामं कुप्यन्तु नाम पाणिनीयाः। तृप्यन्ति वाल्मीकिमुखा ऋषयश्छान्दसा इति ॥ ३४ ॥

रामो गृहीत्वा वैदेहीं किञ्चिल्लज्जास्मिताननाम्।
आरोपयत् तं सङ्घाटं भूषणान्यायुधानि च ॥ ३५ ॥

(भा.दी.) राम इति। श्रीरामः किञ्चित् ईषत् लज्जया कथमनेन सङ्घाटेन नदी तर्तव्येति स्त्रीस्वभावभूतलज्जया स्मितं विकसितमाननं यस्याः सा तथा तां वैदेहीं गृहीत्वा तं सङ्घाटं आरोपयत्। भूषणानि आयुधानि च आरोपयत्। रूप[१] उपरिभावे लङ् ॥ ३५ ॥

(सं.चं.) कथमहमेका सङ्घाटे स्थित्वा यामीति सङ्कोचो लज्जा। लज्जायामपि स्त्रीसहजं भर्तृविषये साभिमानं मन्दस्मितम् ॥ ३५ ॥

राघवौ ययतुर्वीरौ सङ्घाटं परिगृह्य[२] तम्।
कालिन्द्या दक्षिणं तीरं दक्षिणौ रामलक्ष्मणौ ॥ ३६ ॥

(भा.दी.) राघवाविति। वीरौ, दक्षिणौ प्रवीणौ राघवौ रामलक्ष्मणौ तं सङ्घाटं परिगृह्य कलिन्दपर्वतादुत्पन्ना कालिन्दी यमुना तस्याः दक्षिणं दक्षिणदिगवस्थितं तत् तीरं ययतुः ॥ ३६ ॥

(सं.चं.) कालिन्द्या दक्षिणं तीरम्। यद्यपि यमुनाऽन्या। कालिन्दी चान्या। स्वसारौ हि ते। अथापि कलिन्दगिरिजा कालिन्दीनदी यमुनया सहैव प्रवहतीति नदीमेतां क्वचित् कालिन्दीमाहुः। क्वचिद्यमुनाम्। तं सङ्घाटं परिगृह्य दृढं हस्ताभ्यां गृहीत्वा स्वयं जले तरन्तौ ययतुः। त्रयाणां वहने सङ्घाटस्यापर्याप्तत्वात् ॥ ३६ ॥

यमुनावनमभ्येत्य तटाके बहुपुष्करे।
किञ्चिद् विश्रम्य यान्तस्ते[३] श्यामं न्यग्रोधमाययुः ॥ ३७ ॥

---

१. भाष्यकारोदितोऽयं धातुः। पाणिनीयास्तु **'रुह'**धातोरेव रोहयति रोपयतीति रूपद्वयं निष्पादयन्ति हकारस्य वैकल्पिकेन पकारादेशेन–**'रुहः पोऽन्यतरस्याम्'** (अ.सू.७.३.४२) इति।

२. **'तं सङ्घाटं परिगृह्य स्वयमुदके प्लवमानौ सन्तौ'** इति का.श्री.।

३. **'यातास्ते'**

(भा.दी.) यमुनेति । यमुनावनं यमुनातीरस्थं वनं तत् अभ्येत्य, बहूनि पुष्कराणि पद्मानि यस्मिन् तत्तथा तस्मिन् तटाके तटे किञ्चित् विश्रम्य यान्तः गच्छन्तः श्रीरामाद्याः श्यामः श्यामनामकस्तं न्यग्रोधं वटवृक्षं आययुः प्रापुः ॥ ३७ ॥

(सं.चं.) 'सरोजमब्जं नळिनं च पुष्करम्' इत्यभिधानम् । तटाके सरसि, गङ्गायाङ्घोषवादोऽयम्, तटाक-निकटे । तटमकति गच्छतीति तटाकस्तटाकं वा । श्यामाख्यं न्यग्रोधम् । '७८' भाषायाम् । सूर्यातपवारणेन वनं श्यामं चकारेति श्यामाख्या तस्य ॥ ३७–८ ॥

यापयामास भगवानग्रतो भरताग्रजम् ।
रामः स्वयं [१]पृष्ठतोऽगाज्जानकी मद्धयतो ययौ ॥ ३८ ॥

(भा.दी.) यापयेति । भगवान् श्रीरामः अग्रे इत्यग्रतः भरताग्रजं भरतस्याग्रजो ज्येष्ठो लक्ष्मणस्तं यापयामास प्रेषयामास । स्वयं श्रीरामः पृष्ठतः अगात् । जानकी मध्ये इति मध्यतः ययौ ॥ ३८ ॥

गव्यूतिमात्रं[२] गत्वा ते ततोऽपि यमुनातटे ।
हत्वा मृगानुपादाय तां निशामवसन्निह ॥ ३९ ॥

(भा.दी.) गव्यूतीति । ते रामादयः ततोऽपि श्यामनामकवटमूलादपि केवलं गव्यूतिं गव्यूतिमात्रम्, क्रोशद्वयमात्रमित्यर्थः, गत्वा, यमुनायास्तटं तीरं तस्मिन् मृगान् हत्वा, उपादाय उपयुज्य, तां निशां इह यमुनातटे अवसन् आवासं चक्रुः ॥ ३९ ॥

(सं.चं.) गव्यूतिमात्रं यमुनातटात् । न्यग्रोधात् क्रोशमात्रम् । 'क्रोशमात्रं ततो गत्वा भ्रातरौ राम-लक्ष्मणौ । बहून् मेध्यान् मृगान् हत्वा चेरतुर्यमुनावने' (५५.३२) इति च । ननु तर्हि व्याहतभाषी भगवान् वाल्मीकिः । तथाहि पूर्ववचनम्– 'चतुर्दश हि वर्षाणि वत्स्यामि विजने वने । कन्दमूलफलैर्जीवन् हित्वा मुनिवदामिषम्' (२०.२९) इति । 'पित्रा नियुक्ता भगवन् प्रवेक्ष्यामस्तपोवनम् । धर्ममेव चरिष्यामस्तत्र मूलफलाशनाः' (५४.१६) इति च । यदि वाल्मीकिः सत्यवचाः, तर्हि रामो मृषावागित्यायातम् । कन्दमूलफलाशन इति पूर्वमाह । इदानीं मृगमांसमशिशिषति । न भोः । मुनेराशयमविदन्नेवं भाषसे । नहि रामो द्विर्भाषते । नापि परावरज्ञो वाल्मीकिरतथ्यं वक्तुमर्हति । तेनोभयमपि वचनमविरोधेन योजनीयम् ।

---

१. **'पृष्ठतोऽयाज्जानकी'**

२. **'गव्यूतिमात्रं गव्यूतिप्रमाणम् । 'प्रमाणे द्वयसज्दघ्नञ्मात्रचः'** (अ.सू.५.२.३७) **इति मात्रच्प्रत्ययः'** इति का.श्री. ।

अयमत्र सङ्गमनप्रकारः । हिंसा निषिद्धाऽपि यज्ञीयहिंसा शास्त्रेष्वनुमता । एवं भोगार्थं मांसवर्जनेऽपि यागार्थं मांसस्वीकारो न दोषावह इति सम्प्रदायः । न केवलं न दोषावहः । कर्तव्यत्वेन विहितं च क्षत्रियाणां मेध्य-मांसभक्षणम् । वक्ष्यति च मुनिः स्वयमेव– 'इदं मेध्यमिदं स्वादु निष्टप्तमिदमग्निना' (९६.२) इति । गोविन्दराजोऽप्याह रामायणभूषणे–'अत्राऽमिषशब्देन सूदैः संस्कृतं मांसमुच्यते । केवलमांसस्वीकारस्यो-त्तरत्र वक्ष्यमाणत्वात्' इति । आमिषं हित्वेति न मांसहानमुच्यते । 'आमिषं पुन्नपुंसकम् । भोग्यवस्तुनि सम्भोगे' इति मेदिनीवचनाद् राजभोग्यं वस्तु हित्वेत्येवार्थ इति शिरोमणिः । 'आमिषं सम्भोगं राज्यलोभं वा । 'आमिषं पलले लोभे सम्भोगोत्कोचयोरपि' इति विश्ववचनात्' इति सत्यधर्मतीर्थीयम् । तस्मान्न कोऽपि विरोध इति ॥ ३९ ॥

श्रान्तं भुवस्तळे सुप्तं लक्ष्मणं लक्ष्मणाग्रजः ।
कराभ्यां शङ्कराभ्यां तं परिमृज्योदबोधयत् ॥ ४० ॥

(भा.दी.) श्रान्तमिति । लक्ष्मणाग्रजः श्रीरामः श्रान्तं श्रमयुक्तं भुवः तळं प्रदेशस्तस्मिन् सुप्तं निद्रितं तं लक्ष्मणम्, शं सुखं कुरुत इति शङ्करौ ताभ्यां कराभ्याम्, परिमृज्य परितः मार्जयित्वा उदबोधयत् प्रबोधनं चक्रे । बुध अवबोधने लङ् ॥ ४० ॥

(सं.चं.) श्रान्तम् । 'अथ रात्र्यां व्यतीतायामवसुप्तमनन्तरम् । प्रबोधयामास शनैर्लक्ष्मणं रघुनन्दनः' (५६.१) इति च । लक्ष्मणाग्रज इति रामस्यासाधारणं नाम । तेनानुजेऽनुकम्पातिशयमाह ॥ ४० ॥

ततस्ते प्रस्थिताः प्रातश्चित्रकूटं गिरिं गताः ।
तत्राऽश्रमं[१] श्रमोपेता अनुरूपममन्वत[२] ॥ ४१ ॥

(भा.दी.) तत इति । ततः यमुनातटात् प्रातः प्रातःकाले प्रस्थिताः प्रयाताः चित्रकूटः चित्रकूटाख्यस्तं गिरिं गताः श्रमेण उपेता इव श्रमोपेताः ते श्रीरामाद्याः, तत्र चित्रकूटे अनुरूपं योग्यं आश्रमो मुनि-निवासस्तं अमन्वत निरूपितवन्तः । मनु अवबोधे लङ् । इदं स्थानमस्माकमावासार्थमुचितमिति निश्चितवन्त इत्यर्थः ॥ ४१ ॥

(सं.चं.) तत्राऽश्रमनिर्माणमनुरूपममन्वत । आश्रममित्युटजम् ॥ ४१ ॥

---

१. **'तत्र चित्रकूटगिरौ विद्यमानमाश्रमम्'** इति का.श्री. । अत्राऽश्रममिति मुनिस्थानम् । २. **'अनुकूलममन्वत'**

[१]मन्दाकिनीपरिगतं मन्दानिलहिमं वनम् ।
देवीं देवोऽभिनन्द्यात्र[२] सार्वकामिकमैक्षयत्[३] ॥ ४२ ॥

(भा.दी.) मन्देति । देवः श्रीरामः, अत्र चित्रकूटे, मन्दाकिन्या गङ्गया परिगतं परिवृतम्, अनिलश्च हिमश्च अनिलहिमे, मन्दे स्वल्पे अनिलहिमे यस्मिन् तत्तथा तत्, सर्वे कामा अभीप्सितार्था अस्मिन् सन्तीति सार्वकामिकं वनम्, देवीं सीतां अभिनन्द्य सन्तोष्य ऐक्षयत् दर्शयामास । ईक्षतेर्लङ् ॥ ४२ ॥

(सं.चं.) मन्दाकिनीपरिगतम् । रामायणे चित्रकूटं परिगता नदी माल्यवतीति पठ्यते–'सुरम्यमासाद्य तु चित्रकूटं नदीं च तां माल्यवतीं सुतीर्थाम्' (५६.३५) इति । माल्यवत्या एव मन्दाकिनीति नामान्तरं स्यात् । मन्दं वहन्ती अकति कुटिलं यातीति मन्दाकिनी । अक कुटिलायां गतौ । मन्दानिलेन हिमं शीतलम् । सार्वकामिकं सर्वकामसमृद्धम् । देवीमभिनन्द्य नूनं सीताऽत्र रंस्यत इति प्रशस्य ॥ ४२ ॥

शाले विशाले चक्राते पादपैर्गजपातितैः ।
लतावितानैराबद्ध्य पर्ण्णैरास्तीर्य्य राघवौ ॥ ४३ ॥

(भा.दी.) शाले इति । राघवौ गजैः पातितास्तैः पादपैर्वृक्षैः, विशाले विस्तीर्णे शाले, लतानां वितानानि समूहाः तैः, 'चयसमवायवृन्दसन्दोहसमाजवितानसंहतिः' इति हलायुधः आबध्य, पर्णानि पत्राणि तैः आस्तीर्य आच्छाद्य, चक्राते ॥ ४३ ॥

(सं.चं.) विशाले पर्णशाले । लतावितानैः लतानिचयैः पादपानाबद्ध्य । अन्तरा पर्णैराच्छाद्य ॥ ४३ ॥

अशोधयत्[४] स्थलं कृत्वा[५] लक्ष्मणः पर्ण्णशालयोः ।
देवी शाले अलश्चक्रे मार्त्तिकैरनुलेपनैः[६] ॥ ४४ ॥

(भा.दी.) अशोधयदिति । लक्ष्मणः, पर्णरचिते ये शाले तयोः, स्थलं तळं तत्, कृत्वा खननं कृत्वा, अशोधयत् सम्यक् चकार । शुध शौचे लङ् । देवी सीता मृत्तिकामादाय कृतानि मार्त्तिकानि तैः अनुलेपनैः शाले अलश्चक्रे अलङ्कृतवती ॥ ४४ ॥

१. **'मन्दाकिनी नाम काचन नदी । नतु गङ्गा । तस्यास्तीर्णत्वात्'** इति का.श्री. । २. **'देवोऽभिनन्द्याथ'**
३. सर्वत्र प्रचुरः **'सार्वकामिकमैक्षत'** इति पाठः प्रामादिकः । ४. **'व्यशोधयत्'**
५. **'लक्ष्मणः पर्णशालयोः पर्णमण्टपयोः स्थलं मध्यप्रदेशं कृत्वा छित्वा । कृती छेदने । खात्वा, खननं कृत्वेति यावत्'** इति का.श्री. । वैयाकरणास्तु कृन्ततेः क्त्वाप्रत्यये **'कर्तित्वा'** इति रूपमामनन्ति । ६. **'मार्त्तिकैरुपलेपनैः'**

(सं.चं.) वासयोग्यं समतळं स्थलं कृत्वा निर्माय पाषाणकण्टकादीनपनीय अशोधयत् । देवी चालश्चक्रे । रामायणानुक्त ममेतत् ॥ ४४ ॥

रामानुजो रामगिरा हत्वा कृष्णमृगं[1] वने ।
जनयित्वाऽग्निमचिराच्छ्रपयित्वा न्यवेदयत्[2] ॥ ४५ ॥

(भा.दी.) रामेति । रामानुजः लक्ष्मणः, रामगिरा श्रीरामस्य या कृष्णमृगमांसेन हविः कुर्विति गीस्तया, वनं चित्रकूटस्थवनं तस्मिन्, कृष्णश्चासौ मृगश्च तं हत्वा, अग्निं अचिरात् झटिति जनयित्वा शिलाविशेषसङ्घर्षादिना जनयित्वा, श्रपयित्वा पाकं कृत्वा, न्यवेदयत् श्रीरामं प्रति स्वकृतं कर्म विज्ञापितवान् । विद चेतनाख्यान-निवासनेषु लङ् ॥ ४५ ॥

(सं.चं.) मथनेन जनयित्वा । श्रपयित्वा पक्त्वा । श्रा पाके । रामाय न्यवेदयत् । विद ज्ञाने णिच् । 'स लक्ष्मणः कृष्णमृगं हत्वा मेध्यं प्रतापवान् । अथ चिक्षेप सौमित्रिः समिद्धे जातवेदसि' (५६.२६) इति च ॥ ४५ ॥

सतां पतिः[3] ससीतोऽथ स्नात्वा विहितमाचरन् ।
जुहाव हविषो भागं बर्हिरिध्मादिभिः[4] क्रमात् ॥ ४६ ॥

(भा.दी.) सतामिति । अथ सतां पतिः श्रीरामः । अनेन सन्मार्गशिक्षकत्वं श्रीरामस्य प्रदर्शितम् । ससीतः सन् स्नात्वा, विहितं सन्ध्यावन्दनादिकर्म आचरन् सन्, बर्हिरिध्मादिभिः, बर्हींषि कुशास्तानि च, इध्मानि समिधस्तानि च, तानि आदीनि येषां तानि तथा तैः द्रव्यैः, 'बर्हिर्नाऽग्नौ नपुं कुशः' इति वैजयन्ती, सह हविषः भाग एकदेशस्तं क्रमः शास्त्रोक्तक्रमस्तस्मात् जुहाव । हु दानादनयोः लिट् ॥ ४६ ॥

(सं.चं.) 'बर्हिर्दर्भः कुशः कुथः' इत्यभिधानम् । 'एधः समिदिध्म इत्यभिन्नार्थाः' इति च । हविषो भागं पक्वस्य कृष्णमृगमांसस्यैकदेशम् । 'मृगं हत्वाऽऽनय क्षिप्रं लक्ष्मणेह शुभेक्षण । कर्तव्यः शास्त्रदृष्टो हि विधिर्धर्ममनुस्मर' (५६,२३) इति, 'ऐणेयं मांसमाहृत्य शालां यक्ष्यामहे वयम् । कर्तव्यं वास्तुशमनं सौमित्रे

१. **'कृष्णमृगान्'** २. **'न्यवेदयत् रामपुरतः स्थापितवान्'** इति का.श्री. ।

३. **'सीतापतिः ससीतोऽथ'** इति, **'सीतापतिः ससीतोऽयम्'** इति क्वचित् ।

४. **'बर्हिः दर्भमुष्टिः । इध्मं प्रादेशपरिमितः पञ्चदशसमित्समुदायः'** इति का.श्री ।

चिरजीविभिः' (५६.२२) इति, 'तं तु पक्वं समाज्ञाय निष्टप्तं छिन्नशोणितम् । लक्ष्मणः पुरुषव्याघ्रमथ राघवमब्रवीत् । अयं कृष्णः समाप्ताङ्गः शृतः कृष्णमृगो यथा । देवतां देवसङ्काश यजस्व कुशलो ह्यसि' (५६.२७–८) इति च । क्रमात् क्रममनपहाय ॥ ४६ ॥

निवेद्य वासुदेवाय देवाय स्वात्मने हविः ।
पितृभ्योऽथ पवित्रेषु निवापं सजलं[१] ददौ ॥ ४७ ॥

(भा.दी.) निवेद्येति । श्रीरामः देवाय स्वात्मने, स्वस्य आत्मा स्वरूपभूतस्तस्मै, स्वाभिन्नायेत्यर्थः, वासुदेवाय हविः कृष्णमृगमांसरूपं हविः निवेद्य समर्प्य, अथ पितृभ्यः पवित्रेषु कुशेषु । 'अस्त्री कुशः कुथो दर्भः पवित्रम्' इत्यमरः । सजलं निवापः पितृतर्पणकरं हविस्तं ददौ ॥ ४७ ॥

(सं.चं.) पितृभ्यः पितृदेवतान्तर्गताय स्वात्मने । पवित्रेषु दर्भेषु । 'ऋषौ मन्त्रे कुशे देवे पवित्रम्' इति मङ्खः । 'निवापः पितृदानं स्यात्' इति यादवप्रकाशः । रामायणानुक्तमेतद् रामस्य पितृभोजनम् । ननु जीवति पितरि रामः कथं पितृभोजनं दद्यात्? न पित्रे ददौ । किन्तु पितृभ्यः पितामहादिभ्यो ददौ पूर्वराजेभ्योऽजादिभ्यः । एतेन जीवत्पितृकस्यापि पितामहादिश्राद्धकरणं प्रतनानामृषीणामनुमतमिति ज्ञायते । विशेषतः क्षत्रियाणाम् । एवमेतस्यापूर्वप्रमेयस्याऽविष्करणायैव रामायणानुक्तोऽप्ययं प्रसङ्गः कविना निरूपित इति युक्तमुत्पश्यामः ॥ ४७ ॥

पञ्चयज्ञांश्च[२] यज्ञेशो विधायैवं सलक्ष्मणः ।
हविष्यं बुभुजे दिव्यं देव्या पात्रे समर्प्पितम् ॥ ४८ ॥

(भा.दी.) पञ्चेति । यज्ञेशः श्रीरामः एवं पञ्च च ते यज्ञाश्च तान्, स्वाध्यायपाठहोमातिथिपूजापितृतर्पणबलिहरणात्मकपञ्चयज्ञानित्यर्थः, 'पाठो होमश्चातिथीनां सपर्या तर्पणं बलिः । एते पञ्च महायज्ञाः' इत्यमरः । लोकशिक्षार्थं विधाय, सलक्ष्मणः सन्, देव्या सीतया पात्रे भाजनं तस्मिन् समर्पितं परिवेषितं दिव्यं हविष्यं हविश्शेषभूतं तत् बुभुजे । भुज परिपालनाभ्यवहारयोर्लिट् ॥ ४८ ॥

---

१. **'निर्वापं स जलं ददौ'** इति का.श्री. पाठः। तथाहि तद्व्याख्यानम्–**'सः रामः.......अथ हविर्निवेदनानन्तरं पवित्रेषु भूमावास्तृतदर्भेषु निर्वापं पितृतर्पणरूपं जलं ददौ'** इति । **'निवापं च जलं ददौ'** इति क्वचित् ।

२. **'पञ्चयज्ञान् स यज्ञेशो–'**

(सं.चं.) 'अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्' इति मानवे । एतेन तत्रत्यानृषीनाहूयातिथिसत्कारपूर्वकं भोजयामासेत्यवगम्यते । रामायणेऽनुक्तमेतदपि प्रमेयम् । हविष्यं हविःशेषम् ॥ ४८ ॥

परिवेषं[1] सुवेषाऽथ भर्त्तृदेवरयोरिह ।
विधाय भर्त्तुरुच्छेषं कान्तैकान्त उपाददे[2] ॥ ४९ ॥

(भा.दी.) परीति । अथ सु शोभनो वेषोऽलङ्कारो यस्याः सा तथा सीता, भर्ता च देवरो भर्त्रनुजः स च तयोः, परिवेषः परिवेषणं तं विधाय, अन्तो श्रीरामभोजनावसानं तस्मिन्[3], भर्तुः श्रीरामस्य उच्छेष अवशेष-स्तम् । उच्छिष्टमित्यर्थः, कान्ता भार्या सीता इह पर्णशालायां एका सती उपाददे स्वीकृतवती । दातेर्लिट् । एकान्त एकान्तप्रदेशे उपादद इति वा ॥ ४९ ॥

(सं.चं.) उच्छेषं भुक्तशेषम् । इदमपि रामायणेऽनुदितम् ॥ ४९–५० ॥

पर्ण्णशालां विशालां तां रामो राजीवलोचनः ।
वैकुण्ठइव वैकुण्ठं प्राविशत् प्रियया समम् ॥ ५० ॥

(भा.दी.) पर्णेति । राजीववत् कमलवत् लोचने यस्य स तथा श्रीरामः विशालां विस्तीर्णां तां पर्णशालां प्रियया भार्यया समं सह वैकुण्ठो वैकुण्ठलोकस्तं वैकुण्ठइव श्रीहरिरिव प्राविशत् ॥ ५० ॥

नानाफलप्रसवपत्रगणोपहारं मालिन्युदारसलिलैरुपसर्प्पणं च ।
आलोक्य लक्ष्मणसमीरणयोः स्वसेवां रामश्च रामरमणी च मुदं दधाते ॥ ५१ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
अयोद्ध्याकाण्डे नवमः सर्ग्गः ॥

—०—

(भा.दी.) नानेति । श्रीरामश्च रामरमणी रामभार्या सीता च, नानाविधानि यानि चूतादिफलानि तानि च, प्रसवाः कमलादिपुष्पाणि ते च, पत्राणि पल्लवादीनि तानि च, तेषां गणः समूहः तस्य उपहार आनयनं

१. **'पात्रान्तरे स्थितस्यान्नादेः भोजनपात्रे प्रक्षेपः परिवेषः'** इति का.श्री. ।

२. **'कान्तैका तमुपाददे'** इति, **'कान्ता कान्तमुपाददे'** इति क्वचित् ।

३. अस्मिन् पक्षे–**'कान्ता+एका+अन्ते'** इति प्रतृण्णम् ।

तम्, आनयनात्मिकामित्यर्थः । 'घञः पुंसि' इति पुल्लिङ्गता । मालिन्याः गङ्गायाः । 'मन्दाकिन्याश्च मालिनी' इति विश्वः । उदाराणि परिशुद्धत्वेनोत्कृष्टानि यानि सलिलानि तैः सह उपसर्पणं समीपप्राप्तिश्च तत्, समीपप्राप्त्यात्मिकामित्यर्थः । भावे ल्युट् । नपुंसकता च । लक्ष्मणसमीरणयोः लक्ष्मणवाय्वोः स्वसेवां स्वविषयकसेवां अवलोक्य, मुत् प्रीतिस्तां दधाते प्रापतुः । धातेर्लिट् । चित्रकूटस्थयोः श्रीरामसीतयोः लक्ष्मणस्य फलपुष्पपत्रोदकादानाद्यात्मकानवरतपरमसेवया शैत्यसौरभ्यामान्द्यादिगुणविशिष्टचित्रकूटोपवनपवनानुसेवनेन चाऽनन्दोऽजनीति भावः ॥ ५१ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायामयोध्याकाण्डे नवमः सर्गः ॥

(सं.चं.) वसन्ततिलकयोपसंहरति– नानेति । 'पुष्पं प्रसवः कुसुमम्' इत्यभिधानम् । नानाफलप्रसवपत्रगणैरुपहारं सपर्याम् । समीरणः फलादीनि रामपादमूले पातयामास । लक्ष्मणोऽवचित्याऽनिनाय । 'अर्चा पूजा सपर्या स्यादुपहारो बलिः स्मृतः' इत्यभिधानम् । तरङ्गमालिन्याः तीरद्रुममुक्तप्रसवमालिन्याश्च मालिन्या मन्दाकिन्याः माल्यवत्यपराभिधाया उदारैरुत्कृष्टैः सलिलैरुपसर्पणं च । तदप्युपहार इत्येव । समीरणः सुरभिशीतस्वच्छतोयबिन्दुभिः सिञ्चन् राममुपसिषेवे । लक्ष्मणः पूजाद्यर्थं सलिलेनोपससर्प ॥ ५१ ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायामयोध्याकाण्डे नवमसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– ८२९+५१=८८०]

दशमः सर्ग्गः

रामदेवविरहानलदूनास्तद्गुणान् जगुरथामृततुल्यान् ।
नागराः सवनिताः शिशुवृद्धा[1] मातरोऽस्य जनकः स्वजनाश्च ॥ १ ॥

(भा.दी.) श्रीरामे प्रयाते सति अयोध्यापुरवासिनां तद्वियोगजनितावस्थां वर्णयति– **रामेत्यादिना** । अथ श्रीरामानुगमनं कृत्वा नगरप्रवेशानन्तरम्, रामश्चासौ देवस्तस्य विरहो वियोगः स एवानलोऽग्निस्तेन दूनाः सन्तप्ताः, नगरे भवा नागरा जनाः, सवनिताः, वनिताभिः स्त्रीभिः सहिताः, शिशुवृद्धाः, अस्य श्रीरामस्य मातरः कौसल्याद्याः, अस्य जनकः पिता दशरथः, स्वजनाः, स्वे स्वकीयाः रामसम्बन्धिनोऽन्ये जनाश्च, ते सर्वे अमृतस्य तुल्यान् सदृशान् तस्य श्रीरामस्य गुणान् जगुः अस्तुवन् । गै शब्दे लिट् ॥ १ ॥

(सं.चं.) स्वागतच्छन्दोबद्धेन सर्गेणायोध्यावृत्तान्तमाह । नागराः शिशवोऽपि वृद्धा अपि । सवनिताः शिशवो मातृभिः सह । वृद्धाः जरद्भार्याभिः सह । अस्य रामदेवस्य मातरो जनको बन्धुजनाः परिवारजनाश्च । रवया गौ च स्वागतम् ॥ १ ॥

रामरूपमखिलेन्द्रियरम्यं दर्शयन् विहसितामृतसारम् ।
सद्य एव पिदधासि दृशां नो हा विधे तव दया क्व नु[2] याता ॥ २ ॥

(भा.दी.) एतदेव विशदयति– **रामेति** । हे विधे दैव, 'विधी तु दैवकालौ च' इति वैजयन्ती । अखिलानां समस्तप्राणिनां इन्द्रियाणि चक्षुरादीनि तेषां रम्यं तत्, विहसितमेव विशिष्टमन्दहास एव अमृतसारो अमृतवरो यस्य तत्तथा तत्, रामरूपं श्रीरामस्य स्वरूपं दर्शयन् त्वं नः दृशो दृष्टयस्तासां सद्य एव पिदधासि तिरोहितं करोषि । अदृश्यं कृतवानसीत्यर्थः । हा खेदे । अपिपूर्वधाधातोर्लट् । 'वष्टि भागुरिरल्लोपम्' इत्यल्लोपः । तव (दया) एतावत्कालपर्यन्तं श्रीरामदर्शनानुकूलकारुण्यं क्व नु कुत्र याता इदानीं गता ॥ २ ॥

---

१. **'सवनिताशिशुवृद्धा–'**

२. **'पूर्वं विद्यमाना तव दया नु इदानीं क्व याता'** इति का.श्री. ।

(सं.चं.) कविः स्वयं भक्तिपरवशतया राममहिमानुसन्धानलोलः नागरशोकालापव्याजेन रामरूपं भगवन्तं बहुधा वर्णयति– **रामरूपमित्या**दिना श्लोकदशकेन । अखिलानामखिलानीन्द्रियाणि । चक्षू रामरूपं दिदृक्षते । श्रोत्रं तत्सुषमां शुश्रूषते । त्वगपि तत् पिस्पृक्षति । वाक् तद्गुणान् विवक्षति । नासा तद्गन्धमप्राकृतं जिघ्रासति । मनस्तदेव चिराय चिन्तयति । हृदयं तदेव स्वादंस्वादं द्रवति । इत्येवमखिलेन्द्रियरम्यम् । 'आकुञ्चितकपोलाक्षं सस्वनं निस्वनं तथा । प्रस्तावोत्थं सानुरागमाहुर्विहसितं बुधाः' । विशिष्टं मन्दहसितमित्येव वा । तदेवामृतसारोऽमृतरसो यत्र तादृशं रामरूपं नो दृशां दर्शयन् इदानीं सद्य एव पिदधासि । 'दुःखे शोके विषादे हा' इति मङ्खः ॥ २ ॥

पूर्त्तमिष्टमुदितं विदितं वा यद्यदस्ति हि शुभं[1] विहितं नः ।
तेन तुष्टिमुपगम्य परात्मा रामदर्शनसुखं प्रदिशेन्नः ॥ ३ ॥

(भा.दी.) पूर्तमिति । परात्मा सर्वोत्तमः श्रीहरिः, नः अस्माकं सम्बन्धि यत् पूर्त्तं वापीकूपतटाकोत्खननादिकम्, तज्जन्यसुकृतमित्यर्थः, यदि अस्ति । यत् इष्टं यागः यदि अस्ति । यत् उदितं सात्विकहितार्थमुक्तं वचनं यदि अस्ति । यत् विदितं वा भगवत्तत्वज्ञानं वा यदि अस्ति, यत् विहितं कृतं शुभं वा एतद्व्यतिरिक्तदानादिशुभकर्म वा यदि अस्ति । तर्हि तेन पूर्तादिना तुष्टिं सन्तोषं उपगम्य नः अस्मभ्यं श्रीरामस्य यद्दर्शनमवलोकनं तज्जन्यं यत्सुखं तत्प्रदिशेत् दद्यात् ॥ ३ ॥

(सं.चं.) पूर्तमिष्टम् । 'पुष्करिण्यः सभा वापी देवतायतनानि च । आरामाश्च विशेषेण पूर्तं कर्म विनिर्दिशेत्' । 'एकाग्निकर्म हवनं त्रेतायां यच्च हूयते । अन्तर्वेद्यां च यद्दानमिष्टं तदभिधीयते' । उदितं गदितम्, अनुद्वेगकरं सत्यं प्रियं हितं च वचनम् । शास्त्रैर्विदितमवगतं तत्वम् । तत्वज्ञानं वा । एवं यद्यच्छास्त्रविहितं शुभं श्रेयःसाधनं च कर्म कृतमस्ति । परात्मा परमात्मा ॥ ३ ॥

अत्र सन्निहितमात्मकटाक्षं भाग्यदेव्यगमयद् वनवीथीम् ।
तेन तत्र विलसन्ति समस्तश्रीपदानि रघुनाथपदानि ॥ ४ ॥

(भा.दी.) अत्रेति । भाग्यस्य देवी देवता महालक्ष्मीः, अत्र अयोध्यायां सन्निहितं निक्षिप्तं आत्मनः स्वस्याः यः कटाक्षोऽपाङ्गदर्शनं तम्, येन कारणेन वनानां वीथी पङ्क्तिस्तां अगमयत् प्रापयामास । तेन कारणेन तत्र वनवीथ्यां समस्ताः श्रियः सम्पदः तासां पदानि आश्रयभूतानि रघुनाथस्य पदानि पादलक्षणानि विलसन्ति विराजन्ते । लस श्लेषणक्रीडनयोर्लट् ॥ ४ ॥

१. '–दस्ति ह शुभम्'

(सं.चं.) भाग्यदेवता रमा एतावन्तमनेहसमयोध्यां कटाक्षयन्त्यासीत् । तेनायोध्याया भाग्यं विचकासामास । सम्प्रति सा स्वकटाक्षमरण्यपथं प्रत्यगमयत् । तेनायोध्याभाग्यमरण्यं जगाम । तेन भाग्यप्रदानि रामपदानि तत्र विहरन्ति लसन्ति । वीथी पन्थाः पङ्क्तिर्वा । 'वीथी पङ्क्त्यध्वनोरपि' इति यादवप्रकाशः ।।४।।

किं नु[1] तेन सुकृतं कृतमासीन्मार्ग्गजेन तृणगुल्मगणेन ।
[2]ब्रह्मरुद्रमकुटोपनिवेश्यं यं परिस्पृशति रामपदाब्जम् ।। ५ ।।

(भा.दी.) किं न्विति । ब्रह्मा च रुद्रश्च ब्रह्मरुद्रौ, तयोर्ये मकुटे ताभ्यामुप समीपे निवेश्यं निवेशयितुं सेवितुमर्हम्, ब्रह्मरुद्राभ्यां वन्द्यमानमित्यर्थः । रामस्य पदं पादस्तदेवाब्जम्, यं तृणगुल्मगणं परिस्पृशति । स्पृश आमर्शने लट् । मार्गे जातो मार्गजस्तेन, तृणानि च गुल्माश्च तृणगुल्माः, तेषां यो गणस्तेन सुकृतं पुण्यं किं नु किं वा कृतं आसीत्? अस्तेर्लङ् ।। ५ ।।

(सं.चं.) वनमार्गगतेन तृणगुल्मगणेन । सुकृतं पुण्यम् । यं तृणगुल्मगणम् । ब्रह्मरुद्राभ्याम्, किमुतान्यदेवैः, मुकुटे उप उत्कृष्टतया निवेश्यम् ।। ५ ।।

रामपादरजसा विरजस्का पावनीभवति सा वनराजिः[3] ।
यां करेण करुणाकर आरादिन्दिराकरसखेन निमार्ष्टि ।। ६ ।।

(भा.दी.) रामेति । करुणाकरः श्रीरामः इन्दिरायाः लक्ष्म्याः करस्तस्य सखा तेन । 'राजाहस्सखिभ्यष्टच्' (अ.सू.५.४.९१) इति टच् । तेन सह देवनात् क्रीडाकरणादित्यर्थः । करेण यां वनराजीं आरात् समीपे निमार्ष्टि सम्मार्जयति । मृजूष् शुचौ । श्रीरामस्य पादौ तयोर्यद्रजः तेन, विगतं रजः रजोगुणो यस्याः सा तथोक्ता, निर्मला सतीत्यर्थः, सा वनराजी वनानां पङ्क्तिः पावनीभवति पवित्रीभवतीत्यर्थः ।। ६ ।।

(सं.चं.) विरजस्का विगतरजोगुणा वनपङ्क्तिः । अर्थात् वितमस्का च । शुद्धसत्वप्रसरा सती पावनी पवित्रा भवति । पावनीभवतीत्येकं वा पदम् । रामपादरजःस्पर्शात् पूर्वमपावनी सम्प्रति पावनीभवति । अभूततद्भावे च्विः । यामिन्दिराकरसखेन स्वकरेण रामो निमार्ष्टि स्पृष्ट्वा पवित्रीकरोति ।। ६ ।।

---

१. **'नु इदानीं किं सुकृतं पुण्यं कृतमासीत्'** इति का.श्री. । २. **'ब्रह्मरुद्रमुकुटोप-'**

३. **'वनराजी'** इति वि.ती.पाठः स्यात् ।

ता नदीर्न्न भजते भुवने को यासु मज्जति जगत्पतिरेषः[१] ।
यत्पदे सपदि सङ्गममात्राज्जाह्नवी [२]शिवशिरोमणिरासीत् ॥ ७ ॥

(भा.दी.) ता इति । जगत्पतिः एषः श्रीरामः यासु नदीषु मज्जति स्नानं करोति । टु मस्जो शुद्धौ लट् । भुवनं लोकस्तस्मिन् कः पुमान् ताः नदीः न भजते न सेवते । भज सेवायां लट् । श्रीरामचन्द्रस्य स्नानात् को वाऽतिशयस्तासामित्यत आह– **यदिति** । जाह्नवी, यत्पदे यस्य त्रिविक्रमरूपिणः श्रीरामस्य पदं पादस्तस्मिन्, सपदि एकवारं केवलं सङ्गमः सङ्गमात्रं तस्मात्, न तु तपश्चरणादिनेत्यर्थः, शिवस्य शिरोमणिः शिरोरत्नमिव, यथा शिरोमणिः सर्वदा धार्यः एवमतिपवित्रत्वादिना सर्वदा धार्येत्यर्थः, आसीत् ॥ ७ ॥

(सं.चं.) यासु जगत्पतिर्मज्जति ता नदीः को न भजते सेवते । शिरोमणिरिव शिरोधार्या शिरसोऽलङ्कार-भूता च ॥ ७ ॥

चारुचीरमचिरादुपयातं प्रेष्ठबन्धुमिव बन्धुरमारात् ।
तं जटावलयिनं किल दृष्ट्वा पूजयन्ति मुनयः कृतकृत्याः ॥ ८ ॥

(भा.दी.) चार्विति । चारु मनोहरं चीरं वासो यस्य स तथा तम्, बन्धुरं सुन्दरम् । 'बन्धुरौ नम्रसुन्दरौ' इति वैजयन्ती । जटानां वलयं मण्डलं तदस्यास्तीति तथोक्तस्तम्, अचिरात् शीघ्रेण उपयातं समागतं तं श्रीरामम्, अतिशयेन प्रियः प्रेष्ठः स चासौ बन्धुश्च तमिव, आरात् समीपे दृष्ट्वा, श्रीरामेण कृतं सम्पन्नं कृत्यं कार्यं येषां ते तथा सन्तः मुनयः पूजयन्ति किल । पूज पूजायां लट् ॥ ८ ॥

(सं.चं.) चीरं चीवरं मुनीनां वसनम् । आरात् नेदिष्ठं दृष्ट्वा । बन्धुरं नम्रं रम्यं च । 'बन्धूरबन्धुरौ रम्ये नम्रे' इति विश्वः । कृतकृत्या विवृतमुक्तिधाराः ॥ ८ ॥

चापपाणिमवलोक्य ससीतालक्ष्मणं भुवनसुन्दरमेनम् ।
तर्कयन्ति सरतिं रतिनाथं कानने मधुसखं मुनिवध्वः ॥ ९ ॥

(भा.दी.) चापेति । मुनिवध्वः मुनिभार्याः, चापः पाणौ यस्य स तथा तम्, सीता च लक्ष्मणश्च ताभ्यां सहितम्, भुवनेषु सुन्दरम्, एनंश्रीरामम्, काननं वनं तस्मिन् अवलोक्य, सरतिः रत्या रतिनाम्न्या भार्यया सहितम्, मधुर्वसन्तः सखा यस्य तम्, रतेः नाथं भर्तारं कामं तर्कयन्ति ऊहयन्ति । तर्क ऊहायां लट् ॥ ९ ॥

---

१. **'जगद्गुरुरेषः'**इति, **'जगद्गतिरेषः'** इति च । **'जगतो गतिः । सज्जनप्राप्यः'** इति का.श्री । २. **'हरशिरोमणि–'**

(सं.चं.) मधुर्वसन्तः । स सखा यस्य । तत्सहितमित्येतत् । अत्र मधुरिव लक्ष्मणः ॥ ९ ॥

यत्र याति रघुसन्ततिकेतुस्तत्र सम्पदतुला न विपत्तिः ।
सौख्यमूर्त्तिरिति नैव स शोच्यस्तद्वियोगिजनतैव हि शोच्या॥ १० ॥

(भा.दी.) यत्रेति । रघोः सन्ततिर्गोत्रं तस्यां केतुरिव ध्वज इव केतुः । 'उत्पातेऽङ्के ध्वजे केतुः' इति वैजयन्ती । रघुगोत्रे श्रेष्ठ इत्यर्थः । यत्र यस्मिन् देशे याति गच्छति । तत्र देशे न विद्यते तुला उपमा यस्याः सा तथा, असदृशीत्यर्थः, सम्पत् ऐश्वर्यम्, विपत्तिः विपत् न इति हेतोः, सुखमेव सौख्यं तत् मूर्तिः शरीरं यस्य स तथोक्तः, सः श्रीरामः शोच्यः अस्माभिः शोचितुमर्हः नैव न भवत्येव । किं तर्हि शोच्यमित्यत आह– तदिति । तस्य यो वियोगः सोऽस्या अस्तीति तथोक्ता, जनानां समूहो जनता, तद्वियोगिनी च सा जनता चेति कर्मधारयः । सैव शोच्या हि ॥ १० ॥

(सं.चं.) सदाऽऽनन्दमूर्तिरिति हेतोः स न शोच्यः ॥ १० ॥

किं धनैः प्रियजनैरथ किं वा[१] किं सुतैः किमपरैरपि हृद्यैः[२] ।
स्याम रामगुणकीर्त्तनतृप्ता यावदायुरपि तच्चरणाप्त्यै ॥ ११ ॥

(भा.दी.) किमिति । धनानि सुवर्णादीनि तैः किं साध्यम्? न किमपि । अथ प्रिया ये बन्धुजनास्तैर्वा नः किम्? सुतैः पुत्रैर्वा किम्? भृत्यैः अपराणि अवराणि तैरपि किम्? तस्मात् वयं तस्य श्रीरामस्य यौ चरणौ तयोराप्तिः प्राप्तिस्तस्यै, आयुः आयुष्यं यावदस्ति तावत्कालपर्यन्तं श्रीरामस्य ये गुणाः तेषां यत्कीर्तनं तेन तृप्ताः सन्तः स्याम भवेम ॥ ११ ॥

(सं.चं.) अपरैरन्यैः हृद्यैः सखिभिः । मनोहारिभिर्वस्तुभिर्वा । यावदायुस्तावन्तं कालं रामचरणसेवालाभाय ॥ ११ ॥

इत्थमुत्थितविरागविवेकास्ते जना हृदि जनार्द्दनमाप्य ।
योगिवत् सकलकालमवश्यं निन्यिरे सफलमेव हि धन्याः ॥ १२ ॥

---

१. **'किं नः किम्'** इति वि.ती.पाठः स्यात् ।

२. **'किमपरैरपि भृत्यैः'** इति वि.ती.पाठः । **'हृद्यैरपरैरपि पदार्थैः किम्? न किमपि । तेषां नश्वरत्वेन मोहहेतुत्वात्'** इति का.श्री. ।

(भा.दी.) **इत्थमि**ति । इत्थं उत्थितौ उत्पन्नौ, विरागो वैराग्यं स च, विवेको ज्ञानं स च, तौ येषां ते तथोक्ताः, धन्याः ते जनाः, हृदि मनसि, जनान् दुष्टजनानर्दयतीति जनार्दनस्तं श्रीरामं आप्य, तं स्मरन्त इत्यर्थः, योगिवत् ज्ञानिवत्, सकलश्चासौ कालश्च तम्, फलेन प्रयोजनेन सहितस्तमेव, अवश्यं यथा भवति तथा, निन्यिरे हि नीतवन्तो हि । नीतेर्लिट् ॥ १२ ॥

(सं.चं.) अन्यत्र विरागः । राममहिमविषये विवेकः । दुर्जनानर्दयतीति जनार्दनः । जननमर्दयति च । न जायते चार्दयति च संसारमिति च ॥ १२ ॥

राम रम्यहसितामृत[१] सीते लक्ष्मण क्व नु वने द्रवथाद्य ।
हा हतोऽस्मि विरहादिति राजा सुस्वरं स विविधं विललाप॥ १३ ॥

(भा.दी.) इदानीं दशरथविलापं दर्शयति– **रामेत्या**दिना । रम्यं हसितं हास एवामृतं हसितामृतं यस्य स तथा तत्सम्बुद्धिः, हे श्रीराम, हे सीते, हे लक्ष्मण, यूयं अद्य वनमरण्यं तस्मिन् क्व नु कुत्र द्रवथ पर्यटनं कुरुथ । द्रु गतौ लट् । अहं विरहो वियोगस्तस्मात् हतः मृतः अस्मि । हा खेदे । 'हा विषादशुगार्तिषु' इति वैजयन्ती । इति सः राजा सम्यक् स्वरो यथा भवति तथा, विविधं यथा भवति तथा, विललाप परिदेवनं चक्रे । लप व्यक्तायां वाचि लिट् ॥ १३ ॥

(सं.चं.) अथ दशरथावस्थामाह– रामेति । हतोऽस्मि मृतप्रायोऽस्मि ॥ १३ ॥

एकमेकमपि रात्रिविशेषं कल्पकल्पमनयत् पृथिवीशः ।
क्लेश एव[२] परमं तप आसीद् रामसंस्मृतिबलाद् बत राज्ञः ॥ १४ ॥

(भा.दी.) **एक**मिति । पृथिवीशः दशरथः एकं एकमपि रात्रेर्यो विशेषः पूर्वरात्रादिस्तं कल्पस्य कल्पकालस्य कल्पः समानो यथा भवति तथा कल्पकल्पं अनयत् अगमयत् । नीतेर्लङ् । राजर्षेरस्यायं क्लेशस्तपोरूप एवाऽसीदित्याह– **क्लेश** इति । राज्ञः अयं[३] वियोगजनितः क्लेशः, रामस्य संस्मृतिस्तस्या बलं तस्मात्, परमं उत्तमं तपः आसीत् । अस्तेर्लङ् । बत आश्चर्ये । श्रीहरिस्मरणपूर्वकं कायक्लेशादिकं हि तप इत्युच्यते । अयं च क्लेशस्तादृश इति तपोरूप आसीदिति भावः ॥ १४ ॥

१. **'हे हसितामृत, हे रम्य, हे राम'** इति का.श्री. ।
२. **'क्लेश एष–'** इति वि.ती.पाठः स्यादिति भाति ।
३. **'एषः वियोगजनितः'** इति पाठः स्यादिति भाति ।

(सं.चं.) कल्पः ब्रह्मणो दिनम् । ईषदसमाप्तः कल्पः कल्पकल्पः । कल्पतुल्य इत्यर्थः । 'ईषदसमाप्तौ कल्पब्-देश्य-देशीयरः' (अ.सू.५.३.६७) इति पाणिनिस्मरणात् तुल्यार्थे कल्पप्रत्ययः । रात्रीणां विशेषा विघटिका-घटिकाद्याः । बतेति विस्मयते । 'बत त्वामन्त्रणेऽद्भुते । तोषे खेदे कृपायां च' इति यादवप्रकाशः ॥१४॥

तं रथं समधिरुह्य सुमन्त्रः शोकशोषितमनाः पुरमायात् ।
तं परीत्य जनता नगरस्था तत्र राममनवेक्ष्य रुरोद ॥ १५ ॥

(भा.दी.) तमिति । सुमन्त्रः तं रामसम्बन्धिनं रथं समधिरुह्य, शोकेन शोषितं खिन्नं मनो यस्य स तथा सन्, पुरमयोध्यापुरं तत् आयात् । यातेर्लङ् । नगरे तिष्ठतीति नगरस्था, जनानां समूहो जनता, तं रथं परीत्य परिवार्य तत्र रथे श्रीरामं अनवेक्ष्य रुरोद । रुदिर् अश्रुविमोचने लिट् ॥ १५ ॥

(सं.चं.) तं रथं येन रामं वनं निनाय । जनता । 'ग्रामजनबन्धुसहायेभ्यस्तल्'[1] (अ.सू.४.२.४३) ॥१५॥

राघवस्य ननु मन्त्रिवरस्त्वं त्यक्तवानसि वने क्व नु रामम् ।
दुःसहामिति गिरं परिशृण्वन्[2] बाष्पवान् नृपगृहं प्रविवेश ॥ १६ ॥

(भा.दी.) **राघवस्ये**ति । त्वं राघवस्य दशरथस्य मन्त्रिषु वरो ननु श्रेष्ठो ननु । दशरथो हि कैकेय्यधीनो भूत्वा श्रीरामं वनं प्रति प्रेषितवान् । त्वं च तदनुकूलतया रात्रावस्मद्वञ्चनं कृत्वा नीतवानसीत्याक्षेपः । श्रीरामं वने क्व नु कुत्र त्यक्तवान् असि? अस्तेर्लट् । सः सुमन्त्रः सोढुमशक्या दुःसहा तां इति एवमादि गिरं परिशृण्वन् परितः शृण्वन् सन्, बाष्पः अश्रु अस्यास्तीति बाष्पवान् सन्, नृपस्य दशरथस्य यद्गृहं मन्दिरं तत् प्रति प्रविवेश । विशतेर्लिट् ॥ १६ ॥

(सं.चं.) बाष्पवान् अश्रुपूर्णाक्षः । 'नृपगृहं स विवेश' इत्यपि पाठः स्यात् ॥ १६ ॥

रामदूतमवलोक्य सुमन्त्रं मूर्च्छितो नरपतिः स मुहूर्त्तम् ।
वल्लभाशतवृतोऽथ ससञ्ज्ञः पृष्टवान् सपदि राघववृत्तम् ॥ १७ ॥

(भा.दी.) **रामे**ति । मुहूर्तो मुहूर्तकालस्तम्, निरन्तरमुहूर्तकाल इत्यर्थः, मूर्च्छितः, वल्लभानां दयितानां शतानि तैः वृतः परिवृतः, नरपतिः राजा अथ ससञ्ज्ञः सन्, सञ्ज्ञया प्रबोधेन सहितः सन्, रामदूतं श्रीरामस्य वाक्यस्य हर्तारं सुमन्त्रं अवलोक्य सपदि श्रीराघवस्य श्रीरामस्य वृत्तं चरित्रं पृष्टवान् विचारितवान् ॥१७॥

---

१. जयादित्यपाठोऽयम् । **'ग्रामजनबन्धुभ्यस्तल्'** इति पतञ्जलिपाठः ।

२. **'गिरं पथि शृण्वन्'** । **'पथि मार्गे शृण्वन्'** का.श्री. ।

(सं.चं.) रामदूतम् आहृतरामसन्देशम् । वल्लभाशतवृतः । अर्धसप्तशतभार्याभिः कौसल्यया सुमित्रया च वृतः । कैकेयी तु तत्र नाऽस । 'नेह तिष्ठति कैकेयी विश्रब्धं प्रतिभाष्यताम्' (५७.३१) इति हि सुमन्त्रवचनं रामायणे ॥ १७ ॥

राघवस्य रमणीयमुदन्तं कीर्त्तयन् स जनतापमुदास ।
[१]वर्षुकोऽम्बुदइवाम्बु सुमन्त्रो रामवाचमपि तावदुवाच ॥ १८ ॥

(भा.दी.) राघवस्येति । राघवस्य श्रीरामस्य, रमणीयं मनोहरम्, उदन्तो वृत्तान्तस्तम्, कीर्तयन् सन्, सः सुमन्त्रः, जनानां तापः सन्तापस्तम्, वर्षुकः वर्षणशीलः अम्बुदः मेघ इव, उदास निराकृतवान् । असु क्षेपणे लिट् । सः सुमन्त्रः तावत् तदा वर्षुकः अम्बुदः अम्बिव उदकमिव सकलहितकरीं श्रीरामवाचमपि उवाचेत्यन्वयः । वचेर्लिट् ॥ १८ ॥

(सं.चं.) वर्षुको वर्षणशीलोऽम्बुद । तच्छीलार्थे उकञ् । अम्बु, यथा वर्षन् यथा जनतापमुदस्यति तथा सुमन्त्रः राघवोदन्तं कीर्तयन्नन्तःपुरजनतापमुदास । रामवाचमपि तावत् साकल्येनोवाच । 'यावत् तावच्च साकल्यमानावध्यवधारणे' इति यादवप्रकाशः । अम्बुदइवेति उभयत्रापि शक्यमन्वेतुम् ॥ १८ ॥

नन्दयिष्यति नरेन्द्र भवन्तं नन्दनः समयमेनमतीत्य ।
त्वां सदा परिचरन्ननुरागात् साधु शास्तु भरतः किल राज्यम् ॥ १९ ॥

(भा.दी.) नन्देति । हे नरेन्द्र दशरथ, त्वां सदा अनुरागः स्नेहः तस्मात् परिचरन् सेवां कुर्वन् सन्, नन्दनः श्रीरामः एनं चतुर्दशवर्षेषु वनवासलक्षणम्, समयः सङ्केतस्तम्, अतीत्य भवन्तं नन्दयिष्यति । नदि हर्षे लृट् । भरतः राज्यं तत् साधु सम्यक् यथा भवति तथा शास्तु किल । शासु अनुशिष्टौ लोट् । इति रामनियोग इत्युत्तरत्र सम्बन्धः ॥ १९ ॥

(सं.चं.) एनं चतुर्दशवत्सरान्तं समयं कालमतीत्य । समयं स्वप्रतिज्ञां वा । त्वां सदाऽनुरागात् परिचरन् भरतः शास्तु ॥ १९ ॥

वन्दते भुवनवन्द्यपदस्त्वां सुन्दरी च मिथिलेन्द्रसुता सा ।
लक्ष्मणश्च परितप्तमनास्ते हेळनेन महिळाविहितेन ॥ २० ॥

---

१. 'वार्षिकोऽम्बुद–'

(भा.दी.) वन्दत इति । भुवनेषु लोकेषु वन्द्ये पदे पादौ यस्य स तथोक्तः, श्रीरामः त्वां वन्दते नमस्करोति । वन्दतेर्लट् । मिथिलेन्द्रस्य जनकस्य सुता सुन्दरी मनोहरा सा सीता च वन्दते । महिळया स्त्रिया कैकेय्या विहितं कृतं तेन, हेळनेन 'असमञ्जसवद् रामो ज्येष्ठोऽपि त्यज्यताम्' इत्यादिश्रीरामावज्ञया परितप्तं मनो यस्य स तथा लक्ष्मणश्च ते तुभ्यं वन्दते ॥ २० ॥

(सं.चं.) भुवनवन्द्यपदो रामस्त्वां वन्दते । सा, या रामेण सह वनं जगाम, सा मिथिलेन्द्रसुता च त्वां वन्दते । एका मिथिलेन्द्रसुता गृह एवाऽस्ते किलोर्मिळा । लक्ष्मणश्च वन्दते । अथापि न प्रसन्नतया । किन्तु परितप्तमनाः । हेळनमवज्ञानम् । 'हेडृ अनादरे' इति हि धातुः । महिळया कैकेय्या कृतेन राज्यभ्रंशनरूपेणावज्ञानेन, महिळानिमित्तं त्वया कृतेन वा, परितप्तमनाः । असहायकतया कोपसमानाधिकरणं दुःखं परितापः ॥ २० ॥

राममातरुपचर्य्य सदा त्वं रामतातमखिलं त्यज शोकम् ।
राम एष्यति मुदे तव सत्यं रम्य एष ननु रामनियोगः ॥ २१ ॥

(भा.दी.) रामेति । हे राममातः कौसल्ये, त्वं श्रीरामतातं श्रीरामस्य पितरं दशरथं सदा उपचर्य सेवित्वा, अखिलम्, शोको दुःखं तम्, त्यज परित्यज । त्यज विसर्गे लोट् । तव मुद् सन्तोषस्तस्यै श्रीरामः एष्यति आगमिष्यति । इण् गतौ लृट् । एतद्वचः सत्यम् । रम्यः एषः मदुक्तः रामनियोगः श्रीरामस्य नियोग आज्ञारूपं वचः ॥ २१ ॥

(सं.चं.) रामतातमुपचरन्ती शोकं त्यज । रम्य इति रम्योदर्क इत्यर्थः ॥ २१ ॥

ताम्यति स्म वनमम्बुजिनीभिः[१] कस्य रामविरहेण न शोकः ।
[२]स्याच्चराचरगतिस्तव सूनुर्म्मानदेति निजगाद सुमन्त्रः ॥ २२ ॥

(भा.दी.) ताम्यतीति । वनं अम्बुजिनीभिः पद्मिनीभिः पद्माकरैः सरोवरैः सह ताम्यति स्म ग्लानिं गच्छति स्म । तमु ग्लानौ लट् । खिन्नमभवदित्यर्थः । श्रीरामस्य विरहो वियोगस्तेन कस्य चेतनस्य शोकः न स्यात्? मानं बहुमानं सत्कारं ददातीति मानदस्तत्सम्बुद्धिः, हे मानद दशरथ, तव सूनुः श्रीरामः, परं चापरं च परापरे तयोर्गतिः आश्रयः स्यात् । सुमन्त्रः इति (नि)जगाद ॥ २२ ॥

---

१. **'भ्राम्यति स्म वनमम्बुजनाभः'** २. **'स्यात् परापरगति–'** इति वि.ती.पाठः ।

(सं.चं.) अम्बुजनीभिः कमलसरसीभिः सह वनमपि ताम्यति रामविरहेण, यदा स वनान्तरं याति। यतः स चराचरगतिः ॥ २२ ॥

राम वत्स विपिने क्व नु शेषे कुत्र तन्वि परिताम्यसि सीते।
क्वाऽसि लक्ष्मण[1] सुतेति रुदन्तौ स्माऽह रामपितरावथ सूतः ॥ २३ ॥

(भा.दी.) रामेति। अथ सूतः सुमन्त्रः, हे राम, हे वत्स, विपिनं वनं तस्मिन् क्व नु कुत्र शेषे शयनं करोषि? शीङ् स्वप्ने लट्। हे तन्वि कोमले, हे सीते, कुत्र परिताम्यसि परितप्यसे? तमु ग्लानौ लट्। हे लक्ष्मण, हे सुत, क्व नु असि? इति रुदन्तौ रामस्य पितरौ कौसल्यादशरथौ प्रति आह स्म। ब्रूतेर्लट्॥ २३ ॥

हे नृदेव नरदेवि[2] न तापो राघवे निजसुखामृतपूर्णे।
नो भयं स्वबलधारितलोके सर्वसद्गुणनिधौ न हि दोषः ॥ २४ ॥

(भा.दी.) हे इति। हे नृदेव राजन्, हे नरदेवि नरदेवस्य भार्ये कौसल्ये, निजं स्वस्वरूपभूतं यत्सुखं तदेवामृतं तेन पूर्णे, हेतुगर्भविशेषणमेतत्, राघवे श्रीरामे तापः न शङ्क्यः। स्वस्य यद्बलं तेन धारिताः धृताः लोकाः भूरादयो येन स तथा तस्मिन् श्रीरामे भयं नो शङ्क्यम्। सर्वे समस्ताः सन्तो निर्दुष्टा ये गुणाः स्वातन्त्र्यादयस्तेषां निधौ आश्रये श्रीरामे दोषः दुःखादिदोषः न हि, इत्याहेति पूर्वेण सम्बन्धः॥ २४ ॥

(सं.चं.) हे नृदेव राजन्, हे नरदेवि राज्ञि कौसल्ये, राघवे न तापः शक्यसम्भवः। अतस्तद्विषये भवद्भ्यामपि न शोकः कार्यः। नो नैव। उरवधारणे। न हि न सम्भवति हि॥ २४ ॥

न प्रताम्यति न सीदति सीता सौमनस्यमपि नैव जहाति।
राममानसमिता मलहीनं पद्मपालिरिव हन्त हसन्ती ॥ २५ ॥

(भा.दी.) नेति। मलेन रागादिदोषेण हीनं रहितम्, श्रीरामस्य मानसं मनस्तत्, इता गता, तेनानुगृहीतेत्यर्थः, हसन्ती ग्लान्यादिदोषराहित्येन हासं कुर्वन्ती सीता, मलहीनं निर्मलम्, रामं मनोहरम्, यन्मानसं मानससरोवरं तत् इता प्राप्ता, पद्मपालिरिव, पद्मानां पालिरिव पङ्क्तिरिव। 'पालिः स्त्र्यस्त्यङ्कपङ्क्तिषु'

---

१. 'लक्ष्मण बतेति'   २. 'हे नृदेवि नरदेव न तापो–'

इत्यमरः । न प्रताम्यति न ग्लानिं गच्छति । तमु ग्लानौ । न सीदति न नश्यति । षद्लृ विशरणगत्यवसादनेषु । सुमनसो भावः सौमनस्यं तदपि, मनःप्रसन्नत्वमपीत्यर्थः, नैव जहाति नैव त्यजति । ओ हाक् त्यागे लट् । हन्त हर्षे ॥ २५ ॥

(सं.चं.) न प्रताम्यति न ग्लायति । ग्लानिरिति हर्षक्षय उच्यते । सीता कदाऽप्यहृष्टा न भवतीत्येतत् । नापि सीदति विषादमनुभवति । सौमनस्यं मनःप्रसादमपि न जहाति । रामाख्यं मलहीनं निर्मलं मानससरोवरं गता । रामचन्द्रमनसा सङ्गता च । हसन्ती विकसन्ती मानससरोगता पद्मपङ्क्तिरिव । 'पाळिः कर्णलतायां स्यात् प्रदेशे पङ्क्तिचिह्नयोः' इत्यजयः । पद्मपाळिरपि मानसगा न ग्लायति, न सीदति, स्वीयं सुमनस्त्वं न जहाति । पद्मे विकसनह्रासो ग्लानिः । इति 'ಮುದುಡು' भाषायाम् । शोभाविरहः सादः । इति 'ಬಾಡು' भाषायाम् ॥ २५ ॥

रामपादमुपसेव्य कृतार्थो लक्ष्मणः पुरुषलक्षणदक्षः ।
शोच्यता न खलु तेषु ततः स्यान्निर्य्ययाविति निगद्य सुमन्त्रः ॥ २६ ॥

(भा.दी.) रामेति । पुरुषलक्षणदक्षः, पुरुषस्य यल्लक्षणं चिह्नं तेन दक्ष इव मुनिरिव दक्षः । 'मुनिकुक्कुटयोर्दक्षः' इति हलः । निगृहीतेन्द्रियत्वादिना मुनिवद्वर्तमान इत्यर्थः । यद्वा पुरुषस्य यानि लक्षणानि अङ्गसम्पदस्तैर्निमित्तैर्दक्षः समर्थः । इदं लक्षणवत्त्वं शोच्यताभावे हेतुः । दुर्लक्षणनिमित्ता हि दुःखप्राप्तिः । यद्वा पुरुषस्य पूर्णषड्गुणस्य श्रीरामस्य यानि लक्षणानि जगत्कर्तृत्वादीनि तद्विचारविषये दक्षः समर्थः, लक्ष्मणः श्रीरामस्य यः पादस्तं उपसेव्य, कृतः अर्थः प्रयोजनं येन स तथा । तेभ्य इति ततः, श्रीरामसीतालक्ष्मणेषु प्रतिपादितहेतुभ्यः, तेषु श्रीरामादिषु शोच्यता न स्यात् खलु, न भवेत् खलु, इति सुमन्त्रः निगद्य निर्ययौ, दशरथमन्दिरात् स्वगृहं प्रति जगाम ॥ २६ ॥

(सं.चं.) अनितरसाधारणमुत्कृष्टं सेवनमुपसेवा । कृतार्थस्तृप्तः । पुरुषलक्षणं पौरुषम् । तेनाऽत्मरक्षणे दक्षः । तेषु सीतारामलक्ष्मणेषु ॥ २६ ॥

हा हताऽस्मि नरनाथ[१] बताहं मत्सुतस्य विरहानलदूना ।
त्वं रमस्व मम कान्त सपत्न्येत्यत्र रामजननी विललाप ॥ २७ ॥

१. 'नरदेव बताहम्'

(भा.दी.) **हा हते**ति । हे नरनाथ राजन् दशरथ, मम सुतो मत्सुतः श्रीरामः, तस्य विरह एवानलोऽग्निस्तेन दूना परितप्ता, अहं हता मृता अस्मि । बत खेदे । हे कान्त भर्तः, त्वं मम सपत्न्या प्रतिपक्षभूतया कैकेय्या सह रमस्व । रमु क्रीडायां लोट् । इति अत्र दशरथसमीपे रामजननी श्रीराममाता कौसल्या विललाप । रप लप व्यक्तायां वाचि लिट् । हा खेदे ॥ २७ ॥

(सं.चं.) हताऽस्मीति दुःखोद्गारः । न तत्र शब्दार्थान्वेषणा । प्रलापो हि सः । व्यर्थं मे जीवन-मित्येतत् । अत्र मम अन्तःपुरे, अस्मिन् विषमेऽवसरे ॥ २७ ॥

देवि मैवमभिधेहि सती[१] त्वं मा क्षतं मम मनोऽथ च भिन्धि ।
राममातरुपसंस्पृश दोर्भ्यां मां बतेति नरदेव उवाच ॥ २८ ॥

(भा.दी.) **देवी**ति । हे देवि कौसल्ये, सती पतिव्रता त्वं एवं मा अभिधेहि मा वद । धाञो लोट् । क्षतं रामवियोगेन पूर्वमेव क्षुण्णं मम मनः, अथ च पुनरपि, मा भिन्धि मा विदारय । भिदिर् विदारणे लोट् । हे राममातः कौसल्ये, दोषौ हस्तौ ताभ्यां मां उपसंस्पृश परिमार्जय । स्पृश आमर्शने लोट् । बत खेदे । इति नरदेवः दशरथः उवाच ॥ २८ ॥

(सं.चं.) निकटमुपेत्य, अविरळतया गाढं स्पर्शनमुपसंस्पर्शनम् । गाढमुपगूहस्वेत्यर्थः ॥ २८ ॥

वल्लभ प्रलपितं बहुशोकोन्मत्तया ननु मया न विवेकात् ।
हा क्षमस्व सुजनेति गदन्ती तत्र राजमहिषी[२] प्रणनाम ॥ २९ ॥

(भा.दी.) वल्लभेति । हे सुजन हे सज्जन, वल्लभ प्रिय दशरथ, बहुलो यः शोकः, तेन उन्मत्तया भ्रान्तया, बहुशोकपरवशयेत्यर्थः । मया प्रलपितं निरर्थकं वाक्यमभिहितम् । 'प्रलापोऽनर्थकं वचः' इत्यमरः । विवेकः पूर्वोत्तरविमर्शस्तस्मात् न भवति ननु । त्वं क्षमस्व । क्षमूष् सहने लोट् । हा खेदे । इति गदन्ती सती, मह्यते पूज्यते सर्वैरिति महिषी, राज्ञो महिषी राजमहिषी, राज्ञा सहाभिषिक्तेत्यर्थः, कौसल्या तत्र मन्दिरे प्रणनाम ॥ २९ ॥

(सं.चं.) नविवेकादित्येकं वा पदम् । हे सुजन, सौजन्यशील राजन्, सत्यप्यपराधे क्षमाशीलता सौजन्यम् । ततः प्रार्थ्यसे क्षमस्व मेऽपराधमिति । इति गदन्ती सुजना राजमहिषी वा । अकस्मात् सञ्जातेऽप्यपराधे सपदि पश्चात्तापप्रकटनमत्र सौजन्यम् । तत्र स्वस्याविमृश्यवादिताविषये क्षमापयन्ती राजानं प्रणनाम ॥२९॥

१. 'सति त्वम्' २. 'रामजननी'

पञ्चकल्पसदृशाः प्रभुपित्रोः पञ्च रामरहिता दिवसास्ते ।
पञ्चमेऽह्नि विगतेऽथ सुमित्रा नक्तमभ्यधित तौ विलपन्तौ ॥ ३० ॥

(भा.दी.) पञ्चेति । रामरहिताः पञ्च ते दिवसाः, प्रभुपित्रोः, माता च पिता च पितरौ, प्रभोः पितरौ तयोः । 'मातापितरौ पितरौ' इत्यमरः । पञ्च च ते कल्पाश्च पञ्चकल्पाः, तेषां सदृशाः समानाः आसन् । अथ पञ्चमे, अह्नः दिवा तस्मिन्, विगते सति, सुमित्रा नक्तं रात्रौ, विलपन्तौ (तौ) कौसल्यादशरथौ प्रति अभ्यधित उवाच । धात्रो लुङ् ॥ ३० ॥

(सं.चं.) प्रभो रामस्य पित्रोः मातापित्रोः । स च स च तौ । अभ्यधित अवादीत् ॥ ३० ॥

नो कटु स्पृशति यं कटुरश्मिर्य्यत्र वात उत वाति न तीक्ष्णम् ।
विश्वमानमति यं[१] बत रामं नैष शोच्य[२] इति शोभननीतिः ॥ ३१ ॥

(भा.दी.) वचनप्रकारमेव दर्शयति– **नो कट्वि**ति । कटवस्तीक्ष्णा रश्मयो यस्य स तथोक्तः सूर्यः, यं श्रीरामम्, कटु तीक्ष्णं यथा भवति तथा, नो स्पृशति न स्पृशति । स्पृश आमर्शने लट् । वातः यत्र श्रीरामे तीक्ष्णं यथा भवति तथा न वाति उत । वा गतिगन्धनयोर्लट् । विश्वं जगत् यं श्रीरामं प्रति आनमति सम्यक् नम्रीभवति बत, एषः श्रीरामः शोच्यः शोचितुमर्हो न भवति इति शोभना नीतिः समुचिता नीतिः ॥ ३१ ॥

(सं.चं.) कटुरश्मिः उष्णरश्मिः सूर्यः । वात उत वातोऽपि । 'भीषाऽस्माद् वातः पवते भीषोदेति सूर्यः' इति हि श्रुतिः । न शोच्य इति शोभना नीतिः । न्यायोचितं वर्तनमित्यर्थः । बतेति सन्तोषे सम्बोधने वा । 'बत खेदेऽनुकम्पायां हर्षे सम्बोधनेऽद्भुते' इत्यजयः ॥ ३१ ॥

आपदं समपनेष्यति रामः सम्पदं ध्रुवमुपैष्यति देवः ।
यद्यपास्यति रविस्तिमिरौघं यद्यसावुदयमेति सुतेजाः ॥ ३२ ॥

(भा.दी.) आपदमिति । यदि रविः तिमिराणामन्धकाराणामोघः समूहस्तं अपास्यति निराकरोति । असु क्षेपणे लट् । तद्वदेव श्रीरामः राक्षसादिभ्यो या आपत् तां समपनेष्यति निराकरिष्यति । यदि सु शोभनं तेजो यस्य स तथोक्तः सूर्यः, उदय उदयपर्वतस्तं एति, तर्हि देवः श्रीरामः राज्यादिरूपा या सम्पत् ताम्, ध्रुवं निश्चयो यथा भवति तथा, उपैष्यति प्राप्स्यति ॥ ३२ ॥

---

१. 'यं तव रामम्' २. 'नैव शोच्य–'

(सं.चं.) यदि रविस्तिमिरौघमपास्यति तर्हि रामो वनवासभवामापादमपनेष्यति । रवेस्तिमिरौघनाशनवद् रामस्याऽपदपनयनमपि सहजं निश्चितं चेत्यर्थः । यद्ययं तेजस्वी रविरुदयमेति तर्हि देवो रामोऽपि राज्यसम्पदं ध्रुवमुपैष्यति । रामस्य पुना राज्यप्राप्तिरपि सूर्यस्य पुनरुदयवत् निश्चितेत्यर्थः ॥ ३२ ॥

जानकी जगति धन्यतमाऽसाविन्दिरैव ननु सुन्दरपत्नी ।
नानुशोकपदमेवमवश्यं लक्ष्मणः स हि तयोः प्रियदासः ॥ ३३ ॥

(भा.दी.) जानकीति । जगति धन्यतमा अतिशयेन श्लाघ्यगुणा, सुन्दरस्य श्रीरामस्य पत्नी, असौ जानकी इन्दिरैव ननु, महालक्ष्मीरेव हि । अतः एवं श्रीरामवदेव अवश्यं सर्वथा अनुशोकस्य पदमास्पदं न । लक्ष्मणः तयोः सीतारामयोः हि यस्मात् प्रियः दासः प्रीतिविषयो भृत्यः, अतः तयोः परमदयास्पदत्वात् अनुशोकपदं नेति सम्बन्धः ॥ ३३ ॥

(सं.चं.) धन्यतमा यतोऽसाविन्दिरैव । यस्मात् प्रियो दासः तस्मान्नानुशोकपदम् निरन्तरः शोकोऽनुशोकः । भूतमनुस्मृत्य शोकोऽनुशोकः ॥ ३३ ॥

शान्तयोरिति शुभेन सुमित्रासान्त्वितेन बत[1] राघवपित्रोः ।
शोकवह्निरथ चोषसि निद्राभस्मना क्षणमभूदुपगूढः ॥ ३४ ॥

(भा.दी.) शान्तयोरिति । अथ च राघवपित्रोः कौसल्यादशरथयोः इति शुभेन, सुमित्रायाः सान्त्वितं सान्त्ववचनम्, तेन शान्तयोः विलापाद् विनिवृत्तयोः सतोः, उषः उषःकालस्तस्मिन्, शोक एव वह्निः, निद्रैव भस्म तेन, क्षणः क्षणकालस्तम्, क्षणकाल इत्यर्थः । उपगूढः तिरोहितः अभूत् । बत खेदे । क्षणमात्रं तदा निद्रा समागादित्यर्थः ॥ ३४ ॥

(सं.चं.) सुमित्रायाः सान्त्वितेन सान्त्वनेन शान्तदुःखयोः । रामायणेऽनुक्तोऽयं सुमित्राप्रसङ्गः । शोकवह्निः निद्राभस्मना क्षणकालमुपगूढः पिहितो बभूव ॥ ३४ ॥

षष्ठ एव[2] दिवसेऽथ निशीथे शोकशोषितमना नरदेवः ।
संस्मरन् स्वकृतदुष्कृतवीर्य्यं राममातरमवेक्ष्य जगाद ॥ ३५ ॥

---

१. **'बत कष्टेन शान्तयो–'** इति का.श्री. ।

२. **'षष्ठ एष दिवसे'** इत्यपि वि.ती.पाठः स्यात् । **'एषः नरदेवः'** इति प्रतीकग्रहणात् । **'दिवसो दिनं तस्मिन्नेव'** इत्येवकारस्यापि ग्रहणात् सन्देह एव शरणम् । **'षष्ठ एव दिवसे तु'** इति कचित् ।

(भा.दी.) षष्ठ इति। अथ षष्ठे, दिवसो दिनं तस्मिन्नेव, तत्रापि निशीथो मध्यरात्रस्तस्मिन्, शोकेन शोषितं सन्तप्तं मनो यस्य स तथा, एषः नरदेवः राजा दशरथः, स्वेन कृतं यद्दुष्कृतं पापकर्म तस्य वीर्यं सामर्थ्यं तत् संस्मरन् सन्, राममातरं कौसल्यां अवेक्ष्य जगाद ॥ ३५ ॥

(सं.चं.) अत्र दिवस इति नाहर्मात्रम्। किन्तु षष्टिघटीपरिमितः कालः। 'निशीथे' इति वचनात्। षष्ठे दिवसे अथ अहरपगमानन्तरं निशीथे अर्द्धरात्रे च सति। स्वकृतं यद् दुष्कृतं दुरितं तस्य वीर्यं प्रभावम्। राममातरमवेक्ष्य सुमित्रां चावेक्ष्य। 'इति रामस्य मातुश्च सुमित्रायाश्च सन्निधौ। राजा दशरथः शोचन् जीवितान्तमुपागमत्' (६४.७८) इति च ॥ ३५ ॥

ईश्वरः खलु शुभाशुभमूलं भावयेत् स हि[1] सुखासुखभोगम्।
अत्र जन्मनि परत्र पुनर्वा तन्वि तत्र हि निदर्शनमेतत् ॥ ३६ ॥

(भा.दी.) ईश्वर इति। इह जगति, शुभं शुभकर्म तच्च, अशुभं अशुभकर्म तच्च, तयोः मूलं कारणम्, ईश्वरः खलु, सर्वजगदीश्वरः श्रीनारायणः खलु। कुतो वा स मूलमित्यत आह– **अत्रे**ति। सः श्रीहरिः सुखं च (असुखं) दुःखं च तयोर्भोगोऽनुभवस्तम्, अत्र जन्मनि, यज्जन्मनि शुभादिकं करोति तस्मिन् जन्मनि, परत्र वा पुनः परस्मिन् जन्मनि वा, भावयेत् सम्पादयेत्। तत्र उक्तविषये हे तन्वि मनोहरे कौसल्ये, एतत् वक्ष्यमाणं निदर्शनं दृष्टान्तो हि ॥ ३६ ॥

(सं.चं.) ईश्वरः खलु शुभाशुभमूलम्। 'एष ह्येव साधु कर्म कारयति। एष ह्येवासाधु कर्म कारयति' इति हि श्रुतिः। स हि स एव सुखासुखभोगं भावयेत् जनयेत्। कदा? अत्र जन्मनि क्वचित्। क्वचित् पुनः परत्र अन्यजन्मनि। तत्र पुनरत्रैव जन्मनि भवतीत्यत्र विशिष्य निदर्शनमेतत् ॥ ३६ ॥

शब्दवेधपटुना मृगयायां तिष्ठतोषसि वने द्विपबुद्ध्या[2]।
कुम्भमम्भसि[3] निमज्जितवान् द्राक् सूदितो ननु मया मुनिसूनुः ॥ ३७ ॥

(भा.दी.) शब्देति। शब्दात् ध्वनिमात्रात् यः वेधः ताडनं तत्र पटुना समर्थेन, लक्ष्यमदृष्ट्वाऽपि यतः शब्दः श्रूयते तस्य भेदने सामर्थ्यवतेत्यर्थः, उषः उषःकालस्तस्मिन्, वनमरण्यं तस्मिन् तिष्ठता मया, मृगयायां

१. **'भावयेदिह सुखा–'। 'शुभाशुभमूलम्। पुण्यपापयोः कारणम्। स कारयेत् पुण्यमथापि पापमित्यादि' श्रुतिप्रसिद्धेः। स ईश्वर एव इह लोके सुखासुखभोगं सुकृतदुष्कृतफलरूपसुखासुखविषयकानुभवं भावयेत् सम्पादयेत्, प्रेरयेदिति यावत्। 'सुखं दुःखं भवोऽभावो भयं चाभयमेव च। भवन्ति भावा भूतानां मत्त एव पृथग्विधाः', 'पुण्येन पुण्यं लोकं नयति पापेन पापम्' इत्यादेः'** इति का.श्री.।

२. **'वनद्विपबुद्ध्या'**

३. **'मातापित्रोः स्नानार्थं उदकेन कुम्भं पूरितवान्'** इति का.श्री.।

मृगहननक्रियायां क्रियमाणायां सत्याम्, कुम्भो घटस्तं अम्भसि द्राक् क्षिप्रं निमज्जितवान् निमज्जनं कुर्वन्, मुनिसूनुः कस्यचित् मुनेः पुत्रः, द्विप इति गज इति या बुद्धिस्तया, द्राक् कुम्भनिमज्जने क्रियमाणे सति तद्ध्वनिं श्रुत्वा गजोऽत्र स्थित्वा ध्वनिं करोतीति भ्रान्त्येत्यर्थः, सूदितो ननु संहतो ननु ॥ ३७ ॥

(सं.चं.) दशरथः स्वकृतं पूर्वदुष्कृतं स्मरन्नाह– शब्दवेधपटुना । शब्दश्रवणमात्रेण लक्ष्यस्थानमवधार्य वेधे व्यधने पटुना । वने मृगयायां तिष्ठता मग्नेन । मृगयानिमित्तं वने तिष्ठता वा । मृगयायां शब्दवेधपटुनेति वा । अम्भसि निमज्ज्यमानस्य कुम्भस्य गुळुगुळुध्वनिं द्विपस्य गजस्य शुण्डादण्डेन वारिपानध्वनिं मत्वा सूदितः बाणेन ताडितः ॥ ३७ ॥

सानुतापमवलोक्य विषण्णं मां तदा करुणयर्षिकुमारः ।
स्यान्न ते नविदुषो द्विजहत्या राघवेति निगदन्[१] दिवमाप ॥ ३८ ॥

(भा.दी.) सानुतापमिति । ऋषेः कुमारः पुत्रः, तदा सानुतापं पश्चात्तापयुक्तम्, विषण्णं भीतम्, मां अव-लोक्य, हे राघव दशरथ, न वेत्तीति नविद्वान् तस्य । नैकधादिवन्नसमासोऽयम् । अज्ञानादेतत्कर्म कृतवत इत्यर्थः । ते तव द्विजहत्या, ब्रह्महत्यापातकमित्यर्थः, न स्यात् न भवेत् । अस्तेर्लिङ् । करुणया मयि विद्यमानदयया इति निगदन् सन् द्यौः स्वर्गस्तां आप । आप्लृ व्याप्तौ लिट् ॥ ३८ ॥

(सं.चं.) सानुतापं मामवलोक्य । 'विप्रतिसारोऽनुशयः पश्चात्तापोऽनुतापः स्यात्' इत्यभिधानम् । नविदुषः अविदुषः । मुनिसूनुं मामविदित्वा, अत एव न द्विजबुद्ध्या किन्तु द्विपबुद्ध्या मां सूदितवतस्ते द्विजहत्यादोषः न स्यादिति करुणया निगदन् । दिवमाप । 'विघूर्णतो विचेष्टस्य वेपमानस्य भूतळे । तस्य त्वाताम्यमानस्य तं बाणमहमुद्धरम् । स मामुद्वीक्ष्य सन्त्रस्तो जहौ प्राणांस्तपोधनः' (६३.५२) इति च रामायणे । रामायणे तु किञ्चिदिवान्यथा पठ्यते । तथाहि तत्र मुनिसूनुवचनम्–'ब्रह्महत्याकृतं पापं हृदयादपनीयताम् । न द्विजातिरहं ब्रह्मन् मा भूत् ते मनसो व्यथा । शूद्रायामस्मि वैश्येन जातो जनपदाधिप'(६३.५०–५१) इति । न द्विजातिरिति न द्विजजातिरित्यर्थः । जातितः नायम्, नापि तस्य पितरौ द्विजजातयः । तथाऽपि वर्णतः सर्वेऽपि द्विजा एव । अत एवोपरि तत्पिता वदिष्यति– 'अज्ञानात्तु हतो यस्मात् क्षत्रियेण त्वया मुनिः । तस्मात् त्वां नाऽविशत्याशु ब्रह्महत्या नराधिप' (६४.५५) इति । तदेतत् सर्वमवधृत्य पण्डिताचार्यवचनं प्रवृत्तमिति न कोऽपि दोषः । अवश्यं चैवं सङ्गमनीयम् । अन्यथा रामायणवचने व्याहन्येते इति भावः । ब्रह्मज्ञानिहत्या हि ब्रह्महत्या नाम ॥ ३८ ॥

---

१. **'बाणोद्धारानन्तरं दिवं स्वर्गमाप'** इति का.श्री. ।

अन्धयोः स्थविरयोर्म्मुनिपित्रोः पार्श्वमेकसुतयोरहमाप्य ।
आर्ज्जवं[1] परममवेत्य शुचाऽऽर्त्तः प्रावदं बत मुदन्तमुदन्तम् ॥ ३९ ॥

(भा.दी.) अन्धयोरिति । अहं स्थविरयोः अतिवृद्धयोः, अत एवान्धयोः अचक्षुषोः, एकसुतयोः, यो मया हतः स एक एव सुतो ययोस्तौ तथोक्तौ तयोः, मुनिपित्रोः मुनेर्मातापित्रोः पार्श्वं समीपं तत् आप्य गत्वा, ऋजोर्भाव आर्जवम्, ऋजुत्वमित्यर्थः, परमधिकं अवेत्य ज्ञात्वा, शुक् शोकस्तया आर्त्तः सन्, मुदन्तम्, मुदः सन्तोषस्य अन्तः अवसानं यत्र स तथा तम्, उदन्तं सुतहननादिवृत्तान्तं प्रावदम् अब्रुवम् ॥ ३९ ॥

(सं.चं.) पार्श्वमाप्य । शुचा शोकेनाऽर्तः पीडितः । मुदः प्रमोदस्यान्तो येन तमुदन्तं पुत्रसूदनाख्यं प्राव-दम् । प्रकटमवदम्, किमप्यगूहित्वा । 'वार्तोदन्तः प्रवृत्तिश्च वृत्तान्तश्च समाः स्मृताः' इत्यभिधानम् ॥ ३९ ॥

आवयोस्त्वयि हि तात निविष्टं जीवितं च सुकृतं च गतस्त्वम् ।
यज्ञदत्त नय नौ द्रुतमित्थं तत् तपस्विमिथुनं विललाप ॥ ४० ॥

(भा.दी.) आवयोरिति । हे तात, त्वयि आवयोः जीवितं जीवनं तच्च, सुकृतं च पुण्यकर्म च, निविष्टं हि संस्थितं हि । तत्साधकस्यान्यस्य पुत्रस्याभावादित्यर्थः । त्वं गतः, स्वर्गं प्राप्तः असि । हे यज्ञदत्त पुत्र, नौ आवां तव समीपं प्रति द्रुतं नय । इत्थम्, तच्च तत् तपस्विनोर्मिथुनं च तत्, विललाप । रप लप व्यक्तयां वाचि लिट् ॥ ४० ॥

(सं.चं.) अन्ध ऋषिर्मृतं पुत्रं प्रत्याह– आवयोः । नौ आवामपि तत्र नय यत्र गतस्त्वम् । यज्ञेन यजनकर्मणाऽऽराधितेन यज्ञेन नारायणेन दत्त इति पुत्रं श्लाघते । तत् हतैकपुत्रं तपस्विमिथुनम् ॥ ४० ॥

त्वं च पुत्रविरहात् त्यज देहं पार्थिवेति सति मामथ शस्त्वा[2] ।
तापसस्तनयतापपरीतः स्वर्ग्गमार्ग्गमगमत् सह पत्न्या ॥ ४१ ॥

(भा.दी.) त्वं चेति । अथ हे पार्थिव दशरथ, त्वं च, पुत्रस्य विरहो वियोगस्तस्मात्, देहः शरीरं तं त्यज, हे सति कौसल्ये, इति एवमादिप्रकारेण मां शस्त्वा, तनयस्य यस्तापः वियोगनिमित्तसन्तापः तेन परीतः परिपूर्णः, तापसो मुनिः पत्न्या सह, स्वर्गमार्गम्, स्वर्गस्य मार्गः अर्चिरादिः पन्थाः तं अगमत् । गम्लृ गतौ लुङ् ॥ ४१ ॥

---

१. **'आर्जवमृजुत्वं मनोवाक्कायेष्वेकप्रकारत्वम्'** इति का.श्री।
२. **'मामपि शस्त्वा'** । **'पार्थिवेति स ऋषिर्मम शस्त्वा'** इति क्वचित् ।

(सं.चं.) अथ तपस्वी दशरथं शशापेत्याह– त्वं च । हे सति कौसल्ये, तापसो मामिति शस्वा ॥ ४१ ॥

दुष्कृतं ननु कृतं तदिदं मे तत्फलं मरणमेव नचान्यत् ।
भेषजं मम सुतस्य मुखेन्दोर्दर्शनामृतमुपागतमृत्योः ॥ ४२ ॥

(भा.दी.) **दुष्कृतमि**ति । मे मया तत् मुनिपुत्रहननरूपम्, इदं फलोन्मुखम्, दुष्कृतं दुष्कर्म कृतं ननु । तत्फलम्, तस्य दुष्कृतस्य फलं मरणमेव, अन्यत् फलं न च । उपागतः समीपप्राप्तः मृत्युर्मरणं यस्य स तथा तस्य मम, भेषजं औषधम्, मम सुतस्य श्रीरामस्य मुखमेवेन्दुस्तस्य दर्शनामृतम्, दर्शनाख्यामृतमेव ॥ ४२ ॥

(सं.चं.) एवं शापबलेनोपागतमृत्योर्मे जीवनप्रदं भेषजं सुतस्य रामस्य मुखेन्दोर्दर्शनाख्यममृतम् । अहो मुनिशापमहिमा, येन नैकोऽपि पुत्रो मरणकाले तत्सविधे बभूव ॥ ४२ ॥

श्यामलं सुलळितं विमलाङ्गं कोमलं कमलचारुतराक्षम्[१] ।
आव्रजन्तमवलोक्य हि लोको[२] धन्यतां व्रजति मे तनयं तम्॥ ४३ ॥

(भा.दी.) एवं परमभागवतस्यापि स्वस्य प्रारब्धमनुल्लङ्घ्यं ज्ञात्वा साम्परायेऽवश्यकर्तव्यं श्रीहरिस्मरणं श्रीरामस्य गुणानुवर्णनरूपेण दशरथः कृतवानित्याह– **श्यामलमि**त्यादिना । लोको जनः, श्यामलं दूर्वादळश्यामलम्. सुलळितं बहुविलासोपेतम्, विगतं मलं शुक्लशोणितजन्यत्वलक्षणदोषो यस्मात् तथोक्तम्, तादृशमङ्गं यस्य स तथोक्तस्तम्, कोमलं सुकुमारम्, कमलवत् चारुतरे अक्षिणी यस्य स तथा तम्, आव्रजन्तं आगच्छन्तम्, तं मे तनयं श्रीरामं अवलोक्य धन्यतां कृतकृत्यतां व्रजति हि । व्रज गतौ लट् ॥ ४३ ॥

(सं.चं.) आव्रजन्तं वनात् पञ्चदशे वर्षे । मम तु एकैकोऽपि क्षणः कल्पकल्पः । वस्तुतस्तु चतुर्दश वर्षाणीति लोकस्य नातिदीर्घः काल इत्याह । लोको धन्यतां व्रजतीति । व्रजिष्यतीत्यर्थः । 'वर्तमानसामीप्ये वर्तमान-वद् वा' (अ.सू.३.३.१३१) ॥ ४३ ॥

पादपद्मगुणनिर्जितपद्मं यात्रया द्विरदराजसपत्नम् ।
प्रेक्षते भुवनभूषणरत्नं पुण्यवान् पुनरवेक्षणनूत्नम् ॥ ४४ ॥

(भा.दी.) **पादे**ति । पुण्यमस्यास्तीति पुण्यवान् जनः, पादौ पद्मे इव तयोर्ये गुणाः सौरभ्यसौकुमार्यादयः तैर्निर्जितं पद्मं येन स तथोक्तस्तम्, यात्रया गमनेन द्विरदानां गजानां राजा द्विरदराज ऐरावतः, तस्य सपत्नः

२. 'श्यामलं विंसितं विमलाङ्गं लोकमङ्गलदचारुतराक्षम्'
२. '–लोक्य नृलोको–'

प्रतिपक्षस्तम्, तस्मादप्यतिविलासादिमत्तया गमनशक्तिमन्तमित्यर्थः । भुवनानां लोकानां भूषणं अलङ्कार-भूतं रत्नमिव, पुनरवेक्षणनूत्नं पुनःपुनरवेक्षणं दर्शनं तस्मिन् नूत्नः नूतनभूतस्तम्, लोकविलक्षणभूतात्याश्चर्य-सौन्दर्यादिगुणविशिष्टतया पुनःपुनरवेक्षणेऽपि नूतनतया दृश्यमानमित्यर्थः, प्रेक्षते पश्यति । ईक्षतेर्लट् ।।४४।।

(सं.चं.) पादपद्मगुणाः मृदुतामसृणताशोणतादयः । यात्रया गम्भीरेण यानेन । निर्जितगजराजगतिम् । सपत्नः प्रतिस्पर्धी । 'शत्रुः सपत्नो भ्रातृव्यः' इत्यभिधानम् । भुवनस्य भूषणरत्नमिव । 'भूषारत्नं भुवनवलयस्य' इति चोक्तं पुरस्तात् । पुनःपुनरवेक्षणेऽपि प्रतिवारं नित्यनूत्नम् । 'दिनेदिने यन्नवतामुपैति तदेव रूपं रमणीयतायाः' इति हि वदन्ति ।। ४४ ।।

[१]वीरवर्य्यमचिरद्युतिचीरं दीर्घबाहुमिषुकार्म्मुकपाणिम् ।
आयतोरसमवेक्ष्य सुतं मे कस्य तृप्यति मनो नयनं वा ।। ४५ ।।

(भा.दी.) वीरेति । वीरेषु वर्यः श्रेष्ठस्तम्, अचिरद्युतिवत् विद्युद्वत् चीरं वासो यस्य स तथा तम्, दीर्घौ बाहू यस्य स तथा तम्, इषुश्च कार्मुकं च पाण्योर्यस्य स तथा तम्, आयतं विस्तृतमुरो यस्य स तथा तम्, मे सुतं श्रीरामं अवेक्ष्य कस्य पुरुषस्य मनः, नयनं वा, चक्षुर्वा, तृप्यति तृप्तिं प्राप्नोति? न कस्यापीत्यर्थः । तृप प्रीणने लट् ।। ४५ ।।

(सं.चं.) तृप्यति अलम्बुद्धिं प्राप्नोति ।। ४५ ।।

कम्बुकण्ठमरुणाम्बुजमाल्यं प्रोल्लसन्मकरकुण्डलगण्डम् ।
विद्रुमाधरमहो मम पुत्रं द्रक्ष्यतीक्षणमिदं तु कदा नु ।। ४६ ।।

(भा.दी.) कम्ब्विति । कम्बुवत् शङ्खवत् रेखात्रयोपेतः कण्ठो यस्य स तथा तम्, अरुणानि यान्यम्बुजानि रक्ताम्बुजानि तेषां माल्यं माला यस्य स तथा तम्, प्रोल्लसती मकराकारे कुण्डले ययोस्तौ तथोक्तौ, तादृशौ गण्डौ यस्य स तथा तम्, विद्रुमवत् प्रवाळवत् अधरावोष्ठौ यस्य स तथा तम्, मम पुत्रं श्रीरामम्, इदं ईक्षणं चक्षुः, तु विशेषेण, कदा नु द्रक्ष्यति? अहो ।। ४६ ।।

(सं.चं.) कम्बुकण्ठम् । 'रेखात्रयाङ्किता ग्रीवा कम्बुग्रीवेति कथ्यते' इत्यभिधानम् । मकराकारे कुण्डले अधिगण्डं भासमाने इति तस्य विष्णुत्वमाह । मकरकुण्डलो हि विष्णुः । विद्रुमवद् रक्ताधरम् । विद्रुमः प्रवाळः । '**ಹವಳ, ಐಗಳ**' इति भाषायाम् । इदं मदीयमीक्षणं नेत्रम् ।। ४६ ।।

१. 'वीरवीरमचिर–'

अर्द्धचन्द्रमिव तस्य ललाटं चन्द्रसुन्दरकलामिव हासम् ।
पूर्णचन्द्रमिव तस्य[१] मुखाब्जं पश्यतः क्व परितापलवोऽपि ॥ ४७ ॥

(भा.दी.) चन्द्रेति । यस्य श्रीरामस्य, ललाटमळिकं तत्, अर्धचन्द्रमिव पश्यतः, यस्य हासो मन्दहासस्तम्, चन्द्रस्य सुन्दरी या कला षोडशो भागस्तामिव पश्यतः, तस्य मुखमेवाब्जम्, पूर्णो यश्चन्द्रस्तमिव पश्यतः पुरुषस्य, परितापस्य लवोऽप्येकदेशोऽपि क्व कुत्र? न कुत्रापीत्यर्थः । एकमपि चन्द्रमण्डलं पश्यतः परितापो नास्ति । उक्तचन्द्रमण्डलत्रयं युगपत् पश्यतः परितापो नास्तीत्यत्र किमु वक्तव्यमित्यतो लवोऽपीत्युक्तम् ॥ ४७ ॥

(सं.चं.) तस्य ललाटमष्टमीचन्द्रइव । तस्य हासो द्वितीयाचन्द्रइव । मुखाब्जं पूर्णिमाचन्द्रइवेत्यहो तस्मिन् चन्द्रत्रयसमावेशः । तत्रापि मुखपद्मं चन्द्रइवेति विरुद्धयोरेकत्र समावेशः । मुखाब्जः मुखचन्द्र इत्यपि शक्यं व्याख्यातुम् । 'अब्जो धन्वन्तरौ शङ्खे चन्द्रे क्ली लवणेऽम्बुजे' इति यादवप्रकाशः । अथापि न वाक्यार्थ सारस्यमाधत्त इति न तथा व्याख्यायते ॥ ४७ ॥

राजमौलिमणिमद्भुतमौलिं सीतया सह वरासनमाप्तम्[२] ।
लक्ष्मणाचलितचामरमाराद् वीक्षिता[३] मम सुतं पुरि धन्यः ॥ ४८ ॥

(भा.दी.) राजेति । राजसु मौलिमणिरिव रत्नमिव तम्, राजश्रेष्ठमित्यर्थः । अद्भुतो मौलिः किरीटं यस्य स तथा तम् । 'चूडा किरीटं केशाश्च संहता मौलयस्त्रयः' इत्यमरः । वरमुत्तमं यदासनं तत्, सिंहासनमित्यर्थः, सीतया सह आप्तं प्राप्तम्, लक्ष्मणेन आचलितं ईषच्चलितं चामरं यस्य स तथा तम्, मम सुतं श्रीरामं पुरि अयोध्यायाम्, आरात् दूरे समीपे वा वीक्षिता विशेषेण द्रष्टा पुरुषः धन्यः पुण्यवान् ॥ ४८ ॥

(सं.चं.) राज्ञां मौलिमणिरिव राजरत्नम् । अद्भुतमौलिमतिसुन्दरकेशपाशम् । 'मौलिः संयतकेशेषु चूडायां मुकुटेऽप्यषण्' इति, 'व्यजनं तालवृन्तं स्याद् धवित्रं चर्मणा कृतम् । आलावर्तस्तु वस्त्रेण चामरं तु प्रकीर्णकम्' इति च यादवप्रकाशः । 'चामरा चामरं बालव्यजनं रोमगुच्छकम्' इति रभसः । यो धन्यः स एव ईक्षिता ईक्षिष्यते । य ईक्षिष्यते स एव च धन्यः कृतकृत्यः ॥ ४८ ॥

---

१. **'–मिव चास्य'** २. **'परासनमाप्तम्'**

३. **'–मारादीक्षते मम'** । **'माराद् वीक्षते मम'** इति च ।

ज्ञानयज्ञनिजधर्म्मगुणैर्म्मे तुष्टिमेति यदि नाम विधाता[1] ।
रामदर्शनसुखं प्रतिदद्यादुद्धवान्तरगताय च मह्यम् ॥ ४९ ॥

(भा.दी.) ज्ञानेति । विशेषेण धत्ते शुभाशुभकर्मफलं विदधातीति विधाता श्रीहरिः, यदि नाम यर्हि, ज्ञानं चराचरवस्तुविषयकज्ञानं तच्च, यज्ञाश्च, निज आत्मीयो यो धर्मः स च, गुणा हरिगुरुभक्त्यादिशुभधर्मास्ते च, तैः मे तुष्टिं प्रीतिं एति प्राप्नोति । इण् गतौ लट् । तर्हि रामस्य यद् दर्शनं तस्माद् यत् सुखं तत्, अन्य उद्धव उद्धवान्तरम्, जन्मान्तरम्, तद् गतस्तस्मै मह्यं प्रतिदद्यात् प्रदिशतु ॥ ४९ ॥

(सं.चं.) ज्ञानयोगेन कर्मयोगेन क्षात्रधर्मानुष्ठानेन सौशील्यादिगुणैश्च । विधाता विधिर्नारायणो वा । 'यो नः पिता जनिता यो विधाता' इति श्रुतिः । प्रतिदद्यात् पुनःपुनर्दद्यात् । 'वीप्सायां लक्षणे प्रति' इति यादवप्रकाशः । उद्धवान्तरगताय च जन्मान्तगतायापि ॥ ४९ ॥

इत्यमुष्य स विलापविशेषः शेषतामुपजगाम समाधेः ।
येन रामपदवेद्यमुदारं ब्रह्म[2] नन्दनधियाऽपि स दध्यौ ॥ ५० ॥

(भा.दी.) इतीति । अमुष्य दशरथस्य, इति सः विलापस्य विशेषः श्रीरामानुवर्तनरूपः, समाधिर्ध्यानं तस्य, शेषतामङ्गतां उपजगाम । तत्र हेतुमाह– **येने**ति । येन कारणेन, सः दशरथः, राम इति यत्पदं तेन वेद्यं ज्ञेयम्, उदारमुत्कृष्टं विष्ण्वाख्यं वस्तु, ब्रह्मनन्दनधिया, ब्रह्मेति नन्दन इति या धीस्तयाऽपि, दध्यौ ध्यानं कृतवान् । ध्यै चिन्तायां लिट् । अतः समाधेरङ्गतामुपाजगामेत्यर्थः ॥ ५० ॥

(सं.चं.) विलापविशेषः समाधेर्ब्रह्मोपासनस्य शेषतामङ्गतामुपजगाम । रामपदवेद्यं ब्रह्म । नन्दनः स्वपुत्रत्वेनावतीर्य नन्दयतीति धियाऽपि दध्यौ ॥ ५० ॥

वैष्णवं पदमवाप स राजा राजहंसइव निर्म्मलरूपः ।
तच्छरीरमपहाय कृतार्थो वृक्षनीळमिव भीतिसनीळम् ॥ ५१ ॥

(भा.दी.) वैष्णवमिति । अन्तकाले भगवदनुध्यानेन कृतः अर्थः मोक्षलक्षणप्रयोजनं येन स तथा, अत एव निर्गतं मलं रागक्लेशादिदोषो यस्मात् तथोक्तम्, तादृशं रूपं यस्य स तथा, राजा सः दशरथः, तच्च तत् शरीरं च तत्, भीतेः सनीळं समीपम्, भययुक्तमित्यर्थः । 'सनीळं समीपं समर्यादमारात्' इति हला-

१. **'विधाता ब्रह्मा, अदृष्टनियामकदेवता वा'** इति का.श्री ।

२. उपलब्धपाठानुसारेण **'ब्रह्मनन्दनधिया'** इत्येकं पदमिति वि.ती.टीकासम्मतमिति भाति ।

युधः । (अपहाय त्यक्त्वा), वृक्षनीळम्, वृक्षे विद्यमानं नीळं स्वगृहं त्यक्त्वा, वैष्णवं विष्णुसम्बन्धि, पदं स्थानमाकाशप्रदेशम्, राजहंसइव राजहंसपक्षीव, वैष्णवं विष्णुसम्बन्धि, पदं स्थानम् अवाप। आप्लृ व्याप्तौ लिट्। राजहंसपक्षी भीत्यास्पदं स्वनीळं विहाय वैष्णवं पदं आकाशं यथा गच्छति तद्वदयमपि मृत्युभयास्पदं देहं विहाय श्रीहरिलोकं जगामेत्यर्थः ॥ ५१ ॥

(सं.चं.) निर्मलरूपः स्वच्छधवळकायः राजहंसः वृक्षगतं स्वं नीळं कुलायमपहाय वैष्णवं पदमाकाशमाप्नोति । एवमेव स राजा दशरथः तन्मानुषं शरीरमपहाय वैष्णवं विष्णुना दत्तं मनुपदमवाप । स्वमूलरूपमवापेत्यर्थः । क्रमेण वैष्णवं पदं वैकुण्ठलोकं चावाप । भीतिः सनीळा साश्रया येन तादृशं भयावहं मानुषं शरीरम् । भीतिः सनीळे सविधे यस्येति वा । सदा मरणभयग्रस्तम् । वृक्षनीळमपि बलिष्ठपक्षिसर्पाद्याक्रमणभयग्रस्तमिति भीतिसनीळम् ॥ ५१ ॥

रामकीर्त्तनरसामृततृप्तं सुप्तमात्मदयितं प्रतितर्क्य[१] ।
राममेव हृदयेन दधाना[२] स्वापमाप महिषी क्षितिभर्त्तुः ॥ ५२ ॥

(भा.दी.) रामेति । क्षितिभर्तुः भूपतेः दशरथस्य, महिषी कौसल्या, श्रीरामस्य यत्कीर्तनं तस्मिन् यो रसो रागः, आसक्तिरित्यर्थः, स एवामृतं तेन तृप्तम्, आत्मनः स्वस्य दयितं भर्तारं दशरथम्, सुप्तं निद्रितं प्रतिबुध्य, प्रतितर्क्येति क्वचित् पाठः । राममेव, हृदयं मनस्तेन दधाना सती, ध्यायन्ती सती, स्वापः सुषुप्तिस्तमाप ॥ ५२ ॥

(सं.चं.) मुग्धा तु कौसल्या भर्तारं निद्राणं मेन इत्याह– रामकीर्तनरसामृततृप्तम् । प्रतितर्क्य, निद्रासाधारणैर्निश्चलत्वादिलक्षणैरूहित्वा । प्रतिरत्र लक्षणवचनः । 'वीप्सायां लक्षणे प्रति' इति यादवप्रकाशः । तर्क वितर्के । वितर्क ऊह उत्प्रेक्षा ॥ ५२ ॥

आहरन् परिजना जनभर्त्तुः[३] कानकेषु करकेषु जलानि ।
वन्दिनः प्रतिववन्दिर एनं कल्य[४] एतदघमप्रतिबुद्ध्य ॥ ५३ ॥

(भा.दी.) आहरन्निति । जनानां भर्ता पोषयिता तस्य दशरथस्य, परिजनाः भृत्यजनाः, कल्यमुषःकालस्तस्मिन्, एतत् मरणलक्षणम्,अघं व्यसनम्, 'दुःखैनोव्यसनेष्वघम्' इति वैजयन्ती, अप्रतिबुध्य अज्ञात्वा, कनकानां विकाराः कानकास्तेषु, सुवर्णमयेष्वित्यर्थः, करकेषु कलशेषु । 'कुटः कुम्भो निपः स्मृतः । कर्करी करकः

१. 'प्रतिबुद्ध्य' २. 'हृदये निदधाना' ३. 'परिजनाः क्षितिभर्तुः' ४. 'काल्य एत–'

प्रोक्तः' इति हलायुधः । जलानि आहरन् आनीतवन्तः । हृञो लङ् । वन्दिनः स्तुतिपाठकाः । एनं दशरथं प्रति ववन्दिरे स्तुतवन्तः । वन्दतेर्लिट् ॥ ५३ ॥

(सं.चं.) कानकेषु कनकनिर्मितेषु करकेषु कमण्डलुषु । 'कमण्डलौ दाडिमे ना करकः' इति मङ्खः । वन्दिनः स्तुतिपाठकाः प्रतिववन्दिरे प्रत्येकं स्वंस्वं स्तुतिपाठमर्पयामासुः । वन्दतिरत्र स्तुतिवचनः । कल्ये उषः-काले । अघं दुःखम् । 'दुःखांहोव्यसनेष्वघम्' इति च । अप्रतिबुद्धय मरणप्रत्यायकं देहशैत्यादिकम-विज्ञाय ॥ ५३ ॥

पादशैत्यमवगम्य हि भर्त्तुः पादसेवनकृतो नृपनार्य्यः ।
आत्मकान्तमुपलभ्य[१] परेतं चुक्रुशुर्न्निजतनूः[२] प्रहरन्त्यः ॥ ५४ ॥

(भा.दी.) पादेति । भर्तुः पत्युः दशरथस्य, पादयोः सेवनं सेवा तत्कर्म कुर्वन्तीति तथोक्ताः, नृपनार्यः दशरथभार्याः, पादयोः शैत्यं शीतत्वं तत् अवगम्य, आत्मनां कान्तं भर्तारं दशरथं परेतं मृतं उपलभ्य ज्ञात्वा, निजा आत्मीया याः तनवस्ताः, प्रहरन्त्यः ताडयन्त्यः सत्यः, चुक्रुशुः उच्चैः रोदनं चक्रुर्हि । क्रुश[३] आह्वाने रोदने च लिट् ॥ ५४ ॥

(सं.चं.) नृपनार्यो नृपभार्याः । परेतं मृतम् । निजतनूः सशिरउरस्ताडं प्रहरन्त्यः ॥ ५४ ॥

तत्र रामजननी प्रतिबुद्धा प्राणनाथमवलोक्य [४]गतासुम् ।
व्याललाप मृदुमङ्गलतां[५] स्वां ताडयन्त्यतितरां ससुमित्रा ॥ ५५ ॥

(भा.दी.) तत्रेति । तत्र स्त्रीणां रोदनसमये, प्रतिबुद्धा प्रबोधं प्राप्ता, ससुमित्रा सुमित्रया सहिता, श्रीरामस्य जननी कौसल्या, प्राणनाथं भर्तारम् । 'प्राणनाथो यमे प्रिये' इति वैजयन्ती । गता असवो यस्य स तथा तम्, अवलोक्य, मृदुम्, स्वां स्वकीयाम्, अङ्गमेव लता ताम्, अतितरां अत्यन्तम्, ताडयन्ती सती, व्याललाप परिदेवनं कृतवती ॥ ५५ ॥

(सं.चं.) तत्र राजान्तःपुरे पृथक् शय्यायां सुप्ता रोदनेन प्रतिबुद्धा रामजननी ससुमित्रा । मृदुं मृद्वीमङ्ग-लताम् । मृदुशब्दस्य उकारान्तत्वात् स्त्रियां वा ङीष् । स्मरति च पाणिनिः–'वोतो गुणवचनात्' (अ.सू.४.१.४४) इति । व्याललाप मृतभर्त्रा सह आलापरूपं विलापं चकार ॥ ५५ ॥

---

२. '–मुपलक्ष्य परेतम्' २. '–र्न्निजतनुम्' ३. 'क्रुश आध्याने–'
४. '–लोक्य परासुम्' ५. 'मृदुलाङ्गलताम्'

हा पते ननु सुतप्रणयी त्वं स्वां तनुं त्यजसि रामवियोगे ।
त्वां च तं च परिहाय न दीर्ण्णं कर्कशं हि कुलिशाद् हृदयं मे ॥ ५६ ॥

(भा.दी.) **हा पत** इति । हा पते दशरथ, त्वं सुते प्रणयः सोऽस्यास्तीति तथा, श्रीरामे प्रीतिमान् ननु? यस्मात् श्रीरामस्य वियोगस्तस्मिन् सति, स्वां तनुं शरीरं त्यजसि । त्वां च, तं च श्रीरामं च, परिहाय परित्यज्यापि, न दीर्णं मे हृदयम्, कुलिशं वज्रं तस्मादपि कर्कशं कठिनं हि ॥ ५६ ॥

(सं.चं.) कुलिशादपि वज्रायुधादपि कठिनम् । 'अस्त्रियौ वज्रकुलिशौ' इति यादवप्रकाशः ॥ ५६ ॥

नन्दनेन रमणेन च हीनां निन्दितां जगति धिग्धिगवीराम् ।
हा विधातरुपयापय पारं मा नृशंस इति नाम लभेथाः ॥ ५७ ॥

(भा.दी.) **नन्दनेने**ति । नन्दनेन श्रीरामेण, रमणो भर्ता तेन च, हीनां रहिताम्, अत एव अवीरां अवीरा-नाम्नीम् । 'अवीरा निष्पतिसुता' इत्यमरः । अत एव जगति निन्दितां मां धिक् धिक् । हा विधातः हे विधे, पारं ममापि जीवितावसानम्, उपयापय प्रापय । त्वम्, नृशंस इति क्रूर इति, नाम आख्याम्, मा लभेथाः न प्राप्नुहि ॥ ५७ ॥

(सं.चं.) धिगित्यात्मकुत्सने । 'धिग् भर्त्सने कुत्सने च' इति यादवप्रकाशः । 'पतिपुत्रवती वीरा' । सा न भवतीत्यवीरा । अस्य जीवितस्य दुःखस्य वा पारमुपयापय अपरतीरं प्रापय ॥ ५७ ॥

राज्यमागतमिदं[१] त्वयि दैवात् सर्वमेव खलु कैकयपुत्रि[२] ।
भुङ्क्ष्व साम्प्रतमकण्टकमेतत् त्वत्सपत्नविलयोऽखिल आसीत् ॥ ५८ ॥

(भा.दी.) **राज्यमि**ति । हे कैकेयपुत्रि, केकयविषयाधिपतेरश्वपतेः पुत्रि, त्वयि दैवं भागधेयं तस्मात्, सर्वमेव (इदं) राज्यं आगतं खलु । साम्प्रतमिदानीम्, न विद्यते कण्टकः क्षुद्रशत्रुर्यस्य तत्तथोक्तम् । 'स्यात्कण्टकः क्षुद्रशत्रौ' इति वैजयन्ती । निरुपद्रवमित्यर्थः । एतद् राज्यम् भुङ्क्ष्व पालय । भुज पालनाभ्यवहारयोर्लोट् । अखिलः समस्तः, तव ये सपत्नास्तेषां विलयो विनाशः, आसीत् ॥ ५८ ॥

(सं.चं.) कण्टकः क्षुद्रोपद्रवः । अकण्टकं निराबाधम् ॥ ५८ ॥

---

१. **'राज्यमानतमिदम्'** २. **'कैकयपुत्र'** । **' हे कैकेयीपुत्र भरत'** इति का.श्री. ।

[१]इत्यहो विलपितं भुवि पन्नं लोठितं च बहु ताडितमङ्गम्[२] ।
स्त्रीशतैः सह हि रामजनन्या तत्र कस्य करुणा न बभूव ॥ ५९ ॥

(भा.दी.) **इतीति** । रामजनन्या कौसल्यया, स्त्रीणां शतानि चतुर्दशशतानि तैः सह, इति एवमादिप्रकारेण विलपितं विलापोऽकारि (हि) । भुवि पन्नं दुःखात् पतितं च, लोठितं दुःखवशादितस्ततः परिभ्रान्तं च, अङ्गं बहु यथा भवति तथा ताडितं (च) । (तत्र) स्त्रीजने, कस्य पुरुषस्य, करुणा दया न बभूव । अहो आश्चर्यम् ॥ ५९ ॥

(सं.चं.) पन्नं गलितमिव सहसा पतितम् । 'ಕುಸಿದುಬಿದ್ದು' इति भाषायाम् । पद्यतेः क्तः । धातोर्दकारस्य निष्ठातकारस्य च नकारः । 'रदाभ्यां निष्ठातो नः पूर्वस्य दः' (अ.सू.८.२.४२) इति । स्त्रीणामर्धसप्तशतैः, रामजनन्या, सुमित्रया च । तत्र तस्मिन् प्रसङ्गे । कस्य वा जनस्य । पुंस्त्वमविवक्षितम् ॥ ५९ ॥

स्त्रीगणं तमपसार्य्य वसिष्ठस्तां च रामजननीमपयाप्य ।
देशकालविदसावधितैलद्रोणि पार्त्थिवतनुं प्रररक्ष ॥ ६० ॥

(भा.दी.) **स्त्रीति** । देशश्च कालश्च तौ वेत्तीति तथोक्तः, देशकालयोः कर्तव्यकार्यविदित्यर्थः, असौ वसिष्ठः, तं तत्रस्थम्, स्त्रीणां गणः समूहस्तम्, अपसार्य निस्सारयित्वा[३], तां रामजननीं कौसल्यां च, अपयाप्य किञ्चिद्दूरं प्रेषयित्वा, तैलेन पूर्णा द्रोणी तैलद्रोणी, तैलद्रोण्यां अधि अधितैलद्रोणि । विभक्त्यर्थेऽव्ययीभावः । तत एवाव्ययत्वं च । तैलपूर्णमञ्जूषायामित्यर्थः । पार्थिवस्य तनुः शरीरम्, तां प्रररक्ष रक्षितवान् । रक्ष पालने लिट् । संस्कारकर्तुः कस्याप्यभावाद् भरतागमनपर्यन्तमेवं ररक्षेत्यर्थः ॥ ६० ॥

(सं.चं.) अधितैलद्रोणि तैलद्रोण्याम् । पार्थिवतनुं प्रररक्ष प्रक्षिप्य ररक्ष । यावद् भरतागमनं बहून्यहानि रक्षणीयमिति च प्रररक्षेत्याह । दीर्घकालरक्षणं हि प्ररक्षणम् ॥ ६० ॥

रामं रम्यं मरतकमणिश्यामलं कोमलाङ्गं
स्मेरं वीरं मणिघृणिकनत्कुण्डलोल्लासिगण्डम् ।

---

१. **'इत्यहो प्रलपितम्'** २. **'लोटितं च बहु ताडितमङ्गे'**

३. **'निस्सार्य'** इति पर्याप्तम् ।

कौसल्या स्वं तनयमुदितं चित्तपद्मे दयालुं
सान्त्वार्थं वा सपदि समुपाश्लिष्य शोकं मुमोच ॥ ६१ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
अयोद्ध्याकाण्डे दशमः सर्ग्गः ॥

—०—

(भा.दी.) राममिति । कौसल्या रम्यम्, मरतकश्चासौ मणिश्च मरतकमणिः इन्द्रनीलरत्नम्, तद्वच्छ्यामलम्, कोमलं सुकुमारमङ्गं यस्य स तथा तम्, स्मेरं मन्दस्मितोपेतम्, वीरम्, मणीनां रत्नानां घृणयो दीप्तयः, ताभिः कनती, ज्वलती, ये कुण्डले मकरकुण्डले, ताभ्यामुल्लासिनौ शोभमानौ गण्डौ यस्य स तथा तम्, चित्तमेव पद्मं तस्मिन्, सान्त्वार्थं वा, शोको न कार्य इत्यादि सान्त्ववचनानि वक्तुमिव । 'वा विकल्पोपमानयोः' इत्यमरः । उदितं स्मरणेन तथाऽविर्भूतम्, दयालुं दयाशीलम्, स्वं स्वकीयं तनयं पुत्रं श्रीरामम्, सपदि समुपाष्लिष्य, मनसैवाऽलिङ्गनं कृत्वा, पतिमरणादिनिमित्तो यः शोकस्तं मुमोच नाशयामासेत्यर्थः । मुच्लृ मोक्षणे लिट् ॥ ६१ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां
भावार्थदीपिकायामयोध्याकाण्डे दशमः सर्गः ॥

—०—

(सं.चं.) मन्दाक्रान्तयोपसंहरति– रामं रम्यम् । मरतकमणिवत् श्यामलवर्णम् । मरकतमिति पठन्तो भ्रान्ता इति साधितमन्यत्र । कुण्डले खचितानां मणीनां घृणिभिः किरणैः कनती कमनीये कुण्डले । 'कुण्डलं कर्णविष्टनम्' इत्यभिधानम् । ताभ्यां गण्डप्रान्ते प्रचलद्भ्यामुल्लासिनौ मुदिताविव क्रीडन्ताविव लसितौ गण्डौ गल्लौ यस्य तम् । चित्तपद्मे उदितमाविर्भूतं स्वं तनयं मनसैव समुपाश्लिष्य । समिति गाढम्, पुत्रस्नेहेनोपचितमधिकं यथा स्यात् तथा आश्लिष्य । 'उपान्तिकेऽधिके' इति यादवप्रकाशः । पतिमृतिजं शोकं मुमोच जहौ । तस्याश्चित्ते रामप्रादुर्भावस्य बीजं कविरुत्प्रेक्षते– सान्त्वार्थं वा । दुःखितां मातरं सान्त्वयितुमिव ॥ ६१ ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायायोध्याकाण्डे
दशमसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– ८८०+६१=९४१]

एकादशः सर्ग्गः

वैनतेयोदये प्राप्ते वैनतेयध्वजप्रियाः ।
ब्राह्मणा राज्यकर्त्तारः[१] सभां प्रापुः ससङ्कटाः ॥ १ ॥

(भा.दी.) श्रीरामपितुर्मरणोत्तरदिवसे सञ्जातां जनानां प्रवृत्तिं दर्शयति– **वैनतेये**ति । विनताया अपत्यं पुमान् वैनतेयोऽरुणस्तस्योदयस्तस्मिन् प्राप्ते सति । वैनतेयो गरुडो ध्वजो यस्य स तथा तस्य श्रीहरेः प्रियाः, राज्यकर्तारः राज्याधिपत्यकर्तारः ब्राह्मणाः, सङ्कटेन दशरथनिमित्तक्लेशेन सहिताः सन्तः सभां प्रति प्रापुः । आप्लृ व्याप्तौ लिट् ॥ १ ॥

(सं.चं.) वैनतेयोदये अरुणोदये प्राप्ते । वैनतेयध्वजस्य गरुडध्वजस्य विष्णोः प्रिया भक्ताः । वैनतेयध्वजश्च प्रियस्तेषाम् । 'वैनतेयस्तु गरुडे स्यात् प्रभाकरसारथौ' । वैनतेयोदय इति प्रौढिवादोऽयम् । वस्तुतस्तु वैनतेयोदये राजमरणवार्ता श्रुता । ततः सूर्योदये ब्राह्मणाः सभां प्रापुः । तेन वैनतेयोदयपदेन सूर्योदयो लक्ष्यते । अथवैवं व्याख्येयम् । वैनतेयोदये प्राप्ते दुरन्ते, तन्निमित्तं ततः सूर्योदये सति ब्राह्मणाः सभां प्रापुरिति । 'व्यतीतायां तु शर्वर्यामादित्यस्योदये ततः । समेत्य राज्यकर्तारः सभामीयुर्द्विजातयः' (६७.२) इति च । राज्यकर्तारः राज्याधिकृता राजकार्यनिर्वोढारः । ससङ्कटाः शोकव्याकुलाः ॥ १ ॥

मार्क्कण्डेयो वामदेवो मौद्गल्यः[२] काश्यपो मुनिः ।
कात्यायनो[३] गौतमश्च जाबालिरिति सद्गुणाः[४] ॥ २ ॥

पुरोहितं पुरोधाय वसिष्ठं सममन्त्रयन्[५] ।
रामे वनं गते राज्ञि स्वर्ग्गते कार्य्यमत्र किम्[६] ॥ ३ ॥

---

१. **'राज्यकर्तारः राज्यस्य परिपालनविषये युक्तायुक्तविचारकर्तारः, सङ्कटेन धर्मकृच्छ्रेण सह वर्तमानाः ससङ्कटाः'** इति का.श्री. । **'राजभर्तारः'** इति भ्रान्तः पाठः ।

२. **'मौद्गलः काश्यपो–'** । **'मौद्गल्यः कश्यपो–'** इति क्वचित् ।

३. **'कात्यायनो–'**

४. **'सद्गणाः'**

५. वि.ती. रीत्याऽत्र श्लोकसमाप्तिः । तत्पक्षे षट्चरणेयमनुष्टुप् ।

६. **'कृत्यमत्र किम्'**

क्षित्यामराजकायां[१] स्युर्दोषाः सर्वभयङ्कराः ।
भरतः सानुजस्तस्मादानेतव्यो गिरिव्रजात् ॥ ४ ॥

(भा.दी.) मार्कण्डेय इति । मार्कण्डेयः मार्कण्डेयनामको मुनिः । वामदेवः मौद्गल्यः काश्यपः कात्यायन-नामकः गौतमनामकः जाबालिनामक इति प्रसिद्धाः, सन्तो गुणा येषां ते तथोक्ताः मुनयः, पुरोहितं वसिष्ठं पुरोधाय पुरस्कृत्य सममन्त्रयन् आलोचितवन्तः । मत्रि गुप्तभाषणे लङ् । **राम** इति । श्रीरामे वनं प्रति गते सति, राज्ञि दशरथे स्वः गतः स्वर्गतः तस्मिन्, स्वर्गं प्रति गते सतीत्यर्थः । अत्र अयोध्यायां कर्तुमर्हं कार्यं किम्, अस्माभिरिति शेषः । यस्मात् क्षित्यां भूमौ, न विद्यते राजा यस्याः सा अराजका तस्यां सत्याम्, सर्वेषां जनानां भयं कुर्वन्तीति तथोक्ताः, दोषाः परस्परहननद्रव्यापहरणादयो दोषाः स्युः भवेयुः । अस्तेर्लिङ् । तस्मात् कारणात् अनुजेन शत्रुघ्नेन सहितो भरतः, गिरीणां व्रजं समूहो यस्मिन् स तथोक्त-स्तस्मात्, केकयदेशादित्यर्थः, आनेतव्यः । [२]वसिष्ठः एवं तैः मुनिभिः सह निश्चित्य राजामात्यान् राजमन्त्रिणः समादिशत् ॥ २–४ ॥

(सं.चं.) मार्कण्डेयः । 'मार्कण्डेयोऽथ मौद्गल्यः वामदेवश्च काश्यपः । कात्यायनो गौतमश्च जाबालिश्च महायशाः' (६७.३) इति च । इति सप्त सद्गुणाः पुरोहिताः । अत्र सङ्कटे किमस्माभिः कार्यमिति समेत्या-मन्त्रयन् । सम्मन्त्र्य किं निरचैषुः? आह– क्षित्यामराजकायाम् । गिरिव्रजात् केकयराजधानीतः ॥ २–४ ॥

वसिष्ठ एवं निश्चित्य राजामात्यान् समादिशत् ।
भोभो विजय सिद्धार्थ जयन्ताशोक गच्छत ॥ ५ ॥

आयातु भरतस्तूर्णं मदाज्ञेति[३] निवेद्यताम् ।
अयं[४] रामविवासश्च[५] राज्ञो मृत्युश्च नोच्यताम् ॥ ६ ॥

वासोरत्नधनाकल्पा दीयन्तां कैकयाय च ।
कथयित्वेति पाथेयं दत्वा दूतानयातयत्[६] ॥ ७ ॥

१. **'क्षित्यामरक्षकायाम्'** २. उत्तरश्लोकपूर्वार्धस्य व्याख्यानमिदम् । ३. **'ममाऽज्ञेति'** इति वि.ती.पाठः स्यात् ।
४. **'अथ राम–'** ५. **'–विवासश्च वोच्यतां शोककारणम् ।'** ६. **'दूतानयापयत्'** । वि.ती. रीत्याऽयमपि षट्चरणः श्लोकः ।

(भा.दी.) भो इति । भो विजय हे विजयनामक, सिद्धार्थनामक, जयन्तनामक, अशोकनामक, यूयं केकयविषयं प्रति गच्छत । भरतः तूर्णं यथा भवति तथा आयातु । इति मम आज्ञा निवेद्यतां विज्ञाप्यताम् । अयमिति । अयं वृत्तः रामस्य विवासो विदेशवासश्च, राज्ञः मृत्युश्चेत्युभयम्, नोच्यताम् । केकयाय केकयदेशाधिपतये [१]युधाजिते, वासांसि च, रत्नानि च, धनानि च, आकल्पा आभरणानि च, दीयन्तां प्रदीयन्ताम् । वसिष्ठः इति दूतान् प्रति कथयित्वा, पथः सम्बन्धि पाथेयम्, मार्गगमनसमये व्ययाय युक्तद्रव्यमित्यर्थः, दत्वा दूतान् सन्देशहारान् विजयसिद्धार्थादीन् । 'स्यात् सन्देशहरो दूतः' इत्यमरः । अयातयत् प्रेषयामास । यत निकरोपस्कारयोः लङ् । अयापयदिति क्वचित्पाठः ॥ ५–७ ॥

(सं.चं.) एवं मार्कण्डेयादिभिर्मन्त्रालोचनफलतया वसिष्ठः कार्यं निश्चित्य । विजयः सिद्धार्थः जयन्तोऽशोक इतीमांश्चतुरोऽमात्यान् । 'एहि सिद्धार्थ विजय जयन्ताशोकनन्दन' (६८.५) इति च । अशोकनन्दन इत्यशोकस्यैव नामधेयम् । 'अशोको मन्त्रपालश्च सुमन्त्रश्चाष्टमोऽभवत्' (७.३) इति बालकाण्डवचनात् । गच्छत केकयराजधानीम् । इयं मदाज्ञेति भरताय निवेद्यताम् । रामविवासः नोच्यताम् । दशरथस्य मृत्युश्च नोच्यतामिति प्रत्येकमन्वयः । कैकयायाश्वपतये युधाजिते च । आकल्पा मण्डनान्याभरणानि । 'आकल्पो भूषणं वेषः' इत्यभिधानम् । पाथेयं पथि व्ययार्थं यद् धनं दीयते । 'पाथेयं सम्बळं स्मृतम्' इति च । दूतान् सन्देशहरान् मन्त्रिणः ॥ ५–७ ॥

वसिष्ठेन गरिष्ठेन त्वरितं प्रेषितास्ततः ।
ते हस्तिनपुरे गङ्गां तीर्त्वा प्रत्यङ्मुखा ययुः[२] ॥ ८ ॥

(भा.दी.) ततः गरिष्ठेन श्रेष्ठेन वसिष्ठेन प्रेषिताः ते दूताः, हस्तिनाख्यं यत्पुरं तस्मिन् गङ्गां तीर्त्वा, प्रत्यक् मुखं येषां ते तथा, पश्चिमाभिमुखाः सन्त इत्यर्थः, त्वरितं यथा भवति तथा ययुः ॥ ८ ॥

(सं.चं.) गङ्गां यमुनां च तीर्त्वा प्रत्यङ्मुखाः पश्चिमाभिमुखा ययुः । रामायणे च–'ते हस्तिनपुरे गङ्गां तीर्त्वा प्रत्यङ्मुखा ययुः' (६८.८) इत्येव पठ्यते । 'हस्तिनपुरे' इत्यर्वाचीनः पाठः, रामायणे च, सङ्ग्रहरामायणे च । राजपुरोधसां वरिष्ठेन ॥ ८ ॥

अतीत्य पाञ्चालकुरूनिक्षुमत्यादिका नदीः ।
बाह्लीकानतिगत्याऽपुः[३] केकयान् सप्तमे दिने ॥ ९ ॥

---

१. **'अश्वपतये'** इति वक्तुमुचितम् । २. **'अगुः'** ३. **'बाह्लीकानप्यतीत्याऽपुः'** इति, **'बाह्लीकानतिगम्याऽपुः'** इति च ।

(भा.दी.) अतीत्येति। पाञ्चालाः पाञ्चालाख्यदेशास्ते च, कुरवः कुरुनामकदेशास्ते च तान् अतीत्य, इक्षुमती इक्षुमतीनाम्नी आदिर्यासां तास्तथोक्तास्ता नदीश्च, अतीत्य अतिक्रम्य बाह्लीकान् बाह्लीकनामविषयान् अतिगत्य अतीत्य, केकयान् केकयविषयान्, सप्तमे दिनं दिवसस्तस्मिन् आपुः ययुः ॥ ९ ॥

(सं.चं.) बाह्लीकान् जनपदान्। 'ಬಂಜಾರ್' इति भाषायाम् ॥ ९ ॥

यां रात्रिं तत्र ते यातास्तामेव भरतोऽप्यथ।
[१]दुःस्वपमवलोक्याभूच्छोकाकुलितमानसः ॥ १० ॥

(भा.दी.) यामिति। अथ ते दूताः, यां रात्रिं यस्यां रात्रौ, तत्र केकयदेशे याताः, भरतोऽपि तामेव रात्रिं तस्यां रात्रौ, दुष्टश्चासौ स्वप्नश्च दुःस्वप्नस्तम्, 'दुरशोभनदुःखयोः' इति वैजयन्ती, अवलोक्य, शोकेन आकुलितं मानसं मनो यस्य स तथा अभूत् ॥ १० ॥

(सं.चं.) यां रात्रिं यस्यां रात्र्याम्। तामेव रात्रिं तस्यामेव रात्र्याम्। 'यामेव रात्रिं ते दूताः प्रविशन्ति स्म तां पुरीम्। भरतेनापि तां रात्रिं स्वप्नो दृष्टोऽयमप्रियः' (६९.१) इति च। सप्तम्यर्थे द्वितीया छान्दसीत्येके। अत्यन्तसंयोगे द्वितीयेति बहवः। समग्रां रात्रिं प्रयाय प्रातर्गिरिव्रजमापुरित्यर्थः। भरतोऽपि प्रातरन्तं दुःस्वप्नान् ददर्शेति ॥ १० ॥

सागरं शुष्कमद्राक्षीच्चन्द्रं च पतितं भुवि।
रक्तमाल्यं स्वपितरं[२] गोमये मुक्तमूर्द्धजम् ॥ ११ ॥

पिबन्तं तैलमसकृद्धसन्तं[३] खरवाहनम्।
स्थितं कार्ष्णायसे पीठे कृष्णवस्त्रं तमैक्षत[४] ॥ १२ ॥

(भा.दी.) स्वप्नदर्शनप्रकारं दर्शयति– **सागरमि**त्यादिना। सागरः समुद्रस्तं शुष्कं निरुदकं अद्राक्षीत् ददर्श, दृशिर् प्रेक्षणे लुङ्। चन्द्रं च भुवि पतितमद्राक्षीत्। स्वपितरं दशरथं रक्तं माल्यं माला यस्य स तथा तम्, गोपुरीषं गोमयं तस्मिन्, तस्य पुरीषमिति[५] मयट्, मुक्तो विकीर्णो मूर्द्धजः कचभारो यस्य

१. '**दुःस्वप्नानव–**' २. '**रक्तमाल्यं च पितरम्**' ३. '**–कृद् वहन्तम्**' इति वि.ती.पाठः। अर्थस्तु न स्वरसः।
४. '**कृष्णवस्त्रं समैक्षत**' ५. तथाहि पाणिनिः–'**गोश्च पुरीषे**' (४.३.१४५) इति।

स तथा तम्, तिलेभ्य उत्पन्नं तैलं तत् असकृत् बहुवारं पिबन्तम्, खर एव गर्दभ एव वाहनं तत् वहन्तं आरूढम्, कृष्णायसः विकारः कार्ष्णायसं तस्मिन् पीठे स्थितम्, कृष्णं नीलं वस्त्रं यस्य स तथा तं ऐक्षत ॥ ११–२ ॥

(सं.चं.) गोमये पतितम् । असकृत् तैलं पिबन्तम्, पायम्पायं हसन्तम् ॥ ११–३ ॥

दुःस्वप्नेनाऽकुलः प्रातः प्राप्तान् दूतान् पदे नतान् ।
सर्वान् कुशलिनोऽपृच्छद् भरतो भयविक्लबः ॥ १३ ॥

(भा.दी.) **दुरि**ति । दुष्टश्चासौ स्वप्नश्च दुस्स्वप्नस्तेन आकुलः सम्भ्रान्तः, भयेन विक्लबः उद्विग्नः परवशः, भरतः प्रातः प्रातःकाले प्राप्तान्, पदं पादस्तस्मिन् नतान् दूतान् प्रति, सर्वान् बन्धून् कुशलं क्षेमं एषामस्तीति तथोक्तास्तान् अपृच्छत् विचारितवान् । प्रच्छ जिज्ञासायां लङ् ॥ १३ ॥

सर्वान् कुशलिनः प्रोच्य[१] दूतास्ते पुनरब्रुवन् ।
कृत्यमात्ययिकं[२] कर्त्तुमाह्वानं तत् पुरोधसः[३] ॥ १४ ॥

(भा.दी.) **सर्वानि**ति । ते दूताः सर्वान् बन्धून् कुशलिनः प्रोच्य, पुनः अत्ययोऽनन्तरं विद्यमानमात्ययिकम्, दशरथमरणानन्तरं विद्यमानं संस्कारादिकमित्यर्थः, कृत्यं कार्यं तत् कर्तुं पुरोधसः वसिष्ठस्य आह्वानं आह्वानमात्रं तत् अब्रुवन् । न पुनर्दशरथमरणादिकं प्रोचुरित्यभिप्रायः ॥ १४ ॥

(सं.चं.) आत्ययिकम् । 'त्वरमाणश्च निर्याहि कृत्यमात्ययिकं त्वया' (७०.३) इति च । कालात्ययं प्राप्तमात्ययिकम् । सद्यः कर्तव्यमिति माधवयोगी । अत्ययो नाशः । नाशप्रयोजनकमात्ययिकम् । दुरितादिनाशार्थं सद्यः करणीयं प्रायश्चित्तादिकमित्यन्ये । अत्यय इति कृच्छ्रमुच्यते । तेनाऽत्ययिकं कृच्छ्रसाध्यं दुष्करमिति गोविन्दराजीयं विवरणं तु न श्लिष्यति । सर्वथा कालातिक्रमासहं सद्यः करणीयं कर्म पदार्थः ॥ १४ ॥

मातामहं मातुलं च गुरुं चाऽपृच्छ्य सत्वरः ।
धनं च मातुलप्रत्तं सैन्यं चाऽदाय यातवान् ॥ १५ ॥

१. **'प्रोचुर्दूतास्ते'**

२. **'कृत्यमत्यधिकम्'** । **'आत्ययिकम्, अत्ययानन्तरं विद्यमानं दशरथमरणानन्तरमपि विद्यमानं संस्कारादिकमित्यर्थः'** इति वि.भू. । नातिस्वरसम् । तस्य सम्प्रत्यनुद्घाटनीयत्वात् । **'कृत्यमभ्यधिकम्'** इति कचित् ।

३. **'त्वत्पुरोधसः'** इति भ्रान्तः पाठः ।

(भा.दी.) मातामहमिति । त्वरया सहितः सत्वरः भरतः, मातामहं मातुः पितरं अश्वपतिनामानम्, मातुलं युधाजिन्नामानं मातुर्भ्रातरं च, गुरुं स्वस्य विद्याभ्यासकर्तारं गुरुं च आपृच्छ्य आमन्त्र्य, मातुलेन युधाजिता प्रत्तं दत्तं तत् धनं च सैन्यं च आदाय यातवान् अयोध्यां प्रति प्रस्थानं चक्रे ॥ १५ ॥

(सं.चं.) मातामहमश्वपतिम् । मातुलं युधाजितम् । तत्र भरतशत्रुघ्नयोर्यो गुरुरासीत् तं च । केकयराजगुरुं वा । मातुलेन च प्रत्तं दत्तम् । दाञ् दाने । 'अच उपसर्गात् तः' (अ.सू.७.४.४७) । चकारेण मातामहप्रत्तं च धनम् । मातुलप्रत्तमिति विशिष्योल्लेखेन स तदा युवराज आसीदिति सूचयाम्बभूव ॥ १५ ॥

[१]शतद्रुवेदधामादिनदीस्तीर्त्वाऽथ सत्वरः ।
देशानतीत्य विविधान् सप्तमेऽह्नि पुरं ययौ ॥ १६ ॥

(भा.दी.) शुतुद्रीति[२] । अथ सत्वरः भरतः, शुतुद्रिश्च[३] वेदधामा च ते आदी यासां तास्तथा, ताश्च ता नद्यश्च ताः तीर्त्वा, विविधान् देशान् अतीत्य, सप्तमं अहः दिवसस्तस्मिन्, पुरमयोध्यापुरं तत् ययौ ॥ १६ ॥

(सं.चं.) शतद्रुः सिन्धुसङ्गमनी नदी । यां शतद्रूः, शुतुद्रिः, शुतुद्रीति बहुधा वदन्ति । 'सत्लेज्' इति पाश्चात्यं नाम । 'शतद्रुमतरच्छ्रीमान्नदीमिक्ष्वाकुनन्दनः' (७१.२) इति वाल्मीकिः । 'इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या' इति श्रुतिः । शतधा द्रवणात् शतद्रुः शतुद्रूर्वा । वर्णव्यत्ययेन शुतुद्रिः शुतुद्री वा । तथाहि महाभारते– 'शतधा विद्रुता यस्माच्छतद्रुरिति विश्रुता' इति । वेदधामाख्या चापरा नदी ॥ १६ ॥

अप्रहृष्टजनां पश्यन्नप्रहृष्टमनाः पुरीम् ।
भरतो भयसम्भ्रान्तो[४] जनन्यन्तःपुरं ययौ ॥ १७ ॥

(भा.दी.) अप्रहृष्टेति । प्रहृष्टा न भवन्तीत्यप्रहृष्टाः तादृशा जना यस्यां सा तथा तां पुरीं पश्यन्, अत एव अप्रहृष्टमसन्तुष्टं मनो यस्य स तथा, भरतः भयसम्भ्रान्तः सन्, जनन्याः मातुः कैकेय्याः अन्तर्विद्यमानं पुरं मन्दिरं अन्तःपुरं ययौ ॥ १७ ॥

(सं.चं.) अनिष्टाशङ्काजनितेन भयेन सम्भ्रान्तो व्याकुलः ॥ १७ ॥

कैकेयी सुतमालोक्य चिरप्रोषितमागतम् ।
उत्थायाऽश्लिष्य पप्रच्छ बन्धूनां कुशलं मुदा ॥ १८ ॥

---

१. 'शुतुद्रिवेदधामादि–' । 'शुतुद्र-' इति च । २. 'शतद्रुविति' ३. 'शतद्रुश्च' ४. '–भ्रान्तो मातुरन्तःपुरम्'

(भा.दी.) कैकेयीति । कैकेयी चिरं प्रोषितः प्रवासस्थस्तम्, आगतं सुतं भरतं आलोक्य, आसनादुत्थाय, आश्लिष्य च बन्धवो युधाजिदादयस्तेषां कुशलं क्षेमं तत्, मुत् सन्तोषस्तया पप्रच्छ ॥ १८ ॥

(सं.चं.) चिरं प्रोषितम्, प्रकृष्टदूरमुषितम्, प्रवासगतम् । बन्धूनामश्वपत्यादीनाम् । अधिकारदुराशया भर्तृमरणदुःखमपि विस्मृत्य मुदा पप्रच्छ ॥ १८ ॥

भरतस्तान् कुशलिनः प्रोच्य पप्रच्छ मातरम् ।
कुत्राऽस्ते मे पिता तस्य वन्देय चरणाविति ॥ १९ ॥

(भा.दी.) भरत इति । भरतः तान् पृष्टान् बन्धून्, कुशलं क्षेममेषामस्तीति कुशलिनस्तान् प्रोच्य, मे पिता दशरथः कुत्र आस्ते? तस्य चरणौ अहं वन्देय अभिवादयेयम्, इति मातरं पप्रच्छ ॥ १९ ॥

(सं.चं.) तान् केकयदेशगतान् बन्धून् प्रोच्य प्रथमं मातुः प्रश्नस्योत्तरमुक्त्वा ॥ १९ ॥

तात[१] ते स्वर्ग्गतस्तातो यज्वा विपुलदक्षिणः ।
इति [२]मात्रुक्तिबाणेन भरतो मूर्च्छितोऽपतत् ॥ २० ॥

(भा.दी.) तातेति । हे तात भरत, यज्वा यज्ञशीलः, विपुला भूयसी दक्षिणा यस्य स तथोक्तः, बहुदक्षिणाप्रद इत्यर्थः, ते तव पिता स्वः स्वर्गं प्रति गतः प्राप्तः । भरतः इति मातुः कैकेय्या उक्तिर्वाक् सैव बाणस्तेन मूर्छितः सन् अपतत् ॥ २० ॥

(सं.चं.) 'तात' इति प्रीतिसम्बोधनम् । यथा '७ड्ढ' इति भाषायाम् । 'तातोऽनुकम्प्ये पितरि' इति हैमः । इयांस्तु विशेषः । अवरस्य प्रीतिपात्रस्य सम्बोधनमात्रे 'तात' इति प्रयुज्यते । नान्यासु विभक्तिषु । नहि ममायं प्रीतिपात्रं पुत्र इत्यर्थे 'ममायं तातः' इति प्रयोगो युज्यते ॥ २०–१ ॥

कैकेय्योत्थापितः सञ्ज्ञां सम्प्राप्य पुरुषर्षभः ।
रुदन् बाष्पाभिपूर्णाक्षो[३] विलप्येदं वचोऽब्रवीत् ॥ २१ ॥

(भा.दी.) कैकेय्येति । कैकेय्या उत्थापितः पुरुषर्षभः भरतः सञ्ज्ञां सम्प्राप्य, रुदन् सन्, बाष्पेण अश्रुणा अभिपूर्णे अक्षिणी यस्य स तथा सन्, विलप्य परिदेवनं कृत्वा, इदं वक्ष्यमाणं वचः अब्रवीत् ॥ २१ ॥

---

१. **'तातस्ते स्वर्गतस्तात यज्वा'** २. **'मात्रोक्तिबाणेन'** ३. **'बाष्पाम्बुपूर्णाक्षो–'**

अभिषेक्ष्यति मे तातो[१] नूनं रामं ममाग्रजम् ।
इत्यहं[२] हर्षितः प्राप्तो मन्दभाग्यो[३] महापदे ॥ २२ ॥

(भा.दी.) अभीति । मे तातः दशरथः मम अग्रजं ज्येष्ठं श्रीरामं नूनं अभिषेक्ष्यति यौवराज्येऽभिषेकं करिष्यति । षिच सेचने लृट् । इति हर्षितः सन्तुष्टः प्राप्तः, मन्दं स्वल्पं भाग्यं यस्य स तथा, अहं महती च सा आपच्च तस्यै, बहळकष्टानुभवायेत्यर्थः, प्राप्तोऽस्मि ॥ २२ ॥

(सं.चं.) अभिषेकस्मरणेनैव हर्षं प्रापितः । रामाभिषेकदर्शनायेति प्राप्त आगतः । प्रत्युत सम्प्रति महत्या आपदे प्राप्तः ॥ २२–३ ॥

ज्येष्ठाय सर्वश्रेष्ठाय रामाय स्वामिने मम ।
कृपाकराय गुरवे ब्रूहि मां दासमागतम् ॥ २३ ॥

(भा.दी.) ज्येष्ठेति । ज्येष्ठाय अग्रजाय, सर्वेभ्यः श्रेष्ठाय, मम स्वामिने, कृपाया आकर आश्रयस्तस्मै, गुरवे श्रीरामाय दासं मां आगतं ब्रूहि ॥ २३ ॥

भवापदो[४] विनश्यन्ति [५]यत्पादाम्बुजसेवया ।
तस्य रामस्य नाथस्य कुर्य्यां पादाभिवन्दनम् ॥ २४ ॥

(भा.दी.) भवेति । यस्य श्रीरामस्य पादौ तावेवाम्बुजे तयोः सेवा तया, भवः संसारस्तस्य आपदः क्लेशाः विनश्यन्ति । नश अदर्शने लट् । नाथस्य तस्य श्रीरामस्य पादयोरभिवन्दनं नमस्कारस्तत् कुर्यां करवाणि । कृञो लिङ् ॥ २४ ॥

(सं.चं.) भवे संसारे भवस्य वा या आपदः ॥ २४ ॥

पिता दैत्यविदारी मे मारितः केन हेतुना ।
चरमं व्याहृतं तस्य किं च तत् कत्थ्यतामिति ॥ २५ ॥

---

१. 'मे मातर्नूनम्' २. 'इत्येवं हर्षितः' ३. '–भाग्योऽहमापदे'
४. '–पदोऽपि नश्यन्ति' ५. 'यत्पदाम्भोज–'

(भा.दी.) पितेति । दैत्यान् विदारयितुं शीलमस्यास्तीति दैत्यविदारी, दैत्यविनाशक इत्यर्थः, मे पिता केन हेतुना केन कारणेन मारितः मृतः? तस्य दशरथस्य चरमं अवसानकाले विद्यमानं व्याहृतं वचनं (च) किं कीदृशम्? मरणसमये किमुक्तमित्यर्थः । तत् पृष्टं समस्तं त्वया कथ्यताम् । कथ वाक्यप्रबन्धे लोट् । इति अब्रवीत् ॥ २५ ॥

(सं.चं.) केन हेतुना केन व्याधिना? कारणान्तरेण वा? तत् कथ्यताम् । मरणकाले तस्य चरमवाक्यं किम्? तच्च कथ्यताम् ॥ २५ ॥

रामं ससीतं द्रक्ष्यन्ति धन्याः सिद्धार्थमागतम् ।
हा रामेत्युत्तरं वाक्यं तस्येत्यम्बा तमब्रवीत्[1] ॥ २६ ॥

(भा.दी.) राममिति । धन्याः पुण्यवन्तः, सिद्धः निष्पन्न अर्थः प्रयोजनं यस्य स तथा तम्, साधिताभिप्रायमित्यर्थः, आगतं पुरमागतं ससीतं श्रीरामं द्रक्ष्यन्ति, हा राम इति (तस्य दशरथस्य) उत्तरं जीवितावसाने भवं वाक्यम्, मरणकालीनदशरथवाक्यम्, इति अम्बा माता तं भरतं अब्रवीत् ॥ २६ ॥

(सं.चं.) सिद्धार्थः निर्वर्तितप्रतिज्ञः । उत्तरं वाक्यं चरमवाक्यम् ॥ २६ ॥

मम नाथो जगन्नाथः ससीतः कुत्र वर्त्तते ।
इति पप्रच्छ भरतो महादुःखाग्निशङ्कया ॥ २७ ॥

(भा.दी.) ममेति । जगन्नाथः ससीतः मम नाथः श्रीरामः कुत्र वर्तते? भरतः महद्दुःखं तदेवाग्निस्तस्य शङ्कया इति पप्रच्छ ॥ २७ ॥

(सं.चं.) तर्हि रामः क्व गत इति पृच्छति– मम नाथः । महादुःखं रामविप्रयोगाख्यम् । तदेवाग्निः । तस्य शङ्कया ॥ २७ ॥

रामः ससीतासौमित्रिश्चीरी वनमितो गतः ।
इत्युवाच प्रियं मत्वा कैकेयी तस्य विप्रियम् ॥ २८ ॥

(भा.दी.) राम इति । सीता चासौ सौमित्रिश्च ताभ्यां सहितः श्रीरामः, चीरमस्यास्तीति तथा सन्, इतः अयोध्यायाः वनं प्रति गतः, इति तस्य भरतस्य विप्रियं अप्रियं वचः प्रियमिति मत्वा कैकेयी उवाच ॥ २८ ॥

१. 'ततोऽब्रवीत्'

(सं.चं.) चीरी चीरवसनः। तस्य विप्रियमपि राज्यलाभलोभेन प्रियं स्यादिति मत्वा ॥ २८–३० ॥

विवासः श्रीनिवासस्य कस्माद्धेतोरजायत ।
अनवद्यस्य तस्येति पप्रच्छ भरतोऽथ ताम् ॥ २९ ॥

(भा.दी.) **विवास** इति। अथ भरतः, न विद्यते अवद्यं पितृवैमनस्यादिदोषो यस्य स तथा तस्य, श्रियो निवास आवासभूतस्तस्य, तस्य श्रीरामस्य, विवासः वनवासः कस्मात् हेतोः अजायत? जनी प्रादुर्भावे लङ्। इति तां कैकेयीं पप्रच्छ ॥ २९ ॥

[1]इत्याकुलतरं पुत्रं कैकेयी वाक्यमब्रवीत् ।
सत्यं रामोऽनवद्यात्मा चन्द्रवद् रञ्जयन् प्रजाः ॥ ३० ॥

[2]तस्योद्यतेऽभिषेकेऽत्र [3]कृतवत्यस्मि ते हितम् ।
रामस्य तु वने वासं राज्ये त्वदभिषेचनम् ॥ ३१ ॥

(भा.दी.) **इतीति**। इत्येवं अतिशयेन आकुल इत्याकुलतरस्तम्, पुत्रं भरतं प्रति कैकेयी, श्रीरामः, न विद्यते अवद्यं दोषो यस्य स तथोक्तस्तादृश आत्मा स्वभावो यस्य स तथा, चन्द्रवत् प्रजाः रञ्जयन् सन्तोषयन् इत्येतत् सत्यं यथार्थम्। अत्र अयोध्यायां तस्य श्रीरामस्य, अभिषेको यौवराज्याभिषेकस्तस्मिन् उद्यते सति, कर्तुमारब्धे सति, श्रीरामस्य वने वास आवासस्तम्, राज्यं साम्राज्यं तस्मिंस्तु, त्वदभिषेचनं तव अभिषेचनम्, इति ते हितं द्वयं अहं कृतवती अस्मि। इति वाक्यं वचः अब्रवीदिति सम्बन्धः ॥ ३०–३१ ॥

(सं.चं.) तस्य रामस्य, अत्र अयोध्यायाम्, अभिषेक उद्यते प्रारब्धे। अहं तु ते हितमिति। प्रियं स्यात्, मा भूद् वा, किन्तु हितमिति रामस्य वने वासं राज्ये त्वदभिषेचनं च वरबलेन कृतवती साधितवती। तुना रामस्य प्रजारञ्जकत्वं नाम विशेषमाह। अत एव त्वदभिषेचनस्य प्रत्यूहो मा भूदिति तस्य वने वासं वरमवृषि। वृत्वा च ते हितं कृतवती। अहो, अजानन्त्येव कैकेयी दैवचोदितेव तथ्यमाह–ते अहितमिति ॥ ३१–२ ॥

आत्माज्ञया वनं याते सीतासौमित्रिसंयुते ।
[4]रामे हा रामरामेति राजा शोकाद् दिवं गतः ॥ ३२ ॥

---

१. 'अत्याकुल–' २. 'तस्योद्यतोऽभिषेकोऽत्र' ३. 'वृतवत्यस्मि' ४. 'हा राम रामरामेति'

(भा.दी.) श्रीरामस्य वनवासनिमित्तमुक्त्वा दशरथमरणकारणमाह– **आत्मे**ति । राजा दशरथः आत्मनः स्वस्य या आज्ञा, चतुर्दशवर्षेषु वने तिष्ठेत्याज्ञा, तया सीता च सौमित्रिश्च ताभ्यां संयुते श्रीरामे वनं प्रति याते गते सति, (हा) राम (हा) राम इति शोको दुःखं तस्मात् द्यौः स्वर्गस्तां प्रति गतः ॥ ३२ ॥

जुगुप्सितमिदं कर्म्म त्वयि स्नेहान्मया[1] कृतम् ।
रक्ष राज्यं स्वधर्म्मेण यत्नं मे सफलं कुरु ॥ ३३ ॥

(भा.दी.) ईदृशं कुकर्म किमर्थं कृतमित्यत आह– **जुगुप्सितमि**ति । मया जुगुप्सितं निन्दितं इदं श्रीरामस्य वनवासकारणं कर्म त्वयि स्नेहोऽनुरागस्तस्मात् कृतम् । त्वं राज्यं अस्मदीयं यद्राज्यं तत् स्वस्य यो धर्मस्तेन रक्ष । मे यत्नः प्रयत्नस्तं सफलं सप्रयोजनं कुरु इति अब्रवीदिति सम्बन्धः ॥ ३३ ॥

(सं.चं.) यद्यपि जुगुप्सितम् । तथाऽपि त्वयि स्नेहादिदं कृतम् । अदम्यो हि सर्वातिशायी मातुः पुत्रस्नेहः, सोऽकार्यमपि कारयति, असाध्यमपि साधयति ॥ ३३ ॥

जाज्वल्यमाने शोकाग्नाविति वाक्येन पातितः ।
तातप्यमानो भरतः कैकेयीमिदमब्रवीत् ॥ ३४ ॥

(भा.दी.) **जाज्वल्ये**ति । इति वाक्यं वचः तेन, पुनःपुनरतिशयेन वा ज्वलतीति जाज्वल्यमानस्तस्मिन्, शोक एवाग्निस्तस्मिन्, पातितः अत एव तातप्यमानः अतिशयेन तप्यमानः भरतः कैकेयीं प्रति इदं वचः अब्रवीत् ॥ ३४ ॥

(सं.चं.) तातप्यमानः पश्चात्तापदग्धः ॥ ३४ ॥

हत्वा मे पितरं घोरे प्रवास्य च ममेश्वरम् ।
रामं दुःखे महद् दुःखं क्षते क्षारमिव व्यधाः[2] ॥ ३५ ॥

(भा.दी.) **हत्वे**ति । हे घोरे दारुणे कैकेयि, मे पितरं हत्वा, मम ईश्वरं स्वामिनं श्रीरामं प्रवास्य वनवासं कारयित्वा च, पितृमरणं श्रुत्वोत्पन्नं यद् दुःखं तस्मिन्, महद् दुःखम्, श्रीरामप्रवासजन्यं दुःखम्, क्षतं व्रणं तस्मिन्, क्षारमिव विषमिश्रभस्मरूपक्षारमिव । 'धूर्तभस्मरसाः क्षाराः' इति वैजयन्ती । व्यधाः अकरोः ॥३५॥

१. **'स्नेहात् कृतं मया ।'** इति, **'त्वयि स्नेहादिदं कृतम्'** इति च ।

२. **'दुष्टे व्यधा महद् दुःखं विषं क्षीरमिवेक्षसे'** इति, **'दुःखे व्यधा महादुःखं विषक्षारमिव क्षते'** इति च । **'विषक्षारं विषयुक्तसर्षपादिरसमिव'** इति का.श्री ।

(सं.चं.) ममेश्वरं स्वामिनं रामम् । क्षारमिव लवणमिव । 'दुःखे मे दुःखमकरोर्व्रणे क्षारमिवादधाः' (७३.३) इति च । 'भस्मनि धूर्ते लवणे क्षारः' इति हैमः । अत्र 'दुःखे व्यथा महद् दुःखं क्षते क्षारमिव व्यधाः' इति पाठः प्रचलितो दृश्यते । स च पुनरुक्त इव । नापि सा पुनरुक्तिर्लाटानुप्रास इव काव्यशोभां पुष्णाति । तस्माद् 'रामं दुःखे महद् दुःखम्' इति प्राचीनपाठः स्यादिति भाति ॥ ३५ ॥

ब्रह्मभ्रूणवधाभ्यां च दोषौ लक्षगुणोल्बणौ ।
कृत्वा त्वदर्थमित्युक्त्वा मां च[1] भस्मीकरोष्यहो[2] ॥ ३६ ॥

(भा.दी.) ब्रह्मेति । ब्रह्मा ब्राह्मणः स च, भ्रूणो बालः स च, तयोर्वधः ताभ्याम् । 'भ्रूणोऽर्भके स्त्रैणगर्भे गर्भिण्यां श्रोत्रियद्विजे' इति वैजयन्ती । लक्षसङ्ख्याको यो गुण आवर्तनं तस्मात् उल्बणौ क्रूरौ, लक्षावृत्त्या उल्बणावित्यर्थः, दोषौ कृत्वा, तव कृते त्वदर्थम्, तव प्रयोजनार्थमित्यर्थः, इति उक्त्वा मां च भस्मीकरोषि, मां च नरके पातयसीत्यर्थः । अहो आश्चर्यम् ॥ ३६ ॥

(सं.चं.) ब्राह्मणवधः, भ्रूणस्य गर्भस्थशिशोर्वध इत्युभावपि महापातके । ततोऽपि लक्षगुणम्, लक्षेण गुणितं यावत् स्यात् तावदुल्बणौ उद्बणौ । 'उल्बणमुत्कटमुद्धतमिति नातिनानार्थाः' इत्यभिधानम् । अतिघोरमतिक्रूरं चेत्येतत् । पतिमारणं रामविवासनमितीमौ दोषौ । तदपि त्वदर्थं कृतमिति घातकभारं मयि निक्षिप्यापराधाग्निना मां भस्मीकरोषि । अहो कल्पनातीतमेतत् ॥ ३६ ॥

पापिष्ठे राजनिधनं रामप्रव्रजनं च ते ।
राज्यभोगाय मे नैव [3]तत्र स्युः साक्षिणः सुराः ॥ ३७ ॥

(भा.दी.) पापिष्ठ इति । हे पापिष्ठे कैकेयि, राज्ञो निधनं वधः, श्रीरामस्य प्रव्रजनं वनवासश्च, ते तव राज्यस्य भोग उपभोगस्तस्मै स्यात् । मे मम राज्यभोगाय नैव भवेत् । तत्र एतस्मिन्नर्थे सुराः साक्षिणः स्युः भवेयुः ॥ ३७ ॥

(सं.चं.) ते त्वया कृते । मे राज्यभोगाय हेतुभूते नैव स्याताम् ॥ ३७ ॥

त्वद्देहादुदभूद् देहो योऽयं दूषणभूषणे ।
इमं तु सन्त्यजाम्यद्य मा भून्मे देवहेळनम् ॥ ३८ ॥

---

१. **'मां तु भस्मी–'** । **'मां तु मामेव'** इति का.श्री । २. **'करोषि हि'** ३. **'तस्य स्युः'**

(भा.दी.) त्वदिति । दूषणं दोषो भूषणमलङ्कारो यस्याः सा तत्सम्बुद्धिः, हे कैकेयि, यः अयं देहः, तव देहः त्वद्देहः, तस्मात् उदभूत् जातः । इमं तु देहं अद्य सन्त्यजामि । त्यज विसर्गे लट् । मे देवस्य श्रीरामस्य हेळनं अवज्ञा मा भूत् ॥ ३८ ॥

(सं.चं.) दूषणमेव भूषणं मन्यमाना दूषणभूषणा । तमिमं देहं सन्त्यजामि । 'इमं तं सन्त्यजाम्यद्य' इत्येव प्राचीनपाठः स्यादिति भाति । मे मत्तो मम देवस्य रामस्य हेळनमनादरोऽवज्ञा वा मा भूत् ॥ ३८ ॥

सहस्रपुत्रा सुरभिः खिन्ना स्मृत्वा कृशौ सुतौ ।
एकपुत्रा च कौसल्या तद्वियोगं सहेत किम् ॥ ३९ ॥

(भा.दी.) सहस्रेति । सहस्रसङ्ख्याकाः पुत्रा यस्याः सा तथोक्ता, सुरभिः गवां माता सुरभिदेवी, सहस्रपुत्राणां मध्ये द्वौ पुत्रौ कर्षकातिपीडनात् कृशौ स्मृत्वा खिन्ना दुःखिता आसीत् । अस्तेर्लङ् । केदारकर्षकपीडितौ सुतौ स्मृत्वा दुःखितां सुरभिं प्रति पुत्रसहस्रेषु विद्यमानेषु तवानयोः कृपायां कोऽतिशय इतीन्द्रेण पृष्टे सति सर्वत्र प्रीतेः साम्येऽपि दीने तु कृपाऽतिशयितेति सुरभिणोक्ते जीवितादप्यतिशयेन प्रीतिविषयं पुत्रं ज्ञात्वा कर्षकस्य विघ्नमाचरन् (इन्द्रः) सहसा भूयिष्ठं तोयं केदारमज्जनार्थं ववर्षेति हि पौराणिकी प्रसिद्धिः । एकः पुत्रो यस्याः सा तथोक्ता कौसल्या तस्य श्रीरामस्य यो वियोगस्तं सहेत किम्? सहनं कुर्यात् किम्? षह मर्षणे लिङ् । सहस्रपुत्राऽपि सुरभिर्यदा द्वयोः पुत्रयोः खेदेन खिन्नाऽभूत्, तदेक-पुत्रायास्तद्वियोगेन क्लेशः किं वक्तव्य इत्यर्थः ॥ ३९ ॥

(सं.चं.) सहस्रपुत्रा सुरभिः । तथाहि रामायणे कथा—'अन्यदा किल धर्मज्ञा सुरभिः सुरसम्मता । वहमानौ ददर्शोर्व्यां पुत्रौ विगतचेतसौ । तावर्धदिवसे श्रान्तौ पुत्रौ दृष्ट्वा महीतळे । रुरोद पुत्रशोकेन बाष्पपर्या-कुलेक्षणा । अधस्ताद् व्रजतस्तस्याः सुरराज्ञो महात्मनः । बिन्दवः पतिता गात्रे सूक्ष्माः सुरभिगन्धिनः । इन्द्रोऽप्यश्रुनिपातं तं स्वगात्रे पुण्यगन्धिनम् । सुरभिं मन्यते दृष्ट्वा भूयसीं तां सुरेश्वरः । निरीक्षमाणः शक्रस्तां ददर्श सुरभिं स्थिताम् । आकाशे विष्ठितां दीनां रुदन्तीं भृशदुःखिताम् । तां दृष्ट्वा शोकसन्तप्तां वज्रपाणिर्यशस्विनीम् । इन्द्रः प्राञ्जलिरुद्विग्नः सुरराजोऽब्रवीद् वचः । भयं कच्चिन्नचास्मासु कुतश्चिद् विद्यते महत् । कुतोनिमित्तः शोकस्ते ब्रूहि सर्वहितैषिणि । एवमुक्ता तु सुरभिः सुरराजेन धीमता । प्रत्युवाच ततो धीरा वाक्यं वाक्यविशारदम् । शान्तं पापं न वः किञ्चित् कुतश्चिदमराधिप । अहं तु मग्नौ शोचामि स्वपुत्रौ विषमे स्थितौ । एतौ दृष्ट्वा कृशौ दीनौ सूर्यरश्मिप्रतापितौ । अर्द्यमानौ बलीवर्दौ कर्षकेण सुराधिप । मम कायात् प्रसूतौ हि दुःखितौ भारपीडितौ । यौ दृष्ट्वा परितप्येऽहं नास्ति पुत्रसमः प्रियः । यस्याः पुत्रसहस्रैस्तु

कृत्स्नं व्याप्तमिदं जगत् । तां दृष्ट्वा रुदतीं शक्रो न सुतान्मन्यते परम् । सदाऽप्रतिमवृत्ताया लोकधारण-काम्यया । श्रीमत्या गुणनित्यायाः स्वभावपरिवेषया । यस्याः पुत्रसहस्राणि साऽपि शोचति कामधुक् । किं पुनर्या विना रामं कौसल्या वर्तयिष्यति । एकपुत्रा च साध्वी च विवत्सेयं त्वया कृता' (७४.१९–२९) इति ॥ ३९ ॥

न त्वमश्वपतेः पुत्री पुत्री त्वं रक्षसो ध्रुवम् ।
यया नाथो जगन्नाथस्त्यक्तः कान्तश्च[1] सूदितः ॥ ४० ॥

(भा.दी.) उत्तमे वचसा शिक्षेत्युक्तेर्मातुरपि योग्यशिक्षां करोति– **न त्वमि**ति । त्वं अश्वपतेः अश्वपति-नामकस्य केकयराजस्य पुत्री न, किन्तु (त्वं) रक्षसः राक्षसस्य पुत्री ध्रुवम् । कुत इत्यत आह–ययेति । यया त्वया जगन्नाथः मम नाथः स्वामी श्रीरामः त्यक्तः राज्याद् वियोजितः, कान्तश्च भर्ता दशरथश्च सूदितः संहृतः ॥ ४० ॥

(सं.चं.) न त्वमिति । 'न त्वमश्वपतेः कन्या धर्मराजस्य धीमतः । राक्षसी तत्र जाताऽसि कुलप्रध्वंसिनी पितः' (७४.९) इति च । राक्षसी रक्षःस्वभावा, रक्षसः पुत्री चेत्यर्थः । 'न त्वमश्वपतेः कन्या' इति पूर्व-वचनात् । तदेतद् स्फुटमाहपण्डिताचार्यः–'पुत्री त्वं रक्षसो ध्रुवम्'इति । किमुक्तं भवति? धर्मात्मनि महाराजेऽ-श्वपतावाविष्टं किमपि रूक्षं रक्षस्त्वां जनयामासेत्युक्तं भवति । अत एव कान्तश्च । सूदितः मारितः॥४०॥

तस्याऽर्त्तगिरमाश्रुत्य भृशार्त्तो लक्ष्मणानुजः ।
ज्येष्ठं पतितमुत्थाप्य क्षुभितो[2] वाक्यमब्रवीत् ॥ ४१ ॥

(भा.दी.) तस्येति । तस्य भरतस्य, आर्तस्य गीर्नादस्ताम्, आश्रुत्य भृशमत्यन्तमार्तः दुःखितः, लक्ष्मणा-नुजः शत्रुघ्नः, दुःखातिशयात् पतितं ज्येष्ठं भरतं उत्थाप्य, क्षुभितः क्रोधात् क्षुब्धः सन् वाक्यं वचस्तत् अब्रवीत् ॥ ४१ ॥

(सं.चं.) आर्तां दुःखभरितां गिरम् । क्षुभितः क्रोधमूर्छितः । लक्ष्मणानुजः शत्रुघ्नः । ननु भरतोऽपि लक्ष्मणानुजः? सत्यम् । अथापि 'ज्येष्ठं पतितमुत्थाप्य' इत्युत्तरवचनात् शत्रुघ्न इति ज्ञायते । ननु स्फुटं भरतानुज इत्येवोच्यताम् । उच्येत । अथाप्येकमातृकत्वज्ञापनाय लक्ष्मणानुज इत्याह । तद्धि मुख्यमनुजत्वम् । लक्ष्मणानुजोऽप्यहो लक्ष्मणमाचिक्षेपेत्युत्तरवचनानुकूल्याय च ॥ ४१ ॥

---

१. 'कान्तस्तु सूदितः' २. '–मुत्थाय कुपितो–'

कथं लोकैकनाथेन राज्यं त्यक्तं स्त्रिया गिरा ।
कथं वा लक्ष्मणो धीरो यान्तं रामं न रुद्धवान् ॥ ४२ ॥

(भा.दी.) कथमिति । एको मुख्यो नाथ एकनाथः लोकानामेकनाथः तेन श्रीरामेण स्त्रियाः कैकेय्याः गीर्वाक् तया राज्यं कथं त्यक्तम्? धीरः लक्ष्मणः यान्तं वनं प्रति गच्छन्तं श्रीरामं कथं (वा) न रुद्धवान्? न निवारितवान् ॥ ४२ ॥

(सं.चं.) लोकानामयमेक एव नाथः । प्रधानश्च नाथः । 'स्त्रियाः गिरा' इति प्रतृण्णम् । 'स्त्रियो गिरा' इति पठन्तो भ्रान्ताः ॥ ४२ ॥

एवं ब्रुवाणस्तां कुब्जां कैकेयीभेदकारिणीम् ।
श्रुत्वा ददर्श प्रद्वारे[1] सर्वाभरणभूषिताम् ॥ ४३ ॥

(भा.दी.) एवमिति । एवं ब्रुवाणः वदन् शत्रुघ्नः, कुब्जां ह्रस्वकायाम्, तां मन्थराम्, कैकेय्या भेदो बुद्धि-भेदस्तं कर्तुं शीलमस्या अस्तीति तथोक्ता तां श्रुत्वा, प्रद्वारं महाद्वारातिरिक्तद्वारं तस्मिन्, सर्वाणि यान्याभरणानि तैर्भूषितां ददर्श ॥ ४३ ॥

(सं.चं.) कुब्जां मन्थराम् । कैकेय्या मनोभेदकारिणीम् । श्रुत्वा–'यस्याः कृते वने रामो न्यस्तदेहश्च वः पिता । सेयं पापा नृशंसा च तस्याः कुरु यथामति' (७८.९) इति द्वारपालैरुक्तं श्रुत्वा । सर्वाभरणभूषितां ददर्श । प्रगतं द्वारं प्रद्वारम् । द्वारप्रान्ते । 'प्राग्द्वारेऽभूत् तदा कुब्जा सर्वाभरणभूषिता' (७८.५) इति च । 'प्रद्वारेऽभूत्–' इत्येव ग्रन्थकृदभिमतो रामायणपाठः । 'श्रुत्वा ददर्श प्राग्द्वारे' इति वाऽत्र पाठः । अयं मन्थरावृत्तान्तो दशरथसंस्कारानन्तरं त्रयोदशे दिने निर्वृत्त इति रामायणे पठ्यते । पाठक्रमादर्थक्रमो बलीयानिति पण्डिताचार्यः पूर्वं पपाठ ॥ ४३ ॥

शत्रुघ्नः शत्रुदर्प्पघ्नश्चूडे सङ्गृह्य तां खलाम् ।
चकर्षामर्षताम्राक्षः स्मरंस्तस्याः कुमन्त्रितम् ॥ ४४ ॥

(भा.दी.) शत्रुघ्न इति । शत्रूणां दर्पोऽहङ्कारस्तं हन्तीति तथोक्तः, अमर्षेण कोपेन ताम्रे रक्ते अक्षिणी यस्य स तथा, शत्रुघ्नः तस्याः मन्थरायाः कुत्सितं यन्मन्त्रितं कैकेय्या उपदिष्टं तत् स्मरन् सन्, खलां दुष्टां तां मन्थरां चूडः केशपाशस्तस्मिन् सङ्गृह्य चकर्ष कर्षणं चक्रे । कृष विलेखने लिट् ॥ ४४ ॥

---

१. **'प्रद्वारि सर्वा–'** । **'प्रद्वारि महाद्वारातिरिक्ते कस्मिंश्चिद् द्वारविशेषे'** इति वि.भू. ।

(सं.चं.) 'चूडे सङ्गृह्य' इति पठन्ति। 'चूडे केशपाशे सङ्गृह्य' इति व्याचक्षते । तदा 'चूडायाम्' इति पठितव्यम्। न 'चूडे' इति। भिदादिगणपठितत्वेन नियतस्त्रीलिङ्गत्वात्। तस्मात् चूडे इति द्वितीयाद्विवचनान्तं पदमिति युक्तं वचः । संहतः केशपाशः शिखा । शिखण्डा वेणीति यावत् । 'चतुःशिखण्डां हि रमां वदन्ति । वेणीद्वयं सम्भ्रमसूचकम् । विरहिणी पुनरेकवेणी भवतीति सम्प्रदायः । मन्थरा च, भरत आगत इति सम्भ्रमेण द्वे चूडे बध्वा सगर्वमन्तःपुरे चचार । तद् दृष्ट्वा जातामर्षः शत्रुघ्नः तस्याश्चूडे द्वे अपि सङ्गृह्य एकीकृत्य चकर्ष भूमाविति सर्वमनाकुलम् ॥ ४४ ॥

कुब्जाबन्धुजने याते कौसल्यां [१]शरणार्थिनि ।
पुरश्चकर्ष[२] कैकेय्या हा हताऽस्मीतिवादिनीम् ॥ ४५ ॥

(भा.दी.) कुब्जेति । शरणं रक्षकमर्थयितुं शीलमस्यास्तीति तथोक्तस्तस्मिन्, कुब्जायाः मन्थरायाः यो बन्धुजनस्तस्मिन्, कौसल्यां प्रति याते प्राप्ते सति, कैकेय्याः पुरः पुरतः, अहं हता अस्मि, हा खेदे, इति वादिनीं मन्थरां चकर्ष । कृष विलेखने लिट् ॥ ४५ ॥

(सं.चं.) तस्याः बन्धुजनः सखीजनः शरणार्थी कौसल्यासमीपं पलायत। कैकेय्याः पुरः, तस्याः पश्यन्त्याः, चकर्ष ॥ ४५ ॥

रेणुनाऽपूरयत् तस्याः क्रोशन्त्या मुखकोटरम् ।
घोरां गां मेघगम्भीरामब्रवीच्चान्तकोपमः[३] ॥ ४६ ॥

(भा.दी.) रेणुनेति । अन्तकस्य यमस्य उपमा यस्य स तथोक्तः, दुष्टशिक्षणे यमसदृश इत्यर्थः, शत्रुघ्नः क्रोशन्त्याः, आक्रोशनं कुर्वन्त्याः, तस्याः मन्थराया मुखमेव कोटरं वृक्षबिलं तत् रेणुना पांसुना अपूरयत् । पॄ पालनपूरणयोर्लङ् । घोरां भयजनकां मेघवत् मेघगर्जनवत् गम्भीरां गां गिरं अब्रवीच्च ॥ ४६ ॥

(सं.चं.) वृक्षकोटरवद् विवृतं विकृतं च तस्या मुखकोटरं रेणुना पांसुनाऽपूरयत् । रामायणेऽनुक्तमिदम् । 'निष्कुटः कोटरः स्मृतः' इत्यभिधानम् । 'ஐ๑ಚಠ' इति भाषायाम् । घोरामुग्रां गां चाब्रवीत् । घोराङ्गां कुब्जां तस्या अन्तकोपमः शत्रुघ्नोऽब्रवीदिति वा । तदा 'मेघगम्भीरम्' इत्यपि पाठः स्यात् ॥ ४६ ॥

१. 'कौसल्याशर–' २. 'पुनश्चकर्ष कैकेयि हा' ३. '–मब्रवीदन्तकोपमः'

पितरं घातयित्वा[१] त्वं स्वामिनं च विवास्य नः ।
कथं जीवसि दुर्वृत्ते दुर्वृत्तां[२] समुपाश्रिता ॥ ४७ ॥

(भा.दी.) तातमिति । दुष्टं वृत्तं चरित्रं यस्याः सा तत्सम्बुद्धिः । हे मन्थरे, दुष्टं वृत्तं यस्याः सा तथा तां कैकेयीं समुपाश्रिता, त्वं नः अस्माकं पितरं घातयित्वा, नः स्वामिनं श्रीरामं च विवास्य प्रवास्य कथं जीवसि? जीव प्राणधारणे लट् । न कथमपि जीवसीत्यर्थः ॥ ४७ ॥

(सं.चं.) किमब्रवीत्? आह– पितरम् । नः पितरं घातयित्वा । नः स्वामिनं रामं च विवास्य । दुर्वृत्तां कैकेयीं समुपाश्रिता ॥ ४७ ॥

अद्य नेष्याम्यहं मृत्युं मन्थरे त्वाममन्थराम्[३] ।
ईश्वरी तव कैकेयी नश्वरीं त्वां तु पश्यतु ॥ ४८ ॥

(भा.दी.) अद्येति । हे मन्थरे, अमन्थरां अतिकष्टां त्वां मृत्युर्मरणं तं अद्य अहं नेष्यामि । नीतेर्लृट् । तव ईश्वरी स्वामिनी कैकेयी त्वां नश्वरीं नाशशीलां पश्यतु । दृशेर्लोट् ॥ ४८ ॥

(सं.चं.) मृत्युं नेष्यामि । न विद्यते मन्थरा वक्रस्वभावा यस्यास्ताममन्थराम् । अतिकुटिलस्वभावाम् । मन्थर इति कर्णेजप उच्यते । कुटिलश्च ॥ ४८–५० ॥

कर्षन्तमिति तां पापां शत्रुघ्नं भरतोऽब्रवीत् ।
मयैव वद्ध्या तातेयं कैकेयी मन्थरायुता ॥ ४९ ॥

(भा.दी.) कर्षन्तमिति । भरतः पापां तां कर्षन्तं कर्षणं कुर्वन्तं शत्रुघ्नं प्रति, हे तात शत्रुघ्न, मन्थरायुता इयं कैकेयी मयैव वध्या वधार्हा इति अब्रवीत् ॥ ४९ ॥

राजर्षिधर्म्मो रामो मां स्त्रीघातीति परित्यजेत् ।
तत्पादपांसुलोभेन ध्रुवमेतां सहावहै ॥ ५० ॥

---

१. **'तातं नो घातयित्वा'** २. **'दुर्वृत्तं समुपा–'**

३. **'अमन्थराममनोहराम्, अतिकष्टां वा'** इति का.श्री ।

(भा.दी.) राजर्षीति । राजा चासौ ऋषिश्च राजर्षिस्तस्य धर्मो यस्य स तथा श्रीरामः, इयं कैकेयी हता चेत्, मां स्त्रियं घातितवानिति स्त्रीघाती स्त्रीहन्तेत्यर्थः, इति हेतोः परित्यजेत् । ध्रुवम् । तस्य श्रीरामस्य यौ पादौ तयोर्ये पांसवस्तेषां धारणे यो लोभस्तेन, तन्निकटेऽवस्थानलोभेनैवेयं रक्ष्या न मातृत्वादित्यर्थः । एतां कैकेयीं सहावहै सहनं करवावः । षह मर्षणे लट् ॥ ५० ॥

पाशेन पशुवद् बध्वा विवशान् स्ववशे[१] प्रभुः ।
कर्षत्यस्मान् कृतान्तोऽयं वत्स तस्मात् सहावहै ॥ ५१ ॥

(भा.दी.) स्त्रीहत्यालक्षणदोषाच्च सह्यत इत्याह– **पाशेने**ति । प्रभुः अयं लोकप्रसिद्धः, कृतः अन्तो विनाशो येन स तथोक्तः यमः, विवशान् कर्मवशानस्मान् पशुवत् पाशो दाम तेन बध्वा, स्वस्य वशस्तस्मिन्, 'वशो जन्मस्पृहयोः' इति हेमचन्द्रः, कर्षति । कृष विलेखने लट् । हे वत्स शत्रुघ्न, तस्मात् सहावहै । षह मर्षणे लट् ॥ ५१ ॥

(सं.चं.) विवशानस्मान् स्ववशे कृत्वा कर्षति । के वयं जीवने मारणे वा । तस्मात् सहावहै ॥ ५१ ॥

एवमुक्त्वा स भरतः सानुजः प्रस्थितो द्रुतम् ।
कौसल्यां च सुमित्रां च ववन्दे भयकम्पितः ॥ ५२ ॥

(भा.दी.) एवमिति । सः भरतः एवं उक्त्वा, सानुजः शत्रुघ्नसहितः सन्, द्रुतं शीघ्रं यथा भवति तथा प्रस्थितः कौसल्यामन्दिरं प्रति प्राप्तः, भयकम्पितः सन् कौसल्यां च सुमित्रां च ववन्दे ॥ ५२ ॥

(सं.चं.) द्रुतं कौसल्यानिवेशनं प्रति प्रस्थितः । कुपिता कौसल्या मया सह प्रीत्या सम्भाषेत वेति शङ्कया भयकम्पितः ॥ ५२ ॥

राममाता तमाश्लिष्य रामविश्लेषकर्शिता ।
रामभक्तमुवाचाथ रामभ्रातृव्यशङ्कया ॥ ५३ ॥

(भा.दी.) रामेति । अथ श्रीरामस्य यो विश्लेषो वियोगस्तेन कर्शिता कृशीभूता राममाता कौसल्या रामभक्तं तं भरतं आश्लिष्य, श्रीरामस्य भ्रातृव्यः शत्रुरिति या शङ्का तया, 'भ्रातृव्यौ भ्रातृजामित्रौ' इति वैजयन्ती, उवाच ॥ ५३ ॥

---

१. 'स्ववशः प्रभुः' । 'स्ववशः स्वशब्दवाच्यपरमात्माधीनः' इति का.श्री. ।

(सं.चं.) रामस्य भ्रातृव्यः शत्रुरयं सञ्जात इति शङ्कया । 'शत्रुः सपत्नो भ्रातृव्यः' इत्यभिधानम् ॥ ५३ ॥

वत्स राज्यं चिरं भुङ्क्ष्व मात्रा ते प्रतिपादितम् ।
घातयित्वा हि ते तातं कालयित्वा तवाग्रजम् ॥ ५४ ॥

(भा.दी.) **वत्सेति** । हे वत्स, ते मात्रा कैकेय्या ते तातं दशरथं घातयित्वा, तव अग्रजं ज्येष्ठं श्रीरामं कालयित्वा, वनं प्रति प्रेषयित्वा, प्रतिपादितं सम्पादितं तत्, राज्यं चिरं यथा भवति तथा भुङ्क्ष्व पालय । भुजेर्लोट् ॥ ५४ ॥

(सं.चं.) कालयित्वा दूरं निष्कास्य ॥ ५४–५ ॥

मां च तत्र नयत्वेषा त्वं वा मां नय पुत्रक ।
ससुमित्राऽथवा यायां स्वयमेव सुतान्तिकम् ॥ ५५ ॥

(भा.दी.) **मामिति** । हे पुत्रक, कप्रत्ययः कुत्सने, हे भरत, एषा कैकेयी मां च तत्र श्रीरामसमीपे नयतु, त्वं वा मां नय । अथवा ससुमित्रा सुमित्रासहिता अहं स्वयमेव परानपेक्षैव सुतस्य श्रीरामस्य अन्तिकं समीपं तत् प्रति यायां गच्छेयम् । इत्युवाचेति सम्बन्धः ॥ ५५ ॥

कौसल्याया अकल्योऽसौ[1] सोढुमेतदुदीरितम् ।
हा मातरिति तत्पादे पतित्वेदमभाषत ॥ ५६ ॥

(भा.दी.) **कौसल्याया** इति । कौसल्यायाः एतत् उदीरितं वचः सोढुं सहनार्थं अकल्यः असमर्थः असौ भरतः, हा मातः इति वदन् तस्याः पादस्तस्मिन् पतित्वा इदं वचः अभाषत ॥ ५६ ॥

(सं.चं.) सोढुमकल्योऽसमर्थः । 'कल्यो वाक्श्रुतिवर्जिते । सज्जनीरोगदक्षेषु' इति मेदिनी ॥ ५६–६१ ॥

मां शुद्धभावमज्ञात्वा मातर्म्मा त्वं निराकुरु[2] ।
रामपादैकदासोऽहं[3] सत्यमेतद् ब्रवीमि ते ॥ ५७ ॥

---

१. **'अकल्पोऽसौ'** । **'अकल्पः असमर्थः'** इति वि.भू. । २. **'मातस्त्वं मा निराकुरु'**
३. **'–पादैकदासोऽस्मि'** इति वि.ती.पाठः स्यात् ।

(भा.दी.) मामिति । हे मातः कौसल्ये, त्वं मां शुद्धः भावः स्वभावो यस्य स तथा तम्, अज्ञात्वा मा निराकुरु तिरस्कुरु । अहं श्रीरामस्य यौ पादौ तयोरेकदासो मुख्यदासः अस्मि । सत्यं एतत् वचः ते तुभ्यं ब्रवीमि ॥ ५७ ॥

गुरुद्रुहां च मूर्खाणां महापातकिनामपि ।
लोकान् मातरहं यायामार्य्यश्चेन्मन्मते गतः[१] ॥ ५८ ॥

(भा.दी.) **गुर्विति** । हे मातः कौसल्ये, चेद् यदि आर्यः स्वामी रामः मम सतः मयि अयोध्यायां विद्यमाने सतीत्यर्थः[२] । ते तव सकाशात् वनं प्रति गतः, गुरून् द्रुह्यन्तीति गुरुद्रुहस्तेषाम्, मूर्खाणां च, महदपरिहार्यं यत्पातकं ब्रह्महत्यादिपातकं तदेषामस्तीति तथोक्तास्तेषामपि लोकान् यायां प्राप्नुयाम् ॥ ५८ ॥

देवीति शपथैस्तुष्टा भरतं प्रत्यभाषत ।
शुद्धस्वभावं जानामि त्वां रामस्यानुजं प्रियम्[३] ॥ ५९ ॥

(भा.दी.) **देवीति** । इति शपथाः शपथपूर्वकवचनानि तैः तुष्टा देवी कौसल्या, हे भरत, श्रीरामस्य प्रियं अनुजं त्वाम्, शुद्धः स्वभावो यस्य स तथा तं जानामि, इति भरतं प्रति अभाषत ॥ ५९ ॥

त्वं संस्कृत्य पितुर्देहं राज्यं धर्म्मेण पालय ।
चतुर्द्दशे वत्सरे तु[४] रामेण सह रंस्यसे ॥ ६० ॥

(भा.दी.) **त्वमिति** । त्वं पितुः देहः शरीरम्, तं संस्कृत्य दहनादिसंस्कारवन्तं कृत्वा, धर्मः क्षत्रधर्मस्तेन राज्यं पितृराज्यं तत् पालय । पाल रक्षणे लोट् । चतुरधिका दश चतुर्दश, चतुर्दशत्वसङ्ख्यापूरणश्चतुर्दशः, तस्मिन् वत्सरे तु श्रीरामेण सह रंस्यसे क्रीडिष्यसि । रमु क्रीडायां लृट् ॥ ६० ॥

आर्ज्जवेन प्रसीदन्त्या राममात्रेत्युदाहृतः ।
रामरामेति[५] विलपंस्तां रात्रिं भरतोऽनयत् ॥ ६१ ॥

---

१. सर्वत्राशुद्धः पाठः पठ्यते । अयमिह सम्भावितः पाठः ।

२. टीकायामपि विसङ्गत इव पाठः । **'आर्यश्चेन्मम ते गतः'** इति टीकापाठः स्यात् ।

३. **'रामस्यानुजं सुत'** ४. **'वत्सरेऽथ'** ५. **'राम देवेति'**

(भा.दी.) आर्जवेनेति । ऋजोर्भाव आर्जवं तेन, अकौटिल्येनेत्यर्थः, प्रसीदन्त्या प्रसन्नीभवन्त्या राममात्रा कौसल्यया इति उदाहृतः भरतः राम राम इति विलपन् तां रात्रिं अनयत् गमयामास ॥ ६१ ॥

तस्मिन् पुरे जनपदे[1] निखिलप्रजानां शोकोऽपि शोकभयशोषणमूलमासीत् ।
रामस्मृतिश्रवणकीर्त्तनसम्प्रयोगात् सर्वापदां प्रशमनो हि[2] हरेः प्रसङ्गः॥ ६२ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
अयोद्ध्याकाण्ड एकादशः सर्ग्गः ॥

—०—

(भा.दी.) तस्मिन्निति । तस्मिन्, पुरं अयोध्यापुरं तस्मिन्, जनपदो राष्ट्रं तस्मिन्, विद्यमानाः निखिलाः समस्ताः याः प्रजास्तासां शोकोऽपि, श्रीरामस्य स्मृतिश्च, श्रवणं च, कीर्तनं च, तेषां सम्प्रयोगः सम्बन्धः तस्मात्, शोकश्च, भयं च, तयोर्यच्छोषणं विनाशः, तस्य मूलं कारणभूतः आसीत् । यथा परमात्मनि समर्पितं ज्ञानपूर्वं निष्कामकर्म संसारकारणीभूतकर्मण एव विनाशकं भवति । तत्र निमित्तमाह– **सर्वेति** । हरति सर्वारिष्टमिति हरिः श्रीपरमात्मा तस्य प्रसङ्गः सर्वा या आपदस्तासां प्रशमनो हि ॥ ६२ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां
भावार्थदीपिकायामयोध्याकाण्ड एकादशः सर्गः ॥

—०—

(सं.चं.) वसन्ततिलकयोपसंहरति–तस्मिन् पुरे । कथं शोचतां शोकशोषणम्? आह– रामेति । रामस्य स्मृत्या श्रवणेन कीर्तनेन च सम्प्रयोगात् समायोगात् । शोचन्तो राममेव सस्मरुः । रामगुणानेव कीर्तयन्तः शृण्वन्तो रामविरहजशोकं विसस्मरुरित्यर्थः । नवविधभक्तिषु श्रवणं कीर्तनं स्मरणमिति ह्याद्यास्तिस्रो विधाः । तेन शोको भक्तितामाप । भक्तिश्च सदाऽप्यानन्दमयी । तदेवार्थान्तरन्यासेनाऽह– सर्वापदां प्रशमनो हि हरेः प्रसङ्ग इति ॥ ६२ ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायामयोध्याकाण्डे
एकादशसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– ९४१+६२=१००३]

---

१. 'जनपदेऽप्यखिलप्रजानाम्' २. 'प्रशमदो हि'

द्वादशः सर्गः

प्रभाते भरतं दृष्ट्वा विलपन्तं[१] शुचाऽऽकुलम् ।
वृतं प्रकृतिभिस्तत्र वसिष्ठो मुनिरब्रवीत् ॥ १ ॥

(भा.दी.) श्रीरामानुजेन भरतेनानन्तरं किमकारीत्यत आह– **प्रभात** इति । प्रभातः प्रातःकालस्तस्मिन्, मुनिः वसिष्ठः, प्रलपन्तं प्रलापं कुर्वन्तम्, शुक् शोकस्तया आकुलं व्याकुलम्, प्रकृतय अमात्यादयस्ताभिः वृतं परिवृतं भरतं तत्र दशरथमन्दिरे दृष्ट्वा अब्रवीत् ॥ १ ॥

(सं.चं.) विलपन्तं परिदेवयमानम् । प्रकृतिभिरमात्यादिभिराधिकारिकमण्डलस्थैरपि विलपद्भिर्वृतम् ॥१॥

उत्तिष्ठ शीघ्रमायुष्मन्ननुतिष्ठ पितृक्रियाम् ।
उपतिष्ठ द्विजान् वृद्धानधितिष्ठ वरासनम् ॥ २ ॥

(भा.दी.) **उत्तिष्ठेति** । आयुः वेदोक्तमायुरस्यास्तीति तथा तत्सम्बुद्धिः, हे भरत, शीघ्रं यथा भवति तथा उत्तिष्ठ । पितुर्दशरथस्य या क्रिया, प्रेतकार्याद्यवश्यकर्म, तां अनुतिष्ठ कुरु । ज्ञानादिगुणैर्वृद्धान् द्विजान् उपतिष्ठ सेवस्व । वरमुत्तमं यदासनं तत्, राजासनमित्यर्थः, अधितिष्ठ अद्ध्यारोह ॥ २ ॥

(सं.चं.) सार्थकमायुरस्येति, दीर्घमायुरस्येति वा आयुष्मान् । भूम्नि प्रशंसायां च मतुप् । तथा भूया इत्याशीर्गर्भमिदं सम्बोधनम् । उपतिष्ठ उपचर । उपचारेण मानय । मानेन सन्तोषय । देवपूजात्वाभावान्नाऽत्मनेभाषा ॥ २ ॥

कालात्मनः परेशस्य लीलेयं लोककालनी[२] ।
न हृष्यन्ति[३] न शुष्यन्ति पण्डिताः सुखदुःखयोः ॥ ३ ॥

---

१. **'प्रलपन्तम्'** इति वि.ती.पाठः । २. **'लोककालिनी'**। ३. **'न पुष्यन्ति'**

(भा.दी.) कालेति । कालयन्ति[१] विनाशयन्ति सर्वमिति कालाः रुद्रादयः, तेषामात्मा स्वामी तस्य, सर्वेश्वरस्येत्यर्थः, परेषामुत्तमानां ब्रह्मादीनामीशस्य श्रीहरेः इयं जगत्सर्जनसंहारादिरूपा प्रवृत्तिर्लोकानां कालनी[२] विनाशिनी विद्राविणीति वा, नानावस्थापादिकेत्यर्थः, लीला क्रीडारूपा यतः अतः पण्डिताः ज्ञानिनः सुखं च दुःखं च तयोः न हृष्यन्ति, सुखे प्राप्ते सति सन्तोषं न प्राप्नुवन्तीत्यर्थः, न शुष्यन्ति, दुःखे प्राप्ते सति न नीचतां गच्छन्ति । शुष शोषणे लट् ॥ ३ ॥

(सं.चं.) कालात्मनः संहारकर्मणि प्रवृत्तस्य, कालः संहारक आत्मा स्वरूपमस्येति । लोककालनी लोकक्षयकृत् । 'कालोऽस्मि लोकक्षयकृत्' इति हि भगवद्वचनम् । सुखे प्राप्ते न हृष्यन्ति । न तोषेण श्वयन्ति । हृष तुष्टौ । सुखं हि नरमुन्माद्य नर्तयति । दुःखे प्राप्ते न शुष्यन्ति न शोचन्ति । शुष शोषणे । शोको हि शोषयति नरम् ॥ ३ ॥

इत्युक्त ऊचे भरतो बाष्पं सम्मृज्य पाणिना ।
अपण्डितोऽस्मि शोच्योऽस्मि विना राममहं गुरो ॥ ४ ॥

(भा.दी.) इतीति । इति उक्तः वसिष्ठेनाभिहितः भरतः पाणिना बाष्पमश्रु तं सम्मृज्य मार्जयित्वा, हे गुरो वसिष्ठ, अहं श्रीरामं विना अपण्डितः अज्ञः अस्मि, शोच्यः अस्मि, इत्यूचे ॥ ४ ॥

(सं.चं.) सम्मृज्य समन्तात् मार्जित्वा धावित्वा । मृजूष् शुद्धौ । सत्यं पण्डिताः समदर्शिनः । अहं त्वपण्डितोऽस्मि । तेन शोचामि । शोचन् शोचनीयोऽस्मि । अनुकम्पनीयोऽस्मि ॥ ४ ॥

साम्राज्यान्मे शतगुणं वने रामाङ्घ्रिसेवनम् ।
अमृतान्मे शतगुणं [३]रामास्येन्दोरवेक्षणम्[४] ॥ ५ ॥

(भा.दी.) साम्राज्यादिति । साम्राज्यं सार्वभौमत्वं तस्मात्, वने श्रीरामस्य अङ्घ्री पादौ तयोः सेवनम्, शतानां गुणानामावृत्तीनां समाहारः शतगुणम्, शतावृत्त्युत्तममित्यर्थः, रामस्य श्रीरामाख्यस्य इन्दोः अवेक्षणं दर्शनम्, मे अमृतं पीयूषं तस्माच्छतगुणम् ॥ ५ ॥

(सं.चं.) रामास्येन्दोरवेक्षणम् । येनानन्तममृतं लभेय ॥ ५ ॥

---

१. **'कलयन्ति'** २. **'लोकानां कालिनी'**

३. **'रामाख्येन्दोः'** इति वि.ती.पाठ इति भाति । अथाप्यस्फुटमिव टीकावचनम् । लिपिकृत्प्रमादेन गलितमिव ।

४. **'तस्माद् वनं गत्वा रामाङ्घ्रिं सेवमानः, रामास्येन्दोरवेक्षणं कुर्वन् तत्रैव स्थास्यामीति भावः' इति का.श्री. ।**

जगतामेकनाथे मे नाथे रामे विराजति ।
ब्रह्मनन्दन मां नाथं न ब्रुवन्ति भवादृशाः[1] ॥ ६ ॥

(भा.दी.) जगतामिति । जगतां लोकानां एको मुख्यो यो नाथस्तस्मिन्, मे नाथे श्रीरामे विराजति शोभमाने सति, ब्रह्मणश्चतुर्मुखस्य नन्दन पुत्र वसिष्ठ, भवता तुल्यं दृश्यन्त इति भवादृशो ज्ञानिनः, मां नाथं पृथिवीस्वामिनं न ब्रुवन्ति । ब्रूञो लट् ॥ ६ ॥

(सं.चं.) जगतां सप्तानामपि लोकानाम् । ब्रह्मनन्दनो वसिष्ठः । न ब्रुवन्ति न वक्तुमर्हन्ति ॥ ६ ॥

न्याय्यामुदारां करुणां वाणीं रामानुजन्मनः ।
श्रुत्वाऽश्रूण्यमुचंस्तृप्ता गुणैस्तस्य[2] महाजनाः ॥ ७ ॥

(भा.दी.) न्याय्यामिति । महाजनाः, रामादनु अनन्तरं जन्म यस्य स तथा तस्य, भरतस्य न्याय्यां युक्तियुक्ताम्, उदारां उत्तमाम्, करुणां श्रोतॄणां दयाश्रयाम्, वाणीं वाचं श्रुत्वा, तस्य भरतस्य गुणा रामभक्त्यादिगुणास्तैः तृप्ताः सन्तः अश्रूणि अमुचन् । मुच्लृ मोक्षणे लुङ् ॥ ७ ॥

(सं.चं.) न्याय्यां न्यायोपेताम् । दिष्ट्या प्राप्तस्यापि धैर्येण त्याग औदार्यमयी महती धर्मनिष्ठा । तद्युक्तत्वादुदारामुत्कृष्टाम् । करुणां रामविरहजनितेनान्तःशोकेन सम्भृताम् । महान्तो जना ज्ञानेन वयसा च । अस्य गुणैस्तृप्ता आनन्दाश्रूण्यमुचन् ॥ ७ ॥

तैलद्रोण्यामथ न्यस्तां कौसल्याया निवेशने ।
वीक्ष्योद्धृतां[3] पितृतनुं शुशोच भरतः पुनः ॥ ८ ॥

(भा.दी.) तैलेति । अथ भरतः, कौसल्यायाः निवेशनं गृहं तस्मिन्, तैलपूर्णा या द्रोणी तस्यां न्यस्ताम्, संस्कारार्थमुद्धृतां पितुस्तनुं वीक्ष्य पुनः शुशोच । शुच शोके लिट् ॥ ८ ॥

(सं.चं.) सम्प्रति तैलद्रोणीत उद्धृताम् । 'उद्धृतं तैलसंरोधात् स तु भूमौ निवेशितम् । आपीतवर्णवदनं प्रसुप्तमिव भूपतिम् । संवेश्य शयने चाग्र्ये नानारत्नपरिष्कृते । ततो दशरथं पुत्रो विललाप सुदुःखितः' (७६.४–५) इति च ॥ ८ ॥

---

१. **'भवादृशः'**इति वि.ती.पाठः स्यात् । २. **'गुणैरस्य'** ३. **'प्रेक्ष्योद्धृताम्'**

चतुर्दशशतस्त्रीभिः समं राजपरिग्रहैः ।
मातॄर्विलोक्य क्रोशन्तीर्विललाप[1] पुनश्च सः[2] ॥ ९ ॥

(भा.दी.) चतुर्दशेति। राज्ञः परिग्रहा दारास्तैः, चतुरधिका दश चतुर्दश च शतानि च चतुर्दशशतानि , तानि च ताः स्त्रियश्च ताभिः समं सह क्रोशन्तीः उच्चैः रुदन्तीः मातॄः कौसल्याद्या विलोक्य सः पुनश्च विललाप । रप लप व्यक्तायां वाचि लिट् ॥ ९ ॥

(सं.चं.) राजपरिग्रहा अर्धसप्तशतानि राजभार्याः । चतुर्दशशतस्त्रीभिर्दासीभिः समेतै राजपरिग्रहैः समं मातॄः कौसल्याद्यास्तिस्रः । राजपरिग्रहेषु एकैकस्या अपि चतस्रश्चतस्रो दास्य इति चतुर्दशशतानि दास्यः । अथवा परिग्रहशब्दोऽयं न भार्यावचनः । किन्तु भरणीयपरिवारवचनः । राज्ञः परिवारभूतैः, अर्थात् बन्धुतया राजसम्बन्धिनीभिश्चतुर्दशशतस्त्रीभिः समं क्रोशन्तीर्मातॄरिति । 'परिग्रहः कळत्रे च मूलस्वीकारयोरपि । शपथे परिवारे च' इत्यजयः । 'ಬಂಧುಬಳಗ' इति भाषायाम् । सर्वथाऽपूर्वमिदं प्रमेयं रामायणेऽनुक्तम् । प्रायो भगवत्पादेन प्रवचनेष्वाविष्कृतमिति ग्रन्थकृताऽत्र निबद्धम् । वाल्मीकिनाऽपि किञ्चिदिव सूचितम् । तथाहि तद्वचनम्–'क्रौञ्चीनामिव नारीणां निनादस्तत्र शुश्रुवे । आर्तानां करुणं काले क्रोशन्तीनां सहस्रशः' (७६.२१) इति । क्रोशन्तीनां नारीणां सहस्रस्येति किलार्थः । तस्येदं विवरणम्– 'चतुर्दशशतस्त्रीभिः' इति ॥ ९ ॥

दृष्ट्वा वसिष्ठजाबाली रुदन्तं[3] तमवोचताम् ।
अप्राकृतः प्राकृतवत् किं रोदिषि[4] नृपात्मज ॥ १० ॥

(भा.दी.) दृष्ट्वेति । वसिष्ठश्च जाबालिश्च तौ रुदन्तं तं भरतं दृष्ट्वा, हे नृपस्य दशरथस्य आत्मज पुत्र भरत, न प्राकृतोऽप्राकृतः, पामरविलक्षण इत्यर्थः, त्वं प्राकृतवत् पामरजनवत् किं किमर्थं रोदिषि? रुदिर् अश्रुविमोचने लट्, इति अवोचताम् ॥ १० ॥

(सं.चं.) वसिष्ठजाबाली । इदमप्यपूर्वम् । रामायणे वसिष्ठः सान्त्वयामासेतीयदेवोच्यते ॥ १० ॥

---

१. **'शोचन्तीर्विललाप'**

२. **'स भरतः चतुर्दशशतस्त्रीभिः परिचारिकाभिः, चतुःशताधिकसहस्रस्त्रीभिरित्यर्थः, समं साकम्, तथा राजपरिग्रहैः पञ्चाशदधिकत्रिशतसङ्ख्याकैः दशरथभार्याभिः, समं क्रोशन्तीः रुदतीः मातॄः कौसल्याद्यास्तिस्रः विलोक्य पुनश्च विललाप'** इति का.श्री. ।

३. **'जाबाली शोचन्तम्'** इति, **'रुदन्तं समवोचताम्'** इति च ।

४. **'किं विरौषि'**

भूरिद्युम्नो[१] गतः स्वर्ग्गं बन्धुशोकैर्न्निपातितः ।
नानुशोच्यस्ततः प्राज्ञैः पुण्यवान् स्वर्ग्गतिं गतः ॥ ११ ॥

(भा.दी.) भूरीति । भूरि बहु द्युम्नं पराक्रमो धनं वा यस्य स तथोक्तः, 'पराक्रमे धने द्युम्नम्' इति वैजयन्ती, महापराक्रमी बहुदक्षिणश्चेति वाऽर्थः, दशरथः, बन्धोः अनादिबन्धोः श्रीरामस्य वियोगजनिता ये शोकास्तैः निपातितः त्यक्तदेहः सन्, यतः स्वर्गः स्वर्गलोकस्तं गतः प्राप्तः, यतश्च प्राज्ञैर्ज्ञानिभिः पुण्यमस्यास्तीति पुण्यवान् स्वर्गतिं गतः पुरुषः अनुशोच्यः अनुशोचितुं योग्यः न । ततः दशरथोऽपि त्वया न शोच्य इत्यर्थः ॥ ११ ॥

(सं.चं.) भूरिद्युम्नो नाम राजा स्वर्गं गतोऽपि बन्धुशोकैः बन्धवोऽश्रूण्यवर्तयन्निति हेतोः स्वर्गान्निपातितः । ततः प्राज्ञैः पुण्यवान् स्वर्गतिं गतः कोऽपि नानुशोच्यः । ततो दशरथोऽपि नानुशोच्यः । मृतिमनुसृत्य शोकः अनुशोकः । इदमप्यपूर्वं रामायणेऽनुक्तम् । भूरिद्युम्न इति कश्चिच्चक्रवर्ती मैत्रायण्यामुपनिषदि पठ्यते– 'अन्ये महाधनुर्धराश्चक्रवर्तिनः केचित् सुद्युम्नभूरिद्युम्नेन्द्रद्युम्नकुवलयाश्वयवनाश्वाः' (१.४) इति । हरिवंशे (१.७.५८) मार्कण्डेये (९१.९) च कश्चिद् भूरिद्युम्नः भाविमनुपुत्रत्वेनोच्यते ॥ ११ ॥

इत्युक्तो बाढमित्युक्त्वा वन्दिनः प्रेक्ष्य वन्दकान् ।
नाहं राजेति निर्भत्स्य शत्रुघ्नं भरतोऽब्रवीत् ॥ १२ ॥

(भा.दी.) इतीति । इति वसिष्ठजाबालिभ्यां उक्तः भरतः, बाढमिति तथाऽस्त्विति उक्त्वा, वन्दन्ते स्तुवन्तीति वन्दकास्तान् वन्दिनः स्तुतिपाठकान् प्रेक्ष्य अहं राजा न इति निर्भत्स्य शत्रुघ्नं प्रति अब्रवीत् ॥ १२ ॥

(सं.चं.) वन्दिनः स्तुतिपाठकान् वन्दकान् 'जयजय महाराज' इति स्तुवतः ॥ १२ ॥

पश्य शत्रुघ्न कैकेय्या[२] दुर्न्नीतिं लोकनिन्दिताम् ।
रामराजवियोगेन राज्यश्रीर्विधवा यया[३] ॥ १३ ॥

(भा.दी.) पश्येति । हे शत्रुघ्न, यया कैकेय्या, रामश्च राजा च तयोर्यो वियोगस्तेन, राजश्रीः राजलक्ष्मीः विधवा स्वामिरहिता कृता, तस्याः कैकेय्याः लोकेषु निन्दितां दुर्नीतिं पश्य । दृशेर्लोट् ॥ १३ ॥

---

१. **'बहुलदक्षिणत्वात् भूरिद्युम्न इति कश्चन राजा'** इति का.श्री. । २. **'कैकेयीं दुर्नीतिम्'**

३. **'राजश्रीर्विधवा यया'** इति वि.ती.पाठ इति भाति । **'राज्यश्रीर्विधवायिता'** इति क्वचित् ।

(सं.चं.) रामस्य राज्ञश्च वियोगेन । रामाख्यस्य राज्ञो वा ॥ १३ ॥

[1]एवं ब्रुवाणो भरतो सभायां मन्त्रिभिः सह ।
मन्त्रयित्वा यथान्यायं चक्रे तस्यौर्ध्वदैहिकम्[2] ॥ १४ ॥

(भा.दी.) एवमिति । एवं ब्रुवाणः वदन् भरतः सभायां मन्त्रिभिः सुमन्त्रादिभिः सह मन्त्रयित्वा, तस्य दशरथस्य मरणादूर्ध्वं विद्यमानमौर्ध्वं तच्च तद्दैहिकं देहसम्बन्धिसंस्कारादि कर्म च तत्, न्यायं शास्त्रमनतिक्रम्य यथान्यायं चक्रे ॥ १४ ॥

(सं.चं.) यथान्यायं यथाविधि । यथा कर्मभ्रेशो न स्यात् । देहादूर्ध्वं ऊर्ध्वदेहः । ऊर्ध्वदेहे भवमौर्ध्व-देहिकमौर्ध्वदैहिकं वा । 'ऊर्ध्वदेहाच्च' इति वार्तिकेन ठञ् (अ.सू.४.३.६०) । और्ध्वदेहिकम् । 'अनुशतिकादीनां च' (अ.सू.७.३.२०) इति पाणिनिस्मरणात् अनुशतिकादित्वेनोभयवृद्धिवादिनां मते 'औध्र्वदैहिकम्' । यद्यपि अनुशतिकादिगणे ऊर्ध्वदेहशब्दो न पठितः । तथाऽपि तस्याऽकृतिगणत्वात् दृष्टप्रयोगा एवंविधा अन्येऽपि शब्दास्तत्रान्तर्भावमर्हन्तीति तेषामाशयः । अत एवाऽह वामनः–'आकृति-गणश्चायमिष्यते । तेनेदमपि सिद्धं भवति–अभिगममर्हति आभिगामिकः । अधिदेवे भवमाधिदैवम् । आधिभौतिकम् । चतस्र एव विद्याः चातुर्वैद्यम्' इति ॥ १४ ॥

राजदेहमथाऽरोप्य शिबिकां राजभूतिभिः ।
नृपात्मजावनयतां विशदं सरयूतटम् ॥ १५ ॥

(भा.दी.) राजेति । अथ नृपात्मजौ भरतशत्रुघ्नौ, राज्ञो यो देहस्तम्, शिबिकां याप्ययानम्, 'शिबिका याप्ययानं स्यात्' इत्यमरः, आरोप्य, राज्ञो दशरथस्य भूतिभिरैश्वर्यैः च्छत्रचामरादिभिः सह, विशदं निर्मलं सरय्वास्तटं तीरं तत्प्रति अनयतां नीतवन्तौ ॥ १५ ॥

(सं.चं.) शिबिकाम्– **'ಪಾಲಕಿ, ಡೋಲಿ'** इति भाषायाम् । राजदेहं शिबिकायामारोप्य, तां च शिबिकां नृपात्मजावनयताम् । राजयोग्याभिर्भूतिभिः विभवैः । विशदं स्वच्छपुलिनम् । नृपात्मजावनयताम्, परिचारकैः सह । रामायणेऽनुक्तमेतत् । तत्र परिचारका ऊहुरित्युक्तम्– 'शिबिकायामथाऽरोप्य राजानं गतचेतनम् । बाष्पकण्ठा विमनसस्तमूहुः परिचारकाः' (७६.१४) इति ॥ १५ ॥

---

१. **'इति ब्रुवाणो–'** २. **'तस्यौर्ध्वदेहिकम्'**

[१]चन्दनागरुकाष्ठाद्यैश्चितां तत्र नरैश्चिताम् ।
अलङ्कृतं राजदेहं तावारोपयतामथ ॥ १६ ॥

(भा.दी.) चन्दनेति । अथ तत्र सरयूतीरे, नरैः पुरुषैः, चन्दनाः चन्दनवृक्षास्ते च, अगरवो अगरुवृक्षास्ते च, तेषां यानि काष्ठानि तानि आद्यानि येषां तानि कर्पूरादीनि तैः, चितां संयोजिताम्, कृतामित्यर्थः, चितां प्रति अलङ्कृतं राज्ञो यो देहस्तं आरोपयताम् । रूप उपरिभावे लङ् ॥ १६ ॥

(सं.चं.) चन्दनकाष्ठैरगरुकाष्ठैश्च । 'अगुर्वगरु राजार्हम्' इति हैमः । आद्यपदेन तुळसीकाष्ठलामज्जकक-रीषादिभिः करणैः भृत्यजनैश्चितां समूह्य रचितां चितां तावारोपयताम् । ननु रुहिर्न द्विकर्मकः । क एवमाह ते । किं न स्मरसि प्राचां वचनम्–'सुभद्रां रथमारोप्य' (भाग.१०.८७.११) इति । ननु नोक्तं पाणिनिना । पाणिनिः किमपि न मुखत आह । केवलम्–'अकथितं च' (अ.सू.१.४.५१) इत्येवाऽह । तर्हि गृहाणाकथितेषु रुहिमपि । ननु अविदितव्याकरणइव मा स्म भाषथाः । अपादानादिकारकविशेषैरकथितमिति किल सूत्रार्थः । अत्र त्वधिकरणत्वविवक्षया चितायामित्येव युक्तं वक्तुम् । सत्यम्, अधिकरणत्वविवक्षायां चितायामित्येव युक्तं वक्तुम् । अविवक्षित्वाऽधिकरणत्वं विवक्षित्वा च कर्मत्वमेवमाह । नन्वविवक्षिता धातवः पठिताः । सत्यं पठिताः पाणिनीयैः । तत्पक्षे यत्र कारकान्तरविधिर्न शक्यं तत्र कर्मत्वं विवक्षितुम् । तेन पाणिनीयपरमाः प्रतीत्यध्याहार्य सन्तोषितव्याः–'चितां प्रति राजदेहमारोप्य' इति । वयं तु बादरायणप्रयोग-परमा द्विकर्मकत्वमुष्म इति न कोऽपि दोषः । वस्तुतस्तु नायं रुहिः । किन्तु 'रूप उपरिभावे' इति वैदिको धातुः । सोऽयमविदितो धातुः पाणिनीयानाम् । अविदिते पुनस्ते कथं किमपि विदधीरन्? निषेधेयुर्वा? ॥ १६ ॥

अथाऽश्वमेधिकानग्नीन् प्रणीयोद्दीप्य ते द्विजाः ।
पात्राणि च यथास्थानं विन्यस्य जुहुवुर्घृतम् ॥ १७ ॥

(भा.दी.) अथेति । अथ ते वसिष्ठाद्याः द्विजाः, अश्वमेधस्य सम्बन्धिन आश्वमेधिकास्तान् अग्नीन् प्रणीय नीत्वा, उद्दीप्य प्रज्वाल्य, हवनोपयुक्तपात्राणि च स्थानमनतिक्रम्य यथास्थानं विन्यस्य, घृतमाज्यं तत् जुहुवुः । हु दानादनयोर्लिट् ॥ १७ ॥

---

१. 'चन्दनागुरु–'

(सं.चं.) अथाऽश्वमेधिकान् । प्रणीय मन्त्रपूर्वकं संस्कृत्य । 'ये त्वग्नयो नरेन्द्रस्य अग्न्यगाराद् बहिष्कृताः । ऋत्विग्भिर्याजकैश्चैव आह्रियन्त यथाविधि' (७६.१३) इति, 'तथा हुताशनं हुत्वा जेपुस्तस्य तमृत्विजः । जगुश्च ते यथाशास्त्रं तत्र सामानि सामगाः' (१८) इति च ॥ १७ ॥

ततो भरतशत्रुघ्नौ पुरोहितमतेन तौ ।
चक्राते पितृसंस्कारं निघ्नन्तौ शोकमुत्थितम् ॥ १८ ॥

(भा.दी.) तत इति । तौ भरतशत्रुघ्नौ, पुरोहितस्य वसिष्ठस्य मतं सम्मतिस्तेन, पितुः संस्कारो दहनादिरूपः तम्, उत्थितः उत्पन्नः तम्, शोकं निघ्नन्तौ ज्ञानेन नाशयन्तौ चक्राते ॥ १८ ॥

(सं.चं.) निघ्नन्तौ बलात् स्थगयन्तौ ॥ १८–२० ॥

तौ विलापं विहायाथ दध्यतू रामसोदरौ ।
विवेकक्षाळिते चित्ते ज्योतिर्न्नारायणाह्वयम् ॥ १९ ॥

(भा.दी.) ताविति । अथ श्रीरामस्य सोदरौ भ्रातरौ (तौ भरतशत्रुघ्नौ), विलापः परिदेवनं तं विहाय, विवेकेन ज्ञानेन क्षाळितं शोधितं तस्मिन् चित्ते, नारायण इति आह्वयो यस्य तत्तथोक्तं तत्, ज्योतिः दध्यतुः । ध्यै चिन्तायां लिट् ॥ १९ ॥

सरयूसरितं प्राप्य [१]राघवावुदकाञ्जलिम् ।
विगाह्य पित्रे ददतुः पौरा जानपदा अपि ॥ २० ॥

(भा.दी.) सरय्विति । राघवौ रघुगोत्रभवौ भरतशत्रुघ्नौ, सरयूश्चासौ सरिच्च तां प्राप्य, विगाह्य स्नात्वा, उदकाञ्जलिरुदकदानम्, तं पित्रे ददतुः, उदकक्रियां चक्रतुरित्यर्थः । पुरि विद्यमानाः पौराः जनाः, जनपदेषु राष्ट्रेषु विद्यमाना जानपदा जनाश्च उदकाञ्जलिं ददुरिति सम्बन्धः ॥ २० ॥

राज्ञा रामेण च त्यक्तां भरतः प्रेक्ष्य तां पुरीम् ।
नैच्छत् प्रवेष्टुं श्रेयोऽत्र[२] मेने प्रायोपवेशनम् ॥ २१ ॥

---

१. '**राघवायोदका–**'

२. '**अत्रास्मिन्नवसरे, सरयूतीरे वा**' इति का.श्री. ।

(भा.दी.) राज्ञेति । भरतः राज्ञा दशरथेन श्रीरामेण च त्यक्तां तां पुरीं प्रेक्ष्य प्रवेष्टुं नैच्छत् । इषु इच्छायां लङ् । अत्र बहिःप्रदेश एव, एतस्मिन्नेव सरयूतीर इति वा, प्रायेण अनशनेन उपवेशनं यावज्जीवमवस्थानं तत् । 'प्रायो वयसि बाहुल्ये तुल्यानशनमृत्युषु' इति वैजयन्ती । श्रेयः अत्यन्तप्रशस्तं मेने निरूपितवान् । मन ज्ञाने लिट् ॥ २१ ॥

(सं.चं.) मरणान्त उपवासः प्रायोपवेशनम् । 'प्रायो मरणानशने' इति मेदिनी । प्रायेण प्रायाय वोपवेशनम्, एकत्रावस्थानम् ॥ २१ ॥

विप्रस्तं धर्म्मपालाख्यो[१] राजामात्योऽन्वबोधयत्[२] ।
प्रविवेश पुरीं कृच्छ्रादयोद्ध्यां भरतस्ततः ॥ २२ ॥

(भा.दी.) विप्र इति । धर्मपाल इति आख्या यस्य स तथोक्तः राज्ञो दशरथस्य अमात्यः मन्त्री विप्रः (तं भरतं) न्यबोधयत् । अयोध्यामवश्यं प्रविशेत्यादि[३] भरतं प्रति बोधयामास । बुधिर् बोधने लङ् । ततः तेन बोधनानन्तरम्, (भरतः) अयोध्यां पुरीं कृच्छ्रं निर्बन्धस्तस्मात् प्रविवेश ॥ २२ ॥

(सं.चं.) धर्मपालाख्यो राजामात्यः । इदमपि रामायणेऽनुदितम् । वसिष्ठस्तं बोधयामासेति तु रामायणे–'ततः प्रकृतिमान् वैद्यः पितुरेषां पुरोहितः । वसिष्ठो भरतं वाक्यमुत्थाप्य तमुवाच ह' (७७.२१) इति । वसिष्ठमनु धर्मपालोऽबोधयत् ॥ २२ ॥

अथाऽशौचात्यये वीरश्चक्रे श्राद्धानि भक्तिमान् ।
प्रादाद् द्विजेभ्यो ग्रामाग्र्यान् धनं जीवधनं बहु ॥ २३ ॥

(भा.दी.) अथेति । भक्तिमान् वीरः भरतः, आशौचस्य सूतकस्य[४] अत्ययोऽपगमस्तस्मिन् सति, श्राद्धानि चक्रे । द्विजेभ्यः ग्रामाग्र्यान्, बहु बहळं धनं स्वर्णादि, जीवधनं गवाश्वादि (प्रादात्) प्रददौ ॥ २३ ॥

(सं.चं.) अशुचेर्भाव आशौचम् । मृतिनिमित्तमशुचित्वम्, मृतकम् । जीवधनं गवादिकम् । 'बास्तिकं बहु शुक्लं च गाश्चापि शतशस्तदा । दासीर्दासांश्च यानानि वेश्मानि सुमहान्ति च । ब्राह्मणेभ्यो ददौ पुत्रो राज्ञस्तस्यौर्ध्वदैहिकम्' (७७.२३) इति ॥ २३ ॥

---

१. **'विप्रः सुधर्मपालाख्यो–'** २. **'राजामात्यो न्यबोधयत्'** इति वि.ती. पाठ इति भाति । ३. **'अयोध्याऽवश्यं प्रवेश्येति'**

४. 'यद्यपि सूतकमिति जाताशौचमुच्यते । तेन मृतकस्येति वक्तव्यम् । अथाप्युपचारत उभयत्रापि सूतकपदं लौकिकाः प्रयुञ्जते । तदनुसारी चायं प्रयोगः । अत एव का.श्री. टीकायां विद्यभूषणीये चैवमेवोक्तम्–**'आशोचात्यये सूतकापगमे'** इति ।

अराजकमिदं राज्यं राजनन्दन नश्यति ।
अभिषिच्यस्व हन्तेति[1] प्रोचुः प्रकृतयोऽथ तम् ॥ २४ ॥

(भा.दी.) अराजकमिति । अथ अमात्यादिप्रकृतयः, हे राजनन्दन भरत, न विद्यते राजा यस्य तत्तथोक्तं तत्, इदं राज्यं नश्यति । नश अदर्शने लट् । त्वं अभिषिच्यस्व अभिषेकं प्राप्नुहि । षिच सेचने लोट् । इति तं प्रोचुः (हन्त) ॥ २४ ॥

(सं.चं.) अभिषिच्यस्व । 'अभिषेचय चाऽत्मानं पाहि चास्मान्नरर्षभ' (७९.५) इति च। हन्तेति सम्बोधने । हन्त अङ्ग भरत । 'सम्बोधने ननु प्याट् पाट् हे है भो अङ्ग हन्त च' इति यादवप्रकाशः । हर्षोद्गारश्चायम् । 'हन्त हर्षविषादयोः' इति च ॥ २४ ॥

इत्युक्त ऊचे भरतः सत्यमस्त्वभिषेचनम् ।
किन्तु ज्येष्ठस्य रामस्य गुणश्रेष्ठस्य[2] सर्वतः ॥ २५ ॥

(भा.दी.) इतीति । प्रकृतिभिः इत्युक्तः भरतः, अभिषेचनं सत्यं यथा भवति तथा अस्तु । तर्हि किं विळम्ब इत्यत आह– **किन्त्विति** । मम न, किन्तु सर्वतः सर्वस्मात् ब्रह्मादेः ज्येष्ठस्य ज्यायसः, गुणैः ज्येष्ठस्य श्रीरामस्य भवतु, इति ऊचे इति सम्बन्धः ॥ २५ ॥

(सं.चं.) सर्वस्मादपि जगतः गुणैः श्रेष्ठस्य मम ज्येष्ठस्य रामस्याभिषेचनमस्तु ॥ २५ ॥

रामार्थं तस्य शिष्योऽहं चरिष्यामि व्रतं वने ।
सकामा स्यान्न कैकेयी राज्यकामातुरा खला ॥ २६ ॥

(भा.दी.) रामेति । तस्य श्रीरामस्य शिष्यः अहम्, श्रीरामायेति रामार्थम्, वने व्रतम्, चतुर्दशवर्षेषु वनवासलक्षणं व्रतम्, तत् चरिष्यामि करिष्यामि । चर गतिभक्षणयोर्लृट् । राज्ये यः काम इच्छा तेन आतुरा पीडिता, खला दुष्टा कैकेयी, कामेन अभीष्टेन सहिता सकामा न स्यात् ॥ २६ ॥

(सं.चं.) रामस्य वनवासो विहितः । तत् कथं त्वं चरिष्यसीत्यत आह– रामशिष्योऽहमिति । लोकशास्त्रसिद्ध-मेतत्–'यद् गुरोः कार्यं शिष्यः करोति । पितुः कार्यं पुत्रः करोति । राज्यस्य कामेन कामनया आतुरा रोग-

१. **'हन्त प्रजासु दयया त्वभिषिच्यस्व राजा भव'** इति का.श्री। २. **'गुणैर्ज्येष्ठस्य'** इति **'गुणज्येष्ठस्य'** इति वा वि.ती.पाठः स्यात्।

ग्रस्तेव । 'राज्यकामा आतुरा' इति भिन्ने वा पदे । आतुरा भरतं राजासनगतं द्रष्टुमतित्वरमाणेत्यर्थः । राज्याधिकारभोगरोगग्रस्ता वा ॥ २६ ॥

एवं ब्रुवाणं भरतं सर्वे प्रोचुः प्रहर्षिताः ।
रामभक्तस्य ते वत्स सम्पदः सन्तु साध्विति ॥ २७ ॥

(भा.दी.) एवमिति । प्रहर्षिताः भरतवचनेन सन्तुष्टाः सर्वे जनाः, एवं ब्रुवाणं वदन्तं भरतं प्रति, हे वत्स, रामभक्तस्य ते तव सम्पदः साधु सम्यक् यथा भवति तथा सन्तु इति प्रोचुः ॥ २७ ॥

(सं.चं.) भरतवचनश्रवणेन प्रहर्षिताः प्रभूतं हर्षं प्रापिताः सन्तोषिताः ॥ २७ ॥

रामपादान्तिकं गन्तुं सह पौरैः ससैनिकैः[१] ।
शिल्पिभिः खनकैश्चाथ मार्ग्गं[२] सोऽचीकरद् द्रुतम् ॥ २८ ॥

(भा.दी.) रामेति । अथ सः भरतः सङ्गतैः मिळितैः, पुरि विद्यमानाः पौरास्ते च सेनायां भवा सैनिकास्ते च तैः सह, श्रीरामस्य यौ पादौ तयोरन्तिकं समीपं तत् गन्तुम्, शिल्पिभिः कार्वादिभिः खनकैः खननकारिभिश्च, मार्गो राजमार्गस्तं द्रुतं यथा भवति तथा अचीकरत् कारयामास ॥ २८ ॥

(सं.चं.) शिल्पिभिः तन्त्रज्ञैः । अचीकरत् । कारयतेर्लुङि रूपम् । अकारयत् । ससैनिकैः पौरैः सह गन्तुम् । 'क्रियतां शिल्पिभिः पन्थाः समानि विषमाणि च' (७९.१३) इति, 'निर्जलेषु च देशेषु खानयामासुरुत्तमान् । उदपानान् बहुविधान् वेदिकापरिमण्डितान्' (८०.१२) इति च ॥ २८ ॥

समातृकं च भरतं निर्य्यान्तं[३] परिवार्य्य ते ।
पौराः सर्वे प्रभुं जग्मुर्निम्नमापइव स्वयम्[४] ॥ २९ ॥

(भा.दी.) समातृकमिति । सर्वे ते पौराः जनाः, मातृभिः सहितः समातृकस्तम्, अयोध्याया निर्यान्तं निर्गच्छन्तम्, भरतं परिवार्य, प्रभुं श्रीरामं प्रति, निम्नं निम्नस्थलं तत् स्वयं स्वभावतः आप इव जलानीव, जग्मुः ॥ २९ ॥

---

१. **'गन्तुं सङ्गतैः पौरसैनिकैः'** इति वि.ती.पाठः । **'सह तैः पौरसैनिकैः'** इति च क्वचित् ।

२. **'वनवृक्षादिकान् छित्वा सुखेन गन्तुं मार्गं कारयामास'** इति का.श्री. ।

३. **'निर्यातम्'**

४. **'यस्य प्रसन्नो भगवान् गुणैर्मैत्र्यादिभिर्हरिः । तस्मै नमन्ति भूतानि निम्नमाप इव स्वयमिति भागवतोक्तदृष्टान्त उक्तः'** इति का.श्री. ।

(सं.चं.) निम्नं प्रदेशमाप इव । 'ताः प्रजाः सर्वाः प्रभुं जग्मुः' इति पाठः स्वरसः ॥ २९ ॥

अयुतेभं लक्षहयं सरथाष्टसहस्रकम् ।
ययावसङ्ख्यपादातं सैन्यं रामदिदृक्षया ॥ ३० ॥

(भा.दी.) अयुतेति । अयुतं दशसहस्रसङ्ख्याका इभा गजा यस्मिन् तत्तथोक्तम्, लक्षं लक्षसङ्ख्याका ये हया अश्वा यस्मिन् तत्तथा, रथानां अष्टौ च तानि सहस्राणि च अष्टसहस्राणि, तैः सहितं सरथाष्टसहस्रकम्, न विद्यते सङ्ख्या येषां ते तथा तादृशाः पादाताः पत्तयो यस्मिन् तत्तथा, सैन्यं श्रीरामस्य दिदृक्षया दर्शनेच्छया ययौ ॥ ३० ॥

(सं.चं.) अयुतेभम् । गजानां दश सहस्राणि । अश्वानां लक्षं शतं सहस्राणि । रथानामष्टसहस्रकेन सहितम् । सम्प्रति रामायणे किञ्चिदिवान्यथा पठ्यते–'नव नागसहस्राणि कल्पितानि यथाविधि । अन्वयुर्भरतं यान्तमिक्ष्वाकुकुलनन्दनम् । षष्टी रथसहस्राणि धन्विनो विविधायुधाः । अन्वयुर्भरतं यान्तं राजपुत्रं यशस्विनम् । शतं सहस्राण्यश्वानां समारूढानि राघवम् । अन्वयुर्भरतं यान्तं सत्यसन्धं जितेन्द्रियम्' (८३.३–५) इति । अथ चायमत्र ग्रन्थकृत्सम्मतो रामायणपाठः–'नव नागसहस्राणि' इत्यत्र 'दश नागसहस्राणि' इति, 'षष्टी रथसहस्राणि' इत्यत्र 'अष्टौ रथसहस्राणि' इति च । पादाताः पदातयः । ननु रामदिदृक्षया भरतः प्रस्थितः, न युयुत्सया । तत् कुतोऽयं सैन्यसन्नाहः? आह– ययौ सैन्यं रामदिदृक्षया । सैन्यमपि रामदिदृक्षया स्वयं ययौ । न युयुत्सया । राजविभूत्या रामः समानेय इति भरतोऽपि सैन्ययानं संयोजयामास ॥ ३० ॥

अबला अपि बालाश्च वृद्धाश्च किमुतापरे ।
अहं प्रागित्युपाजग्मू रामपाददिदृक्षया ॥ ३१ ॥

(भा.दी.) अबला इति । अबलाः स्त्रियः । 'अबला महिळा ललना' इति हलायुधः । बालाश्च वृद्धाश्च, श्रीरामस्य यौ पादौ तयोर्दिदृक्षा द्रष्टुमिच्छा तया, अहं प्राक् पूर्वं गच्छामि इति मनोरथेन उपाजग्मुः । अपरे गमने शक्ता जना जग्मुरिति किमुत? किमु वक्तव्यम्? ॥ ३१ ॥

(सं.चं.) अबला नार्यः । एवं वृद्धाश्च बालाश्च स्वयमबला अशक्ता अपि । अहं प्रागिति । अहम्पूर्वमहम्पूर्वमित्यहमहमिकया ॥ ३१ ॥

मेघश्यामं मेघघोषं मेघवत् तापहारिणम् ।
द्रक्ष्यामो राममित्युच्चैः प्रहृष्टाः प्राद्रवन् वनम् ॥ ३२ ॥

(भा.दी.) मेघेति । मेघवच्छ्यामः श्यामळस्तम्, मेघस्य घोष इव घोषो यस्य स तथा तम्, मेघ इव तापं हर्तुं शीलमस्यास्तीति तथा तं श्रीरामं द्रक्ष्यामः । इति अभिप्रायेण उच्चैः सम्यक् प्रहृष्टाः सन्तः वनं प्रति प्राद्रवन् ॥ ३२ ॥

(सं.चं.) रामदिदृक्षाजनितसम्भ्रमेण प्रकटं हृष्टाः हृष्टरोमाणः । पुलकितसर्वाङ्गाः । विस्मिता वा । 'हृषेर्लोमसु' (७.२.२९) इति पाणिनिः । 'विस्मितप्रतिघातयोश्चेति वक्तव्यम्' इति तत्रैव वार्तिकम् ॥ ३२ ॥

गङ्गायां सैन्यमाश्वास्य रामं रामानुजः स्मरन् ।
वसिष्ठाद्यैः परिवृतश्चकार पितृतर्प्पणम् ॥ ३३ ॥

(भा.दी.) गङ्गायामिति । रामानुजः भरतः, गङ्गायां सैन्यं सेना तत् आश्वास्य, विश्रमणं कारयित्वा, श्रीरामं स्मरन् सन्, वसिष्ठ आद्यो येषां ते तथा तैः परिवृतः सन्, पितॄणां तर्पणं तत् चकार ॥ ३३ ॥

(सं.चं.) आश्वास्य विश्रान्त्यर्थं निवेश्यतामिति सान्त्वयित्वा । गङ्गातीरे सैन्यमाश्वास्य गङ्गायां पितृतर्पणं चकार ॥ ३३ ॥

भरतः श्रीमदान्धोऽयं रामं प्रत्यवतिष्ठते[१] ।
रोत्स्यामीमं रामभक्त्या गुहस्तत्रेत्यमन्यत ॥ ३४ ॥

(भा.दी.) भरत इति । श्रियः सम्पदो यो मदस्तेन अन्ध इवान्धः अयं भरतः श्रीरामं प्रत्यवतिष्ठते हन्तुमुद्युक्ततयाऽऽगच्छति । इमं भरतम्, श्रीरामे या भक्तिस्तया, रोत्स्यामि रुद्धं करिष्यामि । रुधिर् आवरणे लृट् । इति गुहः गुहनामको निषादाधिपः, तत्र गङ्गातटे अमन्यत । मन ज्ञाने लङ् ॥ ३४ ॥

(सं.चं.) प्रत्यवतिष्ठते विरोधप्रकटनेनावमन्तुं शत्रोरभिमुखं प्रस्थानं प्रत्यवस्थानम् । प्रतिराभिमुख्ये । 'समवप्रविभ्यः स्थः' (अ.सू.१.३.२२) इत्यात्मनेभाषा । प्रतियोगे द्वितीया । इत्यमन्यत । मन्यतिरत्र शङ्कायाम् । कुतोऽमन्यत? रामभक्त्या हेतुभूतया भरतं शत्रुमाशङ्कत ॥ ३४ ॥

गुहः सोपायनो दृष्ट्वा भरतं कृतसङ्कथः[२] ।
तं शुद्धबुद्धिं विज्ञाय पूजयामास सादरम् ॥ ३५ ॥

१. **'प्रत्यवतिष्ठते प्रतिभटत्वेनाऽगच्छति । विरोधं करोतीति यावत्'** इति का.श्री. ।

२. **'कृतसत्कथः'** इति वि.ती.पाठः ।

(भा.दी.) गुह इति । उपायनेन करद्रव्येण सहितः सोपायनः, भरतस्याभिप्रायविज्ञप्त्यै भरतनिकटं प्रत्यागमनसमये मांसाद्युपायनद्रव्यसहित इत्यर्थः, गुहः भरतं दृष्ट्वा, कृता सती कथा श्रीरामकथा येन स तथा सन्, तं भरतं शुद्धा बुद्धिर्यस्य स तथोक्तस्तं विज्ञाय, आदरेण सत्कारेण सहितं यथा भवति तथा सादरं पूजयामास । पूज पूजायां लिट् ॥ ३५ ॥

(सं.चं.) सङ्कथा परस्परं वार्ताविनिमयः । 'सङ्कथाऽन्योन्यसङ्गीतिः' इत्यभिधानम् । उपायनं यदतिथये उपह्रियते । '**ಉಡುಗೊರೆ**' इति भाषायाम् ॥ ३५ ॥

कुत्राऽसितं[1] ससीतेन वने नः स्वामिना[2] गुह ।
किमत्र लक्ष्मणश्चक्र इत्यपृच्छदसौ गुहम् ॥ ३६ ॥

(भा.दी.) कुत्रेति । हे गुह, ससीतेन नः अस्माकं स्वामिना श्रीरामेण वने कुत्र कस्मिन् स्थळे आसितं आस्थितम्? अत्र वने लक्ष्मणः किं चक्रे? असौ भरतः गुहं प्रति इति अपृच्छत् ॥ ३६ ॥

(सं.चं.) नः सर्वेषां स्वामिना रामेण ॥ ३६ ॥

रामस्य वार्त्तामार्त्ताय भरतायोक्तवान् गुहः ।
वनवासाच्च[3] रामस्य सौमित्रेः परिदेवनम् ॥ ३७ ॥

(भा.दी.) रामस्येति । गुहः श्रीरामस्य वार्तां आर्ताय श्रीरामवियोगेन दुःखिताय भरताय उक्तवान् । श्रीरामस्य वने यो वासस्तस्मात् सौमित्रेर्लक्ष्मणस्य परिदेवनं विलापस्तच्च उक्तवान् ॥ ३७ ॥

(सं.चं.) 'विप्रलापो विरोधोक्तिः संलापो भाषणं मिथः । काक्वावर्णनमुल्लापो विलापः परिदेवनम्' इति यादवप्रकाशः ॥ ३७–८ ॥

फलमूलाम्बुभिर्वृत्तिं जटावलयबन्धनम्[4] ।
श्रुत्वा सर्वमिदं शोकाद् भरतो मूर्च्छितोऽपतत् ॥ ३८ ॥

---

१. '**कुत्र स्थितम्**' २. '**वने मे स्वामिना**' ३. '**वनवासं च रामस्य**'

४. '**फलाम्बुभिश्च तां वृत्तिं जटावल्कलबन्धनम्**' । इति, '**सफलाम्बुमितां वृत्तिं जटावलयबन्धनम्**' इति च ।

(भा.दी.) फलेति । भरतः, फलानि च मूलानि अम्बूनि च तैः वृत्तिं जीवनम्, जटानां वलयं मण्डलं तस्य बन्धनं तत्, इदं अत्र वने प्रवृत्तम्, सर्वं समस्तं पर्णशय्यादिकं श्रुत्वा, शोकः शुक् तस्मान्मूर्च्छितः सन्अपतत् ॥ ३८ ॥

आर्त्तोऽधिकं मुहूर्त्तेन सञ्ज्ञामाप्य[1] विलप्य च ।
इङ्गुदीवृक्षमागम्य[2] स्मरन् राममभाषत ॥ ३९ ॥

(भा.दी.) आर्त इति । अधिकं यथा भवति तथा आर्तः भरतः, मुहूर्तो मुहूर्तकालस्तेन सञ्ज्ञां आप्य प्राप्य, विलप्य विलापं कृत्वा च, पूर्वं श्रीरामाधिष्ठितो य इङ्गुदीवृक्षस्तं आनम्य, श्रीरामं स्मरन् सन् अभाषत ॥३९॥

(सं.चं.) इङ्गुदीवृक्षमागम्य यन्मूले रामः स्थितः ॥ ३९ ॥

ईदृशः पर्ण्णपर्य्यङ्कः फलमूलोपजीवनम् ।
जगन्नाथस्य नाथस्य कथं न[3] भविता पुनः ॥ ४० ॥

(भा.दी.) ईदृश इति । जगन्नाथस्य, नाथस्य मे स्वामिनः श्रीरामस्य, ईदृशः एवंविधः पर्णमयः पर्यङ्कः, फलं मूलं च ताभ्यां उपजीवनं च, पुनः कथं न भविता न भविष्यति, इत्यभाषतेति सम्बन्धः ॥ ४० ॥

(सं.चं.) कथं न भविता पुनः, तथा मया करणीयम् ॥ ४० ॥

वन्यैर्ज्जलैश्च वर्त्तिष्ये शयिष्ये स्थण्डिलेष्वहम् ।
अद्यप्रभृति गुर्वर्त्थं सत्यमेतत् प्रतिश्रुतम् ॥ ४१ ॥

(भा.दी.) स्वोक्तार्थे स्वाभिप्रेतमुपायमाह– **वन्यैरिति** । अहं वने भवानि वन्यानि तैः फलादिभिः, वने भवानि यानि जलानि तैश्च, अद्यप्रभृति (एतद्दिनम्) आरभ्य, गुरवे ज्येष्ठायेति गुर्वर्थं वर्तिष्ये । स्थण्डिलानि केवलभूस्थलानि तेषु शयिष्ये । शीङ्धातोर्लृट् । एतत् कृतं प्रतिश्रुतं प्रतिज्ञा सत्यम् ॥ ४१ ॥

(सं.चं.) तदर्थमहं वन्यैः फलमूलैः, वन्यैरेव च जलैः, नतु कृत्रिमकूपादिभिराहतानि वर्तिष्ये जीवनं निर्वक्ष्ये ॥ ४१ ॥

---

१. **'सञ्ज्ञां प्राप्य'** २. **'–वृक्षमानम्य'** इति वि.ती.पाठ इति भाति । ३. **'कथं नु भविता'**

लक्ष्मणार्त्थं[1] च शत्रुघ्नः कार्य्यमेवं करिष्यति ।
आर्य्याभ्यां नगरे स्थेयं दैवं तत्रानुमोदताम् ॥ ४२ ॥

(भा.दी.) लक्ष्मणेति । शत्रुघ्नश्च, लक्ष्मणार्थं लक्ष्मणेन क्रियमाणवनवासाद्यर्थमित्यर्थः, एवं कार्यं करिष्यति । आर्याभ्यां ज्येष्ठाभ्याम्, नगरं पुरं तस्मिन्, स्थेयं स्थातव्यम् । तत्र एतस्मिन् कार्ये दैवं अनुमोदतां आनुकूल्यं करोतु । मुद हर्षे लोट् ॥ ४२ ॥

(सं.चं.) दैवं विधिः । 'विधौ दैवं दिष्टभाग्ये विपाको भवितव्यता' इति यादवप्रकाशः । मम दैवं रामस्तत्रानुमोदतामिति हृदयम् । तथाऽस्त्वित्यनुमोदताम् ॥ ४२ ॥

एवं रामकथामग्नो निशां तामत्यवर्त्तयत् ।
सशत्रुघ्नोऽथ भरतो मातृभिः परिवारितः ॥ ४३ ॥

(भा.दी.) एवमिति । अथ एवं श्रीरामस्य या कथा तस्यां मग्नः आसक्तः सशत्रुघ्नः शत्रुघ्नसहितः मातृभिः परिवारितः भरतः तां निशां अत्यवर्तयत् गमयामास ॥ ४३ ॥

प्रातः सन्ध्यामुपास्याथ गङ्गां स भरतोऽतरत् ।
चतुरङ्गं च तत्सैन्यं प्लवैर्न्नौभिश्च तारकैः ॥ ४४ ॥

(भा.दी.) अथ सः भरतः, प्रातः प्रातःकाले, सन्ध्यां उपास्य गङ्गां अतरत् । तॄ प्लवनतरणयोः लङ् । चत्वारि अङ्गानि रथादीनि यस्य तत्तथा तत्, तत्सैन्यं तस्य भरतस्य सैन्यं च, प्लवा उडुपास्तैः, नावस्तर्यस्ताभिः, तारकैः तारकपुरुषैः, अतरदित्यन्वयः ॥ ४४ ॥

(सं.चं.) प्लवैर्नौभिश्च । प्लवाः 'ತೆಪ್ಪ' इति भाषायाम् । 'तल्पं स्यादुडुपः प्लवः' इत्यभिधानम् । विशालाः समतळाः प्लवाः । मध्ये नता दीर्घायिता नावः । 'ದೋಣಿ' इति भाषायाम् । तारकैर्नाविकैः । 'नावश्चाऽरुरुहुस्त्वन्ये प्लवैस्तेरुस्तथाऽपरे' (८९.१०) इति च ।गजास्तु गजारोहैः प्रचोदिताः स्वयमतरन् । 'सवैजयन्तास्तु गजा गजारोहैः प्रचोदिताः । तरन्तः स्म प्रकाशन्ते सपक्षा इव पर्वताः'(८९.१९) इति च ॥ ४४ ॥

दाशैर्ग्गुहनियुक्तैस्तां सन्तीर्य्य भरतो नदीम् ।
गुहाभिहितमार्ग्गेण जननीभिः समं ययौ ॥ ४५ ॥

१. 'लक्ष्मणार्थे च' । 'लक्ष्मणार्थं लक्ष्मणेन कार्यव्रतकरणार्थम्' इति का.श्री. ।

(भा.दी.) दाशैरिति । भरतः गुहेन नियुक्ता आज्ञप्तास्तैः दाशैः तां नदीं गङ्गां सन्तीर्य, गुहेन अभिहितो यो मार्गस्तेन, जननीभिः समं साकं ययौ ॥ ४५ ॥

(सं.चं.) 'कैवर्तो धीवरो दाशो नौजीवी जालिमार्गरौ' इति यादवप्रकाशः । **'ಬೆಸ್ತ, ಮೀನುಗಾರ'** इति भाषायाम् ॥ ४५ ॥

प्रयागं प्राप्य तत् सैन्यं नियम्याऽरात् ससोदरः ।
भरतोऽथ भरद्वाजं प्राप्तवानभ्यवन्दत ॥ ४६ ॥

(भा.दी.) प्रयागमिति । अथ भरतः, प्रयागः प्रयागक्षेत्रम्, तं प्राप्य, तत् स्वकीयं सैन्यं आरात् दूरे नियम्य आज्ञया स्थापयित्वा, सोदरेण भ्रात्रा शत्रुघ्नेन सहितः सन्, भरद्वाजमृषिं प्राप्तवान् सन् अभ्यवन्दत ॥४६॥

(सं.चं.) आरात् भरद्वाजाश्रमात् किञ्चिद्दूरे । नियम्य स्थीयतामित्याज्ञाप्य । प्रयागं प्रयागाख्यं वनम्, यत्र भरद्वाजाश्रमम् । सादरं वन्दनमभिवन्दम् ॥ ४६ ॥

रामं राज्यात् परित्याज्य[१] त्रैलोक्यस्यैकनायकम् ।
किं विधत्से[२] ससैन्योऽथ त्वमित्याह स्म तं मुनिः ॥ ४७ ॥

(भा.दी.) राममिति । मुनिः भरद्वाजः, हे भरत, त्वम्, त्रयश्च ते लोकाश्च त्रिलोकास्त एव त्रैलोक्यम्, तस्य एको मुख्यो यो नायकः स्वामी तम्, श्रीरामं राज्यं साम्राज्यं तस्मात् परित्याज्य बहिर्वासयित्वा, अथ ससैन्यः सन् त्वं किं कार्यं विधत्से कर्तुमिच्छसि? इति तं आह स्म अवदत् ॥ ४७ ॥

(सं.चं.) किं विधत्से विदधासि? वर्तमानसामीप्ये वर्तमानव्यपदेशः । किं करिष्यति? चिकीर्षसीति पर्यवसितम् ॥ ४७–९ ॥

अनुतप्तोऽस्मि दुष्टायाः कैकेय्याः कैतवान्मुने ।
पुरं नेष्यामि मे नाथमिति तं भरतोऽब्रवीत् ॥ ४८ ॥

---

१. **'परित्यज्य'** । **'परित्यज्य, अन्तर्नीतणिच्, बहिर्वासयित्वा'** इति का.श्री. । **'परित्याज्य बहिर्वासयित्वा'** इति वि.भू. ।

२. **'किं विधित्से'** इति प्रामादिकः पाठः । **'कर्तुमिच्छसि'** इति टीकामूलश्चायं प्रमादः । इच्छसीति व्याख्यानात्, रूपसादृश्याच्च धाञः सनि रूपमिदमिति पाश्चात्या अपक्वव्याकरणा अव्युत्पन्ना निरचेषत । सत्यम् । **'विधित्से'** सनि रूपं भवति । न मध्यमपुरुषे । किन्तु उत्तमपुरुषे–**'विधित्से विधित्सावहे विधित्सामहे'** इति । तेन विधित्से=कर्तुमिच्छामीत्यर्थः स्यात् । 'कर्तुमिच्छसि' इत्यर्थे तु **'विधित्ससे'** इति रूपं स्यात् । तेन सर्वमिदमव्युत्पन्नानां भ्रान्तिविलसितं कपिचापलम् । तस्मात् **'विधत्से'** इत्येव साधुः पाठः । तथैव च पठ्यते सर्वत्र तौळवमूलकोशेषु ।

(भा.दी.) अनुतप्त इति। हे मुने, दुष्टायाः कैकेय्याः कैतवं कापट्यं तस्मात् अनुतप्तः अनुतापं प्राप्तः अस्मि। मे नाथं श्रीरामं पुरं नगरं तत्प्रति नेष्यामि आनेष्यामि, इति भरतः तं मुनिं अब्रवीत् ॥ ४८ ॥

रामानुजोऽसि धन्योऽसि स्वस्ति तेऽस्त्वित्यथाब्रवीत्[१] ।
ससैन्यं तं भरद्वाज आतित्थ्याय न्यमन्त्रयत् ॥ ४९ ॥

(भा.दी.) रामेति। अथ भरद्वाजः, हे भरत, त्वं रामानुजः असि। धन्यः कृतार्थः असि। ते तुभ्यं स्वस्ति शोभनं अस्तु। इति तं भरतं प्रति अब्रवीत्। ससैन्यं सैन्यसहितं तं भरतम्, आतिथ्यं अतिथिसत्कारः तस्मै, न्यमन्त्रयत् निमन्त्रणं कृतवान्। मत्रि गुप्तपरिभाषणे लङ् ॥ ४९ ॥

आहूय विश्वकर्म्मादीन् कारयन् विश्वसम्पदः[२] ।
वासुदेवप्रसादेन स्वर्ग्गभोगान् व्यधान्मुनिः ॥ ५० ॥

(भा.दी.) आहूयेति। वासुदेवस्य श्रीहरेः प्रसादोऽनुग्रहस्तेन, विश्वाः समस्ताः सम्पदः राज्योपभोग्यपदार्थास्ताः कारयन् मुनिः भरद्वाजः, विश्वकर्मा देववर्धकिरादिर्येषां ते तान्, कामधेनुप्रभृतीनित्यर्थः, आहूय, स्वर्गे भुज्यन्त इति स्वर्गभोगास्तान्, अलौकिकान्नादीनित्यर्थः, व्यधात् ॥ ५० ॥

(सं.चं.) आहूय विश्वकर्मादीन्। 'आतिथ्यस्य क्रियाहेतोर्विश्वकर्माणमाह्वयत्' (९१.११) इति च। आदिना त्रयो लोकपाला देवा नदीदेवता गन्धर्वाप्सरसश्च। 'आह्वये विश्वकर्माणमहं त्वष्टारमेव च' (९१.१२) इति, 'आह्वये लोकपालांस्त्रीन् देवान् शक्रमुखांस्तथा' (१३) इति, 'प्राक्स्रोतसश्च या नद्यः प्रत्यक्स्रोतस एवच' (१४) इति, 'आह्वये देवगन्धर्वान् विश्वावसुहहाहुहून्। तथैवाऽप्सरसो देवीर्गन्धर्वीश्चापि सर्वशः' (१६) इति च। त्रयो लोकपाला यमवरुणकुबेराः। शक्रस्य पृथङ् निर्देशात् ॥ ५० ॥

यद्यदिच्छति योयोऽत्र[३] भरतानुव्रतो[४] जनः ।
तं तेन तर्प्पयामास रामभक्त्या द्विजर्षभः ॥ ५१ ॥

(भा.दी.) भरतमनुव्रतोऽनुगतः यःयः जनः, अत्र स्वाश्रमे, यत्यत् वस्तु इच्छति, द्विजेषु ऋषभः श्रेष्ठः भरद्वाजः, तेन वस्तुना तं जनं रामभक्त्या तर्पयामास। तृप प्रीणने लिट् ॥ ५१ ॥

---

१. 'तेऽस्त्वित्यथ ब्रुवन्'
२. 'कारयन् सर्वसम्पदः'
३. 'यो यत्र'
४. 'भरतानुगतो–' इति, 'भरतानुव्रजो' इति च।

(सं.चं.) रामभक्तिमहिम्ना । भक्तिजनितया तपःसिद्ध्या । अथ च रामभक्त्या, एते रामभक्ता इति रामानुजं तदनुव्रतं च जनगणं तर्पयामास । अनेन रामस्तृप्यतीति ॥ ५१–५ ॥

प्रभाते भरतो गन्तुमवन्दत[१] महामुनिम् ।
अवन्दन्त क्रमेणाथ कौसल्याद्याश्च ताः स्त्रियः ॥ ५२ ॥

(भा.दी.) प्रभात इति । (भरतः), प्रभातः प्रातःकालस्तस्मिन्, श्रीरामनिकटं गन्तुम्, महान् यो मुनिस्तं भरद्वाजं अवन्दत । अथ कौसल्या आद्या यासां तास्तथा, ताः समागताः, स्त्रियश्च दशरथभार्याश्च, क्रमः ज्येष्ठकनिष्ठादिक्रमस्तेन अवन्दन्त ॥ ५२ ॥

आसां विवेकमाचक्ष्व मातॄणां ते नृपात्मज ।
भरद्वाजेन भरत इत्युक्तः प्रत्यभाषत ॥ ५३ ॥

(भा.दी.) आसामिति । हे नृपात्मज भरत, ते मातॄणां आसां स्त्रीणाम्, विवेकः इयं कौसल्या इयं सुमित्रेत्यादिविभेदः, तं आचक्ष्व । चक्षिङ्धातोर्लोट् । भरद्वाजेन इति उक्तः भरतः प्रत्यभाषत ॥ ५३ ॥

या पूर्वं वन्दितवती देवीयं देवतोपमा ।
रामविश्लेषतो दीना राममातेति[२] विद्धि ताम् ॥ ५४ ॥

(भा.दी.) येति । देवतायाः देवस्त्रियाः उपमा यस्याः सा तथा, श्रीरामस्य विश्लेषो वियोगस्तस्मादिति ततः, दीना दुःखिता, या इयं देवी राजभार्या, पूर्वं वन्दितवती त्वां नमस्कृतवती, तां रामस्य माता इति विद्धि । विदेर्लोट् ॥ ५४ ॥

तस्या उपान्ते तिष्ठन्ती[३] सुमित्रेयं तपोधन[४] ।
पुत्रौ लक्ष्मणशत्रुघ्नावेषाऽसूत शुभव्रता ॥ ५५ ॥

---

१. **'गन्तुं ववन्दे तम्'**

२. **'राममातरमिति वाच्ये राममातेति प्रथमाविभक्तिस्तु यथा तिङ्कृत्तद्धितसमासैरभिहिते कर्मणि प्रथमा तथेतिशब्देनाभिहिते कर्मणि प्रथमेत्यभिप्राया । अत एवोक्तं माघकाव्ये–'नारद इत्यबोधि'** इति, इति का.श्री ।

३. **'तदुपान्तेऽनुतिष्ठन्ती'** इति वि.ती.पाठः । ४. **'तपोधना'**

(भा.दी.) तस्या इति । तप एव धनं यस्य स तथा तत्सम्बुद्धिः, हे भरद्वाज, तस्याः कौसल्यायाः उपान्तं समीपं तस्मिन्, अनुतिष्ठन्ती अनुसृत्य तिष्ठन्ती, इयं राजभार्या, सुमित्रा सुमित्रानाम्नी । शुभं व्रतं यस्याः सा तथोक्ता, एषा सुमित्रा, लक्ष्मणश्च शत्रुघ्नश्च तौ पुत्रौ असूत प्रसूतवती । षूञ् प्राणिगर्भविमोचने लङ् ॥ ५५ ॥

लज्जयाऽधोमुखी याऽत्र दुष्टा[1] रामप्रवासिनी ।
कैकेयी मम मातेयमित्येतं[2] भरतोऽब्रवीत् ॥ ५६ ॥

(भा.दी.) लज्जयेति । अत्र आसां मध्ये, स्वकृतश्रीरामाभिषेकविघातनिमित्तलज्जया अधः मुखं यस्याः सा तथा, दुष्टा, अत एव रामप्रवासिनी श्रीरामप्रवासकारणीभूता, कैकेयीनाम्नी या इयं राजभार्या मम माता इति एतं भरद्वाजं प्रति भरतः अब्रवीत् ॥ ५६ ॥

(सं.चं.) रामं प्रवासयतीति रामप्रवासिनी रामप्रवासकारणम् । अत एव दुष्टा दुष्टबुद्धिः ॥ ५६–९ ॥

निमित्तमात्रं कैकेयी वनवासे जगत्प्रभोः ।
देवकार्य्याय यातोऽयमिति तं मुनिरब्रवीत् ॥ ५७ ॥

(भा.दी.) निमित्तेति । जगतः प्रभोः श्रीरामस्य वने यो वासस्तस्मिन्, कैकेयी केवलं निमित्तं निमित्तमात्रम्, न मुख्यकारणमित्यर्थः । तर्हि मुख्यहेतुः क इत्यत आह– **देवे**ति । अयं श्रीरामः, देवानां यत्कार्यं राक्षसहननलक्षणं तस्मै, यातः वनं गतः इति तं भरतं मुनिः अब्रवीत् ॥ ५७ ॥

(सं.चं.) सम्प्रति वनं यातोऽयम् । तदर्थमेव च यातो जातः, अवतीर्णोऽयम् । श्लेषे यजयोरभेदात् ॥ ५७–८ ॥

प्राप्यानुज्ञां भरद्वाजाच्छ्रुत्वा रामाश्रमं ततः ।
स ययौ यमुनां तीर्त्वा चित्रकूटं च सानुगः ॥ ५८ ॥

(भा.दी.) प्राप्येति । सः भरतः भरद्वाजात् अनुज्ञां प्राप्य, ततः भरद्वाजात् श्रीरामस्य य आश्रमस्तं श्रुत्वा, यमुनां तीर्त्वा, अनुगैः भृत्यैः सहितः सन्, चित्रकूटः चित्रकूटाख्यपर्वतस्तं (च) ययौ ॥ ५८ ॥

---

१. 'याऽत्र दृष्टा' २. 'मातेयमित्येवम्'

नियम्याऽरात् स[1] सैन्यानि सहितः स्वपुरोहितैः ।
तद् विवेशाऽश्रमपदं रामं पृच्छन् मुनीनिह ॥ ५९ ॥

(भा.दी.) नियम्येति । सः भरतः, स्वसैन्यानि आरात् दूरे नियम्य आज्ञया स्थापयित्वा, स्वस्य ये पुरोहिताः वसिष्ठादयस्तैः सहितः सन्, इह आश्रमे मुनीन् प्रति श्रीरामं पृच्छन् सन्, तत् आश्रमपदं आश्रमलक्षणं स्थानं विवेश ॥ ५९ ॥

(सं.चं.) इह चित्रकूटस्थाश्रमेषु वसतो मुनीन् रामं तद्वासस्थानं पृच्छन् । द्विकर्मको हि पृच्छतिः । तद् यथा– माणवकं पन्थानं पृच्छति ॥ ५९ ॥

दृष्ट्वा सैन्यरजोराजिं[2] सालमारुह्य लक्ष्मणः ।
कोविदारध्वजं प्राप्तं ज्ञात्वा कोपमुपाददे ॥ ६० ॥

(भा.दी.) दृष्ट्वेति । लक्ष्मणः, सैन्यानां यानि रजांसि तेषां या राजिः पङ्क्तिस्तां दृष्ट्वा, सालो सर्जवृक्षस्तम्, 'सालं सर्जं च सूरयः' इति हलायुधः, आरुह्य, कुं भुवं दारयतीति कोविदारश्चमरिवृक्षः, स एव ध्वजो यस्य भरतस्य स तथा तम्, 'कोविदारश्चमरिकः[3] कुद्दालो युगपत्रकः' इत्यमरः, भरतं प्राप्तं ज्ञात्वा, कोपः क्रोधस्तं उपाददे चक्रे ॥ ६० ॥

(सं.चं.) अश्वादीनां पदहतिभिरुत्थितां रजोराजिं धूळिसन्ततिम् । सालं कश्चनोन्नतमभ्रङ्कषं वृक्षम् । सालाख्यं वृक्षविशेषं वा । कोविदारः, **'ಕಂಚಿನಾಳದ ಮರ'** इति भाषायाम् । स यस्य ध्वजे चिह्नभूतस्तं भरतम् ॥ ६०–१ ॥

कैकेयीतनयं दृप्तं ससैन्यं प्रत्युपस्थितम्[4] ।
अनुज्ञां देहि मे हन्तुमिति सौमित्रिरब्रवीत् ॥ ६१ ॥

(भा.दी.) कैकेयीति । सौमित्रिः लक्ष्मणः, दृप्तं श्रीमदान्धम्, ससैन्यं सैन्येन सहितम्, प्रत्युपस्थितं युद्धार्थमागतम्, कैकेय्याः तनयं भरतं हन्तुं मे मह्यं अनुज्ञां देहि इति अब्रवीत् ॥ ६१ ॥

---

१. **'स्वसैन्यानि सहितः स पुरोहितैः ।'** २. **'सैन्यरजोराशिम्'**

३. **'कोविदारे चमरिकः'** इति साम्प्रतः पाठः । ४. **'प्रत्यवस्थितम्'** । **'प्रत्यवस्थितं अस्मद्विरोधित्वेन प्राप्तम्'** इति का.श्री. ।

शान्तो न दृप्तो भरतः शान्तस्त्वं भव लक्ष्मण ।
अस्मान् द्रष्टुमवाप्तोऽसाविति[1] रामोऽब्रवीत् स्मितः[2] ॥ ६२ ॥

(भा.दी.) शान्त इति । हे लक्ष्मण, भरतः शान्तः शमोपेतः । दृप्तः मदोन्मत्तः न । त्वं शान्तः शमोपेतः भव । तर्हि किमर्थमत्र प्राप्त इत्यत आह– **अस्मानि**ति । असौ भरतः अस्मान् द्रष्टुं अवाप्तः प्राप्तः इति श्रीरामः, स्मितं मन्दहासोऽस्यास्तीति स्मितः, अर्शआदित्वात् मत्वर्थे अच्, मन्दहासी सन्नित्यर्थः, अब्रवीत् ।।६२।।

(सं.चं.) तस्मात् त्वमपि शान्तकोपो भव । स्मितः स्मययुतः । ईषद्धसन् । स्मिङ् ईषद्धसने ॥ ६२ ॥

भरतो भगवत्पार्श्वमेतस्मिन्नन्तरे गतः ।
पर्ण्णशालां विशालां तामपश्यत् त्रिदिवोपमाम् ॥ ६३ ॥

(भा.दी.) भरत इति । भगवतः श्रीरामस्य पार्श्वं तत्, एतस्मिन् अन्तरं मध्यं तस्मिन्, एवं सम्भाषणसमय इत्यर्थः, गतः भरतः, विशालां विस्तीर्णाम्, त्रिदिवस्य स्वर्गस्य उपमा यस्याः सा तथा, ताम् श्रीराम-सम्बन्धिनीम्, पर्णै रचिता शाला पर्णशाला तां अपश्यत् ॥ ६३ ॥

(सं.चं.) त्रिदिवोपमां स्वर्गतुल्याम् । 'त्रिदशावासस्त्रिविष्टपं त्रिदिवम्' इत्यभिधानम् ॥ ६३ ॥

[3]हेमचित्रप्रहरणैस्तनुत्रैश्चोपशोभिताम् ।
अरिसङ्घैरनाधृष्यां मृगैः सिंहगुहामिव ॥ ६४ ॥

(भा.दी.) तामेव वर्णयति– **हेमेत्यादि**ना । हेम्ना सुवर्णेन चित्राणि मिश्राणि, बद्धानीति यावत्, यानि प्रहरणानि खड्गा(द्या)युधानि तैः । 'चित्रमालेख्यमिश्रयोः' इति वैजयन्ती । हेमरचितानीति वा । तनुत्राणि कवचानि तैश्चोपशोभितम्, (मृगैरनाधृष्यां) सिंहगुहामिव अरीणां सङ्घाः समूहास्तैः अनाधृष्याम्, धर्षयितुमशक्याम्, तां शालां अपश्यदिति पूर्वेण सम्बन्धः ॥ ६४ ॥

(सं.चं.) हेम्ना चित्रैः शबळैः । सुवर्णखचितैः । प्रहरणैरायुधैः । तनुत्रैः कवचैः । मृगैरनाधृष्या गुहा । अरिसङ्घैरनाधृष्या पर्णशाला । एतेन पुरुषसिंहस्य रामस्य पुरतः राक्षसाः क्षद्रमृगाइवेत्याह ॥ ६४ ॥

१. 'द्रष्टुमसौ प्राप्त इति' २. 'रामोऽब्रवीत् ततः' ३. 'हेमचित्रैः प्रहरणै–'

प्रागुदक्प्रवणे देशे वेदिं[1] वेदविदां गुरोः ।
जाज्वल्यमानज्वलनां[2] भरतो मुहुरैक्षत ॥ ६५ ॥

(भा.दी.) प्रागिति । भरतः प्रागुदक्प्रवणे प्राक् च उदक् च प्रागुदञ्चौ प्रागुत्तरदिशावित्यर्थः, तयोः प्रवणः किञ्चिन्नम्रस्तस्मिन् देशे, प्रदेशे वेदान् विदन्तीति वेदविदस्तेषां ब्रह्मादीनां गुरोः श्रीरामस्य, जाज्वल्यमानः पुनःपुनःरतिशयेन प्रज्वलन् ज्वलनोऽग्निर्यस्याः सा तथा तां वेदीं मुहुः ऐक्षत ॥ ६५ ॥

(सं.चं.) प्राक् चोदक् च प्रवणे निम्ने यत्र तादृशे आश्रमप्रदेशे । वेदिं यज्ञवेदिकाम् । अथवा वेदिः वितर्दिका । 'ઓટલો' इति भाषायाम् ॥ ६५ ॥

तत्रोटजे जटामौलिं चारुचीरमवैक्षत ।
ससीतालक्ष्मणं रामं परमानन्दमन्दिरम् ॥ ६६ ॥

(भा.दी.) तत्रेति । तत्र आश्रमे, उटजः पर्णशाला तस्मिन्, जटा मौलौ शिरसि यस्य स तथा तम्, चारु मनोहरं चीरं वासो यस्य स तथा तम्, सीता च लक्ष्मणश्च ताभ्यां सहितम्, परम उत्तमो य आनन्दस्तस्य मन्दिरमिव मन्दिरम्, आश्रयमित्यर्थः, श्रीरामं अवैक्षत ॥ ६६ ॥

(सं.चं.) उटस्तृणपर्णादिः । तेन जातमुटजमुटजो वा । पर्णशाला ॥ ६६ ॥

न तृप्यति स्म तं दृष्ट्वा भरतो नैतदद्भुतम् ।
अनन्तकालं पश्यन्तो यं न तृप्यन्ति योगिनः[3] ॥ ६७ ॥

(भा.दी.) नेति । भरतः तं श्रीरामं दृष्ट्वा न तृप्यति स्म, तृप्तिं नागच्छत् । तृप प्रीणने लट् । यत् यस्मात्[4] कारणात्, योगो मनोयोगो भगवति एषामस्तीति तथोक्ताः ऋजुयोगिप्रभृतयः, अनन्तो यः कालस्तम्, निरन्तरानन्तकाल इत्यर्थः, यं श्रीरामं पश्यन्तः सन्तः न तृप्यन्ति, तस्मात् एतद्भरतस्य श्रीरामं दृष्ट्वाऽप्यप्रीणनं अद्भुतं न ॥ ६७ ॥

(सं.चं.) तृप्तिरलम्बुद्धिः । योगिनः ब्रह्मणि मनोयोगयुक्ताः ॥ ६७–७२ ॥

---

१. **'वेदीं वेदविदाम्'** इति वि.ती.पाठ इति भाति । **'वेदवेदविदाम्'** इति क्वचित् । २. **'जाज्वल्यमानं ज्वलनम्'**

३. **'योगिनः ब्रह्मादयः' इति का.श्री. ।**

४. **'यन्न तृप्यन्ति'** इति मूलं **'यत् न'** इति, **'यं न'** इति च द्वेधा विभज्येदं व्याख्यानं प्रवृत्तमिति भाति–**'यत् यस्मात् कारणात्'** इति, **'यं श्रीरामम्'** इति ।

पादपद्मे निपतितं सन्तप्तं मातृहेळनात् ।
आशिश्लेषाथ भरतं [1]भक्तं तं भक्तवत्सलः ॥ ६८ ॥

(भा.दी.) पादेति । अथ भक्तवत्सलः भक्तप्रियः श्रीरामः, पादौ पद्ममिव तस्मिन्निपतितम्, अष्टाङ्गप्रणामरूपत्वेन पतितम्, मातुः कैकेय्याः हेळनमवज्ञा तस्मात् सन्तप्तम्, भक्तं तं भरतं आशिश्लेष अलिङ्गितवान् । श्लिष आलिङ्गने लिट् ॥ ६८ ॥

स सर्वज्ञोऽपि[2] सर्वेशः पप्रच्छ कुशलं पितुः ।
अन्यांश्च विविधानर्थान् लोकवृत्तिं विडम्बयन् ॥ ६९ ॥

(भा.दी.) स इति । सर्वेशः (सः) श्रीरामः सर्वज्ञोऽपि, लोकस्य मानुषजनस्य वृत्तिर्वर्तनं तां विडम्बयन् अनुकुर्वन् सन्, पितुः दशरथस्य कुशलं क्षेमं तत्, अन्यान् विविधान् अर्थान् राज्यकोशाद्यर्थांश्च पप्रच्छ ॥ ६९ ॥

प्रोवाच प्राञ्जलिर्दीनः प्ररुदन् भरतोऽग्रजम् ।
स्वर्गतो नः पिता नाथ रामरामेति कीर्त्तयन् ॥ ७० ॥

(भा.दी.) प्रोवाचेति । श्रीरामवचः श्रुत्वा प्ररुदन्, दीनः दुःखितः, भरतः प्राञ्जलिः सन्, हे नाथ श्रीराम, नः पिता रामराम इति कीर्तयन् सन् स्वर्गतः, स्वः स्वर्गं प्रति गतः प्राप्तः, इति अग्रजं श्रीरामं प्रति प्रोवाच ॥ ७० ॥

उदकं दीयतां तस्मै प्रियैर्दत्तं प्रियं भवेत् ।
सर्वेषां सर्वतः प्रेष्ठ त्वया [3]दत्तं तु किम्पुनः ॥ ७१ ॥

(भा.दी.) उदकमिति । सर्वेषां भक्तजनानां सर्वतः पुत्रमित्रकळत्रादेः प्रेष्ठ अतिशयेन प्रिय श्रीराम, तस्मै पित्रे उदकं जलं तत् दीयताम् । त्वया दत्तत्वान्मया पुनः किमर्थं देयमित्यत आह– **प्रियैरि**ति । यस्मात्

---

१. **'भरतं तं भक्तं भक्त–'**

२. **'सर्वज्ञोऽपि स्वपरगताशेषविशेषविषयकज्ञानवानपि लोकवृत्तिमज्ञजनव्यापारं विडम्बयन् अनुकुर्वन् सन्, अजानन्निवेति यावत्'** इति का.श्री.।

३. **'दत्तं च किम्पुनः'** । **'प्रेष्ठस्त्वया दत्तं च'** इति कश्चित् ।

प्रियैः पुरुषैर्दत्तं उदकं मृतानां प्रियं प्रीतिविषयः भवेत् । त्वया सर्वेषां प्रियतमेन दत्तं तु प्रियमिति पुनः किं वक्तव्यम्? ॥ ७१ ॥

आकर्ण्य राज्ञो मरणं सदा सर्वप्रवर्त्तकः ।
अशोकलेशोऽपि विभुर्विललाप विडम्बयन् ॥ ७२ ॥

(भा.दी.) आकर्ण्येति । सदा सर्वस्य रमाब्रह्मादेः प्रवर्तकः नियामकः, विभुः श्रीरामः, शोकस्य लव[१] एकदेशः, न विद्यते शोकलवो यस्य स तथाऽपि, राज्ञः मरणं मृतिस्तत् आकर्ण्य, विडम्बयन् पितृमरणं श्रुत्वा लोको यथा रोदिति तदनुकुर्वन्, विललाप ॥ ७२ ॥

सीतापतिरुपागम्य सीतालक्ष्मणसंयुतः ।
मन्दाकिनीं विगाह्याऽत्र जनकायोदकं ददौ ॥ ७३ ॥

(भा.दी.) सीतेति । सीता च लक्ष्मणश्च ताभ्यां संयुतः, सीतापतिः श्रीरामः, मन्दाकिनीं गङ्गां उपागम्य, अत्र गङ्गायां विगाह्य निमज्ज्य, जनकाय पित्रे उदकं जलं तत् ददौ ॥ ७३ ॥

(सं.चं.) नेयं मन्दाकिनी गङ्गा । किन्त्वन्यैव काचिन्नदीत्युक्तम् । नहि चित्रकूटे गङ्गा प्रवहति । किन्तु चित्रकूटं परिगतां वाहिनीमद्यापि मन्दाकिनीत्याचक्षते । पयस्विनीति केचित् । 'पैशुनी' इति तत्रत्या व्याहरन्ति । माल्यवतीति रामायणे पूर्वमुक्तम् । मालिनीति सङ्ग्रहे । 'ततो मन्दाकिनीतीरं प्रत्युत्तीर्य स राघवः । पितुश्चकार तेजस्वी निवापं भ्रातृभिः सह' (१०३.२८) इति च ॥ ७३ ॥

दर्भेष्विङ्गुदपिण्याकं पित्रे तं न्यस्तवान्[२] विभुः ।
पितृदेवान् पुमान् स्वान्नैः पूजयेदिति दर्शयन् ॥ ७४ ॥

(भा.दी.) दर्भेष्विति । अथ विभुः श्रीरामः, दर्भाः कुशास्तेषु, इङ्गुदपिण्याकम्, इङ्गुदस्य इङ्गुदीवृक्षस्य पिण्याकः पक्वफलात्मको यः पिण्डस्तम्, पुमान् पुरुषः, पितरश्च ते देवाश्च तान्, स्वस्य यान्यन्नानि तैः पूजयेत्, इति दर्शयन्, वनवासे श्राद्धार्थं ग्राम्यान्नादि न भवतीति धर्मं शिक्षयन्नित्यर्थः, पित्रे दशरथाय न्यस्तवान् ॥ ७४ ॥

---

१. सम्पातायातमिदम् । **'शोकस्य लेशः'** इति वक्तव्यम् । उत्तरत्रापि–**'न विद्यते शोकलेशो यस्य'** इति । २. **'पित्रेऽथ न्युप्तवान्'**

(सं.चं.) इङ्गुदस्य बीजानि पिष्ट्वा चूर्णयित्वा तैर्निष्पन्नः पिण्ड इङ्गुदपिण्याकः । पुमान् पितॄन् देवांश्च स्वान्नैः पूजयेदिति लोकाचारं दर्शयन् । 'यदन्नः पुरुषो भवति तदन्नास्तस्य देवताः' (१०२.३०) इति च ॥ ७४–५ ॥

तत्र प्रकृतयः सर्वाः सेनाः पौराश्च[१] सत्वरम् ।
प्राप्य लोकेशमालोक्य यान्ति स्म कृतकृत्यताम् ॥ ७५ ॥

(भा.दी.) **तत्रे**ति । तत्र आश्रमे, सर्वाः प्रकृतयः अमात्यादिप्रकृतयः, पुरे भवाः पौराः जनाः, सेनाश्च, सत्वरं त्वरया सहितं यथा भवति तथा श्रीरामसमीपं प्राप्य, लोकेशं श्रीरामं आलोक्य, कृतं कृत्यं प्रयोजनं यैस्ते तथा तेषां भावस्तत्ता ताम्, यान्ति स्म अगच्छन् ॥ ७५ ॥

कौसल्याऽप्यथ कल्याणी शोकेन परिशोषिता ।
समं राज्ञीभिरन्याभिर्देवं सन्दृश्य निर्वृता ॥ ७६ ॥

(भा.दी.) **कौसल्ये**ति । अथ कल्याणी शोभनगुणा, शोकः श्रीरामवियोगजनितशोकः, तेन परिशोषिता कृशीकृता कौसल्या (अपि), अन्याभिः राज्ञीभिः चतुर्दशशतसङ्ख्याकदशरथभार्याभिः समं साकम्, देवं श्रीरामं सन्दृश्य, सम्यक् दृष्ट्वा, निर्वृता सन्तुष्टा अभवत् ॥ ७६ ॥

(सं.चं.) राज्ञीभिः सप्तशतानामर्धेन कैकेय्या सुमित्रया च समं कौसल्या । निर्वृता तृप्ता । निर्वृतिः **'ನೆಮ್ಮದಿ'** इति भाषायाम् ॥ ७६ ॥

मातॄः सप्रेमबाष्पास्ता[२] जगद्गुरुरवन्दत[३] ।
जानकी लक्ष्मणश्चाथ ताश्चाऽशीर्भिरपूरयन्[४] ॥ ७७ ॥

(भा.दी.) मातॄरिति । अथ श्रीरामः, प्रेम च बाष्पं च प्रेमबाष्पे ताभ्यां सहिताः सप्रेमबाष्पास्ताः मातॄः कौसल्याद्याः प्रभुः अवन्दत । वन्दतेर्लङ् । जानकी च मुहुरवन्दत लक्ष्मणश्च मुहुरवन्दत । ताः मातरः आशिषः शुभवाक्यानि ताभिः अपूजयन् ॥ ७७ ॥

१. **'सर्वाः पौराः सेनाश्च'** इति वि.ती.पाठः स्यात् । **'सेना पौराश्च'** इति क्वचित् । २. **'सप्रेमबाष्पाक्षीः'**

३. **'मुहुः प्रभुरवन्दत'** इति वि.ती.पाठः ।

४. **'ताश्चाऽशीर्भिरपूजयन्'** इति वि.ती. पाठः । **'ताः आशीर्भि–' इति वा ।**

(सं.चं.) प्रेमजनितं बाष्पं प्रेमबाष्पम्, बाष्पो वा । 'बाष्पोऽश्रुण्यम्बुधूमे च' इति यादवप्रकाशः । अथ जानकी लक्ष्मणश्चावन्देताम् ॥ ७७ ॥

तमःशोकाभिभूतां तामतीत्य रजनीं तदा ।
भानुर्नभसि भाति स्म राघवो जनसंसदि ॥ ७८ ॥

(भा.दी.) तम इति । तमश्च शोकश्च ताभ्यां अभिभूतामभिव्याप्तां तां रजनीं रात्रिं अतीत्य भानुः सूर्यः नभसि भाति स्म । भा दीप्तौ लट् । (तदा) राघवः श्रीरामः, जनानां संसत् सभा तस्यां भाति स्मेति सम्बन्धः ॥ ७८ ॥

(सं.चं.) तमोभिभूतां रजनीमतीत्य भानुर्नभसीव शोकाभिभूतां रजनीमतीत्य रामो जनसंसदि बभौ ॥७८॥

किं नु वक्त्येष भरतः प्रतिवक्ष्यति किं प्रभुः ।
इति स्थिते जने जोषं भरतो राममब्रवीत् ॥ ७९ ॥

(भा.दी.) किं न्विति । एषः भरतः किं नु किं वा वचः वक्ति? प्रभुः श्रीरामः किं वचः प्रतिवक्ष्यति, प्रत्युत्तरं वदिष्यति? जने इति अनेनाभिप्रायेण जोषं तूष्णीं स्थिते सति भरतः श्रीरामं अब्रवीत् ॥ ७९ ॥

(सं.चं.) किं नु । 'प्रश्ने विकल्पे नु स्विच्च' इति यादवप्रकाशः । नु इदानीमित्येके । 'तूष्णीं जोषं भवेन्मौने' इत्यभिधानम् ॥ ७९–८१ ॥

अनुग्रहाय नः स्वामिन् स्वामयोद्ध्यां वनाद् व्रज ।
इमामनाथां धरणीं विश्वपालक पालय ॥ ८० ॥

(भा.दी.) अनुग्रहायेति । हे स्वामिन्, नः अनुग्रहः प्रसादस्तस्मै, अस्मास्वनुग्रहं कर्तुमित्यर्थः, वनात् स्वां अयोध्यां व्रज गच्छ । विश्वस्य पालक रक्षक श्रीराम, न विद्यते नाथो यस्याः सा तथा ताम्, अराजकामित्यर्थः, इमां धरणीं पालय ॥ ८० ॥

इत्युक्तो भगवानूचे पितुराज्ञाकरा वयम् ।
सद्धिताय वसामोऽत्र त्वं पालय धरामिति ॥ ८१ ॥

(भा.दी.) इतीति । इति उक्तः भरतेनाभिहितः भगवान् श्रीरामः, वयं पितुः आज्ञां कुर्वन्तीत्याज्ञाकराः सन्तः, सतां मुन्यादीनां यद्धितं तस्मै, अत्र वने वसामः, त्वं धरां पालय इति भरतं ऊचे ॥ ८१ ॥

प्रणामाञ्जलिबाष्पाणि कुर्वाणो भरतस्तदा ।
क्रियासमभिहारेण रामं प्रोचे सगद्गदम् ॥ ८२ ॥

(भा.दी.) **प्रणामे**ति । तदा प्रणामाश्च, अञ्जलयश्च, बाष्पाणि अश्रूणि च तानि, क्रियायाः समभिहार आवृत्तिस्तेन, पुनःपुनरित्यर्थः, कुर्वाणः भरतः श्रीरामं प्रति गद्गदेन स्खलद्वचनेन सहितं यथा भवति तथा सगद्गदं प्रोचे ॥ ८२ ॥

(सं.चं.) क्रियासमभिहारेण पौनःपुनिकतया । प्रणामान् कुर्वाणः । अञ्जलीन् कुर्वाणः बध्नन् । बाष्पाणि कुर्वाणो मोचयन् । गद्गदं कम्पयुक्तं वचनं प्रोचे । गद्गदं यथा भवति तथेति क्रियाविशेषणं वा । गद्गदेन अस्फुटध्वनिना सहितं सगद्गदं वच इति समस्तं वा । क्रियाविशेषणं वा । 'गद्गदः स मनाक् स्फुटः' इति यादवप्रकाशः ॥ ८२ ॥

त्वां तु त्यक्त्वा पतिं हत्वा दत्वा मे परितापिताम् ।
कृत्वा सर्वजगद्दुःखं माता सर्वङ्कषा मम ॥ ८३ ॥

(भा.दी.) **त्वां त्वि**ति । मम माता कैकेयी, त्वां त्यक्त्वा वियोजयित्वा, पतिं भर्तारं हत्वा, मे मह्यं परितापोऽस्यास्तीति परितापी, तस्य भावस्तत्ता, तां दत्वा, सर्वं स्थिरचरात्मकं यज्जगत्, तस्य दुःखं तत् कृत्वा, सर्वं कषति नाशयतीति सर्वङ्कषा, सर्वानर्थकारिणीत्यर्थः ॥ ८३ ॥

(सं.चं.) परितापिनो भावः परितापिता, ताम्, परितापं दत्वा । सर्वजगतः दुःखं कृत्वा । सर्वं कषति हिन-स्तीति सर्वङ्कषा सर्वानिष्टनिदानम् । 'सर्वकूलाभ्रकरीषेषु कषः' (अ.सू.३.२.४२) इति खच् ॥ ८३ ॥

चिकर्त्तिषुं शिरस्तस्या भुजं मे खड्गलम्पटम्[१] ।
प्रतिभा वारितवती त्वत्प्रीतिक्षतिशङ्किनी ॥ ८४ ॥

(भा.दी.) **चिकर्तिषुमि**ति । तस्याः कैकेय्याः शिरः चिकर्तिषुम्, कर्तितुमिच्छतीति चिकर्तिषति, चिकर्तिषतीति चिकर्तिषुस्तम् खण्डयितुमिच्छावन्तमित्यर्थः, खड्गे लम्पट आसक्तस्तं मे भुजम्, तव या मयि प्रीतिस्तस्याः क्षतिर्भङ्गस्तां शङ्कितुं शीलमस्या अस्तीति तथोक्ता, प्रतिभा बुद्धिः वारितवती । स्त्रीवधे कृते सति राजर्षिर्धर्मेण भवताऽहं परित्यक्तः स्यामिति भिया तूर्ष्णीं स्थीयत इति भावः ॥ ८४ ॥

---

१. **'चिकर्त्तिषू शिरस्तस्या भुजौ मे खड्गलम्पटौ ।'**

(सं.चं.) चिकर्तिषुं कर्तितुं च्छेत्तुमिच्छुं मे भुजम् । आत्मनिष्ठामिच्छां भुजगतामाह । कवीनामालङ्कारिकी भणितिरियम् । एवं खड्गलम्पटमित्यपि । चेतनधर्माणामचेतनेष्वारोपं हि रूपकमुशन्ति । तेन तव प्रीतेः क्षतिः स्यादिति शङ्कमाना मे प्रतिभा प्रज्ञा ॥ ८४ ॥

अयि नाथ जगन्नाथ भक्तस्याऽगः क्षमस्व मे ।
भक्तवत्सल भक्तानां नन्वात्मानं दिशेद् भवान्[1] ॥ ८५ ॥

(भा.दी.) **अयी**ति । अयि नाथ, जगतां नाथ, भक्तेषु वत्सल स्निग्ध श्रीराम, भक्तस्य मे आगः अपराधस्तत् क्षमस्व । क्षमूष् सहने लोट् । भवान् भक्तानां आत्मानं स्वसारूप्यलक्षणं स्वरूपमपि दिशेन्ननु । दिश अतिसर्जने लिङ् ॥ ८५ ॥

(सं.चं.) आगोऽपराधं क्षमस्व । मातुरपराधो मन्निमित्त इति ममैव ननु । भक्तानां स्वात्मानमेव दिशेन्ननु भवान् । 'अहं भक्तपराधीनः' इति हि भगवद्वचनम् ॥ ८५ ॥

स्त्रीषु नासत्यदोषोऽस्ति पिता नो न विवेद तत् ।
राजर्षिर्न्न मया दूष्यो ममैवेदमघं महत्[2] ॥ ८६ ॥

(भा.दी.) स्त्रीष्विति । स्त्रीषु असत्येन असत्यवचसा दोषो न नास्ति । इति नः पिता दशरथः न विवेद न वेत्ति स्म । विदेर्लिट् । 'स्त्रीषु नर्मविवाहेषु वृत्त्यर्थे प्राणसङ्कटे । गोब्राह्मणानां हिंसायां नानृतं स्याज्जुगुप्सितम्' इति स्मृत्युक्तधर्मं नाऽश्रितवानित्यर्थः । राजा चासौ ऋषिश्च राजर्षिः पिता मया दूष्यः न । तत् पित्रा कृतम्, इदं कैकेय्यै वरदानलक्षणं अघमपराधः ममैव । मन्निमित्तं कैकेय्या वरयाचनात् तेन च तत्प्रदानादिति भावः ॥ ८६ ॥

(सं.चं.) स्त्रीषु नासत्यदोषोऽस्ति । 'न नर्मयुक्तं वचनं हिनस्ति न स्त्रीषु राजन् न विवाहकाले । प्राणात्यये सर्वधनापहारे पञ्चानृतान्याहुरपातकानि' इति हि स्मरन्ति । प्रायस्तदेतत् पिता न विवेद न विजज्ञौ । अत एवास्मिन् महति सङ्कटगर्ते निममज्ज । अथवा न स मया दूष्यः । ममैवायं दोषः । मदर्थं हि माता वरं वव्रे ॥ ८६ ॥

---

१. **'स्वस्वरूपमपि भक्ताधीनं कुर्वतस्तव मम याच्ञापालनं नासुकरमिति भावः'** इति का.श्री। २. **'ममैवेदमघं च तत्'** इति वि.ती.पाठः।

भूर्दत्ता भूभृता चेन्मे[१] दासस्तेऽर्पितवानहम् ।
लोकन्याय्यं च लोकेश तस्मात्ते राज्यपालनम्[२] ॥ ८७ ॥

(भा.दी.) भूरिति । चेद्यदि भूभृता राज्ञा मे मह्यं भूर्दत्ता तर्हि ते दासः अहं ते तुभ्यं अर्पितवानस्मि । हे लोकेश श्रीराम, तस्मात् मया समर्पितत्वात् ते तव राज्यस्य पालनम्, लोकन्याय्यं च, लोके न्याय्यं युक्तं च । सर्वलोकेशत्वाद्भूस्तव केनापि न देयैव । लौकिकानुसरणं च मया प्रदानत एव जायत इत्यतोऽवश्यं राज्यपालनं कुर्विति भावः ॥ ८७ ॥

(सं.चं.) भूभृता भूर्मे दत्ता चेदपि । तां भुवं तवैवार्पितवान् । यतस्ते दासोऽहम् । यस्मान्मया दत्तं तस्माल्लोकदृष्ट्याऽपि तवैव राज्यपालनं न्याय्यम् ॥ ८७–९ ॥

न यास्यसि पुरं चेत् त्वं नाहं यास्यामि सर्वथा[३] ।
योगिमृग्यं[४] पदाब्जं ते सेवे सौमित्रिवत् सदा ॥ ८८ ॥

(भा.दी.) नेति । चेद्यदि हे ईश्वर, त्वं पुरमयोध्यापुरं तत् न यास्यसि, तर्हि अहं सर्वथा सर्वप्रकारेणापि न यास्यामि । अहं योगिभिः सनकादिभिः मृग्यमन्वेषणीयं तत् ते पदाब्जं सौमित्रिवत् लक्ष्मणवत् सदा सेवे ॥ ८८ ॥

एवं ब्रुवाणे भरते सर्वाः प्रकृतयः प्रभुम् ।
मुनयो मातरश्चैव सबाष्पाक्षा ययाचिरे ॥ ८९ ॥

(भा.दी.) एवमिति । भरते एवं ब्रुवाणे वदति सति, बाष्पेण अश्रुणा सहितानि सबाष्पाणि तादृशानि अक्षीणि यासां तास्तथा, सर्वाः प्रकृतयः अमात्यादयः, वसिष्ठादिमुनयश्च, मातर एवच, प्रभुं श्रीरामं ययाचिरे, अयोध्यां प्रत्यागन्तुं प्रार्थनां चक्रुः । याचृ याच्ञायां लिट् ॥ ८९ ॥

भरतं भगवानूचे शत्रुघ्नेन पुरीं व्रज ।
सलक्ष्मणः सतां प्रीत्यै व्रजेयं दण्डकानिति ॥ ९० ॥

---

१. **'भूर्दत्ता यदि राज्ञा मे'** इति, **'भूर्दत्ता भूभृता यन्मे'** इति च ।

२. **'यस्मान्मया राज्यं तुभ्यं दत्तं तस्मात् ते तव राज्यपालनं लोकन्याय्यं लोकन्यायतः प्राप्तम् । 'शिष्यस्यार्थः स्वीय एव' इत्युक्तेश्च'** इति का.श्री. । ३. **'त्वं न यास्यामीति सर्वथा'** ४. **'योगिभिः ब्रह्मादिभिः मृग्यम्'** इति का.श्री. ।

(भा.दी.) भरतमिति । भगवान् श्रीरामः भरतम्, शत्रुघ्नेन सह पुरीं व्रज गच्छ, अहं सलक्ष्मणः सन्, दण्डकान् दण्डकारण्यानि, सतामगस्त्यादिमुनीनां प्रीत्यै व्रजेयम्, इति भरतं प्रति ऊचे ॥ ९० ॥

(सं.चं.) शत्रुघ्नेन सह पुरीं व्रज, पालय च मेदिनीम् । अहं लक्ष्मणेन सीतया च सह दण्डकान् अरण्यभागान् व्रजेयम्, सतां मुनीनां प्रीत्यै, असतामसुराणां हत्यै च ॥ ९० ॥

क्व गुर्वाज्ञा सर्वगुरोर्द्धर्म्मः कोऽसङ्गिनस्तव ।
गच्छ देव पुरीं शीघ्रमिति जाबालिरब्रवीत् ॥ ९१ ॥

(भा.दी.) क्वेति । सर्वेषां ब्रह्मरुद्रादीनां गुरोः तव, गुरोः पितुराज्ञा क्व? न सङ्गोऽसङ्गः, सोऽस्यास्तीति तथा तस्य, कर्मलेपरहितस्येत्यर्थः, तव धर्मः कः? हे देव, पुरीं अयोध्यां प्रति शीघ्रं यथा भवति तथा गच्छ, इति जाबाल्याख्यो मुनिरब्रवीत् ॥ ९१ ॥

(सं.चं.) क्व ते गुरूणामपि गुरोः गुरुः ? यस्त्वामाज्ञापयति । यस्य पुण्यपापसङ्गः तस्य किल धर्मविधानम् । असङ्गिनः को धर्मः? 'असङ्गो ह्ययं पुरुषः' इति श्रुतिः । एतेन जाबालिकृतो नास्तिक्यवादोऽपि लोकविडम्बनमेवेत्युक्तं भवति ॥ ९१ ॥

गुरुदेवार्च्चनं धर्म्मो ननु वेदविनिश्चितः[१] ।
इति क्रुद्धइव प्रोचे रामो लोकं विडम्बयन्[२] ॥ ९२ ॥

(भा.दी.) गुर्विति । श्रीरामः, लोको जगत् तं विडम्बयन् अनुकुर्वन् सन्, गुरवश्च देवाश्च तेषामर्चनं वेदेषु निश्चितः धर्मः ननु, इति वचः, क्रुद्धइव, जाबालिवचनं वेदविरुद्धमित्यभिप्रायेण क्रुद्ध इव, प्रोचे ॥ ९२ ॥

(सं.चं.) स्वयं जाबालिः नाटकं जानन्नन्तः प्रीयमाणोऽपि बहिस्तस्मै क्रुद्धइव ॥ ९२ ॥

अनुतिष्ठसि धर्म्मं चेद् राजन् राज्यमराजकम् ।
पूर्वजैः पालितं पाल्यमिति ब्रह्मसुतोऽब्रवीत् ॥ ९३ ॥

(भा.दी.) अन्विति । हे राजन् श्रीराम, चेद्यदि पूर्वाचरितो यो धर्मस्तम्, अनुतिष्ठसि अनुसृत्य वर्तसे, तर्हि न विद्यते राजा यस्य तत् तथा, पूर्वजा इक्ष्वाकुप्रभृतयस्तैः पालितं राज्यं पाल्यं पालनीयम्, इति ब्रह्मसुतश्चतुर्मुखसुतो वसिष्ठोऽब्रवीत् ॥ ९३ ॥

---

१. **'वेदेषु निश्चितः'** इति वि.ती.पाठः स्यात् । **'देवविनिश्चितः'** इति कश्चित् । २. **'लोकान् विडम्बयन्'**

(सं.चं.) पितृवचनपालनाख्यं धर्मम् । पूर्वजैः पालितमराजकं राज्यं पाल्यमिति च राज्ञां परमो धर्म एव हि । ब्रह्मसुतो वसिष्ठः ॥ ९३ ॥

मुनीनामुत मातॄणां पौराणामपि याचनम् ।
रामे[१] नगणयत्येव भरतो दुःखितोऽब्रवीत् ॥ ९४ ॥

(भा.दी.) मुनीनामिति । मुनीनां वसिष्ठादीनाम्, उत मातॄणां कौसल्यादीनाम्, उत पुरि भवाः पौराः तेषां जनानां (अपि), याचनं प्रार्थनं तत्, श्रीरामे नगणयति सति, अविचारयति सतीत्यर्थः, नसमासोऽ-यम्, दुःखितः भरतः अब्रवीत् ॥ ९४ ॥

(सं.चं.) नगणयति सत्येव । सर्वथा नगणयति, न लक्षयति, मनसि न कुर्वति, निराकुर्वति च सति । भरतोऽब्रवीत् ॥ ९४ ॥

[२]आर्य्यं प्रत्युपवत्स्यामि[३] यावन्मे सम्प्रसीदति ।
शयिष्येऽहं निराहारः पुरं यावद् व्रजेत् प्रभुः ॥ ९५ ॥

(भा.दी.) आर्येति । हे आर्य स्वामिन् श्रीराम, त्वं मे मम यावत्कालं सम्प्रसीदसि, सम्यक् प्रसन्नो भवसि, तावत्पर्यन्तं अहं प्रत्युपवेक्ष्यामि उपवासं करिष्यामि । विश प्रवेशने लृट् । यावत्कालं प्रभुः श्रीरामः पुरमयोध्यापुरं तत् व्रजेत्, तावत्कालपर्यन्तं (अहं) निराहरः सन् शयिष्ये, समीप एव स्थास्यामि, सर्वथाऽपि न गमिष्यामीत्यर्थः । शीङ् स्वप्ने लृट् ॥ ९५ ॥

(सं.चं.) आर्यं प्रत्यहमप्युपवत्स्यामि उपोषणं करिष्यामि । कियत्पर्यन्तम्? यावन्मे सम्प्रसीदति ॥ ९५ ॥

सर्वथा करणीया चेद् गुर्वाज्ञा ते जगद्गुरो[४] ।
भवद्दासः[५] करोम्येनां भवांस्तु नगरीं व्रजेत् ॥ ९६ ॥

(भा.दी.) सर्वथेति । हे जगद्गुरो श्रीराम, ते तव गुरोः पितुराज्ञा, चेद्यदि सर्वथा करणीया, तर्हि भवतो दासः भृत्यः अहम्, एनां तवाऽदिष्टां गुर्वाज्ञाम्, करोमि । भवांस्तु नगरीं व्रजेत् ॥ ९६ ॥

---

१. **'रामो न गणयत्येव'** । **'रामे नगणयत्येवम्'** इति क्वचित् । २. **'आर्य प्रत्युपवेक्ष्यामि यावन्मे सम्प्रसीदसि'** इति वि.ती.पाठः ।

३. **'प्रत्युपवेक्ष्यामि'** । **'उपवत्स्यामि उप समीप एव स्थास्यामि'** इति का.श्री. ।

४. **'जगद्गुरोः'** ५. **'तावद् दासः'**

(सं.चं.) भवत्प्रतिनिधितया भवद्दासोऽहं करोमि ॥ ९६ ॥

इति ब्रुवाणमास्तीर्य्य कुशान् स्थण्डिलमण्डले ।
स्मित्वा कारुणिकः प्रोचे भरतं भरताग्रजः ॥ ९७ ॥

(भा.दी.) **इती**ति । स्थण्डिलस्य मण्डलं प्रदेशस्तस्मिन्, कुशान् आस्तीर्य, इति ब्रुवाणं भरतम्, कारुणिकः दयाशीलः भरताग्रजः श्रीरामः, स्मित्वा मन्दहासं कृत्वा, प्रोचे ॥ ९७ ॥

(सं.चं.) स्थण्डिलं परिष्कृता भूमिः । मण्डलं तळम् । उपवेशनार्थं कुशानास्तीर्य । भरताग्रज इति रामस्य तस्मिन् प्रीत्यतिशयमाह ॥ ९७ ॥

चतुर्द्दशे वत्सरेऽहं वत्स यास्यामि नः पुरीम् ।
सत्यमित्युदितोऽपीशं ययाचे भरतः पुनः ॥ ९८ ॥

(भा.दी.) **चतु**रिति । हे वत्स भरत, चतुरधिका दश चतुर्दश, चतुर्दशत्वसङ्ख्यापूरणश्चतुर्दशस्तस्मिन्, वत्सरः संवत्सरस्तस्मिन्, अहं नः पुरीं अयोध्यां यास्यामि गमिष्यामि । इदं वचः सत्यम् । इति उदितोऽपि भरतः पुनः ईशं श्रीरामं ययाचे । याचृ याच्ञायां लिट् ॥ ९८ ॥

(सं.चं.) पुनःपुनः ययाचे ॥ ९८ ॥

एतस्मिन्नन्तरे रामं सम्प्रापुः परमर्षयः ।
देवोपदेवैः सम्मन्त्र्य दशग्रीववधार्त्थिनः ॥ ९९ ॥

(भा.दी.) **एतस्मिन्नि**ति । परमाश्च ते ऋषयश्च परमर्षयः अगस्त्यादयः, देवाश्च, उपदेवा गन्धर्वादयस्ते च, तैः सम्मन्त्र्य आलोच्य, दश ग्रीवाः कण्ठा यस्य स तथा तस्य, वधं संहारमर्थयितुं शीलमेषामस्तीति तथा सन्तः, एतस्मिन्नन्तरं मध्यं तस्मिन्, श्रीरामेण भरतं प्रति सम्भाषणसमय इत्यर्थः, श्रीरामं सम्प्रापुः ॥ ९९ ॥

(सं.चं.) उपदेवा गन्धर्वाः । 'एतावदुक्त्वा वचनं गन्धर्वाः समहर्षयः । राजर्षयश्चैव तथा सर्वे स्वास्वां गतिं गताः' (११२.७) इति च ॥ ९९ ॥

ते प्रोचुर्भरतं तत्र नेदानीं पुरमेत्ययम् ।
कृतकार्य्यविशेषस्तु पुरीं रामो व्रजेदिति ॥ १०० ॥

(भा.दी.) त इति । तत्र चित्रकूटे ते ऋषयः भरतं प्रति, अयं श्रीरामः इदानीम्, पुरमयोध्यापुरं तत्, न एति प्राप्नोति, कृतः कार्यविशेषः राक्षसहननादिलक्षणो येन स तथा सन्, पुरीं व्रजेत्, इति प्रोचुः ॥१००॥

(सं.चं.) 'ततस्त्वृषिगणाः क्षिप्रं दशग्रीववधैषिणः । भरतं राजशार्दूलमित्यूचुः सङ्गता वचः' (११२.४) इति, 'ग्राह्यं रामस्य वाक्यं ते पितरं यद्यवेक्षसे'(५) इति च ॥ १००–८ ॥

भरतं राज्यभारार्त्तं लोठन्तं[१] धरणीतळे ।
याचमानं पुनर्दृष्ट्वा वसिष्ठो राममब्रवीत् ॥ १०१ ॥

(भा.दी.) भरतमिति । वसिष्ठः, राज्यमेव भारस्तेन आर्तं दुःखितम्, धरण्याः तळं तस्मिन् लोठन्तं परि-भ्रमन्तम्, पुनश्च याचमानम्, पुरं प्रत्यागन्तव्यमिति याचन्तम्, भरतं दृष्ट्वा, श्रीरामं प्रति अब्रवीत् ॥१०१॥

भक्ताय भरताय त्वं देव देहि स्वपादुके ।
पादुके नित्यमावन्द्य पालयेद् भरतो भुवम् ॥ १०२ ॥

(भा.दी.) भक्तायेति । हे देव, त्वं भक्ताय भरताय स्वस्य पादुके पादपीठे ते देहि । भरतः पादुके त्वदीयपादपीठे नित्यं सर्वदा आवन्द्य भुवं भूमिं पालयेत् ॥ १०२ ॥

वसिष्ठवाक्यमाकर्ण्य्य वैकुण्ठः पादुके ददौ ।
सौवर्ण्णे ते दधन्मूर्ध्नि प्राञ्जलिर्भरतोऽब्रवीत् ॥ १०३ ॥

(भा.दी.) वसिष्ठेति । वैकुण्ठः श्रीरामः वसिष्ठस्य यद् वाक्यं तत् आकर्ण्य पादुके ददौ । भरतः, सौवर्णे सुवर्णमये, ते श्रीरामदत्ते पादुके, मूर्धा शिरस्तस्मिन्, दधत् दधानः सन्, प्रकृष्टः अञ्जलिर्यस्य स तथा सन् अब्रवीत् ॥ १०३ ॥

नगरं न प्रवेक्ष्यामि यावदागमनं तव ।
प्रवेक्ष्याम्यग्निमप्रेक्ष्य वत्सरे त्वां चतुर्द्दशे ॥ १०४ ॥

---

१. **'राज्यभर्तारं लोटन्तम्'** । **'राज्यभर्तारं राज्यरक्षकं याचमानं प्रार्थयमानम्'** इति का.श्री. । **'राज्यकर्तारम्'** इति कश्चित् ।

(भा.दी.) नगरमिति । हे राम, यावत्कालं तव आगमनं तावत्पर्यन्तम्, नगरं अयोध्यापुरं तत्, न प्रवेक्ष्यामि । विश प्रवेशने लृट् । चतुर्दशो वत्सरः संवत्सरः तस्मिन्, त्वां अप्रेक्ष्य अदृष्ट्वा अग्निं प्रवेक्ष्यामि ॥ १०४ ॥

इति प्रतिश्रवौ कृत्वा प्रणम्य च जगत्प्रभुम् ।
मातृभिर्बाष्पनेत्राभिर्भरतः सानुगो ययौ[१] ॥ १०५ ॥

(भा.दी.) इतीति । भरतः इति प्रतिश्रवौ प्रतिज्ञे कृत्वा, जगत्प्रभुं श्रीरामं प्रणम्य च, बाष्पयुक्तानि नेत्राणि यासां ताः तथा ताभिः मातृभिः सह, सानुगः अनुगैर्भृत्यैः सहितः सन् ययौ ॥ १०५ ॥

भरद्वाजं समामन्त्र्य भरतस्त्वरितो गतः ।
गङ्गामतीत्य सम्प्राप्तः स्वपुरीं[२] रहितां श्रिया ॥ १०६ ॥

(भा.दी.) भरद्वाजमिति । चित्रकूटाद्गतः भरतः, भरद्वाजं समामन्त्र्य आपृच्छ्य, गङ्गामतीत्य, त्वरितः वेगितः सन्, श्रिया सम्पदा रहितां स्वपुरीं अयोध्यां प्रति सम्प्राप्तः, अयोध्यानिकटं प्रापेत्यर्थः ॥ १०६ ॥

प्रवेश्य मातॄन्नगरीं नन्दिग्राममवाप्य[३] सः ।
सशत्रुघ्नो वसंस्तत्र[४] पालयामास मेदिनीम् ॥ १०७ ॥

(भा.दी.) प्रवेश्येति । सशत्रुघ्नः, शत्रुघ्नेन सहितः, सः भरतः मातॄः नगरीं अयोध्यां प्रवेश्य, स्वयं नन्दिनामको यो ग्रामस्तं अवाप्य तत्र अवसत् । मेदिनीं पालयामास ॥ १०७ ॥

रामस्य पादुकायुग्मं तत्र सिंहासनेऽर्पितम् ।
सितातपत्रव्यजनैरुपास्त भरतो व्रती ॥ १०८ ॥

(भा.दी.) रामस्येति । तत्र नन्दिग्रामे, सिंहासनं भद्रासनं तस्मिन् अर्पितम्, श्रीरामस्य पादुकयोः युग्मं युगळं तत्, भरतः, व्रतमस्यास्तीति व्रती, फलाहारादिनियमवान् सन् । सितं यदातपत्रं छत्रं तच्च, व्यजनानि तालवृन्तानि तानि च, तैः उपास्त सेवितवान् ॥ १०८ ॥

---

१. **'सानुजो ययौ'** २. **'स्वां पुरीम्'**
३. **'–मवाप सः'** ४. **'सशत्रुघ्नोऽवसत् तत्र'** इति वि.ती.पाठः ।

रममाणेन रामेण रमण्या रमणीयया ।
वनेषु पुष्पपूर्णेषु शैलेन्द्रे सुखमासितम्[1] ॥ १०९ ॥

(भा.दी.) रममाणेनेति । पुष्पैः पूर्णानि तेषु वनेषु, रमणीयया मनोहरया, रमण्या भार्यया सीतया सह रममाणेन क्रीडता श्रीरामेण, शैलानामिन्द्रस्तस्मिन् चित्रकूटे, सुखं यथा भवति तथा, आसितम्, आस्थितम् ॥ १०९ ॥

(सं.चं.) अथ चित्रकूटे रामवृत्तान्तमाह– रममाणेन ॥ १०९ ॥

तिलकं लोकतिलकः प्रियाया व्यधिताळिके ।
पूरयामास पुष्पैश्च कबरीं कमलेक्षणः ॥ ११० ॥

(भा.दी.) तिलकमिति । लोकेषु तिलकः श्रेष्ठः श्रीरामः, प्रियायाः भार्यायाः अळिकं ललाटं तस्मिन्, तिलकं पुण्ड्रं व्यधित चकार । धाञो लुङ् । कमलवदीक्षणे यस्य स तथा, श्रीरामः, पुष्पाणि चम्पकादिपुष्पाणि तैः कबरीं केशभारं पूरयामास । पूरी आप्यायने[2] लिट् ॥ ११० ॥

(सं.चं.) अळिके ललाटे तिलकं व्यधित । 'चकार तिलकं तस्या ललाटे रुचिरं तदा' (९६.१८) इति, 'केसरस्य च पुष्पाणि करेणाऽमृद्य राघवः । अलकं पूरयामास मैथिल्याः प्रीतमानसः' (२०) इति च । एतेनैतमध्यायं प्रक्षिप्तं वदन्तो भ्रान्ता इति सिद्धम् ॥ ११०–१ ॥

वनमालाविलसितौ लीलाकुवलयान्वितौ ।
आनन्दतां यथाकामं[3] दम्पती तौ वनेवने ॥ १११ ॥

(भा.दी.) वनेति । वनमालया विलसितौ विशेषेण शोभमानौ, लीलार्थं क्रीडार्थं ये कुवलये नीलोत्पले ताभ्यामन्वितौ युक्तौ, जाया च पतिश्च दम्पती भार्याभर्तारौ (तौ सीतारामौ), सन् आनन्दो यस्य स तथा

१. **'सुखमास्थितम्'**

२. पूरी आप्यायने इत्यस्य णिचि लिटि रूपम्– **पूरयामासेति** । पॄ पालनपूरणयोरिति धातुपाठं पठन् का.श्री. बभ्राम ।

३. **'अवन्दतां सदानन्दम्'** इति वि.ती.पाठ इति भाति । सन्दिग्धार्थमेतत् । अवन्दतामिति च न स्वरसम् । वन्दतेरात्मनेभाषत्वात् **'अवन्देताम्'** इति पठनीयम् । अथापि न स्वरसोऽर्थः । **'आनन्देतां यथाकामम्'** इति पठन्तोऽपि विभ्रान्ताः । **'अवदेतां यथाकामम्'** इति का.श्री.पाठः । **'अवदेतां स्पष्टमवोचताम् । वद व्यक्तायां वाचि लङि प्रथमपुरुषद्विवचनम् । 'भासमानोपसम्भाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः'** (अ.सू. १.३.४७) **इति भासमानार्थे आत्मनेपदम्'** इति च का.श्री.टीका ।

तं हरिम्, वनेवने अवन्दतां लीलया अस्तुवताम्, वदि अभिवादनस्तुत्योर्लङ् । सन् आनन्दो यथा भवति तथा लीलया अवन्दतां परस्परमस्तुवतामिति वा ॥ १११ ॥

सदा विनिद्रे देवेशे योगनिद्रामुपेयुषि ।
कदाचिदाययौ तत्र वायसो वासवात्मजः ॥ ११२ ॥

(भा.दी.) सदेति । सदा विगता निद्रा यस्मात् स तथा तस्मिन्, देवेशे श्रीरामे, कदाचित् योगनिद्रां उपेयुषि प्राप्ते सति, तत्र चित्रकूटे, वायसः काकात्मकः, वासवस्य इन्द्रस्य आत्मजः पुत्रः जयन्तनामकः आययौ ॥ ११२ ॥

(सं.चं.) योगनिद्रा लीलानिद्रा । वायसरूपो वासवात्मजो जयन्तः ॥ ११२ ॥

आसुरं भावमाश्रित्य भासुरं जानकीस्तनम् ।
तुण्डेन चण्डः पस्पर्श बलिभुग् बलिमाद्य सः ॥ ११३ ॥

(भा.दी.) आसुरमिति । चण्डः क्रूरः सः बलिभुक् वायसः, बलिर्बलिहरणान्नम्, तं आद्य भक्षयित्वा, असुराणां सम्बन्धी आसुरस्तं भावः स्वभावस्तम्, परदारधर्षणलक्षणमित्यर्थः, आश्रित्य, तुण्डं वदनं तेन, भासुरं प्रकाशशीलम्,जानक्याः स्तनः कुचस्तं पस्पर्श । स्पृश आमर्शने लिट् ॥ ११३ ॥

(सं.चं.) बलिभुग् वायसः । बलिं भूतबल्यर्थं बहिर्निक्षिप्तमन्नं आद्य जग्ध्वा । पस्पर्श ददंश ॥११३–५॥

विभीष्यमाणोऽपि यदा न मुमोच स मैथिलीम्[१] ।
तदा तस्मै तृणं किञ्चित् पक्षिणे प्राक्षिपत् प्रभुः ॥ ११४ ॥

(भा.दी.) विभीष्येति । प्रभुः श्रीरामः यदा मैथिलीं सः काकः विभीष्यमाणोऽपि न मुमोच, तदा तस्मै पक्षिणे, किञ्चित् तृणं तत्, प्राक्षिपत् चिक्षेप । क्षिप प्रेरणे लङ् ॥ ११४ ॥

तेन जाज्वल्यमानेन तृणेनासावनुद्रुतः ।
त्रिलोकीं विद्रुतः[२] काकः शरणार्थी भयातुरः ॥ ११५ ॥

---

१. 'न मुमोच स्तनं बली'   २. 'त्रिलोकीं पर्यगात् काकः'

(भा.दी.) तेनेति । पुनःपुनरतिशयेन ज्वलतीति जाज्वल्यमानं तेन, तेन तृणेन अनुद्रुतः अनुगतः, अत एव भयातुरः भयेन खिन्नः, असौ काकः, शरणं रक्षणमर्थयितुं शीलमस्यास्तीति तथा सन्, त्रयाणां लोकानां समाहार-स्त्रीलोकी तां विद्रुतः ॥ ११५ ॥

रामाय नम इत्युक्त्वा ब्रह्मरुद्रादिभिः सुरैः ।
कालितः स्वालयात् काको रामविक्रमभीरुभिः ॥ ११६ ॥

(भा.दी.) रामायेति । श्रीरामस्य यो विक्रमः पराक्रमः तस्मात् भीरुभिर्भयशीलैः, ब्रह्मा रुद्रश्च तौ आदी येषां ते तथा तैः, सुरैः श्रीरामाय नम इति उक्त्वा, काकः स्वेषां य आलयो मन्दिरं तस्मात् कालितः निष्कासितः ॥ ११६ ॥

(सं.चं.) कालितः निरस्तः ॥ ११६–७ ॥

नाविन्दच्छरणं[1] दीनस्त्रैलोक्ये ससुरासुरे ।
जिजीविषुर्जीवनार्थं[2] तमेव शरणं ययौ ॥ ११७ ॥

(भा.दी.) नेति । दीनः, जीवितुमिच्छति जिजीविषति, जिजीविषतीति जिजीविषुः काकः, सुराश्च असुराश्च तैः सहिते, त्रयश्च ते लोकाश्च त्रिलोकाः, त्रिलोका एव त्रैलोक्यं तस्मिन्, शरणं रक्षकं पुरुषं नाविन्दत् न प्राप्तवान् । विद्लृ लाभे लङ् । जीवनायेति जीवनार्थं तमेव श्रीराममेव शरणमरणं तत् ययौ ॥ ११७ ॥

देवैर्दत्तवरः पक्षी धरान्तरचरः पुरा ।
दीनं मां पाहि देवेति पपात हरिपादयोः ॥ ११८ ॥

(भा.दी.) ब्रह्मरुद्रादिलोकगमने मध्ये अमरणे निमित्तं कथयन् शरणागतिप्रकारमाह– **देवैरि**ति । देवैः दत्तः वरः अवध्यत्वादिलक्षणो यस्य स तथा, धराया भूमेर्यदन्तरं मध्यं तत्र चरतीति तथोक्तः, अत एव धरान्तरचरनामकः पक्षी, हे देव, दीनं मां पाहि इति वदन् सन्, हरेः श्रीरामस्य यौ पादौ तयोः पुरा पुरतः पपात ॥ ११८ ॥

(सं.चं.) जयन्ते आविष्टोऽसुरः देवैर्दत्तवरः पुरा । 'स वायसानामसुरोऽखिलानां वरादुमेशस्य बभूव चाक्षिगः' इति निर्णयवचनान्मुख्यतो रुद्रदत्तवरः । ननु तर्हि 'शिवदत्तवरः' इत्येव वक्तव्यम् । किमिति 'देवैर्दत्तवरः'

१. 'अविन्दन् शरणम्' २. '–विषुर्जीवितार्थम्'

इत्याह? रामायणसङ्गमनार्थमित्यवेहि । तथा हि रामायणे–'देवैर्दत्तवरः पक्षी धरान्तरचरो लघुः' (९६.४५) इति । तेन देवाः शिवश्च समेत्य तस्याखिलवायसानामक्षिगतत्वं वरं ददुरिति ज्ञायते । अत्र 'हरान्तर-चरो लघुः' इति रामायणपाठं पठन्तो भ्रान्ताः । उपरिष्टात् सुन्दरकाण्डेऽपि–'पुत्रः किल स शक्रस्य वायसः पततां वरः । धरान्तरं गतः शीघ्रं पवनस्य गतौ समः' (३८.२७) इति स्वर्गलोकाद् धरान्तरं गत इत्यर्थः । स एव धरान्तरे चरन् धरान्तरचर उक्तः । 'धरान्तरचरनामक' इत्यपि वदन्ति । किम्मूलं तद्वचनमिति मृग्यम् ॥ ११८ ॥

न जघान दयालुस्तं तस्य[1] नेत्रमशातयत् ।
ततः प्रभृति[2] सर्वेऽपि काका एकाक्षतां ययुः ॥ ११९ ॥

(भा.दी.) नेति । दयालुः दयाशीलः श्रीरामः तं काकं न जघान । हन हिंसागत्योर्लिट् । तस्य काकस्य नेत्रं चक्षुस्तत् अशातयत् अपातयत् । शो तनूकरणे लङ्[3] । ततश्चक्षुर्निपातनात् प्रभृति आरभ्य, सर्वेऽपि काकाः, एकं अक्षि यस्य स एकाक्षस्तस्य भावस्तत्ता, तां ययुः । श्रीरामः वर्तमानकाकस्याक्षिपातेन भविष्यत्-काकानामप्यक्षि कुरङ्गनामकदैत्यस्याऽवासस्थानभूतं मा भूदिति भविष्यतामप्येकाक्षत्वमचिन्त्यशक्त्या चकारेति भावः ॥ ११९ ॥

(सं.चं.) एकं नेत्रमशातयत् नाशयामास । 'शद्लृ शातने' इत्यस्य णिचि दस्य तकारादेशे रूपम् ॥११९॥

खलावलेपखण्डनस्थिरावतारविभ्रमः ।
अवेक्षते स्म जानकीमुखेन्दुमिन्दिरापतिः ॥ १२० ॥

(भा.दी.) खलेति । खलावलेपखण्डनस्थिरावतारविभ्रमः । खलानां दुष्टानामवलेपो गर्वस्तस्य खण्डनं तस्मिन् स्थिरः अवतारस्य विभ्रमो विलासो यस्य स तथा, इन्दिरापतिः श्रीरामः, जानक्या यन्मुखं तदेवेन्दुस्तं अवेक्षते स्म ऐक्षत । ईक्ष दर्शनाङ्कनयोर्लट् ॥ १२० ॥

(सं.चं.) अथ प्रमाणिकया काकाक्षिपातनकथामुपसंहरति । खलस्य काकासुरस्य सर्वेषां वा खलानां योऽव-लेपोऽहङ्कारस्तस्य खण्डने स्थिरोऽवतारविभ्रमो यस्य ॥ १२० ॥

१. **'दयालुस्तमस्य'** २. **'तदाप्रभृति'** । **'तदा स काल एव प्रभृतिरादिर्यस्मिन् कर्मणि तत् तदाप्रभृतिः'** इति का.श्री. ।

३. **'शो तनूकरणे'** इत्यस्य णिचि लङि **'अशाययत्'** इति रूपं मन्यन्ते पाणिनीयाः । **'शा-च्छा-सा-ह्वा-व्या-वे-पां युक्'** (अ.सू.७.३.३७) इति शयतेर्णौ युगागममाह हि पाणिनिः । तेन **'शद्लृ शातने'** इत्यस्येदं रूपमिति पाणिनिनये स्थितम् **'शदेरगतौ तः'** (७.३.४२) इति ।

सीतामुखाब्जस्मितभानुभानुः सत्कैरवानन्दनचन्द्रभानुः[१] ।
रक्षस्तृणौघक्षपणस्फुलिङ्गो रराज रामस्य कटाक्षमोक्षः ॥ १२१ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
अयोद्ध्याकाण्डे द्वादशः सर्गः ॥

—०—

(भा.दी.) सीतेति । सीताया यन्मुखम्, तदेवाब्जम्, तस्य स्मितं विकासः, तत्करणे भानोः सूर्यस्य भानुरिव किरण इव भानुः, किरणायित इत्यर्थः । सन्तः सज्जना एव कैरवाणि उत्पलानि, तेषां आनन्दनं सन्तोषकरणं तस्मिन्, चन्द्रस्य भानुरिव मरीचिरिव भानुः, चन्द्रिकायित इत्यर्थः । रक्षांसि तृणानीव तेषां ओघः समूहः, तस्य क्षपणं विनाशः, तस्मिन् स्फुलिङ्गइव स्फुलिङ्गः, वह्निकणायित इत्यर्थः । श्रीरामस्य कटाक्षोऽपाङ्गदर्शनम्, तस्य मोक्षः विकासः रराज विरेजे । राजृ दीप्तौ लिट् ॥ १२१ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां
भावार्थदीपिकायामयोध्याकाण्डे द्वादशः सर्गः ॥

—०—

(सं.चं.) उपजात्याऽयोध्याकाण्डकथामुपसंहरति– **सीते**ति । सीतामुखाब्जविकसने भानोः सूर्यस्य भानुः किरण इव । सन्तः कैरवाणि कुमुदानीव । 'ನೈದಿಲೆ' इति भाषायाम् । तेषामानन्दने चन्द्रकिरण इव । रक्षांसि तृणौघा इव । तेषां क्षपणे स्फुलिङ्गोऽग्निकण इव रामस्य कटाक्षमोक्षः ॥ १२१ ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायामयोध्याकाण्डे
द्वादशसर्गविवरणम् ॥

—०—


अयोध्याकाण्डं समाप्तम्

[आदितः श्लोकाः– १००३+१२१=११२४]

[अयोध्याकाण्डे श्लोकाः– ७०२]

१. '–वानन्ददचन्द्रभानुः'

अरण्य-काण्डम् : ३



प्रथमः सर्ग्गः

पुरा पुलस्त्यः परमेष्ठिपुत्रस्तन्वंस्तपो मेरुगिरेः समीपे ।
विलोभयन्तीर्म्मुहुरेत्य कन्या[1] विलोक्य किञ्चित् कुपितो बभाषे ॥ १ ॥

(भा.दी.) श्रीरामचन्द्रस्य रावणहन्तृत्वादिगुणवर्णनोपयुक्तत्वेन रावणोत्पत्त्यादिकं वक्तुं पीठिकामारचयति– **पुरा पुलस्त्य** इत्यादिना । पुरा, मेरुश्चासौ गिरिश्च, तस्य समीपं पार्श्वं तस्मिन्, तपः तन्वन् कुर्वाणः, परमेष्ठिनश्चतुर्मुखस्य पुत्रः पुलस्त्यः, मुहुः एत्य स्वसमीपमागत्य, विलोभयन्तीः विलोभनं कुर्वन्तीः, मनश्चाञ्चल्यं कुर्वन्तीरित्यर्थः, कन्याः विलोक्य किञ्चित् कुपितः सन् बभाषे ॥ १ ॥

(सं.चं.) अथारण्यकाण्डकथा प्रकृता । तत्र प्रथमं प्रसक्तां रामायणस्योत्तरकाण्डे कथितां रावणकथां प्रथमसर्गे प्रस्तौति–**पुरेति** । कुपितइव बभाषे, यथा ताः कन्यकाः श्रूयासुः । श्रुत्वा च पुनर्नेयासुः । 'पुरा कृतयुगे राम प्रजापतिसमः प्रभुः । पुलस्त्यो नाम ब्रह्मर्षिः साक्षादिव पितामहः'(उ.कां.२.४) इति, 'स तु धर्मप्रसङ्गेन मेरोः पार्श्वे महागिरेः । तृणबिन्द्वाश्रमं गत्वा न्यवसन्मुनिपुङ्गवः' (६) इति च । कथं पुलस्त्यः? सदा पुरे हृदये स्त्यायति भगवानस्येति । तमिमं पुरस्त्यं सन्तं पुलस्त्यमाचक्षते परोक्षप्रियाः । मुहुर्मुहुरेत्य विलोभयन्तीः । 'देवपन्नगकन्याश्च राजर्षितनयाश्च याः । क्रीडन्त्योऽप्सरसश्चैव तं देशमुपपेदिरे' (९) इति च । उत्तरार्धे द्वितीयाक्षरप्रासः उपजातिप्रायः सर्गः । यत्र विशेषस्तत्रोच्यते ॥ १ ॥

या कन्यका मामवलोकयेत सा गर्भिणी स्यादिति वाक्यबाणात् ।
कन्या न भीताः[2] पुनरत्र जग्मुर्विवेद नेदं तृणबिन्दुपुत्री ॥ २ ॥

---

१. **'विलोभयन्तीं मुहुरेत्य कन्याम्'**

२. **'गर्भिणीत्वे पुनरन्यपारिग्रहो नस्यादिति भीताः'** इति का.श्री. ।

(भा.दी.) येति । या कन्यका मां अवलोकयेत पश्येत् । लोकृ दर्शने लिङ् । सा कन्या, गर्भोऽस्या अस्तीति गर्भिणी स्यात्, इति वाक्यमेव बाणस्तस्मात् भीताः कन्याः, अत्र अस्मिन्नाश्रमे पुनः न जग्मुः । तृणबिन्दोः तृणबिन्दुनामकस्य राज्ञः पुत्री, इदं एवं शापप्रदानम्, न विवेद न वेत्ति स्म ॥ २ ॥

(सं.चं.) वाक्यबाणात्, कामबाणादप्युग्रात्, भीताः कन्या न पुनरत्र जग्मुः । यस्येदमाश्रमपदं तस्य तृणबिन्दो राज्ञः पुत्री तु तथा भवितव्यतया नेदं विवेद विदाञ्चकार । वेदेति लट् । विवेदेति लिट् । कथं तृणबिन्दुः? क्लेदनशीलो बिन्दुरुच्यते । 'विन्दुरिच्छुः' (अ.सू.३.२.१६९) इति हि पाणिनिः । तृणमपि तमृते न चलतीति तृणेऽपि भगवद्भेदनशीलस्तृणविन्दुः । तमिमं तृणविन्दुं सन्तं तृणबिन्दुमाचक्षते परोक्षप्रियाः ॥ २ ॥

सा शुद्धभावाऽपि नरेन्द्रकन्या[1] दृष्ट्वा कदाचिन्मुनिमाप गर्भम् ।
प्रसाद्य तं प्राप्य च तत्प्रियात्वं सूते स्म सा विश्रवसं कुमारम् ॥ ३ ॥

(भा.दी.) सेति । नरेन्द्रस्य तृणबिन्दोः कन्या सा, शुद्धः भावः स्वभावो यस्याः सा तथाऽपि, कदाचित् मुनिं पुलस्त्यं दृष्ट्वा गर्भं आप । तस्य पुलस्त्यस्य प्रिया भार्या तस्या भावस्तत्त्वं तत् प्राप्य, पितृप्रदानपूर्वकमाप्य, सा तं पुलस्त्यं सेवया प्रसाद्य प्रसन्नीकृत्य, विश्रवसं विश्रवोनामकं कुमारं पुत्रं सूते स्म प्रसूतवती । षूञ् प्राणिगर्भविमोचने लट् । तृणबिन्दुर्हि स्वपुत्रीं गर्भिणीं दृष्ट्वा किमिदमिति पृष्टे सति मयाऽत्र निमित्तं न ज्ञायते किन्तु सखीजनमन्वेष्टुं पुलस्त्याश्रमं प्रति गताऽस्मीत्युक्ते समाधिना तच्छापं ज्ञात्वा तदाश्रमं प्रति गत्वा तनयां तस्मा एव प्रदत्तवानिति हि रामायणे प्रसिद्धम् ॥ ३ ॥

(सं.चं.) नरेन्द्रो राजर्षिस्तृणबिन्दुः । मुनिं पुलस्त्यं दृष्ट्वा । तृणबिन्दुद्वारा तं प्रसाद्य । भागवते त्वन्यथा पठ्यते–'तृणबिन्दुर्महीपतिः । यं भेजेऽलम्बुसा देवी भजनीयगुणालयम् । वराप्सरा यतः पुत्राः कन्या चैळिबिळाऽभवत् । यस्यामुत्पादयामास विश्रवाश्च धनाधिपम्' (९.३.३०–२) इति । चतुर्थे च– 'पुलस्त्योऽजनयत् पत्न्यामगस्त्यं च हविर्भुजि । सोऽन्यजन्मनि दभ्रोऽग्निर्विश्रवाश्च महातपाः । तस्य यक्षपतिर्देवः कुबेरस्त्विळाबिलासुतः' (४.१.३६–७) इति । तदेतत् सर्वमधरोत्तरम् । यद् भागवतानुसारेण तृणबिन्दुतनया विश्रवसो जननी । रामायणानुसारेण भार्या । कथमिदं सङ्गम्यते? किमिळिबिळा माता कुबेरस्य? आहोस्वित् पितामही? अत्र त्रयी गतिः- कल्पभेदेन व्यवस्थेत्येका । मन्वन्तरभेदेनेत्यपरा । मोहनाय पुंव्यत्यासेन कथावैरूप्यमिति तृतीया । तदुक्तं भागवततात्पर्ये–'सृष्टिभेदाद् विरूपं च तथा पञ्चोत्तरं शतम् । वैरूप्यमन्यद्

१. 'नरेन्द्रपुत्री'

विज्ञेयं तात्पर्यान्मोहनाय वा' (४.१.३३) इति । 'कल्पादिभेदतः । कथाभेदस्तु विज्ञेयः' इति च तत्रैव । सृष्टिभेदादिति । मन्वन्तरभेदेन कल्पभेदेन च द्विविधः सृष्टिभेदः । अत्र पुनर्वैवस्वतमन्वन्तरीयैव कथोच्यत इति न मन्वन्तरभेदात् कथावैरूप्यम् । स्यादपि कल्पभेदात् । किन्तु कल्पनामात्रमेतद् । गुह्यभाषामयं शतस्य रीतीनां मध्ये रीत्यन्तरमिदमिति तु युक्तं भाति । तथाचायं भागवतार्थः यस्यामिति जन्यत्वं सप्तम्यर्थः । सीतायां कुशलवौ बभूवतुरितिवत् । यस्यां जात इत्येतत् । तथाच यस्यामिळिबिळायां जातः विश्रवाः धनाधिपमुत्पादया-मासेत्यर्थः । मोहनाय चेदृशी कथनरीतिः पुराणेषु भवति । पूर्वम्–'कुबेरस्त्विळिबिळासुतः' इत्यत्रापि सुतस्य सुतः प्रीत्यतिशयात् सुत इत्युपचर्यते । अत एव कुबेर ऐळिबिळ इत्युच्यते, यथा रावणः पौलस्त्य इति । भारद्वाजपुत्र्या अपि इळिबिळेति नामान्तरं वा । कथं विश्रवाः? विशिष्टं वेदश्रवणं मातुर्येन सः । तथाहि पुलस्त्यवचनं रामायणे–'यस्मात्तु विश्रुतो वेदस्त्वयेहाध्ययतो मम । तस्मात् स विश्रवा नाम भविष्यति न संशयः' (२.३२) इति । तथाच विश्रवण एव विश्रवाः । विश्रवणस्यापत्यं वैश्रवणः कुबेरः । विश्रवसोऽपत्यमिति विग्रहणे सस्य णः ॥ ३ ॥

तस्मात् सुतं वैश्रवणं च[१] भारद्वाजस्य पुत्री सुषुवे सुगात्री ।
ब्रह्मप्रसादाद् दिगधीश्वरत्वं यः पुष्पकाख्यं च विमानमाप ॥ ४ ॥

(भा.दी.) तस्मादिति । सु शोभनं गात्रं शरीरं यस्याः सा तथा, भारद्वाजस्य भारद्वाजनामकस्य ऋषेः पुत्री, तस्मात् विश्रवसः वैश्रवणं वैश्रवणनामकं सुतं सुषुवे । यः वैश्रवणः ब्रह्मणः प्रसादोऽनुग्रहस्तस्मात् दिशोऽधीश्वरो दिगधीश्वरस्तस्य भावस्तत्त्वं तत्, उत्तरदिक्पालकत्वमित्यर्थः, पुष्पकमिति आख्या यस्य तत्तथोक्तं तत् विमानं च चतुर्मुखात् आप । आप्लृ व्याप्तौ लिट् । ननु भागवते पुलस्त्यभार्यायां हवि-र्भुजि विश्रवा उत्पन्नस्तस्माच्च तृणबिन्दुपुत्र्यामिळिविळायां वैश्रवण उत्पन्न इति प्रतिपादनाद् विरोध इति चेन्न । अस्य ग्रन्थस्य वाल्मीकीयरामायाणानुसारेण प्रवृत्तत्वेनाविरोधात् । मुनिमतयोः परस्परविरोधेनाप्रामाण्यस्य वक्तुमनुचितत्वादेव कल्पभेदादिकमनुसृत्य विरोधः परिहरणीयः । यद्वा 'सृष्टिभेदाद् विरूपं तु कथापञ्चोत्तरं शतम् । वैरूप्यमन्यद् विज्ञेयं तात्पर्यान्मोहनाय हि' इत्याचार्योक्त्यनुसारेणैव विरोधः परिहरणीयइति ॥ ४ ॥

(सं.चं.) वैश्रवणं कुबेरम् । भारद्वाजस्य पुत्री देववर्णिनी । तथाहि रामायणे–'ज्ञात्वा तस्य तु तद्वृत्तं भारद्वाजो महामुनिः । ददौ विश्रवसे भार्यां स्वसुतां देववर्णिनीम्' (उ.का.३.३) इति । सुगात्री । 'अङ्गगात्रकण्ठेभ्य

१. '–वणं तु भार–'

इति वक्तव्यम्' इति वार्तिकम् (अ.सू.४.१.५४) । तेन सुगात्री सुगात्रा वा । तपसा तोषितस्य ब्रह्मणः प्रसादात् । इन्द्रवज्रा छन्दः ॥ ४ ॥

हेतेर्विधात्रा विहितस्य विद्युत्केशः सुतस्तस्य सुकेश आसीत् ।
त्रयोऽस्य[१] पुत्राः किल माल्यवांश्च सुमालिमाल्याह्वयकौ च घोराः ॥ ५ ॥

(भा.दी.) हेतेरिति । विधात्रा ब्रह्मणा विहितस्य निर्मितस्य हेतेः हेतिनामकस्य राक्षसस्य विद्युत्केशः विद्युत्केशनामकः सुतः आसीत् । तस्य विद्युत्केशस्य सुकेशः सुकेशनामकः सुतः आसीत् । अस्य सुकेशस्य माल्यवान् माल्यवान्नामकश्च सुमालीति मालीति च आह्वयौ नामनी ययोस्तौ तथोक्तौ इति त्रयः घोराः पुत्राः आसन् किल ॥ ५ ॥

(सं.चं.) विधात्रा विहितस्य सृष्टस्य हेतेः । 'मनोर्वैवस्वतस्यादावथर्वा ब्रह्मणोऽजनि । मित्रश्च वरुणश्चाथो प्रहेतिर्हेतिरेव च' इति ब्रह्माण्डवचनमाथर्वणभाष्ये । 'प्रहेतिर्हेतिश्चेति राक्षसौ । यौ सूर्यस्य रथचक्रपथप्रेरणया नक्षत्रतिथीनां वृद्धिह्रासनिमित्तभूतौ' इति वामनपण्डितः । सोऽयं हेती रविस्थितेन नारायणेन प्रेरितः कीचकं निपातयामास विराटसभायाम् । तस्य भार्यायां कालभगिन्यां विद्युत्केशः सुत आसीत् । स सन्ध्यातनयां सालकटङ्कटामुपयेमे । तस्यामस्य सुकेशः सुत आसीत् । ग्रामणीर्नाम गन्धर्वः स्वतनयां देववतीं सुकेशाय ददौ । देववत्यां सुकेशस्य त्रयः पुत्रा बभूवुः– माल्यवान् सुमाली माली चेति । त्रयोऽपि घोराः । 'त्रयो मन्त्रा इवात्युग्रास्त्रयो घोरा इवाऽमयाः' (उ.कां.५.८८) इति च ॥ ५ ॥

ब्रह्माहितैर्ब्रह्मवरादवध्यैर्लङ्कालयैरुत्कटपुत्रपूगैः ।
त्रिभिस्त्रिलोकीक्षपणैः प्रभग्नाः प्रायन्त शर्वं शरणं सुरेन्द्राः ॥ ६ ॥

(भा.दी.) ब्रह्मेति । ब्रह्मणां ब्राह्मणानां अहितैरत्यन्तं वैरिभिः, ब्रह्मणश्चतुर्मुखस्य यो वरस्तस्मात् अवध्यैः, लङ्का आलय आवास येषां ते तथा तैः, उत्कटाः मत्ताः पुत्राणां पूगाः समूहा येषां ते तथा तैः । 'उत्कटो मत्त उद्भटे' इति वैजयन्ती । त्रिलोक्याः क्षपणा विनाशकास्तैः । त्रिभिः माल्यवत्सुमालिमालिभिः प्रभग्नाः पराजिताः सुरेन्द्राः देवश्रेष्ठाः इन्द्रादयः शर्वं रुद्रं शरणमरणं तत् प्रायन्त प्रापुः । अय गतौ लङ् ॥ ६ ॥

(सं.चं.) तपस्तप्त्वा तोषितस्य ब्रह्मणो वरादवध्यैः, ब्रह्माहितैर्ब्रह्मद्वेषिभिः, ब्रह्मेति वेदा वेदज्ञाश्च । मयदत्तलङ्कालयैः, स्वपुत्रपूगयुक्तैः । नर्मदा नाम गन्धर्वी बभूव । तस्यास्तिस्रः पुत्र्य आसुः– सुन्दरी केतुमती

१. 'त्रयोऽत्र पुत्राः'

वसुधा चेति । वसुदेति क्वचित् । माल्यवान् सुन्दरीमुपयेमे । सुमाली केतुमतीम् । माली च वसुधाम् । सुन्दर्यां सप्त माल्यवतः पुत्राः– वज्रमुष्टिर्विरूपाक्षः दुर्मुखः सुप्तघ्नो यज्ञकोपः मत्त उन्मत्तश्च । एका च पुत्री– अनला नाम । केतुमत्यां सुमालिनो दश पुत्राः– प्रहस्तः अकम्पनः विकटः कालकार्मुकः (कालिकामुख इति क्वचित्) धूम्राक्षः दण्डः सुपाश्र्वः संह्रादिः प्रघसः भासकर्णश्चेति । तिस्रः कन्याः– राका, पुष्पोत्कटापराख्या कैकसी, कुम्भीनस्यपराख्या मालिनी च । वसुधायां मालिनश्चत्वारः पुत्राः– अनलः अनिलः हरिः सम्पातिश्चेति । एते चत्वारोऽपि विभीषणामात्या अभवन् । अन्ये उत्कटाः क्रूरस्वभावाः । तदेतदाह– उत्कटपुत्रपूगैरिति । पुत्र्यश्च पुत्राश्च पुत्राः । तेषां पूगैः ॥ ६ ॥

तानब्रवीत् सुस्मितमिन्दुमौलिर्म्मया न वद्ध्या रजनीचरास्ते ।
विष्णुं शरण्यं शरणं व्रजामः[१] स्वामी[२] स नः शर्म्म विधास्यतीति ॥ ७ ॥

(भा.दी.) तानिति । इन्दुर्मौलौ यस्य स तथा रुद्रः, रजन्यां रात्रौ चरन्तीति रजनीचरा राक्षसा इत्यर्थः, ते माल्यवत्प्रभृतयः, मया वध्याः वधार्हाः न, शरण्यं शरणार्हं विष्णुं शरणमरणं व्रजामः, नः स्वामी सः हरिः, शर्म सुखम्, विधास्यति करिष्यति इति । तान् सुरेन्द्रान् सुशोभनं स्मितं यथा भवति तथा अब्रवीत् ॥ ७ ॥

(सं.चं.) तानब्रवीत् । 'अहं तान्न हनिष्यामि मयाऽवध्या हि तेऽसुराः । गच्छध्वं शरणं विष्णुं हनिष्यति स तान् प्रभुः' (६.११०,११) इति च । मया न वध्याः । ब्रह्मवरादवध्या हि ते ॥ ७ ॥

दुग्धाब्धिशय्यं शरणं प्रपन्नाः प्रोचुः सुराः प्राञ्जलयः प्रणम्य ।
सुकेशसूनून् दमयायि नाथ[३] लोकान् सपालान् परिपालयेति ॥ ८ ॥

(भा.दी.) दुग्धाब्धीति । दुग्धाब्धिः शय्या यस्य स तथा तं श्रीहरिं शरणमरणं तत् प्रपन्नाः प्राप्ताः सुराः रुद्रादयः श्रीहरिं प्रणम्य प्राञ्जलयः सन्तः, अयि नाथ, हे नाथ श्रीहरे, सुकेशसूनून् माल्यवत्प्रभृतीन् दमय

१. **'शरणं प्रयामः'**

२. **'स्वामी हि नः' । 'स्वं (ऐश्वर्यं) अस्यास्तीति स्वामी । 'स्वामिन्नैश्वर्ये'** (अ.सू.५.२.१२६) **इति निपातनात् साधुः । तस्य स्वामित्वादस्माकं भृत्यत्वात् अस्मदापत्परिहरणं तेन कर्तव्यम् । 'स्वामिनि शक्तिसमेते निवेद्य दुःखं सुखी भवति' इत्यभियुक्तोक्तेः'** इति का.श्री. ।

३. **'दमयाधिनाथ'**

विनाशाय । दमु उपशमे लोट् । पालयन्तीति पालाः इन्द्रादयः, तैः सहितान् लोकान् परिपालय । इति प्रोचुः ॥ ८ ॥

(सं.चं.) शय्यतेऽत्रेति शय्या शयनस्थानम् । सुकेशसूनून् सानुबन्धान् दमय । दमयित्वा लोकान् लोकपालांश्च परिपालयेति प्रोचुः ॥ ८ ॥

निरीक्ष्य[१] देवव्यसनं[२] स देवो युयुत्सुरायाद् विहगेन्द्रवाहः ।
ते राक्षसा रूक्षगणा[३] अवापुस्तं सिन्धुरेन्द्राइव सिंहराजम् ॥ ९ ॥

(भा.दी.) निरीक्ष्येति । सः देवः श्रीहरिः देवानां व्यसनं विपत् तत् । 'व्यसनं रक्तिविपदोः' इति वैजयन्ती । निरीक्ष्य, योद्धुमिच्छति युयुत्सति, युयुत्सतीति युयुत्सुः सन्, विहगेन्द्रः गरुडः, सः वाहो वाहनं यस्य स तथा सन्, आयात् युद्धार्थं आजगाम । रूक्षः क्रूरो गणः सैन्यसमूहो येषां ते तथा ते राक्षसाः, तं श्रीनारायणम्, सिंहानां राजा सिंहराजस्तम्, सिंहश्रेष्ठमित्यर्थः, सिन्धुराणां गजानामिन्द्रा इव, 'वारणेभरदिनः सामोद्भवः सिन्धुरः' इति हलायुधः, अवापुः ॥ ९ ॥

(सं.चं.) रूक्षगणा रूक्षसेनाः । सिन्धुरेन्द्राः गजेन्द्राः । 'कुम्भी कुञ्जरवारणेभरदिनः सामोद्भवः सिन्धुरः' इत्यभिधानम् । 'सिंहेन द्विरदा यथा' (७.२०) इति च ॥ ९ ॥

स शङ्खचक्री विबभौ विहङ्गे पिशङ्गवासाः प्रविकृष्टशार्ङ्गः ।
गोवर्षवानिन्दुरवी दधानो[४] गिरौ तटित्वानिव सेन्द्रचापः ॥ १० ॥

(भा.दी.) स इति । शङ्खश्च चक्रं च ते अस्य स्त इति तथोक्तः, पिशङ्गं पीतं वासो यस्य स तथा, प्रविकृष्टं शार्ङ्गं यस्य स तथा, गवां शराणां यद्वर्षं तदस्यास्तीति तथा, सः श्रीनारायणः, विहङ्गे गरुडे, इन्दुरवी चन्द्रसूर्यौ दधानः, गोवर्षवान् जलवर्षवान्, इन्द्रचापेन सहितः, गिरौ मेरुपर्वते तटित्वानिव मेघ इव विबभौ । गरुडस्य मेरोश्च सुवर्णवर्णत्वात्, श्रीहरेः मेघस्य च श्यामळवर्णत्वात्, सूर्यचन्द्रेन्द्रचापानां चक्रशङ्खशार्ङ्गानाम्, तटितः पीतवाससश्च सादृश्यादिति भावः ॥ १० ॥

---

१. **'समीक्ष्य देव–'** २. **'देवव्यसनं देवविपदम्, स्थानभ्रंशे वा । 'व्यसनं विपदि भ्रंशे' इत्यमरः'** इति का.श्री. ।

३. **'रूक्षगुणा–'**

४. **'अभूतोपमेयम् । एकदा इन्दुरव्योः मेघस्योपरि अवस्थानासम्भवात् । 'उभौ यदि व्योम्नि पृथक् प्रवाहावाकाशगङ्गापयसः पतेताम्' इतिवत् । 'सहोदयेतामुदयाद्रिशृङ्गे रवी यदि द्वौ' इतिवत्'** इति का.श्री. ।

(सं.चं.) भगवान् तटित्वानिव सनीरनीरद इव विबभौ । विहङ्गो गरुडो गिरिरिव । पिशङ्गं ईषद्रक्तपीतं कनकवर्णं वासः पीताम्बरं तटिदिव । प्रविकृष्टं कृतज्याबन्धं शार्ङ्गं चापः इन्द्रचाप इव । गवां बाणानां वर्षो निरन्तरक्षेपः गवां जलानां धारासम्पातइव । स्वयं भगवान् नीलमेघइव । 'गौर्नाऽऽदित्ये बलीवर्दे किरण-क्रतुभेदयोः । स्त्री तु स्याद् दिशि भारत्यां भूमौ च सुरभावपि । नृस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बा-णलोमसु' इति केशवः । अथचाभूतोपमानमाह– शङ्खचक्री शङ्खचक्राभ्यां सहितः स हरिः इन्दुरवी दधानो मेघ इव विचित्रं बभाविति । पाञ्चजन्य इन्दुरिव । सुदर्शनो रविरिव । 'सुदर्शन महाज्वाल कोटिसूर्यसमप्रभ' इति हि तं स्तुवन्ति । 'सुपर्णं गिरिसङ्काशं वैनतेयमथाऽस्थितः । राक्षसानामभावाय ययौ तूर्णतरं प्रभुः । सुपर्णपृष्ठे स बभौ श्यामः पीताम्बरो हरिः । काञ्चनस्य गिरेः पृष्ठे सतटित् तोयदो यथा' (६.६६–७) इति च ॥ १० ॥

अवाप्य नेशुः शलभा यथाऽग्निं[१] यथाऽग्नयः पूर्णमहो महाब्धिम् ।
यथाऽब्धयः सम्प्रळयार्कतापं तथा महेशं पिशिताशिनस्ते[२] ॥ ११ ॥

(भा.दी.) अवाप्येति । पिशितं मांसमत्तुं शीलमेषामस्तीति पिशिताशिनः राक्षसाः, ते माल्यवत्प्रभृतयः, महांश्चासौ ईशश्च महेशः, तं श्रीनारायणं अवाप्य, अग्निं प्राप्य शलभाः पतङ्गास्त इव, पूर्णं महांश्चासौ अब्धिश्च तं प्राप्य अग्नयः यथा, अब्धयः सम्प्रळये महाप्रळये ये अर्काः[३] द्वादशादित्यास्तेषां यस्तापस्तं प्राप्य यथा तथा नेशुः नष्टा बभूवुः । णश अदर्शने लिट् । उपेन्द्रवज्रा च्छन्दः ॥ ११ ॥

(सं.चं.) महेशं नारायणमवाप्य ते पिशिताशिनो नेशुः । ये पिशितं मांसमश्नन्ति राक्षसाः । 'पिशितं मांसं पिशिता मांसिका' इति हैमः । यथाऽग्निमवाप्य शलभाः पतङ्गा नश्यन्ति । यथा पूर्णमुद्वेलं महाब्धि-मवाप्याग्नयो नश्यन्ति । यथा प्रळयकालीनस्यार्कस्य शोषकं तापमवाप्याब्धयोऽपि नश्यन्ति शुष्यन्ति । मालोपमेयम् । अहो इति भगवतो दुष्टसंहारलीलां स्मरन् विस्मयते । उपेन्द्रवज्रा छन्दः ॥ ११ ॥

---

१. **'शलभा इवाग्निम्'** इत्यपि वि.ती.पाठः स्यात् ।

२. **'पिशिताशनास्ते' 'शलभतुल्याः केचन पिशिताशनाः राक्षसाः अग्नितुल्यं महेशमवाप्य नेशुः । अग्नितुल्याः केचन पूर्णमहाब्धितुल्यं महेशमवाप्य नेशुः । अब्धितुल्याः केचन प्रळयार्कतापतुल्यं महेशमवाप्य नेशुः । महेशोऽपि तत्तद्बलानुसारेण स्वबलं प्रकटितवानिति भावः'** इति का.श्री ।

३. चिन्त्यमिदम् । आदित्या अदितिपुत्रा द्वादश भवन्ति । तेषु अर्कः भास्वानेकः । न ह्यर्काः क्वापि द्वादश भवन्ति ।

माली बली माधवमभ्युपेत्य विक्रान्तिमाक्रान्तसुरां ततान ।
अपातयत् तालसमस्य तस्य च्छित्त्वा[१] शिरः पक्वफलं यथेशः ॥ १२ ॥

(भा.दी.) मालीति । बलमस्यास्तीति बली मालिनामकः माधवं श्रीहरिं अभ्युपेत्य, आक्रान्ताः निराकृताः सुराः यया सा तथोक्ता, तां विक्रान्तिं विक्रमं ततान चकार । तनु विस्तारे लिट् । ईशः श्रीहरिः तालस्य तालवृक्षस्य समः तस्य, अत्युन्नतस्येत्यर्थः, तस्य मालिनः शिरः, पक्वं च तत् फलं च तत् यथा तथा, च्छित्वा अपातयत् ॥ १२ ॥

(सं.चं.) तालसमस्य तस्य पक्वतालफलसमं शिरः चक्रेण च्छित्वा ॥ १२ ॥

सुमालिना माल्यवता च साकं पराद्रुतान् वीक्ष्य परान् परात्मा ।
सुरामृताब्धिं[२] प्रतिभासुरं तं मुखेन्दुनाऽऽनन्दयदिन्दिरेशः ॥ १३ ॥

(भा.दी.) सुमालिनेति । परश्चासौ आत्मा परात्मा सर्वोत्तमः, इन्दिरेशः श्रीहरिः, सुमालिना सुमालिनामकेन, माल्यवता माल्यवन्नामकेन च साकं सार्धम्, परान् शत्रून् राक्षसान् पराद्रुतान् वीक्ष्य, प्रतिभासुरं भासनशीलं तम्, सुरा एवामृताब्धिस्तम्, सुराख्यक्षीरसमुद्रमित्यर्थः, मुखमेवेन्दुस्तेन, आनन्दयत् सन्तोषयामास ॥१३॥

(सं.चं.) घोरं प्रयुध्य पराजितेन सुमालिना माल्यवता च साकं पराद्रुतान् परान् वीक्ष्य इन्दिरेशः, प्रतिभासुरं विजयश्रिया प्रतिष्ठया नृत्यत्तरङ्गमुदधिमिव । भासमानं सुराख्यममृताब्धिं मुखाख्येनेन्दुनाऽऽनन्दयत् । उपेन्द्रवज्रा च्छन्दः ॥ १३ ॥

ततः सुमाली सुरसूदनः स्याद् दौहित्र इत्युग्रमनोरथेन ।
रसातळात् प्राप्य रसां निनाय पुलस्त्यपुत्रान्तिकमात्मपुत्रीम्॥ १४ ॥

(भा.दी.) तत इति । ततः पराभवानन्तरं सुमाली सुमालिनामकः, सुरान् सूदयतीति सुरसूदनः, देवविनाशक इत्यर्थः, दुहितुः पुत्र्या अपत्यं पुमान् दौहित्रः, स्याद् भवेत्, इति उग्रः क्रूरो मनोरथस्तेन रसातळं रसातळलोकस्तस्मात् रसां भूमिम् । 'रसा विश्वम्भरा स्थिरा' इत्यमरः । प्राप्य, आत्मनः पुत्रीम्, पुलस्त्यस्य पुत्रो विश्रवाः, तस्यान्तिकं समीपं तत् निनाय प्रेषितवान् ॥ १४ ॥

१. **'तस्य कृत्त्वा शिरः'** । **'कृत्त्वा छित्वा'** इति वि.भू. । कृती छेदने इति धातोः क्त्वायोगे कर्तित्वेति रूपम् । न कृत्त्वेति ।

२. **'–ताब्धिं परिभासुरस्तम्'** । **'परिभासुरः षोडशकलोपेतचन्द्रवत् प्रकाशमानः'** इति का.श्री. ।

(सं.चं.) सुरसूदनो देवानामन्तकः। विष्णुना पराजितास्ते लङ्कां त्यक्त्वा रसातळे न्यूषुः। 'अशक्नुवन्तस्ते विष्णुं प्रतियोद्धुं भयार्दिताः। त्यक्त्वा लङ्कां गता वस्तुं पाताळं सहपत्नयः'(८.२२) इति च। पाताळमिति अधोभुवनस्य सामान्यं नाम। विशिष्य सप्तमस्य। रसातळमिति च समष्ट्याऽधोभुवनमात्रमुच्यते। रसाया भूमेस्तळमधोभाग इति। व्यष्ट्या तु षष्ठम्–अतळं वितळं सुतळं तळातळं महातळं रसातळमिति। सोऽयमसुराणां निवासः। तथाहि भागवते–'रसातळे दैतेया दानवा पणयो नाम निवातकवचाः कालकेया हिरण्यपुरवासिन इति विबुधप्रत्यनीका निवसन्ति' (५.२३.३०) इति। रसां पृथिवीं प्राप्य आत्मपुत्रीं कैकसीं पुलस्त्यपुत्रस्य विश्रवसोऽन्तिकं निनाय॥ १४॥

लावण्यपण्येन मनो महर्षेः क्रीत्वा[1] सुतानाप च कैकसी सा।
दशाननं प्रागथ कुम्भकर्ण्णं विभीषणं शूर्प्पणखामुपान्त्याम्[2] ॥ १५॥

(भा.दी.) लावण्येति। कैकसी कैकसीनाम्नी सा सुमालिपुत्री, महर्षेः विश्रवसः मनः, लावण्यं सौन्दर्यमेव पण्यं विक्रयसाधनं द्रव्यं तेन, क्रीत्वा विक्रयणं कृत्वा, स्वाधीनं कृत्वेत्यर्थः, प्राक् प्रथमतः, दश आननानि यस्य स तथा तम्, रावणमित्यर्थः, अथ कुम्भकर्णं कुम्भकर्णनामकम्, विभीषणं विभीषणनामकम्, उपान्ते जाता उपान्त्या ताम्, कनिष्ठामित्यर्थः[3], शूर्पणखां शूर्पणखानाम्नीम्। 'नखमुखात् सञ्ज्ञायाम्' (अ.सू.४.१.५८) इति ङीषोऽभावः। इति सुतान् आप लब्धवती॥ १५॥

(सं.चं.) लावण्यमेव पण्यं विक्रेयं तेन। यथा कश्चिद् गां दत्वा धान्यं क्रीणाति, एवं कैकसी स्वलावण्यं तस्मै भोगार्थमर्पयित्वा तस्य मनश्चिक्राय। सुता च सुताश्च सुतास्तान्। प्राक् प्रथमं दशाननमाप। अथ द्वितीयं कुम्भकर्णमाप। विभीषणं चरमम्। ततः पूर्वं सुतामाप। का सा? शूर्पणखामुपान्त्याम्। अन्त्यस्योप निकटे विद्यमानम्, अन्त्यादव्यवहितं पूर्वमुपान्त्यमुच्यते। यदा रूढं नाम तदा शूर्पणखा। यदा गौणं तदा शूर्पणखी। 'दशग्रीवः प्रसूतोऽयं दशग्रीवो भविष्यति। तस्य त्वनन्तरं जातः कुम्भकर्णो महाबलः। प्रमाणाद्यस्य विपुलं प्रमाणं नेह विद्यते। ततः शूर्पणखा नाम सञ्जज्ञे विकृतानना। विभीषणश्च धर्मात्मा कैकस्याः पश्चिमः सुतः' (९.३३–५) इति च। भीषणो न भवतीति विभीषणः। तद् यथा विमुक्त इत्यमुक्त उच्यते॥ १५॥

---

१. **'अनेन सा राक्षसीस्वरूपमाच्छाद्य सुन्दररूपेण तत्समीपं गतेत्युक्तं भवति'** इति का.श्री.।

२. **'शूर्पनखीमुपान्त्याम्'। 'उपान्त्याम्, अन्त्यात् विभीषणात् पूर्वम्, कुम्भकर्णादनन्तरं शूर्पनखीं कन्यामाप'** इति का.श्री.।

३. चिन्त्यमिदम्। कनिष्ठो हि विभीषणः।

विलोक्य धन्यं धनदं सपत्न्याः सुतं स्वमात्रा प्रतिचोदितास्ते ।
तपस्यतिष्ठन्नतनिष्ठवीर्य्याः सहोदरा दिव्यसमायुतं च ॥ १६ ॥

(भा.दी.) विलोक्येति । समाना च सा पत्नी च सपत्नी, तस्याः भारद्वाजपुत्र्याः सुतं धनदं कुबेरं धन्यं स्तुत्यगुणैः समर्थं विलोक्य स्वेषां मात्रा कैकस्या प्रतिचोदिताः वैश्रवणवत् सौभाग्यार्थं तपः कर्तव्यमिति प्रेरिताः अतनिष्ठवीर्याः अतनिष्ठमतिबहु वीर्यं येषां ते तथा सहोदराः भ्रातरः ते रावणादयः दिव्याः देवानां सम्बन्धिन्यो याः समाः वत्सरास्तासामयुतं दशसहस्रं तत् । तपसि अतिष्ठंश्च आस्थिताश्च । उपेन्द्रवज्रा च्छन्दः ॥ १६ ॥

(सं.चं.) समानः पतिरस्या इति सपत्नी । 'ಸವತಿ इति भाषायाम् । विश्रवसः प्रथमभार्या धनदजननी । 'निरपेक्षो गुणैः पूर्णो धन्य इत्युच्यते' । धनं लब्धा धन्य इति पाणिनिः–'धनगणं लब्धा' (अ.सू.४. ४.८४) । धनशब्दः सम्पद्वचनः । सर्वाः सम्पदस्तमनुगच्छन्ति यो गुणैः पूर्णो निरपेक्षश्च । स्वेषां मात्रा स्वया स्वकीयया वा मात्रा कैकस्या । अतितमां तनुस्तनिष्ठः, अल्पतमः । अतनिष्ठमनल्पं वीर्यं तेषाम् । सहोदरास्त्रयोऽपि । दिव्या याः समाः तासामयुतम् । मानुषमानेन ३६००००० वर्षाणि । ननु तर्हि तपस्येव बहूनि युगान्यतीतानि । सत्यम् । बहुयुगजीविनो हि रावणादयः । तथाहि द्वादश्यां त्रेतायां रावणादीनां जननम् । चतुर्विंश्यां त्रेतायां रामावतारः । तत्रैव रावणकुम्भकर्णयोर्वधश्च । विभीषणस्तु चिरजीवी । तपस्यतिष्ठन् गोकर्णमण्डले चतुराननं प्रति । सम्प्रति रामायणे 'एवं वर्षसहस्राणि दश तस्यातिचक्रमुः' (१०.५) इत्यादि पठ्यते । 'दिव्यवर्षसहस्राणि' इत्येव प्राचीनपाठः सम्भाव्यते । ननु कथं तपसि तिष्ठन्ति? यतस्तपो विना न तिष्ठा सन्ति । तेन निष्ठा सप्तम्यर्थः । स्थितिरिति जीवनम्, तपस्यतिष्ठन् । तपोनिष्ठा अजीवन्नित्यर्थः । अथवा स्थितिरिति निष्ठा । तपसि तपोविषये अतिष्ठन् निष्ठिता अभवन् । नैष्ठिकं तप आचारन्नित्येतत् । उपेन्द्रवज्रा च्छन्दः ॥ १६ ॥

आहारहीनः सततं दशास्यः [1]स्वसाहसादब्दसहस्रकान्ते ।
एकैकमुत्कृत्य शिरः शरीराज्ज्वाज्वल्यमाने ज्वलने जुहाव ॥ १७ ॥

(भा.दी.) आहारेति । सततं आहारेण यत्किञ्चिद्भक्षणेन हीनः रहितः दशास्यः, अब्दानां संवत्सराणां यत्सहस्रकं तस्यान्तोऽवसानं तस्मिन्, स्वस्य साहसं अकर्तव्यधैर्यं तस्मात्, सहो बलं तदनुसारित्वात्

१. **'स साहसा–' 'सः दशास्यः साहसात् सहनसामार्थ्यात्'** इति का.श्री ।

साहसमुपायो वा तस्मात्, शरीरं देहस्तस्मात्, शिरः एकं च एकं च एकैकं तत्, उत्कृत्य सञ्छिद्य, पुनःपुनरतिशयेन वा ज्वलतीति जाज्वल्यमानः, तस्मिन् ज्वलने जुहाव । हु दानादनयोर्लिट् । एकैकदिव्यसंवत्सरसंहस्रान्ते एकैकं शिरो जुहावेत्यर्थः ॥ १७ ॥

(सं.चं.) सिद्धिपर्यन्तं साधनपथादविचलनं साहसम् । अकार्यकरणेऽप्यह्रीकता, अविमृश्यकारिता च । दिव्याब्दसहस्रकान्ते । अनारतं सहस्रं सहस्रकम् । दशकं शतकमिति यथा । प्रत्यब्दसहस्रमेकैकं शिरः ॥१७॥

पूर्णे समानां दशमे सहस्रे चिकर्त्तिषुं तं दशमं शिरश्च ।
मामेति धाता विनिवार्य्य तात वरं वृणीष्वेति हसन् जगाद ॥ १८ ॥

(भा.दी.) पूर्ण इति । समाः संवत्सराः, तासां दशसङ्ख्यापूरणं दशमम्, तस्मिन् सहस्रे पूर्णे सति, दशमं शिरश्च, कर्तितुमिच्छति चिकर्तिषति, चिकर्तिषतीति चिकर्तिषुस्तम्, च्छेतुमिच्छन्तमित्यर्थः, तं धाता चतुर्मुखः, मामा इति, च्छेदनं मा कुरु मा कुर्विति विनिवार्य, हे तात, अभीप्सितो यो वरस्तं वृणीष्व इति हसन् जगाद ॥ १८ ॥

(सं.चं.) मामा साहसं कार्षीः । 'पूर्णे वर्षसहस्रे तु शिरश्चाग्नौ जुहाव सः । एवं वर्षसहस्राणि नव तस्यातिचक्रमुः । शिरांसि नव चाप्यस्य प्रविष्टानि हुताशनम् । अथ वर्षसहस्रे तु दशमे दशमं शिरः । छेत्तुकामे दशग्रीवे प्राप्तस्तत्र पितामहः' (१०.१०–२) इति च ॥ १८ ॥

सुरासुरैरप्यहियक्षरक्षःपतत्रिभिः कैश्चिदवद्ध्यभावम् ।
ददौ प्ररोहं च हुताननानां स वीरवर्य्याय वरं विरिञ्चः ॥ १९ ॥

(भा.दी.) सुरेति । विरिञ्चिः, सुराश्च असुराश्च तैः, अहयश्च यक्षाश्च रक्षांसि च, पतत्रिणः पक्षिणस्तैश्च, कैश्चिदपि एतदन्यदेवयोनिभिरपि, न वध्योऽवध्यस्तस्य भावः धर्मस्तम्, अवध्यत्वमित्यर्थः, वरम्, वीरेषु वर्यः श्रेष्ठस्तस्मै ददौ । हुतानि वह्नौ प्रक्षिप्तानि यानि आननानि तेषां प्ररोहः पुनरुद्भवस्तं च, युद्धे पुनःपुनर्निकृत्तानामप्युत्पत्तिं चेत्यर्थः, ददौ ॥ १९ ॥

(सं.चं.) रावणोऽमरत्वमवृणीत । 'न तच्छक्यम् । अन्यं वरं वरय' इत्याह ब्रह्मा । तेन वृतमन्यं वरं ददौ ब्रह्मा । कोऽसौ वरः? आह– सुरासुरैरित्यादि । 'सुपर्णनागयक्षाणां दैत्यदानवरक्षसाम् । अवध्योऽहं प्रजाध्यक्ष देवतानां च शाश्वत' (१०.१९) इति च । रावणापेक्षितं वरं दत्वा स्वयं प्रीतोऽपरं च वरं ददावित्याह– ददौ प्ररोहं च । इदमुपलक्षणम् । यथेष्टरूपधारणशक्तिं चापरं वरं ददौ । उपेन्द्रवज्रा च्छन्दः ॥ १९ ॥

एकेन पादेन सदैव तिष्ठन्[१] दधन्मुकुन्दं हृदयारविन्दे ।
ततस्तपस्यन्[२] हरिधर्म्मनिष्ठां[३] विभीषणः प्राप वरं वरीयान् ॥ २० ॥

(भा.दी.) एकेनेति । एकेन पादश्चरणस्तेन सदैव तिष्ठन्, हृदये यदरविन्दं तस्मिन् मुकुन्दं श्रीहरिं दधत्, ध्यायन्नित्यर्थः, तपस्यन् उक्तप्रकारेण तपः कुर्वन्, वरीयान् स्वरूपेण उत्तमः विभीषणः, हरेर्ये धर्मास्तेषु निष्ठा आसक्तिस्ताम्, भगवदाराधनादिधर्मेष्वासक्तिमित्यर्थः, वरं ततः चतुर्मुखात् प्राप ॥ २० ॥

(सं.चं.) एकेन पादेन । 'विभीषणस्तु धर्मात्मा नित्यं धर्मपरः शुचिः । पञ्चवर्षसहस्राणि पादेनैकेन तस्थिवान्' (१०.६) इति, 'पञ्चवर्षसहस्राणि सूर्यं चैवान्ववर्तत । तस्थौ चोर्ध्वशिरोबाहुः स्वाध्यायधृतमानसः' (१०) इति च । हृदयारविन्दे मुकुन्दं दधत् । तपश्चरति तपस्यति । 'कर्मणो रोमन्थतपोभ्यां वर्तिचरोः' (अ.सू.३.१.१५) इति क्यङ् । 'तपसः परस्मैपदं च' इति वार्तिकात् परस्मैपदम् । ब्रह्माणं प्रति तपश्चरन्नपि मनसा ब्रह्मान्तर्यामिणं नारायणं दध्यावित्यर्थः । तदेतद् रामायणे सूचितम्– 'विभीषणस्तु धर्मात्मा' इति । धारकत्वाद् धर्मो भगवान् । तस्मिन्नात्मा मनोऽस्येति । 'स्वाध्यायधृतमानसः' इति च । स्वतन्त्रस्य नारायणस्याध्ययनं स्वाध्याय इति तु हृदयम् । रावणकुम्भकर्णौ स्वरूपतो वरावप्यसुरावेशतोऽवरौ । अयमसुरजन्माऽपि स्वरूपतो वरीयान् । हरिभक्ति-निष्ठां वरं प्राप । सहैव ब्रह्मास्त्रप्रतिभानं च । 'अशिक्षितं च ब्रह्मास्त्रं भगवन् प्रतिभातु मे' (१०.३१) इति च ॥ २० ॥

द्वन्द्वाख्यदुःखं सहमान उग्रः स कुम्भकर्ण्णस्तपसा चिरेण ।
देव्या तदा भ्रंशितगीः सुरार्थं सुप्तिश्चिरायास्तु ममेत्यवोचत् ॥ २१ ॥

(भा.दी.) द्वन्द्वेति । द्वन्द्वमिति आख्या नाम यस्य तत्तथोक्तम्, तच्च तद्दुःखं च तत्, सहमानः सहनं कुर्वन्, उग्रः सः कुम्भकर्णः, देव्या सरस्वत्या, सुरेभ्य इति सुरार्थम्, देवानां लोकरक्षणलक्षणकार्यसिद्ध्यर्थमित्यर्थः, तदा वरणकाले भ्रंशिता अन्यथाप्रेरिता गीर्वाग्यस्य स तथा सन्, चिरेण बहुकालीनेन तपसा, चिराय चिरकाले, अव्ययमेतत्, सुप्तिः मम अस्तु इति अवोचत् । अतिस्थूलकायत्वादतिचण्डत्वाच्चायं स्वोदरपोषणार्थं सर्वं भक्षयेदित्यभिप्रायेणास्मै वरो न देय इति देवैरर्थितेन चतुर्मुखेन तपसो विनिवर्तनार्थमस्य वरदानकाले वागन्यथा प्रेर्येति प्रोक्ता सरस्वती सुदीर्घकालं निद्रां मे देहीति प्रेरितवतीति हि रामायणे प्रसिद्धम् ॥ २१ ॥

---

१. **'तिष्ठन् ध्यायन् मुकुन्दम्'**
२. **'तपस्तपस्यन्'**
३. **'–धर्मनिष्ठो विभी-'**

(सं.चं.) उभौ तपसा लब्धफलौ कथितौ। अपरस्य तप एव निष्फलं बभूवेत्याह– द्वन्द्वाख्यदुःखम्। देव्या सुरार्थं भ्रंशितगीः। 'वरव्याजेन मोहोऽस्मै दीयताममितप्रभ' (१०.३९) इति सुरैः प्रार्थितेन ब्रह्मणा तेषां सुराणां कृते 'वाणि त्वं राक्षसेन्द्रास्ये भव या देवतेप्सिता' (१०.४३) इत्याज्ञप्तया वाग्देव्या भ्रंशितगीः। 'स्वप्तुं वर्षाण्यनेकानि ममेप्सितम्' (१०.४५) इत्यवोचत्॥ २१॥

तथेत्युदाहृत्य गतेऽब्जयोनौ सभ्रातृकोऽसौ विचरन् दशास्यः।
नीत्या प्रहस्तस्य सुमालिनश्च लङ्कालयोऽभूद्धनदं प्रकाल्य[1] ॥ २२ ॥

(भा.दी.) तथेति। अब्जं योनिः कारणं यस्य स तथा तस्मिन् चतुर्मुखे, तथेति त्वदुक्तप्रकारेण भविष्यतीति, उदाहृत्य स्वलोकं प्रति गते सति, भ्रातृभ्यां कुम्भकर्णविभीषणाभ्यां सहितः विचरन् असौ दशास्यः, प्रहस्तस्य प्रहस्तनाम्नो राक्षसस्य, सुमालिनः सुमालिनाम्नो मातामहस्य च, नीत्या, धनदं प्रकाल्य, लङ्काया विद्राव्य, लङ्का आलयो निवासो यस्य स तथा अभूत्॥ २२॥

(सं.चं.) तथास्त्वित्युदाहृत्य गतेऽन्तर्हिते सति। आनन्तर्यं सप्तम्यर्थः। यदनन्तरं क्रियान्तरं भवति। 'यस्य च भावेन भावलक्षणम्' (अ.सू.२.३.३७) इति पाणिनिः। भावेन क्रियया क्रियान्तरं लक्ष्यते तत्र पूर्वक्रियावतः सप्तमी भवतीत्यर्थः। निरालयतया विचरम्। 'सौभ्रात्रं नास्ति शूराणां शृणु चेदं वचो मम' (११.१४) इत्यादिकया सुमालितनयस्य स्वमातुलस्य प्रहस्तस्य च दुर्नीत्या धनदं लङ्कातः प्रकाल्य निष्कास्य। कल द्रावणे॥ २२॥

मण्डोदरी नाम मयस्य पुत्री बभूव भार्य्या दशकन्धरस्य।
या मेघनादं सुषुवे सुरारिं वीची महाब्धेरिव कालकूटम् ॥ २३ ॥

(भा.दी.) मण्डेति। मयस्य मयनामकस्य दैत्यस्य पुत्री, मण्डोदरी मण्डोदरीति नाम प्रसिद्धा, दश कन्धरा कण्ठा यस्य स तथोक्तस्य रावणस्य भार्या बभूव। या सुरारिं मेघनादम्, उत्पत्त्यनन्तरमेव मेघवन्नाद-करणात् मेघनादनामकं पुत्रम्, इन्द्रजयात् पूर्वं हीन्द्रजितो मेघनाद इति नाम, महांश्चासौ अब्धिश्च तस्य वीची तरङ्गः। 'ऊर्मिर्वा स्त्रियां वीचिः' इत्यमरः। कालकूटमिव विषमिव सुषुवे। षूञ् प्राणिगर्भविमोचने लिट्॥ २३॥

१. **'लङ्कालयैरुत्कटपुत्रपूगैनित्यनेन पूर्वं लङ्कायां सुकेशसूनवः स्थिता इति ज्ञायते। धनदं प्रकाल्येत्यनेन सुकेशसूनुमालिनाशानन्तरं लङ्कायां धनदोऽवस्थितः। इदानीं दशाननो धनदं द्रावयित्वा स्वयं लङ्कालयोऽभूदिति भावः'** इति का.श्री.।

(सं.चं.) मयस्य पुत्री हेमायामप्सरःस्त्रियां जाता । 'इयं ममाऽत्मजा राजन् हेमयाऽप्सरसा धृता । कन्या मण्डोदरी नाम पत्न्यर्थं प्रतिगृह्यताम्' (१२.१८) इति च । तनुतरतया समग्रस्य देहस्य मण्डनभूतमुदरमास तस्या इति मण्डोदरी । अर्वाचीनास्तां मन्दोदरीमाचक्षते । सा मेघनादं सुषुवे । 'ततो मण्डोदरी पुत्रं मेघनादमजीजनत् । स एष इन्द्रजिन्नाम युष्माभिरभिधीयते । जातमात्रेण हि पुरा तेन रावणसूनुना । रुदता सुमहान्मुक्तो नादो जलधरोपमः । जळीकृता च सा लङ्का तस्य नादेन राघव । पिता तस्याकरोन्नाम मेघनाद इति स्वयम्' (१२.२८–३०) इति च । सुरारिमिति वदता तस्य पाश्चात्यमिन्द्रजिदिति नाम चासूचि ॥ २३ ॥

निद्रां विनिद्रां[१] समियाय विद्युज्जिह्वापतिस्तत्र स कुम्भकर्ण्णः ।
गन्धर्वपुत्रीं सरमामवाप्य विभीषणो भागवतोऽत्र रेमे ॥ २४ ॥

(भा.दी.) निद्रामिति । विद्युज्जिह्वायाः विद्युज्जिह्वानाम्न्याः स्त्रियाः पतिः भर्ता सः कुम्भकर्णः, विहता निद्रा पर्यवसितिर्यस्याः सा तथा ताम्, बहुकालीनामित्यर्थः, निद्रां तत्र लङ्कायां समियाय प्राप । भगवतो भक्तो भागवतः विभीषणः गन्धर्वपुत्रीं सरमां सरमानाम्नीं अवाप्य अत्र लङ्कायां रेमे ॥ २४ ॥

(सं.चं.) विनिद्रां सदा जागरूकां निद्रामानिनीं देवताम् । 'निद्रा समभवत् तीव्रा कुम्भकर्णस्य रूपिणी (१३.१) इति च । कुम्भकर्णजाया वज्रज्वालेति साम्प्रतिको रामायणपाठः–'वैरोचनस्य दौहित्रां वज्रज्वालेति नामतः । तां भार्यां कुम्भकर्णस्य रावणः समकल्पयत्' (१२.२३) इति । 'विद्युज्जिह्वेति नामतः' इत्येव रामायणमूलपाठः स्यात् । नामान्तरं वा स्यात् । 'शैलूषस्य महात्मनः । सरमां नाम धर्मज्ञां लेभे भार्यां विभीषणः' (२५) इति च । अत्र सरमायाम् । तस्या अपि भागवतत्वात् ॥ २४ ॥

गोब्राह्मणानां वधबद्धदीक्षो जेष्यंस्त्रिलोकीं धनदं विजित्य ।
स यक्षलक्षाणि बहूनि हत्वा दशाननः पुष्पकमाजहार ॥ २५ ॥

(भा.दी.) गविति । गावश्च ब्राह्मणाश्च तेषां वधे बद्धा सङ्कल्पिता दीक्षा व्रतसङ्ग्रहणं येन स तथा, त्रिलोकीं जेष्यन् सः दशाननः, धनदं विजित्य, बहूनि यक्षाणां लक्षाणि हत्वा, पुष्पकं पुष्पकाख्यं यद्विमानं तत् आजहार ॥ २५ ॥

---

१. **'विशेषनिद्राम् । यद्वा द्रा कुत्सायां गतौ, कुत्सितगतिम्, विगतसञ्ज्ञाम्, बहुकालिकामिति यावत् । निद्रां सुप्तिम्' इति का.श्री. ।**

(सं.चं.) वधे बद्धदीक्षः । त्रिलोकीं जेष्यन् विजिगीषन् प्रथमं स्वाग्रजं धनदं विजिग्ये । यक्षाः कुबेर-भृत्याः । तेषां बहूनि लक्षाणि हत्वा धनदं विजित्य पुष्पकं विमानमाजहार । द्विविधं विमानं भवति । मन्त्रचालितं यन्त्रचालितमिति । पुष्पकं मन्त्रचालितम् ॥ २५ ॥

गर्वेण शर्वस्य स पर्वतेन्द्रमुद्धर्त्तुकामोऽथ तदङ्घ्रिभग्नः[1] ।
स्वां[2] रावणाख्यां रवणादवाप घोरः प्रजानामपि रावणत्वात् ॥ २६ ॥

(भा.दी.) गर्वेणेति । गर्वो मत्समो नास्तीत्यहङ्कारः, तेन शर्वस्य शिवस्य पर्वतेन्द्रं कैलासं उद्धर्तुं काम इच्छा यस्य स तथा, घोरः सः रावणः, अथ तस्य शिवस्य योऽङ्घ्रिस्तेन भग्नः सन्, रवणं आक्रोशनं तस्मात्, प्रजानामपि, रावयति आक्रोशयति इति रावणस्तस्य भावस्तत्त्वं तस्मात्, आक्रोशकारयितृत्वादित्यर्थः, स्वां स्वकीयां रावण इति आख्यां अवाप । वैश्रवणात्पुष्पकं हृत्वा तत्र स्थित्वा पर्यटनसमये कैलासनिकटगमनासमर्थं पुष्पकं दृष्ट्वा किन्निमित्तमिदं न गच्छतीति ततोऽवरुह्य पद्भ्यां कैलाससमीपं प्रति गमनसमये नन्दिना क्रीडत्यत्र रुद्रस्ततो न गन्तव्यः पर्वत इति वाचा निवारितोऽपि तमवज्ञाय गमनप्रतिबन्धकमिमं पर्वतमुद्धरिष्यामी-त्युद्दधार । तदा कैलासे कम्पमाने भीतया पार्वत्याऽऽलिङ्गितो रुद्रः पादाङ्गुष्ठेन तं शैलं लीलया पीडया-मास । ततः शैलस्याधोगताः रावणभुजाः पीडिता आसन् । ततश्च रुद्रः परमकृपाकरः प्रीतः सन तस्य भुजान् मोचयित्वा यस्माद्वेदनार्तेन त्वया दारुणः स्वरो मुक्तो यस्माच्च सम्प्राप्तभयं लोकत्रयं रावितं तस्मात् त्वं नाम्ना रावणो भविष्यसीति रुद्रेण रावणनाम कृतमिति रामायणे प्रसिद्धम् ॥ २६ ॥

(सं.चं.) गर्वेण अहङ्कारेण भुजैरुद्धर्तुकामः । तस्य शर्वस्याङ्घ्रिणा भग्नः । 'एवमुक्त्वा ततो राम भुजान् विक्षिप्य पर्वते । तोलयामास तं शैलं स शैलः समकम्पत' (१६.२५) इति, 'ततो राम महादेवो देवानां प्रवरो हरः । पादाङ्गुष्ठेन तं शैलं पीडयामास लीलया' (२७) इति च । स्वयं भुजानां पीडया रवणात् लोकानां रावणाच्च । 'शैलाक्रान्तेन यो मुक्तस्त्वया रावः सुदारुणः । यस्माल्लोकत्रयं चैतद् रावितं भयमागतम् । तस्मात् त्वं रावणो नाम नाम्ना राजन् भविष्यसि' (१०.३६–७) इति, 'एवं त्वामभिधास्यन्ति रावणं लोकरावणम्' (३९) इति च । रौति रवीति वा रवणः । रवण एव रावणः । प्रजानां रावणत्वात् रवणहेतुत्वात् रावयतीति च रावणः । इन्द्रवज्रा च्छन्दः ॥ २६ ॥

---

१. 'तदङ्घ्रिभुग्नः' २. 'स्वाद् रावणाख्याम्'

हिमालये वीक्ष्य स देवमायां कन्यां परां[1] वेदवतीं प्रगृह्य ।
शप्तस्तया त्वन्मृतये पुनः स्यामित्थं ज्वलन्तं ज्वलनं विशन्त्या ॥ २७ ॥

(भा.दी.) हिमेति । सः रावणः हिमालयो हिमवत्पर्वतः, तस्मिन् देवस्य श्रीहरेः मायां लक्ष्म्यवतारभूताम्, कन्यां कौमारब्रह्मचारिणीम्, परां उत्तमाम्, वेदवतीम्, वेदवतीनाम्नीं, प्रगृह्य कामातुरतया गृहीत्वा, ज्वलन्तं ज्वलनमग्निं स्वाचिन्त्यशक्त्या (सृष्टं) तद्ग्रहणनिमित्तात् विशन्त्या, तया वेदवत्या, अहं त्वन्मृतये त्वन्मरणार्थं पुनः सीतारूपेण अवतीर्णा स्यां इत्थं शप्तः ॥ २७ ॥

(सं.चं.) देवस्य मायां चित्प्रकृतिम् । परां सर्वजीवोत्तमाम् । केशेषु प्रगृह्य, अत एव तया योगबलेन सृष्टं ज्वलनं विशन्त्या शप्तः । सीतारूपेण पुनरागत्य त्वन्मृत्यवे स्यामिति । 'सैषा जनकराजस्य प्रसूता तनया प्रभो । तव भार्या महाबाहो विष्णुस्त्वं हि सनातनः' (१७.४०) इति, 'एषा वेदवती नाम पूर्वमासीत् कृते युगे । त्रेतायुगमनुप्राप्य वधार्थं तस्य रक्षसः । उत्पन्ना मैथिलकुले जनकस्य महात्मनः' (४४) इति च ॥ २७ ॥

मरुत्तदुष्षन्तमुखान्[2] महीशान् पराजितोऽस्मीति स वादयित्वा ।
हन्ता हरिस्ते मम वंश्य इत्थं शप्तोऽनरण्येन निसूदयंस्तम्[3] ॥ २८ ॥

(भा.दी.) मरुत्तेति । मरुत्तश्च दुःषन्तश्च तौ मुखे मुख्यौ येषां ते तथा तान्, महीशान् राज्ञः, पराजितः त्वया पराभूतः अस्मि, इति वादयित्वा वाचयित्वा, तं तथा अवादिनं अनरण्यं निसूदयन् संहरन् सन्, रावणः अनरण्येन अनरण्यनामकेन राज्ञा, मम वंशे भवो वंश्यः, वंशेऽवतीर्ण इत्यर्थः, श्रीरामनामा हरिः ते त्वां 'कर्मण्यपीति केचित्' इति षष्ठी । हन्ता हनिष्यति । हन्तेर्लुट् । इत्थं शप्तः ॥ २८ ॥

(सं.चं.) मरुत्तदुःषन्तमुखान् । कदाचिन्मरुत्तो राजा यज्ञदीक्षित आस । रावणस्तमासाद्य युद्धं प्रयच्छेत्याजुहुवे । मरुत्तः क्रुद्धो युद्धाय निर्ययौ । तदा तत्पुरोहितः संवर्त ऊचे– 'दीक्षितस्य कुतो युद्धं क्रोधित्वं दीक्षिते कुतः । संशयश्च जये नित्यं राक्षसश्च सुदुर्जयः' (१८.१७) इति । गुरोर्वाक्याद् युद्धान्निवृत्तो मखमुखो बभूव । 'ततस्तं निर्जितं मत्वा घोषयामास वै शुकः । रावणो जयतीत्युच्चैर्हर्षान्नादं विमुक्तवान्' (१८.२०) इति । तथाच मरुत्तः पराजितोऽस्मीति नोवाच । दुष्षन्तमुखाः पराजिताः स्मः इत्यूचुः । तत्कथं

---

१. **'कन्यां वराम्'** २. दुष्षन्त इत्येव प्रतनं रूपम् । दुष्यन्त इति पाश्चात्यम् । ३. **'निषूदयंस्तम्'** इति पाठः प्रमादिकः ।

मरुत्तदुष्षन्तमुखान् पराजितोऽस्मीति वादयित्वा? स यथा मेघे वर्षति पथि पथिकाः पतन्तश्छत्रच्छन्ना यान्ति। तेष्वेकः स्वयमलक्षयन् वृष्टिमच्छत्रोऽनावृतो याति। अथाप्याहुः– छत्रिणो यान्तीति। एवमिह बहुभिः पराजिताः स्म इति वादयामास। उतापि नोवाद मरुत्तः पराजितोऽस्मीति। अथाप्याचक्षते मरुत्त दुःषन्तमुखान् पराजितोऽस्मीति वादयित्वेति। तेनेदं विश्लिष्यावगन्तव्यम्। दुष्षन्ते तद्गुणसंविज्ञानोऽप्ययं समासो मरुत्ते त्वतद्गुणसंविज्ञान इति। कथं मरुत्तः? मरुतस्तेनुरेनमिति। कथं दुष्षन्तः? दुष्टमपि सम्यक् तनोतीति। दुष्टानां दुःख तनोति, सतां सं सुखं तनोतीति वा। कथमनरण्यः? अरमणीयमरण्यमाचक्षते। स न भवतीत्य-नरण्यः। 'दुःषन्तः सुरथो गाधिर्गयो राजा पुरूरवाः। एते सर्वेऽब्रुवंस्तात निर्जिताः स्मेति पार्थिवाः' (१९.५) इति च। अथानरण्यमयोध्याधिपतिं प्राप्य युद्धं देहीत्याह। अनरण्योऽपि महता सैन्येन सन्नद्धो योद्धुं प्रययौ। रावणमासाद्य नश्यति स्मानरण्यबलं हव्यं हुतमिवानले। अथाप्यनरण्यस्तरसा शत्रून् द्रावयन् युयुधे। अन्ते रावणेन तळेन मूर्ध्न्यभिहतो रथान्निपपात। ततो मन्दासू राजा रावणमब्रवीत्– 'उत्पत्स्यते कुले ह्यस्मिन्निक्ष्वाकूणां महात्मनाम्। रामो दाशरथिर्नाम यस्ते प्राणान् हरिष्यति' (१९.३०) इति, भविष्यन् रामाभिधो हरिस्ते तव हन्ता, भविष्यतीति शेषः ॥ २८ ॥

युध्वा स सप्ताहमपास्य कालं रसातळे नागकुलं विजित्य ।
निवातवर्म्माख्यनिबद्धसख्यो जळीचकाराऽथ जलेशपुत्रान् ॥ २९ ॥

(भा.दी.) **युध्वे**ति। सः रावणः सप्तानामह्नां समाहारः सप्ताहं तत्। 'राजाहःसखिभ्यष्टच्'(५.४.९१) इति टच्। युध्वा कालं यमम्, 'कालो मृत्यौ यमे' इति वैजयन्ती, अपास्य, 'मया दत्तवरोऽयं त्वया न हन्तव्यः' इति ब्रह्मवचसा यमेऽन्तर्हिते सति यमं परित्यज्य, रसातळं पाताळं तस्मिन्, नागानां कुलं समूहस्तत् विजित्य, निवातवर्माणि इति निवातकवचा इति आख्या येषां ते तथा, तैरसुरैः निबद्धं सख्यं येन स तथा सन्, ब्रह्मवरेणाजेयत्वात् तेषां जयाशां परित्यज्य तैः सह सख्यं सम्पाद्येत्यर्थः, अथ जलेशस्य वरुणस्य पुत्रान्, वरुणलोकं प्रति गत्वा, जळीचकार युद्धे जळीभूतान् चकार ॥ २९ ॥

(सं.चं.) अथ नारद आगत्य तमाह– 'दैवतैरप्यवध्यस्त्वं किं वृथा मानुषान् विहन्सि' इति। 'अवश्यमेभिः सर्वैश्च गन्तव्यं यमसादनम्। तन्निगृह्णीष्व पौलस्त्य यमं परपुरञ्जय' (२०.१६) इति च। अथ रावणः प्रतस्थे यमपुरं प्रति। नारदः पूर्वमागत्य यमायैतां वार्तां श्रावयामास। ततो रावण आगतः। यमरावणयोर्महद् युद्धं प्रावर्तत। तदेतदाह– स सप्ताहं युध्वा कालं यममपास्येति। सप्तानामह्नां समाहारः सप्ताहः। सप्ताह-मित्येके। 'एवं नानाप्रहणैर्यमेनामित्रकर्शिना। सप्तरात्रं कृतः सङ्ख्ये विसञ्ज्ञो विमुखो रिपुः' (२२.१६) इति

च । रावणं दण्डेन प्रहर्तुकामं यमं ब्रह्मा वारयामास– 'मया दत्तवरोऽयम् । तस्मान्नायं दण्डेन हन्तव्यः' इति । ततो यमोऽन्तर्दधौ । रावणस्तं भयात् पलायितं मेने । तदेतदाह– कालमपास्येति । अत्र रसातळमिति अधोभुवनसामान्यवचनम् । तत्ररसातळे पताळे नागकुलं विजित्य, रसातळाख्ये षष्ठेऽधोलोके निवातकवचैर्निबद्धसख्यः । तथाहि भागवते–'रसातळे दैतेया दानवाः पणयो नाम निवातकवचाः कालकेयाः' (५.२३.३०) इति, 'ततोऽधस्तात् पाताळे नागलोकपतयो वासुकिप्रमुखाः शङ्खगुळिकमहाशङ्खश्वेतधनञ्जय-धृतराष्ट्रशङ्खचूडकम्बळाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसन्ति' (५.२३.३१) इति च । नागकुलं विजिग्ये । विजित्य च नागकुलं निवातकवचाख्यान् राक्षसानभिययौ । 'कृत्वा नागान् वशे हृष्टो ययौ मणिमयीं पुरीम् । निवातकवचास्तत्र दैत्या लब्धवराऽवसन्' (२३.५–६) इति च । ततो घोरः समरः समवर्तत । साग्रः संवत्सरो गतः । पुनः पितामह आगत्य निवातकवचानाह– 'नायं जेतुं शक्यः । तेन सख्यं कुरुत' इति । 'ततोऽग्निसाक्षिकं सख्यं कृतवांस्तत्र रावणः । निवातकवचैः सार्धं प्रीतिमानभवत् तदा' (२३.१४) इति च । तदेतदाह– निवातवर्माख्यैर्निबद्धसख्य इति । तत्र संवत्सरमुवास प्रीत्या । तेषां सविधे माया-विद्यामधिजगाम । एवं दशाननः शतमायो बभूव । अथ वरुणालयं ययौ । तत्र वरुणपुत्रान् जित्वा निश्चेष्टान् पातयामास । तदेतदाह– जळीचकाराथ जलेशपुत्रानिति । तदा वरुणस्य मन्त्री प्रभासो नाम रावणमुपेत्य विज्ञापयामास–'गतः खलु महाराजो ब्रह्मलोकं जलेश्वरः । गान्धर्वं वरुणः श्रोतुं यं त्वमाह्वयसे युधि' (२३.५२) इति । रावणस्तदा ततो निववृते ॥ २९ ॥

अक्षोहिणीभिः सह राक्षसानां सकुम्भकर्ण्णः ससुतो दशास्यः ।
मधुं[1] पुरस्कृत्य महच्चकार महेन्द्रमुख्यैरमरैः सुयुद्धम्[2] ॥ ३० ॥

(भा.दी.) अक्षेति । सः दशास्यः रावणः, राक्षसानां अक्षोहिणीभिः सह, कुम्भकर्णेन सहितः सन्, सुतेन मेघनादेन सहितः सन्, मधुं मधुनामकं दैत्यं पुरस्कृत्य, महेन्द्रो मुख्यो येषां ते तथा तैः (अमरैः) सुरैः महत् सुयुद्धं[3] चकार ॥ ३० ॥

(सं.चं.) बहुभिरक्षोहिणीभिः । 'अक्षोहिणीसहस्राणि चत्वार्यग्र्याणि रक्षसाम्' (२५.३३) इति च । ससुतः समेघनादः । सोऽग्रतो जगाम । 'जगाम रावणो मध्ये कुम्भकर्णश्च पृष्ठतः' (२५.३५) । मधुं पुरस्कृत्येति ।

१. **'मधुकैटभौ प्रसिद्धौ । तत्र मधुम् । कार्यकारणयोरभेदोपचारात् मधुपुत्रो लवणासुरः मधुशब्देन गृह्यते । तं लवणासुरं पुरस्कृत्य पुरतः कृत्वा'** इति का.श्री. । व्याख्यानमसङ्गतं रामायणविरुद्धं चेत्युपेक्ष्यम् । अधिकं सं.चन्द्रिकायाम् ।

२. **'–रमरैः स युद्धम्'** १.

३. सन्दिग्धोऽत्र पाठः । **'सः दशास्यः'** इति प्रतीकग्रहणात् । **'स युद्धम्'** इत्यपि पाठः स्यात् ।

इयमत्र कथा– यदा रावणः पूर्वं दिग्विजयार्थं गतः, तदा मधुनामाऽसुरः लङ्कायां रावणस्यासन्निधानं विज्ञाय लङ्कामाजगाम। आगत्य च माल्यवतो दुहितुरनलाया दुहितरं कुम्भीनसीं नाम, धर्मतो रावणस्य स्वसारमन्तःपुरे सुप्तां बलादपजहार । दिग्विजयात् प्रत्यावृत्तो रावणः श्रुत्वैतां वार्तामवमानित इव क्रोधेन ज्वलन् कुम्भ-कर्णमुत्थाप्य सेनापरिवृतः सकुम्भकर्णमेघनादः स्वयं मधुपुरं प्रति प्रतस्थे । दिष्ट्या मधुर्न पुरत आस । कुम्भीनसी पुर आजगाम । दशाननः प्रथमं ददर्श भगिनीम् । सा च भीतभीता प्रह्वाञ्जली रावणं भ्रातरं प्रार्थयामास–'राजन् प्रसन्नो भव । न मे भर्तारं हन्तुमर्हसि' इति । 'भयानामपि सर्वेषां वैधव्यं व्यसनं महत्' (२५.४२) इति च । तदा दशानन आह– 'क्व चासौ तव भर्ता वै मम शीघ्रं निवेद्यताम् । सह तेन गमिष्यामि सुरलोकं जयावहे। तव कारुण्यसौहार्दान्निवृत्तोऽस्मि मधोर्वधात्' (२५.४५–६) इति। ततश्च मधुना सत्कृतः तेन सहैव सुरलोकविजयाय प्रास्थितेति । तदेतदाह– मधुं पुरस्कृत्यामरैः महद् सुयुद्धं चकारेति । जयफलकं युद्धं सुयुद्धम् । पूर्णाङ्गं सुसज्जितं च युद्धं सुयुद्धम् । यत्र कैकसीपिता सुमाली ममार । अत्र केचिद् व्याचक्षते– मधुशब्देन मधुपुत्रो लवणासुरो गृह्यत इति रामायणविरुद्धं वदन्तो भ्रान्ता इत्युपेक्ष्यास्ते ॥ ३० ॥

महेश्वरस्याथ मखैर्म्महात्मा स मेघनादो युधि मेघवाहम् ।
बबन्ध नाम्नेन्द्रजिदास तस्माद् ब्रह्माज्ञयाऽमुञ्चदमुं च कृच्छ्रात् ॥ ३१ ॥

(भा.दी.) महेति । अथ महान् आत्मा धैर्यं यस्य स तथा । 'आत्मा जीवे धृतौ देहे' इति वैजयन्ती । सः मेघनादः महेश्वरस्य शिवस्य मखाः यज्ञास्तैः निमित्तभूतैः मेघवाहं इन्द्रम् । 'तुराषाट् मेघवाहनः' इत्यमरः । युध् युद्धं तस्यां बबन्ध । बन्ध बन्धने लिट् । तस्मात् युद्धे इन्द्रबन्धनाद्धेतोः नाम्ना इन्द्रजित् इन्द्रजिन्नामकः आस बभूव । अस गतिदीप्तादौ लिट्[१] । ब्रह्माज्ञया अमुं इन्द्रं कृच्छ्रं बन्धनरूपमापत् तस्मादमुञ्चच्च। मुच्लृधातोर्लङ्। अस्मद्वरनिमित्तं हि भवतामिदं सामर्थ्यमत अयमिन्द्रो मोक्तव्य इत्यादिरूपया आज्ञया स्वर्गलोकाद् बध्वा लङ्कां प्रत्यानीतमिन्द्रं मुमोचेत्यर्थः ॥ ३१ ॥

(सं.चं.) तस्मिन् युधि मेघनादो मेघवाहमिन्द्रं बबन्ध । तदपि महेश्वरं मखैः प्रीणयित्वा तेन सञ्जातया महात्मतया । महानात्मा धृतिर्बलं वा यस्य स महात्मा । 'आत्मा कळेबरे यत्ने स्वभावे परमात्मनि । चित्ते धृतौ च बुद्धौ च परव्यावर्तनेऽपि च' इति धरणिः । महानात्मा परमात्मा यस्मिंस्तदा सन्निहितः । इन्द्रजयाय शक्त्याधानार्थमिति च । तस्मादिन्द्रबन्धनादेव कारणात् इन्द्रजिदिति नाम्ना ख्यात आस । 'माहेश्वरे प्रवृत्ते

१. बभूवेत्यर्थे आसेत्यव्ययमिति बहवः ।

तु यज्ञे पुम्भिः सुदुर्लभे । वरांस्ते लब्धवान् पुत्रः साक्षात् पशुपतेरिह' (२५.९) इति च । 'अयं च पुत्रोऽतिबलस्तव रावण वीर्यवान् । जगतीन्द्रजिदित्येव परिख्यातो भविष्यति । बलवान् दुर्जयश्चैव भविष्यत्येव राक्षसः । यं समाश्रित्य ते राजन् स्थापितास्त्रिदशा वशे । तन्मुच्यतां महाबाहो महेन्द्रः पाकशासनः' (३०.५–७) इति ब्रह्माज्ञयाऽमुं महेन्द्रं बन्धनरूपात् कृच्छ्रात् सङ्कटादमुञ्चच्च । 'अमुञ्चदमुं च' इति मधुरोऽनुप्रासः ॥ ३१ ॥

विंशद्भुजः सोऽथ सहस्रहस्तं प्रत्युज्जगर्जार्जुनमभ्युपेत्य ।
विष्णोर्वरादप्रभविष्णुरेष[1] बबन्ध तं ब्रह्मवरादजेयम् ॥ ३२ ॥

(भा.दी.) विंशदिति । अथ दिग्विजयानन्तरम्, विंशत् भुजा यस्य स तथा सः रावणः, सहस्रं हस्ता यस्य स तथा, तं अर्जुनं कार्तवीर्यार्जुनाख्यभूपं अभ्युपेत्य प्रत्युज्जगर्ज युद्धार्थितया सिंहनादं चक्रे । विष्णोर्दत्तात्रेयरूपिणः वरोऽनुग्रहस्तस्मात् प्रभवितुं पराभवितुं शीलमस्यास्तीति प्रभविष्णु, न प्रभविष्णुरप्रभविष्णुः, पराभवं प्रापयितुमशक्य इत्यर्थः, एषः अर्जुनः ब्रह्मणो यो वरस्तस्मात् अजेयं तं रावणं बबन्ध । बन्ध बन्धने लिट् । स्वप्रतिभटं कार्तवीर्यार्जुनं नारदाच्छ्रुत्वा तेन योद्धुं माहिष्मतीं प्रति गतस्तेन युद्धे पराजित्य निबद्ध्य षण्मासपर्यन्तं नर्तनागारे स्थापित इति पौराणिकी प्रसिद्धिः ॥ ३२ ॥

(सं.चं.) विंशद्भुजः विंशतिभुजः । प्रतना विपश्चितः विंशतिरितिवत् विंशदित्यपि प्रयुञ्जते ।अधिकं त्वस्मत्कृतायां निर्णयभावचन्द्रिकायां प्रत्नप्रयोगमीमांसायां च द्रष्टव्यम् । 'सहस्रबाहोस्तद्युद्धं विंशद्बाहोश्च दारुणम्' (३२.६०) इति च । सहस्रहस्तं सहस्रबाहुं कार्तवीर्यार्जुनमभ्युपेत्य प्रतिस्पर्धया उज्जगर्ज सिंहनादं ननाद । एषोऽर्जुनः ब्रह्मवरादजेयं तं रावणं स्वयं बद्धुमप्रभविष्णुः अप्रभुः केवलं विष्णोर्वरबलात् बबन्ध । यद्यपि भविष्णुरिति पाणिनीया लोके न मन्यन्ते । तथाहि जयादित्यः 'भुवश्च' (अ.सू.३.२.१३८) इति सूत्रव्याख्याने–'भवतेर्धातोः छन्दसि विषये तच्छीलादिष्विष्णुच् प्रत्ययो भवति । भविष्णुः' इति । क्षीरस्वामी त्वन्यथाऽऽह–'भुवश्च इतीष्णुच् । छान्दसत्वं नेष्टम् । भविष्णुः' इति । अत एव 'प्रभुता प्रभविष्णुता' इत्याह यादवप्रकाशः । उभयथाऽपि न नो दोषः । यतश्छान्दसप्रयोगप्रियो नः प्रबन्धा । 'स तं बाहुसहस्रेण बलाद् गृह्य दशाननम् । बबन्ध बलवान् राजा बलिं नारायणो यथा' (३२.६४) इति च ॥ ३२ ॥

---

१. **'विष्णोर्वरेणाप्रभविष्णुरेष–' । अत्र सर्वेऽपि व्याख्यातारो व्यभ्राम्यन् 'अप्रभविष्णुः, प्रभवं पराभवं प्रापयितुमशक्यः'** इति वि.भू. । **'प्रभवं पराजयं प्रापयितुमशक्यः'** इति का.श्री. । वि.ती.टीकायामपि तथा । न क्वापि प्रभवः पराभवः । नापि पराभवः प्रभवः । अशब्दार्थत्वात् । नहि पण्डिताचार्यः क्वापीदृशान् स्वप्रज्ञाकल्पितार्तानपशब्दान् प्रयुक्षीष्ट । **'विष्णोर्वरेणाप्रभविष्णुनैष–'** इति तु सर्वथाऽसङ्गतः पाठः ।

पुलस्त्यवाचा पुनरर्ज्जुनेन मुक्तः स लीलामृगवद् दशास्यः ।
तथाऽप्यनिर्विण्णमतिर्बबाधे लोकान् यथा क्षुद्रमृगान् मृगारिः ॥ ३३ ॥

(भा.दी.) पुलस्त्येति । अर्जुनेन, पुलस्त्यवाचा अयमस्मच्छरीरसम्बन्ध्यतो मोक्तव्य इति वाक्येन, लीलार्थं विद्यमानो यो मृगस्तद्वत् पुनः सः दशास्यः अर्जुनेन मुक्तः, तथाऽपि एतादृशीमवस्थां प्राप्तोऽपि, अनिर्विण्णा निर्वेदरहिता मतिर्यस्य स तथा रावणः, मृगारिः सिंहः क्षुद्रमृगान् शशान् यथा तथा लोकान् जनान् बबाधे । बाधृ विलोडने लिट् । रावणे कृतवीर्यात्मजेन बद्धे सति तन्मोक्षार्थिभिः प्रहस्तादिभिः पुलस्त्यनिकटं गत्वा तन्निवेद्य त्वयैवायं मोचनीयो नान्य उपायोऽस्तीति प्रार्थितेन तेनार्जुननिकटं गत्वा मृदुवचसा मोचित इति रामायणे प्रसिद्धम् ॥ ३३ ॥

(सं.चं.) तद् रावणबन्धनं देवैः पुलस्त्याय कथितम् । पुलस्त्यः पौत्रस्नेहात् तं मोचयितुं माहिष्मतीमा-गत्यार्जुनमुवाच– 'सोऽयं मृधे त्वया बद्धः पौत्रो मे रणदुर्जयः । मद्वाक्याद् याच्यमनोऽद्य मुञ्च वत्सं दशाननम्' (३३.१५–६) इति । मुक्तश्च पुलस्त्यवाचाऽर्जुनेन दशास्यः । यथा कश्चिद् बद्धं क्रीडामृगं लीलयैव मुञ्चति । तथाऽपि एवमनुभूतपराभवोऽपि अनिर्विण्णमतिः अनुपरतयुद्धश्रद्धः पुनरपि लोकान् बबाधे क्षुद्रमृगान् मृगारिः सिंह इव । क्षुद्रा इत्यल्पा दुर्बलाश्च । बाधनं प्रतिघातः ॥ ३३ ॥

सान्ध्यं चतुःसिन्धुषु कर्म्म कुर्वन् निक्षिप्य कक्षे विजिगीषुमेनम् ।
वाली हरेर्भावबलात्[1] पपात विहङ्गभर्त्तेव भुजङ्गमाशु[2] ॥ ३४ ॥

(भा.दी.) सान्ध्यमिति । चत्वारो ये सिन्धवः समुद्राः, तेषु सन्ध्यायाः सम्बन्धि सान्ध्यं अर्घ्यादिकर्म कुर्वन् वाली, विजेतुमिच्छति विजिगीषति, विजिगीषतीति विजिगीषुस्तम्, स्वात्मानं जेतुकाममित्यर्थः, एनं रावणम्, विहङ्गानां पक्षिणां भर्ता गरुडः, भुजङ्गमानां सर्पाणामिन्द्रमिव श्रेष्ठमिव, हरेः भावो भवनं आवेश इत्यर्थः, तस्य बलं तस्मात् । 'वालिसाम्बादयश्चैव किञ्चिदावेशिनो हरेः' इत्याद्युक्तेः । अनुग्रहातिशयबलादिति वा । कक्षो बाहुमूलं तस्मिन् । 'बाहुमूले उभे कक्षौ' इत्यमरः । निक्षिप्य, पपात समुद्रस्य तीराणि प्रति उत्पपात । प्रतिदिनमपि सन्ध्योपास्तिं चतुस्समुद्रेषु कुर्यामिति नियमवान् वाली कदाचित् दक्षिणसमुद्रतीरे सन्ध्योपास्ति-

---

१. **'हरेर्भावबलात् हर्यावेशबलात् हर्यनुग्रहातिशयबलाद् वाली रावणं जिगाय। तेन (पुरुहूतसुतः) कपित्वात्' (म.भा.ता.नि.८.२३४) इत्यत्र हरेर्भावबलादित्यपि पूरणीयम्। तथाच न सुग्रीवादौ व्यभिचार इत्युक्तं भवति'** इति का.श्री. । मूलहृदयमज्ञात्वैव व्याचख्यौ ।

२. **'भुजङ्गमेन्द्रम्'** इति वि.ती.पाठः । **'भुजङ्गमेशम्'** इति च क्वचित् ।

समये युद्धार्थिना समागतं रावणं कक्षे निक्षिप्य अन्यसमुद्रतीराणि गत्वा सन्ध्यामुपास्य किष्किन्धां प्रत्यागत्य तत्र चैनं मुमोच । अनन्तरं च विस्मितो दशास्यस्तेन सख्यं सम्पाद्य लङ्कां प्रत्यागत इति पौराणिकी प्रसिद्धिः ॥ ३४ ॥

(सं.चं.) प्रत्यहं चतुःसमुद्रेषु सान्ध्यं कर्म कुर्वन् वाली कदाचिद् दक्षिणसमुद्रतीरे सान्ध्यं वन्दनं कुर्वन्नास । रावणः शनैः पृष्ठत आगत्य तं निग्रहीतुं प्रयेते । एवमविधिना विजिगीषुमेनं वाली सहसा कक्षे निक्षिप्य समुद्रात् समुद्रं पतन् विहायसा जगाम । ततोऽवसितचतुःसिन्धुसन्ध्याकर्मा किष्किन्धामेत्य बन्धान्मुमोच । रावणस्तु– 'अहो बलमहो वीर्यमहो गाम्भीर्यमेव च । येनाहं पशुवद् गृह्य भ्रामितश्चतुरोऽर्णवान्' (३४.३७) इति विस्मयमानस्तेन सख्यसन्धानं विधाय तत्र मासमुषित्वा लङ्कां जगामेति । हरेर्भावबलात् हरेः कपेर्भावः कपित्वम् । तद्बलात् । तदुक्तं तात्पर्यनिर्णये–'पुरुहूतसुतः कपित्वात्' (८.२३४) इति । नहि कपिभिरवध्यत्वं रावणो वव्रे वरम् । न केवलं कपित्वात् । किन्तु हरेर्भावबलात् हरेर्भगवतो विशेषसन्निधान-बलाच्च । नहि कपित्वमात्रेण केनचिदितरेण कपिना स शक्यो निग्रहीतुम् । यथा विहङ्गभर्ता गरुडो भुजङ्गं स्वपादनखैर्गृहीत्वा पतति ॥ ३४ ॥

बलिं जिगीषुं किल रावणं तं चिक्षेप दूरेऽयुतयोजनान्ते ।
पदाङ्गुलीमात्रत[1] एव देवो दौवारिकस्तस्य हरिर्दयालुः ॥ ३५ ॥

(भा.दी.) बलिमिति । तस्य बलेः द्वारि नियुक्तो दौवारिकः, द्वारपालत्वेन स्थित इत्यर्थः, द्वारपालत्वे हेतुः दयालुरिति, दयालुः दयाशीलः देवो हरिः, बलिं बलिचक्रवर्तिनम्, जेतुमिच्छति जिगीषति, जिगीषतीति जिगीषुस्तम्, (तं) रावणं अयुतानि यानि योजनानि तेषामन्तोऽवसानं तस्मिन् दूरं दूरप्रदेशस्तस्मिन् पदस्य पादस्य केवलं अङ्गुली अङ्गुलीमात्रं तस्मादिति तत एव चिक्षेप । क्षिपु निरसने लिट् ॥ ३५ ॥

(सं.चं.) अथ बलिं विजिगीषू रावणः सुतळं जगाम । बलेर्भवने दयाळुर्वामनात्मा हरिर्दौवारिको बभूव । भवनान्तर्विविक्षन्तं रावणं वीक्ष्य भगवांस्तं पदाङ्गुल्यैवोत्क्षिप्य दशसहस्रयोजनान्ते चिक्षेप । सम्प्रति रामा-यणे त्रयोविंशादध्यायात् परमेकोऽध्यायः पठ्यते, यत्र बलिकथा, यं च वृथा प्रक्षिप्तमाहुर्व्याख्यातारः । बलि-कथाऽपि तत्र नातीव स्फुटा । तदर्थमाचार्यः स्फुटमाह निर्णये–'बलेर्द्वारस्थोऽहं वरमस्मै सम्प्रदाय पूर्वं तु । तेन मया रक्षोऽस्तं योजनमयुतं पदाङ्गुल्या' (८.२३६) इति ॥ ३५ ॥

---

१. 'पादाङ्गुलीमात्रत–'

स वासुदेवः कपिलाभिधानो [१]मुष्टिप्रहारान्निरपातयत् तम् ।
युयुत्सुमम्भोधितटे दशास्यं त्रिकोटिरूपोऽस्य सुतश्च वायुः ॥ ३६ ॥

(भा.दी.) स इति । कपिल इति अभिधानं नाम यस्य स तथोक्तः, कपिलावताररूप इत्यर्थः, सः वासुदेवः श्रीहरिः, अम्बोधेस्तटं तीरं तस्मिन्, योद्धुमिच्छति युयुत्सति, युयुत्सतीति युयुत्सुस्तम्, दशास्यं तं रावणं मुष्टिना यः प्रहारस्तस्मात् निरपातयत् न्यपातयत् । पतल् पतने लङ् । अस्य वासुदेवस्य सुतः, तिस्रः कोटयस्त्रिकोटयः, त्रिकोटिसङ्ख्याकानि रूपाणि यस्य स तथोक्तः वायुश्च युयुत्सुं एनं निरपातयदिति सम्बन्धः ॥ ३६ ॥

(सं.चं.) अथ कपिलवासुदेवस्तं पश्चिमोदधितटे द्वीपान्तरे मुष्टिना प्रहृत्य निरपातयत् । 'पश्चिमार्णवमागच्छत् सचिवैः सह राक्षसैः । द्वीपस्थो ददृशे तेन पुरुषः पावकप्रभः' इति, 'भगवान् कपिलो नाम द्वीपस्थो नर उच्यते' इति, 'तेन मुष्टिप्रहारेण स्वल्पमात्रेण लीलया । पाणिना ताडितं रक्षो निपपात महीतळे' इति च रामायणे । व्याख्यातार एतमप्यध्यायं प्रक्षिप्तं मन्यन्ते । अवैष्णवानां चापलमेतदिति नाऽदृत्यम् । आचार्यमध्वपरिगृहीतत्वाच्चैतदवसीयते । त्रिकोटिरूपोऽस्य सुतश्च वायुः तं निरपातयत् । 'दृश्यन्ते तत्र नृत्यन्त्यस्तिस्रः कोट्यो महात्मनाम् । नित्योत्सवाः शान्तभया विमलाः पावकप्रभाः' इति, 'ये तु नृत्यन्ति वै तत्र सुतास्ते तस्य धीमतः । तुल्यतेजःप्रभावास्ते कपिलस्य नरस्य वै' इति च । अस्फुटमेतद् वाल्मीकिवचनं भगवत्पादः स्फुटं व्यवृणीत– 'पुनश्च युद्धाय समाह्वयन्तं न्यपातयं रावणमेकमुष्टिना । महाबलोऽहं कपिलाख्यरूपस्त्रिकोटिरूपः पवनश्च मे सुतः' (८.२३७) इति ॥ ३६ ॥

न रावणं हन्तुमलं जगत्यां विष्णुं विना कश्चन निश्चयोऽयम् ।
विना सहस्रांशुमलङ्घनीयं महान्धकारं धुनुयात् क एव ॥ ३७ ॥

(भा.दी.) नेति । जगत्यां पृथिव्यां विष्णुं विना रावणं हन्तुं कश्चन कोऽपि अलं समर्थः न, अयं अभिहितोऽर्थः, निश्चयः असन्दिग्धः । सहस्रं अंशवो यस्य स तथोक्तस्तं सूर्यं विना अलङ्घनीयं अनतिक्रमणीयं महान् योऽन्धकारस्तं क एव पुरुषः धुनुयात् विनाशयेत् । धूञ् कम्पने लिङ् ॥ ३७ ॥

(सं.चं.) न रावणं हन्तुमलं जगत्यां विष्णुं विना कश्चन । ब्रह्मवरगुप्तत्वात् । येऽपि तं विजिग्यिरे वालि-प्रमुखास्तेऽपि विष्णुबलाभिगुप्ताः । इत्ययं शास्त्रनिश्चयः ॥ ३७ ॥

---

१. **'मुष्टिप्रहारात् मुष्टिप्रहारं दत्वा'** इति वि.भू. । ल्यब्लोपनिमित्ता पञ्चमीत्यर्थः । ल्यबिति क्त्वाऽपि ।

ववौ न वातोऽतितरां पुरोऽस्य बभौ न भानुः कटुकं कदाचित् ।
न वह्निरह्नाय ददाह हन्त [१]तद्भ्रूविजृम्भान्नियतं समस्तम् ॥ ३८ ॥

(भा.दी.) एतदेवोपपादयति–**ववाविति** । अस्य रावणस्य पुरः पुरस्तात् वातः अतितरामत्यन्तं न ववौ । वातेर्लिट् । भानुः कदाचित् अस्य पुरः कटुकं तीक्ष्णं यथा भवति तथा न बभौ । वह्निः अह्नाय शीघ्रम्, अव्ययमेतत्, अस्य पुरः न ददाह । हन्त खेदे । समस्तं इतोऽतिरिक्तं सकलं जगत्, यस्य रावणस्य भ्रुवो विजृम्भो विभ्रमस्तस्मात् नियतं नियमितं आसीत् ॥ ३८ ॥

(सं.चं.) वातो भूतवायुर्मरीचिः, प्रवहो वा । 'अह्नाय सत्वरं च क्षिप्रं द्रुतमञ्जसा झटिति' इत्यभिधानम् । भ्रूविजृम्भात् । हेतौ पञ्चमी ॥ ३८ ॥

स यक्षरक्षोमनुजाहिदैत्यगन्धर्वनारीः सह दानवीभिः ।
विभीषणेनैष[२] निवारितोऽपि जहार हा सत्कुलजाङ्गनाश्च[३] ॥ ३९ ॥

(भा.दी.) स इति । स एषः रावणः, दानवीभिः दानवस्त्रीभिः सह, यक्षाश्च रक्षांसि च मनुजाश्च, अहयः सर्पास्ते च, दैत्याश्च गन्धर्वाश्च तेषां नार्य इति सप्त च तानि कुलानि च सप्तकुलानि, तेषामङ्गनाश्च विभीषणेन निवारितोऽपि, नायं धर्म इति वचसा वारितोऽपि, जहार । हा अद्भुते ॥ ३९ ॥

(सं.चं.) विभीषणेनैष निवारितोऽपि– 'तदेतत् कर्मणो ह्यस्य फलं पापस्य दुर्मते । अस्मिन्नेवाभिसम्प्राप्तं लोके विदितमस्तु ते' (२५.२८), 'ईदृशैस्त्वं समाचारैर्यशोर्थकुलनाशनैः । धर्षणं ज्ञातिनां ज्ञात्वा स्वमतेन विचेष्टसे' (२५.१८) इत्यादिहितवचनैर्निवारितोऽपि । 'एवं पन्नगकन्याश्च राक्षसासुरमानुषीः । यक्षदानवकन्याश्च विमाने सोऽध्यरोपयत्' (२४.३) इति च ॥ ३९ ॥

घनस्तनीनां तनुमध्यमानां शुकालपानां शुभलोचनानाम् ।
चन्द्राननानां नयनाननेभ्यः श्वासाश्रुभिर्वह्निसमैर्बभूवे ॥ ४० ॥

(भा.दी.) घनेति । घनौ दृढौ यौ स्तनौ तावासां स्त इति घनस्तन्यस्तासाम्, तनु सूक्ष्मं मध्यमं मध्यं यासां तथा तासाम्, शुकवदालपन्तीति शुकालपास्तासाम्, शुभलोचनानां सुन्दरलोचनानाम्, चन्द्रवत्

१. **'यद्भ्रूविजृम्भा–'** इति वि.ती.पाठः स्यात् । २. **'विभीषणेनैव निवा–'** ३. **'सप्तकुलाङ्गनाश्च'** इति वि.ती.पाठः ।

सुन्दराननानाम्, दानव्यादिसप्तकुलाङ्गनानां नयनानि च आननानि च तेभ्यः, निर्गतैरिति शेषः, वह्नेः समानि सदृशानि तैः, अत्युष्णैरित्यर्थः, श्वासाश्च अश्रूणि च तैः बभूवे, अभावि, भूतमित्यर्थः । भूधातोर्भावे लिट् ॥ ४० ॥

(सं.चं.) घनौ सान्द्रौ स्तनौ यासां ता घनस्तन्यः । 'स्वाङ्गाच्च–' (६.३.४०) इति वा ङीष् । 'घनं सान्द्रं घनं वाद्यं घनो मुस्तो घनोऽम्बुदः । घनः काठिन्यसङ्घातो विस्तारो लोहमुद्गरौ' इति धरणिः । नयनैरश्रूणि । आननेभ्यः श्वासाः । वह्निसमा अन्तस्तापकराः ॥ ४० ॥

हा तात हा वल्लभ हा विधातर्देहान्तरं देह्यचिरान्न इत्थम्[१] ।
सङ्क्रन्दितं तत्पुरि सुन्दरीणां नराशनानां च कृपां चकार[२] ॥ ४१ ॥

(भा.दी.) **हे**ति । हा तात पितः, हा वल्लभ भर्तः, हा विधातः हा विधे, अस्माकं अन्यो देहो देहान्तरं तत्, न चिरमचिरं तस्मात्[३] देहि । इत्थं सुन्दरीणामपहृतस्त्रीणाम्, तस्य रावणस्य पूः पुरं तस्याम्, सङ्क्रन्दितं आक्रन्दः, नरा मनुष्या अशनं येषां ते तथा तेषां च, राक्षसानां चेत्यर्थः, कृपां चकार । अन्येषां दयां चकारेति किं वक्तव्यमित्यर्थः ॥ ४१ ॥

(सं.चं.) विधातारं विशिष्य प्रार्थयन्ते– देहान्तरं देहीति । रावणस्पृष्टमिमं देहं विनाश्य देहान्तरं देहि । मरणं देहीति यावत् । तदप्यचिरात् । मा विलम्बिष्ठाः । एवं रावणापहृतानां सुन्दरीणां सङ्क्रन्दितमाक्रन्दनं नराशनानां रक्षसामपि कृपां जनयामास । नराशनानां सुन्दरीणामपीत्यपेशलं व्याख्यानम् ॥ ४१ ॥

सङ्क्रन्दतोर्हन्ति शिशूंश्च[४] पित्रोराश्लिष्टवत्यां तरुणं तरुण्याम् ।
गामाग्निहोत्रीं यवसोपहूतां कोऽन्यो नृशंसो दशवक्त्रतुल्यः ॥ ४२ ॥

(भा.दी.) **सम्**इति । माता च पिता च पितरौ तयोः, सङ्क्रन्दतोः सतोः, आक्रोशनं कुर्वतोः सतोः, शिशून् पुत्रांश्च हन्ति । तरुण्यां भार्यायां तरुणं भर्तारं आश्लिष्टवत्यां आलिङ्गितवत्यां सत्यां तरुणं भर्तारं हन्ति । आग्निहोत्रीं अग्निहोत्रार्थं विद्यमानां गाम्, यवसं तृणं तस्मै तृणप्रदानार्थमित्यर्थः, उपहूतां आहूतां हन्ति । यस्मात् तस्मात् दशवक्त्रतुल्यः रावणसदृशः अन्यः नृशंसः क्रूरः कः पुरुषः? न कोऽपीत्यर्थः ॥ ४२ ॥

१. **'–देह्यचिरात् त्वमित्थम्'**

२. **'नराशनानां राक्षसानां सुन्दरीणां स्त्रीणामपि कृपां दयां चकार उत्पादयामास'** इति का.श्री. । अस्वरसमेतद् विवरणं न मनो लगति ।

३. **'अचिरात्'** इत्यव्ययमिति युक्तं वक्तुम् ।

४. **'शिशून् स्वपित्रो–'** । **'शिशुं स्वपित्रो–'** इति च ।

(सं.चं.) पित्रोः सङ्क्रन्दतोः सतोः पुरत एव तावनादृत्य शिशून् हन्ति । 'षष्ठी चानादरे' (अ.सू.२.३.३८) इति पाणिनिः । चकारात् सप्तमी च । पित्रोरिति का विभक्तिः? षष्ठी वा स्यात् । सप्तमी वा स्यात् । न स्यात् । सप्तम्येव । तरुण्यामिति संवादात् । अग्निहोत्रसम्बन्धिनीमाग्निहोत्रीं गाम् । 'घासस्तु यवसः प्रोक्तः' इत्यभिधानम् । ग्रासमुष्टिं प्रदर्श्य गां समीपमाहूय हन्ति । 'शरारुर्घातुको हिंस्रो नृशंसः क्रूरकर्मकृत्' इत्यभिधानम् । इन्द्रवज्रा च्छन्दः ॥ ४२ ॥

एवं त्रिलोकीसरसीं विगाह्य सत्पद्मिनीं क्षोभयते खलाय ।
मत्ताय मांसाशिमतङ्गजाय चुकोप चण्डः किल रामसिंहः ॥ ४३ ॥

(भा.दी.) एवमिति । एवमुक्तप्रकारेण, सन्त एव पद्मानि तानि अस्यां सन्तीति सत्पद्मिनी ताम्, त्रिलोक्येव सरसी सरः, तां विगाह्य निमज्य, अतिक्रम्येत्यर्थः, क्षोभयते आलोडितां कुर्वते, खलाय दुष्टाय, मत्ताय कुलादिमदेनोन्मत्ताय, मांसमशितुं शीलमस्यास्तीति मांसाशी राक्षसः, स एव मतङ्गजो गजस्तस्मै, रावणाख्यगजायेत्यर्थः, चण्डः दुष्टानामतिक्रूरः, श्रीराम एव सिंहः चुकोप किल । कुप क्रोधे लिट् । यथा समीचीनसरो विगाह्य लोडयन्तमुन्मत्तं गजं दृष्ट्वा सिंहः कुप्यति तद्वज्जगति विद्यमानसज्जनसमुदायस्य रावणतदनुबन्धिभ्यः पीडां श्रुत्वा श्रीरामश्चुकोपेति भावः ॥ ४३ ॥

(सं.चं.) सन्त एव पद्मानि । तद्वतीं त्रिलोकीसरसीम् । विगाह्य विलोड्य क्षोभयते मलिनयते मांसाशिने रावणाख्याय मतङ्गजाय मतङ्गजा न मांसाशिनः । अयं पुनरहो मांसाशी मतङ्गजो बभूव । तस्मै चुकोप । 'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः' (अ.सू.१.४.३७) इति चतुर्थी । दुष्टेषु चण्डस्तीक्ष्णः रामसिंहः । सिंहस्तु स्वभावतश्चण्डः ॥ ४३ ॥

स चित्रकूटे वसतो मुनीन्द्रानातङ्किनो रावणकिङ्करेभ्यः ।
सम्भ्रान्तचित्तान् द्रवतो विलोक्य दयां[१] दयालुर्विपुलां चकार ॥ ४४ ॥

(भा.दी.) स इति । दयालुः दयाशीलः सः श्रीरामः, चित्रकूटश्चित्रकूटगिरिस्तस्मिन् वसन्तस्तान्, रावणस्य ये किङ्कराः खरप्रभृतयस्तेभ्यः आतङ्क एषामस्तीत्यातङ्किनः, भीतियुक्तानित्यर्थः, अत एव सम्भ्रान्तं कर्तव्यमूढतयाऽनवस्थितं चित्तं येषां ते तथा तान्, अत एव यत्रकुत्रचिद् द्रवतः मुनीन्द्रान् विलोक्य विपुलां भूयसीं दयां चकार ॥ ४४ ॥

---

१. **'दयां तद्दुःखनिवृत्तीच्छाम्'** इति का.श्री. ।

(सं.चं.) रावणः कथं रामस्य शत्रुः? आह– स चित्रकूटे । अपायशङ्का आतङ्कः, भयं वा । 'आतङ्को भयमाशङ्का' इत्यभिधानम् । रावणकिङ्करेभ्यः खरदूषणत्रिशिरःप्रमुखेभ्यः चतुर्दशभ्यश्चतुर्दशसहस्रेभ्यश्च । सम्भ्रान्तचित्तान् किङ्कर्तव्यमिति निश्चेतुमप्रभवतश्चलितचित्तान् । तं देशं विहायान्यत्र द्रवतो जिगमिषून् । इयमत्र पूर्वकथा– रावणजैत्रयात्रायां शूर्पणखाभर्ता विद्युज्जिह्वोऽपि सहचर आसीत् । कस्मिंश्चित् कदनेऽकस्माद् रावणस्तमावृत्तं परपक्षीय इति भ्रान्त्या निजघान । युद्धान्निवृत्तं तमेत्य शूर्पणखा जगर्हे–'ननु नाम त्वया रक्ष्यो जामाता समरेष्वपि । स त्वया निहतो युद्धे स्वयमेव न लज्जसे' (२४.३०) इति । स तु तां सान्त्वयन्नाह– 'नावगच्छामि युद्धेषु स्वान् परान् वाऽप्यहं शुभे' (२४.३३) । 'तस्माद् युद्धोन्मादजनितः प्रमादोऽयम् । तदिदानीं दानमानैस्त्वां प्रसादयामि । इतः परं दण्डकारण्यं तव राज्यम् । तत्र वस खरदूषणाभ्यां मातृष्वसेयाभ्यां यथेच्छं विहरन्ती । त्रिशिराश्च तयोः सहचरो भवति । चतुर्दश सेनाप्रमुखा राक्षसाः । चतुर्दश सहस्राणि च सैनिकाः । त्वमेव तत्र सम्राज्ञी' इति । तेन दक्षिणभारते स्वराज्यशाखां स्थापयामास रावणः । स्थापयित्वा च ऋषीन् बबाधे । तेन चुकोप राम इति ॥ ४४ ॥

दशमुखवधनाट्यपूर्वरङ्गं खरमुखमूर्खकुलप्रमापणाख्यम् ।
भुवनरसकरं विधातुमायाद् द्रुतमथ दण्डकमण्डलं स रामः ॥ ४५ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
अरण्यकाण्डे प्रथमः सर्ग्गः ॥

—०—

(भा.दी.) दशेति । अथ सः श्रीरामः, भुवने जगति यो रसः सारभूतं सुखं तं करोतीति तथा तम्, खरः खराख्यराक्षसः मुखं प्रधानो येषां ते तथोक्ताः, ते च ते मूर्खाश्च तेषां दूषणादीनां कुलं समूहः, तस्य प्रमापणं विनाशः, तदिति आख्या नाम यस्य स तथा तम्, दशमुखस्य रावणस्य यो वधः सः नाट्यमिव, तस्य यः पूर्वरङ्गः, आदौ क्रियमाणनर्तनं तम्, 'आदावेव च यन्नाट्यं पूर्वरङ्गः स उच्यते' इति हलायुधः । विधातुं द्रुतं शीघ्रं यथा भवति तथा, दण्डकस्य दण्डकारण्यस्य मण्डलं प्रदेशस्तत्, आयात् आगच्छत् । यथा करिष्यमाणातिविचित्रनर्तनाभिरुचिव्युत्पादनार्थं पूर्वरङ्गः क्रियते तद्वद् रावणादिवधे कारणभूतं खरादिसंहारं कर्तुं दण्डकारण्यं प्रति जगामेति भावः ॥ ४५ ॥

इति श्रीविश्वपतितीर्थकृतायां श्रीसङ्ग्रहरामायणव्याख्यायां
भावार्थदीपिकायामरण्यकाण्डे प्रथमः सर्गः ॥

(सं.चं.) पुष्पिताग्रया सर्गमुपसंहरति– दशमुखवधनाट्यपूर्वरङ्गम्। पूर्वरङ्गः प्रस्तावना। प्रधाननाट्यप्रारम्भात् पूर्वं यन्माङ्गलिकतायै नान्दीनाट्यं क्रियते सोऽपि पूर्वरङ्गः । 'आदावेव तु यन्नाट्यं पूर्वरङ्गः स उच्यते' इत्यभिधानम्। पूर्वरङ्गः प्रधाननाट्यावलोकनाय रसं रुचिं जनयतीति रसकरः। अयं च दशमुखवधाख्यनाट्यस्य खरादिवधाख्यः पूर्वरङ्गः त्रिभुवनस्य रसकरः सुखकरः । 'घातनं प्रशमनं प्रमापणम्' इत्यभिधानम् । दण्डकमण्डलं दण्डकारण्यप्रदेशम्, दक्षिणभारतभूमिभागम्। पुष्पिताग्रा च्छन्द इत्युक्तम्। तथाहि हलायुधः– 'यस्य प्रथमे पादे नकारौ रेफयकारौ च, द्वितीये नकारजकारौ जकाररेफौ गकारश्च तद् वृत्तं पुष्पिताग्रा नाम' इति । 'पुष्पिताग्रा नौ र्यौ न्जौ ज्रौ ग्' इति पिङ्गलसूत्रम् ॥ ४५ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायामरण्यकाण्डे प्रथमसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– ११२४+४५=११६९]

द्वितीयः सर्ग्गः

महर्षिष्वपयातेषु चित्रकूटाद् विनिर्ग्गतः ।
ससीतालक्ष्मणः प्रायादत्रेराश्रममश्रमः ॥ १ ॥

(भा.दी.) श्रीरामस्य चित्रकूटाद् दण्डकारण्यं प्रत्यागमनक्रमं दर्शयति– **महर्षिष्वि**त्यादिना । महान्तश्च ते ऋषयश्च तेषु, राक्षसैः क्रियमाणपीडां श्रीरामं प्रति विज्ञाप्य, चित्रकूटात् स्वकीयाश्रमात्, अपयातेषु प्रतिगतेषु सत्सु, चित्रकूटात् विनिर्गतः, न विद्यते प्रवासनिमित्तश्रमो यस्य स तथा श्रीरामः, सीता च लक्ष्मणश्च ताभ्यां सहितः सन्, अत्रेः ऋषेः आश्रमो मुनिवासस्तं प्रति प्रायात् ॥ १ ॥

(सं.चं.) अथायोध्याकाण्डकथाशेषमाह– महर्षिषु । अपयातेषु स्वस्वमाश्रमम् । दण्डकारण्यमार्गे स्थित-मत्रेराश्रमम् ॥ १ ॥

जगतां पितरौ पश्यन्नत्रिर्य्युक्तोऽनसूयया ।
सभाजयामास भृशं कृतार्त्थो भक्तिपूरितः ॥ २ ॥

(भा.दी.) **जगतामि**ति । जगतां माता च पिता च पितरौ, सीतारामौ पश्यन्, अनसूयया अनसूयाख्यया भार्यया युक्तः, भक्त्या पूरितः पूर्णः, अत एव च कृतः अर्थः प्रयोजनं येन स तथा, श्रीरामदर्शनेन कृतार्थ इत्यर्थः, अत्रिः भृशं यथा भवति तथा, सभाजयामास सम्प्रीणयामास । सभाज प्रीतिसेवनयोः लिट् ॥२॥

(सं.चं.) सभाजयामास सत्कारैः सिषेवे । न बाधन्ते त्रीणि तमित्यत्रिः । कानि त्रीणि? अविद्याकाम-कर्माणि त्रीणि । कामक्रोधलोभाख्यानि नरकद्वाराणि त्रीणि । अकारवाच्यभगवद्विषयाण्येव त्रीणि तस्येति चात्रिः । कानि पुनरेतानि त्रीणि? ज्ञानभक्तिवैराग्याणि । भगवदर्थमन्यत्र वैराग्यम् ॥ २–३ ॥

पृष्टाऽनसूयया तत्र प्रोवाच परमेश्वरी ।
आत्मस्वयम्बरकथां[१] रामवीर्य्यप्रकाशिनीम् ॥ ३ ॥

(भा.दी.) पृष्टेति । तत्र आश्रमे अनसूयया पृष्टा, तव स्वयंवरः कथं निर्वृत्त इति विचारिता, परमाणामुत्तमानां ब्रह्मादीनामीश्वरी स्वामिनी सीता, श्रीरामस्य यद्वीर्यमीश्वरधनुःखण्डनादिरूपं तत्प्रकाशयितुं शीलमस्या अस्तीति तथा ताम्, आत्मनः स्वस्याः[२] यः स्वयंवरस्तस्य कथां प्रोवाच ॥ ३ ॥

अत्रिपत्न्या तदा दत्तैः स्रगाकल्पानुलेपनैः[३] ।
अलङ्कृता रराजालं[४] देवी प्रकृतिशोभना ॥ ४ ॥

(भा.दी.) अत्रीति । अत्रेः पत्नी तया अनसूयया तदा दत्तैः, स्रक् च, आकल्पा आभरणानि च, अनुलेपनानि चन्दनादीनि च तैः, अलङ्कृता, प्रकृत्या स्वभावेन शोभना मनोहरा, देवी सीता अलं सम्यक् रराज ।।४।।

(सं.चं.) स्रगाकल्पानुपलेपनैः । 'इदं दिव्यं वरं माल्यं वस्त्रमाभरणानि च । अङ्गरागं च वैदेहि महार्हं चानुलेपनम्' (अयो.कां.११८.१८) इति च ॥ ४–५ ॥

तस्यां रात्र्यां व्यतीतायामापृच्छ्य मुनिपुङ्गवम् ।
प्राविशत् पुण्डरीकाक्षो दण्डकारण्यमण्डलम् ॥ ५ ॥

(भा.दी.) तस्यामिति । पुण्डरीकवत् कमलवदक्षिणी यस्य स तथोक्तः श्रीरामः, तस्यां रात्र्यां व्यतीताया-मतीतायां सत्याम्, मुनिषु पुङ्गवः श्रेष्ठस्तं अत्रिं आपृच्छ्य, दण्डकारण्यस्य मण्डलं प्रदेशस्तत् प्राविशत् ।।५।।

ज्ञानिनः कर्म्मिणश्चात्र वेदवेदाङ्गपारगाः[५] ।
ब्राह्मणा ब्रह्मणस्तातं प्रेक्षन्ते स्म सहस्रशः ॥ ६ ॥

(भा.दी.) ज्ञानीति । अत्र दण्डकारण्ये, भगवद्विषयकं ज्ञानमेषामस्तीति ज्ञानिनः, सनकादिवत् ज्ञानप्रधाना इत्यर्थः, भगवदाराधनादिरूपं कर्म येषामस्तीति कर्मिणः, जनकादिवत् कर्मप्रधाना इत्यर्थः, वेदाश्च वेदाङ्गानि

१. 'स्वयंवरकथाम्'
२. 'स्वस्य' इति युक्तम् ।
३. 'स्रगाकल्पोपलेपनैः'
४. 'अलङ्कृताऽराजदियं देवी'
५. 'वेदवेदान्तपारगाः'

च तेषां पारमवसानं गच्छन्तीति तथा, सहस्रशः सहस्रसङ्ख्याकाः ब्राह्मणाः, ब्रह्मणश्चतुर्मुखस्य तातं श्रीरामं प्रेक्षन्ते स्म अपश्यन् ॥ ६ ॥

(सं.चं.)सर्वेऽपि कर्मिणो ज्ञानिनः । सर्वेऽपि ज्ञानिनः कर्मिणः । नहि ज्ञानकर्मणोर्गोव्याघ्रयोरिव विरोध इति सर्वेऽपि विद्वांसो वेदमर्मज्ञा मन्यन्ते । तत् किमिदं ज्ञानिनः कर्मिण इति विभज्य कथ्यते । प्राधान्य-विवक्षयेदम् । ज्ञानयोगप्रधानाः कर्मिणो ज्ञानिन उच्यन्ते । न त्यक्तकर्माणः । कर्मयोगप्रधाना ज्ञानिनः कर्मिण उच्यन्ते । न त्यक्तज्ञानमार्गाः । ब्रह्मणस्तातं पितरम् । सहस्रशः 'ಸಾವಿರಾರು' इति भाषायाम् ॥ ६–८ ॥

कमलानुगतं देवं कमलायतलोचनम् ।
बिम्बोष्ठं कम्बुकण्ठं तं दृष्ट्वा हृष्टा[१] महर्षयः ॥ ७ ॥

(भा.दी.) कमलेति । महान्तश्च ते ऋषयश्च ते, कमलया महालक्ष्मीस्वरूपया अनुगतम्, कमलवदायते विशाले लोचने यस्य स तथा तम्, बिम्बवद् बिम्बपक्वफलवदोष्ठौ यस्य स तथा तम्, कम्बुवत् शङ्खवत् त्रिरेखान्वितः कण्ठो यस्य स तथा तम्, देवं श्रीरामं दृष्ट्वा, हृष्टाः सन्तुष्टाः आसन् ॥ ७ ॥

सुकृतानां कृतानां नः सर्वेषां फलमागतम् ।
रामसन्दर्शनादित्थं मुनयोऽकथयन्मिथः ॥ ८ ॥

(भा.दी.) सुकृतेति । सर्वेषां नः अस्माकं सुष्ठु कृतानि सुकृतानि तेषां कृतानां भगवदाराधनादि-कर्मणाम् – 'नपुंसके भावे क्तः' (अ.सू.३.३.११४) इति क्तः । श्रीरामस्य यत् सन्दर्शनं तस्मात्, परम-त्वरया कर्मासाध्येश्वरसाक्षात्कारद्वारा[२] सन्मोक्षलक्षणं फलं आगतं सम्प्राप्तम् । इत्थं मुनयः मिथः अकथ-यन् । कथ वाक्यप्रबन्धे लङ् । यद्वा रामसन्दर्शनात् निमित्तात् सर्वेषां नः कृतानां फलं दर्शनलक्षणं फलं आगतमिति वा योजना । अस्मत्सुकृतेन त्वद्दर्शनं जातमिति भावः ॥ ८ ॥

सपर्य्यां सुरवर्य्यस्य विधाय विधिना ततः ।
विप्राः प्राञ्जलयः प्रोचुर्भक्तिगद्गदभाषिणः ॥ ९ ॥

---

१. 'दृष्ट्वा तुष्टा–'

२. नातिस्फुटमिदं वाक्यम् ।

(भा.दी.) सपर्यामिति । ततः विप्राः विधिना, सुरेषु वर्यस्य श्रेष्ठस्य श्रीरामस्य, सपर्यां अर्घ्यादिरूपपूजां विधाय, प्रकृष्टः अञ्जलिर्येषां ते तथा सन्तः, भक्त्या गद्गदं अस्पष्टाक्षरं यथा भवति तथा भाषितुं शील-मेषामस्तीति तथा सन्तः प्रोचुः ॥ ९ ॥

(सं.चं.) सपर्यां सत्कारम् ॥ ९ ॥

लोकनाथ सनाथाः स्मो भवता करुणावता ।
संसारात् पालयन् लोकान् रावणादपि पालय ॥ १० ॥

(भा.दी.) लोकेति । हे लोकनाथ श्रीराम, करुणा दया अस्यास्तीति तथा तेन भवता, सनाथाः स्मः भवामः । लोकान् सज्जनान्, संसारो जननमरणादिलक्षणस्तस्मात्, मोक्षदानेन पालयन् त्वं इदानीं रावणादपि पालय । पा रक्षणे लोट् ॥ १० ॥

(सं.चं.) ज्ञानिलोकान् संसारादुन्मुच्य मोक्षदानेन पालयसि । एवं साधुलोकानपि रावणपीडातः परि-पालय । 'न्यस्तदण्डा वयं राजन् जितक्रोधा जितेन्द्रियाः । रक्षितव्यास्त्वया शश्वद् गर्भभूतास्तपोधनाः' (अर.कां.१.२१) इति च ॥ १०–११ ॥

इति तैरर्थितस्तत्र[१] तां निशामावसन्[२] प्रभुः ।
सदारसोदरः प्रायादुदारगुणवारिधिः ॥ ११ ॥

(भा.दी.) इतीति । तत्र दण्डकारण्ये तैर्मुनिभिः इति अर्थितः, तां निशां आवसन् प्रभुः, उदारा महान्तो ये गुणास्तैर्वारिधिरिव वारिधिः श्रीरामः, दाराश्च सोदरश्च ताभ्यां सहितः सन्, सीतालक्ष्मणाभ्यां सहितः सन्नित्यर्थः, प्रायात् ॥ ११ ॥

तत्रैव दण्डकारण्ये[३] स विवेशाऽश्रमान्तरम् ।
जीर्णाङ्गं शरभङ्गाख्यं तत्र प्रैक्षत तापसम् ॥ १२ ॥

(भा.दी.) तत्रेति । सः श्रीरामः, तत्रैव दण्डकारण्य एव, अन्य आश्रम आश्रमान्तरं तत् विवेश । तत्र शरभङ्गाश्रमे जीर्णं जराग्रस्तमङ्गं शरीरं यस्य स तथा तम्, शरभङ्ग इति आख्या यस्य स तथा तम्, तापसं मुनिं प्रैक्षत ॥ १२ ॥

---

१. **'तैरर्चितस्तत्र'** २. **'निशामावसत्'** इति, **'निशामवसत्'** इति च क्वचित् । ३. **'दण्डकवने स–'**

(सं.चं.) जीर्णाङ्गं जीर्णकायम् । 'अङ्गं वपुर्वर्ष्म पुरं च पिण्डम्' इत्यभिधानम् ॥ १२–४ ॥

वानप्रस्थोऽसमर्थोऽसावग्निहोत्रप्रवर्त्तने ।
देहं जिहासुः[1] सम्पूज्य रामं[2] हृष्टोऽब्रवीदिदम् ॥ १३ ॥

(भा.दी.) वानेति । वानप्रस्थः वानप्रस्थाश्रमवान्, अग्निहोत्रस्य यत् प्रवर्तनं करणं तस्मिन् असमर्थः, अत एव देहः शरीरं तं हातुमिच्छति जिहासति, जिहासतीति जिहासुः, असौ शरभङ्गः, श्रीरामं सम्पूज्य हृष्टः सन् इदं वचः अब्रवीत् ॥ १३ ॥

पुण्यश्लोक प्रसीद त्वं राम राजीवलोचन ।
मुहूर्त्तं स्थीयतामत्र भूयानयमनुग्रहः ॥ १४ ॥

(भा.दी.) पुण्येति । पुण्यः श्लोकः कीर्तिर्यस्य तत्सम्बुद्धिः । राजीववत् कमलवल्लोचने यस्य तत्सम्बुद्धिः । श्रीराम, त्वं प्रसीद प्रसन्नो भव । अत्र मदीयाश्रमे मुहूर्तो मुहूर्तकालस्तम्, मुहूर्तकाल इत्यर्थः, स्थीयताम्, अयं भूयान् महान् अनुग्रहः ॥ १४ ॥

इत्युक्त्वा [3]ज्वालयित्वाऽग्निं हुत्वा देहं प्रभोः पुरः ।
मन्त्रपूतं हविरिव प्रययौ स हरेः पदम् ॥ १५ ॥

(भा.दी.) इतीति । सः शरभङ्गः इति उक्त्वा, प्रभोः श्रीरामस्य पुरः पुरस्तात् अग्निं ज्वालयित्वा, देहः स्वशरीरं तम्, मन्त्रेण पूतं पवित्रं तत् हविरिव हुत्वा, हरेः पदं वैकुण्ठं स्थानं तत् प्रययौ ॥ १५ ॥

(सं.चं.) ज्वालयित्वा । ज्वलतेर्णिचि चत्वारि रूपाणि– ज्वलयति ज्वलयते ज्वालयति ज्वालयते । तेन क्त्वायोगेऽपि रूपद्वयम्– ज्वलयित्वा ज्वालयित्वा । हरेः पदम्, हरेः स्थानम्, यद् विष्णोः परमं पदं मोक्षाख्यम् ॥ १५ ॥

मङ्गलं शरभङ्गस्य कृत्वा मङ्गलकीर्त्तनः[4] ।
विजगाहेऽतिगहनं तथैव[5] विपिनान्तरम् ॥ १६ ॥

---

१. **'अनुष्ठानासमर्थस्य वानप्रस्थस्य जीर्यतः । भृग्वग्निजलसम्पातैर्मरणं प्रविधीयते'** इति स्मृतेर्देहं जिहासुरित्युक्तम् । भृगुसम्पातो नाम पर्वतात् पतनम्' इति का.श्री. ।
२. **'रामं दृष्ट्वाऽब्रवीदिदम्'**
३. **'ज्वलयित्वाऽग्निम्'**
४. **'मङ्गलं श्रोतॄणामुच्चारणं कुर्वतां वा मङ्गलकरं कीर्तनं राम इति यस्य स मङ्गलकीर्तनः'** इति का.श्री. ।
५. **'तत्रैव'**

(भा.दी.) मङ्गलमिति । मङ्गलं कल्याणकरं कीर्तनं नाम यस्य स तथा श्रीरामः, शरभङ्गस्य मोक्षप्रदान-लक्षणं यन्मङ्गलं तत् कृत्वा, तथैव पूर्ववदेव, अत्यन्तं गहनमतिगहनम्, अन्यद्विपिनं विपिनान्तरं तत् विजगाहे विवेश । गाहू विलोडने लिट् ॥ १६ ॥

(सं.चं.) मङ्गलं नित्यसुखप्राप्तिरूपम् । मङ्गलं सुखसाधनं कीर्तनं यस्य । अतिगहनमतिदुर्गमम् । विजगाहे प्रविवेश । यद्यपि गाहनं जलान्तःप्रवेशः । गाहतेऽम्भः । अत्रान्तःप्रवेशमात्रं पदार्थः कवीनामेष स्वभावो यदन्यधर्मानन्दत्रारोप्य रमन्ते रमयन्ति च । केचिद् गाह प्रवेशने इति धातुं पठन्ति ॥ १६ ॥

विराधं दृष्टवान् वीरो मुनिमांसाशिनं वने ।
अष्टौ सिंहान् विनिर्भिद्य शूलेनाऽक्रम्य च स्थितम् ॥ १७ ॥

(भा.दी.) विराधमिति । वीरः श्रीरामः, वने मुनीनां यानि मांसानि तानि अशितुं शीलमस्यास्तीति तथा तम्, अष्टौ सिंहान् शूलं शूलाख्यायुधं तेन विनिर्भिद्य आक्रम्य आरोप्य च स्थितम्, आक्रम्य मार्गं निरुध्यावस्थितमिति वा, विराधनामकं राक्षसं दृष्टवान् ॥ १७ ॥

(सं.चं.) विराधं दृष्टवान् । यद्यपि विराधप्रसङ्गानन्तरं शरभङ्गप्रसङ्गो रामायणे पठ्यते । अथाप्यत्र पाठ-क्रमादर्थक्रमो बलीयानिति व्यत्यस्य पपाठ । तथाहि तात्पर्यनिर्णये । शूलेन विनिर्भिद्य तान् शूलेनैवाऽक्रम्य अवसज्य च स्थितम् । यद्यपि रामायणे– 'त्रीन् सिंहांश्चतुरो व्याघ्रान् द्वौ वृकौ पृषतान् दश । सविषाणं वसादिग्धं गजस्य च शिरो महत्'(२.७) इति पठ्यते । 'अष्टौ सिंहान्' इति तु मूलरामायणादि-ग्रन्थान्तरोदितमिति भाति । रामायणं तु क्रौर्यातिशयोपलक्षणम् । एकदा सिंहानन्यदा व्याघ्रानवसज्येति व्याख्येयम् । रामदर्शनकाले त्वष्टौ सिंहान् ॥ १७ ॥

शम्भोर्वरादवद्ध्यो[१]ऽसौ राक्षसो रूक्षविग्रहः ।
उपद्रुत्य क्षणात् सीतामादायाऽकाशमापतत् ॥ १८ ॥

(भा.दी.) शम्भोरिति । शम्भोश्चतुर्मुखस्य यो वरस्तस्मात् अवध्यः, रूक्षो भयङ्करो विग्रहः शरीरं यस्य स तथा, असौ राक्षसः, क्षणकालस्तस्मात्, उपद्रुत्य समीपमागत्य, सीतां आदाय, आकाशो गगनम्, तं प्रति आपतत् जगाम । पतॢ पतने लङ् ॥ १८ ॥

१. **'अवध्यः रामादन्येन हन्तुमशक्यः'** इति का.श्री. ।

(सं.चं.) शम्भोर्वरादवध्यः । 'तपसा चापि मे प्राप्ता ब्रह्मणो हि प्रसादजा । शस्त्रेणावध्यता लोकेऽच्छेद्याभेद्यत्वमेव च' (३.६) इति विराधवचनं वाल्मीकीये । 'नाम्ना विराधमपि शर्ववरादवध्यम्' (ता.नि.५.२०) इति भगवत्पादवचनं निर्णये । तदुभयसङ्गमनाय 'शम्भोर्वरात्' इति । शम्भुरिति ब्रह्मा । शम्भुरिति शर्वः । उभयोरपि वरादित्यर्थः । 'शम्भुः स्वयम्भूर्द्रुहिणश्चतुर्वक्त्रः प्रजापतिः' इति, 'शर्वः शम्भुरुमापतिः' इति चाभिधानम् । शस्त्रेणाभेद्यत्वं शर्वदत्तम् । अवध्यत्वं ब्रह्मदत्तम् । अधिकमस्मत्कृतनिर्णयभावचन्द्रिकायाम् । रूक्षविग्रहो घोरदर्शनः । उपद्रुत्य समीपमागत्य । क्षणात् । किं घटिष्यतीत्यालोचयितुमप्यदत्तावसरं सापद्यं क्षणशब्दार्थः । सीतामादाय । 'अङ्केनाऽदाय वैदेहीमपक्रम्य ततोऽब्रवीत्' (२.१०)इति च । अपक्रम्येति निर्गमनमुच्यते । नच तद्युक्तम् । अतस्तद्भावमाह– आकाशमापतदिति । 'ततः स्वबलवीर्येण खमुत्पत्य निशाचरः' (३.२४) इति चोपरि ॥ १८ ॥

क्रूरक्रियं क्रूरवाचं क्रूरं[1] दृष्ट्वाऽथ राक्षसम् ।
शरैः शरीरं सौमित्रिस्तस्य शीघ्रमदारयत् ॥ १९ ॥

(भा.दी.) **क्रूरेति** । अथ सौमित्रिः लक्ष्मणः, क्रूरा क्रिया यस्य स तथा तम्, क्रूरा भयङ्करा वाक् यस्य स तथा तम्, क्रूरं राक्षसं दृष्ट्वा, तस्य राक्षसस्य शरीरं देहस्तत्, शराः सायकास्तैः, शीघ्रं यथा भवति तथा अदारयत् ॥ १९ ॥

(सं.चं.) स्वभावतश्च क्रूरम् । एतेन त्रिकरणक्रौर्यमाह । तेन दर्शनेऽपि क्रूरम् । बीभत्सदर्शनम् । भीरूणां भयजननम् । रूक्षदर्शनमित्यस्य विवरणमेतत् ॥ १९ ॥

अविचिन्त्य शराञ् शूलं राक्षसः क्षिप्रमाक्षिपत् ।
लक्ष्मणायाथ तद् रामः शराभ्यां समशातयत् ॥ २० ॥

(भा.दी.) **अविचिन्त्येति** । राक्षसः शरान् अविचिन्त्य अविगणय्य, शूलं शूलाख्यायुधम्, लक्ष्मणाय क्षिप्रं यथा भवति तथा आक्षिपत् चिक्षेप । क्षिप प्रहरणे लङ् । अथ श्रीरामः तत् शूलाख्यमायुधं तत्, शराभ्यां समशातयत् चिच्छेद । शो तनूकरणे लङ्[2] ॥ २० ॥

---

१. **'क्रूरं क्रूरशरीरम्'** इति का.श्री. ।

२. **'शद्लृ शातने'** इति युक्तः पाठ इत्युक्तम् ।

(सं.चं.)अशातयत् व्यनाशयत् । शद्लृ शातने । 'शदेरगतौ तः' (अ.सू.७.३.४२) इति पाणिनिः । 'शदेरङ्गस्यागतावर्थे वर्तमानस्य तकारादेशो भवति णौ परतः । पुष्पाणि शातयति । अगताविति किम्? गाः शादयति गोपालकः' इति वामनः ॥ २० ॥

[१]स्वांसमारोपयत् सोऽत्तुं राघवौ राक्षसः क्षणात् ।
भ्रातरौ खड्गिनौ तस्य खण्डयामासतुर्भुजौ ॥ २१ ॥

(भा.दी.) स्वांसाविति । सः राक्षसः राघवौ रामलक्ष्मणौ अत्तुम्, स्वस्य यौ अंसौ स्कन्धौ तौ, आरोपयत् आरोहयत् । रूप उपरिभावे लङ् । खड्गौ अनयोः स्त इति तथोक्तौ, भ्रातरौ श्रीरामलक्ष्मणौ, तस्य विराधस्य भुजौ, क्षणः क्षणमात्रं तस्मात्, खण्डयामासतुः चिच्छिदतुः । खडि भेदे लिट् ॥ २१ ॥

(सं.चं.) स्वांसमारोपयत् । 'तावारोप्य ततः स्कन्धं राघवौ रजनीचरः । विराधो विनदन् घोरं जगामाभिमुखो वनम्' (३.२५) इति च । खण्डयामासतुर्भुजौ । 'तस्य रौद्रस्य सौमित्रिर्बाहुं सव्यं बभञ्ज ह । रामस्तु दक्षिणं बाहुं तरसा तस्य रक्षसः' (४.५) इति च ॥ २१ ॥

स रामशरसंविद्धो विराममवशो व्रजन्[२] ।
प्राञ्जलिः कञ्जपत्राक्षं संस्मृतिर्वाक्यमुक्तवान्[३] ॥ २२ ॥

(भा.दी.) स इति । श्रीरामस्य ये शरास्तैः सम्यक् विद्धः सः विराधः, अवशः परवशः सन्, विरामो मरणम्, तं अव्रजत् जगाम । व्रजेर्लङ् । सम्यक् स्मृतिः पूर्वजन्मस्मरणं यस्य स तथा, सः प्राञ्जलिः सन्, कञ्जस्य कमलस्य ये पत्रे तद्वदक्षिणी यस्य स तथा, तं श्रीरामं प्रति वाक्यं वचस्तत् उक्तवान् ॥ २२ ॥

(सं.चं.) विरामं शापाद् विरामम्, प्रतिरोधशक्तिविरामम्, तस्माद् राक्षसदेहाच्च विरामम् । संस्मृतिः समागतस्मृतिः । 'सस्मृतिः' इति पाठः स्यादिति भाति ॥ २२–३ ॥

जय देव[४] रमाकान्त जाने त्वां भक्तवत्सलम्[५] ।
तुम्बुरुस्तव दासोऽहं राक्षसीं योनिमागतः ॥ २३ ॥

१. **'स्वांसावारोपयत्'** इति वि.ती.पाठः। २. **'विराममवशोऽव्रजत्'** इति वि.ती.पाठः। ३. **'संस्मृतिर्वाक्यमब्रवीत्'**
४. **'जय राम रमाकान्त'** ५. **'भक्तवत्सल'**

(भा.दी.) **जये**ति । रमाकान्त रमाभर्तः, देव श्रीराम, जय उत्कृष्टतया वर्तस्व, त्वां भक्तेषु वत्सलः प्रियः, तं जाने । ज्ञा अवबोधने लट् । रक्षसः राक्षसस्य सम्बन्धिनी राक्षसी, तां योनिं आगतः अहं तव दासः तुम्बुरुः, तुम्बुरुनामकगन्धर्वः अस्मि ॥ २३ ॥

शप्तो वित्तेश्वरेणाहमुर्वशीसङ्गमागसः ।
[1]तद्दत्तः शापमोक्षश्च [2]तत्प्रसादोऽयमागतः ॥ २४ ॥

(भा.दी.) राक्षसयोनिप्राप्तौ किं कारणमित्यत आह– **शप्त** इति । उर्वश्या यः सङ्गमः मिथुनीभावलक्षणः स एवाऽगः अपराधस्तस्मात्, अहं वित्तेश्वरेण वैश्रवणेन शप्तः देवैकोपभोग्यस्त्रीसम्भोगाद् राक्षसीं योनिं गच्छेति शप्तः अस्मि । तेन वैश्रवणेन दत्तः शापस्य मोक्षो यस्मात् स तथोक्तः अयं वधलक्षणः तत्प्रसादः आगतश्च । यदा दाशरथी रामस्त्वां वधिष्यति तदा निजं पदं प्राप्स्यसीति वैश्रवणेन तुम्बुरुप्रार्थनयोक्तत्वादिति भावः ॥ २४ ॥

(सं.चं.) उर्वशीसङ्गमरूपादागसः अपराधात् । रामायणे तु–'इति वैश्रवणो राजा रम्भासक्तं पुराऽनघ । अनुपस्थीयमानो मां सङ्क्रुद्धो व्याजहार ह' (४.१९) इति पठ्यते । निर्णये तु–'गन्धर्वमुर्वशिरतेरथ यातुधानीम् । प्राप्तं दशाम्–' (ता.नि.५.२०) इति पठ्यते । सङ्ग्रहकृदपि निर्णयवचनमनुसरन्–'उर्वशीसङ्गमागसः' इत्येवाऽह । अनिर्णये हि निर्णयेन निर्णीयते । निर्णयस्य बहुग्रन्थानुसारित्वात् । तर्हि वाल्मीकिवचनं किमप्रमाणम्? न भोः । उभयमपि वयं सङ्गमयामः । रम्भारतेरुर्वशीरतेश्च शापमापेति । प्रथमं रम्भासङ्गमः । तेन चुक्रोध धनदः । न सपदि शशाप । अत एव रामायणे 'रम्भासक्तं पुरा' इत्युदितम् । अथोर्वशीरतो बभूव । तदैव शापमाप । अत एव निर्णये–'सपदि यातुधानीं दशां प्राप्तम्' इत्युक्तम् । 'उर्वशिरतेरथ' इत्यथशब्दोऽप्येतमेवार्थं गमयति– अथ रम्भासम्भोगानन्तरं पुनरुर्वशिरतेरिति । 'यदा दाशरथी रामस्त्वां वधिष्यति संयुगे । तदा प्रकृतिमापन्नो भवान् स्वर्गं गमिष्यति' (४.१८) इति कुबेरेणैव दत्तशापमोक्षश्च । तत् तस्मादेव कारणात् भवद्दर्शनरूपः प्रसादोऽयमागत इति ॥ २४–६ ॥

इति रामप्रसादेन गन्धर्वः स्वगतिं[3] गतः ।
रामानुजो रामवाक्यात् तद्देहं बिलगं व्यधात् ॥ २५ ॥

---

१. **'शापमोक्षश्च तद्दत्तः'** इति, **'तद्दत्तशापमोक्षश्च'** इति वि.ती.पाठः । २. **'त्वत्प्रसादो–'**

३. **'स्वर्गतिं गतः'**

(भा.दी.) **इती**ति । इति रामस्य यः प्रसादोऽनुग्रहस्तेन, गन्धर्वः तुम्बुरुनामकः, स्वस्य या गतिः स्वलोकप्राप्तिलक्षणा, तां गतः प्राप्तः । श्रीरामस्यानुजो लक्ष्मणः, श्रीरामस्य यद्वाक्यं तस्मात्, तस्य विराधस्य यो देहस्तम्, स्वेन खातं यद्बिलं तद्गच्छतीति बिलगं व्यधात् चकार ॥ २५ ॥

नानाश्रमपदेभ्योऽथ मुनयो राक्षसार्दिताः ।
शरण्यं सर्वभूतानां शार्ङ्गिणं शरणं[१] ययुः ॥ २६ ॥

(भा.दी.) **नाने**ति । अथ विराधसंहारानन्तरम्, राक्षसैः अर्दिताः पीडिताः मुनयः (नानाश्रमपदेभ्यः आगताः सन्तः), सर्वे भूताः[२] प्राणिनस्तेषां शरण्यं शरणार्हम्, शार्ङ्गमस्यास्तीति शार्ङ्गी तम्, श्रीरामं शरणमरणं तत् ययुः ॥ २६ ॥

वैखानसा वालखिल्याः पृश्नयो रश्मिपा अपि ।
वारिपा वायुपाः पत्रभोजना अश्मकुट्टकाः ॥ २७ ॥
दन्तोलूखलिनो दान्ताः खेशयाः स्थण्डिलेशयाः ।
अश्विताः[३] पञ्चतपसोऽपरे[४] दशतपोव्रताः[५] ॥ २८ ॥

(भा.दी.) **वैखानसा** इति । वैखानसाः वैखानसनामकाः । वालखिल्याः वालखिल्यनामकाः । पृश्नयः पृश्निनामकाः । रश्मीन् पिबन्तीति रश्मिपाः, रश्मिपानमात्रेण तपश्चरणकर्तार इत्यर्थः । वारि पिबन्तीति वारिपाः, वारिपानमात्रेण तपस्विन इत्यर्थः । (वायुं पिबन्तीति वायुपाः, वायुपानमात्रेण तपःकर्तार इत्यर्थः ।) पत्राण्येव भोजनं येषां ते तथा । अश्मभिः कुट्टयन्तीत्यश्मकुट्टकाः, स्वभोक्तव्यं फलादिकमश्मभिरेव भित्वा भक्षणेन तपस्विन इत्यर्थः । दन्ता एवोलूखलानि तानि एषां सन्तीति दन्तोलूखलिनः, येषां फलादीनां त्वङ्मोक्षो दन्तैर्भवति दन्तैरेव तत्कृत्वा भक्षयित्वा तपस्विन इत्यर्थः । दान्ताः निगृहीतेन्द्रियाः । खे आकाशे शेरत इति खेशयाः, योगशक्त्या खे शयित्वा तपश्चरणकर्तार इत्यर्थः । स्थण्डिले शेरत इति तथोक्ताः । अश्विताः पूजिताः तीर्थयात्रावन्त इति वा[६] । पञ्चानामग्नीनां मध्ये तपो येषां ते तथा । अपरे अन्ये दश तपोव्रतानि

---

१. **'शरणं रक्षणमुद्दिश्य रामं ययुः'** इति का.श्री. । २. **'सर्वाणि भूतानि'** इति युक्तम् ।

३. **'अर्चिताः'** ४. **'पञ्च तपसः परे'** ५. **'दशतपसः दशव्रताः दशनियमाश्च'** इति का.श्री. ।

६. **'अश्वु गतिपूजनयोः'** इति धातुपाठानुसारेणेदमर्थद्वयम् । अश्वु पूजने–अश्विताः पूजिताः । अश्वु गतौ–अश्विताः गतिमन्तः, तीर्थगमनवन्त इत्यर्थः ।

आनृशंस्यादीनि येषां ते तथा– 'आनृशंस्यं क्षमा सत्यमहिंसा दम आर्जवम् । प्रीतिः प्रसादो माधुर्यमक्रोधश्च यमा दश । दानमिज्या तपो ध्यानं स्वाध्यायोपस्थनिग्रहौ । व्रतोपवासौ मौनं च स्नानं च नियमा दश' इति श्लोकद्वयोक्तरीत्या दशतपोव्रता इति भावः ॥ २७–८ ॥

(सं.चं.) 'वैखानसा मूलभक्षाः फलभक्षा उदुम्बराः । वालखिल्याः सर्वभक्षाः पेनपा वत्सफेनपाः' इति तत्वनिर्णयवचनं भागवततात्पर्ये (३.१३.४३) । 'भगवतो नखेभ्यो जाता वैखानसाः । लोमभ्यो जाता वालखिल्याः' इति केचित् । पृश्नयोऽल्पशरीरा वामनाः । 'पृश्निरल्पशरीरः स्यात्' इत्यभिधानम् । रश्मिपाः सूर्यचन्द्रकिरणपानेन वर्तयन्तः । वारिपा वायुपा इति स्फुटम् । 'और्वव्रती जलाहारः' इति 'वाताहारस्त्वहिव्रती' इति च यादवः । पत्रभोजना ये पर्णाशिनः । 'शीर्णकः शीर्णपर्णाशी' इति यादवः । स्वभोज्यं फलमूलादि-कमश्मभिः कुट्टयित्वा खादन्तोऽश्मकुट्टाः । 'अश्मभिरात्मानं कुट्टयन्तीत्यश्मकुट्टाः' इति गोविन्दराजः । 'अपक्वकङ्कन्नभक्षकाः' इत्यन्ये । 'अश्मनः कुट्टयित्वा भक्षयन्तोऽश्मकुट्टाः' इति माधवयोगी । 'कुट्ट च्छेदने' । दन्तव्यतिरिक्तस्वजीवनवस्त्ववहननसाधनरहिता दन्तोलूखलिनः' इति च । दमवन्तो निगृहीतेन्द्रिया दान्ताः । स्थण्डिले कुशाद्यावृते भूतळे ये शेरते ते स्थण्डिलेशयाः । खेशया येऽनावृते प्रदेशे शेरते । अभ्रावकाशिका इत्यर्थः । 'वर्षवातातपानङ्गे बिभ्रदभ्रावकाशिकः' इति यादवः । पञ्चतपसः पञ्चाग्निमध्यतपसः । दशविध-प्राणानग्नींश्च जित्वा ये तपस्यन्ति ते दशतपसः । प्राणापानव्यानोदानसमाना नागकूर्मकृकलदेवदत्तधनञ्जया दशप्राणाः । अग्नयश्च दोषेषु वातपित्तकफेषु दूष्येषु सप्तधातुषु च लीना दश । तन्नामानि च–'भ्राजको रञ्जकश्चैव क्लेदकः स्नेहकस्तथा । धारको रन्धकश्चैव द्रावकाख्यश्च सप्तमः । व्यापकः पावकश्चैव श्लेष्मको दशमः स्मृतः' इति । पञ्च यमाः, पञ्च नियमाश्चेत्याहत्य दशतपोव्रता वा ॥ २७–८ ॥

वृक्षाग्रासक्तपादाग्रा न्यङ्मूर्द्धानस्तपस्विनः ।
सर्वे सर्वेश्वरं ब्रह्म ध्यायन्तो वेदपारगाः ॥ २९ ॥

(भा.दी.) वृक्षाणां यानि अग्राणि तेषु आसक्तानि पादाग्राणि येषां ते तथोक्ताः । तपश्चरणकालेऽधः कृताः मूर्धानो येषां ते तथा । सर्वेषामीश्वरं ब्रह्म विष्ण्वाख्यं ध्यायन्तः, वेदानां पारमवसानं गतवन्त इति वेद-पारगाः, सर्वे तपस्विनः, शरणं ययुरिति पूर्वेण सम्बन्धः ॥ २९ ॥

(सं.चं.) न्यङ्मूर्धानः अधःशिरसः । वृक्षाग्रे पादावासज्याधोमुखाः सन्तस्तपस्यन्त इत्यर्थः । 'वैखानसा वालखिल्याः सम्प्रक्षाला मरीचिपाः । अश्मकुट्टाश्च बहवः पत्राहाराश्च धार्मिकाः । दन्तोलूखलिनश्चैव

तथैवोन्मज्जकाः परे । गात्रशय्या अशय्याश्च तथैवाभ्रावकाशकाः । मुनयः सलिलाहारा वायुभक्षास्तथाऽपरे । आकाशनिलयाश्चैव तथा स्थण्डिलशायिनः । व्रतोपावासिनो दान्तास्तथाऽऽर्द्रपटवाससः । सजपाश्च तपोनित्यास्तथा पञ्चतपोन्विताः' (६.२–५) इति च ॥ २९ ॥

जाज्वल्यमानास्तपसा ज्वलनादित्यवर्चसः[१] ।
अश्रुपूर्णेक्षणाः क्षामाः प्रणम्याऽऽहुः स्म राघवम् ॥ ३० ॥

(भा.दी.) जाज्वल्येति । तपसा पुनःपुनरतिशयेन वा ज्वलन्तीति जाज्वल्यमानाः । ज्वलनोऽग्निः स च, आदित्यश्च, एतयोर्वर्च इव वर्चस्तेजो येषां ते तथा । अश्रुभिः पूर्णानि ईक्षणानि येषां ते तथा । क्षामाः तपःकृशाः मुनयः राघवं प्रणम्य आहुः स्म अवदन् ॥ ३० ॥

(सं.चं.) क्षामाः तपसा व्रतोपवासादिना च क्षीणदेहाः । रक्षोभयेन रामदर्शनानन्देन चाश्रुपूर्णेक्षणाः ॥ ३०–१ ॥

लोकैकनाथे[२] श्रीनाथे त्वयि पृथ्वीं[३] गतेऽप्यहो ।
राक्षसैरर्दिताः स्मोऽथ[४] रावणौजःसमाश्रयैः[५] ॥ ३१ ॥

(भा.दी.) लोकेति । लोकानामेको मुख्यो यो नाथस्तस्मिन्, श्रियः नाथः स्वामी तस्मिन्, त्वयि पृथ्वीं गतेऽपि प्राप्ते सत्यपि, रावणस्य यदोजः सामर्थ्यं समाश्रयो येषां ते तथा तैः, राक्षसैः अथ कात्स्न्र्येन, 'मङ्गळानन्तरारम्भप्रश्नकार्येष्वथो अथ' इत्यमरः । अर्दिताः स्मः भवामः । अहो आश्चर्यम् ॥ ३१ ॥

[६]मन्दाकिनीतीरजुषां पम्पातीरजुषां सताम् ।
प्रत्याश्रमं पश्य देहान् राम राक्षसभक्षितान् ॥ ३२ ॥

(भा.दी.) मन्देति । मन्दाकिन्या गङ्गाया यत्तीरं तज्जुषन्ते सेवन्त इति तथा तेषाम्, पम्पायाः पम्पानद्याः यत्तीरं तज्जुषां च सेवमानानाम्, सतां उत्तमानां ऋषीणाम्, राक्षसैर्भक्षितान् देहान्, हे राम, त्वं आश्रममाश्रमं प्रति प्रत्याश्रमं पश्य ॥ ३२ ॥

---

१. **'केचन ज्वलनवर्चसः । अपरे आदित्यवर्चसः'** इति का.श्री. । २. **'लोकैकनाथ श्रीनाथ त्वयि पृथ्वीगतेऽप्यहो'**

३. **'पृथ्वीगते'** ४. **'राक्षसैर्भक्षिताः स्मोऽत्र'** ५. **'रावणाज्ञासमाश्रयैः'**

६. **'मन्दाकिनीति चित्रकूटसमीपोत्थिता काचन नदी । नतु गङ्गेति यथाश्रुतोऽर्थः ।'** इति, **'पम्पेति विरूपाक्षक्षेत्रे तुङ्गभद्राया दक्षिणतीरतटे किञ्चित् सरः'** इति च का.श्री. ।

(सं.चं.) 'पम्पानदीनिवासानामनु मन्दाकिनीमपि । चित्रकूटालयानां च क्रियते कदनं महत्' (३.६.१७) इति । नेयं मन्दाकिनी गङ्गेत्युक्तम् । चित्रकूटं परिगता काचिदन्यैव नदी । पम्पानदीति पम्पाभिधानं सरः । पवनोद्धूततरङ्गवती सरसी च नदीत्युच्यते । प्रत्याश्रमम्, सर्वेष्वाश्रमेष्वित्यर्थः ॥ ३२–३ ॥

करुणाकर तस्मात् त्वं करुणां कुरु साधुषु ।
हर राक्षससन्दोहं तिमिरं मिहिरो यथा ॥ ३३ ॥

(भा.दी.) **करुणे**ति । करुणाया आकर आश्रय श्रीराम, त्वं तस्मात् कारणात् साधुषु अस्मासु करुणां कुरु । राक्षसानां सन्दोहः समूहः, तं मिहिरः सूर्यः तिमिरं तमस्तत् यथा हरति तथा हर ॥ ३३ ॥

इत्यर्थितोऽब्रवीत् देवो मेघगम्भीरया गिरा ।
खलान् निर्म्मूलयिष्यामि भयं वो मा भवेदिति ॥ ३४ ॥

(भा.दी.) **इती**ति । इति मुनिभिः अर्थितः देवः श्रीरामः, अहं बलात्[१] खलान् राक्षसान् निर्मूलयिष्यामि । मूल रोहणे लृट् । वः भयं मा भवेत् । इति मेघवन्मेघगर्जनवत् गम्भीरया गिरा अब्रवीत् ॥ ३४ ॥

(सं.चं.) निर्मूलयिष्यामि । मूल प्रतिष्ठायाम् । णिचि निर्मूलयति अप्रतिष्ठान् करोति । उन्मूलयतीत्यर्थः ॥३४॥

महर्षिभिर्वृतो[२] रामः सुतीक्ष्णस्याऽश्रमं ययौ ।
तां निशां सह वैदेह्या तेन सम्पूजितोऽवसत् ॥ ३५ ॥

(भा.दी.) **महे**ति । महान्तश्च ते ऋषयश्च तैर्वृतः[३] युक्तः श्रीरामः सुतीक्ष्णस्य सुतीक्ष्णनामकस्य मुनेर्य आश्रमस्तं प्रति ययौ । तेन सुतीक्ष्णेन, वैदेह्या सीतया सह सम्पूजितः सन् तां निशां अवसत् । वस निवासे लङ् ॥ ३५ ॥

(सं.चं.) सुतीक्ष्णेन वैदेह्या सह सम्पूजितो रामः तां निशां वैदेह्या सह सुतीक्ष्णस्याऽश्रमेऽवसत् ॥ ३५–८ ॥

गच्छतोर्म्मुनिभिः सार्द्धं लक्ष्मणेन च कानने[४] ।
जानकीजानकीभर्त्रोर्ल्लीलावादो[५]ऽन्ववर्त्तत ॥ ३६ ॥

---

१. नेदं मूलगतं पदम् । २. **'महर्षिभिर्युतो रामः'** ३. **'तैर्युतः'**
४. **'काननम्'** ५. **'–भर्त्रोः क्रीडावादो–'**

(भा.दी.) गच्छतोरिति । मुनिभिः लक्ष्मणेन च सार्धम्, काननं दण्डकारण्यं तस्मिन् गच्छतोः, जानकी च जानकीभर्ता च तयोः सीतारामयोः लीलया वादः परस्परं संवादः अन्ववर्तत ॥ ३६ ॥

तापसस्त्यक्तराज्यस्त्वं न्यस्तदण्डोऽसि राघव ।
कथं रक्षोवधो धर्म्मस्तवेत्यूचेऽथ जानकी[1] ॥ ३७ ॥

(भा.दी.) तमेव दर्शयति– **तापस** इति । अथ जानकी, हे राघव, त्वं त्यक्तं राज्यं येन स तथा, तापसः मुनिव्रतः, न्यस्तः उपरतः दण्डः प्राणिहिंसनं येन स तथा, 'दण्डोऽस्त्री शासने राज्ञां हिंसायाम्' इति वैजयन्ती, असि । तव रक्षसां वधः कथं धर्मः इति ऊचे ॥ ३७ ॥

दहनं दहनस्येव राज्ञो दुर्ज्जननिग्रहः ।
सर्वावस्थासु धर्म्मः स्यादिति रामोऽभ्यभाषत ॥ ३८ ॥

(भा.दी.) दहनमिति । राज्ञः, दुष्टा ये जनास्तेषां निग्रहः संहरणम्, दहतीति दहनो वह्निः, तस्य दहनमिव भस्मीकरणमिव, सर्वा या अवस्थास्तासु, वनवासाद्यवस्थायामपीत्यर्थः, धर्मः स्यादिति श्रीरामः सीतां प्रति अभ्यभाषत । यथा वह्नेस्तृणादिभस्मीकरणं स्वाभाविकमेवं राज्ञो दुष्टनिग्रहः स्वाभाविकधर्म इत्यर्थः ॥ ३८ ॥

अग्रतः प्रययौ रामो मद्ध्यतः सा सुमद्ध्यमा ।
लक्ष्मणः पृष्ठतस्तेषां पृष्ठतस्ते महर्षयः ॥ ३९ ॥

(भा.दी.) मार्गेण गमनप्रकारमाह– **अग्रत** इति । श्रीरामः तेषां सर्वेषां अग्रतः पुरस्तात् प्रययौ । सु शोभनं मध्यं मध्यप्रदेशो यस्याः सा तथा सीता, मध्ये इति मध्यतः ययौ । लक्ष्मणः तयोः पृष्ठेनेति पृष्ठतः पश्चात् ययौ । ते महर्षयः पृष्ठतः लक्ष्मणपश्चाद्भागे ययुः ॥ ३९ ॥

(सं.चं.) पथि रक्षसां प्रतिरोधसम्भवाद् रामोऽग्रतः प्रययौ । तेषां सीतारामलक्ष्मणानां पृष्ठतस्ते महर्षयः प्रययुः । 'अग्रतः प्रययौ रामः सीता मध्ये सुमध्यमा । पृष्ठतस्तु धनुष्पाणिर्लक्ष्मणोऽनु जगाम ह' (११.१) इति च ॥ ३९ ॥

---

१. **'धर्मस्तवेत्यूचे हि विस्मिता'** इति, **'–त्यूचे शुचिस्मिता'** इति च ।

सरः पञ्चाप्सरो नाम प्रापुस्ते यत्र रेमिरे ।
पञ्चाग्र्याप्सरसोऽदृश्या[१] मुनिना मन्दकर्ण्णिना[२] ॥ ४० ॥

(भा.दी.) सर इति । यत्र सरसि, दृश्याः मनोहराः, पञ्च अग्र्याः श्रेष्ठाः या अप्सरसः, मन्दकर्णिना मन्दकर्णिनामकमुनिना[३] सह रेमिरे । अत एव पञ्चाप्सर इति नाम यस्य तत्तथा तत् सरः ते श्रीरामादयः प्रापुः । मन्दकर्णितपोभीतैः[४] देवैस्तत्तपोविघातार्थं पञ्चाप्सरसः प्रेषितास्ताभिश्च सह रममाणः सन् तत्र तिष्ठतीत्यतः पञ्चाप्सर इति नामास्य सरसोऽभूदिति हि रामायणे प्रसिद्धम् ॥ ४० ॥

(सं.चं.) पञ्चाप्सरो नामेति । 'इदं पञ्चाप्सरो नाम तटाकं सार्वकालिकम् । निर्मितं तपसा राम मुनिना माण्डुकर्णिना' (११.११) इति च । माण्डुकर्णिरिति माण्डकर्णिरिति मन्दकर्णिरिति च बहुधा पाठ-भेदः । मन्दकर्णिनामा मुनिर्दशवर्षसहस्राणि तपस्तेपे । तत्तपोभीता देवास्तपोभङ्गार्थं प्रधानाः पञ्चाप्सरसः प्रेषयामासुः । ताभिर्मुनिर्मदनवश्यतां नीतः । ततः परं मुनिना सह रममाणास्ता अप्सरसो मनुष्याणामदृश्या अत्रैव न्यूषुरिति कथा । पञ्च अप्सरसो यत्र तत् पञ्चाप्सरः सरः ॥ ४० ॥

मासं कुत्रचिदेकं द्वौ[५] क्वचित् त्रिचतुरान् प्रभुः ।
पञ्चषानथ सप्ताष्टानाश्रमेष्ववसत् सुखम्[६] ॥ ४१ ॥

(भा.दी.) मासानिति। प्रभुः श्रीरामः अथ कुत्रचिदाश्रमे, एको वा द्वौ वा मानं येषां ते एकद्वास्तान्, क्वचित् त्रयश्चत्वारो वा मानं येषां ते त्रिचतुरास्तान् मासान्, क्वचिदाश्रमे (अथ पञ्च वा षड् वा मानं येषां ते पञ्चषास्तान्,) सप्त वा अष्टौ वा मानं येषां ते सप्ताष्टास्तान्, 'बहुव्रीहौ सङ्ख्येये डजबहु-गणात्' (अ.सू. ५.४.७३) इति डच् । मासान्, एवं मुनीनां ये आश्रमास्तेषु, सुखमस्यास्तीति सुखी अवसत् ॥ ४१ ॥

---

१. **'अग्र्याप्सरसः दृश्याः'** इति वि.ती.पदपाठः ।
२. **'माण्डुकर्णिना'** इति, **'मदकर्णिना'** इति, **'माण्डकर्णिना'** इति च ।
३. **'माण्डुकर्णिनामकमुनिना'**
४. **'माण्डुकर्णितपोभीतैः'**
५. **'कुत्रचिदेकद्वान्'** इति वि.ती.पाठः । **'मासान् कुत्रचिदेकद्वान् क्वचित् त्रिचतुरान् प्रभुरिति क्वचित् पाठः । तत्र मासानिति बहुवचनान्तस्य विपरिणामेन क्वचिदेकं मासं क्वचिद् द्वौ मासावित्यन्वयो द्रष्टव्यः'** इति. का.श्री. ।
६. **'सुखी'** इति. वि.ती.पाठः ।

(सं.चं.) 'क्वचित् परिदशान् मासानेकं संवत्सरं क्वचित् । क्वचिच्च चतुरो मासान् पञ्च षट् चापरान् क्वचित् । अपरत्राधिकं मासमप्यर्धमधिकं क्वचित् । त्रीन् मासानष्टमासांश्च राघवो न्यवसत् सुखम्' (११.२६–७) इति च ॥ ४१ ॥

सुन्दरीमिन्दिरामेनां स्वानन्दी[१] साधु नन्दयन् ।
ससौमित्रिर्नव समा निन्ये मुनिजनप्रियः[२] ॥ ४२ ॥

(भा.दी.) सुन्दरीमिति । सुन्दरीं इन्दिरां लक्ष्मीस्वरूपां एनां सीतां साधु सम्यक् यथा भवति तथा, नन्दयन् अपेक्षितदानेन सन्तोषयन्, ससौमित्रिः लक्ष्मणसहितः, मुनयश्च ते जनाश्च तेषां प्रियः श्रीरामः, (स्वानन्दी सन्), नव च ताः समाश्च ताः, नवसंवत्सरानित्यर्थः, निन्ये अतिक्रान्तवान् ॥ ४२ ॥

(सं.चं.) चतुर्दशसु वर्षेषु नव समा वर्षाणि निन्ये । रामायणे सम्प्रति– 'ययुः संवत्सरा दश' (२८) इति पठ्यते । 'ययुः संवत्सरा नव' इति ग्रन्थकृत्सम्मतः पाठः ॥ ४२ ॥

प्रोचेऽनुजमथ प्राप्य सोऽगस्त्यभ्रातुराश्रमम् ।
अगस्त्यस्य तपोवीर्य्यं वातापील्वलसूदनम् ॥ ४३ ॥

(भा.दी.) प्रेति । अथ सः श्रीरामः, अगस्त्यस्य भ्राता तस्य य आश्रमस्तं प्राप्य, वातापिश्च इल्वलश्च तयोः सूदनं विनाशो यस्मात् तथोक्तं तत्, अगस्त्यस्य तपसो वीर्यं सामर्थ्यं तत्, अनुजं लक्ष्मणं प्रति प्रोचे । इल्वलो हि मायया मेषरूपिणं वातापिं पक्त्वा ब्राह्मणान् श्राद्धार्थं निमन्त्र्य भोजयित्वा वातापे आगच्छेत्याह्वानमात्रेण जठरं निर्भिद्याऽगतवति तमेव ब्राह्मणं पक्त्वा भक्षयतोस्तयोः विनाशार्थमृषिभिरर्थितोऽगस्त्यो ब्राह्मणरूपिणेल्वलेन पूर्वं निमन्त्रितो वातापिं भक्षयित्वा जीर्णीचकार । तथाकृतं भ्रातरं दृष्ट्वा क्रोधेनागस्त्यवधार्थमागतमिल्वलं च स्वचक्षुस्तेजसा भस्मीचकारेति हि रामायणे प्रसिद्धम् ॥ ४३ ॥

(सं.चं.)अगस्त्यभ्रातुराश्रमं प्राप्य । अनुजं लक्ष्मणं प्रति । अगस्त्यस्य तपसो वीर्यं प्रोचे । किं तत्? वातापील्वलसूदनम् । 'इहैकदा किल क्रूरो वातापिरपि चेल्वलः । भ्रातरौ सहितावास्तां ब्राह्मणघ्नौ महासुरौ । धारयन् ब्राह्मणं रूपमिल्वलः संस्कृतं वदन् । आमन्त्रयति विप्रान् स्म श्राद्धमुद्दिश्य निर्घृणः । भ्रातरं संस्कृतं कृत्वा ततस्तं मेषरूपिणम् । तान् द्विजान् भोजयामास श्राद्धदृष्टेन कर्मणा । ततो भुक्तवतां तेषां

१. **'सानन्दः'**
२. **'मुनिजनोत्सवः'** इति, **'मुनिजनोत्सुकः'** इति च ।

विप्राणामिल्वलोऽब्रवीत् । वातापे निष्क्रमस्वेति स्वरेण महता वदन् । ततो भ्रातुर्वचः श्रुत्वा वातापिर्मेष-वन्नदन् । भित्त्वाभित्त्वा शरीराणि ब्राह्मणानां विनिष्पतत् । ब्राह्मणानां सहस्राणि तैरेवं कामरूपिभिः । विनाशितानि संहत्य नित्यशः पिशिताशनैः । अगस्त्येन तदा देवैः प्रार्थितेन महर्षिणा । अनुभूय किल श्राद्धे भक्षितः स महासुरः । ततः सम्पन्नमित्युक्त्वा दत्वा हस्तोदकं ततः । भ्रातरं निष्क्रमस्वेति चेल्वलः सोऽभ्यभाषत । स तं तथा भाषमाणं भ्रातरं विप्रघातिनम् । अब्रवीत् प्रहसन् धीमानगस्त्यो मुनिसत्तमः । कुतो निष्क्रमितुं शक्तिर्मया जीर्णस्य रक्षसः । भ्रातुस्ते मेषरूपस्य गतस्य यमसादनम् । अथ तस्य वचः श्रुत्वा भ्रातुर्निधनसंश्रयम् । प्रधर्षयितुमारेभे मुनिं क्रोधान्निशाचरः । सोऽभिद्रवन् मुनिश्रेष्ठं मुनिना दीप्त-तेजसा । चक्षुषाऽनलकल्पेन निर्दग्धो निधनं गतः' (११.५५–६६) इति च ॥ ४३–४ ॥

अगस्त्यस्य स्वभक्तस्य प्रीत्यै प्रापाऽश्रमं प्रभुः ।
सदारसोदरं देवं सम्पूज्यासावभाषत ॥ ४४ ॥

(भा.दी.) अगस्त्यस्येति । प्रभुः श्रीरामः, स्वस्य यो भक्तस्तस्य अगस्त्यस्य प्रीत्यै आश्रमं प्रति प्राप । असौ अगस्त्यः, दाराश्च सोदरश्च ताभ्यां सहितम्, सीतालक्ष्मणसहितमित्यर्थः, देवं श्रीरामं सम्पूज्य अभाषत ॥ ४४ ॥

कोदण्डं कालदण्डाभं त्वद्दोर्दण्डैकमण्डनम् ।
वैष्णवं विष्णुमूर्त्ते त्वं गृहाणेन्द्रेण यापितम् ॥ ४५ ॥

(भा.दी.) कोदण्डमिति । विष्णोर्मूर्तिः स्वरूपं यस्य तत्सम्बुद्धिः, श्रीराम, त्वं कालस्य यमस्य दण्ड-स्तद्वदाभा कान्तिर्यस्य तत्तथा, तव दोषौ हस्तौ (दण्डाविव) तयोरेकं मुख्यं मण्डनमलङ्कारो यस्मात् तत्तथा तत्, विष्णोः सम्बन्धि वैष्णवम्, विष्णुना पूर्वं दैत्यनिग्रहे धृतमित्यर्थः । अत्र कथमागतमित्यत आह– इन्द्रेणेति । इन्द्रेण यापितं त्वदर्थं प्रेषितं कोदण्डं धनुः गृहाण ॥ ४५ ॥

(सं.चं.) विष्ण्वाख्या मूर्तिर्यस्य । केवलं त्वद्दोर्दण्डस्य मण्डनम् । अन्यैरधार्यम् । वैष्णवं धनुः परशुरामेण रामाय दत्तम् । रामेण वरुणाय प्रत्तम् । वरुणेनागस्त्यद्वारा रामायार्पयितुं पुनरिन्द्राय दत्तम् । इन्द्रेणा-गस्त्याय । सोऽयं महानगस्त्यानुग्रहः । कालदण्ड इवाभातीति कालदण्डाभम् । कालदण्डः आभा उपमा यस्येति वा ॥ ४५ ॥

इत्युक्त्वा शार्ङ्गिणे शार्ङ्गं प्रददौ कुम्भसम्भवः[१] ।
इषुधी अक्षयेषू च[२] खड्गं च खलखण्डनम्[३] ॥ ४६ ॥

(भा.दी.) इतीति । कुम्भात् सम्भव उत्पत्तिर्यस्य स तथोक्तः अगस्त्यः, इति उक्त्वा शार्ङ्गमस्यास्तीति तथा तस्मै श्रीरामाय, शार्ङ्गं शार्ङ्गसञ्ज्ञं धनुस्तत् प्रददौ । अक्षया इषवो ययोस्तौ इषुधी च ददौ । खलानां खण्डनं विनाशो येन स तथा तं खड्गं च ददौ ॥ ४६ ॥

(सं.चं.)शार्ङ्गधन्वने शार्ङ्गं धनुर्ददौ । तदिदं सरसः सलिलस्य सरसि निक्षेपः । इषुधी चेन्द्रदत्ते । खड्गं च प्रीत्या ददौ ॥ ४६ ॥

तानि सङ्गृह्य भगवान् महर्षेरनुमान्य च[४] ।
अगस्त्योदितमार्गेण ययौ पञ्चवटीं[५] प्रति ॥ ४७ ॥

(भा.दी.) तानीति । भगवान् तानि अगस्त्यदत्तायुधानि, महांश्चासौ ऋषिश्च तस्मात् अगस्त्यात्, सङ्गृह्य अनुमान्य च गमनमामन्त्र्य, अगस्त्येन उदितो यो मार्गस्तेन पञ्चवटीं पञ्चवटीनामकगोदावरीतटप्रदेशं प्रति ययौ ॥ ४७ ॥

(सं.चं.) महर्षेस्तानि सङ्गृह्य । तमनुमान्य च । समूह्य ग्रहणं सङ्ग्रहणम् । सन्तुष्य ग्रहणं सङ्ग्रहणम् । अनुगुणं माननमभिनन्दनम् ॥ ४७ ॥

अप्रीयत प्रभुं प्रेक्ष्य[६] जटायुः पततां पतिः[७] ।
सखा दशरथस्याग्रे[८] दासोऽस्मीति ननाम च ॥ ४८ ॥

---

१. **'सम्भवत्यस्मादिति सम्भवः । कुम्भः सम्भवः उत्पत्तिकारणं यस्य स कुम्भसम्भवः कुम्भाज्जातोऽगस्त्यः'** इति का.श्री. ।

२. **'इषधीरक्षयेषूश्च'** इति, **'इषुधीनक्षयेषूंश्च'** इति च क्वचित् ।

३. **'नन्वत्र अक्षेयेषू इषुधी अगस्त्येन दत्तावित्युच्यते । अयोध्याकाण्डे षष्ठसर्गे–'अभेद्यं कवचं हृद्यमक्षयेषू तथेषुधी । खड्गं चाऽनय–' (सं.रा.२.६.१५) इत्यत्रापि इषुध्योरुक्तत्वात्, आगमनसमय इषुध्योरानीतत्वात् एतयोर्वैयर्थ्यमिति चेन्न । इषुधीनामलौकिकत्वेन एकीभावसम्भवात्'** इति का.श्री. ।

४. **'महर्षेरनुगृह्य च'**

५. **'पञ्चानां वटानां समाहारः पञ्चवटी । गोदावर्या उत्पत्तिस्थानम्, नासिकात्रियम्बकमिति यावत्'** इति का.श्री. ।

६. **'प्रभुं दृष्ट्वा'** इति वि.ती.पाठः ।

७. **'पततां वरः'** इति वि.ती.पाठः ।

८. **'अग्रे रामस्य पुरतः ननाम'** इति का.श्री. ।

(भा.दी.) अप्रीयतेति। पततां पक्षिणाम्, 'पतत्पतत्रिपतग–'[१] इत्यमरः, वरः, अग्रं पूर्वं तस्मिन्, दशरथस्य सखा, जटायुनामकः पक्षिराजः प्रभुं श्रीरामं दृष्ट्वा, अप्रीयत प्रीतोऽभूत्। प्रीङ् प्रीणने लङ्। दासः भृत्यः अस्मीति च ननाम ॥ ४८ ॥

(सं.चं.)अग्रे पूर्वं दशरथस्य सखा। पततां पक्षिणां पतिः श्रेष्ठः। पञ्चवटीनिकटे प्रभुं रामं प्रेक्ष्याप्रीयत। दासोऽस्मीति ननाम च ॥ ४८ ॥

विनतायां दक्षपुत्र्यां मारीचात् काश्यपात्[२] पुरा।
सञ्जातादरुणाज्जन्म स्वस्योवाच विहङ्गमः ॥ ४९ ॥

(भा.दी.) विनतेति। दक्षस्य दक्षप्रजेश्वरस्य पुत्र्यां विनतायाम्, मरीचेरपत्यं पुमान् मारीचः, तस्मात् काश्यपात् पुरा सञ्जातात् अरुणात्, विहङ्गमः पक्षी, स्वस्य जन्म उत्पत्तिं उवाच ॥ ४९ ॥

(सं.चं.) मरीचिपुत्रात् काश्यपात् विनतायां जातोऽरुणः सूर्यसूतः। तस्माज्जातो जटायुः ॥ ४९ ॥

वैनतेयात्मजयुतो वैनतेयध्वजस्तदा।
प्राप पञ्चवटीं रम्यामाराद् गोदावरीयुताम् ॥ ५० ॥

(भा.दी.) वैनतेयेति। विनताया अपत्यं वैनतेयोऽरुणः, तस्यात्मजः पुत्रो जटायुः, तेन युतः, वैनतेयो गरुडो ध्वजो यस्य स तथा श्रीरामः, तदा आरात् समीपे गोदावरीयुताम्, गोदावरीतटस्थामित्यर्थः, रम्यां पञ्चवटीं पञ्चवट्याख्यां स्थलीं प्राप ॥ ५० ॥

(सं.चं.) वैनतेयस्यारुणस्याऽत्मजेन जटायुना युतः। आरात् अन्तिक एव प्रवहन्त्या गोदावर्या युताम् ॥ ५० ॥

सालतालतमालांश्च नागपुन्नागचम्पकान्।
चन्दनान्[३] स्यन्दनांश्चूतान् खर्जूरार्जुनकिंशुकान् ॥ ५१ ॥
बकुलान्[४] वञ्जुलाशोकान् पाटलानपरानपि।
प्रैक्षताऽनम्रशिरसः पार्थिवान् पार्थिवाधिपः[५] ॥ ५२ ॥

---

१. '**पतत्रिपत्रिपतगपतत्–**' इति सम्प्रति पठ्यते। २. '**कश्यपात्**' ३. '**चन्दनस्यन्दनांश्चूतान्**' इति वि.ती.पाठः।
४. '**वकुलान्**' ५. '**पार्थिवात्मजः**'

पल्लवैः पवनोद्धूतैः कुर्वाणानञ्जलीनिव ।
निष्पतद्भिर्म्मुहुः पुष्पैः कुर्वाणांश्च बलीनिव[1] ॥ ५३ ॥

फलं निवेद्यदेशीयं नैकमर्प्पयतः पृथक् ।
आत्मनः स्तवनायैव कलकोकिलनिःस्वनान् ॥ ५४ ॥

चालितान् पवमानेन प्रहर्षादिव नृत्यतः ।
अभ्यनन्दन्मुकुन्दस्तान् भक्ताभान् भक्तवत्सलः ॥ ५५ ॥

(भा.दी.) सालेति । पार्थिवानां राज्ञामधिपः श्रीरामः, सालाः सर्जवृक्षास्ते च, तालाश्च तमालाश्च तान्, नागाश्च पुन्नागाश्च चम्पकाश्च तान्, चन्दनाश्च स्यन्दनाश्च तान्, चूतान्, खर्जूराश्च अर्जुनाश्च किंशुकाश्च तान्, बकुळांश्च, वञ्जुलाश्च अशोकाश्च तान् । पाटलान् अपरान् देवदार्वादीन्, आनम्राणि फलपुष्पादिना नम्राणि शिरांसि अग्राणि येषां ते तथा तान्, पार्थिवान् वृक्षान् प्रैक्षत । तरुजन्मभाजो श्रीरामकृपाविषयत्वादिना भक्ता एव स्वारब्धकर्मपरिपाकाय भुवि जाता इति भावेन भक्तसाम्येन वर्णयति– पल्लवैरित्यादिना । पवनेन उद्धूता कम्पितास्तैः पल्लवैः, अञ्जलीनिव संहतकरानिव कुर्वाणान्, वाय्वागमनसमये पल्लवानां परस्परं संश्लेषादिति भावः । मुहुः नितरां पतन्ति निष्पतन्ति तैः पुष्पैः बलीनिव पूजोपहारानिव, 'बलिः पूजोपहारे च दैत्यभेदे' इति वैजयन्ती, कुर्वाणान् । एकं न भवति यथा तथा नैकं बहुविधमित्यर्थः । निवेद्यस्य समर्पणीयस्य सदृशं निवेद्यदेशीयं तत् । देशीयर्प्रत्ययान्तोऽयं शब्दः । फलं पृथक् अर्पयतः समर्पणं कुर्वतः । आत्मनः स्वस्वामिनः श्रीरामस्य स्तवनं स्तोत्रं तस्मा एव कला अव्यक्तमधुराः कोकिलानां निःस्वनाः येषां ते तथा तान्, पवमानेन वायुना चालितान्, अत एव प्रहर्षः सन्तोषस्तस्मात् नृत्यत इव नर्तनं कुर्वत इव स्थितान्, भक्तानामाभा कान्तिर्येषां ते तथा तान्, तान् वृक्षान्, भक्तेषु वत्सलः स्निग्धः श्रीरामः दृष्ट्वा अभ्यनन्दत् सन्तुष्टोऽभूत् । नदि हर्षे[2] लङ् ॥ ५१–५ ॥

(सं.चं.) सालः सर्जः । 'ಹೆಮ್ಮತ್ತಿ' इति भाषायाम् । तालस्तृणराजः । 'ತಾಳೆ' इति भाषायाम् । तमालस्तापिच्छः='ಹೊಂಗೆ', नागः='ನಾಗಸಂಪಿಗೆ', पुन्नागः='ಹೊನ್ನೆ ಸುರಗಿ', 'ಸರಗಿ', चम्पकः='ಸಂಪಿಗೆ', चन्दनः गन्धद्रुमः । स्यन्दनः= 'ಅತಿಮುಕ್ತ ಹುಲಿಗಿಲು', चूतः प्रसिद्धः । खर्जूरश्च । खर्जूरद्रुमः सम्प्रति भारते

१. **'कुर्वाणाश्चाञ्जलीनपि'** इति, **'कुर्वाणाश्चाञ्जलीनिव'** इति च । **'पुष्पैरञ्जलीन् पुष्पाञ्जलीन् कुर्वाणानिव च'** इति का.श्री. ।

२. **'टु नदि समृद्धौ'** इति धातुपारायणिकाः ।

दुर्लभः । पुराणेषु बहुधा पठ्यते । तेन ज्ञायते तदात्वे खर्जूरोऽपि भारते प्रचुर आसीदिति । अर्जुनः='ಮತ್ತಿ', किंशुकः पलाशः='ಮುತ್ತುಗ' । वकुलः='ಬಕುಳ', वञ्जुलः वेतसः='ಹಬ್ಬುಮುತ್ತುಗ' । अशोकप्रभेदोऽपि वेदस इत्युच्यते शिंशपावत् । अशोकः='ಅಸುಗೆ' पाटलः='ಪಾದರಿ' । 'सालैस्तालैस्तमालैश्च खर्जूरपनसाम्रकैः । नीवारैस्तिनिशैश्चैव पुन्नागैश्चोपशोभिताः । चूतैरशोकैस्तिलकैश्चम्पकैः केतकैरपि । चन्दनैः स्यन्दनैर्नीपैः पर्णासैर्लिकुचैरपि । धवाश्वकर्णखदिरैः शमीकिंशुकपाटलैः' (१५.१६–८) इत्यादि च । पार्थिवान् वृक्षान् । पार्थिवाधिपः आनम्रशिरसः पार्थिवान् राज्ञ इवेति ध्वनिः । पवनोद्धूनेन संहतैः संहताङ्गुलिकल्पैः पल्लवैरञ्जलीनिव कुर्वाणान् बध्नतः । पुष्पैः बलीनुपहारानिव कुर्वाणानर्पयतः । नैकं फलमिति फलानि । निवेद्यं नैवेद्यं तत्कल्पम् । 'ईषदसमाप्तौ कल्पब्-देश्य-देशीयरः' (अ.सू.५.३.६७) इति पाणिनिः . ईषदसमाप्तं निवेद्यं निवेद्यदेशीयम् । अर्पयतः पार्थिवान् । आत्मनः स्वस्य, अन्तर्यामिणः परमात्मन इति ध्वनिः, रामस्य स्तवनायैव कोकिलानां कळनिस्वनवतः । कोकिलैर्मुखैः कळनिस्वनान् कुर्वाणानिति वा । चालितान्, अत एव हर्षोद्रेकान्नृत्यं कुर्वाणानिव । पार्थिवेषु राजत्वं निरूपितम् । सम्प्रति भक्तत्वं रूपयति । रूपारोपाद्धि रूपकं वदन्ति । अयं भक्तवत्सलः । ते भक्तवदाभान्तीति भक्ता इव ॥ ५१–५ ॥

समे स्थले[१] पर्णशालामनुकूलजलाशये ।
रामवाक्याच्चकाराऽथ लक्ष्मणश्चारुलक्षणः ॥ ५६ ॥

(भा.दी.) सम इति । अथ चारूणि लक्षणानि अङ्गसम्पदो यस्य स तथोक्तः लक्ष्मणः, अनुकूलः जलाशयो जलाधारः क्रीडाद्यनुकूलः ह्रदादिर्यस्मिन् तथोक्तं तस्मिन्, समे एकप्रकारे स्थले, श्रीरामस्य यद्वाक्यं तस्मात्, पर्णमयी या शाला तां चकार ॥ ५६ ॥

(सं.चं.)पर्णशालाम् । 'ಎಲೆಮನೆ' इति भाषायाम् । अनुकूलजलाशये प्रागुदक्प्रवणे समे स्थले ॥ ५६ ॥

ससौष्ठवां सत्वरितां सप्रहर्षामवेक्ष्य[२] ताम् ।
शुश्रूषां लक्ष्मणगुरुर्लक्ष्मणं परिरब्धवान् ॥ ५७ ॥

(भा.दी.) सेति । लक्ष्मणस्य गुरुः सः श्रीरामः, सौष्ठवेन सहितां ससौष्ठवाम्, त्वरितेन वेगेन सहिताम्, प्रहर्षेण सहिताम्, (तां) लक्ष्मणसम्बन्धिनीं शुश्रूषां अवेक्ष्य, लक्ष्मणं परिरब्धवान् आलिङ्गितवान् ॥ ५७ ॥

---

१. 'समस्थले' २. 'सप्रहर्षमवेक्ष्य'

(सं.चं.) कृतस्य कर्मणश्चारुता ह्लादजनकता च सौष्ठवम् । ' हा धिक्, मम दौर्भाग्येनेदं कर्तव्यमापतितम्' इति विषादेन शपता कर्मकरणमप्रहर्षः । तद्विरहोऽनिर्विण्णता नाम प्रहर्षः । त्वरितं त्वरा, तेन सहितां सत्वरिताम्, अविलम्बेन कृताम् । ईदृशीं तां लक्ष्मणकृतां शुश्रूषामवेक्ष्य लक्ष्मणगुरुः प्रीत्यतिशयं तस्मिन् प्रकटयन् लक्ष्मणं परिरब्धवान् परिरेभे ॥ ५७ ॥

तां पर्ण्णशालां विमलां विशालां तापैस्त्रिभिर्न्नानुगतां कदाऽपि ।
अध्यास्त रम्यां रमया समेतो रामो मनीषामिव योगभाजाम् ॥ ५८ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्क्षहरामायणेऽरण्यकाण्डे द्वितीयः सर्ग्गः ॥

—०—

(भा.दी.) तामिति । रमया लक्ष्मीस्वरूपया सीतया समेतः श्रीरामः, विमलां निर्मलाम्, विशालाम्, कदाऽपि कस्मिंश्चित्समयेऽपि, त्रिभिः आध्यात्मिकाधिभौतिकाधिदैविकाख्यैः, तापाः सन्तापाः, तैः अनुगता न भवतीति नानुगता ताम्, असंस्पृष्टामित्यर्थः । नसमासोऽयम् । रम्यां तां पर्णशालाम्, योगं भजन्तीति योगभाजः, तेषां सनकादीनां मनीषामिव बुद्धिमिव, अध्यास्त अध्युवास । विमलत्वादिगुणवतीं योगबुद्धिं यथाऽध्यास्ते तद्वत्तस्यां शालायामवस्थितोऽभूदित्यर्थः । आस उपशेवने लङ् ॥ ५८ ॥

इति इति श्रीविश्वपतितीर्थकृतायां श्रीसङ्क्षहरामायणव्याख्यायां भावार्थदीपिकायामरण्यकाण्डे द्वितीयः सर्गः ॥

—०—

(सं.चं.) अथेन्द्रवज्रयोपसंहरति– तां पर्णशालाम् । योगिनां मनीषा विमला रागद्वेषादिदोषरहिता । पर्ण-शालाऽपि विमला लोष्टपङ्कादिरहिता । विशाला उदारा मनीषा । वासपाकशयनाद्यनुकूलता विशालता पर्णशालायाः । त्रिभिस्तापैरननुगता शाला च मनीषा च । आधिव्याधी आध्यात्मिकस्तापः । ईतिबाधा-दिराधिदैविकः । व्याळाद्युपद्रव आधिभौतिकः । मनीषां यथाऽध्यास्ते तथा शालामध्यास्त । 'अधिशीङ्स्थासां कर्म' (अ.सू.१.४.४६) इति द्वितीया ॥ ५८ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्क्षहरामायणटीकायां सङ्क्षहचन्द्रिकायामरण्यकाण्डे द्वितीयसर्गविवरणम् ॥

[आदितः श्लोकाः– ११६९+५८=१२२७]

तृतीयः सर्ग्गः

वैकुण्ठस्येव वैकुण्ठे वने निवसतः सुखम् ।
सार्द्धास्त्रयोदशसमा[1] रामस्यैवं [2]समागमन्[3] ॥ १ ॥

(भा.दी.) श्रीरामस्य दुष्टनिग्रहसमयः प्राप्त इत्याह– **वैकुण्ठस्ये**त्यादिना । वैकुण्ठो वैकुण्ठलोकस्तस्मिन् अर्धेन एकसंवत्सरार्धेन मासषट्केन सहिताः सार्धाः सत्य एव त्रयोदशसमाः । तादृशास्त्रयोदशसमा

---

१. **'सार्धात्रयोदशसमाः'** २. **'रामस्यैवमुपागमन्'** इति वि.ती.पाठः ।

३. अत्र बहुमुखानि व्याख्यानानि पूर्वैः कृतानि दृश्यन्ते । प्राय सर्वाण्यपि मूलभावाविष्करणे विफलानि । तथाहि विद्याभू.व्याख्यानम्–

'सार्धाः अर्धेन सहिताः, मासषट्करूपमर्धं त्रयोदशवर्षपूर्त्यर्थं यदा भविष्यति तादृश्यस्त्रयोदशसमा इत्यर्थः । अयमर्थः कथं लभ्यत इत्याशङ्का न कार्या । एवमनङ्गीकारे बाधकसद्भावात् । तथाहि–'द्वादशे किल मासे मां घ्नन्त्येते दशमो ह्ययम्' इत्युपरि हनुमन्तं प्रति सीतावाक्यम् । 'चतुर्दशवत्सरसमनन्तरमेव रामः स्वपुरीमयोध्यां प्रति नाऽगमिष्यति चेदग्निप्रवेशमहं कुर्याम्' इति च भरतस्य प्रतिज्ञा । तत्र यदि 'सार्धास्त्रयोदशसमाः' इत्यत्र षण्मासाधिकत्रयोदशसमा इत्यर्थाङ्गीकारे परस्परं विरोधः स्यात् । तदुभयविरोधशान्त्यर्थं 'सार्धास्त्रयोदशसमाः' इति पदार्थघटनार्थं चोक्त एवार्थ उपपन्न इति न कोऽपि क्षुद्रोपद्रवः । आ समन्तात् सम्यक् ऋद्धमभिवृद्धमानन्दादिकमर्द्धम् । तेन सहिताः सार्धा इति वा । यद्वा सार्धाः अर्धेन सहिताः लोकदृष्ट्या सीतया सहिताः त्रयोदशं समा इति वा' नैकोऽप्यर्थश्चित्ते लगति । न कवय एवं भाषन्ते येषां वाचमर्थोऽनु-धावति । स्वकपोलकल्पितमप्रज्ञाविलसितमेतत् । विश्वपतितीर्थीयमपीतो नातिभिन्नम् ।

का.श्री. आचार्यस्तु पाठमेव व्यत्स्यस्य पपाठ– सार्धात्रयोदशसमाः' इति । तथाहि तद्व्याख्यानम्–

'सार्धात्रयोदशसमाः मासषट्काधिकद्वादशवत्सराः सुखं यथा तथा समागमन् । ननु सार्धात्रयोदशसमा इत्यत्र पदैक्यमङ्गीकृत्य मासषट्काधिका द्वादश समा अगमन्नित्यर्थ उक्तः । सार्धाः मासषट्केन सहिताः त्रयोदश समा इति पदभेदमङ्गीकृत्य मासषट्काधिकत्रयोदशसमा अगमन्नित्यर्थाङ्गीकारे किं बाधकमिति चेत्, श्रूयतामवधानेन । 'प्रवेक्ष्याम्यग्निमप्रेक्ष्य वत्सरे त्वां चतुर्दशे' (अयो.१२.१०७) इति भरतस्य प्रतिज्ञावाक्येन रामस्य चतुर्दशसमा वनवासकाल इति तावदवगम्यते । पञ्चवट्यामेव मासषट्काधिकत्रयोदशसमा अगमन्नित्यङ्गीकारे मासषट्कमेवोर्वरितमित्यर्थः स्यात् । तदनुपपन्नम् । 'द्वादशे किल मासे मां घ्नन्त्येते दशमो ह्ययम्' इति हनूमन्तं प्रति सीतोक्तवाक्यात् सीताया रावणेनापहारानन्तरं हनुम-द्दर्शनकालस्य दशमासत्वात् तद्विरोधः स्यात् । अत एकपदत्वमङ्गीकृत्य उक्त एवार्थः साधुः । नन्वयमर्थोऽक्षरतः कथं प्राप्त इति चेदुच्यते । अत्रयोदशेति नञः भिन्नार्थत्वेन त्रयोदशभिन्नाः चतुर्दशादयो द्वादशादयश्च भवन्ति । चतुर्दशादीनामङ्गीकारे भरतप्रतिज्ञाविरोधः । एकादशादीनामङ्गीकारे सीतावाक्यविरोधः । उभयान्यथानुपपत्त्या अत्रयोदशशब्देन त्रयोदशाव्यवहितपूर्ववर्तिद्वादशसङ्ख्यैव गृह्यत इति

मासषट्काधिकद्वादशसंवत्सरा इत्युक्तं भवति । ननु सार्धास्त्रयोदशसमा इत्यस्य माषषट्काधिकत्रयोदशसमा इत्यर्थः कुतो न भवतीति शङ्का न कार्या । तथाङ्गीकारे बाधकसद्भावात् । तथाहि– 'द्वादशे किल मासे मां घ्नन्त्येते दशमो ह्ययम्' इत्युपरि हनुमन्तं प्रति सीतावाक्यम् । तेन च श्रीरामवियोगानन्तरं सीतायाः हनुमद्दर्शनसमये दशमासाः (अतीता इति) प्रतीयते । चतुर्दशसंवत्सरानन्तरमेव श्रीरामोऽयोध्यां प्रति नाऽगमिष्यति चेदग्निप्रवेशमेव कुर्यामिति च भरतस्य प्रतिज्ञा । एवं च सार्धास्त्रयोदशसमाः इत्यस्य यदि षण्मासमात्रावशेषेण (त्रयोदशवर्षेणेति नार्थस्तर्हि) 'द्वादशे किल मासे मां घ्नन्त्येते दशमो ह्ययम्' इति सीतावाक्यस्य भरतप्रतिज्ञायाश्च परस्परं विरोधः स्यात् । तदुभयविरोधशान्त्यर्थं सार्धास्त्रयोदशसमा इति वाक्यार्थघटनार्थं चोक्त एवार्थ इति ज्ञायते । किञ्च– 'श्वोभूते पुष्ययोगोऽयं चैत्रमासि च शस्यते । तत्राभिषेक्तुं सम्भारा आदिश्यन्तां यथाविधि' इति चैत्रमासे सङ्कल्पितयौवराज्याभिषेकविघाते सति श्रीरामस्य वनवासः प्रतीयते । 'एतस्मिन्नन्तरे पापा सम्प्राप्ता रावणानुजा' इति हेमन्तर्तौ शूर्पणख्याः श्रीरामसमीपागतिश्च श्रूयते । चैत्रे (वनं) गतस्य हेमन्तर्तोः पूर्वं षण्मासाधिकद्वादशसंवत्सराणामतीतत्वमेव युक्तम् । यद्वा 'यामाहुरात्मनो ह्यर्धं श्रेयस्कामस्य मानिनि' इति भार्यायां भर्तुरर्धत्वेन व्यपदेशादर्धेन स्वात्मार्धतुल्यया सहिताः सार्धाः, लोकदृष्ट्या सीतासाहित्येन प्रमिता इत्यर्थः । त्रयोदशसमाः त्रयोदशसङ्ख्याकाः समा इत्यर्थः । अत एव पाद्मे 'तस्मिन् त्रयोदशाब्दानि रामस्य समतिक्रमुः । गौतम्याश्च तटे पुण्ये पञ्चवट्यां मनोरमे' इत्युक्तिः । न चैवं सति चैत्रे वनं गतस्य कथं हेमन्तसमये त्रयोदशसंवत्सरपूर्तिरिति वाच्यम् । मासानां सौरचान्द्रादिभेदेन बहुत्वात् तन्मध्ये कयाचिद्विवक्षया तत्सम्भवान्न कश्चिद्विरोधः । उपागमन् अगच्छन् ॥ १ ॥

(सं.चं.) वैकुण्ठस्येव वैकुण्ठे । एतेन 'स्वर्गलोके यथाऽमरः' (१५.३१) इति रामायणवचनं गदितार्थम् । स्वर्गलोक इति वैकुण्ठ उच्यते । 'स्वर्गे लोके न भयं किञ्चनास्ति' इति श्रुतेः । अमर इत्यमरप्रभुर्नारायण इति । त्रयोदश समाः समागमन्, रामस्य वने निवसतः । अगमन्निति वक्तव्यम् । कथं समागमन्? न सङ्गताः । नाप्यागताः । गता एव केवलम् । सत्यमेतद् भौतिकानाम् । अध्यात्मवादिनां त्वन्य एव कश्चनार्थः स्फुरति । न केवलं वनदेवताः, दिनमानिन्यो मासमानिन्यो वत्सरमानिन्यश्च देवतास्तं समारिराधयिषवः सङ्गता आगमन्निति । अहो, एतावन्तमनेहसमनाविष्कृतकपाटमिदं पद्यम् । तथाहि –अथ रामायणेऽनुक्तं किञ्चिद् गणितकौतुकमातनोति पण्डिताचार्यः परीचिक्षिषमाण इवाधिजिगांसमानानां प्रज्ञाप्रकर्षम्– सार्द्धास्त्रयोदशसमा

सम्प्रदायविदस्तु, 'सार्धाः त्रयोदशसमाः' इत्येव पदद्वयम् । सार्धा इत्यत्रार्धशब्दस्य अधिकार्थं न्यूनार्धं चेति अर्थद्वयं सम्भावितम् । तत्र अधिकार्धेन सहिताः सार्धा इत्युक्ते मासषट्कसहितत्रयोदशसमा इत्यर्थः स्यात् । स च पूर्वोत्तरविरुद्धः । अतः न्यूनार्धेन सहिताः सार्धा इत्युक्तौ मासषट्काधिकद्वादशसमा इत्यर्थः सम्पद्यते इत्याहुः' इति ।

नितरामस्वरसमिदं व्याख्यानं साम्प्रदायिकादपि । न्यायशास्त्रे पटुरप्ययमाचार्यः साहित्यरसग्रहणे त्वपटुरेवेति स्वयमनेन प्रकटयामास ।

इति । प्रायतन्त च बहवो यथामतिविभवमुत्तरीतुमेतां गणितप्रहेलिकाम् । प्रायः सर्वेऽप्यनुत्तीर्णा एव बभूवुः । तथाहि केचिदाक्षत– रामस्य वने वसतो यावन्तो वर्षा अतीताः, ते सार्धाः वर्षार्धेन सहिताश्चेत् त्रयोदश वर्षा भवन्ति । एवञ्च सार्धद्वादशवर्षा इत्येवोक्तं भवतीति । आ+ऋद्धमर्द्धं समृद्धमानन्दादिकम् । तेन सहिताः सार्द्धास्त्रयोदश वर्षा इत्यपरे समगिरन्त । रामस्य वामार्धेन जानक्या सहितास्त्रयोदश वर्षा इत्येके । अन्ये पुनरन्यथैवामन्यन्त । तेषां मते विसर्गरहितः पाठः सार्धात्रयोदशसमा इति । तथाचार्थं वर्णयन्ति– त्रयोदशसमा न भवन्तीत्यत्रयोदश समाः । सार्धा अत्रयोदशसमा सार्धात्रयोदशसमाः । यद्यपि त्रयोदशभिन्नत्वं चतुर्दशादिष्वपि समानम् । अत्र त्वन्यथानुपपत्त्या त्रयोदशभिन्न इति अव्यवहितपूर्ववर्ती द्वादश एव वर्षो गृह्यत इति । पूर्वोदितेष्वर्थेषु केवलमर्थविप्लव एव । अत्र तु पाठविप्लवोऽपि । सर्वेऽपि कविहृदयमस्पृशन्तश्चस्खलुरिव । प्रादक्षिण्येन नासायामङ्गुलिन्यासोऽयम् । कवयो नैवं भाषन्ते । तर्हि केयं भाषा? कीदृशी भणितभङ्गी? पुराणभाषेयम् । गणितमयी भणितभङ्गीयम् । का पुराणभाषा? ‘त्रयोदशाब्द-साहस्रम्’ (९.९.१८) इति भागवतवचनं स्मरन् कविरिमं श्लोकं निबबन्धेति भागवती भाषेयम् । कामथ गणितमयीं भणितिभङ्गीमङ्गीचकार कविः? श्रूयताम् । यत्र वत्सरमानमपेक्षितादधिकमुच्यते तत्रेडावत्सरमानेन गणनीयमिति पौराणः सम्प्रदायः । तद् यथा– एकादशवर्षसहस्राणि रामो राज्यमकारयदिति सर्वत्रैक-कण्ठ्यम् । एवं स्थिते ‘त्रयोदशाब्दसाहस्रम्’ रामोऽग्निहोत्रमजुहोदिति भागवते । तत्र सप्तविंशतिदिनात्मकनाक्षत्र-मासगणनया विरोधपरिहार इति स्थितमाकरे । ३६० दिनात्मको वत्सरः । (२७x१२=)३२४ दिनात्मको नाक्षत्रो वत्सरः । यमिडावत्सर इत्याचक्षते । एवमत्रापि रामस्य वने वसतो वस्तुतस्त्रयोदशसमा अपि नातीयुः । अथापि सार्द्धास्त्रयोदश समाः समागमन्नित्याह । तेन स्फुटं विज्ञायतेऽत्रोक्ताः समा इडावत्सरा इति । तथाचायं गणितक्रमः– त्रयोदशसमा इति (३२४x१३=)४२१२दिनानि । समाया अर्द्धम् १६२ दिनानि । अर्धेन सहिताः सार्द्धास्त्रयोदश समाः (४२१२+१६२=) ४३७४ दिनानि । अथचेषां वत्सरत्वेन परिवर्तने–

$\frac{४३७४}{३६०} = १२\frac{५४}{३६०}$ द्वादशवत्सराः ५४दिनानि च

अथाप्यपर्याप्तमिदं प्रसङ्ख्यानं भवति । एवं गणने कृते किमायातम्? रामस्य वने वसतस्तदात्वे द्वादशसमाः किञ्चिन्न्यूनं मासद्वयं चातिययुरित्यायातम् । किञ्चिदत्र पूर्ववृत्तं स्मर्तव्यं भवति । रामः किल चैत्रमासे परिसप्ताष्टेषु दिनेष्वतीतेषु पुण्यनक्षत्रे वनं प्रति प्रातिष्ठत । ततश्च सार्द्धानां द्वादशसमानामत्ययो ज्येष्ठमासे भवति । नैतद् युक्तम् । यतो वर्षात्यये शरदि पञ्चवटीगमनम् । पञ्चवट्यां वासावसर एव सार्द्धद्वादशसमासमाप्तिरिति च

मूल एव स्फुटम् । तेनाऽश्विने मासीति साम्प्रतम् । तेनात्र सार्द्धा इति न समोंऽश उच्यते- अर्धमिति । किन्त्वनियतं कालखण्डमुच्यते–अर्द्ध इति । साधिकास्त्रयोदशसमा इत्येतदुक्तं भवति । का साऽधिकसङ्ख्या? वत्सरादर्वाक्तनी या काऽपि स्यात् । ततो यावदाश्विनमपेक्षणीयानि दिनान्यत्र सङ्कलनीयानि । तथाचात्र अर्ध इति न १६२ दिनानि । किन्तु २८८ दिनात्मकं समाशकलमुच्यते । ततश्च संहत्य (४२१२+२८८=)४५०० दिनान्यतीयुरिति पर्यवसितम् । तेषां वत्सरतया परिगणने सार्द्धा द्वादश वत्सरा एव सम्पद्यन्ते–

$\frac{४५००}{३६०} = १२\frac{१}{२}$ इति ।

सेयमपूर्वा गणितचातुरी पण्डिताचार्यस्य । अगणितज्ञोऽपि गणितज्ञः कविरिति ॥ १ ॥

उत्थाय काल्ये[१] कल्याणं देवं गोदावरीं गतम्[२] ।
सीतां कृत्वाऽग्रतो बिभ्रत् कलशं लक्ष्मणोऽन्वगात् ॥ २ ॥

(भा.दी.) उत्थायेति । काल्ये उषःकाले । 'प्रत्यूषोऽहर्मुखं काल्यम्' इत्यमरः । उत्थाय गोदावरीं गतो गोदावरीगतस्तम्, कल्याणं नित्यमङ्गलं देवं श्रीरामम्, लक्ष्मणः कलशो घटस्तं बिभ्रत् दधत् सन्, सीतां अग्रे इत्यग्रतः कृत्वा, अन्वगात् अन्वगच्छत् । इण् गतौ लुङ् ॥ २ ॥

(सं.चं.) उत्थाय काल्ये । 'काल्यमुषः प्रत्यूषम्' इत्यभिधानम् । कलशं कमण्डलुं बिभ्रल्लक्ष्मणः, सीतामग्रतः कृत्वा, तत्पश्चात् स्वयं कल्याणं साधुगुणभरितं राममनुसरन् गोदावरीतीरमगात् ॥ २ ॥

ऋतौ हेमन्त आलोक्य हिमानीपीडितं जगत् ।
प्राञ्जलिः कञ्जनाभं तं[३] सौमित्रिर्वाक्यमब्रवीत् ॥ ३ ॥

(भा.दी.) हेमन्त इति । हेमन्तो हेमन्तसञ्ज्ञकस्तस्मिन् ऋतौ, हिमान्या हिमसंहत्या पीडितं जगत् आलोक्य, प्राञ्जलिः संहताञ्जलिः सन्, कञ्जं कमलं नाभौ यस्य स तथा तं श्रीरामं प्रति, सौमित्रिः वाक्यं वचस्तत् अब्रवीत् ॥ ३ ॥

(सं.चं.)पञ्चवट्यां वसतस्तस्य हेमन्तः समवर्तत । 'हिमसङ्घातो हिमानी च' इत्यभिधानम् ॥ ३ ॥

---

१. **'उत्थाय काले'** २. **'गोदावरीगतम्'** इति वि.ती.पाठः ।

३. **'कञ्जनाभं सः'** इति, **'कञ्जनाभाय'** इति च क्वचित् ।

श्रीहानिदा हिमानीयमन्येषां[१] जाड्यकारणम्[२] ।
न मां त्वत्पादपार्श्वस्थमियं च प्रतिबाधते[३] ॥ ४ ॥

(भा.दी.) श्रीति । श्रियः कान्तेर्या हानिस्तां ददातीति तथा । इयं हिमानी हिमसमूहः । 'हिमानी हिमसंहतिः' इत्यमरः । अन्येषां साधारणजनानां जाड्यस्य आलस्यस्य कारणम् । तव यौ पादौ तयोः, पार्श्वं समीपं तस्मिन्, तिष्ठतीति तथोक्तस्तं माम्, इयं हिमानी न प्रतिबाधते । बाधृ विलोडने लट् ॥ ४ ॥

(सं.चं.) श्रीः शोभा । तस्या हानिदा । निष्प्रभतां जानयन्ती । इयं जनानां जाड्यकारणमपि न मां प्रति जाड्येन बाधते । जाड्यमालस्यम् । कर्तव्यकर्मण्युत्साहविरहः ॥ ४ ॥

इदानीं स्थण्डिलान्नूनमुत्थाय सरयूं गतः ।
त्वत्सङ्गमार्थी भरतः स हि धन्यतमो भुवि ॥ ५ ॥

(भा.दी.) इदानीमिति । तव यः सङ्गमः सहावस्थितिः, तमर्थयितुं शीलमस्यास्तीति तथोक्तः भरतः, इदानीमेतस्मिन् समये, स्थण्डिलं स्थण्डिलप्रदेशस्तस्मात् उत्थाय सरयूं स्नानार्थं गतः स्यात्, नूनम्, सः अस्यां भुवि धन्यतमो हि ॥ ५ ॥

(सं.चं.) स्थण्डिलशायी केवलभूमिशायी भरतः प्रगे स्थण्डिलादुत्थाय नूनं सरयूं गतः, यथाऽऽवां गोदावरीं गतौ, न तस्यापि हिमानी जाड्यकारणम् ॥ ५ ॥

कष्टं कथं नु कैकेयी[४] भूत्वा दशरथप्रिया ।
सूत्वा च भरतं साधुं तदघं[५] कृतवत्यहो ॥ ६ ॥

(भा.दी.) कथमिति । कैकेयी दशरथस्य प्रिया भार्या भूत्वा, साधुं भरतं (च) सूत्वा प्रसूय, कष्टं दुष्टं तत् त्वद्राज्यविभ्रंशलक्षणं अघमपराधम्, कथं (नु) कथमेव कृतवती? अहो आश्चर्यम् । सत्कुलप्रसूतत्वादि-गुणविशिष्टाया एतादृशदुष्टकर्माचरणमत्याश्चर्यमिति भावः ॥ ६ ॥

(सं.चं.) भरतस्मरणेन कैकेयी च स्मृतिपथं गता । आह लक्ष्मणः– कष्टं कथं नु कैकेयी । नामग्रहणेन आक्रोशं व्यनक्ति । कीदृशस्य पुत्रस्य कीदृशी मातेति ॥ ६ ॥

---

१. **'हिमानीयं सर्वेषाम्'** इति, **'हिमानीयं जनानाम्'** इति च । २. **'जाड्यकारिणी'**

३. **'–मियं सा प्रतिबाधते'** इति, **'–मियं सम्प्रति बाधते'** इति च ।

४. **'कथं कष्टं नु कैकेयी'** इति वि.ती.पाठः स्यात् । **'कष्टं कथं सा कैकेयी'** इति, **'कथं कथय कैकेयी'** इति च क्वचित् । ५. **'त्वदघम्'**

इत्युक्त ऊचे भगवान् कार्य्यो नो रक्षसां वधः ।
तस्माद् वनप्रवेशोऽत्र[1] सा निमित्तमभूदिति ॥ ७ ॥

(भा.दी.) **इतीति** । इति लक्ष्मणेनोक्तः भगवान् श्रीरामः, येन हेतुना, नःअस्माकं रक्षसां रावणादीनां वधः कार्यः, तस्मात् वनस्य प्रवेशः नः अभूत् । सा कैकेयी तु अत्र वनप्रवेशे निमित्तमभूत् इति ऊचे ॥ ७ ॥
(सं.चं.) रक्षसां वधः कार्यः । तदर्थं वनप्रवेशश्च कार्यः । तत्र सा निमित्तं बभूवेति कथमम्बा गर्हणीया? ॥ ७ ॥

स्नात्वा शालामुपागम्य कृतपौर्वाह्णिकक्रियः ।
सानन्दं[2] सीतया साकमास्ते स्म जगदीश्वरः ॥ ८ ॥

(भा.दी.) **स्नेति** । जगदीश्वरः श्रीरामः गोदावर्यां स्नात्वा, शालां प्रति उपागम्य, पूर्वाह्णे भवा पौर्वाह्णिकी सा च सा क्रिया च, कृता पौर्वाह्णिकक्रिया येन स तथा सन्, सीतया साकम्, आनन्देन सहितं यथा भवति तथा सानन्दम्, आस्ते स्म ॥ ८ ॥

(सं.चं.) 'कृत्वा पौर्वाह्णिकं कर्म पर्णशालामुपागमत्' (१७.२) इत्यस्याभिप्रायमाह– स्नात्वा शालामुपागम्य कृतपौर्वाह्णिकक्रिय इति । 'कर्तुं पौर्वाह्णिकं कर्म' इत्यपि रामायणमूलपाठः स्यात् । 'स्नात्वा कृतपौर्वाह्णिकक्रियः शालामुपागम्य' इति वाऽन्वयः । अह्नः पूर्वं पूर्वाह्णः । 'अह्नोऽह्न एतेभ्यः' (अ.सू.५.४.८८) इत्यहन्शब्दस्य अह्नादेशः । 'अह्नोऽदन्तात्' (८.४.७) इति नस्य णकारादेशः ॥ ८ ॥

एतस्मिन्नन्तरे पापा सम्प्राप्ता रावणानुजा ।
पतिमन्विष्य धावन्ती त्रिलोक्यां[3] रावणाज्ञया ॥ ९ ॥

(भा.दी.) **एतस्मिन्निति** । रावणाज्ञया त्रिलोक्यां पतिं स्वयोग्यभर्तारं अन्विष्य विचारं कृत्वा धावन्ती पर्यटन्ती पापा क्रूरा रावणानुजा सा शूर्पणखा, एतस्मिन्नन्तरं मध्यं तस्मिन्, वर्तमानप्रसङ्गसमय इत्यर्थः, वर्तमाने हेमन्तर्तुमध्ये इति वा । सम्प्राप्ता श्रीरामनिकटं प्रत्यागता ॥ ९ ॥
(सं.चं.) एतस्मिन्नन्तरे अवसरेऽवकाशे वा । सीतारामयोः सङ्कथामध्ये वा । 'ಈ ನಡುವೆ' इति भाषायाम् । रावणानुजा शूर्पणखा । पतिमन्विष्य धावन्ती पत्युरन्वेषणार्थं त्वरमाणा सञ्चरन्ती ॥ ९ ॥

---

१. **'वनप्रवेशे च सा'** २. **'सानन्दः'** इति, **'ससुखः'** इति च । ३. **'त्रिलोकान् राव–'**

परचक्रेण खचिते निहते निजभर्त्तरि ।
प्रमादाद् राक्षसेन्द्रेण ततः सा व्यचिनोत् पतिम्[१] ॥ १० ॥

(भा.दी.) पत्युरन्वेषणे कारणमाह– **परे**ति । परेषां शत्रूणां चक्रं सैन्यं तेन, 'चक्रं सैन्यं जलावर्तः' इति वैजयन्ती । खचिते मिश्रीभूते । रावणेन दिग्विजये क्रियमाणे रावणस्य कालकेयैः सह युद्धसमये कालकेयसैन्यगत इत्यर्थः । निजः स्वकीयो भर्ता विद्युज्जिह्वनामकस्तस्मिन् । 'ददौ तां कालकेयाय दानवेन्द्राय राक्षसीम् । स्वसां शूर्पणखां नाम विद्युज्जिह्वाय नामतः' इत्युक्तेः । राक्षसेन्द्रेण रावणेन, प्रमादोऽनवधानं तस्मात्, अज्ञानादित्यर्थः, निहते सति, ततः तदनन्तरम्, सा पतिं व्याचिनोत् मार्गयामास ॥ १० ॥

(सं.चं.)परचक्रेण शत्रुसैन्येन खचिते सम्पृक्ते, परसैन्यमध्यगते निजभर्तरि विद्युज्जिह्वे राक्षसेन्द्रेण रावणेन प्रमादात् बुद्धेरनवधानात्, कश्चन शत्रुसैनिकेष्वेक इति भ्रान्त्या निहते । ततः राक्षसेन्द्रादेव, तदभ्यनुज्ञानादेव पतिं व्यचिनोत् मार्गमाणा बभूव ॥ १० ॥

त्रैलोक्यसुन्दरं रामं प्राप्य[२] त्रैलोक्यदुर्भगा ।
शूर्प्पणख्यब्रवीदारादार्त्ता स्मरशराहता ॥ ११ ॥

(भा.दी.) **त्रैलोक्ये**ति । त्रैलोक्ये दुष्टं भगो भाग्यं यस्याः सा तथा, स्वभावतोऽत्यन्तासौम्यरूपेत्यर्थः, आर्ता पतिवियोगदुःखिता, शूर्पणखी, त्रैलोक्ये सुन्दरं श्रीरामं आरात् प्राप्य, स्मरस्य कामस्य यः शरस्तेन आहता ताडिता सती, श्रीरामसौन्दर्यं दृष्ट्वा कामातुरेत्यर्थः, अब्रवीत् ॥ ११ ॥

(सं.चं.)दुर्भगा विकृतरूपा । आरात् समीपं प्राप्य । आराद् दूरादेव रामं दृष्ट्वा स्मरशराहता वा । शूर्पणखीति । अस्य साधुत्वमुक्तं पुरस्तात् । 'ततः शूर्पणखी दृष्ट्वा सहस्राणि चतुर्दश । हतान्येकेन रामेण–' (२१.१) इति च वाल्मीकिप्रयोगः । केचिदणकारमेव पदं पठन्ति– शूर्पनखीति ॥ ११ ॥

कान्त कामयमानां मां कान्तां वह तवोचिताम् ।
[३]अल्पया सीतया किं ते नन्वहं रावणानुजा ॥ १२ ॥

(भा.दी.) **कान्ते**ति । हे कान्त मनोहर श्रीराम, तव (उचितां कामयमानां कान्तां भार्यां मां वह ।) सौन्दर्यादिना मत्तः स्वल्पया सीतया ते किं प्रियोजनम्? अहं भाग्यादिनाऽतिमहतीत्याह– नन्विति । अहं रावणस्य अनुजा भगिनी ननु? इति अब्रवीदिति सम्बन्धः ॥ १२ ॥

---

१. **'व्याचिनोत् पतिम्'** इति वि.ती.पाठः स्यात् । २. **'रामं दृष्ट्वा'** इति, **'रामं प्रेक्ष्य'** इति च । ३. **'स्वल्पया'** इति वि.ती.पाठः ।

(सं.चं.) तवोचितां कान्तां भार्याम् । वह उद्वह । अल्पया कृशाङ्ग्या अल्पभाग्यया च । अहं सर्वथाऽनल्पा । कुतः? नन्वहं रावणानुजा ॥ १२ ॥

इत्युक्त ऊचे भगवान् पश्यन् सीतामुखाम्बुजम् ।
अस्यां सक्तोऽस्म्यहं भद्रे[1] मद्भ्राता ते भवेदिति ॥ १३ ॥

(भा.दी.) इतीति । इति शूर्पणखया उक्तः भगवान् श्रीरामः, सीताया यन्मुखं तदेवाम्बुजं तत् पश्यन् सन्, हे भद्रे शोभने शूर्पणखे, अहं अस्यां सीतायां सक्तः आसक्तः अस्मि, ते तव मम भ्राता लक्ष्मणः भवेत् , पतिरिति शेषः, इति ऊचे ॥ १३ ॥

(सं.चं.) मद्भ्राता तेऽनुरूपो भर्ता भवेदिति ॥ १३ ॥

राक्षसी लक्ष्मणं प्राप्य प्रोचे मन्मथमोहिता ।
तरुण त्वमदारोऽसि[2] मम भर्त्ता भवेरिति ॥ १४ ॥

(भा.दी.) राक्षसीति । मन्मथेन कामेन मोहिता राक्षसी लक्ष्मणं प्राप्य, हे तरुण, त्वं उदारः उत्कृष्टः असि, मम भर्ता भवेः इति प्रोचे ॥ १४ ॥

(सं.चं.) अदारः अकृतदारः । 'श्रीमानकृतदारश्च लक्ष्मणो नाम वीर्यवान्' (१८.३) इति रामवचनं शूर्पणखां प्रति । तदेव सा लक्ष्मणपुरत आह–तरुण त्वमदारोऽसीति । त्वमदारः । अहं चापतिरिति दैवविहितमावयोर्दाम्पत्यम् । 'उदारोऽसि' इति पाठे उदारो विदग्धः स्त्रीहृदयाभिज्ञोऽसीत्यर्थः ॥ १४ ॥

अहं शुश्रूषुरार्य्यस्य गच्छाऽर्य्यं वरवर्ण्णिनि ।
त्वां विना कमनीया का स्यादित्थं लक्ष्मणोऽब्रवीत् ॥ १५ ॥

(भा.दी.) अहमिति । अहं आर्यस्य श्रेष्ठस्य, सेवितुमिच्छति शुश्रूषति, शुश्रूषतीति शुश्रूषुः अस्मि । अतो न विषयासक्त इति भावः । हे वरवर्णिनि अङ्गने शूर्पणखि, आर्यं श्रीराममेव गच्छ । त्वां विना का स्त्री कमनीया मनोहरा स्यात्? इयमपहासोक्तिः । लक्ष्मणः इत्थं अब्रवीत् ॥ १५ ॥

---

१. **'सक्तोऽस्मि भद्रेऽहम्'** २. **'त्वमुदारोऽसि'** इति वि.ती.पाठः ।

(सं.चं.) आर्यस्य अग्रजतया पूज्यस्य रामस्य । '७ळ्ळु' इति भाषायाम् । त्वं पुनरार्यमेव गन्तुं योग्या । न सेवकं माम् । ननु त्वं रावणानुजा । कमनीया का? अकमनीया केति ध्वनिः ॥ १५–६ ॥

तयोरिमां हास्यकथामजानन्ती स्मरार्दिता ।
राक्षसी विकृताकारा पुना राममुपागमत् ॥ १६ ॥

(भा.दी.) तयोरिति । तयोः श्रीरामलक्ष्मणयोः इमां हास्यकथां हास्यरूपां कथाम्, परिहासरूपसम्भाषणमित्यर्थः, अजानन्ती, स्मरेण कामेन अर्दिता राक्षसी, विकृतः कराळवक्त्रत्वादिविकारं प्राप्त आकारो यस्याः सा तथा सती, श्रीरामं पुनरुपागमत् । गमेर्लुङ् ॥ १६ ॥

त्वमेव मम कान्तोऽसि सपत्नीयं स्थिता मम[1] ।
अदान्येनामिति क्रूरा सीतामभ्यद्रवद् द्रुतम् ॥ १७ ॥

(भा.दी.) त्वमिति । मम कान्तः भर्ता त्वमेव असि । त्वत्समीपे स्थिता इयं सीता मम सपत्नी । अतः एनां सीतां अदानि भक्षयाणि । अद भक्षणे लोट् । इति वदन्ती, क्रूरा भयङ्करी सती सीतां द्रुतं यथा भवति तथा अभ्यद्रवत् ॥ १७ ॥

(सं.चं.) अदानि भुनजै इति वदन्ती सीतामभ्यद्रवत् ॥ १७ ॥

राघवस्य मतं ज्ञात्वा लाघवाद् राघवानुजः ।
चकर्त्त कर्णौ नासां च राक्षस्याः खड्गधारया ॥ १८ ॥

(भा.दी.) राघवेति । राघवानुजः लक्ष्मणः, राघवस्य श्रीरामस्य, मतमभिप्रायस्तत्, ज्ञात्वा राक्षस्याः कर्णौ नासां नासिकां च, खड्गधारया लाघवं शैघ्र्यं तस्मात् चकर्त । कृती च्छेदने लिट् ॥ १८ ॥

(सं.चं.) लाघवात्, लाघवं लघुत्वं शैघ्र्यम् । तदाश्रित्य । धारा निशितोऽग्रभागः ॥ १८–९ ॥

विस्वरं विरुदन्ती[2] सा स्नाता रुधिरधारया ।
जगाम शरणं घोरा भ्रातरौ खरदूषणौ[3] ॥ १९ ॥

---

१. **'सपत्नीयं मम स्थिता'** इति, **'सपत्नीयं यतः स्थिता'** इति च । २. **'विस्तरं प्ररुदन्ती'**

३. **'भ्रातरौ शूर्पणख्या मातृष्वसुः पुत्रौ खरदूषणनामकौ राक्षसौ शरणं कुरुतमिति जगाम'** इति का.श्री. ।

(भा.दी.) विस्वरमिति । विविधः स्वरो यथा भवति तथा विस्वरं विरुदन्ती, रुधिरस्य धारया स्नाता, सा घोरा शूर्पणखा, भ्रातरौ खरश्च दूषणश्च तौ राक्षसौ, शरणमरणं तत् जगाम ॥ १९ ॥

(सं.चं.) विकृतस्वरं विकटं रुदन्ती । कैकसी शूर्पणखाया जननी । कैकयीस्वसा खरस्य जननीति स शूर्पणखाया भ्राता । दूषणः कैकसीस्वसुर्बलाकायास्तनय इति वदन्ति । राकाया एव बलाकेति नामान्तरं स्यादिति भाति । नहि बलाका नाम कैकसीस्वसा रामायणे पठ्यते ॥ १९ ॥

कस्य पास्यन्ति रुधिरं कङ्कपत्रा ममाधुना ।
अजिता विजिता केन त्वमित्यूचे खरोऽथ ताम् ॥ २० ॥

(भा.दी.) कस्येति । अथ खरः, मम कङ्कपत्राः शराः अधुना कस्य पुरुषस्य, रुधिरं रक्तं तत्, पास्यन्ति पानं करिष्यन्ति । पातेर्लृट् । अजिता केनाऽप्यजिता त्वं केन पुरुषेण विजिता पराजिता असि? इति तां ऊचे ॥ २० ॥

(सं.चं.) मम कङ्कपत्रा बाणाः । 'कङ्कपत्रशरमार्गणबाणाः' इत्यभिधानम् । केनाप्यजिता सम्प्रति केन विजिता? ॥ २० ॥

तरुणौ तरुणीयुक्तौ वैरिणौ मे वनान्तरे ।
तयोः पिबेयं रक्तौघमिति राक्षस्यभाषत[1] ॥ २१ ॥

(भा.दी.) तरुणाविति । तरुणौ युवानौ, तरुण्या स्त्रिया युक्तौ, मे मम वैरिणौ, वनस्यान्तरं मध्यं तस्मिन्, तिष्ठतः । तयोः पुरुषयोः रक्तानामोघः समूहस्तं पिबेयम् । पा पाने लिङ् । इति राक्षसी खरं प्रति अभाषत ॥ २१ ॥

(सं.चं.) तरुणीयुक्तयोः तयोः पिबेयं रक्तौघं रुधिरधाराम् ॥ २१ ॥

खरः खरानादिदेश चतुर्द्दश निशाचरान् ।
ते तया सार्द्धमाजग्मुर्य्यत्र रामो रमासखः ॥ २२ ॥

(भा.दी.) खर इति । खरः खरनामकः राक्षसः, खरान् क्रूरान्, चतुर्दश चतुर्दशसङ्ख्याकान् निशाचरान्, श्रीरामं गन्तुमादिदेश । ते खरप्रेषिताः चतुर्दश राक्षसाः, तया शूर्पणखया सार्धम्, यत्र वने रमायाः सखा रमासखः श्रीरामस्तिष्ठति तत्र आजग्मुः आगताः ॥ २२ ॥

---

१. **'राक्षस्यवोचत' । 'अवोचत । ब्रूञ् व्यक्तायां वाचि लुङ् । ब्रुवो वचिः'** इति का.श्री. ।

(सं.चं.) खरान् क्रूरान् । ते चतुर्दश निशाचराः । तया शूर्पणखया ॥ २२ ॥

आदत्त दत्तारिभयं चापं चामीकरोज्ज्वलम् ।
आलोक्य लोकनाथस्तान् वचनं चेदमब्रवीत् ॥ २३ ॥

(भा.दी.) आदत्तेति । लोकनाथः श्रीरामः, तान् राक्षसान् आलोक्य, दत्तं अरीणां भयं येन स तथा तम्, चामीकरेण सुवर्णेन उज्वलं प्रकाशमानम्, चापं आदत्त आददे । इदं वचनं च अब्रवीत् ॥ २३ ॥

(सं.चं.) दत्तमरीणां भयं येन । कार्तस्वरमयम्, अत एवोज्ज्वलम् । 'जाम्बूनदं हिरण्यं कनकमहारजत-काञ्चनानि स्युः । कार्तस्वरचामीकरकर्बुरतपनीयनामानि' इत्यभिधानम् । चापश्चापं वा । 'अस्त्रियौ चापधनुषौ' इति यादवप्रकाशः । तान् शूर्पणखामुखान् राक्षसान् । इदं वक्ष्यमाणम् ॥ २३ ॥

ब्रह्मद्रुहो वो वत्स्यामि[१] यदि मे तिष्ठथाग्रतः[२] ।
इत्युक्ता आक्षिपन्ति स्म राक्षसा रूक्षलक्षणाः ॥ २४ ॥

(भा.दी.) ब्रह्मेति । यदि मे अग्रे इत्यग्रतः यूयं तिष्ठथ, तर्हि ब्रह्म ब्राह्मणान् वेदान् वा द्रुह्यन्ति निन्दन्तीति वा ब्रह्मद्रुहस्तान् वः युष्मान् वत्स्यामि हनिष्यामि । वध संप्रहारे लृट् । इति श्रीरामेण उक्ताः, रूक्षाणां क्रूराणां लक्षणं चिह्नं येषां ते तथा, राक्षसाः, आक्षिपन्ति स्म श्रीराममकुत्सयन् ॥ २४ ॥

(सं.चं.) वत्स्यामि इति पठन्ति । हनिष्यामि इति व्याख्यान्ति । 'वध सम्प्रहारे' इति च धातुपाठं पठन्ति । न जानीमहे तेषामाशयमित्यवादिष्म । कश्चन लिपिकृत्प्रमादः सम्भाव्यते । 'योत्स्यामि' इति क्वचित् पाठः । स्यादपि । किन्तु पाणिनीया न सहेरन् । ते हि युधधातुमकर्मकमात्मनेभाषं च पठन्ति । 'वस्यामि' इत्यपि पाठः स्यादित्युक्तम् । अथापि नान्ततो हृदयमावर्जयति । हनिष्यामीत्यर्थतः सुन्दरम् । किन्तु हन-धातोर्लृटि वधादेशः, वधादेशेऽप्यनिट्त्वं च कथमिति चिन्त्यम् । आक्षिपन्ति स्म आचक्रमुः । आचिक्षि-पुश्चाऽयुधानि । रूक्षलक्षणाः रूक्षस्वभावाः ॥ २४ ॥

शस्त्रास्त्रवृष्टिं दुर्द्धर्षां शरैश्छित्वाऽथ[३] रक्षसाम् ।
चतुर्दश शरांस्तीक्ष्णान् रुग्मपुङ्खानमुञ्चत ॥ २५ ॥

---

१. **'योत्स्यामि'** २. **'तिष्ठताग्रतः'** इति पठन्तो भ्रान्ताः । **'तिष्ठत कोट् मध्यमपुरुषबहुवचनम्'** इति का.श्री. व्याख्यानं चिन्त्यम् ।
३. **'शरैश्छित्वा स रक्षसाम्'** इति, **'शरैश्छित्वा च'** इति, **'शरैश्छित्वा तु'** इति च क्वचित् ।

(भा.दी.) शस्त्रेति । अथ श्रीरामः, दुर्धर्षामसह्याम्, रक्षसां शस्त्राणि च अस्त्राणि च तेषां वृष्टिम्, शराः सायकास्तैः छित्वा, रुग्ममयः स्वर्णमयः पुङ्खो येषां ते तथा तान्, तीक्ष्णान् चतुर्दश च ते शराश्च तान् अमुञ्चत । मुच्लृ मोक्षणे लङ् ॥ २५ ॥

(सं.चं.) दुर्धर्षां सोढुमशक्यामन्यैः । पुङ्खः काण्डमूलम् ॥ २५ ॥

शरास्तेऽथ[1] शरीराणि नृशरीराशिनां क्षणात् ।
भित्त्वा धरातळेऽमज्जन् राक्षसा निरयेऽशुचौ ॥ २६ ॥

(भा.दी.) शरा इति । अथ ते शराः, नृणां शरीराणि अशितुं शीलमेषामस्तीति तथा तेषां राक्षसानाम्, शरीराणि क्षणः क्षणकालस्तस्मात्, भित्त्वा धरायास्तळं प्रदेशस्तस्मिन् अमज्जन् । टु मस्जो शुद्धौ लङ् । राक्षसाः, शुचिः न भवतीत्यशुचिस्तस्मिन् निरये नरकेऽमज्जन्, नरकं प्राप्ता इत्यर्थः ॥ २६ ॥

(सं.चं.) राक्षसा निरयेऽमज्जन् ॥ २६ ॥

दुःखाच्छूर्प्पणखी गत्वा रुरोद खरसन्निधौ ।
क्लीबोऽसि त्वं मनुष्याभ्यां भीतः शेषे गृहेष्विति ॥ २७ ॥

(भा.दी.) दुःखादिति । शूर्पणखी, राक्षसवधजन्यं यद्दुःखं तस्मात्, गत्वा, खरस्य सन्निधिः समीपं तस्मिन्, रुरोद । यस्मात् मनुष्याभ्याम्, पञ्चमीयम्, भीतः सन् गृहेषु । 'गृहाः पुंसि च भूम्न्येव' इत्यमरः । शेषे शयनं करोषि (तस्मात् त्वं क्लीबोऽसि) इति रुरोद ॥ २७ ॥

(सं.चं.) क्लीबोऽसि विक्रमहीनोऽसि । 'क्लैब्यं मा स्म गमः पार्थ' इति च गीतासु ॥ २७ ॥

अञ्जनाद्रिशरीराणां रक्षसां भीमकर्म्मणाम् ।
चतुर्द्दशसहस्राणि प्रातिष्ठन्त खराज्ञया ॥ २८ ॥

(भा.दी.) अञ्जनेति । अञ्जनाद्रिवदतिकृष्णानि शरीराणि येषां तानि तथोक्तानि तेषाम्, भीमं भयङ्करं कर्म येषां तानि तेषाम्, रक्षसां चतुर्दश च तानि सहस्राणि च, खराज्ञया प्रातिष्ठन्त युद्धार्थमुत्थितानि ॥ २८ ॥

---

१. 'शरास्तेषां शरीराणि'

(सं.चं.) शूर्पणखीवचोविद्धः खरः चतुर्दश सहस्राणि रक्षसामाज्ञापयामास । खराज्ञया च तानि योद्धुं प्रातिष्ठन्त । 'समवप्रविभ्यः स्थः' (अ.सू.१.३.२२) इत्यात्मनेभाषता ॥ २८ ॥

खरोऽद्रिशिखरप्रख्यं कार्त्तस्वरमयं रथम् ।
आरुह्य रक्षसां मद्ध्ये ययौ दूषणसंयुतः ॥ २९ ॥

(भा.दी.) खर इति । खरः, अद्रेः शिखरं शृङ्गं तस्य प्रख्यः सदृशस्तम् । 'सदृशः सदृक्षः प्रख्यः प्रकाशः' इति हलायुधः । कार्तस्वरस्य सुवर्णस्य विकारः कार्तस्वरमयस्तं सुवर्णात्मकमित्यर्थः, रथं आरुह्य दूषणाख्येन स्वभ्रात्रा संयुतः सन्, रक्षसां मध्यं मध्यप्रदेशस्तस्मिन् ययौ ॥ २९ ॥

(सं.चं.) दूषणेन भ्रात्रा संयुतः ॥ २९ ॥

दिव्यान् भौमांश्च शारीरानुत्पातानभिवीक्ष्य च ।
खरः प्रखरसंरम्भादनादृत्यैव तान् ययौ ॥ ३० ॥

(भा.दी.) दिव्यान्इति । खरः, दिवि भवाः दिव्यास्तान् उल्कापातादीन् उत्पातान्, भूमौ भवाः भौमाः भूकम्पादयस्तान् उत्पातान्, शरीरे भवाः शारीरा वामाक्षिस्फुरणादयस्तान् उत्पातांश्च, अभिवीक्ष्य च युद्धार्थं गमनसमये दृष्ट्वाऽपि, प्रखरो यः संरम्भः तस्मात्, अतिप्रबलकोपादित्यर्थः, तानुत्पाताननादृत्यैव ययौ ॥ ३० ॥

(सं.चं.) दिव्यानुत्पातान्–'तस्मिन् याते जनस्थानादशिवं शोणितोदकम् । अभ्यवर्षन् महामेघास्तुमुलो गर्दभारुणाः' (२३.१) इत्यादि । भौमान्–'प्रचचाल मही सर्वा सशैलवनकानना' (२३.१६) इत्यादि । शारीरान्–'प्राकम्पत भुजः सव्यः स्वरश्चास्यावसज्जत । सास्रा सम्पद्यते दृष्टिः पश्यमानस्य सर्वतः' (२३.१७) इत्यादि च । प्रखरोऽदम्यः संरम्भो दर्पः ॥ ३०–२ ॥

एतस्मिन्नन्तरे रामः सौमित्रिं प्रत्यभाषत ।
निमित्तैर्विद्धि युद्धं नः सौमित्रे[१] प्रत्युपस्थितम् ॥ ३१ ॥

---

१. **'युद्धं नो लक्ष्मण प्रत्युप–'**

(भा.दी.) एतस्मिन्निति । एतस्मिन्नन्तरं मध्यं तस्मिन्, शूर्पणखागमनानन्तरं खरागमनात्पूर्वकाल इत्यर्थः, श्रीरामः, हे सौमित्रे, निमित्तानि शकुनानि तैः (नः) युद्धं प्रत्युपस्थितं सम्प्राप्तं (विद्धि) विजानीहि[१] । इति सौमित्रिं लक्ष्मणं प्रति अभाषत ॥ ३१ ॥

एष बाहुः[२] स्फुरति मे चापं चेदं विचेष्टते ।
बिलेऽस्मिन् तिष्ठ वैदेह्या सार्द्धं शरधनुर्द्धरः ॥ ३२ ॥

(भा.दी.) एष इति । मे मम एषः बाहुः हस्तः स्फुरति चलति । स्फुर सञ्चलने लट् । इदं चापं च विचेष्टते स्वयमेव चलति । चेष्ट चेष्टायां लट् । त्वं शराश्च धनुश्च तानि धारयतीति तथोक्तः तथा सन्, वैदेह्या सार्धम्, अस्मिन् बिलं गुहा तस्मिन् तिष्ठ ॥ ३२ ॥

एवमुक्तो भगवता तथा चक्रे स लक्ष्मणः ।
रामोऽप्यनाकुलस्तस्थौ सवर्म्मा धृतकार्म्मुकः[३] ॥ ३३ ॥

(भा.दी.) एवमिति । भगवता श्रीरामेण एवं उक्तः सः लक्ष्मणः तथा उक्तरीत्या चक्रे । वर्मणा कवचेन सहितः सवर्मा, बद्धकवच इत्यर्थः, धृतं कार्मुकं येन स तथा श्रीरामोऽपि, आकुलो न भवतीत्यनाकुलः असम्भ्रान्तः सन् तस्थौ ॥ ३३ ॥

(सं.चं.) अनाकुलः अभीतः, असम्भ्रान्तः । सवर्म्मा सकवचः । सन्नद्धकार्मुकः ॥ ३३ ॥

रक्षोगणः प्रक्षुभितो गत्वा भग्नजवोऽभवत् ।
आलोकसीमां रामस्य वेलामिव महोदधिः ॥ ३४ ॥

(भा.दी.) रक्ष इति । प्रक्षुभितः क्रोधेन क्षुब्धः, रक्षसां गणः, श्रीरामस्य आलोक एव दर्शनमेव सीमा अवधिस्तां गत्वा, श्रीरामं दृष्ट्वेत्यर्थः, महान् य उदधिः समुद्रः, वेलां तीरं गत्वेव, भग्नः जवो यस्य सः तथा अभवत् ॥ ३४ ॥

---

१. **'जानीहि युद्धं सौमित्रे निमित्तैः प्रत्युपस्थितम्'** इत्यपि वि.ती.पाठः स्यात् ।

२. **'बाहुः वामबाहुः स्फुरति । नेत्रादिचलनमपि द्रष्टव्यम् । तेन निमित्तैरिति बहुवचनोपपत्तिः'** इति.का.श्री. ।

३. **'सवर्मोद्धृतकार्मुकः'**

(सं.चं.) गमनसमय एव प्रक्षुभितः भीतः, जये ससंशयः। गत्वा भग्नजवोऽभवत्। 'दरितश्चकितो भीतस्त्रस्तो भीरुश्च कातरः। क्षुभितः शङ्कितश्चेति नातिनानार्थवाचकाः' इत्यभिधानम्। क्षुभित उच्चलितो वा। महोदधिः क्षुभित उल्लोलकल्लोलः। सीमाऽवधिः। 'सीमा तु सीमा मर्यादा' इति यादवप्रकाशः। 'सीमसीमे तु कूलेऽपि' इति च। रामावलोकनावधिस्तेषां जव इत्यर्थः ॥ ३४ ॥

अमर्षितः[1] खरः प्रागात्[2] परितस्तमथापरे[3] ।
श्येनगामी पृथुग्रीवो यज्ञशत्रुर्म्महाविषः ॥ ३५ ॥

दुर्ज्जयः करवीराक्षः परुषः कालकार्म्मुकः ।
मेघमाली महाबाहुर्म्महास्यो लोहिताम्बरः ॥ ३६ ॥

द्वादशैते महावीर्य्याः प्रेरयन्तश्चमूं ययुः[4] ।
अहं पूर्वमहं पूर्वमिति मत्ताः ससाहसाः[5] ॥ ३७ ॥

(भा.दी.) अमर्षित इति। अमर्षितः कुपितः खरः युद्धार्थं प्रागात्। इण् गतौ लुङ्। अथ तं खरं परितः, श्येनवद्गन्तुं शीलमस्यास्तीति तथा, अत एव तन्नामा, पृथुः ग्रीवा यस्य स तथा, अत एव तन्नामकः, यज्ञस्य शत्रुः, महाविषः, महत् विषं यस्य स तथा, जेतुमशक्यो दुर्जयः, करवीरपुष्पवदक्षिणी यस्य स तथा, परुषो निष्ठुरः, तत एव तन्नामा, कालवत् कार्मुकं यस्य स तथा, मेघवन्नीलवर्णा माला यस्य स तथा, महान्तौ बाहू यस्य स तथा, महदास्यं मुखं यस्य स तथा, लोहितं रक्तमम्बरं यस्य स तथा, द्वादशसङ्ख्याकाः, महद्वीर्यं येषां ते तथा, चमूं प्रेरयन्तः, मत्ताः बलोन्मत्ताः, साहसेन प्रयत्नेन सहिताः एते राक्षसाः, अहं पूर्वं प्रथमतः योद्धुं गच्छामि अहं पूर्वं गच्छामीति वदन्तः सन्तः ययुः ॥ ३५–७ ॥

(सं.चं.) तं परितः परिवार्यापरे द्वादश चमूनाथाः। श्येनगामी पृथुग्रीव इत्यादि। सम्प्रति रामायणे किञ्चिदिवान्यथा पठ्यते–'श्येनगामी पृथुग्रीवो यज्ञशत्रुर्विहङ्गमः। दुर्जयः करवीराक्षः परुषः कालकार्मुकः। मेघमाली महामाली सर्पास्यो रुधिराशनः। द्वादशैते महावीर्या बलाध्यक्षाः ससैनिकाः' (२६.२६–७) इति। अत्र महाविषो विहङ्गमो बभूव। महाबाहुर्महामाली। महास्यः सर्पास्यः। लोहिताम्बरो रुधिरा-

१. 'अमर्षितः तितिक्षारहितः। कुपित इति यावत्' इति का.श्री.।
२. 'प्रायात्'
३. 'परितस्तं तथाऽपरे'
४. 'प्रेषयन्तश्चमूर्ययुः'
५. 'साहसेन सहनशक्त्या सहिताः। शूरा इत्यर्थः' इति का.श्री.।

शनः। दिष्ट्या लिकुचान्वयकृपया लब्धप्राचीनपाठाः सुकृतिनो वयम्। साहसमविमृश्यकारिता। 'ದುಡುಕು' इति भाषायम् ॥ ३५–८ ॥

महाकपालः स्थूलाक्षः प्रमाथी त्रिशिरास्तथा ।
चत्वार एते सेनाग्रे वीरा दूषणमन्वगुः[1] ॥ ३८ ॥

(भा.दी.) महेति । महान् कपालो यस्य स तथा अत एव तत्सञ्ज्ञकः, स्थूले अक्षिणी यस्य स तथा, प्रमथ्नाति शत्रूनिति प्रमाथी, त्रीणि शिरांसि यस्य स तथा, इति चत्वारः वीराः, एते राक्षसाः, सेनाया अग्रं तस्मिन्, दूषणं दूषणनामकं खरभ्रातरं अन्वगुः । इण् गतौ लुङ् ॥ ३८ ॥

धनुर्विष्फारयामास[2] दृष्ट्वा तान् दुष्टसूदनः ।
इषुध्योरिषवस्तस्य जाज्वल्यन्ते स्म वह्निवत् ॥ ३९ ॥

(भा.दी.) धनुरिति । दुष्टान् सूदयति नाशयतीति तथोक्तः श्रीरामः, तान् राक्षसान् दृष्ट्वा, धनुः विष्फारयामास ध्वनयामास । स्फुर चलने लिट् । तस्य श्रीरामस्य इषुध्योः, 'निषङ्ग इषुधिर्द्वयोः' इत्यमरः, इषवः शराः, वह्निवत् जाज्वल्यन्ते स्म अतिशयेन जज्वलुः । ज्वल दीप्तौ लट् ॥ ३९ ॥

(सं.चं.) 'विष्फारो धनुषः स्वानः' इति यादवप्रकाशः । 'स्फर स्फुल चलने' । 'स्फुर स्फुरणे । स्फर इत्येके' इति धातुप्रदीपे मैत्रेयरक्षितः । 'चिस्फुरोर्णौ' (अ.सू.६.१.५४) इति स्फुरतेर्विभाषा आकारादेशः । स्फारयामास स्फोरयामास । 'स्फुरतिस्फुलत्योर्निर्निविभ्यः' (अ.सू.८.३.७६) इति विभाषा मूर्धन्यादेशः । विष्फारयामास विष्फोरयामास । अंसद्वयलग्नयोरिषुध्योर्गता इषवः ॥ ३९ ॥

देवोपदेवा मुनयो[3] रामराक्षससङ्गरम् ।
दिदृक्षमाणा गगनं विमानाग्र्यैरपूरयन् ॥ ४० ॥

(भा.दी.) देवेति । देवाश्च उपदेवाश्च गन्धर्वादयस्ते च, मुनयश्च ते, रामश्च राक्षसाश्च तेषां यः सङ्गरः सङ्ग्रामः तम्, दिदृक्षमाणा द्रष्टुमिच्छावन्तः सन्तः, गगनमन्तरिक्षं तत्, विमानेषु अग्र्याणि श्रेष्ठानि तैः अपूरयन् । पॄ पालनपूरणयोः[4] लङ् ॥ ४० ॥

---

१. **'दूषणमन्वयुः'** २. **'धनुः विष्फारयामास'** ३. **'देवोपदेवमुनयो–'** । वि.ती.पाठोऽपि तथा स्यात् ।
४. पॄधातोर्णिचि लङि **'अपारयत्'** इति रूपमित्युक्तम् । **'पूरी आप्यायने'** इति युक्तम् ।

(सं.चं.) उपदेवा गन्धर्वाप्सरोविद्याधरादयः ॥ ४० ॥

रामोऽयमृजुरेकाकी बहवो मायिनः परे ।
कथं नु स्वस्ति तस्येति[१] केचिदत्राऽचचक्षिरे ॥ ४१ ॥

(भा.दी.) राम इति । अयं श्रीरामः ऋजुरवक्रः, मायायुद्धरहित इत्यर्थः, एकाकी, परे अन्ये राक्षसाः मायिनः कपटिनः बहवश्च, अतः अस्य श्रीरामस्य कथं नु कथं वा स्वस्ति क्षेमः स्यात् इति, अत्र अन्तरिक्षे, केचित् आचचक्षिरे अवदन् । चक्षिङ् व्यक्तायां वाचि लिट् ॥ ४१ ॥

(सं.चं.) कथं नु स्वस्ति स्यादिति ॥ ४१ ॥

यद्भ्रूविभ्रममात्रेण विभ्रश्येद्[२] भुवनत्रयम् ।
तस्य किं राक्षसकुलं[३] रामस्येत्यपरेऽवदन्[४] ॥ ४२ ॥

(भा.दी.) यदिति । भुवनानां त्रयम्, यस्य श्रीरामस्य भ्रुवोर्यद् विभ्रममात्रं चलनमात्रं तेन विभ्रश्येत् विनश्येत्, भ्रंशु अधःपतने लिङ् । तस्य तादृशसामर्थ्यवतः श्रीरामस्य, राक्षसानां कुलं समूहस्तत्, किं गणनीयमस्ति, न किमपि, इति अपरे उत्तमाधिकारिणः अवदन् ॥ ४२ ॥

(सं.चं.) विभ्रश्येत् अधःपतित्वा शकलशः विनश्येत् ॥ ४२–३ ॥

स रक्षसां शस्त्रवृष्टिं निरस्य निशितैः शरैः ।
तान्यथ द्रावयामास क्षणेन कमलेक्षणः ॥ ४३ ॥

(भा.दी.) स इति । अथ कमलवदीक्षणे यस्य स तथा सः श्रीरामः, रक्षसां शस्त्राणां या वृष्टिस्ताम्, निशिताः शाणोल्लीढास्तैः शरैः, निरस्य विनाश्य, तानि रक्षांसि, क्षणेन क्षणकालस्तेन, द्रावयामास ॥ ४३ ॥

दूषणोज्झितमापाथ दूषणो विश्वभूषणम् ।
सा च सेना जगन्नाथमसेनं प्रत्यपद्यत ॥ ४४ ॥

---

१. **'स्वस्त्यतोऽस्येति'** इति वि.ती.पाठः स्यात् ।
१. **'विभ्रंश्येत्'** इति पठन्तो भ्रान्ताः ।
३. **'राक्षसबलम्'**
४. **'–स्येति परेऽवदन्'**

(भा.दी.) दूषणेति । अथ दूषणः, दूषणैर्दोषैरुज्झितं रहितम्, विश्वस्य भूषणमिव भूषणम्, अलङ्कारभूतमित्यर्थः, श्रीरामं आप । सा दूषणसम्बन्धिनी सेना च जगन्नाथम्, न विद्यते सेना यस्य स तथा तं श्रीरामं प्रत्यपद्यत । पद गतौ लङ् ॥ ४४ ॥

(सं.चं.) दूषणैरुज्झितं रामम् । असेनं सेनारहितमेकाकिनम् । इनेन सहितः सेनः । स न भवतीति च ध्वनिः । यतः सर्वस्य जगतोऽयं नाथः ॥ ४४ ॥

[1]सालशैलशिलावर्षान् राक्षसान् विमुखान् व्यधात् ।
दूषणं[2] चापि युद्ध्यन्तं सायकैर्लोकनायकः ॥ ४५ ॥

(भा.दी.) सालेति । लोकानां नायकः स्वामी, अथ सालाः सर्जवृक्षाः ते च, तालाः तालवृक्षास्ते च, शिलाश्च तासां वर्षो येषां ते तथा तान् राक्षसांश्च, सायकाः शराः, तैः विमुखान् पराङ्मुखान् व्यधात् चक्रे । युद्ध्यन्तं दूषणं चापि, विपरीतं मुखं यस्य स तथा तम्, पराङ्मुखमित्यर्थः, व्यधात् चक्रे ॥ ४५ ॥

(सं.चं.) सालाः वृक्षाः । शैलाः गण्डशैलाः । दूषणं च विमुखं व्यधात् । युध्यन्तम् । पाणिनीया युधधातुमात्मनेभाषं भाषन्ते । पौराणिका-स्तूभयतोभाषम् ॥ ४५ ॥

पुनरुद्यच्छतस्तस्य दूषणस्यारिभीषणः ।
ध्वजं वाहांस्त्रिवेणूंश्च[3] सारथिं चाक्षिणोच्छरैः ॥ ४६ ॥

(भा.दी.) पुनरिति । अरीणां भीषणो भयङ्करः श्रीरामः, पुनः उद्यच्छतः युद्धार्थमुद्योगं कुर्वतः, तस्य दूषणस्य यो ध्वजस्तम्, वाहान् वाहनाश्वान् । 'वाजिवाहाश्वगन्धर्व–' इत्यमरः । त्रयश्च ते वेणवश्च रथावयवभूतत्रिवेण्वाख्ययष्टीरित्यर्थः, सारथिं च शरैरक्षिणोत् व्यनाशयत् । क्षिणु हिंसायां लङ् ॥ ४६ ॥

(सं.चं.) अश्वबन्धनदारुणो रथेन संयोजकास्त्रयो दण्डास्त्रिवेणव उच्यन्ते, दण्डस्त्रिवेणुभिर्बद्ध इति त्रिवेणु-रप्युच्यते, यन्मूले सारथिरुपविशति ॥ ४६–७ ॥

अच्छकीर्त्तिरथ च्छित्वा सर्वाण्यस्याऽयुधानि च ।
तेन मुक्तां गदां गुर्वीं लीलयाऽदारयच्छरैः ॥ ४७ ॥

---

१. **'सालतालशिला–'** इति वि.ती.पाठः । २. **'दूषणं चाथ युध्यन्तम्'** इत्यपि वि.ती.पाठः स्यात् । **'चाभियुध्यन्तम्'** इति च क्वचित् ।
३. **'वाहांस्त्रिवेणुं स सारथिम्'**

(भा.दी.) अच्छेति । अथ अच्छा निर्मला कीर्तिर्यस्य स तथा श्रीरामः, अस्य दूषणस्य सर्वाणि यान्यायुधानि तानि, च्छित्वा तेन दूषणेन मुक्तां गुर्वीं गदाम्, शरैर्लीलयाऽदारयत् । दॄ विदारणे लङ् ॥ ४७ ॥

रामेणाष्टेषुभिर्विद्धः परिघं परिगृह्य सः[१] ।
हतोऽसीत्यभ्ययाच्चण्डो[२] दण्डपाणिरिवान्तकः ॥ ४८ ॥

(भा.दी.) रामेणेति । श्रीरामेण, अष्टौ च ते इषवश्च तैर्विद्धः, चण्डः क्रूरः, सः दूषणः, परिघाख्यो य आयुधविशेषः तं परिगृह्य, हे राम, त्वं हतः असि, इति ब्रुवन्निति शेषः, दण्डः पाणौ यस्य स तथा, अन्तकइव यम इव अभ्ययात् ॥ ४८ ॥

(सं.चं.) परिघः अयोदण्डः । 'परिघोऽर्गलदण्डयोः' इति यादवप्रकाशः । **'ಲಾಳವಿಂಡಿಗೆ'** इति भाषायाम् ॥४८॥

आपतन्तं तमालोक्य[३] पत्रिभ्यां पत्रिकेतनः[४] ।
राघवो लाघवात् तस्य च्छित्वा बाहू न्यपातयत् ॥ ४९ ॥

(भा.दी.) आपतन्तमिति । पत्री गरुडः केतने ध्वजे यस्य स तथोक्तः श्रीराघवः, आपतन्तं अभिमुख आगच्छन्तं तं दूषणं आलोक्य, पत्रिणौ शरौ ताभ्यां तस्य दूषणस्य बाहू लाघवं शैघ्र्यं तस्मात् छित्वा न्यपातयत्, दूषणमिति शेषः ॥ ४९ ॥

(सं.चं.) पत्रिकेतनः गरुडध्वजः ॥ ४९ ॥

[५]दिवोऽभवन्निपतिते दूषणे विश्वभीषणे ।
जयशब्दो नमःशब्दः पुष्पवर्षश्च राघवे ॥ ५० ॥

(भा.दी.) दिव इति । विश्वस्य भीषणो भयङ्करः तस्मिन् दूषणे निपतिते सति, द्यौः स्वर्गस्तस्याः जय इति शब्दो जयशब्दः अभूत् । नम इति शब्दो नमश्शब्दः अभूत् । पुष्पवर्षश्च श्रीराघवे अपतत् ॥ ५० ॥

(सं.चं.) दिवो जयशब्दो नमःशब्दश्च घोषितोऽभवत् । पुष्पवर्षश्च पतितोऽभवत् ॥ ५० ॥

---

१. **'परिगृह्य च'** २. **'–त्यभ्यधाच्चण्डो-'** ३. **'आपतन्तं समालोक्य'** ४. **'पक्षिकेतनः'**

५. **'दिवोऽपतन्निपतिते'** इति वि.ती. पाठः स्यात् । **'दिवोऽपतन्निपतिते दूषणे विश्वभूषणे'** इति कश्चित् । तदा **'विश्वभूषणे राघवे'** इत्यन्वयः । अथाप्यस्वरसः पाठः ।

जघान राघवो बाणैर्व्याकुलं रक्षसां कुलम् ।
अवशिष्टं ततोऽशिष्टं[1] परितः स्म पलायते ॥ ५१ ॥

(भा.दी.) जघानेति । श्रीराघवः, व्याकुलं सम्भ्रान्तम्, अशिष्टं दुष्टम्, रक्षसां कुलं समूहस्तत्, बाणाः सायकास्तैः जघान । हन्तेर्लिट् । तेभ्य इति ततः हतेभ्य इत्यर्थः, अवशिष्टं सैन्यम्, परितः पलायते स्म द्रवते स्म ॥ ५१ ॥

(सं.चं.) स्वनायकस्य दूषणस्य पतनेन व्याकुलं प्रतिकर्तुमप्रभवत्, किं तिष्ठाम्यहो पलाये इति द्वन्द्वक्रकचलग्नं विरतव्यापारम् । 'विहस्तो व्याकुलः प्रोक्तः' इत्यभिधानम् । **'ಕೈ ಚೆಲ್ಲು'** इति भाषायाम् । प्रायो बाणैर्जघान । अथाप्यवशिष्टमशिष्टं परितः सर्वतोदिशं कान्दिशीकं पलायते स्म अपलायत ॥ ५१ ॥

महाकपालः स्थूलाक्षः प्रमाथी चोद्यतायुधाः[2] ।
अभ्ययू राक्षसा रामं तान् जघान जगद्गुरुः[3] ॥ ५२ ॥

(भा.दी.) महेति । महाकपालः स्थूलाक्षः प्रमाथी उद्यतायुधः इत्येते चत्वारो राक्षसाः श्रीरामं अभ्ययुः । जगद्गुरुः श्रीरामः तान् जघान ॥ ५२ ॥

(सं.चं.) ततः महाकपालः स्थूलाक्षः प्रमाथी चेति त्रयः सेनाग्रण्यः । 'एतस्मिन्नन्तरे क्रुद्धास्त्रयः सेनाग्रयायिनः । संहत्याभ्यद्रवन् रामं मृत्युपाशावपाशिताः । महाकपालः स्थूलाक्षः प्रमाथी च महाबलः' (२६.१७–८) इति च । त्रयोऽप्युद्यतायुधाः ॥ ५२ ॥

तुल्यं शरशतेनेशः शतं हन्ति स्म राक्षसान् ।
सहस्रेण सहस्रं च लीलया लोकवल्लभः[4] ॥ ५३ ॥

(भा.दी.) तुल्यमिति । लोकानां वल्लभः स्वामी, ईशः सर्वसमर्थः श्रीरामः, शराणां शतं तेन, तुल्यं युगपद् यथा भवति तथा, राक्षसानां शतं तत्, शराणां यत्सहस्रं तेन रक्षसां सहस्रं च, लीलया हन्ति स्म न्यहन् ॥ ५३ ॥

---

१. **'ततो दृष्टम्'** २. **'चोद्यतायुधः'** इति वि.ती.पाठः । रामायणाननुगुणमेतत् । **'एते चत्वारो राक्षसाः'** का.श्री.टीकाऽपि भ्रान्तिमूला ।
३. **'जघान शरैः प्रभुः'** ४. **'लोकवल्लभः लोकप्रियः'** इति का.श्री. ।

(सं.चं.) शराश्च शरहताश्च सङ्ख्यया तुल्या यथा स्युस्तथा । 'रक्षसां तु शतं रामः शतेनैकेन कर्णिना । सहस्रं च सहस्रेण जघान रणमूर्धनि' (२६.३१) इति च ॥ ५३ ॥

एवं चतुर्दशसहस्रपलाशिराशिं
रामानलो विशिखनामशिखी[१] प्रदह्य ।
मुख्यं खराख्यपशुमप्युपयातमारात्[२]
प्रत्यैक्षत प्रमदयन् निखिलान् मखान्नान् ॥ ५४ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणेऽरण्यकाण्डे तृतीयः सर्ग्गः ॥

(भा.दी.) एवमिति । विशिखा इति शरा इति नाम यासां ताः विशिखानाम्न्यस्ताश्च ताः शिखाश्च (ज्वालाश्च) ताः अस्य सन्तीति विशिखनामशिखी । व्रीह्यादित्वादिनिः । शराख्यज्वालवानित्यर्थः । श्रीरामानलः श्रीरामाख्याग्निः, चतुरधिका दश चतुर्दश, तानि च सहस्राणि च चतुर्दशसहस्राणि । पलं मांसमशितुं शीलमेषामस्तीति पलाशिनो राक्षसाः, चतुर्दशसहस्राणि च ते पलाशिनश्च तेषां राशिः समूहः, तं प्रदह्य भस्मीकृत्य, निखिलान्, मखस्य अन्नं येषां ते तथा तान्, क्रतुभुज इत्यर्थः, देवान् प्रमदयन् सन्तोषयन् सन्, आरात् समीपे उपयातं सम्प्राप्तम्, मुख्यम्, खर इति आख्या यस्य स तथोक्तः, स चासौ पशुश्च तमपि, प्रत्यैक्षत प्रतीक्ष्य स्थितोऽभूत् । यथा वनवह्निः पलाशिराशिं वृक्षसमूहं भस्मीकृत्य वनस्थमृगमपि भस्मी-कर्तुमुपक्रमते तद्वदयमपि रक्षस्समूहं निहत्य खरमपि हन्तुमवस्थितोऽभूदिति भावः ॥ ५४ ॥

इति श्रीविश्वपतितीर्थकृतायां श्रीसङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायामरण्यकाण्डे तृतीयः सर्गः॥

(सं.चं.) वसन्ततिलकयोपसंहरति । पलं मांसमश्नन्तीति पलाशिनां क्रव्यादानां रक्षसां राशिं समूहम् । विशिखा बाणा एव शिखा ज्वाला अस्य । तादृशो रामाख्योऽनलः दवाग्निः । प्रदह्य निःशेषं दग्ध्वा । यथा पलाशानि पत्राण्यस्य सन्तीति पलाशिनां वृक्षाणां राशिं पूगं प्रदहति । अथच यज्ञाग्निः पलाशवृक्षसम्बन्धिनः पलाशिनः समिद्विशेषाः, तान् समिद्धोमेऽर्पितान्, प्रदह्य प्रथमं दग्ध्वा ततः पशुमेधे पशुं प्रतीक्षते । एवमत्रापि

१. **'विशिखिनामशिखी'** इति पठित्वा, **'विशिखिनः बाणाः'** इति व्याचख्यौ का.श्री. । सम्पातायातं स्यात् ।

२. **'–यान्तमारात्'**

रामाख्यो यज्ञियाग्निः इध्मस्थानीयान्, अमुख्यपशुकल्पान् वा राक्षसान् प्रथमं प्रमथ्य, अथाश्वमेधेऽश्वमिव खराख्यं प्रधानं पशुं प्रत्यैक्षत प्रतीक्षाञ्चक्रे । आरादुपयातं समीपमागच्छन्तमिति विशेषोक्तिः । यज्ञे पशवो नीयन्ते । अयं तु राक्षसपशुः पतङ्ग इवाऽगत्याग्नौ पिपतिषतीति । अनेन च राक्षसपशुहननकर्मणा महाध्वरेण मख एवान्नं येषां तान् यज्ञदत्तहविर्भुजो देवान् प्रमदयन्नानन्दयन् ॥ ५४ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायामरण्यकाण्डे तृतीयसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– १२२७+५४=१२८१]

चतुर्थः सर्ग्गः

निवार्य्य त्रिशिरा वीरो राघवाभिमुखं खरम् ।
ननाद स्वयमभ्येत्य[1] रामो धनुरघोषयत् ॥ १ ॥

(भा.दी.) श्रीरामस्य खरादीनां च प्रवृत्तं युद्धं दर्शयति– **निवार्येत्या**दिना । वीरः त्रिशिराः, राघवं प्रति अभिमुखो यः स तथोक्तः, तं खरं निवार्य श्रीरामं प्रति स्वयं अभ्येत्य, ननाद सिंहनादं चक्रे । नद अव्यक्ते शब्दे लिट् । श्रीरामश्च धनुः अघोषयत् । घुषिर् विशब्दने लङ् ॥ १ ॥

(सं.चं.) अवशिष्टौ खरत्रिशिरसौ । खरदूषणयोः किंसम्बन्धोऽयं त्रिशिरा इति प्राचीनग्रन्थेषु न स्फुटम् । अथ त्रिशिरसो वधं प्रस्तौति– निवार्येत्यादिना ॥ १ ॥

त्रिशिरास्त्रीञ्छरांस्तीक्ष्णान् मुमोच[2] मधुघातिने ।
त्रिशरोवक्षसि क्रुद्धो रामोऽमुञ्चच्चतुर्दश ॥ २ ॥

(भा.दी.) **त्रिशिरा** इति । त्रिशिराः तीक्ष्णान् निशितान् त्रीन् शरान्, मधुं मधुनामकदैत्यं घातितवानिति मधुघाती, तस्मै श्रीरामाय मुमोच । मुच्लृधातोर्लिट् । क्रुद्धः श्रीरामः, त्रिशिरसो यद्वक्षस्तस्मिन्, चतुर्दश शरान् अमुञ्चत् । मुच्लृ धातोर्लङ् ॥ २ ॥

(सं.चं.) चतुर्दश शरानमुञ्चत् ॥ २ ॥

सूताश्वध्वजविध्वंसं कृत्वा त्रिशिरसः[3] प्रभुः ।
हृदये चाष्टभिर्विध्वा शरैर्म्मूर्द्धोऽच्छिनत् त्रिभिः ॥ ३ ॥

---

१. **'ननाद राममभ्येत्य'** २. **'-स्तीक्ष्णानमुञ्चन्मधु–'** ३. **'त्रिशिरसं प्रभुः'**

(भा.दी.) सूतेति । प्रभुः श्रीरामः, त्रिशिरसः सूतश्च अश्वाश्च ध्वजश्च तेषां यो विध्वंसो नाशस्तं कृत्वा, हृदयं हृदयमण्डलं तस्मिन्, अष्टभिः शरैः विध्वा, त्रिभिः शरैः मूर्धानः शिरांसि तान् अच्छिनत् । च्छिदिर् द्वैधीकरणे लङ् ॥ ३ ॥

(सं.चं.) शरैस्त्रिभिस्त्रीन् मूर्ध्नोऽच्छिनत् ॥ ३ ॥

[1]राक्षसक्षयमालक्ष्य राक्षसाधिपतिः खरः ।
रामं सम्प्राप्य नाराचैर्नभश्चक्रे निरन्तरम् ॥ ४ ॥

(भा.दी.) राक्षसेति । राक्षसाधिपतिः खरः, राक्षसानां यः क्षयस्तं आलक्ष्य, श्रीरामं सम्प्राप्य, नाराचाः नाराचाख्यशरविशेषाः तैः, नभः निर्गतमन्तरमवकाशो यथा भवति तथा चक्रे ॥ ४ ॥

(सं.चं.) निरन्तरं निरवकाशम् । 'नाराच एषणश्चाऽयसे शरे' इति यादवप्रकाशः ॥ ४ ॥

नभो निर्विवरं चक्रे रामोऽपि परितः खरम् ।
शरैरेवं[2] दिशश्छन्नास्तदद्भुतमभून्महत् ॥ ५ ॥

(भा.दी.) नभ इति । श्रीरामोऽपि खरं परितः नभः शरैः निर्गतं विवरं च्छिद्रं यथा भवति तथा चक्रे । एवं दिशः च्छन्नाः शरैराच्छादिता आसन् । तद् दिशामाच्छादनं महत् अद्भुतं द्रष्टृणामाश्चर्यकरमभूत् ॥ ५ ॥

(सं.चं.) रामोऽपि खरं परितः नभो निर्विवरं चक्रे । यथा पुरोवर्ती खरोऽपि न दृश्यते बाण-खचितः ॥ ५–६ ॥

धनुश्छित्वाऽच्छिनद् वर्म्म भूम्नः सप्तशरैः खरः ।
रामो विकवचो रेजे विधूम इव पावकः ॥ ६ ॥

(भा.दी.) धनुरिति । खरः, सप्त च ते शराश्च तैः, भूम्नः पूर्णगुणस्य श्रीरामस्य, धनुः शार्ङ्गातिरिक्तं कार्मुकं च्छित्वा, वर्म चापरमेकं अच्छिनत् । च्छिदेर्लङ् । श्रीरामः विगतं कवचं यस्य स तथा सन् विधूमः पावक इव विरेजे । राजृ दीप्तौ लिट् ॥ ६ ॥

---

१. 'रक्षसः क्षय–' । 'रक्षसः क्षयं त्रिशिरोनाशं आलोक्य दृष्ट्वा' इति का.श्री. । २.'शरैरेव'

शत्रुघ्नं दिव्यमच्छेद्यं शार्ङ्गं शार्ङ्गी प्रगृह्य सः ।
ध्वजं खरस्य चिच्छेद खरोऽमुञ्चच्चतुःशरान् ॥ ७ ॥

(भा.दी.) शत्रुघ्नमिति । शार्ङ्गमस्यास्तीति शार्ङ्गी सः श्रीरामः, शत्रून् हन्तीति शत्रुघ्नं तत्, दिव्यं अच्छेद्यं च्छेत्तुमशक्यं शार्ङ्गं धनुः प्रगृह्य, खरस्य यो ध्वजस्तं च्छिच्छेद । च्छिदेर्लिट् । खरः चत्वारो ये शरास्तान् श्रीरामे अमुञ्चच्च । मुचेर्लङ् ॥ ७ ॥

(सं.चं.) पूर्वं किञ्चिदन्यद्धनुर्जग्राह, यत् खरश्चिच्छेद । अथागस्त्यदत्तं शत्रुनाशनं शार्ङ्गं धनुः प्रगृह्य युयोध । 'सुमहद् वैष्णवं यत्तदतिसृष्टं महर्षिणा । वरं तद्धनुरुद्यम्य खरं समभिधावत' (२८.२१) इति च ॥ ७–८ ॥

एकेन मूर्द्धि विव्याध खरं रामोऽथ पत्रिणा ।
द्वाभ्यां भुजौ त्रिभिर्देहं लीलया प्रहसन्निव ॥ ८ ॥

(भा.दी.) एकेनेति । अथ श्रीरामः, प्रहसन्निव लीलया खरं एकेन, पत्री शरस्तेन, मूर्द्धा शिरस्तस्मिन् विव्याध । द्वाभ्यां भुजौ विव्याध, त्रिभिः शरैः खरस्य यो देहस्तं विव्याध ॥ ८ ॥

युगाश्वसूताक्षधनुस्त्रिवेणूनक्षिणोच्छरैः[१] ।
खरं चैकेन विव्याध देवो देवान् प्रहर्षयन् ॥ ९ ॥

(भा.दी.) युगेति । देवः श्रीरामः, देवान् प्रहर्षयन् सन्, युगश्च बन्धनदारुविशेषः स च, अश्वाश्च, सूतश्च, अक्षाणि रथचक्राणि तानि च, धनुश्च, त्रिवेणवश्च, तान् शरैः अक्षिणोत् व्यनाशयत् । क्षिणु हिंसायां लङ् । खरं च एकेन शरेण विव्याध । व्यध ताडने लिट् ॥ ९ ॥

(सं.चं.)युगमश्वबन्धनदारु । 'ꪎꪮꪇ' इति भाषायाम् । एकेन शरेण युगम् । चतुर्भिश्चतुरोऽश्वान् । एकेन सूतम् । द्वाभ्यामक्षं चक्रनाभिम् । त्रिभिस्त्रिवेणून् । द्वादशेन धनुः । त्रयोदशेन खरं विव्याध । 'ततोऽस्य युगमेकेन चतुर्भिश्चतुरो हयान् । षष्ठेन तु शिरः सङ्ख्ये खरस्य रथसारथेः । त्रिभिस्त्रिवेणून् बलवान् द्वाभ्यामक्षं महाबलः । द्वादशेन तु बाणेन खरस्य सशरं धनुः । छित्त्वा वज्रनिकाशेन राघवः प्रहसन्निव । त्रयोदशेनेन्द्रसमो बिभेद समरे खरम्' (२८.२९–३१) इति च ॥ ९–१० ॥

१. **'–धनुस्त्रिवेणूंश्चाक्षिणोच्छरैः'** इति, **'–स्त्रिवेणुं चाक्षि–'** इति च ।

मुनीनां न्यस्तदण्डानां दण्डकारण्यवासिनाम् ।
इदं ते भक्षणफलं पश्येत्यूचे खरं हरिः ॥ १० ॥

(भा.दी.) मुनीनामिति । स्मरणमात्रेण सर्वदोषान् हरतीति हरिः श्रीरामः, न्यस्त उपरतः दण्डः शिक्षा यैस्ते तथा तेषाम्, प्राणिहिंसाया उपरतानामित्यर्थः, दण्डकारण्ये वस्तुं शीलमेषामस्तीति तथा तेषाम्, मुनीनां भक्षणस्य फलं फलभूतं इदं त्वद्धननं पश्य । इति खरं प्रति ऊचे ॥ १० ॥

विकत्थनं न शूराणां रक्षोहत्याप्रतिक्रियाम् ।
अनया गदया कुर्य्यामिति रामं खरोऽब्रवीत् ॥ ११ ॥

(भा.दी.) विकत्थनमिति । शूराणां विकत्थनं बहुभाषणं न नास्ति । किन्तु कर्मणा प्रदर्शनमेवेत्यर्थः । रक्षसां या हत्या संहारस्तस्याः प्रतिक्रियां अनया गदया कुर्याम्, इति श्रीरामं प्रति खरः अब्रवीत् ॥ ११ ॥

(सं.चं.) शूराणां न युक्तं विकत्थनम्, आत्मप्रशंसनम् । अतोऽनया गदया प्रतिक्रियां कुर्याम्, प्रत्युत्तरं दद्यामिति ॥ ११ ॥

तेन मुक्तां गदां रामः[१] शरैर्भित्त्वाऽभ्यभाषत ।
भग्नं ते बलसर्वस्वं क्लीबोऽसि ब्रह्महन्निति ॥ १२ ॥

(भा.दी.) तेनेति । श्रीरामः तेन खरेण मुक्तां गदां शरैर्भित्त्वा, ब्रह्म ब्राह्मणान् हतवानिति ब्रह्महा तत्सम्बुद्धिः, हे खर, ते तव बलस्य सर्वस्वं साकल्यम्, बललक्षणसर्वस्वमिति वा, भग्नं नष्टम्, त्वं क्लीबः असीति खरं प्रत्यभाषत ॥ १२ ॥

(सं.चं.) ब्रह्मेति ब्राह्मण्यमुच्यते । ब्रह्मेति वेदज्ञ उच्यते । ब्रह्मेति वेदा उच्यन्ते । 'बृह जातिजीवकमलासनशब्दराशिषु' इति स्मरणात् । ब्रह्म ब्रह्माणि ब्रह्मज्ञं वा जघानेति ब्रह्महा । 'ब्रह्मभ्रूणवृत्रेषु क्विप्' (अ.सू.३.२.८७) इति भूते क्विप् । अनेन, सत्यं त्वमाहथाः, गतमेतत् । नेतः परं हन्सि हनिष्यसि वेति ध्वनयति ॥ १२ ॥

आद्रवत्[२] सालमुत्पाट्य खरवन्मुखरः खरः ।
विव्याधेषुसहस्रेण सालं सञ्चूर्ण्य्य राघवः ॥ १३ ॥

---

१. 'शरैश्छित्वाऽभ्यभाषत'   २. 'आद्रवत् तालमु–'

(भा.दी.) आद्रवदिति । खरवत् गर्दभवत् मुखरः वाचाटः खरः, सालं सर्जवृक्षं उत्पाट्य आद्रवत् । राघवः सालं सञ्चूर्ण्य, इषूणां सहस्रं तेन, विव्याध खरं ताडितवान् । व्यध ताडने लिट् ॥ १३ ॥

(सं.चं.) खरवद् गर्दभवन्मुखरः, विकृतवचनः । 'दुर्मुखो मुखरः स्मृतः' इत्यभिधानम् । सालं कश्चन वृक्षमुत्पाट्य । सालं सञ्चूर्ण्य इषुसहस्रेण खरं विव्याध ॥ १३ ॥

गैरिकार्द्रमिवाद्रिं तं रुधिरार्द्रमभिद्रुतम् ।
शरेणापातयच्छार्ङ्गी वज्रेणेवाथ वज्रभृत् ॥ १४ ॥

(भा.दी.) गैरिकेति । अथ शार्ङ्गी श्रीरामः, गैरिकेण धातुना आर्द्रः, तं अद्रिमिव, रुधिरेणाऽर्द्रं सिक्तम्, अभिद्रुतमभिमुखमाद्रवन्तं तं खरम्, वज्रभृदिन्द्रः, वज्रं कुलिशम्, तेनेव शरेण अपातयत् ॥ १४ ॥

(सं.चं.) गैरिकं धातुनिर्यासः । वज्रेणेवाथ वज्रभृत् । 'स वृत्रइव वज्रेण फेनेन नमुचिर्यथा । बलो वेन्द्राशनि-हतो निपपात हतः खरः' (३०.२८) इति च ॥ १४ ॥

खरो नरकमापेदे राघवो धवळं[1] यशः ।
देवसङ्घो मनःस्वास्थ्यमृषिसङ्घः[2] स्वमाश्रमम् ॥ १५ ॥

(भा.दी.) खर इति । खरः नरको निरयस्तं आपेदे । पद गतौ लिट् । श्रीराघवः धवळं शुभ्रम्, शुद्धमित्यर्थः, यशः आपेदे । देवानां सङ्घः समूहः मनसः स्वास्थ्यं तत् आपेदे । ऋषीणां सङ्घः स्वः स्वकीयस्तं आश्रमं आपेदे ॥ १५ ॥

(सं.चं.) राघवो धवलं यश आपेदे । देवसङ्घो मनःस्वास्थ्यमापेदे । ऋषिसङ्घः स्वमाश्रममापेदे । एतावन्तं कालमस्वमिव स्थितं सम्प्रति स्वत्वमापेति भावः । रामस्य राक्षसानां च सङ्गरदिदृक्षया समागतो गगनग ऋषिसङ्घश्च स्वंस्वमाश्रममापेदे ॥ १५ ॥

पूजितो देवदेवीनां नेत्रैः पुष्पैश्च[3] शोभनैः ।
ऋषीणां परमाशीर्भिः प्रविवेशाऽश्रमं प्रभुः ॥ १६ ॥

---

१. 'धवलम्' २. '–स्वास्थ्यं मुनिसङ्घः'
३. '–देवीनां पुष्पैर्नेत्रैश्च'

(भा.दी.) पूजित इति । देवाश्च देव्यश्च तासाम्, श्रीरामवीर्यदर्शनाद् विकसितानि यानि नेत्राणि तैः, शोभनैः पारिजातादीनां यानि पुष्पाणि तैश्च, ऋषीणां परमा या आशिषस्ताभिश्च पूजितः प्रभुः श्रीरामः स्वकीयो यः आश्रमस्तं प्रविवेश ॥ १६ ॥

(सं.चं.) देवानां देवीनां च पुष्पैश्च नेत्रैश्च । शोभनानि विकसितानि पुष्पाणि च नेत्राणि च ॥ १६–८ ॥

गिरिदुर्गाद् विनिष्क्रम्य सौमित्रिः सह सीतया ।
ववन्दे परमानन्दं मुनिभिः[1] परिवारितम् ॥ १७ ॥

(भा.दी.) गिरीति । सौमित्रिः गिरेर्यद्दुर्गं गुहालक्षणदुर्गमप्रदेशस्तस्मात् । 'दुर्गो शब्दे वने दुर्गं दुर्गमे नगरे पुरे' इति वैजयन्ती । सीतया सह विनिष्क्रम्य, परम आनन्दो यस्य स तथा तम्, मुनिभिः परिवारितं रामं ववन्दे ॥ १७ ॥

आर्य्यपुत्र जगन्नाथ पर्य्याप्तं ते महद् यशः ।
मुनीनां रक्षयेत्युक्त्वा परिरेभे पतिं सती ॥ १८ ॥

(भा.दी.) आर्येति । आर्यस्य दशरथस्य पुत्र, जगन्नाथ श्रीराम, ते महद् यशः मुनीनां परिरक्षया पर्याप्तं जगति पूर्णं आसीत् । सती साध्वी पतिव्रता सीता इति उक्त्वा पतिं श्रीरामं परिरेभे । परिपूर्वः रेभृ शब्दे[2] लिट् ॥ १८ ॥

पराक्रन्दपरा दृष्ट्वा राक्षसी रक्षसां क्षयम्[3] ।
लङ्कामभ्यद्रवत् क्रुद्धा कृत्तिकेव भयङ्करी ॥ १९ ॥

(भा.दी.) परेति । पराक्रन्दे आक्रोशे परं तात्पर्यं यस्याः सा, सा तथा, कृत्तिकेव कृत्याख्यपिशाचीव, भयङ्करी सा राक्षसी शूर्पणखा, रक्षसां क्षयो विनाशस्तं दृष्ट्वा क्रुद्धा सती लङ्कां प्रति अभ्यद्रवत् ॥ १९ ॥

(सं.चं.) पराक्रन्दपरा । 'दूषणं च खरं चैव हतं त्रिशिरसा सह । दृष्ट्वा पुनर्महानादं ननाद जलदो यथा' (३२.२) इति च । कृत्तिकेव कृत्यामानिनीव भयङ्करी ॥ १९ ॥

---

१. **'परमानन्दो मुनीन्द्रैः परिवारितम्'** । **'–परमानन्दो–'** इति क्वचित् । **'–नन्दं मुनीन्द्रैः परिवारितः'** इति च ।

२. **'रभ राभस्ये'** इत्यस्य लिडिति युक्तम् । रेभतेर्लिटि **'परिरिरेभे'** इति रूपम् ।

३. **'रक्षसां वधम्'**

ददर्श सा दशमुखं[1] विमुखं धर्म्ममार्ग्गतः ।
मानोन्नतं विमानस्थमक्षयं च क्षये रतम् ॥ २० ॥

(भा.दी.) ददर्शेति । सा शूर्पणखा मानेन अभिमानेन उन्नतमुत्कृष्टम्, देहपरिमाणेन उन्नतमिति वा, विमाने पुष्पकविमाने तिष्ठतीति तथा तम्, न विद्यते क्षयो विनाशो ब्रह्मवराद् यस्य स तथा तम्, क्षये गृहे, 'निलयापचयौ क्षये' इत्यमरः । रतं आसक्तम् । यद्वा प्राणिनां नाशे रतमिति वा । धर्मस्य मार्गः तस्मादिति ततः, विमुखो पराङ्मुखस्तं दशमुखं रावणं ददर्श ॥ २० ॥

(सं.चं.) दशमुखमथापि विमुखं विगतमुखमिति विरोधाभासः । मानेनाहङ्कारेण उन्नतः । अथापि विगतमानस्तिष्ठतीति च । अक्षयमपि क्षये रतमिति च । धर्ममार्गतः पराङ्मुखम्, विमाने प्रासादे स्थितम्, ब्रह्मवरात् स्वयमक्षयमपि लोकक्षये रतमित्यविरोधः । 'विमानोऽस्त्री देवयाने सप्तभूमे च सद्मनि' इति यादवप्रकाशः । क्षये गृहे रतमित्यपि व्याचक्षते ॥ २०–१ ॥

दीना पदे निपतिता रावणं रावणानुजा ।
उवाच वाचं परुषां राक्षसं कोपयन्त्यलम् ॥ २१ ॥

(भा.दी.) दीनेति । दीना दुःखिता, पदं पादस्तस्मिन् निपतिता, रावणानुजा शूर्पणखी, राक्षसं रावणम्, अलं सम्यक् कोपयन्ती सती, परुषां निष्ठुरां वाचमुवाच ॥ २१ ॥

मत्तः प्रमत्तः कामी त्वं विजित्यापि जगत्त्रयम् ।
राजलक्षणहीनोऽसि भयं प्राप्तं न बुद्ध्यसे ॥ २२ ॥

(भा.दी.) मत्त इति । मत्तः मदयुक्तः, प्रमत्तः प्रमादवान्, कामी त्वं विषयाभिलाषी त्वम्, जगतां त्रयं तत् विजित्यापि, राज्ञां यल्लक्षणं प्रमादादिराहित्यं तेन हीनो रहितः असि । प्राप्तं यद् भयं तत् न बुद्ध्यसे न जानासि । बुध अवगमने लट् ॥ २२ ॥

(सं.चं.)मत्तः निरङ्कुशः । मदः, **'ಸೊಕ್ಕು'** इति भाषायाम् । प्रमत्तः कामभोगेषु । प्रमादः, **'ಮೈಮರೆವು'** इति भाषायाम् । कामी स्वैरवृत्तः । अत एव राजलक्षणहीनः । 'प्रमत्तः कामभोगेषु स्वैरवृत्तो निरङ्कुशः' (३३.२) इति, 'ज्ञातव्यं तु न जानीषे कथं राजा भविष्यसि' (३३.८) इत्यादि च ॥ २२ ॥

---

१. **'दशग्रीवम्'** । अस्वरसः पाठः ।

जनस्थानेऽवधीद् रामस्त्रिशिरःखरदूषणान् ।
स विरूपितवान् मां च त्वं शेषे मृतकोपमः ॥ २३ ॥

(भा.दी.) जन इति । सः श्रीरामः, जनस्थानं दण्डकारण्यं तस्मिन्, त्रिशिराश्च खरश्च दूषणश्च तान्, अवधीत् । हन हिंसागत्योः लुङ् । मां च विरूपितवान्, लक्ष्मणेन विरूपां कारितवान् । त्वं तु मृतकस्य शवस्य उपमा यस्य स तथा सन् शेषे तूष्णीं तिष्ठसि ॥ २३ ॥

(सं.चं.) अवधीत् । हनो वधादेशः । 'हनो वध लिङि' (अ.सू.२.४.४२), 'लुङि च' (४३) इति । मृतकोपमः कुणपवत् ॥ २३–४ ॥

स्वसुरित्थं वचः श्रुत्वा दण्डाहत इवोरगः ।
क्रुद्धो दशास्यः पप्रच्छ कोऽयं रामो वदेरिति ॥ २४ ॥

(भा.दी.) स्वसुरिति । स्वसुः भगिन्याः इत्थं वचः श्रुत्वा, दण्डाहतः उरगइव सर्पइव क्रुद्धः दशास्यः, अयं त्वयाऽभिहितः श्रीरामः, कः किञ्जातीयः, वदेः वद इति पप्रच्छ ॥ २४ ॥

करौ भयेन धुन्वाना[१] प्रोचे शूर्पणखी वचः ।
[२]रूपेणाप्रतिमो रामो राजा दाशरथिः किल ॥ २५ ॥

(भा.दी.) कराविति । करौ स्वनासाकृन्तननिमित्तं यद्भयं तेन धुन्वाना कम्पयन्ती शूर्पणखी, श्रीरामः रूपं सौन्दर्यं तेन न विद्यते प्रतिमा सादृश्यं यस्य स तथा, दशरथस्यापत्यं दाशरथिः (राजा) किल इति प्रोचे ॥ २५ ॥

(सं.चं.) करौ भयेन धुन्वाना कम्पयन्ती, कम्पितकरा । धुञ् कम्पने इति पठित्वाऽऽह क्षीरस्वामी–'धूञ् इतीहामुं शिवस्वामी दीर्घमाह– 'धूनोति धूनुते' इति । उभयथाऽपि प्रयोगदर्शनात् उभयथापि धातुरूपं प्रामाणिकं मन्यन्ते पदविदः । दाशरथिः किलेति वार्तायाम् । दशरथपुत्र इति वार्ता श्रूयत इति ॥ २५ ॥

चतुर्दशसहस्राणि रक्षसां यो न्यपातयत् ।
धनुर्द्वितीयो यामेन तद्वीर्य्यं केन बुद्ध्यते ॥२६ ॥

---

१. 'धून्वाना'
२. 'रूपेणानुपमो–'

(भा.दी.) चतुरिति । धनुषा द्वितीयो धनुर्द्वितीयः, धनुरेव द्वितीयं यस्येति वा, धनुर्द्धर इत्यर्थः, यः रामः यामो याममात्रकालः, तेन रक्षसां चतुर्दश च तानि सहस्राणि च तानि न्यपातयत् । तद्वीर्यं (तस्य) श्रीरामस्य वीर्यं सामर्थ्यं केन पुरुषेण बुद्ध्यते ज्ञायते? बुध अवगमने लट् ॥ २६ ॥

(सं.चं.) यामः सार्धसप्तघटिकापरिमितः कालः । अह्नश्चतुर्थो भागः । रामायणे तु–'अर्धाधिकमुहूर्तेन' (३४.१०) इति पठ्यते । प्रौढिवादोऽयम् । अतोऽत्र मुहूर्तशब्देन पञ्चघटिकात्मकः कालविशेषो विवक्षितः । धनुर्द्वितीय इत्येकाकी । सहायान्तररहितः । केवलं धनुषा द्वितीयः ॥ २६ ॥

लक्ष्मणाख्योऽनुजस्तस्य येनाङ्गाहं विरूपिता ।
रामस्य रामा सीताख्या मन्ये तामुचितां तव ॥ २७ ॥

(भा.दी.) लक्ष्मणेति । तस्य श्रीरामस्य अनुजः, लक्ष्मण इति आख्या यस्य स तथोक्तः, हे अङ्ग प्रिय, येन लक्ष्मणेन, अहं सञ्जातं विरूपमस्या इति विरूपिता अस्मि । श्रीरामस्य रामा स्त्री, भार्येत्यर्थः, सीतेति आख्या यस्याः सा तथा, तां तव उचितां मन्ये । मन ज्ञाने लट् ॥ २७ ॥

(सं.चं.) अङ्ग अग्रजेति प्रीत्या सम्बोध्याऽवर्जयति । 'अङ्गेत्यामन्त्रणे हंहो भोभो इति च कथ्यते' इत्यभिधानम् । तवैवोचितां न रामस्य ॥ २७–८ ॥

यं संस्पृशति सा कान्ता सीता सर्वाङ्गशोभना ।
सुधाधारेव नैवास्य देहधर्म्मा जरादयः[1] ॥ २८ ॥

(भा.दी.) तस्या अतिशयमाह– **यमि**ति । सर्वाणि यान्यङ्गानि अयवयवाः, तैः शोभना कान्ता मनोहरा सा सीता, सुधाया अमृतस्य धारेव, यं पुरुषं संस्पृशति । स्पृश आमर्शने लट् । अस्य पुरुषस्य, देहधर्माः जरा वृद्धत्वमादिर्येषां ते तथा, जरामरणादय इत्यर्थः, न भवन्त्येव ॥ २८ ॥

उत्तिष्ठ पुरुषश्रेष्ठ व्याकुलं पाहि नः कुलम् ।
रामान्तकादुपासन्नादित्युक्त्वा विरराम सा ॥ २९ ॥

---

१. **'अमृतपायिनो यथा जरादिरहिता भवन्ति तथा सीतास्पर्शवन्तोऽपि जरादिरहिता भवन्तीति भावः । अमृतपानेन जरादिराहित्यम् । सीता-स्पर्शनमात्रेण जरादिराहित्यं भवतीति अमृतापेक्षया सीताया आधिक्योक्त्या रावणस्य इतरस्त्रीपरित्यागेन सीतापेक्षायां निमित्तमुक्तं भवति'** इति का.श्री. ।

(भा.दी.) उत्तिष्ठेति । हे पुरुषश्रेष्ठ रावण, उत्तिष्ठ सीताहरणार्थं गच्छ । उपासन्नात् समीपगतात्, राम एवान्तको मृत्युः तस्मात्, व्याकुलं सम्भ्रान्तं नः कुलं गोत्रं तत् पाहि । सा शूर्पणखी इति उक्त्वा विरराम तूष्णीं बभूव ॥ २९ ॥

(सं.चं.) व्याकुलं व्यापन्नं भयग्रस्तम् ॥ २९ ॥

रामवीर्य्यमनुस्मृत्य कम्पितश्चाविकम्पनः ।
रावणाय प्रणम्याऽथ तमेवोदन्तमब्रवीत् ॥ ३० ॥

(भा.दी.) रामेति । अथ श्रीरामवीर्यश्रवणानन्तरम्, श्रीरामस्य यद् वीर्यं बलं तत् अनुस्मृत्य भयेन कम्पितः, अविकम्पनश्च अविकम्पननामको रावणमन्त्री कश्चित्, रावणाय प्रणम्य, तमेव शूर्पणख्युक्तमेव उदन्तो वृत्तान्तस्तम्, श्रीरामेण खरादयो निहता इति वृत्तान्तमित्यर्थः, अब्रवीत् ॥ ३० ॥

(सं.चं.) कम्पितश्चाविकम्पनः, जनस्थानगतः कश्चित् खरभृत्यः, कथञ्चिद् रामबाणान्मुक्तो जनस्थानाल्लङ्कामागतः । रामायणे त्वकम्पनः इत्युक्तः–'त्वरमाणस्ततो गत्वा जनस्थानादकम्पनः । प्रविश्य लङ्कां वेगेन रावणं वाक्यमब्रवीत्' (३१.१) इति । अकम्पन इति कश्चिद् रावणमन्त्री च पठ्यते । तद्व्यावृत्त्यै तात्पर्यनिर्णयानुसाराय चाविकम्पन इत्येवाऽह । यद्यपि रामायणेऽयं प्रसङ्गः पूर्वं पठितः । ततः शूर्पणखाप्रसङ्गः । अथापि ग्रन्थकारः मूलरामायणानुसारिणं तात्पर्यनिर्णयमेवानुसरन् व्यत्यस्य कथयामास कथाम् । रामायणेऽपि सूक्ष्मदृशां स्फुटमेतदवगम्यते । शूर्पणखाप्रसङ्गं पठतां तत्पूर्वतनः सर्गः, यत्राकम्पनप्रसङ्गः, अनन्वितइवासङ्गत इव च हि भासते । वाल्मीकिरप्येवं नः प्रज्ञां परीक्षमाणः क्रीडतीव ॥ ३०–१ ॥

चिरं सञ्चिन्त्य निश्चित्य रावणोऽधिष्ठितो रथम् ।
तीरे [१]नदीनदपतेर्गोकर्ण्णं क्षेत्रमाप्तवान्[२] ॥ ३१ ॥

(भा.दी.) चिरमिति । रावणः चिरं यथा भवति तथा कर्तव्यकार्योपायं सञ्चिन्त्य, बुद्ध्या अयं उपाय इति निश्चित्य, स्वकीयो यो रथस्तं अधिष्ठितः आरूढः सन्, नद्यश्च नदाश्च तेषां पतेः समुद्रस्य यत्तीरं तस्मिन्, पश्चिमसमुद्रतीर इत्यर्थः, गोकर्णं गोकर्णाख्यं क्षेत्रं आप्तवान् ॥ ३१ ॥

---

१. **'पूर्वप्रवाहा नद्यः' पश्चिमप्रवाहाः नदाः'** इति का.श्री. । अस्य मूलं मृग्यम् ।

२ **'–पतेर्गोकर्णक्षेत्रमाप्तवान्' । अनेन श्लोकेन '–जगाम तीरे । क्षेत्रं नदीनदपतेः श्रवणे धरित्र्याः' इति श्लोके धरित्र्याः श्रवणमित्यस्य गोकर्णक्षेत्रमित्यर्थ उक्तो भवति'** इति का.श्री. ।

तपस्यन्तं तमस्यन्तं मारीचं तत्र दृष्टवान् ।
विधिना पूजितस्तेन रावणो वाक्यमब्रवीत् ॥ ३२ ॥

(भा.दी.) तपस्यन्तमिति । रावणः तत्र गोकर्णे तपस्यन्तं तपः कुर्वाणम्, तमसि तमोगुणे भवन् तमस्यन् तम्, तमोगुणस्वभावयुक्तमित्यर्थः, तं तादृशं मारीचं दृष्टवान् । तेन मारीचेन विधिना शास्त्रोक्तविधानेन पूजितः सन् वाक्यं वचस्तत् अब्रवीत् ॥ ३२ ॥

(सं.चं.) तं तपस्यं फाल्गुनं शैत्यातिरेकात् कथञ्चिदस्यन्तं तं मारीचम् । अत्र 'तपस्यम्+तम्+तम्+अस्य-न्तम्' इति प्रतृण्णम् । अथापि तपस्यन्तम्, तेन हिमसमयमस्यन्तं तं मारीचम् । अत्र 'तपस्यन्तम्+तम्+अस्यन्तम्' इति प्रतृण्णम् । अथ 'तपस्यन्तं तमस्यन्तम्' इति द्वे पदे । तपश्चरति तपस्यति । 'कर्मणा रोमन्थतपोभ्यां वर्तिचरोः' (अ.सू.३.१.१५) इति क्यङ् । 'तपसि परस्मैपदं च' इति च वार्तिकम् । तमस्यन्तमपि अन्धे तमसि अन्तोऽवसानं यस्य तादृशम् । तमः स्वभावयुक्तमित्यपि व्याचक्षते । तमसि लालसो भगवति तमस्यतीत्यर्थः । 'सर्वप्रातिपदिकेभ्यो लालसायामसुग् वक्तव्यः' इति 'सुग् वक्तव्यः' इति च वार्तिकं पठन्ति (अ.सू.७.१.५१) ॥ ३२ ॥

मानवेनैव रामेण खराद्याः स्वजना हताः ।
तस्य भार्यां[१] हरिष्यामि तत्र मित्रं भवाङ्ग मे ॥ ३३ ॥

(भा.दी.) मानवेनेति । हे अङ्ग प्रिय, मानवो मनुष्यस्तेनैव, नरमात्रेणेत्यर्थः, श्रीरामेण, खर आद्यो येषां ते तथा, स्वाः बन्धवो जनाः हताः । तन्निमित्तमहं तस्य श्रीरामस्य भार्यां सीतां हरिष्यामि । हृञो लृट् । त्वं तत्र सीताहरणे मे मम मित्रं सहायभूतः भव ॥ ३३ ॥

(सं.चं.) मित्रं भव सहायो भव । सहायं हि सखायमाहुः । तत्र हरणकर्मणि ॥ ३३ ॥

त्वं सुवर्ण्णमृगो भूत्वा तत्र सीतां विलोभय ।
अनुधावति रामे त्वां सीतां नेष्याम्यहं सुखम् ॥ ३४ ॥

(भा.दी.) मया किं कार्यमित्यत आह– **त्वमि**ति । त्वं तत्र श्रीरामाश्रमसमीपे, सुवर्णमयो मृगः कुरङ्गो भूत्वा सीतां विलोभय वञ्चय । लुभ गार्ध्ये लोट् । श्रीरामे च त्वां अनुधावति, सीतावाचा ग्रहीतुमनुधावनं कुर्वति सति, अहं सीतां सुखं यथा भवति तथा, निरोधकाभावादिति भावः, नेष्यामि ॥ ३४ ॥

१. 'तस्य जायाम्'

(सं.चं.) तत्र यत्र रामाश्रमः ॥ ३४ ॥

इत्युक्त ऊचे मारीचो न रामं वेत्थ रावण ।
यस्यैकः[1] सायको हन्तुमलं सासुरराक्षसान् ॥ ३५ ॥

(भा.दी.) इतीति । इति रावणेनोक्तो मारीचः, हे रावण, त्वं श्रीरामं न वेत्थ न जानासि, विदेर्लट्, यस्य श्रीरामस्य एकः सायकः, असुरैः सहिताः सासुरास्ते च ते राक्षसाश्च तान्, हन्तुं अलं समर्थः, इति ऊचे ॥ ३५ ॥

(सं.चं.) न वेत्थ न वेत्सि । 'विदो लटो वा' (अ.सू.३.४.८३) इति विकल्पेन लटो लिडादेशे तिपः स्थाने थलि वेत्थेति रूपम् ॥ ३५ ॥

ऊनषोडशवर्षस्य विश्वामित्रार्त्थमीयुषः ।
सिद्धाश्रमेऽन्वभूवं हि तैक्ष्ण्यं रामस्य पत्रिणः ॥ ३६ ॥

(भा.दी.) ऊनेति । षडधिका दश षोडश षोडश च तानि वर्षाणि षोडशवर्षाणि, ऊनानि न्यूनानि षोडशवर्षाणि यस्य स तथोक्तस्तस्य, विश्वामित्रायेति विश्वामित्रार्थम्, विश्वामित्रयज्ञरक्षणार्थमित्यर्थः, ईयुषः सिद्धाश्रमं प्राप्तवतः, सिद्धाश्रमः सिद्धाश्रमनामकविश्वामित्राश्रमः तस्मिन्, श्रीरामस्य पत्रिणः शरस्य, तीक्ष्णस्य भावस्तैक्ष्ण्यं तत् अन्वभूवम् अनुभूतवानस्मि ॥ ३६ ॥

(सं.चं.) ऊनषोडशवर्षस्य रामस्य । 'ऊनषोडशवर्षो मे रामो राजीवलोचनः' (बा.कां.२०.२) इति हि बालकाण्डे । विश्वामित्रार्थं विश्वामित्रेणार्थित इति हेतोः सिद्धाश्रममुपेयुषः ॥ ३६ ॥

पुनश्चाहं गतो वैराद्[2] राक्षसाभ्यां मृगाकृतिः ।
दण्डके तौ हतौ तस्य शरैर्भग्नोऽहमागतः ॥ ३७ ॥

(भा.दी.) पुनरिति । पुनश्च अहम्, मृगस्य आकृतिरिव आकृतिर्यस्य स तथोक्तः तथा सन्, राक्षसाभ्यां सह, वैरं विद्वेषस्तस्मात्, दण्डको दण्डकारण्यं तस्मिन्, गतः श्रीरामं हन्तुं प्राप्तः अस्मि । तस्य शरैः तौ मत्सहायभूतौ राक्षसौ तौ हतौ । अहं भग्नः सन् पराजितः सन् आगतः अस्मि ॥ ३७ ॥

---

१. **'यस्यैकसायको–'** २. **'वैरी राक्ष–'**

(सं.चं.) वैरात् पूर्ववैरमनुस्मृत्य । पुनश्च द्वाभ्यां सहचराभ्यां सह महर्षीणां जिहिंसिषया रामाश्रम-समीपं गतः, तौ मे सखायौ रामेण हतौ । अहं तु भावित्वात् कार्यस्य शरैर्भग्नोऽपि दिष्ट्या जीवन् गोकर्ण-मागतः ॥ ३७ ॥

स्वपक्षक्षयकोपाच्च सीताकामाच्च मा स्म गाः ।
रामं त्वं जीवनार्थी चेत् प्रोच्येति विरराम सः ॥ ३८ ॥

(भा.दी.) स्वेति । हे रावण, त्वं चेद्यदि जीवनमर्थयितुं शीलमस्यास्तीति तथा, तर्हि स्वस्य यः पक्षः सहायभूतः खरादिस्तस्य य क्षयः तस्मात् यः कोपस्तस्माच्च, सीतायां यः कामः अभिलाषस्तस्माच्च, श्रीरामं मा स्म गाः सर्वथा न गच्छ । इण् गतौ लुङ् । 'न माङ्योगे' (अ.सू.६.४.७४) इत्यडभावः । सः मारीचः इति प्रोच्य विरराम ॥ ३८ ॥

(सं.चं.) मा स्म गाः । 'स्मोत्तरे लङ् च' (अ.सू.३.३.१७६) इति पाणिनिः । चकाराल्लुङ् च ॥३८॥

विपक्षपक्षं[१] हन्यां त्वामाज्ञां मे न करोषि चेत् ।
इति ब्रुवन् निश्चकर्ष कोशात् खड्गं दशाननः ॥ ३९ ॥

(भा.दी.) विपक्षेति । चेद्यदि मम आज्ञां न करोषि तर्हि विपक्षस्य शत्रोः पक्षः सहायस्तं त्वां हन्याम् । हन्तेर्लिङ् । इति ब्रुवन् दशाननः, कोशोऽसिपिधानं तस्मात्, खण्डयति भिनत्ति शिर इति खड्गस्तं निश्चकर्ष उद्धृतवान् ॥ ३९ ॥

(सं.चं.) निश्चकर्ष बहिर्निर्गमयामास । कृष विलेखने । धातुरयं द्विः पठ्यते भ्वादौ च तुदादौ च । यद्यपि विलेखनं हलोत्किरणम् । अथापि भ्वादिराकर्षणेऽपि पठ्यते । निश्चकर्ष कोशान्निष्कास आ-चकर्षेत्यर्थः ॥ ३९ –४१ ॥

मारीचो मरणाद् भीतः पापात्मा च निसर्गतः ।
रावणेन सहाऽरुह्य[२] तं रथं दण्डकान् ययौ ॥ ४० ॥

---

१. 'विपक्षभक्तं हन्याम्'
२. 'रावणेन समारुह्य'

(भा.दी.) मारीच इति । मरणं मृतिस्तस्मात् भीतः, प्रहर्तुमुद्यतं रावणासिं दृष्ट्वा मरणभीत इत्यर्थः, निसर्गादिति निसर्गतः स्वभावत इत्यर्थः, पाप आत्मा स्वरूपं यस्य स तथा, तमोयोग्य इत्यर्थः, मारीचः रावणेन सह तं रावणसम्बन्धिनं रथमारुह्य दण्डकान् दण्डकाख्यदेशान् ययौ ॥ ४० ॥

अवरुह्य रथात् तस्माद् रावणेनाभिनन्दितः ।
मायामृगात्मा मारीचो रम्ये रामाश्रमेऽचरत् ॥ ४१ ॥

(भा.दी.) अवेति । रावणेन अभिनन्दितः सबहुमानवचसा सन्तोषितः मारीचः, तस्मात् आरूढात् रथात् अवरुह्य, मायया राक्षसानामौत्पत्तिक्या तामस्या शक्त्या, मृगस्य एणस्य आत्मा स्वरूपं यस्य स तथा सन्, रम्ये श्रीरामस्य यः आश्रमस्तस्मिन् बालतृणादिकं भक्षयन् अचरत् ॥ ४१ ॥

मुक्ताप्रवाळप्रच्छन्नो हेमबिन्दुशतान्वितः[१] ।
शृङ्गारितश्चतुःशृङ्ग्या रौग्म्या मन्दं चचार सः ॥ ४२ ॥

(भा.दी.) मुक्ताः मुक्तामणयः ताश्च, प्रवाळाश्च, तैः प्रच्छन्नः तत्र तत्र आच्छादितः, हेम्नो ये बिन्दवस्तेषां यच्छतं तेनान्वितो युक्तः, रौग्म्या स्वर्णमय्या, चतुर्णां शृङ्गाणां समाहारः चतुश्शृङ्गी, तया शृङ्गारितः अलङ्कृतः, सः मारीचः मन्दं चचार । चर गतिभक्षणयोर्लिट् ॥ ४२ ॥

(सं.चं.) मुक्ताप्रवाळाभ्यां प्रच्छन्नत्वक् । क्वचिन्मुक्ताभः, क्वचित् प्रवाळाभ इत्यर्थः । प्रवाळः='ಹವಳ, ಜಗಳ' इति भाषायाम् । प्रवाळः पल्लवइव वाऽऽरक्तः । चतुःशृङ्ग्या शृङ्गारितः अलङ्कृतः चचार चखाद च तृणानि ॥ ४२ ॥

मायामृगं प्रेक्ष्य देवी मायामानुषधर्म्मिणी[२] ।
मायामनुष्यस्य विभोर्म्मायास्मितमवैक्षत ॥ ४३ ॥

(भा.दी.) मायेति । मायया स्वेच्छया मानुषस्य मनुष्यजातेर्धर्मः अस्या अस्तीति तथा, यद्वा मायया स्वेच्छया मानुषो मानुषाकारः श्रीरामः तस्य धर्मः अस्या अस्तीति तथा, श्रीरामनटनानुसारेण नटनादिकं कुर्वन्तीत्यर्थः, देवी, मायया तामस्या शक्त्या मृगं मृगरूपिणं मारीचं प्रेक्ष्य, मायया स्वेच्छया मनुष्यस्य मानुषाकारस्य विभोः श्रीरामस्य, मायया स्वेच्छया कृतं स्मितं मन्दहासः, तत् अवैक्षत ॥ ४३ ॥

---

१. **'शताश्चितः'** इति, **'शताङ्कितः'** इति च । २. **'मायामानवधर्मिणी'**

(सं.चं.) मायया मोहन्या कपटविद्यया धृतमृगरूपम् । मायया भगवदिच्छया मानुषधर्मिणी मनुष्यस्वभावमनुवर्तमाना । मायया स्वेच्छया स्वमहिम्ना वा धृतमनुष्यरूपस्य, मायया ज्ञानेन स्मितं मायास्मितम् । मृगरूपधरं मारीचं जानन्नेव रामः स्मितमुखो बभूवेत्यर्थः । सीता तत् स्मितं भाविकार्यावबोधकमिवावैक्षत ॥ ४३ ॥

रक्षोलक्षकुलाभिचारमखिलत्रैलोक्यसौख्याकरं
[१]भ्राम्यन्मन्दमनीषमण्डलमनोमोहार्णवोद्घूर्णनम् ।
तत्वज्ञानजुषां विडम्बनमहानाट्याग्ररङ्गं[२] वचो
रामाणां परमा रमा स्वरमणं रामं बभाषे तदा ॥ ४४ ॥

इति श्रीनारायणपण्डिताचार्यविरचिते रामाङ्के सङ्ग्रहरामायणेऽरण्यकाण्डे चतुर्थः सर्गः ॥

(भा.दी.) रक्ष इति । तदा मारीचसञ्चारसमये, रामाणां सरस्वत्यादिस्त्रीणां मध्ये परमा उत्तमा, रमा महालक्ष्मीस्वरूपा सीता, स्वस्य यो रमणो भर्ता तं श्रीरामं प्रति, रक्षसां लक्षाणि लक्षसङ्ख्याकानि यानि कुलानि समूहाः, तेषामभिचार इवाभिचारस्तम्, राक्षसानामनेककुलस्य मारणयोगमित्यर्थः । अखिलानि यानि त्रैलोक्यानि तेषां यत्सौख्यं सुखम्, तस्य आकारइव आकारस्तम्, समस्तत्रैलोक्यस्थितसात्विकजनसौख्योत्पत्तिस्थानभूतमित्यर्थः । भ्राम्यन्तः तत्वापरिज्ञानेन यत्किञ्चिद्भाषमाणाः, मन्दा मनीषा बुद्धिः सा एषामस्तीति मन्दमनीषिणः अज्ञानिनो विपरीतज्ञानिनश्च, तेषां यन्मण्डलं समूहः, तस्य यानि मनांसि तेषां यो मोहः स एवार्णवस्तस्य उद्घूर्णनमभिवृद्धिर्यस्मात् तथोक्तं तत्, अज्ञानिविपरीतज्ञानिनां मनस्सु वर्तमानाज्ञानविपरीतज्ञानात्मको यो मोहसमुद्रः तस्याभिवृद्धिहेतुमित्यर्थः । तेषां चित्तं विशेषतोऽमोहयदिति यावत् । तत्वानां परापरवस्तूनां यज्ज्ञानं तत् जुषन्ते सेवन्त इति तत्वज्ञानजुषः, तेषां समीचीनज्ञानिनां ब्रह्मादीनामित्यर्थः, लोकविडम्बनाख्यं यन्महन्नाटचं नर्तनम्, तस्य अग्ररङ्गइव पूर्वरङ्गइव तम्, वचः वाक्यं बभाषे । भाष व्यक्तायां वाचि लिट् ॥ ४४ ॥

इति श्रीविश्वपतितीर्थकृतायां श्रीसङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायामरण्यकाण्डे चतुर्थः सर्गः समाप्तः ॥

—०—

१. **'भ्राम्यन्मन्दमनीषिमण्डल–'** इति वि.ती.पाठः ।
४. **'अग्ररङ्गं प्रथमनृत्यस्थलम्'** इति का.श्री. ।

(सं.चं.) शार्दूलविक्रीडितेनोपसंहरति । मसजसतताः सगुरवः शार्दूलविक्रीडितम् । तदा यदा सीता मायामृगं ददर्श, राममायास्मितस्याऽशयं विदुषी रमा स्वरमणं, स्वयमेव रमणात् स्वरमणम्, अथापि स्वस्य रमणं रामं वक्ष्यमाणं वचो बभाषे । कीदृशं वचः? रक्षसां यानि लक्षाणि तेषां कुलस्याऽभिचारकर्मैव निःशेष-नाशनिदानम् । पुनः कीदृशम्? त्रैलोक्यस्य कण्टकापनयनेन सौख्यनिधानम् । पुनः कीदृशम्? भ्राम्यन्तो ये मन्दमनीषास्तेषां मण्डलस्य यो मोहः, सीताऽपि मुमोह, रामोऽपि बभ्रामेत्यादिः, स एवार्णवः, तस्योद्घूर्णनम्, उद्रेककारणम् । पुनः कीदृशम्? तत्वज्ञानिनां मतेन विडम्बनं लोकानुकरणमेव यद् भगवतो महानाट्यं तस्याग्ररङ्गं पूर्वरङ्गस्थलकल्पम् ॥ ४४ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायामरण्यकाण्डे चतुर्थसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– १२८१+५४=१३२५]

पञ्चमः सर्ग्गः

क्रीडार्त्थं चित्रसारङ्गं देहीमं देवदेव मे ।
बृस्या[१] आस्तरणायात्र[२] विचित्रामस्य वा त्वचम् ॥ १ ॥

(भा.दी.) श्रीरामस्य सीतायाश्च लोकानुकरणमेव दर्शयति– **क्रीडार्थमित्या**दिना । देवानां ब्रह्मादीनां देवस्तत्सम्बुद्धिः, श्रीराम, इमं चित्रः चित्रवर्णो यः सारङ्गस्तम्, क्रीडायै इति क्रीडार्थं मे मह्यं देहि । विचित्रां नानावर्णां अस्य एणस्य त्वचं वा चर्म वा अत्र आश्रमे बृस्याः ऋषीणामासनस्य । 'ऋषीणामासनं बृसी' इत्यमरः । आस्तरणमाच्छादनं तस्मै देहि ॥ १ ॥

(सं.चं.) चित्रं चित्रवर्णम् । अत एव विस्मयावहं च । सारङ्गं हरिणम् । आनीय देहि । यदि जीवन् नागृह्यत त्वचं वा देहि । किमर्थम्? बृस्या आसनस्योपरि आस्तरणाय । बृसी– **'ಮಣೆ'** इति भाषायाम् । बुवन्तोऽस्यां सीदन्तीति बृसी (ब्रुवच्छब्दस्य बृ इत्ययमादेशः । 'पृषोदरादीनि यथोपदिष्टम्' (अ.सू.६.३.१०९) ॥ १ ॥

इत्युक्तो देव[३] आदाय चापं चारु कलापवान्[४] ।
रक्ष लक्ष्मण सीतां त्वमित्युक्त्वा मृगमन्वगात् ॥ २ ॥

(भा.दी.) **इती**ति । इति उक्तः सीतयाऽभिहितः श्रीरामः, चपस्य वेणोरयं विकारश्चापस्तं आदाय, चारू यौ कलापौ इषुधी तौ अस्य स्त इति तथा सन्, हे लक्ष्मण, त्वं सीतां रक्ष इति उक्त्वा मृगं अन्वगात् । इण् गतौ लुङ् ॥ २ ॥

---

१. **'बृश्या–'** इति पठन्तो भ्रान्ताः ।

२. **'विचित्रां नानावर्णोपेताम्, आश्चर्यकारणमिति वा'** इति का.श्री. ।

२. **'इत्युक्तो राम आदाय'** इति वि.ती.पाठः स्यात् ।

३. **'चापं चारुं कलापवान्'**

(सं.चं.) चारू बाणपूर्णौ कलापौ तूणीरावस्य स्त इति चारुकलापवान् यद्वा चारु चापम् । कलापस्य चारुत्वं मतुबैव बोध्यते । 'भूमनिन्दाप्रशंसासु–' इत्यादिस्मरणात् ॥ २–३ ॥

दूरं दुद्राव दुष्टात्मा मारीचो वीक्ष्य[१] राघवम् ।
रामोऽपि तमनुद्रुत्य मुमोचान्तकरं शरम् ॥ ३ ॥

(भा.दी.) **दूरमि**ति । दुष्ट आत्मा स्वभावो यस्य स तथोक्तः मारीचः राघवं वीक्ष्य दूरं यथा भवति तथा दुद्राव । द्रु गतौ लिट् । रावणेन नीयमानां सीतां श्रीरामो न पश्येदित्यभिप्रायेण दूरं जगामेति भावः । श्रीरामोऽपि तं अनुद्रुत्य, अन्तं नाशं करोतीति तथोक्तस्तं शरं मुमोच ॥ ३ ॥

हा लक्ष्मणेति विक्रुश्य रावणस्यार्थसिद्धये ।
विद्धः[२] स्वरूपवान् पापो भुवमार ममार च ॥ ४ ॥

(भा.दी.) हेति । विद्धं यदेणस्वरूपं तदस्यास्तीति तथोक्तः, पापः मारीचः रावणस्य अर्थस्य सीता-हरणाख्यप्रयोजनस्य या सिद्धिस्तस्यै, हा लक्ष्मण इति विक्रुश्य आक्रोशनं कृत्वा, भुवं भूमिं आर प्राप । ऋ गतौ लिट् । भुवि पपातेत्यर्थः । ममार च । मृङ् प्राणत्यागे लिट् । हा लक्ष्मणेत्याक्रोशने कृते रामान्वेषणार्थं लक्ष्मण आयास्यति । तदा च रावणः सुखेन सीतां हरेदित्यभिप्रायेणाक्रोशनं कृत्वा ममारेति भावः ॥ ४ ॥

(सं.चं.) स्वं स्वकीयं राक्षसरूपम्, तद्वान् । मरणकाले मायाऽपि हि विनश्यति । भुवमार पपात ममार च । 'वमार ममार' इति मधुरोऽनुप्रासः ॥ ४–५ ॥

[३]सर्वज्ञाऽप्यथ सर्वेशी कर्त्तुं रक्षःपरिक्षयम् ।
आर्त्तनादं तमाकर्ण्य लक्ष्मणं प्रत्यवोचत[४] ॥ ५ ॥

(भा.दी.) **सर्वज्ञे**ति । अथ सर्वेषां ब्रह्मादीनां ईष्ट इति सर्वेशी सीता सर्वज्ञाऽपि, रक्षसां यः परिक्षयस्तं कर्तुम्, तं आर्तस्य नादो ध्वनिस्तं आकर्ण्य लक्ष्मणं प्रति अवोचत । ब्रूञो लुङ् ॥ ५ ॥

---

१. **'मारीचोऽन्वीक्ष्य'** २. **'विद्धस्वरूपवान्'** इति वि.ती. पाठः ।

३. **'सर्वज्ञाऽपि ईशादन्यत्र अनालोचनेऽपि सर्वविषयज्ञानवत्यपि । हा लक्ष्मणेति वाक्यं रामवाक्यं न भवति, किन्तु म्रियमाणमारीचवाक्यमिति जानन्त्यपि'** इति का.श्री. । ४. **'प्रत्यचोदयत्'**

(सं.चं.) 'अवोचत, वचेर्लुङ्' इति भ्रान्तं व्याख्यानम् । परस्मैभाषो हि वचिः । तेन 'अवोचत्' इति वचे रूपम् । ब्रूतेरात्मनेभाषायां लुङि 'अवोचत' इति । 'अचोदयत्' इति पाठे स्फुटोऽर्थः ॥ ५ ॥

हा लक्ष्मणेत्यार्त्तनादो नूनं रामस्य लक्ष्मण ।
गच्छ तूर्ण्णं विजानीया इत्युक्तो लक्ष्मणोऽब्रवीत् ॥ ६ ॥

(भा.दी.) हेति । हे लक्ष्मण, हा लक्ष्मण इति आर्तनादः रामस्य श्रीरामस्य सम्बन्धी नूनम् । तूर्णं यथा भवति तथा श्रीरामसमीपं गच्छ । श्रीरामप्रवृत्तिं विजानीयाः जानीहि । ज्ञा अवबोधने लिङ् । इति उक्तः लक्ष्मणः अब्रवीत् ॥ ६ ॥

(सं.चं.) रामस्य वार्तां विजानीयाः ॥ ६–७ ॥

यद्भ्रूविभ्रममात्रेण सुरासुरनरादिकम् ।
विश्वं स्थितिलयोत्पत्तीर्य्याति तस्याम्ब किं[1] भयम् ॥ ७ ॥

(भा.दी.) **यदिति** । हे अम्ब मातृतुल्ये सीते, 'अम्बार्थनद्योर्ह्रस्वः'(अ.सू.७.३.१०७) इति ह्रस्वः । सुराश्च असुराश्च नराश्च त आदयो यस्य तत्तथोक्तं विश्वं जगत्, यस्य श्रीरामस्य भ्रुवोर्विभ्रममात्रं चलनमात्रं तेन, स्थितिश्च लयश्च उत्पत्तिश्च ताः याति, तस्य भयं किं कस्मात्? सर्वस्य तदधीनत्वात् कुतोऽपि भयं नाऽशङ्क्यमित्यर्थः ॥ ७ ॥

नाथो नारायणात्मा नो न शोच्यो देवि राघवः ।
माया मायाविनामेषा[2] स्यान्नूनं पिशिताशिनाम् ॥ ८ ॥

(भा.दी.) मरणभयाभावाच्छोच्यताऽपि नास्तीत्याह– **नाथ** इति । हे देवि, नारायण आत्मा स्वरूपं यस्य स तथोक्तः नः अस्माकं नाथः राघवः शोच्यः न । माया तत्क्षणे वस्तुसर्जनसमर्था तामसी शक्तिरेषामस्तीति तथा तेषां पिशिताशिनां राक्षसानां एषा हा लक्ष्मणेत्यार्तध्वनिकारणीभूता माया तामसी शक्तिः स्यात् । नूनं सन्देहो न कार्य इत्यर्थः ॥ ८ ॥

(सं.चं.) नोऽस्माकं नाथो राघवः ॥ ८ ॥

१. 'तस्य च किम्'
२. 'मायाविनामेषाम्'

इत्युक्ता भगवत्यूचे सौहार्दं नास्ति ते कथम् ।
इच्छस्युपरते[1] देवे त्वं क्रूर शठ मामिति ॥ ९ ॥

(भा.दी.) इतीति । इति लक्ष्मणेन उक्ता भगवती षड्गुणवती सीता, हे क्रूर लक्ष्मण, ते तव श्रीरामे सौहार्दं स्नेहः कथं नास्ति? हे शठ वक्रहृदय, त्वं देवे श्रीरामे उपरते मृते सति मां भोक्तुं इच्छसि । इषु इच्छायां लट् । इति ऊचे ॥ ९ ॥

(सं.चं.) कथं ते भ्रातरि सौहार्दं नास्ति? प्राय इदं स्यात् कारणम्– देवे रामे उपरते मृते प्रायस्त्वं मामिच्छसि । अत इयमुपेक्षा रामविषये ॥ ९ ॥

श्रुत्वेति दुःश्रवं वाक्यं रुदन्नाचष्ट लक्ष्मणः ।
धिग्धिङ् महापातकिनं मामेवंवचनास्पदम् ॥ १० ॥

(भा.दी.) श्रुत्वेति । लक्ष्मणः श्रोतुमनर्हं दुःश्रवं तत् इति वाक्यं श्रुत्वा रुदन् सन् आचष्ट । चक्षिङ् व्यक्तायां वाचि लङ् । एवम्प्रकारं वचनमेवंवचनं तस्य आस्पदो विषयस्तम्, महद् यत्पातकं तदस्यास्तीति तथा तम्, मां धिक्धिक् इति आचष्टेति ॥ १० ॥

(सं.चं.) एवमपवादरूपवचनस्याऽस्पदम् ॥ १० ॥

आर्य्यस्याऽज्ञाविमोक्षोऽयमार्य्याया लङ्घनाल्लघुः ।
स्वस्ति तेऽस्तु गमिष्यामि मातस्त्वां पातु शार्ङ्गभृत् ॥ ११ ॥

(भा.दी.) आर्यस्येति । आर्यस्य स्वामिनः श्रीरामस्य, आज्ञायाः सीतां संरक्षेत्याज्ञायाः, विमोक्षः परित्यागः, आर्यायाः सीतायाः स्वामिन्याः, आज्ञाया इति शेषः, लङ्घनमतिक्रमस्तस्मात् लघुः ह्रस्वः, इति निश्चित्य हे मातः, मातृतुल्ये सीते, ते तुभ्यं स्वस्ति मङ्गळं अस्तु । अहं श्रीरामनिकटं गमिष्यामि । त्वां शार्ङ्गं बिभर्तीति शार्ङ्गभृत् श्रीहरिः पातु ॥ ११ ॥

(सं.चं.) रक्ष सीतामित्यार्यस्य रामस्याऽज्ञाया विमोक्ष उल्लङ्घनम् । सीताया वचनोल्लङ्घनाद् वरम् । तत्र महद्वचनलङ्घनमात्रं दोषः । अत्र त्वाज्ञालङ्घनं वचनीयता चेति दोषद्वयम् ॥ ११–२ ॥

---

१. 'वाञ्छस्युपरते'

इत्युक्त्वाऽन्वद्रवत्[1] तूर्णं राघवं राघवानुजः ।
देवी च देवकार्य्यं तत् कुर्वाणाऽत्राऽश्रमेऽवसत्[2] ॥ १२ ॥

(भा.दी.) इतीति । राघवानुजः लक्ष्मणः इति सीतां प्रति उक्त्वा राघवं श्रीरामं तूर्णं यथा भवति तथा अन्वद्रवत् । द्रु गतौ लङ् । देवानां यत्कार्यं राक्षसहननलक्षणं यस्मात् तथोक्तं तत् तादृशं कर्म कुर्वाणा देवी च सीता च अत्र आश्रमो मुनिवासस्तस्मिन् अवसत् ॥ १२ ॥

(सं.चं.) देवानां हितार्थं करणीयं कार्यम्, स्वापहरणानुकूल्यसम्पादनायेव लक्ष्मणस्य तदाश्रमान्निर्याणरूपं कुर्वाणा ॥ १२ ॥

राक्षसो भिक्षुवेषेण प्राप्तवान् राघवाश्रमम् ।
अकामयत तां देवीं श्रुतिं शूद्रइवावरः[3] ॥ १३ ॥

(भा.दी.) राक्षस इति । राक्षसः रावणः भिक्षूणां सन्यासिनां यो वेषस्तेन राघवस्य य आश्रमस्तं प्राप्तवान् देवीं सीतां श्रुतिं वेदं अवरः वर्णतोऽधमः शूद्रइव अकामयत अपहर्तुमैच्छत । कमु कान्तौ लङ् ॥ १३ ॥

(सं.चं.) भिक्षुरूपेण परिव्राजकरूपेण । 'परिव्राजकरूपेण वैदेहीं समुपागमत्' (४६.४) इति च ॥१३॥

का त्वं कान्तेऽनवद्याङ्गी[4] व्यक्तं देवी न मानवी ।
कस्मात् कान्तारमापन्नाऽसीति[5] तां रावणोऽब्रवीत् ॥ १४ ॥

(भा.दी.) का त्वमिति । हे कान्ते मनोहरे, त्वं का कस्य भार्या असि? न विद्यते अवद्यमलक्षणं यस्य तदनवद्यम्, तादृशमङ्गं यस्याः सा तथोक्ता त्वं व्यक्तं स्पष्टं यथा भवति तथा देवी देवस्त्री । मानवी मानुषजात्युत्पन्ना स्त्री न । कस्मात् कारणात् कान्तारं वनं तत् आपन्ना असि, रावणः इति तां सीतां अब्रवीत् ॥ १४ ॥

---

१. **'इत्युक्त्वाऽभ्यद्रवत्'** २. **'कुर्वाणा स्वाश्रमेऽवसत्'**

३. **'शूद्रइवाशुभः'** इति, **'शूद्रइवापरः'** इति च क्वचित् । ४. **'कान्तेऽनवद्याङ्गि'**

५. **'–मापन्ना इति ताम्'** इति केचिद् विसन्धिं पाठं पठन्ति । **'पदे तु संहिता नित्या नित्या धातूपसर्गयोः। समासे च तथा वाक्ये सा विवक्षामपेक्षत इति शाब्दिकोक्तेः 'आपन्ना इति'** इत्यत्र सन्ध्यभावः' इति का.श्री. । नातिस्वरसमेतत् । **'कान्तारमापन्नमिति'** इति क्वचित् ।

(सं.चं.) दुर्गमं महावनं कान्तारः कान्तारं वा । 'कान्तार इक्षुभेदे ना नस्त्री व्यध्वमहावने' इति यादव-प्रकाशः । आपन्ना प्राप्ता ॥ १४–५ ॥

राजा दाशरथी रामो वनं पित्राज्ञयाऽऽव्रजत् ।
तस्याहं दयिता पत्नी सीतेति[१] प्रत्यभाषत ॥ १५ ॥

(भा.दी.) राजेति । दशरथस्यापत्यं पुमान् दाशरथिः रामनामधेयः राजा पितुर्दशरथस्य आज्ञया वनमरण्यं तत् आव्रजत् । व्रज गतौ लङ् । अहं तस्य श्रीरामस्य दयिता प्रिया पत्नी भार्या सीता सीतानाम्नी अस्मि इति प्रत्यभाषत ॥ १५ ॥

श्रुत्वा दृष्ट्वा च रम्यां त्वां कामार्त्तो रावणोऽस्म्यहम् ।
त्रैलोक्येशस्य मे प्रेष्ठा भवेति स्माऽह रावणः[२] ॥ १६ ॥

(भा.दी.) श्रुत्वेति । अहं त्वां रम्यां पूर्वं श्रुत्वा, इदानीं दृष्ट्वा च, कामार्तः कामपीडितः रावणःअस्मि । त्रैलोक्यस्य ईशस्तस्य मे प्रेष्ठा भार्या, 'वल्लभा प्रेयसी प्रेष्ठा रमणी दयिता प्रिया' इति धनञ्जयः, भव, रावणः इति आह स्म अवदत् ॥ १६ ॥

(सं.चं.) 'प्रेष्ठा प्रियतमा प्रेयसी भव' इति ह स्माऽह कामार्तो रावणः ॥ १६ ॥

अप्रमेयप्रभावं त्वं न रामं वेत्थ राक्षस[३] ।
मत्कामाल्लप्स्यसे मृत्युमिति सीता तमब्रवीत् ॥ १७ ॥

(सं.चं.) अप्रमेयेति । हे राक्षस, (त्वं) अप्रमेयः साकल्येन ज्ञातुमशक्यः प्रभावः सामर्थ्यं यस्य स तथोक्तस्तं श्रीरामं न वेत्थ न जानासि । विद ज्ञाने लट् । मयि यः कामोऽभिलाषस्तस्मात् मृत्युर्मरणं तं लप्स्यसे प्राप्नोषि । डु लभष् प्राप्तौ लृट् । इति सीता तं प्रति अब्रवीत् ॥ १७ ॥

(सं.चं.) अप्रमेयः, न प्रमातुं शक्यः, नापि परिमातुम् । मत्कामात् मां न लप्स्यसे, किन्तु मृत्युं लप्स्यसे ॥ १७ ॥

---

१. 'सीतेत्थं प्रत्य–' २. 'स्माऽह राक्षसः'
३. 'वेत्थ रावण'

सेन्द्रदेवविजिष्णोर्म्मे किं रामान्मानवाद् भयम् ।
इति स्वं घोरमाकारं गृहीत्वा रावणोऽभ्ययात् ॥ १८ ॥

(भा.दी.) सेन्द्रेति । इन्द्रेण सहिताः सेन्द्राः, ते च ते देवाश्च, तान् विजेतुं शीलमस्यास्तीति तथोक्तः, तस्य मे मानवात् मनुष्यात् श्रीरामात् भयं किम्? न किमपीत्यर्थः । इति उक्त्वेति शेषः । स्वः स्वकीयस्तं घोरं आकारः, दशाननत्वादिरूपो य आकारः, तं गृहीत्वा परिगृह्य रावणः अभ्ययात् ॥ १८ ॥

(सं.चं.) सेन्द्राणां देवानां विजिष्णोः । अभ्ययात् सीताभिमुखं ययौ ॥ १८–२० ॥

अधृष्यशक्तिः शक्ताऽपि विक्षेप्तुं राक्षसेश्वरम् ।
विश्वेश्वरी तिरोऽभूत् सा सृष्ट्वा प्रतिकृतिं[1] निजाम् ॥ १९ ॥

(भा.दी.) अधृष्येति । अधृष्या केनाप्यनुल्लङ्घ्या शक्तिः सामर्थ्यं यस्याः सा तथा । तत्र हेतुर्विश्वेश्वरीति । जगत ईश्वरी सा सीता राक्षसेश्वरं रावणं विक्षेप्तुं तिरस्कर्तुं शक्ताऽपि, निजां प्रतिकृतिं प्रतिरूपं सृष्ट्वा, तिरोऽभूत् अदृश्याऽभूत् ॥ १९–२१ ॥

विज्ञाय रामस्य मतं सीता कैलासमाययौ ।
वन्द्यमानाऽवसत् तत्र शिवया च शिवेन च ॥ २० ॥

(भा.दी.) अन्तर्हिता स्वयं कुत्र गतेत्यत आह– **विज्ञायेति** । सीता श्रीरामस्य मतमभिप्रायस्तत् विज्ञाय कैलासः कैलासपर्वतस्तं आययौ । यातेर्लिट् । तत्र कैलासे शिवेन रुद्रेण शिवया पार्वत्या च वन्द्यमाना स्तूयमाना सती अवसत् । स्वप्रतिकृतिहरणं निमित्तीकृत्य रावणो हन्तव्य इति श्रीरामाभिप्रायं जानती सीता स्वप्रतिकृतिं सृष्ट्वा स्वयं कैलासं प्रति श्रीरामानुमत्यैव गतेत्यर्थः । नचात्र प्रमाणाभावः । 'सृष्ट्वा मायायमीं सीतां स रावणवधेप्सया । सीतामादाय धर्मिष्ठां पावकोऽन्तरधीयत । तां दृष्ट्वा तादृशीं सीतां रावणो राक्षसेश्वरः । समादाय ययौ लङ्कां सागरान्तरसंस्थिताम्' इति कूर्मपुराणोक्तेः । तत्रैव च कैलासं प्रति गतेत्यत्र च– 'भवानीपार्श्वमानीता मया रावणकामिता । या नीता राक्षसेशेन सीता भगवती कृता' इति च ॥ २० ॥

तां जानकीप्रतिकृतिं मन्वानो जानकीं खलः ।
तूर्णं स्यन्दनमारोप्य गगने गतवानथ ॥ २१ ॥

१. **'तस्यास्तु तां प्रतिकृतिं प्रविवेश शक्रो देव्याश्च सन्निधियुता व्यवहारसिद्ध्या इत्युक्तेः प्रतिकृताविन्द्रप्रवेशादिकमस्तीति ज्ञेयम्'** इति का.श्री.।

(भा.दी.) **तामि**ति । अथ तां जानकीनिर्मितां जानक्याः प्रतिकृतिं प्रतिबिम्बं जानकीं सीतां मन्वानः खलः रावणः, तूर्णं यथा भवति तथा, स्यन्दनो रथस्तं आरोप्य, गच्छन्त्यत्र खगा इति गगनं तस्मिन् गतवान् ॥ २१ ॥

(सं.चं.) स्वकृतनाटकस्य देवैः कृतं प्रतिमानाटकमजानन् रावणः प्रतिकृतिमेव प्रकृतिं मन्वानः । माया-परिव्राजकस्य मायासीता लब्धेति सुन्दरं नाटकम् ॥ २१ ॥

करुणं विललापाऽथ[१] च्छलसीता पुनःपुनः ।
हा राम रावणात् पाहि मां हा लक्ष्मण लक्षय[२] ॥ २२ ॥

(भा.दी.) **करुणमि**ति । अथ च्छलेन व्याजेन सीता, नतु स्वतः सीतेत्यर्थः, हा राम, रावणात् मां पाहि, हा लक्ष्मण, मां लक्षय पश्य । लक्ष दर्शनाङ्कनयोर्लोट् । इति करुणं कृपास्पदं यथा भवति तथा पुनःपुनः विललाप । लप व्यक्तायां वाचि लिट् ॥ २२ ॥

(सं.चं.) लक्षय पश्य रावणेनापह्रियमाणाम् ॥ २२–४ ॥

इमामवस्थां रामाय त्वं ब्रूहि वनदेवते ।
हाहा जटायो पक्षीन्द्र क्षिप्रं रामाय वेद्यताम् ॥ २३ ॥

(भा.दी.) **इमामि**ति । हे वनदेवते वनाभिमानिदेवते, त्वं इमां मम अवस्थां श्रीरामाय ब्रूहि । पक्षिणा-मिन्द्र हाहा जटायो, क्षिप्रं यथा भवति तथा इयं मदीयावस्था श्रीरामाय वेद्यतां विज्ञाप्यतां । विद ज्ञाने लोट् ॥ २३ ॥

इत्थं जटायुशब्दं[३] तं जटायुरभिशुश्रुवान् ।
पर्वतादुत्पपाताऽथ पर्वताग्र्यइवापरः ॥ २४ ॥

(भा.दी.) इत्थमिति । अथ इत्थं तं सीतयाऽभिहितं जटायुशब्दम्, जटायुरिति यः शब्दस्तम्, अभि-शुश्रुवान् अभिश्रुतवान् जटायुः अपरः पर्वताग्र्यइव पर्वतश्रेष्ठइव, पर्वाणि सन्धयोऽस्य सन्तीति पर्वतस्तस्मात् उत्पपात ॥ २४ ॥

---

१. 'विललापाथो छलसीता' २. 'लक्ष्मण पालय' ३. 'जटायुःशब्दम्'

नय मा राममहिषीं मयि जीवति राक्षस ।
शयिष्यसे रामबाणैरिति गृध्रोऽभ्यधादिमम् ॥ २५ ॥

(भा.दी.) नयेति । हे राक्षस रावण, मयि जीवति राममहिषीं सीतां मा नय । नीतेर्लोट् । त्वं श्रीरामस्य बाणास्तैः शयिष्यसे, मृतः सन् शयनं करिष्यसि । शीङ् स्वप्ने लृट् । इति गृध्रः जटायुः इमं रावणं अभ्यधात् उवाच ॥ २५ ॥

(सं.चं.) रामबाणैर्हतः शयिष्यसे । 'शयिष्यसे हतो भूमौ यथा भ्राता खरस्तथा' (५१.३०) इति च ॥२५॥

ततः[1] प्रववृते युद्धं पक्षिराक्षसराजयोः ।
नखतुण्डैश्च बाणैश्च परस्परवधैषिणोः ॥ २६ ॥

(भा.दी.) तत इति । ततः परस्परं यो वधस्तमेष्टुं शीलमनयोरस्तीति तथोक्तौ तयोः, पक्षिणश्च राक्षसाश्च तेषां राजानौ तयोः, नखाश्च[2] तुण्डानि च तानि तैश्च, बाणयन्ति विरावयन्ति शत्रूनिति बाणास्तैश्च, युद्धं प्रववृते । वृतु वर्तने लिट् ॥ २६ ॥

(सं.चं.) पक्षिराजराक्षसराजयोः । नखैस्तुण्डेन च पक्षिराजस्य । बाणै राक्षसराजस्य ॥ २६ ॥

राक्षसः क्षतगात्रोऽथ नखतुण्डैर्जटायुषः ।
मुमोच गृध्रराजाय दशाऽशु निशिताञ्छरान् ॥ २७ ॥

(भा.दी.) राक्षस इति । अथ जटायुषः नखाश्च तुण्डं च तैः क्षतं गात्रं यस्य स तथा राक्षसः, गृध्राणां राजा गृध्रराजस्तस्मै निशितान् दश शरान् आशु मुमोच ॥ २७ ॥

(सं.चं.) दश शरान् । 'अथ क्रोधाद् दशग्रीवो जग्राह दश मार्गणान्' (५१.८) इति च ॥ २७ ॥

पक्षाभ्यामक्षिणोच्चापं सारथिं नखरैः खरैः ।
रथं छत्रं च वाहांश्च विहङ्गो भङ्गमानयत् ॥ २८ ॥

---

१. **'तत्र प्रववृते'**

२. **'तुण्डं च'** इति युक्तम् । तथैव व्याख्यातं चोत्तरश्लोके ।

(भा.दी.) पक्षेति । विहायसा गच्छतीति विहङ्गः जटायुः पक्षौ पतत्रे ताभ्याम्, चापो धनुस्तं अक्षिणोत् व्यनाशयत् । क्षिणु हिंसायां लङ् । खरैः नखरा नखास्तैः सारथिं अक्षिणोत् । रथः स्यन्दनस्तं च्छत्रं तत् वाहानश्वांश्च भङ्गो विनाशस्तं आनयत् । नीञो लङ् ॥ २८ ॥

(सं.चं.) विहायसा विहायसि वा गच्छतीति विहङ्गः । 'विहायसो विह च' इति वार्तिकेन(अ.सू.३.२.३८) विहायसशब्दस्य विहादेशः । 'गमश्च' (अ.सू.३.२.४७) इति खच्प्रत्यये खित्वात् मुमागमे च 'विहङ्गमः' इति रूपम् । पुनश्च 'खच्च डिद् वा वक्तव्यः' (अ.सू.३.२.३८) इति वार्तिकेन 'विहङ्गः' इति रूप-सिद्धिः । खरैर्नखरैस्तुण्डेन च । पक्षाभ्यामक्षिणोच्चापम् । रामायणे तु–'ततोऽस्य सशरं चापं मुक्तामणिवि-भूषितम् । चरणाभ्यां महातेजा बभञ्ज पतगेश्वरः' (५१.१०) इत्युच्यते । तेन विरोध इति मा शङ्कि । याभ्यां चरन्ति तौ किल चरणौ । पक्षिणः पक्षाभ्यां चरन्ति । न पादाभ्याम् । तेन चरणाभ्यामिति यदाह वाल्मीकिस्तदेव पक्षाभ्यामित्याह सङ्ग्रहकारः, उद्घाटयन्निह वाल्मीकिहृदयम् । 'चरणाभ्यां महातेजा बभञ्जास्य महद् धनुः' (१४) इत्युपरि-तनवचनस्याप्ययमेवार्थः । सारथिं च नखैररक्षिणोत् अहिंसीत् । क्षिणित्वा तुण्डेनापातयत् । 'सारथेश्चास्य वेगेन तुण्डेनैव महच्छिरः । पुनर्न्यपातयत्–' (५१.१८) इति च । पक्षाभ्यां नखैस्तुण्डेन च रथं ध्वजं च वाहांश्च पिशाचवदनान् खरान् ॥ २८ ॥

खेचरैः स्तूयमानोऽसौ खेचरं वीक्ष्य रावणम् ।
आक्षिप्य परुषैर्वाक्यैरारुरोहाथ पृष्ठतः ॥ २९ ॥

(भा.दी.) ख इति । अथ खे आकाशे चरन्तीति खेचरास्तैः । 'तत्पुरुषे कृति बहुलम्' (अ.सू.६.३.१४) इत्यलुक् । गन्धर्वादिभिः स्तूयमानः लाळ्यमानः असौ जटायुः खेचरं रावणं वीक्ष्य, परुषाणि निष्ठुराणि तैः वाक्यैः आक्षिप्य निर्भर्त्स्य पृष्ठतः पृष्ठभागे आरुरोह । रुह बीजजन्मनि प्रादुर्भावे लिट् ॥ २९ ॥

(सं.चं.) खेचरैः स्तूयमानोऽसौ । 'निपपात भृशं पृष्ठे दशग्रीवस्य वीर्यवान् । विददार नखैरस्य तुण्डं पृष्ठे समर्पयन् । केशांश्चोत्पाटयामास नखपक्षमुखायुधः' (५१.३३–५) इति च ॥ २९–३० ॥

पृष्ठपीठं[१] चखानाथ नखैः पक्षी तु रक्षसः ।
विमोचनाय तन्वङ्ग्याः केशांश्चास्योदपाटयत्[२] ॥ ३० ॥

१, 'पृष्ठमूलम्' २. 'केशांश्चास्योदमूलयत्'

(भा.दी.) पृष्ठेति । अथ पक्षी रक्षसः रावणस्य पृष्ठस्य पीठं मूलं तत् नखा नखरास्तैः चखान विददार, खनु अवदारणे लिट् । तनु कोमलमङ्गं शरीरं यस्याः सा तथा तस्याः सीतायाः, विमोचनं विमोक्षस्तस्मै, तादर्थ्ये चतुर्थी, अस्य रावणस्य केशांश्च उदपाटयत् लुलुञ्च । पट गतौ लङ् ॥ ३० ॥

विमुच्य मृगशाबाक्षीं राक्षसः पक्षिविक्षतः[1] ।
अभ्यापतत् पतत्रीन्द्रं तौ मुहूर्त्तं न्ययुद्ध्यताम् ॥ ३१ ॥

(भा.दी.) विमुच्येति । पक्षिणा विक्षतः राक्षसः, मृगस्य एणस्य यः शाबः शिशुस्तस्य अक्षिणी इव अक्षिणी यस्याः सा तथा तां सीतां विमुच्य, पतत्रीन्द्रं जटायुषं अभ्यापतत् अभिययौ । तौ रावणजटायुषौ मुहूर्तो मुहूर्तकालस्तं न्ययुद्ध्यतां युयुधाते ॥ ३१ ॥

(सं.चं.) न्ययुद्ध्यतां न्ययुद्ध्येताम् । युद्ध्यतिमुभयतोभाषं मन्यन्ते कवय इत्युक्तम् । अथापि कथं नियुयुधाते? नियुद्धमिति बाहुयुद्धमुच्यते । रावणस्तु नियुद्ध्येत । कथमबाहुर्जटायुः? मैवमवक्ष्यथाः, यदि वागर्थावध्य-गीष्यथाः । निवृत्तायुधं हि युद्धं नियुद्धमुच्यते । निरायुधमित्येतत् । बाहुषाळिनावेव हि प्रायो युद्ध्येते । तेन नियुद्धं बाहुयुद्धमाचक्षते । अत्र तु निरायुधत्वं समानम् । रावणस्तु पक्षिपक्षक्षिप्तचापः क्षणं बाहुभ्यामेव युयुध इत्यर्थः । 'ततः क्रोधाद् दशग्रीवः सीतामुत्सृज्य रावणः । मुष्टिभ्यां चरणाभ्यां च गृध्रराजमपोथयत्' (५१.४०) इति च ॥ ३१ ॥

तस्य श्रान्तस्य वृद्धस्य षष्टिवर्षसहस्रिणः ।
पक्षौ पादौ च पार्श्वे[2] च खड्गेनाखण्डयत् खलः ॥ ३२ ॥

(भा.दी.) तस्येति । खलः श्रान्तस्य युद्धेन श्रमं गतस्य । तत्र हेतुः– **षष्टीति** । वर्षाणां सहस्राणि वर्षसहस्राणि, षष्टिः वर्षसहस्राणि अस्य सन्तीति तथोक्तः, तस्य, अत एव वृद्धस्य जटायुषः, पक्षौ पादौ च पार्श्वे च, खण्ड्यतेऽनेनेति खड्गस्तेन अखण्डयत् ॥ ३२ ॥

(सं.चं.) 'तस्य व्यायच्छमानस्य रामस्यार्थे स रावणः । पक्षौ पार्श्वौ च पादौ च खड्गमुद्धृत्य सोऽच्छिनत्' (५१.४३) इति च । उरसः पार्श्वे पतत्रमूले इत्यर्थः ॥ ३२–४ ॥

---

१. **'पक्षविक्षतः'**

२. **'पार्श्वे विद्यमानौ पक्षौ'** इति का.श्री. । रामायणाननुगुणमेतत् ।

मन्दचेष्टं निपतितं राममित्रं पतत्रिणम् ।
मायासीता तमाश्लिष्य विललाप शुकालपा ॥ ३३ ॥

(भा.दी.) मन्देति । शुकवदालपति सम्भाषणं करोतीति शुकालपा, मायासीता मायया च्छलेन सीता, सीताप्रतिकृतिरित्यर्थः, मन्दा स्वल्पा चेष्टा यस्य स तथा तम्, निपतितं श्रीरामस्य मित्रं तत्, तं पतत्रिणं आश्लिष्य विललाप ॥ ३३ ॥

हठेन[१] कठिनात्मा स तामाकृष्य निशाचरः ।
गृहीत्वाऽऽकाशमाक्रम्य प्रययौ वायुवेगवान् ॥ ३४ ॥

(भा.दी.) हठेनेति । कठिनः निर्दयः आत्मा मनो यस्य स तथोक्तः, सः निशाचरः, हठो बलात्कारस्तेन, तां सीतां आकृष्य गृहीत्वा, आ समन्तात् काशन्ते सूर्यादयोऽत्रेत्याकाशं तत् आक्रम्य, वायोर्वेग इव वेगोऽस्यास्तीति तथोक्तस्तथा सन् प्रययौ । रथस्य जटायुषा विनाशितत्वादाकाशमार्गेण जगामेति भावः ॥ ३४ ॥

हृतायां रक्षसा तस्यां चुक्षोभेदं चराचरम्[२] ।
हिरण्याक्षेण दैत्येन क्षोण्यामिव गरीयसा ॥ ३५ ॥

(भा.दी.) हृतायामिति । गरीयसा अतिस्थूलकायेन हिरण्याक्षेण हिरण्याक्षनामकेन दैत्येन क्षोण्यामिव पृथिव्यामिव, तस्यां सीतायां रक्षसा रावणेन हृतायां सत्याम्, इदं चराचरं जगत् चुक्षोभ क्षुब्धमभूत् । क्षुभ सञ्चलने लिट् ॥ ३५ ॥

(सं.चं.) क्षोण्यामिव हृतायाम्, आकृष्टिशक्तिविहापनेन ॥ ३५–८ ॥

लोकनाथस्य कान्तां मां कालपाशायितां तव ।
मुञ्चमुञ्चेति सा तन्वी रुरोद करुणं मुहुः ॥ ३६ ॥

(भा.दी.) लोकेति । तन्वी मनोहरा सीता, लोकनाथस्य श्रीरामस्य कान्तां भार्याम्, तव कालस्य यमस्य पाशवदाचरतीति कालपाशायिता तां मां मुञ्चमुञ्च इति करुणं कृपास्पदं यथा भवति तथा मुहुः रुरोद ॥३६॥

---

१. 'हस्तेन'
२. 'चुक्षुभे सचराचरम्'

पन्नगीमिव लोठन्तीं दीप्तां[1] वह्निशिखामिव ।
अङ्के लङ्केश्वरो बिभ्रत् स्वमृत्यै तां निनाय सः ॥ ३७ ॥

(भा.दी.) पन्नगीमिति । सः लङ्केश्वरः रावणः, पन्नगस्य स्त्री पन्नगी सर्पिणी, तामिव लोठन्तीं परिभ्रमन्तीम्, वह्निशिखामिव वह्निज्वालामिव दीप्तां क्रोधदीप्तां तां सीताम्, अङ्क ऊरुस्तस्मिन् बिभ्रत् सन्, स्वस्य मृतिर्मरणं तस्यै निनाय ॥ ३७ ॥

वानरान् गिरिशृङ्गे सा पञ्च पञ्चास्यविक्रमान् ।
अवलोक्याऽक्षिपन्मध्ये तेषामात्मोत्तरीयकम् ॥ ३८ ॥

(भा.दी.) वानरातिति । सा सीता गिरेर्यच्छृङ्गं तस्मिन्, पञ्चं विस्तृतं आस्यं यस्य स पञ्चास्यः सिंहस्तद्वद् विक्रमो येषां ते तथा तान्, पञ्च वानरान् सुग्रीवादीन् अवलोक्य, तेषां मध्यं मध्यप्रदेशस्तस्मिन्, आत्मन उत्तरीयमुत्तरीयवस्त्रं तत् आक्षिपत् चिक्षेप । क्षिपु निरसने लङ् ॥ ३८ ॥

अग्निवर्ण्णान् निजाकल्पान् पातयामास तत्र सा ।
आत्मपूर्ण्णस्य कोपाग्नेः शेषानिव सुमद्ध्यमा ॥ ३९ ॥

(भा.दी.) अग्नीति । सु शोभनं मध्यमं मध्यं यस्याः सा तथोक्ता सा सीता, आत्मनि पूर्णस्तस्य, कोप एवाग्निस्तस्य शेषानिव अधिकभागानिव । 'शेषस्त्रिष्वन्यस्मिन्नुपयुक्ततः' इति वैजयन्ती । अग्निवद् वर्णो येषां ते तथा तान्, निजाः स्वकीया ये आकल्पा अभरणानि तान्, तत्र तेषां मध्ये पातयामास । कोपस्य प्रज्वलनात्मकत्वेनाग्निसदृशत्वादाभरणानां च सुवर्णमयत्वेन तच्छेषत्वोक्तिः । कोपोद्रेकात् स्वाभरणान्युत्कृत्य चिक्षेपेति भावः ॥ ३९ ॥

(सं.चं.) आत्मनि पूर्णस्य, अत एवान्तरमिमानस्य रोषाग्नेः बहिर्निःसृतान् शेषानिव ॥ ३९ ॥

हनुमान्[2] वानरश्रेष्ठस्तत्र भागवताग्रणीः ।
जिघांसू रावणं गच्छन् वारितो रविसूनुना ॥ ४० ॥

---

१. 'दीप्राम्' २. 'हनूमान्'

(भा.दी.) हनुमानिति । तत्र तेषां मध्ये वानरेषु श्रेष्ठः, भागवतेषु भगवद्भक्तेषु अग्रणीः श्रेष्ठः, हनुमान् रावणं जिघांसुः हन्तुमिच्छावान् सन् गच्छन् रविसूनुना सुग्रीवेण वारितः । रावणेन नीयमानया स्त्रिया इदमाभरणादिकमस्मन्मध्ये निक्षिप्तमितीममुदन्तं श्रीरामं प्रति ज्ञापयिष्यतीत्यभिप्रायेण सुग्रीवेण वारितो रामेच्छयैव निवृत्तोऽभूदिति भावः ॥ ४० ॥

(सं.चं.) रविसूनुना सुग्रीवेण । रामायणेऽनुदितेयं कथा । 'मार्गे व्रजन्तमभियाय ततो हनूमान् संवारितो रविसुतेन च जानमानः । दैवं तु कार्यमथ कीर्तिमभीप्समानो रामस्य नैनमहनद् वचनाद्धरेश्च' (५.३९) इति हि तात्पर्यनिर्णये ॥ ४० ॥

नगान् नदीरतिव्रज्य[१] नदीभर्त्तारमप्यथ ।
लङ्कां लङ्केश्वरः प्राप्य चिन्तयामास पापधीः ॥ ४१ ॥

(भा.दी.) नगानिति । (अथ) पापा धीर्यस्य स तथोक्तः लङ्केश्वरः, नगान् पर्वतान्, नदीः, नदीनां भर्ता समुद्रस्तमपि अतिव्रज्य अतिक्रम्य, लङ्कां प्राप्य चिन्तयामास । चिति स्मृत्यां लिट् । श्रीरामोऽत्र यथा नाऽयास्यति तथा तस्य निग्रहः कार्य इति निश्चिकायेत्यर्थः ॥ ४१ ॥

(सं.चं.) अथ रावणस्याविदिततयाऽऽकल्पानामुत्तरीयखण्डेन सह सीतया कपिलोके निक्षेपानन्तरम् । रावणः नदीभर्तारं सागरम् । लङ्कां प्राप्य । किमस्या रक्षायै कर्तव्यमिति चिन्तयामास । रामस्य का दशेदानीमिति च ॥ ४१ ॥

रक्षोवरान् वरोत्सिक्तानष्टौ दुष्टः[२] समादिशत् ।
जनस्थाने हतस्थाने रामो विज्ञायतामिति ॥ ४२ ॥

(भा.दी.) रक्ष इति । दुष्टः रावणः, वरेण उत्सिक्तानुद्धतान् अष्टौ रक्षस्सु वरान् श्रेष्ठान्, हतानां खर-प्रभृतीनां स्थानमाश्रयस्तस्मिन्, जनस्थानं दण्डकारण्यं तस्मिन्, श्रीरामः विज्ञायताम्, किं कार्यं करोतीति दृष्ट्वा स्थीयताम् । ज्ञा अवबोधने लोट् । इति समादिशत् । दिशतेर्लङ् ॥ ४२ ॥

(सं.चं.) हतस्थाने यत्र खरादयो हतास्तत्र जनस्थाने । अष्टौ रक्षोवरान् वरदानेन वरानप्यवरान् । 'ददर्शाष्टौ महावीर्यान् राक्षसान् पिशिताशनान् । स तान् दृष्ट्वा महावीर्यो वरदानेन मोहितान् । उवाचैतानिदं वाक्यं

१. 'नगान् नदीरनुव्रज्य' २. 'दुष्टान् समा–'

प्रशस्य बलवीर्यतः । नानाप्रहरणाः क्षिप्रमितो गच्छत सत्वराः । जनस्थानं हतस्थानं भूतपूर्वं खरालयम्' (५४.१८–२०) इति च । 'वरदानेन मोहितः' इति च साम्प्रतो रामायणपाठः । वरमत्ताः खरादयोऽपि येन हतास्तन्निग्रहाय कथमवराः प्रेष्यन्ते? अतो 'वरदानेन मोहितान्' इत्येव युक्तः पाठः । अत एव पण्डिताचार्योऽपि 'रक्षोवरान् वरोत्सिक्तान्' इत्येव पपाठ। रामो विज्ञायताम्। रामस्य वार्ता विज्ञायताम् ॥ ४२–४ ॥

प्रविश्यान्तःपुरं तन्व्यै[1] दर्शयामास रावणः ।
सर्वसम्पत्समृद्धं तद् वचनं चेदमब्रवीत् ॥ ४३ ॥

(भा.दी.) प्रविश्येति । रावणः सर्वा या सम्पत् तया समृद्धं तत् अन्तःपुरं प्रविश्य, तत् अन्तःपुरं तन्व्यै स्त्रियै सीतायै दर्शयामास । इदं वचनं च अब्रवीत् ॥ ४३ ॥

आगन्तेदं कथं दुर्गं रामः किं वाऽत्र साधयेत् ।
निराशा भव रामे त्वं भार्य्या मे श्रीमतो भव ॥ ४४ ॥

(भा.दी.) आगन्तेति । श्रीरामः इदं दुर्गं समुद्रावृतत्वेन दुर्गप्रदेशं कथं आगन्ता आगमिष्यति? गम्ऌ गतौ लुट्। अत्र लङ्कायां आगतो वा किं वा कार्यं साधयेत्? राध साध संसिद्धौ लिङ्। त्वं श्रीरामे निराशा, निर्गता आशा यस्याः सा तथा भव । श्रीमतः ऐश्वर्यवतः मम भार्या भव ॥ ४४ ॥

इत्युक्ता साश्रुनेत्रोचे[2] कुत्र रामो न यास्यति ।
गुप्तं सुरासुरैश्च त्वां सूदयेद् भगवानिति ॥ ४५ ॥

(भा.दी.) इतीति । इति रावणेन उक्ता, सु शोभने नेत्रे यस्याः सा तथा । अश्रुनेत्रेति क्वचित्पाठः । सा सीता, भगवान् पूर्णषड्गुणः श्रीरामः कुत्र प्रदेशे न यास्यति न गमिष्यति? सुराश्च असुराश्च तैः गुप्तमपि त्वां सूदयेत् संहरेत् । षूद क्षरणे लिङ् । इति ऊचे ॥ ४५ ॥

(सं.चं.) साश्रुणी अश्रुपूर्णे नेत्रे यस्याः । मायासीता हि सा ॥ ४५ ॥

---

१. 'तस्यै'

२. 'सा सुनेत्रोचे'

ततो निर्भत्सयन् क्रुद्धो राक्षसीभिश्च तर्ज्जयन् ।
तन्वीमशोकवनिकां यापयामास[१] राक्षसः ॥ ४६ ॥

(भा.दी.) तत इति । ततः सीतां निर्भत्सयन् कुत्सयन्, तर्जयन् भीषयन्, क्रुद्धः राक्षसः राक्षसीभिः सह तन्वीं पतिविरहेण कृशां सीताम्, अशोकानां अशोकवृक्षाणां वनिकां वनं प्रापयामास ॥ ४६ ॥

(सं.चं.) स्वयं निर्भत्सयन्, राक्षसीभिश्च तर्जयन् ॥ ४६ ॥

हंसीव टिट्टिभीभिः सा काकैरिव च कोकिला ।
उवास शिंशपामूले[२] राक्षसीभिर्वितर्ज्जिता[३] ॥ ४७ ॥

(भा.दी.) हंसीति । टिट्टिभीभिः टिट्टिभीनामिकाभिः पक्षिणीभिः हंसीव हंसस्त्रीव, काकैः कोकिलेव, राक्षसीभिः राक्षसस्त्रीभिः वितर्जिता भीषिता सा सीता, शिंशपायाः काळागरुवृक्षस्य यन्मूलं तस्मिन्नुवास । वस निवासे लिट् ॥ ४७ ॥

(सं.चं.) काकैरिव । 'काकीभिरिव कोकिला' इत्यपि पाठः स्यात् । शिंशपामूले । अशोकप्रभेदः शिंशपा । विविधं विकटं च तर्जिता ॥ ४७ ॥

लक्ष्मीलक्ष्मीपती तावमितगुणगणौ सर्वदा सर्वदेशे
व्याप्तौ निर्द्दोषलेशौ सकलतनुभृतां प्रेरकौ लीलयैव ।
सीतारामाभिधानौ कथमथ विरहः[४] स्यात् तयोः शोकलेशः
कुत्र स्याच्छद्मनेदं प्रकटितमसुखं नाट्यवन्नाऽत्मरूपम् ॥ ४८ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणेऽरण्यकाण्डे
पञ्चमः सर्ग्गः ॥

—०—

१. **'प्रापयामास'** इति वि.ती.पाठः । २. **'शिंशुपामूले'** इति पठन्तो भ्रान्ताः । ३. **'राक्षसीभिर्विभत्सिता'**
४. **'कथमपि विरहः'** । **'व्याप्तयोः विरहो न सम्भवति, पूर्णगुणयोः दोषरहितयोः दुःखं न सम्भवतीति भावः'** इति का.श्री. ।

(भा.दी.) लक्ष्मीति । सीतारामावित्यभिधाने नामनी ययोस्तौ तथोक्तौ, लक्ष्मीश्च लक्ष्मीपतिश्च तौ, लक्ष्मीनारायणावतारावित्यर्थः । अमिता ये गुणास्तेषां गणा ययोस्तौ तथोक्तौ । सर्वदा सर्वस्मिन् काले सर्वो यो देशस्तस्मिन् व्याप्तौ । दोषस्य लेशो दोषलेशः, निर्गतो दोषलेशो याभ्यां तौ तथोक्तौ । तनुं बिभ्रतीति तथोक्तास्तनुभृतः प्राणिनः, सकला ये तनुभृतस्तेषां ब्रह्मादीनां लीलयैव प्रेरकौ । इमानि च विशेषणानि वियोगशोकयोरभावे प्रत्येकं हेतुगर्भाणि । तयोः एतादृशयोः सीतारामयोः विरहः परस्परं वियोगः कुत्र देशे काले वा कथं स्यात्? न कथमपि । अस्तेर्लिङ् । शोकलेशो वा कथं स्यात्? तर्हि कथं तदानीन्तनजनानां तथा प्रतीतिरित्यत आह– **च्छद्मने**त्यादिना । ताभ्यां इदं मन्दानां प्रतीयमानमसुखं नटस्य भावो नाट्यं तद्वन्नाट्याचारवदित्यर्थः, च्छद्मना व्याजेन, लौकिकजनानुकरणेनेत्यर्थः, प्रकटितं प्रदर्शितम् । एवं दुखवत्त्वादिकं आत्मरूपम्, आत्मनोः स्वयोग्यभूतं स्वरूपभूतं स्वाभाविकं नेति सम्बन्धः ॥ ४८ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणटीकायां
भावार्थदीपिकायामरण्यकाण्डे पञ्चमः सर्गः ॥

—०—

(सं.चं.) स्रग्धरयोपसंहरति–लक्ष्मीलक्ष्मीपती इति । मरभनैर्यत्रयैश्च हि स्रग्धरा । सर्वदा सर्वकाले अमितगुणगणौ । सर्वदेशे व्याप्तौ । दोषलेशादपि निष्क्रान्तौ रहितौ निर्दोषलेशौ । 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' इति हि वार्तिकम् (अ.सू.२.२.१८) । कथमथ सर्वगतयोस्तयोर्विरहः? कथन्तरां विरहजः शोकलेशः? अथापि रामेण विरहजमसुखं प्रकटितम् । तदिदं नाट्ये नटकृतं विडम्बनमिव केवलं कपट-नाटकम् । नेदं दुःखं भगवत्स्वरूपम् । नापि सीताया वस्तुतो भगवद्विरहस्तन्निमित्तं दुःखं वा ॥ ४८ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायामरण्यकाण्डे
पञ्चमसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– १३२५+४८=१३७३]

षष्ठः सर्गः

मारयित्वाऽथ मारीचं स्वाश्रमाभिमुखं[१] व्रजन् ।
ऊचे दृष्ट्वाऽभिधावन्तं लक्ष्मणं लक्ष्मणाग्रजः ॥ १ ॥

(भा.दी.) श्रीरामो मारीचं हत्वा किं चकारेत्यत आह– **मारयित्वेति** । अथ मारीचं मारयित्वा संहृत्य, स्वस्य य आश्रमस्तदभिमुखं यथा भवति तथा व्रजन् लक्ष्मणाग्रजः श्रीरामः अभिधावन्तं लक्ष्मणं दृष्ट्वा ऊचे ॥ १ ॥

(सं.चं.) अभिधावन्तं स्वाभिमुखं धावन्धावमागच्छन्तम् ॥ १ ॥

मायिनां रक्षसां स्थाने मुक्त्वा सीतां त्वमागतः[२] ।
निमित्तान्यप्यभद्राणि पश्येत्युक्त्वा ययौ प्रभुः ॥ २ ॥

(भा.दी.) मायिनामिति । माया अदृश्यत्वतात्कालिकसर्जनादिसमर्था तामसी शक्तिरेषामस्तीति तथा तेषां रक्षसां स्थानमाश्रयस्तस्मिन् आश्रमे सीतां मुक्त्वा मां प्रति आगतः असि । अभद्राणि निमित्तान्यपि पश्य । दृशिर् प्रेक्षणे लोट् । इति उक्त्वा प्रभुः श्रीरामः स्वाश्रमं प्रति ययौ ॥ २ ॥

(सं.चं.) स्थाने वासस्थाने जनस्थाने । अभद्राणि अशुभसूचकानि । 'क्रूरस्वनोऽथ गोमायुर्विननादास्य पृष्ठतः' (५७–२) इत्यादि । ययौ स्वाश्रमाभिमुखम् ॥ २ ॥

---

१. **'स्वाश्रमाभिमुखो व्रजन्'**

२. **'सीतां मुक्त्वाऽऽगतोऽसि माम्'** इति वि.ती.पाठः स्यात् । **'मायिनां लक्ष्मण स्थाने सीतां मुक्त्वाऽऽगतः कथम्'** इति का.श्री. पाठः स्यादिति भाति । तथाहि तद् व्याख्यानम्–**'हे लक्ष्मण, मायिनां कपटिनां स्थाने सीतां मुक्त्वा कथमागतः'** इति ।

अश्रमः स्वाश्रमं प्राप्य सोऽपश्यन्निव मैथिलीम् ।
शोकाद् विचिन्वन्निव वा नाटयामास केवलम्[1] ॥ ३ ॥

(भा.दी.) अश्रम इति । न विद्यते धावननिमित्तः श्रमो यस्य स तथा सः श्रीरामः, स्वस्य आश्रमस्तं प्राप्य, मैथिलीमपश्यन्निव, शोको दुःखं तस्मात् विचिन्वन्निव, तत्र तत्रान्वेषणं कुर्वन्निव (वा), केवलं नाटयामास अनुकरणं चकार । नट नृत्तौ लिट् । न तु स्वस्य दुःखं वाऽज्ञानं वेति भावः ॥ ३ ॥

(सं.चं.) नाटयामास । नट नृतौ । नृतिरभिनयः । 'नट नतौ । नटति । नटयति शाखाम् । नृतौ तु नाटयति' इति क्षीरस्वामी ॥ ३ ॥

शुद्धां मान्यां सदा रक्ष्यां सीतामाज्ञां च मे समम् ।
त्यक्तवान् मित्र सौमित्रे त्वमित्थं राघवोऽब्रवीत् ॥ ४ ॥

(भा.दी.) शुद्धामिति । हे मित्र सौमित्रे, त्वं शुद्धां मान्यां सदा रक्ष्यां सीतां मे मम आज्ञां च, विशेषणत्रयमाज्ञायाश्च योज्यम्, समं युगपत् यथा भवति तथा त्यक्तवानसि इत्थं राघवः अब्रवीत् ॥ ४ ॥

(सं.चं.) इत्थं इति अब्रवीत् ॥ ४ ॥

[2]शोकनिष्पन्नबाष्पाम्बुर्लक्ष्मणोऽप्यब्रवीच्छनैः ।
हालक्ष्मणेतिशब्दान्मां देवी गच्छेत्यचोदयत् ॥ ५ ॥

(भा.दी.) शोकेति । शोकेन निष्पन्नं जातं बाष्पाम्बु अश्रुजलं यस्य स तथोक्तः लक्ष्मणोऽपि, हा लक्ष्मण इति यः शब्दस्तस्मात्, ल्यब्लोपनिमित्ता पञ्चमी, हा लक्ष्मणेति शब्दमाश्रुत्येत्यर्थः, देवी मां गच्छ इति अचोदयत् । चुद प्रेरणे लङ् । इति श्रीरामं प्रति शनैः अब्रवीत् ॥ ५ ॥

(सं.चं.) हालक्ष्मणेत्याक्रन्दनरूपाच्छब्दान्निमित्तादित्येकं पदम् । शब्दं श्रुत्वा वा ॥ ५ ॥

पालकस्त्रिदशानां च देवि देवो[3] न संशयः ।
न तस्य व्यसनं शङ्क्यं मयेत्युक्तेऽप्युवाच सा ॥ ६ ॥

---

१. 'नाटयामास केशवः' इति, 'नटयामास केवलम्' इति च । २. 'शोकान्निष्पन्न–' ३. 'देवि रामो न'

(भा.दी.) पालक इति । हे देवि सीते, देवः श्रीरामः त्रिदशानां देवानां च पालकः रक्षकः, अत्र संशयः न, तस्य एतादृशस्य श्रीरामस्य व्यसनमापत् शङ्क्यं न, इति वचसि मया उक्ते सत्यपि सा उवाच ॥ ६ ॥

(सं.चं.) व्यसनं किञ्चिदशुभमनिष्टं वा न शङ्क्यम्, शङ्कितुमशक्यम् । इति मयोक्तेऽपि मद्वचसि अजातविस्रम्भेव सा कठोरमुवाच ॥ ६ ॥

पाप ते पापरूपत्वान्मानसं मयि सङ्गतम् ।
तस्मादुपेक्षसे राममित्युक्तोऽहं विमोहितः ॥ ७ ॥

(भा.दी.) पापेति । हे पाप, लक्ष्मण, पापं रूपं स्वभावो यस्य स तथा तस्य भावस्तत्त्वं तस्मात्, ते मानसं मयि सङ्गतं संलग्नम्, तस्मात् श्रीरामं उपेक्षसे, तद्विचारे उपेक्षां करोषि, इति उक्तः अहं विमोहितः मूढः अस्मि ॥ ७ ॥

(सं.चं.) पापमेव रूपयति चिन्तयतीति पापरूपं मानसम् । पापरूपो वा लक्ष्मणः । विमोहितः किङ्कर्तव्यमूढः कान्दिशीकः सञ्जातः ॥ ७ ॥

तेन वाक्यशरेणाऽहं विद्धो मृगइवाऽद्रुतः[1] ।
इत्युक्त्वा विरुरोदोच्चैर्म्मुक्तकण्ठोऽथ लक्ष्मणः ॥ ८ ॥

(भा.दी.) तेनेति । अथ तेन सीताभिहितेन वाक्यमेव शरस्तेन विद्धः अहं मृगइव आद्रुतः अस्मि । लक्ष्मणः इति उक्त्वा, मुक्तो विभक्तः कण्ठो यस्य स तथा सन्, उच्चैः विरुरोद ॥ ८ ॥

(सं.चं.) आद्रुतः दुःखेन द्रवीभूतः, यथा मृगो भयेन रुधिरेण वाऽऽद्रुतः, धावन्निहाऽगतश्च । मुक्तः अनियन्त्रितः कण्ठनादो यस्य । विरुरोद विविधं विलपन् रुरोद ॥ ८ ॥

सर्वभूतानि पप्रच्छ सर्वत्र विचिकाय च ।
सर्वभूतान्तरः[2] सीतां सर्वविच्चापि मूढवत्[3] ॥ ९ ॥

---

१. 'मृगइवाऽहतः' २. 'सर्वभूतान्तराम्'

३. 'सर्वविच्च विडम्बयन्' इति, 'सर्वविच्च विमूढवत्' इति च ।

(भा.दी.) सर्वेति । सर्वे भूताः[१] प्राणिनस्तेषामन्तर अन्तर्यामी श्रीरामः, सर्वं वेत्तीति सर्वविच्च, तथाऽपि मूढवत्, सर्वाणि यानि भूतानि तानि पप्रच्छ । सीता त्वया दृष्टा किमित्यादिरूपेण विचारितवान् । सर्वत्र देशे विचिकाय च मार्गयामास च । चिञ् चयने लिट् ॥ ९ ॥

(सं.चं.) सर्वभूतानि सीतां पप्रच्छ । द्विकर्मकः प्रच्छिः । अशोककदम्बबिल्वादीन् वृक्षानपि । गिरिनदी-तटाकादीनपि । हरिणगजशार्दूलादीन् वन्यमृगानपि । 'खादौ जन्तौ च भूतं क्ली' इति यादवप्रकाशः । यद्यपि सर्वभूतानामन्तः स्थित्वा रमणकृत् सर्वविच्च, अथापि मूढवदज्ञइव पप्रच्छ विचिकाय च । चिञ् चयने । 'विभाषा चेः' (अ.सू.७.३.५८) इति स्मरणात् लिटि विभाषा कवर्गादेशः । चिकाय चिचाय । कुत इयं पिपृच्छिषा विचिकीषा च? । असुराणां मोहाय, सतां शिक्षायै, आनन्दाय, क्वचिन्मोहाय च ॥ ९ ॥

विरुरोद विचुक्रोश विललाप पुनःपुनः ।
हा सीते क्वासि हन्तेति धूतदुःखोऽपि दुःखिवत् ॥ १० ॥

(भा.दी.) विरुरोदेति । श्रीरामः धूतं निरस्तं दुःखं यस्मात् स तथाऽपि, दुःखमस्यास्तीति दुःखी तद्वत्, विरुरोद, विचुक्रोश, हे सीते, क्व गताऽसीत्यादिरूपेण उच्चैराह्वानं कृतवान् । क्रुश आह्वाने रोदने च लिट् । पुनःपुनः हा सीते त्वं क्व कुत्र असि हन्त इति विललाप ॥ १० ॥

(सं.चं.) 'क्व नु लक्ष्मण वैदेही कं वा देशमितो गता । केनाऽहृता वा सौमित्रे भक्षिता केन वा प्रिया' (६१.३) इत्यादि विलपन् रुरोद अश्रूणि वर्तयामास । रुदिर् अश्रुविमोचने । 'हा सीते, हा जानकि, हा प्रिये' इति विविधं चुक्रोश । नामग्राहं रुरोद । क्रुश आह्वाने रोदने च । हा सीते, क्वासि, हन्त कष्टात् कष्टतरमापतितमिति विललाप परिदेवयामास । न ममेति नमस्कारः । अहं तवेति हन्तकारः ॥ १० ॥

श्रान्तवत् कामिवदपि स जिघत्सुपिपासुवत्[२] ।
[३]निर्द्वन्द्वदुःखोऽप्यद्वन्द्वश्चेष्टते स्मातिरुष्टवत्[४] ॥ ११ ॥

(भा.दी.) श्रान्तवदिति । न विद्यते द्वन्द्वं स्वसदृशं वस्तु यस्य स तथोक्तः सः श्रीरामः, द्वन्द्वात् शीतोष्णादेर्जातं दुःखं द्वन्द्वदुःखम्, निर्गतं द्वन्द्वदुःखं यस्मात् सः, तथाऽपि श्रान्तवत् कामिवदपि,

१. **'सर्वाणि भूतानि'** इति वक्तुमुचितम् ।   ३ . **'सञ्जिघत्सुपिपासुवत्'**

३. **'विधूतदुःखोऽप्यद्वन्द्वश्चेष्टते' । 'न विद्यन्ते द्वन्द्वानि शीतोष्णसुखदुःखलाभालाभजयाजयरूपाणि यस्य सः अद्वन्द्वः । असदृश इति वा । विधूतदुःखः निरस्तदुःखः'** इति का.श्री. । **'निर्धूतदुःखोऽप्यद्वन्द्व–'** इति कश्चित् ।   ४. **'स्मापि रुष्टवत्'**

अत्तुमिच्छति जिघत्सति, जिघत्सतीति जिघत्सुः सः, पातुमिच्छति पिपासति, पिपासतीति पिपासुः स च तद्वत्, अतिरुष्टवत् अतिक्रुद्धवच्च, चेष्टते स्म स्वावस्थां व्यदर्शयत् किल । चेष्ट चेष्टायां लट् ॥ ११ ॥

(सं.चं.) द्वन्द्वदुःखात् निष्क्रान्तः निर्द्वन्द्वदुःखः । जिघत्सुवत् पिपासुवत् । क्वचिदतिरुष्टवत् । 'क्रुद्धो रामः समुद्रान्तां कम्पयन्निव मेदिनीम्' (६७.१३) इत्यादि । तदपि लीलाविडम्बनमेवेत्याह– चेष्टते स्मेति ॥११॥

रजस्तमोमयैर्भावैः शोकाद्यैः प्रकृतेः परः ।
अस्पृष्टस्तत्र विस्पष्टं नैकं मानं विचक्षते[1] ॥ १२ ॥

(भा.दी.) ननु मानुषशरीरसम्बन्धाच्छरीरे चाऽधिकं श्रमादिकं स्वाभाविकं किन्न स्यादित्यत आह– **रज** इति । प्रकृतेः बन्धकजडप्रकृतेः परो विलक्षणः, तत्सम्बन्धरहित इत्यर्थः, श्रीरामः, रजो रजोगुणः तच्च, तमस्तमोगुणः तच्च, तयोर्विकारा रजस्तमोमयाः तैः, शोक आद्यो येषां ते तथा तैः, भावैः श्रमकाम-शयनेच्छापानेष्छादुःखादिभिः, अस्पृष्टः अनाद्यनन्तकालेऽपि सम्बन्धरहितः । तथा च प्रकृतिविलक्षणत्वेन प्राकृतशरीराभावात् शरीरोपाधिकं च तत्र नाऽशङ्कितुमर्हमिति भावः । अत्र किं प्रमाणमित्यत आह– तत्रेति । तत्र श्रीरामस्य दुःखाज्ञानादिराहित्ये नैकं बहु मानं प्रमाणं विस्पष्टं यथा भवति तथा चक्षते आचक्षते । चक्षिङ् व्यक्तायां वाचि लट् ॥ १२ ॥

(सं.चं.) शोकाद्यैर्भावैरस्पृष्टः । यतः प्रकृतेः परः । 'आदित्यवर्णं तमसः परस्तात्' इति । अत्र विषये नैकमनेकं मानं विज्ञा विचक्षते । नैकमपि मानं विरुद्धं चक्षते ॥ १२ ॥

सान्त्वयामास किल तं लक्ष्मणः शोककोपयोः ।
यत्पादपांसु संस्मृत्य[2] द्वन्द्वं च्छिन्दन्ति योगिनः ॥ १३ ॥

(भा.दी.) **सान्त्वेति** । योगिनः सनकादयः, यस्य श्रीरामस्य यौ पादौ तयोः पांसवस्तेषां संस्मृतिस्तया, द्वन्द्वं शीतोष्णक्षुत्पिपासादिद्वन्द्वम्, तत् च्छिन्दन्ति नाशयन्ति । छिदिर् द्वैधीभावे लट् । तं श्रीरामं लक्ष्मणः, शोकश्च कोपश्च तौ तयोः सतोः, सान्त्वयामास किल शमयामास किल । अतो लक्ष्मणसान्त्ववचसा शोकादिकं गतमित्येतद् विडम्बनमात्रमिति भावः ॥ १३ ॥

१. **'मानं प्रचक्षते'**

२. **'यत्पादपांसुसंस्मृत्या'** इति वि.ती.पाठः ।

(सं.चं.) शोकस्थाने कोपस्थाने च तं रामं लक्ष्मणः सान्त्वयामास किल। किलेत्यलीकोक्तौ ॥ १३ ॥

एतैर्दोषैः समं रामं मन्वाना मन्दचेतसः।
आपदं स्म प्रपद्यन्ते सगरक्षीरपायिवत्[१] ॥ १४ ॥

(भा.दी.) **एतैरि**ति। एतैः तदानीन्तनाज्ञजनप्रतीतैः, क्लेशादयो ये दोषास्तैः, समं सह श्रीरामं मन्वानाः जानन्तः, मन्दं चेतो येषां ते तथा, मिथ्याज्ञानिन इत्यर्थः, पुरुषाः, गरेण विषेण सहितं सगरं, तच्च तत् क्षीरं च तत् पातुं शीलमस्यास्तीति[२] तथोक्तः तद्वत्, अन्धन्तमःप्राप्तिलक्षणामापदं प्रपद्यन्ते स्म। पद गतौ लट्। क्लेशादिदोषसाहित्येन श्रीरामस्य यन्माहात्म्यज्ञानं तदपि नित्यनरकाद्यनिष्टसाधनमेव। नतु मोक्ष-साधनमिति भावः ॥ १४ ॥

(सं.चं.) दोषैः समम्, रामं दोषसहितं मन्वाना इत्यर्थः। मन्दचेतसः अल्पबुद्धयः बालिशाः। दोषैः समं रामगुणचिन्तनं गरेण समं क्षीरपानमिव ॥ १४–५ ॥

स्वच्छं येऽनुभवन्तीमं[३] रामं दोषान् विहाय तान्।
त्यक्त्वा नीरं यथा क्षीरं हंसास्ते सम्पदां पदम्[४] ॥ १५ ॥

(भा.दी.) **स्वच्छमि**ति। ये पुरुषाः, तान् अज्ञप्रतीतान् दोषान् विहाय, स्वच्छं निर्मलं निर्दोषम्, इमं श्रीरामम्, हंसाः हंसपक्षिणः, नीरं जलम्, तत् त्यक्त्वा क्षीरं पयस्तत् यथा तथा अनुभवन्ति विजानते, ते पुरुषाः, सम्पदो धर्मादिपुरुषार्थाः, तासां पदं आश्रयभूताः। दोषलेशराहित्येन श्रीराममाहात्म्यज्ञानं मोक्षादिपुरुषार्थसाधनमिति भावः ॥ १५ ॥

एवं बभौ सदसतां विवेकाय स राघवः।
रजतानां च शुक्तीनां विवेकायेव पावकः ॥ १६ ॥

---

१. **'सगरक्षीरपायिनो यथा आपदं मरणं प्रपद्यन्ते, स्म प्रत्यक्षसिद्धमेतत्, तथा ते सदोषं रामं मन्वानाः आपदं नरकाद्यनर्थं प्रपद्यन्ते प्राप्नुवन्ति। स्म श्रुतिस्मृतिसिद्धमेतत्'** इति का.श्री.।

२. **'शीलमेषामस्तीति तथोक्ताः'** इति युक्तः पाठः।

३. **'स्वच्छा येऽनुभवन्तीमम्'** इति, **'स्वच्छं येऽनुवदन्तीमम्'** इति च क्वचित्।

४. **'तथा ये हंसाः निर्मलचित्ताः....ते पुरुषाः सम्पदां मोक्षादिपुरुषार्थानां पदं स्थानभूताः'** इति का.श्री.।

(भा.दी.) स्वतन्त्रः श्रीरामो लोकानुकरणं च किमर्थं चकारेत्यत आह– **एवमि**ति । सः राघवः, रजतानि रूप्याणि तेषाम्, शुक्तीनाञ्च, इदं रजतमियं शुक्तिरिति यो विवेकः विवेचनं तस्मै पावकइव । अग्निसम्बन्धे हि स्फुटं तद्विवेचनं भवति । सन्तश्च असन्तश्च तेषां विवेकाय, लौकिकरीत्या नटने स्वेन कृते सत्यपि ये स्वस्मिन्निर्दोषत्वज्ञानिनस्ते मोक्षयोग्यजीवाः, ये च दोषीति ज्ञानिनस्ते तमोयोग्याः इति स्वभक्तानां विवेचनाय तथा नटनं चकारेति भावः । एवमुक्तरीत्या बभौ । भा दीप्तौ लिट् ॥ १६ ॥

(सं.चं.) एवमात्मानं दर्शयन् बभौ । नेदं नटनम्, किन्तु सत्यमिति विभ्रम्य ये दोषैः समं रामं चिन्तयन्ति, असन्तस्ते, सन्तोऽन्य इति । पावके निहितं रजतं हि द्रवति । न शुक्तिर्द्रवति ॥ १६–७ ॥

सञ्चरन्नञ्चनीयाङ्घ्रिर्विचिन्वानइव प्रियाम् ।
जनस्थानवनप्रान्ते[1] जटायुषमवैक्षत ॥ १७ ॥

(भा.दी.) **सञ्चरन्नि**ति । प्रियां भार्यां विचिन्वानइव मार्गमाणइव सञ्चरन्, अञ्चनीयौ ब्रह्मादिपूज्यौ अङ्घ्री यस्य स तथा श्रीरामः, जनस्थानस्य दण्डकारण्यस्य यद् वनं तस्य यत् प्रान्तं समीपं तस्मिन्, जटायुषं अवैक्षत ॥ १७ ॥

छिन्नपक्षपदं दृष्ट्वा पतितं पर्वतोपमम् ।
सीतार्थेऽथ[2] ययौ तस्मिन् करुणां करुणाकरः ॥ १८ ॥

(भा.दी.) **छिन्ने**ति । अथ करुणाकरः श्रीरामः, सीताया अर्थः प्रयोजनं तस्मिन्, तादर्थ्ये सप्तमी, पक्षौ च पदे च पक्षपदानि, छिन्नानि तानि यस्य स तथा तम्, पतितम्, पर्वतस्य उपमा यस्य स तथा तम्, दृष्ट्वा तस्मिन् करुणां ययौ ॥ १८ ॥

(सं.चं.) आदौ पक्षिरूपोऽयं सीताहन्ता राक्षस इति तस्मिन् क्रुद्ध इव नाटयन्, अथ जटायुमुखादेव सीता-वार्ताश्रवणानन्तरं समधिगततथ्य इव तस्मिन् जटायुषि करुणां ययौ कृपां प्राप, चकारेत्येतत् ॥ १८–१९ ॥

आर्त्तो वार्त्तां विशालाक्ष्या निवेद्य जगदीशितुः ।
चरणाम्बुरुहं दृष्ट्वा मरणं प्राप पक्षिराट् ॥ १९ ॥

---

१. 'जनस्थाने वनप्रान्ते' २. 'सीतार्थे प्रययौ'

(भा.दी.) आर्त इति। आर्तः पक्षिणां राट् राजा जटायुः, विशाले अक्षिणी यस्याः सा तथा, तस्याः सीतायाः वार्तां रावणेन नीतेत्यादिवार्ताम्, निवेद्य विज्ञाप्य, जगतामीशिता स्वामी, तस्य श्रीरामस्य चरणौ अम्बुरुहमिव (तत्), दृष्ट्वा मरणं तत् प्राप ॥ १९ ॥

भक्ताय स्वगतिं[१] दत्वा तस्मै तस्य कळेबरम् ।
संस्कारयामास[२] विभुर्लक्ष्मणेन यथाविधि ॥ २० ॥

(भा.दी.) भक्तायेति । विभुः श्रीरामः, भक्ताय तस्मै जटायुषे स्वर्गतिं दत्वा, तस्य कळेबरं शरीरम्, तत् लक्ष्मणेन विधिमनतिक्रम्य यथाविधि, संस्कारयामास दहनादिसंस्कारं कारितवान् ॥ २० ॥

(सं.चं.) स्वगतिं दत्वा । 'मृतं तमदहत् स्वगतिं तथाऽदात्' (५.४१) इति हि निर्णये ॥ २०–१ ॥

गत्वा गोदावरीं वारि दत्वा तस्मै पतत्रिणे ।
जनस्थाने निशां नीत्वा पश्चिमां जग्मतुर्दिशम् ॥ २१ ॥

(भा.दी.) गत्वेति । तौ रामलक्ष्मणौ गोदावरीं गत्वा, तस्मै पतत्रिणे वारि दत्वा, तां निशां जनस्थानं दण्डकारण्यम्, तस्मिन्नीत्वा पश्चिमां दिशं जग्मतुः ॥ २१ ॥

तावतीत्याथ गच्छन्तौ गहनानि बहून्यपि ।
अपश्यतां कुक्षिगास्यं कवन्धं नाम राक्षसम् ॥ २२ ॥

(भा.दी.) ताविति । अथ बहून्यपि गहनानि अतीत्य गच्छन्तौ तौ, कुक्षिं गच्छतीति कुक्षिगम्, तादृशमास्यं मुखं यस्य स तथा तम्, अत्यन्तलीनमुखमित्यर्थः, कवन्धं नाम कवन्ध इति प्रसिद्धं राक्षसं अपश्यताम् ॥२२॥

(सं.चं.) गहनानि वनानि । कवन्धं नाम । 'प्राप्तः करौ स सहसाऽथ कवन्धनाम्नः'(५.४२) इति हि निर्णये ॥ २२ ॥

योजनायतबाहुभ्यां सिंहव्याळमृगान् बहून् ।
आकृष्य निक्षिपन्नास्ये राघवौ चाग्रहीदयम्[३] ॥ २३ ॥

---

१. **'स्वर्गतिं दत्वा'** इति वि.ती.पाठः कोशेषु सर्वत्र ।

२. **'सम्पर्युपेभ्यः करोतौ भूषणे'** (अ.सू.६.१.१३७) **इति सम्पूर्वकस्य कृञः सुडागमो वा, संस्कारशब्दात्- तत्करोति तदाचष्ट इति णिचि सति, 'कासूप्रत्ययात्...' इत्यापि सति सुब्धातुर्वा'** इति का.श्री ।

३. **'राघवावग्रहीदयम्'** इति वि.ती.पाठः ।

(भा.दी.) योजनेति । योजनमायतौ विशालौ बाहू ताभ्यां बहून् सिंहाश्च, व्याळाश्च गजाश्च, (मृगाश्च) तान् आकृष्य आस्यं मुखं तस्मिन् निक्षिपन् अयं कवन्धः राघवौ अग्रहीत् । ग्रह उपादाने लुङ् ॥ २३ ॥

(सं.चं.) योजनायतबाहुभ्याम् । 'भक्षयन्तं महाघोरमृक्षसिंहमृगद्विपान् । घोरौ भुजौ विकुर्वाणमुभौ योजन-मायतौ' (६९.३१) इति च । व्याळान् व्याघ्रादीन् । 'हिंस्रो व्याघ्रादिको व्याळः' इति यादवप्रकाशः । ननु सिंहोऽपि व्याळः । सत्यं सिंहोऽपि व्याळः । अथापि प्राधान्यात् पृथग् ग्रहणम् । 'सर्पो द्विरशनो व्यालः' इत्यभिधानाद् व्याळाः सर्पा इत्येके । व्याळा दुष्टगजा उच्यन्ते । अत्र गजसामान्यग्रहणमित्यन्ये । मृगाः अजिनयोनयः कृष्णसाराद्याः । आदिना श्वापदभिन्नाः हरिणजातिभिन्नाः शशमहिषादयः पक्षिगणाश्च । 'भक्षयन्तं महाघोरानृक्षसिंहमृगद्विपान्' (६९.३१) इति, 'कराभ्यां विविधान् गृह्य ऋक्षान् पक्षिगणान् मृगान्' (३२) इति च ॥ २३ ॥

दक्षिणो दक्षिणं बाहुमक्षिणोत् खड्गधारया ।
रामो रामानुजश्चास्य[1] वामो वाममखण्डयत् ॥ २४ ॥

(भा.दी.) दक्षिण इति । दक्षिणः समर्थः श्रीरामः, दक्षिणः सव्येतरः, तं बाहुं खड्गधारया अक्षिणोत् अखण्डयत् । क्षिणु हिंसायां लङ् । वामः चतुरः, तस्य शत्रुर्वा । 'वामो वल्गुप्रतीपयोः' इत्यमरः । रामानुजः लक्ष्मणश्च अस्य कवन्धस्य, वामो दक्षिणेतरो यो बाहुः, तं अखण्डयत् । खडि भेदे लङ् ॥ २४ ॥

(सं.चं.) दक्षिणो दक्षिणभागगतः । वामो वामभागगतः ॥ २४ ॥

आ मूलतः कृत्तहस्तो रक्तो रुधिरधारया ।
पतितः परिपप्रच्छ वीराग्र्यौ कौ युवामिति ॥ २५ ॥

(भा.दी.) आमूलत इति । मूलतः बाहुमूलादारभ्य आमूलतः कृत्तौ हस्तौ यस्य स तथा, रुधिरधारया रक्तः, पतितः कवन्धः, वीरेषु अग्र्यौ श्रेष्ठौ युवां कौ इति पप्रच्छ ॥ २५ ॥

(सं.चं.) पतितः । 'स पपात महाबाहुश्छिन्नबाहुर्महास्वनः'(७०.१०)इति च । परिचयं पप्रच्छ ॥२५-६॥

सौमित्रिस्तमुवाचात्र[2] रामो दाशरथिर्हरिः ।
अयमस्यानुजश्चाहं को वा त्वं कत्थ्यतामिति ॥ २६ ॥

१. 'रामानुजस्तस्य'   २. '–स्तमुवाचाथ'

(भा.दी.) सौमित्रिरिति । अत्र आवयोर्मध्ये अयं दशरथस्यापत्यं पुमान् दाशरथिः रामः रामाभिधः हरिः श्रीनारायणः । अहं च अस्य अनुजः । त्वं को वा कथ्यताम् । कथ वाक्यप्रबन्धे लोट् । इति सौमित्रिः तं कवन्धाख्यराक्षसमुवाच ॥ २६ ॥

कवन्धः प्रत्युवाचाथ धन्योऽस्मि भवदीक्षया ।
नमो राम जगन्नाथ[1] शापमोक्षोऽयमागतः ॥ २७ ॥

(भा.दी.) कवन्ध इति । अथ, अहं भवतोः ईक्षया दर्शनेन धन्यः अस्मि । हे राम तुभ्यं नमः अस्तु । वां भवद्भ्यां शापमोक्षः आगतः । इति कवन्धः प्रत्युवाच ॥ २७ ॥

(सं.चं.) भवदीक्षया तव दर्शनेन धन्योऽस्मि । स्थूलशिरसः शापस्य मोक्षकालोऽयमागतः ॥ २७ ॥

दनुर्नामास्मि[2] गन्धर्वः शापाद् रक्षस्त्वमागतः ।
अवद्ध्यो ब्रह्मवरतो वज्रपातेन कुञ्चितः ॥ २८ ॥

(भा.दी.) दनुरिति । स्थूलशिरा इति प्रसिद्धेन ऋषिणा दत्तो यः शापस्तस्मात् रक्षसो भावं रक्षस्त्वं आगतः । ब्रह्मणो यो वरस्तस्मादिति ततः अवध्यः । अवध्यत्वं लब्धम्, किमिन्द्रः करिष्यतीति मत्ते मयि इन्द्रेण युद्धसमये वज्रस्य यः पातस्तेन कुञ्चितः वक्रीकृतः, अहं दनुर्नाम दनुरिति प्रसिद्धः गन्धर्वः अस्मि । दनुनामगन्धर्वो हि घोरं रूपं गृहीत्वा मुनीनां धर्षणं चकार । तदा स्थूलशिराः कुपितस्तवैतादृशरूपमेवास्त्विति शशाप । तेन चाभ्यर्थितो मुनिर्यदा श्रीरामस्ते बाहू च्छित्वा दहेत् तदा निजं रूपमवाप्स्यसीति शापमोक्षं ददाविति हि रामायणे प्रसिद्धम् ॥ २८ ॥

(सं.चं.) दनुर्नामास्मि गन्धर्वः । सम्प्रति रामायणे तु–'श्रिया विराजितं पुत्रं दनोस्त्वं विद्धि लक्ष्मण' (७१.७) इति पठ्यते । अपपाठोऽयम् । 'एवमुक्तस्तु धर्मात्मा दनुना तेन राघवः' (७१.२०) इत्युत्तर-वचनविरोधात् । अत एव भवभूतिरपि दनुकवन्ध इत्येवाऽह । अतः–'दनुं त्वं विद्धि लक्ष्मण' इत्येव युक्तः पाठः । अतः साधूक्तम्–'दनुर्नामास्मि' इति । ऋषिशापाद् रक्षस्त्वमागतः प्राप्तः । तथाहि कथा रामायणे–'सोऽहं रूपमिदं कृत्वा लोकवित्रासनं महत् । ऋषीन् वनगतान् राम त्रासयामि ततस्ततः । ततः स्थूलशिरा नाम महर्षिः कोपितो मया । सञ्चिन्वन् विविधं वन्यं रूपेणानेन धर्षितः । तेनाहमुक्तः प्रेक्ष्यैवं घोरशापाभि-

---

१. **'नमोऽस्तु राम तुभ्यं वाम्'** इति वि.ती.पाठः स्यात् । **'नमोऽस्तु ते जगन्नाथ'** इति का.श्री. पाठः स्यात् । २. **'दनुनामाऽस्मि'**

धायिना । एतदेव नृशंसं ते रूपमस्तु विगर्हितम् । स मया याचितः क्रुद्धः शापस्यान्तो भवेदिति । अभिशापकृतस्येति तेनेदं भाषितं वचः । यदा छित्वा भुजौ रामस्त्वां दहेद् विजने वने । तदा त्वं प्राप्स्यसे रूपं स्वमेव विपुलं शुभम्' (७१.२–६) इति च । अवध्यो ब्रह्मवरतः । 'अहं तु तपसोग्रेण पितामह-मतोषयम् । दीर्घमायुः स मे प्रादात्–' (७१.८) इति च । वज्रपातेन कुश्चितः कुण्ठितः सङ्कुचितदेहः । कुश्च गतिकौटिल्ये द्रव्याल्पत्वे च । 'दीर्घमायुर्मया प्राप्तं किं मे शक्रः करिष्यति । इत्येवं बुद्धिमास्थाय रणे शक्रमधर्षयम् । तस्य बाहुप्रमुक्तेन वज्रेण शतपर्वणा । सक्थिनी चैव मूर्धा च शरीरे सम्प्रवेशितम् । स मया याच्यमानः सन् नाऽनयद् यमसादनम् । पितामहवचः सत्यं तदस्त्विति ममाब्रवीत् । अनाहारः कथं शक्तो भग्नसक्थिशिरोधरः । वज्रेणा-भिहतः कालं सुदीर्घमपि जीवितुम् । एवमुक्तस्तु मे शक्रो बाहू योजन-मायतौ । प्रादादास्यं च मे कुक्षौ तीक्ष्ण-दंष्ट्रमकल्पयत् । सोऽहं भुजाभ्यां दीर्घाभ्यां विकृष्यास्मिन् वने चरान् । सिंहद्विपमृगव्याघ्रान् भक्षयामि समन्ततः । स तु मामब्रवीदिन्द्रो यदा रामः सलक्ष्मणः । च्छेत्स्यते समरे बाहू तदा स्वर्गं गमिष्यसि' (७१.९–१५) इत्यादि च ॥ २८ ॥

नारायण प्रसीदेति स्वां तनुं विमुमोच सः[१] ।
रामाज्ञयाऽथ सौमित्रिस्तद्देहमदहद् बिले ॥ २९ ॥

(भा.दी.) नारायणेति । हे नारायणस्वरूपिन् श्रीराम, प्रसीद प्रसन्नो भव । षद्लृ विशरणगत्यवसादनेषु लोट् । इति वदन्निति शेषः । स कवन्धः स्वां तनुं विमुमोच । (अथ) सौमित्रिः रामाज्ञया तस्य कवन्धस्य यो देहस्तं बिलं गुहा तस्मिन्नदहत् । दह भस्मीकरणे लङ् ॥ २९ ॥

(सं.चं.) बिले निक्षिप्यादहत् ॥ २९ ॥

[२]दनुः स्वरूपी प्रोवाच राम त्वद्भक्तिमान् कपिः ।
सुग्रीवो हनुमद्युक्तः सीतान्वेष्टा भवेदिति ॥ ३० ॥

(भा.दी.) दनुरिति । दनुः दनुनामा गन्धर्वः स्वरूपी स्वरूपवान् सन्, हे राम, त्वयि भक्तिरस्यास्तीति त्वद्भक्तिमान्, हनुमता युक्तः, सुग्रीवो नाम कपिः, सीतायाः अन्वेष्टा विचारयिता भवेत्, इति प्रोवाच ॥३०॥

(सं.चं.) स्वरूपी प्राप्तनिजगन्धर्वरूपः ॥ ३० ॥

---

१. **'तां तनुं प्रमुमोच सः'** इति, **'तां तनुं विमुमोच'** इति च ।

२ **'दनुस्स्वरूपी'**

परिक्रम्य प्रणम्याथ दनुर्दनुजसूदनम् ।
स्वर्ग्गं ययौ ययौ चेशो दनुनोक्तेन वर्त्मना ॥ ३१ ॥

(भा.दी.) परिक्रम्येति । अथ दनुः दनुनामा गन्धर्वः, दनुजान् सूदयतीति तथोक्तस्तं श्रीरामं परिक्रम्य प्रदक्षिणीकृत्य प्रणम्य च स्वर्गः स्वर्गलोकस्तं ययौ । ईशः श्रीरामश्च दनुना उक्तेन वर्त्मना ययौ ॥३१॥

(सं.चं.) दनुनोक्तेन वर्त्मना चेशो रामोऽपि ययौ ॥ ३१ ॥

तौ पम्पाभिमुखौ[१] यान्तौ पद्भ्यां प्राचीं दिशं तदा ।
नीत्वा निशां शैलपृष्ठे प्रभाते जग्मतुः पुनः ॥ ३२ ॥

(भा.दी.) ताविति । पम्पां प्रति अभिमुखं मुखं ययोस्तौ तथोक्तौ, पदे पादौ ताभ्यां यान्तौ तौ, प्राचीं पूर्वां दिशं तदा जग्मतुः । शैलस्य पृष्ठमुपरिभागस्तस्मिन् तां निशां नीत्वा, प्रभातः प्रातःकालस्तस्मिन् पुनः जग्मतुः ॥ ३२ ॥

(सं.चं.) पम्पाया अभिमुखौ प्राचीं दिशमिति । सम्प्रति रामायणे–'प्रतस्थतुर्दिशं गृह्य प्रतीचीं नृवरात्मजौ' (७४.१) इति पठ्यते । 'प्रतस्थतुर्दिशं गृह्य प्राचीं नृपवरात्मजौ' इत्येव साधुः पाठ इति भाति ॥ ३२ ॥

मतङ्गस्याऽश्रमं चित्रं मत्तमातङ्गगामिनौ ।
पम्पायाः पश्चिमे तीरे वीरौ विविशतुः सुखम्[२] ॥ ३३ ॥

(भा.दी.) मतङ्गस्येति । मत्तो यो मातङ्गस्तद्वद्गन्तुं शीलमनयोरस्तीति तथोक्तौ, वीरौ रामलक्ष्मणौ, पम्पायाः पम्पानद्याः पश्चिमे पश्चिमभागस्थे तीरं तटं तस्मिन् चित्रं मतङ्गस्य मतङ्गनामकमुनेः य आश्रमस्तं सुखं यथा भवति तथा विविशतुः ॥ ३३ ॥

(सं.चं.) चित्रं विस्मयावहम् । तथाहि रामायणे–'उत्पलानि च फुल्लानि पङ्कजानि च राघव' (७३.२१), 'नच वै म्लानतां यान्ति न च शीर्यन्ति राघव' (२३) इति, 'ये प्रपेतुर्महीं तूर्णं शरीरात् स्वेदबिन्दवः । तानि जातानि माल्यानि मुनीनां तपसा तदा । स्वेदोबिन्दुसमुत्थानि न विनश्यन्ति राघव' (२४) इति, 'न तत्राऽक्रमितुं नागाः शक्नुवन्ति तमाश्रमम्' (२६) इत्यादि ॥ ३३–६ ॥

---

१. **'तौ पम्पाभिमुखौ यातौ'** इति, **'–भिमुखं यातौ'** इति च । २. **'विविशतुः शुभम्'**

आलोक्य लोकनाथं तं सानुजं स्वाश्रमागतम्[१] ।
शबरी पूजयामास फलमूलैस्तपस्विनी ॥ ३४ ॥

(भा.दी.) आलोक्येति । शबरी शबरीनाम्नी तपस्विनी, सानुजम्, स्वस्या य आश्रमस्तमागतम्, लोकनाथं (तं) श्रीरामं आलोक्य, फलानि च मूलानि च तैः पूजयामास । पूज पूजायां लिट् ॥ ३४ ॥

अपि ते कुशलं भद्रे नियमेषु यमेषु च ।
इति पृष्टा भगवता तुष्टा योगिन्यभाषत ॥ ३५ ॥

(भा.दी.) अपीति । हे भद्रे, ते तव, 'आनृशंस्यं क्षमा सत्यमहिंसा दम आर्जवं । प्रीतिः प्रसादो माधुर्यमक्रोधश्च यमा दश' इत्युक्ता ये यमास्तेष्वपि । 'दानमिज्या तपो ध्यानं स्वाध्यायोपस्थनिग्रहौ । व्रतोपवासौ मौनं च स्नानं च नियमा दश' इत्युक्ता नियमास्तेषु च । (अपि) कुशलं क्षेमम्, इति भगवता श्रीरामेण पृष्टा, तुष्टा श्रीरामदर्शनात् तुष्टा, योगिनी भगवति मनोयोगवती, शबरी अभाषत ॥ ३५ ॥

पद्मनाभ भवत्पादपद्मसद्ममनोळिनाम् ।
मुनीन्द्राणां प्रसादान्मे कुशलं कृपया तव[२] ॥ ३६ ॥

(भा.दी.) पद्मेति । पद्मं नाभौ यस्य स तत्सम्बुद्धिः, श्रीराम, तव कृपया सञ्जातात्, भवतः यौ पादौ तावेव पद्मे ते एव सद्म गृहं तस्मिन् मन एवाळी भ्रमरः स येषां ते तथोक्ताः तेषां मुनीन्द्राणां प्रसादोऽनुग्रहस्तस्मात् कुशलं सर्वविषयेऽपि क्षेमम् ॥ ३६ ॥

(सं.चं.) भवतः पादौ पद्मेइव । तत्र कृतसद्मानि मुनीनां मनांसि अळिनो भ्रमराइव । 'भृङ्गे भ्रमरभृङ्गाणमधुलिण्मधुपालिनः' इति यादवः ॥ ३६ ॥

मतङ्गवाक्यमुकुरे मतं[३] रूपमिदं तव ।
[४]अपरोक्षमवेक्षेऽहं परं ब्रह्म गुणार्ण्णवम् ॥ ३७ ॥

(भा.दी.) मतङ्गेति । मतङ्गस्य मतङ्गनामकमुनेर्यद्वाक्यं तदेव मुकुरो दर्पणस्तस्मिन्, मतङ्गवचनेनेत्यर्थः, मतं परोक्षतः ज्ञातम्, परं सर्वविलक्षणम्, ब्रह्म ब्रह्मात्मकम्, गुणैरर्णव इव तत् तव इदं रूपं अपरोक्षमिव प्रत्यक्षमिव

---

१. **'स्वाश्रमं गतम्'**
२. **'मुनीन्द्राणां प्रसादात् अनुग्रहादुत्पन्नया तव कृपया मम कुशलम्'** इति का.श्री. ।
३. **'–मुकुरे गतम्'**
४. **'अपरोमिवेक्षेऽहं'** इति वि.ती.पाठः ।

ईक्षे । ईक्ष दर्शनाङ्कनयोर्लट् । यथा सर्वज्ञगुरूपदेशेन स्वयोग्यगुणविशिष्टभगवद्ध्याने कृते भगवदपरोक्षज्ञानं भवति तथा श्रीरामरूपी हरिरिममाश्रममायास्यतीति मतङ्गोपदेशात् अपरोक्षज्ञानमिव तव दर्शनं जातमिति भावः ॥ ३७ ॥

(सं.चं.) मतङ्गमुनेर्वाक्यमेव मुकुरो दर्पणः । तत्र मतं मननेन प्रतिफलितं तव रूपम् ॥ ३७–८ ॥

अनुज्ञां देहि[१] यज्ञेश प्रसीदेत्यभिधाय सा ।
पश्यन्तीशं विवेशाथ ज्वलितं ज्वलनं सती ॥ ३८ ॥

(भा.दी.) **अनुज्ञामि**ति । हे यज्ञानां फलदातृत्वेन ईश श्रीराम, परलोकगमनार्थमनुज्ञां देहि । प्रसीद मह्यं प्रसन्नो भव। इति अभिधाय सती निर्दुष्टा सा शबरी, ईशं श्रीरामं पश्यन्ती सती, (अथ) ज्वलितं ज्वलनमग्निं विवेश ॥ ३८ ॥

अवैदिक्यै शबर्य्यै च दयालुः स्वगतिं ददौ[२] ।
तस्या भक्त्या भृशं प्रीतो भक्तिर्हि भवमोचिनी[३] ॥ ३९ ॥

(भा.दी.) **अवैदिक्या** इति । तस्याः भक्त्या भृशं प्रीतः, दयालुः दयाशीलः श्रीरामः, हि यस्मात् भक्तिः हरिभक्तिः, भवं संसारं मोचयितुं शीलमस्या अस्तीति तथा, वैदिकी न भवतीत्यवैदिकी तस्यै, नीचजातित्वेन वेदवाक्यश्रवणानर्हाया इत्यर्थः, शबर्यै (च) स्वगतिं ददौ ॥ ३९ ॥

(सं.चं.) अवैदिक्यै । नहि वैदिकम्मन्याः सर्वे मुक्तिभाजः । वेदोक्तेन पथा यथावदुपासना हि मुक्ति-साधनी । तदभावे न वेदा मुक्तिं गमयन्ति । नापि केवलं ब्राह्मणयोनौ जन्म । 'नाहं वेदैर्न तपसा–' इत्यादि भगवद्वचनम् । 'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन' इत्याद्या च श्रुतिः । 'विप्राद् द्विषड्गुणयुतादरविन्दनाभपादारविन्दविमुखाच्छ्वपचं वरिष्ठम् । मन्ये तदर्पितमनोवचनात्मगेहप्राणः पुनाति सकलं ननु भूरिमानः' इति च भागवते प्रह्लादवचनम् ॥ ३९ ॥

सौमित्रिणा सङ्कथयन् गच्छन्नच्छां स ऐक्षत ।
दासीमिवाच्छाम्बुवहां[४] पम्पां पङ्कजमालिनीम् ॥ ४० ॥

---

१. **'अग्निं प्रवेष्टुमनुज्ञां देहि'** इति का.श्री. ।
२. **'स्वां गतिं ददौ'**
३. **'भवमोचनी'**
४. **'–मिवाच्छाम्बुवाहाम्'**

(भा.दी.) सौमित्रिणेति । सौमित्रिणा सङ्कथयन् सम्भाषणं कुर्वन्, शबर्याश्रमाद् गच्छन्, सः श्रीरामः, अच्छं निर्मलं यदम्बु तद्वहतीति तथोक्तां ताम्, पङ्कजानां माला पङ्क्तिरस्यामस्तीति तथोक्ता ताम्, पम्पां अच्छां निर्मलां दासीमिव ऐक्षत ॥ ४० ॥

(सं.चं.) पम्पां नाम सरसीम् । दासी च अच्छा, पङ्कजमालिनी, भर्तृशुश्रूषार्थं कलशेनाच्छाम्बुवहा च ॥४०॥

स्त्रीसङ्गिनामित्थममङ्गलावलिं प्रकाशयन् साधुषु मोहयन् परान् ।
नित्यं निजानन्दरसानुभूतिमान् निर्दुःखलेशोऽपि बभौ स दुःखिवत्[१] ॥ ४१ ॥

(भा.दी.) स्त्रीति । नित्यं सर्वदा निजः स्वरूपभूतो य आनन्दरसः ज्ञानानन्दादिसारस्तस्य अनुभूतिरनुभवः सः अस्यास्तीति तथोक्तः, सः श्रीरामः, स्त्रीणां सङ्ग एषामस्तीति स्त्रीसङ्गिनस्तेषाम्, स्त्रैणानामित्यर्थः, इत्थं अमङ्गलानामशुभानामावलिः परम्परा तां साधुषु सज्जनेषु प्रकाशयन् सन्, परान् साधुभ्योऽन्यान् दुर्जनान् मोहयन् सन्, दुःखस्य लेशो दुःखलेशः, न विद्यते दुःखलेशो यस्य सः, तथाऽपि दुःखिवत् बभौ । भा दीप्तौ लिट् । अनेन सज्जनैः स्त्रैणैर्न भाव्यमिति सज्जनशिक्षणं दुर्जनविमोहनं च दुःखिवन्नटनस्य प्रयोजनं दर्शितम् ॥ ४१ ॥

(सं.चं.) 'स्त्रीसङ्गिनामिति रतिं प्रथयंश्चचार' इति भागवतवचनं स्मरन् वंशस्थेन्द्रवंशाभ्यामुपजात्योप-संहरति– **स्त्रीसङ्गिनामि**ति । तदपि कुतः? साधुशिक्षार्थं दुर्जनमोहार्थं च । शिक्षा हि द्विविधा भवति– एवं प्रवर्तितव्यमिति, एवं न वर्तितव्यमिति । दुर्जनाः शिक्षां विपरीतां गृह्णीयुः । शिक्षामशिक्षां मन्वाना भगवतो दौर्बल्यमिति मन्येरन् ॥ ४१ ॥

सह निजसहजेन स्वैरमानन्दमूर्त्तिर्व्यलसदनलसोऽसौ तत्र पम्पातटान्ते ।
अनुपममनुरागं बिभ्रतीं भक्तमुख्ये हनुमति मतिदूतीं प्रेषयन् रामदेवः ॥ ४२ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
अरण्यकाण्डे षष्ठः सर्ग्गः ॥

—०—

१. 'सुदुःखिवत्'

(भा.दी.) सहेति । आनन्द एव मूर्तिः शरीरं यस्य स तथोक्तः, अलसो न भवतीत्यनलसः, आलस्यादिदोषरहित इत्यर्थः, असौ श्रीरामदेवः, भक्तेषु मुख्यस्तस्मिन् हनुमति, न विद्यते उपमा यस्य स तथोक्तस्तम्, अनुरागं स्नेहं बिभ्रतीं दधतीं मतिरेव दूती तां प्रेषयन् सन्, दनुवचसा हनुमत्समागमः कदा नु स्यादिति तं संस्मरन्नित्यर्थः, तत्र पम्पाया यत्तटं तस्य अन्तः अन्तिकं तस्मिन्, निजो यः सहजो लक्ष्मणस्तेन सह, स्वैरं यथा भवति तथा व्यलसत् अशोभत । लस श्लेषणक्रीडनयोर्लङ् ॥ ४२ ॥

इति श्रीविश्वपतितीर्थकृतायां श्रीसङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायामरण्यकाण्डे षष्ठः सर्गः ॥

—०—

(सं.चं.) अथ मालिन्योपसंहरति– सह निजसहजेनेति । मूलरूपेऽपि निजः पर्यङ्कः । अवतारे सहजातोऽनुजः । यद्यप्येकोदरजननं नाम सहजननमत्र न विद्यते । अतः समानाधानकत्वमिह सहजननं विवक्षितम् । स्वैरं यथेच्छं व्यलसत् विजहार । हनुमति मतिदूतीं प्रेषयन् । पम्पातटप्रान्ते वसन् भाविकार्यसाधनाय हनूमन्तं सस्मारेत्यर्थः । हनुमते स्वात्मानं दर्शयामीत्यनुग्रहोन्मुखो बभूवेति यावत् ॥ ४२ ॥


इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायामरण्यकाण्डे षष्ठसर्गविवरणम् ॥

अरण्यकाण्डं समाप्तम् ॥

[आदितः श्लोकाः– १३७३+४२=१४१५]

[अरण्यकाण्डे श्लोकाः– २९१]

किष्किन्धा-काण्डम् : ४



प्रथमः सर्ग्गः

प्लवङ्गमानां गत आधिराज्यं प्लवङ्गमः केसरिनामधेयः ।
मेरावुवासाञ्जनया सुगात्र्या शच्या शचीकान्तइव द्युलोके ॥ १ ॥

(भा.दी.) श्रीरामभक्ताग्रेसरस्य हनुमतोऽवतारादिकं वक्तुं पीठिकामारचयति– **प्लवङ्गमानामित्यादिना** । प्लवङ्गमाः कपयस्तेषाम्, अधिकश्चासौ राजा च अधिराजः, तस्य भावस्तत्त्वम्, अधिराजत्वमित्यर्थः, तत् गतः, केसरीति नामधेयं नाम यस्य स तथोक्तः, प्लवङ्गमः वानरः, शोभनं गात्रं यस्याः सा तथा तया, अञ्जनया अञ्जनाख्यया भार्यया सह, द्यौश्चासौ लोकश्च तस्मिन्, स्वर्गलोक इत्यर्थः, शच्या सह शचीकान्तइव इन्द्र इव, मेरौ मेरुपर्वते उवास ॥ १ ॥

(सं.चं.) वाल्मीकिनोत्तरकाण्डे निरूपितं हनूमच्चरितं प्रसक्तमित्यत्रैव प्रस्तौतीन्द्रवज्रोपेन्द्रवज्राभ्यां सङ्कीर्णेनोपजातिच्छन्दसा– प्लवङ्गमानामिति । यत्र केवलेन्द्रवज्रा, केवला वोपन्द्रवज्रा तत्र वक्ष्यते । मेरुगतानां प्लवङ्गमानामधिराजत्वं स्वामित्वं गतः । अञ्जनया भार्यया सुगात्र्या । यद्यपि 'स्वाङ्गाच्च–' (अ.सू.४.१.५४) इति प्राप्तो ङीष् 'असंयोगोपधात्' इति निवृत्तः । अथापि 'अङ्गगात्रकण्ठेभ्यः' इति वार्तिकेन प्रतिप्रसवाद् रूपद्वयमिष्यते–सुगात्री सुगात्रा ॥ १ ॥

हन्तुं भरद्वाजमभिद्रवन्तं सिन्धोस्तटे सिन्धुरमुन्मदान्धम् ।
अवेक्ष्य दूरादपि तस्य कुम्भे स केसरी केसरिवत् पपात ॥ २ ॥

(भा.दी.) हन्तुमिति । सः केसरी, सिन्धुः[१] समुद्रस्तस्य तटं तीरं तस्मिन्, भरद्वाजं भरद्वाजनामकमृषिम्, हन्तुं अभिद्रवन्तम्, उत्कृष्टो यो मदस्तेनान्ध इवान्धस्तम्, सिन्धुरं गजम्, दूरं दूरप्रदेशस्तस्मादपि अवेक्ष्य तस्य गजस्य कुम्भः कुम्भस्थलं तस्मिन्, केसरिवत् सिंहवत् पपात ॥ २ ॥

(सं.चं.) सिन्धुनद्यास्तटे । सिन्धुरो गजः । उत्सिक्त उत्कटो वा मद उन्मदः । केसरी कपिरपि केसरिवत् सिंहवत् तस्य सिन्धुरस्य कुम्भे पपात ॥ २ ॥

[२]तं शङ्खपूर्वं शबलं स हत्वा तीर्थं मुनीनामभयं चकार ।
महर्षिसङ्घः समवाप हर्षं वरं वृणीष्वेति च तं जगाद ॥ ३ ॥

(भा.दी.) तमिति । सः केसरिनामकः, शङ्ख इति पदं पूर्वं यस्य स तथोक्तस्तं शबलं[३] शबलनामकम्, शङ्खशबलनामकमित्यर्थः, तं गजं हत्वा, मुनीनां यत्तीर्थं तत् न विद्यते भयं यत्र तत् तथा, तच्चकार । महान्तो ये ऋषयस्तेषां सङ्घः हर्षः सन्तोषस्तं समवाप । तं वानरं प्रति वरोऽभीष्टं तं वृणीष्व इति जगाद च ॥३॥

(सं.चं.) शङ्खपूर्वं शबलं शङ्खशबलनामकम् । गजरूपं तन्नामकमसुरमित्यर्थः । अत एव केसरी तं जघान । तीर्थं स्नानार्थमवतरणस्थानम् । स्नानघट्टः । 'घट्टोऽवतारस्तीर्थोऽस्त्री' इति यादवप्रकाशः । हर्षं समवाप, ततः वरं वृणीष्वेति च तं केसरिणं जगाद महर्षिसङ्घः ॥ ३ ॥

यदि प्रसन्ना भगवत्तमा मे सुतं वृणे सर्वगुणाभिरामम् ।
तस्मान्न मुख्योऽस्तु विना मुकुन्दमेवं स वव्रेऽथ वरं द्विजेभ्यः॥ ४ ॥

(भा.दी.) यदीति । अथ सः केसरी, अतिशयेन भगवन्तो भगवत्तमाः, हे पूज्यतमा इत्यर्थः, यूयं यदि मह्यं प्रसन्नाः तर्हि सर्वे ये गुणाः शौर्यादयस्तैरभिरामो मनोहरस्तं सुतं अहं वृणे वरयामि । वृञो लट् । मुकुन्दं श्रीहरिं विना तस्मात् पुत्रादन्यः मुख्यः श्रेष्ठः न अस्तु न भवतु । सः एवं वरं द्विजेभ्यः वव्रे ॥४॥

(सं.चं.) भगवत्तमाः पूज्यतमाः महर्षयो यदि मे विषये प्रसन्नाः । तस्मात् भवद्वरलब्धात् सुतादुत्तमः पुमान् मुकुन्दादन्यः कोऽपि नास्तु । रामायणेऽनुक्तेयं कथा । 'तीर्थविघ्नकरं दुष्टगजं हत्वा प्रतोषिताः । भरद्वाजादयो

१. **'सिन्धोः'** इति प्रायः सर्वे प्रतनव्याख्यातारः । नैतत् समीचीनमिति भाति । नहि मेरुं परितः समुद्रो भवति । नापि परितो भरद्वाजाश्रमम् । नच गजाः प्रायः समुद्रतीरे चरन्ति । ते गहनेषु गिरिदुर्गेषु चरन्ति । पिपासवो नद्यां विहरन्ति । भरद्वाजादयो मुनयश्च तीर्थयात्रार्थमटवीमटन्तः कस्मिंश्चित् तीर्थावतारे तेन व्याळरूपेण रक्षसा पीडिता इत्यवगम्यते ।

२. **'शङ्खपूर्वं शबलम् । 'हिरण्यपूर्वं कशिपुं प्रचक्षते' इतिवत्'** इति का.श्री. । ३. **'शबळं शबळनामकं शङ्खशबळ-'**

धन्यं पुत्रं केसरिणो ददुः' इति च प्रमाणान्तरं भावप्रकाशिकायाम् । तीर्थयात्रार्थं प्रस्थिता भरद्वाजादयः कस्मिंश्चिन्नदीजलावतारे विघ्नकरं दुष्टगजं हत्वेत्यर्थः ॥ ४ ॥

ततः कदाचित् कमलायताक्षी स्नाता सुवस्त्राभरणाऽञ्जना सा ।
[१]रम्यान्तमाराममुपश्रयन्ती प्राणं प्रधानं ललितं[२] ददर्श ॥ ५ ॥

(भा.दी.) तत इति । कमलवदायते अक्षिणी यस्याः सा तथा, स्नाता कृतर्तुस्नाना, वस्त्राणि च आभरणानि च शोभनानि तानि यस्याः सा तथा, सा केसरिभार्या अञ्जना, कदाचित् रम्यमन्तर्मध्यं यस्य स तथोक्तम्, आरामं उपवनम्, (उपश्रयन्ती) आश्रयन्ती सती, आरामे संस्थितेत्यर्थः, ललितं मनोहरं प्रधानं सर्वजीवश्रेष्ठं प्राणं मुख्यप्राणं ददर्श ॥ ५ ॥

(सं.चं.) कमलायताक्षी अञ्जना । 'बहुव्रीहौ सक्थ्यक्ष्णोः–' (अ.सू.५.४.११३) इति षच् । षित्त्वात् स्त्रियां ङीष् 'षिद्गौरादिभ्यश्च' (अ.सू.४.१.४१) इति । मेरौ कश्चन रम्यान्तं रम्यप्रदेशमुपवनमुपश्रयन्ती । भाविकार्यस्य उपपन्नं श्रयणमुपश्रयणम् । ललितं शृङ्गारविलासवन्तम् ॥ ५ ॥

[३]संस्पर्शनं नस्तव देवि भूत्यै[४] प्रोच्येति बालामतिमात्रलज्जाम्[५] ।
श्रीमद्भुजाभ्यां परिरभ्य देवो व्यधत्त गर्भं भुवनप्रगल्भम् ॥ ६ ॥

(भा.दी.) समिति । देवः वायुः, हे देवि अञ्जने, (नः) तव संस्पर्शनं अङ्गाभिमर्शः तव भूत्यै स्यात् इति प्रोच्य, अतिमात्रा अत्यधिका लज्जा यस्याः सा तथा तां बालां स्त्रियम्, श्रीमन्तौ यौ भुजौ ताभ्यां परिरभ्य आलिङ्ग्य, भुवनेषु प्रगल्भः श्रेष्ठस्तं गर्भं व्यधत्त, गर्भाधानं चक्र इत्यर्थः । धाञो लङ् ॥ ६ ॥

(सं.चं.) स्तनोष्ठादेर्दृढस्पर्शनं संस्पर्शनम् । सम्भोगाय स्पर्शनमिति वा । तव नः संस्पर्शनं तव भूत्यै, सर्वलोकस्य च भूत्यै स्यादिति प्रोच्य प्रीत्योदीर्य । बालां मुग्धाम् । अनभिज्ञां सुरतव्यापारलीला-विधीनाम् । 'बालोऽज्ञे' इति ह्यभिदधति । अथापि ग्रहणधारणपटुर्गर्भस्य । यतस्तदात्व एवर्तुस्नाता । प्रायः प्रथममार्तवम् । अत एवानभिज्ञत्वादतिमात्रलज्जाम् । अतिमात्रं लज्जमानाम् । श्रीमद्भ्यां कान्तिमद्भ्याम् । श्रीरिति भारती चोच्यते । तेन श्रीर्भारती अस्त्याश्लेषकर्मत्वेनानयोरिति श्रीमन्तौ भुजौ । याभ्यां

१. **'रम्या तमाराम–'** । नातिस्वरसः पाठः । २. **'ललिता ददर्श'**
३. **'संस्पर्शनं सम्भोगः तव भूत्यै सम्पदे भविष्यति' इति का.श्री.** । ४. **'नस्तव तन्वि भूत्यै'** ५. **'बालामतिवेललज्जाम्'**

भारतीं परिरेभे ताभ्यां भुजाभ्यामञ्जनां परिरेभे इति तस्या भाग्यातिशयमाह । अञ्जनायां भारतीसन्निधानं च । अत एव तां देवीत्याह । गर्भं व्यधत्त यथा काळ्यां पराशरः । प्रगल्भमनुपमप्रतिभायुक्तम् ॥ ६ ॥

असूत सूनुं तमसा[१] विनाशं तमञ्जना सज्जनकञ्जबन्धुम् ।
[२]अनर्घमाणिक्यमणिप्रकाशं प्राचीव देवं जगदेकदीपम् ॥ ७ ॥

(भा.दी.) असूतेति । अञ्जना तमसामघानां दुःखानामज्ञानानां वा, विनाशयतीति विनाशस्तम्, विनाशकर-मित्यर्थः । 'तमा राहुस्तमोऽघं शुक् स्वरूपेऽधस्तळोऽस्त्रियाम्'[३] इति वैजयन्ती । तमसां विनाशो यस्मात् स तमसां विनाश इत्यलुक्समासो वा । सज्जना एव कञ्जानि पद्मानि तेषां बन्धुम् । न विद्यतेऽर्घो मौल्यं यस्य सोऽनर्घः, स चासौ माणिक्यमणिश्च, तद्वत्प्रकाशो यस्य स तथा तं सूनुम्, जगत् एकतो मुख्यतो दीपयति प्रकाशयतीति जगदेकदीपः तं देवं सूर्यं प्राचीव पूर्वदिगिव असूत । षूङ् प्राणिगर्भविमोचने लङ् । यथा सूर्यस्य भगवदाज्ञाचरणार्थमभ्युदयः तथा हनुमतोऽपि श्रीहरिसेवार्थं प्रादुर्भावमात्रमेव जन्म, नतु गर्भवासजननादिनिमित्तक्लेशसंस्पर्श इति भावः ॥ ७ ॥

(सं.चं.) तमसामज्ञानानाम् । सूर्योऽन्धकाराणाम् । सज्जनाः कञ्जानि कमलानीव । तेषामयं बन्धुः सूर्य इव । 'सूर्यदत्तवरः स्वर्णः सुमेरुर्नाम पर्वतः । यत्र राज्यं प्रशास्त्यस्य केसरी नाम वै पिता । तस्य भार्या बभूवेष्टा अञ्जनेति परिश्रुता । जनयामास तस्यां वै वायुरात्मजमुत्तमम्' (उ.कां.३५.१९–२०) इति वाल्मीकिना सङ्क्षिप्योक्तं मूलरामायणाद्यनुसारेण किञ्चिद् विववार पण्डिताचार्यः ॥ ७ ॥

प्राणात्मके प्राणसुते प्रजाते चूडामणौ भागवतोत्तमानाम् ।
ननन्द चेतः सुरसुन्दरीणां गर्भः पपातासुरसुन्दरीणाम् ॥ ८ ॥

(भा.दी.) प्राणात्मक इति । प्राणस्य मुख्यप्राणस्य आत्मकः स्वरूपभूतस्तस्मिन्, भगवतः सम्बन्धिनो भागवताः, तेषु उत्तमाः, तेषां चूडामणौ शिरोरत्ने, श्रेष्ठ इत्यर्थः, प्राणस्य सुते हनुमति प्रजाते सति, सुरसुन्दरीणां देवस्त्रीणां चेतः ननन्द । नदि हर्षे लिट् । असुरसुन्दरीणां गर्भः पपात । पतॢ पतने लिट् ॥ ८ ॥

(सं.चं.) न केवलं प्राणसुतः । प्राण आत्मा स्वरूपमस्येति प्राणात्मकश्चायम् । आत्मानमेव प्राणः सुषुवे । यथा भीमः । प्रजाते । अयमेव प्रकर्षः यद् गर्भवासेऽपि दुःखादिविरहः । श्रुतिश्चात्र सर्वथाऽन्वर्था

---

१. **'तपसो विनाशम्'** २. **'अनर्घ्यमाणिक्य–'** ३. **'–तमोऽन्धं शुक्'** इति पार्याप्तम् । उत्तरार्धं नात्र सङ्गतम् ।

बभूव–'आत्मा वै पुत्रनामाऽसि' इति । भागवतोत्तमानां चूडामणिः शिरोरत्नमिव मूर्धन्यः । सुरसुन्दरीणां न केवलम् । सुराणामपि । सर्वेषामपि सताम् । अञ्जना किल सुरस्त्री प्राणं सुतं सुषुव इति विशेषतः सुरसुन्दरीणामानन्दः । असुरसुन्दरीणां गर्भः पपात । तेन तासां चासुराणां च, अन्ततः सर्वेषामसतां च चेतो दुःखितं बभूव । उत्तरार्धे लाटानुप्रासः ॥ ८ ॥

सञ्जातमात्रं शिशुमद्भुताङ्गं बुभुक्षितं तं बलिनं विलोक्य ।
यावत् फलार्थं[1] जननी जगाम तावत् स बालः सहसोत्पपात ॥ ९ ॥

(भा.दी.) समिति । केवलं सञ्जातः सञ्जातमात्रस्तम्, अद्भुतमङ्गं शरीरं यस्य स तथा तम्, बलिनं तं शिशुम्, सञ्जाता बुभुक्षा यस्य स बुभुक्षितस्तं[2] विलोक्य, यावत् यदा जननी माताऽञ्जना फलार्थं फलानयनार्थं जगाम, तावत् तदा सः बालः सहसा उत्पपात ऊर्ध्वं जगाम ॥ ९ ॥

(सं.चं.) बुभुक्षितं तं बलिनम् । स्वस्तन्यमात्रेण नास्य बुभुक्षा निवर्तेतेति विलोक्य विचार्य । अद्भुताङ्गं युवानमिव प्रबुद्धाङ्गम् । 'फलान्याहर्तुकामा वै निष्क्रान्ता गहने वरा । एष मातुर्वियोगाच्च क्षुधया च भृशार्दितः । रुरोद शिशुरत्यर्थं शिशुः शरवणे यथा । तदोद्यन्तं विवस्वन्तं जपापुष्पोत्करोपमम् । ददर्श फललोभाच्च ह्युत्पपात रविं प्रति' (उ.कां.३५.२१–३) इति च । बुभुक्षितमिति बुभुक्षतेः क्तः, इतज् वा ॥ ९ ॥

[3]उद्यद्दिनेशं ग्रसितुं प्रयान्तं तत्तेजसा लोहितमाशु राहुम् ।
प्रत्युद्ययौ नाम फलं[4] विचिन्वन् निसर्गतो दुष्टजनासहोऽसौ ॥ १० ॥

(भा.दी.) उद्यदिति । निसर्गादिति निसर्गतः, स्वभावत इत्यर्थः, दुष्टा ये जनास्तान् न सहत इति तथोक्तः, फलं विचिन्वन् विचारयन् असौ हनुमान्, उद्यन् यो दिनेशः सूर्यस्तं ग्रसितुं ग्रासं कर्तुं प्रयान्तम्, तस्य बालसूर्यस्य यत् तेजस्तेन लोहितं रक्तं राहुं आशु प्रत्युद्ययौ नाम अभिजगाम किल । यातेर्लिट् । निसर्गतः दुष्टजनासह इत्यनेन सूर्यमण्डलोपरागार्थमायान्तं राहुं दृष्ट्वा दुष्टजनशिक्षणस्वभावत्वात् तन्निग्रहार्थमेव फलव्याजेन तस्य गमनं नतु फलभ्रान्त्येति सूचितम् ॥ १० ॥

१. **'फलार्थे जननी'**

२. **'तदस्य सञ्जातं तारकादिभ्य इतच्'** (अ.सू.५.२.३६) इत्यत्र पठिते तारकादिगणे पिपासाशब्दवद् बुभुक्षाशब्दोऽपि पठनीय इत्याशयः ।

३. **'यस्मिन् दिनेऽञ्जनायां शिशुरुत्पन्नः तस्मिन् दिने सूर्योदयकाले सूर्योपरागः'** इति का.श्री. । चित्रापूर्णिमायां हनुमज्जननमिति तु सम्प्रदायः । कथं पूर्णिमायां सूर्योपरागः? जननात् पञ्चदशे दिने इति तु युक्तम् ।

४. **'नायमलम्'** । **'तत्र सूर्यमण्डले नाथं स्वामिनं विचिन्वन् विचारयन् सन्'** इति का.श्री. । नातिस्वरसं व्याख्यानम् ।

(सं.चं.) फलं विचिन्वन् सूर्यतेजसा लोहितं राहुमेव फलं मन्वान इव । प्रत्युद्ययौ नाम । नामेत्यलीके । प्रत्युद्ययौ किल । प्राकाश्ये वा । केवलं तथा प्रकाशयामास । वस्तुतस्तु राहोर्दुष्टस्य निग्रहणं चिकीर्षन्निवेत्याह– निसर्गतो दुष्टजनासह इति । 'यमेव दिवसं ह्येष ग्रहीतुं भास्करं प्लुतः । तमेव दिवसं राहुर्जिघृक्षति दिवाकरम् । अनेन च परामृष्टो राहुः सूर्यरथोपरि । अपक्रान्तस्ततस्त्रस्तो राहुश्चन्द्रार्कमर्दनः' (उ.कां.३५.३१–२) इति च ॥ १० ॥

तमुत्पतन्तं हरिचक्रकल्पं विलोक्य लोकः [१]सकुतूहलोऽभूत् ।
सद्योऽस्य जातस्य सुतेज[२] ईदृग् यूनोऽप्रमेयं हि भविष्यतीति ॥ ११ ॥

(भा.दी.) तमिति । लोकः अन्तरिक्षचारी जनः, हरेर्यच्चक्रं तस्य कल्पः सदृशः हरिचक्रकल्पस्तम्, उत्पतन्तं तं अञ्जनासुतं विलोक्य, सद्यः जातस्य अस्य तेजः सामर्थ्यं ईदृक् एतादृशम्, यूनः यौवनावस्थां प्राप्तस्य तेजः अप्रमेयं अपरिमितं भविष्यति हि, इति कूतूहलेन सहितः अभूत् ॥ ११ ॥

(सं.चं.) हरिचक्रकल्पम् । ईषदसमाप्तं हरिचक्रं यः स हरिचक्रकल्पः । 'ईषदसमाप्तौ कल्पब्-देश्य-देशीयरः' (अ.सू.५.३.६७) इति कल्पप् । हरिचक्रं हि राहोः शिरश्चिच्छेद । सद्योजातस्य जातमात्रस्य ईदृशं सु समीचीनं प्रवृद्धेष्वपि अदृश्यमानं तेजः । प्रवृद्धस्य यूनः पुनरप्रमेयमपरिच्छेद्यं भविष्यतीति । कुतूहलं नाम कीदृशं स्यादिति विस्मयजनितो मनसः सम्भ्रमविशेषः । 'एतस्मिन् प्लवमाने तु शिशुभावे हनूमति । देवदानवयक्षाणां विस्मयः सुमहानभूत् । नाप्येव वेगवान् वायुर्गरुडो न मनस्तथा । यथाऽयं वायुपुत्रस्तु क्रमतेऽम्बरमुत्तमम् । यदि तावच्छिशोरस्य ईदृशो गतिविक्रमः । यौवनं बलमासाद्य कथं वेगो भविष्यति' (उ.कां.३५.२५–७) इति च ॥ ११ ॥

राहुस्तु[३] शक्रं शरणं जगाम शक्रोऽपि वज्रं शिशवे मुमोच ।
अन्याभिसक्ताय नधर्म्मबुद्धिर्म्माद्यन् प्रमाद्येत्[४] सुजनोऽपि नूनम् ॥ १२ ॥

(भा.दी.) राहुरिति । राहुस्तु शक्रमिन्द्रं शरणमरणं तत् जगाम । मां ग्रहीतुमागच्छतोऽस्मात् पाहीति शरणं जगामेत्यर्थः । शक्रोऽपि, अन्यस्मिन् ऐरावते अभिसक्ताय आसक्ताय, राहुणा इन्द्रनिकटं प्रति गते तत्पृष्ठतो

१. 'लोकः सुकुतू-' २. 'जातस्य च तेज ईदृक्' इति वि.ती.पाठः स्यात् । ३. 'राहुः स शक्रम्'

४. 'अन्यातिसक्ताय न धर्मबुद्धिर्माद्येत् प्रमाद्येत् सुजनोऽपि' । 'अतः इन्द्रस्य धर्मबुद्धिर्नास्ति । कुतो नास्तीत्यत आह–**माद्येदि**ति । सुजनोऽपि सज्जनोऽपि माद्येत् मदयुक्तो भवेत् । प्रमाद्येत् प्रमादवान् भवेत् । नूनं निश्चयः । यद्वा नधर्मबुद्धिरित्येकं पदम् । धर्मभुद्धिरहितः इन्द्रोऽपि अन्यासक्ताय शिशवे वज्रं मुमोचेत्यन्वयः । धर्मबुद्धिराहित्यं कुत इत्यत उक्तम्–**माद्येत्यादि**' इति का.श्री. ।

धावन्तं गजं दृष्ट्वा तद्ग्रहणे आसक्तायेत्यर्थः, शिशवे हनुमते वज्रं कुलिशं तत् मुमोच । इन्द्रेण दुष्कर्म कथं कृतमित्यत आह– न धर्मेति । माद्यन् ऐश्वर्यादिमदयुक्तः सुजनोऽपि न विद्यते धर्मबुद्धिर्यस्य स तथा सन् प्रमाद्येत् प्रमादं प्राप्नुयात् नूनम् ॥ १२ ॥

(सं.चं.) शरणं त्रातारं जगाम शिशोः सकाशादात्मत्राणार्थम् । अन्यस्मिन् गजेन्द्रस्यैरावतस्य ग्रहणाख्ये कर्मणि सक्ताय शिशवे । 'ऐरावतं ततो दृष्ट्वा महत् तदिदमित्यपि । फलं तं हस्तिराजानमभिदुद्राव मारुतिः । तथाऽस्य धावतो रूपमैरावतजिघृक्षया । मुहूर्तमभवद् घोरमिन्द्राग्न्योरिव भास्वरम् । एवमाधावमानं तु नातिक्रुद्धः शचीपतिः । हस्तान्तादतिमुक्तेन कुलिशेनाभ्यताडयत्' (उ.कां.३५.४४–६) । वज्रं शिशवे मुमोच, ऐरावतरक्षार्थमुपायान्तरमपश्यन्, न धर्मबुद्धिर्मुमोच । शिशावस्मिन् वज्रपातनं धर्म इति बुद्ध्या न मुमोच । अत एवाऽह वाल्मीकिः–'नातिक्रुद्धः शचीपतिः' इति । अथापि किञ्चिदिव क्रुद्धः । सोऽपि ननु दोषायैव? सत्यमित्याह– नधर्मबुद्धिः । तदा इन्द्रः नधर्मे अधर्मे बुद्धिरस्येति तादृश आस । सहजमेतदित्यर्थान्तरन्यसनेन समर्थयते–सुजनोऽपि दुर्जनसहवासेन स्वार्थेन वा माद्यन् प्रमादमाचरेदेव हि । मदोऽवलोपः । अविमृश्यकारिता प्रमादः । इन्द्रवज्रा छन्दः । उत्तरयोरपि पद्ययोः ॥ १२ ॥

निस्ताडितोऽसौ निशितेन तेन शैलेन्द्रशृङ्गेऽथ शिशुः पपात ।
प्राणाधिनाथः प्रणयात् स्वपोतं जग्राह कुप्यन् कुलिशायुधाय ॥ १३ ॥

(भा.दी.) निस्ताडित इति । भूमिमवरोपयितुम्, निशितं तेन, तेन वज्रेण निस्ताडितः, असौ शिशुः शैलेन्द्रस्य मेरोः यच्छृङ्गं तस्मिन् पपात । अथ प्राणानां[१] सर्वजीवानामधिनाथः, 'प्राणस्तु प्रणवे जीवे जीविते परमात्मनि' इति वैजयन्ती, वायुः स्वस्य पोतः पुत्रस्तम्, प्रणयः स्नेहस्तस्मात्, कुलिशं वज्रमायुधं यस्य स तथा तस्मै इन्द्राय, कुप्यन् कोपं प्राप्नुवन्, जग्राह स्वाङ्के निक्षिप्तवान् ॥ १३ ॥

(सं.चं.) निशितेन वज्रेण ऐरावतस्य राहोर्वा शिशुकेन ग्रहणनिषेधाय ताडितः । शैलेन्द्रस्य मेरोः शृङ्गे । अथ पपात, वज्रताडनादानन्तर्यमेव पतनस्य केवलम् । नतु कार्यकारणभाव इत्यर्थः । जग्राह स्वाङ्के चकार । 'चुक्रोधेन्द्राय पवनः प्रजानामहिताय सः' (उ.कां.३५.४८) इति च ॥ १३ ॥

तेनाऽगसा प्राणपतौ सकोपे चेलुर्न्न लोकाः शिवशक्रमुख्याः[२] ।
प्राणं विना प्राणिषु [३]नास्ति चेष्टा श्रेष्ठापराधा हि फलन्ति सद्यः[४] ॥ १४ ॥

१. **'प्राणानान्द्रियाणामधिनाथः'** । एतस्मिन् पाठे–**'जीविते परमात्मनि इन्द्रिये–'** इत्यन्तं कोशवचनं पठनीयम् ।

२. **'–शक्रपूर्वाः'** ३. **'प्राणिषु नो हि चेष्टा'** ४. **'श्रेष्ठापराधः फलतीह सद्यः'**

(भा.दी.) तेनेति । प्राणानां सर्वेन्द्रियाभिमानिदेवानां पतौ मुख्यप्राणे, तेन इन्द्रकृतेन आगसा अपराधेन सकोपे सति, हि यस्मात् प्राणं मुख्यप्राणं विना प्राणिषु चेष्टा स्वतो नास्ति तस्मात्, शिवश्च शक्रश्च तौ मुख्यौ श्रेष्ठौ येषां ते तथा लोकाः जनाः न चेलुः स्वास्थ्यं न जग्मुः । चल कम्पने लिट् । तथाहि श्रेष्ठेषु स्वोत्तमेषु य अपराधास्ते सद्यः फलन्ति हि । फलप्रदा भवन्ति हि । फल निष्पत्तौ लट् ॥ १४ ॥

(सं.चं.) तेनेन्द्रकृतेनाऽगसाऽपराधेन । उक्तमर्थमर्थान्तरन्यासेन समर्थयते–श्रेष्ठेति । 'अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते' इति हि स्मरन्ति ॥ १४ ॥

यज्ञो न[१] नैवाध्ययनं न धर्म्मो नोच्छ्वासनिश्वासविधिः कुतोऽन्यः ।
लोकप्रणेतुः[२] कुपितेन लोके प्रजाः प्रजापं शरणं प्रजग्मुः ॥ १५ ॥

(भा.दी.) यज्ञ इति । लोकानां प्राणानां प्रणेता प्रेरकस्तस्य वायोः कुपितं कोपस्तेन लोको भुवनं तस्मिन् यज्ञः न प्रवृत्तः । अध्ययनं नैव । धर्मः वर्णाश्रमधर्मो वा न । उच्छ्वासः ऊर्ध्वश्वासः स च निश्वासः अधःश्वासः स च तयोर्विधिः करणं न । अन्यः एतदन्यशरीरादिव्यापारः कुतः? न कुतोऽपि बभूव । तदा प्रजाः सुरादिजनाः प्रजाः पातीति प्रजापश्चतुर्मुखस्तं शरणमरणं तत् प्रजग्मुः ॥ १५ ॥

(सं.चं.) कुतोऽन्यः? उच्छ्वासनिःश्वासमूलो ह्यन्यः सर्वोऽपि व्यापारो भवति । तेनैव हेतुना, वाय्वनुग्रहेणैण कथञ्चिद् धृतप्राणाः प्रजाः प्रजापतिं शरणं प्रजग्मुः । 'ततः प्रजाः सगन्धर्वा सदेवासुरमानुषाः । प्रजापतिं समाधावन् दुःखिताश्च सुखेच्छया' (उ.कां.३५.५३) इति च ॥ १५ ॥

ब्रह्माऽथ किञ्चित् कुपितो बभाषे कः स्वामिने द्रुह्यति जीवितेप्सुः[३] ।
ऐश्वर्य्यमत्तस्त्रिदशेश्वरोऽयं स्वस्य प्रजानां च चकार दुःखम् ॥ १६ ॥

(भा.दी.) ब्रह्मेति । (अथ) किञ्चित् कुपितः, इन्द्रकृतकर्म श्रुत्वा कोपं प्राप्तः, ब्रह्माऽपि, जीवितमीप्सतीति जीवितेप्सुः कः पुरुषः स्वामिने जीवनस्वामिने वायवे द्रुह्यति द्रोहं करोति । द्रुह जिघांसायां लट् । ऐश्वर्येण मत्तः, अयं त्रिदशेश्वरः देवेन्द्रः, स्वस्य एतासां प्रजानां च दुःखं क्लेशस्तत् चकार, इति बभाषे ॥ १६ ॥

(सं.चं.) ब्रह्माऽथ । 'पुत्रस्तस्यामरेशेन इन्द्रेणाद्य निपातितः । राहोर्वचनमास्थाय ततः स कुपितोऽनिलः' (उ.कां.३५.५९–६०) इति च । अत्रापीन्द्रवज्रा छन्दः ॥ १६ ॥

---

१. **'यज्ञा न'** २. **'कुपितेन तेन' इति, लोकप्रणेत्रा कुपितेन तेन प्रजाः'** इति च । ३. **'जीवनेप्सुः'**

श्रेष्ठं [1]श्रुतिर्ज्येष्ठमिमं पपाठ प्राणं तथोक्थं जगतां च सूत्रम् ।
न मद्वशोऽयं[2] न शिवादिकानां नाथोऽस्ति नारायण एव तस्य ॥ १७ ॥

(भा.दी.) श्रेष्ठेमिति । 'यो वै ज्येष्ठं च श्रेष्ठं च वेद' इति श्रुतिः । इमं प्राणं मुख्यप्राणं सर्वजीवेभ्यः श्रेष्ठं ज्येष्ठं च पपाठ । पठ पाठने लिट् । तथा 'उक्थमुक्थमिति वै प्रजा वदन्ति' इति श्रुतिः इमं उक्थं सर्वजगदुत्थापनशक्तिमन्तं पपाठ । तथा 'एतद्वै गौतम तत् सूत्रम्' इत्यादिश्रुतिः जगतां सूत्रं च पपाठ, आधारभूतं च प्रतिपादितवती । अयं प्राणः मद्वशः ममाधीनः न । शिव आदिर्येषां ते तेषां वशः न । तर्हि स्वतन्त्रः किमित्यत आह– नाथ इति । तस्य प्राणस्य नारायण एव नाथः स्वामी अस्ति ॥ १७ ॥

(सं.चं.) 'वायुर्वै ज्येष्ठश्च श्रेष्ठश्च' इति श्रुतिरिमं प्राणं श्रेष्ठं च ज्येष्ठं च पपाठ । गुणैः श्रेष्ठः प्रशस्यतमः । 'प्रशस्यस्य श्रः' (अ.सू.५.३.६०) । वयसा ज्येष्ठ । अतितमां वृद्धः । 'वृद्धस्य च' (अ.सू.५.३.६२) इति च । श्रुत्यनुसारेण–'ज्येष्ठं श्रुतिः श्रेष्ठमिमं पपाठ' इत्यपि मूलपाठः स्यात् । तथा 'उक्थमुक्थमिति वै प्रजा वदन्ति' इति श्रुतिः प्राणमिमं 'उक्थं' सर्वजगदुत्थापकं पपाठ । 'एतद् वै गौतम तत् सूत्रम्' इति श्रुतिः प्राणमिमं जगतां सूत्रं प्रतिष्ठापकं पपाठ । न मद्वशोऽयम् । यतो मत्समः । न शिवादिकानां च वशः । यतस्तेभ्य उत्तमः । तत उत्तम एको नारायण एव तस्य नाथोऽस्ति, नान्यः । 'शरीरं हि विना वायुं समतां याति दारुभिः । वायुः प्राणः सुखं वायुर्वायुः सर्वमिदं जगत्' (उ.कां.३५.६१) इति च ॥१७॥

वाणीमुदाहृत्य तदेत्युदारां शम्भुः सशर्वः प्रययौ प्रजाभिः ।
आहूय देवानुपदेवयुक्तान् सपुत्रको यत्र स जीवदेवः ॥ १८ ॥

(भा.दी.) वाणीमिति । शम्भुश्चतुर्मुखः, 'शम्भुर्धातृहरार्हत्सु' इति वैजयन्ती, तदा इति उदारां उत्कृष्टां वाणीं वाचं उदाहृत्य, सशर्वः सन् रुद्रसहितः सन्, उपदेवा गन्धर्वादयः तैर्युक्तान् देवान् आहूय, प्रजाभिः सह, यत्र देशे जीवस्य प्राणधारकस्य देवः स्वामी[3] मुख्यप्राणः सपुत्रकः पुत्रसहितः सन् वर्तते तत्र प्रययौ ॥ १८ ॥

---

१. **'श्रेष्ठश्रुतिः'** इति, **'ज्येष्ठश्रुतिः'** इति, **'श्रेष्ठा श्रुतिः'** इति च क्वचित् । सर्वेऽपि भ्रान्ताः । **'श्रुतिः, 'यो हवै ज्येष्ठं च श्रेष्ठं च वेद'** इति **बृहदारण्यकश्रुतिः, इमं मुख्यम्, ज्येष्ठं सकलजीवोत्तमम्, श्रेष्ठं गुणैरुत्तमम्, पपाठ पठितवती । तथा–'प्राण उदक्रामत् प्राण उत्क्रान्तेऽपद्यत, प्राणः पाविशत् प्राणे प्रपन्ने' इत्यादिश्रुतिः, इमं प्राणं प्राणनामकं पपाठ । 'उक्थमुत्त्यमिति वै प्रजा वदन्ति' इति श्रुतिः इमं उत्थापनहेतुत्वात् उक्थे उक्थनामके पपाठ । तथा–'वायुना गोतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च सन्दब्धानि' इति श्रुतिः इमम्, स्यूतमस्मिन् जगदिति जगदाधारत्वात् सूत्रनामकं पपाठ'** इति का.श्री. ।

२. **'न मे वशोऽयम्'**

३. **'जीवदेवः जीवस्वामी'** । **'जीवदेवः सकलजीवस्वामी'** इति .का.श्री. ।

(सं.चं.) शम्भुश्चतुराननः । तमेव हि प्रजाः शरणं जग्मुः । पृथग् ग्रहणाच्च शर्वस्य । देवा इन्द्रादयः । उपदेवा गन्धर्वादयः । 'ततः प्रजाभिः सहितः प्रजापतिः सदेवगन्धर्वभुजङ्गगुह्यकैः । जगाम तत्राऽस्यति यत्र मारुतः सुतं सुरेन्द्राभिहतं प्रगृह्य सः' (उ.कां.३५.६४) इति च । जीवदेवः जीवकलाभिमानी जीवानां व्यवहारप्रवर्तकश्च । दिवु व्यवहारे । देवयतीति देवः ॥ १८ ॥

भ्रूभङ्गमात्रेण जगन्ति हन्तुं क्षमं क्षमायां क्षमया निषण्णम् ।
[1]ध्यायन्तमङ्कार्पितपुत्ररत्नं प्रियं सखायं भगवान् ददर्श ॥ १९ ॥

(भा.दी.) भ्रूभङ्गेति । भगवान् ब्रह्मा, भ्रुवोर्भङ्गश्चलनं भ्रूभङ्गः, केवलं भ्रूभङ्गः भ्रूभङ्गमात्रम्, तेन जगन्ति हन्तुं क्षमं समर्थम्, क्षमायां भूमौ क्षमया सहनशक्त्या निषण्णम्, ध्यायन्तं श्रीहरिध्यानं कुर्वन्तम्, अङ्कयोरर्पितं स्थापितं पुत्ररत्नं पुत्रश्रेष्ठं येन स तथा तम्, प्रियं सखायं मुख्यप्राणं ददर्श ॥ १९ ॥

(सं.चं.) हन्तुं क्षमम् । अथापि क्षमया क्षमायां निषण्णम् । क्षमासारा हि साधवः । भगवत्सङ्कल्पमेव ध्यायन्तम् । ब्रह्मणि सन्निधाय स्वसान्त्वनायाऽगच्छन्तं नारायणमेव च ध्यायन्तम् । भगवान् चतुर्मुखः ॥१९॥

स वेदगर्भः करुणाकुलात्मा तूर्णं कराग्रेण सुधामयेन ।
व्यचीकसद् बालमथाभिमृश्य विशुद्धरूपं कुमुदं यथेन्दुः ॥ २० ॥

(भा.दी.) स इति । करुणया आकुलः निबिड आत्मा मनो यस्य स तथोक्तः सः, वेदा गर्भे उदरे यस्य स तथोक्तश्चतुर्मुखः, सुधामयेन अमृतमयेन[2], करस्य यदग्रं तेन, कुमुदं कुमुदपुष्पं तत् इन्दुः यथा तथा विशुद्धं रूपं यस्य स तथा तं बालं हनुमन्तं अभिमृश्य तूर्णं यथा भवति तथा व्यचीकसत् विकासयामास । चकासृ दीप्तौ लुङ् । यथा कुमुदस्य इन्दोरपगमनेन सङ्कोच एव न दुःखम्, तत्किरणस्पर्शेन च विकास एव नतु मूर्च्छापगमस्तथा हनुमतोऽपि वज्रायुधस्यामोघत्वप्रकटनार्थं मूर्च्छितानुकरणमेव न तु दुःखम् । ब्रह्मकरस्पर्शेन विकास एवेति वाल्मीकीयतात्पर्यमुक्तं भवति ॥ २० ॥

(सं.चं.) करुणाकुलात्मा करुणापूर्णमनाः । विशुद्धरूपं बालम्, वस्तुतः पूर्वमपि न मूर्छामलिनम् । अथापि सूर्यभासा मुद्रितमिव कुमुदमात्मशक्तिं सङ्कुच्य मोहग्रस्तमिव स्थितम्, इन्दुरिव सुधामयेन स्वकराग्रेण व्यचीकसत् विचकासयामास । चकास्तेर्णिचि लुङि रूपम् ॥ २० ॥

---

१. '**ध्यायन्तं पुत्रस्य क्षेमं चिन्तयन्तम्**' इति का.श्री. ।
२. '**अमृतस्राविणेत्यर्थः**'

नास्तीश्वराणां जगतीशितव्ये मन्युः पितॄणामिव पुत्त्रवर्गे ।
उक्त्वेत्युदस्थापयदाशु वायुं हस्तेन हस्तं प्रतिगृह्य[1] वेधाः ॥ २१ ॥

(भा.दी.) नास्तीति । ईश्वराणां पालकानां समर्थानां वा, ईशितव्ये शिक्षणीये पालनीये च जगति, मन्युः, पुत्राणां वर्गः समूहस्तस्मिन्, मातरश्च पितरश्च पितरस्तेषामिव, मातापितॄणामिवेत्यर्थः, 'पिता मात्रा' (अ.सू.१.२.७०) इत्येकशेषः । नास्ति न भवति । वेधाश्चतुर्मुखः इति मुख्यवायुं प्रति उक्त्वा, स्वकीयहस्तेन मुख्यवायोर्यो हस्तस्तं प्रतिगृह्य, वायुं आशु उदस्थापयत् उत्थापयामास ॥ २१ ॥

(सं.चं.) ईशितव्ये जगति । 'वायुमुत्थाप्य हस्तेन शिशुं तं परिमृष्टवान्' (उ.कां.३६.३) इति च । इन्द्रवज्रा छन्दः ॥ २१ ॥

प्राणे प्रसन्ने वितते जगाम प्राणिव्रजोऽयं प्रकृतिं विपन्नः ।
निदाघसन्तप्त इवातिमात्रं जलागमे गाधजलेचरौघः[2] ॥ २२ ॥

(भा.दी.) प्राण इति । विपन्नः पूर्वं निश्चेष्टतया पतितः, अयं प्राणिव्रजः, सुतस्योद्बोधनेन प्रसन्ने प्राणे वायौ वितते सर्वशक्तिप्रदत्वेन व्याप्ते सति, प्रकृतिं पूर्वस्वभावं जगाम । गमेर्लिट् । तत् कथमिव? अतिमात्रमत्यन्तं निदाघेन उष्णेन सन्तप्तः, अगाधं अतिनिम्नस्थलस्थितं यज्जलं तत्र चरन्तीति अगाधचलेचराः मत्स्यादयः, तेषामोघः समूहः । 'तत्पुरुषे कृति बहुलम्'(अ.सू.६.३.१४) इति सप्तम्या अलुक् । जलस्य आगमः प्राप्तिस्तस्मिन् सति यथा तथा प्रकृतिं जगामेत्यन्वयः ॥ २२ ॥

(सं.चं.) जगति वितते सति । सकलप्राणिव्रजे सन्निहिते सति । पूर्वं विपन्नः सम्प्रति प्रकृतिं सहज-स्थितिं जगाम । निदाघ इति ग्रीष्मकाल उच्यते । निदाघ इति ग्रीष्मताप उच्यते । निदाघ इति तापजः स्वद उच्यते । तेन निदाघे ग्रीष्मे यो निदाघो घर्मः, येन जलान्तरपि स्विद्यति, तेन अतिमात्रं सन्तप्तः । सर्वाङ्गव्यापी दुःखानुभवहेतुस्तापः । तस्यौत्कट्यं सन्तापः । मात्रामियत्तामतिक्रान्तोऽतिमात्रः सर्वात्मना दुःसहः

---

१. **'परिगृह्य'**

२. अत्र द्वेधा प्रतृण्णं दृश्यते । **'अगाधजलेचरौघः'** इति, **'गाधजलेचरौघः'** इति । प्रथमं विश्वपतितीर्थीये । **'अगाधं अतिनिम्नस्थलस्थितं जलम्'** इति तद्व्याख्यानात् । एवं भाति–लिपिकृत्प्रमादोऽयम् । **'गाधं अनिम्नस्थलस्थितम्'** इत्येव टीकापाठः स्यादिति । द्वितीयं वि.भू.टीकायां का.श्री. टीकायाम् । तथाहि–**'गाधजलेचरौघः अनिम्नस्थलस्थितमत्स्यसमूहः'** इति वि.भू. । **'गाधजलेचरौघः । गाधजलं स्वल्पजलम् । तथाचातिस्वल्पजलस्थलस्थितः जलेचरौघः मत्स्यादिजलजन्तुसमूहः'** इति का.श्री. ।

सन्तापः । तत्रापि गाधजले शुष्कप्राये जम्बालमलिनजले सरसि चराणां जलचराणां मत्स्यादीनामोघो निचयः जलागमे प्रावृषि अगाधजले सति सरसि यथा प्रकृतिं गच्छति । गाधजले इति पदसान्निध्यतः चरा इति जलचरा उच्यन्ते स्फुटम् ॥ २२ ॥

भङ्गे प्रसक्तेऽपि न भङ्गमाप हनुः शिशोर्य्यद्धनुमानतोऽयम्[१] ।
उक्त्वेत्थमम्लानसरोजमालां दिव्यां महेन्द्रो निदधे[२] तदंसे ॥ २३ ॥

(भा.दी.) भङ्ग इति । यत् यस्मात् भङ्गो नाशस्तस्मिन् वज्रपातेन प्रसक्ते सत्यपि, शिशोः वायुसूनोः, हन्ति चणकादिकमिति हनुः, वर्णोच्चारणकाले जिह्वामूलेन स्पृश्यमानोऽवयवविशेषः । 'कपोलौ तत्परो हनुः' इत्यमरः । भङ्गं भञ्जनं नाऽप । ततः अयं तव सुतः हनुमान् हनुमन्नामकः । महेन्द्रः इत्थं उक्त्वा दिव्यानि अम्लानानि यानि सरोजानि तेषां मालां तस्य हनुमतोंऽसः स्कन्धस्तस्मिन् निदधे समर्पितवान् ॥ २३ ॥

(सं.चं.) भङ्गे प्रसक्तेऽपि । 'ततः सहस्रनयनः प्रीतियुक्तः शुभाननः । कुशेशयमयीं मालामुत्क्षिप्येदं वचोऽब्रवीत् । मत्करोत्सृष्टवज्रेण हनुरस्य यथाऽहतः । नाम्ना वै कपिशार्दूलो भविता हनुमानिति' (उ.कां.३६.१०–११) इति च । वज्रपातेऽप्यभुग्नः प्रशस्तो हनुरस्येति हनुमान् ॥ २३ ॥

प्राणाङ्कगं प्राणमिव द्वितीयं बालं च बालेतरसद्गुणाब्धिम् ।
सभा सुराणामथ भासुरं तं सभाजयामास सभाजनीयम् ॥ २४ ॥

(भा.दी.) **प्राणे**ति । अथ सुराणां ब्रह्मणा सहाऽगतदेवानां सभा, प्राणस्याङ्कस्तद्गच्छतीति तथोक्तस्तम्, द्वितीयं प्राणमिव मुख्यप्राणमिव स्थितम्, बालश्च बालमपि बालादितरे येऽभिज्ञास्तेषां ये सद्गुणास्तैरब्धिरिव तम्, भासुरं प्रकाशमानं सभाजनीयं सम्भावनीयं तं हनुमन्तं सभाजयामास युद्धादावस्मदीयशस्त्रसंस्पर्शस्तव मा भूदित्यादिरूपेण वचसा मानयामास । सभाज प्रीतिदर्शनयोः लिट् । अनेन स्वाभिमन्यमानशस्त्रघातस्तव मा भूदिति देवैर्वरो दत्त इति वाल्मीकीयतात्पर्यमुक्तं भवति ॥ २४ ॥

(सं.चं.) बालेतर इव अबालिशो विदग्धः पुरुष इव सद्गुणानामयमब्धिः । सुराणां शर्वशक्रादीनां सभा समुदायः । ब्रह्मणा सह तत्राऽगतः । 'पशूनां समजोऽन्येषां समाजो धीमतां सभा' इति यादवप्रकाशः । भासुरं भासनशीलम् । भासतेर्घुरच् । सभाजनीयं प्रीत्याऽऽदरणीयम् । स्वेष्टवरदानेन सभाजयामास स्वप्रीतिं

---

१. '**–मांस्ततोऽयम्**' इति वि.ती.पाठः । २. '**निदधौ तदंसे**'

व्यानञ्ज । सभाज प्रीतिदर्शने । तथाहि–'इतः प्रभृति वज्रस्य ममावध्यो भविष्यति' (उ.कां.३६.१२) इतीन्द्रः । 'यदा च शास्त्राण्यध्येतुं शक्तिरस्य भविष्यति । तदाऽस्य शास्त्रं दास्यामि येन वाग्ग्मी भविष्यति । नचास्य भरिता कश्चित् सदृशः शास्त्रदर्शने' (१४) इत्यादित्यः । 'वरुणश्च वरं प्रादान्नास्य मृत्युर्भविष्यति । वर्षायुतशतेनापि मत्पाशादुदकादपि' (१५) इति । 'यमो दण्डादवध्यत्वमरोगत्वं च दत्तवान्' (१६) इति । 'वरं ददामि सन्तुष्ट अविषादं च संयुगे । गदेयं मामिका नैनं संयुगेषु वधिष्यति' (१७) इति धनदः । 'मत्तो मदायुधानां च अवध्योऽयं भविष्यति' (१८) इति शिवः । 'मत्कृतानि च शस्त्राणि यानि दिव्यानि तानि च । तैरवध्यत्व-मापन्नश्चिरजीवी भविष्यति' (२०) इति विश्वकर्मा । 'सर्वेषां ब्रह्मदण्डानामवध्योऽयं भविष्यति' (२१) इति चतुर्मुखः । यत् स्वयमेव स मारुतिरास तदेव देवाः स्ववचनैरुपबृंहयामासुरिति सर्वं सुन्दरम् । अत्र प्रथमपादे प्राणेति द्वितीये बालेति तृतीये भासुरेति तुरीये सभाजेत्यक्षराणामावृत्तेरपूर्वो वृत्त्यनुप्रासः ॥ २४ ॥

[१]शस्त्रास्त्रसोढाऽखिलशत्रुहन्ता शास्त्रेषु सर्वेषु विदग्धबुद्धिः ।
ततो हनूमान् भगवत्प्रियाणां श्रेष्ठोऽयमित्यभ्यधिताब्जयोनिः ॥ २५ ॥

(भा.दी.) **शस्त्रे**ति । अब्जं योनिः कारणं यस्य स तथोक्तः चतुर्मुखः, यतः अयं शस्त्राणि च अस्त्राणि च तेषां सोढा सहनशक्तिमान्, अखिला ये शत्रवस्तेषां हन्ता हननशीलः, सर्वेषु, ब्रह्ममीमांसादीनि यानि शास्त्राणि तेषु, विदग्धा कौशलोपेता बुद्धिर्यस्य स तथा, भगवतो हरेर्ये प्रियास्तेषां मध्ये श्रेष्ठः, ततः ज्ञानवत्त्वादिगुणवत्त्वात्, हनुशब्दस्य 'हनशब्दो ज्ञानवाची' इत्युक्तेः ज्ञानोपलक्षितसकलगुणवाचित्वात्, अयं हनूमान् हनूमच्छब्दवाच्यः इति अभ्यधित नाम चक्रे ॥ २५ ॥

(सं.चं.) शस्त्रास्त्रसोढा । शत्रूणां शस्त्रास्त्रघातं सहतेऽस्य हनुरिति हनुमान् । अखिलशत्रुहन्ता । शत्रूणां हनुर्हननम् । तद्वान् हनुमान् । हन हिंसागत्योः । शास्त्रेषु सर्वेषु हनुरवगतिः, स्वच्छन्दा गतिश्चास्येति हनुमान् । 'हनशब्दो ज्ञानवाची हनुमान् मतिशब्दितः' इति हि स्मरन्ति । स्वरूपभूतमतिमान् हनुमा-नित्यर्थः । 'यदीमुप ह्वरते साधते मतिः–' इति च श्रुतिः । हनुमानेव हनूमान् । आधिक्येऽधिकम् । 'शब्दादीनां च' (अ.सू.६.३.१२०) इति शरादिगणपठितत्वात् सञ्ज्ञायां दीर्घ इति पाणिनीयाः । 'ततः सुराणां तु वरैर्दृष्ट्वा ह्येनमलङ्कृतम् । चतुर्मुखस्तुष्टमना वायुमाह जगद्गुरुः । अमित्राणां भयकरो मित्राणामभयङ्करः । अजेयो

१. **'हनुशब्दस्य ज्ञानं हिंसा चेत्यर्थद्वयम् । तथाच हनुरस्यास्तीति हनुमान् ज्ञानवान् शत्रुहिंसकश्चेत्यर्थो भवति । शत्रुप्रक्षिप्तशस्त्रास्त्रसहनशक्त्यभावे शत्रुहन्तृत्वं न सम्भवतीत्यन्यथाऽनुपपत्त्या शास्त्रास्त्रसोढृत्वं लभ्यते'** इति का.श्री. ।

भविता पुत्रस्तव मारुत मारुतिः । कामरूपः कामचारी कामगः प्लवतां वरः । भवत्यव्याहतगतिः कीर्तिमांश्च भविष्यति' (उ.कां.३६.२२–४) इति च । अभ्यधित व्याजहार, अभिधानं चकार च ॥ २५ ॥

सूर्य्यान्तिके व्याकरणाभियोगी सूर्य्याभिमुख्येन पतंश्च पश्चात् ।
प्राच्याद् गिरेरस्तगिरिं जगाम ग्रन्थं महान्तं हनुमान् दधानः ॥ २६ ॥

(भा.दी.) सूर्येति । सूर्यस्य सूर्यमण्डलस्थनारायणस्य, अन्तिकं समीपं तस्मिन्, व्याकरणे मूलव्याकरणशास्त्रे अभियोग आग्रहः, सोऽस्यास्तीति तथोक्तः, मूलव्याकरणादिशास्त्रपाठाग्रहवानित्यर्थः, सूर्यं अग्रत अभिमुखं यस्य स तथोक्तः तेन[1](?), पश्चात् पृष्ठतः प्लवमानः आपतन्, महान्तं ग्रन्थं दधानः हनुमान्, प्राच्यां भवः प्राच्यः तस्मात् गिरेः, उदयपर्वतादित्यर्थः, अस्ताख्यो यो गिरिस्तं जगाम ॥ २६ ॥

(सं.चं.) व्याकरणेऽभियोगोऽभिनिवेशः । सूर्याभिमुख्येन पश्चात् पृष्ठतःपृष्ठतो गच्छन् । व्याकरणमिति वेदार्थव्याकरणम्, न शब्दशास्त्रमात्रम् । महान्तं ग्रन्थं वेदराशिम् । वस्तुतः सर्वदा हृदये दधानः । 'असौ पुनर्व्याकरणं ग्रहीष्यन् सूर्योन्मुखः प्रष्टुमनाः कपीन्द्रः । उद्यद्गिरेरस्तगिरिं जगाम ग्रन्थं महद्धारयन्नप्रमेयः' (३६–४५) इति च । इन्द्रवज्रा छन्दः ॥ २६ ॥

आनन्दभाजो हरिभक्तिराज्ये प्रवृद्धनानागुणरत्नराशेः[2] ।
तस्येन्द्रियारातिजयध्वजोऽभूत् [3]सद्ब्रह्मचर्य्यं भुवनाभिपूज्यम् ॥ २७ ॥

(भा.दी.) आनन्देति । हरेर्या भक्तिः सैव राज्यं तस्मिन्, आनन्दं भजतीति तथोक्तस्तस्य, महासन्तोष-युक्तस्येत्यर्थः, प्रवृद्धा नानाविधा ये गुणास्ते रत्नानीव तेषां राशिः समूहो यस्य स तथोक्तस्तस्य, तस्य हनुमतः भुवने अभिपूज्यम्, सत् उत्तमं यद्ब्रह्मचर्यं समस्तेन्द्रियनिग्रहाख्यव्रतम्, इन्द्रियाण्येव अरातयः शत्रवस्तेषां यो जयस्तस्मिन् ध्वजइव अङ्कइव, 'अस्त्री मेढ्राङ्कयोर्ध्वजः' इति वैजयन्ती, अभूत् ॥ २७ ॥

(सं.चं.) नानागुणा एव रत्नानि । तेषां राशिः प्रवृद्धो यत्र । इन्द्रियाख्यारातिविजयस्य ध्वजायितं सत् निर्दुष्टं ब्रह्मचर्यम् । 'हनुमानिति महितमहापौरुषो बाहुशाली ख्यातस्तेऽग्र्योऽवतारः सहित इह बहुब्रह्मचर्यादिधर्मैः' इति हि वायुस्तुतौ ॥ २७ ॥

---

१. अस्फुटमसङ्गतमिदं विवरणम् । मृग्यः शुद्धः पाठः । **'सूर्यः अग्रजः अभिमुखः यस्य सः'** इति पाठः स्यात् । अथच एतद्व्याख्यानुगुणतया– **'सूर्याग्रगः प्लवमानश्च पश्चात्'** इति टीकासम्मतः पाठ इति प्रतीयते । परन्तु पाठेऽस्मिन् छन्दः कुप्यति ।

२. **'गुणकोशराशेः'**

३. **'सुब्रह्मचर्यम्'** इति, **'सब्रह्मचर्यम्'** इति च ।

चातुर्य्यमाधुर्य्यसुवीर्य्यशौर्य्यैरौदार्य्यधैर्य्यप्रवरैर्गुणैः[१] स्वैः ।
[२]सर्वज्ञतासर्वसमर्थताद्यैर्हनूमतः कोऽस्ति समस्त्रिलोक्याम् ॥ २८ ॥

(भा.दी.) चातुर्येति । चतुरस्य दक्षस्य भावश्चातुर्यं तच्च, 'चतुरौ दक्षधीमन्तौ' इति वैजयन्ती, माधुर्यं मनोहरत्वं तच्च, सुवीर्यं शोभनबलं तच्च, 'वीर्यं बले प्रभावे च ' इत्यमरः, शौर्यं पराक्रमस्तच्च तैः, उदारस्य दातुर्भाव औदार्यं तच्च, 'उदारो दातृमहतोः' इति च, धैर्यं च ते प्रवरे श्रेष्ठे येषां ते तथा तैः, सर्वज्ञता च, सर्वेषु कार्येषु समर्थस्तस्य भावस्तत्ता सा च, ते आद्ये येषां ते तथोक्तास्तैः, स्वैः स्वरूपभूतैः सर्वैः गुणैः शुभधर्मैः, त्रिलोक्यां हनूमतः समः सदृशः कः पुरुषः अस्ति? न कोऽपीश्वरातिरिक्त इत्यर्थः ॥ २८ ॥

(सं.चं.) चातुर्येत्यादि । 'पराक्रमौदार्ययशःप्रतापैः सौजन्यमाधुर्यनयानयैश्च । गाम्भीर्यचातुर्यसुवीर्य-धैर्यैर्हनूमतः कोऽभ्यधिकस्त्रिलोक्याम्' (उ.कां.३६.४४) इति च । सपदि सङ्कटपारगमनं चातुर्यम् । प्रियंवदता माधुर्यम् । सुवीर्यमवार्यमन्तःसत्वम् । शौर्यं पराभिभवनशक्तिः । औदार्यं वदान्यता । धैर्यं सङ्कटेऽपि साध्वसविरहः ॥ २८ ॥

असावसङ्गो[३] विविधेऽपि लोके सर्वत्र सर्वेश्वरमेव पश्यन् ।
चचार[४] योगानुगतान्तरात्मा मरुत्समानो मरुतस्तनूजः ॥ २९ ॥

(भा.दी.) असाविति । न विद्यते सङ्गो विषयासक्तिर्यस्य स तथोक्तः, सर्वत्र जगति सर्वेश्वरं श्रीहरिं (एव) पश्यन् अपरोक्षीकुर्वन्, योगे भगवद्ध्याने अनुगत आसक्त अन्तरात्मा मनो यस्य स तथा, मरुतः वायोः तनुजः पुत्रः, असौ हनुमान्, विविधो नानाविधस्तस्मिन् लोके, अपिरभिव्याप्तौ, सर्वलोकेष्वपीत्यर्थः, मरुत्समानः सन् चचार । चर गतिभक्षणयोर्लिट् ॥ २९ ॥

(सं.चं.) 'स्रुग्भाण्डान्यग्निहोत्राणि वल्कलानां च सञ्चयान् । भग्नविच्छिन्नविध्वस्तान् संशान्तानां करोत्ययम्' (उ.कां.३६.३०) इति वाल्मीकिवचनस्य भावमाह– असावसङ्ग इति । तत्रापि निर्लिप्तः केवलं लीलया जनान् मोहयितुं तथा चकारेत्यर्थः । तदजानन्त ऋषय एनं प्रीत्या शेपुरिव । तस्मै देवानां वरदानमिव व्यर्थमृषीणां

---

१. '–प्रमुखैर्गुणै–'

२. 'सर्वज्ञता ईशादन्यत्राऽलोचने सर्वविषयज्ञानोपेतत्वम् । सर्वसमर्थता सर्वकार्येषु समर्थत्वम्' इतिका.श्री. ।

३. 'असङ्गो लेपरहितः योग्यविषयैर्नहि लेपोऽस्ति वह्निवायुविवस्वतामित्युक्तेः' इति च का.श्री. ।

४. 'चचाल योगा–'

शापदानम्। नहि वरेण किञ्चिदाधीयत। नापि शापेनाहीयत। यो बाल एव सूर्यं प्रति पुप्लुवे तस्य समुद्रतरणं कियत्? भगवति भक्तियोगो योगः। यदयुक्तमिव करोति तत्रापि योगयुक्तं मन एव कारणम्। भगवत्सङ्कल्पं जानन् तदनुगुणं वर्तयंश्चचार। मरुत्समानः अवतारेऽपि मूलरूपादन्यूनगुणः ॥ २९ ॥

सौख्याय सख्यं स्वयमाप तेन सुग्रीवनामा प्लवगप्रबर्हः।
श्रीमाननेकैः सचिवैर्युतोऽपि शतक्रतुर्यद्वदुरुक्रमेण ॥ ३० ॥

(भा.दी.) सौख्यायेति। श्रीमान्, सुग्रीव इति नाम यस्य स तथोक्तः, प्लवगेषु कपिषु प्रबर्हः श्रेष्ठः, अनेके बहवस्तैः सचिवैः भृत्यैर्युतोऽपि, शतं क्रतवो यस्य स तथा इन्द्रः, उरुक्रमेण विष्णुना यद्वत् तद्वत्, तेन तादृशेन हनुमता, सख्युर्भावः सख्यं तत्, सुखमेव सौख्यं तस्मै स्वयं आप जगाम ॥ ३० ॥

(सं.चं.) सौख्याय सख्यम्। 'सुग्रीवेण समं त्वस्य अद्वैधं छिद्रवर्जितम्। आबाल्यं सख्यमभवदनिलस्याग्निना यथा' (उ.कां.३६.४०) इति च। उरुक्रमेण उपेन्द्रेण ॥ ३० ॥

पम्पातटे फुल्लवने प्रकाश्य वियोगिनां शोकदशामशोकः।
सलक्ष्मणोऽसौ गत ऋश्यमूकं तौ वानरेन्द्रौ[1] भगवान् ददर्श ॥ ३१ ॥

(भा.दी.) पम्पेति। न विद्यते शोको यस्य स तथोक्तः, सलक्ष्मणः लक्ष्मणेन सहितः, भगवान् असौ श्रीरामः, फुल्लं विकसितं वनं यस्मिन् तत्तथोक्तं तस्मिन्, पम्पाया यत्तटं तस्मिन्, वियोग एषामस्तीति वियोगिनः तेषाम्, भार्यावियुक्तपुरुषाणामित्यर्थः, शोकस्य दशामवस्थां प्रकाश्य, ऋश्यमूकाख्यो गिरिस्तं गतः सन्, तौ वानरेन्द्रौ हनुमत्सुग्रीवौ ददर्श ॥ ३१ ॥

(सं.चं.) पम्पातटे फुल्लवने। फुल्लकुसुमवन्ति वनानि यत्र। कुसुमनिष्ठं फुल्लत्वं कुसुमवत्युपचर्यते। ञि फला विशरणे इत्यतः 'ञीतः क्तः' (अ.सू.३.२.१८७) इति वर्तमाने क्तः। 'स तां पुष्करिणीं गत्वा पद्मोत्पलझषाकुलाम्। रामः सौमित्रिसहितो विललापाऽकुलेन्द्रियः'(कि.कां.१.१) इति च। ऋश्यो मृगविशेषः। 'रुरुर्महान् कृष्णसारः कुरङ्गो हरिणो महान्। रोहिद् ऋश्यो हरिणवन्मृदुशृङ्गः प्रतापसः' इति यादवप्रकाशः। ऋषीणां तपोभङ्गभिया ऋश्या अपि मूका यत्र स ऋश्यमूको गिरिः। 'ऋष्यमूकम्' इति पठन्तो भ्रान्ताः ॥ ३१ ॥

---

१. **'ऋष्यमूके तौ वानरेन्द्रौ'** इति, **'ऋष्यमूके द्वौ वानरेन्द्रौ'** इति क्वचित्।

सिंहप्रभं पूरुषसिंहमेनं[१] निरीक्ष्य रक्तायतनेत्रमत्र ।
सबाणबाणासनपाणिमारात् स पुप्लुवे[२] सूर्य्यसुतः सहान्यैः ॥ ३२ ॥

(भा.दी.) सिंहेति । सूर्यसुतः सः सुग्रीवः, अत्र ऋष्यमूके, सिंहवत्प्रभा यस्य स तथा तम्, पूरुषसिंहः (पुरुष)श्रेष्ठस्तम्, रक्ते विशाले आयते नेत्रे यस्य तम्, बाणसहितं यद् बाणासनं धनुः, तत् पाण्योर्यस्य तम्, एतं श्रीरामम्, आरात् दूरात् निरीक्ष्य, अन्यैर्नीलादिभिर्वानरैः सह पुप्लुवे । प्लुङ् गतौ लिट् ॥ ३२ ॥

(सं.चं.) आराददूरे निरीक्ष्य अन्यैः हनुमदन्यैरनुगैः कपिभिः । आरात् सुदूरं पुप्लुवे पलायामास ॥ ३२ ॥

अन्याद्रिसंस्थान्[३] भयकम्पिताङ्गान् प्रकम्पितागान्[४] प्लवगानवेक्ष्य ।
अप्राकृतात्मा पुरुषोत्तमोऽयं न वो भयायेत्यवदद्धनूमान् ॥ ३३ ॥

(भा.दी.) अन्येति । ऋष्यमूकादन्यो योऽद्रिस्तत्र संस्थान् संस्थितान्[५], भयेन कम्पितं चलितं अङ्गं येषां ते तथा तान्, प्रकम्पिताः प्लवनवेगेन चलिता अगा वृक्षा यैस्ते तथोक्तान्, प्लवगान् सुग्रीवादिकपीन् अवेक्ष्य हनुमान्, अयं दृश्यमानः, अप्राकृत आत्मा स्वरूपं यस्य स तथोक्तः, पुरुषेभ्यो उत्तमः श्रीहरिः वः भयं भीतिस्तस्मै सम्प्राप्तः न इति अवदत् ॥ ३३ ॥

(सं.चं.) अन्याद्रिसंस्थान् अन्यशिखरसंस्थान् । प्रकम्पितागान् । अगः पर्वतः । अगा वृक्षा वा । 'एवमेकायनगताः प्लवमाना गिरेर्गिरिम् । प्रकम्पयन्तो वेगेन गिरीणां शिखराण्यपि । ततः शाखामृगाः सर्वे प्लवमाना महाबलाः । बभञ्जुश्च नगांस्तत्र पुष्पितान् दुर्गसंश्रितान्' (कि.कां.२.९–१०) इति च । न वो भयायेत्यवदत् । न युष्मान् भीषयितुमागतः, किन्त्वभयायेत्यवदत् । नवो नूतनोऽयमागतोऽस्माकमभयायेति च ॥ ३३ ॥

सगद्गदं सूर्य्यसुतस्तमूचे नूनं सखे वालिहिताय वीरौ ।
इमौ जिघांसू मम पार्श्वमाप्तावेतौ परीक्षस्व विचक्षणेति ॥ ३४ ॥

---

१. **'–सिंहमेतम्'** इति वि.ती.पाठः स्यात् । २. **'–मारात् प्रपुप्लुवे'** ३. **'अन्याद्रिसक्तान्'**

४. **'प्रकम्पिताङ्गान्'** । **'पूर्वं वलिभीत्या कम्पिताङ्गान्, इदानीं रामदर्शनेन प्रकर्षेण कम्पिताङ्गान्'** इति का.श्री. । अस्वरसं व्याख्यानम् ।

५. **'सक्तान्'**

(भा.दी.) सगद्गदमिति । हे सखे हनुमन्, वालिनो हितं तस्मै, मां हन्तुमिच्छतो जिघांसतः, जिघांसत इति जिघांसू, इमौ वीरौ मम पार्श्वं समीपं तत् आप्तौ नूनम्, हे विचक्षण कुशल, एतौ वीरौ परीक्षस्व, कौ किमर्थमागताविति विचारय । ईक्ष दर्शनाङ्कनयोर्लोट् । इति सूर्यपुत्रः, गद्गदेन भीतिवशात् स्खलद्वचनेन सहितं यथा भवति तथा सगद्गदम्, (तं) हनुमन्तं ऊचे ॥ ३४ ॥

(सं.चं.) वालिहिताय वीरौ । 'वालिप्रणिहितावेतौ शङ्केऽहं पुरुषोत्तमौ' (२.२१) इति च ॥ ३४ ॥

स भिक्षुवेषो हनुमान् स्ववेषं विहाय विश्वेश्वरपार्श्वमाप्य ।
प्रणाममष्टाङ्गविशिष्टमस्मै चकार बिभ्रद् विनयं नयं च ॥ ३५ ॥

(भा.दी.) स इति । स हनुमान् स्वस्य यो वेषः कपिवेषः, तं विहाय भिक्षोस्त्रिदण्डिनो वेषो यस्य स तथा सन् । मित्रशत्रुविवेकरूपपरीक्षार्थं गमने भिक्ष्वादिवेषस्य नीतिशास्त्रोक्तत्वादिति भावः । भिक्षुवेषं विधाय विश्वेश्वरस्य यत्पार्श्वं तत् आप्य, विनयः प्रश्रयस्तं च, नयो नीतिस्तमपि बिभ्रत् सन्, 'उरसा शिरसा दृष्ट्या मनसा वचसा तथा । पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टाङ्ग ईरितः' इत्युक्तानि यानि अष्टौ अङ्गानि अवयवाः, तैर्विशिष्टो युक्तस्तं प्रणामं अस्मै श्रीरामाय चकार ॥ ३५ ॥

(सं.चं.) सुग्रीवप्रार्थनया स्ववेषं कपिरूपं विहाय धृतभिक्षुवेषः । भिक्षुस्तापसः । उरः शिरो दृष्टिर्मनो वचः पादौ करौ जानुनी चेत्यष्टभिरङ्गैर्विशिष्टम् । भिक्षुभिरपि महात्मा गृहस्थोऽपि नन्तव्य इति नयं बिभ्रत् । अत्रोपेन्द्रवज्रा छन्दः ॥ ३५ ॥

चरणतरुणपद्मपातिनं तं रघुतिलको[१] हनुमन्तमात्मदासम् ।
उदहरदथ चक्रलक्ष्मभाजा करकमलेन सुकोमलेन रामः ॥ ३६ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
किष्किन्धाकाण्डे प्रथमः सर्ग्गः ॥

—०—

(भा.दी.) चरणेति । अथ रघुषु तिलक इव तिलकः श्रेष्ठ इत्यर्थः, श्रीरामः चरणावेव तरुणे नूतने ये पद्मे तयोः पतितुं शीलमस्यास्तीति तथोक्तस्तम्, नमस्कारशीलमित्यर्थः, आत्मनः स्वस्य दासं तं हनुमन्तम्,

१. **'रघुकुलतिलको–'** इति छन्दोविरुद्धं पठन्तो भ्रान्ताः ।

चक्रस्य यल्लक्ष्म चिह्नं भजतीति तथोक्तं तेन, सुकोमलेन, कर एव कमलं तेन, उदहरत्, उत्थापयामास ॥ ३६ ॥

इति श्रीविश्वपतितीर्थकृतायां श्रीसङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां
किष्किन्धाकाण्डे प्रथमःसर्गः ॥

(सं.चं.) चक्राङ्कितेन करकमलेनोदहरत्, उज्जहार, उद्धारेत्यर्थः। पुष्पिताग्रा छन्दः। नौ रयौ विषमपादयोः, नजजरगाः समर्योहि पुष्पिताग्रा ॥ ३६ ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां
किष्किन्धाकाण्डे प्रथमसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– १४१५+३६=१४५१]

द्वितीयः सर्ग्गः

आञ्जनेयोऽञ्जलिं बध्वा कञ्जलोचनसन्निधौ ।
अञ्जसा वाक्यमादत्त मञ्जुलं चित्तरञ्जनम् ॥ १ ॥

(भा.दी.) श्रीरामस्य प्रणामानन्तरं हनुमान् किं चकारेत्यत आह– **आञ्जनेय** इत्यादिना । अञ्जनाया अपत्यं पुमानाञ्जनेयः हनुमान्, अञ्जलिं करसम्पुटं बध्वा, कञ्जवल्लोचने यस्य स तथा तस्य श्रीरामस्य सन्निधिस्तस्मिन्, अञ्जसा सम्यक् मञ्जुलं मनोहरम्, चित्तं रञ्जयतीति तथोक्तं तत्, वाक्यं आदत्त वक्तुमुपक्रान्तवान् ॥ १ ॥

(सं.चं.) आञ्जनेयः । 'स्त्रीभ्यो ठक्' (अ.सू.४.१.१२०) । कञ्जलोचनो नारायणात्मा रामः । 'यथा कप्यासं पुण्डरीकमेवमक्षिणी' इति हि भगवतो लक्षणम् । अञ्जसा सपदि । मञ्जुलं अर्थतः शब्दतश्च रम्यम् । ललितपदबन्धम्, रमणीयार्थं च । मञ्जुलं मनोहरमिति व्याख्यानं चित्तरञ्जनमित्यनेन पुनरुक्तम् । अत एव चित्तरञ्जनम् । कर्णाटानां प्रियो द्वितीयाक्षरप्रासः ॥ १ ॥

चोद्यस्यास्योत्तरं वीर प्रतिभा प्रतिभाषते ।
तथाऽपि चोद्यतेऽस्माभिर्भवदालापलोलुपैः ॥ २ ॥

(भा.दी.) **चोद्ये**ति । हे वीर श्रीराम, अस्य मद्बुद्धिस्थस्य, चोद्यस्य त्वं क इति प्रश्नस्य, उत्तरं प्रत्युत्तरं तत्, प्रतिभा स्वरूपप्रज्ञैव प्रतिभाषते प्रयच्छति । त्वं श्रीनारायण एव नान्य इति साक्षिरूपज्ञानमेव विषयीकरोति अतस्त्वं क इति प्रश्नस्यावकाशो नास्तीत्यर्थः । तथाऽपि भवता सह आलापो मिथः सम्भाषणम्, तत्र लोलुपैः लोलैः अस्माभिः चोद्यते त्वं क इत्यादिरूपेण पृच्छ्यते । चुद प्रेरणे लट् । अनेन श्रीरामं प्रत्युत्तरत्र क्रियमाणप्रश्नः संशयपूर्वको न भवतीत्युक्तं भवति ॥ २ ॥

(सं.चं.) मया क्रियमाणस्य चोद्यस्य मम प्रतिभैवोत्तरं प्रतिभाषते । स्वरूपप्रतिभयैवोत्तरं प्रतिभाति । तथाऽपि भवान् चोद्यते पृच्छ्यते प्रेर्यते वा । चुद सञ्चोदने । 'सञ्चोदनं प्रेरणम्' इति क्षीरस्वामी ॥ २ ॥

को भवान् भुवनाश्चर्य्यं रूपमीदृशमुद्वहन् ।
नन्दने नन्दितुं योग्यः क्षुद्रं वनमिदं गतः ॥ ३ ॥

(भा.दी.) क इति । भुवनेषु आश्चर्यं तत्, ईदृशं रूपं उद्वहन्, नन्दनं नन्दनाख्येन्द्रोद्यानं तस्मिन्, नन्दितुं योग्यः, क्षुद्रं अल्पं इदं वनं गतः भवान् कः? ॥ ३ ॥

(सं.चं.) को भवान्? नन्दितुं विहर्तुम् । कुतः क्षुद्रं वनमिदं गतः? क्षुद्रं निकृष्टम् ॥ ३ ॥

जटाचीराक्षमालानां[१] त्वत्सङ्गममहोत्सवे ।
मौलिकौशेयवलयैः कुत्र यातं समत्सरैः ॥ ४ ॥

(भा.दी.) जटेति । जटाश्च, चीरं वृक्षत्वक् तच्च, अक्षमाल्यं जपमाला तच्च, तेषां त्वया सह यः सङ्गमः स एव महान् य उत्सवः, तस्मिन् समत्सरैः मत्सरेण सहितानीव तैः, मौलिः किरीटं स च, कौशेयं पीताम्बरं तच्च, वलयं करभूषणं तच्च, तैः कुत्र यातं गतम्? किरीटादिधारणयोग्यस्य तव जटादिधारणं किन्निमित्तमभूदिति भावः ॥ ४ ॥

(सं.चं.) मौलिं मकुटं जटाऽऽचक्राम । कौशेयं पीताम्बरं चीरं वल्कलमाचक्राम । वलयं कटकमक्षमाला । तत्कुतः? ॥ ४ ॥

बाणपूर्णे इमे तूणी पाणिः कोदण्डमण्डितः ।
अहो परिघबाहो त्वां[२] शंसन्ति खलखण्डनम् ॥ ५ ॥

(भा.दी.) बाण इति । परिघवद् बाहू यस्य स तत्सम्बुद्धिः, श्रीराम, ते तव बाणपूर्णे इमे तूणी, कोदण्डमण्डितः पाणिः, इत्येते खलानां खण्डनं नाशः, तत् शंसन्ति निरूपयन्ति । शंसु स्तुतौ लट् । अहो आश्चर्यम् ॥ ५ ॥

(सं.चं.) तूणी च पाणिश्च शंसन्ति । परिघो दण्डाकार आयुधविशेषः । परिघाविव बाहू अस्य । अहो परिघबाहुताऽपि त्वां खलखण्डनं शंसति । खलान् खण्डयतीति खलखण्डनः ॥ ५ ॥

१. **'–माल्यानाम्'** इति वि.ती.पाठः । २. **'–बाहो ते शंसन्ति'** इति वि.ती.पाठः ।

एषा खड्गलता श्यामा चण्डिकेवातिचण्डिका ।
केषां प्राणानहार्षीत् ते केषां प्राणान् हरिष्यति ॥ ६ ॥

(भा.दी.) एषेति । चण्डिकेव भद्रकाळीव, अतिचण्डिका अतिक्रूरा, श्यामा ते तव एषा खड्गलता, केषां शत्रूणां प्राणान् अहार्षीत्, अपहृतवती? हृञ् हरणे लुङ् । केषां प्राणानुत्तरत्र हरिष्यति वा? ॥ ६ ॥

(सं.चं.) लतावल्लसन् खड्गः । श्यामा कृष्णवर्णा, खड्गलता च चण्डिका च । अतिचण्डिकाऽतिकोपना, निर्दया शत्रुमारणकर्मणि ॥ ६ ॥

अन्वेष्टुमिव सन्त्यक्तं कृतकृत्यो भवन्[१] कुतः ।
अम्बुजाभे प्रतिस्तम्बं व्यापारयसि लोचने ॥ ७ ॥

(भा.दी.) अन्विति । कृतं कृत्यं कार्यं येन स तथा भवन्, सन्त्यक्तं परित्यक्तं वस्तु, तत् अन्वेष्टुमिव मार्गयितुमिव, अम्बुजवदाभा कान्तिर्ययोस्ते तथोक्ते लोचने, स्तम्बं स्तम्बं प्रति प्रतिस्तम्बम्, प्रतिगुल्म-मित्यर्थः , कुतः कारणात् व्यापारयसि व्यापारयुक्ते करोषि? निरीक्षस इत्यर्थः । व्याङ्पूर्वकात् पार तीर समाप्ता-वित्यस्माल्लट् ॥ ७ ॥

(सं.चं.) सन्त्यक्तं समुज्झितम्, नतु नष्टम्, किमप्यन्वेष्टुमिव । कृतकृत्यो भवन् सन्नप्यकृतकृत्यइव । प्रतिस्तम्बं प्रतिगुल्मम् ॥ ७ ॥

अनुगन्ताऽनुरूपात्मा कोऽयं ते पुरुषर्षभ[२] ।
चतुरङ्गं बलं[३] त्यक्त्वा परिवारं यमग्रहीः[४] ॥ ८ ॥

(भा.दी.) अन्विति । हे पुरुषर्षभ, पुरुषेषु श्रेष्ठ श्रीराम, ते तव अनुगन्ता पृष्ठत आगन्ता, अनुरूप आत्मा स्वरूपं यस्य स तथा, अयं पुरुषः कः? चत्वारि अङ्गानि यस्य तत्तथोक्तम्, तद् बलं सैन्यम्, तत् त्यक्त्वा यं लक्ष्मणं परिवारं भृत्यजनं अग्रहीः परिगृहीतवानसि । ग्रह उपादाने लुङ् ॥ ८ ॥

(सं.चं.) समग्रं चतुरङ्गं बलं त्यक्त्वा तत्स्थाने यमेकं परिवारमग्रहीः ॥ ८ ॥

---

१. **'भवान् कुतः'** इति पाठे–**'व्यापारयति लोचने'** इत्युत्तरार्धपाठः । २. **'पुरुषर्षभः'**
३. **'चतुरङ्गबलं'** ४. **'परिवारत्वमग्रहीत्'**

इदानीमन्यलोकेभ्यो मन्ये धन्यामिमां धराम् ।
पदपद्मभराक्रान्तां[1] युवयोः पद्मलोचन ॥ ९ ॥

(भा.दी.) इदानीमिति । पद्मवल्लोचने यस्य तत्सम्बुद्धिः, श्रीराम, युवयोः पदान्येव पद्मानि तैः समाक्रान्तां अङ्किताम्, इमां धराम्, इदानीं अन्ये ये लोकाः स्वर्गादयः, तेभ्यः धन्यां मन्ये । मन ज्ञाने लट् । प्रकटतया त्वत्पादसङ्गस्येदानीमन्यलोकेष्वभावादिति भावः ॥ ९ ॥

(सं.चं.) साक्षात् पदपद्मभराक्रान्ताम् । भरो गरिमा ॥ ९ ॥

नरलोकानुरागेण नरनारायणावुभौ ।
अवतीर्य्य [2]महीपृष्ठे चरतः[3] प्रतिभाति मे ॥ १० ॥

(भा.दी.) नरेति । उभौ नरनारायणौ, नराणां यो लोकः, तस्मिन् योऽनुरागः अनुग्रहलक्षणस्तेन, नरलोकस्थभक्तजनानुग्रहेच्छयेत्यर्थः, मह्या यत्पृष्ठं तळं तस्मिन्, अवतीर्य चरतः सञ्चारं कुरुतः । चर गतिभक्षणयोर्लट् । इति मे प्रतिभाति प्रकाशते । भा दीप्तौ लट् ॥ १० ॥

(सं.चं.) नरनारायणौ चरत इति प्रतिभाति मे ॥ १० ॥

वालिनो वानरेन्द्रस्य भ्राता भ्रातृव्यतां गतः ।
सुग्रीवो नाम तस्याहं सुसखा वायुनन्दनः ॥ ११ ॥

(भा.दी.) स्वात्मानं विज्ञापयति– **वालिन** इति । वानरेन्द्रस्य वालिनः भ्राता, भ्रातृव्यतां वालिनः शत्रुतां गतः, यः सुग्रीवो नाम सुग्रीव इति प्रसिद्धो वानरः, अहं तस्य सुग्रीवस्य सुसखा । 'न पूजनात्' (अ.सू.५.४.६९) इति टजभावः । वायुनन्दनः अस्मि ॥ ११ ॥

(सं.चं.) वस्तुतः भ्राता । इदानीं भ्रातृव्यतां शत्रुतां गतः । सुसखा गुरुवत् पूजनीयः सखा । 'पूजायां स्वतिग्रहणं कर्तव्यम्' इति वार्त्तिकम् ॥ ११ ॥

---

१. **'पदपद्मसमाक्रन्ताम्'** इति वि.ती.पाठः । **'पादपद्मभराक्रान्ताम्'** इति क्वचित् । २. **'–र्यावनीपृष्ठे'**
३. **'चरथः प्रतिभाति'**

अपूर्वपुरुषं दृष्ट्वा भवन्तं तेन बिभ्यता ।
जिज्ञासुना प्रेषितोऽहं[1] भिक्षुरूप उपागमम्[2] ॥ १२ ॥

(भा.दी.) अपूर्वेति । पूर्वमदृष्टोऽपूर्वः स चासौ पुरुषश्च तं भवन्तं दृष्ट्वा बिभ्यता, अत एव जिज्ञासुना, त्वत्स्वरूपं ज्ञातुमिच्छता तेन सुग्रीवेण प्रेषितः अहम्, भिक्षोः त्रिदण्डिनः रूपं यस्य स तथा सन् त्वत्समीपं उपागमं आगतोऽस्मि ॥ १२ ॥

(सं.चं.) स बिभाय । भीत्वा च भवन्तं जिज्ञासते । अतस्तदर्थमहं भिक्षुरूप उपागमम्, त्वत्समीपमागमम् । भिक्षुरिति तापसः, ब्रह्मचारी वानप्रस्थो वा मानुषः । न यतिः ॥ १२ ॥

श्रुत्वा वाक्यं हनुमतो रामो लक्ष्मणमब्रवीत् ।
अमित्राणाममित्रोऽयं[3] सौमित्रे मित्रमेष नः[4] ॥ १३ ॥

(भा.दी.) श्रुत्वेति । श्रीरामः हनुमतः इति यद्वाक्यं तत् श्रुत्वा, हे सौमित्रे, अयं नः अमित्राणां शत्रूणां अमित्रः शत्रुः । एषः नः मित्रं मित्रभूतः इति लक्ष्मणं अब्रवीत् ॥ १३ ॥

(सं.चं.) 'एतच्छ्रुत्वा वचस्तस्य रामो लक्ष्मणमब्रवीत्' (३.२५) इति च । सीतापहारणाद् रावणोऽमित्रः, तेन सख्यप्रतिज्ञानाद् वाली च । योऽमित्राणाममित्रः स मित्रमिति राजनीतिः । तेनायं मित्रमेव नः ॥१३॥

व्यक्तं व्याकरणं कृत्स्नमनेन बहुधा मतम् ।
बहु व्याहरताऽनेन न किञ्चिदपशब्दितम् ॥ १४ ॥

(भा.दी.) व्यक्तमिति । अनेन वायुपुत्रेण, कृत्स्नं व्याकरणं व्याकरणशास्त्रम्, व्यक्तं स्पष्टं यथा भवति तथा, बहुधा मतं ज्ञातम्, यतः बहु यथा भवति तथा व्याहरता, बहूनि वाक्यानि व्यवहरता, अनेन किञ्चिदपि पदं नापशब्दितम् अपशब्दतया न व्यवहृतम् ॥ १४ ॥

(सं.चं.) बहु वचो व्याहरता । अपशब्दः प्रयुज्यते अपशब्द्यते । नापशब्दितम् । नापशब्दः प्रयुक्त इत्यर्थः । इयमत्र वैयाकरणानां प्रक्रिया–'शब्द उपसर्गादाविष्कारे भाषणे च । अपशब्दयति अपशब्दं

---

१. **'प्रेरितोऽहम्'**

२. **'भिक्षुरूपमुपागमम्'** इति कश्चित् । **'भिक्षुरूपं कर्मन्दिवेषं उपागमं प्राप्तवानस्मि'** इति का.श्री. ।

३. **'–ममित्रो नः सौमित्रे'** । नातिस्वरसः ।

४. **'मित्रमेव नः'** इति मूलपाठः स्यादिति भाति ।

भाषते । कर्मणि अपशब्द्यते । 'अपशब्दितमिति तारकादितच्' इति वदन्तो भ्रान्ताः । 'नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम् । बहु व्याहरताऽनेन न किञ्चिदपशब्दितम्'(३.२९) इति च ॥ १४ ॥

काकुत्स्थेनेति कथिते चित्तवित् तस्य लक्ष्मणः ।
उदाहरदुदारात्मा मधुरं मारुतिं प्रति ॥ १५ ॥

(भा.दी.) काकुत्स्थेनेति । काकुत्स्थेन श्रीरामेण इति वाक्ये कथिते उदिते सति, तस्य श्रीरामस्य चित्तं वेत्तीति चित्तवित्, एतद्वचनस्य प्रतिवचनं दातव्यमित्यभिप्रायज्ञ इत्यर्थः । तत्र हेतुमुदाहरति– उदारेति । उदार उत्कृष्ट आत्मा बुद्धिर्यस्य स तथोक्तः लक्ष्मणः, मधुरं मनोहरं वाक्यम्, क्रियाविशेषणं वा, मारुतस्यापत्यं पुमान् मारुतिस्तं प्रति उदाहरत् । हृञ् हरणे लङ् ॥ १५ ॥

(सं.चं.) मधुरमुदाहरत् व्याजहार । मरुत् मरुतः मारुत इति त्रीणि प्राणनामानि । 'मरुतः स्पर्शनः प्राणः समीरो मारुतो मरुत्' इत्यभिदधति । मरुत एव मारुतः । मरुतस्य मारुतस्य वाऽपत्यं मारुतिः । 'अत इञ्' (अ.सू.४.१.९५) ॥ १५–६ ॥

राज्ञो दशरथस्याङ्ग पुत्रोऽयं पुरुषर्षभः ।
रामो नाम रमाकान्तादन्यो[१] नास्य समो गुणैः ॥ १६ ॥

(भा.दी.) राज्ञ इति । हे अङ्ग प्रिय, अयं पुरुषर्षभः रामो नाम राम इति प्रसिद्धः, राज्ञः दशरथस्य पुत्रः, रमायाः कान्तो भर्ता तस्मात् श्रीहरेः अन्यः पुरुषः, अस्य श्रीरामस्य ये गुणास्तैः समः सदृशो नेति मारुतिं प्रति उदाहरदिति पूर्वेणान्वयः ॥ १६ ॥

किरीटं कीटवत् त्यक्त्वा[२] महाराज्यैकलक्षणम् ।
गुरोर्नियोगं शिरसा वहन् वनमुपाययौ[३] ॥ १७ ॥

(भा.दी.) तर्हि वनं प्रति मुनिवेषेण किमर्थमागत इत्यत आह– **किरीटमि**ति । अयं महद् यद् राज्यं तस्य एकं मुख्यं यल्लक्षणं चिह्नभूतं किरीटं तत् कीटवत् क्षुद्रजन्तुवत् त्यक्त्वा गुरोः पितुर्दशरथस्य यो नियोग आज्ञा तं शिरसा वहन् सन् वनमरण्यं तत् उपाययौ ॥ १७ ॥

---

१. **'रमानाथादन्यो–'** २. **'महाराजैक–'** ३. **'वनमयं ययौ'**

(सं.चं.) महतो राज्यस्य मुख्यं लक्षणम् । अन्ये क्षत्रियाः किरीटं शिरसा वहन्तः श्वयन्ति । अयं तु किरीटं कीटमिव शिरसि गतां यूकामिव त्यक्त्वा पितुर्नियोगमुवाह शिरसा ॥ १७–१९ ॥

राकाचन्द्रं चन्द्रिकेव पतिमेनं पतिव्रता ।
अन्वयासीदनायासा जानकी जगतां पतिम्[१] ॥ १८ ॥

(भा.दी.) राकेति । पतिव्रता, न विद्यते आयासो यस्याः सा तथा, जानकी जगतां पतिम्, (पतिं) एनं श्रीरामम्, राकायाः पूर्णिमायाश्चन्द्रस्तं चन्द्रिकेव ज्योत्स्नेव अन्वयासीत् अनुगताऽभूत् ॥ १८ ॥

अस्य पादरजोदास्यं वरिष्ठं सर्वसम्पदः ।
वाञ्छन्नन्वागतो ज्येष्ठं नामतो लक्ष्मणोऽस्म्यहम् ॥ १९ ॥

(भा.दी.) अस्येति । नाम्ना इति नामतः लक्ष्मणः अहम्, सर्वा या राज्यादिरूपा सम्पत् तस्याः वरिष्ठं श्रेष्ठम्, अस्य श्रीरामस्य पादयोर्यानि रजांसि तेषां दास्यं दासत्वं तत् वाञ्छन् सन्, ज्येष्ठं श्रीरामं अन्वागतोऽस्मि ॥ १९ ॥

दुराचारेण चोरेण चोरिता रक्षसा वने ।
अस्य भार्य्या सती सीता शूद्रेणेव शुभा श्रुतिः ॥ २० ॥

(भा.दी.) सीता क्व गतेत्यत आह– **दुरि**ति । दुष्ट आचारो यस्य स तथोक्तस्तेन, चोरेण रक्षसा रावणेन, वनं दण्डकारण्यं तस्मिन्, अस्य श्रीरामस्य भार्या सती पतिव्रता सीता, शुभा श्रुतिः वेदः शूद्रेणेव चोरिता कापट्येनापहृता ॥ २० ॥

(सं.चं.) वने चाक्षुषमन्वन्तरप्रळयेजले शुचा साधून् द्रावयतीति शूद्रज हयग्रीवासुरेण श्रुतिमानिनीं देवतेव चोरिता ॥ २० ॥

सुग्रीवः किल साहाय्यं सीतां द्रष्टुं करिष्यति ।
प्रतीक्षते प्रभुर्य्युष्मान् सज्जनान् सज्जनप्रियः ॥ २१ ॥

---

१. 'जगतां गतिम्'

(भा.दी.) सुग्रीव इति। सुग्रीवः सीतां द्रष्टुम्, सहायस्य भावः साहाय्यम्, तत् करिष्यति किल। दनुनामक-गन्धर्वोक्तस्य कथनमेतत् । सज्जनाः प्रियाः यस्य स तथोक्तः प्रभुः श्रीरामः सज्जनान् युष्मान् प्रतीक्षते । सर्वसमर्थोऽपि श्रीरामः सज्जनप्रियत्वादेव भवदनुग्रहवशात् स्वकार्यार्थं भवत्साहाय्यं प्रतीक्षत इत्यर्थः ॥२१॥

(सं.चं.) सुग्रीवः साहाय्यं करिष्यतीति दनुकवन्धाच्छ्रुतम् । सज्जनानामयं प्रियः । सज्जनाश्चास्य ॥ २१ ॥

इत्युक्त ऊचे हनुमान् देव [१]दैवोपपादितम् ।
सुग्रीवो वालिसन्त्रस्तस्त्वां राम शरणं गतः ॥ २२ ॥

(भा.दी.) इतीति। इति लक्ष्मणेनोक्तः हनुमान्, हे देव श्रीराम, त्वत्साहाय्यकरणं दैवेन अस्मद्दिष्टेन उपपादितं सम्पादितम् । कुत इत्यत आह–**वाली**ति । वालिना सन्त्रस्तः सुग्रीवः त्वां शरणं गतः, इत्यूचे ॥ २२ ॥

(सं.चं.) अयि देव राम, दैवेन दिष्टेनोपपादितं त्वाम् ॥ २२ ॥

पुरुषोत्तम ते सख्यं सौख्याय कपिरिच्छति ।
स्वामिनस्तव कार्य्यं नः स्वकृत्यं साधयामहे ॥ २३ ॥

(भा.दी.) पुरुषेति । हे पुरुषोत्तम श्रीराम, ते सख्यं सखित्वम्, तत् कपिः सुग्रीवः सुखमेव सौख्यं तस्मै इच्छति । इषु इच्छायां लट् । स्वामिनः तव कार्यं प्रयोजनं तत् नः अस्माकं सम्बन्धि, अतः स्वकृत्यं स्वकार्यं यथा भवति तथा साधयामहे । राध साध संसिद्धौ लट् ॥ २३ ॥

(सं.चं.) तव कार्यं नः स्वकार्यमिति साधयामहे ॥ २३–४ ॥

इत्युक्त्वा मारुती रामं सुस्मितास्यं सलक्ष्मणम् ।
आरोपयामास तदा निजांसयुगलं द्रुतम् ॥ २४ ॥

(भा.दी.) इतीति । मारुतस्य अपत्यं पुमान् मारुतिः हनुमान्, इति उक्त्वा, सुस्मितमास्यं यस्य स तथा, तम्, सलक्ष्मणं श्रीरामम्, निजौ यौ अंसौ स्कन्धौ तयोर्युगळम्, द्रुतं यथा भवति तथा आरोपयामास । रुह बीजजन्मनि प्रादुर्भावे च लिट् । 'रुहः पोऽन्यतरस्याम्' (अ.सू.७.३.४३) इति पः ॥ २४ ॥

---

१. 'देव देवोपपादितम्'

ऋश्यमूकवनोद्देशान्मलयाद्रिं[1] व्रजन् हरिः ।
सरामलक्ष्मणो रेजे ससूर्य्येन्दुरिवाम्बुदः ॥ २५ ॥

(भा.दी.) ऋश्येति । ऋश्यमूकस्य यो वनोद्देशो वनप्रदेशः, तस्मात् मलयनामको यः अद्रिस्तं व्रजन्, सरामलक्ष्मणः हरिः कपिः हनुमान् सूर्यश्च इन्दुश्च ताभ्यां सहितः अम्बुद इव रेजे ॥ २५ ॥

(सं.चं.) ससूर्येन्दुरित्यभूतोपमा ॥ २५ ॥

सूर्य्यवंशध्वजे प्राप्ते सूर्य्यकोटिप्रभे प्रभौ[2] ।
सूर्य्यसूनुरभूत् फुल्लः सूर्य्य आप्त इवाम्बुजम्[3] ॥ २६ ॥

(भा.दी.) सूर्येति । सूर्यस्य यो वंशस्तस्य ध्वज इव ध्वजः, श्रेष्ठ इत्यर्थः, तस्मिन् सूर्याणां या कोटिस्तद्वत्प्रभा यस्य स तथा तस्मिन्, प्रभौ श्रीरामे प्राप्ते सति, सूर्यसूनुः सुग्रीवः, सूर्ये आप्ते सति उदिते सति, अम्बुजमिव फुल्लः विकसितः, सन्तुष्ट इत्यर्थः, अभूत् ॥ २६ ॥

(सं.चं.) सूर्ये आप्ते उदिते अम्बुजं फुल्लति । एवं राम आगते सूर्यसूनुः फुल्लोऽभूत् । विकसितवदनोऽभूत् । 'ञिफला विशरणे' इत्येतस्माद् धातोरुत्तरस्य निष्ठातकारस्य लकारः । आदेरुत्वमिडभावश्च । तेन फुल्ल इति क्तान्तं रूपम् । तथाहि पाणिनिः–'अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः' (अ.सू.८.२.५५) इति । फुल्लधातोस्तु फुल्लितं इति रूपम् । विशरणमत्र विदलनं विकसनजमित्येतत् । सूर्यवंशस्य ध्वज इवोन्नतः, वंशकीर्तिकरः । प्रथमद्वितीयाक्षरप्रासः ॥ २६ ॥

उवाच वाचं हनुमान्[4] सुग्रीवमवलोकयन् ।
तात दाशरथिं रामं सानुजं पश्य नः पतिम् ॥ २७ ॥

(भा.दी.) उवाचेति । हनुमान्, हे तात सुग्रीव, दाशरथिं दशरथपुत्रं सानुजं नः पतिं श्रीरामं पश्य इति सुग्रीवं अवलोकयन् सन् वाचं उवाच ॥ २७ ॥

(सं.चं.) सुग्रीवमवलोकयन्, तमुद्दिश्य उवाच ॥ २७ ॥

---

१. **'–वनोद्देशान्माल्यवन्तं व्रजन्'**
२. **'सूर्यकोटिसमप्रभे'**
३. **'सूर्येऽम्बुजमिवोदिते'**
४. **'उवाच हनुमांस्तत्र सुग्रीव–'**

कोटिजन्मार्ज्जितैः पुण्यैर्दुर्लभं स्वयमागतम् ।
रामस्य दर्शनं[१] नोऽद्य कैवल्यमिव केवलम् ॥ २८ ॥

(भा.दी.) कोटीति । कोटिसङ्ख्याकानि यानि जन्मानि तेषु अर्जितानि, तैः पुण्यैः दुर्लभं श्रीरामस्य दर्शनं नः अस्माकं अद्य केवलं कैवल्यमिव मोक्षइव स्वयं प्रयत्नमन्तरा आगतं सम्प्राप्तम् ॥ २८ ॥

(सं.चं.) कोटिभिर्जन्मभिर्महता प्रयत्नेनार्जितैरपि पुण्यैर्दुर्लभं रामस्य दर्शनं स्वयमप्रयत्नेनाऽगतं लब्धम् । किमिव? केवलं कृत्स्नं निरवधिकम्, निश्चितं वा, कैवल्यममृतत्वमिव । 'केवलं निश्चिते क्लीबं वाच्यवत्त्वेककृत्स्नयोः' इति यादवप्रकाशः ॥ २८ ॥

अनन्यशरणस्त्वं हि शरण्यं शरणं व्रज ।
रामं राजीवनयनमेष शोकाब्धिशोषणः ॥ २९ ॥

(भा.दी.) अनन्येति । न विद्यते अन्यत्, शरणं रक्षको यस्य स तथोक्तस्त्वम्, शरण्यं शरणार्हम्, राजीववन्नयने यस्य स तथा तं श्रीरामं शरणमरणं तत् व्रज । व्रज गतौ लोट् । एषः श्रीरामः, शोक एवाब्धिस्तं शोषयतीति तथोक्तः (हि) ॥ २९ ॥

(सं.चं.) शरण्यं प्रपन्नत्रातारम् । शरणं व्रज त्वदीयोऽहमिति विश्वस्योपगच्छ ॥ २९ ॥

भार्य्यामार्य्यस्य वैदेहीं द्रक्ष्यामो रक्षसा हृताम् ।
तत्र विश्वस्य मां वीर विश्वभर्त्तुः[२] सखा भव ॥ ३० ॥

(भा.दी.) भार्यामिति । हे वीर सुग्रीव, आर्यस्य स्वामिनः श्रीरामस्य भार्यां रक्षसा रावणेन हृतां वैदेहीं सीतां द्रक्ष्यामः । दृशेर्लृट् । तत्र सीतादर्शनविषये मां विश्वस्य विश्वासं प्राप्य विश्वभर्तुः श्रीरामस्य सखा भव । सीतादर्शनादिश्रीरामकार्यसाधकत्वेन मयि तिष्ठति सति त्वं तु त्वत्कार्यमहं साधयामीति श्रीरामं प्रति प्रतिज्ञाय तत्सख्यं सम्पादयेति भावः ॥ ३० ॥

(सं.चं.) अन्विष्य द्रक्ष्यामः । तत्र सीतान्वेषणविषये मां विश्वस्य, सीतान्वेषणभारं मयि विन्यस्य ॥३०॥

मारुतेर्वाक्यमाकर्ण्य राघवस्य[३] पदान्तिके ।
धन्योऽस्म्यनुगृहीतोऽस्मि दासोऽस्मीत्यपतत् कपिः ॥ ३१ ॥

---

१. **'रामसन्दर्शनम्'** २. **'विश्वकर्तुः'** ३. **'माधवस्य'** इति वि.ती. पाठः स्यात् ।

(भा.दी.) मारुतेरिति । कपिः सुग्रीवः मारुतेः वाक्यं वचः, तत् आकर्ण्य माधवस्य तस्य श्रीरामस्य पदयोरन्तिकं समीपं तस्मिन्, अहं धन्यः कृतार्थः अस्मि, त्वया अनुगृहीतः अनुग्रहविषयीकृतः अस्मि, दासः अस्मि, इति वदन्निति शेषः, अपतत् नमश्चकार ॥ ३१ ॥

(सं.चं.) इति वदन् पदान्तिकेऽपतत् प्रणनाम ॥ ३१ ॥

नरेन्द्रो वानरेन्द्रं तमुत्थाप्याकथयन्मिथः[1] ।
त्वत्कार्य्यं मित्र मत्कार्य्यं मत्कार्य्यं तावकं त्विति ॥ ३२ ॥

(भा.दी.) नरेति । नरेन्द्रः श्रीरामः वानरेन्द्रं तं सुग्रीवं उत्थाप्य, हे मित्र सुग्रीव, त्वत्कार्यं तव कार्यं वालिनिग्रहादिकं तत् मत्कार्यं मम कार्यम्, मत्कार्यं सीतान्वेषणादिकं तु तावकं तव सम्बन्धि इति मिथः अकथयत् । कथ वाक्यप्रबन्धे लङ् ॥ ३२ ॥

(सं.चं.) मिथोऽन्योन्यमकथयत् सङ्कथां चकार । मिथो रहसि वा प्रतिजज्ञे । 'मिथोऽन्योन्यरहस्ययोः' इति यादवप्रकाशः ॥ ३२ ॥

ज्वलनं ज्वलयामास[2] हनुमान् सख्यसाक्षिणम् ।
स्खलति क्वचिदापत्सु नहि नीतिमतां मतम्[3] ॥ ३३ ॥

(भा.दी.) ज्वलनमिति । हनुमान् सख्यसाक्षिणं ज्वलनं वह्निं ज्वालयामास । ज्वल दीप्तौ इत्यस्माल्लिट् । अग्निसाक्षिकं सख्यकरणे निमित्तमाह– **स्खलती**ति । नीतिरेषामस्तीति नीतिमन्तः, तेषां पुरुषाणां मतम् अभिमतम्, गृहीतपक्ष इत्यर्थः, आपदो विपदस्तासु, क्वचित्कालेऽपि न स्खलति हि न चलति हि । स्खल चलने लट् । अतः प्रगृहीतस्य सख्यस्य कदाचित् स्खलनं मा भूदिति नीतिमान् हनुमान् सख्यसाक्षित्वेन वह्निं ज्वालयामासेति भावः ॥ ३३ ॥

(सं.चं.) ज्वलनं ज्वलयामास । ज्वलतिर्घटादिषु पठितः । तेन 'घटादयो मितः' इति गणसूत्रेण मित्त्वं प्राप्तम् । 'मितां ह्रस्वः' (अ.सू.६.४.९१) इत्युपधाया णिचि ह्रस्वे सति ज्वलयामासेति रूपम् । अथ

---

१. **'–कथयत् स्मितः'** २. **'ज्वालयामास'** इति वि.ती.पाठः । **'ज्वालयामास हनूमान्'** इति का.श्री.पाठः ।

३. का.श्री.टीकायां रीत्यन्तरेण व्याख्यातम्–**'यद्यपि नीतिमतां नीतियुक्तानां मतं सम्मतम्, अङ्गीकृतमिति यावत्, आपत्सु सङ्कटेषु, प्राप्तासु सतीषु, क्वचित् काले देशे वा न स्खलति न नश्यति । हि प्रसिद्धम् । तथाऽपि हनूमान् सख्यसाक्षिणं सखित्वस्य साक्षाद्द्रष्टारं ज्वलनं वह्निं ज्वालयामास ज्वलनयुक्तमकरोत्'** इति । नातिस्वरसमेतत् । मूलवाक्ययोर्व्यत्यसनात्, अध्याहारसापेक्षत्वाच्च । पुनर्ज्वलने हेत्वनुक्तेश्च ।

पुनः–'ज्वल-ह्वल-ह्मल-पल-नमामनुपसर्गाद् वा' इति गणसूत्रेण विकल्पाम्नानात् ज्वालयामासेति च रूपम्। सोपसर्गस्य तु मित्त्वं नित्यम्। तेन प्रज्वलयामासेत्येव। सख्यसाक्षिणम्। अग्निसाक्षिकं हि विवाहमिव स्नेहमपि निर्वर्तयन्ति। नीतिशास्त्रविदां मतमाशयः न क्वचित् स्खलति प्रमाद्यति। नीतिमनुसृत्यैव प्रवर्तते। अतो नीत्यनुगुणमग्निसाक्षिकं सख्यं साधयामास ॥ ३३ ॥

सुग्रीव मा विलम्बस्व स्वामिन्नवसरोऽधुना।
इत्युक्तौ तौ हनुमता वह्नेरन्तिकमीयतुः ॥ ३४ ॥

(भा.दी.) हे सुग्रीव, मा विलम्बस्व, सख्यकरणे विलम्बं मा कुरु। लबि अवस्रंसने लोट्। हे स्वामिन्, अधुना अवसरः सख्यकरणसमयः प्राप्तः। हनुमता इति उक्तौ तौ रामसुग्रीवौ वह्नेः अन्तिकं समीपं तत् ईयतुः आगच्छताम्। इण् गतौ लिट् ॥ ३४ ॥

(सं.चं.) मा विलम्बस्व वृथा कालहरणं मा कार्षीः। अलसो मा भूः। स्वामिन् राम, अयमवसरः सख्यस्थिरीकरणाय सूक्तः क्षणः ॥ ३४ ॥

हरीन्द्रहस्तं हस्तेन चक्राङ्केन स चक्रभृत्।
गृह्णन् [१]साप्तपदीनार्त्थं वह्निं चक्रे प्रदक्षिणम् ॥ ३५ ॥

(भा.दी.) हरीन्द्रेति। चक्रं बिभर्तीति चक्रभृत् सः श्रीरामः, चक्रस्य अङ्कश्चिह्नं यस्य स तथा तेन हस्तेन, हरीणां कपीनामिन्द्रस्य सुग्रीवस्य यो हस्तस्तं गृह्णन् सन्, साप्तपदीनं सख्यं तदर्थम्, 'सख्यं साप्तपदीनं स्यात्' इत्यमरः, वह्निं प्रदक्षिणं दक्षिणीकृत्य परितः सञ्चरणं तत् चक्रे ॥ ३५ ॥

(सं.चं.) हरीन्द्रस्य कपीन्द्रस्य सुग्रीवस्य। साप्तपदीनार्थं सख्यस्थिरीकरणार्थम्। 'साप्तपदीनं सख्यम्' (अ.सू.५.२.२२) इति पाणिनिः। सप्तभिः पदैरवाप्यत इति साप्तपदीनम्। वह्निं स्वसञ्चरणे प्रदक्षिणं दक्षभागगतं चक्रे। प्रगतो दक्षिणं प्रदक्षिणमित्यव्ययीभावः। तथाहि पाणिनिः–'तिष्ठद्गुप्रभृतीनि च' (अ.सू. २.१.१७) इति। तिष्ठद्गुगणपठितमिदं पदम्। वह्नेर्वामभागगतौ परितः प्रदक्षिणं प्रजग्मतुरित्यर्थः ॥३५॥

सचिवैः संवृतो राजा सम्मतेन हनूमतः।
उपासितं लक्ष्मणेन सुग्रीवो राममब्रवीत्[२] ॥ ३६ ॥

---

१. **'सख्यप्रत्ययार्थम्'** इति, **'सत्यप्रत्ययार्थम्'** इति च क्वचित्।
२. **'सुग्रीवो वाक्यमब्रवीत्'** इति वि.ती.पाठः।

(भा.दी.) सचिवैरिति । सचिवैः भृत्यैः संवृतः सहितः राजा सुग्रीवः, लक्ष्मणेन उपासितं श्रीरामं प्रति, हनूमतः सम्मतमनुमतिस्तेन वाक्यं वचस्तत् अब्रवीत् ॥ ३६ ॥

(सं.चं.) राजा सुग्रीवः । हनूमतः सम्मतेन हनुमदभिप्रायानुगुणम् ॥ ३६ ॥

निवेदितं हनुमता कार्य्यं नन्वार्य्य तावकम् ।
तत्र किञ्चिदभिज्ञानं वक्ष्ये दैवोपपादितम्[1] ॥ ३७ ॥

(भा.दी.) निवेदितमिति । हे आर्य स्वामिन् श्रीराम, तव सम्बन्धि तावकम्, सीतान्वेषणलक्षणं कार्यम्, हनुमता निवेदितं ननु, मां प्रति ज्ञापितमेव । तत्र तत्साधनविषये दैवेनोपपादितं सम्पादितं (किञ्चित्) अभिज्ञानं चिह्नं तत् वक्ष्ये ॥ ३७ ॥

(सं.चं.) दैवेन विधिना, कपीनां भाग्यविशेषेण, भवितव्यतयाऽकस्मादुपपादितं प्रापितम् । अभिज्ञानं चिह्नम् । '**ಗುರುತು**, **ಕುರುಹು**' इति भाषायाम् ॥ ३७ ॥

चतुर्भिः सचिवैः सार्द्धमहं[2] शैलतटे स्थितः ।
अद्राक्षं राक्षसं रूक्षं दशग्रीवं वियद्गतम् ॥ ३८ ॥

(भा.दी.) चतुर्भिरिति । चतुर्भिः सचिवैः हनुमदादिभिः सार्धम्, शैलस्य ऋश्यमूकगिरेः, यत् तटं तस्मिन् स्थितः अहम्, रूक्षं भयङ्करम्, वियत् गगनं गतस्तम्, आकाशमार्गेण गच्छन्तमित्यर्थः, दश ग्रीवा यस्य तथा तं राक्षसं अद्राक्षम् ॥ ३८ ॥

(सं.चं.) चतुर्भिः हनुमता नळेन नीलेन तारेण च । शैलस्य तटे प्रपाते । '**ಕಣಿವೆ**' इति भाषायाम् । शैलप्रान्ते वा । शैलपाद इत्येतत् ॥ ३८ ॥

क्रन्दन्तीं[3] रामरामेति लक्ष्मणेति च सुस्वरम् ।
स्फुरन्तीं रावणोपान्ते प्रापश्यं लोकसुन्दरीम् ॥ ३९ ॥

१. 'दैवोपसादितम्' २. 'साकमहम्'
३. 'क्रन्दतीम्'

(भा.दी.) **क्रन्दन्तीमि**ति । हे राम राम इति, हे लक्ष्मण इति च, सु सम्यक् स्वरो यथा भवति तथा क्रन्दन्तीं रुदन्तीम्, रावणस्य उपान्तं समीपं तस्मिन् स्फुरन्तीं क्रोधेन ज्वलन्तीम्, लोकेषु सुन्दरीं मनोहरां स्त्रियं प्रापश्यम् ॥ ३९ ॥

(सं.चं.) स्फुरन्तीं वेपमानाम् । पातिव्रत्यप्रभया ज्वलन्तीं वा प्रकटं स्फुटमपश्यम् ॥ ३९ ॥

त्वां विना न हि कान्तोऽस्या न ते कान्ताऽस्ति तां विना ।
सम्बन्धस्त्वनुमेयोऽयं चन्द्रिकाचन्द्रयोरिव ॥ ४० ॥

(भा.दी.) सा च सीतैव भवेदित्याह– **त्वामि**ति । त्वां विना तस्याः कान्तः भर्ता नास्ति हि । ते तव तां विना कान्ता भार्या नास्ति । इत्ययं नियतभार्याभर्तृभावलक्षणः सम्बन्धः, चन्द्रिकाचन्द्रयोः सम्बन्ध इव अनुमेयः ऊहनीयः ॥ ४० ॥

(सं.चं.) तदेव स्फुटमाह– त्वां विना । दर्शनमात्रेणानुमेयोऽयं युवयोः सम्बन्धः ॥ ४० ॥

सोत्तरीयाणि[१] रम्याणि निजान्याभरणानि सा[२] ।
राक्षसक्षयबीजानि मध्येऽस्माकममुञ्चत ॥ ४१ ॥

(भा.दी.) **से**ति । सा सीता, राक्षसस्य रावणस्य यः क्षयः तस्मिन् बीजानि कारणानि, रम्याणि उत्तरीयाणि उत्तरीयवस्त्राणि, निजानि आभरणानि च, अस्माकं यन्मध्यं तस्मिन् अमुञ्चत । मुच्लृ मोक्षणे लङ् । इमानि वस्त्राभरणादीन्येते वानराः श्रीरामाय प्रदास्यन्ति । तेन सीता रावणनीतेति विदित्वा रावणं हनिष्यतीत्यभिप्रायेण स्थापितवतीति भावः ॥ ४१ ॥

(सं.चं.) सोत्तरीयाणि उत्तरीये बध्वा पातितानि । राक्षसक्षयबीजानि । आभरणदर्शनेनैव हि राक्षसकुल-संहारबीजावापो बभूव ॥ ४१ ॥

तानि प्रत्यभिजानीहि न्यस्तान्यस्मासु सीतया ।
इत्युक्त्वा स[३] गुहागेहात्[४] तान्यादायाभ्यदर्शयत्[५] ॥ ४२ ॥

---

१. **'सा+उत्तरीयाणि'** इति वि.ती.सम्मतः पदपाठः । अर्थस्तु न स्वरसः । २. **'–भरणानि च'** इति वि.ती.पाठः ।
३. **'इत्युक्त्वाऽसौ'** ४. **'गुहैव गेहं तस्मात्'** इति का.श्री. । ५. **'तान्यादाय व्यदर्शयत्'**

(भा.दी.) **तानी**ति । तानि सीतया (अस्मासु न्यस्तानि) अस्मन्मध्ये स्थापितानि उत्तरीयादीनि प्रत्यभिजानीहि, तानीमानि सीताभरणादीन्यनुसन्धत्स्व । ज्ञा अवबोधने लोट् । इति उक्त्वा सः सुग्रीवः गुहायां विद्यमानं यद्गेहं तस्मात्, तानि आदाय अभ्यदर्शयत् । दृशिर् प्रेक्षणे लङ् ॥ ४२ ॥

(सं.चं.) प्रत्यभिजानीहि स्मृत्वा परिचिनु तानि वा, अन्यानिवेति । 'ಗುರುತು ಹಿಡಿ' इति भाषायाम् ॥ ४२ ॥

आकल्पानुपगूह्याथ[1] सीतायाः सोत्तरीयकान् ।
शोकं सन्दर्शयामास निःशोको जगतां पतिः[2] ॥ ४३ ॥

(भा.दी.) **आकल्पानि**ति । अथ न विद्यते शोको यस्य स निश्शोकः, जगतां पतिः श्रीरामः, उत्तरीयकैः सहितान्, सीतायाः आकल्पान् आभरणानि, उपगूह्य आलिङ्ग्य सीतावियोगनिमित्तको यः शोकस्तं दर्शयामास । जगत्पतित्वेन शोकलेशरहितोऽपि दुःखिवदनुकरणं चकारेत्यर्थः । अज्ञजनमोहनार्थं शोकवानिव विडम्बनं चकारेति ॥ ४३ ॥

(सं.चं.) आकल्पानलङ्कारान् । सोत्तरीयकान् उत्तरीयेण सहितान् । 'अनुकम्पायाम्' (अ.सू.५.३.७६) इति कन् ॥ ४३ ॥

अमन्दानन्दसन्दोहे रामे शोको भवेत् कथम् ।
मन्दाकिनीपयःपूरे ज्वलनः प्रज्वलेत् कथम् ॥ ४४ ॥

(भा.दी.) कुत इत्यत आह– **अमन्दे**ति । अमन्दाः प्रत्येकं पूर्णाः आनन्दाः, तेषां सन्दोहः समूहरूपः, तस्मिन् श्रीरामे शोकः कथं भवेत्? अत्र दृष्टान्तमाह– **मन्दाकिनी**ति । मन्दाकिन्याः गङ्गायाः यानि पयांसि तेषां यः पूरः प्रवाहः, तस्मिन् ज्वलनः कथं प्रज्वलेत्? न कथमपीत्यर्थः । ज्वल दीप्तौ लिङ् ॥ ४४ ॥

(सं.चं.) हिमशीतले मन्दाकिनीपयःपूरे ॥ ४४ ॥

प्लवगेन्द्रः किलोपेन्द्रं सान्त्वयामास सामभिः ।
राक्षसानपनेष्यामस्तामानेष्याम इत्यपि ॥ ४५ ॥

---

१. '–नुपगृह्याथ'

२. 'जगतां गतिः'

(भा.दी.) **प्लवगे**ति । प्लवगानां कपीनामिन्द्रः सुग्रीवः, उपेन्द्रं श्रीरामं प्रति, वयं राक्षसान् रावणादीन्, अपनेष्यामः विनाशयिष्यामः । नीञो लृट् । तां रावणापहृतां सीतामपि आनेष्यामः, इत्येवमादिप्रकारैः सामभिः सान्त्ववचनैः सान्त्वयामास किल । षान्त्व सामप्रयोगे लिट् ॥ ४५ ॥

(सं.चं.) राक्षसान् सीतापहरणहेतुं तदनुगाश्च । तां सीताम् ॥ ४५–६ ॥

देवो विज्ञाय सुग्रीवं स्वभक्तं भक्तवत्सलः ।
दोर्भ्यामाश्लिष्य दीर्घाभ्यामाह स्म हसिताननः ॥ ४६ ॥

(भा.दी.) **देव** इति । भक्तवत्सलः भक्तेषु प्रियः देवः श्रीरामः, सुग्रीवं स्वभक्तं विज्ञाय, दीर्घाभ्यां दोषौ हस्तौ ताभ्यां आश्लिष्य हसितं सञ्जातहासमाननं यस्य स तथा सन् आह स्म अवदत् ॥ ४६ ॥

भक्तिमानसि वत्स त्वं देवैस्तदनुमोदितम्[1] ।
येन सङ्गतिमात्रेण[2] शुश्रूषेयं कृता मम ॥ ४७ ॥

(भा.दी.) **भक्ती**ति । हे वत्स सुग्रीव, त्वं मयि भक्तिमानसि, येन कारणेन, केवलं सङ्गतिः सङ्गतिमात्रं तेन, समागममात्रेणेत्यर्थः, त्वया मम इयं शुश्रूषा शोकसान्त्वनलक्षणसेवा कृता, तेन कारणेन देवैः तत् आवयोः सख्यं अनुमोदितं अनुमतीकृतम् ॥ ४७ ॥

(सं.चं.) वत्सेति । यद्यपि सुग्रीवो वयसाऽधिकः । अथापि स्वस्य जगत्पतित्वं भक्तवत्सलत्वं च द्योतयन् वत्सेत्याह । सङ्गतिमात्रेण । स्नेहसम्बन्धस्याव्यवहितोत्तरक्षणे । शुश्रूषा अभिज्ञानदर्शनरूपा । तेन ज्ञायते देवैस्तदावयोः सख्यमनुमोदितमिति ॥ ४७ ॥

यतस्वाऽयतनेत्राया दर्शने प्लवगोत्तम ।
ब्रूहि कार्य्यं च ते धृष्टं[3] सत्यं तत् साधयामहे ॥ ४८ ॥

---

१. **'देवैस्तेनानुमोदितः'** । **'तेन कारणेन देवैर्ब्रह्मादिभिः अनुमोदितः सन्तोषितः । भक्तिमत्त्वेनाङ्गीकृत इति च'** इति का.श्री. । नातिस्वरसं व्याख्यानम् ।

२. **'सङ्गममात्रेण'**

३. **'कार्यं च मे धृष्टम्'**

(भा.दी.) यतस्वेति । हे प्लवगोत्तम सुग्रीव, आयते नेत्रे यस्याः सा तथा तस्याः, दर्शनं दृष्टिस्तस्मिन् यतस्व यत्नं कुरु । यती प्रयत्ने लोट् । ते यत्कार्यं मया कर्तुमर्हं प्रयोजनं तत् धृष्टं निस्संशयं यथा भवति तथा ब्रूहि । तत् त्वया प्रोक्तं कार्यं वयं साधयामहे, सत्यं यथार्थम् ॥ ४८ ॥

(सं.चं.) धृष्टं धैर्ययुक्तं यथा स्यात् तथा ब्रूहि ॥ ४८–५० ॥

इति ब्रुवाणं तिष्ठन्तं दृष्ट्वा रामं सलक्ष्मणम् ।
हरीन्द्रहनुमन्तौ तौ शाखे चिच्छिदतुस्तरोः ॥ ४९ ॥

(भा.दी.) इतीति । इति ब्रुवाणं सलक्ष्मणं श्रीरामं तिष्ठन्तं दृष्ट्वा तौ हरीन्द्रहनुमन्तौ तरोः शाखे आसनार्थं चिच्छिदतुः । छिदिर् द्वैधीभावे लिट् ॥ ४९ ॥

ते पुष्पपर्णबहुले शाखे ताभ्यां समास्तृते ।
अध्यासामासतुस्तत्र सुस्मितौ[1] राजनन्दनौ ॥ ५० ॥

(भा.दी.) ते इति । पुष्पाणि च पर्णानि च तैः बहुले, ते च्छिन्ने, शाखे ताभ्यां हनुमत्सुग्रीवाभ्यां समास्तृते भूमौ निक्षिप्ते । तत्र शाखयोः, सु शोभनं स्मितं ययोस्तौ तथोक्तौ, राज्ञो दशरथस्य नन्दनौ रामलक्ष्मणौ अध्यासामासतुः । आस उपवेशने लिट् ॥ ५० ॥

(सं.चं.) ते शाखे अध्यासामासतुः । 'अधि शीङ्स्थासां कर्म' (अ.सू.१.४.४६) इति द्वितीया । 'अध्यासामासतुस्तौ च' इति सम्भावितः प्राचीनपाठः । 'तत्र' इति पाठे, तत्र हरीन्द्रहनुमद्भ्यां प्रदर्शिते आतिथ्यविषये, वन्यामपूर्वामिमामासनव्यवस्थां च दृष्ट्वा सुस्मितौ ॥ ५० ॥

रेजाते रघुकुलकेतनौ गिरीन्द्रे सञ्जाते हनुमदिनात्मजानुषङ्गे ।
धाम्नि स्वे विसरति रामलक्ष्मणौ तावर्केन्दू गुरुबुधसंयुतौ[2] यथा खे ॥ ५१ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
किष्किन्धाकाण्डे द्वितीयः सर्ग्गः ॥

---

१. '–स्तत्र सस्मितौ'

२. '–र्केन्दू बुधगुरुसंयुतौ' इति वि.ती.पाठः ।

(भा.दी.) रेजाते इति । रघोः कुलं गोत्रं तस्मिन् केतनौ प्रधानावित्यर्थः, तौ रामलक्ष्मणौ, हनुमांश्च इनस्य सूर्यस्यात्मजः सुग्रीवः स च तयोर्योऽनुषङ्गोऽनुकूलः समागमस्तस्मिन्, सञ्जाते सम्यक् सम्भूते सति, स्वे स्वकीये धाम्नि तेजसि सामर्थ्ये वा, विसरति सति, मारीचविराधादिनिग्रहेण प्रख्यातिं गतवति सति, बुधश्च गुरुश्च ताभ्यां संयुतौ अन्वितौ, अर्कश्च इन्दुश्च तौ, खं गगनं तस्मिन् यथा तथा, गिरीन्द्रो मलयाद्रिस्तस्मिन् रेजाते । राजृ दीप्तौ लिट् ॥ ५१ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां किष्किन्धाकाण्डे द्वितीयः सर्गः ॥

(सं.चं.) प्रहर्षिण्योपसंहरति– रेजाते । गिरीन्द्रे मलयाचले रेजाते रघुकुलकेतनौ रामलक्ष्मणौ । केतनौ निकेतनौ, आश्रयौ । हनुमदिनात्मजयोः अनुषङ्गे परिचये सञ्जाते सति । स्वे धाम्नि तेजसि विसरति सति । अर्केन्दूइव रामलक्ष्मणौ । गुरुबुधाविव हनुमदिनात्मजौ । खे आकाशे ते चत्वारो ग्रहा यथा तथेमे चत्वारो माल्यवद्गिरीन्द्रे । अभूतोपमा । अपूर्वोऽयं समागमश्चतुर्ग्रहयोगसदृश इत्यर्थः । मनजरगैः प्रहर्षिणी ॥ ५१ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां किष्किन्धाकाण्डे द्वितीयसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– १४५१+५१=१५०२]

तृतीयः सर्ग्गः

सहाऽसीनो हनुमता हरी राघवसन्निधौ ।
[1]प्राञ्जलिर्निष्पतद्बाष्पः करुणं वाक्यमब्रवीत् ॥ १ ॥

(भा.दी.) श्रीरामं प्रति सुग्रीवः स्वकार्यं विज्ञापयति– **सहेति** । राघवस्य सन्निधिस्तस्मिन् हनुमता सहाऽसीनः हरिर्वानरः सुग्रीवः, प्रकृष्ट अञ्जलिर्यस्य स तथा सन्, निष्पतन् बाष्पो यस्य स तथा सन्, करुणं कृपास्पदं तत् वाक्यं अब्रवीत् ॥ १ ॥

(सं.चं.) हरिः सुग्रीवः । 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' (अ.सू.६.३.१११) । करुणमब्रवीत् ॥ १–२ ॥

वाली ज्येष्ठो मम भ्राता बलज्येष्ठो जगत्त्रये ।
राज्यं मित्राणि वित्तं च ममापहृतवान् बलात् ॥ २ ॥

(भा.दी.) **वालीति** । जगतां यत्त्रयं तस्मिन् बलेन ज्येष्ठः श्रेष्ठः, मम ज्येष्ठो भ्राता सहोदरः, वाली मम यद् राज्यं तत्, मम मित्राणि च, मम यद् वित्तं तच्च, बलं बलात्कारस्तस्मात् अपहृतवान् ॥ २ ॥

इतोऽपि दुःसहं किञ्चित् कथं वक्ष्ये तवाग्रतः[2] ।
प्रियां मम प्रणयिनीं बलाद् भुङ्क्तेऽपकृष्य सः[3] ॥ ३ ॥

(भा.दी.) **इत** इति । इतः राज्यहरणादपि दुःसहम्, किञ्चित् वालिकृतं कर्म, तव अग्रतः कथं वक्ष्ये । ब्रूञ् व्यक्तायां वाचि लृट् । सः वाली प्रणयिनीं मयि स्नेहशीलाम्, मम प्रियां भार्याम्, बलं बलात्कारस्तस्मात् अपकृष्य भुङ्क्ते । भुज पालनाभ्यव्यवहारयोर्लट् ॥ ३ ॥

(सं.चं.) प्रियां भार्याम् । अपकृष्य मत्तो वियोज्य ॥ ३ ॥

---

१. **'–लिर्निपत–'** २. **'कथं वक्ष्यामि तेऽग्रतः'** ३. **'भुङ्क्ते प्रकृष्य सः'** इति, **'भुङ्क्तेऽपहृत्य'** इति च क्वचित् ।

प्रेषितास्तेन हरयो बहवो निहता मया ।
ममैको हनुमान् बन्धुर्म्मज्जतो[१] नौरिवाम्भसि ॥ ४ ॥

(भा.दी.) प्रेषिता इति । तेन वालिना प्रेषिताः बहवः हरयः कपयः मया निहताः । बलवद्विरोधं सम्पाद्य तवावस्थानं कस्य बलेनेत्यत आह– ममेति । अम्भसि मज्जतः पुरुषस्य नौरिव मम एकः हनुमान् बन्धुः ॥ ४ ॥

(सं.चं.) प्रेषितास्तेन । निहताः नितरां हिंसिताः पीडिता गताः । 'यत्नवांश्च सुदुष्टात्मा मद्विनाशाय राघव । बहवस्तत्प्रयुक्ताश्च वानरा निहता मया' (८.३४) इति च । एतेन 'मया प्रेषिता हरयस्तेन निहताः' इति विपरीतं व्याख्यान्तो निरस्ताः ॥ ४ ॥

शरण्यानन्यशरणं दीनं दासमवाऽशु माम् ।
त्राता किल त्रिलोक्यास्त्वमवतीर्ण्णोऽवनीतळे[२] ॥ ५ ॥

(भा.दी.) शरण्येति । हे शरण्य शरणार्ह श्रीराम, न विद्यतेऽन्यत् शरणं रक्षको यस्य स तथोक्तस्तम्, दीनं दुःखिनं दुःखशीलम्, दासं मां अव रक्ष । अव रक्षणे लोट् । अवन्या यत् तळं तस्मिन् अवतीर्णः त्वं आशु त्रिलोक्याः त्राता किल । त्रैङ् पालने लुट्[३] ॥ ५ ॥

(सं.चं.) दासं मामव, आशु विलम्बमकृत्वा । त्वं किल त्रिलोक्यास्त्राता त्रायकः । त्रातुमेव चावतीर्णः ॥५॥

अद्रयः कन्दुकायन्ते सिन्धवस्तस्य चान्धवः ।
देवासुरास्तृणायन्ते वालिनो बलमीदृशम् ॥ ६ ॥

(भा.दी.) तद्बलमाह– **अद्रय** इति । तस्य वालिनः अद्रयः कन्दुकायन्ते कन्दुकवदाचरन्ति । सिन्धवः समुद्राः अन्धवः पल्वलायिताः । देवासुरास्तृणायन्ते तृणवदाचरन्ति । वालिनः बलं ईदृशम् ॥ ६ ॥

(सं.चं.) कन्दुका इवाऽचरन्ति कन्दुकायन्ते । तृणानीवाऽचरन्ति तृणायन्ते । आचारार्थे क्यङ् । सिन्धवः सागरा अन्धवः कूपाइव । 'अन्धुरन्धः प्रहिः कूपः' इति यादवप्रकाशः । सिन्धवोऽप्यन्धवन्ति ॥ ६ ॥

---

१. '**बन्धुर्मज्जताम्**' २. '**–तीर्णो भुवस्तळे**'

३. त्राता रक्षक इति सुबन्तं पदमिति युक्तम् । अन्यथा त्रिलोकीं त्रातेति स्यात् । त्रायतेः सकर्मकत्वात् ।

अल्पमागो मया चीर्णं चित्तपूर्वं[१] न चैव तत् ।
चण्डो दण्डः कृतस्तेन साक्षी तत्रैष[२] मारुतिः ॥ ७ ॥

(भा.दी.) ज्येष्ठेन सह विरोधे किं कारणमित्यत आह– **अल्पमि**ति । मया अल्पं आगः अपराधः चीर्णं आचरितम्, तच्च आचरणं चित्तपूर्वं मनःपूर्वं यथा भवति तथा नैव । तेन वालिना दण्डः अपराधाननुसारित्वेन चण्डः क्रूरः सर्वस्वापहारलक्षणः कृतः । अत्र अल्पापराधस्य चण्डो दण्डः अकारीत्यत्र मारुतिर्हनुमान् साक्षी ॥ ७ ॥

(सं.चं.) अल्पं नगण्यम् । आगोऽपराधः । तदपि न चित्तपूर्वम्, न बुद्धिपूर्वम् । दण्डः शिक्षा तु चण्डः उग्रोऽनल्पः ॥ ७ ॥

ताते नावृक्षशिरसि[३] राज्ञि लोकान्तरं गते ।
वाली वानरराजोऽभूद्यौवराज्ये च मां व्यधात् ॥ ८ ॥

(भा.दी.) एतदेव सोपोद्धातमाह– **तात** इति । नौ आवयोः ताते पितरि ऋक्षशिरसि ऋक्षशिरोनामके[४] राज्ञि अन्यः लोकः लोकान्तरं तत् गते सति, मृते सतीत्यर्थः, वाली वानरराजः अभूत् । मां युवा चासौ राजा च युवराजस्तस्य भावस्तत्वं तस्मिंश्च, युवराजत्व इत्यर्थः, व्यधात् अकरोत् । धाञो लुङ् । वालिसुग्रीवयोः ऋक्षरजसः पुत्रत्वं चेत्थम्– ब्रह्मणो योगमभ्यस्यतोऽश्रुकणादृक्षरजा नाम वानरो जातः । स कदाचित् पर्यटन् ब्रह्मलोकेऽप्सरसो रूपकारिणि कस्मिंश्चित् सरसि दैवयोगान्निमज्ज्याप्सरोरूपमभजत । तामप्सरसं दृष्ट्वा काममोहिताविन्द्रादित्यौ हस्तयोर्युगपदगृह्णीताम् । तत्रान्तरे इन्द्रस्य स्खलितं रेतः तस्याः शिरसि वालेष्वपतत् । ततो वाल्यभवत् । इन्द्रः काञ्चनीं जरामरणापहारिणीं मालां च दत्तवान् । सूर्यस्य रेतः ग्रीवायामपतत् । ततः सुग्रीवोऽभवत् । सूर्यस्तु हनुमन्तं सुग्रीवाय मित्रत्वेन दत्तवान् । एवमुत्पन्नाभ्यां कुमाराभ्यां सहितं दृष्ट्वा प्रहस्य ब्रह्माऽप्सरोरूपधारिणमृक्षरजसं यथारूपप्राप्तये कुमाराविमौ गृहीत्वाऽन्यस्मिन् वानररूपकारिणि सरसि निमज्जेत्यवदत् । सोऽपि तथा कृत्वा कुमाराभ्यां सह वानरत्वमभजत् । पश्चाद् विश्वकर्मनिर्मितायां

१. **'वित्तिपूर्वम्'** २. **'साक्षी त्वत्रैष मारुतिः'** इति वि.ती.पाठः स्यात् । **'साक्षी तत्रैव'** इति च क्वचित् ।

३. **'नावृक्षशिरसि'** इति सार्वत्रिकः पाठः । ऋक्षरजा इति रामायणे पठ्यते । वि.ती. टीकायामपि पूर्वमृक्षशरसि इति प्रतीकमादाय पश्चात् कथानिरूपणे ऋक्षरजा इत्येव नामासकृदुदितम् । तेन तदप्यनिर्णायकम् ।

४. **'ऋक्षरजसि ऋक्षरजोनामके'** इत्येव पाठः स्यात् ।

किष्किन्धायां देवदूतं प्रेषयित्वा ऋक्षरजसं सर्ववानरराजत्वेनाभ्यषेचयत् । सदामधुफलं मधुवनं च दत्तवानिति ग्रन्थान्तरे प्रसिद्धम् । एवं तयोर्माता पिता स एव ऋक्षरजास्तस्मात् भ्रातराविति तातेति चाभिहितम् ।।८।।

(सं.चं.) नौ आवयोस्ताते पितरि । ऋक्षशिरसीति प्रचुरं पठन्ति । सम्प्रति रामायणे ऋक्षरजा इति तन्नाम पठ्यते, नर्क्षशिरा इति । प्राय ऋक्षशिरा इत्येव ग्रन्थकृत्सम्मतो रामायणपाठः ।। ८ ।।

मायावी नाम बलवान् दुन्दुभेः पूर्वजोऽसुरः ।
स्त्रीनिमित्तेन[1] वैरेण किष्किन्धां निश्युपागमत् ।। ९ ।।

(भा.दी.) मायावीति । मायावी नाम मायावीति प्रसिद्धः, बलमस्यास्तीति बलवान्, दुन्दुभेः दुन्दुभिनामकासुरस्य पूर्वजः ज्येष्ठः असुरः, स्त्री निमित्तं कारणं यस्य स तथा तेन वैरेण, किष्किन्धां प्रति किष्किन्धाख्यवालिगुहां प्रति निट् निशा तस्यां उपागमत् ।। ९ ।।

(सं.चं.) मायावी दुन्दुभेरग्रजः मयसुतः । मण्डोदरीभ्राता । 'मायावी प्रथमस्तात दुन्दुभिस्तदनन्तरः' (उ.कां.१२.१३) इति मयवचनमुत्तरत्र । स्त्रीनिमित्तेन वैरेणेति । 'तेन तस्य महद् वैरं स्त्रीकृतं विश्रुतं पुरा' (कि.कां.९.४) इति च । एतेन वालिनः स्त्रीलोलत्वं स्फुटम् । न केवलं रुमा । अन्या अपि अनिच्छन्त्योऽपि तेन बलाद् भुक्ता आसुः । तत्रैका मायाविप्रजयिनी । तयोर्द्वेषः सञ्जात इति । तदिदं तस्य स्त्रीलौल्यं च रामेण तन्निग्रहणे कारणं बभूवेति ।। ९ ।।

गुहाद्वारि महाबाहुर्म्मम[2] भ्रातरमाह्वयत् ।
वाली निवारितोऽस्माभिर्निष्पपात गुहागृहात् ।। १० ।।

(भा.दी.) गुहेति । महान्तौ बाहू यस्य स तथोक्तः असुरः, गुहायाः द्वाः द्वारं तस्याम्, मम भ्रातरं वालिनं आह्वयत् । ह्वेञ् स्पर्धायां शब्दे च लङ् । तदा अस्माभिः मत्प्रभृतिभिः निशायां युद्धार्थं न गन्तव्यमिति निवारितः वाली गुहायां विद्यमानं यद्गृहं तस्मात् निष्पपात ।। १० ।।

(सं.चं.) आह्वयदिति । 'स्पर्धायामाङः' (अ.सू.१.३.३१) इत्यात्मनेभाषत्वं नाऽश्रितम् । वालिनो दर्शनमात्रेण भीत्वा प्रद्रुतस्य का स्पर्धेति सूचयितुमिव । रात्रौ मा भूद् युद्धमिति निवारितोऽपि ।। १० ।।

---

१. **'स्त्रीनिमित्तेनेत्यनेन वालिना मायाविस्त्रीभोगे कृते तन्निमित्तेन वैरेण मायाव्यागमदिति भाति'** इति का.श्री. ।

२. **'महाबाहुं मम'**

अन्वगां प्रणयादेनं द्रावयन्तं महासुरम् ।
मायावी च पराद्रुत्य [१]पाताळतळमाविशत् ॥ ११ ॥

(भा.दी.) अन्वगाम्इति । अहं महासुरं द्रावयन्तम्, एनं वालिनं प्रणयः स्नेहस्तस्मात् अन्वगाम् । इण् गतौ लुङ् । माया अस्यास्तीति तथोक्तः दैत्यः पराद्रुत्य पाताळस्य तळं प्रदेशस्तत् आविशत् ॥ ११ ॥

(सं.चं.) मां च वालिनं च दृष्ट्वा भीत्या पराद्रुत्य पलाय्य । 'असुरो जातसन्त्रासः प्रदुद्राव ततो भृशम्' (९.९) इति च ॥ ११–२ ॥

गुहाद्वारि प्रतीक्षस्व यावदागमनं मम ।
मामित्युक्त्वाऽविशद् वीरस्तरसा स रसातळम् ॥ १२ ॥

(भा.दी.) गुहेति । वीरः प्रारब्धकार्यपर्यवसायी सः वाली, मम यावत्पर्यन्तं आगमनं भविष्यति तावत्पर्यन्तं गुहायाः द्वाः द्वारं तस्यां प्रतीक्षस्व प्रतीक्ष्य सन्तिष्ठस्व । ईक्ष दर्शनाङ्कनयोर्लोट् । इति मां उक्त्वा तरसा वेगेन रसातळं पाताळं तत् आविशत् ॥ १२ ॥

संवत्सरमहं ज्येष्ठं प्रतीक्ष्य बिलसम्मुखे ।
सफेनं रुधिरापूरं दृष्ट्वाऽश्रौषं महास्वनम् ॥ १३ ॥

(भा.दी.) सम्इति । अहं संवत्सरः संवत्सरकालः, तम्, ज्येष्ठं वालिनं प्रतीक्ष्य बिलस्य सम्मुखं तस्मिन्, सफेनं रुधिराणामापूरः प्रवाहस्तं दृष्ट्वा महान् यः स्वनस्तं अश्रौषम् । श्रु श्रवणे लुङ् ॥ १३ ॥

(सं.चं.) रुधिरस्याऽपूरम् । बिलस्य सम्मुखे पुरतः, बिलद्वारि । महास्वनमसुराणाम् । 'नर्दतामसुराणां च ध्वनिर्मे श्रोत्रमागतः' (९.१८) इति च ॥ १३ ॥

अथ चामङ्गलाशङ्की शोकशङ्कुविदारितः ।
किञ्चिद् विलप्य शैलेन गुहाद्वारं प्यधामहम् ॥ १४ ॥

(भा.दी.) अथेति । अथ अमङ्गलं मरणलक्षणमशुभमाशङ्कितुं शीलं यस्य स तथा अहं शोक एव शङ्कुः कीलं तेन विदारितः सन् । 'शङ्कुः पत्रसिराजाले कीलेऽस्त्रे मेढ्रसङ्ख्ययोः' इति वैजयन्ती । किञ्चित् विलप्य,

---

१. **'पातालतलं पाताललोकादुपरि विद्यमानं रसातलमविशत्'** इति का.श्री. ।

शैलः पर्वतस्तेन गुहाया यद् द्वारं तत् पुनर्यथा दैत्यो नाऽयास्यति तथा प्यधां पिहितं कृतवानस्मि । धाञो लुङ् ॥ १४ ॥

(सं.चं.) अमङ्गलं भ्रातुर्मरणरूपम् । शोकाख्येन शङ्कुना विदारणास्त्रेण । प्यधाम्, अपेरल्लोपः, अपिहितमकार्षम्, यथा न मायावी पुनरागच्छेत् ॥ १४–५ ॥

अनिच्छन्तं च साम्राज्यं भ्रातृशोकेन मन्त्रिणः ।
यावदत्राभ्यषिञ्चन् मां तावद् वाली समागमत्[१] ॥ १५ ॥

(भा.दी.) **अनिच्छन्तमि**ति । भ्रातुर्मरणनिमित्तो यः शोकस्तेन साम्राज्यमधिराजत्वं तत् अनिच्छन्तं मां मन्त्रिणः यावत् यदा अत्र साम्राज्ये अभ्यषिञ्चन् । षिच सेचने लङ् । तावत् तदा वाली च दैत्यान् हत्वा समागमत् ॥ १५ ॥

वत्सरं मृगयित्वोग्रं यथैव मृगयुर्म्मृगम् ।
हत्वा मायाविनं प्राप्तो बिलं पिहितमैक्षत ॥ १६ ॥

(भा.दी.) **वत्सरमि**ति । उग्रं मायाविनं मायाविनामकं असुरम्, वत्सरो वत्सरकालस्तम्, वत्सरकाल इत्यर्थः, मृगयित्वा अन्वेषणं कृत्वा, मृगयुः लुब्धकः मृगं यथा तथा हत्वैव प्राप्तः वाली बिलं पिहितं पर्वताच्छादितं ऐक्षत ॥ १६ ॥

(सं.चं.) तमसि निलीनमसुरं वत्सरकालं मृगयित्वा ॥ १६ ॥

सुग्रीवेत्याह्वयन्नुच्चैरलब्ध्वा च प्रतिस्वरम्[२] ।
बिलात्[३] कृच्छ्रेण निर्गत्य[४] किष्किन्धायामदृश्यत ॥ १७ ॥

(भा.दी.) **सुग्रीवे**ति । सुग्रीव इति उच्चैः आह्वयन् । वाली प्रतिस्वरः प्रतिध्वनिस्तं अलब्ध्वा, बलं बाहुबलं तस्मात् कृच्छ्रं कष्टं तस्मात् बिलात् निर्गत्य किष्किन्धायां अदृश्यत ॥ १७ ॥

(सं.चं.) कृच्छ्रेणातिप्रयासेन बिलमुद्घाट्य ॥ १७–८ ॥

---

१. **'वाली समागतः'** २. **'प्रतिस्वनम्'**
३. **'बलात् कृच्छ्रात् विनिर्गत्य'** इति वि.ती.पाठः स्यात् । ४. **'निर्गम्य'**

क्रुधा[१] जाज्वल्यमानं तं पदेऽहं पतितोऽवदम् ।
रक्ष राज्यं क्षमस्वाऽर्य्य बालिशत्वं ममेत्यलम् ॥ १८ ॥

(भा.दी.) **क्रुधेति** । पदं पादस्तस्मिन् पतितः अहम्, क्रुध् कोपस्तया, अतिशयेन ज्वलतीति जाज्वल्यमानस्तम्, तं वालिनं प्रति, हे आर्य स्वामिन्, राज्यं कपिराज्यं तत् त्वं रक्ष, मम बालिशत्वं बाल्यं तत् क्षमस्व, क्षमूष् सहने लोट् । इति अलं सम्यक् अवदम् ॥ १८ ॥

उक्त्वा बहुविधं वैरात् परुषं पुरुषोत्तम ।
मामेकवाससं दीनं नगरान्निरयापयत्[२] ॥ १९ ॥

(भा.दी.) **उक्त्वेति** । हे पुरुषोत्तम श्रीराम, वैरं विद्वेषस्तस्मात् बहुविधं परुषं क्रूरवाक्यं उक्त्वा, एकं वासो वस्त्रं यस्य स तथा तम्, दीनं माम्, नगरं किष्किन्धापुरं तस्मात् निरयापयत् । यातेर्लङ् ॥ १९ ॥

(सं.चं.) नगरात् किष्किन्धातः ॥ १९ ॥

ऋश्यमूके वसाम्यस्य दुर्गमे कारणान्तरात् ।
सहजं तं [३]निहन्यास्त्वं महामयमिवाहितम् ॥ २० ॥

(भा.दी.) **ऋश्येति** । अन्यत्कारणं कारणान्तरं तस्मात्, वक्ष्यमाणमतङ्गमुनेः शापादित्यर्थः, अस्य वालिनो दुर्गमे गन्तुमशक्ये, ऋश्यमूकनामको यः पर्वतस्तस्मिन् वसामि । मे मम सह जातः सहजस्तम्, सोदरमित्यर्थः, तं वालिनं अहितं महान् य आमयो रोगस्तमिव त्वं निहन्याः संहर । हन्तेर्लिङ् ॥ २० ॥

(सं.चं.) कारणान्तरात् मतङ्गमुनिशापरूपात् । अस्य वालिनः दुर्गमे । महान् शस्त्रचिकित्सां विनाऽनिवर्त्यो य आमयस्तमिव ॥ २० ॥

परिदेवनमित्यस्य देवः श्रुत्वाऽब्रवीद् वचः ।
एकेषुणा हनिष्यामि तव दारापहारिणम् ॥ २१ ॥

(भा.दी.) **परीति** । देवः श्रीरामः इति अस्य सुग्रीवस्य परिदेवनं विलापस्तत् श्रुत्वा, तव दारान् भार्यामपहर्तुं शीलमस्यास्तीति तथा तं वालिनम्, एको य इषुस्तेन हनिष्यामि, इति वचः अब्रवीत् ॥ २१ ॥

---

१. 'क्रोधाज्जाज्वल्य–' २. 'नगरान्निरयातयत्' ३. 'निहन्या मे महा–'

(सं.चं.) एकेषुणा । रामायणे–'अमोघाः सूर्यसङ्काशा ममैते निशिताः शराः । तस्मिन् वालिनि दुर्वृत्ते निष्पतिष्यन्ति वेगिताः' (१०.३२) इति त्वालङ्कारिकं वचः । न तत्र बहुवचने तात्पर्यम् । हनिष्यति चैकेषुणा । अथच 'तस्मिन् वालिनि दुर्वृत्ते तेष्वेको निपतिष्यति' इत्येव प्राचीनो रामायणपाठः स्यात् । व्याख्यातारो हि बहुधाऽपपाठं पठन्ति ॥ २१–२ ॥

इति प्रतिज्ञां रामस्य श्रुत्वा रविसुतोऽब्रवीत् ।
कथमेकेषुणा नाथ वद्ध्यो वाली बलोद्धतः[१] ॥ २२ ॥

(भा.दी.) इतीति । रविसुतः सुग्रीवः श्रीरामस्य इति प्रतिज्ञां श्रुत्वा, हे नाथ, त्वया बलेन उद्धतः क्रूरः वाली, एको य इषुस्तेन कथं वध्यः, इति अब्रवीत् ॥ २२ ॥

यस्य चर्म्मापि[२] नाभिन्दन् महेन्द्राहितहेतयः ।
तमसाधारणं मन्ये प्रतिज्ञाविषयं तव ॥ २३ ॥

(भा.दी.) यस्येति । महेन्द्रस्य पुरन्दरस्य अहिता दैत्याः, तेषां हेतयः आयुधानि, यस्य वालिनः चर्मापि त्वचमपि नाभिन्दन् । भिदेर्लङ् । तव प्रतिज्ञाविषयं तं वालिनम्, असाधारणं असाधारणपुरुषलक्षणम्, अतिबलिष्ठं एकेषुणा हन्तुमशक्यमिति वा मन्ये । मन ज्ञाने लट् ॥ २३ ॥

(सं.चं.) महेन्द्रस्याहिताः शत्रवो दैत्यास्तैः सम्प्रयुक्ता हेतयः ॥ २३ ॥

एवं ब्रुवाणं सुग्रीवमाचचक्षे स लक्ष्मणः ।
सखे कथं ते विश्वासो वालिनः सूदने भवेत् ॥ २४ ॥

(भा.दी.) एवमिति । सलक्ष्मणः श्रीरामः[३] एवं ब्रुवाणं सुग्रीवं प्रति, हे सखे, वालिनः सूदनं विनाशस्तस्मिन् ते विश्वासः कथं केन प्रकारेण भवेत्, इति आचचक्षे ॥ २४ ॥

(सं.चं.) सः लक्ष्मणः आचचक्षे । 'तथा ब्रुवाणं सुग्रीवं प्रहसन् लक्ष्मणोऽब्रवीत् । कस्मिन् कर्मणि निर्वृत्ते श्रद्दध्या वालिनो वधम्' (११.६९) इति च ॥ २४ ॥

---

१. **'बलोल्बणः'** २. **'अस्य चर्मापि'** । **'यस्य वर्मापि'** इति च ।

३. 'का.श्री. टीकायामपि–**'सलक्ष्मणः रामः'** इत्येव । रामायणाननुगुणमेतत् ।

इत्युक्त ऊचे सुग्रीवो देवेदमवधारय ।
इन्द्रारिर्दुन्दुभिर्नाम दृप्तोऽब्धिं योद्धुमभ्ययात् ॥ २५ ॥

(भा.दी.) **इती**ति । इति उक्तः सुग्रीवः ऊचे, हे देव श्रीराम, इदं वक्ष्यमाणं वचः अवधारय शृणु । धृञ् धारणे लोट् । इन्द्रारिः दुन्दुभिर्नाम दुन्दुभिरिति प्रसिद्धः दैत्यः, दृप्तः बलोन्मत्तः सन्, अब्धिः समुद्राभिमानी वरुणस्तं योद्धुमभ्ययात् ॥ २५ ॥

(सं.चं.) देवेति राममागूर्य लक्ष्मणमाह ॥ २५–६ ॥

वरुणो मरणाद् भीतः प्रतिवीरं सुरद्विषः ।
हिमवन्तमुवाचाथ हिमवानपि वालिनम् ॥ २६ ॥

(भा.दी.) **वरुण** इति । मरणं मृतिस्तस्मात् भीतः वरुणः, सुरान् द्वेष्टीति सुरद्विट् तस्य दुन्दुभेः, प्रतिवीरं प्रतिभटं हिमवन्तं हिमवत्पर्वतमुवाच। नाहं त्वया योद्धुं शक्तः, किं तर्हि हिमवान् प्रतिभट इत्युवाचेत्यर्थः । अथ हिमवानपि वालिनं प्रतिवीरं उवाच । वरुणवचसा हिमवन्निकटं गत्वा युद्धं देहीत्युक्ते सोऽपि मरणाद् भीतो वालिनं प्रतिभटमाहेत्यर्थः ॥ २६ ॥

समुद्रमद्रिं चाऽक्षिप्य दुन्दुभिर्दुन्दुभिस्वनः ।
किष्किन्धाद्वारमासाद्य योद्धुं वालिनमाह्वयत् ॥ २७ ॥

(भा.दी.) **समुद्रमि**ति । दुन्दुभेः भेर्याः स्वन इव स्वनो ध्वनिर्यस्य स तथोक्तः दुन्दुभिः, समुद्रं अद्रिं च आक्षिप्य तिरस्कृत्य, किष्किन्धाया यद् द्वारं तत् आसाद्य योद्धुं वालिनं आह्वयत् ॥ २७ ॥

(सं.चं.) आह्वयदिति । आह्वआनक्षण एव तस्य स्पर्धाबुद्धिर्गलितेति परस्मैभाषा । भ्रातुर्मायाविनः, आवुत्तस्य रवणस्य च निग्रहेण विदितवीर्यो हि वाली ॥ २७ ॥

महिषाकारमसुरं प्रतिद्रुत्य[१] महाकपिः ।
निजघान घनप्रख्यं मातङ्गमिव केसरी ॥ २८ ॥

१. 'परिद्रुत्य'

(भा.दी.) महिषेति । महाकपिः वाली, महिषस्य आकार इव आकारो यस्य स तथा तम्, घनस्य प्रख्यः समानः तम्, मेघवन्नीलमित्यर्थः, असुरं दुन्दुभिं प्रतिद्रुत्य केसरी मातङ्गमिव गजमिव निजघान । हन्तेर्लिट् ॥ २८ ॥

(सं.चं.) घनप्रख्यं मेघराशिमिव कृष्णवर्णम् । असुरस्य गजस्य च समानमेतत् । मातङ्गो गजः । माद्यतीति मातङ्ग इति वैयाकरणाः । माद्यन् तङ्गति गच्छतीति वा । तगि गतौ । सादृश्यसम्बन्धेन मतङ्गस्य मेघस्यायं मातङ्ग इत्यन्ये । इदमपि निर्वचनं सूचयामासेव मूले–'घनप्रख्यम्' इति विशेषणेन ॥ २८ ॥

वीर उत्तोलयन्[1] देहं तस्य योजनमाक्षिपत् ।
तस्माद् देहादपासर्प्पन्[2] सान्द्रा रुधिरबिन्दवः ॥ २९ ॥

(भा.दी.) वीर इति । तस्य दुन्दुभेर्यो देहस्तं उत्तोलयन् बाहुभ्यामुत्तोलितं कुर्वन् वीरः वाली, योजनं तत्, एकस्मिन् योजन इत्यर्थः, आक्षिपत् प्राक्षिपत् । क्षिप प्रेरणे लङ् । तस्मात् ततः देहात्, सान्द्रा रुधिरबिन्दवः अपासर्पन् निर्जग्मुः । सृप्लृ गतौ लङ् ॥ २९ ॥

(सं.चं.) उत्तोलयन् वेगोत्कर्षार्थमुपर्यधश्च चालयन् । 'तं तोलयित्वा बाहुभ्यां गतसत्वमचेतसम् । चिक्षेप बलवान् वाली वेगेनैकं तु योजनम् । तस्य वेगप्रविद्धस्य वक्त्रात् क्षतजबिन्दवः । प्रपेतुर्मारुतोत्क्षिप्ता मतङ्गस्याऽश्रमं प्रति' (११.४७–८) इति च ॥ २९–३० ॥

ऋश्यमूकाश्रयो दृष्ट्वा स्वाश्रमं[3] रुधिरोक्षितम् ।
अमर्षितो महर्षिस्तं मतङ्गो नाम शप्तवान् ॥ ३० ॥

(भा.दी.) ऋश्येति । ऋश्यमूक आश्रयो यस्य स तथोक्तः, मतङ्गो नाम मतङ्ग इति प्रसिद्धः महर्षिः, स्वस्य यः आश्रमस्तं रुधिरेणोक्षितं सिक्तं दृष्ट्वा अमर्षितः सन् तं वालिनं शप्तवान् ॥ ३० ॥

यदेमं[4] देशमायासि तदा वध्यो भवेरिति ।
वालिनो मुनिशापोऽयं वरोऽभून्मम तद्रिपोः ॥ ३१ ॥

---

१. **'उत्तोलयन् गुरुत्वपरीक्षां कुर्वन्'** इति का.श्री. ।
२. **'देहादुपासर्पन्'**
३. **'स्वपदं रुधि–'**
४. **'यदीमम्'** इति, **'यदैनम्'** इति च क्वचित् ।

(भा.दी.) यदेति । यदा इमं देशम्, ऋश्यमूकपर्वतमित्यर्थः, आयासि आगच्छसि, तदा वध्यः भवेः । इति वालिनः अयं मुनिना मतङ्गेन दत्तः शापः, तस्य वालिनो रिपोर्मम वरः वरसदृश अभूत् ॥ ३१ ॥

(सं.चं.) तद्रिपोर्वालिशत्रोर्मम वरोऽभूत् ॥ ३१ ॥

वालिना कालितस्येश त्रिलोक्यां नास्ति मे पदम् ।
इममाश्रममाश्रित्य स्वामिन् जीवामि दीनधीः ॥ ३२ ॥

(भा.दी.) वालिनेति । हे ईश, वालिना कालितस्य द्रावितस्य मे त्रिलोक्यां पदं स्थानं नास्ति । अतः हे स्वामिन्, दीना खिन्ना धीर्यस्य स तथोक्तः, अहं इमं आश्रमं आश्रित्य जीवामि ॥ ३२ ॥

(सं.चं.) कालितस्य निरस्तस्य । पदं निलयः ॥ ३२–३ ॥

यदि दैतेयदेहं तं दूरं क्षिपसि राघव ।
तर्हि यास्यामि विश्वासमित्युक्त्वा विरराम सः ॥ ३३ ॥

(भा.दी.) यदीति । हे राघव, त्वं यदि तं दैतेयस्य दुन्दुभेर्यो देहस्तम्, दूरं यथा भवति तथा क्षिपसि, वालिवत् तोलयित्वा निक्षिपसि, तर्हि एकेषुणा त्वया हन्तुं शक्य इति यो विश्वासस्तं यास्यामि । सः सुग्रीवः इति उक्त्वा विरराम तूष्णींबभूव । रमु क्रीडायां लिट् ॥ ३३ ॥

पूर्वदेवस्य देहं[1] तं पर्वतोपममीश्वरः ।
[2]अङ्गुष्ठलीलयैवाऽराच्छतयोजनमाक्षिपत् ॥ ३४ ॥

(भा.दी.) पूर्वेति । ईश्वरः सर्वसमर्थः श्रीरामः, पूर्वदेवस्य दैत्यस्य दुन्दुभेः, 'पूर्वदेवाः सुरद्विषः' इत्यमरः, पर्वतस्य उपमा यस्य स तथा तम्, तं वालिनिक्षिप्तं देहम्, अङ्गुष्ठस्य या लीला तयैव आराद् दूरे, 'आराद्दूरसमीपयोः' इत्यमरः, शतानां योजनानां समाहारः शतयोजनं तत् आक्षिपत् ॥ ३४ ॥

(सं.चं.) पूर्वदेवस्य असुरस्य । आराद् दूरे चिक्षेप । कियद्दूरे? शतयोजनमाक्षिपत् । 'राघवो दुन्दुभेः कायं पादाङ्गुष्ठेन लीलया । तोलयित्वा महाबाहुश्चिक्षेप शतयोजनम्' (११.४-५) इति च । अर्वाचीनास्तु रामेऽनुकम्पया वाल्मीकिवचनमेवान्यथा पठन्ति– 'चिक्षेप दशयोजनम्' इति ॥ ३४ ॥

---

१. '–देहस्य तद्देहं पर्व–' इति, 'तं देहम्–' इति च क्वचित् । २. 'अङ्गुलीलयैव'

विदार्य्य भूमिं पाताळे देहोऽचूर्ण्णयदासुरान्[१] ।
गर्वोद्धतान् [२]शर्ववराद् रामस्य बलवेगतः ॥ ३५ ॥

(भा.दी.) **विदार्येति** । सः देहः, श्रीरामस्य बलस्य यो वेगस्तस्मादिति ततः, भूमिं विदार्य, पाताळमधोभुवनं तस्मिन्, शर्वस्य यो वरस्तस्मात्, गर्वेण अवध्या वयमित्यभिमानेन उद्धतान् प्रवृद्धान् असुरान् अचूर्णयत् । चूर्ण सङ्कोचने लङ् ॥ ३५ ॥

(सं.चं.) रामायणानुक्तं प्रमेयविशेषमाह– विदार्य । शर्ववराद् वयमवध्या इति गर्वोद्धतान् स देहोऽचूर्णयत् रामस्य बलवेगतः । देहं निमित्तीकृत्य रामोऽचूर्णयदित्यर्थः । 'सोऽसुरानप्यचूर्णयत्' इत्येव मूलपाठः स्यात् । सुन्दरोऽयं पाठः । असुरसङ्घवचनस्य चाऽसुरशब्दस्य बहुवचनेऽसुरानित्येव रूपम् आसुरः, आसुरौ असुराः– इत्यादि । 'पर्श्वादियौधेयादिभ्यामणञौ' (अ.सू.५.३.११७) इति पाणिनिः । पर्श्वादिगणपठितोऽयमसुरशब्दः । तद्राजसञ्ज्ञोऽयं प्रत्ययः । 'ञ्यादयस्तद्राजाः' (अ.सू.५.३.११९) इति वचनात् । तद्राजसञ्ज्ञस्य च प्रत्ययस्य बहुषु वर्तमानस्यास्त्रीलिङ्गस्य हि लुग् भवति–'तद्राजस्य बहुषु तेनैवास्त्रियाम्' (२.४.६२) इति । 'देहोऽचूर्णयतासुरान्' इति वा पाठः स्यात् । शर्ववरादिति । 'शर्वप्रसादजबलाद् दितिजानवध्यान् (म.भा.ता.नि.६.५) इति निर्णये ॥ ३५ ॥

अत्याशङ्की कपिः प्रोचे पुनश्च पुरुषोत्तमम् ।
स्वत्वाद् देवाथ वक्ष्यामि क्षम्यतां[३] नाथ चापलम् ॥ ३६ ॥

(भा.दी.) **अतीति** । अत्यन्तमाशङ्कितुं शीलमस्यास्तीति तथोक्तः, वालिनः स्वेनानुभूतं महद् बलं स्मृत्वा श्रीरामस्यैतादृशबलं दृष्ट्वाऽपि तद्वधे समर्थः स्याद् वा नवेत्याशङ्कावानित्यर्थः, कपिः सुग्रीवः, पुनश्च पुरुषोत्तमं श्रीरामं प्रति, हे देव, अथ स्वस्य स्वकीयस्य भावः स्वत्वं तस्मात् वक्ष्यामि । हे नाथ, चापलं यच्चित्तचाञ्चल्यं तत् क्षम्यताम् इति प्रोचे ॥ ३६ ॥

(सं.चं.) तव स्वीयत्वात्, मम वा त्वदीयत्वात् ॥ ३६ ॥

---

१. **'सोऽसुरानप्यचूर्णयत्'** इति वि.ती.पाठः स्यादिति भाति । **'देहोऽचूर्णयतासुरान्'** इति क्वचित् । स्यात् तथाऽपि वि.ती.पाठः । का.श्री. पाठोऽपि तथेति भाति ।

२. **'शम्भुवराद्–'**

३. **'क्षम्यतां मम चा-'**

जेतुं चतुर्ग्गुणबलो हन्तुं शतगुणाधिकः ।
वीरो[1] वीरं समर्त्थः स्यान्नान्यत्र नियमो भवेत् ॥ ३७ ॥

(भा.दी.) जेतुमिति । वीरः भटः वीरं प्रतिभटं जेतुम्, चत्वारो गुणा आवृत्तयो यस्य तत् चतुर्गुणम्, तादृशं बलं यस्य स तथा सन् समर्थः स्यात् । वीरः वीरं भटं हन्तुम्, शतं गुणा यस्य तत् तथोक्तम्, तेन बलेन अधिकः सन् समर्थः स्यात् । अन्यत्र चतुर्गुणबलरहिते शतगुणबलरहिते वा पुरुषे, नियमः शत्रुत्वेनाभिमतस्य जयनियमो वा हनननियमो वा न । किन्तु यादृच्छिक एव तत्र विजयादिरिति स्वाभिप्रायं वक्तुं लोके सिद्धन्याय-कीर्तनम् ॥ ३७ ॥

(सं.चं.) जेतुं चतुर्गुणबल इति । 'जेतुं चतुर्गुणबलो हि पुमान् प्रभुः स्याद्धन्तुं शताधिकबलोऽतिबलं सुशक्तः' (६.७) इति च निर्णये । अन्यत्र जयेदेवेति हन्यादेवेति वा नियमो नास्ति ॥ ३७–८ ॥

वालिना योजनं क्षिप्तस्त्वया तु शतयोजनम् ।
कुणपः किन्तु गरिमा प्रागार्द्रस्य विशिष्यते ॥ ३८ ॥

(भा.दी.) वालिनेति । वालिना कुणपः दुन्दुभिशवः योजनमेकयोजनं तत् क्षिप्तः, त्वया तु शतानां योजनानां समाहारः शतयोजनं तत्, पूर्ववद् बहुव्रीहिर्वा । एवं तर्हि वालिबलाच्छतगुणाधिके बले सिद्धे सति किं विज्ञापनीयमस्तीत्यत आह– **किन्त्वि**ति । किन्तु गरिमा भारः, आर्द्रस्य अशुष्कस्य कुणपस्य, प्राक् विशिष्यते अतिरिच्यते । शिष अतिशये[2] लट् ॥ ३८ ॥

कुलिशाच्चातिकठिनाः सप्त साला[3] इहोद्गताः ।
चालयेत् तान् बलाद् वाली च्छेत्तुं[4] पत्राणि न प्रभुः ॥ ३९ ॥

(भा.दी.) कुलिशादिति । कुलिशं वज्रं तस्मादपि अतिकठिनाः सप्त सालाः इह उद्गताः उत्पन्नाः । वाली तान् वृक्षान् बलं बाहुबलं तस्मात् चालयेत् । चल कम्पने लिङ् । पत्राणि च्छेत्तुं प्रभुः समर्थः न ॥३९॥

(सं.चं.) सप्त सालाः । 'इमे च विपुलाः सालाः सप्त शाखावलम्बिनः । यत्रैकं घटते वाली निष्पत्रयितुमोजसा' (११.६७) इति च । निष्पत्रयितुं घटत एव केवलम् । न प्रभवतीत्यर्थमभिप्रेत्याऽह– च्छेत्तुं पत्राणि न

---

१. **'परो वीरम्'**
२. **'शिष्लृ विशेषणे'** इति प्रचलितो धातुपाठः ।
३. **'सप्त तालाः'** इति पठन्ति का.श्री.प्रभृतयः । रामायणाननुगुणमेतत् । म.भा.ता.नि.विरुद्धं च ।
४. **'क्षेप्तुम्'**

प्रभुरिति । 'पत्राणि लोप्तुमपि चोत्सहते न शक्तः' (६.६) इति हि निर्णये । 'सप्त तालाः' इति पठन्तो भ्रान्ताः । रामायणतात्पर्यनिर्णयादिसर्वग्रन्थविरोधात् । सालः= 'ಮತ್ತಿ' इति भाषायम् ॥ ३९ ॥

विष्वश्चस्ते विभिद्यन्ते त्वया यद्येकपत्रिणा ।
शङ्काशङ्कुर्म्मम हृदस्तर्हि साधूद्धृतो भवेत् ॥ ४० ॥

(भा.दी.) विष्वश्च इति । त्वया यदि, एकश्चासौ पत्री च तेन, विष्वश्चः परितः स्थिताः ते वृक्षाः विभिद्यन्ते । भिदिर् विदारणे लट् । तदा तर्हि, शङ्कैव शङ्कुः कीलः, मम हृदः हृदयात् साधु सम्यक् यथा भवति तथा उद्धृतः भवेत् ॥ ४० ॥

(सं.चं.) विष्वश्चः समन्ताद् व्याप्य स्थिताः । एकेन पत्रिणा बाणेन । उद्धृतः उत्पाटितः ॥ ४० ॥

पूष्णः पुत्रे वदत्येवं रामः कार्म्मुकमाददे ।
लक्ष्मणास्येन्दुमालोक्य सायकं चैकमाददे ॥ ४१ ॥

(भा.दी.) पूष्ण इति । पूष्णः सूर्यस्य पुत्रे सुग्रीवे एवं वदति सति, श्रीरामः कार्मुकं धनुस्तत् आददे । दाञ् दाने लिट् । लक्ष्मणस्य यदास्यं तदेवेन्दुस्तं आलोक्य, एकं सायकः शरस्तं आददे च ॥ ४१ ॥

(सं.चं.) पूष्णः विवस्वतः पुत्रे सुग्रीवे । यद्यपि विवस्वानन्यः । पूषाऽन्यः । भ्रातौ तौ । विवस्वानर्यमा पूषा' इति स्मरणात् । अथापि अर्यमेति पूषेति सवितेति विवस्वन्नामा सूर्योऽप्युच्यते । विशेषविवक्षया भिन्नार्था एते सामान्यविवक्षायामेकार्थाः सूर्यमाचक्षते । 'अर्कः सूर्योऽर्यमा सूरः' इति, 'मार्तण्डः सविताभानुर्भातुः पूषा दिनप्रणीः' इति यादवप्रकाशः ॥ ४१–३ ॥

विरिश्चिवरतोऽभेद्यान्[१] विरिश्चिपदमिच्छतः ।
असुरांस्तरुतां यातान् ज्ञात्वा तानमुचच्छरम्[२] ॥ ४२ ॥

(भा.दी.) विरिश्चेति । असौ श्रीरामः, विरिश्चस्य यो वरस्तस्मादिति ततः, अच्छेद्यान्, विरिश्चस्य यत् पदं स्थानं तत् इच्छतः, असुरान् तरुतां यातान् प्राप्तान्, ज्ञात्वा तं शरं अमुचत् । मुचेर्लुङ् ॥ ४२ ॥

---

१. **'–वरतोऽच्छेद्यान्'** इति वि.ती.पाठः ।

२. **'तममुचच्छरम्'** इति वि.ती. पाठः । **'ज्ञात्वाऽसावमु–'** इति क्वचित् । **'ज्ञात्वाऽमुश्चच्छरं तरून्'** इति का.श्री. पाठ इति भाति । **'तरून् सालवृक्षान् असुरान् ज्ञात्वा शरममुश्चत्'** इति तट्टीका ।

(सं.चं.) विरिञ्चवरतः। 'धातुर्वरादखिलपुम्भिरभेद्यरूपान्' (६.८) इति निर्णये। विरिञ्चपदं सत्यलोकाधिपत्यम् । 'ब्रह्मत्वमाप्तुमचलं तपसि प्रवृत्तान्' (६.८) इति च ॥ ४२–३ ॥

राममुक्तशरो भित्त्वा सप्त सालांश्च सत्वरः ।
धराधरं धरां चाधः सप्तलोकानदारयत् ॥ ४३ ॥

(भा.दी.) रामेति। श्रीरामेण मुक्तः शरः, त्वरया वेगेन सहितः सन्, सप्त च ते सालाश्च तान् भित्वा, धराधरः पर्वतस्तम्, धरां भूमिं च, अधः विद्यमानान् सप्त च ते लोकाश्च तांश्च अदारयत्। दॄ दारणे लङ् ॥ ४३ ॥

सोऽसुरेन्द्रान् कुमुदिनः पाताळान्ते न्यपातयत्[1] ।
बृंहितान् ब्रह्मवरतो रम्भास्तम्भानिव क्षणात् ॥ ४४ ॥

(भा.दी.) स इति। सः शरः पाताळस्यान्तोऽवसानं तस्मिन्, अन्ते प्रदेश इति वा, अवस्थितान्, ब्रह्मणो यो वरस्तेनेति ततः बृंहितान् परिपूर्णान्, कुमुदिनः कुमुदिनामकान् असुरेन्द्रान्, क्षणः क्षणकालस्तस्मात्, रम्भाणां कदळीनां स्तम्भानिव दण्डानिव न्यपातयत् ॥ ४४ ॥

(सं.चं.) 'प्रविष्टश्च मुहूर्तेन रसां भित्त्वा महाजवः। निष्पत्य च पुनस्तूर्णं स्वतूणीं प्रविवेश ह' (१२.४) इति रामायणे सूचितां भगवत्पादोदितां कथामाह– सोऽसुरेन्द्रान्। नाम्ना कुमुदिनः। 'नाम्नाऽसुराः कुमुदिनोऽब्जजवाक्यरक्षाः' (६.१०) इति च। रम्भास्तम्भान् अतिपेलवान् कदळीकाण्डानिवानायासेन ॥ ४४ ॥

पद्मापतेः पाणिपद्मं सहसा हंसरूपवान् ।
प्रायाद् वायुमयो[2] बाण एवं कृतपराक्रमः ॥ ४५ ॥

(भा.दी.) पद्मेति। एवं कृतः पराक्रमो येन स तथोक्तः, वायुमयः मुख्यप्राणात्मकः बाणः, पद्मायाः लक्ष्म्याः पतेः श्रीरामस्य पाणिरेव पद्मं तत्, हंसवत् सूर्यवद् रूपमस्यास्तीति तथा सन्, 'हंसोऽश्वेऽर्के हरे विष्णौ' इति वैजयन्ती, हंसवदिति वेगवत्त्वेन हंसपक्षिवद् रूपवानिति वा, सहसा शीघ्रं प्रायात् ॥ ४५ ॥

(सं.चं.) वायुमयो बाणः। 'पञ्चात्मको मारुत एव बाणाः' इति ह्युक्तम्। उच्छ्वासनिःश्वासनिरूपकतया नासापुटद्वयगतो हंसरूपवान् वायुः ॥ ४५–६ ॥

---

१. **'पाताळान्तेऽन्वपा–'** २. **'वायुमयः मुख्यप्राणदेवताकः'** इति का.श्री.।

लोके यथैक आलोको बहूनर्थान् प्रकाशयेत् ।
एवमेकं हरेः कर्म्म बहूनर्थान् हि साधयेत् ॥ ४६ ॥

(भा.दी.) एकोद्देशेन कृतस्यापि श्रीरामकर्मणः अनेकार्थसाधकत्वं सदृष्टान्तमाह– **लोक** इति । लोको भुवनं तस्मिन्, एकः आलोकः सूर्यादिप्रकाशः यथा बहून् अर्थान् प्रकाशयेत् । काशृ दीप्तौ लिङ् । एवं एकं हरेः कर्म बहूनर्थान् प्रयोजनानि साधयेद्धि । साध संसिद्धौ लिङ् ॥ ४६ ॥

निष्कग्रीवोऽस्य सुग्रीवो[१] निपत्याङ्घ्रावभाषत ।
अनन्तवीर्य्यानुपम प्रसीद पुरुषोत्तम ॥ ४७ ॥

(भा.दी.) **निष्के**ति । निष्कं कण्ठाभरणं ग्रीवायां यस्य स तथोक्तः सुग्रीवः, अस्य श्रीरामस्य अङ्घ्रिः पादस्तस्मिन् निपात्य नमस्कृत्वा अभाषत । अनन्तं वीर्यं यस्य तत्सम्बुद्धिः, हे अनुपम, हे पुरुषोत्तम श्रीराम, प्रसीद । षदलृ विशरणगत्यवसादनेषु लोट् । मच्चित्तचापल्यलक्षणमपराधं क्षमस्वेत्यर्थः ॥ ४७ ॥

(सं.चं.) निष्कः सौवर्णं वक्षोविभूषणम् । अङ्घ्रावात्मानं निपात्य । 'निपत्य' इत्येव मूलपाठः स्यात् ॥४७॥

तृणैरिवाऽवृतं कूपं भस्मनेवाग्निमावृतम् ।
त्वां स्वच्छं मायया[२] च्छन्नं नायं वेद जळो जनः[३] ॥ ४८ ॥

(भा.दी.) **तृणैरि**ति । तृणानि स्थूलतृणानि तैः आवृतं आच्छादितं तं कूपमिव, भस्मना आवृतं आच्छादितं अग्निमिव, अयं जळः मन्दः जनः, स्वच्छं अज्ञानादिदोषरहितम्, मायया अचिन्त्यशक्त्या च्छन्नं त्वां न वेद । विद ज्ञाने लट् ॥ ४८ ॥

(सं.चं.) नायं वेद जड इति स्वात्मन एव परोक्षनिर्देशः । अयमिति पामरलोकसामान्यवचनं वा ॥४८॥

इदानीमेव मे मृत्युं वालिव्याजं निपातय ।
इमामेव निशामीश शये मरणनिर्भयः ॥ ४९ ॥

---

१. **'निपात्यङ्घ्राव–'** इति वि.ती.पाठः इति भाति । **'अस्य रामस्य अङ्घ्रौ पादे निपत्य पतित्वा नमस्कृत्येति यावत्'** इति का.श्री. ।

२. 'मायया स्वेच्छया' इति वि.भू. । **'महामायेत्यविद्येति (नियतिर्मोहिनीति च । प्रकृतिर्वासनेत्येवं) तवेच्छाऽनन्त कथ्यत इति प्रमाणात् मायया स्वेच्छया छन्नमाच्छादितम्'** इति का.श्री. ।

३. जडमेव प्राचीना जळमाचक्षते । **'अग्निमीळे'** इति यथा । **'जनो जडः'** इति कश्चित् ।

(भा.दी.) **इदानीमि**ति । हे ईश श्रीराम, वालीति व्याजः सञ्ज्ञामात्रं यस्य स तथा तम्, मे मृत्युं इदानीमेव पातय । पत्लृ पतने लोट् । इमां निशामेव मरणान्निर्गतं भयं यस्मात् स तथा सन्, शये स्वापं करोमि । शीङ् स्वप्ने लट् ॥ ४९ ॥

(सं.चं.) वालिरिति व्याज उपदेशः । विहितं रूपं यस्य । व्याजः= **'ನೆಪ, ಛಲ'** इति भाषायाम् । वालिरूपेणाऽत्मानं पिधाय मृत्युरवाऽगत इत्यर्थः ॥ ४८ ॥

इत्थमर्त्थयता[1] साकमाञ्जनेयेन सौरिणा ।
रामः सलक्ष्मणः प्रायात् किष्किन्धां वालिपालिताम् ॥ ५० ॥

(भा.दी.) **इत्थमि**ति । सलक्ष्मणः श्रीरामः, इत्थं अर्थयता सौरिणा सूर्यपुत्रेण सुग्रीवेण, आञ्जनेयेन अञ्जना-पुत्रेण हनुमता च साकं वालिपालितां किष्किन्धां प्रति प्रायात् । या प्रापणे लङ् ॥ ५० ॥

(सं.चं.) आञ्जनेयेन साकमित्थमर्थयता । किञ्चिमप्यपूर्वं धत्त इति किष्किन्धा गुहा कपीनां पुरी वा ॥५०॥

रामः कपीनां नगरान्तिकेऽथ कान्तारकान्ते हरिभिः परीतः ।
तस्थौ हसन्[2] कार्म्मुकबाणपाणिः प्रतीक्ष्य कालं किल वालिकालः ॥ ५१ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
किष्किन्धाकाण्डे तृतीयः सर्ग्गः ॥

—०—

(भा.दी.) **राम** इति । अथ श्रीरामः, कान्तारेण वनेन कान्ते मनोहरे, कपीनां नगरस्य यदन्तिकं तस्मिन्, हरिभिः सुग्रीवादिकपिभिः परीतः परिवृतः सन्, हसन् सन्, कार्मुकं च बाणश्च तौ पाण्योर्यस्य स तथा सन्, वालिनः कालः सन् मृत्युः सन्, कालः समयस्तं प्रतीक्ष्य, युद्धार्थं वाल्यागमनसमयं प्रतीक्ष्येत्यर्थः, तस्थौ किल ॥ ५१ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां
किष्किन्धाकाण्डे तृतीयः सर्गः ॥

—०—

१. **'यद्यपि 'अर्थ उपयाच्ञायाम्' इत्यस्य धातोरनुदात्तत्वादर्थयमानेनेति वाच्यम् । तथाऽप्यनुदात्तत्वनिमित्तकमात्मनेपदमनित्यमिति । चक्षिङ् व्यक्तायां वाचीत्यत्र ङित्करणेन सूचितत्वादर्थयतेत्युक्तम्' अत एव 'प्रार्थयन्ति शयनोत्थितं प्रियाः' इत्यादिप्रयोगश्च'** इति का.श्री. ।

२. **'हसन् भ्रात्रोर्विरोधः प्राप्त इति हासं कुर्वन्'** इति का.श्री. ।

(सं.चं.) इन्द्रोपेन्द्रवज्राभ्यामुपसंहरति– रामः कपीनाम् । हसन् । आपद्यपि अनपगतहासो हि महान् भवति । वालिनिधनोचितं कालं प्रतीक्ष्य । वालिनः कालोऽन्तक इव ॥ ५१ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां किष्किन्धाकाण्डे तृतीयसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– १५०२+५१=१५५३]

चतुर्थः सर्ग्गः

अवलोक्य जगन्नाथः कपिनाथमभाषत ।
भ्रातृव्यं भ्रातरं ते त्वमाहवायाऽह्वयेत्यथ[1] **॥ १ ॥**

(भा.दी.) श्रीरामेणानन्तरं किमकारीत्यत आह– **अवलोक्येति** । अथ जगन्नाथः श्रीरामः, हे सुग्रीव, त्वं ते भ्रातृव्यं शत्रुम्, भ्रातरं वालिनम्, आहवो युद्धं तस्मै, आह्वय आह्वानं कुरु, इति कपिनाथं सुग्रीवं अवलोक्य अभाषत ॥ १ ॥

(सं.चं.) अथ सप्तसालभेदनानन्तरम् । सुग्रीवस्य रामसामर्थ्ये प्रत्ययजननानन्तरम् । 'भ्रातृव्यौ भातृजामित्रौ' इति यादवप्रकाशः । आह्वय शब्दापय ॥ १ ॥

निर्ग्गम्य गहनात् तस्मान्नगरद्वारमागतः ।
सिंहग्रीवोऽथ सुग्रीवो भ्राता भ्रातरमाह्वयत् **॥ २ ॥**

(भा.दी.) **निर्गम्येति** । अथ तस्मात् गहनं वनं तस्मात्, 'गहनं काननं वनम्' इत्यमरः, निर्गम्य नगरस्य किष्किन्धाया यद् द्वारं तत् आगतः, सिंहस्य ग्रीवेव ग्रीवा यस्य स तथा, भ्राता सुग्रीवः, अत्र नगरद्वारे भ्रातरं वालिनं आह्वयत् ॥ २ ॥

(सं.चं.) सिंहइव केसरयुक्तग्रीवः सिंहग्रीवः । सिंहध्वनिर्वा । रामो हनिष्यतीति विश्वस्य स्वयमाह्वयत् । न जात्वहं जेष्यामीति स्पर्धाबुद्ध्या ॥ २–३ ॥

आहूतमात्रो रिपुणा दण्डाहत इवोरगः ।
निष्पपात गुहागेहाद् वाली बलवतां वरः **॥ ३ ॥**

---

१. '–याऽह्वयेरिति'

(भा.दी.) आहूतेति । रिपुणा सुग्रीवेण केवलं आहूत आहूतमात्रः, बलमेषामस्तीति बलवन्तस्तेषां वरः श्रेष्ठः वाली, गुहैव गेहं गृहं तस्मात् दण्डाहतः उरगइव निष्पपात ॥ ३ ॥

मुष्टिभिश्च तळैश्चोभौ निघ्नन्तावितरेतरम् ।
[१]अयुद्ध्यतां क्रमात् क्षीणः सूर्य्यसूनुः पराद्रवत् ॥ ४ ॥

(भा.दी.) मुष्टिभिरिति । उभौ वालिसुग्रीवौ इतरेतरं परस्परम्, ये मुष्टयस्तैश्च, यानि हस्ततळानि तैश्च, निघ्नन्तौ अयुद्ध्यताम् । युध सम्प्रहारे लङ् । क्षीणः क्रमात् बलह्रासं प्राप्तः सूर्यसूनुः सुग्रीवः पराद्रवत् ॥ ४ ॥

(सं.चं.) अयुध्यताम् । अयुध्येताम् । क्षीणः क्षितबलतया दयनीयः । क्षि क्षये इत्यस्य दैन्ये गम्यमाने निष्ठायां दीर्घः–'वाऽऽक्रोशदैन्ययोः' (अ.सू.६.४.६१) इति । 'क्षियो दीर्घात्' (८.२.४६) इति दीर्घादुत्तरस्य निष्ठातकारस्य नकारः ॥ ४ ॥

ऋश्यमूकं प्रतिद्रुत्य[२] यावद् भास्करिणा स्थितम् ।
तावदायातमत्रैव परेशेनापरैः सह[३] ॥ ५ ॥

(भा.दी.) ऋश्येति । भास्करस्यापत्यं पुमान् भास्करिस्तेन, ऋश्यमूकं प्रतिद्रुत्य विद्रुत्य यावत् यदा स्थितम्, तावदेव परेशेन सर्वोत्तमेन श्रीरामेण, अपरैरन्यैर्हनुमदादिभिः वानरैः सह, अत्र ऋष्यमूके आयातं आगतम् ॥ ५ ॥

(सं.चं.) ऋश्यमूकं प्रतिद्रुत्य । 'एतस्मिन्नन्तरे भग्नः सुग्रीवस्तेन वालिना । अपश्यन् राघवं नाथमृश्यमूकं प्रदुद्रुवे' (१२.२१) इति च । तावदायातमत्रैव । 'राघवोऽपि सह, भ्रात्रा सह चैव हनूमता । तदेव वनमागच्छत् सुग्रीवो यत्र वानरः' (१२.२४) इति च ॥ ५–६ ॥

रक्तद्रवैरार्द्रवपुः[४] कपीन्द्रोऽस्यापतत् पदे ।
करुणां वीर कस्मात् त्वं मयि नाऽयातवानिति[५] ॥ ६ ॥

---

१ 'आयुध्यताम्' २. 'पराद्रुत्य' ३. 'परेशेन दयाळुना'
४. '–द्रवैराक्तवपुः' ५. 'नाऽगतवानिति' इति, 'मयि नाथ न यातवान्' इति च ।

(भा.दी.) रक्तेति । रक्तस्य द्रवाः सृतयस्तैः आर्द्रं वपुर्यस्य स तथोक्तः, कपीन्द्रः सुग्रीवः, हे वीर श्रीराम, त्वं कस्मात् करुणां मयि न आयातवान् न प्राप्तवान्, न कृतवानित्यर्थः, इति वदन्निति शेषः, अस्य श्रीरामस्य पदं पादस्तस्मिन् अपतत् ॥ ६ ॥

भ्रातरौ समरूपौ स्थः समवेषौ समस्वनौ[1] ।
अविवेकान्न मुक्तेषुरिति [2]रामोऽब्रवीदिमम् ॥ ७ ॥

(भा.दी.) भ्रातराविति । भ्रातरौ सोदरौ युवाम्, समं रूपं ययोस्तौ तथोक्तौ स्थः भवथः । समः वेषोऽलङ्कारो ययोस्तौ तथोक्तौ, समः सदृशः स्वनो ययोस्तौ तथोक्तौ स्थः । तस्मात्, अविवेकोऽविवेचनं तस्मात्, मया इषुः न मुक्ता । 'पत्री रोप इषुर्द्वयोः' इत्यमरः । इति श्रीरामः इमं सुग्रीवं प्रति अब्रवीत् ॥ ७ ॥

(सं.चं.) इषुर्न मुक्ता । 'इषुर्न षण्' इति यादवप्रकाशः । नाहं मुक्तेषुरिति वा । 'नमुक्तेषुरित्येकं वा पदम् ॥ ७ ॥

भ्रात्रर्थे भ्रातरं रामः सहसा हतवानिति ।
परिहर्तुं परीवादं तदेशो न जघान तम् ॥ ८ ॥

(भा.दी.) भ्रात्रिति । ईशः श्रीरामः, भ्रातुरर्थः प्रयोजनं तस्मिन् विषये, भ्रातरं वालिनं सहसा हतवान् इति परीवादोऽपवादस्तम् । 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' (अ.सू.६.३.१२२) इति सूत्रेणोपसर्गस्य दीर्घः । परिहर्तुं तदा युद्धसमये वालिनं न जघान । हन हिंसागत्योर्लिट् । भ्रात्रर्थे भ्राता शीघ्रं न हन्तव्य इति नीतिप्रदर्शनार्थमेव न जघान । न भ्रात्रोः विवेचनसामर्थ्याभावादिति भावः ॥ ८ ॥

(सं.चं.) सहसेति सद्य इत्यर्थे विना कारणमविचार्येत्यर्थे चाव्ययम् । 'सद्योऽर्थे सहसा हेतुशून्ये' इति यादवप्रकाशः । परिवादो मिथ्याऽभिशंसनम् । शाश्वतः, लोकव्यापी च परिवादः परीवादः ॥ ८–९ ॥

कराग्रे कन्दुकमिव योऽनन्तं जगदीक्षते ।
यश्च कर्त्ताऽखिलस्यास्य तस्य कुत्राविवेकिता[3] ॥ ९ ॥

---

१. 'समस्वरौ' २. 'रामस्तमब्रवीत्' ३. 'कुत्राविवेकता' इति वि.ती.पाठः ।

(भा.दी.) अविवेकादित्युक्तिर्लोकविडम्बनार्थमिति किमर्थं वक्तव्यमित्यत आह– **करे**ति । यः श्रीरामः करस्य यदग्रं तस्मिन्, कन्दुकमिव, न विद्यतेऽन्तोऽवसितिः पर्यवसानं प्रवाहतः सङ्घातश्च यस्य तत्तथोक्तं तत् जगत्, ईक्षते सर्वदा साक्षात्करोति । यश्च अखिलस्यास्य जगतः कर्ता निर्माता, तस्य श्रीरामस्य, न विद्यते विवेको यस्य स तथोक्तस्तस्य भावस्तत्ता, वालिसुग्रीवयोः विविच्यादर्शनमित्यर्थः, कुत्र? न कुत्रापि विषय इत्यर्थः ॥ ९ ॥

रजताभां सुवर्ण्णाभे गजपुष्पमयीं स्रजम् ।
आमुमोचाथ सुग्रीवे हनुमान् रामशासनात् ॥ १० ॥

(भा.दी.) रजतेति । अथ हनुमान् श्रीरामस्य यच्छासनमाज्ञा तस्मात्, रजतवदाभा कान्तिर्यस्याः सा तथा ताम्, गजस्य गजवृक्षस्य यानि पुष्पाणि तेषां विकारः तन्मयी ताम्, गजपुष्पनिर्मितामित्यर्थः, 'लतया विभक्ते' इति तात्पर्यनिर्णयोऽप्युक्तार्थे तात्पर्यवानित्यविरोधः, स्रजम्, सुवर्णवदाभा यस्य स तथा तस्मिन् सुग्रीवे, आमुमोच चिह्नार्थं समर्पितवान् । लोकविडम्बकेन श्रीरामेण वालिनः सुग्रीवस्य विवेकार्थं स्रजं बध्नीहीत्युक्ते तद्विद्वान् हनुमान् सुग्रीवं स्रजा युयोजेति भावः ॥ १० ॥

(सं.चं.) आमुमोचाथ सुग्रीवे हनुमान् । 'ततो गिरितटे जातामुत्पाट्य कुसुमाकुलाम् । लक्ष्मणो गजपुष्पीं तां तस्य कण्ठे व्यसर्जयत्' (१२.४०) इति रामायणे लक्ष्मण इति लक्ष्मीवान् हनुमानुच्यते । अन्यथा भारतादिबहुग्रन्थविरोधः स्यादिति भावः । रामायणे गजपुष्पीति गजपुष्पमयी लतोच्यते–'रामाज्ञयैव लतया रविजे विभक्ते वायोः सुतेन' (६.१८) इति निर्णयवचनात् । लतामेव स्रजं मालां कृत्वाऽऽमुमोच । 'सुग्रीवस्य तथा मालां हनुमान् कण्ठ आसजत्' (वनप.२८१.३४) इति हि भारते । आमुमोच बबन्ध पिननाहेति यावत् । 'आबद्धः पुनरामुक्तः प्रतिमुक्तः पिनद्धवत्' इति यादवप्रकाशः ॥ १० ॥

आलयं वालिनः प्रायात् सहितो हरिभिर्हरिः ।
मण्डितं कदळीषण्डैर्दृष्ट्वा [1]'सप्तजनाश्रमम्'[2] ॥ ११ ॥

---

१. **'सप्तजनाश्रयम्'** । अत्र का.श्री.व्याख्यानम्–**'हरिः सुग्रीवः हरिभिः कपिभिः सहितः सन् सप्तजनाश्रयम्, अमात्यादिसप्तप्रकारोपेतजनाधारम्, कदळीषण्डैः रम्भासमूहैः, मण्डितमलङ्कृतं वालिनः आलयं गृहं दृष्ट्वा प्रायात् पुनर्युद्धाय गतः'** इति । अदृष्टरामायणोऽयं व्याख्याता सर्वमसङ्गतं व्याचष्ट । स्फुटं हि रामायणे–**'सप्तजना नाम मुनयः सप्त'** इति ।

२. इतः परम्– **'चिन्तयामास भगवान् कार्यमुत्तरभावि सः'** इत्यर्धमधिकं क्वचित् । न कैरपि प्राचीनैर्व्याख्यातम् ।

(भा.दी.) आलयमिति । हरिभिः सहितः, हरिः श्रीरामः, कदळीनां षण्डाः समूहास्तैः मण्डितं अलङ्कृतम्, सप्तजनस्य सप्तजननामकस्य मुनेः[1] य आश्रमः, तं दृष्ट्वा वालिन आलय आवासस्तं प्रायात् ॥ ११ ॥

(सं.चं.) हरिभिः सुग्रीवादिभिः । हरिः रामः । 'अग्रतस्तु ययौ तस्य राघवस्य महात्मनः । सुग्रीवः संहत-ग्रीवो लक्ष्मणश्च महाबलः । पृष्ठतो हनुमान् वीरो नळो नीलश्च वानरः । तारश्चैव महातेजा हरियूथपयूथपः' (१३.३-४) इति च । मध्येमार्गं सप्तजनाश्रमं दृष्ट्वा ततो वालिन आलयं प्रायात् । 'मेघसङ्घातविपुलं पर्यन्तकदळीवृतम् । किमेतज्ज्ञातुमिच्छामि सखे कौतूहलं हि मे' (१३.१४) इति, 'अत्र सप्तजना नाम मुनयः संशित-व्रताः । सप्तैवाऽसन्नधःशीर्षा नियतं जलशायिनः । सप्तरात्रकृताहारा वायुना वनवासिनः । दिवं वर्षशतैर्याताः सप्तभिः सकळेबराः' (१३.१८–९) इति च ॥ ११ ॥

पश्येच्चेत् प्रणमेन्मह्यं वाली वद्ध्यो न सन्नतः[2] ।
प्रत्यज्ञायि वधश्चास्य प्रपन्नायार्कसूनवे ॥ १२ ॥

(भा.दी.) पश्येदिति । अनन्तः अन्तरहितः श्रीरामः, चेद् यदि वाली मां पश्येत्, तर्हि मह्यं प्रणमेत् । ततः किमित्यत आह– **सम**िति । सम्यक् भक्तिपूर्वकं नतः वध्यो न । तर्हि वध एव न कर्तव्य इत्यत आह– **प्रती**ति । अस्य वालिनः वधश्च, प्रपन्नाय पूर्वं शरणागताय, अर्कसूनवे सुग्रीवाय प्रत्यज्ञायि प्रतिज्ञातः । ज्ञा अवबोधने लुङ् ॥ १२ ॥

(सं.चं.) अथ भगवच्चिन्तनप्रकारमाह–पश्येच्चेत् । मह्यं मां प्रणमेत् । णमधातुयोगेऽपि चतुर्थी विभाषा भवति । 'रामाय शाश्वतसुविस्तृतषड्गुणाय नत्वा' इतिवत् । तेन रामं नमति, रामाय नमतीत्युभयमपि साधु । सन्नतः प्रणतः सर्वथा न वध्यः । अर्कसूनवे सुग्रीवाय, तदर्थं वधश्च वालिनः प्रत्यज्ञायि ॥ १२ ॥

अनन्त इति सञ्चिन्त्य सालजाले निलीनवत् ।
स्थित्वा [3]प्रास्थापयत् पूष्णः पुत्रं वासविना युधे ॥ १३ ॥

(भा.दी.) अनन्तः इति । अनन्तः इति सञ्चिन्त्य, सालानां सालवृक्षाणां यज्जालं समूहः तस्मिन्, निलीनवत् प्रच्छन्नपुरुषवत् स्थित्वा, पूष्णः सूर्यस्य पुत्रं सुग्रीवम्, वासवस्यापत्यं पुमान् वासविस्तेन वालिना, युध् युद्धं तस्यै, तादर्थ्ये चतुर्थी, प्रास्थापयत् प्रेषयामास ॥ १३ ॥

---

१. **'सप्तजनानां सप्तजननामकानां मुनीनाम्'** इति स्वरसः पाठः । २. **'सम्मतः'** इति भ्रान्तः पाठः । ३. **प्रायातयत्'**

(सं.चं.) सालजाले वृक्षषण्डे । 'वृक्षैरात्मानमावृत्य व्यतिष्ठन् गहने वने' (१४.१) इति च । पूष्णः पुत्रं सुग्रीवं वासविना सह युधे युद्धाय प्रास्थापयत् । 'सालो मत्स्ये वृक्षभेदे प्राकारद्रुममात्रयोः' इति यादव-प्रकाशः । अत्र तु द्रुममात्रे सालशब्दः । न द्रुमविशेषे ॥ १३ ॥

सिंहनादं स विदधे सिंहसंहननो हरिः ।
किष्किन्धावासिनो येन सम्भ्रान्ता वालिना विना ॥ १४ ॥

(भा.दी.) **सिंहेति** । सिंहवत् संहननं शरीरं यस्य स तथोक्तः, हरिः कपिः सः सुग्रीवः, सिंहनादो सिंहध्वनिस्तं विदधे, येन सिंहनादेन, किष्किन्धायां वस्तुं शीलमेषामस्तीति तथोक्ताः, वालिना विना, सम्भ्रान्ताः सम्मूढा अभवन्, तादृशसिंहनादं चक्र इत्यर्थः ॥ १४ ॥

(सं.चं.) सिंहसंहननः अस्थूलमांसलदेहः ॥ १४ ॥

पुरादुदपतद् वाली सुन्दरीवृन्दसङ्कुलात् ।
विद्युल्लतापरिवृतान्मेघानीकादिवाशनिः[1] ॥ १५ ॥

(भा.दी.) **पुरादिति** । वाली, सुन्दरीणां वृन्दं समूहः, तेन सङ्कुलं निबिडं तस्मात् पुरात्, विद्युतो या लताः ताभिः परिवृतं तस्मात्, घनानां यदनीकं समूहस्तस्मात्, अशनिरिव वज्रमिव उदपतत् ॥ १५ ॥

(सं.चं.) पुरादन्तःपुरात् । अशनिर्वज्रः, 'పిడుగు' इति भाषायाम् ॥ १५ ॥

उत्पतन्तं पतिं वीक्ष्य तारा ताराधिपानना ।
शिरीषमालामृदुभ्यां दोर्भ्यां बध्वेदमब्रवीत् ॥ १६ ॥

(भा.दी.) **उदिति** । ताराणां नक्षत्राणामधिपश्चन्द्रः, तद्वदाननं यस्याः सा तथा, तारा तारानाम्नी वालिभार्या, उत्पतन्तं युद्धार्थमागच्छन्तं पतिं वालिनं वीक्ष्य, शिरीषाणां शिरीषवृक्षपुष्पाणां या माला तद्वन्मनोहरौ ताभ्यां दोर्भ्यां बध्वा आलिङ्ग्य इदं वचः अब्रवीत् ॥ १६ ॥

(सं.चं.) ताराधिपानना चन्द्रानना । एतेन कपीनां स्वेच्छारूपत्वमुक्तम् । उत्साहेन उद्धृत्य पतन्तं पतिं वीक्ष्य ॥ १६ ॥

१. '**–वृताद् घनानीकादिवाशानिः**' इति वि.ती.पाठः स्यात् ।

वदामि वाणीं नाथेमां न कार्प्पण्यान्न चापलात् ।
भ्रातुस्ते प्रत्यवस्थानं विद्रुतस्य सकारणम् ॥ १७ ॥

(भा.दी.) वदामीति । हे नाथ भर्तः, इमां वाणीं वाचं वदामि । विद्रुतस्य ते तव भ्रातुः सुग्रीवस्य प्रत्यवस्थानं पुनर्युद्धार्थमागमनम्, कृपणस्य भावः कार्पण्यं तस्मात् क्षुद्रपुरुषत्वात् न । क्षुद्रो हि पुरुषः पराजितोऽपि लज्जाहीनः पुनःपुनरायाति तद्वदिदं नेत्यर्थः । चापलं जयाशया चित्तचाञ्चल्यं तस्मादपि न । किन्तु सकारणं कारणविशेषेण सहितम् । यद्वा यां वाणीं वदामि, सा वाणी कार्पण्यात् क्लैब्याद् वा न, स्त्रीचापल्याद्वा नेति योजना ॥ १७ ॥

(सं.चं.) नेयं वाणी कार्पण्यादुदिता, नापि स्त्रीचापलात् । कार्पण्यं दैन्यं भयग्रस्तता । अतो नात्रानादरः कार्यः । भयाद् विद्रुतस्य भ्रातुः ते पुनः प्रत्यवस्थानं सकारणम् । महत् तत्र कारणं भवितुमर्हति ॥ १७ ॥

सुग्रीवस्याभवन्मित्रं रामो राक्षससूदनः ।
इत्यङ्गदेन [1]कथितं कुमारेण श्रुतं मया ॥ १८ ॥

(भा.दी.) विद्रुतस्य भ्रातुः प्रत्यवस्थानं सकारणमित्युक्तम्, किं तत्कारणमित्यत आह– **सुग्रीवस्ये**ति । राक्षसान् सूदयतीति तथोक्तः श्रीरामः, सुग्रीवस्य मित्रं अभवत्, इति कुमारेण अङ्गदेन कथितं वचः मया श्रुतम् ॥ १८ ॥

(सं.चं.) किं तत्? सुग्रीवस्याभवन्मित्रम् । कुमारेणाङ्गदेन कथितं मया श्रुतम् ॥ १८ ॥

न तेनोपकृतं[2] तस्य न त्वयाऽपकृतं पते[3] ।
लोकानां किल मित्रं स किं नो मित्रं न राघवः ॥ १९ ॥

(भा.दी.) नेति । तेन सुग्रीवेण न तस्य श्रीरामस्य उपकृतम्, कश्चनोपकारो न कृतः । हे पते वालिन्, त्वया तस्य श्रीरामस्य अपकृतं न, अपकारो वा न कृतः । सः राघवः श्रीरामः लोकानां सज्जनानां मित्रं किल । नः अस्माकं मित्रं न किम्? अस्माकमपि मित्रभूत एवेत्यर्थः ॥ १९ ॥

१. '–देव गदितम्' २. 'तेनावकृतम्' ३. '–पकृतं प्रभो'

(सं.चं.) तेन सुग्रीवेण तस्य रामस्य । नापि त्वया तस्यापकृतम् । लोकानां मित्रमपि नः किं न मित्रम्? ॥ १९ ॥

अङ्गदो यातु सङ्गृह्य रमणीयतरान् मणीन् ।
रामं सलक्ष्मणं नेतुमेवं[1] सन्धिर्विधीयताम् ॥ २० ॥

(भा.दी.) बलवत्सहायवतां शत्रूणां सन्धानं न्याय्यमित्याह– **अङ्गद** इति । अङ्गदः रमणीयतरान् मणीन् सङ्गृह्य सलक्ष्मणं श्रीरामं नन्तुं नमस्कर्तुं यातु । एवं उक्तरीत्या सन्धिः सुग्रीवेण सन्धानं विधीयताम् ॥ २० ॥

(सं.चं.) मणीनुपायनत्वेन समर्पयितुं गृहीत्वा । सन्धिः कलहविरहः, रामेण सुग्रीवे च ॥ २० ॥

पराजितत्वाद् भ्रातृत्वाल्लोकनाथाश्रयत्वतः ।
भागार्हत्वाच्च सुग्रीवो यौवराज्येऽभिषिच्यताम्[2] ॥ २१ ॥

(भा.दी.) सुग्रीवेण सन्धानं च युक्तमित्याह– **पराजितत्वादि**ति । पराजितत्वात्, भ्रातृत्वात्, लोकनाथः रामः आश्रयो यस्य तस्य भावो लोकनाथाश्रयत्वम्, तस्मादिति ततश्च, सुग्रीवः यौवराज्यं युवराजत्वं तस्मिन् अभिषिच्यताम् । षिच सेचने लोट् । अनर्हः कथमभिषिच्यतामित्यत आह– भागेति । भागे राज्यभागे अर्हो योग्यः, तस्य भावस्तत्वम्, तस्माच्च (अभिषिच्यताम्) ॥ २१ ॥

(सं.चं.) पराजितत्वात् क्षमामर्हति । भ्रातृत्वेन भागमर्हति । लोकनाथाश्रयत्वादुभयम् । न केवलं सुग्रीवस्याऽश्रयः । लोकनाथो हि रामः। तेनास्माकमपि । अथापि सम्प्रति सुग्रीवमाश्रित्य तिष्ठति ॥ २१ ॥

एवमुक्तोऽवदद्[3] वीरः प्रिये नाहं नपुंसकः ।
आहूतो वैरिणा वाली न नमेन्न पराद्रवेत् ॥ २२ ॥

---

१. **'नन्तुमेवम्'** इति वि.ती.पाठः।

२. इतः परं क्वचित् कोशेष्वेकं पद्यमधिकं पठ्यते । व्याचख्यौ का.श्री.केवलम् । न व्याख्यातं विश्वपतितीर्थीये–
'न चेद् वैरिणि सन्धिस्ते याम दूरं गुहान्तरम् । संहरेल्लोकमेवैको रामेषुस्त्वां तु किं पुनः' इति ।

३. **'तयेत्युक्तोऽवदद्–'**

(भा.दी.) तदा वाली किमाहेत्याह – **एवमि**ति । तारया एवमुक्तो वीरो वाली तामवदत्, प्रिये, अहं न नपुंसकः । वैरिणा युद्धाय आहूतः वाली न नमेत् नापि पराद्रवेत् ॥ २२ ॥

(सं.चं.) आहूतो वैरिणा वालीति परोक्षवचनं दार्ढ्यार्थम् ॥ २२ ॥

अनृशंसो जगन्नाथो न नृशंसत्वमेष्यति ।
अथवा रामबाणेन पूतो यास्यामि सद्गतिम् ॥ २३ ॥

(भा.दी.) **(अनृशंस)** इति ।अनृशंसः अक्रूरः जगन्नाथो रामः नृशंसत्वं सुग्रीवेण युद्ध्यतो मम हननलक्षणं पापकर्मकृत्त्वं तत् । 'नृशंसः क्रूरकर्मकृत्' इति हलायुधः । नैष्यति न प्राप्स्यति । इण् गतौ लृट् । अथवा श्रीरामो हन्ति चेत् श्रीरामस्य यो बाणस्तेन पूतः शुद्धः सन्, सती या गतिस्तां यास्यामि ॥ २३ ॥

(सं.चं.) अनृशंसः दयाळुः । नृशंसत्वं निर्दयत्वं नैष्यति । 'क्रूरो नृशंसोऽप्यदये' इति यादवप्रकाशः ॥२३॥

सौहृदं दर्शितं देवि युक्तमेतत् त्वयोदितम्[1] ।
निवर्त्तस्व सह स्त्रीभिः सत्यमेवाऽत्मना शपे ॥ २४ ॥

(भा.दी.) **सौहृदमि**ति । हे देवि तारे, त्वया सौहृदं स्नेहः दर्शितम् । मयि स्नेहात् त्वया उदितं तव एतत् वचः युक्तमेव । स्त्रीभिः सह त्वं निवर्तस्व स्वमन्दिरं प्रति गच्छ । वृतु वर्तने लोट् । आत्मना स्वात्मना सत्यमेव शपे प्रतिजाने । शप आक्रोशे लट् ॥ २४ ॥

(सं.चं.) सुहृदो भावः सौहृदं मैत्री । सुहृच्छब्दस्य युवादित्वादण् । 'हायनान्तयुवादिभ्योऽण्' (अ.सू.५.१.१३०) इति । आत्मना शपे, '**ನನ್ನಾಣೆ**' इति भाषायाम् ॥ २४ ॥

तमुत्पतन्तमित्युक्त्वा[2] पतिं कृत्वा प्रदक्षिणम् ।
स्वस्तीत्युक्त्वा सती[3] द्रष्टुं नाशक्नोद् बाष्पबाधिता ॥ २५ ॥

(भा.दी.) **तमि**ति । इति उक्त्वा युद्धार्थं उत्पतन्तं तं पतिं सती तारा प्रदक्षिणं तत् कृत्वा, स्वस्ति मङ्गळं भूयात् इति उक्त्वा ययौ । बाष्पबाधिता सती वालिनं द्रष्टुं नाशक्नोत् । शक्ल शक्तौ लङ् ॥ २५ ॥

(सं.चं.) बाष्पबाधिता, नेत्रयोर्बाष्पाकुलिततया द्रष्टुं नाशक्नोत् । भाव्यनर्थसूचनमिदम् ॥ २५ ॥

---

१. **'युक्तमेतत् तवोदितम्'** २. **'–मित्युक्त्वा पतिम्'** ३. **'पतिं द्रष्टुम्'**

निर्गम्य परितः पश्यन् दृष्ट्वा तत्राग्रजोऽनुजम् ।
परिधाय दृढं वास आपतन्तं समापतत् ॥ २६ ॥

(भा.दी.) निरिति । किष्किन्धायाः निर्गम्य परितः पश्यन् अग्रजः वाली तत्र बहिः अनुजं सुग्रीवं दृष्ट्वा दृढं यथा भवति तथा वासः वस्त्रं तत् परिधाय आपतन्तं सुग्रीवं समापतत् ॥ २६ ॥

(सं.चं.) परिधाय दृढं वासः । परिकरबन्धं विधाय । दृढबद्धकक्ष्य इत्येतत् ॥ २६ ॥

निर्घाताविव निर्घोषौ सत्वरौ तौ शराविव ।
बलीन्द्राविव विक्रान्तौ कपीन्द्रौ प्रत्ययुद्ध्यताम् ॥ २७ ॥

(भा.दी.) निर्घाताविति । निर्घाताविव अशनीइव निर्घोषौ नितरां घोषयुक्तौ, शराविव सत्वरौ वेगयुक्तौ, बलिश्च इन्द्रश्च ताविव विक्रान्तौ, तौ कपीन्द्रौ प्रत्ययुध्यताम् ॥ २७ ॥

(सं.चं.) निर्घातः वज्रपातः । बलीन्द्रौ दैत्यराजदेवराजाविव ॥ २७–८ ॥

मुष्टिमुद्यम्य कुपितो वाली सुग्रीवमब्रवीत् ।
एष मुष्टिप्रहारस्ते प्राणानपहरेदिति ॥ २८ ॥

(भा.दी.) मुष्टिमिति । कुपितः वाली, स्वस्य यो मुष्टिस्तं उद्यम्य, एषः मुष्टेः प्रहारः ते तव प्राणान् अपहरेत् इति सुग्रीवं प्रति अब्रवीत् ॥ २८ ॥

तवैव प्राणहृन्मुष्टिरित्युक्त्वा रविनन्दनः ।
मुष्टिमुद्यम्य तन्मूर्ध्नि ताडयामास लाघवात् ॥ २९ ॥

(भा.दी.) तवेति । रविनन्दनः सुग्रीवः, अयं मुष्टिः तवैव प्राणहृत् इति उक्त्वा, मुष्टिं उद्यम्य, तस्य वालिनो मूर्धा तस्मिन्, लाघवं हस्तलाघवं तस्मात् ताडयामास । तड आघाते लिट् ॥ २९ ॥

(सं.चं.) लाघवं क्षिप्रता । कदा मुष्टिमुदयच्छत्, कदा ताडयमासेति विवेकाक्षमता ॥ २९ ॥

रुधिरोद्गारिणं दृष्ट्वा वासविं भास्करिर्द्रुतम् ।
[1]सालमुत्तालमुत्पाट्य तेन तं प्रजहार च ॥ ३० ॥

---

१. **'तालमुत्ताल–'** इति वि.ती.पाठः ।

(भा.दी.) रुधिरेणेति । भास्करिः सुग्रीवः, वासविं इन्द्रपुत्रं वालिनम्, रुधिरमुद्गिरति तच्छील इति रुधिरोद्गारी तं दृष्ट्वा, उत्तालमुन्नतम्, तालो तालवृक्षः, तम्, उत्पाट्य तेन वृक्षेण, द्रुतं यथा भवति तथा, तं वालिनं प्रजहार च तताड च ॥ ३० ॥

(सं.चं.) सालं कञ्चन वृक्षमेकम्, उत्तालं द्रुतमुत्पाट्य । 'उत्तालः कर्मणि द्रुतः' इति यादवप्रकाशः । उत्तालमुन्नतं सालमिति वा ॥ ३० ॥

राघवेण समिद्धोजोलाघवेनार्कसूनुना ।
ताडितो भूतळे वाली निपपातातिविह्वलः ॥ ३१ ॥

(भा.दी.) राघवणेति । राघवेण श्रीरामानुग्रहेणेत्यर्थः । ओजः सहनशक्तिस्तच्च, लाघवं हस्तलाघवं तच्च, सम्यगिद्धे अभिवृद्धे ओजोलाघवे यस्य स तथा तेन, अर्कसूनुना सुग्रीवेण ताडितः वाली, अतिविह्वलः अत्यन्तं परवशः सन्, भुवो यत् तळं तस्मिन्निपपात ॥ ३१ ॥

(सं.चं.) राघवानुग्रहेण समिद्धम्, इन्धी दीप्तौ, सन्दीप्तं यदोजः बलम् । तेन यल्लाघवं क्षिप्रकारिता तेन । 'समिद्धोज–' इति उत्तमोजा इतिवत् । गुणोततामितिवत् ॥ ३१ ॥

आर्त्तो मुहूर्त्तमाश्वास्य जज्वाल क्रोधवह्निना ।
शतमन्युसुतो भूयस्तयोर्य्युद्धमवर्त्तत ॥ ३२ ॥

(भा.दी.) आर्त इति । मुहूर्तो मुहूर्तकालस्तम्, मुहूर्तकाल इत्यर्थः, आर्तः, शतं मन्यवो यज्ञा यस्य पुरन्द-रस्य स तथोक्तः, तस्य सुतः वाली आश्वास्य श्रमं परिहृत्य, क्रोध एव वह्निस्तेन जज्वाल । ज्वल दीप्तौ लिट् । भूयः तयोः वालिसुग्रीवयोः युद्धं अवर्तत ॥ ३२ ॥

(सं.चं.) आर्तः सालपातपीडितः ॥ ३२ ॥

ग्रस्तमालोक्य लोकेशः[१] कनिष्ठं ज्येष्ठतेजसा ।
भाधिपं भानुभासेव शरमेकममुञ्चत ॥ ३३ ॥

१. '–मालोक्य देवेशः'

(भा.दी.) ग्रस्तमिति । लोकेशः श्रीरामः, कनिष्ठं अनुजं सुग्रीवम्, ज्येष्ठस्य वालिनो यत्तेजो बलं तेन, भानोर्या भाः प्रकाशस्तया, भानां नक्षत्राणामधिपश्चन्द्रः, तमिव ग्रस्तं आलोक्य, एको मुख्यस्तं शरं अमुञ्चत ॥ ३३ ॥

(सं.चं.) भानुभासा ग्रस्तं भानां नक्षत्राणामधिपं चन्द्रमिव । शरमेकम् । 'एकेषुणा हनिष्यामि' इति हि प्रतिज्ञातम् ॥ ३३ ॥

वालिनो मरणं कुर्वन्नमृतं च प्रभोः शरः ।
शरीरं दारयन्नेव शिरोमद्ध्यमदारयत् ॥ ३४ ॥

(भा.दी.) वालिन इति । वालिनः मरणं मृतिस्तत्, अमृतं मोक्षस्तच्च, कुर्वन् प्रभोः श्रीरामस्य शरः, शरीरं देहस्तत् दारयन्नेव, शिरसो यन्मध्यं तत् अदारयत् ॥ ३४ ॥

(सं.चं.) अमृतं सद्यः मृत्यभावं च कुर्वन् । अथ चेन्द्रस्य योंऽशो वाली बभूव तस्यापुनर्भवं च कुर्वन् । अत एव शिरोमध्यमदारयत् । वक्षसि निक्षिप्तः शरः शरीरं अर्थात् शरीरमध्यभागं विदारयन्नेव ब्रह्मनाडीनिर्गमाय शिरोमध्यमदारयत् ॥ ३४ ॥

मन्दचेष्टो महीं यातो वन्दमानोऽपि चेतसा ।
इन्द्रसूनुरुवाचेदमिन्दिरेशं पुरोगतम् ॥ ३५ ॥

(भा.दी.) मन्देति । मन्दा स्वल्पा चेष्टा यस्य स तथोक्तः, महीं यातः इन्द्रसूनुः वाली, चेतसा श्रीरामं वन्दमानोऽपि, पुरः पुरतः गतं स्थितं इन्दिरेशं श्रीरामं प्रति इदं वचः उवाच ॥ ३५ ॥

(सं.चं.) चेतसा वन्दमानोऽपि मुखतः आक्षिपन्निव इदं वक्ष्यमाणमुवाच । ब्रूञो वचेर्वा लिट् । कर्णाटानां प्रियो द्वितीयाक्षरप्रासः ॥ ३५ ॥

राम राजर्षिवर्य्यस्त्वमन्यासक्तमनागसम् ।
वनौकसं पशुसमं कथं सूदितवानसि ॥ ३६ ॥

(भा.दी.) रामेति । हे श्रीराम, राजर्षिषु वर्यः श्रेष्ठः त्वम्, अन्यस्मिन् सुग्रीवे आसक्तम्, न विद्यते आगः अपराधो यस्य स तथा तम्, वनमेव ओक आवासो यस्य स तथा तम्, पशुसमम्, एतानि विशेषणानि स्वस्याहिंस्यत्वे प्रत्येकं हेतुगर्भाणि । कथं सूदितवान् हिंसितवान् असि ॥ ३६ ॥

(सं.चं.) अन्यस्मिन् कर्मण्यासक्तं कथं निलीनः सूदितवानसि । अन्यासक्तोऽपि सागा हन्तव्यः स्यात् । अहं त्वनागाः । नन्वनुजभार्यामपाहरः? सत्यं नागरिकाणामयं धर्मः । अहं तु वनौकाः । विवृता हि स्त्रीपुम्प्रसङ्गे वनौकसः पशवो भवन्ति । मनुष्यवद् राज्यव्यवहारादि कुर्वन् कथं भवान् पशुः । सत्यं न पशुः । अथापि मनुष्यदृष्ट्या पशुसमो हि वानरः । न तत्र मानुषं शासनं प्रवर्तते । अन्यो हि मनुष्यधर्मः, अन्यो वानराणामित्यात्मानं समर्थयते । ज्ञानिनं मां पशुसमं पशुतुल्यं यथा स्यात् तथा कथं सूदितवानसीति वा ॥३६॥

पञ्च पञ्चनखा भक्ष्याः प्रशस्ताः शास्त्रवेदिभिः ।
शशकः शल्यको गोधा श्वावित्[१] कूर्म्मश्च पञ्चमः ॥ ३७ ॥

(भा.दी.) का कथन्तेत्यतो हिंस्यपशून् गणयति– **पञ्चे**ति । शास्त्रं वेत्तुं शीलमेषामस्तीति तथोक्ताः, तैः सत्पुरुषैः प्रशस्ताः अनिषिद्धाः, पञ्च पञ्चसङ्ख्याकाः, पञ्च नखा येषां ते तथोक्ताः प्राणिनः भक्ष्याः भक्षणार्हाः । तानाह– **शशक** इत्यादिना । शशकः शशः, शल्यकः वराहजातौ कश्चिद् वराहविशेषः, गोधा सूक्ष्मशिंशुमारवत् स्थितः कश्चित् प्राणिविशेषः, श्वावित् आरण्यः त्रिरेखः, लोके यो रामसेतुबन्धनार्थं पांसून्नीतवानिति प्रसिद्धः क्षुद्रप्राणिविशेषः । नतु श्वाविदिति वृको वक्तुं युक्तः । प्रमाणान्तरविरोधात् । पञ्चमः कूर्मश्चेति पञ्च भक्ष्या इत्यन्वयः ॥ ३७ ॥

(सं.चं.) ननु मांसाद्यर्थं मनुष्याः पशून् घ्नन्ति? न तत्र न्यायसमीक्षा । नहि पशवः पृष्ट्वा हन्यन्ते–'अयि भोः मांसार्थं त्वां हन्मि' इति । अथाप्ययुक्तं कपिहननमित्याह– पञ्च पञ्चनखा भक्ष्या इति । के ते? शशकः । 'पञ्च पञ्चनखा भक्ष्या ब्रह्मक्षत्रेण राघव । शल्यकः श्वाविधो गोधा शशः कूर्मश्च पञ्चमः' (१७.३८) इति । शशको मृदुरोमा । **'ಮೊಲ'** इति भाषायाम् । शल्यकः शललः । **'ಚಿಪ್ಪುಹಂದಿ'** इति भाषायाम् । खड्गमृग इत्येके । तथाहि रामायणतिलके–'शल्यकः खड्गी । शुक्तिकाकारशल्यावृतसर्वाङ्गो जन्तुविशेष इत्यन्ये' इति । चिन्त्यमिदम्-'श्वाविधं शल्यकं गोधां खड्गकूर्मशशांस्तथा' इति मनुना पृथक्पाठात् । गोधा वनपल्ली । भाषायम्- **'ಉಡ'** इति प्रथितोऽयं प्राणिविशेष इति वदन्ति । 'गोधा निहाका मुसली' इति सरीसृपाध्याये यादवप्रकाशः । श्वाविदिति शल्यक एवोच्यते कोशकारैः । अत्र तु श्वाविध इति चुचुन्दरीप्रभेदो

१. **'श्वाविट् कूर्मश्च' । 'श्वाविद् अरण्यचरः, पृष्ठे त्रिरेखः, लोके यो रामेण सेतुबन्धनकाले पांसूनानीतवानिति प्रसिद्धः क्षुद्रप्राणी । नतु श्वाविडिति वृको वक्तुं युक्तः । शल्यक इत्यतो विरोधात्'** इति वि.भू. । **'शशकः=ಮೊಲ, शल्यकः वराहजातौ कश्चिद् वराहविशेषः=ಹಂದಿ, गोधा अरण्यपल्ली =ಉಡು, श्वाविट् पृष्ठे रेखात्रययुक्तः रामस्य सेतुबन्धनार्थं पांसूनानीतवानिति लोकप्रसिद्धः जन्तुर्विशेषः=ಅಳಿಲು,पञ्चमः पञ्चत्वसङ्ख्यापूरकः कूमश्च'** इति का.श्री. । सर्वेऽपि श्वाविदि(डि)ति चुचुन्दरीमाचक्षते । किम्मूलमेतदिति मृग्यम् ।

वन्यः कथ्यत इति वदन्ति । 'ಅಳಿಲು' इति भाषायाम् । वस्तुतस्त्वयमपि वराहप्रभेद एव 'ಮುಳ್ಳುಹಂದಿ'इति भाषायम् । 'कण्टकाकारदीर्घरोमभिः श्वानं विध्यतीति श्वाविधः' इति कतककारः शल्यकश्वाविधौ वराहविशेषौ' इति गोविन्दराजीयम् । श्वानं विध्यतीति श्वावित् । 'नहि-वृति-वृषि-व्यधि-रुचि-सहि-तनिषु क्वौ' (अ.सू.६.३.११६) इति पूर्वपदस्य दीर्घः ॥ ३७ ॥

न चर्म्म नास्थि नो मांसं संस्पृशन्ति मनीषिणः ।
यस्य सोऽहं कपिः कस्मात् त्वया पञ्चनखो हतः ॥ ३८ ॥

(भा.दी.) अहं च तन्मध्ये कोऽपि न भवामीत्याह– **ने**ति । मनीषिणः ज्ञानिनः यस्य वानरस्य चर्म न संस्पृशन्ति, अस्थि न स्पृशन्ति, मांसं वा न स्पृशन्ति । स्पृश आमर्शने लट् । पञ्चनखः सः भक्ष्यत्वे निषिद्धः कपिः अहं त्वया कस्मात् कारणात् हतः? ॥ ३८ ॥

(सं.चं.) न चर्म । 'चर्म चास्थि च मे राजन् न स्पृशन्ति मनीषिणः । अभक्ष्याणि च मांसानि सोऽहं पञ्चनखो हतः' (१७.४०) इति च । मनीषा अस्त्येषामिति मनीषिणः । मनस ईशते वा ॥ ३८–९ ॥

वालिनैवमुपालब्धो धर्म्मसूक्ष्ममपश्यता[१] ।
दत्तवान् भगवांस्तस्मै हसन्नुत्तरमुत्तमम् ॥ ३९ ॥

(भा.दी.) **वालिने**ति । धर्मस्य यत् सूक्ष्मं रहस्यं तत् अपश्यता अविचारयता वालिना, एवं उपालब्ध आक्षिप्तः, भगवान् श्रीरामः, तस्मै हसन् सन् उत्तमं उत्तरं प्रत्युत्तरं तत् दत्तवान् ॥ ३९ ॥

वागुरोपशयः पाशाः पूर्वक्लृप्ता[२] मृगद्रुहाम् ।
हतो मयोपशयिना सौम्य शाखामृगो ह्यसि ॥ ४० ॥

(भा.दी.) **वागुरे**ति । मृगान्[३], द्रुह्यन्तीति तथोक्ताः, तेषां मृगहिंसकपुरुषाणामित्यर्थः, वागुरा जालम्, उपशयः निलीनतयाऽवस्थानम्, पाशाः मार्गादौ मृगवधार्थं यन्त्रेण निक्षिप्यमाणाः पाशविशेषाः, इत्येते हि यस्मात् ब्रह्मणा पूर्वक्लृप्ताः तस्मात् उपशयिना निलीनतया स्थितेन मया, हे सौम्य मनोहर वालिन्, शाखामृगः त्वं हतः असि ॥ ४० ॥

---

१. **'–सूक्ष्ममजानता'** २.**'पूर्वं क्लृप्ता–'** । **'पाशः पूर्वं क्लृप्तो–'** इति, **'पाशः पूर्वक्लृप्तो–'** इति च ।

३. द्रोहोऽत्र हिंसनम् । मृगान् द्रुह्यन्ति भक्षार्थम् । न कोपेन । तस्मान्न मृगेभ्य इति चतुर्थी ।

(सं.चं.) वागुरा मृगबन्धनी । 'ಬಲೆ' इति भाषायाम् । उपशयः समीपे निलीयावस्थानम् । 'वागुराभिश्च पाशैश्च कूटैश्च विविधैर्नराः । प्रतिच्छन्नाश्च दृश्याश्च गृह्णन्ति सुबहून् मृगान्' (१८.३८) इति च ॥४०॥

मृगं चामृगमात्मानं वेत्थ चेद्[1] धार्म्मिकत्वतः ।
कथं त्यक्तोऽनुजो भुक्ता तद्भार्य्या च स्नुषासमा ॥ ४१ ॥

(भा.दी.) मृगमिति । (चेत्) यदि त्वं मृगमपि आत्मानम्, धर्मं चरतीति धार्मिकस्तस्य भावस्तत्वं तस्मादिति ततः, अमृगं मृगभिन्नं वेत्थ । कपिवंशोत्पन्नोऽपि विशिष्टबुद्ध्यादिमत्त्वेन मनुष्यधर्माणमात्मानं जानीष इत्यर्थः । तर्हि अनुजः सुग्रीवः कथं त्यक्तः? स्नुषायाः पुत्रभार्यायाः समा तद्भार्या च तस्य सुग्रीवस्य भार्या च कथं भुक्ता अनुभूता? ॥ ४१ ॥

(सं.चं.) अथ धर्मनिष्ठत्वात्, मृगं सन्तमप्यात्मानममृगं मन्यसे तर्हि कथं त्यक्तोऽनुजः? अस्तु नामानुजत्यागमः । कथं च तद्भार्या स्नुषासमा भुक्ता । स्नुषा पुत्रभार्या । 'ಸೊಸೆ' इति भाषायाम् । 'औरसीं भगिनीं वाऽपि भार्यां वाऽप्यनुजस्य यः । प्रचरेत नरः कामात् तस्य दण्डो वधः स्मृतः' (१८.२२-३) इति च । 'रुमायां वर्तसे कामात् स्नुषायां पापकर्मकृत्' (१८.१९) इति च ॥ ४१ ॥

अहं शास्ताऽस्मि दुष्टानां सतां चोत्पथगामिनाम् ।
तस्माद्धतोऽसि[2] कामं त्वां जीवयामि यदीच्छसि ॥ ४२ ॥

(भा.दी.) मत्कृतं पापमनुभोक्ष्यामि, त्वया तु मद्धननं किमर्थं कृतमित्यत आह– **अहमि**ति । यस्मात् अहं दुष्टानां पुरुषाणाम्, उत्पथमधर्ममार्गं गन्तुं शीलमेषामस्तीति तथोक्ताः, तेषां सतां च शास्ता शिक्षिता अस्मि, तस्मात् कारणात् त्वं हतः । यदि जीवितुं इच्छसि, तर्हि कामः यथा भवति तथा कामं त्वां जीवयामि ॥ ४२ ॥

(सं.चं.) दुष्टानामसतां शास्ता न केवलम् । सतामप्युत्पथगामिनाम् । त्वं सन्नप्युत्पथमगाः । तस्माद्धतोऽसि । अथ पश्चात्तापेन शुद्धं ते मनः, यदि सतां पन्थानं पतितुमिच्छसि, तथा यदि जीवितुमिच्छसि तर्हि जीवयामि ॥ ४२ ॥

रामवाणीसुधां प्राप्य रमणीयां प्रसन्नधीः ।
वाक्यमश्रुमुखो वाली भक्तिगद्गदमुक्तवान् ॥ ४३ ॥

---

१. **'वेत्थ किं धार्मिकत्वतः'**

२. **'तस्माद्धतस्त्वम्'** इति वि.ती.पाठः स्यात् ।

(भा.दी.) रामेति । रमणीयाम्, श्रीरामस्य या वाणी सैव सुधा तां प्राप्य, प्रसन्ना धीरन्तःकरणं यस्य स तथोक्तः वाली, अश्रुयुक्तं मुखं यस्य स तथा सन्, वाक्यं वचस्तत्, भक्त्या गद्गदं स्खलद्वचनं यथा भवति तथा उक्तवान् ॥ ४३ ॥

(सं.चं.) अश्रुपूर्णमुखः ॥ ४३ ॥

क्षमस्वाऽर्त्तगिरं स्वामिन् न मेऽसूयितुमर्हसि ।
पालयस्व शिशुं दासमङ्गदं कनकाङ्गदम् ॥ ४४ ॥

(भा.दी.) क्षमस्वेति । हे स्वामिन्, आर्तस्य मम या गीस्तां क्षमस्व । क्षमूष् सहने लोट् । आर्ता हि दुःखात् यत्किञ्चित् प्रलपन्ति, तद्वदुक्तं मद्वचनं क्षमस्वेति भावः । मे असूयितुं दुरुक्तमुक्तमित्यसूयां कर्तुं नार्हसि न योग्योऽसि । अर्ह पूजायां लट् । शिशुं तव दासम्, कनकमयमङ्गदं बाहुभूषणं यस्य स तथोक्तः, तं अङ्गदं पालयस्व । पा रक्षणे लोट् ॥ ४४ ॥

(सं.चं.) आर्तेन दुःखितेन किमपि प्रलपितमिति मत्वा मे गिरं क्षमस्व । मह्यमभ्यसूयितुं मयि दोषमारोपयितुं नार्हसि । 'असूया दोषदृग् गुणे' इति यादवप्रकाशः । 'तदयुक्तं मया पूर्वं प्रमादादुक्तमप्रियम् । तत्रापि खलु मे दोषं कर्तुं नार्हसि राघव' (१८.४६-७) इति च । तवैव शिशुमङ्गदं पालयस्व । स्वशिशुं पालयेति वा । कनकाङ्गदमिति तस्य सुखवर्धितत्वमाह ॥ ४४ ॥

मृतौ यत्कीर्त्तनं कर्त्तुं तपोदानादि[1] कुर्वते ।
तं[2] त्वामवेक्ष्य मे मृत्युं मन्ये साक्षादनुग्रहम् ॥ ४५ ॥

(भा.दी.) जीवनं किमर्थं नेच्छसीत्यत आह– **मृतावि**ति । ज्ञानिनः मृतौ मरणे सत्याम्, यस्य श्रीरामस्य कीर्तनं नामोच्चारणम्, तत् कर्तुम्, तपश्च दानं च ते आदी यस्य तत्तथोक्तं सत्कर्म कुर्वते । तं तादृशगुणं त्वां अवेक्ष्य मे मृत्युम्, साक्षात् अनुग्रहः प्रसादरूपस्तं मन्ये । मन ज्ञाने लट् ॥ ४५ ॥

(सं.चं.) मृतिकाले यन्नामकीर्तनं कर्तुं समर्थाः स्यामेति समग्रे जीवितकाले तपोदानादि कुर्वते । साक्षादनुग्रहः प्रत्यक्षगोचरः प्रसादः । न फलानुमेयः ॥ ४५ ॥

---

१. **'तपो दानानि कुर्वते'**

२. **'तं सङ्कीर्तनमात्रेण मोक्षप्रदं त्वाम्'** इति का.श्री. ।

उक्त्वेति मोहमापेदे वाली प्राणान् न मुक्तवान् ।
इन्द्रदत्तां दधन्मालां काञ्चनीं [1]मृतिनाशनीम्[2] ॥ ४६ ॥

(भा.दी.) **उक्त्वेति** । वाली इति उक्त्वा मोहो मूर्छा तं आपेदे आप । पद गतौ लिट् । इन्द्रदत्ताम्, मृतिस्तां नाशयतीति तथोक्ता तां काञ्चनीं स्वर्णमयीं मालां दधत् सन् प्राणान्न मुक्तवान् ॥ ४६ ॥

(सं.चं.) मोहमापेदे । अथापि प्राणान् न मुक्तवान् । यतः मृतिनाशनीं मालां दधदास ॥ ४६ ॥

धावन्तीं राजमहिषीं मुञ्चन्तीमश्रुसन्ततिम्[3] ।
दीर्घं श्वसन्तीं सम्प्रेक्ष्य प्रोचिरे वालिसेवकाः ॥ ४७ ॥

(भा.दी.) **धावन्तीमि**ति । वालिसेवकाः वानराः, धावन्तीं पतिमरणं ज्ञात्वा किष्किन्धायाः आद्रवन्तीम्, अस्राणामश्रूणां सन्ततिं मुञ्चन्तीम्, दीर्घं यथा भवति तथा श्वसन्तीम्, राज्ञो वालिनो महिषीं तारां सम्प्रेक्ष्य प्रोचिरे ॥ ४७ ॥

(सं.चं.) राजमहिषीं ताराम् । वालिसेवका वानराः ॥ ४७ ॥

वीरसूर्वीरपत्नी त्वं कुत्र [4]यास्यसि निर्भया ।
सुग्रीवराक्षसाद् बालं पालयामः प्रवासिनः ॥ ४८ ॥

(भा.दी.) **वीरे**ति । वीरं सूतवतीति वीरसूः, अङ्गदं प्रसूतवतीत्यर्थः, वीरस्य वालिनः पत्नी त्वम्, निर्गतं भयं यस्याः सा तथा सती कुत्र यास्यसि । वयं प्रवास एषामस्तीति प्रवासिनः विदेशवासिनः इत्यर्थः, सुग्रीव एव राक्षसस्तस्मात्, ज्येष्ठमारकत्वेन राक्षससदृशसुग्रीवादित्यर्थः, बालमङ्गदं पालयामः ॥ ४८ ॥

(सं.चं.) वीरसूर्वीरमाता । 'वीरपत्नी वीरभार्या वीरमाता च वीरसूः' इति यादवप्रकाशः । कुत्र यास्यसि यत्र निर्भया स्याः । न क्वापि । सर्वत्रापि सुग्रीवराक्षसाद् भयमेव । अथच सुग्रीवाख्याद् राक्षसात् सम्प्रति बालोऽङ्गदः पालनीयः । अन्यथा भ्रातुर्हन्ता हन्तायं राक्षसस्तत्तनयमपि हन्यादेव । अतस्तं वयं

---

१. **'मृतिनाशिनीम्'** । **'मृतिनोदिनीम्'** इति च । **'मृतिनोदिनीमिति पाठे मरणमपाकुर्वाणाम्'** इति का.श्री. ।

२. इतः परं पद्यमेकमधिकं क्वचित्–**'स्वपतिं पतितं श्रुत्वा तारा तारस्वरा पुनः । विलपन्ती गुहात्तस्माद् यातुं मन उपादधे'** इति । नातिस्वरसम् । **'गुहात् तस्मात्'** इत्यसङ्गतम् । **'गृहात् तस्मात्'** इति स्यात् । अथापि न श्लिष्यति । न व्याख्यातं च प्रतनैः ।

३. **'मुञ्चन्तीमस्रसन्ततिम्'** इति वि.ती.पाठः । **'मुञ्चतीमश्रु–'** इति क्वचित् । ४. **'कुत्र धावसि'**

पालयामः । प्रवासिनः वालिपातनेन तदनुगा वयमपि देशभ्रष्टाः सञ्जाताः । तेन प्रवासिनः विदेशे क्वापि वसन्तस्तं पालयाम इति ॥ ४८ ॥

इत्युक्त्वोत्पततो वीक्ष्य क्षुभ्यतो बिभ्यतः कपीन् ।
उवाच वचनं साध्वी देशकालबलोचितम् ॥ ४९ ॥

(भा.दी.) **इती**ति । इति उक्त्वा उत्पततः, क्षुभ्यतः कर्तव्यमूढतया क्षोभं गच्छतः, बिभ्यतः कपीन् वीक्ष्य, साध्वी पतिव्रता तारा, देशश्च कालश्च बलं च तेषामुचितं योग्यं तत् वचनं उवाच ॥ ४९ ॥

(सं.चं.) वालिनं पतितं दृष्ट्वा क्षुभ्यतः किङ्कर्तव्यमूढान् । सकार्मुकं रामं दृष्ट्वा बिभ्यतः । देशकालोचितमात्मसामर्थ्योचितं च ॥ ४९ ॥

अवधीद् भ्रातरं भ्राता राजानं राज्यकामुकः ।
भजताद्य[1] तमात्मेशं कपयः कुत्र यास्यथ ॥ ५० ॥

(भा.दी.) **अवधीदि**ति । भ्राता सुग्रीवः, राज्यस्य कामुकः कामनाशीलः सन्, राजानं भ्रातरं वालिनं अवधीत् । हन हिंसागत्योर्लुङ् । अथ तं सुग्रीवं आत्मनां स्वेषां ईशं भजत । भज सेवायां लोट् । हे कपयः, कुत्र यास्यथ गमिष्यथ ॥ ५० ॥

(सं.चं.) राजानं भ्रातरं वालिनं राज्यकामुको भ्राता सुग्रीवः अवधीत् रामेण सहायेन । इदानीं सुग्रीवो भवतामीशः । तं भजत । तं विहाय कुत्र यास्यथ ॥ ५० ॥

कुणपस्याङ्गदेनेव कृत्यं मेऽस्त्यङ्गदेन किम् ।
तं देवः पालयेदेव मन्नाथमनुयाम्यहम् ॥ ५१ ॥

(भा.दी.) **कुणपस्ये**ति । कुणपः शवस्तस्य अङ्गदं बाहुभूषणं तेनेव, विधवात्वेन कुणपसदृशायाः मे अङ्गदेन पुत्रेण किं कृत्यं किं कार्यमस्ति? न किमपि । देवः श्रीरामः तं अङ्गदं पालयेदेव रक्षेदेव । अहं मम नाथं भर्तारं अनुयामि ॥ ५१ ॥

(सं.चं.) कुणपस्य शवस्याङ्गदेन बाहुभूषणेनेव मम हतधवाया अङ्गदेन पुत्रेण सम्प्रति किं प्रयोजनम्? देवो रामस्तं पालयेदेव । अहं तु मन्नाथमनुम्रिये ॥ ५१ ॥

---

१. **'भजताथ'** इति वि.ती.पाठः ।

वदन्तीत्थं प्रसर्प्पन्ती[१] पतिं पतितमैक्षत ।
रक्तैराक्तं[२] रजोमिश्रं वीरशय्याशयं शुभा ॥ ५२ ॥

(भा.दी.) वदन्तीति । इत्थं वदन्ती, प्रसर्पन्ती धावन्ती, शुभा पतिव्रता तारा, पतितम्, रक्तानि शोणितानि तैः आक्तं आर्द्रम्, रजोमिश्रम्, वीराणां शय्या रणभूमिः, तस्यां शेत इति तथोक्तः, तं पतिं वालिनं ऐक्षत ॥ ५२ ॥

(सं.चं.) वीराणां या चरमा शय्या तत्र शयम् ॥ ५२ ॥

पपात पत्युः पादान्ते हा नाथेति विराविणी ।
करीन्द्रेणेव कदळी शोकेनाभिहता सती ॥ ५३ ॥

(भा.दी.) पपातेति । हा नाथ इति विरावितुं विशेषेण रोदनं कर्तुं शीलमस्या अस्तीति तथोक्ता, सती सा तारा, करीन्द्रेण गजश्रेष्ठेन कदळीव, शोको दुःखं तेन अभिहता सती, दुःखपरवशेत्यर्थः, पत्युः पादयोरन्तं समीपं तस्मिन् पपात ॥ ५३ ॥

(सं.चं.) करीन्द्रेणाभिहता कदळीव ॥ ५३ ॥

अङ्गदं चाग्रतः कृत्वा वानर्य्यो वालिवल्लभाः ।
विलेपुस्तं मृतं[३] प्राप्य ताडयन्त्योऽङ्गमात्मनः ॥ ५४ ॥

(भा.दी.) अङ्गदमिति । वालिनो वल्लभा भार्याः (वानर्यः), अङ्गदं अग्रतः कृत्वा, मृतं तं प्राप्य, आत्मनः स्वस्य अङ्गं शरीरं तत् ताडयन्त्यः सत्यः, विलेपुः परिदेवनं चक्रुः । लप व्यक्तायां वाचि लिट् ॥ ५४ ॥

(सं.चं.) मृगमिव निश्चेष्टम् । मृतं मन्वाना वा । 'तस्या विलपितं श्रुत्वा वानर्य्यः सर्वतश्च ताः । परिगृह्याङ्गदं दीना दुःखार्ता प्रतिचुक्रुशुः' (२०.२३) इति च ॥ ५४–५ ॥

विकीर्ण्णकेशाः क्रोशन्त्यो विकीर्ण्णाभरणस्रजः ।
साश्रुधाराः[४] कृपां कस्य वालिवध्वो न चक्रिरे ॥ ५५ ॥

---

१. **'वदन्ती प्रलपन्तीत्थम्'** इति का.श्री. पाठः स्यात् । तथाहि तद्व्याख्यानम्–**'इत्थं पूर्वोक्तप्रकारेण वदन्ती ब्रुवन्ती प्रलापं कुर्वाणा'** इति । एतदानुगुण्याय **'वदन्तीत्थं प्रलापन्ती'**, इति, **'वदन्तीत्थं लालपन्ती'** इत्यादिकमपपाठं पठन्तो मूलपाठं दूषयन्ति केचिद् वागर्थानभिज्ञाः ।

२. **'रक्तैराक्तरजोमिश्रम्'** ३. **'मृतं मृतप्रायं तं वालिनम्'** इति का.श्री. । ४. **'सास्रधाराः'** इति वि.ती.पाठः ।

(भा.दी.) विकीर्णेति । विकीर्णाः केशाः यासां तास्तथोक्ताः, क्रोशन्त्यः आक्रोशं कुर्वन्त्यः, विकीर्णा आभरणानि स्रजश्च यासां तास्तथोक्ताः, अस्राणां अश्रूणां धाराभिः सहिताः साश्रुधाराः, वालिवध्वः वालिनो भार्याः कस्य पुरुषस्य कृपां न चक्रिरे । तद्द्रष्टॄणां सर्वेषां च कृपा जातेत्यर्थः ॥ ५५ ॥

क्रियासमभिहारेण ताडयन्ती निजां तनुम् ।
विललापाऽकुला बाला तारा पतिपरायणा ॥ ५६ ॥

(भा.दी.) क्रियेति । पतिरेव परायणं केवलमाश्रयो यस्याः सा तथोक्ता, आकुला व्याकुला, बाला तारा, क्रियासमभिहारः पौनःपुन्यं तेन, निजां तनुं शरीरं ताडयन्ती सती विललाप ॥ ५६ ॥

(सं.चं.) क्रियासमभिहारेण पौनःपुन्येन । बालेव बाला मुग्धा । अबाला प्रबुद्धा वा ॥ ५६ ॥

आर्य्यपुत्र प्रबुद्ध्यस्व ताराऽस्मि तव वल्लभा ।
साध्वीमनागसं[१] नाथ कस्मान्मां नाभिनन्दसि ॥ ५७ ॥

(भा.दी.) आर्येति । आर्यस्य त्रैलोक्यस्वामिन इन्द्रस्य पुत्र वालिन्, प्रबुद्ध्यस्व प्रबोधं प्राप्नुहि । बुध अवगमने लोट् । अहं तव वल्लभा प्रिया भार्या तारा अस्मि । हे नाथ, त्वं साध्वीम्, न विद्यते आगोऽपराधो यस्याः सा तथा ताम्, मां कस्मान्नाभिनन्दसि, प्रियभाषणादिना पूर्ववत् सन्तोषं न प्रापयसि ॥ ५७ ॥

(सं.चं.) आर्यपुत्रेति भर्ता सम्बोधनीय इति कविसमयः । गृहे वृद्धः श्वशुरो ह्यार्य उच्यते । अनागसं निरपराधिनीम् । 'अनागसीम्' इति पठन्ति । तदा तु च्छान्दसं रूपम् ॥ ५७ ॥

प्राणप्रख्यः सुतस्तेऽयमङ्गदः समुपस्थितः ।
गाढं रोदिति दीनस्त्वमुत्तिष्ठ परिसान्त्वय ॥ ५८ ॥

(भा.दी.) प्राणेति । ते प्राणानां पञ्चप्राणानां प्रख्यः समानः, अत्यन्तं प्रिय इत्यर्थः, सुतः अयमङ्गदः समुपस्थितः समीपस्थितः सन्, दीनः सन्, गाढं दृढं भूयिष्ठं यथा भवति तथा रोदिति । रुदिर् अश्रुविमोचने लट् । त्वं उत्तिष्ठ उत्थितो भव । रुदन्तमङ्गदं परिसान्त्वय । षान्त्व सामप्रयोगे लोट् ॥ ५८ ॥

---

१. 'सतीमनागसीम्'

(सं.चं.) प्राणप्रख्यः जीवतुल्यः । 'प्राणस्तु प्रणवे जीवे जीविते परमात्मनि' इति यादवप्रकाशः । उत्तिष्ठ । उत्थाय तं परिसान्त्वय ॥ ५८–९ ॥

लोकमन्यं गतोऽसि त्वं लोकपालपराक्रम ।
कृपां नैसर्गिकीं त्यक्त्वा मां च सन्त्यक्तवानसि ॥ ५९ ॥

(भा.दी.) लोकमिति । लोकपालानामिन्द्रादीनां पराक्रम इव पराक्रमो यस्य स तथोक्तस्तत्सम्बुद्धिः, हे वालिन्, त्वं नैसर्गिकीं स्वाभाविकीं मयि कृपां त्यक्त्वा, अन्यो यः स्वर्गलोकस्तं गतः असि । मां च भूमावेव सन्त्यक्तवानसि ॥ ५९ ॥

एकान्तेऽकथयः कान्त सर्वाभ्यः प्रेयसीं हि माम्[1] ।
कथं कितव तत् सत्यं प्राप्तोऽसि सुरसुन्दरीः ॥ ६० ॥

(भा.दी.) एकान्त इति । हे कान्त भर्तः, एकान्तो रहस्यस्थळं तस्मिन्, सर्वाभ्यः स्त्रीभ्यः मां प्रेयसीमतिशयेन प्रियां अकथयः । कथ वाक्यप्रबन्धे लङ् । हे कितव कपटिन्, तत् कथनं कथं सत्यम्? हि यस्मात् मां विहाय सुराणां सुन्दरीः अप्सरस्त्रियः इत्यर्थः, प्राप्तः असि ॥ ६० ॥

(सं.चं.) कितव वञ्चक मिथ्यावादिन् । कथं तदेकान्तकथनं सत्यं स्यात् । यत इदानीं मां विहाय प्राप्तोऽसि सुरसुन्दरीः ॥ ६० ॥

विरहानलसन्तप्तां लोठन्तीं विधवायिताम् ।
नय मामपि ते लोकं गृहदासी भवानि ते[2] ॥ ६१ ॥

(भा.दी.) विरहेति । विरह एवानलोऽग्निस्तेन सन्तप्ता (ताम्), लोठन्तीं भुवि परिभ्रमन्तीम्, विधवा-वत् चरतीति तथोक्ता ताम्, मामपि ते यो लोकस्तं प्रति नय । अहं ते गृहदासी भवानि भूयासम् ॥६१॥

(सं.चं.) विधवायितां विधवीकृताम् । तत्र यास्ते गृहाः दाराः सुरसुन्दर्यस्तासां दासी चेदपि । दासी भवानीति दैन्यातिशयः । 'पत्नी क्षेत्रं कळत्रं च गृहाः पुम्भूम्नि दारवत्' इति यादवः । गृहे सुरसद्मनि दासी, न चेद् भार्या, भवानीति वा । अदासी दासी सम्पद्यमाना भवानीति च्विप्रत्यये सत्येकं पदं वा ॥ ६१ ॥

१. 'प्रेयसीति माम्' २. 'भवामि ते'

हा नाथ[1] कपिनाथ त्वं वैरिकक्षाशुशुक्षणिः ।
रामवारिनिधिं प्राप्य निर्वाणं गतवानसि ॥ ६२ ॥

(भा.दी.) हा नाथेति । कपिनाथ, हे नाथ वालिन्, वैरिण एव कक्षाणि वनानि तेषामाशुशुक्षणिरग्निः त्वम्, राम एव वारिनिधिः समुद्रस्तं प्राप्य निर्वाणो विनाशस्तं गतवानसि ॥ ६२ ॥

(सं.चं.) वैरिकक्षस्य गुल्मस्य तृणस्य वा आशुशुक्षणिः । 'कक्षस्तु गुल्मे स्पर्धापदे तृणे' इति,'आशुशुक्षणिरर्केऽग्नौ' इति च यादवप्रकाशः । निर्वाणं विनाशं गतवानसि । 'निर्वाणं निर्वृतौ मोक्षे विनाशे गजमज्जने' इति च ॥ ६२ ॥

रामं व्रजाम[2] शरणं नाथमित्यर्थितं[3] मया ।
अभिमानज्वरात् तस्मिन् पथ्ये नाभूद् रुचिस्तव ॥ ६३ ॥

(भा.दी.) राममिति । वयं नाथं श्रीरामं शरणमरणं तत् व्रजामः इति मया पूर्वं अर्थितं प्रार्थितम्, अभिमान एव ज्वरस्तस्मात्, 'आहूतो न निवर्तेय' इत्यभिमानादित्यर्थः, पथ्यं हितं तस्मिन्, तस्मिन् मद्वचसि, तव रुचिः प्रीतिः न अभूत् ॥ ६३ ॥

(सं.चं.) पथ्ये वचसि । यथा ज्वरिताय न पथ्यं रोचते ॥ ६३ ॥

चारु चाटु च तेऽपाङ्गं मङ्गलं हसितं सितम् ।
भवान्तरेऽप्यहं वीक्षै[4] शुभं किञ्चिद् यदीश मे ॥ ६४ ॥

(भा.दी.) चार्विति । हे ईश भर्तः, चाटु मनोहरं तव (चारु) वचस्तत्, 'चारु चित्रवचस्यपि' इति वैजयन्ती, ते मङ्गलः अपाङ्गो नेत्रान्तस्तं च, सितं धवळं हसितं हासस्तच्च, अहं अन्यो भवः भवान्तरं तस्मिन्, जन्मान्तर इत्यर्थः, यदि किञ्चिन्मे शुभं कर्म अस्ति तर्हि वीक्षै वीक्षमाणा भवानि ॥ ६४ ॥

(सं.चं.) तव चारु चाटुवचः चमत्कारि वचनम् । सितं निर्मलं हसितम् । वीक्षै साक्षात्करवाणि, अनुभवानि ॥ ६४ ॥

---

१. **'हे नाथ'**

२. **'व्रजामः शरणम्'** इति वि.ती.पाठः स्यात् ।

३. **'मित्यर्थितो मया'**

४. **'भवान्तरेऽपि वीक्षेऽहम्'**

भुङ्क्ष्व सुग्रीव साम्राज्यं ज्येष्ठस्य रुधिरोक्षितम् ।
समं नो[1] राममाश्रित्य न हि सन्धिः कृतस्त्वया ॥ ६५ ॥

(भा.दी.) भुङ्क्ष्वेति । हे सुग्रीव, हि यस्मात् त्वया श्रीरामं आश्रित्य नः बन्धुभूतानामस्माकं (समं) सह परस्परमित्यर्थः, सन्धिः न कृतः, किन्तु ज्येष्ठो वाली घातितः, तस्मात् ज्येष्ठस्य रुधिरेण रक्तेन उक्षितं सिक्तं तत् साम्राज्यं भुङ्क्ष्व अनुभव । भुज पालनाभ्यवहारयोर्लोट् ॥ ६५ ॥

(सं.चं.) रुधिरेण उक्षितम् । उक्ष सेचने । नः तव चास्माकं च समं समानं मित्रत्वे राममाश्रित्य सन्धिः करणीय आसीत् । अथापि नहि सन्धिः कृतस्त्वया । पुनः सन्धातुं लब्धमवकाशं व्यर्थमकरोः । 'सुमना राममाश्रित्य' इति पाठे राममाश्रित्य सुमनाः सन् साम्राज्यं भुङ्क्ष्व ॥ ६५ ॥

अयि नाथ विधे कुर्य्याः करुणां करुणाकर ।
अर्द्धमेतद् वृथा क्लिष्टं कान्तेनार्द्धेन योज्यताम्[2] ॥ ६६ ॥

(भा.दी.) अयीति । अयि नाथ हे स्वामिन्, करुणाया आकर आश्रय, विधे दैव, मयि करुणां कुर्याः । कर्तव्यकरुणामेव दर्शयति– **वृथे**ति । वृथा क्लिष्टं क्लेशितं अर्धं पत्युः शरीरार्धभूतं इदं शरीरं अर्धेन अर्धभूतेन कान्तेन भर्त्रा योज्यताम्, ममापि मरणं कुर्वित्यर्थः ॥ ६६ ॥

(सं.चं.) मयि दयां कुर्याः । दम्पत्योरर्धमङ्गं मदाख्यं वृथा क्लेशभाजनं जातम् । तत् अन्येनार्धेन वालिरूपेण कान्तेन युज्यताम् । अक्लिष्टं स्याद् यद्यहमपि तेन सह म्रिये ॥ ६६–७ ॥

विलपन्तीति करुणं सुस्वरा वालिवल्लभा ।
पत्युरङ्के शिरः कृत्वा मरणाय मनो दधे ॥ ६७ ॥

(भा.दी.) विलपन्तीति । करुणं कृपास्पदं यथा भवति तथा इति विलपन्ती, सु सम्यक् स्वरो यस्याः सा तथा, वालिनो वल्लभा प्रिया तारा, पत्युः अङ्क ऊरुस्तस्मिन् शिरः कृत्वा, मरणं मृतिस्तस्मै मनो दधे ॥ ६७ ॥

तस्या रुदितशब्देन कुमारस्याङ्गदस्य च ।
उद्बुद्धः किञ्चिदुन्मील्य वाली मन्दं वचोऽब्रवीत् ॥ ६८ ॥

१. 'सुमना राम–' २. '–र्धेन युज्यताम्'

(भा.दी.) तस्या इति । तस्याः तारायाः, कुमारस्य अङ्गदस्य च, रुदितस्य रोदनस्य यः शब्दस्तेन, उद्बुद्धः प्रबोधं प्राप्तः वाली, किञ्चिन्नेत्रे उन्मील्य, मन्दं शनैः यथा भवति तथा वचः अब्रवीत् ॥ ६८ ॥

(सं.चं.) अङ्गदस्य च रुदितशब्देन किञ्चिदुद्बुद्धः ॥ ६८ ॥

वत्स सुग्रीव मा वैरमनुसन्धत्स्व मूढवत् ।
कृतापकारोऽपि पुरा मया दिष्टानुवर्त्तिना ॥ ६९ ॥

(भा.दी.) वत्सेति । हे वत्स सुग्रीव, दिष्टं दैवमनुवर्तितुं शीलमस्यास्तीति तथा तेन मया, पुरा कृत अपकारो राज्योच्चाटनादिर्यस्य स तथाऽपि, मूढवत् अज्ञवत् वैरं विरोधस्तत् मा अनुसन्धत्स्व मा स्मर ॥ ६९ ॥

(सं.चं.) दिष्टानुवर्तिना । विधिर्वैरं कारयामास । न तत्र तव मम वा स्वाच्छन्द्यम् । अकरणेऽप्यप्रभुतया त्वया वैरमकरवम् । तत् तन्माऽनुसन्धत्स्व माऽनुसन्धिथाः । माऽनुचिन्तयेत्यर्थः ॥ ६९ ॥

अङ्गदं विद्धि ते पुत्रं शत्रुपुत्रं न जात्वपि[1] ।
भ्रातॄणामेकजातानामन्यपुत्रः स्वपुत्रकः ॥ ७० ॥

(भा.दी.) अङ्गदमिति । अङ्गदं ते पुत्रं विद्धि । विद ज्ञाने लोट् । जात्वपि कदाचिदपि शत्रोः पुत्रस्तं न विद्धि । यस्मात् एकस्मात् पितुर्जातानां भ्रातॄणां सहोदराणां अन्यस्य भ्रातुः पुत्रः स्वपुत्रकः स्वस्य पुत्र एव । तस्माच्छत्रुपुत्रं न विद्धीत्यन्वयः ॥ ७० ॥

(सं.चं.) एकजातानामेकपितृकाणां भ्रातॄणामेकस्य पुत्रोऽन्यस्यापि पुत्र एव । तस्मादङ्गदं स्वपुत्रं विद्धि, न कदाऽपि शत्रुपुत्रम् । अनुकम्पनीयः पुत्रः पुत्रकः ॥ ७० ॥

भुङ्क्ष्व साम्राज्यमेतत् त्वं यौवराज्येऽङ्गदं कुरु ।
सुषेणतनयां तारां माऽवमंस्था महामतिम् ॥ ७१ ॥

(भा.दी.) भुङ्क्ष्वेति । एतत्साम्राज्यं त्वं भुङ्क्ष्व अनुभव । भुज पालनाभ्यवहारयोर्लोट् । अङ्गदं युवा चासौ राजा च युवराजः, तस्य भावस्तत्त्वम्, तस्मिन् कुरु । सुषेणस्य सुषेणनाम्नः कपेः तनयां पुत्रीम्, महती पूज्या मतिर्यस्याः सा तथा तां तारां मा अवमंस्थाः अवज्ञातां मा कुरु ॥ ७१ ॥

---

१. 'न जात्विति'

(सं.चं.) महामतिं महाप्राज्ञाम्, या भाविनीमिमां दुर्दशां पूर्वमेव मे बोधयामास। 'नहि तारामतं किञ्चिदन्यथा परिवर्तते' (२२.१४) इति च ॥ ७१ ॥

सदा रामस्य दासः स्याः सम्पदेऽत्र परत्र च ।
एष प्राणभृतां नाथः पुरुषः प्रकृतेः परः ॥ ७२ ॥

(भा.दी.) सदेति । अत्र अस्मिल्लोके, परत्र परस्मिन् लोके च, सम्पदे ऐश्वर्यार्थं सदा श्रीरामस्य दासः स्याः भवेः । तस्य महिमानमाह– **एष** इति । एषः श्रीरामः प्राणभृतां ब्रह्मादिजीवानां नाथः, पुरुषः पूर्णषड्गुणः, प्रकृतेः जडप्रकृतेः परः विलक्षणः, अनाद्यनन्तकालेऽपि तयाऽबद्ध इत्यर्थः । प्रकृतेः महालक्ष्म्याः पर उत्तम इति वा ॥ ७२ ॥

(सं.चं.) एष रामः प्राणभृतां ब्रह्मादीनां नाथः न केवलम् । प्रकृतेः श्रीतत्वादपि पर उत्तमः पुरुषः ॥ ७२ ॥

रामकार्य्येषु वर्य्येषु न प्रमादी क्वचिद् भव ।
त्वमङ्गदानुवर्त्तस्व सुग्रीवं रामसम्मतम्[1] ॥ ७३ ॥

(भा.दी.) रामेति । वर्येषु श्रेष्ठेषु, श्रीरामस्य कार्याणि सीतान्वेषणादिकार्याणि तेषु, क्वचिदपि देशे काले च प्रमादोऽस्यास्तीति प्रमादी न भव । एवमनुजं प्रति साम्पराये स्वकीयं प्रतिवक्तव्यं हितोपदेशं कृत्वा स्वपुत्रस्य हितमुपदिशति– **त्वमि**ति । हे अङ्गद, (त्वं) श्रीरामस्य सम्मतं सुग्रीवम्, अनुवर्तस्व अनुसृत्य वर्तनं कुरु ॥ ७३ ॥

(सं.चं.) प्रमादी अनवहितः, आदररहितः । एवं सुग्रीवं सन्दिश्याथ तनयं बोधयति– त्वमङ्गदानुवर्तस्व । रामस्य सम्मतं यथा स्यात् ॥ ७३ ॥

अयि नाथ[2] जगन्नाथ पुत्रोऽयं तेऽर्पितो मया ।
इयं च माला[3] भवता सुग्रीवाय प्रदीयताम् ॥ ७४ ॥

१. **'रामसंयुतम्'** २. **'अयि राम'**

३. **'इयं च बाला'** इति. वि.ती.पाठः ।

(भा.दी.) अयीति । अयि नाथ जगन्नाथ श्रीराम, मया पुत्रः अयमङ्गदः ते तव अर्पितः । भव्या शोभना बाला स्त्री इयं तारा भवता सुग्रीवाय प्रदीयताम् ॥ ७४ ॥

(सं.चं.) अथ रामं प्रार्थयते– अयि नाथ । पुत्रोऽयमङ्गदस्तेऽर्पितः । इयं चेन्द्रदत्ता मृतिनाशिनी माला । एतेन 'जग्राह सोऽभ्यनुज्ञातो मालां तां चैव काञ्चनीम्' (२२.१८) इति रामायणवचने 'अभ्यनुज्ञातः' इत्यस्य रामेणाभ्यनुज्ञात इत्यर्थ उक्तो भवति ॥ ७४ ॥

प्रोच्येति मालामुन्मुच्य रामपादारविन्दयोः ।
सम्यगर्प्पितवान् वाली स्वात्मानं चाऽत्मवित्तमः ॥ ७५॥

(भा.दी.) प्रोच्येति । आत्मानं परमात्मानमतिशयेनापरोक्षतो वेत्तीत्यात्मवित्तमः वाली, इति श्रीरामं प्रति प्रोच्य, युद्धतुष्टेन पुरन्दरेण दत्तां सुवर्णमयीं मालामुन्मुच्य, श्रीरामस्य यौ पादौ तावेवारविन्दे तयोः अर्पितवान्, स्वात्मानं च सम्यक् श्रीरामपादारविन्दयोः अर्पितवान् ॥ ७५ ॥

(सं.चं.) स्वात्मानं चार्पितवान् रामपादारविन्दयोः । प्राणान् जहावित्यर्थः ॥ ७५ ॥

स इत्थमुक्त्वा परिमुक्तसङ्गो रामस्य रूपामृतमीक्षणाभ्याम् ।
[1]तदाऽऽत्मचेतःकलशे प्रगृह्य महेन्द्रजः प्राप महेन्द्रभावम् ॥ ७६ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
किष्किन्धाकाण्डे चतुर्त्थः सर्ग्गः ॥

(भा.दी.) स इति । महेन्द्रजः महेन्द्रजातः सः वाली इत्थमुक्त्वा, परिमुक्तः सङ्गः पुत्रकळत्रराज्यादिष्वासक्तिर्येन स तथा सन्, श्रीरामस्य तत् श्रुतिवेद्यम्, रूपमेवामृतं तत्, ईक्षणे लोचने ताभ्यां लोचनाभ्याम्, आत्मनः स्वस्य यच्चेतस्तदेव कलशो घटस्तस्मिन् प्रगृह्य, श्रीरामस्य दिव्यं रूपमनिमिषचक्षुर्भ्यामवलोक्य मनसा संस्मरन्नित्यर्थः, महेन्द्रस्य भावो धर्मस्तं इन्द्रत्वमित्यर्थः, प्राप । आप्लृ व्याप्तौ लिट् ॥ ७६ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां
किष्किन्धाकाण्डे चतुर्थः सर्गः ॥

---

१. **'तदा स्म चेतः–'** **'तदा प्राणत्यागसमये'** इति का.श्री. । **'तत्+आत्मतेजःकलशे'** इति प्रतृण्णे वि.ती.पाठे ।

(सं.चं.) इन्द्रोपेन्द्रवज्राभ्यामुपसंहरति– स इत्थमुक्त्वा । ईक्षणाभ्यां पिबन् चेतःकलशे सङ्गृह्य भरमाणः । महेन्द्रजो वाली महेन्द्रभावं मूलरूपमाप ॥ ७६ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां किष्किन्धाकाण्डे चतुर्थसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– १५५३+७६=१६२९]

पञ्चमः सर्ग्गः

[1]मरणं रमणस्याथ [2]विलपन्ती विलोक्य सा ।
परिरम्भपरा देहं सशरं चाभ्यपद्यत ॥ १ ॥

(भा.दी.) श्रीरामं प्रपन्नस्य सुग्रीवस्य साम्राज्यप्राप्त्यादिकं वक्तुमारभते– **मरणमिति** । (अथ) रमणस्य भर्तुः मरणं मृतिस्तत् विलोक्य विलपन्ती सा तारा, परिरम्भे आलिङ्गने परं तात्पर्यं यस्याः सा तथा सती, शरेण सहितः सशरः, तं देहं अभ्यपद्यत जगाम । पद गतौ लङ् ॥ १ ॥

(सं.चं.) परिरम्भे परा परिरब्धुमुद्युक्ता, परिरम्भबाधकेन शरेण कीलितं देहमभ्यपद्यत प्राप्तवती ॥ १ ॥

पश्यन्नश्रुमुखो देव्याः[3] साहसं सहसा ततः ।
नील उत्पाटयामास शरं वालिशरीरतः ॥ २ ॥

(भा.दी.) **पश्यन्निति** । देव्यास्ताराया: साहसमालिङ्गनेऽतिप्रयत्नः, तं पश्यन् अश्रु मुखे यस्य स तथोक्तः स नीलः (सहसा) ततः, वालिनो यच्छरीरं तस्मादिति ततः, राममुक्तो यः शरः, तं उत्पाटयामास उद्धृतवान् । पट गतौ लिट् ॥ २ ॥

(सं.चं.) सशरस्य देहस्य परिरम्भाख्यं साहसम् । '**ದುಡುಕು**' इति भाषायाम् । सहसा सद्यः । 'उद्बबर्ह शरं नीलस्तस्य गात्रगतं तदा' (२३.१७) इति च ॥ २ ॥

---

१. इतः पूर्वं क्वचिदेकः श्लोकः पठ्यते– '**मृतं तं भ्रातरं दृष्ट्वा सुग्रीवः सुस्वरं रुदन् । 'बहुलं विललापाथ अग्रजस्य पदे पतन्**' इति । अत्र तृतीयतुरीयचरणयोर्विसन्धिता दोषः । नैवं प्रयुञ्जते महाकवयः । न कैरपि व्याख्यातः । निश्चप्रचं प्रक्षिप्त श्लोकः ।

२. '**-स्याथ बहुधा विललाप सा**'

३. '**देव्यां साहसम्**'

कान्ता[१] कान्ताङ्गमालिङ्ग्य रुधिरौघाभिषेकिणी ।
अभिवादय तातं ते यान्तं पुत्रेत्यभाषत ॥ ३ ॥

(भा.दी.) कान्तेति । कान्तस्य भर्तुर्यदङ्गं तत् आलिङ्ग्य, रुधिराणां ओघः प्रवाहः, तस्य योऽभिषेकः, सः अस्या अस्तीति तथोक्ता, कान्तदेहालिङ्गनेन कान्तदेहसम्बन्धिरुधिरेणार्द्रदेहेत्यर्थः, कान्ता भार्या तारा, हे पुत्र, यान्तं स्वर्गं प्रति गच्छन्तम्, ते तातं पितरं वालिनं अभिवादय नमस्कुरु इति अभाषत ॥ ३ ॥

(सं.चं.) वालिकान्ता कान्तस्याङ्गं कळेबरम् । 'क्षेत्रमङ्गं कळेबरम्' इति च । कान्ताङ्गलग्नरुधिरोघेणाऽप्लुता । पुत्र अङ्गद, परलोकं यान्तं तातमभिवादय ॥ ३ ॥

उत्थाय तूर्णं पितरमभ्यवादयदङ्गदः ।
आलोक्य तं सास्रधारा[२] तारा पुनरभाषत ॥ ४ ॥

(भा.दी.) उत्थायेति । अङ्गदः तूर्णं यथा भवति तथा उत्थाय पितरं वालिनं अभ्यवादयत् । तं वालिनं आलोक्य अस्राणां धारया सहिता सास्रधारा तारा पुनः अभाषत ॥ ४ ॥

(सं.चं.) तं पितरमभिवादयन्तमङ्गदमालोक्य ॥ ४ ॥

आयुष्मान् भव वत्सेति वत्समुक्त्वा पते व्रज[३] ।
सचिवान् किङ्करांश्चैताननुज्ञाप्य च सन्नतान्[४] ॥ ५ ॥

(भा.दी.) आयुष्मानिति । हे वत्स पुत्र अङ्गद, आयुरस्यास्तीति आयुष्मान्, सम्पूर्णायुष्यवान् भव, इति वत्सं अङ्गदं प्रति उक्त्वा, (सन्नतान्) समन्तात् नम्रान् सचिवान् मन्त्रिणः, 'मन्त्री बुद्धिसहायः स्यादमात्यः सचिवस्तथा' इति हलायुधः, एतान् किङ्करान् भृत्यजनांश्च अनुज्ञाप्य, हे पते वालिन्, त्वं स्वर्गं प्रति व्रज ॥ ५ ॥

(सं.चं.) वत्सं प्रणतमुक्त्वा आशिषा संयोज्य, सन्नतान् सचिवान् किङ्करांश्चाऽपृच्छ्य ततः प्रयाहि परलोकम् ॥ ५ ॥

---

१. **'कान्ता कान्तं समाश्लिष्य'** २. **'साश्रुधारा'**
३. **'पतिव्रता'**(?) ४. **'सङ्गतान्'**

उत्तिष्ठ भूप भूपृष्ठाद् वल्लभा चेदहं तव ।
[1]वीरलक्षणसम्पन्ना न पृथिव्यां हि शेरते ॥ ६ ॥

(भा.दी.) उत्तिष्ठेति । चेद् यदि अहं तव वल्लभा प्रिया तर्हि, हे भूप वालिन्, भुवः पृष्ठं तळं तस्मात् उत्तिष्ठ, वीराणां यल्लक्षणं तेन सम्पन्नाः युक्ताः पुरुषाः पृथिव्यां न शेरते मरणं न प्राप्नुवन्ति । शीङ् स्वप्ने लट् । त्वं च वीरलक्षणसम्पन्न इत्यतः शीघ्रमुत्तिष्ठेति भावः ॥ ६ ॥

(सं.चं.) मसृणे तल्पे हि शेरते न पृथिव्याम् ॥ ६ ॥

सङ्ग्रामयज्ञावभृथे रामबाणाम्बुना तव ।
पत्नीं मामपि संयुङ्क्ष्व नापत्नीको भवान् व्रजेत् ॥ ७ ॥

(भा.दी.) सङ्ग्रामेति । सङ्ग्रामाख्यो यो यज्ञस्तस्य, अवभ्रियते परिपूर्यतेऽनेन दीक्षाव्रतमित्यवभृथः, यागसमाप्तौ जलावगाहनेष्टिः, तस्मिन् रामस्य यो बाणः स एवाम्बु जलं तेन तव पत्नीं मामपि सयुङ्क्ष्व संयोजय । युजिर् योगे लोट् । न विद्यते पत्नी यस्य स तथा सन् भवान् न व्रजेत् ॥ ७ ॥

(सं.चं.) अवभृथो कर्मान्तस्नानम् । रामबाणाम्बुना निर्वर्त्येऽवभृथे । अत एव कर्णाटकभाषायाम् 'अम्बु' इति बाणमाचक्षते । नह्यपत्नीकः क्वापि यज्ञेष्वधिकृतो भवति । 'दृष्ट्वा सङ्ग्रामयज्ञेन रामप्रहरणाम्भसि । अस्मिन्नवभृथे स्नातः कथं पत्न्या मया विना' (२३.२७) इति च ॥ ७ ॥

विषमालोड्य पास्यामि प्रवेक्ष्याम्यथवाऽनलम् ।
यावद् वीरधवां तां मां न स्पृशेद् विधवापदम् ॥ ८ ॥

(भा.दी.) विषमिति । यावत् यतः पूर्वम्, वीरः वाली धवो भर्ता यस्याः सा तथा तां माम्, विधवा इति यत् पदं नाम तत् न स्पृशेत्, स्पृश आमर्शने लिङ्, तावत् ततः पूर्वमेव, विषं गरळं तत् आलोड्य पेयद्रव्येण सम्पाद्य पास्यामि । अथवा अनलमग्निं प्रवेक्ष्यामि ॥ ८ ॥

(सं.चं.) वीरधवां मां विधवां यावन्न वदेयुस्तावत् । आलोड्य अधश्चोर्ध्वं च सञ्चाल्य, तस्यौत्कट्यं सम्पाद्य ॥ ८ ॥

---

१. 'वीरा लक्षण–'

कर्म्मणा मनसा वाचा यदागस्ते कृतं मया ।
क्षमानाथ क्षमस्व त्वं कान्ता ते[1] स्यां भवान्तरे ॥ ९ ॥

(भा.दी.) कर्मणेति । कर्मणा मनसा वाचा (ते) मया यदागः अपराधः कृतम्, क्षमायाः भूमेः नाथ, क्षमायाः सहनस्य नाथेति वा,(तत् त्वं) क्षमस्व । क्षमूष् सहने लोट् । अन्यो भवः भवान्तरं तस्मिन्, जन्मान्तर इत्यर्थः, ते कान्ता भार्या स्याम् । अस भुवि लिङ् ॥ ९ ॥

(सं.चं.) यद्यागः कृतं तत् सर्वं क्षमस्व । भवान्तरेऽपि तवैव कान्ता स्यामित्याशासे ॥ ९ ॥

विलपन्तीं तथा बालां प्रजिहासुमसूनपि ।
वानर्य्यः सान्त्वयन्त्योऽपि[2] प्रकृतिं नेतुमक्षमाः ॥ १० ॥

(भा.दी.) विलपन्तीमिति । वानर्यः वानरस्त्रियः, तथा विलपन्तीम्, असूनपि प्रकर्षेण हातुमिच्छति प्रजिहासति प्रजिहासतीति प्रजिहासुस्ताम्, बालां भव्यां शोभनां तारां सान्त्वयन्त्योऽपि प्रकृतिं पूर्वस्वभावम्, पूर्वावस्थामिति यावत्, नेतुं अक्षमा असमर्थाः, आसन्निति शेषः ॥ १० ॥

(सं.चं.) बालां मुग्धाम् । अबालां प्रबुद्धां वा । प्राणानपि हातुमिच्छन्तीम् । प्रकृतिं दुःखोन्मादादुन्मुच्य सहजावस्थां प्रापयितुं क्षमा नाभवन् ॥ १० ॥

अन्तःपुरचरो वृद्धः [3]प्राज्ञस्तत्रेदमब्रवीत् ।
[4]का कस्य कान्ता कः कान्तः कः पुत्रः कः पिता भवेत् ॥ ११ ॥

(भा.दी.) अन्तरिति । अन्तःपुरे चरतीत्यन्तःपुरचरः, प्रज्ञा अस्यास्तीति प्राज्ञः । 'प्रज्ञाश्रद्धा–' (अ.सू. ५.२.१०१) इत्यादिना मत्वर्थे णः । वृद्धः कश्चन वानरः, तत्र एतस्मिन्नवसरे, इदं वचः अब्रवीत् । कस्याः स्त्रियाः कान्तो भर्ता कः भवेत्? कस्य पुरुषस्य कान्ता भार्या का भवेत्? कस्य पुत्रः कः भवेत्? कस्य पिता कः भवेत्? न किञ्चिदप्यनादिसंसारे नियतमिति भावः ॥ ११ ॥

---

१. **'कान्ता स्यां ते भवा–'** २. **'–यान्त्योऽत्र प्रकृतिम्'** । **'सान्त्वयन्त्योऽथ'** इति च । ३. **'प्राज्ञस्तामिद–'**

४. **'कः कस्य कान्तः कान्ता का कः पुत्रः'** । **'कस्य स्त्रीजीवस्य कः कान्तः पतिः भवेत् । कस्य पुरुषस्य कान्ता स्त्री का भवेत्'** इति का.श्री. ।

(सं.चं.) अन्तःपुरचरो वृद्धः प्राज्ञः । कोऽयम्? वाल्मीकिस्तु हनुमानिति स्फुटमाह–'ततो निपतितां तारां च्युतां तारामिवाम्बरात् । शनैराश्वासयामास हनुमान् हरियूथपः' (२१.१) इति । 'शोच्या शोचसि कं शोच्यं दीनं दीनाऽनुकम्पसे । कस्य को वाऽनुशोच्योऽस्ति देहेऽस्मिन् बुद्बुदोपमे' (२१.३) इति च अयमन्यो वृद्धो न रामायणोदितः । नच हनुमानेव । ताराया अन्तःपुरचर इत्युक्तेः ॥ ११ ॥

अस्थिरः सङ्गमो ह्येषां कान्तादीनां भवेभवे ।
ईश्वरेच्छानुवृत्तानां स्रवन्त्यामेधसामिव ॥ १२ ॥

(भा.दी.) एतदेव विशदयति– **अस्थिर** इति । ईश्वरस्य या इच्छा तामनुवृत्ताः अनुसृत्य वर्तमानास्तेषाम्, कान्ता आदिर्येषां ते तथा तेषाम्, एषां बन्धूनाम्, भवः जन्म, तस्मिन् भवे जन्मनि सङ्गमः, स्रवन्त्यां नद्यां एधांसि काष्ठानि तेषामिव अस्थिरः । यथा प्रवाहेण उह्यमानानि तृणादीनि कुत्रचित् संयुज्यन्ते तथा वियुज्यन्ते च तद्वदेव भर्त्रादिसङ्गम इति भावः ॥ १२ ॥

(सं.चं.) भवेभवे जन्मनिजन्मनि । स्रवन्त्यामेधसां काष्ठानां सङ्गमइव यादृच्छिकः क्षणिकश्च ॥ १२ ॥

त्वं तु नीतिमती तारे कथमेवं विषीदसि ।
तस्याऽत्मानं सुतं रक्ष प्रियं चेद् भर्त्तुरिच्छसि ॥ १३ ॥

(भा.दी.) एवं संसारचक्रस्य स्थितिमुक्त्वा प्रशंसापूर्वकं हितमाह–त्वं त्विति । हे तारे, त्वं तु नीतिरस्या अस्तीति तथा, यतस्तत एवं कथं विषीदसि मुह्यसि । षद्लृ विशरणगत्यवसादनेषु लट् । चेद् यदि भर्तुः वालिनः प्रियं इष्टं कर्म कर्तुमिच्छसि, तर्हि तस्य वालिनः आत्मानं स्वरूपभूतम्, औरसमित्यर्थः, सुतमङ्गदं रक्ष ॥ १३ ॥

(सं.चं.) तस्याऽत्मानं सुतं रक्ष । 'आत्मा वै पुत्रनामाऽसि' इति हि श्रुतिः । 'अङ्गदस्तु कुमारोऽयं द्रष्टव्यो जीवपुत्रया । आयत्यां च विधेयानि समर्थान्यस्य चिन्तय' (२१.४) इति च ॥ १३ ॥

तस्मिन्नेवं प्रवदति विलपन्तीषु तासु च ।
धृष्टमाचष्ट वचनं लक्ष्मणः शुभलक्षणः ॥ १४ ॥

(भा.दी.) **तस्मिन्निति** । तस्मिन् वृद्धे वानरे एवं प्रवदति सति, तासु वानरीषु च विलम्पन्तीषु सतीषु, शुभानि लक्षणानि अङ्गसम्पदो यस्य स तथोक्तः लक्ष्मणः, धृष्टं धैर्ययुक्तं तत् वचनं आचष्ट ॥ १४ ॥

(सं.चं.) धृष्टं सन्दर्भोचितप्रागल्भ्ययुक्तं यथा स्यात् तथा आचष्ट उवाच ॥ १४ ॥

सुग्रीव किमिदं दैन्यं तारां सान्त्वय सुव्रताम् ।
आरोप्य शिबिकां शीघ्रं देहो निर्ह्रियतामिति ॥ १५ ॥

(भा.दी.) तदेव दर्शयति– **सुग्रीवे**ति । हे सुग्रीव, इदं दीनस्य भावो दैन्यं दुःखमित्यर्थः, किम्प्रयोजनम्? वालिमरणनिमित्तदुःखेन न किमपि प्रयोजनमित्यर्थः । शोभनं व्रतं यस्याः सा तथोक्ता तां तारां सान्त्वय । षान्त्व सामप्रयोगे लोट् । शिबिकां आन्दोळिकां शीघ्रं यथा भवति तथा आरोप्य देहः वालिशरीरं निर्ह्रियतां संस्क्रियताम् । (इति वचनमाचष्टेत्यन्वयः) ॥ १५ ॥

(सं.चं.) ऊर्ध्वसंस्कारार्थं हरणं निर्हरणम् ॥ १५–६ ॥

हरयो हनुमन्नुन्ना घृतगन्धाद्युपानयन् ।
राज्ञो निर्हरणायाऽशु तारेण शिबिकाऽहृता ॥ १६ ॥

(भा.दी.) **हरय** इति । हनुमता नुन्नाः प्रेरिताः हरयः नीलादिकपयः, घृतं च, गन्धः परिमळपदार्थः स च, तौ आदी यस्य तत्तथा तत्, राज्ञो वालिनो निर्हरणं संस्कारप्रयोजनं तस्मै आशु उपानयन् । णीञ् प्रापणे लङ् । तारेण अङ्गदमातुलेन शिबिका आहृता । वालिनो नयनार्थं किष्किन्धाया आनीता ॥ १६ ॥

देहमङ्गदसुग्रीवावारोप्य शिबिकां शुभाम् ।
शिबिकावाहिभिर्भृत्यैर्निन्यतू राजभूतिभिः ॥ १७ ॥

(भा.दी.) **देहमि**ति । अङ्गदसुग्रीवौ वालिनो यो देहस्तं शुभां शिबिकां आरोप्य, शिबिकां वोढुं शीलमेषामस्तीति शिबिकावाहिनस्तैः भृत्यैः, राज्ञो या विभूतयो च्छत्रचामरादिवैभवानि ताभिः सह निन्यतुः ॥१७॥

(सं.चं.) शुभां राजोचितालङ्कारयुक्ताम् । 'दिव्यां भद्रासनयुतां शिबिकां स्यन्दनोपमाम्' (२५.२१) इति च ॥ १७ ॥

संवृतं विलपन्तीभिर्वानरीभिः प्रणीय तम् ।
द्वीपे नद्या[१] अदहतां नानालङ्कारभूषितम् ॥ १८ ॥

---

१. **'नद्याः तुङ्गभद्रायाः द्वीपे मध्यभागे'** इति का.श्री. ।

(भा.दी.) संवृतमिति । विलपन्तीभिः वानरीभिः संवृतम्, नानाविधा ये अलङ्कारा: कटककुण्डलादयः तैर्भूषितः तम्, (तं) वालिनम्, प्रणीय रणाङ्कणान्नीत्वा, नद्याः पम्पायाः यो द्वीपस्तस्मिन् अदहताम् । दह भस्मीकरणे लङ् ॥ १८ ॥

(सं.चं.) गिरिनद्या जलेन संवृते द्वीपे । 'पुलिने गिरिनद्यास्तु विविक्ते जलसंवृते' (२५.३७) इति च ॥ १८–२१ ॥

संस्कृत्य तं यथाशास्त्रं वालिनं वानरोत्तमाः ।
पम्पायामुदकं दत्वा रामपादान्तिकं ययुः ॥ १९ ॥

(भा.दी.) समिति । वानरोत्तमाः सुग्रीवादयः, तं वालिनम्, न्याय्यं शास्त्रविधिमनतिक्रम्य यथाशास्त्रं संस्कृत्य दग्ध्वा, पम्पायां उदकं जलं तत् दत्वा, श्रीरामस्य यौ पादौ तयोरन्तिकं तत् ययुः ॥ १९ ॥

सुग्रीवाङ्गदपूर्वेषु कपिषु[१] प्रणतेष्वथ ।
हनुमान् प्राञ्जलिर्वाक्यं वाक्यज्ञो राममब्रवीत् ॥ २० ॥

(भा.दी.) सुग्रीवेति । अथ सुग्रीवश्च अङ्गदश्च तौ पूर्वौ येषां ते तथा तेषु, कपिषु प्रणतेषु सत्सु, वाक्यं जानतीति वाक्यज्ञः, तत्तत्काले वक्तव्यवाक्यकौशलज्ञ इत्यर्थः, हनुमान्, प्रकृष्टौ अञ्जली यस्य स तथा सन्, वाक्यं वचस्तत् रामं प्रति अब्रवीत् ॥ २० ॥

अयमिच्छति सुग्रीवो निवासं स्वपुरे तव ।
त्वं हि नाथस्त्रिजगतामस्माकं तु विशेषतः ॥ २१ ॥

(भा.दी.) अयमिति । अयं सुग्रीवः स्वस्य यत्पुरं किष्किन्धाख्यं तस्मिन्, तव निवास अवस्थानं तं इच्छति । इषु इच्छायां लट् । कपिराज्यावस्थाने कोऽधिकार इत्यत आह–**त्वमि**ति । त्रीणि च तानि जगन्ति च तेषां नाथस्त्वं अस्माकं त्वद्भक्तानां विशेषतः नाथो हि । तस्मात् सुग्रीवस्तव निवासमिच्छतीत्यर्थः ॥ २१ ॥

१. **'–पूर्वेषु सर्वेषु प्रणतेष्वथ'**

इत्युक्तो भगवानूचे किञ्चित् स्मित्वा मितं वचः ।
पुरग्रामेषु नो वासः पित्राज्ञां मे चिकीर्षतः ॥ २२ ॥

(भा.दी.) **इती**ति । इति हनुमता उक्तः भगवान् श्रीरामः, किञ्चित् स्मित्वा, पितुर्या आज्ञा वने वस्तव्यमिति नियोगस्तां चिकीर्षतः, मे पुराणि च ग्रामाश्च तेषु वासः नो नास्ति इति मितं अल्पाक्षरं वचः ऊचे ॥२२॥

(सं.चं.) पुरेषु ग्रामेषु वा वासो नो, न युक्तः ॥ २२ ॥

सुग्रीव भुङ्क्ष्व साम्राज्यं यौवराज्येऽङ्गदं कुरु ।
कार्य्यं नः कार्त्तिके मासि चिन्त्यतां श्रावणो ह्ययम् ॥ २३ ॥

(भा.दी.) **सुग्रीवे**ति । हे सुग्रीव, साम्राज्यं सार्वभौमत्वं तत् त्वं भुङ्क्ष्व अनुभव । भुज पालनाभ्यवहारयोर्लोट् । यौवराज्यं श्वस्तनराजत्वं तस्मिन् अङ्गदं कुरु । नः कार्यं सीतान्वेषणादिलक्षणं कृत्तिकायोगः पौर्णमास्यामस्तीति कार्त्तिकस्तस्मिन् मासे चिन्त्यताम् । चिती संस्मृत्यां लोट् । अयं वर्तमानः मासः श्रावणो हि । तथा च मासचतुष्टयपर्यन्तं वार्षुककालत्वेन साम्प्रतं सीतान्वेषणस्यायुक्तत्वात् तदनन्तरं कर्तव्यमिति भावः ॥ २३ ॥

(सं.चं.) कार्यं नः । 'कार्त्तिके समनुप्राप्ते त्वं रावणवधे यत' (२६.१७) इति च ॥ २३–४ ॥

इत्थमङ्गदसुग्रीवौ रामस्याज्ञां प्रगृह्य ताम् ।
दशाहं [१]दीक्षितौ राज्ञः पितृमेधं प्रचक्रतुः ॥ २४ ॥

(भा.दी.) **इत्थमि**ति । इत्थं अङ्गदसुग्रीवौ श्रीरामस्य तां आज्ञां प्रगृह्य, दशानां अह्नां समाहारो दशाहं तत् दीक्षितौ व्रतग्रहणनियमवन्तौ सन्तौ, राज्ञो वालिनः पितृमेधो पितृयज्ञः तम्, श्राद्धमित्यर्थः, प्रचक्रतुः ॥ २४ ॥

अथ प्रविश्य नगरीं गरीयोविभवां प्रभुः ।
विवेशान्तःपुरं भ्रातुर्वीक्षमाणः[२] स्वसम्पदः ॥ २५ ॥

---

१. **'दश च तानि अहानि च दशाहम् । 'राजाहःसखिभ्यष्टच्'** (अ.सू.५.४.९१) । **अत्यन्तसंयोगे द्वितीया'** इति का.श्री. ।

२. **'भ्रातुः काङ्क्षमाणः'**(?)

(भा.दी.) अथेति। (अथ) प्रभुः सुग्रीवः, गरीयान् ज्येष्ठो विभवः सम्पद् यस्यां सा तथा तां नगरीं प्रविश्य, स्वस्य याः सम्पदस्ताः वीक्षमाणः सन्, भ्रातुर्वालिनः यदन्तःपुरं तत् विवेश ॥ २५ ॥

(सं.चं.) नगरीं किष्किन्धाम्। सम्प्रति स्वीया जाताः सम्पदः ॥ २५–६ ॥

सुग्रीवं हारवद्ग्रीवं [१]निर्य्यान्तमवरोधतः।
सर्वे ते वानरा नेमुर्ज्जयशब्दपुरःसरम् ॥ २६ ॥

(भा.दी.) सुग्रीवमिति। हारा अस्यां सन्तीति हारवती, तादृशी ग्रीवा यस्य स तथा तम्, अवरोधतः अन्तःपुरात् निर्यान्तं निस्सरन्तं सुग्रीवं सर्वे (ते) वानराः जयशब्दः पुरस्सरः पूर्वो यथा भवति तथा नेमुः ॥ २६ ॥

(सं.चं.) हारवद्ग्रीवम्, यो हारः पूर्वं वालिग्रीवायामासीदिन्द्रदत्तः ॥ २६ ॥

[२]मतेनायं हनुमतः प्रकृतीरनुमान्य च।
प्रासादमारुरोहोच्चमभिषेकाय कल्पितम् ॥ २७ ॥

(भा.दी.) मतेनेति। अयं सुग्रीवः हनुमतः मतं सम्मतिस्तेन, प्रकृतीः अमात्यादिजनान् अनुमान्य राज्याभिषेकसम्मतान् कारयित्वा, अभिषेको राज्याभिषेकस्तस्मै कल्पितं निर्मितम्, (उच्चम्) प्रासादो हर्म्यं तं आरुरोह ॥ २७ ॥

(सं.चं.) प्रकृतीराधिकारिकान् प्रजाश्च। अनुमान्य यथार्हं सत्कृत्याभिनन्द्य च ॥ २७ ॥

आभिषेचनिकैर्द्रव्यैर्वानस्पत्यौषधादिभिः।
नानानदनदीतोयैर्ववृतेऽथाभिषेचनम् ॥ २८ ॥

(भा.दी.) आभिषेचनिकैरिति। अथ वनस्पतीनां वृक्षाणां सम्बन्धीनि वानस्पत्यानि तानि च, ओषधीनां सम्बन्धीनि औषधानि तानि च आदयो येषां तानि तथोक्तानि तैः, अभिषेचनार्थं विद्यमानानि आभिषेचनिकानि तैः द्रव्यैः, नानाविधाः नदा नद्यश्च तासां तोयानि उदकानि तैः अभिषेचनं ववृते ॥ २८ ॥

---

१. 'निर्यातमव–'
२. 'सम्मत्यायं हनूमतः'

(सं.चं.) 'वानस्पत्यः पुष्पफली फली त्वेव वनस्पतिः । ओषधिः फलपाकान्ता' इति च । औषधानीति भेषजानि च ॥ २८ ॥

वाद्यमानेषु वाद्येषु तृप्ते ब्रह्मकुले धनैः ।
कन्याषोडशके प्राप्ते गीते सति मृगीदृशाम् ॥ २९ ॥

दीपलाजाक्षताद्येषु मङ्गलेष्वाहृतेष्विह[१] ।
वरासनस्थे सुग्रीवे नियोजयति मारुतौ ॥ ३० ॥

गजो गवाक्षो गवयो वृषभो गन्धमादनः ।
नळो मैन्दश्च विविदः सुषेणो जाम्बवानपि ॥ ३१ ॥

अभ्यषिञ्चन् रविसुतं ब्रह्मज्ञैर्ब्राह्मणैर्य्युताः[२] ।
शातकुम्भमयैः कुम्भैर्वसवो वासवं यथा ॥ ३२ ॥

(भा.दी.) **वाद्येति** । वाद्यानि भेर्यादीनि तेषु वाद्यमानेषु सत्सु, ब्रह्मणां ब्राह्मणानां कुलं समूहस्तस्मिन् धनानि सुवर्णादीनि तैः तृप्ते सति, कन्यानां यच्छोडशकं षोडश तस्मिन् प्राप्ते सति, मृगीदृशां स्त्रीणां गीतं गानं तस्मिन् सति, दीपाश्च लाजाश्च अक्षताश्च ते आद्या येषां तानि तथोक्तानि तेषु, मङ्गलेषु मङ्गलद्रव्येषु इह आहृतेषु आनीतेषु सत्सु, सुग्रीवे वरमुत्तमं यदासनं तस्मिन् तिष्ठतीति तथोक्तः स तथा सति, मारुतौ हनुमति नियोजयति, अध्यक्षतया तत्तत्पुरुषान् प्रति कर्तव्यकार्याणां नियोगं कुर्वति सति, गजः गजनामको वानरः गवाक्षः गवयः वृषभः गन्धमादनः नळः मैन्दश्च विविदः सुषेणः जाम्बवानपि इत्येते वानराः ब्रह्म वेदं जानन्तीति ब्रह्मज्ञाः, तैः ब्राह्मणैर्युताः सन्तः, शातकुम्भमयाः स्वर्णमयाः, तैः कुम्भैः कलशैः, वसवः अष्टौ वसवः वासवमिन्द्रं यथा तथा रविसुतं सुग्रीवं अभ्यषिञ्चन् ॥ २९-३२ ॥

(सं.चं.) तृप्ते ब्रह्मकुले धनैः । 'रत्नैर्वस्त्रैश्च भक्षैश्च तोषयित्वा द्विजर्षभान्' (२६.२९) इति च । वने तपोनिरतान् ब्राह्मणान् धनदानेन सन्तर्प्येत्यर्थः । वानरजातीयद्विजर्षभा इत्यप्यहो केचिद् व्याचक्षते । अद्भुतं धर्मशास्त्रकौशलं तेषाम् । कन्याषोडशके प्राप्ते उपलेपनद्रव्यैः सह । 'समालम्भनमादाय रोचनां समनः-

---

१. '–ष्वाहृतेषु च' २. '–ब्राह्मणैर्वृताः'

शिलाम् । आजग्मुस्तत्र मुदिता वराः कन्यास्तु षोडश' (२६.२८) इति च । गजो गवाक्षः । 'गजो गवाक्षो गवयो वृषभो गन्ध-मादनः । मैन्दश्च विविदश्चैव हनुमान् जाम्बवान् नळः । अभ्यषिञ्चन्त सुग्रीवं प्रसन्नेन सुगन्धिना । सलिलेन सहस्राक्षं वसवो वासवं यथा' (२६.३४–५) इति च । वसवो देवा वासवमिन्द्रं यथा । वसव इति देवताविशेषवचनं सामान्यवचनं च । अत्र तु देवतासामान्यवचनम् । 'गवयः शरभः' इति पठन्तस्तात्पर्यनिर्णयविरोधादुपेक्ष्याः ॥२९–३२॥

प्रक्रोशत्स्वथ वीरेषु पारमेष्ठ्यान्युपाहरन्[१] ।
पनसश्छत्रमादत्त[२] नळतारौ च चामरे ॥ ३३ ॥

(भा.दी.) अथ वीरेषु प्रक्रोशत्सु सिंहनादं कुर्वत्सु, पारमेष्ठ्यानि राजविभूतयस्तानि उपाहरन् आनीतवन्तः । तदेव विशदयति– **पनस** इति । पनसः तन्नामकः च्छत्रं श्वेतच्छत्रं तत् आदत्त, नळतारौ (च) चामरे आददाताम् ॥ ३३ ॥

(सं.चं.) प्रक्रोशत्सु नन्दिघोषं कुर्वत्सु । 'प्रचुक्रुशुर्महात्मानो हृष्टास्तत्र सहस्रशः' (२६.३७) इति च । पारमेष्ठ्यानि राजचिह्नानि । परमे सिंहासने तिष्ठन् परमेष्ठी ॥ ३३–५ ॥

रेजे राजाऽभिषेकान्ते[३] सर्वाभरणभूषितः ।
आप्यायितो हनुमता ब्रह्मणेव शतक्रतुः ॥ ३४ ॥

(भा.दी.) **रेज** इति । सर्वाणि यान्याभरणानि तैः भूषितः, ब्रह्मणा चतुर्मुखेन शतक्रतुरिव, हनुमता आप्यायितः क्लेशं परिहृत्य सिद्धिं गमितः, राजा सुग्रीवः अभिषेकस्यान्तोऽवसानं तस्मिन् रेजे ॥ ३४ ॥

रामाज्ञां संस्मरन् प्राज्ञो यौवराज्येऽभ्यषेचयत् ।
अङ्गदं कर्म्म तत् तस्य सर्वे साध्वित्यपूजयन् ॥ ३५ ॥

(भा.दी.) **रामे**ति । श्रीरामस्य या आज्ञा, यौवराज्येऽङ्गदं कुर्वित्याज्ञा, तां संस्मरन् प्राज्ञः सुग्रीवः, अङ्गदं यौवराज्यं श्वस्तनराजत्वं तस्मिन् अभ्यषेचयत् । सर्वे कपयः तस्य सुग्रीवस्य तत् अभिषेचनरूपं कर्म साधु सम्यगिति अपूजयन् ॥ ३५ ॥

---

१. 'पारमेष्ठ्यान्युपानयन्' २. '–श्छत्रमाधत्त' ३. 'राज्याभिषेकान्ते'

निवेद्य रामदेवाय तत् साम्राज्याभिषेचनम् ।
सर्वसम्पत्समृद्धां तां किष्किन्धामविशत्[1] कपिः ॥ ३६ ॥

(भा.दी.) निवेद्येति । कपिः सुग्रीवः तत् सञ्जातं साम्राज्याभिषेचनं श्रीरामदेवाय निवेद्य, सर्वा या सम्पत् तया समृद्धां (तां) किष्किन्धां पुरीं आवसत् ॥ ३६ ॥

(सं.चं.) अभिषेचनवार्तां निवेद्य ॥ ३६ ॥

तारया चारुरूपिण्या रुमया च स्वभार्य्यया ।
रामदासः पुरे रेमे बुद्ध्या मत्या यथा पुमान्[2] ॥ ३७ ॥

(भा.दी.) तारेति । रामदासः सुग्रीवः, चारु मनोहरं यद् रूपं तदस्या अस्तीति तथोक्ता तया तारया वालिभार्यया, स्वभार्यया रुमा रुमानाम्नी तया च, पुमान् बुद्ध्या अन्तःकरणेन मत्या ज्ञानेन च, यद्वा 'बुद्धिर्मेधा स्मृतिः' इत्युक्तेः उभे अन्तःकरणवृत्ती एव, ताभ्यां यथा तथा पुरं किष्किन्धा तस्मिन् रेमे । रमु क्रीडायां लिट् ॥ ३७ ॥

(सं.चं.) वालिना कृतस्य रुमाधर्षणस्य परिहारार्थं तारा स्वेच्छया सुग्रीवभार्या बभूव । अग्रजे मृतेऽग्रजभार्याऽनुजेन वोढव्येति च प्रतनः सम्प्रदायः । अत एव तं देवरमाचक्षते द्वितीयोऽयं वरः प्रजावत्या इति । तदेतदाह– तारया चारुरूपिण्या । बुद्ध्या मत्या च । मनोबुद्धिभ्यां पुमानिव । व्यवसायात्मिका बुद्धिरिव तारा । सङ्कल्पमयी मतिरिव रुमा ॥ ३७ ॥

अनुजग्राह सुग्रीवं रामो हत्वेति वालिनम् ।
रूपान्तरेऽनुरूपं स करिष्यन् वाल्यनुग्रहम् ॥ ३८ ॥

(भा.दी.) श्रीरामेण स्वरूपत[3] उभयोरपि वालिसुग्रीवयोः स्वभावानुकूलोऽनुग्रहः कुतो न कृत इत्यत आह– **अनुजग्राहे**ति । अन्यद्रूपं रूपान्तरं तस्मिन्, अर्जुने इत्यर्थः, अनुरूपं तत्स्वरूपयोग्यं वालिनि योऽनुग्रहस्तं करिष्यन् सः श्रीरामः, वालिनं हत्वा सुग्रीवं इति अनुजग्राह । अनुग्रहं कृतवान् । ग्रह आदाने लिट् ॥३८॥

---

१. **'किष्किन्धामावसत्'** इति वि.ती.पाठः । **'किष्किन्धामाविशत्'** इति च ।

२. **'बुद्ध्या तात्कालिकज्ञानेन, मत्या आगामिविषयज्ञानेन च । 'स्मृतिर्व्यतीतविषया मतिरागामिगोचरा । बुद्धिस्तात्कालिकीं प्रोक्ता मती(?) त्रैकालिकी स्मृता' इति प्रसिद्धेः'** इति का.श्री.

३. **'स्वरूपत उत्तमे वालिनि सुग्रीवादप्यनुग्राह्यत्वसेवनानुकूलोऽनुग्रहः'** ।

(सं.चं.) रूपान्तरे अर्जुनात्मना जातस्य वालिनोऽनुग्रहमनुरूपं कृष्णरूपेण सारथ्यरूपं सख्यरूपं च करिष्यन् ॥ ३८ ॥

माल्यवत्कन्दरे देवो दिव्यकन्दफलाशनः ।
अनुकूलजलाधारे सानन्दं सानुजोऽवसत् ॥ ३९ ॥

(भा.दी.) माल्येति । सानुजः देवः श्रीरामः, अनुकूलः स्नानाद्युपयोगी जलाधारः सरोवरं यस्मिन् स तथा तस्मिन्, माल्यवतः माल्यवत्पर्वतस्य यः कन्दरः गुहाप्रदेशः तस्मिन्, दिव्ये ये कन्दफले मूलफले ते अशनं अन्नं यस्य स तथा सन्, आनन्देन सहितं यथा भवति तथा अवसत् ॥ ३९ ॥

(सं.चं.) माल्यवतः प्रस्रवणापरनाम्नो गिरेः कन्दरे । दिव्यानि रस्यानि कन्दानि, **'ಗಡ್ಡೆ-ಗೆಣಸು'** इति भाषायाम् । फलानि चाश्नन् । अनुकूलस्य जलस्याऽधारे । अनुकूलो जलाधारो यत्र वा । 'जलाशया जलाधारास्ते त्वगाधजला ह्रदाः' इति च ॥ ३९ ॥

आर्त्तवा विविधा भावा मन्दवायुधनं वनम्[१] ।
चन्द्रश्च नाप्यरामस्य रामस्य क्षोभमादधुः ॥ ४० ॥

(भा.दी.) आर्तवा इति । ऋतुषु सञ्जाताः आर्तवाः, विविधाः भावाः पदार्थाः, मन्दवायुरेव धनं यस्मिन् तत्तथोक्तं वनम्, चन्द्रश्च इत्येते, न विद्यते रामा भार्या यस्य स तथोक्तः, तस्य श्रीरामस्य क्षोभो मन्मथनिमित्तमनःखेदः, तं नाऽदधुः न चक्रुः ॥ ४० ॥

(सं.चं.) आर्तवा ऋतुसम्भवा भावाः । कदम्बकुसुमादीनि । लोकदृष्ट्या अरामस्य रामया सीतया विरहितस्य रामस्य ॥ ४० ॥

तथाऽप्यतुल्यवैक्लब्यं[२] दर्शयामास दर्शयन् ।
स्त्रीसङ्गिनाममाङ्गल्यं[३] मोहयन्नसुरानपि ॥ ४१ ॥

---

१. **'मन्दवायुर्घनं वनम्' । मन्दवायुः मृदुवायुः । घनं निबिडं वनं काननं च'** इति का.श्री. ।

२. **'–प्युतुलवैक्लव्यम्'**

३. **'स्त्रीसङ्गिनाममङ्गल्यम्'**

(भा.दी.) तथाऽपीति । तथाऽपि सीतानिमित्तकक्षोभरहितोऽपि, स्त्रीषु सङ्गः आसक्तिरेषामस्तीति तथोक्ताः, तेषां अमाङ्गल्यं स्त्रीवियोगेन अमङ्गलत्वं दर्शयन्, असुरान् जनानपि मोहयन्, श्रीरामः विक्लबस्य भावो वैक्लब्यम्, अतुल्यमसदृशं यद्वैक्लब्यं तत्, अत्यन्तकामपरवशतामित्यर्थः, दर्शयामास ॥ ४१ ॥

(सं.चं.) तथाऽपि दर्शयामास । वैक्लब्यं कामविह्वलता । कामेन चलितचित्तता । स्त्रीसङ्गिनां दशाया अमङ्गलत्वमशुभमयत्वं दर्शयन्, असुरान् मोहयन्नपि ॥ ४१–२ ॥

मुनीनां सनकादीनां विषया हि तृणायिताः ।
यत्पादपांसुसंस्मृत्या[1] सोऽजितः स्त्रीजितः कथम् ॥ ४२ ॥

(भा.दी.) वैक्लब्यं स्वाभाविकं किं न स्यादित्यत आह– **मुनीनामि**ति । सनकादीनां मुनीनाम्, यस्य श्रीरामस्य यौ पादौ तयोर्ये पांसवस्तेषां संस्मृत्या, विषयाः स्रगादयः तृणवदाचरन्तीति तृणायिताः, अजितः कामादिषड्वर्गेणापराजितः सः श्रीरामः कथं स्त्रीजितः स्त्रीकामेन पराजितः? सनकादीनां विषयजयोऽपि यस्य स्मृतिबलात् स चेत् स्त्रीजितः कथं तर्हि सनकादयः षड्वर्गविजयवन्तः स्युरिति भावः ॥ ४२ ॥

सुन्दरे वसतोरस्मिन् कन्दरच्छलमन्दिरे ।
सङ्कथा विविधाश्चाऽसन्[2] रामरामानुजन्मनोः ॥ ४३ ॥

(भा.दी.) सुन्दर इति । सुन्दरे अस्मिन् माल्यवच्छृङ्गसम्बन्धिनि, कन्दर इति गुहेति च्छलं यन्मन्दिरं तस्मिन्, वसतोः रामश्च रामानुजन्मा लक्ष्मणः स च तयोः विविधाः सङ्कथाश्च आसुः । अस भुवि लिट्[3] ॥४३॥

(सं.चं.) सङ्कथा ऋतुसम्बन्धनीः । आसन् । अस भुवि लङ् ॥ ४३ ॥

आनयन्त्यो नवं वारि चलत्पीनपयोधराः ।
समित्कुशादीन् कुर्वाणा वर्षाः पर्य्यचरन् विभुम् ॥ ४४ ॥

(भा.दी.). वर्षर्तुं वर्णयति– **आनयन्त्य** इति । नवं वारि आनयन्त्यः अभिवर्षन्त्य इत्यर्थः । चलन्तः पीनाः पुष्टाः पयोधराः मेघाः यासु तास्तथोक्ताः । स्त्रीपक्षे चलत्पीनस्तनवत्य इत्यर्थः । समिधश्च कुशाश्च ते आदयो

---

१. '–पांसु संस्मृत्या'

२. **'विविधाश्चाऽसुः'** इति इति वि.ती.पाठः ।

३. पाणिनीयास्तु अस्तेर्लिटि **'बभूवुः'** इत्येव रूपं पठन्ति । न **'आसुः'** इति । तेन मतान्तरानुसारेणेदम् । सन्ति हि प्राचां प्रयोगाः आस आसतुः आसुरिति । **'अस गतिदीप्त्यादानेषु'** इत्यस्येदं रूपमित्येके ।

येषां ते तथोक्ताः, तान् कुर्वाणा उत्पादयन्त्य इत्यर्थः । स्त्रीपक्षे तु आनीतान् कुर्वाणा इत्यर्थः । वर्षाः वर्षाकालाख्यस्त्रियः । 'वर्षोऽस्त्री भारताद्यब्दवृष्टिषु प्रावृषि स्त्रियः' इति वैजयन्ती । विभुं श्रीरामं पर्यचरन् असेवन्त । चर गतिभक्षणयोर्लङ् । यथा मुनिस्त्रियो जलसमित्कुशाद्यानयनेन मुनिसेवां कुर्वन्ति । तद्वन्मुनिवेषं श्रीरामं सेवितुमिव स्त्रीधर्मैः परिपूर्णा आसन्निति भावः ॥ ४४ ॥

(सं.चं.) वर्षा इति प्रावृषि बहुवचनान्तं स्त्रीलिङ्गं पदम् । वर्षाः स्त्रियइव विभुं रामं पर्यचरन् । समित्कुशादीनुत्पादयन्त्यो वर्षाः । आनयन्त्यः स्त्रिय इव । चलत्पीनकुचाः स्त्रियइव चलत्पीनमेघा वर्षाः । कलशेनेव वर्षणेन नवं वार्यानयन्त्यः ॥ ४४ ॥

स्वच्छाम्बरा स्मिताब्जास्या विशुद्धाशावती शरत् ।
लक्ष्मणं बोधयामास जानकी मृग्यतामिति ॥ ४५ ॥

(भा.दी.) शरदं वर्णयति– **स्वच्छेति** । स्वच्छमम्बरमाकाशं यस्याः सा तथा । स्त्रीपक्षे स्वच्छवस्त्रवतीत्यर्थः । स्मितं विकसितं यदब्जं तदास्यमिव यस्याः सा तथोक्ता । स्त्रीपक्षे स्मितयुक्ताब्जसदृशास्यवतीत्यर्थः । मेघापगमनेन विशुद्धा आशा दिशोऽस्याः सन्तीति तथोक्ता । अन्यत्र विशुद्धाभिप्रायेत्यर्थः । शरत् शरदृत्वाख्यस्त्री, जानकी मृग्यतां विचार्यताम्, मृग अन्वेषणे लोट्, इति लक्ष्मणं बोधयामास । शरद्धर्मान् दृष्ट्वा सीतान्वेषणसमय आगत इति लक्ष्मणो बुबुध इति भावः ॥ ४५ ॥

(सं.चं.) अथापगता प्रावृट् । आगता च शरदित्याह– स्वच्छाम्बरा । स्वच्छाकाशा शरत् । स्वच्छवसना ललनेव । विकसितमब्जमेवाऽस्यमस्याः । विकसितमब्जमिवाऽस्यमन्यस्याः । विशुद्धा आशाः ककुभः । तद्वती शरत् । अनिषिद्धकामना कामिनीव ॥ ४५ ॥

कर्प्पूरगौरी वितता जगत्यां सत्पद्मषण्डेषु पदं दधाना ।
अवाप लक्ष्मीमथ हंसमाला रामस्य जिष्णोरिव[1] कीर्त्तिमाला ॥ ४६ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्क्षरामायणे
किष्किन्धाकाण्डे पञ्चमः सर्ग्गः ॥

—०—

१. 'रामस्य विष्णोरिव'

(भा.दी.) शरत्कालीनहंसमालां वर्णयति– **कर्पूरे**ति । कर्पूरवद्गौरी श्वेता, कीर्तिरपि श्वेततया कविभिर्वर्ण्यमानत्वात् कर्पूरगौरी, जगत्यां भूमौ वितता व्याप्ता, सन्तो ये पद्मानां षण्डाः समूहाः, तेषु पदं स्थितिः, तत् दधाना कुर्वाणा, कीर्तिमालापक्षे तु सात्विकपुरुषाख्यपद्मसमूहेषु पदं स्थितिं दधाना कुर्वाणा, तैस्सदा स्मर्यमाणत्वादित्यर्थः, हंसपक्षिणां माला पङ्क्तिः । अथ शरत्कालागमनानन्तरं जिष्णोः रावणादिजयशीलवतः श्रीरामस्य कीर्तिरिव माला कीर्तिमाला सा इव लक्ष्मीं कान्त्यतिशयं अवाप ॥ ४६ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां किष्किन्धाकाण्डे पञ्चमः सर्गः ॥

(सं.चं.) अथेन्द्रोपेन्द्रवज्राभ्यामुपसंहरति– कर्पूरगौरी । रामस्य कीर्तिपङ्क्तिरिव शरदि हंसमालाऽपि लक्ष्मीं शोभातिशयमवाप । कीर्तिपक्षे सन्तः सज्जना एवाब्जषण्डाः । हंसपक्षे सन्तो निर्मला अब्जषण्डाः । 'पशूनां समजोऽन्येषां समाजो धीमतां सभा । उद्भिज्जानां तु षण्डोऽस्त्री' इति च ॥ ४६ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां किष्किन्धाकाण्डे पञ्चमसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– १६२९+४६=१६७५]

षष्ठः सर्ग्गः

अथ विज्ञाय सुग्रीवं सङ्क्लिश्य प्राप्तसम्पदम् ।
व्यक्तं स्त्रीभोगसंसक्तं [1]हनुमानिदमब्रवीत् ॥ १ ॥

(भा.दी.) श्रीरामस्य कार्यसाधनकालज्ञो हनुमान् ऐश्वर्यमदेन तत्र प्रमादिनं सुग्रीवं प्रति प्रबोधनं चकारेत्याह– **अथेत्यादिना** । अथ हनुमान् सङ्क्लिश्य पूर्वं बहुकालं क्लेशमनुभूय, प्राप्ता सम्पद् येन स तथा तं सुग्रीवम्, स्त्रीणां यो भोगस्तत्र संसक्तम् व्यक्तं यथा भवति तथा विज्ञाय इदं वचः अब्रवीत् ॥ १ ॥

(सं.चं.) सङ्क्लिश्य आदौ क्लेशमनुभूय ततः प्राप्तसम्पदम् । व्यक्तं स्पष्टम् । निर्विचिकित्सं स्त्रभोग-संसक्तम् ॥ १–२ ॥

प्राप्ता रामप्रसादेन राज्यं कोशः स्त्रियस्त्वया[2] ।
इदानीं भोगसंसक्तो[3] नाथं नो व्यस्मरः कथम् ॥ २ ॥

(भा.दी.) **प्राप्ता** इति । हे सुग्रीव, त्वया श्रीरामस्य प्रसादोऽनुग्रहस्तेन, राज्यं च, कोशोऽर्थौघः स च, स्त्रियश्च ताः प्राप्ताः लब्धाः । इदानीं भोगसंसक्तः त्वं नः नाथं श्रीरामं कथं व्यस्मरः? तत्कार्यसाधने विस्मृतिं कथं प्राप्तोऽसीत्यर्थः । स्मृ आध्याने लङ् ॥ २ ॥

सर्प्पवद् दर्प्पवन्तो ये विस्मरन्त्युपकारकम् ।
त्वादृशा मादृशैस्तेषां राजन् कार्य्यं हि शिक्षणम् ॥ ३ ॥

१.**'हनूमानिद–'** २. **'राज्यकोशस्त्रियस्त्वया'** इति वि.ती.पाठः। **'राज्यकोशाः स्त्रियस्त्वया'** इति क्वचित्।

२.**'भोगसक्तस्त्वं नाथम्'**

(भा.दी.) सर्पवदिति । दर्पो गर्व एषामस्तीति तथा त्वादृशा ये पुरुषाः उपकारकं उपकारिणं पुरुषं सर्पवत् क्षुद्रसर्पवत् विस्मरन्ति, हे राजन् सुग्रीव, मादृशैः पुरुषैः तेषां शिक्षणं कार्यं हि ॥ ३ ॥

(सं.चं.) सर्पवदुपकारिणमेव ये दशन्ति । दर्पवन्तो दृप्ता वृथा गर्वोपेताः ॥ ३ ॥

रामो नाम जगन्नाथस्तत्कार्य्यं नो विशेषतः ।
स्वकीयमेव कर्त्तव्यं तस्मात् प्रेषय वानरान् ॥ ४ ॥

(भा.दी.) राम इति । श्रीरामो नाम श्रीराम इति प्रसिद्धः जगन्नाथः सर्वजगत्स्वामी हरिः, तस्य जगन्नाथस्य श्रीरामस्य कार्यं नः अस्माकं विशेषतः स्वकीयं कर्तव्यमेव यस्मात् तस्मात् वानरान् वानरमेळनार्थं प्रेषय । इष गतौ लोट् ॥ ४ ॥

(सं.चं.) तस्मात् सीतान्वेषणार्थं वानरान् प्रेषय । वानरानानेतुं वा । इष्यतेः, एषतेः, प्रेषतेर्वा गत्यर्थस्य णिचि रूपं प्रेषयेति ॥ ४ ॥

हनुमद्वाक्यमाकर्ण्य हनुमन्तं प्रपूज्य सः[१] ।
आहूय नीलप्रभृतीन् सुग्रीवो वाक्यमब्रवीत् ॥ ५ ॥

(भा.दी.) हनुमदिति । सः सुग्रीवः हनुमतः वाक्यं वचस्तत् आकर्ण्य, हनुमन्तं प्रपूज्य, नीलः प्रभृतिरादिर्येषां ते तथा तान् आहूय वाक्यं अब्रवीत् ॥ ५ ॥

(सं.चं.) प्रपूज्य, काले प्रबोधनेन प्रहृष्टः सन् पूजयामासेत्यर्थः ॥ ५ ॥

आनीयन्तां त्वया नील सर्ववानरयूथपाः[२] ।
पूज्यान् वानरवृद्धांस्त्वं साङ्गदः समुपानय ॥ ६ ॥

(भा.दी.) आनीयन्तामिति । हे नील त्वया, सर्ववानरेषु यूथपाः श्रेष्ठाः आनीयन्ताम् । दूतान् प्रेषयित्वा आकार्यन्तामित्यर्थः । त्वं पूज्यान् वानरवृद्धान् साङ्गदः अङ्गदेन सहितः सन् समुपानय आकारय ॥ ६ ॥

(सं.चं.) नील सेनापते, यूथं वृन्दं पान्तीति यूथपाः सयूथा आनीयन्ताम् । तत्रापि पूज्यान् वानरवृद्धान् साङ्गदस्त्वं समुपानय । स्वतः समाहूयाऽनय ॥ ६ ॥

---

१. **'हनुमन्तं प्रयुज्य सः'** (?)

२. **'सर्वे वानरयूथपाः'** । **'सर्वे वानरयूथपाः सेनानायकाः'** इति का.श्री. ।

पौर्णमास्यामिहाऽयातु सेना सेनापतेऽखिला ।
प्राक् सप्तरात्रान्नागच्छन्[1] वानरो दण्ड्य एव मे ॥ ७ ॥

(भा.दी.) पौर्णेति । हे सेनापते नील, अखिला सेना पौर्णमास्यां इह आयातु । सप्तानां रात्रीणां समाहारः सप्तरात्रं तस्मात् प्राक् नागच्छन् नसमासोऽयम्, अनागत इत्यर्थः, वानरः मे दण्ड्य एव ॥ ७ ॥

(सं.चं.) कार्तिक्यां पौर्णास्याम् । प्राक् सप्तरात्रात् । सप्त च ता रात्रयश्च सप्तरात्रः । 'रात्राह्नाहाः पुंसि' (अ.सू.२.४.२९) । 'त्रिपञ्चरात्रादूर्ध्वं यः प्राप्नुयान्नेह वानरः । तस्य प्राणान्तिको दण्डो नात्र कार्या विचारणा' (२९.३२) इति च । पञ्चदशदिनादूर्ध्वमिति स्थूलं व्याख्यानम् ॥ ७ ॥

सुग्रीवेणेति [2]सन्दिष्टान् नीलादीन् वानरोत्तमान् ।
प्रेषयामास हनुमान् राजाऽन्तःपुरमाविशत् ॥ ८ ॥

(भा.दी.) सुग्रीवेणेति । हनुमान् सुग्रीवेण इति सन्दिष्टान् नीलादीन् वानरोत्तमान् प्रेषयामास । इष गतौ लिट् । राजा सुग्रीवः अन्तःपुरमवरोधस्तत् आविशत् ॥ ८ ॥

(सं.चं.) राजा सुग्रीवः ॥ ८–९ ॥

प्राप्तां शरदमालक्ष्य[3] रामो लक्ष्मणमब्रवीत् ।
याहि लक्ष्मण किष्किन्धां ब्रूहि तं वानराधिपम् ॥ ९ ॥

कार्य्यं नो विस्मरसि चेत् कार्य्यं स्वं प्राप्य[4] वानर ।
वालिघ्नमार्ग्गणेनैव वालिमार्ग्गं व्रजेरिति ॥ १० ॥

(भा.दी.) प्राप्तामिति । श्रीरामः शरत् शरदृतुस्तां प्राप्तां आलक्ष्य, हे लक्ष्मण, किष्किन्धां प्रति याहि । वानराधिपं तं सुग्रीवं प्रति, हे वानर सुग्रीव, त्वं स्वकीयं कार्यं प्रयोजनं तत् सम्प्राप्य चेत् नः अस्माकं कार्यं विस्मरसि न स्मरसि, तर्हि वालिनं हतवानिति वालिघ्नः स चासौ मार्गणः शरश्च तेन, वालिनो मार्गो वालिमार्गस्तम्, मरणमित्यर्थः, व्रजेः, इति ब्रूहि, इति लक्ष्मणमब्रवीत् ॥ ९-१० ॥

---

१. '–रात्रान्नाऽगच्छेद् वानरो –'   २. 'सन्दिष्टे नीला–'   ३. 'शरदमालोक्य'

४. 'कार्यं सम्प्राप्य' इति वि.ती.पाठः स्यात् । 'स्वं स्वं स्वकीयं कार्यं कपिराज्यप्राप्तिलक्षणं प्राप्य' इति का.श्री. ।

(सं.चं.) स्वं कार्यं सम्पाद्य नः कार्यं विस्मरसि चेत् । वालिघ्नेन मार्गणेनैव । 'न स सङ्कुचितः पन्था येन वाली हतो गतः । समये तिष्ठ सुग्रीव मा वालिपथमन्वगाः' (३०.८८) इति च ॥ १०–१३ ॥

रामस्य तद्वचः श्रुत्वा रामं रामानुजोऽभ्यधात्[१] ।
आर्य्याधुनाऽतिमर्य्यादं निहनिष्यामि तं कपिम् ॥ ११ ॥

(भा.दी.) रामस्येति । रामानुजः लक्ष्मणः श्रीरामस्य तत् वचः श्रुत्वा, हे आर्य स्वामिन्, अतिक्रान्ता मर्यादा यस्य स तथा तं सुग्रीवं अधुना निहनिष्यामि, हन हिंसागत्योर्लृट्, इति श्रीरामं प्रति अभ्यधात् उवाच ॥

(सं.चं.) मर्यादामतिक्रान्तः अतिमर्यादः ॥ ११–१३ ॥

अतिसक्ते दुराचारे कृतघ्ने[२] रविजे हते ।
विचिनोत्वङ्गदो राजा सीतां हनुमता सह ॥ १२ ॥

(भा.दी.) अतीति । अत्यन्तं सक्तः अतिसक्तस्तस्मिन्, ज्येष्ठभार्याहरणेन दुष्ट आचारो यस्य स तथा तस्मिन्, त्वत्कृतोपकारविस्मरणेन कृतघ्ने, रविजे सुग्रीवे मया हते सति, राजा अङ्गदः हनुमता सह सीतां विचिनोतु मार्गयतु । चिञ् चयने लोट् ॥ ११ ॥

अथवा वानरैः किं ते निजकार्य्यस्य साधने ।
त्वद्भ्रूभङ्गेन नियतं[३] ननु नाथ जगत्त्रयम् ॥ १३ ॥

(भा.दी.) अथेति । अथवा हे नाथ, निजं यत्कार्यं तस्य साधनं सिद्धिस्तस्मिन् ते तव वानरैः किं प्रयोजनम्? यस्मात् जगत्त्रयं तव या भ्रूस्तस्याः भङ्गः सविलासं चलनं तेन नियतं ननु नियमितं ननु ॥ १३ ॥

इति[४] ब्रुवाणं तं दृष्ट्वा क्रुद्धं कोदण्डधारिणम्[५] ।
मा तात साहसं[६] कार्षीरिति रामोऽब्रवीद्धसन् ॥ १४ ॥

---

१. 'रामानुजोऽब्रवीत्'
२. '–चारे वालिघ्ने'
३. '–भङ्गेन हि नतम्' इति, '–भङ्गेण नियतम्' इति च ।
४. 'एवं ब्रुवाणम्'
५. 'कोदण्डपाणिनम्' इति भ्रान्तः पाठः ।
६. 'साहसं सहसा अविचार्य क्रियमाणं कर्म' इति का.श्री. ।

(भा.दी.) इतीति । इति ब्रुवाणं वदन्तं क्रुद्धं कोदण्डधारिणं तं लक्ष्मणं दृष्ट्वा, हे तात, साहसं हननेऽविचारितयत्नः तत् मा कार्षीः मा कुरु । तत्स्वभावं सम्यगविचार्य यत्किञ्चिच्छिक्षणं त्वया न कार्यमित्यर्थः । श्रीरामः हसन् इति अब्रवीत् ॥ १४ ॥

(सं.चं.) कोदण्डधारिणं क्रुद्धं दृष्ट्वा । साहसमविमृश्यकारिता । 'ದುಡುಕು' इति भाषायाम् ॥ १४ ॥

गच्छन् पुरीं स सौमित्रिः स्मरन् सुग्रीवमन्दताम् ।
क्रुद्धः शिलाश्च सालांश्च पादपातैरचूर्णयत्[1] ॥ १५ ॥

(भा.दी.) गच्छन्निति । पुरीं किष्किन्धां गच्छन्, सुग्रीवस्य मन्दतां मुग्धतां स्मरन्, सः सौमित्रिः क्रुद्धः सन्, शिलाश्च सालांश्च सालवृक्षांश्च पादस्य पातास्ताडनानि[2] तैः, अचूर्णयत् चूर्णनं कृतवान् । चूर्ण सङ्कोचने लङ् ॥ १५ ॥

(सं.चं.) मन्दतां मन्दगामिताम् । यद्धविष्योऽलसो मन्दः । मार्गमध्यगतान् सालान् वृक्षांश्च । वृक्षसामान्यवचनोऽयम् । 'सालो मत्स्ये वृक्षभेदे प्राकारद्रुममात्रयोः' इति यादवप्रकाशः ॥ १५ ॥

किष्किन्धां प्रविशन्तं तं कोपेनान्तकसन्निभम् ।
गजलक्षबलाः प्रेक्ष्य कपयोऽथ पराद्रवन् ॥ १६ ॥

(भा.दी.) किष्किन्धामिति । अथ किष्किन्धां प्रविशन्तम्, कोपः क्रोधस्तेन अन्तकस्य यमस्य सन्निभं समानम्, तं लक्ष्मणं प्रेक्ष्य, गजानां यल्लक्षं तस्य बलमिव बलं येषां ते तथोक्ताः कपयः पराद्रवन् भयात् पलायनं चक्रुः । द्रु गतौ लङ् ॥ १६ ॥

(सं.चं.) अथ सामस्त्येन पराद्रवन् । अथ लक्ष्मणदर्शनसमनन्तरमेव वा ॥ १६ ॥

सुरतोत्सवसंसक्तः कपिभिश्च निवेदितः ।
राघवप्रतिघं घोरं सुग्रीवो न विवेद तम् ॥ १७ ॥

(भा.दी.) सुरतेति । सुरतलक्षणः स्त्रीभिः क्रीडालक्षणो य उत्सवस्तत्र संसक्तः आसक्तः, कपिभिः 'लक्ष्मणः क्रुद्धः सन् आयाति' इति निवेदितश्च विज्ञापितोऽपि सुग्रीवः, घोरं राघवस्य श्रीरामस्य प्रतिघं कोपम्, 'प्रतिघौ

१. 'पादघातैरचूर्णयत्'
२. 'पादस्य घातास्ताडनानि'

रुट्प्रतीघातौ' इति वैजयन्ती, न विवेद न विज्ञातवान्। विद ज्ञाने लिट्। कोपकारणं स्वकृतमपराधं किमिति चिन्तयन्नपि न विवेदेत्यर्थः ॥ १७ ॥

(सं.चं.) कपिभिर्निवेदितोऽपि राघवस्य रामस्य लक्ष्मणस्य वा घोरं प्रतिघं रोषं न विवेद। रोषस्येयत्तां न विवेद। रोषकारणं च ॥ १७ ॥

लक्ष्मणप्रेषितो भीतः प्राप्यान्तःपुरमङ्गदः।
तां वार्त्तामब्रवीत् पित्रे सोऽपि त्रस्तोऽन्वचिन्तयत् ॥ १८ ॥

(भा.दी.) लक्ष्मणेति। लक्ष्मणेन प्रेषितः, आगतं मां सुग्रीवं प्रति विज्ञापयेति प्रेषितः, भीतः अङ्गदः, अन्तःपुरमवरोधस्तत् प्राप्य, पित्रे सुग्रीवाय तां वार्तां अब्रवीत्। सोऽपि त्रस्तः सन् अन्वचिन्तयत् ॥ १८ ॥

(सं.चं.) पितेव पिता। पित्रे पितृतुल्याय पितृव्याय सुग्रीवाय। सोऽपि सुग्रीवोऽपि ॥ १८–९ ॥

रामं प्रति मया किञ्चिन्न दुरुक्तं न दुष्कृतम्।
तथाऽपि लक्ष्मणः क्रुद्धो विपरीतो हि मे विधिः ॥ १९ ॥

(भा.दी.) चिन्तामेव दर्शयति– **राममि**ति। मया श्रीरामं प्रति किञ्चित् दुष्टं च तदुक्तं च, दुष्टवचनमित्यर्थः, नोक्तम्। दुष्टं च तत् कृतं च दुष्कृतम्, दुष्कर्मेत्यर्थः, श्रीरामं प्रति किञ्चित् न कृतम्। तथाऽपि यत्किञ्चदपराधाकरणेऽपि लक्ष्मणः क्रुद्धः, तस्मान्मे विधिरदृष्टं विपरीतो हि ॥ १९ ॥

सुग्रीवमिति सन्तप्तं धीरो मारुतिरब्रवीत्।
अशुश्रूषापराधी त्वं लक्ष्मणं क्षमयेरिति ॥ २० ॥

(भा.दी.) सुग्रीवमिति। इति सन्तप्तं सुग्रीवं प्रति धीरः मारुतिः, हे सुग्रीव, त्वं अशुश्रूषैवापराधः सोऽस्यास्तीति तथोक्तः, तस्मात् लक्ष्मणं क्षमयेः, क्षान्तं कुरु। क्षमूष् सहने लिङ्। इति अब्रवीत् ॥ २० ॥

(सं.चं.) रामकार्यस्य कालेऽकरणादशुश्रूषया त्वमपराधी। अशुश्रूषैव वाऽपराधः। तदर्थं लक्ष्मणं क्षमयेः। क्षमु सहने। क्षमूष् सहने वा ॥ २० ॥

दौवारिकाननादृत्य प्राविशल्लक्ष्मणः पुरीम् ।
मणिहेममयीं दिव्यां सप्तवप्रामवैक्षत[1] ॥ २१ ॥

(भा.दी.) दौवारिकानिति । लक्ष्मणः द्वारेषु नियुक्ताः दौवारिकास्तान्, द्वारपालानित्यर्थः, अनादृत्य पुरीं प्राविशत् । मणयश्च हेमानि च तैर्निर्मिता मणिहेममयी ताम्, दिव्याम्, सप्त वप्राणि प्राकारा यस्याः सा तथा तां अवैक्षत ॥ २१ ॥

(सं.चं.) प्रविश्य सप्तभिर्वप्रैः आवरणैर्गुप्तां पुरीमवैक्षत ॥ २१ ॥

वानरीवानरगणैर्देवदेवीसमैर्य्युताम्[2] ।
सर्वाभरणसम्पन्नैः सर्वैः सर्वाङ्गसुन्दरैः ॥ २२ ॥

(भा.दी.) वानरीति । देवाश्च देव्यश्च ताभिः समैः, सर्वाणि यान्याभरणानि तैः सम्पन्नास्तैः, सर्वाणि यान्यङ्गानि अवयवाः, तैः सुन्दरैः, सर्वैः वानर्यश्च वानराश्च तेषां गणाः समूहास्तैः युतां पुरीं अवैक्षतेति सम्बन्धः ॥ २२ ॥

(सं.चं.) देवतास्त्रीसमैर्वानरीगणैः । देवसमैश्च वानरगणैः युतां पुरीमवैक्षत ॥ २२–३ ॥

आरामगृहवापीभिः प्रासादायतनादिभिः ।
विश्वकर्म्मकृतैर्विश्वैर्विशेषैरुपशोभिताम् ॥ २३ ॥

(भा.दी.) आरामेति । आरामा उपवनानि ते च, गृहाणि च, वाप्यश्च ताभिः, प्रासादा राजहर्म्याणि ते च, आयतनानि देवस्थानानि तानि च, तानि आदयो येषां ते तथोक्तास्तैः । 'आयतनं देवानामन्येषां धनवतां हर्म्यम्' इति हलः । विश्वकर्मणा कृतास्तैः, विश्वैः समस्तैर्विशेषैः पदार्थविशेषैः उपशोभितां पुरीं अवैक्षत ॥ २३ ॥

मद्ध्ये कपीन्द्रगेहानां सौमित्रिश्चित्रमैक्षत ।
महेन्द्रमन्दिरमिव महेन्द्रसुतमन्दिरम् ॥ २४ ॥

---

१. '**–वप्रामथैक्षत**'

२. '**–समैवृताम्**' इति, '**–गणैर्देवीदेवसमैर्युताम्**' इति च ।

(भा.दी.) मध्य इति । सौमित्रिः लक्ष्मणः, कपीन्द्राणां नीलादीनां यानि गेहानि तेषां मध्यं मध्यप्रदेशः, तस्मिन् महेन्द्रमन्दिरमिव इन्द्रभवनमिव चित्रम्, महेन्द्रसुतस्य वालिनो यन्मन्दिरं तत् ऐक्षत ॥ २४ ॥

(सं.चं.) महेन्द्रसुतस्य वालिनो मन्दिरम् । सम्प्रति सुग्रीवेणाधिष्ठितम् ॥ २४ ॥

[१]तारारुमाभ्यामाश्लिष्टं दिव्ये सिंहासने[२] स्थितम् ।
रविजं रविसङ्काशं तत्र प्रैक्षत लक्ष्मणः ॥ २५ ॥

(भा.दी.) तारेति । लक्ष्मणः तत्र मन्दिरे, दिव्ये सिंहासनं सिंहाकारमासनं तस्मिन् स्थितम्, तारा च रुमा च ताभ्यां संश्लिष्टं सहितम्, रविवत्सङ्काशः प्रकाशो यस्य स तथा तं रविजं सुग्रीवं प्रैक्षत ॥ २५ ॥

(सं.चं.) संश्लिष्टमाश्लिष्टम् । सङ्काशः समानः । रवेः समानो रविसङ्काशः ॥ २५ ॥

दोर्दण्डार्पितकोदण्डो दष्टोष्ठो भ्रुकुटीकटुः[३] ।
रक्ताक्षस्त्र्यक्षवत् क्रुद्धः सोऽदर्शि रविसूनुना ॥ २६ ॥

(भा.दी.) दोरिति । रविसूनुना, दोषो हस्तस्य यो दण्डस्तत्रार्पितः स्थापितः कोदण्डो येन स तथोक्तः, संरम्भात् दष्टो य ओष्ठः स च, भ्रुकुटी च ताभ्यां कटुः कठोरः, द्रष्टुमशक्य इत्यर्थः, रक्ते अक्षिणी यस्य स तथा, त्रीणि अक्षीणि लोचनानि यस्य स तथा तद्वत्, रुद्रवदित्यर्थः, क्रुद्धः सः लक्ष्मणः अदर्शि । दृशिर् प्रेक्षणे लुङ् ॥ २६ ॥

(सं.चं.) दोरेव दण्डः । दष्टोष्ठः । 'ओत्वोष्ठयोः समासे वा पररूपं वक्तव्यम्' इति वार्त्तिकम् (अ.सू.६.१.९४) इति । क्रोधेनाधरोष्ठं दष्ट्वा स्थितः । बद्धया भ्रुकुट्या कटुः क्रूर-दर्शनः । भ्रकुटिः, भ्रुकुटिः, भ्रूकुटिः, भ्रकुटी, भ्रुकुटी, भ्रूकुटी, भृकुटिः, भृकुटी चेत्यष्टौ रूपाणि । '**ಗಂಟಿಕ್ಕಿದ ಹುಬ್ಬು**' इति भाषायाम् । संहारार्थं क्रुद्धत्र्यक्षवददर्शि ॥ २६–७ ॥

आसनात् तूर्णमुत्पत्य[४] पत्नीभ्यां सहितः कपिः ।
प्राञ्जलिर्भयसम्भ्रान्तः स्वगृहं[५] समवेशयत् ॥ २७ ॥

१. '**–रुमाभ्यां संश्लिष्टम्**' इति वि.ती.पाठः । २. '**दिव्यसिंहासने**' इति, '**वरसिंहासने**' इति च क्वचित् ।

३. '**दष्टोष्ठ(दष्टौष्ठ)भ्रुकुटीकटुः**' इति वि.ती.पाठः । '**भृकुटीकटुः**' इति च क्वचित् । '**भ्रु (भृ)कुट्या भ्रुवो वक्रतया कटुः क्रूरः**' इति का.श्री. ।

४. '**तूर्णमुत्थाय**' ५. '**–सम्भ्रान्तः स्वगेहम्**' इति, '**–सम्भ्रान्तस्तं गृहम्**' इति च ।

(भा.दी.) आसनादिति । पत्नीभ्यां सहितः कपिः, आसनं सिंहासनं तस्मात् तूर्णं यथा भवति तथा उत्पत्य, भयसम्भ्रान्तः भयेनाऽकुलः सन्, प्राञ्जलिः सन्, स्वगृहं मन्दिरं तत् समवेशयत् प्रवेशयामास ॥ २७ ॥

असहिष्णुः कृतघ्नस्य दर्प्पं तस्य श्रियोन्नतम् ।
क्रोधरूक्षाक्षरां प्रोचे लक्ष्मणो गां कपीश्वरम्[१] ॥ २८ ॥

(भा.दी.) असहीति । कृतघ्नस्य तस्य सुग्रीवस्य, श्रिया सम्पदा उन्नतः अभिवृद्धः, तं दर्पं असहिष्णुः असहनशीलः लक्ष्मणः, कपीश्वरं सुग्रीवं प्रति, क्रोधेन रूक्षाणि क्रूराणि अक्षराणि यस्यां सा तथा तां गां वाचं प्रोचे ॥ २८ ॥

(सं.चं.) राज्यश्रिया उन्नतमुत्सिक्तं दर्पमसहमानः गां वाचं प्रोचे । ब्रूञ् व्यक्तायां वाचि । आर्धधातुके वचिरादेशः–'ब्रुवो वचिः' (अ.सू.२.४.५३) इति ॥ २८–९ ॥

नन्वग्निसाक्षिकं[२] प्रोक्तस्त्वया वानर राघवः ।
मह्यं राज्ये त्वया दत्ते सीतां विचिनुयामिति ॥ २९ ॥

(भा.दी.) नन्विति । हे वानर सुग्रीव, त्वया मह्यं यद्राज्यं तस्मिन् दत्ते सति सीतां विचिनुयां अन्वेषयामि इति श्रीराघवः, अग्निः साक्षी यथा भवति तथा अग्निसाक्षिकं त्वया प्रोक्तः ननु ॥ २९ ॥

मदान्धः प्रमदासक्तः प्रमादं प्राप्तवानसि ।
रामकार्य्ये सुरैः पूज्ये यथा प्राकृतपूरुषः ॥ ३० ॥

(भा.दी.) मदेति । मदेन ऐश्वर्यमदेनान्ध इवान्धः, विवेकरहित इत्यर्थः, प्रमदासु आसक्तः त्वं सुरैः पूज्ये श्रीरामस्य यत्कार्यं सीतान्वेषणादि तस्मिन्, प्राकृतः पुरुषः पामरपुरुषः यथा तथा प्रमादोऽनवधानता तं प्राप्तवान् असि ॥ ३० ॥

(सं.चं.) श्रीमदान्धः । सत्यपि चक्षुषि नेक्षसे । प्रमदासक्तिर्हि प्रमादजननी । स्वधुरायां भरविधुरता प्रमादः । रामकार्ये प्रमादं प्राप्तवानसि । प्राकृतोऽज्ञश्चाविवेकी च ॥ ३० ॥

---

१. 'हरीश्वरम्' २. **'अग्निः साक्षी प्रत्यक्षेण द्रष्टा यस्मिन् कर्मणि तदग्निसाक्षिकं यथा तथा प्रोक्तः'** इति का.श्री. ।

अतीता बहवो मासा राज्यं प्राप्तवति त्वयि ।
सीता नाद्यापि विचिता सख्यं खण्डितवानसि ॥ ३१ ॥

(भा.दी.) अतीति । यस्मात् त्वयि राज्यं तत् प्राप्तवति सति बहवः मासाः अतीताः । अद्यापि सीता न विचिता न विचारिता । सख्यं सखित्वं तत् खण्डितवान् असि ॥ ३१ ॥

(सं.चं.) न विचिता नान्विष्टा । खण्डितवान् दूषितवानथ च नाशितवानसि ॥ ३१–२ ॥

देवा यद्दास्यमिच्छन्ति ब्रह्मरुद्रेन्द्रपूर्वकाः ।
देवदेवस्य तस्यास्य[१] किं सख्यं कपिना त्वया ॥ ३२ ॥

(भा.दी.) देवा इति । ब्रह्मा च रुद्रश्च इन्द्रश्च ते पूर्वे येषां ते तथोक्ताः देवाः, यस्य श्रीरामस्य दास्यं दासत्वं तत् इच्छन्ति । इषु इच्छायां लट् । देवदेवस्य, तस्य ब्रह्मादिभिः सेव्यस्य, अस्य श्रीरामस्य कपिना त्वया सख्यं किं किम्प्रयोजनम्? न किमपि प्रयोजनवदित्यर्थः ॥ ३२ ॥

ऋतेऽपि तव साहाय्यं सीतां प्राप्स्यति राघवः ।
ऋतेऽपि पल्वलपयः परिपूर्ण्णो महार्ण्णवः ॥ ३३ ॥

(भा.दी.) ऋत इति । श्रीराघवः तव साहाय्यं सहायत्वं तत् ऋतेऽपि विनाऽपि सीतां प्राप्स्यति । आप्लृ व्याप्तौ लृट् । तत्र दृष्टान्तमाह– **ऋत** इति । महार्णवः पल्वलपयः क्षुद्रसरसः पयः (तत्) ऋतेऽपि परिपूर्णो हि ॥ ३३ ॥

(सं.चं.) क्षुद्रं सरः पल्वलः पल्वलं वा ॥ ३३–४ ॥

चराचरगुरौ वक्रं यदेतद्धृदयं तव ।
अनार्य्य तद् विदार्य्यायं शरः पास्यति शोणितम् ॥ ३४ ॥

(भा.दी.) चरेति । हे अनार्य अधर्मचर, चराश्च अचराश्च तेषां गुरौ श्रीरामे (वक्रं) कुटिलम्, कुटिलमनस्कमित्यर्थः, यदेतत् तव हृदयं हृदयप्रदेशः, तत् विदार्य अयं मत्करस्थः शरः शोणितं रक्तं तत् पास्यति ।

१. 'तस्याऽप्य किम्'

पा पाने लृट् । यद्वा यस्मात् एतत् हृदयं मनः चराचरगुरौ वक्रं कुटिलं तत् तस्मात् अयं शरः त्वां विदार्य शोणितं पास्यतीति वा ॥ ३४ ॥

एवं निर्भत्सयत्युच्चैः[1] कपीन्द्रं राघवानुजे ।
वानरेषु विषण्णेषु तारा सौमित्रिमब्रवीत् ॥ ३५ ॥

(भा.दी.) एवमिति । राघवानुजे लक्ष्मणे, कपीन्द्रं उच्चैः सम्यक् एवं निर्भत्सयति सति, वानरेषु विषण्णेषु सत्सु, प्रत्युत्तरं वक्तुं भीतेषु सत्सु, तारा सौमित्रिं अब्रवीत् ॥ ३५ ॥

(सं.चं.) किं कार्यमित्यप्रतिभतया विषण्णेषु दुःखेनावनतशिरस्सु वानरेषु ॥ ३५ ॥

नरदेवकुमार त्वं धार्म्मिकः[2] क्षन्तुमर्हसि ।
चिरं क्लिष्टः सुखं प्राप्य सत्यं सक्तः[3] कपीश्वरः ॥ ३६ ॥

(भा.दी.) नरेति । नरदेवस्य दशरथस्य कुमार पुत्र, राजर्षिवंशोत्पन्नत्वादेव धार्मिकः त्वं क्षन्तुं क्षमां कर्तुं अर्हसि । अर्ह पूजायां लट् । याथातथ्येन पण्डितमिति न्यायेन लक्ष्मणमनुनयति– चिरमिति । चिरं राज्यादित्यागेन क्लिष्टः क्लेशितः कपीश्वरः सुखं तत् प्राप्य सक्तः आसक्तः, सत्यं यथार्थम् ॥ ३६ ॥

(सं.चं.) चिरं क्लिष्टः । अत इदानीं सुखं प्राप्य भोगे सक्तः इत्येतत् सत्यं न मृषा । अङ्गीक्रियते त्वदुक्तम् ॥ ३६–७ ॥

किन्तु कार्य्याणि रामस्य न विस्मरति जात्वपि[4] ।
वानरान् मुक्तवान् क्षिप्रमानेतुं सर्ववानरान् ॥ ३७ ॥

(भा.दी.) कृतघ्नता चास्मिन्नास्तीत्याह– **किन्त्विति** । किन्तु श्रीरामस्य यानि कार्याणि तानि जात्वपि कदाचिदपि न विस्मरति । सर्वे ये वानरास्तान् क्षिप्रं आनेतुं वानरान् नीलादीन् मुक्तवान् प्रेषितवान् ॥३७॥

रावणो राममहिषीं[5] बहुकोटिबलोऽहरत् ।
तद्वधार्थं चमूर्नेया वालिनोक्तं श्रुतं मया ॥ ३८ ॥

---

१. 'निर्भर्त्सयत्युच्चैः' २. 'धार्मिक क्षन्तु–' ३.'प्राप्य सुसंयुक्तः' (?)
४. 'जात्विति ।' ५. 'रामरमणीं बहु–'

(भा.दी.) रावण इति । बह्व्यो याः कोटयः बहुकोटयः, बहुकोटिसङ्ख्याकानि बलानि सैन्यानि यस्य स तथोक्तः रावणः, राममहिषीं सीतां अहरत् इति वालिना उक्तं वचः मया श्रुतम् । तद्वधार्थं चमूः बह्वी तावती कपिसेना नेया । अतस्तन्मेळनार्थं वानरान् प्रेषयामासेति भावः ॥ ३८ ॥

(सं.चं.) बहुकोटिबलः । 'शतकोटिसहस्राणि लङ्कायां किल राक्षसाः' (३५.१५) इत्यादि च । तद्वधार्थं तादृशी बलिष्ठा बहुकोटिमिता चमूः सेना नेया । चमूरिति सेनाविशेषवचनः क्वचन । अत्र तु सामान्य-वचनः । तदेतद् वालिना पुरोक्तं मया श्रुतम् । 'एवमाख्यातवान् वाली स ह्यभिज्ञो हरीश्वरः' (३५.१८) इति च ॥ ३८ ॥

ज्येष्ठवत् पूज्य एवाङ्ग सुग्रीवोऽस्य सखा तव[१] ।
सख्यं कथं खण्डनीयं हनूमति हि जीवति ॥ ३९ ॥

(भा.दी.) ज्येष्ठवदिति । हे अङ्ग प्रिय लक्ष्मण, तव अस्य श्रीरामस्य सखा सुग्रीवः ज्येष्ठवत् श्रीरामवत् पूज्य एव । हनूमति जीवति सति सख्यं श्रीरामेण सख्यं सखित्वं तत् कथं खण्डनीयं खण्डितुमर्हम्? न कथमपीत्यर्थः ॥ ३९ ॥

(सं.चं.) ज्येष्ठोऽग्रजो रामस्तद्वत् अस्य ज्येष्ठस्य रामस्य सखा सुग्रीवोऽपि तव पूज्य एव । ज्येष्ठवज्ज्येष्ठ-सहायं च हि कनिष्ठाः पूजयेयुरज्येष्ठमपि । यथा गुहं भरतः । ननु भग्नं ज्येष्ठसख्यम्? नेत्याह– सख्यं कथं खण्डनीयम् ॥ ३९ ॥

रामानुज प्रसीद त्वं पश्य दासीस्तवात्र नः ।
पौरस्त्यं[२] भयमाशङ्क्य दीना बाष्पमुखीः स्त्रियः ॥ ४० ॥

(भा.दी.) रामेति । हे रामानुज, त्वं प्रसीद प्रसन्नो भव । प्रपूर्वः षदॢ् विशरणगत्यवसादनेषु लोट् । पुरस्तादुत्तरतो भवं पौरस्त्यं भविष्यदित्यर्थः, भयं त्वत्क्रोधनिमित्तकभयं तत् । पौलस्त्यभयमिति क्वचित् पाठः । श्रीरामसाहाय्येन कपीनां रावणनिमित्तकभयमित्यर्थः । आशङ्क्य दीनाः दुःखोपाताः अत एव बाष्पयुक्तं मुखमासामस्तीति तथोक्ताः (तव दासीः) स्त्रियः (नः अत्र) पश्य ॥ ४० ॥

(सं.चं.) सम्प्राप्ते कपिराक्षससङ्ग्रामे पुरस्ताद् भवम्, भाविकालीनं भयमाशङ्क्यैव दीना भीताः ॥ ४० ॥

---

१. 'सखा त्वया' २. **'पौलस्त्यभयमाशङ्क्य'**

इति तारागिरा शान्तं लक्ष्मणं रविजोऽब्रवीत् ।
सखे ममाऽगः क्षन्तव्यं जनन्येव शिशोस्त्वया ॥ ४१ ॥

(भा.दी.) इतीति । रविजः सुग्रीवः इति तारागिरा शान्तं लक्ष्मणं प्रति, हे सखे लक्ष्मण, त्वया मम आगः अपराधः शिशोः पुत्रस्य अपराधः जनन्येव मात्रेव क्षन्तव्यमिति अब्रवीत् ॥ ४१ ॥

(सं.चं.) जनन्या शिशोरागइव ॥ ४१ ॥

शरो यस्यैक एवैतत् त्रैलोक्यमपि संहरेत् ।
नास्मत् कृत्यं प्रभोस्तस्य वयं स्वार्थं यतामहे ॥ ४२ ॥

(भा.दी.) शर इति । यस्य श्रीरामस्य एक एव शरः एतत् त्रैलोक्यमपि संहरेत् । हृञ् हरणे लिङ् । प्रभोः तस्य श्रीरामस्य अस्मत् अस्मत्तः कृत्यं कार्यं न । तथाऽपि वयं स्वार्थं यतामहे यत्नं कुर्मः ॥ ४२ ॥

(सं.चं.) अस्माभिः कृत्यं प्रयोजनमस्मत्कृत्यं न किमपि तस्य । 'कार्यं कृत्यं प्रयोजनम्' इति यादवप्रकाशः । अस्मत् अस्मत्त इति वा । वयं तु न रामोपकारार्थं किन्तु स्वलाभार्थं यतामहे । 'सीतां प्राप्स्यति धर्मात्मा वधिष्यति च रावणम् । सहायमात्रेण मया राघवः स्वेन तेजसा' (३६.७) इति, 'सहायकृत्यं किं तस्य येन सप्त महाद्रुमाः । शैलश्च वसुधा चैव बाणेनैकेन दारिताः' (८) इति च ॥ ४२ ॥

प्रसादितः सौरिणेति प्रसन्नो लक्ष्मणोऽब्रवीत् ।
कार्याग्रहात् सम्भ्रमोऽयं मित्र मे क्षम्यतामिति ॥ ४३ ॥

(भा.दी.) प्रेति । सूरस्य सूर्यस्यापत्यं पुमान् सौरिः, तेन सुग्रीवेण इति प्रसादितः प्रसन्नः लक्ष्मणः, हे मित्र सुग्रीव, मे अयं सम्भ्रमः कार्ये आग्रहः अभियोगस्तस्मात्, अतः क्षम्यताम्, त्वयाऽपि मद्दुरुक्तं सह्यताम्, क्षमूष् सहने लोट् । इति अब्रवीत् ॥ ४३ ॥

(सं.चं.) सम्भ्रमस्त्वरा । आग्रहो निर्बन्धः । सम्पादनीयमेवेत्यभिनिवेशः ॥ ४३ ॥

हरीन्द्रवचनात् प्रोचे हरींस्तु हनुमान् पुनः ।
विदिक्षु दिक्षु प्लवगानानेतुं गच्छत द्रुतम् ॥ ४४ ॥

(भा.दी.) हरीति । हनुमांस्तु हरीन्द्रस्य सुग्रीवस्य यद्वचनं तस्मात्, विदिशो आग्नेयादयः, तासु दिक्षु च विद्यमानान् प्लवगान् आनेतुं द्रुतं यथा भवति तथा गच्छत इति पुनः हरीन् कपीन् प्रोचे ॥ ४४ ॥

(सं.चं.) दिक्षु विदिक्षु स्थितान् ॥ ४४ ॥

महेन्द्रमलयादिभ्यो द्वीपेभ्यश्च प्लवङ्गमाः ।
आयान्तु दशमाहात् प्राङ् नो चेद् दण्डो भविष्यति ॥ ४५ ॥

(भा.दी.) महेन्द्रेति । प्लवङ्गमाः कपयः, महेन्द्रश्च मलयश्च तौ आदी येषां ते तथा तेभ्यः पर्वतेभ्यः, प्लक्षादयो ये द्वीपास्तेभ्यश्च, दशमं च तदहश्च दशमाहस्तस्मात्, 'रात्राह्नाहाः पुंसि' (अ.सू.२.४.२९) । प्राक् आयान्तु, नो चेत् दण्डो भविष्यति । भूधातोर्लृट् ॥ ४५ ॥

(सं.चं.) महेन्द्रमलयादिभ्यः पर्वतेभ्यः । जम्बूद्वीपादन्यद्वीपेभ्यश्च । दशमाहात् प्राक् । 'अहोभिर्दशभिर्ये हि नाऽगच्छन्ति ममाऽज्ञया । हन्तव्यास्ते दुरात्मानो राजशासनदूषकाः' (३७.१२) इति च । सप्ताहादित्याह सुग्रीवः । दूरदेशगतानां कृपया दिनत्रयमधिकं ददौ हनुमान् ॥ ४५–६ ॥

इति वायुसुतेनोक्ता वायुवेगाः प्लवङ्गमाः[१] ।
मार्ग्गज्ञाः[२] प्लवगान् सर्वानुर्वीगानानयन् द्रुतम् ॥ ४६ ॥

(भा.दी.) इतीति । इति वायुसुतेन हनुमता उक्ताः, वायुवद् वेगो येषां ते तथा, मार्गान् जानन्तीति तथोक्ताः, तत्तत्प्रदेशविशेषान् प्रति गन्तुं मार्गज्ञा इत्यर्थः, प्लवङ्गमाः, उर्वीं गच्छन्तीति उर्वीगास्तान्, भूमिस्थानित्यर्थः, सर्वान् प्लवगान् द्रुतं यथा भवति तथा आनयन् ॥ ४६ ॥

तैश्चोदितास्ततोऽस्ताद्रेः[३] कोट्यो हाटकसन्निभाः ।
दशागच्छन् प्लवङ्गानां तिस्रः कोट्योऽञ्जनप्रभाः ॥ ४७ ॥

(भा.दी.) तैरिति । ततः तैः सुग्रीवप्रेषितैः चोदिताः, हाटकसन्निभाः, सुवर्णसन्निभाः दश दशसङ्ख्याकाः कोट्यः, अञ्जनवत्प्रभा येषां ते तथोक्ताः, प्लवङ्गानां तिस्रः कोट्यश्च, अस्तनामको योऽद्रिस्तस्मात् आगच्छन् ॥ ४७ ॥

---

१. **'वायुवेगास्तु वानराः'** २. **'मार्गज्ञान्'**

३. **'तैश्चोदितास्तु तोताद्रेः'** । **'तोताद्रेस्तु तोताद्रिनामकात् पर्वतात्'** इति का.श्री. । रामायणविरोधाच्चिन्त्यमेतत् ।

(सं.चं.) अस्ताद्रेः कोटयो दश। 'अस्तं गच्छति यत्रार्कस्तस्मिन् गिरिवरे स्थिताः। तप्तहेममहाभासस्तस्मात् कोट्यो दश च्युताः' (३७.२१) इति च। तिस्रः कोटयोऽञ्जनप्रभाः अप्यस्ताद्रेरिति भाति। सम्प्रति रामायणे तु अञ्जनाद्रेरितीव भाति– 'ततस्तेऽञ्जनसङ्काशा गिरेस्तस्मान्महाजवाः। तिस्रः कोट्यः प्लवङ्गानां निर्ययुर्यत्र राघवः' (३७.२०) इति ॥ ४७ ॥

कैलासशिखरेभ्यश्च सिंहकेसरवर्चसाम् ।
सप्तकोटिसहस्राणि कपीनां राममाययुः ॥ ४८ ॥

(भा.दी.) **कैलासे**ति । सिंहस्य केसराः तद्वद् वर्चो येषां ते तथोक्ताः, तेषां कपीनां सप्त कोट्यः सप्तकोटिसङ्ख्याकानि यानि सहस्राणि च, कैलासशिखरेभ्यः श्रीरामं आययुः ॥ ४८ ॥

(सं.चं.) सप्तकोटिसहस्राणि । 'कैलासशिखरेभ्यश्च सिंहकेसरवर्चसाम् । ततः कोटिसहस्राणि वानराणामुपागमन्' (३७.२२) इति तु प्रचलितो रामायणपाठः ॥ ४८ ॥

फलमूलरसज्ञानां हिमालयनिवासिनाम् ।
कपिकोटिसहस्राणां[1] सहस्रं राममाययौ ॥ ४९ ॥

(भा.दी.) **फले**ति । फलानि च मूलानि च तेषां रसः, तं जानन्तीति तथोक्ताः तेषाम्, हिमालये हिमवत्पर्वते निवास एषामस्तीति तथा तेषाम्, कपीनां याः कोटयस्तासां यानि सहस्राणि तेषां सहस्रं श्रीरामं आययौ ॥ ४९ ॥

(सं.चं.) फलमूलरसज्ञानाम् । 'फलमूलेन जीवन्तो हिमवन्तमुपाश्रिताः । तेषां कोटिसहस्राणां सहस्रं समवर्तत' (३७.२३) इति च ॥ ४९ ॥

अङ्गारसप्रभाङ्गानां विन्ध्याच्चावन्ध्यरंहसाम् ।
बहुकोटिसहस्राणि कपीनां[2] राममाययुः ॥ ५० ॥

(भा.दी.) **अङ्गारे**ति । अङ्गारस्य सप्रभाणि समानकान्तिमन्ति अङ्गानि येषां ते तथोक्तास्तेषाम्, अतिरक्ताङ्गानामित्यर्थः, अवन्ध्यं अमोघं रंहो वेगो येषां ते तथा तेषाम्, अमोघव्यापाराणामित्यर्थः, कपीनां बहुकोटिसङ्ख्याकानि सहस्राणि, विन्ध्यो विन्ध्यगिरिस्तस्माच्च श्रीरामं आययुः ॥ ५० ॥

१. '–सहस्राणि सहस्रम्'   २. 'हरीणां राम–'

(सं.चं.) अङ्गारसप्रभाङ्गानाम् । 'अङ्गारकसमानानां भीमानां भीमकर्मणाम् । विन्ध्याद् वानरकोटीनां सहस्राण्यापतन् द्रुतम्' (३७.२४) इति च ॥ ५० ॥

पयोब्धिवेलानिलयास्तमालवनगन्धिनः[१] ।
वानरा नारिकेळाशा[२] असङ्ख्या आपतन्[३] विभुम् ॥ ५१ ॥

(भा.दी.) पय इति । पयोब्धेः क्षीरसमुद्रस्य या वेला तीरं सैव निलय आवासस्थानं येषां ते तथा, तमालवृक्षाणां यद्वनं तस्य गन्धो एषामस्तीति तथोक्ताः, नारिकेळफलमश्नन्तीति [४]नारिकेळाशाः, असङ्ख्याः वानराः विभुं श्रीरामं प्रति आपतन् आययुः ॥ ५१ ॥

(सं.चं.) पयोब्धिवेलानिलयाः । 'क्षीरोदवेलानिलयास्तमालवनवासिनः । नारिकेळाशनाश्चैव तेषां सङ्ख्या न विद्यते'(३७.२५) इति च ॥ ५१ ॥

नदीभ्यश्च[५] नदेभ्यश्च नानादिग्भ्यस्ततस्ततः ।
देवांशा वानराः सर्वे रामनाम्नि श्रुतेऽभ्यगुः ॥ ५२ ॥

(भा.दी.) नदीभ्य इति । देवांशाः देवानामंशभूताः सर्वे वानराः, नदीभ्यः, नदाः शोणादयस्तेभ्यश्च, ततस्ततः नानाविधा या दिशस्ताभ्यश्च रामनाम्नि श्रुते सति अभ्यगुः । इण् गतौ लुङ् ॥ ५२ ॥

(सं.चं.) रामनाम्नि श्रुतेऽभ्यगुः । देवांशत्वात् ॥ ५२ ॥

महेश्वरमखान्नेभ्यो जातमूलफलादिकम् ।
हिमाद्रावाप्य चापूर्वं दूता राज्ञे न्यवेदयन् ॥ ५३ ॥

(भा.दी.) महेश्वरेति । दूताः सुग्रीवभृत्याः । महेश्वरस्य रुद्रस्य यो मखः, तस्य यानि अन्नानि तेभ्यः जातानि यानि मूलानि फलानि च, तानि आदिर्यस्य तत्तथोक्तम्, अपूर्वं वस्तु, हिमाद्रौ आप्य च, राज्ञे सुग्रीवाय न्यवेदयन्, उपायनत्वेन दत्तवन्तः । विद[६] चेतनाख्याननिवासनेषु लङ् ॥ ५३ ॥

---

१. **'–तमालवनवासिनः'** इत्युत्तरत्र (७.३९) व्याख्यात्रा समुद्धृतः पाठः ।
२. **'नारिकेलाशाः'**
३. **'असङ्ख्या अपतन्'**
४. **'नालिकेरफलमश्नन्तीति नालिकेराशाः'**
५. **'नदीभ्यः पूर्वप्रवाहाभ्यः, नदेभ्यः पश्चिमप्रवाहेभ्यः'** इति का.श्री. ।
६. 'अयमात्मनेभाष इत्युक्तम् । विद्लृ लाभे इति युक्तम् ।

(सं.चं.) महेश्वरमखान्नेभ्यः। इयमत्र कथा– 'ये तु त्वरयितुं याता वानराः सर्ववानरान्। ते वीरा हिमवच्छैलं ददृशुस्तं महाद्रुमम् । तस्मिन् गिरिवरे रम्ये यज्ञो माहेश्वरः पुरा । सर्वदेवमनस्तोषो बभौ दिव्यो मनोहरः। अन्ननिष्यन्दजातानि मूलानि च फलानि च। अमृतास्वादकल्पानि ददृशुस्तत्र वानराः। तदन्नसम्भवं दिव्यं फलं मूलं मनोहरम् । यः कश्चित् सकृदश्नाति मासं भवति तर्पितः । तानि मूलानि दिव्यानि फलानि च फलाशनाः । औषधानि च दिव्यानि जगृहुर्हरियूथपाः । तस्माच्च यज्ञायतनात् पुष्पाणि सुरभीणि च । आनिन्युर्वानरा गत्वा सुग्रीवप्रियकारणात्' (३७.२७–३२) इति च। उपायनत्वेन न्यवेदयन्। विद्लृ लाभे णिचि रूपम् ॥ ५३–४ ॥

मणिमय्या शिबिकया स सुग्रीवः सलक्ष्मणः ।
गत्वा रामान्तिके[1] तूर्णमवतीर्णोऽपतत् पदे ॥ ५४ ॥

(भा.दी.) मणीति। सलक्ष्मणः लक्ष्मणसहितः सः सुग्रीवः, मणिमय्या रत्नमय्या शिबिकया आन्दोळिकया गत्वा, श्रीरामान्तिकं समीपं तस्मिन्, तूर्णं अवतीर्णः सन्, पदं पादः, तस्मिन् अपतत् नमश्चकार ॥ ५४ ॥

प्रसीद मे नाथ कृतागसस्त्वं कृपाकरेत्याशु तमर्थयन्तम् ।
[2]रामोऽभिरामस्मितचन्द्रचारुरुत्थाप्य सुग्रीवमथाऽलिलिङ्गे ॥ ५५ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
किष्किन्धाकाण्डे षष्ठः सर्ग्गः ॥

(भा.दी.) प्रसीदेति । अथ हे नाथ, कृपाकर श्रीराम, कृतमागः अपराधो येन स तथा, तस्य मे प्रसीद प्रसन्नो भव । इति अर्थयन्तं तं सुग्रीवम्, अभिरामं मनोहरं यत् स्मितं तदेव चन्द्रस्तेन चारुः श्रीरामः आशु उत्थाप्य आलिलिङ्गे आलिङ्गनं चक्रे । लिगि गतौ लिट् ॥ ५५ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां
भावार्थदीपिकायां षष्ठः सर्गः ॥

(सं.चं.) पुनरिन्द्रोपेन्द्रवज्राभ्यामुपसंहरति–प्रसीद मे नाथ । ममापराधविषये प्रसन्नो भव । क्षान्त्वाऽनु-गृहाण । रमणीयस्मितं वदनमेव चन्द्रस्तेन चारुः । स्मितमेव वा चन्द्रः । 'अभिरामः स्मितचन्द्रचारुः' इति

---

१. 'रामान्तिकं तूर्णम्'

२. 'रामोऽभिरामः स्मित–'

वा प्रतृण्णम् ।'आलिलिङ्गे' इति पठन्ति । 'आलि-लिङ्ग' इत्येव मूलपाठः स्यादिति भाति । प्रायः पाणिनीयमेव पन्थानं पतति पण्डिताचार्यः । अथवा क्वचित्क्वचित् कविश्छान्दसो भवति । तेनार्थयमानमिति वक्तव्ये अर्थयन्तमिति वक्ति । आलिलिङ्गेति वक्तव्य आलिलिङ्ग इति । लोकेऽपि सर्वस्मादुभयं पदमुशन्ति केचित् । पाणिनीया अपि–'अर्थयतेः क्वचित् परस्मैपदत्वमपि' इत्याहुः । 'आङो लिगेरात्मेपदं वा' इति च पूरणीयम् । प्रयोगशरणा हि वैयाकरणाः । नतु वैयाकरणशरणाः प्रयोगाः ॥ ५५ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां
किष्किन्धाकाण्डे षष्ठसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– १६७५+५५=१७३०]

सप्तमः सर्ग्गः

सिंहलक्षार्बुदबलाः सिंहसंहनना अथ ।
प्लवङ्गा[1] आप्लुता दिग्भ्यः पर्वताभा विभोः पुरः ॥ १ ॥

(भा.दी.) श्रीरामसेवार्थमागतानां बलमाहात्म्यादिकं वर्णयति– **सिंहेत्या**दिना । अथ सिंहस्य संहननमिव शरीरमिव संहननं येषां ते, सिंहानां यल्लक्षमर्बुदं च तद्वद् बलं येषां ते तथा, पर्वतवदाभा कान्तिर्येषां ते तथा, प्लवङ्गाः दिग्भ्यः विभोः श्रीरामस्य पुरः पुरस्तात् आप्लुताः आगताः ॥ १ ॥

(सं.चं.) संहनने शरीरविन्यासे सिंहा इव । दृढाङ्गाः संश्लिष्टाङ्गाश्च । अर्बुदं दशकोटिः कोटिर्वा । लक्षसिंहबलाः दशकोटिसिंहबलाश्च । पर्वताभाः महागात्रतया पर्वततुल्याः । आप्लुताः आगत्य स्थिताः ॥ १ ॥

तरुणार्कारुणाः केचिच्चन्द्रगौराश्च[2] वानराः ।
सरोजकेसराभाश्च प्रापुः श्यामाः सितासिताः[3] ॥ २ ॥

(भा.दी.) तरुणेति । केचित् तरुणो योऽर्कस्तद्वदरुणा रक्ताः वानराः । केचित् हारवद् गौराः श्वेताः । केचित् सरोजस्य केसरास्तद्वदाभा कान्तिर्येषां ते तथा सुवर्णाभा इत्यर्थः । केचित् श्यामाः कृष्णवर्णाः । 'त्रिषु श्यामौ हरित्कृष्णौ' इत्यमरः । केचित् सिताश्च असिताश्च सितासिताः श्यामळा इत्यर्थः । वानराः प्रापुः ॥ २ ॥

---

१. **'प्लवगा–'**
२. **'केचिद्धारगौराश्च'** इति वि.ती.पाठः । **'केचिच्छशिराश्च'** इति क्वचित् ।
३. **'सितासिताः कर्बुरवर्णा इत्यर्थः'** इति का.श्री. ।

(सं.चं.) तरुणेति । 'तरुणादित्यवर्णैश्च शशिगौरैश्च वानरैः । पद्मकेसरवर्णैश्च श्वेतैर्मेरुकृतालयैः' (३९.१३) इति च । केचित् श्यामा हरिद्वर्णाः । क्वचित् सिताः । क्वचिदसिताः केचित् ॥ २ ॥

कपिपद्मसहस्रेण कपिशङ्कुशतेन च ।
वृतोऽङ्गदो राममाप्य जयेति प्राञ्जलिः स्थितः ॥ ३ ॥

(भा.दी.) विविच्य दर्शयति– **कपी**ति । कपीनां पद्मानि पद्मनामकसङ्ख्याविशेषास्तेषां यत्सहस्रं तेन, कपीनां ये शङ्कवः शङ्क्वाख्यसङ्ख्याविशेषास्तेषां यच्छतं तेन च वृतः अङ्गदः श्रीरामं आप्य एत्य, जय उत्कृष्टतया वर्तस्व इति प्राञ्जलिः सन् स्थितः ॥ ३ ॥

(सं.चं.) कपिपद्मसहस्रेण । 'ततः पद्मसहस्रेण वृतः शङ्कुशतेन च । युवराजोऽङ्गदः प्राप्तः पितृतुल्यपराक्रमः' (३९.२९) इति च । विभिन्नानि सङ्ख्यानामानि । केचिन्महापद्मं न पठन्ति । शङ्खः शङ्कुरिति चैकार्थम् । यादवप्रकाशस्त्वेवं पठति–'शतं सहस्रमयुतं नियुतं प्रयुतार्बुदे । न्यर्बुदं वृन्दखर्वे च निखर्वं शङ्खमम्बुजम् । समुद्रो मध्यमन्तं च परार्धं च यथाक्रमम्' इति । अयमप्येकः पन्थाः । तथाच गणनाक्रमः–

१. शतम्	१००	२. सहस्रम्	१०००
३. अयुतम्	१००००	४. नियुतम्	१०००००
५. प्रयुतम्	१००००००	६. अर्बुदम्	१०००००००
७. न्यर्बुदम्	१००००००००	८. वृन्दम्	१०००००००००
९. खर्वम्	१००००००००००	१०. निखर्वम्	१०००००००००००
११. शङ्खम्	१००००००००००००	१२. पद्मम्	१०००००००००००००

एवं परार्धान्तं गणनीयम् । रामायणे त्वन्यथोदितम् । तदपि ग्रन्थान्तरानुगुणतया योजनीयम् । अधिकं त्वस्मत्कृतायां भारततात्पर्यनिर्णयटीकायां निर्णयभावचन्द्रिकायां (८.१७९) द्रष्टव्यम् ॥ ३ ॥

ततो[१] नीलच्छविर्नीलो दशकोटिशतैर्वृतः[२] ।
उग्राणां हरिवीराणामग्रतः प्रत्यदृश्यत ॥ ४ ॥

(भा.दी.) **तत** इति । ततः नीला च्छविः द्युतिर्यस्य स तथोक्तः नीलः, कपीनां कोटयस्तासां यानि शतानि तैर्वृतः सन् उग्राणां हरिषु वीराणां तेषां अग्रतः प्रत्यदृश्यत ॥ ४ ॥

१. **'नीलद्युतिर्नीलो–'** २. **'कपिकोटिशतैर्वृतः'** इति वि.ती. पाठः ।

(सं.चं.) दशकोटिशतैर्वृतः । 'नीलाञ्जनचयाकारो नीलो नामाथ यूथपः । अदृश्यत महाकायः कोटिभिर्दशभिर्वृतः' (३९.२२) इति तु साम्प्रतो रामायणपाठः । 'कोटिभिर्दशभिः शतैः' इति प्रतनपाठः स्यात् ॥ ४ ॥

बहुलक्षैः [१]कपीनां तु कोटिभिश्च समन्वितः ।
तारातातः सुषेणोऽथ काञ्चनाद्रिरिवैक्ष्यत[२] ॥ ५ ॥

(भा.दी.) बह्विति । अथ तारायाः तातः पिता सुषेणः, कपीनां बहूनि च तानि लक्षाणि च तानि तैः, कपीनां कोटिभिश्च समन्वितः सन्, काञ्चनमयो योऽद्रिः स इव, मेरुरिवेत्यर्थः, ऐक्ष्यत अदृश्यत ॥ ५ ॥

(सं.चं.) बहुलक्षैः । 'ततः काञ्चनशैलाभस्ताराया वीर्यवान् पिता । अनेकैर्दशसाहस्रैः कोटिभिः प्रत्यदृश्यत' (३९.१५) इति च । 'अनेकैः शतसाहस्रैः' इति मूलपाठः स्यात् ॥ ५ ॥

[३]दशकोटिसहस्रैस्तु वृतः शतवलिर्बली ।
कोसलेन्द्रं ववन्देऽथ पनसो दशकोटिभिः ॥ ६ ॥

(भा.दी.) दशेति । अथ बलमस्यास्तीति बली शतबलिः, कपीनां दशकोटिसङ्ख्याकानि यानि सहस्राणि तैः वृतः सन् कोसलेन्द्रं श्रीरामं ववन्दे । पनसस्तु दश च याः कोटयश्च ताभिः वृतः सन् कोसलवर्षाणामिन्द्रं श्रीरामं ववन्दे ॥ ६ ॥

(सं.चं.) दशकोटिसहस्रैस्तु । 'कोटीसहस्रैर्दशभिः श्रीमान् परिवृतस्तदा । वीरः शतवलिर्नाम वानरः प्रत्यदृश्यत' (३९.१४) इति च । पनसो दशकोटिभिः । 'महाचलनिभैर्घोरैः पनसो नाम यूथपः । आजगाम महावीर्यो दशभिः कोटिभिर्वृतः' (३९.२१) इति च । अर्वाचीनास्तु रामायणपाठं द्वेधा पठन्ति–'पञ्चभिः कोटिभिर्वृतः' इत्येके । 'तिसृभिः कोटिभिः' इत्यपरे ॥ ६ ॥

पिता हनुमतः श्रीमान् [४]सर्ववानरसत्तमः ।
केसरी सूर्य्यदीप्तास्यः प्रायाद् बहुबलैर्वृतः[५] ॥ ७ ॥

---

१. **'बहुलक्षैर्हरीणां तु'** २. **'–नाद्रिरिवैक्षत' । ऐक्षत राममपश्यत्'** इति का.श्री. ।
३. **'शतकोटिसहस्रैस्तु'** ४. **'श्रीमान् कान्तियुक्तः सम्पयुक्तश्च'** इति का.श्री. । ५. **'बहुबलैर्युतः'**

(भा.दी.) पितेति । श्रीमान्, सर्वे ये वानराः तेषु सत्तमः उत्तमः, सूर्यवद्दीप्तमास्यं यस्य स तथा, हनुमतः पिता, केसरी केसरिनामकः वानरः, बहूनि यानि बलानि सैन्यानि तैर्वृतः सन् श्रीरामं प्रायात् । यातेर्लङ् ॥ ७ ॥

(सं.चं.) पिता हनुमतः । 'अनेकैर्बहुसाहस्रैर्वानराणां समन्वितः । पिता हनुमतः श्रीमान् केसरी प्रत्यदृश्यत' (३९.१८) इति च ॥ ७ ॥

गोलाङ्गूलो गवाक्षोऽथ प्राप्तः कोटिसहस्रवान् ।
धूम्रोऽदृश्यत धूम्राक्ष[1] ऋक्षकोटिसहस्रवान् ॥ ८ ॥

(भा.दी.) गोलेति । (अथ) गोलाङ्गूलः कृष्णवर्णमुखमर्कटजातीयः, 'गोलाङ्गूल इति प्रोक्तः कृष्णवक्त्रस्तु मर्कटः' इति हलायुधः, गवाक्षः गवाक्षनामकः कोटिसङ्ख्याकानि यानि सहस्राणि तानि अस्य सन्तीति तथा सन् प्राप्तः । धूम्रा धूम्रवर्णा आभा यस्य स तथा धूम्रः धूम्रनामकः ऋक्षाणां कोटयस्तासां सहस्राणि अस्यास्तीति तथा सन् अदृश्यत ॥ ८ ॥

(सं.चं.) गोलाङ्गूलः । 'गोलाङ्गूलाधिपः श्रीमान् गवाक्षो भीमविक्रमः । वृतः कोटिसहस्रेण वानराणामदृश्यत' (३९.१९) इति च । गोलाङ्गूलोऽसिताननः । '**ಮುಜ್ಜು**' इति भाषायाम् । गोरिव यस्य लाङ्गूलाग्रे लोमवृन्दं भासते । धूम्रोऽदृश्यत । 'ऋक्षाणां भीमवेगानां धूम्रः शत्रुनिबर्हणः । वृतः कोटिसहस्राभ्यां द्वाभ्यां समभिवर्तत' (३९.२०) इति च । धूम्रे धूमले अक्षिणी अस्येति धूम्राक्षः । धूम्रनामा ऋक्षः ॥ ८ ॥

गवयो गतवान् रामं वृतो द्वादशकोटिभिः ।
षष्टिकोटिवृतः प्राप[2] राघवं गन्धमादनः ॥ ९ ॥

(भा.दी.) गवय इति । गवयः गवयनामकः द्वादश च ताः कोटयश्च ताभिः वृतः सन् श्रीरामं गतवान् । गन्धमादनः षष्टिसङ्ख्याकाश्च ताः कोटयश्च ताभिः वृतः सन् श्रीरामं प्राप । आप्लृ व्याप्तौ लिट् ॥९॥

(सं.चं.) गवयः । 'ततः काञ्चनशैलाभो गवयो नाम यूथपः । आजगाम महावीर्यः कोटिभिः पञ्चभिर्वृतः' (३९.२३) इति साम्प्रतो रामायणपाठः । 'कोटिद्वादशभिर्वृतः' इति मूलपाठः स्यात् । षष्टिकोटिवृतः । 'ततः

---

१. '**धूम्राभ–**' इति वि.ती.पाठः । २. '**प्रायाद् राघवम्**'

कोटिसहस्राणां सहस्रेण शतेन च । पृष्ठतोऽनुगतः प्राप्तो हरिभिर्गन्धमादनः' (३९.२८) ति साम्प्रतो रामायणपाठः । 'षष्टिसहस्राणां सहस्रेण' इति प्राचीनपाठ इति स्फुटम् ॥ ९ ॥

गजश्च वृषभाख्यश्च शलभः शरभस्तथा ।
पृथक्पृथक् कोटियुताः[1] रामपादमुपासत[2] ॥ १० ॥

(भा.दी.) गज इति । गजः, वृषभ इति आख्या यस्य स तथा, शलभः, तथा शरभश्च इत्येते पृथक्पृथक् कोटिसेनया युताः सन्तः श्रीरामस्य यः पादस्तं उपासत असेवन्त । आस उपवेशने लङ् ॥ १० ॥

(सं.चं.) गजश्च । 'गजश्च बलवान् वीरः कोटिभिस्तिसृभिर्वृतः' (३९.२६) इति साम्प्रतः पाठः ॥१०॥

महान्तौ मैन्दविविदौ कोटीः सप्त दशाष्ट च ।
प्रकर्षन्तौ गतौ रामं रुमण्वान् कोटिसंवृतः ॥ ११ ॥

(भा.दी.) महेति । महान्तौ मैन्दविविदौ सप्तदश कोटीः अष्ट च ताः कोटीश्च प्रकर्षन्तौ सन्तौ श्रीरामं गतौ । रुमण्वान् रुमण्वन्नामकः कोटिसंवृतः सन् श्रीरामं गतः ॥ ११ ॥

(सं.चं.) महान्तौ मेन्दविविदौ कोटीः सप्तदशाष्ट च । पञ्चविंशतिकोटीः । साम्प्रतं तु रामायणे–'मैन्दश्च विविदश्चोभावश्विपुत्रौ महाबलौ । कोटिकोटिसहस्रेण वानराणामदृश्यताम्' (३९.२५) इति पठ्यते । 'कोटिसप्तदशाष्टभ्यः' इति प्राचीनपाठः स्यात् । रुमण्वान् कोटिसंवृतः । 'रुमण्वान् नाम विक्रान्तो वानरो वानरेश्वरम् । आययौ बलवांस्तूर्णं कोटीशतसमावृतः' (३९.२८) इति साम्प्रतः पाठः । 'कपिकोटिसमावृतः' इति प्राचीनपाठः स्यात् ॥ ११ ॥

बृहस्पतिसमो नीत्या तारस्ताराधिपद्युतिः ।
वृतः कोटिसहस्रेण रामोपान्तमुपेयिवान् ॥ १२ ॥

(भा.दी.) बृहेति । नीत्या बृहस्पतिसमः, ताराधिपश्चन्द्रः, तद्वत् द्युतिर्यस्य स तथा तारः, कोटीनां सहस्रं तेन वृतः सन्, श्रीरामस्य उपान्तं समीपं तत् उपेयिवान् ॥ १२ ॥

(सं.चं.) बृहस्पतिसमः । 'तथाऽपरेण कोटीनां सहस्रेण समन्वितः । पिता रुमायाः सम्प्राप्तः सुग्रीवश्वशुरो विभुः' (३९.१६) इति च । रामायणे पुनरपरश्च तारः पठ्यते– 'ततस्ताराद्युतिस्तारो हरिर्भीम-

---

१. 'कोटिवृताः' २. 'रामपादमुपासते'

पराक्रमः । पञ्चभिर्हरिकोटीभिर्दूरतः प्रत्यदृश्यत' (३९.३०) इति । प्रायः प्रक्षिप्तम् । अन्योऽयं तार इति व्याख्यतारः ॥ १२ ॥

उपेन्द्रमापेन्द्रजानुः कपीनां पद्मकोटिभिः ।
वृतो दधिमुखः[1] प्राप देवं द्वादशकोटिभिः ॥ १३ ॥

(भा.दी.) **उपेति** । इन्द्रजानुः इन्द्रजानुनामकः, कपीनां पद्मानां कोटयस्ताभिः वृतः सन् देवं श्रीरामं आप । दधिमुखः द्वादश च ताः कोटयश्च ताभिः वृतः सन् देवं श्रीरामं प्राप ॥ १३ ॥

(सं.चं.) उपेन्द्रमापेन्द्रजानुः । 'इन्द्रजानुः कपिर्वीरो यूथपः प्रत्यदृश्यत । एकादशानां कोटीनामीश्वरस्तैश्च संवृतः' (३९.३२) इति साम्प्रतो रामायणपाठः । 'कोटीनां पद्मसङ्ख्यानाम्' इति प्राचीनपाठः स्यात् । वृतो दधिमुखः । 'ततो दधिमुखः श्रीमान् कोटिभिर्दशभिर्वृतः' (३९.३७) इति साम्प्रतः पाठः । 'कोटिद्वादशभिर्वृत्तः' इति प्राचीनपाठः स्यात् ॥ १३ ॥

कपिखर्वसहस्रेण[2] कुमुदस्तममोदयत् ।
एकविंशतिकोटीभिरुदारश्च दरीमुखः ॥ १४ ॥

(भा.दी.) **कपीति** । कुमुदः कपीनां खर्वाणि सङ्ख्याविशेषास्तेषां यत्सहस्रं तेन तं श्रीरामं अमोदयत् । उदारः दानशूरः दरीमुखश्च दरीमुखनामको वानरः, एकविंशतयश्च ताः कोटयश्च ताभिः तं अमोदयत् ॥१४॥

(सं.चं.) कपिखर्वसहस्रेण । सम्प्रति कुमुदसेनासङ्ख्या रामायणे न पठ्यते । एकविंशतिकोटीभिः । 'दरीमुखश्च बलवान् यूथपोऽभ्याययौ तदा । वृतः कोटिसहस्रेण सुग्रीवं समुपस्थितः' (३९.२४) इति साम्प्रतः पाठः । 'एकविंशतिकोटीभिः सुग्रीवं समुपस्थितः' इति प्राचीनपाठः स्यात् ॥ १४ ॥

जाम्बवान् विनतो रम्भो भीमः सम्पातिनामकः ।
विजयश्च हरिस्तत्र वेगदर्शी महाहनुः ॥ १५ ॥

शरार्चिः शरगुल्मश्च सुहोत्रोल्कामुखौ तथा ।
ससङ्गाः[3] सङ्गताः सर्वे पुनरन्ये च वानराः ॥ १६ ॥

---

१. **'दधिमुखः सुग्रीवमातुलः कपिः'** इति का.श्री. । २. **'कपिपद्मसहस्रेण'**

३. **'सङ्गताः सङ्घशः सर्वे'** इति, **'ससङ्घाः सहिताः सर्वे'** इति च ।

(भा.दी.) जाम्बेति । जाम्बवान्, विनतः तन्नामकः, रम्भः, भीमः, सम्पातिरिति नाम यस्य स तथा, विजयश्च विजयनामकश्च हरिः, कपिः, वेगदर्शी, महाहनुः, शरार्चिः, शरगुल्मश्च, तथा सुहोत्रश्च उल्कामुखश्च तौ, अन्ये सर्वे पुनः समस्ता एव वानराः । 'पुनरप्रथमे प्रश्ने व्यावृत्तावधारणे' इति च । सङ्घैः समूहैः सहिताः सन्तः श्रीरामसमीपे सङ्गताः मिलिताः आसन् ॥ १५–६ ॥

(सं.चं.) हरिरिति न नामान्तरम् । विजयाख्यश्च हरिः कपिः । सम्प्रति रामायणे नैतेऽत्र पठ्यन्ते । सर्व एते हनुमता सह दक्षिणां दिशमन्वेष्टुं गताः । अत्र जाम्बवानृक्षः । अन्ये कपयः ॥ १५–६ ॥

एतैः सर्वैः परिवृतौ हनुमन्मिहिरात्मजौ ।
विश्वेश्वरमसेवेतां शम्भुशक्राविवामरैः ॥ १७ ॥

(भा.दी.) एतैरिति । सर्वैः एतैः वानरैः परिवृतौ हनुमांश्च, मिहिरस्य सूर्यस्य आत्मजः सुग्रीवश्च तौ, अमरैः सह शम्भुशक्राविव ब्रह्मेन्द्राविव विश्वेश्वरं जगदीश्वरं श्रीरामं असेवेताम् । षेवृ सेवने लङ् ॥ १७ ॥

(सं.चं.) मिहिरात्मजः सूर्यात्मजः सुग्रीवः । 'मिहिरा वायुमेघार्काः' इति च । शम्भुः ब्रह्मा शिवो वा ॥

आस्यतामिति तानुक्त्वा वन्दारून् वानरानथ ।
उवाच वाचं सुग्रीवः प्राञ्जलिः कञ्जलोचनम् ॥ १८ ॥

(भा.दी.) आस्यतामिति । अथ सुग्रीवः वन्दारून् वन्दनशीलान् तान् आगतान् वानरान् आस्यतां स्थीयताम् इति उक्त्वा प्राञ्जलिः सन्, कञ्जे इव लोचने यस्य स तथा तं श्रीरामं वाचमुवाच ॥ १८ ॥

(सं.चं.) वन्दारूनभिवादकान् । कञ्जलोचनं कमलनयनं रामम् ॥ १८–९ ॥

नियुज्यन्तां निजे कार्य्ये नाथ दासा अमी तव[१] ।
इत्युक्तो भगवानूचे त्वं नियुङ्क्ष्व हरीनिति ॥ १९ ॥

(भा.दी.) नियुज्यन्तामिति । हे नाथ श्रीराम, हि यस्मात् अमी वानराः तव दासाः तस्मात् निजं स्वकीयं कार्यं सीतान्वेषणादिरूपं तस्मिन् नियुज्यन्तां आज्ञाप्यन्ताम् । युजिर् योगे लोट् । इति उक्तः भगवान् श्रीरामः

१. **'दासा ह्यमी तव'** इति वि.ती.पाठः ।

हरीन् कपीन् त्वं नियुङ्क्ष्व आज्ञापय, युजिर् योगे लोट्, इति ऊचे। भगवानित्यनेन सर्वसमर्थस्य ममैतेषामपेक्षा नास्त्येव। त्वत्कर्तव्यसेवार्थं त्वयैव नियोज्या इत्यर्थः (सूचितः) ॥ १९ ॥

चतसृष्वप्यथो दिक्षु वानरान् वानराधिपः।
विचेतुं तां सरोजाक्षीं वीरान् सन्दिदिशे क्रमात् ॥ २० ॥

(भा.दी.) चतसृष्विति। अथो वानराधिपः सुग्रीवः, चतसृष्वपि दिक्षु, सरोजवदक्षिणी यस्याः सा तथा तां सीतां विचेतुं मार्गयितुम्, वीरान् वानरान् क्रमात् पूर्वादिर्यो दिक्क्रमस्तस्मात् सन्दिदिशे। दिश अतिसर्जने लिट् ॥ २० ॥

(सं.चं.) सरोजाक्षीं सीताम्। क्रमात् पूर्वादिक्रममनुसृत्य ॥ २०–५ ॥

विनत त्वं हरिगणैः[1] साकमैन्द्रीं दिशं व्रज।
मृग्यतां तत्र वैदेही त्वं हि मे सचिवः सदा ॥ २१ ॥

(भा.दी.) विनतेति। हे विनत विनतनामक, त्वं हरीणां कपीनां गणास्तैः साकम्, ऐन्द्रीं शरावतीनद्याः सकाशं पूर्वां दिशं व्रज। तत्र पूर्वस्यां दिशि वैदेही मृग्यताम्। मृग अन्वेषणे लोट्। त्वं मे सदा सचिवो हि आप्तामात्यो हि ॥ २१ ॥

यमुनोपवनं गत्वा यामुनं च महागिरिम्[2]।
सीता विचीयतां गङ्गां सरयूं कौशिकीं तथा ॥ २२ ॥

(भा.दी.) यमुनेति। यमुनाया यदुपवनं तत्। यमुनायाः सम्बन्धी यामुनस्तम्, अत एव यामुनाख्यं महागिरिं च गङ्गां तथा सरयूं कौशिकीं कौशिकाख्यां[3] नदीं च गत्वा सीता विचीयतां विचार्यताम् ॥ २२ ॥

नर्म्मदां च नदं शोणं कावेरीं गोमतीमपि।
पूर्वां सरस्वतीं भूयो मागधान् काशिकोसलान्[4] ॥ २३ ॥

---

१. **'कपिगणैः'**

२. **'यामुनाख्यं महागिरिम्'** इति वि.ती.पाठः स्यात्।

३. **'कौशिकाख्यनदीं च'**

४. **'काश्यकोसलान्'** इति वि.ती.पाठः।

(भा.दी.) नर्मदामिति। नर्मदां च, शोणः शोणाख्यनदस्तं नदं च, कावेरीमुत्तरकावेरीम्, अरण्यपर्वण्युत्तर-कावेरी च प्रसिद्धा, गोमतीमपि। पूर्वां सरस्वतीं गत्वा मागधान् मगधविषयान्, काश्याः काशीविषयास्ते च कोसलाश्च तान् गत्वा भूयः बहुवारं सीता विचीयताम् ॥ २३ ॥

विदेहानथ[1] पुण्ड्राद्यांस्तिमिं च रजताकरम् ।
मन्दरं तदधिष्ठानं किरातानां च मन्दिरम् ॥ २४ ॥

स्वर्ण्णाकरं स्वर्ण्णरूप्यं गत्वा सीता विमृग्यताम् ।
जम्बूद्वीपमतिक्रम्य शिशिरं गिरिपुङ्गवम् ॥ २५ ॥

द्वीपानन्यानपि प्राप्य देवदेवी विमृग्यताम् ।
आगम्यतां च मासान्ते[2] [3]सर्वैर्द्दण्डोऽन्यथा भवेत् ॥ २६ ॥

(भा.दी.) विदेहानिति। अथ विदेहान् विदेहविषयान्, पुण्ड्रा पुण्ड्राख्यविषयाः आद्या येषां ते तथा तान्, तिमिः, तिमिनामकपर्वतस्तं च, रजताकरं रजताकरनामकगिरिम्,..[4] स्वर्णरूप्यं स्वर्णरूप्याख्यगिरिं गत्वा सीता विमृग्यतां विचार्यताम्। **जम्ब्वि**ति। जम्ब्वाख्यो द्वीपो जम्बूद्वीपस्तं अतिक्रम्य, गिरिषु पुङ्गवः श्रेष्ठस्तं शिशिरं शिशिरनामानं गिरिं प्राप्य, अन्यानपि प्लक्षादिद्वीपान् प्राप्य, देवस्य क्रीडादिगुणवतः श्रीरामस्य देवी महिषी सीता विमृग्यताम्। **आगम्यतामि**ति। सर्वैः वानरैः मासस्यान्तोऽवसानं तस्मिन्, 'मासात् प्राक्' इति क्वचित् पाठः, आगम्यताम्। अन्यथा मासात्प्रागनागते दण्डः शिक्षा वधलक्षणशिक्षा भवेत् ॥ २४–६ ॥

(सं.चं.) यमुनोपवनमित्यादि। रजताकरं रजतोत्पत्तिस्थानं तिमिनामकं च पर्वतम्। 'नदीं भागीरथीं रम्यां सरयूं कौशिकीं तथा। कालिन्दीं यमुनां रम्यां यामुनं च महागिरिम्। सरस्वतीं च सिन्धुं च शोणं मणि-निभोदकम्। महीं कालमहीं चैव शैलकाननशोभिताम्। ब्रह्ममालान् विदेहांश्च मालवान् काशिकोसलान्। मागधांश्च महाग्रामान् पुण्ड्रान् वङ्गांस्तथैव च। पत्तनं कोशकाराणां भूमिं च रजताकराम्। सर्वमेतद् विचेतव्यं मार्गयद्भिस्ततस्ततः' (४०.२०–४) इति च। सङ्ग्रहवचनानुसारेण–'पट्टनं च किरातानां तिमिं च रजताकरम्'

---

१. **'पौण्ड्राद्यांस्तिमिम्'** इति, **'विदेहानपि पुण्ड्राद्यांस्तिमिम्'** इति च क्वचित्। २. **'मासात्प्राक्'**
३. **'सर्वैर्दण्ड्योऽन्यथा'** ४. अत्र वाक्यं लुप्तम्। **'स्वर्णाकरं स्वर्णाकराख्यगिरिम्'** इति स्यात्।

इति रामायणपाठः स्यात् । तदधिष्ठानं मन्दरगतं किरातानां मन्दिरम् । कथमथ पूर्वादिविभागः? हिमाचलविन्ध्ययोर्मध्यगतस्य आर्यावर्तस्यापेक्षया प्राच्यादिविभागो विवक्षित इति सम्प्रदायविदः । अतः कावेरी च विन्ध्योत्तरवाहिन्येव काचिन्नदी विवक्षिता । गोमती अयोध्यापरिसरवाहिनी । पूर्वा सरस्वती प्रयागपरिसरवाहिनी । याऽद्य गुप्तवाहिनी जाता । रजताकरं तिमिं नाम देशविशेषम् । 'भूमिं च रजताकराम्' इत्येव वा पाठः स्यात् । रजतस्याऽकरमधिष्ठानं मन्दरं नामाचलम् । प्राग्ज्योतिषप्रान्ते किरातानां च मन्दिरम् । स्वर्णाकरं स्वर्णरूप्यं च गिरिप्रभेदनम् । गिरिपुङ्गवं शिशिरं चातिक्रम्य । देवस्य रामस्य देवी विमृग्यतामन्विष्यताम् । अन्यथाऽनागमने दण्डः शिक्षा भवेत् ॥ २२–६ ॥

दक्षिणां हनुमन् गत्वा दक्षस्त्वं पश्य जानकीम् ।
गुरुः सखा च सचिवः शरणं च भवान् हि मे ॥ २७ ॥

(भा.दी.) दक्षिणामिति । दक्षः समर्थः, हनुमन्, त्वं शरावतीनद्याः दक्षिणां दिशं गत्वा जानकीं पश्य । त्वमन्यसाधारणो न भवसीत्याह– **गुरुरि**ति । हि यस्मात् भवान् मे गुरुः, सखा च, सचिवः मन्त्री च, शरणं रक्षकश्च ॥ २७ ॥

(सं.चं.) दक्षिणा हि रावणस्य दिक् । यत्र लङ्का । अतस्तत्र हनुमन्तं प्रेषयन्नाह– दक्षस्त्वं पश्य जानकीम् ॥ २७ ॥

अङ्गदाद्या इमे वीरास्त्वामन्वायान्तु [१]नायकम् ।
मुख्यप्राणमिवाक्षाणि[२] त्वयि भारः समाहितः ॥ २८ ॥

(भा.दी.) अङ्गदेति । अङ्गद आद्यो येषां ते तथा इमे वीराः जाम्बवत्प्रभृतयः, नायकं स्वामिनं त्वाम्, अक्षाणि इन्द्रियाणि मुख्यप्राणमिव अन्वायान्तु अनुसृत्य यान्तु । यथा शरीरे मुख्यप्राणे सति चक्षुरादीन्द्रियाणि तिष्ठन्ति तद्गमने च देहान्निःसरन्ति तद्वदेव तेऽप्यनुयान्त्वित्यर्थः । या प्रापणे लोट् । भारः कार्यसिद्धिलक्षणभारः त्वयि समाहितः संस्थितः । अन्ये तु वानराः राजनीत्यर्थं तत्रतत्र प्रेषिता इत्यर्थः । श्रीरामकार्यं तु त्वयैव साधनीयमिति भावः ॥ २८ ॥

(सं.चं.) अक्षाणि सर्वेन्द्रियाणि । यद्यप्यन्येऽपि बहवोऽन्यत्रान्यत्र प्रेषिताः । तथाऽपि त्वयि भारः समाहितः ॥ २८ ॥

---

१. **'–मन्वायान्ति नायकम्'**

२. **'अक्षाणि चक्षुरादीन्द्रियाभिमानिनो देवाः'** इति का.श्री. ।

यदि मे प्राणगोप्ताऽसि रामदासाग्रणीर्य्यदि ।
रावणस्याऽलयं [1]ज्ञात्वा सीतां चाऽगच्छ राघवम् ॥ २९ ॥

(भा.दी.) कर्तव्यं निवेदयति– **यदी**ति । त्वं यदि मे प्राणानां गोप्ता असि, यदि श्रीरामदासेषु अग्रणीः श्रेष्ठः असि, तर्हि रावणस्य आलय आवासस्तं ज्ञात्वा, एतावद् दूरमस्तीति विज्ञाय, सीतां च तत्र ज्ञात्वा श्रीराघवं प्रति आगच्छ ॥ २९ ॥

(सं.चं.) प्रथमं रावणस्याऽलयं ज्ञात्वा तत्र सीतां च ज्ञात्वा ॥ २९ ॥

चतुर्द्दशसु लोकेषु दशस्वपि हि दिक्षु ते ।
गतिर्न्न विहता क्वापि वायुनन्दन वायुवत्[2] ॥ ३० ॥

(भा.दी.) **चतुरि**ति । हे वायुनन्दन हनुमन्, ते गतिः गमनम्, चत्वार अधिका दश चतुर्दश तेषु लोकेषु, दशसु दिक्ष्वपि, क्वापि देशे काले वा वायुवत् विहता प्रतिबद्धा न ॥ ३० ॥

(सं.चं.) गतिर्न विहता क्वापि । 'न भूमौ नान्तरिक्षे वा नाम्बरे नामरालये । नाप्सु वा गतिभङ्गं ते पश्यामि हरिपुङ्गव । सासुराः सहगन्धर्वाः सनागनरदेवताः । विदिताः सर्वलोकास्ते ससागरधराधराः । गतिर्वेगश्च तेजश्च लाघवं च महाकपे । पितुस्ते सदृशं वीर मारुतस्य महौजसः । तेजसा वाऽपि ते भूतं न समं भुवि विद्यते । तद् यथा लभ्यते सीता तत् त्वमेवानुचिन्तय । त्वय्येव हनुमन्नस्ति बलं बुद्धिः पराक्रमः । देशकालानुवृत्तिश्च नयश्च नयपण्डित' (४४.३–७) इति च ॥ ३० ॥

[3]सहस्रशिखरं विन्ध्यमतिदुर्ग्गं जगत्त्रये ।
नर्म्मदाद्या नदीर्ग्गत्वा तत्र सीता विमृग्यताम् ॥ ३१ ॥

(भा.दी.) **सहस्रे**ति । जगतां यत्त्रयं तस्मिन् अतिदुर्गं अत्यन्तं गन्तुमशक्यम्, सहस्रसङ्ख्यानि शिखराणि यस्मिन् स तथा तम्, विन्ध्यं विन्ध्यगिरिं गत्वा, नर्मदा आद्या यासां तास्तथा ताः नदीः गत्वा, तत्र नदीषु सीता विमृग्यताम् ॥ ३१ ॥

---

१. 'रावणस्याऽलये ज्ञात्वा'
२. 'वायुवद् वायुनन्दन'
३. 'सहस्रशिरसम्'

कलिङ्गाद्यांश्च विषयान् दण्डकारण्यमुद्बणम्[1] ।
गोदावरीं च कावेरीं सागस्त्यं मलयाचलम् ॥ ३२ ॥

अगस्त्यमाश्रमगतं[2] नत्वा तस्याभ्यनुज्ञया[3] ।
अतीत्य सिन्धून् द्वीपांश्च गत्वा सीता विमृग्यताम् ॥ ३३ ॥

(भा.दी.) कलिङ्गेति । कलिङ्गा आद्या येषां ते तथा तान् विषयान्, उद्बणं भयङ्करं दण्डकारण्यं च, गोदावरीं च कावेरीम्, अगस्त्येन सहितः सागस्त्यस्तं मलयाचलं च गत्वा, आश्रमं गत आश्रमगतस्तं पुलस्त्यं नत्वा, तस्य पुलस्त्यस्य अभ्यनुज्ञया सिन्धून् समुद्रान् द्वीपांश्च जम्बुप्लक्षादिद्वीपांश्च अतीत्य सीता विमृग्यताम् । मृग अन्वेषणे लोट् ॥ ३२–३ ॥

(सं.चं.) सहस्रशिरसम् । 'सहस्रशिरसं विन्ध्यं नानाद्रुमलतायुतम् । नर्मदां च नदीं दुर्गां महोरगनिषेविताम्' (४१.८) इति, 'अन्वीक्ष्य दण्डकारण्यं सपर्वतनदीगुहम् । नदीं गोदावरीं चैव सर्वमेवानुपश्यत' (४१.१२) इति, 'ततस्तामापगां दिव्यां प्रसन्नसलिलां शिवाम् । तत्र द्रक्ष्यथ कावेरीं विहृतामप्सरोगणैः । तत्राऽसीनं नगस्याग्रे मलयस्य महौजसम् । द्रक्ष्यथाऽदित्यसङ्काशमगस्त्यमृषिसत्तमम् । ततस्तेनाभ्यनुज्ञाताः प्रसन्नेन महात्मना । ताम्रपर्णीं ग्राहजुष्टां तरिष्यथ महानदीम्' (४१.१४–७) इत्यादि च । 'अगस्त्यमाश्रमगतम्' इत्यत्र 'पुलस्त्यामाश्रमगतम्' इति पठन्ति, तद् रामायणाननुगुणमिति भाति । मृग्यं भवति मूलम् ॥ ३१–३ ॥

भवता श्वशुरेदानीं सुषेण वरुणोपम ।
कर्त्तव्यं बन्धुकृत्यं नः पश्चिमा गम्यतां हरित् ॥ ३४ ॥

(भा.दी.) भवतेति । वरुणस्य उपमा यस्य स तथा तत्सम्बुद्धिः, श्वशुर मातुल(?), हे सुषेण, भवता नः बन्धुकृत्यम्, बन्धुभूतस्य श्रीरामस्य कृत्यं कार्यं यतः कर्तव्यं तस्मात् । इदानीं पश्चिमा शरावतीनद्याः पश्चिमा (हरित्) दिक् गम्यताम् । बन्धुभूतानामस्माकं कृत्यं बन्धुकृत्यमिति वा विग्रहः ॥ ३४ ॥

---

१. **'–रण्यमुल्बणम्'**
२. **'पुलस्त्यमाश्रमगतम्'** इति वि.ती.पाठ उपलब्धः । का.श्री.टीकायामपि तथा ।
३. **'नत्वाऽथ तदनुज्ञया'**

(सं.चं.) वरुणावतारत्वाद् वरुणोपमः सुषेणः । नः बन्धुकृत्यं त्वया कर्तव्यम् । बन्धुतानिबन्धनं कृत्यं बन्धुकृत्यम् । श्वशुरेण जामातुः कृत्यं निर्वोढव्यमित्येतत् । नः सर्वेषां बन्धो रामस्य कृत्यं वा । हरित् दिक् ॥ ३४ ॥

युक्तेन कपिलक्षाभ्यां गत्वागत्वा विचीयताम्[1] ।
सीता रावणगेहं च[2] सम्यगेवाधुना त्वया ॥ ३५ ॥

(भा.दी.) युक्तेनेति । (अधुना) कपीनां लक्षे ताभ्यां युक्तेन त्वया तत्तद्देशान् गत्वा सीता रावणगेहं रावणमन्दिरं तच्च (सम्यगेव) विचीयतां विमृग्यताम् । चिञ् चयने लोट् । तत्तद्देशान् विमृग्य इदं रावणगृहं अत्र च सीता तिष्ठतीति निश्चयः कर्तव्य इत्यर्थः ॥ ३५ ॥

(सं.चं.) युक्तेन कपिलक्षाभ्याम् । 'द्वाभ्यां शतसहस्राभ्यां कपीनां कपिसत्तमाः । सुषेणप्रमुखा यूयं वैदेहीं परिमार्गथ' (४२.६) इति च । सीता रावणगेहं च । 'तत्र सीतां च मार्गध्वं निलयं रावणस्य च' (४२.१२) इति च बहुनिलयो हि रावणः । तेन पश्चिमायामपि दिशि स्यात् । यद्यस्ति तत्र गत्वा विचीयताम् ॥ ३५ ॥

बाह्लीकादीन् केकयादीन् विषयान् पट्टनानि च[3] ।
नानावनानि सरितः समुद्रोपान्तपर्वतान् ॥ ३६ ॥

(भा.दी.) बाह्लीकेति । बाह्लीकाः बाह्लीकविषयाः आदयो येषां ते तथा तान्, केकया आदयो येषां ते तथा तान् विषयान्, पत्तनानि च नगराणि च, नानावनानि सरितः समुद्रोपान्ताश्च पर्वताश्च तान्, समुद्रोपान्तविद्यमानपर्वतांश्च गत्वा सीता विचीयतामिति सम्बन्धः ॥ ३६ ॥

(सं.चं.) बाह्लीकादीन् । 'सुराष्ट्रान् सहबाह्लीकान् शूरान् भीमांस्तथैव च' (४२.६) इति, 'राष्ट्राणि च विशालानि पट्टनानि ततस्ततः । सिन्धुसागरयोश्चैव सङ्गमे तत्र पर्वतः' (४२.१४) इत्यादि च ॥ ३६ ॥

अपि पञ्चनदं तीर्थं[4] काश्मीरं प्राप्य[5] मृग्यताम् ।
गान्धारविषयं गत्वा पारियात्रं च पर्वतम् ॥ ३७ ॥

---

१. **विमृग्यताम्'** २. **'रावणगेहे च'** । **'रावणेगेहं च गोकर्णक्षेत्रे मारीचाश्रमे विद्यमानिमिति भाति'** इति का.श्री. ।
३. **'पत्तनानि च'** इति वि.ती.पाठः स्यात् । ४. **पञ्चनदीतीर्थम्'** इति वि.ती.पाठः स्यात् । ५. **'चाऽप्य'**

(भा.दी.) अपीति । पञ्चनदीनां यत्तीर्थं तत्, काश्मीरं काश्मीरदेशस्तदपि प्राप्य, गान्धाराणां विषयस्तं पारियात्रं पारियात्रनामकं पर्वतं च गत्वा सीता विमृग्यताम् ॥ ३७ ॥

(सं.चं.) अपि पञ्चनदं तीर्थं काश्मीरम् । नेदं सम्प्रति रामायणे पठ्यते । 'कोटिं तत्र समुद्रे तु काञ्चनीं शतयोजनाम् । दुर्दर्शां पारियात्रस्य गत्वा द्रक्ष्यथ वानराः' (४२.१९-२०) इति च ॥ ३७ ॥

चक्रवन्तं गिरिं यत्र चक्रं विष्णोर्विनिर्म्मितम् ।
तं च देशं समुद्रान्ते पाञ्चजन्यो यतोऽभवत् ॥ ३८ ॥

(भा.दी.) चक्रेति । यत्र पर्वते विष्णोश्चक्रं विनिर्मितम्, विश्वकर्मणेति शेषः, तं चक्रवन्तं गिरिं प्राप्य, यतः प्रदेशात् पाञ्चजन्यः पाञ्चजन्याख्यः शङ्खः अभवत्, समुद्रान्तः समुद्रमध्यं तस्मिन् विद्यमानं तं च देशं गत्वा सीता विमृग्यताम् ॥ ३८ ॥

(सं.चं.) चक्रवन्तं गिरिम् । 'चतुर्भागे समुद्रस्य चक्रवान्नाम पर्वतः । तत्र चक्रं सहस्रारं निर्मितं विश्वकर्मणा । तत्र पञ्चजनं हत्वा हयग्रीवं च दानवम् । आजहार ततश्चक्रं शङ्खं च पुरुषोत्तमः' (४२.२७–८) इति च ॥ ३८ ॥

परीतं बहुभिर्दुर्गैः[१] प्राप्य प्राग्ज्योतिषं पुरम् ।
सुमेघादीन् गिरीन् गत्वा[२] द्वीपानन्यांश्च मृग्यताम्[३] ॥ ३९ ॥

(भा.दी.) परीतमिति । बहुभिः दुर्गा राष्ट्राणि तैः, वनैरिति वा, दुर्गप्रदेशैरिति वा, 'दुर्गो राष्ट्रे वने दुर्गं दुर्गमे नरके पुरे' इति वैजयन्ती, परीतं परिवृतम्, प्राग्ज्योतिषं प्राग्ज्योतिषनामकं तत् पुरं प्राप्य, सुमेघः सुमेघनामकगिरिरादिर्येषां ते तथा तान् गिरींश्च प्राप्य, अन्यान् प्लक्षादिद्वीपांश्च गत्वा सीता विमृग्यताम् । अन्यान् द्वीपांश्चेत्यनेन तत्रतत्र गन्तुं तेषामनुकूलाः परिचिताः मार्गाः सन्ति । न तु तावद्दूरप्लवनम् । तथात्वे वक्ष्यमाणशक्तितारतम्यकथनविरोधात् । न चान्यान् द्वीपानित्यादौ प्लक्षादिसप्तद्वीपान् विहाय समीपवर्तिनामन्येषां ग्रहणं किन्न स्यादिति वाच्यम् । तथा सति 'पयोब्धिवेलानिलयास्तमालवनवासिनः'[४] इत्युक्ति-

---

१. **'बहुभिर्दुर्गैस्तथा प्राग्ज्योतिषम्'** २. **'गिरीन् प्राप्य'**

३. **'तत्रतत्र तेषामनुकूलः परिचिता मार्गाः सन्ति । नतु प्लवनादिना गमनम् । अन्यथोत्तरत्र लङ्कां प्रति गमने शक्त्यभावकथनविरोधः स्यात् । अत इमामाशङ्कां परिहर्तुं पूर्वमेव ग्रन्थकारः 'मार्गज्ञैः' इत्युक्तवान् । तस्मादन्यद्वीपगमनमपि तेषां युक्तमिति'** इति वि.भू । एतान्येव वाक्यानि का.श्री. टीकायामपि पठ्यन्ते ।

४. **'–तमालवनगन्धिनः'** इति पूर्वत्र (६.५१) पठितः पाठः ।

विरोधात्। न च तथा सति मार्गज्ञैः सर्वैर्वानरैः हनुमता सह लङ्कां कुतो न गतमिति वाच्यम्। लङ्कामार्गाणां प्रतिरुद्धत्वात्। अत एवोत्तरत्राङ्गदवचनं 'मार्गाः सर्वेऽपि सार्गळाः' (८.२) इति। तस्मात् प्लक्षादिद्वीपगमनं तेषां युक्तमेव ॥ ३९ ॥

(सं.चं.) परीतम्। 'तत्र प्राग्ज्योतिषं नाम जातरूपमयं पुरम्। यस्मिन् वसति दुष्टात्मा नरको नाम दानवः' (४२.३१) इति, 'यस्मिन् हरिहयः श्रीमान् महेन्द्रः पाकशासनः। अभिषिक्तः सुरै राजा सुमेघो नाम पर्वतः' (४२.३५) इति च ॥ ३९ ॥

त्वया शतवले सार्द्धं त्रिभिर्वैवस्वतात्मजैः।
देवी मृग्योत्तराशायां गत्वाऽन्यैरपि वानरैः ॥ ४० ॥

(भा.दी.) **त्वये**ति। हे शतवले वानर, त्वया त्रिभिः वैवस्वतस्य यमस्याऽत्मजैः पुत्रैः कपिभिः सार्धम्, अन्यैः वानरैरपि सार्धं गत्वा उत्तराशायां शरावत्या उत्तरदिशि देवी मृग्या ॥ ४० ॥

(सं.चं.) त्वया शतवले। 'वृतः शतसहस्रेण त्वद्विधानां वनौकसाम्। वैवस्वतसुतैः सार्धं प्रतिष्ठस्व स्वमन्त्रिभिः' (४३.३) इति च। पण्डिताचार्यवचनानुसारेण 'पस्थितो मन्त्रिभिस्त्रिभिः' इत्यपि रामायणपाठः स्यात् ॥ ४० ॥

मत्स्यादीञ्छूरसेनादीन् विषयाग्र्यान् कुरूनपि।
मद्रकादीन् हिमाद्रिं च गत्वा सीता विमृग्यताम् ॥ ४१ ॥

(भा.दी.) **मत्स्ये**ति। मत्स्या मत्स्यविषया आदयो येषां ते तथा तान्, शूरसेना शूरसेनाविषया आदयो येषां ते तथा तान्, विषयेषु देशेषु अग्र्यान् कुरूनपि कुरुविषयानपि, मद्रका आदयो येषां ते तथा तान्, तानपि हिमाद्रिः हिमवत्पर्वतस्तं च गत्वा सीता विमृग्यताम् ॥ ४१ ॥

(सं.चं.) मत्स्यादीन्। 'तत्र म्लेच्छान् पुलिन्दांश्च शूरसेनांस्तथैव च। प्रस्थलान् भरतांश्चैव कुरूंश्च सह मद्रकैः' (४३.११) इति च ॥ ४१ ॥

भृगुतुण्डं काळगिरिं तथा ताम्राकरं[1] गिरिम्।
सुदर्शनं देवसखं[2] कैलासमलकापुरीम्[3] ॥ ४२ ॥

---

१. **'ताम्रातकं गिरिम्'** २. देवसभम्' इति. वि.ती. पाठः स्यात्। **'देवसभाम्'** इति क्वचित्। ३. **'-मलकां पुरीम्'**

(भा.दी.) भृग्विति । भृगुतुण्डं भृगुतुण्डगिरिम्, काळगिरिम्, तथा (ताम्रात)कनामकगिरिम्,[१] सुदर्शनः सुदर्शननामकगिरिस्तम्, देवसभं देवसभनामकगिरिस्तम्, कैलासं अलकापुरीं च गत्वा सीता विमृग्यताम् ॥ ४२ ॥

(सं.चं.) भृगुतुण्डम् । 'कालं नाम महासानुं पर्वतं तं गमिष्यथ' (४३.१४) इति, 'ततः सुदर्शनं नाम पर्वतं गन्तुमर्हथ' (४३.१६) इति, 'ततो देवसखो नाम पर्वतः पतगालयः' (४३.१७) इति, 'कैलासं पाण्डुरं प्राप्य हृष्टा यूयं भविष्यथ । तत्र पाण्डुरमेघाभं जाम्बूनदपरिष्कृतम् । कुबेरभवनं रम्यं निर्मितं विश्वकर्मणा' (४३.२०–१) इति च ॥ ४२ ॥

अद्रिं त्रिशिखरं क्रौञ्चं मैनाकं गन्धमादनम् ।
द्वीपानन्यानपि[२] प्राप्य रामरामा विमृग्यताम् ॥ ४३ ॥

(भा.दी.) अद्रिमिति । त्रीणि शिखराणि यस्मिन् स तथा तम्, अत एव तन्नामानं गिरिम्[३], क्रोञ्चः क्रौञ्चगिरिस्तम्, मैनाकं मैनाकनामानं गिरिम्, अयमपि समुद्रनिमग्नादन्यः, गन्धमादनं च प्राप्य, अन्यान् द्वीपानपि प्राप्य रामरामा श्रीरामस्य स्त्री सीता विमृग्यताम् ॥ ४३ ॥

(सं.चं.) अद्रिं त्रिशिखरं क्रौञ्चम् । रामायणे 'क्रौञ्चस्य शिखरं चापि निरीक्ष्य च ततस्ततः' (४३.२८) इति पठ्यते । 'क्रौञ्चं त्रिशिखरं चाद्रिम्' इति प्राचीनः पाठः स्यात् । 'क्रौञ्चं तु गिरिमासाद्य बिलं तस्य सुदुर्गमम् । अप्रमत्तैः प्रवेष्टव्यं दुष्प्रवेशं हि तत् स्मृतम्' (४३.२५) इति, 'क्रौञ्चं गिरिमतिक्रम्य मैनाको नाम पर्वतः' (४३.२९) इत्यादि च । रामस्य रामा सीता विमृग्यताम् ॥ ४३ ॥

आगम्यतां च मासात् प्राक् सर्वैर्दण्डोऽन्यथा[४] भवेत् ।
सीतां वीक्षेत यो दक्षः स मे राज्यार्द्धमर्हति ॥ ४४ ॥

(भा.दी.) आगेति । सर्वैः मासो मासकालस्तस्मात् प्राक् आगम्यताम् । अन्यथा दण्डः शिक्षा भवेत् । यः दक्षः समर्थः कपिः सीतां वीक्षेत सः वानरः मे राज्यस्य यदर्धं तत् अर्हति प्राप्तुं योग्यो भवति । अर्ह पूजायां लट् ॥ ४४ ॥

---

१. **'रम्यकनामकगिरिम्'** (?) इति सर्वत्र पाठ उपलभ्यते । २. **'द्वीपानन्यानथ प्राप्य'**

३. एतेन–**'गिरिं त्रिशिखरम्'** इत्यपि टीकासम्मतः पाठः स्यादिति भाति । ४. **'सर्वैर्दण्ड्योऽन्यथा'**

(सं.चं.) सीतां वीक्षेत । 'यस्तु मासान्निवृत्तोऽग्रे सीता दृष्टेति वक्ष्यति । मत्तुल्यविभवो भोगैः सुखं स विहरिष्यति' (४१.४७) इति च ॥ ४४–५ ॥

क्षेत्रेषु तत्रतत्रापि मुनीन् नमत पृच्छत ।
सीतायाः पदवीमन्यानपि जन्तून् पदेपदे ॥ ४५ ॥

(भा.दी.) अन्वेषणोपायमुपदिशति–**क्षेत्रेष्विति** । तत्रतत्र विद्यमानानि यानि क्षेत्राणि तेषु मुनीन् नमत । सीतायाः पदवीं मार्गम्, सीता अनेन मार्गेण केनापि नीता किमित्येवं रूपेणेत्यर्थः, पृच्छत प्रश्नं कुरुत । अन्यान् जन्तूनपि, पदेपदे प्रतिपादप्रक्षेपमित्यर्थः, पृच्छतेति सम्बन्धः ॥ ४५ ॥

दिशिदिश्येवमादिश्य प्रेषयामास शीघ्रगान् ।
बाढमित्युद्धतान् वीरान्[1] वानरान् वानराधिपः ॥ ४६ ॥

(भा.दी.) **दिशी**ति । वानराधिपः सुग्रीवः दिशिदिशि एवं आदिश्य बाढमिति तथाऽस्त्विति उक्त्वा उद्धतान् अभिवृद्धान् शीघ्रगान् धीरान् वानरान् प्रेषयामास ॥ ४६ ॥

(सं.चं.) बाढमङ्गीकृतं त्वच्छासनमित्यभिधाय प्रस्थितान् ॥ ४६–८ ॥

विनते गतवत्यैन्द्रीं सुषेणे पश्चिमामपि ।
उत्तराशां शतवलौ रामो मारुतिमब्रवीत् ॥ ४७ ॥

(भा.दी.) **विनत** इति । विनते ऐन्द्रीं पूर्वां दिशं गतवति सति, सुषेणे च पश्चिमां दिशं गतवति सति, शतवलौ उत्तराशां उत्तरदिशं गतवति सति, श्रीरामः मारुतस्यापत्यं पुमान् मारुतिस्तं हनुमन्तं प्रति अब्रवीत् ॥ ४७ ॥

तात कार्य्यमिदं कर्त्तुं त्वं प्रभुर्न्नापरे[2] क्वचित् ।
विहाय के[3] श्रीवराहमुद्धरेयुर्वसुन्धराम् ॥ ४८ ॥

१. **'धीरान्'** इति वि.ती.पाठः स्यात् । २. **'प्रभुर्नापरः क्वचित्'** इति वि.ती.पाठः ।

३. **'के उदके हिरण्याक्षेण मज्जितां वसुन्धरां भूमिं श्रीवराहं विना के वा उद्धरेयुः'** इति का.श्री. ।

(भा.दी.) तातेति । हे तात, इदं सीतान्वेषणाख्यं कार्यं कर्तुं त्वं प्रभुः समर्थः । अपरः कश्चित् न । श्रीवराहं विहाय के पुरुषाः वसुन्धरां भुवं उद्धरेयुः ॥ ४८ ॥

तस्मादेतैरुपेतस्त्वं गच्छ दक्षिण दक्षिणाम् ।
देहि देव्यै मदीयं त्वं प्रत्ययायाङ्गुलीयकम् ॥ ४९ ॥

(भा.दी.) तस्मादिति । तस्मात् अन्यासाध्यत्वात् हे दक्षिण समर्थ, हे हनुमन्, त्वं एतैः अङ्गदादिभिः उपेतः सन् दक्षिणां दिशं गच्छ । देव्यै मदीयं अङ्गलीयकं अङ्गुलिमुद्रा तत्, प्रत्ययाय विश्वासहेतवे, 'प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु' इत्यमरः, देहि ॥ ४९ ॥

(सं.चं.) दक्षिणो विदग्धः । त्वं गच्छ, त्वं देहि इति तात्पर्याद् द्विरुक्तिः । अथ 'मदीयं तु' इत्यपि मूलपाठः स्यात् ॥ ४९ ॥

इत्युक्त्वा स ददौ दीप्तं रत्नभासाऽङ्गुलीयकम् ।
मानितं मानसस्येव मण्डलं बालभानुना ॥ ५० ॥

(भा.दी.) इतीति । सः श्रीरामः इति उक्त्वा, रत्नस्य भास्तया दीप्तम्, बालो यो भानुः सूर्यस्तेन मानसं मानससरोवरं तस्य मण्डलमिव मानितम्, श्रीरामेणेति शेषः, अङ्गुलीयकं अदात् ॥ ५० ॥

(सं.चं.) रत्नभासा दीप्तम् । अत एव बालसूर्येण मानितं भासितं मानससरोमण्डलमिव ॥ ५० ॥

अञ्जलिभ्यां[१] तदादाय प्राञ्जलिः सोऽञ्जनासुतः ।
ओमित्युक्त्वा ययौ याम्यां तारजाम्बवदादिभिः ॥ ५१ ॥

(भा.दी.) अञ्जलीति । अञ्जनासुतः सः प्राञ्जलिः सन्, ओमिति तथाऽस्त्विति उक्त्वा, तत् अङ्गुलीयकं अञ्जली हस्तौ ताभ्यां आदाय, तारश्च जाम्बवांश्च तौ आदी येषां ते तथा तैः वानरैः सह याम्यां दिशं प्रायात् ॥ ५१ ॥

(सं.चं.) अञ्जलिभ्यां अञ्जलिबद्धाभ्यां करपुटाभ्याम् ॥ ५१–२ ॥

१. **'यद्यपि 'पाणिर्निकुब्जः प्रसृतिस्तौ युतावञ्जलिः पुमान्' इत्यमरोक्त्या निकुब्जौ पाणी मिलितावञ्जलिरुच्यते । तथाऽपि विकुब्जपाण्योः प्रत्येकमञ्जलित्वविवक्षया 'अञ्जलिभ्याम्' इत्युक्तम्'** इति का.श्री. ।

विनतश्च सुषेणश्च वीरः शतवलिस्तथा ।
मासान्ते सगणाः प्राप्य प्रोचुः प्राञ्जलयः पतिम्[1] ॥ ५२ ॥

(भा.दी.) विनत इति । विनतश्च सुषेणश्च तथा वीरः शतवलिश्च इत्येते मासस्यान्तोऽवसानं तस्मिन् सगणाः कपिसमूहसहिताः सन्तः पतिं सुग्रीवं प्राप्य प्राञ्जलयः सन्तः प्रोचुः ॥ ५२ ॥

देशांस्त्वयोक्तानन्यांश्च विचित्यातिप्रयत्नतः[2] ।
सीतागतिर्न्न विदिता तिसृष्वाशासु मानद ॥ ५३ ॥

(भा.दी.) देशान्निति । हे मानद, सेवानुसारेण बहुमानकर्तः सुग्रीव, त्वया उक्तान् देशान् अन्यांश्च प्रयत्नतः विचित्य मार्गयित्वा, तिसृषु आशासु दिक्षु सीतायाः गतिः, सीता अत्र गता अत्र तिष्ठतीति प्रवृत्तिः, अस्माभिर्न विदिता ॥ ५३ ॥

(सं.चं.) विचित्यातिप्रयत्नतः । 'विचित्यापि प्रयत्नतः' इत्यपि पाठः स्यात् ॥ ५३–४ ॥

अनूनविक्रमो नूनं हनूमंस्तामवेक्षते ।
दयितां देवदेवस्य हयग्रीवस्त्रयीमिव ॥ ५४ ॥

(भा.दी.) अनूनेति । अनूनः पूर्णो विक्रमो यस्य स तथा हनुमान् देवदेवस्य श्रीरामस्य दयितां भार्यां (तां) सीताम्, त्रयीं वेदत्रयं हयग्रीव इव अवेक्षते नूनम् ॥ ५४ ॥

इत्थमामन्त्रयद्भिस्तैर्म्मन्त्रिभिः सह सूर्य्यजः ।
प्रत्यैक्षत हनूमन्तं तितीर्षुरिव तारकम् ॥ ५५ ॥

(भा.दी.) इत्थमिति । सूर्यजः सुग्रीवः इत्थं आमन्त्रयद्भिरालोचयद्भिर्मन्त्रिभिस्तैर्वानरैः सह हनुमन्तं तारकं नदीतारकपुरुषं तितीर्षुरिव नदीतरणेच्छुरिव प्रत्यैक्षत ॥ ५५ ॥

(सं.चं.) नदीं तितीर्षुस्तारकं नाविकमिव । प्रत्यैक्षत तदागमनमेव प्रतीक्षमाणस्तस्थौ ॥ ५५–६ ॥

---

१. **'प्राञ्जलयो विभुम्'**

२. **'विचित्यापि प्रयत्नतः'** इति वि.ती.पाठः स्यात् ।

हनूमान् हरिभिः सार्द्धं विचिन्वंस्तां सुमद्ध्यमाम् ।
चचार विन्ध्ये गहने गुहासु विपिनेषु च ॥ ५६ ॥

(भा.दी.) हनुमानिति । हरिभिः कपिभिः सार्धम्, सु शोभनं मध्यमं मध्यं यस्याः सा तथा तां सीतां विचिन्वन् विचारयन् हनुमान्, गहने विन्ध्यो विन्ध्यगिरिस्तस्मिन्, गुहासु, विपिनानि वनानि तेषु च चचार ॥ ५६ ॥

महर्षेर्म्मृतपुत्रस्य [१]कण्डोश्चण्डस्य शापतः ।
निःसत्वे निस्तरौ देशे विचिक्युर्न्निर्ज्जलेऽथ ते ॥ ५७ ॥

(भा.दी.) महर्षेरिति । अथ ते कपयः मृतः पुत्रो यस्य स तथा तस्य, चण्डस्य तपसा क्रूरस्य, कण्डोः कण्डुनामकमुनेः शापेन निर्गतानि सत्वानि प्राणिनो यस्मात् स तथा तस्मिन्, निर्गतास्तरवो यस्मात् स तथा तस्मिन्, निर्गतं जलं यस्मात् स तथा तस्मिन्, देशे विचिक्युः सीतां मार्गयामासुः । कण्डुर्हि तस्मिन् वने द्वादशवार्षिकं स्वपुत्रं[२] मृतं दृष्ट्वा तद्वनं निर्जलोदकसत्वं भूयादिति शप्तवानिति रामायणे प्रसिद्धम् ॥५७॥

(सं.चं.) चण्डस्य कोपनस्य नामतः कण्डोः शापतः । 'कण्डुर्नाम महाभागः सत्यवादी तपोधनः । महर्षिः परमामर्षी नियमैर्दुष्प्रधर्षणः । तस्य तस्मिन् वने पुत्रो बालो द्वादशवार्षिकः । प्रनष्टो जीवितान्ताय क्रुद्ध-स्तेन महामुनिः । तेन धर्मात्मना शप्तं कृत्स्नं तत्र महद् वनम् । अशरण्यं दुराधर्षं मृगपक्षिविवर्जितम्' (४८.१२–५) इति च ॥ ५७ ॥

गिरिगह्वरमाप्यान्यद् ददृशुः कञ्चनासुरम् ।
मारीचपुत्रमत्रस्तं रावणं तं शशङ्किरे ॥ ५८ ॥

(भा.दी.) गिरीति । ते अन्यं गिरेर्गह्वरं गह्वरप्रदेशस्तत्, लतागुल्मादिना पिहितप्रदेशमित्यर्थः, आप्य कञ्चन असुरं ददृशुः । मरीचेरपत्यं मारीचः काश्यपस्तस्य पुत्रम्,[३] अत्रस्तं अभीतं तमसुरं रावणं शशङ्किरे । शकि शङ्कायाम् ॥ ५८ ॥

---

१. **'–पुत्रस्य चण्डेश्चण्डस्य' । 'चण्डेः चण्डिनामकस्य । कण्डोरिति कचित् पाठः'** इति का.श्री. । वि.भू.टीकायामपि तथैव पाठः उपलब्धः- **'चण्डस्य चण्डिनामकस्य'** इति । रामायणे तु कण्डुरित्येव पठ्यते । न चण्डिरिति ।

२. सम्प्रति रामायणे त्रेधा पाठं पठन्ति–**'बालः षोडशवार्षिकः'** इति गोविन्दराजादयः । **'बालो द्वादशवार्षिकः'** इति माधवयोगी । **'बालको दशवार्षिकः'** इत्यपरे । **'बालो द्वादशवार्षिकः'** इति वि.ती.सम्मतः पाठः ।

३. मारीचो यो मृगरूपो रामेण हतस्तस्य पुत्रमिति युक्तम् ।

अङ्गदस्तमभिद्रुत्य तिष्ठतिष्ठेति निष्ठुरम्[१] ।
मुष्टिघातेन घोरेण जघानामरवैरिणम्[२] ॥ ५९ ॥

(भा.दी.) अङ्गद इति । अङ्गदः निष्ठुरं तं दैत्यं तिष्ठतिष्ठ इति वदन् सन् अभिद्रुत्य घोरेण मुष्टेर्यो घातस्तेन अमरवैरिणं तं जघान ॥ ५९ ॥

(सं.चं.) अन्यद् गिरिगह्वरमाप्य गह्वरं कन्दरम् । कश्चनासुरम्– 'सोऽपि मारीचतनयो नष्टाः स्थेत्यब्रवीद् बली । अभ्यधावत सङ्क्रुद्धो मुष्टिमुद्यम्य दक्षिणम् । तमापतन्तं तरसा वालिपुत्रोऽङ्गदस्तदा । रावणोऽयमिति ज्ञात्वा तळेनाभिजघान ह' (४८.१९–२१) इति च ॥ ५८–९ ॥

सन्नदन्तो रिपौ सन्ने तत्रतत्र विचित्य ते ।
सीतामदृष्ट्वा सीदन्तः[३] सालमूलमुपाविशन् ॥ ६० ॥

(भा.दी.) समिति । रिपौ तस्मिन् दैत्ये सन्ने सति मृते सति, सन्नदन्तः ते तत्रतत्र प्रदेशेषु विचित्य विचार्य, तां सीतामदृष्ट्वा विषीदन्तः कार्यगौरवभीताः सन्तः, सालस्य सर्जवृक्षस्य मूलं तस्मिन्नुपाविशन् संस्थिताः । विशतेर्लङ् ॥ ६० ॥

(सं.चं.) सम्यगुच्चैर्नदन्तः । सीदन्तः श्रमखिन्नाः । सालमूलं वृक्षमूलम् ॥ ६० ॥

श्रीमानुवाच हनुमान् तत्रेदं वानरान् प्रति ।
अविक्लबोऽक्लीबधीश्च परीक्षार्थं विचक्षणः ॥ ६१ ॥

(भा.दी.) श्रीमानिति । विक्लबो न भवतीत्यविक्लबः श्रमरहित इत्यर्थः, अक्लीबा धीर्यस्य स तथा, चोऽप्यर्थे, श्रमरहितोऽपीत्यर्थः, श्रीमान् विचक्षणः हनुमान्, वानरान् प्रति परीक्षार्थं मनःपरीक्षार्थं इदं वचः तत्र सालमूले अब्रवीत् ॥ ६१ ॥

(सं.चं.) अविक्लबः । अविह्वलोऽसम्भ्रान्तः, अश्रान्तो वा । क्लीबा अकार्यसाधनक्षमा दुर्बला धीर्नास्येत्य-क्लीबधीः । श्रीमान् प्रसन्नमुखः । इतरे कपयः सीता न लब्धेति विषीदत्सु स्वयमयमविषण्णस्तथौ । परीक्षार्थं कपीनामन्तरङ्गपरीक्षार्थम् ॥ ६१–२ ॥

---

१. **'निष्ठितम्'** २. **'जघान सुरवैरिणम्'** ३. **'तामदृष्ट्वा विषीदन्तः'** इति वि.ती.पाठः ।

सुचिरं विचिता देवी न दृष्टा किं नु कुर्म्महे ।
इत्याकर्ण्याङ्गदः प्रोचे सर्वानाभाष्य वानरान् ॥ ६२ ॥

(भा.दी.) सुचिरमिति । देवी सीता सुचिरं यथा भवति तथा विचिता विचारिता, अथापि न दृष्टा, किं नु किं वा वयं कुर्महे? अङ्गद इति वचः आकर्ण्य सर्वान् वानरान् आभाष्य सम्बोध्य प्रोचे ॥ ६२ ॥

कार्य्यत्वाद् रामसेवायाः राजदण्डस्य गौरवात् ।
यत्नस्य च फलान्तत्वात् पुनर्देवीं विचिन्महे[1] ॥ ६३ ॥

(भा.दी.) कार्येति । रामसेवायाः कार्यत्वात् कर्तुमर्हत्वात्, राज्ञः सुग्रीवस्य यो दण्डस्तस्य गौरवं भूयस्त्वं तस्मात्, यत्नः प्रयत्नस्तस्य यत्फलमन्तेऽवसाने यस्य स तथा तस्य भावस्तत्वं तस्मात्, 'अनारम्भो मनुष्याणाम्' इति न्यायादिति भावः । पुनः देवीं विचिन्महे मार्गयामः ॥ ६३ ॥

(सं.चं.) कार्यत्वात् कर्तव्यत्वात् । राजदण्डस्य राजशासनस्य गौरवात्, अनुल्लङ्घ्यतयाऽऽदरणीयत्वात् । कार्याकरणे दण्डस्य शिक्षाया गुरुतरत्वादिति वा ॥ ६३ ॥

अङ्गदेनेति गदिते गन्धमादनपूर्वकाः ।
उत्तस्थुः क्षुत्तृडार्त्ताश्च[2] साधुसाध्विति वानराः ॥ ६४ ॥

(भा.दी.) अङ्गदेति । अङ्गदेन इति वचसि गदिते सति, गन्धमादनः पूर्वो येषां ते तथा वानराः, क्षुच्च तृट् च ताभ्यां आर्ताश्च आर्ता अपि, साधुसाध्विति वचः वदन्तः सन्तः उत्तस्थुः प्रोत्थिताः ॥ ६४ ॥

(सं.चं.) क्षुत्तृडार्ता अपि कार्योत्साहेनोत्तस्थुः ॥ ६४ ॥

विचिच्यिरेऽथ[3] रूप्याद्रौ रामकीर्त्तिशशिप्रभे ।
सप्तपर्ण्णैश्च लोध्रैश्च पुष्पितैरतिपाण्डुरे ॥ ६५ ॥

---

१. **'लोपश्चास्यान्यतरस्यां म्वोः'** (अ.सू.६.४.१०७) इति विकल्पेन श्नुप्रत्ययस्योकारस्य मात्रस्य लोपः' इति का.श्री.। तेन विचिनुमहे विचिन्महे इति रूपद्वयं भवतीत्यर्थः ।

२. **'क्षुत्तृषार्ताश्च'**

३. **'विचिन्विरेऽथ'** इति सर्वत्र ताळपत्रेषु पाठः व्याख्यानेषु च । चिनुधातोर्लिटि रूपद्वयं भवति–**'विचिक्यिरे'** इति, **'विचिच्यिरे'** इति । तेन **'विचिन्विरे'** इति लिपिकृतां प्रमाद एवायम् । बहुलं लिपिकृतः प्रमाद्यन्ति । न महान्तो विदितवेद्याः प्रबन्धारः । एवं वि.ती.टीकायामपि

(भा.दी.) विचिन्विर(?) इति । अथ ते वानराः श्रीरामस्य या कीर्तिः सैव शशी तद्वत्प्रभा यस्य स तथा तस्मिन्, सप्तपर्णाः सप्तपर्णाख्यवृक्षास्तैश्च, सञ्जातानि पुष्पाणि एष्विति पुष्पितास्तैः, तारकादित्वादितज्, लोध्रैश्च लोध्रनामकवृक्षविशेषैश्च, अतिपाण्डुरे अतिश्वेते रूप्याद्रौ च, विचिन्विरे(?), निमार्गयामासुः ॥६५॥

(सं.चं.) विचिच्यिरेऽथ रूप्याद्रौ । 'विचिन्विरे' इति पाठोऽसङ्गतः । रामकीर्तिवत् शशिवच्च धवळप्रभे । रूप्याद्रिरयं दक्षिणदेशगः कश्चन पर्वतभागः । सप्तपर्णैः– 'ಏಳೆಲೆ ಬಾಳೆ, 'ಹಾಲೆ' इति भाषायाम् । लोध्रः हैमर्तुभवः पुष्पविशेषः । 'ते शारदाभ्रप्रतिमं श्रीमद्रजतपर्वतम् । शृङ्गवन्तं दरीमन्तमाधिरुह्य च वानराः । तत्र लोध्रवनं रम्यं सप्तपर्णवनानि च । व्यचिन्वंस्ते कपिवराः सीतादर्शनकाङ्क्षिणः' (४९.१६–७) इति च ॥ ६५–६ ॥

विन्ध्याटव्यामटन्ति स्म कपयस्ते पुनःपुनः ।
समागमार्थं सङ्केतं कृत्वा तत्राथ सत्वराः[१] **॥ ६६ ॥**

(भा.दी.) विन्ध्येति । ते कपयः समागमार्थं सम्मेळनार्थं सङ्केतं चिह्नविशेषस्तं कृत्वा, सत्वराः त्वरया सहिताः सन्तः, विन्ध्याटव्यां (पुनःपुनः)अटन्ति स्म चरन्ति स्म । अट गतौ लट् ॥ ६६ ॥

सम्प्राप्य गिरिदुर्गाणि गह्वराणि महागुहाः ।
रामभक्त्या व्यचिन्वंस्ते कपिराजभयादपि ॥ ६७ ॥

(भा.दी.) समिति । ते कपयः गह्वराणि लतागुल्मादिना पिहितत्वेन गम्भीराणि गिरेर्दुर्गाणि दुर्गप्रदेशान्, महागुहाश्च सम्प्राप्य, रामभक्त्या, कपिराजस्य सुग्रीवस्य यद्भयं तस्मादपि, व्यचिन्वन् निमार्गितवन्तः ॥६७॥

(सं.चं.) गिरौ यानि दुर्गाणि दुर्गमाः प्रदेशा वनानि च । 'वने दुर्गं दुर्गमे' इति वैजयन्ती । गह्वराणि लतापिहितानि निकुञ्जानि । 'गह्वरस्तु गुहादम्भनिकुञ्जगहनेष्वपि' इति ह्यभिदधति । गहनेषु वरं गह्वरमति-गहनम् ॥ ६७–८ ॥

लिपिकृत्प्रमादः सम्भाव्यते । यद्यपि का.श्री.टीकायां 'विचिन्विरे' इत्येव प्रतीकमादाय व्याख्यातम् । प्रायो लिपिकृत्प्रमादोऽयम् । तदिदमुत्तरवचनेभ्यः स्फुटम् । तथाहि–**'विभाषा चेः' (अ.सू.७.३.५८) इति कुत्वस्य विकल्पितत्वादभ्यासस्य कुत्वाभावः'** इति । तेनाभ्यासे सति, कुत्वाभावे च सति **'विचिच्यिरे'** इत्येव रूपम्, न **'विचिन्विरे'** इति । तेन **'विचिच्यिरे'** इत्येव साधुः पाठ इत्यवसीयते ।

१. **'कृत्वाकृत्वाऽतिसत्वराः'**, इति **'कृत्वाकृत्वा च सत्वराः'** इति च । **'अथ रूप्याद्रौ अन्वेषणानन्तरं ते कपयः समागमार्थं सङ्केतं यत्र क्वापि गतेनापि अत्रागन्तव्यमिति समयबन्धं कृत्वा विन्ध्याटव्यां विन्ध्यपर्वतसमीपवने सवेगाः सत्वसः सन्तः पुनःपुनः अटन्ति स्म'** इति का.श्री. ।

सुधार्थमिव दुग्धाब्धिं सुरासुरवराः पुरा ।
अक्षोभयन् भूवलयं सीतार्थं वानरेश्वराः ॥ ६८ ॥

(भा.दी.) सुधेति । वानरेश्वराः सीतार्थं भुवो वलयं मण्डलं तत्, सुरासुरवराः सुधार्थं अमृतार्थं पुरा दुग्धाब्धिमिव अक्षोभयन् । क्षुभ सञ्चलने लङ् ॥ ६८ ॥

शैलानुदहरन् वीरा गण्डशैलानलोठयन्[१] ।
वनान्यधून्वन्नपरे गुहाः केचिज्जगाहिरे ॥ ६९ ॥

(भा.दी.) शैलेति । अपरे वीराः शैलान् पर्वतान् उदहरन् उद्दध्रुः । हृञ् हरणे लङ् । केचिद् वीराः गण्डशैलान् पर्वतेभ्यो पतितपाषाणान् अलोठयन् बिभिदुः । लुठ गतौ लङ् । अपरे वीराः वनानि अधून्वन् कम्पयामासुः । धूञ् कम्पने लङ् । केचित् गुहाः जगाहिरे प्रविविशुः । गाहू विलोडने लिट् ॥ ६९ ॥

(सं.चं.) केचिद् वीराः उदहरन् अदधत । 'गण्डशैलास्तु पाषाणाः स्थूलाः प्रगळिता गिरेः' इति च । अलोठयन् स्वैरं प्रचिक्षिपुः । लुठ विलोडने । 'ಜಾಲಾಡಿಸು' इति भाषायाम् । अधून्वन् फलानि पुष्पाणि चावचित्य, शाखा विच्छिद्य क्षोभयामासुः । गुहाः जगाहिरे विलोळयामासुः ॥ ६९ ॥

मत्तान् मतङ्गजान् सिंहान् तरक्षून् राक्षसानपि ।
आद्रुत्य[२] रावणोऽसीति[३] जघ्नुः केचन कोपिनः[४] ॥ ७० ॥

(भा.दी.) मत्तानिति । कोप एषामस्तीति कोपिनः केचित् कपयः, मत्तान् मतङ्गजान् गजान्, सिंहान्, तरक्षून्, व्याघ्रान्, राक्षसानपि आद्रुत्य त्वं रावणः असि इति जघ्नुः । हन्तेर्लिट् ॥ ७० ॥

(सं.चं.) मतङ्गजान् गजान् । तरक्षून् मृगाजीवान् । 'ತಿವಂಗಿ, ಕತ್ತೆಕಿರುಬ' इति भाषायाम् । सीताया अदर्शननिमित्तेन नैराश्येन सञ्जातकोपाः ॥ ७०–२ ॥

कपीन् यूथपरिभ्रष्टानन्विष्यान्विष्य धावतः[५] ।
मेघगम्भीरनादेन [६]हनुमानाह्वयत् सुखम् ॥ ७१ ॥

---

१. '–शैलानलोडयन्' २. 'आवृत्य' ३. 'त्वं रावणोऽसि किमित्युक्त्वा' इति का.श्री. ।
४. 'केचिच कोपिनः' इति वि.ती.पाठः स्यात् । ५. '–भ्रष्टानन्वीक्ष्यान्वीक्ष्य धावतः' ६. 'हनूमाना–'

(भा.दी.) कपीनिति । हनुमान् यूथेभ्यः परिभ्रष्टान् अन्विष्यअन्विष्य स्वस्वयूथं विचार्यविचार्य धावतः कपीन् मेघवत् मेघगर्जनवद् गम्भीरो नादो ध्वनिस्तेन सुखं यथा भवति तथा आह्वयत् आह्वानं चक्रे ॥ ७१ ॥

क्षुत्पिपासापरिश्रान्ताः शुष्ककण्ठाः श्रमातुराः ।
पानीयपानं वाञ्छन्तो ददृशुस्ते महागुहाम् ॥ ७२ ॥

(भा.दी.) क्षुदिति । क्षुच्च, पिपासा पानेच्छा, सा च ताभ्यां परिश्रान्ताः, अत एव शुष्काः कण्ठाः येषां ते, श्रमेण आतुराः अत्यन्तमर्दिताः, पानीयस्य उदकस्य यत्पानं तत् वाञ्छन्तः ते वानराः महागुहां ददृशुः ॥७२॥

मिश्रैः पद्मपरागेण हंसाद्यैरार्द्रपक्षिभिः ।
गुहोत्थितैस्ते कपयो[१] नीरं तत्रानुमेनिरे ॥ ७३ ॥

(भा.दी.) मिश्रैरिति । ते कपयः पद्मानां परागो रजस्तेन मिश्रैः, आर्द्रा जलाक्ताः पक्षाः एषां सन्तीति तथोक्तास्तैः, गुहाया उत्थितैः, हंस आद्यो येषां ते तथा तैः पक्षिभिः तत्र गुहायां नीरं जलं तत् अनुमेनिरे ऊहितवन्तः । मनु अवबोधने लिट् ॥ ७३ ॥

(सं.चं.) पद्मपरागेण कमलरेणुना मिश्रैः, जलार्द्रपक्षोपलक्षितैः । गुहात आगतैः । 'अस्माच्चापि बिलाद्धंसाः क्रौञ्चाश्च सह सारसैः । जलार्द्राश्चक्रवाकाश्च निष्पतन्ति स्म सर्वतः' (५०.१५-६) इति च ॥ ७३ ॥

अस्त्यधो वारिमान् देशः प्रविशाम पिबाम कम् ।
अन्विष्याम च वैदेहीमिति ते प्राविशन् गुहाम् ॥ ७४ ॥

(भा.दी.) अस्तीति । वारि अस्मिन्नस्तीति वारिमान् देशः, अधः गुहायाः अधरभागे अस्ति, वयं तत्र प्रविशाम, कमुदकं तत् पिबाम । वैदेहीं सीतां अन्विष्याम च निमार्गयाम च । इषु इच्छायां[२] लोट् । इति वदन्तः ते गुहां प्राविशन् । 'अन्विष्यामलवैदेहीम्' इति पाठे अमलवैदेहीं विमृश्य कं पिबाम इति सम्बन्धः ॥ ७४ ॥

(सं.चं.) कं जलं पिबाम । तेन समेधितप्राणा अन्विष्याम च वैदेहीम् । प्रथमं तत्रैव ॥ ७४ ॥

---

१. **'गुहोत्थितैस्ते हरयो नीरम्'**

२. **'इष गतौ'** इति वक्तव्यम् । दिवादिरयम् । **'इषु इच्छायाम्'** इत्यस्य तुदादेः 'अन्विच्छाम' इति रूपम् ।

अन्योन्यहस्तग्राहेण भ्राम्यन्तो विन्ध्यकन्दरे ।
नाविन्दन्[1] निर्गतेर्म्मार्ग्गं तमसा योजनायते ॥ ७५ ॥

(भा.दी.) अन्येति । योजनं आयते विस्तीर्णे, विन्ध्यस्य कन्दरो गुहा तस्मिन्, अन्योन्यं परस्परं यो हस्तस्य ग्राहो ग्रहणं तेन भ्राम्यन्तः इतस्ततः सञ्चरन्तः, तमसा निमित्तेन निर्गतेः निर्गमनस्य यो मार्गस्तं नाविन्दन् न लब्धवन्तः । विदॢ लाभे लङ् ॥ ७५ ॥

(सं.चं.) योजनायते विन्ध्यस्य कन्दरे गुहायाम् । तमसा हेतुना निर्गममार्गं नाविन्दन्, नालभन्त ॥ ७५–६ ॥

निराशा जीवने[2] दीनाः क्षुत्क्षामाः श्रमकर्शिताः ।
क्रन्दन्तो रामरामेति ददृशुर्द्देशमद्भुतम् ॥ ७६ ॥

(भा.दी.) निरिति । जीवनं प्राणधारणं तस्मिन् निर्गता आशा येभ्यस्तथा, अत एव दीनाः, क्षुधा क्षामाः, श्रमकर्शिताः, (राम)राम इति क्रन्दन्तः क्रोशन्तः, अद्भुतं देशः प्रदेशस्तं ददृशुः ॥ ७६ ॥

काञ्चन स्त्रीमवेक्ष्याऽथ काञ्चनश्रीमये वने ।
मुदा हनूमान् वचनमुदाहरदविक्लमः[3] ॥ ७७ ॥

(भा.दी.) काञ्चनेति । अथ अविक्लमः श्रमरहितः हनूमान्, काञ्चनस्य श्रीः कान्तिस्तया प्रचुरं काञ्चनश्रीमयं तस्मिन् वने, काञ्चन कामपि स्त्रीं स्त्रियं अवेक्ष्य, मुत् सन्तोषस्तया वचनं वाक्यं तत् उदाहरत् उवाच ॥७७॥

(सं.चं.) उदाहरदुवाच । अविक्लमः ग्लानिरहितः । पादयोर्मधुरं यमकम् ॥ ७७–८० ॥

का त्वं कञ्जपलाशाक्षि[4] तपसा जिततापसा ।
कस्येदं काञ्चनमयं सरोवनगुहादिकम्[5] ॥ ७८ ॥

---

१. **'नाविदन्'** । **'नाविदन् नाजानन् । विद ज्ञाने'** इति का.श्री. ।
२. **'जीविते दीनाः'**
३. **'–हरदविक्लवः'** । **'अविक्लवः अज्ञानरहितः'** इति का.श्री. ।
४. **'–पलाशाक्षी'**
५. **'–वनगृहादिकम्'**

(भा.दी.) केति । कञ्जस्य कमलस्य पलाशं पत्रं तद्वदक्षिणी यस्याः, तत्सम्बुद्धिः । तपसा जिताः तापसाः मुनयो यया सा तथोक्ता त्वं का कस्य कुलोत्पन्ना? काञ्चनस्य विकारः काञ्चनमयम्, सरश्च, वनं तच्च, गुहाश्च ता आदयो यस्य तत्तथोक्तं इदं स्थलं कस्य सम्बन्धि? ॥ ७८ ॥

रामो नाम रमाकान्तः कान्तो दशरथात्मजः ।
पितुर्न्नियोगादागच्छत् सभार्य्यः सानुजो वनम् ॥ ७९ ॥

(भा.दी.) स्वस्वरूपमाह– **राम** इत्यादिना । रामो नाम श्रीराम इति प्रसिद्धः, कान्तः मनोहरः, दशरथात्मजः रमाकान्तः श्रीहरिः, पितुः दशरथस्य नियोग आज्ञा तस्मात्, सभार्यः सन्, सानुजः सन्, वनं तत् आगच्छत् ॥ ७९ ॥

तस्य सुग्रीवमित्रस्य वयं भृत्या वरानने ।
[1]नष्टां भार्य्यां विचिन्वाना दैवादेतां[2] गुहां गताः[3] ॥ ८० ॥

(भा.दी.) तस्येति । वरमुत्तममाननं यस्याः सा तथा, तत्सम्बुद्धिः, सुग्रीवस्य मित्रं तस्य, तस्य श्रीरामस्य भृत्याः वयम्, नष्टां अपहृतां भार्यां सीतां विचन्वानाः सन्तः मार्गमाणाः सन्तः, दैवमदृष्टं तस्मात् एतां गुहां श्रिताः ॥ ८० ॥

मारुतेरिति गां श्रुत्वा[4] योगिनीदमभाषत ।
दुहिता मेरुसावर्ण्णेरहं नाम्ना स्वयम्प्रभा ॥ ८१ ॥

(भा.दी.) मारुतेरिति । योगिनी तपस्विनी सा स्त्री मारुतेः हनुमतः इति गां वाचं श्रुत्वा इदं वचः अभाषत । मेरुसावर्णेः मेरुसावर्णिनामकस्य मनोः दुहिता तनया अहं नाम्ना स्वयम्प्रभा ॥ ८१ ॥

(सं.चं.) भविष्यतः द्वादशमन्वन्तरस्याधिपतिः मेरुसावर्णिः ॥ ८१–२ ॥

उवासात्र चिरं पूर्वं निर्म्मायेमां मयो गुहाम् ।
अप्सरोवरया साकं हेमया हेमशोभया ॥ ८२ ॥

---

१. **'तस्य भार्याम्'** २. **'दैवादेनाम्'**
३. **'गुहां श्रिताः'** इति वि.ती. पाठः स्यात् । ४. **'मारुतेनेरितं श्रुत्वा'**

(भा.दी.) उवासेति । मयः मयनामको दैत्यवर्धकिः इमां गुहां निर्माय अप्सरःसु वरया, हेमशोभया हेमवत् शोभा यस्याः सा तथा तया, हेमया हेमानाम्न्या साकं अत्र गुहायां पूर्वं चिरं यथा भवति तथा उवास ॥ ८२ ॥

हेमाया हे महाबाहो सखीं मां विद्धि तापसीम् ।
आमन्त्रयामि वः श्रान्तान् विश्रामायाऽश्रमागतान्[1] ॥ ८३ ॥

(भा.दी.) हेमाया इति । महान्तौ बाहू यस्य तत्सम्बुद्धिः हे हनुमन्, तापसीं तपस्विनीं मां हेमायाः सखीं विद्धि । विद ज्ञाने लोट् । आश्रमागतान् (श्रान्तान्) वः युष्मान् विश्रामो विश्रमणं तस्मै, आमन्त्रयामि आतिथ्याय निमन्त्रयामि । मत्रि गुप्तभाषणे लट् ॥ ८३ ॥

(सं.चं.) आश्रममागताः श्रान्ता इति विश्रमणायाऽमन्त्रयामि ॥ ८३–५ ॥

इत्युक्त्वा फलमूलैस्तान् बहुलैरमृतोपमैः ।
श्रान्तानाप्याययामास तर्प्पयित्वा तपस्विनी ॥ ८४ ॥

(भा.दी.) इतीति । तपस्विनी स्वयम्प्रभा इति उक्त्वा, बहुलैः अमृतस्य उपमा येषां तानि तैः, फलानि च मूलानि च तैः, श्रान्तान् तान् वानरान् तर्पयित्वा आप्ययामास, ग्लानिं परिहृत्य बलादिना अभिवर्धयामास । प्यायी वृद्धौ लिट् ॥ ८४ ॥

विश्रान्तानथ[2] सन्तुष्टानात्मानमभिनन्दतः[3] ।
बिलान्निर्ग्गममार्ग्गाज्ञान् कपीनूचे स्वयम्प्रभा ॥ ८५ ॥

(भा.दी.) विश्रान्ताननिति । अथ स्वयम्प्रभा, विश्रान्तान् विगतश्रमान्, सन्तुष्टान्, आत्मानं च स्वां च अभिनन्दतः प्रशंसतः, बिलं गुहा तस्मात्, निर्गमस्य निर्गमनस्य यो मार्गस्तं न जानन्तीति तथा तान्, कपीन् प्रति ऊचे ॥ ८५ ॥

विरिञ्चस्य वरादत्र जन्तूनां नोद्गमागमौ ।
योगाद् वो गमयिष्यामि निमीलयत लोचने ॥ ८६ ॥

---

१. **'विश्रामायाऽश्रमं गतान्'** इति, **'विश्रमायाऽश्रमागतान्'** इति च ।

२. **'विश्रमानथ'** । अयमेव वि.ती.सम्मतः पाठोऽपि स्यात् । **'विगतश्रमान्'** इति व्याख्यानस्वारस्यात् ।

३. **'–त्मानं चाभिनन्दतः'** इति वि.ती.पाठः ।

(भा.दी.) विरिञ्चस्येति । विरिञ्चस्य चतुर्मुखस्य मयाय दत्तो यो वरस्तस्मात् अत्र गुहायां जन्तूनां प्राणिनां उद्गमागमौ गमनागमने न स्तः । तस्मात् वः युष्मान् योगो योगसामर्थ्यं तस्मात् गमयिष्यामि बहिः प्रापयिष्यामि, लोचने निमीलयत निमीलिते कुरुत । मील निमेषणे लोट् ॥ ८६ ॥

(सं.चं.) योगात् अणिमादिसिद्धिबलात् ॥ ८६–७ ॥

तस्या इत्युपदेशेन निमीलितविलोचनाः[३] ।
क्षणेनाचक्षताऽत्मानं विन्ध्यपृष्ठे प्लवङ्गमाः ॥ ८७ ॥

(भा.दी.) तस्या इति । तस्याः स्वयम्प्रभायाः इति य उपदेशस्तेन निमीलिते लोचने येषां ते तथोक्ताः, प्लवङ्गमाः क्षणः क्षणकालस्तेन विन्ध्यस्य यत्पृष्ठमुपरिभागः तस्मिन् आत्मानं स्वस्वदेहं अचक्षत दृष्टवन्तः । चक्षिङ् व्यक्तायां वाचि लङ् ॥ ८७ ॥

हैमन्तिकैः प्रसूनैस्ते हेमन्तमृतुमागतम् ।
ज्ञात्वा सर्वे भयं भूयो भेजुः सुग्रीवदण्डतः ॥ ८८ ॥

(भा.दी.) हैमन्तिकैरिति । ते सर्वे वानराः, हेमन्ते भवानि हैमन्तिकानि तैः प्रसूनैः ज्ञापकैः, हेमन्तो हेमन्तर्तुस्तं आगतं ज्ञात्वा, सुग्रीवस्य यो दण्डः शिक्षा तस्मादिति ततः भूयः बहु भयं भेजुः प्रापुः ॥८८॥

(सं.चं.) हैमन्तिकैः हेमन्तकालभवैः । रामायणे सम्प्रति ‘द्रुमान् वासन्तिकान् दृष्ट्वा बभूवुर्भयशङ्किताः’ (५३.४) इति पठ्यते । पुरा मार्गशीर्ष एव वसन्तागम आसीदित्यपि वदन्ति ॥ ८८–९ ॥

चिन्ताकुले कपिकुले निषेदुषि धरातळे ।
अङ्गदो भङ्गदोऽरीणां धीरमेतद् वचोऽब्रवीत् ॥ ८९ ॥

(भा.दी.) चिन्तेति । चिन्तया कर्तव्यकार्यानिष्पत्तिचिन्तया आकुले व्याकुले, कपीनां कुलं समूहस्तस्मिन्, धरायास्तळं तस्मिन् निषेदुषि निषण्णे सति, अरीणां भङ्गं पराभवं ददातीत्यरिभङ्गदः अङ्गदः धीरं धैर्ययुक्तं यथा भवति तथा एतत् वक्ष्यमाणं वचः अब्रवीत् ॥ ८९ ॥

कालो गतो नश्वरतां मयमायामये[१] बिले ।
सुग्रीवेण तु यः क्लृप्तः[२] कृत्यमत्र विचिन्त्यताम् ॥ ९० ॥

१. ‘नश्वरतामयं मायामये’ २. ‘यस्तु सुग्रीवसङ्क्लृप्तः’

(भा.दी.) काल इति । सुग्रीवेण क्लृप्तः एकमासात् पूर्वमागन्तव्यमित्याज्ञप्तः यः काल स तु मयस्य माया शक्तिस्तया निर्मितं मयमायामयं बिलं तस्मिन् बिले चरतां नः गतः । अत्रैवं सति कृत्यं कर्तुमर्हं कार्यं विचन्त्यतां आलोच्यताम् ॥ ९० ॥

(सं.चं.) सुग्रीवेण क्लृप्तः नियतः कालः गतः ॥ ९० ॥

हनिष्यति हरीन्द्रोऽस्मान् ध्रुवं लङ्घितशासनान् ।
राजदण्डवधाच्छ्रेयो वृणे प्रायोपवेशनम् ॥ ९१ ॥

(भा.दी.) हनिष्यतीति । हरीन्द्रः कपीन्द्रः सुग्रीवः, लङ्घितमतिक्रान्तं शासनमाज्ञा यैस्तथा तान् अस्मान् हनिष्यति ध्रुवम् । राज्ञो यो दण्डः शिक्षा तेन यो वधस्तस्मात् श्रेयः श्रेष्ठं प्रायेण अनशनव्रतेन उपवेशनमवस्थानं तत् वृणे वरयामि । वृञ् वरणे लट् ॥ ९१ ॥

(सं.चं.) प्राया आमरणोपवासाय एकत्रोपवेशनम् ॥ ९१–२ ॥

युवराजवचः श्रुत्वा सबाष्पेषु हरिष्वथ ।
तारस्तारतरं वाक्यं वानरान् प्रत्यभाषत ॥ ९२ ॥

(भा.दी.) युवेति । अथ युवराजस्य अङ्गदस्य वचः श्रुत्वा हरिषु कपिषु सबाष्पेषु, तारः तारनामा वानरः तारतरं उच्चैस्तरं तत् वाक्यं वानरान् प्रति अभाषत ॥ ९२ ॥

(सं.चं.) सबाष्पेषु साश्रुनेत्रेषु । 'बाष्पोऽश्रुण्यम्बुधूमे च' इति च ॥ ९२ ॥

अग्रजो येन तूग्रेण मारितो रामबन्धुना ।
भुज्यते ज्येष्ठपत्नी च स कथं नः क्षमी भवेत् ॥ ९३ ॥

(भा.दी.) अग्रज इति । उग्रेण क्रूरहृदयेन, राम एव बन्धुर्यस्य स तथा तेन, येन सुग्रीवेण अग्रजः वाली मारितः । येन ज्येष्ठस्य वालिनः पत्नी च तारा भुज्यते । सः सुग्रीवः नः अस्माकं क्षमा अस्यास्तीति क्षमी कथं भवेत्? न कथमपीत्यर्थः ॥ ९३ ॥

(सं.चं.) रामेण बन्धुभूतेनाऽत्तबलः ॥ ९३ ॥

न यास्यामोऽथ सुग्रीवं न हास्यामश्च नस्तनुम् ।
प्रवेक्ष्यामो गुहामेनां प्रयास्यामश्चिरं[1] सुखम् ॥ ९४ ॥

(भा.दी.) नेति । अथ इतोऽनन्तरं सुग्रीवं प्रति न यास्यामः । यातेर्लृट् । (नः) तनुः शरीरं तां च प्रायोपवेशेन न हास्यामः । ओ हाक् त्यागे लृट् । एनां गुहां प्रवेक्ष्यामः । विश प्रवेशने लृट् । चिरं यथा भवति तथा सुखं तत् प्रयास्यामः प्राप्स्यामः ॥ ९४ ॥

(सं.चं.) प्रायोपवेशेन न हास्यामश्च नस्तनुम् ॥ ९४ ॥

वज्रिणाऽपि स्ववज्रेण किञ्चित् किल विदारिता ।
गुहेयं नात्र रामस्य विक्रमः सङ्क्रमिष्यति[2] ॥ ९५ ॥

(भा.दी.) अत्रावस्थाने रामाद् भयं च नास्तीत्याह– **वज्रिणे**ति । वज्रमस्यास्तीति वज्री तेन इन्द्रेण स्वस्य यद्वज्रं तेनापि इयं गुहा किञ्चिद् विदारिता किल । नतु सर्वात्मना विदारणे समर्थोऽभूदित्यर्थः । अत्र गुहायां श्रीरामस्य विक्रमः न सङ्क्रमिष्यते । क्रमु पादविक्षेपे लृट् । श्रीरामोऽप्यत्रावस्थानं बाधितुं समर्थः न स्यादि-त्यर्थः ॥ ९५ ॥

(सं.चं.) न सङ्क्रमिष्यति न पादप्रसारणाय प्रभवति । 'सङ्क्रमिष्यते' इति पाठे सर्वस्मादुभयं पदम् ॥ ९५–६ ॥

[3]वाचमाकर्ण्य तारस्य जाम्बवद्वालिजादिषु ।
वदत्सु बाढमित्येव[4] वाचमाचष्ट मारुतिः ॥ ९६ ॥

(भा.दी.) वाचमिति । जाम्बवांश्च, वालिजोऽङ्गदः स च, तौ आदी येषां ते तेषु तारस्य वाचं आकर्ण्य, बाढमित्येव तथाऽस्त्वित्येव, वदत्सु मारुतिर्हनुमान् वाचं आचष्ट प्रोक्तवान् ॥ ९६ ॥

विदितेयं मया नीतिस्तारेण प्रतिपादिता ।
स्वजामेयस्य साम्राज्यं साधयामीति वाञ्छता ॥ ९७ ॥

१. **'प्रवत्स्यामश्चिरम्' । 'प्रवत्स्यामः वासं करिष्यामः । वस निवासे लृट्'** इति का.श्री. ।

२. **'सङ्क्रमिष्यते'** इति सर्वत्र पठ्यते । कथमात्मनेपदत्वमिति मृग्यम् । **'न सङ्क्रमिष्यति न व्याप्स्यति'** इति का.श्री. ।

३. **'वाक्यमाकर्ण्य'** ४. **'बाढमित्येवम्'**

(भा.दी.) विदितेति । स्वस्य जामेयः स्वस्वसुस्ताराया पुत्रस्तस्य अङ्गदस्य साम्राज्यं सार्वभौमत्वं तत् साध-यामि इति वाञ्छता इच्छता तारेण प्रतिपादिता सम्पादिता इयं नीतिः मया विदिता विज्ञाता ।।९७।।

(सं.चं.) स्वजामेयस्य । 'जामेयभागिनेयौ तु स्वस्रीयः' इति । 'जामिः स्वसृकुलस्त्रियोः' इति च ।।९७।।

असहाये रविसुते सीतां तां द्रष्टुमक्षमे ।
खण्डितं रामसख्यं स्यादित्थमाशा विजृम्भते ।। ९८ ।।

(भा.दी.) तामेव नीतिं दर्शयति– **असहाय** इति । न विद्यते सहायो यस्य स तथा तस्मिन् रविसुते, तां सीतां द्रष्टुमक्षमेऽसमर्थे सति, रामस्य सख्यं सखित्वं तत् खण्डितं च्छिन्नं स्यात्, इत्थं आशा विजृम्भते प्रकाशते । जभि जृभि गात्रविनामे लट् ।। ९८ ।।

प्राज्ञम्मन्यानिहाप्राज्ञान् रामकार्य्याभ्युपेक्षिणः ।
चतुर्त्थेनाप्युपायेन[1] शिक्षयिष्याम्यहं हरीन् ।। ९९ ।।

(भा.दी.) प्राज्ञमिति । इह कपिसमूहे, प्राज्ञम्मन्यानित्येकं पदम्, प्राज्ञा इति मन्यन्त इति प्राज्ञम्मन्यास्तान्, वयं प्राज्ञा इत्यभिमानवत इत्यर्थः, अप्राज्ञानप्रौढान्, श्रीरामस्य यत्कार्यं तस्मिन् अभ्युपेक्षा एषामस्तीति तथा तान्, हरीन् कपीन् चतुर्थेन सामभेददानदण्डानां मध्ये चतुर्थो दण्डाख्यस्तेन उपायेनापि शिक्षयिष्यामि, दण्डेन बाधितान् करिष्यामीत्यर्थः । शिक्ष विद्योपादाने लृट् ।। ९९ ।।

(सं.चं.) प्राज्ञमात्मानं मन्यन्त इति प्राज्ञम्मन्याः । 'आत्ममाने खश् च' (अ.सू.३.२.८३) । चतुर्थेन दण्डाख्येनाप्युपायेन ।। ९९ ।।

शतक्रतोः शतगुणाः कुलिशाल्लक्ष्मणेषवः ।
आनयेयुस्तिलतुलां बिलं वः शुष्कपर्ण्णवत् ।। १०० ।।

(भा.दी.) शतेति । शतसङ्ख्याकाः क्रतवो यस्य स तथा तस्य इन्द्रस्य कुलिशं वज्रं तस्मात् शतं गुणा आवृत्तयो येषां ते तथा, शतावृत्तिश्रेष्ठा इत्यर्थः, लक्ष्मणेषवः, बिलं शुष्कपर्णवत् तिलानां तुला साम्यं आनयेयुः ।। १०० ।।

---

१. 'चतुर्थेनाभ्युपायेन'

(सं.चं.) शतक्रतोः कुलिशाद् वज्रादपि शतगुणाः । 'यां चेमां मन्यसे धात्रीमेतद् बिलमिति श्रुतम् । एतल्लक्ष्मणबाणानामीषत् कार्यं विदारणे । स्वल्पं हि कृतमिन्द्रेण क्षिपता ह्यशनिं पुरा । लक्ष्मणो निशितैर्बाणैर्भिन्द्यात् पत्रपुटं यथा' (५४.१३–२) इति च । तिलतुलामाननेयुः । तिलशश्चूर्णयेयुः ॥ १०० ॥

[१]यस्य भ्रूभङ्गनियतं त्रैलोक्यं कोसलेशितुः ।
तस्यागम्यं किल बिलं बालिशैः किं न[२] कत्थ्यते ॥ १०१ ॥

(भा.दी.) यस्येति । त्रैलोक्यं कोसलेशितुः यस्य श्रीरामस्य भ्रुवो भङ्गश्चलनं तेन नियतं नियमितं तस्य श्रीरामस्य बिलं अगम्यं किल? बालिशैः मन्दबुद्धिभिः एतैः किं न कथ्यते? सर्वमप्यसम्भावितं कथ्यत एव । कथ वाक्यप्रबन्धे लट् ॥ १०१ ॥

(सं.चं.) रामस्य बिलनिग्रहणे बाणापेक्षाऽपि नास्तीत्याह–यस्येति ॥ १०१–२ ॥

यया नीत्या पुरा जज्ञे विरोधो रविजेन वः ।
साम्प्रतं सम्प्रवृत्ता सा विपदे नैव सम्पदे ॥ १०२ ॥

(भा.दी.) ययेति । यया नीत्या वः युष्माकं रविजेन सुग्रीवेण सह विरोधः पुरा वालिकाले जज्ञे । जनी प्रादुर्भावे लिट् । साम्प्रतमिदानीं सम्प्रवृत्ता सा नीतिः विपदे भवति । सम्पदे सम्पदर्थं नैव न भवत्येव ॥ १०२ ॥

नन्वङ्गद पितृव्यस्ते धर्म्मात्मा न तवाहितः ।
त्वन्मातुर्म्मतमालम्ब्य वर्त्तमानस्तु किम्पुनः ॥ १०३ ॥

(भा.दी.) स्वदयापात्रभूतं युवराजमङ्गदं सान्त्ववचनेनैव वशयति– **नन्वि**ति । हे अङ्गद, धर्मे आत्मा मनो यस्य स तथा, ते पितृव्यः पितृभ्राता सुग्रीवः तव अहितः पूर्वमारभ्य न भवति ननु? त्वन्मातुः तारायाः मतं तत् आलम्ब्य वर्तमानस्तु पुनः तवाहितो न भवतीति किं वक्तव्यम्? ॥ १०३ ॥

१. **'नात्र रामस्य विक्रमः सङ्क्रमिष्यति' इत्यस्योत्तरमाह–यस्येति'** इति का.श्री. ।

२. **'किं नु कथ्यते'**

(सं.चं.) नन्वङ्गद पितृव्यस्ते । 'धर्मकामः पितृव्यस्ते प्रीतिकामो दृढव्रतः । शुचिः सत्यप्रतिज्ञश्च न त्वां जातु जिघांसति । प्रियकामश्च ते मातुस्तदर्थं चास्य जीवितम् । तस्यापत्यं च नास्त्यन्यत् तस्मादङ्गद गम्यताम्' (५४.२१–२) इति च ॥ १०३ ॥

वदतीत्थं हनुमति वानरास्ते मुनिव्रताः ।
तमन्ववर्त्तन्त यथा नद्योघं नगनिम्नगाः ॥ १०४ ॥

(भा.दी.) वदतीति । हनुमति इत्थं वदति सति, ते वानराः मुनेः व्रतं येषां ते तथा, तूष्णीम्भूताः सन्त इत्यर्थः, नगस्य निम्नगा नद्यः, क्षुद्रनद्यः इत्यर्थः, महानद्याः ओघः प्रवाहस्तं यथा तथा तं हनुमन्तं अन्ववर्तन्त अनुसृत्य वर्तनं चक्रुः । वृतु वर्तने लङ् ॥ १०४ ॥

(सं.चं.) महानद्योघं क्षुद्रनिम्नगाः ॥ १०४ ॥

अलङ्घ्यमल्पैरवलोक्य तेऽत्रसन् महार्ण्णवं स्वं च मनोरथार्ण्णवम् ।
श्रमापनोदाय समाश्रयन्नमी वेलावनं रामपदं च पावनम् ॥ १०५ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
किष्किन्धाकाण्डे सप्तमः सर्ग्गः ॥

—०—

(भा.दी.) अलङ्घ्येति । ते वानराः, अल्पाः अल्पबलाः पुरुषाः, तैः अलङ्घ्यं लङ्घितुमशक्यं महान् योऽर्णवो दक्षिणसमुद्रस्तं अवलोक्य, स्वं स्वकीयम्, मनोरथः सीता(मार्गण)लक्षणो यो वाञ्छितार्थः स एवार्णवस्तं च अलङ्घ्यमसाध्यं अवलोक्य आलोच्य, अत्रसन् भीता बभूवुः । त्रसी उद्वेगे लङ् । अमी वानराः श्रमस्यापनोदः परिहारस्तस्मै वेलायां समुद्रतीरे विद्यमानं वनं तत्, पावनं पवित्रं श्रीरामस्य पदं पादः स्वरूपं वा तच्च समाश्रयन् । श्रीरामपादकमलमस्मरन्नित्यर्थः ॥ १०५ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां
किष्किन्धाकाण्डे सप्तमः सर्गः ॥

—०—

(सं.चं.) अथ वंशस्थेन्द्रवंशाभ्यामुपजात्योपसंहरति– अलङ्घ्यमल्पैः । अल्पैरल्पसारैः, अल्पैश्च प्रयत्नैः । सीतान्वेषणाख्यं मनोरथार्णवं च । अत्रसन् । 'वा भ्राश-भ्लाश-भ्रमु-क्रमु-क्लमु-त्रसि-त्रुटि-लषः' (अ.सू.३.१.७०) इति विभाषा श्यन् । तेन रूपद्वयम्– त्रस्यति, त्रसति । त्रस्यतु, त्रसतु । अत्रस्यत्, अत्रसत् । त्रस्येत्, त्रसेत् इत्यादि ॥ १०५ ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां किष्किन्धाकाण्डे सप्तमसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– १७३०+१०५=१८३५]

अष्टमः सर्ग्गः

अथ दीर्घं विनिःश्वस्य [1]चिन्तातान्ताननोऽङ्गदः ।
कुलवृद्धान् कपिवरान् प्रणिपत्येदमब्रवीत् ॥ १ ॥

(भा.दी.) श्रीरामदासाग्रणीरङ्गदः स्वाभिप्रायं निवेदयति– **अथे**ति । अथ वेलावनाश्रयणानन्तरम्, चिन्तया कार्यानिष्पत्तिचिन्तया तान्तं म्लानं आननं यस्य स तथोक्तः अङ्गदः, दीर्घं यथा भवति तथा विनिःश्वस्य कुलवृद्धान् कपिवरान् प्रणिपत्य इदं वचः अब्रवीत् ॥ १ ॥

(सं.चं.) बहिर्वृत्तः श्वासो निःश्वासः । विषादपूर्वो निःश्वासो विनिःश्वासः । कुलवृद्धान् तारादीन् ॥ १ ॥

समयः समतीतो नः सीता नाधिगता क्वचित् ।
दुस्तरस्तोयराशिश्च मार्ग्गाः सर्वेऽपि सार्ग्गळाः[2] ॥ २ ॥

(भा.दी.) समय इति । नः समयः सुग्रीवादिष्टः कालः समतीतः, सीता क्वचित् न अधिगता न ज्ञाता, तोयराशिः समुद्रश्च दुस्तरः तर्तुमशक्यः, इतः परं गन्तुं सर्वेऽपि मार्गाः सार्गळाः सबाधाः, इति अब्रवीदिति सम्बन्धः ॥ २ ॥

(सं.चं.) सार्गळाः सप्रतिबन्धाः । 'अर्गळं द्वारपटलम्' इति यादवप्रकाशः ॥ २ ॥

रामदेवप्रसादेन यौवराज्यमभून्मम ।
हततातस्य[3] दीनस्य न सुग्रीवानुरागतः ॥ ३ ॥

(भा.दी.) रामेति । हतः तातः पिता यस्य स तथोक्तस्तस्य, अत एव दीनस्य मम, रामदेवस्य प्रसादस्तेन यौवराज्यं युवराजत्वमभूत् । सुग्रीवस्य मय्यनुरागः स्नेहः तस्मादिति ततः यौवराज्यं नाभूत् ॥ ३ ॥

---

१. 'चिन्ताक्रान्ताननो–' २. 'सार्गलाः' ३. 'मृततातस्य'

(सं.चं.) हततातस्य दीनस्य मम ॥ ३–६ ॥

रामस्याऽनृण्यमप्राप्य किं फलं जीवितेन मे ।
सर्वे ममानुमोदध्वं वृद्धाः प्रायोपवेशनम् ॥ ४ ॥

(भा.दी.) **रामस्ये**ति । श्रीरामस्य आनृण्यं ऋणरहितत्वं तत्, कृतकर्मणः प्रत्युपकारमित्यर्थः, अप्राप्य मे जीवितं जीवनं तेन फलं साध्यं किम्? न किमपीत्यर्थः । सर्वे वृद्धाः कपयः अत्र प्रायेण अनशनेन उपवेशनं तत् मम अनुमोदध्वं अनुमतिं कुरुध्वं । मुद हर्षे लोट् ॥ ४ ॥

दीनां मे मातरं तारां तां[१] सान्त्वयत सामभिः ।
नूनं सा भर्त्तृशोकार्त्ता पुत्रशोके मरिष्यति ॥ ५ ॥

(भा.दी.) **दीनामि**ति । हे वृद्धाः, दीनां मे मातरं तां ताराम्, सामानि सान्त्ववचनानि तैः सान्त्वयत । षान्त्व सामप्रयोगे लोट् । भर्तुः यः शोकस्तेन आर्ता सा तारा, पुत्रमृतिनिमित्तो यः शोकः तस्मिन् सति, मरिष्यति नूनम् ॥ ५ ॥

उक्त्वेति युवराजं तं कृतप्रायोपवेशनम् ।
अवलोक्यारुदन्नुच्चैः कपयः समसङ्कटाः ॥ ६ ॥

(भा.दी.) **उक्त्वे**ति । इति उक्त्वा, कृतं प्रायोपवेशनं येन स तथा तं युवराजं अङ्गदं अवलोक्य, समं सङ्कटं प्रयासो येषां ते तथा कपयः, उच्चैः सम्यक् अरुदन् । रुदिर् अश्रुविमोचने लुङ् ॥ ६ ॥

वानरा वार्य्युपस्पृश्य[२] सर्वे प्रायमुपाविशन् ।
दक्षिणाग्रेषु दर्भेषु कृत्वा चोत्तरतः शिरः ॥ ७ ॥

(भा.दी.) **वानरा** इति । ते वानराः वारि उपस्पृश्य, दक्षिणस्यां दिश्यग्राणि येषां ते तथा तेषु दर्भेषु शिरः उत्तरस्यामित्युत्तरतः कृत्वा प्रायोऽनशनव्रतं तम्, 'अनशने पुमान् प्रायः' इत्यमरः, उपाविशन्, विश प्रवेशने लङ् । दक्षिणाभिमुखेषु दर्भेषु पूर्वाभिमुखतया उत्तरतः शिरःकृत्वा उपाविशन्नित्यर्थः ॥ ७ ॥

---

१. **'तारां प्रसान्त्वयत'**

२. **'वार्युपस्पृश्य तेऽथ प्रायमुपा–'** इति वि.ती.पाठः स्यात् ।

(सं.चं.) वार्युपस्पृश्य आचम्य । 'स्यादुपस्पर्शनं स्पर्शे स्नानाचमनयोरपि' इति यादवप्रकाशः । प्रायमुपाविशन् अशिश्रियन् । उत्तरतः शिरः कृत्वा शयानाः ॥ ७ ॥

[१]देहान् जिहासूंस्तान् दृष्ट्वा तुतोष पिशिताशनः ।
सम्पातिनामा पक्षीन्द्रो दग्धपक्षो बुभुक्षितः ॥ ८ ॥

(भा.दी.) देहानिति । पिशितं मांसमशनं यस्य स तथोक्तः, दग्धौ पक्षौ यस्य स तथोक्तः, बुभुक्षितः भोक्तुमिच्छावान्, सम्पातिरिति नाम यस्य स तथा पक्षीन्द्रः, देहान् जिहासून् हातुमिच्छावतः तान् वानरान् दृष्ट्वा तुतोष । तुष तुष्टौ लिट् । एतेषां प्राणत्यागानन्तरमेकैकं भोक्ष्यामीति तुष्टोऽभूदित्यर्थः ॥ ८ ॥

(सं.चं.) पिशिताशनः मांसाशनः । गृध्रा हि पिशिताशनाः ॥ ८ ॥

अजामिळोऽप्यजन्मत्वं[२] यन्नामग्रहणाद् ययौ ।
ते कथां तस्य देवस्य प्रोचुः संसारहारिणीम् ॥ ९ ॥

(भा.दी.) अजेति । अजामिळोऽपि यस्य श्रीरामस्य नाम तस्य ग्रहणमुच्चारणं तस्मात्, न विद्यते जन्म यस्य स तथा तस्य भावस्तत्वं तत्, अपुनर्भवरूपमोक्षमित्यर्थः, ययौ, यातेर्लिट् । देवस्य तस्य श्रीरामस्य, संसारं हर्तुं शीलमस्यास्तीति तथा तां कथां ते कपयः प्रोचुः ॥ ९ ॥

(सं.चं.) अजामिळोऽपि त्यक्तसर्वधर्माऽपि । यस्य नारायणस्य नामग्रहणात् । तस्य नारायणावतारस्य देवस्य रामस्य ॥ ९ ॥

त्रिधामा रामनामाऽभूदवन्यां रघुनन्दनः ।
अपीपलन्मुनेर्य्यज्ञं सीतां देवीमरीरमत् ॥ १० ॥

(भा.दी.) त्रिधामेति । त्रीणि धामानि मन्दिराणि यस्य स तथोक्तः श्रीहरिः, रघून् रघुगोत्रभवान् नन्दय-तीति तथोक्तः, राम इति नाम यस्य स तथा सन्, अवन्यां भुवि अभूत् । मुनेर्विश्वामित्रस्य यज्ञो यागस्तं अपीपलत् । पा रक्षणे लुङ् । देवीं सीतां अरीरमत् रमयामास । रमु क्रीडायां लुङ् ॥ १० ॥

---

१. 'दृष्ट्वा देहान् जिहासूंस्तांस्तुतोष'

२. **'अजामिळोऽपि धन्यत्वम्'** इति कचित् । **'यस्य रामाभिन्नस्य हरेः नामग्रहणात् नारायण इति नामोच्चारणात् अजामिळनामको ब्राह्मणोऽपि, अपिशब्देन दोषदुष्टोऽपीति गम्यते, अजन्मत्वं जन्मराहित्यम्, मुक्तत्वमिति यावत्, प्राप'** इति का.श्री. ।

(सं.चं.) श्वेतद्वीपमनन्तासनं वैकुण्ठमिति त्रीणि धामानि । 'अमृतं क्षेममभयं त्रिधाम्नोऽधायि मूर्धसु' इति हि भागवते । रघूणां नन्दनस्तनयः सन् मुनेः विश्वामित्रस्य यज्ञं अपीपलत् पालयामास । पा रक्षणे । 'पाते-र्णौ लुग् वक्तव्यः' इति णिचि लुगागमः । चुरादेः 'पाल रक्षणे' इत्यस्य वा लुङि रूपम् ॥ १०–१ ॥

कैकेय्या वाक्यमात्रेण त्यक्तराज्यो वनं ययौ ।
चतुर्द्दशसहस्राणि रक्षांसि प्रभुरक्षिणोत् ॥ ११ ॥

(भा.दी.) **कैकेय्या** इति । कैकेय्याः केवलं वाक्यं वाक्यमात्रं तेन, त्यक्तं राज्यं येन स तथा सन्, वनं तत् ययौ । प्रभुः श्रीरामः चतुर्दश च तानि सहस्राणि च तानि रक्षांसि अक्षिणोत् जघान । क्षिणु हिंसायां लङ् ॥ ११ ॥

विजनेऽथ जनस्थाने रागरोगादचूचुरत् ।
रत्नमालामिव ध्वाङ्क्षो रावणो रामवल्लभाम् ॥ १२ ॥

(भा.दी.) **विजन** इति । अथ विजने मनुष्यसम्बन्धरहिते, जनस्थानं दण्डकारण्यं तस्मिन्, रावणः रामस्य वल्लभां प्रियां सीताम्, रत्नमालां ध्वाङ्क्षइव काकइव, राग एव रोगस्तस्मात् कामोपद्रवादित्यर्थः, अचूचुरत् स्तैन्यं कृत्वा नीतवान् । चुर स्तेये लुङ् ॥ १२ ॥

(सं.चं.) अस्थानेऽनुरागाख्याद् रोगात् । 'ध्वाङ्क्षः स्याद् वायसे बके' इति च ॥ १२ ॥

युयोध पक्षिराजस्तं जटायुः कूटयोधिनम् ।
रामभक्त्या स तत्याज मूर्त्तिं कीर्त्तिमुपाददे ॥ १३ ॥

(भा.दी.) **युयोधेति** । पक्षिराजः जटायुः कूटेन कापट्येन योद्धुं शीलमस्यास्तीति तथा तं रावणं राम-भक्त्या युयोध । सः जटायुः मूर्तिं देहं तत्याज । कीर्तिं श्रीरामसेवार्थत्वेन देहं त्यक्तवानिति कीर्तिं उपाददे लेभे ॥ १३ ॥

(सं.चं.) 'युयोध' इति पठन्ति । 'युयुधे' इति स्वरसम् । अकर्मकश्चायं धातुः । तेन 'तं प्रति युयोध' इत्यध्याहारेण योजनीयम् । कूटयोधिनम्, कपटेन युद्ध्यमानम् । मूर्तिं स्वकळेबरम् ॥ १३–४ ॥

स हि धन्यतमः पक्षी रामार्त्थं जीवितं त्यजन् ।
अकृतार्त्था वयं हन्त मन्दभाग्या म्रियामहे ॥ १४ ॥

(भा.दी.) स हीति । रामार्थं रामसेवार्थं जीवितं जीवनं तत् त्यजन् सः पक्षी धन्यतमः अत्यन्तं सुकृती (हि) । मन्दं स्वल्पं भाग्यं येषां ते तथा वयं अकृतः अनिष्पादितः अर्थः श्रीरामप्रयोजनं यैस्ते तथा सन्तः (हन्त) म्रियामहे मरणं प्राप्नुमः । मृङ् प्राणत्यागे लट् ॥ १४ ॥

सकामा खलु कैकेयी सख्या मन्थरया सह ।
हत्वा पतिं शोकतप्तं वालिनं वानरांश्च नः ॥ १५ ॥

(भा.दी.) सकामेति । कैकेयी सख्या मन्थरया सह, शोकेन श्रीरामवियोगजेन दुःखेन तप्तं पतिं दशरथम्, वालिनम्, वानरान् नः अस्मांश्च हत्वा सकामा खलु अभीष्टसहिता खलु ॥ १५ ॥

(सं.चं.) वालिनं वानरांश्च हत्वा । कथं कैकेयी पुनरेतानहन्? अन्ततः सैव हि कारणम् । यदि कैकेयी न रामवनगमनवरमवरीष्यत न रामो वनमगमिष्यत्, न दशरथोऽमरिष्यत्, नतरां वाली, नतमां वानराः ॥१५॥

अपि सुग्रीवमित्रं नः सौमित्रेरग्रजो विभुः ।
सीतान्वेषणसङ्खिन्नान् करुणः[1] संस्मरिष्यति ॥ १६ ॥

(भा.दी.) अपीति । सुग्रीवस्य मित्रं मित्रभूतः, सौमित्रेः लक्ष्मणस्य अग्रजः, विभुः श्रीरामः, सीतायाः यदन्वेषणं तेन सङ्खिन्नान् नः अस्मान्, करुणः सन् दयाशीलः सन्, संस्मरिष्यति अपि संस्मरिष्यति कच्चित्? स्मृ आध्याने लृट् ॥ १६ ॥

(सं.चं.) सुग्रीवमित्रं रामः । अपि संस्मरिष्यति सम्यक् अनुग्रहबुद्ध्या स्मरेद्वा? कर्मकारकस्य शेषत्वेनाविवक्षितत्वान्न षष्ठी । यदाह जयादित्यः–'कर्मणि कारके शेषत्वेन विवक्षिते षष्ठी विभक्तिर्भवति । मातुः स्मरति । शेष इति किम्? मातरं स्मरति' (अ.सू.२.३.५२) इति ॥ १६ ॥

इत्थं कथान्तरे श्रुत्वा देहत्यागं जटायुषः ।
वृद्धो गृध्रपतिः प्रोचे रुदन् ज्येष्ठो जटायुषः[2] ॥ १७ ॥

(भा.दी.) इत्थमिति । जटायुषः ज्येष्ठः वृद्धः गृध्रपतिः सम्पातिः इत्थं कथाया यदन्तरं मध्यं तस्मिन् जटायुषः देहस्य त्यागस्तं श्रुत्वा रुदन् सन् प्रोचे ॥ १७ ॥

१. **'करुणा अस्यास्तीति करुणः । 'अर्शआदिभ्योऽच्'** (अ.सू.५.२.१२७) इति का.श्री. ।

२. **'ज्येष्ठो जटायुषः'** इत्येव वि.ती.पाठः । का.श्री पाठोऽपि तथैव । क्वचित्–**'ज्येष्ठो गतायुषः'** इति पाठान्तरम् ।

(सं.चं.) गतायुषः जटायुषः ज्येष्ठोऽग्रजः ॥ १७–२२ ॥

मम प्राणसमो भ्राता रावणेन हतः कथम् ।
के यूयं केन दुःखेन प्राप्ताः प्रायोपवेशनम् ॥ १८ ॥

(भा.दी.) ममेति । प्राणैः समः मम भ्राता जटायुः रावणेन कथं हतः? यूयं के कस्य सम्बन्धिनः? केन दुःखं क्लेशस्तेन प्रायोपवेशनं तत् प्राप्ताः ॥ १८ ॥

सम्पातिनेत्यभिहिताः प्रत्यूचुस्ते प्लवङ्गमाः ।
सौम्य दाशरथेर्भार्य्यां राक्षसो रावणोऽहरत् ॥ १९ ॥

(भा.दी.) समिति । सम्पातिना इति अभिहिताः ते प्लवङ्गमाः, हे सौम्य सम्पाते, दाशरथेः दशरथपुत्रस्य श्रीरामस्य भार्यां राक्षसः रावणः अहरत् इति प्रत्यूचुः ॥ १९ ॥

पश्यंस्तं पथि गच्छन्तं पक्षीन्द्रो राघवप्रियः ।
निवारयन् हतस्तेन रामेण किल संस्कृतः ॥ २० ॥

(भा.दी.) पश्यन्निति । राघवस्य श्रीरामस्य प्रियः, पथि गच्छन्तं तं रावणं पश्यन्, पक्षीन्द्रः जटायुः, रावणं निवारयन् सन्, तेन रावणेन हतः, श्रीरामेण संस्कृतः किल दहनादिसंस्कारं प्रापितः किल ॥ २० ॥

रामसुग्रीवयोः सख्यमथाभूद्[१] वालिनो वधात् ।
वयं तयोर्न्नियोगेन तां देवीं मृगयामहे ॥ २१ ॥

(भा.दी.) केन हत इत्यस्योत्तरमभिधाय के यूयमित्यस्योत्तरमाह– **रामेत्या**दिना । अथ वालिनो यो वधस्तस्मात् रामसुग्रीवयोः सख्यं सखित्वं तत् अभूत् । वयं तयोः रामसुग्रीवयोः नियोग आज्ञा तेन तां देवीं मृगयामहे । मृग अन्वेषणे लट् ॥ २१ ॥

समतीतः स समयः सीतां नोपलभामहे ।
उत्कटात् सङ्कटात् तस्माद्[२] वयं प्रायमुपास्महे ॥ २२ ॥

---

१. 'सख्यमथाऽसीत्' २. 'सङ्कटादस्मात्'

(भा.दी.) समिति। सः सुग्रीवाज्ञप्तः समयः समतीतः। सीतां न उपलभामहे न प्राप्नुमः। तस्मात् तन्निमित्तात् उत्कटं भूयिष्ठं तस्मात् सङ्कटात् प्रायोऽनशनव्रतं तं उपास्महे आश्रयामः ॥ २२ ॥

पक्षिप्रवर कस्मात्ते पक्षयोः सङ्क्षयोऽभवत् ।
कच्चिज्जानासि सीतायाः पदवीं तात कुत्रचित् ॥ २३ ॥

(भा.दी.) **पक्षी**ति। हे पक्षिप्रवर सम्पाते, ते यौ पक्षौ तयोः सङ्क्षयः कस्मात् कारणादभवत्? हे तात, सीतायाः पदवीं मार्गम्, अवस्थितिमिति यावत्, कुत्रचित् देशे जानासि कच्चित्? ॥ २३ ॥

(सं.चं.) जानासि कच्चित्? जानासि किम्? 'कच्चित् प्रश्ने कामवादे' इति च ॥ २३ ॥

वर्णितं तैस्तदाकर्ण्य[1] द्विजः शोकाकुलः शनैः ।
[2]कनिष्ठायोदकं दत्वा कपीन्द्रानिदमब्रवीत् ॥ २४ ॥

(भा.दी.) **वर्णितमि**ति। तैः कपिभिः वर्णितं प्रोक्तं तत् वचः आकर्ण्य शोकाकुलः द्विजः पक्षी सम्पातिः कनिष्ठाय जटायुषे उदकं तत् दत्वा, उदकक्रियां कृत्वेत्यर्थः, कपीन्द्रान् प्रति शनैः इदं वचः अब्रवीत्। ब्रूञ् धातोर्लङ् ॥ २४ ॥

(सं.चं.) द्विजः पक्षी सम्पातिः। कनिष्ठायानुजाय जटायुषे। 'समुद्रं नेतुमिच्छामि भवद्भिर्वरुणालयम्। प्रदास्याम्युदकं भ्रातुः स्वर्गतस्य महात्मनः' (५८.३५) इति च ॥ २४ ॥

अरुणस्य सुतावावां तरुणत्वेऽतिगर्वितौ[3] ।
निजं राज्यं[4] पणं कृत्वा पर्य्यैक्षावहि वेगिताम् ॥ २५ ॥

(भा.दी.) **अरुणे**ति। अरुणस्य अरुणनाम्नः सूर्यसारथेः सुतौ आवाम्, तरुणत्वं युवत्वं तस्मिन् अतिगर्वितौ, वेगविषये अतिगर्ववन्तौ सन्तौ, निजं यद्राज्यं तत् पणो ग्लहस्तम्, 'पणो मूल्ये ग्लहे माने' इति वैजयन्ती, कृत्वा वेगोऽस्यास्तीति वेगी तस्य भावस्तत्ता तां पर्यैक्षावहि परीक्षां अकुर्व ॥ २५ ॥

(सं.चं.) अरुणस्य सूर्यसूतस्य ॥ २५ ॥

---

१. **'वर्णितं तैरथाऽकर्ण्य'**
२. **'कनिष्ठस्योदकम्'**
१. **'तरुणत्वेन गर्वितौ'** इति, । **'गर्विणौ'** इति च क्वचित्।
४. **'निजराज्यं पणम्'** इति, **'निजराज्यपणम्'** इति च क्वचित्।

कलिङ्गबलिभुक्क्रौञ्चश्येनगृद्ध्रसितच्छदान् ।
सर्वानतीत्य नौ माग्र्गो डयनेनोत्तरोत्तरान्[१] ॥ २६ ॥

(भा.दी.) कलिङ्गेति । डयनं आकाशगमनं तेन उत्तरोत्तरानुत्तरस्मादुत्तरान्, उपर्युपरि सम्प्लवमानानित्यर्थः, कलिङ्गः धूम्राटः स च, बलिभुक् काकः स च, क्रौञ्चश्च, श्यायते आशु गच्छतीति श्येनः स च, मांसं गृध्यति काङ्क्षत इति गृध्रः स च, सितौ च्छदौ पक्षौ यस्य स तथा हंस इत्यर्थः, स च, तान् सर्वान् पक्षिणः अतीत्य नौ आवयोः मार्गः अभवत् ॥ २६ ॥

(सं.चं.) कलिङ्गः कलविङ्कजातीयः पक्षिविशेषः । केचित् 'कुलिङ्ग' इति पठन्ति । बलिभुग् वायसः । कलविङ्क इत्यन्ये । क्रौञ्चः क्रुङ् बकभेदः । '**ಕೊಂಗ್ರೆ**' इति भाषायाम् । श्येनः '**ಗಿಡುಗ**' इति भाषायाम् । गृध्रः '**ಹದ್ದು**' इति भाषायाम् । सितच्छदो हंसः । अयं च पक्षिणां गतिभेदेन मार्गभेदेन च क्रमिको निर्देशः । तथाहि रामायणे–'आद्यः पन्थाः कुलिङ्गानां ये चान्ये धान्यजीविनः । द्वितीयो बलिपुष्टानां ये च वृक्षफलाशिनः । भासास्तृतीयं गच्छन्ति क्रौञ्चाश्च कुररैः सह । श्येनाश्चतुर्थं गच्छन्ति गृध्रा गच्छन्ति पञ्चमम् । बलवीर्योपपन्नानां रूपयौवनशालिनाम् । षष्ठस्तु पन्था हंसानां वैनतेयगतिः परा । वैनतेयाच्च नो जन्म सर्वेषां वानरर्षभाः' (५८.२४–६) इति ॥ २६ ॥

आवामनुगतौ सूर्य्यमुदयन्तमथोदये ।
आ मद्ध्याह्नगतेः शौर्य्यात्[२] ततो मोहो महानभूत् ॥ २७ ॥

(भा.दी.) आवामिति । अथ उदय उदयपर्वतस्तस्मिन् उदयन्तं सूर्यम्, अह्नो मध्यं मध्याह्नस्तत्पर्यन्ता या गतिस्तस्याः आ पर्यन्तम्, वयं शौर्यं बलं तस्मात् अनुगतौ अनुसृत्य गतौ, ततः महान् मोहः मूर्छा अभूत् ॥ २७ ॥

(सं.चं.) उदयाचले उदयन्तं सूर्यमण्डलमनुगतौ शौर्यात् । ई गतौ । अयति । 'उदयति दिननाथो याति याति शीतांशुरस्तम्' इत्यादि च प्रयुञ्जते । यावद् मध्याह्नस्याऽगतिः । ततः सूर्यतापवशादावयोर्मोहो महा-नभूत् ॥ २७ ॥

---

१. **'प्लवनेनोत्तरोत्तरान्'**

२. **'–गते सूर्ये ततो–'** इति, **'–गतेः सौर्यात् ततो–'** इति च । **'ततः मध्याह्नपर्यन्तगमनानन्तरं सौर्यात् सूर्यमण्डलतेजसः सकाशात् महानधिकः मोहो मूर्छाऽभूत्'** इति का.श्री. ।

भ्राता सन्तप्यमानो मे पक्षाभ्यां रक्षितो मया ।
दग्धपक्षोऽपतं पश्चात् क्षीणपुण्यइवाम्बरात् ॥ २८ ॥

(भा.दी.) भ्रातेति । सूर्यतेजसा सन्तप्यमानः मे भ्राता जटायुः मया यौ पक्षौ ताभ्यां रक्षितः । यथा सूर्यकिरणसम्बन्धो न स्यात् तथा पक्षाभ्यामाच्छाद्य रक्षित इत्यर्थः । (पश्चात्) अहं च दग्धौ पक्षौ यस्य स तथा सन्, अम्बरमाकाशस्तस्मात्, क्षीणं पुण्यं यस्य स तथा सइव, स्वर्गीवेत्यर्थः, अपतम् ॥ २८ ॥

(सं.चं.) सन्तप्यमानः मध्याह्नसूर्यस्य प्रखरतेजसा सन्दह्यमानो मे भ्राता मम पक्षाभ्यामाच्छाद्य रक्षितः । तेनाहं दग्धपक्षोऽपतम् । क्षीणपुण्यः स्वर्गात् पतन्निव ॥ २८ ॥

सप्तमेऽह्नि गतः सञ्ज्ञां कथञ्चिद् देशकालवित् ।
अपक्षो मरणाकाङ्क्षी निषिद्धोऽहं महर्षिणा ॥ २९ ॥

(भा.दी.) सप्तम इति । सप्तमे अहर्दिनं तस्मिन् कथञ्चित् सञ्ज्ञां गतः, देशश्च कालश्च तौ वेत्तीति तथोक्तः, आपत्काले कर्तव्यकार्यविदित्यर्थः, न विद्येते पक्षौ यस्य स तथोक्तः, अत एव मरणमाकाङ्क्षितुं शीलमस्यास्तीति तथोक्तः अहम्, महान् य ऋषिस्तेन निशाकरनामकेन (निषिद्धः) रुद्धः अस्मि ॥ २९ ॥

(सं.चं.) सप्तमेऽह्नि । 'लब्धसञ्ज्ञस्तु षड्रात्रात् विवशो विह्वलन्निव' (६०.५) इति च । देशकालवित्, पुरा किमासीत्, इदानीं क्वास्मि इत्यादि सर्वं विज्ञाय । 'हृष्टपक्षिगणाकीर्णः कन्दरोदरकूटवान् । दक्षिणस्योदधेस्तीरे विन्ध्योऽयमिति निश्चितः' (६०.७) इति, 'आसीच्चात्राऽश्रमं पुण्यं सुरैरपि सुपूजितम् । ऋषिर्निशाकरो नाम यस्मिन्नुग्रतपाऽभवत्' (८) इति च ॥ २९ ॥

भविष्यति त्वया कृत्यं रामकार्य्यं चिकीर्षताम् ।
रामप्रसादात् पक्षी स्या देहो[१] न त्यज्यतामिति ॥ ३० ॥

(भा.दी.) मुनेर्निषेधप्रकारं दर्शयति– **भविष्यतीति** । श्रीरामस्य यत्कार्यं सीतान्वेषणलक्षणं तत् चिकीर्षतां कर्तुमिच्छतां रामदूतानां त्वया कृत्यं कार्यं तत् भविष्यति । त्वं रामस्य यः प्रसादस्तस्मात् पक्षौ अस्य स्त इति पक्षी स्याः । पक्षी स्यादिति पाठे देहः पक्षी स्यादिति योजना । त्वया देहः तस्मान्न त्यजताम् इति निषिद्ध इति सम्बन्धः ॥ ३० ॥

१. 'पक्षी स्याद् देहो–'

(सं.चं.) त्वया कर्तव्यं कृत्यं किञ्चिद् भविष्यति । पक्षी जातपक्षः स्याः इति महर्षिणा निषिद्धः । 'एष्यन्ति प्रेषितास्तत्र रामदूताः प्लवङ्गमाः । आख्येया राममहिषी त्वया तेभ्यो विहङ्गम । सर्वथा तु न गन्तव्यमीदृशः क्व गमिष्यसि । देशकालौ प्रतीक्षस्व पक्षौ त्वं प्रतिपत्स्यसे' (६२.११–२२) इति च ॥ ३० ॥

निशाकरस्य मे सख्युर्म्मुनेर्वाचः[1] स्मरन्नहम् ।
निविष्टो गिरिरन्ध्रान्ते रामदूतप्रतीक्षया ॥ ३१ ॥

(भा.दी.) निशेति । मे सख्युः निशाकरस्य निशाकरनामकस्य मुनेः वाक् वाक्यं तस्याः (स्मरन्) अहं श्रीरामस्य ये दूतास्तेषां प्रतीक्षया दर्शनापेक्षया गिरेर्यद्रन्ध्रं गुहा तस्यान्तो मध्यं तस्मिन्निविष्टः उपविष्टः अस्मि ॥ ३१ ॥

(सं.चं.) इति निशाकरस्य मे सख्युः वाचः स्मरन् । 'अधीगर्थदयेशाम्–'(अ.सू.२.३.५२) इति षष्ठी । गिरिरन्ध्रान्ते गिरिगुहाप्रान्ते ॥ ३१ ॥

हन्त राजा दशरथः सखा मे प्राणसम्मितः ।
ममापि पुत्रास्तत्पुत्राः स्नुषा तस्य मम स्नुषा ॥ ३२ ॥

(भा.दी.) हन्तेति । राजा दशरथः मे प्राणसम्मितः प्राणैः समानः सखा, हन्त हर्षे । तत्पुत्राः श्रीरामादयः ममापि पुत्राः पुत्रसदृशाः, तस्य दशरथस्य स्नुषा पुत्रभार्या सीता मम स्नुषा स्नुषासदृशी ॥ ३२ ॥

(सं.चं.) प्राणसम्मितः प्राणतुल्यः । तत्पुत्राः ममापि पुत्राः । तस्य स्नुषा ममापि स्नुषा ॥ ३२–३ ॥

मम स्नुषाहरं चोरं मम भ्रातृनिसूदनम्[2] ।
रावणं हन्तुकामोऽपि न समर्थोऽस्मि वानराः ॥ ३३ ॥

(भा.दी.) ममेति । हे वानराः, मम स्नुषां स्नुषासदृशीं सीतां हरतीति तथा तम्, अत एव चोरम्, मम भ्रातरं जटायुषं निसूदितवानिति तथा तम्, रावणं हन्तुं कामो यस्य स तथाऽपि तद्धनने समर्थः नास्मि ॥३३॥

अपक्षस्यामिषाकाङ्क्षी सुपार्श्वो मम नन्दनः ।
राक्षसं प्रैक्षत व्योम्नि हरन्तं रामवल्लभाम् ॥ ३४ ॥

---

१. **'–र्वाचं स्मरन्नहम्'**

२. **'भ्रातृनिषूदनम्'** इति पठन्तो भ्रान्ताः ।

(भा.दी.) अपक्षेति । न विद्येते पक्षौ यस्य स तथा तस्य मम भोजनार्थं आमिषं मांसमाकाङ्क्षितुं शीलमस्यास्तीति तथा, मांसमानेतुं गत इत्यर्थः, सुपाश्र्वः सुपाश्र्वनामकः मम नन्दनः सुतः रामवल्लभां सीतां हरन्तं राक्षसं रावणं व्योम्नि प्रैक्षत, आकाशमार्गेण गच्छन्तं ददर्शेत्यर्थः ॥ ३४ ॥

(सं.चं.) अपक्षस्य ममाऽहारार्थमामिषमाहर्तुमाकाङ्क्षन् सुपाश्र्वनामा मम सुतः ॥ ३४ ॥

हा राम राम नाथेति लक्ष्मणेति च सुस्वरम् ।
क्रन्दन्तीं सुन्दरीं तां च दृष्ट्वा तापमुपेयिवान् ॥ ३५ ॥

(भा.दी.) हेति । हा राम राम नाथ इति हा लक्ष्मण इति च सु सम्यक् स्वरो यथा भवति तथा क्रन्दन्तीं (सुन्दरीं) तां सीतां दृष्ट्वा तापः सन्तापस्तं उपेयिवान् प्राप्तवांश्च ॥ ३५ ॥

(सं.चं.) तापमुपेयिवान् सुपाश्र्वः । प्रतिकर्तुमप्रभवन् ॥ ३५–७ ॥

रामकार्य्यं मया कार्य्यं मनसा वचसाऽथवा[१] ।
तस्माद् वक्ष्याम्यहं वीरा दूरदर्शी स्वभावतः ॥ ३६ ॥

(भा.दी.) रामेति । हे वीराः वानराः, यस्मात् मया मनसा वचसा अथ कर्मणा, वा शब्दोऽनुक्तसमुच्चये, रामकार्यं तत् कार्यं कर्तुं योग्यम्, तस्मात् स्वभावतः दूरं द्रष्टुं शीलमस्यास्तीति तथा, दूरदर्शनसामर्थ्यवानित्यर्थः, अहं वक्ष्यामि ॥ ३६ ॥

शतयोजनदूरस्था लङ्केयं लवणाम्भसि ।
उद्याने शिंशपामूले[२] तत्राऽस्ते जनकात्मजा ॥ ३७ ॥

(भा.दी.) शतेति । लवणमयं यदम्भस्तस्मिन्, लवणसमुद्र इत्यर्थः, इयं दृश्यमाना लङ्का शतसङ्ख्याकानि योजनानि यस्य तच्छतयोजनं दूरं दूरप्रदेशस्तत्र तिष्ठतीति तथोक्ता, तत्र लङ्कायां यदुद्यानं तस्मिन् शिंशपायाः काळागरुवृक्षस्य यन्मूलं तस्मिन्, जनकात्मजा सीता आस्ते ॥ ३७ ॥

राक्षसीभिः प्रदत्तानि सुरामांसान्यपास्यति ।
वासवेनोपनीतेन साऽमृतान्नेन वर्त्तते ॥ ३८ ॥

१. 'वचसा तथा'
२. 'शिंशुपामूले' इति भ्रान्तः पाठः ।

(भा.दी.) राक्षसीति । सा सीता राक्षसीभिः राक्षसस्त्रीभिः प्रदत्तानि सुरामांसानि अपास्यति निराकरोति । असु क्षेपणे लट् । सा वासवेन इन्द्रेण उपनीतेन आनीतेन अमृतात्मकं यदन्नं तेन भोजनं कृत्वा वर्तते । वृतु वर्तने लट् ॥ ३८ ॥

(सं.चं.) सुरामांसानि अपास्यति निराकरोति । 'सा च कामैः प्रलोभ्यन्ती भक्ष्यैर्भोज्यैश्च मैथिली । न भोक्ष्यति महाभागा दुःखे मग्ना यशस्विनी' (६२.७) इति च । वासवेनोपनीतेन । 'परमान्नं तु वैदेह्या ज्ञात्वा दास्यति वासवः । यदन्नममृतप्रख्यं सुराणामपि दुर्लभम् । तदन्नं मैथिली प्राप्य विज्ञायेन्द्रादिदं त्विति । अग्रमुद्धृत्य रामाय भूतळे निर्वपिष्यति । यदि जीवति मे भर्ता लक्ष्मणेन सह प्रभुः । देवत्वं गच्छतोर्वाऽपि तयोरन्नमिदं त्विति' (६२.८–१०) इति । केचिदिममध्यायं वृथा प्रक्षिप्तं मन्यन्ते । तन्निरासाय च विशिष्येदं जग्रन्थ ग्रन्थकारः ॥ ३८–४० ॥

इदं रामाय देवाय देवराय भवेदिदम् ।
इत्यग्रभागौ विन्यस्य शेषमश्नाति शोभना ॥ ३९ ॥

(भा.दी.) इदमिति । शोभना सीता, इदं देवाय श्रीरामाय भवेत्, इदं देवराय भर्तुरनुजाय लक्ष्मणाय भवेत्, इति अग्रौ भागौ विन्यस्य, शेषोऽतिरिक्तांशस्तं अश्नाति स्वीकरोति । अश भोजने लट् ॥ ३९ ॥

रामप्रसादमाहात्म्यमहो पश्यत वानराः ।
रामस्य हि कथां[1] श्रुत्वा तनुर्म्मे तरुणीकृता ॥ ४० ॥

(भा.दी.) रामेति । हे वानराः, श्रीरामस्य यः प्रसादोऽनुग्रहस्तस्य माहात्म्यं तत् पश्यत, अहो आश्चर्यम्, श्रीरामस्य कथां श्रुत्वा मे तनुः शरीरम्, 'तनुः स्त्री त्वचि देहे च'' इति वैजयन्ती, तरुणीकृता नवीकृता हि ॥ ४० ॥

दग्धौ पक्षाविमौ रूढौ जरा स्वयमजीर्य्यत[2] ।
[3]बलवेगावनुद्वेगौ यथा यूनस्तथाऽद्य मे ॥ ४१ ॥

---

१. 'रामस्य तु कथाम्' २. 'जरा त्वियमजीर्यत'

३. 'यथेच्छकरणशक्तिर्बलम् । दूरगमनसामर्थ्यं वेगः । तौ अनुद्वेगौ उद्वेगरहितौ पूर्णौ बभूवतुः' इति का.श्री. ।

(भा.दी.) दग्धाविति । सूर्यतेजसा पूर्वं दग्धौ इमौ पक्षौ रूढौ अङ्कुरितौ, उत्पन्नावित्यर्थः, जरा च स्वयं अजीर्यत विनष्टाऽभूत् । जॄष् वयोहानौ लङ् । मे बलं च वेगश्च तौ, यूनः यथा तथा, न विद्यते उद्वेगः कम्पो ययोस्तौ तथोक्तौ, पूर्ववदनिवार्यावित्यर्थः, (अद्य) अभूताम् ॥ ४१ ॥

(सं.चं.) अजीर्यत जीर्णा अक्रियत । अनुद्वेगौ निरातङ्कौ ॥ ४१ ॥

शतयोजनमत्येतुं[1] यः शक्तो विश्रमं विना ।
स सीतां द्रक्ष्यति श्रीमानिति मे दिव्यनिश्चयः[2] ॥ ४२ ॥

(भा.दी.) शतेति । यः वानरः विश्रमः विश्रमणम्, मध्ये क्वचिदवस्थानमित्यर्थः, विना शतानां योजनानां समाहारः शतयोजनं तत्, शतं योजनानि यस्य प्रदेशस्य तमिति वा, अत्येतुं अतिक्रान्तुं शक्तः श्रीमान् स वानरः सीतां द्रक्ष्यति, इति मे दिव्यनिश्चयः, अन्यैरेवं ज्ञातुमशक्यत्वादिति भावः ॥ ४२ ॥

(सं.चं.) दिव्यनिश्चयः दिव्यदृष्टिलब्धो निश्चयः ॥ ४२–३ ॥

[3]महेन्द्रमलयप्रान्तमारुह्य प्लवनं भवेत् ।
स्वस्ति वोऽस्तु गमिष्यामि हिमवन्तं ममाऽलयम् ॥ ४३ ॥

(भा.दी.) महेन्द्रेति । महेन्द्रमलययोः महेन्द्रमलयपर्वतयोः यत्प्रान्तं समीपं तत् आरुह्य प्लवनं समुद्र-लङ्घनं तत् भवेत् । वः युष्मभ्यं स्वस्ति मङ्गळं अस्तु । अहं मम आलय आवासस्थानं (तं) हिमवन्तं गमिष्यामि ॥ ४३ ॥

इत्युक्त्वा तं पतत्रीन्द्रं पतन्तमवलोक्य ते ।
राघवाय नमश्चक्रुर्विस्मयोत्फुल्ललोचनाः[4] ॥ ४४ ॥

(भा.दी.) इतीति । ते वानराः इति उक्त्वा (पतन्तं) उत्पतन्तं तं पतत्रीन्द्रं सम्पातिं अवलोक्य विस्मयेन उत्फुल्लानि विकसितानि मानसानि येषां ते तथा सन्तः राघवाय नमश्चक्रुः । कृञ् धातोर्लिट् । श्रीरामकथा-श्रवणमहिम्नाऽस्य पक्षिणः पतत्रोत्पत्यादि जातमहो इति श्रीरामाय नमस्कारं चक्रुरित्यर्थः ॥ ४४ ॥

---

१. **'शतयोजनमभ्येतुम्'** २. **'इति मे निश्चिता मतिः'**
३. **'माहेन्द्र–'** ४. **'–त्फुल्लमानसाः'** इति वि.ती.पाठः।

(सं.चं.) उत्फुल्ल इति 'ञि फला विशरण' इत्यतः क्तान्तम् । 'अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः' (अ.सू.८.२.५५) इति निष्ठातकारस्य लकारः । नन्वनुपसर्गादित्युक्तम् । सत्यमुक्तम् । तस्यापवादमाह वार्तिककारः–'उत्फुल्लसम्फुल्लयोरिति वक्तव्यम्' इति ॥ ४४–६ ॥

कथयन्तोऽथ रामस्य[1] कथामाहात्म्यमद्भुतम् ।
दक्षिणाम्भोनिधिं प्रापुर्म्मलयानिलशीतलम् ॥ ४५ ॥

(भा.दी.) कथेति । अथ श्रीरामस्य अद्भुतं कथाया माहात्म्यं महिमा तत् कथयन्तः सन्तः, मलयस्य योऽनिलस्तेन शीतलस्तं दक्षिणाम्भोनिधिं दक्षिणसमुद्रं प्रापुः ॥ ४५ ॥

अम्भोनिधिं तं गम्भीरं वीक्षमाणान् विषादिनः ।
वानरानङ्गदः प्रोचे विषादस्त्यज्यतामिति ॥ ४६ ॥

(भा.दी.) अम्भ इति । गम्भीरमगाधं तं दक्षिणं अम्भोनिधिं वीक्षमाणान्, अत एव कथमयं लङ्घनीय इति विषाद एषामस्तीति विषादिनः, दीनानित्यर्थः, वानरान् प्रति अङ्गदः विषादः भयं त्यज्यतां इति प्रोचे ॥ ४६ ॥

यस्य या प्लवने शक्तिः स तां वदतु वानरः[2] ।
इति जाम्बवताऽऽदिष्टास्ते स्वशक्तिं न्यवेदयन् ॥ ४७ ॥

(भा.दी.) यस्येति । यस्य वानरस्य प्लवनं लङ्घनं तस्मिन् विषये या यावती शक्तिस्तां शक्तिं (सः वानरः) वदतु । इति जाम्बवता आदिष्टाः अभिहिताः ते वानराः स्वशक्तिं न्यवेदयन् विज्ञापयाञ्चक्रुः ॥ ४७ ॥

(सं.चं.) इति जाम्बवताऽऽदिष्टाः । 'ब्रुवध्वं यस्य या शक्तिः प्लवने प्लवगर्षभाः' (६४.२२) इत्यङ्गदवचनमिति रामायणे । प्रथममङ्गदेन, ततो जाम्बवता च पृष्टा इत्यविरोधः । 'ततस्तु ते ब्रह्मसुतेन पृष्टा न्यवेदयन्नात्मबलं पृथक्पृथक्' (६.५२) इति हि निर्णये ॥ ४७ ॥

योजनानि दश प्रोचे गजः प्लवनमात्मनः ।
विंशद्गवाक्षस्त्रिंशत्तु गवयो योजनान्यथ[3] ॥ ४८ ॥

---

१. **'कथामाहात्म्यं कथाश्रवणसामर्थ्यम्'** इति का.श्री. । २. **'सत्यं वदतु वानरः'** इति, **'स तां वदतु वानराः'** इति च ।
३. **'–त्रिंशत्तु शरभो योजनान्यथ'** इति पठन्तः का.श्री. प्रभृतयो भ्रान्ताः ।

(भा.दी.) योजनेति । अथ गजः गजनामकः आत्मनः प्लवनं तत् दशयोजनानि प्रोचे । गवाक्षः विंशत् योजनानि प्रोचे । गवयः त्रिंशत् योजनानि प्रोचे । 'विंशत्यादिरानवतेः' इति सूत्राद् विंशत्त्रिंशदादयः सर्वेऽपि स्त्रीलिङ्गाः ॥ ४८ ॥

(सं.चं.) विंशत् विंशतिः । विंशदिति च बहुलं प्रतनाः प्रयुञ्जते । 'त्रिंशत्तु शरभः' इति केचित् पठन्ति । प्रामादिकमेतत् । 'त्रिंशत्तु गवयः' इति साधुः पाठः । 'गजो गवाक्षो गवयो वृषभो गन्धमादनः' (६५.२) इति रामायणोक्तः क्रमः । वृषभमेवार्वाचीनाः शरभमाहुः । इयमपि नामभ्रान्तिः ॥ ४८ ॥

चत्वारिंशच्च वृषभः[१] पञ्चाशद्गन्धमादनः ।
मैन्दः षष्टिं सप्ततिं च विविदो वदति स्म तम् ॥ ४९ ॥

(भा.दी.) चत्वारिंशदिति । ऋषभः चत्वारिंशद् योजनानि प्रोचे । गन्धमादनश्च पञ्चाशत् योजनानि प्रोचे । मैन्दः षष्टिं योजनानि प्रोचे । विविदश्च सप्ततिं योजनानि तं जाम्बवन्तं प्रति वदति स्म अवदत् । मैन्दविविदयोः स्वरूपतः साम्येऽपीन्द्रावेशनिमित्तबलाधिक्यं मैन्दापेक्षया विविदस्येत्यत इयमुक्तिरुपपन्ना । एवमन्यस्यापि स्वरूपत अवरस्य प्लवनाधिक्यं निमित्तान्तरायत्तमिति द्रष्टव्यम् ॥ ४९ ॥

(सं.चं.) वदति स्म जाम्बवन्तम् । 'आबभाषे गजस्तत्र प्लवेयं दशयोजनम् । गवाक्षो योजनान्याह गमिष्यामीति विंशतिम् । गवयो वानरस्तत्र वानरांस्तानुवाच ह । त्रिंशतं तु गमिष्यामि योजनानां प्लवङ्गमाः । वृषभस्तानुवाचाथ वानरान् वानरर्षभः । चत्वारिंशद् गमिष्यामि योजनानां प्लवङ्गमाः । वानरांस्तु महातेजा अब्रवीद् गन्धमादनः । योजनानां गमिष्यामि पञ्चाशत्तु न संशयः । मैन्दस्तु वानरस्तत्र वानरांस्तानुवाच ह । योजनानां परं षष्टिमहं प्लवितुमुत्सहे । ततस्तत्र महातेजा विविदः प्रत्यभाषत । गमिष्यामि न सन्देहः सप्ततिं योजनान्यहम्' (६५.३–८) इति च ॥ ४९ ॥

सुषेणसूनुश्चाशीतिं जाम्बवान् स्वयमब्रवीत्[२] ।
वृद्धं हसेयुस्तरुणा मां तथाऽपि ब्रवीम्यहम् ॥ ५० ॥

(भा.दी.) सुषेणेति । सुषेणसूनुः तारः अशीतिं योजनानि अब्रवीत् । स्वयं जाम्बवांश्च तरुणाः युवानः वृद्धं मां हसेयुः, वृद्धोऽयं किं वा लङ्घनं करिष्यतीति हासं कुर्युः, हसे हसने लिङ् । तथाऽपि अहं ब्रवीमि । इत्यब्रवीदिति सम्बन्धः ॥ ५० ॥

---

१. '–रिंशच्च ऋषभः'

२. 'स्वयमभ्यधात्'

(सं.चं.) सुषेणसूनुश्चाशीतिम्। सुषेणसूनुस्तारः। ननु रामायणेऽन्यथा पठ्यते–'सुषेणस्तु हरिश्रेष्ठः प्रोक्तवान् कपिसत्तमम्। अशीतिं योजनानां तु प्लवेयं प्लवगेश्वराः' (६५.९) इति। तेन सुषेणोऽशीतिमाहेति वक्तव्यम्। तत् कथं सुषेणसूनुरिति। अयि रामायणपाठमुग्ध, शृणु तावद् वास्तवम्। सुग्रीवेण सुषेणः किल पश्चिमां दिशं प्रति प्रेषितः। स कथं सपदि पश्चिमां दिशं विहायात्राऽगच्छेत्। किं वाल्मीकिरपि स्वयं विसस्मार पूर्वोक्तम्। न हि महान्तो पूर्वोक्तं विस्मरन्ति; स्वव्याहतं वा भाषन्ते। तेन 'सुषेणस्तु हरिश्रेष्ठः' इत्यपपाठः। पूर्वोत्तरपाठक्लृप्तिविधुराणां किमपि चापलमेतत्। तर्हि कः शुद्धपाठः स्यात्? 'सुषेणजः कपिश्रेष्ठः' इति स्यात्। 'सुषेणतनयस्तारः' इति वा स्यात्। अत आह पण्डिताचार्यः–'सुषेणसूनुः' इतीति सर्वं सुन्दरम्॥ ५०॥

त्रिविक्रमस्य क्रमणे कुर्वतो नन्दिघोषणम्[१]।
त्रैलोक्ये भ्राम्यतो[२] मेऽभूज्जानु मेरुनिपीडितम् ॥ ५१ ॥

(भा.दी.) **त्रिवी**ति। त्रिषु लोकेषु विक्रमाः पादविन्यासाः यस्य स तथा तस्य विष्णोः क्रमणं पादविन्यासस्तस्मिन् सति, नन्दिघोषणं तूर्यरावस्तत् कुर्वतः, बलेः त्रैलोक्यं त्रिविक्रमो जहारेत्युच्चैरुक्त्वोक्त्वा तूर्यघोषं कुर्वत इत्यर्थः, तदर्थं त्रयश्च ते लोकाश्च त्रिलोकास्त एव त्रैलोक्यं तस्मिन् भ्राम्यतः सञ्चारं कुर्वतः मे जानु मेरुणा निपीडितं अभूत्॥ ५१॥

(सं.चं.) त्रिविक्रमस्य ब्रह्माण्डक्रमणे। नन्दिघोषम्, बलिविजयनिमित्तमानन्दवार्ताघोषणम्। तदर्थं त्रैलोक्ये भ्राम्यतः। जानु मेरुशिखरेण घट्टितं सत् पीडितं सवेदनमास। भगवत्पादेन स्फुटमुदितं रामायणे सूचितमेतत्– 'मया महाबलेश्चैव यज्ञे विष्णुः सनातनः। प्रदक्षिणीकृतः पूर्वं क्रममाणस्त्रिविक्रमः' (६५.१५) इति, 'त्रिविक्रमे मया तात सशैलवनकानना। त्रिःसप्तकृत्वः पृथिवी परिक्रान्ता प्रदक्षिणम्' (६६.३२) इति च॥ ५१–२॥

नवतिप्लव एवाहं ततः षण्णवतिप्लवः[३]।
पुरस्तादित्यभिहिते ब्रह्मजेनाङ्गदोऽब्रवीत् ॥ ५२ ॥

---

१. **'–घोषणाम्'** २. **'भ्रमतो–'**

३. **षण्णवतिः– 'अनाम् नवतिनगरीणामिति वक्तव्यम्'** (वा.८.४.४२) **इति णत्वम्'** इति का.श्री.।

(भा.दी.) नवेति । ततः मेरुताडननिमित्तात् अहं इदानीं नवतिः नवतियोजनानि प्लवः प्लवनं यस्य स तथा चास्मि । पुरस्तात् पूर्वं तु षडधिका नवतिः षण्णवतिः, षण्णवतिः प्लवो यस्य स तथा अस्मि । ब्रह्मणो जातो ब्रह्मजस्तेन जाम्बवता इति अभिहिते सति अङ्गदः अब्रवीत् ॥ ५२ ॥

योजनानां[१] शतं गन्तुं शक्तिं मे[२] निश्चिनोम्यहम् ।
न निश्चिनोमि विक्रम्य प्रत्यागन्तुं प्लवङ्गमाः ॥ ५३ ॥

(भा.दी.) योजनेति । हे प्लवङ्गमाः वानराः, अहं योजनानि तेषां शतं तत् गन्तुं मे शक्तिं निश्चिनोमि । चिञ् चयने लट् । विक्रम्य समुद्रं विलङ्घ्य प्रत्यागन्तुं परावृत्याऽगन्तुं शक्तिं न निश्चिनोमि ॥ ५३ ॥

(सं.चं.) योजनानां शतं गन्तुम् । 'अहमेतद् गमिष्यामि योजनानां शतं महत् । निवर्तने तु मे शक्तिः स्यान्न वेति न निश्चिता' (६५.१९) इति च ॥ ५३ ॥

इत्युक्ते[३] जाम्बवानूचे[४] गन्तव्यं न तु संशये ।
वत्स नः पालनीयेन किम्पुनर्भवता त्विति[५] ॥ ५४ ॥

(भा.दी.) इतीति । इति अङ्गदेन उक्ते सति, जाम्बवान् कार्यसाधनसामर्थ्ये यः संशयः तस्मिन् सति येनकेनापि पुरुषेण न गन्तव्यं तु न गन्तव्यमेव । हे वत्स, नः अस्माकं युवराजत्वेन पालनीयेन रक्षणीयेन भवता तु संशये सति न गन्तव्यमिति पुनः किं वक्तव्यं इति ऊचे ॥ ५४ ॥

(सं.चं.) गमनशक्तिसंशये केनापि न गन्तव्यम् । किं पुनरस्माकं स्वामिना भवता ॥ ५४ ॥

अथ वालिसुतोऽवादीत् को नु नः पालयिष्यति[६] ।
कस्तरिष्यति सिन्धुं को रामप्रेष्ठो भविष्यति[७] ॥ ५५ ॥

(भा.दी.) अथेति । अथ वालिसुतः अङ्गदः, नः अस्मान् को नु क एव पालयिष्यति रामकार्यकरणेन प्रायोपेशान्निवर्तनं कृत्वा रक्षिष्यति? पा रक्षणे लृट् । सिन्धुः समुद्रस्तं कः तरिष्यति? तॄ प्लवनतरणयोः लृट् । कः रामप्रेष्ठः श्रीरामस्यातिशयेन प्रियो भवेत्? इति अवादीत् ॥ ५५ ॥

---

१. **'योजनानि शतम्'** २. **'शक्तिर्मे'** ३. **'इत्युक्तो–'** ४. **जाम्बवान् प्रोचे'**

५. **'पालनीयेन भविता किम्पुनः शुचा'** इति का.श्री. पाठः स्यात् । तथाहि तद्व्याख्यानम्–**'नोऽस्माकं पालनीयेन, रक्षितुं योग्येन, रक्षकेनेति यावत् 'केनचिद् भविता भवितव्यम् । भावे लुट् । शोकेन किं पुनः किं प्रयोजनम्'** इति । पाठश्चास्वरसः । अर्थश्च ।

६. **'पालयेदिति'** ७. **'भवेदिति'** इति वि.ती.पाठः ।

(सं.चं.) अस्मात् सङ्कटात् तारयित्वा पालयिष्यति । पाल लक्षणे । तेन को रामस्य प्रियतमो भविष्यति? ॥ ५५ ॥

प्लवनं कुर्वतोऽपि स्युरन्तरायाः किलान्तरे ।
प्राप्तं नोऽकृतकृत्यत्वात्[1] प्रायः प्रायोपवेशनम् ॥ ५६ ॥

(भा.दी.) **प्लवनमि**ति । प्लवनं लङ्घनं तत् कुर्वतःअन्तरं मार्गमध्यं तस्मिन् अन्तरायाः विघ्नाः स्युः किल । अस्माकं अकृतं सीतादर्शनलक्षणं कृत्यं प्रयोजनं यैस्तथोक्तास्तेषां भावस्तत्वं तस्मात् प्रायः प्रायशः प्रायोऽनशनव्रतं तेन उपवेशनं प्राप्तम् ॥ ५६ ॥

(सं.चं.) अतः प्रायः प्रायोपवेशनेन मरणमेव शरणम् ॥ ५६–८ ॥

इति खिन्नतरं प्रोचे जाम्बवानङ्गदं प्रति ।
कश्चिद् विपश्चिद् बलवान् कार्य्यं नः साधयेदिति ॥ ५७ ॥

(भा.दी.) **इती**ति । जाम्बवान् इति खिन्नतरं अत्यन्तं खिन्नं अङ्गदं प्रति, बलमस्यास्तीति बलवान् कश्चित् विपश्चित् प्राज्ञचूडामणिः नः कार्यं तत् साधयेत् इति प्रोचे ॥ ५७ ॥

एकान्ते कान्तिमन्तं तं हनूमन्तमवस्थितम् ।
आत्मारामं तदा रामप्रेष्ठं प्रोवाच जाम्बवान् ॥ ५८ ॥

(भा.दी.) **एके**ति । जाम्बवान्, एकान्त एकान्तप्रदेशस्तस्मिन् अवस्थितम्, आत्मनि पूर्णे ब्रह्मणि आ अतिशयेन रमत इति आत्मारामस्तम्, भगवद्विषयगुणकर्मादिध्यानेन परिपूर्णमित्यर्थः, श्रीरामप्रेष्ठं श्रीरामस्यातिशयेन प्रियं कान्तिमन्तं तं हनूमन्तं प्रति तदा प्रोवाच ॥ ५८ ॥

[2]सर्वशास्त्ररसाभिज्ञ सर्ववीर्य्यरसार्ण्णव ।
सर्वसद्गुणसम्पन्न हनूमन्[3] किं न भाषसे ॥ ५९ ॥

---

१. '–कृत्यत्वात् पुनः प्रायोप–'

२. **'ऋग्यजुःसामाथर्वाश्च भारतं पञ्चरात्रकम् । मूलरामायणं चैव शास्त्रमित्यभिधीयते । यच्चानुकूलमेतस्य तच्च शास्त्रं प्रकीर्तितमिति प्रमाणोक्तसर्वशास्त्रतात्पर्याभिज्ञ । सर्ववीर्यरसार्णव सर्वविषयकपराक्रमलक्षणोदकस्य समुद्र इव स्थित'** इति का.श्री. ।

३. **'हनुमन्'**

(भा.दी.) सर्वेति । सर्वाणि यानि शास्त्राणि ब्रह्मतर्कमूलरामायणादीनि तेषां रसः सारस्तं अभिजानातीति तथा, तत्सम्बुद्धिः । सर्वे ये वीर्यरसाः सामर्थ्यवरास्तैः अर्णव इव, तत्सम्बुद्धिः । सर्वे ये सन्तः श्रेष्ठा गुणा ज्ञानबलादयस्तैः सद्गुणैर्युक्त हे हनूमन्, किं किमर्थं न भाषसे । भाष व्यक्तायां वाचि लट् ॥ ५९ ॥

(सं.चं.) वीर्यं रसस्तोयमिव । तस्यायमर्णव इव ॥ ५९ ॥

इमानि कपिलक्षाणि भयशोकमहानले ।
लोटन्ति[१] चावलोक्य त्वं करुणां न करोषि किम् ॥ ६० ॥

(भा.दी.) इमानीति । भयं च शोकश्च तावेव महान् योऽनलोऽग्निस्तस्मिन् लोटन्ति इतस्ततः परिभ्रमणं कुर्वन्ति (इमानि) कपिलक्षाणि अवलोक्य च त्वं करुणां किमर्थं न करोषि? ॥ ६० ॥

(सं.चं.) लोटन्ति विलुळितानि । लुट विलोडने । कपिलक्षाणि अवलोक्यापि स्वभावतः करुणालुस्त्वं किमिति न करुणां करोषि ॥ ६० ॥

अञ्जनात्वेन सञ्जाता मञ्जुला पुञ्जिकस्थला[२] ।
तस्यां हि भवतो जन्म प्राणात् प्राणिप्रणायकात् ॥ ६१ ॥

(भा.दी.) अञ्जनेति । मञ्जुला मनोहरा पुञ्जिकस्थला पुञ्जिकस्थला नामाप्सराः अञ्जनात्वेन सञ्जाता, तस्यां अञ्जनायां प्राणिनां प्रणायकः प्रेरकस्तस्मात् प्राणात् मुख्यप्राणात् भवतः जन्म उत्पत्तिर्हि ॥ ६१ ॥

(सं.चं.) अञ्जनात्वेन सञ्जाता । 'आसीदप्सरसां श्रेष्ठा विख्याता पुञ्जिकस्थला । अञ्जनेति परिख्याता पत्नी केसरिणो हरेः । विख्याता त्रिषु लोकेषु रूपेणाप्रतिमा भुवि । अभिशापादभूत् तात वानरी कामरूपिणी' (६६.८–९) इति, 'स त्वं केसरिणः पुत्रः क्षेत्रजो भीमविक्रमः । मारुतस्यौरसः पुत्रस्तेजसा चापि तत्समः' (६६.२९–३०) इति च ॥ ६१ ॥

भुवेव हैरण्यनिधिं भस्मनेवाग्निमावृतम् ।
लोकानुवृत्त्या गूढं त्वां वेदाहं बलदेवताम्[३] ॥ ६२ ॥

---

१. 'लोठन्ति' २. 'पुञ्चकस्थली' ३. 'बलदैवतम्'

(भा.दी.) भुवेति । भुवा भूम्या आवृतं आच्छादितं हैरण्यो यो निधिः पिहितद्रव्यं तमिव, भस्मनाऽऽवृतं अग्निमिव, लोकस्य जनस्य योऽनुवृत्तिरनुकरणं तया गूढम्, लौकिकपुरुषानुकृतिं दृष्ट्वा लौकिकैः महाबलत्वेनाविदितमित्यर्थः, त्वां अहं बलस्य देवतामभिमानिनं मुख्यप्राणं वेद जानामि ॥ ६२ ॥

(सं.चं.) भुवा पिहितं हिरण्यसम्भृतं निधिमिव गूढं त्वाम् ॥ ६२ ॥

गरुडो नानुगन्तुं त्वां समर्थः किमुतापरे ।
तात ते समतां यातुं तात एव प्रभुः स्वयम्[1] ॥ ६३ ॥

(भा.दी.) गरुड इति । गरुडः त्वां अनुगन्तुं समर्थः न, अपरे देवाः अनुगन्तुं समर्था न भवन्तीति किं वक्तव्यम्? हे तात हनुमन्, ते समतां बलादिना साम्यं यातुं प्राप्तुं ते तव तातः पिता मुख्यप्राण एव (स्वयं) प्रभुः समर्थः ॥ ६३ ॥

(सं.चं.) गरुडः । तेन गरुडशेषरुद्रेभ्य उत्तमत्वमुक्तं भवति । मुख्यप्राणस्वरूपत्वं च । ते तव तातः प्रधानवायुः ॥ ६३–६ ॥

उत्तिष्ठ पुरुषश्रेष्ठ[2] ज्ञातीनामथ[3] सम्पदे ।
तव त्रिविक्रमस्येव विक्रमावसरोऽधुना ॥ ६४ ॥

(भा.दी.) उत्तिष्ठेति । अथ हे पुरुषश्रेष्ठ हनुमन्, ज्ञातीनां सगोत्राणामस्माकं सम्पत् विभूतिस्तस्यै उत्तिष्ठ । अधुना त्रिविक्रमस्येव तव विक्रमावसरः सम्प्राप्तः ॥ ६४ ॥

ब्रह्मपुत्रे वदत्येवं वायुपुत्रोऽब्रवीद् वचः[4] ।
नन्दयञ्छोकसन्तप्तान् मन्दहासेन्दुना हरीन्[5] ॥ ६५ ॥

(भा.दी.) ब्रह्मेति । ब्रह्मपुत्रे जाम्बवति एवं वदति सति, वायुपुत्रः हनुमान्, शोकसन्तप्तान् हरीन् मन्दहास एवेन्दुस्तेन नन्दयन् सन् (वचः) अब्रवीत् ॥ ६५ ॥

अत्येतुं योजनशतं ममाऽयासो न विद्यते ।
सर्वत्राव्याहतगतेर्गरुडस्येव गोष्पदम् ॥ ६६ ॥

---

१. 'प्रभुस्तव' २. 'पुरुषश्रेष्ठ सकलजीवोत्तम' इति का.श्री. । ३. 'ज्ञातीनामद्य सम्पदे'
४. 'वायुपुत्रोऽवदद् वचः' ५. '–हासेन्दुना कपीन्'

(भा.दी.) अतीति । सर्वत्र अव्याहता अप्रतिहता अप्रतिबद्धा गतिर्यस्य स तथा तस्य मम योजनानां शतं तत् अत्येतुं उल्लङ्घितुं तु गोः पदं तत् अत्येतुं गरुडस्येव आयासः न विद्यते ॥ ६६ ॥

सहस्रवारं पर्य्यागां मेरुं प्रागेकपाततः[१] ।
आभिमुख्येन तीक्ष्णांशोरुदयादस्तमप्यगाम् ॥ ६७ ॥

(भा.दी.) सहस्रेति । अहं प्राक् पूर्वं एको यः पातस्तस्मादिति ततः, एकप्लवनेनेत्यर्थः, मेरुर्मेरुपर्वतस्तं सहस्रसङ्ख्याकं वारं गुणनं यथा भवति तथा पर्यागां परितः समागतवानभूवम् । प्राक् तीक्ष्णा अंशवो यस्य स तथा सूर्यस्य अभिमुखस्य भाव आभिमुख्यं तेन उदय उदयपर्वतस्तस्मात् अस्त अस्तपर्वतस्तमपि एकपातेन आगाम् ॥ ६७ ॥

(सं.चं.) सहस्रवारं पर्यागाम् । 'उत्सहेय हि विस्तीर्णमालिखन्तमिवाम्बरम् । मेरुं गिरिमसङ्गेन परिगन्तुं सहस्रशः' (६७.११) इति, 'उदयात् प्रस्थितं वाऽपि ज्वलन्तं रश्मिमालिनम् । अनस्तमितमादित्यमभिगन्तुं समुत्सहे' (६७.१५) इति च ॥ ६७–८ ॥

राघवस्य प्रसादेन लाघवं पौरुषं च मे ।
मत्पितुश्च प्रसादेन[२] भवेदेव विशेषतः ॥ ६८ ॥

(भा.दी.) राघवेति । मे मम लाघवं लघुत्वम्, पौरुषं पराक्रमश्च, राघवस्य यः प्रसादोऽनुग्रहस्तेन, मत्पितुर्वायोश्च यः प्रसादस्तेन च विशेषतः भवेदेव । यत्कार्यसाधनार्थं यावद् बलं पौरुषादिकमपेक्षितं तावदभिव्यक्तं भवेदेव । 'इच्छाव्यक्तिः प्रायशो मारुतस्य' इत्युक्तेरिति भावः ॥ ६८ ॥

भवन्तोऽत्रैव तिष्ठन्तु भवन्तो वीतसम्भ्रमाः ।
कृतकार्य्य उपेष्यामि कृतका विक्रमा न मे ॥ ६९ ॥

(भा.दी.) भवन्त इति । भवन्तः वीतः अपगतः सम्भ्रम उद्वेगो येषां ते तथा भवन्तः सन्तः अत्रैव तिष्ठन्तु । अहं कृतं कार्यं येन स तथा सन् उपेष्यामि आगमिष्यामि । मे विक्रमाः कृतकाः प्राकृताः वरादिलब्धाः, आभासा इति यावत्, न भवन्ति ॥ ६९ ॥

---

१. **'एकपाततः एकवारपतनेनैव । मध्ये क्वचिदप्यस्थित्वेति यावत्'** इति का.श्री. ।

२. **'–तुश्च प्रभवेन'** (ण)

(सं.चं.) वीतसम्भ्रमाः सन्तः। कृतका मे न विक्रमाः, किन्तु औत्पत्तिकाः स्वभावसिद्धाः। पादादि-यमकम् ॥ ६९ ॥

मम निष्पततो वीर्य्यं न सहेत महीतळम्।
पङ्कवत् परिदार्य्येत[१] प्लवेयास्मान्महीधरात् ॥ ७० ॥

(भा.दी.) ममेति। निष्पततः लङ्कां प्रति पततः मम वीर्यं बलं तत् महीतळं न सहेत। पङ्कवत् कर्दमप्रदेशवत् परिदार्येत विशीर्येत। दॄ विदारणे लिङ्। यस्मात् तस्मात् कारणात् महीधरो महेन्द्रस्तस्मात् प्लवेय प्लवनं कुर्याम्। प्लुङ् गतौ लिङ् ॥ ७० ॥

(सं.चं.) यदा महीतळं पङ्कवद् परिदार्य सागरेणाप्लुता द्रवेत् तदाऽहं द्रवतोऽस्मान्महीधरात् प्लवेय। 'सागरं क्षोभयिष्यामि दारयिष्यामि मेदिनीम्' (६७.१७) इति ॥ ७०–२ ॥

हनूमति ब्रुवत्येवं भूषयामासुरुद्धताः।
वनमालाङ्गदाद्यैस्तमङ्गदाद्याः प्लवङ्गमाः ॥ ७१ ॥

(भा.दी.) हनूमतीति। हनूमति एवं ब्रुवति सति, उद्धताः सन्तोषातिशयेनाभिवृद्धा अङ्गदाद्याः प्लवङ्गमाः, तं हनुमन्तम्, वनमाला च अङ्गदं च ते आद्ये येषां तानि तैः आभरणैः भूषयामासुः ॥ ७१ ॥

पालयन् वानरकुलं कालयन् रक्षसां कुलम्।
जय वीर जयेत्युच्चैः चुक्रुशुर्वानरेश्वराः ॥ ७२ ॥

(भा.दी.) पालयन्निति। हे वीर हनुमन्, वानराणां कुलं समूहस्तत् पालयन् सन्, रक्षसां कुलं समूहस्तत् (कालयन्) संहरन्, जय जय इति उच्चैः वानरेश्वराः अङ्गदाद्याः चुक्रुशुः सिंहनादं चक्रुः ॥ ७२ ॥

स्मितं हरीणां वदनारविन्दं कुर्वन् हनूमानधिकं चकाशे।
माहेन्द्रमारुह्य महीधरेन्द्रं यथोदयं भानुरुदारभानुः ॥ ७३ ॥

(भा.दी.) स्मितमिति। हनुमान् महीधरेन्द्रं पर्वतश्रेष्ठं माहेन्द्रो माहेन्द्रपर्वतस्तं आरुह्य, हरीणां कपीनां वदनारविन्दं तत्, जात्येकवचनमेतत्, स्मितं विकसितं कुर्वन्, उदारा भानवो यस्य स तथोक्तः भानुः सूर्यः, उदयः उदयपर्वतस्तमारुह्य यथा तथा अधिकं यथा भवति तथा चकाशे अत्यन्तं बभौ ॥ ७३ ॥

१. **'परिदीर्यैतत् प्लवेया–'**। **'अहं पङ्कवत् कर्दममिव एतत् महीतलं परिदीर्य भित्त्वा'** इति का.श्री.।

(सं.चं.) इन्द्रोपेन्द्रवज्राभ्यामुपसंहर्तुमुपक्रमते– स्मितम् हरीणाम् । स्मितं मन्दहासोपेतम् । उदयमुदयाचलम् । उदारा महाप्रकाशा भानवः किरणा अस्य । उदयाद्रिमारुह्य भानुररविन्दं स्मितं विकसितं करोति । हनुमान् कपीनां वदनारविन्दं स्मितं मन्दमहासोपेतं चकार ॥ ७३ ॥

क्रतुमिव हरितुष्ट्यै विक्रमं कर्त्तुकामः
प्लवनमथ करिष्यन्[1] दीक्षणीयामिवेष्टिम् ।
रघुकुलतिलकं श्रीकान्तमेकान्तभक्तः
समनमदसमानं राममेकाभिरामम् ॥ ७४ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे किष्किन्धाकाण्डेऽष्टमः सर्ग्गः ॥

—०—

(भा.दी.) **क्रतुमि**ति । अथ हरितुष्ट्यै क्रतुमिव क्रत्वाख्यप्रधानयज्ञमिव विक्रमः पराक्रमस्तं कर्तुं काम इच्छा यस्य स तथा, (अथ) विक्रमार्थं च दीक्षणीयाख्यां प्रधानक्रत्वङ्गभूतां इष्टिमिव इष्ट्याख्ययागविशेषमिव प्लवनं तत् करिष्यन्, एकान्तभक्तः मुख्यभक्तः सः हनुमान्, न विद्यते समानो यस्य स तथा तं असदृशमित्यर्थः, एकतो मुख्यतोऽभिरामं मनोहरम्, रघूणां यत्कुलं तस्मिन् तिलकः श्रेष्ठः (तम्), श्रीकान्तं श्रियो भर्तारं श्रीरामं समनमत् नमश्चकार ॥ ७४ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां किष्किन्धाकाण्डेऽमष्टमः सर्ग्गः ॥

—०—

(सं.चं.) अन्ते मालिन्योपसंहरति– **क्रतुमिव** । मुख्यक्रतोरादौ क्रत्वारम्भदीक्षारूपा दीक्षणीया नामेष्टिर्भवति । अत्रापि भगवत्प्रीत्यर्थं समुद्रतरणाख्यो विक्रमः क्रतुः । तस्य महेन्द्रादुत्प्लवनं दीक्षणीयेष्टिरिति । तामिष्टिं करिष्यन्, करिष्यमाणस्य कर्मणो निर्विघ्नतायै रामनमनरूपमङ्गलमाचचारेति ॥ ७४ ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां किष्किन्धाकाण्डे अष्टमसर्गविवरणम् ॥

—०—

॥ इति किष्किन्धाकाण्डं समाप्तम् ॥

[आदितः श्लोकाः– १८३५+७४=१९०९]

[किष्किन्धाकाण्डे श्लोकः–४९४]

---

१. 'प्लुतिमथ स करिष्यन्'

श्रीनारायणपण्डिताचार्य्यविरचितं

सङ्ग्रहरामायणम्

[श्रीविश्वपतितीर्थकृतया भावार्थदीपिकया,
आचार्यगोविन्दकृतया सङ्ग्रहचन्द्रिकया च भूषितम्]

[द्वितीयो भागः]

संशोधकः-सम्पादकः
डा. बन्नञ्जे गोविन्दाचार्यः

प्रकाशनम्
श्रीपेजावराधोक्षजमठः, जगद्गुरुश्रीमध्वाचार्यमहासंस्थानम्
उडुपी
२०१५

SANGRAHA-RAMAYAṆAM [Samskṛtam], Second part,
by Śrī Nārāyaṇa Paṇḍitācārya, with commentaries: Bhāvārtha dipikā of Viśvapati Tithra and Saṇgraha cahndrikā of Dr. Bannañje Govindācārya.

Critically Edited by : **Dr. Bannañje Govindācārya**
Vidyāvācaspati, Vidyāratnākara, Padmashri awardee.

Published by : **Śrī Pejāvara Adhokṣaja Maṭha,**
Jagadguru Śrī Madhwācārya Mahā Samsthāna
Udupi
Karnātaka, India
Mob : 9845468508

First Edition : **2015**, (**Copies** :**500**)

Pages : **14+698**

Price : **₹ 1500 (complete set)**

Sketches : **Ujvala Nilamani, Ukraine**

Typeset : **Kaddi S. Badarinarayanachar**
Poornaprajna Vidyapeetha
E-Mail : bnkaddi@gmail.com

Printed at **Sri Anirudh Creations**
#144, 6th main, Gururaja Layout
Behind Vidyapeetha, Bengaluru-560028
Cell: 9880077876
E-Mail : srikanth.nsil@gmail.com:



कृष्णं वन्दे जगद्गुरुम्



प्रणतवान् प्राणिनां प्राणभूतं
प्रणतिभिः प्रीणये पूर्णबोधम् ।।

विषयानुक्रमणिका

सुन्दरकाण्डम्

पञ्चमः सर्गः सीतया हनुमद्दर्शनम् । तयोः संवादः । हनुमता समग्रवृत्तान्तनिवेदनपूर्वकमभिज्ञानाङ्गुलीयकदानम् । सीतायै प्रत्ययार्थं स्वबृहद्रूपदर्शनम् । सीतयाऽभिज्ञानार्थं चूडामणिदानम् । हनुमताऽशोकवनभङ्गः । अवध्यकिङ्करसेनावधः ॥

षष्ठः सर्गः प्रासादभङ्गः । चैत्यपालवधः । जम्बुमालिवधः । अन्येषां मन्त्रिपुत्राणां वधः । पञ्चसेनानायकवधः । अक्षकुमारपोथनम् । इन्द्रजिता ब्रह्मास्त्रस्य प्रयोगः । हनुमतो रावणसमीपनयनम् । तेन रावणबोधनम् । रावणेन पुच्छदाहाज्ञा । हनुमता लङ्काया दहनम् । जलधितरणम् । कपिभिः समागमः । हृष्टैः कपिभिर्मधुवन-भङ्गः । श्रुतसीतावार्तेन श्रीरामेण हनुमदालिङ्गनम् ॥

युद्धकाण्डम्

प्रथमः सर्गः कपिसेनया सह श्रीरामस्य यानम् । दक्षिणसमुद्रतीरे वासः । रावणेन तिरस्कृतस्य विभीषणस्य रामप्रपदनम् ॥

द्वितीयः सर्गः तद्विषये सुग्रीवादीनाामविस्रम्भः । हनुमता तस्य साधुत्वसमर्थनम् । रामेण तस्य परिग्रहः । तस्य लङ्काधिपतित्वेनाभिषेकः । शार्दूलेन कपिसैन्यागमनस्य रावणाय निवेदनम् । रावणप्रहितेन शुकेन सुग्रीवबोधनम् । अङ्गदादिभिस्तस्य पक्षच्छेदः । सुग्रीवेण प्रतिसन्देशः । समुद्रनिग्रहाय रामेण धनुरादानम् । समुद्रराजागमनम् । समुद्राभ्यर्थनया नळेन सेतुनिर्माणम् । कपिभिः सेतुबन्धाय शिलानयनम् । पञ्चभिर्दिनैः सेतुसमाप्तिः । सुवेलाद्रौ सेनाविश्रान्तिः ॥

तृतीयः सर्गः कपिरूपयोः शुकसारणयोः रामेणाभयदानम् । ताभ्यां रावणाय कपिसेनाया असङ्ख्यतानिवेदनम् । रावणेन सीतायै रामस्य मायाशिरःप्रदर्शनम् । इयं राक्षसमायेति सरमया सीतासान्त्वनम् । माल्यवता रावणबोधनम् । रावणेन तन्निराकृत्य युद्धाय सन्नाहः । प्रासादगतं रावणं दृष्ट्वा सुग्रीवस्य संरम्भः ॥

चतुर्थः सर्गः अङ्गददौत्यम् । रावणप्रासादभङ्गः । उभयपक्षयोर्युद्धसन्नाहः ॥

पञ्चमः सर्गः रामरावणभृत्यानां द्वन्द्वयुद्धम् । रक्षसां नाशः । रात्रियुद्धम् । प्रहस्तादिवधः । कपिभिर्लङ्कादहनम् ॥

षष्ठः सर्गः अङ्गदेन कम्पनप्रजङ्घयोर्वधः । मैन्देन यूपाक्षवधः । विविदेन शोणिताक्षवधः । सुग्रीवेण कुम्भवधः । हनुमता निकुम्भवधः । सुप्तघ्नादीनां रामेण वधः । अङ्गदेन नरान्तकवधः । हनुमता देवान्तकवधः । तेनैव युद्धोन्मत्तादीनां च वधः ॥

सप्तमः सर्गः लक्ष्मणेन ब्रह्मास्त्रेणातिकायवधः । रामेण मकराक्षवधः ॥

अष्टमः सर्गः रावणेन कपिसेनाक्षोभणम् । हनुमता तस्य मुष्टिप्रहारः । रावणमूर्छा । नीलेन रावणजडीकरणम् । रावणबाणेन सौमित्रिमोहः । हनुमता तस्य रामोपकण्ठं नयनम् । रामेण लक्ष्मणोज्जीवनम् । रामेण सह रावणस्य युद्धम् । पराजितस्य रावणस्य नगरीं प्रति गमनम् ॥

नवमः सर्गः कुम्भकर्णप्रबोधनम् । तेनास्य युद्धस्यानयत्वप्रतिपादनम् । अग्रजवचनेन युद्धाय प्रस्थानम् । तं दृष्ट्वा कपीनां द्रवणम् । कपिवीराणां तेन मुष्टिघातेन पातनम् । सुग्रीवं मूर्छितं गृहीत्वा पुरगमनम् । सुग्रीवेण तं वञ्चयित्वोत्पतनम् । हनुमत्प्रहारेण कुम्भकर्णस्य पतनम् । रामेण कुम्भकर्णवधः ॥

दशमः सर्गः इन्द्रजिता नागास्त्रप्रयोगः । गरुडागमनेन नागास्त्रमोक्षः । पुनरपि नागभोगैर्बन्धनम् । हनुमता गन्धमादनानयनम् । कपीनामुज्जीवनम् ॥

एकादशः सर्गः पुनरिन्द्रजिता नागास्त्रबन्धनम् । रामप्रयुक्तज्ञानास्त्रेण सर्वेषामुद्बोधनम् । इन्द्रजिता निकुम्भिलायां होमः । विभीषणेन तद्वधार्थं चोदना । तद्वधाय रामेण सविभीषणस्य लक्ष्मणस्य प्रेषणम् । कपिभिर्यज्ञध्वंसः । हनुमता इन्द्रजिन्निरोधः । लक्ष्मणेन सह इन्द्रजित्समागमः । कपिभिः राक्षससंहारः । लक्ष्मणेन इन्द्रजिद्वधः ॥

द्वादशः सर्गः षट्त्रिंशत्सहस्राक्षोहिणीनां युद्धार्थं रावणेन प्रेषणम् । अनन्तरूपैः रामेण लीलया तत्संहारः । अन्ते पुनरेकीभावः ॥

त्रयोदशः सर्गः रावणेन पुष्पकमारुह्य प्रस्थानम् । विरूपाक्षादिभिः परिवर्त्य गमनम् । अङ्गदेन महोदरवधः । महापार्श्ववधश्च । सुग्रीवेण यूपाक्षविरूपाक्षयोर्वधः । लक्ष्मणेन सह रावणस्य सङ्ग्रामः । लक्ष्मणे शक्तिमोचनम् । लक्ष्मणमूर्छा । हनुमता रावणवक्षसि पर्वतपातनम् । रावणेनासृग्वमनम् । रामाज्ञया हनुमता पुनर्गन्धमादनानयनम् ।

ओषधिगन्धेन लक्ष्मणोत्थानम् । तेन सर्वेऽपि कपयो निरुजोऽभवन् । इन्द्रेण रामाय स्वरथप्रेषणम् । रामरावणयोर्युद्धम् । रावणमूर्च्छा ॥

चतुर्दशः सर्गः अगस्त्येन रामाय आदित्यहृदयनिवेदनम् । रामरावणयोः पुनश्चित्रयुद्धम् । रावणपातः । अवशिष्टराक्षसानां पलायनम् । विभीषणविषादः । रावणमहिळानां विलापः । विभीषणेन भ्रातुः संस्कारः । ब्रह्मादिभी रामस्तवनम् । रुद्रेण युद्धायाऽ-ह्वानम् । शुद्धभावेन क्षमाभ्यर्थनम् । विभीषणाभिषेकः । मायासीता-नयनम् । तस्या अग्निप्रवेशः । निजसीताया अग्नेरुत्थानम् । तस्या रामेण समा-गमः ॥

पञ्चदशः सर्गः इन्द्रेण सहाऽगतेन दशरथेन रामाभिनन्दनम् । रामेण पुष्पकमारुह्य कपि-राक्षसैः सहायोध्यागमनम् । भरद्वाजाश्रमं प्राप्य भरताय वार्तां निवेदयितुं हनुमत्प्रेषणम् । मानुषवेषेण हनुमता भरताय रामागमननिवेदनम् । भरतेन रामसमागमः । अयोध्यायां महोत्सवः ॥

षोडशः सर्गः वसिष्ठादिभी रामाभिषेचनम् । शत्रुघ्नः श्वेतच्छत्रं दधार । सुग्रीवविभीषणौ चामरे द्वे । रामानुमत्या सीतया कण्ठादुन्मुच्य मुक्तामालाया हनुमदंस आमोचनम् । रामः सर्वेषां मनोदृशां महोत्सवो बभूव ॥

उत्तरकाण्डम्

प्रथमः सर्गः अगस्त्येन रामाभिनन्दनम् । रामस्य दिनकृत्यम् । राजसभायां रामसन्देशः । अतिथिभूतानां भूपानां सत्कारपूर्वकं प्रेषणम् । सुग्रीवादीनां रामेण सन्देशः । हनुमता केवलं निरन्तरभक्तिप्रार्थना । रामेण सपरिरम्भं तद्दानम् । सुग्रीवादीनां स्वस्वराज्यं प्रति प्रेषणम् ॥

द्वितीयः सर्गः भरताय यौवराज्यदानम् । पुष्पकप्रेषणम् । रामराज्यसमृद्धिः । सर्वर्तुवैभवम् । लवकुशजननम् ॥

तृतीयः सर्गः लक्ष्मणस्य राजकार्ये नियोजनम् । शुनो न्यायदानम् । लवणासुरत्रस्तानां मुनीनां रामाय निवेदनम् । लवणासुरहननार्थं शत्रुघ्नप्रेषणम् । मध्ये वाल्मीकेराश्रमे वासः ॥

चतुर्थः सर्गः शत्रुघ्नेन लवणासुरस्य वधः । तत्र मधुरानगरीनिर्माणम् । द्वादशे वत्सरे पुनर्वाल्मीक्याश्रमगमनम् । तत्र रामायणगानश्रवणम् । रामपादसेवनम् । ततो रामाज्ञया पुनर्मधुरागमनम् । द्विजबालकमृतिः । जम्बुकस्य वधः । द्विजबालोज्जीवनम् । अगस्त्याश्रमगमनम् । आगस्त्येन श्वेतदत्तमालाया रामायार्पणम् । श्वेतराजचरितम् । रामेण भ्रातृभिरालोच्याश्वमेधकरणनिर्धारः । अश्वभ्रमणम् । अभूतपूर्वोऽश्वमेधः ॥

पञ्चमः सर्गः अग्निष्टोमादिकरणम् । कौसल्यादिनिर्याणम् । युधाजितप्रार्थनया त्रिकोटिसङ्ख्यानां गन्धर्वाणां निरासार्थं गान्धारदेशं प्रति भरतस्य प्रेषणम् । भरतेन सप्तरात्रं गन्धर्वैः सह युद्धम् । तेषां हननम् । पुष्करावते भरतपुत्रस्य पुष्करस्यस्थापनम् । तक्षशिलायां तक्षस्य । लक्ष्मणपुत्रयोः रामेण मल्लभूम्यां कारापथे च स्थापनम् ॥

षष्ठः सर्गः अवतारसमाप्तिं प्रार्थयितुं विरिञ्चेन शिवप्रेषणम् । एकान्ते तयोः सम्भाषणम् । तदैव दुर्वासस आगमनम् । अस्मिन्नेव क्षणे रामो द्रष्टव्य इति तेनानुरोधः । तत्क्षणसिद्धान्नदानाय तेन रामनिकटे निवेदनम् । रामेण तदिच्छापूरणम् । लक्ष्मणपरित्यागः । मोक्षेच्छूनां समागमः । लवकुशयोः स्वराज्ये स्थापनम् । शत्रुघ्नेनापि पुत्रयोः मधुरायां वैदिशे च विभज्य राज्यदानम् ॥

सप्तमः सर्गः श्रीरामेण हनुमते साश्लेषं महाननुग्रहः । हनुमता सप्रणामं निरन्तरभक्तिप्रार्थना । रामस्य प्रभाते नगराद् बहिर्गमनम् । पौरजानपदादीनां तदनुगमनम् । केशादिपादान्तं रामसुषमाया वर्णनम् । रामप्रस्थाने सर्वदृश्या चामरहस्ता द्विरूपा सीता । श्वेतच्छत्रधारी हनुमान् । चक्रं दधद् भरतः । शङ्खं शत्रुघ्नः । पुरतः सर्वे देवा वेदाश्च । पृष्ठतश्च चराचरं जीवजातम् । सर्वैः सरयूस्नानम् । ब्रह्मस्तुतिः । रामेण सहाऽगतानामनन्तलोकाप्तिः । तदानीमवतीर्णानां मूलरूपप्राप्तिः । श्रीरामस्य मूलरूपेणैकीभावः ॥

अष्टमः सर्गः हनुमतः किम्पुरुषखण्डे वासः । हनुमता भगवद्रूपाणां गुणगानम् । अधुनाऽपि तत्र तेन रामायणभारतपञ्चरात्रादिप्रवचनम् । गन्धर्वैः पवमानसूनुगानम् । तस्मिन् भगवदनुग्रहातिशयः ॥

—०—


रामोऽपि नान्यदनुदातुममुष्य योग्य-

मत्यन्तभक्तिपरमस्य विलक्ष्य किञ्चित् ।

स्वात्मप्रदानमधिकं पवनात्मजस्य

कुर्वन् समाश्लिषदमुं परमाभितुष्टः ॥

सुन्दरकाण्डम् : ५



प्रथमः सर्ग्गः

प्रणम्य सम्यक् पुरुषं पुराणमवर्द्धतोच्चैर्हनुमान् महाद्रौ ।
लङ्कां दिधक्षन्निव धूमकेतुर्द्धूमोपमां तत्र ययौ घनौघः ॥ १ ॥

(भा.दी.) श्रीरामदासाग्रगण्यस्य हनुमतोऽम्भोधिलङ्घनसमये प्रकटितं स्वरूपादिकं वर्णयति– **प्रणम्ये**त्या-दिना । हनुमान्, पुरा आदिकाले अणति चेष्टत इति वा, पुराणि शरीराणि अणति गच्छतीति वा पुराणः, तं पुरुषं पूर्णषड्गुणं श्रीरामरूपिणं विष्णुं सम्यक् प्रणम्य, लङ्कां दिधक्षन् दग्धुमिच्छावान्, धूमः केतुश्चिह्नं यस्य स तथा, वह्निरिवेत्यर्थः, महान् योऽद्रिस्तस्मिन् महेन्द्रपर्वत इत्यर्थः, उच्चैः सम्यक् अवर्धत । तत्र हनुमदाख्येऽग्नौ घनौघः मेघसमूहः धूमोपमां ययौ । महेन्द्रे हनुमति जाज्वल्यमानतयाऽतिस्थूलरूपेण स्थितवति तदुपरितनमेघमण्डलं धूमवच्चकाश इत्यर्थः ॥ १ ॥

(सं.चं.) अथ सुन्दरकाण्डकथां सञ्जिघृक्षुः कविः स्वगुरोः प्रथमावतारं भक्त्यतिशयेन समग्रे प्रथमसर्गे इन्द्रोपेन्द्रवज्राभ्यामुपजातिप्रचुरे हनुमतः प्लवनसन्नाहसौन्दर्यं वर्णयति- प्रणम्येत्यादिना । पुराणं पुरुषं राम-रूपम् । महाद्रौ माहेन्द्रे, धूमकेतुर्वह्निरिव । अथच लङ्काविपत्सूचको धूमकेतुरुत्पातइवेति च ध्वनयति । 'अग्न्युत्पातौ धूमकेतू' इति च । अथ चायं माहेन्द्रः पर्वतो वह्निमान् धूमादित्याह- धूमोपमामिति । तत्र हनूमति वह्न्युपमे सति । तत्पृष्ठतश्चलन् घनौघः मेघराशिः ॥ १ ॥

लाङ्गूलमाविद्ध्य सरोमहर्षं विकुच्य[१] कर्ण्णाववलोक्य लङ्काम् ।
गिराववष्टभ्य करावुताङ्घ्री स उत्पतिष्यन् विरराज वीरः ॥ २ ॥

(भा.दी.) **लाङ्गूलमि**ति । वीरः अध्यवसितकार्यान्तगामी सः हनुमान्, लाङ्गूलं पुच्छं तत् रोमहर्षेण रोमाञ्चेन सहितं यथा भवति तथा आविध्य, कपिजात्यनुसारेण आवर्तयित्वा, कर्णौ विकुच्य उत्तब्धौ कृत्वा,

---

१. **'विकुञ्च्य'** इति केचित् पठन्ति । अत्र सम्भाविताস্त्रयो धातवः–**'कुच सङ्कोचने'** इति, **'कुच सम्पर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु'** इति, **'कुञ्च कौटिल्याल्पीभावयोः'** इति । त्रिष्वपि ल्यपि साधारणं रूपम्–**विकुच्येति । कुञ्चेर्विकुञ्च्येत्य**पि । **'विकुञ्च्य कर्णौ हनुमान्'** (१.३८) इति रामायणे ।

केवलमूर्ध्वाग्रौ कृत्वेत्यर्थः, लङ्कामवलोक्य, गिरौ माहेन्द्रे करौ अङ्घ्री उत पादौ च अवष्टभ्य समौ कृत्वा, उत्पतिष्यन् उत्पतनं करिष्यन् सन् विरराज । राजृ दीप्तौ लिट् ॥ २ ॥

(सं.चं.) आविध्य आस्फोट्य । कर्णौ विकुच्य सङ्कुच्य उत्तानौ कृत्वा । गन्तव्यमार्गदूरमापनार्थमवलोक्य लङ्काम् । करावङ्घ्री च चतुरः पादानिव दृढं संस्थाप्य, यथा युयुत्सुर्वृषभः, गिरौ विरराज ॥ २ ॥

प्राणान् समायम्य समर्ज्जुकायो ध्यायन् स योगीव रघुप्रवीरम् ।
व्यचीकसद् व्यक्तमथाऽत्मतेजः फणासहस्रं फणिनामिवेशः ॥ ३ ॥

(भा.दी.) प्राणानिति । अथ सम ऋजुरवक्रः कायो यस्य स तथा । 'समा स्त्री वत्सरे साधुसर्वतुल्येषु वाच्यवत्' इति वैजयन्ती । स हनुमान् प्राणान् समायम्य, शरीरलाघवार्थं सन्नियम्य, रघुप्रवीरं श्रीरामं योगिवद् ध्यायन् सन्, फणानां सहस्रं तत् फणिनां सर्पाणां ईशः शेषइव, आत्मनस्तेजो बलं तत् व्यक्तं यथा भवति तथा व्यचीकसत् प्रकटितमकरोत् । कस गतौ लुङ् ॥ ३ ॥

(सं.चं.) योगीव प्राणान् समायम्य, समर्जुकायः । समं सर्वत्र समानं यथा स्यात् तथा ऋजुकायः । ऋजु-कायशिरोग्रीवः । समर्जुः सर्वऋजुः कायोऽस्येति वा । व्यचीकसत् विकासयामास । कसतेर्णिचि लुङ् । आत्मनस्तेजः पराक्रमः प्रभावो वा । यः शस्त्रोरुत्थानं न सहते । 'अधिक्षेपावमानादेः प्रयुक्तस्य परेण यत् । प्राणात्ययेऽप्यसहनं तत् तेजः समुदाहृतम्' इति भरतः । अहेः फणा हि सदा सङ्कुचिता भवति । यदाक्रुध्यत्यहिः तदा फणां विस्तारयति । फणिनामीशः शेषइव ॥ ३ ॥

स्यान्नः पुनर्दर्शनमित्युदीर्य्य सगद्गदं सन्नगिरः कपीन्द्रान् ।
आह्लादयन् स्माऽह स मेघघोषः[१] सुमेरुसङ्काशतनुर्हनूमान् ॥ ४ ॥

(भा.दी.) स्यादिति । मेघस्य घोष इव घोषो यस्य स तथा, सुमेरोः शोभनमहामेरोः सङ्काशा समाना तनुः शरीरं यस्य स तथा, सः हनुमान्, नः अस्माकं पुनः तव दर्शनं स्यादिति गद्गदेन वियोगक्लेशपारवश्यात् स्खलद्वचनेन सहितं यथा भवति तथा उदीर्य, सन्ना शान्ता गीर्येषां ते तथा(तान्) कपीन्द्रान् आह्लादयन् आनन्दयन् सन् आह स्म अवदत् ॥ ४ ॥

(सं.चं.) सगद्गदमुदीर्य सन्नगिरः उपरतवचनान् । मेघगम्भीरनिस्वनः । सुमेरुर्हेमाद्रिफ । तत्सङ्कारः गात्रेण कान्त्या च । स्वर्णकान्तिर्महागात्र इत्येतत् । 'मार्गमालोकयन् दूरादूर्ध्वप्रणिहितेक्षणः । रुरोध हृदये

१. **'समेघघोषम्' । 'समेघघोषं मेघघोषसमानध्वनिमान् यथा भवति तथा अत्युच्चैरित्यर्थः'** इति वि.भू. । अस्वरसोऽयमर्थः ।

प्राणानाकाशमवलोकयन् । पद्भ्यां दृढमवस्थानं कृत्वा स कपिकुञ्जरः । विकुच्य कर्णौ हनुमानुत्पतिष्यन् महाबलः' (सु.कां.१.३७.८) इति च ॥ ४ ॥

रामस्य भूम्नः शरवत् त्वरेय प्रेक्षेय सीतामधुनैव[1] नो चेत् ।
लङ्कामहं [2]पद्मवदाहरेयं बध्वा दशास्यं पशुवद्धरेयम् ॥ ५ ॥

(भा.दी.) रामस्येति । भूम्नः पूर्णगुणस्य श्रीरामस्य शरवत् त्वरेय लङ्कां गन्तुं वेगवान् भवेयम् । ञि त्वरा सम्भ्रमे लिङ् । अधुनैव सीतां प्रेक्षेय पश्येयम् । ईक्ष दर्शनाङ्कनयोः । नो चेत् सीतां न पश्येयं चेत्, लङ्कां पद्मवत् आहरेयम् आनयेयम् । हृञ् हरणे लिङ् । दशास्यं बद्ध्वा पशुवत् हरेयम् ॥ ५ ॥

(सं.चं.) पद्मवत् रामपादपूजार्थमाहृतं पद्ममिव । आहृत्य च रामाय समर्पयेयम् । अत्र केवलेन्द्रवज्रा ॥ ५ ॥

[3]सिन्धूनथान्धूनिव शोषयेयं गिरीन् गुरून् कन्दुकवत् क्षिपेयम् ।
सुरासुरानप्यजवज्जयेयं तथाऽपि[4] देवीं ध्रुवमानयेयम् ॥ ६ ॥

(भा.दी.) सिन्धूनिति । अथ सिन्धून् समुद्रान् अन्धूनिव क्षुद्रनदीरिव[5] शोषयेयम् शोषणं कुर्याम् । शुष शोषणे लिङ् । गुरून् स्थूलान् गिरीन् कन्दुकवत् क्षिपेयं पातयेयम् । क्षिपु निरसने लिङ् । सुरासुरानपि अजवत् छागानिव जयेयम् । जि जये लिङ् । तथाऽपि एवं कृत्वाऽपि देवीं सीतां आनयेयम् । णीञ् प्रापणे लिङ् । ध्रुवम् ॥ ६ ॥

(सं.चं.) अन्धून् कूपानिव । 'अन्धुरब्धः प्रहिः कूपः' इति च । अजवत् छागानिव । क्षुद्रपशूनिवेत्येतत् । अर्थान्तरं च ध्वनयन्नेवमाह- स्वयमजइव चतुर्मुखइव विष्णुरिवेति च । 'अजः पितामहेऽनादौ छागे विष्णौ हरे रवौ' इति च । तथाऽपि एवमन्यैरसाध्यं साधयित्वाऽपि ॥ ६ ॥

समीरवत् सर्वजगद् वलेयं पश्येयमार्य्यां पुनरानयेयम् ।
सत्यं सखायः पुनरेव सत्यं रामैकदासोऽस्मि हि पावमानिः ॥ ७ ॥

---

१. **'पश्येयमार्यामधुनैव'** २. **'पद्मवदानयेयम्'** ३. **'सिन्धानिहान्धू–'**

४. **तथापीति । अपिशब्दो भिन्नक्रमः । तथा देवीं सीतामपि आनयेयम् । यथाभूतान्वयो वा । नो चेत् आनेतव्येवेति चेत् तथाऽपि आनेतव्यत्वेऽपि समार्थ्यं कृत्वाऽपीति वा'** इति का.श्री । नातिरुचिरं व्याख्यानम् । ५. वि.भू.टीकायामप्येवम् । चिन्त्यमौचित्यम् ।

(भा.दी.) समीरेति । अहं समीरवत् वायुवत् सर्वजगत् वलेयं परिवर्तयेयम् । वल वर्तने लिङ् । आर्यां सतीं सीतां पश्येयं । दृशिर् प्रेक्षणे लिङ् । पुनः दर्शनानन्तरं आनयेयम् । हे सखायः वानराः, इदं वचः सत्यम्, पुनरेव च सत्यम् । एवं धैर्यनिमित्तमाह– **रामे**ति । अहं श्रीरामस्य एको मुख्यो दासः अस्मि । पवमानस्यापत्यं पावमानिः वायुपुत्रश्च अस्मि । अस भुवि लट् । स्वरूपतः सर्वाधिकार्युत्तमत्वात् श्रीरामस्य परमानुग्रहाच्चासाध्यं मम किमपि नास्तीति भावः ॥ ७ ॥

(सं.चं.) वलेयमाच्छादयेयं सञ्चरेयं वा । वल संवरणे सञ्चरणे च । पाणिनीया वलतिमात्मनेभाषं मन्यन्ते । कवय उभयतोभाषम् । केचित्तु परस्मैपदमपि वलतिं पठन्ति । अन्ये तं बलतिमाहुः । केवलं रामदासः, रामस्य मुख्यदासश्च ॥ ७ ॥

इत्थं स गां कामदुघां प्रदाय[१] स्वबन्धुतायै सुखजीवनाय ।
निष्पीड्य माहेन्द्रमिमं पदाभ्यां विनिष्पतन्नम्बरमाललम्बे ॥ ८ ॥

(भा.दी.) इत्थमिति । सः हनुमान् काममभीष्टं दोग्धीति कामदुघा ताम्, कामितार्थप्रदात्रीं (कामधेनुमिवाव) स्थितामित्यर्थः । गां अभयवचनात्मिकां वाचम्, बन्धूनां समूहो बन्धुता, स्वस्य या बन्धुता तस्यै । 'ग्रामजन-बन्धुसहायेभ्यस्तल्' (अ.सू.४.२.४३) इति समूहार्थे तल् । सुखेन जीवनं तस्मै, निश्चिन्ततयाऽवस्थाना-येत्यर्थः, प्रदाय, इमं माहेन्द्रं पदे पादौ ताभ्यां निष्पीड्य, विनिष्पतन् सन् अम्बरं गगनं तत् आललम्बे आश्रितोऽभूत् । लबि शब्दे लिट् ॥ ८ ॥

(सं.चं.) कामदुघां गां कामधेनुमिव कामदुघां गां वाचम् । स्वबन्धुतायै स्वेन सहाऽगतकपिसमूहाय । स्वस्य पुनरागमनं यावत् सुखेन, '**ಹಾಯಾಗಿ**' इति भाषायाम्, प्राणधारणाय सुखजीवनाय हि पीनोध्नी द्रोणदुग्धा धेनुः प्रदीयते । विनिष्पतन् उत्पतन् । लम्बनमम्बरे निराधारा स्थितिः । 'लबि शब्दे अवस्रंसने च' इति पाणिनीयानां धातुपाठः ॥ ८ ॥

तत्पीडितोऽद्रिर्भुवि मङ्क्षु मग्नो महाभराक्रान्त इव प्लवोऽप्सु ।
असुस्रवंस्तत्र च धातुधारा विदारिते देह इवाऽस्रधाराः ॥ ९ ॥

(भा.दी.) तदिति । तत्पीडितः उत्पतनसमये हनुमत्पीडितः अद्रिः माहेन्द्रः, भुवि मङ्क्षु क्षिप्रम्, अप्सु महान् यो भरो भारस्तेन आक्रान्तः प्लव इव नौरिव मग्नः अभवत् । तत्र तादृशे पर्वते धातूनां गैरिकाणां धाराः,

१. **'गां प्रदायेत्यनेन पात्रेभ्यो गोप्रदानं ध्वन्यते'** इति का.श्री. ।

'धातुर्वातादिशब्दादिगैरिकादित्वगादिषु' इति वैजयन्ती । धातुशिलारसा इत्यर्थः । विदारितो विदीर्णस्तस्मिन् देहे अस्राणां रक्तानां धारा इव । 'अस्र आस्रश्च पुल्लिङ्गौ क्लेशे क्ली रुधिरेऽश्रुणि' इति वैजयन्ती । असुस्रवन् । परिस्रुता बभूवुः । स्रु गतौ लुङ् ॥ ९ ॥

(सं.चं.) 'असुस्रवन्' इति स्रवतेः लुङि रूपम् । सुस्रुवुरित्यर्थः । तत्राद्रौ विदारिते धातुधाराः, देहे विदारिते आस्रधारा रुधिरधारा इव । असह्यया वेदनया अश्रुधारा इवेति च ध्वनिः । आस्रवणादास्रमस्रं वा, शोणितं चाश्रु च ॥ ९ ॥

पतत्यमुष्मिन् परिलोड्यमानाच्छैलाच्छिलाजालमधः पपात ।
विद्याधराणां च तपस्विनां च ससुन्दरीकं कुलमुत्पपात ॥ १० ॥

(भा.दी.) पततीति । अमुष्मिन् हनुमति पतति सति, उत्पतति सति, परिलोड्यमानात् सङ्क्षोभ्यमाणात्, शैलो माहेन्द्रगिरिस्तस्मात्, शिलानां जालं समूहस्तत् अधः पपात । पत्‌ल् पतने लिट् । विद्याधराणां तपस्विनां मुनीनां च सुन्दरीभिः स्वभार्याभिः सहितं ससुन्दरीकं कुलं समूहश्च उत्पपात । ऊर्ध्वगमनसामर्थ्यादन्तरिक्षं प्रति गतोऽभूत् ॥ १० ॥

(सं.चं.) पतति ऊर्ध्वं गच्छति सति । पदतळभारक्षुण्णतया परिलोड्यमानात् मथ्यमानादिति यावत् । शिलाजालमधः पपात । पर्वते कृतावासं विद्याधराणां तपस्विनां च कुलमूर्ध्वं पपात । अत्र सुन्दरीशब्दः पत्नीवचनः, सुष्ठु उन्दयति क्लेदयति प्रीत्येति । 'भिद्यतेऽयं गिरिर्भूतैरिति मत्वा तपस्विनः । त्रस्ता विद्याधरास्तस्मादुत्पेतुः स्त्रीगणैः सह' (१–२२) इति च ॥ १० ॥

रामप्रियां रामचरो दिदृक्षुर्न्नन्वेकपातेन ततार सिन्धुम्[१] ।
तं विस्मयं[२] वक्तुमिव त्रिलोक्यां पर्य्यानशे तस्य हि सिंहनादः ॥ ११ ॥

(भा.दी.) रामेति । रामप्रियां श्रीरामस्य भार्यां दिदृक्षुः द्रष्टुकामः रामचरः श्रीरामभृत्यः हनुमान् एको यः पातस्तेन, मध्ये काप्यविश्रान्तप्लवनेनेत्यर्थः, सिन्धुः समुद्रस्तं ततार ननु । तं तादृशं विस्मयं त्रिलोक्यां वक्तुमिव तस्य हनुमतः सिंहनादः पर्यानशे हि व्याप्तोऽभूत् । अशू व्याप्तौ लिट् ॥ ११ ॥

---

१. 'ससार सिन्धुम्' 'ससार ततार । ननु विरुद्धम् 'अघटितघटनारूपत्वादत्याश्चर्यमिति यावत्' ननु च स्वविरोधोक्तौ' इत्यमरः' इति का.श्री. । चिन्त्यमेतत् । 'ननुच' इति समस्तं हि स्वविरोधोक्तिवाचि । नाप्यत्र काचित् स्वविरोधोक्तिः । २. 'तं विक्रमम्'

(सं.चं.) परिचरतीति चरो दासः । रामचरो रामदासः । विस्मयं विस्मयावहमुदन्तम् । पर्यानशे पर्याशिष्ट परितो व्याप । अत्रापि केवलेन्द्रवज्रा ॥ ११ ॥

देवोपदेवर्षिगणा अगण्या वधूयुता विस्मयिनः खमाप्य ।
[१]विकासिभिश्चारुतरप्रसूनैरपूजयंस्तं नयनाम्बुजैश्च ॥ १२ ॥

(भा.दी.) देवेति । अगण्याः गणयितुमशक्याः, वधूभिर्भार्याभिर्युताः युक्ताः, देवाश्च उपदेवा गन्धर्वास्ते च ऋषयश्च तेषां गणाः समूहाः, विस्मय एषामस्तीति विस्मयिनः सन्तः, खं गगनं तत् आप्य, विकासिभिः फुल्लैः, अत्यन्तं चारूणि चारुतराणि तैः प्रसूनैः देवोद्यानपुष्पैः, तं हनुमन्तं पुष्पवर्षणपूर्वकं अपूजयन् । पूज पूजायां लङ् । नयनानि अम्बुजानि तैश्च अपूजयन्, पुष्पवर्षणपूर्वकं सम्यगपश्यन्नित्यर्थः ॥ १२ ॥

(सं.चं.) उपदेवा देवयोनयो गन्धर्वयक्षविद्याधरादयः । दिव्योद्यानकुसुमैः दिदृक्षया विकसितैर्नयनाम्बुजैश्च । नयनान्येवाम्बुजानि तैः ॥ १२ ॥

कुतूहलात्यायतलोचनासु सर्वासु तास्वायतलोचनासु ।
वदत्सु सर्वेष्वपि साधुसाध्वित्युच्चैर्म्मुनीन्द्रा मुदिता अवोचन् ॥ १३ ॥

(भा.दी.) कुतूहलेति । आयते स्वभावत एव विशाले लोचने यासां तासु, सर्वासु तासु गगनतळस्थितासु स्त्रीषु, कुतूहलः हनुमद्दर्शनजन्यकौतुकं तेन अत्यायतलोचनासु सतीषु, सर्वेष्वपि देवादिषु साधुसाधु इति वदत्सु सत्सु, मुनीन्द्राः मुदिताः सन्तः उच्चैः अवोचन् । वच परिभाषणे लुङ् ॥ १३ ॥

(सं.चं.) स्वत एवाऽयतलोचनासु, कुतूहलेन पुनरत्यायतलोचनासु तासु देवोपदेववनितासु । सर्वेषु देवादिगणेषु साधुसाध्विति उच्चैर्वदत्सु । मुदिता मुनीन्द्रा वक्ष्यमाणमवोचन् ॥ १३ ॥

गुणेन सन्धाय गुणार्ण्णवेन रामेण मुक्तो रणकोविदेन[२] ।
स्वपक्षदक्षः सफलो हनूमान् शरोपमोऽरींस्त्वरते निहन्तुम् ॥ १४ ॥

(भा.दी.) वचनप्रकारं दर्शयति– **गुणेनेत्यादिना** । गुणैरर्णवइव तेन, रणे कोविदो निपुणस्तेन, श्रीरामेण कर्त्रा, गुणोऽनुनयस्तेन सन्धाय सम्मान्य, शरपक्षे गुणेन धनुस्तन्तुना सन्धाय सम्बध्य, मुक्तः प्रेषितः स्वस्य

---

१. **'विकासिभिश्चारुतरुप्र–'** २. **'रणपण्डितेन'**

पक्षो बलं तस्मिन् दक्षः समर्थः । 'पक्षः पार्श्वे गरुत्साध्यसहायबलभित्तिषु' इति वैजयन्ती । स्वेन साध्ये कार्ये दक्ष इति वा । शरोऽपि मयूरबर्हादिपक्षबन्धमूलत्वाद् गमनादौ दक्षो भवति । फलेन कार्यनिष्पत्त्या सहितः सफलः । 'लाभनिष्पत्तिभोगेषु बीजे फाले धने फलम्' इति च । शरोऽपि लोहविशेषसहितत्वात् सफलः । हनुमान् शरस्य श्रीरामशरस्य उपमा यस्य स तथा सन्, अरीन् राक्षसान् निहन्तुम्, त्वरते वेगं करोति । ञि त्वरा सम्भ्रमे लट् ॥ १४ ॥

(सं.चं.) धनुर्गुणेन सन्धाय मुक्तः शरइव, 'त्वय्येव हनुमन्नस्ति बलं बुद्धिः पराक्रमः'(कि.कां.४४.७) इत्यादिना गुणेन सन्धाय गुणवत्तया प्रशस्य, गुणानुसन्धानपूर्वकम्, रामेण मुक्तः । 'कर्णान्तिमानीय गुणग्रहीत्रा रामेण मुक्तो रणकोविदेन' इति हि श्रीमध्वविजये । स्वमूलबद्धेन पक्षेण पतत्रेण दक्षो जातवेगः शरः । फलेन आयसेन शस्त्रमुखेन सहितश्च । 'शस्त्रमुखं फलम्' इति वैजयन्ती । स्वपक्षकार्यसाधनदक्षो हनूमान् । कार्यनिष्पत्त्या सफलो भविष्यन् शरोऽपि हनूमानपि । द्व्यर्थकैः पदैरभङ्गश्लेषोऽयम् ॥ १४ ॥

अस्योरुवेगैः [१]परिकृष्यमाणा नानानगाश्चन्दनचम्पकाद्याः ।
कृत्वाऽनुयात्रां[२] सुमनोभिसारैर्नमन्ति भक्ताइव वारिपारे ॥ १५ ॥

(भा.दी.) अस्येति । ऊर्वोर्वेगास्तैः परिकृष्यमाणाः, चन्दनाश्च चम्पकाश्च ते आद्या येषां ते तथोक्ताः नानानगाः नानावृक्षाः, अनुयात्रां कृत्वा, सुमनसां पुष्पाणामभिसाराः वर्षाणि तैः, वारिणः समुद्रजलस्य पारं तीरं तस्मिन् भक्ताइव नमन्ति । णमु प्रह्वत्वे शब्दे च लट् । यथा, अनुयात्रां कृत्वा नमन्ति तद्वदूरुवेगावकर्षणेनाऽगमनं चक्रुरिव, पुष्पपातेन च नमनं चक्रुरिव बभूवुरिति भावः ॥ १५ ॥

(सं.चं.) अस्य उरुभिर्वेगैरूरुवेगैर्वा । परितः सर्वतः कृष्यमाणाः । सुमनसामभिसारा आसाराः धारासम्पाताः । वारिपारे सागरतीरे । पुष्पाञ्जलिं समर्प्य नमन्तीव वारितीरपर्यन्तमनुगन्तव्यम् । ततो नतिपूर्वं महान्तः प्रेषणीया इति सम्प्रदायः ॥ १५ ॥

उपर्य्युपर्य्येनमथो अधोऽधो लसन्ति मेघास्तरसाऽभिकृष्टाः[३] ।
[४]सितासिता रक्तरुचश्च यद्वद्धरिप्रवीराः परिवारभूताः ॥ १६ ॥

---

१. '–वेगैरनुकृष्य–' २. 'कृत्वाऽनुयानम्' ३.'तरसाऽतिकृष्टाः'

४. 'सितासिताः देहे सिताः मुखे कृष्णाः गोलाङ्गूलाः । रक्तरुचः हनुमज्जातीयाः' इति का.श्री. ।

(भा.दी.) उपरीति । तरसा हनुमद्वेगेन अभिकृष्टा अवाकृष्टाः, जलराहित्यात् सिताः धवळास्ते च, जलसंसर्गादसिता नीलास्ते च, सूर्यविकरणसंसर्गविशेषाद् रक्ता रुक् कान्तिर्येषां ते तथोक्ताश्च मेघाः एनं अस्य हनुमतः उपरिउपरि अथो अनन्तरं अधःअधश्च । 'उपर्यध्यधसः सामीप्ये' (अ.सू.८.१.७) इति कर्मप्रवचनीयसञ्ज्ञायां द्वितीया[१] । परिवारभूताः हरिषु कपिषु प्रवीराः श्रेष्ठा अङ्गदाद्याः यद्वत् तद्वल्लसन्ति । लस श्लेषणक्रीडनयोः लट् ॥ १६ ॥

(सं.चं.) सिता असिता रक्तरुचश्च मेघाश्च हरिप्रवीराश्च । इयं केवलोपेन्द्रवज्रा ॥ १६ ॥

निपातवातैः परिलोड्यमानः फेनायमानः सकलोऽपि सिन्धुः ।
आशङ्क्यते रामयशोम्बुधिर्वा पयोम्बुधिर्वेत्यपि हारगौरः ॥ १७ ॥

(भा.दी.) निपातेति । नितरां पात उत्पतनं तस्मात् सञ्जाता ये वाता वायवस्तैः परिलोड्यमानः आलोड्यमानः, अत एव फेनवदाचरतीति फेनायमानः, फेनपरिपूर्णतया वर्तमान इत्यर्थः, अत एव हारगौरः सकलोऽपि सिन्धुः, श्रीरामस्य यद् यशस्तदेवाम्बुधिः स वा, पयोम्बुधिर्वा, केवलसमुद्रो[२] वा इति आशङ्क्यते, द्रष्टृभिरिति शेषः । शकि शङ्कायां लट् । उभयोरप्यमितत्वगौरत्वादिना साम्यादिति भावः ॥ १७ ॥

(सं.चं.) उत्पतनवेगजनितवातैः मथ्यमानः, अत एव फेनायमानः हारगौरः । तेन कल्पनाचतुरैराशङ्क्यते विकल्प्यते किमयं धवळरामयशोऽम्बुधिराहो क्षीराम्बुधिरिति ॥ १७ ॥

द्रोणीकरोत्येष समुद्रमद्धयं वेगानिलेनानिलदेवसूनुः ।
सेतुं विधातुं हरिवाहिनीनां पुरैव कुर्वन्निव लक्ष्मलेखाम्[३] ॥ १८ ॥

(भा.दी.) द्रोणीति । अनिलश्चासौ देवश्च अनिलदेवः वायुदेवः, तस्य सूनुः एषः हनुमान्, वेगजन्यो योऽनिलस्तेन हरीणां कपीनां वाहिन्यः सेनास्तासां गन्तुं यः सेतुस्तं विधातुं लक्ष्मणः चिह्नस्य लेखां रेखां पुरैव पूर्वमेव कुर्वन्निव समुद्रस्य यन्मध्यं तत् द्रोणीकरोति[४] परिमाणीकरोति 'परिमाणे दारुपात्रे द्रोणोऽस्त्री

---

१. 'द्विर्वचनविधायकं सत्रमिदम् । आम्रेडितत्वेन च द्वितीया–**'उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु । द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते'** इति । अयमर्थः–उभसर्वतसोः उभयतः सर्वतः इत्येतयोः द्वितीया कार्या । धिग्योगेऽपि द्वितीया कार्या । उपर्यादिषु उपरि-अधि-अधः इत्येतेषु त्रिषु आम्रेडितान्तेषु सत्स्वेव द्वितीया कार्येति ।

२. **'क्षीरसमुद्रो वा'** इति युक्तः पाठः । ३. **'लक्ष्मरेखाम्'** ४. **'द्रोणीकरोति अम्बुवाहिनीकरोति'** इति का.श्री. ।

वायसे पुमान्' इति वैजयन्ती । उत्तरत्र श्रीरामेण सहागतकपीनां लङ्कां प्रति गन्तुं सेतुं कर्तुमिदानीं परिमाणं करोतीव जगामेति भावः ॥ १८ ॥

(सं.चं.) गमनवेगजनितेनानिलेन उभयपार्श्वयोर्जलसम्बाधेन समुद्रमध्यं किञ्चिदुन्नतजलमालोपेतं भवति । सा जलमाला लङ्काभिमुखं चलन्ती द्रोणीव नौरिव भाति । **'ଡଙ୍ଗା'** इति भाषायम् । सा पुनर्भाविनः सेतोर्लक्ष्मलेखा चिह्नाङ्कनरेखेवाशोभतेति मुनीन्द्रा उत्प्रेक्षन्ते । 'येनासौ याति बलवान् वेगेन कपिकुञ्जरः । तेन मार्गेण सहसा द्रोणीकृत इवार्णवः' (१.७९) इति च ॥ १८ ॥

इन्द्रध्वजाभं स्फुरति द्युसङ्गि लाङ्गूलमस्याखिलमङ्गलाय[१] ।
तद्वैजयन्तीमिव मेघपालिं[२] दोलायमानामवलोकयध्वम्　　॥ १९ ॥

(भा.दी.) **इन्द्रेति** । इन्द्रध्वजवत् उत्सवविशेषे ऊर्ध्वं संस्थाप्यमानदण्डवत् आभा कान्तिर्यस्य तत्तथोक्तम्, अत एव दिवः अन्तरिक्षस्य सङ्गः सोऽस्यास्तीति तथोक्तम्, द्युलोकस्पृगित्यर्थः, अस्य लाङ्गूलं पुच्छं जगतः शुभं तस्मै स्फुरति प्रकाशते । स्फुर स्फुरणे लट् । तद् वैजयन्तीमिव तस्य लाङ्गूललक्षणध्वजस्य वैजयन्तीमिव पताकामिव दोलायमानां अतिचञ्चलतया अवलम्बमानां मेघानां पालिस्तां अवलोकयध्वम् । लोकृ दर्शने लोट् ॥ १९ ॥

(सं.चं.) इन्द्रध्वजाभम् । इयमत्र कथा–असुरान् प्रतियोधयितुमशक्ता अमरा ब्रह्माणं शरणं ययुः । ब्रह्मा तानुवाच–'नारायणं क्षीरोदशायिनं प्रार्थयध्वम् । स वः केतुं प्रदास्यति । केतुं दृष्ट्वा दैत्या गलितपौरुषा नाऽजौ स्थास्यन्ति' इति । देवास्तथा चक्रुः । देवैः संस्तुतो नारायणस्तुतोष । ददौ चैषामसुरवधूमुखम्लानताहेतुं केतुम् । इन्द्रस्तं ध्वजं विष्णुतेजःसमिद्धमुच्छ्रितं चकार । तेनेन्द्रध्वजेनासुरसैन्यं नाशं निनायेन्द्रः । ततस्तमिन्द्रध्वजमिन्द्र उपरिचरवसोर्ददौ । यस्य तनया मत्स्यकन्या व्यासजननी । स राजा तामिन्द्रयष्टिं विधिवत् पूजयामास । तेन महेन प्रीतो मघवा प्राह–'ये नृपा एवमिन्द्रध्वजं विधिवत् पूजयन्ति वसुवद् वसुमन्तस्ते भुवि सिद्धाज्ञा भविष्यन्ति । मुदिताः प्रजाश्च तेषां भसरोगविवर्जिताः प्रभूतान्नाः' इति । ततः परमियं शक्रध्वजपूजा भुवि क्षत्रियैः प्रवृत्ताऽखिललोकमङ्गलाय । तस्य विधानं च विस्तारेणोपवर्णितं बृहत्संहितायां त्रिचत्वारिंशेऽध्याये । तत् तत्रैव द्रष्टव्यम् । तदेवमखिललोकमङ्गलाय स्थापित इन्द्रध्वज

---

१. **'इन्द्रध्वजाभं जगतः शुभाय लाङ्गूलमस्य स्फुरति द्युसङ्गि'** इति वि.ती.सम्मतः पाठः स्यात् ।　　२. **'मेघपङ्क्तिम्'**

एवाभातीति इन्द्रध्वजाभं हनुमतो लाङ्गूलमुच्छ्रितं द्युस्पृक् । 'लाङ्गूलं च समाविद्धं प्लवमानस्य शोभते । अम्बरे वायुपुत्रस्य शक्रध्वजमिवोच्छ्रितम्' (१.६१) इति च । तत्र लगिता वैजयन्ती पताकेव मेघमाला । दोलायमाना पताका सीताप्राप्तिद्योतनी । पताकानाशो हि राज्ञीविनाशसूचकः । तथाहि वराहमिहिरः–'राज्ञीविनाशं पतिता पताका करोति' इति । पश्यत तामेतां पवमानपुच्छसुषमाम् । 'वैजयन्ती पताकायां जयन्त्यां केशवस्रजि' इति च । इयमिन्द्रवज्रा ॥ १९ ॥

हस्तावुदस्तौ लसतोऽस्य दीर्घौ पीनौ सुवृत्तौ पवमानसूनोः ।
अर्द्धोद्गतौ पर्वतपार्श्वयुग्मात् पञ्चास्यवन्ताविव पन्नगेन्द्रौ ॥ २० ॥

(भा.दी.) हस्ताविति । उदस्तौ उत्क्षिप्तौ दीर्घौ आजानुमितौ पीनौ सुवृत्तौ अस्य पवमानसूनोर्हनुमतः हस्तौ, पर्वतस्य ये पार्श्वे तयोर्युग्मं युगळं तस्मात्, अर्धमुद्गतौ निर्गतौ, पञ्च आस्यानि मुखानि, तानि अनयोः सन्तीति तथोक्तौ पन्नगेन्द्राविव सर्पश्रेष्ठाविव लसतः राजेते । लस श्लेषणक्रीडनयोर्लट् ॥ २० ॥

(सं.चं.) उदस्तौ परितः प्रसारितौ । पर्वताद् बहिर्गतौ । पञ्चभिरङ्गुलिभिः पञ्चास्यवन्ताविव । 'तस्याम्बर-गतौ बाहू ददृशाते प्रसारितौ । पर्वताग्राद् विनिष्क्रान्तौ पञ्चास्याविव पन्नगौ' (१.५६) इति च । इयमिन्द्र-वज्रा ॥ २० ॥

शस्त्रं विना शत्रुपुरीमुपैति मत्तो हनूमानिति माऽस्तु शङ्का ।
नन्वेकवज्रो रिपुमेति वज्री दशास्य घोरा नखनामवज्राः ॥ २१ ॥

(भा.दी.) शस्त्रमिति । हनुमान् शस्त्रमायुधं तत् विना शत्रुपुरीं लङ्कां प्रति उपैति । इण गतौ लट् । इति हेतोः मत्तः उन्मत्तः इति शङ्का माऽस्तु मा भवतु । अस भुवि लोट् । वज्रमस्यास्तीति वज्री इन्द्रः, एको वज्रो यस्य स तथा सन्, रिपुं स्वशत्रुं प्रति एति ननु, गच्छति ननु । अस्य हनुमतस्तु घोराः प्रसिद्धवज्रादपि भयङ्करा, नखा इति नाम येषां ते तथा, ते (च ते) वज्राश्च ते दश सन्ति । तस्माद् दशवज्रसदृशनखवतोऽस्याऽ-न्यायुधैः प्रयोजनाभावाद्दशभिरायुधैः रिपुपुरं प्रति गच्छतोऽस्य नाविवेकित्वमिति भावः ॥ २१ ॥

(सं.चं.) माऽस्तु शङ्का । 'शङ्का वितर्कभययोः' इति च । एकेनैव वज्रायुधेन युतो वज्री रिपुमेति योद्धुम् । अस्य पुनर्घोरा नखाख्यवज्रा दश सन्ति । ते नूनं दशास्यस्य घोरा भविष्यन्तीति ध्वनिः । 'वज्रोऽस्त्री हीरकास्त्रयोः' इति च ॥ २१ ॥

सहोदयेतामुदयाद्रिशृङ्गे रवी यदि द्वौ नवधातुताम्रे ।
तर्हीक्षणे ताम्रतरे सुवृत्ते ताम्राननास्यास्य विडम्बयेताम् ॥ २२ ॥

(भा.दी.) सहेति । नवा नूतना ये धातवो मनश्शिलाः, तैः ताम्रे रक्ते, उदयनामको योऽद्रिस्तस्य शृङ्गं तस्मिन्, यदि द्वौ रवी सूर्यौ सह युगपत् उदयेतां उदयं कुरुताम्, अभूतोपमेयम्, तर्हि एवं तर्हि ताम्रं रक्तमाननं यस्य स तथा तस्य अस्य हनुमतः, अतिशयेन ताम्रे ताम्रतरे, अतिरक्ते इत्यर्थः, सुवृत्ते ईक्षणे नयने विडम्बयेतां अनुकुर्याताम् ॥ २२ ॥

(सं.चं.) उदयेताम् । ई गतौ । अयति अयेत् । ताम्राननमुदयाद्रितुल्यम् । तत्र हनुमदीक्षणे रवीइवेत्य-भूतोपमा । विडम्बयेतामनुकुर्याताम् । 'डबि क्षेपे' इति चन्द्रः । विपूर्वोऽयमनुकारे प्रयुज्यते ॥ २२ ॥

अर्द्धोद्गते [१]इन्दुकलेइव द्वे दंष्ट्रे अमुष्य स्फटिकस्फुटाभे ।
सद्भक्तिवध्वा स्थिरयोगभाजां सुखाय दुःखाय वियोगभाजाम् ॥ २३ ॥

(भा.दी.) अर्धेति । अर्धमुद्गते उदिते अर्धोद्गते इन्दुकलेइव विद्यमाने, वदनादर्धनिर्गतत्वात् तथा वर्तमाने इत्यर्थः । स्फटिकवत् स्फुटा अतिविशदा आभा कान्तिर्ययोस्तौ तथोक्ते, अमुष्य हनुमतः द्वे दंष्ट्रे, सती या भक्तिः सैव वधूः स्त्री तया स्थिरो यो योगः सम्बन्धस्तं भजन्तीति तथोक्तास्तेषाम्, श्रीहरिभक्तिमतामित्यर्थः, सुखं सन्तोषस्तस्मै भवतः । सद्भक्तिवध्वा वियोगभाजाम्, हरिभक्तिरहितानामित्यर्थः, दुःखं क्लेशस्तस्मै भवतः । यथोदितश्चन्द्रः स्त्रिया संयुक्तानां कामोद्दीपकत्वेनाऽनन्दकरः, स्त्रीवियुक्तानां क्लेशकरः, तद्वदिमे च सदसतां सुखदुःखकरे इति भावः ॥ २३ ॥

(सं.चं.) सती भगवद्विषया गुरुविषया च भक्तिरेव वधूः । तया स्थिरयोगभाजां सुखाय । यस्य सविधे दयिता तमेव हि सुखयति शशिकला । सद्भक्तिवध्वा वियोगभाजां दुःखाय । हरिभक्तान् रमयति । हरि-द्विषो दुःखयति ॥ २३ ॥

मेरुः सुरेन्द्रेण सुराचलत्वादच्छिन्नपक्षो द्रवतीह नूनम्[२] ।
इति प्रतर्कं तनुते प्रजानां शरीरमस्यातनु हेमधाम ॥ २४ ॥

---

१. **'अर्धोद्गते चन्द्रकले–'**

२. **'–पक्षो डयते ह नूनम्'** इति वि.ती.पाठः स्यात् । अथापि **'इह गगने'** इति व्याख्यानं कथमिति चिन्त्यम् । **'डयते सञ्चरति । हेत्याश्चर्यार्थे'** इति का.श्री ।

(भा.दी.) मेरुरिति। अतनु अतिबहुलम्, हेमवद्धाम तेजो यस्य तत् तथोक्तम्, अस्य हनुमतः शरीरं सुरेन्द्रेण सुराणामचलः पर्वतस्तस्य भावस्तत्वं तस्मात् अच्छिन्नौ पक्षौ यस्य स तथा मेरुः इह गगने नूनमिदानीं डयते पक्षिवत् पतति। डीङ् विहायसा गतौ लट्। इति प्रजा जनास्तासां प्रतर्क ऊहस्तं तनुते करोति ॥२४॥

(सं.चं.) सुराचलत्वात्। मेरौ हि ब्रह्मादीनां सुराणां निलयनम्। इह वियति द्रवति चलति। अतनु अनल्पम्, हेम्नो धामेव धाम प्रभा यस्य। अत एव हेमाद्रिसमता। इति प्रतर्कं शङ्कां जनानां तनुतेऽस्य शरीरम्। 'शुशुभे स महातेजा महाकायो महाकपिः। वायुमार्गे निरालम्बे पक्षवानिव पर्वतः' (१.७८) इति च ॥ २४ ॥

अलङ्करोत्यस्य विशालमूर्त्तेरुरो[१] विशालं वनमालिकेयम्।
आकाशमाकाशसुरापगेव समुद्रसीमेव भुवोऽवकाशम् ॥ २५ ॥

(भा.दी.) अलमिति। विशाला मूर्तिः शरीरं यस्य स तथा तस्य, अस्य हनुमतः विशालं उरः वक्षस्थलं तत्, इयं उरसि वर्तमाना वनमालिका, आकाशं नभस्तत्, आकाशसुरापगेव आकाशगङ्गेव, भुवः अवकाशः प्रदेशस्तं समुद्रसीमेव समुद्रवेलेव अलङ्करोति अलङ्कृतं करोति ॥ २५ ॥

(सं.चं.) आकाशसुरापगा स्वर्गङ्गेव। भूभागं समुद्रवेलेव ॥ २५ ॥

विस्तीर्ण्णभावे दशयोजनाऽस्य च्छायाऽम्बुधौ तत्त्रिगुणायतेयम्[२]।
लब्धा कवीन्द्रैरुपमानभूमिर्हनूमतो न ह्यपरा त्रिलोक्याम् ॥ २६ ॥

(भा.दी.) विस्तीर्णेति। विस्तीर्णस्य भावस्तस्मिन्, विस्तीर्णत्व इत्यर्थः, दश योजनानि यस्याः सा तथा, अम्बुधौ तस्मात् त्रिगुणमायता विस्तीर्णा, त्रिंशद्योजनपरिमितेत्यर्थः, अस्य हनुमतः इयं च्छाया अस्य हनुमतः उपमानस्य सादृश्यस्य भूमिः स्थानं कवीन्द्रैः कविश्रेष्ठैः लब्धा। त्रिलोक्यां अपरा हनुमच्छायातिरिक्ता हनुमदुपमानभूमिः न लब्धा हि ॥ २६ ॥

(सं.चं.) हनूमतश्छाया समुद्रे दृश्यमाना विस्तारे दशयोजना। आयत्यां तत्त्रिगुणा त्रिंशद्योजना। इयमेव तस्य उपमानभूमिरुपमानस्थानम्। तच्छायां विना किमन्यत् तत्सदृशं त्रिलोक्याम्? 'दशयोजनविस्तीर्णा त्रिंशद्योजनमायता। छाया वानरसिंहस्य जवे चारुतराऽभवत्' (१.७६) इति च ॥ २६ ॥

---

१. 'विशालकीर्तेरुरो–' २. 'तत् त्रिगुणायतेऽलम्'

सुराधिराजं पतगाधिराजः सुधां जिहीर्षुर्ज्जितवान् जवेन ।
प्लवङ्गराजो हि पतङ्गराजं सीतां जिहीर्षुर्ज्जितवानवश्यम् ॥ २७ ॥

(भा.दी.) सुरेति । सुधां जिहीर्षुः अपहर्तुकामः पतगाधिराजः पक्षिराजो गरुडः जवो वेगस्तेन सुराधिराजं देवेन्द्रं जितवान् । प्लवङ्गराजः कपीनामधिपतिः हनुमान् सीतां जिहीर्षुः सन् जवेन विहङ्गराजं पक्षिराजं गरुडं च अवश्यं निरुपचारेण जितवान् हि । गरुडादप्यतिजवेन जगामेत्यर्थः ॥ २७ ॥

(सं.चं.) पतगाधिराजो गरुडः सुधाहरणार्थमिन्द्रं जितवान् । अयं प्लवङ्गराजो गरुडमपि जवेन जितवान् सीतामाजिहीर्षुः । अवश्यं निश्चितमेतत् ॥ २७ ॥

को वानरेन्द्रस्य समानतायां वर्त्तेत यस्यानिल एव तुल्यः ।
को वा नरेन्द्रस्य समानतायां रामस्य यो भाति कृपालुतायाम्[१] ॥ २८ ॥

(भा.दी.) क इति । वानरेन्द्रस्य यस्य हनुमतः अनिल एव मुख्यवायुरेव गुणतस्तुल्यः तस्य हनुमतः समानतायां समानत्वे को वा पुरुषो वर्तेत । तत्र निमित्तमाह– क इति । यः हनुमान् नरेन्द्रस्य राजचूडामणेः श्रीरामस्य समानतायां सम्यग् विस्तृतायां कृपालतायां कृपाख्यलतायां विषये को वा चतुर्मुख इव वायुदेव इव इति वा । 'कश्चित्तात्मार्कधीधातृवाताः' इति वैजयन्ती । भाति शोभते । भा दीप्तौ लट् ॥ २८ ॥

(सं.चं.) वानरेन्द्रस्य साम्ये को वर्तेत? न कोऽप्यृतेऽनिलात् । यो नरेन्द्रस्य रामस्य सम्यगाततायां कृपालुतायां विषये को वा कइव ब्रह्मेव वायुरिव च भाति । पादयमकम् । इन्द्रवज्रा च च्छन्दः ॥ २८ ॥

जयति जगति दिव्यश्रीतनूमान्
हनूमानहितमवहितात्मा बाह्यमभ्यन्तरं च ।
वसति[२] वसतिभूते यस्य चित्ते विचित्रे
भुवनभवनपूर्ण्णो रामदेवः सदेति ॥ २९ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे सुन्दरकाण्डे प्रथमः सर्ग्गः ॥

---

१. कृपालतायाम्' इति वि.ती.पाठः । **'यो रामः कृपालुतायां भाति प्रकाशते तस्य नरेन्द्रस्य रामस्य समानतायां को वा, वर्तेतेत्यनुकर्षः, न कोऽपीत्यर्थः'** इति का.श्री. ।
२. **'लसति वसतिभूते'**

(भा.दी.) जयतीति । जगति लोके दिव्या अलौकिका श्रीः कान्तिर्यस्याः सा तथोक्ता तादृशी या तनूः स्वरूपं (सा) अस्यास्तीति तथोक्तः । 'तनुस्तनूः संहननं शरीरम्' इति हलः । अवहित एकाग्र आत्मा मनो यस्य स तथा, वशीकृतमना इत्यर्थः, हनूमान् बाह्यं अहितं शत्रुं रावणादिकं जयति । अभ्यन्तरं आन्तरं च अहितं कामक्रोधादिशत्रुजातं च जयति । भुवनान्येव भवनं गृहं तत्र पूर्णः श्रीरामदेवः वसतिभूते आवासभूते, आत्मनोऽवस्थानहेतुभूत इत्यर्थः, विचित्रे अत्यद्भुते हनुमतः चित्तं मनस्तस्मिन् सदा वसति । श्रीरामदेवः सदा हनुमतः चित्ते वसति । श्रीरामं सदा स्मरत्यसावित्यर्थः । मुदिताः मुनीन्द्राः इति अवोचन्निति पूर्वेणान्वयः ॥ २९ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां सुन्दरकाण्डे प्रथमः सर्गः ॥

—०—

(सं.चं.) अथ मालिन्योपसंहरति मुनीन्द्राणां वचनानि– जयति । दिव्या लोकोत्तरा श्रीः शोभा यस्याः सा तनूः, बाह्यमभ्यन्तरमन्तरालं चाहितमनिष्टं जयति नाशयतीत्येतत् । भुवनमेव यस्य भवनम् । 'ब्रह्माण्डं वरमन्दिरम्' इति ह्याचक्षते । मन्दिरे नैकत्र कोष्ठे वसति । किन्तु पूर्णो व्याप्तः । रामदेवः वसतिभूते स्वावासभूते यस्य विचित्रे चित्ते सदा लसति । इति मुदिता मुनीन्द्रा अवोचन् ॥ २९ ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां सुन्दरकाण्डे प्रथमसर्गविवरणम् ॥

[आदितः श्लोकाः– १९०९+२९=१९३८]

द्वितीयः सर्ग्गः

पवमानसुतं वीक्ष्य प्लवमानं महार्ण्णवः ।
मग्नमात्मनि मैनाकं हिमाद्रेः सूनुमब्रवीत् ॥ १ ॥

(भा.दी.) श्रीरामदासाग्रण्या हनुमता लङ्कां प्रति प्लवने क्रियमाणे मध्येमार्गं किङ्किं वृत्तमित्यत आह– **पवमानेत्या**दिना । महार्णवः प्लवमानं मार्गे गच्छन्तं पवमानसुतं हनुमन्तं वीक्ष्य, आत्मनि स्वस्मिन् मग्नम्, शक्रेण गिरीणां पक्षच्छेदे क्रियमाणे सति वज्रपातभयेन समुद्रे निमज्ज्यावस्थितमित्यर्थः, हिमाद्रेः सूनुं मैनाकं प्रति अब्रवीत् ॥ १ ॥

(सं.चं.) उपरि वियति प्लवमानं लङ्घयमानं हिमाद्रेः सूनुं मैनाकम् ॥ १ ॥

उत्तिष्ठ पर्वतश्रेष्ठ विश्रमार्त्थं हनूमतः ।
रामदेवस्य दूतोऽयं माननीयो हि मादृशैः ॥ २ ॥

(भा.दी.) **उत्तिष्ठे**ति । हे पर्वतश्रेष्ठ मैनाक, हनूमतः विश्रमायेति विश्रमार्थम्, अवस्थित्यर्थमित्यर्थः, उत्तिष्ठ, रामश्चासौ देवश्च तस्य दूतः अयं मादृशैः पुरुषैः माननीयः पूजनीयो हि ॥ २ ॥

(सं.चं.) विश्रमार्थं प्लवनजनितश्रमापनोदमार्थम् । मादृशैः उपकारं स्मरद्भिः । सगरतनयैर्वर्धितो हि सागरः । अयं च तद्वंशजातस्य रामस्य अथ चास्माकं देवस्य आराध्यस्य, दूतः ॥ २ ॥

इति वारिनिधेर्वाक्यादुत्तस्थौ कनकाचलः[1] ।
कलायश्यामले[2] सिन्धावचिरांशुरिवाम्बुदे[3] ॥ ३ ॥

---

१. **‘काञ्चनाचलः’**

२. **‘कलापश्यामले’** इति क्वचित् । **‘कलायः स्यात् कालपूरः’** इति वैजयन्ती । **‘कलायवत् कलायकुसुमवत् श्यामले’** इति वि.भू. टीकायाम् । **‘कला यस्यामले सिन्धौ’** इति का.श्री.पाठः । तथाहि तद्व्याख्यानम्–**‘यस्य मैनाकस्य कलादीप्तिः अम्बुदे मेघे अर्चिरांशुरिव विद्युदिव अमले निर्मले सिन्धौ बभाविति शेषः’** इति । सर्वमेतदकाण्डताण्डवमिव भाति । **‘कलायश्यामले’** इत्येव मूलपाठः स्यात् । तथाहि माघे प्रयोगः– **‘विकसत्कलायकुसुमासितद्युतेः’** (१३.३१) इति।

३. **‘–रिवाम्बरे’**

(भा.दी.) **इती**ति । वारीणि निधीयन्तेऽत्रेति वारिनिधिस्तस्य वाक्यं वचस्तस्मात् कनकमयश्चासावचलश्च सः कलायवत् कलायवृक्षकुसुमवत् श्यामलस्तस्मिन् सिन्धौ, अम्बु ददातीत्यम्बुदस्तस्मिन् अचिरांशुरिव विद्युदिव । 'सौदामिन्यचिरांशुः' इति हलः । उत्तस्थौ ॥ ३ ॥

(सं.चं.) कनकाचलः कनकमयो मैनाकः । 'हिरण्यगर्भो मैनाको निशम्य लवणाम्भसः । उत्पपात जलात् तूर्णं महाद्रुमलतावृतः' (१.१०१) इति च । कलायकुसुमश्यामले । 'कलापश्यामले' इति पाठे । कलापः बर्हिणां प्रचलाकः । तद्वच्छ्यामले । अम्बुदेऽचिरांशुर्विद्युदिव ॥ ३ ॥

अनेकसानुमात्मानं नानावनमनोरमम् ।
अनादृत्योत्पतन्तं तं हनूमन्तं धरोऽब्रवीत् ॥ ४ ॥

(भा.दी.) **अनेके**ति । अनेकानि सानूनि शृङ्गाणि यस्य स तथा तम्, नानाविधानि यानि वनानि तैर्मनोरमं मनोहरम्, आभ्यां च विशेषणाभ्यामवस्थानानुकूलता दर्शिता, आत्मानं स्वात्मानं अनादृत्य उत्पतन्तं तं हनूमन्तं प्रति धरः पर्वतो मैनाकः अब्रवीत् ॥ ४ ॥

(सं.चं.) अवस्थानार्थं सानवः प्रस्थाः समतळभूमिभागाः । क्षुधाशान्त्यै फलभरितानि नानावनानि । एतेन विशेषणद्वयेन मैनाकस्य विश्रमयोग्यत्वमाह । 'सानुरस्त्री वने प्रस्थे' इति ह्यभिदधति । अथाप्यनादृत्योत्पतन्तम् । वनेधरः पर्वतो मैनाकः पुरुषरूपधरः ॥ ४ ॥

वीर विश्रम्यतामत्र भुज्यतां स्वादु मत्फलम्[1] ।
बान्धवा वयमित्युक्तो मारुतिर्गिरिमब्रवीत्[2] ॥ ५ ॥

(भा.दी.) **वीरे**ति । हे वीर, अत्र मयि स्थित्वा विश्रम्यतां आलस्यपरिहारः क्रियताम् । श्रमु तपसि खेदे च लोट् । स्वादु अस्यास्तीति स्वादुमत् फलं भुज्यतम्, भुज पालनाभ्यव्यवहारयोर्लोट् । वयं तव बान्धवाः बन्धुसदृशाः इति मैनाकेन उक्तः मारुतिः हनुमान् वाक्यं वचस्तत् अब्रवीत् । इन्द्रेण पक्षच्छेदकाले मैनाको वायुं शरणं जगाम । स वायुस्तं समुद्रे संस्थाप्य रक्षितवानित्यतः– 'जनिता चैव नेता च शास्त्रविद्याप्रदो गुरुः । अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः' इत्युक्तेर्बान्धवा इत्युक्तम् ॥ ५ ॥

---

१. **'स्वादुमत् फलम्'** इति वि.ती.पाठः ।

२. **'मारुतिर्वाक्यमब्रवीत्' इति वि.ती.पाठः** । **'मारुतिर्गिरमब्रवीत्'** इति कश्चित् । **'मारुतिः गिरिं मैनाकमब्रवीत्'** इति का.श्री । मनोज्ञोऽयं पाठः ।

(सं.चं.) यद्यपि त्वं वीरः । तेन तव श्रमो न स्यात् । अथापि मदातिथ्यस्वीकारार्थमत्र मम सानुषु विश्रम्यताम् । मम वनेषु विद्यमानानि स्वादूनि फलानि भुज्यन्ताम् । समुदायैकवचनम् । स्वादु मधुरं मनोज्ञं च । 'स्वादु मिष्टममनोज्ञयोः' इति मेदिनी । बान्धवा वयम् । अहं वायुना गुप्तः । त्वं वायुतनयः ॥ ५ ॥

विश्रमः श्रमिणां सौम्य न श्रमो मम विद्यते ।
अविश्रमे प्रतिज्ञा मे कृता वानरसन्निधौ ॥ ६ ॥

(भा.दी.) **विश्रम** इति । हे सौम्य मनोहर मैनाक, श्रम एषामस्तीति श्रमिणस्तेषम्, आलस्यवतामित्यर्थः, विश्रमः । मम तु श्रमः खेदः न विद्यते । विद सत्तायां लट् । अथापि मय्यनुरागवशात् कर्तव्य इत्यत आह– **अविश्रम** इति । वानरसन्निधिर्वानराणां समीपं तस्मिन्, मे मया, कर्तरि षष्ठी, अविश्रमः मध्ये कुत्रचिदनवस्थानं तस्मिन् प्रतिज्ञा च कृता ॥ ६ ॥

(सं.चं.) विश्रमार्थमिति प्रथमं पक्षं निराह–विश्रमः श्रमिणामिति । सौमय साधो । 'सौम्यः साधुगुणत्वतः' इति हि स्मरन्ति । विद्वन्निति वा । 'सौम्यो बुधे मनोज्ञे स्यादनुग्र' इति चाभिधानम् । तर्हि आतिथ्यस्वीकारेणानुग्रहार्थं स्थीयताम् । तदपि न शक्यमित्याह–यानमध्ये अविश्रमे प्रतिज्ञा मे कृतेति ॥ ६ ॥

अल्पशेषश्च दिवसस्त्वरेऽहं[१] कार्य्यगौरवात् ।
महीधर महीं मुक्त्वा[२] कस्मान्मग्नोऽम्बुधौ भवान् ॥ ७ ॥

(भा.दी.) अविश्रमे निमित्तान्तरं चाह– **अल्पे**ति । दिवसः अल्पः शेषो यस्य स तथा, सूर्यास्तमयार्थं स्वल्पावशेषवानित्यर्थः । अतः अहं कार्यस्य यद्गौरवं महत्त्वं तस्मात् त्वरे वेगितोऽस्मि । ञि त्वरा सम्भ्रमे लट् । तत्कालोचितं प्रियसम्भाषणलक्षणमनुग्रहं करोति– **महीधरे**ति । हे महीधर मैनाक, भवान् महीं मुक्त्वा कस्मात् कारणात् अम्बुधौ समुद्रे मग्नः? ॥ ७ ॥

(सं.चं.) अजानन्निव पृच्छति प्लवमान एव– महीं मुक्त्वाऽम्बुधौ कस्मान्मग्नः? ॥ ७ ॥

मारुतेरीरितं श्रुत्वा स्यालः[३] शम्भोरभाषत ।
पक्षिणः पर्वताः पूर्वमक्षिण्वन् भुवनत्रयम् ॥ ८ ॥

---

१. **'त्वरेयं कार्य–'** । इयं त्वरा । २. **'महीं त्यक्त्वा'** ३. **'श्रुत्वा शालः'**

(भा.दी.) मारुतेरिति । शम्भोः रुद्रस्य स्यालः भार्यासोदरः मैनाकः, मारुतेः हनुमतः ईरितं वचः, भावे क्तः, श्रुत्वा अभाषत । पूर्वं पक्षौ एषां स्त इति पक्षिणः, पक्षयुक्ता इत्यर्थः, पर्वताः भुवनानां त्रयं तत् अक्षिण्वन्, तत्रतत्र सञ्चरणेन विनाशयामासुः । क्षिणु हिंसायां लङ् ॥ ८ ॥

(सं.चं.) 'स्यालः स्यादनुजः पत्न्याः' इति च । पक्षिणः सपक्षाः । तेन अक्षिण्वन् अंहिसन् । 'पूर्वं कृतयुगे तात पर्वताः पक्षिणोऽभवन् । तेऽपि जग्मुर्दिशः सर्वा गरुडाइव वेगिनः' (१.१२२) इति च ॥ ८ ॥

वज्रेण वज्री चिच्छेद पक्षान् निश्शेषभूभृताम् ।
नीतोऽहं दयया सिन्धौ[१] वायुना वायुनन्दन ॥ ९ ॥

(भा.दी.) वज्रेणेति । वज्रमस्यास्तीति वज्री पुरन्दरः वज्रं वज्राख्यमायुधं तेन निःशेषाः समस्ताः ये भूभृतः पर्वतास्तेषां पक्षान् चिच्छेद । च्छिदिर् द्वैधीभावे लिट् । हे वायुनन्दन, तदा अहं वायुना मुख्यप्राणेन दयया सिन्धौ नीतः प्रापितः । अनेन 'अन्नदाता भयत्राता' इत्युक्तं पितृत्वं मुख्यवायोरुक्तं भवति । अत एव पूर्वं वयं त्वद्बान्धवा इत्युक्तम् ॥ ९ ॥

(सं.चं.) नीतोऽहम् । नीत्वा निक्षिप्य रक्षितः ॥ ९ ॥

सर्वान्तरात्मा तातस्ते पक्षदो मे ततो भवान् ।
पूज्यो मे प्रेषितश्चाहं रामभक्तेन सिन्धुना ॥ १० ॥

(भा.दी.) सर्वेति । यतः सर्वान्तरात्मा सर्वेषामन्तर्यामी ते तातः वायुः मे मह्यं पक्षौ ददातीति पक्षदः ततः भवान् मे मया पूज्यः । अहं रामभक्तेन सिन्धुना समुद्रेण प्रेषितश्चास्मि ॥ १० ॥

(सं.चं.) त्वं मे मम पूज्यः, रामभक्तेन प्रेषितश्चाहम्, इति द्वाभ्यां कारणाभ्यां मयि विश्राम्य गम्यताम् ॥ १० ॥

हिरण्यनाभस्य च गां[२] श्रुत्वा प्राभञ्जनिः प्रभुः ।
परिरभ्य ययौ दोर्भ्यामद्रिं पुरुषरूपिणम् ॥ ११ ॥

१. **'सिन्धुं वायुना'**

२. **'हिरण्यनाभगामेवं श्रुत्वा'** इत्यशुद्धः पाठः । समासान्ते टच्प्रत्यये सति **'हिरण्यनाभगवीम्'** इति रूपं स्यात् । न केनापि व्याख्यात्रा परिगृहीतोऽयं पाठः । **'हिरण्यनाभस्यैवं गाम्'** इति, का.श्री. पाठः स्यात् ।

(भा.दी.) हिरण्येति। प्रभञ्जनस्यापत्यं पुमान् प्राभञ्जनिः प्रभुः हनुमान् हिरण्यनाभस्य मैनाकस्य गां वाचं श्रुत्वा पुरुषस्य रूपमिव रूपमस्यास्तीति तथा तं अद्रिं दोषौ हस्तौ ताभ्यां परिरभ्य ययौ ॥ ११ ॥

(सं.चं.) हिरण्यनाभस्य मैनाकस्य गां वाचम्। 'हिरण्यनाभो मैनाकः' इति यादवप्रकाशः ॥ ११ ॥

स्थाने सत्यप्यविश्रान्तं तं शशंसुः सुरेश्वराः।
पुंसः प्रभावसामग्र्यान्नैरपेक्ष्यं[1] हि लक्षणम् ॥ १२ ॥

(भा.दी.) स्थान इति। सुरेश्वराः इन्द्राद्याः स्थानमवस्थानप्रदेशस्तस्मिन् सत्यपि अविश्रान्तं अनवस्थितं तं हनुमन्तं शशंसुः। शंसु स्तुतौ लिट्। हि यस्मात् पुंसः प्रभावस्य सामर्थ्यस्य सामग्र्यं साकल्यं तस्मात् न विद्यते परापेक्षा यस्य स निरपेक्षस्तस्य भावस्तत्त्वं लक्षणमसाधारणो धर्मः। अत एतादृशं हनुमन्तं शशंसुरिति भावः ॥ १२ ॥

(सं.चं.) स्थाने सत्यपि अवकाशे सत्यपि। स्वाभाविकात् प्रभावसामग्र्यात् कारणात् बाह्यपरिकरसहकारनैरपेक्ष्यं पुंसः पौरुषलक्षणं हि ॥ १२ ॥

इन्द्रो गिरीन्द्रमाचष्ट तोषितस्तेन कर्म्मणा।
अभयं ते मया दत्तं रामशुश्रूषणादिति ॥ १३ ॥

(भा.दी.) इन्द्र इति। तेन मैनाककृतेन कर्मणा हनुमत्प्रत्युद्गमलक्षणकर्मणा तोषितः इन्द्रः, गिरीन्द्रं प्रति, श्रीरामस्य यच्छुश्रूषणं तस्मात्, श्रीरामभृत्यशुश्रूषणस्यापि श्रीरामशुश्रूषणत्वादिति भावः, मया ते तुभ्यं अभयं पक्षच्छेदनिमित्तभयाभावः, दत्तं इति आचष्ट ॥ १३ ॥

(सं.चं.) इन्द्रः 'उवाच वचनं धीमान् परितोषात् सगद्गदम्। सुनाभं पर्वतश्रेष्ठं स्वयमेव शचीपतिः। हिरण्यनाभ शैलेन्द्र परितुष्टोऽस्मि ते भृशम्। अभयं ते प्रयच्छामि गच्छ सौम्य यथासुखम्' (१.१३८-९) इति च ॥ १३ ॥

प्लवमानं तमालोक्य द्विगुणं वेगमागतम्।
न्यगदन् नागजननीं सुरसां सरसाः[2] सुराः ॥ १४ ॥

---

१. **'–सामग्र्यां नैरपेक्ष्यम्'। 'सामग्र्यामिति पाठे सत्यामिति शेषः। समग्रस्य भावः सामग्र्यमिति विग्रहे ब्राह्मणादित्वात् ष्यञ्। सामग्रीत्यत्र तु षित्वात् ङीषि 'हलस्तद्धितस्य' इति यकारलोपः'** इति का.श्री.। २ **'सरसाः सानुरागाः'** इति का.श्री.।

(भा.दी.) प्लवमानमिति । रसेन स्नेहेन सहिताः सरसाः सुराः, द्वौ गुणौ आवृत्ती यस्य स तथा तम्, पूर्वापेक्षयाऽप्यधिकमित्यर्थः, वेगं आगतं सम्प्राप्तं प्लवमानं आकाशमार्गे गच्छन्तं तं हनुमन्तं आलोक्य, नागजननीं नागानां मातरं सुरसां सुरसानामिकां दक्षपुत्रीं प्रति न्यगदन् । गद व्यक्तायां वाचि लङ् ॥१४॥

(सं.चं.) सरसाः हनुमद्वीर्यास्वादनलोलाः ॥ १४ ॥

मारुतेः कुरु विघ्नं त्वं जिज्ञासामोऽस्य तद् बलम् ।
यद्यदिच्छसि तत्तत् ते वक्त्रमेतु वरेण नः ॥ १५ ॥

(भा.दी.) मारुतेरिति । हे सुरसे, त्वम् मारुतेः हनुमतः लङ्कां प्रति गमने यो विघ्नस्तं कुरु । श्रीरामकार्यविघातः किमर्थं कार्य इत्यत आह– **जिज्ञासाम** इति । अस्य हनुमतः तत् प्रसिद्धं बलं जिज्ञासामः ज्ञातुमिच्छामः । तस्यान्तरायचरणे मम क्व बलमित्यत आह–त्वमिति । त्वं यद्यत् वस्तु ग्रस्तुं इच्छसि । तत्तत् वस्तु ते तव वक्त्रं मुखं तत्, नः अस्माकं यो वरस्तेन एतु गच्छतु ॥ १५ ॥

(सं.चं.) जिज्ञासामः । पाणिनिस्तु जानातेः सनि आत्मनेपदं विधत्ते–'ज्ञा-श्रु-स्मृ-दृशां सनः' (अ.सू. १.३.५७) इति । अथापि तत्रतत्र कविश्छान्दसो भवति ॥ १५ ॥

दक्षा दाक्षायणीत्युक्ता भूत्वा सा रूक्षराक्षसी ।
तस्थावास्यं विवृण्वाना मार्ग्गमावृत्य मारुतेः ॥ १६ ॥

(भा.दी.) दक्षेति । इति देवैरुक्ता दक्षा समर्था दक्षस्यापत्यं स्त्री दाक्षायणी, दक्षप्रजेश्वरपुत्रीत्यर्थः, सा सुरसा रूक्षराक्षसी क्रूरराक्षसीस्वरूपिणी भूत्वा आस्यं मुखं तत् विवृण्वाना सती मारुतेर्हनूमतो यो मार्गस्तं आवृत्य तस्थौ ॥ १६ ॥

(सं.चं.) दाक्षायणी दक्षतनया । रूक्षराक्षसीव भूत्वा ॥ १६ ॥

तामवेक्ष्य कराळाक्षीं पिङ्गाक्षेन्द्रोऽभ्यभाषत ।
मारुती रामदूतोऽस्मि[1] मार्ग्गो मे दीयतामिति ॥ १७ ॥

१. 'रामदासोऽस्मि'

(भा.दी.) तामिति । पिङ्गाक्षेन्द्रः वानरेन्द्रः हनुमान्, कराळे भयङ्करे अक्षिणी यस्याः सा तथा ताम्, तां सुरसां अवेक्ष्य, अहं मारुतिः वायुपुत्रः रामदूतः अस्मि, मे मह्यं मार्गः दीयतां इति अभ्यभाषत ॥ १७ ॥

(सं.चं.) पिङ्गे अक्षिणी एषामस्ति । पिङ्गाक्षाणां कपीनामिन्द्रः श्रेष्ठः । 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्' (अ.सू.५.४.११३) इति षच् । ततः षित्त्वात् 'षिद्गौरादिभ्यश्च' (अ.सू.४.१.४१) इति स्त्रियां ङीषि कराळाक्षी ॥ १७ ॥

योे वा को वा भवेदानीं वदनं प्रविशाऽशु मे ।
इत्युक्त्वा साट्टहासां तां कपीन्द्रः कुपितोऽब्रवीत् ॥ १८ ॥

(भा.दी.) य इति । त्वं यो वा को वा यःकश्चन भव । इदानीं मे वदनं मुखं तत् आशु प्रविश । इति उक्त्वा अट्टहासेन महाहासेन सहिता साट्टहासा ताम्, तां प्रति कुपितः क्रुद्धः कपीन्द्रः अब्रवीत् ॥ १८ ॥

(सं.चं.) 'निकुञ्चितशिरोग्रीवमन्दहासो महाहसे' इति यादवप्रकाशः । अहं स्पृशन् हासोऽट्टहासः । अत्र तु गगनव्यापी ॥ १८ ॥

कथं मां ग्रससीत्युक्त्वा विग्रहं जगृहे हरिः[1] ।
आयामेऽप्यथ विस्तारे समानं बहुयोजनम् ॥ १९ ॥

(भा.दी.) कथमिति । हरिः कपिः हनुमान् मां कथं ग्रससि । ग्रसु ग्लसु अदने लट् । इति उक्त्वा आयामो दैर्घ्यं तस्मिन्, अथ विस्तारस्तस्मिन्, समानं बहूनि योजनानि यस्य स तथा तं विग्रहो देहस्तं जग्राह । ग्रह उपादाने लिट् ॥ १९ ॥

(सं.चं.) समानं बहुयोजनम् । 'इत्युक्त्वा सुरसां क्रुद्धो दशयोजनमायतः । दशयोजनविस्तारो हनूमानभवत् तदा' (१.१६०-१) इति च ॥ १९ ॥

व्यादात् सा द्विगुणं वक्त्रं तद्देहपरिमाणतः ।
सोऽङ्गुष्ठमात्रस्तद्वक्त्रं प्रविश्य निरगात् प्रभुः ॥ २० ॥

१. **'हरिर्जग्राह विग्रहम्'** इति वि.ती.पाठः स्यात् ।

(भा.दी.) व्यादादिति । सा नागजननी तस्य हनुमतो यो देहस्तस्य यत्परिमाणं तस्मादिति ततः द्वौ गुणौ यस्य तद्विगुणं तत् वक्त्रं व्यादात् विवृतवती । प्रभुः स हनुमान् अङ्गुष्ठमात्रः अङ्गुष्ठपरिमाणः सन्, परिमाणे मात्रच्, तस्य वक्त्रं तद्वक्त्रं तत् प्रविश्य निरगात् निःसृतोऽभूत् ॥ २० ॥

(सं.चं.) व्यादात् सा द्विगुणम् । 'चकार सुरसाऽप्यास्यं विंशद्योजनमायतम्' (१.१६२) इति च । सोऽङ्गुष्ठमात्रः । 'स सङ्क्षिप्याऽत्मनः कायं जीमूतइव मारुतिः । तस्मिन् मुहूर्ते हनुमान् बभूवाङ्गुष्ठमात्रकः । सोऽभिपद्याथ तद्वक्त्रं निष्पत्य च महाबलः । अन्तरिक्षे स्थितः श्रीमानिदं वचनमब्रवीत्' (१.१६७-८) इत्यादि च । मानुषाङ्गुष्ठः प्रमाणं परिमाणं वाऽस्येत्यङ्गुष्ठमात्रः । तथाहि–प्रमाणे द्वयसज्दघ्नञ्मात्रचः' (अ.सू. ५.२.३७) इत्यत्र वार्तिकम्–'प्रमाणपरिमाणाभ्यां सङ्ख्यायाश्चापि संशये मात्रज् वक्तव्यः' इति । प्रमाण-मित्यूर्ध्वमानमुच्यते । परिमाणमित्यविशेषेण समान्यवचनम् । एतेन रामायणे 'विंशद्योजनमायतम्' इत्यतः परं सम्प्रति पठ्यमानाः–'हनुमांस्तु ततः क्रुद्धस्त्रिंशद्योजनमायतः । चकार सुरसा वक्त्रं चत्वारिंशत् तथो-च्छ्रितम् । बभूव हनुमान् वीरः पञ्चाशद्योजनोच्छ्रितः । चकार सुरसा वक्त्रं षष्टिं योजनमुच्छ्रितम् । तदैव हनुमान् वीरः सप्ततिं योजनोच्छ्रितः । चकार सुरसा वक्त्रमशीतिं योजनोच्छ्रितम् । हनुमाननलप्रख्यो नवतिं योजनोच्छ्रितः । चकार सुरसा वक्त्रं शतयोजनमायतम्' इति चत्वारः श्लोकाः प्रक्षिप्ता इति स्फुटम् ।।२०।।

तस्य प्रभावं सम्भाव्य सरसा[1] सुरसाऽब्रवीत् ।
जीवन्नेवामरवरं तात रक्षितवानसि ॥ २१ ॥

(भा.दी.) तस्येति । सरसा स्नेहसहिता, हनुमति भक्तिमतीत्यर्थः, सुरसा तस्य हनुमतः प्रभावः सामर्थ्यं तं सम्भाव्य, हे तात हनुमन्, त्वं जीवन्नेव अमराणां यो वरस्तम्, यद्यदिच्छसि तत्ते मुखमेत्वित्युक्तवरमित्यर्थः, रक्षितवानसि इति अब्रवीत् ॥ २१ ॥

(सं.चं.) सम्भाव्य मानयित्वा । सुरसा धृतनिजरूपा । सरसा हनूमति प्रीतिमती । वक्त्रं प्रविश्यापि जीवन्नेव निर्गत्य ॥ २१ ॥

सत्यं लङ्कामुपेत्य त्वं जानीया जनकात्मजाम् ।
तामेवंवादिनीं वीरः प्रतिपूज्य[2] प्रपुप्लुवे ॥ २२ ॥

१. **'सरसा भक्तिसहिता'** इति वि.भू. । **'सरसा हनुमत्सामर्थ्यरसज्ञा'** इति का.श्री. । २. **'वीरः परिपूज्य'**

(भा.दी.) सत्यमिति। त्वं च लङ्कामुपेत्य जनकात्मजां जानीयाः अवगच्छ, सत्यं यथार्थम्, वीरः हनुमान् एवंवादिनीं तां सुरसां प्रतिपूज्य प्रपुप्लुवे ॥ २२ ॥

(सं.चं.) तया कृतस्य शुभाशंसनस्य प्रतिक्रियात्वेन तां पूजयित्वा अभिनन्द्य प्रकृष्टवेगः सन् पुप्लुवे ॥२२॥

तमापतन्तमालोक्य सिंहिका सिंहविक्रमम् ।
दैवान्मे भोजनं पूर्ण्णं प्राप्तमित्यन्वचिन्तयत् ॥ २३ ॥

(भा.दी.) तमिति। सिंहिका सिंहिकानाम्नी राक्षसी सिंहवद्विक्रमो यस्य स तथा तम्, आपतन्तं तं हनुमन्तं आलोक्य, दैवं भागधेयं तस्मात्, पूर्णं भोजनं मे प्राप्तं इति अन्वचिन्तयत् ॥ २३ ॥

(सं.चं.) स्वभावानुगुणं चिन्तनमनुचिन्तनम् ॥ २३ ॥

विधेर्वरादवद्ध्या सा लङ्कापालनतत्परा ।
छायाग्रह[१] इति ख्याता छायां जग्राह मारुतेः ॥ २४ ॥

(भा.दी.) विधेरिति। विधेश्चतुर्मुखस्य यो वरस्तस्मात् अवध्या, लङ्कायाः पालनं रक्षणं तस्मिन् तत्परा परायणा, 'तत्परस्तत्परायणः' इति हलायुधः, तात्पर्यवतीत्यर्थः, च्छायां गृह्णातीति च्छायाग्रह इति ख्याता, स्वस्यां यस्य च्छाया पतति तस्यापहरणं कृत्वा भक्षणशीलेति हेतोः (छायाग्रह इति ख्याता, मारुतेः छायां जग्राह) ॥ २४ ॥

(सं.चं.) हन्तुमर्हा न भवतीत्यवध्या। 'हनो वा वध च' इति वार्तिकेन (अ.सू.३.१.९७) हन्तेर्विभाषा वधादेशः, यत्प्रययश्च ॥ २४–५ ॥

[२]लोकघ्नीमवलोक्यायं दानवीं विकृताननाम्[३] ।
अभूदद्रिनिभः साऽपि वक्त्रेणाम्बरमावृणोत् ॥ २५ ॥

(भा.दी.) लोकघ्नीमिति। लोकान् जनान् हन्तीति लोकघ्नी ताम्, विकृतं विरूपमाननं यस्याः सा तथोक्ता ताम्, दानवीं (दनुपुत्रीं सिंहिकाम्, अवलोक्य अयं हनुमानद्रिनिभः अभूत्,) साऽपि सिंहिकाऽपि हनुमतो ग्रहणार्थं वक्त्रं मुखं तेन अम्बरं व्योम तत् आवृणोत्। वृञ् वरणे लङ् ॥ २५ ॥

---

१. **'छायाग्रहः छायायाः स्पर्शनमात्रेण छायवन्तं गृह्णातीति तथोक्ता'** इति का.श्री.।

२. **'लोकघ्नीं लोकहन्त्रीम्। 'अमनुष्यकर्तृके च' (अ.सू.३.२.५३) इति टक्। टित्वात् ङीप्'** इति का.श्री.। ३. **'विवृताननाम्'**

स्वतनुं तनुतां नीत्वा हनुमानाविवेश ताम् ।
हृदयं निर्दयं तस्या बिभेद नखरैः खरैः ॥ २६ ॥

(भा.दी.) स्वेति । हनुमान् स्वस्य तनुः शरीरं तां तनुतां सूक्ष्मतां नीत्वा, सूक्ष्मशरीरो भूत्वेत्यर्थः, तां सिंहिकां आविवेश । निर्गता दया यस्मात् तथोक्तं तस्या हृदयं तत्, खरैः क्रूरैः नखरा नखास्तैः निर्बिभेद । भिदिर् विदारणे लिट् ॥ २६ ॥

(सं.चं.) स्वतनुं तनुतां नीत्वा । 'स तस्या विकृते वक्त्रे वज्रसंहननः कपिः । सङ्क्षिप्य मुहुरात्मानं निपपात महाबलः । आस्ये तस्या निमज्जन्तं ददृशुः सिद्धचारणाः । ग्रस्यमानं यथा चन्द्रं पूर्णं पर्वणि राहुणा । ततस्तस्या नखैस्तीक्ष्णैर्मर्माण्युत्कृत्य वानरः । उत्पपाताथ वेगेन मनःसम्पातविक्रमः' (१.१९४-७) इति च । निर्दयं यथा स्यात् तथा तस्या हृदयमुरो बिभेद । 'हृदयं ह्युरो वक्षः' इति यादवप्रकाशः ॥ २६ ॥

आन्त्रमालिनमुत्क्रान्तं तां निहत्य महाहरिम्[१] ।
नरसिंहमिवासँह्यमस्तुवन् सुरकिन्नराः ॥ २७ ॥

(भा.दी.) आन्त्रेति । तां राक्षसीं निहत्य उत्क्रान्तं निर्गच्छन्तम्, आन्त्रस्य माला अस्यास्तीति तथा तम्, नरसिंहमिव नरसिंहरूपिणं विष्णुमिव असह्यं महाहरिं महाकपिं हनुमन्तं सुरकिन्नरा अस्तुवन् ॥ २७ ॥

(सं.चं.) नरसिंहमिवाऽन्त्रमालिनम् । अत एवासह्यं दुर्दर्शम् । असह्यवीर्यं च । महान्तं हरिं कपिं हनु-मन्तम् । सुरकिन्तराणां महमुत्सवमाहरन्नप्ययं महाहरिः ॥ २७ ॥

हनुमन्[२] भूरिमहिमन् हता सर्वाहिता त्वया[३] ।
खेचराः खे चरिष्यन्ति त्वां गायन्तो भयं विना ॥ २८ ॥

(भा.दी.) हनुमन्निति । भूरिर्महान् महिमा यस्य सः भूरिमहिमा तत्सम्बुद्धिः । हे हनुमन्, सर्वे च ते अहिताश्च, ते सर्वशत्रव इत्यर्थः, त्वया हताः, खे आकाशे चरन्तीति खेचराः गन्धर्वादयः इति त्वां गायन्तः सन्तः भयं

---

१. **'महासुरीम्'** २. **'हनूमन्'**

३. **'हताः सर्वाहितास्त्वया'** इति वि.ती.पाठः । **'भूरिमहिमन् छायाग्रहहननाद्यधिकसामर्थ्योपेत, हे हनूमन्, सर्वाहिता सर्वप्राणिनामहिता शत्रुभूता सिंहिका त्वया हता'** इति का.श्री ।

भीतिस्तद्विना खे आकाशे चरिष्यन्ति पूर्वं सिंहिकाभीत्याऽत्रासश्चरन्तः खेचराः सिंहिकायाः त्वया हतत्वादितः परं आकाशे सुखेन सञ्चरिष्यन्तीति भावः ॥ २८ ॥

(सं.चं.) सर्वेषामहिता सिंहिका त्वया हता ॥ २८ ॥

इति संस्तुवतः सर्वान् दिव्यपुष्पप्रवर्षिणः[१] ।
अपाङ्गेनोपसङ्गम्य प्लवगेन्द्रः प्रपुप्लुवे ॥ २९ ॥

(भा.दी.) **इतीति** । इति संस्तुवतः, दिव्यानि यानि पुष्पाणि तानि प्रवर्षयितुं शीलमेषामस्तीति तथोक्तास्तान्, सर्वान् सुरकिन्नरादीन्, अपाङ्गो नेत्रान्तस्तेन उपसङ्गम्य दयया दृष्ट्वेत्यर्थः, प्लवगेन्द्रः हनुमान् प्रपुल्पुवे । प्लुङ् गतौ लिट् ॥ २९ ॥

(सं.चं.) अपाङ्गेनोपसङ्गम्य तेषु प्रेमार्द्रमपाङ्गपातं विधाय । प्रकृष्टवेगेन पुप्लुवे ॥ २९ ॥

उल्लोलमेघकल्लोलं लोलसत्वगणाकुलम् ।
अम्बरं चाम्बुराशिं च स समं समलङ्घयत् ॥ ३० ॥

(भा.दी.) **उल्लोलेति** । सः हनुमान्, उल्लोला अतिचञ्चला ये मेघास्त एव कल्लोलाइव तरङ्गाइव यस्य तथा तत्, समुद्रपक्षे अतिचञ्चलमेघसदृशतरङ्गवन्तमित्यर्थः । लोलाश्चञ्चला ये सत्वाः पक्ष्यादिप्राणिनस्तेषां यो गणस्तेनाऽकुलं निबिडं तत्, समुद्रपक्षे लोलमत्स्यादिप्राणिसमूहाकुलमित्यर्थः । अम्बरं गगनम्, अम्बुराशिः समुद्रस्तं च समं युगपत् समलङ्घयत् अतिक्रान्तवान् । लघि गतौ लङ् ॥ ३० ॥

(सं.चं.) उल्लोला उत्तुङ्गा मेघा एव कल्लोला यस्य तदम्बरम् । उल्लोलमेघाइव कल्लोला यस्य तमम्बुराशिम् । पक्ष्यादीनि सत्वान्यम्बरे । मत्स्यादीन्यम्बुराशौ । 'सत्वोऽस्त्री जन्तुषु' इति वैजयन्ती । समं युगपत् समलङ्घयत् लङ्घनमिदं भगवत्पूजार्थमिति परस्मैभाषा ॥ ३० ॥

आलम्बशिखरे लम्बे लङ्काप्राकाररूपके ।
निपपात कपिश्रेष्ठः स त्रिकूटोपशोभिते ॥ ३१ ॥

(भा.दी.) **आलम्बेति** । सः कपिश्रेष्ठः आलम्बमानानि अतिदीर्घाणि शिखराणि शृङ्गाणि यस्मिन् स तथा तस्मिन्, लङ्कायाः प्राकाररूपक आवरणरूपकस्तस्मिन्, त्रिकूटेन त्रिकूटनामकपर्वतेन उपशोभिते लम्बे लम्बनामकपर्वते निपपात अवस्थितोऽभूत् । पत्लृ पतने लिट् ॥ ३१ ॥

१. **'दिव्यपुष्पप्रवर्षिणः नन्दनवनसञ्जातपारिजातादिपुष्पवर्षिणः'** इति का.श्री ।

(सं.चं.) त्रिभिः कूटैः शिखरैरुपशोभिते लम्बनाम्नि गिरौ। 'ततः स लम्बस्य गिरेः समृद्धे विचित्रकूटे निपपात कूटे' (१.२११) इति च ॥ ३१ ॥

आपाततोऽभ्यापततो वायुपुत्रस्य[१] निस्वनात् ।
खगा मृगा दश दिशो वित्रस्ता दुद्रुवुर्द्रुतम् ॥ ३२ ॥

(भा.दी.) आपातत इति । आपाततः एकपातात्, वेगादिति वा, अभ्यापततः अभ्यागच्छतः वायुपुत्रस्य हनुमतः निस्वनः शब्दः तस्मात्, खगा मृगाश्च वित्रस्ताः भीताः सन्तः दश दिशः द्रुतं यथा भवति तथा दुद्रुवुः । द्रु गतौ लिट् ॥ ३२ ॥
(सं.चं.) आपाततः आशुपाततः । वित्रस्ताः खगा मृगा दश दिशो दुद्रुवुः ॥ ३२ ॥

पुष्पाणि ववृषुर्वृक्षास्तस्मिन्नापतिते सति ।
विक्रान्तिमति सम्भ्रान्ता बान्धवाइव बान्धवे ॥ ३३ ॥

(भा.दी.) पुष्पाणीति । सम्भ्रान्ताः सञ्चालिताः वृक्षाः, विक्रान्तिर्विक्रमोऽस्यास्तीति तथा तस्मिन् हनुमति आपतिते सति, बान्धवे बन्धुजने बान्धवाइव बन्धुजनाइव पुष्पाणि ववृषुः । वृष सेचने लिट् । तदा वातकम्पितेभ्यो वृक्षेभ्यः पुष्पाणि पेतुरिति भावः ॥ ३३ ॥
(सं.चं.) आपतिते अवतीर्णे सति विक्रान्तिमति हनूमति । बान्धवाः सम्भ्रान्ताः सम्भ्रमोपेताः । 'सम्भ्रमोऽत्यादरे भये' इति च। वृक्षाः सम्भ्रान्ता इव। विक्रान्तिमति विजितारौ बान्धवे समागते सम्भ्रमोपेता बान्धवाइव । बन्धवइव । मित्राणीव वा । 'बान्धवो बन्धुमित्रयोः' इति हैमः ॥ ३३ ॥

बलात्मनो हनुमतो न ग्लानिर्विक्रमेऽप्यभूत् ।
नहि तेजस्विनो वह्नेर्निशीथेऽप्यन्धकारिता ॥ ३४ ॥

(भा.दी.) बलात्मन इति। बलस्याऽत्मनः स्वामिनः, बलाभिमानिन इत्यर्थः, हनुमतः विक्रमः समुद्रातिक्रमणं तस्मिन् सत्यपि ग्लानिः श्रमः न अभूत्। एतदेव दृष्टान्तमुखेनोपपादयति– **नही**ति। तेजस्विनः वह्नेः निशीथो मध्यरात्रस्तस्मिन्नपि अन्धकारोऽस्यास्तीत्यन्धकारी तस्य भावस्तत्ता अन्धकारयुक्ततेत्यर्थः, नहि। यथा वह्नेस्तेजोरूपत्वेनान्धकारप्रतिबद्धता नास्ति तद्वद्बलदेवत्वादेव बलाभावनिमित्तकग्लानिर्नाभूदिति भावः ॥ ३४ ॥

१. 'वातपुत्रस्य'

(सं.चं.) बलात्मनः बलस्वरूपस्य बलदेवतायाः । ग्लानिः खेदः । ग्लै हर्षक्षये । 'हर्षक्षयोऽत्र धात्वपचयः' इति क्षीरस्वामी । अग्लानिमर्थान्तरन्यासेन सर्थयते–नहीति ॥ ३४ ॥

त्रिकूटशृङ्गमारुह्य प्रेक्षमाणो दिशो दश ।
लङ्कामलङ्कारवतीं ददर्शेन्द्रपुरीमिव ॥ ३५ ॥

(भा.दी.) **त्रिकूटेति** । त्रिकूटस्य यच्छृङ्गं तत् आरुह्य दश दिशः प्रेक्षमाणः हनुमान् अलङ्कारोऽस्यास्तीति अलङ्कारवती तां लङ्कामिन्द्रपुरीमिव अमरावतीमिव ददर्श । दृशिर् प्रेक्षणे लिट् ॥ ३५ ॥

(सं.चं.) त्रिकूटाद्रेः शृङ्गमारुह्य ॥ ३५ ॥

गम्भीरपरिखां[१] भीमां बहुप्राकारदुर्ग्गमाम् ।
दृष्ट्वा लङ्कां गिरीन्द्रस्थो नानायन्त्रामचिन्तयत् ॥ ३६ ॥

(भा.दी.) **गम्भीरेति** । गिरीन्द्रस्थः हनुमान् गम्भीरः परिघः[२] परितः खातप्रदेशो यस्यां सा तथा ताम्, यद्वा परिघशब्देन[३] कवाटादीनां दार्ढ्यार्थं पृष्ठतः पूर्वापरीभावेन निक्षिप्यमाणो दारुविशेष उच्यते । 'परिघो[४]ऽर्गळदण्डयोः' इति वैजयन्ती । भीमां भयङ्कराम्, बहवो ये प्राकारा परिधयस्तैर्दुर्गमाम्, नानाविधानि यन्त्राणि यस्यां सा तथा तां लङ्कां दृष्ट्वा अचिन्तयत् ॥ ३६ ॥

(सं.चं.) गम्भीरसमुद्रपरिखाम् । परिखा '**ಕಂದಕ**' इति भाषायाम् । नानाविधानि यन्त्राणि शतघ्न्यादीनि, तत एव सुरक्षिताम् ॥ ३६ ॥

न नूनं वानराणां स्याल्लङ्घनं[५] लवणोदधेः ।
अथापि[६] लङ्घितवतां पुरीयं सुगमा कथम् ॥ ३७ ॥

(भा.दी.) **नेति** । वानरेन्द्राणां अङ्गदादीनां लवणमयो य उदधिस्तस्य लङ्घनं प्लवनमेव न भवेन्नूनम् । तथाऽपि कथञ्चित् लङ्घितवतां वानरेन्द्राणां इयं पुरी कथं सुगमा? अन्तःप्रवेष्टुं शक्त्यभावात् ॥ ३७ ॥

---

१. **'गम्भीरपरिघाम्'** इति वि.ती.पाठ इति भाति । अथापि सन्दिग्धं सम्मुग्धं च व्याख्यानम् । नातीव सङ्गतम् ।

२. **'परिखः'**(?) ३. **'परिखशब्देन'** ४. **'परिखाऽर्गलदण्डयोः'** (?)

५. **'वानरेन्द्राणां लङ्घनम्'** इति वि.ती.पाठः । ६. **'तथाऽपि'** इति च ।

(सं.चं.) कथं सुगमा? न कथमपि । अथ गन्तव्यमेव । तत् कथं केनोपायेन सुगमा स्यात् ॥ ३७ ॥

चिन्तया तान्तिकर्य्या किं नास्ति रामस्य दुष्करम् ।
रामदेवप्रसादेन किं ममाप्यस्ति दुष्करम्[१] ॥ ३८ ॥

(भा.दी.) चिन्तयेति । तान्तिं ग्लानिं करोतीति तान्तिकरी तया चिन्तया किं प्रयोजनम्? श्रीरामस्य दुष्करं कर्तुमशक्यं कार्यं किमपि नास्ति । श्रीरामदेवस्य यः प्रसादस्तेन ममापि दुष्करं कार्यं किमस्ति? न किमप्यस्तीत्यर्थः ॥ ३८ ॥

(सं.चं.) तान्तिकर्या खेदजनन्या । तमु काङ्क्षायां खेदे च ॥ ३८ ॥

अरुणीभवतीदानीं तरणिस्तरुणो यथा ।
अस्तङ्गतेऽस्मिन् यास्यामि मा द्राक्षुर्म्मां हि राक्षसाः ॥ ३९ ॥

(भा.दी.) अरुणीति । तरणिः सूर्यः, तरुणः बालसूर्यः यथा तथा इदानीं अरुणीभवति रक्तीभवति । अस्मिन् सूर्ये अस्तः अस्तगिरिस्तं गते सति यास्यामि लङ्कां पुरीं प्रवेक्ष्यामि । राक्षसाः मां मा द्राक्षुः मा पश्येयुः । 'न माङ्योगे' (अ.सू.६.४.७४) इत्यडभावः ॥ ३९ ॥

(सं.चं.) तरुणः उद्यन् यथा तथा इदानीं अस्तं गच्छन्नपि अरुणीभवति । मा द्राक्षुः मा दर्शन् ॥३९॥

माममी राक्षसा वीक्ष्य शङ्केरन्नीदृशाकृतिम् ।
अणुः पुरीं प्रवेक्ष्यामि ततोऽन्वेष्टुं नृपात्मजाम् ॥ ४० ॥

(भा.दी.) तैर्दृष्टं चेत् किमित्यत आह– **मामि**ति । अमी राक्षसा ईदृशी अतिस्थूला आकृतिर्यस्य स तथा तं मां वीक्ष्य शङ्केरन्, कोऽयमिति शङ्कां कुर्युः । शकि शङ्कायां लिङ् । शङ्किताश्च पूर्वमेव युद्धार्थमागच्छेयुः, ततश्च सीतान्वेषणं न निर्विघ्नं स्यादिति भावः । ततः नृपात्मजां सीतां अन्वेष्टुं अणुः सूक्ष्मरूपः सन् पुरीं प्रवेक्ष्यामि ॥ ४० ॥

(सं.चं.) शत्रुं शङ्केरन् तर्कयेयुः । तेन शङ्केरन् बिभियुरपि । 'शङ्का वितर्कभययोः' इति च । उभयमपि सम्प्रति नापेक्षितम् । अज्ञातेन हि स्पशेन गन्तव्यम् ॥ ४० ॥

---

१. **'ममास्ति च दुष्करम्'**

इति सञ्चिन्त्य शैलाभो बिलाळाभो बभूव सः ।
योगैश्वर्य्यबलेनैव योगीशवरवल्लभः[१] ॥ ४१ ॥

(भा.दी.) इतीति । शैलवदाभा कान्तिर्यस्य स तथोक्तः सः हनुमान् इति सञ्चिन्त्य योगस्य भगवद्ध्यानविशेषस्य यदैश्वर्यं सामर्थ्यं तस्य यद्बलं तेनैव ईशवरस्य वल्लभः प्रियः योगी बिलाळवत् मार्जारवदाभा कान्तिर्यस्य स तथोक्तः बभूव । यथा योगी योगसामर्थ्यात् स्वापेक्षितरूपं गृह्णाति तद्वदयमपि मार्जालपरिमितरूपवान् बभूवेत्यर्थः ॥ ४१ ॥

(सं.चं.) बिलाळो मार्जारः, आखूनां बिलमडतीति । योगलब्धेन अणिमाद्यैश्वर्यबलेन । भगवति चित्त-योगेन लब्धसामर्थ्यबलेन वा । योगीशवरो योगेश्वरो भगवान् तस्य वल्लभः प्रियः । योगी, ईशवरवल्लभ इति वा । योगीशस्य हरेः वरः सर्वाधिको वल्लभ इति वा । 'सूर्ये चास्तं गते रात्रौ देहं सङ्क्षिप्य मारुतिः । पृषदंशक-मात्रः सन् बभूवाद्भुतदर्शनः' (२.४९) इति च ॥ ४१ ॥

मत्तप्रमत्तस्त्रीपुंस्कं पुरं शुद्धिविवर्ज्जितम्[२] ।
[३]आभिचारइव क्रूरः प्रदोषे प्राप्तवान् कपिः ॥ ४२ ॥

(भा.दी.) मत्तेति । कपिः हनुमान्, मत्ताः अनादिमदोपेताः, प्रमत्ताः अपेयपानादिना प्रकृष्टमदयुक्ताः, प्रमादयुक्ता इति वा, तादृशाः स्त्रियः पुमांसश्च यस्मिन् तत्तथोक्तं तत्, शुद्धिविर्वर्ज्जितं पुरं प्रति, प्रदोषः प्रदोषकालस्तस्मिन्, क्रूरः आभिचारइव कृत्येव प्राप्तवान् ॥ ४२ ॥

(सं.चं.) स्त्रियश्च पुमांसश्च स्त्रीपुमांसः । पानमत्ताः प्रमादयुक्ताश्च स्त्रीपुमांसो यत्र । द्विवचनान्तयोरेवाज् विहितः स्त्रीपुंसौ स्त्रीपुंसाभ्यां स्त्रीपुंसयोरिति । आभिचारः कृत्याप्रयोगः । 'हिंसाकर्माभिचारः स्यात्' इति यादवप्रकाशः । अस्तं गते हि सूर्येऽभिचारः प्रयुज्यते ॥ ४२ ॥

अच्छिद्रवप्रवसनां मणिहेमविभूषणाम् ।
स पुरीं[४] स्त्रीमिवाद्राक्षीत् पीनोन्नतगृहस्तनीम् ॥ ४३ ॥

---

१. **'योगेशवरवल्लभः'** इति, **'योगीशेश्वरवल्लभः'** इति च क्वचित् ।

२, **'शुद्धिविवर्जितम्, मद्यसेवनसुरतादिना पावित्र्यरहितम्'** इति का.श्री. ।

३. **'अभिचारइव'**

४. **'स पुरम्'**

(भा.दी.) अच्छिद्रेति । सः अच्छिद्रं अव्यवच्छिन्नं यद्वप्रं प्राकारः, तदेव वसनं यस्याः सा तथा ताम्, मणयश्च हेमानि च तान्येव विभूषणानि यस्याः सा तथा ताम्, रत्नादिभिः परिपूर्णामित्यर्थः, पीना पुष्टा उन्नता ये गृहाः, त एव स्तना यस्याः सा तथा ताम्, तां पुरीं[१] लङ्कापुरीं स्त्रीमिव अद्राक्षीत् ॥ ४३ ॥

(सं.चं.) अच्छिद्रं दृढं वप्रमेव वसनम् । 'तां रत्नवसनोपेताम्' (३.१८) इति सम्प्रति रामायणे पठ्यते । 'वप्रवसनोपेताम्' इत्येव प्राचीनपाठः स्यात् । उन्नतगृहा एव पीनस्तनइव । पीनो मांसलः । स्त्रीमिव । 'वाऽम्शसोः' (अ.सू.६.४.८०) इति द्वितीयायां रूपद्वयम्–'स्त्रीं स्त्रियौ स्त्रीः' इति, 'स्त्रियं स्त्रियौ स्त्रियः' इति ॥ ४३ ॥

इन्दुहासेन [२]सन्दीप्तसौधगण्डेन पाण्डुना ।
आह्वयत् सा हरिं नूनं पाणिकान्त्या पताकया ॥ ४४ ॥

(भा.दी.) इन्द्विति । इन्दुरेव हासस्तेन, पाण्डुना श्वेतेन, सन्दीप्तः सम्यक् प्रकाशितः सौध एव गण्डो गण्डस्थलं तेन युक्ता, सा लङ्कानामकस्त्री पाणिरिव कान्तिर्यस्याः सा तथा तया पताकया हरिं वानरं हनुमन्तं आह्वयत् आह्वयामास[३] नूनम्, श्रीरामभक्तं हनुमन्तमागतं दृष्ट्वा शीघ्रमागच्छेत्येवमाह्वयतीव वर्तत इत्यर्थः ॥ ४४ ॥

(सं.चं.) इन्दुरेव हासः, तेन सन्दीप्तो यः सौधः महाभवनं स एव गण्डो गल्लः, तेन सुधालिप्ततया पाण्डुना उपलक्षितां स्त्रीमिवाद्राक्षीत् इति पूर्वान्वयः । पाणेरिव कान्तिर्यस्याः, पाणिस्थानीयया पताकया नूनमाह्वयदित्युत्प्रेक्षते ॥ ४४ ॥

पत्यौ धनपतौ याते भजन्त्युपपतिं खलम् ।
लज्जितेवाऽवृणोल्लङ्का[४] धूमपट्या निजं वपुः ॥ ४५ ॥

(भा.दी.) पत्याविति । पत्यौ धनपतौ कुबेरे याते सति, रावणभयेन लङ्कां विहायालकापुरीं गते सति, खलं उपपतिं जारं रावणं भजन्ती, लज्जितेव, असतां शिक्षकं हनुमन्तं दृष्ट्वा सञ्जातलज्जेव, धूम एव पटी

१ **'तां पुरम्'** २. **'सन्दीप्ता सौध–'** ३. **'आजुहाव'** इति युक्तम् ।

४. **'धूमव्याजान्निजं वपुः'** । **'धूमव्याजात् धूमधूमबलात् निजं वपुः आवृतवती । अनेन सर्वत्र धूपधूमावरणेन सर्वगृहेष्वपि सम्पत्समृद्धिः सूचिता'** इति का.श्री. ।

तया निजं स्वकीयं वपुः आवृणोदिव आच्छादितवतीव । यथा पूर्वं काचित्पतिव्रता सती पश्चाज्जारं भजन्ती धार्मिकपुरुषदर्शने सञ्जातलज्जा तं द्रष्टुमक्षमा वस्त्रेण मुखमाच्छाद्य तिष्ठति तद्वत्तिष्ठतीति भावः ॥४५–६॥

(सं.चं.) उपपतिं रावणं भजन्ती । अत एव लज्जितेव धूपधूमाख्यया व्यवधावपट्यायवनिकयाऽत्मानमावृणोदिव । कथं लज्जिता? ओलिस्जी व्रीडे । लज्जनं लज्जना । साऽस्याः सञ्जातेति लज्जिता । तारकादित्वादितच् ॥ ४५ ॥

कस्त्वं पुरप्रवेशीति भत्सयन्ती नदन्त्युत[१] ।
ताडयामास तं चण्डी स्त्रीरूपा पुरदेवता ॥ ४६ ॥

(भा.दी.) कस्त्वमिति । पुरं प्रवेष्टुं शीलमस्यास्तीति तथोक्तः त्वं क इति भत्सयन्ती तर्जयन्ती उत नदन्ती सिंहनादं कुर्वती, चण्डी क्रूरा, स्त्रियो रूपं यस्याः सा तथा, पुरदेवता पुराभिमानिनी देवता, तं हनुमन्तं ताडयामास । तड आघात इत्यस्माल्लिट् ॥ ४६ ॥

(सं.चं.) ताडयामास । 'ततः कृत्वा महानादं सा वै लङ्का भयङ्करम् । तळेन वानरश्रेष्ठं ताडयामास वेगिता' (३.३८) इति च ॥ ४६ ॥

अचिकीर्षुः कपिवरः स्त्रीवधं [२]सुजुगुप्सितम् ।
वामो वामकराग्रेण तां मनाक् प्रत्यताडयत् ॥ ४७ ॥

(भा.दी.) अचिकीर्षुरिति । सुजुप्सितं शास्त्रेऽतिनिषिद्धं स्त्रियाः यो वधस्तं अचिकीर्षुः न कर्तुमिच्छुः, वामः मनोहरः कपिवरः हनुमान्, वामः सव्यो यः करस्तस्य यदग्रं तेन, तां स्त्रियं मनाक् किञ्चित् प्रत्यताडयत्, प्रतिताडनं चक्रे । तड आघाते लङ् ॥ ४७ ॥

(सं.चं.) अचिकीर्षुः कर्तुमनिच्छन् । वामः सौम्यः प्रतीपो वा । 'वामस्तु सौम्ये सव्यप्रतीपयोः' इति वैजयन्ती । तत्कृतमहाताडनप्रतीकारतया मनागीषदेवाताडयत् । यावता सा न म्रियेत । 'स्त्री चेति मन्यमानेन नातिक्रोधः स्वयङ्कृतः' (३.४१) इति च ॥ ४७-८ ॥

पीडिता ताडितेनास्य[३] विह्वला प्रह्वतां गता ।
गद्गदाक्षरमूचेऽसावाञ्जनेयं कृताञ्जलिः ॥ ४८ ॥

---

१. 'नदन्त्यपि' २. '–वधं सञ्जुगुप्सितम्' ३. 'ताडिते ताडनेनास्य'

(भा.दी.) पीडितेति । अस्य यत्ताडितं ताडनं तेन पीडिता, विह्वला परवशा, प्रह्वतां विनयेन युतत्वं गता असौ पुरदेवता, कृता अञ्जलिर्यस्याः सा तथा सती, आञ्जनेयं हनुमन्तं प्रति गद्गदानि भयवशात् स्खलन्ति अक्षराणि यथा भवति तथा ऊचे ॥ ४८ ॥

स्वागतं ते महाभाग[१] जाने त्वां ब्रह्मणो गिरा ।
लङ्कासङ्कटकाले त्वां कपिर्जेता बलादिति ॥ ४९ ॥

(भा.दी.) स्वागतमिति । महान् भागो भाग्यं यस्य स तथा तत्सम्बुद्धिः । 'भागो भाग्यांशतुर्यांशाः' इत्यमरः । हनुमन्, ते तुभ्यं स्वागतमस्तु । लङ्कायाः लङ्कापुर्याः यत् सङ्कटमापत् तस्य यः कालः प्राप्ति-कालः तस्मिन्, त्वां कपिः बलं बलात्कारस्तस्मात् जेता जेष्यति इति ब्रह्मणश्चतुर्मुखस्य गिरा त्वां अहं जाने ॥ ४९ ॥

(सं.चं.) महाभाग महाभाग्य । इति ब्रह्मणो गिरा । जेता,जि जये लुट् ॥ ४९ ॥

वीर वीरप्रणयिनीं मृगयस्व मृगीक्षणाम्[२] ।
[३]व्याधैरप्यनुकम्प्यायाः क्षमस्वाऽगः स्त्रिया मम[४] ॥ ५० ॥

(भा.दी.) वीरेति । हे वीर हनुमन्, वीरस्य श्रीरामस्य प्रणयिनीं भार्याम्, मृग्या ईक्षणमिवेक्षणं यस्याः सा तथा तां सीतां मृगयस्व । मृग अन्वेषणे लोट् । व्याधैरपि अनुकम्प्यायाः स्त्रीत्वादनुग्रहीतुमर्हायाः स्त्रिया मम आगः अपराधस्तत् क्षमस्व । क्षमूष् सहने लोट् ॥ ५० ॥

(सं.चं.) वीरस्य रामस्य प्रणयिनीं मृगयस्व अन्वेषय । व्याधैरपि, ये हिंसारमाः तैरपि स्त्रियो न हिंस्यन्ते किन्त्वनुकम्प्यन्ते । व्याळैरिति क्वचित् पठन्ति । तदा शठैः क्रूरैरित्यर्थः । आगोऽपराधं क्षमस्व, स्त्रीत्वा-देव ॥ ५० ॥

तामेवंवादिनीं दीनां मा भीरिति विसृज्य सः ।
अद्वारेण बलोदारः प्रविवेश रिपोः पुरीम् ॥ ५१ ॥

---

१. **'हे महाभाग, शौर्याद्यनेकगुणसम्पादकादृष्टशालिन्'** इति का.श्री. ।
२. **'मृगेक्षणाम्'** इति, **'मृगेक्षणीम्'** इति च क्वचित् ।
३. **'व्याळैरप्यनु–'**
४. **'स्त्रियो मम'** इति पठन्तो भ्रान्ताः ।

(भा.दी.) तामिति । बलेनोदारः ख्यातः । 'उदारो महति ख्याते' इति वैजयन्ती । स एवंवादिनीं वदन्तीं दीनां स्वकृतापराधेन दुःखितां तां पुरदेवतां प्रति, भीः माऽस्तु इति विसृज्य, रिपोः रावणस्य पुरीम्, द्वारं न भवतीत्यद्वारं तेन, द्वारभिन्नमार्गेणेत्यर्थः, प्रविवेश ॥ ५१ ॥

(सं.चं.) भीः मा भूदिति अभयं दत्वा विसृज्य । बलोदारः बलेन महान् महाबलः । 'अद्वारेण महातेजाः प्राकारमवपुप्लुवे' (४.२) इति च । 'अद्वारेण रिपोर्गेहं द्वारेण सुहृदो गृहान्' इति हि भारते ॥ ५१ ॥

द्विषां मूर्ध्नि पदं वामं चक्रे निद्रामुपेयुषाम् ।
पश्चात् करिष्यन् स रणे दीर्घनिद्रामुपेयुषाम्[1] ॥ ५२ ॥

(भा.दी.) द्विषामिति । सः हनुमान् रणं युद्धं तस्मिन् दीर्घनिद्रां मृतिं उपेयुषां प्राप्तानां राक्षसानां मूर्धा तस्मिन् वामं पदं पादस्तत् पश्चात् उत्तरत्र करिष्यन् सन्, इदानीं निद्रां उपेयुषां तेषां मूर्ध्नि वामं पदं चक्रे निदधे । डु कृञ् करणे लिट् ॥ ५२ ॥

(सं.चं.) द्विषां मूर्ध्नि । 'चक्रेऽथ पादं सव्यं च शत्रूणां स तु मूर्धनि' (४.३) इति च । दीर्घनिद्रामुपेयुषां मूर्ध्नि पदं करिष्यन् । 'दीर्घनिद्रा निमीलनम् । पञ्चत्वं मरणं मृत्युः' इति च । छेकानुप्रासः ॥ ५२ ॥

सुन्दरे मन्दराकारे मन्दिरेमन्दिरे हरिः ।
ददर्श राक्षसान् रूक्षान् नानावस्थानवस्थितान् ॥ ५३ ॥

(भा.दी.) सुन्दर इति । हरिः कपिः सुन्दरे, मन्दरस्य मन्दरपर्वतस्य आकार इव आकारो यस्य तत्तथोक्तं तस्मिन्, मन्दिरेमन्दिरे गृहेगृहे, नानाविधा अवस्था येषां ते तथा तान्, अवस्थितान् रूक्षान् क्रूरान् राक्षसान् ददर्श ॥ ५३ ॥

(सं.चं.) मन्दराकारे मन्दरवदभ्रङ्कषे । मन्दिरेमन्दिरे इत्येकं पदम् । वीप्सायामैकपद्यनियमात् । सहप्रयोगनैयत्यं ह्यैकपद्यं नाम ॥ ५३ ॥

मत्तान् प्रमत्तानुन्मत्तान् नानापानरतानपि ।
सुरतोत्सवसंसक्तान्[2] रमणीभिरवैक्षत ॥ ५४ ॥

---

१. **'उपेयुषां युद्धायाऽगच्छतां राक्षसानां रणे दीर्घनिद्रां मरणं पश्चादनन्तरं अक्षयुद्धसमये करिष्यन्, इदानीं लङ्कायां निद्रामुपेयुषां निद्रितानां द्विषां रक्षसां मूर्ध्नि, मूर्धास्त्वित्यर्थः, जात्येकवचनम्, वामं पादं चक्रे'** इति का.श्री । २. **'सुरतोत्सवसंयुक्तान्'** इति वि.ती.पाठः ।

(भा.दी.) मत्तानिति । हनुमान्, मत्तान् गर्वयुक्तान्, प्रमत्तान् प्रमादयुक्तान्, उन्मत्तान् मद्यपानादिना भ्रान्तान्, नानाविधानि पानानि तेषु रतान् आसक्तानपि, रमणीभिः सह सुरतलक्षणो य उत्सवस्तस्मिन् संयुक्तानपि राक्षसान् अवैक्षत ॥ ५४ ॥

(सं.चं.) कथं नानावस्थान्? मत्तानित्यादि । ऐश्वर्यादिना मत्तान्, पुनरपि मद्यादिना प्रमत्तान्, अत एवोन्मत्तान् उद्धृतान् । कथं वर्तितव्यमिति प्रज्ञाविधुरान् । नानाविधमद्यपानरतान्, सुरतोत्सवे संसक्तान् निमग्नान् ॥ ५४ ॥

जुह्वतोऽग्नींश्च[१] जपतो ध्यायतो ब्रह्म[२] राक्षसान् ।
नानायुधधरांश्चान्यानपश्यत् पुररक्षिणः[३] ॥ ५५ ॥

(भा.दी.) जुह्वत इति । अग्नीन् जुह्वतः होमं कुर्वतः, ब्रह्म वेदं जपतः, ब्रह्म परब्रह्म ध्यायतश्च राक्षसान् अपश्यत् । दृशिर् प्रेक्षणे लङ् । नानाविधानि यान्यायुधानि धारयन्तीति तथोक्तास्तान्, पुरं रक्षितुं शीलमेषामस्तीति तथा तान्, अन्यांश्च राक्षसानपश्यत् ॥ ५५ ॥

---

१. **'जुह्वतोऽग्निं च'** २. **'ब्रह्म नारायणाख्यं ध्यायतः'** इति का.श्री. ।

३. पञ्चपञ्चाशश्लोकानन्तरं केचित् षट् श्लोकानधिकान् वृथा पठन्ति–

'वैष्णवं विष्णुगायन्तं सदा सत्यरतं ततः ।
'विभीषणं लोकहिते रतं मङ्गलमैक्षत ॥

'दुरुश्वासं गाढनिद्रमुन्मत्तं पर्वतोपमम् ।
'कुम्भकर्णं समालोक्य शिरो धुन्वन् स मारुतिः ॥

'ततो विग्नां स भगिनीं राक्षसेन्द्रस्य दुष्कृतिम् ।
'विवासिनीं राक्षसानां पलपानाशनैर्युताम् ॥

'नग्नां स्रस्तशिरःकेशां पानादुन्मत्तचेतनाम् ।
'गायन्तीं विस्वरं हास्याद् दुर्भगां श्लक्ष्णेतराम् ॥

'करोभयेन शिरसा धुन्वता प्रभयङ्करीम् ।
'अत्यन्तमिव नृत्यन्तीं सहितां पिशिताशिभिः ॥

'इन्द्रजिन्मुख्यपुत्राणां रावणस्य गृहेगृहे ।
'तत्रतत्र समालोक्य जानकीं किल नैक्षत' ॥

तदिदम्, **'विष्णुगायन्तम्, दुरुश्वासम्, श्लक्ष्णेतराम्' करोभयेन (करौ भयेन)'** इत्याद्यसङ्गतपदबाहुल्यात् स्फुटं प्रक्षिप्तम् । अस्वरसमपेशलं चार्थतः । न व्याख्यातं च प्रतनैः कैरपि ।

(सं.चं.) जुह्वतोऽग्नीन् । मन्त्रान् जपतः । ब्रह्मतत्वं ध्यायतो राक्षसान् । ब्रह्मराक्षसानिति सहप्रयोगेण परिहसतीव । 'शुश्राव जपतां तत्र मन्त्रान् रक्षोगृहेषु वै । स्वाध्यायनिरतांश्चैव यातुधानान् ददर्श सः' (४.१३) इति च । अत्र वृथैव व्याख्यातॄणां कर्मभूमिजिज्ञासा । यो यत्र जातस्तस्य सैव कर्मभूमिः । तत्र कर्मप्रधाना भोगप्रधाना चेति विवेकः । अथच सर्वमविहितमाचरतां रात्रौ यज्ञरतानां का धर्माधर्मशङ्का? अस्थाने धर्मशास्त्रचिन्तकाः शोच्या एव ॥ ५५ ॥

राक्षसीरैक्षतानेका[1] मानिनीः कामिनीरपि ।
विलासिनीर्भोगिनीश्च योगिनीश्च वियोगिनीः[2] ॥ ५६ ॥

(भा.दी.) राक्षसीरिति । सः हनुमान्, अनेकाः, मान अभिमान आसामस्तीति मानिन्यस्ताः, कुलीनत्वादहङ्कारवतीरित्यर्थः, काम आसामस्तीति कामिन्यस्ता अपि, विलास आसामस्तीति विलासिन्यस्ता अपि, भोग आसामस्तीति भोगिन्यस्ता अपि, योग आसामस्तीति योगिन्यस्ता अपि, भर्त्रा योगवतीरिति वा, विगतः योगः आसामस्तीति वियोगिन्यस्ता योगरहिता इत्यर्थः, भर्त्रा वियुक्ता अपि राक्षसीः प्रैक्षत ॥ ५६ ॥

(सं.चं.) इतः परं पठ्यमानम्-'वैष्णवं विष्णुगायन्तम्-' इत्यादिकमशुद्धपदमसङ्गतं च श्लोकषट्कं प्रक्षिप्तमिति स्फुटं चक्षुष्मताम् । पण्डिताचार्यस्यावमाननेयं यदेतेषामव्युत्पन्नचापलानां श्लोकानां ग्रन्थमध्ये निवेशनम् । राक्षसीरैक्षत । कीदृशीः? मानिनीरित्यादि । काश्चित् मानिन्यः स्वसौन्दर्यगर्विताः । काश्चित् कामिन्यः वृषस्यन्त्यः । काश्चिद् विलासिन्यः । शृङ्गारजश्चेष्टाविशेषो विलासः, तद्वत्यः । काश्चित् मद्यमांसादिभोगरताः । काश्चित् भर्त्रा सह योगिन्यः । काश्चिद् वियोगिन्यः विरहदीनाः ॥ ५६ ॥

क्रीडितान् पीडितान् पोतान् मुदितान् रुदितानपि ।
लाळितान् भत्सितान्[3] कांश्चित् मातृभिर्दृष्टवानसौ ॥ ५७ ॥

(भा.दी.) क्रीडितानिति । असौ, मातृभिः स्वमातृभिः, कांश्चित् पोतान् बालान्, क्रीडितान् क्रीडतः, कांश्चित् पीडितान्, कांश्चित् मुदितान्, कांश्चित् रुदितानपि, कांश्चित् लाळितान्, कांश्चित् हसितान् दृष्टवान् ॥ ५७ ॥

---

१. **'राक्षसीः प्रैक्षतानेका–'** इति वि.ती.पाठः ।

२. **'मान आसामस्तीति मानिन्यः, पतिव्रताः स्त्रिय इत्यर्थः । कामिनीः वेश्याः । विलासिनीः नर्तकीः । भोगिनीः सर्पस्त्रियः योगिनीः पतिसंयोगिनीः वियोगिनीः पतिवियगिनीः'** इति का.श्री. ।

३. **'लाळितान् हसितान्'** इति वि.ती.पाठः ।

(सं.चं.) पोतान् शिशूंश्च दृष्टवानसौ । बालिकाश्च बालकांश्च । कांश्चित् मातृभिः क्रीडितान्, मात्रा सह क्रीडतः, कांश्चित् कृतापराधतया मातृभिः पीडितान् ताडितान्, कांश्चिदिष्टलाभेन मुदितान्, कांश्चित् क्षुदादिभी रुदितान् रोरुद्यमानान् । कांश्चित् प्रीत्या मातृभिर्लाळितान् । लाळनमुपच्छन्दनम् । 'ಮುದ್ದಿಸು' इति भाषायाम् । कांश्चित् कुपिताभिर्मातृभिर्भत्सितान् तर्जितान् । भत्सतिमर्वाचीना भर्त्सतिं पठन्ति ॥ ५७ ॥

चतुरङ्गं तु कामं नो युद्धं स्यादिति गर्ज्जितम् ।
चतुरं गन्तुकामं नो निद्रां सैन्यमवैक्षत[१] ॥ ५८ ॥

(भा.दी.) **चतुरङ्ग**मिति । नः अस्माकं कामो यथा भवति तथा कामं युद्धं स्यात् इति गर्जितं गर्जनयुक्तं चतुरं युद्धशौण्डम् । नो गन्तुं कामोऽस्यास्तीति नो गन्तुकामं तत् नो इत्यस्य गन्तुकाममित्यनेनान्वयः, तथाच निद्रां नो गन्तुकाममित्यस्य जागरणपरमित्यर्थः, चत्वारि अङ्गानि यस्य तत्तथोक्तं सैन्यं अवैक्षत ॥ ५८॥

(सं.चं.) चतुरङ्गं सैन्यमवैक्षत । नः कामं युद्धं स्यादिति गर्जनवत् । युद्धचतुरम् । निद्रां नो गन्तुकामम् । रात्रावपि युद्धस्पृहया विगतनिद्रम् । अनिशं लङ्कारक्षणे जागरूकम् । आदियमकम् ॥ ५८ ॥

रामाननाभं हनुमानयं तं खे वीक्ष्य पूर्णेन्दुममानयन्तम् ।
नाथं ह सस्मार समा नयन्तं भक्तान् सुखेनैव स मानयन्तम्[२] ॥ ५९ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्क्षरामायणे
सुन्दरकाण्डे द्वितीयः सर्ग्गः ॥

—०—

(भा.दी.) रामेति । **रामाननाभम् । हनुमान् । अयम् । तम् । खे । वीक्ष्य । पूर्णेन्दुम् । अमान् । अयन्तम् । नाथम् । ह । सस्मार । समाः । नयन्तम् । भक्तान् । सुखेन । एव । सः । मानयन्तम्** । इति पदच्छेदः ।

---

१. **'नोऽस्माकं चतुरं युद्धं कामं यथेच्छं स्यादिति गर्जितं गर्जत् । 'गत्यर्थाकर्मक–'** (अ.सू.३.४.७२) **इत्यादिनाऽकर्मकत्वात् कर्तरि क्तप्रत्ययः । चतुरं युद्धकुशलमिति सैन्यविशेषणं वा । चतुरङ्गं हस्त्यश्वरथपादातोपेतम् । 'हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयम्' इत्यमरः । सैन्यमवैक्षत । निद्रां गन्तुकामं नो अवैक्षत । न दृष्टवान् । युद्धसन्नद्धमेव सर्वसैन्यम्, न निद्रितमिति भावः ।** इति का.श्री. ।

२. का.श्री. रीत्या–**'पूर्णेन्दुम् । अमानयन्तम्'** इति पदपाठः । तथाहि तद्व्याख्यनम्–**'खे आकाशे अमानयन्तम् । अमानेन अपरिमाणेन, इयद्दूरं गमिष्यामीति परिमितिं विना, यन्तम् । अलक्षीकुर्वन्तमिति रामविशेषणं वा । अत एव समाः सुखेन नयन्तमित्युपपद्यते । भक्तान् मानयन्तं बहुमानयन्तम् । सुखेनैव समाः संवत्सरान् नयन्तम् । अनेन रामस्य सीतावियोगदुःखं नास्तीति सूचितम्'** इति ।

मातीति मान् परिमित इत्यर्थः । नमान् अमान् अपरिमित इत्यर्थः । अतिबहळशक्त्यादिमानिति यावत् । सोऽयं हनुमान्, खमाकाशस्तस्मिन् अयन्तं गच्छन्तम्, समाः संवत्सरान् नयन्तं प्रवर्तयन्तम्, श्रीरामस्य आननवत् मुखवदाभा कान्तिर्यस्य स तथोक्तस्तं पूर्णेन्दुं पूर्णचन्द्रमवेक्ष्य, भक्तान् सुखेनैव मानयन्तं सम्भावयन्तं नाथं स्वामिनं तं तादृशं श्रीरामदेवं सस्मार ह स्मृतवान् बभूव । श्रीरामदेववक्त्रचन्द्रबिम्बयोः समानत्वादिन्दुबिम्बं दृष्ट्वा श्रीरामं विशेषतः सस्मारेति भावः ॥ ५९ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां
सुन्दरकाण्डे द्वितीयः सर्गः ॥

(सं.चं.) न माति शक्त्या मितो भवतीति अमान् अमितशक्तिमान् सोऽयं हनुमान् खे वियति अयन्तमुदयन्तम् । नेदमयते रूपम् । तस्याऽत्मनेभाषत्वात् । ई गतावित्यस्येदं रूपम्, अयति अयन्तमिति । तथा हि प्रयुञ्जते– 'उदयति दिननाथः', 'उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम्' इत्यादि । समाः वत्सरान् चैत्रादिफाल्गुनान्तान् नयन्तं नियमयन्तम् । 'पक्षमासाब्दपः शशी' इति हि भगवत्पादवचनम् । रामाननाभं पूर्णेन्दुं वीक्ष्य स्वनाथं रामं सस्मार । सदृशदर्शनं हि सदृशान्तरस्मृतिं जनयति । कीदृशं रामम्? समाः सीताविरहितं वत्सरं नयन्तम् । नित्यबहुवचनत्वात् समा इति । तथा भक्तान् सुखेनैव सुखं वितीर्यैव मानयन्तं च । पादान्त्ययमकम् । इन्द्रवज्रा च्छन्दः ॥ ५९ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां
सुन्दरकाण्डे द्वितीयसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– १९३८+५९=१९९७]

तृतीयः सर्ग्गः

प्रहस्तकुम्भकर्णादिराक्षसानां गृहेगृहे ।
स [1]विमृग्य सरोजाक्षीं रावणान्तःपुरं ययौ ॥ १ ॥

(भा.दी.) श्रीरामाच्छिन्नभक्तेन हनुमता समनन्तरं च किमकारीत्यत आह– **प्रहस्ते**ति । सः प्रहस्तस्य कुम्भकर्णश्च तौ आदी येषां ते तथा ते च ते राक्षसाश्च तेषां गृहे, 'गृहं च भवनम्' इति हलायुधः, सरोजवदक्षिणी यस्यास्तां सीतां विमृग्य अन्विष्य रावणस्य यदन्तःपुरं तत् ययौ ॥ १ ॥

(सं.चं.) प्रहस्तकुम्भकर्णादीति । 'अवप्लुत्य महावेगः प्रहस्तस्य निवेशनम् । ततोऽन्यत् पुप्लुवे वेश्म महापार्श्वस्य वीर्यवान् । अथ मेघप्रतीकाशं कुम्भकर्णनिवेशनम् । विभीषणस्य च तथा पुप्लुवे स महाकपिः' (६.१७-८) इत्यादि ॥ १ ॥

वाहरत्नैर्वधूरत्नै रत्नैर्वासोविभूषणैः ।
आश्चर्य्यरत्नैः सर्वैश्च सम्पूर्ण्णं पुरमैक्षत ॥ २ ॥

(भा.दी.) **वाहे**ति । वाहेषु हयेषु रत्नानि श्रेष्ठानि तैः हयश्रेष्ठैरित्यर्थः । 'वाजिवाहार्वगन्धर्व–' इत्यमरः । वधूषु रत्नानि तैः, रत्नानि माणिक्यादीनि तैः, वासांसि च विभूषणानि च तैः, सर्वैः आश्चर्यरत्नैश्च आश्चर्यभूतवस्तुश्रेष्ठैश्च सम्पूर्णं पुरं अन्तःपुरं तत् ऐक्षत ॥ २ ॥

(सं.चं.) पुरमन्तःपुरमैक्षत ॥ २–३ ॥

यानियानि वरीयांसि वस्तूनि भुवनत्रये ।
तानितान्युपनीतानि रक्षसैक्षत[2] मारुतिः ॥ ३ ॥

---

१. 'स विमृग्य'

२. '–नीतानि तत्र प्रैक्षत'

(भा.दी.) यानीति । भुवनानां यत् त्रयं तस्मिन् यानियानि वस्तूनि वरीयांसि श्रेष्ठानि शङ्खपद्मनिध्यादीनि रक्षसा रावणेन उपनीतानि तानितानि वस्तूनि मारुतिः ऐक्षत ॥ ३ ॥

अन्तःपुरान्तरेऽपश्यत् केवलं रावणालयम् ।
अर्द्धयोजनविस्तारं[१] सार्द्धयोजनमायतम् ॥ ४ ॥

(भा.दी.) अन्तरिति । अन्तःपुरस्य (अन्तरं मध्यं तस्मिन्) अर्धयोजनं विस्तारो यस्य स तथोक्तस्तम्, अर्धेन सहितं सार्धम्, सार्धं च तत् योजनं च सार्धयोजनं आयतं दीर्घं केवलं रावणस्य आलयस्तं अपश्यत् ॥ ४ ॥

(सं.चं.) अन्तःपुरस्यान्तरे मध्ये । साम्प्रतं रामायणे 'अर्धयोजनविस्तीर्णमायतं योजनं महत्' (९.२) इति पठ्यते । 'आयतं सार्धयोजनम्' इति प्राचीनो रामायणपाठः स्यात् ॥ ४ ॥

मणिहेममये तस्मिन् भवने भुवनाद्भुते[२] ।
दीप्तं विमानमाचष्ट स ज्योतिरिव तेजसि ॥ ५ ॥

(भा.दी.) मणीति । सः हनुमान् मणयश्च हेमानि च तेषां विकारो मणिहेममयं तस्मिन्, भुवनाद्भुते, तस्मिन् रावणसम्बन्धिनि मन्दिरे दीप्तं विमानं पुष्पकाख्यं तत् तेजसि ज्योतिरिव, उभयोरपि प्रकाशमानत्वादिति भावः, आचष्ट अपश्यत् ॥ ५ ॥

(सं.चं.) तेजसि निक्षिप्तं ज्योतिरिव ॥ ५ ॥

मणिश्रेणिश्रिया गौरे[३] पुष्पके पुरुषर्षभः ।
अपश्यद् रावणं सुप्तं शशिबिम्बे शशं यथा ॥ ६ ॥

(भा.दी.) मणीति । पुरुषर्षभः पुरुषश्रेष्ठः हनुमान् मणीनां या श्रेणिः पङ्क्तिस्तस्याः श्रिया दीप्ते, पुष्पकं पुष्पकाख्यविमानं तस्मिन्, शशिनश्चन्द्रस्य बिम्बं मण्डलं तस्मिन् लाञ्छनभूतो यः शशस्तं यथा तथास्थितं सुप्तं रावणं अपश्यत् ॥ ६ ॥

(सं.चं.) पुष्पके विमाने । गौरे शशिबिम्बे कृष्णवर्णं शशमिव ॥ ६ ॥

---

१. **'–विस्तीर्णमर्धयोजन–'**

२. **'मन्दिरे भुवनाद्भुते'** इति वि.ती.पाठः स्यात् ।

३. **'–श्रिया दीप्ते पुष्पके'** इति वि.ती.पाठः ।

परिवार्य्य पतिं वीरं शयानं शयनोत्तमे ।
सहस्रं वरनारीणां तत्र प्रैक्षत मारुतिः[१] ॥ ७ ॥

(भा.दी.) परीति । मारुतिः तत्र पुष्पके शयनेषु पर्यङ्केषु उत्तमं तस्मिन् शयानं वीरं पतिं रावणं परिवार्य स्थितं वरनारीणां यत्सहस्रं तत् प्रैक्षत ॥ ७ ॥

(सं.चं.) शयानं पतिं रावणं परिवार्य स्थितम् । पतिं परिवार्य शयानं वा वरनारीणां सहस्रम् ॥ ७ ॥

विहृत्य[२] सुचिरं पीत्वा मदिरां मदिरेक्षणाः ।
कान्ता रतिपरिश्रान्ताः शेरते स्मातिनिद्रया ॥ ८ ॥

(भा.दी.) विहृत्येति । मदिरां मद्यं पीत्वा, सुचिरं विहृत्य, मदिराणि मदिरापानघूर्णितानि ईक्षणानि यासां तास्तथा, रत्या परिश्रान्ताः कान्ताः स्त्रियः अतिनिद्रया शेरते स्म । शयनं कृत्वा सन्ति किल । शीङ् स्वप्ने लट् । 'शीङो रुट्' (अ.सू.७.१.६) इति रुडागमः ॥ ८ ॥

(सं.चं.) मदिरां पीत्वा सुचिरं विहृत्य । मदिरामत्ते ईक्षणे यासाम् । कान्ताः कामिन्यः ॥ ८ ॥

स्त्रीरत्नमालावलये तस्मिन् रुचिररोचिषि ।
महानीलमणिश्यामो रावणो नायकायितः ॥ ९ ॥

(भा.दी.) स्त्रीति । रुचिरं रोचिर्यस्मिन् तथोक्तः तस्मिन्, तस्मिन् परितः स्थिते, स्त्रिय एव रत्नानि तेषां या माला पङ्क्तिः सैव वलयः करभूषणं तस्मिन्, महान् यो नीलमणिः तद्वच्छ्यामः रावणः नायकवत् नायकरत्नवदाचरतीति नायकायितः ॥ ९ ॥

(सं.चं.) स्त्रिय एव रत्नमाला । स्त्रीरत्नान्येव वा माला तस्या वलयः, वलयाकारा रत्नमालेत्यर्थः । तत्र नायकमरतकमणिरिव रावणः । 'नायको नेतरि श्रेष्ठे हारमध्यमणावपि' इति विश्वप्रकाशः ॥ ९ ॥

हन्त सोऽयं खल इति प्रैक्षतैनं[३] स मारुतिः ।
विकस्वराभ्यां नेत्राभ्यामुपसृत्याकुतोभयः ॥ १० ॥

१. **'तत्र सर्वाङ्गसुन्दरम्'** २. **'विमृग्य सुचिरम्'** ३. **'प्रैक्षतैतम्'** इति वि.ती.पाठः ।

(भा.दी.) हन्तेति । सः मारुतिः उपसृत्य समीपं गत्वा, न विद्यते कुतः कस्मादपि भयं यस्य स तथा सन्, सः सीताहर्ता खलः रावणः अयम्, हन्त हर्षे, इति आलोचयन् सन् विकस्वराभ्यां बालसूर्यवच्छोभमानाभ्यां नेत्राभ्यां एतं रावणं प्रैक्षत ॥ १० ॥

(सं.चं.) हन्त सोऽयं सीताचोरः खल इति । उपसृत्य समीपमेत्य । न विद्यते कुतोऽपि भयं यस्य । 'सोऽपासर्पत् सुभीतवत्' (१०.१२) इत्यस्य विवरणमिदम् । सुभीतवदात्मानं दर्शयामास । वस्तुतस्तु अकुतोभय इति ॥ १० ॥

वज्रपाताङ्कितौ तस्य भुजगेन्द्रोपमौ भुजौ ।
रक्तचन्दनसंसिक्तौ पर्य्यङ्के परिसारितौ ॥ ११ ॥

(भा.दी.) वज्रेति । वज्रस्य यः पातस्तेन अङ्कितौ, इन्द्रेण सह युद्धसमये वज्रताडनेनाङ्कितावित्यर्थः, भुजगेन्द्रस्य उपमा ययोस्तौ तथोक्तौ, रक्तं यच्चन्दनं तेन संसिक्तौ, तस्य रावणस्य भुजौ पर्यङ्कः शय्या तस्मिन् परिसारितौ परिस्तृतौ ॥ ११ ॥

(सं.चं.) परिसारितौ परित उभयोः पाश्र्वयोः प्रसारितौ ॥ ११ ॥

देदीप्यमानैराकल्पैस्तद्देहे माषमेचके ।
नीलाम्बुदतटित्प्रख्यैर्दीपदीप्तिरजीयत[१] ॥ १२ ॥

(भा.दी.) देदीप्येति । नीलो योऽम्बुदस्तस्मिन् यास्तटितो विद्युतस्तासां प्रख्याः समानास्तैः, रावणदेहस्य नीलत्वादाभरणानां च सुवर्णमयत्वादिति भावः, (देदीप्यमानैः) आकल्पा आभरणानि तैः, माषवत् मेचकः श्यामळस्तस्मिन्, 'काळश्यामळमेचकाः' इत्यमरः, तद्देहे रावणदेहे दीपदीप्तिः परितोविद्यमानमणिमयदीपानां दीप्तिः कान्तिः अजीयत जिताऽभवत् ॥ १२ ॥

(सं.चं.) 'तिमिरे कृष्णवर्णे तु मेचकम्' इति च । माषमेचकत्वात् नीलाम्बुदप्रख्ये रावणदेहे तटित्प्रख्यै-राकल्पैराभरणैः । दीपदीप्तिरजीयत ततोऽप्यधिकदीप्तिमत्त्वात् ॥ १२ ॥

[२]अतिप्रमाणप्राणस्य घ्राणोत्थाः श्वासवायवः ।
दीपान्न शमयाञ्चक्रुर्व्यक्तं मणिमयत्वतः ॥ १३ ॥

---

१. ' –**दीप्तिरजायत**'

२. '**अतिप्रमाणप्राणस्य अतिदीर्घश्वासवायोः**' इति का.श्री. ।

(भा.दी.) अतीति । प्रमाणं परिमितिमतिक्रान्त इति अतिप्रमाणस्तादृशः प्राणो बलं प्राणवायुर्यस्य स तथा तस्य रावणस्य घ्राणादुत्था उत्पन्ना श्वासवायवः श्वासरूपवायवः दीपान् न शमयाञ्चक्रुः । शम उपशमे लिट् । कुत इत्यत आह– **व्यक्तमि**ति । व्यक्तं स्पष्टं यथा भवति तथा मणिमयत्वतः रत्नमयत्वादेव, न चेदतिशीघ्रं विनश्येयुरिति भावः ॥ १३ ॥

(सं.चं.) मणिमयत्वादिति व्यक्तं स्फुटम् ॥ १३ ॥

विलोक्यैवंविधाकारं सुप्तं तं[1] तदुपान्तिके ।
मण्डोदरीमथापश्यत् कान्तामन्तःपुरेश्वरीम् ॥ १४ ॥

(भा.दी.) विलोक्येति । एवंविधः एतादृश आकारो यस्य स एवंविधाकारस्तं प्रसुप्तं रावणं विलोक्य, अथ तस्य उपान्तिकं समीपं तस्मिन् कान्तां मनोहराम्, अन्तःपुरस्य ईश्वरीम्, रावणभार्यामित्यर्थः, मण्डोदरीं अपश्यत् ॥ १४ ॥

(सं.चं.) उपेति अन्तिकमिति च भिन्ने अपि सामीप्यवचने । उपेति अन्तमिति च । अथापि अतिशयार्थे समस्तं प्रयुञ्जते–उपान्तमिति उपान्तिकमिति च। तेनाव्यवहितं नैकट्यं बोध्यते। मण्डे मण्डनभूतमुदरमस्या इति मण्डोदरी । तनुतरमुदरं हि समग्रं देहं मण्डयति । मन्दोदरीत्यर्वाचीनाः ॥ १४ ॥

किं देवी दानवी किं वा का न्वेषा कामवल्लरी ।
इत्याशङ्क्य न सीतेति तार्किकः समतर्कयत् ॥ १५ ॥

(भा.दी.) किमिति । इयं दृश्यमाना देवी किं देवस्त्री किम्? किं दानवी (वा)? कामवल्लरी काम-लता[2] एषा का नु? इति आशङ्क्य तार्किकः ऊहापोहपटुः हनुमान् सीता न इति समतर्कयत् ऊहितवान् । तर्क ऊहायां लङ् ॥ १५ ॥

(सं.चं.) कान्वेषा काऽपि कमनीयतमा कामवल्लरी कुसुमबाणस्य कामस्य करगता कुसुमिता वल्गु वल्गन्ती लोभनीया लतेव । वल्लरीति क्वचिद् वल्ली कथ्यते । क्वचित् कुसुमगुच्छः । नेयं सीता रावणोपान्तगत्वादिति समतर्कयत् सम्यगेवातर्कयत् । तार्किकः युक्तिज्ञः, ऊहकुशलो वा ॥ १५-६ ॥

---

१. **'–कारं प्रसुप्तं तदुपा–'** इति वि.ती.पाठः ।

२. कोशकारास्तु लतां वल्लीमाहुः । वल्लरीं मञ्जरीम् । अथापि कवयो लतामपि वल्लरीमाहुः । तथाहि कुमारसम्भवे कालिदासः(वसन्तं प्रति रतिवचनम्)–**'विधिना कृतमर्धवैशसं ननु मां कामवधे विमुञ्चता । अनपायिनि संश्रयद्रुमे गजभग्ने पतनाय वल्लरी'** (४.३१) इति।

सहस्रशः सह प्रेष्ठैः पानभूमिमुपेयुषीः ।
दर्शनीयाङ्गीरङ्गनाः[१] स प्लवङ्गमः ॥ १६ ॥

(भा.दी.) सहस्रश इति । प्लवङ्गमः सः हनुमान् प्रेष्ठैः अतिशयेन प्रियैः भर्तृभिः सह पानभूमिं सुरापानस्य भूमिं उपेयुषीः प्राप्ताः, दर्शनीयं अङ्गं यासां तास्तथोक्तास्ताः सहस्रशः अङ्गना ददर्श ॥ १६ ॥

बभौ पानस्थलं रूप्यचषकाणां[२] शतान्वितम् ।
तस्योपमापदं स्याच्चेच्छतचन्द्रं नभस्तळम्[३] ॥ १७ ॥

(भा.दी.) बभाविति । रूप्यमयानि चषकाणि पानपात्राणि तेषां शतान्वितं पानस्थलं बभौ । भा दीप्तौ लिट् । चेद्यदि नभस्तळं शतसङ्ख्याकाश्चन्द्रा यस्मिन् तत्तथोक्तं स्यात् । तर्हि तस्य पानस्थलस्य उपमापदं उपमाया आस्पदं स्यात् ॥ १७ ॥

(सं.चं.) पानपात्रं चषकं चषको वा । 'चषकाणाम्' इति पठनीयम् । सर्वत्र आदर्शेषु '–चषकानाम्' इत्येव पठ्यते । प्रायो लिपिकृतः प्रामाद्यन् । साधुत्ववादिनां पक्षे तु 'क्षुभ्नादिषु च' (अ.सू.८.४.३९) इति पठितः अविहितलक्षणः प्रतिषेधो वा वक्तव्यः । सुषुम्नेति यथा, सङ्क्षिप्नुरिति यथा ॥ १७ ॥

यत्रयत्र विलासिन्यो विलासं विपुलं दधुः ।
हरिः स तत्रतत्रागाद् रामसेवैकभूषणः ॥ १८ ॥

(भा.दी.) यत्रेति । श्रीरामस्य या सेवा एकं केवलं भूषणमलङ्कारो यस्य स तथोक्तः हरिः कपिः सः हनुमान् यत्रयत्र प्रदेशे विलासिन्यः विपुलो बहळस्तं विलासं दधुः धृतवत्यः । तत्रतत्र अगात् ॥ १८ ॥

(सं.चं.) तत्रतत्रागात् केवलं सीतान्वेषणरूपरामसेवार्थम् ॥ १८ ॥

गृहोर्ध्वगृहसौधेषु [४]प्रकोष्ठवलभीषु च ।
चैत्यचत्वररथ्यासु विचिक्ये च्छलजानकीम् ॥ १९ ॥

---

१. **'प्रशस्तान्यङ्गान्यासां सन्तीत्यस्मिन्नर्थे पामादित्वान्नप्रत्ययः'** इति का.श्री. । तथाहि पामादिषु गणसूत्रम्–**'अङ्गात् कल्याणे'** (अ.सू. ५.२.१००) इति ।

२. **'चषकानाम्'** इति, तथा टीकायाम्–**'चषकानि'** इति लिपिकृत्प्रमादः ।

३. **'नभस्थलम्'**

४. **'प्रकोष्ठे वल-'** । **प्रकोष्ठं बहिर्द्वारगृहम्'** इति का.श्री. ।

(भा.दी.) गृहेति । गृहाश्च ऊर्ध्वगृहाणि च सौधानि च तेषु, मन्दिरोपरि विशालतयाऽवस्थानार्थं कृतं स्थलं प्रकोष्ठमित्युच्यते । प्रकोष्ठानि च वलभ्यो गृहाच्छादनानि ताश्च तासु । 'आच्छादनं स्याद् वलभी गृहाणाम्' इति हलायुधः । चैत्यानि वनानि तानि च, चत्वराणि चतुष्पथानि तानि च, रथ्या रथवीथ्यस्ताश्च तासु च्छलजानकीं सीताप्रतिकृतिमित्यर्थः, विचिक्ये निमार्गितवान् ॥ १९ ॥

(सं.चं.) ऊर्ध्वगृहाणि उपरिगृहाणि– '**ಉಪ್ಪರಿಗೆ**' इति भाषायाम् । सौधानि सुधाधवलितानि श्रीमतां गृहाणि । प्रकोष्ठेषु '**ಚಾವಡಿ**' इति भाषायाम् । 'प्रकोष्ठेऽलिन्दकेऽपि च' इति च । वलभीषु कूटागारेषु । चैत्येषु देवतायतनेषु । 'कूटागारं तु वलभी' इति । कूटागारमिति सन्दिग्धार्थं पदम् । चन्द्रशालेत्येके । स्त्रीणां क्रीडागृहमित्यपरे । प्रायः गृहाद् बहिर्निर्मितं कृतकं गृहं तदिति भाति । यद् भाषायाम्– '**ಕೊಟ್ಟಗೆ**' इत्युच्यते । यद्यपि 'देवतायतनं चैत्यम्' इत्यभिदधति । अथापि 'देवालयलतालयान्' (२१) इत्युपरिवचनेन पुनरुक्तं भवति । अतोऽत्र चैत्यमिति यज्ञस्थानमुच्यते । चत्वरेषु अङ्गणेषु चतुष्पथेषु च । 'स्थण्डिले प्राङ्गणे च क्ली चत्वरं ना चतुष्पथे' इति च । रथ्यासु रथचरणयोग्यासु वीथीषु । छलजानकीं मायासीताम् । राम-सेवार्थमिदमप्येकं हनुमन्नाटकम् ॥ १९ ॥

क्वचिद् द्वारं विवृण्वानः क्वचिच्च विवृतं विशन् ।
क्वचिज्जालान्तरेणैव प्राविशत् प्राणनन्दनः ॥ २० ॥

(भा.दी.) क्वचिदिति । प्राणनन्दनः मुख्यप्राणपुत्रः हनुमान् क्वचित्प्रदेशे द्वारं तत् विवृण्वानः सन् प्राविशत् । क्वचिच्च विवृतं द्वारं विशन् सन् अन्तः प्राविशत् । क्वचिच्च जालस्य गवाक्षस्य अन्तरं च्छिद्रं तेनैव प्राविशत् ॥ २० ॥

(सं.चं.) जालान्तरेण गवाक्षावकाशेन । 'जालं गवाक्ष आनाये क्षारके कपटे गणे' इति च ॥ २० ॥

अवाप्य वापीरन्विष्यन्[1] देवालयलतालयान् ।
जलाशयांश्च विविधांश्चचारासङ्गमो हरिः[2] ॥ २१ ॥

(भा.दी.) अवाप्येति । न विद्यते सङ्गमो यस्य स तथा, विषयेष्वनासाक्तमना इत्यर्थः, हरिः कपिः हनुमान् अन्विच्छन् सीतां द्रष्टुमिच्छन्, वापीः दीर्घिकाः अवाप्य, देवालया देवस्थानानि ते च, लतालया लतागृहाणि ते च तान्, विविधान् जलाशयान् तटाकानि च चचार । चर गतिभक्षणयोर्लिट् ॥ २१ ॥

१. **'वापीरन्विच्छन्'** । वि.ती.पाठोऽपि तथैवेति भाति ।
२. **'–रासङ्गमो विभुः'**

(सं.चं.) वापीः यत्रावरुह्य स्नान्ति । 'ૐ୫ଛ୬୨' इति भाषायाम् । स्नानार्थं वाप्यामप्यवरूढा स्यादिति वापीरप्यन्विियेष । असङ्गमोऽसङ्गः । अकारवाच्येन भगवता सर्वदा सङ्गमोऽस्येति च ॥ २१ ॥

बहिरन्तश्च विचरन् वायुवद् वायुनन्दनः ।
चतुरङ्गुलमात्रं च पुर्य्यां न व्यचिनोन्न हि ॥ २२ ॥

(भा.दी.) बहिरिति । बहिः लङ्कायाः बहिः प्रदेशे अन्तश्च वायुवत् विचरन् वायुनन्दनः हनुमान् पुर्यां लङ्कायां चतुरङ्गुलयः प्रमाणानि यस्य स्थलस्य तच्चतुरङ्गुलम्[१], केवलं चतुरङ्गुलं चतुरङ्गुलमात्रं तच्च न व्यचिनोदिति न, नान्वेषणं कृतवानिति नहि, किन्तु साकल्येनान्वेषितवानित्यर्थः ॥ २२ ॥

(सं.चं.) चतुरङ्गुलमात्रं च । अत्र कश्चनापूर्वोऽर्थः प्रतिभाति । तथाहि-'अङ्गुलोऽस्त्री यवा अष्टौ समस्तु चतुरङ्गुलः' इति यादवप्रकाशः । तथाच समचतुरश्रोऽङ्गुलश्चतुरङ्गुलः । केवलं चतुरङ्गुलिश्चतुरङ्गुलमात्रः । तावन्तमपि प्रदेशमचित्वा न जहावित्यर्थः । चतसृणामङ्गुलीनां समाहारश्चतुरङ्गलम् । चतुरङ्गुलमेव चतुरङ्गुल-मात्रम्' इत्यपि व्याचक्षते । रामायणाननुगुणमेतत् । 'चतुरङ्गुलमात्रोऽपि नावकाशः स विद्यते । रावणान्तःपुरे तस्मिन् यं कपिर्न जगाम सः' (१२.१७) इति च ॥ २२ ॥

चिन्तयामास हनुमानदृष्ट्वा जानकीतनुम् ।
मया न दृष्टा सा देवी[२] कार्य्यं सकलमाकुलम् ॥ २३ ॥

(भा.दी.) चिन्तयेति । हनुमान् जानक्याः तनुराकृतिस्तां अदृष्ट्वा, देवी सीता मया न दृष्टा, सकलं कार्यं मदागमनप्रयोजनं आकुलं विनष्टं इति चिन्तयामास ॥ २३ ॥

(सं.चं.) जानक्याः तनुं प्रतिकृतिम् । आकुलं विपरीतं विषमम् ॥ २३ ॥

नागाङ्गना नाकनारीर्न्नगर्य्यां राक्षसीरपि ।
अद्राक्षं यास्ववस्थासु ता न हन्त ममोचिताः[३] ॥ २४ ॥

---

१. तथाहि पाणिनिः-**'तत्पुरुषस्याङ्गुलेः सङ्ख्याव्ययादेः'** (अ.सू.५.४.८६) इति । तेनाङ्गुलिशब्दस्याच् प्रत्ययः ।

३. **'मया न दृष्टा देवीति'** इति वि.ती.पाठः स्यात् ।

३. **'न हन्त सभोचिताः'** इति वि.ती.पाठः । **'न हन्ततथोचिताः'** इति क्वचित् ।

(भा.दी.) नागेति । अहं नागाङ्गनाः नागानां स्त्रियः, नाकनारीः स्वर्गस्य स्त्रियः, गन्धर्वादिस्त्रिय इत्यर्थः, राक्षसीरपि यास्ववस्थासु रतिसमये दिगम्बरत्वाद्यवस्थासु नगर्यां लङ्कायां अद्राक्षं दृष्टवानस्मि, ताः स्त्रियः न सभोचिताः न सभायां वक्तुमुचिताः ॥ २४ ॥

(सं.चं.) नगर्यां लङ्कायाम् । न ममोचिताः । मम ब्रह्मचारिणो न दर्शनोचिताः । अथाप्यद्राक्षं कार्यगौरवात्, मम वशीकृतमनस्त्वाच्च ॥ २४ ॥

नावस्त्राः स्त्रिय ईक्षेत ब्रह्मचारी विशेषतः ।
इति शास्त्रगतिं[१] नाहमद्राक्षं कार्य्यगौरवात् ॥ २५ ॥

(भा.दी.) नावस्त्रा इति । पुरुषः न विद्यते वस्त्रं यासां तथोक्तास्ताः स्त्रियः न ईक्षेत न पश्येत् । ब्रह्मचारी विशेषतः न ईक्षेत । इति शास्त्रगतिं शास्त्रप्रतिपादितस्थितिं कार्यस्य सीतान्वेषणलक्षणकार्यस्य यद्गौरवं महत्त्वं तस्मात् न अद्राक्षम् । शास्त्रविधिमुलङ्घ्याऽपि दृष्टवानस्मीत्यर्थः ॥ २५ ॥

(सं.चं.) शास्त्रगतिं शास्त्रविधिं, नाद्राक्षं न पर्यालोचयम् ॥ २५ ॥

लवणाब्धिर्वृथा तीर्ण्णो न कार्य्याब्धिर्म्महानयम् ।
नानानार्य्यो वृथा दृष्टा रामनारी न हा बत[२] ॥ २६ ॥

(भा.दी.) लवणेति । लवणाब्धिः वृथा तीर्णः लङ्घितः । महान् अयं उपक्रान्तः कार्याब्धिः कार्यलक्षणसमुद्रः न तीर्णः, हा बत । नानानार्यः नानाविधस्त्रियः वृथा दृष्टाः, श्रीरामस्य नारी सीता न दृष्टा बत ॥२६॥

(सं.चं.) रामनारी न दृष्टा । हा बत । हेति विषीदति । बतेति विस्मयते । अनुकम्पते च ॥ २६ ॥

मम त्वसङ्गमनसो न दोषो विषयेक्षणात् ।
विषयैर्न्नहि लेपोऽस्ति वह्निवायुविवस्वताम् ॥ २७ ॥

(भा.दी.) तर्हि नानानारीदर्शनाद्भावो न दुष्टः किमित्यत आह– ममेति । असङ्गं विषयेष्वसक्तं मनो यस्य स तथा तस्य मम विषयाणां वनितादीनां यदीक्षणं तस्माद्दोषः नास्ति । असङ्गत्वेन लोपाभावः क्व दृष्ट इत्यत आह– वह्नीति । वह्निश्च वायुश्च विवस्वांश्चैषां विषया दुर्विषयास्तैः लेपः नास्ति हि ॥ २७ ॥

---

१. **'शास्त्रस्थितिं नाह –'** २. **'न सा बत'**

(सं.चं.) मम त्वसङ्गमनसः । 'मनो हि हेतुः सर्वेषामिन्द्रियाणां प्रवर्तने । शुभाशुभास्ववस्थासु तच्च मे सुव्यवस्थितम्' (११.४२) इति च ॥ २७ ॥

यन्न देवी मया दृष्टा सङ्कटः स हि नापरः ।
तामदृष्ट्वा कपीन् प्राप्य किं नु वक्ष्यामि षण्ढवत्[1] ॥ २८ ॥

(भा.दी.) **यदि**ति । यत् यस्मात् देवी सीता मया न दृष्टा । स हि स एव सङ्कटः, अपरः समुद्रोल्लङ्घनादिनिमित्तसङ्कटः नास्ति । अहं तां अदृष्ट्वा कपीन् प्राप्य षण्ढवत् नपुंसकवत् किन्नु किं वा वचः वक्ष्यामि । वच परिभाषणे लृट् ॥ २८ ॥

(सं.चं.) न दृष्टेति यत् स एव सङ्कटः सम्बाधः 'ಪಮಜ್ಞ' इति भाषायम् । षण्ढवत् निःसत्ववत् । पाणिनीयाः षडिं वा षढिं वा न पठन्ति । सनोतेर्डप्रत्ययेन षण्डशब्दं निष्पादयन्ति । यो बलीवर्दवचनः वृक्षादिसङ्घात-वचनश्च । शमेर्ढप्रत्ययेन मूर्धन्यादित्वेन वर्षवरवचनं षण्ढशब्दं च । काशकृत्स्नस्तु षडि शिखिडि निर्बीजे इति पठति । षण्डति सन्ततिहीनो भवतीति षण्ड इति । काशकृत्स्नस्य पाठक्रमानुगुणतया–'षडि निर्बीजे' इत्यपि पठनीयम् । 'ढुढि अन्वेषणे' इति हि ढान्तः पूर्वपाठः । तेन षण्ढतीति षण्ढः ॥ २८-९ ॥

सीता न दृष्टेति कथं वक्ष्ये संवन्द्य राघवम् ।
अवेक्षिष्ये कथं तस्य पूर्णचन्द्रोपमं मुखम् ॥ २९ ॥

(भा.दी.) **सीते**ति । अहं राघवं संवन्द्य सीता न दृष्टा इति कथं वक्ष्ये । तस्य राघवस्य पूर्णचन्द्रस्य उपमा यस्य तत्तथोक्तं मुखं कथं अवेक्षिष्ये ॥ २९ ॥

सीता क्वापि न दृष्टेति वचनं विषमं विषम्[2] ।
नरेन्द्रवानरेन्द्राणां कुलयोर्विलयप्रदम् ॥ ३० ॥

(भा.दी.) **सीते**ति । सीता क्वापि स्थले न दृष्टा इति विषमं विपरीतं वचनम्, विप्रियं वचनमित्यर्थः, नरेन्द्रः श्रीरामः स च वानरेन्द्रः सुग्रीवश्च तेषां कुले गोत्रे तयोर्विलयं प्रददातीति विलयप्रदं विषं विषसदृशम्, मानभङ्गहेतुत्वादिति भावः ॥ ३० ॥

---

१. 'षण्डवत्' २. 'वचनं विषसन्निभम्' । 'विषमं कार्याननुगुणत्वात् । विषं विषवन्मालकम्' इति का.श्री. ।

(सं.चं.) कुलयोर्विलयप्रदम् । अत एव विषसन्निभं विषतुल्यम् विषमिव ॥ ३० ॥

सर्वं विक्रमजालं मे निष्फलं हीन्द्रजालवत् ।
देवीमपश्यतो यद्वल्लालित्यं फेनसम्पदः ॥ ३१ ॥

(भा.दी.) सर्वमिति । देवीं सीतामपश्यतः मे सर्वं विक्रमजालं विक्रमसमूहः इन्द्रजालवत् मायिकवस्तुवत् निष्फलं व्यर्थं हि । फेनस्य या सम्पत्तस्याः लालित्यं मनोहरत्वं यद्वत्तद्वत् विद्यमानम्, अकार्यकारित्वादिति भावः ॥ ३१ ॥

(सं.चं.) फेनसम्पदः डिण्डीरपिण्डस्य लालित्यं कोमलत्वमिव ॥ ३१-२ ॥

मुष्टिघातैर्दुराचारं रावणं मारयामि वा ।
अथवा पशुवद् बध्वा रामपार्श्वं[1] नयामि तम्[2] ॥ ३२ ॥

(भा.दी.) मुष्टीति । दुष्ट आचारो यस्य स तथा तं रावणं मुष्टेर्ये घातास्तैः मारयामि वा? अथवा, निपातसमुदायोऽयम्, तं पशुवत् बध्वा श्रीरामस्य पार्श्वं समीपं तत् नयामि वा? ॥ ३२ ॥

अशोकवनिकायां[3] तामशोकवनितां वराम् ।
अथाप्यहं विचेष्यामि[4] स्याद् यत्नः सफलो यतः ॥ ३३ ॥

(भा.दी.) अशोकेति । अथापि बध्वा नयनादिसामर्थ्ये सत्यपि, अहं अशोकानां अशोकवृक्षाणां वनिका वनं तस्याम्, न विद्यते शोको यस्य स तथोक्तस्तस्य श्रीरामस्य वनितां स्त्रियम्, शोकरहितां वनितामिति वा, वरां उत्तमां तां सीताम् । यतः तां (प्रति) यत्नः, स यत्न इति वा, सफलः तस्मात् विचेष्यामि मार्गयिष्यामि ॥ ३३ ॥

(सं.चं.) अशोकस्य रामस्य वनिताम् । यतः यत्र तद्विचयनयत्नः सफलः स्यादित्याशया विचेष्यामि ॥ ३३ ॥

---

१. **'नयामि वा' 'वर्तमानप्रयोगादिदानीमेवेतरानपेक्षतया कर्तृत्वसामर्थ्यमस्तीति ध्वन्यते'** इति का.श्री. ।

२. इतः परमेकोऽधिकः श्लोकः क्वचित् पठ्यते– **'बलेन लङ्कामुद्धृत्य रामपादान्तिकेऽथवा । यामीति लङ्कां बालेन परिवार्यागिलद्धरिः'** इति । **'परिवार्य गिलन् हरिः'** इति च । व्याचख्यौ च का.श्री. । हनुमद्वचनमध्येऽनन्वितमिदं पद्यं स्फुटं प्रक्षिप्तम् ।

३. **'–वनिकां यायामशोक–'**

४. **'विचेष्यामि तद्यत्नः'** इति वि.ती.पाठ इति स्यात् ।

नमोऽस्तु रामरामायै रामायापि नमोनमः ।
भूम्ने सर्वान्तरायापि सर्वसिद्धिप्रदायिने[1] ॥ ३४ ॥

(भा.दी.) नम इति । रामरामायै श्रीरामभार्यायै सीतायै अपि नमः अस्तु । सर्वेषामन्तः रमत इति सर्वान्तरस्तस्मै, सर्वाश्च सिद्धयस्ताः प्रददातीति तथोक्तस्तस्मै भूम्ने पूर्णगुणाय श्रीरामायाऽपि नमोनमः (अस्तु) ॥ ३४ ॥

(सं.चं.) 'नमोऽस्तु रामाय सलक्ष्मणाय देव्यै च तस्यै जनकात्मजायै । नमोऽस्तु रुद्रेन्द्रयमानिलेभ्यो नमोऽस्तु चेन्द्राग्निमरुद्गणेभ्यः'(१३.५९) इत्यादिसमग्रं रामायणवचनमेकयोक्त्या व्याख्याति–सर्वान्तरायेति । तत्तदन्तर्यामितया तत्तत्पदवाच्याय तत्तद्रूपायापि रामायेत्यर्थः । स एव च भूमा सर्वपदवाच्य-सर्वगुणपूर्णः ॥ ३४ ॥

इत्यालोच्य विविच्यासौ कार्य्यं निर्द्धार्य्य वीर्य्यवान् ।
अशोकवनिकां प्रायात् सर्वर्त्तुफलपुष्पिणीम् ॥ ३५ ॥

(भा.दी.) इतीति । वीर्यं अस्यास्तीति वीर्यवान् असौ इति आलोच्य, विविच्य कर्तव्याकर्तव्ययोर्मध्य इदं कर्तव्यमिति बुद्ध्या विवेचयित्वा, कार्यं निर्धार्य इदं करिष्य इति निश्चित्य च, सर्वेऽपि च ऋतवस्तेषु फलानि च पुष्पाणि च तानि अस्यां सन्तीति तथोक्ता तां अशोकवनिकां अशोकवनं प्रायात् ॥ ३५ ॥

(सं.चं.) वीर्यवान् पराक्रमी महात्मा च । 'वीर्यं पराक्रमे रेतस्यन्नमाहात्म्ययोरपि' इति यादवप्रकाशः । कार्यं विविच्य विमृश्य निर्धार्य ॥ ३५ ॥

अशोकशोचिषा[2] शोणं वनमैक्षत मारुतिः[3] ।
पद्मरागैरिवाऽकीर्ण्णं हरितोपलपर्वतम् ॥ ३६ ॥

(भा.दी.) अशोकेति । मारुतिः, अशोकपुष्पाणां यत् शोचिस्तेन, 'रोचिः शोचिरभीशुः' इति हलायुधः, शोणं रक्तं तत् वनम्, पद्मरागा लोहितरत्नानि तैः, 'शोणरत्नं लोहितकं पद्मरागः' इत्यमरः, आकीर्णम्,

---

१. **'सर्वसिद्धिप्रदाय च'** इति वि.ती.पाठ इति भाति । अत्र का.श्री. व्याख्याने विशेषः–**'सर्वसिद्धिप्रदायिने सकलकार्यसिद्धिप्रदात्रे सर्वान्तराय सर्वान्तरात्मने अपि । विशेषणसमुच्चयार्थोऽपिशब्दः । भूम्ने पूर्णाय रामाय नमः अस्तु । भूम्ने पूर्णाय सर्वसिद्धिप्रदायिने सर्वान्तराय सर्वान्तश्चारिणे वायवेऽपीति वा'** इति । स्यादिदमपि, द्विरपिशब्दश्रवणात् ।

२. **'अशोकरोचिषा'** ३. **'वनमैक्षत वानरः'**

हरितोपालात्मक इन्द्रनीलरत्नात्मको यः पर्वतस्तमिव ऐक्षत । अशोकपुष्पाणां रक्तवर्णत्वाद् वनस्य च नीलवर्णत्वादिति भावः ।। ३६ ।।

(सं.चं.) अशोकशोचिषा शोणम् । शोणकुसुमो ह्यशोकः । पत्राणि च हरितानि । तेन पद्मरागैः शोणोपलैराकीर्णं हरितोपलपर्वतमिवैक्षत । हरितोपलः मरतकमणिः । 'गारुत्मतं मरतकमश्मगर्भं हरिन्मणिः । शोणरत्नं लोहितकं पद्मरागोऽरुणोपलः' इति च ।। ३६ ।।

नदी त्रिकूटात् पतिता वनमद्ध्यं व्यराजयत् ।
रम्यं सीमन्तसीमेव सीमन्तिन्याः शिरोरुहम् ।। ३७ ।।

(भा.दी.) नदीति । त्रिकूटः त्रिकूटपर्वतस्तस्मात् पतिता निःसृता नदी, वनस्य मध्यं तत्, सीमन्तिन्याः अङ्गनायाः रम्यम्, शिरोरुहः केशस्तम्, सीमन्तसीमेव ललाटमारभ्य शिरोमध्ये केशपाशेषु द्विधा विभक्तेषु सत्सु या रेखा सा सीमन्त इत्युच्यते । स एव सीमेव मर्यादेव व्यराजयत् । राजृ दीप्तौ लङ् ।। ३७ ।।

(सं.चं.) सीमन्तिन्याः शिरोरुहं सीमन्तसीमेव । सीमन्तः केशपद्धतिः, 'ಬೈತಲೆ' इति भाषायाम् ।। ३७ ।।

भवने पवनस्याथ वने पवननन्दनः ।
विजहार यथाकामं प्लवमान इतस्ततः ।। ३८ ।।

(भा.दी.) भवन इति । अथ पवननन्दनः हनुमान् पवनस्य भवनं गृहायितं तस्मिन् वने, काममनतिक्रम्य यथाकामम्, इच्छानुसारेणेत्यर्थः, इतस्ततः प्लवमानः प्लवनं कुर्वन् सन् विजहार चिक्रीड ।। ३८ ।।

(सं.चं.) पवनस्यैव हि भवनं वनं नाम ।। ३८ ।।

काञ्चनीनां च वल्लीनां काञ्चनानां च शाखिनाम् ।
समभ्यनन्दत् संयोगं[१] दम्पतीनामिव प्रभुः ।। ३९ ।।

(भा.दी.) काञ्चनीति । प्रभुः हनुमान् काञ्चनीनां सुवर्णमयीनां वल्लीनां लतानां काञ्चनाः स्वर्णमयास्तेषां (शाखिनां) वृक्षाणां च सन्नामः नम्रीभावस्तं जायाश्च पतयश्च दम्पतयस्तेषां सन्नाममिव समभ्यनन्दत् । नदि हर्षे । तुतोषेति भावः ।। ३९ ।।

१. **'सन्नामम्'** इति वि.ती.पाठः । **'सन्नाहम्'** इति च । **'सन्नाहं परस्परसंश्लेषम्'** इति का.श्री। ।

(सं.चं.) अनुरूपं संयोगम् ॥ ३९ ॥

जैत्रं चैत्ररथस्येदं कान्त्या नन्दननिन्दनम्[१] ।
मणिहेममयं दिव्यमुद्यानं समवैक्षत[२] ॥ ४० ॥

(भा.दी.) जैत्रमिति । चैत्ररथस्य वैश्रवणोद्यानस्य, 'अस्योद्यानं चैत्ररथम्' इत्यमरः, जैत्रं जयशीलम्, कान्त्या नन्दनं इन्द्रोद्यानं निन्दयति तिरस्करोतीति नन्दननिन्दनम्, 'नन्दनमुद्यानमिन्द्रस्य' इति हलायुधः, मणयश्च हेमानि च तेषां विकारो मणिहेममयम्, अत एव दिव्यं इदं उद्यानं समवैक्षत ॥ ४० ॥

(सं.चं.) चैत्ररथस्य कुबेरोद्यानस्यापि जैत्रं जेतृ । स्पर्धया भ्रातुरुद्यानादप्यधिकमनोज्ञतया रूपितम् । कान्त्या इन्द्रोद्यानस्य नन्दनस्यापि निन्दनम्, ततोऽप्यधिककान्तम् । दिव्यं सर्वातिशायि लोकोत्तरम् ॥ ४० ॥

[३]वने तुच्छेतरच्छाये ददर्श पवनात्मजः ।
शिंशपां काञ्चनमयीं मेघे सौदामिनीमिव ॥ ४१ ॥

(भा.दी.) वन इति । पवनात्मजः तुच्छात् स्वल्पादितराऽनल्पा च्छाया यस्मिन् तत्तथोक्तं तस्मिन्, अतिनिबिडवृक्षच्छायायुक्त इत्यर्थः, काञ्चनमयीं स्वर्णमयीं शिंशपां काळागरुवृक्षम्, 'पिच्छिलागरु शिंशपा' इत्यमरः, मेघः काळमेघस्तस्मिन् सौदामिनीमिव विद्युतमिव ददर्श ॥ ४१ ॥

(सं.चं.) छाया कान्तिः । अनल्पनीलकान्तिमति उद्याने । आतपाभावोऽपि छाया स्यात् । युक्तश्चायमर्थो भाति छायातरुनिबिडे राजोद्याने । अथापि नात्रायमर्थो विवक्ष्यते । निशायां हि हनुमानुद्यानं ददर्श । तदा सर्वथाऽप्यातपाभाव एव । चन्द्रिकाप्रकाशप्रसरोऽपि नातीवाऽसेति वा वक्तव्यम् ॥ ४१ ॥

तत्र प्रवाळसोपानं[४] चैत्यप्रासादमद्भुतम् ।
सहस्रस्तम्भमैक्षिष्ट श्रीमत्काञ्चनवेदिकम्[५] ॥ ४२ ॥

(भा.दी.) तत्रेति । तत्र स्थले प्रवाळनिर्मितं सोपानं आरोहणप्रदेशो यस्मिन् स तथोक्तम्, 'आरोहणं स्यात् सोपानम्' इत्यमरः, सहस्रसङ्ख्याकाः स्तम्भाः यस्मिन् स तथा तम्, श्रीमती काञ्चनमयी वेदिका यस्मिन् स तथोक्तः तम्, अद्भुतं चैत्ये शिंशपामूले तद्वने विद्यमानो यः प्रासादस्तं ऐक्षिष्ट ॥ ४२ ॥

---

१. 'नन्दनन्दनम्' २. '–मयं सर्वमुद्यानं स समैक्षत' ३. 'वनेऽतुच्छे तरुच्छाये'
४. 'चैत्ये प्रासाद–' ५. 'श्रीमत्कनकवेदिकम्'

(सं.चं.) तत्र शिंशपामूले । चैत्य इत्युद्देशपादप उच्यते । उद्यानमध्यगतं राज्ञां विश्रान्तिमन्दिरं चैत्यप्रासाद उच्यते । वेदिका वितर्दिका । अन्तरुपवेशस्थानम् । 'स ददर्शाविदूरस्थं चैत्यप्रासादमूर्जितम् । मध्ये स्तम्भसहस्रेण स्थितं कैलासपाण्डरम् । प्रवाळकृतसोपानं तप्तकाञ्चनवेदिकम्' (१५.१६-१७) इति च । 'चैत्यं बुद्धमन्दिरम् । तदाकारं प्रासादम्' इति रामायणवचनं व्याख्यान्तः शोच्याः ॥ ४२-४ ॥

इमां नदीं शिवजलां शिवच्छायां च शिंशपाम् ।
सा तन्वी सेवते नूनमित्यमन्यत मारुतिः ॥ ४३ ॥

(भा.दी.) **इमामि**ति । मारुतिः शिवं शोभनं जलं यस्यां सा तथोक्ता तां इमां नदीम्, शिवा च्छाया यस्यां सा तथा तां शिंशपां च तन्वी मनोहरा सा सीता सेवते नूनम् । षेवृ सेवने लट् । इति अमन्यत निरूपितवान्, मन ज्ञाने लङ् ॥ ४३ ॥

तस्या एकतमां शाखां शाखामृगपतिः शनैः ।
आरुह्य संवृतः पर्णैर्ददर्श स दिशो दश ॥ ४४ ॥

(भा.दी.) तस्या इति । शाखामृगाणां वानराणां पतिः स हनुमान् तस्याः शिंशपायाः एकतमां एकां शाखां आरुह्य पर्णानि पत्राणि तैः संवृतः सन् दश दिशः शनैः ददर्श ॥ ४४ ॥

तत्र दीनामिवादीनां मलिनामिव चामलाम् ।
कृशामिवोपवासेन [१]नकृशां प्रकृतिश्रिया ॥ ४५ ॥

(भा.दी.) तत्रेति । मारुतिः तत्र शिंशपावृक्षमूले दीनामिव दुःखितामिव स्थिताम्, अदीनां स्वभावतोऽ-दुःखिताम्, मलिनामिव स्थिताम्, स्वभावतस्तु न विद्यते मलं यस्याः सा तथा ताम्, उपवासोऽनशनं तेन कृशामिव स्थिताम्, प्रकृतिश्रिया नकृशां अकृशाम्, नसमासोऽयम्, मायासीतां व्याजेन सीतां अवैक्षतेति वक्ष्यमाणेन सम्बन्धः ॥ ४५ ॥

(सं.चं.) तत्रेत्यादिश्लोकचतुष्टयस्य 'मायासीतामवैक्षत' इत्येकान्वयः । दीनामिवाऽत्मानं दर्शयन्तीम् । स्वभावतोऽदीनाम् । प्रकृत्या या श्रीस्तया स्वरूपभूतया सहजकान्त्या नकृशां परिपूर्णशोभाम् ॥ ४५ ॥

---

१. **'–वासेन ह्यकृशाम्'**

फुल्लपद्मपलाशाक्षीं पूर्णचन्द्रनिभाननाम् ।
निष्टप्तस्वर्णवर्णाङ्गीं साक्षात्[१] सर्वाङ्गसुन्दरीम् ॥ ४६ ॥

(भा.दी.) **फुल्लेति** । फुल्लं विकसितं यत् पद्मं तस्य यत्पलाशं पत्रं तद्वदक्षिणी यस्याः सा तथा ताम्, पूर्णो यश्चन्द्रस्तस्य निभं समानमाननं यस्याः सा तथा ताम्, नितरां तप्तं निष्टप्तं यत्स्वर्णं तस्य वर्ण इव वर्णो यस्य तत्तथोक्तं तादृशमङ्गं शरीरं यस्याः सा तथा ताम्, सर्वाणि यान्यङ्गान्यवयवास्तैः सुन्दरीं मनोहरां मायासीतां साक्षात् अवैक्षतेति सम्बन्धः ॥ ४६ ॥

(सं.चं.) पद्मस्य पलाशं दलम् । साक्षादनुपचारतः । प्रत्यक्षतः राक्षसजनैरप्यनुभूयमानसुषमाम् ॥ ४६-५०॥

आलम्बिनीं केशवेणीं कृत्वा जघनमण्डले ।
आसीनामवनीपृष्ठे सन्ततास्राम्बुसन्ततिम् ॥ ४७ ॥

(भा.दी.) **आलम्बिनीमिति** । आ सम्यक् समन्तात् लम्बिनीं लम्बनशीलां केशानां वेणीं जघनस्य कटिप्रदेशस्य यन्मण्डलं प्रदेशस्तस्मिन् कृत्वा, अवन्याः पृष्ठं प्रदेशस्तस्मिन् आसीनाम्, सन्ततानि अव्युच्छिन्नानि आस्ररूपाणि अश्रुरूपाणि अम्बूनि तेषां सन्ततिः समूहो यस्याः सा तथा तां मायासीतां अवैक्षत ॥ ४७ ॥

हन्तैकवसनां कैश्चिद् भूषितां भूषणैरपि ।
मारुतिः शिंशपामूले मायासीतामवैक्षत ॥ ४८ ॥

(भा.दी.) **हन्तेति** । मारुतिः एकं वसनं वस्त्रं यस्याः सा तथा ताम्, कैश्चित् भूषणानि आभरणानि तैः भूषिताम् (अपि), मायासीतां च्छलसीतां शिंशपाया यन्मूलं तस्मिन् अवैक्षत हन्त ॥ ४८ ॥

राक्षसारेः प्रियां जायां[२] राक्षसीगणमद्ध्यगाम् ।
मृगीमिव श्वगणगां दृष्ट्वा चिन्तामवाप सः ॥ ४९ ॥

---

१. **'साक्षात् सर्वाङ्गसुन्दरीम्, समानं सर्वावयवेषु सौन्दर्यवतीम् । गौरादित्वात् ङीष् । 'साक्षात् प्रत्यक्षतुल्ययोः' इत्यमरः'** इति का.श्री. ।

२. **'प्रियां भार्याम्'** इति, **'प्रियां छायाम् '** इति च क्वचित् ।

(भा.दी.) राक्षसेति । सः हनुमान् राक्षसीनां राक्षसस्त्रीणां यो गणस्तस्य यन्मध्यं तद्गच्छतीति तथोक्ता ताम्, राक्षसारेः श्रीरामस्य प्रियां जायां भार्यां सीताम्, शुनां यो गणस्तं गच्छतीति तथोक्ता ताम्, मृगीमिव एणस्त्रियमिव दृष्ट्वा चिन्तां विमर्शं अवाप ॥ ४९ ॥

रामदेवस्य देवीयं व्यक्तमायतलोचना ।
ईदृशं लक्षणं तेन कीर्त्तितं पुण्यकीर्त्तिना ॥ ५० ॥

(भा.दी.) रामेति । आयते लोचने यस्याः सा तथा, इयं श्रीरामदेवस्य देवी सीता, पुण्या शोभना कीर्तिर्यस्य स तथा तेन श्रीरामेण व्यक्तं स्पष्टं यथा भवति तथा ईदृशं एवंविधं लक्षणं अङ्गसम्पत्तिः कथितम् ॥ ५०॥

ह्रियमाणा मया दृष्टा सेयमेवेति भाति मे ।
तस्योत्तरीयस्य सममुत्तरीयमिदं ध्रुवम् ॥ ५१ ॥

(भा.दी.) ह्रियमाणेति । पूर्वं रावणेन ह्रियमाणा मया दृष्टा सा स्त्री इयमेवेति मे प्रतिभाति प्रकाशते । भा दीप्तौ लट् । तस्य पूर्वं मत्पुरतः स्थापितस्य उत्तरीयं उत्तरीयवस्त्रं तस्य इदं उत्तरीयं ध्रुवं समम् ॥ ५१ ॥

(सं.चं.) नन्वेकवसनामित्युक्तम् । तत् कुत इदमकस्मादुत्तरीयमुद्गतम्? नाकस्दादुद्गतम् । पूर्वमप्यासीदेव । अथाप्युत्तरीयखण्डं कपिमध्ये निपातितमिति अवशिष्टमपर्याप्तमुत्तरीयखण्डमविद्यमानमिवेत्येकवसनामित्याह । अत एव चोपरि वक्ष्यति– 'स्तनावप्यतनू दोर्भ्यां छादयन्ती' इति ॥ ५१ ॥

कथं विश्वेश्वरी सीता स्वयं विश्वेश्वरप्रिया ।
दुःखिनीति [१]महच्चोद्यं प्रतिभा मे निरस्यति ॥ ५२ ॥

(भा.दी.) कथमिति । स्वयं स्वभावतः विश्वेश्वरस्य श्रीरामस्य प्रिया भार्या विश्वेश्वरी जगदीश्वरी सीता कथं दुःखमस्या अस्तीति दुःखिनी इति महत् चोद्यं आश्चर्यम्, मे प्रतिभा स्वरूपप्रज्ञा निरस्यति प्रतिक्षिपति । असु क्षेपणे लट् । इयं दुःखवती न भवत्येवेति विषयीकरोति ॥ ५२ ॥

(सं.चं.) कथं दुःखिनी दुःखवती स्यादिति महदिदं चोद्यं अद्भुतं प्रश्नो वा स्यादितरेषाम् । 'चोद्यं स्यादद्भुते प्रश्ने' इति विश्वप्रकाशः । मम तु नवनवोन्मेषशालिनी 'यं कामये तन्तमुग्रं कृणोमि' इत्यादिश्रुतिसमेधिता प्रज्ञैव चोद्यमेतन्निरस्यति ॥ ५२–५ ॥

१. **'महाचोद्यम्'**

अनुकुर्वाणयोर्ल्लोकं[१] देवदेव्योरदीनयोः ।
दुःखमोहादिकं मित्थ्या नटनव्योरिव ध्रुवम् ॥ ५३ ॥

(भा.दी.) अन्विति । लोको जनस्तं अनुकुर्वात इति अनुकर्वाणौ तयोः, लोकविडम्बकयोरित्यर्थः, अदीनयोः दुःखरहितयोः देवदेव्योः, दुःखं च मोहश्च तौ आदी यस्य तत्तथोक्तं दूषणम्, नटश्च नटी नटस्त्री सा च तयोरिव मिथ्या अयथार्थं ध्रुवम् ॥ ५३ ॥

[२]मायामयीमिमां सृष्ट्वा सीता प्रतिकृतिं निजाम् ।
स्वयमन्तर्हिता व्यक्तमित्थं मे प्रतिभा शुभा ॥ ५४ ॥

(भा.दी.) मायेति । स्वयं सीता मायया अचिन्त्यशक्त्या निर्मिता मायामयी तां निजां आत्मीयां इमां सीताप्रतिकृतिं सृष्ट्वा अन्तर्हिता तिरोहिता इत्थं व्यक्तं यथा भवति तथा मे शुभा प्रतिभा प्रज्ञा ॥ ५४ ॥

मनसा विमृशन्नेवं मरुतस्तनयो[३] मुहुः ।
आस्ते पर्ण्णैर्विलीनात्मा कृशानुरिव भस्मनि[४] ॥ ५५ ॥

(भा.दी.) मनसेति । मरुतः वायोः तनयः हनुमान् मुहुः एवं मनसा विमृशन् आलोचयन् सन्, पर्णानि पत्राणि तैर्विलीनः गूहित आत्मा देहो यस्य स तथा सन्, भस्मनि कृशानुरिव वह्निरिव आस्ते तिष्ठति ॥ ५५ ॥

चित्तं बभौ स्फुरति रामपदारविन्दे
नेत्रं रमाप्रतिकृतेश्चरणारविन्दे ।
कोपोदयो हनुमतो दशवक्त्रसैन्ये
प्रेमोदयः सपदि वानरराजसैन्ये ॥ ५६ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
सुन्दरकाण्डे तृतीयः सर्ग्गः ॥

---

१. **'–कुर्वाणयोर्लोकान् देव–'**
२, **'मायामयीं स्वेच्छया निर्मिताम्'** इति का.श्री. ।
३. **' मरुतस्तनुजो मुहुः'**
४. **'कृशानुरिव भस्मभिः'**

(भा.दी.) चित्तमिति । हनुमतः चित्तं सपदि स्फुरति शोभने श्रीरामस्य ये पदे ते एवारविन्दं तस्मिन् बभौ । श्रीरामानुस्मरणं कृतवानित्यर्थः । रमायाः सीतायाः प्रतिकृतिः प्रतिबिम्बं तस्याः चरणावेवारविन्दं तस्मिन् हनुमतः नेत्रं बभौ । अनिमिषाक्षेण[१] सीताप्रतिकृतिं दृष्टवानित्यर्थः । दशवक्त्रस्य रावणस्य यत्सैन्यं तस्मिन् कोपोदयः बभौ । वानरराजस्य सुग्रीवस्य यत्सैन्यं कपिसैन्यं तस्मिन् प्रेमोदयः बभौ ॥ ५६ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां सुन्दरकाण्डे तृतीयः सर्गः ॥

—०—

(सं.चं.) वसन्ततिलकयोपसंहरति– चित्तम् । स्फुरति शोभमाने रामपदारविन्दे चित्तं बभौ । भणिति-भङ्गीयम् । रामपदारविन्दं चित्ते बभावित्यर्थः । कोपोदयो बभूव संहर्तव्यमेतदिति । वानरराजसैन्ये सपदि प्रेमोदयश्च बभूव रामसेवाभाग्यभाज एते भूयासुरिति । पादान्त्ययोर्लाटानुप्रासः । शब्दार्थयोरुभयोरावर्तनं हि लाटानुप्रासः ॥ ५६ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां सुन्दरकाण्डे तृतीयसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– १९९७+५६=२०५३]

---

१. **'अनिमिषाक्षिभ्याम्'** इति, **'अनिमिषाक्षः सन्'** इति वा साधुः पाठः ।

चतुर्थः सर्ग्गः

परितः पद्मनयनां परिवारत्वमागताः ।
राक्षसीरैक्षत हरिर्वरळामिव[1] टिट्टिभीः ॥ १ ॥

(भा.दी.) श्रीरामभृत्येन हनुमता पुनः के दृष्टा इत्यत आह– **परित** इत्यादिना । हरिः कपिः हनुमान्, पद्मवन्नयने यस्याः सा तथा तां सीतां परितः, टिट्टिभीः टिट्टिभनामिकाः पक्षिस्त्रियः वरळामिव हंसस्त्रियमिव, 'वरळा हंसकान्ता स्याद् वराळा वरटा तथा' इति हलः । परिवारत्वं आगताः राक्षसीः ऐक्षत ॥ १ ॥

(सं.चं.) परितः पद्मनयनाम् । 'अभितःपरितःसयानिकषाहापतियोगेषु च दृश्यते' इति वार्तिके (अ.सू.२.३.२) वचनाद् द्वितीया । वरळां परितः स्थिताः टिट्टिभीरिव । 'टिट्टि' इति कूजन् भातीति टिट्टिभः । '**ಟಿಟ್ಟಿಭ**' इति भाषायाम् । टिट्टिभस्य स्त्री टिट्टिभी । 'पुंयोगादाख्यायाम्' (अ.सू.४.१.४८) इति ङीष् । 'वरटा हंसकान्ता स्याद् वराळा वरळाऽपि च' इति यादवप्रकाशः ॥ १ ॥

नानामृगपतङ्गानां सरूपवदनादिकाः ।
एकहस्ताङ्घ्रिनेत्राद्या द्विनासाजठरादिकाः ॥ २ ॥

पादादिस्थमुखीः काश्चिद् व्यत्यस्तावयवास्तथा ।
दृष्ट्वा नैकान्तिकीं मेने स्रष्टुः सृष्टिं स पावनिः[2] ॥ ३ ॥

(भा.दी.) **नाने**ति । पवनस्यापत्यं पुमान् पावनिः (सः) हनुमान्, नानाविधा ये मृगाः, पतङ्गाः पक्षिणश्च तेषाम्, वदनमादिर्येषामवयवानां ते तथोक्ताः, सरूपाः सदृशाः वदनादयो यासां ताः सरूपवदनादिकाः, ताः काश्चिद् राक्षसीः, हस्तश्च अङ्घ्रिश्च नेत्रे च तानि आद्यानि येषामवयवानां ते तथोक्ताः एकाः एकैकसङ्ख्याका

---

१. **'हरिर्वरटामिव '** २. **'पावनिः पवनतनयः'** । **'अत इञ्' (अ.सू.४.१.९४) इतीञ्प्रत्ययः'** इति का.श्री. ।

हस्ताङ्घ्रिनेत्राद्या यासां तास्तथा काश्चिद् राक्षसीः, नासा च जठरश्च ते आदी येषां ते तथा द्विसङ्ख्याकाः नासाजठरादयो यासां ताः द्विनासाजठरादिकास्ताः काश्चित् राक्षसीः, पाद आदिर्येषां ते तथोक्तास्तेषु तिष्ठतीति पादादिस्थं मुखं यासां तास्तथोक्ताः काश्चिद्राक्षसीः, तथा व्यत्यस्ता विपर्यस्ता अवयवा हस्तपादादयो यासां तास्तथा ताः काश्चिद्राक्षसीः दृष्ट्वा स्रष्टुश्चतुर्मुखस्य सृष्टिं नैकान्तिकीं नैकप्रकाराम्, नसमासोऽयम्, मेने निरूपितवान् । मन ज्ञाने लिट् ॥ २–३ ॥

(सं.चं.) मृगाणां पतङ्गानां पक्षिणां च समानरूपं वदनादि यासां ताः । हस्ताङ्घ्रिनेत्राद्यं सर्वत्रान्यत्र द्विधा भूत्वा वर्तमानमवयवजातं यासां पुनरेकमेव ता एकहस्ताङ्घ्रिनेत्राद्याः । आदिना श्रोत्रे नासापुटे स्तनौ च गृह्यन्ते । द्वे नासाजठरादिनी यासाम् । आदिना वदनं नाभिः पायूपस्थौ च । द्वे नासे जठरे च यासां ता द्विनासाजठराः । ता आदयो यासामिति वा । एकान्त एकतानः । नैकान्तिकीं एकतानताविधुरामनियतानेकरूपाम् । 'वराहमृगशार्दूलमहिषाजशिवामुखाः' (१७.१०) इति, 'एकहस्तैकपादाश्च' (१७.११) इति, 'एकाक्षीमेककर्णां च' (१७.५) इति, 'अनासा अतिनासाश्च' (१७.१२) इति, 'अतिमात्रकुचोदरीः' (१७.१३) इत्यादि च । व्यत्यस्तावयवास्तथा । यथा पादे मुखमेवमन्येऽप्यवयवा व्यत्यस्ता यासाम् । श्रोत्रस्थाने चक्षुषी चक्षुःस्थाने श्रोत्रे इत्येवं रीत्या व्यत्यस्ता वा ॥ २–३ ॥

सपद्यपररात्रोत्थैः[1] पवनैस्त्रिगुणोत्कटैः ।
उददीपि[2] दशास्यस्य मायाश्रीमन्मथानलः ॥ ४ ॥

(भा.दी.) सपदीति । सपदि, अपरा च सा रात्रिश्च अपररात्रः, तस्मिन् उत्था उत्पन्नास्तैः, त्रयः शैत्यमान्द्यसौरभ्याख्या ये गुणास्तैरुत्कटा उद्रिक्तास्तैः पवनैः, दशास्यस्य मायायाः बन्धिकायाः प्रकृतेः श्रीः सम्पत्तथा मायाश्रीरूपश्चासौ मन्मथाख्याग्निश्च सः । यद्वा मायया व्याजेन या श्रीः सीताप्रतिकृतिस्तद्विषयो मन्मथानलः कामाग्निरिति वा । उददीपि प्रजज्वाल । दीपी दीप्तौ लुङ् ॥ ४ ॥

(सं.चं.) अपरं रात्रेरपररात्रः । अपरमिति सामान्ये नपुंसकम् । अपरभाग इत्यर्थ इति वैयाकरणाः । यत्र विशेष्यस्य स्फुटमनुल्लेखस्तत् सामान्यम् । सहजं पवनो यावदुत्कटस्ततस्त्रिगुणमुत्कटैः उन्मादकैः । कालस्या-

१. **'रात्रेरपरभागोऽपररात्रः । 'पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे' (अ.सू.२.२.१) इति समासः । अहःसर्वैकदेश–' (५.४.८७) इत्यादिना अच्प्रत्ययः । 'रात्राह्नाहाः पुंसि' (२.४.२९) इति पुंस्त्वम्'** इति का.श्री. ।

२. **'उददीपि प्रज्वलितः । उत्पूर्वात् दीप्यतेः कर्मणि लुङ् । 'चिण्भावकर्मणोः' (अ.सू.३.१.६६) इति च्लेश्चिणि 'चिणो लुक्' (६.४.१०४) इति तत्प्रत्ययस्य लुक्'** इति.का.श्री. ।

पररात्रत्वात्, वायोः स्वत उद्दीपकत्वात्, रावणस्य कामाक्रान्तत्वाच्च, त्रिगुणता । 'किञ्चिच्छेषा निशाऽभवत्' (१८.१) इति च । मायाश्रीः मायासीता । मायाश्रियि विषये मन्मथानलः ॥ ४–५ ॥

[१]तेन तातप्यमानोऽसौ तल्पतः सहसोत्थितः ।
अशोकवनिकां प्रायान्मदान्धः प्रस्खलन्निव[२] ॥ ५ ॥

(भा.दी.) तेनेति । तेन मन्मथाग्निना तातप्यमानः नितरां दह्यमानः, तल्पतः शय्यायाः सहसा उत्थितः, असौ रावणः मदान्धः सन् प्रस्खलन्निव अशोकवनिकां प्रायात् ॥ ५ ॥

चार्वङ्ग्यश्चामरच्छत्रप्रदीपैः प्रतिदीपिताः ।
[३]अन्वीयुः किञ्चिदुन्निद्राः प्रमदास्तं मदालसाः ॥ ६ ॥

(भा.दी.) चार्वङ्ग्य इति । चारूणि मनोहराणि अङ्गानि यासां तास्तथा, चामराणि च छत्राणि च प्रदीपाश्च तैः प्रतिदीपिताः प्रकाशिताः, किञ्चित् उद्गता निद्रा यासां तास्तथा, मदालसाः मदेनालसगतयः प्रमदाः, (तं रावणं) अन्वीयुः ॥ ६ ॥

(सं.चं.)चार्वङ्ग्यः।'अङ्गगात्रकण्ठेभ्य इति वक्तव्यम्'इति वार्तिकात् (अ.सू.५.१.५४)इति ङीष्। चार्वङ्ग्यश्चार्वङ्गा वा । प्रतिदीपिताः प्रत्येकं विशिष्य प्रकाशिताः । **'ഉദ്ദ്ക്കാരു'** इति भाषायाम् । किञ्चिदुद्गतनिद्राः असम्पूर्णनिद्राः, निद्रायामेव चलन्त्य इव । वयःसहजेन पानजनितेन च मदेन अलसा मन्थराः ॥ ६-९ ॥

तमापतन्तमालोक्य विवर्णवदना सती ।
ससर्ज[४] वेपथुमती श्वासान् दीर्घानशीतलान् ॥ ७ ॥

(भा.दी.) तमिति । आपतन्तं तं रावणं आलोक्य, विगतो वर्णो यस्य तत्तथोक्तं तादृशं वदनं यस्याः सा तथा सती, वेपथुः शरीरकम्पोऽस्या अस्तीति तथा सती, (सती सीता) दीर्घान् अशीतलान् अत्युष्णान् श्वासान् ससर्ज । सृज विसर्गे लिट् ॥ ७ ॥

(सं.चं.) वेपथुमती भयकम्पिता । टु वेपृ कम्पने । ट्वित्त्वादेवाथुच्–'ट्वितोऽथुच्' (अ.सू.३.३.८९) इति ॥ ७ ॥

---

१. **'तेन देदीप्यमानो–'**
२. **'प्रायान्मन्मथान्धः स्खलन्निव।' 'मन्मथान्धःमन्मथावेशेन धर्माधर्मविवेकशून्यः'** इति का.श्री.।
३. **'अन्वयुः'**
४. **'ससृजे'** । तुदादेः सृजेर्लिटि **'ससर्ज'** इति रूपम् । दिवादेः **'ससृजे'** इति ।

ऊरुभ्यां म्लानवासोभ्यां छादयन्ती तनूदरम् ।
स्तनावप्यतनू दोर्भ्यां सा बभूव पराङ्मुखी[१] ॥ ८ ॥

(भा.दी.) ऊरुभ्यामिति । सा सीता, म्लानं मलिनं वासो ययोस्तौ तथोक्तौ ताभ्यामूरुभ्यां तनु सूक्ष्मं यदुदरं तत् च्छादयन्ती सती, अतनू असूक्ष्मौ स्तनावपि दोषौ हस्तौ ताभ्यां छादयन्ती सती, पराक् मुखमस्या अस्तीति तथा, दिगन्तरं प्रेक्ष्य विमुखीत्यर्थः, बभूव ॥ ८ ॥

(सं.चं.) 'स्वाङ्गाच्च–' (अ.सू.४.१.५४) इति वा ङीष् । पराङ्मुखी पराङ्मुखा वा ॥ ८ ॥

रावणो विद्धहृदयः पञ्चसायकसायकैः ।
चापलं विपुलं प्राप्य [२]तां सान्त्वेनेदमब्रवीत् ॥ ९ ॥

(भा.दी.) रावण इति । 'अरविन्दमशोकं च चूतं च नवमल्लिका । नीलोत्पलं च' इति प्रसिद्धाः पञ्च सायका यस्य कामस्य स तथोक्तस्तस्य ये सायकास्तैः विद्धं हृदयं मनो यस्य स तथा, (रावणः) विपुलं भूयिष्ठं चापलं मनश्चाञ्चल्यं तत् प्राप्य, तां सीतां सान्त्वं सान्त्ववाक्यं तेन (इदं) अब्रवीत् ॥ ९ ॥

(सं.चं.) सान्त्वेन सामोपायेन तां छन्दयन् ॥ ९ ॥

मन्ये त्वामिन्दिरेशोरोमन्दिरामिन्दिरामहम् ।
लावण्यवल्लीपुष्पाणि तवाङ्गानि स्मरेषवः ॥ १० ॥

(भा.दी.) मन्य इति । अहं त्वां इन्दिराया य ईशः श्रीहरिस्तस्य यदुरस्तदेव मन्दिरं यस्याः सा तथा तां इन्दिरां महालक्ष्मीं मन्ये जानामि । मन ज्ञाने लट् । लावण्याख्या या वल्ली कल्पलता तस्याः पुष्पाणि पुष्पसदृशानि तव अङ्गानि अवयवाः स्मरेषवः कामबाणसदृशा इत्यर्थः ॥ १० ॥

(सं.चं.) इन्दिरेशस्योरोमन्दिराम्, वक्षसि लक्षणभूतां हृदयवल्लभां च । स्मरेषव इव मां बाधन्ते । पुष्पबाणो हि स्मरः ॥ १०–११ ॥

---

१. **'पराङ्मुखा'**

२. **'सान्त्वेन प्रियोक्त्या इदं वचनमब्रवीत्'** इति का.श्री. । असङ्गतमेतत् । प्रियवचनेन वचनमब्रवीदित्यनन्वितं व्याख्यानम् । एतेन वि.ती.व्याख्यानमपि गदितार्थम् ।

विश्वैश्वर्य्यमिदं पश्य मम मानिनि मानिनः ।
अस्मिन् मे यौवनवने लल[1] त्वं ललनालते ॥ ११ ॥

(भा.दी.) विश्वेति । हे मानिनि स्त्रि, मानोऽस्यास्तीति मानी तस्य, अभिमानिन इत्यर्थः, बहुमानवत इति वा, मम इदं विश्वं पूर्णं यदैश्वर्यं तत् पश्य । दृशिर् प्रेक्षणे लोट् । हे ललनालते, त्वं मे अस्मिन् यौवनमेव वनं तस्मिन् लल विलासं कुरु । लल विलासे[2] लोट् ॥ ११ ॥

कथं द्रक्ष्यति रामस्त्वां दृष्ट्वा वा नेष्यते कथम् ।
तस्मात् त्वं तापसं त्यक्त्वा[3] भज मां भुवनेश्वरम् ॥ १२ ॥

(भा.दी.) कथमिति । श्रीरामः त्वां कथं द्रक्ष्यति? दृशिर् प्रेक्षणे लृट् । समुद्राद्युल्लङ्घने मानुषस्य तस्य शक्त्यभावादिति भावः । दृष्ट्वा वा कथं त्वां नेष्यते? बलान्नेतुमशक्यत्वादिति भावः । तस्मात् तापसं मुनिवेषधारिणं श्रीरामं त्यक्त्वा भुवनेश्वरं मां त्वं भज । भज सेवायां लोट् ॥ १२ ॥

(सं.चं.) साम्ना तामावर्जयितुमप्रभवन् सम्प्रति भेदोपायं प्रयुङ्क्ते–कथं द्रक्ष्यति ॥ १२ ॥

मां कृत्वा कृपया दासं लक्ष्मीमेनावमाप्नुहि ।
दास्यामि राज्यं रत्नानि[4] जनकायापि जानकि ॥ १३ ॥

(भा.दी.) मामिति । मां कृपया मयि विद्यमानदयया दासं कृत्वा, भर्तारं कृत्वेत्यर्थः, त्वं एनां लक्ष्मीं सम्पदं अवाप्नुहि ।आपॢ् व्याप्तौ लोट् । हे जानकि, तव पित्रे जनकायापि राज्यं तत्, रत्नानि च दास्यामि ॥ १३ ॥

(सं.चं.) अथ तृतीयेन दानोपायेन सान्त्वयितुं प्रयतते–मां कृत्वेति । दास्यामीति च ॥ १३ ॥

एवं विलोभयन्तं तं कुपिता सा पतिव्रता ।
तृणमन्तरतः कृत्वा युक्तमुक्तवती शनैः ॥ १४ ॥

---

१. **'लस त्वम्'**

२. **'लड विलासे'** इति पाणिनीयाः । ते लडयोरभेदेन कथञ्चिन्निर्वाहयन्ति ।

३. **'तापसं हित्वा'**

४. **'राज्यरत्नानि '**

(भा.दी.) एवमिति । एवं विलोभयन्तं वञ्चयन्तं तं रावणं प्रति कुपिता पतिव्रता सा सीता तृणं तत् अन्तरतः मध्ये कृत्वा निक्षिप्य युक्तं न्याय्यं वचः शनैः उक्तवती ॥ १४ ॥

(सं.चं.) तृणमन्तरतः कृत्वा । साक्षान्मुखतः स न सम्भाषणीय इति । रामस्याग्रे स तृणोपम इति बोधयितुं च । 'तृणमन्तरतः कृत्वा प्रत्युवाच शुचिस्मिता'(२१.३) इति च ॥ १४–५ ॥

शूद्रेण ब्रह्मविद्येव खद्योतेनेव भानुभाः ।
त्वया रावण दुष्प्रापा रामस्याहं[१] प्रिया सती ॥ १५ ॥

(भा.दी.) शूद्रेणेति । शूद्रेण ब्रह्मविद्येव वेदविद्येव, खद्योतेन भानुभाइव सूर्यप्रभेव, हे रावण, त्वया श्रीरामस्य (प्रिया) भार्या सती पतिव्रता अहं दुष्प्रापा प्राप्तुमशक्या ॥ १५ ॥

पुलस्त्यस्य कुले जातो न धर्म्मान्[२] वेद किं भवान् ।
परदारप्रसङ्गोऽयमङ्ग मङ्गलभङ्गदः[३] ॥ १६ ॥

(भा.दी.) पुलस्त्येति । पुलस्त्यस्य पुलस्त्यमुनेः कुलं गोत्रं तस्मिन् जातः भवान् धर्मान् न वेद किम्? विद ज्ञाने लट् । अङ्ग अङ्गशालिन्, अयं परस्य दारा भार्यास्तेषां प्रसङ्गः सङ्गमः, मङ्गलस्य ऐहिकामुष्मिकशुभस्य भङ्गदः नाशदः ॥ १६ ॥

(सं.चं.) अङ्ग रावण । 'सम्बोधने ननु प्याट् पाट् हे है भो अङ्ग हन्त च' इति च । मङ्गलस्य श्रेयसः भङ्गदः ॥ १६ ॥

तुभ्यं चेन्नाभ्यसूयामि[४] हितं तथ्यं[५] वदामि ते ।
रामाय मां प्रदायाऽशु कृपालुं तं प्रसादय[६] ॥ १७ ॥

(भा.दी.) तुभ्यमिति । अहं चेद् यदि तुभ्यं नाभ्यसूयामि असूयां न करोमि, तर्हि हितं तत्थ्यं वचः वदामि । श्रीरामाय आशु मां प्रदाय कृपालुं कृपाशीलं तं प्रसादय प्रसन्नीकुरु । षद्लृ विशरणगत्यवसादनेषु लोट् ॥ १७ ॥

---

१. 'राघवस्य प्रिया' २. 'न धर्मं वेद' ३. '–प्रसङ्गोऽयं जगन्मङ्गल–'
४. 'तुभ्यं नचाभ्यसूयामि' ५. 'हितं सत्यं वदामि' ६. 'तं क्षमापय'

(सं.चं.) नाभ्यसूयामि चेत् न दोषमुद्घाटयामि चेत् । 'गुणेषु दोषाविष्करणमसूया' इति काशिका । किं वृथा दोषाविष्करणेन । तदलमसूयित्वा । हितं तावच्छ्रुणु । यदिदानीं वदामि तत् तथ्यम् ॥ १७ ॥

यदीदानीं[१] न मन्येथाः मन्येथास्त्वमथाचिरात् ।
शरैर्विदीर्णहृदयो रामलक्ष्मणलक्षणैः ॥ १८ ॥

(भा.दी.) यदीति । यदि इदानीं न मन्येथाः न संवादं करोषि, अथ तर्हि अचिरात् त्वं रामश्च लक्ष्मणश्च तयोर्लक्षणं चिह्नं येषां ते तथोक्तास्तैः, तन्नामाङ्कितैरित्यर्थः, शरैः विदीर्णं हृदयं यस्य स तथा सन् मन्येथाः मदुक्तवचः सत्यमिति जानासि ॥ १८ ॥

(सं.चं.) रामलक्ष्मणयोः लक्षणं नाम मुद्रा वा येषु तैः शरैः । 'लक्षणं नाम्नि चिह्ने च' इति विश्वप्रकाशः । 'इषवो निष्पतयिष्यन्ति रामलक्ष्मणलक्षिताः' (२१.२५) इति च ॥ १८ ॥

अथापि चेदनङ्गस्ते निद्राविघ्नं[२] करिष्यति ।
रामस्त्वामप्रमेयाङ्गो[३] दीर्घनिद्रां प्रणेष्यति ॥ १९ ॥

(भा.दी.) अथापीति । अथापि परदारधर्षणस्यानर्थहेतुत्वेऽपि अनङ्गः कामः, (ते) निद्रायाः विघ्नस्तं (चेद् यदि) करिष्यति । तर्हि अप्रमेयं साकल्येन ज्ञातुमशक्यमङ्गं यस्य स तथोक्तः श्रीरामः त्वां दीर्घनिद्रां मरणमित्यर्थः, प्रणेष्यति प्रापयिष्यति ॥ १९ ॥

(सं.चं.) अप्रमेयमनश्वरमङ्गं शरीरं यस्य । कामोऽनङ्गः । रामोऽनश्वराङ्गः ॥ १९ ॥

राक्षसाधम ते वाचा जानकी न विलोभ्यते ।
काकस्य काकुस्वानेन राजहंसीव मानसी[४] ॥ २० ॥

(भा.दी.) राक्षसेति । हे राक्षसाधम रावण, (ते) तव वाचा जानकी न विलोभ्यते न वञ्च्यते । लुभ गार्ध्ये लट् । तत्कथमिव? काको वायसस्तस्य काकुः ध्वनिविकारविशेषयुक्तो यः स्वानः शब्दस्तेन मानसी

---

१. **'इदानीं रामगमनात् प्रागेव मदुक्तं यदि न मन्येथा न जानासि अथ कालान्तरे, रामगमनानन्तरं वा'** इति का.श्री. ।

२. **'निद्राभङ्गं करि–'** ३. **'अप्रमेपायङ्गः साकल्येन नाशरहितस्वरूपः । अनेन रामस्य रावणबाणहतिर्नास्तीति सूचिता'** इति का.श्री. ।

४. **'मानसी मानससरोभवा । 'तत्र भवः'** (अ.सू.४.३.५३) **इत्यण्'** इति का.श्री. ।

मानससरसि भवा राजहंसीव राजहंसस्य स्त्रीव । यथा काकेन स्वकीयमुग्धवचसा राजहंसी स्वभार्यात्वेन लोभयितुं न शक्यते विजातीयत्वेनासँह्यत्वादेवं त्वयाऽपि न लोभयितुं शक्याऽहमिति भावः ॥ २० ॥

(सं.चं.) काकुः भिन्नकण्ठोत्थः विकृतः स्वानः । काकुशब्दस्य स्त्रीलिङ्गत्वपक्षे काकुरूपः स्वानः । मानसे भवति विद्यत इति मानसी ॥ २०–२ ॥

ग्रामसिंहं यथा सिंहो गरुडः पन्नगं यथा ।
गजो यथाऽजं हन्ता त्वामप्रयत्नेन राघवः ॥ २१ ॥

(भा.दी.) **ग्रामे**ति । ग्रामसिंहं शुनकं सिंहः यथा, पन्नगं सर्पं गरुडः यथा, अजं च्छागं गजः यथा तथा राघवः त्वां अप्रयत्नोऽनायासस्तेन हन्ता हनिष्यति । हन्तेर्लुट् ॥ २१ ॥

न नाशयामि शक्ताऽपि[1] त्वां नृशंसं दशानन ।
विना रामाज्ञया किन्तु त्वां हत्वा स भजेद् यशः ॥ २२ ॥

(भा.दी.) **ने**ति । हे दशानन, नृशंसं क्रूरकर्माणं त्वां शापः शापप्रदानं तेन, हन्तुं शक्ताऽपि, रामाज्ञया विना न नाशयामि । नश अदर्शने सतं लट् । एवं तर्हि नाशः कदाऽपि नास्तीति न मन्तव्यमित्याह– **किन्त्वि**ति । किन्तु सः श्रीरामः त्वां हत्वा यशः भजेत् प्राप्नुयात् ॥ २२ ॥

इमां च वाचमत्युष्णामश्रुधारां च सन्तताम् ।
विसृज्य सा सरोजाक्षी परिरेभे पतिं हृदा[2] ॥ २३ ॥

(भा.दी.) **इमामि**ति । सरोजवदक्षिणी यस्याः सा तथोक्ता, सा सीता, इमां वाचं (च) विसृज्य, सन्ततां अव्यवच्छिन्नां अत्युष्णां अश्रूणां या धारा तां च विसृज्य, पतिं श्रीरामं हृदा मनसा परिरेभे । स्मरणमात्रेण सर्वदुःखनाशकं श्रीरामं स्मृतवतीत्यर्थः । रेभृ शब्दे लिट्[3] ॥ २३ ॥

(सं.चं.) हृदा प्रीत्या हृदा मनसा पतिं रामं परिरेभे ॥ २३ ॥

---

१. **'न नाशयामि शापेन त्वाम्'** इति वि.ती.पाठ इति भाति । २. **'परिरेभे प्रभुं हृदा'**

३. **'रभ राभस्ये लिट्'** इति वक्तव्यम् । रेभतेस्तु लिटि **'परिरिरेभे'** इति रूपम्, **न 'परिरेभे'** इति । वक्ष्यति च तथैवोत्तरत्र ।

इत्युक्तः कोपवान्[१] क्रूरः क्रूरमाचष्ट राक्षसः ।
एवं चेत् प्रातराशं त्वां कुर्य्यां सूदजनैरिति ॥ २४ ॥

(भा.दी.) इतीति । इति सीतया उक्तः कोपोऽस्यास्तीति कोपवान् क्रूरः राक्षसः रावणः, हे सीते, त्वं एवं चेत्, मद्वचनं न करोषि चेत्, तर्हि त्वां प्रातराशः प्रातःकालीनाहारस्तं सूदाः पचनकर्तारो ये जनास्तैः कुर्याम्, सूदजनैस्त्वां घातयित्वा पाचयित्वा तेन मांसेन प्रातर्भोजनं करिष्य इति क्रूरं वचः आचष्ट ॥ २४ ॥

(सं.चं.) सामभेददानानि विफलान्यासन् । अथ निराशः सन् दण्डोपायं प्रयुङ्क्ते–एवं चेत् । प्रातराशं त्वाम् । 'द्वाभ्यामूर्ध्वं तु मासाभ्यां भर्तारं मामनिच्छतीम् । मम त्वां प्रातराशार्थे सूदाश्छेत्स्यन्ति खण्डशः' (२२.९-१०) इति च ॥ २४ ॥

सान्त्वयन्ति स्म[२] तन्वीं तामपाङ्गेन वराङ्गनाः ।
मयजा मैवमित्येनमाश्लिषत्[३] कुपितं पतिम् ॥ २५ ॥

(भा.दी.) सान्त्वयन्तीति । वराङ्गनाः त्रिजटाद्याः उत्तमराक्षस्यः तन्वीं स्त्रियं तां अपाङ्गो नेत्रान्तस्तेन सान्त्वयन्ति स्म । रावणस्य पुरतः सान्त्ववचनस्य वक्तुमशक्यत्वात् कटाक्षसूचनेन त्वया भीर्न कार्या रावणस्त्वां न हनिष्यतीत्यादिरूपेणासान्त्वयन् । षान्त्व सामप्रयोगे लट् । मयजा मयपुत्री मण्डोदरी एवं क्रूरं वचः माऽस्तु इति वदन्ती सती कुपितं पतिं आश्लिषत् । श्लिष आलिङ्गने लुङ् ॥ २५ ॥

(सं.चं.) सान्वयन्ति स्म । रावणेन सहाऽगता वराङ्गनाः । 'ओष्ठप्रकारैरपरा नेत्रैर्वक्त्रैस्तथाऽपराः । सीतामाश्वासयामासुस्तर्जितां तेन रक्षसा' (२२.११) इति च । मयजा मण्डोदरी मैवं कार्षीरित्येनं रावणं निवार्य कुपितं सान्त्वयितुमाश्लिक्षत् उपजुगूह । 'श्लिष आलिङ्गने' (अ.सू.३.१.४६) इति श्लिषः प्राण्याश्लेषे च्लेः क्सः । क्वचित् 'आश्लिषत् कुपितं पतिम्' इत्येव पाठः । ननु रामायणविरुद्धमेतत् । तत्र हि रावणस्य कनिष्ठपत्नी धान्यमालिनी रावणमाश्लिष्य सान्त्वयामासेत्युच्यते–'उपगम्य ततः क्षिप्रं राक्षसी धान्यमालिनी । परिष्वज्य दशग्रीवमिदं वचनमब्रवीत् । मया क्रीड महाराज सीतया किं तवानया' (२२.३९-

---

१. **'इत्युक्तः क्रोधवान्'**

२. **'सान्त्वयन्तीव तन्वीं तामपाङ्गेन वराङ्गना' । 'मयजा मयपुत्री वराङ्गना प्रशस्तावयवा मण्डोदरी । 'नासिकोदरौष्ठजङ्घनदन्तकर्णशृङ्गाच्च' (अ.सू.४.१.५५) इति ङीष् । अपाङ्गेन कटाक्षेण तां तन्वीं सीतां सान्त्वयन्तीव कुपितं कोपयुक्तं पतिं रावणं मैवं भाषिष्ठाः इत्येवमुक्त्वा आश्लिषत् आलिङ्गितवती'** इति.का.श्री. ।

३. **'–माश्लिक्षत् कुपितं पतिम्'**

४०) इति । नूनं रामायणमपाठीः, किं मध्ये व्यरमः । आन्तं पठ । तथाहि काण्डान्ते हनुमद्वचनम्–'मैथिलीं हन्तुमारब्धः स्त्रीभिर्हाहाकृतं तदा । स्त्रीणां मध्यात् समुत्पत्य तस्य भार्या दुरात्मनः । वरा मण्डोदरी नाम तया स प्रतिषेधितः' (५८.७६-य) इति । परत्र वक्ष्यमाणमपि स्मरन् पण्डिताचार्यस्तमपि प्रसङ्गमत्रैव निबबन्ध । तथाचेदमुदितं भवति– तदा मण्डोदरी धान्यमालिनी चेत्युभे अपि रावणं सान्त्वयामासतुः । वाल्मीकिस्तु विक्षिप्यैकामेकत्राऽहापरामपरत्रेति । पण्डिताचार्यस्तु प्रधानमहिषीत्वात् केवलं मण्डोदरीमेवोल्लिलेखेति ॥ २५–६ ॥

वशीकर्त्तुं समादिश्य राक्षसीर्विकृताकृतीः ।
सामादिभिरुपायैस्तां विवेशान्तःपुरं खलः ॥ २६ ॥

(भा.दी.) वशीति । खलः रावणः विकृता एकहस्तत्वादिविकृता आकृतिः शरीरं यासां ताः तथा ताः राक्षसीः साम आदिर्येषां दानदण्डभेदानां ते तथोक्तास्तैः उपायैः (तां सीतां) वशीकर्तुं समादिश्य अन्तःपुरं तत् विवेश । विश प्रवेशने लिट् ॥ २६ ॥

निशाचर्य्योऽथ तामेकजटाहरिजटादिकाः[1] ।
पृथक्पृथक् सामपूर्वं दण्डगर्भं वचोऽब्रुवन्[2] ॥ २७ ॥

(भा.दी.) निशेति । अथ एकजटा च हरिजटा च ते आदी यासां तास्तथोक्ताः निशाचर्यः तां सीतां प्रति साम पूर्वं यस्य तत्तथोक्तम्, दण्ड एव गर्भो यस्य तत्तथोक्तं तत्, श्रवणतः सामरूपमभिप्रायतो दण्डनयुक्तमित्यर्थः, वचः पृथक्पृथक् अब्रुवन् ॥ २७ ॥

(सं.चं.) एकजटाहरिजटादयः । 'ततस्त्वेकजटा नाम राक्षसी वाक्यमब्रवीत्' (२३.५) इति, 'ततो हरिजटा नाम राक्षसी वाक्यमब्रवीत्' (२३.९) इति, 'अन्या तु विकटा नाम राक्षसी वाक्यमब्रवीत्' (२३.१४) इति, 'ततस्तां दुर्मुखी नाम राक्षसी वाक्यमब्रवीत्' (२३.१६) इति च ॥ २७ ॥

पुलस्त्यस्य मुनेः पौत्रो[3] वेदवेदाङ्गपारगः ।
प्रजापतिसमः सीते विश्वैश्वर्य्येण रावणः ॥ २८ ॥

---

१. '–जटाभूरिजटादिकाः' २. 'वचोऽवदन्' ३. 'पुलस्त्यस्य कुले जातो वेद–'

(भा.दी.) पुलस्त्येति । हे सीते, रावणः पुलस्त्यस्य मुनेः पौत्रः पुत्रपुत्रः, अनेन वरणीयत्वे कुलीनत्वं दर्शितम् । वेदाश्च वेदाङ्गानि व्याकरणादीनि च तेषां पारमन्तं गत इति तथोक्तः, अनेन वैदुष्यं दर्शितम् । विश्वं पूर्णं यदैश्वर्यं तेन प्रजापतिसमः चतुर्मुखसमः, अनेन वरणीयत्वोपयुक्तं परमैश्वर्यं दर्शितम् ॥ २८ ॥

(सं.चं.) विश्वं समग्रमैश्वर्यं तेन । विश्वस्य जगत ईश्वरत्वं वा । जगन्नाथत्वम् । तेन प्रजापतिसमः चतुर्मुखसमः, नारायणसमो वा । 'प्रजानां पालनाद् विष्णुः प्रजापतिरितीरितः' इति स्मरणात् ॥ २८–९ ॥

सन्त्यज्य निर्गुणं[१] रामं भज भद्रे दशाननम् ।
स्वयं कामयमानं तं न त्वं कामयसे कथम् ॥ २९ ॥

(भा.दी.) सन्त्यज्येति । हे भद्रे शोभने सीते, त्वं निर्गता गुणा ब्रह्मर्षिकुलोद्भवत्वादिगुणा यस्मात् स तथा तं श्रीरामं सन्त्यज्य दशाननं रावणं भज वरय । भज सेवायां लोट् । एतादृशमपि मत्पराङ्मुखं कथं वरयामीत्यत आह– स्वयमिति । स्वयं कामयमानं तं रावणं (त्वं) कथं न कामयसे नेच्छसि? कमु कान्तौ लट् ॥ २९ ॥

इति श्रुत्वाऽब्रवीद् बाला निर्गुणः सगुणोऽपि वा ।
राम एव पतिः[२] स्यान्मे कामं खादत मामिति ॥ ३० ॥

(भा.दी.) इतीति । बाला स्त्री भीता इति वचः श्रुत्वा, निर्गुणोऽपि वा सगुणोऽपि वा श्रीराम एव मे पतिः स्यात् । मां काम इच्छा यथा भवति तथा कामं खादत भक्षयत । खाद भक्षणे लोट् । इति अब्रवीत् ॥ ३० ॥

(सं.चं.) कामं खादत मामिति । 'न मानुषी राक्षसस्य भार्या भवितुमर्हति । कामं खादत मां सर्वा न करिष्यामि वो वचः' (२४.८) इति च ॥ ३० ॥

विनता विकटा चाश्वमुखी चण्डोदरी तथा ।
विघसाऽयोमुखी शूर्प्पणख्याद्या राक्षसस्त्रियः ॥ ३१ ॥

---

१. **'निर्गुणं ज्ञानित्वेश्वरत्वादिगुणरहितम्, दरिद्रमित्यर्थः'** इति का.श्री. । २. **'राम एव गतिः'**

विवृत्य नेत्रवक्त्राणि[१] समुद्यम्याऽयुधानि च ।
तां शिंशपामुपायन्तीं परिद्रुत्याभ्यभत्सयन् ॥ ३२ ॥

(भा.दी.) **विने**ति । विनता विनताख्यराक्षसी, विकटा अश्वमुखी, (तथा) चण्डोदरी च, विघसा, अयोमुखी, शूर्पणखी आद्या यासां तास्तथा राक्षसस्त्रियः, नेत्राणि च वक्त्राणि च विवृत्य विवृतं कृत्वा, आयुधानि च समुद्यम्य, शिंशपां काळागरुवृक्षं उपायान्तीं राक्षसीभत्सनस्य श्रोतुमशक्यतया राक्षसीनिकटाच्छिंशपा-वृक्षनिकटमुपागच्छन्तीं तां सीतां परिद्रुत्य अभ्यभत्सयन् अतर्जयन् । तर्ज भत्स सन्तर्जने लङ् । 'सा भत्स्यमाना भीमाभी राक्षसीभिर्वरानना । सा बाष्पमवमार्जन्ती शिंशपां तामुपागमत् । ततस्तां शिंशपां सीता राक्षसीभिः समावृता । अभिगम्य विशालाक्षी तस्थौ शोकपरिप्लुता' (सुं.कां.२४.१७–८) इत्यादि रामायण-श्लोकानां सङ्ग्रहणपरोऽयं श्लोकः ॥ ३१–२ ॥

(सं.चं.) विनतेत्यादि । 'ततस्तु विनता नाम राक्षसी भीमदर्शना' (२४.२०) इति, 'अन्या तु विकटा नाम लम्बमानपयोधरा' (२४.२८) इति, 'ततश्चण्डोदरी नाम राक्षसी क्रूरदर्शना' (२४.३८) इति, 'ततस्तु विघसा नाम राक्षसी वाक्यमब्रवीत्' (२४.४१) इति, 'ततस्त्वयोमुखी नाम राक्षसी वाक्यमब्रवीत्' (२४.४३) इति, 'ततः शूर्पणखा नाम राक्षसी वाक्यमब्रवीत्' (२४.४५) इति च । अश्वमुखी सम्प्रति रामायणे न पठ्यते । विघसां च प्रघसां पठन्ति । अयोमुखीं चाजामुखीम् । अभि अभीक्ष्णम्भत्सयन् ॥ ३१–२ ॥

न चेद् रावणभार्य्या स्या विदार्य्याङ्गानि तेऽधुना ।
खादङ्खादं प्रनृत्यामः पायम्पायं सुरामिति[२] ॥ ३३ ॥

(भा.दी.) भत्सनप्रकारं दर्शयति– **न चेदि**ति । चेद्यदि रावणभार्या न स्याः न भवसि । अस्तेर्लिङ् । तर्हि अधुना ते तव अङ्गानि अवयवान् विदार्य खादङ्खादं खादित्वाखादित्वा सुरां पायम्पायं पीत्वापीत्वा प्रनृत्यामः । नृती गात्रविक्षेपे लट् ॥ ३३ ॥

(सं.चं.) इत्यभत्सयन् ॥ ३३–४ ॥

---

१. **'नेत्रे वक्त्राणि'**

२. **'सुरामिमाम्' । खादङ्खादम्, खादित्वाखादित्वा सुरापानसमये उपदंशीकृत्वेत्यर्थः । सुरां पायम्पायम् । पीत्वापीत्वा । 'आभीक्ष्ण्ये णमुल् च' (अ.सू.३.४.४२) इति णमुल् । 'नित्यवीप्सयोः' (८.१.४) इति द्वित्वम्'** इति का.श्री. । स्फुटं वार्तिकं चात्र भवति– **'आभीक्ष्ण्ये द्वे भवत इति वक्तव्यम्'** (८.१.१२) इति ।

इत्यादि राक्षसीभिः सा मायासीता प्रभत्सिता ।
रुरोद सुस्वरं नाथ हा राम[१] क्व भवानिति ॥ ३४ ॥

(भा.दी.) इतीति । राक्षसीभिः इति एवंप्रकार आदिर्यथा भवति तथा इत्यादि, प्रभत्सिता सन्तर्जिता सा मायासीता च्छलसीता, सीताप्रतिकृतिरित्यर्थः, हे नाथ स्वामिन्, हे राम, भवान् क्व कुत्र तिष्ठति इति सु सम्यक् स्वरो यथा भवति तथा सुस्वरं रुरोद । रुदिर् अश्रुविमोचने लिट् ॥ ३४ ॥

विलापं विदधे चित्रं सीताप्रतिकृतिर्हि सा ।
यत्र सामग्र्यमगमत् त्रिलोक्यां करुणो रसः[२] ॥ ३५ ॥

(भा.दी.) विलापमिति । सा सीताप्रतिकृतिः सीताप्रतिबिम्बम्, चित्रं नानाविधं विलापः परिदेवनं तं विदधे हि चक्रे हि । डु धाञ् धारणपोषणयोर्लिट् । यत्र सीताविलापे त्रिलोक्यां विद्यमानः करुणः कृपास्पदीभूतः रवः ध्वनिः समग्रस्य भावः सामग्र्यं पूर्णत्वं तत् अगमत् । त्रिलोक्यां क्रियमाणः करुणास्पदीभूतो विलापः केनाप्येवं न कृत इत्यर्थः ॥ ३५ ॥

(सं.चं.) यत्र सीताविलापे करुणो रसः सामग्र्यं परिपूर्णतामगमत् । सेयं करुणरसस्य परा काष्ठा ॥ ३५–६ ॥

श्रुत्वा विलापं तस्यास्तं रावणाय निवेद्य च ।
राक्षस्यो भक्षयिष्यामस्त्वामित्यभ्यापतन्निमाम्[३] ॥ ३६ ॥

(भा.दी.) श्रुत्वेति । राक्षस्यः तस्यास्तं विलापं श्रुत्वा, रावणाय निवेद्य च, एवं विलापं करोतीति विज्ञाप्य च, त्वां भक्षयिष्यामः, भक्ष अदने लृट्, इति वदन्त्यः सत्यः, इमां सीतां अभ्यापतन् अभ्यागच्छन् ॥३६॥

तत्रैव त्रिजटा नाम शुद्धभावा[४] निशाचरी ।
शयाना शयने वृद्धा गामुदारामुदाहरत् ॥ ३७ ॥

---

१. **'हे राम'** इति वि.ती.पाठः स्यात् ।
२. **'करुणो रवः'** इति वि.ती.पाठः । **'करुणारसः'** इति च ।
३. **'–मित्यभ्यपतन्निमाम्'**
३. **'शुद्धभावा पिङ्गलाख्याप्सरःस्त्रीत्वादिति भावः'** इति का.श्री. ।

(भा.दी.) तत्रेति । तत्रैव राक्षसस्त्रीणां मध्य एव, शयनं पर्यङ्कस्तस्मिन् शयाना त्रिजटा नाम त्रिजटा इति प्रसिद्धा, शुद्धो भावः स्वभावः यस्याः सा तथा वृद्धा निशाचरी, उदारां श्रेष्ठां गां वाचं उदाहरत् उवाच । हृञ् हरणे लङ् ॥ ३७ ॥

(सं.चं.) शयाना शयने । तदात्व एव प्रबुद्धा स्वप्नदृष्टार्थकथनोत्सुका त्रिजटा । इयं विभीषणपुत्रीति वदन्ति । नेदं ग्रन्थकृत्सम्मतमिति भाति । 'एकस्त्वास्ते विभीषणः' इत्युपरि वचनं च तदेव समर्थयते । 'एकस्तत्र मया दृष्टः श्वेतच्छत्रो विभीषणः' (२७.३२) इति च रामायणे । अन्यथा पिता मम इत्येवावक्ष्यत् ॥ ३७ ॥

आत्मानं खादतानार्य्या न सीतां[१] साधुसम्मताम् ।
नेयं शोच्या मम स्वप्नदर्शनं तन्निदर्शनम् ॥ ३८ ॥

(भा.दी.) आत्मानमिति । हे अनार्याः हे राक्षसस्त्रियः, आत्मानं मां खादत भक्षयत । खाद भक्षणे लोट्, साधुसम्मतां सीतां न खादत । इयं सीता शोच्या न । तन्निदर्शनं तस्मिन् दृष्टान्तः मम स्वप्नस्य स्वप्नार्थस्य दर्शनम् ॥ ३८ ॥

(सं.चं.) आत्मानम् । स्वात्मानमेव खादत स्वशरीरम् । 'आत्मानं खादतानार्या न सीतां भक्षयिष्यथ । जनकस्य सुतामिष्टां स्नुषां दशरथस्य च । स्वप्नो ह्यद्य मया दृष्टो दारुणो रोमहर्षणः । राक्षसानामभावाय भर्तुरस्या भवाय च' (२७.५-६) इतिच ॥ ३८-९ ॥

इत्थं वदन्तीं त्रिजटां राक्षस्यः पर्य्यवारयन् ।
भीताः[२] सन्त्यज्य तां तन्वीं स्वप्नं ब्रूहीति चाब्रुवन् ॥ ३९ ॥

(भा.दी.) इत्थमिति । राक्षस्यः भीताः सत्यः, तन्वीं तां सीतां सन्त्यज्य, इत्थं वदन्तीं त्रिजटां पर्यवारयन् । दृष्टो यः स्वप्नस्तं ब्रूहि इति (च) अब्रुवन् ॥ ३९ ॥

रामायाञ्जलिमाबद्ध्य त्रिजटा वाक्यमब्रवीत् ।
अदर्शि राघवः क्षोणीं सङ्गसन् रुधिरं पिबन् ॥ ४० ॥

---

१. **'न स्त्रीं ताम्'**

२. **'त्रस्ताः सन्त्यज्य'** इति, **'भीतां सन्त्यज्य '** इति च ।

(भा.दी.) रामायेति । त्रिजटा श्रीरामाय अञ्जलिः संहतहस्तस्तं आबध्य, श्रीराघवः क्षोणीं भुवं सङ्ग्रसन् रुधिरं रक्तं तत् पिबन् अदर्शि इति वाक्यं वचस्तत् अब्रवीत् ॥ ४० ॥

(सं.चं.) रावणपालितां क्षोणीं ग्रसन् । रक्षसां रुधिरं पिबन् । नेदं रामायणे पठ्यते ॥ ४० ॥

सोऽद्ध्यास्त शिबिकां[1] दान्तीं हन्त हंससहस्रिणीम् ।
सानुजः सीतया देव्या मोदते पुष्पके पुनः ॥ ४१ ॥

(भा.दी.) स इति । सः श्रीरामः दन्तैर्निर्मिता दान्ती ताम्, गजदन्तविनिर्मितामित्यर्थः, हंसानां हंसपक्षिणां यत्सहस्रं तदस्या अस्तीति तथा तां शिबिकां अध्यास्त अध्यतिष्ठत् । पुनः सानुजः लक्ष्मणसहितः श्रीरामः देव्या सीतया सार्द्धं पुष्पकं पुष्पकविमानं तस्मिन् मोदते (हन्त) । मुद हर्षे लट् ॥ ४१ ॥

(सं.चं.) दान्तीं गजदन्तमयीम् । पुनः पुष्पके मोदत इति स्वप्नान्तरम् ॥ ४१–३ ॥

श्वेतमाल्याम्बरधरा श्वेताद्रौ[2] भाति जानकी ।
सागरेण परिक्षिप्ते[3] चन्द्रलेखेव सुन्दरी ॥ ४२ ॥

(भा.दी.) श्वेतेति । सागरेण परिक्षिप्ते परिवेष्टिते, श्वेतश्चासौ अद्रिश्च तस्मिन्, सुन्दरी जानकी, माल्यं पुष्पमाला तच्च अम्बरं वस्त्रं तच्च (श्वेते)शुक्ले ते धारयतीति तथा सती चन्द्रलेखेव चन्द्रकलेव भाति । भा दीप्तौ लट् ॥ ४२ ॥

चतुर्द्दन्तिनि दन्तीन्द्रे चन्द्रवर्ण्णे मया पुनः ।
रामः सलक्ष्मणो दृष्टः शुक्लमाल्याम्बरो वरः ॥ ४३ ॥

(भा.दी.) चतुरिति । चन्द्रस्य वर्ण इव वर्णो यस्मिन् स तथा तस्मिन्, चत्वारः दन्ता अस्य सन्तीति तथा तस्मिन्, दन्तिनां गजानामिन्द्रे श्रेष्ठे ऐरावते, माल्यं माला तच्च अम्बरं च शुक्ले माल्याम्बरे यस्य स तथा, वरः श्रेष्ठः, सलक्ष्मणः रामः मया पुनर्दृष्टः ॥ ४३ ॥

---

१. **'सोऽध्यास्ते शिबिकाम्'** इति, **'अध्यास्ते शिबिकाम्'** इति च । २. **'श्वेताद्रौ कैलासे'** इति का.श्री. ।

३. **'परिक्षिप्ता'** । **'सागरेण परिक्षिप्ता निरस्ता, समुद्रोत्पन्नेत्यर्थः, दार्ष्टान्तिके तु सागरेण सगरवंशोद्भवेन परिक्षिप्ता त्यक्तेत्यर्थः'** इति का.श्री. ।

प्रकाशमानमाकाशे गजेन्द्रे गजविक्रमम्[१] ।
रामं दृष्ट्वाऽन्वगात् सीता हंसी हंसमिवोत्प्लुता[२] ॥ ४४ ॥

(भा.दी.) प्रकाशेति । सीता आकाशो वियत्तस्मिन्, गजेन्द्रे प्रकाशमानम्, गजस्य विक्रम इव विक्रमो यस्य स तथा तं श्रीरामं दृष्ट्वा, हंसं राजहंसपक्षिणं दृष्ट्वा हंसीव राजहंसीव उत्प्लुता[३] सती अन्वगात् अन्वगच्छत् ॥ ४४ ॥

(सं.चं.) आकाशे प्रकाशमानं हंसं दृष्ट्वा उत्प्लुता उत्पतिता हंसीव ॥ ४४ ॥

कान्तस्याङ्कं ततः प्राप्ता सीतेयं प्रेक्षिता मया ।
स्पृशन्ती पाणिपद्माभ्यां दिवाकरनिशाकरौ ॥ ४५ ॥

(भा.दी.) कान्तस्येति । ततः इयं सीता मया प्रेक्षिता सती पाणी पद्मे इव ताभ्यां दिवाकरनिशाकरौ सूर्यचन्द्रौ स्पृशन्ती सती कान्तस्य भर्तुः श्रीरामस्य अङ्कं उरस्तं[४] प्राप्ता ॥ ४५ ॥

(सं.चं.) ततः कान्तस्याङ्कमुत्सङ्गं प्राप्ता दिवाकरनिशाकरौ स्पृशन्ती मया स्वप्ने प्रेक्षिता दृष्टा ॥ ४५ ॥

उपर्युपरि नो लङ्कां रामस्ताभ्यां सह स्थितः ।
याने श्वेतवृषैर्युक्ते श्वेताकल्पो न्यदर्शि सः ॥ ४६ ॥

(भा.दी.) उपरीति । श्वेता ये वृषा वृषभास्तैः युक्ते, यानं रथस्तस्मिन्, ताभ्यां सीतालक्ष्मणाभ्याम्, चन्द्र-सूर्याभ्यामिति वा, सह स्थितः सः श्रीरामः, श्वेत आकल्प आभरणं यस्य स तथा सन्, नः अस्माकं लङ्कां लङ्काया उपरि, 'उपर्यध्यधसः सामीप्ये' (अ.सू.८.१.७) इति द्वितीया, न्यदर्शि, मयेति शेषः ॥ ४६ ॥

(सं.चं.) नः लङ्कामुपर्युपरि। सामीप्ये वाच्ये वीप्सा। **'ಮೇಲಿಂದ ಮೇಲೆ'** इति भाषायाम्। अतो नात्रोपरिशब्द ऊर्ध्ववचनः, किन्तु देशतः कालतश्च सामीप्यवचनः । ताभ्यां सीतालक्ष्मणाभ्याम् । वृषैरष्टभिर्युक्ते रथे । 'पाण्डुरर्षभयुक्तेन रथेनाष्टयुजा स्वयम्' (२७.१७) इति च। श्वेताकल्पः शुक्लमाल्याम्बरधरः। न्यदर्शि नितरां स्फुटमदर्शि ॥ ४६ ॥

---

१. **'गजेन्द्रे राजविक्रमम्'**
२. **'हंसमिवाऽऽप्लुता'**
३. **'आप्लुता'**
४. **'अङ्कश्चिह्नेऽन्तिकोरसोः'** इति वैजयन्ती।

रावणः पतितो दृष्टः पुष्पकादधुना मया ।
कृष्यमाणः स्त्रिया नीचैर्म्मुण्डः कृष्णाम्बरो हसन् ॥ ४७ ॥

(भा.दी.) रावण इति । मया रावणः स्त्रिया नीचैः अधः कृष्यमाणः सन्, पुष्पकं पुष्पकविमानं तस्मात् अधुना पतितः दृष्टः । मुण्डः मुण्डितशिराः कृष्णं कृष्णवर्णमम्बरं यस्य स तथोक्तः दृष्टः । हसंश्च दृष्टः ॥ ४७ ॥

(सं.चं.) रावणः । 'विमानात् पुष्पकादद्य रावणः पतितः क्षितौ । कृष्यमाणः स्त्रिया मुण्डो दृष्टः कृष्णाम्बरः पुनः' (२७.२३-४) इति च । मुण्डः मुण्डितमुण्डः ॥ ४७ ॥

रथेन खरयुक्तेन रक्तमाल्यानुलेपनः ।
याति याम्यां दिशं तत्र प्रविष्टः कर्द्दमं ह्रदम्[१] ॥ ४८ ॥

(भा.दी.) रथेनेति । रावणः खरैर्गर्दभैर्युक्तस्तेन रथेन, माल्यं माला तच्च, 'माल्यं पुष्पे पुष्पदाम्नि' इति वैजयन्ती, अनुलेपनं गन्धस्तच्च, रक्ते माल्यानुलेपने यस्य स तथा सन्, याम्यां दिशं याति । यातेर्लट् । तत्र दक्षिणस्यां दिशि कर्दमः कर्दममयस्तम्, कर्दमह्रदमिति क्वचित् पाठः, ह्रदं प्रविष्टः ॥ ४८ ॥

(सं.चं.) याति । 'प्रस्थितो दक्षिणामाशां प्रविष्टः कर्दमं ह्रदम्' (२७.२९) इति च । 'प्रविष्टोऽकर्दमं ह्रदम्' इति रामायणपाठं पठन्ति केचिदर्वाचीना भ्रान्ताः ॥ ४८ ॥

रावणोऽयं वराहेण शिंशुमारेण शक्रजित् ।
उष्ट्रेण कुम्भकर्ण्णश्च याति[२] याम्यामथो दिशम् ॥ ४९ ॥

(भा.दी.) रावण इति । अथो अयं रावणः वराहेण याम्यां दक्षिणां दिशं याति, कोलवाहनः सन् यातीत्यर्थः, शक्रजित् शिंशुमारेण याम्यां दिशं याति । कुम्भकर्णश्च उष्ट्रेण क्रमेलकेन याम्यां यातीत्यन्वयः ॥ ४९ ॥

(सं.चं.) रावणोऽयम् । 'वराहेण दशग्रीवः शिंशुमारेण चेन्द्रजित् । उष्ट्रेण कुम्भकर्णश्च प्रयातो दक्षिणां दिशम्'(२७.३१-२) इति च । अर्वाचीनास्तु शिंशुमारं शिशुमारमाहुः । 'शिंशुमारस्त्वम्बुकपिः' इति यादवप्रकाशः । 'शिंशुमारोऽम्बुसम्भूतजन्तौ' इति विश्वप्रकाशः । उष्ट्रो महाग्रीवः ॥ ४९ ॥

---

१. **'कर्दमह्रदम्'** २. **'याता याम्यामहो दिशम्'**

खरयुक्तरथेनापि याम्यां याति दशाननः ।
राक्षस्यो राक्षसाश्चामी[१] रक्तवस्त्रा हसन्त्यहो ॥ ५० ॥

(भा.दी.) खरैरिति । दशाननः खरैर्गर्दभैः युक्तो यो रथस्तेनापि याम्यां दिशं याति । यातेर्लट् । राक्षस्यश्च रक्तं वस्त्रं यासां तास्तथा सत्यः हसन्ति । अमी राक्षसाश्च रक्तं वस्त्रं येषां ते तथोक्ता हसन्ति । हसे हसने लट् । अहो ॥ ५० ॥

(सं.चं.) 'अहो धिगर्थे शोके च करुणार्थविषादयोः' इति च । सर्वेऽप्यर्था अत्र यथासम्भवं विवक्षिताः। स्वप्ने वर्णमयी प्रायो भाषा भवति । शुक्लवर्णः शुभकरः । रक्तवर्णोऽनिष्टकारति सामान्यनियमः ॥ ५० ॥

तैलं पीत्वा प्रनृत्यन्ति गायन्त्यो राक्षसाङ्गनाः ।
गोमयह्रदगाः सर्वे लङ्केयं भस्मसादभूत् ॥ ५१ ॥

(भा.दी.) तैलमिति । राक्षसाङ्गनाः तैलं तिलस्नेहस्तत् पीत्वा गायन्त्यः सत्यः प्रनृत्यन्ति । नृती गात्रविक्षेपे लट् । सर्वे राक्षसाः गोमयोदकात्मको यो ह्रदस्तं गच्छन्तीति गोमयह्रदगाः दृष्टाः । इयं लङ्का भस्मसात् भस्मावशिष्टाऽभूत् ॥ ५१ ॥

(सं.चं.) तैलं पीत्वा । 'पीत्वा तैलं प्रनृत्ताश्च प्रहसन्त्यो महास्वनाः । लङ्कायां भस्मरूक्षायां सर्वा राक्षसयोषितः । कुम्भकर्णादयश्चेमे सर्वे राक्षसपुङ्गवाः । रक्तं निवसनं गृह्य प्रविष्टा गोमयह्रदम्' (२७.३९-४०) इति, 'लङ्का दृष्टा मया स्वप्ने रावणेनोभिरक्षिता । दग्धा रामस्य दूतेन वानरेण तपस्विना (३८) इति च ॥ ५१ ॥

श्वेतातपत्रः श्वेताद्रावेकस्त्वास्ते[२] विभीषणः ।
चतुर्भिः सचिवैः सार्द्धमेवं स्वप्नो मम त्वभूत् ॥ ५२ ॥

(भा.दी.) श्वेतेति । एकः विभीषणः चतुर्भिः सचिवैः सार्द्धं श्वेताद्रौ श्वेतमातपत्रं यस्य स तथा सन् आस्ते । मम एवं स्वप्नः अभूत् ॥ ५२ ॥

(सं.चं.) चतुर्भिः सचिवैः । 'अनलानिलसम्पातिहर्याख्यैः सचिवैर्निजैः' (यु.कां.३.४७) इति वक्ष्यति । रामायणे च–'चतुर्भिः सचिवैः सार्धं वैहायसमुपस्थितः' (२७.३५) इति ॥ ५२ ॥

---

१. **'राक्षस्यश्चापि नृत्यन्ति'** २. **'–वेक आस्ते'**

सम्पत्तिरस्ति सीताया विपत्तिर्निशिचारिणाम् ।
व्यक्तमेवंविधे स्वप्ने मा भत्सयत मैथिलीम् ॥ ५३ ॥

(भा.दी.) समिति । एवं विधा प्रकारा यस्य स तथा तस्मिन् स्वप्ने जाते सति, सीतायाः व्यक्तं यथा भवति तथा सम्पत्तिः सम्पत् अस्ति । निशि चर्तुं शीलमेषामस्तीति निशिचारिणस्तेषां विपत्तिः विपत् अस्ति । तस्मात् मैथिलीं मा भत्सयत मा सन्तर्जयत ॥ ५३ ॥

(सं.चं.) नष्टस्य पुनःप्राप्तियोगः सम्पत्तिः ॥ ५३ ॥

नाशोभनार्हा [1]भद्रेयं सीता सर्वाङ्गशोभना ।
प्रत्यागतं सूचयति काकोऽयं जानकीहितम्[2] ॥ ५४ ॥

(भा.दी.) नेति । सर्वाणि यान्यङ्गान्यवयवास्तैः शोभना, भद्रा इयं सीता, अशोभनममङ्गळं तस्य अर्हा योग्या न । अयं काकः जानक्याः हितमिष्टं पुरुषं प्रत्यागतं समीपगतं सूचयति ज्ञापयति । सूच पैशुन्ये लट् । प्रातः कालस्य समीपप्राप्तत्वात् तादृशध्वनिं करोतीत्यर्थः ॥ ५४ ॥

(सं.चं.) काकोऽयम् । 'पक्षी च शाखानिलयं प्रविष्टः पुनःपुनश्चोत्तमसान्त्ववादी' (२७-५३) इति च । 'पक्षी काकादिः' इति तिलककारः, शिरोमणिकारश्च । 'पक्षी पिङ्गलिका' इति भूषणकारः ॥ ५४–५ ॥

वदन्त्यामिति राक्षस्यां व्यलपच्छलमैथिली ।
हा राम राम नाथेति पालयेति पुनःपुनः ॥ ५५ ॥

(भा.दी.) वदन्त्यामिति । राक्षस्यां त्रिजटायां इति वदन्त्यां सत्याम्, च्छलमैथिली व्याजेन मैथिली, सीताप्रतिकृतिरित्यर्थः, हा राम इति, नाथ इति, पालय इति पुनःपुनः व्यलपत् विलापं चक्रे । लप व्यक्तायां वाचि लङ् ॥ ५५ ॥

वामैः प्रियंवदैस्तस्या हस्तोरुनयनैरथ ।
शिरीषमालाकदळीनळिनाभैरकम्प्यत ॥ ५६ ॥

---

१. **'भद्रा मङ्गलस्वरूपा'** इति का.श्री. । २. **जानकीहितं सीतामनोरथम् । सीताहितं सीतापतिं राममिति वा'** इति का.श्री. ।

(भा.दी.) वामैरिति । अथ तस्याः सीतायाः प्रियं प्रीतिविषयमुदन्तं वदन्तीति प्रियंवदानि तैः, वामैः वामभागस्थैः, शिरीषाणां शिरीषपुष्पाणां माला सा च, कदळी च, नळिनं च, तेषां आभेव आभा कान्तिर्येषां तानि तथोक्तानि तैः, हस्तश्च ऊरुश्च नयनं च तैः अकम्प्यत अचाल्यत । कपि चलने लङ् ॥ ५६ ॥

(सं.चं.) वामैरपसव्यैः । शिरीषमालाभो हस्ताख्यो भुजदण्डः । कदळीकाण्डाभ ऊरुदण्डः । नळिनाभं नयनम् । वामभागस्फुरणं स्त्रीणां शुभदमिति शकुनज्ञाः । 'दृश्यते च स्फुरच्चक्षुः पद्मपत्रमिवाऽयतम् । ईषच्च हृषितो वाऽस्या दक्षिणाया अदक्षिणः । अकस्मादेव वैदेह्या बाहुरेकः प्रकम्पते । करेणुहस्तप्रतिमः सव्यश्चोरुरनुत्तमः । वेपमानः सचयति राघवं पुरतः स्थितम्' (२७.५०–५२) इति च । प्रियंवदैः । 'प्रियवशे वदः खच्' (अ.सू.३.२.३८) इति मुम् ॥ ५६ ॥

इमामवस्थामखिलां पश्यन् पवननन्दनः ।
चिन्तयामास बहुधा कार्य्यगौरवयन्त्रितः ॥ ५७ ॥

राक्षसीभिरविज्ञातः सीतां विश्वासयन्नहम् ।
संवदिष्य इति ह्यासां निद्रां प्रत्यैक्षत प्रभुः ॥ ५८ ॥

(भा.दी.) इमामिति । अखिलां इमामवस्थां सीतावस्थां पश्यन् पवननन्दनः हनुमान्, कार्याणां सीतासम्भाषणादिकार्याणां यद्गौरवं बाहुल्यम्, कार्यस्य महत्त्वमिति वा, रामनियुक्तकार्यबहुमानेनेति वा, तेन यन्त्रितः नियन्त्रितः सन्, (राक्षसीभिः अविज्ञातः सन्,) सीतां विश्वासयन् श्रीरामचरित्रवर्णनादिना रामभृत्योऽयमिति विश्वासमुपजनयन् सन्, अहं संवदिष्ये सीतया सम्भाषणं करिष्ये । वद व्यक्तायां वाचि लृट् । इति अनेनाभिप्रायेण प्रभुः सर्वसमर्थोऽपि हनुमान् आसां राक्षसीनां निद्रां प्रत्यैक्षत ॥ ५७–८ ॥

(सं.चं.) राक्षसैरविदिततया सीतायै रामसन्देशनिवेदनाख्येन कार्यगौरवेण नियन्त्रितः । संवदिष्ये । 'व्यक्तवाचां समुच्चारणे' (अ.सू.१.३.४८) इत्यात्मनेपदम् ॥ ५७–८ ॥

मानुषीमाशु मधुरां संस्कृतां श्रीतनुप्रियाम् ।
नीतिमान् हनुमान् वाचमुवाच विटपाश्रयः ॥ ५९ ॥

(भा.दी.) मानुषीमिति । विटपः आश्रयो यस्य स तथोक्तः, शिंशपाशाखामाश्रित्य स्थित इत्यर्थः, नीतिमान् हनुमान्, मधुरां मनोहराम्, संस्कृतां शब्दतोऽर्थतश्च मृष्टाम्, श्रियः लक्ष्म्याः तनुः सीता तस्याः प्रियाम्, मानुषसम्बन्धिनी मानुषी तां वाचं आशु उवाच ॥ ५९ ॥

(सं.चं.) श्रीतनुः सीताप्रतिकृतिः । शिंशपाविटपाश्रयः ॥ ५९-६० ॥

ईशो दाशरथिः श्रीमान् रामो राजीवलोचनः ।
निधिः सर्वगुणानां हि वारीणामिव वारिधिः ॥ ६० ॥

(भा.दी.) ईश इति । दाशरथिः श्रीरामः ईशः सर्वजगदीशः, श्रीमान् कान्तिमान्, राजीववल्लोचने यस्य सः, वारीणामुदकानां वारिधिरिव समुद्र इव सर्वे ये गुणा बलवीर्यादयः तेषां निधिराश्रयः ॥ ६० ॥

कान्तास्यः [१]पितृसन्देशात् कान्तारं स समाविशत्[२] ।
कान्तासक्तमनाः प्रायात् कान्ता तस्य च जानकी ॥ ६१ ॥

(भा.दी.) कान्तेति । कान्तं आस्यं मुखं यस्य स तथोक्तः सः श्रीरामः, पितृसन्देशः पितुराज्ञा तस्मात्, कान्तारं वनं तत् समाविशत् । तस्य श्रीरामस्य (कान्ता) भार्या जानकी च कान्ते भर्तरि आसक्तं मनो यस्याः सा तथा सती प्रायात् । श्रीरामेण सह वनं प्रत्यगच्छत् ॥ ६१ ॥

(सं.चं.) तस्य कान्ता च तेन सह कान्तारं प्रायात् । पादादियमकम् ॥ ६१–३ ॥

विचिन्वानस्य रामस्य रावणेन हृतां प्रियाम् ।
सलक्ष्मणस्य दूतोऽहं दृष्टवानस्मि तामिमाम् ॥ ६२ ॥

(भा.दी.) विचिन्वेति । रावणेन हृतां सीतां विचिन्वानस्य निमार्गयतः सलक्ष्मणस्य श्रीरामस्य प्रियां भार्यां तामिमां सीतां तस्य दूतः अहं दृष्टवान् अस्मि ॥ ६२ ॥

देवि त्वां देवदेवोऽसौ[३] देवरश्च तवानघे ।
कुशलं पृच्छतः प्रीतौ सत्यं दूतमुखेन हि ॥ ६३ ॥

(भा.दी.) देवीति । न विद्यते अघं पापं यस्यास्तत्सम्बुद्धिः, देवि सीते, त्वां देवः श्रीरामः, तव देवरः भर्तुरनुजो लक्ष्मणश्च, इति तौ श्रीरामलक्ष्मणौ कुशलं क्षेमं तत् दूतस्य यत् मुखं तेन, दूतद्वारेणेत्यर्थः, पृच्छतः, सत्यं यथार्थम् ॥ ६३ ॥

---

१. **'कान्तोऽस्याः'** २. **'कान्तारं सममाविशत्'** । **'लक्ष्मणेन समं कान्तारं वनमाविशत्'** इति का.श्री. ।

३. **'देवदेवोऽयम्'** । **'त्वामिति तौ देवो'** इति वि.ती.पाठः स्यात् ।

एवंवक्तारमेनं विटपिविटपसंसङ्गिनं मङ्गलाङ्गं
पिङ्गं सौदामनीवद् धवळनिवसनं पद्मरागारुणास्यम् ।
केशानुत्सार्य्य दोष्णा मुखविधुमशनैरुन्नमय्याऽकुलाक्षी
दृष्ट्वा रामस्य दूतं सरणरणिकया सा मृगाक्षी ददर्श ॥ ६४ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
सुन्दरकाण्डे चतुर्त्थः सर्ग्गः ॥

(भा.दी.) एवमिति । मृगस्य अक्षिणीइव अक्षिणी यस्याः सा तथोक्ता सा सीता, एवंवक्तारम्, विटपिनः शिंशपावृक्षस्य यो विटपः शाखा तस्या [१]आसङ्गोऽस्यास्तीति तथोक्तस्तम्, शिंशपावृक्षशाखावस्थितमित्यर्थः, मङ्गलानि शोभनानि अङ्गानि अवयवा यस्य स तथा तम्, सौदामनीवत् तटिद्वत् पिङ्गं पिङ्गवर्णम्, धवळं शुभ्रं निवसनं वस्त्रं यस्य स तथा तम्, पद्मरागवत् पद्मरागरत्नवदरुणं रक्तं आस्यं यस्य स तथा तम्, रामस्य दूतं हनुमन्तम्, दोर्हस्तस्तेन केशानुत्सार्य अपसार्य, मुखमेव विधुश्चन्द्रस्तं अशनैः शीघ्रं उन्नमय्य उद्धृत्य, आकुले दुःखव्याकुले अक्षिणी यस्याः सा तथा सती, रणरणिकाया सहिता सरणसरणिका तया, श्रीरामगुणकीर्तनपरः पुरुषः कोऽयमिति दर्शनोत्कण्ठयेत्यर्थः, दृष्ट्वा ददर्श ॥ ६४ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां
भावार्थदीपिकायां सुन्दरकाण्डे चतुर्थः सर्गः ॥

(सं.चं.) स्रग्धरया सर्गमुपसंहरति– एवम् । रामस्य दूतं मृगाक्षी सा सीता सरणरणिकया सोत्कण्ठया दृष्ट्वा ददर्श । कीदृशं रामस्य दूतम्? शिंशपाविटपिविटपे संसङ्गिनम् संसक्तम् । सुखेन शाख्यामासीनम् । 'समभेदे समीचीने सुष्ठुपूजासुखेषु च' इति यादवप्रकाशः । सौदमनीवद् विद्युद्वत् पिङ्गं पिशङ्गम् । कीदृशी सीता? दोष्णा केशानुत्सार्य, अशनैः सपदि रामकथाश्रवणाव्यवहितक्षण एव वृक्षाभिमुखं मुखमुन्नमय्य स्थिता । आकुलाक्षी सम्भ्रान्तनयना ॥ ६४ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां सुन्दरकाण्डे चतुर्थसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– २०५३+६४=२११७]

---

१. **'संसङ्गोऽस्यास्तीति'** इति पठनीयम् । अन्यथा **'विटिपिविटपासङ्गिनम्'** इति मूलपाठः स्यात् । तदा स्रग्धरा एकाक्षरन्यूना भवति । अथवा एकाक्षरन्यूना स्रग्धरेयमिति टीकाकृदाशयः स्यात् । तद् यथा तात्पर्यनिर्णये– **'सेत्युक्ता मन्थराऽऽसीत् तदनु कृतवत्येव चैतत् कुकर्म'** (५.२) इति, **'शैलेशं चित्रकूटं कतिपयदिनान्यत्र मोदन्नुवास'** (४) इति च ।

पञ्चमः सर्ग्गः

एवं प्रियंवदं दृष्ट्वा द्रुमाग्रे विद्रुमाननम् ।
तर्कयामास बहुधा तर्कज्ञा तनुमद्ध्यमा ॥ १ ॥

(भा.दी.) श्रीरामप्रिययाऽनन्तरं किमकारीत्यत आह– **एवमिति** । एवं प्रियं वदतीति प्रियंवदस्तम्, विद्रुमवत् प्रवाळवदाननं यस्य स तथा तं हनुमन्तम्, द्रुमस्य शिंशपावृक्षस्य यदग्रं तस्मिन् दृष्ट्वा, तर्कमूहं जानातीति तर्कज्ञा, ऊहविशारदेत्यर्थः, तनु सूक्ष्मं मध्यमं यस्याः सा तथोक्ता सा सीता बहुधा तर्कयामास ऊहितवती । तर्क ऊहायां लिट् ॥ १ ॥

(सं.चं.) देहस्य मध्ये भवं मध्यमम् । उदरमित्येतत् । तनूदरी । 'मध्यान्मः' (अ.सू.४.३.८) इति मः प्रत्ययः । तर्कज्ञा ऊहापोहपटुः । तर्कयामास ऊहाश्चक्रे ॥ १ ॥

[1]हनुमानवतीर्य्याऽथ विनीतो नीतिमत्तमः[2] ।
प्रश्रयावनतः प्रोचे प्राञ्जलिः कञ्जलोचनाम्[3] ॥ २ ॥

(भा.दी.) **हनुमानिति** । अथ अतिशयेन नीतिमान् नीतिमत्तमः हनुमान्, अवतीर्य वृक्षादवरुह्य विनीतः विनयवान् सन्, प्रश्रयेण स्वभक्त्यतिशयेन अवनतः नम्रः सन्, प्रकृष्ट अञ्जलिर्यस्य स तथा सन्, कञ्जवल्लोचने यस्यास्तां सीतां प्रति प्रोचे ॥ २ ॥

(सं.चं.) विनीतः विजितेन्द्रियः । प्रश्रयाय अनुनयाय, प्रश्रयेण वा, अवनतो नम्रः ॥ २ ॥

---

१. **'हनूमानव–'** २. **'नीतिसत्तमः'**

३. **'कञ्जलोचनां कमलनयनाम् । 'स्वाङ्गाच्चोपसर्जनात्–' (अ.सू.४.१.५४) इति प्राप्तस्य ङीषः 'न क्रोडादिबह्वचः'(५६) इति निषेधः'** इति का.श्री. ।

राक्षसीमद्ध्यमापन्ना का त्वं त्रैलोक्यसुन्दरी ।
कच्चिद् रामस्य पत्नी त्वं कच्चिन्नः सफलः श्रमः ॥ ३ ॥

(भा.दी.) राक्षसीति । त्रयश्च ते लोकाश्च त्रिलोकाः, त एव त्रैलोक्यम्, तस्मिन् सुन्दरी मनोहरा, राक्षसीनां यन्मध्यं तत् आपन्ना प्राप्ता त्वं का? त्वं श्रीरामस्य पत्नी कच्चित् भार्या किम्? नः श्रमः सफलः कच्चित् सप्रयोजनः किम्? ॥ ३ ॥

(सं.चं.) जानन्नप्यजानन्निव पृच्छति कार्यसिद्ध्यै– का त्वमिति ॥ ३-६ ॥

इत्युक्ता तरुणी सोचे विद्धि मां रामवल्लभाम् ।
स्नुषां दशरथस्याङ्ग जनकस्य सुतामिति ॥ ४ ॥

(भा.दी.) इतीति । इति उक्ता तरुणी सा सीता, हे अङ्ग, मां रामवल्लभां श्रीरामस्य प्रियां सीतां विद्धि । विद ज्ञाने लोट् । दशरथस्य स्नुषां पुत्रभार्यां विद्धि । जनकस्य सुतां विद्धि । इति ऊचे ॥ ४ ॥

मातर्लोकपिता रामः कुशलं त्वाऽनुपृच्छति[१] ।
प्राप्तो रामस्य दूतोऽहमिति मारुतिरब्रवीत् ॥ ५ ॥

(भा.दी.) मातरिति । हे मातः, लोकपिता श्रीरामः त्वा त्वां प्रति कुशलं क्षेमं तत् (अनु)पृच्छति विचारयति । पृच्छ जिज्ञासायां लट् । श्रीरामस्य दूतः अहं प्राप्तः अस्मि । इति मारुतिः अब्रवीत् ॥ ५ ॥

उपसृत्य ततस्तस्या हनुमान्[२] भक्तिमत्तमः[३] ।
चरणावरुणाब्जाभौ धन्योऽस्मीत्यभ्यवन्दत ॥ ६ ॥

(भा.दी.) उपसृत्येति । ततः अतिशयेन भक्तिमान् भक्तिमत्तमः हनुमान्, अरुणं यदब्जं तस्य आभेव आभा कान्तिः ययोस्तौ तथोक्तौ तस्याः चरणौ उपसृत्य, सीतासमीपं गत्वा, अहं धन्यः कृतकार्यत्वात् पुण्यवान् अस्मि इति एवमादि वदन् अभ्यवन्दत । वदि अभिवादनस्तुत्योर्लङ् ॥ ६ ॥

किञ्चित् ततोऽपसर्प्पन्ती प्रोचे सा हरिणेक्षणा ।
नूनं स रावणोऽसि त्वं हन्त रूपान्तरं गतः ॥ ७ ॥

---

१. 'त्वां नु पृच्छति' २. 'हनूमान्' ३. 'नीतिमत्तमः'

(भा.दी.) किञ्चिदिति । ततः हरिणस्य ईक्षणे इव ईक्षणे लोचने यस्याः सा तथोक्ता सा सीता, किञ्चित् अपसर्पन्ती, रावणः कपिर्भूत्वा वञ्चयतीत्याशङ्कया अपगच्छन्ती सती, त्वं अन्यद् रूपं रूपान्तरं तत्, कपिरूपमित्यर्थः, गतः प्राप्तः सः रावणः नूनम्, असि हन्त इति प्रोचे ॥ ७ ॥

(सं.चं.) नूनं स रावणः । 'स्वं परित्यज्य रूपं यः परिव्राजकरूपधृक् । जनस्थाने मया दृष्टस्त्वं स एव हि रावणः' (३४.१५) इति च ॥ ७–८ ॥

यदि रामस्य दूतोऽसि वद रामस्य लक्षणम् ।
वार्त्तां चाऽर्त्तिच्छिदं[1] तस्य पुण्यकीर्त्तेः प्रकीर्त्तय ॥ ८ ॥

(भा.दी.) यदीति । त्वं यदि श्रीरामस्य दूतः असि तर्हि रामस्य लक्षणमङ्गसम्पत् तत् वद । पुण्या पुण्यप्रदा कीर्तिर्यस्य स तथा श्रीरामस्य आर्तिं छिनत्तीत्यार्तिच्छित् तां वार्तां च प्रकीर्तय ॥ ८ ॥

आकर्ण्य जल्पितं[2] तस्या वाक्यज्ञो वाक्यमब्रवीत् ।
लक्षणं देवदेवस्य को वक्ताऽथापि सूच्यते ॥ ९ ॥

(भा.दी.) आकर्ण्येति । तस्याः कर्तरि षष्ठी, तयेत्यर्थः, यज्जल्पितं प्रोक्तं वचः तत् आकर्ण्य, तस्या जल्पितं वच इति वा, आकर्ण्य वाक्यं जानातीति वाक्यज्ञः, विवक्षितार्थप्रतिपादकवाक्यप्रयोगे चतुर इत्यर्थः, हनुमान् देवदेवस्य श्रीरामस्य लक्षणं तत् कः पुरुषः वक्ता साकल्येन प्रतिपादयिता? न कोऽपीत्यर्थः । अथापि वक्तुमशक्यत्वेऽपि सूच्यते लेशतः कथ्यते । सूच पैशुन्ये लट् । इति वाक्यं वचस्तत् अब्रवीत् ॥ ९ ॥

(सं.चं.) जल्पितं वचनम् । सूच्यते किञ्चिदुच्यते । अथापि सुष्ठु उच्यते ॥ ९ ॥

[3]क्षमा क्षमां रविस्तेजः कामः कान्तिं वृषा यशः ।
अन्ये चान्यान् गुणान् देवाः शिक्षन्ते प्रेक्ष्य राघवे ॥ १० ॥

(भा.दी.) क्षमामिति । 'क्षमा भूमिः क्षमां क्षान्तिं राघवे प्रेक्ष्य शिक्षते' इति यथायोग्यं सर्वत्रान्वयः । रविः तेजस्तत् राघवे प्रेक्ष्य शिक्षते । कामः कान्तिं शोभाम्, 'कान्तिः शोभाभिकामयोः' इति वैजयन्ती, राघवे

---

१. **'चार्तिभिदाम्'** इति, **'चार्त्तिच्छिदाम्'** इति च ।

२. **'आकर्ण्य वर्णितं तस्या–'**

३. **'क्षमां क्षमा'** इति वि.ती.पाठः ।

प्रेक्ष्य शिक्षते । वृषा इन्द्रः, 'वृषा हरिहयः प्राचीनबर्हिः स्मृतः' इति हलायुधः । यशः राघवे प्रेक्ष्य शिक्षते । अन्ये च देवा वस्वादयः अन्यान् बलादिगुणान् राघवे प्रेक्ष्य शिक्षन्ते । शिक्ष विद्योपादाने लट् ॥ १० ॥

(सं.चं.) राघवे गतां क्षमां प्रेक्ष्य क्षमा भूमिः क्षमागुणं शिक्षत इत्यादि । 'तेजसाऽऽदित्यसङ्काशः क्षमया पृथिवीसमः । बृहस्पतिसमो बुद्ध्या यशसा वासवोपमः' (३५.९) इति च । वृषा इन्द्रः ॥ १० ॥

रामो हरिन्मणिश्यामः पद्माक्षः सिंहविक्रमः ।
एवं लोकप्रवादोऽम्ब सत्यं तेऽनुपमः पतिः ॥ ११ ॥

(भा.दी.) राम इति । श्रीरामः हरिन्मणिवदिन्द्रनीलवच्छ्यामः, पद्मवदक्षिणी यस्य स तथोक्तः, सिंहस्य विक्रमइव विक्रमो यस्य स तथोक्तः, हे अम्ब मातः, 'अम्बार्थनद्योः–' (अ.सू.७.३.१०७) इति ह्रस्वः, सीते, ते पतिः श्रीरामः न विद्यते उपमा यस्य स तथोक्तः असदृश इत्यर्थः । एवं लोकानां जनानां प्रवादः प्रकथनं इदं च मद्वचः सत्यं तथ्यम् ॥ ११ ॥

(सं.चं.) हरिन्मणिश्याम इत्यादिनोपमानकथनं केवलं लोकप्रवादः । अनुपमस्ते पतिरिति तु सत्यम् ॥११॥

एकरूपो द्विशुक्लोऽसौ त्रिसमस्त्रिषु चोन्नतः ।
त्रिषु ताम्रस्त्रिषु स्निग्धस्त्रिवलिस्त्रिजगद्गुरुः ॥ १२ ॥

(भा.दी.) एकेति । त्रीणि यानि जगन्ति तेषां गुरुः असौ श्रीरामः एकं मुख्यं रूपं यस्य स तथोक्तः । 'एकः प्रधान उद्दिष्टः' इति वचनात् । सर्वत्रावतारादिषु भेदरहित इति वा । द्विशुक्लः द्वाभ्यां मातापितृपक्षाभ्यां शुक्लः शुद्धः । मातापितृवंशद्वयशुद्धिमानित्यर्थः । यद्वा शुद्धगन्धद्वयवान् कुसुमगन्धमधुगन्धवानित्यर्थः । 'कुसुमसमा गन्धेन ज्ञातव्या महीभुजो मनुजाः । मधुगन्धा बहुवित्ताः–' इति वचनात् । दन्तनयनयोर्विशेषेण शुक्लगुणयुक्त इति वा । असौ त्रिसमः त्रिभिः केशाग्रवृषणजानुभिः समः । 'केशाग्रं वृषणं जानु समं यस्य स भूपतिः' इति वचनात् । त्रीणि कुक्षिनाभिहृदयानि तेषु उन्नतः । 'उन्नतकुक्षिः क्षितिपः परिमण्डलोन्नतनाभयः क्षितिपाः । हृदयं नवेपनं पृथु समोन्नतं मांसलं च नृपतीनाम्' इति च । असौ त्रिषु हस्तपादतळनेत्रनखाख्येषु त्रिषु स्थलेषु ताम्रः रक्तवर्णः । 'रक्ताभिः सुखमाप्नोति कृष्णाभिर्दुःखितामियात्' इत्यादि च । असौ त्रिषु पादरेखालिङ्गमणिकेशाख्यस्थलेषु स्निग्धः । 'स्निग्धा स्यात् पादरेखेयं धनिनां व्यत्ययेन तु । दरिद्रत्वं परिज्ञेयम्' इति च,'स्निग्धोन्नतसममणयो धनवनिताविषयभोगभोक्तारः' इति च । 'स्निग्धनीलमृदुकुञ्चितास्तथा

मूर्धजाः सुखकराः समं शिरः' इति च । असौ त्रिवलिः तिस्रः वलयो यस्य स तथोक्तः, उदरे रेखात्रयवानित्यर्थः ॥ १२ ॥

(सं.चं.) अनन्तरूपोऽप्येकरूपोऽसौ । सर्वरूपेष्वभेदात् । सर्वोत्तमत्वाच्चैकरूपः । 'एकं रूपं बहुधा यः करोति', 'एको देवः सर्वभूतेषु गूढः' इत्याद्या श्रुतिः । 'द्विशुक्लवान्' (३५.२०) इति रामायणे । 'द्वौ शुद्धौ तु शुभौ शुक्लौ वंशौ मातुः पितुस्तथा' इति तिलककारादयः । 'द्वौ दन्तनेत्रे शुक्ले यस्य स द्विशुक्लवान्' इति भूषणकारः । अथच द्वयोः मूलरूपेऽवताररूपे च शुक्लः अस्पृष्टदोषलेशः द्विशुक्लः । एकरूपत्वात् । द्वयोः निग्रहेऽनुग्रहे च शुक्लः पक्षपातराहित्यात् । द्वयोरर्जने दाने च शुक्लः । अविहितक्रमवर्जनात् । द्वयोः शत्रौ मित्रे च शुक्लः समः । यथायोग्यं वर्तनात् । 'समः शत्रौ च मित्रे च' इति हि स्मरन्ति । 'त्रिसमस्त्रिषु चोन्नतः । त्रिताम्रस्त्रिषु च स्निग्धो गम्भीरस्त्रिषु नित्यशः । त्रिवलीमान्–' (३५.१७-८) इति च । त्रिष्ववयवेषु समः । 'केशाग्रं वृषणं जानु समं यस्य स भूपतिः' इति स्मरणात् । अथच सात्विकादिभेदेन त्रिविधेषु जीवेषु समः अपक्षपाती, यथायोग्यं फलदाता । त्रिषु लोकेषु समः समानतया व्याप्तः । त्रिषु वेदेषु समः समानतया मुख्यवृत्त्या प्रतिपाद्यः । त्रिषु कालेष्वपि समो निर्विकारः । त्रिषु चोन्नतः । 'नाभ्यन्तःकुक्षिवक्षोभिरुन्नतैः क्षितिपो भवेत्' इति स्मरणात् । अथच त्रिषु वेदेषु च उन्नतः सर्वोत्तमत्वेन स्तुतः । त्रिषु ताम्रः । त्रयो नेत्रान्तादयस्ताम्रा अरुणा यस्य स त्रिताम्रः । 'नेत्रान्तनखपाण्यङ्घ्रितळैस्ताम्रस्त्रिभिः सुखी' इति स्मरणात् । त्रिषु स्निग्धः । 'स्निग्धा भवति वै येषां पादरेखाः शिरोरुहाः । तथा लिङ्गमणिस्तेषां महाभाग्यं विनिर्दिशेत्' इति सामुद्रिकवचनम् । त्रिवलिरुदरे कण्ठे च रेखात्रयवान् । 'स्थिरा त्रिरेखा सुभगोपपन्ना स्निग्धा सुमांसोपचिता सुवृत्ता । न चातिदीर्घा चतुरङ्गुला च ग्रीवासु दीर्घा भवतीह धन्या' इति गर्गवचनम् ॥ १२ ॥

चतुष्कलश्चतुःकिष्कुश्चतूरेखश्चतुःसमः[1] ।
चतुर्गतिश्चतुर्दंष्ट्रो चतुर्वेदोदितः प्रभुः ॥ १३ ॥

पञ्चस्निग्धोऽष्टवंशोऽसौ[2] षड्गुणाढ्यः षडुन्नतः ।
सप्तेशोऽष्टाक्षराख्यानो[3] देवो नवनतो ध्रुवम्[4] ॥ १४ ॥

---

१. '–श्चतुर्लेखश्चतुःसमः'
२. '–स्निग्धोऽष्टवर्णोऽसौ' इति वि.ती.पाठः । '–स्निग्धोऽष्टर्जुरसौ' इति क्वचित् ।
३. '–ष्टाक्षराख्यातो–'
४. 'नवतनुर्ध्रुवम्'

(भा.दी.) चतुरिति । असौ श्रीरामः चतुष्कलः चतस्रः कला यस्य स तथोक्तः, चतुर्वेदज्ञापक-रेखा(युक्ता)ङ्गुष्ठमूल इत्यर्थः । 'मूलेऽङ्गुष्ठस्य वेदानां चतस्रस्तिस्र एव वा । एका द्वे वा यथायोगं रेखा ज्ञेया द्विजन्मनाम्' इति च । असौ चतुष्किष्कुः, चत्वारः किष्कवो यस्य स तथोक्तः । चतुर्विंशत्यङ्गुलः, किष्कुः, तादृशकिष्कुचतुष्टयपरिमाणवान् षण्णवत्यङ्गुलोच्छ्रय इत्यर्थः । असौ चतस्रः रेखा यस्य तथोक्तः, ललाटे रेखाचतुष्टयवानित्यर्थः । असौ चतुर्भिर्मानोन्मानसंहतिवर्णैः समः समानः । तत्र मानं नामाङ्गप्रत्यङ्ग-प्रमाणम् । पादादिशिरोन्तं यत्परिमाणं तदुन्मानमुच्यते । संहतिर्नामात्यन्तमङ्गानां संहननम् । अङ्गानां प्रत्यङ्गानां च सुस्थिरत्वम् । वर्णो नाम धूम्रादिवर्णराहित्यम्, एकप्रकारवर्णोपेतत्वमित्यर्थः । तथाच चतुःसम इति न्यूनाधिकभावरहितैः मानोन्मानसंहतिवर्णैः सहितः समः इत्युक्तं भवति । **चतुरि**ति । असौ श्रीरामः चतुर्णां सिंहव्याघ्रगजवृषभाणां गतिरिव गतिर्यस्य स तथोक्तः । असौ चतस्रः दम्ष्ट्राः प्रधानदन्ता यस्य स तथोक्तः । असौ चत्वारो ये वेदास्तैरुदितः प्रतिपादितः । पञ्चस्निग्धः वाग्वक्त्रनखरोमत्वच इति पञ्चसु स्थलेषु स्निग्धः कोमळः । त्वग्दन्तनेत्रपादकेशेषु स्निग्ध इति वा । असौ अष्टवर्णः अष्टसु स्थलेषु पृष्ठवंशशरीर-हस्तपादहस्ताङ्गुलिनासिकाचक्षुःकर्णेषु वर्णो विस्तारो यस्य स तथोक्तः । वर्ण वर्णक्रियाविस्तारगुणवचने-ष्विति धातुव्याख्यानात् । 'पृष्ठवंशः शरीरं च हस्तपादाङ्गुलिस्तथा । नासिका चक्षुषी कर्णावृजवो यस्य चाऽयताः । तस्य राज्यं विजानीयात्' इति च । असौ ऐश्वर्यादिषड्गुणैः आढ्यः सम्पन्नः । षट्सु कक्षकुक्षि-वक्षोघ्राणस्कन्धललाटिकासु उन्नतः । 'कक्षं कुक्षिश्च वक्षश्च घ्राणं स्कन्धो ललाटिका । सर्वभूतेषु निर्दिष्टा उन्नतास्तु शुभप्रदाः' इति वचनात् । असौ 'अमात्या मन्त्रिणो दूताः श्रेणयश्च पुरोहिताः । पुरं जनपदं चेति सप्त[१] प्रकृतयस्त्विमाः', इत्युक्तानां सप्तप्रकृतीनामीशः । सप्तलोकानामीश इति वा । असौ अष्टाक्षरः नारायणाष्टाक्षरमन्त्रः आख्यानं नाम यस्य स तथोक्तः, श्रीमदष्टाक्षरप्रतिपाद्य इत्यर्थः । देवः क्रीडादिगुणविशिष्टः असौ नवसु स्थानेषु नतः–'सूक्ष्माण्यङ्गुलिपर्वाणि केशरोमनखत्वचः । शेफश्च सूक्ष्मा येषां स्युस्ते नरा दीर्घजीविनः' इत्युक्तेः[२] । ध्रुवमसन्दिग्धम् ॥ १३–४ ॥

(सं.चं.) 'चतुष्कलश्चतुर्लेखश्चतुष्किष्कुश्चतुःसमः' (३५.१८) इति च । चतुष्कलः । चतस्रः कला वेदाः, सामुद्रिकप्रकरणत्वात् चतुर्वेदज्ञतासूचन्योऽङ्गुष्ठमूलरेखा यस्य स चतुष्कलः । 'मूलेऽङ्गुष्ठस्य वेदानां चतस्रस्तिस्र

१. **'सप्त प्रणिधयः स्मृताः'** इति मूलपाठ इत्युक्तम् । अत्र **'सप्तप्रकृतयः स्मृताः'** इति भागवततात्पर्यपाठ इति सर्वेऽपि व्याख्यातारो भ्रान्ताः । वि.भू.टीकायामप्येवम् । का.श्री. टीकायामपि । सप्तप्रकृतस्त्वन्यत्रोक्ताः–**'स्वाम्यमात्यश्च राष्ट्रं च दुर्गं कोशो बलं सुहृत् । परस्परोपकारीदं सप्ताङ्गं राज्यमुच्यते'** अत्र स्वामीति राजोच्यत इत्येके । पुरोहित इत्यन्ये । पुरोहितग्रहणे सप्तप्रकृतीशः सप्तेशः इति स्यात् । यद्यपि राज्यभ्रष्टः । अथापि वस्तुतः सर्वराज्येश इति ।

२. अपूर्णमिदं विवरणम् । श्लोके षण्णामेव नतानामुल्लेखात् । अत्र श्मश्रुदशनबुद्धयः पूरणीया इति रामायणव्याख्याने स्थितम् । का.श्री. टीकायामप्येवम् ।

एव वा । एका द्वे वा यथायोगं ज्ञेया रेखा द्विजन्मनाम्' इति नन्दिकेश्वरः । अथच इन्द्रियमनस्तपःकर्माख्याश्चतस्रः स्वरूपभूताः कला यस्य । चतुष्किष्कुः । चतुर्विंशत्यङ्गुलात्मको हस्तः किष्कुः । 'ಮೊಳ' इति भाषायम् । चत्वारः किष्कवो यस्य देहमानं स चतुष्किष्कुः षण्णवत्यङ्गुलोत्सेधः । 'षण्णवत्यङ्गुलो यस्तु न्यग्रोधपरिमण्डलः । सप्तपादश्चतुर्हस्तः' इत्यादिस्मरणात् । चतूरेखः । ललाटे चतूरेखायुक्तः । 'ललाटे यस्य दृश्यन्ते चतुस्त्रिव्येकरेखिकाः । शतद्वयं शतं षष्टिस्तस्याऽयुर्विंशतिस्तथा' इति कात्यायनः । अथ पादयोश्चतूरेखः । 'यस्य पादतळे वज्रध्वजशङ्खाङ्कु-शोपमाः । रेखाः सम्यक् प्रकाशन्ते मनुजेन्द्रं तमादिशेत्' इति नारदः । अथ पाणौ चतूरेखः । 'पाणौ चतस्रो रेखाश्च यस्य तिष्ठन्त्यभङ्गुराः' इति चान्यत्र । चतुःसमः । 'बाहुजानूरुगण्डाश्च चत्वार्यथ समानि च' इति ब्रह्माण्डे । द्वयोरेकप्रमाणत्वं साम्यम् । 'चतुर्दंष्ट्रश्चतुर्गतिः' (३५.१९) इति च । चतुर्णा सिंहशार्दूलगजवृषभाणां गतिरिव गतिरस्य । 'गजसिंहगती वीरौ शार्दूलवृषभोपमौ' (४८.२) इति बालकाण्डे । मोक्ष-स्वर्गनरकान्धन्तमआख्याश्चतस्रो गतयो यस्मादिति च । चतुर्दंष्ट्रः दन्तपङ्क्तिद्वयपार्श्ववर्तिन्यः चतस्रो दंष्ट्रा यस्य सः । 'सुतीक्ष्णदंष्ट्राः शुभाश्चतस्रः' इति ह्यामनन्ति । वराहसंहितायां च–'पञ्चस्निग्धोऽष्टवंशवान्' (३५.१९) इति, 'षडुन्नतो नवतनुः' (३५.२०) इति च । पञ्चस्निग्धः । पञ्चसु स्निग्धः । पञ्च स्निग्धा अवयवा यस्येति वा । वाग्- वक्त्र-नख-लोम-त्वचः पञ्च । केश-नेत्र-दन्त-त्वक्-पादतळानि वा पञ्चावयवा इति भूषणकारः । तथाह्याह– 'अत्र वररुचिः– 'चक्षुःस्नेहेन सौभाग्यं दन्तस्नेहेन भोजनम् । त्वचः स्नेहेन शयनं पादस्नेहेन वाहनम्' इति । 'स्निग्धनीलमृदुकुञ्चितास्तथा मूर्धजाः सुखकराः समं शिरः' इति मिहिरः' इति । पञ्चानां ज्ञानेन्द्रिया-णामन्तरङ्गाणां वा स्निग्ध इति च । अष्टवंशः । प्रशस्ताष्टवंशाख्यदीर्घावयववान् । 'बाहू च नलकावूरू जङ्घे चेत्यष्टवंशकाः' इति हि स्मरन्ति । नलकावङ्गुल्यावित्याहुः । अथच सामुद्रिकशास्त्रोक्ता आयताष्टावयवाः । तथाहि सामुद्रिकम्– 'पृष्ठवंशः शरीरं च हस्तपादाङ्गुली करौ । नासिका चक्षुषी कर्णौ प्रजनो यस्य चाऽयताः' इति । अथच 'देवगन्धर्वदानवाः । राक्षसाश्च पिशाचाश्च तिर्यङ्ग्मानुषतस्थुषः' इत्युक्ता अष्टौ जीववंशा अनेन सृष्टा इत्ययमष्टवंशः । 'ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः' इति षड्गुणाढ्यः । 'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा' इति च । षडुन्नतः । 'कक्षः कुक्षिश्च वक्षश्च घ्राणं स्कन्धो ललाटिका । सर्वभूतेषु निर्दिष्टा उन्नतास्तु सुखप्रदाः' इति वररुचिवचनम् । 'अमात्या मन्त्रिणो दूताः श्रेणयश्च पुरोहिताः । पुरं जनपदं चेति सप्त प्रणिधयः स्मृताः' इति सप्तानां प्रणिधीनामीशः । सप्तलोकानामीशः । सप्तच्छन्दसामीशः । ॐ नमो नारायणायेत्यष्टाक्षरमाख्यानं यस्य । नवनतः । नवसु नतः सूक्ष्मः । 'सूक्ष्माण्यङ्गुलिपर्वाणि केशरोमनखत्वचः । शेफश्च येषां सूक्ष्माणि

ते नरा दीर्घजीविनः' इति वररुचिनोक्ताः षट् । श्मश्रुबुद्धिदशनैः सह नवेति भूषणकारः । अथच नवभिः परिगताभिः स्वशक्तिभिर्विमलादिभिर्लीलया नतः । भिन्नाभिर्वस्तुतो नतः । नुवन्तीति नवाः वेदमन्त्रास्तैर्नतः स्तुतः ॥ १३–५ ॥

बिम्बोष्ठः कम्बुकण्ठोऽयं सुन्दरो दुन्दुभिस्वनः ।
गजराजगतिः स्वामी सोऽगण्यगुणवारिधिः ॥ १५ ॥

(भा.दी.) बिम्बेति । सोऽयं बिम्बवत् बिम्बफलवदोष्ठो[1] यस्य स तथोक्तः । कम्बुवच्छङ्खवत् त्रिरेखोपेतः कण्ठो यस्य स तथोक्तः । सोऽयं सुन्दरः, दुन्दुभेः स्वन इव स्वनो यस्य स तथोक्तः । सोऽयं गज-राजस्य गतिरिव गतिर्यस्य स तथोक्तः । सोऽयं स्वामी सर्वस्येशः । सोऽयं अगण्या ये गुणास्तैः वारिधिरिव वारिधिः ॥ १५ ॥

अनुरूपोऽनुजस्तस्य लक्ष्मणः शुभलक्षणः[2] ।
त्वां वनेषु विचिन्वानो देवरो देवि दूयते ॥ १६ ॥

(भा.दी.) अन्विति । अनुसृतं रूपं यस्य स तथोक्तः, श्रीरामरूपसदृशरूपवानित्यर्थः, तस्य अनुजः, शुभानि लक्षणानि यस्य स तथोक्तः, देवरः भर्तुरनुजः लक्ष्मणः, हे देवि, त्वां वनानि तेषु विचिन्वानः सन् निमार्गणः सन् दूयते परितप्यते ॥ १६ ॥

(सं.चं.) रामस्य अनुरूपं अनुगुणं वा रूपमस्येत्यनुरूपः । रामस्यानुजः । अत एव तव देवरः ॥ १६ ॥

ऋश्यमूकेऽभवत् ताभ्यां सङ्गमो मङ्गलाय नः[3] ।
मया सख्यं कृतं तत्र वानरेन्द्रनरेन्द्रयोः ॥ १७ ॥

(भा.दी.) ऋश्येति । ऋश्यमूकः ऋश्यमूकपर्वतस्तस्मिन् ताभ्यां श्रीरामलक्ष्मणाभ्यां सह नः अस्माकं मङ्गलं शुभं तस्मै सङ्गमः अभवत् । तत्र ऋश्यमूके मया वानरेन्द्रनरेन्द्रयोः सुग्रीवरामयोः सख्यं कृतम् ॥ १७ ॥

---

१. '**बिम्बपक्वदोष्ठौ**'

२. '**शुभलक्षणः 'एकरूपः–' इत्यादिषु यथासम्भवलक्षणयुक्तः तस्य रामस्य अनुरूपः सदृशरूपः । 'पश्चात्सादृश्ययोरनु' इत्यमर**' इति का.श्री. ।

३. '**मङ्गलायनः कल्याणसाधनमित्यर्थः । नोऽस्माकं मङ्गलायेति वा**' इति का.श्री. ।

(सं.चं.) मङ्गलाय नः क्षेमाय । 'मङ्गलायनः' इत्येकं वा पदम् । मङ्गलस्यायनः । मङ्गलमय्यतेऽनेनेति वा । मङ्गमाययतीति वा । नरेन्द्रवानरेन्द्रयोरिति वक्तव्यम् । अल्पाच्तरत्वात्, लघ्वक्षरत्वात्, अभ्यर्हितत्वाच्च । अथापि लोकदृष्ट्या वानरेन्द्रो राज्येऽभिषिक्त इति, वयसा च ज्यायानिति तस्य पूर्वप्रयोगः ॥ १७-९ ॥

सुग्रीवाय ददौ राज्यं रामो हत्वाऽथ वालिनम् ।
विचिन्वते चतुर्दिक्षु त्वां हरीन्द्रास्तदाज्ञया ॥ १८ ॥

(भा.दी.) **सुग्रीवे**ति । अथ श्रीरामः वालिनं हत्वा सुग्रीवाय राज्यं कपिराज्यं तत् ददौ । तदाज्ञया सुग्रीवाज्ञया हरीन्द्राः कपिश्रेष्ठाः चतस्रश्च ताः दिशश्च तासु त्वां विचिन्वते निमार्गयन्ति । चिञ् चयने लट् ॥ १८ ॥

प्रभञ्जनादञ्जनायां जातोऽहं हनुमान् हरिः[१] ।
तीर्णार्ण्णवो रामदूतः सत्यं प्राप्तोऽस्मि शोभने ॥ १९ ॥

(भा.दी.) **प्रभञ्जने**ति । प्रभञ्जनाद् वायोः अञ्जनायां जातः हनुमान् हनुमन्नामकः रामदूतः हरिः कपिः अहम्, तीर्णः अर्णवः येन स तथा सन्, हे शोभने, प्राप्तः अस्मि । इदं वचः सत्यम् ॥ १९ ॥

इत्युक्त्वा रामनामाङ्कं स[२] प्रादादङ्गुलीयकम् ।
जग्राह सानुरागं[३] तद् रामा राममिवाऽगतम् ॥ २० ॥

(भा.दी.) **इती**ति । इति उक्त्वा सः हनुमान्, श्रीरामस्य यन्नाम राम इति तस्याङ्को यस्मिन् तत्तथोक्तं तत्, अङ्गुलीयकं अङ्गुलिभूषणं प्रादात् । रामा स्त्री जानकी आगतं श्रीराममिव अनुरागेण भक्त्या सहितं यथा भवति तथा सानुरागम्, तत् जग्राह । ग्रह उपादाने लिट् ॥ २० ॥

(सं.चं.) स्वतः राममागतमिव तदङ्गुलीयकं जग्राह रामा सीता । 'गृहीत्वा प्रेक्षमाणा सा भर्तुः करविभूषणम् । भर्तारमिव सम्प्राप्तं जानकी मुदिताऽभवत्' (३६.४) इति च ॥ २०-१ ॥

प्रत्ययं प्राप्य सा प्रीता[४] प्रत्यभाषत मारुतिम् ।
वीरोऽसि रामदूतोऽसि प्राज्ञोऽसि त्वं हरीश्वर ॥ २१ ॥

---

१. **'हनूमान् प्रभुः'** । **'प्रभुः अर्णवलङ्घने समर्थः'** इति का.श्री. ।
२. **'सम्प्रादादङ्गुलीयकम्'**
३. **'साऽनुरागात् तम्'**
४. **'सा देवी'** इति वि.ती.पाठः । **'सा सीता'** इति कश्चित् ।

(भा.दी.) प्रत्ययमिति। सा देवी प्रत्ययो विश्वासस्तम्, हनुमदुक्तवचसि विश्वासमित्यर्थः, प्राप्य हे हरीश्वर, त्वं वीरः असि, रामदूतः असि, प्राज्ञः असि इति मारुतिं प्रति प्रत्यभाषत ॥ २१ ॥

कच्चित् पालयते लोकान् रामः सौमित्रिणा सह ।
कच्चिदेष्यति काकुत्स्थः कच्चिन्मां प्रतिनेष्यति ॥ २२ ॥

(भा.दी.) कच्चिदिति । श्रीरामः सौमित्रिणा सह लोकान् पालयते कच्चित् पालयति किम्? पा रक्षणे लट्[१] । काकुत्स्थः श्रीरामः एष्यति कच्चित् अत्राऽयास्यति किम्? इण् गतौ लृट् । मां प्रतिनेष्यति कच्चित् मां परावृत्य नेष्यति किम्? णीञ् प्रापणे लृट् ॥ २२ ॥

(सं.चं.) लोकानाश्रितलोकान्। आहो मां स्मरन् तदपि विस्मृतवान्। कच्चिदेष्यति सौमित्रिणा सह? आहो मामपि विस्मृतवान् ॥ २२ ॥

द्वादशे किल मासे मां घ्नन्त्येते दशमो ह्ययम् ।
विभीषणस्य कन्या मामनलेदं वचोऽब्रवीत्[२] ॥ २३ ॥

(भा.दी.) द्वादश इति । एते राक्षसाः द्व्यधिकानां दशानां पूरणो द्वादशस्तस्मिन् मासे मां घ्नन्ति किल। हन हिंसागत्योर्लट्। अयं मासः दशमो हि। श्रीरामवियोगानन्तरं नव मासा निवृत्ताः, इदानीं दशमः प्रवर्तत इत्यर्थः। द्वादशे मासे घ्नन्तीत्येतत्त्वया कुतोऽवगतमित्यत आह– विभीषणस्येति। विभीषणस्य कन्या पुत्री अनला अनलानाम्नी मा मां प्रति इदं वचः अब्रवीत् ॥ २३ ॥

(सं.चं.) विभीषणस्य कन्या माम् । 'ज्येष्ठा कन्याऽनला नाम विभीषणसुता कपे । तया ममैतदाख्यातं मात्रा प्रहितया स्वयम्' (३७.११), ज्येष्ठा कन्या 'नळा' इति प्रतृण्णामिति कश्चिद् मा रामायणपाठी भ्रमीदिति स्फुटं तन्नामाह 'अनलेदं वचोऽब्रवीत्' इति च ॥ २३-४ ॥

एवं ब्रुवन्ती[३] करुणं विलपन्ती शुकालपा ।
स्वामिन् राम प्रसीदेति प्ररुरोद पुनःपुनः ॥ २४ ॥

---

१. पाधातोर्णिचि पालयति, पालयते इति च रूपं भवति। अथापि **'पाल रक्षणे'** इत्यस्येदं रूपमिति साधीयो वचः।

२. **'कन्या मां नळा नामेदमब्रवीत्'** । इति, **'कन्या मामनला नामेदमब्रवीत्'** इति च क्वचित् । उभयमप्यसङ्गतम्। प्रथममर्थतः। द्वितीयं छन्दस्तः। **'नवा एकेनाक्षरेण'** इत्यादिश्छान्दसो नियमो न काव्येष्वन्वेति। **'–कन्यां मां बला नामेदमब्रवीत्'** इति का.श्री. पठति। तथाहि तद्व्याख्यानम्–**'बलानामा बलेति नाम यस्यास्तथोक्ता। नाम प्रसिद्धेति वा' इति।** इदमपि रायाणाननुगुणम्। **'कन्या माऽनला चेदं वचोऽब्रवीत्'** इति वि.ती.पाठः स्यात्।

३. **'ब्रुवाणा करुणम्'**

(भा.दी.) एवमिति । एवं ब्रुवन्ती, शुकवदालपतीति तथोक्ता सा सीता, करुणं कृपास्पदं यथा भवति तथा विलपन्ती सती । हे स्वामिन् श्रीराम, प्रसीद । षद्लृ विशरणगत्यवसादनेषु लोट् । इति पुनःपुनः प्ररुरोद । रुदिर् अश्रुविमोचने लिट् ॥ २४ ॥

[1]हनुमान् प्राञ्जलिः प्रोचे पादयोर्देवि ते शपे ।
क्षिप्रमेष्यति काकुत्स्थः सानुजः सकपिव्रजः ॥ २५ ॥

(भा.दी.) हनुमानिति । हनुमान्, प्रकृष्टः अञ्जलिर्यस्य स तथा सन्, हे देवि, ते तव पादौ चरणौ तयोः शपे । शप आक्रोशे लट् । काकुत्स्थः सानुजः सलक्ष्मणः सन्, कपीनां व्रजः समूहस्तेन सहितः सन्, क्षिप्रं यथा भवति तथा एष्यति आगमिष्यति । इण् गतौ लृट् । इति प्रोचे ॥ २५ ॥

(सं.चं.) प्रबद्धः अञ्जलिर्येन स प्राञ्जलिः पादयोस्ते शपे । 'ನಿನ್ನ ಪಾದದಾಣೆ' इति भाषायाम् ॥ २५ ॥

दशाननो रामबाणैर्दशान्तं द्रुतमेष्यति ।
निद्रावान् कुम्भकर्णोऽपि दीर्घनिद्रां[2] गमिष्यति ॥ २६ ॥

(भा.दी.) दशेति । दशाननः श्रीरामस्य ये बाणास्तैः दशान्तं मरणं तत् द्रुतं यथा भवति तथा एष्यति । निद्रा अस्याऽस्तीति निद्रावान् कुम्भकर्णोऽपि दीर्घनिद्रां मरणं गमिष्यति ॥ २६ ॥

(सं.चं.) दशानां बाल्यादीनामन्तो मृतिः ॥ २६ ॥

अपनेष्यत्यप्रियांस्ते रामस्त्वां नेष्यते द्रुतम्[3] ।
अथवाऽस्मिन् मुहूर्त्ते त्वां नयेयं रामसन्निधिम् ॥ २७ ॥

(भा.दी.) अपेति । श्रीरामः ते अप्रियान् राक्षसान् अपनेष्यति संहरिष्यति । त्वां द्रुतं नेष्यते आनेष्यति । अथवा अस्मिन् वर्तमाने मुहूर्तो मुहूर्तकालस्तस्मिन् श्रीरामस्य सन्निधिः समीपं तं नयेयं प्रापयेयम् ॥ २७ ॥

(सं.चं.) नेष्यते । उभयतोभाषोऽयं धातुः । एष हि तस्य स्वार्थ इत्यनेनाऽह । अस्मिन्नेव मुहूर्ते । इदानीमेव, विना विलम्बम् ॥ २७–८ ॥

---

१. **'हनूमान्'** २. **'दीर्घनिद्रां पुनः प्रबोधरहितनिद्राम् । मरणमिति यावत्'** इति का.श्री. ।

३. **'नेष्यति ध्रुवम्'** इति **'नेष्यति द्रुतम्'** इति च ।

इत्युक्तोवाच वामोरुः[१] कथं मां नेष्यसे कपे ।
अल्पस्त्वं राक्षसकुलाद् दुःसहादमरैरपि[२] ॥ २८ ॥

(भा.दी.) **इतीति** । वामौ मनोहरौ ऊरू यस्याः सा तथोक्ता सीता इति उक्ता सती, हे कपे, अल्पः अणुपरिमाणः त्वं अमरैरपि दुःसहं तस्मात् राक्षसानां यत्कुलं समूहस्तस्मात् कथं मां नेष्यसे इति उवाच ॥ २८ ॥

हसन् हनूमान् सङ्गृह्य रूपं [३]हेमाद्रिसन्निभम् ।
वज्रदंष्ट्रनखस्तां च ताम्रवक्त्रोऽभ्यभाषत ॥ २९ ॥

(भा.दी.) **हसन्निति** । हसन् मन्दहासं कुर्वन् हनूमान् माहेन्द्रस्य महेन्द्रपर्वतस्य सन्निभं समानं तत् रूपं सङ्गृह्य प्रकटीकृत्य, दंष्ट्राश्च नखाश्च दंष्ट्रनखाः वज्रसदृशास्ते यस्य स तथा सन्, ताम्रं वक्त्रं यस्य स तथा सन्, तां प्रति अभ्यभाषत ॥ २९ ॥

(सं.चं.) हेमाद्रिसन्निभं मेरुसन्निभम् ॥ २९-३३ ॥

उद्धरेयं धरामेनां क्षणेऽस्मिन्नब्धिमेखलाम्[४] ।
किमुताल्पीयसीं लङ्कां रामदासाग्रणीरहम् ॥ ३० ॥

(भा.दी.) **उदिति** । श्रीरामस्य ये दासा भृत्यास्तेषु अग्रणीः श्रेष्ठः अहं अब्धिः एव मेखला मेखलासूत्रमिव यस्याः सा तथा तां एनां धरां अस्मिन् वर्तमाने क्षणः क्षणकालस्तस्मिन् उद्धरेयम् । धृञ् धारणे लिङ् । अल्पीयसीं धरामण्डलादत्यल्पां लङ्कां उद्धरेयमिति किमुत? ॥ ३० ॥

तिष्ठ मातर्म्मुहूर्त्तं मे पृष्ठे मन्दरसुन्दरे ।
शतयोजनविस्तीर्ण्णे रामं प्रेक्षिष्यसेऽधुना ॥ ३१ ॥

(भा.दी.) **तिष्ठेति** । हे मातः सीते, मन्दरवत् सुन्दरं तस्मिन्, शतसङ्ख्याकानि योजनानि तैर्विस्तीर्णे मे पृष्ठे मुहूर्तो मुहूर्तकालस्तं तिष्ठ । अधुना श्रीरामं प्रेक्षिष्यसे ॥ ३१ ॥

---

१. **'वामोरूः'** इति सर्वत्र प्रचुरः पाठो लिपिकृत्प्रमादमूलः । औपम्ये गम्यमान एव ऊङ्प्रत्ययमाह पाणिनिः–**'ऊरूत्तरपदादौपम्ये '** (अ.सू.४.१.६९) । यथा– **करिकरोरूः, करभोरूः** । नात्रौपम्यं गम्यत इति **'वामोरुः'** इत्येव युक्तं रूपम् । यथा–'वृत्तोरुः' इति ।

२. **'–दमरैरिति'** ३. **'रूपं माहेन्द्रसन्निभम्'** इति वि.ती.पाठः । ४. **'युद्धे रवैर्धरामेनां क्षिणोम्यद्याब्धिमेखलाम्'** इति क्वचित् ।

इत्युक्तोवाच तन्वङ्गी जाने ज्ञानं बलं च ते ।
लङ्कां सपालां सञ्चूर्ण्य त्वं तु मां नेतुमीश्वरः ॥ ३२ ॥

(भा.दी.) इतीति । इति उक्ता तनु कोमलं अङ्गं यस्याः सा तथोक्ता सीता, अहं ते तव ज्ञानं तत् बलं तच्च जाने । ज्ञा अवबोधने लट् । त्वं पालयन्तीति पालाः लङ्कारक्षकास्तैः सहिता तां लङ्कां सञ्चूर्ण्य मां नेतुं ईश्वरः समर्थः, इति उवाचेति सम्बन्धः ॥ ३२ ॥

किन्तु कान्तस्य मे कीर्त्तिः स्याद् दशास्यनिसूदनात्[1] ।
स्वयं ममाप्याहरणात् कथं वा मन्यते भवान् ॥ ३३ ॥

(भा.दी.) किन्त्विति । किन्तु स्वयं स्वेन श्रीरामेण दशास्यस्य निसूदनं संहरणं तस्मात्, स्वयं मम आहरणमानयनं तस्मादपि मे कान्तस्य भर्तुः कीर्तिः स्यात् । भवान् कथं वा मन्यते? जानाति । मन ज्ञाने लट् ॥ ३३ ॥

एकान्ते मम कान्तेन[2] वायसस्याक्षितक्षणम् ।
मद्दर्शने वदाभिज्ञां प्रणामं च निवेदय ॥ ३४ ॥

(भा.दी.) एकेति । एकान्त एकान्तप्रदेशस्तस्मिन् मम कान्तेन भर्त्रा कृतं वायसः कुरङ्गनामककाकस्तस्य अक्ष्णस्तक्षणं विनाशस्तत् मम दर्शनं तस्मिन् अभिज्ञां अभिज्ञानं वद । प्रणामो मे नमस्कारस्तं च निवेदय विज्ञापय ॥ ३४ ॥

(सं.चं.) अक्ष्णः तक्षणं सामर्थ्यक्षपणम् । तक्षू तनूकरणे ॥ ३४-५ ॥

विश्वेश्वरो न चेदेनं रावणं मारयिष्यति ।
मासात् पूर्वमिहाऽगत्य प्राणांस्त्यक्ष्यामि मारुते ॥ ३५ ॥

(भा.दी.) विश्वेति । हे मारुते, विश्वेश्वरः श्रीरामः मासात् पूर्वं इह आगत्य एनं रावणं चेत् न मारयिष्यति न संहरिष्यति, मृङ् प्राणत्यागे लृट्, तर्हि प्राणान् त्यक्ष्यामि । त्यज विसर्गे लृट् ॥ ३५ ॥

---

१. **'–निषूदनात्'** इत्यपपाठः । **'कीर्तिर्दशास्याख्यस्य सूदनात्'** इति कचित् । २. **'मम कान्तस्य'**

कुशलं कुशलाऽपृच्छ[1] भ्रातरौ रामलक्ष्मणौ ।
सुग्रीवमपि सामात्यं पन्थानः सन्तु ते शिवाः ॥ ३६ ॥

(भा.दी.) कुशलमिति । हे कुशल हनुमन्, कुशलं क्षेमं तत् भ्रातरौ रामलक्ष्मणौ प्रति आपृच्छ विचारय । सामात्यं सुग्रीवमपि कुशलं आपृच्छ । ते पन्थानः गन्तुं मार्गाः शिवाः शोभनाः, बाधरहिता इत्यर्थः, सन्तु ॥ ३६ ॥

(सं.चं.) आरब्धकार्यनिर्वहणकुशल ॥ ३६ ॥

इत्युक्त्वा दिव्यमुद्दीप्रं[2] ददौ चूडामणिं सती ।
इमं देवाय देहीति चिह्नमैकान्तिकं निजम्[3] ॥ ३७ ॥

(भा.दी.) इतीति । सती सीता इति उक्त्वा, दिव्यम्, उद्दीप्रं उद्दीपनशीलम्, एकान्ते भव ऐकान्तिकस्तम्, चूडायां गूहितमित्यर्थः, निजं आत्मीयं चिह्नं चिह्नभूतं चूडामणिम्, इमं मणिं देवाय देहि, इति उक्त्वा ददौ ॥ ३७ ॥

(सं.चं.) दिव्यं देवलोकभवम् । नहि भूलोके निर्मितम् । सीताचूडामणिप्रतिकृतित्वात् । । उद्दीप्रं द्योतमानम् । 'नमि-कम्पि-स्मि-अजस-कम-हिंस-दीपो रः' (अ.सू.३.१.१६७) इति ताच्छील्ये रः । ऐकान्तिकमसाधारणं सीतादर्शनचिह्नम् । चूडामणिः शिरोधार्यो मणिमय आभरणविशेषः । '**ತುರುಬು**' इति भाषायाम् ॥ ३७ ॥

चूडामणिं तं सङ्गृह्य प्रणम्योवाच पावनिः ।
रावणारिं पतिं देवि त्वं द्रक्षस्यचिरादिति ॥ ३८ ॥

(भा.दी.) चूडेति । पवनस्यापत्यं पावनिः तं चूडामणिं सङ्गृह्य, प्रणम्य, हे देवि, त्वं रावणारिं पतिं अचिरात् शीघ्रेण द्रक्ष्यसि । दृशिर् प्रेक्षणे लृट् । इति उवाच ॥ ३८ ॥

(सं.चं.) सङ्गृह्य सादरं गृहीत्वा, सीतां प्रणम्य ॥ ३८ ॥

---

१. **'कुशलौ पृच्छ'** २. **'दिव्यमुद्दीप्तम्'**

३. **'ऐकान्तिकं नियतम् । असाधारणमिति यावत् । अध्यात्मादित्वात् ठञ्'** इति का.श्री. ।

पावनिः पर्वताकारः परिक्रम्य प्रणम्य ताम् ।
ततः स्थलान्तरं प्राप्य कार्य्यशेषमचिन्तयत् ॥ ३९ ॥

(भा.दी.) पावनिरिति । पर्वतस्य आकार इवाकारो यस्य स तथोक्तः, पवनस्यापत्यं पावनिः, तां सीतां परि-क्रम्य प्रदक्षिणीकृत्य, प्रणम्य, ततः स्थलात् अन्यत् स्थलं स्थलान्तरं प्राप्य, कार्यशेषः कार्यविशेषस्तं अचिन्त-यत् । चिति स्मृत्यां लङ् ॥ ३९ ॥

(सं.चं.) कार्यशेषम् । अवशिष्टं कर्तव्यम् ॥ ३९ ॥

स्वदूतस्य निलीनत्वं[१] न रामस्य यशस्करम् ।
तस्मादाविर्भवन् शत्रून् हत्वा स्यां राघवार्चकः ॥ ४० ॥

(भा.दी.) स्वेति । स्वस्य स्वतन्त्रस्य श्रीरामस्य दूतस्तस्य मम विलीनत्वं गूहितत्वम्, गूहितत्वेनाऽगम्य गूहितत्वेन गमनमिति यावत्, श्रीरामस्य यशस्करं कीर्तिकरं न, तस्मात् आविर्भवन् प्रकटीभवन् सन् शत्रून् हत्वा राघवार्चकः स्याम् ॥ ४० ॥

(सं.चं.) स्वस्य स्वीयस्य दूतस्य स्वो दूतः स्वदूतः ॥ ४०–१ ॥

इति सञ्चिन्त्य हनुमान् कोपयन् राक्षसेश्वरम् ।
वनं विनाशयामास[२] विना तं शिंशपातरुम्[३] ॥ ४१ ॥

---

१. **'विलीनत्वम्'** इति वि.ती.पाठः स्यात् ।

२. **'युद्धस्य कोपमूलकत्वेन राक्षसानां कोपसञ्जननाय वनं व्यनाशयदिति भावः'** इति का.श्री. ।

३. इतः परं क्वचित् सार्धं श्लोकचतुष्टयं पठ्यते–

'खर्जूरं तिन्त्रिणीं चाऽम्रं तिलकं बिल्वमर्जुनम् । अश्वत्थं चम्पकं चूतं जम्बुनिम्बकदम्बकान् ॥

'कपित्थबदरी(कदली)भूर्जतमालान् गुग्गुलान् वटान् । आमलकान् नारिकेलभल्लमल्लिकचन्दनान् ॥

'पनसागरुतालांश्च देवदार्वादिकान् द्रुमान् । नानापुष्पसुवल्लीभिर्युक्तांश्चानाशयत् कपिः ॥

'सरःकमलकल्हरान् करीव कमलेक्षणः । चाङ्गुल्या(लाङ्गूल)हस्तघातेन चोरसा(सः) ।

'लाङ्गूलेन पदाङ्गुल्या जानुना च हरीश्वरः॥

प्रतनैर्न कैरपि व्याख्यातम् । स्फुटं प्रक्षिप्तम् ।

(भा.दी.) इतीति । हनुमान् इति सञ्चिन्त्य, राक्षसेश्वरं रावणं कोपयन् सन्, तं सीताधिष्ठितं शिंशपातरुं विना वनं तत् विनाशयामास । णश अदर्शने लिट् ॥ ४१ ॥

निपात्योत्पत्य[1] सञ्छिद्य विदार्य्योन्मूल्य च द्रुमान् ।
मारुतिर्म्मारुतइव रावणोद्यानमक्षिणोत्[2] ॥ ४२ ॥

(भा.दी.) निपात्येति । मारुतिः मारुतस्यापत्यं स हनुमान् (द्रुमान्) निपात्य पातयित्वा, उत्पत्य उत्पातयित्वा[3], सञ्छिद्य द्विधाकृत्वा, विदार्य विभिद्य, उन्मूल्य च आमूलादुद्धृत्य च रावणोद्यानं तत् मारुत इव अक्षिणोत् व्यनाशयत् । क्षिणु हिंसायां लङ् ॥ ४२ ॥

(सं.चं.) 'इति सञ्चिन्त्य–' इत्यतः परम्– 'खर्जूरं तिन्त्रिणीम्–' इत्यादि सार्धं श्लोकचतुष्टयमपठित-रामायणैः प्रक्षिप्तम् । वनेषु किलैते प्रायो रोहन्ति । नोद्यानेषु रोपयन्ति । कमलेक्षणः कपिरिति चाप्रबुद्धं वचनम् । वृत्तपिङ्गाक्षा हि कपयो भवन्ति । न कमलाक्षाः । निपात्योत्पत्येत्यादि । वृक्षाद् वृक्षमुत्पत्य । कांश्चि-दुत्पाटनेन निपात्य, केषाञ्चिच्छाखाः सञ्छिद्य । कांश्चिदामूलं विदार्य । कांश्चिन्मूलमेवोत्पाट्य ॥ ४२ ॥

अघौघं रामनामेव पद्मषण्डमिव[4] द्विपः ।
तूलमग्निरिवाऽरामं रामदूतोऽक्षिणोत् क्षणात् ॥ ४३ ॥

(भा.दी.) अघेति । अघौघः पापसमूहस्तं रामनामेव, नळषण्डः शरस्तम्बविशेषाणां समूहस्तं द्विप इव गज इव, तूलं तदग्निरिव, आरामः उपवनं तं क्षणः क्षणकालस्तस्मात् (रामदूतः) अक्षिणोत् ॥ ४३ ॥

(सं.चं.) पद्मषण्डं पद्मवृन्दम् । नळषण्डमिति पाठे नळः नडः । बृहत्तृणविशेषः ॥ ४३ ॥

सिंहनादेन महता लङ्कामुत्कम्पयन् कपिः ।
[5]युद्धमद्भुतमन्विच्छन्नारुरोहाथ तोरणम् ॥ ४४ ॥

---

१. **'विभिद्योन्मूल्य'** २. **'–द्यानमाक्षिपत्'**

३. **'उच्चैः पतित्वा–'** इति वक्तुमुचितम् । अथवा **'निपात्योत्पात्य'** इति टीकाभिमतः पाठः स्यात् । अथापि–**'उत्पाटयित्वा'** इति **'उत्पाट्य'** इति वा पाठः स्यादिति भाति ।

४. **'नळषण्डमिव'** इति वि.ती.पाठः । ५. **'युद्धमुद्धतम-'** । **'उद्धतमुत्कृष्टं कष्टं क्रूरं वा'** इति का.श्री. ।

(भा.दी.) सिंहेति । अथ महता सिंहनादो वीरगर्जनं तेन लङ्कां उत्कम्पयन् चालयन्, अद्भुतं महत् तत् युद्धं अन्विच्छन् कपिः तोरणं तत् आरुरोह ॥ ४४ ॥

(सं.चं.) तोरणं पुरद्वारप्रासादम् ॥ ४४ ॥

उद्बुद्धास्तेन नादेन दृष्ट्वा तं पर्वतोपमम् ।
राक्षस्यश्चकिताः साम्ना मायासीतामथाब्रुवन् ॥ ४५ ॥

(भा.दी.) उदिति । अथ तेन हनुमत्कृतेन नादो ध्वनिस्तेन उद्बुद्धाः राक्षस्यः, सीतासमीपस्था राक्षसस्त्रियः, पर्वतस्य उपमा यस्य स तथा तं दृष्ट्वा चकिताः भीताः सत्यः, मायासीतां च्छलसीताम्, सीताप्रतिकृतिमित्यर्थः, साम्ना सामवचनेन अब्रुवन् ॥ ४५ ॥

(सं.चं.) चकिता भीता विस्मिताश्च । साम्ना सान्त्वविधानेन ॥ ४५ ॥

कान्ते कोऽयं कपिश्रेष्ठो यस्ते संवादगोचरः ।
इत्युक्ता साऽवदत्[1] तन्वी मायेयं रक्षसां ध्रुवम् ॥ ४६ ॥

(भा.दी.) कान्त इति । हे कान्ते, यः ते संवादे गोचरः, परस्परं वादस्य विषयः, अयं कपिश्रेष्ठः कः? इति उक्ता तन्वी सीता, रक्षसां इयं मायाशक्तिः ध्रुवं इति अवदत् । वदधातोर्लङ् ॥ ४६ ॥

(सं.चं.) संवादगोचरः । त्वया सम्भाषमाणः सन् दृष्टिविषयीभूतः ॥ ४६ ॥

मायाविनां गतिं लोके जानन्त्येव हि मायिनः ।
अहिरेव ह्यहेः पादान् विजानाति[2] न चापरः ॥ ४७ ॥

(भा.दी.) मायेति । मायिनः कपटिनः (एव) मायाविनां कपटिनां गतिं स्थितिं लोके भुवनं तस्मिन् जानन्ति । अहिरेव हि, सर्प एव हि, अहेः पादान्, (वि)जानीते । अपरः प्राणी न च जानीते । अतो भवतीभिरेव चेदं ज्ञायते न मयेति मां प्रति किमर्थं पृच्छ्यत इत्यर्थः ॥ ४७ ॥

(सं.चं.) मायिन एव जानन्ति हि । तद्यथा–अहिरेव । 'यूयमेवास्य जानीत योऽयं यद्वा करिष्यति । अहिरेव ह्यहेः पादान् विजानाति न संशयः' (४२.९) इति च ॥ ४७-८ ॥

---

१. **'साऽब्रवीत् तन्वी'** इति वि.ती.पाठः ।
२. **'विजानीते'** इति वि.ती.पाठ इति भाति ।

इत्यस्या वचनं श्रुत्वा राक्षस्यो विद्रुता द्रुतम् ।
न्यवेदयन्नुदन्तं तं लङ्कापालाय शङ्किताः ॥ ४८ ॥

(भा.दी.) इतीति । इति अस्याः वचनं वचस्तत् श्रुत्वा शङ्किताः, रामदूतो वाऽन्यो वा कश्चिदिति शङ्किताः, राक्षस्यः द्रुतं यथा भवति तथा विद्रुताः सत्यः, तं वनविनाशलक्षणं उदन्तो वृत्तान्तस्तं लङ्कां पालयतीति लङ्कापालो रावणस्तस्मै न्यवेदयन् । विद चेतनाख्याननिवासनेषु लङ् ॥ ४८ ॥

तदाकर्ण्य भृशं क्रुद्धो रावणोऽथ समादिशत् ।
अवद्ध्यान् शङ्करवरात् किङ्करान् नाम राक्षसान् ॥ ४९ ॥

(भा.दी.) तदिति । अथ रावणः तत् राक्षसीवचः आकर्ण्य भृशं क्रुद्धः सन्, शङ्करस्य वरस्तस्मात् अवध्यान्, किङ्करान् नाम, किङ्करा इति प्रसिद्धान्, राक्षसान् समादिशत्, कपिर्निगृह्यतामिति आज्ञापयामास । दिश अतिसर्जने लङ् ॥ ४९ ॥

(सं.चं.) अवध्यान् शङ्करवरात् । एतेन 'आत्मनः सदृशान् वीरान् किङ्करान् नाम राक्षसान्' (४२.२४) इत्येतद् वचनं गदिताभिप्रायम् । वरबलादवध्यत्वमेव सादृश्यमिति ॥ ४९ ॥

साशीतिकोटियूथेशं सपुरोगाष्टकायुतम् ।
आववार हरिं वीरं तद् बलं लोकभीषणम् ॥ ५० ॥

(भा.दी.) सेति । अशीतिसङ्ख्याकाः कोटयोऽशीतिकोटयः, यूथानां भटसमूहानामीशाः यूथेशाः, सेनानायका इत्यर्थः, अशीतिकोटयो ये यूथेशाः तैः सहितं साशीतिकोटियूथेशम्, सपुरोगाष्टकायुतम्, लोकान् भीषयतीति तथोक्तं तत् बलं सैन्यं वीरं हरिं कपिं हनुमन्तं आववार समावृणोत् । वृञ् वरणे लिट् ॥ ५० ॥

(सं.चं.) 'तेषामशीतिसाहस्रं' (४२.२५) इत्यत्र शेषं पूरयति– साशीतिकोटियूथेशं सपुरोगाष्टकायुतं बलमिति । तदेतद् भगवत्पादेन स्फुटीकृतम्–'समस्तशो विमृत्यवो वराद्धरस्य किङ्कराः । समासदन् महाबलं सुरान्तरात्मनोऽङ्गजम् । अशीतिकोटियूथपं पुरःसराष्टकायुतम् । अनेकहेतिसङ्कुलं कपीन्द्रमावृणोद् बलम्' इति । पुरोगामिना अष्टकायुतेन अशीतिसाहस्रेण सहितम् ॥ ५० ॥

रक्षोजीमूतसङ्घानामूर्ज्जितानां प्रगर्ज्जताम् ।
नानाहेतिमयैर्वर्षैर्नाचलद् वानराचलः ॥ ५१ ॥

(भा.दी.) रक्ष इति । ऊर्जितानां बलादिना विवृद्धानाम्, प्रगर्जतां सिंहनादं कुर्वताम्, रक्षांस्येव जीमूता मेघास्तेषां सङ्घाः समूहास्तेषां नानाविधा या हेतय आयुधानि तासां स्वरूपाणि नानाहेतिमयानि तैः वर्षैः वानर एवाचलः, हनुमदाख्यपर्वत इत्यर्थः, नाचलत् ॥ ५१ ॥

(सं.चं.) प्रकटस्तनितानामिव मेघसङ्घानां प्रकटं गर्जतां रक्षःसङ्घानाम् । 'जीमूतौ मेघपर्वतौ' इति वैजयन्ती ॥ ५१ ॥

आविद्धय भुवि लाङ्गूलं तिर्य्यक् सम्प्रेक्ष्य राक्षसान् ।
स्फुटमास्फोट्य हनुमानुच्चैरेवमुदाहरत् ॥ ५२ ॥

(भा.दी.) आविद्धयेति । हनुमान् भुवि लाङ्गूलं पुच्छं तत् आविद्धय सम्यगवष्टम्भं कृत्वा, राक्षसान् तिर्यक् सम्प्रेक्ष्य, स्फुटं यथा भवति तथा आस्फोट्य द्विगुणीकृतहस्तप्रहारं कृत्वा, उच्चैः एवं वक्ष्यमाणरीत्या उदाहरत् । हृञ् हरणे लङ् । प्रोच इत्यर्थः ॥ ५२ ॥

(सं.चं.) आविध्य, **'ಅಪ್ಪಳಿಸಿ'** इति भाषायाम् । तिर्यक् अवाक् सतिरस्कारं सम्प्रेक्ष्य । आस्फोट्य । स्फुटिर् विशरणे । भुजावास्फल्य **'ತೋಳು ತಟ್ಟು'** इति भाषायाम् । स्फोरितकोपो भूत्वा वा ॥ ५२ ॥

स्वामी रामो जयति जगति [१]श्रीधरोऽनन्तवीर्य्य-
स्तं सौमित्रिः प्लवगवृषभश्चानुवृत्तौ सुवृत्तौ[२] ।
सीतां नत्वा रणमुखमितो नन्वहं रामदूतो
नालन्नालं[३] मुहुरहह मे रावणानां सहस्रम् ॥ ५३ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
सुन्दरकाण्डे पञ्चमः सर्ग्गः ॥

—०—

१. **'श्रीधरः लक्ष्मीपतिः । स्वामी जगदीशः'** इति का.श्री. ।

२. **'–नुवृत्तौ'** । **'विवृत्तौ स्थिरहृदयादियुक्तौ'** इति वि.भू. । अस्वरसः पाठः । **'सुवृत्तौ शोभनव्यापारवन्तौ'** इति का.श्री. ।

३. **'रामदूतोऽस्म्युच्चैर्नालम्'** इति वि.ती.पाठः स्यात् ।

(भा.दी.) स्वामीति । अनन्तं वीर्यं सामर्थ्यं यस्य स तथोक्तः, श्रियं धरतीति श्रीधरः, कान्त्यादिमानित्यर्थः, स्वामी श्रीरामः जगति जयति सर्वोत्कृष्टतया वर्तते । सु शोभनं वृत्तं चरित्रं ययोस्तौ तथोक्तौ सौमित्रिः प्लवगेषु वृषभः सुग्रीवश्चेत्युभौ तं श्रीरामं अनुवृत्तौ अनुसृतौ वर्तेते । रामदूतः अहं सीतां नत्वा रणस्य मुखं तत् इतः प्राप्तः सन् अस्मि ननु । मे रावणानां सहस्रं तत् अलं पर्याप्तं न । हनुमत्सामर्थ्यसहने समर्थं युद्धे न भवतीत्यर्थः । मुहुः उच्चैः बहुवारं वा एवं उदाहरदित्यन्वयः । अहहेति शत्रूणामाभासीकरणे कुतूहलोक्तिः ॥ ५३ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां सुन्दरकाण्डे पञ्चमः सर्गः ॥



(सं.चं.) अथ मन्दाक्रान्तयोपसंहरति– स्वामीति । सौमित्रिः प्लवगवृषभः सुग्रीवश्च सुवृत्तौ तं राममनुवृत्तौ सन्तौ जयतः । रणमुखं रणाग्रम्, रणरङ्गमित्येतत् । इतः प्रातः । 'जयत्यतिबलो रामो लक्ष्मणश्च महाबलः । राजा जयति सुग्रीवो राघवेणाभिपालितः । दासोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः । हनूमान् शत्रुसैन्यानां निहन्ता मारुतात्मजः । न रावणसहस्रं मे युद्धे प्रतिबलं भवेत्' (४२.३३-५) इति च । नालं नालमित्याम्रेडनेन राक्षसान् भीषयन् परिहसतीव । अहहेति तानाहूय, भाविनो युद्धस्य स्मरन् स्वयं प्रहृष्यतीव । 'अहहेत्यद्भुते खेदे परिक्लेशप्रहर्षयोः । सम्बोधनेऽपि' इति ह्यभिदधति॥ ५३ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां सुन्दरकाण्डे पञ्चमसर्गविवरणम् ॥



[आदितः श्लोकाः– २११७+५३=२१७०]

षष्ठः सर्ग्गः

वाणीति वाणीपतिनन्दनस्य व्यक्तं चचारानुसभं सुराणाम् ।
वियद् भजेयुः कथमन्यथा ते वैमानिका युद्धदिदृक्षयाऽत्र ॥ १ ॥

(भा.दी.) श्रीरामदूतस्य हनुमतो वाच उच्चत्वं वर्णयन् तद्युद्धप्रकारं दर्शयति– **वाणीत्यादि**ना । वाण्याः भारत्याः पतिर्वायुः, तस्य नन्दनः तस्य इति एवमादिप्रकारा वाणी सुराणां सभां अनु अनुसभम्, अव्ययीभावसमासत्वादव्ययोऽयम् । व्यक्तं यथा भवति तथा चचार जगाम । चर गतिभक्षणयोर्लिट् । इममर्थमन्यथानुपपत्त्योत्प्रेक्षते– **वियदि**ति । अन्यथा, देवसभां प्रत्ययं शब्दः न गतश्चेत्, ते देवाः विमानारूढाः वैमानिकास्तथा सन्तः युद्धस्य दिदृक्षया दर्शनेच्छया (अत्र) युद्धसमये वियत् गगनं तत् कथं भजेयुः? भज सेवायां लिङ् । अतः शब्दश्रवणनिमित्तेनैवाऽगता इत्यर्थः ॥ १ ॥

(सं.चं.) अथोपजातिप्रचुरेण च्छन्दसा सर्गं विस्तारयति–वाणीति । यत्र च्छन्दोविशेषस्तत्र वक्ष्यते । वाणीपतिर्भारतीपतिर्वायुः । स एव तस्य नन्दनो बभूव । यथा भीमः । अनुसभम् । वीप्सायामनुः । सभायांसभायामित्यनुसभम् । ते सुराः वैमानिकाः सन्तः । विमानेन चरन्तीति वैमानिकाः । 'चरति' (अ.सू.४.४.८) इति चरणार्थे ठक् । अत्र उपलङ्कम् ॥ १ ॥

तळप्रहारेण बहून् निहत्य स तोरणस्थं परिघं दधद् द्राक् ।
शिष्टानशिष्टांश्च निहत्य तेन प्रासादमासाद्य मुहुर्ज्जगर्ज्ज ॥ २ ॥

(भा.दी.) **तळे**ति । सः तळस्य हस्ततळस्य प्रहारस्तेन बहून् राक्षसान् निहत्य, तोरणे तिष्ठतीति तोरणस्थस्तं परिघः परिघाख्यायुधविशेषस्तं दधत् दधानः सन्, द्राक् शीघ्रं तेन परिघेण, शिष्टान् तळप्रहारचूर्णितावशिष्टान्, अशिष्टान् दुष्टान् राक्षसान्निहत्य, प्रासादः सौधस्तं आसाद्य मुहुः जगर्ज । गर्ज शब्दे लिट् ॥ २ ॥

(सं.चं.) तोरणमुद्यानस्य बहिर्द्वारम् । परिघः । 'ভাৱ' इति भाषायाम् । प्रासाद इत्यनुद्यानसङ्गतं राज्ञां विहारसदनम् । शिष्टानवशिष्टान् ॥ २ ॥

स्तम्भं च तत्रोदहरद्धनूमान् स चैत्यपालांश्च जघान तेन ।
प्रासादमप्यम्बरगो ददाह स्तम्भानलेनायमुवाच चोच्चैः ॥ ३ ॥

(भा.दी.) स्तम्भमिति । सः हनुमान् तत्र प्रासादे यस्तम्भस्तं च उदहरत् उद्बबर्ह । उत्पूर्वः हरतेर्लङ् । तेन स्तम्भेन चैत्यमुद्यानं पालयन्तीति चैत्यपालांस्तांश्च जघान । अयं हनुमान् अम्बरमाकाशं गच्छतीत्यम्बरगः सन् स्तम्भस्य योऽनलस्तेन, स्तम्भेन राक्षसहनने तत्सङ्घर्षजन्याग्निनेत्यर्थः, यः प्रासादस्तमपि ददाह । दह भस्मीकरणे लिट् । उच्चैः वचः उवाच (च) ॥ ३ ॥

(सं.चं.) उदहरत् उत्पाट्य हस्ते दधावित्यर्थः । चैत्यमिति बुद्धमन्दिरमुच्यते । चित्तसम्बन्धि चैत्त्यमिति ध्या(यम)नमन्दिरमुच्यते । चित्यासम्बन्धि चैत्यमिति यज्ञशालोच्यते । नैतेष्वेकोऽप्यर्थोऽत्र सङ्गतः । अथ चित्तं रमयतीति चैत्यमुद्देशपादप इत्यन्ये । किमेकेन पादपेन । पादपसश्रयात्मकमुद्यानमेवात्र चैत्यम् । तेन चैत्यपालानित्युद्यानपालान् । स्तम्भसङ्घर्षजेनानलेन ॥ ३ ॥

यं मादृशानां[१] भजते सहस्रं रामः स सुग्रीवगुरुः पतिर्म्मे ।
कण्डूतिचण्डो मम बाहुदण्डो विजृम्भते वैरिणमाह्वयामि ॥ ४ ॥

(भा.दी.) यमति । यं श्रीरामं मादृशानां मत्सदृशानां कपीनां सहस्रं बहुसाहस्रं भजते । सुग्रीवगुरुः सः श्रीरामः मे पतिः । कण्डूत्या कण्डूयनेन चण्डः समर्थः, युद्धार्थमतिकण्डूतियुक्त इत्यर्थः, मे मम बाहुदण्डः विजृम्भते अभिवर्धते । जृभि गात्रविक्षेपे लट् । अतः वैरिणं रावणं युद्धार्थमाह्वयामि । ह्वेञ् स्पर्धायां शब्दे च लट् ॥ ४ ॥

(सं.चं.) सहस्रमित्यसङ्ख्यवचनम् । विजृम्भते सोत्साहं स्फुरति । ततो योयो रामवैरी तन्तमाह्वयामि ॥४॥

प्रगर्ज्जतीत्थं हनुमत्युदारे प्रहस्तपुत्रप्रमुखान् प्रचण्डान् ।
सप्ताऽदिशत्[२] सप्तशिखोपमानान्[३] स मन्त्रिपुत्रान् कुपितो दशास्यः ॥ ५ ॥

---

१. **'यन्मादृशानाम्'** २. **'समादिशत्'** । **'सप्त मन्त्रिपुत्रान् आदिशत् हनुमता सह युद्धायेति शेषः'** इति का.श्री. ।

३. **'सप्त शिखा यस्येति सप्तशिखोऽग्निः । 'हिरण्या कनका रक्ता कृष्णा चैवतु सुप्रभा । बहुरूपाऽतिरक्ता च शिखाः सप्त हविर्भुजः' इति । अग्निसदृशानित्यर्थः'** इति का.श्री. ।

(भा.दी.) प्रेति । उदारे उत्कृष्टे, 'उदारो महति ख्याते' इति वैजयन्ती, हनुमति इत्थं प्रगर्जति सति, कुपितः सः दशास्यः, सप्त शिखा अर्चिषो यस्य स तथोक्तस्तस्य उपमानं येषां ते तथोक्तास्तान्, वह्निसदृशानित्यर्थः, प्रहस्तस्य यः पुत्रः स मुखं प्रधानो येषां ते तथोक्तास्तान्, प्रचण्डानतिक्रूरान्, सप्त मन्त्रिपुत्रानदिशत् । दिश अतिसर्जने लङ् ॥ ५ ॥

(सं.चं.) उदारे महाबले । काळी कराळी मनोजवा सुलोहिता सुधूम्रवर्णा स्फुलिङ्गिनी विश्वरुची चेति सप्त शिखा ज्वाला यस्य स सप्तशिखः । तस्य सप्तशिखस्य वह्नेः सप्तशिखोपमानान् सप्त मन्त्रिपुत्रान् प्रहस्तपुत्राष्टमान् 'सन्दिष्टो राक्षसेन्द्रेण प्रहस्तस्य सुतो बली । जम्बुमाली महादंष्ट्रो निर्जगाम धनुर्धरः' (४४.१) इति, 'ततस्ते राक्षसेन्द्रेण चोदिता मन्त्रिणः सुताः । निर्ययुर्भवनात् तस्मात् सप्त सप्तार्चिवर्चसः' (४५.१) इति च ॥ ५ ॥

प्रहस्तपुत्रस्त्वथ जम्बुमाली प्राभञ्जनिं प्राप्य सुवर्ण्णमाली ।
ववर्ष बाणान् खरयुक्तयानः शिलां विशालां हनुमान् मुमोच ॥ ६ ॥

(भा.दी.) **प्रहस्ते**ति । अथ प्रहस्तपुत्रः, सुवर्णमयी माला अस्यास्तीति तथोक्तः, खरैः युक्तं यानं रथो यस्य स तथोक्तः, जम्बुमाली जम्बुमालिनामकः प्राभञ्जनिं वायुपुत्रं हनुमन्तं प्राप्य बाणान् ववर्ष । वृष सेचने लिट् । हनुमान् विशालां शिलां मुमोच ॥ ६ ॥

(सं.चं.) प्रहस्तपुत्रो जम्बुमाली प्रथममागत्य युयुधे ॥ ६ ॥

शरैः शिलायां शकलीकृतायां साले च मुक्ते रिपुणा निकृत्ते ।
तेनैव वीरः परिघेण पापं सञ्चूर्ण्णयामास सयानमेनम् ॥ ७ ॥

(भा.दी.) **शरैरि**ति । जम्बुमालिमुक्ता ये शरास्तैः शिलायां शकलीकृतायां सत्याम्, हनुमता मुक्ते सालो वृक्षस्तस्मिंश्च रिपुणा जम्बुमालिना (नि)कृत्ते सति, खण्डिते सति, वीरः हनुमान्, पापम्, सयानं सरथं एनं राक्षसं तेनैव प्राक् तोरणात् गृहीतेनैव घरिघः परिघाख्यायुधविशेषस्तेन सञ्चूर्णयामास । चूर्ण सङ्कोचने लिट् ॥ ७ ॥

(सं.चं.) शरैर्दशभिः । साले सर्जाख्ये वृक्षे च चतुर्भिः शरैर्निकृत्ते । 'सालः सर्जतरौ वृक्षमात्रप्रकारयोरपि' इति ह्यभिदधति । 'भ्रामयन्तं कपिं दृष्ट्वा सालवृक्षं महाबलम्' (४४.१३) इति च । सञ्चूर्णयामास सामस्त्येन

चूर्णयामास । 'तस्य चैव शिरो नास्ति न बाहू नच जानुनी । न धनुर्न रथो नाश्वास्तस्यादृश्यन्त नेषवः' (४४.१७) इति च ॥ ७ ॥

रणोत्कटान् मन्त्रिसुतानवाप्तानन्यान् ससैन्यान् न्यहनद्धनूमान् ।
तळेन कांश्चिच्चरणेन कांश्चिदन्यान् नखैः कांश्चन नादमात्रात् ॥ ८ ॥

(भा.दी.) रणेति । रणे उत्कटान् मत्तान्, 'उत्कटो मत्त उद्धटे' इति वैजयन्ती, ससैन्यान् अवाप्तान् युद्धार्थमागतान् अन्यान् मन्त्रिसुतान्, कांश्चित् तळं तळप्रहारस्तेन, कांश्चित् चरणः चरणप्रहारस्तेन, अन्यान् नखाः नखरास्तैः, कांश्चन केवलं नादः नादमात्रं तस्मात् न्यहनत् । हन्तेर्लङ्[१] ॥ ८ ॥

(सं.चं.) 'ससैन्यान्न्यहनद्धनूमान्' इति मौलः पाठः । व्याख्यातारश्च तूष्णीं तथैव पठित्वा व्याचक्षते । अहन्निति भाव्यम् । अहनदित्यपाणनीयं रूपम् । लोकसङ्ग्रहाय प्रायः पाणिनीयामेव सरणिमनुसरति ग्रन्थ-कारः । तेन 'ससैन्यान् न्यवधीद्धनूमान्' इत्येव प्रयोक्तव्यमासीत् । बहुषु स्थलेषु सङ्ग्रहरामायणमपपाठव्याकुलं कृतमनधिगतव्याकरणगन्धैः पारायणपरायणैः । अथापि क्वचिदपाणिनीयमपि व्याकरणान्तरसिद्धं महद्भिः प्रयुक्तं लोकेऽपि प्रयोक्तुमुचितमिति ग्रन्थकारो मन्यत इति वक्तव्यम् । एतेन 'युयोध' इत्यादयः प्रयोगा अपि दत्तोत्तराः । तद्यथा 'प्रार्थयति' इत्यादि लोकेऽपि प्रयुञ्जते । प्रयोगशरणा हि वैयाकरणाः । नोत वैया-करणशरणाः प्रयोगाः । अत्र भगवान् वाल्मीकिरप्यहनदित्येवाऽह–'तळेनाभ्यहनत् कांश्चित् पादैः कांश्चित् परन्तपः । मुष्टिनाऽभ्यहनत् कांश्चिन्नखैः कांश्चिद् व्यदारयत् । केचित् तस्य निनादेन तत्रैव पतिता भुवि' (४५.१२-३) इति । तेन पाणिनिं परित्यज्य वाल्मीकिमनुससार कविः ॥ ८ ॥

सञ्चिन्त्य[२] किञ्चित् स निशाचरेशो दुर्द्धर्षयूपाक्षविरूपपूर्वान्[३] ।
सभासकर्ण्णप्रघसानुवाच सेनाग्रनेतॄनिति पञ्च वीरान् ॥ ९ ॥

(भा.दी.) समिति । निशाचरेशः सः रावणः किञ्चित् सञ्चिन्त्य, पूर्वं स्वदृष्टकपीनां बलं स्मृत्वा, सेनाया यदग्रं तन्नयन्तीति तथोक्तास्तान् वीरान् पञ्च पञ्चसङ्ख्याकान्, भासकर्णश्च प्रघसश्च ताभ्यां सहितान्, दुर्धर्षश्च

१. **'अहन्'** इति लङि रूपम् । **'अहनत्'** इति प्रतनं छान्दसं रूपम् । २. **'विचिन्त्य'**

३. **'दुर्धर्षादयः पूर्वे येषां तान्'** इति का.श्री. व्याख्यानं तु रामायणाननुगुणम् । **'क्रुद्धो विरूपाक्षः–'** (१३) इत्युत्तरवचनाननुगुणं च । अत एव **'दुर्धर्षयूपाक्षविरूपमुख्यान्'** इति कचित् पाठान्तरं च भ्रान्तिमूलम् ।

यूपाक्षश्च विरूपः विरूप इति पदं पूर्वस्मिन् स्वनाम्न आदौ यस्य स विरूपपूर्वः, विरूपाक्ष इत्यर्थः, स च तान् पञ्च वीरान् प्रति इति उवाच ॥ ९ ॥

(सं.चं.) विरूपपदं पूर्वं यस्य नाम्नि स विरूपपूर्वो विरूपाक्षः। 'स विरूपाक्षयूपाक्षौ दुर्धर्षं चैव राक्षसम्। प्रघसं भासकर्णं च पञ्च सेनाग्रनायकान्' (४६.२) इति च। 'दुर्धरं चैव राक्षसम्' इति साम्प्रतो रामायण-पाठः ॥ ९ ॥

स्युर्वालिसुग्रीवमुखाः कपीन्द्रा लोकाधिका नेदृशविक्रमास्ते।
इदं महद् भूतमहो क्षयाय प्राप्तं हि नः सम्प्रति गृह्यतां तत् ॥ १० ॥

(भा.दी.) स्युरिति । वाली च सुग्रीवश्च तौ (मुखं) प्रधानौ येषां ते तथोक्ताः, लोकाधिकाः लोकेषु श्रेष्ठाः, कपीन्द्राः स्युः बभूवुः। ते ईदृश एवंविधः विक्रमो येषां ते तथोक्ताः न। इदं महद् भूतं नः क्षयो नाशस्तस्मै सम्प्रति इदानीं प्राप्तं हि। तद् भूतं भवद्भिः गृह्यताम्। ग्रह उपादाने लोट् ॥ १० ॥

(सं.चं.) स्युर्वालिसुग्रीवमुखाः। 'वाली च सहसुग्रीवो जाम्बवांश्च महाबलः। नैवं तेषां गतिर्भीमा न तेजो न पराक्रमः। महत् सत्वमिदं ज्ञेयं कपिरूपं व्यवस्थितम्। प्रयत्नं महदास्थाय क्रियतामस्य निग्रहः' (४६.१२-१५) इति च ॥ १० ॥

इतीरितास्ते चतुरङ्गिणीं स्वां चमूमुपानीय रणाय याताः[१]।
परीत्य दीप्ते पवमानसूनौ शरान् निशातानकिरन् कराळाः[२] ॥ ११ ॥

(भा.दी.) इतीति। इति ईरिताः रावणेनाऽऽज्ञप्ताः ते पञ्च राक्षसाः, चत्वारि अङ्गानि यस्यास्तां स्वां चमूं उपानीय उपादाय रणं युद्धं तस्मै याताः। कराळाः क्रूराः दन्तुरा इति वा, 'कराळो दन्तुरे तुङ्गे विशाले विकृतेऽपि च' इति वैजयन्ती, ते राक्षसाः परीत्य परिवार्य दीप्ते पवमानसूनौ निशातान् निशितान् शरान् अकिरन् ववृषुः। कॄ विक्षेपे लङ् ॥ ११ ॥

(सं.चं.) इतीरिता इत्युपेन्द्रवज्रा ॥ ११ ॥

निर्घातवद् घोरतरोऽतिघोषः[३] पतन् हनूमान् गगनाच्चकाशे।
[४]दुर्द्धर्षदेहेऽथ महानगाभः स पिष्टफेनोपमतां जगाम ॥ १२ ॥

१. 'रणाभियाताः' २. 'कराळान्' ३. 'घोरतरातिघोषः' ४. 'दुर्धर्षदेहोऽथ महानगाभः सम्पिष्ट–'

(भा.दी.) निर्घातवदिति । दुर्धर्षस्य दुर्धर्षनामकराक्षसस्य यो देहस्तस्मिन् निर्घातवत् अशनिवत् गगनमाकाशस्तस्मात् पतन् प्लवमानः, घोरतरः अत्यन्तं भयङ्करः, (अतिशयितः) घोषो यस्य स तथोक्तः, हनुमान् चकाशे । काशृ दीप्तौ लिट् । अथ यो (महान्) नगः पर्वतस्तस्य आभेव आभा यस्य स तथोक्तः सः दुर्धर्षः, पिष्टो यः फेनस्तस्य उपमा यस्य स तथा तस्य भावस्तत्ता ताम्, अत्यन्तं नष्टतामित्यर्थः, जगाम ॥ १२ ॥

(सं.चं.) निर्घातवत् । 'वज्रपातस्तु निर्घातः' इति यादवप्रकाशः । निर्घातवद् घोरतरोऽतिघोषश्च । दुर्धर्षस्य देहे पतन् । महानगाभः । स दुर्धर्षदेहः पिष्टफेनोपमतां जगाम । यथा पिष्टः फेनो डिण्डीरः,'ೱೲ' इति भाषायाम्, अदर्शनमेव तथा महाद्रितुल्योऽपि दुर्धर्षदेहः कणशः शकलितोऽदृश्य एव बभूवेत्यर्थः । महानगाभो हनुमानित्यपि व्याचक्षते । 'स दूरं सहसोत्पत्य दुर्धर्षस्य रथे हरिः । निपपात महावेगो विद्युद्राशिर्गिराविव' (४६.२७) इति च ॥ १२ ॥

क्रुद्धो विरूपाक्ष इमं युयोध यूपाक्षनामाऽप्यथ मुद्गरेण ।
सालेन सञ्चूर्ण्णितवान् हनूमान् तौ पांसुपिण्डाविव पाण्डुकीर्त्तिः ॥ १३ ॥

(भा.दी.) क्रुद्ध इति । दुर्धर्षवधं दृष्ट्वा क्रुद्धः विरूपाक्षः विरूपाक्षनामक इमं हनुमन्तं युयोध । युध सम्प्रहारे लिट् । यूपाक्ष इति नाम यस्य स तथोक्तः सोऽपि मुद्गरः मुद्गराख्यायुधविशेषस्तेन इमं युयोध । अथ पाण्डुः स्वच्छा कीर्तिर्यस्य स तथोक्तः हनूमान् तौ राक्षसौ पांसुपिण्डाविव स्वमुक्तो यः सालो वृक्षस्तेन सञ्चूर्णितवान् ॥ १३ ॥

(सं.चं.) मुद्गरेण आयसदण्डेन युयोध युयुधे । 'स ताभ्यां सहसोत्पत्य विष्ठितो विमलेऽम्बरे । मुद्गराभ्यां महाबाहुर्वक्षस्यभिहतः कपिः' (४६.३०) इति च । सालाख्यवृक्षेण । 'स सालवृक्षमासाद्य समुत्पाट्य च वानरः । तावुभौ राक्षसौ वीरौ जघान यवनात्मजः' (४६.३२) इति च । पाण्डुकीर्तिः निर्मलयशाः । इन्द्रवज्रा छन्दः ॥ १३ ॥

तं भासकर्ण्णः शितशूलशाली सपट्टसश्च[1] प्रघसोऽभियातौ ।
तौ द्वौ च पञ्चत्वमहो निनाय महाद्रिशृङ्गेण महाबलोऽसौ ॥ १४ ॥

१. 'सपट्टिशश्च'

(भा.दी.) तमिति । शितं यच्छूलं तेन शालते शोभत इति शितशूलशाली भासकर्णः भासकर्णनामकः सपट्टसः पट्टसाख्यायुधसहितः प्रघसश्चेत्युभौ युद्धार्थमभियातौ । महत् बलं यस्य स तथोक्तः महाबलः असौ हनुमान् महद् यदद्रिशृङ्गं तेन तौ द्वौ राक्षसौ पञ्चत्वं मरणं तत् निनाय गमयामास । णीञ् प्रापणे लिट् । अहो ॥ १४ ॥

(सं.चं.) 'पट्टसो लोहदण्डो यस्तीक्ष्णधारः क्षुरोपमः' इति च । द्वयोः पञ्चत्वमिति श्लेषेण विस्मयत इव । पूर्वैस्त्रिभिः सह तौ द्वौ च संहत्य पञ्चत्वं निनायेति परिहसतीव ॥ १४ ॥

गजैर्ग्गजेन्द्रांस्तुरगैस्तुरङ्गान् रथै रथानेष भटैर्भटांश्च ।
अपातयत् कर्म्मसु लाघवज्ञो विना शिलासालनिमार्ग्गणेन[1] ॥ १५ ॥

(भा.दी.) गजैरिति । कर्मसु युद्धकर्मसु लाघवज्ञः एषः हनुमान्, शिलाश्च सालाश्च तेषां यन्निमार्गणं युद्धार्थत्वेनान्वेषणम्, तेन विना, गजैः गजेन्द्रान्, तुरगैः तुरङ्गान्, रथैः रथान्, भटैश्च भटान् (अपातयत्) निपातया-मास ॥ १५ ॥

(सं.चं.) गजैरिति । लाघवज्ञः सुलभमार्गज्ञः । विना प्रयासं विनाऽतियत्नं विपक्षक्षपणतन्त्रज्ञः । हस्तप्राप्तैर्गजैरेव, साधनान्तरान्वेषणश्रमं विनैव । निमार्गणेनेति विनायोगे तृतीया । 'पृथग्विना-नानाभिस्तृतीयाऽन्यतरस्याम्' (अ.सू.१.३.३२)इति । अन्यतरस्यामिति पञ्चमी च । द्वितीया च । 'अश्वैरश्वान् गजैर्नागान् योधैर्योधान् रथान् रथैः । स कपिर्नाशयामास सहस्राक्ष इवासुरान्' (४६.३९) इति च । उपेन्द्रवज्रा छन्दः ॥ १५ ॥

तृतीयमंशं स्वपताकिनीनां विज्ञाय भग्नं कपिपुङ्गवेन ।
स विंशदक्षः सकलाक्षिभिश्च कुमारमक्षं स्थितमैक्षताथ ॥ १६ ॥

(भा.दी.) तृतीयमिति । अथ विंशत् अक्षीणि यस्य स तथोक्तः सः रावणः, स्वस्य पताकिन्यः सेनास्तासां मध्ये तृतीयो यः अंशो भागस्तं कपिपुङ्गवेन कपिश्रेष्ठेन हनुमता (भग्नं) नाशितं विज्ञाय, सकलानि यान्यक्षीणि तैः अक्षोऽक्षनामकस्तं स्थितं समीपस्थं कुमारं स्वपुत्रं ऐक्षत ॥ १६ ॥

---
१. **'–सालविमार्गणेन'**

(सं.चं.) पताकिनी सेना । 'पताकिनी वाहिनी बलं सैन्यम्' इत्यभिधानम् । विंशदक्षः विंशत्यक्षः । प्रतनैर्बहुलमेवं प्रयुज्यते । आचार्यप्रयुक्तानि छान्दसानि पदानि तत्रतत्रानुसरति ग्रन्थकारः । अधिकं त्वस्मत्कृतायां प्रत्नप्रयोगमीमांसायाम् ॥ १६-८ ॥

पितुर्न्नियोगं चतुरः स विद्वान् बालार्क्कभासं रथमारुरोह ।
धनुर्द्धरं वीरवरं प्रयान्तं[१] तमन्वगच्छन् पृतना असङ्ख्याः ॥ १७ ॥

(भा.दी.) पितुरिति । चतुरः सः अक्षः कुमारः पितुः रावणस्य युद्धार्थं यो नियोगस्तं विद्वान् सन् बालार्कवद्भाः दीप्तिर्यस्य स तथा तं रथं आरुरोह । रुह बीजजन्मनि प्रादुर्भावे च लिट् । धनुर्धरतीति तथोक्तस्तम्, वीरवरं प्रयान्तं तं न विद्यते सङ्ख्या यासां तास्तथा असङ्ख्याः पृतनाः अन्वगच्छन् ॥ १७ ॥

क्रोधारुणाक्षः कपिमैक्षताक्षो[२] विष्फारयन्[३] कार्म्मुकमुग्रकर्म्मा[४] ।
स तोरणस्थस्तरुणार्क्कवक्त्रस्तूर्ण्णं नदन्नम्बरमाललम्बे ॥ १८ ॥

(भा.दी.) क्रोधेति । क्रोधेन अरुणे अक्षिणी यस्य स तथोक्तः, उग्रं कर्म यस्य स तथा, एषः अक्षकुमारः कार्मुकं तत् विष्फारयन् कपिं ऐक्षत, तोरणे तिष्ठतीति तथोक्तः, तरुणार्कवत् बालसूर्यवत् वक्त्रं यस्य स तथोक्तः, (सः) हनुमान्, नदन् सन्, तूर्णं यथा भवति तथा अम्बरं तत् आललम्बे आश्रितवान् । लबि अवस्रंसने लिट् ॥ १८ ॥

आकाशमार्ग्गानवकाशहीनांश्चक्रे शरै रावणिरद्भुतं तत् ।
ततोऽद्भुतं तत्र चरन्नसङ्गः स वायुवद् वायुसुतोऽक्षतोऽपतत् ॥ १९ ॥

(भा.दी.) आकाशेति । रावणस्यापत्यं रावणिः अक्षः, आकाशस्य मार्गाः प्रदेशास्तान्, शरा इषवस्तैः अवकाशहीनान् चक्रे । कृञ्धातोर्लिट् । तत्कर्म द्रष्टॄणां अद्भुतमाश्चर्यमभूत् । तत्र आकाशमार्गे वायुवच्चरन् न विद्यते सङ्गः शरसम्बन्धः यस्य तथा सः वायुसुतः, न विद्यते क्षतं यस्य स तथा, शरघातकृतव्रणरहित इत्यर्थः, (अपतत्) इति यत् तत् ततोऽपि शरैराकाशनिश्छिद्रकरणादपि द्रष्टॄणामद्भुतमभूत् ॥ १९ ॥

(सं.चं.) ततोऽप्यद्भुतम् । वायुवदक्षतोऽसङ्गः अपतत् वियति चचार ॥ १९ ॥

---

१. **'प्रयातम्'**
२. **'कपिमैक्षतेष–'** इति वि.ती.पाठः स्यात् ।
३. **'विस्फार यन्'**
४. **'कार्मुकमुग्रधन्वा'**

न रावणी रावणतोऽयमूनो हन्यामिमं मन्युबलप्रचण्डम् ।
अलं हि लीलाभिरमूभिरित्थं विचिन्त्य वीरोऽभ्यपतद् विपक्षम् ॥ २० ॥

(भा.दी.) **ने**ति । यस्मात् अयं रावणिः रावणतः ऊनः बलादिना हीनः न, तस्मात् मन्युश्च बलं च ताभ्यां प्रचण्डं क्रूरं इमं अक्षं हन्याम् । हन हिंसागत्योर्लिङ् । अमूभिः प्रदर्शिताभिः लीलाभिः युद्धक्रीडाभिः अलं (हि) । वीरः हनुमान् इत्थं विचिन्त्य विपक्षं शत्रुं प्रति अभ्यपतत् ॥ २० ॥

(सं.चं.) नायं रावणत ऊनो बले । विपक्षमक्षमभिमुखमपतत् ॥ २०–१ ॥

रथं रिपोश्चक्रमिव भ्रमन्तं नभश्चरं प्राप्य नभश्चरोऽसौ ।
सुरासुराभेद्यमथो बिभेद तळेन तुङ्गांश्च तुरङ्गमांस्तान् ॥ २१ ॥

(भा.दी.) **रथमि**ति । नभसि चरतीति तथोक्तः, असौ हनुमान्, चक्रमिव भ्रमन्तं सञ्चरन्तम्, सुराश्च असुराश्च तैः अभेद्यम्, (नभश्चरं) रिपोरक्षस्य रथं प्राप्य तळं हस्ततळं तेन बिभेद । भिदिर् विदारणे लिट् । अथो तुङ्गान् उन्नतान् तान् तुरङ्गमान् अश्वांश्च बिभेद । इदमुपरितनं च पद्यमुपेन्द्रवज्राबद्धम् ॥ २१ ॥

विहाय यानं च विहायसीमं कृपाणपाणिं कृतिनं चरन्तम् ।
निशाचरेन्द्रं जगृहे हरीन्द्रो[१] विहङ्गभर्त्तेव भुजङ्गमेन्द्रम् ॥ २२ ॥

(भा.दी.) **विहाये**ति । हरीन्द्रः हनुमान्, यानं तत् विहाय, विहायसि विहायो गगनं तस्मिन् चरन्तम्, कृपाणः खड्गः पाणौ यस्य स तथा तम्, कृतिनं खड्गयुद्धे कुशलम्, इमं निशाचरेन्द्रं अक्षकुमारम्, भुजङ्गमेन्द्रं सर्पश्रेष्ठं विहङ्गमानां पक्षिणां भर्त्ता स्वामी गरुडइव जगृहे । ग्रह उपादाने लिट् ॥ २२ ॥

(सं.चं.) यानं विहायापि विहायसि चरन्तम् । विहङ्गभर्ता गरुडः ॥ २२ ॥

पादाग्रयोस्तं परिगृह्य तूर्णं सहस्रकृत्वः परिवर्त्त्य[२] चण्डः ।
मुमोच भूमौ सहसा कुमारं मुमोच देहं सहसा कुमारः ॥ २३ ॥

१. 'जगृहे कपीन्द्रो–' २. 'परिवृत्य'

(भा.दी.) पादेति । चण्डः शत्रुषु क्रूरः हनुमान्, तं पादयोर्ये अग्रे तयोः, तूर्णं यथा भवति तथा परिगृह्य, सहस्रकृत्वः सहस्रवारं परिवर्त्य[१] भ्रामयित्वा, सहसा बलेन भूमौ कुमारं मुमोच । मुच्लृ मोक्षणे लिट् । कुमारः सहसा शीघ्रेण देहः शरीरं तं मुमोच ॥ २३ ॥

(सं.चं.) सहसा बलेन, वेगेन । सपदि च भूमौ मुमोच अपोथयत् । कुमारः सपदि देहं मुमोच ॥ २३ ॥

अपूर्वमोदोऽजनि देवसङ्घे [२]सत्पुष्पवर्षो हनुमत्यपूर्वः ।
अपूर्वशोको दशकन्धरेऽलं लङ्कालयेऽपूर्वतरो विलापः ॥ २४ ॥

(भा.दी.) अपूर्वेति । देवानां सङ्घः समूहस्तस्मिन् पूर्वमसञ्जातोऽपूर्वश्चासौ मोदश्च सः अजनि । हनुमति अपूर्वः नूतनः सन्ति पुष्पाणि तेषां वर्षः अजनि । दशकन्धरे रावणे अपूर्वः शोकः अजनि । लङ्का आलयो यस्य स तथा तस्मिन् जने अपूर्वतरः अतिनूतनः, कदाऽप्येतादृशावस्थाया अनुद्भवादिति भावः, विलापः परिदेवनं अजनि ॥ २४ ॥

(सं.चं.) लङ्कालये जने, लङ्काया आलये मन्दिरे वा ॥ २४ ॥

सशोककोपः पिशिताशनेशः समादिदेशेन्द्रजितं रणाय ।
महेन्द्रशत्रो स महाप्लवङ्गो[३] निगृह्यतामाशु सुत त्वयेति ॥ २५ ॥

(भा.दी.) सशोकेति । शोकश्च कोपश्च ताभ्यां सहितः, पिशितं मांसमशनं येषां ते तथा तेषां राक्षसानामीशः रावणः, महेन्द्रशत्रो हे सुत, त्वया सः महान् प्लवङ्गमः महाकपिः आशु निगृह्यताम्, ग्रह उपादाने लोट्, इति इन्द्रजितं रणं युद्धं तस्मै समादिदेश । दिश अतिसर्जने लिट् ॥ २५ ॥

(सं.चं.) सशोककोप इत्युपेन्द्रवज्रा ॥ २५ ॥

स व्याळयुक्तेन रथोत्तमेन दिव्येन दिव्यास्त्रविदां प्रबर्हः ।
सबाणबाणासनपाणिरुग्रस्तूर्णं महान्तं हनुमन्तमाप ॥ २६ ॥

(भा.दी.) स इति । दिव्यानि यान्यस्त्राणि ब्राह्मादीनि तानि विदन्तीति तथोक्तास्तेषां मध्ये प्रबर्हः श्रेष्ठः, उग्रः सः इन्द्रजित्, व्याळैः दुष्टगजैर्युक्तस्तेन, 'व्याळो दुष्टगजः' इत्यभिधानम्, दिव्येन रथोत्तमेन, बाणाश्च

१. **'परिवृत्य'** २. **'–सङ्घे तत्पुरुष–'** ३. **'महान् प्लवङ्गमः'** इति वि.ती.पाठः स्यात् । छन्दस्तु भिद्यते ।

बाणासनं धनुश्च ताभ्यां सहितौ सबाणबाणासनौ तादृशौ पाणी बाहू यस्य स तथोक्तः, महान्तं हनुमन्तं तूर्णं यथा भवति तथा आप । आप्लृ व्याप्तौ लिट् ॥ २६ ॥

(सं.चं.) व्याळयुक्तेन रथोत्तमेन । 'स पक्षिराजोपमतुल्यवेगैर्व्याळैश्चतुर्भिः सिततीक्ष्णदंष्ट्रैः । रथं समायुक्तमसङ्गवेगं समारुरोहेन्द्रजिदिन्द्रकल्पः' (४८.१८) इति च । कोऽयं व्याळो नाम? अनियतार्थमिदं पदम् । व्याळ इति सर्प उच्यते । व्याळ इत्यनिग्राह्यो गज उच्यते । व्याळ इति हिंस्रः व्याघ्रादिः श्वापद उच्यते । अत्र कोऽर्थः स्यात्? प्रथमस्तावन्न युक्तः । द्वितीयस्तृतीयो वा स्यात् । गज इत्येके । सिंह इत्यपरे । किं सिंह इत्येव । व्याघ्रादिरपि स्यात् । यदि व्याघ्रः स्यात्, व्याघ्रैश्चतुर्भिरित्येवावक्ष्यत् । आदिपदोक्ता वृकादयो दूरतोऽपास्ताः । तेन सिंहो वा स्यात्, गजो वा । अथ गजं प्रायो न रथे योजयन्ति । गज एव स्थिता योधयन्ति । अतः सिंह एव वा व्याळः । राक्षसलोकवृत्तं को निश्चेतुं प्रभवेत्? यस्य सर्वमपि महत् तं महान्तम् । 'तोरणस्थं महोत्साहं महासत्वं महाबलम् । महामतिं महावेगं महाकायं महाभुजम्' (४६.१८) इति च ॥ २६–७ ॥

तं मेघनादं स समुद्रनादो विलोक्य भूयो ववृधे हनूमान् ।
शरानसङ्ख्यान् स ववर्ष यावत् तावद्धरिस्तोरणतः खमाप ॥ २७ ॥

(भा.दी.) **तम्**इति । समुद्रस्य नाद इव नादो यस्य स तथोक्तः सः हनूमान्, मेघस्य नाद इव नादो यस्य स तथा तं तमिन्द्रजितं विलोक्य भूयः ववृधे । वृध वृद्धौ लिट् । यावत् यतः पूर्वम्, न विद्यते सङ्ख्या येषां ते तथा तान् शरान् सः ववर्ष, वृष सेचने लिट्, तावत् ततः पूर्वमेव, हरिः हनुमान् तोरणतः (खं) गगनं तत् आप । आप्लृ व्याप्तौ लिट् ॥ २७ ॥

न पक्षिपक्ष्मस्वपि यस्य बाणा लक्षच्युता[१] जात्वपि शक्रशत्रोः ।
तस्येषवः खं परिपूरयन्तः[२] सर्वे हनूमत्यभवन् विलक्षाः[३] ॥ २८ ॥

(भा.दी.) **ने**ति । यस्य शक्रशत्रोः बाणाः पक्षिणां पक्ष्मस्वपि पक्ष्मप्रदेशेष्वपि जात्वपि एकवारमपि लक्ष्यच्युता न भवन्ति । तस्य इषवः खं गगनं प्रतिपूरयन्तः हनूमति सर्वेऽपि विगतं लक्षं येषां ते तथोक्ताः । लक्षं परित्यज्य गता इत्यर्थः, अभवन् । हनुमन्तं लक्षीकृत्य मुक्तशराणां मध्ये एकोऽपि देहे न पपातेति भावः ॥ २८ ॥

---

१. उत्तरार्धानुसारेण–**'लक्षच्युताः'** इत्येव मूलपाठो युक्तः । **'ब्रह्म तल्लक्षमुच्यते'** इति च श्रुतिः । अथापि **'लक्ष्यच्युताः'** इत्येव सार्वत्रिकः पाठः ।

२. **'प्रतिपूरयन्तः'** इति वि.ती.पाठः स्यात् । **'खं परिपूरयन्त्यो सर्वा हनूमत्यभवन् विलक्ष्याः'** इति क्वचित् । यद्यपि इषुशब्द उभयलिङ्गः । अथापि **'बाणाः'** इति पूर्वनिर्देशानुसारेण अत्रापि **'परिपूरयन्तः'** इति पुल्लिङ्गनिर्देशः स्वरसः ।

३. **'विलक्ष्याः'**

(सं.चं.) पक्ष्मसु नयनच्छदरोमसु । जात्वपि लक्षच्युताः न बभूवुः । अभूतपूर्वमिदं यदिन्द्रजितोऽपि बाणा लक्षच्युता अभवन्निति । विलक्षाः लक्षं विहायान्यत्र पतन्तः । 'लक्षं तु लक्षणं लक्ष्यम्' इति यादव-प्रकाशः ॥ २८ ॥

तं वञ्चयन्तं सकलांश्च बाणानभ्युत्पतन्तं च भुजौ प्रसार्य्य ।
प्रक्रीडितं[१] प्रेक्ष्य कपिप्रवीरं चिन्तामनन्तां प्रययौ[२] सुरारिः ॥ २९ ॥

(भा.दी.) तमिति । सुरारिः इन्द्रिजित् सकलान् बाणान् वञ्चयन्तम्, भुजौ प्रसार्य विस्तारयित्वा अभ्युत्पतन्तं च, विक्रीडितं विशेषेण क्रीडां कुर्वन्तं कपिषु प्रवीरं हनुमन्तं प्रेक्ष्य अनन्तां चिन्तां प्रययौ ॥ २९ ॥

(सं.चं.) तं वञ्चयन्तमितीन्द्रवज्रा ॥ २९–३० ॥

[३]अवेद्ध्यमेनं भुवनेष्ववद्ध्यं पितामहास्त्रेण वशीकरोमि[४] ।
इत्थं स निर्द्धार्य्य महामनस्वी[५] ब्रह्मास्त्रमस्मै सहसा मुमोच ॥ ३० ॥

(भा.दी.) अवध्यमिति । महदक्षुद्रं यत् मनस्तदस्यास्तीति महामनस्वी सः इन्द्रजित्, भुवनानि जगन्ति तेषु अवेध्यं शरादिना भेत्तुमशक्यम्, (अवध्यं) एनं पितामहस्य ब्रह्मणो यदस्त्रं तेन वशीकरोमि अधीनं करोमि, इत्थं निर्धार्य निश्चित्य ब्रह्मास्त्रं तत् अस्मै हनुमते सहसा मुमोच ॥ ३० ॥

विष्णोः[६] प्रसादात् सकलास्त्रतेजो न मां स्पृशेदेवमपीह बद्धः ।
द्रक्ष्यामि वक्ष्यामि च रावणं तमिति स्मरन्नस्त्रवशोऽभवत् सः ॥ ३१ ॥

(भा.दी.) विष्णोरिति । सः हनुमान्, विष्णोः प्रसादोऽनुग्रहस्तस्मात् सकलानि यान्यस्त्राणि तेषां तेजः सामर्थ्यं मां न स्पृशेत् । स्पृश आमर्शने लिङ् । एवमपि इह ब्रह्मास्त्रविषये बद्धः सन् राक्षसं तं रावणं द्रक्ष्यामि । दृशिर् प्रेक्षणे लृट् । वक्ष्यामि श्रीरामपराक्रमवीर्यादिकं वदिष्यामि, इति स्मरन् सन् अस्त्रस्य वशः अधीनः अभवत् ॥ ३१ ॥

---

१. **'विक्रीडितम्'** इति वि.ती.पाठः । २. **'–मनन्तां स ययौ'** ३. **'अवध्यमेनं भुवनेष्ववेध्यम्'** ४. **'वशीकरिष्ये'**
५. **'महामनस्वी धैर्ययुक्तः'** इति का.श्री. । मनसो धीरत्वमेव हि महत्त्वमित्यर्थः । ६. **'विष्णुप्रसादात्'**

(सं.चं.) स्मरन् आलोचयन् । नात्र स्मरणमिति विस्मृतार्थप्रत्यभिज्ञानम् । तदेतत् 'स्मृ आध्याने' इति धातुपारायणिकाः । किन्तु आलोचनापरपर्यायं चिन्तनमिह पदार्थः । 'स्मृ चिन्तायाम्' इति च हि पठन्ति । तथाच इति स्मरन् एवं विचार्यास्रवशो बभूवेत्यर्थः ।

स राक्षसैस्तैः शणचीरबद्धः[1] सभां प्रणीतः प्रतिभत्सितश्च[2] ।
राज्ञः पुरस्तान्निहितोऽखिलं च शक्तोऽपि सेहे निजकार्य्यसिद्ध्यै ॥ ३२ ॥

(भा.दी.) स इति । तैः राक्षसैः शणस्य शणवृक्षस्य यानि चीराणि चर्माणि तैर्बद्धः, सभां प्रणीतः प्रापितः, परिभत्सितः राक्षसैः कुत्सितश्च, राज्ञः रावणस्य पुरस्तात् निहितः निक्षिप्तः स हनुमान् शक्तोऽपि स्वं मोक्तुं शक्तोऽपि, निजं यत्कार्यं तस्य सिद्ध्यै निष्पत्त्यर्थम्, रावणसम्भाषणकार्यसिद्ध्यर्थमित्य(र्थः, अ)खिलं राक्षसकृतं समस्तं कर्म तत् सेहे सहनशक्तिमाश्रित्य स्थितोऽभूत् । षह मर्षणे लिट् ॥ ३२ ॥

(सं.चं.) शणः 'ಸೆಣಬು' इति भाषायाम् । शणचीरम् 'ಗೋಣಿನಾರು' इति भाषायाम् ॥ ३२–५ ॥

कस्त्वं कपे त्वं कुत आगतोऽसि कस्यासि दूतोऽपकृतं[3] किमर्त्थम् ।
इत्थं दशास्येन स पृच्छ्यमानः प्रणम्य रामं हनुमानुवाच ॥ ३३ ॥

(भा.दी.) कस्त्वमिति । हे कपे, त्वं कः कस्य सुतः असि? त्वं कुतः देशात् आगतः असि? कस्य दूतः असि? किमर्थं अपकृतम्, अशोकवनभङ्गाद्यपकारः कृतः? इत्थं दशास्येन पृच्छमानः विचार्यमाणः (सः हनुमान्) श्रीरामं प्रणम्य उवाच ॥ ३३ ॥

जातिस्वभावो वनलोपनं तत् क्षमस्व राजन् फलजीविनां नः[4] ।
जिघांसयाऽभ्यापततः क एव जिजीविषुर्न्न क्षपयेत् प्रभुश्चेत् ॥ ३४ ॥

(भा.दी.) जातीति । हे राजन् रावण, फलेन जीवितुं शीलमेषामस्तीति तथा तेषां नः कपीनाम्, वनस्य लोपनं विनाशनं जातेः कपिजातेः स्वभावः, तत् जातिस्वभावेन कृतं वनविनाशनं क्षमस्व । क्षमूष् सहने

---

१. **'शणचीरबद्धः । शणनिर्मितरज्जुभिः चीरवस्त्रैश्च बद्धः'** इति वि.भू. । **'शरचीरबद्धः'** इत्येके पठन्ति । **'शरचीरबद्धः शरमयवल्कलेन बद्धः'** इति का.श्री. । शर इति मुञ्जाख्यस्तृणविशेषः । येन मौञ्जी क्रियते ।

२. **'परिभत्सितश्च'** इति वि.ती.पाठः ।

३. **'-दूतोऽपकृतः'**

४. इतः परं श्लोकार्धमधिकं क्वचित्–**'मया तथाऽपि प्रतिभर्जितं तल्लाङ्गूलमित्थं कृतमन्यथा न'** (?) इति ।

लोट् । जातिस्वभावेन वनविनाशने क्रियमाणे सति तद्रक्षणमकृत्वा किमर्थं (अप)कृतमिति प्रश्नस्य प्रौढिद्योतकत्वात् क्षमस्वेत्याभासोक्तिः । तर्हि रक्षसां हननं किमर्थं कृतमित्यत आह– **जिघांसये**ति । जिघांसया हननेच्छया अभ्यापततः अभ्यागच्छतः पुरुषान्, जिजीविषुः जीवितुमिच्छावान् पुरुषः, चेत् प्रभुः शत्रुहनने समर्थः, तर्हि क एव को वा न क्षपयेत्? न विनाशयेत्? क्षप[१] विनाशने लिङ् । तथा आततायिवधस्य न्याय्यप्राप्तत्वात् तद्विषये का कथन्तेति भावः ॥ ३४ ॥

(सं.चं.) क्षपयेत् । 'क्षप क्षेपे' इति कविकल्पद्रुमः । अपठितोऽयं धातुः पाणिनीयैः । अत एव धातुसूत्रेष्वन्ते सूत्रमेकं पठन्ति–'बहुलमेतन्निदर्शनम्' इति । केचिदिदं सूत्रमार्षमाचक्षते । व्याचख्यौ च क्षीरस्वामी–'यदेतद् भवत्यादिधातुपरिगणनं तद् बाहुल्येन निदर्शनत्वेन ज्ञेयम् । तेनापठिता मिलि-क्लविप्रभृतयो लौकिकाः, स्तम्भुस्तुम्भादयश्च सौत्राः, चुलुम्पादयश्च वाक्यकारीया धातव उदाहार्याः' इति । आह च श्रीभोजः– 'मिलन्त्याशासु जीमूता विक्लवन्ते दिवि ग्रहाः । तपः क्षपयति प्रावृट् क्षीयन्ते कामिविग्रहाः । अतस्तुनीहि मासर्तून् वसन्तो मानघस्मरः । दूतिद्रूतिमृतीयस्व जुजावायिषति स्मरः । मुषलक्षपहुङ्कारस्तोमैः कलम-खण्डिनि । कुचविष्कम्भमुत्तभ्नन् निष्कुभ्नातीव ते स्मरः । नयन्नान्दोलयन्नेष प्रेङ्खोलयति मे मनः । पवनो वीजयन्नाशा ममाऽशामुंचुलुम्पति' इति शृङ्गारप्रकाशे । मिल श्लेषणे, क्लव भये, क्षप क्षेपणे, क्षि हिंसायाम्, स्तुञ्-? घस (घस्लृ) भक्षणे, द्रू वधे गतौ, ऋत गत्यां स्पर्धने ऐश्वर्ये, घृणायां च, जु रंहसि, स्कम्भु रोधे, स्तम्भु रोधे, स्कुन्भ रोधे, दोलृ गतिचातुर्ये, प्रेङ्खोल चापले, वीज उत्क्षेपे, चुलुम्प लोपे– इत्यन्यत्र धातुपाठः । न ब्राह्ममितीन्द्रवज्रा ॥ ३४–५ ॥

न ब्राह्ममस्त्रं मम बन्धकं स्यान्मा कौतुकं ते सुतविक्रमे स्यात् ।
मां रामदूतं मरुतस्तनूजं विद्धि स्वयं द्रष्टुमुपागतं त्वाम् ॥ ३५ ॥

(भा.दी.) ब्रह्मास्त्रबद्धश्चाहं नास्मीति वदन् कस्य दूत इत्यस्योत्तरमाह– **ने**ति । ब्रह्मा देवता यस्य तद्ब्राह्मं अस्त्रं मम बन्धकं न स्यात् । अतः सुतस्य इन्द्रजितो यो विक्रमः पराक्रमस्तस्मिन् ते कौतुकं कुतूहलं मा स्यात् । तर्हि बलात् कथमानीतस्त्वमित्यतो रामदूतत्वादहमेवात्र स्वेच्छया त्वां प्रति सम्भाषणार्थमागतोऽस्मि, इदं तु व्याजमात्रमित्याह– मामिति । मरुतः तन्वा जातस्तनूजस्तम्, पुत्रमित्यर्थः, रामदूतं मां त्वां स्वयं द्रष्टुं उपागतं सम्प्राप्तं विद्धि । विद ज्ञाने लोट् ॥ ३५ ॥

---

१. धातुपाठेष्वपठितयोऽयं प्रयोगसिद्धो धातुः । **'वर्धते हि धातुगणः'** इति च क्षीरस्वामी ।

कृपाकरः क्षाम्यति चौर्य्यमार्य्यः प्रणम्य देवी प्रतिदीयते चेत् ।
न चेद् द्रुतं[1] द्रक्ष्यसि राघवौ तौ तं[2] चातिवीरं[3] कपियूथनाथम् ॥ ३६ ॥

(भा.दी.) कृपेति । चेत् त्वया देवी सीता श्रीरामं प्रणम्य प्रतिदीयते परावृत्य दीयते, तर्हि कृपाकरः आर्यः स्वामी[4] श्रीरामः चौर्यं त्वत्कृतचोरत्वं तत् क्षाम्यति । क्षमूष् सहने लट् । न चेत्, न ददासि चेत्, तौ राघवौ, अनिवार्यं निवारयितुमशक्यम्, कपीनां ये यूथास्तेषां नाथं तं सुग्रीवं च स्वयं द्रक्ष्यसि ॥ ३६ ॥

(सं.चं.) अतिवीरं सुग्रीवम् । अनिवार्यमिति पाठे अनिवार्यं निवारयितुमशक्यं यथा स्यात् तथा । अनिवार्यवीर्यं वा कपियूथनाथं सुग्रीवम् ॥ ३६ ॥

रामेषुरेकः ससुरासुरादीन् संहर्त्तुमीष्टे सकलांश्च लोकान् ।
त्वामल्पसारं किमुताल्पबुद्धे मा विग्रहो भूच्छरणं व्रजैनम् ॥ ३७ ॥

(भा.दी.) रामेति । एकः रामेषुः सुराश्च असुराश्च ते आदयो येषां ते तथोक्तास्तैः सहितान् सकलान् लोकांश्च संहर्तुं ईष्टे शक्तो भवति । ईश ऐश्वर्ये । अल्पा बुद्धिर्यस्य तत्सम्बुद्धिः, हे रावण, अल्पः सारो बलं यस्य स तथोक्तः तं त्वां उत हन्यादिति किं वक्तव्यम्? विग्रहः श्रीरामेण कलहः मा भूत् । एनं श्रीरामं शरणं तत् व्रज ॥ ३७ ॥

(सं.चं.) रामेषुरितीन्द्रवज्रा ॥ ३७ ॥

शक्तोऽप्यहं त्वां सबलं न हन्यां भूम्नः स्वयं शत्रुवधे यशः स्यात् ।
एवं ब्रुवाणे पवमानसूनावाज्ञापयत् तस्य वधं दशास्यः ॥ ३८ ॥

(भा.दी.) शक्त इति । भूम्नः परिपूर्णस्य श्रीरामस्य स्वयं स्वेन शत्रोर्यो वधस्तस्मिन् कृते सति यशः स्यात्, इति हेतोः अहं त्वद्वधे शक्तोऽपि सबलं ससैन्यं त्वां न हन्याम् । पवमानसूनौ वायुपुत्रे, (एवं ब्रुवाणे सति) दशास्यः रावणः तस्य वधं आज्ञापयत् । ज्ञा अवबोधने लङ् ॥ ३८ ॥

१. **'नो चेद् द्रुतं द्रक्ष्यसि'** । **'स्वयं द्रक्ष्यसि'** इति वि.ती.पाठः ।

२. **'राघवौ त्वम्'** इति क्वचित् ।

३. **'चानिवार्यं कपि–'** इति वि.ती.पाठः । **'तं चाथ वीरम्'** इति क्वचित् ।

४. **'अर्यः स्वामी'** इत्यपि पाठः सम्भवी । **'अर्यः स्वामिवैश्ययोः'** (अ.सू.३.१.१०३) इति हि पाणिनिः । तदा तु मूलपाठोऽपि **'चौर्यमर्यः'** इत्येव स्यात् ।

(सं.चं.) सबलं त्वां हन्तुं शक्तोऽपि । इदमपीन्द्रवज्राबद्धम् ॥ ३८ ॥

राज्ञो न दूतस्य वधः प्रशस्तः पुच्छं कपेरस्य दहाम शीघ्रम्[1] ।
विभीषणेनेत्यभिभाषितोऽसौ तत्पुच्छमच्छं किल दग्धुमैच्छत् ॥ ३९ ॥

(भा.दी.) राज्ञ इति । दूतस्य वधः राज्ञः प्रशस्तः श्लाघ्यः न । अतः अस्य कपेः पुच्छं तत् शीघ्रं यथा भवति तथा दहामः । दह भस्मीकरणे लट् । विभीषणेन इति अभिभाषितः प्रोक्तः असौ रावणः अच्छं निर्मलं तस्य पुच्छं तत् दग्धुं ऐच्छत् किल । इषु इच्छायां लङ् ॥ ३९ ॥

(सं.चं.) राज्ञो न दूतस्य वधः प्रशस्तः । 'वैरूप्यमङ्गेषु कशाभिघातो मौण्ड्यं तथा लक्षणसन्निपातः । एतान् हि दूते प्रवदन्ति दण्डान् वधस्तु दूतस्य न नः श्रुतोऽपि' (५२.१५) इति, 'कपीनां किल लाङ्गूलमिष्टं भवति भूषणम् । तदस्य दीप्यतां शीघ्रं तेन दग्धेन गच्छतु' (५३.३) इति च ॥ ३९ ॥

राजाज्ञया पुच्छममुष्य वस्त्रैः संवेष्टितं संववृधेऽतिमात्रम् ।
यत्नेन संवेष्ट्य निशाचरेन्द्रास्तत्राग्निमुच्चैरुददीपयंस्ते ॥ ४० ॥

(भा.दी.) राजेति । राजाज्ञया रावणाज्ञया अमुष्य पुच्छं वस्त्राणि चेलानि तैः संवेष्टितं तत् अतिमात्रमत्यन्तं ववृधे । वृधु वृद्धौ लिट् । ते निशाचरेन्द्राः यत्नः प्रयत्नस्तेन संवेष्ट्य तत्र पुच्छे अग्निं उच्चैः उददीपयन् ज्वलयामासुः । दीपी दीप्तौ लङ् ॥ ४० ॥

(सं.चं.) तत्र पुच्छे । इदमपीन्द्रवज्राबद्धम् ॥ ४० ॥

पुनःपुनस्तैः पुरि नीयमानः[2] सम्प्रीयते स्मैष पुरीं दिधक्षुः ।
ज्वलंश्च नैनं ज्वलनो ददाह मरुत्स्वरूपं हि मरुत्सखत्वात्[3] ॥ ४१ ॥

(भा.दी.) पुनरिति । तैः राक्षसैः पुनःपुनः पुरि, पुर्यामित्यर्थः, नीयमानः एषः हनुमान्, पुरीं दिधक्षुः दग्धुकामः सन्, सम्प्रीयते स्म अत्यन्तं प्रीतोऽभवत् किल । प्रीङ् प्रीणने लट् । ज्वलंश्च ज्वलमानोऽपि ज्वलनः

---

१. **'पुच्छं दहामोऽस्य कपेस्तु शीघ्रम्'** इति वि.ती. पाठः स्यात् । **'अस्य दूतस्य कपेः पुच्छं शीघ्रं दहाम । दग्धं करिष्यामः (?करवाम) । दूतस्याङ्गवैरूप्यकशाभिघातादिदण्डस्य विहितत्वात्, कपेर्लाङ्गूलस्येष्टत्वाच्चेति भावः'** इति का.श्री. ।

२. **'पुनः परीतैः परिणीयमानः' इति पुनः पुनस्तैः परिणीयमानः'** इति च । **'परित आनीयमानः'** इति वि.भू. । **'एषः हनुमान् परीतैः राक्षसैः पुनः परणीयमानः'** इति का.श्री. ।

३. **'मरुत्सखित्वात्'** इति वि.ती.पाठः ।

अग्निः मरुतः स्वरूपमवतारभूतं एनम्, मरुत् सखा यस्य वह्नेस्तस्य भावस्तत्वं तस्मात् न ददाह । दह भस्मीकरणे लिट् ॥ ४१ ॥

(सं.चं.) अत्र द्वेधा पाठं पठन्ति । मरुत्सखित्वादिति मरुत्सखत्वादिति । पूर्वपाठे बहुव्रीहिः । उत्तरपाठे तत्पुरुषः । मरुत् सखा यस्य स मरुत्सखा । तस्य भावः मरुत्सखित्वम् । मरुतः सखा मरुत्सखः । तस्य भावः मरुत्सखत्वम् । 'राजाहःसखिभ्यष्टच्' (अ.सू.५.४.९१) इति तत्पुरुषे समासान्तष्टच् ॥ ४१ ॥

स शैलसङ्काशशरीर आसीत् क्षणाद् बिलाळप्रतनुश्च पश्चात् ।
बन्धाद् विमुक्तोऽथ च पर्वताभो योगीश्वरस्तच्च पुरं ददाह ॥ ४२ ॥

(भा.दी.) स इति । अथ शणचीरस्य यो बन्धस्तस्माद् विमुक्तः, योगिनां योगसामर्थ्यवतामीश्वरः, सः हनुमान्, शैलस्य सङ्काशा समाना तनुर्यस्य स तथोक्तः आसीत्, पश्चात् क्षणः क्षणकालस्तस्मात् बिलाळवत् मार्जारवत् प्रतनुश्च सूक्ष्मश्च आसीत्, अथ च पर्वताभः सन् तत् पुरं ददाह ॥ ४२ ॥

(सं.चं.) स इति । समुद्रतरणसमये शैलसङ्काशशरीरः । पुनर्लङ्कान्वेषणे बिलाळप्रतनुः । लङ्कादहने पुनः पर्वताभः । अथच वनभञ्जने पर्वताभः । ब्रह्मास्त्रबन्धने बिलाळप्रतनुः । पुनर्बन्धाद् विमुक्तः पर्वताभः । 'स भूत्वा शैलसङ्काशः क्षणेन पुनरात्मवान् । ह्रस्वतां परमां प्राप्तो बन्धनान्यवशातयत् ।विमुक्तश्चाभवच्छ्रीमान् पुनः पर्वतसन्निभः' (५३.४१-२) इति च ॥ ४२ ॥

स तोरणस्स्थं[1] परिघं गृहीत्वा [2]तान् रक्षिणस्तेन निहत्य सर्वान् ।
लङ्कां सभागोपुरसौधसद्मराजावरोधादिमतीं ददाह ॥ ४३ ॥

(भा.दी.) स इति । सः तोरणे तिष्ठतीति तोरणस्थस्तं परिघं गृहीत्वा, तेन सर्वान् तान् रक्षिणः लङ्कारक्षकान् निहत्य, सभाश्च गोपुराणि च, 'पुरद्वारं तु गोपुरम्' इत्यमरः, सौधाः राजगृहाणि ते च, 'सौधोऽस्त्री राजसदनम्' इत्यमरः, सद्मानि च, राजावरोधा राजान्तःपुराणि ते च, 'भूभुजामन्तःपुरं स्यादवरोधनम् । शुद्धान्तश्चावरोधश्च' इत्यमरः,(ते आदयः येषाम्,)ते अस्यां सन्तीति तथोक्ता, तां लङ्कां ददाह ॥ ४३ ॥

(सं.चं.) तोरणं गृहप्रवेशद्वारम् । **'ಹೆಬ್ಬಾಗಿಲು'** इति भाषायम् । तान् तोरणरक्षिणः । बहिर्द्वारपालकान् । सह भान्त्यत्रेति सभा । पुरद्वारं गोपुरम् । **'ಅಗಸೆಬಾಗಿಲು'** इति भाषायम् । सौधं सुधाधवळितं श्वेतभवनमाधिकारिकाणाम् । सद्म सदनमन्येषाम् । राज्ञामवरोधोऽन्तःपुरम् ॥ ४३–४ ॥

१. **'तोरणस्थः परिघम्'**

३. **'तद्रक्षिणस्तेन'** इति, **'द्वारक्षिणस्तेन'** इति च ।

जज्वाल तत्र ज्वलनोऽतिमात्रं[1] जज्वाल तस्माद् द्विगुणं हनूमान् ।
सर्वत्र चैकक्षण एव दृष्टः स विश्वरूपत्वमवाप नूनम् ॥ ४४ ॥

(भा.दी.) **जज्वाले**ति । तत्र लङ्कायां ज्वलनः अतिमात्रमत्यन्तं जज्वाल । ज्वल दीप्तौ लिट् । तस्मादग्नेः हनूमान् द्वौ गुणौ आवृत्ती यथा भवति तथा जज्वाल । सः हनुमान् सर्वत्र प्रदेशे एको यः क्षणस्तस्मिन्नेव दृष्टः सन्, विश्वानि व्याप्तानि रूपाणि यस्य स तथा तस्य भावस्तत्त्वं तत्, अनन्तरूपत्वमिति भावः, अवाप नूनम् ॥ ४४ ॥

आक्रन्दनैः सन्दहनैर्निपातैर्विलोठनाद्यैर्भयदुःखपूर्णैः[2] ।
हनूमता दण्डधरेण दग्धा लङ्का न रेजे नरकोपमाना[3] ॥ ४५ ॥

(भा.दी.) आक्रन्दनैरिति । दण्डं धारयतीति तथोक्तस्तेन हनूमता दग्धा लङ्का, आक्रन्दनानि रोदनानि तैः, सन्दहनानि सम्यक् दहनानि तैः, निपाताः कूपादिषु पतनानि तैः, भयं च दुःखं च ताभ्यां पूर्णैः विलोठनं ताडनं आद्यं येषां तानि तथोक्तानि तैः, लुठ उपघाते इति धातुः, नरकस्य उपमानं उपमा यस्याः सा तथाभूता सती न रेजे । राजृ दीप्तौ लिट् ॥ ४५ ॥

(सं.चं.) दण्डधरेण यमेनेव लङ्कां दण्डयता हनूमता लङ्का नरकोपमाना सती न रेजे । 'यमः पितृपतिर्दण्डधरो महिषवाहनः' इति यादवप्रकाशः । कथं नरकोपमाना? भयदुःखपूर्णैराक्रन्दनैः, अग्निमध्ये सन्दहनैः, गर्तादिषु निपातैः, असह्यया वेदनया विलोठनाद्यैश्च । विलोठनं विवेष्टनम् ॥ ४५ ॥

---

१. **'अतिमात्रं अत्यन्तं जज्वाल । मरुता सहितत्वादिति भावः'** इति का.श्री. ।

२. **'–पातैर्विलोडनाद्यैर्भयदुःखपूर्णैः'** । **'निपातैः सौधादिपतनैः विलोडनाद्यैः सङ्क्षोभधावनाद्यैः'** इति का.श्री. ।

२. इतः परं श्लोकत्रयं क्वचित् पठ्यते– **'सुताबलाभिः प्रययौ दशास्यो विक्षिप्य गेहाध्वनि कुम्भकर्णम् ।**
'ऋते गृहं चैव ददाह सर्वान् गृहांश्च सौधानि विभीषणस्य ॥ १ ॥

'वृद्धौ च मातापितरौ स्नुषाश्च बालाश्च शीला दुहिता(?) स्वकीयाः ।
'भ्राता भगिन्यः सधनाश्च कुत्र स्वाकल्पवस्त्रा इति चुक्रुशुः प्रजाः ॥ २ ॥

'ज्ञात्वाऽभिरामं पुरुषोत्तमेति भयाद् विसृष्टो दशकन्धरस्य ।
'ददाह सर्वं प्रकटोत्कटध्वनिर्मरुत्सुतेनापि विवृद्धतेजाः ॥ ३ ॥

अप्रबुद्धाऽसङ्गता च रचना प्रक्षिप्ततां स्फुटमवगमयति । न व्याख्यातं च कैरपि ।

वितानकर्म्मेत्थमिदं विधाय नदाधिराजेऽवभृथं च कृत्वा[१] ।
समर्प्पयामास समर्प्पणीयं रामाय तन्मारुतियायजूकः ॥ ४६ ॥

(भा.दी.) वितानेति । मारुतियायजूकः हनुमदाख्ययजमानः इत्थं इदं वितानकर्म युद्धलक्षणयज्ञाख्यं कर्म विधाय, नदानामधिराजः समुद्रः तस्मिन् अवभृथः अवभृथस्नानं तं च कृत्वा, समर्पणीयं श्रीरामाय समर्पणार्हं तत् युद्धयज्ञाख्यकर्म श्रीरामाय समर्पयामास ॥ ४६ ॥

(सं.चं.) वितानकर्म यज्ञकर्म । अवभृथः यागावसानस्नानम् । तत् वितानकर्म । मारुतिरेव यायजूकः इज्याशीलः यजमानः । 'इज्याशीलो यायजूकः' इति यादवप्रकाशः । यायज्यते पुनःपुनर्यजतीति यायजूकः । एतेन रामपूजाख्यो यज्ञः हनुमतो नित्यकर्मेत्याह ॥ ४६–७ ॥

दग्धा पुरी मारुतिना समस्ता सीतान्विता नैव च शिंशपा सा ।
स्याद् विक्रमो नीतियुतः प्रभूणां[२] श्रुत्वेत्यृषीणां स वचोऽभ्यनन्दत् ॥ ४७ ॥

(भा.दी.) दग्धेति । मारुतिना समस्ता पुरी दग्धा, सीतान्विता सा शिंशपा च नैव दग्धा, यस्मात् प्रभूणां समर्थानां विक्रमः नीतियुतः स्यात् । इति ऋषीणां युद्धदर्शनार्थमागतमुनीनां वचः श्रुत्वा हनुमान् अभ्यनन्दत् । नदि समृद्धौ लङ् ॥ ४७ ॥

(सं.चं.) दग्धा पुरीतीन्द्रवज्रा ॥ ४७ ॥

शीतो भवाग्ने[३] मरुतः सुते त्वं प्रागेव [४]हीत्याशिषमुक्तवत्यै ।
संसान्त्वितायै सरमावचोभिर्ननाम तस्यै हनुमान् यियासुः ॥ ४८ ॥

(भा.दी.) शीत इति । यियासुः परावृत्य गमनेच्छावान् हनुमान्, हे अग्ने, त्वं मरुतः सुते शीतः भव, इति प्रागेव पुच्छदाहसमय एव भीत्या आशीः शुभवाक्यं तां उक्तवत्यै, सरमायाः विभीषणभार्यायाः वचोभिः संसान्त्वितायै तस्यै प्राग्दृष्टायै सीतायै ननाम ॥ ४८ ॥

(सं.चं.) प्रागेव पुच्छदाहवार्ताश्रवणसमय एव, 'हे अग्ने, मरुतः सुते हनुमति त्वं शीतो भव' इत्याशिषं शुभाशंसनमुक्तवत्यै । सरमायाः विभीषणभार्यायाः वचोभिः संसान्त्वितायै कृतसमाधानायै तस्यै शिंशपामूलगतायै

१. '–भृत्यं चकार'
२. 'सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः' इति का.श्री. ।
३. 'शान्तो भवाग्ने'
४. 'प्रागेव भीत्याऽऽशिष–' इति वि.ती.पाठः ।

सीतायै रामसमीपं प्रति यियासुर्हनुमान् ननाम । 'यद्यस्ति पतिशुश्रूषा यद्यस्ति चरितं तपः । यदि वाऽस्त्येकपत्नीत्वं शीतो भव हनूमतः' (५३.२७) इत्यादि च ॥ ४८ ॥

क्षिप्रं समागच्छतु देव इत्थं तयोदितो बाढमिति प्रणम्य ।
गिरीन्द्रमारुह्य गिरिप्रकाशस्तितीर्षुरब्धिं ववृधे पुरेव ॥ ४९ ॥

(भा.दी.) क्षिप्रमिति । देवः श्रीरामः क्षिप्रं यथा भवति तथा समागच्छतु, गम्लृ गतौ लोट्, इत्थं तया सीतया उदितः हनुमान्, बाढमिति तथाऽस्त्विति प्रणम्य, गिरीन्द्रं त्रिकूटं आरुह्य, अब्धिं तितीर्षुः तर्तुकामः सन्, गिरिप्रकाशः गिरिसमः सन्, 'प्रख्यः प्रकाशः प्रतिमः प्रकारस्तुल्यः समः सन्निभ इत्यभिन्नाः' इति हलायुधः । पुरेव पूर्ववत् ववृधे । वृधु वृद्धौ लिट् ॥ ४९ ॥

(सं.चं.) क्षिप्रं देवो रामः समागच्छतु इत्थमिति तया सीतयोदितः । पुरा लङ्कां प्रति गमनसमये ॥ ४९ ॥

धराधरं तं धरया समानं कुर्वन् पदाभ्यामवपीडनेन[१] ।
उत्पत्य नित्यद्युतिमान्[२] हनूमानमेयधामा जलधिं ततार ॥ ५० ॥

(भा.दी.) धरेति । तं धराधरं त्रिकूटपर्वतं पदे पादौ ताभ्यामवपीडनं विमर्दस्तेन धरया भूम्या समानं कुर्वन् सन्, उत्पत्य नित्या अविच्छिन्ना या उद्द्युतिः उत्कृष्टप्रभा अस्यास्तीति तथोक्तः, अमेयमपरिमितं धाम तेजो यस्य स तथोक्तः हनूमान् जलधिं ततार । तॄ प्लवनतरणयोः लिट् ॥ ५० ॥

(सं.चं.) अवपीडनेन अधःपीडनेन । अमेयधामा अमितप्रभावः ॥ ५० ॥

आशा विशाला[३] हरतीव दोर्भ्यामूर्ध्वाण्डमुत्खण्डयतीव मूर्ध्ना ।
पुराऽन्यतेजः पिबतीव भासा[४] श्रीमान् हनूमानधिकं रराज ॥ ५१ ॥

(भा.दी.) आशा इति । यः हनूमान् विशाला विस्तीर्णा आशा दिशः दोषौ हस्तौ ताभ्यां हरति पुरा इव अहरदिवाभूत् । हृञ् हरणे लट् । मूर्ध्ना ऊर्ध्वं च तत् अण्डं च तत् ब्रह्माण्डोपरिभागमित्यर्थः । उत्खण्डयति

१. **'–मतिपीडनेन'** २. **'नित्योद्द्युतिमान्'** इति वि.ती.पाठः। ३. **'आशां विशालां हरतीव'**

४. **'भासा स्वतेजसा अन्यतेजः सूर्यादितेजः पिबति पुरः पास्यतीव'** इति का.श्री. । **'यावत्पुरानिपातयोर्लट्'** (अ.सू.३.३.४) इति भविष्यदर्थे लडित्यर्थः ।

पुरा इव खण्डितवानिवाभूत् । खडि मन्थे[1] लट् । भासा तेजसा अन्येषां सूर्यादीनां तेजस्तत् पिबति पुरा अपिबदिवाभूत् । श्रीमान् सः हनुमान् अधिकं यथा भवति (तथा) रराजेत्यन्वयः । राजृ दीप्तौ लिट् । यद्वा श्रीमान् हनुमान् विशालाः आशाः दोर्भ्यां हरतीव मूर्ध्ना ऊर्ध्वाण्डं उत्खण्डयतीव भासा अन्यतेजः पुरा पुरतः पिबतीव अधिकं रराज ॥ ५१ ॥

(सं.चं.) अन्यतेजः तस्य भानात् पुरा पूर्वमेव स्वभासा पिबतीव ॥ ५१–४ ॥

कपीन्द्रचन्द्रे गगनं गतेऽस्मिन् वीचीव वाणी मम वर्द्धतेऽलम् ।
तां ग्रन्थबाहुल्यभयान्मनीषा स्थैर्य्येण वेलेव नियच्छतीयम् ॥ ५२ ॥

(भा.दी.) **कपी**ति । अस्मिन् कपीन्द्र एव चन्द्रस्तस्मिन् गगनं नभस्तस्मिन् गते सति, मम वाणी वीचीव तरङ्गइव अलं सम्यक् वर्धते । वृध वृद्धौ लट् । इयं ग्रन्थसङ्कोचरुचिः मनीषा बुद्धिः तां वाणीं ग्रन्थस्य यद्बाहुल्यं तदेव भयं तस्मात् स्थैर्यं तेन वेलेव समुद्रतटमिव नियच्छति प्रशमयति । निपूर्वाद्यम उपरम इत्यस्मात् लट् । लङ्कायाः परावृत्य गमनसमयेऽत्यन्तं वर्णनीयमाहात्म्यस्य हनुमतो वर्णने ग्रन्थबाहुळ्यं स्यादिति बुद्ध्योपरम्यत इति भावः ॥ ५२ ॥

पारस्थले सन्निहिते ननाद स्वज्ञातिवर्ग्गान्[2] प्रतिहर्षयन् सः ।
दीना निराशाः पतिताः कपीन्द्रास्ते तेन नादेन ननन्दुरुच्चैः ॥ ५३ ॥

(भा.दी.) **पारे**ति । पारं च तत् स्थलं च तस्मिन्, समुद्रतीर इत्यर्थः, सन्निहिते समीपस्थे सति, सः हनुमान्, स्वस्य जातिर्येषां ते तथा तेषां वर्गान् समूहान्, कपिसमूहानित्यर्थः, प्रतिहर्षयन् सन्, ननाद सिंहनादं चक्रे । णद अव्यक्तशब्दे लिट् । दीनाः दुःखिताः, निर्गता आशा जीवनाशा येभ्यस्ते तथोक्ताः, पतिताः क्लेशमापन्नाः ते तीरस्थाः कपीन्द्राः तेन नादो ध्वनिस्तेन उच्चैः सम्यक् ननन्दुः । नदि हर्षे लिट् ॥ ५३ ॥

व्यक्तं हनूमान् स ददर्श सीतां मानी न गर्ज्जेदकृतार्थ इत्थम् ।
ब्रह्मात्मजोक्ताः कपयः प्रहृष्टा नगेषु पेतुर्न्ननृतुर्ज्जगुश्च ॥ ५४ ॥

(भा.दी.) **व्यक्तमि**ति । सः हनूमान् व्यक्तं यथा भवति तथा सीतां ददर्श । मानः अभिमानोऽस्यास्तीति तथोक्तः, अकृतः अर्थः प्रयोजनं येन स तथोक्तः सन्, इत्थं न गर्जेत् । गर्ज शब्दे लिङ् । इत्थं ब्रह्मात्मजस्तेन

१. भ्वादिरयं खडिः । मन्थो विलोडनम् । 'खडि भेदने' इति चुरादिः खडिरत्र समुचितः ।
२. **'स्वजातिवर्गान्'** इति वि.ती.पाठः ।

जाम्बवता उक्ताः कपयः प्रहृष्टाः सन्तः, नगा वृक्षास्तेषु पेतुः प्लवनं चक्रुः । केचन ननृतुः । नृती गात्रविक्षेपे लिट् । जगुश्च । गै शब्दे लिट् ॥ ५४ ॥

अथावतीर्ण्णं परिपूर्ण्णमेनमवेक्ष्य माहेन्द्रमहीधरेन्द्रे[1] ।
उपायनैर्म्मूलफलैः [2]सपुष्पैरभ्यर्च्च्य सर्वेऽपि[3] ववन्दिरे ते ॥ ५५ ॥

(भा.दी.) अथेति । (अथ) सर्वे ते कपयः माहेन्द्रश्चासौ महीधरश्च तस्मिन्, माहेन्द्रपर्वत इत्यर्थः, अवतीर्णं आगत्य स्थितम्, परिपूर्णं मुखप्रसन्नतादिना पूर्णम्, एनं अवेक्ष्य उपायनैः उपायनभूतैः, मूलानि फलानि च तैः, सु शोभनानि यानि पुष्पाणि तैः अभ्यर्च्य अभिनन्दिरे सन्तोषयामासुः । नदि हर्षे लिट् ॥५५॥

(सं.चं.) ववन्दिरे तुष्टुवुः ॥ ५५–६ ॥

दृष्टा मया राघववल्लभेति निशम्य वायोस्तनयस्य वाणीम् ।
हृष्टं कपीनां कुलमुज्जगर्ज प्रत्युत्पपातालमुदग्रपुच्छम् ॥ ५६ ॥

(भा.दी.) दृष्टेति । राघववल्लभा श्रीरामप्रिया सीता मया दृष्टा इति वायोः तनयस्य वाणीं निशम्य, हृष्टम्, उदग्राणि पुच्छानि यस्य तत्तथोक्तम्, कपीनां कुलं समूहः उज्जगर्ज । गर्ज शब्दे लिट् । अलं सम्यक् प्रत्युत्पपात इतस्ततः पुप्लुवे ॥ ५६ ॥

पिङ्गेक्षणैरङ्गदशम्भुजाद्यैः पृष्टः पुनश्चाधिकविस्तरेण ।
उदन्तमाद्यन्तयुतं निवेद्य प्रशस्यते स्म श्वसनस्य सूनुः ॥ ५७ ॥

(भा.दी.) पिङ्गेति । अङ्गदश्च शम्भुजो ब्रह्मजो जाम्बवान् स च तौ आद्यौ येषां ते तथोक्तास्तैः, पिङ्गेक्षणैः कपिभिः पृष्टः गमनागमनविषये विचारितः, पुनः अधिकमत्यन्तं विस्तरस्तेन, आदिश्च अन्तश्च ताभ्यां युतस्तम्, गमनमारभ्य आगमनपर्यन्तं कृतस्वपराक्रमयुक्तमित्यर्थः, उदन्तं वृत्तान्तं निवेद्य विज्ञाप्य, श्वसनस्य वायोः सूनुः हनुमान् कपिभिः प्रशस्यते स्म संस्तुतोऽभूत् । शंसु स्तुतौ लट् ॥ ५७ ॥

(सं.चं.) शम्भुरिति ब्रह्मा । तदात्मजो जाम्बवान् ॥ ५७ ॥

---

१. **'माहेन्द्रमहीध्रपृष्ठे'** । अत्रापूर्णं वि.ती.व्याख्यानम् । **'माहेन्द्रमहीधरेऽत्र'** इति तत्पाठः स्यात् ।

२. **'–फलैः सुपुष्पैः–'** इति वि.ती.पाठः । ३. **'सर्वेऽभिननन्दिरे ते'** इति वि.ती.पाठः । आत्मनेपदत्वं तु कथमिति चिन्त्यम् ।

आलोच्य ते कार्य्यमथाऽर्य्यवर्य्या निश्चित्य सर्वं हनुमन्मतेन ।
आशामुदीचीं प्रययुस्तरन्तो नानानगाळीर्न्नगरीर्न्नदीश्च ॥ ५८ ॥

(भा.दी.) आलोच्येति । अथ आर्यवर्याः सत्सु श्रेष्ठाः ते कपयः, सर्वं कार्यं तत् आलोच्य, हनुमतः यन्मतं सम्मतिस्तेन निश्चित्य, नानाविधा ये नगाः पर्वतास्तेषां या आळयः समूहास्ताः, नगरीः, नदीश्च तरन्तः सन्तः, उदीचीं उत्तरां दिशं प्रति (प्र)ययुः ॥ ५८ ॥

(सं.चं.) आलोच्येतीन्द्रवज्रा ॥ ५८ ॥

सम्प्राप्य राज्ञो मधुमद् वनं ते ययाचिरे तत्र मधूनि लोलाः ।
श्लाघ्यं हनूमन्तमथाङ्गदं च तयोर्न्नियोगेन पपुर्य्यथेष्टम्[1] ॥ ५९ ॥

(भा.दी.) समिति । ते हरयः राज्ञः सुग्रीवस्य मधूनि अस्मिन् सन्तीति मधुमच्च तत् वनं च तत् सम्प्राप्य, तत्र वने, लोलाः मधुपानलोलुपाः सन्तः, श्लाघ्यं प्रशस्यं हनूमन्तं अङ्गदं च प्रति मधूनि ययाचिरे । याचृ याच्ञायां लिट् । अथ तयोः नियोग आज्ञा तेन, इष्टं यथा भवति तथा यथेष्टं मधु पपुः । पा पाने लिट् ॥ ५९ ॥

(सं.चं.) हनुमन्तमङ्गदं च मधूनि ययाचिरे । 'कुमारमभ्ययाचन्त' (६१.११) इति तु रामायणे । प्रथमं ते कुमारमङ्गदमभ्ययाचन्त । स पुनः 'हनुमन्तं पृच्छत' इत्याह । ततस्ते हनुमन्तं ययाचिर इति भावः ॥५९॥

क्रुद्धोऽतिमात्रं वनपालनाथो यो मातुलः सूर्य्यसुतस्य राज्ञः ।
[2]अभ्याद्रवत् तान् मधुपानमत्तान् सालं दधानः सहितः स्वदासैः ॥ ६० ॥

(भा.दी.) क्रुद्ध इति । वनपालानां मधुवनरक्षकाणां कपीनां नाथः, सूर्यसुतस्य राज्ञः सुग्रीवस्य मातुलः, दधिमुखाख्यो यः कपिः, सः अतिमात्रं अत्यन्तं क्रुद्धः सन्, स्वदासैः सहितः सन्, सालः सालवृक्षस्तं दधानः सन् मधुनो यत्पानं तेन मत्तान् तान् वानरान् प्रति अभ्याद्रवत् । द्रु गतौ लङ् ॥ ६० ॥

(सं.चं.) मातुलो मातुर्भ्राता । 'यद् रक्षति महावीर्यः सदा दधिमुखः कपिः । मातुलः कपिमुख्यस्य सुग्रीवस्य महात्मनः' (६१.९) इति च । एतेन ऋक्षरजस एव स्त्रीत्वदशायां वालिसुग्रीवौ जातावित्युत्तरकाण्डोक्ता कथा सन्दिग्धप्रामाण्या जाता । इदमपीन्द्रवज्राबद्धम् ॥ ६० ॥

---

१. 'पपुर्निकामम्' २. 'अभ्यद्रवन्'

अप्यार्य्यकं तं मधुमत्तचित्तस्तत्राङ्गदो भूमितळे पिपेष ।
परे परान् जानुभिराक्षिपन्[१] द्राक् ते देवमार्ग्गं[२] प्रतिदर्शयन्तः॥ ६१ ॥

(भा.दी.) **अपीति** । तत्र तेषां मध्ये, मधुना मत्तं चित्तं यस्य तत्तथोक्तः अङ्गदः, आर्यकमपि बन्धुत्वेन पूजार्हमपि तं दधिमुखाख्यं वानरं भूमेः यत्तळं तस्मिन् पिपेष । पिष्लृ सञ्चूर्णने लिट् । परे अन्ये ते वानराः देवमार्गः अपानं तं प्रतिदर्शयन्तः परान् अन्यान् वानरान् जानुभिः द्राक् आक्षिपन् अताडयन् । क्षिपु निरसने लङ् ॥ ६१ ॥

(सं.चं.) पितामहतुल्यतयाऽऽर्यकं पूजार्हमपि दधिमुखम् । परे कपयः परान् दधिमुखप्रेष्यान् । 'जानुभिस्तु प्रकृष्टाश्च देवमार्गं च दर्शिताः' (६२.१६) इति च । 'देवमार्गोऽपानद्वारम्' इति रामायणव्याख्यातारो गोविन्दराजादयः । अन्ये पुनराहुः–'देवमार्गं दर्शिताः पादौ गृहीत्वोर्ध्वं प्रक्षिप्ता इत्यर्थः' इति । 'कर्णावङ्गुलीभि-र्धृत्वोर्ध्वीकृताः' इत्यपरे । 'देवमार्गं आकाशं दर्शिताः प्रक्षेपेण प्रापिताः' इति शिवसहायः ॥ ६१–२ ॥

मुहूर्त्तमार्त्तः प्रतिलभ्य[३] सञ्ज्ञां सह स्वभृत्यैरुपगम्य तूर्ण्णम् ।
सुग्रीवमावेदयति स्म वृत्तं तन्मातुलो राघवसन्निधाने ॥ ६२ ॥

(भा.दी.) **मुहूर्तेति** । मुहूर्तो मुहूर्तकालस्तं आर्तः, (तस्य) सुग्रीवस्य मातुलः दधिमुखः, सञ्ज्ञां प्रतिलभ्य, स्वभृत्यैः सह तूर्णं सुग्रीवं उपगम्य, श्रीरामस्य सन्निधानं समीपं तस्मिन्, वृत्तं वृत्तान्तस्तत् आवेदयति स्म व्यज्ञापयत् । विद ज्ञाने लट् ॥ ६२ ॥

राजा तदा मधुवनस्य विलोळनं[४] त-
च्छ्रुत्वा मुदा दधिमुखाद् रघुनाथमूचे ।
सीता ध्रुवं हनुमता ददृशे मधूनि
तस्मात् पिबन्ति कृतकृत्यधियस्त एवम् ॥ ६३ ॥

(भा.दी.) **राजेति** । राजा सुग्रीवः तदा मधुनः वनं तस्य, तत् विलोळनं उन्मथनं तत्, दधिमुखाच्छ्रुत्वा मुदा रघुनाथं प्रति, हनुमता सीता (ध्रुवं) ददृशे दृष्टा, दृशिर् प्रेक्षणे लिट्, यस्मात् ते कपयः कृतं कृत्यं कार्यं यैस्ते कृतकृत्याः इति धीर्येषां ते तस्मात् मधूनि पिबन्ति । पा पाने लट् । एवं ऊचे ॥ ६३ ॥

---

१. **'–भिरक्षिपन्'**
२. **'देवस्य यमस्य मार्गं गतिं वा । मरणं प्रापयन्त इति यावत्'** इति का.श्री. ।
३. **'प्रतिलब्धसञ्ज्ञः सह'**
४. **'विलोपनम्'**

(सं.चं.) अथ वसन्ततिलकया सन्तोषवार्तामाह–राजा तदा । राजा सुग्रीवः । तस्मात् एवं स्वच्छन्दं मधूनि पिबन्ति ॥ ६३ ॥

आनन्दी दिनकरनन्दनः कपीन्द्रानानेतुं दधिमुखमादिशद् द्रुतं तान् ।
प्राप्तस्तान् स मधुवने प्रणम्य चोचे राजा वः सपदि दिदृक्षते मुदेति ॥ ६४ ॥

(भा.दी.) आनन्दीति । आनन्दोऽस्यास्तीत्यानन्दी दिनकरनन्दनः सुग्रीवः, तान् कपीन्द्रान् आनेतुं दधिमुखं द्रुतं यथा भवति तथा आदिशत् । दिश अतिसर्जने लङ् । प्राप्तः सः मधुवने तान् प्रणम्य, 'राजा सुग्रीवः वः युष्मान् सपदि इदानीमेव (मुदा) दिदृक्षते द्रष्टुमिच्छति' इति ऊचे ॥ ६४ ॥

(सं.चं.) अथ पञ्चभिः प्रहर्षिणीभिर्हर्षोत्कर्षं विस्तारयति–आनन्दी ॥ ६४ ॥

आयान्तो वियति [१]घनाघनायमानाः सम्मोदात् सकिलकिलारवाः किलैते ।
सम्प्राप्ता रविसुतसेवितं रमेशं[२] सन्नेमुः सह महता हनूमताऽथ ॥ ६५ ॥

(भा.दी.) आयान्त इति । अथ वियत् गगनं तस्मिन् आयान्तः आगच्छन्तः, महान् यो घनस्तद्वदाचरन्तीति तथोक्ताः, सम्मोदः सन्तोषस्तस्मात् किलकिलेति आरवः कपिजातिध्वनिस्तेन सहिताः एते हनुमदाद्याः, रवेः सूर्यस्य सुतः सुग्रीवस्तेन सेवितं रमेशं श्रीरामं सम्प्राप्ताः सन्तः, महता हनूमता सह सन्नेमुः । णमु प्रह्वत्वे शब्दे च लिट् ॥ ६५ ॥

(सं.चं.) घनाघनायमानाः । 'घनाघनो मत्तगजे वासवे वार्षुकाम्बुदे' इति यादवप्रकाशः । किलकिलेति हर्षोद्गारस्यानुकारध्वनिः । 'ततः किलकिलाशब्दं शुश्रावाऽसन्नमम्बरे' (६४.३७) इति च ॥ ६५ ॥

दृष्टा सा जनकसुतेति वाक्यमात्रात् सन्तुष्टे[३] सरविजलक्ष्मणे रमेशे[४] ।
प्रोचेऽसौ पवनसुतोऽखिलं च वृत्तं सन्देशानपि विशदाञ्छुकालपायाः॥ ६६ ॥

(भा.दी.) दृष्टेति । जनकसुता सीता मया दृष्टा इति केवलं वाक्यं वाक्यमात्रं तस्मात्, रविजश्च लक्ष्मणश्च ताभ्यां सहिते रमेशे श्रीरामे सन्तुष्टे सति, असौ पवनसुतः अखिलं च अखिलमेव वृत्तं वृत्तान्तः तत्,

---

१. **'महाघनायमानाः'** इति वि.ती.पाठः।
२. **'–सेवितं परेशम्'**
३. **'संहृष्टे'**
४. **'–लक्ष्मणे महेशे'**

शुकवदालपतीति तथोक्ता तस्याः सीतायाः विशदान् असन्दिग्धान् सन्देशानपि विज्ञापनीयवाक्यान्यपि प्रोच इत्यन्वयः ॥ ६६ ॥

(सं.चं.) दूतस्य वचनचातुरीयम्–यद् दृष्टेति प्रथममुक्त्वा पश्चाज्जनकसुतेत्याह । आदौ जनकसुतेत्युक्ते किं तस्या इति श्रोतुरुद्वेगः स्यात् । तस्मादनुद्वेगकरपदं प्रथमं वक्तव्यमिति विद्वत्सम्प्रदायः ॥ ६६ ॥

कान्तायास्तिलकविधिं मनःशिलायाः[१] काकाक्षिक्षतिमपि चित्रकूट ऊचे ।
तं चूडामणिमपि दत्तवान् हनूमान् सोऽभिज्ञा इति विदधेऽखिलज्ञपार्श्वे॥ ६७ ॥

(भा.दी.) कान्ताया इति । सः हनूमान्, चित्रकूटः चित्रकूटपर्वतस्तस्मिन्, कान्तायाः भार्यायाः सीतायाः मनश्शिलायाः मनश्शिलारसस्य सम्बन्धिनं तिलकस्य विधिः करणं तं च चिह्नार्थं ऊचे । काकस्य यदक्षि तस्य क्षतिर्विनाशस्तमपि सीतादर्शनचिह्नं ऊचे । पूर्वं चित्रकूटे स्थितिकाले कदाचित्त्वया मनश्शिलारसेन सीतायास्तिलकं कृतं किल, तथा कस्यचित्काकस्य सीतास्तने तुण्डं निक्षिप्तवतः चक्षुः पातितं किलेति सीतयोक्तं वचनमुक्तवानित्यर्थः । तं सीतादत्तं चूडामणिमपि दत्तवान् । अखिलज्ञस्य सर्वज्ञस्य श्रीरामस्य यत्पार्श्वं तस्मिन् इति अभिज्ञाः सीतादर्शनविश्वासकारणानि विदधे चक्रे ॥ ६७ ॥

(सं.चं.) कान्तायास्तिलकविधिम् । 'मनःशिलायास्तिलको गण्डपार्श्वे निवेशितः' (६५.२२) इति च । मनःशिलेति नेपाळसम्भवः शिलारसविशेषः । इतीमा अभिज्ञाः अभिज्ञानानि प्रत्ययजनकानि लक्षणानि रामस्य पार्श्वे सन्निधौ विदधे विज्ञापयामास ॥ ६७ ॥

निर्दुःखः[२] परमसुखानुभूतिरेको रामोऽयं जगति तथैव रामरामा ।
वेदायं पवनसुतोऽपि[३] तत्वतस्तावप्येवं व्यधुरधिकं विडम्बनं ते ॥ ६८ ॥

(भा.दी.) एतत्काण्डे कृतलीलायास्तात्पर्यमाह– **निर्दुःख** इति । जगति एकः मुख्यः (अयं) श्रीरामः, निर्गतं दुःखं यस्मात् स तथोक्तः, सुखं च अनुभूतिर्ज्ञानं च परमे उत्तमे यस्य स तथोक्तः, परमं यत्सुखं तस्य अनुभूतिरनुभवोऽस्यास्तीति वा । श्रीरामस्य रामा भार्या सीता तथैव श्रीरामदेवइव निर्दुःखा परमसुखानुभूतिश्चेत्यर्थः । अयं पवनसुतोऽपि तत्वतः परमार्थतः तौ सीतारामौ वेद । विद ज्ञाने लट् । तर्हि सीतारामाभ्यां दुःखादिकं कुतो वा दर्शितम्? हनुमता च तदनुसारेण सम्भाषणादिकं किमर्थं कृतम्? इत्यत आह–

१. **'मनःशिलायाः हरिताळनामकाश्मविकारविशेषस्य'** इति का.श्री. ।

३. **'निर्दुःखः दुःखात्यन्ताभाववान् । परमसुखानुभूतिः अप्राकृतसुखज्ञानस्वरूपः'** इति का.श्री. । ३. **'–सुतो हि तत्व–'**

एवमिति । एवमपि ते श्रीरामसीताहनुमन्तः विडम्बनं लोकानुकरणं तत् अधिकं यथा भवति तथा व्यधुः । असुरजनमोहार्थं चक्रुः । डु धाञ् धारणे लुङ् ॥ ६८ ॥

(सं.चं.) अथाप्येवं लोकविडम्बनलीलां व्यधुश्चक्रुः ॥ ६८ ॥

जातां सेवासमुद्रात् स्वपदसरसिजे स्वर्प्पितां स्वप्रकाशां[१]
निर्द्दोषामर्घहीनां जगति हनुमतो भक्तिमाणिक्यमालाम् ।
दृष्ट्वा तस्मै[२] प्रदातुं सकलमसदृशं चिन्तयन् रामदेवः
प्रादादात्मानमेव प्रमदमहपरिष्वङ्गलीलाच्छलेन ॥ ६९ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे सुन्दरकाण्डे षष्ठः सर्ग्गः ॥

—०—

(भा.दी.) श्रीरामेण हनुमति कृतमालिङ्गनाख्यमनुग्रहं वर्णयति– **जाता**मिति । श्रीरामदेवः सेवैव समुद्रस्तस्मात् जातामुत्पन्नाम् । माणिक्यरत्नानामपि समुद्राज्जातत्वेन तत्साम्योक्तिः । स्वस्य श्रीरामस्य यत् पदं तत् सरसिजमिव तस्मिन् सु सम्यगर्पिताम् । सतां सज्जनानां प्रिया ये अङ्काः–'श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्' इत्युक्तनवलक्षणानि अस्यां सन्तीति तथोक्ता ताम् । माणिक्यमालाऽपि माणिक्यपरीक्षाभिज्ञसत्पुरुषाणां प्रियचिह्नोपेतेति साम्यम् । निर्गता दोषा रागादयो यस्याः सा तथा ताम् । मणीनामपि त्रासादिदोषराहित्यात् साम्यम् । जगति अर्घेण मौल्येन हीनाम्, भक्तिरेव माणिक्यानि तेषां मालां दृष्ट्वा, तस्मै तादृशाय हनुमते प्रदातुं सकलं राज्यकोशादिकं धर्मादिपुरुषार्थजातं वा असदृशं तदर्घार्थमननुकूलं चिन्तयन् सन्, प्रमदः सन्तोषः स एव मह उत्सवस्तस्मिन् विद्यमानो यः परिष्वङ्गः आलिङ्गनं तद्विषया लीला सैव च्छलं व्याजमात्रं तेन आत्मानमेव प्रादात् । डु दाञ् दाने लुङ् । स्वालिङ्गनापेक्षया सर्वस्याप्यवत्वात् तद्भक्त्यनुरूपं स्वात्मप्रदानमेव चक्र इति भावः ॥ ६९ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां सुन्दरकाण्डे षष्ठः सर्गः ।

—०—

१. **'स्वर्पितां सत्प्रियाङ्काम्'** इति वि.ती.पाठः । **'स्वर्पितां सप्रकाशाम्'** इति कश्चित् ।

२. **'तस्मै दशविधभक्तियुक्ताय हनुमते'**

(सं.चं.) अन्ते स्रग्धरया काण्डार्थमुपसंहरति– जातां सेवासमुद्रात् । माणिक्यमिति मणिविशेष उच्यते । अत्र तु मणिसामान्यवचनम् । जगति अर्घहीनाममूल्याम् । जगति विद्यमानं सकलमसदृशं दृष्ट्वा मत्वा । प्रमदमहेन सीतावार्ताश्रवणनिमित्तेन आनन्दोत्सवेन, प्रमदमहे वा या परिष्वङ्गलीला तन्मिषेणाऽत्मानमेव प्रादात् । 'इदं तु मम दीनस्य मनो भूयः प्रकर्षति । यदिहास्य प्रियाख्यातुर्न कुर्मि सदृशं प्रियम् । एष सर्वस्वभूतस्तु परिष्वङ्गो हनूमतः । मया कालमिमं प्राप्य दत्तस्तस्य महात्मनः । इत्युक्त्वा प्रीतिहृष्टाङ्गो रामस्तं परिषस्वजे । हनूमन्तं महात्मानं कृतकार्यमुपागतम्' (यु.कां.१.१२–४) इति च ॥ ६९ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां सुन्दरकाण्डे षष्ठसर्गविवरणम् ॥

—०—

इति सुन्दरकाण्डं समाप्तम्

[आदितः श्लोकाः– २१७०+६९=२२३९]


[सुन्दरकाण्डे श्लोकाः– ३३०]



लीलयोत्तोलयन्नद्रिं कराग्रे कन्दुकायितम् ।
विरराज वियत्येष वीरराजो जगत्त्रये ॥

[सं.रा.युद्धकां.१०.४८]

युद्ध-काण्डम् : ६



प्रथमः सर्ग्गः

वाणीं श्रुत्वा हनुमतो वाचमाचष्ट[१] राघवः ।
कुर्वन्[२] प्रसादसामग्रीं निर्व्याजां सर्वतोऽधिकाम् ॥ १ ॥

(भा.दी.) श्रीरामः हनुमदुदितमुदन्तं निशम्य किं प्रत्युत्तरमदादित्यत आह– **वाणीमि**ति । राघवः हनुमतः वाणीं श्रुत्वा, निर्गतं व्याजं कैतवं यस्याः सा तथा ताम्, सर्वतः रुद्रादिजगतः अधिकाम्, प्रसादस्य अनुग्रहस्य सामग्रीं पौष्कल्यं हनुमति कुर्वन् सन् वाचं आचष्ट अब्रवीत् । चक्षिङ् व्यक्तायां वाचि लङ् ॥ १ ॥

(सं.चं.) अथ षोडशभिः सर्गैर्युद्धकाण्डकथासङ्ग्रहः । वाणीमित्यादिना । प्रसादस्य सामग्रीं समग्रतां हनूमति कुर्वन् । निर्व्याजा सर्वतोऽधिका हनुमतो भक्तिर्भगवति । निर्व्याजः सर्वतोऽधिकः प्रसादो भगवतो हनुमति । तं यथोपासते तदेव हि प्राप्नुवन्ति ॥ १ ॥

पौरुषे पुरुषः कोऽन्यो विद्यते हनुमत्समः ।
रावणं यस्तृणीचक्रे[३] सिन्धुमुल्लङ्घ्य लीलया ॥ २ ॥

(भा.दी.) **पौरुष** इति । पौरुषं पराक्रमस्तस्मिन् हनुमत्समः पुरुषः अन्यः कः (विद्यते)? न कोऽपि । यः लीलया सिन्धुं उल्लङ्घ्य रावणं तृणीचक्रे तृणसमं चक्रे ॥ २ ॥

(सं.चं.) पौरुषं पुरुषकारः ॥ २ ॥

इत्युक्त्वा सह सम्मन्त्र्य भगवान् सूर्य्यसूनुना[४] ।
कपीनां लङ्घनोपायं निश्चिक्ये सेतुमम्बुधौ[५] ॥ ३ ॥

---

१. 'वाणीमाचष्ट' २. 'कुर्वन् प्रणयसामग्रीम्' ३. 'यस्तृणं चक्रे'
४. 'भगवान् वायुसूनुना' ५. 'सेतुमम्बुधेः' इति वि.ती.पाठः ।

(भा.दी.) इतीति । भगवान् श्रीरामः इति उक्त्वा, सूर्यसूनुना सुग्रीवेण सह सम्मन्त्र्य कर्तव्यमालोच्य, कपीनां अम्बुधेः लङ्घने य उपायस्तं सेतुं निश्चिक्ये निश्चितवान्, चिञ् चयने लिट् ॥ ३ ॥

(सं.चं.) सूर्यसूनुना सह । अम्बुधौ सेतुबन्धमेव कपीनामम्बुधिलङ्घनोपायं निश्चिकाय ॥ ३ ॥

लङ्कापुरस्य दुर्गत्वं राक्षसानां च तद् बलम् ।
उक्तं श्रुत्वा हनुमता रामः स्मितमुखोऽब्रवीत् ॥ ४ ॥

(भा.दी.) लङ्केति । श्रीरामः हनुमता उक्तं लङ्कायां विद्यमानं यत्पुरं तस्य दुर्गत्वं दुर्गमत्वम्, 'दुर्गो राष्ट्रे वने दुर्गं दुर्गमे नरके पुरे' इति च । राक्षसानां तद् बलं सैन्यं च श्रुत्वा, स्मितं मुखं यस्य स तथा सन् अब्रवीत् ॥ ४ ॥

(सं.चं.) लङ्कायाः पुरम्, यत्र रावणो वसति । 'राजराजाश्रयं पुरम्' इति हि स्मरन्ति । तद् इन्द्रजिदादिभिः सह सङ्ग्रामे स्वेनानुभूतं राक्षसानां सामर्थ्यम् । तदसङ्ख्यं बलं सैन्यं च ॥ ४ ॥

समूलतूलं धक्ष्यामि [1]राक्षसारण्यमुद्धणम्[2] ।
उत्तरा फल्गुनी ह्यद्य मध्याह्ने गमनं [3]शुभम् ॥ ५ ॥

(भा.दी.) समूलेति । अहं उद्धणं क्रूरम्, रावण एवारण्यं तत्, राक्षसारण्यमिति क्वचित्पाठः । मूलं च तूलमग्रं तच्च ताभ्यां सहितं यथा भवति तथा, सर्वात्मनेत्यर्थः, धक्ष्यामि । दह भस्मीकरणे लृट् । हि यस्मात् अद्य अह्नः मध्यं मध्यभागस्तस्मिन् उत्तरा फल्गुनी उत्तरानक्षत्रं अतः गमनं शुभं मङ्गलम् ॥ ५ ॥

(सं.चं.) मूलमादौ भवति । तूलमन्ते भवति । साद्यन्तं समग्रं राक्षसारण्यम् । यस्य मूलं रावणः । तूलं वर्धमाना रक्षःपोताः । उद्धणं भयानकम् । अद्य मध्याह्ने उत्तरा फल्गुनी । तस्मात् तदा गमनं शुभं विजयावहम् । 'उत्तरा फल्गुनी ह्यद्य श्वस्तु हस्तेन योक्ष्यते' (यु.कां.४.५) इति, 'अस्मिन् मुहूर्ते सुग्रीव प्रयाणमभिरोचये । युक्तो मुहूर्तो विजयः प्राप्तो मध्यं दिवाकरः' इति च ॥ ५ ॥

राम उक्त्वेति रविजमारुरोहाथ मारुतिम् ।
निशाचरध्वान्तभिदे सवितेवोदयाचलम् ॥ ६ ॥

---

१. **'रावणारण्यम्'** इति वि.ती.पाठः । २. **'–रण्यमुल्बणम्'** ३. **'गमनं भवेत्'**

(भा.दी.) राम इति । अथ श्रीरामः इति रविजं सुग्रीवं प्रति उक्त्वा, उदयश्चासौ अचलश्च तं उदयनामक-पर्वतमित्यर्थः, सवितेव, निशाचर एव ध्वान्तं तस्य भित् भेदनं विनाशस्तस्मै तं हनुमन्तं आरुरोह । रुह बीजजन्मनि प्रादुर्भावे च लिट् ॥ ६ ॥

(सं.चं.) इति रविजमुक्त्वा अथ सपदि मारुतिमारुरोह ॥ ६–७ ॥

आरुरोह च [१]सौमित्रिरङ्गदं कनकाङ्गदम् ।
रामसुग्रीवयोर्वाक्यात् सर्वसैन्यानि निर्य्ययुः ॥ ७ ॥

(भा.दी.) आरुरोहेति । सौमित्रिः कनकात्मकं अङ्गदं बाहुभूषणं यस्य स तथा तं अङ्गदं आरुरोह । रामसुग्रीवयोर्यद्वाक्यं तस्मात् सर्वसैन्यानि निर्ययुः युद्धार्थं निर्जग्मुः ॥ ७ ॥

नीलः सेनापतिः सेनामाकर्षन्नग्रतो ययौ ।
पार्श्वयोर्य्यूथनाथावप्यृषभो गन्धमादनः ॥ ८ ॥

(भा.दी.) नील इति । नीलनामकः सेनापतिः सेनां आकर्षन् सन् अग्रतः अग्रे ययौ । या प्रापणे लिट् । सेनायाः ये पार्श्वे तयोः ऋषभः गन्धमादन इत्युभौ यूथनाथौ कपिसमूहनाथौ ययतुः ॥ ८ ॥

(सं.चं.) आकर्षन् आज्ञया नियम्य नयन् ॥ ८ ॥

सुषेणजाम्बवत्पूर्वा रक्षन्तः कुक्षिमव्रजन्[२] ।
[३]सुग्रीवसौमित्रियुतः सेनामद्ध्ये ययौ प्रभुः ॥ ९ ॥

(भा.दी.) सुषेणेति । सुषेणश्च जाम्बवांश्च तौ पूर्वौ येषां ते तथोक्ताः सेनानायकाः, कुक्षिः सेनामध्यप्रदेशस्तं रक्षन्तः सन्तः आव्रजन् अगच्छन् । व्रज गतौ लङ् । सुग्रीवसौमित्रियुतः प्रभुः श्रीरामः, सेनाया यन्मध्यं तस्मिन् ययौ ॥ ९ ॥

(सं.चं.) सेनामध्ये हृदयस्थाने नाभिस्थाने वा सुग्रीवसौमित्रियुतः प्रभू रामः । कपिराजत्वेनाभ्यर्हित-त्वात् सुग्रीवस्य पूर्वनिर्देशः । तेषामभितः कुक्षिभागे सुषेणाद्याः ॥ ९ ॥

---

१. **'आरुरोहाथ सौ–'** २. **'कुक्षिमाव्रजन्'** । **'कुक्षिं मध्यप्रदेशस्य वामकुक्षिप्रदेशं दक्षिणकुक्षिप्रदेशं चेत्यर्थः'** इति का.श्री. ।

३. **'सुग्रीवो लक्ष्मणयुतः'**

पनसाद्या वानरेन्द्रा रामसुग्रीवशासनात् ।
[1]पर्य्यगुश्चक्रवच्चक्रं परितः परिपालकाः ॥ १० ॥

(भा.दी.) पनसेति । पनस आद्यो येषां ते तथोक्ताः वानरेन्द्राः, रामसुग्रीवयोर्यच्छासनं तस्मात्, चक्रं सैन्यं तत्, 'चक्रं सैन्ये जलावर्ते' इति वैजयन्ती, परितः सर्वतः परिपालकाः परिरक्षकाः सन्तः चक्रवत् पर्यगुः परितो जग्मुः ॥ १० ॥

(सं.चं.) चक्रं कपिसैन्यं परितः परिपालयन्तः चक्रवत् पर्यगुः परिभ्रमन्तो बभूवुः ॥ १० ॥

[2]जीमूताइव गर्ज्जन्तः सपक्षाः पर्वताइव ।
रामदासाः कपीन्द्रास्ते रेजिरे गमनोत्सवे ॥ ११ ॥

(भा.दी.) जीमूता इति । जीमूताइव मेघाइव गर्जन्तः रामदासाः ते कपीन्द्राः सपक्षाः पक्षसहिताः पर्वता इव गमनमेवोत्सवस्तस्मिन् रेजिरे । राजृ दीप्तौ लिट् ॥ ११ ॥

(सं.चं.) 'जीमूतौ मेघपर्वतौ' इति यादवप्रकाशः । जीवनस्य मूत आतश्चनं जीमूतः । पृषोदरादित्वाद् वनशब्दस्य लोपः । सपक्षाः पर्वता इव प्लन्तः ॥ ११–२ ॥

अदन्तः फलमूलानि पिबन्तो मधुरं मधु ।
गायन्तो राघवगुणान् स्वैरं यान्ति स्म वानराः ॥ १२ ॥

(भा.दी.) अदन्त इति । वानराः, फलानि च मूलानि च तानि अदन्तः भक्षयन्तः सन्तः, मधुरं मधु पुष्परसम्, 'मधु मद्ये पुष्परसे' इत्यमरः, पिबन्तः सन्तः, राघवगुणान् गायन्तः सन्तः, स्वैरं यथा भवति तथा, स्वेच्छानुसारेणेत्यर्थः, यान्ति स्म अगच्छन् ॥ १२ ॥

रामाज्ञावेलया रुद्धः कपिसैन्यमहार्ण्णवः ।
पुरग्रामव्रजादीनि क्षुभितो नातिचक्रमे[3] ॥ १३ ॥

---

१. **'चक्रं कपिसैन्यं परितः प्रादक्षिण्येन पर्यगुः'** इति का.श्री. ।

२. **'जीमूताः उदकपूर्णोदरमेघाः । सपक्षाः इन्द्रेण पक्षच्छेदनात् पूर्वं पर्वता आप्लुत्याऽप्लुत्य पुरग्रामादिकमबाधयन्निति प्रसिद्धम्'** इति का.श्री ।

३. **'क्षुभितोऽपि न चक्रमे'** । **'क्षुभितः मत्तोऽपि पुरग्रामव्रजादीनि, पुरं धनिनामाश्रयः, ग्रामो बहुजनसङ्कीर्णः, व्रजः गोष्ठः, तदादीनि स्थलानि न चक्रमे न लङ्घितवान्'** इति का.श्री. ।

(भा.दी.) रामेति । क्षुभितः, कपीनां सैन्यं तदेव महार्णवः, रामस्य या आज्ञा सैव वेला तया रुद्धः सन्, पुराणि च, ग्रामाश्च, व्रजाश्च गोष्ठाश्च, ते आदयो येषां तानि तथा तानि नातिचक्रमे न लङ्घितवान्, अतिक्रम्य न पीडादिकं कृतवानित्यर्थः । क्रमु पादविक्षेपे लिट् ॥ १३ ॥

(सं.चं.) क्षुभितः उत्तरङ्गो महार्णवः । क्षुभितमुन्मत्तं कपिसैन्यम् । पुरं राजधानी । बहुविधवृत्तयो जना यत्र वसन्ति स ग्रामः । पशुपालनैकवृत्तयो यत्र स व्रजः ॥ १३–४ ॥

[1]दक्षिणः स दिशं गच्छन् दक्षिणां लक्ष्मणाग्रजः ।
विन्ध्यं सह्यं चाभ्यगच्छन्मलयं च महीधरम् ॥ १४ ॥

(भा.दी.) दक्षिण इति । दक्षिणां दिशं गच्छन् दक्षिणः कुशलः लक्ष्मणाग्रजः सः श्रीरामः विन्ध्यो विन्ध्यगिरिस्तं सह्यं मलयं महीधरं च अभ्यगच्छत् अतिक्रान्तवान् । गम्लृ गतौ लङ् ॥ १४ ॥

(सं.चं.) दक्षिणो विदग्धः, सरळ उदारो वा ॥ १४ ॥

महेन्द्रवन्द्यो माहेन्द्रमधिरुह्य महीधरम् ।
प्रत्यनीकमिवापश्यद् वारिधिं[2] सैन्यवारिधेः ॥ १५ ॥

(भा.दी.) महेन्द्रेति । महेन्द्रवन्द्यः श्रीरामः, माहेन्द्रो माहेन्द्रनामकस्तं महीधरं अधिरुह्य, सैन्यमेव वारिधिः समुद्रस्तस्य प्रत्यनीकमिव प्रतिसैन्यमिव वारिधिं अपश्यत् । दृशिर् प्रेक्षणे लङ् ॥ १५ ॥

(सं.चं.) प्रत्यनीकमिव प्रतिस्पर्धिनमिव ॥ १५–६ ॥

वेलां विशालामापेदे माहेन्द्रादवरुह्य सः ।
सेनायास्तत्र सेनान्या रामो वासमकल्पयत् ॥ १६ ॥

(भा.दी.) वेलामिति । सः श्रीरामः माहेन्द्रात् गिरेरवरुह्य विशालां वेलां समुद्रतटं आपेदे प्राप । पद गतौ लिट् । तत्र वेलायां सेनान्या सेनानायकेन नीलेन, नीलं प्रत्युक्त्वेत्यर्थः, सेनायाः वासो निवासस्तं अकल्पयत् । क्लृपू सामर्थ्ये लङ् ॥ १६ ॥

---

१. **'दक्षिणां ककुभं गच्छन् दक्षिणो लक्ष्म-'** २. **'वारिधिं दक्षिणसमुद्रमपश्यत्'** इति का.श्री ।

[१]प्रार्थयन् किल पन्थानं सिन्धुं सिन्धुशयस्ततः ।
विश्वेश्वरोऽपि[२] भगवान् मार्द्दवं धर्म्ममाश्रितः ॥ १७ ॥

(भा.दी.) **प्रार्थयन्निति** । ततः सिन्धौ क्षीरसमुद्रे शेत इति तथोक्तः भगवान् श्रीरामः, विश्वेश्वरोऽपि, मृदुनो भावो मार्द्दवं तत्, अग्रे मृदुत्वलक्षणम्, (धर्मं) राजधर्ममित्यर्थः, आश्रितः सन् सिन्धुं प्रति पन्थानं लङ्कां प्रति गन्तुं मार्गं प्रार्थयन् अभवत् किल ॥ १७ ॥

(सं.चं.) पन्थानं प्रार्थयन् मार्दवं धर्ममश्रितो बभूव । 'प्रार्थयत्' इति स्वरसः पाठः । 'दुहियाचि–' इति द्विकर्मता ॥ १७ ॥

अशेतानन्तशयनो वेलायां दर्भसंस्तरे ।
भुजं [३]भुजङ्गभोगाभमुपधायाथ दक्षिणम् ॥ १८ ॥

(भा.दी.) **अशेतेति** । अथ, अनन्तः शयनं यस्य स तथोक्तः श्रीरामः, वेलायां समुद्रतीरे, दर्भाणां संस्तरः प्रस्तरस्तस्मिन्, दर्भैरास्तृतप्रदेश इत्यर्थः, भुजगस्य यो भोगः शरीरं तस्य आभेव आभा यस्य स तथा तम्, दक्षिणं भुजं उपधाय उपधानं कृत्वा, शिरःपीठं कृत्वेत्यर्थः, अशेत विश्रमणमकरोत् । शीङ् स्वप्ने लङ् ॥ १८ ॥

(सं.चं.) दर्भसंस्तरे । 'प्रस्तरः संस्तरः शय्या रचिता पल्लवादिभिः' इति यादवप्रकाशः । उपधाय उपधानीकृत्य । उपधानम् '**ತಲೆಗಿಂಬು**' इति भाषायाम् । दक्षिणं भुजम् ॥ १८ ॥

[४]तादृशं हनुमद्वीर्य्यं वीक्ष्य राक्षसपुङ्गवः ।
सभायां मन्त्रिणां मद्ध्ये [५]चिन्ताक्रान्तोऽब्रवीदिदम् ॥ १९ ॥

---

१. **'प्रार्थयत् किल' 'प्रार्थयत् अयाचक किल । अर्थ याच्ञायाम् लङ्'** इति का.श्री. ।

२. **'विश्वेश्वरोऽपि सकलनियामकोऽपि'** इति का.श्री. ।

३. **'भुजगगोगाभ–'** इति वि.ती.पाठः स्यात् ।

४. इतः पूर्वमेकः श्लोकोऽधिकः कचित् पठ्यते– **'रावणो मयमाहूय गृहहर्म्याणि पूर्ववत् । 'कारयामास चित्राणि सभां प्राप सभापतिः'** इति । न केनापि व्याख्यातमिति स्फुटं प्रक्षिप्तम् ।

५. **'चिन्तातान्तो–'**

(भा.दी.) हनुमद्वीर्यं दृष्ट्वा रावणः किं चकारेत्यत आह– **तादृशमि**ति । राक्षसपुङ्गवः राक्षसश्रेष्ठः रावणः तादृशं अनुभूतप्रकारं तत् हनुमतः वीर्यं वीक्ष्य, चिन्तया आक्रान्तः सन्, सभायां मन्त्रिणां यन्मध्यं तस्मिन् इदं वचः अब्रवीत् । ब्रूञ् धातोर्लङ् ॥ १९ ॥

(सं.चं.) लङ्कायां रावणः किमकार्षीदित्याह–तादृशम् । मयमाहूय पुनर्निर्मितायां सभायाम् ॥ १९ ॥

दृष्टं हि तस्य वीरस्य कपेः पौरुषमद्भुतम् ।
किं वर्ण्णयामो रामस्य यस्यायं किङ्करः किल ॥ २० ॥

(भा.दी.) **दृष्टमि**ति । वीरस्य तस्य कपेः अद्भुतं पौरुषं पराक्रमस्तदस्माभिः दृष्टं हि । रामस्य पौरुषं पराक्रमं किं वर्णयामः? अयं कपिः यस्य श्रीरामस्य किङ्करः किल । किङ्करस्य पौरुष एवं सति स्वामिनः पौरुषं किं वर्णनीयमित्यर्थः ॥ २० ॥

(सं.चं.) रावणे भाषमाणे कश्चिज्जयो भाषते । बहुलं हिरण्यकशिपुः । अथेदानीं किञ्चिदभिव्यक्तजयो बभाषे–दृष्टं हि । भवद्भिरपि दृष्टं हि ॥ २० ॥

शोषयन् स्तम्भयन् वाऽपि[1] सिन्धुं सीतापतिस्तरेत् ।
लङ्कायाः सङ्कटं कुर्य्यात् तत्र नीतिर्विधीयताम् ॥ २१ ॥

(भा.दी.) **शोषयन्नि**ति । सीतापतिः सिन्धुं शोषयन् अस्त्रसामर्थ्येन शोषणं कुर्वन् वा, वारि स्तम्भयन् वा तरेत् । तॄ प्लवनतरणयोर्लिङ् । लङ्कायाः सङ्कटं पीडा तत् कुर्यादपि । तत्र लङ्कायाः पीडने नीतिर्विधीयताम् ॥ २१ ॥

(सं.चं.) तत्र रामेण सम्भावितलङ्कासङ्कटनिवारणे ॥ २१–२ ॥

इत्युक्ते[2] रावणेनोचे प्राञ्जलिः स विभीषणः ।
रामायानन्तवीर्य्याय वैदेही दीयतामिति ॥ २२ ॥

(भा.दी.) इतीति । रावणेन इति वचसि उक्ते सति सः नीतिमत्त्वेन प्रसिद्धः विभीषणः प्राञ्जलिः सन्, अनन्तं वीर्यं सामर्थ्यं यस्य स तथा तस्मै श्रीरामाय वैदेही दीयताम्, इति वचः ऊचे ॥ २२ ॥

---

१. **'स्तम्भयन् वारि'** इत्यपि पाठः स्यात् । २. **'इत्युक्तो–'**

[1]क ईश्वरः को विजयी मां विना जगदीश्वरम् ।
बालिशैः प्रोच्यते किं नो [2]इत्युच्चै रावणोऽब्रवीत् ॥ २३ ॥

(भा.दी.) **क** इति । जगदीश्वरं मां विना ईश्वरः कः? मां विना विजयी विजयशीलः कः? बालिशैः अज्ञैः किं वचः नो प्रोच्यते? इति वचः रावणः उच्चैः अब्रवीत् ॥ २३ ॥

(सं.चं.) विभीषणवचनेन पुनरभिव्यक्तो हिरण्यकशिपुराह–क ईश्वरः । बालिशैः किङ्किं न प्रोच्यते? ॥२३॥

तं प्रहस्तप्रभृतयः सुपार्श्वाद्यास्तथाऽपरे ।
उच्चैरास्फोट्य गर्ज्जन्तो राजानमिदमब्रुवन् ॥ २४ ॥

(भा.दी.) **तमि**ति । प्रहस्तः प्रभृतिर्येषां ते तथोक्ताः राक्षसाः, तथा सुपार्श्वः आद्यो येषां ते तथोक्ताः अपरे राक्षसाश्च, उच्चैः आस्फोट्य द्विगुणीकृतहस्तप्रहारं कृत्वा, तृणीकृत्य गर्जन्तः सन्तः, राजानं रावणं प्रति इदं वचः अब्रुवन् ॥ २४ ॥

(सं.चं.) आस्फोट्य उत्साहभरेण हस्तेन भूमिं भुजं वा ताडयित्वा । उच्चैर्गर्जन्तः । सुपार्श्वाद्याः । महापार्श्व इति रामायणे ॥ २४ ॥

लोकपालान् सलोकांस्त्वमिन्द्रादीन् जितवान् ननु ।
रामः किल भयस्थानं[3] मानवस्तापसस्तव ॥ २५ ॥

(भा.दी.) **लोके**ति । लोकैः सहिताः सलोकास्तान् लोकपालान् इन्द्रादीन् त्वं जितवान् (ननु) । तापसः मुनिवेषः मानवः श्रीरामः तव भयस्थानं किल भयस्य निमित्तं किल ॥ २५ ॥

(सं.चं.) तादृशस्य तव रामो मानवः किल भयस्थानम् । किलेत्यरुचौ च । असम्भवार्थे च । 'वार्तायामरुचौ किल' इत्यन्यत्र 'वार्तासम्भाव्ययोः किल' इति यादवप्रकाशः । वार्तायां सम्भाव्ये च । वार्तायामसम्भाव्ये चेति द्वेधाऽपि च्छेदः सम्मतः ॥ २५ ॥

---

१. इतः पूर्वमेकः श्लोकोऽधिकः क्वचित् पठ्यते–**'ब्रह्मरुद्रादयो देवा यस्य रामस्य किङ्कराः । 'करामलकवद् विश्वं वैदेही दीयतामिति'** इति ।

२. **'किं नन्वित्युच्चै–'** उत्तरार्धे पाठान्तरम्–**'तस्मै रामाय जयिने वैदेही–'** व्याख्यातमेतत् का.श्री. टीकायाम्– **'अनन्तवीर्यत्वमुपपादयति – ब्रह्मेति । यद्वा ब्रह्मरुद्रादिवरस्य सत्त्वात् रामेणास्माकं किं भयमित्यत आह–ब्रह्मेति । ब्रह्मरुद्रादयो देवाः यस्य रामस्य किङ्कराः भृत्याः । तस्मै जयिने जयशीलाय रामाय वैदेही दीयतामित्यूचे'** इति ।

३. **'भयस्थानं किल । असम्भावितमेतत्'** इति का.श्री. ।

वानराः किं नराहारानस्मान् कुर्य्युः फलाशिनः[१] ।
कथश्चिज्जीवता यातं कपिना तेन[२] भूयसा[३] ॥ २६ ॥

(भा.दी.) वानरा इति । फलानि (अशितुं) अत्तुं शीलमेषामस्तीति फलाशिनः वानराः, नरा आहारो येषां ते तथा तान् अस्मान् किं कुर्युः? न किमप्यनिष्टं कर्तुं समर्थाः । इदं हनुमद्वीर्यदर्शनविरुद्धमित्यत आह–**कथश्चिदिति** । येषु वानरेषु भूयसा कपिनाथेन हनुमता कथश्चिज्जीवता जीवनवता इतः यातं गतम्, हनुमतोऽप्यत्राऽगतस्य कथश्चिज्जीवनं जातमित्यर्थः ॥ २६ ॥

(सं.चं.) वानराः फलाशिनः । वयं नराहाराः पलाशिनः । वानराहारा अपि । बलेन भूयसा कपिना हनुमता । कथश्चिदस्माकमनवहिततया ॥ २६ ॥

त्वद्भ्रूविभ्रममात्रेण विभ्रान्तं[४] भुवनत्रयम् ।
कथं तापसपत्नीं त्वं बलाद् राजन् न भोक्ष्यसे ॥ २७ ॥

(भा.दी.) त्वदिति । हे राजन्, भुवनत्रयं तव या भ्रूस्तस्याः विभ्रममात्रं चलनमात्रं तेन विभ्रान्तम्, कुलालचक्रवत् परिवर्तितम् । हे राजन्, स त्वं तापसस्य पत्नीं सीतां बलं बलात्कारस्तस्मात् कथं न भोक्ष्यसे नानुभवसि । भुज पालनाभ्यवहारयोर्लृट् ॥ २७ ॥

(सं.चं.) तव यो भ्रूविभ्रमस्तन्मात्रेण । विभ्रान्तं भयग्रस्तम् ॥ २७–८ ॥

मन्त्रिणां वाक्यमाकर्ण्य सस्मितं[५] रावणोऽब्रवीत् ।
सत्यमेवमिदं किन्तु गोप्यं किश्चिद् वदामि वः ॥ २८ ॥

(भा.दी.) मन्त्रिणामिति । रावणः मन्त्रिणां प्रहस्तादीनां वाक्यं वचस्तत् आकर्ण्य, एवं एवंप्रकारम्, इदं वचः सत्यमेव, किन्तु गोप्यं रहस्यं किश्चित् प्रमेयं वः युष्मान् प्रति वदामि, इति सस्मितं स्मितेन सहितं यथा भवति तथा अब्रवीत् ॥ २८ ॥

---

१. **'पलाशिनः'**   २. **'कपिनाथेन'** ।**'कपिनाऽथैषु'** । **'कपिना येषु'** इति क्वचित् ।

३. **'भूयसा बलिष्ठेन, बलिष्ठत्वादेवेति यावत्, कथश्चित्यन्तप्रयासेन, जीवता प्राणधारणं कुर्वता तेन हनुमदाख्येन कपिना वानरेण यातम्, भावेक्तः, गतम्'** इति का.श्री. ।

४. **'सम्भ्रान्तम्'**   ५. **'सस्मितो–'**

मया बलेनोपभुक्ता मञ्जुला पुञ्जिकस्थला ।
पितामहो लोकहितं तदा शापमदाद्धि मे[1] ॥ २९ ॥

(भा.दी.) तदेवाह– **मयेति** । मया मञ्जुळा मनोहरा पुञ्जिकस्थला पुञ्जिकस्थलाख्या अप्सराः बलं बलात्कारस्तेन उपभुक्ता, तदा पितामहः चतुर्मुखः, लोकानां हितो लोकहितस्तं शापं मे अदाद्धि । दाण् दाने लुङ् ॥ २९ ॥

(सं.चं.) मया बलेन । 'पितामहस्य भवनं गच्छन्तीं पुञ्जिकस्थलाम् । चञ्चूर्यमाणामद्राक्षमाकाशेऽग्नि-शिखामिव । सा प्रसह्य मया भुक्ता कृता विवसना ततः' (१३.११.१२) इति च । लोकस्य हितं मम त्वहितम् ॥ २९ ॥

बलाच्चेद् भोक्ष्यसे काञ्चिच्छिरः शीर्य्येत ते तदा ।
शापोऽयं ननु सीतायाः पातिव्रत्यैकपालकः ॥ ३० ॥

(भा.दी.) **बलादिति** । (चेत्) यदि काञ्चित् स्त्रियं बलं बलात्कारस्तस्मात् भोक्ष्यसे, भुजधातोर्लृट्, तदा तर्हि ते शिरः शीर्येत भिद्येत । शॄ हिंसायां लिङ् । अयं शापः सीतायाः पातिव्रत्यस्य एकतो मुख्यतो पालकः रक्षकः ननु । चतुर्मुखशापोल्लङ्घनासामर्थ्यात्[2] तूष्णीं स्थीयत इत्यर्थः । ब्रह्मसदनं प्रति गच्छन्तीं पुञ्जिकस्थलाख्याप्सरसीं मार्गे दृष्ट्वा रावणः कामातुरः बलाद् बुभुजे । अथ ब्रह्मसदनं प्रति गतां तां दृष्ट्वा (ब्रह्मणा) रावणकृतं कर्म ज्ञात्वैवं शापो दत्त इति रामायणे प्रसिद्धम् ॥ ३० ॥

(सं.चं.) बलाच्चेत् । 'अद्यप्रभृति यामन्यां बलान्नारीं गमिष्यसि । तदा ते शतधा मूर्धा फलिष्यति न संशयः' (१३.१४) इति च । पातिव्रत्यैकपालकः । एकः केवलः पालक एकपालकः । पातिव्रत्यस्यैक-पालकः । अहो विधेर्विधानम्, यामेव पुञ्जिकस्थलां रावणः पुरा बलाच्चकार तस्यामेव रावणवधपूर्वरङ्गो हनुमतो जननं बभूव ॥ ३० ॥

मद्बाहुवननिर्य्यातान् पत्रिणः प्राणहारिणः ।
न नूनं वेत्ति रामोऽसौ[3] तेन मां प्रति गर्ज्जति ॥ ३१ ॥

१. **'शापं हि मे ददौ'** २. **'चतुर्मुखशापबलाद् भोक्तुमशक्येति तूष्णीम्'** । ३. **'रामोऽयम्'** इति वि.ती.पाठः ।

(भा.दी.) मदिति । अयं श्रीरामः मम बाहवस्त एव वनानि तेभ्यो निर्यातान् निःसृतान् प्राणहारिणः पत्रिणः शरान् न वेत्ति । विद ज्ञाने लट् । नूनं तेन कारणेन मां प्रति गर्जति । गर्ज शब्दे लट् । इदं दूतान्तरितवचसः प्रत्युत्तरम् ॥ ३१ ॥

(सं.चं.) गूढचरैः श्रुताया वार्तायाः प्रत्युत्तरमाह– मदित्याना । वनान्निर्यातान् पत्रिणः पक्षिण इव बाहुनिर्यातान् पत्रिणो बाणान् ॥ ३१–२ ॥

कुम्भकर्णेन्द्रजित्पूर्वेष्वेकैकोऽलं रिपोर्वधे ।
न मे दोर्दण्डकण्डूतिं विधिर्नूनं विनाशयेत् ॥ ३२ ॥

(भा.दी.) कुम्भेति । कुम्भकर्णश्च इन्द्रजिच्च तौ पूर्वौ येषां ते तथोक्तास्तेषु मध्ये एकैकः रिपोः श्रीरामस्य वधस्तस्मिन् अलं समर्थः । मे मम दोषः हस्ता एव ये दण्डास्तेषां कण्डूतिं विधिः अदृष्टं न विनाशयेत् । नश अदर्शने लिङ् । रामवधार्थं तैरेव चरितार्थत्वात् मम युद्धाश्रद्धापनोदार्थं श्रीरामो विषय एव न भविष्यतीत्यर्थः ॥ ३२ ॥

इत्थं विकत्थनं श्रुत्वा शुद्धबुद्धिर्विभीषणः ।
आह[१] स्म प्रहसन् वाक्यमुदारं [२]हितमच्छलम् ॥ ३३ ॥

(भा.दी.) इत्थमिति । शुद्धा बुद्धिर्यस्य स तथोक्तः विभीषणः, इत्थं विकत्थनं आभासवचनम्, तत् श्रुत्वा प्रहसन् सन्, उदारं उत्कृष्टार्थम्, हितं रावणस्य हितोपदेशरूम्, न विद्यते च्छलं कैतवं यस्मिन् तत् तथोक्तम्, यथाकथञ्चित् भर्तुः प्रीतिर्भूयादित्यभिप्रायेणाप्रवृत्तमित्यर्थः, वाक्यं आह स्म अवदत् ॥ ३३ ॥

(सं.चं.) विकत्थनं मिथ्याप्रशंसावचनम् । 'ಬಡಾಯಿ' इति भाषायम् । उदारं गुणबृंहितम् । हितं श्रेयःसाधनम् । अच्छलं निष्कापट्यम् ॥ ३३ ॥

अतार्किकानशास्त्रज्ञानवृद्धोपासकान् खलान् ।
मुखरान् केवलं मूर्खान् वर्ज्जयेन्मन्त्रमण्टपे ॥ ३४ ॥

(भा.दी.) अतार्किकानिति । तर्के ऊहे कुशलास्तार्किकास्ते न भवन्तीत्यतार्किकास्तान् ऊहापोहविशारदान्, तर्कशास्त्राकुशलानित्यर्थः, शास्त्रज्ञा न भवन्तीत्यशास्त्रज्ञास्तान् धर्मशास्त्रनीतिशास्त्रादिज्ञानरहितान्, अवृद्धोपास-

१. 'प्राह स्म' २. 'उदारमुत्कृष्टम् । यथार्थमिति यावत् । हितं कालान्तरे सुखसाधनम् । अच्छलं निष्कपटं वाक्यम्' इति का.श्री. ।

कान् अवृद्धोपसेविनः, खलान्, मुखरान् वाचाटान्, केवलं मूर्खान् मन्त्रमण्टप आलोचनप्रदेशस्तस्मिन् वर्जयेत् । वृजी वर्जने लिङ् ॥ ३४ ॥

(सं.चं.) अतार्किकान् ऊहापोहपाटवरहितान् । केवलं मुखरान् वृथा बह्वबद्धभाषिणः । मूर्खानशिष्टान् । मण्टपः सभामण्टपं वा ॥ ३४ ॥

विनीतान्[1] नीतिसम्पन्नान् धर्म्माधर्म्मविचक्षणान् ।
पूर्वापरज्ञान् पुरुषान् मन्त्रिणः प्रतिमन्त्रयेत् ॥ ३५ ॥

(भा.दी.) तर्हि कीदृशाः सङ्ग्राह्या इत्यत आह– **विनीतानि**ति । विनीतान् विनयोपेतान्, नीतिसम्पन्नान् राजनीत्यादिना युक्तान्, धर्मश्चाधर्मश्च तयोर्विचक्षणान्, अयं धर्मोऽयमधर्म इति विवेचने कुशलानित्यर्थः, पूर्वापरज्ञान् प्रस्तुतकार्यस्य यत्पूर्वमादिरपरोऽन्तस्तज्ज्ञानन्तीति तथोक्तान्, पूर्वमीमांसापरमीमांसाशास्त्रज्ञानिति वा, मन्त्रिणः पुरुषान् प्रतिमन्त्रयेत् कार्यमालोचयेत् । मत्रि गुप्तभाषणे लिङ् ॥ ३५ ॥

(सं.चं.) मन्त्रिणः प्रति तेष्वेतानि लक्षणानि प्रतीत्य मन्त्रयेत् । अथ च प्रति क्रियासमभिहारेण मन्त्रयेत् । 'वीप्सायां लक्षणे प्रति' इति यादवप्रकाशः । ॥ ३५ ॥

सिद्ध्युपायगुणाङ्गानि न ये शक्त्युदयान् विदुः ।
न तैर्म्मन्त्रविधिं कुर्य्यात् षण्ढैरिव[2] रतिं बुधः ॥ ३६ ॥

(भा.दी.) **सिद्धी**ति । ये पुरुषाः, सिद्धयः कार्यनिष्पत्तयस्ताश्च, उपायाश्च सामभेदाद्युपायास्ते च, गुणाः मन्त्रिगुणास्ते च, अङ्गानि मन्त्राङ्गानि राजनीतिज्ञत्वादीनि तानि च सिध्युपायगुणाङ्गानि, तानि न विदुः । शक्त्युदयान् आत्मनः शक्तय एवंविधाः, परस्य शक्तय इदानीमेवंविधा इति शक्तयश्च, युद्धेन आत्मनोऽभिवृद्धय एतावत्यः, परस्याभिवृद्धय एतावत्य इत्युदयाश्च तान् न विदुः । विद ज्ञाने लट् । तैः सह बुधः प्राज्ञः पुरुषः मन्त्रविधिः मन्त्रकरणं तम्, षण्ढा नपुंसकास्तेषु रतिमिव रमणमिव न कुर्यात् ॥ ३६ ॥

(सं.चं.) कार्यसिद्धेरुपायाश्चत्वारः साम दानं भेदो दण्ड इति । 'सन्धिं च विग्रहं चैव यानमासनमेव च । द्वैधीभावं सञ्चयं च षड् गुणान् कवयो विदुः' इति षड् गुणाः । पञ्चाङ्गानि– कर्मणामारम्भोपायः, पुरुषद्रव्यसम्पत्, विनिपातप्रतीकारः, देशकालावेक्षणम्, कार्यसिद्धिरिति । शक्तयस्तिस्रः– उत्साहशक्तिर्मन्त्र-

---

१. **'विनीतान् वृद्धैः शिक्षितान् । नीतिसम्पन्नान् न्याययुक्तान् । पूर्वापरज्ञान् पूर्वोत्तरविषयकज्ञानयुक्तान् । मन्त्रिणः आलोचनपरान् पुरुषान् प्रति उद्दिश्य मन्त्रयेत् आलोचयेत्'** इति का.श्री. ।

२. **'षण्ढेष्विव'** इति वि.ती.पाठः स्यात् ।

शक्तिः प्रभुत्वशक्तिरिति । उदयाश्च त्रयः– मित्रलाभेन, भूलाभेन, कोशलाभेन चेति । अधिकमस्मत्कृत-श्रीमध्वविजयटीकायाम् ॥ ३६–४० ॥

मन्त्रिदोषा अशेषाश्च राजन् त्वन्मन्त्रिषु स्थिताः ।
गुणं नैकं[1] च पश्यामि मन्ये ते भयमागतम् ॥ ३७ ॥

(भा.दी.) मन्त्रीति । हे राजन् रावण, अशेषाः सकलाश्च मन्त्रिदोषाः त्वन्मन्त्रिषु प्रहस्तादिषु स्थिताः । अहं एकं च गुणं न पश्यामि । (अतस्ते भयमागतमिति मन्ये) ॥ ३७ ॥

पुलस्त्यस्यान्वये जातस्त्वं श्रुतिस्मृतिपारगः ।
परदारपरामर्शं न [2]कुर्य्या लोकनिन्दितम् ॥ ३८ ॥

(भा.दी.) सत्कुलप्रसूतस्याभिज्ञस्य तवेदं कर्म न युक्तं चेत्याह– **पुलस्त्ये**ति । त्वं पुलस्त्यस्य मुनेः अन्वयो वंशस्तस्मिन् जातः । श्रुतयश्च स्मृतयश्च तासां पारमन्तं गतवानिति तथोक्तः । सकलशास्त्राभिज्ञ इत्यर्थः । तस्माद् भवान् लोकेषु निन्दितं परस्य ये दारा भार्यास्तेषां परामर्शस्तं न कुर्यात् ॥ ३८ ॥

यदि त्रैलोक्यजैत्रं त्वमात्मानं मन्यसे प्रभो ।
कुसुमास्त्रमिमं देवं जय मृत्युं तवाऽगतम् ॥ ३९ ॥

(भा.दी.) यदीति । हे प्रभो, त्वं आत्मानं यदि त्रैलोक्यस्य जैत्रं जेतारं मन्यसे । मन ज्ञाने लट् । तर्हि तव आगतं सम्प्राप्तं मृत्युं मारकं देवं इमं कुसुमास्त्रं कामं जय । जि जये लोट् ॥ ३९ ॥

शिरीषमालामृदुलां यां त्वं कामयसे सतीम् ।
व्याळीं कराळीं तां विद्धि सुप्तां केनापि हेतुना ॥ ४० ॥

(भा.दी.) शिरीषेति । त्वं शिरीषाणां शिरीषवृक्षपुष्पाणां या माला तद्वन्मृदुलां मृदुशीलां मृदुगात्रीं सतीं यां सीतां कामयसे । कमु कान्तौ लट् । तां सीतां केनापि हेतुना सुप्तां कराळीं क्रूरां व्याळीमिव सर्पस्त्रियमिव विद्धि । विद ज्ञाने लोट् ॥ ४० ॥

---

१. **'गुणं चैकं न पश्यामि'**

२. **'न कुर्याल्लोक–'** इति वि.ती.पाठः ।

अलं विरुद्धच[१] रामेण प्रणतेषु कृपालुना ।
राजन् बद्धोऽञ्जलिस्तुभ्यं देवी देवाय दीयताम् ॥ ४१ ॥

(भा.दी.) अलमिति । प्रणतेषु शरणागतेषु कृपालुना श्रीरामेण विरुध्य अलम् । हे राजन्, तुभ्यं मया अञ्जलिः बद्धः । देवी देवाय श्रीरामाय दीयताम् । दाण् दाने लोट् ॥ ४१ ॥

(सं.चं.) देवी सीता देवाय रामाय दीयताम् । देवी किल देवमर्हति । न त्वदेवं भवादृशम् ॥४१–४॥

बान्धवाः सन्त्यजेयुस्त्वामधर्म्मेण विनश्वरम् ।
तस्मादधर्म्मं निर्द्धूय देवी देवाय दीयताम् ॥ ४२ ॥

(भा.दी.) बान्धवा इति । बान्धवाः मत्प्रभृतयः अधर्मः दुष्कर्म तेन विनश्वरं विनाशशीलं त्वां सन्त्यजेयुः । त्यज विसर्गे लिङ् । तस्मात् अधर्मः परदारधर्षणलक्षणः, तं निर्धूय विहाय देवी देवाय दीयताम् ॥ ४२ ॥

रामप्रसादप्रसरः सर्वासां सम्पदां पदम् ।
तस्मै [२]त्रैलोक्यनाथाय देवी देवाय दीयताम् ॥ ४३ ॥

(भा.दी.) रामेति । श्रीरामस्य प्रसादस्तस्य प्रसरः प्राप्तिः सर्वासां सम्पदां पदं स्थानम् । (तस्मात्) त्रैलोक्यनाथाय तस्मै देवाय देवी दीयताम् ॥ ४३ ॥

यावन्न रामसूर्य्यस्य गावः सत्पद्मबन्धवः[३] ।
हन्यू रक्षस्तमस्तावद् देवी देवाय दीयताम् ॥ ४४ ॥

(भा.दी.) यावदिति । राम एव सूर्यस्तस्य, सन्तः सज्जना एव पद्मानि तेषां बन्धवः गावः शरा (एव) रश्मयः, रक्षांस्येव च तमस्तत् यावद्यतः पूर्वं न हन्युः । हन्तेर्लिङ् । तावत् ततः पूर्वमेव देवी देवाय दीयताम् ॥ ४४ ॥

१, **'अलं विरोधो रामेण'** इति केचित् पठन्ति । अपपाठोऽयम् । **'अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा'** (अ.सू.३.४.१८) इति पाणिनिस्मरणात् । तेन **'अलं विरुध्य'** इत्येव साधुः पाठः । विकल्पपक्षेऽपि–**'अलं विरोधेन'** इति स्यात् । न तु **'अलं विरोधः'** इति । एतेन **'रामेण साकं विरोधः विद्वेषः अलं माऽस्तु'** इति का.श्री.व्याख्यानमपि परास्तम् ।

२. **'तस्मै लोकैकनाथाय'**

३. **'सत्पद्मबान्धवाः'**

न भयान्न च कार्प्पण्यान्न डम्भान्न च मोहतः[१] ।
मयेदमुदितं राजंस्तव पत्थ्यं[२] शृणोषि चेत् ॥ ४५ ॥

(भा.दी.) नेति । युद्धे यद् भयं तस्मादिदं वचः मया उदितं न, कार्पण्यं क्षुद्रपुरुषत्वं तस्माद्वा इदं उदितं न, डम्भः स्वस्मिन्नविद्यमानगुणख्यापनं तस्माद्वा इदमुदितं न, मोहतोऽज्ञानतो वा इदमुदितं न, किन्तु चेद् यदि शृणोषि । तर्हि तव पथ्यं वचः उदितम् ॥ ४५ ॥

(सं.चं.) न युद्धभयादिदमुदितम् । किन्तु धर्मभयात् । कार्पण्यं लोभः क्षुद्रता वा । नापि क्षुद्रनर इव धनादिलोभात्, किन्तु पुण्यलोभात् । मोहो मौर्ख्यम् । डम्भो महात्म्यभावनम् । तेन वैदुष्यप्रदर्शनम् । शृणोषि चेत् समेषां हितं भूयादिति पथ्यं हितं यथार्थमुदितम् ॥ ४५ ॥

विभीषणेनैवमुक्ते क्रुद्धः प्रोवाच शक्रजित् ।
अस्मान् महेन्द्रजयिनो मानवः किं जयेदिति ॥ ४६ ॥

(भा.दी.) विभीषणेनेति । विभीषणेन एवं वचसि उक्ते सति क्रुद्धः शक्रजित्, महेन्द्रं पुरन्दरं जेतुं शीलमेषामस्तीति तथा तानस्मान् मानवः मनुष्यः श्रीरामः किं जयेत्? जेतुमसमर्थ एवेत्यर्थः, इति प्रोवाच । वचधातोर्लिट् ॥ ४६ ॥

(सं.चं.) शक्रजित् इन्द्रजित् तेनैव मदभ्रमेणाऽह ॥ ४६ ॥

बालोऽयं बालिशो राजन् वद्धचस्ते कार्य्यदूषणः[३] ।
व्रजाम[४] शरणं राममित्युवाच विभीषणः ॥ ४७ ॥

(भा.दी.) बाल इति । हे राजन् रावण, बालो मूर्खः, 'बालो मूर्खे शिशौ च' इति वैजयन्ती । बालिशो मन्दबुद्धिः, ते कार्यं दूषयति नाशयतीति कार्यदूषणः, अयं इन्द्रजित् वध्यः वधार्हः, वयं श्रीरामं शरणं तत् व्रजामः । इति विभीषणः उवाच ॥ ४७ ॥

(सं.चं.) अस्मत्पुरतः बालोऽयम् । अप्रबुद्धोऽयम् । बालिशो मूर्खोऽयम् । वयसा युवाऽपि बुद्ध्या बालोऽयम् ॥ ४७–८ ॥

---

१. **'कार्पण्यान्न मोहान्न च डम्भतः'** इति वि.ती.पाठः । २. **'तथ्यं शृणोषि'** ३. **'कार्यदूषकः'**

४. **'व्रजामः शरणम्' इति वि.ती.पाठः स्यात् । 'व्रजामि शवणम्' इति कचित् ।**

मित्रवेषममित्रं त्वां नित्यं वेद्मि विभीषण ।
[1]अन्यं चेत् त्वादृशं हन्यामित्युवाचाथ रावणः ॥ ४८ ॥

(भा.दी.) मित्रेति । अथ, हे विभीषण, मित्रस्य वेषो यस्य स तथा तम्, अमित्रं शत्रुं त्वां अहं नित्यं वेद्मि । विद ज्ञाने लट् । त्वादृशं अन्यं चेत् हन्याम् । रावणः इति उवाच ॥ ४८ ॥

मृषितं परुषं वाक्यं ज्येष्ठत्वात् तव रावण ।
स्वस्ति तेऽस्तु गमिष्यामीत्युक्त्वोत्तस्थौ विभीषणः ॥ ४९ ॥

(भा.दी.) मृषितमिति । हे रावण तव ज्येष्ठत्वात् परुषं निष्ठुरं इदं वाक्यं मृषितं क्षान्तम्, अन्यश्चेत् त्वां इदानीमेव हन्यामिति भावः । ते स्वस्ति मङ्गळं अस्तु । अहं गमिष्यामि । इति उक्त्वा विभीषणः उत्तस्थौ । ष्ठा गतिनिवृत्तौ लिट् ॥ ४९ ॥

(सं.चं.) ज्येष्ठत्वान्मृषितम् । अन्यथा सर्वथा न मर्षणीयम् । मृष तितिक्षायाम् ॥ ४९–५२ ॥

चतुर्भिः सचिवैः सार्द्धं चतुरैः स गदाधरः ।
मुहूर्त्तेनाम्बरचरो रामपार्श्वमुपाययौ ॥ ५० ॥

(भा.दी.) चतुर्भिरिति । सः विभीषणः, गदां धारयतीति गदाधरस्तथा सन्, चतुरैः कुशलैः चतुर्भिः सचिवैर्भृत्यैः सार्धं अम्बरचरः सन् श्रीरामस्य पाइर्वं समीपं तत् मुहूर्तो मुहूर्तकालस्तेन उपाययौ । यातेर्लिट् ॥ ५० ॥

प्रकाशमान आकाशे संरब्धान् प्रेक्ष्य वानरान् ।
मेघगम्भीरनिर्घोषो बभाषे स विभीषणः ॥ ५१ ॥

(भा.दी.) प्रकाशेति । अथ आकाशो गगनं तस्मिन् प्रकाशमानः, मेघवद्गम्भीरः निर्घोषो यस्य स तथोक्तः विभीषणः, संरब्धान् स्वस्य वाधार्थमुद्युक्तान् वानरान् प्रेक्ष्य बभाषे । भाष व्यक्तायां वाचि लिट् ॥ ५१ ॥

रावणस्यानुजं प्राप्तं रावणेनावमानितम् ।
रामभक्त इति त्यक्तं मां मन्यध्वं हरीश्वराः ॥ ५२ ॥

---

१. 'अन्यश्चेत् त्वादृशो हन्या–'

(भा.दी.) रावणस्येति । हे हरीश्वराः कपिश्रेष्ठाः, रामे श्रीरामे भक्त इति रावणेन अवमानितम्, अत एव त्यक्तं श्रीरामनिकटं प्राप्तं रावणस्य अनुजं मां मन्यध्वं जानीध्वं । मन ज्ञाने लोट् ॥ ५२ ॥

भवभयवनवह्निभर्ज्जितानां निरुपधिभक्तिरसामृताब्धिभाजाम् ।
शरणमशरणो व्रजामि रामं शरणमहं करुणाकरं मुकुन्दम् ॥ ५३ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
युद्धकाण्डे प्रथमः सर्ग्गः ॥

—०—

(भा.दी.) भवेति । न विद्यते शरणं रक्षको यस्य स तथोक्तः अहम्, भवस्य संसारस्य यद्भयं तदेव वन-वह्निस्तेन (भर्जितानां) क्षुभितानाम्, संसारार्दितानामित्यर्थः, निरुपधिर्निर्व्याजो यो भक्तिरसनामकोऽ-मृताब्धिः क्षीरसमुद्रस्तं भजन्तीति तथोक्तास्तेषां पुरुषाणां शरणं रक्षकं करुणाकरं मुकुन्दं श्रीरामं शरणं तत् व्रजामि ॥ ५३ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां
युद्धकाण्डे प्रथमः सर्गः ॥

—०—

(सं.चं.) पुष्पिताग्रया सर्गमुपसञ्जहार– भवभयेत्यादि ॥ ५३ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणव्याख्यायां सङ्ग्रहचन्द्रिकायां
युद्धकाण्डे प्रथमसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– २२३९+५३=२२९२]

द्वितीयः सर्ग्गः

इति ब्रुवाणे पौलस्त्ये सूर्य्यसूनुरमर्षितः ।
अश्रद्दधानस्तद्वाक्यं प्राप्य राममभाषत ॥ १ ॥

(भा.दी.) श्रीरामभृत्यैरेतद्वच आकर्ण्य किमकारीत्यत आह– **इती**त्यादिना । पुलस्त्यस्य गोत्रापत्यं पुमान् पौलस्त्यः तस्मिन् विभीषणे, इति वचसि ब्रुवाणे सति, अमर्षितः क्रुद्धः सूर्यसूनुः सुग्रीवः, तद्वाक्यं विभीषण-वाक्यं तत् अश्रद्दधानः अविश्वसन्, श्रीरामं प्राप्य अभाषत । भाष व्यक्तायां वाचि लङ् ॥ १ ॥

(सं.चं.) पुलस्त्यपौत्रः । पौलस्त्यो विभीषणः । सूर्यसूनुः सुग्रीवः । शत्रुरयं मृषावादी चेत्यमर्षितः सञ्जात-क्रोधः ॥ १ ॥

रावणस्यानुजो नाथ शरणं त्वां [१]किलाऽगतः ।
मायिनां रक्षसामेतां[२] मायां मन्ये स वद्धयताम्[३] ॥ २ ॥

(भा.दी.) रावणस्येति । हे नाथ श्रीराम, रावणस्य अनुजः विभीषणः त्वां शरणं तत् आगतः किल । किलेत्यपरमार्थे । एतां शरणागतिम्, माया एषामस्तीति मायिनस्तेषाम्, कापट्यवतामित्यर्थः, रक्षसां मायां कापट्यं मन्ये । मन ज्ञाने लट् । अतः सः विभीषणः वध्यताम् । वध सम्प्रहारे लोट् ॥ २ ॥

(सं.चं.) किलेत्यरुचावलीके च । त्वां शरणं गत इत्यलीकमेव ब्रूते । तस्मान्न स मह्यं रोचते इत्यर्थः । वध्यताम्, मायित्वात्, रक्षस्त्वाददूतवाच्च । इत्यभाषत ॥ २ ॥

---

१. **'त्वां गतः किल'** २. **'–सामेनां मायाम्'**

३. **'स बद्धयताम्'** इति, **' स बुध्यताम्'** इति च । **'बुध्यतां ज्ञायताम्, विचार्यतामिति यावत्'** इति का.श्री. ।

कपिराजोदितं[१] श्रुत्वा कपीनाभाष्य राघवः ।
ब्रुवन्तु सचिवाः सर्वे नीतिं स्वामित्यभाषत ॥ ३ ॥

(भा.दी.) कपीति । राघवः कपीनां राजा कपिराजस्तेन उदितं तत् वचः श्रुत्वा, कपीन् आभाष्य हे कपिश्रेष्ठा इति सम्बोध्य, सचिवाः मद्भृत्याः सर्वे भवन्तः स्वां स्वीयां नीतिं ब्रुवन्तु इति अभाषत ॥ ३ ॥

(सं.चं.) आभाष्य, नामग्रहणपूर्वकमामन्त्र्य । मन्त्राय सचन्त इति सचिवाः मन्त्रालोचनचतुराः । मन्त्रणे सहायकाः । 'षच समवाये' । नीतिं विभीषणस्वीकारे राजनीतिसम्मतं निर्णीतमाशयम् ॥ ३ ॥

किमस्त्यविदितं देव त्रैलोक्ये सचराचरे ।
वक्ष्यामोऽथ नियोगात् त इत्युक्त्वा ते बभाषिरे ॥ ४ ॥

(भा.दी.) किमिति । हे देव, त्वया चराश्च अचराश्च तैः सहितं सचराचरं तस्मिन् त्रैलोक्ये (अविदितं) अज्ञातं वस्तु किमस्ति? न किमपि । अथ अथापि ते नियोग आज्ञा तस्मात् वक्ष्यामः, इति उक्त्वा ते कपिश्रेष्ठाः स्वस्वनीतीः बभाषिरे । 'अज्ञातं नास्ति ते किञ्चित् त्रिषु लोकेषु राघव । आत्मानं पूजयन् राम पृच्छस्यस्मान् सुहृत्तया' (१०.३५) इति च ॥ ४ ॥

(सं.चं.) तवाविदितं किमस्ति? अथापि तव नियोगं मानयित्वा यथामति वक्ष्यामः ॥ ४ ॥

विपक्षवर्ग्गनिर्म्मुक्ताः सस्नेहाः सफला अपि ।
शराइव निकृन्तेयुरिति तत्राङ्गदोऽब्रवीत् ॥ ५ ॥

(भा.दी.) विपक्षेति । विपक्षाणां शत्रूणां यो वर्गः समूहस्तेन निर्मुक्ताः प्रेषिताः, परित्यक्ता इति वा, पुरुषाः अस्मासु सस्नेहा अपि, सफला अपि सप्रयोजना अपि, शराइव निकृन्तेयुः अपकुर्युः । कृती च्छेदने लिङ् । इति तत्र कपीनां मध्ये अङ्गदः अब्रवीत् । शरपक्षे स्नेहस्तैलं तद्वन्तोऽपि । फलं लोहस्तद्वन्तोऽपीत्यर्थः ॥५॥

(सं.चं.) सस्नेहाः स्निह्यन्तः पुरुषाः । तैलादिद्रवलिप्ताः शराः । सफलाः प्रयोजनवन्तः पुरुषाः । तीक्ष्णमुखाः शराः । 'शस्त्रमुखं फलम्' इति यादवप्रकाशः ॥ ५ ॥

१. 'कपिराजवचः श्रुत्वा'

स्नेहवांश्चापरिचितः परीक्ष्यो नाऽऽशु गृह्यताम् ।
गृहीतो विषवद्धन्यादिति तं शरभोऽब्रवीत् ॥ ६ ॥

(भा.दी.) स्नेहेति । अपरिचितः पुरुषः, स्नेहोऽस्यास्तीति स्नेहवान् तथाऽपि परीक्ष्यः, आशु अविचार्य न गृह्यताम् । ग्रह उपादाने लोट् । गृहीतः अपरीक्ष्य गृहीतः विषवत् हन्यात् । हन हिंसागत्योर्लिङ् । इति तं श्रीरामं प्रति शरभः शरभाख्यकपिः अब्रवीत् ॥ ६ ॥

(सं.चं.) अपरिचितः स्नेहवानपि परीक्ष्यः । अत आशु अपरीक्ष्य सह न स्वीक्रियताम् । अन्यथा स्नेहवद् विषमिव हन्यादेव । पार्थिवांशयोः संयोगहेतुर्द्रवद्रव्याश्रितो गुणः स्नेहः ॥ ६ ॥

देशकालस्वजातीनां दोषाच्छङ्क्यो हि राक्षसः[१] ।
मन्ये परीक्ष्य एवेति जाम्बवान् व्यक्तमब्रवीत्[२] ॥ ७ ॥

(भा.दी.) देशेति । अयं विभीषणः, देशो लङ्कालक्षणदुष्टदेशः स च, कालो युद्धकालः स च, स्वस्य या राक्षसी जातिः सा च, तासां दोषो दुष्टदेशनिवासादिप्रयुक्तो दोषः, तस्मात् शङ्क्यः साधुरितरो वेति शङ्कार्हः, तस्मात् परीक्ष्य एवेति अहं मन्ये । इति जाम्बवान् व्यक्तं यथा भवति तथा अब्रवीत् ॥ ७ ॥

(सं.चं.) शत्रुदेशादागत इति देशदोषात्, शत्रोराक्रमणसन्नाहकाले समागत इति कालदोषात्, स्वयं चास्मच्छत्रूणां राक्षसानां जातौ जात इति स्वजातिदोषात् शङ्कास्पद एवायमतः परीक्ष्य एव ॥ ७ ॥

[३]आकारैरिङ्गितैर्वाक्यैः सोऽश्रद्धेयः परीक्ष्यताम् ।
औषधैरामयो यद्वदिति मैन्दोऽभ्यभाषत ॥ ८ ॥

(भा.दी.) आकारैरिति । अश्रद्धेयः रावणावरजत्वादविश्वसनीयः सः विभीषणः, आकाराः शत्रुमित्रचिह्नानि तैः, 'आकारस्त्वाकृतावात्मवैकृते' इति वैजयन्ती, इङ्गितानि आकूतानि तैः, वाक्यानि च तानि तैः, औषधानि तत्तद्व्याधिनिश्चायकौषधानि तैः आमयः रोगो यद्वत् तद्वत् परीक्ष्यतां विचार्यताम्, ईक्ष दर्शनाङ्कनयोर्लोट्, इति मैन्दः अभ्यभाषत ॥ ८ ॥

---

१. **'दोषाच्छङ्क्यो विभीषणः'** इति, **'दोषाच्छङ्क्योऽयमित्यहम्'** इति वा वि.ती.पाठः स्यादिति भाति ।

२. **'व्यक्तमभ्यधात्' इति केचित् पठन्ति । तदा द्विकर्मकत्वं कथमिति चिन्त्यम् । 'दुह्यादित्वाद् ब्रूञो द्विकर्मकत्वम्'** इति का.श्री. ।

३. **'आमयो रोगो यद्वत् यथा आकारैः । 'इङ्गितं हृद्गतो भावो बहिराकार आकृतिः' इत्यभिधानात् रोगिणः शरीराकारैः, शरीरचेष्टाभिः, इङ्गितैः मनोगताभिप्रायैः वाक्यैः रोगिणो मुखवचनैः औषधैश्च परीक्ष्यः । तथा अश्रद्धेयः स राक्षसः आकारादिभिः परीक्ष्यताम्'** इति का.श्री. ।

(सं.चं.) आकारैर्मुखविकारादिभिः । आकारैरिङ्गितमाकूतमन्तराशयः ज्ञातव्यः । इङ्गितैस्तदुदितानां वाक्यानां प्रामाण्यमप्रमाण्यं वा निर्णेतव्यम् । स्वतस्तु रावणानुजत्वादयमश्रद्धेय एव ॥ ८ ॥

नीलतारादिभिर्नीत्या निन्द्यमाने विभीषणे ।
प्रतिभाजृम्भितं वाक्यं हनूमान्[1] राममब्रवीत्[2] ॥ ९ ॥

(भा.दी.) नीलेति । नीलश्च तारश्च तौ आदी येषां ते तथा तैः, नीत्या विभीषणे निन्द्यमाने सति, हनुमान् प्रतिभया स्वरूपप्रज्ञया जृम्भितं विकसितं तत् वाक्यं श्रीरामं प्रति अब्रवीत् ॥ ९ ॥

(सं.चं.) नीत्या स्वाशयनिर्णीतेन वचसा । प्रतिभया सहजया नवनवोन्मेषशालिन्या प्रज्ञया जृम्भितमुत्फुल्लं परिपूर्णं वाक्यम् ॥ ९ ॥

[3]हेयभागाच्च गृह्णन्ति सारं सारविदो जनाः ।
सानुरागमवित्रस्तं[4] मणिं फणिकुलादिव ॥ १० ॥

(भा.दी.) हेयेति । सारं पुरुषार्थं विदन्तीति सारविदः । 'सारो बले स्थिरांशेऽर्थे पुमान्न्याये वरे त्रिषु' इति रत्नमाला[5] । जनाः हेयवस्तुनो यो भागस्तस्मात्, सारो सारभागस्तम्, फणीनां कुलं गोत्रविशेषस्तस्मात् अनुरागेण शोभादिगुणविशेषेण सहितः सानुरागस्तम्, वित्रस्तः न भवतीत्यवित्रस्तस्तम्, त्रासाख्यमणिदोष-रहितमित्यर्थः, तं मणिमिव गृह्णन्ति । ग्रह उपादाने लट् ॥ १० ॥

(सं.चं.) हेयभागात् शत्रुपक्षादपि । सारं न्यायादनपेतमुत्तमं नरं सारविदो गृह्णन्ति । विषमयत्वेन हेयात् फणिकुलात् सारं श्रेष्ठं मणिमिव । उभयत्रापि श्रैष्ठ्ये हेतुः– सानुरागमवित्रस्तम् । हेयं पक्षं विहाय यं पक्षमवृणीत तत्रानुरागयुक्तं नरम् । अवित्रस्तं शत्रुभिरभीतं च । अनुरूपेण रागेण त्विषा युक्तं मणिम् । त्रासाख्यमणिदोषरहितं च । 'मणिदोषे भये त्रासः' इति यादवप्रकाशः । त्रसयति मणेर्धर्तारमामयादिनेति त्रसो मणिदोषः । त्रसी उद्वेगे । 'उद्वेगो भयम्' इति क्षीरस्वामी । 'विपक्षवर्गनिर्मुक्ताः–' इत्यङ्गदोक्तस्येद-मुत्तरम् ॥ १० ॥

---

१. **'हनुमान्'** २. **'राममभ्यधात्'**

३. **'अङ्गदाद्युक्तानां क्रमेणोत्तरमाह–'हेयभागादित्यादिनां 'विमलः कमलाकरः'** इत्यन्तेन' इति का.श्री. ।

४. **'त्रासो नाम महामणेः दुर्धरत्वत्रिकोणत्वादिकश्च दोषः'** इति का.श्री. ।

५. नेदमभिधानरत्नमालायां पठ्यते । अमरकोशे तु पठ्यते । **'सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिषु'** इति प्रचलितः पाठः ।

अपरीक्ष्यापरिचितं सारं गृह्णाति सारवित् ।
तत्रोदाहरणं गृह्णन् पौष्पं मधुकरो मधु ॥ ११ ॥

(भा.दी.) एवमङ्गदनीतिं विनिन्द्य शरभनीतिं दूषयति– **अपरीक्ष्येति** । सारवित् पुरुषार्थवित् पुरुषः, अपरिचितं पुरुषं अपरीक्ष्यापि, सारं श्रेष्ठं पुरुषं गृह्णाति । तत्र प्रोक्तार्थे पुष्पाणां सम्बन्धि पौष्पं तत् मधु पुष्परसं गृह्णन् मधुकरः उदाहरणं दृष्टान्तः ॥ ११ ॥

(सं.चं.) अपरिचितमपि पौष्पं मधु गृह्णन् मधुकरस्तत्रोदाहरणम् । 'स्नेहवांश्चापारिचितः–' इति शरभोक्तेरिद-मुत्तरम् ॥ ११ ॥

देशकालादिदुष्टोऽपि सारः सारेण[१] शुद्ध्यति ।
नानामलेन मलिनं शुद्धं हेमेव वह्निना ॥ १२ ॥

(भा.दी.) जाम्बवतो नीतिं दूषयति– **देशेति** । सारः गुणतः श्रेष्ठः पुरुषः, देशश्च कालश्च तौ आदी येषां जात्यादीनां ते तथोक्तास्तैः दुष्टोऽपि, सारेण उत्तमपुरुषेण त्वादृशोत्तमपुरुषसमागमेनेत्यर्थः, नानाविधं यन्मलं तेन मलिनं स्वतः शुद्धं हेम वह्निनेव शुद्ध्यति । शुध शौचे लट् ॥ १२ ॥

(सं.चं.) देशेति । 'देशकालस्वजातीनाम्–' इति जाम्बवद्वचनस्येदमुत्तवम् ॥ १२ ॥

अतिमात्रं[२] परिक्षाभिः प्रसन्नः कलुषीभवेत् ।
प्रकृतिं च त्यजेद् यद्वद् विमलः कमलाकरः[३] ॥ १३ ॥

(भा.दी.) मैन्दनीतिं पराचष्टे– **अतीति** । प्रसन्नः पुरुषः अतिमात्रमत्यन्तं याः परीक्षास्ताभिः कलुषी-भवेत् । विश्वस्तोऽप्यविशस्तो भवेत् । विमलः कमलाकरः सरः यद्वत् तद्वत् प्रकृतिं च स्वपूर्वस्वभावं च त्यजेत् । त्यज विसर्गे लिङ् ॥ १३ ॥

(सं.चं.) अतिमात्रमिति । 'आकारैरिङ्गितैर्वाक्यैः–' इति मैन्दवचनस्येदमुत्तरम् ॥ १३ ॥

---

१. **'सारेण स्वमनसो निर्मलत्वेन'** इति वि.भू. । का.श्री. अपि ।
२. **'अतिमात्रपरीक्षाभिः'**
३. **'कमलाकरस्तटाकः । तत्र परीक्षा नामावगाह्यात्यन्तविलोडनम् '** इति वि.भू.. । का.श्री. च ।

अपि नीतिमतां[१] नीतिं नाहं मानद मानये ।
सचिवानाममीषां ते मम तावन्मतं शृणु ॥ १४ ॥

(भा.दी.) अपीति । हे मानद ज्ञानद श्रीराम, नीतिमतामपि अमीषां ते सचिवानां अङ्गदादीनां नीतिं अहं न मानये न पूजयामि । मान पूजायां लिङ् । मम मतं सिद्धान्तस्तत् तावत् शृणु । श्रु श्रवणे लोट् ॥१४॥

(सं.चं.) यद्यपि नीतिमन्तः । तथापि न सूक्ष्मतः । अतो नाहं मानये । अल्पज्ञानामपि बहुमानद ॥१४॥

ऋजुः [२]परपरित्यक्तो धार्म्मिकः शरणागतः[३] ।
सर्वलोकशरण्येन त्वया ग्राह्यो विभीषणः ॥ १५ ॥

(भा.दी.) ऋजुरिति । ऋजुरवक्रबुद्धिः, परेण शत्रुणा, 'परोऽरिपरमात्मनोः' इति वैजयन्ती, परित्यक्तः, धर्मं चरतीति धार्मिकः, शरणागतः । इमानि ग्राह्यत्वे हेतुगर्भाणि । विभीषणः, सर्वे ये लोकास्तेषां शरण्यः शरणार्हस्तेन त्वया ग्राह्यः ॥ १५ ॥

(सं.चं.) सर्वलोकानां शरणं रक्षणमर्हतीति सर्वलोकशरण्यः ॥ १५ ॥

वीर्य्यौदार्य्यं[४] तव ज्ञात्वा राक्षसानां च सङ्क्षयम् ।
साम्राज्यं भोक्तुमाप्तोऽयं पादोपान्तं तव प्रभो[५] ॥ १६ ॥

(भा.दी.) वीर्येति । अयं विभीषणः तव वीर्यं च औदार्यं महत्त्वं च तत् ज्ञात्वा, राक्षसानां सङ्क्षयो नाशस्तं च ज्ञात्वा, सम्राजो भावः साम्राज्यम्, अधिराजत्वमित्यर्थः, भोक्तुं अनुभवितुम्, हे प्रभो, तव पादयोरुपान्तं समीपं तत् आप्तः आगतः ॥ १६ ॥

(सं.चं.) लङ्कासाम्राज्यं भोक्तुम् ॥ १६ ॥

भ्रातृव्यं भ्रातरं हत्वा राज्यमस्मै प्रदीयताम् ।
अनुरक्ताय दासाय सुग्रीवाय यथा पुरा ॥ १७ ॥

---

१. **'अविनीतिमताम्'** । **'विशिष्टनीतिपरिचयरहितानाम्'** इति वि.भू. । का.श्री. च । २. **'शरणं गतः'**

३. **'ऋजुःमनोवाक्कायकर्मसु एकप्रकारः । परपरित्यक्तः शत्रुणा निष्कासितः'** इति का.श्री ।

४. **'वीर्यं च औदार्यं च वीर्यौदार्यम् । द्वन्द्वैकवद्भावः । वीर्यमध्यवसायान्तगामित्वम् । औदार्यं मोक्षादिसर्वपुरुषार्थप्रदत्वम्'** इति का.श्री. ।

५. **'तव प्रभोः'**

(भा.दी.) भ्रातृव्यमिति । भ्रातृव्यं शत्रुम्, 'भ्रातृव्यौ भ्रातृजामित्रौ' इति वैजयन्ती, भ्रातरं रावणं हत्वा अनुरक्ताय अनुरागवते भक्तायेत्यर्थः, दासाय अस्मै विभीषणाय, पुरा सुग्रीवाय यथा तथा, राज्यं तत् प्रदीयताम् । दाण् दाने लोट् ॥ १७ ॥

(सं.चं.) भ्रातृव्य इति व्यत्प्रत्यये भ्रातुरपत्यमुच्यते, तित्स्वरेण प्रत्ययाद्युदात्तः–भ्रातृव्यः । व्यन्प्रत्यये शत्रुरुच्यते, नित्स्वरेणाऽद्युदात्तः–भ्रातृव्यः । 'व्यन् सपत्ने' (अ.सू.४.१.१४५) इति हि पाणिनिः । तदिह भ्रातृव्य इति सपत्नवचनम् । यथा पुरा सुग्रीवस्य भ्रातृव्यं भ्रातरं वालिनं हत्वा सुग्रीवाय कपिराज्यं प्रादीयत तथेदानीं विभीषणस्य भ्रातृव्यं भ्रातरं रावणं हत्वा विभीषणाय लङ्काराज्यं प्रदीयताम् । उभयत्रापि कारणसाम्यात् । अनुरक्तत्वाद् भक्तत्वात्, दासत्वाच्च ॥ १७ ॥

इति तन्मारुतेर्वाक्यं [१]लाळयन्नब्रवीत् प्रभुः ।
मन्मतप्रतिबिम्बं तन्मतं साधु हनूमतः ॥ १८ ॥

(भा.दी.) इतीति । मारुतस्यापत्यं पुमान् मारुतिस्तस्य इति तद्वाक्यं लाळयन् मानयन् प्रभुः श्रीरामः हनूमतः साधु समीचीनं तत् मतं अभिमतम्, मन्मतस्य मदभिमतस्य, प्रतिबिम्बम् अतिसदृशं इति अब्रवीत् ॥ १८ ॥

(सं.चं.) लाळयन् प्रशंसन् । लड लळ उपसेवायाम् । मन्मतप्रतिबिम्बम् । भगवान् यन्मन्यते तदेव भक्ताग्रणीर्हनुमानपि मन्यते । भगवन्मतमेवात्र प्रतिफलति । तस्मादशक्यमन्यथाचिन्तनमित्येतत् । 'कामेन मे काम आगाद्धृदयाद्धृदयं मृत्योः' इति हि श्रुति ॥ १८ ॥

अपरोक्षं परोक्षं वा शरणं मामुपागतम् ।
शत्रुं मित्रमथान्यं वा पालयेयेति मे व्रतम्[२] ॥ १९ ॥

(भा.दी.) अपरेति । अपरोक्षं प्रत्यक्षं यथा भवति तथा । परोक्षं व्यवहितं यथा भवति तथा वा । मां शरणं तत् उपागतं शत्रुं मित्रं तत् अथ अन्यं उदासीनं वा पालयेय इति मे मतं सिद्धान्तः ॥ १९ ॥

(सं.चं.) अपरोक्षं परोक्षं वा । 'सकृदेव प्रपन्नाय तवास्मीति च याचते । अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम' (१८.३३) इति च । शरणं त्रातारं मामुपागतम् । शरणं रक्षणमुद्दिश्य वा ॥ १९ ॥

---

१. **'लालयन्नब्र–'** २. **'मे मतम्'** इति वि.ती.पाठः । **'व्रतं स्वभावः'** इति वि.भू. । **'व्रतं नियमः'** इति का.श्री. ।

न मे[१] भयं राक्षसतो यद्ययं छद्मसौहृदः[२] ।
मदङ्गुलिं चालयितुं नालं सर्वे सुरासुराः ॥ २० ॥

(भा.दी.) नेति । यदि अयं च्छद्मना कापट्येन सौहृदं मित्रत्वं यस्य स तथा तर्ह्यपि अस्मात् राक्षसतः विभीषणात् भयं नच नैव । यतः सर्वे सुरासुराः मम अङ्गुलिर्मदङ्गुलिस्तां चालयितुं अलं समर्थाः न । तस्माद् भयं नैवेति सम्बन्धः ॥ २० ॥

(सं.चं.) शोभनं हृदयमस्येति सुहृत् । तस्य भावः सौहृदं भक्तिः । छद्मना शाठ्येन अपदेशेन वा । अपदेशः='**ಛಲ**' इति भाषायाम् । सर्वे सुरासुराः मिलिता अपि ॥ २०–१ ॥

अवगच्छामि च स्वच्छं मम भक्तं विभीषणम् ।
इत्युक्त्वा वानरैरेनमाह्वयद् भक्तवत्सलः ॥ २१ ॥

(भा.दी.) अवेति । अहं विभीषणं स्वच्छं निर्मलान्तःकरणं मम भक्तं च अवगच्छामि विजानामि । भक्तवत्सलः श्रीरामः इति उक्त्वा वानरैः एनं आह्वयत् आजुहाव । ह्वेञ् स्पर्धायां शब्दे च लङ् ॥ २१ ॥

आयुधानि नगे न्यस्य शान्तं रूपान्तरं गतः ।
ननाम रामपादाब्जे सह भृत्यैर्विभीषणः ॥ २२ ॥

(भा.दी.) आयुधेति । विभीषणः आयुधानि नगः पर्वतस्तस्मिन्, वृक्ष इति वा, न्यस्य निक्षिप्य, शान्तं प्रसन्नं तत् रूपान्तरं गतः सन्, भृत्यैः सह श्रीरामस्य यौ पादौ तावेवाब्जं तस्मिन् ननाम । णमु प्रह्वत्वे शब्दे च लिट् ॥ २२ ॥

(सं.चं.) अन्तरिक्षादवतरन् आयुधानि नगे समीपगते वृक्षे न्यस्य । 'वरायुधधरो वीरो दिव्याभरणभूषितः' (१७.४) इत्युक्तं पूर्वरूपं विहाय, उन्मुक्तकिरीटाद्याभरणो विनीतं शान्तं रूपान्तरं गतः । रामायणानुक्तमेतत् । भृत्यैश्चतुर्भिः सचिवैः ॥ २२ ॥

रावणं सगणं हत्वा देवविप्रापराधिनम् ।
प्राज्यं[३] राक्षसराज्यं ते दास्यामीत्यब्रवीत्[४] प्रभुः ॥ २३ ॥

---

१. **'नास्माद् भयं राक्षसतः'** इति वि.ती.पाठः स्यादिति भाति । अथापि चकारो बाधते । २. **'छद्मसंवृतः'**

३. **'पश्चाद् राक्षस–'** ४. **'–त्यवदत्'**

(भा.दी.) रावणमिति । देवाश्च विप्राश्च तेषामपराधिनं सगणं सपरिवारं रावणं हत्वा प्राज्यं भूयिष्ठं तत् राक्षसराज्यं ते तुभ्यं दास्यामि । दाञो ऌट् । प्रभुः इति अब्रवीत् ॥ २३ ॥

(सं.चं.) प्राज्यं प्रभूतम्, समृद्धमित्येतत् । राक्षसराज्यमिति प्रायोवचनम् । हे राक्षस ते लङ्काराज्यं दास्यामीति वा ॥ २३ ॥

दास्यं ते दुर्लभं प्राप्तं कैवल्यस्यैककारणम्[1] ।
योत्स्यामि [2]राक्षसान् घोरानित्युवाच विभीषणः ॥ २४ ॥

(भा.दी.) दास्यमिति । कैवल्यं मोक्षस्तस्य एककारणं मुख्यकारणं तत्, दुर्लभं ते तव दास्यं मया प्राप्तम्, घोरान् राक्षसान् प्रति योत्स्यामि । युध सम्प्रहारे ऌट् । विभीषणः इति श्रीरामं उवाच ॥ २४ ॥

(सं.चं.) युधिः कविसमय उभयतोभाष इत्युक्तम् । यद्यप्ययमकर्मकः । तेन प्रतियोगेन द्वितीया समर्थनीया– राक्षसान् पतियोत्स्यामीति । अत एव केचित् 'योत्स्यामि राक्षसैः सार्धम्' इति पाठान्तरं पठन्ति । मम सचिवैश्चतुर्भी राक्षसैः सहितो योत्स्यामि । रावणभटैः राक्षसै साकं वा प्रत्यर्थीभूय योस्त्यामीति तदर्थः ॥ २४ ॥

[3]लक्ष्मणेनाऽहृतेनाथ रामो वारिधिवारिणा ।
लङ्काधिपतिरित्युच्चैरभ्यषिञ्चद् विभीषणम् ॥ २५ ॥

(भा.दी.) लक्ष्मेति । अथ लक्ष्मणेन रामाज्ञया आहृतेन आनीतेन वारिधेर्वारि उदकं तेन । श्रीरामः विभीषणं अयं लङ्काधिपतिरिति उच्चैः, वदन्निति शेषः, अभ्यषिञ्चत् । षिच सेचने लङ् ॥ २५ ॥

(सं.चं.) लङ्काधिपतिरित्युच्चैरुद्घोष्य । लक्ष्मणोऽभ्यषिञ्चदिति रामायणे–'अब्रवील्लक्ष्मणं प्रीतः समुद्रजल-मानय । तेन चेमं महाप्राज्ञमभिषिञ्च विभीषणम् । राजानं रक्षसां क्षिप्रं प्रसन्ने मयि मानद । एवमुक्तस्तु सौमित्रिरभ्यषिञ्चद् विभीषणम्' (१९.२४–६) इति । सौमित्रिरभ्यषिञ्चत्, रामोऽपि । तथाहि भारते– 'सर्वराक्षसराज्ये चाप्यभ्यषिञ्चद् विभीषणम्' इति । अतो न विरोधः । एतदुभयसङ्गमनाय भगवत्पादः–

---

१. **'कैवल्यस्यैव कारणम्'** २. **'राक्षसैः सार्धमित्युवाच'** । **'राक्षसैः भृत्यैः सार्धम्'** इति का.श्री. ।

३. **'ब्रह्मजेनाऽहृतेनाथ'**

'राज्येऽभ्यषेचयदुदारसुसत्वराशिः' (म.भा.ता.नि.८.८) इत्याह । लक्ष्मणेनाभ्यषेचयत् । स्वयं चाभ्यषेचयत् । स्वार्थे णिच् । 'रामो राज्यमकारयत्' इति यथा ॥ २५ ॥

कपिराजेन सम्पृष्टो निजगाद विभीषणः ।
समुद्रतरणोपायं सेतुबन्धं महामतिः ॥ २६ ॥

(भा.दी.) कपीति । कपीनां राजा कपिराजस्तेन सुग्रीवेण, समुद्रस्य तरणं तस्मिन् य उपायस्तं प्रति सम्पृष्टः, महती पूज्या मतिर्यस्य स तथोक्तः विभीषणः, सेतोर्बन्धो बन्धनं तं निजगाद । गद व्यक्तायां लिट् ॥ २६ ॥

(सं.चं.) निजगाद विभीषणः । 'अबध्वा सागरे सेतुं घोरेऽस्मिन् वरुणालये । लङ्का नाऽन्सादयितुं शक्त्या सेन्द्रैरपि सुरासुरैः । विभीषणस्य शूरस्य यथार्थं क्रियतां वचः' (१९.३९–४०) इति च ॥ २६–७ ॥

दृष्ट्वा कपीन्द्रसैन्यं तच्छार्दूलो नाम राक्षसः ।
रावणस्य चरो गत्वा रावणाय न्यवेदयत् ॥ २७ ॥

(भा.दी.) दृष्ट्वेति । शार्दूलः शार्दूल इति नाम प्रसिद्धः रावणस्य चरो गूढपुरुषो राक्षसः, तत् कपीन्द्रसैन्यं दृष्ट्वा, रावणं गत्वा रावणाय न्यवेदयत् आचख्यौ ॥ २७ ॥

ध्यात्वा मुहूर्त्तं निश्वस्य[1] सम्भ्रान्तः स दशाननः ।
शुकं दूतं कपीन्द्राय प्रेषयामास सत्वरः ॥ २८ ॥

(भा.दी.) ध्यात्वेति । सम्भ्रान्तः कपीन्द्रसैन्यं श्रुत्वा कर्तव्यमूढः स दशाननः, मुहूर्तो मुहूर्तकालस्तम्, मुहूर्तकाले इत्यर्थः, ध्यात्वा निश्वस्य, सत्वरः त्वरया सहितः सन्, शुकं शुकनामकं दूतम्, कपीन्द्राय सुग्रीवाय प्रेषयामास । इषु गतौ लिट् ॥ २८ ॥

(सं.चं.) सम्भ्रान्तोऽन्तर्भीतः ॥ २८–९ ॥

शुको विहङ्गमो भूत्वा निस्तीर्य्य लवणार्ण्णवम् ।
स्थितो वियति सुग्रीवं रावणस्य [2]वचोऽब्रवीत् ॥ २९ ॥

---

१. **'निश्वस्य दीर्घश्वासं विसृज्य'** इति का.श्री. । 'ನಿಟ್ಟುಸಿರು' इति भाषायाम् । २. **'रावणस्य चरोऽब्रवीत्'** इति वि.ती. पाठः ।

(भा.दी.) **शुक** इति । रावणस्य चरः गूढपुरुषः शुकः, विहङ्गमः पक्षी भूत्वा, लवणजलात्मको योऽर्णवस्तं निस्तीर्य, वियत् नभस्तस्मिन् स्थितः सन्, सुग्रीवं प्रति अब्रवीत् ॥ २९ ॥

नरेन्द्रस्याहरं भार्य्यां वानरेन्द्र कृतागसः[१] ।
भवान् मे भ्रातृदेशीयो विरोधं कुरुते कुतः ॥ ३० ॥

(भा.दी.) नरेति । हे वानरेन्द्र सुग्रीव, कृतं आगः शूर्पणखीनासिकाकृन्तनलक्षणापराधो येन स तथा तस्य नरेन्द्रस्य राज्ञः श्रीरामस्य भार्यां अहरं अपहृतवानस्मि । हृञो लङ् । (मे)भ्रातृदेशीयः भ्रातृतुल्यः भवान् कुतः कारणात् विरोधः कलहस्तं कुरुते? ॥ ३० ॥

(सं.चं.) भ्रातृदेशीयः ईषदसमाप्तो भ्राता । भ्रातृसमान इत्येतत् । 'ईषदसमाप्तौ कल्पप्देश्यदेशीयरः' (अ.सू. ५.३.३७) इति पाणिनिः । 'अहं यद्यहरं भार्यां राजपुत्रस्य धीमतः । किं तत्र तव सुग्रीव किष्किन्धां प्रति गम्यताम्' (२०.११) इति च ॥ ३० ॥

सुरासुरैरप्रधृष्या लङ्का वानरदुर्ग्गमा ।
तस्मात् ते विग्रहो मा भूत् किष्किन्धां कुशली व्रज ॥ ३१ ॥

(भा.दी.) मया सह विरोधो विफलश्चेत्याह– **सुरेति** । यस्मात् सुरासुरैः अप्रधृष्या अनुल्लङ्घ्या, योद्धुमशक्येत्यर्थः, लङ्का वानरदुर्गमा वानरैर्गन्तुमशक्या, तस्मात् ते विग्रहः मया सह युद्धं मा भूत् । कुशलं क्षेममस्यास्तीति कुशली सन् किष्किन्धां प्रति व्रज ॥ ३१ ॥

(सं.चं.) यदि विग्रहमेव मन्यसे तर्हि किष्किन्धां कुशली न व्रजेरिति स्नेहमार्गं भीषयति । इति रावणस्य वचोऽब्रवीत् ॥ ३१–२ ॥

इति ब्रुवाणं तं दृष्ट्वा कपीन्द्रा अङ्गदादयः ।
खमुत्पत्य निपात्याधः पक्षं तस्योदमूलयन् ॥ ३२ ॥

(भा.दी.) **इतीति** । अङ्गदादयः कपीन्द्राः, इति ब्रुवाणं तं शुकरूपिणं राक्षसं दृष्ट्वा, खं नभस्तत् उत्पत्य, अधः निपात्य पातयित्वा, तस्य पक्षः च्छदस्तं उदमूलयन् लुलुञ्चुः । मूल आरोहणे लङ् ॥ ३२ ॥

---

१. **'कृतागसः शूर्पणखीनासाच्छेदादिकं खरादिवधादिकं चापराधं कृतवतः'** इति वि.भू. । **शूर्पणखीनासिकाच्छेदखरादिवधाख्यमपराधं कृतवतः'** इति का.श्री. ।

लोड्यमानो[१] धरापृष्ठे ताड्यमानश्च वानरैः ।
हा राम राजधर्म्मज्ञ दूतं पाहीति सोऽरुदत्[२] ॥ ३३ ॥

(भा.दी.) लोठ्येति । वानरैः धरायाः पृष्ठं तळं तस्मिन् लोठ्यमानः मर्द्यमानः, ताड्यमानश्च सः शुकः, हा राम, राज्ञां यो धर्मः दूतवधो न कार्य इत्यादिस्तं जानातीति तथा तत्सम्बुद्धिः, त्वं दूतं मां पाहि, पा रक्षणे लोट् । इति अरुदत् । रुदिर् अश्रुविमोचने लुङ् ॥ ३३ ॥

(सं.चं.) लोड्यमानः, भूमौ विलोडनं कुर्वन् । **'ಹೊರಳಾಡು'** इति भाषायाम् । लुट विलोटने । विलोडन इति दुर्गः । लुड इति द्रमिडाः' इति क्षीरस्वामी । लोठ्यमान इति पाठेऽपि स एवार्थः । लुठ संश्लेषणे ॥ ३३ ॥

न दूतश्चोर एवायं चार इत्यङ्गदोऽब्रवीत् ।
मा घानि [३]दूतम्मन्योऽसावित्यूचे सस्मितं प्रभुः ॥ ३४ ॥

(भा.दी.) नेति । अयं चारः गूढपुरुषः दूतः न किन्तु चोर एव, सीताचोरस्य रावणस्य भृत्यत्वाच्चोरतुल्य एव इति अङ्गदः अब्रवीत् । प्रभुः श्रीरामः, दूतं मन्यत इति दूतम्मन्यः असौ एषः, मा घानि न हन्यताम्, हन्तेर्लुङ् । मा घानि दूतं मान्योऽसाविति पाठे दूतं मा घानि, असौ दूतः शुकः मान्य इत्यन्वयः । इति सस्मितं ऊचे ॥ ३४ ॥

(सं.चं.) नायं दूतः । किन्तु चौर्येणास्मत्सेनासंस्थानमवगन्तुमागतो चारो गूढचरः दूतमात्मानं मन्यत इति दूतम्मन्यो दूतमानी । 'आत्ममाने खश्च' (अ.सू.३.२.८३) इति खश् । मा घानि । हन्तेः कर्मणि लुङि रूपमघानीति । 'माङि लुङ्' (अ.सू.३.३.१७६) माङ्योगे लोडर्थे लुङ् । अल्लोपश्च ॥ ३४ ॥

न मे मित्रममित्रोऽयं रामामित्रो दशाननः ।
गच्छेद् यमपुरीमित्थं सुग्रीवः शुकमब्रवीत् ॥ ३५ ॥

---

१. **'लोढ्यमानो–'** इति वि.ती.पाठः । २. **'सोऽवदत्'**

३. **'मा घानि दूतं मान्योऽसौ'** इति कचित् पठ्यते । विश्वपतितीर्थीयेऽपि स पाठः समुद्धृतः । अथाप्यनन्वयादग्राह्यः स पाठः । दूतोऽसौ मा घानीति वक्तव्यम् । दूतं मा घानीत्यनुपपन्नमेव । **'दूतम्मन्यः दूतोऽहं दूतोऽहमिति भाषमाणः'** इति वि.भू. । **'दूतोऽहमिति भाषमाणः असौ शुकः भवद्भिः मा घानि । न हन्यताम् । हन हिंसागत्योः । कर्मणि माङ्योगे लोडर्थे लुङ् । 'चिण् भावकर्मणोः' (अ.सू.३.१.६६) इति चिणि कृते, 'हो हन्तेः–' (७.३.५४) इति कुत्वे, 'अत उपधायाः' (७.२.११६) इत्युपधावृद्धौ, 'चिणो लुक्' (६.४.१०४) इति प्रत्ययस्य लुकि सति, 'न माङ्योगे' (६.४.७४) इत्यडभावे 'मा घानि' इति रूपम्'** इति का.श्री. ।

(भा.दी.) **ने**ति । रामस्य अमित्रः अयं दशाननः मे मित्रं इष्टः न । किन्तु अमित्रः शत्रुः । दशाननः यमपुरीं गच्छेत् । गम्लृ गतौ लिङ् । इत्थं सुग्रीवः शुकं प्रति अब्रवीत् ॥ ३५ ॥

(सं.चं.) रामस्यामित्रो ममाप्यमित्रः । यतो रामामित्रस्तस्माद् यमपुरीमेव गन्तुं योग्यः । 'किष्किन्धां कुशली व्रज' इत्यस्येदमुत्तरम् । प्रथमं त्वं यमपुरीं गच्छ । पश्चादहं कुशली किष्किन्धां व्रजेयमिति, त्वयि जीवति कथं नः कुशलमिति ॥ ३५ ॥

प्रतीक्षमाणो[१] भगवान् त्रिरात्रं च क्षमापरः ।
चुक्रोधानभियाताय वीर्य्याब्धिर्ल्लवणाब्धये ॥ ३६ ॥

(भा.दी.) **प्रती**ति । तिसृणां रात्रीणां समाहारस्त्रिरात्रं तत्, समीक्षमाणः समुद्रागमनं पश्यन्, क्षमायां परं तात्पर्यं यस्य स तथा, भगवान् वीर्याब्धिः सः श्रीरामः, अनभियाताय स्वदर्शनार्थमनागताय लवणाब्धये चुक्रोध । क्रुध कोपे लिट् ॥ ३६ ॥

(सं.चं.) लवणाब्धये तन्मानिने वरुणाय चुक्रोध । 'क्रुधद्रुह–' (अ.सू.१.४.३७) इति चतुर्थी ॥ ३६ ॥

मन्यते क्षमिणं क्षामं नीचो दण्डेन तृप्यति[२] ।
इत्युक्त्वाऽऽदत्त भगवान् बाणं बाणासनं च सः ॥ ३७ ॥

(भा.दी.) **मन्यत** इति । नीचः पुरुषः, क्षमा अस्यास्तीति क्षमी तं पुरुषं क्षामं अशक्तं मन्यते । मन ज्ञाने लट् । नीचः पुरुषः । दण्डः शासनं तेन तृप्यति । तृप प्रीणने लट् । इति उक्त्वा सः भगवान् श्रीरामः बाणः शरस्तं बाणासनं धनुस्तच्च आदत्त जगृहे ॥ ३७ ॥

(सं.चं.)क्षामं क्षीणं दुर्बलम् । 'एक एव क्षमादोषो द्वितीयो नोपपद्यते । यदेनं क्षमया सन्तमशक्तं मन्यते जनः' इति हि महाभारते ॥ ३७–८ ॥

आकर्षतो राघवस्य बाहुना बाणमुल्बणम्[३] ।
निसर्ग्गरक्तो नेत्रान्तो रक्तत्वमभजत् पुनः ॥ ३८ ॥

---

१. '**समीक्षमाणो–**' इति वि.ती.पाठः । २. '**दण्डेन तृप्यति प्रीणाति । स्वाधीनो भवतीति यावत्**' इति का.श्री. ।

३. '**शरमुत्तमम्**' इति वि.ती.पाठः स्यात् । '**बाणमुत्तमम्**' इति क्वचित् ।

(भा.दी.) आकर्षत इति । बाहुना उत्तमं शरं समुद्रमुद्दिश्य आकर्षतः श्रीराघवस्य, निसर्गतः स्वभावतः रक्तः नेत्रान्तः कटाक्षः पुनः रक्तत्वं अभजत् । भज सेवायां लङ् ॥ ३८ ॥

रामापाङ्गानलज्वालाजालालीढो महोदधिः ।
सर्पिःकलशदेशीयो भृशं तातप्यते पुरा[१] ॥ ३९ ॥

(भा.दी.) रामेति । श्रीरामस्यापाङ्गो नेत्रान्तस्तस्मादुत्पन्नो योऽनलोऽग्निस्तस्य याः ज्वालास्तासां जालं समूहस्तेन आलीढः संस्पृष्टः महोदधिः, सर्पिष आज्यस्य यः कलशो घटस्तस्य समानस्तद्देशीयस्तथा सन् भृशं तातप्यते पुरा अत्यन्तं तप्यमानोऽभूत् । तप सन्तापे लट् ॥ ३९ ॥

(सं.चं.)सर्पिःकलशदेशीयः घृतकुम्भसमः । ईषदसमाप्तौ देशीयर् । यथा घृतकुम्भः अधिश्रयण्यां निहितः, अधस्तात् प्रज्वलत्यग्नौ कतकतेति क्वथति, महोदधेर्दशाऽपि तादृशी बभूवेति । तातप्यते पुरा । 'पुरि लुङ् चास्मे' (अ.सू.३.२.१२२) इति भूते लट् ॥ ३९ ॥

शुष्यत्यम्भोनिधौ मङ्क्षु क्षुभ्यत्यस्मिन् जगत्त्रये ।
प्रसीद लोकनाथेति देवाः समुनयोऽब्रुवन् ॥ ४० ॥

(भा.दी.) शुष्यतीति । अम्भोनिधौ मङ्क्षु क्षिप्रं शुष्यति सति शोषं प्राप्नुवति सति, अस्मिन् जगतां त्रयं तस्मिन् क्षुभ्यति सति भयाच्चलति सति, समुनयः मुनिसहिताः देवाः, हे लोकनाथ, प्रसीद, षद्लृ विशरणगत्यवसादनेषु लोट्, इति अब्रुवन् ॥ ४० ॥

(सं.चं.) अत्राम्भोनिधिरिति जलराशिः । मङ्क्षु क्षिप्रम् । क्षुभ्यति । क्षुभ सञ्चलने ॥ ४०–१ ॥

कोपो विश्वस्य विपदे प्रसादः सम्पदे तव ।
क्षमस्वाऽर्य्येति धनुषि व्याललम्बे स लक्ष्मणः ॥ ४१ ॥

(भा.दी.) कोप इति । हे आर्य स्वामिन्, तव कोपः विश्वं जगत्तस्य विपदे स्यात् । तव प्रसादः विश्वस्य सम्पदे सम्पत्तये स्यात् । तस्मात् क्षमस्व । क्षमूष् सहने लोट् । इति उक्त्वा सः लक्ष्मणः धनुषि व्याललम्बे आश्रित्य ललम्बे, गृहीतवानित्यर्थः । लबि शब्दे (अवस्रंसने च) लिट् ॥ ४१ ॥

---

१. **'यावत्पुरानिपातयोर्लट्'** (अ.सू.३.३.४) **इति पुरायोगे भूते कर्मणि लट्'** इति का.श्री. । यद्यपि भविष्यति काले लड्विधायकमिदं सूत्रम्, न भूत इति वैयाकरणाः । अथापि बहुलं प्रयोगदर्शनाद् भूतेऽपि वक्तव्यमिति टीकाकृदाशयः । वस्तुतस्तु **'पुरि लुङ् चास्मे'** (अ.सू.३.२.१२२) इत्यनेन पुरायोगे भूतार्थे लडिति वक्तव्यम् ।

सम्भ्राम्यन्नक्रचक्रादिः[१] सम्भ्राम्यन्नम्बुधिः स्वयम् ।
अर्हणं शिरसा बिभ्रद् रूपवान् समदृश्यत[२] ॥ ४२ ॥

(भा.दी.) समिति । नक्राणां ग्राहाणां चक्रं समूहस्तदादिर्यस्य जलजन्तोः स नक्रचक्रादिः, सम्भ्राम्यन् परिवर्तमानः नक्रचक्रादिर्यस्य तथा, सम्भ्राम्यन् सम्भ्रमयुक्तः, अम्बुधिः स्वयं अर्हणं उपायनं तत् शिरसा बिभ्रत् सन् रूपवान् समदृश्यत श्रीरामेणादृश्यत । दृशिर् प्रेक्षणे लङ् ॥ ४२ ॥

(सं.चं.) नक्रपदं मकरवचनमपि जलचरसामान्यवचनं च । 'नक्रं यादसि' इति ह्यभिदधति । नक्रचक्रं यादोवृन्दं आदिः येषां, शङ्खशुक्त्यादीनां ते नक्रचक्रादयः, जङ्गमाः स्थावराश्चेत्येतत् । सम्भ्राम्यन्तः यत्रक्वापि विक्षिप्यमाणा नक्रचक्रादयो यत्र सोऽम्बुधिः । अत्राम्बुधिरिति वरुणः स्वयं सम्भ्राम्यन् भयग्रस्तः ॥ ४२ ॥

वैडूर्य्यमणिसङ्काशो नानामणिविभूषितः ।
गङ्गादिभिर्वृतो[३] दारै रामं नत्वाऽभ्यभाषत ॥ ४३ ॥

(भा.दी.) वैडूर्येति । वैडूर्याख्यो यो मणिस्तस्य सङ्काशः प्रकाशो यस्य स तथा । नानाविधा ये मणयस्तैर्विभूषितः । गङ्गा आदिर्येषां ते तथा तैः दारैः भार्याभिः वृतः समुद्रः श्रीरामं नत्वा अभ्यभाषत । भाष व्यक्तायां वाचि लङ् ॥ ४३ ॥

(सं.चं.) वैडूर्यमणिसङ्काशः । 'स्निग्धवैडूर्यसङ्काशो जाम्बूनदविभूषितः' (२२.१८) इति, 'आत्मजानां च रत्नानां भूषितो भूषणोत्तमैः' (२२.२०) इति च । गङ्गादिभिर्नदीदेवताभिः ॥ ४३ ॥

न वेदाहं जडमतिस्त्वां विश्वाधीश्वराधुना ।
त्रिगुणैस्त्रिजगन्ति त्वं सृजस्यवसि चात्स्यसि[४] ॥ ४४ ॥

(भा.दी.) नेति । विश्वाधीश्वर श्रीराम, त्वां जडा विस्मरणशीला मतिर्यस्य स तथा अहं अधुना न वेद । विद ज्ञाने लट् । त्वं त्रयो गुणाः सत्वादयस्तैः, त्रीणि च तानि जगन्ति च तानि, रजसा सृजसि, सृज विसर्गे लट् । अवसि सत्वेन पासि, अव रक्षणे लट् । अत्स्यसि तमोगुणेन संहरिष्यसि च । अद भक्षणे लृट् ॥ ४४ ॥

---

१. **'सम्भ्रमन्नक्रचक्रादिः'** २. **'रूपवान् प्रत्यदृश्यत'**
३. **'गङ्गादिभिर्युतो–'** ४. **'–स्यवसि पास्यसि'** इति, **'स्यत्सि च पास्यसि '** इति, **'सृजस्यत्सि च पासि च'** इति च ।

(सं.चं.) न वेदाहं जडमतिः । तथाहि भागवते–'तं त्वा वयं जडधियो न विदाम भूमन् कूटस्थमादिपुरुषं जगतामधीशम् । त्वं सत्वतः सुरगणान् रजसो मनुष्यांस्तार्तीयतोऽसुरगणानभितस्तथाऽस्राः' इति ॥४४॥

[१]यशःसमुद्रसेतुस्ते मयि सेतुर्विधीयताम् ।
तेन रावणमासाद्य सूदयाऽनय जानकीम्[२] ॥ ४५ ॥

(भा.दी.) यश इति । हे श्रीराम, ते यश एव समुद्रस्तस्य सेतुरिव यशःसमुद्रसेतुः सेतुः मयि विधीयतां क्रियताम् । धाञो लोट् । तेन सेतुना लङ्कां आसाद्य सम्प्राप्य रावणं सूदय संहर । षूद क्षरणे लोट् । जानकीं आनय । नीञो लोट् ॥ ४५ ॥

(सं.चं.) तव यशःसमुद्रस्य सेतुरिवायं सेतुः । मयि मदभिमन्यमाने जलधौ । रावणं सूदय । जानकी-मानय ॥ ४५ ॥

मम कुक्षौ दुकूलाख्ये मरुदेशो महासुरान् ।
निसूदयेदयं[३] देव शरो मोघेतरस्तव[४] ॥ ४६ ॥

(भा.दी.) ममेति । हे देव, अत्यन्तममोघः अमोघतरः अयं तव शरः धनुषि समारोपितः, दुकूलमित्याख्या यस्य स तथा तस्मिन्, मम कुक्षौ मध्यदेशे मरुदेशः ऊषरभूदेशस्तस्मिन्, स्थितान् महासुरान् निसूदयेत् संहरेदिति प्रार्थना ॥ ४६ ॥

(सं.चं.) 'रामो द्विर्नाभिसन्धत्ते' इति किल तस्य प्रतिज्ञा । सम्प्रत्यभिसंहितस्य शरस्य का गतिरित्यत आह – मम कुक्षौ । अयं त्वया धनुष्यारोपितः शरः ॥ ४६ ॥

---

१. **'कामं प्रयाहि जहि विश्रवसोऽवमेहं त्रैलोक्यरावणमवाप्नुहि वीर पत्नीम् । बध्नीहि सेतुमिह ते यशसो वितत्यै गायन्ति दिग्विजयिनो यमुपेत्य भूपाः-इति श्लोकार्थं वदति–यश इति'** इति का.श्री. ।

२. इतः परं श्लोकत्रयमधिकं क्वचित्–

'उक्तोऽहं मुनिना पूर्वं नलस्य कपिकर्मतः । पीतेन मां कुम्भजेन भविष्यत्कार्यवेदिना ॥

'नलविक्षपितं सर्वं न गलेरति शोभन । तेन कार्यमिदं सेतुबन्धनं भवदाज्ञया ॥

'अगस्त्यस्य वरादेव नलो मत्सेतुबन्धकः । भवेदागो मम स्वामिन् क्षम्यतां भक्तवत्सल ॥'

अशुद्धमनन्वितं चेति स्फुटं प्रक्षिप्तम् ।

३. **'निषूदयेदयम्'** इति मूर्धन्यपाठः प्रामादिकः ।

४. **'शरोऽमोघतरस्तव '** इति वि.ती.पाठः । **'माघेतरः अमोघः'** इति वि.भू. । का.श्री. च ।

इत्यर्थितः सागरेण [१]सगरान्वयशेखरः ।
[२]आभीरजन्मनो दैत्यानवधीत् तेन पत्रिणा ॥ ४७ ॥

(भा.दी.) इतीति । सागरेण इति अर्थितः, सगरनामकराजस्य गोत्रापत्यं पुमांसः सागराः, तेषामन्वयो वंशः सूर्यवंशः, तस्मिन् शेखरश्चूडामणिभूतः श्रीरामः, तेन पत्रिणा शरेण, आभीराख्यदेशे जन्म येषां ते तथा तान् । 'घोष आभीरपल्ली स्यात्' इति हलः । दैत्यान् अवधीत्, वध सम्प्रहारे लुङ् ॥ ४७ ॥

(सं.चं.) आ समन्ताद् भियं रातीति आभीरो नाम लोककण्टको जातिविशेषः । आभीरेषु जन्म येषाम् । 'आभीरप्रमुखाः पापाः पिबन्ति सलिलं मम' (२२.३३) इति, 'अमोघः क्रियतां राम तव तेषु शरोत्तमः' (२२.३४) इति च ॥ ४७ ॥

सीताकान्तप्रसादेन मरुकान्तारनामकम् ।
वनं तदभवत् पुण्यं फलमूलाम्बुपुष्कळम्[३] ॥ ४८ ॥

(भा.दी.) सीतेति । सीतायाः कान्तो भर्ता तस्य प्रसादोऽनुग्रहस्तेन तत् स्थळं मरुकान्तारमिति नाम यस्य तत् तथोक्तम्, फलानि च मूलानि च अम्बूनि च तैः पुष्कळं पूर्णं पुण्यं वनं अभवत् ॥ ४८ ॥

(सं.चं.) सीताकान्तप्रसादेन । 'तेन तन्मरुकान्तारं पृथिव्यां खलु विश्रुतम्' (२२.३६) इति च ॥४८॥

विश्वकर्म्मसुतं वीरं[४] विश्वकर्म्मविशारदम् ।
आदिदेश नळं देवः सेतुं कर्त्तुं महार्ण्णवे ॥ ४९ ॥

(भा.दी.) विश्वेति । देवः, विश्वकर्मणो देववर्धकेः सुतम्, विश्वं सर्वं च कर्म तस्मिन् विशारदं सर्वकर्मनिपुणम्, धीरं नळं महार्णवे सेतुं कर्तुं आदिदेश । दिश अतिसर्जने लिट् ॥ ४९ ॥

(सं.चं.) विश्वस्मिन् कर्मणि विशारदम् । कर्तुं बन्द्धुम् ॥ ४९ ॥

शैलेन्द्रान् गण्डशैलांश्च तृणस्तम्बांश्च[५] पादपान् ।
आजह्रुः कपियूथानि शतशोऽथ सहस्रशः ॥ ५० ॥

---

१. **'सागरान्वय–'** इति वि.ती.पाठः । २. **'आभीरेभ्यो महाशूद्रेभ्यो जातान् । आभीरनामकानिति वा'** इति का.श्री ।
३. **'–पुष्पकम्'** ४. **'–सुतं धीरम्'** इति वि.ती.पाठः । ५. **'तृणस्तम्बान् तृणगुच्छान्'** इति.वि.भू. ।

(भा.दी.) शैलेति । अथ शतशः शतसङ्ख्याकानि, सहस्रशः सहस्रसङ्ख्याकानि, कपियूथानि शैलेन्द्रान् गिरिश्रेष्ठान्, गण्डशैलान् गिरिच्युतस्थूलपाषाणान्, 'गण्डशैलास्तु च्युताः स्थूलोपला गिरेः' इत्यमरः । तृणानि च स्तम्बा गुल्मानि च तान्, पादपान् वृक्षांश्च आजह्रुः ॥ ५० ॥

(सं.चं.) शतानि सहस्राणि च कपियूथानि । 'ನೂರಾರು, ಸಾವಿರಾರು' इति भाषायाम् । 'गण्डशैलास्तु पाषाणाः स्थूलाः प्रगळिता गिरेः' इति यादवप्रकाशः । तृणानां स्तम्बान् गुल्मान् ॥ ५० ॥

केचित् सूत्राणि जगृहुर्दण्डैः स्म मिमतेऽपरे[1] ।
[2]अपूरयन् परे वृक्षैर्वानरा नळशासनात्[3] ॥ ५१ ॥

(भा.दी.) केचिदिति । केचित् कपयः सूत्राणि जगृहुः, सेतुर्यथा वक्रो न स्यात् तथा जगृहुरित्यर्थः । ग्रह उपादाने लिट् । अपरे दण्डाः मानयष्टयस्तैः मिमते स्म मानं चक्रुः । माङ् माने लट् । परे वानराः नळस्य शासनं तस्मात् वृक्षैः अपूरयन् । पॄ पालनपूरणयोर्लङ्[4] ॥ ५१ ॥

(सं.चं.) केचित् सूत्राणि जगृहुः सेतुपथमानाय, अवक्रत्वाय च । केचिन्मानदण्डैः मिमते स्म अमि-मत । सेतुमध्ये शिलाखण्डविवरान् परे वृक्षैरपूरयन् ॥ ५१–५३ ॥

देवोपदेवा देवीभिः साकमाकाशमागमन् ।
इदमत्यद्भुतं द्रष्टुं रामदासविचेष्टितम् ॥ ५२ ॥

(भा.दी.) देवेति । देवाश्च उपदेवाश्च गन्धर्वादयस्ते च देवीभिः देवस्त्रीभिः साकं अत्यद्भुतं इदं रामदासानां कपीनां विचेष्टितं कर्म द्रष्टुं आकाशं तत् आगमन् । गम्लृ गतौ लुङ् ॥ ५२ ॥

---

१. **'–र्दण्डैर्विममिरेऽपरे'** २. **'आपूरयन्'**

३. इतः परं पञ्च श्लोकाः क्वचित् पठ्यन्ते–

'कैलासमङ्गदो गत्वा गृहीत्वा तत्र शूलिना । मानितो रामदासोऽस्मीत्युपपर्वतमाहरत् ॥
हिमवन्तं मैन्द एत्य गृहीत्वा तत्र तेन सः । मानितो रामदासोऽस्मीत्युपपर्वतमाहरत् ॥
मेरुमुन्मूलयन् देवो हनूमान् ब्रह्मणा ततः । सम्भावितः स्ववीर्येण ह्युपपर्वतमाहरत् ॥
माहेन्द्रं जाम्बवानेत्य गृहीत्वा तत्र देवतैः । मानितो रामदासोऽस्मीत्युपपर्वतमाहरत् ॥
सर्वैः स्वस्थानसंस्थैश्च मानिताः सर्ववानराः । देवर्षिभिः परान् शैलानाहरन्नतिविक्रमाः ॥'

न कैरप्येतानि व्याख्यातानीति स्फुटं प्रक्षिप्तानि । ४. 'का.श्री. टीकायामप्येवम् । **'पूरी आप्यायने'** इति तु युक्तमित्युक्तम् ।

नगानादाय पततां नगार्थं पततां द्रुतम् ।
बध्नतां चान्तरं तेषां वेगिनां न व्यदृश्यत ॥ ५३ ॥

(भा.दी.) नगानिति । नगान् पर्वतान् वृक्षांश्च आदाय पततां आपतताम्, द्रुतं यथा भवति तथा नगार्थं पर्वतानयनार्थं पततामुत्पतताम्, सेतुं बध्नतां च वेगिनां वेगवतां तेषां कपीनां अन्तरं व्यवधानं तत् न व्यदृश्यत । दृशिर् प्रेक्षणे लङ् ॥ ५३ ॥

क्षुभ्यतः कपिसैन्यस्य क्षुभ्यतो वारिधेरपि ।
उपमानपदं नाऽसीद् विनाऽन्योन्यं जगत्त्रये ॥ ५४ ॥

(भा.दी.) क्षुभ्यत इति । क्षुभ्यतः पर्वताद्यानयनादिना क्षोभं गच्छतः, कपिनां सैन्यं तस्य, क्षुभ्यतः पर्वतादिक्षेपेण क्षोभं गच्छतः वारिधेरपि अन्योन्यं परस्परं विना उपमानस्य पदं स्थानं जगत्त्रयं तस्मिन्, न आसीत् ॥ ५४ ॥

(सं.चं.) क्षुभ्यतः उच्चलितस्य । क्षुभ सञ्चलने । 'सञ्चलनं रूपान्यथात्वम्' इति श्रीरस्वामी ॥५४–५॥

परस्परं स्पर्द्धयेव प्रवृद्धौ सेतुवारिधी ।
मद्ध्यस्थो भगवान् नूनं तयोर्वैरमवारयत् ॥ ५५ ॥

(भा.दी.) परस्परमिति । सेतुश्च वारिधिश्च तौ, अहं पूर्वमभिवृद्धः स्यामिति परस्परमन्योन्यं, या स्पर्धा तयेव प्रवृद्धौ आस्ताम् । भगवान् श्रीरामः सेतोः मध्यस्थः सन् तयोः सेतुसमुद्रयोः वैरं तत् अवारयत् । नूनं वितर्कः ॥ ५५ ॥

दशयोजनविस्तीर्ण्णं शतयोजनमायतम्[१] ।
सेतुं पञ्चाहतश्चक्रे नळिनाक्षप्रियो नळः ॥ ५६ ॥

(भा.दी.) दशेति । नळिनवत् कमलवत् अक्षिणी यस्य स तथा तस्य श्रीरामस्य प्रियः नळः, दश च तानि योजनानि तैः विस्तीर्णस्तम्, ततः दशयोजनेभ्यः दश च ते गुणा आवृत्तयस्तैरायतं दीर्घम्, सेतुं पञ्च तानि अहानि च तेभ्यः इति ततः, चक्रे ॥ ५६ ॥

---

१. **'ततो दशगुणायतम्'** इति वि.ती.पाठः । **'शतयोजनं यथा तथाऽऽयतं दीर्घम्'** इति का.श्री. । समाहारे **'शतयोजनी'** स्यादित्येवं व्याख्या-तम् । वस्तुतस्तु शतं योजनानि यत्रेति विग्रहणमेव साधु ।

(सं.चं.) दशेति। 'दशयोजनविस्तीर्णं शतयोजनमायतम्। ददृशुर्देवगन्धर्वा नळसेतुं सुदुष्करम्' (२२.७६) इति च । पञ्चाहत इति । प्रथमेऽह्नि चतुर्दश योजनानि । द्वितीये विंशतिः । तृतीय एकविंशतिः । चतुर्थे द्वाविंशतिः । पञ्चमे त्रयोविंशतिरित्याहत्य पञ्चाहतश्चक्रे । पञ्च अहानि पञ्चाहः ॥ ५६–८ ॥

श्रीमता सेतुना तेन समेन विमलेन च ।
कपिकोटिसहस्राणि सहसाऽब्धिमतारयन् ॥ ५७ ॥

(भा.दी.) **श्रीमते**ति । अथ कपीनां कोटयस्तासां सहस्राणि श्रीमता कान्तिमता समेन विमलेन च तेन सेतुना सहसा शीघ्रं अब्धिं अतारयन् । तॄ प्लवनतरणयोर्लङ् ॥ ५७ ॥

विभीषणो गदापाणिरग्रतः सचिवैर्य्ययौ ।
राघवौ च ससुग्रीवौ वायुजाङ्गदवाहनौ ॥ ५८ ॥

(भा.दी.) **विभीषण** इति । गदा पाणौ यस्य स तथा सः विभीषणः सचिवैः चतुर्भिः सह अग्रतः ययौ । ससुग्रीवौ वायुजो हनुमान् सच अङ्गदश्च तौ वाहनभूतौ ययोस्तौ तथोक्तौ राघवौ श्रीरामलक्ष्मणौ च ययतुः ॥ ५८ ॥

कोसलेन्द्रः सुवेलाद्रिं समारुह्य सलक्ष्मणः ।
सेनाया विश्रमं[1] चक्रे सुग्रीवेणाभिनन्दितः ॥ ५९ ॥

(भा.दी.) **कोसले**ति । सलक्ष्मणः कोसलानां कोसलविषयाणामिन्द्रः श्रीरामः सुवेलः सुवेलनामको योऽद्रिस्तं समारुह्य सुग्रीवेण अभिनन्दितः अनुमोदितः सन् सेनायाः विश्रमोऽवस्थितिस्तं चक्रे । कृञो लिट् ॥ ५९ ॥

(सं.चं.) लङ्काप्राकारकल्पं सुवेलाद्रिम् ॥ ५९ ॥

दशमुखनगरीं विलोक्य लङ्कां शरमथ पाणिगतं परीक्षमाणः[2] ।
दयितहनुमदंसंसक्तहस्तो गिरिशिखरे विरराज वीरराजः[3] ॥ ६० ॥

१. **'विश्रमं श्रमराहित्यं चक्रे कारयामास'** इति का.श्री. ।
२. **'निरीक्षमाणः'**
३. **'विरराज रामवीरः'**

(भा.दी.) दशेति । अथ वीराणां राजा वीरराजः, वीरश्रेष्ठ इत्यर्थः, श्रीरामः दशमुखस्य रावणस्य नगरीं लङ्कां विलोक्य, पाणिं गतः पाणिगतस्तं शरं परीक्षमाणः सन्, दयितः परमप्रियो हनुमान् तस्य योंऽसस्तस्मिन् सक्तो हस्तो यस्य स तथा सन्, गिरेः सुवेलाद्रेः शिखरं शृङ्गं तस्मिन् विरराज ॥ ६० ॥

(सं.चं.) पुष्पिताग्रया रामविराजनप्रकारमाह– दशमुखेति । वीरराजो महावीरो रामचन्द्रः ॥ ६० ॥

अम्भोधिशोषणमशेषसुरारिनाशं
सेतोश्च बन्धनमवेक्ष्य परस्य वीर्य्यम् ।
देवोपदेवमुनयो मुदिता उपेत्य
रामस्य चक्रुरथ तत्र महाभिषेकम्[१] ॥ ६१ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे द्वितीयः सर्ग्गः ॥

—०—

(भा.दी.) **अम्भोधी**ति । अथ देवाश्च उपदेवा गन्धर्वादयस्ते च मुनयश्च ते, अम्भोधेः शोषणं तत्, अशेषाः ये सुरारयश्च आभीरजन्मानस्तेषां नाशस्तम्, सेतोश्च बन्धनं तच्च, परस्य सर्वोत्तमस्य श्रीरामस्य वीर्यं च सामर्थ्यं च अवेक्ष्य मुदिताः सन्तुष्टाः सन्तः श्रीरामसमीपमुपेत्य श्रीरामस्य महान् योऽभिषेकस्तं तत्र सुवेलाद्रौ चक्रुः ॥ ६१ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां युद्धकाण्डे द्वितीयः सर्गः ॥

—०—

(सं.चं.) अथ वसन्ततिलकया सर्गमुपसंहरति– अम्भोधीत्यादि । अम्भोधिशोषणम्, आभीरसुरारिनाशम्, सेतोः बन्धनं च परमपुरुषस्य रामस्य वीर्यमवेक्ष्य । कार्यकारणयोरभेदोपचारः । वीर्यफलमवेक्ष्य । अथवा शोषयतीति शोषणं शोषकम् । कर्तरि करणे वा ल्युट् । अम्भोधेः शोषकम्, सुरारीणां नाशो यस्मात् तत् सुरारिनाशकम्, बध्नातीति बन्धनं सेतोः बन्धनहेतुभूतं च रामस्य वीर्यमवेक्ष्येति सामानाधिकरण्येनान्वयः । तत्र सुवेलाद्रौ । महद्भिः भक्त्या कृतत्वान्महान्तमभिषेकम् । महाय रामरीर्यविजयोत्सवाय योऽभिषेकस्तमिति

१. **'–रथ पुष्पमहाभिषेकम्'**

वा। दुर्गमशश्रुराज्ये रामस्याभिषेक इति च महानयमभिषेकः। रावण पातनान्दी चेयम्। 'तदद्भुतं राघवकर्म दुष्करं समीक्ष्य देवाः सह सिद्धचारणैः। उपेत्य रामं सहसा महर्षिभिः समभ्यषिञ्चन् सुशुभैर्जलैः पृथक्' (२२.८८) इति च ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां युद्धकाण्डे द्वितीयसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– २२९२+६१=२३५३]

तृतीयः सर्ग्गः

विधाय व्यूहविस्तारं[१] रामः सुग्रीवसंयुतः ।
शुकमेव मुमोचाथ तं दूतं रावणान्तिकम् ॥ १ ॥

(भा.दी.) श्रीरामेणानन्तरं किमकारीत्यत आह– **विधायेति** । अथ सुग्रीवसंयुतः श्रीरामः व्यूहस्य विस्तारस्तं विधाय तं पूर्वं कपिभिर्गृहीतं दूतं शुकं रावणस्यान्तिकं समीपं तत् प्रत्येव मुमोच । मुच्लृ मोक्षणे लिट् ॥ १ ॥

(सं.चं.) व्यूहः सेनाविन्यासः । 'व्यूहः स्याद् बलविन्यासे' इति विश्वप्रकाशः । विस्तारेण व्यूहनं व्यूह-विस्तारः । तं पूर्वं कपिभिर्गृहीतं स्वेन मोचितम् । रावणदूतं शुकं रावणान्तिकमेव मुमोच । अथच रावणदूतं तमेव स्वदूतत्वेनापि मुमोच । दूतः सन्देशहरः ॥ १–२ ॥

कपिभिर्म्मुष्टिपिष्टाङ्गो लुप्तपक्षस्तथा शुकः ।
जीवन् कथञ्चिद् वृत्तान्तं रावणाय न्यवेदयत् ॥ २ ॥

(भा.दी.) कपिभिरिति । कपिभिः मुष्टिभिः पिष्टं चूर्णितमङ्गं यस्य स तथा, लुप्तौ च्छिन्नौ पक्षौ यस्य स तथा, शुकः शुकरूपी राक्षसः कथञ्चित् जीवन् सन्, रावणाय तथा स्वानुभूतरीत्या, वृत्तान्त उदन्तस्तं न्यवेदयत् विज्ञापयामास ॥ २ ॥

विकत्थनपरः पापो रावणः शुकसारणौ ।
रामसेनां गणयितुं चारौ प्रेषितवान् पुनः ॥ ३ ॥

१. **'व्यूहविस्तारम्, कपीनां समूहस्य विस्तारं मण्डलाकारेण स्थितिम्'** इति का.श्री ।

(भा.दी.) विकत्थनेति । विकत्थने परं तात्पर्यं यस्य स तथा, शुकोक्तं श्रुत्वा श्रीरामादिनिन्दनपर इत्यर्थः, पापः क्रूरः रावणः पुनश्च, शुकसारणौ शुकसारणनामकौ चारौ गूढपुरुषौ, रामसेनां गणयितुं प्रेषित-वान् ॥ ३ ॥

(सं.चं.) विकक्थनमात्मश्लाघनम् । शुकं प्रेष्य प्राप्तमुखभङ्गोऽपि पुनः प्रेषितवान् । एकः पराजितः । द्वौ विजयेतामिति चारौ प्रेषितवान् ॥ ३ ॥

कपिरूपधरौ चारौ चरन्तौ राक्षसौ च तौ[1] ।
इतस्ततो गणयितुं प्रायतेतां[2] प्रभोश्चमूम् ॥ ४ ॥

(भा.दी.) कपीति । कपेर्यद् रूपं तद्धारयत इति तथोक्तौ, चारौ इतस्ततः चरन्तौ, शुकसारणौ रक्षसः रावणस्य चरौ गूढपुरुषौ सन्तौ, 'अपसर्पश्चरश्चारः प्रणिधिर्गूढपूरुषः' इति हलः, प्रभोः श्रीरामस्य चमूं गणयितुं प्रायतेताम् प्रयत्नं चक्रतुः । यती प्रयत्ने लङ् ॥ ४ ॥

(सं.चं.) रावणप्रेषितौ तौ च राक्षसौ चारौ गूढचरावत एव कपिरूपधरौ । यथा रावणचाराविति राक्षसाविति न विज्ञायेताम् 'हरिरूपधरौ वीरौ प्रविष्टौ वानरं बलम्' (२५.९) इति च ॥ ४ ॥

पारेऽस्मिन् परपारे च सेतावद्रौ वने जले ।
[3]शयितानासितान् यातानैक्षेतां तौ कपिव्रजान् ॥ ५ ॥

(भा.दी.) पार इति । तौ शुकसारणौ, अस्मिन् लङ्कासमीपस्थं पारं तीरं तस्मिन्, परमन्यत्पारं तस्मिंश्च, सेतौ अद्रौ वने जले च शयितान् शयनं कुर्वतः, आसितान् उपविष्टान्, यातान् इतस्ततो गच्छतः कपिव्रजान् ऐक्षेताम् ॥ ५ ॥

(सं.चं.) जले यातान् प्लवमानान् । ऐक्षेतामपश्यताम् ॥ ५ ॥

ज्ञात्वा विभीषणः प्रोचे तौ चोरौ छलवानरौ ।
सुवृत्ताविव दुर्वृत्तौ [4]प्रोत्पतन्ताावितस्ततः ॥ ६ ॥

---

१. **'चरन्तौ रक्षसश्चरौ'** इति वि.ती.पाठः । **'चरौ चारौ'** इति पुनरुक्तं तु भवति । **'राक्षसेक्षरौ'** इति कश्चित् । २. **'गणयितुमयतेताम्'**

३. **'शयितान् विश्रमं कृतवतः'** इति वि.भू. । **'शयितानशितान्'** इति कश्चित् । **अशितानिति पाठे फलादिभक्षणं कुर्वतः'** इति का.श्री. ।

४. **'दुर्वृत्तौ प्राप्तवन्ता- '**

(भा.दी.) ज्ञात्वेति । विभीषणः चोरौ च्छलेन मायया वानरौ, शोभनं वृत्तं चरित्रं ययोस्ताविव दृश्यमानौ, स्वभावतस्तु दुष्टं वृत्तं ययोस्तौ दुर्वृत्तौ, इतस्ततः प्रोत्पतन्तौ तौ शुकसारणाविति ज्ञात्वा, प्रोचे इमौ राक्षसाविति कपीन् प्रत्युवाच ॥ ६ ॥

(सं.चं.) अथापि विभीषणो विजज्ञौ । ज्ञात्वा प्राह । रहस्यवार्तां चोरयितुमागतौ । छलेन कपटेन धृतवानरवेषौ दाण्डाजिनकौ । सुवृत्ताविव नाटयन्तौ, वस्तुतो दुर्वृत्तौ । इतस्ततो मुग्धाविव प्रोत्पतन्तौ । अथापि शत्रुसेनासङ्ख्यानाय प्रेक्षापूर्वमुत्पतन्तौ ॥ ६ ॥

महाबलैर्हन्यमानौ कपिभिः क्रूरविक्रमैः ।
क्षीणप्राणावथाऽक्रन्दं चक्राते तौ जिजीविषू ॥ ७ ॥

(भा.दी.) महेति । अथ क्रूरो विक्रमः पराक्रमः येषां ते तथा तैः कपिभिः हन्यमानौ ताड्यमानौ, महद्बलं ययोस्तौ तथा, क्षीणः प्राणो बलं ययोस्तौ, जीवितुमिच्छतः जिजीविषतः, जिजीविषत इति जिजीविषू, तौ आक्रन्दो रोदनं तं चक्राते ॥ ७ ॥

(सं.चं.) महाबलैः क्रूरविक्रमैर्हन्यमानौ क्षीणप्राणौ क्षीणबलौ चलितुमप्यशक्तौ जातौ । अत एव जिजीविषयाऽऽक्रन्दं चक्राते ॥ ७ ॥

रावणस्य चरावावां त्वत्सेनायाः परीक्षकौ ।
बद्धोऽञ्जलिरयं राम क्षमस्व जय धार्म्मिक ॥ ८ ॥

(भा.दी.) रावणस्येति । धर्मं चरतीति धार्मिकस्तत्सम्बुद्धिः, हे श्रीराम, तुभ्यं अयं अञ्जलिः बद्धः । त्वत्सेनायाः परीक्षकौ कियदस्तीति विचारकौ, आवां रावणस्य चरौ गूढपुरुषौ । त्वं क्षमस्व । क्षमूष् सहने लोट् । जय । जि जये लोट् ॥ ८ ॥

(सं.चं.) किमित्याचक्रन्दतुः? रावणस्य चरावावाम् ॥ ८ ॥

इत्युक्त ऊचे भगवान् प्रहसन् शुकसारणौ ।
मा भयं रामभृत्येभ्यो युवयोर्न्यस्तशस्त्रयोः ॥ ९ ॥

१. '**महाबलौ हन्यमानौ**' इति वि.ती.पाठः ।

(भा.दी.) इतीति । इति ताभ्यां उक्तः भगवान् श्रीरामः प्रहसन् सन् शुकसारणौ प्रति, न्यस्तानि अधृतानि शस्त्राणि याभ्यां तौ तथा तयोः, युवयोः रामभृत्येभ्यः कपिभ्यः भयं (मा) नास्ति इति ऊचे ॥ ९ ॥

(सं.चं.) न्यस्तानि निरस्तानि त्यक्तानि शस्त्राणि याभ्याम् । भयं मा भूत् ॥ ९ ॥

सङ्ख्यातं चेदिदं सैन्यं गम्यतां स्वामिनोऽन्तिकम् ।
नो चेत् पुनश्च सङ्ख्येयं सहायोऽस्तु विभीषणः ॥ १० ॥

(भा.दी.) समिति । चेत् इदं मम सैन्यं सङ्ख्यातं परिगणितम् । तर्हि स्वामिनः भवत्स्वामिनः रावणस्य अन्तिकं तत्, गम्यताम् । गम्लृ गतौ लोट् । चेत् नो न परिगणितं पुनश्च सङ्ख्येयं सङ्ख्यातव्यम्, विभीषणः सहायः कपिभिरताडने मदीयत्वेन युवयोः सहायभूतः अस्तु ॥ १० ॥

(सं.चं.) यथा कपयः सङ्ख्यानकर्मणि न विघ्नं कुर्युस्तथा सहायोऽस्तु विभीषणः । तत्र सङ्ख्यान-कर्मणि ॥ १० ॥

अनङ्गबाणक्षुभितं हृदयं रावणस्य यत्[१] ।
अङ्गवन्तो वयं बाणैर्भेत्स्याम इति चोच्यताम् ॥ ११ ॥

(भा.दी.) अनङ्गेति । अनङ्गस्य कामस्य यो बाणस्तेन क्षुभितं क्षुब्धं रावणस्य यत् हृदयम्, अङ्गवन्तः सेनालक्षणावयववन्तः, अङ्गशालिन इति वा, वयं बाणाः शरास्तैः भेत्स्यामः । भिदिर् विदारणे लृट् । अङ्गरहितापेक्षयाऽङ्गवतां प्राबल्यात् तेन विक्षुब्धं हृदयं वयं सर्वात्मना भेत्स्याम इति भावः । इति वचश्च उच्यताम् ॥ ११ ॥

(सं.चं.) अनङ्गस्य अशरीरस्य कुसुममयैः बाणैः केवलं क्षुभितम्, विजये साशङ्कं भयग्रस्तं च जातम् । सम्प्रत्यङ्गवतां सशरीरामयोमयैः बाणैर्भिद्येतैव । वयं करचरणाद्यङ्गवन्तो न केवलम् । प्रबुद्धसेनाङ्गवन्तश्च । 'दुरितश्चकितो भीतस्त्रस्तो भीरुश्च कातरः । क्षुभितः शङ्कितश्चेति नातिनानार्थवाचकाः' इत्यभिधानम् ॥ ११ ॥

एवं रामेण गदिते सुग्रीवः कुपितोऽब्रवीत् ।
इदं च[२] वचनं वाच्यं भवद्भ्यां स्वामिसन्निधौ ॥ १२ ॥

---

१. **'रावणस्य तत्' । अनङ्गबाणक्षुभितं मन्मथस्य कुसुमास्त्रेण लोडितम्, रावणस्य तत् हृदयम्, अङ्गवन्तः शरीरवन्तो वयं बाणैः अयोमयैः शरैः भेत्स्यामः'** इति का.श्री. ।

२. **'इदं मम वचो वाच्यम्'** इति वि.ती.पाठः स्यात् ।

(भा.दी.) एवमिति । श्रीरामेण एवं वचसि गदिते सति, सुग्रीवः कुपितः सन् भवद्भ्यां स्वामिनः भवन्नाथस्य सन्निधिस्तस्मिन्, इदं वक्ष्यमाणं वचः वचनं वाच्यम्, इति अब्रवीत् ॥ १२ ॥

(सं.चं.) रामवचः श्रवणानन्तरं पुनरधिकं रावणे कुपितः । भवत्स्वामिसन्निधौ ॥ १२–१३ ॥

बाणबर्हिःपरिस्तीर्ण्णे वानरर्त्विक्समीडिते ।
रावणाख्यपशोर्होमो[१] रामाग्नौ समुपस्थितः ॥ १३ ॥

(भा.दी.) बाणेति । बाणा एव बर्हींषि दर्भास्तैः परिस्तीर्णे परिस्तृते, वानरा एव ऋत्विजस्तैः समीडिते स्तुते, रामाग्नौ रावणस्य रावणाख्यस्य पशोः होमः हवनं समुपस्थितः सम्प्राप्तः ॥ १३ ॥

[२]इत्युक्तौ राक्षसावेतौ निर्म्मुक्तौ च भयातुरौ ।
प्रासादशिखरारूढं प्राप्य रावणमूचतुः ॥ १४ ॥

(भा.दी.) इतीति । सुग्रीवेण इति उक्तौ, कपिभिः निर्मुक्तौ, भयेन आतुरौ परवशौ, एतौ शुकसारणाख्यौ राक्षसौ, प्रासादस्य हर्म्यस्य यच्छिखरं तत् आरुढस्तं रावणं प्राप्य ऊचतुः ॥ १४ ॥

(सं.चं.)भयेन आतुरौ रुग्णाविव । त्वरमाणौ वा ॥ १४ ॥

राघवोऽपि सुवेलाद्रेर्लङ्काभिमुख आययौ[३] ।
सानुजो मुदितः [४]सार्द्धमृक्षराक्षसवानरैः ॥ १५ ॥

(भा.दी.) राघव इति । सानुजः मुदितः राघवोऽपि, ऋक्षाः जाम्बवदाद्यास्ते च, राक्षसाः विभीषणभृत्याश्चत्वारो विभीषणश्च ते च, वानराः सुग्रीवादयश्च तैः सार्धम्, सुवेलनामको योऽद्रिस्तस्मात् लङ्काभिमुखः सन् आययौ आजगाम ॥ १५ ॥

(सं.चं.) राघवोऽपीति कविवचनम् । शुकसारणवचनमिति पक्षे– यं मनुष्यमात्रं मन्यसे, यस्य लङ्कां दुष्प्रवेशां मन्यसे सोऽपि राघवः । ऋक्षैर्जाम्बवदादिभी राक्षसेन ससचिवेन विभीषणेन, सुग्रीवहनुमदादिभिश्च वानरैः ॥ १५ ॥

---

१. **'रावणस्य पशोर्होमो–'** इति वि.ती.पाठः । **'पशोः छागस्य होमः'** इति का.श्री. ।
२. **'इत्युक्त्वा'**
३. **'–मुखमाययौ'**
४. **'मुदितः सानुजः सार्ध-'**

नीलाङ्गदनळश्वेतकुमुदान् कपियूथपान् ।
पनसं शरभं रम्भं ताववर्ण्णयतां पृथक् ॥ १६ ॥

(भा.दी.) नीलेति । तौ शुकसारणौ, कपियूथपान् नीलाङ्गदनळश्वेतकुमुदान् एतन्नामकान् पनसं पनसाख्यं शरभं शरभाख्यं रम्भं रम्भनामकं वानरं पृथक्, अवर्णयताम्, रावणसमीपे तेषां बलादिकं प्रोक्तवन्तौ, वर्ण वर्णक्रियाविस्तारगुणवचनेषु लङ् ॥ १६ ॥

(सं.चं.) रावणेन पुनः पृष्टौ कांश्चित् प्रधानान् यूथपान्नामत आहतुः– नीलेत्यादिना । पृथगिति । 'बलाग्रे तिष्ठते वीरो नीलो नामैष यूथपः' (२६.१४), 'यौवराज्येऽङ्गदो नाम त्वामाह्वयति संयुगे' (२६.१७), 'वीरस्तिष्ठति सङ्ग्रामे सेतुहेतुरयं नळः' (२६.२१), 'श्वेतो रजतसङ्काशश्चपलो भीमविक्रमः' (२६.२४), 'कुमुदो नाम यूथपः' (२६.२७), 'युद्धे दुष्प्रसहो नित्यं पनसो नाम यूथपः' (२६.३९), 'शरभो नाम यूथपः' (२६.३६), 'रम्भो नामैष यूथपः' (२६.३१) इत्यादि च । पृथगिति । कांश्चन सारणोऽवर्णयत् । कांश्चन शुक इत्यर्थः ॥ १६ ॥

तारं धूम्रं जाम्बवन्तं [१]विनतं कत्थनं तथा ।
केसर्य्याख्यं शतवलिं[२] प्रमाथिगजपूर्वकान् ॥ १७ ॥

(भा.दी.) तारमिति । तारं धूम्रं जाम्बवन्तं विनतम्, दुर्मुखमिति क्वचित् पाठः, तथा कत्थननामकम्, केसरीति आख्या यस्य स तथा तम्, शतवलिम्, प्रमाथी च गजश्च तौ पूर्वौ येषां ते तथा तान् । बहुव्रीहौ कप् । वानरान् अवर्णयतामिति सम्बन्धः ॥ १७ ॥

(सं.चं.) धूम्र इति ऋक्षाणामधिपतिः । 'तारो नामैष वानरः' (२७.३), 'सर्वर्क्षाणामधिपतिर्धूम्रो नामैष यूथपः' (२७.९), 'स एष जाम्बवान्नाम महायूथपयूथपः' (२७.११), 'एष दर्दुरसङ्काशो विनतो नाम यूथपः' (२६.४२), 'युद्धेष्वकत्थनो नित्यं कत्थनो नाम यूथपः' (२७.२३), 'त्वामाह्वयति युद्धाय कत्थनो नाम वानरः' (२६.४३), 'मुख्यो वानरमुख्यानां केसरी नाम यूथपः' (२७.३८), 'नाम्ना पृथिव्यां विख्यातो नाम्ना शतवलीति यः' (२७.४४), 'स एष दुर्धरो राजन् प्रमाथी नाम यूथपः' (२७.३०), 'गजो गवाक्षो गवयो नळो नीलश्च वानरः' (२७.४६), 'मैन्दश्च विविदश्चैव ताभ्यां नास्ति समो युधि' (२८.६) इत्यादि

१. **'–वन्तं दुर्मुखं कत्थनम्'**
२. **'शतबलिम्'** इति प्रामादिकः पाठः ।

च । सम्प्रति रामायणे कत्थनः क्रथनो बभूव । अपपाठोऽयम् । गजपूर्वकाः गजो गवाक्षो गवयो वृषभो गन्धमादन इति पञ्च । अन्ये च तत्पूर्वका मैन्दविविदाद्याः ॥ १७–१८ ॥

खर्वार्बुदाधिपत्यं च तेषां[१] राज्यं च विक्रमम् ।
निगद्य विस्तरेणैव रावणं पुनरूचतुः ॥ १८ ॥

(भा.दी.) खर्वेति । तेषां नीलादिकपीनां खर्वं अर्बुदं च ते आद्ये येषां पद्मादीनां तानि खर्वार्बुदाद्यानि तेषामाधिपत्यं स्वामित्वं तत्, खर्वार्बुदसङ्ख्याकवानराधिपतित्वमित्यर्थः, तेषां राज्यं तत्, तेषां विक्रमः पराक्रमस्तं च विस्तरेण निगद्य रावणं पुनरेव ऊचतुः ॥ १८ ॥

प्राहुर्लक्षशतं कोटिं तल्लक्षं शङ्कुनामकम् ।
शङ्कुलक्षं महाशङ्कुं तल्लक्षं वृन्दमुत्तमाः ॥ १९ ॥

(भा.दी.) प्राहुरिति । उत्तमाः पुरुषाः लक्षाणां शतं तत् । कोटिं प्राहुः । ब्रूञो लट् । तासां कोटीनां लक्षं तल्लक्षं तत् शङ्कुरिति नाम यस्य तथोक्तं तत् प्राहुः । शङ्कुमहाशङ्कित्यादिकाः सर्वेऽपि सङ्ख्याविशेषाः ज्ञातव्याः । शङ्कूनां लक्षं तत् महांश्चासौ शङ्कुश्च तं प्राहुः । तेषां महाशङ्कूनां लक्षं तत् वृन्दं वृन्दनामकं प्राहुः ॥ १९ ॥

(सं.चं.) खर्वार्बुदसङ्ख्यामानं स्वयमाह– प्राहुर्लक्षशतं कोटिमित्यादि । उत्तमाः सङ्ख्यानकुशलाः सङ्ख्यावन्तः । तथाहि रामायणे–'शतं शतसहस्राणां कोटिमाहुर्मनीषिणः । शतं कोटिसहस्राणां शङ्कुरित्यभिधीयते । शतं शङ्कुसहस्राणां महाशङ्कुरिति स्मृतः । महाशङ्कुसहस्राणां शतं वृन्दमिति स्मृतम् । शतं वृन्दसहस्राणां महावृन्दमिति स्मृतम् । महावृन्दसहस्राणां शतं पद्ममिति स्मृतम् । शतं पद्मसहस्राणां महापद्ममिति स्मृतम् । महापद्मसहस्राणां शतं खर्वमिहोच्यते । शतं खर्वसहस्राणां महाखर्वमिति स्मृतम् । महाखर्वसहस्राणां समुद्रमभिधीयते । शतं समुद्रसाहस्रमोघ इत्यभिधीयते । शतमोघसहस्राणां महौघ इति विश्रुतः' (२८.३३–८) इति । अर्वाचीन-रामायणपाठकाः शङ्कुं शङ्खं पठन्ति । अथच सङ्ग्रहे पठिता धूळिसङ्ख्या सम्प्रति रामायणे न पठ्यते । ओघसङ्ख्या न पठ्यते । उभयत्रापि पाठवैय्याकुल्यं भाति । द्विविधश्चात्र सङ्ख्यानक्रमः–दशगुणोत्तरः, लक्षगुणोत्तरश्चेति । दशगुणोत्तरसङ्ख्यानक्रमस्तु निर्णयभावचन्द्रिकायामस्माभिः सन्दर्शितः (८.१७९) । लक्षगुणोत्तरः सङ्ग्रहोक्तः । द्वैविध्यं चोक्तं यादवप्रकाशेन–

१. **'राज्ञश्च विक्रमम्'**

‘परे दशगुणोत्तराः । शतं सहस्रमयुतं नियुतं प्रयुतार्बुदे । न्यर्बुदं वृन्दखर्वे च निखर्वं शङ्खमम्बुजम् । समुद्रो मध्यमन्तं च परार्धं च यथाक्रमम् । परं परार्धाद् द्विगुणमथ स्त्री कोटिरर्बुदे । व्यत्यासेन च दृश्येते नियुतप्रयुते क्वचित् । वृन्दादिषु तु षट्स्वन्ये निखर्वं बद्ध-मक्षितम् । व्योम चान्तश्च सर्वश्च समुद्राद्यास्तु वा त्रिषु । अन्ये त्वाहुः शतं कोटिः शङ्कुर्वृन्दं महागुणः । पद्मं महाम्बुजं चेति क्रमाल्लक्षगुणोत्तरम् । सहस्राणां शते लक्षा लक्षं च नियुतं च तत्’ इति । तथाचायं दशगुणोत्तरः सङ्ख्यानक्रमः–

१. शतम्	२. सहस्रम्
३. अयुतम्	४. नियुतम् (प्रयुतम्, लक्षम्, लक्षा)
५. प्रयुतम् (नियुतम्, दशलक्षाणि)	६. अर्बुदं (कोटिः, कोटी)
७. न्यर्बुदम् (दशकोटयः)	८. वृन्दम् (निखर्वम्)
९. खर्वम् (बद्धम्)	१०. निखर्वम् (अक्षितम्)
११. शङ्खम् (व्योम)	१२. अम्बुजम् (अन्तः)
१३. समुद्रः (सर्वः, समुद्रम्, समुद्रा)	१४. मध्यम् (मध्यः, मध्या)
१५. अन्तम् (अन्तः, अन्ता)	१६. परार्धम् ।

अथ लक्षगुणोत्तरः सङ्ख्यानक्रमः–

१. शतम् ।	२. कोटिः (लक्षशतम्)
३. शङ्कुः (कोटिलक्षम्)	४. महाशङ्कुः (शङ्कुलक्षम्)
५. वृन्दम् (महाशङ्कुलक्षम्)	६. महावृन्दम् (वृन्दलक्षम्)
७. पद्मम्(महावृन्दलक्षम्)	८. महापद्मम् (पद्मलक्षम्)
९. खर्वम् (महापद्मलक्षम्)	१०. महाखर्वम् (खर्वलक्षम्)

इतः परं रामायणे सङ्ग्रहे च विभिन्नो गणनक्रमः पठ्यते । रामायणरीत्या–

११ समुद्रम् (महाखर्वलक्षम्)	१२. ओघः (समुद्रलक्षम्)
१३. महौघः (ओघलक्षम्)	

सङ्ग्रहपाठरीत्या–

११. धूळिः (महाखर्वलक्षम्)	१२. महाधूळिः (धूलिलक्षम्)
१३. समुद्रम् (महाधूळिलक्षम्)	१४. महौघः (समुद्रलक्षम्)

उभयत्रापि पाठभ्रेषः सम्भाव्यते । सङ्ग्रहानुगुणतया पुनरेवं रामायणपाठः स्यात्– ‘महाखर्वसहस्राणां शतं धूळिरिहोच्यते । शतं धूळिसहस्राणां महाधूळिरिति स्मृतम् । महाधूळिसहस्राणां समुद्रं शतमुच्यते । शतं

समुद्रसाहस्रं महौघ इति विश्रुतः' इति । अथाप्यसमग्रेव गणना । अस्यां गणनायामोघो विलुप्तः । विद्वद्भिर्विमृष्टव्यमेतद् भवति ॥ १९–२४ ॥

वृन्दलक्षं महावृन्दं तल्लक्षं पद्ममप्युत ।
पद्मलक्षं महापद्मं तल्लक्षं खर्वमभ्यधुः ॥ २० ॥

(भा.दी.) **वृन्देति** । उत्तमाः । वृन्दानां लक्षं तत् । महच्च तत् वृन्दं च तत्, अभ्यधुः प्राहुः । उत तेषां महावृन्दानां लक्षं तत्, पद्ममपि पद्मनामकमपि अभ्यधुः । पद्मलक्षं महच्च तत् पद्मं च तत् अभ्यधुः । तल्लक्षं महापद्मलक्षं खर्वं खर्वनामकं तत् अभ्यधुः ॥ २० ॥

खर्वलक्षं महाखर्वं तल्लक्षं धूळिमप्युत ।
धूळिलक्षं महाधूळिं तल्लक्षं हि समुद्रकम् ॥ २१ ॥

(भा.दी.) **खर्वेति** । उत्तमाः खर्वलक्षं महच्च तत् खर्वं च तत् अभ्यधुः । उत तल्लक्षं महाखर्वलक्षं च तत् धूळिमपि धूळिनामिकामपि अभ्यधुः । धूळिलक्षं महती च सा धूळिश्च तां अभ्यधुः । तासां महाधूळीनां लक्षं तल्लक्षं तत् समुद्रकं समुद्रनामकं तत् अभ्यधुः ॥ २१ ॥

समुद्रलक्षं कवयो महौघं कीर्त्तयन्ति हि ।
पश्य सङ्ख्यामिमां [1]राजन्नस्मिन् वानरमण्डले ॥ २२ ॥

(भा.दी.) **समुद्रेति** । कवयः सङ्ख्यातत्वविदः । समुद्रलक्षं महांश्चासौ ओघश्च तं कीर्तयन्ति हि । कृत सङ्कीर्तने लट् । हे राजन् रावण, इमां अभिहितां सङ्ख्यां अस्मिन् दृश्यमाने वानराणां मण्डलं समुदायस्तस्मिन् पश्य जानीहि । दृशिर् प्रेक्षणे लोट् ॥ २२ ॥

अवद्ध्यानामवेद्ध्यानां[2] हरीणां वातरंहसाम् ।
हन्त कोटिसहस्रेण [3]तेषां शङ्कुशतेन च ॥ २३ ॥
महावृन्दसहस्रेण तथा पद्मशतेन च ।
महापद्मसहस्रेण तेषां खर्वशतेन च ॥ २४ ॥

---

१. '**–मिमां राजन् स्वामिन् वानर–**' २. '**अवेध्यानामवध्यानाम्**' । '**अवध्यानामभेद्यानम्**' इति च । ३. '**–स्रेण तथा शङ्कु–**'

तेषां कोटिमहौघेन समुद्रेण च संवृतः ।
रामो विभीषणसखः ससुग्रीवो विजृम्भते ॥ २५ ॥

(भा.दी.) सङ्ख्याबाहुल्यमात्रं न प्रयोजकमित्यतः कपीनां स्वभावं वर्णयन्ताविमां सङ्ख्यां पश्येत्युक्तमेव विशदयतः– **अवध्येत्या**दिना । अवध्यानां शत्रुभिर्वधानर्हाणाम्, अवेध्यानां शस्त्रादिना वेद्धुमशक्यानाम्, वातस्य रंह इव रंहो वेगो येषां ते तथा तेषाम्, हरीणां कपीनां कोटीनां सहस्रं तेन, तेषां कपीनां शङ्कूनां शतं तेन च, तेषां कपीनां महान्ति यानि वृन्दानि तेषां सहस्रं तेन, तथा तेषां पद्मानां शतं तेन च, तेषां महापद्मानां सहस्रं तेन, तेषां खर्वाणां शतं तेन च, तेषां वानराणां कोटिसङ्ख्याकश्चासौ महौघश्च तेन, तेषां समुद्रः समुद्राख्यसङ्ख्याविशेषस्तेन च संवृतः, विभीषणः सखा यस्य स तथा[१] । विभीषणस्य सखेति वा । ससुग्रीवः श्रीरामः विजृम्भते विराजते । हन्त हर्षे खेदे वा । जृभि गात्रविनामे लट् ॥ २३–२५ ॥

(सं.चं.) विभीषणस्य सखा रामः ससुग्रीवो विजृम्भते वैभवोपेतः शोभते ॥ २५ ॥

कपिकोटिमहौघेभ्यो महौघगुणवीर्य्यवान्[२] ।
एको हनूमान् नूनं नो नाशायालं दशानन ॥ २६ ॥

(भा.दी.) तमन्ध्ये श्रेष्ठानां हनुमदादीनां सामर्थ्यमाहतुः– **कपी**ति । कपीनां कोटयस्तासां महौघास्तेभ्यः, महौघः, महौघसङ्ख्याकः गुणः आवृत्तिर्यस्य तत्तथोक्तम्, तादृशं यद्वीर्यं बलं तदस्यास्तीति तथोक्तः, एकः हनूमान्, हे दशानन, नः अस्माकं नाशाय अलं समर्थः, नूनम् ॥ २६ ॥

(सं.चं.) कपिकोटिमहौघानां यावन्ति वीर्याणि ततोऽपि महौघगुणितवीर्यवान् हनूमान् । एकोऽसदृशः, एकोऽसहाय एव नो नाशायालम् ॥ २६ ॥

रामानुजो लक्ष्मणोऽयं सुग्रीवो वालिनोऽनुजः ।
तेन तर्क्यं तयोर्वीर्य्यं क्षेमायाऽर्य्य[३] प्रयत्यताम् ॥ २७ ॥

(भा.दी.) रामेति । अयं दृश्यमानः लक्ष्मणः रामानुजः श्रीरामस्यानुजः । अयं सुग्रीवः वालिनः अनुजः । तेन रामानुजत्वेन वाल्यनुजत्वेन च तयोः लक्ष्मणसुग्रीवयोः यादृग् वीर्यं तर्क्यं ऊह्यम्, अतः (आर्य), क्षेम आत्मरक्षणं तस्मै प्रयत्यतां प्रयत्नः क्रियताम् । यती प्रयत्ने लोट् ॥ २७ ॥

---

१. तत्पुरुषसमास एव टजिति वैयाकरणाः ।

२. '**महौघगुणवीर्यवान् महौघसङ्ख्याकगुणवान् वीर्यवांश्च**' इति का.श्री. ।

३. '**क्षेमायाऽशु प्रयत्यताम्**'

(सं.चं.) रामानुजो लक्ष्मणोऽयम् । अग्रजेनानुजोऽपि व्याख्यातः । एवं सुग्रीवोऽपि । वाली किल परिचित-चरः । तेन तयोः लक्ष्मणसुग्रीवयोः वीर्यमननुभूतमपि शक्यं तर्कयितुम् ॥ २७ ॥

रामस्त्रिलोकीं[१] संहर्त्तुमेक एव किलेश्वरः[२] ।
अलं राजन् विरोधेन दीयतामाशु मैथिली ॥ २८ ॥

(भा.दी.) राम इति । श्रीरामः त्रिलोकीं लोकत्रयं संहर्तुं एक एव असहाय एव ईश्वरः समर्थः किल । हे राजन् रावण, श्रीरामेण विरोधः कलहस्तेन अलम् । मैथिली जानकी आशु दीयताम् ॥ २८ ॥

(सं.चं.) क्षेमाय आत्मनो रक्षसां चाविनाशाय दीयतामाशु मैथिली ॥ २८–९ ॥

श्रुत्वा तयोरिदं वाक्यं दृष्ट्वा रामचमूं च ताम् ।
रावणोऽतिविषण्णोऽपि मानी[३] तावाक्षिपत् क्रुधा ॥ २९ ॥

(भा.दी.) श्रुत्वेति । मानोऽस्यास्तीति मानी, अभिमानीत्यर्थः, रावणः तयोः शुकसारणयोः इदं वाक्यं श्रुत्वा, तां रामचमूं दृष्ट्वा च, अतिविषण्णोऽपि अत्यन्तं भीतोऽपि तौ शुकसारणौ क्रुधा क्रोधेन आक्षिपत्, अभर्त्सयत् । क्षिपु निरसने लङ् ॥ २९ ॥

पुनश्च प्रेषितास्तेन चाराः शार्दूलपूर्वकाः ।
वानरैः पीडिता मुक्ताः प्राप्योदन्तं न्यवेदयन् ॥ ३० ॥

(भा.दी.) पुनरिति । तेन रावणेन पुनश्च प्रेषिताः, शार्दूलः शार्दूलनामकराक्षसः पूर्वो येषां ते तथा चाराः गूढपुरुषाः, वानरैः पीडिताः सन्तः, अथ मुक्ताः सन्तः रावणं प्राप्य उदन्तो वृत्तान्तस्तं न्यवेदयन् । सेनाविस्तारादिकं विज्ञापितवन्तः ॥ ३० ॥

(सं.चं.) पुनश्च प्रेषिताः । 'अब्रवीच्च दशग्रीवः समीपस्थं महोदरम् । उपस्थापय मे शीघ्रं चरानिति निशाचरः' (२९.१६) इति, 'ततश्चाराः सन्त्वरिताः प्राप्ताः पार्थिवशासनात्' (१७) इति, 'चारास्तु ते तथेत्युक्त्वा

१. 'रामस्त्रिलोकान्'

२. 'एवाखिलेश्वरः' । अस्मिन् पाठे 'अलम्' इति पूर्वार्धेऽप्यन्वेति । 'अलं समर्थः । 'विरोधेनालम्' इत्यलंशब्दस्योभयत्रान्वयः' इति वि.भू. ।

३. 'मानी अभिमानी अहङ्कारयुक्त इति यावत्' इति का.श्री. ।

प्रहृष्टा राक्षसेश्वरम् । शार्दूलमग्रतः कृत्वा ततश्चक्रुः प्रदक्षिणम्' (२२) इति च । 'ते तु धर्मात्मना दृष्टा राक्षसेन्द्रेण राक्षसाः । विभीषणेन तत्रत्या निगृहीता यदृच्छया' (२५–६) इति च ॥ ३० ॥

सम्मन्त्र्य मन्त्रिभिः सार्द्धमशोकवनिकां गतः ।
मायी स रावणस्तन्वीं रामस्यापायमभ्यधात् ॥ ३१ ॥

(भा.दी.) सम्मन्त्र्येति । माया तत्कालवस्तुसर्जनशक्तिरस्यास्तीति मायी, सः रावणः मन्त्रिभिः प्रहस्तादिमन्त्रिभिः सार्धं कर्तव्यं सम्मन्त्र्य, सीता चेद् वशीकृता तर्ह्यस्यां सक्तायां सत्यां निराशो रामः समराद् विमुखो भवेदित्यालोच्य, आशोकवनिकां गतः सन्, तन्वीं स्त्रियं सीताप्रतिकृतिं प्रति श्रीरामस्य अपायो विनाशस्तं अभ्यधात् प्रोचे ॥ ३१ ॥

(सं.चं.) सीताप्रसादनोपायं सम्मन्त्र्य । मायी डाम्भिकः प्रातिहारिकः । तन्वीं मायासीतां प्रति । अपायं मरणम् ॥ ३१ ॥

विद्युज्जिह्वोऽथ मायावी रावणेन प्रचोदितः ।
रामस्येदं शिर इति शिरः किञ्चिदिहाऽनयत् ॥ ३२ ॥

(भा.दी.) विद्युदिति । (अथ) माया अदृश्यत्वादिशक्तिरस्यास्तीति मायावी, मत्वर्थे विनिः, रावणेन प्रचोदितः, श्रीरामशिरःसदृशं शिरः सृष्ट्वा तत्सीतायै प्रदर्शयेति प्रेरितः, विद्युज्जुह्वः विद्युज्जुह्वनामकः राक्षसः, रामस्य इदं शिर इति वदन् सन् किञ्चित् शिरः इह सीतानिकटे आनयत् ॥ ३२ ॥

(सं.चं.) मायावी शाम्बरीं मायां विदन् । इन्द्रजालपटुः ॥ ३१ ॥

माययाऽप्यकृतार्थेऽथ रावणे निर्गते वनात् ।
करुणं विलपन्तीं तां सरमोपाययौ[१] सतीम् ॥ ३३ ॥

(भा.दी.) माययेति । अथ माययाऽपि कापट्येनापि, अकृतः अर्थः सीतावशीकरणलक्षणं प्रयोजनं येन स तथोक्तस्तस्मिन् रावणे, वनं अशोकवनं तस्मात् निर्गते सति, करुणं द्रष्टॄणां कृपास्पदं यथा भवति

१. 'सरमोपययौ'

तथा विलम्पन्तीं सतीं पतिव्रतां तां सीतां, सरमा विभीषणभार्या, उपाययौ । लोकदृष्ट्या विद्युज्जिह्वप्रदर्शितशिरो दृष्ट्वा विलपन्त्यां सत्यां सरमाऽगतेत्यर्थः ॥ ३३ ॥

(सं.चं.) मायया रामस्य कृतकशिरःप्रदर्शनेनापि अकृतार्थे सीतां वशीकर्तुमसमर्थे, निराशतया वनान्निर्गते सति । सीतारक्षणार्थं नियुक्ता सरमा सतीं सीतामुपाययौ ॥ ३३ ॥

रक्षणाय नियुक्ताऽपि राक्षसेन्द्रेण राक्षसी ।
मायासीतां भक्तियुक्ता[1] विदितार्थेदमब्रवीत् ॥ ३४ ॥

(भा.दी.) रक्षेति । राक्षसेन्द्रेण रावणेन रक्षणं सीतारक्षणं तस्मै नियुक्ताऽपि आज्ञप्ताऽपि । विदितः रक्षसां मायेति विज्ञात अर्थो यया सा तथोक्ता राक्षसी सा सरमा, सीतायां भक्तियुता सती मायासीतां प्रति सीताप्रतिकृतिं प्रति इदं वचः अब्रवीत् ॥ ३४ ॥

(सं.चं.) विदितार्था विदितरावणमाया ॥ ३४ ॥

मायाया[2] रक्षसां भद्रे मा यायाः सति सङ्कटम् ।
सबलस्ते सुवेलाद्रौ सबलः क्रीडते पतिः ॥ ३५ ॥

(भा.दी.) मायेति । हे भद्रे, शोभने, सति पतिव्रते सीते, इयं दृष्टा रक्षसां माया तत्कालसर्जनशक्तिसृष्टं वस्तु, नतु रामशिरः । तस्माच्छिरोदर्शनादिना सङ्कटं खेदस्तत्, मा यायाः न प्राप्नुहि । सबलः बाहुबलसहितः, सबलः कपिसैन्यसहितः, ते पतिः श्रीरामः, सुवेलाख्यो योऽद्रिस्तस्मिन् क्रीडते । क्रीडृ विहरणे लट् ॥३५॥

(सं.चं.) रक्षसां मायायाः सकाशात् सङ्कटं मा यायाः मा यासीः । सबलः ससैन्यः । बलेनाऽत्मसामर्थ्येन च सहितः । क्रीडतीति वक्तव्यम् । अथापि प्रार्थयती-त्यादिवत् उभयपदतामभिप्रयन् 'क्रीडते' इत्याह । 'क्रीडतेऽस्माभिरच्युतः' इति च प्रतनः प्रयोगः । पादादि-यमकम् ॥ ३५–६ ॥

चारा वानरनिष्पिष्टाः श्वासमात्रावशेषिताः[3] ।
रामस्य तद् बलौदार्य्यं वदन्तो वीक्षिता मया ॥ ३६ ॥

(भा.दी.) चारा इति । वानरैः निष्पिष्टाः अर्दिताः, अत एव श्वासमात्रेण अवशेषिताः, श्रीरामस्य तत् बलं तस्य औदार्यं बाहुल्यं तत् वदन्तः चाराः रावणगूढपुरुषाः मया वीक्षिताः दृष्टाः ॥ ३६ ॥

---

१. **'भक्तियुता'** इति वि.ती.पाठः । २. **'मायेयं रक्षसाम्'** इति वि.ती.पाठः । ३. **'श्वासमात्रावशेषिणः'**

रावणो बोद्ध्यमानोऽपि मात्रा वृद्धैश्च मन्त्रिभिः ।
न त्वां मुञ्चति रम्भोरु हतो रामेण शेष्यते[1] ॥ ३७ ॥

(भा.दी.) रावण इति । रावणः मात्रा कैकस्याख्यया, वृद्धैः मन्त्रिभिश्च सीतां मुञ्चेति बहुधा बोध्यमानोऽपि, रम्भावद् रम्भादण्डवदूरू यस्याः सा तत्सम्बुद्धिः, हे सीते, त्वां न मुञ्चति । मुच्लृ मोक्षणे लट् । यस्मात् अतः रामेण हतः सन् शेष्यते शयनं करिष्यति । शीङ् स्वप्ने लृट् ॥ ३७ ॥

(सं.चं.) शेष्यते शयिष्यते । प्राचीनानां प्रयोगसरणिरियम् । 'संशय्यते' इति वक्तव्ये 'संशीयते' इति प्रयुञ्जते । 'शयिता' इति वक्तव्ये 'शेता' इति । 'शयिष्यते' इति वक्तव्ये–शेष्यते' इति ॥ ३७ ॥

एवमुक्ता[2] सरमया सा रामा मोदमाददे ।
शुश्राव रामसैन्यानां नादं वाद्यस्वनोर्ज्जितम् ॥ ३८ ॥

(भा.दी.) एवमिति । सरमया एवमुक्ता सा रामा स्त्री सीताप्रतिकृतिः मोदः सन्तोषस्तं आददे सम्प्राप्तवती । वाद्यानां ये स्वनास्तैरूर्जितं अभिवृद्धम्, रामस्य सैन्यानि तेषां कपीनां नादो ध्वनिस्तं शुश्राव । श्रु श्रवणे लिट् ॥ ३८ ॥

(सं.चं.) रणवाद्यस्वनोर्जितम् । रणवाद्यं काहलादि । '**ಕಹಳೆ**' इति भाषायाम् । वाद्यस्वनादप्यूर्जितं वा । ऊर्जितं प्रबलम् ॥ ३८–४३ ॥

मातामहो माल्यवांस्तं वृद्धो रावणमब्रवीत् ।
शृणु वत्स हितं वाक्यं विदुषा भाष्यते मया ॥ ३९ ॥

(भा.दी.) मातेति । मातामहो मातुः पिता वृद्धः माल्यवान् माल्यवन्नामकः तं रावणं अब्रवीत् । ब्रूञो लङ् । विदुषा रामस्वरूपं जानता मया भाष्यते । भाषधातोर्लट् । हे वत्स, हितं तद्वाक्यं शृणु । श्रु श्रवणे लोट् ॥ ३९ ॥

---

१. **'यद्यपि शीङः सेट्त्वात् 'शयिष्यते' इति वाच्यम् । तथाऽपि 'चिक्रंसया' इत्यादिप्रयोगादागमानुशासनस्यानित्यत्वात् 'शेष्यते' इत्युक्तम्'** इति का.श्री. । चिन्त्यमिद् । क्रमेः सनि चिक्रंसते रूपस्यापि पाणिनीयैरभ्युपगमात् ।

२. **'एवमुक्ते'**

धर्म्मपक्षस्थिता देवा वयं चाधर्म्मपक्षिणः ।
पुरा जयो[१] ह्यधर्म्मस्य धर्म्मो विजयतेऽधुना ॥ ४० ॥

(भा.दी.) धर्म इति । देवाः धर्मस्य पक्षः सहायस्तस्मिन् स्थिताः । वयं च अधर्मस्य पक्षः सहायः स एषामस्तीति तथोक्ताः । अधुना अधर्मः अधर्मपक्षस्तस्य पराजयः । धर्मः धर्मपक्षः विजयते । जि जये लट् ॥ ४० ॥

पालितो धर्म्मपक्षोऽयं विष्णुना प्रभविष्णुना ।
मन्ये विष्णुमिमं जातं रामं तेजोभिरीदृशैः ॥ ४१ ॥

(भा.दी.) पालित इति । प्रकर्षेण शश्वदेकप्रकारेण भवितुं शीलमस्यास्तीति प्रभविष्णुस्तेन विष्णुना, अयं धर्मपक्षः पालितः । अतः इमं श्रीरामं ईदृशैः वालिनिग्रहणसेतुबन्धनादिभिरलौकिकैः तेजोभिः प्रभावैः कारणभूतैः, जातं धर्मरक्षार्थमवतीर्णं विष्णुं मन्ये जानामि । मन ज्ञाने लट् ॥ ४१ ॥

सन्धीयतां राघवेण दीयतां तात मैथिली ।
इति तेनोदितं श्रुत्वा क्रुद्धः प्रोवाच रावणः ॥ ४२ ॥

(भा.दी.) सन्धीयतामिति । हे तात रावण, राघवेण सह सन्धीयतां सन्धानं क्रियताम् । मैथिली श्रीरामाय दीयताम् । इति तेन माल्यवता उदितं वचः श्रुत्वा क्रुद्धः रावणः प्रोवाच ॥ ४२ ॥

नानुरूप इति त्यक्तः पित्रा दीनो वनं गतः ।
जेता किं मानवो रामः क्षुद्रैः शाखामृगैर्वृतः[२] ॥ ४३ ॥

(भा.दी.) नेति । पित्रा दशरथेन न अनुरूपः राज्यरक्षणे अनुकूलो न इति त्यक्तः, दीनः दरिद्रः, वनं गतः, क्षुद्रैः नीचैः शाखामृगैः वानरैः वृतः, मानवः श्रीरामः मां जेता किम्? कथं जेष्यति? न कथञ्चनेति भावः ॥ ४३ ॥

एक एव क्षिपेद् रामं जम्भारिस्तम्भनो भुजः ।
भुजैरेकोनविंशद्भिः कृत्यं नैवोपलक्ष्यते[३] ॥ ४४ ॥

१. **'पराजयो ह्यध–'** इति वि.ती.पाठः । २. **'–मृगैर्युतः'** ३. **'नैवोपलभ्यते'**

(भा.दी.) एक इति । जम्भारिरिन्द्रस्तं स्तम्भयतीति तथोक्तः मे एक एव भुजः श्रीरामं क्षिपेत् पराजयेत । क्षिपु निरसने लिङ् । एकेन ऊना न्यूना विंशत् एकोनविंशत् ताभिः(?) एकोनविंशतिसङ्ख्याकैरित्यर्थः, भुजैः कृत्यं कार्यं नैव उपलक्ष्यते नैव दृश्यते ॥ ४४ ॥

(सं.चं.) 'भुजैरेकोनविंशद्भिः' इति पठन्ति । छान्दसः प्रयोगः स्यात् । लिपिकृत्प्रमादो वा स्यात् । तदा 'भुजैरेकोनविंशत्या' इति प्रतनः पाठः स्यादिति भाति ॥ ४४ ॥

मन्त्रैरलमलं हन्त प्रहस्त प्रतिगम्यताम् ।
सन्नह्यतां प्रतिद्वारं स्थीयतां बलिभिर्य्युधे ॥ ४५ ॥

(भा.दी.) मन्त्रैरिति । मन्त्राः गुप्तभाषणानि तैः अलं पर्याप्तम्, हन्त हर्षे, हे प्रहस्त, युध् युद्धं तस्यै, बलिभिः राक्षसैः सह प्रतिगम्यताम् । गम्लृ गतौ लोट् । सन्नह्यतां युद्धसंनहनं क्रियताम् । णह बन्धने लोट् । द्वारेद्वारे प्रतिद्वारं स्थीयताम् ॥ ४५ ॥

(सं.चं.) अलमलमिति सम्भ्रमाद् द्विरुक्तिः । गुह्योक्तिर्मन्त्रः । हन्तेति पुनर्वाक्यारम्भे । तेनैव मन्त्रमूढाननुकम्पते च । शत्रून् प्रतिगम्यताम् । युधे युद्धाय बलिभिः सन्नह्यताम् । कवचबन्धः क्रियताम् । सन्नाहः कवचम् । 'वक्षश्छदः सन्नाहकङ्कटौ' इति यादवप्रकाशः । चतुर्दिशं प्रतिद्वारं शत्रूणामन्तः प्रवेशनिरोधेन द्वाररक्षार्थं च सन्नद्धैः स्थीयताम् ॥ ४५ ॥

इति ब्रुवाणमालोक्य राक्षसं पक्षिरूपिणः ।
चारा विभीषणस्याथ विभीषणमुपाययुः ॥ ४६ ॥

(भा.दी.) इतीति । अथ, पक्षिणां रूपमेषामस्तीति तथोक्ताः विभीषणस्य चाराः इति ब्रुवाणं राक्षसं रावणं आलोक्य विभीषणं उपाययुः ॥ ४६ ॥

(सं.चं.) विभीषणस्य पक्षिरूपिणश्चाराः ॥ ४६ ॥

अनलानिलसम्पातिहर्य्याख्यैः सचिवैर्न्निजैः ।
उदितं पुरि वृत्तान्तं राममूचे विभीषणः ॥ ४७ ॥

(भा.दी.) अनलेति । अनलश्च अनिलश्च सम्पातिश्च हरिश्च इति आख्या येषां ते तथोक्तास्तैः निजैः स्वकीयैः सचिवैः उदितं प्रोक्तम्, पुरि लङ्कायां उदितमुत्पन्नम्, वृत्तान्तो वार्त्ता तं विभीषणः रामं प्रति ऊचे । ब्रूञ् धातोर्लिट् ॥ ४७ ॥

(सं.चं.) अनलानिलसम्पातिहर्याख्यैः । सम्प्रति रामायणेऽन्यथा नामानि पठ्यन्ते– 'अनलः शरभश्चैव सम्पातिः प्रघसस्तथा' (३७.७) इति । उत्तरखण्डे पुनरन्यथा–'अनलश्चानिलश्चैव हरिः सम्पातिरेव च' (उ.कां.५.४४) इति । तदनुगुणमत्रापि एवं पाठः स्यात्–'अनलश्चानिलश्चैव सम्पातिर्हरिरेव च' इति । अनिलस्य शरभ इति हरेः प्रघस इति नामान्तरं वा ॥ ४७ ॥

भगवांश्च प्रतिद्वारं योद्धुं सङ्कल्प्य वानरान् ।
श्वः प्रभाते रणमिति सुवेलमधिरूढवान् ॥ ४८ ॥

(भा.दी.) भगवानिति । भगवान् श्रीरामश्च लङ्कायाः द्वारेद्वारे प्रतिद्वारं योद्धुं वानरान् सङ्कल्प्य, श्वः आगामिदिवसे, प्रभातः प्रातःकालस्तस्मिन् रणमिति सङ्कल्प्य, सुवेलं सुवेलाख्यपर्वतं अधिरूढवान् आरुरोह ॥ ४८ ॥

(सं.चं.) सङ्कल्प्य निश्चित्य, रणमित्युक्त्वा ॥ ४८ ॥

ससुग्रीवौ राघवौ[1] तौ हरयः सविभीषणाः ।
उपासत सुवेलाग्रे सूर्य्यश्चास्तङ्गतस्तदा ॥ ४९ ॥

(भा.दी.) सेति । सविभीषणाः विभीषणसहिताः हरयः, ससुग्रीवौ सुग्रीवसहितौ राघवौ रघुगोत्रोत्पन्नौ तौ श्रीरामलक्ष्मणौ सुवेलस्य अग्रं शिखरं तस्मिन् उपासत असेवन्त । आस उपवेशने लङ् । तदा सूर्यश्च अस्तोऽस्तगिरिस्तं गतः । सायङ्कालो जात इत्यर्थः ॥ ४९ ॥

(सं.चं.) सुवेलाग्रे उपासत सुवेलाग्रमध्यासत । अथवा ससुग्रीवं रामं लक्ष्मणं च कपयः सविभीषणाः उपासत उपासीनाः सेवमाना बभूवुः ॥ ४९–५२ ॥

१. **'राघवाविति द्वितीयाद्विवचनम् । उपासत उपास्तिं चक्रुः'** इति वि.भू. । **'ससुग्रीवौ सुग्रीवेण सहितौ राघवौ रामलक्ष्मणौ कर्म उपासत असेवन्त'** इति का.श्री ।

सुग्रीवः सहितः प्रातर्देवेनाऽनन्दमूर्त्तिना ।
तुङ्गे शृङ्गे त्रिकूटस्य तां लङ्कामथ दृष्टवान् ॥ ५० ॥

(भा.दी.) **सुग्रीव** इति । अथ, आनन्दः मूर्तिः शरीरं यस्य स तथा तेन देवेन श्रीरामेण सहितः सुग्रीवः, प्रातः प्रातःकाले, त्रिकूटस्य त्रिकूटपर्वतस्य (तुङ्गे) शृङ्गे, शृङ्गं शिखरं तस्मिन्, स्थितः सन् तां लङ्कां दृष्टवान् ॥ ५० ॥

प्राकारगृहहर्म्याढ्यां सर्वसम्पत्समन्विताम् ।
तां दृष्ट्वा विस्मयं भेजे पुरन्दरपुरीमिव ॥ ५१ ॥

(भा.दी.) **प्राकारे**ति । सुग्रीवः प्राकाराः भित्तयस्ते च गृहाणि च हर्म्याणि च तैः आढ्यां युक्ताम्, सर्वाः याः सम्पदस्ताभिः समन्विताम्, तां लङ्कां पुरन्दरपुरीमिव दृष्ट्वा विस्मय आश्चर्यस्तं भेजे प्राप । भज सेवायां लिट् ॥ ५१ ॥

(सं.चं.) प्राकारावृतानि गृहाणि श्रीमतां हर्म्याणि प्रसादाश्च ॥ ५१–२ ॥

तत्र प्रासादशिखरे चारुचामरवीजितम्[1] ।
रावणं प्रैक्षत कपिः सर्वभूषणभूषितम्[2] ॥ ५२ ॥

(भा.दी.) **तत्रे**ति । कपिः सुग्रीवः तत्र लङ्कायां प्रासादस्य यच्छिखरं तस्मिन्, चारूणि यानि चामराणि तैर्वीजितम्, सर्वाणि यानि भूषणानि तैर्भूषितमलङ्कृतं रावणं प्रैक्षत ॥ ५२ ॥

स्वामिनो दारचोरो मे सोऽयमास्ते खलः सुखम् ।
इति संरम्भसम्भिन्नश्चुक्षोभ रविनन्दनः ॥ ५३ ॥

(भा.दी.) **स्वामिन** इति । मे स्वामिनः श्रीरामस्य, दाराणां भार्याणां[3] चोरः, सीताचोर इत्यर्थः, खलः सोऽयं रावणः सुखं यथा भवति तथा आस्ते, इति संरम्भेण कोपेन सम्भिन्नः सहितः रविनन्दनः सुग्रीवः चुक्षोभ सञ्चचाल । क्षुभ सञ्चलने लिट् ॥ ५३ ॥

(सं.चं.) मे स्वामिनो दारचोरः । संरम्भेण सम्भ्रमेणाऽटोपेन च सम्भिन्नः सम्मिश्रः ॥ ५३ ॥

---

१. **'चारुचामराभ्यां वीजितम्'** इति का.श्री. । २. **'सर्वाभरणमण्डितम्'** ३. **'भार्यायाः'** इति पर्याप्तम् ।

मरतकमणिवर्ण्णं मत्तमातङ्गलीलं
मधुकरपरिघुष्टां वैजयन्तीं वहन्तम् ।
हरिपरिषदि रामं सस्मितं वीक्षमाणं[१]
हरिपतिरथ नत्वा चोदयामास सेनाम् ॥ ५४ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
युद्धकाण्डे तृतीयः सर्ग्गः ॥

—०—

(भा.दी.) मरतकेति । अथ हरिपतिः कपीश्वरः सुग्रीवः, मरतकाख्यो यो मणिस्तद्वद्वर्णो यस्य स तथा तम्, मत्तो यो मातङ्गस्तद्वल्लीला यस्य स तथा तम्, मधुकरैः भ्रमरैः परिघुष्टां कौतूहलेनाऽकुलिताम्, अनुनादितामिति वा, वैजयन्तीं वैजयन्त्याख्यमालां वहन्तम्, हरीणां कपीनां परिषत्सभा तस्याम्, स्मितेन सहितं यथा भवति तथा सस्मितम्, आत्मानं कारुण्यात् वीक्षमाणं श्रीरामं नत्वा सेनां युद्धार्थं चोदयामास । चुद सञ्चोदने[२] लिट् ॥ ५४ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां
युद्धकाण्डे तृतीयः सर्गः ॥

—०—

(सं.चं.) अथ मालिन्योपसंहरति– मरतकमणिवर्णम् । मधुकरैः परितः सर्वतः घुष्टां नादिताम् । 'वैजयन्ती पताकायां जयन्त्यां केशवस्रजि' इति यादवप्रकाशः ॥ ५४ ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां
युद्धकाण्डे तृतीयसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– २३५३+५४=२४०७]

१. **'वीक्ष्यमाणम्'** । **'हरिपरिवारे कपिसभायां सर्वैः वीक्ष्यमाणम्'** इति का.श्री. ।
२. **'सञ्चोदनं प्रेरणम्'** इति क्षीरस्वामी ।

चतुर्थः सर्ग्गः

रामानुजो रामनियोगतोऽथ मधूनि मूलानि फलानि चाऽशु ।
यथेष्टमत्र व्यभजत् कपिभ्यो महायुयुत्सोत्सवदर्प्पवद्भ्यः[1] ॥ १ ॥

(भा.दी.) श्रीरामानुजेन तदानीं कृतं निरूपयति– **रामानुज** इति । अथ रामानुजः लक्ष्मणः श्रीरामस्य नियोग आज्ञा तस्मादिति ततः, मधूनि मूलानि फलानि च, आशु युद्धं कर्तुमिच्छा युयुत्सा, सैवोत्सवो महान् महा-युयुत्सोत्सवः, तस्मिन् दर्पः अहं समर्थः इत्यहङ्कारः, एषामस्तीति तथा तेभ्यः कपिभ्यः, अत्र सुवेलशृङ्गे, इष्टमनतिक्रम्य यथेष्टम्, तत्तदभीष्टानुसारेणेत्यर्थः, व्यभजत् विभज्य दत्तवान् । भज सेवायां लङ् ॥ १ ॥

(सं.चं.) इन्द्रोपेन्द्रवज्राभ्यामुपजात्या सर्गमारभते– रामानुज इत्यादिना ॥ १ ॥

रामोऽथ बाणासनबाणपाणिः सलक्ष्मणो व्यूह्य बलं समस्तम् ।
लङ्कामलङ्कारवतीमवाप [2]प्रस्फारविस्फारविनादिताशः ॥ २ ॥

(भा.दी.) **राम** इति । अथ, बाणासनं धनुस्तच्च बाणश्च तौ पाण्योर्यस्य स तथोक्तः, सलक्ष्मणः श्रीरामः, समस्तं बलं सैन्यं तत्, व्यूह्य व्यूहं कारयित्वा, प्रस्फारस्य विस्फारो ध्वनिस्तेन विनादिताः आशा दिशो येन स तथा सन्, अलङ्कारोऽस्या अस्तीति तथा तां लङ्कां प्रति अवाप जगाम । आप्लृ व्याप्तौ लिट् ॥ २ ॥

---

१. **'महायुयुत्सोत्सवश्च दर्पश्च महायुयुत्सोत्सवदर्पौ । तावेषां स्त इति महायुयुत्सोत्सवदर्पवन्तः'** इत्यर्थान्तरे च का.श्री.टीकायाम् ।

२. **'प्रस्फारविष्फार–'** । **'स्फुरतिस्फुलत्योर्निर्निविभ्यः'** (अ.सू.८.३.७६) इति वैकल्पिको मूर्धन्यादेशः**–विस्फारः विष्फारः** । **'प्रस्फारः धनुष्टङ्कारः तस्य विस्फारेण ध्वनिना'** इति विभू. । का.श्री. । टङ्कार इत्येव ध्वनिवाचीत्यस्वरसमेतत् । **'अथवा प्रस्फरः धनुष्टङ्कार एव विस्फारो ध्वनिः'** इति चार्थान्तरं का.श्री टीकायाम् किमुक्तं भवति? टङ्कार एव ध्वनिरिति ध्वनिरेव ध्वनिरित्युक्तं भवति । तस्मादिदमप्यसङ्गतम् ।

(सं.चं.) व्यूह्य यथास्थानं विन्यस्य । प्रस्फारेण अतिविपुलेन विस्फारेण धनुष्टङ्कारेण प्रतिध्वनितहरित् । स्फुरतीति स्फारः । स्फुर सञ्चलने, घञ् । स्फुरतेरेचः स्थाने आकारादेशः । 'स्फुरतिस्फुलत्योर्घञि' (अ.सू. ६.१.४७) इति । 'विपुलं पृथुलं पृथु । स्फारं भद्रं बृहत्' इत्यभिधानम् । 'विष्फारो धनुषः स्वानो भूषादीनां तु शिञ्जितम्' इति च । वैकल्पिको मूर्धन्यादेशः । तेन विष्फारो विस्फारश्च ॥ २ ॥

तमन्वगच्छन्नरिमर्दनाय सौमित्रिसुग्रीवविभीषणाश्च ।
ते सत्यमैक्यं[1] प्रययुस्ततो हि तेषां त्रयाणां च विभीषणत्वम् ॥ ३ ॥

(भा.दी.) **तमि**ति । हि यस्मात् सौमित्रिसुग्रीवविभीषणाश्च, अरीणां मर्दनं संहारस्तस्मै, तं श्रीरामं अन्वगच्छन् । अनुजग्मुः । गम्ॡ गतौ लङ् । तस्मात् ते त्रयः सत्यं यथार्थं यथा भवति तथा ऐक्यं बुद्ध्यैक्यं तत् प्रययुः । यातेर्लिट् । ततः बुद्धेरैक्यादेव तेषां त्रयाणां लक्ष्मणादीनां च विभीषणत्वं विभीषणनाम-वत्त्वम् ।अनेन त्रयो विभीषणा जग्मुरिति ग्रन्थान्तरेऽभिहितं विभीषणत्रित्वं बुद्ध्यैक्येन शत्रुविभीषणत्वेन नायुक्तमिति ग्रन्थान्तराभिप्राय उक्तो भवति ॥ ३ ॥

(सं.चं.) ऐक्यं समानधर्मत्वम् । कः समानधर्मस्त्रयाणाम्? शत्रुविभीषणत्वम् ॥ ३ ॥

हरिप्रबर्हा हनुमत्पुरोगाः शिला[2] विशाला दधतः कराग्रैः ।
अभ्यापतन् राक्षसराजधानीं पक्षक्षयात् प्रागिव पर्वतेन्द्राः ॥ ४ ॥

(भा.दी.) **हरी**ति । हनुमान् पुरोगः पुरःसरो येषां ते तथोक्ताः, हरिप्रबर्हाः कपिश्रेष्ठाः अङ्गदादयः, कराणामग्राणि तैः, विशालाः शिलाः दधतः दधानाः सन्तः, पक्षाणां पतत्राणां क्षयस्तस्मात् प्राक् पर्वतेन्द्रा इव, राक्षसस्य रावणस्य राजधानीं पुरीं लङ्कां प्रति अभ्यापतन् अभिजग्मुः । पतॢ पतने लङ् ॥ ४ ॥

(सं.चं.) पर्वतेन्द्रा अपि शिला विशाला दधति । पक्षक्षयात् पूर्वं सपक्षाः पर्वतेन्द्रा इव ॥ ४ ॥

स राजधर्म्मं[3] भुवनैकराजो रामो विधातुं किल वालिसूनुम् ।
विभीषणस्यानुमतेन दूतं प्रस्थापयामास दशास्यपार्श्वम् ॥ ५ ॥

---

१. **'ऐक्यं ऐकमत्यं एकार्थविषयबुद्धिमत्त्वम्'** इति का.श्री. । २. **'शिलाश्च सालान् दधतः'**

३. **'राजधर्मम्, अग्रे मार्दवप्रदर्शनं कतव्यमिति राजनीतिम्'** इति का.श्री. ।

(भा.दी.) स इति । एकः मुख्यो राजा एकराजः, भुवनानामेकराजः, सः श्रीरामः, राज्ञां धर्मः सन्धिविग्रहादिलक्षणः, तं विधातुं कर्तुम्, वालिनः सूनुस्तमङ्गदं दूतम्, दशास्यस्य पार्श्वं समीपं तत्, विभीषणस्य अनुमतं सम्मतिस्तेन, प्रस्थापयामास किल प्रेषयामास किल । ष्ठा गतिनिवृत्तौ लिट् ॥ ५ ॥

(सं.चं.) राजधर्मं विधातुं पालयितुम् । 'विभीषणस्यानुमते राजधर्ममनुस्मरन् । अङ्गदं वालितनयं समाहूयेदमब्रवीत्' (४१.६०) इति च ॥ ५ ॥

अथाङ्गदो वह्निरिव प्रदीप्तः प्राकारमुल्लङ्घ्य पुरं प्रविश्य ।
तन्मन्दिरं[1] सुन्दरमावसन्तं दशाननं मन्त्रपरं ददर्श[2] ॥ ६ ॥

(भा.दी.) अथेति । अथ वह्निरिव प्रदीप्तः प्रकाशमानः अङ्गदः, प्राकारं आवरणं उल्लङ्घ्य, पुरं तत् प्रविश्य, सुन्दरं मन्दिरं राजभवनं तत् आवसन्तम् । 'उपान्वध्याङ् वसः' (अ.सू.१.४.४८) इति कर्मप्रवचनीयसञ्ज्ञायामधिकरणे द्वितीया । मन्त्रे आलोचने परं तात्पर्यं यस्य स तथा तं दशाननं ददर्श ॥ ६ ॥

(सं.चं.) वह्निरिव प्रदीप्तः । 'मूर्तिमानिव हव्यवाट्' (४१.७३) इति च वाल्मीकिः । 'दीप्ताग्निसदृशः' (७५) इति च ॥ ६ ॥

विवक्षतो रूक्षमुखस्य किञ्चिद् दशाननस्याङ्गद आबभाषे ।
मां वालिनः सूनुमवैहि राजन् किं सौम्य वाली भवताऽवबुद्धः[3] ॥ ७ ॥

(भा.दी.) विवक्षत इति । रूक्षाणि क्रूराणि मुखानि यस्य स तथोक्तस्तस्य दशाननस्य, किञ्चिद् वचः विवक्षतः वक्तुमिच्छावतः सतः, अङ्गद आबभाषे । भाषधातोर्लिट् । हे राजन्, मां वालिनः सूनुं अवैहि । जानीहि । इण् गतौ लोट् । हे सौम्य मनोहर, वाली भवता अवबुद्धः किम्? परिज्ञातः किम्? वालिना पशुवन्निगृह्य परित्यक्तत्वादियमवहासोक्तिः । इति बभाष इति सम्बन्धः ॥ ७ ॥

---

१. **'तं मन्दिरम्'**

२. इतः परं क्वचिदिदं पद्यं पठ्यते– **'सिंहासनस्योपरि तं च दृष्ट्वा तदुन्नते बालवरे निषण्णम् ।**
'दृष्ट्वा बभाषे दशकन्धरः कपे कः कस्य सूनुः कुत आगतस्त्वम्' ॥

उत्तरपद्याननुगुणमेतत् । रामायणाननुगुणं च । तृतीयचरणे पुनरिन्द्रवंशेति छन्दोभङ्गश्च । अत एव न व्याख्यातं च कैरपीति स्फुटं प्रक्षिप्तम् ।

३. **'भवता नु बुद्धः'** इति, **'भवता न बुद्धः'** इति च । **'न बुद्धः किम्, न ज्ञातः किम्?'** इति का.श्री. ।

(सं.चं.) किञ्चिद्विवक्षतः प्रष्टुमिच्छत इव । विवक्षन्तमनादृत्य । 'षष्ठी चानादरे' (अ.सू.२.३.३८) । भवताऽवबुद्धः ज्ञातः किम्? आहो विस्मृतः? तेन निगृहीतः कथं विस्मरेरिति परिहसति । 'अवैहि' इति प्रतनः प्रयोगः । 'अवैहि दूतमागतम्' इति च निर्णये । 'अवैहीत्यसाधुरेव' इति वदन् वैयाकरणपाशः शोचनीय एव ॥ ७ ॥

भ्रूविभ्रमस्तम्भितवारिराशेः सीतापतेर्विद्धि वचोहरं माम् ।
श्रेणीं शराणां च दधाति देवो[१] वाणीमपीमां रुचितां[२] वृणीहि ॥ ८ ॥

(भा.दी.) **भ्रूविभ्रमे**ति । हे रावण, मां भ्रुवो विभ्रमश्चलनमात्रं तेन स्तम्भितः वारिराशिः समुद्रो येन स तथा तस्य सीतापतेः वचांसि हरतीति वचोहरस्तं दूतमित्यर्थः, विद्धि । विद ज्ञाने लोट् । श्रीरामः शराणां श्रेणीं परम्परां दधाति बिभर्ति । धाञो लट् । इमां वक्ष्यमाणां वाणीमपि दधाति । तयोर्मध्ये त्वं रुचितां अभीप्सितां वृणीहि स्वीकुरु । वृञ् वरणे लोट् ॥ ८ ॥

(सं.चं.) वचोहरं सन्देशहरम् । शराणां श्रेणीमपि दधाति । वक्ष्यमाणां वाणीमपि दधाति पालयति । इन्द्रवज्रेयम् ॥ ८ ॥

गुरुद्रुहो ब्राह्मणसूदनस्य व्रतच्छिदः सत्कुलजाङ्गनानाम्[३] ।
देवद्विषस्ते फलति प्रवृद्धो नूनं महापातकपादपोऽयम् ॥ ९ ॥

(भा.दी.) का सा वाणीत्यत आह– **गुर्वि**ति । गुरून् ज्येष्ठत्वेन गुरुसदृशान् वैश्रवणादीन् द्रुह्यतीति तथा तस्य, बाह्मणान् सूदयति संहरतीति तथा तस्य, दैत्ययक्षरक्षोमनुजनागगन्धर्वदानवाख्यानि यानि सप्तकुलानि तेषूत्पन्ना या अङ्गनास्तासां व्रतं पातिव्रत्यलक्षणं च्छिन्नत्तीति तथोक्तस्तस्य, देवान् द्वेष्टीति तथोक्तस्तस्य ते तव, प्रवृद्धः, अयं लोकप्रसिद्धः, महापातकानि ब्रह्महत्यादीनि तान्येव पादपः, फलति फलवान् भवति । नूनं निश्चितम् । फल निष्पत्तौ लट् । त्वत्कृतपातकानां फलरूपं दुष्टस्य तव मरणं समीपप्राप्तमिति भावः ॥ ९ ॥

---

१. **'दधाति रामो–'** इति.वि.ती.पाठः । **'शराणां धाति'** इति क्वचित् । ३. **'रुचिराम्'**

३. **'सप्तकुलाङ्गनानाम्'** इति वि.ती.पाठः । **'सत्यकुलाङ्गनानाम्'** इति क्वचित् । **'सप्त च ताः कुलाङ्गनाश्च । तासां सप्तकुलाङ्गनानाम् । 'सयक्षरक्षोमनुजाहिदैत्यगन्धर्वनारीः सह दानवीभिः'** (सं.रा.३.१-३९) **इत्युक्तसप्त(विध)स्त्रीणां व्रतच्छिदः पातिव्रत्यनाशकस्य'** इति का.श्री. ।

(सं.चं.) तां वाणीमाह–गुरुद्रुहः । गुरुभ्यो द्रुह्यतीति गुरुध्रुक्, तस्य । सत्कुलप्रसूतानामङ्गनानां व्रतं भर्तृपरायणतारूपं छिनत्तीति तादृशस्य ॥ ९ ॥

अचूचुरस्त्वं महिषीमसारो[1] वने परोक्षं पुरुषोत्तमस्य ।
तन्मृष्यते त्वं प्रतिदाय देवीं देवं शरण्यं शरणं व्रजेश्चेत् ॥ १० ॥

(भा.दी.) अचूचुर इति । न विद्यते सारो बलं यस्य स तथा तत्सम्बुद्धिः । 'सारो बले स्थिरांशेऽर्थे' इति वैजयन्ती । रावण, त्वं पुरुषोत्तमस्य श्रीरामस्य महिषीं सीतां वनं दण्डकारण्यं तस्मिन् परोक्षं यथा भवति तथा, श्रीरामस्यापश्यतः सत इत्यर्थः, अचूचुरः स्तैन्यमकरोः, चुर स्तेये लुङ् । चेत् त्वं देवीं प्रतिदाय दत्त्वा शरण्यं शरणार्हं देवं श्रीरामं शरणमरणं तत् व्रजेः गच्छसि । व्रज गतौ लिङ् । तर्हि तत् सीताचौर्यं श्रीरामेण मृष्यते क्षम्यते । मृष तितिक्षायां लट् ॥ १० ॥

(सं.चं.) परोक्षमचूचुरः । अथाप्यपरोक्षमेव तद् विश्वतश्चक्षुषः पुरुषोत्तमस्य । प्रतिदानं प्रत्यर्पणम् । अपहृत-द्रव्यस्य पुनरर्पणम् ॥ १० ॥

नो चेत् प्रियार्थानुपभुङ्क्ष्व शीघ्रं कृत्येषु मा भूत् तव सम्प्रमादः ।
विदारणं दारुणरामबाणैः सम्प्राप्य शीघ्रं ननु शेष्यसे[2] त्वम् ॥ ११ ॥

(भा.दी.) नो चेदिति । नो चेत् न मोक्ष्यसे चेत्, प्रिया ये अर्थाः स्रगादिविषयास्तान् शीघ्रं यथा भवति तथा उपभुङ्क्ष्व अनुभव । भुज पालनाभ्यवहारयोः लोट् । कृत्यानि कर्तव्यकार्याणि परलोकसाधनपुण्यकर्माणीत्यर्थः, तेषु सम्प्रमादो मा भूदिति पदच्छेदः । 'न माङ्योगे' (अ.सू.६.४.७४)इत्यडभावः । त्वं दारुणा भयङ्कराः ये रामबाणास्तैः विदारणं हृदयविदारणं तत् सम्प्राप्य शीघ्रं यथा भवति तथा शेष्यसे भूमौ शयनं करिष्यसि ननु । शीङ् स्वप्ने लृट् ॥ ११ ॥

(सं.चं.) नो चेत्, रामाय सीता न प्रतिदीयते चेत् । उत्कृष्टं भोजनमुपभोजनम् । सम्भ्रममूलः प्रमादः सम्प्रमादः । शेष्यसे । सेट् इति पाणिनीयाः । षूङिव शीङपि वेट् इति प्रतनाः । तेन शेष्यसे शयिष्यसे इत्युभयमपि साधु ॥ ११–१२ ॥

---

१. **'महिषीमसार वने'** इति वि.ती.पाठः । का.श्री. पाठोऽपि ।

२. **'शेष्यसे रणरङ्गे शयनं करिष्यसि'** इति का.श्री. ।

उक्तं निशम्येति निशाचरेन्द्रः क्रोधारुणाक्षः सचिवानुवाच ।
प्रगृह्यतामाशु[१] निगृह्यतां च शाखामृगो दुर्वचनोऽयमित्थम् ॥ १२ ॥

(भा.दी.) **उक्तमि**ति । निशाचरेन्द्रः इति अङ्गदेन उक्तं वचः निशम्य, क्रोधेन अरुणानि रक्तानि अक्षीणि यस्य स तथा सन्, इत्थं दुष्टानि वचनानि यस्य स तथा अयं शाखामृगः आशु प्रगृह्यताम्, आशु निगृह्यतां च दण्ड्यतां च । इति सचिवान् प्रति उवाच ॥ १२ ॥

तमुग्रवेगा जगृहुर्नराशाः स तान् समादाय खमुत्पपात ।
ते तेन मुक्ता भुवि पेतुरार्त्ताः प्रासादभङ्गं विदधेऽङ्गदोऽथ ॥ १३ ॥

(भा.दी.) **तमि**ति । अथ उग्रः असह्यः वेगो येषां ते तथोक्ताः नराशाः राक्षसाः तं जगृहुः । सः अङ्गदः तान् समादाय खं गगनं तत् उत्पपात । गगने तेन मुक्ताः ते राक्षसाः आर्ताः सन्तः भुवि पेतुः । अथ अङ्गदः, प्रासादस्य रावणावस्थितहर्म्यस्य भङ्गो नाशस्तं विदधे च ॥ १३ ॥

(सं.चं.) तमुग्रवेगा जगृहुः । 'जगृहुस्तं ततो घोराश्चत्वारो रजनीचराः' (४१.८४) इति च ॥१३–१४॥

प्रासादभङ्गादथ रावणस्य प्रसादभङ्गो[२] नितरां बभूव ।
प्रसादभङ्गाद् द्विषतो मुकुन्दप्रसादमुन्मेषितवान् कपीन्द्रः[३] ॥ १४ ॥

(भा.दी.) **प्रासादे**ति । अथ रावणस्य, प्रासादस्य हर्म्यस्य भङ्गो नाशस्तस्मात्, प्रसादस्य मुखप्रसन्नतायाः भङ्गः नितरां बभूव । (द्विषतः) रावणस्य प्रसादस्य मुखप्रसन्नतायाः भङ्गस्तस्मात्, रावणमानभङ्गकारणादित्यर्थः, मुकुन्दस्य श्रीरामस्य प्रसादोऽनुग्रहस्तम्, मुखप्रसन्नतां कपीन्द्रः उन्मेषितवान् विकसितमकरोत् ॥ १४ ॥

दोषेषु[४] तत्र प्रविजृम्भितेषु[५] द्वाराणि देवो न्यरुणत् पुरस्य ।
आयासनिश्वासपरं पुरं तत् पर्य्याकुलं मङ्क्षु बभूव शोच्यम् ॥ १५ ॥

---

१. 'प्रगृह्यतामुपादीयताम्, बध्यतामिति यावत्' इति का.श्री. ।
२. 'प्रसादभङ्गः चित्तप्रसन्नताभङ्गः, दुःखमिति यावत्' इति का.श्री. ।
३. '–तवान् हरीन्द्रः'
४. 'दोषेषु दोषेष्वेव, न तु, स्वल्पेष्वपि गुणेषु' इति वि.भू. ।
५. 'प्रतिजृम्भितेषु' । 'प्रविजृम्भितेषु अभिवृद्धेषु सत्सु । फलोन्मुखेषु सत्स्विति' इति का.श्री ।

(भा.दी.) दोषेष्विति । तत्र रावणे दोषा भगवद्द्वेषाद्यास्तेषु प्रविजृम्भितेषु विराजितेषु सत्सु, देवः श्रीरामः पुरस्य द्वाराणि न्यरुणत् निवारयामास । रुधिर् आवरणे लङ् । आयासः बहिर्निःसरणाभावनिमित्तकप्रयासः स च निश्वासस्तन्निमित्तकदीर्घश्वासः स च तयोः परं तात्पर्यं यस्य तथा पर्याकुलं परितः सम्भ्रान्तं तत् पुरं मङ्क्षु क्षिप्रं शोच्यं बभूव ॥ १५ ॥

(सं.चं.) दोषेष्वितीन्द्रवज्रा । भगवद्द्वेषरूपेषु दोषेषु । प्रविजृम्भितेषु प्रकाममभिवृद्धेषु। चतुर्दिशं द्वाराणि । बहिर्वृत्तः श्वासो निश्वासः । आयासजनितो दीर्घश्च श्वासो निश्वासः । 'ನಿಟ್ಟುಸಿರು' इति भाषायाम् ॥१५॥

महाशिलाशैलनगायुधानामहो[1] महौघैः कपिकुञ्जराणाम् ।
आक्रम्यमाणा नगरी स्थिराऽपि महोदवाहैरिव[2] नौश्चकम्पे ॥ १६ ॥

(भा.दी.) महेति । शिलाः पाषाणास्ते च शैलाः पर्वतास्ते च नगा वृक्षास्ते च महान्तो ये शिलादयस्त एव आयुधानि येषां ते तथोक्तास्तेषां कपिकुञ्जराणां कपिश्रेष्ठानां महान्तो ये महोघास्तैः आक्रम्यमाणा निष्पीड्यमाना नगरी लङ्का स्थिराऽपि । महान्तो य उदवाहास्तैः नौरिव द्रोणीव चकम्पे । कपि कम्पने लिट् ॥ १६ ॥

(सं.चं.) महौघशब्दार्थः पूर्वमुक्तः । महान्तः ओघाः सेनाप्रवाहा वा । उदकस्य वाहाः उदवाहाः । महद्भिः उदवाहैः जलप्रवाहैः । 'पेषं-वास-वाहन-धिषु च' (अ.सू.६.३.५८) इत्यत्र वाहनपदेन तत्समानार्थको वाहशब्दोऽप्युपलक्षणीय इति ग्रन्थकृदाशयः । अत उदवाहैरित्याह । अथवा उदशब्दोऽयम् । नोदकशब्दः । उदकमुदं चेति त्रीण्यपि जलवचनानि । कैयटोऽप्याह–'उदकशब्दसमानार्थ उदशब्दो विद्यते । तथाच 'प्रसन्नोदम्'इत्यादावसञ्ज्ञायामप्युदशब्दः प्रयुज्यते' (६.३.५७) इति ॥ १६–७ ॥

[3]समादिदेशाथ दिशि प्रतीच्यामायोधनायेन्द्रजितं दशास्यः ।
प्राच्यां प्रहस्तं दिशि वज्रदम्ष्ट्रं याम्यां स्वयं चागमदुत्तरस्याम् ॥ १७ ॥

(भा.दी.) समिति । अथ दशास्यः प्रतीच्यां पश्चिमायां दिशि आयोधनं युद्धं तस्मै इन्द्रजितं समादिदेश । दिश अतिसर्जने लिट् । प्राच्यां पूर्वस्यां दिशि प्रहस्तं समादिदेश । याम्यां दिशि वज्रदम्ष्ट्रं आदिदेश । उत्तरस्यां दिशि च स्वयमेव अगमत् ॥ १७ ॥

---

१. **'नगायुधानां महामहौघैः'** इति वि.ती.पाठः ।

२. **'महोदवाहैः महामेघैः'** इति वि.भू.। का.श्री च–**'महोदवाहैः महामेघैः'** । **'महोदवातैः'** इति कचित् पाठः । तदा प्रळयोदककालस्थितवायुभिरित्यर्थः' इति । उभयमपि नातिस्वरसम् ।

३. **'दिदेश चाथो दिशि पश्चिमायामायो–'** इति का.श्री.पाठः स्यात् ।

प्रभुः प्रतीच्यां दिशि योधनाय प्रभुं हनूमन्तमथाऽदिदेश ।
प्राच्यां च नीलं दिशि वालिसूनुं याम्यां स्वयं चावसदुत्तरस्याम्[1] ॥ १८ ॥

(भा.दी.) प्रभुरिति । अथ प्रभुः (श्रीरामः) प्रतीच्यां दिशि योधनं युद्धं तस्मै प्रभुं हनूमन्तं आदिदेश । प्राच्यां दिशि च नीलं आदिदेश । याम्यां दिशि वालिनः सूनुस्तं अङ्गदं आदिदेश । उत्तरस्यां दिशि स्वयमेव श्रीराम एव अगमत् । अवसदिति क्वचित्पाठः ॥ १८ ॥

(सं.चं.) प्रभुः कः केन योधनीय इति निर्णेतुं समर्थो जगत्प्रभू रामः । प्रभुमिन्द्रजिन्निग्रहणे प्रभवन्तं हनूमन्तम् ॥ १८ ॥

नीलानुगामी विविदः समैन्दो गजादयश्चाङ्गदमन्वगच्छन् ।
सम्प्रेक्षको[2] वायुसुतं प्रमाथी तस्थुः परे सूर्य्यसुतस्य पार्श्वे ॥ १९ ॥

(भा.दी.) नीलेति । समैन्दः मैन्देन सहितः विविदः नीलमनुगन्तुं शीलमस्यास्तीति तथा सन् अन्वगच्छत् । गजः गजनामकः कपिः आदिर्येषां ते तथोक्ताः अङ्गदं अन्वगच्छन् । गमेर्लङ् । प्रमाथी प्रमाथिनामकः सम्प्रेक्षकः सन् हनुमदिन्द्रजितोर्युद्धावलोककः सन्, नतु युद्धे सहायकत्वेनेति भावः, वायुसुतं हनुमन्तं अन्वगच्छदित्यन्वयः । परे वानराः सूर्यसुतस्य सुग्रीवस्य पार्श्वं तस्मिन् तस्थुः, रक्षकत्वेनातिष्ठन् ॥ १९ ॥

(सं.चं.) प्रमाथी हनुमत्पराक्रमेण मुग्धः केवलं सम्प्रेक्षकः सन् । नत्वापदि संरक्षकः सन् । किमप्यकुर्वन् तूष्णीं प्रेक्षकः सम्प्रेक्षकः । अन्ये तु सहायकतया रक्षार्थमन्वगच्छन् ॥ १९ ॥

यूथान्विता वानरयूथनाथाः प्रत्येकमुच्चैर्बहुकोटिसङ्ख्याः ।
द्वारेष्ववर्त्तन्त सुषेणपूर्वाः पुरीं परीयुर्हरिचक्रकल्पाः ॥ २० ॥

(भा.दी.) यूथेति । प्रत्येकं यूथैः कपिसमूहैः अन्विताः, बह्व्यश्च ताः कोटयश्च तादृक् सङ्ख्या येषां ते तथा, वानराणां यानि यूथानि समूहास्तेषां नाथाः । 'सजातीयैः कुलं यूथं तिरश्चां पुन्नपुंसकम्' इत्यमरः । द्वाराणि चतुर्द्वाराणि तेषु उच्चैः सम्यक् युद्धार्थं अवर्तन्त । वृतु वर्तने लङ् । सुषेणः पूर्वो येषां ते तथा, हरेर्यच्चक्रं सुदर्शनं तस्य कल्पाः सदृशाः सन्तः पुरीं परीयुः परितोऽगच्छन् । इण् गतौ लिट् ॥ २० ॥

---

१. **'चागमदुत्तरस्याम्'**

२. **'सम्प्रेक्षकः अङ्गरक्षकः सन्'** इति वि.भू. । का.श्री. च ।

(सं.चं.) वानराणां यूथं यूथो वा । 'वृन्दे तिरश्चां यूथोऽस्त्री' इति यादवप्रकाशः । प्रत्येकं स्वस्वयूथान्विता बहुकोटिसङ्ख्या वानरयूथनाथाः । सर्वेऽप्युच्चैः स्थिताः, बलेन चोत्साहेन च । द्वारपैर्नीलादिभिः सह द्वारेष्व-वर्तन्त । सुषेणपूर्वाः पुरीं परितः परिवार्य तस्थुः । हरिचक्रकल्पाः सुदर्शनतुल्याः ॥ २० ॥

कोट्योऽथ षट्त्रिंशदतिप्रसिद्धा यूथाधिनाथा निजयूथयुक्ताः ।
सुग्रीवमारात् परिवार्य्य तस्थुः काकुत्स्थयोः पश्चिमतो निषण्णम् ॥ २१ ॥

(भा.दी.) कोट्य इति । अथ षडधिका त्रिंशत् षट्त्रिंशत् कोट्यः कोटिसङ्ख्याकाः अतिप्रसिद्धाः यूथाधिनाथाः, निजानि स्वकीयानि यूथानि स्वजातिसमूहाः, तैर्युक्ताः सन्तः, काकुत्स्थयोः ककुत्स्थगोत्रभवयोः श्रीरामलक्ष्मणयोः पश्चिमतः पृष्ठभागे निषण्णं सुग्रीवम्, आरात् समीपं परिवार्य तस्थुः ॥ २१ ॥

(सं.चं.) कोट्योऽथ षट्त्रिंशदितीन्त्रवज्रा । 'वानराणां तु षट्त्रिंशत्कोट्यः प्रख्यातयूथपाः । निपीड्योपनिविष्टाश्च सुग्रीवो यत्र वानरः' (४१.४२) इति च । आरात् सविधे ॥ २१ ॥

प्राकारमध्यारुरुहुः कपीन्द्राः प्रासादमन्येऽथ परे गृहाणि ।
अन्येऽवकाशानवलोक्य पूर्णानाकाशमापूरितवन्त आशु ॥ २२ ॥

(भा.दी.) प्राकारमिति । अथ कपीन्द्राः प्राकार आवरणभित्तिस्तं अध्यारुरुहुः । रुह बीजजन्मनि प्रादुर्भावे च लिट् । अन्ये प्रासादो हर्म्यं तमारुरुहुः । अथ परे गृहाणि आरुरुहुः । अन्ये अवकाशान् भूप्रदेशान् वानरैः पूर्णान् अवलोक्य आशु आकाशस्तं आपूरितवन्तः, आकाशमार्गे इतस्ततः प्लवनानि चक्रुरित्यर्थः ॥ २२ ॥

(सं.चं.) अन्ये भूमेरवकाशान् । इयमपीन्द्रवज्रा ॥ २२ ॥

पुनस्त्रिकूटाद्रितटेषु पूर्णाः सुवेलशैलं परिपूरयन्तः ।
व्याप्ता महाब्धेश्च तटे कपीन्द्रा निशाचराणां विदधुर्विषादम् ॥ २३ ॥

(भा.दी.) पुनरिति । त्रिकूटाख्यो योऽद्रिस्तस्य तटानि नितम्बप्रदेशास्तेषु पूर्णाः, सुवेलाख्यो यः शैलस्तं परिपूरयन्तः, महाब्धेः तटं तीरं तस्मिन् व्याप्ताः, कपीन्द्राः निशाचराणां विषादो भयं तं विदधुः चक्रुः ॥२३॥

(सं.चं.) विषाद उत्साहविरहः ॥ २३–४ ॥

केचिद् गजानां शततुल्यवीर्य्याः सहस्रवीर्य्या अपि लक्षवीर्य्याः ।
समुद्रवीर्य्याश्च महौघवीर्य्याः केचिन्महान्तोऽपरिमेयवीर्य्याः ॥ २४ ॥

(भा.दी.) केचिदिति । केचित् कपयः गजानां शतेन तुल्यं वीर्यं बलं येषां ते तथा, 'वीर्यं बले प्रभावे च' इत्यमरः, केचिद् गजानां सहस्रेण तुल्यं वीर्यं येषां तथा, केचित् गजानां लक्षेण तुल्यं वीर्यं येषां ते तथा, केचिच्च गजानां समुद्राख्यसङ्ख्याविशेषेण तुल्यं वीर्यं येषां ते तथा, केचित् गजानां महौघेन तुल्यं वीर्यं येषां ते तथा । केचित् महान्तः हनुमदादयः, अपरिमेयं अतर्क्यं वीर्यं येषां ते तथा ॥ २४ ॥

ऋक्षाश्च रूक्षा बहुकोटयो गोलाङ्गूलकोट्यश्च कटुस्वभावाः ।
पृथक्पृथक् पर्वतसन्निभाङ्गा भङ्गं निनीषन्ति पुरा विपक्षान्[१] ॥ २५ ॥

(भा.दी.) ऋक्षा इति । रूक्षाः क्रूराः, बह्वश्च ताः कोटयश्च बहुकोटयः, बहुकोटिसङ्ख्याका इत्यर्थः, पर्वतस्य सन्निभानि सदृशानि अङ्गानि येषां ते तथोक्ताः, ऋक्षाः जाम्बवदादयः, कटुः तीक्ष्णः स्वभावो यासां तास्त-थोक्ताः, गोलाङ्गूलानां नीलवर्णमुखकपीनां कोट्यश्च, 'गोलाङ्गूल इति प्रोक्तो कृष्णवक्त्रस्तु मर्कटः' इति हलः, पृथक्पृथक् विपक्षान् शत्रून् भङ्गो नाशस्तं निनीषन्ति पुरा प्रापयितुमैच्छन् । इषु इच्छायां लट् ॥ २५ ॥

(सं.चं.) कोटिः कोटीतीदन्तमीदन्तं च कोटिशब्दं पठन्ति । 'गोलाङ्गूलोऽसिताननः' । गोपुच्छसदृशगुच्छान्तपुच्छः कपिप्रभेदः । निनीषन्ति पुरा अनिनीषन् ॥ २५ ॥

विश्वेशितुः कार्म्मुकबाणपाणेरेकत्र पार्श्वेऽवरजो रराज[२] ।
अन्यत्र चित्राङ्गदवान् गदावान् विभीषणः शत्रुविभीषणोऽभूत् ॥ २६ ॥

(भा.दी.) विश्वेति । कार्मुकं च बाणश्च तौ पाण्योर्यस्य स तथा तस्य, विश्वेशितुः जगदीश्वरस्य श्रीरामस्य एकत्र पार्श्वं पक्षस्तस्मिन्, अवरजः लक्ष्मणः रराज । राजृ दीप्तौ लिट् । अन्यत्र चित्रं यदङ्गदं केयूरं तदस्या-स्तीति तथोक्तः, गदा अस्यास्तीति तथा, शत्रून् विभीषयतीति शत्रुविभीषणः विभीषणः अभूत् ॥ २६ ॥

(सं.चं.) सुग्रीवः रामलक्ष्मणयोः पश्चिमतः पृष्ठतोऽभूदिति पूर्वमेवोक्तम् ॥ २६ ॥

---

१. **'पुरा परांश्च'** इति, **'पुरा परांस्ते'** इति च ।

२. **'पार्श्वे रविजो रराज'**

दन्तान् नखानप्यशनिप्रकाशान् प्रकाशयन्तः प्रतिघारुणाक्षाः ।
तुच्छेतरं [1]पुच्छमथोत्क्षिपन्तस्तिर्य्यङ् निरैक्षन्त रिपून् कपीन्द्राः ॥ २७ ॥

(भा.दी.) दन्तानिति । अथ कपीन्द्राः, अशनेः वज्रस्य प्रकाश इव प्रकाशो येषां ते तथा तान् दन्तान् नखानपि प्रकाशयन्तः सन्तः, प्रतिघेन कोपेन अरुणानि अक्षीणि येषां ते तथा सन्तः, 'कोपः क्रोधामर्षरोषप्रतिघाः' इत्यमरः, तुच्छात् सूक्ष्मादितरं तुच्छेतरं तत्, अतिस्थूलमित्यर्थः, पुच्छं उत्क्षिपन्तः सन्तः, ऊर्ध्वं क्षिपन्तः सन्तः, रिपून् तिर्यक् यथा भवति तथा निरैक्षन्त । ईक्षतेर्लङ् ॥ २७ ॥

(सं.चं.) अशनिवत् प्रकाशन्ते प्रतीयन्त इत्यशनिप्रकाशा अशनितुल्या वज्रायिताः । प्रतिघेन रोषेण रक्तनेत्रान्, तुच्छेतरं पुष्कळं पुच्छं लाङ्गूलम् । 'प्रतिघः प्रतिघाते च रोषे च प्रतिघो मतः' इति विश्वप्रकाशः । तिर्यक् साचि निरैक्षन्त । राक्षसेषु वक्रां दृष्टिं पातयामासुः ॥ २७ ॥

यन्त्राण्यकृन्तन् परिखा[2] अपूरयन् वप्राण्यभिन्दंश्च वनान्यखण्डयन् ।
प्रासादमालाः सकला असादयन् युद्धोद्धताः कोसलनाथकिङ्कराः ॥ २८ ॥

(भा.दी.) यन्त्राणीति । युद्धे उद्धताः उन्नद्धाः, कोसलानां नाथस्य श्रीरामस्य किङ्कराः यन्त्राणि कूटयुद्धसाधनानि तानि अकृन्तन् । कृती च्छेदने लङ् । परिखाः, परिघान् इति पाठान्तरम्, परितः खात-प्रदेशान् तृणगुल्मादिना अपूरयन् । पॄ पालनपूरणयोर्लङ् । वप्राणि प्राकारांश्च अभिन्दन् । भिदिर् विदारणे लङ् । वनानि अखण्डयन् । खडि भेदे लङ् । सकलाः प्रासादानां हर्म्याणां मालाः पङ्क्तीः असादयन् व्यनाशयन् । षद्लृ विशरणगत्यवसादनेषु लङ् ॥ २८ ॥

(सं.चं.) अथ द्वाभ्यां वंशस्थेन्द्रवंशाभ्यामुपसञ्जिहीर्षति । तत्र प्रथमेन्द्रवंशा । द्वितीया वंशस्थेन्द्रवंशाभ्यामुप-जातिः । स्यादिन्द्रवंशस्थेति नामकरणम् । यन्त्रशैलपरिखादिभिर्दुष्प्रापं दुर्गमाहुः । तत्र प्रवेशवारकाणि शतघ्न्यादीनि यन्त्राणि । पुराद् बहिर्जलावृतिः परितः खाता परिखा । वप्राः शैलसानवः कृतकप्राकाराश्च । कपीनां दुर्गभेदनप्रकारमाह– यन्त्राण्यभिन्दन् । परिखा मृत्पाषाणादिभिरपूरयन् । असादयन् अवासादयन् व्यशृणन् ॥ २८ ॥

---

१. 'पुच्छमथो क्षिपन्तः' २. 'परिघान्'

अन्योन्यतः पाणिपुटावपीडयन्नताडयन् स्वोरुमथ प्लवङ्गमाः ।
साटोपमास्फोट्य गभीरनिस्वना उच्चैरुदारामिति[1] गामुदाहरन् ॥ २९ ॥

(भा.दी.) अन्येति । अथ प्लवङ्गमाः अन्योन्यतः परस्परं पाणिपुटौ पाणितळे अपीडयन् । क्रोधवशात् सङ्कट्टयामासुः । पीडृ बाधने लङ् । स्वस्य यदूरुस्तं अताडयन् । तड आघाते लङ् । आटोपेन सम्भ्रमेण सहितं यथा भवति तथा साटोपम्, आस्फोट्य द्विगुणीकृतहस्तप्रहारं कृत्वा, गभीरः निस्वनो येषां ते तथा सन्तः, उदारां उत्कृष्टां गां वाचं उच्चैः इति उदाहरन् प्रोचुः ॥ २९ ॥

(सं.चं.) पाणिपुटावपीडयन् । पाणिपीडनं–**'ಕೈಹಿಸುಕು'** इति भाषायाम् । अन्योन्यं हस्तलाघवं ददुरिति वा । ऊरुताडनं– **'ತೊಡೆ ತಟ್ಟು'** इति भाषायाम् । भुजावास्फोट्य । **'ತೋಳು ತಟ್ಟು'** इति भाषायाम् । युद्धाह्वाने वीराणां व्यापारविशेषा एते ॥ २९ ॥

जयति जगति रामो रावणक्रोष्टुसिंहो
जयति ननु हनूमान् रामपादाब्जभृङ्गः ।
जयति जगदधीशस्यानुजो लक्ष्मणोऽयं
जयति रवितनूजः सार्द्धमृद्धैः स्वसैन्यैः[2] ॥ ३० ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
युद्धकाण्डे चतुर्त्थः सर्ग्गः ॥

—०—

(भा.दी.) जयतीति । रावण एव क्रोष्टा जम्बुकस्तस्य सिंहः श्रीरामः जगति जयति । जि जये लट् । श्रीरामस्य ये पादाब्जे तयोः भृङ्गः भ्रमरः हनूमान् जयति ननु । जगदधीशस्य अनुजः अयं लक्ष्मणः जयति । रवेर्या तनूः शरीरं तस्या जात इति रवितनूजः सुग्रीवः ऋद्धैः स्वस्य सैन्यानि तैः सार्धं जयति ॥ ३० ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां
युद्धकाण्डे चतुर्थः सर्गः ॥

—०—

१. **'–रुदारामपि गा–'** । **'उदारामर्थपुष्टिमतीम्'** इति वि.भू. ।

२. **'–मृद्धैश्च सैन्यैः'**

(सं.चं.) अथ जयगीतमालिन्या मालिन्योपसंहरति– जयति जगति रामः । रावणाख्यस्य क्रोष्टुः क्रोष्टोर्वा सिंह इवायम् । 'तृज्वत् क्रोष्टुः'(अ.सू. ७.१.९५), 'विभाषा तृतीयादिष्वचि' (९७) इति च हि स्मरति पाणिनिः । 'सृगालो भरुजः क्रोष्टा श्वभीरुर्मृगमत्तकः' इति यादवप्रकाशः । नन्विति सम्बोधने । नन्वित्यवधारणे । नन्वित्यैतिह्ये । इति ह श्रूयते हनुमतो जयगाथेति । नन्वित्यनुमते । हनुमान् जयतीति सर्वेषामविप्रतिपन्नमनुमतमिति । जयो नामात्र शत्रुविजय उत्कर्षश्च । यथायोग्यं चोत्कर्षः । 'ननु प्रश्नेऽप्यनुनयेऽनुज्ञानेऽप्यवधारणे । आमन्त्रणे चापि ननु' इति विश्वप्रकाशः । ऋद्धैः बलसमृद्धैः ॥ ३० ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां
युद्धकाण्डे चतुर्थसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– २४०७+३०=२४३७]

पञ्चमः सर्गः

कोपाटोपं कपीन्द्राणां वीर्य्यौदार्य्यं च शार्ङ्गिणः[1] ।
दृष्ट्वा मुहूर्त्तं दध्यौ स रावणो लोकरावणः ॥ १ ॥

(भा.दी.) श्रीरामं तत्सैन्यं च दृष्ट्वा रावणेन किमकारीत्यतो ब्रवीति– **कोपे**ति । लोकान् जनान् रावयति आक्रोशयतीति लोकरावणः रावणः, कपीन्द्राणां कोपस्य आटोपः सम्भ्रमस्तं दृष्ट्वा, शार्ङ्गिणः श्रीरामस्य वीर्यस्य औदार्यं महत्त्वं तच्च दृष्ट्वा, मुहूर्तो मुहूर्तकालस्तम्, मुहूर्तकाल इत्यर्थः, दध्यौ कर्तव्यमूढतया व्यचिन्तयत् । ध्यै चिन्तायां लिट् ॥ १ ॥

(सं.चं.) वीर्यस्यौदार्यं महत्ताम् । कथं प्रतिकर्तव्यमिति प्रश्नस्यालब्धोत्तरः मुहूर्तं दध्यौ चिन्तयामास भाविकार्यम् ॥ १–३ ॥

धैर्य्यमालम्ब्य सङ्क्रुद्ध[2] उत्तिष्ठन् हेमपीठतः ।
प्रबलं राक्षसबलं नगरान्निरयापयत्[3] ॥ २ ॥

(भा.दी.) **धैर्यमि**ति । सः, धैर्यं विपदि धीरत्वम्, तत् आलम्ब्य, सङ्क्रुद्धः सन्, हेममयं यत्पीठं तस्मादिति ततः उत्तिष्ठन् सन्, प्रकृष्टं बलं यस्य तत्तथा तत्, राक्षसानां बलं सैन्यं तत्, नगरात् युद्धार्थं निरयापयत् निःसारयामास ॥ २ ॥

नानायुधधरा वीरा राक्षसा रणकोविदाः ।
प्रत्येकं प्रत्यगच्छंस्ते कपीन् कम्पितपादपान् ॥ ३ ॥

---

१. **'–दार्यं च सर्वशः'** । **'सर्वशः सर्वेषां कपीन्द्राणां कोपाटोपं क्रोधाधिक्यम्, वीर्यौदार्यं पराक्रमाधिक्यं च दृष्ट्वा'** इति का.श्री. ।

२. **'धैर्यमाश्रित्य स क्रुद्धः'**

३. **'निरयातयत्'**

(भा.दी.) नानेति । नानाविधानि यान्यायुधानि तानि धारयन्तीति तथोक्ताः, वीराः रणे कोविदाः विचक्षणाः ते राक्षसाः, कम्पिताः उत्पाटिताः पादपाः यैस्ते तथोक्तास्तान् कपीन् प्रत्येकं यथा भवति तथा प्रत्यगच्छन् । गम्लृ गतौ लङ् ॥ ३ ॥

रामरावणभृत्यानां द्वन्द्वयुद्धमभून्मिथः ।
तीव्राणां पुण्यपापानां यथैव[1] पुरसन्निधौ ॥ ४ ॥

(भा.दी.) रामेति । रामश्च रावणश्च तयोर्भृत्यास्तेषां द्वन्द्वं च तत् युद्धं च तत् । तीव्राणां पुण्यानि च पापानि च तेषां पुरस्य शरीरस्य सन्निधिस्तस्मिन् । 'अङ्गं वपुः पुरम्' इति हलः । यथा तद्वदेव मिथः पुरसन्निधौ लङ्कापुरसन्निधौ अभूत् ॥ ४ ॥

(सं.चं.) द्वयोर्द्वयोर्युद्धं द्वन्द्वयुद्धम् । यथा पुण्यपापानां द्वन्द्वयुद्धं पुरसन्निधौ । पुरे शरीरे जीवस्य सन्निधौ । जीवसन्निहिते पुरे । अन्यत्र लङ्कापुरसमीपे । 'पुरं पुरि शरीरे च' इति विश्वप्रकाशः । 'रक्षसां वानराणां च द्वन्द्वयुद्धमवर्तत' (४३.५) इति च ॥ ४ ॥

मुख्यप्राणसुतो मुख्यो युयोधेन्द्रजिता भृशम् ।
पराद्रवत् तद्बलज्ञो हस्तप्राप्तइवेन्द्रजित् ॥ ५ ॥

(भा.दी.) मुख्येति । मुख्यः सर्वजीवश्रेष्ठः मुख्यप्राणस्य मुख्यवायोः सुतः हनुमान् इन्द्रजिता भृशं यथा भवति तथा युयोध । युध सम्प्रहारे लिट् । तस्य हनुमतो यद्बलं तज्जानातीति तथोक्तः इन्द्रजित् हस्तं प्राप्तः हस्तप्राप्तः इव पराद्रवत् । द्रु गतौ लङ् ॥ ५ ॥

(सं.चं.) इन्द्रजिदङ्गदेन सार्धमयुध्यतेति रामायणे । तद् युद्धस्य पूर्वार्धम् । तस्योत्तरार्धमाह–मुख्यप्राणसुत इति । 'विद्रावितो हनुमतेन्द्रजिदाशु हस्तं तस्य प्रपन्नं इव' (८.२१) इति हि निर्णये । हस्तप्राप्तइव । यदि न पराद्रविष्यत् तदा हस्तप्राप्त एवाभविष्यत् ॥ ५ ॥

सम्पातिने प्रजङ्घोऽथ बाणांस्त्रीन् मुक्तवान् रणे ।
आश्वेव सोऽश्वकर्णेन प्रजङ्घं निजघान च ॥ ६ ॥

---

१. **'–पापानां तथैव'** । **'पुण्यपापाभिमानिनाम्'** इति का.श्री. ।

(भा.दी.) समिति । अथ प्रजङ्घः प्रजङ्घनामकराक्षसः, सम्पातिने सम्पातिनाम्ने वानराय, रणो युद्धं तस्मिन् त्रीन् बाणान् मुक्तवान् । सः सम्पातिनामको वानरः, अश्वकर्णो अश्वकर्णाख्यवृक्षविशेषः, तेन प्रजङ्घं राक्षसं आशवेव निजघान (च) ॥ ६ ॥

(सं.चं.) सम्पातिने प्रजङ्घोऽथ । 'सम्पाती तु त्रिभिर्बाणैः प्रजङ्घेन समाहतः । निजघानाश्वकर्णेन प्रजङ्घं रणमूर्धनि' (४३.२०) इति च । अश्वकर्णः सर्जः । 'ಮತ್ತಿ' इति भाषायाम् ॥ ६ ॥

मुमोच लोहजां शक्तिं जम्बुमाली[१] हनूमते ।
हनूमत्तळचूर्णाङ्गो मुमोचाऽथ शरीरजाम् ॥ ७ ॥

(भा.दी.) मुमोचेति । जम्बुमाली प्रहस्तपुत्रातिरिक्तो जम्बुमाल्याख्यराक्षसः, लोहाज्जाता लोहजा ताम्, लोहनिर्मितामित्यर्थः, शक्तिं हनूमते मुमोच । मुच्लृ मोक्षणे लिट् । अथ सः हनुमतः यत्तळं हस्ततळं तेन चूर्णं अङ्गं यस्य स तथा सन्, शरीरजां शक्तिं सामर्थ्यं मुमोच, ममारेत्यर्थः ॥ ७ ॥

(सं.चं.) प्रहस्ततनयो जम्बुमाली पूर्वमेवाशोकवनभङ्गे हनुमता हतः । अथ प्रहस्ततनयादन्यो जम्बुमाली लोहजातां शक्तिं मुमोच । ततो हनूमता चूर्णितः शरीरजातामपि शक्तिं मुमोच । मृत इत्यर्थः ॥ ७ ॥

नळः प्रतपनस्योग्रः पातयामास चक्षुषी ।
गजोऽद्रिशृङ्गमुष्टिभ्यां [२]तापनं निरपातयत् ॥ ८ ॥

(भा.दी.) नळ इति । उग्रः नळः, प्रतपनः प्रतपनाख्यराक्षसस्तस्य चक्षुषी पातयामास । पत्लृ पतने लिट् । गजः गजाख्यकपिः अद्रिशृङ्गं च मुष्टिश्च ताभ्यां तापनिं तापन्याख्यम्, तापनमिति क्वचित् पाठः, राक्षसं निरपातयत् । पत्लृ पतने लङ् ॥ ८ ॥

(सं.चं.) 'नळः प्रतपनस्याऽशु पातयामास चक्षुषी' (४३.२३) इति च । 'तापनेन गजः सार्धं राक्षसेन महाबलः' (४३.९) इति च तस्य निष्पातनं सम्प्रति रामायणे न पठ्यते । ततः पण्डिताचार्यः वक्तव्यशेषं पूरयामास । 'तपनेन' इति साम्प्रतो रामायणपाठः ॥ ८ ॥

---

१. **'जम्बुमाली प्रहस्तपुत्रः'** इति का.श्री. व्याख्यानं व्याहतमित्युपेक्ष्यम् । तस्य पूर्वमेव हनुमता हतत्वात् । तथाहि सुन्दरकाण्डे पण्डिताचार्यवचनम्– **'तेनैव वीरः परिघेण पापं सञ्चूर्णयामास सयानमेनम्'** (६.७) **इति । 'स हतस्तरसा तेन जम्बुमाली महारथः । पपात निहतो भूमौ चूर्णिताङ्ग इव द्रुमः'** (सुं.का.४४.१८) इति च रामायणे । **'प्रहस्तपुत्रादन्यः'** इति वक्तव्ये **'प्रहस्तपुत्रः'** इति लिपिकृत्प्रमादो वा ।

२. **'तापिनिम्'** इति.वि.ती.पाठः ।

मित्रघ्नेन शरैर्विद्धस्तं जघान विभीषणः ।
शरवर्षं विरूपाक्षं शरेणैव च लक्ष्मणः ॥ ९ ॥

(भा.दी.) मित्रेति । मित्रघ्नेन राक्षसेन शरैः विद्धः विभीषणः तं मित्रघ्नं जघान । हन्तेर्लिट् । लक्ष्मणश्च शराणां वर्षं यस्य स तथा तं विरूपाक्षं राक्षसं शरेणैव जघानेत्यन्वयः ॥ ९ ॥

(सं.चं.) 'मित्रघ्नेन विभीषणः' (४३.८) समयुध्यतेति रामायणे पठ्यते । युद्धफलं तत्रानुदितं ग्रन्थकृदाह– मित्रघ्नेन । साम्प्रते रामायणपाठे मित्रघ्नः शत्रुघ्नो बभूव । एकेनैव शरेण । 'निजघान विरूपाक्षं शरेणैकेन लक्ष्मणः' (४३.२६) इति च ॥ ९ ॥

प्रहस्तं सप्तपर्ण्णेन सुग्रीवो न्यहनद् बली ।
मैन्दस्य मुष्टिनिष्पिष्टो वज्रमुष्टिरुतापतत् ॥ १० ॥

(भा.दी.) प्रहस्तमिति । बलमस्यास्तीति बली सुग्रीवः सप्तपर्णेन सप्तपर्णाख्यवृक्षेण, 'सप्तपर्णो विशालत्वक्' इत्यमरः, प्रहस्तं न्यहनत् तताड । हन्तेर्लङ् । (उत) वज्रमुष्टिः राक्षसः मैन्दस्य वानरस्य मुष्टिभिः निष्पिष्टः सञ्चूर्णितः सन् अपतत् ममार । पत्‌ऌ पतने लङ् ॥ १० ॥

(सं.चं.) प्रहस्तं सप्तपर्णेन । सम्प्रति रामायणे प्रहस्तस्य स्थाने प्रघसः पठ्यते–'ग्रसन्तमिव सैन्यानि प्रघसं वानराधिपः । सुग्रीवः सप्तपर्णेन निर्बिभेद जघान च' (४३.२५) इति ।पूर्वत्र च–'वानरेन्द्रस्तु सुग्रीवः प्रघसेन समागतः' (४३.१०) इति । दुःशकमिदं सम्प्रति निर्णेतुम्–किं रामायणे प्रघसस्थाने पठनीयः, उत सङ्ग्रहरामायणे प्रहस्तस्थाने प्रघसः पठनीयः । अथापि सर्वकोशानामैककण्ठ्यात् 'प्रहस्तं सप्तपर्णेन' इति सङ्ग्रहरामायणपाठमेव समादृत्य व्याख्यास्यामः । सप्तपर्णो विषमच्छदः । 'ഏഴിലംപാല' इति भाषायाम् । 'न्यहनत्' इति प्रयुञ्जानः कविश्छान्दसो बभूव । न्यहनत् नितरां पीडयामास । न मारयामास । स किल नीलेन मारित इति वक्ष्यते । अन्योऽन्यं प्रहस्त इति वा वक्तव्यम् । मैन्दस्येति । 'वज्रमुष्टिस्तु मैन्देन मुष्टिना निहतो रणे' (४३.२८) इति च ॥ १० ॥

निकुम्भेन शरैर्विद्धो नीलो नीलाञ्जनप्रभः ।
तस्यैव रथचक्रेण निकुम्भस्याहरच्छिरः ॥ ११ ॥

(भा.दी.) निकुम्भेति । निकुम्भेन राक्षसेन शरैर्विद्धः, नीलं यदञ्जनं तद्वत्प्रभा यस्य स तथा नीलः वानरः तस्य निकुम्भस्य रथचक्रं रथाङ्गं तेन (एव) निकुम्भस्य कुम्भकर्णपुत्रभिन्नस्य निकुम्भाख्यराक्षसस्य शिरः अहरत् । हरतेर्लङ् ॥ ११ ॥

(सं.चं.) निकुम्भस्य ससारथेरहरच्छिरः । अन्योऽयं कुम्भकर्णतनयात् स तु हनुमता हत इति वक्ष्यते । 'शिरश्चिच्छेद समरे निकुम्भस्य च सारथेः' (४३.३१) इति । निकुम्भस्य च सरथेश्च शिरश्चिच्छेद । 'निकुम्भस्य ससारथेः' इति प्राचीनपाठः स्यात् ॥ ११ ॥

शरानशनिसङ्काशान् किरन्तमशनिप्रभम् ।
विदग्धो विविदस्तत्र सालेन न्यहनद् बली[1] ॥ १२ ॥

(भा.दी.) शरानेति । अशनेर्वज्रस्य सङ्काशान् समानान्, 'निभसङ्काशनीकाशाः' इत्यमरः, शरान् किरन्तं वर्षन्तम्, अशनेः प्रभेव प्रभा यस्य स तथा तं अशनिप्रभाख्यराक्षसं तत्र युद्धे विदग्धः कुशलः बली विविदः सालो सर्जवृक्षस्तेन, 'सालं सर्ज च सूरयः' इति हलः, न्यहनत् ॥ १२ ॥

(सं.चं.) सालेन वृक्षेण न्यहनत् । 'सालेन सरथं साश्वं निजघानाशनिप्रभम्' (४३.३४) इति च ॥१२॥

सुषेणोऽथ रथं भित्त्वा विद्युन्मालिन आहवे[2] ।
गदया ताडितस्तेन शिलया तममारयत् ॥ १३ ॥

(भा.दी.) सुषेण इति । अथ सुषेणः वानरः, आहवो युद्धं तस्मिन्, विद्युन्मालिनः रथस्तं भित्त्वा, तेन गदया ताडितः सन्, शिलया तं विद्युन्मालिनं अमारयत् । मृङ् प्राणत्यागे लङ् ॥ १३ ॥

(सं.चं.) तेन विद्युन्मालिना गदया ताडितः सुषेणः विद्युन्मालिनः रथं भित्त्वा शिलया तममारयत् । शिला-प्रहाराभिहतो विद्युन्माली निशाचरः । निष्पिष्टहृदयो भूमौ गतासुर्निपपात ह' (४३.४१)इति च ॥ १३ ॥

अन्यैश्च वानरैर्वीरै राक्षसा विविधायुधाः ।
नखदन्तायुधैर्भग्नाः शिलासालायुधैरपि ॥ १४ ॥

---

१. 'न्यहनद् रणे'　　२. 'विद्युन्मालिनमाहवे'

(भा.दी.) अन्यैरिति । नखाश्च दन्ताश्च त एवायुधानि येषां ते तथा तैः वानरैः, शिलाश्च साला वृक्षास्ते च, 'अनोकहः कुटः सालः' इत्यमरः, त एव आयुधानि येषां ते तथा तैः, वीरैः अन्यैः वानरैरपि विविधानि आयुधानि येषां ते तथा राक्षसा भग्नाः पराजिताः, अपतन्निति शेषः ॥ १४ ॥

(सं.चं.) नखदन्तायुधैः शिलावृक्षायुधैरपि वानरैः ॥ १४ ॥

अथ रात्रिचरैस्तेषां रात्रियुद्धमवर्त्तत ।
यत्र[1] सुस्रुवुरत्युष्णा बहवः शोणितापगाः ॥ १५ ॥

(भा.दी.) अथेति । (अथ) तेषां वानराणां रात्रिचरैः राक्षसैः सह रात्रियुद्धं अवर्तत । वृतु वर्तने लङ् । यत्र युद्धे अत्युष्णा बहवः । 'वोतो गुणवचनात्' (अ.सू.४.१.४४) इति वचनात् ङीबभावः । शोणितापगाः रक्तनद्यः सुस्रुवुः । स्रु गतौ लिट् ॥ १५ ॥

(सं.चं.) रात्रियुद्धमवर्तत । 'सम्प्रवृत्तं निशायुद्धं तदा वानररक्षसाम्' (४४.२) इति, 'रुधिरौघा महाघोरा नद्यस्तत्र विसुस्रुवुः' (४४.११) इति च ॥ १५ ॥

चापहस्त प्रहस्त त्वं स्वस्ति द्रावय तान् कपीन् ।
मानवौ सूदयेत्यूचे प्रहस्तं तं[2] दशाननः ॥ १६ ॥

(भा.दी.) चापेति । चापो हस्ते यस्य स तथा तत्सम्बुद्धिः, हे प्रहस्त, त्वं तान् कपीन् स्वस्ति क्षेमेण द्रावय । द्रु गतौ लोट् । मानवौ मनुष्यौ श्रीरामलक्ष्मणौ च सूदय विनाशय । षूद क्षरणे लोट् । इति प्रहस्तं प्रति दशाननः ऊचे ॥ १६ ॥

(सं.चं.) रामायणे व्यत्यस्य कथिता युद्धवार्ता निर्णयानुसारेण क्रमश आह- चापहस्तेत्यादिना । स्वस्ति तेऽस्त्विति शुभाशंसनम् । मानवौ रामलक्ष्मणौ ॥ १६ ॥

रामेण युद्धं विपदे सन्धानं सम्पदे प्रभो ।
आस्तां हि मन्त्रो योत्स्याम[3] इति मन्त्री तमब्रवीत् ॥ १७ ॥

१. **'यत्राऽसुस्रुवु–'**
२. **'प्रहस्तं स दशा–'** । **'प्रहस्तं च'** इति वि.ती.पाठः स्यात् ।
३. **'योत्स्यामि'**

(भा.दी.) **रामेणे**ति । हे प्रभो रावण, श्रीरामेण सह युद्धं विपदे विपत्तये स्यात् । श्रीरामेण सन्धानं सम्पदे सम्पत्तये स्यात्, इति मन्दमतीनां मन्त्रः भाषणं आस्तां तिष्ठतु । वयं योत्स्यामः । युध सम्प्रहारे लृट् । रावणस्य मन्त्री प्रहस्तः इति तं रावणं अब्रवीत् ॥ १७ ॥

(सं.चं.) रामेण युद्धं विपदे इति सर्वेषां मम च मन्त्रः । आस्तां तावदयं मन्त्रः । यद् भवति तद् भवतु । वयं तु त्वत्प्रियार्थं योत्स्याम इति मन्त्री प्रहस्तोऽब्रवीत् 'प्रदानेन तु सीतायाः श्रेयो व्यवसितं तथा । अप्रदाने पुनर्युद्धं दृष्टमेव तथैव नः' (५७.१४) इति, 'नहि मे जीवितं रक्ष्यं पुत्रदारधनानि च । त्वं पश्य मां जुहूषन्तं त्वदर्थे जीवितं युधि' (१६) इति च ॥ १७ ॥

प्रहस्तो रथमारुह्य प्राच्यद्वारेण निर्य्ययौ ।
उत्पातान् मृतिदान्[१] पश्यन् वृतो विपुलसेनया ॥ १८ ॥

(भा.दी.) प्रहस्त इति । प्रहस्तः रथं आरुँह्य, प्राच्याः पूर्वस्याः दिशः सम्बन्धि प्राच्यं तच्च तत् द्वारं द्वास्तेन, मृत्युदान् उत्पातान् पश्यन् सन्, विपुलसेनया बहळसेनया वृतः सन् निर्ययौ ॥ १८ ॥

(सं.चं.) प्राच्यद्वारेण । 'व्यूढेनैव सुघोरेण पूर्वद्वारात् स निर्ययौ' (५७.३१) इति च । उत्पातान् मृतिदानिति । 'अन्तरिक्षात् पपातोल्का वायुश्च परुषो ववौ' (५७.३५) इत्यादि च ॥ १८ ॥

युद्धं प्रवृद्धमत्राऽसीद् वानराणां नराशिभिः ।
बलिष्ठं[२] हतभूयिष्ठं वानरै[३] रक्षसां बलम् ॥ १९ ॥

(भा.दी.) **युद्धमि**ति । अत्र पूर्वद्वारे वानराणां नराशिभिः राक्षसैः सह प्रवृद्धं युद्धं आसीत् । बलिभिः वानरैः रक्षसां बलिष्ठं बलं सैन्यं हतं भूयिष्ठं यस्मात् तथा आसीत् ॥ १९ ॥

(सं.चं.) बलिष्ठमपि रक्षसां बलं हतभूयिष्ठमासीत् ॥ १९ ॥

अद्रावयन् कपीन् क्रूराः[४] प्रहस्तसचिवास्तदा ।
अभ्यधावन्नतिक्रुद्धा विविदाद्याः क्षणेन तान् ॥ २० ॥

---

१. **'मृत्युदान्'** इति वि.ती.पाठः । **'मृतिदान् मरणसूचकान् उत्पातान् अपशकुनानि पश्यन्नपिताननादृत्य'** इति का.श्री.।

२. **'वरिष्ठम्'** ३. **'–भूयिष्ठं बलिभी रक्षसां बलम्'** इति वि.ती.पाठः स्यात् । ४. **'कपीन् वीराः'**

(भा.दी.) अद्रावयन्निति । तदा क्रूराः प्रहस्तसचिवाः प्रहस्तभृत्याः कपीन् अद्रावयन् । द्रु गतौ लङ् । तान् राक्षसान् अतिक्रुद्धाः, विविद आद्यो येषां ते तथा, क्षणः क्षणकालस्तेन अभ्यधावन् । धावु गतिशुद्धयोः लङ् ॥ २० ॥

(सं.चं.) प्रहस्तसचिवाश्चत्वारः । 'नरान्तकः कुम्भहनुर्महानादः समुन्नतः । एते प्रहस्तसचिवाः सर्वे जघ्नुर्वनौकसः' (५८.१९) इति च । प्राचीनपाठे नरान्तकः न पठ्यते । 'धुरन्धरः कुम्भहनुः' इति प्रतनः पाठः । विविदाद्याश्च चत्वारः–विविदो दुर्मुखो जाम्बवांस्तार इति ॥ २० ॥

विविदो गिरिशृङ्गेण धुरन्धरममारयत् ।
समुन्नतेन वृक्षेण दुर्म्मुखश्च समुन्नतम् . ॥ २१ ॥

(भा.दी.) विविद इति । विविदः गिरेः शृङ्गं शिखरं तेन धुरन्धरं धुरन्धराख्यराक्षसं अमारयत् जघान । दुर्मुखश्च समुन्नतेन सम्यगुन्नतेन वृक्षेण समुन्नतं समुन्नताख्यराक्षसं अमारयत् ॥ २१ ॥

(सं.चं.) कः कमभ्यधावत्? आह– विविदः धुरन्धरम् । दुर्मुखः समुन्नतम् । जाम्बवान् महानादम् । तारः कुम्भहनुम् ॥ २१ ॥

सूदयामास शिलया महानादं च जाम्बवान् ।
तळेन तरसा तारो निन्ये कुम्भहनुं क्षयम् ॥ २२ ॥

(भा.दी.) सूदयेति । जाम्बवांश्च शिलया महानादं महानादाख्यं राक्षसं सूदयामास । षूद क्षरणे लिट् । तारः तळं हस्ततळं तेन तरसा कुम्भहनुं तन्नामकं राक्षसं क्षयं नाशं निन्ये ॥ २२ ॥

(सं.चं.) तळेन तरसा । वृक्षेण जघानेति साम्प्रतिको रामायणपाठः–'वृक्षेण महता सद्यः प्राणान् सन्त्याजयद् रणे' (५८.२३) इति ॥ २ ॥

चापहस्तः प्रहस्तोऽथ ववर्षामर्षितः शरान् ।
शरीराणि कपीन्द्राणामुदारो दारयन् मुहुः[१] ॥ २३ ॥

(भा.दी.) चापेति । अथ चापो हस्ते यस्य स तथा, उदारः ख्यातः, 'उदारो महति ख्याते' इति वैजयन्ती, प्रहस्तः अमर्षितः सन् कपीन्द्राणां शरीराणि मुहुः दारयन् सन् शरान् ववर्ष ॥ २३ ॥

१. '–मुदारोऽदारयन्मुहुः'

(सं.चं.) अथ चतुर्ष्वपि सचिवेषु हतेषु, बलोदारः प्रहस्तः शरीराणि दारयन् शरान् ववर्ष ॥ २३ ॥

सेनानीरथ सेनान्यं प्रहस्तं नील आपतत् ।
प्रहस्तेन शरैर्विद्धस्तरुणा तमताडयत् ॥ २४ ॥

(भा.दी.) सेनानीरिति । अथ सेनानीः सेनानायकः नीलः, सेनान्यं सेनानायकं प्रहस्तं प्रति युद्धार्थं आपतत् । प्रहस्तेन शरैर्विद्धः सन् तरुणा तं प्रहस्तं अताडयत् । तड आघाते लङ् ॥ २४ ॥

(सं.चं.) कपिसेनानीर्नीलः । राक्षससेनान्यं प्रहस्तम् ॥ २४ ॥

नीलो निमीलिताक्षोऽथ शरवर्षसहो[१] बली ।
सालेनास्य जघानाश्वान् मुसली सोऽत्यजद् रथम् ॥ २५ ॥

(भा.दी.) नील इति । (अथ) निमीलिते अक्षिणी येन स तथा सन्, शराणां वर्षं सहत इति तथोक्तः, बली नीलः, सालो सर्जवृक्षस्तेन अस्य प्रहस्तस्य अश्वान् जघान । सः प्रहस्तः मुसलोऽस्यास्तीति तथा सन् रथं अत्यजत् । त्यज विसर्गे लङ् । मुसलं गृहीत्वा नीलं प्रत्यधावदित्यर्थः ॥ २५ ॥

(सं.चं.) शरवर्षं धैर्येण सोढुं निमीलिताक्षः 'निमीलिताक्षः सहसा नीलः सेहे दुरासदान्' (५८.४२) इति च ॥ २५ ॥

शिरो बिभेद नीलस्य प्रहस्तो मुसलेन सः[२] ।
तरुणाऽताडयन्नीलः प्रहस्तोऽभ्यापतत्[३] पुनः ॥ २६ ॥

(भा.दी.) शिर इति । सः प्रहस्तः मुसलस्य यदग्रं तेन नीलस्य शिरः बिभेद । भिदिर् विदारणे लिट् । नीलः तरुणा अताडयत् । तड आघाते लङ् । प्रहस्तः पुनः अभ्यापतत् । पत्लृ पतने लङ् ॥ २६ ॥

(सं.चं.) शिरो बिभेद । 'आजघान तदा नीलं ललाटे मुसलेन सः' (५८.४९) इति च ॥ २६ ॥

ज्ञात्वा तं नीलदुर्द्धर्षं शक्तिं प्रास्यद् विभीषणः ।
नीलः शिलां प्रहस्ताय ताभ्यां भग्नो ममार सः ॥ २७ ॥

---

१. **'शरवर्षासहो–'** इति, **'–ताक्षोऽरेः शरवर्षसहो'** इति क्वचित् ।

२. **'शिरो बिभेद नीलस्य मुसलाग्रेण चापि सः'** इति वि.ती.पाठः स्यात् । २. **'–ऽभ्यपतत्'**

(भा.दी.) **ज्ञात्वेति** । विभीषणः प्रहस्तं नीलेन दुर्धर्षं हन्तुमशक्यं ज्ञात्वा प्रहस्ताय शक्तिं प्रास्यत् चिक्षेप । असु क्षेपणे लङ् । नीलश्च शिलां प्रास्यत् । ताभ्यां शक्तिशिलाभ्यां भग्नः मर्दितः स प्रहस्तः ममार । मृङ्धातोर्लिट् ॥ २७ ॥

(सं.चं.) नीलेनैकेन धर्षयितुमशक्यं ज्ञात्वा । विभीषणः शक्तिं नीलः शिलामसकृत् । ताभ्यां शक्तिशिलाभ्यां ममार सः । विभीषणेन शक्तिमोचनं रामायणानुक्तम् । निर्णये तूक्तम्–'नीलो विभीषण उभौ शिलया च शक्त्या सञ्चक्रतुर्यमवरां गमितं प्रहस्तम्'(म.भा.ता.नि.८.२१) इति । भारते चैतत् स्फुटम् । अधिकं निर्णयभावचन्द्रिकायाम् ॥ २७–८ ॥

प्रहस्ते निहते तस्मिन् राक्षसेन्द्रनियोगतः ।
वज्रदम्ष्ट्रो ययौ योद्धुं ससैन्यो दक्षिणां दिशम् ॥ २८ ॥

(भा.दी.) **प्रहस्त** इति । तस्मिन् प्रहस्ते निहते सति, राक्षसेन्द्रस्य रावणस्य नियोग आज्ञा तस्मादिति ततः, वज्रदंष्ट्रः ससैन्यः सन् योद्धुं दक्षिणां दिशं ययौ ॥ २८ ॥

निशाचरचमूं भीमां विविधायुधधारिणीम् ।
शैलैः सालैर्नखैश्चोग्रा[1] कपिसेना न्यसूदयत् ॥ २९ ॥

(भा.दी.) **निशेति** । उग्रा कपिसेना, विविधान्यायुधानि तानि धारयितुं शीलमस्या अस्तीति तथा ताम्, भीमां भयजननीं निशाचरचमूं शैलैः पर्वतैः सालाः सर्जवृक्षास्तैः नखा नखरास्तैः न्यसूदयत् । षूद क्षरणे लङ् ॥ २९ ॥

(सं.चं.) शैलैः सालैः वृक्षैः नखैश्चोग्रा कपिसेना निशाचरचमूं न्यसूदयत् ॥ २९ ॥

वज्रदंष्ट्रोऽधिकं क्रुद्धो वीक्ष्य तं रक्षसां क्षयम् ।
शरैः शरीरान्तकरैर्दारयामास वानरान् ॥ ३० ॥

(भा.दी.) **वज्रेति** । वज्रदंष्ट्रः, अधिकं यथा भवति तथा रक्षसां तं क्षयं वीक्ष्य क्रुद्धः सन्, शरीरस्यान्तो नाशस्तं कुर्वन्तीति तथा तैः शरैः वानरान् दारयामास विदारितवान् । दॄ विदारणे लिट् ॥ ३० ॥

---

१. **'–श्चोग्राः कपिसेना न्यषूदयन्'** इति, **'....न्यसूदयन्'** इति च ।

(सं.चं.) अधिकं क्षयं वीक्ष्याधिकं क्रुद्धः ॥ ३०–५ ॥

पातितान् दारितान् कांश्चिद् द्रावितानपि तान् हरीन् ।
युवराजोऽङ्गदो दृष्ट्वा वज्रदंष्ट्रमुपाद्रवत् ॥ ३१ ॥

(भा.दी.) **पातितानिति** । युवराजः अङ्गदः तान् युध्यतः (हरीन्) कांश्चित् पातितान् कांश्चित् दारितान् कांश्चित् द्रावितानपि दृष्ट्वा वज्रदंष्ट्रं उपाद्रवत् । द्रु गतौ लङ् ॥ ३१ ॥

अङ्गदो वज्रदंष्ट्रेऽथ पातयामास पादपम् ।
शरैस्तं शकलीचक्रे वज्रदंष्ट्रो हसन्निव ॥ ३२ ॥

(भा.दी.) **अङ्गद** इति । अथ अङ्गदः वज्रदंष्ट्रे पादपो वृक्षस्तं पातयामास । पत्लृ पतने लिट् । वज्रदंष्ट्रः हसन्निव शरैः तं वृक्षं शकलीचक्रे तिलशोऽखण्डयत् ॥ ३२ ॥

शैलमुत्पाट्य चिक्षेप बलवान् वालिनन्दनः ।
अपासर्प्पद् वज्रदंष्ट्रो गिरिणा चूर्ण्णितो रथः ॥ ३३ ॥

(भा.दी.) **शैलमिति** । बलमस्यास्तीति बलवान् वालिनन्दनः शैलं गिरिं उत्पाट्य वज्रदंष्ट्रे चिक्षेप न्यपातयत् । क्षिपु निरसने लिट् । वज्रदंष्ट्रः अपासर्पत् रथादपगतोऽभूत् । सृप्लृ गतौ लङ् । रथः, गिरिणा अङ्गदक्षिप्तगिरिणा चूर्णितः अभवत् ॥ ३३ ॥

गदापाणिमसम्भ्रान्तं[1] वज्रदंष्ट्रमवेक्ष्य सः ।
शिरः शैलेन तस्याथ ताडयन् मोहमानयत् ॥ ३४ ॥

(भा.दी.) **गदेति** । अथ सः अङ्गदः, गदा पाणौ यस्य स तथा तं असम्भ्रान्तं अनाकुलं वज्रदंष्ट्रं अवेक्ष्य तस्य शिरः शैलो गिरिस्तेन ताडयन् मोहो मूर्छा तं आनयत् प्रापयत् । नीञो लङ् ॥ ३४ ॥

लब्धसञ्ज्ञो निशिचरः सोऽङ्गदं गदयाऽहनत् ।
धृष्टयोः स्पष्टमनयोर्म्मुष्टियुद्धमवर्त्तत ॥ ३५ ॥

१. '–मसम्भ्रान्तो–'

(भा.दी.) लब्धेति । लब्धा सञ्ज्ञा बोधो येन स तथा निशिचरः, 'तत्पुरुषे कृति बहुलम्' (अ.सू.६.३.१४) इति सप्तम्या अलुक्, सः अङ्गदं गदया अहनत् । हन्तेर्लङ् । धृष्टयोः धैर्यवतोरनयोः अङ्गदवज्रदंष्ट्रयोः स्पष्टं यथा भवति तथा मुष्टियुद्धं अवर्तत । वृतु वर्तने लङ् ॥ ३५ ॥

वानरो वृक्षमादत्त राक्षसः खड्गचर्म्मणी ।
चिरं चित्रं रणं कृत्वा जानुभ्यां तौ धरां गतौ ॥ ३६ ॥

(भा.दी.) वानर इति । वानरः अङ्गदः वृक्षं आदत्त जगृहे । दाण् दाने लङ् । राक्षसः वज्रदंष्ट्रः, खड्गश्च चर्म च ते आदत्त । चिरं यथा भवति तथा चित्रमद्भुतं रणं कृत्वा, (तौ अङ्गदवज्रदंष्ट्रौ) जानुनी ऊरुपर्वणी ताभ्यां श्रमवशात् धरां गतौ ॥ ३६ ॥

(सं.चं.) चिरं चित्रम् । 'युध्यमानौ परिश्रान्तौ जानुभ्यामवनिं गतौ' (५४.३२) इति च ॥ ३६ ॥

अङ्गदः सहसोत्थाय तं निपात्य निशाचरम् ।
यमक्षयं[1] निनायास्य शिरोमर्दननिर्दयः ॥ ३७ ॥

(भा.दी.) अङ्गद इति । अङ्गदः सहसा उत्थाय तं निशाचरं निपात्य, अस्य वज्रदंष्ट्रस्य शिरसो यन्मर्दनं तस्मिन्, निर्गता दया यस्मात् स तथा सन्, यमस्य क्षयो मन्दिरं तं निनाय प्रेषयामास ॥ ३७ ॥

(सं.चं.) शिरोमर्दननिर्दयः । 'अङ्गद उपेत्य जघान वज्रदंष्ट्रं निपात्य भुवि शीर्षममुष्य मृद्नन्' (म.भा. ता.नि.८.२२) इति निर्णयवचनम् । रामायणे तु किञ्चिदिवान्यथोक्तम् –'खड्गेनास्य महच्छिरः । जघान वज्रदंष्ट्रस्य वालिसूनुर्महाबलः' (५४.३४) इति । प्रथमं खड्गेन जघान । तेन पपात । ततोऽस्य शिरोऽस्य मृद्नन् मारयामासेति सर्वं समञ्जसम् ॥ ३७ ॥

तेजसाऽङ्गदचन्द्रस्य विष्णोः पदमुपेयुषः ।
ध्वस्तं नक्तञ्चरतमः कपिचक्राब्धिरुद्धतः ॥ ३८ ॥

(भा.दी.) तेजसेति । श्रीरामरूपिणो विष्णोः पदं पादस्तत्, श्लेषार्थे आकाशमित्यर्थः, उपेयुषः प्राप्तस्य, अङ्गद एव चन्द्रस्तस्य तेजसा, नक्तं रात्रौ चरन्तीति नक्तञ्चरास्त एव तमः, ध्वस्तं विनाशितम् । कपीनां चक्रं सैन्यं तदेवाब्धिः सन्तोषेण उद्धतः अभिवृद्धः ॥ ३८ ॥

१. 'यमावासम्'

(सं.चं.) विष्णोः रामस्य पदमुपेयुषोऽङ्गदस्य। विष्णोः पदमाकाशमुपेयुषश्चन्द्रस्येव। नक्तञ्चरो वज्रदंष्ट्रस्तदाख्यं तमः। नक्तञ्चरा अपि तमः। तमोऽपि नक्तमेव चरति ॥ ३८–४२ ॥

धूम्राक्षः पश्चिमद्वारा निरगाद्[१] रावणाज्ञया।
खरैः[२] सिंहमुखैर्युक्ते रथे तिष्ठन् बलैर्वृतः ॥ ३९ ॥

(भा.दी.) धूम्राक्ष इति। सिंहस्य मुखमिव मुखं येषां ते तथा तैः खरैः गर्दभैः युक्ते रथे तिष्ठन् बलैः सैन्यैः वृतः धूम्राक्षः, पश्चिमा च सा द्वाश्च तया रावणाज्ञया निरगात् निर्जगाम। इण् गतौ लुङ् ॥ ३९ ॥

राक्षसान् वानरैर्भग्नान् दृष्ट्वा बाणान् ववर्ष सः।
धूम्राक्षः क्रोधधूम्राक्षो धुन्वानश्चापमुत्तमम् ॥ ४० ॥

(भा.दी.) राक्षसानिति। सः धूम्राक्षः राक्षसान् वानरैः भग्नान् दृष्ट्वा क्रोधेन ताम्रे अक्षिणी यस्य स तथा सन्, उत्तमं श्रेष्ठं तत्, चापं धुन्वानः सन् बाणान् ववर्ष। वृष सेचने लिट् ॥ ४० ॥

स्वां चमूं चञ्चलां दृष्ट्वा मारुतिर्म्मारुतोपमः।
शिलयाऽथो विपुलया धूम्राक्षरथमक्षिणोत् ॥ ४१ ॥

(भा.दी.) स्वामिति। अथो मारुतस्य उपमा यस्य स तथा मारुतिः, स्वां स्वकीयां चमूं भयेन चञ्चलां दृष्ट्वा विपुलया स्थूलया शिलया धूम्राक्षस्य यो रथस्तं अक्षिणोत् व्यनाशयत्। क्षिणु हिंसायां लङ् ॥४१॥

गदया ताडितस्तेन [२]हनुमांस्तदचिन्तयन्।
गिरिशृङ्गेण धूम्राक्षं चूर्ण्णयामास लीलया ॥ ४२ ॥

(भा.दी.) गदयेति। तेन धूम्राक्षेण गदया ताडितः हनुमान् तत् ताडनं अचिन्तयन् सन् गिरेर्यच्छृङ्गं तेन धूम्राक्षं लीलया चूर्णयामास। चूर्ण सङ्कोचने लिट् ॥ ४२ ॥

गर्ववान् शर्ववरतो रावणेन प्रचोदितः।
अकम्पनः कपिवरान् द्रावयामास सायकैः ॥ ४३ ॥

---

१. 'खरैर्हयमुखैः–' इति का.श्री. पाठः। **'अथ सिंहमुखैर्युक्तं खरैः'** (५१.२८) इति तु रामायणे। २. **'हनुमांस्तद–'**

(भा.दी.) गर्ववानिति । शर्वस्य रुद्रस्य योऽवध्यत्वलक्षणो वरस्तस्मादिति ततः, गर्वोऽस्यास्तीति गर्ववान्, मत्सदृशो नास्तीत्यहङ्कारवानित्यर्थः[१] । रावणेन प्रचोदितः अकम्पनः अकम्पनाख्यराक्षसः कपिवरान् सायकैः द्रावयामास । द्रु गतौ लिट् ॥ ४३ ॥

(सं.चं.) गर्ववान् शर्ववरतः । निर्णयोक्तमेतत्–'उमापतेर्वरोद्धतः' (८.२४) इति ॥ ४३ ॥

पर्वतादभ्रकायोऽथ पर्वतान् पादपानपि ।
हनूमानाक्षिपत्[२] तस्मै स शरैस्तानखण्डयत् ॥ ४४ ॥

(भा.दी.) पर्वतेति । अथ पर्वतवददभ्रः स्थूलः कायो यस्य स तथा हनूमान् पर्वतान् पादपानपि तस्मै अकम्पनाय आक्षिपत् चिक्षेप । क्षिप प्रेरणे लिट् । सः शरैः तान् पर्वतवृक्षान् अखण्डयत् ॥ ४४ ॥

(सं.चं.) पर्वतवददभ्रकायः अनल्पकायः । अभ्रंलिहकायः । 'अकम्पनस्तं शैलाभं हनूमन्तमवस्थितम्' (५६.१२) इति, 'प्ररूढ इव सानुमान्' (२७) इति च ॥ ४४ ॥

[३]पावमानिरथोत्पाट्य पादपं प्रहसन्निव ।
जघानाकम्पनं तेन चक्रेणेवाहितं हरिः ॥ ४५ ॥

(भा.दी.) पावमानिरिरिति । अथ पवमानस्यापत्यं पुमान् पावमानिः हनुमान् पादपं उत्पाट्य प्रहसन्निव तेन वृक्षेण अकम्पनं राक्षसम्, चक्रं सुदर्शनं तेन अहितं शत्रुं हरिरिव श्रीनारायण इव जघान ॥ ४५ ॥

(सं.चं.) चक्रेणेवाहितं हरिः । 'विष्णुर्यथैवोरुबलं चमूमुखे' (५६.३८) इति च ॥ ४५ ॥

रामाज्ञया ततो लङ्कामदहन् निशि वानराः ।
उच्चावचाः प्रगर्ज्जन्त उच्चैरुल्मुकपाणयः ॥ ४६ ॥

(भा.दी.) रामेति । ततः, उच्चाश्च अवचाश्च[४] ते बलेनातिश्रेष्ठाः साधारणाश्चेत्यर्थः, वानराः निशि निशायां उल्मुकानि अलातानि पाणिषु येषां ते तथा सन्तः, उच्चैः सम्यक् प्रगर्जन्तः सन्तः, रामाज्ञया लङ्कां अदहन् । दह भस्मीकरणे लङ् ॥ ४६ ॥

---

१. **'नास्तीत्यहङ्कारीत्यर्थः'** २. **'हनूमानक्षिपत्'**
३. **'स पावनिरथो–'** ४. **'अवाश्चश्च'** इति साधुः पाठः ।

(सं.चं.) उदञ्चश्च अवाञ्चश्च उच्चावचा अनेकप्रकाराः । 'मयूरव्यंसकादयश्च' (अ.सू.३.१.७) इति मयूर-व्यंसकादिगणपठितमिदं पदम् । 'समुदाया एव निपात्यन्ते । मयूरव्यंसकादयः शब्दास्तत्पुरुषसञ्ज्ञा भवन्ति' इति जयादित्यः । उल्मुकमलातम्, दीप्ताग्रं काष्ठम् । 'ಕೊಂಡ' इति भाषायाम् । भयजनकं गर्जनं प्रगर्जनम् । रामायणे तु कुम्भकर्णवधानन्तरमिदमुदितम्–'ततोऽस्तं गत आदित्ये रौद्रे तस्मिन् निशामुखे । लङ्कामभिमुखाः सोल्का जग्मुस्ते प्लवगर्षभाः' (७५.३) इति । 'व्यत्यासः प्रातिलोम्यं च' ह्युक्तम् ॥ ४६–७ ॥

जाज्वल्यमानज्वलनैरलातैरस्त्रमन्त्रितैः ।
विकीर्य्यमाणैः कपिभिर्लङ्का सर्वाऽप्यदह्यत ॥ ४७ ॥

(भा.दी.) जाज्वल्येति । कपिभिः, जाज्वल्यमानः पुनःपुनः ज्वलन् (ज्वलनो)ऽग्निर्येषु तानि तथा तैः अस्त्रैः आग्नेयास्त्रैर्मन्त्रितैः विकीर्यमाणैः पुर्यां प्रसार्यमाणैः अलातैः उल्मुकैः 'अलातमुल्मुकं ज्ञेयम्' इति हलः, सर्वाऽपि लङ्का अदह्यत । दह भस्मीकरणे लङ् ॥ ४७ ॥

बालानामबलानां च प्रबलानां च रक्षसाम् ।
सीताहेळनदोषेण विनाशोऽभूदचिन्तितः ॥ ४८ ॥

(भा.दी.) बालानामिति । बालाः बालकास्तेषाम्, अबलानां स्त्रीणाम्, प्रकृष्टं बलं येषां ते तथा तेषां रक्षसां च अचिन्तितः अस्मृतः विनाशः, सीतायाः यद्धेळनं अवज्ञानं तदेव दोषस्तेन अभूत् ॥ ४८ ॥

(सं.चं.) हेळनमवहेळनमवज्ञा । 'हेडृ अनादरे' । अचिन्तितः अनिरीक्षितः ॥ ४८–९ ॥

हा पुत्र मातस्तातेति कान्ते कान्तेति चाऽसकृत्[१] ।
अश्रूयन्तात्र दग्धायां[२] प्रजानां करुणा[३] रवाः ॥ ४९ ॥

(भा.दी.) हेति । हा पुत्र इति, हा मातः इति, हा तात इति, हा कान्ते भार्ये इति, हा कान्त भर्तः इति च, अत्र लङ्कायां दग्धायां प्रजानां करुणाः कृपास्पदीभूताः रवाः असकृत् अश्रूयन्त । श्रु श्रवणे लङ् ॥ ४९ ॥

---

१. 'वाऽसकृत्' २. 'दग्धानाम्'

३. 'करुणा रवाः श्रोतॄणां दयोत्पादका ध्वनयः' इति का.श्री. ।

कपिकुलकमलप्रोज्जृम्भणे तिग्मभानु-
र्ज्जनकदुहितृचेतःकैरवश्वेतभानुः ।
निशिचरचयसत्रध्वंसने चित्रभानु-
र्व्यजयत जगदेको रामनेत्रान्तभानुः ॥ ५० ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
युद्धकाण्डे पञ्चमः सर्ग्गः ॥

—०—

(भा.दी.) कपीति । कपीनां कुलानि समूहास्तानि कमलानीव तेषां प्रोज्जृम्भणं विकसनं तस्मिन् तिग्मभानुरिव सूर्य इव । जनकस्य दुहिता सुता (सीता) तस्या यच्चेतस्तत्कैरवमिव तस्य उद्बोधने श्वेतभानुरिव चन्द्र इव । निशिचराणां राक्षसानां यश्चयः समूहः सत्रमिव वनमिव तस्य ध्वंसनं नाशस्तस्मिन्, 'सत्रमाच्छादने वस्त्रे यज्ञे दाने वनेऽपि च' इत्यमरः, चित्रभानुरिव वह्निरिव । जगदेकः जगति मुख्यः, श्रीरामस्य नेत्रान्तोऽपाङ्गः स एव भानुः व्यजयत । उत्कृष्टतयाऽवर्तत । जि जये लङ् ॥ ५० ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां
युद्धकाण्डे पञ्चमः सर्गः ॥

—०—

(सं.चं.) अथ मालिन्योपसंहरति– कपीति । उज्जृम्भणमुन्मीलनम् । कपीनां विजयोल्लासः । कैरवं कुमुदम् । 'ಬಿಳನೈದಿಲ' इति भाषायाम् । श्वेतभानुः शीतभानुश्चन्द्रः । निशिचराणां चयः समूहः सत्रं वनमिव । 'सत्रमाच्छादने वने' इति यादवप्रकाशः । चित्रभानुर्दवानल इव । 'चित्रभानू इनानलौ' इति च । नेत्रान्तस्य कटाक्षस्य भानुः दीधितिः, किरणप्रसरः । एकोऽसमानः । सर्वं जगद् व्यजयत वशीचकार । 'भानुः किरणसूर्ययोः' इति विश्वप्रकाशः ॥ ५० ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां
युद्धकाण्डे पञ्चमसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– २४३७+५०=२४८७]

षष्ठः सर्ग्गः

ततो निकुम्भः कुम्भश्च कुम्भकर्ण्णसुतावुभौ ।
वानरानुल्मुकधरान् प्रापतू रावणाज्ञया ॥ १ ॥

(भा.दी.) श्रीरामदूतैरेवं लङ्कायां दह्यमानायां राक्षसैः किं कृतमित्यत आह– **तत** इति । ततः दाहानन्तरं निकुम्भः कुम्भश्चेत्युभौ कुम्भकर्णसुतौ, रावणाज्ञया, उल्मुकानि धारयन्तीति तथा तान् वानरान् प्रापतुः । आप्लृ व्याप्तौ लिट् ॥ १ ॥

(सं.चं.) रामायणे विक्षिप्य कथिता युद्धवार्ता यथाक्रमं निरूपयन्निदानीं कुम्भकर्णसुतयोर्युद्धवार्तामाह– ततो निकुम्भः कुम्भश्च । कुम्भोऽग्रजः ॥ १ ॥

यूपाक्षः शोणिताक्षश्च प्रजङ्घः कम्पनस्तथा ।
निर्य्ययुः [1]कौम्भकर्ण्णिभ्यां सार्द्धं नानायुधा[2] युधे ॥ २ ॥

(भा.दी.) **यूपाक्ष** इति । यूपाक्षः शोणिताक्षश्च प्रजङ्घः तथा कम्पनः इत्येते राक्षसाः, नानाविधानि आयुधानि येषां ते तथा सन्तः, युध् युद्धं तस्यै, कुम्भकर्णस्य पुत्रौ कौम्भकर्णी ताभ्यां निकुम्भकुम्भाभ्यां (सार्धं) निर्ययुः निर्जग्मतुः । यातेर्लिट् ॥ २ ॥

(सं.चं.) 'यूपाक्षः शोणिताक्षश्च प्रजङ्घः कम्पनस्तथा । निर्ययुः कौम्भकर्णिभ्यां सह रावणशासनात्' (७५.४६) इति च ॥ २–३ ॥

वानरा राक्षसान् जघ्नुः पादपोपलपर्वतैः ।
आयुधैर्वानरांस्तेऽपि बभौ युद्धं तदद्भुतम् ॥ ३ ॥

---

१. **'कौम्भकर्णाभ्याम्'**

२. **'नानायुधैर्युधे'** इति, **'नानायुधा मृधे'** इति च ।

(भा.दी.) वानरा इति । वानराः, पादपाश्च उपलाश्च पर्वताश्च तैः राक्षसान् जघ्नुः । (ते राक्षसा अपि वानरानायुधैः जघ्नुः) । अद्भुतं तत् युद्धं बभौ । भा दीप्तौ लिट् ॥ ३ ॥

अङ्गदो गदया गुर्व्या कम्पनेनाभिताडितः ।
जघान गिरिशृङ्गेण कम्पनं कोपकम्पितः[1] ॥ ४ ॥

(भा.दी.) अङ्गद इति । कम्पनेन कम्पनाख्येन, गुर्व्या गदया दृढया गदया अभिताडितः अङ्गदः, कोपेन कम्पितः चालितः सन्, गिरेर्यच्छृङ्गं तेन कम्पनं जघान । हन्तेर्लिट् ॥ ४ ॥

(सं.चं.) जघान गिरिशृङ्गेण । तेन कम्पनः भुवि पपात च ममार च ॥ ४ ॥

क्षुरार्द्धचन्द्रनाराचान् वत्सदन्तान् शिलीमुखान् ।
कर्णिशल्यविपाठांश्च[2] शोणिताक्षोऽङ्गदेऽकिरत्[3] ॥ ५ ॥

(भा.दी.) क्षुरेति । शोणिताक्षः तन्नामकः, क्षुराश्च अर्धचन्द्राश्च नाराचाश्च तान् वत्सदन्तान् शिलीमुखान् कर्णिनश्च शल्याश्च विपाठाश्च तान्, क्षुरार्धचन्द्रेत्यादि शरविशेषाणां सञ्ज्ञा, अङ्गदे अकिरत् ववर्ष । कॄ विक्षेपे लङ् ॥ ५ ॥

(सं.चं.) 'क्षुरक्षुरप्रनाराचैर्वत्सदन्तैः शिलीमुखैः । कर्णिशल्यविपाठैश्च बहुभिर्निशितैः शरैः' (७६.६) इति च । अग्रे क्षुराकारः शरः क्षुरः । अर्धचन्द्राकारक्षुराग्रः क्षुरप्रः । तस्यैव चार्धचन्द्र इति नामान्तरम् । नाराच आयसः शरः । निशितदन्ताकाराग्रः वत्सदन्तः । शिली शल्यं मुखे यस्य स शिलीमुखः । कङ्कपत्रमूलः स एव कङ्कपत्रः । कर्णाकारनिशितशङ्कुः कर्णी । शल्यः शङ्कुः । पक्षिचञ्च्वग्रो विपाठः । विपवदठति । अठ गतौ ॥ ५–६ ॥

अनादृत्याङ्गदो वेधं धनुर्बाणरथानथ[4] ।
अचूर्णयद् रक्षसोऽस्य सोऽपि खड्गी खमापतत् ॥ ६ ॥

---

१. **'लोककम्पनः'** । **'लोककम्पनः राक्षस(लोक)भयङ्करः'** इति का.श्री. । २. **'–विपाजांश्च'** ३. **'–देऽक्षिपत्'**

४.**'–र्बाणधरानथ'** । **'अस्य रक्षसः शोणिताक्षस्य सम्बन्धिनः धनुर्बाणधरान् राक्षसान् अचूर्णयत्' इति का.श्री.** । रामायणाननुगुण-मेतत् । **तथाहि रामायणे–'धनुरुग्रं रथं बाणान् ममर्द तरसा बली । शोणिताक्षस्ततः क्षिप्रमसिचर्म समाददे'** (६७.८) इति ।

(भा.दी.) अनादृत्येति । अथ अङ्गदोऽपि वेधः शस्त्रैस्ताडनं तं अनादृत्य, अस्य रक्षसः कम्पनस्य(?शोणिताक्षस्य) धनुश्च बाणाश्च रथश्च तान् अचूर्णयत् । चूर्ण सङ्कोचने लङ् । सोऽपि खड्गोऽस्यास्तीति खड्गी तथा सन्, खं नभस्तत् आपतत् उत्पपात ॥ ६ ॥

[१]अङ्गदः खड्गमाच्छिद्य छित्वांऽसं तस्य रक्षसः ।
तेनैव सिंहनादोग्रः खड्गेनाखण्डयत् परान् ॥ ७ ॥

(भा.दी.) अङ्गद इति । अङ्गदः खड्गं आच्छिद्य तद्धस्तादपहृत्य, तस्य कम्पनस्य (?शोणिताक्षस्य) अंसः स्कन्धस्तं च्छित्वा, तेनैव खड्गेन, सिंहनादेन उग्रः सन् परान् शत्रून् अखण्डयत् । खडि भेदे लङ् ॥ ७ ॥

(सं.चं.) छित्वांऽसम् । 'स्कन्धो दोःशिखरोंऽसोऽस्त्री' इति यादवप्रकाशः ॥ ७ ॥

प्रजङ्घयूपाक्षयुतः शोणिताक्षोऽभ्ययाद् गदी ।
अङ्गदो वारयामास तान् मैन्दिविविदान्वितः ॥ ८ ॥

(भा.दी.) प्रजङ्घेति । प्रजङ्घश्च यूपाक्षश्च ताभ्यां युतः शोणिताक्षः, गदा अस्यास्तीति गदी तथा सन्, युद्धाय अभ्ययात्, यातेर्लङ्, अङ्गदः तान् त्रीन् राक्षसान् मैन्दविविदान्वितः सन् वारयामास । वृञ् वरणे लिट् ॥ ८ ॥

(सं.चं.) तदा प्रजङ्घयूपाक्षयुतः । अङ्गदोऽपि मैन्दविविदान्वितः वारयामास 'त्रयाणां वानरेन्द्राणां त्रिभी राक्षसपुङ्गवैः । संसक्तानां महद् युद्धमभवद् रोमहर्षणम्' (७६.१८) इति च ॥ ८ ॥

उत्पाट्योत्पाट्य विक्षिप्तान् वनौकोभिरनोकहान् ।
गदाखड्गशरैराशु चिच्छिदुस्ते निशाचराः ॥ ९ ॥

(भा.दी.) उदिति । वनमोको गृहं येषां ते तथा तैः वानरैः, उत्पाट्योत्पाट्य विक्षिप्तान् अनोकहान् वृक्षान् ते निशाचराः शोणिताक्षादयः, गदाश्च खड्गाश्च शराश्च तैः आशु चिच्छिदुः । छिदिर् द्वैधीकरणे लिट् ॥९॥

(सं.चं.) उत्पाट्योत्पाट्य । वनौकोभिः अङ्गदमैन्दविविदैः । ते निशाचराः प्रजङ्घयूपाक्षशोणिताक्षाः । गदाखड्गशरैः । शोणिताक्षो गदया, प्रजङ्घः खड्गेन यूपाक्षः शरैः । 'ते तु वृक्षान् समादाय सम्प्रचिक्षिपु-

---

१. **'अङ्गदः स्वयमपि आकाशमुत्पत्य शोणिताक्षस्य अंसं भुजं छित्वा'** इति का.श्री ।

राहवे । खड्गेन प्रतिचिच्छेद तान् प्रजङ्घो महाबलः । रथानशवान् द्रुमैः शैलैस्ते प्रचिक्षिपुराहवे । शरौघैः प्रतिचिच्छेद तान् यूपाक्षो निशाचरः । सृष्टान् विविदमैन्दाभ्यां द्रुमानुत्पाट्य वीर्यवान् । बभञ्ज गदया मध्ये शोणिताक्षः प्रतापवान्' (७६.१८–२०) इति च ॥ ९ ॥

अश्वकर्णेन सन्ताड्य मुष्टिघातेन[1] चाङ्गदः ।
प्रजङ्घस्य करात् खड्गमाच्छिद्य प्राहरच्च तम् ॥ १० ॥

(भा.दी.) अश्वेति । अङ्गदः अश्वकर्णो अश्वकर्णाख्यवृक्षविशेषस्तेन, मुष्टिना यो घातः प्रहारस्तेन च तं प्रजङ्घं सन्ताड्य, प्रजङ्घस्य करो हस्तस्तस्मात् खड्गं आच्छिद्य अपहृत्य प्राहरच्च । हृञो लङ् ॥ १० ॥

(सं.चं.) अश्वकर्णेन सर्जाख्येन वृक्षेणेत्युक्तम् । मुष्टिघातेन प्रजङ्घस्य करात् खड्गमाच्छिद्य, भूमौ पातयित्वा, पुनश्च तं मुष्टिना प्राहरत् । तेनैव वा पतितेन खड्गेन । बाहुं चास्य सनिस्त्रिंशमाजघान स मुष्टिना । वालिपुत्रस्य घातेन स पपात क्षितावसिः' (७६.२४) इति च ॥ १० ॥

प्रजङ्घो मुष्टिघातेन[1] तं तारेयममोहयत् ।
लब्धसञ्ज्ञो मुहूर्त्तेन वालिजोऽस्य शिरोऽहरत् ॥ ११ ॥

(भा.दी.) प्रजङ्घ इति । प्रजङ्घः मुष्टिघातेन, तारायाः अपत्यं पुमान् तारेयस्तम्, तं अङ्गदं अमोहयत् । मूर्च्छामगमयत् । मुह वैचित्ये लङ् । मुहूर्तो मुहूर्तकालस्तेन लब्धा सञ्ज्ञा बोधो येन स तथा वालिजः अस्य प्रजङ्घस्य शिरः अहरत् ॥ ११ ॥

(सं.चं.) शिरोऽहरत् । मुष्टिघातेनैव । 'प्रजङ्घस्य शिरः कायात् पातयाास मुष्टिना' (७६.२७) इति च ॥ ११ ॥

यूपाक्षं विविदोऽरौत्सीद् युवराजाभिगामिनम् ।
उरस्याहत्य तं दोर्भ्यां जग्राह च महाबलः ॥ १२ ॥

(भा.दी.) यूपाक्षमिति । विविदः युवराजमङ्गदमभिगन्तुं शीलमस्यास्तीति तथा तं यूपाक्षं अरौत्सीत्, मध्ये न्यवारयत् । रुधिर् आवरणे लुङ् । महद् बलं यस्य स तथा विविद उरसि आहत्य तं यूपाक्षं दोर्भ्यां हस्ताभ्यां जग्राह ॥ १२ ॥

---

१. **'मुष्टिपातेन'**

(सं.चं.) प्रजङ्घे पितृव्ये मृते यूपाक्षोऽङ्गदमभिजगाम । तं मध्ये विविदोऽरौत्सीत् अरुधत् । रुद्धः स विविदमभिजगाम । महाबलो विविदस्तमुरस्याहत्य जग्राह । 'स यूपाक्षोऽश्रुपूर्णाक्षः पितृव्ये निहते रणे । अवरुह्य रथात् क्षिप्रं क्षीणायुः खड्गमाददे । तमापतन्तं सम्प्रेक्ष्य यूपाक्षं विविदस्त्वरन् । आजघानोरसि क्रुद्धो जग्राह च बलाद् बली' (७६.२८–९) इति च ॥ १२–५ ॥

भ्रातरं मोचयन् वीरो गदयोरस्यताडयत् ।
शोणिताक्षोऽथ विविदं तां गदां विविदोऽग्रहीत् ॥ १३ ॥

(भा.दी.) भ्रातरमिति । भ्रातरं यूपाक्षं मोचयन् वीरः शोणिताक्षः गदया विविदं उरसि अताडयत् । अथ विविदः तां गदां अग्रहीत् । ग्रह उपादाने लुङ् ॥ १३ ॥

नखैर्म्मुखं परिक्षिण्वन् विविदो भुवि पातयन् ।
पिपेष शोणिताक्षं तं मैन्दो यूपाक्षमक्षिणोत्[1] ॥ १४ ॥

(भा.दी.) नखैरिति । विविदः, नखाः नखरास्तैः शोणिताक्षस्य मुखं परिक्षिण्वन् परितो विक्षतं कुर्वन् सन्, भुवि पातयन् सन्, तं (शोणिताक्षं) पिपेष । पिष्लृ सञ्चूर्णने लिट् । मैन्दः यूपाक्षं अक्षिणोत् । क्षिणु हिंसायां लङ् ॥ १४ ॥

काल्यमानां कपिवरैः कुम्भो दृष्ट्वा निजां चमूम् ।
अभिधावन् शरेणाऽऽशु विविदं भुव्यपातयत् ॥ १५ ॥

(भा.दी.) काल्येति । कुम्भः निजां चमूं कपिवरैः काल्यमानां द्राव्यमाणां दृष्ट्वा, आशु अभिधावन् अभिमुखतया गच्छन् सन्, शरेण विविदं भुवि अपातयत् । पत्लृ पतने लङ् ॥ १५ ॥

अथाऽऽपतन्तं मैन्दं च शरेणापातयत् क्षितौ ।
मातुलौ मोहितौ दृष्ट्वा तमभ्यद्रवदङ्गदः ॥ १६ ॥

(भा.दी.) अथेति । अथ अभिमुखतया आपतन्तं आगच्छन्तं मैन्दं च शरेण क्षितौ अपातयत् । अङ्गदः मातुलौ मैन्दविविदौ मोहितौ दृष्ट्वा तं कुम्भं अभ्यद्रवत् अभ्यगच्छत् । द्रु गतौ लङ् ॥ १६ ॥

---
१. **'विविदस्य भ्राता मैन्दः कपिः शोणिताक्षस्य भ्रातरं यूपाक्षमक्षिणोत् जघान'** इति का.श्री ।

(सं.चं.) विविदरक्षणाय शिलां गृहीत्वा आपतन्तम्। ताराभ्रातरौ मैन्दविविदावित्यङ्गदस्य मातुलौ ॥ १६ ॥

[१]वद्ध्यमानः शरैस्तीक्ष्णैर्बलवान् वालिनन्दनः ।
ववर्षाथ शिलासालान् कुम्भस्तानच्छिनच्छरैः ॥ १७ ॥

(भा.दी.) **वध्येति** । अथ तीक्ष्णैः तेजितैः शरैः वध्यमानः, बलमस्यास्तीति बलवान् वालिनन्दनः अङ्गदः शिलासालान् ववर्ष । वृषु सेचने लिट् । कुम्भः तान् शिलासालान् शरैः अच्छिनत् । च्छिदिर् द्वैधीकरणे लङ् ॥ १७ ॥

(सं.चं.) शिलाश्च सालान् पादपांश्च । 'शिलापादपवर्षाणि तस्य मूर्ध्नि ववर्ष ह' (७६.५०) इति च ॥ १७ ॥

[२]अङ्गदस्याभिपततो भ्रुवोर्बाणौ स मुक्तवान् ।
रुधिरव्याकुलाक्षोऽपि वृक्षं चिक्षेप सोऽङ्गदः ॥ १८ ॥

(भा.दी.) **अङ्गदस्येति** । सः कुम्भः, अभिपततः अभ्यागच्छतः अङ्गदस्य, भ्रुवोरिति सप्तमीद्विवचनं स्त्रीलिङ्गं च, बाणौ मुक्तवान् । सः अङ्गदः, रुधिरेण रक्तेन व्याकुले निबिडे अक्षिणी यस्य स तथा सन्नपि वृक्षं तस्मै चिक्षेप । क्षिप प्रेरणे लिट् ॥ १८ ॥

(सं.चं.) भ्रुवोर्बाणौ । यथा लोचने रुधिरपिहिते स्याताम् । यथा पुरो द्रष्टुं न प्रभवेत् । भ्रुवोरिति षष्ठी सप्तमी वा । भ्रूः झिल्लिका । नेत्रोपरिगता धनुराकारा रोमराजिः 'भ्रुवौ विव्याध बाणाभ्यामुल्काभ्यामिव कुञ्जरौ' (७६.५२) इति च ॥ १८–९ ॥

कुम्भो वृक्षं शरैश्छित्वा युवराजममोहयत् ।
हाहाकारो महानासीत् तदा[३] वानरमण्डले ॥ १९ ॥

(भा.दी.) **कुम्भ** इति । कुम्भः शरैः वृक्षं च्छित्वा युवराजमङ्गदं अमोहयत् । मुह वैचित्ये लङ् । तदा वानराणां मण्डलं समूहस्तस्मिन्, महान् हाहेत्याकारः प्रकारो यस्य स तथा ध्वनिः आसीत् ॥ १९ ॥

---

१. **'विध्यमानः'**
२. **'अङ्गदस्यापि पततो भ्रुवोर्बाणान् स–'**
३. **'यदा युवराजमङ्गदमारोहयत् मूर्छां प्रापितवान् तदा'** इति का.श्री. ।

सुषेणो जाम्बवान् नीलो नळस्तारादयस्तथा ।
अभ्यद्रवन् शिलाहस्ताः कुम्भस्तानजयच्छरैः ॥ २० ॥

(भा.दी.) सुषेण इति । सुषेणः जाम्बवान् नीलः इत्येते, तथा नळश्च, तारः आदिर्येषां ते तथा हरयः, शिलाः हस्तेषु येषां ते तथा सन्तः कुम्भं अभ्यद्रवन् । द्रु गतौ लङ् । कुम्भः तान् शरैरजयत् । जि जये लङ् ॥ २० ॥

(सं.चं.) रामायणोक्तं निर्णयोक्तं च सङ्गृह्याऽह– सुषेणो जाम्बवान् नीलः । 'जाम्बवांश्च सुषेणश्च वेगदर्शी च वानरः' (७६.६१) इति रामायणे । तत्र वेगदर्शीति प्रायो नील उच्यते । तारादय इत्यादिपदेन मैन्द-विविदौ । तथाहि निर्णये–'स कुम्भो विधातुः सुतौ तारनीलौ नळ चैश्विपुत्रौ जिगायाङ्गदं च' (८.२७) इति ॥ २० ॥

भ्रातृजं पतितं दृष्ट्वा वानरेन्द्रांश्च विद्रुतान् ।
[१]क्रुद्धो हि द्रुमवर्षेण सुग्रीवः कुम्भमाद्रवत् ॥ २१ ॥

(भा.दी.) भ्रातृजमिति । सुग्रीवः भ्रातृजं वालिजं अङ्गदं पतितं दृष्ट्वा, वानरेन्द्रांश्च विद्रुतान् दृष्ट्वा, क्रुद्धः सन्, अद्रयश्च द्रुमाश्च तेषां यद्वर्षं तेन कुम्भं राक्षसं आद्रवत् अभ्यगच्छत् ॥ २१ ॥

(सं.चं.) वानरेन्द्रांश्च सुषेणादीन् । द्रुमवर्षेण । 'विविधान् वृक्षांश्चिक्षेप स महाकपिः' (७६.६६) इति च ॥ २१ ॥

शीर्य्यमाणान् रिपुशरैः शिलावृक्षान् विलोक्य सः ।
कुम्भस्य धनुराच्छिद्य चिच्छेदेक्षुमिव द्विपः ॥ २२ ॥

(भा.दी.) शीर्येति । सः सुग्रीवः स्वनिक्षिप्तान् शिलावृक्षान् रिपोः शरास्तैः शीर्यमाणान् विनाश्यमानान् विलोक्य, कुम्भस्य धनुः आच्छिद्य अपहृत्य, द्विपः गजः इक्षुरिक्षुदण्डस्तमिव चिच्छेद । च्छिदिर् द्वैधी-भावे लिट् ॥ २२ ॥

(सं.चं.) रामायणे 'विविधान् वृक्षान्' इत्युक्तमुपलक्षणमिति सूचयन्नाह–शिलावृक्षादीनिति ॥ २२ ॥

१, **'क्रुद्धोऽद्रिद्रुमवर्षेण'** इति वि.ती.पाठः ।

[१]जितकाशी भवान् कुम्भ पौरुषं पश्य मेऽधुना ।
इत्युक्त्वा जगृहे राजा कुम्भं संरम्भसम्भृतः[२] ॥ २३ ॥

(भा.दी.) जितेति । हे कुम्भ, जितेन जयेन काशत इति जितकाशी भवान् अधुना मे पौरुषं पराक्रमस्तत् पश्य, दृशिर् प्रेक्षणे लोट् , राजा सुग्रीवः इति उक्त्वा, संरम्भेण कोपेन सम्भृतः सम्पूर्णः सन् कुम्भं राक्षसं जगृहे ॥ २३ ॥

(सं.चं.) 'जितकाशी जितरणः' इति यादवप्रकाशः । शत्रुषु जितेषु काशते, जयेन वा काशत इति जितकाशी । भवान् पश्य । युष्मदीव भवत्युपपदेऽपि क्वचित् प्रयुञ्जते । यत्र परिहासपूर्वस्त्वङ्कारो बोध्यते । 'जितकाशी भवन्' इत्येव मूलपाठः स्यादपि । 'जितकाशी इभवान्' इति च्छेदस्तु न स्वरसः । राजा सुग्रीवः । संरम्भस्त्वरा कोपो वा ॥ २३ ॥

नियुद्धं वीरयोरासीच्चिरं चित्रं समं तयोः ।
कुम्भमम्भोनिधौ प्रास्यत् कपीन्द्रोऽब्धिस्तदोद्धतः[३] ॥ २४ ॥

(भा.दी.) नियुद्धमिति । वीरयोः तयोः सुग्रीवकुम्भयोः चित्रमद्भुतं समं नियुद्धं बाहुयुद्धम्, 'नियुद्धं बाहुयुद्धं स्यात्' इत्यमरः । चिरं च बहुकाले आसीत् । अस्तेर्लङ् । कपीन्द्रः कुम्भं कुम्भाख्यराक्षसं अम्भोनिधौ प्रास्यत् चिक्षेप । असु क्षेपणे लङ् । तदा अब्धिः उद्धतः तद्देहगरिम्णा अभिवृद्धः ॥ २४ ॥

(सं.चं.) निकषा युद्धं नियुद्धम् । बाहुयुद्धमित्येतत् । चिरं सममेवाऽसीत् । न सुग्रीवो जिगाय । नापि कुम्भः । उद्धतः उद्वेलं उद्गतः । 'ततः कुम्भनिपातेन जलराशिः समुत्थितः'(७६.८५) इति च ॥ २४ ॥

अर्ण्णवात् तूर्ण्णमुत्पत्य स सुग्रीवमताडयत् ।
सुग्रीवो मुष्टिघातेन तं निनाय यमक्षयम्[४] ॥ २५ ॥

(भा.दी.) अर्णवादिति । स कुम्भः अर्णवात् तूर्णं यथा भवति तथा उत्पत्य ऊर्ध्वमागत्य सुग्रीवमताडयत् । तड आघाते लङ् । सुग्रीवः तं कुम्भं मुष्टेर्यो घातस्तेन यमस्य क्षयो मन्दिरं तं निनाय प्रेषयामास ॥ २५ ॥

---

१. **'जयकाशी'** २. **'संरम्भसंयुतः'**

३. **'कपीन्द्राब्धिस्तदोद्धतः'** इति का.श्री.पाठः । तथाहि तद्व्याख्यानम्–**'कपीन्द्राब्धिः कपिश्रेष्ठाख्यः समुद्रः उद्धतः हर्षेणाभिवृद्धोऽभूत्'** इति । रामायणाननुगुणमेतत् । ४. **'यमालयम्'**

(सं.चं.) यमक्षयं यमलोकम् । 'केतरं केतनं क्षयः' इति च ॥ २५ ॥

कुम्भं तं निहतं दृष्ट्वा निकुम्भो भानुनन्दनम् ।
संरम्भारुणताम्राक्षो[1] गम्भीरं[2] प्रैक्षत ज्वलन् ॥ २६ ॥

(भा.दी.) कुम्भमिति । निकुम्भः तं कुम्भं निहतं दृष्ट्वा, संरम्भेण कोपेन, अरुणे विशेषतो रक्ते, स्वभावतस्ताम्रे, अक्षिणी यस्य स तथा सन्, अत एव ज्वलन् सन्, गम्भीरं यथा भवति तथा भानुनन्दनं सूर्यपुत्रं सुग्रीवं प्रैक्षत । ईक्षतेर्लङ् ॥ २६ ॥

(सं.चं.) कुम्भमग्रजं निहतं दृष्ट्वा । अरुणाविव उदयन्तौ सूर्याविव ताम्रे अक्षिणी यस्य ॥ २६ ॥

धनुःशतमितं देशं पुप्लुवे प्लवगेश्वरः ।
पश्यन् निकुम्भसंरम्भं किमुतान्ये प्लवङ्गमाः ॥ २७ ॥

(भा.दी.) धनुरिति । प्लवगेश्वरः सुग्रीवः निकुम्भस्य संरम्भः कोपस्तं पश्यन् सन् भयात् धनुषां यच्छतं तेन मितः परिमितस्तं देशं पुप्लुवे पृष्ठतः प्लवनमकरोत् । अन्ये प्लवङ्गमा दुद्रुवुरिति किमुत? ॥ २७ ॥

(सं.चं.) रामायणेऽस्फुटं प्रमेयान्तरमाह-धनुःशतमितं देशं पुप्लुव इति । तथाहि निर्णये–'ससार सूर्यात्मजमाशु भीतः स पुप्लुवे पश्चिमतो धनुःशतम्' (८.२८) इति ॥ २७ ॥

परिघं प्रतिघोन्नद्धः सुरवारणदारणम् ।
अबिभ्रमन्निकुम्भोऽथ दण्डं दण्डधरो यथा ॥ २८ ॥

(भा.दी.) परिघमिति । अथ निकुम्भः प्रतिघेन कोपेन उन्नद्धः उद्रिक्तः सन्, सुराणां वारणाः गजाः ऐरावतादयस्तान् दारयतीति तथोक्तस्तम्, सुरवारणाः सुरश्रेष्ठास्तद्विदारकमिति वा, 'स्युरुत्तरपदे व्याघ्र-पुङ्गवर्षभकुञ्जराः । सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः' इत्यमरः । दण्डधरः यमः दण्डं यथा तद्वत् परिघः परिघाख्यशस्त्रं तं अबिभ्रमत् भ्रामयामास । भ्रमु सञ्चलने लुङ् ॥ २८ ॥

(सं.चं.) परिघो लोहदण्डः । 'परिघः परिघातनः' इति च । प्रतिघः कोप इत्युक्तम् । सुरवारणान् दिग्गजानपि यो दारयेत् । अबिभ्रमत् । भ्रामयतेर्लुङ् ॥ २८–९ ॥

---

१. **'अरुणं ताम्रमिव अक्षिणी यस्य'** इति का.श्री. ।
२. **'गम्भीरः'** । **'गम्भीरः अगाधबलः'** इति का.श्री. ।

[१]परिघभ्रामणेनास्य सम्भ्रान्तं भुवनत्रयम् ।
विषसाद लये यद्वत् ससुरासुरमानवम् ॥ २९ ॥

(भा.दी.) परिघेति । अस्य निकुम्भस्य परिघस्य यद्भ्रामणं तेन भुवनत्रयं सम्भ्रान्तं कुलालचक्रवत् परिभ्रान्तमभूत् । सुराश्च असुराश्च मानवाश्च तैः सहितं जगत्, प्रळयः सर्वनाशकालस्तस्मिन् यद्वत् तद्वत्, विषसाद अबिभेत् । षद्लृ विशरणगत्यवसादनेषु लिट् ॥ २९ ॥

अवद्ध्यः शङ्करवरादवद्ध्याता च नाकिनाम् ।
जाज्वल्यते स्म तस्मिन् स काले कालानलोपमः ॥ ३० ॥

(भा.दी.) अवध्य इति । शङ्करस्य यो वरस्तस्मात् अवध्यः, नाकिनां च देवानामपि युद्धे अवध्याता अवज्ञा-कर्ता, कालानलस्य प्रळयाग्नेः उपमा यस्य स तथा सः निकुम्भः तस्मिन् काले जाज्वल्यते स्म । अतिशयेन ज्वलति (स्म) । ज्वल दीप्तौ लट् ॥ ३० ॥

(सं.चं.) अवध्यः शङ्करादवरैः । कुतः? शङ्करवरात् । 'सुराश्च तस्योरु बलं वरं च शर्वोद्भवं वीक्ष्य विषेदुरीषत्' (८.२९) इति निर्णये । अत विश्वस्य विषादं वीक्ष्येति वक्ष्यते । अवमतया ध्यानमवध्यानम् । अवज्ञाय ध्यानमवध्यानम् । कालानलः युगान्ताग्निः ॥ ३०–३२ ॥

विषादं वीक्ष्य हनुमान् विश्वस्य तमुपस्थितम् ।
निकुम्भाग्रत आप्लुत्य विशालं वक्ष ऐक्षयत् ॥ ३१ ॥

(भा.दी.) विषादमिति । हनुमान्, विश्वं जगत् तस्य, विषादो भयम्, तं समुपस्थितं सम्प्राप्तं वीक्ष्य, निकुम्भस्य अग्रं तस्मिन्निति ततः आप्लुत्य, विशालं विस्तीर्णं तत् वक्षः ऐक्षयत् दर्शयामास ॥ ३१ ॥

अभीरो वीर किं कृत्यं भीरुभिर्विद्रुतैस्तव ।
अत्र प्रहर ते हेतिमित्यूचे हनुमानिमम् ॥ ३२ ॥

(भा.दी.) अभीरविति । भीरुर्भयशीलः स न भवतीत्यभीरुस्तत्सम्बुद्धिः, वीर निकुम्भ, भीरुभिः भयशीलैः विद्रुतैः एभिः कपिभिः तव कृत्यं किम्? न किमपि । (ते) तव हेतिमायुधं अत्र मद्वक्षसि प्रहर । इति वचः हनुमान् इमं निकुम्भं प्रति ऊचे ॥ ३२ ॥

---

१. **'परिघभ्रमणे–'**

अमोघं[१] परिघं घोरमुद्भ्राम्य प्रजहार सः ।
हनूमति स मोघोऽभूत् पतत्रीन्द्रे पविर्य्यथा ॥ ३३ ॥

(भा.दी.) अमोघमिति । सः निकुम्भः मोघो न भवतीत्यमोघस्तं घोरं परिघं उद्भ्राम्य भ्रामयित्वा हनूमति प्रजहार तताड । स परिघः पतत्रीन्द्रे गरुडे पविर्वज्रः यथा तद्वत् मोघः व्यर्थः अभूत् । गरुडेनामृतहरणकाले पूर्वमिन्द्रमुक्तो वज्रः यथा व्यर्थोऽभूत् तद्वदयं च हनूमिति व्यर्थोऽभूदिति भावः ॥ ३३ ॥

(सं.चं.) शर्ववरादमोघम् । 'वरादमोघं प्रजहार वक्षसि । विचूर्णितोऽसौ तदुदस्यभेद्ये यथैव वज्रो विपतौ वृथाऽभवत्'(८.३१) इति निर्णये ॥ ३३ ॥

मारुतेर्म्मुष्टिपिष्टोऽथ मूर्च्छितः कुम्भसोदरः ।
आश्वस्तस्तं हनूमन्तमंसे न्यस्याऽद्रवद् द्रुतम् ॥ ३४ ॥

(भा.दी.) मारुतेरिति । अथ मारुतेः मुष्टिना पिष्टो मर्दितः, अत एव मूर्च्छितः कुम्भसोदरः निकुम्भः आश्वस्तः सन्, तं हनूमन्तं अंसः कन्धरा तस्मिन् न्यस्य द्रुतं यथा भवति तथा आद्रवत् । द्रु गतौ लङ् ॥ ३४ ॥

(सं.चं.) अंसे स्कन्धे न्यस्य । 'स्कन्धो दोःशिखरोंऽसोऽस्त्री' इति यादवप्रकाशः ॥ ३४–५ ॥

नीते हनूमत्यारब्धं क्रन्दितं कपिमण्डलैः ।
जातं सपदि हासान्तं[२] पातितेऽस्मिन् हनूमता ॥ ३५ ॥

(भा.दी.) नीत इति । हनूमति निकुम्भेन नीते सति, कपीनां मण्डलानि समूहाः, तैः आरब्धं क्रन्दितं रोदनम्, हनूमता सपदि अस्मिन् निकुम्भे पातिते सति, हासोऽन्तो यस्य तत्तथोक्तं जातम् । क्रन्दनार्थमारब्धं कपिमण्डलं निकुम्भपतनं दृष्ट्वा जहासेत्यर्थः ॥ ३५ ॥

महासङ्गमखे तस्मिन् प्रमत्थ्याविक्षतं हरिः ।
तं निकुम्भपशुं तत्र[३] यज्ञेश्वरमतोषयत् ॥ ३६ ॥

---

१. **'अमोघं इतरत्रानिष्फलम्'** इति का.श्री. ।
२. **'हासः सन्तोषजन्यः अट्टहासः'** इति का.श्री. ।
३. **'निकुम्भं पशुं कृत्वा यज्ञे–'** । **'अविक्षतं इतरैरहतं तं प्रसिद्धं निकुम्भं पशुं कृत्वा'** इति का.श्री. ।

(भा.दी.) महेति । हरिः कपिः हनुमान् तस्मिन् महान् यः सङ्खो युद्धं स एव मखस्तस्मिन् अविक्षतं अविनष्टं तं निकुम्भपशुं प्रमथ्य मर्दयित्वा तत्र युद्धाख्ययज्ञे यज्ञेश्वरं श्रीरामं अतोषयत् । तुष तुष्टौ लङ् ॥ ३६ ॥

(सं.चं.) महासङ्खं महायुद्धम् । सङ्खमिति प्रतनम् । सङ्ख्यमिति पाश्चात्यम् । इतरैः पूर्वमविक्षतं पशुम् 'चकार तं रणात्मके मखे रमेशदैवते । पशुं प्रभञ्जनात्मजः' (८.३४) इति निर्णये ॥ ३६ ॥

कुम्भकर्णात्मजे तस्मिन् कुम्भकर्णसमे[1] हते ।
नन्दितं [2]नाकिलोकेऽभूत् क्रन्दितं रक्षसां पुरे ॥ ३७ ॥

(भा.दी.) कुम्भेति । कुम्भकर्णसमे कुम्भकर्णात्मजे तस्मिन्निकुम्भे हते सति, नाकिनां देवानां लोकस्तस्मिन् नन्दितं सन्तोषः अभूत् । रक्षसां पुरे लङ्कायां क्रन्दितं रोदनं अभूत् ॥ ३७ ॥

(सं.चं.) नन्दितं हर्षोद्गारः । क्रन्दितं हाहाकारः ॥ ३७ ॥

ससुप्तघ्ना यज्ञकोपरश्मिकेत्वग्निकेतवः ।
प्रेषिता रावणेनाऽजौ क्षणाद् रामेण सूदिताः ॥ ३८ ॥

(भा.दी.) ससुप्तेति । सुप्तघ्नेन सहिताः ससुप्तघ्नाः यज्ञकोपश्च रश्मिकेतुश्च अग्निकेतुश्च ते रावणेन युद्धार्थं प्रेषिताः सन्तः आजिर्युद्धं तस्यां, क्षणः क्षणमात्रं तस्मात् श्रीरामेण सूदिताः संहृताः ॥ ३८ ॥

(सं.चं.) रामायणे पूर्वमुक्तं प्रसङ्गान्तरं यथाक्रममाह– ससुप्तघ्नाः । 'अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च राक्षसः । सुप्तघ्नो यज्ञकोपश्च रामं निर्बिभिदुः शरैः । तेषां चतुर्णां रामस्तु शिरांसि निशितैः शरैः । क्रुद्धश्चतुर्भिश्चिच्छेद घोरैरग्निशिखोपमैः' (४३.२६–७) इति च । 'सुप्तघ्नो यज्ञकोपश्च शकुनिर्देवतापनः' इति तात्पर्यनिर्णये (८.३५) । प्रायोऽत्र रश्मिकेतुरेव शकुनिः । अग्निकेतुर्देवतापनः ॥ ३८ ॥

यमशत्रुश्च दुर्द्धर्षो महापार्श्वो महोदरः ।
वज्रदंष्ट्रो महाकायस्तौ चोभौ शुकसारणौ ॥ ३९ ॥

ससैन्या रावणादिष्टा हता रामेण लीलया ।
उदारविक्रमेणाऽजौ मृगेन्द्रेण मृगाइव ॥ ४० ॥

---

१. 'कुम्भकर्णोपमे' २. 'नाकलोके–'

(भा.दी.) यमेति । दुर्धर्षः तन्नामकः, यमशत्रुः महापाश्वर्वः महोदरः वज्रदंष्ट्रः महाकायः तौ पूर्वं सेनागणनार्थमागतौ शुकसारणौ इत्येते रावणेनादिष्टाः सन्तः ससैन्याः सन्तः आजिर्युद्धं तस्यां, उदारो महान् विक्रमो यस्य स तथा तेन श्रीरामेण, मृगेन्द्रेण सिंहेन मृगाइव, लीलया हताः । वाल्मीकीयानुसारेणात्र नाममात्रभेद इत्यत्रोक्तानां सुप्तघ्नादिसारणान्तानां मध्ये केचन निर्णयोक्ता एवेत्यविरोधः ॥ ३९–४० ॥

(सं.चं.) यमशत्रुरित्याद्या अष्टौ । अत्रोक्तौ महोदरमहापाश्वर्वौ उपरि वक्ष्यमाणाभ्यामङ्गदहताभ्यां महोदरमहापाश्वर्वाभ्यामन्यौ । वज्रदंष्ट्रः प्रायो विद्युज्जिह्वापरनामा । महाकायः प्रमाथी । 'विद्युज्जिह्वः प्रमाथी च शुकसारणसंयुताः' इति हि तात्पर्यनिर्णये (८.३५) । हता रामेण लीलया । यद्यप्येते रामेण हता इति रामायणे न पठ्यते । 'यमशत्रुश्च दुर्धर्षो महापाश्वर्वमहोदरौ । वज्रदंष्ट्रो महाकायस्तौ चोभौ शुकसारणौ । ते तु रामेण बाणौघैः सर्वे मर्मसु ताडिताः । युद्धादपसृतास्तत्र स्ववशेषायुषोऽभवन्' (४४.२०–१) इति ते रामबाणपीडिता युद्धादुपरता इत्येवोच्यते । अथापि तात्पर्यनिर्णये– 'अवध्या ब्रह्मवरतो निहता रामसायकैः' (८.३६) इति स्फुटवचनात् 'हता रामेण' इत्युक्तम् । रामायणे शुकसारणादीनामन्येन वधाकथनाच्चैतदवसीयते ॥ ३९–४१ ॥

निकुम्भादीन् हताच्छ्रुत्वा विलपन्तं दशाननम् ।
आश्वास्य निर्य्ययुर्य्योद्धुं कुमारास्तदनुज्ञया ॥ ४१ ॥

(भा.दी.) निकुम्भेति । निकुम्भादीन् हतान् श्रुत्वा विलपन्तं दशाननम् आश्वास्य सान्त्वयित्वा कुमाराः रावणपुत्राः तदनुज्ञया योद्धुं निर्ययुः ॥ ४१ ॥

त्रिशिरा अतिकायश्च देवान्तकनरान्तकौ ।
ते मत्तयुद्धोन्मत्ताभ्यां पितृव्याभ्यां समं ययुः[१] ॥ ४२ ॥

(भा.दी.) ते कुमाराः क इत्यत आह– **त्रिशिरा** इति । 'त्रिशिरा अतिकायश्च देवान्तकनरान्तकौ' इति ते पितृव्याभ्यां पितृभ्रातृभ्याम्, 'पितृभ्राता पितृव्यः स्यात्' इत्यमरः, रावणमातुः कैकस्याः सहोदरीपुत्राः, न विश्रवसः पुत्राः, रावणभ्रातृभ्यामित्यर्थः । मत्तयुद्धोन्मत्ताभ्यां समं साकं ययुः ॥ ४२ ॥

(सं.चं.) त्रिशिरा अतिकायश्च देवान्तनरान्तकौ च रावणकुमाराश्चत्वारः । देवान्तकनरान्तकौ गन्धर्वकन्यकाजातौ । अतिकायो धान्यमालिन्यास्तनयः । त्रिशिराः पत्न्यन्तरजातः । मत्तो युद्धोन्मत्तश्च रावणस्य

१. **'समाययुः'**

सापत्नभ्रातरौ 'युद्धोन्मत्तं च मत्तं च भ्रातरौ चापि रावणः । रक्षणार्थं कुमाराणां प्रेषयामास संयुगे' (६९.१६) इति च ॥ ४२ ॥

उग्रा तदग्रगा सेना वानरान् पर्य्यपीडयत् ।
नानाहेतिमतीं दीप्तां तां कपीन्द्रा न्यवारयन् ॥ ४३ ॥

(भा.दी.) **उग्रे**ति । तेषामग्रगा तदग्रगा, उग्रा सेना वानरान् पर्यपीडयत् पर्यमर्दयत् । पीड बाधने लङ् । कपीन्द्राः, नानविधाः या हेतयस्ता अस्यां सन्तीति तथा, तां दीप्तां सेनां न्यवारयन् ॥ ४३ ॥

(सं.चं.) तेषां षण्णामग्रगामिनी दैत्यसेना । पुरुषकारेण दीप्ता । उग्रेत्येतत् ॥ ४३ ॥

वानरा वारणैर्भग्नैर्वारणांश्च हयैर्हयान् ।
रथै रथान् राक्षसांश्च राक्षसैः समसूदयन् ॥ ४४ ॥

(भा.दी.) **वानरा** इति । वानरा भग्नैः वारणैः गजैः वारणान् समसूदयन् संहृतवन्तः । सूद क्षरणे लङ् । हयैः हयान् असूदयन् । रथैः रथान् असूदयन् । राक्षसैश्च राक्षसान् असूदयन् ॥ ४४ ॥

(सं.चं.) वानराः । 'रथेन च रथं चापि वारणेनैव वारणम् । हयेन च हयं केचिन्निजघ्नुर्वानरा रणे' (६९.६२) इति च ॥ ४४ ॥

नरान्तकोऽन्तकनिभः क्रुद्धो वाजिवरे स्थितः ।
कपिसप्तशतान्येकः प्रासेनादारयत् क्षणात् ॥ ४५ ॥

(भा.दी.) **नरे**ति । अन्तकस्य यमस्य निभः समानः, वाजिषु हयेषु वरः तस्मिन् स्थितः, क्रुद्धः नरान्तकः, कपीनां सप्तशतानि, प्रासः कुन्तस्तेन क्षणं क्षणमात्रं तस्मात् एक एव अदारयत् । दृ विदारणे लङ् ॥ ४५ ॥

(सं.चं.) नरान्तकः । 'स वानरान् सप्त शतानि वीरः प्रासेन दीप्तेन विनिर्बिभेद' (६९.७०) इति च । प्रास्यत इति प्रासः शूलाग्रो दण्डः कुन्तकापरनामा ॥ ४५ ॥

दीनं दूनं कुमारेण हरिचक्रं विलोकयन् ।
नरान्तकं प्रतिययौ सुग्रीवप्रेषितोऽङ्गदः ॥ ४६ ॥

(भा.दी.) दीनमिति । रावणस्य कुमारेण नरान्तकेन, हरीणां कपीनां चक्रं सैन्यं तत्, दीनं यथा भवति तथा, दीनं दैन्यं प्राप्तमिति वा, दूनं दुःखं प्राप्तं विलोकयन्, अङ्गदः सुग्रीवप्रेषितः सन्, नरान्तकं प्रति ययौ ॥ ४६ ॥

(सं.चं.) कुमारेण नरान्तकेन दूनं सन्तापितम्, दीनं क्षीणं च । दूङ् परितापे । दीङ् क्षये । हरिचक्रं कपिवृन्दं कपिसैन्यं वा ॥ ४६ ॥

तिष्ठ किं प्राकृतैरेभिः[१] प्रासं मे प्रहरोरसि ।
इत्यङ्गदस्य ब्रुवतः प्रासं प्रास्यत् स वक्षसि ॥ ४७ ॥

(भा.दी.) तिष्ठेति । हे नरान्तक, मत्पुरतः तिष्ठ । ष्ठा धातोर्लोट् । प्राकृतैः पामरैरेभिः वानरैः किं प्रयोजनम्? प्रासः कुन्तस्तं मे उरसि प्रहर । हृञ् हरणे लोट् । इति अङ्गदस्य ब्रुवतः सतः, स उरसि वक्षसि प्रासं प्रास्यत् अङ्गदोरसि चिक्षेप । असु क्षेपणे लङ् ॥ ४७ ॥

(सं.चं.) प्राकृतैरसमीक्ष्यकारिभिः दुर्बलैः । 'तिष्ठ किं प्राकृतैरेभिः हरिभिस्त्वं करिष्यसि । अस्मिन् वज्रसम-स्पर्शं प्रासं क्षिप ममोरसि' (६९.८६) इति च ॥ ४७ ॥

अङ्गदोरसि स प्रासः पातितः [२]खण्डितोऽपतत् ।
तारेयस्तरसा तस्य तळेनाश्वमताडयत् ॥ ४८ ॥

(भा.दी.) अङ्गदेति । अङ्गदस्य उरस्तस्मिन् पातितः सः प्रासः खण्डितः अपतत् । पत्लृ पतने लङ् । तारेयः तारापुत्रोऽङ्गदः तरसा तस्य अश्वम्, तळं हस्ततळं तेन अताडयत् । तड आघाते लङ् ॥ ४८ ॥

(सं.चं.) तारेयोऽङ्गदस्तस्य नरान्तकस्य । तरसा वेगेन । क्षिप्रमिति यावत् । तरसा बलेन वा ॥ ४८ ॥

ताडितादश्ववदनान्नयने भुवि पेततुः ।
तारकेइव[३] मेघाग्रात् स पपात ममार च ॥ ४९ ॥

(भा.दी.) ताडितादिति । ताडितात्, अश्वस्य यद्वदनं तस्मात् नयने, मेघस्य यदग्रं तस्मात्तारिकेइव, 'ईदूदेद्द्विवचनं प्रगृह्यम्' (अ.सू.१.१.११) इति प्रगृह्यत्वात् सन्ध्यभावः । भुवि पेततुः । पत्लृ पतने लिट् । सः अश्वः पपात ममार च । मृङ् प्राणत्यागे लिट् ॥ ४९ ॥

---

१. 'प्राकृतैरेतैः' २. 'प्रासः पतितः' ३. 'तारिकेइव'

(सं.चं.) नयने पेततुः । तारकेइव नक्षत्रेइव । 'तारका **(न?)**)नाऽक्षिमध्ये नक्षत्रे' इति यादवप्रकाशः । सः अश्वश्च पपात ममार च ॥ ४९ ॥

दुष्टधीः पातयामास मुष्टिमङ्गदमूर्ध्नि सः ।
मूर्च्छितः प्राप सञ्ज्ञां [1]स रक्तो रुधिरधारया ॥ ५० ॥

(भा.दी.) दुष्टधीरिति । दुष्टा धीर्यस्य स तथा सः नरान्तकः, अङ्गदस्य मूर्धा तस्मिन्, मुष्टिं पातयामास । मूर्च्छितः रुधिरधारया रक्तः सः अङ्गदः सञ्ज्ञां प्राप । आप्लृ व्याप्तौ लिट् ॥ ५० ॥

(सं.चं.) दुष्टधीः स नरान्तकः । 'अथाङ्गदो मुष्टिविभिन्नमूर्धा सुस्राव तीव्रं रुधिरं भृशोष्णम् । मुहुर्विजज्वाल मुमोह चापि सञ्ज्ञां समासाद्य विसिस्मिये च' (६९.९६) इति च ॥ ५० ॥

तन्मुष्टिपीडितः क्रुद्धो [2]दधे खड्गं नरान्तकः ।
खड्गमाच्छिद्य तेनैनमङ्गदो भङ्गमानयत् ॥ ५१ ॥

(भा.दी.) तदिति । तस्य अङ्गदस्य यो मुष्टिस्तेन पीडितः क्रुद्धः नरान्तकः खड्गोऽसिस्तं दधे जग्राह । अङ्गदः खड्गं आच्छिद्य तद्धस्तादपहृत्य तेन एनं नरान्तकं भङ्गं नाशं आनयत् ॥ ५१ ॥

(सं.चं.) रामायणेऽनुक्तं किञ्चित् स्वयमापूर्याऽह– तन्मुष्टिपीडित इत्यादि । तेन नरान्तकखड्गेनैव एनं नरान्तकं भङ्गमानयत् । सेयं खड्गकथा रामायणेऽनुक्ता । तथाहि रामायणे–'स मुष्टिनिष्पिष्टविभिन्नवक्षा ज्वाला वमञ्छोणितदिग्धगात्रः । नरान्तको भूमितळे पपात यथाऽचलो वज्रनिपातभग्नः' (६९.९८) इति । अत्रानुक्तः कथाशेषो निर्णयोक्तः–'स खड्गवरमादाय प्रससार रणे कपिम् । आच्छिद्य खड्गमस्यैव निहतो वालिसूनुना' (८.४२) इति । अयमत्र विशेषः– मुष्टिपीडनकथा निर्णयेऽनुक्ता । खड्गकथा रामायणे । उभयमपि संयोज्य पण्डिताचार्यः समग्रां कथां निरूपयामासेति सुन्दरम् । आच्छिद्य नरान्तकहस्तादाकृष्य ॥ ५१–३ ॥

नरान्तके निपतिते क्रुद्धो देवान्तकोऽभ्ययात् ।
जाम्बवत्प्रमुखाः[3] सर्वे तं दृष्ट्वैव पराद्रवन् ॥ ५२ ॥

१. **'संरक्तो–'** इति, **'स आर्द्रो रुधिर–'** इति च । २. **'दध्रे'** ३. **'जाम्बवत्पूर्वकाः'**

(भा.दी.) नरेति । नरान्तके निपतिते सति, क्रुद्धः देवान्तकः अभ्ययात् । जाम्बवान् प्रमुखः प्रधानो येषां ते तथा सर्वे कपयः तं देवान्तकं दृष्ट्वैव पराद्रवन् । द्रु गतौ लङ् ॥ ५२ ॥

देवान्तकाय चिक्षेप वृक्षान् वालिसुतो बहून् ।
स तांश्छित्वा शरेणाऽशु वालिसूनुममोहयत् ॥ ५३ ॥

(भा.दी.) देवेति । वालिसुतः अङ्गदः बहून् वृक्षान् देवान्तकाय चिक्षेप । क्षिप प्रेरणे लिट् । स तान् वृक्षान् छित्वा शरेण आशु वालिसूनुं अमोहयत् । मुह वैचित्ये लङ् ॥ ५३ ॥

[१]अथ तिग्मांशुतनयः शैलं प्रचलपादपम् ।
अभिदुद्राव सङ्गृह्य चिक्षेप च निशाचरे ॥ ५४ ॥

(भा.दी.) अथेति । अथ तिग्माः तीक्ष्णाः अंशवो यस्य स तथा तस्य तनयः सुग्रीवः, प्रचलाः प्रचलन्तः पादपा वृक्षा यस्मिन् स तथा तं शैलं सङ्गृह्य अभिदुद्राव । द्रु गतौ लिट् । निशाचरे राक्षसे देवान्तके चिक्षेप च । क्षिप प्रेरणे लिट् ॥ ५४ ॥

(सं.चं.) अथ अङ्गदमपि पराजितमवलोक्य तिग्मांशुतनयः सुग्रीवः । इयमपि रामायणेऽनुक्ता कथा । अत इमं श्लोकं तात्पर्यनिर्णयादविकलमुज्जहार (८.४६) ॥ ५४–५ ॥

स शैलं शकलीकृत्य शरैर्देवान्तको बली ।
हृदि विध्वा शरं घोरं कपिराजं व्यमोहयत् ॥ ५५ ॥

(भा.दी.) स इति । बलमस्यास्तीति बली सः देवान्तकः शरैः शैलं शकलीकृत्य चूर्णीकृत्य, घोरं शरं हृत् हृदयं तस्मिन् विध्वा, कपिराजं सुग्रीवं व्यमोहयत् । मुह वैचित्ये लङ् ॥ ५५ ॥

बलमप्रतिमं वीक्ष्य सुरशत्रोस्तु मारुतिः ।
तमाहवायाऽह्वयत[२] केशवः कैटभं यथा ॥ ५६ ॥

---

१. **'ग्रन्थकारः स्वग्रन्थस्याऽप्तिमूलत्वं दर्शयितुं निर्णयश्लोकमेव पठति–अथेति'** इति का.श्री. ।

२. **'तमाहवायाऽश्वाह्वास्त'** इति वि.ती.पाठः ।

(भा.दी.) बलमिति । मारुतिः हनुमान् सुरशत्रोः सुरान्तकस्य, न विद्यते प्रतिमा उपमा यस्य तत्तथा तत्, 'प्रतिमा प्रतियातना प्रतिच्छाया । प्रतिकृतिरर्चा पुंसि प्रतिनिधिरुपमोपमोपमानं स्यात्' इत्यमरः, असदृश-मित्यर्थः, बलं वीक्ष्य, आहवो युद्धं तस्मै, तं देवान्तकम्, केशवः कैटभं कैटभासुरं यथा तथा, आशु आह्वास्त आजुहाव । ह्वेञ् स्पर्धायां शब्दे च लुङ् ॥ ५६ ॥

(सं.चं.) सुरशत्रोः देवान्तकस्य । 'बलमप्रतिमं वीक्ष्य सुरशत्रोस्तु मारुतिः । आह्वयामास युद्धाय केशवः कैटभं यथा' (८.४९) इति निर्णये । आह्वयामासेति रूपमपठतां वैयाकरणानां तुष्ट्यै तृतीयं पादमन्यथा पपाठ–'तमाहवायाऽह्वयत' इति । 'तमाह्वयाऽश्वाह्वास्त' इति क्वचित् । आह्वायतेति ह्वेञो लङ् । आह्वत, आह्वास्तेति लुङ् ॥ ५६ ॥

तस्याऽपतत एवाऽशु रथं सहयसारथिम् ।
चूर्णयित्वा धनुश्चास्य चिच्छेदाऽच्छिद्य मारुतिः ॥ ५७ ॥

(भा.दी.) तस्येति । मारुतस्यापत्यं पुमान् मारुतिः (सः हनुमान्) तस्य सुरान्तकस्य आपतत एव आगच्छत एव सतः, हयाश्च सारथिश्च तैः सहितस्तं रथं आशु चूर्णयित्वा अस्य धनुश्च आच्छिद्य अपहृत्य चिच्छेद । च्छिदिर् द्वैधीभावे लिट् ॥ ५७ ॥

(सं.चं.) तस्याऽपतत इति । नेदमपि रामायणोदितम् । 'तमापतन्तमालोक्य रथं सहयसारथिम् । चूर्णयित्वा धनुश्चास्य समाच्छिद्य बभञ्ज ह' (८.५०) इति हि निर्णये ॥ ५७ ॥

अथ खड्गिनमायान्तं पातयित्वा स पावनिः ।
शिरः पादेन [१]निष्पिष्य जघानामरवैरिणम् ॥ ५८ ॥

(भा.दी.) अथेति । पवनस्यापत्यं पावनिः, (सः हनुमान्) खड्गोऽस्यास्तीति खड्गी तं आयान्तं अमरवैरिणं देवान्तकं पातयित्वा पादोऽङ्घ्रिस्तेन शिरः निष्पिष्य जघान ॥ ५८ ॥

(सं.चं.) अथ खड्गिनमायान्तम् । इदमप्यस्फुटं रामायणे । तत्र ह्येवं पठ्यते–'आजघान तदा मूर्ध्नि वज्रकल्पेन मुष्टिना' (७०.२४) इति । अतो निर्णयानुगुणं कथां विश्लिष्याऽह । 'अथ खड्गं समादाय पुर आपततो रिपोः । हरिः प्रगृह्य केशेषु पातयित्वैनमाहवे । शिरो ममर्द तरसा पवमानात्मजः पदा' (८.५१) इति हि निर्णये ॥ ५८ ॥

१. **'निष्पीड्य'**

सुवर्ण्णसुन्दरैरेष मारुतिः प्रत्यपूज्यत ।
अमराणां कपीनां च स्तवनैर्न्नयनैरपि ॥ ५९ ॥

(भा.दी.) सुवर्णेति । एषः मारुतिः, सुवर्णैः शोभनाक्षरैः सुन्दराणि मनोहराणि तैः, अमराणां स्तवनैः स्तुतिरूपवाक्यैः, सुवर्णवत् सुन्दराणि शोभनानि तैः कपीनां च नयनैरपि प्रत्यपूज्यत । पूज पूजायां लङ् ॥ ५९ ॥

(सं.चं.) महार्थतया शोभनवर्णैः, अत एव सुन्दरैः श्रवणमनोहरैः अमराणां स्तवनैः । सुवर्णवदारक्तपिङ्गतया सुन्दरैः कपीनां नयनैः ॥ ५९ ॥

युद्धोन्मत्तं च मत्तं च वीरावन्वर्थनामकौ ।
जघान मुष्टिघातेन मारुतिः क्षिप्तवानरौ ॥ ६० ॥

(भा.दी.) युद्धेति । मारुतिः, क्षिप्ताः निरस्ताः वानराः याभ्यां तौ तथोक्तौ, अर्थमनुसृत्य वर्तमाने अन्वर्थे, तादृशे नामनी ययोस्तौ तथोक्तौ युद्धोन्मत्तं च मत्तं चेति (वीरौ) राक्षसौ, मुष्टेर्यो घातस्तेन जघान ॥६०॥

(सं.चं.) प्रथमं युद्धोन्मत्तो हतः । ततस्त्रिशिराः । ततो मत्तः । एकोक्तिसौकर्याय युद्धोन्मत्तस्य मत्तस्य च वधं प्रथममाह ग्रन्थकारः । त्रिशिरोवधादनन्तरमाह निर्णयकारः । युद्धोन्मत्तस्यैव महोदर इति नामान्तरं रामायणे । मत्तस्य महापार्श्व इति । तेन महोदरमहापार्श्वनामानस्त्रयः पठ्यन्ते । रामेण हतौ, हनुमता हतौ, अङ्गदेन हतौ रावणमन्त्रिणौ चेति । क्षिप्तवानरौ युद्धे विजित्य विद्रावितवानरौ । युद्धोन्मत्तो नीलेन मत्तश्च वृषभेण हत इति रामायणे पठ्यते । पुराणादिष्विव पुंव्यत्यासेनेयमुक्तिः । नील इति नीचकालो हनुमानेवोच्यते । ऋषभ इति प्राणवृषभः । सेयं चातुरी गुह्यभाषायाः । 'युद्धोन्मत्तश्च मत्तश्च पार्वतीवरदर्पितौ । प्रमथन्तौ कपीन् सर्वान् हतौ मारुतिमुष्टिना' (८.५४) इति हि निर्णये ॥ ६० ॥

अङ्गदादीन् प्लवङ्गेन्द्रान्[१] द्रावयन्तं शरोत्करैः[२] ।
प्राप्य[३] त्रिशिरसं तस्य हनूमान् [४]रथमक्षिणोत् ॥ ६१ ॥

---

१. **'अङ्गदादिप्लवङ्गेन्द्रान्'** इति वि.ती.पाठः । २. **'शरोत्तमैः'**

३. **'प्राप्तं त्रिशिरसं तस्य'** इति वि.ती.पाठः स्यात् । का.श्री. पाठोऽपि तथा । तथाहि तद्व्याख्यानम्–**'स्वसमीपं प्राप्तं त्रिशिरसं दृष्ट्वा'** इति ।

४. **'हनूमान् यानमक्षिणोत्'**

(भा.दी.) अङ्गदेति । हनूमान्, अङ्गद आदिर्येषां ते तथोक्तास्ते च ते प्लवङ्गेन्द्राश्च तान्, शराणामुत्कराः समूहास्तैः द्रावयन्तम्, स्वनिकटं प्राप्तं त्रिशिरसं दृष्ट्वा तस्य त्रिशिरसः रथं अक्षिणोत् अनाशयत् । क्षिणु हिंसायां लङ् ॥ ६१ ॥

(सं.चं.) त्रिशिरोवधेऽपि कथाव्यत्यासं निर्णयानुसारेण वर्णयति–अङ्गदादीन् । 'विद्रावितखिलकपिं वरात् त्रिशिरसं विभोः । भङ्क्त्वा रथं धनुः खड्गमाच्छिद्याशिरसं व्यधात्' (८.५३) इति निर्णये ॥ ६१ ॥

सञ्छिद्य चापखड्गौ च तळेन बलचुञ्चुना[1] ।
त्रिमूर्द्धानममूर्द्धानं चक्रे चक्रायुधप्रियः ॥ ६२ ॥

(भा.दी.) समिति । चक्रायुधस्य श्रीहरेः प्रियः, चापं च खड्गं च तौ सञ्छिद्य, बलेन चारु चतुरं तेन, बलचुञ्चुनेति पाठे बलप्रसिद्धेनेत्यर्थः । तळेन, त्रयः मूर्धानो यस्य स तथा तं राक्षसम्, न विद्यते मूर्धा यस्य स तथा तं चक्रे ॥ ६२ ॥

(सं.चं.) बलेन वित्तः बलचुञ्चुः । 'तेन वित्तश्चुञ्चुप्चणपौ' (अ.सू.५.२.२६) इति हि पाणिनिः । चक्रायुध-प्रियः हनुमान् ॥ ६२ ॥

परमपरमहिष्ठं[2] मानयन्तं नयन्तं
जयमखिलकपींस्तान्[3] राममत्राभिनन्दन् ।
रणरणरणिकायां वर्त्तमानोऽसमानो
मुहुरपि मिहिरश्रीः श्रीहनूमान् जगर्ज ॥ ६३ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्क्षरामायणे
युद्धकाण्डे षष्ठः सर्गः ॥

—०—

१. **'बलचारुणा'** इति वि.ती.पाठः ।

२. **'परमाणां मध्ये पराः उत्तमाः परमपराः अत्युत्तमाः, तेषामपि अतिशयेन पूज्यं परमपरमहिष्ठं रामम्'** इति का.श्री. ।

३. **'–कपीन्द्रान् राम–'**

(भा.दी.) परमेति । मिहिरस्य सूर्यस्य श्रीरिव श्रीः कान्तिर्यस्य स तथोक्तः, न विद्यते समानः सदृशो यस्य स तथोक्तः, रणे या रणरणिका उत्कण्ठा तस्यां वर्तमानः, अत्यर्थं युद्धाकाङ्क्षावानित्यर्थः, श्रीहनूमान्, परमा उत्तमाः ब्रह्मरुद्रादयस्तेषां परमहिष्ठं पूज्यतमम्, तान् अखिलकपीन् मानयन्तम्, तान् कपीन् प्रति जयमपि नयन्तं प्रापयन्तम्, श्रीरामं अत्र युद्धे अभिनन्दन् अभिनन्दयन् सन् मुहुः जगर्ज सिंहनादं चक्रे । गर्ज शब्दे लिट् ॥ ६३ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां युद्धकाण्डे षष्ठः सर्गः ॥

—०—

(सं.चं.) मालिन्या सर्गमुपसंहरति– परमेति । परमेभ्योऽपि परः परात्परः, सचायं महिष्ठः पूज्य-तमश्च । तादृशम्, अखिलकपीन् जयं नयन्तम्, एवं जयदानेन तान् मानयन्तं राममत्र युद्धोन्मत्तादिविजये अभिनन्दन्, रणे या रणरणिका उत्कटेच्छा तस्यां वर्तमानः, राक्षसनिग्रहे कृतनिर्धारः, युद्धरङ्गेऽसमानः, जीवकोटिष्व-प्यसमानः, मिहिरश्रीः भानुकान्तिः श्रीहनूमान् पलायमानान् राक्षसान् निरीक्ष्य मुहुर्मुहुर्जगर्ज । 'उद्यद्रविप्र-करसन्निभम्' इति हि मुख्यप्राणं स्तुवन्ति । प्रथमतृतीयपादयोरन्त्ययमकम् ॥ ६३ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां युद्धाकाण्डे षष्ठसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– २४८७+६३=२५५०]

सप्तमः सर्ग्गः

अद्रिकायोऽतिकायोऽथ[1] सन्तप्तो भ्रातृमारणात् ।
रथं स्वयम्भुवा दत्तमारुरोहार्क्कभास्वरम् ॥ १ ॥

(भा.दी.) श्रीरामभृत्यैरेवं विजयलक्ष्म्या विराजिते सति रक्षस्तमोभिः किमकारीत्यत आह– **अद्रिकाय** इत्यादिना । अथ भ्रातॄणां देवान्तकादीनां मारणं मृतिस्तस्मात् सन्तप्तः, अद्रिवत्कायो यस्य स तथा, अतिकायः तन्नामकः रावणात्मजः, स्वयम्भुवा चतुर्मुखेन दत्तम्, अर्कवद्भास्वरः प्रकाशनशीलस्तं रथं आरुरोह । रुह बीजजन्मनि प्रादुर्भावे च लिट् ॥ १ ॥

(सं.चं.) रामलक्ष्मणयोर्वीर्यवर्णनार्थोऽयं सर्गः । लक्ष्मणोऽतिकायं जघान । रामो मकराक्षरम् । अतिकायो धान्यमालिन्यास्तनय इत्युक्तम् । भ्रातॄणां नरान्तकादीनां त्रयाणां । मारणात् संहरणात् । इदमुपलक्षणम् । पितृव्ययोः मत्तयुद्धोन्मत्तयोर्मारणाच्च । रथं स्वयम्भुवा दत्तम् । 'सुरासुरैरवध्यत्वं दत्तमस्मै स्वयम्भुवा । एतच्च कवचं दिव्यं रथश्चैषोऽर्कभास्वरः' (७१.३२) इति च ॥ १ ॥

ब्रह्मणो वरदृप्तोऽसौ ब्रह्महा देवदारुणः[2] ।
[3]विष्फारयन् महच्चापं कोपाटोपमुपाययौ ॥ २ ॥

(भा.दी.) **ब्रह्मण** इति । ब्रह्मणः वरदृप्तः, ब्रह्महा ब्राह्मणहन्ता, देवान् दारयतीति तथोक्तः असौ अतिकायः महत् चापं विष्फारयन् सन्, कोपस्य आटोपः सम्भ्रमस्तं उपाययौ । यातेर्लिट् ॥ २ ॥

(सं.चं.) देवानामपि दारुणः भयङ्करः । ब्रह्महा ज्ञानिद्विट् । जीवजातशत्रुर्वा । 'ब्रह्माणि जीवाः सर्वेऽपि' इति हि स्मरन्ति । कोपस्य आटोपं वेगोत्कर्षम् ॥ २ ॥

---

१. **'–तिकायश्च सन्तप्तो–'** २. **'विस्फारयन् महाचापम्'** ३. **'देवदारणः'** इति वि.ती.पाठः ।

कुमुदं विविदं मैन्दं जित्वा[१] नीलादिकाञ्छरैः ।
विजित्याङ्गदसुग्रीवौ लीलया प्राप स प्रभुम्[२] ॥ ३ ॥

(भा.दी.) कुमुदमिति । सः कुमुदं विविदं मैन्दं शरैर्जित्वा[३], एवं नीलादिकानपि अङ्गदसुग्रीवौ च विजित्य लीलया प्रभुं श्रीरामं प्राप । आप्लृ व्याप्तौ लिट् ॥ ३ ॥

(सं.चं.) कुमुदम् । 'कुमुदो विविदो मैन्दो नीलः शरभ एव च । पादपैर्गिरिशृङ्गैश्च युगपत् समभिद्रवन्' (७१.३९) इति च ॥ ३ ॥

विपक्षवक्षो नावेक्षे[४] मच्छरानेव पृष्ठगान्[५] ।
निवर्त्तिष्ये[६] निराशोऽहमित्यूचे रावणात्मजः ॥ ४ ॥

(भा.दी.) विपक्षेति । अहं, विपक्षस्य शत्रोः वक्षः न अवेक्षे न पश्यामि । ईक्षतेर्लट् । पृष्ठं पृष्ठप्रदेशं गच्छन्तीति तथोक्तास्तान् मच्छरानेव अवेक्षे[७] । स्वकीयरथगतेः स्वमुक्तशरगमनादप्यतिशयितत्वेन पृष्ठतः पतन्तीत्यत एवमुक्तमिति हृदयम् । प्रतिभटाभावाद्युद्धान्निवर्तिष्ये, परावृत्य गमिष्ये । वृतु वर्तने लृट् । रावणात्मजः इति वचः ऊचे । वचधातोर्लिट् ॥ ४ ॥

(सं.चं.) विपक्षवक्षो नावेक्षे । सर्वे पलायनपरा इति पृष्ठमेवावेक्षे । शत्रुपृष्ठगान् मच्छरानेव केवलमवेक्षे । तेन प्रतिभटाभावान्निराशो निवर्तिष्ये ॥ ४ ॥

मानेनासहमानेन तत्र सौमित्रिणा क्षणात् ।
वर्षकेण शरान् घोरानतिकायोऽभ्यपद्यत ॥ ५ ॥

(भा.दी.) मानेति । तत्र तस्मिन् समये, घोरान् शरान् वर्षकेण वर्षणशीलेन, सहमानो न भवतीत्यसहमानस्तेन, अतिकायवचः श्रुत्वा असहमानेनेत्यर्थः, मानेन अभिमानेन, सौमित्रिणा क्षणं क्षणकालस्तस्मात् अतिकायः अभ्यपद्यत । पद गतौ लङ् ॥ ५ ॥

---

१. **'मैन्दं छित्वा'** २. **'प्राप राघवम्'** ३. **'शरैश्छित्वा'** ४. **'विपक्षकक्षान्नावेक्षे'**

५. **'मच्छरा नैव पृष्ठगाः'** । **'विपक्षवक्षः शत्रुवक्षःस्थलं नावेक्षे न द्रक्ष्यामि । न कोऽपि शत्रुः मत्पुरतो तिष्ठतीति भावः । तर्हि पृष्ठभागे शराः क्षिप्यन्तामित्यत आह–मदिति । मच्छराः मद्बाणाः पृष्ठगाः शत्रुदेहचरमभागस्पर्शिनो न भवन्ति'** इति का.श्री. ।

६. **'निवर्तिष्ये ततो युद्धादित्यूचे'** इति वि.ती.पाठ इति भाति । ७. **'मच्छरानेव न अवेक्षे'** इति कोशेषु पठ्यते । लिपिकृत्प्रमादः स्यात् ।

(सं.चं.) मानेनाऽत्माभिमानेन निमित्तेन शत्रोर्निन्दागर्भमाह्वानमसहमानेन, घोरान् शरान् वर्षकेण सौमित्रिणा अभ्यपद्यत अभिगतः ॥ ५ ॥

ननु बालोऽसि सौमित्रे न बली नापि चास्त्रवित् ।
गच्छ तिष्ठ मुमूर्षुश्चेदिति रावणिरभ्यधात् ॥ ६ ॥

(भा.दी.) नन्विति । हे सौमित्रे, त्वं बालः बालकः असि । बलमस्यास्तीति बली न असि । अस्त्राणि वेत्तीत्यस्त्रविन्न तादृशोऽपि । तस्मात् गच्छ मत्पुरतोऽन्यत्र याहि । गम्लृ गतौ लोट् । चेद्यदि मुमूर्षुः मरणेच्छावान् तर्हि तिष्ठ । इति वचः रावणिः रावणपुत्रः अतिकायः अभ्यधात् उवाच ॥ ६ ॥

(सं.चं.) ननु बालोऽसि । 'बालस्त्वमसि सौमित्रे विक्रमेष्वविचक्षणः । गच्छ किं कालसदृशं मां योधयितुमिच्छसि' (७१.५१) इति, 'अथवा त्वं प्रतिष्टब्धो न निवर्तितुमिच्छसि । तिष्ठ प्राणान् परित्यज्य गमिष्यसि यमक्षयम्' (७१.५४) इति च ॥ ६ ॥

बालस्य किमवद्यं मे बालो हि प्राक् त्रिविक्रमः ।
विक्रमस्व पुरा मृत्योरित्यूचे लक्ष्मणो रिपुम् ॥ ७ ॥

(भा.दी.) बालस्येति । बालस्य मे अवद्यं दोषः किम् । प्राक् बलेः राज्यापहरणसमये त्रिविक्रमः वामनरूपी विष्णुः बालो हि । मृत्योः मरणात् पुरा पूर्वं विक्रमस्व पराक्रमं कुरु । क्रमु पादविक्षेपे लोट् । इति लक्ष्मणः रिपुं अतिकायं प्रति ऊचे । ब्रूञ् धातोर्लिट् ॥ ७ ॥

(सं.चं.) बालस्य । 'बालेन विष्णुना लोकास्त्रयः क्रान्तास्त्रिभिः क्रमैः' (७१.६४) इति च ॥ ७ ॥

रणं द्रष्टुं नभो भेजुस्तयोर्वीरकुमारयोः ।
[१]पक्षपाते परिक्षिप्ता उभयेऽपि सुरासुराः ॥ ८ ॥

(भा.दी.) रणमिति । उभयेऽपि सुरासुराः पक्षपाते परिक्षिप्ताः निविष्टाः सन्तः, वीरयोः दशरथरावणयोः कुमारौ पुत्रौ तयोः लक्ष्मणातिकाययोः रणं युद्धं तद् द्रष्टुं नभः भेजुः । भज सेवायां लिट् ॥ ८ ॥

---

१. **'पक्षपातपरिक्षिप्ताः'** । **'पक्षपातेन सहायत्वेन परिक्षिप्ताः आकृष्टाः यद्वा पक्षपातेन बलदत्वेन परिक्षिप्ताः** । **'पक्षः पार्श्वगरुत्साध्यसहायबलभित्तिषु'** इत्यमरः (?वैजयन्ती) । **उभये द्विप्रकारा अपि सुरासुराः वीरौ च तौ कुमारौ च वीरकुमारौ । तयोः वीरकुमारयोः लक्ष्मणातिकाययोः रणं युद्धं द्रष्टुं नभोऽन्तरिक्षं भेजुः प्रापुः'** इति का.श्री. । किमनेन सिकतानिष्पीडनेन । वस्तुतस्तु अत्र पक्षशब्दः पार्श्ववचनः । उभयोः पार्श्वयोरेकस्मिन् पातोऽभिनिवेश इत्यर्थः ।

(सं.चं.) रणं द्रष्टुम् । 'ततो विद्याधरा भूता देवा दैत्या महर्षयः । गुह्यकाश्च महात्मानस्तद् युद्धं द्रष्टुमागमन्' (७१.६६) इति च । द्वावपि वीरौ । द्वावपि कुमारौ देवास्तदनुगाश्च लक्ष्मणपक्षपाते, दैत्यास्तदनुगाश्चातिकायपक्षपाते परिक्षिप्ताः आग्रहवन्तः । एकस्मिन् पक्षे निष्ठा पक्षपातः ॥ ८ ॥

एकं पञ्च च चिक्षेप सोऽतिकायः शरोत्तमान् ।
तानप्राप्तान्[१] शरैस्तीक्ष्णैश्चिच्छेद भरताग्रजः ॥ ९ ॥

(भा.दी.) एकमिति । (सः) अतिकायः एकं पञ्च च शरोत्तमान् लक्ष्मणाय चिक्षेप । क्षिप प्रेरणे लिट् । भरतस्य अग्रजः लक्ष्मणः अप्राप्तान् तान् शरान् तीक्ष्णैः शरैः चिच्छेद । च्छिदिर् द्वैधीभावे लिट् ॥ ९ ॥

(सं.चं.) प्रथममेकं शरोत्तमम् । लक्ष्मणेन तच्छेदे पुनः पञ्च शरोत्तमान् । 'तानप्राप्तान् शरैस्तीक्ष्णैश्चिच्छेद भरताग्रजः' इति तु समग्रं रामायणवचनम् (७१.७०) । 'चिच्छेद भरतानुजः' इत्यर्वाचीनाः पठन्ति । तं भ्रमं वारयितुं चेदमुद्धरणम् ॥ ९ ॥

आकर्णपूर्णमाकृष्य लक्ष्मणो मुक्तवाञ्छरम् ।
ललाटं पाटयामास रिपोः सादं च सोऽकरोत् ॥ १० ॥

(भा.दी.) आकर्णेति । लक्ष्मणः कर्णात् आ पर्यन्तं (पूर्णं) आकर्णपूर्णं यथा भवति तथा आकर्णपूर्णं आकृष्य (शरं) मुक्तवान् । सः शरः रिपोः ललाटमलिकं तत् पाटयामास सम्बिभेद । पट गतौ लिट् । सादो मूर्च्छा तं भयं वा अकरोच्च ॥ १० ॥

(सं.चं.) आकर्णं पूर्णं यथा स्यात् तथा । आकर्णं पूर्णं पूरितं आकृष्टं शरमिति वा । स शरः ललाटं पाटयामास, सादं विषादं च रिपोरकरोत् ॥ १० ॥

आश्वास्य रावणिर्वीरो वीरोऽसीति ब्रुवन् परम् ।
एकं त्रीन् पञ्च सप्तेति लक्ष्मणायाक्षिपच्छरान् ॥ ११ ॥

(भा.दी.) आश्वास्येति । रावणिः रावणपुत्रः, वीरः अतिकायः, आश्वास्य श्रमं परिहृत्य, परं शत्रुं लक्ष्मणं प्रति वीरः असि इति ब्रुवन् सन्, एकं त्रीन् पञ्च सप्त (इति) शरान् लक्ष्मणाय अक्षिपत् ॥ ११ ॥

---

१. 'तान् प्राप्तांश्च शरै–'

(सं.चं.) आश्वास्य कथञ्चिदात्मानं समाधाय । परं स्वशत्रुं लक्ष्मणम् । 'एकं त्रीन् पञ्च सप्तेति सायकान् राक्षसर्षभः । आदधे सन्दधे चापि विचकर्षोत्ससर्ज च' (७१.९६) इति च ॥ ११ ॥

चिच्छेद तांश्च सौमित्रिः परोऽमुञ्चन्महाशरम् ।
शरेण तेन भिन्नोरा ववर्षेषूः[१] स लक्ष्मणः ॥ १२ ॥

(भा.दी.) चिच्छेदेति । सौमित्रिः तांश्च शरान् चिच्छेद । च्छिदिर् द्वैधीभावे लिट् । परः शत्रुः अतिकायः महाशरं अमुञ्चत् । मुच्लृ मोक्षणे लङ् । तेन शरेण भिन्नमुरो यस्य स तथा सन् सः लक्ष्मणः इषूः शरान्, 'इषुर्द्वयोः' इत्यमरः, ववर्ष । वृषु सेचने लिट् ॥ १२ ॥

(सं.चं.) भिन्नोरा अपि सहसाऽऽत्मानं विशल्यं विधाय इषूः ववर्ष । 'इषुर्न षण्' इति यादवप्रकाशः । न षण् न नपुंसक इत्यर्थः । 'अभ्यवर्षन्महेषूणां सहस्रेण महायशाः' (७१.९६) इति च ॥ १२–५ ॥

असङ्ख्यास्तदिषूर्दृष्ट्वा मुमोचेषूः सकोपितः[२] ।
असङ्ख्या अतिकायश्च नभ आसीत् तमोमयम् ॥ १३ ॥

(भा.दी.) असङ्ख्या इति । सः अतिकायश्च, न विद्यते सङ्ख्या यासां तास्तथा ताः तदिषूः लक्ष्मणेषूः दृष्ट्वा कोपितः सन् असङ्ख्या इषूः मुमोच । मुच्लृधातोर्लिट् । नभः तमोमयं शरान्धकारितं आसीत् ॥ १३ ॥

साम्यं नसहमानोऽथ सौमित्रिर्बाणमन्त्रितम् ।
आग्नेयमस्त्रं व्यसृजत्[३] तत् सौरेणाऽक्षिपत् परः ॥ १४ ॥

(भा.दी.) साम्यमिति । अथ साम्यं समत्वं तत् नसहमानः, नसमासोऽयं नैकधेत्यादिवत्, असहमान इत्यर्थः, सौमित्रिः बाणे मन्त्रितम्, अग्निर्देवता अस्येत्याग्नेयं तत् अस्त्रं व्यसृजत् । सृज विसर्गे लङ् । परः शत्रुः अतिकायः, तत् अस्त्रं सूरो देवता अस्येति सौरं तेन, 'सूर्यसूरार्यमादित्य–' इत्यमरः, अस्त्रेण आक्षिपत् । क्षिपु निरसने लङ् ॥ १४ ॥

मुमोच रावणिर्याम्यं वायव्येन निरस्य तत् ।
चिच्छेद तच्छिरो बाणैर्बाहू च भरताग्रजः ॥ १५ ॥

---

१. **'ववर्षेषून् स–'** २. **'–चेषूः प्रकोपितः'** इति, **'असङ्ख्यांस्तदिषून् दृष्ट्वा मुमोचेषून् प्रकोपितः । असङ्ख्यानतिकायश्च'** इति च ।
३. **'–मस्त्रमसृजत्'**

(भा.दी.) मुमोचेति । रावणिः यमो देवता अस्येति याम्यं अस्त्रं मुमोच । मुच्लृ मोक्षणे लिट् । भरतस्याग्रजः लक्ष्मणः तत् याम्यमस्त्रं वायुर्देवता अस्येति वायव्यं तेन अस्त्रेण निरस्य, बाणैः तच्छिरः अतिकायशिरः बाहू च चिच्छेद । च्छिदेर्लिट् ॥ १५ ॥

द्विशिराः स चतुर्बाहुरतिकायो व्यदृश्यत ।
चिच्छेद तानि चाङ्गानि[1] लाघवाद् राघवानुजः ॥ १६ ॥

(भा.दी.) द्विशिरा इति । सः अतिकायः, द्वे शिरसी यस्य स तथा सन्, चत्वारो बाहवो यस्य स तथा सन् व्यदृश्यत । दृशेर्लङ् । राघवानुजः तानि च अङ्गानि, लाघवमस्त्रलाघवं तस्मात् चिच्छेद ॥ १६ ॥

(सं.चं.) द्विशिराः स चतुर्बाहुः । रामायणे न स्फुटमुक्तमिदम् । 'छिन्नेषु तेषु द्विगुणास्यबाहुः पुनःपुनः सोऽथ बभूव वीरः' (८.६०) इति निर्णये ॥ १६–७ ॥

द्विगुणाङ्गोऽभवत्[2] सोऽथ छिन्नश्छिन्नः पुनःपुनः ।
तं विषण्णं [3]विवर्णास्यं सौमित्रिं वायुरब्रवीत् ॥ १७ ॥

(भा.दी.) द्विगुणेति । अथ सः अतिकायः, पुनःपुनः छिन्नः च्छिन्नः सन्, द्वौ गुणौ आवृत्ती येषां तानि द्विगुणानि तानि अङ्गानि यस्य स तथा सन् अभवत् । वायुः विषण्णम्, विवर्णमास्यं मुखं यस्य स तथा तं सौमित्रिं प्रति अब्रवीत् । अशरीरवागभूदित्यर्थः ॥ १७ ॥

ब्राह्मेणास्त्रेण वद्ध्योऽयं तात नैवापरैरिति ।
तद् दिव्यवचनं[4] श्रुत्वा विरिञ्चास्त्रं स सन्दधे ॥ १८ ॥

(भा.दी.) ब्राह्मणेति । हे तात लक्ष्मण, अयं अतिकायः ब्रह्मा देवता अस्येति ब्राह्मं तेन अस्त्रेण वध्यः । अपरैरस्त्रैर्न वध्यः (इति अब्रवीत्) । सः लक्ष्मणः तत् दिवि भवं दिव्यं तच्च तत् वचनं तत्, अशरीर-वाक्यमित्यर्थः, श्रुत्वा विरिञ्चास्त्रं धनुषि सन्दधे ॥ १८ ॥

---

१. **'तानि जातानि'** २. **'द्विगुणास्योऽभवत्'**

३. **'वायुः मुख्यवायुः अतिकायस्यादृश्यः सन्, अतिकायः यथा न शृणोति तथाऽब्रवीत् अत एवोक्तम्– 'रक्षःसुतस्याश्रवणीयम्' (म.भा.ता.नि.८.६१) इति'** इति का.श्री ।

४. **'दिव्यं वचनम्'** । **'दिव्यं दिवि भवम् । दिव्यं अलौकिकं वा, तान् वायुना उक्तं वचनम्'** इति का.श्री. ।

(सं.चं.) दिवि आकाशे भवं दिव्यम् । आकाशवाणी ॥ १८–२० ॥

मुमोच ब्राह्ममस्त्रं तत् स ब्रह्मजनकानुजः ।
ससूताश्वरथं तूर्णमतिकायं ददाह तत् ॥ १९ ॥

(भा.दी.) मुमोचेति । ब्रह्मणो यो जनकः पिता श्रीरामरूपी विष्णुः, तस्यानुजः सः तत् वायुप्रोक्तं ब्राह्मं अस्त्रं अतिकायाय मुमोच । तत् अस्त्रम्, सूतश्च अश्वश्च रथश्च तैः सहितम्, अतिकायं तूर्णं यथा भवति तथा ददाह । दहधातोर्लिट् ॥ १९ ॥

निहत्य वैरिणं वीरो[1] रामं रामानुजोऽव्रजत् ।
प्रणतं प्रणयेनेशः परिरेभेऽथ लक्ष्मणम् ॥ २० ॥

(भा.दी.) निहत्येति । रामानुजः वैरिणं अतिकायं निहत्य भूयः श्रीरामं अव्रजत् । व्रजेर्लङ् । अथ प्रणयः स्नेहः तेन प्रणतं लक्ष्मणं ईशः श्रीरामः परिरेभे आलिलिङ्गे । रेभृ शब्दे[3] लिट् ॥ २० ॥

रावणं पुत्रशोकार्त्तं विलप्य क्रोधमाश्रितम् ।
[2]निर्य्याणाभिमुखं प्रेक्ष्य खरपुत्रोऽभ्यभाषत ॥ २१ ॥

(भा.दी.) रावणमिति । खरपुत्रः मकराक्षनामा, पुत्रशोकार्तम्, विलप्य विलापं कृत्वा क्रोधः कोपस्तं आश्रितं रावणं निर्याणे युद्धार्थं गमने अभिमुखं तं प्रेक्ष्य अभ्यभाषत ॥ २१ ॥

(सं.चं.) अथान्यत्र रामायणोदितं मकराक्षवधप्रसङ्गं तात्पर्यनिर्णयानुगुणमत्र संयोज्य कथयति– रावणमिति । पुत्रमरणनिमित्तः शोकः मनसो व्याकुलता नामाऽघातः । तेनाऽर्तं दुःखितम् । दुःखेन विलपन्तम् । प्रथमं विलप्य पश्चात् क्रोधमाश्रितम् । पुत्रशोकेन विललाप । अथ पुत्रहन्तरि क्रोधमाशिश्रिये । स्वयमेव युद्धार्थं निर्याणायाभिमुखं सन्नद्धम् । खरपुत्रो मकराक्षः ॥ २१ ॥

राजन् नियोजनीयोऽहं रणार्त्थं रणपण्डितः ।
निहत्य मत्पितृरिपुं सबलं त्वां प्रसादये ॥ २२ ॥

१. **'वैरिणं भूयो रामम्'** इति वि.ती.पाठः । २. **'प्रयाणाभिमुखम्'**

३. **'रभ राभस्ये'** इति साधुः पाठः । रेभतेः **'परिरिरेभे'** इति रूपं भवतीत्युक्तम् ।

(भा.दी.) राजन्निति । हे राजन्, रणे पण्डितः कुशलः अहं रणार्थं नियोजनीयः प्रेषणीयः । मत्पितुः खरस्य रिपुं श्रीरामं सबलं ससैन्यं निहत्य त्वां प्रसादये प्रसन्नं करवाणि । षद्लृ विशरणगत्यवसादनेषु लट् ॥२२॥

(सं.चं.) मत्पितृ रिपुं रामम् । सबलं सकपिसैन्यम् ॥ २२–३ ॥

इत्युक्त्वा मन्युरक्ताक्षो मकराक्षो महाबलः ।
रावणेन समादिष्टो रथी धन्वी विनिर्य्ययौ[1] ॥ २३ ॥

(भा.दी.) इतीति । इति उक्त्वा, मन्युना रक्ते अक्षिणी यस्य स तथा, महद् बलं यस्य स तथा मकराक्षः रावणेन समादिष्टः सन्, रथोऽस्यास्तीति रथी सन्, धनुरस्यास्तीति धन्वी तथा सन् विनिर्ययौ ॥ २३ ॥

राक्षसान् मकराक्षस्य पुरोगान् कपिपुङ्गवाः ।
नानाविधायुधान् सङ्ख्ये निजघ्नुः सशिलानगाः ॥ २४ ॥

(भा.दी.) राक्षसानिति । मकराक्षस्य पुरोगान् पुरःसरान्, नानाविधानि आयुधानि येषां ते तथा तान्, राक्षसान् शिलाश्च नगा वृक्षाश्च तैः सहिताः, कपिपुङ्गवाः कपिश्रेष्ठाः, सङ्ख्ये युद्धे तस्मिन् निजघ्नुः ॥ २४ ॥

(सं.चं.) शिलाभिर्नगैर्वृक्षैश्च सहिताः ॥ २४–५ ॥

नीलाङ्गदादीन् सुग्रीवं शरैर्विद्राप्य[2] वीर्य्यवान् ।
[3]लक्ष्मणेषूरगणयन् रामं प्राप खरात्मजः ॥ २५ ॥

(भा.दी.) नीलेति । वीर्यमस्यास्तीति वीर्यवान्, खरात्मजः मकराक्षः, नीलश्च अङ्गदश्च तौ आदी येषां ते तथा तान् सुग्रीवं च शरैः विद्राप्य लक्ष्मणेषूः अगणयन् अलक्षयन् सन् श्रीरामं प्राप ॥ २५ ॥

पश्यामि राम दैवात्[4] त्वां मत्पितृघ्नमकिञ्चनम् ।
करिष्ये निष्क्रियामित्थं मकराक्षोऽब्रवीत् प्रभुम् ॥ २६ ॥

---

१. **'धन्वी च निर्ययौ'** इति, **'धन्वी स निर्ययौ'** इति च। २. **'–र्विद्राव्य वीर्य-'**

३. **'लक्ष्मणेषूनजणयन्'** इति, **'लक्ष्मणेषून् न गणयन्'** इति च। ४. **'रामदेव त्वाम्'**

(भा.दी.) पश्यामीति । हे रामदेव, मत्पितरं हतवानिति तथा तम्, अकिञ्चनं दरिद्रं त्वां अहं दैवं भागधेयं तस्मात् पश्यामि । तव निष्क्रियां प्रतिक्रियां करिष्ये । कृञो लृट् । इत्थं मकराक्षः प्रभुं श्रीरामं प्रति अब्रवीत् । ब्रूञो लङ् ॥ २६ ॥

(सं.चं.) दैवात् भाग्यवशात्, दिष्ट्येति यावत्, त्वां पश्यामि । त्यक्तराज्यतयाऽकिञ्चनम् । न किञ्चन शक्यमनेन कर्तुमिति चाकिञ्चनम् । निष्क्रियां प्रतीकारम् ॥ २६ ॥

मत्कङ्कपत्रैर्निहतः[1] कङ्कानां निष्क्रियां भवान् ।
करिष्यते निजैर्म्मांसैरिति रामस्तमब्रवीत्[2] ॥ २७ ॥

(भा.दी.) मदिति । ततः श्रीरामः मत्कङ्कपत्राः मद्बाणास्तैः निहतः भवान्, निजानि स्वकीयानि तैः मांसैः कङ्कानां कङ्कनामकपक्षिणां निष्क्रियां तृप्तिं करिष्यते । इति मकराक्षमब्रवीत् ॥ २७ ॥

(सं.चं.) कङ्कपत्रैर्बाणैः । कङ्का गृध्रविशेषा इत्याहुः । 'कङ्कस्तु कर्कटस्कन्धः पर्कटः कमलच्छदः । दीर्घपादः प्रियापत्यो लोहपृष्ठश्च मल्लकः' इति यादवप्रकाशः । क्रौञ्चप्रभेदोऽयमित्यन्ये । निष्क्रियां निरृणत्वम् ॥ २७ ॥

ववर्ष बाणान् दुष्टोऽसौ[3] रामश्चिच्छेद ताञ्छरैः ।
ववर्ष रामश्च शरानस्त्रैरस्त्राण्यवारयत् ॥ २८ ॥

(भा.दी.) ववर्षेति । दुष्टः असौ मकराक्षः, श्रीरामे बाणान् ववर्ष । वृष सेचने लिट् । श्रीरामः तान् बाणान् शरैः चिच्छेद । च्छिदेर्लिट् । शरांश्च ववर्ष, अस्त्रैरस्त्राणि अवारयत् । वृञ् आवरणे लङ् ॥ २८ ॥

(सं.चं.) शरान् ववर्ष च । अस्त्रैरस्त्राण्यवारयच्च ॥ २८–९ ॥

रामः स्मितमुखो बाणैः सरथं सारथिं क्षणात् ।
उदारो दारयामास स शूली च खमाप्लुतः ॥ २९ ॥

---

१. '**–पत्रैर्विहतः**' इति, '**–पत्रनिहतः**' इति च ।

२. '**रामस्ततोऽब्रवीत्**' इति वि.ती.पाठः स्यात् ।

३. '**दृप्तो बाणान् ववर्षासौ**'

(भा.दी.) राम इति । उदारः श्रीरामः, स्मितं मुखं यस्य स तथा सन्, बाणैः रथेन सहितः सरथस्तं सारथिम्, क्षणः क्षणमात्रं तस्मात् दारयामास । दृ विदारणे लिट् । स च मकराक्षः शूलमस्यास्तीति शूली सन्, खं गगनं तत् आप्लुतः ॥ २९ ॥

चिक्षेप राक्षसः शूलं रामश्चिच्छेद तच्छरैः ।
चिच्छेद च शरेणास्य[१] शिरः कुण्डलमण्डितम् ॥ ३० ॥

(भा.दी.) चिक्षेपेति । राक्षसः शूलं चिक्षेप । क्षिपु निरसने लिट् । श्रीरामः तत् शरैः चिच्छेद । कुण्डलाभ्यां मण्डितमलङ्कृतं तत्, अस्य मकराक्षस्य शिरश्च शरैः चिच्छेद ॥ ३० ॥

(सं.चं.) पावकास्त्रमन्त्रितेन शरेण । 'पावकास्त्रं ततो रामः सन्दधे तु शरासने' (७९.६७) इति च ॥ ३० ॥

निकरा राक्षसानां ते मकराक्षानुगामिनः ।
परेताः कपिभिः शैलैः परे च प्राद्रवन् पुरीम् ॥ ३१ ॥

(भा.दी.) निकरा इति । मकराक्षमनुगन्तुं शीलमेषामस्तीति तथा ते, राक्षसानां ते निकराः समूहाः कपिभिः शैलै पर्वतैः परेताः मारिताः । परे च राक्षसाः पुरीं प्रति प्राद्रवन् ॥ ३१ ॥

(सं.चं.) शैलैस्ताडिताः परेता मृताः । परे ये न मृतास्ते च । द्वितीयाक्षरप्रासः ॥ ३१ ॥

विक्रान्तकान्तकरकाशितकार्म्मुकं तं रामं रमारमणमेवमवेक्षमाणाः ।
देवोपदेवमुनयो मुदिता मुकुन्दं देवारिवारदमनं प्रववन्दिरेऽत्र ॥ ३२ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्क्षहरामायणे
युद्धकाण्डे सप्तमः सर्ग्गः ॥

—०—

(भा.दी.) विक्रान्तेति । मुदिताः मकराक्षवधेन सन्तुष्टाः, देवाश्च, उपदेवाः गन्धर्वादयस्ते च, मुनयश्च ते, विक्रान्तेन पराक्रमेण कान्ते मनोहरे करे काशितं शोभितं कार्मुकं यस्य स तथोक्तः तम्, विक्रान्तकान्तश्चासौ

१. **'शरैरस्य'** इति वि.ती.पाठः स्यात् ।

करकाशितकार्मुकश्चेति वा, रमायाः रमणं पतिम्, देवारीणां राक्षसानां वारः समूहस्तं दमयति नाशयतीति तथा तम्, मुकुन्दं भक्तमोक्षप्रदं तं श्रीरामम्, (एवं) अवेक्षमाणाः सन्तः, अत्र सुवेलाद्रौ, प्रववन्दिरे संस्तुतवन्तः । वदि अभिवादनस्तुत्योः लिट् ॥ ३२ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां युद्धकाण्डे सप्तमः सर्गः ॥

—०—

(सं.चं.) अथ वसन्ततिलकया सर्गमुपसंहरति– विक्रान्तेति । शत्रुदमने विक्रान्तः शूरः, चक्षुषां कान्तः कमनीयतमश्चेति विक्रान्तकान्ते करे प्रकाशमानं कार्मुकं धनुर्यस्य । देवारीणामसुराणां वारं समुदायं दमयतीति तादृशं रामं देवोपदेवमुनयो मकराक्षवधेन मुदिताः प्रववन्दिरे । प्रकर्षेण सभक्तिश्रद्धं ववन्दिरे प्रणेमुस्तुष्टुवुश्च ॥ ३२ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां युद्धकाण्डे सप्तमसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– २५५०+३२=२५८२]

अष्टमः सर्ग्गः

निशम्य सम्यङ्मकराक्षमृत्युं स शोककोपाकुलितो दशास्यः ।
सन्नाहयन्नाहवशोभिनीं स्वां सेनां रणायाऽशु विनिर्ज्जगाम ॥ १ ॥

(भा.दी.) श्रीरामेण जयश्रिया दीप्यमाने सति रावणपतङ्गेन किं कृतमित्यत आह– **निशम्येति** । सः दशास्यः मकराक्षस्य मृत्युर्मरणं तं निशम्य, सम्यक् शोकश्च कोपश्च ताभ्यामाकुलितः आकुलीभूतः, आहवे युद्धे शोभितुं शीलमस्या अस्तीति तथा ताम्, स्वां सेनां सन्नाहयन् सन्, रणं युद्धं तस्मै आशु विनिर्जगाम । गम्लृ गतौ लिट् ॥ १ ॥

(सं.चं.) अथेन्द्रोपेन्द्रवज्रयोरुपजात्या रावणयुद्धसन्नाहमाह– निशम्येति । मकराक्षमृत्युं निशम्य सम्यगतितरां शोककोपाभ्यामाकुलितः व्यग्रः । **'ಕಳವಳಗೊಂಡ'** इति भाषायाम् । स्वपक्षक्षयेण शोकः । परपक्षोत्कर्षेण कोपः । सन्नाहयन् सज्जितां कवचितां वा कारयन् ॥ १ ॥

स कुण्डली भूषणभूषिताङ्गो देदीप्यमानं रथमारुरोह ।
तस्याऽतपत्रं सितचामरे च नीलाभ्रभासः परभागभाञ्जि[१] ॥ २ ॥

(भा.दी.) स इति । कुण्डलानि अस्य सन्तीति कुण्डली, भूषणैः भूषितानि अङ्गानि अवयवा यस्य स तथोक्तः, देदीप्यमानोऽतिशयेन[२] ज्वलमानस्तं रथं आरुरोह । रुहेर्लिट् । आतपत्रं च्छत्रम्, सितचामरे च, नीलं तदभ्रं मेघस्तद्वद् भाः कान्तिर्यस्य स तथा तस्य, तस्य रावणस्य परे अन्ये ये भागाः पृष्ठपार्श्वप्रदेशास्तान्

---

१. **'नीलवर्णस्य तस्य सितातपत्रादिसम्बन्धात् शोभाविशेषोऽभूदित्यर्थः'** इति वि.भू. । का.श्री. च ।

२. **'–शयेन दीप्यमानस्तम्'** इति युक्तः पाठः ।

भजन्तीति तथोक्तानि आसन् । यद्वा परभागभाञ्जि वर्णोत्कर्षकराणि, 'परभागो गुणोत्कर्षः' इति हलः । अभूवन् । नीलवर्णस्य सितातपत्रादिसम्बन्धाच्छोभाविशेषोऽभूदित्यर्थः ॥ २ ॥

(सं.चं.) नीलाभ्रभासः तस्य श्वेतच्छत्रं श्वेतचामरे च परभागं गुणोत्कर्षं शोभातिशयं भाजयन्तो बभूवुः । कादम्बिनीं परितश्चरन्ती हंसमालेव ॥ २ ॥

तं वानरास्तत्र नराशिनाथं नराशिराशिप्रकरैः[1] परीतम् ।
सबाणबाणासनमुद्बणास्य[2]मायान्तमालोक्य विदुद्रुवुस्ते ॥ ३ ॥

(भा.दी.) **तमि**ति । ते वानराः तत्र युद्धे नराशिनां राक्षसानां ये राशयस्तेषां प्रकराः समूहास्तैः परीतं परिवृतम्, बाणा बाणासनं च तैः सहितम्, उद्बणानि क्रूराणि आस्यानि यस्य स तथा तम्, आयान्तं (नराशिनाथं) राक्षसाधिपतिं (तं) रावणं आलोक्य विदुद्रुवुः ॥ ३ ॥

(सं.चं.) नराशी नरमांसादो राक्षसः । नराशिनां राशयः सेनाघटनाः । तेषं प्रकरैः । बहुविधैः सेनासमुदायैः । ते वानरा विदुद्रुवुः । रामायणे त्वियं कथा प्रहस्तवधानन्तरमुक्ता । व्यत्यासो नाम शैलीप्रभेदोऽयमिति सूचयन् पण्डिताचार्यो निर्णयानुसारेण मकराक्षवधानन्तरमाह ॥ ३ ॥

विंशद् दशास्यस्य[3] च लोचनानि रक्तानि दृष्ट्वा मदमन्युमन्ति[4] ।
भुजांश्च विंशद् भुजगप्रकारान्[5] कुतूहलं प्राप कुलं कपीनाम् ॥ ४ ॥

(भा.दी.) **विंशदि**ति । कपीनां कुलं समूहः, मदश्च मन्युश्च तौ एषां स्त इति तथोक्तानि, (रक्तानि) दशास्यस्य विंशत् विंशतिसङ्ख्याकानि लोचनानि दृष्ट्वा, भुजगवत् सर्पवत् प्रकार आकारो येषां ते तथा तान्, विंशद्भुजांश्च दृष्ट्वा कुतूहलं कौतुकं तत् प्राप ॥ ४ ॥

(सं.चं.) विंशदिति द्वितीया । विंशतिं लोचनानीत्यर्थः । मदमन्युमत्पुरुषाश्रितत्वं मदमन्युव्यञ्जकत्वं च लोचनानां मदमन्युमत्त्वम् । विंशद्भुजानिति विंशतिं भुजानित्यर्थः । प्रतनाश्छान्दसाः त्रिंशद्वत् विंशत्पदमप्यूरीकुर्वन्ति । तमेव प्रतनानामार्षं पन्थानं प्रबन्धाऽयमप्यनुपपात । अपूर्वोऽयं प्राणिविशेष इति कुतूहलं विनोदं प्राप ॥ ४ ॥

---

१. **'नराशिनाथप्रकरैः'** २. **'–सनमुल्बणा–'** ३. **'–स्य विलोचनानि'**

४. **'मदेन अहङ्कारेण मन्युना कोपेन च युक्तानि । मदमन्युज्ञापकानीति यावत्'** इति का.श्री. । ५. **'भुजगप्रकाशान्'**

दंष्ट्राकटूनां मुखकोटराणां महाञ्जनाद्रेरिव कन्दराणाम् ।
लोलाहिजिह्वादशकं चकाशे दिशो दशेव ग्रसितुं सुरारेः ॥ ५ ॥

(भा.दी.) **दंष्ट्रेति** । दंष्ट्राभिः कटूनां क्रूराणाम्, महान् योऽञ्जनाद्रिस्तस्य कन्दराणामिव गुहानामिव, 'दरी तु कन्दरो वाऽस्त्री' इत्यमरः, संस्थितानामिति शेषः, सुरारेः राक्षसस्य रावणस्य मुखान्येव कोटराणि वृक्षबिलानि तेषाम्, 'निष्कुहः कोटरं वा' इत्यमरः, लोला अतिचञ्चला ये अहयः सर्पास्तेषां समानं जिँह्वादशकं दश दिशः ग्रसितुमिव स्थितं चकाशे । काशृधातोर्लिट् ॥ ५ ॥

(सं.चं.) कोटराः निष्कुटाः । 'निष्कुटः कोटरः स्मृतः' इति हलायुधः । '**ಪೊಟರೆ**' इति भाषायाम् । लोला अहय इव लोलं जिह्वादशकम् । सुरारेः रावणस्य ॥ ५ ॥

किं पौरुषं तत् पुरुषादभर्त्तुः संवर्ण्णनीयं कविभिर्विविच्य ।
कालानलस्येव न यस्य शान्तिर्विनेशितुर्वीर्य्यलयोदवाहम् ॥ ६ ॥

(भा.दी.) **किमिति** । कविभिः, पुरुषादानां राक्षसानां भर्तुः स्वामिनः रावणस्य, तत् लोकप्रसिद्धं पौरुषं पराक्रमः, विविच्य किं वा संवर्णनीयम्, विविच्य वर्णयितुं (न) शक्यमित्यर्थः । यस्य रावणसम्बन्धिनः वीर्यस्य, (ईशितुः सर्वस्वामिनः) श्रीरामस्य, उदकानां वाहः उदवाहः, लयस्य प्रळयस्य उदवाहो लयोदवाहः, वीर्यमेव लयोदवाहः, तं विना, लयोदवाहं प्रळयोदकप्रवाहं विना कालानलस्येव प्रळयकालाग्नेरिव, शान्तिः शमनं नेति सम्बन्धः ॥ ६ ॥

(सं.चं.) किमिति संवर्णनीयं सामस्त्येन वर्णनीयम्? अशक्यवर्णनं तत्पौरुषमित्यर्थः । कथम्? कालानलस्य प्रळयकालाग्नेः पौरुषमिव । लयोदवाहं विना न तस्य शान्तिः । लयोदवाहसदृशं ईशितू रामस्य वीर्योत्कर्षं विना न रावणपौरुषस्य शान्तिर्विरामः । पाणिनिसूत्रे वाहनपदं वाहस्याप्युपलक्षणमित्युक्तम् ॥ ६ ॥

सेनान्य एनं बहुसैन्यवन्तो वीराः सहस्रायुतकोटिसङ्ख्याः ।
नानायुधाढ्याः परिवारयन्तो व्यद्रावयंस्तत्[१] कपिचक्रमाशु ॥ ७ ॥

(भा.दी.) **सेनान्य** इति । बहूनि यानि सैन्यानि तानि एषां सन्तीति तथोक्ताः, वीराः पराक्रमिणः, सहस्रं च, अयुतं च, कोटयश्च, ताः सङ्ख्या येषां ते तथा । केचित् समुदायेन सहस्रसङ्ख्याः, अपरे अयुतसङ्ख्याः,

१. **'व्यद्रावयत् तत्'** इति वि.ती.पाठः ।

अन्ये च कोटिसङ्ख्याका इत्यर्थः । नानाविधान्यायुधानि तैराढ्याः सम्पन्नाः, सेनान्यः सेनानायकाः, एनं रावणं परिवारयन्तः परिवारभूताः आसन् । रावणः तत् कपिचक्रं कपिसैन्यं आशु व्यद्रावयत् ॥ ७ ॥

(सं.चं.) सेनान्य इतीन्द्रवज्रा । सहस्रायुतकोटिसङ्ख्याः सेनान्यः । एकत्र सहस्रसङ्ख्याः । अन्यत्रायुत-सङ्ख्याः । अपरत्र कोटिसङ्ख्याः । तेष्वेकैकोऽपि बहुसैन्यवान् । परिवारयन्तः रावणं परिवार्य स्थिताः । कपिसैन्यं व्यद्रावयन् । 'ततः सहस्रायुतकोट्यनीकपैर्निशाचरैराशु ययौ रणाय' (८.७०) इति हि निर्णये ॥ ७ ॥

गजो गवाक्षो गवयो वृषश्च सगन्धमादाः सह कत्थनेन[1] ।
रक्षश्चमूं जघ्नुरिमे कपीन्द्राः षड्भिः शरैस्तानतुदद् दशास्यः ॥ ८ ॥

(भा.दी.) गज इति । गन्धमादेन सहिताः सगन्धमादाः, गजः गवाक्षः गवयः वृषश्च इति इमे कपीन्द्राः, कत्थनेन कत्थनाख्यकपीन्द्रेण सह, रक्षसो रावणस्य चमूं जघ्नुः । दशास्यः षड्भिः शरैः तान् गन्धमादनादिषट्कपीन् अतुदत् । तुद व्यथने लङ् ॥ ८ ॥

(सं.चं.) गजो गवाक्षः । अनेन 'ततो गवाक्षो गवयः सुदंष्ट्रस्तथर्षभो ज्योतिमुखो नभश्च' (५९.४२) इति रामायणवचनं च विवृतम् । अत्र सुदंष्ट्र इति गज उच्यते । ज्योतिर्मुख इति गन्धमादनः । नभः कत्थनः । तान् षड् वीरान् षड्भिः शरैरतुदद्दशास्यः ॥ ८ ॥

नासत्यसूनू स च शम्भुसूनुः शैलैः प्रजह्रुः कुपिता दशास्यम् ।
शरैः स शैलाञ्छकलीचकार त्रिभिस्त्रिभिः पातितवानिमांश्च ॥ ९ ॥

(भा.दी.) नासत्येति । नासत्ययोरश्विनोः सूनू पुत्रौ मैन्दविविदौ, शम्भुसूनुः चतुर्मुखपुत्रः सः जाम्बवांश्च इत्येते त्रयः कुपिताः क्रुद्धाः सन्तः दशास्यं शैलैः पर्वतैः प्रजह्रुः ताडितवन्तः । सः रावणः त्रिभिः शरैः शैलान् शकलीचकार चूर्णीकृतवान् । इमान् जाम्बवत्प्रमुखांश्च त्रिभिः शरैः पातितवान् ॥ ९ ॥

(सं.चं.) अथ नासत्यसूनू मैन्दविविदौ, शम्भोश्चतुर्मुखस्य सूनुर्जाम्बवांश्चेति त्रयः । त्रिभिः शरैः त्रीन् शैलान् शकलीचकार । इमांश्च त्रीन् त्रिभिः शरैः पातितवान् । रामायणेऽनुक्तेयं कथा निर्णयोदिता ॥ ९ ॥

अथाङ्गदोऽङ्गीकृतगण्डशैलः प्रचण्डवेगोऽभिपपात रोषात् ।
उदारवीर्य्यः प्रविदार्य्य तूर्ण्णं तं रावणः पातितवाञ्छरेण ॥ १० ॥

---

१. **'गन्धमादेन सहिता गजादयश्चत्वारः कपयः कत्थनेन कुबेरावतारेण कत्थनाख्येन स्वपित्रा सह'** इति का.श्री. ।

(भा.दी.) **अथेति** । अथ अङ्गीकृतः गृहीतः गण्डशैलो महापाषाणं येन स तथा अङ्गदः, प्रचण्डस्तीक्ष्णो वेगो यस्य स तथा सन्, रोषः क्रोधस्तस्मात् अभिपपात अभिजगाम । उदारं महद् वीर्यं यस्य स तथा रावणः, तं अङ्गदं तूर्णं यथा भवति तथा शरेण प्रविदार्य पातितवान् ॥ १० ॥

(सं.चं.) गण्डशैलः गिरेः प्रच्युता शिला । अङ्गदप्रसङ्गोऽपि रामायणेऽनुक्तः ॥ १० ॥

उग्रं दशग्रीवमथाभ्यरौत्सीत् सुग्रीव उच्चैः प्रगृहीतवृक्षः ।
छित्वा तरुं तस्य विदार्य्य कण्ठं शरेण तं पातितवान् दशास्यः ॥ ११ ॥

(भा.दी.) **उग्रमिति** । अथ उच्चैः सम्यक् प्रगृहीतो वृक्षो येन स तथा, सुग्रीवः कपिराजः, उग्रं दशग्रीवं अभ्यरौत्सीत् रुरोध । दशास्यः तरुं छित्वा तस्य सुग्रीवस्य कण्ठो गळस्तं शरेण विदार्य तं पातितवान् न्यपातयत् ॥ ११ ॥

(सं.चं.) तस्य सुग्रीवस्य कण्ठं शरेण विदार्य । 'स सायकार्तो विपरीतचेताः कूजन् पृथिव्या निपपात वीरः' (५९.४१) इति च ॥ ११ ॥

भुजं भुजङ्गाभमथोन्नमय्य तं रावणं ताडितवान् हनूमान् ।
सर्वाननेभ्योऽस्य जगाल[1] रक्तं धातुद्रवोऽद्रेरिव कन्दरेभ्यः ॥ १२ ॥

(भा.दी.) **भुजमिति** । अथ हनूमान् भुजङ्गवच्छेषवदाभा कान्तिर्यस्य स तथा तं भुजं उन्नमय्य उद्यम्य तं रावणं ताडितवान् । अस्य सर्वाणि यान्याननानि तेभ्यः, अद्रेः कन्दराणि गुहास्तेभ्यः धातूनां मनःशिलानां द्रव इव स्राव इव, रक्तं शोणितं तत् जगाल निःसृतमभूत् । गल उद्गमने लिट् ॥ १२ ॥

(सं.चं.) अद्रेः कन्दरेभ्यः धातुद्रव इव । धातुद्रवः गैरिकादि । गैरिकं पीतधातुः स्यात् कुनटी तु मनः-शिला । रोचनी रञ्जनी हृद्या रसनेत्री महासना । करवीरा कला विद्युन्नागमाता विगन्धिका । शिला मनोऽभिधा काला नागजिह्वा च ताः समाः' इति यादवप्रकाशः । 'सुवर्णरूप्यताम्राणि हरितालं मनःशिलाः । गैरिकाञ्जनकासीससीसलोहाः सहिङ्गुलाः । गन्धकोऽभ्रकमित्याद्या धातवो गिरिसम्भवाः' इति चान्यत्र । जगाल सुस्राव । गल अदने । 'स्रवणेऽपि । अनेकार्थत्वात्' इति क्षीरस्वामी ॥ १२–३ ॥

१. **'जगाल निःसृतमभूत् । गॄ निगरणे लिट् । 'अचि विभाषा' (अ.सू.८.२.२) इति लत्वम् । 'गल् उद्गमने' इति केचित्'** इति का.श्री. । अत्र **'केचित्'** इति वि.भू.टीकाम्, वि.ती.टीकां च कटाक्षयतीव । अथापि निगरणमिति गिलनमुच्यते । कथमुद्गमनार्थतेति चिन्त्यम् ।

स मूर्च्छितस्तत्र मुहूर्त्तमुग्रः सञ्ज्ञां गतो विस्मित आबभाषे ।
न पौरुषे स्यात् पुरुषो भवादृक् को मोहयेन्मां भुवनेऽन्य एवम् ॥ १३ ॥

(भा.दी.) **स** इति । तत्र युद्धे मुहूर्तो मुहूर्तकालस्तं मूर्च्छितः उग्रः स दशास्यः, सञ्ज्ञां प्रबोधं गतः सन्, विस्मितः सन् आबभाषे । भाषधातोर्लिट् । भवादृक् भवत्सदृशः पुरुषः, पौरुषं पराक्रमस्तस्मिन् विषये न स्यात् नास्ति । कुत इत्यत आह– **क** इति । भुवनं जगत् तस्मिन् त्वत्तः अन्यः कः पुरुषः मां एवं मोहयेत् मूर्छां गमयेत्? न कोऽपीत्यर्थः ॥ १३ ॥

[१]लीलाप्रहारोऽयमरे नराश तस्मात् पुनर्ज्जीवसि दुर्ज्जन त्वम् ।
त्वां नन्वहं शोणितपङ्कपेषं न पिष्टवानित्यवदद्धनूमान् ॥ १४ ॥

(भा.दी.) **लीले**ति । दुर्जन, अरे नराश राक्षस, अरे इति नीचसम्बोधने, यस्मात् अयं लीलाप्रहारः लीलया कृतः प्रहारः तस्मात् त्वं पुनः जीवसि । जीव प्राणधारणे लट् । अहं त्वां शोणितस्य पङ्कः कर्दमस्तेन । 'इत्थम्भूतलक्षणे तृतीया' । पेषः पेषणं यथा भवति तथा न पिष्टवान् सञ्चूर्णितवान् ननु? तथात्वे तव जीवनं न स्यादेवेति भावः । इति हनूमानवदत् ॥ १४ ॥

(सं.चं.) तस्मात् पुनर्जीवसि । 'धिगस्तु मम वीर्येण यस्त्वं जीवसि रावण' (५९.६६) इति च । शोणितपङ्कपेषं न पिष्टवान् । शोणितपङ्केन न पिष्टवान् । शोणितपङ्कस्निग्धा रावणास्थिरेणवो न कृता इत्यर्थः । 'स्नेहने पिषः' (अ.सू.३.४.३८) इति पाणिनिः । 'स्नेहनवाचिनि करणे उपपदे पिषेर्धातोर्णमुल् प्रत्ययो भवति । तैलपेषं पिनष्टि तैलेन पिनष्टीत्यर्थः' इति जयादित्यः ॥ १४ ॥

मत्तोऽसि मत्तोऽपि गृहाण वीर मुष्टिप्रहारं त्वमथेत्युदीर्य्य ।
सर्वौजसा सर्वजयी दशास्यः सन्ताडयामास समीरसूनुम् ॥ १५ ॥

(भा.दी.) **मत्त** इति । अथ हे वीर हनुमन्, त्वं मत्तः बलोन्मत्तः असि । मत्तोऽपि त्वं मुष्टेः प्रहारस्तं गृहाण स्वीकुरु, इति उदीर्य, सर्वान् देवासुरादीन् जेतुं शीलमस्यास्तीति तथा दशास्यः, समीरसूनुं वायुपुत्रं सर्वं यदोजः सामर्थ्यं तेन ताडयामास ॥ १५ ॥

(सं.चं.) मत्तोऽसीतीन्द्रवज्रा । मत्तोऽसि बलगर्वितोऽसि । मदः– **'ಸೊಕ್ಕು'** इति भाषायाम् । अथ तस्मात् मत्तोऽपि त्वं मुष्टिप्रहारं गृहाण । सर्वौजसा सर्वप्राणेन । 'ओजोऽवष्टम्भबलयोः' इति यादवप्रकाशः ॥ १५ ॥

---

१. **'लीलाप्रहारः सर्वशक्त्या प्रहारो न कृत इति यावत्'** इति का.श्री. ।

मरुत्सुते विह्वलवन्निषण्णे[1] मा याहि चोरेति मुहुर्ब्रुवाणे ।
लब्धान्तरोऽस्मीति ययौ विचिन्त्य किरन् शरान् नीलसनीळमेषः[2] ॥ १६ ॥

(भा.दी.) मरुदिति । मरुत्सुते हनुमति विह्वलवत् मूर्च्छया परवशवत् निषण्णे स्थिते सति, हे चोर रावण, मा याहि न गच्छ इति मुहुः ब्रुवाणे सति, अहम्, इदानीं लब्धमन्तरं श्रीरामनिकटं प्रति गन्तुमवकाशो यस्य स तथा अस्मि, इति विचिन्त्य एषः रावणः शरान् किरन् वर्षन् सन् नीलस्य सनीळं समीपं तत् ययौ ॥ १६ ॥

(सं.चं.) नीलसनीळं नीलसमीपम् । 'समीपं सनीडं समर्यादमारात्' इति हलायुधः । बह्वृचाः सनीडं सनीळमाहुः । 'विह्वलं तु तदा दृष्ट्वा हनूमन्तं महाबलम् । रथेनातिरथः शीघ्रं नीलं प्रति समाभ्यगात्' (५९.६९) इति च । 'विह्वलं तु' इत्याह वाल्मीकिः । तत्र तुना सूचितमर्थविशेषं विववार पण्डिताचार्यः–विह्वलवन्निषण्ण इति ॥ १६ ॥

अप्यात्ममुक्तेषु[3] विदारितेषु नगेषु नीलो ध्वजमारुरोह ।
दशाननस्याथ [4]धनूरथाश्वानाचक्रमे तस्य शिरांसि चाऽशु ॥ १७ ॥

(भा.दी.) अथेति । नीलोऽपि, आत्मना ये मुक्ता निक्षिप्तास्तेषु नगेषु गिरिषु विदारितेषु सत्सु, दशाननस्य ध्वजः केतुस्तं आरुरोह । अथ, धनुश्च रथश्च अश्वाश्च तान् तस्य रावणस्य शिरांसि च आशु आचक्रमे आक्रमणं चक्रे, दंशनादिकं कुर्वन् तेषु चचारेत्यर्थः । क्रमु पादविक्षेपे लिट् ॥ १७ ॥

(सं.चं.) प्रथमं नगो गिरिर्मुक्तः । गिरौ रावणेन भग्ने नगा वृक्षा मुक्ताः । तेऽपि रावणेन विदारिताः । 'सोऽश्वकर्णान् धवान् सालांश्चूतांश्चापि सुपुष्पितान् । अन्यांश्च विविधान् वृक्षान्नीलश्चिक्षेप संयुगे । स तान् वृक्षान् समासाद्य प्रतिचिच्छेद रावणः' (५९.७७–८) इति च । ध्वजमारुरोह । 'ह्रस्वं कृत्वा तदा रूपं ध्वजाग्रे निपपात ह' (५९.७९) इति, 'ध्वजाग्रे धनुषश्चाग्रे किरीटाग्रे च तं हरिम् । लक्ष्मणोऽथ हनूमांश्च दृष्ट्वा रामश्च विस्मिताः' (५९.८१) इति च ॥ १७ ॥

---

१. **'मरुत्सुते हनुमति विह्वलवत् अज्ञजनवञ्चनार्थं किञ्चित् परवशवत् निषण्णे उपविष्ये सति'** इति का.श्री. ।

२. **'नीलसमीपमेषः'** इति, **'नीलसनीडमेषः'** इति च ।

२. **'अथाऽत्ममुक्तेषु'**

४. **'धनुरिति भिन्नं पदम् । रथाश्वान् रथमश्वांश्च । धनूरथाश्वानित्येकं वा पदम् । तदा धनूंषि तथास्थितानि रथमश्वांश्चेत्यर्थः'** इति वि.भू. ।

निरीक्ष्य तं राक्षसराट् चुकोप ननाद नीलोऽथ च कोपयंस्तम् ।
जळीकृतस्तेन स रावणोऽलं[1] सराघवास्ते हरयोऽहसंश्च[2] ॥ १८ ॥

(भा.दी.) **निरीक्ष्येति** । राक्षसानां राट् राजा दशास्यः तं तादृशं निरीक्ष्य चुकोप । कुप क्रोधे लिट् । (अथ) नीलश्च तं कोपयन् सन् ननाद । णद अव्यक्ते शब्दे लिट् । तेन नीलेन सः रावणः अलं सम्यक् जळीकृतः कर्तव्यकर्मणि जडीकृतः अभवत् । सराघवाः श्रीरामसहिताः ते हरयः अहसन् स्म । हसतेर्लङ् ।।१८।।

(सं.चं.) निरीक्ष्येति केवलोपेन्द्रवज्रा ॥ १८ ॥

मा गाः कपे [3]कौतुकमात्मलौल्यान्मद्विद्धमात्मानमव प्रभुश्चेत् ।
इत्थं ब्रुवाणो धनदानुजोऽयमाग्नेयमस्त्रं प्रमुमोच[4] तस्मै ॥ १९ ॥

(भा.दी.) **मा गा** इति । हे कपे नील, आत्मनः लौल्यं चापल्यं तस्मात् कौतुकं कौतूहलं तत् मा गाः न गच्छ । इण् गतौ लुङ् । चेद् यदि मां प्रति योद्धुं समर्थः प्रभुः तर्हि मद्विद्धं आत्मानं स्वात्मानं अव रक्ष । अव रक्षणे लोट् । इत्थं ब्रुवाणः वदन् धनदानुजः अयं रावणः, अग्निर्देवता अस्येत्याग्नेयम्, तत् अस्त्रं (तस्मै) प्रमुमोच । मुच्ऌ् धातोर्लिट् ॥ १९ ॥

(सं.चं.) मा गा इतीन्द्रवज्रा । लौल्यं जवने क्षिप्रता, चपलता वा । कौतुकं हर्षं मा गाः । 'कौतुकं चाभिलाषे स्यादुत्सवे नर्महर्षयोः' इति विश्वप्रकाशः । आग्नेयमग्निदेवताकमस्त्रं प्रमुमोच तस्मै अग्निदेवावताराय नीलाय ॥ १९ ॥

अग्नेस्तनूजः स्वयमग्निभावान्ममार नास्त्रेण पतंश्च भूमौ ।
तं रावणं राममभिद्रवन्तं रुरोध सौमित्रिरमित्रहन्ता ॥ २० ॥

(भा.दी.) **अग्नेरिति** । अग्नेः तनूजः पुत्रः नीलः, स्वयं अग्नेर्भावः स्वरूपं तस्मात्, अग्न्यवतारत्वादिति भावः, अस्त्रेण भूमौ पतंश्च पतन्नपि न ममार । मृङ्धातोर्लिट् । श्रीरामं प्रति अभिद्रवन्तं तं रावणं अमित्राणां शत्रूणां हन्ता सौमित्रिः रुरोध । रुधधातोर्लिट् ॥ २० ॥

---

१. **'राक्षसोऽलम्'**
२. **'हरयोऽहसन् स्म'** इति वि.ती.पाठः ।
३. **'कौतुकमाश्चर्यबुद्धिम्'** इति वि.भू. ।
४. **'–मस्त्रं विमुमोच'**

(सं.चं.) आग्नेयास्त्रेण ताडितः भूमौ पपात । अथापि न ममार । स्वस्यैवाग्निरूपत्वात् । नीले पतिते तं विहाय रामममभिद्रवन्तम् ॥ २० ॥

दिष्ट्याऽसि दृष्टो विगतायुरद्य मर्त्त्येति मर्त्त्याशननाथ ऊचे ।
शूरा न गर्ज्जन्ति निशाचरेति धुन्वन् धनुर्ल्लक्ष्मण आचचक्षे ॥ २१ ॥

(भा.दी.) दिष्ट्येति । हे मर्त्य मानुष लक्ष्मण, विगतमायुर्यस्य स तथोक्तः, त्वं दिष्ट्या दैवात् अद्य दृष्टः असि । मर्त्या अशनमन्नं येषां ते तथोक्तास्तेषां नाथः रावणः इति वचः ऊचे । वचधातोर्लिट् । हे निशाचर, शूराः न गर्जन्ति । गर्ज शब्दे लट् । इति वचः लक्ष्मणः धनुः धुन्वन् कम्पयन् सन्, आचचक्षे । चक्षिङ् व्यक्तायां वाचि लिट् ॥ २१ ॥

(सं.चं.) दिष्ट्याऽसीतीन्द्रवज्रा । दिष्ट्या, आनन्दस्यायं विषयः, यद् दृष्टोऽसि । 'सुखे दिष्ट्योपजोषं शम्' इति यादवप्रकाशः । धुन्वन् धनुः । ज्याकर्षणेन टङ्कारं जनयन्नित्यर्थः । 'राजन्न गर्जन्ति महाप्रभावा विकत्थसे पापकृतां वरिष्ठ' (५९.९७) इति च ॥ २१ ॥

सप्तार्च्चिराभानथ सप्त बाणान् निशाचरेशो निशितान् मुमोच ।
चिच्छेद रामावरजः शरैस्ताञ्छरानमुञ्चच्च दशाननाय ॥ २२ ॥

(भा.दी.) सप्तेति । अथ निशाचरेशः रावणः, सप्तार्चिर्वदग्निवदाभा कान्तिर्येषां ते सप्तार्चिराभाः, तान् निशितान् सप्त सप्तसङ्ख्याकान् बाणान् मुमोच । मुच्लृधातोर्लिट् । रामावरजः रामानुजः शरैः तान् रावणमुक्तान् शरान् चिच्छेद । (स्वयं दशाननाय शरानमुञ्चच्च) ॥ २२ ॥

(सं.चं.) सप्तार्चिराभान् वह्नेः सप्तजिह्वाभान् । 'काळी कराळी च मनोजवा च सुलोहिता या च सुधूम्र-वर्णा । स्फुलिङ्गिनी विश्वरुची च देवी लेलायमाना इति सप्त जिह्वाः' इति श्रुतिः । 'शिखा जिह्वाऽर्चिरपुमान् कीला ज्वाला च नृस्त्रियोः' इति यादवप्रकाशः । निशाचरेशमुक्तान् चिच्छेद च । स्वयममुञ्चच्च ॥ २२ ॥

तान् रावणश्चाच्छिनदाशु बाणैरमुञ्चतां तावथ[1] बाणसङ्घान् ।
धनुर्द्धराणां प्रवरौ धरण्यां जिगीषया लक्ष्मणराक्षसेन्द्रौ ॥ २३ ॥

---

१. 'तावपि बाण–'

(भा.दी.) तानिति। रावणश्च तान् लक्ष्मणमुक्तान् शरान् बाणैः आशु अच्छिनत्। च्छिदेर्लङ्। अथ धरण्यां धनुर्द्धारयन्तीति तथा तेषां मध्ये प्रवरौ तौ लक्ष्मणराक्षसेन्द्रौ जिगीषया जयेच्छया बाणसङ्घान् (अमुञ्चतां) ववृषतुः। वृषु सेवने लिट्॥ २३॥

(सं.चं.) अथ तावुभावपि परस्परं बाणसङ्घानमुञ्चताम्॥ २३॥

स्वयम्भुवा दत्तममोघमुग्रं स रावणो बाणवरं मुमोच।
स लक्ष्मणस्यादलयल्ललाटं पपात सौमित्रिरवाप्तमोहः ॥ २४॥

(भा.दी.) स्वयमिति। सः रावणः स्वयम्भुवा ब्रह्मणा दत्तम्, अमोघं उग्रम्, बाणेषु वरः श्रेष्ठस्तं मुमोच। सः शरः लक्ष्मणस्य ललाटमलिकं तत् अदलयत् व्यदारयत्। दल विदारणे[1] लङ्। सौमित्रिः अवाप्तो मोहो येन स तथा सन् पपात॥ २४॥

(सं.चं.) स्वयम्भुवेति पुनरुपेन्द्रवज्रा। बाणवरं मुमोच। वाल्मीकिः शक्तिं मुमोचेत्याह–'जग्राह शक्तिं स्वयमुग्रशक्तिः स्वयम्भुदत्तां युधि देवशत्रुः' (५९.१०७) इति। आत्तशक्तिमिषुमित्येवार्थः। 'बाणममोघ-मुग्रं स्वयम्भुदत्तम्' (८.८४) इति निर्णयवचनात्। अधिकं निर्णयभावचिन्द्रकायाम्। अदलयत्। दल विशरणे। तस्य णिचि दलयतीति रूपम्। मित्सु पाठात्। तथाहि सरस्वतीकण्ठाभरणे भोजराजः–'दलि-वलि-स्खलि-रणि-ध्वनि-क्षपि-त्रपयश्च' (१.१.१९२) इति॥ २४॥

रथादवप्लुत्य स रावणोऽपि क्षणादभिद्रुत्य बलाच्चकर्ष।
यावत् स तावत् स्मरति स्म रूपं शेषं निजं शेषशयानुजन्मा ॥ २५॥

(भा.दी.) रथादिति। सः रावणः रथः स्यन्दनस्तस्मात् अवप्लुत्य क्षणः क्षणमात्रं तस्मात् लक्ष्मणं अभिद्रुत्य, बलं बलात्कारस्तस्मात् यावत् यदा चकर्ष, तावत् ततः पूर्वमेव, शेषे शेत इति शेषशयः श्रीरामरूपी हरिः, तस्मादनु अनन्तरं जन्म यस्य स तथा (सः) लक्ष्मणः निजं आत्मीयं शेषं शेषाख्यं स्वरूपं मूलरूपं तत् स्मरति स्म अस्मरत्। स्मृ (चिन्तायां)॥ २५॥

(सं.चं.) शेषशयः शेषशयनो नारायणः। तदात्मा रामः। तस्यानुजन्मा लक्ष्मणः निजं मूलरूपं शेषं स्मरति स्म सस्मार॥ २५॥

---

१. **'दल विदारणे'** इति का.श्री. च धातुरयं चुरादिषु पठ्यते। तस्य लङि रूपम्–अदालयदिति। तस्माद् भ्वादेर्दलतेरिदं रूपमिति वक्तव्यम्।

विंशद्भिरप्यात्मभुजैः प्रगृह्य दुष्टेन कृष्टोऽपि चचाल नायम् ।
गिरिस्तनी सप्तसमुद्रवस्त्रा मही चकम्पे महिळेव भीता ॥ २६ ॥

(भा.दी.) **विंशद्भिरि**ति । दुष्टेन रावणेन विंशद्भिरपि आत्मनो भुजा हस्तास्तैः प्रगृह्य कृष्टोऽपि समाकृष्टोऽपि अयं लक्ष्मणः न चचाल । चलतेर्लिट् । गिरयः स्तनाविव यस्याः सा तथोक्ता, सप्त च ते समुद्राश्च ते वस्त्रमिव यस्याः सा तथा, मही भीता महिळेव वनितेव चकम्पे विचचाल । कपिधातोर्लिट् ॥ २६ ॥

(सं.चं.) विंशद्भिरिति दत्तोत्तरम् । विंशत्याऽऽत्मभुजैरित्यर्थः । ननु रामायणे–'जग्राह राजा तरसा भुजाभ्याम्' (५९.११०) इति पठ्यते । तत् कथं 'विंशद्भिरप्यात्मभुजैः' इति । शृणु, प्रथमं भुजाभ्यां जग्राह । यदा न शशाक तदा विंशत्याऽपि भुजैराक्रष्टुं प्रयेते । तथैव किल लोकव्यवहारः । पुरःस्थितं वस्तु समुद्धर्तुमेकं हस्तं प्रसारयति । यदा न शक्नोति तदा द्वाभ्यामुद्धरति । अत एव निर्णये 'स्वबाहुभिर्नेतुमिमं समैच्छत्' (८.८५) इत्युक्तम् । अधिकं निर्णयभावचन्द्रिकायां द्रष्टव्यम् । गिरिस्तनी मेरुमन्दरौ गिरी स्तनाविव । सागरोऽम्बरमिव । 'चचाल पृथ्वी सहमेरुमन्दरा ससागरा नैव चचाल लक्ष्मणः' (८.८७) इति निर्णयवचनसूचितोऽयमर्थः ॥ २६ ॥

भूमण्डलं सर्षपकल्पमल्पं विभाति पाताळसमेतमेतत् ।
सहस्रमूर्ध्नोऽस्य बतैकमूर्ध्नि प्रसह्य को नाम हरेत् तमेनम् ॥ २७ ॥

(भा.दी.) कैलासोद्धरणादावपि शक्तस्य रावणस्य लक्ष्मणचालनेऽप्यशक्तौ निमित्तमाह– **भूमण्डलमि**ति । पाताळैरधोभुवनैः समेतं एतत् भूमण्डलं सत्यलोकान्तं ब्रह्माण्डमण्डलं सर्षपकल्पं सर्षपसमं सत्, सहस्रं मूर्धानो यस्य स तथा तस्य अस्य लक्ष्मणरूपस्य शेषस्य, एकश्चासौ मूर्धा च तस्मिन् । अल्पं यथा भवति तथा (विभाति) शोभते । तं तादृशमहिमानं एनं लक्ष्मणं प्रसँह्य बलात्कृत्य को नाम पुरुषः हरेत्? न कोऽपीत्यर्थः ॥ २७ ॥

(सं.चं.) भूमण्डलम् । 'सहस्रमूर्ध्नोऽस्य बतैकमूर्ध्नि ससप्तपाताळगिरीन्द्रसागरा । धराऽखिलेयं ननु सर्षपायति प्रसह्य को नाम हरेत् तमेनम्' (८.८८) इति निर्णये । पाताळमिति सप्तानामप्यधोभुवनानां सामान्यवचनम् । अतळं वितळं सुतळं तळातळं महातळं रसातळं पातळमिति विशेषनामानि ॥ २७ ॥

क्रुद्धोऽभिनिष्पत्य[१] मरुत्तनूजः प्रोद्यम्य मुष्टिं प्रजहार घोरम्[२] ।
सर्वैर्म्मुखैः शोणितमुद्गिरन् स पौलस्त्यपुत्रो[३] मृतवत् पपात ॥ २८ ॥

(भा.दी.) **क्रुद्ध** इति । मरुत्तनूजः मरुत्पुत्रः हनुमान् लक्ष्मणावस्थां दृष्ट्वा क्रुद्धः सन्, अभिनिष्पत्य रावणमभिद्रुत्य, मुष्टिं प्रोद्यम्य (घोरं) रावणं प्रजहार ताडितवान् । पुलस्त्यस्य गोत्रोद्भवः पौलस्त्यः (तस्य पुत्रः) सः रावणः सर्वैः मुखैः शोणितं रक्तं तत् उद्गिरन् सन् मृतवत् मरणं प्राप्तवत् पपात ॥ २८ ॥

(सं.चं.) क्रुद्धोऽभिनिष्पत्येतीन्द्रवज्रा । घोरं यथा तथा प्रजहार । घोरं वा रावणम् । पौलस्त्यो विश्रवाः । तस्य पुत्रो रावणः ॥ २८ ॥

सौमित्रिमार्त्तं पतितं विलोक्य प्रेमाकुलात्मा प्रतिगृह्य दोर्भ्याम् ।
निन्ये हनूमान् परमोपकण्ठं मातेव पोतं[४] जनकोपकण्ठम् ॥ २९ ॥

(भा.दी.) **सौमित्रिमिति** । प्रेम्णा प्रीत्या आकुलः निबिड आत्मा मनो यस्य स तथा हनूमान् आर्तं पतितं सौमित्रिं विलोक्य, दोषौ हस्तौ ताभ्यां प्रतिगृह्य, परमस्य सर्वोत्तमस्य श्रीरामस्य उपकण्ठं समीपं तत्, पोतो बालकस्तं जनकोपकण्ठं पितृसमीपं मातेव निन्ये ॥ २९ ॥

(सं.चं.) सौमित्रिमार्तमित्यपीन्द्रवज्रा । प्रेम्णा आकुलः भरित आत्मा मनो यस्य । 'आकुलं भरितं पूर्णम्' इति हलायुधः । 'पोतश्च पृथुकः शिशुः' इति च ॥ २९ ॥

स्पृष्ट्वा कराभ्यां करुणाकरस्तं मग्नं ललाटे शरमुज्जहार ।
स राहुमुक्तेन्दुरिवाऽर्त्तिमुक्तो रराज सौमित्रिरुदारकान्तिः ॥ ३० ॥

(भा.दी.) **स्पृष्ट्वेति** । करुणाकरः श्रीरामः (तं) लक्ष्मणं कराभ्यां स्पृष्ट्वा ललाटं अलिकं तस्मिन् मग्नं शरं उज्जहार उद्दधार । आर्तिमुक्तः सः सौमित्रिः, उदारा उत्कृष्टा कान्तिर्यस्य स तथा सन्, राहुमुक्तेन्दुरिव रराज ॥ ३० ॥

(सं.चं.) 'तं समुत्सृज्य सा शक्तिः सौमित्रिं युधि निर्जितम् । रावणस्य रथे तस्मिन् स्थानं पुनरुपागमत्' (५९.१२०) इत्याह वाल्मीकिः । तायुधं लक्ष्मणदेहात् स्वयमेवोद्धृत्य रावणरथं जगामेति वाल्मीकिवचसः

१. 'क्रुद्धो विनिष्पत्य'
२. '–जहार चोग्रम्'
३. 'पौलस्त्यपुत्रः पौलस्त्यस्य पुलस्त्यपुत्रस्य विश्रवसः पुत्रः रावणः' इति का.श्री. ।
४. 'मातेव तोकम्'

प्रातीतिकमर्थं निवारयन् वक्तव्यशेषं पूरयति– स्पृष्ट्वा कराभ्याम् । 'स रामसंस्पर्शनिवारितक्लमः समुत्थितस्तेन समुद्धृते शरे' (८.९२) इति हि निर्णये । समुद्धृतः शरः क जगामेति शङ्कां रावणरथं प्रति जगामेति वदन् वाल्मीकिः परिजहार । स्वयम्भुदत्तो हि स शरो न वृथा भवितुमर्हति । अतो रामानुज्ञया स्वस्थानमेव पुनर्जगामेत्यर्थः ॥ ३० ॥

अवाप्य सञ्ज्ञामवलम्ब्य धैर्य्यं स रावणो राघवमाससाद ।
मदप्रमादप्रति[1]मुष्टदृष्टिर्म्मतङ्गजः सिंहमिवाप्रसह्यम् ॥ ३१ ॥

(भा.दी.) अवाप्येति । सः रावणः सञ्ज्ञां अवाप्य, धैर्यं तत् अवलम्ब्य, श्रीराघवं आससाद । सदेर्लिट् । तत्कथमिव–अप्रसह्यं सिंहमिव मदयुतो यः प्रमादस्तेन प्रतिमुष्टा तिरोहिता दृष्टिर्विवेकबुद्धिर्यस्य स तथा मतङ्गज इव, आससादेत्यन्वयः ॥ ३१ ॥

(सं.चं.) अवाप्येति पुनरुपेन्द्रवज्रा । मदेन अहङ्कारेण प्रमादेन यथार्थग्रहणापटुना मनसो व्यग्रभावेन च प्रतिमुष्टा प्रतिहता दृष्टिर्यस्य रावणस्य । मतङ्गजस्य तु मदेन दानेन यः प्रमाद आलस्यं तेन प्रतिमुष्टा दृष्टिः । 'मदो रेतसि कस्तूर्या गर्वे हर्षेभदानयोः' इति विश्वप्रकाशः ॥ ३१ ॥

भोगीन्द्रभोगप्रतिमं प्रदीप्तं सन्धाय[2] विस्फार्य्य धनुर्द्धुनानः ।
अविस्मितः स[3] स्मितवानदीनां जगाद वाणीं जगदेकनाथः ॥ ३२ ॥

(भा.दी.) भोगीति । जगतां एकनाथः मुख्यस्वामी सः श्रीरामः, भोगिनां सर्पाणामिन्द्रः शेषस्तस्य भोगः शरीरं तस्य प्रतिमा उपमा यस्य स तत् तथा, तत् प्रदीप्तं धनुः सन्धाय विस्फार्य धुनानः धुन्वन् सन्, विस्मितो न भवतीत्यविस्मितः, विस्मयरहितः सन्नित्यर्थः, स्मितमस्यास्तीति स्मितवान्, मन्दं हसन् सन्, अदीनां प्रौढां वाणीं जगाद । गदेर्लिट् ॥ ३२ ॥

(सं.चं.) धनुर्ज्यया सन्धाय, ज्याताडनेन धनुर्विष्फार्य ध्वनयन् धुनानः । धूञ् कम्पने । अदीनां निर्भयां गम्भीरां वा ॥ ३२ ॥

स्वयम्भुवं वा भुवनाभिपूज्यं[4] स्वयं भवं वा शरणं गतस्त्वम्[5] ।
न मोक्ष्यसे राक्षस सर्वथाऽपि कृतापराधः समरोद्यमी स्याः ॥ ३३ ॥

---

१. ' –प्रविमृष्ट–'
२. 'सन्धाय विष्फार्य' इति, 'सन्धार्य विस्फार्य' इति च ।
३. '–स्मितः सुस्मित–'
४. 'भुवनाधिनाथम्'
५. 'शरणागतस्त्वम्'

(भा.दी.) स्वयमिति । हे राक्षस, त्वं भुवनेषु अभिपूज्यं स्वयम्भुवं ब्रह्माणम्, भवं शिवं वा यदि शरणं तत् गतः, अपि तथाऽपि स्वयं स्वात्मानं सर्वथा न मोक्ष्यसे न मोचयिष्यसे । मत्तः स्वात्मानं मोचयितुं समर्थो न भविष्यसि । किन्तु मत्पुरो मरिष्यस्येवेत्यर्थः । कृतः अपराधः सीतापहरणलक्षणो येन स तथा त्वम्, समरे उद्यमः प्रयत्नः सोऽस्यास्तीति तथोक्तः स्याः भवेः ॥ ३३ ॥

(सं.चं.) स्वयम्भुवमिति पुनरुपेन्द्रवज्रा । मोचनमिह क्षमादानम् । न मोक्ष्यसे न क्षमिष्यस इत्यर्थः । कुतः? क्षमानर्हापराधकरणादित्याह– कृतापराधः ॥ ३३–४ ॥

एवं ब्रुवाणं भुवनप्रभुं तं प्राभञ्जनिः प्राञ्जलिराबभाषे ।
शत्रौ रथस्थे सति नाथ भूमौ न तिष्ठ शीघ्रं मयि तिष्ठ हीति ॥ ३४ ॥

(भा.दी.) एवमिति । प्रभञ्जनस्य वायोरपत्यं प्राभञ्जनिः हनुमान् एवं ब्रुवाणं वदन्तं भुवनानां प्रभुं (तं) श्रीरामं प्राञ्जलिः सन्, हे नाथ, शत्रौ रावणे रथस्थे सति भूमौ न तिष्ठ । शीघ्रं यथा भवति तथा मयि तिष्ठ, इति आबभाषे निजगाद हि ॥ ३४ ॥

ओमित्यथोक्त्वा पुरुषः पुराणः स मारुतिं मङ्क्षु समारुरोह[१] ।
स रावणो राघवमाप्य बाणैर्दिशो दश द्राक् तिमिरीचकार[२] ॥ ३५ ॥

(भा.दी.) ओमिति । अथ पुराणः पुरातनः पुरुषः (सः) श्रीरामः, ओमिति तथाऽस्त्विति उक्त्वा, मारुतिं हनुमन्तं आरुरोह । रुहेर्लिट् । सः रावणः राघवं आप्य, बाणैः शरैर्दश दिशः द्राक् झटिति तिमिरीचकार अन्धकारयुक्ताश्चकार ॥ ३५ ॥

(सं.चं.) स रावणोऽपि रथं समारुह्य राघवमाप्य । अतिमिरं तिमिरं सम्पद्यते, तथा चकार तिमिरीचकार । तिमिरमासामस्तीति तिमिराः । अतिमिरा दिशस्तिमिराः सम्पद्यन्ते तथा चकारेति वा । 'अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः' (५.४.५०) इति हि पाणिनिः । 'रथं समारुह्य पुनः सकार्मुकः समार्गणो रावण आशु रामम् । अभ्येत्य सर्वांश्च दिशश्चकार शरान्धकाराः परमास्त्रवेत्ता' (८.९४) इति हि निर्णये ॥ ३५ ॥

---

१. **'पुराणः स राघवो मारुतिमारुरोह'** इति वि.ती.पाठः स्यात् । व्याख्यापदानां स्खलनादस्फुटः पाठः । २. **'तिमिरं चकार'**

[१]संरम्भसम्भिन्नमना दशास्यः शरान् मुमोचानिलनन्दनाय ।
हनूमतोऽवर्द्धत तैः स्वतेजः प्राज्यैरिवाऽज्यैर्ज्वलतो महाग्नेः ॥ ३६ ॥

(भा.दी.) **संरम्भे**ति । संरम्भेण कोपेन सम्भिन्नं सहितं मनो यस्य स तथोक्तः दशास्यः अनिलनन्दनाय हनुमते शरान् मुमोच । तैः शरैः हनूमतः स्वं स्वकीयं तेजः स्वतेजः, हनुमद्बलमित्यर्थः, प्राज्यानि भूयिष्ठानि तैः आज्यैः ज्वलतः महाग्नेः तेज इव अवर्धत अभिवृद्धमभूत् ॥ ३६ ॥

(सं.चं.) भूमौ स्थितोऽयं रामो मत्पुरत एव वायुवाहनो बभूवेति वाहनभूते हनुमत्येव संरम्भसम्भिन्न-मनाः । संरम्भो गर्वः । संरम्भस्त्वरा । ताभ्यां सम्भिन्नं संश्लिष्टं मनः यस्य । प्राज्यैः प्रभूतैः । 'प्रभूतं प्रचुरं प्राज्यं बहळं बहुलं बहु' इति यादवप्रकाशः । 'वायुपुत्रं महावेगं वहन्तं राघवं रणे । रोषेण महताऽऽविष्टः पूर्ववैरमनुस्मरन् । आजघान शरैर्दीप्तैः कालानलशिखोपमैः । राक्षसेनाऽहवे तस्य ताडितस्यापि सायकैः । स्वभावतेजोयुक्तस्य भूयस्तेजोऽभ्यवर्धत' (५९.१३३–५) इर्ति च ॥ ३६ ॥

प्रहस्य रामः प्रदरप्रवेकैः सप्तींश्च सूतं च निहत्य सद्यः ।
ध्वजं रथं छत्रमुतातिचित्रं चिच्छेद हेतीश्च दशाननस्य ॥ ३७ ॥

(भा.दी.) **प्रहस्ये**ति । श्रीरामः प्रहस्य रावणपराक्रममपहस्य, प्रदरेषु शरेषु प्रवेकाः श्रेष्ठास्तैः । प्रवेक-शब्द उत्तमार्थः– 'उन्मिषन्मणिप्रवेकनिष्काभरणैः सुवर्चसः' इत्युक्तेः[२] । दशाननस्य सप्तीन् अश्वान्, 'हयसैन्धवसप्तयः', सूतं सारथिं (च निहत्य), ध्वजः केतुस्तम्, रथं च, अतिचित्रं च्छत्रमुत च्छत्रं च, हेतीश्च आयुधानि च सद्यः चिच्छेद ॥ ३७ ॥

(सं.चं.) प्रदरप्रवेकैः । प्रदीर्यते एभिरिति प्रदरा बाणाः । 'रुग्भङ्गबाणाः प्रदराः' इति च । तेषु प्रवेका मुख्याः । 'मुख्यवर्यवरेण्याश्च प्रवेकः' इति च । सप्तीनश्वान् । काञ्चनखचितमणिभिरतिचित्रं श्वेतच्छत्रं च । हेतीरायुधानि च । 'अश्वस्तुरङ्गस्तुरगो हयः सप्तिस्तुरङ्गमः' इति, 'न क्ली हेतिः शस्त्रमस्त्रम्' इति च ॥ ३७ ॥

---

१. **'संरम्भसाभिन्नमनाः कोपेन युक्तचित्तः कोपेन विदारितचित्तो वा'** इति का.श्री. ।

२. भागवतगतं पद्यमिदम्–**'सर्वे चतुर्बाहव उन्मिषन्मणिप्रवेकनिष्काभरणाः सुवर्चसः'** (२.९.११) इति । वि.भू. सर्वत्र –**'निष्काभरणाः'** इत्येव ।

शरेण विध्वा विवशां[१] विधाय शरीरयष्टिं शतमन्युशत्रोः ।
चकर्त्त कार्त्तस्वरभास्वरं सरत्नं[२] किरीटं सुरकीर्त्त्यकीर्त्तिः ॥ ३८ ॥

(भा.दी.) **शरेणे**ति । सुरैः ब्रह्मादिभिः कीर्त्या स्तुत्या कीर्तिर्यस्य स तथोक्तः सः श्रीरामः, शतं मन्यवो यज्ञाः यस्य स शतमन्युरिन्द्रः, तस्य शत्रोः रावणस्य शरीरमेव यष्टिः स्थाणुस्तां शरेण विध्वा विवशां विह्वलां विधाय, कार्तस्वरवत् सुवर्णवद् भास्वरं प्रकाशनशीलं तत्, कार्तस्वरैर्भास्वरमिति वा, रत्नैर्निर्मितं रात्नम्, रत्नखचितिमिति वा, किरीटं चकर्त । कृती च्छेदने लिट् ॥ ३८ ॥

(सं.चं.) शतमन्युशत्रोरिन्द्रशत्रो रावणस्य । यष्टिर्दण्डः । शरीरयष्टिमिति दण्डकाष्ठमिव निश्चेष्टं शरीरमित्यर्थः । विवशमिति केचित् । विवशामिति केचित् । उभयथाऽपि न दोषः । यष्टिशब्दो हि स्त्रीपुंसयोः पठ्यते ॥ ३८ ॥

तं निर्विषाशीविषवद् विषण्णं कर्त्तव्यमूढं भगवान् बभाषे ।
अनुज्ञया मे पुरमज्ञ याहि शरार्दितो नन्वधुना[३] हि राजन् ॥ ३९ ॥

(भा.दी.) **तमि**ति । भगवान् श्रीरामः, निर्गतं विषं यस्मात् स निर्विषः, आशीषु दन्तेषु विषं यस्य स आशीविषः, निर्विषो य आशीविषः सर्पः, तद्वत् विषण्णं भीतम्, परवशं गतसारमिति वा, अत एव कर्तव्ये मूढं अज्ञं रावणं प्रति, हे राजन्, अज्ञ मूढ रावण, मे अनुज्ञया पुरं लङ्कापुरं तत् याहि गच्छ । अधुना शरार्दितः असि । इति बभाषे ॥ ३९ ॥

(सं.चं.) निर्विषाशीविषः । **'ಹಲ್ಲು ಕಿತ್ತ ಹಾವು'** इति भाषायाम् । 'आशीस्तालुगता दंष्ट्रा तया दष्टो न जीवति' इति स्मरन्ति । आशीराशी च । तस्यां विषमस्य । आशिषि विषमिति पक्षे आशीर्विष एव वर्णलोपेनाऽशीविषः । वाल्मीकिरप्याह–'तं निर्विषाशीविषसन्निकाशम्' (५९.१४१) इति । अनुज्ञातोऽसि मया । अयि युद्धतन्त्रानभिज्ञ । पुरं याहि । योद्धुमसमर्थस्य किं युद्धरङ्गे वृथाऽवस्थानेन । अथच शरार्दितस्त्वं ननु । तेन न प्रभवसि च स्थातुम् । अतो गच्छ । 'अनुज्ञया', 'पुरमज्ञया' इति मधुरः प्रासः ॥ ३९ ॥

---

१. **'विवशम्'**

२. **'स रत्नं किरीटम्'** इति वि.ती.पाठः । **'सरत्नं रत्ननिर्मितम् । रत्नखचितमित्यर्थः'** इति वि.भू.।

३. **'शरार्दितोऽसि ह्यधुनेति राजन्'** इति वि.ती.पाठः स्यात् । **'शराहतो नन्वधुना हि राजन्'** इति च ।

भोगानशेषाननुभुङ्क्ष्व[1] शीघ्रं प्रेष्ठं जनं तोषय तोषणीयम् ।
अप्यप्रमत्तः कुरु सर्वकृत्यं रणाय शीघ्रं मरणाय चैहि ॥ ४० ॥

(भा.दी.) भोगानिति । हे रावण, अशेषान् भुज्यन्त इति भोगाः स्रगादिविषयाः, तान् शीघ्रं यथा भवति तथा, अनुभुङ्क्ष्व अनुभव, भुजो लोट् । अभीप्सितदानेन तोषयितुं योग्यस्तोषणीयस्तं प्रेष्ठं अतिशयेन प्रियं जनं तोषय, तदभीष्टदानादिना सन्तोषय । तुष तुष्टौ लोट् । सर्वं यत्कृत्यं कार्यं परलोकप्रदं दानादिकर्म तदपि अप्रमत्तः सन् सावधानः सन् कुरु । अथ रणं युद्धं तस्मै मरणं मृतिस्तस्यै, मरणार्थमित्यर्थः, शीघ्रं यथा भवति तथा एहि आगच्छ । इण् गतौ लोट् ॥ ४० ॥

(सं.चं.) न केवलं रणाय, किन्तु मरणाय च ॥ ४०–२ ॥

वाणीमुदारामिति राघवस्य निशम्य यातो नगरीं दशास्यः ।
स्मरन्नसह्यान् रघुनाथबाणांश्चिन्तामनन्तां मनसा जगाम ॥ ४१ ॥

(भा.दी.) वाणीमिति । दशास्यः राघवस्य उदारां उत्तमां इति वाणीं निशम्य नगरीं यातः गतः सन् असँह्यान् रघुनाथबाणान् स्मरन् दशास्यः अनन्तां अपरिमितां चिन्तां मनसा जगाम ॥ ४१ ॥

स वायसो हंसमिवातिमूढो मत्तो महासिंहमिवेभराजः ।
अहिर्विहङ्गेन्द्रमिवाभियुद्ध्य[2] देवं दशास्यः परितापमाप ॥ ४२ ॥

(भा.दी.) स इति । अत्यन्तं मूढोऽतिमुग्धः, अत्यज्ञ इत्यर्थः, सः दशास्यः देवं श्रीरामं अभियुद्ध्य, हंसं हंसपक्षिणं अभियुद्ध्य वायस इव, महासिंहं अभियुद्ध्य (मत्तः) इभराज इव गजश्रेष्ठ इव, विहगेन्द्रः पक्षीन्द्रः गरुडः, तमभियुद्ध्य अहिरिव सर्प इव परितापः पराजयनिमित्तसन्तापस्तं आप ॥ ४२ ॥

(सं.चं.) अभियुध्येत्यभियोगेन कर्मप्रवचनीयसञ्ज्ञायां द्वितीया ॥ ४२ ॥

दशमुखविशिखैः शिखिप्रकाशैरपरशरैरपि पातितान् प्लवङ्गान् ।
प्रभुरमृतमयैरपाङ्गपातैरकृत निरस्तरुजः स रामदेवः ॥ ४३ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
युद्धकाण्डेऽष्टमः सर्ग्गः

---

१. 'अशेषभोगाननुभुङ्क्ष्व' । 'यथेष्टभोगाननुभुङ्क्ष्व' इति कश्चित् । २. '–भियुध्यन्'

(भा.दी.) दशेति । प्रभुः श्रीरामदेवः, शिखिवदग्निवत् प्रकाशो येषां ते तथा तैः, दशमुखस्य रावणस्य विशिखाः शरास्तैः, अपरेषां अतिकायादीनां शरैरपि, पातितान् प्लवङ्गान् कपीन्, अमृतमयैः अमृतवृष्टिसदृशैः, अपाङ्गानां पातास्तैः, नेत्रान्तनिरीक्षणैरित्यर्थः, निरस्ता (रुक्) शस्त्रघातजन्यव्रणलक्षणरोगो येषां ते तथा तान् अकृत ॥ ४३ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां युद्धकाण्डेऽष्टमः सर्गः ॥

—०—

(सं.चं.) अथ पुष्पिताग्रया सर्गमुपसंहरति– दशमुखेति । अपरेषां रक्षसामपि शरैः । निरस्तरुजः निरस्तव्रणा निरस्तसन्तापा वा । रुजो भङ्गे । 'सन्तापोऽपाटवं मान्द्यमाकुल्यं रुग्रुजे स्त्रियौ' इति च ॥ ४३ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां युद्धकाण्डेऽष्टमसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– २५८२+४३=२६२५]

नवमः सर्ग्गः

कुम्भकर्ण्णाग्रजः क्रुद्धः कुम्भकर्ण्णप्रबोधने ।
रक्षसामयुतं भीममादिदेश बलीयसाम्   ॥ १ ॥

(भा.दी.) श्रीरामेण विजित्य बालवत्प्रेषितो दशास्यः किं निश्चिकायेत्यत आह– **कुम्भे**ति । क्रुद्धः कुम्भकर्णाग्रजः रावणः, कुम्भकर्णस्य प्रबोधनं तस्मिन्, अतिशयेन बलमेषामस्तीति बलीयांसि तेषां रक्षसां भीमं भयङ्करं अयुतं दशसहस्रं तत् आदिदेश आज्ञप्तवान् । दिशतेर्लिट् ॥ १ ॥

(सं.चं.) अयुतं दश सहस्राणि । समुदायैकवचनम् । 'अयुतैरनेकैः' (८.९९) इति निर्णयवचनात् ॥१॥

भेरीशङ्खादिवाद्यानां भूरीणां भूरिभिः स्वनैः[१] ।
ते सन्नादैश्च युगपन्न शेकुस्तत्प्रबोधने   ॥ २ ॥

(भा.दी.) भेरीति । (ते राक्षसाः) भूरीणां बहूनाम्, भेर्यश्च शङ्खाश्च ते आदयो येषां तानि भेरीशङ्खादीनि, तानि च तानि वाद्यानि च तेषाम्, भूरिभिः बहुभिः स्वनाः ध्वनयस्तैः, युगपत् सन्तो ये नादाः सिंहनादास्तैश्च, तस्य प्रबोधनं तस्मिन् न शेकुः, न समर्था बभूवुः । शक्ल शक्तौ लिट् ॥ २ ॥

(सं.चं.) समन्तात् नादा महानादाः, आस्फोटितक्ष्वेळितादयः ॥ २–३ ॥

श्वासवेगैः पतन्तोऽस्य कृच्छ्रेणान्तिकमागताः ।
शैलैः खड्गाद्यायुधैश्च[२] जघ्नुस्ते रावणानुजम्   ॥ ३ ॥

(भा.दी.) श्वासेति । अस्य कुम्भकर्णस्य श्वासस्य वेगास्तैः पतन्तस्ते राक्षसाः, कृच्छ्रं प्रयासस्तेन अन्तिकं कुम्भकर्णसमीपं तत् आगताः सन्तः, शैलाः पर्वतास्तैः, खड्ग आद्यो येषां तानि खड्गादीनि तानि च तानि आयुधानि तैः, रावणानुजं कुम्भकर्णं जघ्नुः ताडितवन्तः ॥ ३ ॥

---

१. 'भूरिनिस्वनैः'   २. 'खड्गायुधाद्यैश्च'

अङ्गे तुङ्गाद्रिसङ्काशे खरैरुष्ट्रैर्गजादिभिः[१] ।
समन्तात् परिधावन्तो नदन्तो नाप्यबोधयन् ॥ ४ ॥

(भा.दी.) **अङ्ग** इति । तुङ्ग उन्नतो योऽद्रिस्तस्य सङ्काशः समानस्तस्मिन्, 'निभसङ्काशनीकाशाः' इत्यमरः, अङ्गे, खरा गर्दभास्तैः, उष्ट्रा गजा आदयो येषां ते तथा तैः सह, समन्तात् (नदन्तः) परिधावन्तोऽपि न अबोधयन् । बुधिर् अवबोधने लङ् ॥ ४ ॥

(सं.चं.) गजादिभिः सह परिधावन्तः । नाप्यबोधयन् । त्रयोऽत्र धातवो भवन्ति । 'बुध बोधने' भ्वादिः । इममेव 'बुधिर् बोधने' इति पेठुः काशकृत्स्नादयः । बोधति । 'बुध अवगमने' इति भ्वादिः । बोधति । 'अवगमनं ज्ञापनम्' इति क्षीरस्वामी । 'बुध अवगमने' इति दिवादिः । बुध्यते । सर्वत्रापि णिचि बोधयतीत्येवं रूपम् ॥ ४ ॥

केचित् केशान् परे श्मश्रु लोमान्यप्युदमूलयन्[२] ।
शतकुम्भैरथाम्भांसि सिञ्चन्ति स्मास्य कर्ण्णयोः ॥ ५ ॥

(भा.दी.) **केचिदिति** । केचिद् राक्षसाः अस्य केशान् उदमूलयन् लुलुञ्चुः । मूल रोहणे लङ् । परे राक्षसाः श्मश्रु, परे लोमानि रोमाण्यपि उदमूलयन् । अथ परे शतसङ्ख्या ये कुम्भाः तैः अम्भांसि अस्य कर्णौ श्रवणे तयोः सिञ्चन्ति स्म अपूरयन् । षिचिर् आसेचने लट् ॥ ५ ॥

(सं.चं.) केचित् केशान् । 'केशानन्ये प्रलुलुपुः कर्णावन्ये दशन्ति च । उदकुम्भशतान्यन्ये समसिञ्चन्त कर्णयोः' (६०.५१–२) इति । शतकुम्भैरिति बहुत्ववचनम् । शतम्, 'ನೂರಾರು' इति भाषायाम् ॥ ५ ॥

अप्रबुद्धं प्रयत्नेन संरम्भात् ते निशाचराः ।
पुनरेवाऽयुधैर्घोरैश्चिच्छिदुः क्रोधमूर्च्छिताः[३] ॥ ६ ॥

---

१. **'–रुष्ट्रगजादिभिः'** इति वि.ती.पाठः । **'खरैः, उष्ट्रैः गजादिभिः गजाश्वाद्यैः समन्तात् पादादिशिरःपर्यन्तं परिधावन्तः'** इति का.श्री. ।

२. **'उदमूलयन् मूलत उत्पाटयामासुः'** इति का.श्री. ।

३. इतः परं क्वचित् सार्धश्लोकद्वयं पठ्यते–

'तप्ततैलैरयःपिण्डैः शूलैः पार्ष्णिप्रदाहनैः । अयोदण्डविघातैस्ते बोधयन्तो विचुक्रुशुः ॥
'अङ्गप्रवर्त्तनेनास्य भङ्गमापुर्नराशिनः । क्षिपद्भ्यो हस्तपादेभ्यो रक्षांसि क्षयमाययुः ॥
'श्वासवातहताः केचित् पतन्तो व्यङ्गतां ययुः ।'

न कैरपि व्याख्याताः स्फुटं प्रक्षिप्ताः ।

(भा.दी.) अप्रबुद्धमिति । क्रोधमूर्च्छिताः ते निशाचराः प्रयत्न उत्साहस्तेन अप्रबुद्धं कुम्भकर्णं घोराणि भयङ्कराणि तैः आयुधैः संरम्भः क्रोधस्तस्मात् पुनरेव चिच्छिदुः । छिदिर्धातोर्लिट् ॥ ६ ॥

(सं.चं.) संरम्भात् सम्भ्रमात् । त्वरातिशयोऽत्र सम्भ्रमो नाम ॥ ६ ॥

निद्रावशो भुजेनैव कुम्भकर्ण्णो युयोध तान् ।
पुनश्च च्छिद्यमानाङ्गः[1] कथञ्चित् प्रत्यबुद्ध्यत[2] ॥ ७ ॥

(भा.दी.) निद्रेति । निद्रायाः वशः निद्रावशः कुम्भकर्णः, भुजो हस्तस्तेनैव तान् राक्षसान् युयोध, युध सम्प्रहारे लिट् । पुनश्च छिद्यमानानि अङ्गानि अवयवा यस्य स तथा सन् कथञ्चित् प्रत्यबुद्ध्यत तत्प्रबोधोऽभूत् । बुध अवगमने लङ् ॥ ७ ॥

(सं.चं.) तान् प्रतियुयोध ॥ ७ ॥

स जृम्भमाणः सहसा प्रोत्थितो बुभुजे बहून् ।
मांसराशीन् सरुधिरान् पूर्वमेवोपकल्पितान् ॥ ८ ॥

(भा.दी.) स इति । जृम्भमाणः निद्राभङ्गात् जृम्भणं कुर्वन् सहसा झटिति प्रोत्थितः सः कुम्भकर्णः पूर्वमेव उपकल्पितान् आहारार्थं क्लृप्तान् सरुधिरान् (बहून्) मांसराशीन् बुभुजे । भुजधातोर्लिट् ॥ ८ ॥

(सं.चं.) सहसा सद्यः । जृम्भणम् '**ഏക്കൽ**' इति भाषायाम् ॥ ८ ॥

द्विसहस्रकरीरेषु पूर्ण्णां पीत्वाऽथ वारुणीम् ।
ज्येष्ठेन प्रेषितः प्रायात् कुम्भकर्ण्णः सभातळम् ॥ ९ ॥

(भा.दी.) द्विसहस्रेति । अथ कुम्भकर्णः, द्विसहस्रसङ्ख्याका ये करीरा घटास्तेषु, 'घटः करीरः कलशः' इति हलः, पूर्णां वारुणीं मद्यं पीत्वा, ज्येष्ठेन रावणेन प्रेषितः आगन्तव्यमित्याकारितः सन् सभायास्तळं प्रदेशस्तत् प्रायात् । यातेर्लङ् ॥ ९ ॥

(सं.चं.) द्वे सहस्रे करीराः कुम्भाः । वारुणीं मदिराम् । 'पीत्वा घटसहस्रे द्वे' (६०.९३) इति च । ज्येष्ठेन भ्रात्रा रावणेन प्रेषितः प्रेष्याभ्यां यूपाक्षमहोदराभ्यामाकारितः ॥ ९–१२ ॥

---

१. '**भिद्यमानाङ्गः**' २. '**प्रत्यबोधत**'

दशाननं वन्दमानः कुम्भकर्ण्णोऽभ्यभाषत ।
त्रयाणां कतमं लोकं संहराणि[१] क्षणादिति ॥ १० ॥

(भा.दी.) **दशेति** । कुम्भकर्णः दशाननं रावणं वन्दमानः सन् त्रयाणां लोकानां मध्ये कतमं लोको भुवनं तं क्षणः क्षणमात्रं तस्मात् संहराणि संहारं करवाणि । हृञो लोट् । इति अभ्यभाषत ॥ १० ॥

न भयं लोकपालैर्न्नो भयं तु नरवानरैः[२] ।
रामः सलक्ष्मणो वद्ध्यस्त्वयेत्यूचे स रावणः ॥ ११ ॥

(भा.दी.) **नेति** । लोकान् पालयन्तीति तथा तैः इन्द्रादिभिः नः अस्माकं भयं न । नरौ च वानराश्च तैः नः भयं तु आगतम् । तस्मात् त्वया सलक्ष्मणः लक्ष्मणसहितः श्रीरामः वध्यः । सः रावणः इति ऊचे । वचधातोर्लिट् ॥ ११ ॥

सकलं कलहस्याथ कारणं श्रुतवानयम् ।
कुम्भकर्ण्णो बभाषे तं नीतिमान् निःश्वसन् मुहुः ॥ १२ ॥

(भा.दी.) **सकलमिति** । अथ कलहो युद्धं तस्य सकलं कारणं सीताहरणादिकं तत् श्रुतवान्, नीतिमान् अयं कुम्भकर्णः मुहुः निःश्वसन् दुःखवशात् समुच्छ्वसन् तं रावणं बभाषे । भाषधातोर्लिट् ॥ १२ ॥

[३]रामेणामोघवीर्य्येण विग्रहोऽयमुपस्थितः ।
अचिरान्मरणायात्र नरकाय परत्र च ॥ १३ ॥

(भा.दी.) **रामेणेति** । अमोघं वीर्यं सामर्थ्यं यस्य स तथा तेन श्रीरामेण सह अयं विग्रहः युद्धलक्षणः कलहः, अत्र अस्मिन् लोके अचिरात् शीघ्रं नः मरणं मृतिस्तस्मै, परत्र च परलोके च नरको दुर्गतिस्तस्मै उपस्थितः सम्प्राप्तः ॥ १३ ॥

(सं.चं.) अथ कुम्भकर्णगतो विजयोऽजागः । जागरित्वा च रावणं प्रत्याह–रामेणामोघवीर्येण ॥१३–५॥

---

१. **'संहरामि'** २. **'तु किन्तु नराभ्यां रामलक्ष्मणाभ्याम्, वानरैश्च भयं प्राप्तम्'** इति का.श्री. ।

२. **'विजयासञ्जीवप्रवेशदशायामाह–रामेऐति'** इति च।

बलिना सन्धिरल्पस्य बलिनोऽल्पेन विग्रहः ।
औदासीन्यं समेन स्यादिति शास्त्रविनिश्चयः[१] ॥ १४ ॥

(भा.दी.) बलिनेति । अल्पो अल्पबलस्तस्य पुरुषस्य, बलमस्यास्तीति बली तेन सह सन्धिः स्यात् । बलिनः पुरुषस्य अल्पेन पुरुषेण विग्रहः स्यात् । समेन स्वसमानेन पुरुषेण औदासीन्यं उपेक्षा स्यादिति शास्त्रं नीतिशास्त्रम्, तस्य नीतिशास्त्रस्य विनिश्चयः निर्णयः ॥ १४ ॥

अनयं त्वं समाश्रित्य प्राप्तो रामेण विग्रहम् ।
शर एको दहेद् यस्य त्रैलोक्यं सचराचरम् ॥ १५ ॥

(भा.दी.) अनयमिति । त्वं अनयोऽनीतिस्तं समाश्रित्य श्रीरामेण विग्रहं विरोधं प्राप्तः असि । 'गत्य-र्थ–' (अ.सू.३.४.७२) इत्यादिना कर्तरि क्तः । नरत्वेनाल्पबलेन श्रीरामेण सह विरोधे कोऽनय इत्यत आह– **शर** इति । यस्य श्रीरामस्य एकः शरः चरं च अचरं च ताभ्यां सहितं सचराचरं त्रैलोक्यं दहेत् । दहतेर्लिङ् ॥ १५ ॥

कुम्भकर्णगिरं श्रुत्वा रावणो वाक्यमब्रवीत् ।
त्वादृशैर्बन्धुभिर्गुप्ता[२] राजानः किं न[३] कुर्वते ॥ १६ ॥

(भा.दी.) कुम्भेति । रावणः कुम्भकर्णस्य गीर्वाक् तां श्रुत्वा, त्वमिव दृश्यन्त इति त्वादृशास्तैः बन्धुभिः गुप्ताः रक्षिताः राजानः किं कर्म न कुर्वते? सर्वं चायुक्तं कर्म कुर्वत एवेत्यर्थः । कृञो लट् । इति वाक्यं तत् अब्रवीत् ॥ १६ ॥

(सं.चं.) किं न कुर्वते? यत्किमपि, अनुचितमपि कुर्युरेव ॥ १६ ॥

पाल्योऽहं हि[४] त्वया वत्स त्वद्बलेन किमन्यथा ।
ज्येष्ठं गुरुं कथं त्वं मामवजानासि[५] मूर्खवत् ॥ १७ ॥

---

१. **'शास्त्रविनिर्णयः'** इति, **'शास्त्रसुनिश्चयः'** इति च क्वचित् । २. **'–न्धुभिर्युक्ता–'** ३. **'किं नु कुर्वते'**
४. **'पाल्योऽहं च त्वया'** ५. **'–मवज्ञाताऽसि'**

(भा.दी.) पाल्य इति । हे वत्स, त्वया अहं पाल्यो हि रक्ष्यो हि । अन्यथा आपदि मदपालने, तव बलं त्वद्बलं तेन किं कार्यम्? न किमपि । त्वं ज्येष्ठं गुरुं पितृसमं मां मूर्खवत् अज्ञवत् कथं अवजानासि अवज्ञातं करोषि ॥ १७ ॥

(सं.चं.) गुरोर्ज्येष्ठभ्रातुरापदि रक्षार्थमनुद्युञ्जानेन तव बाहुबलेन किं प्रयोजनम्? स्वयं ज्येष्ठं कुबेरमवजानन्नपि अनुजाय धर्ममुपदिदेश । तदिदमहो स्वार्थाय धर्मावलम्बनं नाम ॥ १७ ॥

[१]अग्रजेनैवमुक्तः स विग्रहायोग्रमानसः ।
त्रिशिखं [२]शूलमुद्धुन्वन्नुदतिष्ठत् स निष्ठुरः[३] ॥ १८ ॥

(भा.दी.) अग्रजेनेति । अग्रजेन ज्येष्ठेन एवं उक्तः, उग्रं मानसं मनो यस्य स तथा, निष्ठुरः सः कुम्भकर्णः, तिस्रः शिखाः कोटयो यस्य तत्तथोक्तं तत् शूलं उद्धुन्वन्, उन्मुखतया कम्पयन् सन्, विग्रहो युद्धं तस्मै उदतिष्ठत् ॥ १८ ॥

(सं.चं.) अथ विजयमपोह्य हिरण्याक्षो जजागार । निष्ठुरः स्वभावतः क्रूरः । अत एवोग्रं निर्दयं मानसमस्य । 'सुनिष्ठुरः' इति साधुः पाठः ॥ १८ ॥

मद्बन्धुनिधनस्याद्य[४] कृत्वा निष्कृतिमुत्तमाम् ।
प्रसादयेयं राजंस्त्वां व्येतु ते हृदयज्वरः ॥ १९ ॥

(भा.दी.) मदिति । हे राजन् रावण, मम ये बन्धवः खरादयस्तेषां निधनं नाशस्तस्य अद्य उत्तमां निष्कृतिं प्रतिक्रियां कृत्वा, श्रीरामं हत्वेत्यर्थः, त्वां प्रसादयेयं प्रसन्नं करवाणि । तेन तव, हृदयस्य मनसो ज्वरः कथं श्रीरामं हनिष्यामीति चिन्तेत्यर्थः, व्येतु गच्छतु । इण् गतौ लोट् ॥ १९ ॥

(सं.चं.) निष्कृतिं प्रतीकारम् ॥ १९ ॥

कबळत्रितयार्थं स्यात् कथञ्चिद् भुवनत्रयम् ।
सप्ताब्धयोऽनुपानार्थमित्युक्त्वा स ययौ युधे ॥ २० ॥

---

१. **'दुर्जीवव्यापारमाह–अग्रजेनेति'** इति का.श्री. । २. **'शूलमाधुन्वन्नुद–'**

३. **'स निष्ठुरः'** इति पाठे **'सः'** इति पुनरुक्तं भवति । अतः **'सुनिष्ठुरः'** इति मूलपाठः स्यादिति भाति । अत एव का.श्री. **'सनिष्ठुरः'** इति समस्तपदं मन्यते-**सनिष्ठुरः निष्ठुरवाक्येन सहितः** ' इति । ४. **'–निधनस्याथ कृत्वा'**

(भा.दी.) कबळेति । भुवनानां त्रयं भूरादिकं कबळानां ग्रासानां त्रितयं तस्मै इति तदर्थम्, कथञ्चित् स्यात्, ग्रासत्रयमपि सम्पूर्णं न भवेदित्यर्थः । सप्त च ते अब्धयश्च ते अनुपानार्थं भोजनान्ते क्रियमाणं पानमनुपानं तस्मै इति तदर्थं स्युः । सः कुम्भकर्णः इति उक्त्वा युत् युद्धं तस्यै ययौ ॥ २० ॥

(सं.चं.) कवळानन्तरं पानमनुपानम् ॥ २० ॥

एकाकिना न गन्तव्यं सर्वे याम[१] वयं युधे ।
सीता विलोभ्या मायाभिरित्युवाच महोदरः ॥ २१ ॥

(भा.दी.) एकेति । एकाकिना त्वया न गन्तव्यम्, सर्वे वयं युध् युद्धं तस्यै यामः गच्छामः, गत्वा चास्माभिः मायाभिः सीता विलोभ्या वञ्चनीया, महोदरः तन्नामकः राक्षसः इति वचः रावणसभायां कुम्भकर्णं प्रति उवाच ॥ २१ ॥

(सं.चं.) सर्वे यामः । कुम्भकर्णेन सह वयं सर्वे महोदरः, द्विजिह्वः, संह्रादी, वितर्दनश्च । 'अहं द्विजिह्वः संह्रादी कुम्भकर्णो वितर्दनः । पञ्च रामवधायैते निर्यान्तीत्यवघोषय' (६४.२२) इति च । निद्राळुरयं कुम्भकर्णः प्रमाद्येतेति भयेन महोदर एवमाह । पञ्चभिरपि कार्यसिद्धिः स्यादिति न विश्रम्भः । अतः सीता विलोभ्या मायाभिः ॥ २१–२ ॥

महोदरं विनिर्भर्त्स्य रावणं प्रतिनन्दयन् ।
सम्पूजितो रावणेन प्रययौ रावणानुजः ॥ २२ ॥

(भा.दी.) महेति । रावणं प्रतिनन्दयन् सन्तोषयन् रावणानुजः महोदरं विनिर्भर्त्स्य, देवादिविजिगीषो-र्मम रामेण सह युद्धे ससहायत्वं किं वदिष्यसीत्यादिरूपेण निन्दयित्वा, रावणेन सम्पूजितः सन् युद्धाय प्रययौ । (अहमेक एव ससैन्यं श्रीरामं हनिष्य इत्यादि बहुधा वदन्तं कुम्भकर्णं प्रति महोदराख्यराक्षसः त्वं रामपराक्रमं न जानीषे त्वमेकाकी मैहीत्युक्त्वा, रावणं प्रति त्वं कुम्भकर्णेन रामलक्ष्मणौ भक्षिताविति प्रसिद्धिमुत्पाद्य सीता वशीकरणीयेत्यादि वाचो वदन्तं विनिर्भर्त्स्य योद्धुं कुम्भकर्णो जगामेति रामायणस्य सङ्ग्रहोक्तिरियम्[२]) ॥ २२ ॥

---

१. **'यामो वयम्'** इति वि.ती.पाठः ।

२. () एतच्चिह्नान्तर्गतानि वाक्यानि ताडपत्रस्य पाइर्वे लिखितानि ।

स पञ्चयोजनोत्सेधं[१] प्राकारमतिलङ्घयन् ।
निर्गम्य नगरात् तस्मात् कपिसैन्यमवैक्षत ॥ २३ ॥

(भा.दी.) स इति । पञ्च च तानि योजनानि च तावन्ति उत्सेध उन्नतिर्यस्य तथोक्तः सन् प्राकारं अतिलङ्घयन् अतिक्रम्य गच्छन् सः कुम्भकर्णः तस्मात् नगरं पुरं तस्मात् निर्गम्य कपीनां सैन्यं तत् अवैक्षत । ईक्षतेर्लङ् ॥ २३ ॥

(सं.चं.) 'उत्सेधो वपुरुन्नती' इति यादवप्रकाशः । 'प्राकारमुल्लङ्घ्य स पञ्चयोजनम्' (८.१०५) इति निर्णये ॥ २३ ॥

नानायुधधरा वीरा नानावाहनसंस्थिताः ।
तमन्वयू राक्षसेन्द्राश्चतुरङ्गबलैर्वृताः[२] ॥ २४ ॥

(भा.दी.) नानेति । नानाविधान्यायुधानि तानि धारयन्तीति तथोक्ताः, नानाविधानि यानि वाहनानि गजादीनि तेषु संस्थिताः, वीराः राक्षसेन्द्राः, चतुरङ्गानि बलानि सैन्यानि तैः वृताः सन्तः, तं कुम्भकर्णं अन्वयुः, अनुसृत्य जग्मुः ॥ २४ ॥

(सं.चं.) पदातयोऽश्वा गजा रथाश्चेति चत्वार्यङ्गानि सेनायाः । अन्वयुः । या प्रापणे लङ् ॥ २४ ॥

बहुयोजनविस्तीर्ण्णं ततश्चाभ्यधिकोच्छ्रयम्[३] ।
कालाम्बुदप्रभतनुं कालान्तकयमोपमम् ॥ २५ ॥

(भा.दी.) बह्विति । बहूनि यानि योजनानि तैर्विस्तीर्णम्, ततश्च तेभ्यो योजनेभ्योऽपि अभ्यधिक उच्छ्रय उन्नतिर्यस्य स तथा तम्, काळः कृष्णो योऽम्बुदो मेघस्तस्य प्रभेव प्रभा यस्याः सा तथोक्ता तादृशी तनुः शरीरं यस्य स तथोक्तः तम्, कालो मृत्युः स च, 'कालो मृत्यौ यमे च' इति वैजयन्ती । अन्तको रुद्रः स च, यमश्च तेषामुपमा यस्य स तथा तं कुम्भकर्णं 'दृष्ट्वा कपिसङ्घाः दुद्रुवुः' (३१)इत्येतेनान्वयः ॥ २५ ॥

---

१. **'–योजनोत्सेधः'** इति वि.ती.पाठः । **'–त्सेधं प्राकारमभिलङ्घयन्'** इति क्वचित् । २. **'–बलैर्युताः'** इति, **'–बलान्विताः'** इति च ।
३. **'अधिकोच्छ्रयं त्रिगुणोन्नतम्'** इति का.श्री. ।

(सं.चं.) बहुयोजनविस्तीर्णम् । योजनमिति धनुर्मानमुच्यते । 'धनुःशतपरीणाहः स षट्शतसमुच्छ्रितः । रौद्रः शकटचक्राक्षो महापर्वतसन्निभः' (६५.४१) इति च । कालाम्बुदः प्रळयकालिको मेघः । कालान्तकः प्रळयकालान्तकः रुद्रः, तेन यमेन चोपमीयत इति ताभ्यां सदृशः ॥ २५ ॥

महाकटककेयूरकोटीरादिदिविभूषणम्[1] ।
करौ च परिघाकारौ व्यापयन्तं दिशो दश ॥ २६ ॥

(भा.दी.) महेति । कोटीरं किरीटं तच्च, कटकं हस्ताभरणं तच्च, आदिर्येषां तानि कोटीरकटकादीनि, तानि च तानि विभूषणानि च कोटीरकटकादिविभूषणानि, हाटकमयानि च तानि, तानि महान्ति यस्य स तथा तम्, परिघयोः आकार इव आकारो ययोस्तौ तथा तौ करौ दश दिशः व्यापयन्तं व्यापारयन्तं कुम्भकर्णं दृष्ट्वा कपिसङ्घाः दुद्रुवुः ॥ २६ ॥

(सं.चं.) कटकं वलयम् । '**ಕಡಗ**' इति भाषायाम् । केयूरमङ्गदम् । '**ತೋಳುಬಂದಿ**' इति भाषायाम् । कोटीरं किरीटम् । 'काञ्चनाङ्गदकेयूरनिष्काभरणभूषितः । कुम्भकर्णो बृहत्कर्णः सुहुतोऽग्निरिवाऽबभौ' (६५.२८) इति च । रामायणे अङ्गदमिति भुजकीर्तिः । 'परिघोऽर्गलदण्डयोः' इति यादवप्रकाशः ॥ २६–८ ॥

पादाभ्यामतिभीमाभ्यां दारयन्तमिवावनिम् ।
वृत्ताभ्यां ताम्रनेत्राभ्यां विसृजन्तं महानलम् ॥ २७ ॥

(भा.दी.) पादाभ्यामिति । अत्यन्तं भीमौ अतिभीमौ ताभ्यां पादाभ्यां अवनिं भूमिं दारयन्तमिव, दृश्यमानमिति शेषः, वृत्ताभ्यां वर्तुळाभ्यां ताम्रे रक्ते ये नेत्रे ताभ्यां महान् योऽनलोऽग्निस्तं विसृजन्तमिव, कुम्भकर्णं (दृष्ट्वा) दुद्रुवुः ॥ २७ ॥

दंष्ट्राभ्यां क्षुरधाराभ्यां खण्डयन्तमिवाखिलम् ।
महागुहावद्[2] गहनं व्याददानं महाननम् ॥ २८ ॥

(भा.दी.) दंष्ट्राभ्यामिति । क्षुरस्य क्रकचस्य धारेव धारा ययोस्ते ताभ्यां दंष्ट्राभ्यां अखिलं जगत् खण्डयन्तमिव स्थितम्, महती या गुहा तद्वत् गहनं गम्भीरं महद् यदाननं तत् व्याददानं विवृतं कुर्वाणं कुम्भकर्णं दृष्ट्वा दुद्रुवुः ॥ २८ ॥

---

१. '**महाहाटककोटीरकटकादिविभूषणम्**' इति वि.ती.पाठः । '**महाकटककोटीरकेयूरादिविभूषणम्**' इति क्वचित् ।

२. '**–गुहावद् वदनम्**' इति, '**–गुहाभवदनम्**' इति च ।

ग्रसन्तमिव लोकांस्त्रीन् भूरिसंरम्भसम्भृतम्[१] ।
महाट्टहासप्रक्ष्वेळं घनाघनघनस्वनम् ॥ २९ ॥

(भा.दी.) ग्रसन्तमिति । त्रीन् लोकान् ग्रसन्तमिव स्थितम्, भूरिः बहळो यः संरम्भः क्रोधस्तेन सम्भृतं पूर्णम्, महान् योऽट्टहासो महाहासस्तेन युक्ता प्रक्ष्वेळाः सिंहनादाः यस्य स तथा तम्, 'क्ष्वेडा तु सिंहनादः स्यात्'[२] इत्यमरः, घनाघनो वर्षणशीलो मेघस्तद्वत् घनो गम्भीरः स्वनो यस्य स तथा तम्, 'घनाघनो मत्तगजे वासवे वार्षुकाम्बुदे' इति वैजयन्ती । कुम्भकर्णं दृष्ट्वा दुद्रुवुः ॥ २९ ॥

(सं.चं.) संरम्भः कोपः । क्ष्वेळ इति नादसामान्यं सिंहनादश्च । महानट्टहासस्य नादो यस्य । महान्ता-वट्टहाससिंहनादौ यस्येति वा । 'घनाघनो मत्तगजे वासवे वार्षुकाम्बुदे' इति यादवप्रकाशः । मत्तगजवद् वार्षुकाम्बुदवद् वा घनः स्वनो यस्य ॥ २९ ॥

क्व द्रुता वानराः क्षुद्राः क्व रामः क्व च लक्ष्मणः ।
[३]आस्फोटयन्तमित्युक्त्वा मनोमारुतरंहसम् ॥ ३० ॥

कुम्भकर्णं तथा दृष्ट्वा जम्भारेश्च भयङ्करम् ।
दुद्रुवुः कपिसङ्घास्ते चापमुक्ता[४] इवेषवः ॥ ३१ ॥

(भा.दी.) क्वेति । क्षुद्राः नीचाः, 'क्षुद्रो दरिद्रे कृपणे नृशंसेऽल्पनिकृष्टयोः' इति वैजयन्ती, वानराः क्व कुत्र द्रुताः? श्रीरामः क्व वर्तते? लक्ष्मणश्च क्व वर्तते? इति उक्त्वा आस्फोटयन्तं द्विगुणीकृतहस्तप्रहारं कुर्वन्तम्, मनोमारुतयोः रंहो वेगो यस्य स तथा तम्, जम्भनामा योऽसुरस्तस्य अरिः शत्रुरिन्द्रस्तस्यापि भयं करोतीति भयङ्करस्तं कुम्भकर्णं दृष्ट्वा (ते कपिसङ्घाः) तथा पूर्ववत् चापोन्मुक्ता इषव इव दुद्रुवुः । द्रु गतौ लिट् ॥ ३०–३१ ॥

(सं.चं.) इत्युक्त्वा आस्फोटयन्तम्, कपिसेनां भेदयन्तं खेदयन्तं च । स्फुट भेदने । । भुजमास्फोट-यन्तं वा । **'ತೊಡೆ ತಟ್ಟು'** इति भाषायाम् । मनोवत् मारुतवच्च वेगोऽस्य । जम्भारेरिन्द्रस्यापि भयङ्करम् ॥ ३०–२ ॥

---

१. **'–संरम्भसम्भ्रमम्'** इति **'संरम्भसंवृतम्'** इति च ।
२. **'क्ष्वेडितं सिंहनादः स्यात्'**
३. **'आस्फोटयन्तं भुजं हस्तेनाऽस्फालयन्तं हस्तेनोरुं ताडयन्तं वा'** इति का.श्री. ।
४. **'चापोन्मुक्ता–'** इति वि.ती.पाठः ।

सेतुमत्यगमन् केचित् केचित् सेतुमुपागमन् ।
केचिन्निलीना वृक्षेषु पतिताः केचन क्षितौ ॥ ३२ ॥

(भा.दी.) सेतुमिति । केचित् कपयः सेतुः नळसेतुस्तं अत्यगमन् अत्यागच्छन् । गम्लृ गतौ लुङ् । केचित् कपयः सेतुमुपागमन् । केचित् वृक्षेषु निलीनाः गूढाः आसन् । केचन क्षितौ पतिताः आसन् । यथा चेत्कुम्भकर्णो न पश्यति तद्वद् भूमौ पतिता इत्यर्थः ॥ ३२ ॥

युवराजोऽङ्गदो दृष्ट्वा निजसैन्यं भयाकुलम् ।
नळादीन्[१] द्रवतः प्रोचे वीर्य्यौदार्य्ययुतं वचः ॥ ३३ ॥

(भा.दी.) युवराज इति । युवराजः अङ्गदः निजमात्मीयं यत्सैन्यं तत्, भयेन आकुलं सम्भ्रान्तं तत् दृष्ट्वा, द्रवतः नळादीन् कपीन् वीर्यस्य यदौदार्यं महत्त्वं तेन युतं युक्तं वचः प्रोचे ॥ ३३ ॥

(सं.चं.) नळादीन् । 'तांस्तु विप्रद्रुतान् दृष्ट्वा युवराजोऽङ्गदोऽब्रवीत् । नळं नीलं गवाक्षं च कुमुदं च महाबलम्' (६६.४) इति च । औदार्यं महार्थता, आत्मप्रत्ययवर्धकता च ॥ ३३ ॥

भुवनानां प्रभौ रामे नाथेऽस्मिन्नभयङ्करे ।
वानराः षण्ढतिलवत् कुत्र द्रवथ[२] विक्लबाः[३] ॥ ३४ ॥

(भा.दी.) भुवनेति । भुवनानि जगन्ति तेषां प्रभौ, अभयं करोतीति अभयङ्करस्तस्मिन्, श्रीरामे नाथे अस्मत्स्वामिनि सति, हे वानराः, षण्ढा नीरसाः तिला इव तद्वत् विक्लबाः, सन्तः कुत्र द्रवत पलायत[४] । द्रु गतौ लोट् ॥ ३४ ॥

(सं.चं.) षण्ढतिलः 'ಜೊಳ್ಳೆಳ್ಳು' इति भाषायाम् । यतो न तैलम् । नापि तेमनम् । 'तिलपिञ्चस्तिलपेजस्तथा षण्ढतिलः स्मृतः' इति हलायुधः । 'द्रवत' इति पठन्ति । 'द्रवथ' इत्येव प्रतनः पाठ इति युक्तम् । विक्लबा विह्वला भयभ्रान्तचेतसः ॥ ३४–६ ॥

इत्यङ्गदोदितं श्रुत्वा निवृत्त्य कपिपुङ्गवाः ।
सालशैलशिलाहस्ताः कुम्भकर्ण्णमथाभ्ययुः[५] ॥ ३५ ॥

---

१. **'नीलादीन्'** २. **'द्रवत'** इति प्रचुरः पाठो न स्वरसः । ३. **'विक्लवाः'**
४. **'द्रवथ पलायध्वे'** इति पठनीयम् । ५. **'–मथाऽययुः'**

(भा.दी.) इतीति । अथ कपिपुङ्गवाः कपिश्रेष्ठाः, इति अङ्गदेन उदितं तत् वचः श्रुत्वा, निवृत्य परावृत्य, साला वृक्षास्ते च शैलाश्च शिलाश्च ताः हस्तेषु येषां ते तथा सन्तः कुम्भकर्णं अभ्ययुः ॥ ३५ ॥

कुम्भकर्णानुगास्तूर्णं वानरानतुदञ्छरैः ।
कपयो विविदाद्यास्तान् कुपिताः समसूदयन् ॥ ३६ ॥

(भा.दी.) कुम्भेति । कुम्भकर्णस्य अनुगाः भृत्याः शरैः तूर्णं यथा भवति तथा वानरान् अतुदन् । तुद व्यथने लङ् । विविद आद्यो येषां ते तथोक्ताः कपयः तान् कुम्भकर्णभटान् कुपिताः क्रुद्धाः सन्तः समसूदयन् संहृतवन्तः । षूद क्षरणे लङ् ॥ ३६ ॥

तस्मै सालशिलाशैलान् वानराः प्रतिचिक्षुपुः ।
कुम्भकर्णाङ्गसङ्गात् ते[1] चूर्णिताः पांसुपिण्डवत् ॥ ३७ ॥

(भा.दी.) तस्मा इति । वानराः सालाश्च शिलाश्च शैलाश्च तान्, तस्मै कुम्भकर्णाय प्रतिचिक्षिपुः, निक्षिप्तवन्तः । क्षिप प्रेरणे लिट् । कुम्भकर्णस्य अङ्गसङ्गोऽङ्गसम्बन्धस्तस्मात् ते सालशिलाशैलाः पांसूनां पिण्डा इव चूर्णिताः ॥ ३७ ॥

(सं.चं.) तस्मै कुम्भकर्णाय । चूर्णिता बभूवुः ॥ ३७ ॥

शतानि सप्त चाष्टौ च सहस्राणि च वानरान् ।
युगपत् प्रतिनिष्पिष्य कुम्भकर्णो न्यपातयत् ॥ ३८ ॥

(भा.दी.) शतानीति । कुम्भकर्णः शतानि अनेकसङ्ख्याकान्, सप्त च अष्टौ च सहस्राणि च सहस्रसङ्ख्याकांश्च वानरान्, युगपत् प्रतिनिष्पिष्य पेषयित्वा न्यपातयत् ॥ ३८ ॥

(सं.चं.) शतानीति । 'शतानि सप्त चाष्टौ च सहस्राणि च वानराः । प्रकीर्णाः शेरते भूमौ कुम्भकर्णेन पोथिताः' (६७.६) इति च । सप्ताष्टानि शतानि, सप्ताष्टानि सहस्राणि चेत्यर्थः ॥ ३८ ॥

षोडशाष्टौ च दश च विंशत् त्रिंशत् तथाऽपरान् ।
परिगृह्य स[2] पाणिभ्यां खादन्नादं स्म धावति ॥ ३९ ॥

---

१. '–सङ्गास्ते'
२. '–गृह्य स्वपाणिभ्याम्'

(भा.दी.) षोडशेति । (सः कुम्भकर्णः) षडधिका दश षोडशसङ्ख्याकानित्यर्थः, अष्टौ (च) दश च, विंशत् विंशतिः, त्रिंशत् कपीन् तथा अपरान् कपींश्च पाणी हस्तौ ताभ्यां परिगृह्य खादङ्खादं खादित्वाखादित्वा, भक्षयित्वा भक्षयित्वेत्यर्थः, धावति स्म अधावत् । धावु गतिशुद्ध्योः लट् ॥ ३९ ॥

(सं.चं.) षोडशेति । 'षोडशाष्टौ च दश च विंशत् त्रिंशत् तथैवच । परिक्षिप्य च बाहुभ्यां खादन् विपरिधावति' (६५.७) इति च । अष्टौ च दश च अष्टादशेत्यर्थः ॥ ३९ ॥

अभ्यापतितदर्शं स निनायादर्शनं कपीन् ।
रणरङ्गानुपातं च द्रुतवेदं स्म तिष्ठति ॥ ४० ॥

(भा.दी.) अभीति । कुम्भकर्णः कपीन् अभ्यापतितदर्शं अभ्यापतितान् दृष्ट्वादृष्ट्वा, येयेऽभ्यापतन्ति तान् सर्वानित्यर्थः, अदर्शनं विनाशस्तत् निनाय प्रापयामास । रणरङ्गानुपातं रणरङ्गमनुपत्यानुपत्य, रणरङ्गं प्रत्यागत्याऽगत्य स्थितान् वानरान् द्रुतवेदं द्रुतान् विदित्वाविदित्वा तिष्ठति स्म अतिष्ठत् । यद्वा स्वयमेव रणरङ्गानुपातं रणरङ्गमनुपत्यानुपत्य वर्तमानः वानरान् द्रुतवेदं द्रुतान् ज्ञात्वा तिष्ठतीत्यर्थः । अभ्यापतितदर्शमित्यादिकं णमुलन्तमव्ययम् ॥ ४० ॥

(सं.चं.) अभ्यापतितदर्शं अभ्यापतितान् दर्शन्दर्शम्, कपीनदर्शनं निनाय । यान्यानभ्यापतितान् पश्यति तांस्तान् कपीनदर्शनं निनाय नाशयामास । रणरङ्गानुपातं रणरङ्गमनुपत्यानुपत्य, द्रुतवेदं सर्वान् कपीन् द्रुतान् विदित्वा, प्रतिभटादर्शनात् तूष्णीं तिष्ठति स्म । 'कर्मणि दृशिविदोः साकल्ये' (अ.सू.३.४.२९) इति, 'विशि-पति-पदि-स्कन्दां व्याप्यमानासेव्यमानयोः' (३.४.५६) इति च हि स्मरति पाणिनिः ॥ ४० ॥

क्षिप भक्षय पिङ्ग्ध्युर्व्यां प्रतिदारय पातय ।
वानरान् स नराहार इत्थं भूयो व्यनीनशत्[१] ॥ ४१ ॥

(भा.दी.) क्षिपेति । नरा आहारो यस्य स तथोक्तः स कुम्भकर्णः, क्षिप क्षिप्त्वाक्षिप्त्वा, भक्षय भक्षयित्वाभक्षयित्वा, पिङ्ग्धि पिष्ट्वापिष्ट्वा, सञ्चूर्ण्यसञ्चूर्ण्येत्यर्थः, प्रतिदारय प्रतिदारयित्वाप्रतिदारयित्वा, पातय पातयित्वापातयित्वा, वानरान् भूयः इत्थं व्यनीनशत्, नाशयामास । णश अदर्शने लुङ् । यद्वा क्षिप क्षिपति

१. अर्थान्तरं च का.श्री. टीकायाम्–'यद्वा, **'पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हरामराङ्गनाः' इतिवत् क्षिप भक्षयेत्यादिप्रयोगे क्रियासमभिव्याहारे लोट् । तथाच क्षिप वानरान् पुनःपुनराक्षिपत् । भक्षय पुनःपुनरभक्षयत् । पिङ्ग्धि पुनःपुनः पिष्टानकरोत् । उर्व्यां भूमौ पातय पुनःपुनः पातयामास । प्रतिदारय पुनःपुनरदारयत्'** इति ।

भक्षय भक्षयति, पिङ्क्ष्व सञ्चूर्णयतीत्यर्थः, प्रतिदारय प्रतिदारयति, निपातय निपातयति । इति कृत्वा वानरान् व्यनीनशदित्यर्थो वाच्यः ॥ ४१ ॥

(सं.चं.) शत्रुशरीरं दूरे क्षिप, समुद्रे वा, तन्मांसं भक्षय, तदस्थीनि उर्व्यां पिङ्क्ष्व पेषय, तदवयवान् प्रतिदारय, तच्छरीरं पातयेत्येवमयं कपीन् व्यनीनशत् । क्षिप्त्वा भक्षयित्वा, पिष्ट्वा, प्रतिदार्य, पातयित्वा च कपीन् विनाशाया-मासेत्यर्थः । तथाहि पाणिनिः–'समुच्चये सामान्यवचनस्य' (अ.सू.३.४.५) इति । 'द्वितीये लोड्विधाने समुच्चये सामान्यवचनस्य धातोरनुप्रयोगः कर्तव्यः । ओदनं भुङ्क्ष्व, सक्तून् पिब, धानाः खादेत्येवा-यमभ्यवहरति' इति जयादित्यः । यद्यपि पिषिः परस्मैभाषः । तेन पिण्ढि इति वक्तव्यम् । अथापि पिङ्क्ष्वेत्या-त्मनेभाषं प्रायुङ्क्त कविः । नियोगपर्यनुयोगानर्हाः कवयः सर्वस्मादुभयपपदवादिनः ॥ ४१ ॥

ततः शतवलिं श्वेतं सम्पातिपनसावपि ।
उन्मुखान् दुर्म्मुखमुखान् राक्षसोऽभक्षयत् कपीन् ॥ ४२ ॥

(भा.दी.) **तत** इति । राक्षसः कुम्भकर्णः शतवलिं शतवल्याख्यं श्वेतं श्वेताख्यम्, सम्पातिश्च[१] पनसश्च तावपि, ऊर्ध्वं मुखं येषां ते तथा तान् स्वाभिमुखानित्यर्थः, दुर्मुखो मुखं येषां ते तथा तान् कपीन् अभक्षयत् । भक्षधातोर्लङ् ॥ ४२ ॥

(सं.चं.) ततः शतवलिम् । सम्पाती च पनसश्च । अत्र केचिद् रामायणोक्ताः । केचिदनुक्ताः । 'शतवलि-पनसाख्यौ तत्र वस्वंशभूतौ पवनगणवरांशौ श्वेतसम्पातिनौ च । निरृतितनुमथोग्रं दुर्मुखं केसरीति प्रवरमथ मरुत्सु प्रास्यदेतान् मुखे सः' (८.१०६) इति निर्णये ॥ ४२ ॥

क्षणात् पिपेष पाणिभ्यां[२] जयन्तकुमुदावुभौ[३] ।
गर्ज्जन्नास्फोट्य[४] युद्धार्थी ददर्शाऽशु दिशो दश ॥ ४३ ॥

(भा.दी.) **क्षणादिति** । जयन्तः कुमुदश्च तौ उभौ, हस्तौ पाणी ताभ्यां क्षणः क्षणमात्रं तस्मात् पिपेष । पिष्लृ सञ्चूर्णने लिट् । युद्धमर्थितुं शीलमस्यास्तीति तथोक्तः कुम्भकर्णः, गच्छन् सन् आस्फोट्य द्विगुणीकृतहस्तप्रहारं कृत्वा, दश दिशः आशु ददर्श । दृशिर् प्रेक्षणे लिट् ॥ ४३ ॥

---

१. **'सम्पाती च'** इति युक्तं वचः ।

२. **'पिपेष हस्ताभ्याम्'** इति वि.ती.पाठः स्यात् ।

३. **'जयन्तकुमुदयोः शरीरस्य सर्वात्मना नाशात् गन्धमादनपर्वतानयनानन्तरमेतयोर्जीवनं नाभूदित्याहुः'** इति का.श्री. । चिन्त्यमेतत् । **'तदा मृतान् मृतान् राघव आनिनाय यमक्षयाद् देवगणांश्च सर्वशः'** (८.११५) इति निर्णये सर्वेषां कपीनां पुनर्जीवनोक्तेः ।

४. **'गच्छन्नास्फोट्य'** इति वि.ती.पाठः स्यात् । **'भुजावास्फोट्य'** इति का.श्री.पाठः ।

(सं.चं.) क्षणात् पिपेष । 'रजनिचरवरोऽसौ कुम्भकर्णः प्रतापी कुमुदमपि जयन्तं पाणिना निष्पिपेष' (८.१०७) इति च । युद्धार्थी प्रतियोद्धॄणामदर्शनात् क ते पलायिता इति दिशो दश ददर्श ॥ ४३ ॥

गजं गवाक्षं गवयं वृषाख्यं गन्धमादनम् ।
तारनीलनळान् योद्धॄन्[1] मुष्टिघातैरपातयत् ॥ ४४ ॥

(भा.दी.) गजमिति । गजं गजाख्यं गवाक्षं गवयम्, वृष इति आख्या यस्य स तम्, गन्धमादनं योध्यन् (?योद्धॄन्) तारनीलनळान् मुष्टीनां ये घातास्तैः अपातयत् ॥ ४४ ॥

(सं.चं.) गजं गवाक्षं गवयम् । 'नळमथ च गजादीन् पञ्च नीलं सतारं गिरिवरतरुहस्तान् मुष्टिनाऽपातयच्च' (८.१०७) इति च । योद्धॄन् गजादीनष्टावपातयत् ॥ ४४ ॥

युवराजयुतो राजा वीक्ष्य तं पृतनाक्षयम् ।
अभ्यधावदभिक्रुद्धो[2] जाम्बवांश्चापरैः सह[3] ॥ ४५ ॥

(भा.दी.) युवेति । युवराजेन अङ्गदेन युतः राजा सुग्रीवः तं पृतनाक्षयं वीक्ष्य अभिक्रुद्धः सन् अभ्यधावत् । धावु गतिशुद्ध्योः लङ् । जाम्बवांश्च अपरैर्वानरैः सह अभ्यधावत् ॥ ४५ ॥

(सं.चं.) युवराजयुतो राजा अङ्गदयुतः सुग्रीवः । 'अथाङ्गदश्च जाम्बवानिनात्मजश्च वानरैः । निजघ्निरे निशाचरं सवृक्षशैलसानुभिः' (८.१०८) इति च ॥ ४५ ॥

सालशैलशिलावर्षं चक्रुस्ते कपयस्त्रयः ।
चूर्णीबभूवुस्तेऽस्याङ्गे[4] नैवाकम्पत राक्षसः ॥ ४६ ॥

(भा.दी.) सालेति । ते त्रयः कपयः सालाश्च शैलाश्च शिलाश्च तासां वर्षं वृष्टिस्तत् चक्रुः । कृञो लिट् । ते सालादयः अस्य कुम्भकर्णस्य अङ्गं शरीरं तस्मिन् चूर्णीबभूवुः । राक्षसः कुम्भकर्णः नैव अकम्पत नैव चचाल । कपि कम्पने लङ् ॥ ४६ ॥

(सं.चं.) कपयस्त्रयः । छत्रिन्यायेन जाम्बवानपि कपिः ॥ ४६ ॥

---

१. **'योध्यन्'** इति कोशपाठो लिपिकृत्प्रमादमूलः ।
२. **'–दतिक्रुद्धो–'**
३. **'–वांश्च परैः सह'**
४. **'चूर्णा बभूवुस्तस्याङ्गे'** इति, **'चूर्णीबभूवुस्तस्याङ्गे'** इति च ।

अथ पर्वतमुत्पाट्य तस्मै चिक्षेप तापनिः ।
तमेवाद्रिं कपीन्द्राय[१] कुम्भकर्णोऽक्षिपद्धसन् ॥ ४७ ॥

(भा.दी.) अथेति । अथ तपनस्यापत्यं पुमान् तापनिः सुग्रीवः पर्वतं उत्पाट्य तस्मै कुम्भकर्णाय चिक्षेप । क्षिप प्रेरणे लिट् । कुम्भकर्णः तमेव सुग्रीवक्षिप्तमेवाद्रिं हरीन्द्राय हसन् अक्षिपत् ॥ ४७ ॥

(सं.चं.) अथ पर्वतमुत्पाट्य । 'अथापरं महाचलं प्रगृह्य भास्करात्मजः । मुमोच राक्षसेऽथ तं प्रगृह्य तं जघान सः' (८.११०) इति च ॥ ४७–८ ॥

तपनस्य सुते तस्मिन् पतिते पर्वताहते ।
अङ्गदो जाम्बवांश्चैनं सङ्क्रुद्धावभ्यधावताम् ॥ ४८ ॥

(भा.दी.) तपनस्येति । पर्वतेन आहते ताडिते तपनस्य रवेः सुते तस्मिन् सुग्रीवे पतिते सति अङ्गदः जाम्बवांश्चेत्युभौ सङ्क्रुद्धौ सन्तौ एनं कुम्भकर्णं अभ्यधावताम् ॥ ४८ ॥

तळताडनमात्रेण कुम्भकर्णो निपात्य तौ[२] ।
मूर्च्छितं द्रुतमादाय भास्करिं राक्षसो ययौ ॥ ४९ ॥

(भा.दी.) तळेति । कुम्भकर्णः केवलं तळताडनं तळताडनमात्रं तेन तौ जाम्बवदङ्गदौ निपात्य, मूर्च्छितं भास्करस्यापत्यं पुमान् भास्करिस्तं सुग्रीवं द्रुतं यथा भवति तथा आदाय ययौ, लङ्कां प्रति सन्तोषातिशयेन अगच्छत् ॥ ४९ ॥

(सं.चं.) तळताडनमात्रेण । 'तदा पपात सूर्यजस्तताड चाङ्गदं रुषा । सजाम्बवन्तमाशु तौ निपेततुस्तळाहतौ' (८.१११) इति च । भास्करिं सुग्रीवमादाय ययौ ॥ ४९ ॥

नयन्तं कपियूथेशं प्रयान्तं च निजां पुरीम् ।
तं सूक्ष्ममक्षिकारूपः[३] क्षिप्रं मारुतिरन्वगात् ॥ ५० ॥

---

१. **'हरीन्द्राय'** इति वि.ती.पाठः । २. **'कुम्भकर्णेन पातितौ'**

३. **'–मक्षिकारूपी'** इति वि.ती.पाठ इति भाति । **'सूक्ष्ममक्षिकारूपः सूक्ष्ममक्षिकासदृशकपिरूपवान्'** इति का.श्री. ।

(भा.दी.) नयन्तमिति । मारुतस्यापत्यं मारुतिः हनुमान्, सूक्ष्मा या मक्षिका तस्या रूपमिव रूपमस्यास्तीति तथा , कपीनां यो यूथः समूहस्तस्य ईशं सुग्रीवं नयन्तं गृहीत्वा गच्छन्तम्, निजां पुरीं प्रति प्रयान्तं (च तं) कुम्भकर्णं क्षिप्रं यथा भवति तथा अन्वगात् अन्वगच्छत् । इण् गतौ लुङ् ॥ ५० ॥

(सं.चं.) नयन्तं कपियूथेशम् । रामायणे न स्फुटमिदम् । निर्णये स्फुटमुक्तम्– 'अथ प्रगृह्य भास्करिं ययौ स राक्षसो बली । जगाम चानु मारुतिः सुसूक्ष्ममक्षिकोपमः' (८.११२) इति ॥ ५०–२ ॥

[1]बाद्ध्यते चेदयं राजा मोचयेयं बलादिमम् ।
स्वयं चेन्मोचयेच्छ्रेय इत्थं हनुमतो मतम्[2] ॥ ५१ ॥

(भा.दी.) सूक्ष्मरूपं धृत्वाऽनुगन्तुरभिप्रायमाह– **बाध्यते चेदि**ति । राजा अयं सुग्रीवः चेद् यदि कुम्भकर्णेन बाध्यते पीड्यते । बाधृ विलोडने लट् । तर्हि अहं बलं बलात्कारस्तस्मात् इमं कुम्भकर्णात् मोचयेयम् । मुच्लृधातोर्लिङ् । चेत् सुग्रीवः (स्वयं) स्वात्मानं मोचयेत् तर्हि श्रेयः अत्युत्तमम्, इत्थं अनुगच्छतः हनुमतः मतम् अभिप्रायः ॥ ५१ ॥

विवेश बिभ्रत् सुग्रीवं लङ्कां लङ्केश्वरानुजः ।
प्रहृष्टै राक्षसगणैस्तत्रतत्राभिपूजितः ॥ ५२ ॥

(भा.दी.) विवेशेति । सुग्रीवं बिभ्रत् दधानः लङ्केश्वरानुजः रावणानुजः कुम्भकर्णः प्रहृष्टैः राक्षसानां गणाः समूहास्तैः तत्रतत्र स्थले अभिपूजितः लङ्कां विवेश ॥ ५२ ॥

पूजयद्भिः कुम्भकर्ण्णं [3]स्रग्गन्धैस्तुहिनाम्बुभिः ।
आसिच्यमानः सुग्रीवः शनैः सञ्ज्ञामवाप्तवान् ॥ ५३ ॥

(भा.दी.) पूजयद्भिरिति । शोभनो गन्धो येषां तानि तथा तैः, तुहिनस्य हिमस्य अम्बुभिः कुम्भकर्णं पूजयद्भिः युद्धश्रमपरिहारार्थं सेचनलक्षणपूजां कुर्वद्भिः राक्षसैः आसिच्यमानः सुग्रीवः शनैः सञ्ज्ञामवाप्तवान् ॥ ५३ ॥

(सं.चं.) स्रग्भिः पुष्पमालाभिश्चन्दनैश्च । स्तुहिनाम्बुभिः । 'ಪನ್ನೀರು' इति भाषायाम् ॥ ५३–८ ॥

---

१. 'बाध्येत चेदयम्' २. '-मतो मनः' ३. '–कर्णं सुगन्धै–' इति वि.ती.पाठः । '–सगन्धै–' इति कचित् ।

कुम्भकर्णस्य कर्णौ स कराभ्यां तूर्णमच्छिनत् ।
नासिकां चाऽशु दशनैः सुग्रीवोऽथोत्पपात च ॥ ५४ ॥

(भा.दी.) कुम्भकर्णस्येति । सुग्रीवः करौ हस्तौ ताभ्यां कुम्भकर्णस्य कर्णौ, दशना दन्तास्तैश्च नासिकामपि तूर्णं यथा भवति तथा अच्छिनत् चिच्छेद । छिदिर् धातोर्लङ् । अथ आशु उत्पपात ऊर्ध्वं पुप्लुवे । पत्लृ गतौ लिट् ॥ ५४ ॥

कुम्भकर्णोऽथ[1] सम्भ्रान्तस्तलेनैनमताडयत् ।
पिपेष च पुनः पृथ्व्यां[2] सोऽङ्गुल्यन्तरतो ययौ ॥ ५५ ॥

(भा.दी.) कुम्भेति । अथ कुम्भकर्णः सम्भ्रान्तः सन् तळं हस्ततळं तेन एनं सुग्रीवं अताडयत् । तड आघाते लङ् । पुनश्च उर्व्यां पिपेष । पिषॢ सञ्चूर्णने लिट् । सः सुग्रीवः अङ्गुल्योर्यदन्तरं विवरं तस्मादिति ततः ययौ । यातेर्लिट् । भूमौ निपात्य पेषणसमयेऽङ्गुल्योर्यदन्तरं तस्माद् ऊर्ध्वं जगामेत्यर्थः ॥ ५५ ॥

अमोघं शूलमशनैः प्राक्षिपद्[3] राक्षसाधिपः ।
कालदण्डप्रचण्डाभं कपिराजजिघांसया ॥ ५६ ॥

(भा.दी.) अमोघमिति । राक्षसाधिपः कुम्भकर्णः कालस्य यमस्य यो दण्डस्तद्वत् प्रचण्डा तीक्ष्णा आभा कान्तिर्यस्य तत् तथोक्तं तत्, अमोघं शूलं तत् कपिराजस्य सुग्रीवस्य जिघांसया हननेच्छया अशनैः झटिति प्राक्षिपत् । क्षिपधातोर्लङ् ॥ ५६ ॥

जग्राह हनुमान् मङ्क्षु खमाप्लुत्य महायुधम् ।
जानुनि न्यस्य तच्छित्वा जहास च ननाद च[4] ॥ ५७ ॥

(भा.दी.) जग्राहेति । हनुमान् मङ्क्षु तत्क्षणे खं वियत् तत् आप्लुत्य, महद्यदायुधं शूलाख्यं तत् जग्राह । ग्रह उपादाने लिट् । तत् कुम्भकर्णमुक्तं शूलं जानुनि न्यस्य निक्षिप्य च्छित्वा जहास हासं चकार च । हसतेर्लिट् । ननाद च । नदतेर्लिट् ॥ ५७ ॥

---

१. **'सम्भ्रान्तः कुम्भकर्णोऽथ तले–'**
२. **'पुनश्चोर्व्याम्'** इति वि.ती.पाठः स्यात् ।
३. **'–मशनैरक्षिपद्–'**
४. **'जहास अट्टहासं कृतवान् । ननाद च सिंहनादमकरोत्'** इति का.श्री. ।

ततः क्रुद्धः कुम्भकर्ण्णो मुष्टिमावृत्य सत्वरम् ।
विशाले प्रजहारोच्चैर्वायुनन्दनवक्षसि ॥ ५८ ॥

(भा.दी.) तत इति । ततः क्रुद्धः कुम्भकर्णः त्वरया सहितं यथा भवति तथा सत्वरं मुष्टिं आवृत्य विशाले वायुनन्दनस्य यद्वक्षस्तस्मिन् उच्चैः सम्यग् यथा भवति तथा प्रजहार तताड । हृञो लिट् ॥ ५८ ॥

अचिन्तयंस्तस्य परं प्रहारं नदन् हनूमान् प्रजहार चैनम् ।
तन्मुष्टिपिष्टः स पपात दुष्टो वज्रप्रभिन्नोऽद्रिरिवातितुङ्गः ॥ ५९ ॥

(भा.दी.) अचिन्तयन्निति । तस्य कुम्भकर्णस्य परमुत्तमं प्रहारं अचिन्तयन् सन्, (नदन्) हनूमान् एनं कुम्भकर्णं (च) प्रजहार । तस्य हनुमतो यो मुष्टिस्तेन पिष्टः सञ्चूर्णितः, दुष्टः सः कुम्भकर्णः, वज्रप्रभिन्नः अतितुङ्गः अत्युन्नतः अद्रिरिव पपात ॥ ५९ ॥

(सं.चं.) अथोपजात्या प्रायः सर्गशेषं निबध्नाति–अचिन्तयन्नित्यादिना ॥ ५९ ॥

सञ्ज्ञामवाप्याथ[१] च कुम्भकर्ण्णः संरम्भनिर्य्यद्भ्रुकुटीकठोरः ।
तुङ्गं गिरेः शृङ्गमथ प्रगृह्य चचार दण्डीव स दण्डपाणिः ॥ ६० ॥

(भा.दी.) सञ्ज्ञामिति । सः कुम्भकर्णः सञ्ज्ञां अवाप्य, संरम्भेण कोपेन निर्यन्ती या भ्रुकुटी शिखा ललाटसीरा तया कठोरः क्रूरः सन्, अथ गिरेः तुङ्गमुन्नतं तत्, शृङ्गं प्रगृह्य, दण्डोऽस्यास्तीति दण्डी, दण्डाख्यायुधवानित्यर्थः, दण्डपाणिरिव यम इव चचार ॥ ६० ॥

(सं.चं.) संरम्भेण क्रोधेन निर्यत्या भ्रुकुट्या भ्रूभङ्गविशेषेण कठोरः । दण्डीव यम इव । 'द्वारपाले यमे दण्डी' इति यादवप्रकाशः ॥ ६० ॥

[२]जघास कांश्चिन्निजघान कांश्चिच्चिक्षेप कांश्चित् स पिपेष कांश्चित् ।
कपीनकम्प्यो विगतानुकम्पः प्रकम्पयन् [३]गामपि कुम्भकर्ण्णः ॥ ६१ ॥

---

१. **'सञ्ज्ञामवाप्याथ'** इति सर्वत्र प्रचुरः पाठः । तदा तु द्विरथशब्दप्रयोगो भवति । **सञ्ज्ञामवाप्याऽशु च कुम्भकर्णः'** इत्यपि मूलपाठः स्यात् ।

२. **'जघान कांश्चिन्निजघान'** । **'कांश्चित् कपीन् जघान ताडितवान् । कांश्चित् निजघान हिंसितवान्'** इति का.श्री. । ३. **'–यन् क्ष्मामपि'**

(भा.दी.) जघासेति । अकम्प्यः अचाल्यः, युद्धेऽजेय इत्यर्थः, विगता अनुकम्पा यस्मात् स तथा, भूतदयारहित इत्यर्थः, गामपि भुवमपि (प्र)कम्पयन् स्वशरीरगरिम्णा चालयन् सन् सः कुम्भकर्णः कांश्चित् कपीन् जघास अभक्षयत् । अद भक्षणे लिट् । कांश्चित् कपीन् निजघान तताड । हन्तेर्लिट् । कांश्चित् समुद्रे तोयादौ चिक्षेप । क्षिप प्रेरणे । कांश्चित् पिपेष । पिष्लृ सञ्चूर्णने लिट् ॥ ६१ ॥

(सं.चं.) अकम्प्यः महाकायत्वान्महाबलत्वाच्च । गामपि भुवमपि स्वपदक्षेपेण प्रकम्पयन् नमयन्निव । जघास आद ॥ ६१ ॥

ते भक्ष्यमाणा हरयो निरीयुः स्रोतोभिरन्येऽस्य[1] च रोमकूपैः ।
सहस्रशः साहसिनः पुनश्च तमेव हन्ताऽरुरुहुर्य्यथाऽद्रिम् ॥ ६२ ॥

(भा.दी.) त इति । कुम्भकर्णेन भक्ष्यमाणाः ते हरयः, स्रोतांसि इन्द्रियद्वाराणि तैः निरीयुः निस्सृता बभूवुः । इण् गतौ लिट् । अन्ये च कपयः, अस्य रोम्णां कूपानि च्छिद्राणि तैः निरीयुः । सहस्रशः सहस्रसङ्ख्याकाः, साहसं प्रयत्नो एषामस्तीति तथा कपयः, पुनश्च तमेव कुम्भकर्णमेव अद्रिं यथा तथा आरुरुहुश्च । रुहेर्लिट् ॥ ६२ ॥

(सं.चं.) स्रोतोभिः इन्द्रियैः । कर्णकुहरादिभिः । 'खमक्षमिन्द्रियं स्रोतः' इति हलायुधः । अशक्यमिति विदित्वाऽपि बलात्कारेण यथाकथाच प्रयतनं साहसम् । 'साहसं तु बलात्कारकृतकार्ये' इति विश्वप्रकाशः ॥ ६२ ॥

स रक्तगन्धेन विवृद्धदर्प्पः प्रभक्षयन् राक्षसवानरौघम् ।
रघुप्रवीरं विभयोऽभिधावन्[2] स्वानां परेषां च भयङ्करोऽभूत् ॥ ६३ ॥

(भा.दी.) स इति । रक्तस्य गन्धः परिमळस्तेन, विवृद्धो दर्पो यस्य स तथोक्तः, राक्षसाश्च वानराश्च तेषामोघः समूहस्तं प्रभक्षयन्, विगतं भयं यस्मात् स तथा, रघुषु प्रवीरं श्रीरामं प्रति युद्धार्थं अभिधावन् सः स्वानां स्वकीयानां राक्षसानाम्, 'स्वेऽर्थज्ञात्यन्यवाच्यपि' इत्युक्तेरसर्वनामत्वेन सुडभावः, परेषां कपीनां च भयङ्करः अभूत् ॥ ६३ ॥

१. **'स्रोतेभिरप्यस्य'** २. **'विभयो विधावन्'**

(सं.चं.) स्वपरविवेकविधुरः वानराणामिव राक्षसानामप्योघं भक्षयन्, अत एव स्वानां आत्मीयानां परेषां च भयङ्करोऽभूत्। 'स्वमज्ञातिधनाख्यायाम्' (अ.सू.१.१.३५) इत्यतः स्वमित्येतत्, आत्मीयमित्यर्थे विभाषा सर्वनामसञ्ज्ञं भवति । तेन स्वानाम्, स्वेषामित्युभयमपि साधु ॥ ६३ ॥

वज्रोपमैर्बाणगणैरगण्यैः सौमित्रिरेनं प्रबिभेद वीरः ।
अचिन्तयंस्तान् प्रययौ सुरारिः [1]सृणिप्रहारानिव मत्तहस्ती ॥ ६४ ॥

(भा.दी.) **वज्रे**ति । वीरः सौमित्रिः लक्ष्मणः, वज्रस्य उपमा येषां ते तथा तैः, अगण्यैः बाणगणैः एनं कुम्भकर्णं प्रबिभेद प्रचिच्छेद । भिदेर्लिट् । सुरारिः कुम्भकर्णः, सृणेरङ्कुशस्य प्रहारान् मत्तहस्तीव मत्तगज इव तान् प्रहारान् अचिन्तयन् सन् श्रीरामं प्रययौ ॥ ६४ ॥

(सं.चं.) 'सृणिरङ्कुशमुच्यते' इति हलायुधः । 'सृणिः स्त्रियाम्' इति वदन्तो भ्रान्ताः । सृणिं पुंस्यपि पठन्ति । 'अङ्कुशोऽस्त्री सृणिर्न षण्' इति यादवप्रकाशः । सुरारिः कुम्भकर्णः ॥ ६४ ॥

क्षिप्रं [2]च चिक्षेप स राक्षसेन्द्रः शृङ्गं गिरेर्म्मङ्गलकीर्त्तनाय ।
चिच्छेद तच्छीघ्रमतुच्छकीर्त्तिः स सत्वरं सप्तभिरेव बाणैः ॥ ६५ ॥

(भा.दी.) **क्षिप्र**मिति । सः राक्षसेन्द्रः गिरेः शृङ्गं तत्, मङ्गलं मङ्गलकरं कीर्तनं नाम यस्य स तथा तस्मै श्रीरामाय, क्षिप्रं यथा भवति तथा चिक्षेप । क्षिपतेर्लिट् । अतुच्छा अतिमहती कीर्तिर्यस्य स तथोक्तः सः श्रीरामः, त्वरया सहितं यथा भवति तथा सत्वरम्, प्रमुक्तैरिति शेषः, सप्तभिरेव बाणैः तत् शृङ्गं शीघ्रं यथा भवति तथा चिच्छेद ॥ ६५ ॥

(सं.चं.) मङ्गलकीर्तनाय रामाय । 'पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम्' इति हि तं कीर्तयन्ति । मङ्गलं श्रेयःसाधनं गुणसङ्कीर्तनमस्येति । सत्वरं त्वरया रामान्तिकमापतत् तद् गिरिशृङ्गं शीघ्रं सपदि चिच्छेद । शीघ्रं आहितवेगं तत् सत्वरं चिच्छेदेति वा । तुच्छमिति शून्यमुच्यते । अतुच्छा अशून्या परिपूर्णा कीर्तिरस्य । तुच्छमित्यल्पवचनं हेयवचनं वा । अतुच्छा अनल्पा अहेया च कीर्तिरस्य ॥ ६५ ॥

स रामबाणैरथ भिन्नवर्म्मा रक्तं पिबन् राक्षसवानराणाम् ।
सकोपमाटोपमुपाजगाम[3] कपीन् विधुन्वन् मुहुरङ्गलग्नान् ॥ ६६ ॥

---

१. **'अङ्कुशं तु सृणिर्द्वयोरित्यमरः'** इति का.श्री.पठति। **'अङ्कुशोऽस्त्री सृणिः स्त्रियाम्'** इति साम्प्रतः अमरकोशपाठः। **'अङ्कुशोऽस्त्री सृणिर्द्वयोः'** इति मल्लिनाथोऽपि पपाठ माघव्याख्यायाम्। २. **'क्षिप्रं प्रचिक्षेप'** ३. **'आटोपं भयङ्करत्वमुपाजगाम'** इति का.श्री. ।

(भा.दी.) स इति । अथ रामबाणैः भिन्नं वर्म कवचं यस्य स तथोक्तः, राक्षसवानराणां रक्तं शोणितं तत् पिबन्, सः कुम्भकर्णः, अङ्गलग्नान् शरीरस्थान् कपीन् मुहुः विधुन्वन् सन्, कोपेन सहितः सकोपस्तं आटोपं सम्भ्रमं उपाजगाम ॥ ६६ ॥

(सं.चं.) आटोपं त्वरातिशयम् । असहिष्णुताया आविष्करणं वाऽऽटोपः ॥ ६६ ॥

एह्येहि किं ते कपिकालनेन नन्वस्मि देवारिनिसूदनोऽहम्[1] ।
इति ब्रुवाणो भगवानुदारो विस्फारयामास धनुः सुधन्वा[2] ॥ ६७ ॥

(भा.दी.) एहीति । हे कुम्भकर्ण, युद्धाय मां प्रति एहिएहि आगच्छागच्छ । इण् गतौ लोट् । ते तव कपीनां कालनं विद्रावणं तेन किं प्रयोजनम्? न किमपि । अहं, देवारीन् राक्षसान् निसूदयतीति तथोक्तः, राक्षससंहारक इत्यर्थः, अस्मि ननु, इति ब्रुवाणः उदारः सर्वोत्तमः भगवान्, शोभनं धनुर्यस्य स तथा श्रीरामः धनुः विस्फारयामास कूजयामास ॥ ६७ ॥

(सं.चं.) कपीनां कालनेन नाशनेन । धनुर्विस्फारयामास ज्याताडनेन टङ्कारं जनयामास । सु समीचीनं शत्रुभिरपि पूजितं धनुरस्येति सुधन्वा । 'धनुषश्च' (अ.सू.५.४.१३१) इति हि पाणिनिः । 'धनुःशब्दान्तस्य बहुव्रीहेरनङादेशो भवति समासान्तः । शार्ङ्गं धनुरस्य शार्ङ्गधन्वा' इति जयादित्यः । 'सुधन्वा खण्डपरशुः' इति विष्णुसहस्रनामसु । एते भगवद्रूपविशेषवचने अपि नामनी विशिष्य कोदण्डरामं परशुरामं च स्मारयतः ॥ ६७ ॥

नाहं विराधो न खरो वराको[3] नाम्नाऽस्म्यहं राघव कुम्भकर्ण्णः ।
बाहू इमौ पश्य महेन्द्रभीमावुक्त्वेति रामं स खलोऽभ्यधावत् ॥ ६८ ॥

(भा.दी.) नाहमिति । हे राघव, अहं विराधः पूर्वं त्वद्धतो यो विराधाख्यो राक्षसः सः न, न भवामि, वराकः बलादिना नीचः खरो न, न भवामि । किन्तु नाम्ना कुम्भकर्णः अस्मि । महेन्द्रस्य भीमौ भयङ्करौ इमौ बाहू पश्य, दृशिर्धातोर्लोट् । खलः दुष्टः सः श्रीरामं इति उक्त्वा अभ्यधावत् । सृ गतौ लङ् । 'पाघ्राध्मा–' (अ.सू.७.३.७८) इत्यादिना धावादेशः । धावु गतिशुद्ध्योर्वा ॥ ६८ ॥

(सं.चं.) नाहं विराध इतीन्द्रवज्रेयम् । 'नाहं विराधो विज्ञेयो न कवन्धः खरो नच । न वाली नच मारीचः कुम्भकर्णोऽहमागतः' (६७.१४७) इति हि वाल्मीकिः । वराकः शोचनीयः । 'वराकः सङ्गरे शोच्ये' इति

---

१. **'–निषूदनोऽहम्'** इति भ्रान्तः पाठः । २. **'विष्फारयामास धनुः सधन्वा'** ३. **'न खरो वराको'–'**

विश्वप्रकाशः । महेन्द्रस्यापि भीमौ भयजननौ । अभ्यधावत् । सृ गतौ । गतेर्वेगितायां सर्तेर्धावादेशः । 'धावु शुद्धौ' इति प्रतनं धातुपाठमाश्रित्य सर्तेर्धावादेशः पाणिनिना विहित इति भाति । अर्वाचीनास्तु धावतिमेव गत्यर्थं पठन्ति–धावु गतिशुद्ध्योरिति । तदा तु व्यर्थमिव सर्तेर्धावादेशविधानम् ॥ ६८ ॥

तौ कुम्भकर्ण्णस्य करावुदीर्ण्णावुदीक्ष्य देवा दिवमुल्लिखन्तौ ।
भियाऽपयाताः सहसोपयाता रामो हि नः पालक इत्युदीर्य्य ॥ ६९ ॥

(भा.दी.) ताविति । देवाः दिवं अन्तरिक्षम्, 'द्यौर्दिवौ द्वे स्त्रियाम्' इत्यमरः, उल्लिखन्तौ संस्पृशन्तौ उदीर्णौ उद्युक्तौ कुम्भकर्णस्य तौ करौ उदीक्ष्य भिया अपयाताः विद्रुताः सन्तः श्रीरामः नः अस्माकं पालकः रक्षकः इति उदीर्य सहसा उपयाताः युद्धदर्शनायोपजग्मुः ॥ ६९ ॥

(सं.चं.) दिवमुल्लिखन्तौ अभ्रंलिहौ । उदीर्णौ उच्छ्रितौ । देवाः प्रथमं सहसाऽतर्कितघटनेन तस्मिन् क्षणे भियाऽपयाताः, ततः रामो हि नः पालकोऽत्रास्ति किं भियेति परस्परमुदीर्य युद्धदर्शनार्थं सहसा पुनरुपयाताः । 'आकस्मिकार्थे सहसा तत्काले च निगद्यते' इति हलायुधः ॥ ६९ ॥

देदीप्यमानानलसन्निकाशैः सुवर्ण्णपुङ्खैश्च सुपर्ण्णवेगैः ।
रामः शरौघैः प्रबिभेद शूरः सतां शरारोर्द्विषतः[1] शरीरम् ॥ ७० ॥

(भा.दी.) देदीप्येति । शूरः श्रीरामः, देदीप्यमानोऽतिशयेन ज्वलमानो[2] योऽनलोऽग्निस्तस्य सन्निकाशा समानास्तैः, सुवर्णमया पुङ्खा येषां ते तथा तैः, सुपर्णस्य वेग इव वेगो येषां ते तथा तैः, शरौघैः शरसमूहैः सतां सज्जनानां शरारोः हिंसाशीलस्य, 'शरारुर्हिंसकः प्रोक्तः' इति रत्नमाला । द्विषतः कुम्भकर्णस्य शरीरं देहस्तत् प्रबिभेद ॥ ७० ॥

(सं.चं.) सुवर्णपुङ्खैः । 'कर्तरी पुङ्ख उच्यते' इति हलायुधः । तदाकारं काण्डमूलमित्येतत् । सुवर्णमयाः पुङ्खा येषाम् । सतां शरारोः हिंसकस्य, अत एव द्विषतः स्वशत्रोः । ज्ञानिनां शत्रुरेव हि भगवतः शत्रुः । नहि भगवतः स्वतः शत्रुर्नाम कश्चिदस्ति । 'न मे द्वेष्योऽस्ति न प्रियः' इति हि स्वयमाह । 'शरारुर्घातुको हिंस्रो नृशंसः क्रूरकर्मकृत्' इति हलायुधः ॥ ७० ॥

---

१. **'सतां सुराणां द्विषतः'** । **'शरारोर्हिंसनशीलस्य । शृ हिंसायामित्यतः, 'शृवन्द्योरारुः'** (अ.सू.३.२.१२३) **इत्यारुप्रत्यये शरारुरिति रूपम्'** इति का.श्री. ।

२. **'ज्वलन्'** इति युक्तम् । सर्वत्राप्येवम् । लिपिकृत्प्रमादः स्यात् ।

उद्यच्छतो मुद्गरमुग्रमूर्त्तेः[१] काण्डेन [२]दोर्द्दण्डमखण्डयत् सः ।
महीयसीं व्याप महीं स बाहुर्म्महामहीभृच्छिखरोपमानः ॥ ७१ ॥

(भा.दी.) उदिति । सः श्रीरामः मुद्गरो मुद्गराख्यायुधविशेषस्तं उद्यच्छतः मोक्तुमुद्युक्तस्य, उग्रा मूर्तिः शरीरं यस्य स तथा तस्य कुम्भकर्णस्य, काण्डः शरस्तेन, 'सायकप्रदरकाण्डपृषत्काः' इति हलः । दोष्णो हस्तस्य दण्डस्तं अखण्डयत् । खडि भेदे लङ् । महान् यो महीभृत् पर्वतस्तस्य यच्छिखरं तस्य उपमानं उपमा यस्य स तथोक्तः सः बाहुः महीयसीं अतिमहतीं महीं व्याप व्याप्तोऽभूत् । आप्लृ व्याप्तौ लिट् ॥ ७१ ॥

(सं.चं.) मुद्गरो द्रुघणः । परशवधाकारः शस्त्रविशेषः । दोः बाहुरेव दण्डः ॥ ७१ ॥

उन्मूल्य सालं विपुलं परेण हस्तेन हस्तीन्द्रवदाद्रुतस्य ।
पौलस्त्यपुत्रस्य परं च बाहुं चिच्छेद तीव्रेण शरेण रामः ॥ ७२ ॥

(भा.दी.) उन्मूल्येति । श्रीरामः, विपुलं स्थूलं सालो सर्जवृक्षस्तम्, परेण अन्येन हस्तेन, हस्तीन्द्रवत् गजश्रेष्ठवत् उन्मूल्य आद्रुतस्य अभ्यागतस्य, पुलस्त्यस्य गोत्रे भवः पौलस्त्यः विश्रवाः, तस्य पुत्रस्य कुम्भकर्णस्य परं अन्यं बाहुं च तीव्रेण शरेण चिच्छेद । च्छिदेर्लिट् ॥ ७२ ॥

(सं.चं.) उन्मूल्येति चेन्द्रवज्रा । परेणावशिष्टेन वामहस्तेन । सालं कश्चन वृक्षं उन्मूल्य समूलमुत्पाट्य । हस्तेन शुण्डादण्डेन वृक्षमुत्पाट्य आद्रुतस्य गजेन्द्रस्येव ॥ ७२ ॥

उद्गर्ज्जतोऽभिद्रवतः परस्य क्रोधाज्जिघांसोः प्रपदप्रहारैः ।
सम्पूर्णचन्द्राभमुखोऽर्द्धचन्द्रौ[१] विमुच्य पादौ च चकर्त्त शत्रोः ॥ ७३ ॥

(भा.दी.) उद्गर्जत इति । सम्पूर्णो यश्चन्द्रस्तस्य आभेव आभा कान्तिर्यस्य तत्तथोक्तं तादृशं मुखं यस्य स तथोक्तः श्रीरामः, उद्गर्जतः प्रकृष्टतया गर्जतः, अभिद्रवतः अभिमुखमाद्रवतः, प्रपदस्य पादाग्रस्य ये प्रहारास्तैः क्रोधः कोपस्तस्मात् परस्य शत्रोः श्रीरामस्य जिघांसोः हन्तुमिच्छतः, शत्रोः कुम्भकर्णस्य पादौ अर्धचन्द्रौ अर्धचन्द्राकारौ शरौ विमुच्य चकर्त च । कृती च्छेदने लिट् ॥ ७३ ॥

(सं.चं.) उद्गर्जतः सिंहनादं कुर्वतः । पादाग्रप्रहारैः । अर्धचन्द्रौ विमुच्य । 'द्वावर्धचन्द्रौ निशितौ प्रगृह्य चिच्छेद पादौ युधि राक्षसस्य' (६७.१६१) इति च ॥ ७३ ॥

---

१. **'–मुग्रकीर्त्तिः'** २. **'दोर्दण्डम्, दण्डवत् स्थितं दक्षिणबाहुम्'** इति का.श्री. । ३. **'–मुखोऽर्धचन्द्रम्'**

ते कौम्भकर्ण्णा भुवि हस्तपादा लोठन्त[१] उच्चैः [२]कठिनाद्रितुल्याः ।
अनीकिनीं तां कपिराक्षसानामक्षोभयन्नम्बुनिधिं पुरं च ॥ ७४ ॥

(भा.दी.) त इति । भुवि उच्चैः सम्यक् लोठन्तः परिभ्रमन्तः, कठिनो योऽद्रिस्तस्य तुल्याः, कुम्भकर्णस्य सम्बन्धिनः कौम्भकर्णाः, हस्तौ च पादौ च ते, कपयश्च राक्षसाश्च तेषां तां अनीकिनीं सेनाम् अम्बुनिधिं समुद्रम्, पुरं लङ्कापुरं तच्च व्यक्षोभयन् व्यचालयन् । क्षुभ सञ्चलने लङ् ॥ ७४ ॥

(सं.चं.) ते कौम्भकर्णाः । पूर्वमिमे कुम्भकर्णस्येति कौम्भकर्णाः । हस्तपादा इति । क्षोभस्य वैपुल्य-प्रदर्शनार्थमेकवद्भावो नाऽश्रितः । प्राणिसंयोगविरहाच्चाङ्गानम् । 'तौ तस्य पादौ प्रदिशो दिशश्च गिरीन् गुहाश्चैव महार्णवं च । लङ्कां च सेनां कपिराक्षसानां विनादयन्तौ विनिपेततुश्च' (६७.१६२) इति च ॥ ७४ ॥

अहस्तपादोऽपि विवृत्य वक्त्रं महागुहाभं स समुद्रनादः ।
अभ्यापतत् तं ग्रसितुं तदोग्रं[३] शरैरपूरि प्रभुरस्य वक्त्रम् ॥ ७५ ॥

(भा.दी.) अहस्तेति । तदा समुद्रस्य नाद इव नादो यस्य स तथा, सः (कुम्भकर्णः), न विद्यन्ते हस्त-पादा यस्य स तथाभूतोऽपि, महती या गुहा तद्वदाभा कान्तिर्यस्य तत्तथोक्तं तत्, उग्रं वक्त्रं विवृत्य विवृतं कृत्वा, तं श्रीरामं ग्रसितुं अभ्यापतत् अभ्यागच्छत् । पतॢ पतने लङ् । प्रभुः श्रीरामः अस्य वक्त्रं शरैः अपूरि । पॄ पालनपूरणयोः[४] लुङ् ॥ ७५ ॥

(सं.चं.) हस्तौ च पादौ च हस्तपादम् । न विद्यते हस्तपादं यस्य सोऽहस्तपादः । 'द्वन्द्वश्च प्राणितूर्य-सेनाङ्गानाम्' (अ.सू.२.४.२)इत्येकवद्भावः । उग्रं वक्त्रम् । अपूरि पूरयामास । पूरी आप्यायने ॥ ७५ ॥

परेण घोरेण शरेण रामः स्वच्छेन चिच्छेद बृहच्छिरोऽस्य ।
उद्दीप्तनेत्रं कटुदंष्ट्रमस्य पतच्छिरो भूरि बिभेद भूमिम् ॥ ७६ ॥

(भा.दी.) परेणेति । श्रीरामः, घोरेण स्वच्छेन निर्मलेन, परेण उत्तमेन शरेण अस्य बृहत् स्थूलं शिरः चिच्छेद । च्छिदेर्लिट् । उद्दीप्ते नेत्रे यस्य तत्तथोक्तम्, कटुस्तीक्ष्णा दंष्ट्रा यस्य तत् तत्तथोक्तं पतत् पतमानं अस्य कुम्भकर्णस्य शिरः भूमिं भूरि बहु यथा भवति तथा बिभेद ॥ ७६ ॥

---

१. **'लोटन्त–'** २. **'कठिनाद्रि–'** ३. **'तदोग्रः शरै-'**

४. 'प्रायोऽयं लिपिकृत्प्रमादः । **'पूरी आप्यायने'** इति पठनीयम् । पॄधातोर्लुङि **'अपारीत्'** इति रूपम् ।

(सं.चं.) स्वच्छेन ऐन्द्रास्त्रमन्त्रपूतेन । कटू दंष्ट्रे यस्य स्तस्तच्छिरः । यद्यपि कटुदंष्ट्रमाननम् । आननं च शिरसि मुण्डे । तेन परम्परया कटुदंष्ट्रं शिरः ॥ ७६ ॥

त्रिलक्षमानः खलु योजनानां स कुम्भकर्ण्णो ववृधे पुरस्तात् ।
सङ्कोचमाप्तो नगरीं प्रवेष्टुं निसूद्यमानो[1] ववृधे पुरेव ॥ ७७ ॥

(भा.दी.) त्रिलक्षेति । सः कुम्भकर्णः पुरस्तात् पूर्वम्, योजनानि गव्यूतिद्वयात्मकानि, तेषां त्रीणि च तानि लक्षाणि च, तावन्ति योजनानि मानं परिमितिर्यस्य स तथा सन् ववृधे । वृधु वर्धने लिट् । पश्चात् नगरीं लङ्कां प्रवेष्टुं प्रवेशाय सङ्कोचं शरीरसङ्कोचस्तं स्वशक्त्या आप्तः, पुनः श्रीरामेण निसूद्यमानः वध्यमानः सन् पुरेव ववृधे, त्रिलक्षमानोऽभूदित्यर्थः ॥ ७७ ॥

(सं.चं.) त्रिलक्षमानः । 'योजनानां त्रिलक्षं हि कुम्भकर्णो व्यवर्धत । पूर्वं पश्चात् सञ्चुकोच लङ्कायामुषितुं स्वयम् । स तु स्वभावमापन्नो म्रियमाणो व्यवर्धत । तेनास्मिन् पतिते त्वब्धिरवर्धदधिकं तदा' (८.१३२–३) इति निर्णये । अत्र विशेषो निर्णयभावचन्द्रिकायां द्रष्टव्यः ॥ ७७ ॥

चिक्षेप तद्राक्षसदेहमब्धौ[2] शरैः शरण्यो जगतां सलीलम्[3] ।
शरीरपातादुदगान्महाब्धिर्म्महाश्मपातादिव पल्वलाम्भः[4] ॥ ७८ ॥

(भा.दी.) चिक्षेपेति । जगतां शरण्यः श्रीरामः, स चासौ राक्षसश्च तद्राक्षसस्तस्य देहस्तम्, अब्धौ शरैः लीलया सहितं यथा भवति तथा सलीलं चिक्षेप । समुद्रे देहखण्डानि निक्षिप्तवानित्यर्थः । महाब्धिः, शरीरस्य पातः पतनं तस्मात्, महद्यदश्म तस्य पातः पतनं तस्मात्, पल्वलाम्बु इव तटाकोदकमिव, उदगात् अभिवृद्धोऽभूत् । इण् गतौ लुङ् ॥ ७८ ॥

(सं.चं.) तत् तेन च्छिन्नं राक्षसदेहम् । 'देहोऽस्त्री स्त्री तनुर्गात्रम्' इति च ॥ ७८ ॥

करटकटककाळं भीषणं प्राणभाजां
भुवनभवनपूर्ण्णं कुम्भकर्ण्णच्छलेन ।

---

१. '**निषूद्यमानो–**' इति भ्रान्तः पाठः ।

२. '**अब्धौ पूर्वादिदिक्षु विद्यमाने समुद्रे द्वौ बाहू द्वौ पादौ शिरः मध्यप्रदेशं चतुरोऽवयवान् । चतुःसमुद्रेषु अवयवचतुष्टयं चिक्षेपेत्यर्थः**' इति वि.भू. । '**पूर्वसमुद्रे दक्षिणसमुद्रे पश्चिमसमुद्रे उत्तरसमुद्रे च तस्यैकैकावयवशेषं निक्षिप्तवानित्यर्थः**' इति का.श्री ।

३. '**सलीलः**' ४. '**पल्वलाम्बु**' इति वि.ती.पाठः ।

तिमिरमहरदेवं रामभानुः शरोस्रैः[१]
सुरमुनिनिकरस्तं पूजयामास पुष्पैः ॥ ७९ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
युद्धकाण्डे नवमः सर्ग्गः ॥

—०—

(भा.दी.) करटेति । रामभानुः श्रीरामसूर्यः, करटानां काकानां कटकं समूहस्तद्वत् काळं कृष्णवर्णं तत्, 'काके तु करटारिष्टबलिपुष्ट–' इत्याद्यमरः । प्राणान् भजन्तीति तथा तेषां भीषणं भयङ्करम्, भुवनाख्यं यद्भवनं गृहं तत्र पूर्णं तिमिरं तमः, कुम्भकर्ण एव च्छलं व्याजमात्रं तेन, शरा एव एवोस्राः किरणास्तैः एवं अहरत् । सुरमुनिनिकरः सुरमुनिसमूहः, तं श्रीरामम्, पुष्पाणि कुसुमानि तैः पूजयामास ॥ ७९ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां
युद्धकाण्डे नवमः सर्गः ॥

—०—

(सं.चं.) मालिन्योपसंहरति–करटेति । 'अरिष्टः करटः काकः' इति हलायुधः । करटानां कटकं मण्डलम् । तद्वत् काळः । कुम्भकर्णच्छलेन स्थितं तिमिरम् । शरा एव उस्राः किरणाः । 'किरणोस्रौ च रोचिः क्ली' इति यादवप्रकाशः॥ ७९ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां
युद्धकाण्डे नवमसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– २६२५+७९=२७०४]

१.'शरौघैः'

दशमः सर्ग्गः

रावणो निहतं[1] श्रुत्वा भ्रातरं भ्रातृवत्सलः ।
मुहूर्त्तं मूर्छितः प्राप्य मनीषां विललाप सः ॥ १ ॥

(भा.दी.) श्रीरामाख्यसूर्येण कुम्भकर्णाख्यतमसि नाशिते सति रावणाख्यदिवाभीतेन किमकारीत्यत आह– **रावण** इति । भ्रातरि वत्सलः स्नेहशीलः सः रावणः भ्रातरं श्रीरामेण निहतं श्रुत्वा, मुहूर्तो मुहूर्तकालस्तं मूर्च्छितः सन् मनीषां सञ्ज्ञां प्राप्य विललाप परिदेवनं चक्रे । रप लप व्यक्तायां वाचि लिट् ॥ १ ॥

(सं.चं.) मनीषां प्रज्ञां प्राप्य । विषादवचनं विलापः ॥ १ ॥

हा वत्स कुम्भकर्ण्ण त्वं कुत्र यासि मया विना ।
अनुयास्याम्यहं च त्वां रामबाणाग्निदीपितः ॥ २ ॥

(भा.दी.) हेति । हा वत्स कुम्भकर्ण, त्वं मया विना कुत्र यासि । अहं च श्रीरामस्य, बाणास्त एवाग्निस्तेन दीपितो दग्धः सन् त्वां अनुयास्यामि अनुगमिष्यामि ॥ २ ॥

(सं.चं.) हा वत्सेति रावणस्थो जयो भाषते । मया विना । 'पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्' (अ.सू.२.३.३२) । बाण एवाग्निस्तेन दीपितो दग्धः ॥ २ ॥

कुलभूषणभूतो नः सत्यवादी विभीषणः ।
मया कामात्मना त्यक्तः सद्यः पश्यामि तत्फलम् ॥ ३ ॥

१. 'रावणः पतितम्'

(भा.दी.) कुलेति । (नः) कुलस्य गोत्रस्य भूषणभूतः अलङ्कारभूतः, सत्यं वक्तुं शीलमस्यास्तीति तथोक्तः विभीषणः, कामाक्रान्त आत्मा मनो यस्य स तथा तेन मया त्यक्तः, परित्यक्तः । तस्य त्यागस्य फलं तत् सद्यः पश्यामि ॥ ३ ॥

(सं.चं.) कामे आत्मा मनो यस्य, विषयासक्तमनसा । तत्फलं कुम्भकर्णस्य मरणम् ॥ ३ ॥

विलपन्तं विषण्णं तमवलोक्य सुरेन्द्रजित् ।
मेघनादो जगादोच्चैर्म्मेघसन्नादिनीं गिरम् ॥ ४ ॥

(भा.दी.) विलपन्तमिति । मेघस्य नाद इव नादो यस्य स तथा, सुरेन्द्रं जितवानिति सुरेन्द्रजित् । अत एव स पूर्वं मेघनादनामकोऽपि पश्चादिन्द्रजिन्नामकः रावणपुत्रः, विलपन्तं विलापं कुर्वन्तं श्रीरामपराक्रमात् विषण्णं भीतं तं रावणं अवलोक्य, मेघस्य सन्नाद इव सन्नादो ध्वनिर्यस्याः सा तथा तां गिरं उच्चैः यथा भवति तथा जगाद । गदधातोर्लिट् ॥ ४ ॥

(सं.चं.) विषण्णं कथं प्रतिकर्तव्यमित्यजानन्तम्, दिङ्मूढम् । मेघस्य सन्नादो गर्जितमिव सन्नादोऽस्या इति सन्नादिनी । तादृशीं गिरम् ॥ ४ ॥

नरराजसुताद् भीतो देवराजजितः[1] पिता ।
मा भूदित्थं परीवादो मामादिश युधे द्रुतम् ॥ ५ ॥

(भा.दी.) नरेति । देवराजमिन्द्रं जितवानिति देवराजजित्, तस्य देवराजजितः मम पिता रावणः, नरराजसुतात् दशरथसुतात् भीतः इत्थं परीवादोऽपवादः मा भूत् इति पदच्छेदः । 'न माङ्योगे' (अ.सू.६.४.७४) इत्यडो निषेधात् । भुवो लुङ् । युध् युद्धं तस्यै, मां द्रुतं यथा भवति तथा, आदिश आज्ञापय ॥ ५ ॥

(सं.चं.) देवराजजितः इन्द्रजितो मम पिता । परीवादो गर्हाविषयत्वम् । 'उपसर्गस्य घञि–' (अ.सू.६.३.१२२) इति वैकल्पिको दीर्घः । 'आधिक्येऽधिकम्' इति प्राचीनम् । तेनातिशयितः परिवादः परीवादः । महानपवादः । महती अकीर्तिः ॥ ५ ॥

इत्युक्त्वा तातमापृच्छ्य सन्नद्धो युद्धकर्म्मणे[2] ।
चकार [3]रुद्रदेवत्यमभिचारं[4] महेन्द्रजित् ॥ ६ ॥

१. 'देवराजाजितः' २. '–कर्मणि' ३. 'रुद्रदैवत्य–' इत्यपपाठः । ४. '–माभिचारम्'

(भा.दी.) इतीति । महेन्द्रजित् इति उक्त्वा, तातं रावणं आपृच्छ्य आमन्त्र्य, युद्धाख्यं यत्कर्म तस्मै सन्नद्धः सन्, रुद्रो देवता अस्येति तथा तं अभिचारं मारणप्रयोगं चकार ॥ ६ ॥

(सं.चं.) सन्नद्धः कवचितः, सज्जो वा । रुद्रदेवतायै अयमिति रुद्रदेवत्यः । 'देवतान्तात् तादर्थ्ये यत्' (अ.सू.५.४.२४) । शत्रुनाशार्थं क्रियमाणः कर्मविशेषोऽभिचार आभिचारो वा ॥ ६ ॥

शरबर्हिः शोणवासा वह्नौ वैभीतकेध्मवान् ।
कार्ष्णायसस्रुवश्छागं[1] सर्वकृष्णं जुहाव सः ॥ ७ ॥

(भा.दी.) शरेति । शरा एव बर्हींषि कुशा यस्य स तथा, शोणं रक्तं वासो यस्य स तथा, विभीतकस्य कारस्करवृक्षस्य सम्बन्धि वैभीतकं तादृशमिध्मं समित् तदस्यास्तीति तथोक्तः, कृष्णायसा कृतः कार्ष्णायसः, तादृशः स्रुवो यस्य स तथा । इन्द्रजित्, सर्वं कृष्णः सर्वकृष्णस्तं च्छागं अजं (वह्नौ) जुहाव । हु दाना-दनयोर्लिट् ॥ ७ ॥

(सं.चं.) तमेवाऽह– शरबर्हिः । शरा एव बर्हींषि बर्हिषो वा यस्य । 'बर्हिः पुंसि हुताशने । नस्त्री कुशे' इत्यभिदधति । शोणवासा रक्ताम्बरः । विभीतकः कलिद्रुमः । 'विभीतकस्त्रिलिङ्गः स्यात् कलिस्तिष्यः कलिद्रुमः' इति यादवप्रकाशः । तस्येदं वैभीतकमिध्मं होमार्थमिन्धनं यस्य । 'होमेन्धने स्यादिध्मोऽस्त्री पुमानेधः समित् स्त्रियाम्' इति यादवप्रकाशः । कृष्णायसं खर्वम् । '**ಕಬ್ಬಿಣ**' इति भाषायाम् । स्रुव आघारणः । आघारसाधनं यज्ञपात्रम् । कृष्णायसनिर्मितः स्रुवो यस्य । सर्वकृष्णं सर्वत्रावयवेषु कृष्णवर्णम् । 'शस्त्राणि शरपत्राणि समिधोऽस्य विभीतकाः । लोहितानि च वासांसि स्रुवं कार्ष्णायसं तथा' (८०.७) इति, 'छागस्य कृष्णवर्णस्य गलं जग्राह जीवतः' (८०.८) इति च ॥ ७ ॥

स हुत्वाऽऽथर्वणैर्म्मन्त्रैर्द्दिव्यं रथमधिष्ठितः ।
गच्छन् गगनमार्ग्गेण माययाऽन्तर्द्दधे खलः ॥ ८ ॥

(भा.दी.) स इति । खलः स इन्द्रजित्, अथर्वणि वेदे विद्यमाना आथर्वणास्तैः मन्त्रैः हुत्वा, दिव्योऽलौकिकस्तं रथं अधिष्ठितः सन्, गगनमेव मार्गस्तेन गच्छन् सन् मायया अन्तर्धानशक्त्या अन्तर्दधे अदृश्योऽभूत् । धाञो लिट् ॥ ८ ॥

---

१. '–स्रुवं छागम्'

(सं.चं.) आथर्वणैर्मन्त्रैः प्रत्यङ्गिरःसूक्तादिभिः ॥ ८–९ ॥

स शरैरशनिप्रख्यैर्दिव्यैर्नागास्त्रमन्त्रितैः ।
राघवौ वानरांस्तांश्च च्छादयामास राक्षसः ॥ ९ ॥

(भा.दी.) स इति । सः राक्षसः, अशनिना वज्रेण प्रख्याः समानास्तैः, दिव्यैः, नागास्त्रेण सर्पास्त्रेण मन्त्रितैः शरैः राघवौ श्रीरामलक्ष्मणौ (तान्)वानरांश्च च्छादयामास । छदिर् संवरणे लिट् ॥ ९ ॥

दिदृक्षमाणाः प्रक्षीणा राक्षसं रूक्षविक्रमम्[१] ।
क्षोभयन्तोऽपि गगनं[२] नापश्यन् वानरा रिपुम् ॥ १० ॥

(भा.दी.) दिदृक्षमाणा इति । क्रूरो विक्रमो यस्य स तथा तं राक्षसं इन्द्रजितं दिदृक्षमाणाः दिदृक्षवः, प्रक्षीणा इन्द्रजिच्छरपीडितत्वेन क्षीणशक्तयः वानराः, गगनं वियत् तत् क्षोभयन्तोऽपि, शिलावृक्षप्रक्षेपणादिना पूरयन्तोऽपीति यावत्, रिपुं इन्द्रजितं न अपश्यन् ॥ १० ॥

(सं.चं.) प्रक्षीणा नागास्त्रेण गगने व्याप्तेन प्रक्षीणपौरुषाः । क्षोभयन्त आलोडयन्तोऽपि ॥ १० ॥

शरैराशीविषाकारैरसङ्ख्यैः सङ्ख्पण्डितः ।
रावणिर्दारयामास[३] वानरांस्तान् महाबलान् ॥ ११ ॥

(भा.दी.) शरैरिति । सङ्ख्ये युद्धे पण्डितः कुशलः सः रावणिः, आशीविषाणां सर्पाणामाकार इवाकारो येषां ते तथा तैः असङ्ख्यैः अगण्यैः शरैः, महत् बलं येषां ते तथा तान्, तान् वानरान् दारयामास । दॄ विदारणे लिट् ॥ ११ ॥

(सं.चं.) सङ्ख्पण्डितः युद्धकुशलः । सङ्ख्मिति प्राचीनम् । सङ्ख्यमित्यर्वाचीनम् ॥ ११–२ ॥

बध्वाऽऽशीविषपाशैस्तान् कपीन् सर्वान्[४] सलक्ष्मणान् ।
शक्रशत्रुः पुरीं प्राप्य मुमुदे रावणान्वितः ॥ १२ ॥

---

१. **'राक्षसं क्रूरविक्रमम्'** इति वि.ती.पाठः ।
२. **'गगने'**
३. **'रावणिर्द्रावयामास'**
४. **'बध्वा चाऽशीविषशरैस्तांश्च सर्वान्'** इति वि.ती.पाठः स्यात् ।

(भा.दी.) बध्वेति । शक्रशत्रुः इन्द्रजित्, आशीविषमया सर्पमया ये शरास्तैः सलक्ष्मणान् तान् सर्वान् बध्वा पुरीं लङ्कां प्राप्य रावणान्वितः सन् मुमुदे । मुद हर्षे लिट् ॥ १२ ॥

नामोचयन् नागबन्धाद् राममारुतिलक्ष्मणाः ।
[१]देवगुह्यमनुस्मृत्य समर्था अपि वानरान् ॥ १३ ॥

(भा.दी.) नेति । राममारुतिलक्ष्मणाः समर्थाः स्वसामर्थ्येन नागबन्धात् कपीन् मोचयितुं समर्था अपि देवगुह्यं देवरहस्यं तत् अनुस्मृत्य । 'सर्वदेवानां श्रीरामसेवाज्ञापनसमये गरुडेनापि सेवा प्रार्थिता । तदा श्रीहरिणा 'कपीनां बन्धे युद्धचतेन्द्रजिता कृते सति हनुमल्लक्ष्मणाभ्यां सहितोऽहं तूष्णीं स्थास्यामि, तदा त्वमागत्य तन्मोचनं कुरु, भुव्यवतारशून्यस्य तवैवमेवेयं मदीया सेवा भवेत्' इति विष्णूदितं रहस्यमनुस्मृत्येत्यर्थः । वानरान् नागैर्यो बन्धस्तस्मात् न अमोचयन् । मुचॢ धातोर्लङ् ॥ १३ ॥

(सं.चं.) गरुडेन नागास्त्रं मोचनीयमिति भगवत्सङ्कल्परूपं देवगुह्यम् । राममारुतिलक्ष्मणाः । 'अभ्यर्हितं च पूर्वं निपततीति वक्तव्यम्' (अ.सू.२.२.३४) इति वार्तिकम् ॥ १३ ॥

विद्धवद् बद्धवद् रामो मुग्धवत् क्षतजार्द्रवत् ।
दर्शयामास पापानां[२] मोहनायाखिलेश्वरः ॥ १४ ॥

(भा.दी.) श्रीरामोऽपीन्द्रजिता बद्ध इति श्रीरामायणवाक्यतात्पर्यमाह– **विद्धवदि**ति । अखिलेश्वरः श्रीरामः पापाः तामसजनाः तेषां मोहनं मोहस्तस्मै, शरेण विद्धइव विद्धवत्, इन्द्रजिता बद्धइव बद्धवत्, मूर्च्छां प्राप्तइव मुग्धवत्, क्षतजेन रक्तेन आर्द्रइव क्षतजार्द्रवत् दर्शयामास । दृशेर्लिट् । स्वभावतस्तु नास्त्येवात्रेति हेतुनाऽखिलेश्वर इत्युक्तम् ॥ १४ ॥

---

१. **'देवगुह्यमित्यनेन, 'वरेण शर्वस्य हि रावणात्मजो यदा निबध्नाति कपीन् सलक्ष्मणान् । उरङ्गपाशेन तदा त्वमेव समेत्य सर्वानपि मोचयस्व । अहं समर्थोऽपि स लक्ष्मणश्च तथा हनूमान् न विमोचयामः । तव प्रियार्थं गरुडैष एव कृतस्तवाऽदेश इमं कुरुष्व' (म.बा. ता.नि.८.१४०–१) इति हरिणाऽवतारसमये गरुडं प्रत्यभिहितत्वादिदानीं गरुडेन कपयो मोचनीया इति देवगुह्यमनुस्मृत्य नामोचयन्निति सूचितम्'** इति का.श्री. ।

२. **'पापानां तमोयोग्यानां मोहनाय वञ्चनाय मित्याज्ञानोत्पत्तये ।....मुग्धवत् अजानन्निव....आत्मानं दर्शयामास । इदं वक्ष्यमाणस्य सर्वस्यापि तात्पर्यम् । तदुक्तम्–'विद्धवन्मुग्धवच्चैव केशवो वेदनार्तवत् । दर्शयन्नपि मोहाय नैव विष्णुस्तथा भवेत्' (म.भा.ता.नि.११.९६) इत्यादि'** इति का.श्री. ।

(सं.चं.) पापानामासुराणां मिथ्याज्ञानं जनयित्वा तमसि पातनाय । क्षतजार्द्रवत् रक्तसिक्त इव । कुतः? अखिलेश्वरत्वात् । तथाच पुराणादिषु दशनभाषया तं तथा वर्णयन्तीति हृदयम् । 'एतेन–'नीलश्च विवदो मैन्दः सुषेणः कुमुदोऽङ्गदः । तूर्णं हनुमता सार्धमन्वशोचन्त राघवौ । अचेष्टौ मन्दनिःश्वासौ शोणितेन परिप्लुतौ । शरजालाचितौ स्तब्धौ शयानौ शरतल्पगौ । निःश्वसन्तौ यथा सर्पौ निश्चेष्टौ मन्दविक्रमौ । रुधिरस्रावदिग्धाङ्गौ तपनीयाविव ध्वजौ । तौ वीरशयने वीरौ शयानौ मन्दचेष्टितौ । यूथपैः स्वैः परिवृतौ बाष्पव्याकुललोचनैः । राघवौ पतितौ दृष्ट्वा शरजालसमन्वितौ । बभूवुर्दुःखिताः सर्वे वानराः समभीषणाः' (४६.३–७) इत्यादिवाल्मीकिवचनं गदिताभिप्रायम् । एवं सर्वत्रापि ॥ १४ ॥

मायासीतामुपादाय राक्षस्यो रावणाज्ञया ।
अदर्शयन् दशामेतां[1] त्रिजटा तामसान्त्वयत् ॥ १५ ॥

(भा.दी.) मायेति । राक्षस्यः रावणाज्ञया मायासीतां सीताप्रतिकृतिं उपादाय एनां कपीनां दशामवस्थां अदर्शयन् । त्रिजटा त्रिजटानाम्नी राक्षसी तां सीताप्रतिकृतिं असान्त्वयत् । षान्त्व सामप्रयोगे लङ् ॥१५॥

(सं.चं.) दशामेतां रामादीनां नागपाशबद्धताम् । त्रिजटा तामसान्त्वयत् । 'परिदेवयमानां तां राक्षसी त्रिजटाऽब्रवीत् । मा विषादं कृथा देवि भर्ताऽयं तव जीवति' (४८.२२) इत्यादि ॥ १५ ॥

शक्रारिणा शर्ववरात्[2] पातितेषु कपिष्वपि ।
सप्तद्वीपवतीं पृथ्वीं[3] कम्पयन् वायुराववौ ॥ १६ ॥

(भा.दी.) शक्रेति । शक्रारिणा इन्द्रजिता, शर्वस्य यो वरस्तस्मात् कपिषु पातितेषु सत्सु, सप्त ये द्वीपास्ते अस्यां सन्तीति तथा तां पृथ्वीं कम्पयन् चालयन् वायुः आववौ । वा गतिगन्धनयोर्लिट् ॥ १६ ॥

(सं.चं.) शर्ववरात् । अत एव शर्वादुत्तमौ राममारुती, शर्वसमो लक्ष्मणश्च न बद्धाः । केवलं तथा दर्शयामासुः । गरुडपक्षपतनवेगजो वायुराववौ ॥ १६ ॥

आ जानुतः स्वर्ण्णवर्ण्ण आ नाभेर्हारगौरभाः ।
माणिक्यशोण आ [4]कण्ठादा केशाद्धरितप्रभः ॥ १७ ॥

---

१. '**दशामेनाम्**' इति वि.ती.पाठः स्यात् ।
२. '**शर्वबलात् पातितेषु कपिष्विति**' इति '**कपिष्वथ**' इति च ।
३. '**–वर्ती भूमिं कम्पयन्**'
४. '**–शोण आ कर्णादा केशा–**'

नीलकेशो लसन्माल्यश्चारुचन्दनचर्च्चितः ।
अष्टभिर्भोगिभिः पुष्टैर्भूषितो[१] मणिमौलिभिः ॥ १८ ॥

पत्राभ्यां चित्रवर्णाभ्यां[२] मुञ्चद्भ्यां च सुधाकणान् ।
कालयन् नागपूगं तं चारुचञ्चुः सुलोचनः[३] ॥ १९ ॥

ब्रुवाणो जय रामेति दृष्टः स्पष्टं प्लवङ्गमैः ।
ववन्दे परमानन्दं[४] गरुडो गरुडध्वजम् ॥ २० ॥

(भा.दी.) आ जानुत इति । जानुत आ पर्यन्तं स्वर्णवद् वर्णो यस्य स तथा, नाभिर्नाभिप्रदेशस्तस्मात् आ पर्यन्तं हारवद् गौरत्वेन भाः कान्तिर्यस्य स तथोक्तः, कण्ठो गळस्तस्मात् आ पर्यन्तं माणिक्यवत् माणिक्यरत्नवच्छोणो रक्तः, केशः केशपाशस्तस्मात् आ पर्यन्तं हरितवत् हरिद्रावत् प्रभा यस्य स तथोक्तः, नीलाः केशाः यस्य स तथोक्तः, लसत् माल्यं पुष्पदाम यस्य स तथा, चारु यच्चन्दनं तेन चर्चितः लिप्तः, अष्टभिः भोगिभिः आभरणभूतैर्महानागैः पुष्टो पूर्णाङ्गः, मणयश्च मौलिः किरीटं स च तैर्भूषितः, चित्रं नानाविधं रूपं ययोस्ताभ्याम्, सुधाकणान् सुधाबिन्दून् मुञ्चद्भ्याम्, पत्राभ्यां पक्षाभ्यां च, तं नागपूगं नागसमूहं कालयन् द्रावयन्, चारुः चञ्चुः तुण्डो यस्य स तथा, शोभने लोचने यस्य स तथा, 'हे राम, जय' इति ब्रुवाणः प्लवङ्गमैः कपिभिः स्पष्टं यथा भवति तथा दृष्टः गरुडः, परम आनन्दो यस्य स तथा तं (गरुडध्वजं) श्रीरामं ववन्दे नमश्चकार ॥ १७–२० ॥

(सं.चं.) चतुर्भिर्गरुडरूपं वर्णयति । 'पीतशुक्लारुणो हरिः । कृष्णश्चाऽ जानुतो नाभेः कण्ठात् कादन्त एवच' (४.८४) इति तन्त्रसारसङ्ग्रहे । पादतो जानुपर्यन्तं स्वर्णवर्णः । ततो नाभिपर्यन्तं गौरवर्णः । ततः कण्ठपर्यन्तं माणिक्यवत् पद्मरागमणिवत् शोणः । 'शोणरत्नं लोहितकं पद्मरागोऽरुणोपलः' इति यादवप्रकाशः । ततः केशपर्यन्तं हरिद्वर्णः । केशेषु नीलः । मणिभूषितमौलिभिः पुष्टैः पूर्णाङ्गैरष्टभिर्महानागैः परिगतैर्भूषितः । रामायणानुक्तमपूर्वमेतत् प्रमेयम् । इन्द्रजिदस्त्रनिर्गतं कपिबन्धनं नागपूगं कालयन् द्रावयन् । ववन्दे तुष्टाव च ननाम च ॥ १७–२० ॥

---

१. **'पुष्टो भूषितो–'** इति वि.ती.पाठः । नातिस्वरसमिदम् । मणिमौलयो हि भोगिनः प्रसिद्धाः । **'मणिमौलिभिः रत्नयुक्तशिरस्कैः पुष्टैः सन्तुष्टैः अष्टभिर्भोगिभिर्नागैः भूषितोऽलङ्कृतो गरुडः'** इति का.श्री. ।

२. **'चित्ररूपाभ्याम्'** इति वि.ती.पाठः ।

३. **'चारुचञ्चुसुलोचनः'**

४. **'परमानन्दमित्युक्त्या नागपूगनिबन्धनं (दुःखं)रामस्य नास्तीति सूचितम्'** इति का.श्री. ।

कालिताः काद्रवेयास्ते पक्षवातेन पक्षिणः ।
तद्दर्शनस्पर्शनाभ्यां वानरा बलिनोऽभवन् ॥ २१ ॥

(भा.दी.) कालिता इति । पक्षौ अस्य स्त इति पक्षिणः गरुडस्य पक्षयोर्वातस्तेन, ते पाशभूताः कद्रोरपत्यानि पुमांसः काद्रवेयाः सर्पाः कालिताः द्राविताः । वानराः, तस्य गरुडस्य यद् दर्शनं स्पर्शनं च ताभ्यां बलिनः अभवन् ॥ २१ ॥

(सं.चं.) तस्य गरुडस्य दर्शनेन स्पर्शनेन च ॥ २१ ॥

शुश्रूषां गरुडः कृत्वा राममामन्त्र्य यातवान् ।
सालशैलशिलाहस्ता उदगर्ज्जन् प्लवङ्गमाः ॥ २२ ॥

(भा.दी.) शुश्रूषामिति । गरुडः श्रीरामस्य शुश्रूषां सेवां कृत्वा, श्रीरामं आमन्त्र्य आपृच्छ्य, यातवान् गतः । प्लवङ्गमाः सालाश्च शैलाश्च शिलाश्च ताः हस्ते येषां ते तथा सन्तः उदगर्जन् उत्कृष्टतया जगर्जुः । गर्ज शब्दे लङ् ॥ २२ ॥

(सं.चं.) उदगर्जन् सिंहनादं चक्रुः ॥ २२ ॥

आकर्ण्य कपिसिंहानां सिंहनादं भयानकम् ।
अस्त्रमोक्षं विनिश्चित्य त्रस्तौ रावणरावणी ॥ २३ ॥

(भा.दी.) आकर्ण्येति । रावणश्च रावणिश्च तौ, कपिषु सिंहाः श्रेष्ठास्तेषां भयानकं भयजनकं सिंहनादो सिंहगर्जनं तं आकर्ण्य श्रुत्वा, अस्त्रान्मोक्षो मोचनं तं विनिश्चित्य त्रस्तौ अभूताम् ॥ २३ ॥

(सं.चं.) कपिसिंहानां कपिवीराणाम् । कपयः सिंहा इव । उत्तरपदभूताः सिंहव्याघ्रर्षभादयो वीर्याधिक्य-वचनाः ॥ २३ ॥

आथर्वणविधानेन हुत्वा हुतवहं मुहुः ।
अदृश्यो रथमध्यास्य ययावाकाशवर्त्मना ॥ २४ ॥

(भा.दी.) आथर्वणेति । आथर्वणं अथर्ववेदे प्रोक्तं यद्विधानमभिचारविधिस्तेन हुतवहमग्निं मुहुः हुत्वा रथः स्यन्दनं तं अध्यास्य अधिष्ठाय अदृश्यः सन् आकाशवर्त्मना ययौ ॥ २४ ॥

(सं.चं.) अदृश्यो ययौ । रावणरावणी इत्यत्र प्रस्तुतः रावणिः ॥ २४–५ ॥

शर्वशम्भुवराद् गर्वी[1] पूर्ववत् सर्ववानरान् ।
नागभोगैर्दृढं[2] बध्वा रावणं रावणिर्य्ययौ ॥ २५ ॥

(भा.दी.) शर्वेति । शर्वः शिवः, शम्भुश्चतुर्मुखः स च तयोर्यो वरस्तस्मात् गर्वोऽस्यास्तीति गर्वी, अजेयत्वाभिमानवानित्यर्थः, रावणिः रावणपुत्रः अस्त्रशक्त्या पूर्ववत् सर्ववानरान् दृढं यथा भवति तथा बध्वा रावणं ययौ ॥ २५ ॥

राक्षसेन्द्रो महेन्द्रारिमभ्यनन्दत् स्वनन्दनम् ।
कृतकार्य्यं महावीर्य्यं प्रशशंस च सादरम् ॥ २६ ॥

(भा.दी.) राक्षसेति । राक्षसेन्द्रः रावणः, कृतं कार्यं येन स तथा तम्, महत् वीर्यं यस्य स तथा तम्, स्वनन्दनं महेन्द्रारिमिन्द्रजितं दृष्ट्वा अभ्यनन्दत् । नदि हर्षे लङ् । आदरेण बहुमानेन सहितं यथा भवति प्रशशंस च । शंसु स्तुतौ लिट् ॥ २६ ॥

(सं.चं.) स्वनन्दनं स्वस्य सन्तोषजनकं स्वतनयम् ॥ २६–८ ॥

जिज्ञासुः पुरि वृत्तान्तं पूर्वं यातो[3] विभीषणः ।
रणभूमिं तदा प्राप्तो ददर्श पतितान् कपीन् ॥ २७ ॥

(भा.दी.) जिज्ञासुरिति । पुरि लङ्कायां वृत्तान्त उदन्तस्तं जिज्ञासुः सन् पूर्वं इन्द्रजिदागमनात् प्रागेव यातः विभीषणः तदा रणभूमिं प्राप्तः सन् पतितान् कपीन् ददर्श ॥ २७ ॥

अपश्यन्नुत्थितं कश्चिद् रात्र्यां रात्रिचरेश्वरः[4] ।
कोऽत्राविपन्न इत्युच्चैरुवाच जलदस्वनः ॥ २८ ॥

---

१. **'शर्वशम्भुवराद् गर्वात्'** इति, **'स शम्भुवरतो गर्वी'** इति, **'स शम्भुवरतो गर्वात्'** इति च क्वचित् ।

२. **'अस्त्रशक्त्या दृढं बध्वा'** इति वि.ती.पाठः । **'नागभोगैः सर्पश(री)रैः'** इति का.श्री. ।

३. **'पूर्वयातो–'**

४. **'रात्रिश्चरेश्वरः'**

(भा.दी.) अपश्यन्निति । रात्र्यां कश्चित् कमपि उत्थितं स्थितं अपश्यन्, जलदस्य मेघस्य स्वन इव स्वनो यस्य स तथोक्तः, रात्रिचरेश्वरः राक्षसेश्वरः विभीषणः, अत्र कपीनां मध्ये अविपन्नः अमूर्च्छितः कः इति उच्चैः उवाच ॥ २८ ॥

अहमस्मीति हनुमान् ब्रुवन्नुपससार तम् ।
अलातं भ्रामयन्तौ तौ कपीन् विष्वगपश्यताम् ॥ २९ ॥

(भा.दी.) अहमिति । हनुमान् अहं अमूर्छितः अस्मि इति ब्रुवन् सन् तं विभीषणं उपससार समीपमाप । सृ गतौ लिट् । तौ हनुमद्विभीषणौ अलातमुल्मुकं तत् भ्रामयन्तौ कपीन् विष्वक् परितः अपश्यताम् ॥२९॥

(सं.चं.) अलातमुल्काम् – 'ಪಂಜು' इति भाषायाम् । दीप्राग्रं काष्ठम् ॥ २९–३० ॥

सुग्रीवाङ्गदनीलादीन् भग्नाङ्गान् रुधिरोक्षितान् ।
दृष्ट्वाऽन्यांश्चोपययतुर्ज्जाम्बवन्तं विमोहितम् ॥ ३० ॥

(भा.दी.) सुग्रीवेति । सुग्रीवश्च अङ्गदश्च नीलश्च ते आदयो येषां ते तथा तान्, भग्नानि अङ्गानि अवयवा येषां ते तथा तान्, रुधिरोक्षितान् रुधिरसिक्तान् दृष्ट्वा, अन्यांश्च वानरान् तथाभूतान् दृष्ट्वा, विमोहितं जाम्बवन्तं उपययतुः उपजग्मतुः ॥ ३० ॥

आश्वासयन् जाम्बवन्तमम्बुसेकैर्विभीषणः ।
किं जीवसीत्युवाचाऽरामन्दम्मन्दं स चाब्रवीत् ॥ ३१ ॥

(भा.दी.) आश्वासयन्निति । विभीषणः अम्बुनः सेकाः सेचनानि तैः जाम्बवन्तं आश्वासयन्, श्रमं परिहारयन्, 'त्वं जीवसि किम्?' जीव प्राणधारणे लट्, इति आरात् समीपे स्थित्वा उवाच । स च जाम्बवान् मन्दम्मन्दमिति क्रियाविशेषणं, अब्रवीत् ॥ ३१ ॥

(सं.चं.) आरान्निकटमेत्य किं जीवसीत्युवाच ॥ ३१ ॥

अञ्जना सुप्रजा येन स किं जीवति पावनिः ।
तस्मिन् जीवति जीवामो मृते तस्मिन् मृता वयम् ॥ ३२ ॥

(भा.दी.) अञ्जनेति । अञ्जना अञ्जनादेवी येन हनुमता शोभना (प्रजा) सुतो यस्याः सा तथा, 'प्रजा तु जनपुत्रयोः' इति वैजयन्ती । सः पावनिः पवनपुत्रः हनुमान् जीवति किम्? सर्वान् परित्यज्य तस्यैव जीवनप्रश्नकारणमाह– **तस्मिन्नि**ति । तस्मिन् हनुमति जीवति सति वयं जीवामः । तस्मिन् मृते सति वयं मृताः स्म इति अब्रवीत् ॥ ३२ ॥

(सं.चं.) शोभना प्रजाऽस्या इति सुप्रजाः । बहुव्रीहेरसिच्प्रत्ययः । 'नित्यमसिच् प्रजामेधयोः' (५.४.१२२) इति हि पाणिनिः । नञ्दुःसुभ्य इति पूर्वसूत्रादनुवर्तते । अप्रजाः, दुष्प्रजाः, सुप्रजाः । अमेधाः, सुमेधाः, दुर्मेधाः ॥ ३२–४ ॥

इत्युक्त ऊचे पौलस्त्यः कस्मात् पृच्छसि मारुतिम् ।
न लक्ष्मणं न सुग्रीवं नाङ्गदं मतिमन्निति[१] ॥ ३३ ॥

(भा.दी.) इतीति । इति जाम्बवता उक्तः, पुलस्त्यस्य गोत्रे भवः पौलस्त्यः विभीषणः, हे मतिमन् विवेकिन् जाम्बवन्, मारुतिं हनुमन्तं कस्मात् कारणात् पृच्छसि, लक्ष्मणं कस्मान्न पृच्छसि, अङ्गदं सुग्रीवं वा कस्मान्न पृच्छसि, जीवति मृतो वेति न विचारयसि, इति जाम्बवन्तं ऊचे ॥ ३३ ॥

इत्युक्तो ब्रह्मजः प्रोचे हनूमान् यदि जीवति ।
स्वतेजसा पालयेन्नो नास्त्यन्यः शक्तिमानिति ॥ ३४ ॥

(भा.दी.) इतीति । इति उक्तः ब्रह्मजः ब्रह्मपुत्रः जाम्बवान्, यदि हनुमान् जीवति, तर्हि स्वतेजसा स्वसामर्थ्येन नः पालयेत् । पाल रक्षणे लिङ् । अन्यः पुरुषः शक्तिमान्नास्ति इति विभीषणं प्रोचे ॥ ३४ ॥

आर्य्य जीवाम्यहमिति ब्रुवाणो वायुनन्दनः ।
उपसृत्य तमस्प्राक्षीच्छङ्करेण स्वपाणिना ॥ ३५ ॥

(भा.दी.) आर्येति । हे आर्य साधो जाम्बवन्, 'आर्यः साधुकुलीनयोः' इति वैजयन्ती, अहं जीवामि इति ब्रुवाणः वदन् वायुनन्दनः हनुमान्, उपसृत्य समीपं गत्वा, शं सुखं करोतीति शङ्करस्तेन स्वपाणिना तं जाम्बवन्तं अस्प्राक्षीत् । स्पृश आमर्शने लुङ् ॥ ३५ ॥

(सं.चं.) आर्यो वयसा ज्येष्ठः । कुलवृद्धः । 'ଓଝା' इति भाषायाम् । शङ्करेण सुखकरेण ॥ ३५ ॥

---

१. **'–नाङ्गदं सन्मतिं त्विति'**

अथाब्रवीद् ब्रह्मसुतो वत्स स्वज्ञातिवत्सल[१] ।
मृतं कपिकुलं रक्ष रामदासाग्रणीर्भवान् ॥ ३६ ॥

(भा.दी.) अथेति । अथ ब्रह्मसुतः जाम्बवान्, वत्स, स्वज्ञातयो बान्धवास्तेषु वत्सल स्निग्ध हनुमन्, श्रीरामस्य ये दासास्तेषु अग्रणीः श्रेष्ठः भवान्, मृतं मृतप्रायम्, कपिकुलं कपिसमूहः, तत् रक्ष । रक्ष पालने लोट् । इति अब्रवीत् ॥ ३६ ॥

(सं.चं.) वत्स हनुमन्, त्वं मृतं कपिकुलं रक्ष । रामदासाग्रणीः किल भवान् । एवं भिन्नवाक्यतया रक्षेति युक्तम् । अन्यथा भवान् रक्षतु इति वक्तव्यम् । छान्दसं वा पन्थानं कविः पपात ॥ ३६–७ ॥

समीपे मेरुशैलस्य शैलो यो[२] गन्धमादनः ।
तस्मादानीयतां शीघ्रं [३]त्वयौषधचतुष्टयम् ॥ ३७ ॥

(भा.दी.) रक्षणे स्वज्ञातोपायमाह–**समीप** इति । मेर्वाख्यो यः शैलः, तस्य समीपं पार्श्वं तस्मिन्, गन्धमादनः गन्धमादनाख्यो यः शैलः तस्मात्, त्वया औषधानां चतुष्टयं तत् शीघ्रं यथा भवति तथा आनीयताम् । नीञो लोट् ॥ ३७ ॥

मृतसञ्जीवनी मुख्या सन्धानकरणी परा ।
सवर्ण्णकरणी चैव विशल्यकरणीति च[४] ॥ ३८ ॥

(भा.दी.) औषधचतुष्टयनामान्याह– **मृते**ति । मुख्या श्रेष्ठा, मृतं सञ्जीवयितुं शीलमस्या अस्तीति तथा, अत एव तन्नाम्नी एका । खण्डितानवयवान् सन्धानं कर्तुं शीलमस्या अस्तीति सन्धानकरणी परा अन्या । विगतं शल्यं कर्तुं शीलमस्या अस्तीति विशल्यकरणी । अपरा चैव, समानश्चासौ वर्णश्च तं कर्तुं शीलमस्या अस्तीति तथोक्ता । इति औषधचतुष्टयं आनीयतामिति सम्बन्धः ॥ ३८ ॥

(सं.चं.) मृतसञ्जीवनीत्यविकलं निर्णयवचनम् (८.१५३) । ल्युडन्तानि नामान्येतानि । मृतं सञ्जीवयतीति मृतसञ्जीवनीत्यादि ॥ ३८–९ ॥

१. **'–वत्तलः'**
२. **'शैलोऽयं गन्ध –'**
३. **'त्वयौषधिचतु–'**
४. **'विशल्यकरणी चैव सवर्णकरणीति च'** इति वि.ती.पाठः।

इत्युक्तो हनुमान् नत्वा रामं रामप्रियामपि ।
ववृधे पर्वताग्रस्थो द्वितीय इव पर्वतः ॥ ३९ ॥

(भा.दी.) **इतीति** । इति उक्तः हनुमान् श्रीरामं (रामप्रियां) रामभार्यां सीतामपि नत्वा पर्वतस्य त्रिकूटपर्वतस्य यदग्रं तस्मिन् तिष्ठतीति तथोक्तः तथा सन् द्वितीयः पर्वत इव ववृधे । वृध वृद्धौ लिट् ॥ ३९ ॥

अतुच्छं[१] पुच्छमाविद्ध्य कर्ण्णावाकुञ्च्य पूर्ण्णभाः ।
धराधरमवष्टभ्य[२] धीरोऽसावथ पुप्लुवे ॥ ४० ॥

(भा.दी.) **अतुच्छमिति** । अथ पूर्णा भाः कान्तिर्यस्य स तथा, धीरः असौ हनुमान् अतुच्छं अतिमहत् तत् पुच्छं आविद्ध्य आवर्तयित्वा, कर्णौ आकुञ्च्य उत्तब्धौ कृत्वा, केवलं मूर्धाग्रगौ कृत्वेत्यर्थः, धराधरः त्रिकूटपर्वतस्तं अवष्टभ्य निष्पिष्य पुप्लुवे । प्लुङ् गतौ लिट् ॥ ४० ॥

(सं.चं.) भुजङ्गकल्पत्वादतुच्छम् । 'स पुच्छमुद्यम्य भुजङ्गकल्पं विनम्य पृष्ठं श्रवणे निकुञ्च्य' (७४.४९) इति च ॥ ४० ॥

सप्तद्वीपवती पृथ्वी चकम्पे तेन पीडिता ।
शाखेव शाखिनः स्निग्धा पल्लवावलिशालिनी ॥ ४१ ॥

(भा.दी.) **सप्तेति** । सप्तसङ्ख्याका ये द्वीपा जलमध्यस्थानानि ते अस्यां सन्तीति तथोक्ता पृथ्वी, तेन हनुमता पीडिता सती, पल्लवानां किसलयानां आवलयः पङ्क्तयस्ताभिः शालते शोभत इति शालिनी, युक्ता मनोहरेति वा, स्निग्धा कोमळा शाखिनो वृक्षस्य शाखेव चकम्पे चचाल । कपि कम्पने लिट् ॥ ४१ ॥

(सं.चं.) ब्रह्माण्डं शाखीव । पृथ्वी तस्यैका शाखेव । द्वीपानि पल्लवावलिरिव ॥ ४१ ॥

प्रासादशिखरादीनि लङ्कायां[३] भङ्गमाययुः[४] ।
[५]निष्पीडिते त्रिकूटे च मारुतेः पातरंहसा ॥ ४२ ॥

---

१. **'अतुलं पुच्छ–'** २. **'–ष्टभ्य वीरोऽसा–'** ३. **'लङ्काया भङ्ग–'** इति.वि.ती.पाठः । ४. **'भङ्गमानयन्'**
५, **'मारुतेः पातरभसा त्रिकूटे लोळिते तथा'** । इति, **'त्रिकूटे चालिते तथा'** इति च ।

(भा.दी.) प्रासादेति । मारुतेः हनुमतः पातस्य उत्पतनस्य यद्रंहो वेगस्तेन (त्रिकूटे) निष्पीडिते सति, लङ्कायाः प्रासादानां हर्म्याणां शिखराणि, तानि आदयो येषां तानि तथोक्तानि, भङ्गो नाशस्तं च आययुः । यातेर्लिट् ॥ ४२ ॥

(सं.चं.) पातस्य उत्पत्य वियति डयनस्य रंहसा वेगेन ॥ ४२ ॥

मृताः केचित् परे मुग्धा रुरुदू राक्षसाः परे ।
कर्त्तव्यमूढा अपरे लङ्काकम्पनकम्पिताः ॥ ४३ ॥

(भा.दी.) मृता इति । लङ्कायां यत्कम्पनं चलनं तेन कम्पिताः चालिताः, केचित् राक्षसा मृताः, परे राक्षसाः मुग्धाः मूर्छिताः, परे रुरुदुः । रुदिर् अश्रुविमोचने लिट् । अपरे कर्तव्ये कर्मणि मूढाः आसन् ॥ ४३ ॥

(सं.चं.) मुग्धा मोहमापन्नाः । भयकम्पिताः ॥ ४३–५ ॥

स द्वितीय इवाऽदित्य आदित्यपथमेयिवान् ।
अतिदीर्घमथाध्वानं[१] हनुमानत्यवर्त्तत ॥ ४४ ॥

(भा.दी.) स इति । सः हनुमान् द्वितीयः आदित्य इव, आदित्यस्य पन्था आदित्यपथस्तं आकाशमार्गमित्यर्थः, एयिवान् सम्प्राप्तः । अथ, अत्यन्तं दीर्घः अतिदीर्घस्तं अध्वानं अत्यवर्तत अतिक्रान्तवान् । वृतु वर्तने लङ् ॥ ४४ ॥

योजनानामर्द्धलक्षमतीत्यायत्नतो द्रुतम् ।
असङ्ग एकपातेन प्रापासौ गन्धमादनम् ॥ ४५ ॥

(भा.दी.) योजनानामिति । असौ हनुमान् असङ्गः सन् असंसक्तः सन्, उत्पतनानन्तरं कुत्राप्यस्थितः सन्नित्यर्थः, एकश्चासौ पातश्च तेन, एकोत्पतनेनेत्यर्थः, योजनानां लक्षस्य अर्धं अर्धलक्षं तत्, पञ्चाशत्सहस्रमित्यर्थः, अयत्नतः अनायासेन द्रुतं यथा भवति तथा अतीत्य गन्धमादनं प्राप । आपॢ व्याप्तौ लिट् ॥ ४५ ॥

---

१. **'–मथाऽकाशं हनूमानभ्यवर्धत'** इति, **'हनूमानत्यवर्तत'** इति च ।

औषधानि विलीनानि[१] ज्ञात्वा क्रुद्धो मरुत्सुतः ।
गिरिमेवोज्जहारैनं शतयोजनमण्डलम्[२] ॥ ४६ ॥

(भा.दी.) औषधानीति । मरुत्सुतः औषधानि मृतसञ्जीवनादीनि विलीनानि अन्तर्हितानि ज्ञात्वा क्रुद्धः सन्, शतसङ्ख्याकानि यानि योजनानि तावत्परिमिति मण्डलं यस्य स तथा तं एनं गिरिमेव उज्जहार उद्बबर्ह । हृञो लिट् ॥ ४६ ॥

(सं.चं.) मण्डलं परिधिः । '[illegible]' इति भाषायाम् ॥ ४६ ॥

तं गिरिं काञ्चनमयं प्रतिदीप्तमहौषधम् ।
प्रतिगृह्याऽपपाताथ[३] रामं रामप्रियाग्रणीः ॥ ४७ ॥

(भा.दी.) तमिति । अथ, रामप्रियेषु अग्रणीः श्रेष्ठः हनुमान्, काञ्चनमयम्, प्रतिदीप्तानि महौषधानि यस्मिन् स तथा तम्, तं गन्धमादनाख्यं गिरिं प्रतिगृह्य श्रीरामं प्रति आपपात ॥ ४७ ॥

(सं.चं.) प्रतिरुद्धतया दीप्तानि महौषधानि यत्र ॥ ४७–८ ॥

[४]लीलयोत्तोळयन्नद्रिं कराग्रे कन्दुकायितम् ।
विरराज वियत्येष वीरराजो जगत्त्रये ॥ ४८ ॥

(भा.दी.) लीलयेति । जगतां त्रयं तस्मिन् वीरराजः एषः हनुमान्, करस्य यदग्रं तस्मिन्, कन्दुकवदाचरतीति कन्दुकायितः, तं अद्रिं लीलया उत्तोळयन् उच्चालयन् सन्, वियत् नभस्तस्मिन् विरराज । राजृ दीप्तौ लिट् ॥ ४८ ॥

निन्ये [५]निमेषमात्रेण स यावद् गन्धमादनम् ।
उदतिष्ठन् कपिगणास्तावदौषधवायुना ॥ ४९ ॥

---

१. **'–धानि निलीनानि'**
२. **'शतयोजनमण्डलम् शतयोजनविशालम्'** इति का.श्री. ।
३. **'प्रतिगृह्य पपाताथ'** इति, **प्रतिगृह्योत्पपाताथ'** इति च ।
४, **'लीलयोल्लेलय–'** इति, **'लीलया लोलय –'** इति च ।
५. **'निमिषमात्रेण'**

(भा.दी.) निन्य इति । सः यावत् यदा, केवलं निमेषः निमेषमात्रं तेन, गन्धमादनं लङ्कां प्रति निन्ये नीतवान्, तावत् तदा, कपिगणाः, औषधसम्बद्धो यो वायुस्तेन, उदतिष्ठन् उत्थिता बभूवुः ॥ ४९ ॥

(सं.चं.) यावत् यदा निन्ये तदोदतिष्ठन् ॥ ४९ ॥

जीवनं च्छिन्नसन्धानं विशल्यत्वं सवर्णताम् ।
चतुर्णामौषधानां ते गन्धसामर्थ्यतोऽगमन्[1] ॥ ५० ॥

(भा.दी.) जीवनमिति । ते वानराः, चतुर्णाम्, औषधानि मृतसञ्जीवनादीनि तेषां, गन्धस्य यत्सामर्थ्यं तस्मादिति ततः जीवनं प्राणधारणं तत्, च्छिन्नानां सन्धानं सन्धिस्तत्, विगतं शल्यं यस्मात् स तथा, तस्य भावस्तत्त्वं तत्, शल्यवैकल्यमित्यर्थः, सवर्णतां च पूर्वसदृशवर्णतां च अगमन् ॥ ५० ॥

(सं.चं.) जीवनं पुनरुज्जीवनम् । विशल्यत्वं शल्योद्धरणे सत्यव्रणत्वम् ॥ ५० ॥

स देवतानामभयङ्करात्मा भयङ्करो दैवतशात्रवाणाम् ।
बभौ गिरिं बिभ्रदहो[2] हनूमान् त्रिविक्रमश्चक्रधरो यथा प्राक् ॥ ५१ ॥

(भा.दी.) स इति । (सः हनूमान्) देवताः देवास्तासाम्, अभयङ्करः आत्मा स्वरूपं यस्य स तथा, दैवतानां देवानां शात्रवाः शत्रवस्तेषां भयङ्करः, हनूमान् गिरिं बिभ्रत् सन्, चक्रधरः त्रिविक्रमः प्राक् पूर्वं यथा तथा बभौ । भा दीप्तौ । अहो आश्चर्यम् ॥ ५१ ॥

(सं.चं.) स देवतानामित्युपेन्द्रवरज्रा ॥ ५१ ॥

सौमित्रिसुग्रीवविधातृनन्दना आनन्दिनः साङ्गदनीलपूर्वकाः ।
धराधरेन्द्रं दधतं तमार्चयन्[3] धरां दधानं विबुधा यथा हरिम् ॥ ५२ ॥

---

१. ‘चतुर्णां सञ्जीवनादीनां औषधानां लताविशेषाणां गन्धसामर्थ्यतः परिमळसामर्थ्यात् जीवनं प्राणधारणम्, छिन्नसन्धानं छिन्नावयवानां पुनर्मेलनं पुनरुत्पत्तिं वा, विशल्यत्वं शरीरान्तर्विद्यमानशरादीनां बहिर्गमनम्, सवर्णतां पूर्ववर्णसमानवर्णोपेतत्वमगमन् अगुः। गन्धमादनपर्वतानयनानन्तरं कपीनामिव राक्षसानामपि जीवनादिप्राप्तिः किं न स्यादिति शङ्का–‘रामाज्ञया हि हरयोऽब्धाववाक्षिपन् । नोज्जीवितास्ततस्ते तु वानरा निरुजोऽभवन्’ (म.भा.ता.नि.८.२०४) इत्यनेन परिहर्तव्या’ इति का.श्री. ।

२. ‘बिभ्रदसौ’

३. ‘दधतं समर्चयन्’

(भा.दी.) सौमित्रीति । आनन्द एषामस्तीति आनन्दिनः, सौमित्रिश्च सुग्रीवश्च विधातृनन्दनो जाम्बवान् स च ते, अङ्गदेन सहितः साङ्गदः स चासौ नीलश्च स पूर्वो येषां ते तथोक्ताः सर्वे वानराः, धराधराः पर्वतास्तेषामिन्द्रः गन्धमादनस्तं दधतं तं हनुमन्तं धरां भुवं दधानं हरिं वराहरूपिणं विष्णुं विबुधाः सुराः यथा तथा आर्चयन्, अर्च पूजायां लङ् ॥ ५२ ॥

(सं.चं.) विधातृनन्दनो जाम्बवान् । इन्द्रवंशावंशस्थयोरुपजातिः ॥ ५२ ॥

समधिकपरिरब्धो रामदेवस्य दोर्भ्यां स्तुवदमरविमुक्तैर्भूषितः पुष्पपूगैः ।
समरभुवि स तिष्ठन् क्षेपणेनैव चक्रे पवनतनय एनं पूर्ववत् पर्वतेन्द्रम्॥ ५३ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
युद्धकाण्डे दशमः सर्ग्गः ॥

—०—

(भा.दी.) समिति । रामदेवस्य दोषौ हस्तौ ताभ्यां, समधिकं अतिदृढं यथा भवति तथा परिरब्धः आलिङ्गितः समधिकपरिरब्धः, स्तुवन्तो येऽमरा देवास्तैः विमुक्ता अभिवृष्टास्तैः पुष्पाणां पूगाः समूहास्तैः, 'पूगः क्रमुकवृन्दयोः' इत्यमरः, भूषितः सः पवनतनयः वायुपुत्रः हनुमान्, समरभुवि युद्धभूमौ तिष्ठन् सन्, एनं आनीतं पर्वतेन्द्रं गन्धमादनं क्षेपणं परावृत्य प्रक्षेपणं तेनैव पूर्ववत् चक्रे । लङ्कायां स्थित एव सन् यत्र पूर्वं पर्वतः स्थितस्तत्रैव चिक्षेपेत्यर्थः ॥ ५३ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां
युद्धकाण्डे दशमः सर्गः ॥

—०—

(सं.चं.) मालिन्योपसंहरति । समधिकं परिरब्धः । प्रीतिपूर्वतैवाधिक्यम् । स्तुवद्भिरमरैर्विमुक्तैः विसृष्टैः पुष्पपूगैः । क्षेपणेनैव पूर्ववत् स्वस्थानस्थितं चक्रे ॥ ५३ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां
युद्धकाण्डे दशमसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– २७०४+५३=२७५७]

एकादशः सर्ग्गः

उत्थितैरुद्धतैर्वीरैरुद्धर्णैः सर्ववानरैः ।
सिंहनादः कृतो घोरः सद्यो लङ्कामकम्पयत्   ॥ १ ॥

(भा.दी.) श्रीरामदासाग्रगण्येन हनुमतोज्जीवितानां प्लवङ्गमानां प्रवृत्तिं दर्शयति– **उत्थितैरि**ति । उत्थितैः, उद्धतैः अभिवृद्धैः, वीरैः उद्धर्णैः शत्रुभयङ्करैः, सर्ववानरैः कृतः घोरः सिंहनादः सद्यः लङ्कां अकम्पयत् अचालयत् । कपि चलने लङ् ॥ १ ॥

(सं.चं.) उद्धतैः शत्रूनगणयद्भिः, बलगर्वितैः । उद्धर्णैः शत्रूणां भयजननैः ॥ १ ॥

रावणस्य नियोगेन रावणिः पुनरुत्कटः ।
निर्य्ययौ[1] रथमध्यास्य तर्प्पयित्वा हुताशनम्   ॥ २ ॥

(भा.दी.) रावणस्येति । उत्कटः उन्मत्तः, रावणिः रावणपुत्रः इन्द्रजित्, रावणस्य नियोग आज्ञा तेन, हुताशनं वह्निं तर्पयित्वा, रथः स्यन्दनस्तं अध्यास्य अधिष्ठाय पुनः निर्ययौ ॥ २ ॥

(सं.चं.) उत्कटः असह्यपौरुषः । स्वभावतः क्रूरः ॥ २ ॥

शर्वशम्भुवराद् गर्वी पूर्ववत् सर्ववानरान् ।
बबन्ध नागैः[2] शक्रारिस्तन्न[3] सेहेऽथ लक्ष्मणः   ॥ ३ ॥

(भा.दी.) शर्वेति । शर्वः शिवः स च, शम्भुर्ब्रह्मा स च, तयोर्योऽजेयत्वादिरूपो वरस्तस्मात् गर्वी प्रतिभटो नास्तीत्यभिमानी, सः शक्रारिः इन्द्रजित्, पूर्ववत् सर्वे च ते वानराश्च तान् नागैः बबन्ध । बन्ध बन्धने लिट् । अथ लक्ष्मणः तत् इन्द्रजित्कर्म न सेहे न ममर्ष । षह मर्षणे लिट् ॥ ३ ॥

---

१. **'आकाशवर्त्मना निर्ययौ'** इति का.श्री. ।   २. **'नागैरिन्द्रारि–'**   ३. **'–रिस्तं बन्धं न सेहे'** इति का.श्री. ।

(सं.चं.) प्रथमं गरुडार्थं ततो मारुत्यर्थं द्विः बद्धवत् स्थितो भगवद्भावज्ञो लक्ष्मणः, अथ तृतीयं नागास्त्रप्रयोगमसहमान उत्तस्थौ ॥ ३–४ ॥

रामानुजोऽब्रवीद् रामं देवाहं ते प्रसादतः[१] ।
सूदयिष्यामि शक्रारिं ब्रह्मास्त्रेण क्षणादिति ॥ ४ ॥

(भा.दी.) **राम**ेति । रामानुजः लक्ष्मणः, हे देव, अहं ते तव प्रसादतः शक्रारिं इन्द्रजितम्, ब्रह्मणो यदस्त्रं तेन, ब्रह्मदेवताकास्त्रेणेत्यर्थः, क्षणः क्षणमात्रं तस्मात् सूदयिष्यामि संहरिष्यामि । षूद् क्षरणे लृट् । इति रामं प्रति अब्रवीत् ॥ ४ ॥

भयाददृश्ये ब्रह्मास्त्रं न मोक्तव्यं विपश्चिता[२] ।
[३]हन्यां शरेण शक्रारिमिति रामोऽब्रवीदिमम्[४] ॥ ५ ॥

(भा.दी.) **भया**दिति । विपश्चिता अस्त्रज्ञेन पुंसा । भयं भीतिस्तस्मात् अदृश्ये अन्तर्हिते पुरुषे, ब्रह्मास्त्रं न मोक्तव्यम्, यतः तस्मात् अहं शक्रारिं शरेण शरमात्रेण हन्याम्, इति श्रीरामः इमं लक्ष्मणं अब्रवीत् ॥ ५ ॥

(सं.चं.) अनभिमन्त्रितब्रह्मास्त्रेण केवलशरेण ॥ ५ ॥

रामो गरुडमारुत्योर्बलं दर्शयितुं पुरा ।
अस्त्रबद्धवदास्ते स्म तदोग्रं शरमाददे ॥ ६ ॥

(भा.दी.) एवं तर्हि रामेण पूर्वं कुतो वा इन्द्रजिदुपेक्षित इत्यत आह– **राम** इति । श्रीरामः पुरा गरुडश्च मारुतिश्च तयोर्बलं सामर्थ्यं दर्शयितुं अस्त्रबद्धवत् आस्ते स्म अतिष्ठत् । आस उपवेशने लट् । नतु अशक्त्येत्यर्थः । तदा तयोर्बलप्रकटनानन्तरसमये उग्रं शरं आददे जग्राह ॥ ६ ॥

(सं.चं.) तदा तृतीये नागास्त्रप्रयोगे ॥ ६–७ ॥

अद्राक्षीन्मामयं रामो घोरशक्तिरिति स्मरन् ।
पलायत[५] प्राणभयाद् रणं त्यक्त्वा स रावणिः ॥ ७ ॥

---

१. **'त्वत्प्रसादतः'** २. **'विपश्चिता स्वात्मानमेव हिनस्तीति जानता'** इति का.श्री. । ३. **'शरेण हन्यां शक्रारि–'** ४. **'–ऽब्रवीदिदम्'**
५. **'पलायितः'** । **'रामेण शरे मुक्ते प्राणांस्त्यक्ष्यामीति भीत्या रणं त्यक्त्वा पलायत पलायनमकरोत् । दुद्रावेति यावत्'** इति का.श्री. ।

(भा.दी.) अद्राक्षीदिति । घोरा शक्तिर्यस्य स तथा, अयं श्रीरामः मां अद्राक्षीत् अपश्यत् । दृशिर् प्रेक्षणे लुङ् । इति स्मरन् सः रावणिः, रणं युद्धं तत् त्यक्त्वा, प्राणानां भयं तस्मात्, प्राणपरित्यागनिमित्तकभयादित्यर्थः, पलायत पलायनमकरोत् ॥ ७ ॥

(सं.चं.) स्मरन् चिन्तयन् । स्मृ चिन्तायाम् । प्राणस्य जीवस्य देहविरहभयात् । प्राणस्य जीवितस्य वा हानिभयात् । 'प्राणस्तु प्रणवे जीवे जीविते परमात्मनि' इति यादवप्रकाशः ॥ ७ ॥

जय देव त्रिलोकैकभूषणारिविभीषण ।
इति देवस्तदाऽस्तावि देवैरिन्द्रारिकालनात्[1] **॥ ८ ॥**

(भा.दी.) जयेति । त्रयश्च ते लोकाश्च तेषां एकभूषण मुख्यालङ्कार, अरि(वि)भीषण शत्रुभयङ्कर, देव श्रीराम, जय । जि जये लोट् । इति देवः श्रीरामः, इन्द्रारेरिन्द्रजितः कालनं विद्रावणं तस्मात्, देवैः अस्तावि अस्तूयत । ष्टुञ् स्तुतौ लुङ् ॥ ८ ॥

(सं.चं.) इन्द्रारेरिन्द्रजितः कालनात् पलायनं प्रति कारणत्वात् । इन्द्रारिकालन इति पाठे इन्द्रारिं कालयति द्रावयतीतीन्द्रारिकालनो रामः । 'हाहाकृते प्रद्रुत इन्द्रशत्रौ रघूत्तमः शत्रुविभीषणत्वात् । विभीषणेत्येव सुरैरभिष्टुतो विज्ञानमस्त्रं त्वमुचत् स्वसैन्ये' (८.१६७) इति निर्णये ॥ ८–११ ॥

मृतकोपममालोक्य स्वसैन्यं करुणाकरः ।
ज्ञानास्त्रेण ज्ञानमूर्त्तिः क्षणमात्रादबूबुधत् ॥ ९ ॥

(भा.दी.) मृतकेति । करुणाकरः, ज्ञानं मूर्तिः शरीरं यस्य स तथोक्तः श्रीरामः, स्वसैन्यं मृतकस्य शवस्य उपमा यस्य तत् तथोक्तं तत् आलोक्य, ज्ञानाख्यं यदस्त्रं तेन, विज्ञानास्त्रेणेत्यर्थः, केवलं क्षणः क्षणमात्रं तस्मात् अबूबुधत् बोधयामास । बुधिर् बोधने लुङ् ॥ ९ ॥

उत्तस्थुरुन्नदन्तस्ते सालशैलशिलाधराः ।
हनूमन्तं पुरस्कृत्य लङ्कामभ्यद्रवन् रुषा ॥ १० ॥

(भा.दी.) उदिति । ते वानराः उन्नदन्तः सिंहनादं कुर्वन्तः सन्तः उत्तस्थुः । स्थातेर्लिट् । अथ, सालाश्च शैलाश्च शिलाश्च ताः धारयन्तीति तथोक्तास्तथा सन्तः, हनूमन्तं पुरस्कृत्य, रुट् कोपस्तया लङ्कां अभ्य-द्रवन् । द्रु गतौ लङ् ॥ १० ॥

---

१. '–कालनः'

रावणस्य नियोगेन रावणिः पुनरुत्कटः ।
ससैन्यः पश्चिमद्वारे रथी धन्वी विनिर्य्ययौ ॥ ११ ॥

(भा.दी.) रावणस्येति । उत्कटः उन्मत्तः रावणिः इन्द्रजित्, रावणस्य नियोग आज्ञा तेन, पुनः ससैन्यः सन्, रथोऽस्यास्तीति रथी सन्, धनुरस्यास्तीति धन्वी सन् पश्चिमं यद्द्वारं तस्मिन् विनिर्ययौ ॥ ११ ॥

हरयो हरिसङ्काशा युयुधुः शक्रशत्रुणा ।
सृष्ट्वा स्वमायया सीताकृतिं तां निजघान सः ॥ १२ ॥

(भा.दी.) हरय इति । हरेरिन्द्रस्य सङ्काशाः समानाः हरयः कपयः, शक्रशत्रुणा इन्द्रजिता युयुधुः युद्धं चक्रुः । इन्द्रजित् स्वमायया स्वशक्त्या सीताकृतिं सृष्ट्वा तां निजघान ॥ १२ ॥

(सं.चं.) हरिसङ्काशाः सिंहसदृशा विक्रमे ॥ १२ ॥

दुःखाज्ञानविहीनोऽपि रामः स्वानन्दवारिधिः ।
दर्शयामास दुःखादीन् नटवत् पटुचेष्टितः ॥ १३ ॥

(भा.दी.) दुःखेति । स्वरूपभूत आनन्दः स्वानन्दः, तेन वारिधिरिव वारिधिः, परिपूर्ण इत्यर्थः, श्रीरामः, दुःखं च अज्ञानं च ताभ्यां विहीनोऽपि रहितोऽपि, नटवत् नटपुरुषवत् पटु स्पष्टं चेष्टितं यस्य स तथा, दुःखादीन् दर्शयामास । यथा नटो रङ्गस्थळे स्वस्य दुःखाद्यभावेऽपि दुःखिवत् स्वात्मानं जनानां प्रदर्शयति तद्वदसुरजनमोहनायैव दुःखिवद् दर्शयामासेति भावः ॥ १३ ॥

(सं.चं.) पटु चतुरं चेष्टितं नटनं यस्य ॥ १३ ॥

शक्रशत्रोः परिजनान्[१] हत्वा मारुतिरुद्धतः ।
प्रचण्डो गण्डशैलेन[२] द्रावयामास रावणिम् ॥ १४ ॥

(भा.दी.) शक्रेति । उद्धतः, प्रचण्डः युद्धे समर्थः, मारुतिः हनुमान्, शक्रशत्रोः इन्द्रजितः परिजनान् भृत्यजनान् हत्वा गण्डशैलः स्थूलपाषाणस्तेन रावणिं द्रावयामास ॥ १४ ॥

---

१. 'शतक्रतो रिपुजनान्' २. 'प्रचण्डगण्डशैलेन'

(सं.चं.) गिरेः प्रच्युतः स्थूलः पाषाणो गण्डशैल इत्युच्यत इत्युक्तम् ॥ १४ ॥

भग्नदर्पो हनुमता जम्भारिद्विट् निकुम्भिलाम् ।
प्राप्य होतुं हुतवहं चक्रे परममुद्यमम् ॥ १५ ॥

(भा.दी.) भग्नेति । हनुमता भग्नो दर्पः अहङ्कारो यस्य स तथोक्तः, जम्भारिमिन्द्रं द्वेष्टीति जम्भारिद्विट् इन्द्रजित्, निकुम्भिलां निकुम्भिलानामिकामेकान्तस्थलीं प्राप्य, हुतवहं वह्निं होतुं परमं उद्यमो यत्नस्तं चक्रे ॥ १५ ॥

(सं.चं.) जम्भारेरिन्द्रस्य द्विट् शत्रुरिन्द्रजित् । निकुम्भिला निगूढमुपवनम् । 'ततो निकुम्भिला नाम लङ्कोपवनमुत्तमम्' (२५.२) इत्युत्तरकाण्डे ॥ १५ ॥

विभीषणोऽब्रवीद् रामं रावणिर्वध्यतां द्रुतम् ।
कृतहोमो ह्यवध्यः स्याद् ब्रह्मणोऽयं वरादिति ॥ १६ ॥

(भा.दी.) विभीषण इति । हि यस्मात् कृतो होमो येन स तथा, अयं रावणिः ब्रह्मणो वरस्तस्मात् अवध्यः स्यात्, तस्मात् द्रुतं यथा भवति तथा वध्यताम्, विभीषणः इति श्रीरामं प्रति अब्रवीत् ॥ १६ ॥

(सं.चं.) ब्रह्मणो वरादिति । 'तेन वीरेण तपसा वरदानात् स्वयम्भुवः । अस्त्रं ब्रह्मशिरः प्राप्तं कामगाश्च तुरङ्गमा । स एव किल सैन्येन प्राप्तः खलु निकुम्भिलाम् । यद्युत्तिष्ठेत् कृतं कर्म हतान् सर्वांश्च विद्धि नः । निकुम्भिलामसम्प्राप्तामकृताग्निं च यो रिपुः । त्वामाततायिनं हन्यादिन्द्रशत्रो स ते वधः । वरो दत्तो महाबाहो सर्वलोकेश्वरेण वै । इत्येवं विहितो राजन् वधस्तस्यैव धीमतः' (८५.१२–१५) इति च ॥ १६–१७ ॥

महेन्द्रारिं जिघांसन्तं लक्ष्मणं लक्ष्मणाग्रजः ।
आदिदेश हरीन्द्रांश्च समारुतिविभीषणान् ॥ १७ ॥

(भा.दी.) महेन्द्रेति । लक्ष्मणाग्रजः श्रीरामः महेन्द्रारिं इन्द्रजितं जिघांसन्तं हन्तुमिच्छावन्तं लक्ष्मणं आदिदेश आज्ञप्तवान् । दिश अतिसर्जने लिट् । मारुतिश्च विभीषणश्च ताभ्यां सहितांस्तान् हरीन्द्रांश्च आदिदेश ॥ १७ ॥

परादुतं नीचवृत्तिं रावणिं कूटयोधिनम् ।
अजिघांसुः स्वयं रामः प्रेषयामास लक्ष्मणम् ॥ १८ ॥

(भा.दी.) स्वयं कुतो हन्तुं न जगामेत्यत आह– **परे**ति । परादुतं पूर्वं यथार्थं शरग्रहणसमये विद्रुतम्, नीचा अभिचाररूपा वृत्तिर्वर्तनं यस्य स तथा तम्, कूटेन अदृश्यो भूत्वा सर्पैर्बन्धनादिरूपेण कपटेन योद्धुं शीलमस्यास्तीति तथा, (तम्) इमानि च निर्व्याजवीरेण श्रीरामेणावध्यत्वे हेतुगर्भाणि विशेषणानि । रावणस्यापत्यं पुमान् रावणिस्तं इन्द्रजितं स्वयं अजिघांसुः हन्तुमनिच्छावान् श्रीरामः लक्ष्मणं प्रेषयामास । इषु गतौ लिट् ॥ १८ ॥

(सं.चं.) कूटयोधिनं कपटयोधिनम् ॥ १८ ॥

प्राप्ता निकुम्भिलाप्रान्तं[१] ते विभीषणनीतितः ।
निजघ्नू रक्षसां सैन्यं नियुक्तं शक्रशत्रुणा ॥ १९ ॥

(भा.दी.) **प्राप्ता** इति । विभीषणस्य नीतिरुपायतस्या इति ततः, विभीषणप्रदर्शितमार्गादित्यर्थः, निकुम्भिलायाः निकुम्भिलाख्यायाः स्थल्याः प्रान्तः समीपस्तं प्राप्ताः ते कपयः शक्रशत्रुणा नियुक्तं युद्धायाऽज्ञप्तं रक्षसां सैन्यं सेना तत् निजघ्नुः ॥ १९ ॥

(सं.चं.) विभीषणस्य नीतिर्नयो नेतृत्वं वा । तामनुसृत्य । निगूढायाः निकुम्भिलायाः प्रान्तं प्राप्ताः ॥१९॥

ऋक्षवानरवीराणां वृक्षशैलप्रहारतः ।
लक्ष्मणस्य शरैश्चोग्रै रक्षसामभवत् क्षयः ॥ २० ॥

(भा.दी.) **ऋक्षे**ति । ऋक्षाश्च वानराश्च तेषु वीरास्तेषाम्, वृक्षाश्च शैलाः पर्वतास्ते च तेषां ये प्रहारास्तेभ्य इति ततः, लक्ष्मणस्य उग्रैः शरैश्च रक्षसां क्षयः अभवत् ॥ २० ॥

(सं.चं.) ऋक्षेत्यादि कर्णाटानां प्रियो द्वितीयाक्षरप्रासः ॥ २० ॥

ते विभीषणसौमित्र्योर्वाक्यतः कपयो रिपोः ।
होमविघ्नं स्फुटं चक्रुर्हसन्तो बहुहेळनैः[२] ॥ २१ ॥

---

१. **'निकुम्भिलोपान्तम्'** इति, **'निकुम्भिलोपान्ते'** इति च ।

२. **'बहु हेळनैः बहुविधाभिरवज्ञाभिः मलमूत्रोत्सर्जनादिभिरिति यावत्'** इति का.श्री. ।

(भा.दी.) त इति । विभीषणसौमित्र्योः वाक्यतः, ते कपयः रिपोः इन्द्रजितः होमस्य यो विघ्नस्तम्, बहूनि यानि हेळनानि गुदप्रदर्शनकुण्डोन्मूलनादीनि अवज्ञानानि तैः हसन्तः सन्तः स्फुटं यथा भवति तथा चक्रुः ॥ २१ ॥

(सं.चं.) विभीषणसौमित्र्योः । वयसाऽभ्यर्हित इति विभीषणः पूर्वमुक्तः । लघ्वक्षरत्वाच्च । होमं विहतेत्यादेशरूपाद् वाक्यतः । हेळनमवज्ञानम् । 'हेडृ अनादरे' इति धातुपारायणिकाः । तदा डस्य ळः । 'हेळ अनादरे' इत्यपि प्रतनाः पेठुः ॥ २१ ॥

कपिभिः कोपितस्तत्र रावणी रणदुर्म्मदः[1] ।
सालजालादथोत्पत्य रथी धन्वी व्यदृश्यत ॥ २२ ॥

(भा.दी.) कपिभिरिति । अथ तत्र निकुम्भिलायां कपिभिः कोपितः, कोपं प्रापितः, रणे दुर्मदो यस्य स तथा रावणिः, सालानां सर्जवृक्षाणां जालं समूहस्तस्मादुत्पत्य, कपीनां वचनादिकं श्रुत्वा स्थातुमशक्ततया ऊर्ध्वमुल्लङ्घ्य रथी सन् धन्वी सन् व्यदृश्यत ॥ २२ ॥

(सं.चं.) रणे दुर्मदः मिथ्याभिमानवान् । सालजालात् निकुम्भिलाया वृक्षस्तोममध्यात् । 'वृक्षान्धकारान्निर्गत्य जातक्रोधः स रावणिः । आरुरोह रथं सज्जं पूर्वयुक्तं सुसंयतम्' (१६–१५) इति च । व्यदृश्यत कपिभिः ॥ २२ ॥

रक्तास्यनयनः क्रुद्धो भिन्नाञ्जनचयोपमः ।
कपीनद्रावयद्[2] बाणैर्दण्डपाणिरिवापरः ॥ २३ ॥

(भा.दी.) रक्तेति । आस्यं च नयने च आस्यनयनानि रक्तानि तानि यस्य स तथोक्तः, क्रुद्धः, भिन्नः सम्भिन्नः संसक्तः, पुञ्जीकृत इति यावत्, तादृशो योऽञ्जनचयस्तस्य उपमा यस्य स तथोक्तः, स इन्द्रजित् अपरः अन्यः दण्डपाणिरिव बाणैः कपीन् अद्रावयत् । द्रु गतौ लङ् ॥ २३ ॥

(सं.चं.) अपरो दण्डपाणिरिव यमइव रक्तास्यनयनः क्रुद्धः भिन्नाञ्जनचयोपमश्च । आस्यं च नयने च आस्यनयनम् । रक्तमास्यनयनं यस्य । आस्यमित्या कण्ठादा ललाटमुच्यते । 'ಮೋರೆ' इति भाषायाम् । भिन्न एकत्र पुञ्जीकृतोऽञ्जनचयः । 'भिन्नमन्यार्थवचने सङ्गते दारिते स्फुटे' इति विश्वप्रकाशः । 'स भीमकार्मुकशरः कृष्णाञ्जनचयोपमः । रक्तास्यनयनो भीमो बभौ मृत्युरिवान्तकः' (१६) इति च ॥२३–४॥

१. **'रणदुर्मदः रणं करोमीति दुष्टाहङ्कारवान्'** इति का.श्री. ।
२. **'कपीन् व्यद्रावयद्–'**

कपीनां कालनं दृष्ट्वा कुपितो मारुतात्मजः ।
राक्षसीमक्षिणोत् सेनां वृक्षवर्षैर्निरन्तरैः ॥ २४ ॥

(भा.दी.) कपीनामिति । कपीनां कालनं विद्रावणं, तत् दृष्ट्वा कुपितः मारुतात्मजः, राक्षसीं रक्षसः सम्बन्धिनीं सेनाम्, निर्गतमन्तरं व्यवधानं येषां तथा तैः वृक्षवर्षैः अक्षिणोत् । क्षिणु हिंसायां लङ् ॥२४॥

जाज्वल्यमानः[१] कोपेन कालज्वलनसप्रभम् ।
अभ्यद्रवद्धनूमन्तं शरवर्षेण रावणिः ॥ २५ ॥

(भा.दी.) जाज्वल्येति । कोपः क्रोधस्तेन जाज्वल्यमानः पुनःपुनर्ज्वलमानः[२] रावणिः, कालो मृत्युः स च ज्वलनश्च तयोः समाना प्रभा यस्य स तथा तम्, प्रळयकालाग्निसमप्रभमिति वा, तं हनूमन्तं शराणां वर्षं तेन अभ्यद्रवत् ॥ २५ ॥

(सं.चं.) कालज्वलनः प्रळयकालानलः । 'स राक्षसनां तत् सैन्यं कालाग्निरिव निर्दहन्' (१६.१९) इति च ॥ २५ ॥

परश्वधान् पट्टसांश्च[३] खड्गानन्यायुधान्यपि ।
क्षणमात्रेण चिक्षेप शक्रशत्रुर्हनूमते ॥ २६ ॥

(भा.दी.) परश्वधानिति । शक्रशत्रुः परश्वधान् परशून् पट्टसान् खड्गांश्च अन्यायुधान्यपि केवलं क्षणः क्षणमात्रं तेन हनूमते चिक्षेप मुमोच । क्षिप प्रेरणे लिट् ॥ २६ ॥

(सं.चं.) 'पट्टसो लोहदण्डो यस्तीक्ष्णधारः क्षुरोपमः' इति यादवप्रकाशः । 'पट्टिशः' इत्यर्वाचीनाः ॥२६॥

यद्यदायुधमत्युग्रं प्राक्षिपद् राक्षसात्मजः ।
तच्छित्त्वाऽऽदाय[४] हस्तेन हनूमान् हसितोऽब्रवीत् ॥ २७ ॥

(भा.दी.) यद्यदिति । राक्षसात्मजः, अत्यन्तमुग्रं अत्युग्रं तत् यद्यत् आयुधं प्राक्षिपत् । क्षिप प्रेरणे लङ् । हनूमान् तत्तत् आयुधं हस्तः करस्तेन आदाय परिगृह्य छित्वा, सञ्जातो हासोऽस्यास्तीति हसितः,(?) 'तदस्य सञ्जातं तारकादिभ्य इतच्' (अ.सू.५.२.३६) इतीतच्, हासं कुर्वन्नित्यर्थः, अब्रवीत् ॥ २७ ॥

---

१. **'जाज्वल्यमानम्'** २. **'पुनःपुनर्ज्वलन्'** इति युक्तम् ।
३. **'पट्टिशांश्च'** ४. **'तत्तदादाय'**

(सं.चं.) हसितोऽब्रवीत् हसन्नब्रवीदित्यर्थः । 'आदिकर्मणि क्तः कर्तरि च' (अ.सू.३.४.७१) इति हि पाणिनिः ॥ २७ ॥

यद्याखण्डलशत्रुस्त्वं पण्डको[1] नासि वा यदि ।
एह्येहि[2] मारुतिकराज्जीवन् पाप[3] न मोक्ष्यसे ॥ २८ ॥

(भा.दी.) यदीति । त्वं यदि आखण्डलशत्रुः इन्द्रजित् असि । यदि षण्डको वा नपुंसको वा न असि । तर्हि मां प्रति एहि युद्धार्थमागच्छ । इण् गतौ लोट् । हे पाप इन्द्रशत्रो, त्वं मारुतेर्हनुमतो यः करस्तस्मात् जीवन् सन् न मोक्ष्यसे । जीवन् सन् परावृत्य न गमिष्यसीत्यर्थः । मुच्लृ मोक्षणे लृट् ॥ २८ ॥

(सं.चं.) आखण्डलस्य इन्द्रस्य शत्रुः । 'आखण्डलस्तुराषाट् सुत्रामा गोत्रभित् शुनासीरः' इति हलायुधः । पण्डकः क्लीबः । 'क्लीबः पण्डः षण्डो नपुंसकम्' इति यादवप्रकाशः । मारुतिकरादिति परोक्षनिर्देशोऽवधारणार्थः ॥ २८ ॥

बाहुभ्यामथ बाणैर्वा माययाऽमाययाऽथवा[4] ।
मद्वेगं सहसे चेत् त्वं कीर्त्तिं पूर्वामवाप्स्यसि ॥ २९ ॥

(भा.दी.) बाहुभ्यामिति । चेद्यदि त्वं मम वेगो मद्वेगस्तम्, बाहू हस्तौ ताभ्याम्, अथवा बाणैः, मायया वा अमायया वा, सहसे मर्षयसि । षह मर्षणे लट् । तर्हि पूर्वां कीर्तिं इन्द्रजित् इत्यादिकीर्तिं अवाप्स्यसि ॥ २९ ॥

(सं.चं.) पूर्वां इन्द्रशत्रुरिति कीर्तिमवाप्स्यसि सार्थकं करोषि ॥ २९ ॥

तस्येत्युच्चैर्ब्रुवाणस्य बलं जानन् बलारिजित् ।
अपक्रम्याभिमुखतः प्रययावपरान् युधे ॥ ३० ॥

(भा.दी.) तस्येति । इति उच्चैः ब्रुवाणस्य वदतः तस्य हनुमतः बलं तत् जानन्, बलारिजित् इन्द्रजित्, अभिमुखतः अपक्रम्य अपसृत्य, युध् युद्धं तस्यै अपरान् वानरान् प्रययौ ॥ ३० ॥

---

१. **'षण्डको–'** इति वि.ती.पाठः स्यात् ।
२. **'मामेहि '** इति वि.ती.पाठः ।
३. **' –ज्जीवन् यावन्न मो–'**
४. **'बाहुभ्यामथ वा बाणैर्मायया वाऽप्यमायया'**

(सं.चं.) बलारिरिन्द्रः । 'वृत्रारिर्बलसूदनः शतमखः' इति च ॥ ३० ॥

एतस्मिन्नन्तरे प्राह[1] लक्ष्मणं स विभीषणः ।
त्वरस्व[2] हन्तुमिन्द्रारिं पुरा कर्म्मकृतेरिति ॥ ३१ ॥

(भा.दी.) **एतस्मिन्नि**ति । एतस्मिन् अन्तरं मध्यं तस्मिन् सः विभीषणः इन्द्रारिं हन्तुं कर्मकृतेः अभिचारलक्षणकर्मकरणात् पुरा पूर्वं त्वरस्व वेगं कुरु । ञि त्वरा सम्भ्रमे लोट् । इति लक्ष्मणं प्रति प्राह ॥ ३१ ॥

(सं.चं.) पुरा होमकर्मकृतेः । 'कृतहोमो ह्यवध्यः स्यात्' इति ह्युक्तम् ॥ ३१ ॥

अभ्यद्रवच्छक्रशत्रुं[3] सौमित्रिः सविभीषणः ।
मण्डलीकृतकोदण्डो मण्डयन् कपिमण्डलम् ॥ ३२ ॥

(भा.दी.) **अभी**ति । सविभीषणः विभीषणसहितः सौमित्रिः, मण्डलीकृतं कोदण्डं धनुर्येन तथा सन्, कपीनां मण्डलं समूहस्तत् मण्डयन् अलङ्कुर्वन् सन्, शक्रशत्रुं रिपुं अभ्यद्रवत् ॥ ३२ ॥

(सं.चं.) मण्डलीकृतकोदण्डः ज्याबन्धेन नमितकोदण्डः । 'कार्मुकं तु चतुर्हस्तं कोदण्डं त्र्यङ्गुलं विना' इति च । मण्डयन् हर्षयन् । 'मडि भूषायां हर्षे च' ॥ ३२ ॥

ज्ञातीन् सन्त्यज्य [4]नीचांस्त्वं पितृव्य कथमाश्रितः ।
इत्यब्रवीदिन्द्ररिपुः प्रहसंस्तं विभीषणम् ॥ ३३ ॥

(भा.दी.) **ज्ञातीनि**ति । हे पितृव्य, पितू रावणस्य भ्रातः विभीषण, 'पितुर्भ्राता पितृव्यः स्यात्' इत्यमरः, त्वं ज्ञातीन् बन्धून् सन्त्यज्य, नीचान् मनुष्यत्वेनावरान् श्रीरामादीन् कथं आश्रितः? इन्द्ररिपुः प्रहसन् सन् तं विभीषणं प्रति इति अब्रवीत् ॥ ३३ ॥

(सं.चं.) पितृव्य पितू रावणस्यानुज । 'पितृव्याः सहजाः पितुः' इति यादवप्रकाशः । नीचान् रामपक्षीयान् कथमाश्रितः । प्रहसन् परिहसन् ॥ ३३ ॥

---

१. **'स्माऽह'** इति वि.ती.पाठः ।
२. **'यतस्व'**
३. **'–च्छक्रजितम्'**
४. **'नीचान् कपीन् कथं केन प्रकारेण आश्रितोऽसि'** इति का.श्री. ।

पुत्र यूयं नरकिणां नीचानां सख्यमाप्स्यथ ।
अहं विश्वेशदासः स्यामित्यूचे तं विभीषणः ॥ ३४ ॥

(भा.दी.) पुत्रेति । हे पुत्र, नीचानाम्, नरक एषामस्तीति नरकिणस्तेषाम्, नित्यनरकं प्राप्तानामित्यर्थः, सख्युर्भावः सख्यं आप्स्यथ प्राप्स्यथ । आप्लृ व्याप्तौ लृट् । एतद्युद्धे मरणानन्तरमन्धं तमः प्राप्य तत्रत्य-नीचैर्भवतां सख्यं समीप्तप्राप्तमिति भावः । अहं विश्वेशदासः श्रीरामदासः स्याम् । इति तं इन्द्रजितं विभीषण ऊचे ॥ ३४ ॥

(सं.चं.) नांह नीचानाश्रितः, किन्तु त्वमेवेत्याह विभीषणः–पुत्र । यूयं त्वं च त्वदनुगा राक्षसाश्च । नरकिणां नरके पतितानां सख्यमाप्स्यथ । त्वमपि सद्यो नरके पतिष्यसि, पतित्वा नरकिभिः सख्यमाप्स्यसि । त्वदनुगास्तत्रापि त्वामनुगमिष्यन्तीत्यर्थः । सम्प्रत्यपि तादृशैर्नीचैः सख्यमापिथेति यावत् । सख्युर्भावः सख्यम्, सखित्वम् । 'सख्युर्यः' (५.१.१२६) इति हि पाणिनिः ॥ ३४–५ ॥

लक्ष्मण त्वं[1] मुमूर्षुश्चेत् तिष्ठ गच्छ न चेदिति ।
उवाचाथ धनुर्द्धुन्वन् रावणी रामसोदरम् ॥ ३५ ॥

(भा.दी.) लक्ष्मणेति । अथ रावणिः धनुः धुन्वन् सन्, लक्ष्मण, चेद् यदि त्वं मुमूर्षुः मर्तुमिच्छावान् तर्हि तिष्ठ । न चेत् मुमूर्षुर्न चेत् तर्हि मत्पुरतोऽन्यत्र गच्छ । इति वचः रामसोदरं रामभ्रातरं लक्ष्मणं प्रति उवाच ॥ ३५ ॥

वाचा मायाविनां वीर्य्यं वीराणां कर्म्मणा ननु ।
क्लीब तिष्ठ क्षणमिति स्पष्टमाचष्ट लक्ष्मणः ॥ ३६ ॥

(भा.दी.) वाचेति । हे क्लीब विक्रमरहित, माया एषामस्तीति मायाविनस्तेषां वाचा वाङ्मात्रेण वीर्यं पराक्रमः, वीराणां वीर्यं कर्मणा ननु कर्मणैव, नतु वाचा, क्षणः क्षणमात्रं तं मत्पुरतस्तिष्ठ । इति वचः स्पष्टं यथा भवति तथा इन्द्रजितं लक्ष्मणः आचष्ट । चक्षिङ् व्यक्तायां वाचि लङ् ॥ ३६ ॥

(सं.चं.) वीराणां कर्मणा ननु । 'कार्याणां कर्मणा पारं यो गच्छति स बुद्धिमान्'८८.१३) इति च ॥ ३६ ॥

---

१. 'लक्ष्मणस्त्वम्'

अविद्ध्यत् पञ्चविंशद्भिर्विशिखैरथ लक्ष्मणम्[१] ।
पौलस्त्यमष्टादशभिर्नदन् पौलस्त्यनन्दनः ॥ ३७ ॥

(भा.दी.) अविध्यदिति । अथ लक्ष्मणः पञ्चाधिका विंशतः पञ्चविंशतस्तैः विशिखैः शरैः, पुलस्त्यस्य गोत्रे भवः पौलस्त्यस्तं इन्द्रजितं अविध्यत् अताडयत् । व्यथ ताडने लङ् । पौलस्त्यनन्दनः रावणपुत्रः नदन् सन् अष्टौ अधिकाः दश अष्टादश तैः शरैः अविध्यदित्यन्वयः ॥ ३७ ॥

(सं.चं.) पञ्चविंशद्भिः पञ्चविंशत्या विशिखैर्लक्ष्मणमविध्यत् पौलस्त्यनन्दनः रावणात्मजः । 'अविध्यत् पञ्चविंशत्या' इत्येव स्यादपि मूलपाठः । सिंहनादं नदन् । पौलस्त्यं विभीषणं चाष्टादशभिर्विशिखैरविध्यत् सम्प्रति रामायणे नेदं पठ्यते अर्थान्तरं तु न स्वरसम् ॥ ३७ ॥

पुनः शरशतेनाऽशु शक्रशत्रुर्विदार्य्य तौ ।
उवाच परुषं वाक्यं ततश्चुक्रोध लक्ष्मणः ॥ ३८ ॥

(भा.दी.) पुनरिति । शक्रशत्रुः पुनः शराणां शतं तेन तौ लक्ष्मणविभीषणौ आशु विदार्य, परुषं क्रूरं वाक्यं तत् उवाच । ततः लक्ष्मणः चुक्रोध । क्रुध कोपे लिट् ॥ ३८ ॥

(सं.चं.) तौ लक्ष्मणविभीषणौ ॥ ३८–४१ ॥

सौमित्रिः पञ्च नाराचानमित्रोरस्यमज्जयत्[२] ।
त्रीन् बाणानुद्धणांस्तस्मै व्यमुचद्[३] रावणात्मजः ॥ ३९ ॥

(भा.दी.) सौमित्रिरिति । सौमित्रिः अमित्रोरसि शत्रुवक्षसि पञ्च नाराचान् शरविशेषान् अमज्जयत् निमग्नानकरोत् । टु मस्जो शुद्धौ लङ् । रावणात्मजः उद्धणान् भयङ्करान् त्रीन् बाणान् तस्मै लक्ष्मणाय व्यमुचत् । मुच्लृधातोर्लुङ् ॥ ३९ ॥

धरायां धन्विनां श्रेष्ठौ वरिष्ठावस्त्रवेदिनाम् ।
चिरं चित्रं युयुधतुस्तौ रामानुजरावणी ॥ ४० ॥

---

१. **'लक्ष्मणः'** इति वि.ती.पाठः । का.श्री. टीकायामपि तथा–**'अथ लक्ष्मणः पञ्चविंशद्भिः पञ्चविंशतिसङ्ख्याकैः विशिखैः शरैः पौलस्त्यं पुलस्त्यगोत्रोत्पन्नं इन्द्रजितमविध्यत् । अताडयत् । नदन् ध्वनिं कुर्वन् पौलस्त्यनन्दनः पुलस्त्यपौत्रस्य रावणस्य पुत्रः इन्द्रजित् अष्टादशभिर्विशिखैः लक्ष्मणमविध्यत्'** इति । २. **'–रस्यमोचयत्'** इति, **'–रस्यताडयत्'** इति च । ३. **'व्यमुञ्चद्–'**

(भा.दी.) धरायामिति। धरायां धनुः एषामस्तीति धन्विनस्तेषां मध्ये श्रेष्ठौ, अस्त्राणि ब्राह्मादीनि विदन्तीति तथोक्तास्तेषां मध्ये वरिष्ठौ, तौ रामानुजरावणी चिरं चित्रं यथा भवति तथा युयुधतुः ॥ ४० ॥

ततः शरशतेनाऽशु शक्रशत्रुं स लक्ष्मणः ।
अदारयदुदारात्मा विषण्णोऽभूत् स रावणिः ॥ ४१ ॥

(भा.दी.) तत इति। ततः उदार उत्कृष्ट आत्मा मनो यस्य स तथोक्तः मनस्वीत्यर्थः, सः लक्ष्मणः शक्रशत्रुं शराणां शतं तेन आशु अदारयत् । दॄ विदारणे लङ् । सः रावणिः विषण्णः भीतः अभूत् ॥ ४१ ॥

इदमन्तरमिन्द्रारेर्वधायाऽशु प्रयत्यताम् ।
इत्यूचे नीतिसम्पन्नो लक्ष्मणं स विभीषणः ॥ ४२ ॥

(भा.दी.) इदमिति । इन्द्रारेः वधः संहारस्तस्मै इदं अन्तरं अवकाशः, आशु प्रयत्यताम् प्रयत्नः क्रियताम् । यती प्रयत्ने लोट् । नीतिसम्पन्नः नीतियुक्तः सः विभीषणः लक्ष्मणं इति वचः ऊचे ॥ ४२ ॥

(सं.चं.) इदमन्तरम्, अयमवकाशः । नीतिसम्पन्नः युद्धतन्त्रनिपुणः ॥ ४२ ॥

स सौमित्रिरमित्राय शरान् शिखिशिखोपमान् ।
मुमोच स दृढं विद्धो मुहूर्त्तं मूर्च्छितोऽपतत्[१] ॥ ४३ ॥

(भा.दी.) स इति। सः सौमित्रिः, अमित्रः शत्रुस्तस्मै, 'द्विट् विपक्षाहितामित्र–' इत्यमरः, शिखिनो वह्नेः शिखा ज्वाला तस्या उपमा येषां ते तथा तान् शरान् मुमोच । मुच्लृ धातोर्लिट् । दृढं यथा भवति तथा विद्धः स इन्द्रजित्, मुहूर्तो मुहूर्तकालस्तं मूर्च्छितः अपतत् ॥ ४३ ॥

(सं.चं.) शिखिशिखोपमान् वह्निज्वालोपमान् । शिखिशिखा उपमा येषां तान् । एवमन्यत्रापि । 'सप्तार्चिर्बहुलः शिखी हुतवहो वैश्वानरोऽग्निर्वसुः' इति च ॥ ४३–७ ॥

सञ्ज्ञामवाप्येन्द्ररिपुः [२]कोपसंरक्तलोचनः ।
तूर्णं शरशतं तस्मै लक्ष्मणाय मुमोच सः ॥ ४४ ॥

---

१. 'मूर्च्छितोऽभवत्' २. 'कोपात् संरक्त –'

(भा.दी.) सञ्ज्ञामिति । सः इन्द्ररिपुः सञ्ज्ञां अवाप्य, कोपेन संरक्ते लोचने यस्य स तथा सन्, शराणां शतं तत् तूर्णं यथा भवति तथा तस्मै लक्ष्मणाय मुमोच ॥ ४४ ॥

पुनः शरशतेनाऽशु निर्बिभेद विभीषणम् ।
वानरांश्च नराशेन्द्रः शरैराशीविषोपमैः ॥ ४५ ॥

(भा.दी.) पुनरिरिति । नराशेन्द्रः राक्षसेन्द्रः इन्द्रजित्, पुनः शराणां शतं तेन विभीषणम्, वानरांश्च, आशीविषस्य सर्पस्य उपमा येषां ते तथा तैः शरैः आशु निर्बिभेद ॥ ४५ ॥

प्रहस्य लक्ष्मणो वीरो नैतत् किञ्चिदिति ब्रुवन् ।
शरैर्विदारयामास कवचं शक्रवैरिणः ॥ ४६ ॥

(भा.दी.) प्रहस्येति । वीरः लक्ष्मणः प्रहस्य, एतत् त्वत्कृतं कर्म किञ्चित् कार्यकरं च न इति ब्रुवन् सन्, इन्द्रजित्पराक्रमं तुच्छीकुर्वन् सन्नित्यर्थः, शरैः शक्रवैरिणः कवचं वर्म तत् विदारयामास निर्बिभेद । दॄ विदारणे लिट् ॥ ४६ ॥

शूरः शरसहस्रेण मेघनादोऽपि लक्ष्मणम् ।
सञ्छाद्य[१] तस्य कवचं सञ्छिद्यापातयद् भुवि ॥ ४७ ॥

(भा.दी.) शूर इति । शूरः मेघनादः मेघनादनामकोऽपि, इन्द्रजितो महेन्द्रविजयात् पूर्वं मेघनाद इति नाम रामायणे प्रसिद्धम्, शराणां सहस्रं तेन लक्ष्मणं सञ्छाद्य, तस्य लक्ष्मणस्य कवचं वर्म तत् सञ्छिद्य (भुवि) अपातयत् ॥ ४७ ॥

दिशो दश शरव्रातैश्छादयामासतुस्तदा ।
कृतप्रतिकृतोदारौ तौ रामानुजरावणी ॥ ४८ ॥

(भा.दी.) दिश इति । तदा कृतस्य कर्मणः प्रतिकृतं प्रतिकर्म तस्मिन् उदारौ समर्थौ तौ रामानुजरावणी शराणां व्राताः समूहास्तैः दश दिशः च्छादयामासतुः । च्छद आवरणे लिट् ॥ ४८ ॥

---

१. 'आविध्य तस्य'

(सं.चं.) कृतस्य यत् प्रतिकृतम्, प्रतीकार इत्येतत्, तत्र उदारौ विदग्धौ, ख्यातौ वा । कृते प्रतिकृते चोदाराविति वा ॥ ४८ ॥

सौष्ठवे लाघवे वीर्य्ये शौर्य्ये वेगे पराक्रमे ।
अन्योन्यमतिशिश्याते धन्विनां प्रवरावुभौ ॥ ४९ ॥

(भा.दी.) सौष्ठव इति । सौष्ठवं सुष्ठुत्वं तस्मिन्, लाघवं लघुत्वं तस्मिन्, वीर्यं बलं तस्मिन्, 'वीर्यं बलं प्रभावे च' इत्यमरः, शौर्यं शूरत्वं तस्मिन्, वेगो जवस्तस्मिन्, पराक्रमः पराभिभवशक्तिस्तस्मिन्, धन्विनां धानुष्काणां मध्ये प्रवरौ उभौ लक्ष्मणेन्द्रजितौ अन्योन्यं अतिशिश्याते अतिक्रमं कुरुतः । शीङो लिट् ॥ ४९ ॥

(सं.चं.) सौष्ठवं सलीलता, अनायासेन शत्रुनिग्रहणपाटवम् । लाघवं क्षिप्रप्रतिक्रिया । परैरनभिभाव्यत्वं वीर्यम् । पराभिभवनशक्तिः शौर्यम् । प्रयुक्तानामस्त्राणामधिकवेगिता वेगः । परान् प्रत्याक्रमणप्रावण्यं पराक्रमः ॥ ४९ ॥

[२]आक्तौ रक्तेन महता धातुनेव धराधरौ ।
अयुद्ध्यतामस्त्रशस्त्रैरस्त्रशस्त्रविशारदौ ॥ ५० ॥

(भा.दी.) रक्ताविति । धातुर्धातुरसस्तेन धराधराविव पर्वताविव महता रक्तेन रक्तौ रक्तवर्णौ, अस्त्राणि ब्राह्मादीनि तानि, शस्त्राणि खड्गाद्यायुधानि तानि च, तेषु विशारदौ निपुणौ लक्ष्मणेन्द्रजितौ अस्त्रशस्त्रैः अयुध्यतां युद्धं चक्रतुः ॥ ५० ॥

(सं.चं.) रक्तेन रुधिरेण आक्तौ लिप्तौ । धातुना गैरिकेणेव धराधरौ पर्वतौ ॥ ५०–३ ॥

अस्मिन् हते हतं सर्वं रावणस्यातुलं बलम् ।
त्वरध्वं[३] हरयो योद्धुमित्युवाच विभीषणः ॥ ५१ ॥

(भा.दी.) अस्मिन्निति । अस्मिन्निन्द्रजिति हते सति, रावणस्य सर्वं अतुलं असदृशं बलं सैन्यं हतं संहृतम् । हे हरयः कपयः, योद्धुं त्वरध्वं वेगं कुरुध्वम् । ञि त्वरा सम्भ्रमे लोट् । विभीषणः इति वचः कपीन् प्रति उवाच ॥ ५१ ॥

---

१. 'रक्तौ रक्तेन' इति वि.ती.पाठः । २. 'चरध्वम्' ३. 'रक्षसां क्षय–'

(सं.चं.) हतं सर्वम् । 'अस्सिंश्च पापे राक्षसे रणमूर्धनि । रावणं वर्जयित्वा तु शेषमस्य बलं हतम्' (८९.९) इति च ॥ ५१ ॥

विभीषणस्य वचनात् कपयो जाम्बवन्मुखाः ।
दन्तैर्न्नखैश्च वृक्षैश्च राक्षसान् क्षयमानयन् ॥ ५२ ॥

(भा.दी.) विभीषणस्येति । विभीषणस्य वचनं वाक्यं तस्मात्, जाम्बवान् मुखं प्रधानः येषां ते तथा कपयः, दन्ता रदनास्तैः, नखा नखरास्तैः, वृक्षैश्च, राक्षसान् क्षयो नाशस्तं आनयन् ॥ ५२ ॥

विभीषणस्यानुचरा विभीषण उत स्वयम् ।
भीषणं विदधुर्य्युद्धं भीषणैरिन्द्रजिद्भटैः ॥ ५३ ॥

(भा.दी.) विभीषणस्येति । विभीषणस्यानुचराश्चत्वारः, स्वयं विभीषण उत विभीषणश्च, भीषणैः इन्द्रजितो भटास्तैः, भीषणं भयङ्करं तत् युद्धं विदधुः चक्रुः ॥ ५३ ॥

रक्षसां विक्रमं वीक्ष्य भीमः[१] प्राभञ्जनिः प्रभुः ।
सालेन[२] तान् जघानोग्रान् सौमित्रेर्बृंहयन् बलम् ॥ ५४ ॥

(भा.दी.) रक्षसामिति । प्रभुः प्राभञ्जनिः प्रभञ्जनपुत्रः हनुमान्, रक्षसां भीमो भयङ्करस्तं विक्रमं पराक्रमं वीक्ष्य, सौमित्रेः बलं तत् बृंहयन् वर्धयन् सन्, उग्रान् तान् राक्षसान् सालो सर्जवृक्षस्तेन जघान ॥ ५४ ॥

(सं.चं.) प्राभञ्जनिर्हनूमान् । सालेन वृक्षेण ॥ ५४ ॥

चतुर्भिश्चतुरो वाहान् कराळान् काळवर्चसः ।
शरैर्विव्याध सौमित्रिः सूतं चान्येन वैरिणः ॥ ५५ ॥

(भा.दी.) चतुर्भिरिति । सौमित्रिः चतुर्भिः शरैः, काळं कृष्णं वर्चो येषां ते तथा तान्, कराळान् क्रूरान्, दन्तुरानिति वा, 'कराळो दन्तुरे तुङ्गे विशाले विकृतेऽपिच' इति वैजयन्ती, चतुरः चतुःसङ्ख्याकान् वैरिणः शक्रजितः (वाहान्) हयान् विव्याध । अन्येन शरेण सूतं सारथिं च विव्याध जघ्ने । व्यध ताडने लिट् ॥ ५५ ॥

---

१. **'भीमं प्राभञ्जनिः'** इति.वि.ती.पाठः ।   २. **'सर्जेन तान्'**

(सं.चं.) काळवर्चसः कृष्णवर्णान् । 'अथ राक्षससिंहस्य कृष्णान् कनकभूषणान् । शरैश्चतुर्भिः सौमित्रिर्विव्याध चतुरो हयान् । ततोऽपरेण भल्लेन शितेन निशितेन च । महेन्द्राशनिकल्पेन सूतस्य विचरिष्यतः । लाघवाद् राघवः श्रीमान् शिरः कायादपाहरत्' (९०.३९–४१) इति च ॥ ५५ ॥

ववर्षाथोद्धणान् बाणान् पदाती रावणात्मजः ।
शरैरशनिकल्पैस्तं[1] लक्ष्मणः [2]श्रममानयत् ॥ ५६ ॥

(भा.दी.) ववर्षेति । अथ रावणात्मजः पदातिः सन्, भूमाववस्थितः सन् इत्यर्थः, उद्धणान् शरान् बाणान् ववर्ष । वृष सेचने लिट् । अशनेः वज्रस्य सङ्काशाः समानास्तैः शरैः लक्ष्मणः तं इन्द्रजितं, श्रमो ग्लानिस्तं आनयत् आगमयत् ॥ ५६ ॥

(सं.चं.) पदाती रथभङ्गेन पादचारी । श्रमं खेदमानयत् । श्रमवन्तं चकार ॥ ५६ ॥

मण्डोदरीसुतश्चण्डो विरथः पुरमाविशत् ।
रथमारुह्य सन्नद्धः पुनरागाद् रणाजिरम् ॥ ५७ ॥

(भा.दी.) मण्डोदरीति । विरथः चण्डः क्रूरः, मण्डोदर्याः मण्डोदरीनाम्न्याः रावणमहिष्याः सुतः इन्द्रजित्, पुरं लङ्कापुरं तत् आविशत् । पुनः रथः स्यन्दनस्तं आरुँह्य, सन्नद्धः युद्धसन्नाहोपेतः सन्, रणस्य अजिरं अङ्गणं तत् आगात् ॥ ५७ ॥

(सं.चं.) पूर्वं च्छिन्नकवचतया पुनः सन्नद्धः कवचितः, अन्यं रथमारुह्य, रणाजिरं रणाङ्गणम् ॥ ५७ ॥

स रावणिर्बाणगणैर्निशातैः प्लवङ्गमान् भङ्गमुपानिनाय ।
चिच्छेद रामावरजः शरेण शक्रद्विषः कार्म्मुकमुग्रकर्म्मा[3] ॥ ५८ ॥

(भा.दी.) स इति । सः रावणिः, निशातास्तेजितास्तैः बाणगणैः, प्लवङ्गमान् भङ्गः पराभवस्तं उपानिनाय प्रापयामास । उग्रं धनुः यस्य स तथोक्तः रामावरजः शरेण शक्रद्विषः कार्मुकं तत् चिच्छेद ॥ ५८ ॥

(सं.चं.) स रावणिरित्यादीनि त्रीण्युपजातिबद्धानि । निशातैर्निशितैः । शत्रूणामुग्रं कर्मास्येत्युग्रकर्मा ॥ ५८–९ ॥

---

१. **'–रशनिसङ्काशैर्लक्ष्मणः'** इति वि.ती.पाठ इति भाति । २. **'शममानयत्'** ३. **'कार्मुकमुग्रधन्वा'** इति वि.ती.पाठः ।

क्षणेन चापान्तरमाददे स क्षणेन चिच्छेद[१] स लक्ष्मणस्तत् ।
वक्षो विपक्षस्य बिभेद चाऽशु स पञ्चभिः पत्रिभिरत्र वीरः ॥ ५९ ॥

(भा.दी.) क्षणेनेति । सः इन्द्रजित्, क्षणः क्षणमात्रं तेन, अन्यच्चापं चापान्तरं तत् आददे जग्राह । सः लक्ष्मणः तच्चापं क्षणेन चिच्छेद । अत्र धनुषो भङ्गसमये वीरः लक्ष्मणः पञ्चभिः पत्रिभिः विपक्षस्य शत्रोः वक्षः आशु बिभेद ॥ ५९ ॥

वमंश्च रक्तं शतमन्युशत्रुश्चापान्तरेणेषुगणान् ववर्ष ।
च्छित्वैव तांस्तस्य चमूं च हत्वा जघान सौमित्रिरमित्रसूतम् ॥ ६० ॥

(भा.दी.) वमन्निति । शतमन्युशत्रुः इन्द्रशत्रुः रक्तं तत् वमंश्च च्छर्दिं कुर्वन्नपि, चापान्तरेण इषुगणान् ववर्ष । वृष सेचने लिट् । सौमित्रिः तस्य तान् शरान् च्छित्वैव चमूं च हत्वा, अमित्रस्य शत्रोः सूतं सारथिं जघान ॥ ६० ॥

(सं.चं.) अमित्रस्येन्द्रजितः सूतम् ॥ ६० ॥

विनाऽपि सूतं वहतोऽस्य वाहानबिभ्रमल्लक्ष्मण उग्रबाणैः ।
न भेत्तुमीशः कवचं [२]सुरारिर्बिभेद बाणैरथ तल्ललाटम् ॥ ६१ ॥

(भा.दी.) विनाऽपीति । लक्ष्मणः, सूतं विनाऽपि वाहान् अश्वान् वहतः वाहयतः, सारथ्यं कुर्वत इत्यर्थः, अस्य इन्द्रजितः वाहान् अश्वान् उग्रबाणैः अबिभ्रमत् व्यथामापयत् । भ्रमु चलने लुङ् । अथ कवचं वर्म तत् भेत्तुं न ईशः न समर्थः सुरारिः इन्द्रजित् तल्ललाटं लक्ष्मणललाटं तत् (बाणैः) बिभेद ॥ ६१ ॥

(सं.चं.) विनाऽपीत्युपेन्द्रवज्रा । वाहानश्वान् अबिभ्रमत् भ्रामयामास । रथाद्विश्लेष्य द्रावयामासेत्यर्थः । भ्रमु अनवस्थाने । 'अनवस्थानं देशान्तरगमनम्' इति क्षीरस्वामी । सुरारिरिन्द्रजित् लक्ष्मणस्य कवचं भेत्तुमनीशस्तल्ललाटं त्रिभिर्बाणैर्बिभेद ॥ ६१ ॥

ललाटमस्याऽशु स लक्ष्मणोऽपि[३] बिभेद बाणैरशनिप्रकाशैः ।
भिन्नाखिलाङ्गाविषुभिः सरक्तौ तौ रेजतुः पुष्पितकिंशुकाभौ ॥ ६२ ॥

---

१. 'चिच्छेद च लक्ष्मणस्तम्' २. 'सुरारेर्बिभेद' ३. 'लक्ष्मणस्य बिभेद'

(भा.दी.) ललाटमिति । सः लक्ष्मणोऽपि अशनेर्वज्रस्य प्रकाश इव प्रकाशो येषां ते तथा तैः बाणैः इन्द्रजितः ललाटं तत् आशु बिभेद । इषुभिः, भिन्नानि अखिलानि अङ्गानि अवयवाः ययोस्तौ तथोक्तौ, रक्तेन सहितौ सरक्तौ तौ लक्ष्मणेन्द्रजितौ, सञ्जातानि पुष्पाणि यस्मिन् स पुष्पितः स चासौ किंशुकश्च तद्वदाभा कान्तिर्ययोस्तौ तथोक्तौ सन्तौ रेजतुः । राजृ दीप्तौ लिट् ॥ ६२ ॥

(सं.चं.) ललाटमित्यादीनि सप्तोपजातिबद्धानि । बाणैः पञ्चभिः । अशनिप्रकाशैः । अशनिना प्रकाशः साम्यं येषां तैः । अशनितुल्यैः । किंशुकः 'ಮುತ್ತುಗ' इति भाषायाम् । किंशुकाविव आभात इति किंशुकाभौ । किंशुकाभ्यामाभा साम्यं ययोस्ताविति वा । 'आभा प्रख्योपमाऽभिख्या प्रकारः सन्निभं निभम् । निकाशाद्याश्च साम्यार्थाः समे स्युः शब्दतः पराः' इति यादवप्रकाशः । 'ततः शोणितदिग्धाङ्गौ लक्ष्मणेन्द्रजितावुभौ । रणे ते रेजतुर्वीरौ पुष्पिताविव किंशुकौ' (९१.३७) इति च ॥ ६२ ॥

विभीषणायैष[1] मुमोच बाणांस्त्रीनेकमेकं हरिपुङ्गवेभ्यः ।
विभीषणोऽश्वान् न्यहनत् सुरारेः शक्तिं पितृव्याय मुमोच पुत्रः ॥ ६३ ॥

(भा.दी.) विभीषणायेति । एषः इन्द्रजित् विभीषणाय त्रीन् बाणान् मुमोच । हरिपुङ्गवेभ्यः कपिश्रेष्ठेभ्यः एकमेकं बाणं मुमोच । विभीषणः सुरारेः इन्द्रजितः अश्वान् न्यहनत् । हन्तेर्लङ् । पुत्रः इन्द्रजित् पितृव्याय पितृभ्रात्रे शक्तिं शक्त्यायुधं (मुमोच) चिक्षेप ॥ ६३ ॥

(सं.चं.) विभीषणायैषः विभीषणं हन्तुम् । 'ततः समरकोपेन संयुक्तो रावणात्मजः । विभीषणं त्रिभिर्बाणैर्विव्याध वदने शुभे' (९०.३९) इति, 'एकैकेनाभिविव्याध तान् सर्वान् हरियूथपान्' (९१.४०) इति च । विभीषणोऽश्वान् । 'तस्मै दृढतरं क्रुद्धो जघान गदया हयान्' (९०.४१) इति च । शक्तिं पितृव्याय । 'अथ शक्तिं महातेजाः पितृव्याय मुमोच ह' (९०.४२) इति च ॥ ६३ ॥

चिच्छेद सौमित्रिरमोघशक्तिं विभीषणश्चेषुभिरार्दयत् तम् ।
यमेन दत्तं प्रमुमोच बाणं विभीषणं हन्तुमथेन्द्रवैरी ॥ ६४ ॥

(भा.दी.) चिच्छेदेति । सौमित्रिः इन्द्रजिन्मुक्तां अमोघशक्तिं चिच्छेद । विभीषणश्च तं इन्द्रजितं इषुभिः आर्दयत् अपीडयत् । अर्द गतौ याचने च लङ् । अथ इन्द्रवैरी विभीषणं हन्तुं यमेन दत्तं बाणं प्रमुमोच ॥ ६४ ॥

---

१. **'विभीषणायैव'**

(सं.चं.) यमेन दत्तम् । 'स पितृव्याय सङ्क्रुद्ध इन्द्रजिच्छरमाददे । उत्तमं रक्षसां मध्ये यमदत्तं महाबलः' (९०.४६) इति च ॥ ६४ ॥

कुबेरदत्तं प्रमुमोच बाणं [1]सलाघवो राघवसोदरोऽथ ।
शरौ ज्वलन्तौ ज्वलनप्रकाशौ संहत्य तौ[2] व्योम्नि निपेततुः कौ ॥ ६५ ॥

(भा.दी.) कुबेरेति । अथ राघवसोदरः श्रीरामभ्राता, सः राघवः लक्ष्मणः, कुबेरेण दत्तस्तं बाणं इन्द्रजिन्मुक्तशरनिवारणार्थं मुमोच । ज्वलन्तौ, ज्वलनस्य प्रकाश इव प्रकाशो ययोस्तौ तथोक्तौ तौ शरौ व्योम्नि परस्परं संहत्य सम्बध्य कौ भूमौ निपेततुः । 'कुः पृथ्वी पृथिवी' इति हलः ॥ ६५ ॥

(सं.चं.) कुबेरदत्तं प्रमुमोच बाणम् । सलाघवो लाघवेन सहितः । क्षिप्रं प्रतिकुर्वन् । 'लक्ष्मणोऽप्याददे बाणमन्यं भीमपराक्रमः । कुबेरेण स्वयं स्वप्ने स्वस्मै दत्तं महात्मना' (९०.४७-८) इति । ज्वलनप्रकाशौ ज्वननोपमौ । संहत्य सङ्घट्टय । कौ भूमौ । 'मुखेन मुखमाहत्य सन्निपेततुरोजसा' (९०.५१) इति च ॥ ६५ ॥

स लक्ष्मणोऽमुञ्चत वारुणास्त्रं निरास रौद्रेण स मेघनादः ।
आग्नेयमस्त्रं मुमुचे सुरारिः सौरेण सौमित्रिरदो निरास ॥ ६६ ॥

(भा.दी.) स इति । सः लक्ष्मणः, वरुणो देवता अस्येति वारुणम्, तच्च तत् अस्त्रं च तत् अमुञ्चत । मुच्लृधातोर्लङ् । सः मेघनादः इन्द्रजित् रुद्रो देवता अस्येति रौद्रम्, तेन अस्त्रेण लक्ष्मणास्त्रं निरास निराकृतवान् । असु क्षेपणे लिट् । सुरारिः इन्द्रजित्, अग्निर्देवता अस्येत्याग्नेयम्, तत् अस्त्रं मुमुचे । मुच्लृधातोर्लिट् । सौमित्रिः, सूरो देवता अस्येति सौरम्, तेन अदः इन्द्रजिदस्त्रं निरास व्यनाशयत् ॥ ६६ ॥

(सं.चं.) स लक्ष्मणोऽमुञ्चत वारुणास्त्रम् । 'सुसंरब्धस्तु सौमित्रिरस्त्रं वारुणमाददे' (९०.५५) इति च । निरास रौद्रेण । 'रौद्रं महेन्द्रजिद् युद्धे व्यसृजद् युधि निष्ठितः' (९०.५५) इति च । आग्नेयमस्त्रम्, 'आग्नेयं सन्दधे दीप्तं स लोकं सङ्क्षिपन्निव । सौरेणास्त्रेण तद्वीरो लक्ष्मणः प्रत्यवारयत्' (९०.६-७) इति च ॥ ६६ ॥

अथाऽसुरास्त्रं सुरशत्रुरुग्रं[3] मुमोच नानायुधवर्षभीमम् ।
महेश्वरास्त्रेण महामनस्वी तल्लक्ष्मणोऽस्त्रं प्रतिसञ्जहार ॥ ६७ ॥

१. **'स राघवो–'** इति वि.ती.पाठः । २. **'तौ इन्द्रजिल्लक्ष्मणाभ्यां मुक्तौ शरौ'** इति का.श्री. । ३. **'–शत्रुरुग्रो–'** इति वि.ती.पाठः ।

(भा.दी.) अथेति । अथ उग्रः सुरशत्रुः इन्द्रजित्, नानाविधानि यान्यायुधानि तेषां वर्षैर्भीमं भयङ्करम्, असुराणां सम्बन्धि आसुरम्. तच्च तदस्त्रं च मुमोच । महच्च तन्मनश्च तदस्यास्तीति तथोक्तः, अतिभीमासुरास्त्रमोचनेऽप्यभीरुत्वेनातिधीरमना इत्यर्थः, लक्ष्मणः, महेश्वरस्य पशुपतेर्यदस्त्रं तेन, तत् इन्द्रजिन्मुक्तं आसुरास्त्रं प्रतिसञ्जहार व्यनाशयत् ॥ ६७ ॥

(सं.चं.) अथाऽसुरास्त्रम् । असन्तान्मत्वर्थे णिनिः–'अस्मायामेधासजौविनिः' (अ.सू.५.२.१२१ इति । 'आसुरं शत्रुनाशाय घोरमस्त्रं समाददे । तस्माच्चापाद् विनिष्पेतुर्भास्वराः कूटमुद्गराः । शूलानि च भुशुण्ड्यश्च गदाः खड्गाः परश्वधाः' (९०.५८–९) इति च । महत् महायुधैरप्यप्रकम्प्यं मनोऽस्येति महामनस्वी । असन्तान्मत्वर्थे विनिः–'अस्मायामेधास्रजो विनिः' (अ.सू.५.२.१२१) इति । प्रतिसञ्जहार निर्वीर्यताकरणेन शमयामास । 'माहेश्वरेण द्युतिमांस्तदस्त्रं प्रत्यवारयत्' (९०.६१) इति च ॥ ६७ ॥

सुराः पुरस्कृत्य पुरन्दरं खे तस्थू रणं चित्रमवेक्षमाणाः ।
स्वस्त्यस्तु रामानुज देवशत्रुं[१] विनाशयेति प्रवदन्त उच्चैः ॥ ६८ ॥

(भा.दी.) सुरा इति । चित्रं अद्भुतं तत् रणं अवेक्षमाणाः पश्यन्तः सुराः, पुरन्दरं पुरस्कृत्य, हे रामानुज लक्ष्मण, ते स्वस्ति मङ्गलं अस्तु । देवशत्रुं इन्द्रजितं विनाशय । नश अदर्शने लोट् । इति उच्चैः प्रवदन्तः सन्तः, खं गगनं तस्मिन् तस्थुः ॥ ६८ ॥

(सं.चं.) पुरन्दरं पुरस्कृत्य । खे गगने । सुरा इत्युपलक्षणम् । 'ऋषयः पितरो देवा गन्धर्वगरुडोरगाः । शतक्रतुं पुरस्कृत्य ररक्षुर्लक्ष्मणं रणे' (९०.६३) इति च । ररक्षुः रक्षार्थं प्रार्थयामासुरित्यर्थः ॥ ६८ ॥

दिव्यं पुरासादितदैत्यचक्रमाकृष्य चाऽकर्णत उग्रवीर्य्यम्[२] ।
रामोऽभिरामो जयतीत्युदीर्य्य रामानुजो बाणवरं मुमोच ॥ ६९ ॥

(भा.दी.) दिव्यमिति । रामानुजः, पुरा सादितं दैत्यानां चक्रं समूहो येन स तथा तम्, दिव्यम्, उग्रं वीर्यं सामर्थ्यं यस्य स तथा तम्, बाणवरं कर्णतः आ पर्यन्तं आकृष्य, अभिरामः श्रीरामः जयति इति उदीर्य मुमोच ॥ ६९ ॥

---

१. '–नुज ते सुरारिं विना–' । 'हे रामानुज लक्ष्मण, ते तुभ्यं स्वस्ति मङ्गलमस्तु । सुरारिमिन्द्रजितं विनाशय अदर्शनं प्रापय' इति का.श्री. ।

२. 'उग्रवीर्यः'

(सं.चं.) दिव्यमित्यादिपद्यद्वयमिन्द्रवज्राबद्धम् । दिव्यं ऐन्द्रास्त्रेण योजितम् । अत एव बाणेषु वरम् । पुरा सूदितदैत्यचक्रम् । 'येन शक्रो महातेजा दानवानजयत् प्रभुः । पुरा दैवासुरे युद्धे वीर्यवान् हरिवाहनः' (९०.६७) इति च ॥ ६९ ॥

आखण्डलारातिशिरः प्रचण्डमुत्खण्डितं काण्डवरेण तेन ।
सम्मण्डितं कुण्डलमण्डलाभ्यां भूमण्डले भूधरवत् पपात ॥ ७० ॥

(भा.दी.) आखण्डलेति । तेन लक्ष्मणमुक्तेन, काण्डेषु शरेषु वरः श्रेष्ठः तेन, प्रचण्डं अ(ति)तीक्ष्णं यथा भवति तथा उत्खण्डितं च्छिन्नम्, कुण्डलयोर्ये मण्डले ताभ्यां सम्मण्डितं सम्यगलङ्कृतम्, आखण्डलारातेः इन्द्रजितः शिरः, भुवो मण्डलं प्रदेशस्तस्मिन्, भूधरवत् पर्वतवत् पपात ॥ ७० ॥

(सं.चं.) आखण्डलस्येन्द्रस्यारातिः शत्रुः । प्रचण्डं कोपाभिव्यञ्जकतया कराळम् । काण्डवरेण बाणवरेण उत्खण्डितं छिन्नम् । तेन रामानुजेन । कुण्डले कर्णपूरे मण्डलौ विषसर्पभेदाविव । कुण्डलीकृतसर्पवद् भीषणाभ्यां कुण्डलाभ्यां समन्तात् प्रसृतप्रकाशतया मण्डितम् । मण्डलाभ्यां वृत्ताकाराभ्यां कुण्डलाभ्यां वा ॥ ७० ॥

तस्मिन् हते तत्र[1] हतावशिष्टाः प्रदुद्रुवुः क्रव्यभुजोऽतिभीताः ।
हरिप्रबर्हा[2] हनुमत्पुरोगाः सौमित्रिमस्तारिमपूजयंस्ते ॥ ७१ ॥

(भा.दी.) तस्मिन्निति । तत्र युद्धे, तस्मिन्निन्द्रजिति हते सति, हतेभ्यो अवशिष्टाः, क्रव्यं मांसं भुञ्जत इति तथोक्ताः, राक्षसा इत्यर्थः, अतिभीताः सन्तः प्रदुद्रुवुः । द्रु गतौ लिट् । हनुमान् पुरोगो येषां ते तथा ते, हरिप्रबर्हाः कपिश्रेष्ठाः, अस्तः संहृतः अरिः शत्रुर्येन स तथा तम्, सौमित्रिं लक्ष्मणं अपूजयन् । पूज पूजायां लङ् ॥ ७१ ॥

(सं.चं.) तस्मिन् हत इत्यादिपद्यद्वयमुपजातिबद्धम् । इन्द्रवज्रोपेन्द्रवज्राभ्यामुपजातिरित्युक्तम् । प्रदुद्रुवुः कान्दिशीकाः पलायामासुः । 'केचिल्लङ्कां परित्रस्ताः प्रविष्टा वानरार्दिताः । समुद्रे पतिताः केचित् केचित् पर्वतमाश्रिताः' (९०.७९) इति च । क्रव्यं मांसं भुञ्जत इति क्रव्यभुजो मांसादा राक्षसाः । 'मांसं तु काश्यपं क्रव्यं तरसं पललं पलम्' इति यादवप्रकाशः । 'रात्रिञ्चरा रात्रिचराः क्रव्यात्क्रव्यादनैरृताः' इति च । हरिप्रबर्हाः कपिप्रवराः । अस्तारिं नाशितशत्रुम् । अपूजयन् सत्कारेणाभिनन्दुः । ते लक्ष्मणेन सहाऽगताः ॥ ७१ ॥

---

१. 'हते तेन हता–'

२. 'हरिप्रवीरा–'

दिनैस्त्रिभिस्तत्र दिवानिशं च युध्वा हते राक्षसराजसूनौ ।
इन्द्रादिदेवा वरपुष्पवर्षमिन्द्रारिशत्रौ विदधुः स्तुवन्तः[1] ॥ ७२ ॥

(भा.दी.) दिनैरिति । तत्र युद्धे, त्रिभिः दिनानि दिवसास्तैः, दिवा च निशा च दिवानिशम्, अहोरात्रं चेत्यर्थः, युध्वा राक्षसराजस्य रावणस्य सूनौ इन्द्रजिति हते सति, इन्द्रादिदेवाः वरमुत्तमं यत्पुष्पवर्षं तत्, इन्द्रारिशत्रौ लक्ष्मणे, स्तुवन्तः सन्तः विदधुः चक्रुः । धाञो लिट् ॥ ७२ ॥

(सं.चं.) दिनैस्त्रिभिः । 'अहोरात्रैस्त्रिभिर्वीरः कथञ्चिद् विनिपातितः' (९१.१६) इति च । देवतरुजत्वाद् वराणि पुष्पाणि ॥ ७२ ॥

रामाभ्याशं प्राप्य रामानुजन्मा साकं वायोः सूनुना तं ववन्दे ।
सान्द्रानन्दो मन्दहासी मुकुन्दस्तं सौमित्रिं लाळयन्नालिलिङ्गे॥ ७३ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
युद्धकाण्ड एकादशः सर्ग्गः ॥

—०—

(भा.दी.) रामेति । रामादनु जन्म यस्य स तथा लक्ष्मणः, वायोः सूनुना सुतेन हनुमता साकम्, श्रीरामस्य अभ्याशं समीपं तत् प्राप्य, तं श्रीरामं ववन्दे । वदिधातोर्लिट् । सान्द्रः अव्युच्छिन्न आनन्दो यस्य स तथा, मन्दहासोऽस्यास्तीति तथा मन्दहासी मुकुन्दः, तं सौमित्रिं लाळयन् सन्, आलिलिङ्गे आलिङ्गनं चक्रे । लिगि गतौ लिट् ॥ ७३ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां
युद्धकाण्ड एकादशः सर्गः ॥

—०—

(सं.चं.) शालिन्योपसंहरति–रामाभ्याशमिति । मस्तौ गौ च शालिनी । रामस्य अनुजन्मा अनुजो लक्ष्मणः । वायोः सूनुना हनुमता साकं रामसमीपमेत्य । वायोः सूनुना साकं तं रामं ववन्दे । लाळयन्, लळ विलासे, शिरस्युपाघ्राय, उपवेश्य चोत्सङ्गे प्रीत्युत्कर्षं प्रदर्शयन्, आलिलिङ्गे । यद्यपि लिगिः परस्मै-

१. 'विदधुर्नदन्तः'

भाषः । अथापि चुचुम्बे, आलिलिङ्गे इत्यादीनि पदानि प्रचुरं प्रयुञ्जते कवयः । अत एवाऽह चन्द्रः– सर्वस्मादुभयं पदमिति । आत्मप्रीतिव्यञ्जक आलिङ्गने विवक्षिते आत्मनेभाषा । परार्थमालिङ्गने परस्मैभाषा । एवं चुम्बनेऽपि ॥ ७३ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां युद्धकाण्ड एकादशसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– २७५७+७३=२८३०]

द्वादशः सर्ग्गः

भूयानभूद् राघवसैनिकानां[1] मोदश्च मोदप्रभवश्च रावः ।
ततोऽपि भूयान् पुरि राक्षसानां शोकश्च शोकप्रभवश्च रावः ॥ १ ॥

(भा.दी.) श्रीरामानुजेन रावणपुत्रे हते सति सैन्यद्वयजातावस्थां दर्शयति– **भूयानि**ति । राघवस्य या सेना तस्यां भवन्तीति राघवसैनिकास्तेषां मोदः सन्तोषः, मोदात् प्रभवतीति तथोक्तः रावश्च सिंहनादश्च भूयान् महान् अभूत् । राक्षसानां पूः पुरं तस्यां शोकश्च, शोकात् प्रभवतीति तथोक्तः रावः ध्वनिश्च ततोऽपि सिंहनादादपि भूयान् अभूत् ॥ १ ॥

(सं.चं.) अथोपजातिप्रचुरेण च्छन्दसा द्वादशं सर्गमारभते । सेनां समवयन्तीति सैनिकाः । 'सेनाया वा' (अ.सू.४.४.४५) इति समवायार्थे ठक् । मोदप्रभवश्च रावः हर्षोद्गारः जयघोषश्च । शोकप्रभवश्च रावः रोदनम् ॥ १ ॥

मृतं निशम्येन्द्रजितं सुतं स्वं प्राणोपमानं व्यलपद् दशास्यः ।
हा वत्स नौ त्वं पितरौ विहाय मृतोऽसि देवेन्द्रजयिन् बतेति ॥ २ ॥

(भा.दी.) मृतमिति । दशास्यः, प्राणा एव उपमानं यस्य स तथा तम्, प्राणप्रियमित्यर्थः, स्वं सुतं इन्द्रजितं मृतं निशम्य, हा वत्स देवेन्द्रजयिन् इन्द्रजित्, त्वं माता च पिता च पितरौ, नौ आवां विहाय मृतः असि बत, इति व्यलपत् विलापमकरोत् । लप व्यक्तायां वाचि लङ् ॥ २ ॥

(सं.चं.) प्राणः स्वजीवितमेव स्वयमेव वा प्रियतायामुपमानं यस्य । 'प्राणस्तु प्रणवे जीवे जीविते परमात्मनि' इति यादवप्रकाशः । बतेति खेदे विस्मये च । प्राणसमः पुत्रो मृत इति खेदः । इन्द्रस्य जेताऽपि मानुषेण पराजित इति विस्मयः । तदेतदाह– देवेन्द्रजयिन् बतेति ॥ २ ॥

---

१. **'राघवसैनिकानां राघवसेनायां समवेतानां कपीनाम्'** इति का.श्री. ।

पुनश्च कोपं[१] द्विगुणं प्रयातो [२]जिघांसुरायाच्छलमैथिलीं सः ।
व्यक्तं सुपार्श्वेन निवारितोऽथ [३]सम्मन्त्रयामास सभामवाप्य ॥ ३ ॥

(भा.दी.) पुनरिति । सः पुनश्च, द्वौ गुणौ आवृत्ती यस्य स तथा तं कोपं प्रयातः सन्, च्छलेन मैथिलीं सीताम्, सीताप्रतिकृतिमित्यर्थः, जिघांसुः सन् हन्तुकामः सन्, अशोकवनिकां आयात् जगाम । अथ सुपार्श्वेन सुपार्श्वनामकराक्षसेन व्यक्तं यथा भवति तथा स्त्रीवधो न कार्य इति निवारितः रावणः, सभां अवाप्य सम्मन्त्रयामास । मत्रि गुप्तपरिभाषणे लिट् ॥ ३ ॥

(सं.चं.) पुनश्च शोकाद् द्विगुणं कोपं प्रयातः । च्छलमैथिलीं सीताप्रतिकृतिम् । सुपार्श्वेन शीलवता रावणामात्येन । निवारितः । 'सुपार्श्वो नाम मेधावी रावणं राक्षसेश्वरम् । निवार्यमाणो सचिवैरिदं वचनमब्रवीत् । कथं नाम दशग्रीव साक्षाद् वैश्रवणानुज । हन्तुमिच्छसि वैदेहीं क्रोधाद् धर्ममपास्य हि' (९२.६२–३) इति च ॥ ३ ॥

त्रिंशत्सहस्राणि महौघकानामक्षोहिणीनामपि षट्सहस्रम् ।
समादिदेशाऽशु रणाय यास्यन् स रक्षसां [४]राक्षसयूथनाथः ॥ ४ ॥

(भा.दी.) त्रिंशदिति । राक्षसानां यूथानि समूहास्तेषां नाथः सः रावणः, रणं युद्धं तस्मै यास्यन् गमिष्यन् सन्, पूर्वं रक्षसां महौघका इति सङ्ख्याविशेषाः, तेषां त्रिंशत्सङ्ख्याकानि च तानि सहस्राणि च तानि, अक्षोहिणीनां षण्णां सहस्राणां समाहारः षट्सहस्रं तदपि, आशु समादिदेश, युद्धार्थमाज्ञप्तवान् । दिश अतिसर्जने लिट् ॥ ४ ॥

(सं.चं.) 'त्रिंशत् सहस्राणि महौघकानामक्षोहिणीनां सह षट्सहस्रम्' (८.१७९) इति निर्णयवचनम् । महान् ओघः सेनापरम्परा यासु तासामक्षोहिणीनां षट्त्रिंशत्सहस्राणि । अत्र वक्तव्यमधिकं 'निर्णयभावचन्द्रिकायां' द्रष्टव्यम् ॥ ४ ॥

कल्लोलकल्पैः करिभिः [५]परीतस्त्वङ्गत्तरङ्गाभतुरङ्गतुङ्गः ।
रथाख्ययादोभरितोऽभिपेदे बलार्ण्णवो[६] राघवबाडवाग्निम् ॥ ५ ॥

---

१. 'पुनश्च शोकं द्वि–' । 'पुनश्च पुनरपि द्विगुणं शोकं दुःखं प्राप्तः' इति का.श्री । २. 'जिघांसुराप च्छल–'
३. 'स मन्त्रयामास ' ४. 'स राक्षसान् राक्षस-' ५. 'परितैस्त्वङ्ग–' ६. 'बलार्णवः मूलबलाख्यसमुद्रः' इति का.श्री. ।

(भा.दी.) कल्लोलेति । कल्लोलानां महातरङ्गाणां कल्पाः समानाः, तैः करिभिः गजैः परीतः परिवृतः, त्वङ्गन्तो ये तरङ्गाः, तद्वदाभा कान्तिर्येषां ते तथोक्ताः, तादृशाश्च ते तुरङ्गाश्च, तैः तुङ्ग उन्नतः, रथा इति आख्या येषां तानि रथाख्यानि तादृशानि यानि यादांसि जलजन्तवस्तैः भरितः पूर्णः, बलमेव सैन्यमेवार्णवः, राघव-बाडवाग्निस्तं अभिपेदे जगाम । पद गतौ लिट् ॥ ५ ॥

(सं.चं.) महत्तरस्तरङ्गः कल्लोलः । तेन कल्लोलकल्पाः करिणः । तरङ्गकल्पास्तुरङ्गाः । ईषदसमाप्ताः कल्लोलाः कल्लोलकल्पाः । तरङ्गैराभा साम्यं येषां ते तरङ्गाभाः । 'वीची भङ्गस्तरङ्गः स्यात् तन्महत्त्वे च कथ्यते । ऊर्मिरुत्कलिकोल्लोलः कल्लोलो लहरी तथा' इति हलायुधः । त्वङ्गन्तश्चलन्तस्तरङ्गाः । तदाभैस्तुरङ्गैस्तुङ्गः उन्नतः । रथाख्यानि यादांसि जलजन्तवः । 'और्वः समुद्रवह्निः स्याद् बाडवो बडवामुखः' इति च ॥ ५ ॥

जाज्वल्यमानोज्ज्वलहेतिलीलो धूमायमानोद्धतधूळिधूम्रः ।
विसृत्वरः सैन्यमहौघसङ्घः सांवर्त्तको वह्निरिवोददीपि ॥ ६ ॥

(भा.दी.) जाज्वल्येति । उत्कृष्टतया ज्वलन्तीत्युज्ज्वलाः, तादृश्यः या हेतयः आयुधानि, ताभिः लीला विलासः जाज्वल्यमाना अतिशयेन ज्वलन्ती उज्ज्वलहेतिलीला यस्य स तथोक्तः । धूमवदाचरन्तीति धूमाय-मानाः उद्धताः अतिवृद्धाः उद्गता वा या धूळयस्ताभिर्धूम्रः मिश्रवर्णः । विसृत्वरः विशेषेण व्यापनशीलः, सैन्यानां ये महौघास्तेषां सङ्घः समूहः, संवर्ते प्रळये भवतीति सांवर्तकः वह्निरिव उददीपि जज्वाल । दीपी दीप्तौ लुङ् ॥ ६ ॥

(सं.चं.) जाज्वल्यमाना देदीप्यमानाः उज्ज्वलाः फळफळायिताः हेतयः आयुधानि सैन्यसङ्घस्य । हेतयो ज्वाला वह्नेः । उद्धता उद्गताः धूळयः । तैः धूम्रः धूमलः । 'रक्तश्यामो भवेद् धूम्रो धूमलः स च कथ्यते' इति च । विसृत्वरः सर्वत्र प्रसरणशीलः । 'इण्-नश्-जि-सर्तिभ्यः क्वरप्' (अ.सू.२.१६३) इति क्वरप् । महान् ओघः परम्परा यत्र तादृशः सैन्यसङ्घः । महौघशब्दः सङ्ख्याविशेषवचन इत्यपि व्याचक्षते । सांवर्त्तकः प्रळयकालीनः । उददीपि उददीपिष्ट ॥ ६ ॥

उन्मूलयन्ती सकलांश्च सालान् निमीलयन्ती सकलांश्च लोकान् ।
सा वाहिनी वानरवाहिनीं द्राक् चिक्षेप[1] वात्येव विशीर्ण्णपर्ण्णम्[2] ॥ ७ ॥

---

१. **'वाहिनीन्द्रान् चिक्षेप'**

२. **'–शीर्णपर्णा'** । **'विशीर्णपर्णा नाशितपर्णा बभूव'** इति का.श्री. ।

(भा.दी.) **उदिति** । सकलान् सालान् वृक्षान् आयुधार्थत्वेन उन्मूलयन्ती उत्पाटयन्ती, सकलान् लोकान् जनांश्च निमीलयन्ती द्रष्टुमशक्यत्वेन चक्षुर्निमीलनं कारयन्ती, सा वाहिनी रावणसेना, वानरवाहिनीं वानरसेनां द्राक् शीघ्रं विशीर्णं च तत् पर्णं च तत्, शुष्कपर्णमित्यर्थः, वात्येव चक्रवात इव, 'वात्या वातस्य मण्डली' इति हलः, चिक्षेप व्यद्रावयत् । क्षिपु निरसने लिट् ॥ ७ ॥

(सं.चं.) वात्या 'ಸುಂಟರಗಾಳಿ' इति भाषायाम् । वात्येव सालान् वृक्षजालानुन्मूलयन्ती । विसृत्वराभिर्धूलिभिश्चक्षुर्निमीलनं कारयन्ती । विशीर्णमत एव शुष्कं पर्णम् । 'ತರಗೆಲೆ' इति भाषायाम् । शुष्कानि हि विशीर्यन्ते पर्णानि । शुष्कानि पर्णानि वात्या क्षिप्रं क्षिपति ॥ ७ ॥

छिन्नेषु भिन्नेषु निपातितेषु विद्रावितेष्वाकुलितेषु[1] भूयः ।
सैन्येषु सैन्यप्रभवोऽभ्ययुद्ध्यन् सुग्रीवनीलाङ्गदपूर्वकास्ताम्[2] ॥ ८ ॥

(भा.दी.) **छिन्नेष्विति** । सैन्यानि कपिसैन्यानि तेषु, भूयः छिन्नेषु सत्सु, भिन्नेषु विदारितेषु सत्सु, निपातितेषु सत्सु, विद्रावितेषु सत्सु, भूयः आकुलितेषु सम्भ्रान्तेषु सत्सु, सैन्यप्रभवः सेनानायकाः सुग्रीवनीलाङ्गदपूर्वकाः तान् राक्षसान् अभ्ययुध्यन् । युध सम्प्रहारे लङ् ॥ ८ ॥

(सं.चं.) छिन्नेष्वितीन्द्रवज्रा । कपिसैन्येषु । सेनां समवयन्तीति सैन्याः । 'सेनाया वा' (अ.सू.४.४.३५) इति समवायार्थे ण्यः । 'सेनास्थाः सैनिकाः सैन्याः' इति यादवप्रकाशः । खड्गादिना छिन्नेषु । बाणादिना भिन्नेषु । अच्छिन्नभिन्नेष्वपि केषुचिन्निपातितेषु, केषुचिदनिपातितेष्वपि विद्रावितेषु । एवं सर्वेष्वपि भूयः पौनःपुन्येन आकुलितेषु व्याकुलीकृतेषु । 'ಕಳವಳಿಸು' इति भाषायाम् । सैन्यप्रभवः सेनाप्रमुखाः । तां राक्षसवाहिनीमभ्ययुध्यन् । युध्यतिरात्मनेभाष इति पाणिनीयाः । प्रयोगप्राचुर्यादुभयतोभाष इति भूयांसो भाषाविद इत्युक्तम् ॥ ८ ॥

वराद् विरिञ्चस्य परैरजेयां सर्वैरवद्ध्यां च चमूं प्रयुद्ध्य ।
तरङ्गिणीतुङ्गतरङ्गलोलपलण्डुवन्न[3] स्थिरतां ययुस्ते ॥ ९ ॥

---

१. **'आकुलितेषु मूर्छितेषु सत्सु'** इति का.श्री. । २. **'–पूर्वकास्तान्'** इति वि.ती.पाठः । **'तां रावणसेनां अभ्ययुध्यन्'** इति का.श्री. ।

३. **'–पलाण्डुवन्न'** । **'तरङ्गिण्याः नद्याः तुङ्गा उन्नताः ये तरङ्गाः तेषु लोलाश्चञ्चला ये पलाण्डवः शुष्कालाबूनि तद्वत्'** इति वि.भू. । **'शुष्कालाबूपमाः'** इति का.श्री. ।

(भा.दी.) वरादिति । ते सुग्रीवादयः, विरिञ्चस्य यो वरस्तस्मात् पराः शत्रवस्तैः अजेयाम्, सर्वैः पुरुषैः अवध्याम्, चमूं प्रयुध्य, तरङ्गिण्याः नद्याः ये उन्नतास्तरङ्गाः, तेषु, लोलाश्चञ्चला ये पलण्डवः शुष्कालाबुफलानि तद्वत् ते सुग्रीवादयः नस्थिरताम्, न समासोऽयम्, ययुः । स्थिरतां न ययुरिति वा । यथा नदीतीरस्थशुष्कालाबु-फलानि नदीवेगेन ताड्यमानानि न तिष्ठन्ति तद्वत् सेनायाः अतिबहुत्वेन तत्पुरतः स्थातुमशक्ता अभवन्निति भावः ॥ ९ ॥

(सं.चं.) वराद् विरिञ्चस्य । 'वरो हि दत्तोऽस्य पुरा स्वयम्भुवा धरातळेऽल्पेऽपि निवासशक्तिः । अजेयता चेत्यत एव सार्कजाः प्लवङ्गमा द्रष्टुमपि स्म नाशकन्' (१८२) इति निर्णये । परैः विरिञ्चादवरैः सर्वैरपि । पलण्डुः '**ಈರುಳ್ಳಿ**' इतिभाषायाम् । पलाण्डुरित्यर्वाचीनाः पठन्ति । 'न पलण्डुं भक्षयीत' इति श्रौतः प्रयोगः । किन्त्वत्र पलण्डुशब्दोऽलाबुवचन इति वदन्ति । '**ಸೋರೆಬುರುಡೆ**' इति भाषायाम् । प्लवते ह्यलाबु ॥ ९ ॥

पराक्रमं क्रूरतरं विधाय परान् पराभाव्य वरास्त्रशस्त्रैः[१] ।
रामं ययौ रावणवाहिनी सा ज्वलन्तमग्निं शलभावलीव ॥ १० ॥

(भा.दी.) पराक्रममिति । सा रावणवाहिनी, क्रूरतरोऽसह्यतरः, तं पराक्रमं विधाय, महान्ति यानि अस्त्राणि च शस्त्राणि च तैः, परान् शत्रून् कपीन् पराभाव्य पराजित्य, ज्वलन्तं अग्निं शलभानां पतङ्गानां आवलीव पङ्क्तिरिव श्रीरामं प्रति ययौ ॥ १० ॥

(सं.चं.) शलभाः पतङ्गाः । '**ಮಿಡತೆ**' इति भाषायाम् ॥ १० ॥

अथेषुभिः[२] पट्टसभिण्डिपालैः[३] शक्त्या शतघ्नीपरिघैश्च शूलैः ।
गदासिभिस्तोमरसायकाद्यैर्युयोध रामं विविधायुधैः सा[४] ॥ ११ ॥

---

१. **'–भाव्य महास्त्रशस्त्रैः'** इति वि.ती.पाठः ।

२. **'यष्ट्यृष्टिभिः पट्टस–'** इति च । **'अथर्ष्टिभिः'** इति का.श्री. पाठः । तथाहि तद्व्याख्यानम्– **'अथ रामप्राप्त्यनन्तरं सा रावणवाहिनी ऋष्टिनामकैरायुधैः'** इति । ऋष्टिरिति खड्गस्यैव नामान्तरम् । **'ऋष्टिः खड्गः प्रचारोऽसिः'** इति वैजयन्ती । तेनास्मिन् पाठे **'गदासिभिः'** इत्यनेन पुनरुक्तं भवति । एतेन वि.ती.व्यख्यानमपि व्याख्यातम् ।

३. **'पट्टिशभिन्दिपालैः'** । **'पट्टसभिन्दिपालैः'** इति वि.ती.पाठः स्यात् । ४, **'विविधायुधैश्च'**

(भा.दी.) यष्टीति । सा सेना, यष्टयश्च ऋष्टयश्च ताभिः, पट्टसाश्च भिन्दिपालाश्च तैः, शक्त्या, शतघ्न्यश्च परिघाश्च तैः, शूलानि त्रिशूलानि तैः, गदाश्च असयश्च तैः, तोमराश्च सायकाश्च ते आद्या येषां तानि तैः, विविधान्यायुधानि तैरपि श्रीरामं युयोध । युधधातोर्लिट् ॥ ११ ॥

(सं.चं.) पट्टसः यः करे धृत्वा योद्धुमुपयुज्यते, 'ಭರ್ಜಿ' इति भाषायाम् । पट्टसप्रभेदो यः क्षेप्यते स भिण्डि-पालः । 'भिण्डिपालः क्षेपणीयः' इति यादवप्रकाशः । 'ಎಸೆಯುಈಟಿ' इति भाषायाम् । शक्तिः कासूः, तीक्ष्णाग्रलोहदण्डविशेषः । 'ಈಟಿ' इति भाषायाम् । कण्टकचितो लोहदण्डः शतघ्नी । 'शतघ्नी तु चतुस्ताला लोहकण्टकसञ्चिता' इति च । 'ಫಿರಂಗಿ' इत्यप्याहुः । प्रतिघः प्रतिघातनः लोहबद्धः लगुडविशेषः ।'ಲೋಹದಬಡಿಗೆ' इति भाषायाम् । तोमरः=शक्ति('ಈಟಿ')प्रभेदः । युध्यतिरात्मनेभाषोऽकर्मकश्चेति पाणिनीयाः । अपाणिनीया अपि सन्ति साधवः शब्दा इति विदितमेव विदुषाम् । नियोगपर्यनुयोगानर्हाश्च कवयः । एतेन सर्वेऽपि पूर्वोत्तरप्रयोगा दत्तोत्तराः । पाणिनीया अप्याचक्षते–'कथं युध्यति' इति? युधमिच्छन्तीति क्यच् । 'अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम्' इति वा' इति ॥ ११ ॥

कच्चिद्[1] बहून् जेष्यति राम एको रामो जयेदेव रिपून् प्रवीरः ।
विश्वेश्वरः क्रीडति सेनयेति बालाः समा भूरिधियोऽप्यवोचन् ॥ १२ ॥

(भा.दी.) कच्चिदिति । बालाः अधमाधिकारिणः, एकः श्रीरामः बहून् राक्षसान् जेष्यति कच्चित् जेष्यति किम्? जि जये लृट्, इति अवोचन् । समाः मध्यमाधिकारिणः, नित्यसंसारिण इत्यर्थः, प्रवीरः श्रीरामः रिपून् जयेदेव । जि जये लिङ् । इति अवोचन् । भूरिर्भूयसी धीर्भगवद्विषयकज्ञानं येषां ते तथा, उत्तमा-धिकारिण इत्यर्थः, विश्वेश्वरः सर्वजगदीश्वरः श्रीरामः सेनाया क्रीडति, क्रीड विहारे लट्, इति अवोचन्नित्यन्वयः ॥ १२ ॥

(सं.चं.) कच्चिदितीन्द्रवज्रा । रामः एकः बहून् कच्चित् जेष्यति इति बाला अप्रबुद्धाः । कथं जेष्यति? अशक्यमेतद् यदेकेन बहूनां जय इति मन्यमानाः । 'कच्चित् प्रश्ने कामवादे' इति च । 'वैधेये बालिशो बालो जडो जाल्मो यथोदितः । मूढो मन्दो विवर्णश्च मूर्खः स्यान्मातृशासितः' इति हलायुधः । प्रकृष्टो वीरः प्रवीरः । प्रवीरत्वाज्जयेदेव बहूनपि रिपूनिति समाः नाप्रपुद्धाः नापि सुप्रबुद्धाः, न मान्याः किन्तु सामान्या जना अवोचन् । विश्वेश्वरः सेनया क्रीडतीति भूरिधियो बहुज्ञास्तत्वविदः ॥ १२ ॥

---

१. 'कचिद् रिपून् जेष्यति'

आदाय[1] कार्त्तस्वरभास्वरं स चापं चकार प्रभुराशु सज्यम्[2] ।
विष्फारशब्देन[3] सुरासुराणामुद्घोषयामास सुखासुखे च ॥ १३ ॥

(भा.दी.) **आदत्तेति** । प्रभुः सः श्रीरामः, कार्तस्वरेण सुवर्णेन भास्वरं भासनशीलं तत्, चापं आदत्त जग्राह । सज्यं ज्यया सहितं आशु चकार । विष्फारलक्षणो यः शब्दस्तेन, 'विष्फारो[4] धनुषः स्वानः' इत्यमरः, सुरासुराणां सुखं च असुखं च ते उद्घोषयामास प्रकटयामास । घुषिर् शब्दे लिट् ॥ १३ ॥

(सं.चं.) आदायेति चेन्द्रवज्रा । कार्तस्वरवद् सुवर्णवद् भास्वरं भासनशीलम् । कार्तस्वरमयं भास्वरं चेति वा । 'स्थेशभासपिसकसो वरच्' (अ.सू.३.२.१७५) इति भासतेर्वरच् । सज्यं बद्धमौर्वीकं चकार । विष्फार-शब्देन धनुषष्टङ्कारेण सुराणां भाविसुखमसुराणां भावि दुःखं च प्रकटयामास । विस्फरतीति विस्फारः । 'स्फर-स्फुर-स्फल-स्फुल चलने' । विस्फुरतीति वा । 'स्फुरतिस्फुलत्योर्घञि' (अ.सू.६.१.४७) इति स्फुरतेरेच आकरादेशः । 'स्फुरतिस्फुलत्योर्निर्निविभ्यः' (अ.सू.८.३.७६) इति वीत्युपसर्गात् परस्य सकारस्य वैकल्पिके मूर्धन्यादेशे सति 'विष्फारः' इति च रूपम् ॥ १३ ॥

सुवर्ण्णपुङ्खानतितीव्रधारानक्षीणपक्षान्[5] नतपर्वणोऽथ ।
बाणासने बाणगणानगण्यान् सन्धायसन्धाय मुमोच रामः ॥ १४ ॥

(भा.दी.) **सुवर्णेति** । अथ श्रीरामः, सुवर्णमयाः पुङ्खाः येषां ते तथा तान्, अतितीव्रा धारा येषां ते तथा तान्, अक्षीणः पक्षो वाजो येषां ते तथा तान्, 'पक्षो वाजस्त्रिषूत्तरे' इत्यमरः, नतानि पर्वाणि ग्रन्थयो येषां ते तथा तान्, अगण्यान् बाणगणान् बाणासनं धनुस्तस्मिन् सन्धायसन्धाय मुमोच ॥ १४ ॥

(सं.चं.) सुवर्णपुङ्खान् स्वर्णमयकाण्डमूलान् । अतितीक्ष्णा धारा अग्रं येषां तान् । 'धारा शस्त्रमुखं फलम्' इति यादवप्रकाशः । बाणानां वेगातिशयार्थं बाणमूले निबद्धः पक्षः पतत्रिपक्षः, 'ጠ໐' इति भाषायाम् । अक्षीणः पुष्कळो पक्षो येषां तान् । नतानि वक्राणि पर्वाणि वंशग्रन्थयो येषु तान् । 'वक्रं वृजिनं भङ्गुरमाविद्धं वेल्लितं नतं जिह्मम्' इति हलायुधः ॥ १४ ॥

---

१. **'आदत्त'** इति.वि.ती.पाठः । २. **'सज्जम्'** ३. **'विस्फारशब्देन'**

४. **'विस्फारो–'** इति प्रचलितोऽमरकोशपाठः । **'विष्फारो धनुषः स्वानः'** इति वैजयन्ती ।

५. **'अक्षीणपक्षान् नाशरहितगृध्रबर्हयुक्तान्'** इति का.श्री. ।

कण्ठेषु घण्टाघटितेषु कांश्चित् करेषु कांश्चिच्चरणेषु कांश्चित्[१] ।
मदोत्कटानापततः क्षुरप्रैश्चकर्त्त कर्त्ता जगतां गजेन्द्रान् ॥ १५ ॥

(भा.दी.) कण्ठेष्विति । जगतां कर्ता श्रीरामः, मदोत्कटान् मदोन्मत्तान्, आपततः अभिमुखतया द्रवतः, कांश्चित् गजेन्द्रान्, घण्टाभिर्घटिताः सम्बद्धास्तेषु कण्ठेषु, कांश्चित् करा गजहस्तास्तेषु, कांश्चित् चरणाः पादास्तेषु, क्षुरप्राः सायकविशेषास्तैः, चकर्त । कृती च्छेदने लिट् ॥ १५ ॥

(सं.चं.) करेषु शुण्डासु । क्षुरप्रैः अर्धचन्द्राकृतिभिर्बाणैः । 'अर्धचन्द्रः क्षुरप्रः स्यात्' इति यादवप्रकाशः । जगतां कर्ता निर्माता संहर्ता वा । कृञ् करणे । कृञ् हिंसायाम् ॥ १५ ॥

श्रिया प्रदीप्तानविषादिनश्च[२] निषादिनः संयति सादिनश्च ।
अपातयत् तान् सहसा स[३] देवो नाकाधिरोहानिव[४] पुण्यनाशे ॥ १६ ॥

(भा.दी.) श्रियेति । देवः सः श्रीरामः, श्रिया प्रदीप्तान्, विषादो भयमेषामस्तीति विषादिनः, विषादिनो न भवन्तीत्यविषादिनः, युद्धे निर्भयानित्यर्थः, निषादिनः गजारोहांश्च, सादिनः अश्वारोहांश्च, पुण्यस्य नाशस्तस्मिन् सति, नाकस्य स्वर्गस्य अधिरोह आरोहणं येषां ते तथा नाकाधिरोहास्तानिव, स्वर्गिण इवेत्यर्थः, अत्र संयत् युद्धं तस्यां, सहसा झटिति अपातयत् । पत्लृ पतने लङ् ॥ १६ ॥

(सं.चं.) उत्साहविधुरता विषादः । संयत्यविषादिनः युद्धोत्सुकानित्यर्थः । 'निषादिनो गजारोहा अश्वारोहास्तु सादिनः' इति हलायुधः । पुण्यनाशे नाकान्निपततः नाकाधिरोहानिव अश्वारोहान् गजारोहांश्च अश्वेभ्यो गजेभ्यश्च निपातयामास नीचैः पातयामास मारयामासेत्येतत् ॥ १६ ॥

अलङ्घनीयां विमलां विशालां वेलामिवानन्तशरावलिं[५] ताम् ।
अभ्यापतन्ती प्रययौ क्षणेन भङ्गं तुरङ्गाख्यतरङ्गमाला ॥ १७ ॥

---

१. **'–णेषु चान्यान्'** इति वि.ती.पाठः स्यात् । २. **'–विषादिनोऽत्र'** ३. **'सहसा च देवो–'**

४. **'पुण्यनाशे पुण्यक्षये सति नाकाधिरोहानिव स्वर्गाधिरूढान् पुरुषान् यथा इन्द्रभृत्याः पातयन्ति । 'क्षीणे पुण्ये मर्त्यलोकं विशन्ति' इति वचनात् । तथा ....सहसा स्वसामर्थ्येनापातयत्'** इति का.श्री. । ५. **'–शरावलीम्'**

(भा.दी.) अलमिति । तुरङ्गा इति आख्या येषां ते तुरङ्गाख्याः, ते च ते तरङ्गाश्च, तेषां माला पङ्क्तिः, अलङ्घनीयां अतिक्रान्तुमशक्याम्, विमलां निर्मलाम्, विशालां ताम्, अनन्तस्य श्रीरामस्य ये शरास्तेषामावलिस्तां वेलामिव, अभ्यापतन्ती अभित आगच्छन्ती सती, क्षणः क्षणकालस्तेन भङ्गो नाशस्तं प्रययौ ॥ १७ ॥

(सं.चं.) वेला तरङ्गमालयाऽलङ्घनीया । अनन्ता असङ्ख्या अदृष्टान्ता, अनन्तस्य वा रामस्य शरावलिः तुरङ्गमालयाऽलङ्घनीया । वेलाऽपि विमला शुद्धा, विशाला सुदीर्घा च । रामशरावलिश्च ॥ १७ ॥

पदातिपङ्क्तिं द्रुतमापतन्तीं पतत्रिवेगां धृतखड्गखेटाम्[1] ।
निरास रामो बहुबाणवर्षैर्वर्षैर्म्महामेघइवोरुधूलिम् ॥ १८ ॥

(भा.दी.) पदातीति । श्रीरामः द्रुतं यथा भवति तथा आपतन्तीम्, पतत्रीव पक्षिवत् वेगो यस्याः सा तथा ताम्, खड्गश्च खेटश्चर्म स च धृतौ तौ यया ताम्, पदातीनां पङ्क्तिस्ताम्, (उरुधूळिं महामेघः वर्षैरिव बहुबाणानां) वर्षाणि वृष्टयस्तैः निरास व्यनाशयत् । असु क्षेपणे लिट् ॥ १८ ॥

(सं.चं.) पतत्रिसमानवेगाम् । पतत्रिपङ्क्तिवद् द्रुतमापतन्तीम् । खेटः फलकम् । **‘ଗଠାଣ’** इति भाषा-याम् ॥ १८ ॥

युद्धे समृद्धे कृतविक्रमाणां पुरा [2]मुहुर्द्रावितदैवतानाम् ।
महारथानां मधुजिच्छिरांसि चिच्छेद[3] भल्लैश्चलकुण्डलानि ॥ १९ ॥

(भा.दी.) युद्ध इति । मधुजित् श्रीरामः, समृद्धेऽतिमहति युद्धं रणं तस्मिन्, कृतः विक्रमो यैस्ते तथा तेषाम्, (पुरा) मुहुः द्रावितानि दैवतानि देवाः यैस्ते तथा तेषाम्, महारथानां महारथिकानां, चलानि कुण्डलानि येषां तानि शिरांसि भल्लाः शरविशेषास्तैः चिच्छेद । छिदिर्धातोर्लिट् ॥ १९ ॥

(सं.चं.) महारथानां राक्षसवीराणाम् । ‘स्नुहीदलफलो भल्लः’ इति यादवप्रकाशः । पार्श्वयोः कण्टक-चितस्तीक्ष्णाग्रो बाणप्रभेदः । **‘ଭଲ୍ଲ’** इत्येव भाषायाम् ॥ १९ ॥

सन्धानमाकर्षमिषोर्विमोक्षमादानमीशस्य तथाऽपदानम् ।
जनो विवेकी च विवेकहीनं[4] विभ्रान्तचक्रारवदीक्षते स्म ॥ २० ॥

---

१. **‘धृतखड्गखेटां धृतखड्गसमूहाम्’** इति वि.भू. व्याख्यानमसङ्गतम् । २. **‘मुहुर्दारित–’** ३. **‘-जिच्छिरांसि चकर्त भल्लै–’**

४. **‘जनः अविवेकी च विवेकहीनः विभ्रान्तचक्राक्षम(मि)वेक्षते’** इतीव पाठं पपाठ का.श्री. । **तथाहि तद्व्याख्यानम्–‘अविवेकी विवेकहीनः, अज्ञ इति यावत्, जनः लोकः ईशस्य रामस्य सम्बन्धिः इषोः बाणस्य आदानम्......अपदानं तिर्यगादानं तिर्यक् प्रयोगं वा नावेक्षते स्म–**

(भा.दी.) समिति । जनः विवेकी च विविच्य द्रष्टुमुद्युक्तोऽपीत्यर्थः, ईशस्य स्वामिनः श्रीरामस्य इषुः शरस्तस्य आदानं तूणाद् ग्रहणं तत्, सन्धानं मौर्व्यां संयोजनं तत्, आकर्षः कर्णपर्यन्ताकर्षणम्, विमोक्षो मोचनं तम्, तथा अपदानं रक्षः शिरसां निकृन्तनं तत् । दो अवखण्डन इति धातुः । यद्वा अपदानं तिर्यगादानं तिर्यक् प्रयोगं वा, इत्येतत्सर्वं विवेकहीनं विवेकरहितं यथा भवति तथा, विभ्रान्तं यच्चक्रं तस्य अराणि दलानि तानीव तद्वत् परिभ्रमितचक्रदलसमं यथा भवति तथेत्यर्थः, ईक्षते स्म अपश्यत् किल ॥ २० ॥

(सं.चं.) ईशस्य कर्तुरिषोः कर्मणः धनुषि सन्धानम्, गुणेन सह कर्णान्तमाकर्षम्, लक्षं प्रति विमोक्षम्, तूणादादानं, लक्षस्यापदानं भेदनं च । 'अपदानं खण्डने स्यात्' इति मेदिनी । विवेक्तुं शक्तोऽपि जनः एतानि क्रमभावीन्यपि विवेक्तुमप्रभवन् विवेकहीनं असकृत् प्रवृत्तं यथा तथा ईक्षते स्म । यथा विभ्रान्तस्य वेगेन परिभ्रमतश्चक्रस्य अराणि नेमिनाभ्योर्मध्ये स्थितान् संयोजकान् कीलानपि न विविच्य वीक्षितुं प्रभवन्ति तथा ॥ २० ॥

स यौगपद्येन शतं सहस्रं लक्षं च साक्षादविलक्ष एव[१] ।
कोटिं च खर्वं च तथा महौघं मुञ्चन्निषूनेष रिपून् जघान ॥ २१ ॥

(भा.दी.) स इति । सः शरमोक्षणे तादृशचातुर्यवान् एषः श्रीरामः । यौगपद्यमेकवारं तेन शतं शतसङ्ख्याकान्, सहस्रं सहस्रसङ्ख्याकान्, (लक्षसङ्ख्याकान्, कोटिसङ्ख्याकान्, खर्वः सङ्ख्याविशेषस्तावत्सङ्ख्याकान्, तथा) महौघसङ्ख्याकांश्च इषून् मुञ्चन् सन्, न विद्यते लक्षं लक्ष्यं यस्य स तथोक्तः लक्ष्यविशेषोद्देशरहितः सन्नित्यर्थः । रिपून् जघान ॥ २१ ॥

(सं.चं.) स एष रामः, यौगपद्येन एकक्षणावच्छेदेन, साक्षात् मूकीभूय प्रेक्षमाणानां कपिराक्षसानां समक्षमेव । एवं सर्वविस्मयावहकर्माणि कुर्वन्नपि अविलक्षः स्वयमविस्मयः । 'विलक्षः सविस्मयः' इति यादवप्रकाशः । विलक्षो न भवतीत्यविलक्षः । दश शतानि सहस्रम् । शतं सहस्राणि लक्षम् । शतं लक्षाणि कोटिः । सहस्रं कोटयः खर्वम् । मतान्तरेण कोटिकोटयः खर्वम् । दशसहस्रखर्वाणि महौघः । अधिकं निर्णयभावचन्द्रिकायाम् ॥ २१ ॥

इति नञोऽध्याहारेण योजनीयम् । किन्तु धनुर्मण्डले विभ्रान्तचक्रारमिव, विभ्रान्तं विशेषेण भ्रामितं यच्चक्रं तस्य दलमिव । परिभ्रामितचक्रदलसमं यथा तथा अवेक्षते स्म ऐक्षत' इति । समग्रं व्याख्यानमेव विभ्रान्तचक्रारमिव, व्याकुलमिव च ।

१. **'लक्षं च लक्षाधिकलक्षसैन्यम्'** । का.श्री. तु **'साक्षादविलक्ष्य एव'** इति पठति । तथाहि तद्व्याख्यानम्–**'अविलक्ष्य एव लक्ष्यमनवेक्ष्यैव युध्यन्'** इति ।

अपाङ्गमात्रेण जगन्नियन्ता नन्वेकरूपोऽपि रिपून् [१]निहन्यात् ।
स्वैश्वर्य्यमेवं च निदर्शयन् हि स विश्वरूपोऽकृत विश्वरूपम् ॥ २२ ॥

(भा.दी.) अपाङ्गेति । केवलमपाङ्गं अपाङ्गमात्रम्, तेन रमाब्रह्मादिजगतो नियन्ता प्रेरकः, विश्वानि देशतः कालतो गुणतश्च पूर्णानि रूपाणि यस्य स तथा, (सः) श्रीरामः, एकं रूपं यस्य सः (अपि) रिपून् हन्यात् हन्तुं (शक्तः) स्यात्, तथाऽपि (एवं स्वैश्वर्यं) निदर्शयन् नितरां दर्शयन्, विश्वमपरिमितं यद्रूपं तत् अकृत हि प्रादुश्चकार हि । नत्वेकेन रूपेण हन्तुमशक्त्येति भावः ॥ २२ ॥

(सं.चं.) नयनोपान्तमपाङ्गः । '**ಕಡೆಗಣ್ಣು**' इति भाषायाम् । अपाङ्गदृष्टिक्षेपमात्रेण जगतां नियन्ता । विश्वानि पूर्णानि सर्वाणि रूपाणि यस्य । तस्मादेकेनापि रूपेण सर्वानपि रिपून् निहन्यादेव । एवञ्च एवमपि, स्वस्यानन्तरूपत्वमैश्वर्यं निदर्शयन्, अनेन निदर्शनेन प्रकटयन् । एवमेतादृशमनुपममनन्तमैश्वर्यं निदर्शयन्निति वा । विश्वेषां रूपाणां समाहारो विश्वरूपम् । एकरूपोऽप्यनेकानि रूपाणि लीलया स्व्यकृतेति यावत् ॥ २२ ॥

रामो धरण्यां गगने च रामो रामोऽन्तिके दूरतरे च रामः ।
रामो विपक्षे स्वबले च रामः सर्वत्र रामः क्व बभौ न रामः ॥ २३ ॥

(भा.दी.) राम इति । धरण्यां श्रीरामः बभौ । भातेर्लिट् । गगनमाकाशस्तस्मिन् श्रीरामः बभौ । अन्तिकं समीपं तस्मिन् श्रीरामः बभौ । दूरतरं अतिदूरं तस्मिंश्च श्रीरामः बभौ । विपक्षः शत्रुसैन्यं तस्मिंश्च श्रीरामः बभौ । स्वबलं स्वसैन्यं तस्मिंश्च बभौ । सर्वत्र अन्तर्बहिश्च श्रीरामः बभौ । श्रीरामः क्व कुत्र न बभौ? सर्वत्र बभावित्यर्थः ॥ २३ ॥

(सं.चं.) रामो धरण्यामितीन्द्रवज्रा । क्व न बभौ नादृश्यत? सर्वत्राप्यदृश्यतैव न क्वाप्यदृश्यता बभूव तस्य ॥ २३ ॥

रामाननन्तानवलोकयन्तः प्रत्येकशस्तेषु गुणाननन्तान् ।
एकैकशस्तेषु गुणाननन्तान् सुरेश्वराः प्राञ्जलयः प्रणेमुः ॥ २४ ॥

(भा.दी.) रामानिति । अनन्तान् अपरिमितान् रामान् अवलोकयन्तः पश्यन्तः, एतेषु श्रीरामेषु एकमेकं प्रति प्रत्येकशः, एकैकरामेष्वित्यर्थः, अनन्तान् गुणान् अवलोकयन्तः, तांश्च गुणान् ज्ञानबलैश्वर्यादिशुभधर्मान्

१. '**रिपून् स हन्यात्**' इति वि.ती.पाठः स्यात् ।

एकैकशः एकैकं, अनन्तान् देशतः कालतो गुणतोऽसङ्ख्यातांश्च अपरिमितांश्च अवलोकयन्तः, सुरेश्वराः देवश्रेष्ठाः ब्रह्मादयः प्राञ्जलयः सन्तः प्रणेमुः । णमुधातोर्लिट् ॥ २४ ॥

(सं.चं.) तेष्वनन्तेषु रामेष्वेकैकस्यापि अनन्तान् गुणान्, तेष्वपि एकैकस्मिन् गुणे अनन्तगुणात्मकतामवलोकयन्तः । 'मय्यनन्तगुणेऽनन्ते गुणतोऽनन्तविग्रहे' इति हि भागवते । प्राञ्जलयः प्रबद्धाञ्जलयः ॥ २४ ॥

हरिन्मणिश्यामलकोमलाङ्गान् बिम्बाधरानम्बुजपत्रनेत्रान् ।
रामान् विरामान् रिपुवाहिनीनां प्रेक्ष्य प्रजाः प्राञ्जलयः प्रणेमुः ॥ २५ ॥

(भा.दी.) साधारणैः कथं दृष्ट इत्यत आह– **हरिदि**ति । हरिन्मणिवत् इन्द्रनीलरत्नवत् श्यामलानि कोमलानि अङ्गानि येषां ते तथा तान्, बिम्बवद् बिम्बपक्ववदधरः अधरोष्ठो येषां ते तथा तान्, अम्बुजस्य यत्पत्रं दलं तद्वन्नेत्रे येषां ते तथा तान्, रिपोर्वाहिन्यः सेनास्तासां विरामयन्तीति विनाशयन्तीति विरामास्तान्, संहर्तॄनित्यर्थः, श्रीरामान् प्रेक्ष्य प्रजाः प्राञ्जलयः सत्यः प्रणेमुः ॥ २५ ॥

(सं.चं.) विरामान् अवसानहेतून् ॥ २५ ॥

विष्फारयन्ति[1] स्म धनूंषि केचित् केचिद् विभिन्दन्ति पुरा विपक्षान् ।
अन्ये पराक्रम्य नदन्ति यावद् रामास्त्रिलोक्यामभिरामरूपाः ॥ २६ ॥

(भा.दी.) **विष्फारयन्ती**ति । त्रिलोक्यां अभिरामं मनोहरं रूपं येषां ते तथा, केचिद् रामाः धनूंषि विष्फारयन्ति स्म धनुःकूजनमकुर्वन् । स्फुल स्फुर सञ्चलने लट् । केचिद् रामाः विपक्षान् शत्रून् यावत् यतः पूर्वं विभिन्दन्ति विदारयन्ति । भिदिर्धातोर्लट् । पुरा ततः पूर्वमेव अन्ये श्रीरामाः पराक्रम्य युद्धे पराक्रमं कृत्वा नदन्ति सिंहनादं कुर्वन्ति । नद अव्यक्ते शब्दे लट् । यथा वीरा युद्ध्यतोऽन्यान् दृष्ट्वाऽभिवृद्धपौरुषाः सन्तः स्वयं पूर्वमेव शत्रून् सङ्गृह्य सन्तोषातिशयेन सिंहनादं कुर्वन्ति तद्वत् केचन रामाश्चक्रुरिति भावः ॥ २६ ॥

(सं.चं.) विष्फारयन्तीति पुनरिन्द्रवज्रा । 'चिस्फुरोर्णौ' (अ.सू.६.१.५४) इति णिचि विभाषा आकारादेशः । तेन रूपद्वयम्–विस्फारयन्तम्, विस्फोरयन्तम् । विभाषा मूर्धन्यादेशे–विष्फारयन्तम्, विष्फोरयन्तम् । अभिरामं अतिमनोज्ञं रूपं येषाम् । ते केचिद् रामाः धनूंषि विष्फारयन्ति स्म व्यस्फारयन् । केचिद् विभिन्दन्ति पुरा व्यभिन्दन् । अन्ये नदन्ति यावत् व्यनदन् । यद्यपि 'यावत्पुरानिपातयोर्लट्'

---

१. 'विस्फारयन्ति'

(अ.सू.३.३.४) इति भविष्यदर्थ एव लङ् विधीयते इति वैयाकरणाः, न भूतार्थे । ग्रन्थकारस्त्वेवं मन्यते– 'भविष्यति' (३.३.३) 'भूतेऽपि' (३.३.२) इति द्वयमपि पूर्वसूत्राभ्यामनुवर्तते । तेन यावत्पुरानिपातयोगे भविष्यतीव भूतेऽपि क्वचिल्लट् स्यादिति ॥ २६ ॥

जिघांसतां[1] वानरवाहिनीं तां कृताट्टहासं मुखकोटरान्तम् ।
निशाचराणां निशितैः शरौघैरपूरयन् केचन रामदेवाः ॥ २७ ॥

(भा.दी.) जिघांसतामिति । केचन रामदेवाः, वानरवाहिनीं जिघांसतां हन्तुमिच्छताम्, निशाचराणां राक्षसानाम्, कृत अट्टहासो येन तत्तथा तत्, मुखमेव कोटरं वृक्षबिलं तस्य अन्तं मध्यं तत्, निशितैः शराणामोघास्तैः अपूरयन् । पूरी आप्यायने लङ्[2] ॥ २७ ॥

(सं.चं.) जिघांसतामित्युपेन्द्रवज्रा । हन्तुमिच्छताम् । तां स्वेन रक्षणीयाम् । मुखकोटरस्य मुखसुषिरस्य अन्तमवकाशम् ॥ २७ ॥

रामैरगण्यैरिति वद्ध्यमानां सम्पश्यमाना रिपुवाहिनीं ताम् ।
अन्योन्यमाबद्धकरा हसन्तस्तस्थुः परं[3] केचन रामदेवाः ॥ २८ ॥

(भा.दी.) रामैरिति । केचन रामदेवाः, अगण्यैः असङ्ख्यातैः रामैः इति वध्यमानां तां रिपुवाहिनीं रावणसेनां सम्पश्यमानाः सन्तः, अन्योन्यं विलासेन आबद्धकराः सन्तः, हसन्तः सन्तः, परं केवलं तस्थुः ॥ २८ ॥

(सं.चं.) रामैरगण्यैरितीन्द्रवज्रा । सम्पश्यमानाः ।'दृशेश्चेति वक्तव्यम्' इति वार्तिकात् (अ.सू.१.३.३९) आत्मनेपदम् । नन्वकर्मकादेव दृशेरात्मनेपदं वैयाकरणाः मन्यन्ते । तथाहि जयादित्यः–'सम्पश्यते । अकर्मकादित्येव– ग्रामं सम्पश्यति' इति । सकर्मकाश्चात्र दृशिः– 'सम्पश्यमाना रिपुवाहिनीम्' इति । सत्यं वैयाकरणा एवमाचक्षते । कवयस्तु सकर्मकादपि प्रयुञ्जते । यथाऽऽह भारविः–'आजघ्ने विषमविलोचनस्य वक्षः' इति । नियोगपर्यनुयोगानर्हाः कवयः प्रायुञ्जतेति तूष्णीमासितव्यं प्रयोगशरणैर्वैयाकरणैः । आबद्धकराः 'ಕೈಕಟ್ಟಿ ನಿಂತು' इति भाषायाम् ॥ २८ ॥

---

१. **'जिघत्सतां'** । **'जिघत्सतामत्तुकामानाम्'** इति का.श्री । २. पूरीधातुर्दिवादावपि पठ्यते । चुरादावपि । दिवादेर्लङि अपूर्यन्तेति रूपम् । चुरादेरपूरयन्निति ।

३. **'परे केचन'**

किं विश्वमूर्त्तेः कपिभिस्तु कृत्यमिति ब्रुवाणान् प्लवगान् विलोक्य ।
अविस्मितं सुस्मितमाननाब्जमकम्पयन् केचन रामदेवाः ॥ २९ ॥

(भा.दी.) **किमि**ति । केचन रामदेवाः, विश्वाः पूर्णाः मूर्तयो यस्य स तथा तस्य श्रीरामस्य, कपिभिरस्माभिः कृत्यं कर्तुमर्हं प्रयोजनं किमस्ति? न किमपि । इति ब्रुवाणान् प्लवगान् कपीन् विलोक्य, न विद्यते विस्मितं विस्मयो यस्य तत्तथोक्तं तत्, शोभनं स्मितं यस्य तत् तथा तत्, आननाब्जं अकम्पयन् सन्तोषातिशयेन व्यचालयन् । कपि चलने लङ् ॥ २९ ॥

(सं.चं.) अविस्मितमथापि सुस्मितमिति विरोधाभासः । अविस्मितमविस्मयमिति परिहारः । अकम्पयन् 'ತಲೆದೂಗಿದರು' इति भाषायाम् ॥ २९ ॥

भिन्ना न वह्नेः पृथगीक्षिताश्च जाता यथा दीपत एव दीपाः ।
न विश्वमूर्त्तेर्नुनु जातु भिन्ना जातास्तथा रामत एव रामाः ॥ ३० ॥

वर्त्याद्युपाधेर्ननु तारतम्याद् दीपेषु दृष्टं गुणतारतम्यम् ।
रामस्य रूपेषु तथा गुणानां नैसर्गिकाणां न हि तारतम्यम् ॥ ३१ ॥

(भा.दी.) अनन्तरूपत्वेन प्राप्तां परस्परं भेदशङ्कां सदृष्टान्तं निवारयति– **भिन्ना** इति । दीपत एव दीपादेव जाताः दीपाः यथा पृथक् भेदेन ईक्षिताश्च दृष्टा अपि वह्नेः भिन्नाः वह्नित्वेनाकारेण भेदवन्तो न । यद्वा वह्नेः अभिमानिनो हि देवात् भिन्नदेवताकाः न, तथा रामत एव जाताः प्रादुर्भूताः रामाः विश्वमूर्तेः श्रीरामात् जातु कदाचिदपि भिन्नाः न भवन्ति ननु? किन्त्वत्यन्ताभिन्ना एवेत्यर्थः । ननु दीपानां वह्नित्वेनाभिन्नत्वेऽपि यथा प्रकाशादिगुणतारतम्यमस्ति तथा प्रकृतेऽप्यस्ति किम्? नेत्याह– **वर्ती**ति । दीपेषु, वर्तिरादिर्यस्य स तथोक्तः, स चासौ उपाधिश्च तस्य, दीपोच्चत्वादिप्रयोजकवर्तितैलादिनिमित्तस्येत्यर्थः, तारतम्यं नीचोच्च-भाव, तस्मात् गुणेषु प्रकाशादिगुणेषु तारतम्यं तत् दृष्टं ननु । तथा श्रीरामस्य रूपेषु, नैसर्गिकाः स्वाभाविका-स्तेषां गुणानां तारतम्यं तत् नहि । किन्तु सर्वत्राऽपि रूपेषु वीर्यशौर्यादिगुणानां साम्यमेव, न तूच्चनीचत्वे, अनन्यनिमित्तकत्वेन स्वाभाविकत्वात् । दीपगुणानां तु वर्त्यादिनिमित्तत्वेनान्याधीनत्वादुच्चनीचत्वे स्यातामिति भावः ॥ ३०–३१ ॥

(सं.चं.) पृथगीक्षिताश्च भिन्नत्वेन दृष्टिगोचरा अपि वस्तुतो न भिन्नाः । अभिमानिविवक्षयेदम् । एवं विश्वमूर्तेर्न जातु भिन्ना ननु? 'ननु प्रश्नेऽवधारणे' इति हलायुधः । नन्वित्यनुनये वा । वर्त्याद्युपाधेरितीन्द्र-

वज्रा । गुणतारतम्यं प्रकाशतारतम्यम् । वर्तिभेदेन तैलभेदेन पात्रभेदेन च कश्चिद् दीपः प्रचुरप्रकाशः । कश्चिदल्पप्रकाशः । नैसर्गिकाणां स्वाभाविकानां निरुपाधिकानाम् ॥ ३०–१ ॥

सर्वेऽपि ते श्याममणीन्द्ररामाः सर्वेऽपि विध्वस्तनिजोपरामाः ।
सर्वेऽपि ते सर्वगुणाभिरामाः सर्वेऽपि नाथा जगतां हि रामाः ॥ ३२ ॥

(भा.दी.) तारतम्यं नेत्युक्तमेवोपपादयति– **सर्वेऽपी**ति । सर्वेऽपि ते श्रीरामाः श्यामा ये मणीन्द्राः मणिश्रेष्ठाः, तद्वद् रामाः मनोहराः, सर्वेऽपि श्रीरामाः विध्वस्तः अपास्तः निज आत्मीय उपरामो विनाशो येषां ते तथोक्ताः, नाशरहिता इत्यर्थः । सर्वेऽपि ते श्रीरामाः सर्वे ये गुणाः ज्ञानशक्त्यादयः, तैरभिरामाः मनोहराः । सर्वेऽपि श्रीरामाः जगतां नाथाः स्वामिनो हि । हि शब्देनोक्तार्थे नैकानि प्रमाणानि सूचितानि ॥३२॥

(सं.चं.) सर्वेऽपीति पुनरिन्द्रवज्रा । सर्वेऽपि ते रामाः श्याममणीन्द्रवत् इन्द्रनीलवत् रामाः श्यामवर्णाः । 'रामश्चारौ सितेऽसिते' इति यादवप्रकाशः । विध्वस्तः निरस्तः निजः स्वरूपसम्बन्धी उपरामो विरामः येषां ते । '**ಮುಕ್ತಾಯ**' इति भाषायाम् । सर्वैर्गुणैरभिरामा मनोज्ञतमाः । आद्यन्तयोर्मधुरेण प्रासेन श्लोकोऽप्ययं मनोऽभिरामः ॥ ३२ ॥

भेदं विनैवापि विशेषमात्राद् रूपाण्यनन्तानि पृथग्विधाय ।
एकीचकाराथ स रामदेवो दीपाभिमानी हि यथाऽग्निर्देवः ॥ ३३ ॥

(भा.दी.) श्रीरामरूपाणां एकीभावं दर्शयति– **भेदमि**ति । सः रामदेवः, भेदोऽन्योन्याभावः, तं विनैवापि केवलं विशेषः विशेषमात्रं तस्मात्, भेदप्रतिनिधेर्विशेषाख्यगतेरित्यर्थः, अनन्तानि रूपाणि पृथक् विधाय, अथ दीपाभिमानी अग्निर्देवः यथा तथा एकीचकार प्रपञ्चव्याप्तत्वेन प्रकटितस्वस्वरूपजातमेकत्वेन प्रकटीचकारेत्यर्थः ॥ ३३ ॥

(सं.चं.) भेदं विनैवापीति चेन्द्रवज्रा । पृथगिव विधाय निर्माय । 'ते तु रामसहस्राणि रणे पश्यन्ति राक्षसाः । पुनः पश्यन्ति काकुत्स्थमेकमेव महाहवे' (९३.२७) इति च ॥ ३३ ॥

[१]न भवति बहुभावो भेदहीनात्र्थ इत्थं
मतिरपटुमतीनामस्तु डोलायमाना ।

१. 'भवति नु बहु–'

वपुरवयवधर्म्मा वर्ण्णचेष्टागुणाद्या
ध्रुवमपरिमिताः श्रीराम एको विशेषात्[1] ॥ ३४ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
युद्धकाण्डे द्वादशः सर्ग्गः ॥

—०—

(भा.दी.) ननु श्रीरामरूपेषु भेदस्य प्रतीतत्वेन कथं नास्तीत्युच्यत इत्यत आह– **न भवती**ति । इत्थं सर्वदीपाभिमान्यग्निदेववत् भेदेन रहितोऽर्थः श्रीरामाख्यस्तस्मिन् बहुभावः बहुत्वं न भवति । तथा च ज्ञानिनां श्रीरामरूपेषु परस्परं भेदबुद्धिः स्वरूपत एवासिद्धेति भावः । ननु केषाञ्चिद् भेदः प्रतीयत इत्यत आह– **मतिरि**ति । अपटुरकुशला अयथार्था मतिर्येषां ते तथा तेषां डोलावदाचरतीति डोलायमाना, श्रीरामरूपेषु भेदोऽस्ति नवेति चञ्चलरूपेत्यर्थः, मतिः बुद्धिः अस्तु । उपलक्षणं चैतत्, श्रीरामरूपगुणादिषु विभेद एवेति विपरीतबुद्धिर्वाऽस्तु । न तावता श्रीरामरूपादिषु भेदलक्षणार्थसिद्धिः । नहि मन्दैः प्रदेशपरिमितत्वेन चन्द्रः प्रतीत इत्येतावता तत्र तत्सिद्धिः । अतो मन्दानां प्रतीतिर्भ्रमरूपैवेत्यकिञ्चित्करेत्यतोऽस्त्वित्युक्तम् । किं तर्हि तत्वमित्यत आह– **वपुरि**ति । वपूंषि स्वरूपाणि तानि च, अवयवा करचरणाद्यवयवास्ते च तेषां धर्माः स्वभावभूताः । 'धर्मोऽस्त्री सुकृते साम्ये स्वभावे' इति वैजयन्ती । वर्णाः श्यामत्वादयस्ते च, चेष्टाः शरीरव्यापारास्ताश्च, गुणाः ज्ञानशक्त्यादयस्ते च वर्णचेष्टागुणाः, ते आद्या येषां ते तथोक्ताः, विशेषात् श्रीरामस्वरूपभूतस्वनिर्वाहकविशेषाख्यशक्त्यतिशयात् अपरिमिता असङ्ख्याता अपि श्रीरामः एक एव श्रीरामात्मका एव । नतु ततो भिन्ना इत्यर्थः । एक एव चेद् गुणानां बहुत्वं कथमित्यादिशङ्का-पिशाचिकाऽचिन्त्यशक्तिवशात् सम्भवतीति 'न भवति' इत्यनेन परिहृतैवेति सर्वमनवद्यम् । अस्मिंश्च श्रुतिस्मृत्यादयो भगवत्पादैरुदाहृता यथायोग्यमनुसन्धेया इति ॥ ३४ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां
युद्धकाण्डे द्वादशः सर्गः ॥

—०—

(सं.चं.) अथ मालिन्या सर्गमुपसंहरति– **न भवती**ति । इत्थं यथाऽग्निदेवे तथा भेदहीने पदार्थे बहुभावो न सम्भवति । ननु बहवो बहुभावममन्वत । मन्वताम् । भगवती भ्रान्तिरियं तेषामित्याह– मतिरिति ।

---

१. **'विशेषात्, 'भेदहीने त्वपर्यायशब्दान्तरनियामकः । विशेषो नाम कथितः सोऽस्ति वस्तुष्वशेषतः' इति प्रमाणसिद्धात् विशेषाख्यशक्तिबलात्'** इति का.श्री. ।

वास्तवग्रहणदक्षता पाटवम् । तद्रहिता अपटुर्मतिर्येषां तेषामचतुरधिषणानां मतिर्डोलायमाना सत्यासत्ययो-रितस्ततश्चलन्ती इदमित्थमिति निश्चेतुमप्रभवन्ती संशीतिडोलानिमग्ना स्यात् । अस्तु नाम । तेन न काऽपि क्षतिः । यस्ययस्य यादृशी योग्यता सस तथा पश्यति । नहि कदाऽपि सर्वस्य सर्वं यथावत् प्रतीयते । वस्तुप्रतीतिरन्यादृशी भवति । वस्तुस्थितिश्चान्यादृशी । यतः भेदहीनेऽर्थे बहुभावो न भवति ततः भेद-हीने भगवति कथं बहुभावः स्यादित्यपटुधियां मतिस्तु डोलायमानेत्यन्वयः । 'डोला प्रेङ्खोलनं प्रेङ्खा' इति हलायुधः । वास्तवं तत्वमाह– वपुरवयवधर्माः । अवतारवपूंषि, करचरणाद्यवयवाः, उग्रत्वशान्तत्वादयः चक्रपरशुकोदण्डदण्डधरत्वादयश्च तद्धर्माः शुक्लकृष्णत्वादयो वर्णाः कंसवधरावणवधादयश्चेष्टाः ज्ञानानन्दादयश्च गुणा अपरिमिताः सर्व एते एको राम एव । रामेणैकीभूता इत्यर्थः । कुतः? अभेदेऽपि भेदव्यवहारहेतु-विशेषबलात् ॥ ३४ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां
युद्धकाण्डे द्वादशसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– २८३०+३४=२८६४]

त्रयोदशः सर्ग्गः

महाबलेन रामेण श्रुत्वा मूलबलं हतम् ।
जीविताशां सुखाशां च क्षणात् तत्याज रावणः ॥ १ ॥

(भा.दी.) श्रीरामेण मूलबले हते सति तच्छ्रुतवतो रावणस्यावस्थां दर्शयति– **महे**ति । महत् बलं यस्य स तथा तेन श्रीरामेण, मूलं आदिभूतं यद् बलं सैन्यं तत्, स्वापत्काले नियोजनीयबलमित्यर्थः, स्वीयबलमिति वा । 'मूलं वशीकृतौ स्वीये शिफातारान्तिकादिषु' इति वैजयन्ती । हतं श्रुत्वा (रावणः क्षणात्) जीविते जीवने आशा ताम्, सुखाशां च तत्याज । त्यज विसर्गे लिट् ॥ १ ॥

(सं.चं.) सुखाशां च । जीविते सति हि सुखाशा । केवलमात्मरक्षार्थमुपयुज्यमानं बलं मूलबलम् । '**ಖಾಸಗಿ**' इति भाषायाम् । क्षणादिति सपदीत्यर्थे विभक्तिप्रतिरूपमव्ययम् । चिरादितिवत् । अथवा क्षणादल्पकालावच्छेदेन । क्षणात् निर्व्यापारो भूत्वेति वा । दुःखपारवश्यादिति वा । 'क्षणो व्यापारवैकल्ये कालभेदाल्पकालयोः' । उत्सवे परतन्त्रत्वे मध्यावसरपर्वसु' इति यादवप्रकाशः ॥ १ ॥

स्नुषाणामथ भार्य्याणां परासामपि योषिताम् ।
पत्यपत्यार्त्तिजं[1] रोदं श्रुत्वा मर्त्तुं मनो दधे ॥ २ ॥

(भा.दी.) **स्नुषाणामि**ति । स्नुषाणां इन्द्रजिदादिपुत्रभार्याणाम्, अथ भार्याणाम्, तन्मातॄणां स्वभार्याणां च, परासां योषितामपि, पतयश्च, अपत्यानि पुत्रास्तानि च, तेषां या आर्तिः क्लेशः, तया जातस्तं रोदं श्रुत्वा मर्तुं मनः दधे ॥ २ ॥

---

१. **'पत्यपत्यार्तिजं पतिपुत्राणां शोकजम्, पतिपुत्रैर्विहीना अभूमेति क्लेशजातं रोदं विलपन्'** इति वि.भू। **'रोदं अश्रुविमोचनपूर्वकं विलापम्'** इति का.श्री ।

(सं.चं.) स्नुषाणामित्यादि । ये तत्र मृताः स्वतनयास्तेषां भार्या रावणस्नुषाः । तेषां मातरो मण्डोदरीधान्यमालिनीप्रभृतयश्च स्वभार्या इति स्वगृहावस्थामाह । अथापरासामपि पुरवासिनीनां हतबन्धूनां योषितामिति समग्रनगरावस्थामाह । 'मम पुत्रो मम भ्राता मम भर्ता रणे हतः । इत्येवं श्रूयते शब्दो राक्षसानां कुलेकुले' (९४.२२) इति च । मृतेभ्यः पतिभ्योऽपत्यादिभ्यश्च या आर्तिः व्यथा तया जातं रोदं रोदनम् स्नुषाणां पतिविपत्तिजाऽऽर्तिः । भार्याणामपत्यविपत्तिजा । परासु च योषत्सु भार्याणां पतिविपत्तिजा, मातॄणा-मपत्यविपत्तिजेति भेदः ॥ २ ॥

जाज्वल्यमानः क्रोधेन[1] नेत्रेभ्यो वह्निमुद्गिरन् ।
अवानरनरामुर्वीं करिष्यामीत्युवाच सः ॥ ३ ॥

(भा.दी.) जाज्वल्येति । क्रोधः कोपस्तेन जाज्वल्यमानः, अत एव नेत्राणि अक्षीणि तेभ्यः वह्निमुद्गिरन् सन् रावणः, उर्वीम्, न विद्यन्ते वानरा नराश्च यस्यां सा तथा तां करिष्यामि इति उवाच ॥ ३ ॥

(सं.चं.) नेत्रेभ्यो वह्निमुद्गिरन् । 'निर्दहन्निव चक्षुषा' (९५.४) इत्यर्थः । अवानरनराम् । सङ्ख्याबाहुल्याद् वानराणामभ्यर्हितत्वम् । ततश्च पूर्वनिपातः ॥ ३ ॥

सर्वदिव्यायुधोपेतं पुष्पकं पुष्टिवर्द्धनम् ।
आरुरोह महाबाहुः[2] सन्नद्धो दशकन्धरः ॥ ४ ॥

(भा.दी.) सर्वेति । महान्तो बाहवो यस्य स तथा, सन्नद्धः युद्धसन्नहनोपेतः, दश कन्धराः कण्ठा यस्य स तथा, सर्वाणि यानि दिव्यान्यायुधानि तैरुपेतं युक्तम्, पुष्टिं वर्धयतीति तथोक्तं तत्, विजयाद्यभिवृद्धिकरमित्यर्थः, पुष्पकं पुष्पकविमानं तत् आरुरोह ॥ ४ ॥

(सं.चं.) पुष्पकमारुरोह । तथाहि निर्णये–'अथाऽययौ सर्वनिशाचरेश्वरो हतावशिष्टेन बलेन संवृतः । विमानमारुह्य च पुष्पकं त्वरन् शरीरनाशाय महायुधोद्धतः' (८.१८९) इति । एतेनैतदाह– 'आरुरोह रथं भीमो दीप्यमानं स्वतेजसा' (९५.३३) इति रामायणवचनमपि विमानपरतया योजनीयमिति ॥ ४ ॥

विरूपाक्षश्च यूपाक्षो महापार्श्वमहोदरौ ।
दंसिता[3] रथमारुह्य रावणं पर्य्यवारयन् ॥ ५ ॥

---

१. **'–मानः कोपेन'** २. **'महाबाहुः महासमर्थः । सन्नद्धः युद्धप्रयत्नोपेतः बद्धकवचो वा'** इति का.श्री । ३. **'दंशिता–'**

(भा.दी.) विरूपाक्ष इति। विरूपाक्षः विरूपाक्षनामकः, यूपाक्षः यूपाक्षनामकः, महापार्श्वः महोदरः इत्येतौ दंसिताः बद्धकवचाः सन्तः रथः स्यन्दनस्तं आरुह्य रावणं पर्यवारयन्। वृञ् वरणे लङ्॥ ५॥

(सं.चं.) विरूपाक्षश्च यूपाक्षः। रामायणेऽत्र यूपाक्षो न पठ्यते। 'रावणेनाभ्यनुज्ञातौ महापार्श्वमहोदरौ। विरूपाक्षश्च दुर्धर्षो रथानारुरुहुस्तदा' (९०.३९) इति। एको यूपाक्षः पूर्वं हनुमता हतः, अपरश्च मैन्देन हत इति द्वौ यूपाक्षौ रामायणे पठ्येते। सुग्रीवहतोऽयमन्यस्तृतीयः स्यात्। 'विरूपनेत्रोऽथ च यूपनेत्रस्तथा महापार्श्वमहोदरौ च। ययुस्तमावृत्य सहैव मन्त्रिणो मृतिं पुरोधाय रणाय यान्तम्' (८.१८६) इति हि निर्णये। दंसिताः कवचिताः॥ ५॥

निर्य्ययौ नगराद् राजा सेनया हतशेषया।
उत्पातान् वीक्षमाणोऽपि दिव्यान् भौमानथाङ्गिकान्[1] ॥ ६॥

(भा.दी.) निर्ययाविति। राजा रावणः, दिवि अन्तरिक्षे भवाः दिव्याः रुधिरवृष्ट्यादयस्तान्, भूमौ भवाः भौमाः पक्षिरुतादयस्तान्, अङ्गेषु भवा आङ्गिका कम्पादयस्तान् उत्पातान् वीक्षमाणोऽपि, पश्यन्नपि हतेभ्यः शेषया अविशिष्टया सेनया सह नगरं लङ्कापुरं तस्मात् निर्ययौ॥ ६॥

(सं.चं.) अङ्गे भवा जाता वा आङ्गिकाः॥ ६॥

देवो ववर्ष रुधिरं विनेदुरशिवाः शिवाः।
चेलुरङ्गानि[2] वामानि यतो मृत्युः प्रतीयते ॥ ७॥

(भा.दी.) उत्पातानेव दर्शयति– **देव** इति। देवः पर्जन्यः रुधिरं रक्तं तत् ववर्ष। वृष सेचने लिट्। अशिवाः शिवाः गोमायवः, 'स्त्रियां शिवा भूरिमायः' इत्यमरः, विनेदुः। नद अव्यक्ते शब्दे लिट्। वामानि सव्यानि अङ्गानि अवयवाः चेलुः। चल कम्पने लिट्। यतः येभ्यः उत्पातेभ्यः मृत्युः प्रतीयते ज्ञायते। इण् गतौ लट्॥ ७॥

(सं.चं.) देवो ववर्ष रुधिरमिति दिव्य उत्पातः। विनेदुरशिवाः शिवा इति भौमः। चेलुरङ्गानि वामानीत्यङ्गजः। 'सृगालो जम्बुकः शिवा' इति हलायुधः॥ ७–९॥

---

१. **'–नथाऽङ्गजान्'**

२. **'वामानि अपसव्यानि अङ्गानि नेत्रबाहूरुपादादीनि'** इति का.श्री.।

पुरुषादाधिपस्यास्य पुरुषादान् पुरःसरान् ।
वानरा वारयामासुस्तन्नासहत रावणः ॥ ८ ॥

(भा.दी.) पुरुषादेति । पुरुषादा राक्षसास्तेषामधिपस्य अस्य रावणस्य पुरःसरान् भृत्यान् पुरुषादान् राक्षसान् वानराः वारयामासुः । रावणः तत् निवारणं न असहत न ममर्ष । षह मर्षणे लङ् ॥ ८ ॥

[१]निकृत्तकरकर्णाङ्घ्रिकण्ठाद्यवयवान् बहून् ।
पत्रिभिः पातयामास युगपद् रावणः कपीन् ॥ ९ ॥

(भा.दी.) निकृत्तेति । रावणः, कराश्च कर्णाश्च अङ्घ्रयश्च कण्ठाश्च ते आद्या येषां ते तथोक्ताः ते च ते अवयवाश्च ते, निकृत्ताः करकर्णाङ्घ्रिकण्ठाद्यवयवा येषां ते तथा तान् बहून् कपीन् पत्रिभिः युगपत् पातयामास ॥ ९ ॥

पराद्रवन् पराभूताः केचित् तच्छरपावकैः[२] ।
अपरे कपयस्तस्य ध्वजिनीं जघ्नुरुद्धताः ॥ १० ॥

(भा.दी.) परेति । केचित् कपयः तस्य ये शरास्त एव पावकास्तैः पराभूताः पराजिताः सन्तः पराद्रवन् पलायितवन्तः । द्रु गतौ लङ् । अपरे कपयः उद्धताः सन्तः तस्य ध्वजिनीं सेनां जघ्नुः ॥ १० ॥

(सं.चं.) उद्धताः प्रगल्भा निर्भयाः ॥ १०–३ ॥

प्रक्षीणान् राक्षसान् वीक्ष्य[३] महादेहो महोदरः ।
अभ्यद्रवद् वानरेन्द्रान् शरवर्षी[४] घनस्वनः ॥ ११ ॥

(भा.दी.) प्रक्षीणानिति । महान् देहो यस्य स तथा, घनस्य मेघस्य स्वन इव स्वनो यस्य स तथा, महोदरः महोदराख्यरावणमन्त्री, राक्षसान् युद्धे प्रक्षीणान् विनष्टान् वीक्ष्य, शरवर्षी सन् वानरेन्द्रान् अभ्यद्रवत् । द्रु गतौ लङ् ॥ ११ ॥

---

१. 'निकृत्य' २. 'तच्छरपातनैः'
३. 'राक्षसान् दृष्ट्वा महा–' ४. 'शरवर्षो–'

स एव[1] कुम्भकर्णोऽयं हन्तुं नः पुनरागतः ।
इति विक्रुश्य हरयो पलायन्त दिशो दश ॥ १२ ॥

(भा.दी.) स इति । हरयः एषः आगच्छन् राक्षसः सः मृतः कुम्भकर्णः, अयं कुम्भकर्णः नः हन्तुं पुनः आगतः, इति विक्रुश्य आक्रोशं कृत्वा दश दिशः पलायन्त दुद्रुवुः ॥ १२ ॥

इदं विभीषिकामात्रं[2] मैवं द्रवत तिष्ठत ।
इत्युक्त्वा स्थापयामास तारेयो ध्वजिनीं निजाम् ॥ १३ ॥

(भा.दी.) इदमिति । ताराया अपत्यं पुमान् तारेयः अङ्गदः, इदं कुम्भकर्णोऽयमित्येतत् केवलं विभीषिका विभीषिकामात्रम्, भयमात्रनिमित्तमित्यर्थः, यद्वा इदं रक्षः विभीषिकामात्रम्, न तु कुम्भकर्ण इत्यर्थः । मैवं द्रवत । किन्तु तिष्ठत । इति उक्त्वा निजां ध्वजिनीं स्थापयामास ॥ १३ ॥

(सं.चं.) इदं महोदराख्यम् । विभीषिका '**ಬೆದರುಬೊಂಬೆ**' इति भाषायाम् । तारेयोऽङ्गदः ॥ १३ ॥

इन्द्रसूनुसुतो वीरो महोदरमथाद्रवत् ।
सङ्ग्रामः समजन्युग्रो रक्षोवानरवीरयोः ॥ १४ ॥

(भा.दी.) इन्द्रेति । अथ वीरः इन्द्रसूनुसुतः वालिसुतः अङ्गदः महोदरं अद्रवत् । द्रु गतौ लङ् । रक्षांसि च वानराश्च तेषु वीरौ तयोः महोदराङ्गदयोः उग्रः सङ्ग्रामः समजनि अभूत् ॥ १४ ॥

(सं.चं.) इन्द्रसूनुसुत इति चाङ्गदः । इन्द्रसूनुर्वाली । समजनि समजायत ॥ १४–५ ॥

महोदरो वालिसुते ववर्ष निशितान् शरान् ।
अचिन्तयंस्तान् जग्राह केशे वालिसुतो रिपुम् ॥ १५ ॥

(भा.दी.) महेति । महोदरः निशितान् शरान् वालिसुते अङ्गदे ववर्ष । वृष सेचने लिट् । वालिसुतः तान् शरान् अचिन्तयन् अगणयन् सन् तं रिपुं केशः केशपाशस्तस्मिन् जग्राह । ग्रह उपादाने लिट् ॥ १५ ॥

---

१. '**स एष कुम्भ–**' इति.वि.ती.पाठः ।
२. '**–मात्रं नैवम्**'

महोदरं महीपृष्ठे पातयित्वाऽङ्गदो रुषा ।
परिघापातपरुषैः पादपातैरचूर्णयत् ॥ १६ ॥

(भा.दी.) महोदरमिति । अङ्गदः रुट् रोषस्तया महोदरं मह्याः पृष्ठं तळं तस्मिन् पातयित्वा, परिघस्य परिघाख्यायुधस्य आपाता आघाताः तद्वत्परुषा असह्यास्तैः पादपातैः पादप्रहारैः अचूर्णयत् । चूर्ण सङ्कोचे लङ् ॥ १६ ॥

(सं.चं.) पादपातैरचूर्णयदङ्गदः । रामायणे तु पुंव्यत्यासेन सुग्रीवनिहतोऽयमित्युच्यते । सुन्दरग्रीवोऽङ्गद इत्यर्थः । तथाहि निर्णयवचनम्–'महोदरो वालिसुतेन चूर्णितः' (८.१९०) इति । ननु रामायणं हि रामकथायां मूलं प्रमाणम् । उपजीव्यमन्यासां रामकथानाम् । तत् कथं भवदाचार्यवचनेन वाल्मीकिवचनमन्यथयसि? प्रत्युत उपजीव्यविरोधात् तत्रभवतो भवदाचार्यस्य वचनमेवान्यथा व्याख्येयम् कनकाङ्गदः सुग्रीव इति । वालिसुत इति पुत्रतुल्योऽनुज इति । न भोः । वास्तवमविदन् विवदसे । अनिर्णीतस्य वचनस्यार्थः निर्णयानुगुणतया करणीय इति शास्त्रसम्प्रदायः । वाल्मीकिवचनं तु पुराणानीति भाषात्रयबन्धमित्यनिर्णायकम् । व्यत्यासादिसप्तभेदेन सावकाशं तत् । सर्वशास्त्रानुगुणतया निर्णीतमाचार्यवचनम् । तत् स्वयमेवाऽचार्यः स्पष्टमाचष्ट –'बहुकल्पानुसारेण मयेयं सत्कथोदिता । नैकग्रन्थाश्रयात् तस्मान्नाऽशङ्क्याऽत्र विरुद्धता । क्वचिन्मोहायासुराणां व्यत्यासः प्रतिलोमता । उक्ता ग्रन्थेषु तस्माद्धि निर्णयोऽयं कृतो मया' (म.भा.ता.नि.९.१२७–८) इति । सन्दिग्धमसन्दिग्धेन निर्णीयत इति विदितमेव पुराणमीमांसकानाम् । व्याख्यानतो विशेषप्रतिपत्तिरिति च । तस्मान्नात्र दुराग्रहलेशोऽपि ॥ १६–९ ॥

महोदरं हतं दृष्ट्वा महापार्श्वः समापतन्[१] ।
ववर्ष विशिखान्[२] घोरान् वालिसूनुजिघांसया ॥ १७ ॥

(भा.दी.) महेति । महापार्श्वः तन्नामकः, महोदरं अङ्गदेन हतं दृष्ट्वा समापतन् समागच्छन् वालिसूनोः जिघांसया घोरान् विशिखान् शरान् ववर्ष ॥ १७ ॥

अङ्गदस्तमभिद्रुत्य प्रसह्याऽदत्त तद्धनुः ।
महापार्श्वोऽथ[३] कुपितः खड्गमादत्त वेगवान् ॥ १८ ॥

१. '**समापतत्**' इति, '**समाययौ**' इति च क्वचित् । २. '**ववर्ष च शरान् घोरान्**' ३. '**महापार्श्वोऽपि**'

(भा.दी.) अङ्गद इति । अङ्गदः तं महापार्श्वं अभिद्रुत्य तद्धनुः प्रसह्य बलात्कृत्य आदत्त अपहृतवान् । अथ वेगोऽस्यास्तीति वेगवान् महापार्श्वः कुपितः सन् खड्गोऽसिस्तं आदत्त सञ्जग्राह ॥ १८ ॥

खलस्य खड्गमाच्छिद्य केशपाशे प्रगृह्य तम् ।
पातयित्वा धरापृष्ठे[1] खड्गेनाकृन्तदङ्गदः ॥ १९ ॥

(भा.दी.) खलस्येति । अङ्गदः खलस्य महापार्श्वस्य खड्गं आच्छिद्य अपहृत्य, तं केशानां पाशः समूहस्तस्मिन्, 'हस्तः पक्षः पाशः केशेषु बहुत्ववाचकाः शब्दाः' इति हलायुधः, प्रगृह्य, धरायाः पृष्ठं तळं तस्मिन् पातयित्वा खड्गेन अकृन्तत् । कृती च्छेदने लङ् ॥ १९ ॥

आ दक्षिणोदरप्रान्तादा वामांसाच्च राक्षसम् ।
खण्डयन् निजघानैनमाखण्डलसुतात्मजः ॥ २० ॥

(भा.दी.) कृन्तनप्रकारमाह– **आदक्षिणे**ति । आखण्डलस्य सुतो वाली, तस्य आत्मजः अङ्गदः, एनं राक्षसं दक्षिणो य उदरप्रान्तस्तस्मात् आ आरभ्य वामो योंऽसस्तस्मात् आ पर्यन्तमुपवीताकारेण खण्डयन् सन् निजघान । हन्तेर्लिट् ॥ २० ॥

(सं.चं.) आ दक्षिणोदरप्रान्तात् । न स्फुटमिदं रामायणे । 'निगृह केशेषु निपात्य भूतळे चकर्त्त वामांसत ओदरं परम् । यथोपवीतं स तथा द्विधाकृतो ममार मन्त्री रजनीचरेशितुः' (८.१९२) इति निर्णये ॥२०॥

ततो विरूपनेत्रेण यूपनेत्रेण चाङ्गदः ।
आच्छन्नः शरवर्षेण[2] मेघाभ्यामिव भास्करः ॥ २१ ॥

(भा.दी.) तत इति । ततः अङ्गदः विरूपनेत्रेण तन्नामकेन राक्षसेन, यूपनेत्रेण च, मेघाभ्यां भास्कर इव, शराणां वर्षेण ताभ्यां आच्छन्नः, अभवत् ॥ २१ ॥

(सं.चं.) शरवर्षेण बाणवर्षणेन रक्षोभ्यां यूपाक्षविरूपाक्षाभ्यामाच्छन्नोऽङ्गदः । जलवर्षेण मेघाभ्यां भास्करः । 'शरस्तेजनके बाणे दध्यग्रे ना शरं जले' इति मेदिनी ॥ २१–२ ॥

---

१. 'धरातळे पातयित्वा'
२. 'शरवर्षाभ्यां मेघा–'

शरपञ्जरबद्धोऽथ रक्षोभ्यां वालिनन्दनः ।
न शशाक प्रचलितुं व्याघ्रः पञ्जरगो यथा ॥ २२ ॥

(भा.दी.) शरेति । अथ रक्षोभ्यां शरमयं पञ्जरं पेटी तेन बद्धः वालिनन्दनः, पञ्जरगः व्याघ्रः यथा तथा प्रचलितुं न शशाक न समर्थोऽभूत् । शक्लृ शक्तौ लट् ॥ २२ ॥

सुतं संशयितं वीक्ष्य पृतनां च प्रपातिताम्[1] ।
गुल्मे सुषेणं विन्यस्य सुग्रीवोऽभ्यपतद्[2] रुषा ॥ २३ ॥

(भा.दी.) सुतमिति । सुग्रीवः, (सुतं) अङ्गदं संशयितं प्राणसंशयं प्राप्तं वीक्ष्य, प्रपातितां पृतनां कपिसेनां च वीक्ष्य, गुल्मः सेनामुखत्रितयं तस्मिन्, 'एको रथो गजश्चैको नराः पञ्च पदातयः । त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते । पत्तिं तु त्रिगुणामेतां विदुः सेनामुखं बुधाः । त्रीणि सेनामुखान्येष गुल्म इत्यभिधीयते' इति भारते । अत्र गजाद्यभावेऽपि पत्तिमात्रस्य सत्वात् गुल्म इति प्रयोगः सम्भवति । 'एकदेशविकृतमनन्य-वद् भवति श्वा पुच्छकर्णाद्यङ्गेषु च्छिन्नेष्वपि श्वैव नाश्वो न गर्दभः' इति वचनात् । यद्वा गुल्मे सेनायाम्, 'गुल्मा रुक्स्तम्बसेनाश्च' इत्यमरः । सुषेणं सुषेणनामकं वानरं विन्यस्य रुट् कोपस्तया अभ्यपतत् अभ्या-गच्छत् ॥ २३ ॥

(सं.चं.) जीवेद्वा नवेति संशयमापन्नम् । सुतमङ्गदम् । गुल्मे सैन्यरक्षणे सुषेणं विन्यस्य । 'गुल्मः स्तम्बे प्लीह्नि पट्टसैन्ययोः सैन्यरक्षणे' इति विश्वप्रकाशः ॥ २३ ॥

उत्पाट्य पाटवेनाऽशु गिरिं हरिगणेश्वरः ।
तरसा पातयामास[3] तयो रावणमन्त्रिणोः ॥ २४ ॥

(भा.दी.) उदिति । हरिगणेश्वरः कपिसमूहेश्वरः सुग्रीवः, पाटवं लाघवं तेन, आशु गिरिं उत्पाट्य, रावणमन्त्रिणोस्तयोः विरूपनेत्रयूपनेत्रयोः, सप्तमीद्विवचनमेतत् तरसा पातयामास न्यपातयत् । पत्लृ पतने लिट् ॥ २४ ॥

---

१. **'प्रतापिनां ताभ्यां नाशिताम्'** इति का.श्री ।
२. **'सुग्रीवोऽभ्यद्रवद्–'** इति च ।
३. **'पोथयामास'**

(सं.चं.) पाटवेन लाघवेन चातुर्येण च। विरूपाक्षवधो रामायणे रीत्यन्तरेणोक्तः। महोदरमहापाश्वर्वयोर्वधात् पूर्वं च। कालव्यत्यासः कथाव्यत्यासश्च पुराणशैलीभेदोऽयम्। 'हरीश्वरः शैलमतिप्रमाणमुत्पाट्य चिक्षेप तयोः शरीरे' (८.१९४) इति निर्णये। विवृतं चैतत् पुरस्तात्॥ २४–६॥

चूर्णीबभूवतुस्तूर्णममात्यौ रावणस्य तौ।
तेन स्थूलेन शैलेन पांसुपिण्डाविवाश्मना ॥ २५॥

(भा.दी.) चूर्णीति। रावणस्य तौ अमात्यौ स्थूलेन तेन शैलेन अश्मना पांसुपिण्डाविव (अचूर्णं) चूर्णं यथा भवति तथा बभूवतुः॥ २५॥

मन्त्रिणां[1] मरणं वीक्ष्य क्रोधदीप्तो दशाननः।
उद्घणं बाणमादाय कार्म्मुकेणाऽशु सन्दधे ॥ २६॥

(भा.दी.) मन्त्रिणामिति। मन्त्रिणां महोदरादीनां चतुर्णां मरणं तत् वीक्ष्य, क्रोधः कोपस्तस्मात् दीप्तः दशाननः उद्घणं क्रूरं बाणं आदाय, कार्मुकं धनुस्तेन आशु सन्दधे॥ २६॥

तेन हर्य्यृक्षराजस्य वक्षो रक्षोधिपो बली।
निर्बिभेदाथ सुग्रीवो मूर्च्छितो न्यपतद् भुवि ॥ २७॥

(भा.दी.) तेनेति। रक्षसामधिपः रक्षोधिपः, बलमस्यास्तीति बली रावणः तेन बाणेन, हर्यृक्षाणां वानराणां (भल्लूकानां च) राजा हर्यृक्षराजस्तस्य सुग्रीवस्य वक्षः निर्बिभेद। अथ सुग्रीवः मूर्च्छितः सन् भुवि भूमौ न्यपतत्॥ २७॥

(सं.चं.) हरीणां कपीनामृक्षाणामच्छभल्लानां च राजा हर्यृक्षराजः सुग्रीवः। 'भल्लूको दीर्घरोमर्क्षो भल्लाटो वृकधूर्तकः। विकराळोऽच्छभल्लश्च' इति यादवप्रकाशः। रामायणेऽनुक्तेयं कथा। 'निशाचरेशोऽथ शरेण सूर्यजं बिभेद वक्षस्यपि सोऽपतद् भुवि' (८.१९५) इति निर्णये॥ २७॥

विधूय वानरान् बाणैर्विधूमोऽग्निरिव ज्वलन्।
राममभ्यद्रवत् क्रुद्धो[2] रामभ्राता रुरोध तम्[3] ॥ २८॥

१. **'मन्त्रिणोर्मरणम्'** २. **'–द्रवद् दुष्टो–'**

३. इतः परं पद्यमेकमधिकं कचित्–**'तत्र युद्धमभूचित्रं सौमित्रिदशवक्त्रयोः। शरवर्षं सुबहुलं मुश्चतोरितरेतरम्॥'** व्याचख्यौ च केवलं का.श्री.।

(भा.दी.) विधूयेति । बाणैः अन्यान् वानरान् विधूय द्रावयित्वा, विधूमः धूमरहितः अग्निरिव ज्वलन् रावणः क्रुद्धः सन् श्रीरामं अभ्यद्रवत् । तं रावणं रामभ्राता लक्ष्मणः रुरोध ॥ २८ ॥

(सं.चं.) क्रुद्धो रावणो राममभ्यद्रवत् । मध्ये रामभ्राता लक्ष्मणो रुरोध तम् ॥ २८–३० ॥

विभीषणो गदापाणिर्न्यहनद् रावणानुगान् ।
मुमोच रावणः शक्तिं घोरां भ्रातृजिघांसया ॥ २९ ॥

(भा.दी.) विभीषण इति । विभीषणः, गदा पाणौ यस्य स तथा सन्, रावणानुगान् न्यहनत् । हन्तेर्लङ् । रावणः घोरां शक्तिं भ्रातृजिघांसया विभीषणजिघांसया मुमोच ॥ २९ ॥

तामापतन्तीं चिच्छेद सौमित्रिः पत्रिभिस्त्रिभिः ।
विनेदुर्वानरा हृष्टास्ततश्चुक्रोध रावणः ॥ ३० ॥

(भा.दी.) तामिति । सौमित्रिः आपतन्तीं तां शक्तिं त्रिभिः पत्रिभिः शरैः चिच्छेद । च्छिदिर्धातोर्लिट् । तद् दृष्ट्वा वानराः हृष्टाः सन्तः विनेदुः सिंहनादं चक्रुः । नद अव्यक्ते शब्दे लिट् । ततः रावणः चुक्रोध । क्रुध कोपे लिट् ॥ ३० ॥

लक्ष्मण त्वं बलश्लाघी विभीषणमपीपलः ।
शक्तश्चेत् पालयाऽत्मानमित्युवाच दशाननः ॥ ३१ ॥

(भा.दी.) लक्ष्मणेति । हे लक्ष्मण, बलेन श्लाघ्यते स्तूयत इति बलश्लाघी, बलित्वेन प्रसिद्ध इत्यर्थः, त्वं विभीषणं अपीपलः अरक्षः । पाल रक्षणे लुङ् । चेद्यदि मया योद्धुं शक्तस्तर्हि आत्मानं पालय । तत एव लोट् । इति दशाननः उवाच ॥ ३१ ॥

(सं.चं.) बलेनाऽत्मश्लाघी । आत्मानं मुधा बलिष्ठं मन्यमानः ॥ ३१ ॥

मयाय ब्रह्मणा दत्तां मयेन पुनरात्मने ।
कालदण्डोपमां शक्तिं मुमोचास्मै स रावणः ॥ ३२ ॥

(भा.दी.) मयायेति । सः रावणः, ब्रह्मणा मयाय मयनामकासुराय दत्ताम्, पुनः मयेन आत्मने स्वात्मने विवाहकाले कन्यया सह दत्ताम्, कालस्य यमस्य यो दण्डस्तस्य उपमा यस्याः सा तथा तां शक्तिं अस्मै लक्ष्मणाय मुमोच ॥ ३२ ॥

(सं.चं.) मयाय ब्रह्मणा दत्ताम्। 'तदा दशास्योऽन्तकदण्डकल्पां मयाय दत्तां कमलोद्भवेन। मयाद् गृहीतां च विवाहकाले प्रगृह्य शक्तिं विससर्ज लक्ष्मणे' (८.१९७) इति निर्णये ॥ ३२–३ ॥

अथाष्टघण्टाघटिता[१] ज्वलन्ती शक्तिरम्बरे ।
लक्ष्मणस्य क्षणाद् वक्षो दारयामास दारुणा ॥ ३३ ॥

(भा.दी.) **अथे**ति। अथ अष्टौ या घण्टा ताभिर्घटिता सम्बद्धा, अम्बरं नभस्तस्मिन् ज्वलन्ती, दारुणा भयङ्करा शक्तिः लक्ष्मणस्य वक्षस्तत् क्षणः क्षणमात्रं तस्मात् दारयामास । दॄ विदारणे लिट् ॥ ३३ ॥

पतितं लक्ष्मणं वीक्ष्य कुपितो वायुनन्दनः ।
विशालं शैलमादाय रक्षोवक्षस्यथाक्षिपत्[२] ॥ ३४ ॥

(भा.दी.) **पतितमि**ति। अथ पतितं लक्ष्मणं वीक्ष्य कुपितः वायुनन्दनः हनुमान् विशालो विस्तीर्णस्तं शैलं आदाय रक्षोवक्षसि रावणोरसि अक्षिपत् । क्षिप प्रेरणे लङ् ॥ ३४ ॥

(सं.चं.) पतितं लक्ष्मणं वीक्ष्य । नायमपि प्रसङ्गो रामायणे पठ्यते । निर्णये तु पठ्यते– 'मरुत्सुतः शैलमतिप्रमाणं चिक्षेप रक्षःपतिवक्षसि द्रुतम्' (८.१९७) इति ॥ ३४–९ ॥

गर्वी पर्वतपातेन व्यथां प्राप्यं[३] गरीयसीम् ।
दशास्यो दशभिश्चाऽस्यैः शोणितं वमति स्म सः ॥ ३५ ॥

(भा.दी.) **गर्वी**ति। गर्वोऽस्यास्तीति गर्वी, युद्धे प्रतिभटो नास्तीत्यभिमानीत्यर्थः, सः दशास्यः, पर्वतस्य पातस्तेन गरीयसीं अतिमहतीं व्यथां प्राप्य दशभिरपि आस्यैः मुखैः शोणितं तत् वमति स्म चच्छर्द । वम उद्गिरणे लट् ॥ ३५ ॥

एतस्मिन्नन्तरे हन्त [४]निःसञ्ज्ञं राघवानुजम् ।
पादारविन्दं देवस्य प्राणदेवात्मजोऽनयत् ॥ ३६ ॥

---

१. '–घण्टारणिता'। 'अष्टाभिर्घण्टाभिः ध्वनिं कुर्वती' इति का.श्री। २. '–वक्षस्यवाक्षिपत्'
३. 'व्यथां प्राप' ४. 'हन्त विसञ्ज्ञम्'

(भा.दी.) एतस्मिन्निति । एतस्मिन् अन्तरोऽवकाशस्तस्मिन्, रावणमूर्च्छासमय इत्यर्थः, प्राणदेवस्य मुख्यप्राणस्य आत्मजः हनुमान्, निर्गता सञ्ज्ञा यस्य तथा तं राघवानुजं देवस्य श्रीरामस्य पादारविन्दं तत् अनयत् (हन्त) ॥ ३६ ॥

सर्वशक्तिरिमां शक्तिमुत्पाट्यानुजवक्षसः ।
औषधान्यानयेत्याशु हनूमन्तमचोदयत्[1] ॥ ३७ ॥

(भा.दी.) सर्वेति । सर्वा पूर्णा शक्तिर्यस्य स तथोक्तः श्रीरामः, इमां शक्तिं अनुजवक्षसः लक्ष्मणोरः-स्थलात् उत्पाट्य उद्धृत्य, औषधानि मृतसञ्जीवनादीनि तानि (आशु) आनय इति हनूमन्तं अचोदयत् । चुद प्रेरणे लङ् ॥ ३७ ॥

पूर्ववत् पर्वतश्रेष्ठं सर्वौषधनिधिं[2] प्रभुः ।
आनिनाय महातेजा वायुजो वायुवेगवान् ॥ ३८ ॥

(भा.दी.) पूर्ववदिति । प्रभुः, महत् तेजो बलं यस्य स तथा, वायुवद् वेगोऽस्यास्तीति तथोक्तः, वायुजः हनुमान्, सर्वाणि यान्यौषधानि मृतसञ्जीवनादीनि तेषां निधिराश्रयस्तं पर्वतश्रेष्ठं गन्धमादनं पूर्ववत् आनिनाय ॥ ३८ ॥

अप्यौषधानां गन्धेन सौमित्रिर्म्मित्रवर्द्धनः ।
अक्षतः प्रोत्थितो वीरः पूर्णानन्दमवन्दत ॥ ३९ ॥

(भा.दी.) अपीति । औषधानि मृसञ्जीवनादीनि तेषां गन्ध आमोदस्तेनाऽपि, गन्धसम्बन्धमात्रेणेत्यर्थः, मित्राणि वर्धयतीति तथोक्तः, मित्राणामानन्दं वर्द्धयन् सन्, न विद्यते क्षतं शस्त्राघातव्रणं यस्य स तथा सन्, वीरः पूर्ववद् वीर्योपेतः सन्, प्रोत्थितः सौमित्रिः, पूर्ण आनन्दो यस्य स तथा तं श्रीरामं अवन्दत ॥ ३९ ॥

श्यामलाङ्गं शबलयन् हसितेन सितत्विषा ।
प्रसन्नो मारुतिं प्रेक्ष्य परिरेभे परः पुमान् ॥ ४० ॥

---

१. '–मन्तमबोधयत्' २. 'सर्वौषधिनिधिम्'

(भा.दी.) श्यामेति । श्यामलं यदङ्गं तत्, सिता श्वेता त्विट् कान्तिर्यस्य तत्तथा तेन हसितेन मन्दहासेन शबलयन् मिश्रितं कुर्वन्, मन्दहासं कुर्वन्नित्यर्थः, हनुमत्कर्मणा प्रसन्नः, परः सर्वोत्तमः पुमान् पुरुषः श्रीरामः मारुतिं प्रेक्ष्य परिरेभे आलिलिङ्गे ॥ ४० ॥

(सं.चं.) श्यामं सितेन सङ्गमय्य शबलयन् कल्माषयन् । 'सितकृष्णस्तु कल्माषः' इति यादवप्रकाशः । परिरेभे परिषस्वजे ॥ ४० ॥

छिन्नप्रोहिणश्चैव विशल्याः पूर्ववर्णिनः ।
औषधीनां प्रभावेन सर्वेऽपि[1] हरयोऽभवन् ॥ ४१ ॥

(भा.दी.) छिन्नेति । सर्वेऽपि हरयः कपयः, औषध्यो मृतसञ्जीवनाद्याः, तासां प्रभावः सामर्थ्यं तेन, च्छिन्नानां हस्ताद्यवयवानां प्ररोहः पुनरुत्पत्तिः स एषामस्तीति तथोक्ता अभवन् । विगतं शल्यं शरादि येषां ते तथा-भूताश्च अभवन् । पूर्वो यो वर्ण एषामस्तीति तथोक्ता अभवन् ॥ ४१ ॥

(सं.चं.) छिन्नप्रोहिण इति समग्रं पद्यं निर्णयादुद्धृतम् (८.२०५) । उत्तमा ओषधय एव औषधयः । 'आधिक्येऽधिकम्' । अनौपममिति यथा । औषधस्येयमौषधी वा । तथाहि वाल्मीकिः–'सन्धानीं च महौषधीम्' (१०१.३२) इति, 'महौषधिमिहाऽनय'(३१) इति च ॥ ४१ ॥

राक्षसान् प्राक्षिपन्नब्धौ वानरेन्द्रा मृतान्मृतान् ।
रामाज्ञया[2] ततस्त्वेते नाजीवन्नौषधैरपि ॥ ४२ ॥

(भा.दी.) तर्हि राक्षसानां च्छिन्नप्ररोहणादिकं कुतो नाऽसीदित्यत आह– **राक्षसानि**ति । वानरेन्द्राः रामाज्ञया मृतान्मृतान् राक्षसान् अब्धौ प्रागेव प्राक्षिपन् चिक्षिपुः । क्षिप प्रेरणे लङ् । ततः कारणात् (एते) राक्षसाः, औषधानि मृतसञ्जीवनादीनि, तैरपि न अजीवन् । जीवधातोर्लङ् ॥ ४२ ॥

(सं.चं.) राक्षसान् प्राक्षिपन् । 'यदाप्रभृति लङ्कायां युद्ध्यन्ते कपिराक्षसाः । तदाप्रभृति मानार्थमाज्ञया राघवस्य च । ये हन्यन्ते रणे तत्र राक्षसाः कपिकुञ्जरैः । हताहतास्तु क्षिप्यन्ते सर्व एव तु सागरे' (७४.७५–६) इति हि रामायणे । अधुनातनास्तु–'–आज्ञया रावणस्य च' इति पठन्तो भ्रान्ताः ॥ ४२ ॥

---

१. **'–ऽपि निरुजोऽभवन्' । 'निरुज इति पाठे रोगरहिताः, व्यथारहिताः इत्यर्थः '** इति का.श्री. । २. **'–ज्ञया मृतास्त्वेते'**

लक्षार्द्धयोजनाध्वानं प्राक्षिपन्मारुतिस्ततः[१] ।
पर्वतं पूर्ववत् सोऽद्रिर्निश्छेदाङ्कः [२]स्थिरोऽभवत् ॥ ४३ ॥

(भा.दी.) लक्षेति । मारुतिः हनुमान्, ततः लङ्कायाः पर्वतं गन्धमादनगिरिम्, लक्षस्य अर्धं लक्षार्धम्, तावद् योजनानि यस्य स लक्षार्धयोजनः, सचासौ अध्वा च तम्, पञ्चाशत्सहस्रयोजनमार्गमित्यर्थः, प्राक्षिपत् लङ्कायां स्थित एव सन् चिक्षेप । सः अद्रिः गन्धमादनः पूर्ववत् निर्गतः च्छेदस्य अङ्कश्चिह्नं यस्य स तथा सन् स्थिरः अभवत् ॥ ४३ ॥

(सं.चं.) लक्षार्धेति । ततः सर्वेषां नीरोगताकरणानन्तरम्, ततः लङ्कातः पञ्चाशत्सहस्रयोजनपरिमितः अध्वा अतिक्रमणीयो मार्गो यस्य तं पर्वतम् । 'प्राक्षिपत् तं गिरिवरं लङ्कास्थः सन् स मारुतिः । अर्धलक्षे योजनानां यत्रासौ पूर्वसंस्थितः' (८.२०२) इति निर्णये । '–नष्टच्छेदाङ्कः प्रागिवाभूत् कपिवरवपुषस्ते नमः कौशलाय' इति तत्वप्रदीपाचार्यः ॥ ४३ ॥

अथाभिनन्द्य स्वचमूं चक्रे रामो धनुर्ध्वनिम् ।
युद्धनाट्यप्रसङ्गाय पूर्वरङ्गमिवाग्रतः ॥ ४४ ॥

(भा.दी.) अथेति । अथ श्रीरामः स्वचमूं अभिनन्द्य सन्तोष्य, युद्धलक्षणं यन्नाट्यं नर्तनं तस्य प्रसङ्गः प्रसक्तिस्तस्मै, युद्धलक्षणनाट्यं कर्तुमित्यर्थः, अग्रतः पूर्वरङ्गमिव उपक्रमरूपनाट्यमिव, 'आदावेव तु यन्नाट्यं पूर्वरङ्गः स उच्यते' इति हलायुधः, धनुषो ध्वनिः कूजनं तं चक्रे ॥ ४४ ॥

(सं.चं.) पूर्वरङ्गो नान्दी । ततो हि नाटकं प्रसज्यते ॥ ४४ ॥

विमाने भासमानः स [३]महामानो दशाननः ।
मण्डलीकृतकोदण्डः पुण्डरीकाक्षमभ्ययात् ॥ ४५ ॥

(भा.दी.) विमान इति । विमानं पुष्पकाख्यं तस्मिन् भासमानः प्रकाशमानः, महान् मानोऽभिमानो यस्य स तथा, 'सहमानः' इति पाठे सहिताभिमान इति वा, अत्याश्चर्यायुधादिकं सहमान इति वाऽर्थः, सः

---

१. **'–न्मारुतात्मजः'** २. **'स्थितोऽभवत्'**

३. **'सहमानो–'** । **'सहमानः सहिताभिमानः । शत्रोरायुधादिकं सहमान इति वा'** इति वि.भू. । का.श्री. च ।

दशाननः, मण्डलीकृतं कोदण्डं येन स तथा, नैरन्तर्येण शरमोक्षणायेत्यर्थः, पुण्डरीकवदक्षिणी यस्य स तथा (तं)श्रीरामं अभ्ययात् ॥ ४५ ॥

(सं.चं.) मण्डलीकृतकोदण्डः सज्यीकृतकोदण्डः ॥ ४५–७ ॥

शम्भुशर्वौ पुरस्कृत्य पुरन्दरपुरःसराः ।
देवोपदेवमुनयो युद्धं द्रष्टुं वियद् ययुः ॥ ४६ ॥

(भा.दी.) **शम्भ्विति** । पुरन्दरः पुरःसरो येषां ते तथा, देवाश्च, उपदेवा गन्धर्वादयस्ते च, मुनयश्च ते, शम्भुशर्वौ ब्रह्मरुद्रौ पुरस्कृत्य युद्धं तत् द्रष्टुं वियन्नभस्तत् ययुः । यातेर्लिट् ॥ ४६ ॥

नास्मन्नाथः क्षितौ तिष्ठेद् राक्षसेऽस्मिन् विमानगे ।
इति मत्वा महेन्द्रोऽस्मै निजं रथमयापयत् ॥ ४७ ॥

(भा.दी.) **नास्मदिति** । महेन्द्रः, अस्मिन् राक्षसे विमानगे सति, अस्मन्नाथः श्रीरामः क्षितौ न तिष्ठेत्, इति मत्वा, अस्मै श्रीरामाय, निज आत्मीयस्तं रथं अयापयत् प्रेषयामास ॥ ४७ ॥

अवतार्य्य रथं दिव्यं प्राञ्जलिः [१]स्माऽह मातलिः ।
विजयस्व जगन्नाथ रथेऽस्मिन् विहरन्निति ॥ ४८ ॥

(भा.दी.) **अवतार्येति** । मातलिः शक्रसारथिः, दिव्योऽलौकिकस्तं रथं अवतार्य भुवं प्रत्यानीय, प्राञ्जलिः सन्, हे जगन्नाथ, अस्मिन् इन्द्रसम्बन्धिनि रथे स्थित्वा, विहरन् युद्धक्रीडां कुर्वन् सन्, विजयस्व उत्कृष्टतया वर्तस्व । जि जये लोट् । इति श्रीरामं आह स्म अवदत् । ब्रूञो लट् ॥ ४८ ॥

(सं.चं.) विहरन् विजयस्व । शत्रुविजयो हि लीलामात्रं भगवतः ॥ ४८ ॥

रथोदयाद्रिमारूढो रेजे रामसहस्रगुः ।
विश्वग्रासिदशग्रीवध्वान्तविध्वंसदीक्षितः ॥ ४९॥

१. 'प्राञ्जलिः प्राह'

(भा.दी.) रथेति । रथ एवोदयाद्रिरुदयाख्यपर्वतः, तं आरूढः राम एव सहस्रं गावो यस्य स सहस्रगुः सूर्यः, विश्वं जगत् ग्रस्तुं शीलमस्यास्तीति विश्वग्रासी दशग्रीव एव रावण एव ध्वान्त अन्धकारः, तस्य विध्वंसो विनाशः, तस्मिन् सञ्जाता दीक्षा यस्य स दीक्षितः सन् रेजे । राजृ दीप्तौ लिट् ॥ ४९ ॥

(सं.चं.) सहस्रं गावः किरणा अस्येति सहस्रगुः सूर्यः । एकादशस्वर्थेषु गोशब्दः पठ्यते । 'गौः स्वर्गे च बलीवर्दे रश्मौ च कुलिशे पुमान् । स्त्री सौरभेयीदृग्बाणदिग्वाग्भूष्वप्सु भूम्नि च' इति मेदिनी । केचिच्चन्द्रमसमपि गोशब्दार्थं वदन्ति । तथाहि विश्वप्रकाशः–'गौः स्वर्गे वृषभे रश्मौ वज्रे चन्द्रमसि स्मृतः । अर्जुनीनेत्रदिग्बाणभूवाग्वारिषु गौर्मता' इति । रामः स्वयं सहस्रगुरपि । सहस्रं गावो बाणा अस्येति । सहस्राक्षत्वाच्च 'सहस्राक्षः सहस्रपात्' इति हि गदन्ति । 'गोस्त्रियोरुपर्जनस्य' (अ.सू.१.२.४८) इति ह्रस्वः । ध्वान्तविध्वंसे दीक्षितः धृतव्रतः । दीक्ष 'मौण्ड्येज्योपनयननियमव्रतादेशेषुः' इत्यतः क्तः ॥ ४९–५१ ॥

बाणान् बहून् [१]बहुविधानुद्धणान् निशितान् दृढान् ।
स्वर्णपुङ्खान् स्फुरत्पक्षान् प्रास्यद् रामाय रावणः ॥ ५० ॥

(भा.दी.) बाणानिति । रावणः, पञ्च विधाः प्रकारा येषां ते तथा तान्, उद्धणान् क्रूरान्, निशितान्, दृढान्, स्वर्णमयः पुङ्खो येषां ते तथा तान्, स्फुरन्तः पक्षा वाजा येषां ते तथा तान् बहून् बाणान् श्रीरामाय प्रास्यत् मुमोच । असु क्षेपणे लङ् ॥ ५० ॥

ताननन्तोऽन्तरेणैव भल्लैश्चिच्छेद राघवः ।
मुमोच च स्वयं बाणान् प्रहसन्नेव लीलया ॥ ५१ ॥

(भा.दी.) तानिति । अनन्तः बलादिना अपरिच्छन्नः श्रीराघवः, तान् शरान्, अन्तरं मध्यं तेनैव भल्लाः शरविशेषास्तैः चिच्छेद । च्छिदिर्धातोर्लिट् । स्वयं च प्रहसन्नेव रावणमपहसन्नेव बाणान् लीलया मुमोच ॥ ५१ ॥

मण्डलानि विचित्राणि दक्षिणानीतराणि च ।
चरन्तौ चक्रतुश्चित्रं युद्धं तौ विश्वविस्मयम् ॥ ५२ ॥

---

१. **'बहून् पञ्चविधानुद्धणान्'** इति वि.ती.पाठः । किमिदं पाञ्चविध्यं बाणानामिति न स्फुटम् । स्थानपाञ्चविध्यमेव वा बाणेषूपचर्यते । तच्च सङ्ग्रहचन्द्रिकायामुक्तमुपरिष्टात् । **'बहूंश्च विविधान्'** इति कश्चित् ।

(भा.दी.) मण्डलानीति । तौ रामरावणौ विचित्राणि, दक्षिणानि प्रदक्षिणाकाराणि, इतराणि च सव्याकाराणि च मण्डलानि चरन्तौ सन्तौ, विश्वस्य सकलजगतो विस्मयो यस्मात् तत्तथोक्तं तत्, जगदाश्चर्यकरमित्यर्थः, (चित्रं) युद्धं चक्रतुः ॥ ५२ ॥

(सं.चं.) दक्षिणाभिमुखानि भ्रमणानि दक्षिणानि मण्डलानि । इतराणि वामाभिमुखानि वामानि मण्डलानि । 'स्थानानि धन्विनां पञ्च तत्र वैशाखमस्त्रियाम् । त्रिवितस्त्यन्तरौ पादौ मण्डलं तोरणाकृती । अन्वर्थं स्यात् समपदमालीढं तु ततोऽग्रतः । दक्षिणे वाममाकुञ्च्य प्रत्यालीढं विपर्यये । वैहायसं च–' इति यादवप्रकाशः ॥ ५२–३ ॥

दिशो दश शरैः शूरौ छादयामासतुः क्षणात् ।
अन्धकारेण सान्द्रेण विश्वमन्धमभूत् तदा ॥ ५३ ॥

(भा.दी.) दिश इति । शूरौ तौ दश दिशः शरैः क्षणः क्षणमात्रं तस्मात् च्छादयामासतुः । च्छदिर् आवरणे लिट् । तदा सान्द्रो निबिडस्तेन अन्धकारेण विश्वं जगत् अन्धं अन्धीभूतं अभूत् ॥ ५३ ॥

वानरा राक्षसाश्चेमे विस्मयोत्फुल्ललोचनाः ।
तस्थुर्विहाय सङ्ग्रामं सङ्ग्रामं वीक्ष्य तं तयोः[१] ॥ ५४ ॥

(भा.दी.) वानरा इति । वानराः, इमे रावणसम्बन्धिनो राक्षसाश्च, तयोः तं सङ्ग्रामं वीक्ष्य विस्मयेन उत्फुल्लानि विकसितानि लोचनानि येषां ते तथा सन्तः, सङ्ग्रामं विहाय तद्दर्शनौत्सुक्येन तस्थुः ॥ ५४ ॥

(सं.चं.) उत्फुल्ललोचनाः । ञि फला विशरणे इति धातोः निष्ठातकारस्य लकारे उत्वे च, इडभावे च उत्फुल्लमिति रूपम् । सम्यग् विकसितमित्यर्थः । यद्यप्यनुपसर्गादेव तथा रूपमाह पाणिनिः–'अनुपसर्गात् फुल्ल-क्षीबकृशोल्लाघाः' (अ.सू.८.२.५५) इति । अथाप्यस्यापवादमाह वार्तिककारः–'उत्फुल्लसम्फुल्लयोरिति वक्तव्यम्' इति । तेन युक्तमुक्तम्–उत्फुल्ललोचना इति । तयोः सङ्ग्रामं वीक्ष्य स्वयं सङ्ग्रामं विहाय तस्थुः ॥ ५४ ॥

किञ्चित् प्रहृष्टं वित्रस्तं किञ्चित् किञ्चित् समाकुलम् ।
विचित्ररूपं त्रैलोक्यं विस्मितं समभूत् तदा ॥ ५५ ॥

---

१. 'सङ्ग्रामं वीक्षितुं तयोः'

(भा.दी.) किञ्चिदिति । तदा किञ्चिदुत्तमाधिकारिजातं प्रहृष्टम्, श्रीराम एव जेष्यतीति निश्चयेन सन्तुष्टमभूत्, किञ्चिन्मध्यमाधिकारिजातं वित्रस्तम्, श्रीरामस्य जयः कथं नु स्यादिति जयशङ्कया भीतमभूत् । किञ्चिदधमाधिकारिजातं समाकुलं पराजयभीत्या दुःखितमभूत् । तदा एवम्प्रकारेण विचित्रं नानाविधं रूपं स्वभावो यस्य तत्तथोक्तम्, 'रूपं शब्दे पशौ श्लोके ग्रन्थावृत्तौ सितादिषु । सौन्दर्ये च स्वभावे च' इति वैजयन्ती, त्रैलोक्यं विस्मितमभूत् ॥ ५५ ॥

(सं.चं.) किञ्चित् ज्ञानिवृन्दं सन्तुष्टम् । रावणवधः साद्यस्क इति निश्चयेन । अज्ञेषु किञ्चिद् राजसवृन्दमदृष्टपूर्वं भयानकं कदनं वीक्ष्य वित्रस्तम् । किञ्चित् तामसवृन्दं रावणे पराजिते का गतिरिति समाकुलम् । एवं विचित्ररूपं नानास्वभावं त्रैलोक्यमैकमत्येन विस्मितं समभूत् । 'रूपं स्वभावे सौन्दर्ये नामके पशुशब्दयोः । ग्रन्थावृत्तौ नाटकादावाकारश्लोकयोरपि' इति मेदिनीविश्वप्रकाशौ ॥ ५५–७ ॥

नाराचमालाममुचद् रावणो राममूर्द्धनि ।
सा नीलोत्पलमालेव न रामस्य व्यथां व्यधात् ॥ ५६ ॥

(भा.दी.) नाराचेति । रावणः, रामस्य मूर्धा शिरः, तस्मिन् नाराचमालां नाराचपङ्क्तिं अमुचत् । मुच्लृ-धातोर्लुङ् । सा नाराचपङ्क्तिः, नीलानि यान्युत्पलानि तेषां मालेव, श्रीरामस्य व्यथां न व्यधात् न चक्रे ॥ ५६ ॥

ललाटं पाटयामास पाटवात् कैटभार्द्दनः ।
शरैर्न्निशाचरेन्द्रस्य चुक्षोभ स[1] दशाननः ॥ ५७ ॥

(भा.दी.) ललाटमिति । कैटभार्दनः श्रीरामः, पाटवं पटुत्वं तस्मात्, निशाचरेन्द्रस्य रावणस्य ललाटं तत् शरैः पाटयामास दारयामास । पट गतौ लिट् । तेन च सः दशाननः चुक्षोभ अशक्त्या चचाल । क्षुभ सञ्चलने लिट् ॥ ५७ ॥

ससर्ज्ज[2] विविधान् बाणानासुरास्त्रेण रावणः ।
सिंहव्याघ्रादिकमुखान् पक्षिसर्प्पाननानपि[3] ॥ ५८ ॥

१. **'चरेशस्य चुक्षोभ च दशा–'**

२. **'ससर्ज निर्मितवान्', मुमोचेति वा'** इति का.श्री. ।

३. **'पक्षिसर्पादिकानपि'** इति वि.ती.पाठः।

(भा.दी.) ससर्जेति । रावणः आसुरनामकं यदस्त्रं तेन । विविधान् बाणान् ससर्ज । सृज विसर्गे लिट् । सिंहाश्च व्याघ्राश्च ते आदयो येषां ते सिंहव्याघ्रादयस्त एव सिंहव्याघ्रादिकास्त एव मुखानि प्रधानानि येषां ते तथा तान् मृगान् ससर्ज, पक्षिणश्च सर्पाश्च ते आदयो येषां ते तथा तानपि ससर्ज ॥ ५८ ॥

(सं.चं.) आसुरास्त्रेणाभिमन्त्रितान् बाणान् । सिंहव्याघ्रादिकानां मुखमिव मुखं येषां बाणानाम् । एवं गृध्रादिपक्षिमुखान् विषमयसर्पमुखानपि ॥ ५८ ॥

राघवो रावणास्त्राणि [1]स्वतन्त्रास्त्रैर्न्यवारयत् ।
[2]यान्याग्नेयादिनामानि वह्न्याद्यैः साधितत्वतः ॥ ५९ ॥

(भा.दी.) राघव इति । श्रीराघवः यानि अस्त्राणि, वह्निराद्यो येषामिन्द्रादीनां ते तथोक्तास्तैः देवैः साधितत्वतः, तपःपुनश्चरणादिकं कृत्वा सम्पादितभगवत्प्रसादात् स्वाभिमन्यमानत्वेन कृतत्वतः, अग्निर्देवता अस्येत्याग्नेयं तदादिर्येषां तानि आग्नेयादीनि, आग्नेयादीनीति नामानि येषां तानि तथोक्तानि, नतु मुख्य-तत्तदस्त्रमन्त्रप्रतिपाद्यत्वेनेत्यर्थः । तर्हि मुख्यत आग्नेयाद्यस्त्रमन्त्राः कस्येत्यत आह– स्वतन्त्रास्त्रैरिति । स्वस्य स्वात्मनः श्रीरामस्य मुख्यतः प्रतिपादकतया तन्त्राणि यानि अस्त्राणि आग्नेयादीनि तैः रावणास्त्राणि न्यवा-रयत् । वृञ् वरणे लङ् । तथाच यथा रावणादिभिः बाह्मपाशुपताद्यस्त्रबलाद् विजयः सम्पाद्यते तथाऽन्यतन्त्रतया श्रीराघवविजयः न । किन्तु 'नामानि सर्वाणि यमाविशन्ति' इति श्रुतेरग्न्यादिनामभिर्भगवान् श्रीराम एव मुख्यवाच्य इति तान्यस्त्राणि श्रीरामास्त्राण्येवेति युद्धे तन्मोचनेन जायमानप्रत्यस्त्रनिवारणादिकं स्वसामर्थ्येनैव नान्यायत्ततयेति भावः ॥ ५९ ॥

(सं.चं.) स्वतन्त्रैः स्वाधीनैरिन्द्राग्न्यादिसुराणामस्त्रैः आसुरास्त्रं न्यवारयत् । यद्यपि आग्नेयमस्त्रमित्यादि व्याहरन्ति । अग्निदेवत्यमाग्नेयमिति च व्याचक्षते । वस्तुतस्तु अग्न्याद्यन्तर्गतः अग्न्यादिनामा नारायणात्मा राम एव तेषामस्त्राणां देवता । अथापि अग्नेयमस्त्रमित्यादि युक्तं व्याहरणम् । वह्न्याद्यैर्देवैः भगवन्तं प्रसाद्य तदस्त्राभिमानित्वस्य तत्तदवान्तरदेवतात्वस्य च साधितत्वादिति ॥ ५९–६० ॥

ब्रह्मेन्द्रपशुपत्यद्या देवा यस्य प्रसादतः ।
सत्ताशक्त्यादिमन्तः स्युस्तस्य का परतन्त्रता ॥ ६० ॥

---

१. 'स्वमन्त्रास्त्रै–' २. 'याम्याग्नेयादिनामानि'

(भा.दी.) ननु अन्येषामिवास्याप्यस्त्रमहिम्ना विजय इति किं न स्यादित्यत आह– **ब्रह्मेति**। ब्रह्मा च इन्द्रश्च पशुपतिश्च ते आद्या येषां ते तथा देवाः, यस्य श्रीरामस्य प्रसादतः अनुग्रहात्, सत्ता स्वरूपसत्ता सा च, शक्तिः सर्जनपालनसंहरणादिसामर्थ्यं सा च, ते आदी येषां सत्ताशक्त्यादयः, ते एषां सन्तीति तथोक्ताः स्युः भवेयुः । तस्य एतादृशमहिम्नः श्रीरामस्य रावणादिविजये परतन्त्रता अस्त्राद्यन्याधीनता का? न काऽपीत्यर्थः । किन्तु लीलयैव तथातथा क्रीडतीति भावः ॥ ६० ॥

आग्नेयास्त्रेण भगवान् ससर्ज्जाग्निमुखाञ्छरान्[१] ।
विद्युन्मुखांश्च [२]सूर्य्यास्यांस्तैस्तस्यास्त्रमनीनशत्[३] ॥ ६१ ॥

(भा.दी.) **आग्नेयेति**। भगवान् श्रीरामः, आग्नेयं अग्निदेवताकं यदस्त्रं तेन अग्निमयान् अग्न्यात्मकान् शरान्, विद्युद्वन्मुखं येषां ते तथा तांश्च शरान्, सूर्यवदास्यं येषां ते तांश्च ससर्ज, सृज विसर्गे लिट्। अग्निमुखानिति क्वचित् पाठः । तैः शरैः तस्य रावणस्य अस्त्रं अनीनशत् नाशयामास । नश अदर्शने लुङ् ॥ ६१ ॥

(सं.चं.) अग्निर्मुखे अग्रभागे येषां तान्। एवं विद्युन्मुखे येषां तान्। एवं सूर्य एव ज्योतिर्मण्डलरूपेणाऽस्ये येषां तान् । तैस्तस्य रावणस्यास्त्राणि नाशयामास ॥ ६१ ॥

दैवगान्धर्वपूर्वाणि मुक्तान्यस्त्राणि वैरिणा ।
दैवगान्धर्वपूर्वैः स नाशयामास केशवः[४] ॥ ६२ ॥

(भा.दी.) **दैवेति**। वैरिणा रावणेन मुक्तानि, दैवानि च गान्धर्वाणि च तानि पूर्वाणि येषां तानि तथोक्तानि अस्त्राणि, सः केशवः श्रीरामः, देवानां सम्बन्धीनि दैवानि तानि, गन्धर्वाणां सम्बन्धीनि गान्धर्वाणि तानि च तानि पूर्वाणि येषां तानि तैः नाशयामास ॥ ६२ ॥

(सं.चं.) दैवगान्धर्वपूर्वाणि । 'स गान्धर्वेण गान्धर्वं दैवं दैवेन राघवः । अस्त्रं राक्षसराजस्य जघान परमास्त्रवित्' (१०४.१९) इति च ॥ ६२ ॥

रावणोऽथास्त्रवीर्य्येण[५] नागांश्चक्रे विषोद्बणान्[६] ।
सुपर्ण्णैः स्वशरोद्भूतैस्तान् जघान जगद्गुरुः ॥ ६३ ॥

---

१. **'–ग्निमयाञ्छरान्'** इति.वि.ती.पाठः। २. **'सूर्यास्त्रैस्तै–'** ३. **'–स्तस्यास्त्राण्यनीनशत्'**

४. **'कश्चेशश्च केशौ ब्रह्मरुद्रौ, तौ वर्तयति प्रवर्तयतीति केशवः ब्रह्मरुद्रनियामकः स रामः'** इति का.श्री. ।

५. **'अस्त्रवीर्येण मन्त्रसामर्थ्येन'** इति का.श्री. । ६. **'विषोल्बणान्'**

(भा.दी.) रावण इति । अथ रावणः, अस्त्राणां यद् वीर्यं सामर्थ्यं तेन, विषोद्धणान् विषेण क्रूरान् नागान् चक्रे । जगद्गुरुः श्रीरामः स्वस्य ये शरास्तेभ्य उद्भूता उत्पन्नास्तैः सुपर्णैः गरुडैः तान् नागान् जघान । हन्तेर्लिट् ॥ ६३ ॥

(सं.चं.) रावणोऽथ । 'ते रावणधनुर्मुक्ताः शराः काञ्चनभूषणाः । अभ्यवर्तन्त काकुत्स्थं सर्पा भूत्वा महाविषाः' (१०२.२१) इति, 'तान् दृष्ट्वा पन्नगान् रामः समापतत आहवे । अस्त्रं गारुत्मतं घोरं प्रादुश्चक्रे भयावहम्' (१०२.२४) इति च ॥ ६३–४ ॥

यत् परैर्दुष्करं लोके तच्चक्रे रावणो युधि ।
यद्यच्चक्रे दशास्योऽयं तत्तत् प्रत्यहनत् प्रभुः[1] ॥ ६४ ॥

(भा.दी.) यदिति । रावणः, लोको भुवनं तस्मिन्, परैः पुरुषैः यत् कर्म दुष्करं कर्तुमशक्यम्, तत् तादृशं कर्म युध् युद्धं तस्यां चक्रे । विभुः श्रीरामः, अयं दशास्यः यद्यत् कर्म चक्रे तत्तत् प्रत्यहनत् व्यनाशयत् । हन्तेर्लङ् ॥ ६४ ॥

रामरावणयोर्य्युद्धं रामरावणयोरिव ।
गगनं गगनाकारं सागरं[2] सागरोपमम् ॥ ६५ ॥

(भा.दी.) रामेति । रामरावणयोः युद्धं रामरावणयोर्युद्धमिव, उपमानान्तराभावादिति भावः । यथा गगनं व्योम गगनस्य आकारो यस्य तत् तथोक्तम्, यथा सागराणां समूहः सागरम्, 'तस्य समूहः' (अ.सू.४.२.३६) इत्यण्, तदन्तस्य च नपुंसकलिङ्गत्वनियमात् साधुः, सागरसमूहस्य उपमा यस्य तत्तथोक्तं तत् । एतत्कल्पीयरामरावणयुद्धस्य कल्पान्तरीयरामरावणयुद्धमेव सदृशं नान्यद्युद्धम् । यथा एतत्कल्पीयगगनसागरयोः कल्पान्तरीयगगनसागरमूहावेव सदृशौ नान्यद्वत्स्वन्तरमेतत्सदृशं तथेति भावः । यद्वा एतत्कल्पत्वावच्छेदेन रामरावणयुद्धस्य इदमेव युद्धं सदृशम्, नान्यद्युद्धान्तरम्, यथैत्कल्पीयगगनस्य सागरसमूहस्य च इदमेव नभः समम्, अयमेव सागरसमूहः सदृशः, नान्यद् वस्त्वन्तरमित्यर्थः ॥ ६५ ॥

(सं.चं.) रामरावणयोर्युद्धमिति समग्रं पद्यं रामायणेऽपि पठ्यते (१०७.५१-२) । परं तु साम्प्रतिकाः 'सागरः सागरोपमः' इति पाठं व्यत्यस्य पठन्ति व्याकरणमुग्धाः । 'सागरं सागरोपमम्' इत्येव भगवत्पाद-

१. **'प्रत्यहनद् विभुः'** इति वि.ती.पाठः । **'प्रत्याहारत् प्रभुः'** इति का.श्री. पाठः ।

२. **'सागराणां समाहारः सागरम् । काकानां समूहः; काकमित्यादिवदयं शब्दः'** इति वि.भू. ।

सम्मतः प्राचीनश्च पाठः । सगरस्येदं सागरमिति सामान्ये नपुंसकम् । सागरं जलम् । गगनाकारं गगनसदृशम् । रामरावणयोर्युद्धं रामरावणयोर्युद्धमिव ॥ ६५ ॥

रथं सारथिमप्यश्वान् ध्वजं च निशितैः शरैः ।
रावणस्ताडयामास रामस्य प्रणदन् मुहुः ॥ ६६ ॥

(भा.दी.) रथमिति । रावणः निशितैः शरैः श्रीरामस्य रथम्, सारथिम्, (अश्वानपि), ध्वजः केतुस्तं च प्रणदन् सन् मुहुः ताडयामास । तड आघाते लिट् ॥ ६६ ॥

(सं.चं.) सिंहवत् प्रणदन् युद्धानुरागजनितो नादः प्रणादः । 'प्रणादस्त्वनुरागोत्थः' इति यादवप्रकाशः ॥ ६६–७ ॥

कोपं प्रकटयामास[१] भगवांल्लोकभीषणम् ।
पूर्णानन्दे मुकुन्देऽस्मिन् कुतः कोपस्तमोभवः ॥ ६७ ॥

(भा.दी.) कोपमिति । भगवान् श्रीरामः, लोकान् भीषयतीति तथोक्तस्तं कोपं प्रकटयामास । द्रष्टॄणां क्रुद्धवत् स्वाकारं प्रदर्शयामास । न स्वभावतः क्रुद्ध इत्यर्थः । कुत इत्यत आह– पूर्णेति । पूर्ण आनन्दो यस्य स तथा तस्मिन्, मुकुन्दे मोक्षदातरि श्रीरामे, तमसस्तमोगुणाद् भवः उद्भवो यस्य स तथोक्तः कोपः कुतः कारणात् भवेत्? न कुतोऽपि । इष्टाप्राप्तौ हि कोपः सम्भावितः । नचास्याप्राप्तव्यमिष्टमस्ति पूर्णानन्दमयत्वात् । किञ्च मोक्षे तावत्क्रोधाद्यभावः सिद्धः, तादृशस्य मोक्षस्य दातरि कोपकारणं च गुणत्रयातीते नास्त्येवेति तामसक्रोधो नास्ति । किन्तु ततोऽतिरिक्तो निजस्वरूपभूत एव दुष्टसंहरणकाले प्रकटीभवन् सञ्जिहीर्षेच्छात्मकः धर्मविशेषः संहारकारणीभूतोऽस्तीति ज्ञापयितुमेव तमोभव इत्युक्तम् । अन्यथा नृसिंहप्रसन्नीकरणार्थं प्रह्लादादिप्रेषणं ब्रह्मादिभिः क्रियमाणमयुक्तं स्यादित्याशयः ॥ ६७ ॥

[२]भ्रुकुटीमल्ललाटेन सर्वशोणेक्षणेन च[३] ।
भ्रूभ्यां च भावगर्भाभ्यां रामोऽभूत् सर्वदुःसहः[४] ॥ ६८ ॥

(भा.दी.) भ्रुकुटीति । भ्रुकुटी ललाटसीरा अस्यास्तीति भ्रुकुटीमत्, तादृशं च तत् ललाटं च तेन, सर्वं शोष-यतीति सर्वशोषं तादृशं यदीक्षणं चक्षुस्तेन च, भाव अभिप्रायः गर्भ इव ययोस्ते तथोक्ते ताभ्याम्,

---

१. **'प्रकाशयामास'** २. **'भृकुटी–'** ३. **'सर्वशोषेक्षणेन च'** इति वि.ती.पाठः । ४. **'सर्वभीषणः'**

दुष्टेऽस्मिन् कृपा न कार्येत्यभिप्राययुक्ताभ्यामित्यर्थः, भ्रूभ्यां श्रीरामः सर्वैः देवासुरैः दुःसहः असह्यः द्रष्टुमशक्य इत्यर्थः, अभूत् ॥ ६८ ॥

(सं.चं.) कुटिला भ्रूः भ्रुकुटी । ललाटसङ्कोचनं वा । सर्वत्र शोणं रक्तवर्णम् । 'हन्तव्योऽयं दुरात्मा' इति भावः गर्भ इवान्तर्लीनो ययोस्ताभ्यां क्रोधवक्राभ्यां भ्रूभ्याम् ॥ ६८–९ ॥

संरम्भं तं भगवतो वीक्षमाणो भयाकुलः ।
न्यस्तमापद्धनमिव शूलमादत्त रावणः ॥ ६९ ॥

(भा.दी.) समिति । भगवतः श्रीरामस्य तं संरम्भं कोपं वीक्षमाणः भयाकुलः भयसम्भ्रान्तः रावणः आपदो धनमापद्धनं तदिव, आपत्काले व्ययीकर्तव्यधनमिवेत्यर्थः, न्यस्तं तत् शूलं आदत्त जग्राह ॥ ६९ ॥

जाज्वल्यमानं तच्छूलं युगान्तानलभीषणम् ।
चिक्षेप घण्टाघटितं क्षिप्रं रामाय रावणः ॥ ७० ॥

(भा.दी.) जाज्वल्यमानमिति । रावणः जाज्वल्यमानं अतिशयेन ज्वलमानम्, युगान्तानलवत् युगान्ताग्निवत् भीषणं भयङ्करम्, घण्टाभिः घटितं युक्तं तत् शूलं श्रीरामाय क्षिप्रं यथा भवति तथा चिक्षेप ॥ ७० ॥

(सं.चं.) अष्टघण्टाघटितम् ॥ ७० ॥

सर्वशक्तिस्ततः शक्त्या तस्य शूलमशातयत् ।
बिभेद चोद्घणैर्बाणैरुरु[1] वक्षश्च रक्षसः ॥ ७१ ॥

(भा.दी.) सर्वेति । ततः, सर्वा पूर्णा शक्तिर्यस्य स तथा श्रीरामः, शक्त्या शक्त्याख्यायुधेन, तस्य रावणस्य शूलं अशातयत् व्यनाशयत्[2] । उद्घणाः क्रूरास्तैः बाणैः रक्षसः रावणस्य उरु वक्षश्च बिभेद ॥ ७१ ॥

(सं.चं.) मातलिनीतया शक्त्या । अशातयत् । शद्लृ शातने । 'शदेरगतौ तः' (अ.सू.७.३.४२) । शदेर्णिचि तोऽन्तादेशः गतिभिन्नेऽर्थे । शातयति नाशयति । शादयति गमयति ॥ ७१ ॥

---

१. **'–र्बाणैरूरू वक्षश्च'** । **'ऊरू सक्थितो वक्षश्च बिभेद'** इति का.श्री. ।

२. इतः परं कोशेषु **'शो तनूकरणे, लङ्'** इति पठ्यते । यदि स साधुः पाठस्तदा **'शूलमशाययत्'** इति मूलपाठ इति वक्तव्यम् ।

विकिरन्तं बहून् बाणान् विकिरन्नेव सायकान् ।
मेघगम्भीरया वाचा रामो रावणमब्रवीत् ॥ ७२ ॥

(भा.दी.) विकिरन्तमिति । श्रीरामः बहून् बाणान् विकिरन्तं अभिवर्षन्तं रावणं सायकान् विकिरन्नेव अभिवर्षन्नेव मेघगम्भीरया वाचा अब्रवीत् ॥ ७२ ॥

(सं.चं.) बहून् बाणान् विकिरन्तं रावणम् ॥ ७२ ॥

सुतो विश्रवसः शूरस्त्वं[१] हि वैश्रवणानुजः ।
जितवान् किल[२] दिक्चक्रं भवान् निजभुजौजसा ॥ ७३ ॥

(भा.दी.) सुत इति । हे शूर, त्वं विश्रवसः विश्रवोनामकस्य सुतो हि । त्वं वैश्रवणानुजः किल । भवान्, निजा ये भुजास्तेषामोजो बलं तेन, दिशां चक्रं मण्डलं दिक्चक्रं तत् जितवान् किल ॥ ७३ ॥

(सं.चं.) त्वं शूरो हीति परिहासः । जितवान् किलेति च । वैश्रवणस्य धनदस्यानुजः ॥ ७३ ॥

नटवत् कपटीभूतान् नाटयन् स्वगतान्[३] गुणान् ।
निसर्गनीचस्त्वमिति स्त्रीचौर्य्येणावगम्यते ॥ ७४ ॥

(भा.दी.) नटवदिति । नटवत् कपटीभूतान् स्वगतान् गुणान् ,विश्रवसः सुतत्वादहं ब्राह्मण इत्यभिप्रायेण स्नानसन्ध्यावन्दनादिधर्मान्, नाटयन् अनुकुर्वन् त्वं, निसर्गतः स्वभावतो नीचः अधमः इति, स्त्रिया यच्चौर्यं तेन अवगम्यते ज्ञायते । गम्लृ गतौ लट् ॥ ७४ ॥

(सं.चं.) नाटयन् अभिनीय प्रदर्शयन् ॥ ७४–५ ॥

ब्रह्महत्या गुरुद्रोहो देवतानां[४] च हेळनम् ।
इत्यादयोऽपराधास्ते स्त्रीचौर्य्येण नवीकृताः ॥ ७५ ॥

---

१. **'शूर त्वं हि'** २. **'जितवान् किल पराभूतं कृतवानिति लोकवार्ता'** इति का.श्री. ।

३. **'नाटयस्यङ्ग तान् गुणान्'** । **'हे अङ्ग प्रीतिविषयेत्यपहासः । हे रारण, त्वं नटवत् नृत्तं कुर्वाण इव कपटीभूतान् कपटत्वं प्राप्तान्, तान् शूरत्वादिक्चक्रजयित्वादीन् गुणान् नाटयसि अनुकरोषीव । वस्तुतस्ते गुणा न सन्तीति भावः'** इति का.श्री । ४. **'दैवतानाम्'**

(भा.दी.) **ब्रह्महत्ये**ति । ब्रह्मणां ब्राह्मणानां हत्या हननम्, गुरूणां ज्येष्ठत्वेन गुरूणां वैश्रवणादीनां द्रोहः, देवतानां इन्द्रादीनां हेळनमवज्ञा इत्यादयः ते तव अपराधाः, स्त्रियाः सीताया यच्चौर्यं तेन नवीकृताः नूतनीकृताः, मरणलक्षणफलोन्मुखा जाता इति भावः ॥ ७५ ॥

दारयिष्यामि हृदयं दारुणं तव रावण ।
साधूनां धर्म्ममार्ग्गस्य कवाटमिव रोधकम् ॥ ७६ ॥

(भा.दी.) **दारयिष्यामी**ति । हे रावण, तव दारुणम्, साधूनां सज्जनानां धर्म एव मार्गस्तस्य कवाटमिव रोधकं प्रतिबन्धकम्, हृदयं वक्षः दारयिष्यामि । दॄ विदारणे लृट् ॥ ७६ ॥

(सं.चं.) धर्मस्य यो मार्गस्तस्य । कवाटोऽररं द्वारबन्धनम् ॥ ७६ ॥

मुनिमांसेन पुष्टस्य तव मांसेन दुर्म्मते ।
कङ्कान्[१] सन्तर्प्पयिष्यामि पश्य सीतापतेर्बलम् ॥ ७७ ॥

(भा.दी.) **मुनी**ति । हे दुर्मते रावण, मुनीनां यन्मांसं तेन पुष्टस्य तव मांसेन कङ्कान् सन्तर्पयिष्यामि । तृप प्रीणने लृट् । सीतापतेर्मम बलं पश्य ॥ ७७ ॥

(सं.चं.) 'कङ्कस्तु कर्कटस्कन्धः पर्कटः कमलच्छदः' इति यादवप्रकाशः । '**ಬಣಹದ್ದು**' इति भाषायाम् । सीतापतेरित्यवधारणार्थः परोक्षनिर्देशः ॥ ७७–९ ॥

इत्युदाहृत्य भगवान् शरैरशनिसन्निभैः ।
राघवो रावणस्याङ्गं बिभेद गिरिसन्निभम् ॥ ७८ ॥

(भा.दी.) **इती**ति । भगवान् राघवः इति उदाहृत्य, अशनेर्वज्रस्य सन्निभाः समानास्तैः शरैः, गिरेः सन्निभं समानं तत्, रावणस्य अङ्गं शरीरं बिभेद ॥ ७८ ॥

रामबाणैर्विभिन्नाङ्गो रावणो विश्वरावणः[२] ।
स्रस्तगात्रो[३] विवृत्ताक्षो मुहूर्त्तं मूर्च्छितोऽपतत् ॥ ७९ ॥

---

१. '**कङ्कान् श्वेतगृध्रान् सन्तर्पयिष्यामि**' इति का.श्री. ।
२. '**लोकरावणः**'
३. '**त्रस्तगात्रो–**' इति वि.ती.पाठः । '**स्रस्तगात्रः स्वेदयुक्तगात्रः**' इति का.श्री. ।

(भा.दी.) **रामे**ति । रामस्य ये बाणास्तैः, विभिन्नमङ्गं यस्य स तथा, विश्वं रावयति आक्रोशयतीति विश्वरावणो रावणः त्रस्तं उद्वेजितं गात्रं यस्य स तथा सन्, विवृत्तानि अक्षीणि यस्य स तथा सन् मुहूर्तो मुहूर्तकालस्तं मूर्च्छितः सन् अपतत् ॥ ७९ ॥

अर्द्धप्रहर्षितसुराम्बुरुहस्तदानीमर्द्धावमीलितसुरेतरकैरवोऽयम् ।
अर्द्धप्रभग्नदशवक्त्रतमाः स्वगोभिरर्द्धोदितो रविरिवाथ रराज रामः ॥ ८० ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
युद्धकाण्डे त्रयोदशः सर्ग्गः ॥

—०—

(भा.दी.) **अर्धे**ति । अथ तदानीं, (अयं रामः) अर्धं यथा भवति तथा प्रहर्षितानि प्रहर्षं गमितानि अर्धप्रहर्षितानि, सुरा एवाम्बुरुहाणि येन स तथोक्तः, अर्धं यथा भवति तथा अवमीलितानि अर्धावमीलितानि सुरेतरे राक्षसास्त एव कैरवाणि कुमुदानि, अर्धावमीलितानि सुरेतरकैरवाणि येन स तथा, स्वस्य ये गावः शराख्यकिरणास्तैः अर्धं यथा भवति तथा प्रभग्नं विनाशितं अर्धप्रभग्नम्, दशवक्त्र एव तमः दशवक्त्रतमः अर्ध-प्रभग्नं दशवक्त्रतमो येन स तथोक्तः, अर्धेन अर्धभागेन उदितः अर्धोदितः रविरिव रराज । रेजृ दीप्तौ लिट् ॥ ८० ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां
युद्धकाण्डे त्रयोदशः सर्गः ॥

—०—

(सं.चं.) वसन्ततिलकया सर्गमुपसंहरति– **अर्धे**ति । रावणो न हतः, केवलं पराजित इति अर्धप्रहर्षितानि सुरा एवाम्बुरुहाणि येन । अहतत्वेऽपि मूर्छाजर्झरित इत्यर्धनिमीलितानि सुरेतराख्यानि कैरवाणि कुमुदानि येन । कुमुदम्– **'ಬಿಳನೈದಿಲೆ'** इति भाषायाम् । अर्धप्रभग्नं दशवक्त्राख्यं तमो येन । गोभिः किरणैः बाणैश्च । अत एवार्धोदितो रविरिव ॥ ८० ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां
युद्धाकाण्डे त्रयोदशसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– २८६४+८०=२९४४]

चतुर्द्दशः सर्ग्गः

[1]विमानयानैर्विबुधैर्द्विजैश्च निमन्त्रितो मन्त्रविदां वरिष्ठः ।
व्योम्नोऽवतीर्य्योपगतो मुकुन्दमुवाच वाचं मतिमानगस्त्यः ॥ १ ॥

(भा.दी.) श्रीरामसूर्ये रावणतमो विजित्य देदीप्यमाने सति देवर्षिभिः प्रेषितेनागस्त्येन स्वाभिप्रायनिवेदनं कृतमित्याह– **विमाने**ति । विमानैः यानं गमनं येषां ते तथा तैः । 'गमने वाहने यानम्' इति वैजयन्ती । विबुधैः देवैः, द्विजैः मुनिभिश्च निमन्त्रितः अनुज्ञातः, मन्त्रान् वेदान् विदन्तीति मन्त्रविदः, तेषां मुनीनां मध्ये वरिष्ठः श्रेष्ठः, मतिर्भगवज्ज्ञानमस्यास्तीति मतिमान्, अगस्त्यः व्योम्नः अवतीर्य, उपगतः समीपमाप्तः सन्, मुकुन्दं श्रीरामं प्रति वाचं उवाच ॥ १ ॥

(सं.चं.) विमानं यानं वाहनं येषाम्, वियति विमानमारुह्य चरन्तः, तैर्विबुधैर्द्विजैर्मुनिभिश्च । निमन्त्रितश्चोदितः मतिमान् भगवदवगतिमान् । अगस्त्यः मुकुन्दं वक्ष्यमाणां वाचमुवाच । उपजातिप्रचुरोऽयं सर्गः ॥ १ ॥

लीलाभिरेताभिरलं महेश क्षिप्रं क्षिपैनं जगदेकशत्रुम् ।
बिभेति लोको नविदन् भवन्तमपायदर्शी प्रणयो मृदूनाम्[2] ॥ २ ॥

(भा.दी.) ***लीलाभिरि***ति । महांश्चासौ ईशश्च तत्सम्बुद्धिः श्रीराम, एताभिः एतावत्पर्यन्तं प्रदर्शिताभिः लीलाभिः युद्धक्रीडाभिः अलम् । जगतः एको मुख्यो यः शत्रुः, तं एनं रावणं क्षिप्रं यथा भवति तथा क्षिप संहर । क्षिपु निरसने लोट् । भवन्तं नविदन् न जानन्, नसमासोऽयम्, अत एव अपायं अनिष्टं पश्यतीति तच्छील इत्यपायदर्शी लोकः जनः बिभेति । ञि भी भये लट् । एवमपायदर्शनहेतुः मृदूनां पुरुषाणां प्रणयः

१. **'विमानयानैर्विविधैर्द्विजैश्च' । 'विमानान्येव यानानि रथाः येषां ते, तैः विमानयानैः देवैः, विविधैर्नानाप्रकारैः द्विजैश्च ब्राह्मणैरपि निमन्त्रितः गच्छेति प्रेरितः मन्त्रविदां विचारं विजानतां मध्ये वरिष्ठः'** इति का.श्री. । २. **'प्रणयेन दूनः'**

त्वयि विद्यमानः स्नेहः । 'प्रणयेन दूनः' इति पाठे प्रणयेन त्वयि स्नेहेन दूनः दुःखितः लोक इति योज्यम् ॥ २ ॥

(सं.चं.) भवन्तं परमपुरुषं न विदन् अज्ञलोकः त्वं विजयसे नवेति भीतोऽस्ति । यतो मृदुहृदयानां प्रणयः सदा प्रीतिपात्रेषु अपायशङ्कीत्यर्थान्तरं न्यास ॥ २ ॥

मार्त्तण्डसन्मण्डलमद्ध्यवृत्तं[1] नारायणं भक्तपरायणं त्वाम् ।
संसेव्य दिव्यस्तुतिभिर्ज्जनोऽयं सर्वोऽपि सर्वं पुरुषार्त्थमेतु[2] ॥ ३ ॥

(भा.दी.) श्रीरामं प्रति सूर्यस्तुतिं कृत्वा रावणं जहीत्यगस्त्येनोपदिष्टमिति रामायणतात्पर्यमाह– **मार्त्तण्डे**ति । अयं सर्वोऽपि जनः मार्त्तण्डस्य सूर्यस्य, सत् निर्दुष्टं यन्मण्डलं तस्य मध्यं तस्मिन् वृत्तं वर्तनं यस्य स तथा तम्, भक्तानां परायणो मुख्याश्रयस्तम्, (नारायणं) त्वां दिव्यस्तुतिभिः संसेव्य, सर्वं पुरुषार्थो धर्मादिस्तम्, एति लभते । इण् गतौ लट् । अतस्त्वयाऽपि सज्जनशिक्षार्थं सूर्यमण्डलान्तर्गतत्वदीयरूपस्तुतिः कर्तव्येत्युपदिष्टमिति भावः ॥ ३ ॥

(सं.चं.) मार्त्तण्डेतीन्द्रवज्रा । सन्मण्डलं लसन्मण्डलम् । भक्तानां परः सर्वोत्तम आश्रयः । एतेन–आदित्य-हृदयाख्या दिव्यस्तुतिर्लोकशिक्षाया अगस्त्येन रामाय दत्ता, भगवल्लीलानुगुणेयं मुनिलीलेत्याह ॥ ३ ॥

इत्युक्त ईशो मुनिना नितान्तमोमित्युदाहृत्य चकर्ष चापम् ।
सम्प्राप्य सञ्ज्ञामनवाप्य भीतिं स रावणस्तावदवाप रामम् ॥ ४ ॥

(भा.दी.) **इती**ति । मुनिना अगस्त्येन इति उक्तः ईशः श्रीरामः ओमिति तथाऽस्त्विति, स्तुतिमिति शेषः, उदाहृत्य, चापं धनुस्तत् नितान्तमत्यन्तं चकर्ष । कृष विलेखने लिट् । तावत् तदानीं सः रावणः सञ्ज्ञां प्रबोधं सम्प्राप्य, भीतिं अनवाप्य, श्रीरामं अवाप । आप्लृ व्याप्तौ लिट् ॥ ४ ॥

(सं.चं.) ओमित्युदाहृत्य ओमित्युक्त्वा, तथाऽस्त्वित्यङ्गीकृत्य । लोकानुजिघृक्षया स्वेच्छयैवा-गस्त्योदितमादित्यहृदयं स्वयमुदाहृत्य जप्त्वा च । यावद्रामश्चापं चकर्ष तावत् तदा रावणोऽपि सञ्ज्ञामवाप्य, भीतिं दूरीकृत्य राममवाप ॥ ४ ॥

---

१. **'–मध्यवृत्तिम्'**

२. **'पुरुषार्थमेति'** इति वि.ती.पाठः । **'सर्वं सकलं पुरुषार्थं मोक्षरूपं फलं एतु'** इति का.श्री. ।

विज्ञाय वीर्य्यं रघुवंशकेतोर्दृष्ट्वा निमित्तं मृतिसूचकं च ।
चचाल चेतो न दशाननस्य न मानिनामापदि चापलं स्यात् ॥ ५ ॥

(भा.दी.) विज्ञायेति । रघोर्यो वंशस्तस्मिन् केतुरिव केतुः श्रेष्ठस्तस्य श्रीरामस्य वीर्यं बलं तत् विज्ञाय, मृतिसूचकं निमित्तं शकुनं तच्च दृष्ट्वाऽपि दशाननस्य चेतः न चचाल । चल कम्पने लिट् । तथा हि मानः एषामस्तीति मानिनस्तेषाम्, शौर्याभिमानिनामित्यर्थः । आपदि चपलस्य चञ्चलपुरुषस्य भावश्चापलं तत् न स्यात् । किन्तु धैर्यमेवावलम्बन्त इति भावः ॥ ५ ॥

(सं.चं.) मृतिसूचकं निमित्तं शकुनम् । न मानिनामिति पुनरर्थान्तरं न्यास्यत् । चपलस्य भावः कर्म वा चापलम्, सम्भ्रमेण प्रवृत्तिः । 'हायनान्त-युवादिभ्योऽण्' (अ.सू.५.१.१३०) । चपलशब्दो युवादिगण-पठितः ॥ ५ ॥

स्वपार्षदानां प्रवरेण तेन महर्षिशापाद् रिपुजन्मभाजा ।
प्रक्रीडितस्तत्र[1] दशाननेन चकार चित्रं रणमम्बुजाक्षः ॥ ६ ॥

(भा.दी.) स्वेति । स्वस्य ये पार्षदाः नन्दसुनन्दादयस्तेषां मध्ये प्रवरेण श्रेष्ठेन जयाख्येन, महर्षयः सनकादय-स्तेषां यः शापः, श्रीहरिदर्शनार्थं वैकुण्ठं प्रति गमनसमये मार्गनिरोधनिमित्तको जन्मत्रये हरिरिपुः सन् भवेति शापः, तस्मात् रिपुरूपं जन्म तद्भजतीति तथोक्तः, तेन दशाननेन, प्रक्रीडितः प्रकर्षेण युद्धक्रीडां कुर्वन्, अम्बुजवदक्षिणी यस्य स तथा श्रीरामः चित्रमद्भुतं तत् रणं तत्र लङ्कायां चकार ॥ ६ ॥

(सं.चं.) स्वपार्षदानां परिचराणां प्रवरेण । जयो हि रावणो बभूव सनकादिशापात् । चित्रमद्भुतं रणं चकार । तथाऽपि तस्येदं क्रीडामात्रम् ॥ ६ ॥

उत्कार्म्मुकौ काञ्चनवर्म्मभाजौ तौ रेजतुः सन्ततबाणवर्षौ ।
व्यक्तेन्द्रचापावचिरांशुचारू संवर्त्तमेघाविव भूरिवर्षौ ॥ ७ ॥

(भा.दी.) उदिति । उत्कृष्टे कार्मुके ययोस्तौ तथा, काञ्चनमये वर्मणी ते भजत इति तथा, सन्ततं निरन्तरं बाणवर्षं ययोस्तौ तथा, तौ श्रीरामरावणौ, व्यक्ते अभिव्यक्ते इन्द्रचापे ययोस्तौ तथा, अचिरांशुभिर्विद्युद्भि-श्चारू, भूरि बहुवर्षं ययोस्तौ तथा, संवर्तमेघाविव प्रळयकालमेघाविव रेजतुः । राजृ दीप्तौ लिट् ॥ ७ ॥

---

१. '–डितस्तेन दशा–'

(सं.चं.) उत्कार्मुकावितीन्द्रवज्रा। मेघौ व्यक्तेन्द्रचापौ। तौ उद्धृतकार्मुकौ। मेघावचिरांशुभिर्विद्युद्भिर्द्योतै-श्चारू। तौ तु काञ्चनकवचचारू। संवर्तमेघौ प्रळयकालमेघौ भूरिवर्षौ। तौ तु सन्ततबाणवर्षौ ॥७॥

ताभ्यां तदा [1]राघवरावणाभ्यां युद्धोद्धताभ्यामभिलोठ्यमाना[2] ।
धरा ससप्ताब्धिधराधराऽपि वाताहता नौरिव चञ्चलाऽभूत् ॥ ८ ॥

(भा.दी.) ताभ्यामिति। तदा युद्धे उद्धताभ्यामभिवृद्धाभ्यां ताभ्यां राघवरावणाभ्यां अभिलोठ्यमाना अभितो मर्द्यमाना, अब्धयश्च धराधराः पर्वतास्ते च सप्तसङ्ख्याका ये अब्धिधराधरास्तैः सहिता, सप्तसमुद्रैः सप्त-कुलाचलैश्च सहिताऽपीत्यर्थः, धरा भूमिः, वातेन वायुना आहता ताडिता नौरिव चञ्चला अभूत् ॥ ८ ॥

(सं.चं.) अभितः लोठ्यमाना पीड्यमाना । लुठ प्रतिघाते । ससप्ताब्धिः ससप्तधराधरा ॥ ८ ॥

प्रभाकरे निष्प्रभतां प्रयाते वातेऽप्यवाते सुरसिद्धसङ्घाः ।
प्रोचुः प्रभुं प्राञ्जलयः प्रसीद राम द्विषं संहरसंहरेति ॥ ९ ॥

(भा.दी.) प्रभेति। प्रभाकरे सूर्ये, निर्गता प्रभा यस्मात् स तथा तस्य भावस्तत्ता तां प्रयाते सति, वातेऽपि न वातीत्यवातस्तस्मिन्, अवीजति[3] सतीत्यर्थः । सुराश्च सिद्धाश्च तेषां सङ्घाः समूहाः, प्राञ्जलयः सन्तः, हे श्रीराम, अस्माकं प्रसीद प्रसन्नो भव । द्विषं रावणं संहर । इति प्रभुं श्रीरामं प्रति प्रोचुः । वचधातो-र्लिट् ॥ ९ ॥

(सं.चं.) वातेऽप्यवाते अवाति सति । संहरसंहरेति त्वरायां द्विरुक्तिः । सत्वरं संहर ॥ ९ ॥

दशाननस्याथ शिरांसि शीघ्रं दश स्फुरत्कुण्डलमण्डितानि ।
चिच्छेद तुच्छेतरमौलिमन्ति तुल्यं क्षुरप्रेण रघुप्रवीरः ॥ १० ॥

(भा.दी.) दशेति । अथ रघुप्रवीरः, स्फुरन्ति यानि कुण्डलानि तैर्मण्डितानि अलङ्कृतानि, तुच्छेतराः अतिमहान्तो मौलयः किरीटानि एषां सन्तीति तथोक्तानि, दशाननस्य दश शिरांसि, तुल्यं युगपद्यथा भवति तथा, क्षुरप्रं सायकविशेषस्तेन, शीघ्रं यथा भवति तथा चिच्छेद । च्छिदिर्धातोर्लिट् ॥ १० ॥

---

१. **'तदा रावणराघवाभ्याम्'** २. **'–मतिलोड्यमाना'**

३. 'शास्त्रेष्वपठितोऽयं वीजधातुर्लोकप्रयोगसिद्धः। किन्त्वयमात्मनेभाषः। **'अवीजयति सति'** इति पाठः स्यात्। **'वीजेर्लौकिकादवीजयत्'** इति क्षीरस्वामी।

(सं.चं.) तुच्छेतरा अनर्घाः मौलयः किरीटानि । तुल्यमेककालम् । क्षुरप्रेण अर्धचन्द्रेण ॥ १० ॥

अन्यानि दृष्ट्वा पुनरुद्गतानि शिरांसि देवो दशकन्धरस्य ।
जानन् विरिञ्चस्य वरं वरिष्ठमादत्त बाणं प्रहसन् महेशः[१] ॥ ११ ॥

(भा.दी.) अन्यानीति । महतां ब्रह्मादीनामीशः देवः श्रीरामः, दशकन्धरस्य रावणस्य पुनः उद्गतानि उत्पन्नानि अन्यानि शिरांसि दृष्ट्वा, विरिञ्चस्य, वरिष्ठः श्रेष्ठस्तम्, निकृत्तानि शिरांसि पुनःपुनरुद्भविष्यन्तीति वरः, तं जानन् सन्, प्रहसन् सन्, बाणं आदत्त जग्राह ॥ ११ ॥

(सं.चं.) पुनरन्यानि शिरांसि उद्गतानि । 'छिन्नमात्रं तु तच्छीर्षं पुनरन्यत् स्म दृश्यते । तदप्यशनि-सङ्काशैश्छिन्नं संयति सायकैः । एवमेकशतं छिन्नं शिरसां तुल्यवर्चसाम्' (१०७.५६–७) इति च । वरिष्ठं बाणमादत्त । महतामपि महानयमीशः ॥ ११ ॥

तं वायुवाजं रविवह्निधारमाकाशमानस्वशरीरयष्टिम् ।
शरं महामेरुगुरुं स्वचापे सुवर्ण्णपुङ्खं प्रतिसन्दधे सः ॥ १२ ॥

(भा.दी.) तमिति । सः श्रीरामः, वायुरेव वाजः पक्षो यस्य स तथा तम्, रविश्च वह्निश्च तावेव धारा यस्य स तथा तम्, आकाशे मानोऽभिमानो यस्य आकाशमानः आकाशाभिमानिदेवः, स एव स्वशशीररूपा यष्टिः दण्डो यस्य स तथा तम्, यद्वा आ सम्यक् काशमाना प्रकाशमाना स्वशरीरयष्टिर्यस्य तमिति वा, अथवा, आकाशस्य मानं परिमितिर्यस्याः सा आकाशमाना अतिस्थूलेत्यर्थः, तादृशी शरीरयष्टिर्यस्य तमिति वा, महान् यो मेरुस्तद्वद् गुरुं भारयुक्तम्, महामेरोरपि गुरुं भारयुक्तमिति वा, सुवर्णमयः पुङ्खो यस्य स तथा तं शरम्, स्वस्य चापं धनुस्तस्मिन् प्रतिसन्दधे । मौर्व्यां सन्धितवान् ॥ १२ ॥

(सं.चं.) तां वरिष्ठतामेवाह– तं वायुवाजमिति । 'ब्रह्मणा निर्मितं पूर्वमिन्द्रार्थममितौजसा । दत्तं सुरपतेः पूर्वं त्रैलोक्यजयकाङ्क्षिणः । यस्य वाजेषु पवनः फले पावकभास्करौ । शरीरमाकाशमयं गौरवे मेरुमन्दरौ' (१०८.५–६) इति च । पुङ्खे निक्षिप्तानि पतत्रिपत्राणि वाजाः । तत्र स्वयं मुख्यवायुः । बाणस्य वेगसम्पा-दकः । धारायां फलापराभिधे बाणाग्रे रविवह्नी सन्निहितौ यस्य । आकाशमानी गणाधिपः यस्य बाणस्य शरीरयष्टिमानी । बाणताडितस्य वपुषि मेरुवद् गौरवमनुभावयन् महामेरुगुरुः । तादृशं शरं स्वचापे सन्दधे रामः ॥ १२ ॥

---

१. 'प्रहसन् रमेशः'

विदारणं दारुणदानवानामदारणीयं कुलिशादिभिश्च ।
विराविणं भीमतरं नितान्तं स रावणायाथ मुमोच बाणम् ॥ १३ ॥

(भा.दी.) विदारणमिति । अथ सः श्रीरामः, दारुणा भयङ्करा ये दानवाः, तेषां नितान्तमत्यन्तं विदारणं विदारकम्, कुलिशं वज्रमादिर्येषां शस्त्राणां तानि तथोक्तानि तैश्च अदारणीयं दारयितुमशक्यम्, विरावो विशेषेण ध्वनिरस्यास्तीति तथा तम्, भीमतरं अत्यन्तभयङ्करं बाणं रावणाय मुमोच ॥ १३ ॥

(सं.चं.) विदारणमित्युपेन्द्रवज्रा । विराविणं गमनवेगजनितरावयुक्तम् । नितन्तं घोरतरं बाणम् । अत्रापि मधुरो द्वितीयाक्षरप्रासश्चित्तं चोरयति ॥ १३ ॥

श्रीरामनामाक्षरलक्षणोऽयं विलक्षणः सर्वजगत्सु जिष्णुः ।
स मार्ग्गणः श्रीरमणेन मुक्तो मुख्यः स्वयं भक्त इवाज्वलत् खे ॥ १४ ॥

(भा.दी.) श्रीरामेति । राम इति यन्नाम तस्य यान्यक्षराणि तान्येव लक्षणं चिह्नं यस्य स तथोक्तः, विलक्षणः इतरबाणासदृशः, सर्वाणि यानि जगन्ति तेषु जिष्णुः जयशीलः, श्रियो रमणो भर्ता तेन स्वयं स्वेन श्रीरामचन्द्रेण मुक्तः, सोऽयं मार्गणः, स्वस्य श्रीरामस्य मुख्यः भक्तः हनुमानिव, खं नभस्तस्मिन् अज्वलत्, ज्वल दीप्तौ लङ् । हनुमानपि हि श्रीरामनामोच्चरणात् श्रीरामनामाक्षरलक्षणः अधिकार्युत्तमत्वेन सर्वविलक्षणः सर्वजगत्सु जिष्णुः श्रीरामेण सीतान्वेषणार्थं मुक्तः । पूर्वश्लोकोक्तविशेषणवांश्च भवतीति स एवात्र भक्तशब्देन ग्राह्यः ॥ १४ ॥

(सं.चं.) मुख्यो भक्तः हनुमान् । श्रीरामनामाक्षराणि लक्षणं ज्ञापकं यस्य तादृशो हनुमान् । यत्र रघु-नाथकीर्तनं तत्र हनुमानित्यर्थः । मार्गणोऽपि श्रीरामनामाक्षरैरङ्कितः । सर्वजगत्सु विलक्षणो सर्वजीवोत्तम-त्वाद्धनुमान् । मार्गणोऽपीतरसर्वमार्गणविलक्षणोऽधिकशक्तित्वात् । सर्वजगत्सु जिष्णुर्जयशीलः हनुमानपि मार्गणोऽपि । हनुमानपि श्रीरमणेन रामेण मुक्तः मार्गण इव खे जज्वाल लङ्कागमने गन्धमादनाहरणे च । मार्गणोऽपि रामेण प्रेषितो हनुमानिव गगने जज्वाल ॥ १४ ॥

विदारयामास स रावणोरो निपातयामास च पुष्पकात् तम् ।
व्यापादयामास च तं शराग्र्यः सम्पादयामास च विश्वमोदम्[1] ॥ १५ ॥

१. 'सद्विनोदम्'

(भा.दी.) विदारयामासेति । सः शराग्र्यः शरश्रेष्ठः रावणोरः विदारयामास । दॄ विदारणे लिट् । तं रावणं पुष्पकं पुष्पकविमानं तस्मात् निपातयामास च । पत्ऌ पतने लिट् । तं व्यापादयामास च मृतमकरोच्च । पद गतौ लिट् । विश्वस्य मोदः सन्तोषस्तं सम्पादयामास च ॥ १५ ॥

(सं.चं.) तेन मार्गणेन रावणवधः सम्पन्न इत्याह– विदारयामास । तेन विश्वस्य मोदं सम्पादयामास । रावणव्यापादनेन समग्रं विश्वं मुमुद इत्यर्थः ॥ १५ ॥

प्रशस्यमानः सकलैः स लोकैर्विवेश भूमिं प्रदरो ह्रियेव[1] ।
पत्युः पुनः पाश्वर्मुपाजगाम साक्षादृजूनां[2] ननु युक्तमेतत् ॥ १६ ॥

(भा.दी.) प्रशस्येति । सः प्रदरः शरः, सकलाः समस्ताः, तैः लोकैः जनैः प्रशस्यमानः स्तूयमानः सन्, ह्रियेव श्रीरामस्य पुरतः स्तवननिमित्तकलज्जयेव भूमिं विवेश । विशतेर्लिट् । रावणोरो भित्त्वा भूमिं च व्यदारयदित्यर्थः । पुनः पत्युः स्वामिनः श्रीरामस्य पाश्वर्ं समीपं तत् उपाजगाम । गम्ऌधातोर्लिट् । एतत् फलानपेक्षया श्रीरामसेवावरणम्, साक्षात् ऋजूनां ऋजुनामकब्रह्मपदयोग्यजीवानां युक्तं ननु । अनेन श्रीरामशराभिमानी देवो मुख्यतः श्रीमुख्यप्राण एवेत्युक्तं भवति । अत एव पूर्वं तद्रूपो हनुमान् दृष्टान्तत्वेना-भिहितः ॥ १६ ॥

(सं.चं.) प्रदरो बाणः आत्मप्रशंसाजनितया ह्रियेव प्रथमं भूमिं विवेश । अथ पत्यू रामस्य पाश्वर्मुपा-जगाम । 'रुधिराक्तः स वेगेन जीवितान्तकरः शरः । रावणस्य हरन् प्राणान् विवेश धरणीतळम् । स शरो रावणं हत्वा रुधिरार्द्रीकृतच्छविः । कृतकर्मा निभृतवत् स्वतूर्णीं पुनरागमत्' (१०८.१९–२०) इति च । साक्षादनुपचारतः ऋजूनां ब्रह्मपदयोग्यानाम् । एतत् लज्जितवत् विनयेन रामसमीपोपसदनम् । एतेन मुख्यप्राण एव मार्गणरूपेण रावणं जघानेत्युक्तं भवति । उक्तं हि निर्णये–'पश्चात्मको मारुत एव बाणाः' (३.७६) इति ॥ १६ ॥

ते राक्षसा रावणभृत्यभूता हतावशिष्टाः पतिते दशास्ये ।
पराद्रवन् [3]प्राणरिरक्षयाऽथ वृक्षे विपन्ने पतगाइव द्राक् ॥ १७ ॥

१. 'ह्रियेव जगत्संहारकस्य म रावणसंहारोऽल्प इति लज्जयेव' इति का.श्री. ।

२. 'साक्षान्मुख्यतः ऋजूनां मनोवाक्कर्मसु एकप्रकाराणाम्' इति का.श्री. ।

३. 'प्राणपरीप्सयाऽथ'

(भा.दी.) **त** इति । अथ रावणभृत्यभूताः, हतेभ्य अवशिष्टाः, ते राक्षसाः, दशास्ये रावणे पतिते सति, वृक्षे विपन्ने सति पतिते सति पतगाइव पक्षिणइव द्राक् शीघ्रं प्राणरिरक्षया प्राणरक्षणेच्छया पराद्रवन् । द्रु गतौ लङ् ॥ १७ ॥

(सं.चं.) रिरक्षया रिरक्षिषया । ग्रन्थकृदेतस्मिन् प्रबन्धे भगवत्पादमनुसरन् छान्दसप्रयोगलोलः बहुलं वैदिकानि पदानि प्रयुङ्क्ते । अन्यथा 'परीप्सया' इत्येवावक्ष्यत् ॥ १७ ॥

प्रक्षीणकर्म्माणमिवाथ पृथ्व्यां प्रेक्ष्याग्रजं निष्पतितं विमानात् ।
विभीषणोऽलं विललाप हाहा रामागसस्तात मृतोऽसि हीति ॥ १८ ॥

(भा.दी.) **प्रक्षीण** इति । अथ विभीषणः, विमानं पुष्पकाख्यं तस्मात् पृथ्व्यां भूमौ निष्पतितम्, अग्रजं रावणम्, प्रक्षीणं भोगेन विनष्टं कर्म पुण्यं यस्य स तथा तमिव, पतितं स्वर्गिणमिवेत्यर्थः, प्रेक्ष्य हे तात रावण, रामस्य आगः अपराधस्तस्मात्, श्रीरामं प्रति कृतापराधादित्यर्थः, मृतः असि । हाहा कष्टंकष्टं इति अलं सम्यक् विललाप । रप लप व्यक्तायां वाचि लिट् ॥ १८ ॥

(सं.चं.) प्रक्षीणकर्माणमिव । यथा प्रक्षीणपुण्यकर्माणो दिवः प्रच्यवन्ते । 'क्षीणे पुण्ये मर्त्यलोकं विशन्ति' इति हि श्रूयते । रामागसः रामविषये कृताद-पराधात् ॥ १८ ॥

धूळीविधूम्रं रुधिरौघसिक्तं वीरं विधात्राऽर्पितवीरशय्यम् ।
पतिं परेतं परिरभ्य दीना मयात्मजाद्या महिळा विलेपुः ॥ १९ ॥

(भा.दी.) **धूळी**ति । दीनाः खिन्नाः, मयस्य मयनामकदैत्यस्य आत्मजा पुत्री मन्डोदरी आद्या यासां तास्तथोक्ताः महिळाः रावणस्त्रियः, धूळीभिः (वि)धूम्रं धूसरवर्णम्, रुधिराणामोघः समूहः, तेन सिक्तम्, वीरम्, विधात्रा विधिना अर्पिता वीरशय्या रणभूशयनं यस्य स तथा तम्, परेतं मृतं पतिं रावणं परिरभ्य विलेपुः परिदेवनं चक्रुः ॥ १९ ॥

(सं.चं.) विधूम्रं धूसरम् । 'धूम्रधूमलौ कृष्णलोहिते' इति यादवप्रकाशः । मयात्मजा मण्डोदरी । तदाद्या धान्यमालिन्याद्याः ॥ १९–२१ ॥

हा रामकान्तामपहृत्य कान्त विभीषणादीन् सुनयान् विधूय ।
दशामिमां प्राप्य गतोऽसि कुत्र प्रियाः प्रियास्मांश्च नयाऽत्मपार्श्वम्[1] **॥ २० ॥**

१. **'नय स्वपार्श्वम्'** इति, **'नय प्रियास्मान् करवाम कृत्यम्'** इति, **'प्रियास्मांश्च करोमि कृत्यम्'** इति च ।

(भा.दी.) हा रामेति । कान्त भर्तः, रामकान्तां श्रीरामभार्यां अपहृत्य, सु शोभनो नयो नीतिर्येषां ते तथा तान् विभीषणादीन् विधूय परित्यज्य, इमां दशामवस्थां प्राप्य कुत्र गतः असि । हे प्रिय भर्तः, प्रियाः भार्याः अस्मांश्च आत्मनः स्वस्य पार्श्वं समीपं तत् नय ॥ २० ॥

एवं विलापे बहु वर्त्तमाने[१] विभीषणं तं भगवान् बभाषे ।
भ्रातुः परेतस्य कुरुष्व कृत्यं नारीः पुरीं[२] प्रापय धार्म्मिकेति ॥ २१ ॥

(भा.दी.) एवमिति । भगवान् श्रीरामः, एवं विलापे बहु यथा भवति तथा वर्तमाने सति, तं विभीषणं प्रति, धर्मं चरतीति धार्मिकस्तत्सम्बुद्धिः, हे विभीषण, परेतस्य मृतस्य भ्रातुः रावणस्य कृत्यं साम्परायिकं कर्म कुरुष्व । नारीः रावणभार्याः पुरीं लङ्कां प्रापय इति बभाषे । भाषधातोर्लिट् ॥ २१ ॥

दारापहारी[३] तव नाथ पापो भ्राता न मे तस्य करोमि कृत्यम् ।
एवं ब्रुवाणं तमुवाच देवो मदाज्ञया स्यादिति मन्दहासी ॥ २२ ॥

(भा.दी.) दारेति । हे नाथ श्रीराम, तव दारान् भार्यां अपहर्तुं शीलमस्यास्तीति तथा पापः रावणः मे भ्राता न । अतः अस्य रावणस्य कृत्यं साम्परायिकं कर्म न करोमि । एवं ब्रुवाणं तं विभीषणं प्रति देवः श्रीरामः मन्दहासोऽस्यास्तीति मन्दहासी तथा सन् मदाज्ञया कर्तव्यं स्यात् भवेत् इति उवाच ॥ २२ ॥

(सं.चं.) मे भ्राता पापः । न मे भ्रातेति वा । तस्य न करोमि कृत्यम् । तस्य तादृशस्यापि कृत्यं करोमीत्याक्षेपो वा । 'तन्न करोमि कृत्यम्' इत्यपि पाठः स्यात् । केचिदन्यथा पाठं पठन्ति–'दारापहाराद् भवतोऽद्य पापो भ्राता च नैवास्य करोमि कृत्यम्' इति । तदा तु नार्थक्लेशः । मदाज्ञया स्यादिति । 'मरणान्तानि वैराणि निर्वृत्तं नः प्रयोजनम् । क्रियतामस्य संस्कारो ममाप्येष यथा तव' (१११.१००-१) इति च ॥ २२ ॥

दशाननस्य क्रतुभिः [४]समिद्धानग्नीन् पुरस्कृत्य पुरोहिताग्र्यैः[५] ।
विधाय संस्कारमथापराश्च क्रियाश्चकाराऽशु विभीषणोऽत्र ॥ २३ ॥

---

१. 'एवं ब्रुवाणे बहुधा जने स्वे विभी–' इति च । २. 'पुरं प्रापय धाम चेति'

३. 'दारापहाराद् भवतोऽद्य पापो भ्राता च नैवास्य करोमि' । 'हे राम, यस्माद् भ्राता रावणः भवतस्तव दारापहारात् स्त्रीचौर्यात् अद्य इदानीं पापः पापिष्ठोऽभूत् । तस्मादस्य पापस्य रावणस्य कृत्यं उत्तरक्रिया नैव करोमि' इति का.श्री. ।

४. 'समृद्धानग्नीन्' ५. '–हिताग्रैः'

(भा.दी.) **दशे**ति । अत्र लङ्कायां विभीषणः, दशाननस्य क्रतवो यज्ञाः तैः समिद्धान् समेधितान् अग्नीन्, पुरोहितेषु अग्र्याः श्रेष्ठास्तैः पुरस्कृत्य, अग्रतः कारयित्वा, संस्कारः शवदाहादिस्तं विधाय, अथ आशु अपराश्च क्रियाः चकार ॥ २३ ॥

(सं.चं.) अग्नीन् पुरस्कृत्य, पुरोहिताग्र्यैः सह तद्दर्शितमार्गेण, संस्कारं विधाय । संस्कारं दाहसंस्कारम् । अपराश्च तदङ्गभूताः क्रियाः ॥ २३–४ ॥

लोकैकशत्रौ निहते दशास्ये लोकैकनाथो द्रुहिणो हरश्च ।
महेन्द्रपूर्वैः सह लोकपालैर्लोकेशचूडामणिमाप्य नेमुः ॥ २४ ॥

(भा.दी.) **लोके**ति । लोकानामेकः केवलं यः शत्रुस्तस्मिन् दशास्ये निहते सति, लोकानामेको मुख्यो यो नाथः द्रुहिणश्चतुर्मुखः, हरश्च, महेन्द्रः पूर्वः येषां ते तथा तैः लोकपालैः अग्न्यादिभिः सह, लोकेशेषु ब्रह्मादिषु चूडामणिरिव चूडामणिः श्रेष्ठ इत्यर्थः, तं श्रीरामं प्राप्य ते सर्वेऽपि नेमुः नमश्चक्रुः । णमु प्रह्वत्वे शब्दे च लिट् ॥ २४ ॥

पद्मापतिं पद्मभवोऽथ देवो बद्धाञ्जलिर्बद्धमहानुबन्धः ।
तुष्टाव तुष्टात्ममतिर्वचोभिर्गुह्यैः स वेदान्तकृतान्तसारैः[१] ॥ २५ ॥

(भा.दी.) **पद्मे**ति । अथ देवः, बद्धः महाननुबन्धो महती भक्तिर्येन स तथा, तुष्टः सन्तुष्टो य आत्मा स्वामी श्रीरामः तद्विषयिणी मतिर्ज्ञानं यस्य स तथा, सन्तुष्टा आत्मनः स्वस्य मतिर्यस्येति वा, प्रसन्नमना इत्यर्थः, पद्मात् नाभिपद्मादुद्भवो यस्य स तथा सः ब्रह्मा, बद्धः अञ्जलिर्येन स तथा सन्, वेदान्तानामुपनिषदां यः कृतान्तः सिद्धान्तः, वेदार्थनिर्णयरूपः कृतान्त इति वा, 'कृतान्तो यमसिद्धान्तदैवाकुशलकर्मसु' इत्यमरः, तस्य सार अर्थो येषां तानि, 'सारो बले स्थिरांशेऽर्थे पुमान् न्याये वरेऽर्थवत्' इति वैजयन्ती । वेदान्तशास्त्रप्रतिपादकैरित्यर्थः, गुह्यैः रहस्यार्थप्रतिपादकैः वचोभिः तुष्टाव । ष्टुञ् स्तुतौ लिट् ॥ २५ ॥

(सं.चं.) पद्मापतिमितीन्द्रवज्रा । अनुबन्धो भक्तिबन्धः । आत्मा मनः मतिर्बुद्धिः । भगवन्मयतया सदा तुष्टे मनोबुद्धी यस्य । गुह्यैः गोपनीयैर्वेदमन्त्रैः । 'गुह्यं रहस्यमित्येतावप्रकाश्येऽपि वस्तुनि' इति यादवप्रकाशः । वेदानामन्तश्चरमो यः कृतान्तः सिद्धान्तः विष्णुपारम्यं तस्य सारभूतैर्वचनैः । वेदान्तानामुपनिषदां सिद्धान्तसारैरिति वा ॥ २५ ॥

---

१. **'वेदानामन्तो निर्णयो यस्मात् तत् ब्रह्ममीमांसाशास्त्रम् । वेदान्ताख्यसिद्धान्तसारभूतैः'** इति का.श्री. ।

जयो ध्रुवस्ते न पराजयः स्याद् विश्वेश्वरस्त्वं वयमत्र दासाः ।
न चान्यथा स्यादयमीरितोऽर्थः क्वचित् कदाचिद् भगवन् कुतश्चित् ॥ २६ ॥

(भा.दी.) जय इति । हे भगवन् श्रीराम, ते जयः ध्रुवः नित्य एव स्यात् । पराजयः न स्यादेव । यतः त्वं विश्वेश्वरः सर्वजगदीश्वरः, (वयम्) अत्र त्वत्सेवाविषये दासाः । अतः मया ईरितः अयमर्थः जयो ध्रुवः इत्यादिनोक्तार्थः, क्वचिद् देशे कदाचित् कस्मिंश्चित् काले, कुतश्चित् कारणादपि, अन्यथा अन्यप्रकारेण न स्यात् नैव स्यात् ॥ २६ ॥

(सं.चं.) अत्र त्वत्सन्निधौ । कुतश्चिदपि कारणविशेषात् ॥ २६ ॥

नाऽदिर्न नाशस्तव सद्गुणानां नान्तो न हन्तास्ति तिरस्कृतिश्च ।
एकैकशोऽप्येवमुतान्यथा नो क्वचित् कदाचिद् भगवन् कुतश्चित् ॥ २७ ॥

(भा.दी.) नाऽदिरिति । हे भगवन् श्रीराम, तव सन्तो ये गुणाः ज्ञानादयस्तेषां आदिः उत्पत्तिर्नास्ति । नाशो वा नास्ति । अन्तः परिच्छेदो वा नास्ति । तिरस्कृतिः अन्यगुणैरभिभवश्च नास्ति, हन्त । एकैकशोऽपि ज्ञानशक्तिबलैश्वर्याद्यानन्तगुणानां मध्ये एकैकगुणोऽपि, एवं उक्तप्रकारेण देशतः कालतो गुणतश्च परिच्छेद-रहितः । अन्यथा क्वचिद् देशे वा कदाचित् काले वा कुतश्चित्कारणाद् वा न ॥ २७ ॥

(सं.चं.) गुणानां दोषासमानाधिकरणत्वं सत्वम् । तिरस्कृतिस्तिरोधानमप्रकाशः । यथा देवानामवतारेषु । एकैकोऽपि गुण एवमाद्यन्तविधुरस्तिरस्कृतिविधुरश्च ॥ २७ ॥

अनाद्यनन्तः परमः स्वतन्त्रस्त्वमेक एवेश भवद्वशाः स्मः ।
अहं भवः[१] शक्र इनादयश्च भवे च मुक्तौ च परे च सर्वे ॥ २८ ॥

(भा.दी.) अनादीति । हे ईश श्रीराम, त्वं एक एव आदिश्च अन्तश्च आद्यन्तौ, न विद्येते आद्यन्तौ यस्य स तथा, परमः सर्वोत्तमः, स्वतन्त्रश्च, अहम्, भवो रुद्रः, शक्रः इनः सूर्यः, आदिर्येषां ते तथा, परे अन्ये च देवाः सर्वे वयम् । भवः संसारस्तस्मिंश्च मुक्तौ च भवद्वशाः भवदधीनाः स्मः भवामः ॥ २८ ॥

---
१. 'अहं शिवः शक्र-'

(सं.चं.) अनाद्यनन्तः इत्युपेन्द्रवज्रा । अहमिति तत्समानकक्ष्यो वायुरपि गृहीतः । भव इति गरुडशेषौ च । देवाः प्रायः सपत्नीका गृह्यन्ते । एतेभ्यः परेऽन्ये अनुक्ता देवाश्च इनादयः सर्वे देवाः भवे च मुक्तौ । परे च सर्वे जीवाः, केचिद् भवे च मुक्तौ च । केचिद् भव एवेति वा ॥ २८ ॥

अर्चिष्मतोऽर्चींषि रवेर्म्मयूखा वेगाश्च वायोः सरितां[१] यथाऽऽपः ।
निर्य्यान्ति संयान्ति च सन्ततं हि त्वत्तो वयं चेश तथा समस्ताः ॥ २९ ॥

(भा.दी.) अर्चिष्मत इति । अर्चींषि ज्वाला अस्य सन्तीति अर्चिष्मान्, तस्मात् अर्चींषि ज्वालाः यथा, रवेः मयूखाः किरणाः यथा, वायोश्च वेगाः यथा, सरितः नद्यः तासां आपः यथा । सन्ततं अविरतं निर्यान्ति निर्गच्छन्ति, संयान्ति च प्रविशन्ति च, तथा हे ईश श्रीराम, त्वत्तः वयं समस्ताः भूतभविष्यद्वर्त-मानाः सर्वे च सृष्टिकाले यथायोग्यं निर्गच्छामः । प्रळयकाले प्रविशामश्च । हिशब्दात् उक्तार्थे श्रुत्यादिप्रसिद्धिः द्योतिता ॥ २९ ॥

(सं.चं.) अर्चिष्मतोऽर्चींषीतीन्द्रवज्रा । तथाहि श्रुतिः–'अग्निर्यथैको भुवनं प्रविष्टो रूपंरूपं प्रतिरूपो बभूव' इति, 'वायुर्यथैको भुवनं प्रविष्टो रूपंरूपं प्रतिरूपो बभूव' इति, 'सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः' इति च । 'भवान् नारायणो देवः श्रीमांश्चक्रायुधो विभुः' (११७.१३) इति, 'त्वं त्रयाणां हि लोकानामादिकर्ता स्वयं प्रभुः' (११७.१८), 'सहस्रचरणः श्रीमान् शतशीर्षः सहस्रदृक्' (११७.२१), 'अहं ते हृदयं राम जिह्वा चैव सरस्वती' (११७.२३), 'सीता लक्ष्मीर्भवान् विष्णुर्देवः कृष्णः प्रजापतिः' (११७.२७) इत्यादि च रामायणे । 'त्वमेक ईशोऽस्य नचाऽदिरन्तस्तवेड्य कालेन तथैव देशतः । गुणा ह्यगण्यास्तव तेऽप्यनन्ताः प्रत्येकशश्चादिविनाशवर्जिताः । न चोद्भवो नैव तिरस्कृतिस्ते क्वचिद् गुणानां परतः स्वतो वा । त्वमेक आद्यः परमः स्वतन्त्रो भृत्यास्तवाहं शिवपूर्वकाश्च ये । यथाऽर्चिषोऽग्नेः पवनस्य वेगा मरीचयोऽर्कस्य नदीषु चाऽपः । गच्छन्ति चाऽयान्ति च सन्ततास्त्वत् तद्वन्मदाद्या शिवपूर्वकाश्च ये' (८.२१३–५) इति च निर्णये ॥ २९ ॥

न दोषलेशोऽपि तवेश कश्चिद् गुणान् सुखादीन् गणयन्ति के वा ।
स्वरूपभूताश्च वपुर्ग्गुणाद्या विशेषतोऽनन्त तव ह्यनन्ताः ॥ ३० ॥

---

१. 'सरितो यथाऽऽपः'

(भा.दी.) नेति । हे ईश, तव कश्चित् दोषलेशोऽपि अज्ञानपारतन्त्र्यादिदोषगन्धोऽपि न । के वा पुरुषाः सुखमादिर्येषां ते तथा तान् गुणान् गणयन्ति? गण सङ्ख्याने लट् । गुणगुणिभावे प्राप्ते भेदशङ्कां वारयति– **स्वरूपे**ति । हे अनन्त श्रीराम, तव वपूंषि मत्स्यादिरूपाणि तानि च, गुणाश्च ते आद्या येषां ते तथोक्ताः क्रियादयः स्वरूपभूताश्च स्वरूपभूता एव । तर्हि अनन्तगुणित्वं कथमित्यत आह–विशेषत इति । विशेषतः विशेषाख्यशक्त्यतिशयात् अनन्ता असङ्ख्याताः ॥ ३० ॥

(सं.चं.) न दोषलेशोऽपीत्युपेन्द्रवज्रा । गणयन्ति के वा । 'विष्णोर्नु कं वीर्याणि प्र वोचं यः पार्थिवानि विममे रजांसि' इति हि श्रुतिः । 'विष्णोर्नु वीर्यगणनां कतमोऽर्हतीह यः पार्थिवान्यपि कविर्विममे रजांसि' इति च भागवते । श्रुतौ कं क एव । बिन्दुरवधारणे । प्र वोचं प्रावोचदेव । स्वरूपभूता अपि विशेषतोऽनन्ताः । विशेषबलादनन्तत्वव्यवहारभाजः ॥ ३० ॥

भ्रूविभ्रमेणैव जगन्ति हन्तुं स्रष्टुं पुनः पालयितुं प्रभोस्ते ।
रक्षोवधो[१] नाद्भुतमत्र यद्वत् तूलप्रदाहः प्रळयानलस्य ॥ ३१ ॥

(भा.दी.) भ्रूविभ्रमेति । भ्रुवो यो विभ्रमश्चलनमात्रं तेनैव जगन्ति स्रष्टुं पालयितुं पुनश्च हन्तुमपि प्रभोः समर्थस्य ते तव अत्र युद्धे रक्षोवधः राक्षससंहारः प्रळयानलस्य प्रळयकालीनाग्नेः तूलप्रदाहः यद्वत् तद्वत् अद्भुतमाश्चर्यं न ॥ ३१ ॥

(सं.चं.) भ्रूविभ्रमेणेतीन्द्रवज्रा । भ्रूविभ्रमेण भ्रूभङ्गविलासमात्रेण ॥ ३१ ॥

अनन्यसाध्येन तथाऽपि शत्रोर्वधेन रक्षस्यखिलामरांस्त्वम्[२] ।
नमोनमो राम नमोनमस्ते सदेति तुष्टाव विधिः स्वतातम् ॥ ३२ ॥

(भा.दी.) तथाऽपीदमनन्यसाध्यमित्याह– **अनन्ये**ति । तथाऽपि ते सुलभत्वेऽपि, अन्यसाध्यो न भवतीत्यनन्यसाध्यः, तेन शत्रोः रावणस्य वधेन अखिलामरान् (त्वं) रक्षसि । रक्ष पालने लट् । हे श्रीराम, ते तुभ्यं नमः अस्तु, सदा नमः अस्तु इति विधिर्ब्रह्मा स्वतातं स्वपितरं श्रीरामं तुष्टाव ॥ ३२ ॥

(सं.चं.) अनन्यसाध्येनेत्युपेन्द्रवज्रा । 'किमेष ईदृग्गुणकस्य ते प्रभो रक्षोवधोऽशेषसुरप्रपालनम् । अनन्यसाध्यं हि तथाऽपि तद् द्वयं कृतं त्वया तस्य नमोनमस्ते' (८.२१७) इति निर्णये ॥ ३२ ॥

---

१. **'रक्षोवध इति यत् तन्नाद्भुतम्'** इति का.श्री. । २. **'–स्यखिलामरांश्च'**

दशाननं स्वेन वरेण गुप्तं निरीक्ष्य रामेण निपातितं तम्[१] ।
भवस्तदा [२]तामसभावमाप्तो योद्धुं क्रुधाऽऽह्वास्त रघुप्रवीरम् ॥ ३३ ॥

(भा.दी.) **दशेति** । तदा भवः, स्वः स्वकीयस्तेन वरेण गुप्तं दशाननं रावणं श्रीरामेण भुवि निपातितं वीक्ष्य, तामसो यो भावोऽभिप्रायस्तं आप्तः सन्, योद्धुं, क्रुध् कोपस्तया रघुप्रवीरं श्रीरामं आह्वास्त, युद्धार्थमसूययाऽऽहूतवान् । ह्वेञ् स्पर्धायां शब्दे च लङ् ॥ ३३ ॥

(सं.चं.) स्वेन स्वदत्तेन । आह्वास्त आजुहुवे । ह्वेञ् स्पर्धायामाह्वाने च । 'स्पर्धायामाङः' (अ.सू.१.३.३१) इत्यात्मनेभाषा । 'आत्मनेपदेष्वन्यतरस्याम्' (अ.सू.३.१.५४) इति आत्मनेपदे लुङि रूपद्वयम्–आह्वत । आह्वास्त ॥ ३३ ॥

चापेन रोपं प्रतिसन्दधाने चराचरेशे[३] विचचाल भूमिः ।
पृथ्वीप्रकम्पेन पपात शर्वः स उत्थितोऽभूच्च विशुद्धभावः ॥ ३४ ॥

(भा.दी.) **चापेनेति** । पराश्च अपराश्च तेषां प्राणिनामीशे श्रीरामे, चापं धनुः, तेन रोपं शरम्, 'पत्री रोप इषुर्द्वयोः' इत्यमरः, प्रतिसन्दन्धाने सति भूमिः (वि)चचाल । चल कम्पने लिट् । शर्वः पृथ्व्याः प्रकम्पस्तेन पपात । सः शिवः विशुद्धो भावोऽभिप्रायो यस्य स तथा सन् उत्थितोऽभूत् ॥ ३४ ॥

(सं.चं.) रोपं शरम् । पतनेन सञ्जातविशुद्धभावः । रामायणे न स्फुटमिदम् । निर्णये स्फुटमुक्तम्–'इतीरिते त्वब्जभवेन शूली समाह्वयद् राघवमाहवाय । वरं मदीयं त्वगणय्य रक्षो हतं त्वया तेन रणाय मेहि । इतीरितेऽस्त्वित्यभिधाय राघवो धनुः प्रगृह्याथ शरं च सन्दधे । विकृष्यमाणे चलिता वसुन्धरा पपात रुद्रोऽपि धराप्रकम्पतः' (८.२१८–९) इति ॥ ३४–५ ॥

पद्मापतेराशु स पादपद्मे पपात भक्त्या भरितो भवोऽथ ।
क्षमस्व लक्ष्मीरमणापराधं शुद्धाऽस्तु मे बुद्धिरिति[४] ब्रुवाणः ॥ ३५ ॥

(भा.दी.) **पद्मेति** । अथ श्रीरामसामर्थ्यदर्शनानन्तरम्, भवः भक्त्या भरितः पूर्णः सन्, लक्ष्मीरमण, लक्ष्मीभर्तः श्रीराम, अपराधो युद्धाद्युक्तलक्षणः, तं क्षमस्व । क्षमूष् सहने लोट् । मद्बुद्धिः शुद्धा

१. **'तं वीक्ष्य रामेण निपातितं भुवि'** इति वि.ती.पाठः स्यात् । अथापि छन्दो भिद्यते ।
२. **'तामसभावं तमोगुणकार्यमसुरावेशमाप्तः'** इति का.श्री. । ३. **'परापरेशे'** इति वि.ती.पाठः । ४. **'मद्बुद्धिरिति'** इति वि.ती.पाठः ।

रागादिरहिता अस्तु । इति ब्रुवाणः सन् पद्मायाः लक्ष्म्याः पतिस्तस्य श्रीरामस्य पादे एव पद्मं तस्मिन् आशु पपात ॥ ३५ ॥

वृन्दारकैरिन्द्रपुरःसरैश्च स्वानन्दमूर्त्तिः परिवन्द्यमानः ।
मुखेन्दुना चारुवचोऽमृतेन विश्वाभिरामोऽभिननन्द रामः ॥ ३६ ॥

(भा.दी.) वृन्देति । इन्द्रः पुरःसरः, प्रधानो येषां ते तथा तैः, वृन्दारकैश्च देवैश्च परिवन्द्यमानः, सु शोभनो य आनन्दः स एव मूर्तिः शरीरं यस्य स तथा, विश्वमभिरमयति सुखयतीति विश्वाभिरामः श्रीरामः, मुखमेवेन्दुस्तेन, चारु यद् वचस्तदेवामृतं तेन अभिननन्द स्वभक्तान् सन्तोषयामास ॥ ३६ ॥

(सं.चं.) चारु वच एवामृतं यस्य तेन मुखेन्दुना । अमृतांशुर्हीन्दुरुच्यते ॥ ३६–७ ॥

रामानुजो रामनियोगतोऽथ समं समस्तैः कपिपुङ्गवैस्तैः ।
लङ्काधिनाथोऽयमिति ब्रुवाणो विभीषणं शोभनमभ्यषिञ्चत् ॥ ३७ ॥

(भा.दी.) रामेति । अथ रामानुजः लक्ष्मणः, तैः समस्तैः कपिपुङ्गवैः कपिश्रेष्ठैः समं साकम्,, श्रीरामस्य नियोग आज्ञा तस्मादिति ततः, अयं विभीषणः लङ्काधिनाथः लङ्काधिपतिः इति ब्रुवाणः सन् शोभनं विभीषणं अभ्यषिञ्चत् । षिच सेचने लङ् ॥ ३७ ॥

भूम्ना नियुक्तः पवनस्य सूनुः सीताकृतिं तां विनयेन गत्वा ।
पतिव्रते ते पतिरेष हत्वा तं रावणं राजत इत्युवाच ॥ ३८ ॥

(भा.दी.) भूम्नेति । भूम्ना परिपूर्णेन रामेण, अनेन च हनुमत्प्रेषणं न सीतादर्शनेच्छयेति दर्शितम्, नियुक्तः आज्ञप्तः, पवनस्य सूनुः, तां सीताकृतिं विनयः प्रश्रयस्तेन गत्वा, हे पतिव्रते सीते, ते तव पतिः एषः श्रीरामः तं रावणं हत्वा राजते । राजृ दीप्तौ लट् । इति उवाच ॥ ३८ ॥

(सं.चं.) भूम्ना गुणपूर्णेन रामेण ॥ ३८–९ ॥

स्वस्त्यस्तु वत्स प्रियवादिने ते प्रियं दिदृक्षे मम देवदेवम् ।
इति ब्रुवन्त्यां तनुमद्ध्यमायामुवाच तन्मारुतिराप्य[1] रामम् ॥ ३९ ॥

---
१. **'तं मारुतिराप्य'** इति वि.ती.पाठः ।

(भा.दी.) स्वस्तीति । हे वत्स, प्रियवादिने ते तुभ्यं स्वस्ति मङ्गळं अस्तु । देवदेवं रामं प्रियं मम भर्तारं दिदृक्षे द्रष्टुमिच्छामि । तनु मध्यमं मध्यं यस्याः सा तथा तस्यां सीतायां इति ब्रुवन्त्यां सत्यां मारुतिः तं श्रीरामं एत्य उवाच, सीता त्वद्दर्शनमाशास्ते इत्यवदत् ॥ ३९ ॥

रामाज्ञया तत्र विभीषणस्तामुपानिनायाधिकगोपनेन ।
स्वयंवरे च व्यसने च युद्धे[1] राज्ञी न गोप्येति जगाद रामः ॥ ४० ॥

(भा.दी.) रामेति । विभीषणः रामाज्ञया तां सीतां तत्र श्रीरामनिकटे अधिकं यद्गोपनं गूहनं तेन उपानिनाय समानयत् । श्रीरामः, स्वयं वरणं तस्मिन्, अथ व्यसनमपायस्तस्मिन्, अथ युद्धं रणं तस्मिन्, राज्ञी राजभार्या (गोप्या) निगूहनीया न इति जगाद । गद व्यक्तायां वाचि लिट् ॥ ४० ॥

(सं.चं.) राज्ञी न गोप्या । 'न गृहाणि न वस्त्राणि न प्राकारास्तिरस्क्रियाः । नेदृशा राजसत्कारा वृत्तमावरणं स्त्रियाः । व्यसनेषु च कृच्छ्रेषु न युद्धेषु स्वयंवरे । न क्रतौ न विवाहे च दर्शनं दुष्यति स्त्रियाः' (१४७.२८–८) इति च ॥ ४० ॥

तिरस्करिण्यामपवाहितायामसंवृता संसदि जातलज्जा ।
स्वेष्वेव गात्रेषु निलीय याता रामाननं चारु ददर्श रामा ॥ ४१ ॥

(भा.दी.) तिरस्करिण्यामिति । तिरस्करिण्यां यवनिकापट्यां (अपवाहितायां सत्याम्, असंवृता संसदि) जाता लज्जा यस्याः सा तथा, अत एव स्वेष्वेव स्वकीयेष्वेव गात्राणि अवयवास्तेषु निलीय निगूह्य, श्रीरामं प्रति याता प्राप्ता, रामा स्त्री सीता चारु मनोहरं रामाननं तत् ददर्श ॥ ४१ ॥

(सं.चं.) तिरस्करिण्याम् । 'काण्डपटः स्यादपटी प्रतिसारा यवनिका तिरस्करिणी' इति यादवप्रकाशः ॥ ४१ ॥

आलोक्य तां लोकपतिर्बभाषे [2]जिताऽसि भद्रे विनिहत्य शत्रुम्[3] ।
दारापहारोद्भवदुर्य्यशो मे प्रमृष्टमेवं किमिहाद्य कृत्यम् ॥ ४२ ॥

---

१. **'स्वयंवरेऽथ व्यसनेऽथ युद्धे'** इति वि.ती.पाठः । २. **'जित्वाऽस्मि भद्रे'**

३. **'विनिहत्य शत्रून्'** इति वि.ती.पाठः स्यात् ।

(भा.दी.) आलोक्येति । लोकपतिः श्रीरामः तां सीतां आलोक्य, हे भद्रे सीते, त्वं शत्रून् विनिहत्य जिता असि । मे मम दाराणां भार्याया अपहारस्तस्मादुद्भव उत्पत्तिर्यस्य तत्तादृशं यु दुर्यशः तत् एवं प्रमृष्टं मार्जितम् । इह एतर्हि मम त्वया कृत्यं कार्यं किमस्ति? न किमपि इति बभाषे ॥ ४२ ॥

(सं.चं.) किमिहाद्य त्वया मम कृत्यम्? ॥ ४२–४ ॥

कुलाङ्गनायां परवेश्मगायां कथं कुलीनः कुरुतेऽभिलाषम् ।
वयं तु सर्वत्र च सङ्गहीनाः शुचिस्मिते याहि यथेप्सितं त्वम्[१] ॥ ४३ ॥

(भा.दी.) कुलेति । कुले उत्पन्ना या अङ्गना तस्यां, परस्य यद् वेश्म गृहं तद्गच्छतीति परवेश्मगा तस्यां सत्याम्, कुलीनः सत्कुलप्रसूतः पुरुषः, अभिलाषः स्वीकारकामः, तं कथं कुरुते? न कथमपि । रागिणः पुरुषस्य परवेश्मगायामप्यासक्तिर्दृष्टेत्यत आह– **वयमि**ति । (वयं तु) सर्वत्र च राज्यकळत्रादिषु, सङ्गेन आसक्त्या हीनाः रहिताः । शुचि स्मितं यस्याः सा तत्सम्बुद्धिः, हे सीते, त्वं इष्टमनतिक्रम्य यथेष्टम्, कामानुसारेणेत्यर्थः, याहि ॥ ४३ ॥

नास्म्यन्यसक्तेति मुहुर्ब्रुवाणा विज्ञाय भावं भुवनेश्वरस्य ।
शुकालपा लक्ष्मणमाललाप चितां[२] द्रुतं मे कुरु लक्ष्मणेति ॥ ४४ ॥

(भा.दी.) नास्मीति । अहं अन्यस्मिन् पुरुषे सक्ता आसक्ता न, इति मुहुः ब्रुवाणा वदन्ती, शुकवदालपतीति तथोक्ता सीता, भुवनेश्वरस्य श्रीरामस्य भावोऽभिप्रायस्तं विज्ञाय, विशुद्धतया प्रकटितां त्वां ग्रहीष्यामीत्यभिप्रायं ज्ञात्वेत्यर्थः, हे लक्ष्मण, द्रुतं यथा भवति तथा मे चितां अग्निप्रवेशनानुकूलचितां कुरु, इति लक्ष्मणं आललाप । रप लप व्यक्तायां वाचि लिट् ॥ ४४ ॥

सुग्रीवमुख्येष्वथ वानरेषु मुञ्चत्सु बाष्पं सविभीषणेषु ।
बाष्पेक्षणो लक्ष्मण आशु चक्रे चितां[३] प्रभोश्चित्तमवेत्य भावैः ॥ ४५ ॥

(भा.दी.) सुग्रीवेति । अथ, सुग्रीवो मुख्यो येषां ते तथा तेषु, सविभीषणेषु वानरेषु बाष्पः अश्रुजलं तं मुञ्चत्सु सत्सु, बाष्पेण युक्ते ईक्षणे चक्षुषी यस्य स तथा लक्ष्मणः, प्रभोः श्रीरामस्य भावा अभिलपनादिक्रियास्तैः,

१. **'यथेप्सितं ते'** । **'याहि ततो यथेष्टम्'** इति वि.ती.पाठः स्यादपि । २. **'चितिं द्रुतम्'** ३. **'चितिं प्रभो–'**

'भावो लीला क्रिया चेष्टा भूत्यभिप्रायजन्तुषु' इति वैजयन्ती, चित्तं मनस्तत् अवेत्य, विशुद्धतया प्रख्यापितां ग्रहीष्यामीत्याशयं ज्ञात्वेत्यर्थः, चितां आशु चक्रे ॥ ४५ ॥

(सं.चं.) भावैः भ्रूचलनादिचेष्टाविशेषैः । 'स विज्ञाय ततश्छन्दं रामस्याऽऽकारसूचितम् । चितां चकार सौमित्रिर्मते रामस्य वीर्यवान्' (११६.२१) इति च ॥ ४५ ॥

अगामहं चेन्मनसाऽपि नान्यं मां पावकः पातु परीक्षकोऽयम् ।
सेति ब्रुवाणा प्रणिपत्य रामं जाज्वल्यमाने ज्वलने पपात ॥ ४६ ॥

(भा.दी.) अगामिति । मनसाऽपि यदि अन्यं पुरुषं अगाम्, अयं मे रमणो भूयादिति सङ्कल्पितवतीत्यर्थः, तर्हि धर्माधर्मसाक्षित्वेन परीक्षकः अयं पावकः स्वात्मनि प्रविष्टां मां न पातु । पा रक्षणे लोट् । सा सीता इति ब्रुवाणा सती श्रीरामं प्रणिपत्य प्रणम्य जाज्वल्यमाने ज्वलने वह्नौ पपात ॥ ४६ ॥

(सं.चं.) यदि मनसाऽप्यन्यं नागां तदा मां पावकः पातु । यद्यगां तदा न पातु ॥ ४६ ॥

हाहाकृतं वानरराक्षसैस्तैस्तस्यां पतन्त्यामनले विशङ्कम्[1] ।
ब्रह्मादयो राममथाभ्यधुस्ते शुद्धैव सीता महिषी तवेति ॥ ४७ ॥

(भा.दी.) हाहेति । तैः वानरराक्षसैः, अनलेऽग्नौ, तस्यां सीतायाम्, विगता शङ्का यथा भवति तथा विशङ्कम्, पतन्त्यां सत्याम्, हाहाकृतं हाहाकारध्वनिरकारि । (अथ) ते ब्रह्मादयः तव महिषी मूर्धाभिषिक्ता भार्या सीता शुद्धैव इति अभ्यधुः प्रोचुः ॥ ४७ ॥

(सं.चं.) हाहाकृतमितीन्द्रवज्रा । शुद्धैव सीता महिषी तवेत्यभ्यधुः ॥ ४७ ॥

सीताकृतिं दिव्यपरीक्षणच्छलात् सीतापतिर्हव्यवहे निधाय[2] ताम् ।
कैलासशैलात् पुनरागतां प्रियां सीतां स्वयं प्रैक्षत पावकार्पिताम् ॥ ४८ ॥

१. **'–मनलेऽविशङ्कम्'** । **'अविशङ्कं निःशङ्कं यथा भवति तथा'** इति वि.भू. ।

२. इन्द्रवंशाबद्धमिदं पद्यम् । द्वितीयचरण एकादशाक्षर इन्द्रवज्राबद्धः सम्प्रति सर्वत्रोपलभ्यते । **'सीतापतिर्हव्यवहे निधाय'** इति । प्रायो लिपिकृत्प्रमादोऽयम् । **'सीतापतिर्हव्यवहे निधाय ताम्'** इत्येव युक्तः पाठः । तथैव व्याख्यातं च का.श्री. टीकायाम्–**'तां रावणहृतां सीताकृतिं सीताप्रतिकृतिम्'** इति का.श्री. ।

(भा.दी.) सीतेति । सीतापतिः श्रीरामः, दिव्यमलौकिकमग्निप्रवेशलक्षणं यत्परीक्षणं तदेव च्छलं व्याजमात्रं तस्मात्, रावणापहृतां सीताकृतिं सीताप्रतिकृतिं हव्यवहेऽग्नौ निधाय, कैलासाख्यो शैलस्तस्मात् पुनः स्वयं स्वेच्छया आगतां प्रियां भार्याम्, प्राक् कैलासं प्रति गताम्, पावकार्पितां कैलासादागत्य अग्नावभिव्यक्ताम्, सीतां प्रैक्षत ॥ ४८ ॥

(सं.चं.) सीताकृतिमितीन्द्रवंशा । दिव्यपरीक्षणमग्निदिव्यं नामाग्नौ परीक्षणम् ॥ ४८ ॥

प्राप्येन्दिरां नृपसुतामतिसुन्दरीं तां
मन्दस्मितेन्दुलसितां मुमुदे मुकुन्दः ।
रामं समेत्य परमं मुमुदेऽपि देवी
दृष्ट्वैव तौ मुमुदिरे सुजनाः समेतौ[१] ॥ ४९ ॥

(भा.दी.) प्राप्येति । मुकुन्दः श्रीरामः, अतिसुन्दरीम्, मन्दस्मितमेवेन्दुस्तेन लसितां शोभिताम्, इन्दिरां महालक्ष्यात्मिकां नृपसुतां जनकपुत्रीं तां सीतां प्राप्य मुमुदे । मुद हर्षे लिट् । देव्यपि सीताऽपि परमं सर्वोत्तमं श्रीरामं समेत्य मुमुदे । सुजनाः समेतौ लोकदृष्ट्या सहितौ सीतारामौ (तौ) दृष्ट्वैव मुमुदिरे तुष्टा बभूवुः ॥ ४९ ॥

(सं.चं.) अथ वसन्ततिलकया सीतारामसमागममाह– **प्राप्ये**ति । तौ समेतौ दृष्ट्वैव । 'सीताकृतिं तामथ तत्र चाऽगतां दिव्यच्छलेन प्रणिधाय पावके । कैलासतस्तां पुनरेव चाऽगतां सीतामगृह्णाद्धुतभुक्समर्पिताम् । जानन् गिरीशालयगां स सीतां समग्रहीत् पावकसम्प्रदात्ताम् । मुमोद सम्प्राप्य च तां स रामः सा चैव देवी भगवन्तमाप्य' (८.२२२–३) इति निर्णये ॥ ४९ ॥

[२]ब्रह्म ब्रह्मादिकानां शिशुरतिललितः केवलं राजराज्यो-
राजेन्द्रो मद्ध्यमानां स्वगतिरथ सतामङ्गनानामनङ्गः ।

१. **'सुजनाः समेताः'**

२. **'मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान् । गोपानां स्वजनोऽसतां क्षितिभृतां शास्ता स्वपित्रोः शिशुः । मृत्युर्भोजपतेर्विधातृविहितत्वं परं योगिनां वृष्णीनां परदेवतेति शुशुभे रङ्गेऽच्युतः साग्रजः'** (भाग.१०.४१.१७) **इति श्लोकार्थमाह–ब्रह्मेति'** इति का.श्री. ।

मृत्युर्न्नक्तञ्चराणां जगति हनुमतो नित्यनैसर्ग्गिकेष्टो
रेजे रामोऽभिरामो जनकदुहितुरश्रान्तमेकान्तकान्तः ॥ ५० ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे युद्धकाण्डे चतुर्द्दशः सर्ग्गः ॥

—०—

(भा.दी.) ब्रह्मेति । ब्रह्मा आदिर्येषां ते तथा तेषाम् । बहुव्रीहौ कप् । केवलं निरुपचारेण ब्रह्म परब्रह्मभूतः । राजराज्ञ्योः दशरथकौसल्ययोः अतिलळितः अतिमनोहरः शिशुः पुत्रः । मध्यमानां मध्यमाधिकारिणां मनुष्याणां राजेन्द्रः राजश्रेष्ठः । अथ सतामुत्तमानां स्वगतिः स्वगतिभूतः, आश्रयभूत इत्यर्थः । यद्वा, स्वस्य स्वरूपभूतानन्दस्य प्राप्तौ गतिरुपायः । 'दशोपायागमे गतिः' इति वैजयन्ती । अङ्गनानां स्त्रीणां अनङ्गः कामः । नक्तं चरन्तीति नक्तंचरा राक्षसास्तेषां मृत्युः । जगति हनुमतः नित्यं नैसर्गिकः इष्टः स्वाभाविक इष्टः प्रियरूपः, नत्वन्येषामिवेष्टसाधनमात्रम् । जनकदुहितुः जनकपुत्र्याः अश्रान्तं निरन्तरं एकान्तकान्तः, एकान्ततो मुख्यतः कान्तो भर्ता अभिरामः श्रीरामः रेजे । राजृ दीप्तौ लिट् ॥ ५० ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां युद्धकाण्डे चतुर्दशः सर्गः ॥

—०—

(सं.चं.) अथ स्रग्धरया सर्गमुपसंहरति– **ब्रह्मे**ति । ब्रह्मादिकानां देवानां परं ब्रह्म । राजराज्ञ्योः दशरथकौसल्ययोः केवलं सर्वात्मनाऽऽतिलळितः शिशुः । मध्यमानां राजसानां मनुष्याणां राजेन्द्रः । सतां सात्विकानां ज्ञानिनां स्वगम्यं स्थानम्, परमाश्रयः । अङ्गनानामनङ्ग इव चक्षुश्चित्तचोरः । अश्रान्तमनवरतम् । एकान्तोऽनन्यः कान्तः ॥ ५० ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां युद्धाकाण्डे चतुर्दशसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– २९४४+५०=२९९४]

पञ्चदशः सर्ग्गः

गिरेरानयनात् पश्चाद् ये रावणशराहताः ।
हरींस्तान् [1]निरुजश्चक्रे सुषेणो भिषजां वरः ॥ १ ॥

(भा.दी.) श्रीरामसेवार्थत्वेन युद्धे मृतानां सर्वकपीनां जीवनं श्रीरामेण अचिन्त्यशक्तिप्रकटनार्थं दत्त-मित्याह– **गिरेरि**त्यादिना । गिरेर्गन्धमादनस्य हनुमता यदानयनं तस्मात् पश्चात्, रावणस्य ये शराः, तैराहताः ताडिता ये वानराः तान् हरीन्, भिषजां वैद्यानां मध्ये वरः सुषेणाख्यः कपिः, निर्गता[2] रुग् येभ्यस्तथा तान् चक्रे ॥ १ ॥

(सं.चं.) रावणशरैः पीडिताः भग्नाङ्गा व्रणिताङ्गाश्च । निरुजश्चक्रे न्यक्कृतरुजः । नैतत् स्फुटं रामायणे । निर्णये तु स्फुटमुक्तम्–'अथो गिरेरानयनात् परस्ताद् ये वानरा रावणबाणपीडिताः । तारापिता तान् निरुज-श्चकार सुषेणनामा भिजां वरिष्ठः' (८.२२४) इति। सुषेणः पिता मैन्दविविदयोस्तारायाश्च ॥ १ ॥

उच्चावचा ये हरयो मृतास्तान् राघवः स्वयम् ।
सङ्कल्पात् सत्यसङ्कल्पः समानिन्ये यमक्षयात्[3] ॥ २ ॥

(भा.दी.) **उच्चे**ति । उच्चा बलादिना उन्नतास्ते च, अवचा बलादिना अवरास्ते च, उच्चावचा ये हरयः मृताः तान्, सत्यः सङ्कल्पो यस्य स तथोक्तः स्वयं राघवः, सङ्कल्पात्, यमालयं गता जीवन्त्विति मनसा सङ्कल्पमात्रात्, 'सङ्कल्पः कर्म मानसम्' इत्यमरः, यमस्य क्षयो गृहं तस्मात् समानिन्ये आनयामास ॥२॥

---

१. **'नीरुज–'** इति, **'विरुज–'** इति वा वि.ती.पाठः । २. **'विगता–'** इति क्वचित् ।

३. **'यमक्षयात् यमगृहात्, यमपुरादिति वा'** इति का.श्री. । **'यमक्षयात् यमपुरात्'** इति वि.भू. । क्षयोऽत्र पुरमित्येव साधु ।

(सं.चं.) उदञ्चश्च ते अवाञ्चश्च उच्चावचा अनेकप्रकाराः । अस्मिन्नर्थे उच्चावचा इति समुदितं निपात्यत इति वैयाकरणाः । 'मयूरव्यंसकादयश्च' (अ.सू.२.१.७२) इति समुदायनिपातः । 'तदा मृतान् राघव आनिनाय यमक्षयात्' (८.२२५) इति हि निर्णये ॥ २ ॥

ततो राजा[१] दशरथो महेन्द्रेण समागतः[२] ।
परिरेभे सुतं प्रीत्या बाष्पपर्य्याकुलेक्षणः ॥ ३ ॥

(भा.दी.) तत इति । ततः महेन्द्रेण सह समागतः राजा दशरथः, बाष्पेण पर्याकुले ईक्षणे यस्य स तथा सन्, सुतं श्रीरामं प्रीत्या परिरेभे आलिलिङ्गे । रभ राभस्ये लिट् ॥ ३ ॥

(सं.चं.) समागतः समेत्याऽगतः । स्वर्गलोकात् ॥ ३–४ ॥

लक्ष्मणं च परिष्वज्य लक्ष्मणाग्रजमब्रवीत् ।
त्वया भवाब्धिमतरं विश्वानन्दन[३] नन्दन ॥ ४ ॥

(भा.दी.) लक्ष्मणं चेति । लक्ष्मणं च परिष्वज्य, लक्ष्मणाग्रजं श्रीरामं प्रति, विश्वमानन्दयति सन्तोषयतीति विश्वानन्दनस्तत्सम्बुद्धिः, हे नन्दन पुत्र श्रीराम, त्वया अहम्, भवः संसार एव अब्धिः, तं अतरं तीर्णोऽ-भवम् । तॄ प्लवनतरणयोर्लङ् । इति अब्रवीत् ॥ ४ ॥

[४]स्वर्ग्गादप्यपवर्ग्गाच्च सर्वस्माच्चान्यतः सुखात् ।
श्रवणं दर्शनं वा ते स्मरणं वा वरं मम ॥ ५ ॥

(भा.दी.) स्वर्गादिति । स्वः निरतिशयसुखं गमयतीति स्वर्गः तस्मात्, अपवर्गो मोक्षः तस्माच्च, सर्वस्मात् अन्यतः सुखाच्च ते तव श्रवणं दर्शनं (वा) स्मरणं वा मम वरं उत्तमम् ॥ ५ ॥

(सं.चं.) स्वर्गेऽपि विततस्य रावणवधजनितस्य ते यशसः श्रवणम्, अथेदानीं मृतस्यापि मे भूमावागत्य तव दर्शनम् । इतः परमस्य दर्शनस्य निरन्तरं स्मरणं च सर्वतोऽपि पुरुषार्थाद् वरं मम । एतेन 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति श्रुतिं च स्मारयति ॥ ५ ॥

---

१. **'तदा राजा'** । **'तदा यमक्षयात् हरिणामागमनसमये '** इति का.श्री. । २. **'सहाऽगतः'** ३. **'विश्वनन्दन'**

४. **'स्वर्गात् स्वर्गसुखात्, अपवर्गाच्च मोक्षसुखादपि, अन्यतः स्वर्गापवर्गाभ्यामन्यस्मात् सर्वस्मात् सकलात् सुखादपि'** इति का.श्री. ।

धन्या सा खलु कौसल्या सुमित्राऽन्ये च नागराः ।
ये तवानुभवेयुस्तमभिषेकमहोत्सवम् ॥ ६ ॥

(भा.दी.) धन्येति । सा कौसल्या धन्या, धन्या खलु सुमित्रा च, ये तव तं अभिषेक एव महोत्सवस्तं अनुभवेयुः पश्येयुः, ते अन्ये नागराश्च, अयोध्यायां विद्यमानाश्च, धन्याः पुण्यवन्तः ॥ ६ ॥

(सं.चं.) धन्या सा खलु कौसल्यासुमित्रा च । कैकैयी पुनरनुभवेदपि रामाभिषेकमहोत्सवम् । तथाऽपि तां धन्यां न मन्यते राजा । रामे स्वस्मिन्नपि कृतापराधत्वात् । यदि कथञ्चिदुल्लेखनीया, स्यान्नागरेष्वेकेति, न राजमातेतीति भावः ॥ ६–८ ॥

सीते सीमन्तिनीनां त्वां मन्ये धन्यतमां सति[१] ।
साक्षान्नारायणं रामं या मत्सुतमुपाश्रिता ॥ ७ ॥

(भा.दी.) सीते इति । सति पतिव्रते हे सीते, त्वां सीमन्तिनीनां सभर्तृकस्त्रीणां मध्ये धन्यतमां मन्ये, मन ज्ञाने लट् । या त्वं साक्षान्नारायणं मत्सुतं श्रीरामं उपाश्रिता असि ॥ ७ ॥

सौमित्रे कृतकृत्योऽसि रामशुश्रूषणाद्[२] ध्रुवम् ।
वासुदेवमिमं देवा विदुर्वेदान्तवेदितम्[३] ॥ ८ ॥

(भा.दी.) सौमित्र इति । हे सौमित्रे, रामस्य यच्छुश्रूषणं सेवात्मकं तस्मात्, कृतं कृत्यं प्रयोजनं येन स तथा असि । ध्रुवं देवाः ब्रह्मादयः, वेदान्तैः वेदितं विज्ञापितम्, इमं श्रीरामं वासुदेवं श्रीनारायणं विदुः । विद ज्ञाने लट् ॥ ८ ॥

इति ब्रुवाणं पितरमभिवन्द्य[४] जगद्गुरुः ।
[५]अन्वजानात् ततो रामो ब्रह्मादीनपि दैवतान् ॥ ९ ॥

---

१. 'धन्यतमां सतीम्' २. 'रामशुश्रूषया ध्रुवम्'

३. '–मिमं पूर्णं विदुर्वेदान्तवेदिनः । वेदान्तवेदिनः ब्रह्ममीमांसापारङ्गता विद्वांसः इमं रामं पूर्णगुणं वासुदेवं वासुदेवावतारं विदुः विजानन्ति । अत एवोक्तं बालकाण्डे–'चतुर्मूर्तेर्मुकुन्दस्य मूर्तिराद्याऽग्रतोऽभवत्' (३.३५) इति' इति का.श्री. ।

४. '–मभिनन्द्य' ५. 'अन्वजानात् स्वपितरं ब्रह्मादीनितरानपि'

(भा.दी.) इतीति । ततः जगद्गुरुः श्रीरामः, इति ब्रुवाणं पितरं दशरथं अभिवन्द्य, पितरं अन्वजानात् स्वलोकं गन्तुं अनुजज्ञे । ब्रह्मादीन् (दैवतान्) देवानपि स्वस्वलोकं गन्तुमन्वजानात् ॥ ९ ॥

(सं.चं.) ब्रह्मादीन् दैवतानपि अन्वजानात् । 'न स्त्री स्याद् दैवतं देवता स्त्रियाम्' इति यादवप्रकाशः ॥ ९–१० ॥

तत आमन्त्रयामास भक्त्या रामं विभीषणः ।
राजभोगैर्वस स्वामिन् ससीतो मे गृहेष्विति ॥ १० ॥

(भा.दी.) तत इति । ततः विभीषणः, हे स्वामिन्, मे गृहेषु मन्दिरेषु, 'गृहाः पुंसि' इत्यमरः, ससीतः सीतासहितः सन्, राज्ञा ये भुज्यन्त इति भोगाः च्छत्रचामरादिविभूतयः, तैः सह वस आवासं कुरु । वस निवासे लोट् । श्रीरामं भक्त्या इति आमन्त्रयामास प्रार्थयामास । मत्रि गुप्तभाषणे लिट् ॥ १० ॥

उपवासकृशं दीनं भरतं स्थण्डिलेशयम् ।
नादृष्ट्वा पुरि मे वास इति रामोऽब्रवीदिमम् ॥ ११ ॥

(भा.दी.) उपवासेति । उपवासकृशं दीनं दुःखितम्, स्थण्डिले शेत इति स्थण्डिलेशयस्तं भरतमदृष्ट्वा तव पुरि लङ्कायां मे वासः अवस्थानं न सम्भवति । इति श्रीरामः इमं विभीषणं अब्रवीत् ॥ ११ ॥

(सं.चं.) स्थण्डिलेशयम् । 'स्थण्डिलं संस्कृता भूमिः' इति हलायुधः । यो भूमावेव शेते स स्थण्डिलेशय उच्यते ॥ ११ ॥

अथ रामाज्ञया सर्वान् वानरान् स विभीषणः ।
रत्नैः सुवर्णैः कामैश्च[१] यथाकाममपूजयत् ॥ १२ ॥

(भा.दी.) अथेति । अथ सः विभीषणः, रामाज्ञया सर्वान् वानरान्, रत्नानि माणिक्यानि तैः, सुवर्णानि हाटकानि तैः, कामाः अन्येऽभीप्सितपदार्थाः, तैश्च, काममनतिक्रम्य यथाकामं अपूजयत् ॥ १२ ॥

(सं.चं.) कामैः कामितैरर्थैश्च ॥ १२–४ ॥

१. **'काम्यैश्च'**

सुमेरुशिखराकारं नानारत्नमयं शुभम्[1] ।
पुष्पकं प्रार्प्पयामास राघवाय विभीषणः ॥ १३ ॥

(भा.दी.) सुमेर्विति । विभीषणः, सुमेरोर्यच्छिखरं तस्य आकार इव आकारो यस्य स तथा तत्, नानाविधानि यानि रत्नानि तैर्निर्मितं नानारत्नमयम्, शुभं पुष्पकं राघवाय प्रार्पयामास । ऋ गतौ लिट् ॥ १३ ॥

आरुह्य पुष्पकं दिव्यमङ्कमारोप्य[2] जानकीम् ।
रेजे रामो यथा मेघः सविद्युन्मन्दराचले ॥ १४ ॥

(भा.दी.) आरुह्येति । श्रीरामः दिव्यमलौकिकं तत् पुष्पकं आरुह्य, अङ्क ऊरूस्तं जानकीमारोप्य, सविद्युत् विद्युत्सहितः मेघः मन्दराख्यो योऽचलस्तस्मिन् यथा तथा रेजे । राजृ दीप्तौ लिट् ॥ १४ ॥

रामः सलक्ष्मणस्तत्र हनूमत्सूर्य्यजादिकान् ।
कपीन् विभीषणं चैनमारोपयत पुष्पकम् ॥ १५ ॥

(भा.दी.) राम इति । सलक्ष्मणः लक्ष्मणसहितः श्रीरामः तत्र कपीनां मध्ये, हनुमांश्च सूर्यजश्च तौ आदी येषां ते तथा तान् कपीन्, एनं विभीषणं च, पुष्पकं पुष्पकविमानं तत् आरोपयत आरोपयमास । रुह बीजजन्मनि प्रादुर्भावे च लङ् ॥ १५ ॥

(सं.चं.) आरोपयत आरोहयत् । 'रुहः पोऽन्यतरस्याम्' (अ.सू.७.२.४३) इति पकारादेशः । रामप्रिय-मेतदित्यात्मनेभाषा ॥ १५ ॥

हंससंहतियुक्तेन पुष्पकेणार्कवर्चसा ।
विमानेनासमानेन ययौ रामो निजां पुरीम् ॥ १६ ॥

(भा.दी.) हंसेति । श्रीरामः, हंसानां संहतिः समूहस्तेन युक्तं तेन, अर्कस्य वर्च इव वर्चो दीप्तिर्यस्य तत् तथा तेन, न विद्यते समानं सदृशं यस्य तत् तथा तेन, पुष्पकेण विमानेन निजां स्वकीयां पुरीमयोध्यां ययौ ॥ १६ ॥

---

१. **'नानारत्नविभूषितम्'** २. **'दिव्यमङ्क आरोप्य'**

(सं.चं.) वाहकानां दिव्यानां हंसानां संहत्या वृन्देन युक्तेन । 'ययौ तेन विमानेन हंसयुक्तेन भास्वता' (१२२.२६) इति च । 'हंसयुक्तं महावेगम्'(१२३.१) इति चोपरि ॥ १६ ॥

तत्रतत्रातिचित्राणि सिन्धुशैलवनानि सः ।
वर्ण्णयन् दर्शयन् देव्यै ययौ देवो विहायसा[1] ॥ १७ ॥

(भा.दी.) तत्रेति । सः देवः श्रीरामः, तत्रतत्र प्रदेशेषु, अतिचित्राणि, सिन्धवो नद्यस्ताश्च, शैलाश्च, वनानि च, तानि देव्यै सीतायै वर्णयन् सन्, दर्शयन् सन्, विहायसा नभसा, आकाशमार्गेणेत्यर्थः, ययौ ॥ १७ ॥

(सं.चं.) सिन्धुमम्बुधिम् । सिन्धूः नदीश्च । 'स्त्री नद्यां ना नदे सिन्धुर्देशभेदेऽम्बुधौ गजे' इति यादवप्रकाशः ॥ १७ ॥

वानरेन्द्रकळत्राणि किष्किन्धायाः स राघवः ।
आदायाऽरोप्य च क्षिप्रं विमानेन ययौ पुनः ॥ १८ ॥

(भा.दी.) वानरेन्द्रेति । सः राघवः, वानरेन्द्रस्य सुग्रीवस्य, कळत्राणि भार्याः, तानि किष्किन्धानगर्याः आदाय, विमाने पुष्पके आरोप्य च, पुनः क्षिप्रं यथा भवति तथा विमानं तेन ययौ ॥ १८ ॥

(सं.चं.) वानरेन्द्राणां सुग्रीवादीनां कळत्राणि । 'ब्रूहि वानरशार्दूल सर्वान् वानरपुङ्गवान् । नारीभिः सहिताः सर्वे ह्ययोध्यां यान्तु सीतया' (१२३.२६-७) इति च । आदानमाह्वानेन स्वीकरणम् । आदाय–**'ಕರೆದುಕೊಂಡು'** इति भाषायाम् ॥ १८ ॥

पूर्ण्णे चतुर्दशे वर्षे पञ्चम्यां पुरुषोत्तमः ।
भरद्वाजाश्रमं प्राप्य मुनेः पूजामुपाददे ॥ १९ ॥

१. **'विहायसि'** । इतः परं श्लोकद्वयमधिकं पठ्यते क्वचित् । न कैरपि व्याख्यातमिति स्फुटं प्रक्षिप्तम्–

स शनैर्वानरेन्द्रस्य पुरीं गत्वा सुशोभनाम् ।
हनुमद्दर्शनसुग्रीवसख्यादीनुक्तवान् प्रियाम् ॥

तत्र तैराप्तसर्वार्थो शबर्यादिविमोक्षणम् ।
गृध्रराजस्य वृत्तान्तमुक्त्वा देव्यै ययौ पुनः ॥

प्रथमपद्ये तृतीयचरणो नवाक्षर इति छन्दश्च स्खलितम् । नहि कवयश्छन्दोबन्धे 'न वा एकेनाक्षरेण' इति छान्दसं पन्थानमनुसरन्ति ।

(भा.दी.) पूर्ण इति । पुरुषोत्तमः श्रीरामः, चत्वारो अधिका दश च चतुर्दश, तत्सङ्ख्यापूरणं चतुर्दशं तस्मिन्, 'बहुव्रीहौ सङ्ख्येये डजबहुगणात्' (अ.सू.५.४.७३) इति डट्, सङ्ख्येये वर्षे संवत्सरे पूर्णे सति, पञ्चम्यां तिथौ, भरद्वाजस्य य आश्रमस्तं प्राप्य, मुनेर्भरद्वाजात् पूजामुपाददे जगृहे ॥ १९ ॥

(सं.चं.) पूर्णे चतुर्दशे वर्षे । 'पूर्णे चतुर्दशे वर्षे पञ्चम्यां लक्ष्मणाग्रजः । भरद्वाजाश्रमं प्राप्य ववन्दे नियतो मुनिम्' (१२७.४) इति च ॥ १९ ॥

हनूमन्तमुपान्तस्थमुवाच मधुसूदनः ।
मारुते मामुपायान्तं भरताय वदेरिति ॥ २० ॥

(भा.दी.) हनूमन्तमिति । मधुसूदनः श्रीरामः, हे मारुते, उपायान्तं समीपप्राप्तं मां भरताय वदेः । वद-धातोर्लिङ् । इति उपान्ते समीपे तिष्ठतीत्युपान्तस्थस्तं हनूमन्तं उवाच ॥ २० ॥

(सं.चं.) उपान्ते सविधे स्थितम् । 'उदा जीवसङ्घाः । सूदो मुख्यप्राणः । तस्य सर्वाधिकं मधु आनन्दं नयति प्रापयतीति मधुसूदनः ॥ २० ॥

ययौ रामनियोगेन मारुतिर्म्मारुतोपमः ।
मानुषं वेषमाश्रित्य पुरीं राघववल्लभाम् ॥ २१ ॥

(भा.दी.) ययाविति । मारुतस्य उपमा यस्य स तथा, मारुतिः मरुत्पुत्रः हनुमान्, मनुष्यस्य सम्बन्धी मानुषस्तं वेषं आश्रित्य, रामस्य नियोग आज्ञा तेन, राघवस्य वल्लभां प्रियां पुरीम्, अयोध्यां ययौ । याते-र्लिट् ॥ २१ ॥

(सं.चं.) वेगेन मारुतोपमः । वायुसमो जवे । कपिरूपमात्मानं सहसा भरतो न श्रद्दध्यादिति भरतप्रत्यायनाय मनुष्यसम्बन्धि तापसं वेषमाश्रित्य । 'मानुषं धारयन् रूपमयोध्यां त्वरितो ययौ' (१२५.१९) इति च । राघवाणां राघवस्य च वल्लभां पुरीमयोध्याम् ॥ २१ ॥

जटिलं[1] चीरिणं वीरमुपवासकृशं मृदुम् ।
मलिनं तीव्रतपसं रामरामेतिवादिनम् ॥ २२ ॥

१. **'जटिनम्'** इति वि.ती.पाठः । का.श्री. पाठश्च । **'जटिलं मलदिग्धाङ्गं भ्रातृव्यसनकर्षितम्'** (यु.का.१२३.२७) इति रामायणे ।

पादुके देवदेवस्य वन्दमानं पुनःपुनः ।
रामोक्ते समये प्राप्ते [1]रामादर्शनविक्लवम् ॥ २३ ॥

देदीप्यमानमनलं प्रवेष्टुं धृष्टमुद्यतम्[2] ।
भरताग्रजदूतोऽसौ भरतं क्षिप्रमैक्षत ॥ २४ ॥

(भा.दी.) जटिनमिति । भरताग्रजस्य श्रीरामस्य दूतः, असौ हनूमान्, जटा अस्य सन्तीति जटी तम्, (चीरिणं चीरवसनम्, वीरमुपवासेन कृशम्, मृदुं सौम्यम्, मलिनं मलिनाम्बरम्, तीव्रं तपो यस्य स तथा तम्,) रामरामेतिवादिनम्, देवदेवस्य पादुके पादपीठे पुनःपुनः वन्दमानम्, रामेणोक्तो रामोक्तस्तस्मिन् समये समाप्ते सति श्रीरामस्य यददर्शनं तेन विक्लवः परवशस्तम्, देदीप्यमानं पुनःपुनः ज्वलमानम्, अनलं प्रवेष्टुम्, धृष्टं धैर्ययुक्तं यथा भवति तथा उद्यतं सन्नद्धम्, भरतं क्षिप्रं यथा भवति तथा ऐक्षत ॥ २२–२४ ॥

(सं.चं.) मारुतेर्भरतदर्शनमाह–जटिलमित्यादिभिस्त्रिभिः कुलकेन । जटिलं जटायुक्तमकृत्तश्मश्रुं च । 'जटिलस्तु जटायुक्ते' इति विश्वप्रकाशः । 'श्मश्रुलो जटिलः' इति यादवप्रकाशः । 'लोमादि-पामादि-पिच्छादिभ्यः शनेलच्' (अ.सू.५.२.१००) इति पिच्छादित्वादिलच् । चीरं '**ನಾರುಡೆ**' इति भाषायाम् । वीरं मुनिवेषमपि राज्यरक्षणदक्षम् । स्वभावतः मृदुं शालीनम् । मलिनं मलदिग्धाङ्गम् । कुतः? तीव्रतपस्त्वात् । समये प्राप्तेऽपि रामस्यादर्शनात् विक्लवं विह्वलम्, दृढमवस्थातुमशक्तम् । '**ಗಾಬರಿಗೊಂಡ**' इति भाषायाम् । देदीप्यमानं इन्धनाधानेन समेध्य सज्जीकृततया देदीप्यमानं प्रज्वलन्तमनलं प्रवेष्टमुद्यतम् । स्वभावतो मृदुमप्यस्मिन् विषये धृष्टम् कृतसाहसम् । भरताग्रजस्य रामस्य दूतो हनुमानीदृशं भरतमैक्षत ॥ २२–५ ॥

मा वीर साहसं कार्षीर्व्यक्तं भक्तोऽसि पूर्वजे ।
इत्युक्त्वा भरतं प्रोचे मतिमान् हनुमान् पुनः ॥ २५ ॥

(भा.दी.) मा वीरेति । मतिमान् प्रशस्तबुद्धिमान् हनुमान्, वीर भरत, साहसं वह्निप्रवेशलक्षणे क्रूरे कर्मणि प्रयत्नः तत् मा कार्षीः न कुरु । 'न माङ्योगे' (अ.सू.६.४.७४) इत्यडभावः । पूर्वजे ज्येष्ठे श्रीरामे व्यक्तं यथा भवति तथा, सम्यगित्यर्थः, भक्तः असि । इति भरतं प्रति उक्त्वा पुनः प्रोचे ॥ २५ ॥

---

१. **'रामदर्शन–'** । **'रामदर्शनविक्लवम्, रामदर्शनं कथं स्यादिति मनःखेदयुक्तम्'** इति का.श्री. । २. **'वेष्टुं ध्रुवमुद्यतम्'**

सीतापतिः ससीतस्त्वां ससौमित्रिरमित्रजित्[१] ।
रामो रामानुज[२] प्राप्तः कुशलं सौम्य पृच्छति ॥ २६ ॥

(भा.दी.) सीतेति । सौम्य मनोहर, रामानुज भरत, सीतया सहितः ससीतः सन्, ससौमित्रिः सलक्ष्मणः सन्, अमित्राणि जितवानित्यमित्रजित् तथा सन्, प्राप्तः सः सीतापतिः श्रीरामः, त्वां प्रति कुशलं क्षेमं तत् पृच्छति विचारयति । प्रच्छ जिज्ञासायां लट् ॥ २६ ॥

(सं.चं.) सौम्य रामानुज भरत । सोम इव शीतलस्वभावः सोम्यः । सोम्य एव सौम्यः । 'सौम्यो बुधे मनोज्ञे स्यादनुग्रे' इति विश्वप्रकाशः । त्वां कुशलं पृच्छति । द्विकर्मकः प्रच्छिः ॥ २६–३४ ॥

इति प्रियं ब्रुवाणाय तस्मै मारुतये तदा ।
तुभ्यं किं प्रददानीति[३] ब्रुवाणः प्रणनाम सः ॥ २७ ॥

(भा.दी.) इतीति । सः भरतः, तदा इति प्रियं वाक्यं ब्रुवाणाय वदते, तस्मै मारुतये हनुमते, ते तुभ्यं किं वस्तु प्रददामि, इति ब्रुवाणः सन् प्रणनाम ॥ २७ ॥

प्रहर्षो रोमहर्षश्च वर्षो हर्षाश्रुसन्ततेः ।
चित्ते गात्रे च नेत्रे च भरतस्याभवन् समम् ॥ २८ ॥

(भा.दी.) प्रहर्ष इति । भरतस्य चित्तं मनस्तस्मिन्, गात्रं शरीरं तस्मिंश्च, नेत्रं चक्षुस्तस्मिंश्च, क्रमेण प्रहर्षः सन्तोषः, रोमहर्षः रोमाञ्चश्च, हर्षादुत्पन्नानि यान्यश्रूणि तेषां सन्ततिः समूहस्तस्याः वर्षश्च वृष्टिश्च । 'वर्षोऽस्त्री वर्षणं वृष्टिः' इति वैजयन्ती । समं सह अभवन् ॥ २८ ॥

महापुरुष कोऽसि त्वं त्वां मन्ये धन्यमात्मना[४] ।
कथाः[५] कथय रामस्य तमित्थं[६] भरतोऽब्रवीत् ॥ २९ ॥

(भा.दी.) महेति । हे महापुरुष, त्वं कः कस्य पुत्रः असि? त्वां आत्मना बुद्ध्या । 'आत्मा जीवे धृतौ देहे स्वभावे परमात्मनि । यत्नेऽर्केऽग्नौ मतौ वाते' इति वैजयन्ती । धन्यं पुण्यवन्तं मन्ये निरूप-

१. **'रमित्रहन्'** २. **'रामानुजं प्राप्तः'** ३. **'प्रददामीति'** इति वि.ती.पाठः ।
३. **'धन्यमात्मनाम्' आत्मनां जीवानां मध्ये धन्यं कृतकृत्यं मन्ये जानामि'** इति का.श्री. ।
४. **'कथां कथय'** ६. **'त्वमित्थम्'** इति वि.ती.पाठः ।

यामि । मन ज्ञाने लट् । त्वं श्रीरामस्य कथाः कथय । कथ वाक्यप्रबन्धे लोट् । इत्थं भरतः हनुमन्तं प्रति अब्रवीत् ॥ २९ ॥

(सं.चं.) आत्मना स्व एव, इतरनिरपेक्षम् ॥ २९–३४ ॥

हनुमान् कथयामास काकुत्स्थस्य कथां कविः[१] ।
आत्मानं चावदत् तेन मुमुदे भरतोऽधिकम् ॥ ३० ॥

(भा.दी.) हनुमानिति । हनुमान्, ककुत्स्थगोत्रे भवः काकुत्स्थः, तस्य रामस्य, सेतुबन्धनराक्षसहननादिकथां कथयामास । कथ वाक्यप्रबन्धे लिट् । आत्मानं च स्वनामगोत्रादिकथनेन स्वस्वरूपं च अवदत् । तेन कथनेन भरतः अधिकं यथा भवति तथा मुमुदे ॥ ३० ॥

अनुजं प्रत्युवाचेदं भरतोऽथ सगद्गदम् ।
आयाति किल देवो नः[२] पुरी संस्क्रियतामिति ॥ ३१ ॥

(भा.दी.) अनुजमिति । अथ भरतः, अनुजं शत्रुघ्नं प्रति, देवः नः स्वामी श्रीरामः, आयाति किल, पुरी अयोध्या संस्क्रियतां अलङ्क्रियताम्, इति इदं वचः, गद्गदेन स्खलद्वचनेन सहितं यथा भवति तथा सगद्गदम्, उवाच । वचधातोर्लिट् ॥ ३१ ॥

किङ्कराणां सहस्रैः स [३]शोधयामास तां पुरीम् ।
अप्यलङ्कारयामास शत्रुघ्नो भरताज्ञया[४] ॥ ३२ ॥

(भा.दी.) किङ्कराणामिति । सः शत्रुघ्नः, भरताज्ञया तां पुरीम्, किङ्कराणां सहस्राणि अनेकसहस्राणि, तैः शोधयामास । शुध शौचे लिट् । अलङ्कारयामासापि, अलङ्कारं कारितवांश्च ॥ ३२ ॥

स्वामी राम उपायातः[५] पश्यामैनं सुदुर्लभम् ।
इति ब्रुवाणा आजग्मुः पौरा जानपदा अपि ॥ ३३ ॥

---

१. **'कथां कपिः'** वि.ती.टीकायां नेदं पदं व्याख्यातम् । लिपिकृत्प्रमादेन प्रायो गलितम् । **'कविः सर्वज्ञः'** इति का.श्री. ।

२. **'किल नः स्वामी पुरी'**

३. **'सहस्रैश्च शोध–'**

४. इतः परं कचिर्धं मद्यमधिकं पठ्यते । स्फुटं प्रक्षिप्तम्–**'रामो गङ्गामथ प्राप्य ततारऽशु सकिङ्करः'** ।

५. **'उपयाति पश्या–'**

(भा.दी.) स्वामीति । पुरि विद्यमानाः पौराः जनाः, जनपदे भवाः जानपदा जनाः अपि, स्वामी श्री-रामः उपायातः समागतः । सुदुर्लभं एनं श्रीरामं पश्यामः । इति ब्रुवाणाः सन्तः आजग्मुः ॥ ३३ ॥

भरतोऽभिययौ[१] गृह्णन् पादुके मन्त्रिभिर्य्युतः[२] ।
सस्त्रीबालैः[३] सर्व्ववर्ण्णैः परीतो मातृभिश्च सः ॥ ३४ ॥

(भा.दी.) भरत इति । सः भरतः, पादुके गृह्णन् सन्, मन्त्रिभिः सुमन्त्रादिभिः, मातृभिः कौसल्यादिभिश्च युतः[४] सन्स स्त्रियश्च बालाश्च तैः सहिताः सस्त्रीबालास्तैः, सर्वे ये ब्राह्मणादिवर्णास्तैः परीतः परिवृतः सन्, अभिययौ ॥ ३४ ॥

हनूमतो मुखं वीक्ष्य बाष्पाक्षो[५] भरतोऽब्रवीत् ।
कच्चित् कपीन्द्र कापेयी नेयं चपलता तव ॥ ३५ ॥

(भा.दी.) हनूमत इति । भरतः हनूमतः मुखं तत् वीक्ष्य, बाष्पेण पूर्णे अक्षिणी यस्य स तथा सन्, हे कपीन्द्र, तव इयं कापेयी कपिसम्बन्धिनी चपलता चापल्यं न कच्चित्? न किम्? 'कच्चित्प्रश्ने काम-वादे' इति वैजयन्ती । अप्राप्तमेव श्रीरामं कपिचेष्टावशाद् वृथैवाऽगत इति प्रोक्तं न किमित्यर्थः, (इति अब्रवीत्) ॥ ३५ ॥

(सं.चं.) कापेयी कपिजातिसहजा । 'कच्चिन्न खलु कापेयी सेव्यते चलचित्तता । नहि पश्यामि काकुत्स्थं राममार्यं परन्तपम्' (१२७.२४) इति च ॥ ३५–६ ॥

कच्चिदार्य्यस्य पादाब्जं सेविष्येऽद्य सुदुर्ल्लभम् ।
कच्चिन्मे सफलं जन्म कच्चिद् भूर्ल्लप्स्यते पतिम् ॥ ३६ ॥

(भा.दी.) कच्चिदिति । आर्यस्य स्वामिनः श्रीरामस्य, सुदुर्लभमत्यन्तदुर्लभं तत् पादाब्जं अहं अद्य सेविष्ये कच्चित्? षेवृ सेवने लृट् । मे जन्म सफलं कच्चित्? भूः पतिं स्वामिनं लप्स्यते कच्चित्? डु लभष् प्राप्तौ लृट् । (इति च अब्रवीत्)॥ ३६ ॥

---

१. **'भरतो निर्ययौ'** २. **'मन्त्रिभिर्वृतः'** ३. **'सस्त्रीबालः'**
४. **'वृतः सन्'** ५. **'बाष्पाक्षः आनन्दाश्रु(पूर्ण)नेत्रः'** इति का.श्री ।

इत्युक्तो हनुमान् प्रोचे पश्येमान् पुष्पितान्[१] द्रुमान् ।
अकालेऽप्यधुना सौम्य सामीप्यात् तेऽग्रजन्मनः ॥ ३७ ॥

(भा.दी.) **इतीति** । इति उक्तः हनुमान्, हे सौम्य मनोहर भरत, ते अग्रे जन्म यस्य स तस्य, ज्येष्ठस्येत्यर्थः, श्रीरामस्य सामीप्यं सान्निध्यं तस्मात्, कालो न भवतीत्यकालस्तस्मिन् पुष्पोद्भवासमयेऽपीत्यर्थः, अधुना इमान् द्रुमान् सञ्जातानि पुष्पाणि येष्विति पुष्पितास्तान् पश्य । इति प्रोचे ॥ ३७ ॥

(सं.चं.) तेऽग्रजन्मनः रामस्य सामीप्यात् तत्सन्निधानमहिम्ना हृषितान्, अत एव पुष्पितान् द्रुमान् पश्य । पुष्प विकसने ॥ ३७ ॥

पांसुं दाशरथे[२] पश्य व्यश्नुवानं[३] दिशो दश ।
किङ्कराणां त्वदार्य्यस्य हरीणां रभसोत्थितम्[४] ॥ ३८ ॥

(भा.दी.) **पांसुमिति** । हे दाशरथे दशरथपुत्र भरत, तव आर्यः स्वामी त्वदार्यः, तस्य श्रीरामस्य, किङ्कराणां हरीणां कपीनां रभसेन वेगेनोत्थितः, तं दश दिशः व्याप्नुवानं प्रसरन्तम्, पांसुं पश्य ॥ ३८ ॥

(सं.चं.) त्वदार्यस्य तव स्वामिनः । कुलज्येष्ठमार्यं वदन्ति । गुणेन वयसा ज्येष्ठं च । हरीणां कपीनां रभसेन पतनवेगेन उत्थितमत एव दश दिशः व्यश्नुवानं व्याप्नुवानं पांसुं पश्य ॥ ३८–९ ॥

इमं किलकिलाशब्दं कपीनां कौतुकोद्भवम् ।
अवधारय वीर त्वं त्वज्ज्येष्ठस्याग्रगामिनाम्[५] ॥ ३९ ॥

(भा.दी.) **इममिति** । हे वीर, तव ज्येष्ठः त्वज्ज्येष्ठः, तस्य श्रीरामस्य, अग्रे गन्तुं शीलमेषामस्तीत्यग्रगामिनः. तेषां कपीनां कौतुकात् कुतूहलादुद्भवो यस्य स तं इमं किलकिलाशब्दस्तं अवधारय श्रुणु ॥ ३९ ॥

पुष्पकं पुष्करे पश्य पुष्करेक्षणवाहनम् ।
सफलीकुरु लोले ते[६] लोचने रामदर्शनात् ॥ ४० ॥

---

१. **'पुष्पितद्रुमान्'** २. **'दाशरथेः पश्य'** ३. **'व्याप्नुवानम्'** इति वि.ती.पाठः ।
४. **'रभसा वेगेनोत्थितम्'** इति का.श्री. ५. **'–स्याग्रगामिनम्'** ६. **'लोके ते '**

(भा.दी.) पुष्पकमिति । पुष्करवदरविन्दवदीक्षणे यस्य स तथा, तस्य वाहनं यानं तत् पुष्पकम्, पुष्करं गगनं तस्मिन्, 'व्योम पुष्करमम्बरम्' इत्यमरः, पश्य । लोले श्रीरामदर्शनलोलुपे, ते तव लोचने, श्रीरामस्य दर्शनं तस्मात् सफलीकुरु ॥ ४० ॥

(सं.चं.) पुष्करे गगने । पुष्करेक्षणस्य कमलानयनस्य रामस्य वाहनम् । 'पुष्करं पङ्कजे व्योम्नि पयः-करिकराग्रयोः' इति विश्वप्रकाशः ॥ ४०–३ ॥

आर्य्यस्याङ्के स्मितमुखीमार्य्यां किं सौम्य पश्यसि[१] ।
आर्य्यापार्श्वे विनीतं तं लक्ष्मणं वीक्षसे न किम् ॥ ४१ ॥

(भा.दी.) आर्यस्येति । हे सौम्य, आर्यस्य स्वामिनः श्रीरामस्य, अङ्को वामोरुस्तस्मिन्, अवस्थितामिति शेषः, स्मितं मन्दहासोपेतं मुखं यस्याः सा तथा ताम्,आर्या कुलीनां सीतां पश्यसि किम्? आर्यपार्श्वं समीपं तस्मिन् विनीतं विनयोपेतं तं लक्ष्मणं न वीक्षसे किम्? किं न पश्यसि? ॥ ४१ ॥

कपीन्द्रराक्षसेन्द्रौ त्वं तौ सुग्रीवविभीषणौ ।
पश्य देवस्य पार्श्वस्थौ किङ्करौ सुप्रियङ्करौ ॥ ४२ ॥

(भा.दी.) कपीति । त्वम्, देवस्य पार्श्वे तिष्ठत इति तौ तथौक्तौ, किङ्करौ, श्रीरामस्य सुप्रियं कुरुत इति तथोक्तौ, कपीन्द्रराक्षसेन्द्रौ तौ सुग्रीवविभीषणौ पश्य ॥ ४२ ॥

इति मारुतिवाक्येन वर्ण्यमानं स्वदैवतम् ।
गुरोरिवोपदेशेन ददर्श भरतो विभुम् ॥ ४३ ॥

(भा.दी.) इतीति । भरतः, इति मारुतेर्यद्वाक्यं तेन, वर्ण्यमानम्, स्वस्य दैवतो देवस्तम्, 'वृन्दारका दैवतानि पुंसि वा देवता स्त्रियाम्' इत्यमरः, विभुं श्रीरामम्, गुरोः उपदेशेनेव ददर्श ॥ ४३ ॥

श्यामलं कोमलं रामं विमलं कमलेक्षणम् ।
मन्दहासेन्दुमालक्ष्य ननाम भरतो भुवि ॥ ४४ ॥

१. 'सौम्य वीक्षसे'

(भा.दी.) श्यामलमिति । भरतः, श्यामलम्, कोमलं सुकुमारम्, विमलं निर्मलम्, कमलवदीक्षणे यस्य स तथा तम्, मन्दहास एव इन्दुर्यस्य स तथा तम्, श्रीरामं आलक्ष्य भुवि ननाम ॥ ४४ ॥

(सं.चं.) मन्दहासेन कौमुदीकल्पेन इन्दुमिव भासमानम् ॥ ४४ –६ ॥

सीताकान्तं रावणारिं रामं पश्यतपश्यत ।
उत्थितं सर्वतो वाक्यमित्येवं विश्वमङ्गलम् ॥ ४५ ॥

(भा.दी.) सीतेति । सीताकान्तं रावणारिं श्रीरामं पश्यत । इति एवमादि, 'इति हेतुप्रकरणप्रकारादि-समाप्तिषु' इत्यमरः, विश्वस्मिन् जगति मङ्गलं वाक्यम्, सर्वतः सर्वदिग्भ्यः, उत्थितं उत्पन्नम् ॥ ४५ ॥

भासमानं विमानाग्रे नेमुः सर्वाः प्रजाः प्रभुम्[१] ।
तमांसि परिमुष्णन्तमुदयाद्रौ रविं यथा ॥ ४६ ॥

(भा.दी.) भासमानमिति । सर्वाः प्रजाः, विमानस्य यदग्रमूर्ध्वभागस्तस्मिन् भासमानं प्रकाश-मानं विभुं श्रीरामं, उदयाख्यो योऽद्रिस्तस्मिन् तमांसि परिमुष्णन्तं विनाशयन्तं रविं सूर्यं यथा तथा नेमुः ॥ ४६ ॥

अवातरत् पुराभ्याशे पुराणपुरुषस्ततः ।
सोऽभवत् सर्वजगतां नेत्रचित्तमहोत्सवः[२] ॥ ४७ ॥

(भा.दी.) अवातरदिति । ततः विमानात्, पुराणपुरुषः श्रीरामः, पुरस्य यदभ्याशं समीपं तस्मिन् अवा-तरत् । तॄ प्लवनतरणयोर्लङ् । सः श्रीरामः, सर्वाणि यानि जगन्ति स्थावरजङ्गमप्राणिनः, तेषां नेत्राणि (च) चित्तानि च, तेषां महोत्सवः महोत्सवरूपः अभवत् ॥ ४७ ॥

(सं.चं.) पुराभ्याशे नन्दिग्रामे । यत्र भरतः ॥ ४७ ॥

चरणावरुणाब्जाभौ ववन्दे विश्ववन्दितौ ।
रामानुजोऽथ रामस्य धन्योऽस्मीत्यनुचिन्तयन् ॥ ४८ ॥

---

१. **'प्रजा विभुम्'** इति वि.ती.पाठः । **'प्रजाः शुभम्'** इति कश्चित् ।

२. **'–जगतां चित्तनेत्रमहोत्सवः'** । **'चित्तनेत्रमहोत्सवः मनोनयनमहोत्सवकरः'** इति का.श्री. ।

(भा.दी.) चरणाविति । अथ रामानुजः भरतः, अहं धन्यः कृतार्थः (अस्मि), इति अनुचिन्तयन् सन्, अरुणे रक्ते ये अब्जे ते इव आभा कान्तिर्ययोस्तौ तथोक्तौ, विश्ववन्दितौ सर्ववन्दितौ, श्रीरामस्य चरणौ ववन्दे ॥ ४८ ॥

आकृष्याऽश्लिष्यमाणस्य भरतस्य जगद्धृता ।
भावः कश्चिदपूर्वोऽभूल्लज्जासम्भ्रमभक्तिभिः[१] ॥ ४९ ॥

(भा.दी.) आकृष्येति । जगद् बिभर्तीति जगद्धृत्, तेन श्रीरामेण, आकृष्य अश्लिष्यमाणस्य भरतस्य, लज्जा च सम्भ्रमश्च भक्तिश्च ताभिः अपूर्वः पूर्वमजातः कश्चित् भावः मनोधर्मः अभूत् ॥ ४९ ॥

(सं.चं.) ब्रह्मादिभिरपि दुर्लभालिङ्गनो भगवान् स्वयमालिलिङ्गेति लज्जा सम्भ्रमश्च भक्तिश्च सममावृणतेति अपूर्वोऽयमनुभवः । अथच राज्यभ्रंशस्य चतुर्दशवत्सरान् वनेषु वासस्य च हेतुमपि तदविगणय्य प्रीत्यालिलिङ्गेति लज्जा । जीर्णवनवासः पुनरागत इति हर्षभरेण ईषद्भयेन च सङ्कीर्णा सत्वरता नाम सम्भ्रमः । सोऽयं जगद्भर्ता मम भ्रातेति गौरवसम्भृतः स्नेहातिशय इति भावसङ्करः ॥ ४९ ॥

सीताया लक्ष्मणस्यापि ववन्दे चरणावसौ ।
परिरेभे हरिश्रेष्ठान् ससुग्रीवविभीषणान् ॥ ५० ॥

(भा.दी.) सीताया इति । असौ भरतः सीतायाः चरणौ, लक्ष्मणस्य चरणावपि ववन्दे । सुग्रीवश्च विभीषणश्च ताभ्यां सहिताः, तान् हरिश्रेष्ठान् कपिश्रेष्ठान् परिरेभे आलिलिङ्गे । रभ राभस्ये लिट् ॥ ५० ॥

(सं.चं.) सीताया लक्ष्मणस्यापि । 'ततो लक्ष्मणमासाद्य वैदेहीं च परन्तपः । अभ्यवादयत प्रीतो भरतो नाम चाब्रवीत्' (१२७.४२) इति च ॥ ५० ॥

शत्रुघ्नोऽप्येवमेवैतान् ववन्दे परया मुदा ।
स्वागतं रामदेवेति प्रोचुः प्राञ्जलयो जनाः ॥ ५१ ॥

(भा.दी.) शत्रुघ्न इति । शत्रुघ्नोऽपि, एवमेव भरतवदेव, एतान् श्रीरामसीतालक्ष्मणान्, परया मुदा ववन्दे । जनाः, हे रामदेव, स्वागतं शोभनागमनं अस्तु, इति प्राञ्जलयः सन्तः प्रोचुः ॥ ५१ ॥

---

१. **'मात्रपराधजन्यलज्जया, सम्भ्रमेण आलिङ्गनजन्यसन्तोषेण, सुदृढस्नेहेन च'** का.श्री. ।

(सं.चं.) एतान् रामसीतालक्ष्मणान् ववन्दे । परिरेभे च कपिश्रेष्ठान् ॥ ५१ ॥

स्मितावलोकैः सम्पूज्य लोकांस्तांल्लोकनायकः ।
ससीतालक्ष्मणो मातॄर्ववन्दे सकला अपि ॥ ५२ ॥

(भा.दी.) **स्मि**तेति । लोकानां नायकः स्वामी श्रीरामः, तान् लोकान् जनान्, स्मितेन युक्ता ये अवलोकाः अवलोकनानि, तैः सम्पूज्य मानयित्वा, ससीतालक्ष्मणः सीतालक्ष्मणसहितः सन्, सकला अपि मातॄः कौसल्याद्याः ववन्दे ॥ ५२ ॥

(सं.चं.) ससीतालक्ष्मणः । सीतालक्ष्मणावपि ववन्दाते ॥ ५२ ॥

पादुके पादयोः कृत्वा रामं रामानुजोऽब्रवीत्[१] ।
निवेदयामि देवेश त्वद्राज्यं पालितं मया ॥ ५३ ॥

(भा.दी.) **पादुके** इति । रामानुजः भरतः, पादौ श्रीरामचरणौ तयोः पादुके कृत्वा विन्यस्य, हे देवेश श्रीराम, मया पालितम्, तव राज्यं त्वद्राज्यम्, तत् निवेदयामि समर्पयामि । विद ज्ञानाख्यान-निवासनेषु[२] लट् । (श्रीरामं इति अब्रवीत्) ॥ ५३ ॥

(सं.चं.) त्वद्राज्यं तवैव निवेदयामि समर्पयामि । विदॢ लाभे इत्यस्य णिचि रूपम्– वेदयति वेद-यते ॥ ५३ ॥

कोशकोष्ठबलाद्यं च धनं जीवधनं च ते ।
स्वामिंस्तव प्रसादेन कृतं[३] दशगुणं मया ॥ ५४ ॥

(भा.दी.) **कोशे**ति । (हे स्वामिन्,) ते तव कोशो धनौघः स च, कोष्ठमन्तःपुरं तच्च, बलं सैन्यं तच्च, तानि आद्यानि यस्य, तथोक्तम्, तत् धनम्, जीवधनं च जीवरूपधनं पश्वादि च, तव प्रसादोऽनुग्रहस्तेन, मया दश गुणा आवृत्तयो यस्य तत्तथोक्तम्, दशावृत्त्यभिवृद्धमित्यर्थः, कृतम् ॥ ५४ ॥

---

१. **'रामस्य भरतोऽब्रवीत्'**

२. चुरादिरयं धातुरात्मनेभाष इत्युक्तम् । **'सर्वस्मादुभयं पदम्'** इति कथञ्चिदुपपादनीयम् । तुदादेर्विन्दते रूपमित्यभ्युपगमे न काप्यनुपपत्तिः । अदादेः वेत्ते रूपमिति का.श्री. टीकायाम्–**'निवेदयामि विज्ञापयामि । विद ज्ञाने लट्'** इति । स्यादपि ।

३. **'कृतं शतगुणम्'** । **'शतं गुणा आवृत्तयो यस्य तत्'** इति का.श्री. । रामायणाननुगुणम् ।

(सं.चं.) कोशकोष्ठवलाद्यं च । 'कोशोऽर्थसञ्चयो राज्ञाम्' इति, 'हस्त्यश्वरथपादातं बलं स्याच्चतुरङ्गकम् ' इति च यादवप्रकाशः । कोष्ठं राजमन्दिरान्तर्भागः । 'गोमहिष्यादिकं जीवधनं स्यात् पाशबन्धनम्' इति यादव-प्रकाशः । प्राणिसन्ततिरित्येतत् । दशगुणम्–'अवेक्षतां भवान् कोशं कोष्ठागारं पुरं बलम् । भवतस्तेजसा सर्वं कृतं दशगुणं मया' (१२७.५७) इति च ॥ ५४ ॥

तथा ब्रुवाणं तं दृष्ट्वा वानरा राक्षसाः परे ।
रुरुदुर्विक्लबास्तस्य प्रावण्यार्जवभक्तिभिः ॥ ५५ ॥

(भा.दी.) तथेति । वानराः सुग्रीवादयः, राक्षसाः विभीषणादयः, परे अन्ये मनुष्यादयश्च, तथा ब्रुवाणं तं भरतं दृष्ट्वा, तस्य भरतस्य प्रावण्यं विनयावनतत्वं तच्च, आर्जवं तच्च, भक्तिश्च, ताभिः विक्लबाः परवशाः सन्तः, रुरुदुः ॥ ५५ ॥

(सं.चं.) परे च पुरगता मनुष्याः । प्रावण्यं प्रह्वता दक्षता च । 'प्रवणो दक्षिणे प्रह्वे' इति यादव-प्रकाशः । आर्जवमकुटिलता गुणाधिकता च । 'अवक्रे प्रगुणेऽप्यृजुः' इति च ॥ ५५ ॥

कृत्वा प्रसादं निर्व्याजं कैकेयीतनये प्रभुः ।
वसिष्ठं तं कुलगुरुमार्चयज्जगतां[1] गुरुः ॥ ५६ ॥

(भा.दी.) कृत्वेति । ब्रह्मादिजगतां गुरुः, अनेन वसिष्ठाद्यर्चनं लोकशिक्षार्थमिति दर्शितम्, प्रभुः श्रीरामः कैकेयीतनये भरते, निर्गतः व्याजः कैतवं यस्मात् स तथोक्तः, तं प्रसादं कृत्वा, (तं) कुलगुरुं वसिष्ठं आर्चयत, अर्च पूजायां लङ् ॥ ५६ ॥

(सं.चं.) जगद्गुरुः कुलगुरुमार्चयत् आर्चत् लोकसङ्ग्रहार्थम् । यतो जगतां गुरुः मार्गदर्शकः, इत्थं वर्तितव्यम्, नेत्थं वर्तितव्यमिति । 'प्राप्ते नरेषु जनने नरवत् प्रवृत्तिः' इति चोक्तम् । अर्चतिर्भ्वादिष्वपि पठ्यते, अर्चति । चुरादिष्वपि, अर्चयति अर्चयते ॥ ५६–८ ॥

धनदं प्रति याहीति पुष्पकं सन्नियोज्य[2] सः ।
सह सर्वैरयोध्याया बाह्योपवनमाययौ ॥ ५७ ॥

१, **'–मार्चिचज्जगताम्'** । चुरादेरर्चधातोर्लङि **'आर्चयत्'** इति रूपम् । लुङि **'आर्चिचत्'** इति । २. **'सन्नियुज्य'**

(भा.दी.) धनदमिति। सः श्रीरामः धनदं वैश्रवणं प्रति याहि गच्छ। इति पुष्पकं तत् सन्नियोज्य, सर्वैर्जनैः सह अयोध्यायाः बाह्यं बहिर्विद्यमानं यदुपवनं तत् आययौ ॥ ५७ ॥

प्रार्थितो भरतेनेशः सर्वप्रकृतिभिस्तथा ।
सिंहासनमथाध्यास्त रामः साम्राज्यलक्षणम् ॥ ५८ ॥

(भा.दी.) प्रार्थित इति। अथ भरतेन, तथा सर्वाः याः प्रकृतयः– '[१]अमात्या मन्त्रिणो दूता श्रेणयश्च पुरोहिताः। पुरं जनपदं चेति सप्त प्रकृतयः स्मृताः', ताभिश्च प्रार्थितः, ईशः श्रीरामः, साम्राज्यस्य सार्वभौमत्वस्य लक्षणं चिह्नभूतं तत्, सिंहासनं अध्यास्त अधिरूढवान्। अधिपूर्वादास उपवेशने इत्यस्माल्लङ्। 'अधिशीङ्-स्थासां कर्म' (अ.सू.१.४.४६) इत्यधिकरणस्य कर्मसञ्ज्ञायां कर्मणि द्वितीया ॥ ५८ ॥

सर्वाङ्गसुन्दरं रूपं[२] वानर्य्यो वानरा अपि ।
भेजुर्य्योगानुभावेन तस्मिन् जनसमागमे ॥ ५९ ॥

(भा.दी.) सर्वेति। तस्मिन्, जनानां समागमस्तस्मिन्, वानराः सुग्रीवादयः, वानर्यः तारादिवानरस्त्रियोऽपि, योगलक्षणो योऽनुभावः सामर्थ्यं तेन, सर्वाणि यान्यङ्गानि तैः सुन्दरं तत् रूपं भेजुः ययुः। भज सेवायां लिट्। वानररूपत्वेऽप्यतिसुन्दरमलौकिकरूपं दधुरित्यर्थः[३] ॥ ५९ ॥

(सं.चं.) सर्वाङ्गसुन्दरं मानुषं रूपम्। 'ते कृत्वा मानुषं रूपं वानराः कामरूपिणः' (१२७.४५) इति च। वानरा इत्युपलक्षणं वानरीणामपि। वानर्यश्च वानराश्च वानरा इति वा। 'मानुषं विग्रहं कृत्वा सर्वाभरणभूषिताः' (१२८.३२) इति च ॥ ५९–६१ ॥

अलङ्कारांश्चकाराऽशु रामलक्ष्मणयोस्तदा ।
सशत्रुघ्नोऽथ भरतो हरीणां रक्षसामपि ॥ ६० ॥

(भा.दी.) अलमिति। अथ, सशत्रुघ्नः शत्रुघ्नसहितः भरतः, तदा रामलक्ष्मणयोः, हरीणां कपीनाम्, रक्षसामपि अलङ्कारान् आशु चकार ॥ ६० ॥

---

१. नेदमत्र सङ्गतमित्युक्तम्। **'सप्त प्रणिधयः स्मृताः'** इति मूलपाठ इति च। तेन नायं प्रकृतिशब्दार्थः। किन्तु प्रणिधिशब्दार्थः। स्खलितमत्र सर्वैर्व्याख्यातृभिः।

२. **'वानररूपं त्यक्त्वा सर्वाङ्गसुन्दरं रूपं भेजुः'** इति का.श्री.। वि.भू.च।

३. रामायणाननुगुणमेतत्।

जानकीं तामलञ्चक्रुः सर्वा दशरथस्त्रियः ।
कौसल्या भूषयामास स्वयं वानरवल्लभाः ॥ ६१ ॥

(भा.दी.) जानकीमिति । सर्वाः दशरथस्त्रियः कौसल्याद्याः, तां जानकीम्, अलञ्चक्रुः अलङ्कृतां चक्रुः । कौसल्या स्वयं वानरवल्लभाः सुग्रीवादिवानरनारीः भूषयामास अलञ्चक्रे । भूष अलङ्कारे लिट् ॥ ६१ ॥

स्नाताः सुवस्त्राभरणाः स्रग्विणश्चारुकुण्डलाः ।
विरेजुर्देवसङ्काशा वानर्यो वानरा अपि ॥ ६२ ॥

(भा.दी.) स्नाता इति । स्नाता तैलाभ्यञ्जनवन्तः, वस्त्राणि च आभरणानि च, सु शोभनानि वस्त्राभरणानि येषां ते तथा, स्रक् पुष्पमाला एषामस्तीति स्रग्विणः, चारूणि कुण्डलानि येषां ते तथा, देवानां सङ्काशाः समानाः, वानराः सुग्रीवादयः, वानर्यः तारादिवानरस्त्रियोऽपि विरेजुः ॥ ६२ ॥

(सं.चं.) वानर्यः स्रग्विण्यः । 'असुमायामेधास्रजो विनिः' (अ.सू.५.२.१२१) अन्यत् समानं वानराणां वानरीणां च । चारुणी कुण्डले येषां यासां च, ते च ताश्च । देवैः सदृशा देवसङ्काशा वानराः । समानं काशन्त इति सङ्काशाः । देवीसङ्काशा वानर्यः ॥ ६२ ॥

उपायनान्युपादाय सर्वाश्च नगराङ्गनाः ।
सीतां सुग्रीवपत्नीं च दृष्ट्वा मुमुदिरे मुहुः ॥ ६३ ॥

(भा.दी.) उपेति । सर्वाः, नगरे विद्यमाना अङ्गनाः नगराङ्गनाः, उपायनानि उपायनद्रव्याणि उपादाय, सीतां सुग्रीवपत्नीं च तारां च, दृष्ट्वा मुहुः मुमुदिरे । मुद हर्षे लिट् ॥ ६३ ॥

(सं.चं.) उपायनानि प्राभृतानि । 'ಉಡುಗೊರೆ' इति भाषायाम् । सुग्रीवपत्नीं तारां रुमां च ॥ ६३ ॥

सुमन्त्रो मन्त्रयामास विशोकविजयान्वितः ।
अभिषेकाय रामस्य भरतेन प्रचोदितः ॥ ६४ ॥

(भा.दी.) सुमन्त्र इति । भरतेन प्रचोदितः सुमन्त्रः सुमन्त्राख्यमन्त्री, श्रीरामस्य अभिषेकः साम्राज्याभिषेचनं तस्मै, विशोकश्च विजयश्च ताभ्यामन्वितः सन्, मन्त्रयामास मुहूर्तादिविचारं चक्रे । मत्रि गुप्तभाषणे लिट् ॥ ६४ ॥

(सं.चं.) विशोकविजयाभ्यां मन्त्रिभ्यामन्वितः ॥ ६४ ॥

शत्रुघ्नेन समादिष्टः सुमन्त्रो रथमानयत् ।
रामस्य पुरतो दिव्यं[1] प्रोद्यत्प्रद्योतनप्रभम् ॥ ६५ ॥

(भा.दी.) शत्रुघ्नेनेति । शत्रुघ्नेन समादिष्टः आज्ञप्तः सुमन्त्रः, दिव्यम्, प्रोद्यन् यः प्रद्योतनः सूर्यस्तस्य प्रभेव प्रभा यस्य स तथा, तं रथं श्रीरामस्य पुरतः आनयत् ॥ ६५ ॥

(सं.चं.) प्रोद्यत्प्रद्योतनप्रभम् । उद्यदादित्यसदृशम् । 'दीप्त्यां प्रद्योतनं नाऽर्के' इति च ॥ ६५ ॥

आरुरोह रथं रामो रम्यया सीतया सह ।
शिखरं हेमशैलस्य विद्युतेव बलाहकः ॥ ६६ ॥

(भा.दी.) आरुरोहेति । श्रीरामः रम्यया सीतया सह, हेममयो यः शैलस्तस्य, महामेरोरित्यर्थः, शिखरं शृङ्गं तत्, विद्युता सह बलाहकइव मेघइव, रथं आरुरोह ॥ ६६ ॥

(सं.चं.) 'बलाहको गिरौ मेघे' इति ह्यामनन्ति ॥ ६६ ॥

दिव्याकल्पाम्बरधरौ दीप्तकुण्डलमण्डितौ[2] ।
रामं मारुतिसुग्रीवावनुयातौ गजेन्द्रगौ ॥ ६७ ॥

(भा.दी.) दिव्येति । आकल्पोऽलङ्कारः स च, अम्बराणि च, दिव्यानि यान्याकल्पाम्बराणि तानि धारयत इति तथोक्तौ, दीप्ते च ते कुण्डले ताभ्यां मण्डितौ अलङ्कृतौ, मारुतिसुग्रीवौ, गजेन्द्रौ गच्छत इति गजेन्द्रगौ, गजारूढौ सन्तावित्यर्थः, श्रीरामं अनुयातौ अन्वगच्छताम् ॥ ६७ ॥

(सं.चं.) आकल्पः प्रसाधनम् । 'आकल्पवेषौ नैपथ्यं प्रतिकर्म प्रसाधनम्' इति च । दिव्यं द्योतमानमलौकिकम् । यदन्यत्र लोके न दृश्यते । गजेन्द्रगाविति रामायणे न पठ्यते । 'सुग्रीवो हनुमांश्चैव महेन्द्रसदृशद्युती' (१२८.२१) इति साम्प्रतः पाठः । 'गजेन्द्रोपरि संस्थितौ' प्रतनपाठः स्यात् । उपरि च गजेन्द्रगतत्वं सुग्रीवस्य पठ्यते–'ततः शत्रुञ्जयं नाम कुञ्जरं पर्वतोपमम् । आरुरोह महातेजाः सुग्रीवः प्लवगर्षभः' (१२८.३१) इति ॥ ६७ ॥

---

१. 'दीप्तम्' २. '–कुण्जलधारिणौ'

गजाश्वादीनथाऽरुह्य वानराः सपरिग्रहाः ।
विविशुर्नगरीं ते च राक्षसाः सविभीषणाः ॥ ६८ ॥

(भा.दी.) गजेति । अथ परिग्रहैर्भार्याभिः परिजनैर्वा सहिताः सपरिग्रहाः, 'पत्नीपरिजनादानमूलशापाः परिग्रहाः' इत्यमरः, वानराः नीलाङ्गदादयः, (ते) सविभीषणाः राक्षसाश्च, गजाश्च अश्वाश्च ते आदयो येषां ते तथा तान् आरुह्य नगरीमयोध्यां विविशुः ॥ ६८ ॥

(सं.चं.) गजाश्वादीन् । 'नवनागसहस्राणि ययुरास्थाय वानराः' (१२८.३२) इति च । सपरिग्रहाः सभार्याः । 'परिग्रहः परिजने पत्न्याम्' इति विश्वप्रकाशः । वानराः सभार्याः । किमिर्मि न विभीषणः? बन्धने । या पुनरेकाकिनी भर्तृविरहं रारणपीडां चासहत यदा विभीषणो लङ्कां च तां च विहाय राममा-शिश्रिये । ऊर्मिळायामिव सरमायामपि वाल्मीकिर्निष्करुणं काष्ठमौनं भजति । सङ्ग्रहकारोऽप्यहो वाल्मीकि-मेवानुचकार ॥ ६८ ॥

तूर्य्यदुन्दुभिनिर्घोषाः[१] शङ्खशब्दविमिश्रिताः ।
जज्ञिरे जयशब्दाश्च पुरीं प्रविशति प्रभौ ॥ ६९ ॥

(भा.दी.) तूर्येति । प्रभौ श्रीरामे पुरीं प्रविशति सति, शङ्खानां ये शब्दास्तैर्विमिश्रिताः सहिताः, तूर्याणि वाद्यविशेषास्तानि, दुन्दुभयश्च, तासां निर्घोषाः, जयशब्दाश्च जज्ञिरे ॥ ६९ ॥

(सं.चं.) वाद्यघोषस्तूर्यं तूर्यो वा । 'तूर्योऽस्त्री वाद्यनिर्घोषे वादित्रं वादनं च तत्' इति यादवप्रकाशः । तूर्यं 'ತುತ್ತೂರಿ' इति प्रथितो वाद्यविशेषो वा । दुन्दुभीनां भेरीणां निर्घोषाः ॥ ६९ ॥

तं सभार्य्यमुपायान्तं भ्रातृभिः परिवारितम् ।
प्रत्युद्ययुः प्रहृष्टास्ते पौरा मङ्गलपाणयः ॥ ७० ॥

(भा.दी.) तमिति । (प्रहृष्टाः ते) पौराः जनाः, भ्रातृभिः लक्ष्मणादिभिः, परिवारितं परिवृतम्, सभार्यं ससीतम्, उपायान्तं आगच्छन्तम्, तं श्रीरामम्, मङ्गलानि मङ्गलद्रव्याणि दध्यक्षतादीनि पाणिषु येषां ते तथा सन्तः प्रत्युद्ययुः अभिजग्मुः ॥ ७० ॥

---

१. '–निर्घोषैः'

(सं.चं.) मङ्गलपाणयः लाजकुसुमादिमङ्गलद्रव्यपाणयः। 'अक्षतं जातरूपं च गावः कन्याः सह द्विजाः। नरा मोदकहस्ताश्च रामस्य पुरतो ययुः' (१२८.३८) इति च। हरिद्रादिभिर्जातरूपमक्षतम् ॥ ७० ॥

हर्म्यस्थाः पुररामास्तं रामं स्वरमणीयुतम्।
अवेक्षमाणाः सुप्रीता लाजपुष्पाण्यवाकिरन् ॥ ७१ ॥

(भा.दी.) हर्म्येति। स्वरमण्या स्वभार्यया सीतया युतम्, तं श्रीरामम्, अवेक्षमाणाः पश्यन्त्यः, सुप्रीताः हर्म्यस्थाः पुररामाः पुरस्त्रियः, लाजाश्च पुष्पाणि च तानि अवाकिरन् ववृषुः। कृ विक्षेपे लङ् ॥ ७१ ॥

(सं.चं.) पुरं राजधानी। 'राजराजाश्रयं पुरम्' इत्यभिदधति। तत्रस्था रामा नार्यः। 'पृथुकश्चिपिटो लाजाः पुम्भूम्नि' इति यादवप्रकाशः। '৩০৩১' इति भाषायाम् ॥ ७१ ॥

सुग्रीवस्य च तत् सख्यं वीर्य्यं भक्तिं च मारुतेः।
सकौतुकेभ्यो मन्त्रिभ्यो जगाद जगदीश्वरः ॥ ७२ ॥

(भा.दी.) सुग्रीवस्येति। जगदीश्वरः श्रीरामः, सुग्रीवस्य तत् पूर्वं वृत्तं सख्यम्, मारुतेः वीर्यं बलं तत्, भक्तिं च कौतुकेन कुतूहलेन सहिताः सकौतुकाः, तेभ्यः मन्त्रिभ्यः जगाद ॥ ७२ ॥
(सं.चं.) तत् तादृशमपूर्वम् ॥ ७२ ॥

अन्तःपुरं स्वतातस्य पुरन्दरपुरोपमम्।
हेमरत्नमयं दिव्यं प्रविश्य निषसाद सः ॥ ७३ ॥

(भा.दी.) अन्तरिति। सः श्रीरामः पुरन्दरस्य यत्पुरं तस्य उपमा यस्य तत्तथोक्तं तत्, हेमानि च रत्नानि च तैर्निर्मितं हेमरत्नमयम्, दिव्यं स्वतातस्य दशरथस्य अन्तःपुरं प्रविश्य निषसाद उपविष्टोऽभूत् ॥ ७३ ॥

(सं.चं.) पुरन्दरपुरोपममत एव दिव्यम्, दैविकम्। द्योतमानं वा ॥ ७३ ॥

रामाज्ञयाऽथ सुग्रीवं भरतः प्रापयद् गृहम्।
मुक्तावैडूर्य्यसङ्कीर्ण्णमशोकवनिकान्तरे ॥ ७४ ॥

(भा.दी.) रामेति । अथ भरतः रामाज्ञया, अशोकानां अशोकवृक्षाणां या वनिका वनं तस्याः यदन्तरं मध्यं तस्मिन् विद्यमानम्, मुक्ता मुक्तमणयः, ताश्चैव वैडूर्याणि च, तैः सह सङ्कीर्णं प्रसारितं तत् गृहम्, सुग्रीवं प्रति प्रापयत् अगमयत् । आप्लृ व्याप्तौ लङ् ॥ ७४ ॥

(सं.चं.) सङ्कीर्णं सङ्कुलं सन्दब्धम् । 'तच्च मद्धवनं श्रेष्ठं साशोकवनिकं महत् । मुक्तावैडूर्यसङ्कीर्णं सुग्रीवस्य निवेदय' (१२८.४५) इति च ॥ ७४ ॥

वसिष्ठस्तापसश्रेष्ठः सम्भारान् समुपादिशत् ।
रामाभिषेकलोलानां प्रकृतीनां मते स्थितः ॥ ७५ ॥

(भा.दी.) वसिष्ठ इति । तापसेषु मुनिषु श्रेष्ठः वसिष्ठः, श्रीरामस्य योऽभिषेकः, तस्मिन् लोलाः लोलुपाः, तासां प्रकृतीनां अमात्यादिसप्तप्रकृतीनाम्, मतमनुमतिस्तस्मिन् स्थितः सन्, सम्भारान् अभिषेकसाधनीभूतद्रव्याणि समुपादिशत् आज्ञप्तवान् । दिशतेर्लङ् ॥ ७५ ॥

(सं.चं.) लोलानां लालसानाम् । उत्कटेच्छा लौल्यम् । प्रकृतीनां प्रजानाम् । अमात्यानां वा । 'प्रकृतिः सहजे योनावमात्ये परमात्मनि' इति विश्वप्रकाशः । सम्भारान् सामग्रीः ॥ ७५ ॥

शुभान् ब्रीहिमहाब्रीहिप्रियङ्गुयवसम्भवान् ।
तोक्मभेदान् दधिमधुसर्पींष्यन्यांश्च सर्वशः ॥ ७६ ॥

(भा.दी.) शुभानिति । शुभान्, व्रीहयश्च, महाव्रीहयश्च, प्रियङ्गवश्च, यवाश्च, तेभ्यः सम्भवन्तीति तथोक्ताः, तान् तोक्मभेदान् पल्लवाानां वृन्तविशेषान् दधीनि च मधूनि च सर्पींषि च, सर्वशः समस्तान्, अन्यांश्च पदार्थान् सम्पादयितुं वसिष्ठः समुपादिशिदिति सम्बन्धः ॥ ७६ ॥

(सं.चं.) शुभान् प्रशस्तान् । 'शुभो मञ्जुप्रशस्तयोः' इति यादवप्रकाशः । व्रीहयः 'ಅಕ್ಕಿ', ನೆಲ್ಲು' इति भाषायाम् । महाव्रीहयः 'ಜೋಳ' इति । प्रियङ्गवः 'ನವಣೆ' इति । तत्सम्भवान् पिष्टविशेषान् । यवाः 'ಜವೆ' इति । चूतपनसाद्यङ्कुरप्रभेदाः । हरिद्वर्णा यवभेदाः । अन्यांश्च सर्वशः सर्वान् सम्भारान् ॥ ७६ ॥

अप आतपवर्ष्याश्च नानातीर्थोदकानि च ।
[१]न्यग्रोधोदुम्बराश्वत्थप्लक्षक्काथाम्बु चोत्तमम् ॥ ७७ ॥

---

१. 'न्यग्रोधौदुम्बर–'

(भा.दी.) अप इति । आतपे भवं वर्षं आतपवर्षम्, तस्य सम्बन्धिन्य आतपवर्ष्याः, आतपे सत्येव यदा वर्षं भवति तदा गृहीत्वा सम्पादिता इत्यर्थः, (ताः)अपः, नानाविधानि यानि तीर्थानि गङ्गादीनि तेषां यानि उदकानि तानि च,उत्तमम्, न्यग्रोधश्च उदुम्बरश्च अश्वत्थश्च प्लक्षश्च तेषां त्वग्भिः क्वाथः क्वथनं यस्य तत्, न्यग्रोधोदुम्बराश्वत्थप्लक्षक्वाथम्, तादृशं यदम्बु तच्च सम्पादयितुं वसिष्ठः समादिशदिति पूर्वेण सम्बन्धः ॥ ७७ ॥

(सं.चं.) आतपेन सहैव यद् वर्षं तदातपवर्षम् । ततः सङ्गृहीता आप आतपवर्ष्याः । नानातीर्थोदकानि च । 'नदीशतानां पञ्चानां जलं कुम्भैरुपाहरन्' (१२८.५३) इति च । न्यग्रोधः='ಆಲ' उदुम्बरः='ಅತ್ತಿ', अश्वत्थः= 'ಅರಳಿ', प्लक्षः='ಗೋಳಿ', न्यग्रोधादीनां त्वचं निक्षिप्य क्वथितमम्बु चोत्तममौषधगुणोपेतत्वात् । क्वाथः कषायः । फाण्टः क्वाथरसः । एतानि च वसिष्ठः समुपादिशत् । सङ्ग्रहीतुमादिशत् ॥ ७७–८ ॥

किङ्कराणां सहस्राणि तान् सम्भारान् समाहरन्[1] ।
[2]वानरा वार्धिवार्य्यर्थं सुग्रीवस्याऽऽज्ञया ययुः ॥ ७८ ॥

(भा.दी.) किङ्कराणामिति । किङ्कराणां सहस्राणि, तान् वसिष्ठोक्तान्, सम्भारान् साधनद्रव्यानि समाहरन् आनिन्युः । वानराः, वार्धीनां चतुःसमुद्राणां यद् वारि जलं तदर्थम्, सुग्रीवस्य आज्ञया ययुः ॥ ७८ ॥

सुषेणो जलमानिन्ये पूर्वाब्धेर्ग्गवयस्तथा ।
पश्चिमादृषभो[3] याम्यान्नळ उत्तरवारिधेः ॥ ७९ ॥

(भा.दी.) सुषेण इति । सुषेणः, पूर्वो योऽब्धिस्तस्मात् जलं तत् आनिन्ये । तथा गवयः पश्चिमात् जलं आनिन्ये, वृषभः, याम्यां दक्षिणस्यां भवो याम्यस्तस्मात् समुद्रात् जलं आनिन्ये, नळः उत्तरो यो वारिधिस्तस्मात् जलं आनिन्ये ॥ ७९ ॥

(सं.चं.) सुषेणः 'पूर्वात् समुद्रात् कलशं जलपूर्णमथाऽनयत् । सुषेणः सत्वसम्पन्नः सर्वरत्नविभूषितम् । ऋषभो दक्षिणात् तूर्णं समुद्राज्जलमानयत् । गवयः पश्चिमात् तोयमाजहार महार्णवात् । उत्तराच्च जलं शीघ्रं गरुडानिलविक्रमः । आजहार स धर्मात्मा नळः सर्वगुणान्वितः' (१२८.५३–७) इति च ॥ ७९ ॥

शातकुम्भमयैः कुम्भैर्म्मणिश्रेणिप्रदीपितैः ।
पल्लवावरणं वारि ते सहेळमुपानयन् ॥ ८० ॥

---

१. **'समानयन्'** २. **'वीरा वारिधिवार्यर्थम्'** ३. **'पश्चिमाद् वृषभो–'** इति वि.ती.पाठः स्यात् ।

(भा.दी.) शातकुम्भैरिति । ते वानराः, शातकुम्भस्य सुवर्णस्य विकाराः शातकुम्भमयाः तैः, मणीनां श्रेणयः पङ्क्तयः ताभिः प्रदीपिताः प्रकाशिताः तैः कुम्भैः, पल्लवः किसलय आवरणं यस्य तत् तथोक्तं वारि समुद्रोदकम्, हेळया लीलया सहितं यथा भवति तथा सहेळं उपानयन् ॥ ८० ॥

(सं.चं.) शातकुम्भमयैः कनकमयैः । पल्लवानि नवदलानि आवरणानि यस्याम्बुनस्तत् पल्लवावरणम् । उपरिष्टात् पल्लवैरावृतमम्भोधिजलम् । सहेळं सलीलम् ॥ ८०–१ ॥

[अभिषेकोद्यमे रामः ससीतो जनसंसदि ।
चन्द्रश्चन्द्रिकयेवालं विरेजे तारकागणे[१] ॥ * ॥]

(भा.दी.) अभिषेकेति । अभिषेके य उद्यमः प्रयत्नः तस्मिन् वर्तमाने सति, जनसंसदि जनानां सभायम्, श्रीरामः ससीतः सन्, तारकाणां गणः समूहः तस्मिन्, चन्द्रः चन्द्रिकयेव, कौमुद्या यथा तथा विरेजे ॥*॥

कार्य्यदक्षोऽत्र[२] शत्रुघ्नः सुहृदः सपुरोहितान् ।
अभिषेकोत्सवं कुर्वन्नृत्विजश्च न्यमन्त्रयत्[३] ॥ ८१ ॥

(भा.दी.) कार्येति । कार्याणि कर्तव्यकर्माणि तेषु दक्षः समर्थः शत्रुघ्नः, अभिषेकलक्षणो य उत्सवस्तं कुर्वन् सन् अत्र अभिषेके सुहृदो बन्धून् सपुरोहितान् ऋत्विजश्च न्यमन्त्रयत् आगन्तुमाह्वानं चक्रे ॥ ८२ ॥

(सं.चं.) अत्र अभिषेकोत्सवे । 'अभिषेकाय रामस्य शत्रुघ्नः सचिवैः सह । पुरोहिताय श्रेष्ठाय सुहृद्भ्यश्च न्यवेदयत्' (१२८.५८) इति च ॥ ८१ ॥

वसिष्ठो वामदेवश्च जाबालिरुत काश्यपः[४] ।
कात्यायनः[५] सुयज्ञश्च तेऽभिषेकार्त्थमाययुः ॥ ८२ ॥

(भा.दी.) वसिष्ठ इति । वसिष्ठः वामदेवश्च जाबालिः उत काश्यपः कात्यायनः सुयज्ञश्चेति ये मुनयः ते अभिषेकार्थं आययुः ॥ ८२ ॥

---

१. इदं समग्र पद्यं कोशेषु न पठ्यते । केचित्तूत्तरार्धमन्यथा पठन्ति– **'विरेजे तारकागणे चन्द्रश्चन्द्रिकया यथा'** इति ।

२. **'कार्ये दक्षः स शत्रुघ्नः सुहृदोऽत्र न्यमन्त्रयत्'**, **'कार्येऽतिक्षः शत्रुघ्नः'** इति च । **'कार्ये कर्तव्यविषये अतिदक्षः अत्यन्तसमर्थ अभिखे,ोत्सवं कुर्वन् कारयन्'** इति का.श्री. ।

३. **'–जश्च पुरोहितान्'** ४. **'काश्यपः'** ५. **'कार्त्यायनः'**

(सं.चं.) वसिष्ठो वामदेवश्च । 'वसिष्ठो वामदेवश्च जाबालिरथ काश्यपः । कात्यायनः सुयज्ञश्च गौतमो विजयस्तथा' (१२८.६०) इति च ॥ ८२–३ ॥

रामोऽभिषिच्यते नाथ इत्युदन्ते प्रवर्त्तिते ।
पुरे जनपदे चाऽसीदपूर्वोऽयं महोत्सवः ॥ ८३ ॥

(भा.दी.) राम इति । नाथः सर्वस्वामी श्रीरामः अभिषिच्यते । षिचिर् सेचने लट् । इति उदन्तो वृत्तान्त!, तस्मिन् प्रवर्तिते सति, पुरमयोध्या तस्मिन्, जनपदः देशः तस्मिंश्च, अपूर्वः अयं अभिषेकनिमित्तमहोत्सवः आसीत् ॥ ८३ ॥

विश्लेषार्त्ता रामदेवस्य सर्वे प्रीयन्ते स्मास्याभिषेकप्रसङ्गे ।
घर्म्मेणाऽर्त्तास्तोयदर्त्ताविवाऽप्ते संसारार्त्ता यद्वदाप्ते विमोक्षे ॥ ८४ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
युद्धकाण्डे पञ्चदशः सर्ग्गः ॥

—०—

(भा.दी.) विश्लेषेति । पूर्वं रामदेवस्य वियोगो विश्लेषः तेन आर्ताः आतुराः, सर्वे सज्जनाः, अस्य श्रीरामस्य, अभिषेकस्य यः प्रसङ्गः प्रसक्तिः तस्मिन् सति, घर्मः उष्णकालः तेन आर्ता खिन्नाः, तोयदः ऋतुः तोयदर्तुर्वर्षर्तुः तमिन् आप्ते सतीव, संसारार्ताः विमोक्षे आप्ते सति यद्वत्, तद्वत् प्रीयन्ते स्म सन्तुष्टा बभूवुः । प्रीङ् प्रीणने लट् ॥ ८४ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां
युद्धकाण्डे पञ्चदशः सर्गः ॥

—०—

(सं.चं.) अथ शालिन्योपसंहरति–विश्लेषार्ता इति । मस्तौ गौ च शालिनी । पूर्वं विश्लेषेण आर्ता दुःखिताः । सम्प्रति प्रीयन्ते स्म अप्रीयन्त । घर्मेण ग्रीष्मर्तुना ऊष्मणा च पीडिताः । तोयदर्तौ वर्षर्तावाप्ते यथा । 'निदाघ ऊष्मणि ग्रीष्मे स्वेदे घर्मस्तु तेषु च' इति च ॥ ८५ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां युद्धाकाण्डे पञ्चदशसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– २९९४+८४=३०७८]

षोडशः सर्ग्गः

अथाहिमांशावुदयं प्रयाते द्विजैः कृते स्वस्त्ययने समस्तैः ।
[1]महामणीन्द्रैरुपक्लृप्तमत्र रामो महामण्डपमाप[2] दिव्यम् ॥ १ ॥

(भा.दी.) श्रीरामस्य साम्राज्याभिषेकं सविस्तरं वर्णयति–**अथे**त्यादिना । अथ, अहिमा उष्णा अंशवो यस्य स तथा तस्मिन् सूर्ये, उदयः प्रादुर्भावस्तं प्रयाते सति, समस्तैर्द्विजैः वसिष्ठादिभिः स्वस्त्ययनं मङ्गल्यवचनं तस्मिन् कृते सति, श्रीरामः अत्र सभायाम्, महान्तो ये मणीन्द्रास्तैः उपक्लृप्तं निर्मितम्, दिव्यम्, महान् यो मण्डपस्तं आप प्राप । आप्लृ व्याप्तौ लिट् ॥ १ ॥

(सं.चं.) अथोपजातिप्रचुरैश्छन्दोभिः सर्गमारभते । हिमांशुर्निशाकरः । स न भवतीत्यहिमांशुर्दिवाकरः । अहिमा उष्णा अंशयोऽस्येति च । स्वस्त्ययनं स्वस्तिवाचनपूर्वकं पूर्णकलशेन स्वागतम् । 'क्लीबे स्वस्त्ययनं पूर्णकलशे' इति यादवप्रकाशः । उपक्लृप्तं खचितम् । आप उपससादेत्यर्थः ॥ १ ॥

[3]समन्त्रतन्त्रान्तरकोविदैस्तैर्वसिष्ठपूर्वैरुपकल्प्यमाने ।
[4]महार्घमाणिक्यमणीन्द्रक्लृप्ते सिंहासने दैवतसिंह आस्त ॥ २ ॥

(भा.दी.) स इति । दैवतेषु देवेषु सिंहः श्रेष्ठः सः श्रीरामः, मन्त्राः वेदास्ते च, तन्त्राणि यज्ञकर्मप्रयोगास्तानि च, तेषां यदान्तरं रहस्यं तस्मिन् कोविदा निपुणास्तैः, वसिष्ठः पूर्वो येषां ते तथा तैः ऋत्विग्भिः, उपकल्प्यमाने संस्क्रियमाणे, महानर्घो मूल्यं येषां ते तथोक्तास्ते च, माणिक्यमणीन्द्राश्च, तैः क्लृप्तं निर्मितम्, तस्मिन् सिंहासने आस्त आस्थितोऽभूत् । आस उपवेशने लङ् ॥ २ ॥

---

१. **'महामुनीन्द्रैरुप–'** । **'महामुनीन्द्रैः वसिष्ठादिभिः उपक्लृप्तं नियमितम्'** इति का.श्री । २. **'–मण्टपमाप'**

३. **'सन्मन्त्रतन्त्रा-'** । **'सः मन्त्रतन्त्रान्तर–'** इति पदपाठः वि.ती.पाठे । ४. **'महार्घ्यमाणिक्य–'**

(सं.चं.) अध्वरकर्मणां प्रयोगस्तन्त्रम् । समन्त्रस्य तन्त्रस्य अन्तरमन्तरङ्गं रहस्यम् । उपकल्प्यमाने विधिपूर्वं सम्पाद्यमाने ॥ २ ॥

सीता पदैस्तं ललितैरुपेत्य तस्थौ समन्दाक्षममन्दकान्तिः ।
अनन्यलभ्ये निजविष्टरार्द्धे न्यवीविशत् तां परिगृह्य रामः ॥ ३ ॥

(भा.दी.) सीतेति । अमन्दा पूर्णा कान्तिर्यस्याः सा तथोक्ता सीता, तं श्रीरामं, ललितानि मनोहराणि तैः पदैः पादविन्यासैः उपेत्य, मन्दाक्षेण लज्जया सहितं यथा भवति तथा समन्दाक्षम्, 'मन्दाक्षं ह्रीस्त्रपा लज्जा' इत्यमरः, तस्थौ । श्रीरामः तां सीतां परिगृह्य, अन्यलभ्यं अन्यप्राप्यं न भवतीत्यनन्यलभ्यं तस्मिन्, निजः विष्टरः सिंहासनलक्षणं पीठं तस्य यदर्धं तस्मिन् न्यवीविशत् ॥ ३ ॥

(सं.चं.) ललितैः कोमलैः । समन्दाक्षं सव्रीळम् । उप समीपमेत्य तस्थौ । तां रामः निजविष्टरार्धे, विष्टरमासनम्, न्यवीविशत् उपवेशयामास । परिगृह्य हस्ते गृहीत्वा ॥ ३ ॥

भासेव भानुः शिखया शिखीव रेजे तया चन्द्रिकयेव चन्द्रः ।
आस्तां कवीनामिति वाक्प्रसारः श्रीश्रीकमित्रोरुपमा न काचित् ॥ ४ ॥

(भा.दी.) भासेति । श्रीरामः तया सीतया, भासा दीप्त्या भानुरिव, शिखया ज्वालया शिखीव वह्निरिव, चन्द्रिकया कौमुद्या चन्द्रइव रेजे । राजृ दीप्तौ लिट् । इति कवीनां वाक्प्रसारः वचनविस्तारः आस्तां तिष्ठतु । वस्तुतस्तु, श्रीश्च श्रियः कमिता भर्ता च तयोः, सीतारामयोरित्यर्थः, काचिदपि उपमा न । तादृशवस्त्वन्तराभावादिति भावः ॥ ४ ॥

(सं.चं.) भासेव भानुरितीन्द्रवज्रा । आस्तामिति सावज्ञमङ्गीकारे । वस्तुतस्तु श्रियः श्रीकमितुश्च न विद्यते क्वापि काचिदुपमा ॥ ४ ॥

उशीरगुग्गुल्वगरुप्रवृद्धो धूमो वितानेन निवार्य्यमाणः ।
रत्नप्रदीपैः खचितः सविद्युन्नवाम्बुदाडम्बरमाललम्बे ॥ ५ ॥

(भा.दी.) उशीरेति । उशीरं नलदं तच्च गुग्गुलुश्च अगरुश्च तैः प्रवृद्धः, वितानं वितानवस्त्रं तेन निवार्यमाणः, रत्नमयाः प्रदीपास्तैः खचितः सम्मिश्रः धूमः, सविद्युत् विद्युत्सहितो नवो नूतनो योऽम्बुदो मेघस्तस्य

आडम्बरोऽनुकरणं तम्, आललम्बे आश्रितवान् । रत्नदीपस्य विद्युद्वर्णत्वाद् धूमस्य च मेघवर्णत्वादिति भावः । लबि अवस्रंसने लिट् ॥ ५ ॥

(सं.चं.) उशीरं लामज्जम् । 'ಲಾವಂಚ', 'ಬಾಳದ ಬೇರು' इति भाषायाम् । गुग्गुलुर्देवधूपः । 'ಗುಗ್ಗುಳು' इति भाषायाम् । अगरु तीक्ष्णगन्धश्चन्दनभेदः । वितानम्='ಮೇಲ್ಕಟ್ಟು' इति भाषायाम् । रत्नप्रदीपा विद्युतव । नवाम्बुदः सजल-जलदः । तस्याऽडम्बरमनुकारमाललम्बे आशिश्रिये । डबि क्षेपे । आडम्बरमाटोपं वा । 'ಠೀವಿ' इति भाषायाम् । लबि अवस्रंसने च । विपूर्वः कालदैर्घ्यमाह । विलम्बते । आङ्पूर्वोऽवपूर्वश्चाश्रया-श्रयिभावमाह । आलम्बते, अवलम्बते । अवस्रंसनं–'ಜೋತಾಡು' इति भाषायाम् । क्वचित् 'ಸಡಿಲಾಗು' इत्यर्थेऽपि ॥ ५ ॥

मृदङ्गभेरीपटहादिकानां सकांस्यशङ्खानकगोमुखानाम् ।
सवेणुवीणागणकाहळानां शब्दोऽथ शब्दान्तरमूर्ण्णुनाव ॥ ६ ॥

(भा.दी.) मृदङ्गेति । अथ, कांस्यानि कांस्यमयानि तानि च शङ्खाश्च आनकाश्च गोमुखानि च, एतैः सहितानि तेषाम्, वेणवश्च वीणागणाश्च काहळाश्च, तैः सहितानि तेषाम्, मृदङ्गाश्च भेर्यश्च पटहाश्च ते आदयो येषां तानि तथा तेषां शब्दः, अन्यः शब्दः शब्दान्तरं तत् ऊर्णुनाव तिरश्चकार । ऊर्णुञ् आच्छादने लिट् ॥ ६ ॥

(सं.चं.) मुरजापरनामा मृदङ्गः प्रसिद्धः । भेरी दुन्दुभिः । 'ನಗಾರಿ' इति भाषायाम् । पटह आडम्बरः । 'ತಮಟೆ' इति भाषायाम् । कांस्यं कांस्यनिर्मिततालघण्टादिकम् । आनकोऽपि भेरीप्रभेदः । प्रायः 'ಚಂಡೆ' इति भाषायाम् । गोमुख इति गोमुखाकारो मुरजभेदः । वेणुः मुरळी, 'ಕೊಳಲು' इति भाषायाम् । वीणागणा अनेकप्रभेदा वीणाः । तथाहि सप्ततन्त्री चित्रा । एकादशतन्त्री एकादशी । त्रयोदशतन्त्री त्रयोदशी । चतुर्दश-तन्त्री चतुर्दशी । शततन्त्री, 'ಸಂತೂರು' इति भाषायाम् । एवमाद्या वीणागणाः । काहळाः कहाळाः । 'ಕಹಳೆ' इति भाषायाम् । 'कहाळा तु स्याच्चण्डकोलाहलेति च' इति यादवप्रकाशः । ऊर्णुनाव आच्छादयामास । वाद्यानां महता कोलाहलेनान्ये नादा आवृताः सन्तो नाश्रूयन्तेत्यर्थः । अनेन चतुर्विधमपि वाद्यं विवृतम् । 'ततं वीणादिकं वाद्यं तालाद्यं विततं घनम् । वंशादिकं तु सुषिरमानद्धं मुरजादिकम्' ॥ ६ ॥

सम्मूर्च्छयन्तोऽपि विकासयन्तः सप्तस्वरांस्तान् नवतां नयन्तः ।
अग्राम्यका ग्रामविशेषदक्षा गन्धर्ववर्य्या जगुरत्र रामम् ॥ ७ ॥

(भा.दी.) सम्मूर्च्छयन्त इति ।[1] सम्मूर्च्छयन्तः प्रतिग्रामं स्वरान् एकविंशतिमूर्छनायुक्तान् कुर्वन्तः । तद्यथा 'आदावुत्तरमन्द्रा स्याद् रजनी चोत्तरा तथा । चतुर्थी शुद्धषड्जा तु पञ्चमी मत्सरी मता । अश्वक्रान्ता तथा षष्ठी सप्तमी चाभिरुद्गता । षड्जग्रामाश्रिताश्चैता विज्ञेयाः सप्त मूर्च्छनाः' इत्याद्याः । एवं प्रतिस्वरमपि मूर्च्छनाविशेषाः सन्ति । तत्सहितान् कुर्वन्त इत्यर्थः । विकासयन्तः सप्तस्वराणां श्रुतीर्विकासयन्त इत्यर्थः । तत्र श्रुतयो नाम स्वराणां धर्मविशेषाः । श्रुतयश्च प्रतिस्वरं नियतसङ्ख्याः । उक्तं च– 'तिस्रो द्वे च चतस्रश्च चतस्रस्तिस्र एव च । द्वे च तिस्रश्च विज्ञेयाः षड्जादौ श्रुतयस्तथा' इति । श्रुतीनां नामानि चोक्तानि– 'सिद्धिः प्रभाविनी कान्ता सुप्रभा संहता शिवा' इत्यादिना । श्रुतयश्च द्वितीयतृतीयचतुष्टयरूपेण सन्धीभूय प्रवर्तन्ते । तत्र समूहवाची मण्डलशब्दः । तत्र स्वरेषु श्रुतियोजनाप्रकारोऽप्युक्तः– 'षड्जश्चतुःश्रुतिर्ज्ञेय ऋषभस्त्रिश्रुतिः स्मृतः । त्रिश्रुतिश्चापि गान्धारो मध्यमश्च चतुःश्रुतिः । चतुश्श्रुतिः पञ्चमः स्याद् धैवतस्त्रिश्रुतिः स्मृतः । निषादो द्विश्रुतिश्चैव षड्जग्रामः स्वरान्तरम्' इति । तान् प्रसिद्धान् सप्तस्वरान् निषादादिसप्त-स्वरान् । 'निषादर्षभगान्धारषड्जमध्यमधैवताः । पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः' इत्यमरः । नवतां पदेपदे गानचातुर्येण नूतननूतनत्वं नयन्तः प्रापयन्तः । ग्राम्यकाः ग्राम्यभोगासक्ता न भवन्तीत्यग्राम्यकाः, विषयालम्पटा इत्यर्थः । ग्रामविशेषदक्षाः, ग्रामो नाम स्वरसमूहस्य स्थानमुच्यते, सच त्रिविधः– षड्जग्रामो मध्यमग्रामो गान्धारग्रामश्चेति । सप्तस्वराणां मध्ये एकैकस्यापि स्वरस्य गानकरणे स्थानान्तरे भेदो भवति । तत एव तद्वारेण ग्रामभेदो भवतीति गान्धर्वशास्त्रोक्तरीत्या ग्रामविशेषकरणदक्षाः कुशलाः ग्राम-विशेषदक्षाः, गन्धर्ववर्या अपि, गन्धर्वश्रेष्ठा अपि श्रीरामं अत्र जगुः । गा गाने लिट् ॥ ७ ॥

(सं.चं.) इत उत्तरं पद्यद्वयमिन्द्रवज्राबद्धम् । सप्तानामपि स्वराणां समाहारः सम्यगाहरणमारम्भावस्था मूर्छना । सप्तसु स्वरेषु त्रिषु ग्रामेषु संहत्य एकविंशतिर्मूर्छनाः । मूर्छनायां समाहृतान् सप्तापि स्वरान् तानेन विकासयन्तः । नवेननवेन तानवितानेन गानेऽप्यपूर्वां नवतां नयन्तः । सप्तानां नवत्वमिति विरोधाभासः । ग्रामविशेषे गान्धारग्रामेऽपि दक्षाः । त्रिविधो हि ग्रामः । षड्जग्रामो मध्यमग्रामो गान्धारग्रम इति । श्रुतीनां ग्रामः समुदायो ग्राम इत्युच्यते । गान्धारग्रामस्तु द्युविषयत्वाद् गन्धर्वाणां तत्र दक्षता । अग्राम्यकाः अमिश्रित-ग्राम्यगानाः, दिव्यं गान्धर्वं गायन्त इत्यर्थः । राममुद्दिश्य जगुः, रामगुणगानं चक्रुरित्यर्थः ॥ ७ ॥

तत्राऽगता अप्सरसोऽथ दृष्ट्वा रूपातिरिक्ताः पुरि वारकान्ताः ।
अस्पर्द्धमाना ननृतुः प्रजानां रामस्य पार्श्वे न हि दोषबुद्धिः ॥ ८ ॥

१. 'त्रिष्वपि व्याख्यानेषु प्राय एतान्येव वाक्यान्यविकलमुद्धृतान्यान्तम् । एकः प्रथमं व्याचख्यौ । अपरौ तमनुचक्राते चक्षुषी निमील्य । प्रायः प्रतना उद्धरणं नापहरणं मन्यन्ते स्म ।

(भा.दी.) तत्रेति । अथ तत्र आगताः रूपेण अतिरिक्ताः अतिशयानाः अप्सरसः ऊर्वश्याद्याः (दृष्ट्वा) पुरि अयोध्यायां विद्यमानाः वारकान्ताश्च अस्पर्धमानाः सत्यः ननृतुः । नृती गात्रविक्षेपे लिट् । सौन्दर्यादि-वैषम्येऽप्यस्पर्धायां निमित्तमाह– **प्रजानामि**ति । श्रीरामस्य पार्श्वे समीपं तस्मिन्, प्रजानां दोषबुद्धिः रागादिदोषयुक्ता बुद्धिः न हि । ताः तथा ननृतुरिति भावः ॥ ८ ॥

(सं.चं.) रूपेण सौन्दर्येण अतिरिक्ताः अप्सरसोऽप्यतिशयानाः, अयोध्यापुरि विद्यमाना वारकान्ताः वेश्या दृष्ट्वा । अस्पर्धमाना अविजगीषवः, विगतमत्सराः । रामस्य पार्श्वे प्रजानां परदोषान्वेषणबुद्धिर्न भवति हि ॥ ८ ॥

अग्रे [१]विधायाथ विधातृसूनुं ते वामदेवादिमहामुनीन्द्राः ।
रत्नोज्ज्वलैर्हैमघटैर्म्महेशं तमभ्यषिञ्चन् सलिलैः प्रशस्तैः[२] ॥ ९ ॥

(भा.दी.) अग्र इति । अथ वामदेव आदिर्येषां ते वामदेवादयः, ते च ते महामुनीन्द्राश्च, ते विधातृसूनुं ब्रह्मपुत्रं वसिष्ठम्, अग्रं पुरोभागस्तस्मिन् विधाय, रत्नैरुज्वलाः प्रकाशमानास्तैः, हेममया ये घटास्तैः, प्रशस्तानि शुद्धानि तैः, (सलिलैः) जलैः, महतां ब्रह्मादीनामीशं तं श्रीरामं अभ्यषिञ्चन् । षिचिर् सेचने लङ् ॥ ९ ॥

(सं.चं.) विधातृसूनुं वसिष्ठम् । महानयमीश इति, ईशादपि महानयमिति महेशो रामः ॥ ९ ॥

सितातपत्रं तपनीयदण्डं दधे सुमित्रातनयो यवीयान् ।
[३]अचालयेतामथ चामरे द्वे देवस्य सुग्रीवविभीषणौ तौ ॥ १० ॥

(भा.दी.) सितेति । यवीयान् अवरजः सुमित्रातनयः शत्रुघ्नः, देवस्य श्रीरामस्य, तपनीयमयः सुवर्णमयो दण्डो यस्य तत्तथोक्तं तत्, सितं श्वेतं यदातपत्रं च्छत्रं तत् दधे दध्रे । धाञो लिट् । अथ तौ सुग्रीवविभीषणौ द्वे चामरे अचालयेताम् । चल कम्पने लङ् ॥ १० ॥

(सं.चं.) तपनीयदण्डं कनकदण्डं सितातपत्रं श्वेतच्छत्रम् । आतपात् त्रायत इत्यातपत्रम् । सुमित्रा-तनयो यवीयान् शत्रुघ्नः । 'व्यजनं तालवृन्तं स्याद् धवित्रं चर्मणा कृतम् । आलावर्तसु वस्त्रेण चामरं तु प्रकीर्णकम्' इति यादवप्रकाशः । 'छत्रं तस्य च जग्राह शत्रुघ्नः पाण्डुरं शुभम् । श्वेतं च वालव्यजनं सुग्रीवो

१. **'अग्रे निधायाथ'** २. **'सलिलैः समस्तैः'** ३. **'सञ्चालयेता–'** इति, **'आचालयेता–'** इति च ।

वानरेश्वरः। अपरं चन्द्रसङ्काशं राक्षसेन्द्रो विभीषणः' (१२८-६९) इति च। अचालयेताम्। समग्रं पुष्पफल-मात्मगामीत्यात्मनेभाषा ॥ १० ॥

न केवलं कोसलपालकोऽयं पाता भुवः सप्तसमुद्रवत्याः[१] ।
इतीर्य्यमाणो[२] मनुजैर्जगाम स्मितं त्रयाणां जगतां स नाथः ॥ ११ ॥

(भा.दी.) नेति। अयं श्रीरामः, केवलं कोसलानां कोसलविषयाणां पालको न रक्षको न। किन्तु सप्त च ते समुद्राश्च ते अस्यां सन्तीति तथोक्ता तस्याः भुवः पाता रक्षकः। मनुजैः मनुष्यैः इति ईर्यमाणः त्रयाणां जगतां नाथः श्रीरामः, स्मितं मन्दहासस्तत् जगाम। गम्लृ गतौ लिट्॥ ११ ॥

(सं.चं.) इति मनुजैरीर्यमाणः। न केवलं सप्तसमुद्रवत्या भुवः। किन्तु त्रयाणां जगतां च नाथः। अथापि तदनभिज्ञानां भाषणेनापि प्रसन्नः कृपया स्मितं मन्दहासं जगाम प्राप। स्मितेन तानभिननन्देत्यर्थः। अदृष्टदशनो हासः स्मितम्॥ ११ ॥

साधारणं भूषणभूष्यभावं मन्ये प्रभोस्तस्य च भूषणानाम्।
परस्परालङ्क्रियेति[३] मित्थ्या स भूषणं सर्वविभूषणानाम् ॥ १२ ॥

(भा.दी.) साधारणमिति। अहं प्रभोः तस्य श्रीरामस्य च, भूषणानि आभरणानि तेषां च, भूषणं (च) भूष्यमलङ्कार्यं तच्च तयोर्भावस्तम्, भूषणत्वभूष्यत्वे इत्यर्थः, साधारणं आभरणानां श्रीरामो भूषणभूतः, आभरणानि च तेन भूष्याणि, श्रीरामस्य आभरणानि भूषणभूतानि, श्रीरामश्च भूष्य इति। परस्परं भूषण-भूष्यभावं समानं मन्ये तर्के। मन ज्ञाने लट्। वस्तुतस्तु (सः) श्रीरामः, सर्वाणि यानि विभूषणानि तेषां विभूषणं[३] अलङ्कारभूतः। तस्मात् परस्परालङ्क्रियताऽपि परस्परालङ्कारवत्ताऽपि मिथ्या इति मन्ये। विचार्य-माणे परस्परं भूषणभूष्यभावोऽपि न। किन्त्वाभरणानामेव श्रीरामावयवसम्बद्धानामलङ्कारविशेषोऽभूदिति भावः॥ १२ ॥

(सं.चं.) प्रभो रामस्य भूषणानि भूषणानि। भूषणानां प्रभुर्भूषणमिति साधारणो भूषणभूष्यभावः। भूषणैः प्रभुर्भूष्यते। भूषणानि प्रभुणा भूष्यन्ते। रामचन्द्रेण धृतानीति भूषणानां भूषणत्वम्। एवं परस्परा-

---

१. **'सप्तसमुद्रकाञ्च्याः'** २. **'इतीर्यमाणे'**

३. **'परस्परालङ्क्रियताऽपि मिथ्या'** इति वि.ती.पाठः। **'भूषणभूष्यभावं अलङ्कारालङ्क्रियमाणत्वं साधारणं तुल्यमित्येतत् मिथ्येति मन्ये'** इति का.श्री.। अस्मिन् विवरणे **'भूषणभूष्यभावम्'** इति द्वितीया दुरुपपादा। चस्खालात्र का.श्री.आचार्यः। ३. **'भूषणम्'** इति पर्याप्तम्।

लङ्क्रियया हेतुना कविभिरुच्यमानं साधारणभूषणभआवं अहं मिथ्येति मन्ये । किन्तु स एव भूषणानां च भूषणम् ॥ १२ ॥

हेमाम्बुजानां रचितां शतेन मालां शुभां सौरभलोलभृङ्गाम्[1] ।
बभार रामः पवनेन दत्तां चन्द्रांशुगौरीमपि हारमालाम् ॥ १३ ॥

(भा.दी.) हेमेति । (श्रीरामः) हेममयानि यान्यम्बुजानि तेषां शतेन रचितां निर्मिताम्, शुभाम्, सौरभे लोलाः लोलुपाः भृङ्गाः यस्यां सा तथा तां मालाम्, पवनेन वायुना दत्ताम्, चन्द्रस्य येंऽशवस्तद्वद् गौरीं श्वेताम्, हारमालामपि बभार ॥ १३ ॥

(सं.चं.) सौरभलोलाः सौरभास्वादचपलाः, सौरभास्वादार्थं लोलाः परितो भ्रमन्तः भृङ्गा भ्रमरा यस्याम् । 'लोलं चले लोलुपे च' इति यादवप्रकाशः । सोऽयं हेम्नः परमामोदः । हेमाम्बुजानां शतेन रचितां मालाम् । शुभां शोभ-मानाम् । पवनेन दत्तां बभार । अथच पवनेनैव दत्तां चन्द्रांशुगौरीं हारमालां मुक्तावळीमालामपि बभार । 'हारो मुक्तावली युद्धे' इति विश्वप्रकाशः । 'मालां ज्वलन्तीं वपुषा काञ्चनीं शतपुष्कराम् । राघवाय ददौ वायुर्वासवेन प्रचोदितः' (१३१.६८) इति, 'सर्वरत्नसमायुक्तं मणिरत्न-विभूषितम् । मुक्ताहारं नरेन्द्राय ददौ शक्रप्रचोदितः' (१३१.६९) इति च ॥ १३ ॥

गवां स लक्षाणि सुलक्षणानां[2] ददौ द्विजेभ्यो बहुलानि[3] देवः ।
त्रिंशच्च कोटीर्वरहाटकानां[4] कामांश्च सर्वान् परिपूर्णकामः ॥ १४ ॥

(भा.दी.) गवामिति । परिपूर्णः कामो यस्य स तथा देवः श्रीरामः सु शोभनानि लक्षणानि यासां तास्तथा तासां गवां बहुलानि लक्षाणि द्विजेभ्यः ददौ । दाञो लिट् । वराणि यानि हाटकानि सुवर्णानि तेषां त्रिंषत् कोटीश्च, सर्वान् कामान् कामितांश्च ददौ ॥ १४ ॥

(सं.चं.) गवां स लक्षाणि । 'सहस्रशतमश्वानां धेनूनां च गवां तथा । ददौ शतवृषान् पूर्वं द्विजेभ्यो मनुजर्षभः' (१२८.७३) इति । शतशब्दोऽत्र बहुत्ववचनः । अतो बहुलानि लक्षाणीत्याह । वरहाटकानां पुटपाके स्फुटितानां सुवर्णानां त्रिंशत्कोटीश्च द्विजेभ्यो ददौ । सर्वेषां सर्वांश्च कामितान् । 'त्रिंशत् कोटीर्हिरण्यस्य ब्राह्मणेभ्यो ददौ पुनः । नानाभरणवस्त्राणि माहार्हाणि च राघवः' (१३१.७३) इति च ॥ १४ ॥

---

१. **'–लोलभृङ्गीम्'**
२. **'सुलक्षणानि'**
३. **'बहळानि'**
४. **'वरहाटकानां उत्तमसुवर्णानाम्, स्वमुद्राङ्कितनिष्काणां वा'** इति का.श्री. ।

रत्नान्यनर्घ्याणि वराम्बराणि हारान् पराद्ध्र्यांश्च[१] विभूषणानि ।
ददौ स देवो जनकात्मजायै तेभ्यश्च कामान् कपिराक्षसेभ्यः ॥ १५ ॥

(भा.दी.) रत्नानीति । स देवः श्रीरामः, अनर्घ्याणि रत्नानि, वराम्बराणि च, पराध्र्यान् अत्युत्तमान् हारांश्च, विभूषणानि च, जनकात्मजायै सीतायै ददौ । तेभ्यः समागतेभ्यः, कपयश्च राक्षसाश्च तेभ्यः, कामान् (कामितांश्च) ददौ ॥ १५ ॥

(सं.चं.) मूल्यार्हमर्घ्यम् । अनर्घ्याणि अमूल्यानीत्यर्थः । पराद्ध्र्यान् श्रेष्ठान् मुक्ताहारान् । जनकात्मजायै ददौ । कपिभ्यश्च राक्षसेभ्यश्च कामितानर्थान् ददौ । 'मणिप्रवरजुष्टं च मुक्ताहारमनुत्तमम् । सीतायै प्रददौ रामश्चन्द्ररश्मिसमप्रभम् । अरजे वाससी दिव्ये शुभान्याभरणानि च' (१२८.७७–८) इति च । 'अर्करश्मिप्रतीकाशां काञ्चनीं मणिविग्रहाम् । सुग्रीवाय स्रजं दिव्यां प्रायच्छन्मनुजाधिपः । वैडूर्यमणिचित्रे च वज्ररत्नविभूषिते । वालिपुत्राय धृतिमानङ्गदायाङ्गदे ददौ' (१२८.७५–७) इति च । 'विभीषणोऽथ सुग्रीवो हनुमान् जाम्बवांस्तथा । सर्वे वानरमुख्याश्च रामेणाक्लिष्टकर्मणा । यथार्हं पूजिताः सर्वे कामै रत्नैश्च पुष्कलैः' (१३१.८३–४) इति च ॥ १५ ॥

विभूषणैस्तैश्च विभूषिताङ्गी[२] सीता वरिष्ठामथ[३] हारमालाम् ।
उन्मुच्य कण्ठादवलोकयन्ती ददर्श देवस्य मुखेन्दुबिम्बम् ॥ १६ ॥

(भा.दी.) विभूषणैरिति । अथ तैः श्रीरामदत्तैः, विभूषणानि आभरणानि तैः, विभूषितानि अङ्गानि अवयवा यस्याः सा तथोक्ता सीता, वरिष्ठां श्रेष्ठां हारमालाम्, कण्ठो ग्रीवा तस्मात् उन्मुच्य, अवलोकयन्ती मालां पश्यन्ती सती, देवस्य श्रीरामस्य मुखमेवेन्दुबिम्बं चन्द्रमण्डलं तत् ददर्श । दृशिर् प्रेक्षणे लिट् ॥ १६ ॥

(सं.चं.) पूर्वं भूषिताङ्ग्यपि तै रामदत्तैर्विभूषिणैश्च पुनर्विभूषिताङ्गी । मुक्तामालां कण्ठादुन्मुच्य तां पश्यन्ती रामस्य मुखेन्दुबिम्बं ददर्श ॥ १६ ॥

[४]मुहुर्म्मुखेन्दुं निजमीक्षमाणां मुहुश्च मुक्तास्रजमीक्षमाणाम् ।
शुचिस्मितां तां पतिरिङ्गितज्ञः पश्यन्नपाङ्गेन जगाद रामः ॥ १७ ॥

---

१. 'पराद्ध्र्यानि विभूषणानि'
२. '–स्तैः परिभूषिताङ्गी'
३. 'वरिष्ठा वरहारमालाम्'
४. 'मुहुर्मुकुन्दं निज–'

(भा.दी.) मुहुरिति । निजमात्मीयं मुखमेवेन्दुस्तम्, मुहुः ईक्षमाणां पश्यन्तीम्, मुक्तास्रजं च मौक्तिकमालां च मुहुः ईक्षमाणाम्, शुचि शोभनं स्मितं यस्याः सा तथा तां सीताम्, अपाङ्गो नेत्रान्तस्तेन पश्यन्, इङ्गितमभिप्रायं जानातीति तथोक्तः पतिर्भर्ता श्रीरामः जगाद ॥ १७ ॥

(सं.चं.) इङ्गितं अभिप्रायानुगुणा चेष्टा । तस्य भावज्ञः । अपाङ्गेन नेत्रान्तेन पश्यन् स्वयमपीङ्गितं दर्शयामास । ततः स्फुटं जगाद च ॥ १७ ॥

विद्याविशेषेषु विशिष्टमेकं सद्ब्रह्मचर्य्यादिषु वा गुणेषु[1] ।
यं मन्यसे धन्यतमं त्रिलोक्यां मुक्ताकलापं सति देहि तस्मै ॥ १८ ॥

(भा.दी.) विद्येति । सति पतिव्रते सीते, विद्यनां विशेषाः प्रभेदास्तेषु, विद्यानां विशेषा विषया येषां ते तथा तेषु पुरुषेष्विति वा, विशिष्टमुत्तमम्, सत् यद् ब्रह्मचर्यं समस्तेन्द्रियनिग्रहस्तदादिर्येषां ते तथा तेषु, 'ब्रह्मचर्यं बुधाः प्राहुः समस्तेन्द्रियसंयमम्' इति हलायुधः, गुणेषु धर्मेषु, एकं मुख्यम्, त्रिलोक्यां धन्यतमं पुरुषं यं मन्यसे जानासि । मन ज्ञाने लट् । तस्मै पुरुषाय मुक्ताकलापं मुक्ताकलापात्मकमाभरणम्, 'कलापो भूषणे बर्हे' इत्यमरः, देहि ॥ १८ ॥

(सं.चं.) विद्याविशेषेष्वितीन्द्रवज्रा । विद्यानां विशेषाः प्रभेदाः । चत्वारो वेदाः, पञ्चरात्रं भारतं मूलरामायणं पुराणजातं चेति चत्वारः पौरुषेया वेदाः, शीक्षादीनि स्मृतयश्च सप्ताङ्गानि, मीमांसात्रयमित्यष्टादश । तेषु एकमनन्यं असमानं विशिष्टमतिशयानं पाण्डित्ये, तथा सत् मनोवचःकायेषु शुद्धं ब्रह्मचर्यम्, तदादिषु गुणेषु च यमेकं विशिष्टमनितरसाधारणं मन्यसे । मुक्तामयं कलापमाभरणम् ॥ १८ ॥

अतिक्रमं यस्य पराक्रमाणां न कोऽपि कुर्य्यादुचितक्रमाणाम् ।
अतिक्रमी योऽन्यपराक्रमाणां तस्मै शुभे त्वं दिश वेतनार्थम् ॥ १९ ॥

(भा.दी.) अतीति । उचितः क्रमो येषां ते तथा तेषाम्, अवसरोचितानामित्यर्थः, यस्य पुंसः पराक्रमाणां सकाशात् अतिक्रम आधिक्यं तं वा, अतिलङ्घ्य वर्तनं वा, कोऽपि पुरुषः न कुर्यात् । यश्च अन्येषां ये पराक्रमास्तेषां अतिक्रमोऽस्यास्तीत्यतिक्रमी, अतिशयेन समर्थ इत्यर्थः, तस्मै पुरुषाय, शुभे सीते, त्वं हारमालाम्, वेतनार्थं कृतस्योपकारस्य प्रत्युपकारार्थम्, अनेन यश्चात्यन्तं सेवक इत्यपि सूचितम्, दिश देहि । दिशतेर्लोट् ॥ १९ ॥

---

१. 'सब्रह्मचर्यादिगुणेषु गूढम्'

(सं.चं.) अयोग्यदमनायैव पराक्रमः प्रकटनीयः, न योग्येषु– इत्ययमुचितः क्रमः । अस्थाने पराक्रमाप्रकटनमित्येतत् । वेतनार्थं कृतोपकारनिष्क्रियार्थम् । यद्यपि स नापेक्षते वेतनम् । नाप्यस्माभिर्भृतित्वेन दीयते । किन्तु कर्तव्यमेवेदं कृतज्ञतार्पणेन सन्तोषप्रकटनं नाम वेतनम् । वीयतेऽवगम्यतेऽनेन नः कार्तज्ञ्यमिति वेतनम् ॥ १९ ॥

मम प्रियं यं भुवनेषु वेत्थ तव प्रियो योऽस्मदुपासकेषु ।
सर्वेष्वसङ्गो मयि योऽतिसङ्गी सम्प्रीतिदेयं सति देहि तस्मै ॥ २० ॥

(भा.दी.) ममेति । हे सति सीते, भुवनानि जगन्ति तेषु, यं मम प्रियं वेत्थ जानासि । विद ज्ञाने लट् । आवयोरुपासका अस्मदुपासकास्तेषु च तव यः प्रियः, सर्वे ये साम्राज्यादयस्तेषु यः न विद्यते सङ्ग आसक्तिर्यस्य स तथा, यश्च मयि अत्यन्तं सङ्गः अतिसङ्गः अत्यासक्तिः सोऽस्यास्तीति तथा, तस्मै एवमादिगुणवते पुरुषाय सम्प्रीत्या देयं दातुमर्हं तत् हारभूषणं देहि ॥ २० ॥

(सं.चं.) तदेवोत्तरपद्ये स्फुटमाह– सम्प्रीतिदेयं सति देहि तस्मै ॥ २० ॥

एवं ब्रुवाणे जगदेकनाथे सीता हनूमन्तमवेक्ष्य हृष्टा ।
अनन्यलभ्यां स्वयमामुमोच तां हारमालामतुलां[1] तदंसे ॥ २१ ॥

(भा.दी.) एवमिति । जगदेकनाथे श्रीरामे एवं ब्रुवाणे सति, हनूमन्तं अवेक्ष्य, श्रीरामेणोक्तगुणवन्तमवेक्ष्य, हृष्टा सीता, अतुलाम्, अनन्यलभ्याम्, हनुमदन्येन प्राप्तुमयोग्याम्, तां गृहीतां हारमालां तस्य हनुमतो योंऽसस्तस्मिन् स्वयं आमुमोच मुक्तवती । मुच्लृधातोर्लिट् ॥ २१ ॥

(सं.चं.) आमुमोच आबबन्ध । 'आबद्धः पुनरामुक्तः' इति यादवप्रकाशः ॥ २१ ॥

सुधासुधारासितया तयाऽलं सुवर्ण्णवर्ण्णोऽथ [2]दधार शोभाम् ।
हारस्रजाऽसौ हनुमान् महात्मा यथा महामेरुरमर्त्त्यनद्या ॥ २२ ॥

(भा.दी.) सुधेति । अथ सुवर्णवद् वर्णो यस्य स तथा, महात्मा अत्युत्तमाधिकारी, असौ हनुमान्, सुधायाः या सुधारा तद्वत्सितया शुभ्रया, तया सीतानिक्षिप्तया हारस्रजा, महामेरुः अमर्त्यानां देवानां नद्या गङ्गया यथा तथा शोभां दधार । डु धाञ् धारणे लिट् ॥ २२ ॥

१. '–मालाममलाम्' २. '–वर्णोऽथ बभार'

(सं.चं.) सुधायाः सुधारा निरन्तरधारा। तद्वत् सितया तया हारस्रजा। सुवर्णवर्णो हनुमान्। यथा सुवर्णवर्णो हेमाद्रिः सुधासितया धवळगङ्गया ॥ २२ ॥

एषां गुणानामतिदुर्लभानां पात्रं प्रियोऽयं[१] ननु देवदेव्योः ।
ब्रह्मैव नूनं भगवान् हनूमानित्येव वाणी ववृधे[२] त्रिलोक्याम् ॥ २३ ॥

(भा.दी.) एषामिति। एषां श्रीरामोक्तानाम्, अत्यन्तं दुर्लभा अतिदुर्लभाः, तेषां गुणानाम्, पात्रं पात्रभूतः अयं हनूमान्, देवदेव्योः श्रीरामसीतयोः प्रियो ननु निरुपाधिकप्रीतिविषयो ननु । अतः भगवान् ब्रह्मैव भाविचतुर्मुख एव नूनम्। अन्यथोक्तनिरुपाधिकगुणानां श्रीरामसीतयोः एतादृशदयाविषयत्वस्यान्यस्मिन्न-सम्भवादिति भावः । इत्येवं वाणी वाक् त्रिलोक्यां ववृधे प्रसृताऽभूत् । वृधुधातोर्लिट् ॥ २३ ॥

(सं.चं.) एवं गुणानामितीन्द्रवज्रा । ब्रह्मैव भावी ॥ २३ ॥

स राजराजः परिराजमानो रामोऽथ राजीवसमाननेत्रः ।
महामहाः सर्वमहाजनानां मनोदृशामेष महोत्सवोऽभूत् ॥ २४ ॥

(भा.दी.) स इति। अथ राजराजः चक्रवर्ती, परिराजमानः परितः शोभमानः, राजीवस्य पद्मस्य समाने नेत्रे यस्य स तथोक्तः, महत् बहुलं महः तेजो यस्य स तथा, स एष श्रीरामः, सर्वे ये महान्तो जनाः देवर्ष्यादयस्तेषां मनांसि च दृशश्च तासां महोत्सवः महोत्सवरूपः अभूत् ॥ २४ ॥

(सं.चं.) परितः प्रभावळ्या राजमानः। राज्ञामपि राजा राजराजः सार्वभौमः। 'राजराजः कुबेरेऽपि सार्वभौमे सुधाकरे' इति विश्वप्रकाशः । महत् महः तेज उत्सवो वाऽस्येति महमहाः । 'महसी तेजउत्सवौ' इति यादवप्रकाशः । महाजनानामिति महत्त्वं योग्यतया सङ्ख्यया च । तेषां मनसां दृशां च ॥ २४ ॥

कीर्त्तिं वदाम तव तां शृणवाम राम
ध्यायाम राम चरणौ च भजाम राम ।
अर्चाम राम जय राम नमाम राम
दासा वयं सहचरास्तव राम क्लृप्ताः ॥ २५ ॥

---

१. 'प्रियो यो ननु'
२. 'ववृते त्रिलोक्याम्'

(भा.दी.) कीर्तिमिति । हे श्रीराम, वयं तव कीर्तिं वदाम । वदधातोर्लोट् । अनेन 'श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्' इत्युक्तनवविधभक्तिमध्ये विष्णूत्कर्षकीर्तन-लक्षणा भक्तिः दर्शिता । हे श्रीराम, तव तां कीर्तिं शृणवाम । श्रु श्रवणे । अनेन श्रवणलक्षणा भक्ति-र्दर्शिता । हे श्रीराम, ध्यायाम । ध्यै चिन्तायाम् । अनेन स्मरणलक्षणा भक्तिर्दर्शिता । श्रीराम (तव चरणौ) भजाम । भज सेवायाम् । (अनेन)पादसेवालक्षणभक्तिर्दर्शिता । हे श्रीराम अर्चाम । अर्चनलक्षणा भक्तिः दर्शिता । हे राम, जय । जी जये लोट् । हे श्रीराम नमाम । णमुधातोर्लोट् । आभ्यां वन्दनस्य स्तुति-नमस्काररूपत्वात् वन्दनरूपा भक्तिर्दर्शिता । हे राम, वयं तव दासाः स्मः । दास्यरूपा भक्तिर्दर्शिता । हे राम, तव सहचराः सखित्वेन प्रेष्याः । एतेन सख्यरूपा भक्तिर्दर्शिता । हे राम, तव क्लृप्ताः सङ्क्लृप्ताः समर्पिता इत्यर्थः । एतेन चाऽत्मनिवेदनरूपा भक्तिर्दर्शितेति द्रष्टव्यम् ॥ २५ ॥

(सं.चं.) अथ वसन्ततिलकया महाजनानां नवविधां भक्तिमाह–कीर्तिं वदाम तव । तां कीर्तिं शृण-वाम । इति श्रवणकीर्तने । तव चरणौ ध्यायाम भजाम । एतेन स्मरणं पादसेवनं चोक्ते । अर्चाम नमामेति स्फुटमर्चनं वन्दनं च । दासा वयं तवेति दास्यम् । वयं सहचरास्तवेति सख्यम् । अन्तर्मनसि गाढवेदनं क्लृप्तिः । तद्वन्तः क्लृप्ताः । तेनाऽत्मनि वेदनं नाम भक्तिरुक्ता ॥ २५ ॥

गदति जगति भद्रां भारतीमेवमेवं[1]
नवविधगुणभाजा काममेकान्तभक्त्या ।
अरमत परमश्रीरामया रामदेवः
स्वयमकृतकपूर्णानन्दसन्दोहदेहः ॥ २६ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायणे
युद्धकाण्डे षोडशः सर्ग्गः ॥

—०—

(भा.दी.) गदतीति । जगति सज्जनसमूहे, नवविधा ये गुणा श्रवणादिधर्माः, तान् भजतीति तथोक्ता तया, नवविधगुणोपेतयेत्यर्थः, एकान्तभक्त्या मुख्यभक्त्या, पुनरपि अनन्तवारम्,[2] एवमेवं 'कीर्तिं वदाम'

१. **'–मेवमेनाम्'**

२. 'मूले **'पुनरपि'** इति पदं न पठ्यते । **'कामम्'** इत्यस्यैव विवरणं स्यात् । मूले पदान्तरं वा टीकाभिमतं स्यात् ।

इत्यादिपूर्वोक्तप्रकारेणैव, भद्रां शोभनां भारतीं वाचं गदति व्यक्तं वदति सति, श्रीरामदेवः अकृतकः स्वाभाविकः पूर्णो यः आनन्दानां सन्दोहः समूहः, स एव देहो यस्य स तथोक्तः, तथाभूतोऽपि, परमा उत्तमा या श्रीनामिका रामा स्त्री तया, सीतयेत्यर्थः, सह, परमः सर्वोत्तमः इति विशेषणं वा, अरमत क्रीडामकरोत् । रमु क्रीडायां लङ् । स्वयं परिपूर्णानन्ददेहोऽपि श्रीमहालक्ष्मीस्वरूपसीतायां परमानुग्रहं कर्तुं लीलया सीतया सहारमतेति भावः ॥ २६ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायां युद्धकाण्डे षोडशः सर्गः ॥

—०—

(सं.चं.) अथ मालिन्या सर्गमुपसंहरति– गदतीति । 'श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वन्दनं दास्यं सख्यमात्मनि वेदनम्' इत्युक्तान् नवविधान् गुणान् भजतीति तया एकान्तभक्त्या अनन्यभक्त्या जगति सज्जनलोके कामं यथेच्छम्, एवमेवमित्याम्रेडनं वीप्सार्थे, गदति सति । स्वयं स्वत एवान्यनिरपेक्षं सहजपूर्णानन्दसन्दोहदेहोऽपि रामदेवः परमा श्रीरूपा रामा रमणी तयाऽरमत । 'परमः श्रीरामः' इत्यपि शक्यं पदपाठः कर्तुम् । तदा 'खर्परे शरि वा लोपो वक्तव्यः' इति वार्तिकेन (अ.सू.८.३.३६) वैकल्पिको विसर्गलोपः ॥ २६ ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायां युद्धकाण्डे षोडशसर्गविवरणम् ॥


—०—

इति युद्धकाण्डं समाप्तम्

[आदितः श्लोकाः– ३०७८+२६=३१०४]

[युद्धकाण्डे श्लोकाः– ८६६]

उत्तर-काण्डम् : ७



प्रथमः सर्ग्गः

श्रिया सह[1] श्रीरमणं निषण्णमगस्त्यमुख्या मुनयः सभायाम् ।
उपासतोपासि[2]तमात्मभक्तैर्हर्षेण हंसाइव दुग्धसिन्धुम् ॥ १ ॥

(भा.दी.) श्रीरामेण सीतया सह सिंहासने राजमाने सति तत्सेवार्थमागतानामगस्त्यादिमुनीनां श्रीरामस्य च सम्प्रवृत्तं प्रसङ्गं वक्तुमुपक्रमते–**श्रियेत्या**दिना । अगस्त्यो मुख्यः श्रेष्ठः येषां ते तथा मुनयः सभायां श्रिया श्रीस्वरूपया[3] सीतया सह निषण्णम्,[4] आत्मनः स्वस्य ये भक्ता हनुमदादयस्तैः (हर्षेण) उपासितं सेवितम्, श्रीरमणं श्रीभर्तारं श्रीरामम्, दुग्धमयो यः सिन्धुस्तम्, क्षीरसमुद्रमित्यर्थः, हंसाइव हंसपक्षिणइव उपासत उपास्तिं चक्रुः । आस उपवेशने लङ् ॥ १ ॥

(सं.चं.) अथोपजातिप्रचुरैः पद्यैः प्रथमं सर्गमारभते । श्रिया सह सभायां निषण्णम् । उप समीपे आसत उपाविशन् । उपासत असेवन्तेति वा । आत्मभक्तैः हनुमदादिभिर्लक्ष्मणादिभिश्च हर्षेण उपासितं सेवितम् । हर्षेणोपासतेति वा ॥ १ ॥

अभ्यर्चितोऽभ्यर्थितदेन भूम्ना शृण्वत्सु सर्वेषु स कुम्भयोनिः ।
मा शब्द इत्यायति वेत्रपाणावुदाहरद् वाचमुदारभावाम् ॥ २ ॥

(भा.दी.) अभ्यर्चित इति । अभ्यर्थितमभीष्टं ददातीति तथोक्तस्तेन, भूम्ना परिपूर्णेन श्रीरामेण, अनेनागस्त्यार्चनादिकं लोकशिक्षार्थमिति दर्शितम्, अभ्यर्चितः सः कुम्भयोनिः अगस्त्यः, सर्वेषु जनेषु शृण्वत्सु सत्सु, वेत्रं पाणौ यस्य स तस्मिन् पुरुषे, शब्दः मा माऽस्त्विति उक्त्वा आयति सति, आगत्य वार-यित्वा स्थिते सति, उदारो उत्कृष्टो भावो यस्याः सा तथा ताम्, उत्तमाभिप्रायामित्यर्थः, वाचं उदाहरत् उवाच । हृञो लङ् ॥ २ ॥

---

१. 'श्रिया समं श्री–' २. 'उपासतोपाश्रित–' ३. 'श्रीरूपया' ४ . 'समं निषण्णम्'

(सं.चं.) अभ्यर्थितदेन भूम्ना रामेण। कुम्भयोनिरगस्त्यः उदारभावां महार्थगर्भितां वाचं व्याजहार। वेत्रपाणौ द्वारपाले मा शब्द इति उद्घोष्य सभास्थानं प्रत्यागच्छति सति । 'दौवारिको वेत्रधरः' इति यादवप्रकाशः॥ २ ॥

[१]स्वस्त्यस्तु सद्भ्यो भवतः प्रसादाद् राजन् सुराजन् रघुवंशदीप ।
कीर्त्तिं च ते[२] कीर्त्तयितुं प्रभुः स्याच्छ्रीमान् हनूमांश्चतुराननो वा॥ ३ ॥

(भा.दी.) स्वस्तीति। रघोर्यो वंशस्तस्य दीप इव दीपस्तत्सम्बुद्धिः, रघुवंशदीपकेत्यर्थः, सुष्ठु राजते प्रकाशते इति सुराजा तत्सम्बुद्धिः । 'न पूजनात्'(अ.सू.५.४.६९) इति निषेधात् समासान्तविध्यभावः । राजन् श्रीराम, भवतो यः प्रसादस्तस्मात्, विश्वं जगत्तस्य स्वस्ति मङ्गळं अस्तु[१] । ते तव कीर्तिं कीर्तयितुं सम्यग् वर्णयितुं (श्रीमान्) श्रिया कान्त्या नित्ययुक्तः हनूमान् प्रभुः स्यात् । चतुराननो वा ब्रह्मा वा प्रभुः समर्थः स्याद्धि । नान्य इत्यर्थः ॥ ३ ॥

(सं.चं.) स्वस्त्यस्त्वितीन्द्रवज्रा । सद्भ्यः स्वस्ति क्षेममस्तु । 'नमःस्वस्ति-'(अ.सू.२.३.१६) इति चतुर्थी। राजन् प्रभो, जनानामनुरञ्जयितः। सुराजन् पूजार्ह क्षत्रिय। 'राजाहःसखिभ्यष्टच्' (अ.सू.५.४.९१) इति विहितस्य समासान्तस्य टच्प्रत्ययस्य 'न पूजनात्' (अ.सू.५.४.६९) इति स्वतियोगे निषेधात् । श्रीमान् वेदरहस्यज्ञः । 'ऋचो यजूंषि सामानि । सा हि श्रीरमृता सताम्' इत्युक्तेः ॥ ३ ॥

सुमालिमालिप्रमुखान् सुरारीन् नारायणात्मैव निराचकर्थ ।
रामाधुना रावणमुग्रवीर्य्यं हत्वा त्वमाश्वासयसीह[३] विश्वम् ॥ ४ ॥

(भा.दी.) सुमालीति । हे राम, त्वं नारायण इति आत्मा स्वरूपं यस्य स तथा सन्नेव, मूलरूपेणैवेत्यर्थः । सुमाली च माली च तौ प्रमुखौ प्रधानौ येषां ते तथा तान् सुरारीन् राक्षसान् निराचकर्थ निराकृतवानभूः । कृञो लिट् । अधुना इह भुवि, उग्रं वीर्यं यस्य स तथा तं रावणं हत्वा, विश्वं जगत् आश्वासयसि उज्जीवयसि । श्वस प्राणने लट् ॥ ४ ॥

(सं.चं.) आश्वासयसि समाधत्से, जीवनोत्साहयुक्तं करोषीत्यर्थः ॥ ४ ॥

---

१. **'स्वस्त्यस्तु विश्वस्य भवत्प्रसादात्'** इति वि.ती.पाठः स्यात्। अथापि स्वस्तियोगे कथं षष्ठीति चिन्त्यम्। **'भवतः प्रसादात् सद्भ्यः सज्जनेभ्यः शुभं मङ्गलमस्तु भवतु। ते तव कीर्तिं कीर्तयितुं वर्णयितुं भवतः प्रसादात् चतुराननः चतुर्मुखः प्रभुः समर्थः स्यात्। श्रीमान् कान्तियुक्तः अणिमाद्यैश्वर्ययुक्तः हनुमांश्च प्रभुः स्यात्। न वयं समर्था इति भावः'** इति का.श्री. ।

२. **'कीर्तिं हि ते'** इति वि.ती.पाठः स्यात्।

३. **'–श्वासयसीश विश्वम्'** । **'हे ईश परमसमर्थ'** इति का.श्री. ।

विना जगन्नाथमनन्यनाथं त्वां राक्षसानां क्षयकृत् क एव ।
सहस्रभानुं न विना हि भानुं भवेत् क्वचित् सन्तमसस्य हन्ता ॥ ५ ॥

(भा.दी.) विनेति । न विद्यते अन्यो नाथो यस्य स तथा तम्, सर्वाधीश्वरमित्यर्थः, जगन्नाथं त्वां विना राक्षसानां रावणादीनां क्षयकृत् क एव? न कोऽपि । सहस्रं भानवः किरणा यस्य स तथा तं (भानुं) सूर्यं विना, क्वचिद्देशे काले वा सन्तमसस्य अन्धकारस्य हन्ता विनाशकः न भवेद्धि ॥ ५ ॥

(सं.चं.) अनन्यं नाथम् । नाथान्तररहितं च । सहस्रांशुमादित्यं विना कश्चिदन्यः सन्तमसस्य हन्ता नहि भवेत् । 'अवसमन्धेभ्यस्तमसः' (अ.सू.५.४.७९) इति तमःशब्दस्य समासान्तोऽच् ॥ ५ ॥

जाता हि देवास्तव सेवनार्थममी च सर्वे नरवानरेन्द्राः[१] ।
पुंसां भवत्सेवनमेव कृत्यं यतः समग्रः पुरुषार्थसार्थः ॥ ६ ॥

(भा.दी.) जाता इति । यतः भवत्सेवनात् समग्रः सर्वः पुरुषार्थानां धर्मादीनां सार्थः समूहः, 'वृन्दभेदाः समैर्वर्गः सङ्घसार्थौ तु जन्तुभिः' इत्यमरः, भवति, तद् भवत्सेवनमेव पुंसां पुरुषाणां कृत्यम् अवश्यं कार्यम् । तस्माद् देवाः तव सेवनार्थं अमी (सर्वे च) नरवानरेन्द्राः जाताः उत्पन्नाः (हि) ॥ ६ ॥

(सं.चं.) नरेन्द्राः वानरेन्द्राश्च सन्तः । नरेन्द्रा भ्रातृतया । यतः भवत्सेवनात् समग्रः पुरुषार्थसार्थः पुरुषार्थवर्गः तस्मात् पुंसां भवत्सेवनमेव परमं कृत्यम् । यद्यपि 'सङ्घसार्थौ तु जन्तूनां वर्गस्तु सदृशां गणे' इत्यभिदधति । अथापि विशेषवचनं सामान्यवचनं चैतत् । सुशब्दात् तथाहि मेदिनी –'सार्थो वणिक्समूहे स्यादपि सङ्घातमात्रके' इति च । भागुरिश्च–'सङ्घसङ्घातपुञ्जौघसार्थयूथकदम्बकाः' इति ॥ ६ ॥

इति ब्रुवाणं विविधाः कथाश्च[२] मुनिं मुनीन्द्रैः सहितं मुकुन्दः ।
यज्ञाय यज्ञाधिपतिर्निमन्त्र्य सम्पूज्य पूज्यं विससर्ज्ज हृष्टम् ॥ ७ ॥

(भा.दी.) इतीति । इति वाचः विविधाः कथाश्च ब्रुवाणम्, मुनीन्द्रैः सहितं मुनिं अगस्त्यम्, यज्ञाधिपतिः मुकुन्दः श्रीरामः, यज्ञोऽश्वमेधस्तस्मै (निमन्त्र्य), यज्ञकरणसमये आगन्तव्यमित्यामन्त्रणं कृत्वा, पूज्यं हृष्टं अगस्त्यं सम्पूज्य, विससर्ज आश्रमं प्रति गन्तुमनुजज्ञे ॥ ७ ॥

---

१. **'नराः लक्ष्मणभरतशत्रुघ्नाः, वानरेन्द्राः हनुमदादयः'** इति का.श्री. ।

२. **'विविधाश्च वाचो मुनिम्'** इत्यपि वि.ती.पाठः स्यात् । क्वचित् कोशेषु च ।

(सं.चं.) विविधाः कथाश्च हनुमदादिरावणादिजन्मविषया ब्रुवाणम् । करिष्यमाणाय यज्ञाय ॥ ७ ॥

सम्प्रेष्य[1] नम्रान् नरवानरेन्द्रान् पौरान्[2] प्रभुर्वैषयिकांश्च सर्वान् ।
सूर्य्येऽस्तमायाति स लोकनाथः सन्ध्यामवन्ध्यां सुधियामुपास्त ॥ ८ ॥

(भा.दी.) मुमोचेति[3] । सः लोकनाथः, नम्रान् भक्तिनम्रान् नरवानरेन्द्रान्, पौरान् जनान्, कोसलकेकयादिविषयेषु भवा वैषयिकास्तांश्च सर्वान् सम्प्रेष्य, सूर्ये अस्तो गिरिस्तं आयाति सति, शोभना धीर्येषां ते तथा तेषां नृणां सत्पुरुषाणां अवन्ध्यां सफलां सन्ध्यां उपास्त । लोकधर्मशिक्षार्थमुपासितवान् । आस उपवेशने लङ् ॥ ८ ॥

(सं.चं.) पौरानयोध्यावासिनः । वैषयिकान् नानादेशेभ्यः आगतांश्च । सम्प्रेष्य सम्मानपूर्वकं प्रेष्य । प्रपूर्वस्य 'इष गतौ' इत्यस्य णिचि रूपम् –प्रेषयति । 'एषृ गतौ' इत्यस्य वा । 'प्रेषृ गतौ' इत्येव धात्वन्तरं च केचित् पठन्ति । सान्ध्यं कर्म सन्ध्याशब्देनोच्यते । सन्ध्यादेवतां गायत्रीं वा । सुधियां ज्ञानिनामवन्ध्याम्, 'कर्मणा ज्ञानमातनोति' इत्यमृतसोपानत्वात् । लोकशिक्षाया उपास्त । लोकनाथो हि सः ॥ ८ ॥

प्रविश्य चान्तःपुरमम्बुजाक्षः पुरन्दरान्तःपुरकान्तिहारि ।
अन्नानि पीयूषमयानि[4] भुक्त्वा विवेश शय्याशरणं शरण्यः ॥ ९ ॥

(भा.दी.) प्रविश्येति । अम्बुजाक्षः, शरण्यः शरणार्हः श्रीरामः, पुरन्दरस्य यदन्तःपुरं तस्य या कान्तिस्तां हरतीति तथोक्तं तत्, अन्तःपुरं प्रविश्य, पीयूषमयानि अमृतकल्पानि अन्नानि भुक्त्वा, शय्यायाः पर्यङ्कस्य शरणं गृहम्, शयनमन्दिरमित्यर्थः, विवेश । विशतेर्लिट् ॥ ९ ॥

(सं.चं.) पीयूषमयानि अमृतस्वरूपाणि । आरोग्यकराणि अमृततुल्यानीत्याशयः । नक्तं न दधिभोजनं प्रशस्तमिति क्षीरमयान्यन्नानि वा । 'नवसूतगवीदुग्धे पीयूषममृतेऽपि च' इति यादवप्रकाशः । शय्याशरणं शयनगृहम् ॥ ९ ॥

तल्पं पयःफेननिभं पवित्रं विष्वङ्मणिश्रेणिघृणिप्रदीप्तम् ।
सीतापतिः कोमलमध्यशेत भोगीन्द्रभोगं भगवानिवाथ ॥ १० ॥

---

१. **'मुमोच नम्रान्'** २. **'पौरान् जनान् वैषयिकांश्च'** इति वि.ती.पाठः ।

३. सम्पातायातमिदम् । **'सम्प्रेष्येति'** वक्तव्यम् । **'मुमोच'** इत्यस्याव्याख्यानात् । **'सम्प्रेष्य'** इति प्रतीकग्रहणपूर्वकं व्याख्यानाच्च ।

४. **'पीयूषमयानि क्षीरयुक्तानि अन्नानि भुक्त्वा'** इति का.श्री. ।

(भा.दी.) तल्पमिति । अथ सीतापतिः श्रीरामः, पयसो यः फेनस्तस्य निभं समानं तत्, अतिनिर्मलं मृदु चेत्यर्थः, पवित्रम्, विष्वक् परितो या मणीनां श्रेणयः, तासां ये घृणयः किरणाः, तैः प्रदीप्तं प्रकाशितं तत्, कोमलं तल्पम्, भोगीन्द्रस्य शेषस्य यो भोगः शरीरं तं भगवानिव श्रीनारायण इव अध्यशेत विश्रमणं चक्रे । अधिपूर्वः शीङ् स्वप्ने लङ् । अधिपूर्वत्वादेवाऽधारकर्मकसञ्ज्ञाया द्वितीया ॥ १० ॥

(सं.चं.) तल्पमितीन्द्रवज्रा । 'तल्पं शय्याट्टजायासु' इति यादवप्रकाशः । तल्पो वा । पयसः फेनो बुद्बुदः । '**ಹಾಲ**' इति भाषायाम् । मणिश्रेणीनां घृणिभिर्गभस्तिभिः प्रकर्षेण द्योतमानम् । कोमलं तल्पमध्यशेत । 'अधिशीङ्स्थासां कर्म' (अ.सू.१.४.४६) इति द्वितीया । भोगीन्द्रभोगोऽपि पयःफेननिभः, पवित्रः, कोमलः, फणासु मणिश्रेणिघृणिप्रदीप्तश्च ॥ १० ॥

तं नित्यमुक्तं निबबन्ध दोर्भ्यामरञ्जयन्नीरजसं सदैव[1] ।
स्वाराममेवारमयच्च रामं सीता विरुद्धा न तथाऽपि जातु ॥ ११ ॥

(भा.दी.) तमिति । सीता नित्यमुक्तं तं श्रीरामं दोषौ हस्तौ ताभ्यां निबबन्ध । बन्ध बन्धने लिट् । निर्गतं रजः रजोगुणोपलक्षितगुणत्रयं यस्मात् स तथा तं श्रीरामं अरञ्जयत् रागयुक्तमकरोत्[2] । रञ्ज रागे लङ् । स्वेन स्वरूपभूतानन्देन आरमत इति स्वारामस्तं श्रीरामम्, स्वैः स्वकीयैः रूपैः आरमत इति वा, तं अरमयच्च । रमु क्रीडायां लङ् । सीता, तथाऽपि नित्यमुक्तत्वादिधर्मवतो बन्धनादिकरणेऽपि, विरुद्धा श्रीराम-चिन्ताननुकूला जातु कदाचिदपि न बभूव । अनाद्यनन्तकालेऽपि तदिच्छानुसारेण प्रवर्तनादिति भावः ॥११॥

(सं.चं.) निरस्तरजसमरञ्जयत् । स्वयमेवाऽरमते, नान्यत इति स्वारामः । तादृशमपि अरमयत् । अथापि न विरुद्धता क्वापि दम्पत्योः ॥ ११ ॥

रामाभिषेकोत्सवमुत्सुकानां प्रशंसतामप्यभिनन्दतां[3] च ।
सा शर्वरी [4]सर्वमहाजनानामानन्दसन्दोहकरी बभूव ॥ १२ ॥

---

१. '**–रजसं तथैव**' २. '**अरञ्जयत् स्वस्यां रागयुक्तमिवाकरोत्**'

३. '**प्रशंसतामभ्यनन्दतां च**' इत्यपि केचित् पठन्ति । '**प्रशंसतां रामाभिषेकस्तुतिं कुर्वतम् । अभि अधिकं अभिनन्दतां च स्वत एव हर्षयुक्ता-नामपि । नद हर्षे । सम्पत्समृद्धियुक्तानामिति वा । टु नदि समृद्धौ**' इति का.श्री. । असमञ्जसः पाठश्चार्थश्च । '**अध्यभिनन्दतां च**' इति तदभिमतः पाठः स्यादिति भाति । ४. '**सर्वजगज्जनाना–**'

(भा.दी.) रामेति । श्रीरामस्य योऽभिषेकाख्य उत्सवस्तम्, उत्सुकानां आकाङ्क्षमाणानाम्, प्रशंसतां अभिषेकोत्सवं संस्तुवतामपि, अभिनन्दतां च तद्दृष्ट्वा सन्तुष्यतां च, सर्वे ये महाजनास्तेषां सा शर्वरी अभिषेकदिवसरात्रिः आनन्दानां सन्दोहः समूहस्तं करोतीति तथोक्ता बभूव ॥ १२ ॥

(सं.चं.) रामगुणानुसन्धाने उत्सुकानामत एव रामाभिषेकोत्सवं प्रशंसतामभिनन्दतां च । गुणवर्णनं प्रशंसा, सन्तोषाविष्करणमभिनन्दनम् । प्रीतिप्रकटनं वा । सर्वसज्जनानाम् ॥ १२ ॥

स्निग्धस्वराः पीडितपञ्चमाख्याः[१] षड्जस्वरं[२] भिन्नकतां नयन्तः ।
विनर्षभाख्यं पुरुषर्षभस्य[३] ववन्दिरे बन्दिगणाः पुरान्ते ॥ १३ ॥

(भा.दी.) स्निग्धेति । स्निग्धो मनोहरः स्वरो येषां ते तथा । स्निग्धत्वं नाम कण्ठगुणः, स्निग्धः अशुष्कः अरूक्षः, आर्द्रीभाववानित्यर्थः । स्वरास्तावत् सप्त प्रसिद्धाः षड्ज ऋषभो गान्धारो मध्यमः पञ्चमो धैवतो निषादश्चेति । 'षड्जं मयूरा ब्रुवते गावस्त्वृषभभाषिणः । अजाविकं तु गान्धारं क्रौञ्चः क्वणति मध्यमम् । पुष्पसाधारणे काले पिकः कूजति पञ्चमम् । धैवतं हेषते वाजी निषादं ब्रुवते गजाः' । तन्मध्ये पिण्डितः अल्पीकृतः पञ्चमाख्यः स्वरो यैस्ते तथोक्ताः । सम्पूर्णपञ्चमाख्यस्वरोच्चारणस्योषःकालानर्हत्वात् पञ्चमस्वरमल्पप्रयोगवन्तं कुर्वन्त इत्यर्थः । अत्र श्रुतिसमधिकत्वेनेत्यपि ग्राह्यम् । तत्र कथं पञ्चमस्य श्रुतिसमधिकत्वम्? इत्थम्– 'षड्जश्चतुःश्रुतिर्ज्ञेय ऋषभस्त्रिश्रुतिः स्मृतः । द्विश्रुतिश्चापि गान्धारो मध्यमश्च चतुःश्रुतिः । चतुःश्रुतिः पञ्चमः स्यात् धैवतस्त्रिश्रुतिः स्मृतः । निषादो द्विश्रुतिश्चैव षड्जग्रामः स्वरान्तरम्' इति । तत्र यद्यपि षड्जमध्यमाभ्यां समानश्रुतित्वं पञ्चमस्य । तथाऽपि ऋषभगान्धारधैवतनिषादापेक्षया श्रुतिसमधिकत्वम् । ततादिवाद्यविशेषेण सहिततयेत्यपि ग्राह्यम् । चतुर्विधं तावद् वाद्यम् । ततमानद्धं घनं सुषिरमिति । ततं वीणादि । आनद्धं मुरजादि । घनं कांस्यताळादि । सुषिरं वंशादि । तत्र ततादियुक्तं गायन्त इत्यर्थः । षड्जस्वरं षड्जनामकं स्वरविशेषं भिन्नकतां स्वरूपमात्रेणावस्थिततां नयन्तः प्रापयन्तः । तत्रायं प्रभेदः– त्रिप्रकारस्तावत् षड्जस्वरः । ऋषभरूपः पञ्चमरूपः स्वात्मरूपश्चेति । तत्र ऋषभरूपं पञ्चमरूपं च पृथक्कृत्याऽत्मरूपेणावस्थितः षड्जो भिन्नक इत्युच्यते । षड्जं भिन्नकं कृत्वा षड्जानुषक्तावप्यृषभपञ्चमौ

१. **'पिण्डितपञ्चमाख्याः'** इति वि.ती.पाठः स्यात् । २. **'षड्जं स्वरम्'**

५. अत्र वि.ती.पाठः न स्फुटः । व्याख्याने च पाठसङ्कीर्णता दृश्यते । विद्याभूषणतीर्थीयस्य समग्राऽक्षरशोऽनुकृतिरियम् । वि.भू.तीर्थीयमप्यस्फुट-पाठम् । 'ववन्दिरेऽकाकितयर्षभाख्यं स्वरं विना वन्दिगणाः पुरान्ते' इति तु सम्भावितः पाठः स्यात् । **'पुरुषर्षभस्य'** इति पदस्य टीकयोरुभयोरप्यव्याख्यानं च स्फुटमिह पाठान्तरमवगमयति । प्रचलितस्तु पाठः काशीश्रीनि. टीकानुगुणः । तत्र **'पुरुषर्षभस्य पुरुषश्रेष्ठस्य रामस्य'** इति प्रतीकग्रहणेन व्याख्यनात् ।

त्यक्त्वा स्वात्मरूपेण षड्जं प्रयुञ्जाना इत्यर्थः । न विद्यते काकिः कण्ठदोषो यस्य स तथा तस्य भावस्तत्ता तया[१] । श्रावकादिगुणयुक्तत्वेन चेत्यपि ग्राह्यम् । 'श्रावकः कण्ठजो गुणः । यो दूराच्छ्रावयत्यन्ये त्वन्वर्था मधुरादयः । काकीत्याद्याः कण्ठदोषास्तत्र काकी नृलिङ्गकः' इति वैजयन्ती । ऋषभ इति आख्या यस्य स तथा तं स्वरं विना त्यक्त्वा । अरुणोदयकाले ऋषभाख्यस्वरविशेषेण गानं कर्तुमनुचितत्वात् तं वर्जयित्वेत्यर्थः । वन्दिगणाः स्तुतिपाठकानां समूहाः, पुरस्य अन्तं मध्यं तस्मिन्, अन्तःपुर इत्यर्थः, ववन्दिरे । वदि अभिवादनस्तुत्योर्लिट् ॥ १३ ॥

(सं.चं.) स्निग्धः मधुरः । यत्र श्रोतुर्मनः स्निह्यत् पुनःपुनः शुश्रूषति । पीडितः नियन्त्रितः पञ्चमाख्यः स्वरो यैः । 'पीडितं बाधिते स्त्रीणां करणे चापि यन्त्रिते' इति विश्वप्रकाशः । पिण्डितपञ्चमाख्या इति पाठेऽप्ययमेवार्थः । 'पिण्डितं गणिते सान्द्रे' इति च । षड्जस्वरं भिन्नकतां अमिश्रिततां शुद्धषड्जतामित्यर्थः । ऋषभं विना । सम्प्रत्यपि सुप्रभातादिश्लोकं कर्णाटकभूपाळिरागे विनर्षभमेव गायन्ति । पुरुषर्षभस्य वन्दिगणाः । वन्दिनः स्तुतिपाठकाः । ववन्दिरे गायन्तस्तुष्टुवुः । 'पुरान्ते अन्तःपुरे' इति व्याचक्षते । 'प्रभाते' इति तु वक्तव्यम् । 'निशान्ते' इति वा । अतः 'ववन्दिरे वन्दिगणाः प्रभाते' इति, '–निशान्ते' इति वा मूलपाठः स्यादिति भाति ॥ १३ ॥

द्विजाः प्रबुद्धा विरळोऽन्धकारो विधुर्विधामा कुमुदं मुदाऽस्तम् ।
विकासमर्हत्यधुनाऽर्हणीयं नवाम्बुजं त्वन्नयनाम्बुजं च ॥ १४ ॥

(भा.दी.) स्तुतिप्रकारमेव दर्शयति–**द्विजा** इत्यादिना । द्विजाः पक्षिणो ब्राह्मणा वा प्रबुद्धाः प्रबोधं प्राप्ताः । अन्धकारः विरळः शिथिलः, विनष्ट इत्यर्थः । विधुश्चन्द्रः, विगतं धाम तेजो यस्य स तथा अभवत् । कुमुदं कुमुदकुसुममपि मुदा विकासेन अस्तं निरस्तम्, मुकुळितमभूदित्यर्थः । हे राजन् श्रीराम, अधुना नवं नूतनं यदम्बुजं तत्, अर्हणीयं श्लाघनीयं तव नयनलक्षणं यदम्बुजं कमलं तच्च, विकासः उन्मीलनं तं प्राप्तुमर्हति योग्यं भवति । अर्ह पूजायां लट् । प्रबोधार्थं समयः प्राप्त इत्यर्थः ॥ १४ ॥

(सं.चं.) द्विजाः प्रबुद्धा इत्युपेन्द्रवज्रा । किमिति तुष्टुवुः? आह– द्विजाः प्रबुद्धाः । द्विजाः पक्षिणः प्रबुद्धाः कलं गायन्ति । द्विजा विप्राः प्रबुद्धा मन्त्रान् पठन्ति । विधुर्विधामा विगतरश्मिः विगतप्रभावश्च जातः ।

१. साम्प्रतमुपलब्धपाठे नेदं विग्रहवाक्यमिहापेक्षितम् । **'अकाकितया'** इति पदस्य मूलेऽश्रवणात् । तस्मात् **'अकाकितया'** इति पदघटितं पाठान्तरं स्यादित्युक्तम् ।

'धाम देहे गृहे रश्मौ स्थाने जन्मप्रभावयोः' इति विश्वप्रकाशः । मुदाऽस्तं निरस्तमोदं निमीलितमित्यर्थः । अर्हणीयं पूजार्हं प्रशंसनीयं वा ॥ १४ ॥

भजत्यपास्यत्यपि रागलीलां चक्राङ्गनोषस्यथ कौशिकी च ।
यथा तवोरुक्रम विक्रमान्ते स्वःसुन्दरी चासुरसुन्दरी च ॥ १५ ॥

(भा.दी.) भजतीति । उरवः क्रमाः पादविन्यासाः यस्य स तथा तत्सम्बुद्धिः, श्रीराम, तव विक्रमस्य पराक्रमस्यान्तोऽवसानं तस्मिन्, त्वयाऽसुराणां हनने क्रियमाण इत्यर्थः, स्वः स्वर्गस्य सुन्दरी देवस्त्रीत्यर्थः, असुरसुन्दरी च, यथा रागलीलां कर्तव्यानुरागेण लीलां भजति, अपास्यति त्यजति च, तथा चक्राङ्गना चक्रवाकपक्षिस्त्री उषसि रागलीलां भर्तर्यनुरागेण क्रीडां भजति । भज सेवायां लट् । चक्रवाकस्त्रीणां दिवा प्रबोधवत्त्वादिति भावः । कौशिकी उलूकी (रागलीलामपास्यति) दिवान्धत्वादिति भावः । असु क्षेपणे लट् ॥ १५ ॥

(सं.चं.) चक्राङ्गना चक्रवाकी चक्रवाकेण सह रागलीलां प्रणयलीलां भजति । रात्रिविरहा दिवाप्रणयाश्च हि चक्रवाकाः । कौशिकी उलूकी, **'ഔ൦ൾ'** इति भाषायाम् । रागलीलां अपास्यति जहाति दिवान्धत्वात् । स यथा – हे उरुक्रम रामचन्द्र । विष्णोरसाधारणं नामेदम् । 'शं नो विष्णुरुरुक्रमः' इति श्रुतिः । तव राक्षससंहाराख्यस्य विक्रमस्यान्ते स्वःसुन्दरी, समुदायैकवचनम्, रागेण वीक्षा-जनितेन रसमयेन अनुरागेण वा लीलां सन्तोषसूचनीं नाट्यलीलाम्, शृङ्गारलीलां वा बभाज । असुरनारीगणश्च भीत्या स्त्रीसहजां शृङ्गारलीलामपास ॥ १५ ॥

उन्मोच्य[१] रम्यं पतिबाहुबन्धं पतिव्रताः पत्युरुपेत्य पादम् ।
श्रीरामरामेति कलं वदन्त्यः कुर्वन्ति सुप्रातमिमाः[२] प्रजानाम् ॥ १६ ॥

(भा.दी.) उदिति । इमाः अयोध्यायां विद्यमानाः, पतिव्रताः स्त्रियः, रम्यं पत्युर्यो बाहुभ्यां बन्धस्तम्, पत्यालिङ्गनमित्यर्थः, उन्मोच्य मोचयित्वा, उन्मुच्येति पाठे पतिबाहुबन्धं स्वयं मुक्त्वेत्यर्थः, पत्युः पादश्चरणस्तं उपेत्य, भर्तृपादपार्श्वेऽवस्थिताः सत्य इत्यर्थः, श्रीराम राम इति कलमव्यक्तमधुरं यथा भवति तथा वदन्त्यः सत्यः, प्रजानां दिनं (सुप्रातं) सु शोभनं प्रातर्यस्य तत्तथोक्तं तत्, 'सुप्रातसुश्वसुदिव–' इत्यादिना निपातनात् साधुः, कुर्वन्ति ॥ १६ ॥

---

१. **'उन्मुच्य'** २. **'सुप्रातरिमाः'** इत्यशुद्धः पाठः । **'प्रातरित्येतत् रेफान्तमव्ययम् । तदेव कर्म'** इति वदन् का.श्री. च भ्रान्तः ।

(सं.चं.) वन्दनार्थं पत्युरुपेत्य पादम् । प्रजानां तं दिवसं सुप्रातं कुर्वन्ति । शोभनं प्रातरस्येति सुप्रातस्तम् । 'सुप्रात-सुश्‍व-सुदिव-शारिकुक्ष-चतुरश्रैणीपदाजपद-प्रोष्ठपदाः' (अ.सू.५.४.१२०) इति प्रातः - शब्दस्य समासान्ताऽच्प्रत्ययान्तता । 'सुप्रातादयो बहुव्रीहिसमासा अच्प्रत्ययान्ता निपात्यन्ते' इति हि जयादित्यः । तेन 'सुप्रातरिमाः प्रजानाम्' इति पठन्तः सर्वेऽपि भ्रान्ताः ॥ १६ ॥

प्राच्या मुखं रागगुणेन[१] भाति कान्तेन काल्येन[२] हि सङ्गतेयम् ।
प्रसोष्यते साम्प्रतमेतयाऽर्कः कौसल्ययेवात्र भवान् प्रभावान् ॥ १७ ॥

(भा.दी.) **प्राच्या** इति । इयं प्राची दिक्, पूर्वदिङ्नामिका स्त्री, काल्येन उषःकालनामकेन, 'काल्यमुषःप्रत्यूषसी अपि' इत्यमरः, कान्तेन भर्त्रा सङ्गतेति संसक्तेति हि यस्मात् तस्मात्, प्राच्याः मुखं तत्, रागाख्यो रक्तिमाख्यो यो गुणस्तेन भाति । एतया पूर्वदिगाख्यस्त्रिया, साम्प्रतमिदानीम्, प्रभा कान्तिः अस्यास्तीति प्रभावान् अर्कः, भवान् अत्र अयोध्यायां कौसल्ययेव प्रसोष्यते प्रसूतः करिष्यते । षू प्रसवे लृट् । इदानीमुषःकालो जातः, सूर्योदयश्च प्राप्त इत्यर्थः ॥ १७ ॥

(सं.चं.) इयं प्राची दिक् काल्येन प्रभाताख्येन कान्तेन रमणेन सङ्गता बभूव । 'काल्यं प्रभातम्' इति यादवप्रकाशः । तेन रमणसमागमेन लज्जितायाः प्राच्या मुखं रागगुणेन लोहितवर्णेन युक्तं भाति । सङ्गमानन्तरं साम्प्रतं सद्य एवैतया प्राचीमहिळया प्रभावानर्कः प्रसोष्यते । यथा प्रभावान् भवान् कौसल्यया प्रासूयत ॥ १७ ॥

विधिर्विभुत्वस्य हरो हि मन्योः कीर्त्तेर्म्महेन्द्रो मदनश्च[३] कान्तेः ।
बुद्धेर्ग्गुरुश्चेति भवद्गुणानां बिम्बोष्ठ सर्वे प्रतिबिम्बमेते[४] ॥ १८ ॥

(भा.दी.) **विधिरिति** । बिम्बवद् बिम्बपक्कवदोष्ठो यस्य स तथा तत्सम्बुद्धिः, श्रीराम, विधिः ब्रह्मा तव विभुत्वस्य सर्वाधिपतित्वलक्षणगुणस्य प्रतिबिम्बम् प्रतिबिम्बभूतः । हरः ते मन्योः क्रोधस्य प्रतिबिम्बभूतः । महेन्द्रः तव कीर्तेः प्रतिबिम्बभूतः । मदनः तव कान्तेः शोभायाः, 'कान्तिः शोभाभिकामयोः' इति

१. **'स्त्रियः पतिसंयोगकाले हरिद्रादिना मुखं प्रक्षालयन्तीति प्रसिद्धमेतत्'** इति का.श्री. । अनुवाकहतानामरसिकं व्याख्यानम् ।

२. **'भाति काल्येन कान्ते हि'**

३. **'मदनोऽपि कान्तेः'**

४. **'प्रतिबिम्बभूताः' 'तथाच ब्रह्मादयः सर्वे त्वद्गुणसदृशगुणाः, त्वदधीनगुणाश्चेति भावः'** इति का.श्री. ।

वैजयन्ती, प्रतिबिम्बभूतः । गुरुः बृहस्पतिश्च तव बुद्धेः प्रतिबिम्बभूतः । इति एवमेव सर्वे (एते) अन्येऽपि वाय्वादयो देवाः भवतो ये गुणाः बलादयस्तेषां प्रतिबिम्बभूताः । प्रतिबिम्बत्वं नाम तदधीनत्वे सति तत्सदृशत्वम् ॥ १८ ॥

(सं.चं.) जीवनिष्ठाः सर्वे विभुत्वादयो गुणा गुणसमुद्रस्य तव गुणानां बिन्दुमात्रं प्रतिबिम्बम् । शरावजले सूर्यबिम्बस्य प्रतिफलनमिव । बिम्बं पक्वं बिम्बिकाफलम् । **'ଓ଼ଠ଼'** इति भाषायाम् । बिम्बवदोष्ठोऽस्येति बिम्बोष्ठः ॥ १८ ॥

इत्यादि तद्गीतमकाकि शृण्वन् यावत् स[१] तल्पादुदतिष्ठदीशः ।
उपस्थितं तत्र नृणां सहस्रं हेमोदपात्रैरुदकं दधानम् ॥ १९ ॥

(भा.दी.) इत्यादीति । ईशः सः श्रीरामः, इति आदिर्यस्य तदित्यादि, एवमादीत्यर्थः, न विद्यते काकिः काकिनामककण्ठदोषो यस्य तदकाकि, तेषां वन्दिनां गीतं शृण्वन् सन्, यावत् यदा तल्पं पर्यङ्कस्तस्मात् उदतिष्ठत् उत्थितोऽभूत्, ततः पूर्वमेव, हेममयानि यानि उदपात्राणि उदकपात्राणि तैः उदकं तत् दधानं नृणां भृत्यजनानां सहस्रं तत्र अन्तःपुरे उपस्थितं समीपं प्रत्यागत्य स्थितमभूत् ॥ १९ ॥

(सं.चं.) तदुदयगीतम् । न विद्यते काकी नाम स्वरदोषो यत्र तदकाकि । अगम्भीरः स्वरः काकी । उपलक्षण-मेतदन्यस्वरदोषाणामपि । तथाहि पठन्ति स्वरदोषान्– 'अथ काकी नृलिङ्गकः । अगम्भीरः स्वरोऽथ स्यात् तम्बिकी घ्राणनिर्गतिः । सन्दष्टो भेदसम्मिश्रः कफिलो घर्घरः कफात्' इति । तल्पं शय्या । यावदुददिष्ठत् तावत् तदैव उपस्थितं भृत्यजनानां सहस्रम् । सहस्रमुपस्थितं ममैव स्यादद्य सेवाभाग्यमिति । सहस्रे द्वित्राः सेवाभाग्यं लभन्ते । 'तमुत्थितं महात्मानं प्रह्वाः प्राञ्जलयो नराः । सलिलं भाजनैः शुभ्रैरुपतस्थुः सहस्रशः' (उ.कां.३७.१२) इति च । उदपात्रैः उदकपात्रैः । 'एकहलादौ पूरयितव्येऽन्यतरस्याम्' (अ.सू.६.३.५९) इति विभाषा उदकस्योद इत्ययमादेशः ॥ १९ ॥

यन्नामसङ्कीर्त्तनमात्रमत्र दिशेन्महापातकमोक्षमाशु[२] ।
स नित्यशुद्धोऽपि किलाऽत्मशुद्धिं चक्रेऽथ सल्लक्षणशिक्षणार्थम् ॥ २० ॥

---

१. **'यावत् स्वतल्पा–' 'तल्पादवतिष्ठदीशः'** इति भ्रान्तः पाठः । २. **'–मोक्षशुद्धिम्'** इति, **'–मोक्षसिद्धिम्'** इति च क्वचित् ।

(भा.दी.) यदिति । अत्र लोके, यस्य श्रीरामस्य, नाम श्रीराम इति नाम, तस्य सङ्कीर्तनमात्रं केवलं सङ्कीर्तनम्, महान्ति यानि पातकानि ब्रह्महत्यादीनि तेभ्यो मोक्षो मोचनम्, तं आशु दिशेत् प्रयच्छेत्, कुर्यादित्यर्थः, सः श्रीरामः, अथ शयनादुत्थानानन्तरम्[१] नित्यशुद्धोऽपि, सतां यानि लक्षणानि चिह्नानि दन्तधावनादीनि तेषां शिक्षणं तस्मै, 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः' इत्युक्तेः स्वाचरणेन सतः शिक्षयितुमित्यर्थः, आत्मनो देहस्य शुद्धिराचमनादिना शुचित्वं तां चक्रे किल ॥ २० ॥

(सं.चं.) दन्तधावनादिनाऽऽत्मशुद्धिं देहशुद्धिम् । नित्यशुद्धस्वरूपदेहोऽपि । सतां लक्षणस्य जीवनधर्मस्य शिक्षणार्थम् ॥ २० ॥

स्नातः सुवासाः समुपास्य सन्ध्यां हुत्वा[२] स हव्यं प्रतिदाय देयम् ।
अग्नीनुपातिष्ठदुताग्निहोत्रगृहेष्वथेक्ष्वाकुभिरादृतेषु ॥ २१ ॥

(भा.दी.) स्नात इति । अथ स्नातः, सु शोभनं वासो यस्य स तथा, सः श्रीरामः सन्ध्यां समुपास्य, हव्यं हविस्तत् अग्नौ हुत्वा, दातुं योग्यं देयं सुवर्णादि प्रतिदाय ब्राह्मणेभ्यो दत्वा, उत अनन्तरम्, इक्ष्वाकोर्गोत्रभवा इक्ष्वाकवस्तैः, 'तद्राजस्य बहुषु तेनैवास्त्रियाम्' (अ.सू.२.४.६२) इति गोत्रापत्यार्थकाणप्रत्ययलोपः, इक्ष्वाकुपूर्वकैरिति वा, राजभिः आदृतेषु सत्कृतेषु, अग्निहोत्रस्य गृहाणि तेषु, अग्नीन् उपातिष्ठत् पर्यचरत् ॥ २१ ॥

(सं.चं.) प्रत्येकं यस्मैयस्मै यद्यद् देयं तत्तद् दत्वा अथाग्नीनुपातिष्ठदुत । उतेति समुच्चये । उपातिष्ठच्च । यद्यपि 'उपाद् देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वाच्यम्' इति वार्तिकेन (अ.सू.१.३.२५) देवपूजार्थकस्य उपात् परस्य तिष्ठतेरात्मनेपदं विहितम् । तेन 'अग्नीनुपातिष्ठत' इति वक्तव्यम् । अथाप्यग्नीनुपातिष्ठदित्याह । तेनैतदाह– नेयं देवपूजा । सर्वदेवोत्तमस्य का देवपूजा नाम? किन्त्वात्मन एवेयं पूजा परेषां शिक्षणार्थम् । तेन परस्मैपदमेव भगवद्विषये साध्विति । 'यज्ञैश्च यजन् स्वमेव' (९.४१) इति तात्पर्यनिर्णये । पूर्वैरिक्ष्वाकुवंशोद्भवैराचरिताग्न्युपस्थानेषु अग्निहोत्रशरणेषु । 'देवागारं जगामाऽशु पुण्यमिक्ष्वाकुसेवितम्' (३७.१३) इति च ॥ २१ ॥

पुंसां[३] ललामैष ललाम कृत्वा नवार्कभासा हरिचन्दनेन ।
विभूषणानां च विभूषणत्वं ययौ त्रिलोकैकविभूषणं सः ॥ २२ ॥

---

१. 'शयनादुत्थापनानन्तरम्' २. 'हुत्वाऽथ हव्यम्' ३. 'पुंसां पुरुषाणां ललामा तिलकभूतः, पुरुषश्रेष्ठ इति यावत्' इति का.श्री. ।

(भा.दी.) पुंसामिति । पुंसां पुरुषाणां मध्ये ललामा तिलकभूतः एषः श्रीरामः । 'ललामं स्याल्ललाम च' इत्यमरः[१] । नवो योऽर्कस्तस्य भाः इव भाः कान्तिर्यस्य तत्तथा तेन, हरिचन्दनेन श्रीगन्धेन, ललाम तिलकं तत् कृत्वा, त्रयश्च ते लोकाश्च तेषां एकविभूषणं मुख्यालङ्कारभूतः सः श्रीरामः, विभूषणानि आभरणानि तेषां विभूषणत्वं च आभरणत्वं च ययौ । सर्वाभरणभूषितः सन्नाभरणानां शोभां ददाविति भावः ॥२२॥

(सं.चं.) पुंसां ललामा श्रेष्ठः । ललाम तिलकं कृत्वा धृत्वा । हरिचन्दनेन कुङ्कुमेन रचितं तिलकम् । 'हरिचन्दनमाख्यातं गोशीर्षे सुरपादपे । ज्योत्स्नायां कुङ्कुमे च' इति विश्वप्रकाशः । हरिचन्दनं चन्दनभेद इत्यप्याचक्षते । 'ललामोऽस्त्री ललामापि' इति यादवप्रकाशः । 'ललाम च ललामं च लाञ्छनध्वज-वाजिषु । शृङ्गे प्रधाने भूषायां रम्ये वालधिपुण्ड्रयोः' इति विश्वप्रकाशः ॥ २२ ॥

निर्गम्य रौग्मात् स्वसमाधिधाम्नः सभां महारत्नमयीं विवेश ।
यावत् स सूर्य्यान्वयसूर्य्य ईशः सूर्य्यो गिरेर्व्योम विवेश तावत् ॥ २३ ॥

(भा.दी.) निर्गम्येति । सूर्यस्य योऽन्वयो वंशस्तस्य सूर्य इव सूर्यः, सूर्यवंशदीप इत्यर्थः, ईशः श्रीरामः, रुग्मस्य सुवर्णस्य विकारो रौग्मं तस्मात्, स्वस्य समाधेः चित्तैकाग्रतायाः स्वध्यानस्य धाम गृहं तस्मात्, स्वस्य जपार्थं विद्यमानादित्यर्थः, निर्गम्य यावत् यदा, महान्ति यानि रत्नानि तैर्निर्मिता महारत्नमयी, तां सभां विवेश, तावत् तदा सूर्यः गिरेरुदयपर्वतात् व्योम विवेश आरुढोऽभूत् ॥ २३ ॥

(सं.चं.) सूर्यवंशस्य सूर्य इव दीपक ईशो रामः यावत् यत्कालावच्छेदेन ध्यानमन्दिरात् राजसभां विवेश तावत् तस्मिन्नेव क्षणे सूर्योऽप्युदयाचलाद् गगनं विवेश । ननु भगवान् कमेव ध्यायेत्? आत्मानमेवेत्याह– स्वसमाधिधाम स्वस्यैव ध्यानार्थं मन्दिरम् । रौग्मं रुग्ममयम् । रुग्ममित्येव प्रतनम् । रुक्ममित्यर्वाक्त-नम् । अधिकमस्मत्कृतायामुपनिषच्चन्द्रिकायां द्रष्टव्यम् ॥ २३ ॥

आसीनमेनं मणिहेमरूपे सिंहासने सिंहमिवाद्रिशृङ्गे ।
उपासताऽरादनुजा विनीता भक्तास्तथा वानरराक्षसेन्द्राः ॥ २४ ॥

(भा.दी.) आसीनमिति । मणयश्च हेमानि च तेषां रूपं स्वरूपं तस्मिन्, मणिहेममय इत्यर्थः, सिंहासने, अद्रेः मेरुगिरेः शृङ्गं शिखरं तस्मिन् सिंहमिव, आसीनं उपविष्टम्, एनं श्रीरामम्, विनीताः विनयोपेताः,

१. सम्पातायातमिदम् । नेदममरवचनम् । **'इति रुद्रः'** इति पठनीयम् । नेदमत्रातीव सङ्गतम् । **'ललाम तिलकम्'** इत्यतः परं पठनीयम् ।

अनुजाः लक्ष्मणादयः, तथा भक्ताः वानरराक्षसेन्द्राः सुग्रीवविभीषणादयश्च, आरात् समीपे उपासत सेवां चक्रुः । आसतेर्लङ् ॥ २४ ॥

(सं.चं.) आरात् समीपे । विनीता भक्ता अनुजा वानरराक्षसेन्द्राश्च ॥ २४ ॥

सभागते[1] स्वामिनि सानुरागा सामन्तमालाऽत्र समन्ततोऽभूत् ।
हरिन्मणिश्रीरधिकप्रभोऽस्याः स नायको नायकतामुपायात् ॥ २५ ॥

(भा.दी.) सभेति । स्वामिनि श्रीरामे, सभां गतः सभागतस्तस्मिन् सति, अनुरागेण भक्त्या सहिता सानुरागा, सामन्तानां खण्डाधिपतीनां माला पङ्क्तिः, अत्र सभायाम्, समन्ततः अभूत् संस्थिताऽभूत् । हरिन्मणिवदिन्द्रनीलरत्नवत् श्रीः कान्तिर्यस्य स तथा, अधिका प्रभा यस्य स तथा, सः श्रीरामः, अस्याः सामन्तमालायाः नायकः स्वामी सन्, नायकतां नायकरत्नताम्, हारमध्यस्थरत्नभावमित्यर्थः, उपायात् प्राप्तोऽभूत् ॥ २५ ॥

(सं.चं.) अनुरागेण भक्त्या सहिता सामन्तमाला । अनुगुणेन रागेण लोहितवर्णेन मणिमाला । राज्यस्य समन्ततो विद्यमाना माण्डलिकाः नृपाः सामन्ताः । तेषां मालेव माला पङ्क्तिः । हरिन्मणिः मरतकम् । अस्याः सामन्तमालाया अधिकप्रभो नायको रामः, अरुणोपलमालाया मध्ये खचितोऽधिकप्रभो मणिरिव नायकतामुपाजगाम । नायकमणिरिव बभावित्यर्थः । 'हारमध्यस्थितं रत्नं तरळो नायकोऽपिच' इति यादवप्रकाशः ॥ २५ ॥

पुरोधसस्तत्र वसिष्ठपूर्वान् समागतान् स्वं नमतो[2] धियैव ।
न्यवीविशन्न्यायनिदर्शनाय[3] तूर्णं चलन्नासनतः स नाथः ॥ २६ ॥

(भा.दी.) पुरोधस इति । सः नाथः श्रीरामः, तत्र सभायां समागतान्, न्यायस्य. ब्राह्मणैः क्षत्रियवन्दनं न कार्यमिति लोकन्यायस्य, निदर्शनं प्रदर्शनं तस्मै, धियैव मनसैव, न तु कायेनेत्यर्थः, स्वं नमतः स्वात्मने नमस्कारं कुर्वतः, वसिष्ठपूर्वान् ऋषीन्[4] । न्यायनिदर्शनाय शिष्यादिभिर्गुरवो माननीया इति

---

१. **'सभां गते'** २. **'–गतान् सन्नमतो–'**

३. **'न्यायनिदर्शनाय शिष्यादिभिः गुर्वाद्याः पूजनीया इति लोकन्यायप्रदर्शनार्थम्......न्यवीविशत् आसनेषूपवेशयामास। 'स्वावराणां गुरुत्वं तु भवेत् कारणतः क्वचित् । मर्यादार्थं तेऽपि पूज्या नतु यद्वत् परो गुरुः' इति'** इति का.श्री. ।

४. **'वसिष्ठपूर्वान् पुरोधसः'** इति युक्तः पाठः ।

न्यायप्रदर्शनार्थम्, आसनतः तूर्णं यथा भवति तथा चलन् उत्तिष्ठन् सन्, मुनीन् न्यवीविशत् उपवेशयामास ॥ २६ ॥

(सं.चं.) वृद्धैर्यवीयांसः विप्रैः क्षत्रिया न नन्तव्या इति लोकनीतिं दर्शयितुं धियैव मनसैव स्वमात्मानं नमतः पुरोधसः स तेषामपि नाथः स्वामी रामः वृद्धास्तरुणैर्विप्रा राजभिरादर्तव्या इति लोकन्यायनिदर्शनायैव तूर्णमासनाच्चलन् तानासने निवेशयामास । 'ये केचास्माच्छ्रेयांसो ब्राह्मणाः । तेषां त्वयाऽऽसने न प्रश्वसितव्यम्' इति हि श्रुतिः ॥ २६ ॥

स्वालोकलोलानवलोक्य लोकान् लोकाधिनाथः सकलान् सभायाम् ।
स्मितामृतेन प्रतितर्प्पयंस्तान् वाणीमुदारां समुदाजहार[1] ॥ २७ ॥

(भा.दी.) स्वेति । लोकाधिनाथः श्रीरामः, सभायां सकलान् लोकान् जनान्, स्वस्य य आलोको दर्शनं तस्मिन् लोलान् आसक्तान् अवलोक्य, तान् जनान्, स्मितमेवामृतं तेन प्रतितर्पयन् प्रीणयन्, उदारां उत्तमां वाणीं समुदाजहार निरूपितवान् ॥ २७ ॥

(सं.चं.) स्वावलोकने लोलानुत्सुकान् । प्रत्येकमेकैकमपि तर्पयन् सन्तोषयन् ॥ २७ ॥

वर्ण्णाश्रमाचारविशेषनिष्ठाः समस्तविद्याभिरतौ पटिष्ठाः[2] ।
मामेव सेवध्वमकैतवेन[3] प्रजाः प्रजानामधिनाथमेकम् ॥ २८ ॥

(भा.दी.) वर्णेति । हे प्रजाः, वर्णाः ब्राह्मणादयश्चत्वारस्ते च, आश्रमा गृहस्थादयस्ते च, तेषां ये आचारविशेषाः आचारप्रभेदाः, तेषु निष्ठा स्थितिर्येषां ते तथोक्ताः, समस्ता या विद्याः वेदादिसच्छस्त्राणि, तासु या अभिरतिः पठनादिनिमित्तसन्तोषः, तस्यां पटिष्ठाः अतिशयेन चतुराः, पटुशब्दादतिशायने इष्ठन्, सदाऽपि विद्वज्जनगोष्ठीनिरता इत्यर्थः, 'वेदान्तविद्याभिरतौ वरिष्ठा' इति क्वचित् पाठः, यूयं प्रजानामधिनाथं मां एकमेव, अकैतवं अकापट्यं तेन सेवध्वम्, मामेव एकं प्रधानं सर्वोत्तममित्यादिप्रकारेण सेवध्वमिति वा । षेवृ सेवने लोट् ॥ २८ ॥

---

१. **'समुदाहरत् सः'** २. **'वेदान्तविद्याभिरतौ वरिष्ठाः'** । **'–रतौ द्रढिष्ठाः'** इति क्वचित् ।

३. **'अकैतवेन निर्व्याजतया, छद्माभावेनेति वा । मामेकमेव सेवध्वमिति सम्बन्धः । मामेकं प्रधानं सर्वोत्तममित्यादिप्रकारेण सेवध्वमिति वा'** इति वि.भू. ।

(सं.चं.) अतितमां पटवः पटिष्ठाः पटुतमाः । समस्तासु लौकिकीषु वैदिकीषु च विद्यासु । मामेकमेव । अकैतवेन निष्कपटम् ॥ २८ ॥

[१]अहंममेत्याग्रहमोह एष देहे च देहानुगते च मा भूत् ।
मोहेन्धनेऽस्मिन् भवदाववह्नौ तातप्यमानानवलोकयध्वम् ॥ २९ ॥

(भा.दी.) अहमिति । देहः शरीरं तस्मिन्, अहं इति आग्रहेण अभिनिवेशेन मोहः मूढता, 'मोहो कृत्ये विमूढता' इति वैजयन्ती, मा भूत्, देहमनुसृत्य गतो देहानुगतस्तस्मिंश्च, देहानुबन्धिविषयभोगादावित्यर्थः, इदं ममेति एषः आग्रहमोहः मा भूत् न भूयात् । 'न माङ्योगे' (अ.सू.६.४.७४) इत्युक्तेरडभावः । मोहाख्यमज्ञानाख्यमिन्धनं काष्ठं यस्य स तथोक्तस्तस्मिन्, अस्मिन् अनुभूयमाने, भव एव दाववह्निस्तस्मिन्, 'वनवह्निर्दवो दावः' इति हलः, तातप्यमानान् पुनःपुनस्तप्यमानान् जनान् अवलोकयध्वम् । लोकृ दर्शने लोट् । तस्मात् संसारमूलमहङ्कारममकारादिकं सर्वथा त्यक्तव्यमित्यर्थः ॥ २९ ॥

(सं.चं.) देहे अहमिति । देहानुगते भार्यापुत्रादौ गेहवित्तादौ ममेति । भव एव दाववह्निर्दावानलः–'**ಕಾಡ್ಗಿಚ್ಚು**' इति भाषायाम् ॥ २९ ॥

सर्वेन्द्रियाणां विषये विषाभे सङ्गं प्रसङ्गं[२] च विमुञ्चतैनम् ।
सङ्गो [३]ह्यमङ्गल्यकरोऽत्र मीनो निदर्शनं स्याद् बळिशानुषङ्गी ॥ ३० ॥

(भा.दी.) सर्वेति । सर्वाणि यानीन्द्रियाणि तेषाम्, विषवदाभा कान्तिर्यस्य स तथा तस्मिन्, विषसम इत्यर्थः, आत्मन एवानर्थकारणत्वादिति भावः, विषये शब्दस्पर्शादीन्द्रियविषये, एनं लोकसिद्धम्, सङ्गप्रसङ्गं च विमुञ्चत परित्यजत । सङ्गः विषयाभिसक्तिः[४] अमङ्गल्यकरो हि नरकाद्यनर्थकरो हि, अत्र सङ्गस्यानर्थहेतुत्वे, बळिशानां मत्स्यबन्धजालानामनुषङ्गोऽस्यास्तीति बळिशानुषङ्गी, 'बळिशं मत्स्यबन्धनम्' इत्यमरः, मीनः निदर्शनं दृष्टान्तः स्यात् । (मीनः) किञ्चिन्मात्रमांसाद्याकाङ्क्षया स्वयमेव तत्र यथा पतित्वा म्रियते तद्वन्निषिद्धविषयादिनिषेवणम्, नरकादिपतनहेतुत्वादिति भावः ॥ ३० ॥

---

१. **'देहे शरीरे अहम्, मकारान्तमव्ययम्, अहङ्कारः, अहं कर्तेति एषः प्रसिद्धः मोहः मिथ्याज्ञानं मा भूत् । यद्वा देहे विद्यमाने जीवे अहं कर्तेति कर्तृत्वाग्रहाख्यमोहः मा भूत् । तथा देहानुगते देहानुसम्बन्धिनि कळत्रादौ मम सम्बन्ध्येतत् अहमेव स्वामीत्याग्रहमोह एषः मा भूत्'** इति का.श्री. ।

२. **'सङ्गप्रसङ्गं च'** । **'सङ्गं सम्बन्धम् । प्रसङ्गं वार्ताम्'** इति वि.भू. । ३. 'ह्यमाङ्गल्य–' ४. **'निषिद्धविषयाभिसक्तिः'**

(सं.चं.) इन्द्रियविषयजाते । सङ्गं सम्बन्धम् । तत्र प्रसङ्गं अभिनिवेशं लौल्यम् । सङ्गो ह्यागृह्यमाणोऽमङ्गल्यकरः अनिष्टकरः । मङ्गले साधुः मङ्गल्यः । स न भवतीति । बळिशे अनुषङ्गी दृढसक्तः । बळिशं 'ಗಾಳ' इति भाषायाम् ॥ ३० ॥

सङ्गोज्झिता विष्णुपदैकनिष्ठा दैवोपनीतान् विषयान् भजन्तः[1] ।
न लेपमर्हन्ति महानुभावाः साक्षादिहोदाहरणं नभस्वान्[2] ॥ ३१ ॥

(भा.दी.) सङ्गेति । सङ्गेन विषयासक्त्या उज्झिताः रहिताः, विष्णोर्यत्पदं स्वरूपं तस्मिन् (विष्णुपदे केवलं निष्ठा येषां ते, दैवेन भाग्येन) उपनीतान् सम्प्रापितान्, विषयान् अनिषिद्धस्रगादिवस्तूनि, जुषन्तः सेवमानाः, महाननुभावो हरिस्मरणलब्धमाहात्म्यं येषां ते तथा पुरुषाः, लेपो विषयभोगनिमित्तकानिष्टसम्बन्धः, तं नार्हन्ति प्राप्तुं योग्या न भवन्ति । अर्ह पूजायां लट् । इह अस्मिन्नर्थे, नभस्वान् वायुः सूर्यो वा, साक्षात् उदाहरणं दृष्टान्तः । तयोरपि पुण्यपापवस्तुसम्बन्धनिमित्तकगुणदोषसम्बन्धरहितत्वात्, आकाशे स्थितिमत्त्वाद्, दैवोपपादितदेशादिविषयलेपानार्हत्वाच्चेति भावः ॥ ३१ ॥

(सं.चं.) वायुर्नभसि वहन्नपि न क्वापि सज्जत इति सङ्गोज्झितः । विष्णुपदे नभस्येव निष्ठा स्थितिस्तस्य । वहनसमये यदृच्छयोपगतान् विषयान् देशान् जुषते । अतो नभस्वान् वायुरलिप्तः । एवं मुख्यप्राणोऽपि । एवं हनुमानपि । तदा तु हरिचरणयोरेकाऽनन्या निष्ठा तस्य । भगवदनुग्रहलब्धान् विषयान् सुखप्रारब्धभोगान् प्रीत्या सेवमानः । एवं महानुभावाः ज्ञानिनोऽपि विषयसङ्गोज्झिताः । हरिचरणैकनिष्ठाः । दैवाल्लब्धान् विषयान् भगवत्प्रसाद इति जुषमाणा निर्लिप्ताः सुखं जीवन्ति । यद्यपि जुषतिरात्मनेभाषः । अथापि सर्वस्मादुभयं पदमिति मतमनुसरन् जुषन्त इत्याह । परस्मैभाषेणापि शानचः, आत्मनेभाषेणापि शतुर्योगमनेनानुमन्यते ॥ ३१ ॥

मामेव नाथं सततं स्मरन्तो ममैव सारूप्यमदुःखसौख्यम् ।
यूयं लभध्वं भवभीतिमुक्ताः पेशस्कृतः कीट इवाचिरेण ॥ ३२ ॥

(भा.दी.) मामिति । हे जनाः, यूयं नाथं मां (एव) सततं स्मरन्तः सन्तः, न विद्यते दुःखं यस्य तत् तथोक्तम्, दुःखासम्भिन्नमित्यर्थः, तादृशं सौख्यं सुखं यस्य तत् तथोक्तम्, दुःखलेशेनापि रहिततयाऽ-

---

१. **'विषयान् जुषन्तः'** इति वि.ती.पाठः । वस्तुतस्तु जुषिरात्मनेभाषः । **'दैवोपनीतान् ईश्वरेण प्रापितान् विषयान् अन्नादीन् भजन्तः । यदृच्छालाभसन्तुष्टा इत्यर्थः'** इति का.श्री. ।

२. **'नभस्वान् सूर्यः वायुर्वा साक्षात् मुख्यतया उदाहरणं दृष्टान्तः । 'विषयैर्नहि लेपोऽस्ति वह्निवायुविवस्वताम्'** इत्युक्तेः' इति का.श्री. ।

त्युद्रिक्तानन्दात्मकमित्यर्थः,मम सारूप्यम्, भवात् संसाराद् या भीतिस्तस्याः मुक्ताः, कीटः पेशसोऽन्तर्निर्वेशितो जन्तुविशेषः, पेशः भित्तिकादौ दृश्यमानमतिदृढं किमपि मृदादिमयं जन्तुनिवासार्थं भ्रमरेण क्रियमाणं स्थानम्, तत् करोतीति तथोक्तस्तस्य भ्रमरस्य, सारूप्यमिव अचिरेण शीघ्रेण लभध्वम् । डु लभष् प्राप्तौ लोट् । भवन्तो मामेवमुक्तप्रकारेण ध्यायन्तो मत्तो भिन्ना एव मम सारूप्यं प्राप्नुतेत्यर्थः ॥ ३२ ॥

(सं.चं.) दुःखासम्भिन्नसौख्यरूपं सारूप्यम् । पेशस्कृतः सारूप्यं कीट इव । पेशस्कृत् भ्रमरजातिविशेषः । '**ಕಂಚುಗಾರ ಹುಳ**' इति भाषायाम् । कुड्ये कीटवासार्थं भ्रमरेण मृदा निर्मितं नीळमिव कीटपञ्जरं पेश इत्युच्यते । भ्रमरस्तत्र कञ्चन कीटविशेषं निक्षिप्य पालयति । स कीटस्तत्र स्वपोषकं भ्रमरमेव चिन्तयन् स्वयमपि भ्रमरसारूप्यं भजते । सोऽयं भ्रमरकीटन्यायः ॥ ३२ ॥

एवं स देवोऽनुदिनं प्रवृत्तस्ततः कदाचित् स्थिरभक्तिनम्रान् ।
वैदेहकैकेयमुखान् महीशान् मुमोच सम्पूज्य समस्तपूज्यः ॥ ३३ ॥

(भा.दी.) एवमिति । ततः समस्तपूज्यः, एवमनुदिनं प्रतिदिवसं प्रवृत्तः, देवः सः श्रीरामः, कदाचित्, स्थिरा या भक्तिस्तया नम्रान्, विदेहेषु भवा वैदेहास्ते च, केकयेषु भवा कैकेयास्ते च, ते मुखानि प्रधाना येषां ते तथा तान्, महीशान् राज्ञः, सम्पूज्य मुमोच, स्वविषयान् प्रति प्रेषयामास ॥ ३३ ॥

(सं.चं.) स्वयं समस्तपूज्योऽपि महीशान् सम्पूज्य, लोकसङ्ग्रहायैव । सम्यक् तत्तदुचितं पूजनं सम्पूजनम् ॥ ३३ ॥

मुखेन्दुना[1] व्यक्तिमुपागतेन सम्पूरयन् वानरसङ्घसिन्धुम् ।
उवाच सुग्रीवविभीषणादीनाप्तानुपाप्तांस्तनयं[2] च वायोः ॥ ३४ ॥

(भा.दी.) मुखेति । व्यक्तिरनुग्रहाभिव्यक्तिस्तां उपागतेन सम्प्राप्तेन, अनुग्रहोन्मुखेनेत्यर्थः, मुखमेवेन्दुस्तेन, वानराणां यः सङ्घः समूहः, स एव सिन्धुः समुद्रः, तं सम्पूरयन्, सम्यगानन्देनाभिवर्धयन्, आप्तान् अत्यन्तं प्रियान्, उपाप्तान् स्वनिकटमागतान्, सुग्रीवविभीषणादीन् प्रति, तथा वायोः तनयं हनुमन्तं च प्रति उवाच ॥ ३४ ॥

---

१. 'स्मितेन्दुना'

२. '–नाप्तानवाप्तांस्तनयम्'

(सं.चं.) स्वराज्यप्रजाः समदिश्यन्त । अथ कपिराक्षसानां सन्देशप्रकारमुपक्रमते–मुखेन्दुना । व्यक्तिमुपागतेन दर्शनदानेनेत्यर्थः । वानराणाम्, राक्षसानामप्युपलक्षणम्, सङ्घ एव सिन्धुः । सम्पूरयन् वर्धयन् । इन्दुना सिन्धुर्जलपूरैर्वर्धते । वानरसङ्घो राममुखेन्दुनाऽऽनन्दपूरैरवर्धत । आप्ताननुकूलानात्मीयान् । उपाप्तान् सन्निहितान् सुग्रीवादीन् वानरान् विभीषणादीन् राक्षसांश्च । उपाप्तमाप्तं तनयं च वायोः ॥ ३४ ॥

मह्यं मनोदेहवचांसि यूयं समर्प्पयन्तः सहवृत्तिकानि ।
तेनैव मूल्येन पुमर्त्थमूलं सम्प्राप्तवन्तो[१] मम दास्यमग्र्यम् ॥ ३५ ॥

(भा.दी.) मह्यमिति । यूयं, वृत्तिभिः मनोवाक्कायवृत्तिभिः सहितानि सहवृत्तिकानि, मनश्च देहश्च वचश्च तानि, मह्यं समर्पयन्तः सन्तः, तेनैव मनोवाक्कायसमर्पणाख्येनैव, मूल्यं अर्घः, विक्रयणप्रतिनिधिद्रव्यमित्यर्थः, तेन पुमर्थानां पुरुषार्थानां मूलं आदिभूतम्, मम अग्र्यं श्रेष्ठम्, दास्यं दासत्वं तत् सम्प्राप्तवन्तः ॥ ३५ ॥

(सं.चं.) मनसो वृत्तिश्चिन्तनम् । मनसा मामेव चिन्तयन्तः । देहस्य वृत्तिः परिचर्यादिका । देहेन मामेव परिचरन्तः । वचसो वृत्तिरभिजल्पः । वचसा मद्विषयामेव कथामभिजल्पन्तः । तेनैव मूल्येनार्घेण मम दास्यं सम्प्राप्तवन्तः, यत् सर्वपुमर्थानां मूलम्, विशेषतः परमपुमर्थस्य मोक्षस्य ॥ ३५ ॥

अहं तदानृण्यमवाप्तुकामो दत्वाऽपि साम्राज्यमिदं न तृप्तः ।
तस्मादनन्तं वितरामि मोक्षं दास्यस्य साक्षादनुरूपमर्घम्[२] ॥ ३६ ॥

(भा.दी.) अहमिति । तदानृण्यम्, तस्याः भवत्सेवायाः आनृण्यं अनृणत्वं तत्, अवाप्तुं कामो यस्य स तथा, अहम्, इदं मया अनुभूयमानम्, साम्राज्यं सार्वभौमत्वं तत्, दत्वाऽपि तृप्तः न । तस्मात् दास्यं दासत्वं तस्य, साक्षात् केवलम्, अनुरूपं अनुगुणम्, अर्घं मूल्यभूतम्, 'मूल्ये पूजाविधानेऽर्घः' इत्यमरः, अनन्तं विनाशरहितम्, मोक्षः संसारान्मोचनम्, तं वितरामि ददामि । तॄ प्लवनतरणयोः लट् ॥ ३६ ॥

(सं.चं.) अहं च प्रतिदानेनाऽनृण्यमवाप्तुकामः । सुग्रीवस्य कपिसाम्राज्यम्, विभीषणस्य राक्षससाम्राज्यं दत्वाऽपि न तृप्तः । तैः कृतं महत् । मया प्रतिकृतं त्वल्पमिति । तस्माद् भवदीयदास्यस्य अनुरूपमर्घं मूल्यमनन्तं मोक्षमेव दास्यामि । सर्वेषां च कपीनाम्, राक्षसेषु विशेषतो विभीषणस्य, तदनुव्रतानां कतीनाञ्चिद् राक्षसानां च ॥ ३६ ॥

---

१. **'–मूलमवाप्तवन्तो–'** २. **'–रूपमर्थम्'**

हनूमतः सेवनकौस्तुभस्य मुक्त्याख्यमर्घं सदृशं न मन्ये ।
स्वभावभक्तो[१] मम नो उपाधेर्मद्भक्त्युपाधेः स्वमपीक्षते[२] यः ॥ ३७ ॥

(भा.दी.) हनूमत इति । हनूमतः, सेवनमेव सेवैव कौस्तुभमणिः, तस्य मुक्तिरिति आख्या यस्य स तथोक्तः, तं अर्घं मूल्यम्, सदृशं समानं न मन्ये । मन ज्ञाने लट् । यः हनूमान् स्वभावः प्रकृतिः तेनैव[३] मम भक्तः, उपाधिः पुरुषार्थावाप्त्यादिनिमित्तं तस्मात् नो, भक्तो न भवति । यः मयि या भक्तिः सैवोपाधिः कारणं तस्मादेव, स्वमपि स्वात्मानमपि, ईक्षते प्रियत्वेन जानाति । स्वशरीरेन्द्रियादिकमपि हरिसेवानुकूलमित्येव तस्य प्रीतिविषयीभूतम्, न त्वन्येषामिव स्वोपभोगसाधनत्वेनेति भावः ॥ ३७ ॥

(सं.चं.) हनूमतः, सेवाख्यस्य तु कौस्तुभमणेः, कौस्तुभो हि सदा भगवतो हृदये तिष्ठति । हनुमतः सेवा च सदा भगवतः स्वान्ते । अतस्तस्य मुक्त्याख्यं मूल्यमपि न सदृशम् । किन्त्वल्पमेव । स किल स्वभावतः स्वरूपत एव, अनादित एकान्तभक्तः । नो उपाधेः । न मोक्षाद्युपाधिनिमित्ता तस्य भक्तिः । 'एकान्तानां न कस्यचित् । अर्थे नारायणो देवः' इति ह्युक्तम् । मद्भक्तिनिमित्तादेव स्वात्मानमपि सार्थकं मन्यते । भक्त्यर्थमेव जीवनम् । अन्यथा सर्वं व्यर्थमिति । 'यावद् रामकथा वीर चरिष्यति महीतळे । तावच्छरीरे वत्स्यन्तु प्राणा मम न संशयः' (४०.१७) इति च । 'वत्स्यन्तु' इति लोलृट् । अत्र निर्णयवचनम्–'सर्वैर्भवद्भिः सुकृतं विधाय देहं मनोवाक्सहितं मदीयम् । एतावदेवाखिलसद्भिधेयं यत् कायवाक्चित्तभवं मदर्चनम् । मुक्तिप्रदानात् प्रतिकर्तृता मे सर्वस्य चाथो भवतां भवेत । हनूमतो न प्रतिकर्तृता स्यात् स्वभावभक्तस्य निरौपधं मे' (८.२३१–२) इति ॥ ३७ ॥

यो भोगयोगादिगुणैः समो मे रवेस्तथाऽऽभास[४] इवावभातः ।
तस्याब्जयोनेः सहभोगनाम पदं हनूमन् प्रदिशामि तुभ्यम् ॥ ३८ ॥

(भा.दी.) य इति । यः चतुर्मुखः, भोगोऽनिषिद्धभोगः स च, योगो योगसामर्थ्यं स च, तौ आदी येषां ते भोगयोगादयः, ते च ते गुणाश्च, तैः रवेः आभास इव प्रतिबिम्बं इव मे समः, भिन्नः सन्नेव समान इव, अवभातः परिदृष्टः, तस्य एवं मत्समस्य अब्जयोनेश्चतुर्मुखस्य, सम उक्तरीत्या समानः भोगो यस्मिन् तत् सहभोगम्, सहभोगमिति नाम यस्य तत्तथोक्तं तत्, मम वैकुण्ठलोकभोगानां प्रतिबिम्बभूतभोगगुणयुक्त-

---

१. 'भक्तः स्वभावान्मम'
२. 'स्वयमीक्षते' । 'स्वयमेव अन्यप्रेरणं विना ईक्षते मां जानाति' इति का.श्री. ।
३. 'प्रकृतिस्तस्मादेव'
४. 'रवेरिवाऽभास–'

त्वात् सहभोगाख्यमित्यर्थः, पदं सत्यलोकस्थानम्, हे हनुमन्, तुभ्यं प्रदिशामि ददामि । दिश अतिसर्जने लट् ॥ ३८ ॥

(सं.चं.) आनन्दभोगः । ज्ञानयोगः । ऐश्वर्यबलादिरादिपदार्थः । य एतैर्गुणैर्मे समः सदृशः । कथं सादृश्यम्? बिम्बप्रतिबिम्बभावेनेत्याह– रवेरिवाऽभासः । जले प्रतिफलितो रवेराभासः प्रतिबिम्बमिव, स यथा रविवदेव भासते, तथा मे सम इवावभातः प्रतिफलितः । तदधीनं तत्सदृशं च हि प्रतिबिम्बं भवति । तस्य एवं साक्षान्मत्प्रतिबिम्बभूतस्य अब्जयोनेः यत् पदं सहभोगनामकं पारमेष्ठ्यं पदम् । भगवद्भोगप्रतिबिम्बतया तत्समानभोगवत्त्वात् । भगवता सहैव भोगाच्च । तत् तुभ्यं प्रदिशामि । तथाहि निर्णये–'मदैशं पदमहममुना सार्द्धमेवोपभोक्ष्ये' (८.२३३) इति, 'अतो हनूमान् पदमेतु धातुर्मदाज्ञया सृष्ट्यवनादि कर्म । मोक्षं च लोकस्य सदैव कुर्वन् मुक्तश्च मुक्तान् सुखयन् प्रवर्तताम् । भोगाश्च ये यानि च कर्मजातान्यनाद्यनन्तानि ममेह सन्ति । मदाज्ञया तान्यखिलानि सन्ति धातुः पदे तत् सहभोगनाम । एतादृशं मे सहभोजनं ते मया प्रदत्तं हनुमन् सदैव' (८.२४०–२) इति च । 'ब्रह्मा भविष्यत्यपि ते प्रसादात्' (३६.४६) इति च रामायणे उत्तरकाण्डे ॥ ३८ ॥

अस्यां कथायां मम चन्द्रगौर्य्यां प्रादुर्भवन्त्यां निगमान्तसिन्धोः ।
मग्नः सुधायामिव वत्स भूयो वृणीष्व कामानखिलान् यथेष्टम् ॥ ३९ ॥

(भा.दी.) अस्यामिति । हे वत्स हे हनुमन्, चन्द्रवद् गौरी धवळा तस्याम्, उपलक्षणमेतत्, सर्वदोषरहितायामित्यर्थः, निगमान्ता उपनिषद एव सिन्धुः समुद्रः, तस्मात् प्रादुर्भवन्त्याम् अस्यां विश्वामित्ररक्षणादिकथायाम्, सुधायामिव मग्नः, त्वं भूयः अखिलान् कामान्, यथेष्टं इष्टमनतिक्रम्य वृणीष्व । वृञ् वरणे लोट् ॥ ३९ ॥

(सं.चं.) अस्यां मम कथायां सदा मग्नः लीनः । कीदृशी कथा? चन्द्र इव गौरी धवळा नित्यशुद्धा । सुधायामिव निगमान्तसिन्धोः प्रादुर्भवन्त्याम् । निगमानां श्रुतीनामन्तः सिद्धान्तः स एव सिन्धुस्ततो जातायाम् । 'वेदः प्राचेतसादासीत् साक्षाद् रामायणात्मना' इति हि भणन्ति । वत्स हनुमन्, सहभोगादतिरिक्तानपि कामान् वृणीष्व यदीच्छसि । न किमपि तवादेयं नाम । यद्यपि हनुमान् वयसा ज्यायान् । अथापि वत्सेत्याह । तेनेदमाह । मूलरूपे त्वं किलाब्जयोनिरिव साक्षाद्वत्सः । अन्ये तु भवदादिद्वारेति । उक्तं हि–'ब्रह्मणः पितरं वन्दे शङ्करस्य पितामहम् । श्रियः पतिमजं नित्यमिन्द्रादिप्रपितामहम्' इति । भाविब्रह्मणश्च पितरम् । तेन साक्षाद्वत्सत्वं ब्रह्मवाय्वोरेव ॥ ३९ ॥

उक्त्वेति वैडूर्य्यनिबद्धमद्ध्यं मुक्ताकलापं स कलापगौरम् ।
उन्मुच्य कण्ठान्निदधेऽस्य कण्ठे रामः स्वयं मूर्त्तमिव प्रसादम् ॥ ४० ॥

(भा.दी.) **उक्त्वेति** । सः श्रीरामः, इति उक्त्वा, वैडूर्यैर्निबद्धं मध्यं यस्य स तथोक्तम्, कलाः पातीति कलापश्चन्द्रः, तद्वद् गौरं श्वेतम्, मुक्ताकलापं मौक्तिकमालाख्यभूषणम्, कण्ठो गळः, तस्मात् उन्मुच्य, अस्य हनुमतः कण्ठे, स्वयं श्रीरामः, मूर्तं मूर्तिमन्तं प्रसादोऽनुग्रहस्तमिव निदधे न्यस्तवान् ॥ ४० ॥

(सं.चं.) उक्त्वेतीन्द्रवज्रा । मुक्ताकलापम् । मुक्ताहारम् । 'कलापकः कण्ठबन्धः' इति यादवप्रकाशः । प्रतिदिनमेकैकां कलामाप्नोतीति कलापश्चन्द्रः । तद्वद् गौरं हारम् । 'ततोऽस्य हारं चन्द्राभं मुच्य कण्ठात् स राघवः । वैडूर्यतरळं कण्ठे बबन्ध च हनूमतः' (४०.२५) इति च । 'वैडूर्यतरळम्' इति वाल्मीकिवचनस्य विवरणम्–वैडूर्यनिबद्धमध्यमिति । मध्यमणिर्हि नायक इति तरळ इति चोच्यते । 'हारमध्यस्थितं रत्नं तरळो नायकोऽपि च' इति च । वैडूर्यं वालवायजम्' इति च । वैयाकरणास्तु वैडूर्यं वैदूर्यमाचक्षते । तथाहि पाणिनिः– 'विदूराञ् ञ्यः' (अ.सू.४.३.८४) इति । 'विदूरात् प्रभवति वैदूर्यो मणिः' इति जयादित्यः । विडूरात् प्रभवतीति तु तत्ववादिनः । अत एव सन्दिहानाः शाब्दिका आचक्षते–'वालवायो विदूरं वा प्रकृत्यन्तरमेव वा' इति । अधिकं तात्पर्यनिर्णयभावचन्द्रिकायाम् । 'वैढूर्यनिबद्ध–' इति पठन्तो भ्रान्ताः । 'चन्द्राभम्' इत्यस्य विवरणम्–'कलापगौरम्' इति ॥ ४० ॥

भक्तिर्म्मम स्यात् त्वयि वर्द्धमाना प्रीतिस्तव स्यान्मयि वर्द्धमाना ।
इमौ हि कामौ मम नापरः स्यान्नाथेति रामं हनुमान् बभाषे ॥ ४१ ॥

(भा.दी.) **भक्तिरि**ति । त्वयि वर्धमाना भक्तिः मम स्यात् । मयि च वर्धमाना प्रीतिः तव स्यात् । हे नाथ, मम इमौ कामौ अभीप्सितार्थौ स्याताम् । अपरः अन्यः कामः न स्यात् । इति श्रीरामं प्रति हनुमान् बभाषे ॥ ४१ ॥

(सं.चं.) भक्तिरिति । 'स्नेहस्ते परमो राजन् मयि तिष्ठतु नित्यदा । भक्तिश्च नियता वीर मम नान्यत्र गच्छतु' (४०.१६) इति सम्भावितः पाठः । अर्वाचीनस्त्वन्यादृशः पाठः–'स्नेहो मे परमो राजंस्त्वयि तिष्ठतु नित्यदा । भक्तिश्च नियता वीर भावो नान्यत्र गच्छतु' इति ॥ ४१ ॥

लक्ष्मीनिवासेन भुजान्तरेण प्रभुर्भुजाभ्यां भुवनावनाभ्याम् ।
तं पावमानिं परिरेभ आशु द्वयं च तद् ब्रह्मपदं च दत्वा ॥ ४२ ॥

(भा.दी.) **लक्ष्मी**ति । प्रभुः श्रीरामः, तत् हनुमद्याचितं द्वयम्, भक्तिरनुग्रहश्चेति द्वयम्, ब्रह्मपदं चतुर्मुखस्थानं च, भाविचतुर्मुखत्वमिति यावत्, दत्वा, लक्ष्म्याः निवासो यस्मिन् तत्तथा तेन, लक्ष्मीनिवासभूतेनेति वा, भुजयोर्यदन्तरं मध्यं तेन, वक्षसेत्यर्थः, भुवनानामवनं रक्षा याभ्यां तौ तथा ताभ्यां भुजाभ्याम्, पवमानस्यापत्यं पुमान् पावमानिस्तम्, तं हनुमन्तं आशु परिरेभे ॥ ४२ ॥

(सं.चं.) लक्ष्म्या निवासेन श्रीवत्साङ्कितेन भुजान्तरेण वक्षसा । 'वक्षसि लक्षणभूता लक्ष्मीः' इति पण्डिताचार्यवचनम् । भुवनान्यवत इति भुवनावनाभ्यां भुजाभ्यां च । सवक्षःपीडं भुजाभ्यां गाढमालिङ्ग्येत्यर्थः । 'प्रवर्द्धतां भक्तिरलं क्षणेक्षणे त्वयीश मे ह्रासविवर्जिता सदा । अनुग्रहस्ते मयि चैवमेव निरौपधौ तौ मम सर्वकामः । इतीरितस्तस्य ददौ स तद् द्वयं पदं विधातुः सकलैश्च शोभनम् । समाश्लिषच्चैनमथाऽर्द्रया धिया यथोचितं सर्वजनानपूजयत्' (८.२४७–८) इति निर्णये ॥ ४२ ॥

दिव्यानि रत्नाभरणानि दत्वा वस्त्राणि भद्राणि बहूनि[१] चेशः ।
सन्तर्प्य्य सुग्रीवविभीषणादीन् सर्वांश्च गन्तुं स्वगृहानवोचत् ॥ ४३ ॥

(भा.दी.) **दिव्यानी**ति । ईशः श्रीरामः, दिव्यानि भद्राणि बहूनि वस्त्राणि, रत्नमयानि यान्याभरणानि तानि च दत्वा, सर्वान् सुग्रीवविभीषणादीन् (सन्तर्प्य), स्वगृहान् प्रति गन्तुमवोचत् ॥ ४३ ॥

(सं.चं.) दिव्यानीतीन्द्रवज्रा । दिव्यानि द्योतमानानि रत्नाभरणानि । भद्राणि सुखावहानि मसृणानि वस्त्राणि । 'भद्रं कल्याणसौख्ययोः' इति च ॥ ४३ ॥

त्वत्पादपार्श्वादपगम्य नाथ राज्यं न यामो[२] भयशोकमूलम् ।
कल्पाङ्घ्रिपेन्द्रादिव [३]काकतुण्डीमित्यूचतुस्तौ कपिराक्षसेन्द्रौ ॥ ४४ ॥

(भा.दी.) **त्वदि**ति । तौ कपिराक्षसेन्द्रौ सुग्रीवविभीषणौ, हे नाथ श्रीराम, तव यौ पादौ तयोः पार्श्वं समीपं तस्मात् अपगम्य निर्गम्य, भयं च शोकश्च तयोर्मूलं कारणं राज्यं तत्, कल्पः सुरद्रुमाख्यो योऽङ्घ्रिपेन्द्रः पादपश्रेष्ठस्तस्मात्, 'कल्पो न्याये सुरद्रुमे' इति वैजयन्ती । काकशुण्डीमिव काकशुण्ड्याख्यलतामिव न यामः न गच्छामः, इति वचः ऊचतुः ॥ ४४ ॥

---

१. **'मृदूनि चेशः'** । **'श्लाघ्यानि दिव्यानि बहूनि दत्वा वस्त्राणि भद्राणि मृदूनि चेशः'** इति क्वचित् । **'ईशः रामः श्लाघ्यानि श्रेष्ठानि दिव्यान्यलौकिकानि मृदूनि मार्दवयुक्तानि बहूनि बहुलानि भद्राणि प्राणिनां मङ्गलकराणि वस्त्राणि'** इति का.श्री ।

२. **'यामोऽक्षयशोक–'**

३. **'काकशुण्डीमित्यूचतु–' इति वि.ती.पाठः स्यात् । 'काकतुण्डीं काकतुण्डीनामकलताम्'** इति वि.भू. । का.श्री. च ।

(सं.चं.) त्वत्पादपार्श्वादिति चेन्द्रवज्रा । कल्पाख्यादङ्घ्रिपेन्द्रात् वृक्षश्रेष्ठादपगम्य, कल्पतरुमपहायेति यावत्, काकतुण्डीमिव क्षुद्रवीरुधम्, **'ಕಾಗೆಸೊಪ್ಪು'** इति भाषायाम् । अथवा काकतुण्डीति बिम्बप्रभेदस्य लतोच्यते । तुण्डी **'ತೊಂಡೆ'** इति भाषायाम् । कोशकारास्तु काकतुण्डीं तापिच्छमाहुः–'तापिच्छे काकतुण्डिका' इति । तापिच्छस्तमालप्रभेदः ॥ ४४ ॥

प्रजाधिपाभ्यां[1] भरणं प्रजानां शुश्रूषणं मे क्रियतां युवाभ्याम् ।
उक्त्वेति विष्णोः प्रददौ विमानं विभीषणायान्वयभूषणं सः ॥ ४५ ॥

(भा.दी.) **प्रजे**ति । प्रजाधिपाभ्यां[1] राजभ्यां युवाभ्याम्, प्रजानां भरणं पालनम्, मे शुश्रूषणं क्रियताम् । सः श्रीरामः, इति उक्त्वा, अन्वयस्य वंशस्य भूषणमलङ्कारायितं तत्, विष्णो रङ्गनाथस्य विमानम्, इक्ष्वाकुकुले चतुर्मुखानुगृहीतम्, यदिदानीमपि श्रीरङ्गक्षेत्रे तिष्ठति । एतादृशं विमानं विभीषणाय प्रददौ ॥ ४५ ॥

(सं.चं.) प्रजाधिपाभ्यां युवाभ्यां कपिराक्षसेन्द्राभ्यां सुग्रीवविभीषणाभ्याम् । प्रजानां भरणमेव मे शुश्रूषणम् । अतस्तदेव क्रियताम् । विष्णोर्विमानं चतुर्मुखदत्तं स्वकुलस्य भूषणायितं विभीषणाय ददौ । 'आद्यं स्वयंव्यक्तमिदं विमानं रङ्गसञ्ज्ञितम्' इति हि स्मरन्ति ॥ ४५ ॥

संरञ्जयन्नङ्गदमङ्ग बालं भुक्त्वा चिरं राज्यमुपैहि मां त्वम् ।
सुषेणतारादिगणैः प्रियैर्मे सुग्रीवमित्यभ्यधिताथ भूमा ॥ ४६ ॥

(भा.दी.) **सम**िति । अथ भूमा पूर्णगुणः श्रीरामः, हे अङ्ग प्रिय सुग्रीव, बालं अङ्गदं वालिसुतम्, संरञ्जयन् सम्यक् लाळयन्, त्वं चिरं राज्यं तत् भुक्त्वा, (मे) प्रियैः सुषेणश्च तारश्च आदी येषां ते तथा तेषां गणाः तैः सह, पश्चात् यज्ञकरणादिसमये, मां उपैहि आगच्छ । इण् गतौ लोट् । इति सुग्रीवं प्रति अभ्यधित प्रोचे । धाञो लुङ् ॥ ४६ ॥

(सं.चं.) बालमङ्गदं संरञ्जयन् प्रीतिपूर्वं पालनेन सन्तोषयन् । राज्यं च चिरं भुक्त्वा पालयित्वा ततः मामुपैहि । मे प्रियैः सुषेणतारादिकपिगणैः सह ॥ ४६ ॥

स्तुवन्ति भूयः प्रणमन्ति केचित् परिक्रमन्तेऽथ परे पुरैनम् ।
बाष्पेक्षणा वानरराक्षसौघा[2] नाथं विहातुं बत नाथ शेकुः ॥ ४७ ॥

१. **'प्रजापतिभ्याम्'**

२. **'राक्षसवानरौघा–'** इति वि.ती.पाठः ।

(भा.दी.) स्तुवन्तीति । अथ केचित् एनं श्रीरामं स्तुवन्ति (पुरा) स्तुतिं चक्रुः । ष्टुञ् स्तुतौ लट् । केचित् भूयः प्रणमन्ति (पुरा) पुनः प्रणामं चक्रुः । णमुधातोर्लट् । अथ परे वानराः परिक्रमन्ते (पुरा) प्रदक्षिणं चक्रुः । क्रमुधातोर्लट् । राक्षसवानराणामोघाः समूहाः, बाष्पः अश्रु ईक्षणेषु दृष्टिषु येषां ते तथा सन्तः, नाथं श्रीरामम्, विहातुं सन्त्यज्य गन्तुम्, न शेकुः, न समर्था बभूवुः, बत । शक्ऌ शक्तौ लिट् ॥ ४७ ॥

(सं.चं.) केचित् भूयोभूयः स्तुवन्ति पुरा अस्ताविषुः । केचित् प्रणमन्ति पुरा प्राणंसिषुः । परे पुनरेनं परिक्रमन्ते पुरा पर्यक्रमिषत । यद्यपि क्रमिः परस्मैभाषः । अथापि 'उपपराभ्याम्' (अ.सू.१.३.३९) इत्यत्र 'परेर्विभाषा' इति पूरणीयम् । तेन द्वयमपि साधु– परिक्रामति परिक्रमते । स्तुवन्तीत्यादि–'पुरि लुङ् चास्मे' (अ.सू.३.२.१२२) इति पुराशब्दयोगेन भूतानद्यतनेऽर्थे विभाषा लट् । अथापि विहातुं न शेकुर्बत । रामदर्शनजेनाऽनन्देन भाविविरहचिन्ताजनितेन दुःखेन च बाष्पपूर्णेक्षणाः ॥ ४७ ॥

कथमपि गतवन्तस्ते निजं गेहमापु-
र्य्यमुचदपि गतांस्तान् नैव देवः कृपालुः ।
यदवसदुरुतापध्वंसनश्चन्द्रचारु-
र्म्मनसिमनसि तेषां हन्त रामोऽभिरामः ॥ ४८ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के
सङ्ग्रहरामायण उत्तरकाण्डे प्रथमः सर्ग्गः ॥

—०—

(भा.दी.) कथमिति । कथमपि कथञ्चित् गतवन्तः, वानरादयः निजं गेहं गृहं तत् आपुः । आप्लृ व्याप्तौ लिट् । उरवो ये तापा आध्यात्मिकादयस्तान् ध्वंसयति विनाशयतीति तथोक्तः, चन्द्रवच्चारुर्मनोहरः, अभिरामो मनोहरः, कृपया आलुरिव पूर्णकलश इव कृपालुः देवः श्रीरामः, यत् यस्मात् कारणात् तेषां स्वगृहं प्रति गतानां वानरराक्षसेन्द्राणां मनसिमनसि अवसत् । वस निवासे लङ् । तस्मात् तान् वानरादीन् स्वगृहान् प्रति गतानपि नैव व्यमुचत् । मुच्लृ मोक्षणे लुङ् । हन्त हर्षे । नैव व्यमुचदित्यत्र हेतुर्यदवसदित्यादि । ते गत्वाऽपि सर्वदा श्रीराममेव स्मरन्तोऽवर्तन्त । श्रीरामस्तेभ्यो महानुग्रहं कुर्वन् मनसिमनसि सन्निधानमकरोदिति भावः ॥ ४८ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां
भावार्थदीपिकायामुत्तरकाण्डे प्रथमः सर्गः ॥

—०—

(सं.चं.) मालिन्या सर्गमुपसंहरति– कथमिति । गतानपि न व्यमुचत् । न तत्याज । यत् तेषां मनसिमनस्यवसत् । कृपयतीति कृपालुः । कृपेरालुच् । ननु न पाणिनिरालुचि कृपिं परिजग्राह । तेन यन्नोक्तं तद्वार्तिककार आह–'आलुचि शीङो ग्रहणं कर्तव्यम्' इति । तेन यद् विस्मृतं तद् वयं स्मारयामः–'आलुचि कृपेरपि ग्रहणं कर्तव्यम्' इति । ननु कृपाया आलुरिवेति शक्यं व्याख्यातुम् । तर्हि दयाया आलुरिव, निद्राया आलुरिवेति च शक्यं व्याख्यातुम् । तेन '–दयिनिद्रातन्द्राश्रद्धाभ्यः'(अ.सू.३.२.१५३) इत्यपि न वक्तव्यं स्यात् । तेन कृपेरालुजित्येव सूक्तम् । अभितः इह च परत्र च साधून् रमयतीत्यभिरामः ॥ ४८ ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायामुत्तरकाण्डे प्रथमसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– ३१०४+४८=३१५२]

द्वितीयः सर्ग्गः

विश्वेश्वरः प्राज्यमवाप्य राज्यं कृपानिधिर्ल्लक्ष्मणमाचचक्षे ।
शुश्रूषया वत्स तवास्मि तुष्टस्त्वं यौवराज्यं भज शोभनेति ॥ १ ॥

(भा.दी.) श्रीरामेण स्वानुजेषु लक्ष्मणादिषु कृतानुग्रहप्रकारं दर्शयति– **विश्वेत्या**दिना । कृपानिधिः कृपाश्रयः विश्वेश्वरः श्रीरामः, प्राज्यं श्रेष्ठं तत् राज्यं अवाप्य, शोभन, हे वत्स लक्ष्मण, तव शुश्रूषया, वनवासादिषु कृतसेवया, अहं तुष्टः अस्मि । त्वं यौवराज्यं युवराजत्वं तत् भज आतिष्ठ । भज सेवायां लोट् । इति लक्ष्मणं आचचक्षे प्रोवाच । चक्षिङ् व्यक्तायां वाचि लिट् ॥ १ ॥

(सं.चं.) प्रायेणोपजातिप्रचुरैः पद्यैः सर्गमुपनिबध्नाति । प्राज्यं प्रभूतं समृद्धम् ॥ १ ॥

स्वर्ग्गाधिपत्यादपवर्ग्गसौख्यात् [1]साम्राज्यभोगाच्च वरीयसीं[2] ते ।
पादाब्जसेवां हि वृणे न चान्यत् प्रसीद नाथेत्यवदत्[3] स धन्यः ॥ २ ॥

(भा.दी.) **स्वर्गे**ति । अहं, स्वर्गस्य यदाधिपत्यं स्वामित्वं तस्मात्, अपवर्गे मोक्षे यत्सौख्यं सुखं तस्मात्, साम्राज्यस्य सार्वभौमत्वस्य यो भोगस्तस्माच्च, वरीयसीं अतिशयेन श्रेष्ठाम्, ते तव पादावेव अब्जे तयोः सेवाम्, वृणे वरयामि हि, अन्यत् न च नैव वृणे, हे नाथ श्रीराम, प्रसीद, त्वत्सेवाविषये प्रसन्नो भव, धन्यः सः लक्ष्मणः इति वचः अवदत् ॥ २ ॥

(सं.चं.) निरपेक्षो गुणशाली धन्यः । धनं लब्धा धन्य इति वैयाकरणाः । 'धनगणं लब्धा' (अ.सू.४.४.८४) इति पाणिनिः । स्यान्नाम । लोके सामान्यतो दुर्लभमपूर्वं किञ्चिदत्र धनमित्युक्तम् । अपूर्वं लब्धा धन्यः । लक्ष्मणश्च रामपादसेवाख्यमपूर्वं धनं लब्धा ॥ २ ॥

---

१. **'साम्राज्यभोगात् यौवराज्यसुखात् पृथ्वीपतित्वजन्यसुखाच्च'** इति का.श्री. ।   २. **'गरीयसीम्'**

३. **'प्रसीद देवेत्यवदत्'**

तामेव तस्मै प्रतिदाय देवः प्रीतो[१] भुजाभ्यां परिरभ्य चैनम् ।
तद् यौवराज्यं भरताय दत्वा चक्रे द्रुतं चक्रधरोऽभिषेकम् ॥ ३ ॥

(भा.दी.) तामिति । प्रीतः लक्ष्मणवचःश्रवणेन तुष्टः देवः श्रीरामः, तामेव सेवामेव, तस्मै लक्ष्मणाय, प्रतिदाय दत्वा, एनं भुजौ हस्तौ ताभ्यां परिरभ्य च, तत् लक्ष्मणाय सङ्कल्पितं यौवराज्यं युवराजत्वं भरताय दत्वा, चक्रधरः श्रीरामः द्रुतं यथा भवति तथा अभिषेकः अभिषेचनं तम् चक्रे ॥ ३ ॥

(सं.चं.) यौवराज्येऽभिषेकं चक्रे । 'सर्वात्मना पर्यनुनीयमानो यदा न सौमित्रिरुपैति योगम् । नियुज्यमानो भुवि यौवराज्ये ततोऽभ्यषिश्चद् भरतं महात्मा' (यु.कां.१२८.९३) इति च । निर्णये च–'अथाऽप्तराज्यो भगवान् स लक्ष्मणं जगाद राजा तरुणो भवाऽशु । इतीरितस्त्वाह स लक्ष्मणो गुरुं भवत्पदाब्जान्न परं वृणोम्यहम्' (९.१) इति, 'इतीरितस्तस्य तदेव दत्वा दृढं समाश्लिष्य च राघवः प्रभुः । स यौव-वाज्यं भरते निधाय जुगोप लोकानखिलान् सधर्मकान्' (९.३) इति च । चक्रं सुदर्शनम् । मूलरूपे चक्रधरः । चक्रं राष्ट्रम् । स्वयमेव सकलराष्ट्ररक्षकः । चक्रं विश्वचक्रम् । स्वयमेव च सकललोकपालकः । अथापि करुणया भरतं यौवराज्येऽभ्यषिश्चत् ॥ ३ ॥

विमानमागादथ पुष्पकाख्यं प्रत्यर्पितं वैश्रवणेन भूम्ने ।
देव प्रसीदेति वदन्नभस्थं स्मृतं त्वमेहीति मुमोच रामः ॥ ४ ॥

(भा.दी.) विमानमिति । अथ भूम्ने पूर्णगुणाय श्रीरामाय, वैश्रवणेन प्रत्यर्पितं परावृत्य प्रेषितं पुष्पकाख्यं विमानं आगात् आगच्छत् । इणो लुङ् । देव श्रीराम, प्रसीद, मत्परिग्रहेणानुग्रहं कुर्वित्यर्थः, इति वदत्, नभसि तिष्ठतीति नभस्थं तद्विमानम्, मया स्मृतं सत् त्वं एहि मन्निकटमागच्छ, श्रीरामः इति आज्ञाप्य मुमोच, वैश्रवणनिकटं प्रत्येव प्रेषितवान् । मुच्लृ मोक्षणे लिट् । देवताधिष्ठितत्वाद् विमानस्य सम्भाषण-मविरुद्धम् ॥ ४ ॥

(सं.चं.) देव प्रसीदेति वदद् विमानम् । चेतनात्मकं मन्त्रचालितं विमानम् । यन्त्रचालितं जडम् । स्मृतं सत् पुनरेहीति उक्त्वा मुमोच धनदसकाशमेव प्रेषया-मास । 'गम्यतामिति चोवाच आगच्छ त्वं स्मरे यदा' (उ.कां.४१.१४) इति च ॥ ४ ॥

१. 'देवसन्तुष्टो–'

नारायणोपास्तिपरायणानां नान्यत्र भक्तिः[१] कुहचित् प्रजानाम् ।
तद्भक्तवर्गे स्थिरभक्तिभाजां रामे भुवो राजनि राजमाने ॥ ५ ॥

(भा.दी.) नारायणेति । राजमाने शोभमाने श्रीरामे भुवः राजनि सति, श्रीनारायणस्य या उपास्तिरुपासनं तस्यां परायणानामासक्तानाम्, तस्य श्रीनारायणस्य ये भक्ताः ब्रह्मादयस्तेषां यो वर्गः समूहस्तस्मिन् स्थिरा या भक्तिस्तां भजन्तीति तथोक्ताः तासां प्रजानाम्, अन्यत्र अन्यस्मिन् देवे भक्तिः, नारायणे यादृशी भक्तिस्तत्सदृशी भक्तिः, कुहचित् कदाचिदपि न बभूव ।। किमः सप्तम्यन्तात् हप्रत्ययं छन्दसीत्याह पाणिनिः– 'वा ह च च्छन्दसि' (अ.सू.५.३.१३) इति । सत्यं छान्दसा वयम् ।। ५ ।।

(सं.चं.) नारायणेत्यादि पद्यत्रयमिन्द्रवज्राबद्धम् । रामे भुवो राजनि सति, अन्यत्र नारायणतद्भक्तवर्गाभ्यामन्यत्र कुहचित् कुत्रचिदपि प्रजानां न भक्तिर्बभूव ॥ ५ ॥

रामस्य रूपे मतिरक्षियुक्ता कीर्त्यां सकर्णा रमते स्म वाणी[२] ।
शक्तिः प्रजानां सकराऽर्चनायां[३] कान्ता सकान्तेव समृद्धधाम्नि ॥ ६ ॥

(भा.दी.) रामस्येति । अक्ष्णा चक्षुषा युक्ता अक्षियुक्ता प्रजानां मतिः बुद्धिः, समृद्धं धाम तेजो यस्मिन् तत्तथा तस्मिन्, श्रीरामस्य यद्रूपं तस्मिन्, सकान्ता भर्तृसहिता कान्तेव स्त्रीव, रमते स्म अरमत । रमु क्रीडायां लट् । अनिमिषचक्षुषा श्रीरामं पश्यन्तो मनसा च तं स्मृतवन्त इत्यर्थः । सकर्णा कर्णसहिता वाक् वागिन्द्रियं श्रीरामस्य कीर्त्यां रमते स्म । सर्वदाऽपि श्रीरामयशः कर्णाभ्यां शृण्वन्तो वाचाऽकीर्तयन्नित्यर्थः । शक्तिः शारीरं बलं सकथा कथासहिता या अर्चना तस्यां रमते स्म । सकरेति पाठे सकरा हस्तसहिता शक्तिः श्रीरामस्य अर्चनायां रमते स्मेति सम्बन्धः । महता प्रयत्नेन श्रीरामार्चनादौ सदोद्युक्ता अभवन्नित्यर्थः ।। ६ ।।

---

१. **'रामे सर्वोत्तमत्वेन भक्तिः, ब्रह्मादिषु रामभक्तत्वेन भक्तिः प्रजाभिः कृता । नतु सर्वोत्तमत्वेन कृतेति भावः'** इति का.श्री. ।

२. **'स्म वाक् च'**

३. **'सक्तिः प्रजानां सकथार्चनायाम्' । 'शक्तिः प्रजानां सकथार्चनायाम्'** इति वि.ती.पाठः । **'भक्तिः प्रजानां जनानां अक्षियुक्ता नेत्रयुक्ता मतिर्बुद्धिः रामस्य रूपे सौन्दर्ये रमते स्म अरमत । चक्षुषा रामरूपं दृष्ट्वा प्रजाः सन्तुष्टा इति भावः । सकर्णा श्रोत्रसहिता प्रजानां वाणी वाक् रामस्य कीर्त्या रमते स्म । श्रोत्रेण रामकीर्तिं श्रुत्वा वाचा प्रतिपादितवन्त इति भावः । प्रजानां भक्तिः सकान्ता पतिसहिता कान्तेव योषिदिव समृद्धधाम्नि पूर्णकान्तौ रामे रमते स्म । तथा प्रजानां भक्तिः सकथार्चनायाम्, कथासहितपूजायां रमते स्म'** इति का.श्री. । सर्वमाकुलमिदं व्याख्यानम् ।

(सं.चं.) प्रजानामक्षियुक्ता मतिः कान्तयुक्ता कान्तेव रामस्य समृद्धतेजसि रूपे रमते स्म । एवं कान्तयुक्ता कान्तेव कर्णयुक्ता वाणी च रामस्य कीर्त्या रमते स्म । प्रजा राममनिमेषं पश्यन्तस्तद्रूपसौष्ठवमेव मनसा दध्युः । रामस्य गुणानाकर्णयन्तस्तद्यशः सदा कीर्तयामासुः । तदेवं 'चक्षुः श्रोत्रं मनो वाक् प्राणः' इति श्रुतिगदितेषु पञ्चस्विन्द्रियेषु चतुर्णां रामे रतिरुक्ता । चक्षुर्मन इति रविशङ्करौ । कर्णौ वागिति चन्द्राग्नी । अथ घ्राणदेवतां प्राणं कर्मदेवतामिन्द्रं चाऽह– शक्तिः प्राणशक्तिः, श्वासोच्छ्वाससमयं समग्रं जीवनमित्येतत् । कान्तयुक्ता कान्तेव करयुक्ता प्राणशक्तिः रामस्यार्चनायां रमते स्म । अर्चनार्थं प्राणन्तः कराभ्यां पुष्पाञ्जल्यादिना रामप्रतीकमर्चन्तः प्रजा अरमन्तेत्यर्थः ॥ ६ ॥

केचिन्मनोयोगकृतो मनोज्ञे रामे नवेन्दीवरसुन्दराभे ।
धन्या उतान्ये स्म विचारयन्ति तं सर्ववेदान्तकृतान्तसारम् ॥ ७ ॥

(भा.दी.) केचिदिति । केचिद्धन्याः मनोज्ञे मनोहरे, नवं यदिन्दीवरं तद्वत्सुन्दरा मनोहरा आभा यस्य स तथोक्तस्तस्मिन् श्रीरामे, मनसो योगः सम्बन्धस्तं कुर्वन्तीति तथोक्ताः, ध्यायन्त इत्यर्थः, आसन् । उत अन्ये धन्याः, सर्वे ये वेदान्ता उपनिषदस्तेषां कृतान्तः सिद्धान्तशास्त्रम्, ब्रह्ममीमांसाशास्त्रमित्यर्थः, तस्य सारं रहस्यप्रतिपाद्यभूतम्, तं श्रीरामं विचारयन्ति स्म, सच्छास्त्रश्रवणमननादिकं कुर्वन्तीत्यर्थः ॥ ७ ॥

(सं.चं.) मनसो योग एकाग्रता ध्यानं मनोयोगः । इन्दीवरं नीलोत्पलम् । तद्वत् सुन्दरी आभा अस्य । ध्यानमग्ना बभूवुरित्यर्थः । उत अन्ये च धन्याः साधकाः श्रवणमननाभ्यां तं विचारयन्ति स्म । कीदृशम्? सर्ववेदान्तकृतान्तसारम् । सर्वेषां वेदानामन्तश्चरमो यः कृतान्तः सिद्धान्तः भगवत्पारम्यरूपः । तस्य सारभूतम् । चरमा वा ये सिद्धान्ताः जगत्सत्यत्वजीवेश्वरभेददेवतातारतम्यादयस्तेषां सारभूतम्, परममुख्यतातात्पर्यविषयमित्यर्थः ॥ ७ ॥

कथां कथाज्ञा अवतारमूलां रामस्य तां रावणमारणान्ताम् ।
पराक्रमानुक्रमतोऽनुवर्ण्य ननन्दुरेनामनुमोद्य[1] चान्ये ॥ ८ ॥

(भा.दी.) कथामिति । कथाज्ञा, श्रीरामावतारादिषु कृतचरित्रविशेषज्ञाः अन्ये भक्ताः, अवतारः मूलमादिर्यस्याः सा तथा ताम्, अवतारमारभ्य वर्तमानामित्यर्थः, रावणस्य यन्मारणं संहरणं तदन्तेऽवसाने यस्याः सा तथा

१. '–रेतामनुमोद्य'

ताम्, श्रीरामस्य तां प्रसिद्धां कथाम्, पराक्रमाणां योऽनुक्रमोऽनुगमस्तस्मादिति ततः, अनुवर्ण्य ननन्दुः । नदि हर्षे लिट् । अन्ये एनां वर्ण्यमानां कथां श्रुत्वा, तत्र अनुमोद्य अनुमतीकृत्य ननन्दुरित्यन्वयः ॥ ८ ॥

(सं.चं.) अन्ये च धन्याः कथाज्ञाः अवताराम्भां रावणसंहारान्तां रामस्य तान्तां कथामनुवर्ण्य ननन्दुः । वर्णनं च नास्तव्यस्ततया । किन्तु पराक्रमानुक्रमतया । पराक्रमकथाक्रमनुसृत्यैव । ताटकासंहारमारभ्य रावणसंहारपर्यन्तमनुक्रमेण । अन्ये धन्या एतां वर्ण्यमानां कथामाकर्ण्य सशिरःकम्पमनुमोद्य ननन्दुः । अनुमोदनं साभिनन्दनमास्वादनम् ॥ ८ ॥

[१]रामाभिरामानुपराम राम रामाश्मरामारिविराम[२] राम ।
श्रीराम रामेति पुरा रमन्ते रामस्य नामामृतपायिनोऽन्ये ॥ ९ ॥

(भा.दी.) रामेति । अन्ये भक्ताः, अभिराम मनोहर हे राम, न विद्यते उपरामो नाशो यस्य स तथोक्तस्तस्य सम्बुद्धिः, अनादिनित्येत्यर्थः, हे राम, रामः नीलः अश्मा तद्वत्, इन्द्रनीलरत्नवदित्यर्थः, राम मनोहर, 'रामश्चारौ सितेऽसिते' इति वैजयन्ती । स्वरामेति क्वचित् पाठः । हे राम, अरीणां विरामो विनाशो यस्मात् स तथा तत्सम्बुद्धिः, समस्तशत्रुनाशकेत्यर्थः, हे राम, श्रियं रमयतीति श्रीरामस्तत्सम्बुद्धिः, श्रीः रामा भार्या यस्येति वा, हे राम, इति श्रीरामस्य नाम अमृतमिव नामामृतं तत् । पातुं शीलमेषामस्तीति तथोक्ताः सन्तः रमन्ते पुरा अरमन्त । रमु क्रीडायां लट् ॥ ९ ॥

(सं.चं.) रामाभिरामेति चेन्द्रवज्रा । अन्ये धन्या नामामृतपानेन नामस्मरणेन चरितार्था बभूवुः । नामामृतं पातुं शीलमेषामिति ताच्छील्ये णिनिः । 'सुप्यजातौ णिनिस्ताच्छील्ये' (अ.सू.३.२.७८) इति स्मरणात् । पुनःपुनः पिबन्तीति आभीक्ष्ण्ये वा । 'बहुलमाभीक्ष्ण्ये' (८१) इति च । श्रवणकीर्तने पूर्वमुदिते । अत्र स्मरणमुच्यते । 'शक्तिः प्रजानां सकराऽर्चनायाम्' इत्युक्तम् । राम अभिराम । योगिनो रमयन् रामः । स्त्रीणामभिरामः । रामाणामभिराम इत्येकं वा पदम् । उपरामो विरामोऽवसानम् । तदभावादनुपरामो नाशरहितः । रामरामरामेति भक्तिपारवश्यादाम्रेडनम् । रमाया अयं रमण इति च रामः । 'रामः पशुविशेषे स्याज्जामदग्न्ये हलायुधे । राघवे चासितश्वेतमनोज्ञेषु च वाच्यवत्' इति विश्वप्रकाशः । रामाश्मा नीलमणिः । तद्वद्रामो नीलः । अरीन् विरमयतीत्यरिविरामः । श्रीरामः श्रीरमणः । रमन्ते पुरा अरंसत । 'पुरि लुङ् चास्मे' (अ.सू.३.२.१२२) इत्युक्तम् ॥ ९ ॥

---

१. **'निश्चिततत्वा ध्यानमकुर्वन् । अनिश्चिततत्वा मीमांसां चक्रुः । मीमांसायामनधिकारिणः कथामवदन् । कथनेऽप्यनधिकारिणः कथामशृण्वन्नित्युक्तम् । तत्राप्यनधिकारिणः नामार्थज्ञानपूर्वकं नामोच्चारणमकुर्वन्नित्याह –रामेति । अन्ये धन्याः 'अन्त्यजा अपि ये भक्ता नामज्ञानाधिकारिणः' इत्युक्ता जनाः'** इत्यादि का.श्री. ।

२. **'राम स्वरामारिविराम'**

वर्णाश्रमाचारविशेषशोभानधर्म्मगन्धाविषयान् स्वधर्म्मान् ।
कामाद्यवद्यै[१] रहितान् विदूराद् रामाय सर्वे स्म समर्प्पयन्ति ॥ १० ॥

(भा.दी.) वर्णेति । सर्वे भक्तजनाः, वर्णाश्च आश्रमाश्च तेषां ये आचारविशेषास्तैः शोभा येषां ते तथा तान्, अधर्मस्य यो गन्धो लेशस्तस्य अविषयान्, अधर्मलेशमात्रेणापि कदाचित् कुत्राऽपि कथञ्चनापि रहितानित्यर्थः, कामः फलाकाङ्क्षा आदिर्येषां तानि तथोक्तानि, तानि च तानि अवद्यानि च, तैः रहितान्, स्वधर्मान् स्वविहितधर्मान्, विदूरात् समीपे अतिदूरे च, येये यत्रयत्र स्थितास्तत एवेत्यर्थः, श्रीरामे समर्पयन्ति स्म समर्पयामासुः । ऋ गतौ लट् ॥ १० ॥

(सं.चं.) आचारविशेषैः शोभमानान् अधर्मलेशविधुरान् । 'गन्धो लेशे महीगुणे' इति यादवप्रकाशः । कामादिभिर्दोषैश्च रहितान्, सर्वे जना नरा नार्यश्च रामाय विदूरात् स्वयं यत्र स्थितास्तत्रैव, नतु रामसमीपमेत्य । समर्पयन्ति स्म समार्पिपन् । ऋतेः ऋच्छतेर्वा णिचि पुगागमे सति रूपम् । तथा ह्यामनन्ति–'अर्तिह्री-व्ली-री-क्नूयी-क्ष्माय्यातां पुग् णौ' (अ.सू.७.३.३६) इति । 'अर्ति-अर्पयति । अर्तीति ऋ गतिप्राणनयोः (भ्वा.), ऋ गतौ (जु.) इति द्वयोरपि धात्वोर्ग्रहणम्' इति जयादित्यः ॥ १० ॥

सर्वत्र सर्वस्य च सर्ववित्तं स्वयोग्यतावृत्ति[२] च सर्ववित्त्वम् ।
तदा बभूवास्य महाजनस्य यदा स चक्री भुवि चक्रवर्त्ती ॥ ११ ॥

(भा.दी.) सर्वत्रेति । यदा स रामरूपी चक्री श्रीहरिः भुवि चक्रवर्ती सार्वभौमः, तदा अस्य तदानीं वर्तमानस्य सर्वस्य महाजनस्य, सर्वत्र सर्वदेशेऽपि सर्वं सम्पूर्णं वित्तं धनं तच्च बभूव । स्वस्य या योग्यता तया वृत्तिर्वर्तनं यस्य तत्तथोक्तं तत्, स्वयोग्यतानुसारीत्यर्थः, सर्वं वेत्तीति सर्ववित् तस्य भावस्तत्त्वम्, तच्चेत्यर्थः, बभूव ॥ ११ ॥

(सं.चं.) यदा स चक्री चक्रभृन्नारायणः रामः सन् भुवि चक्रवर्ती बभूव तदा अस्य महाजनस्य प्रजावर्गस्य, रामराज्यस्य प्रजा इत्येव प्रजानां महत्त्वम् । सर्वत्र राज्ये नगरे ग्रामे वा, सर्वं वित्तं बभूव । सर्वाः प्रजा वित्तपूर्णाः अभूवन्नित्येतत् । स्वयोग्यतानुगुणा वृत्तिरवस्थितिर्यस्य तादृशं सर्ववित्त्वम् । योग्यतानुगुणं सर्वज्ञत्वं च बभूव ॥ ११ ॥

---

१. **'कामायवद्यैः फलाकाङ्क्षादिदोषैः । कामक्रोधादिदोषैरिति वा'** इति वि.भू. । का.श्री. च ।

२. **'स्वयोग्यतावृत्ति सर्ववित्त्वम् । स्वयोग्यतानुसारेण सर्वतत्वपरिज्ञानम् । स्वयोग्यतावृत्ति स्वयोग्यतायामेव वर्तमानं सर्ववित्तं परिपूर्णधनम्'** इति वि.भू. । का.श्री. च ।

सर्वेन्द्रियानन्दकरानमन्दान् स्पर्शान् रसादीन् विषयानथान्यान् ।
शास्त्रोपपन्नाननुभुञ्जते[1] स्म रामस्य राज्ये न तु[2] बन्धहेतून् ॥ १२ ॥

(भा.दी.) सर्वेति । अथ, सर्वाणि यानीन्द्रियाणि तेषामानन्दस्तं कुर्वन्तीति तथोक्तास्तान्, अमन्दान् बहुलान्, शास्त्रेण उपपन्नान् युक्तान्, शास्त्रविहितानित्यर्थः, स्पर्शान् रसादीन् अथ अन्यान् शब्दादिविषयांश्च, श्रीरामस्य यद्राज्यं तस्मिन्, अनुभुञ्जते स्म अनुभूतवन्तः । भुज पालनाभ्यवहारयोर्लट् । बन्धहेतून् संसार-बन्धहेतून् शास्त्रनिषिद्धकामादिविषयान् नच नैव अनुभुञ्जते ॥ १२ ॥

(सं.चं.) सर्वेन्द्रियेतीन्द्रवज्रा । सर्वेन्द्रियानन्दकरान् शास्त्रविहितान् अमन्दाननल्पान् विषयाननुभुञ्जते स्म स्वस्वभावानुगुणमभुक्षत । परवनितालिङ्गनादिः स्पर्शो बन्धहेतुः । सुरापानादिबन्धहेतू रसः । तेन रसान् स्पर्शानिति जिह्वोपस्थजयं मुखत आह ॥ १२ ॥

सहस्रसंवत्सरजीविनस्ते[3] लावण्यतारुण्यगुणाभिरामाः ।
मुक्ता जरारोगपुरोगदोषै रामस्य राज्ये रमणाः सरामाः ॥ १३ ॥

(भा.दी.) सहस्रेति । श्रीरामस्य राज्ये सरामाः भार्यासहिताः ये रमणाः भर्तारः ते, सहस्रसङ्ख्याः संवत्सरास्तेषु जीवितुं शीलमेषामस्तीति तथोक्ताः अभूवन् । लावण्यं सौन्दर्यं तच्च, तारुण्यं यौवनं तच्च, लावण्यतारुण्ये तदाख्यौ यौ गुणौ ताभ्यामभिरामाः मनोहरा आसन् । जरा च रोगश्च तौ पुरोगा पुरःसरा येषां ते तथोक्तास्ते च ते दोषाश्च तैः मुक्ताः रहिताश्च बभूवुः ॥ १३ ॥

(सं.चं.) सहस्रसंवत्सरजीविनः । ताच्छील्ये णिनिरित्युक्तम् । सरामाः सललनाः रमणाः पुरुषाः । लावण्यमङ्गसौष्ठवम् । जरारोगाकालमरणादिदोषैर्मुक्ताः ॥ १३ ॥

वैधव्यवैधुर्य्यभयं न किञ्चिन्न पुत्रशोको नच मित्रशोकः ।
नामङ्गलं किञ्चिदथापरं च [4]मङ्गल्यदेवीरमणस्य राज्ये ॥ १४ ॥

(भा.दी.) वैधव्येति । मङ्गल्यस्य मङ्गलस्य देवी देवता महालक्ष्मीः, तस्या रमणो भर्ता, तस्य सीता-पतेरित्यर्थः, श्रीरामस्य राज्ये, विधवाया भावो वैधव्यं तच्च, विधुरस्य भावो वैधुर्यं तच्च ताभ्यां भयम्,

---

१. **'–पन्नान् ननु भुञ्जते'** २. **'नच बन्ध–'** इति वि.ती.पाठः । ३. **'–जीवनास्ते'** ४. **'माङ्गल्यदेवी–'**

तत्प्राप्तिनिमित्तभयमित्यर्थः, किञ्चिदपि न। तयोरप्राप्तेरेवेति भावः। पुत्रशोकः पुत्रालाभतन्मरणनिमित्तकदुःखं वा न। मित्रशोको वा मित्रालाभनिमित्ततन्मरणनिमित्तकदुःखं वा न। अथ अपरं च अमङ्गलं अशुभं किञ्चिदपि न च बभूवेति योजना ॥ १४ ॥

(सं.चं.) अकालमरणेन स्त्रीणां वैधव्यभयं पुरुषाणां वैधुर्यभयं वा तत्र किञ्चिदीषदपि नाऽसीत्। दुष्पुत्रजननेन वा पुत्रमरणेन वा पुत्रविरहेण वा शोकः पुत्रशोकः। एवं मैत्रीभङ्गेन मित्रमरणेन मित्रविरहेण वा शोको मित्रशोकः। अथापरं किमप्यमङ्गलं च नाऽसीत्। मङ्गलदेवताया रमाया रमणस्य हि राज्यं तत्। तत्र कथममङ्गलं मुखं प्रसरेत्। मङ्गल्या या लोकांस्त्रायते या च शुभकरी। 'मङ्गल्यस्त्रायमाणे स्याद् बिल्वेऽश्वत्थे मसूरके। मङ्गल्यं दध्नि मङ्गल्यो मनोज्ञे चाभिधेयवत्' इति विश्वप्रकाशः ॥ १४ ॥

यँय्यं जनः कामयतेऽर्थमत्र रामप्रसादात् सकलः सस स्यात्।
किं चित्रमेतज्जगतामधीशे रामे स्वयं राजनि राजमाने ॥ १५ ॥

(भा.दी.) यमिति। अत्र श्रीरामराज्ये जनः यंयं अर्थं प्राप्तुं कामयते इच्छति। कमु कान्तौ लट्। श्रीरामस्य प्रसादोऽनुग्रहस्तस्मात्, सकलः ससः अर्थः स्यात्। जगतां अधीशे राजमाने श्रीरामे स्वयं राजनि सति, एतत् उक्तं सर्वाभीष्टप्राप्त्यादिकं चित्रं किम्? न चित्रमित्यर्थः। तद्भक्तेषु भुवोऽधीश्वरेषु सत्स्वपि कामितार्थावाप्तेर्दर्शनादिति भावः ॥ १५ ॥

(सं.चं.) यंय्यंमितीन्द्रवज्रा। यंय्यं सस इति वीप्सायामैकपद्यम्। यंय्यमर्थं जनः कामयते ॥ १५ ॥

अनेन किं वा बहुनोदितेन रामस्य राज्यं वलयं धरायाः।
वैकुण्ठलोकप्रतिबिम्बभूतं विरिञ्चिलोकं प्रतिगर्ज्जतीदम् ॥ १६ ॥

(भा.दी.) अनेनेति। बहुना अनेन उदितेन वचसा किम्? न किमपि। साकल्येन वर्णयितुमशक्यत्वादिति भावः। श्रीरामस्य राज्यं राज्यभूतं धरायाः इदं वलयं मण्डलम्, वैकुण्ठाख्यो लोकस्तस्य प्रतिबिम्बभूतं सत्, तत्सदृशं सदित्यर्थः, विरिञ्चस्य यो लोकः सत्यलोकाख्यः, तं प्रति गर्जति प्रमुखतया सिंहनादं करोति। गर्ज शब्दे लट्। तदपेक्षयाऽप्युत्कृष्टगुणतया प्रकाशत इत्यर्थः ॥ १६ ॥

(सं.चं.) इदं धराया वलयं यदा रामस्य राज्यमास, यदाऽस्मिन् भूमण्डले रामो राजाऽस तदेदं वैकुण्ठलोक-प्रतिबिम्बभूतमास वैकुण्ठसदृशमास। 'प्रतिबिम्बोपमाने च सादृश्ये सन्निभं निभम्' इति यादवप्रकाशः। विरिञ्चिलोकं पुनः प्रतिगर्जति जिगीषया स्पर्धत इव ॥ १६ ॥

निर्दुःखसौख्यं स्थिरभक्तिभाजामनन्तशय्यः प्रदिशेदनन्तम् ।
स्वानुग्रहस्यास्य निदर्शनार्थं[1] रामः स्वराज्ये श्रियमातनोत् ताम् ॥ १७ ॥

(भा.दी.) निर्दुःखेति । अनन्तः शय्या यस्य स तथा श्रीरामः, अनन्तं नाशरहितम्, निर्गतं दुःखं यस्मात् तन्निर्दुःखं तादृशं यत्सौख्यं सुखं तत्, स्थिरा या भक्तिस्तां भजन्तीति तथोक्तास्तेषां प्रदिशेत् दद्यात् । दिशतेर्लिङ् । अस्य निर्दुःखसुखप्रदानसमर्थस्य स्वानुग्रहस्य, निदर्शनार्थं दृष्टान्तेन सम्यक् प्रत्यक्षतया प्रदर्शयितुम्, श्रीरामः स्वस्य यद्राज्यं तस्मिन्, वैकुण्ठसमानां श्रियं सम्पदं आतनोत् चक्रे । तनु करणे लङ् । श्रीरामः स्वभक्तानां निर्दुःखसौख्यात्मकं मोक्षं प्रदास्यामीत्येतदत्रापि तादृशसौख्यप्रदानेन स्पष्टीचकारेति भावः ॥ १७ ॥

(सं.चं.) अनन्तः शेषः शय्या शयनमस्येत्यनन्तशय्यः । अनन्तं दुःखासम्भिन्नं च सौख्यम् । एवं स्वानुग्रहस्यानन्तफलदत्वमभिनीय दर्शयितुं अत्रापि स्वराज्ये श्रियं सुखसमृद्धिं विस्तारयामास ॥ १७ ॥

अनाद्यनन्तं रमणं श्रिता या विना वियोगं सततं ततः श्रीः ।
सीताभिधामत्र रमां स्वरामां रामोऽभिरामां[2] रमयाम्बभूव ॥ १८ ॥

(भा.दी.) अनादीति । यतः या महालक्ष्मीः, न विद्येते आद्यन्तौ उत्पत्तिनाशौ यस्य स तथा तम्, रमणं भर्तारं श्रीरामम्, वियोगो विश्लेषस्तं विना सततं श्रिता, (ततः) तस्मात् श्रीः श्रीशब्दवाच्या । श्रयत इति श्रीरित्यनुशासनादिति भावः । ततः नित्यं भगवदाश्रितत्वादेव श्रीरामः सीतेति अभिधा यस्याः सा तथा ताम्, स्वरामां स्वभार्याम्, अभिरामां मनोहरां श्रियं (अत्र) रमयाम्बभूव रमयामास ॥ १८ ॥

(सं.चं.) श्रयत इति श्रीः । असाधारण्येन व्यपदेशा भवन्तीति अनाद्यनन्तं श्रयत इति सिद्ध्यति । तामेवात्र सीताभिधां स्वरमणीम् । अत्रायोध्यायाम् ॥ १८ ॥

सीतामुखेन्दोः सदृशोऽयमिन्दुर्व्यङ्को भवेच्चेदिति काव्यभङ्गी ।
सीतामुखेन्दुः स्वरुचेन्दुवृन्दं कळङ्कहीनं च नयेत् कळङ्कम् ॥ १९ ॥

(भा.दी.) सीतेति । चेद्यदि अयं प्रसिद्धः इन्दुः, विगतोऽङ्को यस्य स तथोक्तः, निष्कलङ्क इत्यर्थः, भवेत् तर्हि सीतायाः यन्मुखं तदेवेन्दुस्तस्य सदृशः समानः (भवेत्) इति काव्यभङ्गी काव्यप्रक्रिया, कवीनां

१. '–हस्याभिनिदर्शनार्थम्' २. '–ऽभिरामो रमयाम्–'

वर्णनप्रकार इत्यर्थः । विचार्यमाणे तदप्यनुपपन्नमित्याह– **सीते**ति । सीतायाः यन्मुखं तदेवेन्दुः, स्वरुचा स्वकान्त्या, कळङ्कहीनं कळङ्करहितं, इन्दूनां वृन्दं समूहस्तदपि, कळङ्को लाञ्छनं तं नयेत् प्रापयेत् । ततोऽप्यनन्तगुणतया शोभनत्वादिति भावः ॥ १९ ॥

(सं.चं.) व्यङ्को निष्कळङ्को भवेच्चेत् । काव्यभङ्गी काव्यशैली । केवलं कविसमय एवायम्, नात्र तथ्यमित्यर्थः । किं तर्हि तथ्यम्? कळङ्कहीनमिन्दुवृन्दमपि स्वरुचा सीतामुखेन्दुः कळङ्कं नयेदिति तु तथ्यम् । नयतेः द्रुह्यादित्वाद् द्विकर्मकत्वम् ॥ १९ ॥

अत्रस्तमाणिक्यमणिप्रकाशैः पुष्पैर्विनिद्रैः[१] परिभासमानम्[२] ।
प्रविश्य सोऽशोकवनं विशोकः स्वानन्दमूर्त्तिर्विजहार देव्या ॥ २० ॥

(भा.दी.) अत्रस्तेति । विगतः शोको यस्मात् स तथोक्तः, स्वः स्वरूपभूतो य आनन्दः स एव मूर्तिर्देहो यस्य स तथोक्तः, सः श्रीरामः । अनेन रमणं दुःखनिवृत्त्यर्थं स्वात्मसुखार्थं वा न भवति । किन्तु सीतायामनुग्रहवशादेवेति दर्शितम् । (अत्रस्ताः) न विद्यते त्रासाख्यमणिदोषो येषां ते तथोक्ताः, ते च माणिक्यमणयश्च तेषां प्रकाश इव प्रकाशो येषां तानि तथा, तानि तैः, उत्फुल्लैरतिरक्तैश्चेत्यर्थः, विनिद्रैः अम्लानपुष्पैः, परिभासमानं शोभमानं अशोकवनं प्रविश्य देव्या सीतया सह विजहार चिक्रीड ॥ २० ॥

(सं.चं.) अत्रस्ता निर्दुष्टा माणिक्यमणयः, तद्वत् प्रकाशमानैः । 'मणिदोषे भये त्रासः' इति यादवप्रकाशः । विनिद्रैर्विकसितैः । 'रेमे तया स परमः स्वरतोऽपि नित्यं नित्योन्नतप्रमदभारभृतस्वभावः । पूर्णोडुराजसुविराजितसन्निशासु दीप्यन्नशोकवनिकासु सुपुष्पितासु' (९.१४) इति निर्णये । 'स विसृज्य ततो रामः पुष्पकं हेमभूषितम् । प्रविवेश महाबाहुरशोकवनिकां तदा' (४२.१) इति चोत्तरकाण्डे ॥ २० ॥

शम्पोल्लसच्चम्पकपुष्पवर्षैर्म्मन्दानिलान्दोलितमाधवीभिः ।
मधुव्रतानां[३] मधुरैश्च गीतैर्द्देवः सिषेवे मधुमाधवाभ्याम् ॥ २१ ॥

(भा.दी.) षड्तूनां वर्णनं क्रमेण करोति– **शम्पेत्या**दिना । शम्पावत् तडिद्वदुल्लसन्ति शोभमानानि यानि चम्पकानि चम्पकपुष्पाणि तेषां वर्षाणि तैः । 'शम्पा चपला क्षणिका शतह्रदा । ह्रादिनी तडिद्विद्युत्' इति हलः । मन्दानिलेन आन्दोलिताः कम्पिताः या माधव्यो माधव्याख्यलतास्ताभिः, माधवीलताकुसुमादिभि-

---

१. **'विनिद्रैः अम्लानैः । विकसितैरिति वा'** इति वि.भू. । का.श्री. च । २. **'परिशोभमानम्'**

३. **'मधु वर्तयन्ति भासयन्तीति मधुव्रताः'** इति का.श्री. । **'मधु व्रतं भक्ष्यं येषाम्'** इति वैयाकरणाः ।

रित्यर्थः, मधुव्रताः भ्रमरास्तेषाम्, मधुराणि मनोहराणि तैः, गीतानि गानानि तैश्च, मधुमाधवाभ्यां वसन्तर्तौ विद्यमानाभ्यां मधुमाधवाख्यमासाभ्यां 'चैत्रादिमासौ मधुमाधवौ द्वौ' इति हलः । देवः श्रीरामः सिषेवे सेवितो बभूव । षेवृ सेवने लिट् ॥ २१ ॥

(सं.चं.) अथाशोकवनिकायामृतुवैभवमाह । तत्र वसन्तः । शम्पा तटित् । तद्वद् भासमानानि चम्पक-पुष्पाणि । तेषां वर्षैः । आन्दोलिताः प्रेङ्खोलिताः माधव्यः वासन्त्यः । मधुमासे पुष्प्यन्तीति माधव्यः । अतिमुक्तकुसुमानि । लता वा । कुसुमानि पुष्प्यन्ति विकसन्ति । पुष्पविकसने । लताः पुष्प्यन्ति पुष्पवत्यो भवन्ति । 'कालात् साधुपुष्प्यत्पच्यमानेषु' (अ.सू.४.३.४३) इत्यण् । 'वैशाखे माधवः कृष्णो माधवी चातिमुक्तके' इति रन्तिदेवः । '**ಅದಿಮುಕ್ತ**' इति '**ಇರುವಂತಿಗೆ**' इति च भाषायाम् । मधुमाधवाभ्यां चैत्र-वैशाखाभ्यां रामः सिषेवे असेव्यत ॥ २१ ॥

उल्लासिनीभिर्नवमल्लिकाभी रामाङ्घ्रिमाराध्य मलैरपेतौ ।
ऋतू इमौ[1] शुक्लशुची प्रसिद्धौ न नामतः केवलमर्थतोऽपि ॥ २२ ॥

(भा.दी.) उल्लासिनीभिरिति । इमौ मधुमाधवयोरनन्तरौ, शुक्लश्च शुचिश्च तौ शुक्लशुच्याख्यौ, ऋतू मासौ, ग्रीष्मर्तुसम्बन्धित्वादृतू इति, अतः ज्येष्ठाषाढमासावित्यर्थः, उल्लसिनीभिः विकासवतीभिः, नवमल्लिकाभिः नूतनमल्लिकाभिः, श्रीरामस्य योऽङ्घ्रिस्तं आराध्य, मलानि कल्मषाणि तैः अपेतौ रहितौ सन्तौ, न केवलं नामत एव शुक्लशुची अभूताम् । अपि तर्हि उक्तप्रकारेण श्रीरामसेवाकरणात् अर्थतोऽपि शुक्लशुची निर्मलत्वशुद्धत्वनिमित्ताभ्यां शुक्लशुची इति प्रसिद्धौ अभूतामित्यर्थः ॥ २२ ॥

(सं.चं.) शुक्लो ज्येष्ठः । शुक्रो वा । शुचिराषाढः । ऋतू इति मासयोः ऋतुत्वोपचारः । ग्रीष्मर्तुरित्यर्थः । श्रुतरप्याह–'मधुमाधवौ वासन्तिकावृतू' इत्यादि । शुक्लाभिः शुचिभिर्नवमल्लिकाभी रामार्चनादर्थतोऽपि शुक्लशुची अभूताम् ॥ २२ ॥

खर्जूरजम्बूफलसन्निवेद्यमुर्वीश्च दूर्वास्तरुणं च वारि ।
रामेऽर्प्पयन् केकिकुलस्य नृत्तैर्गीतैश्च धन्यो[2] जलदर्त्तुरासीत् ॥ २३ ॥

---

१. '**ऋतू ग्रीष्मर्तौ विद्यमानत्वादृतुनामकौ**' इति का.श्री. । '**ऋतुसम्बन्धित्वादृतू इत्युच्येते**' इति वि.भू. ।

२. '**स्नानार्थं नूतनं वारि, आस्तरणार्थं दूर्वाः, भक्षणार्थं खर्जूरादिफलं दत्वा, केकिकुलगीतैः स्तुत्वा जलदर्तुः कृतकृत्य आसीदिति भावः**' इति का.श्री. ।

(भा.दी.) खर्जूरेति । जलदर्तुः वर्षर्तुः, केकिनां मयूराणां यत्कुलं समूहस्तस्य, नृत्तानि नर्तनानि तैः, गीतानि गानानि तैश्च समम्, खर्जूराश्च जम्ब्वश्च तासां यानि फलानि तान्येव सदुत्तमं निवेद्यं समर्पणार्हं वस्तु तत्, उर्वीः महतीः बहळा वा दूर्वाश्च, तरुणं नूतनं वारि च, श्रीरामे अर्पयन् सन् धन्यः आसीत् ॥ २३ ॥

(सं.चं.) खर्जूरेतीन्द्रवज्रा । जलदर्तुरिति श्रावणभाद्रपदौ । खर्जूरजम्बूफलाख्यं सन्निवेद्यं समर्पणीयं द्रव्यं रामेऽर्पयन् । उर्वीः विपुला दूर्वाः, तरुणं नूतनं मेघच्युतं वारि चार्पयन् धन्यः कृतार्थो बभूव ॥ २३ ॥

कर्णावतंसार्थमनिन्दनीयं दत्वा नवेन्दीवरमिन्दिरायै ।
लीलारविन्दं च करारविन्दे दासीवदासीच्छरदाशु देव्याः ॥ २४ ॥

(भा.दी.) कर्णेति । आश्विनकार्त्तिकमासात्मिका शरत्, इन्दिरायै सीतायै, कर्णस्य अवतंसः आभरण-विशेषस्तदर्थम्, कर्णाभरणविशेषं कर्तुमित्यर्थः, अनिन्दनीयं श्रेष्ठं नवेन्दीवरं नूतननीलकुमुदम्, 'इन्दीवरं च नीलेऽस्मिन् सिते कुमुदकैरवे' इत्यमरः, दत्वा, कर एवारविन्दं तस्मिन् लीलारविन्दं च दत्वा, तदा देव्याः सीतायाः दासीवत् आसीत् ॥ २४ ॥

(सं.चं.) कर्णावतंसेति चेन्द्रवज्रा । कर्णावतंसः कर्णभूषणम् । अवतंस इति कर्णभूषणमुच्यते शिरोभूषणं च । व्यावृत्तये स्फुटत्वाय च कर्णपदमादत्त । नवमिन्दीवरं नीलोत्पलम् । करारविन्दे च लीलार्थमरविन्दं च दत्वा । शरत् आश्विनकार्तिकौ । दासीव बभूव । श्रवणसुभगः प्रासः ॥ २४ ॥

परिस्फुरत्स्फाटिकभित्तिशोभां चक्रे हिमानीं परितो हिमर्त्तुः ।
भृत्यः पटुः काण्डपटीमिवाग्र्यामेकान्तभाजोरिह देवदेव्योः ॥ २५ ॥

(भा.दी.) परीति । हिमर्तुः पुष्यमाघमासात्मको हिमर्तुः, परिस्फुरन्ती स्फाटिकी स्फटिकमयी या भित्तिः, तद्वच्छोभा यस्याः सा तथा ताम्, हिमानीं हिमसमूहम्, 'हिमानी हिमसन्ततिः' इत्यमरः, इह अयोध्यायां क्रीडार्थं एकान्तमेकान्तप्रदेशं भजत इति तथोक्ते (तयोः), देवदेव्योः श्रीरामसीतयोः, पटुः कुशलः भृत्यः अग्र्यां श्रेष्ठां काण्डपटीमिव यवनिकामिव, पिधानवस्त्रमिवेत्यर्थः, चक्रे ॥ २५ ॥

(सं.चं.) हिमर्तुः हेमन्तः । मार्गशीर्षः पुष्यश्च । एकान्ते विहरतोः सीतारामयोः परितः काण्डपटीमिव चक्रे रचयामास । 'काण्डपटः स्यादपटी प्रतिसीरा यवनिका तिरस्करिणी' इति यादवप्रकाशः ॥ २५ ॥

नैकं विनिद्रं फलिनीप्रसूनमापादितं यच्छिशिरेण भक्त्या ।
तन्नर्म्मसाचिव्यकृदप्युपांशु मन्दानिलो मन्दरधारिणेऽदात् ॥ २६ ॥

(भा.दी.) नैकमिति । शिशिरेण कुम्भमीनमासात्मकेन शिशिरर्तुना, एकं न भवतीति नैकम्, अतिबहुल-मित्यर्थः, विगता निद्रा यस्मात् तथा तत्, उत्फुल्लमित्यर्थः, फलिन्याः प्रियङ्ग्वाख्यलतायाः प्रसूनं पुष्पम्, 'प्रियङ्गुः फलिनी फली' इत्यमरः, भक्त्या आपादितं सम्पादितं सत्, तादृशं तत् पुष्पम्, जातावेकवचनम्, मन्दानिलोऽपि मन्दवायुरपि, नर्मणि सीतया सह परिहासक्रियायां साचिव्यं सचिवत्वं तत्करोतीति तथोक्तः, क्रीडासाधानादिकमानीय दत्वा सेवां कुर्वन् सन्नित्यर्थः, उपांशु एकान्ते, मन्दरधारिणे कूर्मरूपेण मन्दराचलं धृतवते, श्रीरामाय अदात् आनीय दत्तवान् ॥ २६ ॥

(सं.चं.) नैकमित्यपीन्द्रवज्रा । माघफाल्गुनौ शिशिरर्तुः । फलिनी अग्निशिखापरनामधेया शक्रपुष्पी । प्रसूनजातम् । नैकमिति विशेषणात् । शिशिरर्तुना यद् भक्त्या निष्पादितम् । तत् फलिनीकुसुमं मन्दानिलो रामरूपाय मन्दरधारिणे ददौ । कीदृशो मन्दानिलः? उपांशु एकान्ते नर्मसाचिव्यकृत् । सीतारामयोः नर्मसु लीलाकर्मसु साहाय्यकृत् । 'सचिवः सहाये मन्त्रिणि स्मृतः' इति विश्वप्रकाशः ॥ २६ ॥

सर्वर्त्तवः सर्वगुणाभिरामास्तं यौगपद्येन सिषेविरेऽत्र ।
[1]स्वाराममप्यद्भुतभावभाजा देव्याऽतिदिव्यं रममाणमीशम् ॥ २७ ॥

(भा.दी.) सर्वेति । सर्वे ये गुणास्तैः अभिरामाः, मनोहराः, सर्वे वसन्ताद्याः ऋतवः सर्वर्तवः, स्वेन आत्मना रमत इति स्वारामस्तम्, तथाऽपि सीतानुग्रहार्थम्, अत्यद्भुतो यो भावो लीला तं भजतीति तथोक्ता तया, 'भावो लीलाक्रियाचेष्टाभूत्यभिप्रायजन्तुषु' इति वैजयन्ती, देव्या सीतया, अतिदिव्यं अत्यलौकिकं यथा भवति तथा, अत्र अयोध्यायाम्, रममाणं ईशं तं श्रीरामम्, यौगपद्यं युगपत् तेन, युगपदेव गत्वेत्यर्थः, सिषेविरे सर्वदा सम्यक् भक्त्या सेवितवन्तः । षेवृ सेवने लिट् ॥ २७ ॥

(सं.चं.) सर्वर्तव इति चेन्द्रवज्रा । सर्वेऽप्यृतवः सर्वैरप्यृतुधर्मैरभिरामाः । स्वाराममात्माराममपि देव्या रममाणम् । दिव्यं रमणमप्यतिगतं यथा स्यात् तथा । कीदृश्या देव्या? अद्भुतभावभाजा । भाविदेवकार्यार्थं जननी स्यामित्यद्भुतं भावमाशयं भजमानया । अद्भुतं भावं लीलाविशेषं भजमानया । अद्भुतं भावं भगवति

१. **'स्वाराममत्यद्भुत–'** इति वि.ती.पाठः। **'स्वाराममपि स्वरूपभूतपूर्णसुखमपि अद्भुतभावभाजा आश्चर्यकरभक्तियुक्तया देव्या सीतया रममाणम्'** इति का.श्री. ।

भक्तिं च भजमानया। 'भावः स्वभावेऽभिप्राये चेष्टासत्तात्मजन्मसु। क्रियालीलापदार्थेषु बुधजन्तुविभूतिषु' इति विश्वप्रकाशः। तेन अद्भुतं भावं विभूतिं भजमानया च। रतिश्च शृङ्गारभावः। तेनाद्भुतां रतिं भजमानया च ॥ २७ ॥

गन्धर्वविद्याधरचारणाद्याः सहाप्सरोभिर्जगुरेत्य रामम्।
सदा सदानन्दतनुं मुनीन्द्राः सहामरेन्द्रैरभितुष्टुवुस्तम् ॥ २८ ॥

(भा.दी.) गन्धर्वेति। गन्धर्वाश्च विद्याधराश्च चारणाश्च ते आद्या येषां ते तथोक्ताः, अप्सरोभिः उर्वश्यादिभिः सह साकम्, श्रीरामं एत्य सदा जगुः । गै गाने लिट्। मुनीन्द्राः वसिष्ठादयः, अमरेन्द्रैः ब्रह्मादिभिः सह, सन् आनन्दः स एव तनुः शरीरं यस्य स तथा तं श्रीरामं अभितुष्टुवुः संस्तुतवन्तः ॥ २८ ॥

(सं.चं.) गन्धर्वविद्याधरचारणाद्याः देवयोनिविशेषाः। 'गन्धर्वाप्सरसः सिद्धाः यक्षरक्षांसि चारणाः। भूतप्रेतपिशाचाश्च विद्याध्रा किन्नरादयः' (३.११.२६) इति भागवते। नृत्तगानादिकर्तारः गन्धर्वाः अप्सरसश्च। विद्याधरा काले सेवाकर्तारः। चाराश्चारणाः। 'गायन्ति चैनमनुरक्तधियः सुकण्ठा गन्धर्व-चारणगणाः सह चाप्सरोभिः। तं तुष्टुवुर्मुनिगणाः सहिताः सुरेशै राजान एनमनुयान्ति सदाऽप्रमत्ताः' (९.१५) इति निर्णये ॥ २८ ॥

त्रयोदशैवं त्रिदशाधिनाथः समाः सहस्राणि महीं ररक्ष।
सुराहितध्वान्तनिकृन्तनार्को रामो महत्कैरववृन्दचन्द्रः ॥ २९ ॥

(भा.दी.) त्रयोदशेति। त्रिदशाधिनाथः देवाधीश्वरः श्रीरामः, त्र्यधिका दश त्रयोदश सहस्राणि समाः संवत्सरान्, त्रयोदशसहस्रसंवत्सरेष्वित्यर्थः, सुराणामहिता ये दैत्यादयस्त एव ध्वान्तानि अन्धकारास्तेषां निकृन्तनं विनशनं तस्मिन् अर्क इवार्कः, दुष्टा१नां निग्रहं कुर्वन् सन्नित्यर्थः, महान्त एव उत्तमा एव कैरववृन्दानि कुमुदपुष्पसमूहाः, तेषां चन्द्र इव चन्द्रः, शिष्टानां प्रतिपालनं कुर्वन् सन्नित्यर्थः, एवं शश्वदेकप्रकारेणैव महीं ररक्ष। रक्ष पालने लिट् ॥ २९ ॥

(सं.चं.) त्रयोदश सहस्राणि समाः वत्सरान्। निर्णये च–'एवं त्रयोदशसहस्रमसौ समास्तु पृथ्वीं ररक्ष विजितारिरमोघवीर्यः' (९.१६) इति। भागवते च–'त्रयोदशाब्दसाहस्रमग्निहोत्रमखण्डितम्' (९.९.१८) इति। २७ दिनात्मकनाक्षत्रमासगणनया ३२४ दिनात्मको वत्सरो भवति। अनया गणनया त्रयोदशसहस्राणि समा रामराज्यकालः। त्रिंशद्दिनात्मकमासपक्षे त्वेकादशसहस्रसमाः। तद्विवक्षया 'दशवर्षसहस्राणि दश-

वर्षशतानि च' इति रामायणभारतादिवचनानि प्रवृत्तानीति न विरोधः । अधिकमस्मत्कृतायां निर्णयभावचन्द्रिकायाम् । सुराहिता असुरा ध्वान्तानीव तेषां निकृन्तनेऽयमर्क इव । महान्तः सज्जनाः कैरववृन्दमिव । तेषामयं चन्द्र इवाऽनन्ददः । कैरवं कुमुदम् । 'ಕೊಳೆಹೂವು' इति भाषायाम् ॥ २९ ॥

महान्वयस्यास्य[१] समेधनाय बभार गर्भं भुवनप्रगल्भम् ।
विदेहपुत्री रघुवंशकेतोः पुराणमायेव पुराणमूर्त्तेः ॥ ३० ॥

(भा.दी.) महेति । विदेहपुत्री जनकपुत्री सीता, महान् पूज्यो योऽन्वयस्तस्य, अस्य श्रीरामेणावतीर्णस्य सूर्यवंशस्य, समेधनं सम्यगभिवृद्धिस्तस्मै, भुवनेषु प्रगल्भः श्रेष्ठस्तं गर्भम्, पुराणी प्रळयकालेऽप्यविनष्टा मूर्तिः शरीरं यस्य स तथा तस्मात्, पुराणमायेव श्रीमहालक्ष्मीरिव, रघुवंशकेतोः श्रीरामात् बभार ॥ ३० ॥

(सं.चं.) महान्वयस्येत्युपेन्द्रवज्रा । समेधनाय वंशवृक्षस्य निरन्तरतायै । प्रगल्भं विख्यातम् । पुराणमूर्त्तेः वासुदेवात् तज्जाया पुराणी मायेव । या विरिञ्चं सुषुवे ॥ ३० ॥

कुशं लवं चाथ यमौ कुमाराविन्द्रानलांशौ[२] सुषुवे सुमध्या ।
यच्छैशवं रामकथाप्रसङ्गैरानन्दयत् तापसमानसानि ॥ ३१ ॥

(भा.दी.) कुशमिति । अथ, सु शोभनं मध्यं यस्याः सा तथोक्ता सा सीता, इन्द्रश्च अनलोऽग्निश्च तयोरंशौ, यमौ यमळौ, कुशं लवं चेति कुमारौ बालकौ सुषुवे प्रसूतवती । षू प्रसवे लिट् । ययोः शैशवं यच्छैशवम्, कुशलवबाल्यावस्थेत्यर्थः, श्रीरामस्य याः कथास्तासां प्रसङ्गास्तैः, तापसानां वाल्मीक्यादिमुनीनां मानसानि मनांसि आनन्दयत् अतोषयत् । नदि हर्षे लङ् । अनेन च तयोरुत्पत्तिर्वाल्मीकेराश्रम इत्युक्तं भवति । तत्र च कळभाषणमारभ्य श्रीरामकथागानादितत्परावास्तामिति भावः ॥ ३१ ॥

(सं.चं.) 'मुखादिन्द्रश्चाग्निश्च' इति यौ पुरा पुरुषमुखादुद्गतौ तावेवात्र यमळौ रामतनयौ बभूवतुरित्याह– कुशं लवं च । यच्छैशवं तापसमानसान्यानन्दयदिति । अनेन लवकुशयोर्वाल्मीकेराश्रमे जननं तत्र वाल्मीकिना रामायणपाठनं च सूचितम् । एतद् विना अन्यत्र सीतापरित्यागादिके सर्वत्र कविर्मौनमेव श्रयते ॥ ३१ ॥

---

१. 'महान्ववायस्य'

२. 'इन्द्रानलांशौ । तत्र कुश इन्द्रः । लवस्त्वनलांश इत्यर्थः' इति वि.भू. ।

दशशतनयनो वा तान् सहस्रााननो वा
दशशतहृदयो वा केवलं[1] वेदगर्भः ।
न गणयति गुणौघान् रामदेवस्य सर्वा-
नहह वयमधीरा वर्ण्णयामः कथं तान् **॥ ३२ ॥**

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायण उत्तरकाण्डे द्वितीयः सर्ग्गः ॥

—०—

(भा.दी.) कविरात्मनः श्रीरामकथायाः साकल्येन वर्णनासामर्थ्यं कैमुत्यन्यायेन दर्शयति– दशशतेति । दश च तानि शतानि च दशशतानि, सहस्रमित्यर्थः, तावन्ति नयनानि यस्य स तथोक्त इन्द्रो वा, तान् श्रुत्यादिसिद्धान्, सर्वान् श्रीरामदेवस्य गुणौघान् गुणसमूहान्, न गणयति साकल्येन न पश्यति । गण सङ्ख्याने लट् । सहस्राक्षश्चापि साकल्येन द्रष्टुमसमर्थ इति भावः । सहस्रं आननानि यस्य स तथोक्तः (शेषो वा न गणयति न वक्ति), साकल्येन वक्तुमसमर्थ इत्यर्थः । दशशतानि हृदयानि बुद्धयो यस्य स तथोक्तः, सर्वज्ञ इत्यर्थः, केवलं वेदगर्भो वा चतुर्मुखो वा, तान् गुणान् न गणयति न चिन्तयति, साकल्येन तत्स्मर्तुम-समर्थ इत्यर्थः, धातूनामनेकार्थत्वादत्र गणधातोरनेकधात्वर्थत्वमविरुद्धम् । अधीराः इन्द्राद्यपेक्षयाऽल्पज्ञाः वयं तान् ब्रह्माद्यैरपि साकल्येन स्मर्तुमशक्यान् सर्वगुणान् कथं वा साकल्येन वर्णयामः? न कथमपीत्यर्थः । वर्ण वर्णक्रियाविस्तारगुणवचनेषु लट् । अहह आश्चर्यम् । 'अहहाद्भुतखेदयोः' इति वैजयन्ती ॥ ३२ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायामुत्तरकाण्डे द्वितीयः सर्गः ॥

—०—

(सं.चं.) मालिन्योपसंहरति– दशशतेत्यादिना । सहस्राक्ष इन्द्रः । सहस्राननः शेषः । दशशतहृदयः पूर्णहृदयः पूर्णप्रज्ञो वेदगर्भः केवलं चतुर्मुख एक एव वा । केवलं कृत्स्नं यथा स्यात् तथा वा । 'केवलं निश्चिते क्लीबे वाच्यवत्त्वेककृत्स्नयोः' इति यादवप्रकाशः । एतेऽपि गुणौघान् न गणयितुमीशते । वयं पुनरधीरा अल्प-प्रज्ञाः ॥ ३२ ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायामुत्तरकाण्डे द्वितीयसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– ३१५२+३२=३१८४]

---

१. **'केवलं मुख्यं यथा तथा तान् न गणयति'** इति का.श्री. । नातिस्वरसं व्याख्यानम् ।

तृतीयः सर्ग्गः

कदाचित् प्रणतं प्रेक्ष्य लक्ष्मणं लक्ष्मणाग्रजः ।
उवाच वाचं सद्धर्म्माञ्छिक्षयन् क्षत्रियोचितान् ॥ १ ॥

(भा.दी.) श्रीरामेण लक्ष्मणं प्रत्युपदिष्टक्षत्रियधर्मप्रकारं दर्शयितुमुपक्रमते– **कदाचिदिति** । लक्ष्मणाग्रजः श्रीरामः कदाचित् प्रणतं लक्ष्मणं प्रेक्ष्य क्षत्रियोचितान् सद्धर्मान् शिक्षयन् सन् वाचं उवाच ॥ १ ॥

(सं.चं.) लक्ष्मणस्य तद्व्याजेन सर्वलोकस्य च सद्धर्मान् शिक्षयन् । सतो धर्मान् । सतां वा धर्मान् । सीतापरित्यागानन्तरं प्रवृत्तोऽयं प्रसङ्गः ॥ १ ॥

पौरजानपदानां यत्[१] कार्य्यं लक्ष्मण चिन्त्यताम् ।
अविचारयतो[२] राज्ञो धर्म्मकामौ विनश्यतः ॥ २ ॥

(भा.दी.) **पौरेति** । हे लक्ष्मण, यस्मात् अविचारयतः राज्यविचारमकुर्वतः राज्ञः धर्मकामौ विनश्यतः नाशं गच्छतः । नश अदर्शने लट् । तस्मात् पुरे विद्यमानाः पौरास्ते, जनपदेषु प्रसिद्धराष्ट्रेषु विद्यमाना जानपदास्ते च, तेषां जनानां यत् कार्यं तत् चिन्त्यतां विचार्यताम् । चिति स्मृत्यां लोट् ॥ २ ॥

(सं.चं.) कार्यं यत् तेषां हितं कर्तव्यम्, यच्च तैरपेक्षितं सङ्कटनिवारणम् । 'पौरकार्याणि यो राजा न करोति दिनेदिने । स मृतो नरके घोरे पात्यते नात्र संशयः' (उ.कां.५३.६) इति च ॥ २ ॥

[३]गोविवादेन सम्प्राप्तौ ब्राह्मणौ राजवेश्मनि ।
दिनत्रयान्तेऽप्यप्रेक्ष्य नृगं शापममुञ्चताम् ॥ ३ ॥

---

१. **'–पदानां हि कार्यम्'** २. **'अविचारयितू राज्ञो–'**

३. **'पूर्वं क्वचिद् विवादेन ब्राह्मणो राजवेश्मनि । दिनत्रयान्तेऽप्यप्रेक्ष्य नृपं शापममुञ्चत'** इति वि.भू. पाठ इति भाति । **'पूर्वं क्वचित् कदाचित् केनचिद् (विवादेन) ब्राह्मणो राजवेश्मनि कस्यचिद् राज्ञः सद्मनि । अप्रेक्ष्य राजानमदृष्ट्वा'** इति हि तद्व्याख्यानम् ।

(भा.दी.) गविति । गोर्यो विवादः 'इयं मह्यं नृगेण दत्ता इयं मह्यं नृगेण दत्ता' इति परस्परविवादः, तेन सम्प्राप्तौ नृगनामकराजानं प्रष्टुं तन्मन्दिरमागतौ ब्राह्मणौ, राज्ञो नृगस्य यद्वेश्म मन्दिरं तस्मिन्, दिनानां यत्त्रयं तस्यान्तोऽवसानं तस्मिन्नपि नृगं अप्रेक्ष्य, कृकलासो भवेति यः शापस्तं अमुञ्चतां ददतुः । मुच्ल् धातो-र्लङ् । अतो राज्ञा पौरजानपदानां कार्यमप्रमादेनावश्यं विचार्यमिति भावः । नृगाख्यो हि राजा दानशीलः कदाचित् कस्मैचित् ब्राह्मणाय काश्चिद्गाः प्रदत्तवान् । काचित् तं मुक्त्वा राजमन्दिरमुपाजगाम । स्वमन्दिरस्थगोमण्डलप्रविष्टां च तामजानन् पुनर्द्वितीयदिवसेऽन्यस्मै कस्मैचित् विप्राय दत्तवान् । तेन च नीत्वा स्वगृहे निबद्धां मार्गमाणो दृष्ट्वा, (उभावपि)मह्यमियं नृगेण दत्ता मह्यमियं नृगेण दत्तेति विवदमानौ नृगं विचारयितुं गतौ तौ राजभवनद्वारि प्रवेष्टुं नृगशासनमप्राप्य त्रिरात्रान्ते क्रुद्धौ सन्तौ कृकलासो भविष्यसीति शापं ददतुरिति रामायणे प्रसिद्धम् ॥ ३ ॥

(सं.चं.) गोविवादेन । तथाचेयं रामायणे कथा–'श्रूयते हि पुरा राजा नृगो नाम महायशाः । बभूव पृथिवीपालो ब्रह्मण्यः सत्यवाक् शुचिः । स कदचिद् गवां कोटीः सवत्साः स्वर्णभूषिताः । नृदेवो भूमिदेवेभ्यः पुष्करेषु ददौ नृपः । ततः सङ्गाद् गता धेनुः सवत्सा स्पर्शिताऽनघ । ब्राह्मणस्याऽहिताग्नेस्तु दरिद्रस्योञ्छवर्तिनः । स नष्टां गां क्षुधार्तो वै अन्विष्यंस्तत्रतत्र च । नापश्यत् सर्वराज्येषु संवत्सरगणान् बहून् । ततः कनखलं गत्वा जीर्णवत्सां निरामयाम् । ददृशे तां स्वकां धेनुं ब्राह्मणस्य निवेशने । अथ तां नामधेयेन स्वकेनोवाच स द्विजः । आगच्छ शबलेत्येवं सा तु शुश्राव गौः स्वरम् । तस्य तु स्वरमाज्ञाय क्षुधार्तस्य द्विजस्य वै । अन्वगात् पृष्ठतः सा गौर्गच्छन्तं पावकोपमम् । योऽपि पालयते विप्रः सोऽपि गामन्वगाद् द्रुतम् । गत्वा च तमृषिं चष्टे मम गौरिति सत्वरम् । स्पर्शिता राजसिंहेन मम दत्ता नृगेण ह । तयोर्ब्राह्मणयोर्वादो महानासीद् विपश्चितोः । विवदन्तौ ततोऽन्योन्यं दातारमभिजग्मतुः । तौ राजभवनद्वारि न प्राप्तौ नृगशासनम् । अहोरात्राण्यनेकानि वसन्तौ क्रोधमीयतुः । ऊचतुश्च महात्मानौ तावुभौ द्विजसत्तमौ । क्रुद्धौ परमसन्तप्तौ वाक्यं घोराभिसंहितम् । अर्थिनां कार्यसिद्ध्यर्थं यस्मात् त्वं नैषि दर्शनम् । अदृश्यः सर्वभूतानां कृकलासो भविष्यसि । बहुवर्षसहस्राणि बहुवर्षशतानि च । श्वभ्रे त्वं कृकलासो वै दीर्घकालं निवत्स्यसि' (५३.७–१९) इत्यादि । दिनत्रयान्तेऽपि । एतदनुसारेण 'अहोरात्राण्यथ त्रीणि वसन्तौ क्रोधमीयतुः' इति रामायण-मूलपाठः स्यादिति भाति ॥ ३ ॥

यजमानं निमिं सत्रे निद्रयाऽनभिभाषिणम् ।
वसिष्ठः शप्तवांस्तस्माद् राजा नित्योद्यतो[1] भवेत् ॥ ४ ॥

१. **'नित्योदितो–'** इति, **'नित्योद्यमी'** इति च ।

(भा.दी.) **यजमानमि**ति । वसिष्ठः सत्रं सत्रयागस्तस्मिन् निद्रया अनभिभाषिणम्, वसिष्ठं प्रति सम्भाषणमकुर्वन्तम्, यजमानं निमिं निमिनामकभूपं शप्तवान्, प्रत्युत्थानाद्यकरणेन कुपितो मरणलक्षणशापं प्रदत्तवान् । तस्मात् राजा नित्योद्यतः गुरुपूजनादौ समाहितो भवेत् । निमिर्हि सत्रयागार्थं वसिष्ठं वरयामास । सच पूर्वमहमिन्द्रेण सत्रयागार्थं वृतोऽस्मि तस्मिन्निवृत्ते तव सत्रयागार्थमायास्यामीत्युक्ते क्रुद्धो निमिः गौतमादीनन्यान् वरयित्वा सत्रं प्रवर्तयामास । तन्मध्ये वसिष्ठश्च शतक्रतोः सत्रं समाप्य निमिनिकटमाजगाम । तदा च गौतमादिभिः पूरितं सत्रं दृष्ट्वा क्रुद्धो वसिष्ठो राजदर्शनाकाङ्क्षी मुहूर्तं समुपाविशत् । तस्मिन्नहनि निमिरपि दैवयोगान्निद्रा-माहृतवान् । तदा च स्वात्मानमवज्ञातं मन्यमानो वसिष्ठो दीर्घनिद्रां समाप्नुहीति शापं दत्तवानिति हि पौराणिकी प्रसिद्धिः ॥ ४ ॥

(सं.चं.) यजमानं निमिम् । तथाच कथा रामायणे–'आसीद् राजा निमिर्नाम इक्ष्वाकूणां महात्मनाम् । पुत्रो द्वादशमो वीर्ये धर्मे च परिनिष्ठितः' (५५.४), 'तस्य बुद्धिः समुत्पन्ना निवेश्य सुमहापुरम् । यजेयं दीर्घसत्रेण पितुः प्रह्लादयन् मनः । ततः पितरमामन्त्र्य इक्ष्वाकुं हि मनोः सुतम् । वसिष्ठं वरयामास पूर्वं ब्रह्मर्षि-सत्तमम् । अनन्तरं स राजर्षिर्निमिरिक्ष्वाकुनन्दनः । अत्रिमङ्गिरसं चैव भृगुं चैव तपोनिधिम् । तमुवाच वसिष्ठस्तु निमिं राजर्षिसत्तमम् । वृतोऽहं पूर्वमिन्द्रेण अन्तरं प्रतिपालय । तदन्तरं महाविप्रो गौतमः प्रत्यपूरयत् । वसिष्ठोऽपि महातेजा इन्द्रयज्ञमथाकरोत् । निमिस्तु राजा विप्रांस्तान् समानीय नराधिपः । अयजद्धिमवत्पार्श्वे स्वपुरस्य समीपतः । पञ्चवर्षसहस्राणि राजा दीक्षामथाकरोत् । इन्द्रयज्ञावसाने तु वसिष्ठो भगवानृषिः । सकाशमागतो राज्ञो हौत्रं कर्तुमनिन्दितः । तदन्तरमथापश्यद् गौतमेनाभिपूरितम् । कोपेन महताऽऽविष्टो वसिष्ठो ब्रह्मणः सुतः । स राज्ञो दर्शनाकाङ्क्षी मुहूर्तं समुपाविशत् । तस्मिन्नहनि राजर्षिर्निद्रयाऽपहृतो भृशम् । ततो मन्युर्वसिष्ठस्य प्रादुरासीन्महात्मनः । अदर्शनेन राजर्षेर्व्याहर्तुमुपचक्रमे । यस्मात् त्वमन्यं वृतवान् मामवज्ञाय पार्थिव । चेतनेन विनाभूतो देहस्तव भविष्यति' (५५.७–१७) इत्यादि ॥ ४ ॥

शप्तोऽपि ब्राह्मणै राजा क्षमी चेत् सुखमाप्नुयात् ।
ययातिः शुक्रशप्तोऽपि क्षमी क्षेममवाप्तवान् ॥ ५ ॥

(भा.दी.) **शप्त** इति । चेद्यदि ब्राह्मणैः शप्तोऽपि (राजा), क्षमाऽस्यास्तीति क्षमी तर्हि सुखं तत् आप्नुयात् । आप्लृ व्याप्तौ लिङ् । तन्निदर्शनेन दर्शयति– **ययातिरि**ति । ययातिः ययातिनामा भूपतिः[१] शुक्रशप्तोऽपि, शुक्रेण स्वपुत्र्याः देवयान्याः अवज्ञानिमित्तात् जराग्रस्तो भवेति शप्तोऽपि, क्षमी प्रतिशापमदत्वा क्षमां

१. 'ययातिनामकभूपः'

कृतवानित्यतः क्षेमं पुनस्तदनुग्रहेण जरापगमलक्षणकुशलं तत् अवाप्तवान्। शुक्रो हि स्वपुत्र्यां देवयान्यामनासक्तं वृषपर्वणः पुत्र्यां शर्मिष्ठायामासक्तं स्वतनयावचसा ज्ञात्वा जराग्रस्तो भवेति ययातिं शशाप । स च प्रतिशापमदत्वा तमेव शापमोक्षार्थं ययाचे। स च तत्पुत्रे पूरौ जरासङ्क्रमणं कृत्वा तदीयवचश्चास्मिन् संस्थाप्य देवयान्या सह रमस्वेत्यनुग्रहं क्षमालक्षणयोगात् प्राप। निमिस्तु न पुनर्देहयोगं प्राप। नृगस्त्वज्ञानतः कृतमिदं कर्म युवभ्यां क्षन्तव्यमिति ब्राह्मणयाचनादेव श्रीकृष्णकरकमलसंस्पर्शात् कृकलासयोनेर्मुक्तो भविष्यसीति शापमोक्षं जगामेति क्षमा सर्वगुणभूषणभूतेति राज्ञा क्षमावता भाव्यमिति ॥ ५ ॥

(सं.चं.) ययातिः शुक्रशप्तोऽपि। तथाहि रामायणे–'नहुषस्य सुतो राजा ययातिः पौरवर्धनः। तस्य भार्याद्वयं सौम्य रूपेणाप्रतिमं भुवि। एका तु तस्य राजर्षेर्नाहुषस्य पुरस्कृता। शर्मिष्ठा नाम दैतेयी दुहिता वृषपर्वणः। अन्या तूशनसः[1] पत्नी ययातेः पुरुषर्षभ। न तु सा दयिता राज्ञो देवयानी सुमध्यमा। तयोः पुत्रौ तु सम्भूतौ रूपवन्तौ समाहितौ। शर्मिष्ठाऽजनयत् पूरुं देवयानी यदुं तदा। पूरुस्तु दयितो राज्ञो गुणैर्मातृकृतेन च। ततो दुःखसमाविष्टो यदुर्मातरमब्रवीत्। भार्गवस्य कुले जाता देवस्याक्लिष्टकर्मणः। सहसे हृद्गतं दुःखमवमानं च दुःसहम्। आवां च सहितौ देवि प्रविशाव हुताशनम्। राजा तु रमतां सार्धं दैत्यपुत्र्या बहुक्षपाः। यदि वा सहनीयं ते मामनुज्ञातुमर्हसि। क्षम त्वं न क्षमिष्येऽहं मरिष्यामि न संशयः। पुत्रस्य भाषितं श्रुत्वा परमार्तस्य रोदतः। देवयानी तु सङ्क्रुद्धा सस्मार पितरं तदा। इङ्गितं तदभिज्ञाय दुहितुर्भार्गवस्तदा। आगतस्त्वरितं तत्र देवयानी तु यत्र सा। दृष्ट्वा चाप्रकृतिस्थां तामप्रहृष्टामचेतनाम्। पिता दुहितरं वाक्यं किमेतदिति चाब्रवीत्। पृच्छन्तमसकृत् तं वै भार्गवं दीप्ततेजसम्। देवयानी तु सङ्क्रुद्धा पितरं वाक्यमब्रवीत्। अहमग्निं विषं तीक्ष्णमपो वा मुनिसत्तम। भक्षयिष्ये प्रवेक्ष्ये वा नतु शक्ष्यामि जीवितुम्' (५८.७–१९), 'मय्यवज्ञां प्रयुङ्क्ते हि नच मां बहु मन्यते। तस्यास्तद् वचनं श्रुत्वा कोपेनाभिपरिप्लुतः। व्याहर्तुमुपचक्राम भार्गवो नहुषात्मजम्। यस्मान्मामवजानीषे नाहुष त्वं दुरात्मवान्। जरया परया जीर्णः शैथिल्यमुपयास्यसि' (५८.२२–३) इति, 'एष तूशनसा मुक्तः शापोत्सर्गो ययातिना। धारितः क्षत्रधर्मेण यं निमिश्चक्षमे नच' (५९.२१) इति च। क्षेममवाप्तवान्, शापनिमित्तं कमपि दोषं नाऽप्तवान्। पूरुसङ्क्रान्तवृद्धत्वः। '–राजा पूरुमथाब्रवीत्। इयं जरा महाबाहो मदर्थं प्रतिगृह्य-ताम्। नाहुषेणैवमुक्तस्तु पूरुः प्राञ्जलिरब्रवीत्। धन्योऽस्म्यनुगृहीतोऽसि शासनेऽस्मि तव स्थितः। पूरोर्वचनमाज्ञाय नाहुषः परया मुदा। प्रहर्षमतुलं लेभे जरां सङ्क्रामयच्च ताम्। ततः स राजा तरुणः प्राप्य यज्ञान् सहस्रशः। बहुवर्षसहस्राणि पालयामास मेदिनीम्' (५९.६–९) इत्यादि ॥ ५ ॥

१. **'उशनसः दुहिता'** इति पूर्वेणान्वयः।

संरक्ष्यः क्षत्रधर्म्मोऽयमस्माभिस्तु विशेषतः ।
श्रेष्ठानां चरितं लोकैः प्रमाणं क्रियते[१] यतः ॥ ६ ॥

(भा.दी.) संरक्ष्य इति । यतः लोकाः जनास्तैः श्रेष्ठानां पुरुषाणां चरितं वृत्तम्, कस्यचित्कर्मणः कर्तव्यतायां प्रमाणत्वेन क्रियते, अतः अयं राजर्षिभिः अनुष्ठितः क्षत्रस्य क्षत्रियजातेर्धर्मः अस्माभिः सर्वश्रेष्ठत्वेन सम्मतैः विशेषतः संरक्ष्यः संरक्षणार्हः । 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः' इत्युक्तेरिति भावः ॥ ६ ॥

(सं.चं.) संरक्ष्यः सन्ततं रक्षणीयः । अस्माभिस्तु, यान् लोकः श्रेष्ठान् मन्यते, येषामाचारं स्वाचरणस्याऽदर्शं मन्यते ॥ ६ ॥

एवं रामोदितः सोऽथ [२]पौरजानपदान् प्रति ।
चतुरश्चतुरः कार्य्ये सामादीन् विनियुक्तवान् ॥ ७ ॥

(भा.दी.) एवमिति । एवं रामोदितः, कार्यं कर्तव्यं तस्मिन् चतुरः कुशलः स लक्ष्मणः, पौरजानपदान् प्रति चतुरः चतुःसङ्ख्याकान् सामादीन् धर्मलक्षणोपायान् विनियुक्तवान् ॥ ७ ॥

(सं.चं.) अथ रामोक्तिसमनन्तरमेव, विलम्बमकृत्वा । कार्ये चतुरः दक्षः, राजकार्ये सामादीन् चतुर उपायान्, साम दानं भेदो दण्ड इति ॥ ७ ॥

एकया द्वौ विनिश्चित्य तिसृभिः पञ्च साधयन् ।
षड्भिः सप्त पुरा रक्षन् रामं प्रीणाति[३] लक्ष्मणः ॥ ८ ॥

(भा.दी.) एकयेति । लक्ष्मणः एकया प्रधानया बुद्ध्या, द्वौ धर्माधर्मौ विनिश्चित्य, तिसृभिः उत्साहशक्तिः मन्त्रशक्तिः प्रभुशक्तिरिति ताभिः, पञ्च अङ्गानां पञ्चकम्, 'कर्मारम्भोचितोपायः पुरुषद्रव्यसम्पदौ । विनिपातप्रतीकारो देशकालावलोकनम् । कार्यसिद्धिरिति प्रोक्तमङ्गानां पञ्चकं बुधैः' इति प्रसिद्धाङ्गानां पञ्चकम्, साधयन् सन् । तत्राङ्गपञ्चकगणनामध्ये पुरुषद्रव्यसम्पदावेकीकृत्य गणनीये । षड्भिः सन्ध्यादिभिः । 'सन्धिं च विग्रहं चैव यानमासनमेव च । द्वैधीभावाश्रयौ चेति षड् गुणान् कवयो विदुः' इत्युक्तषड्गुणैरित्यर्थः ।

---

१. **'प्रमाणीक्रियते'** २. **'पौरान् जानपदान्'**

३. **'प्रीणाति पुरा प्रीतियुक्तमकरोत् । रामं प्रति स्वयं प्रीतिमानभूदिति वा'** इति वि.भू. ।

सप्त प्रकृतीः– 'अमात्या मन्त्रिणो दूताः श्रेणयश्च पुरोहिताः । पुरं जानपदं चेति सप्तप्रकृतयस्त्विमाः[१]' इति प्रसिद्धसप्तप्रकृतीः रक्षन् सन् श्रीरामं प्रीणाति (पुरा) । प्रीतियुक्तमकरोत् । प्रीञ् प्रीणने लट् ॥ ८ ॥

(सं.चं.) एकया द्वावित्यादि तु–'एकया द्वे विनिश्चित्य त्रींश्चतुर्भिर्वशे कुरु । पञ्च जित्वा षड् विदित्वा सप्त हित्वा सुखी भव' इति भारतवचनलब्धस्फूर्ति पद्यम् । एकया व्यवसायात्मिकया बुद्ध्या, द्वौ धर्माधर्मौ विनिश्चित्य । एकत्रापराधमन्यत्र तदभावं च विनिश्चित्य । एकं सन्तमन्यमसन्तं च विनिश्चित्य । तिसृभिः शक्तिभिः उत्साहशक्तिः, मन्त्रशक्तिः, प्रभुत्वशक्तिरिति । पञ्चाङ्गानि साधयन् । 'कर्मणामारम्भोपायः, पुरुषद्रव्यसम्पत्, देशकालविभागः, विनिपातप्रतीकारः, कार्यसिद्धिश्चेति पञ्चाङ्गो मन्त्रः' इति सोमदेवः । षड्भिः गुणैः सप्त प्रकृती रक्षन् । 'सन्धिविग्रहासनयानसंश्रयद्वैधीभावाः षाड्गुण्यम्' इति च । अधिकं त्वस्मत्कृतमध्वविजयटीकायां तत्वचन्द्रिकायाम् । 'स्वाम्यमात्यश्च राष्ट्रं च दुर्गं कोशो बलं सुहृत् । परस्परोपकारीदं सप्ताङ्गं राज्यमुच्यते' इति कामन्दकीये । इमान्येव सप्ताङ्गानि सप्त प्रकृतय उच्यन्ते । प्रीणाति पुरा तर्पयामास । प्रीञ् तर्पणे ॥ ८ ॥

न किञ्चित् कस्यचित् क्वापि कार्य्यं नाकृतमैक्ष्यत ।
लक्ष्मणानुगते देवे रामे राजनि राजति ॥ ९ ॥

(भा.दी.) नेति । लक्ष्मणानुगते देवे राजनि श्रीरामे राजति सति राजमाने सति । कस्यचिदपि पुरुषस्य क्वापि प्रदेशेऽपि किञ्चिदपि कार्यं न कृतं अकृतम् न ऐक्ष्यत । किन्तु सर्वमपि कृतमेवैक्ष्यतेत्यर्थः ॥ ९ ॥

(सं.चं.) लक्ष्मणानुगते रामे राजनि विराजमाने सति । कस्यापि कार्यमकृतं नैक्ष्यत न दृष्टम् ॥९–१०॥

कदाचिल्लक्ष्मणोऽपश्यच्छ्वानं द्वारमुपागतम्[२] ।
पाहि देव[३] शरण्येति क्रोशन्तं द्विपदस्थितम्[४] ॥ १० ॥

(भा.दी.) कदाचिदिति । कदाचिल्लक्ष्मणः द्वारं सभाद्वारं तत् उपागतम्, हे शरण्य हे शरणार्ह, देव श्रीराम, पाहि इति क्रोशन्तम्, द्वे च ते पदे ताभ्यां स्थितं श्वानं अपश्यत् ॥ १० ॥

१. भागवततात्पर्योदाहृतं ब्राह्मवचनमिदम् । परं तु तत्र **'सप्त प्रणिधयस्त्विमाः'** इति पाठ इत्युक्तम् ।

२. **'–च्छ्वानं राममुपागतम्'** ३. **'पाहि राम शरण्येति'** ४. **'द्विपदि स्थितम्'**

रामराज्ये भयं किं ते ब्रूहीत्याचष्ट लक्ष्मणः ।
राममेव दिदृक्षेऽहमित्यवोचत् स कुक्कुरः[1] ॥ ११ ॥

(भा.दी.) रामेति । हे कुक्कुर, श्रीरामस्य यद्राज्यं तस्मिन् ते किं भयं ब्रूहि । ब्रूञो लोट् । इति लक्ष्मणः आचष्ट ऊचे । चक्षिङ् धातोर्लङ् । हे लक्ष्मण, अहं श्रीराममेव दिदृक्षे द्रष्टुमिच्छामि इति स कुक्कुरः श्वा अवोचत् ॥ ११ ॥

(सं.चं.) 'श्वा सारमेयः शुनको भषणो मृगदंशकः । दीर्घनादी गृहमृगः कुक्कुरः क्रोधनः शुनिः' इति यादवप्रकाशः । सेयं सारमेयकथा रामायणे एकोनषष्टितमात् सर्गात् परं पठ्यते । परं तु कतकतिलकाद-योऽधुनातना व्याख्यातार एतमध्यायं प्रक्षिप्तं मन्यन्ते । अत्र संहत्य त्रयः सर्गाः प्रक्षिप्ता इत्यर्वाचीनाः । तृतीयः सर्ग एव प्रक्षिप्तः, यत्र गृध्रोलूकप्रसङ्गो भवति, आद्यं सर्गद्वयम्, यत्र सारमेयकथा, न प्रक्षिप्तमिति पण्डिताचार्याशय इति भाति ॥ ११–३ ॥

रामाज्ञया लक्ष्मणेन प्रविशेति प्रचोदितः ।
सारमेयो विनीतात्मा[2] प्रविवेश प्रभोः सभाम् ॥ १२ ॥

(भा.दी.) रामेति । लक्ष्मणेन श्रीरामाज्ञया प्रविश इति प्रचोदितः सारमेयः शुनकः, विनीतः विनयोपेतः आत्मा स्वभावो यस्य स तथा सन्, प्रभोः श्रीरामस्य सभां प्रविवेश ॥ १२ ॥

विवक्षितं ब्रूह्यशङ्कस्त्वमित्युक्तो जगद्भृता ।
सारमेयोऽब्रवीदुच्चैर्नीचयोनिरनीचवत् ॥ १३ ॥

(भा.दी.) विवक्षितमिति । वक्तुमिष्टं विवक्षितं तत् प्रमेयम्, न विद्यते शङ्का यस्य स तथा सन्, त्वं ब्रूहि (इति) जगद्भृता श्रीरामेण उक्तः, नीचा योनिर्यस्य स तथोक्तः, नीचयोन्युत्पन्न इत्यर्थः, सारमेयः अनीचवत् सत्पुरुषवत् उच्चैः अब्रवीत् ॥ १३ ॥

अगण्यगुणसम्पन्न जगन्मङ्गलकीर्त्तन ।
नीचजातेः प्रलापो मे क्षम्यतां करुणाकर ॥ १४ ॥

---

१. **'–मित्युवाच स कुक्कुरः'**

२. **'विनीतात्मा शिक्षितमनाः, नम्रदेहो वा सन्'** इति का.श्री. ।

(भा.दी.) अगण्येति । अगण्या ये गुणास्तैः सम्पन्न युक्त, जगतो मङ्गलं यस्मात् तथोक्तं तादृशं कीर्तनं यस्य स तथा तत्सम्बुद्धिः, करुणाकर कृपाश्रय श्रीराम, नीचा अपकृष्टा जातिर्यस्य स तथा, (तस्य) मे प्रलापः अनर्थवचनम्, 'प्रलापोऽनर्थकं वचः' इत्यमरः, क्षम्यताम् । क्षमूष् सहने लोट् ॥ १४ ॥

(सं.चं.) प्रलाप इति सौजन्योद्गारः । दीनं वचनमित्यर्थः ॥ १४ ॥

भिक्षुः सर्वार्थसिद्धो मां दण्डेनाताडयद् भृशम् ।
अनागसं दीनतरं लोकानां त्वयि शास्तरि[१] ॥ १५ ॥

(भा.दी.) भिक्षुरिति । लोकाः जनाः तेषां त्वयि शास्तरि धर्माधर्मशिक्षके सति, सर्वार्थसिद्धः सर्वार्थसिद्धनामकः भिक्षुः सन्यासी, न विद्यते आगः अपराधो यस्य स तथा तम्, दीनतरं अतिशयेन खिन्नम्, दण्डेन भृशं यथा भवति तथा अताडयत् । तड आघाते लङ् ॥ १५ ॥

(सं.चं.) सर्वार्थसिद्धाख्यः कश्चन भिक्षुर्यतिः ॥ १५ ॥

श्रुत्वा[२] शुनेति गदितं क्षत्त्रा भिक्षुं तमानयत् ।
भिक्षोर्दण्डं सभामध्ये सर्वज्ञोऽपि व्यचीचरत्[३] ॥ १६ ॥

(भा.दी.) श्रुत्वेति । सर्वज्ञोऽपि श्रीरामः शुना शुनकेन इति गदितं प्रोक्तं वचः श्रुत्वा, क्षत्त्रा द्वारपालकेन वेत्रपाणिना मनुष्येण तं सर्वार्थसिद्धाख्यं भिक्षुं आनयत् आकारयामास । सभाया मध्यं तस्मिन् भिक्षोः दण्डो योग्यशिक्षा तं व्यचीचरत् विचारयामास । चरतेर्लुङ् ॥ १६ ॥

(सं.चं.) 'दौवारिको वेत्रधरो द्वास्थः क्षत्ता च धर्षकः' इति यादवप्रकाशः । 'द्वास्थः सम्प्रेषितस्तदा' इति हि रामायणे । भिक्षोर्दण्डं व्यचीचरत् । किं भिक्षुर्दण्डनीय उत न, यदि दण्डनीयः, कीदृशोऽस्य दण्डः स्यादिति विचारयामास ॥ १६ ॥

---

१. **'त्वयि शासति'** इति का.श्री.पाठः । **'लोकानां लोकान्'** । **नञा निर्दिष्टमनित्यमितिलोकनिषेधस्यानित्यत्वात् लोकानामित्युक्तम् । शासति शिक्षति सति'** इति तट्टीका । शासतीति शतरि रूपम् । **'न लोकाव्यय–'**(अ.सू.२.३.६९) इत्यत्र ल इति शतृशानचोः षष्ठीनिषेधा-दित्यर्थः । शास्तरीति पाठे न कोऽपि दोषः । शास्तरीति तृच् । न तृन् । तेन नायमस्य सूत्रस्य विषयः ।

२. **'शुना निगदितम्'**

३. **'व्यचारयत्'**

दण्डं निपातयस्यस्मिन् यदि योग्यं प्रदीयताम् ।
कालञ्जरे[१] कौलपत्यमित्युवाच स कुक्कुरः ॥ १७ ॥

(भा.दी.) दण्डमिति । यदि अस्मिन् भिक्षौ दण्डं योग्यशिक्षां निपातयसि कारयसि, तर्हि कालञ्जरे कालञ्जरनामके देवालये योग्यं मत्ताडनयोग्यं कौलपत्यं सामञ्जस्यं[२] तत् प्रदीयताम् , मत्ताडनयोग्यदण्डः स एवेति भावः, सः कुक्कुरः इति उवाच ॥ १७ ॥

(सं.चं.) यदि योग्यमपराधानुगुणं दण्डं निपातयसि तर्हि कालञ्जरक्षेत्रे कौलपत्यं कुलपतित्वं धर्माधिकारित्वं प्रदीयताम् ॥ १७ ॥

तच्छ्रुत्वेशोऽभ्यषिञ्चत् तं [३]कालञ्जरजनाधिपम् ।
गजस्थं प्रापयामास हृष्टं देवालयं च तम् ॥ १८ ॥

(भा.दी.) तदिति । ईशः श्रीरामः तत् शुनकवचः श्रुत्वा, तं यतिं कालञ्जरस्य कालञ्जराख्यदेवालयस्य ये जनाः, तेषामधिपं स्वामिनं अभ्यषिञ्चत् । षिचिर् आसेचने लङ् । गजस्थं हृष्टं तं यतिं देवालयः देवस्थानं तं प्रति प्रापयामास प्रेषयामास ॥ १८ ॥

(सं.चं.) कालञ्जरक्षेत्रे येऽधिकृता जनास्तेषामधिपम् । अत एव हृष्टं गजस्थं तं भिक्षुं देवालयं प्रापयामास ॥ १८ ॥

दण्डार्हायेह विप्राय वरो दत्तः कथं विभो[४] ।
इत्यवोचन्त सचिवा रामं कौतूहलाकुलाः ॥ १९ ॥

(भा.दी.) दण्डेति । इह सभायां कौतूहलेन कौतुकेन आकुलाः सम्भ्रान्ताः सचिवाः भृत्यजनाः, हे विभो श्रीराम, दण्डस्य शिक्षणस्य अर्हस्तस्मै विप्राय कथं वरः सामञ्जस्यलक्षणः दत्तः इति श्रीरामं प्रति अवोचन्त । वचधातोर्लुङ्[५] ॥ १९ ॥

---

१. **'कारञ्जले तन्नामकगिरौ, विद्यमाने देवालये कौलपत्यं देवलकत्वं प्रदीयताम्'** इति वि.भू. । **'अजपस्त्वसदध्येता देवाजीवस्तु देवलः'** इत्यभिधानम् ।

२. समाजव्यवस्थाहेतुर्न्यायः समञ्जसमुच्यते । तेन न्यायनिरूपकत्वं सामञ्जस्यम् ।

३. **'कालञ्जरधराधि–'** ४. **'कथं प्रभो'** ५. लिपिकृत्प्रमादः स्यात् । **'ब्रूञ्धातोर्लुङ्'** इति वक्तव्यम् ।

(सं.चं.) कौतूहलाकुलाः किमिदमिति निर्णेतुमप्रभवतः स्वान्तस्य यथाकथाच ज्ञातव्यमेतदित्युत्कण्ठा कौतूहलम् । तेन आकुला व्याप्ताः सचिवा मन्त्रिणः ॥ १९ ॥

रामेण चोदितः प्रोचे श्वाऽयं जातिस्मरस्तदा ।
कालञ्जरे कौलपत्याच्छ्वयोनित्वं तदात्मनः ॥ २० ॥

(भा.दी.) रामेणेति । श्रीरामेण चोदितः, दण्डार्हस्यापि कालञ्जराधिपत्यदाननिमित्तं वदेति प्रेरितः, जातिं पूर्वजन्म स्मरतीति तथोक्तः अयं श्वा (तदा) आत्मनः स्वस्य कालञ्जरः कालञ्जरदेवालयस्तस्मिन् कौलपत्यं सामञ्जस्यं तस्मात् सम्प्राप्तं तत् स्वकीयं श्वयोनित्वं प्रोचे । ब्रूञ्धातोर्लिट् ॥ २० ॥

(सं.चं.) कालञ्जरे कौलपत्यान्निमित्तात् प्राप्तं तत् आत्मनः श्वयोनित्वम् ॥ २० ॥

ततः प्रणम्य रामाय कृतकृत्यः स कुक्कुरः ।
गत्वा वाराणसीं वायुं[१] तत्रोपास्यानघोऽभवत् ॥ २१ ॥

(भा.दी.) तत इति । ततः श्रीरामाय प्रणम्य, कृतं कृत्यं येन स तथोक्तः सः कुक्कुरः शुनकः, वाराणसीं काशीं गत्वा, तत्र वाराणस्यां वायुं मुख्यप्राणं उपास्य, न विद्यतेऽघं पापं यस्य स तथा अभवत् ॥२१॥

(सं.चं.) रामाय प्रणम्येति । रामाय नत्वेति तात्पर्यनिर्णयमनुकरोति । तत्र वाराणस्यां वायुमुपास्य अनघः वीतपापः । 'वारणस्यां महाभागः प्रायं चोपविवेश ह' इति साम्प्रतो रामायणपाठः ॥ २१–२ ॥

सभागतः स भगवान् कदाचिद् भ्रातृभिः सह ।
प्रतीक्षमाणान् विज्ञाय मुनीन् द्वास्थैरुपाह्वयत् ॥ २२ ॥

(भा.दी.) सभेति । कदाचित् भ्रातृभिर्लक्ष्मणादिभिः सह सभां गतः सभागतः, सभां प्रत्यागत इति वा, सः भगवान् श्रीरामः प्रतीक्षमाणान् मुनीन् विज्ञाय द्वास्थैः द्वारपालैः उपाह्वयत् आह्वयामास । ह्वेञ्-धातोर्लङ् ॥ २२ ॥

च्यवनाख्यं पुरस्कृत्य भार्ग्गवं मुनयो मुनिम् ।
रामाय तीर्त्थकलशान् फलमूलानि[२] चाऽदिशन् ॥ २३ ॥

१. **'वायुं मुक्यप्राणान्तर्गतं परमात्मानमुपास्य'** इति का.श्री. ।
२. **'–मूलादि चाऽदिशन्'**

(भा.दी.) च्यवनाख्यमिति । मुनयः च्यवन इति आख्या यस्य स तथा तम्, भृगुगोत्रे भवो भार्गवः, तं मुनिं पुरस्कृत्य, श्रीरामाय तीर्थकलशान् फलमूलानि च आदिशन् ॥ २३ ॥

(सं.चं.) भृगोर्गोत्रापत्यं च्यवनाख्यं मुनिं पुरस्कृत्य शताधिका मुनयः तीर्थपूर्णकलशान् फलमूलानि च रामायाऽदिशन् आर्पयन् । 'ते द्विजाः पूर्णकलशैः सर्वतीर्थाम्बुसत्कृतैः । गृहीत्वा फलमूलं च रामस्याभ्याहरन् बहु' (६०.८–९) इति च ॥ २३–४ ॥

सौवर्ण्णान्यासनान्येभ्यो दत्वा सम्पूज्य च प्रभुः ।
[१]स्वागतं वो मुनिश्रेष्ठाः किं कार्य्यं चेत्यवोचत ॥ २४ ॥

(भा.दी.) सौवर्णेति । प्रभुः श्रीरामः, एभ्यः मुनिभ्यः, सुवर्णस्य विकारभूतानि सौवर्णानि तानि आसनानि दत्वा, सम्पूज्य च, अर्घ्याद्युपचारपूजां (च) कृत्वा, हे मुनिश्रेष्ठाः, वः युष्माकं स्वागतं शोभनागमनं अस्तु, कार्यं आगमनप्रयोजनं च किं इति अवोचत प्रोचे ॥ २४ ॥

रामवाणीसुधाध्वस्ततापत्रयमकल्मषम् ।
उवाच तं[२] मुनिशतं [३]निष्पतद्बाष्पलोचनम् ॥ २५ ॥

(भा.दी.) रामेति । श्रीरामस्य या वाणी एवंरूपा वाक् सैव सुधा तया ध्वस्तं तापानां अध्यात्मिकाधिदैविकाधिभौतिकाख्यानां त्रयं तत् तथोक्तम्, न विद्यते कल्मषं रागादिदोषो यस्य तत् तथोक्तम्, निष्पतन्तो बाष्पा अश्रूणि येभ्यस्तानि निष्पतद्बाष्पाणि, तादृशानि लोचनानि यस्य तत् तथोक्तं मुनिशतम्, तं श्रीरामं प्रति उवाच ॥ २५ ॥

(सं.चं.) रामवाणीसुधापानेन ध्वस्ततापत्रयं मुनिशतं शताधिका मुनयः । 'शतं समधिकं तत्र दीप्यमानं स्वतेजसा । प्रविष्टं राजभवनं तापसानां महात्मनाम्' (६०.७) इति स्मरणात् । अधिकेन समेतं शतं समधिकं शतम् । '**ನೂರಾರು**' इति भाषायाम् । देशपीडा देहपीडा मनःपीडा चेति तापत्रयम् । सुधापानेन मानसी व्यथा तावदपगता । वचनसञ्जातप्रत्ययेन लवणजनितं देहपीडाभयं देशपीडाभयं च तत्क्षणादेव गलितमिति भावः ॥ २५ ॥

---

१. **'वः युष्मभ्यं स्वागतं सुष्ठ्वागमनमस्तु । वः युष्माकं मया कार्यं कर्तव्यं किम्'** इति का.श्री. ।

२. **'तन्मुनिशतम्'**

३. **'निपतद्बाष्प–'**

नाथ नाऽविदितं किं ते वदामोऽथ त्वदाज्ञया ।
मधोः[१] सुतो मधुवने वर्त्तते लवणोऽसुरः ॥ २६ ॥

(भा.दी.) नाथेति । हे नाथ श्रीराम, ते त्वया आविदितं सम्यक् विज्ञातं किं न? सर्वमपि सम्यग्विज्ञातमेवेत्यर्थः[२] । अथ अथाऽपि तव आज्ञा त्वदाज्ञा तया, आगमनकार्यं वक्तव्यमिति भवदीयाज्ञया वदामः । मधोः मधुनामकदैत्यस्य सुतः लवणः लवणाख्यः असुरः मधुनामकं यद्वनं तस्मिन् वर्तते । वृतु वर्तने लट् ॥ २६ ॥

(सं.चं.) 'नाविदितं किं ते' इति पठन्ति । 'तव आविदितं किं न' इति च व्याचक्षते । किं किमपि तव अविदितं नास्तीति वा । 'नो विदितं किं ते' इति मूलपाठः स्यादिति भाति । नो विदितम्, नः अविदितम्, इति वा प्रतृण्णम् । हे नाथ, ते नो विदितं नविदितं किमस्ति? अथापि वदामः । किं कार्यमित्युच्यतामिति त्वदाज्ञया । नोऽस्माकं नाथ, अविदितं किं त इति वा ॥ २६ ॥

मुनीन् मुनिकुमारांश्च मुनिदारानभक्षयत् ।
नृशंसो यानसौ देव तेषां सङ्ख्या न विद्यते ॥ २७ ॥

(भा.दी.) मुनीनिति । हे देव, नृशंसः प्राणिहिंसादिक्रूरकर्मकृत् (असौ) लवणः, यान् मुनीन्, यान् मुनिकुमारान्, यान् मुनिदारांश्च अभक्षयत् । भक्ष अदने लङ् । तेषामृष्यादीनां सङ्ख्या न विद्यते । विद सत्तायां लट् ॥ २७ ॥

(सं.चं.) असौ यान्यान् मुन्यादीनभक्षयत् तेषं सङ्ख्या न विद्यते । तादृशोऽयं नृशंसः क्रूरः ॥ २७ ॥

मधुना तपसा प्राप्तं शूलं माहेश्वरं महत् ।
तेन[३] दायेन देवैरप्यबाध्यो बाधते जगत् ॥ २८ ॥

(भा.दी.) मधुनेति । मधुनाम्ना दैत्येन (तपसा) महत्, महेश्वरस्य रुद्रस्य सम्बन्धि माहेश्वरम्, तत् शूलं तच्च सम्प्राप्तम् । तेन मधुसम्पादितेन दायः पितृवित्तं तेन देवैरपि इन्द्रादिभिरपि अबाध्यः सन् जगत् बाधते । बाधृ लोडने लट् ॥ २८ ॥

---

१. **'मधोः मधुकैटभयोर्मध्ये मधुनामकस्यासुरस्य'** इति व्याख्यान् का.श्री.स्फुटं बभ्राम ।

२. वि.भू. टीकायामप्येवमेव ।

३. **'तेनायुधेन देवैः'**

(सं.चं.) मधुर्लोलायाः पुत्रः लवणपिता । कैटभभ्रातुरन्योऽयं मधुः । महेश्वरं प्रति तपस्तप्त्वा लब्धम् । दायेन पैतृकेन वित्तेन । 'भवतः पुत्रमेकं तु शूलमेतद् गमिष्यति । अवध्यः सर्वभूतानां शूलहस्तो भविष्यति' (६१.१३–४) इति च । 'विभक्तपितृद्रव्यं च दायमाहुर्मनीषिणः' इति विश्वप्रकाशः ॥ २८ ॥

अलब्धशरणा दीनाश्चरन्तो भुवने वयम्[1] ।
रावणारिमथ ज्ञात्वा विष्णुं त्वां शरणं गताः ॥ २९ ॥

(भा.दी.) अलब्धेति । अलब्धं शरणं रक्षको येषां ते तथोक्ताः, दीनाः दुःखिताः, भुवनानां त्रयं भुवनत्रयं तत् चरन्तः वयं रावणारिं त्वां विष्णुं नारायणं ज्ञात्वा शरणं तत् गताः प्राप्ताः ॥ २९ ॥

(सं.चं.) अलब्धशरणा अलब्धरक्षणाः । 'शरणं वधरक्षित्रोः शरणं रक्षणे गृहे' इति च । त्वां विष्णुं शरणं रक्षितारं मत्वा गताः प्राप्ताः ॥ २९ ॥

ऋषीणां भाषितं श्रुत्वा रामः स्मितमुखाम्बुजः ।
कस्यांशोऽयमिति प्रोच्य भ्रातॄणां वक्त्रमैक्षत ॥ ३० ॥

(भा.दी.) ऋषीणामिति । श्रीरामः ऋषीणां भाषितं भाषणं तत् श्रुत्वा, स्मितं मन्दहासयुक्तं मुखाम्बुजं यस्य स तथा सन्, अयं लवणः कस्य पुंसः अंशः संहर्तृभागः इति प्रोच्य भ्रातॄणां लक्ष्मणादीनां वक्त्रं मुखं तत् ऐक्षत ॥ ३० ॥

(सं.चं.) लक्ष्मणादिषु त्रिषु कस्यायमंशः कर्तव्यभागः इति भ्रातॄणां वक्त्रमैक्षत । वक्त्रमिति समुदायवचनम् । स्त्रीणां स्तनाविति यथा ॥ ३० ॥

लक्ष्मणः प्राञ्जलिरभूद्धनिष्यामि महासुरम् ।
इत्यूचे भरतः पीठादुत्तस्थौ भरतानुजः ॥ ३१ ॥

(भा.दी.) लक्ष्मण इति । लक्ष्मणः श्रीरामवचः श्रुत्वा प्राञ्जलिः अभूत् । भरतः अहं महासुरं लवणं हनिष्यामि इति श्रीरामं ऊचे । भरतानुजः शत्रुघ्नः पीठमासनं तस्मादुत्तस्थौ ॥ ३१ ॥

(सं.चं.) लक्ष्मणः यथा भवदाज्ञेति प्रबद्धाञ्जलिरभूत् । अहं हनिष्यामीति भरत ऊचे । अथ भरतानुजः शत्रुघ्न आसनादुत्तस्थौ स्वाशयं निविवेदयिषुः ॥ ३१ ॥

१. **'भुवनत्रयम्'** इति वि.ती.पाठः ।

शत्रुघ्नः प्राञ्जलिः प्रोचे प्रसीद पुरुषोत्तम ।
आर्य्यो मे मद्ध्यमो [१]धन्यस्त्वच्छुश्रूषां वनेऽकरोत् ॥ ३२ ॥

(भा.दी.) शत्रुघ्न इति । शत्रुघ्नः प्राञ्जलिः सन्, हे पुरुषोत्तम श्रीराम, प्रसीद वत्से विषये प्रसन्नो भव । षद्लृ धातोर्लोट् । इति सम्प्रार्थ्य प्रोचे । ब्रूञ्धातोर्लिट् । धन्यः मध्यमः मे आर्यः श्रेष्ठः लक्ष्मण इत्यर्थः, ते तव शुश्रूषां सेवां वने अकरोत् । समग्राऽपि शुश्रूषा कृतैवेत्यर्थः ॥ ३२ ॥

(सं.चं.) प्रोचे सविनयमूचे । आर्य इति ज्यायोवचनम् । 'ભાઈ' इति भाषायाम् । शत्रुघ्नस्य च आर्या भ्रातरः रामो लक्ष्मणो भरत इति । तत्र मध्यम आर्यो लक्ष्मणः । स स्वकर्तव्यभागं कृत्वा धन्यः कृत-कृत्यः । तस्मान्नायं तस्यांशः ॥ ३२ ॥

भरतेन ममाऽर्य्येण मयि जीवति किङ्करे ।
चतुर्द्दश समास्तप्तं त्वत्प्रीत्यै भूमिशायिना ॥ ३३ ॥

(भा.दी.) भरतेनेति । मम आर्येण साक्षात् ज्येष्ठेन, भूमौ शेत इति भूमिशायी तेन, भरतेन, किङ्करे भृत्यभूते मयि जीवति सति, त्वत्प्रीत्यै तव प्रीतये चतुर्दशसमाः चतुर्दशसंवत्सरान्, निरन्तरं चतुर्दशवर्षेष्वित्यर्थः, तप्तं कायक्लेशरूपं तपश्चीर्णम् ॥ ३३ ॥

(सं.चं.) ममाव्यवहितेनाऽर्येण भरतेन । यद्यपि किङ्करेण मया तप्तव्यमासीत् । अथापि मयि जीवति तेन स्वयं तप्तम् । कायक्लेशोऽनुभूत इत्यर्थः । तेन सोऽपि कृतकर्तव्यांशः । चतुर्दश समा वर्षाणीत्यत्यन्तसंयोगे द्वितीया । निरन्तरमविच्छिन्नं तप्तमिति । भूमावेव शेते नान्यत्र तल्पादाविति भूमिशायी । भूशयनव्रतः । 'व्रते' (अ.सू.३.२.८०) इति णिनिः ॥ ३३ ॥

ब्रह्मघ्नं लवणं हत्वा त्वत्प्रसादेन केवलम् ।
सार्त्था शत्रुघ्नता स्यान्मे प्रोच्येति प्रणनाम सः ॥ ३४ ॥

(भा.दी.) ब्रह्मघ्नमिति । ब्रह्म ब्राह्मणान् हतवानिति ब्रह्मघ्नस्तं लवणम्, केवलं तव प्रसादः त्वत्प्रसादः तेन हत्वा, (मे) शत्रुघ्नता शत्रुघ्नशब्दवाच्यता सार्था शत्रून् हन्तीति शत्रुघ्न इति प्रतिपाद्यार्थोपेता स्यात् भवतु । इति प्रोच्य सः शत्रुघ्नः प्रणनाम । णमु प्रह्वत्वे शब्दे च लिट् ॥ ३४ ॥

१. **'धन्यस्ते शुश्रूषाम्'** इति वि.ती.पाठः स्यात् । **'मान्यस्ते शुश्रूषाम्'** इति कश्चित् । **'धन्यः कां शुश्रूषां न तेऽकरोत्'** इति च । **'ते तव कां शुश्रूषां कां सेवां नाकरोत् न कृतवान् । वनवासकाले सर्वां शुश्रूषां कृतवानित्यर्थः'** इति का.श्री. ।

(सं.चं.) केवलं त्वत्प्रसादेन । त्वत्प्रसादेनैव । न स्वशक्त्या ॥ ३४ ॥

प्रसन्नो भगवानूचे करिष्याम्यभिषेचनम् ।
शत्रुघ्न लवणघ्नस्त्वं[१] पाहि तान् विषयानिति ॥ ३५ ॥

(भा.दी.) **प्रसन्न** इति । प्रसन्नः शत्रुघ्नवचसा सन्तुष्टः भगवान् श्रीरामः, अहं तव अभिषेचनमभिषेकस्तत् करिष्यामि, हे शत्रुघ्न, लवणघ्नः सन् तान् लवणपालितान् विषयान् पाहि इति ऊचे ॥ ३५ ॥

(सं.चं.) लवणघ्नः सन् पाहि लवणं हत्वा पाहीत्यर्थः । तान् लवणाधिष्ठितान् वनोद्देशान् जनवास-योग्यान् विषयान् देशान् विधाय पाहि । तेन तद्राज्ये तव करिष्याम्यभिषेचनम् ॥ ३५–७ ॥

शत्रुघ्नो लज्जितः प्रोचे किङ्करोऽहं[१] न राज्यभाक् ।
कनिष्ठस्याभिषेकोऽयं ज्येष्ठैर्न क्रियतामिति ॥ ३६ ॥

(भा.दी.) **शत्रुघ्न** इति । लज्जितः श्रीरामवाक्यश्रवणात् सञ्जातलज्जः शत्रुघ्नः, अहं तव किङ्करः अस्मि, राज्य-भाक् न, ज्येष्ठैः भवद्भिः कनिष्ठस्य मम अयमभिषेकः न क्रियताम्, इति श्रीरामं प्रति प्रोचे ॥ ३६ ॥

वसिष्ठाद्यैर्द्विजश्रेष्ठैरभ्यषिञ्चित् ततोऽनुजम् ।
रामस्तस्मिन्नहन्यासीदयोद्ध्यायां महोत्सवः ॥ ३७ ॥

(भा.दी.) **वसिष्ठ** इति । ततः श्रीरामः, वसिष्ठ आद्यो येषां ते तथा तैः द्विजश्रेष्ठैः सह अनुजं शत्रुघ्नं अभ्य-षिञ्चत् । षिचिर् आसेचने लङ् । तस्मिन्नहनि अयोध्यायां महोत्सवः आसीत् ॥ ३७ ॥

शत्रुघ्नायाथ शत्रुघ्नं शरं दत्वाऽब्रवीत् प्रभुः[३] ।
शरोऽयं प्राङ्मया सृष्टः शयानेन महार्ण्णवे ॥ ३८ ॥

(भा.दी.) **शत्रुघ्नायेति** । अथ प्रभुः श्रीरामः, शत्रून् हन्तीति शत्रुघ्नस्तं शत्रुघ्नं शरं शत्रुघ्नाय दत्वा अब्रवीत् । प्राक् पूर्वं महान् योऽर्णवः प्रळयोदकं तस्मिन् शयानेन मयाऽयं शरः सृष्टः ॥ ३८ ॥

---

१. **'–घ्नस्त्वं याहि तान्'** २. 'किङ्करोऽयम्'

३. इतः परं कचित्–**'तेजसामाश्रयामास शत्रुघ्नं परिरभ्य सः'** इति श्लोकार्धमधिकं पठ्यते । असङ्गतमनस्विनं चेति । स्फुटं प्रक्षिप्तम् । **'आश्रयामास'** इत्यशुद्धं पदम् । पुनरुक्तं च **'तेजसा पूरयामास'** (४२) इत्युत्तरवचनेन । **'तेजसामाश्रयामास आश्रयं कृतवान्'** इति विद्याभूषणीयं व्याख्यानमपि स्फुटं केनचित् प्रक्षिप्तम् ।

(सं.चं.) शत्रुघ्नं शत्रुनाशनं शरम् । 'अमनुष्यकर्तृके' (अ.सू.३.२.५३) इति हन्तेः कर्मण्युपपदे टक् । तर्हि कथं रामानुजः शत्रुघ्नः? 'कप्रकरणे मूलविभुजादिभ्य उपसङ्ख्यानम्' वार्तिकात्(अ.सू.३.२.५) कप्रत्ययेन रूपसिद्धिरित्येके । 'कृत्यल्युटो बहुलम्' (अ.सू.३.३.११३) इति बहुलग्रहणात् टक्प्रत्ययेनैव रूपसिद्धिरित्यपरे । दुर्गसिंहस्तु 'अमनुष्यकर्तृकेऽपि च' इति सूत्रं पठित्वा अपिशब्देन कृतघ्नशत्रुघ्नादय उपलक्षणीया इत्याह । सञ्ज्ञायां हनष्टग् वा णिनिर्वा स्यादिति वक्तव्यमिति तत्ववादिनः । शत्रुघ्नः शत्रुघाती । अथच 'शक्तौ हस्तिकपाटयोः' (अ.सू.३.३.५४) इत्यत्र शत्रुरप्युपलक्षणीयः । स्वयं शत्रुं हन्तुं शक्तः शत्रुघ्नः ॥ ३८ ॥

असूदयं[१] तदा घोरावनेन मधुकैटभौ ।
समस्तवीर्य्यसारोऽयममोघस्तेऽरिसूदनः[२] ॥ ३९ ॥

(भा.दी.) असूदयमिति । तदा आदिकाले अनेन शरेण घोरौ मधुकैटभौ अहं असूदयम्, हतवान-भूवम् । षूद क्षरणे लङ् । समस्ते जगति यानि वीर्याणि तेषां सारः सारभूतः अमोघः अयं शरः ते तव अरिसूदनः अरिनाशकः स्यात् ॥ ३९ ॥

(सं.चं.) समस्तानि वीर्याणि । तेषां सारोऽयम् । तवारेः लवणस्य चायं सूदनो भविष्यति ॥ ३९ ॥

इत्युक्त्वा प्रेषयामास देवस्तं दैत्यमृत्यवे
आपन्नानां प्रपन्नानां मुनीनामप्यमृत्यवे[३] ॥ ४० ॥

(भा.दी.) इतीति । इति उक्त्वा देवः श्रीरामः, दैत्यस्य लवणासुरस्य मृत्युर्मरणं तस्मै, आपन्नानामागतानां प्रपन्नानां शरणागतानां मुनीनां च्यवनादिमुनीनां अमृत्यवे अमरणाय (अपि) तं शत्रुघ्नं प्रेषयामासेत्यन्वयः । इषु गतौ लिट् ॥ ४० ॥

(सं.चं.) आपन्नानां आपद्ग्रस्तानाम्, अत एव स्वसमीपमापन्नानामागतानाम् । शरणं प्रपन्नानाम् । अमृत्यवे क्षेमाय ॥ ४० ॥

चत्वार्य्यश्वसहस्राणि रथानां द्वे सहस्रके ।
गजानां च शतं दत्वा पदातीन् स ददौ बहून् ॥ ४१ ॥

१. **'अयातयम्'** इति **'अघातयम्'** इति च । २. **'–सूदन'** ३. इदमर्धं कचिन्न पठ्यते ।

(भा.दी.) चत्वारीति । सः श्रीरामः चत्वारि अश्वसहस्राणि, रथाः स्यन्दनास्तेषां द्वे सहस्रके, गजानां शतं तच्च दत्वा बहून् पदातीन् ददौ ॥ ४१ ॥

(सं.चं.) चत्वारीति । 'इमान्यश्वसहस्राणि चत्वारि पुरुषर्षभ । रथानां द्वे सहस्रे च गजानां शतमुत्तमम्' (६४.२) इति च ॥ ४१ ॥

सुवर्ण्णरत्नाकल्पांश्च[1] प्रदाय बहुलान् प्रभुः ।
तेजसा पूरयामास शत्रुघ्नं परिरभ्य सः ॥ ४२ ॥

(भा.दी.) सुवर्णेति । प्रभुः श्रीरामः बहुलान्, सुवर्णानि च रत्नानि च आकल्पा आभरणानि तांश्च प्रदाय, शत्रुघ्नं परिरभ्य तेजसा सामर्थ्येन तं पूरयामास आप्याययामास । पूरि आप्यायने लिट् ॥ ४२ ॥

(सं.चं.) सुवर्णरत्नमयानाकल्पान् आभरणानि ॥ ४२ ॥

प्रणम्य रामं सर्वांश्च गुरूनत्राभिवन्द्य[2] सः ।
पूर्वं प्रस्थाप्य सैन्यं स्वं द्विजैः सार्द्धं स्वयं ययौ ॥ ४३ ॥

(भा.दी.) प्रणम्येति । सः शत्रुघ्नः अत्र अयोध्यायां श्रीरामं प्रणम्य, सर्वान् गुरूंश्च अभिवन्द्य नमस्कृत्य, स्वं स्वीयं सैन्यं तत् पूर्वं प्रथममेव प्रस्थाप्य प्रेषयित्वा, स्वयं द्विजैः समागतैः द्विजैः च्यवनादिमुनिभिः सार्धं ययौ ॥ ४३ ॥

(सं.चं.) द्विजैः च्यवनादिभिः सार्धं स्वयं पृष्ठतो ययौ ॥ ४३ ॥

वाल्मीकेराश्रमं प्राप्य सौमित्रिर्म्मित्रवर्द्धनः ।
अभ्यवन्दत तं दृष्ट्वा तेन च प्रत्यपूज्यत ॥ ४४ ॥

(भा.दी.) वाल्मीकेरिति । मित्राणि वर्धयतीति मित्रवर्धनः, सौमित्रिः सुमित्रापुत्रः शत्रुघ्नः, वाल्मीकेः आश्रमो मुनिवासस्तं प्राप्य, तं वाल्मीकिं दृष्ट्वा अभ्यवन्दत । तेन वाल्मीकिना प्रत्यपूज्यत अर्घ्याद्युपचारैरपूज्यत च । पूज पूजायां लङ् ॥ ४४ ॥

(सं.चं.) सौमित्रिः शत्रुघ्नः । स्वागताद्युपचारेण प्रत्यपूज्यत ॥ ४४ ॥

---

१. 'रत्नस्वाकल्पान् प्रदाय'　　२. '–नत्राभिनन्द्य'

प्राचेतसोऽथ प्रोवाच [१]सौदासस्येममाश्रमम् ।
शापस्य प्राप्तिमोक्षौ च वसिष्ठात् स्वपुरोहितात् ॥ ४५ ॥

(भा.दी.) प्राचेतस इति । अथ प्राचेतसः वाल्मीकिः सौदासस्य सौदासनामकस्य राज्ञः इमं आश्रमं प्रोवाच । स्वपुरोहितात् वसिष्ठात् सुदासस्य यः शापस्तस्य प्राप्तिमोक्षौ च प्रोवाचेति सम्बन्धः । 'सौदासो मृगयां किञ्चिच्चरन् रक्षो जघान ह । मुमोच भ्रातरं सोऽथ गतः प्रतिचिकीर्षया । स चिन्तयन्नघं राज्ञः सूदरूपधरो गृहे । गुरवे भोक्तुकामाय पक्त्वा निन्ये नरामिषम् । परिवेष्यमाणं भगवान् विलोक्याभक्ष्यमञ्जसा । राजानमशपत् क्रुद्धो रक्षो ह्येवं भविष्यसि । रक्षःकृतं तद्विदित्वा चक्रे द्वादशवार्षिकम्' (९.८.५२–५) इति भागवतोक्तशापमोक्षप्रकारौ द्रष्टव्यौ (यत्तु रामायणे सुदासपुत्रः मित्रसहाख्यो वसिष्ठादुक्तरीत्या शापमोक्षौ प्रापेति तत्तु पुरुषव्यत्यासेन वा कल्पभेदेन वोपपद्यत इति भावः[२] ।) ॥ ४५ ॥

(सं.चं.) प्राचेतसो वरुणपुत्रो वाल्मीकिः । अथ अर्घ्याद्युपचारपूर्वकं फलमूलाशनानन्तरम् । प्रोवाच शत्रुघ्नप्रश्नस्योत्तरत्वेनोवाच । तथाहि रामायणे–'युष्माकं पूर्वको राजा सुदासस्तस्य भूपतेः । पुत्रो मित्रसहो नाम वीर्यवानतिधार्मिकः । स बाल एव सौदासो मृगयामुपचक्रमे । चञ्चूर्यमाणं ददृशे स पुरो राक्षसद्वयम् । शार्दूलरूपिणौ घोरौ मृगान् बहुसहस्रशः । भक्ष्यमाणावसन्तुष्टौ पर्याप्तिं नैव जग्मतुः । स तु तौ राक्षसौ दृष्ट्वा निर्मृगं च वनं कृतम् । क्रोधेन महताऽऽविष्टो जघानैकं महेषुणा । विनिपात्य तमेकं तु सौदासः पुरुषर्षभः । विज्वरो विगतामर्षो हतं रक्षो ह्युदैक्षत । निरीक्षमाणं तं दृष्ट्वा सहायं तस्य रक्षसः । सन्तापमकरोद् घोरं सौदासं चेदमब्रवीत् । यस्मादनपराधं तं सहायं मम जघ्निवान् । तस्मात् तवापि पापिष्ठ प्रदास्यामि प्रतिक्रियाम् । एवमुक्त्वा तु तद्रक्षस्तत्रैवान्तरधीयत । कालपर्याययोगेन राजा मित्रसहोऽभवत् । राजाऽपि यजते यज्ञमस्याऽश्रमसमीपतः । अश्वमेधं महायज्ञं तं वसिष्ठोऽभ्यपालयत् । तत्र यज्ञो महानासीद् बहुवर्षगणायुतः । समृद्धः परया लक्ष्म्या देवयज्ञसमोऽभवत् । अथावसाने यज्ञस्य पूर्ववैरमनुस्मरन् । वसिष्ठरूपी राजानमिति होवाच राक्षसः । अद्य यज्ञस्य जातोऽन्तः सामिषं भोजनं मम । दीयतामिह शीघ्रं वै नात्र कार्या विचारणा । तच्छ्रुत्वा व्याहृतं वाक्यं रक्षसा ब्रह्मरूपिणा । सूदान् संस्कारकुशलानुवाच पृथिवीपतिः । हविष्यं सामिषं स्वादु यथा भवति भोजनम् । तथा कुरुत शीघ्रं वै परितुष्येद् यथा गुरुः । शासनात् पार्थिवेन्द्रस्य

---

१. **'सुदासस्य तन्नामकराज्ञः । तस्य सुदासस्य शापस्य प्राप्तिमोक्षौ च'** इति वि.भू.टीकापाठः प्रायो लिपिकृतां प्रमाद एव । का.श्री. च तथैव पठति ।

२. इदं वाक्यं पश्चात् केनचिदुपक्षिप्तम् । मित्रसह इति सौदासस्यैव नामान्तरम् । तथाहि विष्णुपुराणे –**'सुदासात् सौदासो मित्रसहनामा'** (४.४.४०) इति । तस्मान्न कोऽपि विरोधः ।

सूदः सम्भ्रान्तमानसः । तच्च रक्षः पुनस्तत्र सूदवेषमथाकरोत् । स मानुषमथो मांसं पार्थिवाय न्यवेदयत् । इदं स्वादु हविष्यं च सामिषं चान्नमाहृतम् । स भोजनं वसिष्ठाय पत्न्या सार्धमुपाहरत् । मदयन्त्या नरश्रेष्ठ सामिषं रक्षसा हृतम् । ज्ञात्वा तदामिषं विप्रो मानुषं भाजनं गतम् । क्रोधेन महताऽऽविष्टो व्याहर्तुमुप-चक्रमे । यस्मात् त्वं भोजनं राजन् ममैतद् दातुमिच्छसि । तस्माद् भोजनमेतत् ते भविष्यति न संशयः । ततः क्रुद्धस्तु सौदासस्तोयं जग्राह पाणिना । वसिष्ठं शप्तुमारेभे भार्या चैनमवारयत् । राजन् प्रभुर्यतोऽस्माकं वसिष्ठो भगवानृषिः । प्रतिशप्तुं न शक्तस्त्वं देवतुल्यं पुरोधसम् । ततः क्रोधमयं तोयं तेजोबलसमन्वितम् । व्यसर्जयत धर्मात्मा ततः पादौ सिषेच च । तेनास्य राज्ञस्तौ पादौ तदा कल्माषतां गतौ । तदा राजा स पत्न्या वै प्रणिपत्य मुहुर्मुहुः । पुनर्वसिष्ठं प्रोवाच यदुक्तं ब्रह्मरूपिणा । तच्छ्रुत्वा पार्थिवेन्द्रस्य रक्षसा विकृतं च तत् । पुनः प्रोवाच राजानं वसिष्ठः पुरुषर्षभम् । मया रोषपरीतेन यदिदं व्याहृतं वचः । नैतच्छक्यं वृथाकर्तुं प्रदास्यामि च ते वरम् । कालो द्वादशवर्षाणि शापस्यान्तो भविष्यति । मत्प्रसादाच्च राजेन्द्र अतीतं न स्मरिष्यसि । एवं स राजा तं शापमुपभुज्यारिसूदनः । प्रतिलेभे पुना राज्यं प्रजाश्चैवान्व-पालयत् । तस्य कल्माषपादस्य यज्ञस्याऽयतनं शुभम् । आश्रमस्य समीपेऽस्य यन्मां पृच्छसि राघव' (६५.१०–३८) इति च ॥ ४५ ॥

हरिहरिरमणीविलासमूलं कुशलवसूदयमत्र मन्यमानः ।
सकलसुजनसौख्यदं निशां तां व्यधित स रामसहोदरोऽत्र वासम् ॥ ४६ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्क्षेपरामायण उत्तरकाण्डे तृतीयः सर्ग्गः ॥

—०—

(भा.दी.) हरीति । हरिश्च हरिरमणी सीता सा च तयोर्यो विलासः क्रीडा तस्य मूलं कारणं उद्देश्यत्वेन निमित्तभूतम्, लोके सत्पुरुषोत्पत्तिमुद्दिश्य हि सतोर्दम्पत्योः क्रीडेत्यत इदमुक्तम् । यद्वा हरिहरिरमणीविलासवर्णनस्य मूलं हेतुभूतमिति वा । सकला ये सुजनास्तेषां सौख्यं सुखं तद् ददतीति तथोक्तम्, कुशश्च लवश्च तयोर्यः सूदयः शोभनोत्पत्तिस्तम्, अत्र वाल्मीकेराश्रमे मन्यमानः जानानः सन् रामसहोदरः सः शत्रुघ्नः अत्र वाल्मीकेराश्रमे तां निशाम्, तस्यां निशायामित्यर्थः, वासो निवासस्तं व्यधित । सुराणकाख्या हि दैत्या भूरिपापकृतिनामप्यस्माकं मोक्षो भूयादिति ब्रह्माणमुद्दिश्य तपश्चेरुः । स च तपसो तान्निवर्तयन् श्रीहरिं लक्ष्मीवियुक्तं कुरुध्वम्, तर्हि मोक्षो भविष्यतीति सोपाधिकं वरं ददौ । ते च दैवयोगेन श्रीरामावतारकाले

भुव्युत्पन्नाः कामुको रामः परापहृतां सीतां जगृह इत्यादिरूपेणानेकधाऽदूषयन् । तेषां च तमःप्राप्त्यर्थं चतुर्मुखवरं मानयता श्रीरामेण लोकदृष्ट्या परित्यक्ता लक्ष्मणेन च वाल्मीकेराश्रमोपान्ते नीत्वाऽन्तर्वत्नी मुक्ता सीता वाल्मीकेराश्रममागत्य निवासं मुनिवधूभिः सहाकरोत् । यस्मिन् दिने शत्रुघ्नो लवणवधार्थं गच्छन् वाल्मीकेराश्रममगच्छत् तस्यामेव निशायां सीता कुशलवौ सुषुवे इति वाल्मीकेराश्रमे रात्रौ प्रोच्यमानमुदन्तं शृण्वन् सन् तस्यां निशायां सुखं निवासमकरोदिति भावः ॥ ४६ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायामुत्तरकाण्डे तृतीयः सर्गः ॥

—०—

(सं.चं.) पुष्पिताग्रयोपसंहरति– हरिहरिरमणीविलासमूलम् । हरे रामस्य च हरिरमण्याः सीतायाश्च विलासस्य शृङ्गारलीलाया मूलम् कुशलवोदयः । तन्निमित्तो ह्ययं सीतारामयोर्विलासः । विलासो मूलं यस्येति वा । कुशलस्य वसुनः सम्पद उदयमिव कुशलवयोः शुभोदयम् । अथ वसुशब्दो देवतासामान्यवचनः । कुशलेन जगतः पुण्येन वस्वोः देवांशयोरिन्द्राग्न्योरुदयम् । अथ च देवानां कुशलमनेनेति कुशल इन्द्रः । वसुरित्यष्टवसुषु प्रधानोऽग्निः । 'कुशलं निपुणे पुण्ये पर्याप्तौ मङ्गले क्षमे' इति वैजयन्ती । अत्राऽश्रमे तस्यामेव निशायाम् । मन्यमानः मुनिदारकैरुक्तमवगच्छन् । तां निशामत्र वासं व्यधित चकार । 'यामेव रात्रिं शत्रुघ्नः पर्णशालाः समाविशत् । तामेव रात्रिं सीताऽपि प्रसूता दारकद्वयम्' (६६.१) इति, 'सङ्कीर्तनं च रामस्य सीतायाः प्रसवौ शुभौ । अर्धरात्रे तु शत्रुघ्नः शुश्राव सुमहत् प्रियम्' (६६.११) इति च ॥ ४६ ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायामुत्तरकाण्डे तृतीयसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– ३१८४+४६=३२३०]

चतुर्थः सर्ग्गः

शत्रुघ्नो मुनिमामन्त्र्य ततः प्रायादुदङ्मुखः ।
सम्प्राप्य यमुनातीरं न्यवसन्मुनिभिः समम् ॥ १ ॥

(भा.दी.) श्रीरामसहोदरस्य शत्रुघ्नस्य लवणासुरनिग्रहादिकं सविस्तरमाह– **शत्रुघ्न** इति । शत्रुघ्नः मुनिं वाल्मीकिं आमन्त्र्य आपृच्छ्य, ततः वाल्मीकेराश्रमात् उदङ्मुखः उत्तराभिमुखः सन् प्रायात् । यमुनायास्तीरं तटं तत् सम्प्राप्य, मुनिभिः च्यवनादिभिः सह न्यवसत् । वस निवासे लङ् ॥ १ ॥

(सं.चं.) यमुनातीरं सम्प्राप्य, यस्या अपरपारे लवणाधिष्ठितं मधुवनम् । मुनिभिश्च्यवनादिभिः ॥ १ ॥

शुश्राव च्यवनेनोक्तं लवणस्य स विक्रमम् ।
अयोद्ध्याधिपतेः पूर्वं मान्धातुर्न्निधनादिकम् ॥ २ ॥

(भा.दी.) **शुश्रावे**ति । सः शत्रुघ्नः च्यवनेन मुनिना उक्तम्, पूर्वं अयोध्याधिपतेः मान्धातुः मान्धातृनामकस्य[१] भूपस्य, निधनं संहारः आदिर्यस्य स तथा तम्, लवणस्य विक्रमं पराक्रमं शुश्राव । श्रु श्रवणे लिट् । युवनाश्वसुतो मान्धाता कृत्स्नां पृथिवीं विजित्य सुरलोकमपि जेतुकामः सुरलोकं गतः सन् स सुरेन्द्रस्य भयं जनयामास । तैश्च शक्रेणार्धराज्येन याच्यमानोऽपि नाभ्यरोचयत् । तदा चेन्द्र उवाच– 'सकलां पृथिवीमवश्यां कृत्वा तव सुरलोकविजयेच्छाऽयुक्ता' इति । तदा तेन 'मनुष्यलोके को मयाऽविजितः' इत्युक्ते 'मधुपुत्रो लवणस्तव शासने नास्ति' इतीन्द्रवचः श्रुत्वा क्रुद्धः सन् भुवमागत्य लवणविजयार्थं तेन सह युद्ध्यन् लवणमुक्तरुद्रदत्तशूलेन ससैन्यो भस्मीबभूवेति रामायणे प्रसिद्धम् ॥ २ ॥

(सं.चं.) मान्धातुर्न्निधनादिकम् । तथाहि रामायणे कथा–'अयोध्यायां पुरा राजा युवनाश्वसुतो बली । मान्धातेति स विख्यातस्त्रिषु लोकेषु वीर्यवान् । स कृत्वा पृथिवीं कृत्स्नां शासने पृथिवीपतिः । सुरलोकमितो

१. **'मान्धातृनाम्नः'**

जेतुमुद्योगमकरोन्नृपः । इन्द्रस्य च भयं तीव्रं सुराणां च महात्मनाम् । मान्धातरि कृतोद्योगे देवलोक-जिगीषया । अर्धासनेन शक्रस्य राज्यार्धेन च पार्थिवः । वन्द्यमानः सुरगणैः प्रतिज्ञामध्यरोहत । तस्य पापमभिप्रायं विदित्वा पाकशासनः । सान्त्वपूर्वमिदं वाक्यमुवाच युवनाश्वजम् । राजा त्वं मानुषे लोके न तावत् पुरुषोत्तम । अकृत्वा पृथिवीं वश्यां देवराज्यमिहेच्छसि । यदि वीर समग्रा ते मेदिनी निखिला वशे । देवराज्यं कुरुष्वेह सभृत्यबलवाहनः । इन्द्रमेवं ब्रुवाणं तं मान्धाता वाक्यमब्रवीत् । क्व मे शक्र प्रतिहतं शासनं पृथिवीतळे । तमुवाच सहस्राक्षो लवणो नाम राक्षसः । मधुपुत्रो मधुवने न तेऽज्ञां कुरुतेऽनघ । तच्छ्रुत्वा विप्रियं घोरं सहस्राक्षेण भाषितम् । व्रीळितोऽवाङ्मुखो राजा व्याहर्तुं न शशाक ह । आमन्त्र्य तु सहस्राक्षं ह्रिया किञ्चिदवाङ्मुखः । पुनरेवाऽगमच्छ्रीमानिमं लोकं नरेश्वरः । स कृत्वा हृदयेऽमर्षं सभृत्य-बलवाहनः । आजगाम मधोः पुत्रं वशे कर्तुमरिन्दमः । स काङ्क्षमाणो लवणं युद्धाय पुरुषर्षभः । दूतं सम्प्रेषयामास सकाशं लवणस्य हि । स गत्वा विप्रियाण्याह बहूनि मधुनः सुतम् । वदन्तमेवं तं दूतं भक्षयामास राक्षसः । चिरायमाणे दूते तु राजा क्रोधसमन्वितः । अर्दयामास तद् रक्षः शरवृष्ट्या समन्ततः । ततः प्रहस्य तद् रक्षः शूलं जग्राह पाणिना । वधाय सानुबन्धस्य मुमोचाऽयुधमुत्तमम् । तच्छूलं दीप्यमानं तु सभृत्यबलवाहनम् । भस्मीकृत्वा नृपं भूयो लरणस्यागमत् करम्' (६७.५–२१) इत्यादि ॥ २ ॥

ततो रामानुजः प्रातरतीत्य यमुनां गतः ।
तस्थौ मधुवनद्वारि[1] चापरोपधरो बली ॥ ३ ॥

(भा.दी.) तत इति । ततः प्रातः यमुनां अतीत्य गतः बली रामानुजः शत्रुघ्नः, मधुसुतस्य द्वाः द्वारं तस्याम्, चापश्च रोपः शरः स च तौ धारयतीति तथोक्तः सन् तस्थौ ॥ ३ ॥

(सं.चं.) रोपो बाणः । 'रोपो रोपणबाणयोः' इति विश्वप्रकाशः ॥ ३ ॥

ततोऽर्द्धदिवसे प्राप्ते लवणः प्रत्यदृश्यत ।
भक्षार्थं स्वपुराद् यातः सहस्रं प्राणिनां वहन् ॥ ४ ॥

(भा.दी.) तत इति । स्वस्य पुरं मन्दिरं तस्मात्, भक्षार्थं[2] मृगयया मांसाद्यानयनार्थम्, यातः लवणः, अर्धश्चासौ दिवसश्च तस्मिन् प्राप्ते सति, मध्याह्नसमय इत्यर्थः,प्राणिनां सहस्रं वहन् सन् प्रत्यदृश्यत ॥४॥

१. **'मधुसुतद्वारि'** इति वि.ती.पाठः । **'मधुवनमेव गोकुलमिति सम्प्रायविदः'** इति का.श्री. । २. **'भक्षार्थं आहाराय मांसा–'**

(सं.चं.) अर्द्धदिवसे मध्यह्ने । अर्द्धं दिवसस्य अर्द्धदिवसः । 'अर्धं नपुंसकम्'(अ.सू.२.२.२.) इति तत्पुरुषः । आ सम्यगृद्धः अभिवृद्धः दिवस इति वा । प्रातः स्वपुराद् यातः । 'ततोऽर्धदिवसे प्राप्ते क्रूरकर्मा स राक्षसः । आगच्छद् बहुसाहस्रं प्राणिनां भारमुद्वहन्' (६८.४) इति च ॥ ४ ॥

त्वादृशानां सहस्राणि भक्षितानि मया ननु[१] ।
किमर्थं स्वयमागास्त्वमित्येनं[२] लवणोऽब्रवीत् ॥ ५ ॥

(भा.दी.) त्वादृशानामिति । मया, त्वमिव दृश्यन्त इति त्वादृशास्तेषाम्, त्वत्सदृशानामित्यर्थः, सहस्राणि भक्षितानि ननु । त्वं स्वयं किमर्थं आगाः मत्पुरतः प्राप्नोः । इण् गतौ लुङ् । लवणः एनं शत्रुघ्नं प्रति इति अब्रवीत् ॥ ५ ॥

(सं.चं.) त्वं स्वयम्, सेनासहायमपहाय त्वमेक एव किमर्थमागाः आगतः । इत्येनं शत्रुघ्नम् ॥ ५ ॥

इत्थं विकत्थनैः किं ते ननु रामानुजोऽस्म्यहम् ।
द्वन्द्वयुद्धं त्वया देयमिति सौमित्रिरब्रवीत् ॥ ६ ॥

(भा.दी.) इत्थमिति । इत्थं (ते) विकत्थनानि व्यर्थवचनानि, तैः किं प्रयोजनम्? अहं रामानुजः अस्मि ननु । त्वया द्वन्द्वयुद्धं देयं दातव्यम् । इति सौमित्रिः अब्रवीत् ॥ ६ ॥

(सं.चं.) किं मुधा विकत्थनैरात्मश्लाघनैः । रावणवधेन तवापि ज्ञातस्य रामस्यानुजो नन्वहम् । केवलं द्वौ द्वौ द्वन्द्वम् । पूर्वपदस्याम्भावः । अत्वं चोत्तरपदस्य । यथा स्त्रीपुंसौ द्वन्द्वम् । क्वचिद् विरुद्धयोः सन्निपातः । यता द्वन्द्वं युद्धम् । केवलं द्वयोर्द्वयोरिति द्वन्द्वम् ॥ ६ ॥

मद्भ्रातृघ्नस्य रामस्य हन्तुं त्वां भ्रातरं बत ।
आनेष्याम्यायुधमिति शत्रुघ्नं लवणोऽब्रवीत् ॥ ७ ॥

(भा.दी.) मदिति । मम यो भ्राता भ्रातृतुल्यो रावणस्तं हतवानिति तथा तस्य । मम मातुः कुम्भीनस्याः भ्राता मद्भ्रातेति मध्यमपदलोपिसमासे सति वा मद्भ्रातृशब्देन रावण उच्यते । मधुनामकदैत्येन कुम्भीनस्याख्या रावणभगिनी रावणे दिग्विजयार्थं (गते) लङ्काया आहृता,[२] पुनस्तस्मा एव दत्ता, तस्यां चायं लवण उत्पन्न

१. 'मया नर' २. '–मित्येवम्' २. 'अपहृता'

इति रामायणे प्रतिपादनात्। श्रीरामस्य भ्रातरं त्वां हन्तुं आयुधं त्रिशूलाख्यमायुधं तत् आनेष्यामि, बत हर्षे, इति शत्रुघ्नं प्रति लवणः अब्रवीत् ॥ ७ ॥

(सं.चं.) मद्भ्रातृघ्नस्य रामस्य। कथं भ्रातृघ्नः? 'कृत्युल्युटो बहुलम्' (अ.सू.३.३.११३) इत्युक्तम्। किञ्चिदिव मोहकमिदं वचनम्। द्वे कुम्भीनस्यौ रामायणे पठ्येते। एका रावणजनन्याः कैकस्याः सहोदरी सुमालितनया। 'राका पुष्पोत्कटा चैव कैकसी च शुचिस्मिता। कुम्भीनसी च इत्येते सुमालेः प्रसवाः स्मृताः' (उ.कां.५.४१) इति। अपरा सुमालिनोऽग्रजस्य माल्यवतः पौत्री। माल्यवतस्तनयाऽनला नाम। तस्या इयं तनयाऽपरा कुम्भीनसी। तथाहि विभीषणवचनम्–'मातामहस्य योऽस्माकं ज्येष्ठो भ्राता सुमालिनः। माल्यवानिति विख्यातो वृद्धः प्राज्ञो निशाचरः। पिता ज्येष्ठो जनन्या नो ह्यस्माकं चाऽर्यकोऽभवत्। तस्य कुम्भीनसी नाम दुहितुर्दुहिताऽभवत्। मातृष्वसुरथास्माकं सा च कन्याऽनलोद्भवा। भवत्यस्माकमेवैषा भ्रातॄणां धर्मतः स्वसा'(२५.२२–४) इति च। सा चेयं रावणस्वसा कुम्भीनसी मधोर्भार्या लवणमाता। अत्रैव शत्रुघ्नं प्रति लवणवचनं च–'मम मातृष्वसुर्भ्राता रावणो राक्षसाधिपः। हतो रामेण दुर्बुद्धे स्त्रीहेतोः पुरुषाधम' (६८.१४) इति। मातृष्वसा शूर्पणखा। तस्या भ्रातेति वचनार्थः। तत् कथं मद्भ्रातृघ्नस्येति। यदि कैकसीसहोदरी कुम्भीनसी स्यादत्र विवक्षिता तदा भवति रावणो लवणभ्राता। किन्तु रामायणवचनविरुद्धमेतद् भवति। तत् किमित्येवं जगाद पण्डितचार्यः? प्रतिपक्षी ब्रूयात्– प्रथमकुम्भीनसीभ्रान्त्या 'मातुलघ्नस्य' इति वक्तव्ये 'भ्रातृघ्नस्य' इति जगाद। तेन नूनं भ्रान्तः कविरिति। अथ किमुत्तरं स्यादुत्तरपक्षिणाम्? शृणु तर्हि यद्यस्ति जिज्ञासा। वस्तुतस्तु न रावणो मातुलोऽपि। किन्तु धर्मतो मातुलः, मातुलतुल्य इत्यर्थः। अत एव लवणो 'मातुर्भ्राता' इत्यनुक्त्वा 'मातृष्वसुर्भ्राता' इति साकूतमाह। मातुलादपि स्नेहनैकट्यं भ्रातुर्भवतीति रावणस्य भ्रातृतुल्यतां प्रकटयन् रावणघ्नं स्वभ्रातृघ्न-माह। लोकेऽपि यङ्कमपि सम्बन्धनैकट्यज्ञापनाय 'ಅವರು ನನಗೆ ಅಣ್ಣನಂತೆ' इत्येव व्याहरन्ति। सम्बन्धनैकट्यमेव भ्रातृशब्दार्थः। न सम्बन्धविशेषः। मम भ्रातेव मद्भ्रातेति विग्रहः। अतः साधूक्तं मद्भ्रातृघ्नस्य रामस्य भ्रातरं त्वां हन्तुमिति। महान्त एवं मोहयन्तोऽन्तः परिहसन्ति। आयुधं शूलम् ॥ ७ ॥

ब्रह्मघ्नस्त्वं[1] न मोक्तव्यो दृष्टमात्रस्तु मादृशैः।
कितव[2] क प्रयासीति शत्रुघ्नः शत्रुमब्रवीत् ॥ ८ ॥

१. **'ब्रह्मघ्न त्वम्'** इति वि.ती.पाठः। २. **'कितव त्वं क यासीति'**

(भा.दी.) **ब्रह्मे**ति । ब्रह्म ब्राह्मणान् हतवानिति ब्रह्मघ्नस्तस्य सम्बुद्धिः, लवण, त्वं मादृशैः दृष्टमात्रः सन् मोक्तव्यः न । हे कितव कपटिन्, त्वं क्व प्रयासि गच्छसि । शत्रुघ्नः शत्रुं लवणं प्रति इति अब्रवीत् ॥ ८ ॥

(सं.चं.) दृष्टमात्रोऽपि त्वं न मोक्तव्यः । ब्रह्मघ्नत्वात् । 'आततायिनमायान्तं हन्यादेवाविचारयन्' इति हि स्मरन्ति । कितवो धूर्तः । लोककण्टकः । ननु कथं ब्रह्मघ्नः? 'ब्रह्मभ्रूणवृत्रेषु क्विप्' (अ.सू.३.२.८८) इति क्विपो नियमनात् । यदाह जयादित्यः–'ब्रह्मादिषु हन्तेः क्विब्वचनं नियमार्थम्' इति सत्यम् । अथापि– 'अमनुष्यकर्तृके च' (३.२.५३) इत्यनेन रूपसिद्धिरिति गृहाण । ब्रह्माणि मनुष्यजीवान् हतवानयमनुष्यो राक्षस इति । यदाहुः–'अनुष्यशब्दो रूढ्या रक्षःपिशाचादीनाह' इति । तेन ब्रह्महा मनुष्यः । भ्रूणहा मनुष्यः । वृत्रहा देवः । ब्रह्मघ्नो राक्षस इति ॥ ८ ॥

लवणोऽसहमानोऽथ[1] मानी तां परुषां गिरम् ।
वृक्षमुत्पाट्य रूक्षाक्षः शत्रुघ्नं प्रत्युपाद्रवत् ॥ ९ ॥

(भा.दी.) **लवण** इति । अथ मानी शूरत्वाभिमानवान् लवणः, परुषां निष्ठुरां तां गिरं असहमानः सन्, वृक्षमुत्पाट्य, रूक्षे क्रोधदीप्ते अक्षिणी यस्य स तथा सन्, शत्रुघ्नं प्रति उपाद्रवत् ॥ ९ ॥

(सं.चं.) रूक्षे निष्करुणे अचिक्कणे चाक्षिणी यस्य ॥ ९–१० ॥

क्षिप्तं[2] वृक्षमसम्भ्रान्तः शरैश्चिच्छेद राघवः ।
पुनश्चैवं पुनश्चैवं तदाश्चर्य्यमवर्त्तत ॥ १० ॥

(भा.दी.) **क्षिप्तमि**ति । राघवः रघुगोत्रे भवः शत्रुघ्नः, लवणेन क्षिप्तं वृक्षं असम्भ्रान्तः सन् शरैः चिच्छेद । पुनश्च एवं प्रक्षिप्तं प्रक्षिप्तं वृक्षं चिच्छेद । पुनश्च एवं चिच्छेद । तद्युद्धं आश्चर्यं यथा भवति तथा अवर्तत । वृतु वर्तने लङ् ॥ १० ॥

शरान् ववर्ष शतशः शत्रुघ्नः शत्रुवक्षसि ।
सालमुत्तालमुत्पाट्य लवणस्तमताडयत् ॥ ११ ॥

(भा.दी.) **शराननि**ति । शत्रुघ्नः शतशः शरान् शत्रोर्लवणस्य यद्वक्षस्तस्मिन् ववर्ष । वृष सेचने लिट् । उत्ताल उन्नतस्तं सालं सर्जवृक्षं उत्पाट्य लवणस्तं शत्रुघ्नं अताडयत् । तड आघाते लङ् ॥ ११ ॥

---

१. '–मानोऽपि मानी'

२. 'क्षिप्रं वृक्ष–' इति, 'प्राक्षिपत् तमसम्भ्रान्तः' इति च ।

(सं.चं.) उत्तालमुन्नतं महान्तं सालं वृक्षमुत्पाट्य । उत्तालं द्रुततरं यथा स्यात् तथेति क्रियाविशेषणं वा । 'उत्तालः कर्मणि द्रुतः' इति, 'उत्तालो द्रुत उत्तानेऽपि' इति च यादवप्रकाशः ॥ ११–४ ॥

सौमित्रिस्ताडितस्तेन विसञ्ज्ञो न्यपतद् भुवि ।
हाहाकृतं मुनिगणैः प्रहृष्टं[1] लवणेन च ॥ १२ ॥

(भा.दी.) सौमित्रिरिति । तेन वृक्षेण ताडितः सौमित्रिः विसञ्ज्ञः सन् भुवि न्यपतत् । तदा मुनीनां गणाः समूहास्तैः हाहाकृतं हाहेति ध्वनिरकारि । लवणेन च प्रहृष्टं सन्तुष्टम् ॥ १२ ॥

रामानुजः पुनः सञ्ज्ञां प्राप्तः क्रोधाग्निना ज्वलन् ।
रामदत्तममोघं तं शरं चापेन सन्दधे ॥ १३ ॥

(भा.दी.) रामेति । पुनः सञ्ज्ञां प्राप्तः रामानुजः, क्रोध एवाग्निस्तेन ज्वलन् सन्, रामदत्तं अमोघं (तं) शरं चापं धनुस्तेन सन्दधे सन्धितवान्[2] ॥ १३ ॥

बाणस्य तस्य ज्वलतो ज्वालया भीषितं[3] जगत् ।
ब्रह्माणं शरणं प्राप मा भीरित्यभ्यधादजः ॥ १४ ॥

(भा.दी.) बाणस्येति । ज्वलतः तस्य बाणस्य ज्वालया भीषितं जगत् ब्रह्माणं शरणं तत् प्राप । अजः ब्रह्मा भीर्भयं मा न कार्या इति अभ्यधात् । शत्रुघ्नेन लवणासुरवधार्थं श्रीरामदत्तः शरः मुच्यते, भवद्भिर्न भेतव्यमित्युक्त्वाऽऽश्वासयामासेत्यर्थः ॥ १४ ॥

शरः शत्रुघ्ननिर्म्मुक्तो निहत्य लवणासुरम् ।
रसातळं प्रविश्याथ पुना रामकरं ययौ ॥ १५ ॥

(भा.दी.) शर इति । शत्रुघ्ननिर्मुक्तः शरः लवणासुरं निहत्य, अथ रसातळं पाताळं तत् प्रविश्य, पुनः श्रीरामस्य यः करस्तं ययौ ॥ १५ ॥

(सं.चं.) रसातळम् । 'गत्वा रसातळं दिव्यः शरो विबुधपूजितः । पुनरेवागमत् तूर्णमिक्ष्वाकुकुलनन्दनम्' (६९.३५) इति च ॥ १५ ॥

---

१. '–गणैः संहृष्टम्' २. 'धि धारणे' इत्यस्येदं रूपम् । ३. 'ज्वालया पीडितम्'

निवेशमकरोद् वीरस्तत्र देवप्रसादतः ।
मधुरा नगरी साऽभूत् सर्वसम्पत्समन्विता ॥ १६ ॥

(भा.दी.) निवेशमिति । वीरः शत्रुघ्नः तत्र मधुवने निवेशः नगरं तं अकरोत्, देवस्य श्रीरामस्य यः प्रसादोऽनुग्रहस्तस्मादिति ततः सर्वाः याः सम्पदस्ताभिः समन्विता सा प्रसिद्धा मधुरा मधुराख्यनगरी अभूत् ॥ १६ ॥

(सं.चं.) निवेशं गृहोद्यानादि । देवानां प्रसादतः वररूपादनुग्रहात् । 'इयं मधुपुरी रम्या मधुरा देव-निर्मिता । निवेशं प्राप्नुयाच्छीघ्रमेष मेऽस्तु वरः परः । तं देवाः प्रीतमनसो बाढमित्येव राघवम् । भविष्यति पुरी रम्या शूरसेना न संशयः । ते तथोक्त्वा महात्मानो दिवमारुरुहुस्तदा' (७०.६–७) इति च । मधुरा नगरी साऽभूत् यत्राष्टाविंशे द्वापरे कृष्णोऽवततार ॥ १६–८ ॥

स्वां च सेनां निवेश्यात्र रामपाददिदृक्षया ।
द्वादशे वत्सरे गच्छन् वाल्मीकेराश्रमं ययौ ॥ १७ ॥

(भा.दी.) स्वामिति । शत्रुघ्नः स्वां स्वकीयां सेनां अत्र मधुरायां निवेश्य स्थापयित्वा, द्व्यधिका दश द्वादश, (तस्मिन्) द्वादशे वत्सरे श्रीरामस्य यौ पादौ तयोर्दिदृक्षा दर्शनेच्छा तया, अयोध्यां प्रति गच्छन् सन्, पुनः वाल्मीकेः आश्रमं प्रति ययौ ॥ १७ ॥

लवणस्य वधात् प्रीतो वाल्मीकी राघवानुजम् ।
आतिथ्याय समामन्त्र्य ससैन्यं समतर्प्पयत् ॥ १८ ॥

(भा.दी.) लवणस्येति । लवणस्य वधः संहारस्तस्मात् प्रीतः वाल्मीकिः, राघवानुजं शत्रुघ्नं आतिथ्यं अतिथि-सत्कारस्तस्मै समामन्त्र्य ससैन्यं सेनासहितं शत्रुघ्नं अन्नादिना समतर्पयत् । तृप प्रीणने ॥ १८ ॥

ततः श्रुत्वाऽतिमधुरं गीतं कौतूहलाकुलाः[1] ।
सैनिकास्तं मुनिं प्रष्टुं शत्रुघ्नं समचोदयन्[2] ॥ १९ ॥

१. **'–हलान्विताः'** इति वि.ती.पाठः । २. **'शत्रुघ्नं प्रत्यचोदयन्'**

(भा.दी.) **तत** इति । ततः सेनायां भवाः सैनिकाः जनाः, अत्यन्तं मधुरं मनोहरमतिमधुरं तत् गीतं कुशलवाभ्यां क्रियमाणं श्रीरामायणगानं श्रुत्वा, कौतूहलेन कौतुकेनान्विताः युक्ताः सन्तः मुनिं वाल्मीकिं प्रति, प्रष्टुं काभ्यामिदं गीतं क्रियत इति[1] प्रष्टुम्, शत्रुघ्नं समचोदयन् । चुद प्रेरणे लङ् ॥ १९ ॥

(सं.चं.) कुत इदं रामकथागानमिति मुनिं प्रष्टुम् ॥ १९ ॥

महर्षिर्हि महातेजा बह्वाश्चर्य्योऽस्य चाऽश्रमः ।
न प्रष्टव्यमिहास्माभिरित्यूचे रामसोदरः ॥ २० ॥

(भा.दी.) **महे**ति । महर्षिः वाल्मीकिः महत् तेजः सामर्थ्यं यस्य स तथा, महाप्रभावयुक्त इत्यर्थः । अस्य आश्रमश्च बहु प्रसिद्धं आश्चर्यं यस्य स तथोक्तः । इह आश्रमे, इह गानविषये, अस्माभिः न प्रष्टव्यं न विचारणीयम्, श्रीरामसोदरः शत्रुघ्न इति ऊचे ॥ २० ॥

(सं.चं.) स्वयं जानन्नपि तत् कुशलवरहस्यं सैनिकेषु प्रकटयितुमनिच्छन्नाह–महर्षिरिति । तस्मादस्माभिर्न प्रष्टव्यम् ॥ २०–१ ॥

अभिरामं स रामस्य चरितं गीतमद्भुतम् ।
आकर्ण्य कर्णपीयूषं न सुष्वाप निशामिमाम् ॥ २१ ॥

(भा.दी.) **अभी**ति । सः शत्रुघ्नः अभिरामं मनोहरम्, अद्भुतं श्रीरामस्य चरितं चरितनिबन्धनात्मकम्, कर्णयोः पीयूषमिव कर्णपीयूषम्, अत्यन्तं श्रवणीयमित्यर्थः, गीतं गानम्, वाल्मीकिकृतरामायणगानमित्यर्थः, श्रुत्वा इमां निशां न सुष्वाप, तच्छ्रवणलौल्यान्न निद्रितोऽभूत् । ञि ष्वप् शये लिट् ॥ २१ ॥

प्रतस्थे मुनिमामन्त्र्य प्रभाते भरतानुजः ।
अयोद्ध्यां शात्रवायोद्ध्यां विवेश च[2] ससैनिकः ॥ २२ ॥

(भा.दी.) **प्रतस्थ** इति । भरतानुजः प्रभातं प्रातःकालस्तस्मिन् मुनिं वाल्मीकिं आमन्त्र्य आपृच्छ्य प्रतस्थे प्रययौ । शात्रवैः शत्रुभिः अयोध्यां योद्धुमशक्यां अयोध्यां प्रति ससैनिकः सेनासहितः सन् प्रविवेश ॥ २२ ॥

(सं.चं.) शात्रव एव शात्रवाः । प्रज्ञादित्वात् स्वार्थेऽण् । शात्रवैरयोध्यां अशक्याक्रमणाम् ॥ २२ ॥

१. **'क्रियमाणमिति'**

२. **'–योध्यां प्रविवेश सनैनिकः'** इति वि.ती.पाठः ।

मातरं तर्ण्णकइव घर्म्मतप्तइवामृतम् ।
रामपादमुपव्रज्य निर्व्ववौ रामसोदरः ॥ २३ ॥

(भा.दी.) मातरमिति । रामसोदरः श्रीरामभ्राता शत्रुघ्नः मातरं धेनुं प्राप्य तर्णक इव वत्सक इव, अमृतमुदकं तत् प्राप्य घर्मतप्त इव निदाघसन्तप्त इव, श्रीरामस्य यः पादस्तं उपव्रज्य निर्ववौ निर्वृतिमागच्छत्, सुखातिशयं प्रापेत्यर्थः । निरुपपदाद् वा गतिगन्धनयोर्लिट् ॥ २३ ॥

(सं.चं.) मातरं गां तर्णको वत्स इव । 'माता तु गव्यकारादौ' इति यादवप्रकाशः । अमृतं पीयूषं जलं वा । निर्ववौ निर्वृतो बभूव ॥ २३ ॥

साम्राज्यसौख्यतूलं मे नाथ त्वद्विरहानलः ।
क्षिणोति मे प्रसीदेति ब्रुवाणः प्रणनाम सः ॥ २४ ॥

(भा.दी.) साम्रज्येति । हे राम, तव यो विरहो वियोगः स एवानलः, मे साम्राज्यस्य राज्याधिपत्यस्य यत् सौख्यं सुखं तदेव तूलं तत् क्षिणोति नाशयति । क्षिणु हिंसायां लट् । मे मह्यं प्रसीद । यथा वियोगो न स्यात् तथाऽनुगृहाण । इति ब्रुवाणः सन् सः शत्रुघ्नः प्रणनाम ॥ २४ ॥

(सं.चं.) साम्राज्यसौख्यमेव तूलं पिचुः । '**ಅರಳೆ, ಹತ್ತಿ**' इति भाषायाम् । तव पादमूल एव यथा स्थितिः स्यात् तथा प्रसीद ॥ २४ ॥

क्षत्रधर्म्मं प्रजारक्षां शुश्रूषां मे समाचर[1] ।
तात नात्र[2] विषादः[3] स्यादित्यूचे तं जगद्गुरुः ॥ २५ ॥

(भा.दी.) क्षत्रेति । हे शत्रुघ्न, मे मम शुश्रूषां सेवात्मिकां क्षत्रस्य क्षत्रियजातेर्धर्मं धर्मभूताम्, 'स्याद्धर्ममस्त्रियाम्' इत्यमरः, प्रजारक्षां सदा आचर कुरु । चरतेर्लोट् । अत्र रक्षणविषये विषाद आलस्यं भयं वा मा स्यात्, न स्यात् । जगद्गुरुः श्रीरामः तं शत्रुघ्नं प्रति इति ऊचे ॥ २५ ॥

(सं.चं.) प्रजारक्षा क्षत्रधर्मः । सैव मम शुश्रूषा च । विषादो वैमुख्यम्, हेयताबुद्धिः ॥ २५ ॥

---

१. '**सदाऽऽचर**' इति वि.ती.पाठः । २. '**तात माऽत्र**' इति च ।

३. '**विषदः दौश्चित्त्यम् । आलस्यं वा**' इति वि.भू. ।

पञ्चरात्रमसौ तत्र स्वामिना सार्द्धमूषिवान् ।
प्रभोर्न्नियोगाच्छत्रुघ्नो मधुरां सानुगोऽगमत् ॥ २६ ॥

(भा.दी.) पञ्चेति । तत्र अयोध्यायां स्वामिना श्रीरामेण सार्धं पञ्चानां रात्रीणां समाहारः पञ्चरात्रं तत् ऊषिवान् वासं कृतवान्, असौ शत्रुघ्नः प्रभोः श्रीरामस्य नियोग आज्ञा तस्मात्, सानुगः सभृत्यः सन् मधुरां प्रति अगमत् ॥ २६ ॥

(सं.चं.) पञ्च रात्रयः समाहृताः पञ्चरात्रः । पक्षान्तरे पञ्चरात्रं वा । तमूषिवानुवास स्वामिना रामेण सार्धम् । पुनरसौ मधुरां सानुगोऽगमत् । तदपि प्रभो रामस्य नियोगात् । नतु स्वेच्छया, स्वयं रामविरहमसहमानोऽपि । सम्प्रति रामायणे सप्तरात्रमुवासेति पठ्यते–'तस्मात् त्वं वस काकुत्स्थ सप्तरात्रं मया सह' (७२.१७) इति, 'सप्तरात्रं च काकुत्स्थो राघवस्य यथाज्ञया । उष्य तत्र महेष्वासो गमनायोपचक्रमे' इति । स्फुटमेकत्र पाठव्यत्यासः । स्यात् 'पञ्चरात्रम्' इति रामायणपाठः । अथ स्यादपि 'सप्तरात्रम्' इति सङ्ग्रहरामायणपाठः । किं वास्तवमिति देव एव जानाति ॥ २६ ॥

अथ कश्चिद् द्विजो वृद्धो नगरद्वारमागतः ।
सङ्गृह्य पुत्रं मृतकं रुरोदोच्चैः शुचाऽऽकुलः ॥ २७ ॥

(भा.दी.) अथेति । अथ वृद्धः कश्चित् द्विजः, मृतकं शवभूतं पुत्रं सङ्गृह्य, नगरस्य अयोध्याया द्वारं तत् आगतः सन्, शुक् शोकस्तया आकुलः सन् उच्चैः रुरोद ॥ २७ ॥

(सं.चं.) अथ शूद्रतापसकथामारभते– अथेति । अथ गतेषु कतिपयाहःसु ॥ २७–३१ ॥

हा पुत्र रामराज्येऽस्मिन् न मृत्युर्व्युत्क्रमात्[१] क्वचित् ।
त्वामहं मन्दभाग्यत्वात् परासुमवलोकये ॥ २८ ॥

(भा.दी.) हा पुत्रेति । हा पुत्र, अस्मिन् श्रीरामस्य यद्राज्यं तस्मिन्, व्युत्क्रमो विपरीतक्रमस्तस्मात् क्वचिदपि मृत्युः मरणं न, नास्ति । अहम्, मन्दमल्पं भाग्यं यस्य स तथा तस्य भावस्तत्वं तस्मात्, (त्वां) परासुं मृतं अवलोकये पश्यामि ॥ २८ ॥

---

१. **'व्युत्क्रमात् विपरीतक्रमात् । वृद्धे जीवति यूनो मृत्युर्विपरीतक्रमः'** इति का.श्री. ।

वत्सोत्तिष्ठ कळैर्वाक्यैः पितरौ नौ प्रहर्षय ।
नैवं चेदचिरेण त्वामनुयास्याव एव हि ॥ २९ ॥

(भा.दी.) वत्सेति । हे वत्स, उत्तिष्ठ उत्थितो भव । कळानि अव्यक्तमधुराणि, तैः वाक्यैः, माता च पिता च पितरौ, नौ आवां प्रहर्षय सन्तोषय । हृष तुष्टौ लोट् । चेद् यदि एवं न, उत्थाय सम्भाषणादिकं न करोषि, तर्हि अचिरेण शीघ्रं त्वां अनुयास्यावः अनुगमिष्याव एव ॥ २९ ॥

सर्वलोकैकशरणं[१] शरणं मे भवेत् प्रभुः ।
पातु मे पतितं पोतं राघवः करुणाकरः ॥ ३० ॥

(भा.दी.) सर्वेति । यदि सर्वे ये लोकाः जनास्तेषामेकं मुख्यं शरणं पालकः प्रभुः श्रीरामः मे शरणं रक्षकः भवेत् । भुवो लिङ् । तर्हि करुणाकरः राघवः पतितं मे पोतो बालकस्तं पातु रक्षतु । पा रक्षणे लोट् ॥३०॥

एवं ब्रुवाणे विप्रेऽस्मिन् नारदो वाक्यमब्रवीत् ।
मुनिमण्डलमद्ध्यस्थः सभायां रामसन्निधौ ॥ ३१ ॥

(भा.दी.) एवमिति । अस्मिन् विप्रे एवं ब्रुवाणे वदति सति, मुनीनां यन्मण्डलं समूहस्तस्य यन्मध्यं तस्मिन् तिष्ठतीति तथोक्तः नारदः, सभायां श्रीरामस्य सन्निधिस्तस्मिन् वाक्यं तत् अब्रवीत् ॥ ३१ ॥

धर्म्मश्चतुष्पाद् धर्म्मेश त्वत्प्रसादात् कृते स्थितः ।
क्रमान्न्यूनपदोऽन्यत्र सोऽधर्म्मपदपीडितः ॥ ३२ ॥

(भा.दी.) धर्म इति । हे धर्मेश हे धर्मपालक श्रीराम, कृतं कृतयुगं तस्मिन्, चत्वारः तपः शौचं दया सत्यमिति प्रसिद्धाः पादा यस्य स चतुष्पात् धर्मः, तव प्रसादोऽनुग्रहस्तस्मात् स्थितः, अन्यत्र युगान्तरे त्रेतादिषु, सः धर्मः अधर्मस्य यानि पदानि स्मयसङ्गमदानृतलक्षणपादास्तैः पीडितः सन्, क्रमो युगक्रम-स्तस्मात्, न्यूनानि पदानि यस्य स तथा सन् अवस्थितः ॥ ३२ ॥

(सं.चं.) धर्मश्चतुष्पादिति । 'तपः शौचं दया सत्यमिति पादाः कृते कृताः' इति भागवते । क्रमान्न्यून-पदः । त्रेतायां स्मयेन तपो न्यूनं भवति । द्वापरे दुष्टसङ्गेन शौचमपि । कलौ मदेन दयापादोऽपि भ्रश्यति । अन्ते सत्यमनृतेन ॥ ३२–३ ॥

१. '–लोकैकशरणः'

अद्विजा द्विजधर्म्माणो[1] नूनं लोकविनाशकाः ।
दयालुना त्वया नाथ तेषु दण्डो निपात्यताम् ॥ ३३ ॥

(भा.दी.) अद्विजा इति । अद्विजा द्विजव्यतिरिक्ताः शूद्रादयः ये पुरुषाः, लोकविनाशकाः सन्तः, द्विजानां धर्मा येषां ते तथोक्ताः, नूनं तेषु हे नाथ, दयालुना त्वया दण्डः शिक्षा निपात्यतां क्रियताम् ॥ ३३ ॥

नारदेनेति गदिते राघवेणाभिनन्दिते ।
रामानुजो रामवाक्यात् सान्त्वयामास तं द्विजम् ॥ ३४ ॥

(भा.दी.) नारदेनेति । नारदेन इति वचसि गदिते प्रोक्ते सति, श्रीराघवेण श्रीरामेण अभिनन्दिते नारदवचः श्रुत्वा सन्तुष्टे सति, रामानुजः लक्ष्मणः श्रीरामस्य यद्वाक्यं तस्मात्, तं द्विजं सान्त्वयामास आश्वासयामास । षान्त्व सामप्रयोगे लिट् ॥ ३४ ॥

(सं.चं.) रामानुजो लक्ष्मणः । 'गच्छ सौम्य द्विजश्रेष्ठं समाश्वासय सुव्रतम् । बालस्य च शरीरं तत् तैलद्रोण्यां निधापय' (७५.२) इति रामवाक्यात् ॥ ३४–५ ॥

स्मृतमात्रमुपायातं[2] पुष्पकं पुष्करेक्षणः ।
आरुह्य विचचाराथ दिक्षु सर्वासु च क्षणात् ॥ ३५ ॥

(भा.दी.) स्मृतेति । अथ पुष्करवत्कमलवदीक्षणे यस्य स तथा श्रीरामः, केवलं स्मृतं स्मृतमात्रं तस्मात्, स्मरणमात्रादित्यर्थः, उपायातं पुष्पकं पुष्पकविमानं तत् आरुह्य सर्वासु च दिक्षु क्षणं क्षणमात्रं तस्मात् विचचार ॥ ३५ ॥

विचिन्वानः किलान्याय्यं[3] सर्वसाक्षी स राघवः ।
याम्यां दिशि सरः प्राप शैवलस्योत्तरान्तिके ॥ ३६ ॥

(भा.दी.) विचिन्वान इति । (सर्वं) साक्षादीक्षत इति (सर्व)साक्षी, सर्वज्ञ इत्यर्थः, सः राघवः अन्यायोऽधर्मस्तं विचिन्वानः निमार्गमाणः किल । अनेन सर्वज्ञस्य श्रीरामस्य मद्राज्येऽधर्मशीलः क इति

१. '**द्विजानां धर्म इव धर्मो येषां ते द्विजधर्माणः । 'धर्मादनिच् केवलात्**' (अ.सू.५.४.१२८) इत्यनिच्प्रत्ययः' इति का.श्री. ।

२. '**स्मृतमात्रादुपायातम्**' इति वि.ती.पाठः ।

३. '**किलान्यायम्**' इति वि.ती.पाठः ।

निमार्गणं लोकानुकरणमात्रमित्युक्तं भवति । याम्यां दक्षिणस्यां दिशि, शैवलो शैवलाख्यो गिरिस्तस्य उत्तरं यदन्तिकं पाश्वर्वं तस्मिन्, उत्तरतट इत्यर्थः, विद्यमानं सरः प्राप ॥ ३६ ॥

(सं.चं.) सर्वसाक्षी सन्नप्यजानन्निव विचिन्वानः । अन्याय्यमयुक्तं कर्म । शैवल इति विन्ध्यसमीपे दक्षिणपाश्र्वे कश्चन शैलः । 'दक्षिणां दिशमाक्रामत् ततो राजर्षिनन्दनः । शैवलस्योत्तरे पाश्र्वे ददर्श सुमहत् सरः' (७५.१३) इति च ॥ ३६ ॥

अधःशिरसमूर्ध्वाङ्घ्रिं लम्बमानं तपस्विनम् ।
तत्र दृष्ट्वा स पप्रच्छ को भवानिति विश्ववित् ॥ ३७ ॥

(भा.दी.) अध इति । विश्वं समस्तं वेत्तीति विश्ववित्, सर्वज्ञ इत्यर्थः, सः श्रीरामः तत्र सरसि, अधः शिरो यस्य स तथा तम्, ऊर्ध्वौ अङ्घ्री यस्य स तथा तम्, लम्बमानं तपस्विनं दृष्ट्वा, भवान् कः किञ्जातीयः इति पप्रच्छ ॥ ३७ ॥

(सं.चं.) अधःशिरसम् । 'ददर्श राघवः श्रीमान् लम्बमानमधोमुखम्' (७५.१४) इति च । विश्वं सर्वं विदन्नपि पप्रच्छ ॥ ३७ ॥

जम्बुको नाम शूद्रोऽहं त्र्यम्बकस्य पदेच्छया ।
व्रतं तीव्रं करोमीति प्रोचे तं शूद्रतापसः ॥ ३८ ॥

(भा.दी.) जम्बुक इति । जम्बुक इति नाम प्रसिद्धः शूद्रः अहम्, त्रीणि अम्बकानि लोचनानि यस्य स तथा तस्य, 'चक्षुर्नयनाम्बकेक्षणाक्षीणि' इति हलः, रुद्रस्य पदे कैलासाधिपत्ये या इच्छा तया, रुद्रत्वप्राप्ती-च्छयेत्यर्थः, तीव्रं व्रतं कायक्लेशलक्षणं तत् करोमि, इति शूद्रतापसः तं श्रीरामं प्रोचे ॥ ३८ ॥

(सं.चं.) जम्बुको नाम । रामायणे तु– 'शूद्रयोन्यां प्रसूतोऽस्मि शम्बूको नाम नामतः' (७६.२) इति पठ्यते । जम्बुक इति पाठव्यत्यासो वा स्यात् । नामान्तरं वा स्यात् । त्र्यम्बकस्य यत् पदं मनोमानित्वं तदिच्छया । एतेन '–देवलोकजिगीषया । शूद्रं मां विद्धि काकुत्स्थ तप उग्रं समास्थितम्' (७६.३) इति रामायणवचनं विवृतम् । देवलोकजिगीषा नाम देवलोकादप्युत्तमस्य शिवपदस्य प्रेप्सेति ॥ ३८ ॥

निष्कृष्य तरसा खड्गं कोशादाकाशसन्निभम् ।
चिच्छेद तच्छिरस्तेन देवो देवान् प्रहर्षयन् ॥ ३९ ॥

(भा.दी.) निष्कृष्येति। देवः श्रीरामः देवान् प्रहर्षयन् सन्, आकाशस्य सन्निभः समानस्तम्, अतिनिर्मलतया नीलवर्णमित्यर्थः, खड्गं तरसा शीघ्रं कोशोऽसिपिधानं तस्मात् निष्कृष्य उत्कृष्य, तेन खड्गेन तच्छिरः शूद्रतपस्विशिरः चिच्छेद ॥ ३९ ॥

(सं.चं.) आकाशसन्निभम्। अतिस्वच्छतयाऽऽकाशे लीनप्रभम्। आकाशे उन्नमय्य धृतः खड्ग आकाशे लीन इव पृथङ् नादृश्यतेत्यर्थः। चिच्छेद तच्छिरस्तेन शिवपदप्रेप्सुत्वेन हेतुना। नहि शूद्रत्वं हननहेतुः। स किल शूद्रतापसीं शबरीमुज्जहार। रावणं द्विजमपि सञ्जहार। अवैधं तप एवोभयत्रापि शिक्षाकारणम्। 'तपश्चचार दुर्बुद्धिरिच्छन् माहेश्वरं पदम्। अनन्यवध्यं तं तस्माज्जघान पुरुषोत्तमः' (९.२१) इति निर्णये ॥ ३९ ॥

अधर्म्ममुत्साद्य विभुर्ज्जीवयामास तं शिशुम्।
अन्यथाऽपि समर्त्थः सन् लोकशिक्षणमाचरन् ॥ ४० ॥

(भा.दी.) अधर्ममिति। लोकानां शिष्टजनानां शिक्षणम्, क्षत्रियेणाधर्मशीलो निहन्तव्य इति शिक्षा, तत् आचरन् विभुः श्रीरामः, अन्यथाऽपि जम्बुकवधमन्तराऽपि ब्राह्मणपुत्रोज्जीवने समर्थः सन्नपि, अधर्मं तत् उत्साद्य विनाश्य तं मृतं शिशुं जीवयामास। जीव प्राणधारणे लिट् ॥ ४० ॥

(सं.चं.) अधर्मिणः शिक्षयित्वा धर्मो रक्षणीयः क्षत्रियेणेति लोकान् शिक्षयन् जीवयामास तं शिशुम्। 'यस्मिन् मुहूर्ते काकुत्स्थ शूद्रोऽयं विनिपातितः। तस्मिन् मुहूर्ते बालोऽसौ जीवेन समयुज्यत' (७६.१५) इति च ॥ ४० ॥

स्तवः सकलनाथस्य सुमनोभिरलं कृतः।
भगवांस्तैर्विकीर्ण्णाभिः सुमनोभिरलङ्कृतः ॥ ४१ ॥

(भा.दी.) स्तव इति। सुमनोभिः देवैः सकलनाथस्य श्रीरामस्य स्तवः स्तुतिः अलं सम्यक् कृतः। भगवान् श्रीरामः तैर्देवैः विकीर्णाभिः अभिवृष्टाभिः सुमनोभिः पुष्पैः, 'सुमनाः पुष्पमालत्योः स्त्री देवबुधयोः पुमान्' इति वैजयन्ती, अलङ्कृतः विभूषितः अभूत् ॥ ४१ ॥

(सं.चं.) सुमनोभिर्देवैरलं स्तवः कृतः। तैर्देवैर्विकीर्णाभिर्वृष्टाभिः सुमनोभिर्भगवानप्यलङ्कृतो बभूव। 'सुमनाः पुष्पमालत्योस्त्रिदशे कोविदेऽपि च' इति विश्वप्रकाशः। सुमनस इति पुष्पवचनं स्त्रियां भूम्नि प्रायः प्रयुञ्जते। सुमना इति सुमनेति च क्वचित्। पुंसि देवतावचनम्। अत्र द्वितीयतुरीयचरणयोर्यमकम् ॥४१॥

अगस्त्यस्याऽश्रमं [1]दिव्यं प्राप पापहराह्वयः[2] ।
कुम्भसम्भव आश्वेनं [3]शम्भुपूज्यमपूजयत् ॥ ४२ ॥

(भा.दी.) अगस्त्येति । पापहरः आह्वयो नाम यस्य स तथोक्तः श्रीरामः, दिव्योऽलौकिकस्तं अगस्त्यस्य मुनेः आश्रमं प्राप । कुम्भसम्भवः अगस्त्यः शम्भुना रुद्रेण पूज्यं एनं श्रीरामं आशु अपूजयत् ॥ ४२ ॥

(सं.चं.) कुम्भसम्भवोऽगस्त्यः । कुम्भे निक्षिप्तेनोर्वशीमुग्धयोर्मित्रावरुणयो रेतसा किल सम्बभूवायम् । अत एनं मैत्रावरुणिमप्याहुः । 'त्वं प्रभुः सर्वदेवानां पुरुषस्त्वं सनातनः' (७६.२९) इत्यस्य तात्पर्यमाह– सर्वदेवप्रभोः शम्भोरपि ब्रह्मणोऽपि पूज्यमिति ॥ ४२ ॥

रामाय रम्यां प्रददौ मालाममलिनां मुनिः ।
इमां च वाणीमाचष्ट राघवं भक्तिमत्तमः ॥ ४३ ॥

(भा.दी.) रामायेति । अतिशयेन भक्तिमान् भक्तिमत्तमः मुनिः अगस्त्यः, अमलिनां निर्मलां रम्यां मालाम्, रत्नमयीं मालाम्, श्रीरामाय प्रददौ । राघवं प्रति इमां वाणीं च आचष्ट प्रोचे । चक्षिङ् व्यक्तायां वाचि लङ् ॥ ४३ ॥

(सं.चं.) प्रददौ महाफलं प्राप्तुं ददौ । मालां विश्वकर्मनिर्मितां स्वर्णमालाम् । 'इदं चाऽभरणं सौम्य निर्मितं विश्वकर्मणा । दिव्यं दिव्येन वपुषा दीप्यमानं स्वतेजसा । प्रतिगृह्णीष्व काकुत्स्थ मत्प्रियं कुरु राघव । दत्तस्य हि पुनर्दाने सुमहत् फलमुच्यते' (७६.३०–१) इति । आभरणं वलयरूपमिति वदन्तो रामायणव्याख्यतारो भ्रान्ताः । 'श्वेतदत्तां तथा मालामगस्त्यादाप राघवः' (९.२२) इति निर्णये ॥ ४३ ॥

अनन्नयज्ञकृच्छ्वेतो राजा मांसमदन्निजम् ।
मालां ब्रह्मनियोगान्मे दत्वा [4]तदघमत्यगात् ॥ ४४ ॥

(भा.दी.) अनन्नेति । न विद्यतेऽन्नं येषु तेऽनन्नास्ते च ते यज्ञाश्च तान् कृतवानिति तथोक्तः, सुवर्णादिकं दत्तं चेदन्नं स्वत एव लभ्यत इति अन्नदानरहितयज्ञकृदित्यर्थः, श्वेतः श्वेताख्यो राजा स्वर्गप्राप्त्यनन्तरम्, निजमात्मीयं तत्, स्वेन यस्मिन्नाश्रमे तपश्चरता देहस्त्यक्तस्तद्देहसम्बन्धीत्यर्थः, तथा रामायणे प्रतिपादनात्,

१. **'–श्रमं पुण्यं प्राप'** २. **'पापक्षयाह्वयः'** ३. **'शम्भुपूज्यम्, ब्रह्मणा रुद्रेण वा पूजार्हम्'** इति का.श्री. ।
४. **'तदघं स्वमांसभक्षणाख्यं पापम्'** इति वि.भू. । का.श्री. च ।

मांसं अदन् भक्षयन् सन्, ब्रह्मणो यो नियोग आज्ञा तस्मात्, मम क्षुदुपशान्तिः केन कर्मणा भवतीति श्वेतेन राज्ञा पृष्टेन ब्रह्मणा प्रोक्तमेतदघशान्त्यर्थमगस्त्याय रत्नमयीं मालां देहीति यद्वचनं तस्मादित्यर्थः, मालां मे अगस्त्याय दत्वा, तच्च तदघं च तदघं तत्, अनन्नदाननिमित्तपापमित्यर्थः, अत्यगात् अतिक्रान्तवान् । इण् गतौ लुङ् । श्वेतो हि ब्रह्मणो लोकं[१] गतोऽपि क्षुत्पिपासार्दितः सन् ब्रह्माणमुवाच किं मया भक्षणीयं कथं च क्षुदुपशान्तिरिति । स चागस्त्याय रत्नमयीं मालां श्रीरामाय दातुं (कथयित्वा) यावन्न दास्यसि तावत्पर्यन्तं स्वाश्रमपतितपूर्वदेहमांसं भुञ्जन् क्षुदुपशान्तिं कुर्वित्युवाच । स च कदाचिद् ब्रह्मलोकादागत्य स्वमांसमदन्तमगस्त्येन किमिदमिति पृष्टः स्वपूर्ववृत्तान्तमुक्त्वाऽगस्त्याय मालां ददौ । तदानीमेव स्वपूर्वशरीरं ननाश । क्षुदुपशान्तिं च जगामेत्यादि रामायणे प्रसिद्धम् ॥ ४४ ॥

(सं.चं.) अनन्नयज्ञकृच्छ्रेतः । श्वेत इति कश्चित् पुरातनो वैदर्भको राजा । तथाहि कथा रामायणे स्वयं राज्ञा श्वेतेन कथिताऽगस्त्याय– 'पुरा वैदर्भको राजा पिता मम महायशाः । सुदेव इति विख्यातस्त्रिषु लोकेषु वीर्यवान् । तस्य पुत्रद्वयं ब्रह्मन् द्वाभ्यां स्त्रीभ्यामजायत । अहं श्वेत इति ख्यातो यवीयान् सुरथोऽभवत् । ततः पितरि स्वर्याते पौरा मामभ्यषेचयन् । तत्राहं कृतवान् राज्यं धर्म्यं च सुसमाहितः । एवं वर्षसहस्राणि समतीतानि सुव्रत । राज्यं कारयतो ब्रह्मन् प्रजा धर्मेण रक्षतः । सोऽहं निमित्ते कस्मिंश्चिद् विज्ञातायु-र्द्विजोत्तम । कालधर्मं हृदि न्यस्य ततो वनमुपागमम् । सोऽहं वनमिदं दुर्गं मृगपक्षिविवर्जितम् । तपश्चर्तुं प्रविष्टोऽस्मि समीपे सरसः शुभे । भ्रातरं सुरथं राज्ये ह्यभिषिच्य महीपतिम् । इदं सरः समासाद्य तपस्तप्तं मया चिरम् । सोऽहं वर्षसहस्राणि तपस्त्रीणि महावने । तप्त्वा सुदुष्करं प्राप्तो ब्रह्मलोकमनुत्तमम् । तस्य मे स्वर्गभूतस्य क्षुत्पिपासे द्विजोत्तम । बाधेते परमोदार ततोऽहं व्यथितेन्द्रियः । गत्वा त्रिभुवनश्रेष्ठं पितामहमुवाच ह । भगवन् ब्रह्मलोकोऽयं क्षुत्पिपासाविवर्जितः । कस्यायं कर्मणः पाकः क्षुत्पिपासानुगो ह्यहम् । आहारः कश्च मे देव तन्मे ब्रूहि पितामह । पितामहस्तु मामाह तवाऽहारः सुदेवज । स्वादूनि स्वानि मांसानि तानि भक्षय नित्यशः । स्वशरीरं त्वया पुष्टं कुर्वता तप उत्तमम् । अनुप्तं रोहते बीजं न कदाचिन्महा-मते । तृप्तिर्न तेऽस्ति सूक्ष्माऽपि वने सत्त्वनिषेविते । पुरा त्वां भिक्षमाणाय भिक्षायै यतये नृप । नहि दत्ता त्वयेन्द्राभ यस्मादतिथयेऽपि वै । तेन स्वर्गगतो वत्स बाध्यसे क्षुत्पिपासया । स त्वं सुपुष्टमाहारैः स्वशरीर-मनुत्तमम् । भक्षयित्वाऽमृतरसं तेन तृप्तिर्भविष्यति । यदा तु तद् वनं श्वेत अगस्त्यः सुमहानृषिः । आगमिष्यति दुर्धर्षस्तदा कृच्छ्राद् विमोक्ष्यसे । स हि तारयितुं सौम्य शक्तः सुरगणानपि । किं पुनस्त्वां महाबाहो क्षुत्पि-पासावशं गतम् । सोऽहं भगवतः श्रुत्वा देवदेवस्य निश्चयम् । आहारं गर्हितं कुर्मि स्वशरीरं द्विजोत्तम ।

---

१. **'ब्रह्मलोकम्'**

बहून् वर्षगणान् ब्रह्मन् भुज्यमानमिदं मया । क्षयं नाभ्येति ब्रह्मर्षे तृप्तिश्चापि ममोत्तमा । तस्य मे कृच्छ्रभूतस्य कृच्छ्रादस्माद् विमोक्षय । अन्येषां न गतिर्ह्यत्र कुम्भयोनिमृते द्विजम् । इदमाभरणं सौम्य तारणार्थं द्विजोत्तम । प्रतिगृह्णीष्व भद्रं ते प्रसादं कर्तुमर्हसि' (७८.३–२३) इति । ब्रह्मनियोगान्मे दत्त्वा । 'अनन्नयज्ञकृच्छ्वेतो राजा क्षुद्विनिवर्तनम् । कुर्वन् स्वमांसैर्धात्रोक्तो मालां रामार्थमर्पयत् । अगस्त्याय न साक्षात्तु रामे दद्यादयं नृपः । क्षुदभावमात्रफलदं न साक्षाद् राघवेऽर्पितम् । क्षुदभावमात्रमाकाङ्क्षन् मामसौ परिपृच्छति । व्यवधानतस्ततो रामे दद्याच्छ्वेत इति प्रभुः । मत्वा ब्रह्मादिशन्मालां प्रदातुं कुम्भयोनये' (९.२२–५) इति निर्णये ॥ ४४ ॥

सेयं माला मया दत्ता तुभ्यमभ्यर्हितात्मने ।
सर्वोऽपि [1]कल्याणविधिरनन्तो ह्यर्प्पितस्त्वयि[2] ॥ ४५ ॥

(भा.दी.) सेयमिति । मया सा श्वेतेन दत्ता इयं माला, अभ्यर्हितः सर्वोत्कृष्ट आत्मा स्वरूपं यस्य स तथा तस्मै, सर्वोत्तमायेत्यर्थः, तुभ्यं दत्ता । त्वयि अनन्तः नाशरहितः सर्वोऽपि कल्याणमेव निधिः निहितद्रव्यं अर्पितो हि समर्पितो हि[3] । अतः श्वेतराजस्य कल्याणार्थत्वेन इयं माला मया दत्ता, त्वया स चानुग्राह्य इति भावः ॥ ४५ ॥

(सं.चं.) कल्याणविधिः माङ्गलिकी क्रिया । त्वय्यर्पितो ह्यनन्तफलदो भवति ॥ ४५ ॥

दण्डस्य राज्ञो विषयो दण्डकारण्यतां ययौ ।
शुक्रशापेन तत्राग्रे श्वेतश्चक्रे महत्तपः ॥ ४६ ॥

(भा.दी.) श्वेतराजेन कुत्र तपश्चीर्णमित्यत आह– **दण्डस्ये**ति । अग्रं पूर्वं तस्मिन्, त्रेतायुग इत्यर्थः, दण्डस्य दण्डनामकस्य राज्ञः विषयः, शुक्रस्य यः स्वतनयाधर्षणनिमित्तकः शापस्तेन, दण्डकारण्यतां दण्डकाख्यारण्यतां ययौ । तत्र दण्डकारण्ये श्वेतः महत् तपः चक्रे । दण्डकाख्यो हि राजा कदाचिच्छुक्रस्याऽश्रमं जगाम । तत्र च विचरन्तीमौशनसीं विरजां नाम कन्यकां बलादुपभुक्त्वा[4] नगरं ययौ । तत आगतो मुनिस्तत्सर्वं श्रुत्वा कुपितः सन् शशाप– 'सप्तरात्रेण राजाऽसौ सभृत्यबलवाहनः । पापकर्मसमाचारो वधं प्राप्स्यति

१. **'कल्याणनिधि–'** इति वि.ती.पाठः ।

२. **'अक्षयं कर्म यस्मिन् परे स्वर्पितम्', 'क्षेमं न विन्दन्ति विना यदर्पणम्' इत्यादिप्रमाणप्रसिद्धमेतत्'** इति का.श्री. ।

३. **'संस्थितो हि'**

४. **'बलादुपभुज्य'** इति साधुः पाठः ।

दुर्मतिः । समन्ताद्योजनशतं विषयं चास्य दुर्मतेः । धक्ष्यते पांसुवर्षेण महता पाकशासनः । सर्वसत्वानि यानीह स्थावराणि चराणि च । महता पांसुवर्षेण नाशं यास्यन्ति सर्वशः । दण्डस्य विषयो यावत्तावत्सर्व-समुच्छ्रयः । पांसुभूत इवालक्ष्यः सप्तरात्राद् भविष्यति' इति । ततः प्रभृति तद्विषयस्य दण्डकारण्यमिति सञ्ज्ञा । बहुकालात्ययानन्तरमगस्त्यादितपस्विभिरवस्थानात् जनस्थानमिति चोच्यते ॥ ४६ ॥

(सं.चं.) यत्र श्वेतस्तपश्चचार तस्य दण्डकारण्यमिति नामनिमित्तमितिहासमाह– दण्डस्य राज्ञः । तथाहि रामायणे–'पुरा कृतयुगे राजा मनुर्दण्डधरः प्रभुः । तस्य पुत्रो महानासीदिक्ष्वाकुः कुलनन्दनः' (७९.५), 'प्रयाते त्रिदिवं तस्मिन्निक्ष्वाकुरमितप्रभः । जनयामास धर्मात्मा शतं देवसुतोपमान् । तेषामवरजस्तात सर्वेषां रघुनन्दन । मूढश्चाकृतविद्यश्च न शुश्रूषति पूर्वजान् । नाम तस्य च दण्डेति पिता चक्रेऽल्पमेधसः । विन्ध्यशैवलयोर्मध्ये राज्यं प्रादादरिन्दम । स दण्डस्तत्र राजाऽभूद् रम्ये पर्वतरोधसि । पुरोहितं तूशनसं वरयामास सुव्रतम्' (७९.१२–१८), 'अथ काले तु कस्मिंश्चिद् राजा भार्गवमाश्रमम् । रमणीयमुपाक्रामच्चैत्रे मासि मनोरमे । तत्र भार्गवकन्यां स रूपेणाप्रतिमां भुवि । विचरन्तीं वनोद्देशे दण्डोऽपश्यदनुत्तमाम् । स दृष्ट्वा तां सुदुर्मेधा अनङ्गशरपीडितः । अभिगम्य सुसंविग्नां कन्यां वचनमब्रवीत् । कुतस्त्वमसि सुश्रोणि कस्य वाऽसि सुता शुभे । पीडितोऽहमनङ्गेन पृच्छामि त्वामनिन्दिते । तस्य त्वेवं ब्रुवाणस्य मोहोन्मत्तस्य कामिनः । भार्गवी प्रत्युवाचेदं वचः सानुनयं नृपम् । भार्गवस्य सुतां विद्धि देवस्याक्लिष्टकर्मणः । अरजां नाम राजेन्द्र ज्येष्ठामाश्रमवासिनीम् । मा मां स्पृश बलाद् राजन् कन्या पितृवशा ह्यहम् । गुरुः पिता मे राजेन्द्र त्वं च शिष्यो महात्मनः । क्रोधेन हि पिता मेऽसौ त्रैलोक्यमपि निर्दहेत् । दास्यते चानवद्याङ्ग तव मां याचितः पिता । एवं ब्रुवाणामरजां दण्डः कामवशं गतः । प्रत्युवाच मदोन्मत्तः शिरस्याधाय चाञ्जलिम् । त्वां प्राप्य मे वधो वा स्याच्छापो वा यदि दारुणः । भक्तं भजस्व मां भीरु भजमानं सुविह्वलम् । एवमुक्त्वा तु तां कन्यां दोर्भ्यां गृह्य बलाद् बली । विस्फुरन्तीं यथाकामं मैथुनायोपचक्रमे । तमनर्थं महाघोरं दण्डः कृत्वा सुदारुणम् । नगरं प्रययावाशु मधुमन्तमनुत्तमम्' (८०.३–१७), 'स मुहूर्तादुपश्रुत्य देवर्षिरमितप्रभः । स्वमाश्रमं शिष्यवृतः क्षुधार्तः सन्न्यवर्तत । सोऽपश्यदरजां दीनां रजसा समभिप्लुताम् । ज्योत्स्नामिव ग्रहग्रस्तां प्रत्यूषे न विराजतीम् । तस्य रोषः समभवत् क्षुधार्तस्य विशेषतः । निर्दहन्निव लोकांस्त्रीन् शिष्यांश्चैतदुवाच ह । सप्तरात्रेण राजाऽसौ सभृत्यबलवाहनः । पापकर्मसमाचारो वधं प्राप्स्यति दुर्मतिः । समन्ताद् योजनशतं विषयं चास्य दुर्मतेः । धक्ष्यते पांसुवर्षेण महता पाकशासनः' (८१.१–८), 'इत्युक्त्वा भार्गवो वासमन्यत्र समकारयत् । तच्च राज्यं नरेन्द्रस्य सभृत्यबलवाहनम् । सप्ताहाद् भस्मसाद् भूतं यथोक्तं ब्रह्मवादिना । तस्यासौ दण्डविषयो विन्ध्यशैवलयोर्नृप । ततः प्रभृति काकुत्स्थ दण्डकारण्यमुच्यते' (८१.१७–९) इति ॥ ४६–७ ॥

मुनावेवं कथयति ययावस्तं दिवाकरः ।
न्यवसत् तत्र तां रात्रिं रामो मुनिगणार्च्चितः[१] ॥ ४७ ॥

(भा.दी.) मुनाविति । मुनावेवं कथयति सति दिवाकरः अस्तोऽस्तगिरिस्तं ययौ । श्रीरामः तत्रागस्त्याश्रमे मुनिगणान्वितः सन् तां रात्रिं न्यवसत् । वसतेर्लङ् ॥ ४७ ॥

प्रातः प्रयास्यन् प्रोवाच भगवान् कुम्भसम्भवम् ।
पुनस्ते दर्शनं भूयात् पावनस्त्वं नृणामिति ॥ ४८ ॥

(भा.दी.) प्रातरिति । प्रातः अयोध्यां प्रति प्रयास्यन् गमिष्यन् भगवान् श्रीरामः, कुम्भसम्भवमगस्त्यं प्रति, पुनः ते दर्शनं अवलोकनं तत् भूयात्, त्वं नृणां मध्ये पावनः पवित्रीभूतः इति प्रोवाच ॥ ४८ ॥

(सं.चं.) यतः पावनदर्शनस्त्वं नृणाम् ॥ ४८ ॥

निष्पतद्बाष्पनयनो भक्तिमानभ्यधान्मुनिः ।
पावनोऽस्मि[२] प्रभो सत्यं[३] पादपद्मस्मृतेस्तव ॥ ४९ ॥

(भा.दी.) निष्पतदिति । भक्तिमान्, अत एव निष्पतन् बाष्पः अश्रु ययोस्ते तथोक्ते तादृशे नयने यस्य स तथोक्तः मुनिः, हे प्रभो श्रीराम, तव पादावेव पद्मे तयोः स्मृतिः स्मरणं तस्याः, अहं पावितः पवित्रीकृतः अस्मि, इदमेव सत्यं यथार्थं इति अभ्यधात् ॥ ४९ ॥

(सं.चं.) 'बाष्पोऽश्रुण्यम्बुधूमे च' इति यादवप्रकाशः । सत्यमहं पावनोऽस्मि यथाऽऽह भवान् । तच्च पावनत्वं न स्वतः । किन्तु तव पादपद्मस्मृतेः ॥ ४९ ॥

महापातकिनः पूताः श्रुतिस्मृत्यनुकीर्त्तनैः[४] ।
यस्य ते[५] स भवान् राम साक्षात्पावनपावनः[६] ॥ ५० ॥

---

१. **'मुनिगणान्वितः'** इति वि.ती.पाठः ।
२. **'पावितोऽस्मि'** इति वि.ती.पाठः ।
३. **'प्रभो नित्यम्'**
४. **'श्रुतिस्मृत्यनुकीर्तनैः श्रवणस्मरणनामोच्चारणैः'** इति का.श्री. ।
५. **'ते भगवान्'**
६. **'साक्षान्मङ्गलमङ्गलः'** इति, **'साक्षान्मङ्गलकीर्तनः'** इति च ।

(भा.दी.) महेति । यस्य ते तव, श्रुतिः त्वत्कथाश्रवणं सा च, स्मृतिश्च, अनुकीर्तनं च, तैः महान्ति यानि पातकानि ब्रह्महत्यादीनि तानि एषां सन्तीति तथोक्ताः पुरुषाः पूताः पवित्रीकृताः, सः तादृशमहिमा भवान् (श्रीराम,) साक्षात् पावयन्ति पवित्रीकुर्वन्ति इति पावनानि गङ्गादीनि तीर्थानि तेभ्यः पावनः पवित्रभूतः, अस्तीति सम्बन्धः ॥ ५० ॥

(सं.चं.) साक्षात् मुख्यतया । नत्वन्यद्वारा । पावनानामपि पावनः । 'पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम्' इति हि भारते । 'पावनः सर्वभूतानां त्वमेव रघुनन्दन' (८२.९) इति रामायणे ॥ ५० ॥

इत्यगस्त्येन गदितो मन्दहासोऽभिनन्द्य तम् ।
राजमानो विमानेन राजराजोऽगमत् पुरीम्[१] ॥ ५१ ॥

(भा.दी.) इतीति । इति अगस्त्येन गदितः उदितः, मन्दो हासो यस्य स तथोक्तः, राज्ञां राजा राजराजः श्रीरामः, तं अगस्त्यं अभिनन्द्य सन्तोष्य, विमानं पुष्पकं तेन राजमानः सन्, पुरीमयोध्यां अगमत् ॥५१॥

(सं.चं.) मन्दः लक्ष्यालक्ष्यः हासोऽस्य । 'स्मितं त्वदृष्टदशने हासो वक्रोष्ठिका न ना' इति यादवप्रकाशः । सदा राजमानः । विमानेनागमत् पुरीमयोध्याम् ॥ ५१–२ ॥

सर्वसम्पत्समृद्धां तां प्रविवेश पुरीं प्रभुः ।
स्मृतमेहीति[२] सम्प्रोच्य पुष्पकं च विसृष्टवान् ॥ ५२ ॥

(भा.दी.) सर्वेति । प्रभुः श्रीरामः, सर्वा या सम्पत् तया समृद्धां तां पुरीं प्रविवेश । स्मृतः सन् त्वं एहि आगच्छ इति सम्प्रोच्य, पुष्पकं तच्च विसृष्टवान् वैश्रवणनिकटमप्रेषयत्[३] ॥ ५२ ॥

लक्ष्मणं भरतं चाथ द्वाःस्थैराहूतवानयम्[४] ।
प्रणतौ प्रवणावेतौ प्रणयादभिषस्वजे ॥ ५३ ॥

(भा.दी.) लक्ष्मणमिति । अथ अयं श्रीरामः, लक्ष्मणं भरतं च, द्वास्थाः द्वारपालास्तैः आहूतवान् आह्वयामास[५] । अथ प्रणतौ प्रवणौ विनयोपेतौ एतौ लक्ष्मणभरतौ, प्रणयः स्नेहः तस्मात् अभिषष्वजे । ष्वञ्ज परिष्वङ्गे लिट् ॥ ५३ ॥

---

१. **'–गमत् पुरम्'** २. **'स्मृत एहीति'** इति वि.ती.पाठः । ३. **'प्रेषृ गतौ'** इत्यस्येदं लङि रूपम् ।
४. **'भरतं चायं......हूतवानथ'** ५. **'आह्वयामास' इति मूलपाठः स्यात् । अन्यथा 'आजुहाव' इति वक्तव्यम् ।**

(सं.चं.) प्रवणौ प्रह्वौ । 'प्रवणो दक्षिणे प्रह्वे' इति च । प्रणयात् स्वयमेवाभिगम्य सस्वजे । गाढं स्वक्त्वा स्वप्रणयमभिव्यानगित्यर्थः । 'उपसर्गात्' (असू.८.३.६५) इति सकारस्य मूर्धन्यादेशः ॥ ५३ ॥

यज्ञैर्यज्ञेशमात्मानं यक्ष्येऽहं मुख्यकल्पकैः ।
इत्युक्तवन्तमूचाते तौ रामं साधुसाध्विति ॥ ५४ ॥

(भा.दी.) यज्ञैरिति । अहम्, मुख्यः कल्पो विधानं येषां ते मुख्यकल्पकास्तैः यज्ञैः, यज्ञेशं आत्मानं स्वात्मानं यक्ष्ये यजनं करिष्ये । इति उक्तवन्तं श्रीरामं प्रति तौ लक्ष्मणभरतौ साधु सम्यक् साधु सम्यक् इति ऊचाते ॥ ५४ ॥

(सं.चं.) आत्मानं परमात्मानमिति लोकविडम्बनम् । स्वात्मानमिति वस्तुस्थितिः । मुख्यकल्पकैरुत्तम-कल्पकैः । कल्पो विधिः । कल्पकश्च सर्वोत्तमो भगवान् ॥ ५४–५ ॥

लक्ष्मीशं लक्ष्मणः प्रोचे बद्धाञ्जलिपुटः पटुः ।
अश्वमेधेन विश्वेश यष्टुमर्हसि साम्प्रतम् ॥ ५५ ॥

(भा.दी.) लक्ष्मीशमिति । बद्धे अञ्जलिपुटे येन स तथोक्तः, पटुः समर्थः लक्ष्मणः, लक्ष्मीशं श्रीरामं प्रति, हे विश्वेश श्रीराम, त्वं साम्प्रतमिदानीं अश्वमेधेन यज्ञेन यष्टुं अर्हसि योग्योऽसि । अर्ह पूजायां लट् । इति प्रोचे ॥ ५५ ॥

पुरा विष्णुप्रसादेन वज्री वृत्रममारयत् ।
ब्रह्महत्याविषण्णोऽथ[1] वाजिमेधेन पावितः[2] ॥ ५६ ॥

(भा.दी.) वाजिमेधस्य क्रतुश्रेष्ठत्वं सेतिहासमुपपादयति– **पुरे**ति । पुरा वज्री इन्द्रः विष्णोः प्रसादोऽनुग्रहस्तेन वृत्रं वृत्राख्यमसुरं अमारयत् जघान । अथ (ब्रह्मणः) ब्राह्मणस्य हतिस्तया, विषण्णः भीत इन्द्रः, वाजिमेधो अश्वमेधयज्ञस्तेन पावितः पवित्रीकृतः, ब्रह्महत्यादोषान्मुक्त इत्यर्थः, अभूत् । पुरन्दरो हि विष्ण्वाविष्टो ब्राह्मणजातिं वृत्रं जघान । अथ ब्रह्महत्यापीडितः श्रीहरिमेव प्रार्थयित्वा श्रीहर्यनुज्ञया अश्वमेधयागं कृत्वा विष्ण्वनुग्रहाद् ब्रह्महत्या मुक्तः पुनः सुराणामाधिराज्ये संस्थितोऽभूदिति रामायणे प्रसिद्धम् ॥ ५६ ॥

---

१. **'ब्रह्महत्या विषण्णः अथ'** इति वि.ती.सम्मतः पदपाठः ।

२. **'तदुक्तं षष्ठस्कन्धे –'स वाजिमेधेन यथोदितेन वितायमानेन मरीचिमिश्रैः । इष्ट्वाऽपि यज्ञं पुरुषं पुराणमिन्द्रो महानास विधूतपापः' (भाग.६.१३.२१) इति'** इति का.श्री. ।

(सं.चं.) पुरा विष्णुप्रसादेन । तथाहि रामायणे लक्ष्मणवचनम्–'पुरा किल महाबाहो देवासुरसमागमे । वृत्रो नाम महानासीद् दैतेयो लोकसम्मतः' (८४.४), 'स निक्षिप्य सुतं ज्येष्ठं पौरेषु मधुरेश्वरम् । तप उग्रं समातिष्ठत् तापयन् सर्वदेवताः । तपस्तप्यति वृत्रे तु वासवः परमार्तवत् । विष्णुं समुपसङ्क्रम्य वाक्यमेतदुवाच ह । तपस्यता महाबाहो लोका वृत्रेण निर्जिताः । बलवान् स हि धर्मात्मा नैनं शक्ष्यामि शासितुम्' (८४.१०–२), 'यदा हि प्रीतिसंयोगं त्वया विष्णो समागतः । तदा प्रभृति लोकानां नाथत्वमुपलब्धवान्' (८४.१५), 'सहस्राक्षवचः श्रुत्वा सर्वेषां च दिवौकसाम् । विष्णुर्देवानुवाचेदं सर्वानिन्द्रपुरोगमान् । पूर्वं सौहृदबद्धोऽस्मि वृत्रस्य तु महात्मनः । येन युष्मत्प्रियार्थं हि नाहं हन्मि महासुरम् । अवश्यं करणीयं च भवतां सुखमुत्तमम् । तस्मादुपायमाख्यास्ये सहस्राक्षो वधिष्यति । त्रेधाभूतं करिष्यामि आत्मानं सुरसत्तमाः । तेन वृत्रं सहस्राक्षो वधिष्यति न संशयः । एकांशो वासवं यातु द्वितीयो वज्रमेव तु । तृतीयो भूतळं शक्तस्तदा वृत्रं वधिष्यति' (८५.३–७), 'ततः सर्वे महात्मानः सहस्राक्षपुरोगमाः । तदरण्यमुपाक्रामन् यत्र वृत्रो महासुरः । तेऽपश्यंस्तेजसा भूतं तप्यन्तमसुरोत्तमम् । पिबन्तमिव लोकांस्त्रीन् निर्दहन्तमिवाम्बरम् । दृष्ट्वैव चासुरश्रेष्ठं देवास्त्रासमुपागमन् । कथमेनं वधिष्यामः कथं न स्यात् पराजयः । तेषां चिन्तयतां तत्र सहस्राक्षः पुरन्दरः । वज्रं प्रगृह्य पाणिभ्यां प्राहिणोद् वृत्रमूर्धनि । कालाग्निनेव घोरेण दीप्तेनेव महार्चिषा । पतता वृत्रशिरसा जगत् त्रासमुपागमत् । असम्भाव्यं वधं तस्य वृत्रस्य विबुधाधिपः । चिन्तयानो जगामाऽशु लोकस्यान्तं महायशाः । तमिन्द्रं ब्रह्महत्याऽऽशु गच्छन्तमनुगच्छति । अपतच्चास्य गात्रेषु तमिन्द्रं दुःखमाविशत् । हतारयः प्रनष्टेन्द्रा देवा अग्निपुरोगमाः । विष्णुं त्रिभुवनेशानं मुहुर्मुहुरपूजयन् । त्वं गतिः परमेशान पूर्वजो जगतः पिता । रक्षार्थं सर्वभूतानां विष्णुत्वमुपजग्मिवान् । हतश्चायं त्वया वृत्रो ब्रह्महत्या च वासवम् । बाधते सुरशार्दूल मोक्षं तस्या विनिर्दिश । तेषां तद्वचनं श्रुत्वा देवानां विष्णुरब्रवीत् । मामेव यजतां शक्रः पावयिष्यामि वज्रिणम् । पुण्येन हयमेधेन मामिष्ट्वा पाकशासनः । पुनरेष्यति देवानामिन्द्रत्वमकुतोभयम्' (८५.१०–२१), 'ततः सर्वे सुरगणाः सोपाध्यायाः सहर्षिभिः । तं देशं समुपाजग्मुर्यत्रेन्द्रो भयमोहितः । ते तु दृष्ट्वा सहस्राक्षमावृतं ब्रह्महत्यया । तं पुरस्कृत्य देवेशमश्वमेधमुपाक्रमन् । ततोऽश्वमेधः सुमहान् महेन्द्रस्य महात्मनः । ववृते ब्रह्महत्यायाः पावनार्थं नरेश्वर' (८६.७–९), 'ततः प्रीत्याऽन्विता देवाः सहस्राक्षं ववन्दिरे । विज्वरः स च पूतात्मा वासवः समपद्यत' (८६.१८) इति । तदेतदुक्तम्– पुरा वज्रे वज्रिणि चाऽविष्टस्य विष्णोः प्रसादेन वज्री वृत्रममारयत् । अथ अनुगच्छन्त्या ब्रह्महत्यया विषण्णः पुनर्विष्णुप्रसादेन सम्पादितेन वाजिमेधेन पावित इति ॥ ५६ ॥

त्वं तु यज्ञं विधेहीमं लोकशिक्षणलक्षणः[१] ।
इत्युक्तवन्तं प्रोवाच[२] लक्ष्मणं लक्ष्मणाग्रजः ॥ ५७ ॥

(भा.दी.) त्वमिति । लोकानां सज्जनानां यच्छिक्षणम्, भूपतिना यागः कर्तव्य इति शिक्षणम्, तदेव लक्षणं निमित्तं यस्य स तथोक्तः, त्वं तु त्वं च इमं अश्वमेधाख्यं यज्ञं विधेहि कुरु । धाञो लोट् । इति उक्तवन्तं लक्ष्मणं प्रति लक्ष्मणाग्रजः श्रीरामः प्रोवाच ॥ ५७ ॥

(सं.चं.) लोकशिक्षणमेव लक्षणं लक्षणीयमुद्देश्यं यस्य । 'ꠇꠛ' इति भाषायाम् ॥ ५७ ॥

इळो राजा गतः स्त्रीत्वं मासं मासं ततः पुमान्[३] ।
अश्वमेधात् पुमानेव जज्ञे श्रेष्ठो[४] हि स क्रतुः ॥ ५८ ॥

(भा.दी.) इळ इति । इळः इळाख्यः राजा स्त्रीत्वं गतः प्राप्तः ततः तदनन्तरं मासम्मासं मासेमासे, पुमान् पुरषः जातः । अनन्तरं अश्वमेधात् अश्वमेधयज्ञकरणात् पुमानेव जज्ञे जातः । अतः सः क्रतुः श्रेष्ठो हि । इळनामको हि राजा मृगयां गतो यत्र षण्मुख उत्पन्नस्तं रुद्ररुद्राण्योर्विहारप्रदेशं जगाम । यत्र प्रविष्टानां पुंसामपि सद्यः स्त्रीभावो रुद्राणीप्रीत्यै रुद्रेण दत्तवराद् भवति । अतः स्त्रीभावमापन्नः खिन्नः सन् शितिकण्ठमेव शरणं जगाम । स च पुंस्त्वमृतेऽन्यं वरं वृणीष्वेत्युक्तः शोकार्तः सन् रुद्राणीं शरणं जगाम । सा च मासेमासे पुम्भावस्त्रीभावलक्षणवरं प्रादात् । अनन्तरं च तस्मिन्नेव काननप्रदेशान्तरे स्त्रीभावमाप्तैः स्वानुचरैः सह स्त्रीत्वमाप्य विचरन्ती बुधेन वृता सती पुरूरवसं पुत्रं जनयित्वा, बुधेनैवाऽकारितैः संवर्तादिभिर्मुनिभिश्च ईश्वरोद्देशेन अश्वमेधयज्ञमकार्षीत् । तस्मात् प्रसन्नमीश्वरं मुनयः प्रसादयित्वा पुरुषत्वमेव दापितवन्तः, ततश्च स्वनगरं प्रति जगामेति रामायणे प्रसिद्धम् । ग्रन्थान्तरविरोधस्तु पूर्ववदेव परिहरणीयः ॥ ५८ ॥

(सं.चं.) इळो राजा । मासं स्त्रीत्वं प्राप्तः । ततः पुनर्मासं पुमानासीत् । अन्ते विष्णुप्रसादेन विहितादश्वमेधात् पुमानेव जज्ञे । तस्माच्छ्रेष्ठो हि स क्रतुः । तथाचेदमिळोपाख्यानं रामायणे पठ्यमानम्–'श्रूयते हि पुरा सौम्य कर्दमस्य प्रजापतेः । पुत्रो बाह्लीश्वरः श्रीमानिळो नाम महायशाः' (८७.३), 'स प्रचक्रे महाबाहुर्मृगयां

१. **'–लक्षणम्'** । **'–लक्षण'** इति क्वचित् । २. **'–वन्तमाचष्ट लक्ष्मणम्'**

३. **'मासम्मासं पुनःपुनः'** इति **'मासम्मासं पुनः पुमान्'** इतिच ।

४. **'–नेव यज्ञश्रेष्ठो हि'** । **'अश्वमेधः क्रतुश्रेष्ठो ज्योतिःश्रेष्ठो दिवाकरः । ब्राह्मणो द्विपदां श्रेष्ठो देवश्रेष्ठस्तु मारुतः' इति प्रमाणप्रसिद्धिद्योतको वा हिशब्दः'** इति का.श्री.।

रुचिरे वने । यत्र जातो महासेनस्तं देशमुपचक्रमे । तस्मिन् प्रदेशे देवेशः शैलराजसुतां हरः । रमयामास दुर्धर्षः सर्वैरनुचरैः सह । कृत्वा स्त्रीरूपमात्मानमुमेशो गोपतिध्वजः । देव्याः प्रियं चिकीर्षुः संस्तस्मिन् पर्वतनिर्झरे । यच्च किञ्चन तत् सर्वं नारीसञ्ज्ञं बभूव ह । एतस्मिन्नन्तरे राजा स इळः कर्दमात्मजः । निघ्नन् मृगसहस्राणि तं देशमुपचक्रमे । स दृष्ट्वा स्त्रीकृतं सर्वं सव्याळमृगपक्षिकम् । ततो देवं महात्मानं शितिकण्ठं कपर्दिनम् । जगाम शरणं राजा सभृत्यबलवाहनः । ततः प्रहस्य वरदः सह देव्या महेश्वरः । प्रजापति-सुतं वाक्यमुवाच वरदः स्वयम् । पुरुषत्वमृते सौम्य वरं वरय सुव्रत । ततः शोकेन महता शैलराजसुतां नृपः । प्रणिपत्य ह्युमामूचे सर्वेणैवान्तरात्मना । अमोघदर्शने देवि भज सौम्येन चक्षुषा । प्रत्युवाच शुभं वाक्यं देवी रुद्रस्य सम्मता । अर्धस्य वरदो देवो वरार्धस्य तव ह्यहम् । तस्मादर्धं गृहाण त्वं स्त्रीपुंसोर्याव-दिच्छसि । सम्प्रहृष्टमना भूत्वा राजा वाक्यमथाब्रवीत् । मासं स्त्रीत्वमुपासित्वा मासं स्यां पुरुषः पुनः । ईप्सितं तस्य विज्ञाय देवी सुरुचिरानना । प्रत्युवाच शुभं वाक्यमेवमेव भविष्यति' (८७.८.२८), 'तमेव प्रथमं मासं स्त्री भूत्वा लोकसुन्दरी । पर्वताभोगविवरे तस्मिन् रेमे इळा तदा । ददर्श सा त्विळा तस्मिन् बुधं सोमसुतं तदा । बुधस्तु तां समीक्ष्यैव कामबाणवशं गतः' (८८.५–१२), 'उवाच रूपसम्पन्नां तां स्त्रियं प्रहसन्निव । सोमस्याहं सुदयितः सुतः सुरुचिरानने । भजस्व मां वरारोहे भक्त्या स्निग्धेन चक्षुषा । इळा सुरुचिरप्रख्यं प्रत्युवाच महाप्रभम् । अहं कामचरी सौम्य तवास्मि वशवर्तिनी । प्रशाधि मां सोमसुत यथेच्छसि तथा कुरु । स वै कामी सह तया रेमे चन्द्रमसः सुतः' (८९.३–७), 'मासं स स्त्री तथा भूत्वा रमयत्यनिशं शुभा । मासं पुरुषभावेन धर्मबुद्धिं चकार सः । ततः सा नवमे मासि इळा सोमसुतात्म-जम् । जनयामास सुश्रोणी पुरूरवसमूर्जितम्' (८९.२२–३), 'पुरुषत्वं गते शूरे बुधः परमबुद्धिमान् । संवर्तं परमोदारमाजुहाव महायशाः । च्यवनं भृगुपुत्रं च मुनिं चारिष्टनेमिनम् । प्रमोदनं मोदकरं तथा दुर्वाससं मुनिम् । उवाच सर्वान् सुहृदो धैर्येण सुसमाहितान् । अयं राजा महाबाहुः कर्दमस्य इळः सुतः । जानीतैनं यथाभूतं श्रेयो ह्यस्य विधीयताम् । तेषां संवदतामेव तदाश्रममुपागमत् । कर्दमस्तु महातेजा द्विजैः सह महात्मभिः । कर्दमस्त्वब्रवीद् वाक्यं सुतार्थं परमं हितम् । द्विजाः शृणुत मद्वाक्यं सच्छ्रेयः पार्थिवस्य हि । नान्यं पश्यामि भैषज्यमन्तरा वृषभध्वजम् । नाश्वमेधात् परो यज्ञः प्रियश्चैव महात्मनः । तस्माद्यजामहे सर्वे पार्थिवार्थे दुरासदम् । कर्दमेनैवमुक्तास्तु सर्व एव द्विजर्षभाः । रोचयन्ति स्म तं यज्ञं रुद्रस्याऽऽराधनं प्रति । ततो यज्ञो महानासीद् बुधाश्रमसमीपतः । रुद्रश्च परमं तोषमाजगाम महायशाः । ततः प्रीतो महादेवः पुरुषत्वं ददौ पुनः । इळायै सुमहातेजा दत्वा चान्तरधीयत । ईदृशो ह्यश्वमेधस्य प्रभावः पुरुषर्षभ' (९०.४.२०) इति । भागवते चेयं कथा पठ्यते । इयांस्तु भेदः । भागवतानुसारेण नायं कर्दमात्मजः । किन्तु वैवस्वतमनोरात्मजः । बहुवचनसंवादात् स एव युक्तः पन्थाः । रामायणवचनमेव तदनुगुणतयाऽ-

न्यथा नेयम् । पुंव्यत्यासनामाऽयं पुराणशैलीभेद इत्येके । वस्तुतस्तु कर्दम इति वैवस्वतमनोरेव नामान्तरमिति युक्तम् । शुभेन कर्मणा शमलं दमयतीति कर्दमः । इळस्य पुरुषत्वे सुद्युम्न इति नामेति च । अन्यत् सर्वं नातीव विप्रतीपम् ॥ ५८ ॥

एवमुक्त्वा स भगवानाहूय मुनिपुङ्गवान् ।
वसिष्ठवामदेवादीनामन्त्र्येदं[१] वचोऽब्रवीत् ॥ ५९ ॥

(भा.दी.) एवमिति । भगवान् (सः) श्रीरामः एवं लक्ष्मणं प्रति उक्त्वा, मुनिपुङ्गवान् मुनिश्रेष्ठान् वसिष्ठवामदेवादीन् आहूय, आमन्त्र्य यज्ञार्थमामन्त्रणं कृत्वा, इदं वचः अब्रवीत् ॥ ५९ ॥

(सं.चं.) आहूय आनाय्य, तैः साकमामन्त्र्य मन्त्रयित्वा लक्ष्मणं प्रतीदं वचोऽब्रवीत् ॥ ५९ ॥

सुग्रीवादीन् वानरेन्द्रान् सगणं च विभीषणम् ।
देवर्षिमानुषादींश्च[२] सर्वानाह्वय लक्ष्मण ॥ ६० ॥

(भा.दी.) सुग्रीवेति । हे लक्ष्मण, सुग्रीवादीन् वानरेन्द्रान्, सगणं राक्षससमूहसहितं विभीषणं च, देवर्षि-मानुषादीन् सर्वांश्च जनान्, यज्ञं प्रत्यागन्तुं आह्वय ॥ ६० ॥

(सं.चं.) देवानृषीन् मानुषान्, आदिना यक्षगन्धर्वादीन् ॥ ६०–१ ॥

पृथिव्यां पार्थिवा ये च नानाविद्याश्च ये द्विजाः ।
सर्वे सदारा आयान्तु हयमेधं महाक्रतुम् ॥ ६१ ॥

(भा.दी.) पृथिव्यामिति । पृथिव्यां ये पार्थिवाः ते च, नानाविधाः विद्याः येषां ते तथोक्ताः ये द्विजाः ते च, सर्वे हयमेधं महाक्रतुं प्रति दारैर्भार्याभिः सहिताः सदाराः सन्तः आयान्तु आगच्छन्तु ॥ ६१ ॥

स्याद् यज्ञवाटः सुमहान् गोमत्या नैमिशे तटे[३] ।
सम्भ्रियन्तां च सम्भारा वसिष्ठस्य नियोगतः ॥ ६२ ॥

---

१. **'–नामन्त्र्यैवम्'** २. **'देवर्षीन् मानुषाद्यांश्च'**

३. **'गोमत्यां नैमिशे तटे'** इति, **'गोमत्यां नैमिशे वने'** इति च कचित् । **'नैमिषे'** इति पठन्तो भ्रान्ताः ।

(भा.दी.) स्यादिति । गोमत्याः गोमतीनद्याः तटं तीरं तस्मिन्, नैमिशं नैमिशाख्यं तस्मिन् वने, सुमहान् यज्ञवाटः यज्ञशाला स्यात् भवतु । वसिष्ठस्य नियोगतः आज्ञातः, सम्भाराः यज्ञसाधनद्रव्याणि (च) सम्भ्रियन्तां सम्पाद्यन्ताम् ॥ ६२ ॥

(सं.चं.) यज्ञवाटः वृतिबद्धा यज्ञभूमिः । गोमत्यास्तटे नैमिशारण्ये । सम्भाराः सामग्र्यः । 'यज्ञवाटश्च सुमहान् गोमत्या नैमिशे वने । आज्ञाप्यतां महाबाहो तद्धि पुण्यमनुत्तमम्' (९१.१५) इति च ॥ ६२ ॥

शतं वाहसहस्राणां नयेन्नस्तण्डुलान् शुचीन् ।
अयुतं तिलमुद्गानामग्रतो भरतो व्रजेत् ॥ ६३ ॥

(भा.दी.) शतमिति । वाहानामश्वानां सहस्राणि तेषाम्, 'वाजिवाहार्वगन्धर्वाः' इत्यमरः, शतं अश्वलक्षमित्यर्थः, नः अस्माकं सम्बन्धिनः, शुचीन् तण्डुलान् नयेत् । तिलाश्च मुद्गाश्च तेषामयुतं दशसहस्रपरिमितान् भारांश्च नयेत् । अग्रतः भरतः व्रजेत् तद्रक्षणार्थं गच्छतु ॥ ६३ ॥

(सं.चं.) शकटवाहानां बलीवर्दानां सहस्राणां शतम् । शतसहस्रैः शकटैरित्यर्थः । शुचीन् अच्छिन्नान् वितुषांश्च तण्डुलान् नयेत् । तिलमुद्गानाम् । बहुवचनमाद्यर्थे । तिलमुद्गचणककुलस्थादीनाम् । भारमिति शेषः । वाहनानामयुतं नयेत् । एषामग्रतो भरतो व्रजेत् । 'शतं वाहसहस्राणां तण्डुलानां वपुष्मताम् । अयुतं तिलमुद्गस्य प्रयात्वग्रे महाबलः' (९१.१९) इति च ॥ ६३ ॥

सुवर्ण्णकोटीर्बहळा[१] हिरण्यं तच्छतोत्तरम् ।
उच्चावचं यदन्यच्च नयन्तु भरतानुगाः ॥ ६४ ॥

(भा.दी.) सुवर्णेति । भरतानुगा भरतभृत्याः बहळाः सुवर्णकोटीः, ताभ्यः सुवर्णकोटिभ्यः शतोत्तरं शतगुणाधिकम्, तच्छतोत्तरं तत्, हिरण्यं रजतं च, 'स्यात् कोशश्च हिरण्यं च हेमरूप्ये कृताकृते' इत्यमरः । उच्चं च अवचं उच्चावचम्, महदल्पं चेत्यर्थः, यदन्यद् यज्ञसाधनं वस्तु तच्च नयन्त्विति सम्बन्धः ॥६४॥

(सं.चं.) बहळाः सुवर्णानां दीनाराणां कोटीः भरतानुगा नयन्तु । तच्छतोत्तरं हिरण्यम् । 'ಬೆಳ್ಳಿಯ ನಾಣ್ಯ' इति भाषायाम् । यदन्यच्चोच्चावचं नानाविधं सम्भारजातम् । उदक् चावाक् च उच्चावचम् । उत्कृष्टं चाप-

---

१. **'–कोटीर्बहुधा हिर–'** इति, **'कोटीर्बहुला–'** इति च । **'हिरण्यकोटीर्बहुलाः सुवर्णं तच्छतोत्तरम्'** इति च कचित् । **'हिरण्यकोटीः रजतकोटीः'** इति का.श्री. ।

कृष्टं चेत्यर्थः । नानाविधमित्येतत् । मयूरव्यंसकादित्वात् साधुः । तदपि भरतानुगा नयन्तु । 'सुवर्णकोट्यो बहुला हिरण्यस्य शतोत्तराः । अग्रतो भरतः कृत्वा गच्छत्वग्रे समाधिना' (९१.२१) इति च ॥ ६४ ॥

शिल्पिनो[१] नागरान् बन्धून् मम पत्नीं च काञ्चनीम्[२] ।
अग्रतो भरतः कृत्वा यातु यज्ञप्रवृत्तये[३] ॥ ६५ ॥

(भा.दी.) शिल्पिन इति । शिल्पिनः यज्ञशालानिर्माणाद्यर्थं कार्वादीन्, नागरान् नगरभवान् जनान्, बन्धून्, काञ्चनीं सुवर्णमयीं मम पत्नीं सीतां च अग्रतः पुरतः कृत्वा भरतः यज्ञस्य वृत्तिः प्रवृत्तिस्तस्यै यातु गच्छतु ॥ ६५ ॥

(सं.चं.) शिल्पिनो नागरान् । 'कर्मान्तिकान् वर्धकिनः कोशाध्यक्षांश्च नैगमान् । मम मातॄस्तथा सर्वाः कुमारान्तःपुराणि च । काञ्चनीं मम पत्नीं च दीक्षायां ज्ञांश्च कर्मणि । अग्रतो भरतः कृत्वा गच्छत्वग्रे महायशाः' (९१.२४–५) इति च । सीताया भूमिप्रवेशानन्तरमपि 'न सीतायाः परां भार्यां वव्रे स रघुनन्दनः । यज्ञे यज्ञे च पत्न्यर्थं जानकी काञ्चनी भवत्' (९९.८) इति च ॥ ६५–६ ॥

इत्युक्तं[४] रामदेवेन श्रुत्वा तावविलम्बितम् ।
चक्राते तत् तथैवाथ दक्षौ भरतलक्ष्मणौ ॥ ६६ ॥

(भा.दी.) इतीति । अथ दक्षौ समर्थौ तौ भरतलक्ष्मणौ रामदेवेन इति उक्तं वचः श्रुत्वा तत् रामोक्तं कर्म तथैव श्रीरामोक्तप्रकारेणैव अविलम्बितं शीघ्रं यथा भवति तथा चक्राते ॥ ६६ ॥

हयं सुलक्षणं रामश्चारयिष्यन्नथामुचत् ।
ऋत्विग्भिः सहितो[५] रक्षन् लक्ष्मणस्तमथान्वगात्[६] ॥ ६७ ॥

---

१. **'शिल्पिनोऽनुगतान् बन्धून्'**

२. **'असुराणां दूषणानन्तरं सीताया भूमौ प्रवेशात्, अपत्नीकस्य यज्ञायोगात्, 'काञ्चनीं मम पत्नीम्' इत्युक्तम् । अनेन रामः सीताया अदृश्यत्वप्राप्त्यनन्तरं सुवर्णमयसीतया साकं सर्वकर्माकरोदिति गम्यते' इतिका.श्री. । नेदं रामायणानुगुणम् । सीताया भूमिप्रवेश इतः परं यज्ञवाट एव भविष्यति । सीतायाः परित्यागात्, यजमानेन सपत्नीकेन भाव्यमिति याज्ञिकैरुक्ते रामः हिरण्मयीं सीताप्रतिकृतिं कारयामासेति तु युक्तं वचः ।**

३. **'यज्ञस्य वृत्तये'** इति वि.ती.पाठः ।

४. **'इत्युक्ते रामदेवेन'** इति, **'इत्येवं रामगदितं श्रुत्वा'** इति च क्वचित् ।

५. **'सहितं राजन्'**

६. क्वचित्–**'हयं रामश्चारयिष्न् सुलक्षणमथामुचत् । लक्ष्मणोऽथर्षिभिः सार्धं रक्षंस्तं हयमन्वगात्'** इति पठ्यते । अन्यत्र च–**'हयं विसृज्य सम्पूज्य सुलक्षणमलङ्कृतम् । प्रेषयामास शत्रुघ्नं रक्षणार्थं सलक्ष्मणम्'** इति । रामायणाननुगुणमेतत् । **'भरतस्तान् सशत्रुघ्नः'** (६९) इत्युत्तरवचन-विरुद्धं च ।

(भा.दी.) हयमिति । अथ श्रीरामः, शोभनानि लक्षणानि अङ्गसम्पदो यस्य स तथा तम्, यज्ञे आलम्भनोपयोगिलक्षणयुक्तमित्यर्थः, हयं चारयिष्यन् भूप्रदक्षिणं कारयिष्यन् सन् अमुचत् अर्चयित्वा मुक्तवान् । मुच्लृधातोर्लुङ् । अथ लक्ष्मणः ऋत्विग्भिः सहितः तं हयं रक्षन् सन् अन्वगात् अन्वगच्छत् ॥ ६७ ॥

(सं.चं.) हयमिति । 'हयं लक्षणसम्पन्नं कृष्णसारं मुमोच ह । ऋत्विग्भिर्लक्ष्मणं सार्धमश्वतन्त्रे नियोज्य च । ततोऽभ्यगच्छत् काकुत्स्थः सह सैन्येन नैमिशम्' (९२.१–२) इति च ॥ ६७ ॥

चतुरङ्गबलोपेतो विप्रैः परिवृतः प्रभुः ।
नैमिशारण्यमासाद्य यज्ञवाटमवैक्षत ॥ ६८ ॥

(भा.दी.) चतुरङ्गेति । चत्वारि अङ्गानि यस्य तत्तथोक्तं तादृशं यद्बलं सैन्यं तेनोपेतो युक्तः, विप्रैः परिवृतः प्रभुः लक्ष्मणः[1], नैमिशारण्यं नैमिशाख्यमरण्यं तत् आसाद्य यज्ञस्य वाटः शाला तं अवैक्षत । ईक्षते-लङ् । अश्वस्य प्रदक्षिणीकरणसमये मार्गे गच्छन् नैमिशमरण्यं गत्वा तत्र यज्ञवाटादिकं गत्वाऽन्यत्र जगामेति भावः ॥ ६८ ॥

(सं.चं.) प्रभू रामचन्द्रः ॥ ६८–९ ॥

राजानः सर्वराष्ट्रेभ्यो वैश्यवत् करमाहरन् ।
भरतस्तान् सशत्रुघ्नः सर्वकामैरपूजयत् ॥ ६९ ॥

(भा.दी.) राजान इति । राजानः सर्वाणि यानि राष्ट्राणि तेभ्यः वैश्यवत् वैश्या इव करं बलिं आहरन् आनिन्युः। सशत्रुघ्नः शत्रुघ्नसहितः भरतः, तान् राज्ञः, सर्वे ये कामाः अभीप्सितार्थास्तैः अपूजयत् ॥ ६९ ॥

ब्रह्मण्यदेवमाजग्मुर्ब्राह्मणाः सर्वदेशतः ।
सुग्रीवाद्यास्ततश्चक्रुरेतेषां परिवेषणम् ॥ ७० ॥

(भा.दी.) ब्रह्मण्येति । सर्वे ये देशास्तेभ्य इति ततः, ब्राह्मणाः, ब्रह्मसु ब्राह्मणेषु साधुः ब्रह्मण्यः ब्राह्मणप्रियः स चासौ देवश्च तं रामं आजग्मुः । ततः सुग्रीवाद्याः वानराः एतेषां ब्राह्मणानां परिवेषणं अन्नादिपरिवेषणकर्म चक्रुः ॥ ७० ॥

---

१. **'प्रभुर्लक्ष्मणः'** इति न स्वरसमिदं व्याख्यानम् । युक्तमाह का.श्री. **'प्रभू रामः'** इति ।

(सं.चं.) सुग्रीवाद्यास्ततश्चक्रुः । 'वानराश्च महात्मानः सुग्रीवसहितास्तदा । विप्राणां प्रवराः सर्वे चक्रुश्च परिवेषणम्' (९१.२८) इति, 'वानराश्च महात्मानः सुग्रीवसहितास्तदा । परिवेषणं च विप्राणां प्रयताः सम्प्रचक्रिरे' (९२.६) इति च ॥ ७० ॥

विभीषणो भूषणाढ्यः शुची रक्षोगणैर्वृतः[1] ।
ऋषीणामुग्रतपसां परिचर्य्यां चकार ह[2] ॥ ७१ ॥

(भा.दी.) **विभीषण** इति । भूषणैः आढ्यः सम्पन्नः, शुचिः शुद्धः, रक्षसां ये गणास्तैः वृतः विभीषणः, उग्रं तपो येषां ते तथोक्तास्तेषां ऋषीणां परिचर्यां पादसंवहनादिसेवां चकार । ह आश्चर्यम् ॥ ७१ ॥

(सं.चं.) विभीषणो भूषणाढ्यः । 'विभीषणश्च रक्षोभिः स्त्रीभिश्च बहुभिर्वृतः । ऋषीणामुग्रतपसां पूजां चक्रे महात्मनाम्' (९१.२९) इति, 'विभीषणश्च रक्षोभिर्बहुभिः स्रग्विभिर्वृतः । ऋषीणामुग्रतपसां किङ्करः समपद्यत' (९२.७) इति च । 'चकार ह' इति रक्षसामृषीणां चापूर्वं सामरस्यं स्वदते ॥ ७१ ॥

पितामहपितुर्य्यज्ञं पितामहपुरोगमाः ।
देवोपदेवा [3]आजग्मुर्हनुमांस्तानपूजयत् ॥ ७२ ॥

(भा.दी.) **पितेति** । पितामहश्चतुर्मुखः पुरोगमो येषां ते तथोक्ताः देवाश्च, उपदेवाश्च गन्धर्वादयस्ते च, पितामहपितुः चतुर्मुखपितुः श्रीरामस्य यज्ञं प्रति आजग्मुः । तान् ब्रह्मादीन् हनुमान् अपूजयत् ॥ ७२ ॥

(सं.चं.) पितामहस्य चतुर्मुखस्यापि पितुः । हनुमांस्तानपूजयत् । रामायणेऽनुक्तमिदम् । सुन्दरमिदं सपरिवारस्य ब्रह्मणः सम्प्रति परिचरणं तेन यो ब्रह्मा भविष्यति ॥ ७२ ॥

अश्वमेधे प्रवृत्तेऽस्मिन्नश्वो मेद्ध्य उपागमत् ।
भुवं प्रदक्षिणीकुर्वन् साक्षाल्लक्ष्मणरक्षितः ॥ ७३ ॥

(भा.दी.) **अश्वेति** । अस्मिन् श्रीरामसम्बन्धिनि अश्वमेधयज्ञे प्रवृत्ते प्रवर्तयितुमारब्धे सति, भुवं प्रदक्षिणीकुर्वन्, साक्षात् प्रत्यक्षं लक्ष्मणरक्षितः, मेध्यः शुद्धः अश्वः उपागमत् आगच्छत् ॥ ७३ ॥

(सं.चं.) मेध्यः यज्ञियः पवित्रोऽश्वः । प्रदक्षिणीकुर्वन्, प्रदक्षिणीकृत्येति यावत् । साक्षात् स्वयम्, न तु पुरुषान्तरद्धारा ॥ ७३ ॥

---

१. '–गणैर्युतः' २. 'चकार च' ३. 'आजग्मुर्हनूमांस्ता –'

दीक्षिते यज्ञपुरुषे दीक्षितान्वीक्षिते[1] स्वयम् ।
प्रावर्त्तत महायज्ञो ब्राह्मणैर्ब्रह्मवादिभिः ॥ ७४ ॥

(भा.दी.) दीक्षित इति । दीक्षितैः सर्वयज्ञेषु दीक्षितैर्ब्रह्मादिभिः अन्वीक्षिते आलोचिते, ध्यात इत्यर्थः, यज्ञानां पुरुषेऽधीश्वरे श्रीरामे स्वयं दीक्षिते सति, यज्ञसम्बन्धिनियमान् कर्तुमारब्धे सति, ब्रह्म वक्तुं सर्वोत्तमत्वादि-गुणविशिष्टतया प्रतिपादयितुं शीलमेषामस्तीति ब्रह्मवादिनस्तैः ब्राह्मणैः महायज्ञः प्रावर्तत ॥ ७४ ॥

(सं.चं.) यज्ञाराध्ये पुरुषे स्वयमत्र यज्ञदीक्षिते सति । दीक्षितैः ऋत्विग्भिरहो यज्ञपुरुषं यजमानपदे दीक्षयाम इति विस्मयेनान्वीक्षिते ॥ ७४ ॥

सर्वेशोऽतर्प्पयत् सर्वान् वासोमाल्यानुलेपनैः ।
रम्यैरप्यन्नपानाद्यैराकल्पमणिकाञ्चनैः ॥ ७५ ॥

(भा.दी.) सर्वेश इति । सर्वेशः श्रीरामः सर्वान् जनान्, रम्यैः, वासांसि च, माल्यानि पुष्पदामानि तानि च, अनुलेपनानि च तैः, आकल्पा आभरणानि ते च, मणयश्च काञ्चनानि तानि च तैः (अन्नपानाद्यैरपि), अतर्पयत् । तृप प्रीणने लङ् ॥ ७५ ॥

(सं.चं.) 'माल्यं पुष्पे पुष्पदाम्नि' इति यादवप्रकाशः । अनुलेपनैः सुगन्धद्रव्यैः । अन्नपानाद्यैरित्याद्य-पदेन खाद्यानां ग्रहणम् । 'त्रेधा वा इदमन्नं विहितम्, अशनं पानं खादः' इति श्रुतिः । चोष्यलेह्ययोरपि खाद्यतैव । रम्यैः स्वादुभिरन्नपानाद्यैः । रम्यै रमणीयैर्वासोमाल्यानुलेपनैराकल्पमणिकाञ्चनैश्च । आकल्पाः भूषणानि मणिकाञ्चनमयानि । पृथक् च मणयः काञ्चनानि च । एवं सर्वान् सर्वशः सर्वविधैरुपचारैः अतर्पयत् ॥ ७५ ॥

सर्वेभ्यः सर्वदा[2] सर्वं सर्वेश्वरनियोगतः ।
निशाचरा वानराश्च दिशन्ति स्म दिनेदिने ॥ ७६ ॥

(भा.दी.) सर्वेभ्य इति । निशाचराः विभीषणाद्याः, वानराः सुग्रीवाद्याश्च, (सर्वदा) सर्वस्मिन् काले, सर्वेभ्यः जनेभ्यः, सर्वं वस्तुजातम्, दिनेदिने प्रतिदिवसमित्यर्थः, सर्वेश्वरस्य श्रीरामस्य नियोगस्तस्मादिति ततः, श्रीरामाज्ञयेत्यर्थः, दिशन्ति स्म ददुः ॥ ७६ ॥

---

१. **'यज्ञपुरुषे रामे दीक्षितान् ऋत्विजः वीक्षिते अवलोकिते सति '** इति का.श्री. । अस्वरसं व्याख्यानम् । २. **'सर्वशः सर्वम्'**

(सं.चं.) सर्वशः सर्वत्र । 'रजतानां सुवर्णानामश्मनामथ वाससाम् । अनिशं दीयमानानां राशिः समुपदृश्यते' (९२.१६) इति, 'सर्वत्र वानरास्तस्थुः सर्वत्रैव च राक्षसाः । वासोधानान्नकामेभ्यः पूर्णहस्ता ददुर्भृशम्' (९२.१८) इति च ॥ ७६ ॥

[1]देवदेवस्य यज्ञेऽस्मिन् देहिशब्दो न जात्वपि ।
अलंशब्दोऽनवरतं वर्त्ततेऽस्म[2] महाजने ॥ ७८ ॥

(भा.दी.) **देवेति** । देवदेवस्य श्रीरामस्य अस्मिन् यज्ञे, जात्वपि कदाचिदपि, देहीति शब्दो देहिशब्दो न वर्तते । अस्मिन् मिळिते, महान् पूज्यो यो जनस्तस्मिन्, अलं पर्याप्तमिति शब्दोऽलंशब्दः सः अनवरतं सदा वर्तते ॥ ७८ ॥

(सं.चं.) देहिशब्दो न जात्वपि । 'नः निःसृतं भवत्योष्ठात् वचनं यावदर्थिनाम् । तावद् वानररक्षोभिर्दत्त-मेवाभ्यदृश्यत' (९२.१२) इति च । अस्मिन् यज्ञार्थमागते महाजने । महत्त्वं सङ्ख्यया, जनसमुदाये ॥७८॥

संवत्सरं सम्प्रवृत्तं दृष्ट्वा राममखोत्सवम् ।
चिरायुषोऽत्र मुनयो जगुः [3]कौतूहलाकुलाः ॥ ७७ ॥

(भा.दी.) **संवत्सरमिति** । चिरं दीर्घं आयुर्येषां ते तथोक्ताः मुनयः मार्कण्डेयाद्याः, अत्र यज्ञशालायाम्, श्रीरामस्य मखो यज्ञाख्यो य उत्सवस्तम्, संवत्सरं संवत्सरकालस्तम्, निरन्तरसंवत्सर इत्यर्थः, सम्प्रवृत्तं दृष्ट्वा, कौतूहलेन आकुलाः पूर्णाः, वर्णनमकृत्वा स्थातुमशक्ताः सन्त इत्यर्थः, जगुः यज्ञवर्णनं चक्रुः ॥७७॥

(सं.चं.) जगुस्तुष्टुवुः । चिरायुषश्चिरजीविनः कल्पायुषः ॥ ७७ ॥

नाभूत् समो यस्य न चैव भावी भवंश्च किं नो[4] पुनरुत्तमोऽस्मात् ।
पूर्णो गुणैर्दोषलवैरसङ्गी रामस्य तुल्यः क्रतुरेष एव ॥ ७९ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के सङ्ग्रहरामायण उत्तरकाण्डे चतुर्त्थः सर्ग्गः ॥

—०—

१. वि.ती.टीकायामिदं पद्यं **'देवदवस्य'** इति श्लोकात् पठ्यते । ७७तमं ७८तमत्वेन । ७८तमं ७७तमत्वेन । का.श्री.पाठोऽपि । स तु नातीवार्थानुगुणः।
२. **'वर्ततेऽस्मिन् महा–'**
३. **'जग्मुः कौतू–'** । **'जग्मुः स्वस्वाश्रमं प्रति गताः'** इति का.श्री. ।
४. **'भवश्च किं नो पुन–'**

(भा.दी.) **ने**ति । यस्य यज्ञस्य समः सदृशः यज्ञः नाभूत् । पूर्वं कस्यचिद्देवादेरपि न बभूव । भावी उत्तरत्र भविष्यन् यज्ञः एतत्समः नैव नास्त्येव । भवन्निदानीं वर्तमानकाले यज्ञ एतत्समः नास्त्येव । एतत्सदृशस्याभावेऽपि उत्तमः किं न स्यादित्यत आह– किमिति । अस्माद् यज्ञात् उत्तमः यज्ञः (नो) नाभूत् नास्ति न भविष्यतीति किं पुनर्वक्तव्यम्? कैमुत्यन्यायेन सिद्धमेवेत्यतो हेतोर्न वक्तव्यमिति भावः । गुणैः देशकालर्त्विक्पुरोहितयजमानद्रव्यदेवतामन्त्रदक्षिणादिसर्वगुणैः पूर्णः, दोषस्य अङ्गवैकल्यादिलक्षणस्य ये लवाः एकदेशास्तैः न सङ्गस्तेन नित्ययुक्तः, बहुव्रीहिणैव दोषराहित्यसिद्धावपि मत्वर्थीयप्रत्ययस्तु दोषराहित्यस्य नित्ययोगताज्ञापनार्थः । एषः क्रतुः श्रीरामस्यैव तुल्यः, श्रीरामस्यैवोक्तगुणवत्त्वादन्यस्य गुणवतोऽभावात् नान्य इत्यर्थः । इति जगुरिति पूर्वेणान्वयः ॥ ७९ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां
भावार्थदीपिकायामुत्तरकाण्डे चतुर्थः सर्गः ॥

—०—

(सं.चं.) अथेन्द्रवज्रोपेन्द्रववज्राभ्यामुपजात्या सर्गमुपसंहरति–नाभूत् । कथं जगुः? नाभूत् सम इत्यादि । भवन् वर्तमानः । आस्मादुत्तमः नो नाभूत्, न भवन् न भावीति किं पुनर्वक्तव्यम्? अनेकयुगजीविभिरपि पूर्वमेतादृशो यज्ञो न दृष्टः । तेनानुभवेन न भविष्यतीति च तर्क्यत इत्यर्थः । 'न शक्रस्य न सोमस्य यमस्य वरुणस्य च । ईदृशो दृष्टपूर्वो न एवमूचुस्तपोधनाः' (९२.१७) इति च । अत्र सर्वाणि यज्ञविशेषणानि नाभूदित्यादीनि रामेऽपि समानानि ॥ ७९ ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायामुत्तरकाण्डे
चतुर्थसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– ३२३०+७९=३३०९]

पञ्चमः सर्ग्गः

अथ यज्ञेश्वरो यज्ञमुदवस्य विधानतः ।
ऋत्विक्सदस्यानन्यांश्च पूर्णैर्वित्तैरतर्प्पयत् ॥ १ ॥

(भा.दी.) श्रीरामेण षोडशर्त्विग्भ्यः प्रदत्तदक्षिणादिप्रकारं दर्शयति– **अथेत्या**दिना । अथ यज्ञेश्वरः श्रीरामः, विधानतः शास्त्रोक्तरीत्या यज्ञं उदवस्य समाप्य, ऋत्विजश्च सदस्याः क्रियादर्शिनश्च तान्, अन्यान् ब्राह्मणांश्च पूर्णैः वित्तानि स्वर्णादीनि तैः अतर्पयत् । तृप प्रीणने लङ् ॥ १ ॥

(सं.चं.) उदवस्य उदवसाय उत्तमकल्पेनावसाय परिसमाप्य । उद्वास्येति यावत् । 'उद्वास्य च विधानतः' इत्येव मूलपाठः स्यादपि । सदस्या अध्वरं द्रष्टुमागता अतिथयः । अथच यज्ञभ्रेषनिवारका विधिदर्शिनश्च सदस्याः । 'उपद्रष्टा सदस्यः स्यात्' इति यादवप्रकाशः । पूर्णैः वित्तशाठ्यं विना यथेष्टं वितीर्णैः । वित्तैः हेमरूप्यात्मकैर्द्रविणैः ॥ १ ॥

विससर्ज्ज नरेन्द्रांस्तान् ऋक्षवानरराक्षसान्[1] ।
परिपूज्य जगन्नाथः प्रणतान् विरहासहान् ॥ २ ॥

(भा.दी.) **विससर्जे**ति । जगन्नाथः श्रीरामः प्रणतान्, विरहं वियोगं न सहन्त इति तथोक्तास्तान्, समागतान् नरेन्द्रांश्च, ऋत्विजश्च, वदान्यास्तांश्च(?) राक्षसा विभीषणाद्यास्ते च, वानराः सुग्रीवादयस्ते च, तान् परिपूज्य सत्कृत्य विससर्ज स्वस्वनगरं प्रेषयामास । सृज विसर्गे लिट् ॥ २ ॥

(सं.चं.) विससर्ज । 'विसृज्य पार्थिवान् सर्वानृक्षवानरराक्षसान् । जनौघं विप्रमुख्यानां वित्तपूर्वं विसृज्य च । एवं समाप्य यज्ञं तु विधिवत् स तु राघवः । ततो विसृज्य तान् सर्वान् रामो राजीवलोचनः । हृदि

---

१. **'नरेन्द्रर्त्विग्राक्षसवानरान्'** इति वि.ती.पाठः स्यात् । व्याख्यानं तु लिपिकृत्प्रमादेन समाकुलं न कमप्यर्थं स्फुटमवगमयति । **'–स्तान् नरवानरराक्षसान्'** इति क्वचित् । **'नरान् मनुष्यान्, वानरान् सुग्रीवादीन्, राक्षसान् विभीषणादीन्'** इति का.श्री. ।

कृत्वा तदा सीतामयोध्यां प्रविवेश ह' (९९.५–६) इति च । यथा सीतापरित्यागकथा तथाऽत्र यज्ञवाटे सीताया भूमिप्रवेशकथाऽपि ग्रन्थकृताऽन्तरिता वेदितव्या । आह च किञ्चिदिव मणिमञ्जर्याम्–'सुराणकांस्तमो नेतुं तत्याजेव स जानकीम् । व्याप्तत्वान्निरवद्यत्वात् तस्यास्त्यागः कथं भवेत् । स्वात्मानं यज्ञपुरुषं यज्ञेनायजताथ सः । तत्राऽगता सती सीता वेद्यामन्तर्दधे किल' (२.२३–४) इति ॥ २ ॥

अग्निष्टोमातिरात्रादीन् वाजपेयाननेकशः ।
बहुस्वर्ण्णव्ययानेवं चक्रे चक्रायुधः क्रतून् ॥ ३ ॥

(भा.दी.) अग्नीति । चक्रमायुधं यस्य स तथोक्तः श्रीरामः, अग्निष्टोमश्च अतिरात्रश्च तौ यज्ञविशेषौ आदी येषां ते तथा तान् क्रतून्, वाजपेयांश्च वाजपेयाख्यांश्च, बहूनि यानि स्वर्णानि तेषां व्ययो येषु तथा तान्, बहुस्वर्णकाख्यानित्यर्थः[1], क्रतून् एवं महाश्वमेधवत् अनेकशः अनेकवारं चक्रे ॥ ३ ॥

(सं.चं.) अग्निष्टोमातिरात्रादीन् । अग्निष्टोमादयः सोमयागप्रभेदाः । 'दशवर्षसहस्राणि वाजिमेधानथा-करोत् । वाजपेयान् दशगुणांस्तथा बहुसुवर्णकान् । अग्निष्टोमातिरात्राभ्यां गोसवैश्च महाधनैः । ईजे क्रतुभिरन्यैश्च स श्रीमानाप्तदक्षिणैः' (९९.८–९) इति च । अनेकशः अनेकान्, अनेकवारं वा ॥ ३ ॥

बभूवुः सम्पदः सर्वा विपदो नैव काश्चन ।
रामे राजनि लोकानां धर्म्मशिक्षणलक्षणे ॥ ४ ॥

(भा.दी.) बभूवुरिति । धर्माणां यच्छिक्षणं कर्तव्यत्वेन शिक्षणम्, तदेव लक्षणं चिह्नं यस्य स तथा तस्मिन् श्रीरामे, लोका जनास्तेषां राजनि सति, सर्वाः सम्पदः बभूवुः । विपदः काश्चन न बभूवुः ॥ ४ ॥

(सं.चं.) धर्मशिक्षणमेव लक्षणं लक्षं यस्य । 'काले वर्षति पर्जन्यः सुभिक्षं विमला दिशः । हृष्टपुष्टजनाकीर्णं पुरं जनपदास्तथा । नाकाले म्रियते कश्चिन्न व्याधिः प्राणिनां तथा । नानर्थो विद्यते कश्चिद् रामे राज्यं प्रशासति' (९९.१२–३) इति च ॥ ४ ॥

कौसल्याद्यास्तु कालेऽस्मिन् देव्यो दिवमुपाययुः ।
तासां देवः क्रियाः कुर्वन् [2]द्विजेभ्योऽदान्महद् धनम् ॥ ५ ॥

---

१. '**बहुस्वर्णव्ययसाध्यानित्यर्थः**' इति साधुः पाठः ।

२. '**कुर्वन् विप्रेभ्यो–**'

(भा.दी.) कौसल्येति । अस्मिन् काले, यज्ञकरणानन्तरं राज्यपालनकाले, कौसल्या आद्या यासां तास्तथोक्ता देव्यः दशरथमहिष्यस्ताः द्यौः स्वर्गः तं उपाययुः । देवः श्रीरामः तासां कौसल्याद्यानां क्रियाः साम्परायिककर्माणि कुर्वन् सन् द्विजेभ्यो महद्धनं अदात् ॥ ५ ॥

(सं.चं.) कौसल्याद्यास्तु । अस्मिन् काले यागोत्तरकाले । क्रियाः अपरकर्माणि । 'अथ दीर्घस्य कालस्य राममाता यशस्विनी । पुत्रपौत्रैः परिवृता कालधर्ममुपागमत् । अन्वियाय सुमित्रा च कैकेयी च यशस्विनी' (९९.१४) इति च ॥ ५ ॥

अथो कदाचित् सम्प्राप्तं केकयेन्द्रनियोगतः ।
गार्ग्यमाङ्गिरसं वृद्धं पूजयामास राघवः ॥ ६ ॥

(भा.दी.) अथो इति । अथो राघवः कदाचित् केकयेन्द्रस्य युधाजितो नियोग आज्ञा तस्मादिति ततः सम्प्राप्तम्, अङ्गिरसः अपत्यं पुमानाङ्गिरसस्तम्, गर्गस्य गोत्रे भवो गार्ग्यस्तम्, वृद्धं ब्राह्मणं पूजयामास ॥ ६ ॥

(सं.चं.) केकयेन्द्रस्य युधाजितः नियोगतः । सन्देशपूर्वकं प्रेषणं नियोगः । 'विधिर्नियोगः सम्प्रेषः' इति यादवप्रकाशः । गार्ग्यमाङ्गिरसं केकयानां गुरुम् । 'कस्यचित्त्वथ कालस्य युधाजित् केकयो नृपः । स्वगुरुं प्रेषयामास राघवाय महात्मने । गार्ग्यमङ्गिरसः पुत्रं ब्रह्मर्षिममितप्रभम्' (१००.१) इति च ॥ ६ ॥

कम्बळाजिनरत्नानि बहून्यश्वायुतं तथा ।
युधाजिता प्रेषितानि जग्राह भगवान् [१]द्विजात् ॥ ७ ॥

(भा.दी.) कम्बळेति । भगवान् श्रीरामः, युधाजिता युधाजिन्नाम्ना केकयेशेन प्रेषितानि, बहूनि, कम्बळाश्च अजिनानि च रत्नानि च तानि तथा, अश्वानामयुतं दशसहस्रं तत्, द्विपांश्च गजांश्च जग्राह । ग्रह उपादाने लिट् ॥ ७ ॥

(सं.चं.) कम्बळाजिनरत्नानि । 'दश चाश्वसहस्राणि प्रीतिदानमनुत्तमम् । कम्बळानि च रत्नानि चित्र-वस्त्रमथोत्तमम् । रामाय प्रददौ राजा शुभान्याभरणानि च' (१००.२–३) इति च ॥ ७ ॥

गार्ग्यो गामब्रवीद् रामं प्रोक्तां केकयभूभृता ।
शैलूषाख्यस्य दुःशीला गन्धर्वस्याभवन् सुताः ॥ ८ ॥

१. '**द्विपान्**' इति वि.ती.पाठः ।

(भा.दी.) गार्ग्य इति । गार्ग्यः गर्गगोत्रे भवः आङ्गिरसः केकयानां केकयविषयाणां भूभृता राज्ञा युधाजिता प्रोक्तां गां वाचं श्रीरामं प्रति अब्रवीत् । शैलूष इति आख्या यस्य स तथा तस्य गन्धर्वस्य दुष्टं शीलं येषां ते तथोक्ताः सुताः आसन् ॥ ८ ॥

(सं.चं.) गां वाचमब्रवीत् या रामाय वक्तव्येति युधाजिता प्रोक्ता । तामाह–'शैलूषाख्यस्येत्यादिना सार्धश्लोकद्वयेन । शैलूषाख्यस्य गान्धारराजस्य ॥ ८ ॥

बाधन्ते [1]बलिनो लोकांस्ते जित्वा जगतः पतीन्[2] ।
तान् सूदयित्वाऽथ जगत् त्वं पालय कृपालय ॥ ९ ॥

(भा.दी.) बाधन्त इति । ते बलिनः । अबाधिन इति क्वचित् पाठः । बाधरहिता इत्यर्थः । शैलूषसुताः जगतः पतीन् इन्द्रादीन् जित्वा लोकान् जनान् बाधन्ते । बाधतेर्लट् । हे कृपालय श्रीराम, तान् गन्धर्वसुतान् सूदयित्वा संहृत्य (त्वं) जगत् पालय । पालधातोर्लोट् ॥ ९ ॥

(सं.चं.) बलिनस्ते अबलिनो लोकान् बाधन्ते । जगतः पतीन् सर्वानपि महीपतीन् । अथ तस्मात् ॥ ९ ॥

कटूंस्त्रिकोटिसङ्ख्यांस्तान् हत्वा कुरु पुरे उभे ।
सिन्धोरुभयतः पाश्र्वे गन्धर्वविषये शुभे ॥ १० ॥

(भा.दी.) कटूनिति । कटून् क्रूरान्, तिस्रश्च ताः कोटयश्च त्रिकोटयः, त्रिकोटयः सङ्ख्या येषां ते तथा तान्, (तान्) गन्धर्वान् हत्वा, शुभे गन्धर्वाणां विषयो देशस्तस्मिन्, सिन्धोः नद्या उभयतः उभयस्मिन् पाश्र्वे तटं तस्मिन् उभे पुरे कुरु ॥ १० ॥

(सं.चं.) सिन्धोर्नदस्योभयतः पाश्र्वे स्थिते, केकयानामनन्तरे गान्धाराख्ये गन्धर्वाणां राष्ट्रे । तान् हत्वा उभे पुरे कुरु । 'शैलूषस्य महावीर तिस्रः कोट्यो महाबलाः । तान् विनिर्जित्य काकुत्स्थ गन्धर्वनगरं शुभम् । निवेशय महाबाहो स्वे पुरे सुसमाहिते' (१००.१२) इति साम्प्रतो रामायणपाठः । '–गन्धर्वनगरे शुभे । निवेशय महाबाहो द्वे पुरे सुसमाहिते' इति ग्रन्थकृत्सम्मतो रामायणपाठः स्यात् ॥ १० ॥

इत्यङ्गिरःसुतेनोक्तो[3] देवो देवारिमृत्यवे ।
भरतस्य कुमारौ तं[4] भरतं च न्ययोजयत् ॥ ११ ॥

१. 'बाधन्तेऽबाधिनो–'
२. 'जगतः पतीन्, राज्ञः लोकपालान् वा' इति का.श्री. ।
३. '–सुतेनोक्ते'
४. 'कुमारौ स भरतं च'

(भा.दी.) इतीति । इति अङ्गिरसः सुत आङ्गिरसस्तेन गार्ग्येण उक्तः देवः श्रीरामः, देवानामरयः शैलूषपुत्राः तेषां मृत्युर्मरणं तस्मै, भरतस्य कुमारौ पुत्रौ भरतं च न्ययोजयत् प्रेषयामास । युजिर् योगे लङ् ॥ ११ ॥

(सं.चं.) देवारीणां शैलूषसुतानां मृत्यवे । यद्यपि गन्धर्वसुताः । अथापि न देवयोनयः । किन्तु देवा-रयः । तेन हन्तव्याः । 'इमौ कुमारौ तं देशं ब्रह्मर्षे विचरिष्यतः । भरतस्याऽऽत्मजौ वीरौ तक्षः पुष्कल एव च । भरतं चाग्रतः कृत्वा कुमारौ सबलानुगौ । निहत्य गन्धर्वसुतान् द्वे पुरे विभजिष्यतः' (१००.१५–१७) इति च ॥ ११ ॥

ययौ बहुबलैः सार्द्धं[१] सगार्ग्यो नन्दनान्वितः ।
अद्ध्यर्द्धमासकालेन केकयान् केशवानुजः ॥ १२ ॥

(भा.दी.) ययाविति । सगार्ग्यः गार्ग्यसहितः, केशवानुजः श्रीरामानुजः भरतः, नन्दनाभ्यामन्वितः सन्, बहूनि यानि बलानि सैन्यानि तैः सार्धम्, अधिकमर्धं यस्य स तथोक्तः स चासौ मासश्च तत्परिमितश्चासौ कालश्च तेन, सार्द्धैकमासकालेनेत्यर्थः, केकयान् विषयान् ययौ ॥ १२ ॥

(सं.चं.) केशवानुजः भरतः नन्दनाभ्यामन्वितः केकयान् ययौ । अर्धाधिको मासोऽध्यर्धमासः । तावता कालेन । 'भरतः सह सैन्येन कुमाराभ्यां विनिर्ययौ' (१००.२०) इति, 'अध्यर्धमासमुषिता पथि सेना निरामया । हृष्टपुष्टजनाकीर्णान् केकयान् समुपागमत्' (१००.२५) इति च ॥ १२ ॥

ततः केकयराजेन[२] ससैन्येन समन्वितः[३] ।
गन्धर्वनगरं प्राप्य वीरः शङ्खमपूरयत् ॥ १३ ॥

(भा.दी.) तत इति । ततः ससैन्येन केकयराजेन युधाजिता समन्वितः वीरः भरतः, गन्धर्वाणां नगरं पुरं तत् प्राप्य, शङ्खो दरस्तं अपूरयत् । पूरि आप्यायने लङ् ॥ १३ ॥

(सं.चं.) शङ्खं अपूरयत् दध्मौ । शङ्खध्वनिर्हि माङ्गलिकः । तेनैव शत्रूणां युद्धाह्वानं च भवति ॥ १३ ॥

सर्वे[४] बलमदान्धास्ते गन्धर्वाः सिंहविक्रमाः ।
अभ्ययुर्भरतानीकं गर्ज्जन्तो विविधायुधाः ॥ १४ ॥

---

१. **'–बलैः साकं सगार्ग्यो–'**
२. **'केकयराजेन स्वमातामहेन मातुलेन वा'** इति का.श्री. । **'मातुलेन'** इति पर्याप्तम् ।
३. **'–सैन्येन समावृतः'**
४. **'सर्वे मदबलान्धा–'** इति वि.ती.पाठः स्यात् ।

(भा.दी.) सर्व इति । मदश्च बलं च ताभ्यामन्धा इवान्धाः, अतिगर्विता इत्यर्थः, सिंहवद् विक्रमो येषां ते तथोक्ताः, विविधानि आयुधानि येषां ते तथोक्ताः, सर्वे ते गन्धर्वाः, भरतस्य अनीकं सैन्यं तत् गर्जन्तः सिंहनादं कुर्वन्तः सन्तः अभ्ययुः अभिजग्मुः ॥ १४ ॥

(सं.चं.) बलमदेन अन्धाः । अभिमुखमगुः । अभितश्चायुः । अयुरिति यातेर्लङ् ॥ १४ ॥

गन्धर्वेन्द्रैर्नरेन्द्राणां सप्तरात्रमभूत् कलिः ।
अतुलस्तुमुलो रौद्रः सुराणामसुरैरिव ॥ १५ ॥

(भा.दी.) गन्धर्वेति । तैः गन्धर्वेन्द्रैः सह नरेन्द्राणां राज्ञाम्, सप्तानां रात्रीणां समाहारः सप्तरात्रं तत्, निरन्तरः सप्तरात्रिष्वित्यर्थः, न विद्यते तुला उपमा यस्य स तथाऽतुलः, (तुमुलः) निर्मर्यादः, रौद्रः भयङ्करः, कलिः युद्धम्, 'कलहे च युगे कलिः' इति वैजयन्ती, असुरैः सह सुराणामिव अभूत् ॥ १५ ॥

(सं.चं.) कलिः कलहः । तुमुलः कर्णकर्कशैर्घोषैर्व्याकुलः । 'ततः समभवद् युद्धं तुमुलं रोमहर्षणम् । सप्तरात्रं महाभीमं नचान्यतरयोर्जयः' (१०१.५) इति च । सप्त रात्रयः समाहृताः सप्तरात्रः । 'रात्रं प्राक् सङ्ख्ययाऽन्वितम्' इति सप्तरात्रं वा ॥ १५ ॥

रावणारेरवरजो न क्षाम्यन् परपौरुषम् ।
कालास्त्रं विमुमोचाऽथ संवर्त्तं नाम दारुणम्[1] ॥ १६ ॥

(भा.दी.) रावणारेरिति । अथ रावणारेः श्रीरामस्य अवरजः भरतः, परेषां शत्रूणां पौरुषं पराक्रमस्तत् न क्षाम्यन् असहमानः सन्, संवर्तस्य प्रळयस्य योऽनलोऽग्निस्तद्वद्दारुणं भयङ्करम्, संवर्तं नाम दारुणमिति क्वचित् पाठः । कालास्त्रं कालाख्यमस्त्रं विमुमोच । मुच्लृधातोर्लिट् ॥ १६ ॥

(सं.चं.) कालदेवत्यमस्त्रम् । काल इति यमः शिवो दुर्गा वा । प्रळयकालानलतुल्यत्वात् संवर्ताख्यम् । 'ततो रामानुजः क्रुद्धः कालस्यास्त्रं सुदारुणम् । संवर्तं नाम भरतो गन्धर्वेष्वभ्यचोदयत्' (१०१–७) इति च ॥ १६ ॥

तेन निर्दह्यमानास्ते कालपाशवशाः समम् ।
आर्त्ता मुहूर्त्तमात्रेण गन्धर्वा मम्रुरुद्धताः ॥ १७ ॥

---
१. **'संवर्तानलदारुणम्'** इति वि.ती.पाठः ।

(भा.दी.) तेनेति । उद्धताः बलादिनाऽभिवृद्धाः ते गन्धर्वापसदाः, (तेन) कालास्त्रेण निर्दह्यमानाः सन्तः, आर्ताः सन्तः, कालस्य यमस्य पाशस्तस्य वशाः सन्तः, केवलं मुहूर्तो महूर्तमात्रं तेन समं साकं मम्रुः । मृञ् प्राणत्यागे लिट् ॥ १७ ॥

(सं.चं.) तेन निर्दह्यमानास्ते । मृत्युपाशतुल्यस्य संवर्तास्त्रस्य वशा अधीनाः । कालास्त्राख्यस्य मृत्युपाशस्य वशगा इति वा । 'ते बद्धाः कालपाशेन संवर्तेन विदारिताः । क्षणेनाभिहतास्तेन तिस्रः कोट्यो महात्मना' (१०१.८) इति च । आर्ताः अस्त्रवेनामनुभवन्तः । समं युगपत् मम्रुः ॥ १७ ॥

क्रव्यादनेन क्रव्यादा वैरिनाशेन चामराः[१] ।
स्वोपसर्गक्षयान्मर्त्या मोदमाददिरे मुहुः ॥ १८ ॥

(भा.दी.) क्रव्येति । क्रव्यं मांसमदन्तीति क्रव्यादाः सृगालादयः, क्रव्यस्य मांसस्य अदनं भक्षणं तेन, मुहुः मोदः सन्तोषस्तं आददिरे प्रापुः । दाञो लिट् । अमराश्च वैरिणां शैलूषपुत्राणां नाशस्तेन मोदं मुहुः आद-दिरे । मर्त्याः स्वेषां ये उपसर्गाः उपद्रवास्तेषां क्षयस्तस्मात् मुहुः मोदं आददिरे ॥ १८ ॥

(सं.चं.) क्रव्यस्य मांसस्यादनेन क्रव्यादा राक्षसाः मोदमाददिरे । गृध्रगोमाय्वादयश्च ये क्रव्यमाममांस-मदन्ति । तथाहि रामायणे–'भूतग्रामाश्च बहवो मांसभक्षाः सुदारुणाः । गन्धर्वपुत्रमांसानि भोक्तुकामाः सहस्रशः । सिंहव्याघ्रवराहाणां खेचराणां च पक्षिणाम् । बहूनि वै सहस्राणि सेनाया ययुरग्रतः'(१००.२३-४) इति । पाणिनीयास्तु क्रव्यमदन्तीति विग्रहणं नाभ्युपयन्ति । तथाहि पाणिनिराह–'क्रव्ये च' (अ.सू. ३.२.६९) इति । अत्र जयादित्यः–'क्रव्यशब्द उपपदेऽदेर्धातोर्विट् प्रत्ययो भवति । क्रव्यमत्ति क्रव्यात् । पूर्वेणैव सिद्धे वचनमणूरूपबाधनार्थम् । तेनाण् न भवति । कथं तर्हि क्रव्यादः? कृत्तविकृत्तशब्द उप-पदेऽण् । तस्य च पृषोदरादित्वात् क्रव्यभावः । कृत्तविकृत्तपक्वमांसभक्षः क्रव्याद उच्यते । आममांसभक्षः क्रव्यादिति' इति । तेन कृत्तविकृत्तमदन्तीति क्रव्यादा इति विग्रह इति पाणिनीयानां मतम् । 'पक्वमांसशब्द उप-पदेऽण् । पक्वमांसशब्दस्य च क्रव्यभावः । पक्वमांसमदन्तीति क्रव्यादाः' इत्यपरे । किमर्थोऽयं द्राविडप्राणायाम इति तत्ववादिनो विस्मयन्ते । वस्तुतस्तु 'क्रव्ये च' सूत्रमेवानपेक्षितम् । तेन वयं ब्रूमः– 'अयमपि योगः शक्योऽवक्तुम्' इति तपस्विनां वैयाकरणानां श्रुतपरित्यागोऽश्रुतस्वीकारश्च शिरोऽवतंसौ भवतः । तेनाऽममनामं वा क्व्यमदन्तीति क्रव्यादाः । तस्मात् साधूक्तं कविना क्रव्यादनेन क्रव्यादाः ।

१. '–नाशेन चापराः'

क्रव्यादनेनेति निर्वचनदर्शनेन स्फुटं निराचकार वैयाकरणानां व्यर्थं पृषोदरादित्वमित्यलम्। वैरिनाशेन चामरा मोदमाददिरे । स्वस्य स्वानां चोपसर्गस्य उत्पातस्य क्षयान्मर्त्याश्च । मुहुर्मुहुः ॥ १८ ॥

पुष्करं पुष्करावत्यां तक्षं तक्षशिलापुरे ।
भरतो विषये तस्मिन् पुत्रौ वीरौ न्यवेशयत् ॥ १९ ॥

(भा.दी.) पुष्करमिति । भरतः तस्मिन् गन्धर्वसम्बन्धिनि, विषयो देशस्तस्मिन्, निर्मितायां पुष्करावत्यां पुष्करावतीनामिकायां पुर्याम्, तत्र विषये निर्मिते तक्षशिलाख्यं यत्पुरं तस्मिंश्च, पुष्करं पुष्कराख्यम् तक्षं तक्षकाख्यं चेति वीरौ स्वस्य पुत्रौ न्यवेशयत् स्थापयामास ॥ १९ ॥

(सं.चं.) पुष्करं पुष्करावत्याम्। 'तक्षं तक्षशिलायां तु पुष्करं पुष्करावते' (१०१.११) इति च। पुष्करावतम्, सम्प्रति 'पेशावर' इति ख्यातम् ॥ १९ ॥

निधाय राज्ययोस्तौ स धनधान्यसमृद्धयोः ।
पञ्चमे वत्सरेऽयोद्ध्यां प्राप्य राममुपानमत् ॥ २० ॥

(भा.दी.) निधायेति । भरतः तौ पुत्रौ, धनानि च धान्यानि च तैः समृद्धे, तयोः राज्ययोः निधाय, पञ्चमे वत्सरः संवत्सरस्तस्मिन् अयोध्यां प्राप्य श्रीरामं उपानमत् ॥ २० ॥

(सं.चं.) निधाय। 'निवेश्य पञ्चभिर्वर्षैर्भरतो राघवानुजः। पुनरायान्महाबाहुरयोध्यां कैकयीसुतः' (१०१.१६) इति च । गुरुत्वेनोपसद्य नमनमुपनमनम् ॥ २० ॥

भरतेनाथ सम्मन्त्र्य रामो राजीवलोचनः ।
चक्रे कारापथे[1] रम्यामङ्गदीयाभिधां पुरीम् ॥ २१ ॥

(भा.दी.) भरतेनेति । अथ राजीववल्लोचने यस्य स तथा श्रीरामः, भरतेन सम्मन्त्र्य, तारापथस्तारा-पथाख्यदेशस्तस्मिन्, अङ्गदीयेत्यभिधा यस्याः सा तथा तां (रम्यां) पुरीं चक्रे ॥ २१ ॥

(सं.चं.) कारापथे । कारुपथ इति सम्प्रति रामायणे पठ्यते–'अयं कारुपथो देशो रमणीयो निरामयः' (१०२.५) इति ॥ २१ ॥

१. **'चक्रे तारापथे'** इति वि.ती.पाठः स्यात्।

मल्लभूम्यां समृद्धायां चन्द्रकान्ताभिधां पुरीम्[1] ।
कृत्वाऽथ लक्ष्मणसुतौ रामो राज्येऽभ्यषेचयत्[2] ॥ २२ ॥

(भा.दी.) मल्लेति । अथ श्रीरामः समृद्धायां मल्लभूम्यां मल्लभूमिरिति प्रसिद्धे देशे, चन्द्रकान्तमित्यभिधा यस्य तत्त्थोक्तम्, तत् पुरं कृत्वा, लक्ष्मणसुतौ अङ्गदचन्द्रकेत्वाख्यौ राज्ये अभ्यषेचयत् ॥ २२ ॥

(सं.चं.) मल्लभूम्याम् । 'चन्द्रकेतोस्तु मल्लस्य मल्लभूम्यां निवेशिता । चन्द्रकान्तेति विख्याता दिव्या स्वर्गपुरी यथा' (१०२.९) इति च ॥ २२–४ ॥

अङ्गदीयां पुरीं रम्यामङ्गदं ज्येष्ठमात्मजम् ।
धार्म्मिकं लक्ष्मणो नीत्वा चक्रे पश्चिमभूमिपम् ॥ २३ ॥

(भा.दी.) अङ्गदीयामिति । लक्ष्मणः धर्मं चरतीति धार्मिकस्तं ज्येष्ठं अङ्गदं अङ्गदाख्यं आत्मजं पुत्रम्, रम्यां अङ्गदीयां अङ्गदीयाख्यां पुरीं प्रति नीत्वा, पश्चिमा या भूमिस्तां पातीति तथोक्तस्तम्, पश्चिम-देशाधिपमित्यर्थः, चक्रे ॥ २३ ॥

चन्द्रकान्तपुरं निन्ये चन्द्रकेतुं ततोऽनुजम् ।
भरतो भगवद्वाक्यात् तत्र राज्यमरक्षयत् ॥ २४ ॥

(भा.दी.) चन्द्रेति । भरतः ततः अङ्गदाख्यलक्ष्मणपुत्रात् अनुजं अवरजं चन्द्रकेतुं चन्द्रकेत्वाख्यं लक्ष्मणपुत्रं भगवतः श्रीरामस्य यद्वाक्यं तस्मात् चन्द्रकान्ताख्यं यत्पुरं तत् प्रति निन्ये । नीतेर्लिट् । तत्र पुरे तद् राज्यं अरक्षयत्, तं तत्र स्थापयित्वा तेन रक्षणमकारयदित्यर्थः ॥ २४ ॥

प्रोष्य तौ पुत्ररक्षार्त्थं वत्सरं पुत्रवत्सलौ ।
रामपादाम्बुजे[3] लोलौ राजहंसाविवाऽपतुः ॥ २५ ॥

(भा.दी.) प्रोष्येति । पुत्रयोर्वत्सलौ स्निग्धौ तौ लक्ष्मणभरतौ पुत्ररक्षार्थं वत्सरं संवत्सरकालस्तं प्रोष्य प्रवासं कृत्वा श्रीरामस्य पादौ तावेवाम्बुजं तत् राजहंसाविव राजहंसपक्षिणाविव लोलौ लोलुपौ सन्तौ, श्रीरामदर्शनोत्सुकावित्यर्थः, आपतुः ॥ २५ ॥

---

१. **'–कान्ताभिधं पुरम्'** इति वि.ती.पाठः । २. **'राज्येऽभिषिक्तवान्'** ३. **'–पादाम्बुजं लोलौ'** इति वि.ती.पाठः ।

(सं.चं.) पुत्रवत्सलौ लक्ष्मणभरतौ । रामसकाशात् दूरं प्रोष्य ॥ २५ ॥

एवंविधान्यगण्यानि कर्म्माणि भगवान् व्यधात् ।
लोकेशैर्ब्रह्मरुद्राद्यैर्दुष्कराण्यपि चेतसा[1] ॥ २६ ॥

(भा.दी.) एवमिति । भगवान् श्रीरामः, लोकानां चतुर्दशभुवनानामीशैः ब्रह्मरुद्राद्यैः चेतसा मनसाऽपि दुष्कराणि कर्तुमशक्यानि, एवं पूर्वोक्ताः विधाः प्रकाराः येषां तानि तथोक्तानि, अगण्यानि असङ्ख्यातानि कर्माणि व्यधात् चक्रे । यान्युद्दिश्य शतकोटिप्रविस्तरस्य मूलरामायणस्य प्रवृत्तिः ॥ २६ ॥

(सं.चं.) एवंविधान्यगण्यानि । तथाहि निर्णये–'एवंविधान्यगणितानि जनार्दनस्य रामावतारचरितानि तदन्य-पुम्भिः । शक्यानि नैव मनसाऽपि हि तानि कर्तुं ब्रह्मेशशेषपुरुहूतमुखैः सुरैश्च' (९.४३) इति । चेतसाऽपि दुष्कराणि । मनसा चिन्तयितुमप्यशक्यानि ॥ २६ ॥

वीर्य्याणि विष्णोरिह वक्ति को वा सङ्ख्यांश्च विद्वान् जगदण्डपांसून् ।
संवर्ण्णितानित्युरुमन्त्रवर्ण्णैः[2] को वर्ण्णयेद् रामपराक्रमांस्तान् ॥ २७ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते
रामाङ्के सङ्ग्रहरामायण उत्तरकाण्डे पञ्चमः सर्ग्गः ॥

—०—

(भा.दी.) **वीर्याणी**ति । जगतां यानि अण्डानि भूतभविष्यद्वर्तमानब्रह्माण्डानि तेषां ये पांसवस्तान् सङ्ख्यान् सङ्ख्यानं कुर्वंश्च, सङ्ख्यानं कर्तुं समर्थोऽपीत्यर्थः, विद्वान् सर्वज्ञः कविः, इह जगति, विष्णोः श्रीरामनाम्नः वीर्याणि सामर्थ्यानि को वा वक्ति साकल्येन प्रतिपादयति? न कोऽपि साकल्येन विशेषतया प्रतिपादयितुं समर्थ इत्यर्थः । अत्यन्तमुरवो बहवो ये मन्त्रवर्णा वेदास्तैः, अनन्तवेदैरित्यर्थः, संवर्णितान्, तान् केनापि साकल्येनाज्ञेयान्, श्रीरामपराक्रमान् को वा कविः वर्णयेत् साकल्येन वर्णनं कुर्यात्? कोऽपि साकल्येन वर्णयितुमसमर्थ इत्यर्थः । वर्ण वर्णक्रियाविस्तारगुणवचनेषु लिङ् । श्रीरामपराक्रमान् कविः सर्वज्ञः कश्चतुर्मुखः वर्णयेद् वा । नास्माकं तत्कथने वा तद्वर्णने वा ईषदपि सामर्थ्यम् । किन्त्वेषां चतुर्मुखादीनमनुग्रहात् तद्वर्णितानामेकदेशानुवादमात्रं क्रियत इति भावः ॥ २७ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायामुत्तरकाण्डे पञ्चमः सर्गः ॥

१. **'–राण्यपि तेजसा'** २. **'–नत्युरुमन्त्रवर्णैः'** इति वि.ती.पाठः ।

(सं.चं.) अथेन्द्रवज्रया सर्गमुपसंहरति– वीर्याणि । सङ्ख्यान् गणयन्नपि । 'विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि' इति श्रुतिः । 'विष्णोर्नु वीर्यगणनां कतमोऽर्हतीह यः पार्थिवान्यपि कविर्विममे रजांसि' इति भागवते । विष्णोर्नुकमिति उरुभिः मन्त्रवर्णैः वेदाक्षरैः संवर्णितान् को वर्णयेत्? न कोऽपि । यदि कोऽपि वर्णयेत् तर्हि को वर्णयेत् । क इति ब्रह्मा वायुर्वा ॥ २७ ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायामुत्तरकाण्डे पञ्चमसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– ३३०९+२७=३३३६]

षष्ठः सर्ग्गः

भूलोकं ब्रह्मलोकाभं दृष्ट्वा रामेण पालितम् ।
आत्मसद्मविशेषार्त्थं देवाः शम्भुं ययाचिरे ॥ १ ॥

(भा.दी.) श्रीरामान्तिकं प्रति रुद्रागमनादिकं वक्तुमुपोद्घातमुपक्रमते– **भूलोकमि**ति । देवा इन्द्रादयः श्रीरामेण पालितं भूलोकम्, ब्रह्मणो यो लोकः सत्याख्यस्तस्य आभेव आभा यस्य स तथोक्तस्तं दृष्ट्वा, आत्मनः स्वस्य यत् सद्म मन्दिरं तस्य विशेषोऽतिशयस्तदर्थम्, स्वलोकाधिक्यार्थमित्यर्थः, शम्भुं चतुर्मुखं ययाचिरे, श्रीरामः स्वलोकं प्रत्यागन्तुं प्रार्थनीय इत्यूचुः । याचृ याच्ञायां लिट् ॥ १ ॥

(सं.चं.) आत्मसद्मनः भूलोकाद् विशेषार्थमतिशयनार्थम् । शम्भुं शतानन्दं चतुर्मुखम् । उत्तरत्र विरिश्चपदेन परामर्शात् । तथाहि निर्णये–'तस्यैवमब्जभवलोकसमामिमां क्ष्मां कृत्वाऽनुशासत उदीक्ष्य गुणान् धरायाः । वैशेष्यमात्मसदनस्य हि काङ्क्षमाणा वृन्दारकाः कमलजं प्रति तच्छशंसुः' (९.४४) इति ॥ १ ॥

विचार्य्य कार्य्यं गिरिशं विरिश्चः[१] क्ष्मामयापयत् ।
स कालात्मा कपर्द्दी च रामपार्श्वमुपाययौ ॥ २ ॥

(भा.दी.) **विचार्ये**ति । विरिश्चः कार्यं कर्तव्यं तत् विचार्य, गिरौ कैलासे शेत इति गिरिशस्तम्, गिरौ शेत इति डः[२] , क्ष्मां भूमिं प्रति, श्रीरामं स्वलोकागमनाय प्रार्थयितुम्, अयापयत् प्रेषयामास । कपर्दो जटाजूटोऽ-स्यास्तीति तथोक्तः कालात्मा संहारकारणभूतः, सः रुद्रश्च श्रीरामस्य पार्श्वं समीपं तत् उपाययौ । कालात्मेत्यनेन प्रेषितः कालः मुनिरूपी सन् रामनिकटमागत इति ग्रन्थान्तरोक्तेर्गतिरुक्ता भवति । तत्र कालशब्दस्य रुद्रवाचित्वादिति ॥ २ ॥

---

१. **'विरिश्चिः'**

२. **'गिरौ डश्छन्दसि'** (३.२.१५) इति वार्तिकादित्यर्थः । छन्दसीति प्रायिकं वचः ।

(सं.चं.) विरिञ्चः देवैः सह विचार्य गिरिशं क्ष्मामयापयत् गमयामास । स च कपर्दी जटाजूटवान्, मुनिवेष इत्यर्थः । कालात्मा मृत्युदेवता गिरिशः रामपार्श्वमुपाययौ । एतेन 'कालस्तापसरूपेण राजद्वारमुपागमत्' (१०३.१) इति रामायणवचनं व्याख्यातम् । वक्ष्यति च स्फुटम्–'कालास्तापसरूपवान्' इति ॥ २ ॥

स राजद्वारमासाद्य कालस्तापसरूपवान्[1] ।
महर्षेर्दूतमाचक्ष्व मामित्याचष्ट लक्ष्मणम्[2] ॥ ३ ॥

(भा.दी.) स इति । तापसस्य मुनेर्यो वेषः सोऽस्यास्तीति तथोक्तः, कालयति[3] संहरति जगन्तीति कालः संहारकः (सः) रुद्रः, राजद्वारं राजमन्दिरसभाद्वारम्, तत् आसाद्य, महांश्चासौ ऋषिश्च तस्य, चतुर्मुखस्येत्यर्थः, दूतं मां श्रीरामं प्रति सम्प्राप्तं आचक्ष्व विज्ञापय । चक्षिङः लोट् । इति लक्ष्मणं प्रति आचष्ट । तत एव लङ् ॥ ३ ॥

(सं.चं.) महर्षेः नारायणस्य । 'महर्षिः कपिलाचार्यः' इति स्मरणात् । अथच महान् ऋषिर्भगवज्ज्ञानी विरिञ्च इत्यर्थः । आचक्ष्व रामाय । 'दूतोऽस्म्यतिबलस्याहं महर्षेरमितौजसः । रामं दिदृक्षुरायातः कार्येण हि महाबलः' (१०३.२) इति च ॥ ३ ॥

[4]सञ्ज्ञापितो लक्ष्मणेन रामवाक्यात् प्रवेशितः ।
उपवेश्याऽसने दिव्ये रामेण प्रत्यपूज्यत ॥ ४ ॥

(भा.दी.) समिति । लक्ष्मणेन सञ्ज्ञापितः कश्चित्तापसस्त्वां दिदृक्षतीति विज्ञापितः, श्रीरामस्य तं प्रवेश-येत्यादि यद् वाक्यं तस्मात् प्रवेशितः तापसः, दिव्यमलौकिकं तस्मिन् आसने उपवेश्य, श्रीरामेण प्रत्यपूज्यत अर्घ्यादिना सत्कृतोऽभूत् ॥ ४ ॥

(सं.चं.) लक्ष्मणेन रामाय सञ्ज्ञापितः परिचायितः– महर्षेरतिबलस्य दूत इत्यात्मानं परिचाययन् कश्चिदा-गत इति । 'प्रवेश्यतां मुनिस्तात' इति रामवाक्यात् । तापसेन मनसा पूजितः रामेण युक्तर्घ्यपाद्यादिभिः प्रत्यपूज्यत ॥ ४ ॥

एकान्ते मे गुरोर्वाक्यं देव वक्ष्यामि ते पुरः ।
इत्युक्ते तेन कालेन व्यसृजद् राघवोऽखिलान् ॥ ५ ॥

---

१. **'कालस्तापसवेषवान्'** इति वि.ती.पाठः । २. **'–मित्याह च लक्ष्मणम्'** ३. **'कलयति'** ४. **'विज्ञापितो–'**

(भा.दी.) एकान्त इति । हे देव श्रीराम, मे गुरोः पितुः, चतुर्मुखस्येत्यर्थः, वाक्यं ते पुरः एकान्त एकान्तप्रदेशस्तस्मिन् वक्ष्यामि । वचधातोर्लृट् । तेन तापसवेषेण कालेन रुद्रेण इति उक्ते सति श्रीराघवः अखिलान् जनान् व्यसृजत् । सृजतेर्लङ् ॥ ५ ॥

(सं.चं.) कालेन तापसरूपेण शिवेन ॥ ५–७ ॥

लक्ष्मण द्वारि तिष्ठ त्वं नैवान्तर्म्मुञ्च कञ्चन ।
वद्ध्यः स्याः कस्यचिन्मोक्ष इत्यूचे राघवोऽनुजम् ॥ ६ ॥

(भा.दी.) लक्ष्मणेति । हे लक्ष्मण, त्वं द्वाः द्वारं तस्यां तिष्ठ । कञ्चन पुरुषमपि अन्तः आगन्तुं नैव मुञ्च, सर्वथा न मुञ्च । मुचल्धातोर्लोट् । कस्यचित् पुरुषस्यापि, मोक्षः अन्तः प्रवेष्टुं मार्गमोचनम्, तस्मिन् वध्यः, त्वं वधलक्षणदण्डार्हः स्याः । राघवः अनुजं लक्ष्मणं प्रति इति ऊचे ॥ ६ ॥

अतिष्ठल्लक्ष्मणो द्वारि बाढमित्यभिधाय तम् ।
कथयामास चैकान्ते कपर्दी कमलेक्षणम् ॥ ७ ॥

(भा.दी.) अतिष्ठदिति । लक्ष्मणः तं श्रीरामं प्रति बाढमिति तथाऽस्त्विति अभिधाय द्वारि अतिष्ठत् । कपर्दी च रुद्रश्च, कमलवदीक्षणे यस्य स तथा तं श्रीरामं प्रति, (एकान्तः) एकान्तप्रदेशस्तस्मिन्, कथयामास चतुर्मुखोदितमवदत् । कथधातोर्लिट् ॥ ७ ॥

देवकार्य्यमकारीदं त्वया दुष्टविनाशनम् ।
अथेदानीं निजं धाम नाथ सम्पद्यतां द्रुतम् ॥ ८ ॥

(भा.दी.) देवेति । हे नाथ श्रीराम, त्वया दुष्टानां रावणादीनां विनाशनं संहारलक्षणम्, इदं देवकार्यं अकारि । अथ इदानीं निजं स्वकीयं धाम मन्दिरम्, तत् द्रुतं यथा भवति तथा सम्पद्यतां प्राप्यताम् । पद गतौ लोट् ॥ ८ ॥

(सं.चं.) धाम वैकुण्ठाख्यम् । सम्पद्यतां प्राप्यतां गम्यतामित्येतत् ॥ ८–९ ॥

इत्थमर्त्थयते देव सदेवस्त्वां पितामहः ।
विशेषमात्मलोकस्य भूलोकान्ननु वाञ्छति ॥ ९ ॥

(भा.दी.) **इत्थमि**ति । (हे देव,) देवैः सहितः सदेवः, पितामहः चतुर्मुखः, इत्थं त्वां अर्थयते प्रार्थयते । अर्थ याच्ञायां लट् । इतः परमपि मयाऽत्र स्थिते सति किं क्षतमित्यत आह– **विशेषमि**ति । आत्मनो यो लोकः सत्याख्यस्तस्य भूलोकात् विशेषोऽतिशयस्तं वाञ्छति ननु । वाञ्छ इच्छायां लट् ॥ ९ ॥

ब्रह्मणेदं विसृजसि मया संहरसि प्रभो ।
त्वमेव पालयस्येवं त्रीन् गुणान् वर्त्तयस्यहो ॥ १० ॥

(भा.दी.) अश्राव्यवचःकीर्तनभीतस्तं स्तुवन् क्षमापयति– **ब्रह्मणेत्या**दिना । हे प्रभो श्रीराम, त्वमेव इदं जगत् ब्रह्मणा चतुर्मुखेन, स्वेच्छयैव ब्रह्माणं निमित्तीकृत्येत्यर्थः, ब्रह्मगतेन ब्रह्मनामकरूपेणेति वा, विसृजसि । मया मां निमित्तीकृत्य, मद्गतेनेश्वराख्येन रुद्ररूपेणेति वा, इदं जगत् संहरसि । त्वं (एव) इदं जगत् दुष्टसंहरणादिकं कृत्वा पालयसि । एवमुक्तप्रकारेण, त्रीन् गुणान् सत्वरजस्तमोलक्षणगुणान्, वर्तयसि स्वस्वकार्योन्मुखतया प्रेरयसि । अहो आश्चर्यम् ॥ १० ॥

(सं.चं.) त्वमेव विष्णुरूपेण ॥ १० ॥

त्वन्नाभिपद्मभूर्ब्रह्मा पद्मभूतनयोऽस्म्यहम् ।
तस्मात् पौत्रस्य मे वाक्यमयोग्यमपि लाल्यताम्[१] ॥ ११ ॥

(भा.दी.) **त्वदि**ति । ब्रह्मा तव या नाभिः (तस्यां यत् पद्मं) तस्माद् भवतीति तथोक्तः । अहम्, पद्मभूश्चतुर्मुखस्तस्य तनयः पुत्रः अस्मि । तस्मात् त्वत्तनयचतुर्मुखोत्पन्नत्वात्, पौत्रस्य पुत्रपुत्रस्य, मे वाक्यं अयोग्यमपि लाळ्यताम् । लळ ईप्सायां लोट् । यथा लोके पितामहः स्वपौत्रवचः किञ्चदयोग्यं श्रुत्वाऽपि बालकोऽयं पूर्वोत्तरविवेकशून्य इति सञ्चिन्त्य तद्वचः लाळयत्येव न कुप्यति । तद्वन्मय्यनुग्रहः कार्य इति भावः ॥ ११ ॥

(सं.चं.) पद्मभूतनयोऽस्म्यहम् । 'पुत्रस्तवेश कमलप्रभवस्तवाहं पौत्रस्तु पौत्रकवचो यदपि ह्ययोग्यम् । सम्भावयन्ति गुणिनस्तदहं ययाचे गन्तुं स्वसद्म नतिपूर्वमितो भवन्तम्' (९.४६) इति निर्णये ॥११–२॥

इत्युक्त ऊचे भगवान् नायोग्यं भाषते भवान् ।
ब्रह्माऽपि मत्प्रियापेक्षी[२] प्रयास्याम्यचिरादिति[३] ॥ १२ ॥

१. **'पाल्यताम्'** २. **'मत्प्रियाकाङ्क्षी'** ३. **'–म्यचिरं त्विति'** इति वि.ती.पाठः स्यात् ।

(भा.दी.) इतीति । इति रुद्रेण उक्तः भगवान् श्रीरामः, भवान् अयोग्यं वचः न भाषते, किन्तु मदभिप्रेतमेव भाषत इत्यर्थः, ब्रह्माऽपि मम यत् प्रियं तदपेक्षत इति मत्प्रियापेक्षी, अतः सोऽपि मदभिमतं ज्ञात्वैव त्वां प्रेषितवानिति भावः, अतः अचिरं शीघ्रं यथा भवति तथा प्रयास्यामि, स्वलोकमागमिष्यामि । इति एवमादि वचः ऊचे ॥ १२ ॥

एवं तयोर्म्मन्त्रयतो रुद्र एवान्यरूपवान् ।
दुर्वासा नाम[1] दुर्वारः पुरद्वारमुपागमत् ॥ १३ ॥

(भा.दी.) एवमिति । एवं तयोः श्रीरामरुद्रयोः, मन्त्रयतोः गुप्तभाषणं कुर्वतोः सतोः, अन्यच्च तत् रूपं च अन्यरूपम्, तदस्यास्तीति तथोक्तः, रूपान्तेणावतीर्ण इत्यर्थः, दुर्वारः वारयितुमशक्यः, यतित्वेन वारयितुमयोग्य इति, रुद्र एव (दुर्वासा नाम) पुरस्य मन्दिरस्य द्वारं तत्, 'आगारे नगरे पुरम्' इत्यमरः, उपागमत् ॥ १३ ॥

(सं.चं.) एवं तयोर्मन्त्रयतोः । 'एवं तयोः संवदतोर्दुर्वासा भगवानृषिः । रामस्य दर्शनाकाङ्क्षी राजद्वारमुपागमत्' (१०५.१) इति च । दुर्वासा नाम । दुर्वासो नामेति पाठे दुष्करो वासोऽस्येति दुर्वासो नाम । 'दुर्वासनामयुक्' (९.४९) इति, 'सुदुःखवासनामकम्' (१७.२३८) इति च निर्णयवचनम्, पुरद्वारमन्तःपुरद्वारम् ॥ १३ ॥

मम कारय सौमित्रे क्षणेऽस्मिन् रामवीक्षणम् ।
गामृषेरिति साटोपां श्रुत्वा दध्यौ स लक्ष्मणः ॥ १४ ॥

(भा.दी.) ममेति । हे सौमित्रे, अस्मिन् वर्तमाने क्षणे श्रीरामस्य वीक्षणं दर्शनं तत् मम कारय । कृञो लोट् । ऋषेर्दुर्वाससः आटोपेन सम्भ्रमेण सहिता साटोपा ताम्, (इति) गां वाचं श्रुत्वा, सः लक्ष्मणः दध्यौ व्यचिन्तयत् । ध्यै चिन्तायां लिट् ॥ १४ ॥

(सं.चं.) आटोपः संरम्भः । '**ಡಠಾಡುಠ**' इति भाषायाम् । 'आटोपावेगसंरम्भसम्भ्रमास्तु त्वरातुरी' इति यादवप्रकाशः । 'त्वरा त्वरी' इत्यन्ये । तेन साटोपां सत्वरां सोद्वेगां वा गां वाणीम् ॥ १४ ॥

आर्य्यस्य दुर्य्यशः स्याद्धि मुनेरातिथ्यभङ्गतः ।
सूदयन्नपि कुर्य्यात् स दयां मयि दयानिधिः ॥ १५ ॥

---

१. 'दुर्वासो नाम'

(भा.दी.) आर्यस्येति । मुनेः आतिथ्यस्य अतिथिपूजायाः भङ्गो नाशस्तस्मादिति ततः, आर्यस्य स्वामिनः श्रीरामस्य, दुर्यशः मदभीष्टप्रदानेऽसमर्थः सन् द्वारनिषेधं कारितवानित्यादि दुष्टं यशः, मया द्वारनिरोधे कृते सति स्याद्धि भवेद्धि । दयानिधिः दयाश्रयः सः श्रीरामः, सूदयन्नपि स्वकृतपूर्वप्रतिज्ञानुसारेण मां संहरन्नपि, मयि दयां कुर्यात् ॥ १५ ॥

(सं.चं.) दुर्यशोऽकीर्तिः । 'दुर्वाससः प्रतिज्ञा तु रामं प्राप्यैव भज्यताम् । अन्यथा त्वयशो रामे करोत्येष मुनि-र्ध्रुवम् । राघवो घ्नन्नपि तु मां करोत्येव दयां मयि' (९.५५–६) इति निर्णये ॥ १५ ॥

इति सञ्चिन्त्य सोऽमुञ्चद् यतिं भागवताग्रणीः ।
रामश्च कालं विसृजन्[1] मुनिं प्राप्तमवैक्षत ॥ १६ ॥

(भा.दी.) इतीति । भागवतेषु भगवद्भक्तेषु अग्रणीः श्रेष्ठः सः लक्ष्मणः, इति मद्वधो वा भूयाद-थापि श्रीरामस्य दुर्यशो मा भूदिति, सञ्चिन्त्य निश्चित्य, नह्यन्यथैतादृशी बुद्धिर्भवतीति भागवताग्रणीरि-त्युक्तम्, यतिं दुर्वाससं अमुञ्चत् । मुच्लृधातोर्लङ् । श्रीरामश्च कालं रुद्रं व्यसृजत् । प्राक् तं मुनिं दुर्वाससं अवैक्षत अपश्यत् । ईक्षतेर्लङ् ॥ १६ ॥

(सं.चं.) भागवताग्रणीः, स किल भगवदाशयं विवेद । यतिं दुर्वाससम् । कालं तापसवेषं विसृजन्, प्राक् ततः किञ्चित्पूर्वं तं दुर्वाससमवैक्षत ॥ १६ ॥

अत्रिपुत्रोऽब्रवीद्[2] रामं निराहारोऽस्मि तापसः ।
सहस्रवत्सरात्[3] राम क्षिप्रं मां भोजयेद् भवान् ॥ १७ ॥

(भा.दी.) अत्रीति । हे राम, सहस्राणां वत्सराणां समाहारः सहस्रवत्सरं तस्मात्, सहस्रसङ्ख्याकः वत्सरः सहस्रवत्सर इति वा, आरभ्येति शेषः, सहस्रवत्सरमिति क्वचित् पाठः । तापसः तपस्वी अहम्, निराहारः आहार-रहितः अस्मि, भवान् मां क्षिप्रं यथा भवति तथा भोजयेत् भोजनं कारयेत् । भुजेर्लिङ् । अत्रिपुत्रः दुर्वासाः श्रीरामं प्रति इति अब्रवीत् ॥ १७ ॥

(सं.चं.) अत्रिपुत्रो दुर्वासाः । 'अद्य वर्षसहस्रस्य समाप्तिस्तपसो मम । सोऽहं भोजनमिच्छामि यथासिद्धं तवानघ' (१०५.१३) इति च ॥ १७ ॥

१.**'कालं व्यसृजन्मुनि प्राक् तमवैक्षत'** इति वि.ती.पाठः । २. **'–पुत्रोऽवदद् रामम्'** २. **'सहस्रवत्सरम्'**

[1]प्राक् सिद्धं मे न भोज्यं स्यादन्नं सेत्स्यति चेदथ ।
क्षुधं[2] कथं सहे वीर क्षणेऽस्मिन् देहि भोजनम् ॥ १८ ॥

(भा.दी.) श्रीराममाहात्म्यं प्रकटयितुं स्वाभिप्रेतमन्नं वदति– **प्रागि**ति । प्राक् सिद्धं निष्पन्नं अन्नं मे भोज्यं भिक्षार्हं न स्यात् । अथ चेद् यदि सेत्स्यति पक्वं भविष्यति तदप्यन्नं मे भोज्यं न स्यात् । तर्हि कीदृशमन्नं भोज्यमित्यत आह– **क्षुधमि**ति । हे वीर श्रीराम, अहं क्षुत् क्षुधा तां कथं सहे? षह मर्षणे लट् । अस्मिन् वर्तमाने क्षणे विद्यमानम्, भुज्यत इति भोजनमन्नं तत् देहि । अस्मिन् क्षणे देहि कारयेति वा ॥ १८ ॥

(सं.चं.) अथ ईषत्कालानन्तरं सेत्स्यति सिद्धं भविष्यति चेत् तदपि मे भोज्यं न स्यात् । क्षुधं बुभुक्षाम्, एतावत्पर्यन्तं तपोनिमित्तं सोढम्, समाप्ते तपसि कथं सहे? तस्मात् क्षणेऽस्मिन् देहि भोजनम् ॥ १८ ॥

इत्युक्तमात्रे मुनिना देवः स्वात् पाणिपल्लवात् ।
अन्नं चतुर्गुणं[3] सृष्ट्वा षड्रसं प्रददौ क्षणात् ॥ १९ ॥

(भा.दी.) **इती**ति । देवः श्रीरामः मुनिना दुर्वाससा इति वचसि उक्तमात्रे केवलमुक्तवति, स्वात् स्वकीयात् पाणिरेव पल्लवस्तस्मात्, षड्रसम्, कषायमधुरतिक्तकट्वम्ललवणाख्याः षट् रसा यस्मिन् तत्तथा तत्, चतुर्विधं भक्ष्यभोज्यलेह्यपेयलक्षणाश्चतस्रो विधा यस्मिन् तत्तथोक्तम्, तत् अन्नं क्षणः क्षणमात्रं तस्मात् सृष्ट्वा प्रददौ ॥ १९ ॥

(सं.चं.) चतुर्गुणं भक्ष्यं भोज्यं लेह्यं पेयमिति चतुर्विधम् । 'पचाम्यन्नं चतुर्विधम्' इति भगवद्गीतासु । 'सिद्धं न देयमथ साध्यमपीति वाचं श्रुत्वाऽस्य वाक्समयजातमुरु स्वहस्तात् । अन्नं चतुर्गुणमदादमृतोपमानं रामस्तदाप्य बुभुजेऽथ मुनिः सुतुष्टः' (९.५०) इति निर्णये । भक्ष्यं यदास्वादविशेषाय खाद्यते अपूपादि । भोज्यं यत् प्रधानतया भुज्यते सोपसेचनमन्नम् । लेह्यं यच्चूष्यते लिह्यते वा चूतशर्कराखण्डादि । पेयं यत् पीयते क्षीरादि । मधुरस्तिक्तः कटुः कषायो लवणोऽम्लश्चेति षड् रसाः । मधुरः स्वतन्त्रो रसः । अन्ये यथायोग्यं संयुक्ता रुचिमुत्पादयन्ति ॥ १९ ॥

---

१. **'क्षुधाम्'** २. **'चतुर्विधम्'** इति वि.ती.पाठः ।

३. **'सहस्रवत्सरात् निराहारत्वं कुत इत्यत आह– प्रागिति । प्राक् मदागमनात् प्राक् सिद्धं पाकयुक्तमन्नं मे मम भोज्यं भोजनार्हं न स्यात् न भवेत् । अथ मदागमनानन्तरं चेद् यदि अन्नं सेत्स्यति सेधिष्यति, पाकयुक्तं भविष्यन्तीति यावत् । षिधू शास्त्रे माङ्गल्ये च लृट् । उदित्वादिड् वा । तर्हि तदन्नं मे न भोज्यं स्यात् । हे वीर राम, अहं क्षुधम्, धकारान्तोऽयम्, बुभुक्षां कथं केन प्रकारेण सहे क्षाम्यामि । षह मर्षणे । लडुत्तमपुरुषैकवचनम् । अस्मिन् क्षणे मे भोजनं देहीत्यवदत्'** इति का.श्री. ।

भुक्त्वा भक्त्या यतिवरस्तुष्टस्तुष्टाव केशवम् ।
त्वामृते कोऽत्र भुवने प्रार्थितं मे दिशेदिति ॥ २० ॥

(भा.दी.) भुक्त्वेति । यतिवरः यतिश्रेष्ठः दुर्वासाः, भुक्त्वा तुष्टः सन्, भक्त्या, केशवं रामम्, अत्र भुवनं जगत् तस्मिन्, त्वां ऋते विना, कः पुरुषः मे प्रार्थितमन्नम्, मे मह्यं दिशेत् दद्यात्, इति तुष्टाव । ष्टुञ् ष्टुतौ लिट् ॥ २० ॥

(सं.चं.) भुक्त्वा भक्त्या । 'तृप्तो ययौ च सकलान् प्रति कोपयानः कश्चिन्न मेऽर्थितवरं प्रतिदातुमीशः । एवम्प्रतिज्ञक ऋषिः स हि तत्प्रतिज्ञां मोघां चकार भगवान् न तु कश्चिदन्यः' (९.५१) इति च निर्णये ॥ २० ॥

[१]सभागतः स भगवान् प्रयाते कोपने मुनौ ।
वधस्त्यागो[२] हि सुहृदां मत्वेत्याचष्ट लक्ष्मणम् ॥ २१ ॥

(भा.दी.) सभेति । सभां गतः प्राप्तः सभागतः, सभायामेव स्थित इत्यर्थः, सः भगवान् श्रीरामः, कुप्यतीति कोपनस्तस्मिन्, कोपशील इत्यर्थः, मुनौ दुर्वाससि प्रयाते सति, सुहृदां वधः त्यागो हि त्याग एव, परित्याग एवेत्यर्थः, इति मत्वा लक्ष्मणं आचष्ट ॥ २१ ॥

(सं.चं.) वधस्त्यागो हि । 'त्यागो वधो वा विहितः साधूनां ह्युभयं समम्' (१०६.१३) इति च रामायणे । 'अत्यन्तबन्धुनिधनं त्याग एवेति चिन्तयन् । याहि स्वलोकमचिरादित्युवाच स लक्ष्मणम्' (९.५८) इति निर्णये ॥ २१–२ ॥

गच्छ लक्ष्मण लोकं स्वं ब्रुवाणमिति राघवम् ।
परिक्रम्य प्रणम्य द्राङ् निर्ज्जगाम स लक्ष्मणः ॥ २२ ॥

(भा.दी.) गच्छेति । लक्ष्मण, स्वं लोकं गच्छ, इति ब्रुवाणं राघवं श्रीरामम्, परिक्रम्य प्रदक्षिणीकृत्य, प्रणम्य नमस्कृत्य, द्राक् शीघ्रं सः लक्ष्मणः निर्जगाम नगरान्निर्गतोऽभूत् ॥ २२ ॥

स गत्वा सरयूतीरं[३] समाधाय मनो हरौ ।
निरुच्छ्वासो निरायासो योगेन[४] स्वात्मतां ययौ ॥ २३ ॥

---

१. **'सभां गतः'**
२. **'–स्त्यागोऽपि सुहृदामवेत्याचष्ट'**
३. **'–तीरं निधाय च मनो–'**
४. **'योगेन अणिमाद्युपायेन ध्यानेन वा'** इति का.श्री. ।

(भा.दी.) स इति । सः लक्ष्मणः सरय्वाः तीरं तटं तत् गत्वा, हरौ मनः समाधाय, योगो योगसामर्थ्यं तेन, निर्गत उच्छ्वासो यस्य स निरुच्छ्वासः, प्राणायामेन निर्जितश्वास इत्यर्थः, निर्गत आयासो यस्य स निरायासः, उत्क्रमणनिमित्तक्लेशरहितः सन्नित्यर्थः, स्वस्य आत्मा स्वरूपं तस्य भावस्तत्ता ताम्, स्वमूल-रूपशेषत्वमित्यर्थः, ययौ ॥ २३ ॥

(सं.चं.) स्वात्मतां स्वमूलरूपेणैकताम् । 'स गत्वा सरयूतीरमुपस्पृश्य कृताञ्जलिः । निगृह्य सर्वस्रोतांसि निःश्वासं न मुमोच ह' (१०६.१५) इति च रामायणे ॥ २३ ॥

[१]महामणिश्रेणिमतीं फणादशशतीं दधत् ।
अनन्तोऽनन्तपर्य्यङ्को बभौ देवैः सुसेवितः[२] ॥ २४ ॥

(भा.दी.) महेति । महान्तो ये मणयस्तेषां श्रेणयः पङ्क्तयः ता अस्याः सन्तीति तथोक्ता ताम्, दशानां शतानां समाहारो दशशती फणानां दशशती तां दधत्, अनन्तस्य श्रीविष्णोः पर्यङ्कः शय्याभूतः अनन्तः शेषः, देवैः सेवितः सन् बभौ ॥ २४ ॥

(सं.चं.) 'स्फटा भोगः फणा नषण्' इति यादवप्रकाशः । अनन्तः शेषः । अनन्तस्य विष्णोः पर्यङ्कः शय्या । 'दशशतैर्युक्तो मुखाम्भोरुहैः' (९.५९) इति, 'पर्यङ्कत्वमवाप यो जलनिधौ विष्णोः शयानस्य च' इति च निर्णये । देवैः सुसेवितः । तथाहि रामायणे–'देवाः सर्षिगणाः सर्वे पुष्पैरभ्यकिरंस्तदा' (१०६.१६) इति ॥ २४–५ ॥

यो मोक्षमक्षयानन्दमपेक्षेतानुयातु सः ।
इत्थं रामेण सर्वत्र भेरीभिरभिघोषितम् ॥ २५ ॥

(भा.दी.) य इति । यः पुरुषः, अक्षयः अविनाशी आनन्दो यस्य स तथा, तं मोक्षं अपेक्षेत, प्राप्तुमिति यावत्, सः पुरुषः, अनुयातु अनुसृत्याऽगच्छतु, इत्थं सर्वत्र राज्ये भेरीभिः श्रीरामेण अभिघोषितं आघोषितम् ॥ २५ ॥

कैवल्यनाथे कैवल्यं दिशत्येवं[३] दयानिधौ ।
[४]विनैतान् दीर्घभविनः सर्वेऽप्यन्वगमन्[५] विभुम् ॥ २६ ॥

---

१. **'महामणिश्रेणिमतीः फणा दशशत दधत्'** २. **'स सेवितः'** इति वि.ती.पाठः स्यात् । २. **'ददत्येवम्'**
४. **'दीर्घभविनः बहुकालसंसारयोग्यान् अस्मदादीन् विना'** इति का.श्री. । ४. **'–गमन् प्रभुम्'**

(भा.दी.) कैवल्येति । कैवल्यनाथे मोक्षनाथे, दयानिधौ दयाश्रये श्रीरामे, एवं कैवल्यं मोक्षस्तत्, दिशति सति ददति सति, दीर्घो यो भवः संसारः स एषामस्तीति तथोक्ताः तान्, एतान् संसारित्वेन प्रसिद्धान् जीवान् विना, सर्वेऽपि विभुं श्रीरामं अन्वगमन् अन्वगच्छन् ॥ २६ ॥

(सं.चं.) दीर्घभविनः, नित्यसंसारिणः, तदा ये न मुक्तियोग्या अनष्टप्रारब्धास्ते च ॥ २६ ॥

[१]दर्शनात् स्पर्शनाद् भूम्नः श्रवणात् कीर्त्तनादपि ।
स्मरणाच्चामलात्मानस्तमन्वीयुश्चराचराः ॥ २७ ॥

(भा.दी.) दर्शनादिति । भूम्नः पूर्णगुणस्य श्रीरामस्य दर्शनं अवलोकनं तस्मात्, स्पर्शनं पादस्पर्शादिस्तस्मात्, श्रवणं माहात्म्यश्रवणं तस्मात्, कीर्तनं श्रीमद्गुणादिसङ्कीर्तनं तस्मादपि, स्मरणं श्रीमच्चरितादिस्मरणं तस्माच्च, अमलः रागादिदोषरहित आत्मा मनो येषां ते तथोक्ताः, चराश्च अचराश्च ते प्राणिनः, तं श्रीरामं अन्वीयुरन्वगच्छन् । इण् गतो लिट् ॥ २७ ॥

(सं.चं.) अचरा वृक्षतृणादयः ॥ २७ ॥

अभूच्चरणसामर्थ्यमचराणां[२] च देहिनाम् ।
सर्वान्तर्य्यामिणस्तस्य रामस्यैव प्रसादतः ॥ २८ ॥

(भा.दी.) अभूदिति । सर्वेषामन्तः यमयति प्रेरयतीत्यन्तर्यामी, तस्य श्रीरामस्य प्रसादतः अनुग्रहात् (एव) अचराः स्थावराः तेषामपि देहिनां जीवानां चरणे गमने सामर्थ्यं अभूत् ॥ २८ ॥

(सं.चं.) अभूच्चरणसामर्थ्यम् । 'रामाज्ञया गमनशक्तिरभूत् तृणादेर्ये तत्र दीर्घभविनो नहि ते तदैच्छन्' (९.६१) इति हि निर्णये ॥ २८ ॥

अथाभ्यषिञ्चद् भगवान्[३] कोसलाधिपतिं[४] कुशम् ।
साम्राज्ये यौवराज्ये तु[५] लवमुत्तरराष्ट्रपम् ॥ २९ ॥

---

१. '**दर्शनात् अपरोक्षज्ञानात्.......स्मरणाच्च ध्यानादपि**' इति का.श्री. । २. '**–मचलानाम्**'

३. '**अभ्यषिञ्चत्स भगवान्**' ४. '**कोसलाधिपतिः**'

५. '**यौवराज्येषु**' इति, '**यौवराज्यं च**' इति च ।

(भा.दी.) अथेति । अथ भगवान् श्रीरामः, कोसलानां कोसलविषयाणामधिपतिं कुशम्, सम्राजो भावः साम्राज्यं तस्मिन्, 'शास्ति यश्चाऽऽज्ञया राज्ञः स सम्राट्' इत्यमरः, राजराजत्व इत्यर्थः, अभ्यषिञ्चत् । (उत्तरराष्ट्रपं उत्तरकोसलविषयाणां पतिं लवं तु यौवराज्ये अभ्यषिञ्चत्) ॥ २९ ॥

(सं.चं.) उत्तरराष्ट्रपम् । उत्तरकोसलानामधिपतिम् । 'कोसलेषु कुशं वीरमुत्तरेषु तथा लवम्' (१०७.१७) इति रामायणे । उत्तराणि यानि राष्ट्राणि विषयास्तान् पातीति तथोक्तस्तं लवं यौवराज्यं युवराजत्वं तस्मिन् अभ्यषिञ्चत् ॥ २९ ॥

कुशं कुशावतीपुर्य्यां शाबस्त्यां च लवं प्रभुः ।
चतुरङ्गं[१] बलं भूरि दत्वा कोशं न्यवेशयत्[२] ॥ ३० ॥

(भा.दी.) कुशमिति । प्रभुः श्रीरामः कुशावतीपुर्याम्, कुशावत्याख्या या पुरी तस्याम्, चतुरङ्गं यद् बलं सैन्यं दत्वा, भूरि बहु कोशं धनौघस्तत्, 'कोशोऽस्त्री कुड्मळे दिव्ये शास्त्रेऽर्थौघे' इति वैजयन्ती, दत्वा, कुशं कुशाख्यं ज्येष्ठं पुत्रम्, न्यवेशयत् स्थापयामास । शाबस्त्यां शाबस्त्याख्यायां पुर्यां लवं चतुरङ्गबलादिकं दत्वा न्यवेशयदिति सम्बन्धः ॥ ३० ॥

(सं.चं.) चतुरङ्गं बलं भूरि कोशं च दत्वा । 'कोशोऽर्थसञ्चयो राज्ञाम्' इति यादवप्रकाशः । 'रथानां तु सहस्राणि नागानामयुतानि च । दशायुतानि चाश्वानामेकैकस्य धनं ददौ' (१०७.१९) इति च । 'कुशस्य नगरी रम्या विन्ध्यपर्वतरोधसि । कुशावतीति नाम्ना सा कृता रामेण धीमता । शाबस्तीति पुरी रम्या श्राविता च लवस्य ह' (१०८.४–५) इति च । शाबस्तीं श्रावस्तीमाहुर्वाश्चः । तथैव च साम्प्रतो रामायण-पाठः । 'विश्वगन्धिः सुतश्चन्द्रो युवनाश्वस्तु तत्सुतः । शाबस्तिस्तत्सुतो येन शाबस्ती निर्मिता पुरी' (९.७.२०) इति भागवते ॥ ३० ॥

अस्त्रशस्त्रविशेषज्ञौ शास्त्रज्ञावतिधार्म्मिकौ ।
कुमारौ स कुमाराभौ न्ययुङ्क्त क्षितिपालने ॥ ३१ ॥

(भा.दी.) अस्त्रेति । सः श्रीरामः अस्त्राणि च शस्त्राणि च तेषां ये विशेषाः प्रभेदास्तान् जानीत इति तथोक्तौ, शास्त्राणि जानीत इति तथोक्तौ, अत्यन्तं धर्मान् चरत इति तथोक्तौ, कुमारस्य षण्मुखस्य आभेव आभा कान्तिर्ययोस्तौ तथोक्तौ, कुमारौ कुशलवौ क्षितेः पालनं रक्षणं तस्मिन् न्ययुङ्क्त आज्ञापयामास । युजिर् योगे लङ् ॥ ३१ ॥

---

१. '**चतुरङ्गबलम्**'
२. '**न्यवेदयत्**' । '**न्यवेदयत् आज्ञप्तवान्**' इति का.श्री. ।

(सं.चं.) कुमारो देवसेनानीः स्कन्दः, तदाभौ तत्सदृशौ ॥ ३१ ॥

दूतैरुदितमाकर्ण्य रामप्रस्थानमद्भुतम् ।
शत्रुघ्नोऽपि निजौ पुत्रावभ्यषिञ्चन्महामतिः[१] ॥ ३२ ॥

(भा.दी.) दूतैरिति । महती पूज्यतमा मतिर्यस्य स तथोक्तः शत्रुघ्नोऽपि, दूतैः श्रीरामप्रेषितदूतैः उदितं अद्भुतं श्रीरामस्य प्रस्थानं स्वलोकं प्रति प्रयाणं तत् आकर्ण्य निजौ पुत्रौ अभ्यषिञ्चत् ॥ ३२ ॥

(सं.चं.) रामप्रहितैर्दूतैरुदितमाकर्ण्य ॥ ३२ ॥

सुबाहुं मधुरापुर्यां निदधे पूर्वजं सुतम् ।
शत्रुघातिनमप्येष नगरे वैदिशाह्वये ॥ ३३ ॥

(भा.दी.) सुबाहुमिति । एषः शत्रुघ्नः, मधुराख्या पुरी मधुरापुरी तस्यां सुबाहुं सुबाहुनामकं पूर्वजं ज्येष्ठं सुतं निदधे स्थापयामास । शत्रुघातिनमपि शत्रुघातीतिनामानमपि कनिष्ठं सुतं वैदिशमिति आह्वयो नाम यस्य तत्तथोक्तं तस्मिन्नगरे निदधे ॥ ३३ ॥

(सं.चं.) शत्रुघाती सुबाहोरनुजः । ताच्छील्ये स्वभावे वा णिनिः । पाणिनिस्तु जातौ णिनिं न मन्यते । यं शूरसेनमप्याहुः । 'सुबाहुः शूरसेनश्च शत्रुघ्नस्य बभूवतुः' (९.९.१३) इति भागवते । 'सुबाहुर्मधुरां लेभे शत्रुघाती च वैदिशम्' (१०८.१०) इति रामायणे ॥ ३३ ॥

रथेनैकेन शत्रुघ्नः प्राप्यायोद्ध्यां पुरीं द्रुतम् ।
प्रयाणाभिमुखं रामं प्रणनाम जगत्प्रभुम् ॥ ३४ ॥

(भा.दी.) रथेनेति । शत्रुघ्नः एकेन रथः स्यन्दनस्तेन अयोध्यां पुरीं द्रुतं यथा भवति तथा प्राप्य प्रयाणे स्वलोकं प्रति गमनेऽभिमुखं तं जगत्प्रभुं श्रीरामं प्रणनाम ॥ ३४ ॥

(सं.चं.) रथेनैकेनेति । परिवारमृते जगामेत्यर्थः । 'सुबाहुं मधुरायां च वैदिशे शत्रुघातिनम् । ययौ स्थाप्य तदाऽऽयोध्यां रथेनैकेन राघवः' (१०८.११) इति च ॥ ३४ ॥

---

१. **'–षिञ्चन्महामती' । 'महामती महाबुद्धिशालिनौ निजौ औरसौ पुत्रौ'** इति का.श्री. ।

निजराज्येऽभिषिच्य द्रागङ्गदं रिपुभङ्गदम् ।
सुग्रीवः सगणः प्रायाद् रामं सोऽपि विभीषणः ॥ ३५ ॥

(भा.दी.) निजेति । सुग्रीवः, रिपूणां भङ्गः पराजयस्तं ददातीति तथोक्तस्तम् अङ्गदम्, निजं स्वकीयं यद्राज्यं कपिराज्यं तस्मिन् द्राक् अभिषिच्य, सगणः कपिसमूहसहितः सन् श्रीरामं प्रति प्रायात् जगाम । सः विभीषणोऽपि श्रीरामं प्रायादिति सम्बन्धः ॥ ३५ ॥

(सं.चं.) सुग्रीवः सगणः प्रायात् । 'अभिषिच्याङ्गदं वीरमागतोऽस्मि नरेश्वर । तवानुगमने राजन् विद्धि मां कृतनिश्चयम्' (१०८.२३) इति च । स विभीषणोऽपि रामं प्रायात् ॥ ३५ ॥

विभीषणं स्ववंशस्य भूषणं स्माऽह राघवः ।
आ कल्पान्ताच्च मत्सेवी[१] निजराज्यमवेरिति ॥ ३६ ॥

(भा.दी.) विभीषणमिति । श्रीरामः, स्वस्य यो वंशस्तस्य, पुलस्त्यवंशस्येत्यर्थः, भूषणोऽलङ्कारभूतस्तं विभीषणं प्रति, कल्पस्य दैनन्दिनकल्पस्यान्तोऽवसानं तस्मात् आ पर्यन्तम्, मां सेवितुं शीलमस्यास्तीति मत्सेवी सन्, मत्कथाश्रवणादिशीलः सन्नित्यर्थः, निजं यद्राज्यं तत् अवेः रक्ष । अवतेर्लिङ् । इति आह स्म अवदत् । ब्रूञो लट् ॥ ३६ ॥

(सं.चं.) स्ववंशस्य पुलस्त्यवंशस्य राक्षसकुलस्य वा । आ कल्पान्तात् यावत् दिनकल्पसमाप्तिः । तावत्पर्यन्तं मां सेवमानो निजराज्यमवेरिति । 'विभीषणमथोवाच राक्षसेन्द्रं महायशाः । यावत् प्रजा धरिष्यन्ति तावत् त्वं वै विभीषण । राक्षसेन्द्र महावीर्य लङ्कास्थः स्वं धरिष्यसि । यावच्चन्द्रश्च सूर्यश्च यावत् तिष्ठति मेदिनी । यावच्च मत्कथा लोके तावद् राज्यं तवास्त्विह' (१०८.२६–८) इति च ॥ ३६ ॥

रामाज्ञानियतः प्राज्ञो रामं सञ्चिन्तयन् सदा ।
सद्धर्म्मानन्वतिष्ठत् स लङ्कां प्राप्य विभीषणः ॥ ३७ ॥

(भा.दी.) रामेति । श्रीरामस्य या आज्ञा तया नियतः नियमितः, प्राज्ञः (सः) विभीषणः लङ्कां प्राप्य, सदा श्रीरामं सञ्चिन्तयन् सन्, सतां सत्पुरुषाणां ये धर्माः हर्यर्चनादयस्तान् अन्वतिष्ठत् समाचरत् ॥ ३७ ॥

---

१. **'आ कल्पान्ता च मत्सेवा'** इति, **'आकल्पान्तं च मत्सेवी'** इति च । **'आकल्पान्तं वैवस्वतमनुकल्पपर्यन्तम्'** इति का.श्री. ।

(सं.चं.) रामाज्ञानियतः । 'तथेति प्रतिजग्राह रामवाक्यं विभीषणः' (१०८.३१) इति च ॥ ३७ ॥

तदैव रामं भगवन्तमापुः सभागतं भागवताः समस्ताः ।
सद्योऽन्यसङ्गो[1] भृशमाप भङ्गं तेषां जगन्मङ्गलसङ्गमेन ॥ ३८ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के
सङ्गहरामायण उत्तरकाण्डे षष्ठः सर्ग्गः ॥

—०—

(भा.दी.) तदैवेति । तदैव समस्ताः भागवताः भगवद्भक्ताः, सभां गतः सभागतस्तं भगवन्तं श्रीरामं आपुः । तेषां भगवद्भक्तानाम्, (जगतः) मङ्गळं मङ्गळभूतः श्रीरामः, तस्य सङ्गमः सान्निध्यलक्षणसमागमस्तेन, अन्येषां श्रीरामातिरिक्तपुत्रमित्रकळत्रादिसमस्तवस्तूनां सङ्गः स्नेहलक्षणः पाशः भृशं यथा भवति तथा भङ्गो नाशस्तं सद्यः आप प्राप । विषयान्तरासक्तिं परित्यज्य श्रीराम एव सक्ता बभूवुरित्यर्थः ॥ ३८ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्गहरामायणव्याख्यायां
भावार्थदीपिकायामुत्तरकाण्डे षष्ठः सर्गः ॥

—०—

(सं.चं.) अथोपजात्योपसंहरति–तदैव राममिति । भागवताः हनुमत्प्रधाना भगवद्भक्ताः । जगन्मङ्गलस्य रामस्य सङ्गमेनान्यविषयसङ्गः सद्यो भङ्गमाप । अत्र पूर्वार्धे उपेन्द्रवज्रा । उत्तरार्धे इन्द्रवज्रा ॥ ३८ ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्गहरामायणटीकायां
सङ्गहचन्द्रिकायामुत्तरकाण्डे षष्ठसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– ३३३६+३८=३३७४]

१. **'अन्यसङ्गः पुत्रादिस्नेहः भृशं सर्वात्मना भङ्गं नाशमाप'** इति का.श्री. ।

सप्तमः सर्गः

तस्यां सभायां प्रतिभासमानं वायोः सुतं प्रेक्ष्य शुभासमानम् ।
देवोऽथ दोर्भ्यामहिसन्निभाभ्यां समाश्लिषत् काममसन्निभाभ्याम् ॥ १ ॥

(भा.दी.) श्रीरामेणाच्छिन्नभक्ते हनुमति कृतानुग्रहप्रकारं दर्शयति– **तस्यामि**त्यादिना । अथ देवः श्रीरामः, तस्यां सभायां प्रतिभासमानं सम्यक् शोभमानम्, शुभैः कर्मभिरसमानमसदृशम्, वायोः सुतं हनुमन्तं प्रेक्ष्य, अहेः महानागस्य शेषस्य सन्निभौ समानौ ताभ्याम्, वस्तुस्थित्या काममत्यन्तं असन्निभाभ्यां असदृशाभ्यां दोर्भ्यां समाश्लिषत् आलिङ्गनं चक्रे । श्लिष आलिङ्गने लुङ् ॥ १ ॥

(सं.चं.) सर्गोऽयं प्रायेणोपजातिबद्धः । भगवद्रूपसौन्दर्यवर्णनमत्र । प्रतिभासमानं भगवत्प्रतिनिधिमिव भासमानम् । शुभैर्गुणैरसमानम् । अहिसन्निभाभ्याम् । अथापि वस्तुतोऽसन्निभाभ्यामसदृशाभ्यां बाहुभ्यां काममाश्लिषत् । न विद्यते सन्निभं सादृश्यं ययोरिति । 'सादृश्ये सन्निभं निभम्' इति यादवप्रकाशः । अत्र प्रथमद्वितीययोस्तृतीयतुरीययोश्च पादान्तयमकम् ॥ १ ॥

ससार सारं हृदये प्रसादं बभार भारं करुणारसानाम् ।
निनाय नायं हनुमन्तमारादुवाच वाचं च रघुप्रवीरः ॥ २ ॥

(भा.दी.) **ससारे**ति । रघुप्रवीरः श्रीरामः हनुमद्विषये हृदये मनसि सारं अत्युत्तमम्, प्रसादोऽनुग्रहस्तं ससार । सृ गतौ लिट् । हनुमत्यनुग्रहमकरोदित्यर्थः । करुणा एव रसास्तेषाम्, कारुण्याख्यरसानामित्यर्थः, भारोऽतिशयस्तं बभार दध्रे । अत्यन्तं कृपामकरोदित्यर्थः । अयं श्रीरामः हनुमन्तं आरात् न निनाय न मुक्तवान् । अतिप्रियत्वाद्धनुमन्तं स्वस्य समीप एव स्थापितवान् । सदाऽपि तस्मिन्नेव महानुग्रहादिकर्ताऽभूदित्यर्थः । वाचं च उवाच ॥ २ ॥

(सं.चं.) सारं सर्वाधिकं प्रसादं हृदये ससार चकार दधार वा । प्रयोगानुगुणा हि धात्वर्था भवन्ति । करुणारसानां दयास्वादानां भारं गरिमाणम्, गरिष्ठं कृपारसमित्यर्थः, हृदये बभार । नचायं रघुप्रवीरः हनुमन्तं आरात् स्वहृदयाद् दूरं निनाय । अत एव स्वधाम जिगमिषुः, अनिनीषुश्च हनुमन्तम्, तत्कारणवादिनीं वाचमुवाच । उपेन्द्रवज्रा च्छन्दः ॥ २ ॥

तान् ब्रह्मचर्य्यादिगुणानगण्यान् [१]मद्भक्तिसेवादिगुणास्तवामी ।
निसर्ग्गपूर्ण्णा अतिशेरते स्म महासमुद्राइव निम्नगौघान् ॥ ३ ॥

(भा.दी.) **तानि**ति । तान् पूर्वमारभ्यापि विद्यमानान्, अगण्यान् गणयितुमशक्यान्, ब्रह्मचर्यं समस्तेन्द्रिय-निग्रहः आदिर्येषां ते तथा, (ते च ते) गुणाश्च तान्, तव निसर्गात् स्वभावादेव पूर्णाः, अमी श्रुत्यादि-प्रसिद्धाः, मम या भक्तिः सेवा च ते आदी येषां ते मद्भक्तिसेवादयस्ते च ते गुणाश्च ते, निम्नगौघान् नदी-प्रवाहान् महासमुद्रा इव अतिशेरते स्म । अतिशयतया वर्तन्ते, ब्रह्मचर्यादिगुणेभ्योऽप्यधिका भूत्वा वर्तन्त इत्यर्थः ॥ ३ ॥

(सं.चं.) ब्रह्मचर्यादिगुणान् मद्भक्तिसेवादिगुणा अतिशेरते । निम्नगौघान् नदीसमूहान् महासमुद्रा इव । सर्वे गुणा भगवद्भक्त्यङ्गभूता इत्यर्थः ॥ ३ ॥

प्रेष्ठं तु सर्वत्र च सर्वदा ते वपुर्म्मदीयं यदुपाधिभिन्नों ।
सदैव साक्षात्कुरु तात तत् त्वं तत्वं परं योगिजनैर्विमृग्यम् ॥ ४ ॥

(भा.दी.) **प्रेष्ठमि**ति । भो हनुमन्, मदीयं यद्वपुस्तत्, ते तव सर्वत्र प्रदेशे सर्वदा च काले, प्रेष्ठं तु अतिशयेन प्रियमेव । उपाधिभिः कामलोभादिनिमित्तैः अन्येषां भक्तानामिव प्रेष्ठं नो न भवति । मोक्षाद्याकाङ्क्षया तव मयि प्रीतिर्न्न, किन्तु सर्वदा स्वाभाविक्येव प्रीतिरस्तीत्यर्थः । हे तात, योगिनः सनकादयो ये जनाः, तैर्विमृग्यं हृदये ध्येयम्, विचार्यमिति वा, परं सर्वोत्कृष्टं तत्वं परमतत्वात्मकं तत्, त्वं सदैव साक्षात्कुरु प्रत्यक्षतया पश्य ॥ ४ ॥

(सं.चं.) मदीयं रूपं तव सदा प्रियतमम् । तदपि प्रियत्वं नोपाधिभिः । न निमित्तान्तरापेक्षम् । किन्तु निरुपाधिकम् । योगिजनैर्विमृग्यं मत्स्वरूपाख्यं तत् परं तत्वं त्वं सदैव साक्षात्कुरु ॥ ४ ॥

---

१. **'मद्भक्तिसेवादिगुणाः, मद्भक्तिः, मत्सेवा, मज्ज्ञानम्, विषयवैराग्यमित्यादिगुणाः'** इति वि.भू. । **'मद्भक्तिः, मत्सेवा, मद्ध्यानमित्यादयो गुणाः'** इति का.श्री. ।

गन्धर्वपूर्वैः परिगीयमानो गायन् यशः पावनपावनं मे ।
[१]अभीष्टभोगानुभवी रमेथा ममाग्रतोऽनुग्रहविग्रहस्य ॥ ५ ॥

(भा.दी.) **गन्धर्वे**ति । गन्धर्वाः पूर्वे येषां ते तथोक्तास्तैः परिगीयमानः, पावनात् पवित्राद् गङ्गाजलादेः पावनं पवित्रम्, तत् मे यशः स्वयं गायन्, गानं कुर्वन् सन्, अभीष्टाः अभीप्सिता ये भोगाः, भुज्यन्त इति भोगशब्दवाच्याः स्रगादिविषयाः,ताननुभवितुं शीलमस्यास्तीति तथोक्तस्तथा सन्, अनुग्रहार्थं भक्ताननुग्रहीतुं विग्रहः प्रकटितस्वरूपं यस्य स तथोक्तस्तस्य, तवानुग्रहार्थं मूर्तिमत्तया सर्वदा तवाग्रे स्थितस्येत्यर्थः, ममाग्रतः पुरतः रमेथाः क्रीडां कुरुष्व ॥ ५ ॥

(सं.चं.) गन्धर्वैर्गीयमानः । गन्धर्वास्तव यशो गायन्ति । त्वं तु मम यशो गायन् रमस इत्यर्थः । त्वदनुग्रहार्थं त्वत्पुरतोऽभिव्यक्तस्य मम विग्रहस्याग्रतः ॥ ५ ॥

मम त्रिधाम्नस्त्रिषु धामसु त्वमनल्पगम्येषु चरेर्य्यथेष्टम् ।
यदायदा यद्यदभीप्सितं ते सम्पत्स्यते तत्तदलं समस्तम् ॥ ६ ॥

(भा.दी.) **ममे**ति । त्वं त्रीणि धामानि वैकुण्ठश्वेतद्वीपानन्तासनाख्यानि मन्दिराणि यस्य स तथा तस्य मम, अल्पगम्या न भवन्तीत्यनल्पगम्यास्तेषु, स्वल्पपुण्यैर्गन्तुमयोग्येष्वित्यर्थः, अनल्पैरुत्तमाधिकारिभिर्गम्येष्विति वा, अनल्पैः बहळैः ज्ञानादिसाधनैर्गम्येष्विति वा, त्रिषु धामसु वैकुण्ठादिषु इष्टमनतिक्रम्य यथेष्टं चरेः । यदायदा यद्यत् ते तव अभीप्सितमाकाङ्क्षितं तत्तत् समस्तं अलं सम्यक् सम्पत्स्यते सम्प्राप्तं भविष्यति ॥ ६ ॥

(सं.चं.) श्वेतद्वीपानन्तासनवैकुण्ठाख्यानि त्रीणि धामानि यस्य मम । अल्पैरमुक्तियोग्यैरगम्येषु । अनल्पैरेव गम्येषु । 'अमृतं क्षेममभयं त्रिधाम्नोऽधायि मूर्धसु' इति भागवते ॥ ६ ॥

गदन्तमित्थं जगदेकनाथं जगाद बद्धाञ्जलिराञ्जनेयः ।
नगद्गदी नाश्रुमुखोऽधिभक्तो[२] न विक्रिया [३]धीरधियां भवेद्धि ॥ ७ ॥

(भा.दी.) **गदन्तमि**ति । इत्थं गदन्तं वदन्तं जगदेकनाथं श्रीरामं प्रति अतिभक्तः अत्यन्तं भक्तः, गद्गदं स्खलद्वचनमस्यास्तीति गद्गदी, गद्गदी न भवतीति नगद्गदी तथा सन्, नसमासत्वान्न नलोपोऽत्र सर्वत्र,

१. **'यथेष्टभोगा–'** २. **'नाश्रुमुखोऽतिभक्तो–'** इति वि.ती.पाठः । ३. **'धीरधियां ननु स्यात्'**

अश्रुयुक्तं मुखं यस्य सोऽश्रुमुखः, अश्रुमुखो न भवतीति नाश्रुमुखः तथा सन् (बद्धाञ्जलिः आञ्जनेयः) जगाद। तत्र निमित्तमाह– नेति। धीरा धैर्ययुक्ता धीर्येषां तेषां उत्तमाधिकारिणाम्, विक्रिया प्रियवियोगादिप्रसक्तेऽप्यन्तःकरणे विकारः क्लेशादिर्न भवेद्धि।धीरे श्रीरामे धीर्येषामिति वा,भगवदपरोक्षज्ञानिनामित्यर्थः ॥ ७ ॥

(सं.चं.) गदन्तमित्थमित्युपेन्द्रवज्रा। अधिकं भक्तः। अधिकश्च भक्तः। अत एव नगद्गदी। 'चित्तद्रवस्तथा स्थैर्यं प्रसादो भक्तिलक्षणम्। आधिक्येन तु तत्रापि स्थैर्यमेव विशेषतः। डम्भस्य चलभक्तेश्च यस्मादश्र्वादिकं भवेत्। डम्भादिपरिहारार्थं निगृह्णीयाच्च धीरधीः। अत आध्यात्मिकैः क्लेशैराधिभूताधिदैविकैः। वाक्यैश्च वेदतन्त्राद्यैरुपदेशैश्च तादृशैः। बलवच्छासनैर्वाऽपि यस्य भक्तिर्न चाल्यते। स एव परमो भक्तो विष्णोर्हृदयवल्लभः' इति भागवततात्पर्ये। यस्माद् धीरधियोऽश्र्वादि निगृह्णीयुः तस्मात् तेषां तादृशी विक्रिया न भवेद्धि ॥ ७ ॥

संवर्द्धमाना परिधूतमाना नव्याजिनी नव्यभिचारिणी च।
त्वद्भक्तिरीशास्त्ववियोगिनी मे सत्या[१] तया सत्यमलं रमेऽहम्[२] ॥ ८ ॥

(भा.दी.) समिति। हे ईश श्रीराम, संवर्धमाना क्षणेक्षणे सम्यग् वर्धमाना, परिधूतोऽविद्यमानो मानो गर्वो यस्याः सा तथोक्ता, परिधूतं तिरस्कृतं मानं परिमितिर्यस्याः सा तथेति वा, व्याजमस्या अस्तीति व्याजिनी, व्याजिनी न भवतीति नव्याजिनी, फलाकाङ्क्षाद्यनिमित्तकेत्यर्थः, व्यभिचर्तुं शीलमस्या अस्तीति व्यभिचारिणी, व्यभिचारिणी न भवतीति नव्यभिचारिणी, सर्वदाऽपि सम्यगक्षीणतया प्रवर्तमानेत्यर्थः, वियोगः अस्या अस्तीति वियोगिनी, वियोगिनी न भवतीत्यवियोगिनी, अव्युच्छिन्नेत्यर्थः, सत्या साधूनां हितभूता, निर्दुष्टतयाऽत्युत्तमेति वा, त्वद्भक्तिः मे अस्तु। अहं तया तादृश्या भक्त्या रमे हि रममाणो भवामि हि। रमुधातोर्लट्। सत्यं इदमेव तत्थ्यम् ॥ ८ ॥

(सं.चं.) संवर्धमानेति चेन्द्रवज्रा। सदा वर्धमाना। परिधूतं जीवनिष्ठाया भक्तेः इयत्तामानं यया। समस्तजीवसञ्चयादधिका। फलापेक्षादिव्याजरहिता निर्व्याजा निष्कपटा। अव्यभिचारिणी भगवदेकनिष्ठा। अवियोगिनी निरन्तरा। सत्या निर्दोषतया प्रशस्ता। 'विधेहि पादपङ्कजे तवेश भक्तिमुत्तमाम्। सदा

---

१. **'सत्या साधूनां हितभूता। सत्या निर्दोषया, अत्युत्तमयेति वा। तया तादृश्या भक्त्या'** इति वि.भू.। **'सत्याऽनया'** इति कचित्। **'सतीशब्दस्तृतीयान्तः। साधूनां हितभूतया, निर्दोषया वा। अत्युत्तमया वा। अनया भक्त्या'** इति का.श्री.।

२. **'सत्यमहं रमे हि'** इति वि.ती.पाठः। **'सत्यमलं रमे हि'** इति कचित्।

प्रवर्धमानया तया रमेऽहमञ्जसा । समस्तजीवसञ्चयात् सदाऽधिका हि मेऽस्तु सा' (९.६९–७०) इति निर्णये ॥ ८ ॥

नमोनमो नाथ नमोनमस्ते नमोनमो राम नमोनमस्ते ।
स्वामिन् पुनस्ते चरणारविन्दं नमामि तन्वा वचसा धियाऽपि[1] ॥ ९ ॥

(भा.दी.) नम इति । हे नाथ श्रीराम, ते तुभ्यं नमः नमः नमः नमः । हे राम, तुभ्यं नमः नमः नमः नमः । हे स्वामिन्, ते तव चरणमेवारविन्दं तत् पुनरपि तन्वा शरीरेण, शरीरं दण्डवत्पातियत्वेत्यर्थः, नमामि । वचसाऽपि श्रीरामाय ते नमोनम इत्यादिरूपेण नमामि । धिया बुद्ध्याऽपि नमामि त्वद्रूपगुणस्मरणादिकं कुर्वन् सन् त्वत्प्रवणो भवामीत्यर्थः ॥ ९ ॥

(सं.चं.) नमोनमो नाथ । मध्वविजयेऽपि पूर्वार्धमविकलं पठ्यते । उत्तरार्धं किञ्चिदिवान्यथा–'पुनःपुनस्ते चरणारविन्दं नमामि नाथेति नमन् स रेमे' इति । 'नमोनमो नमोनमो नतोऽस्ति ते सदा पदम् । समस्तसद्गुणोच्छ्रितं नमामि ते पदं पुनः' (९.७१) इति निर्णये । आदरातिशयादाम्रेडितम् । सहपठितयोर्द्वयोरैक-पद्यम् ॥ ९ ॥

प्राणस्य सूनुं तमिति ब्रुवाणमोमित्युदाहृत्य ततो[2] मुकुन्दः ।
प्रभाकरे प्रागचलं[3] प्रयाते ययावयोद्ध्यानगराद् [4]गरिष्ठात् ॥ १० ॥

(भा.दी.) प्राणस्येति । ततः मुकुन्दः श्रीरामः, इति एवमादि ब्रुवाणं वदन्तम्, प्राणस्य मुख्यवायोः सूनुम्, तं हनूमन्तम्, ओमिति तथाऽस्त्विति उदाहृत्य उक्त्वा, प्रभाकरे सूर्ये प्रागचलः उदयपर्वतस्तस्मिन् प्रभाते सम्यक् शोभिते सति, उदयं प्राप्तवति सतीति वा, वरिष्ठात् श्रेष्ठात् अयोध्याख्यं यन्नगरं पुरं तस्मात् ययौ ॥ १० ॥

(सं.चं.) प्रागचलमुदयाद्रिं प्रयाते सति । गरिष्ठादितरभौमनगरेभ्यः । स्वसन्निधानेन गरिष्ठात् नगरात् ययौ । नगरं विहाय ययौ ॥ १०–११ ॥

अनन्तमन्तःपुरवर्त्तिनस्ते पौरा [5]जना जानपदाश्च सर्वे ।
नराश्च नार्य्यः शिशवो युवानो वृद्धाश्च[6] गच्छन्तमथान्वगच्छन् ॥ ११ ॥

---

१. 'धियाऽथ' २. 'तदा मुकुन्दः' । ३. 'प्रागचले प्रभाते' इति वि.ती.पाठः । ४. 'वरिष्ठात्' इति वि.ती.पाठः ।
५. 'पौराः पुनर्जानपदाश्च' । ६. 'शिशवो नवाश्च वृद्धाश्च' । 'नवाश्च युवानश्च' इति वि.भू. ।

(भा.दी.) अनन्तमिति । अथ अन्तःपुरे वर्तितुं शीलमेषामस्तीति तथोक्ताः, ते भगवद्भक्ताः जनाः, पौराः पुरि विद्यमाना जनाः, जनपदेषु ग्रामेषु भवाः जानपदा जनाश्च, सर्वे नराश्च नार्यश्च शिशवश्च युवानश्च वृद्धाश्च गच्छन्तं अनन्तं श्रीरामं अन्वगच्छन् ।। ११ ।।

कैवल्यनाथे कमलेक्षणेऽस्मिन् कैवल्यदे कः किल नोपगच्छेत् ।
मायाख्यदेव्या परिमुग्धबुद्धीन् विना यया संसरतीह देही ।। १२ ।।

(भा.दी.) कैवल्येति । कैवल्यस्य मोक्षस्य नाथे स्वामिनि, मोक्षदानसमर्थ इत्यर्थः, कमलवदीक्षणे यस्य स तथा तस्मिन् श्रीरामे, कैवल्यं मोक्षं ददातीति कैवल्यदस्तस्मिन्, मोक्षप्रदातृतया स्थिते सतीत्यर्थः, यया मायाख्यया देव्या इह लोके देही जीवः संसरति संसारावस्थां प्राप्नोति, तया मायेति आख्या यस्याः सा मायाख्या सा च सा देवी तया, बन्धनसमर्थया दुर्गादेव्येत्यर्थः, साक्षादीश्वरेच्छयेति वा, परिमुग्धा सम्मोहिता बुद्धिर्येषां ते तथा तान् जीवान् विना कः किल को वा पुरुषः नोपगच्छेत्? ।। १२ ।।

(सं.चं.) स्वयं कैवल्यनाथे कैवल्यदे सति कः किल तं नोपगच्छेत् नानुगच्छेत् । सर्वोऽपि गच्छेदेव । अथा-प्यपवादमाह– मायाख्यदेव्या बन्धकशक्त्या दुर्गया भगवदिच्छया वा परिमुग्धबुद्धीन् विना । तत् कुतः? यया बन्धकशक्त्या बद्धो देही नित्यमिह संसरत्येव । अतस्ते संसारं विहाय भगवन्तं नानुगच्छन्ति ।। १२ ।।

सल्लोकसङ्घेन समागतोऽसौ कल्लोलिनीनामिव मण्डलेन ।
हरिन्मणिश्रीरधिकं चकाशे हरिर्गुणाम्भोनिधिरेव साक्षात् ।। १३ ।।

(भा.दी.) सदिति । सन्तो ये लोका जनाः तेषां सङ्घः समूहस्तेन समागतः सहितः, अन्वागत इति वा, हरिन्मणिवदिन्द्रनीलवत् श्रीः कान्तिर्यस्य स तथोक्तः, गुणैः अम्बोनिधिरिव समुद्र इव गुणाम्बोनिधिः, साक्षात् प्रत्यक्षतः हरिरेव श्रीमन्नारायणात्मकः असौ श्रीरामः, कल्लोलिनीनां महानदीनां मण्डलं समूहस्तेन समागतः सम्प्राप्तः हरिन्मणिश्रीः नीलवर्णः अम्भोनिधिरिवेति यथायोग्यं श्लेषार्थान्वयः कर्तव्यः । अधिकं यथा भवति तथा चकाशे बभौ । काशृ दीप्तौ लिट् ।। १३ ।।

(सं.चं.) गुणाम्भोनिधिर्हरिः साक्षादनुपचारत एवाम्भोनिधिसाम्यमाप । यतस्तरङ्गिणीनां मण्डलेनेव ज्ञानि-लोकसमुदायेन सङ्गतः । यतः हरिन्मणिवत् मरतकवत् नीलभाश्च । 'गारुत्मतं मरतकमश्मगर्भं हरिन्मणिः' इति यादवप्रकाशः । महातरङ्गवचनः कल्लोलशब्दोऽत्र तरङ्गसामान्यवचनः । ज्ञानिनोऽपि भगवदनुभवजनि-तानन्दकल्लोलिन इति सूचनायैवमाह । पूर्वार्धोत्तरार्धयोर्द्वितीयाक्षरप्रासः ।। १३ ।।

अप्येकसूर्य्यान्वयलब्धजन्मा सहस्रसूर्य्याभकिरीटयुक्तः[१] ।
अनन्तसूर्य्याधिकभाः स्वयं तु चित्राच्च चित्रं पुरुषोत्तमोऽयम् ॥ १४ ॥

(भा.दी.) तदानीं विशेषतः प्रकटितगुणं श्रीरामं वर्णयति– **अपीत्या**दिना । स्वयं एको यः सूर्यस्तस्य योऽन्वयो वंशस्तस्मिन् लब्धं जन्म यस्य स तथोक्तस्तथाऽपि, अनन्ता ये सूर्यास्तेभ्योऽधिका भाः दीधितिर्यस्य स तथोक्तः, सहस्रसङ्ख्याका ये सूर्यास्तेषामाभेवाऽभा कान्तिर्यस्य तत्सहस्रसूर्याभं तादृशं किरीटं यस्य स तथा, ईशः सर्वाधीश्वरः पुरुषोत्तमः अयं श्रीरामः चित्रात् आश्चर्यभूतवस्तुनश्च चित्रं आश्चर्यतमः सन् बभौ । लोके सूर्यसमानप्रकाशवद्वस्तु दुर्लभम् । अनन्तसूर्याधिकभाः सहस्रसूर्याभकिरीटयुक्त इत्यतोऽतिविचित्रतम इति भावः ॥ १४ ॥

(सं.चं.) एकस्य सूर्यस्यान्वये लब्धजन्मा । तथाऽप्यनेकसूर्याभकिरीटयुक्तः । स्वयं चानन्तसूर्या इव सर्वाधिकभाः । एकस्मात् सूर्यादागतस्य कथमेवं स्यादिति चित्रादपि चित्रमेतत् । 'अनन्तसूर्यदीधिति-दुरन्तसद्गुणार्णवः । सहस्रसूर्यमण्डलज्वलत्किरीटमूर्धजः' (९.७५–६) इति निर्णये ॥ १४ ॥

अहो महानीलमणीन्द्रलक्ष्म्याश्चोरोऽतिनीलः कुटिलोऽतिमात्रम् ।
तथाऽप्ययं केशवकेशपाशो निर्दोषलेशोऽखिलसद्गुणाब्धिः[२] ॥ १५ ॥

(भा.दी.) अहो इति । यद्यपि अयम्, केशाः अस्य सन्तीति केशवः, 'केशाद् वोऽन्यतरस्याम्' (अ.सू. ५.२.१०९) इति वः, श्रीरामः, तस्य यः केशपाशः, केशसमूहः, महान् यो नीलमणीन्द्रस्तस्य लक्ष्म्याः कान्तेः चोरः तस्करः, इन्द्रनीलरत्नशोभामपि तिरस्कृत्यातिशयेन शोभमान इत्यर्थः, अतिनीलः, अतिमात्रं अत्यन्तं कुटिलः वक्रः, तथाऽपि चोरत्वातिनीलत्वकुटिलत्वोपेतत्वेऽपि, निर्गतः दोषलेशो यस्मात् स तथोक्तः, विकसन्तः प्रकाशमाना ये गुणास्तैः अब्धिरिवाब्धिः । अहो दोषिणो दोषलेशराहित्यादिकमत्याश्चार्यभूतं हि ॥ १५ ॥

(सं.चं.) हरिन्मणीन्द्रस्य महती या लक्ष्मीः तस्याश्चोरः । अत एव स्वयमतिनीलः । अतिमात्रं कुटिलश्च श्रीहरेः केशपाशः केशराशिः । 'पक्षः पाशश्च हस्तश्च केशार्थेभ्यः परो गणे' इति च । एवं चोरोऽयं नीलोऽयं कुटिलोऽयम्, अथापि स्वयं भगवानिव निर्दोषलेशः, सद्गुणाब्धिश्च । केशोऽपि हि केशवएव । येऽन्यत्र दोषास्ते केशवइव केशेष्वपि गुणा बभूवुरिति विनुत्सति । 'गुणाः श्रुताः सुविरुद्धाश्च देवे' इति हि श्रुतिः ॥ १५ ॥

---

१. **'–किरीट ईशः'** इति वि.ती.पाठः । २. **'–लेशो विकसद्गुणाब्धिः'** इति वि.ती.पाठः ।

विशेषको नो विशिशेष भूम्नः स्वयं विशिष्टां वदनेन्दुकान्तिम् ।
विशेषकाख्या विफला न तस्य रम्यादशेषाच्च विशेषिणोऽत्र[१] ॥ १६ ॥

(भा.दी.) विशेषक इति । विशेषकः तिलकम्, भूम्नः पूर्णगुणस्य श्रीरामस्य स्वयं स्वत एव विशिष्टामधिकां वदनमेवेन्दुस्तस्य कान्तिं नो विशिशेष अधिकां नाकरोत्, शिष्लृ विशेषणे लिट् । स्वयमेवात्युत्तमस्य श्रीराममुखेन्दोस्तिलकोऽपि शोभां न करोतीत्यर्थः । तथाऽपि रम्यात् मनोहरात्, अशेषं समस्तं तस्मादपि वस्तुनः, विशेषिणः विशेषवतः अत्युत्तमस्य, तस्य तिलकस्य विशेषक इति आख्या विशेषकाख्या, विगतं फलं प्रवृत्तिनिमित्तं यस्याः सा तथोक्ता, प्रतिपाद्यार्थहीनेत्यर्थः, न, किन्तु सफलैव । विशेषयति विशिष्टं करोतीति व्युत्पत्त्या विशेषकशब्दवाच्यत्वाभावेऽपि श्रीरामललाटसम्बन्धेन स्वस्यैवाऽन्यस्मादाभरणादतिविशेषविशिष्टत्वात् विशिष्यते श्रीरामललाटसम्बद्धादितराभरणाद् विशिष्टो भवतीति व्युत्पत्त्या विशेषकाख्या अत्र लोके सफलैवेति भावः ॥ १६ ॥

(सं.चं.) विशेषकस्तिलकः । 'तिलकोऽस्त्री विशेषकम्' इति च । 'विशेषकोऽस्त्री तिलके' इति च । नो विशिशेष । शिष्लृ विशेषणे । विशेषणमतिशायनम् । गुणान्तरोत्पादनमित्येतत् । लोके तु विशिनष्टि मुखस्य शोभातिशयमुत्पादयतीति तिलकं विशेषकमाहुः । नेदं निर्वचनमत्र युज्यते । अथापि रामतिलकस्य विशेषकाख्या न विफला न व्यर्था । यतः रम्यादशेषादितरललाटस्थात् तिलकात्, अन्यैर्धृतादशेषादाभरणाद्वा अयं विशेषवान् । तेन इतरेभ्यो विशिष्यत इति सफला विशेषकाख्या रामललाटमाश्रितस्य तिलकस्य । अत्र लोके । तथाच अन्यतिलकानां विशिनष्टीति विशेषकाख्या । रामतिलकस्य तु विशिष्यत इति विशेषकाख्या लोके प्रसृतेति ॥ १६ ॥

चन्द्रारविन्दश्रियमाजहार मुखं मुकुन्दस्य रुचेति मिथ्या ।
इदं द्वयं राममुखोपमत्वाल्लक्ष्मीसुधावास इतीक्षिका मे ॥ १७ ॥

(भा.दी.) चन्द्रेति । मुकुन्दस्य श्रीरामस्य मुखम्, रुचा कान्त्या, चन्द्रश्च अरविन्दं च तयोः श्रीः कान्तिस्तां आजहार आप इति कवीनां वर्णनं मिथ्या । वस्तुतस्तु इदं चन्द्रारविन्दाख्यं वस्तुद्वयम्, श्रीरामस्य यन्मुखं तस्य उपमा ययोस्ते तथोक्ते तयोर्भावस्तत्त्वं तस्मात्, लक्ष्मीश्च सुधा च तयोर्वास आवासभूतम्, चन्द्रः सुधावासः, अरविन्दं तु लक्ष्मीवास इति विवेकः । इति मे ईक्षिका उत्प्रेक्षा, आलोचनेति वा । चन्द्रस्यामृतमण्डलत्वं

---

२. **'अत्र रामललाटे स्थितत्वादेव....तदुक्तम्–'लोकप्रेक्षाभयाद्वाऽवृणुत वरगुणं स्वात्मशोभेच्छया वा'** इति का.श्री. ।

पद्मस्य लक्ष्मीवासत्वं च ताभ्यामप्यतिशयितसुधामयत्वलक्ष्मीवासत्वाद्यनन्तगुणस्य श्रीराममुखस्य सादृश्यादेवेति तर्कय इत्यर्थः ॥ १७ ॥

(सं.चं.) मुकुन्दस्य मुखं स्वरुचा चन्द्रारविन्दयोः शोभामपजहारेति मिथ्या वचः । व्यत्यस्तोऽयमुपमा-नोपमेयभावः । न चन्द्रारविन्दोपमं मुखम् । किन्तु चन्द्रारविन्दावीषद्राममुखोपमाविति वक्तव्यमिति ममेक्षिका मम दर्शनम् । ममत्वेवं प्रतिभातीत्यर्थः । अरविन्दं लक्ष्म्या आवासः । तां हि पद्मालयामाचक्षते । चन्द्रः सुधाया आवासः । तं हि सुधाकरमाचक्षते । भगवन्मुखं तूभयोरप्यावासः ॥ १७ ॥

अत्यायताभ्यामरुणान्तराभ्यां[1] विकस्वराभ्यां सदयोदयाभ्याम् ।
पद्मेक्षणोऽनुक्षणमीक्षणाभ्यां निजाः प्रजा [2]ज्ञानरसैरपूरि ॥ १८ ॥

(भा.दी.) अतीति । पद्मेक्षणः श्रीरामः, अत्यन्तमायते दीर्घे ताभ्याम्, अरुणे अन्तरे अवसाने ययोस्ते ताभ्याम्, रक्तापाङ्गयुक्ताभ्यामित्यर्थः । 'अन्तरं परिधानीये बाह्ये स्वीयेऽन्तरात्मनि । तथा मध्येऽवकाशे च तादर्थ्येऽ-वसरेऽवधौ । विशेषविवरान्तर्धिष्ववसानविनार्थयोः' इति वैजयन्ती । विकस्वराभ्यां विकासशीलाभ्याम्, दयाया उदयस्तेन सहिते सदयोदये ताभ्याम्, ईक्षणाभ्यां दृष्टिभ्याम्, निजाः आत्मीयाः प्रजाः, ज्ञानलक्षणा ये रसास्तैः अनुक्षणं प्रतिक्षणं अपूरि पूरितवान् । पूरि आप्यायने लुङ् ॥ १८ ॥

(सं.चं.) अन्तरे अन्तभागे अरुणाभ्याम् । विकस्वराभ्यां सदा विकसिताभ्याम् । दयाया उदयेन आविष्कर-णेन सहिताभ्याम् । ईक्षणाभ्यां ज्ञानरसैरपूरि पूरयामास । कटाक्षपातमात्रेण सतां मनसि ज्ञानं वर्धया-मासेत्यर्थः । 'ज्ञानं नेत्राब्जयुग्मात्' (९.८८) इति निर्णये ॥ १८ ॥

[3]विद्युल्लतामण्डलमञ्जुळाभ्यां कर्णोल्लसत्कुण्डलमण्डलाभ्याम् ।
श्यामोऽतिगम्भीररवो जिगाय नवाम्बुदाडम्बरमम्बुजाक्षः ॥ १९ ॥

(भा.दी.) विद्युदिति । विद्युतो यत् लतामण्डलं तद्वन्मञ्जुळे मनोहरे ताभ्याम्, कर्णयोरुल्लसन्ती ये कुण्डलमण्डले ताभ्याम्, श्यामः श्यामळः, अत्यन्तं गम्भीरः अतिगम्भीरः तादृशो रवो ध्वनिर्यस्य स तथोक्तः, अतिगम्भीरस्वर इत्यर्थः, अम्बुजाक्षः श्रीरामः, नवो नूतनो योऽम्बुदो मेघस्तस्याऽडम्बरो विलासस्तं जिगाय ॥ १९ ॥

---

१. **'–णान्तरुग्भ्याम्'** २. **'ज्ञानरसैः ज्ञानरसायनैः ज्ञानश्रेष्ठैर्वा'** इति का.श्री. ।

३. क्वचित् पादौ व्यत्यस्य पठ्येते–**'कर्णोल्लसत्कुण्डलमण्डलाभ्यां विद्युल्लतामण्डलमञ्जुलाभ्याम्'** इति ।

(सं.चं.) विद्युल्लतानां मण्डलं वृन्दम् । तद्वन्मञ्जुळाभ्याम् । मण्डलाभ्यां वृत्ताकाराभ्यां कुण्डलाभ्याम् उपलक्षितः । श्यामोऽतिगम्भीररवश्च । आडम्बरमाटोपम् । स्वस्य सुभगतानटनम् । 'ೞೞ इति भाषायाम् । जिगाय विफलीचकारे-त्यर्थः । नवाम्बुदोऽपि विद्युल्लतामण्डलमञ्जुळः । श्यामः । स्तनितेनातिगम्भीररवश्च । 'सुविद्युदाभकुण्डलः' (९.७७) इति निर्णये ॥ १९ ॥

वेदार्थसारान् विमलान[१]नर्घान्महामणीन्द्रानिव दुर्लभान् सः ।
निर्गच्छतो राममुखादजस्रं जग्राह लोकः सकुतूहलोऽत्र ॥ २० ॥

(भा.दी.) वेदार्थेति । अत्र अस्मिन् समये, सः लोकः जनः, न विद्यते अर्घः मूल्यं येषां ते तथा तान्, महामणीन्द्रानिव, तादृशोपदेशकाभावात् दुर्लभान् प्राप्तुमशक्यान्, विमलान् निर्मलान्, श्रीरामस्य मुखं तस्मात् अजस्रमखण्डिततया निर्गच्छतः निःसरतः, वेदानां ये अर्थसाराः अत्यर्थं श्रेष्ठाः (अर्थाः) तान्, कुतूहलेन सहितः सकुतूहलः सन् जग्राह ॥ २० ॥

(सं.चं.) महामणीन्द्रानिव विमलाननर्घान् दुर्लभांश्च । वेदानां परममुख्यार्थान् । अत्र रामनिर्याणमार्गे सः रामेण सह गतः ज्ञानिलोकः सकुतूहलो जग्राह । 'मुखवरकमलात् सर्ववेदार्थसारान्' (९.८८) इति निर्णये ॥ २० ॥

[२]ताम्रोष्ठमुन्नम्रमनोज्ञनासं कनत्कपोलं नवकुन्ददन्तम् ।
रामस्य रम्यभ्रु मुखं प्रजानां स्निग्धस्मितं विस्मयमाततान ॥ २१ ॥

(भा.दी.) ताम्रेति । ताम्रः ताम्रवर्णः ओष्ठो यस्य स तत् तथोक्तम्, उन्नम्रा उन्नता मनोज्ञा मनोहरा नासा यस्य तत्तथोक्तम् , कनन्तौ दीप्यमानौ कपोलौ यस्य तत्तथोक्तम्, नवानि कुन्दानि कुन्दकुसुममुकुळानि तानीव दन्ता यस्य तत्तथोक्तम्, रम्ये भ्रुवौ यस्य तद् रम्यभ्रु, स्निग्धं रम्यं स्मितं यस्य तत् तथोक्तम्, श्रीरामस्य मुखं प्रजानां विस्मयं आश्चर्यं आततान । तनोतेर्लिट् । विस्मितमकरोदिति भावः ॥ २१ ॥

(सं.चं.) स्निग्धस्मितं रामस्य मुखं प्रजानां विस्मयमाततान विस्तारयामास । नम्रं नतम् । उन्नम्रमुन्नतम् । कनत्कपोलम् । कनी दीप्तिकान्तिगतिषु । कुन्दः '**ಕುಡುಮಲ್ಲಿಗೆ**' इति भाषायाम् । नवकुन्दाः कुन्दकुड्मला इव दन्ता यत्र ॥ २१ ॥

---

१. '**–ननर्घान्महा–**' । '**विमलानमूल्यान्महा–**' इति च । '**समुद्रात् महामणीन्द्रानिव**' इति का.श्री. ।

२. '**यद्यपि चन्द्रारविन्देति श्लोके मुखं वर्णितम् । तथाऽपि सपरिकरं पुनर्वर्णयति–ताम्रेति**' इति का.श्री. ।

मुक्ताकलापेन परं परीतः कण्ठे [1]लसत्कौस्तुभरत्नराजः[2] ।
दुग्धाब्धिमध्ये जितभानुपुञ्जं ज्योतिः स्म[3] रम्यं स्मरयत्यमुष्य ॥ २२ ॥

(भा.दी.) मुक्तेति । मुक्तानां मौक्तिकमणीनां कलापः समूहस्तेन सह, कण्ठो गळस्तस्मिन्, परमुत्तमं यथा भवति तथा परीतः परिवार्य स्थितः, लसन् शोभमानो यः कौस्तुभाख्यो रत्नराजो रत्नश्रेष्ठः । कण्ठोल्लसत्कौस्तुभरत्नराज इति क्वचित्पाठः । दुग्धाब्धेः क्षीरसमुद्रस्य यन्मध्यं तस्मिन्, स्थितमिति शेषः, जिता भानूनां पुञ्जानि व्रजाः समूहा येन तत्तथोक्तम्, रम्यं अमुष्य श्रीरामात्मकस्य हरेः ज्योतिः तेजोमयं रूपं स्मरयति संस्मृतं करोति स्म । स्वस्यातिधवळमुक्तामालामिश्रितत्वात् वर्णतस्तु रक्तत्वान्मुक्तामालावद्धवळे क्षीरसमुद्रे स्थितं सुवर्णवर्णं भगवद्रूपम्, 'सदृशो दृष्टिचिन्ताद्याः स्मृतिबीजस्य बोधकाः' इति न्यायेन तत्सदृशत्वात् स्मरयतीति भावः । स्मृ आध्याने लट् ॥ २२ ॥

(सं.चं.) मुक्ताकलापेनेतीन्द्रवज्रा । परं केवलं मुक्ताकलापमयेन हारेण परिगतः । कौस्तुभः श्रीहरिवक्षसि लक्षणभूतो मणिः । क्षीराब्धिमध्ये शयानस्य अमुष्य रामात्मनो नारायणस्य जितभानुपुञ्जं उद्यद्भानुपुञ्जसमाभासं रम्यं ज्योतिः स्मरयति ध्यनपथमागमयति । धवलो मुक्ताहारः क्षीरसमुद्र इव । मध्ये भानुप्रभः कौस्तुभः स्वयं भगवज्ज्योतिःप्रतिबिम्बमिव ध्यानगोचरो भवन् चित्तं विस्मापयतीत्यर्थः । स्मरतिर्द्विः पठ्यते वैया-करणैः । 'स्मृ आध्याने' इति, 'स्मृ चिन्तायाम्' इति । आध्यानमुत्कण्ठा । आध्यानार्थस्य घटादिषु पाठात् णिचि स्मरयतीति रूपम् । चिन्तायां स्मारयतीति रूपमिति वैयाकरणाः ॥ २२ ॥

हरिन्मणीन्द्रस्थलहर्म्यरम्ये विलासिनी तस्य ललास लक्ष्मीः ।
उरःस्थले सौरभमत्तभृङ्गा नूनं तदर्थं वनमालिकाऽभूत्[4] ॥ २३ ॥

(भा.दी.) हरिदिति । लक्ष्मीः, हरिन्मणीन्द्रात्मकं इन्द्रनीलरत्नश्रेष्ठात्मकं स्थलं यस्मिन् तत्तथोक्तम्, तादृशं यद्धर्म्यं प्रासादः, तद्वद् रम्यं मनोहरं तस्मिन्, तस्य श्रीरामस्य उरःस्थले, विलासिनी विलासवती ललास चिक्रीड । लस श्लेषणक्रीडनयोः लिट् । सैव लक्ष्मीः, तदर्थं तत्र स्थितायाः स्वस्याः विलासं कर्तुम्, सौरभेण

१. **'कण्ठोल्लसत्कौस्तुभरत्नराजः'** २. **'–रत्नसारः'** । **'कौस्तुभरत्नसारः कौस्तुभाख्यरत्नश्रेष्ठः'** इति का.श्री. ।

३. **'स्म प्रसिद्धमेतत् । स्मरयति स्म अस्मरयदिति वा'** इति का.श्री. ।

४. **'वनमालिका वैजयन्तीनामिका माला तदर्थं वक्षःस्थलस्थितााया लक्ष्म्या विलासार्थमुरःस्थले स्थिताऽभूत् । नूनमिति तर्कः । निश्चितमिति वा'** इति का.श्री. ।

परिमळेन मत्ताः भृङ्गाः भ्रमरा यस्याः सा तथोक्ता वनमालिका अभूत् । नूनं निश्चितम् । नूनमिति तर्के इति वा । 'तर्कनिश्चितयोर्नूनम्' इति वैजयन्ती ॥ २३ ॥

(सं.चं.) नीलमणीन्द्रेन खचितस्थलं यद्धर्म्यं प्रासादः, तद्वद्रम्यनीलभासि तस्य हरेरुरःस्थले लक्ष्मीः विलासिनी ललास । पतिसन्निधाने स्त्रीणामङ्गविकारविशेषो विलास इत्युच्यते । 'विलासोऽङ्गे विशेषो यः प्रियाप्तावासनादिषु' इति हि स्मरन्ति । तथाच विलासिनी शृङ्गारभाववती ललास भगवति श्लिष्टा विललास उरःस्थलमाश्लिष्य चिक्रीडेत्यर्थः । 'लस श्लेषणक्रीडनयोः' इति हि पठन्ति । 'वक्षसि लक्षणभूता लक्ष्मीः' इति पण्डिताचार्यवचनम् । तदर्थं लक्ष्म्या विलसनार्थमेव तुळसी वनमाला सती हरिकण्ठालिङ्गिनी ललासेत्यर्थः । 'आपादपद्मं या माला वनमालेति सा स्मृता' । गुणसौरभे मत्ताः आम्नायाख्या भृङ्गा यत्र । 'निवीतमाम्नायमधुव्रताश्रयस्वकीर्तिमय्या वनमालया हरिम्' (३.९.३१) इति भागवते । 'मत्तद्वि-रेफवनमालिकया निवीतौ' (३.१६.२८) इति च । एतेन वनमाला तुळसीमालेति च स्फुटम् । तुळस्यां च लक्ष्म्या नित्यसन्निधानमिति च । 'तुळसि श्रीसखि शुभे' इति च स्मरन्ति । 'अनर्घरत्नमालया वनाख्यया च मालया । विलासिविस्तृतोरसा बभार च श्रियं प्रभुः' (९.८४) इति निर्णये । अनेन, भगवता प्रीत्या वननीया माला वनमालेत्युक्तं भवति ॥ २३ ॥

युद्धे रिपूणां [1]मुसलायमानौ मालायमानौ जनकात्मजांसे ।
सन्मण्डले कल्पनगायमानौ[2] सत्यं करौ तस्य हि निःसमानौ ॥ २४ ॥

(भा.दी.) युद्ध इति । युद्धं सङ्गरस्तस्मिन् रिपूणां मुसल इव आचरत इति मुसलायमानौ, जनकात्मजायाः सीतायाः अंसः स्कन्धस्तस्मिन् मालावदाचरत इति मालायमानौ, सतां मण्डलं समूहस्तस्मिन् कल्पसञ्ज्ञका ये नगा वृक्षास्तद्वदाचरत इति तथोक्तौ, तस्य श्रीरामस्य करौ, निर्गतं समानं सदृशं ययोस्तौ निःसमानौ असदृशावित्यर्थः । इदं सत्यं हि ॥ २४ ॥

(सं.चं.) युद्धे रिपूणामिति पुनरिन्द्रवज्रा । सन्मण्डले ज्ञानिमण्डले कल्पवृक्षायमाणौ । यमानाविति पादत्रययमकम् । मानाविति पादचतुष्टयेऽपि ॥ २४ ॥

सर्वासुरघ्नं जगदेकसारं शरं च शार्ङ्गं च विभुर्बभार ।
तयोर्न किञ्चित् प्रतिघातनं स्यात् षष्ठे रसे सोत्तरतां गतेऽपि ॥ २५ ॥

---

१. **'रिपूणामनलायमानौ' । युद्धकाले रिपूणामनलायमानौ अग्निवदाचरन्तौ'** इति का.श्री. । २. **'कल्पलतायमानौ'**

(भा.दी.) सर्वेति । विभुः श्रीरामः, सर्वे येऽसुरास्तान् हन्तीति तथोक्तस्तम्, जगति एकसारः मुख्यसारः मुख्यसारभूतस्तम्, शरं च शार्ङ्गं शार्ङ्गाख्यं धनुश्च बभार । भृञो लिट् । षण्णां पूरकः षष्ठस्तस्मिन् रसे सोत्तरतां सप्तमरसादिना सहिततां गतेऽपि, यथा पुरुषादयो विषाणवन्तो न भवन्ति तद्वत् षष्ठो रसः कदाचिदपि सप्तमादिरसयुक्तो न भवत्येव, षड्रसातिरिक्तरसस्य अत्यन्तासत्वात्, स च सप्तमादियुक्तो भविष्यति चेदपि तयोः शरशार्ङ्गयोः किञ्चिदपि प्रतिघातनं प्रतिक्रियाकरणसमर्थं न स्यादेव । तयोर्विघातनसमर्थं किञ्चिदपि कदाचिदपि कुत्रचिदपि कथञ्चिदपि सप्तमरसकूर्मरोमादिवन्न स्यादेवेति भावः ॥ २५ ॥

(सं.चं.) स्याच्चेदपि सप्तमो रसः, न भगवच्छरशार्ङ्गयोः प्रतिघातनं सर्वथा । सप्तमरस एवासम्भवी । भगवदस्त्रप्रतिघातनं पुनरष्टमरसायितमिति ॥ २५ ॥

जगत्त्रयं चारुवलित्रयं च द्वयं लघिम्ना तुलितं बभार ।
उदारभासा तनुनोदरेण मनोज्ञनाभेन स पद्मनाभः ॥ २६ ॥

(भा.दी.) जगदिति । पद्मं नाभौ यस्य स तथोक्तः सः श्रीरामः, उदारा भाः कान्तिर्यस्य तत्तथोक्तं तेन, तनुना सूक्ष्मेण, मनोज्ञो मनोहरो नाभिर्यस्य स तत्तथोक्तं तेन उदरेण, जगतां त्रयं जगत्त्रयं तच्च, चारु मनोहरं वलीनां त्रयं वलित्रयं तच्च, इति द्वयं लघिम्ना लाघवेन तुलितं बभार । भृञो लिट् ॥ २६ ॥

(सं.चं.) जगत्त्रयमित्युपेन्द्रवज्रा । तनुनोदरेण द्वयं बभार– जगत्त्रयं च वलित्रयं च । लघुतया वलित्रयेण तुलितं जगत्त्रयम् । 'स भूतिवत्सभूषणस्तनूदरे वलित्रयी' (९.८५) इति च । 'तनुत्वेऽप्यखिलम्भरम्' इति चान्यत्र ॥ २६ ॥

वासः कनत्काञ्चनभङ्गपिङ्गं पर्य्यञ्चितं काञ्चनकाञ्चिदाम्ना ।
रम्ये रमाया रमणस्य तस्य नितम्बबिम्बे नितरां विरेजे[1] ॥ २७ ॥

(भा.दी.) वास इति । कनन् दीप्यन् यः काञ्चनस्य सुवर्णस्य भङ्गो भागस्तद्वत् पिङ्गं पिशङ्गवर्णम्, पीतवर्णमित्यर्थः, रमायाः रमणस्य भर्तुः तस्य श्रीरामस्य, रम्ये नितम्बस्य बिम्बो मण्डलं तस्मिन्, काञ्चनात्मकं यत्काञ्चीदाम काञ्चीसूत्रं तेन पर्यञ्चितं परितः अञ्चितं घट्टितम्, सहितमित्यर्थः, वासः वस्त्रं नितरां विरेजे । राजृ धातोर्लिट् ॥ २७ ॥

---

१. 'नितरां रराज'

(सं.चं.) कनन् काञ्चनस्य भङ्गः प्रभेदः । स्फुटितं काञ्चनम् । तद्वत् पिङ्गं पीतवर्णम् । काञ्चिदाम्नेति सञ्ज्ञात्वाद् ह्रस्वता । परितः अञ्चितं परिवेष्टनेनार्चितम् । परिवेष्टितमित्येतत् ॥ २७ ॥

सीतापतेः सुन्दरमूरुयुग्मं हस्तीन्द्रहस्तोपममित्युदीर्य्य ।
भृशावमत्वादुपमानभूमेर्डोलायते चित्तमिदं मदीयम् ॥ २८ ॥

(भा.दी.) सीतेति । सीतापतेः श्रीरामस्य, सुन्दरं ऊर्वोः युग्मं ऊरुयुग्मं तत्, हस्तीन्द्रस्य गजेन्द्रस्य यो हस्तस्तस्य उपमा यस्य तत्तथोक्तं इति उदीर्य, उपमानस्य सादृश्यस्य भूमिः स्थलं तस्याः, हस्तीन्द्रहस्तस्येत्यर्थः, भृशमवमोऽवरः तस्य भावः तत्त्वं तस्मात्, प्राकृतत्वादिनाऽत्याभासत्वादित्यर्थः, इदं मदीयं चित्तं डोलायते डोलावदाचरति । हस्तीन्द्रहस्तस्याप्यनुत्कृष्टत्वेनोपमानभूमित्वानुपपत्तेरन्योन्यमुपमानस्थलमस्ति वा नास्ति वेति चञ्चलीभवतीत्यर्थः ॥ २८ ॥

(सं.चं.) हस्तीन्द्रहस्तोपमम् । 'करीन्द्रसत्करोरुयुक्' (९.८६) इति च । उपमानस्थानस्य हस्तीन्द्रहस्तस्य सीतापतेरूरुयुग्मान्नितरामवमत्वात् । डोलायते चञ्चलं सदितस्ततो भ्रमति । विविधेषूपमानस्थानेषु चरित्वा निरस्तभ्रमम् ॥ २८ ॥

क्रमात् तनिष्ठे[1] रुचिरे सुवृत्ते जङ्घे जगन्मङ्गलकीर्त्तनस्य ।
परस्परेणोपमिते कवीन्द्रैर्व्यक्तं त्रिलोक्यामुपमामलब्ध्वा[2] ॥ २९ ॥

(भा.दी.) क्रमादिति । क्रमोऽनुक्रमस्तस्मात् तनिष्ठे ऊर्ध्वभागमारभ्याऽधोऽधः सूक्ष्मभूते, रुचिरे मनोहरे, सुवृत्ते सम्यगनुवर्तुळे, जगतः मङ्गलं यस्मात् तज्जगन्मङ्गलम्, तादृशं कीर्तनं नाम यस्य स तथा, तस्य श्रीरामस्य जङ्घे, कवीन्द्रैः वाल्मीकिप्रभृतिभिः त्रिलोक्यां उपमां व्यक्तं यथा भवति तथा अलब्ध्वा, परस्परमन्योन्यं तेन उपमिते उपमानोपमेयभावतया वर्णिते ॥ २९ ॥

(सं.चं.) अत इदानीं वृथोपमानान्वेषणभ्रमं विहाय 'परस्परेणोपमिते' इत्याह । न केवलं स्वेन । सर्वैरपि कवीन्द्रैः । प्रथमं तनु, ततस्तनीयः, ततस्तनिष्ठमितिक्रमात् ॥ २९ ॥

भासा नखा लज्जितबन्धुजीवा एवं च नो लज्जितबन्धुजीवाः ।
पुनर्न्नवत्वं दधुरीक्षकाणामनादिपुंसो न पुनर्न्नवत्वम् ॥ ३० ॥

---

१. 'क्रमात् कनिष्ठे' २. '–मुपमा न लब्धा'

(भा.दी.) भासेति । नखाः भासा कान्त्या लज्जितानि लज्जायुक्ततया कृतानि बन्धुजीवानि बन्धुजीवकाख्यान्यतिरक्तनि पुष्पाणि यैस्तैस्तथोक्ताः । 'बन्धूकं बन्धुजीवं स्यात्[1] पुन्नागः सुरपर्णिका' इति हलः । 'बन्धूकपुष्पसदृशाधरपाणिपादम्' इति प्रयोगश्च । एवं च एवमपि, उक्तरीत्या लज्जितबन्धुजीवत्वेऽपीत्यर्थः, लज्जिताः लज्जायुक्ताः बन्धवो बन्धुभूताः भक्त्यादिमन्तो जीवाः सज्जीवाः येषां नखानां ते तथोक्ताः नो । स्वभावतस्तेषां लज्जितबन्धुजीवत्वेऽपि तद्गुणलोलाः श्रीरामबन्धवः सज्जनाः तत्र भक्त्यादिकमेव कुर्वन्ति । न पुनस्ततः पराङ्मुखाः कदाऽपि भवन्तीत्यर्थः । तादृशाः नखाः ईक्षकाणां जनानां पुनःपुनः नवो नूतनः पुनर्नवस्तस्य भावस्तत्त्वं तत्, नखानामत्याश्चर्यत्वात् क्षणेक्षणेऽपि अन्याकारा इवेत्यादिना प्रकारेण पुनःपुनः अभिनवत्वं दधुः चक्रुः । धात्रो लिट् । अनादिपुंसः अनादिपुरुषस्य श्रीरामस्य पुनर्नवत्वं न दधुः । तस्य सर्वदाऽप्येवंविधस्वभावत्वादनन्ताश्चर्यसमूहनिकरपात्रत्वाद् तस्य नित्यदाऽप्येकप्रकारत्वात् पुनर्नवत्वं क्षणेक्षणे नूतनतयोत्पन्नभिन्ननवप्रकारवत्त्वं नेत्यर्थः ॥ ३० ॥

(सं.चं.) शोणभासा । बन्धुजीवः '**ಕಿಸ್ಗಾಠ**' इति भाषायाम् । 'अथ रक्तकः । बन्धूको बन्धुजीवश्च' यादवप्रकाशः । एवमपि बन्धुजीवाः न ततो लज्जया पराङ्मुखा बभूवुः । वीक्षकाणां प्रतिक्षणं पुनःपुनर्नवत्वं दधुः । 'दिनेदिने यन्नवतामुपैति तदेव रूपं रमणीयतायाः' इति हि वदन्ति । न पुनर्भगवतः । तस्यानादितः शश्वदेकप्रकारत्वात् । विरोधाभासोऽयम् ॥ ३० ॥

बालो रविर्लोलगुणः [2]सुगन्धिर्नो पद्मरागः परितामि पद्मम् ।
विहाय सर्वानिति रागलक्ष्मीरियाय[3] रामाङ्घ्रिमदोषलेशम् ॥ ३१ ॥

(भा.दी.) बाल इति । बालः रविः लोलाः चञ्चला गुणा यस्य स तथोक्तः, उदितः सन्नेव (तथा) न तिष्ठति यतस्ततश्चञ्चलभूतरागादिगुण इत्यर्थः । पद्मरागः पद्मरागमणिः लोलगुणः चञ्चलरक्तिमाख्यगुणो न भवति, तथाऽपि सु शोभनो गन्धो यस्य स सुगन्धो[4] न भवति । 'गन्धस्येदुत्पूतिसुसुरभिभ्यः' (अ.सू.५.४.१३५) इति समासान्तप्रत्ययः । पद्मं सुगन्धि भवति । तथाऽपि परितामः परिग्लानिरस्यस्तीति परितामि । तमु ग्लनाविति धातुः । इति अनेनाभिप्रायेण रागलक्ष्मीः रागलक्षणा कान्तिः, रक्तिमाख्यो गुण

---

१. **'बन्धूकं बन्धुजीवं स्यात्'** इति पर्याप्तम् । **'पुन्नागः सुरपर्णिका'** इति पुष्पान्तरम् ।

२. **'सुगन्धे नो पद्म–'** । **'सुगन्धिः शोभनगन्धवान्'** इति वि.भू. ।

३. **'रागलक्ष्मीरवाप'**

४. उत्तरवाक्यानुसारेण **'सुगन्धिः न भवति'** इति साधुः पाठः । तदनुगुणतया **'सुगन्धिर्नो पद्मरागः'** इत्येव मूलपाठष्टीकासम्मत इति ज्ञायते ।

इत्यर्थः, सर्वान् बालसूर्यपद्मरागपद्मादीन् विहाय, न विद्यते दोषस्य लोलगुणत्वादिदोषस्य लेशो यस्य स तथा तं श्रीरामाङ्घ्रिं इयाय प्राप । इण् गतौ लिट् ॥ ३१ ॥

(सं.चं.) रागलक्ष्मीः शोणिमा सर्वान् विहाय रामाङ्घ्रिमियाय नित्यं सिषेवे । कुतः? तस्यादोषत्वात् । अन्येषामाश्रितशोणिम्नां सदोषत्वात् । तथाहि बालरविः, उद्यन् शोणो दृश्यते । अथाप्युद्गच्छन्न शोणो भवतीति चपलस्वभावता तस्य दोषः । लोला गुणा अस्येति । अथ पद्मरागः शोणः, अलोलगुणश्च । तथाऽपि तस्मिन् न सौगन्ध्यसौकुमार्यादयो गुणा इतीतरगुणासामानाधिकरण्यं दोषः । शोभनो गन्धोऽस्येति सुगन्धिः । 'सुगन्धः' इति क्वचित् पाठः । तदा समासान्तविधेः प्रायिकत्वात् 'गन्धस्येदुत्पूतिसुसुरभिभ्यः' (अ.सू.५.४.१३५) इति नेकारादेशः । अन्यत्राप्येवमेव प्रायुङ्क्त–'ववृषुरखिलदृश्यं पुष्पवारं सुगन्धम्' । अथ पद्मं शोणम्, न लोलगुणम्, नापि न सुगन्धम् । अथापि परिताम्यति ग्लायतीति ग्लानता तस्य दोषः । भगवांस्तु सर्वथाऽप्य-दोषगन्ध इति । 'सुरक्तपादपल्लवः' (९.८६) इति निर्णये । तत्र स्वित्यस्य विवरणरूपमिदं पद्यम् ॥३१॥

रत्नाङ्गुलीयाङ्गदनूपुरादितद्भूषणानामपि भूषणानि [१] ।
अङ्गानि तस्याखिलभूषणानि स्वयं प्रभुत्वात् सुखचिन्मयानि ॥ ३२ ॥

(भा.दी.) **रत्ने**ति । रत्नमयानि यान्यङ्गुल्याभरणानि तानि च, अङ्गदे च नूपुरे च तानि आदयो येषां तानि तथोक्तानि, यानि तस्य भूषणानि तेषामपि भूषणानि आभरणभूतानि । अखिलानि भूषणानि येषु तानि तथोक्तानि, तस्य श्रीरामस्य अङ्गानि हस्तपादाद्यवयवाः, स्वयं प्रभुत्वात् श्रीरामात्मकत्वेन स्वतन्त्रत्वात् सुखं च चिच्च तयोः स्वरूपाणि सुखचिन्मयानि ॥ ३२ ॥

(सं.चं.) रत्नखचितमङ्गुलीयम् । अङ्गदे केयूरे । **'ತೋಳುಬಂದಿ'** इति भाषायाम् । 'केयूरमङ्गदं भूषा दोर्मूले' इति यादवप्रकाशः । नूपुरे मञ्जीरे । **'ಕಾಲುಗೆಜ್ಜೆ'** इति भाषायाम् । एवमादीनां भूषणानामपि भूषणानि भगव-दङ्गानि । आभरणस्याभरणानि । अथाप्यखिलभूषणवन्ति । नाऽत्मानं भूषयितुम् । किन्तु भूषणानि भूषयितुं तानि स्वयमङ्गे दधारेति । 'उदारबाहुभूषणः शुभाङ्गदः सकङ्कणः । महाङ्गुलीयभूषितः सुरक्तसत्कराम्बुजः (९.८३) इति च । बाहुभूषणं भुजकीर्तिः ॥ ३२ ॥

इमाननन्तस्य गुणाननन्ताननन्तबोधा विधिशर्वपूर्वाः ।
अंशांशतो वक्तुमहो न शक्ताः कथं पुनर्म्मादृशमानवाः [२] स्युः ॥ ३३ ॥

---

१. **'–नूपुरादिविभूषणाना–'** २. **'–मानसाः स्युः'**

(भा.दी.) एतावता समस्तावयवादिवर्णनं सम्पूर्णं किमित्यतो न केनापि तेषां साकल्येन वर्णनं कर्तुं शक्यं किं पुनर्मयेत्याह– **इमानि**ति । अनन्तो बोधो ज्ञानं येषां ते तथा, विधिश्च शर्वश्च तौ पूर्वौ येषां ते तथा, अनन्तस्य महागुणस्य, 'महागुणत्वाद् यमनन्तमाहुः' इत्युक्तेः, श्रीरामस्य अनन्तान् अपरिमितान् (इमान्) गुणान् अंशानामंशः अंशांशतस्मादिति ततः, लेशतोऽपीत्यर्थः, वक्तुं शक्ताः समर्थाः न भवन्ति । अहो आश्चर्यम् । मादृशाः मत्सदृशाः ये मानवाः मनुष्यास्ते मद्बुद्धिसमबुद्धयः पुरुषा इत्यर्थः, कथं पुनः शक्ताः स्युः? न कथमपीत्यर्थः ॥ ३३ ॥

(सं.चं.) अनन्तं भगवन्तं बोधन्तीत्यनन्तबोधाः । भगवत्तत्ववेदिनः विधिशर्वपूर्वा अपि अंशांशतोऽपि वक्तुं न शक्ताः । वयं के? ॥ ३३ ॥

सीता सिताभे मणिहेमदण्डे द्वे चामरे चारुतरे धुनाना ।
श्रीर्ह्रीरिति द्वित्ववती परेशपार्श्वद्वये सर्वजनैरवैक्षि ॥ ३४ ॥

(भा.दी.) सीतेति । सिता धवळा आभा कान्तिर्ययोस्ते तथोक्ते, हेममयौ दण्डौ हेमदण्डौ मणिखचितौ हेमदण्डौ ययोस्ते तथोक्ते, चारुतरे द्वे चामरे धुनाना वीजयन्ती, श्रीरिति नाम्ना ह्रीरिति नाम्ना च द्वित्वमस्या अस्तीति द्वित्ववती, द्विरूपवतीत्यर्थः, वस्तुतस्तु एकरूपैवेत्यर्थः, सीता, सर्वे ये जनास्तैः, (परेशस्य) पार्श्वयोर्द्वयं तस्मिन् अवैक्षि परिदृष्टाऽभूत् । सुराणकान् तमः प्रापयितुं लोकदृष्ट्या वियुक्ततया स्थिता तदानीं सर्वैरपि श्रीरामसमीपे प्रत्यक्षतया दृष्टेति भावः ॥ ३४ ॥

(सं.चं.) सीता सिताभे इतीन्द्रवज्रा । मणिहेममयौ दण्डौ ययोः । धुनाना चालयन्ती । 'रामस्य दक्षिणे पार्श्वे सपद्मा श्रीरुपाश्रिता । सव्ये तु ह्रीर्महादेवी' (१०९.६) इति रामायणे । एकत्वसमानाधिकरणद्वित्ववती । 'सीता सैवाखिलाक्ष्णां विषयमुपगता श्रीरिति ह्रीरथैका । द्वेधा भूता दधार व्यजनमुभयतः पूर्णचन्द्रांशुगौरम्' (९.८९) इति निर्णये ॥ ३४ ॥

तारुण्यलावण्यविलासलक्ष्मीरनाद्यनन्ताऽनुपमाऽनवद्या ।
रामस्य पत्न्या ननु रामकान्त्या प्रतर्क्यतां वेदनिवेदिताऽपि ॥ ३५ ॥

(भा.दी.) तारुण्येति । न विद्यते आदिर्यस्याः सा अनादिः, सा च सा अनन्ता च, उत्पत्तिनाशरहितेत्यर्थः, न विद्यते अवद्यं दुःखस्पृष्टत्वादिदोषो यस्याः सा तथोक्ता, श्रीरामस्य पत्न्याः सीतायाः, तारुण्यं

यौवनं तच्च, लावण्यमवयवसौन्दर्यं तच्च, विलासो विभ्रमः स च, तेषां लक्ष्मीः श्रीः, तारुण्यलावण्यविलासादिगुणसम्पत्तिरित्यर्थः, न विद्यते उपमा यस्याः सा तथाऽपि, वेदैर्निवेदिताऽपि ज्ञापिताऽपि, वेदप्रतिपादिताऽपीत्यर्थः, रामकान्त्या ध्रुवं निश्चितं यथा भवति तथा प्रतर्क्यतां ऊह्यताम्। तर्क ऊहायां लोट्। अन्यस्य तत्सदृशवस्तुनोऽभावात् श्रीरामस्य कान्तिः तारुण्यादियुक्ता च अनाद्यनन्तकालीना च अनवद्या च अनुपमा च वेदोदिता च भवति यतस्तस्मात् तत्समानतया सीताकान्त्यास्तर्को युक्त इत्यर्थः। सीतारामनिष्ठसौन्दर्यादिगुणानां परस्परमेवोपमानोपमेयभावतया नान्यत् किञ्चिदुपमानस्थलमिति भावः ॥ ३५ ॥

(सं.चं.) तारुण्यलावण्याभ्यां यो विलासो हावविशेषस्तस्य लक्ष्मीः शोभा। तारण्यस्य लावण्यस्य विलासस्य च लक्ष्मीरिति वा। रामस्य पत्न्याः सीताया विलासलक्ष्मीः अनाद्यनन्ता अनुपमा अनवद्या चेति वेदनिवेदिताऽपि रामकान्त्या दृष्टान्तभूतया प्रतर्क्यताम्, तर्केणापि निश्चीयताम्। युक्तं वेदनिवेदितं सीताङ्गलक्ष्म्या अनुपमत्वं रामस्य कान्तिवदिति। सीताऽनुपमदेहकान्तिः। रामकान्तिसदृशकान्तिमत्त्वादिति। चित्रमिदं यद् रामकान्त्युपमत्वेनैवानुपमत्वं बोध्यत इति। सीतारामयोर्देहकान्त्योस्तदितरोपमानराहित्यं पदार्थ इत्यविरोधः ॥ ३५ ॥

बिन्दूनमन्दान् विकिरत् सुधाया हारानिवाऽराद् ध्रुवमाप्तभूत्यै।
भूम्नः सितच्छत्रमधत्त चित्रं [१]श्रीमान् हनूमान् हसितेन्दुबिम्बम् ॥ ३६ ॥

(भा.दी.) **बिन्दूनि**ति। श्रीमान् हनूमान्, आप्तानां शरणागतानां भक्तानां भूतिरैश्वर्यं तस्यै, ऐश्वर्यादिप्राप्तय इत्यर्थः, हारानिव, सुधाया अमृतस्य अमन्दान् बहून् बिन्दून् आरात् समीपे ध्रुवमव्यवधानं यथा भवति तथा विकिरत् प्रस्रवत्, हसितः अपहसितः इन्दुबिम्बश्चन्द्रमण्डलं येन तत्तथोक्तम्, चन्द्रमण्डलादप्यधिककान्तियुक्तमित्यर्थः, चित्रं भूम्नः पूर्णगुणस्य श्रीरामस्य सितं श्वेतं यच्छत्रं तत् अधत्त ॥ ३६ ॥

(सं.चं.) बिन्दूनमन्दानिति चेन्द्रवज्रा। अमन्दान् निरन्तरान् सुधाया बिन्दून् हारानिवाऽप्तानां भगवद्भक्तानां भूत्यै सम्पदे, भगवन्महिमानुसन्धानेनाऽत्मोन्नत्यै, विकिरत्, ततः धावल्येन च हसितेन्दुबिम्बं भूम्नो रामस्य श्वेतच्छत्रम्। 'दध्रे च्छत्रं हनूमान् स्रवदमृतमयं पूर्णचन्द्रायुताभम्' (९.८९) इति निर्णये ॥ ३६ ॥

चक्रं विधूताखिलदुष्टचक्रं चक्रात्मकोऽसौ भरतो दधानः।
भ्राजत्सहस्रांशुसहस्रतेजस्तस्यानुजो दक्षिणतो जगाम ॥ ३७ ॥

---

१. 'चित्रं धीमान्'

(भा.दी.) चक्रमिति । विधूतं निरस्तं अखिला ये दुष्टास्तेषां चक्रं समूहो येन तत्तथोक्तं चक्रं दधानः, चक्रमात्मा स्वरूपं यस्य स तथोक्तः, चक्राभिमानीत्यर्थः, भ्राजन्तो ये सहस्रांशवः सूर्यास्तेषां यत्सहस्रं तद्वत्तेजो यस्य स तथोक्तः,[१] तस्य श्रीरामस्य अनुजः भरतः दक्षिणतः दक्षिणपार्श्वतः जगाम ॥ ३७ ॥

(सं.चं.) चक्रमिति पुनरिन्द्रवज्रा । भ्राजत्सहस्रांशुसहस्रतेजश्चक्रम् । तस्य रामस्यानुजो भरतः ॥ ३७ ॥

स्वयं स्वनन्तं[२] श्वसनावपूरैश्चन्द्रच्छविं हासमिवातिरम्यम्[३] ।
शङ्खं दधच्छङ्खतनुः स्वयं च शत्रुघ्न आयात् प्रभुसव्यभागे ॥ ३८ ॥

(भा.दी.) स्वयमिति । श्वसनस्य वायोः ये अवपूराः अवपूरणानि, तैः स्वयमेव स्वनन्तं ध्वनिं कुर्वन्तम्, चन्द्रस्य च्छविरिव च्छविः कान्तिर्यस्य स तथा तम्, हांसमिव हंसनिवहमिव अतिरम्यम् । अतिदिव्यमिति क्वचित् पाठः । शङ्खं दधत् दधानः, स्वयं शङ्खः तनुः शरीरं यस्य स तथोक्तः, शङ्खाभिमानीत्यर्थः, शत्रुघ्नः प्रभोः श्रीरामस्य सव्यो भागस्तस्मिन् आयात् जगाम ॥ ३८ ॥

(सं.चं.) मुखवायुपूरणेन विना स्वयमेव श्वसनस्य वायोरवपूरणेन स्वनन्तं ध्वनन्तम् । चन्द्रच्छविम् । चन्द्रमिति कुमुदकुसुममुच्यते । कुमुदमिव सितम् । चन्द्र इति कर्पूर उच्यते । कर्पूरगौरम् । चन्द्र इति चन्द्रमा उच्यते । तद्वच्छोभमानम् । अत एव हासमिवातिरम्यम् । हासो धवळ इति कविसमयः । स्वयं शङ्खतनुः शङ्खमानी । 'साक्षाच्चक्रतनुस्तथैव भरतश्चक्रं दधद् दक्षिणेनाऽयात् सव्यत एव शङ्खतनुभृच्छङ्खात्मकः शत्रुहा' (९.९०) इति निर्णये ॥ ३८ ॥

तस्याग्रतो ब्रह्मशिवादिदेवास्तत्सेवनार्थं प्रययुः स्वभूत्या[४] ।
ओङ्कारपूर्वा अपि सर्ववेदास्तं कीर्त्तयन्तो निजमूर्त्तिमन्तः[५] ॥ ३९ ॥

(भा.दी.) तस्येति । ब्रह्मशिवादिदेवाः स्वभूत्या स्वेषां भूत्या हंसवाहनत्वादिवैभवेन सह, नतु रूपान्तरेणे-त्यर्थः, तस्य श्रीरामस्य यत्सेवनं तस्मा इति तदर्थम्, तस्य श्रीरामस्य अग्रतः अग्रभागे प्रययुः । ओङ्कारः

---

१. एतत्पक्षे भरतविशेषणमिदम् । **'–सहस्रतेजास्तस्यानुजो–'** इति च मूलपाठः । सर्वथाऽस्वरसमिदं लिपिकृत्प्रमादफलमिति भाति । अत एव क्वचित्–**'तद्वत् तेजो यस्य तत् तथोक्तम्'** इति पठ्यते । तदा त्विदं वाक्यम्, **'चक्रं समूहो येन तत् तथोक्तम्'** इत्यतः परं पठनीयम् ।

२. **'स्वनन्तस्वना–'** । **'स्वनन्तस्वसनावपूरैः'**, **'अनन्तस्य नारायणस्य शोभनमुखवायुपूरैः'** इति वि.भू. । अनन्वितमिवेदं व्याख्यानम् ।

३. **'हंसमिवातिरम्यम्'** इति वि.ती.पाठः । **'हंसमिवातिदिव्यम्'** इति क्वचित् । **'हासमिवातिव्यिम्'** इति च ।

४. **'प्रययुः प्रभूत्या'**

५. **'निजकीर्त्तिमन्तम्'** इति, **'निजकीर्तिमन्तः'** इति च ।

पूर्वो येषां ते तथोक्ताः सर्ववेदा अपि, निजा या मूर्तिः सा एषामस्तीति तथोक्तास्तथा सन्तः, तं श्रीरामं कीर्तयन्तः संस्तुवन्तः सन्तः अग्रतः प्रययुः ॥ ३९ ॥

(सं.चं.) तस्याग्रत इति पुनरिन्द्रवज्रा । स्वभूत्या आयुधवाहनादिसम्पदा सह । निजमूर्तिमन्तः दिव्यरूपधरा ओङ्कारपूर्वाः सर्ववेदाभिमानिनश्च । 'अग्रे ब्रह्मपुरोगमाः सुरगणा वेदाश्च सोङ्कारकाः' (९.९०) इति निर्णये । रामायणे च–'वेदा ब्राह्मणरूपेण गायत्री सर्वरक्षिणी । ओङ्कारोऽथ वषट्कारः सर्वे राममनुव्रताः' (१०९.८) इति ॥ ३९ ॥

खगा मृगाद्याश्च पिपीलिकाद्या नगास्तृणाद्याश्च चराचरा ये[१] ।
लोकाः स्वलोकाभिमुखं मुकुन्दं पश्चान्महाकारुणिकं प्रजग्मुः ॥ ४० ॥

(भा.दी.) खगा इति । खगाः पक्षिणः, मृगा आद्याः येषां ते तथोक्तास्ते च, पिपीलिकाः आद्याः येषां ते तथोक्तास्ते च, (नगाः वृक्षाश्च, तृणाद्याश्च),पराश्च अवराश्च ये लोकाः जनाश्च, स्वस्य यो लोकस्तं प्रति अभिमुखम्, महान् यः कारुणिकः करुणाशीलस्तम्, मुकुन्दं मोक्षप्रदं श्रीरामं पश्चात् पृष्ठभागे प्रजग्मुः ॥ ४० ॥

(सं.चं.) मृगाद्या ग्राम्यारण्याः पशवः । पिपीलिकाकीटशलभाद्याः क्षुद्रजन्तवः । नगा द्रुमाः । तृणगुल्मलताः त्वक्साराश्च । एवं चराचराः सर्वलोकाः । स्वलोकस्याभिमुखं मुकुन्दं पश्चात् पृष्ठतः प्रजग्मुः । मुखमभिगतोऽभिमुखः । 'अत्यातयः क्रान्त्याद्यर्थे द्वितीयया' (२.२.१८) इति वार्तिकेन द्वितीयातत्पुरुषः । 'पश्चात् सर्वजगज्जगाम रघुपं यान्तं निजं धाम तम्' (९.९०) इति, 'जगाम धाम चाऽत्मनस्तृणादिना सहैव सः । खगा मृगास्तृणादयः पिपीलिकाश्च गर्दभाः । तदाऽऽसुरुत्तमा यतो नृवानरास्तु किम्पुनः' (९.७२–३) इति च निर्णये । रामायणे च–'यानि पश्यन्ति काकुत्स्थं स्थावराणि चराणि च । सर्वाणि रामगमने अनुजग्मुर्हि तान्यपि' (१०९.२१) इति ॥ ४० ॥

ते वानरास्तं रविसूनुपूर्वाः सर्वे नरा अप्यतिशुद्धभावाः ।
गायन्त उच्चैश्चरितानि भूम्नो रामस्य पार्श्वद्वितये स्म यान्ति ॥ ४१ ॥

(भा.दी.) त इति । रविसूनुः पूर्वो येषां ते तथा ते वानराः, अतिशुद्धो भावो भक्तिर्येषां ते तथा, सर्वे नरा अपि, भूम्नः पूर्णगुणस्य श्रीरामस्य चरितानि चरित्राणि उच्चैः सम्यक् गायन्तः सन्तः, पार्श्वयोर्द्वितयं द्वयं तस्मिन् यान्ति स्म ययुः ॥ ४१ ॥

---

१. **'–द्याश्च परावरा ये'** इति वि.ती. पाठः ।

(सं.चं.) ते वानरा इति चेन्द्रवज्रा । सुग्रीवपूर्वा वानराः । अतिशुद्धो भाव आशयो येषाम् । मनसि रजस्त-मोमूलकालुष्यरहिताः । पार्श्वद्वितये दक्षिणपार्श्वे वानराः सव्ये नराः । 'तस्य सूर्यसुतपूर्ववानराः दक्षिणेन मनुजास्तु सव्यतः । रामजन्मचरितानि तस्य ते कीर्तयन्त उच्चकैर्द्रुतं ययुः' (९.९१) इति निर्णये ॥४१॥

गान्धर्वसारानवर्त्तयन्तो[1] गन्धर्वविद्याधरचारणाद्याः ।
महामुनीन्द्रा अपि कोसलेन्द्रं वेदैः स्तुवन्तः परितोऽन्वगच्छन् ॥ ४२ ॥

(भा.दी.) गान्धर्वेति । गन्धर्वाश्च विद्याधराश्च चारणाश्च ते आद्या येषां देवयोनीनां ते तथोक्ताः, गान्धर्वेषु गानेषु सारान् श्रेष्ठान्, यद्वा गान्धर्वस्य गन्धर्वशास्त्रस्य सारान् प्रतिपाद्यान् अर्थभूतान् गान्धर्वशास्त्रप्रतिपादि-तान् गीतनर्तनादिकानित्यर्थः, अनुवर्तयन्तः सन्तः, 'सारो बले स्थिरेंऽशेऽर्थे पुमान् न्याये वरे त्रिषु' इति रत्नमाला, महामुनीन्द्राः नारदादयोऽपि, कोसलेन्द्रं कोसलविषयाणामिन्द्रं श्रीरामम्, वेदैः स्तुवन्तः सन्तः परितः अन्वगच्छन् । गम्लृधातोर्लङ् ॥ ४२ ॥

(सं.चं.) दैवं गानं गान्धर्वमुच्यते । नृत्यं च । गानेषु नृत्येषु च ये साराः श्रेष्ठाः प्रकाराः,ताननुवर्तयन्तः क्रियासमभिहारेण दर्शयन्तः गन्धर्वाद्याः । वेदैः स्तुवन्तो महामुनीन्द्रा नारदाद्याः । 'गन्धर्वैर्गीयमानो विबुध-मुनिगणैरब्जसम्भूतपूर्वैर्वेदोदारार्थवाग्भिः प्रणिहितसुमनः सर्वदा स्तूयमानः' (९.९२) इति च ॥ ४२ ॥

प्राणः स्वयम्भूर्गरुडादयोऽस्य गुणान् वदन्तस्त्रिदिवादुपेत्य[2] ।
द्रष्टुं तमीशं जगतो मुमुक्षोर्ज्ञानप्रदीपानुददीपयन्त ॥ ४३ ॥

(भा.दी.) प्राण इति । प्राणः मुख्यवायुः, स्वयम्भूश्चतुर्मुखः, गरुड आदिर्येषां ते तथोक्ताः देवाः, ईशं तं श्रीरामं द्रष्टुम्, त्रिदिवः स्वर्गलोकादिस्तस्मात्, सत्यलोकादिस्वस्वलोकादित्यर्थः, उपेत्य अस्य श्रीरामस्य गुणान् वदन्तः वर्णयन्तः सन्तः, मुमुक्षोः मोक्षेच्छोः,'तृतीयादिषु भाषितपुंस्कं पुंवद् गालवस्य' (अ.सू. ७.१.७४) इति पुंवद्भावः, जगतः लोकस्य ज्ञानप्रदीपान् ज्ञानलक्षणप्रदीपान् उददीपयन्त उपदेशादिना उत्पादितवन्तः । दीपी दीप्तौ लङ् ॥ ४३ ॥

(सं.चं.) स्वलोकं जिगमिषन्तं तमीशं द्रष्टुं त्रिदिवादुपेत्य । तस्य गुणान् वदन्तः तच्छृण्वतः मुमुक्षोर्जनस्य ज्ञानप्रदीपानुददीपयन्त ब्रह्माद्याः । 'प्रायाच्छेषगरुत्मदादिकनिजैः संसेवितः स्वं पदम्' (९.९३) इति, 'ब्रह्म-रुद्रगरुडैः सशेषकैः प्रोच्यमानसुगुणोरुविस्तरः' (९.९३) इति च निर्णये ॥ ४३ ॥

---

१. '–ननुवर्णयन्तो–' २. 'वदन्तस्त्रिदशा उपेत्य'

सद्भक्तिसिद्धाञ्जनतेजिताभिः सज्ज्ञानदृग्भिः प्रभुमीक्षमाणाः ।
चराचराः प्राणभृतः प्रमोदमभूतपूर्वं प्रययुः प्रभूतम् ॥ ४४ ॥

(भा.दी.) सदिति । चराचराः प्राणभृतः प्राणिनः, सती या भक्तिः सैव सिद्धाञ्जनमञ्जनविशेषस्तेन तेजिताभिः निशिताभिः, निर्मलाभिः, पुष्टाभिरित्यर्थः, समीचानानि यानि ज्ञानानि तान्येव दृशस्ताभिः, प्रभुं श्रीरामं ईक्षमाणाः सन्तः, पूर्वमभूतोऽभूतपूर्वस्तम्, पूर्वमनुत्पन्नमित्यर्थः, प्रभूतं समृद्धम्, बहुलमित्यर्थः, प्रमोदं प्रययुः ॥ ४४ ॥

(सं.चं.) सद्भक्तिरेव मन्त्रसिद्धमञ्जनम् । तेन तेजिताभिर्धौताभिः । 'धौते निशातं निशितं क्ष्णुतं तेजित-मर्थवत्' इति यादवप्रकाशः । उत्तेजिताभिर्वा । ज्ञानदृष्टिभिः । नतु चर्मचक्षुर्भ्याम् । 'दिव्यं ददामि ते चक्षुः' इति हि भगवानुवाच । 'सर्वैर्भूतैश्च भक्त्या स्वनिमिषनयनैः कौतुकाद् वीक्ष्यमाणः' (९.९२) इति निर्णये ॥ ४४ ॥

अनन्त एवं विभवैरनन्तैः स योजनं सार्द्धमितो जगाम ।
रामाज्ञया तत्र मनोरमायां सस्नुः सरय्वां सकलाश्च लोकाः ॥ ४५ ॥

(भा.दी.) अनन्त इति । अनन्तः सः श्रीरामः, अनन्तैः अपरिमितैः, एवम्भूतैः विभवाः वैभवानि तैः सहितः सन्, अर्धेन सहितं सार्धं तत् योजनं इतः अयोध्यायाः जगाम । सकलाः सर्वे लोकाः जनाश्च, मनोरमायां मनोहरायां तत्र सरय्वां रामाज्ञया सस्नुः स्नानं चक्रुः । ष्णा शौचे लिट् ॥ ४५ ॥

(सं.चं.) अनन्त एवम् । 'अध्यर्धयोजनं गत्वा नदीं पश्चान्मुखाश्रिताम् । सरयूं पुण्यसलिलां ददर्श रघुनन्दनः' (११०.१) इति रामायणे ॥ ४५ ॥

प्राप्ता दिवस्तत्र विमानकोटीर्म्मणिप्रवेकैर्ल्लसमानकोटीः ।
प्रजा अपश्यंश्चलचामराणां वृन्दं वधूनामिह चामराणाम् ॥ ४६ ॥

(भा.दी.) प्राप्ता इति । मणिषु प्रवेकाः श्रेष्ठास्तैः, लसमानाः शोभमानाः कोटयो अग्रभागा यासां तास्तथोक्ताः, दिवः वैकुण्ठसत्यलोकादिलोकात् तत्र सरय्वां तटे प्राप्ताः आगताः विमानकोटीः, इह विमानकोटीषु चलन्ति चामराणि यासां तास्तथोक्तास्तासाम्, चामरोपेतहस्तानामित्यर्थः, वधूनां स्त्रीणां वृन्दम्, अमराणां देवानां वृन्दं समूहस्तच्च प्रजाः अपश्यन् ॥ ४६ ॥

(सं.चं.) दिवः प्राप्ता विमानकोटीः प्रजा अपश्यन् । कीदृशीः? मणिश्रेष्ठैर्लसदग्रभागाः । लसदाश्रयो वा । 'कोटिस्त्वश्रौ प्रकर्षेऽग्रे' इति यादवप्रकाशः । इह विमानकोटीषु चलचामराणाममरवधूनां वृन्दं चापश्यन् । वधूरिति वनितासामान्यवचनम् । अमराणां वृन्दं चापश्यन्, पादान्त्ययमकम् ॥ ४६ ॥

अथाऽरुरोहाम्बरमम्बुजाक्षः सदा चिदानन्दतनुः[१] ससीतः ।
सद्योऽतिदिव्याकृतयः समस्ताश्चराचरास्ते च विमानभाजः ॥ ४७ ॥

(भा.दी.) अथेति । सदा सर्वदा चिच्च आनन्दश्च तौ तनुः शरीरं यस्य स तथोक्तः, ससीतः सीतासहितः, अम्बुजवदक्षिणी यस्य स तथा श्रीरामः, अम्बरं व्योम तत् आरुरोह । रुहतेर्लिट् । चराचराः स्थावरजङ्गमात्मकाः समस्ताः, ते श्रीरामेण सह गताः श्रीरामभक्ताश्च, (अति)दिव्या आकृतयो देहा येषां ते तथा सन्तः, सद्यः सपदि विमानानि भजन्तीति विमानभाजस्तथा सन्तः, विमानारूढाः सन्त इत्यर्थः, अम्बरमारुरुहुरित्यन्वयः ॥ ४७ ॥

(सं.चं.) तेन सहाऽगतास्ते चराचराश्च दिव्यदेहाः सन्तो विमानभाजो बभूवुः । 'आरुरोह विभुरम्बरं शनैस्ते च दिव्यवपुषोऽभवंस्तदा' (९.९३) इति निर्णये ॥ ४७ ॥

बद्धाञ्जलिर्म्मूर्द्धनि राजितश्रीरामाय रामाय मनोरमाय ।
ब्रह्माऽथ वृन्दारकवृन्दजुष्टं तुष्टाव[२] तुष्टावधिकं निमग्नः ॥ ४८ ॥

(भा.दी.) बद्धेति । अथ श्रीरिति प्रसिद्धा रामा स्त्री श्रीरामा राजिता शोभिता श्रीरामा यस्य स तथा तस्मै, सीतासहितायेत्यर्थः, यद्वा राजिता या श्रीस्तां रमयतीति राजितश्रीरामस्तस्मै, मनोरमाय मनोहराय, श्रीरामाय मूर्धा शिरस्तस्मिन् बद्धः अञ्जलिर्येन स तथा ब्रह्मा, वृन्दारकाणां देवानां यद् वृन्दं तेन जुष्टं सेवितं श्रीरामम्, तुष्टौ सन्तोषे अधिकं यथा भवति तथा निमग्नः सन् तुष्टाव स्तुतवान् । ष्टुञ् स्तुतौ लिट् ॥ ४८ ॥

(सं.चं.) बद्धाञ्जलिरितीन्द्रवज्रा । पार्श्वे विराजिता श्रीरिति ख्याता रामा रमणी यस्य तस्मै रामाय बद्धाञ्जलिर्ब्रह्मा तुष्टाव रामम् । अधिकं सदा तुष्टौ निमग्नः । 'रामाय रामाय' इति 'तुष्टाव तुष्टाव' इति द्वितीये तुरीये च पादादियमकम् ॥ ४८ ॥

---

१. **'–जाक्षस्तदा चिदानन्दवपुः'**

२. **'–वृन्दयुक्तस्तुष्टाव'** । **'रामाय तुष्टाव राममस्तुवत्'** । **'क्रियाग्रहणमपि कर्तव्यम्' (वार्तिकम्–१.४.३२) इति चतुर्थी'** इति का.श्री. ।

रामाज्ञया विश्वगुरुर्विरिञ्चः स वैष्णवीमेव गतिं दिदेश ।
स्वानन्दसन्तानवतीमनन्तां ताभ्यः प्रजाभ्यो विभयां विशोकाम्[१] ॥ ४९ ॥

(भा.दी.) रामेति । विश्वगुरुः सर्वजगद्गुरुः सः विरिञ्चः, रामाज्ञया ताभ्यः श्रीरामेण सहाऽगताभ्यः प्रजाभ्यः, स्वरूपभूता आनन्दा स्वानन्दाः, शोभनानन्दा इति वा, तेषां सन्तानः परम्परा साऽस्यास्तीति तथोक्ता ताम्, अनन्तां नाशरहिताम्, विगतं भयं यस्याः सा तथा ताम्, विगतः शोको यस्याः सा तथा तां विशोकाम्, वैष्णवीं विष्णुसम्बन्धिनीमेव गतिं दिदेश श्रीरामाज्ञया प्रददौ ॥ ४९ ॥

(सं.चं.) स्वानन्दसन्तानवतीम् । अत एव नाम्ना सान्तानिकीम् । 'पिपीलिकातृणान्तानां ददौ लोकाननुत्तमान् । वैष्णवान् सन्ततत्वाच्च नाम्ना सान्तानिकान् विभुः' (९.१०६) इति निर्णये । 'लोकान् सान्तानिकान् नाम यास्यन्तीमे समागताः' (११०.१८) इति रामायणे ॥ ४९ ॥

येये पुरस्तादवतारमापुरंशैरवन्यां कपिमर्त्त्ययोन्याम् ।
देवोपदेवा निजमूलरूपं विहाय देहं विविशुर्विशुद्धाः ॥ ५० ॥

(भा.दी.) य इति । येये देवाः सूर्यादयस्ते च उपदेवाः गन्धर्वादयस्ते च, अंशैः अवन्यां भुवि, कपयश्च मर्त्याश्च तेषां योन्याम्, पुरस्तात् पूर्वं अवतारः उत्पत्तिस्तं प्रापुः, ते सर्वेऽपि देहो वानरादिशरीरम्, तं विहाय सरयूनद्यां परित्यज्य, विशुद्धाः सन्तः निजं यन्मूलरूपं तत् विविशुः ॥ ५० ॥

(सं.चं.) भौमं देहं विहाय विशुद्धरूपा देवोपदेवाः प्रायो निजमूलरूपं विविशुः । 'ये तु देवा इहोद्भूता नृवानरशरीरिणः । ते सर्वे स्वांशितामापुस्तन्मैन्दविविदावृते' (९.१०८) इति निर्णये । वक्ष्यमाणानङ्गदं जाम्बवन्तं विभीषणं चर्ते । अनुदिता अप्रधाना अङ्गदप्रजाश्च । 'वानराश्च स्वकां योनिमृक्षाश्चैव तथा ययुः । येभ्यो विनिःसृताः सर्वे सुरेभ्यः सुरसम्भवाः । तेषु प्रविविशे चैव सुग्रीवः सूर्यमण्डलम् । पश्यतां सर्वदेवानां स्वान् पितॄन् प्रतिपेदिरे' (११०.२०–२) इति रामायणे ॥ ५० ॥

विशेषमात्रेण विनैव भेदं पृथक् पुरस्तादपृथक् ततोऽभूत् ।
अनन्तशय्येन पयोब्धिमद्ध्ये स्वमूलरूपेण स रामदेवः ॥ ५१ ॥

(भा.दी.) विशेषेति । सः रामदेवः, पुरस्तात् पूर्वम्, भेदः स्वरूपादिभेदस्तं विनैव वर्जयित्वैव, केवलं विशेषः विशेषमात्रं तेन, भेदप्रतिनिधिना विशेषाख्यशक्त्यतिशयमात्रेणेत्यर्थः, पृथक् भिन्न इव दृष्टः, ततः

१. 'विशङ्काम्'

स्वलोकगमनानन्तरम्, पयोब्धेर्मध्यं तस्मिन् स्थितेन, अनन्तः शेषः शय्या यस्य तत्तथोक्तं तेन, स्वस्य श्रीरामस्य यन्मूलरूपं श्रीनारायणाख्यं तेन अपृथगभिन्नः सर्वात्मना एकीभूतः अभूदित्यन्वयः ॥ ५१ ॥

(सं.चं.) विशेषमात्रेणेत्युपेन्द्रवज्रा । विनैव भेदं पुरस्तात् पृथगभूत् । ततोऽपृथगभूत् । सर्वमिदं भेदप्रति-निधिना विशेषमात्रेण । भेदहीनेऽपि भेदव्यवहारहेतुर्हि विशेषः ॥ ५१ ॥

सर्वसद्गुणगणैरपि भूम्नः फुल्लतामरसदृंशि सदृंशि ।
रामनामवपुषः खलु विष्णोर्भान्ति सद्विभवपुंषि वपूंषि[1] ॥ ५२ ॥

इति श्रीनारायणपण्डिताचार्य्यविरचिते रामाङ्के
सङ्ग्रहरामायण उत्तरकाण्डे सप्तमः सर्ग्गः ॥

—०—

(भा.दी.) **सर्वे**ति । फुल्लानि विकसितानि यानि तामरसानि पद्मानि तानीव विद्यमाना दृशो दृष्टयो येषां तानि तथोक्तानि, अतिविकसितपद्मसमनेत्राणीत्यर्थः, सर्वे ये सन्तो गुणास्तेषां गणाः समूहास्तैः सदृंशि समानानि । सर्वत्र देशे सर्वदाऽपि काले सर्वगुणगणैश्च सर्वाण्यपि रूपाणि समानान्येव । न हि नीचोत्तमत्वादियुक्तानीत्यर्थः । सन्तो निर्दोषा ये विभवाः आनन्दैश्वर्यशौर्यादयस्तान् पुष्णन्ति पुष्टिं कुर्वन्तीति तथोक्तानि, सदाऽप्यनन्तनानाविधपरमविभवसमूहैः परिपूर्णानीत्यर्थः, राम इति नाम यस्य तत्तथोक्तं तादृशं वपुः यस्य स तथोक्तः तस्य, भूम्नः परिपूर्णगुणस्य विष्णोः, वपूंषि रूपाणि, अनन्तावताररूपाणीत्यर्थः, भान्ति खलु शोभन्ते खलु । भा दीप्तौ लिट् ॥ ५२ ॥

इति श्रीविश्वपतितीर्थकृतायां सङ्ग्रहरामायणव्याख्यायां भावार्थदीपिकायामुत्तरकाण्डे सप्तमः सर्गः ॥

—०—

सं.चं.) स्वागतेन च्छन्दसा सर्गमुपसंहरति– सर्वेति । रामनामकं वपुरवताररूपं यस्य, भूम्नः पूर्णस्य विष्णोः सर्वगुणैरपि सदृंशि समानानि फुल्लारविन्दसमचक्षुष्मन्ति सतां ज्ञानिनां विभवं समृद्धिं पुष्णन्ति तादृशानि वपूंषि अनन्तानि रूपाणि लोके ज्ञानिनामन्तरङ्गे च भान्ति खलु ॥ ५२ ॥

इत्याचार्यगोविन्दस्य कृतिषु सङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायामुत्तरकाण्डे सप्तमसर्गविवरणम् ॥

—०—

[आदितः श्लोकाः– ३३७४+५२=३४२६]

---

१. **'अत्र बहुप्रमाणानि वक्तुं शक्यन्ते । तथाऽपि बालजनमनःसमाधानाय प्रवृत्तत्वादुपरम्यतेऽस्माभिः'** इति वि.भू. ।

अष्टमः सर्ग्गः

अनुग्रहात्र्थं [1]पवमानसूनो रूपान्तरेणाथ सदाऽन्तरेण[2] ।
उवास रामो [3]रमणीयकीर्त्तिर्भूमण्डले किम्पुरुषाख्यखण्डे ॥ १ ॥

(भा.दी.) श्रीरामेण हनुमत्यनुग्रहपारवश्येन भूमावपि केनचिद्रूपेणापरोक्षतयाऽवस्थितमित्याह– **अनुग्रहार्थ-मिति** । अथ रमणीया अतिमनोहरा कीर्तिर्यस्य स तथोक्तः श्रीरामः, भुवो मण्डलं प्रदेशस्तस्मिन्, तत्रापि किंपुरुष इति आख्या यस्य स तथोक्तः स चासौ खण्डश्च तस्मिन्, पवमानसूनोः हनुमतः अनुग्रहार्थम्, सतामुत्तमानामान्तरं प्रियं तेन, रूपान्तरेण स्वरूपविशेषेण, अन्येन रूपेणेति वा, उवास ॥ १ ॥

(सं.चं.) प्रायेणोपजातिबद्धोऽयं सर्गः । सदा आन्तरेण अन्तर्दृश्यमानेन, तथा बहिर्गतेनापि रूपान्तरेण अनुग्रहार्थम् । भूमण्डलेऽप्युवास । कुत्र? किम्पुरुषाख्यखण्डे ॥ १ ॥

रामप्रसादाय स शास्ति राज्यं प्राणात्मजः किम्पुरुषाख्यवर्षे[4] ।
रामं सदा तत्र निरीक्षमाणः कीर्त्तिं प्रभोर्ग्गायति गानदक्षः ॥ २ ॥

(भा.दी.) **रामे**ति । प्राणात्मजः मुख्यप्राणपुत्रः सः हनुमान्, रामस्य प्रसादोऽनुग्रहस्तस्मै, श्रीरामानुग्रहं स्वस्मिन् पूर्णमपि, मत्प्रीत्यर्थं किम्पुरुषे कल्पान्तं राज्यपालनं कुरु' इत्याज्ञाकरणेन पुनः पूर्णतया प्राप्तुमि-त्यर्थः, किम्पुरुष इति आख्या यस्य तत्तथोक्तं तच्च तद्वर्षं च तत्, 'वर्षोऽस्त्री भारताद्यब्दवृष्टिषु प्रावृषि स्त्रियः' इति वैजयन्ती, राज्यं शास्ति पालयति । शासु अनुशिष्टौ लट् । तत्र किम्पुरुषे श्रीरामं सदा निरीक्षमाणः सन् गानदक्षः गानचतुरः हनुमान् प्रभोः कीर्तिं गायति । गा गाने लट् ॥ २ ॥

---

१. **'पवनस्य सूनो–'** २. **'सदान्तरेण, सतामुत्तमानामान्तरेणाऽन्तर्विद्यमानेन, सतां प्रियेणेति यावत्'** इति का.श्री. ।
३. **'रमणीयकान्तिर्भू–'** ४. **'–षाख्यखण्डे'**

(सं.चं.) रामप्रसादायेत्यादीनि त्रीणि पद्यानीन्द्रवज्राबद्धानि । किम्पुरुषेषु राज्यं कुर्विति रामाज्ञापालनेन तत्प्रसादाय । 'रामाज्ञया किम्पुरुषेषु राज्यं चकार रूपेण तथाऽपरेण' (९.१२१) इति निर्णये ॥ २ ॥

वन्दामहे सुन्दरमिन्दिरेशं नारायणं विश्वपरायणं त्वाम् ।
विष्णुं च विश्वस्थितिदं विजिष्णुं पाताळपादं पुरुषं द्युमौळिम्[१] ॥ ३ ॥

(भा.दी.) गानप्रकारमेव दर्शयति– **वन्दामह** इति । वयं सुन्दरं इन्दिरेशम्, विश्वस्य समस्तजगतः परायणं परमाश्रयम्, 'विश्वो हिरण्यगर्भः' इति श्रुतेर्विश्वस्य मुख्यप्राणस्य परायणमिति वा, 'परायणमभिप्रेते तत्परे परमाश्रये' इति वैजयन्ती । [२]नारायणमिन्दिरापतित्वादिना नारायणं नारायणाख्यं मूलरूपिणं त्वां वन्दामहे । वदि अभिवादनस्तुत्योः लट् । विश्वस्य समस्तस्य स्थितिः पालनं तां ददाति तथोक्तस्तम्, विजिष्णुं समस्तशत्रुविजयशीलम्, विष्णुं च विष्णुनाम्नाऽवतीर्णं च त्वां वन्दामहे । 'पुनश्च माया त्रिविधा बभूव सत्वादिरूपैरथ वासुदेवात् । सत्वात्मिकायां स बभूव तस्मात् स विष्णुनामैव निरन्तरोऽपि' इत्युक्तेः । पाताळं पदयोर्यस्य तथा तम्, पाताळाधारभूतपादमित्यर्थः, यद्वा पाताळं पादौ यस्य स तथा तम्, 'ब्राह्मणोऽस्य मुखमासीत्' इतिवत् पाताळलोकजनकपादवन्तमित्यर्थः, द्यौः सत्यलोको मौळौ यस्य स तथा तम्, सत्यलोकाधारशिरोयुक्तमित्यर्थः, यद्वा पूर्ववत् सत्यलोकजनकशिरोयुक्तमिति वा, अथवा पाताळे पादौ यस्येति वा, पाताळव्यापिपादमित्यर्थः, दिवि सत्यलोके मौलिर्यस्येति वा, सत्यलोकव्यापिमूर्धानमिति वाऽर्थः । समस्तमपि ब्रह्माण्डमण्डलं तत्तदवयवैर्व्याप्य तद्रक्षणार्थं तत्प्रेरणार्थं च तिष्ठन्तमित्यर्थः । 'पाताळमेतस्य हि पादमूलं पठन्ति पार्ष्णिप्रपदे रसातळम्' इत्यादिभागवतोक्तेः । पुरुषं विराट्पुरुषनाकं त्वां वन्दामहे ॥ ३ ॥

(सं.चं.) नारायणाख्यं मूलरूपं विष्ण्वाख्यं पुरुषाख्यमवतारद्वयं च स्तौति– वन्दामहे । विश्वस्थितिदम् । सृष्ट्यर्थं ब्रह्माणमाविवेश । संहारार्थं रुद्रम् । स्थित्यर्थं स्वयं विष्णुनामाऽऽविर्बभूव । लोकसिसृक्षया पुरुषरूपं जग्राह । 'पातळमेतस्य हि पादमूलम्–' (२.१.२६) इति, 'उरःस्थळं ज्योतिरनीकमस्य ग्रीवा महर्वदनं वै जनोऽस्य । तपो रराटिं विदुरादिपुंसः सत्यं तु शीर्षाणि सहस्रशीर्ष्णः' (२.१.२८) इति च भागवते । 'शीर्ष्णो द्यौः समवर्तत पद्भ्यां भूमिः' इति पौरुषे सूक्ते ॥ ३ ॥

---

१. **'पाताळपादं पाताळलोकजनकपादवन्तम् । पुरुषं विराट्पुरुषनामकं पूर्णषड्गुणम् । द्युमौलिम्, द्यौरिति सत्यलोक उच्यते, सत्यलोकजनकशिरोयुक्तमित्यर्थः । तथा च श्रुतिः–'दिवो मूर्धानमरतिं पृथिव्या वैश्वानरमृत आजातमग्निम्' इति । दिवो मूर्धानं सत्यलोकजनकमूर्धानमित्यर्थः । पृथिव्या अरतिं पृथिव्युपलक्षितपाताळजनकपादवन्तमित्यर्थः'** इति वि.भू. ।

२. **'नराश्रयत्वेन्दिरापतित्वादिना'** इति पाठः स्यात् ।

त्वां वासुदेवं निजमुक्तिबीजं सङ्कर्षणं संहरणप्रवीणम् ।
प्रद्युम्नमस्य प्रभवप्रभावं वन्देऽनिरुद्धं सकलैकपालम् ॥ ४ ॥

(भा.दी.) **त्वामिति** । निजानामात्मीयानाम्, स्वभक्तानामित्यर्थः, या मुक्तिस्तस्याः बीजं कारणभूतम्, नियमनाद्यर्थं सर्वप्राणिष्वन्तर्यामितया तिष्ठतीति वा[१], सचति सृष्टिकाले सर्वजगदुत्पादयतीति सुः, दीव्यतीति देवः वासुश्चासौ देवश्चेत्यादिप्रवृत्तिनिमित्तैर्वासुदेवस्तं वासुदेवनाम्नाऽवतीर्णं त्वाम् (वन्दे) 'वानात् सूतेर्देवनात् वासुदेवो वासाद् द्युतेश्छादनात् क्रीडनाच्च । बलादसुत्वात् दातृतो वर्तनाच्च तं वासुदेवं प्रवदन्ति देवाः' इति । संहरणे संहारे प्रवीणं चतुरम्, सर्वजगत्संहारकर्तारमित्यर्थः, सङ्कर्षणं त्वां वन्दे । अस्य लोकस्य प्रभवे जननविषये प्रभावः सामर्थ्यं यस्य स तथा तम्, सर्वजगत्सर्ज्जनकर्तारमित्यर्थः, प्रद्युम्नं त्वां वन्दे । सकलं जगदेकतो मुख्यतः पालयतीति तथा तम्, सर्वजगत्स्थितिकर्तारमित्यर्थः, अनिरुद्धं त्वां वन्दे ॥ ४ ॥

(सं.चं.) अथ वासुदेवादिचतुर्मूर्त्तीराह । अस्य जगतः प्रभवे सृष्टौ प्रभावः सामर्थ्यमस्य ॥ ४ ॥

गुरुं विधेर्विश्वगुरुं कुमारं महीवहं त्वां च महावराहम् ।
[२]सम्पादकं सात्वतमैतरेयं नारायणं[३] धर्म्मभवं च वन्दे ॥ ५ ॥

(भा.दी.) **गुरुमिति** । विधिश्चतुर्मुखस्तस्य गुरुं साक्षात्तत्त्वोपदेष्टारम्, विश्वगुरुं सर्वगुरुम्, कुमारं कुमार-नाम्नाऽवतीर्णं वन्दे । 'विष्णोः सनत्कुमाराख्याच्छुश्रुवुर्ज्ञानमुत्तमम् । सनत्कुमारप्रमुखा योगम्' इत्युक्तेः । महीं भुवं वहतीति धरतीति महीवहस्तम्, हिरण्यकेन[४] भुवि नीतायां सत्यां तं हत्वा भुवं स्वस्थानं प्रत्यानीतवन्त-मित्यर्थः, महांश्चासौ वराहश्च तं त्वां वन्दे । सात्वतं सात्वताख्यशास्त्रं तत् सम्पादयति करोतीति सम्पादकस्तम्, सात्वताख्यसंहिताविशेषं कृतवन्तमित्यर्थः, इतारायाः इतरादेव्या अपत्यं पुमानैतरेयस्तं महिदासाख्यं त्वां वन्दे । 'महिदासाभिधो जज्ञे इतरायास्तपोबलात् । साक्षात् स भगवान् विष्णुर्यस्तन्त्रं वैष्णवं व्यधात्' इत्युक्तेः । धर्मात् धर्मप्रजेश्वराद् भवतीति धर्मभवस्तम्, यमस्य रूपविशेषात् धर्माख्यात् मूर्तिनाम्न्यां तद्भार्याया-मवतीर्णमित्यर्थः, नारायणं नारायणाख्यं च त्वां वन्दे ॥ ५ ॥

---

१. वासुदेवनाम्नि वाकारार्थोऽयम् ।

२. **'सम्पादकम्, सम्पादयितुं भक्ताभीष्टं कर्तुं शीलवन्तम् । सात्वतं सात्वनामकम् । ऐतरेयमितरायाः कुमारं महिदासनामकम् ।......मह उत्सव एषामस्तीति महिनो ब्रह्मादयो (दासाः) भृत्या यस्येति विग्रहः'** इति का.श्री. । एतेन **'सम्पादुकम्'** इति का.श्री. सम्मतः पाठः स्यादिति भाति । **'शीलवन्तम्'** इति व्याख्यानात् । **'लषपतपद–'**(अ.सू.३.२.१५४) इति ताच्छील्यार्थे उकञ् ।

३. **'नारायणं बदरिकाश्रमे विद्यमानम्'** इति का.श्री. । ४. **'हिरण्यकासुरेण'**

(सं.चं.) सनत्कुमारावतारमाह– गुरुं विधेः । सनकादिषु चतुर्ष्वप्येकः सनत्कुमारः पठ्यते । स विधेः सुतः । अयं तद्भिन्न इति गुरुं विधेरित्याह । ब्रह्मणोऽपि गुरुं जनकं च । विश्वस्य वायोरपि गुरुम् । विश्वस्य जगतो गुरुम् । कुमारं सनत्कुमारम् । 'स एव प्रथमं देवः कौमारं सर्गमास्थितः' (१.३.६) इति हि भागवते । 'कुमारो नाम भगवान् स्वयं स्वस्मादजायत । दिदेश ब्रह्मणे ब्रह्म ब्रह्मचर्ये स्थितो विभुः' इति तात्पर्ये ब्राह्मवचनम् । 'सनत्कुमारोऽवतु कामदेवात्' (६.८.१७) इति च । 'सनत्कुमारनामा तु ब्रह्मचर्यवपुर्हरिः । सनत्कुमारमपरं ब्रह्मपुत्रं विवेश यः' इति च तन्त्रभागवतवचनं तात्पर्ये । वराहावतारमाह– महीवहम् । 'द्वितीयं तु भवायास्य रसातळगतां महीम् । उद्धरिष्यन्नुपादत्त यज्ञेशः सौकरं वपुः' (१.३.७) इति च । महीं वहति स्वस्थानं प्रापयति उद्वहति च । स्वायम्भुवमन्वन्तरे वैवस्वतमन्वन्तरे च । ब्रह्मणो नासापुटतोऽणुः पतन् परतो महानयं भवन् स्वदंष्ट्रयोन्नीतधरो बभूव । महिदासावतारमाह– सम्पादकम् । सात्वतम् । षष्ठ्यर्थे द्वितीया । 'षट्सु द्वितीया' इति प्राचीनम् । सात्वतस्य वैष्णवतन्त्रस्य सम्पादकं प्रवर्तकम् । सम्पादयितारम् । 'अवतारस्तृतीयोऽस्य देवर्षिः प्रथितो दिवि । महिदासस्त्वैतरेयो यस्तन्त्रं नारदेऽवदत्' इति च ब्राह्मवचनं तात्पर्ये (१.३.८) । 'ऐतरेयो हरिः प्राह नारदाय स्वकां तनुम् । यत् प्रापुर्वैष्णवा नान्ये यद्दते न सुखं परम्' इति च ब्राह्मवचनम् (२.७.१९) । 'महिदासो देवऋषिः पातु मां विष्णुरव्ययः' इति च तन्त्रभागवतवचनम् (६.८.१७) । अथ धर्मतनयेषु नारायणाख्यं रूपमाह– नारायणं धर्मभवम् । 'तुर्ये धर्मकलासर्गे नरनारायणावृषी । भूत्वाऽऽत्मोपशमोपेतमकरोद् दुश्चरं तपः' (१.३.९) इति च भागवते ॥ ५ ॥

कृष्णं च धर्म्मस्य सुतं हरिं च विरिञ्चरक्षाकरनामधेयम् ।
त्वां साङ्ख्यहेतुं कपिलं च भूमन्नान्वीक्षिकीवादिनमेमि दत्तम् ॥ ६ ॥

(भा.दी.) **कृष्णं** चेति । धर्मस्य धर्मप्रजेश्वरस्य सुतं कृष्णं च कृष्णाख्यं च त्वां वन्दे । धर्मस्य धर्मप्रजेश्वरस्य सुतं विरिञ्चस्य ब्रह्मणः रक्षाकरं नामधेयं नाम यस्य स तथा तम्, ब्रह्मणि श्रीनारायणनाभिपद्मे स्थितवति प्रळयकालवायुना पद्मे कम्पिते तत्रावस्थितो ब्रह्मा हरिरित्यब्रवीत्, तदा भीतं तं रक्षितवान् हरिरिति कथा, तस्मादेवमुक्तम्, हरिं च हरिनामकं च त्वां वन्दे । यमस्य रूपविशेषाद् धर्मात् मूर्तिदेव्यां नरनारायणकृष्णहरयोऽवतीर्णा इत्यतो धर्मस्य सुतं हरिं चेत्यप्यन्वयः कर्तव्यः । हे भूमन् पूर्णगुण श्रीराम, साङ्ख्यस्य यथार्थज्ञनहेतुत्वेन साङ्ख्य(नामक)स्य शास्त्रस्य हेतुं कारणभूतम्, साङ्ख्यशास्त्रकर्तारमित्यर्थः, कर्दमप्रजेश्वराद् देवहूत्यामवतीर्णं कपिलं कपिलाख्यं च त्वां वन्दे । आन्विक्षिकीं आन्वीक्षिकीनामिकां

योगविद्यां वक्तुं शीलमस्यास्तीति तथा तम्, आन्वीक्षिक्याख्ययोगशास्त्रप्रवर्तकमित्यर्थः, दत्तं अत्रि-मुनेरनसूयायामवतीर्णं दत्तनामकं च त्वां एमि शरणं गतोऽस्मि । इण् गतौ लट् ॥ ६ ॥

(सं.चं.) धर्मतनयतया जातमवशिष्टं रूपद्वयमाह– धर्मस्य तनयं कृष्णं च हरिं च । 'नरो नारायणश्चैव हरिः कृष्णस्तथैव च । चत्वारो धर्मतनया हरिरेव त्रयो मताः । अनन्तो नरनामाऽत्र तस्मिंस्तु नरनाम-वान् । विशेषेण स्वयं विष्णुर्निवसत्यम्बुजेक्षणः' इति षाड्गुण्यवचनं तात्पर्ये (२.७.६) । विरिञ्चिरक्षाकरं हरिरिति नामधेयं यस्य । 'अन्तर्हितेन्द्रियार्थाय हरयेऽवहिताञ्जलिः । सर्वभूतमयो विश्वं ससर्जेदं स पूर्ववत्' (२.९.३८) इति भागवते । अथ कपिलावतारमाह– त्वां साङ्ख्यहेतुम् । 'पञ्चमः कपिलो नाम सिद्धेशः कालविप्लुतम् । प्रोवाचाऽसुरये साङ्ख्यं तत्वग्रामविनिर्णयम्' (१.३.१०) इति, 'जज्ञे च कर्दमगृहे द्विज देवहूत्यां स्त्रीभिः समं नवभिरात्मगतिं स्वमात्रे । ऊचे य आत्मशमलं गुणसङ्गपङ्कमस्मिन् विधूय कपिलः स्वगतिं प्रपेदे' (२.७.३) इति च । अथ दत्तावतारमाह– आन्वीक्षिकीमळर्काय प्रह्लादादिभ्य ऊचिवान्' (१.३.११) इति, 'अत्रेरपत्यमभिकाङ्क्षत आह तुष्टो दत्तो मयाऽहमिति यद् भगवान् स दत्तः' (२.७.४) इति च । आन्वीक्षिकी तत्वविद्या । वेदाद्यनुसारेण तत्वानीक्ष्यन्तेऽस्यां विद्यायामिति ॥ ६ ॥

यज्ञं महेन्द्रं मनुसूक्तवर्ण्यमसङ्गिनं[1] स्तौम्यृषभं च नाभ्यम् ।
पृथुं पृथुस्थं वरचक्रिणं च मत्स्यं मनुं गामपि गुप्तवन्तम् ॥ ७ ॥

(भा.दी.) **यज्ञम्**इति । महेन्द्रं इन्द्रपदे स्थित्वा त्रैलोक्याधिपत्यं कृतवन्तम्, 'पूर्वेन्द्रोऽसौ यज्ञनामा परेशः' इत्युक्तेः, मनुना स्वायम्भुवमनुना सूक्तैरुपनिषन्मन्त्रविशेषैः, 'ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्' [2]इत्यादिभिर्वर्ण्यं स्तुत्यम्, यज्ञं रुचिप्रजेश्वरादाकूतिदेव्यामवतीर्णं यज्ञनामकं त्वां वन्दे । नाभेरपत्यं पुमान् नाभ्यस्तं नाभ्याख्यराजर्षेर्मेरुदेव्यामवतीर्णमित्यर्थः, असङ्गिनं विरक्तम्, ऋषभं ऋषभनामकं च त्वां वन्दे । पृथौ पृथुनामकराजर्षौ तिष्ठतीति पृथुस्थस्तम्, वरं यच्चक्रं सुदर्शनं तदस्यास्तीति तथा तम्, पृथुं पृथुनामकं च त्वां वन्दे । मनुं वैवस्वतमनुं गामपि भूमिमपि, वेदरूपवाचमपीति वा, गुप्तवन्तं उपप्रळये रक्षितवन्तम्, मत्स्यं मत्स्यरूपिणं च त्वां वन्दे ॥ ७ ॥

(सं.चं.) यज्ञावतारमाह– यज्ञम् । स्वायम्भुवमन्वन्तरे लीलया धृतमहेन्द्रपदम् । स्वायम्भुवमनुदृष्टेन 'ईशावास्यमिदं सर्वम्' इत्यादिना सूक्तेन वर्णितमहिमानम् । मनुना स्वदृष्टसूक्तेन वर्ण्यमिति वा । 'ततः

---

१. '–सूक्तवन्द्यमसङ्गिनम्' २. 'इत्यादिभिर्वन्द्यं स्तुत्यम्'

सप्तम आकूत्यां रुचेर्यज्ञोऽभ्यजायत । स यामाद्यैः सुरगुणैरपात् स्वायम्भुवान्तरम्' (१.३.१२) इति, '–यज्ञः सर्वगतो हरिः । यामैः परिवृतो देवैर्हत्वाऽशासत् त्रिविष्टपम्' (८.१.१८) इति च । अथ ऋषभावतारमाह– असङ्गिनम् । 'अष्टमो मेरुदेव्यां तु नाभेर्जात उरुक्रमः । दर्शयन् वर्त्म धीराणां सर्वाश्रमनमस्कृतम्' (१.३.१३) इति, 'नाभेरसावृषभ आस सुदेविसूनुर्यो वै चचार समदृग्घृदि योग-चर्याम् । यत् पारमहंस्यमृषयः पदमामनन्ति स्वस्थः प्रशान्तकरणः परिमुक्तसङ्गः' (२.७.१०) इति च । नाभ्यं नाभितनयम् । अथ पृथुस्थितं पृथुनामकं रूपमाह– पृथुं पृथुस्थम् । 'ऋषिभिर्याचितो भेजे नवमं पार्थिवं वपुः' (१.३.१४) इति च । 'आविवेश पृथुं देवः शङ्खी चक्री चतुर्भुजः' इति पाद्मवचनं तात्पर्ये । 'पृथुर्नाम महाराजस्तत्र विष्णुः स्वयं प्रभुः । पृथुनामा चतुर्बाहुः प्रविष्टस्तेन हेतुना' इति महासंहितावचनं च (२.७.९) । अथ मत्स्यावतारमाह– मत्स्यम् । वैवस्वतमनुम् दैत्यहननेन गां वेदवाचमपि गुप्तवन्तम् । 'रूपं स जगृहे मात्स्यं चाक्षुषान्तरसम्प्लवे । नाव्यारोप्य महीमय्यामपाद् वैवस्वतं मनुम्' (१.३.१५) इति, 'मत्स्यो युगान्तरसमये मनुनोपलब्धः क्षोणीमयो निखिलजीवनिकायकेतः । विस्रंसितानुरुभये सलिले मुखान्म आदाय तत्र विजहार ह वेदमार्गान्' (२.७.१२) इति च । 'अतीते प्रळयापाये उत्थिताय च वेधसे । हत्वाऽसुरं हयग्रीवं वेदान् प्रत्याहरद्धरिः' (८.२२.२७) इति च ॥ ७ ॥

कूर्म्मं महामन्दरधारिलीलं धन्वन्तरिं त्वाममृतं दधानम् ।
वधूं सुधार्थं[१] हतदैत्यधैर्य्यां दैत्येभसिंहं च नृसिंहमेमि ॥ ८ ॥

(भा.दी.) कूर्ममिति । महान् यो मन्दरस्तं धर्तुं शीलमस्या अस्तीति मन्दरधारिणी तादृशी लीला यस्य स तथा तम्, कूर्मं कूर्मरूपिणं त्वां नमामि । अमृतममृतकलशस्तद् दधानं धन्वन्तरिं धन्वन्तरिरूपिणं त्वां वन्दे । (सुधार्थं) अमृतार्थं देवासुरैः क्षीराब्धिमथनकालेऽमृतकलशं धृत्वाऽवतीर्णस्य धन्वन्तरेः करादमृत-कलशमनयादपहृतवतो दैत्यान् वञ्चयितुं वधूं स्त्रीरूपिणम्, हृतं दैत्यधैर्यं यया सा तथा ताम्, दैत्यविमोहिनीमित्यर्थः, नारायणीरूपिणं त्वां वन्दे । दैत्या एव इभा गजास्तेषां हनने सिंह इव सिंहस्तम्, हिरण्यकशिप्वादिदैत्यहनने सिंहायितमित्यर्थः, नृसिंहं च नृसिंहरूपिणं च त्वां एमि शरणं गच्छामि । इण् गतौ लट् ॥ ८ ॥

(सं.चं.) अथ कूर्मधन्वन्तरिमोहिनीनृसिंहावतारानाह– कूर्ममित्यादिना । 'सुरासुराणामुदधिं मथ्नतां मन्द-राचलम् । दध्रे कमठरूपेण पृष्ठ एकादशं विदुः । धान्वन्तरं द्वादशमं त्रयोदशममेव च । अपाययत् सुधामन्यान्

१. 'सुरार्थम्'

मोहिन्या मोहयन् स्त्रिया । चतुर्दशं नारसिंहं बिभ्रद् दैत्येन्द्रमूर्जितम् । ददार करजैरूरावेरकान् कटकृद् यथा' (१.३.१६–१८) इति च । स्वलीलाविलासैः हतदैत्यधैर्यां वधूं मोहिनीम् । दैत्यधैर्यहरणमपि सुधार्थम् । स्त्रीरूपधारणमपि । दैत्या इभा गजा इव । तेषामयं सिंह इव । दैत्येभः हिरण्यकशिपुर्वा ॥ ८ ॥

श्रीवामनाख्यं बलिबन्धनं त्वां क्षत्रक्षयार्थं ननु भार्ग्गवं च ।
[१]वेदान्तदं व्यासमुपैमि तं त्वां रामं च रक्षःक्षपणं पतिं मे ॥ ९ ॥

(भा.दी.) श्रीवामनेति । बलिं बन्धयतीति बलिबन्धनस्तम्, त्रिपादयाच्ञालक्षणपाशेन बन्धकमित्यर्थः, यद्वा बलिदत्तत्रैलोक्यं पदद्वयेऽन्तर्भाव्य तृतीयस्य पदप्रदेशस्याप्रदातुस्तव बन्धनं न्याय्यमिति तद्भक्तिपरीक्षार्थं वरुणपाशैर्बन्धनकर्तारमिति वा, श्रीवामन इति आख्या यस्य स तथा तं च त्वां शरणं उपैमि प्राप्नोमि । इण् गतौ लट् । क्षत्राणां क्षत्त्रजातीनां क्षयः संहारस्तस्मा इति तदर्थं भार्गवं च, भृगुगोत्रे भवं श्रीपरशुरामं च शरणं उपैमि प्राप्नोमि । वेदानामन्तो निर्णयो यस्मात् तत्तथोक्तं तद्दर्शयति प्रदर्शयतीति वेदान्तदर्शस्तम्, सर्ववेदान्तादिसच्छास्त्रप्रवर्तकमित्यर्थः, वेदान्तदमिति क्वचित् पाठः, वेदान्तदर्शमिति पाठे न वा एकेनाक्षरेण च्छन्दांसि वियन्तीत्युक्तेरदोषः, व्यासं वेदव्यासरूपिणं त्वां उपैमि । रक्षांसि क्षपयति नाशयति तथा तम्, रक्षःसंहारकमित्यर्थः, मे पतिं रामं च शरणं उपैमि ॥ ९ ॥

(सं.चं.) श्रीवामनाख्यमिति पुनरिन्द्रवज्रा । अथ वामनभार्गवव्यासदाशरथ्यवतारानाह– श्रीवामनाख्यम् । बलिं बध्नातीति बलिबन्धनः । पदत्रययाच्ञामिषेण तं वचनबद्धं कृत्वा भुवनाधिपत्यं ततो हृत्वा पाताळे बबन्धेति । क्षत्रियसंहारार्थं धृतभार्गवरूपम् । क्षत्रक्षयः अर्थः प्रयोजनं यस्यावतारस्य तमिति वा । ब्रह्मसूत्राख्यं वेदार्थनिर्णायकं शास्त्रमितिहासपुराणं च ददाविति वेदान्तदः । 'पञ्चदशं वामनकं कृत्वाऽगादध्वरं बलेः । पदत्रयं याचमानः प्रत्यादित्सुस्त्रिविष्टपम् । अवतारे षोडशमे यच्छन् ब्रह्मद्रुहो नृपान् । त्रिः सप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीम् । ततः सप्तदशे जातः सत्यवत्यां पराशरात् । चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्प-मेधसः । नरदेवत्वमापन्नः सुरकार्यचिकीर्षया । समुद्रनिग्रहादीनि चक्रे वीर्याण्यतः परम्' (१.३.१९–२२) इति च । व्यासावतारो रामावतारात् पूर्वमप्यस्ति परस्तादपि । 'तृतीये सप्तमे चैव षोडशे पञ्चविंशके । अष्टाविंशे युगे कृष्णः सत्यवत्यामजायत । व्यासाचार्यस्तु पूर्वेषु चरमे स्वयमेव तु । विव्यास वेदांश्चक्रे च भारतं वेदसम्मितम्' इति स्कान्दवचनं तात्पर्ये (१.७.३६) । चतुर्विंश्यां त्रेतायां रामावतारः । ततः पूर्वं त्रिर्व्यासावतारः । पश्चाद् द्विः ॥ ९ ॥

१. **'वेदान्तदर्शम्'** इति वि.ती.पाठः । अस्वरसः पाठः ।

त्वां शुक्लकेशं बलदेवसंस्थं कृष्णं धरित्रीभरहारिलीलम् ।
नमाम्यसद्बुद्धिभिदं च बुद्धं कल्किस्वरूपं कलिकल्कशान्त्यै ॥ १० ॥

(भा.दी.) त्वामिति । बलदेवे बलभद्रे सन्तिष्ठतीति बलभद्रसंस्थस्तम्, शुक्लकेशं शुक्लकेशात्मकं त्वां नमामि । धरित्र्याः भुवो यो भारस्तं हरतीति धरित्रीभरहारिणी तल्लक्षणा लीला यस्य स तथा तम्, कृष्णं देवकीकृष्णं च त्वां नमामि । असतां दुष्टानां जिनादीनां या बुद्धिः यागादिसद्धर्माचरणबुद्धिस्तां भिनत्तीति तथोक्तस्तम्, दुष्टानां तमःप्राप्त्यर्थमसच्छास्त्रोपदेशेन तद्बुद्धिमोहकमित्यर्थः, बुद्धं च त्वां नमामि । कलिनिमित्तकं कल्कमघं तस्य शान्त्यै प्रशमनार्थम्, 'कल्को ना सिह्लके नस्त्री किट्टे डम्भेऽघपिष्टयोः' इति वैजयन्ती, कल्किरिति स्वरूपं यस्य स तथा तं च त्वां नमामि ॥ १० ॥

(सं.चं.) बलरामकृष्णबुद्धकल्क्यवतारानाह– त्वां शुक्लकेशम् । शुक्लकेशं बलदेवसंस्थं बलदेवाभिधम् । कृष्णकेशं स्वयं कृष्णम् । कलेः कल्कस्य मलस्य शान्त्यै । कलिकल्मषोपशमनाय । 'कल्कः पापाशये पापे डम्भे विट्किट्टयोरपि' इति विश्वप्रकाशः । 'एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी । रामकृष्णाविति भुवो भगवानहरद् भरम् । ततः कलौ सम्प्रवृत्ते सम्मोहाय सुरद्विषाम् । बुद्धो नाम्ना जिनसुतः कीकटेषु भविष्यति । अथासौ युगसन्ध्यायां दस्युप्रायेषु राजसु । जनिता विष्णुयशसो नाम्ना कल्की जगत्पतिः' (१.३. २३–५) इति च । 'भूमेः सुरेतरवरूथविमर्दितायाः क्लेशव्ययाय कलया सितकृष्णकेशः । जातः करिष्यति जनानुपलक्ष्यमार्गः कर्माणि चाऽत्ममहिमोपनिबन्धनानि' (२.७.२६) इति च । 'राम एको ह्यनन्तांशस्तत्र रामाभिधो हरिः । शुक्लकेशात्मकस्तिष्ठन् रमयामास वै जगत्' इति ब्राह्मवचनं तात्पर्ये (२.७.२६) ॥ १० ॥

मधुद्विषं वेदहरं[1] हयास्यं त्वां शिंशुमारं ग्रहतारकेशम् ।
धेनुं रसान् पीतवतीं परेषां वन्दे विरिञ्चादिगुरुं च हंसम् ॥ ११ ॥

(भा.दी.) मध्विति । मधुं मधुनामकदैत्यं द्वेष्टीति तथा तम्, वेदं हरति आहरतीति तथा तम्, वेदापहारिणं मधुनामकदैत्यं हत्वा चतुर्मुखार्थं वेदमानीतवन्तमित्यर्थः, हयस्य आस्यमिव आस्यं यस्य स तथा तम्, हयग्रीवस्वरूपं त्वां नमामि । ग्रहाः सूर्यादिनवग्रहास्ते च तारकाणि अश्विन्यादिनक्षत्राणि तानि च तेषामीशं स्वामिनम्, तदाश्रयमित्यर्थः, शिंशुमारं दोषाख्यवसोः सकाशात् शर्वर्याख्यायामवतीर्णं शिंशुमारस्वरूपिणं त्वां वन्दे । 'दोषस्य शर्वरीपुत्रः शिंशुमारो हरेः कला' इति भागवतोक्तेः । परेषां देवशत्रूणां त्रिपुरवासिनां रसान् त्रिपुरस्थमयनिर्मितकूपविशेषसम्पादितानमृततुल्यानौषधिरसान् पीतवतीम्, रूद्रस्य जयार्थं पानं कृतवतीम्,

१. **'वेदभृतं हयास्यम्'** इति, **'–हयाख्यम्'** इति कचित् ।

धेनुं च धेनुस्वरूपिणं च त्वां वन्दे । 'अथानुगृह्य भगवान् मा भैष्टेति सुरान् विभुः । शरं धनुषि सन्धाय पुर्यामस्त्रं व्यमुञ्चत । तेनाग्निवर्णा इषव उत्पेतुः सूर्यमण्डलात् । यथा मयूखसन्दोहा नादृश्यन्त पुरो यतः । तैः स्पृष्टा व्यसवः सर्वे निपेतुस्त्रिपुरौकसः । तानानीय महायोगी मयः कूपरसेऽक्षिपत् । सिद्धामृतरसस्पृष्टाः वज्रसारा महौजसः । उत्तस्थुर्मेघपटलाद् वैद्युता इव चाग्नयः । विलोक्य भग्नसङ्कल्पं विमनस्कं वृषध्वजम् । तदाऽयं भगवान् विष्णुस्तत्रोपायमकल्पयत् । वत्स आसीत् तदा ब्रह्मा स्वयं विष्णुरयं हि गौः । प्रविश्य त्रिपुरं काले रसकूपामृतं पपौ । तेऽसुरा ह्यपि पश्यन्तो न न्यषेधन् विमोहिताः' इति भागवते धेन्ववतारः प्रसिद्धः । विरिञ्चः आदिः कारणं येषां सनकादीनां ते तथोक्ताः, तेषां गुरुं ज्ञानोपदेष्टारम्, हंसं हंसपक्षिरूपिणं च, सनकादीनां स्वस्वरूपोपदेशार्थं हंसरूपं धृतवन्तमित्यर्थः, त्वां वन्द इत्यन्वयः । 'हंसस्वरूप्यवददच्युत आत्मयोगम्' इति भागवतोक्तेः ॥ ११ ॥

(सं.चं.) हयग्रीवशिंशुमारधेनुहंसरूपाण्याह– मधुद्विषम् । 'कृत्वा हयशिरोरूपं हत्वा तु मधुकैटभौ । ब्रह्मणे तेऽर्पिता वेदास्तेन सत्येन मोक्षय' (भ.प.७२.७७) इति हरिवंशे । शिंशुमारं ग्रहाणां ध्रुवतारकस्य चेशम् । यः समग्रस्य विश्वचक्रस्य केन्द्रनियन्ता ध्रुवनक्षत्रगतः । 'केचनैतज्ज्योतिरनीकं शिंशुमारसंस्थानस्य भगवतो वासुदेवस्य योगधारणामनुवर्णयन्ति । एतदुहैव भगवतो विष्णोः सर्वदेवतामयं रूपम्' (५.२२) इति भागवते । 'ज्ञानानन्दात्मके विष्णौ शिंशुमारवपुष्यथ । ऊर्ध्वलोकेषु संव्याप्त आदित्याद्याः समाश्रिताः' इति ब्रह्माण्डवचनं तात्पर्ये (५.२०.३७) । 'दोषस्य शर्वरीपुत्रः शिंशुमारो हरेः कला' (६.६.१४) इति च भागवते । 'कपिलो दत्तवृषभौ शिंशुमारो रुचेः सुतः' (२.२६) इति निर्णये । परेषामसुराणां मयनिर्मितसिद्धामृतरसकूपं प्रविश्य तद्गतान् सिद्धामृतरसान् पीतवतीम् । 'वत्स आसीत् तदा ब्रह्मा स्वयं विष्णुरयं हि गौः । प्रविश्य त्रिपुरं काले रसकूपामृतं पपौ' (७.११.१२) इति च भागवते । विरिञ्चादिगुरुं च हंसम् । तथाहि भागवते–'स मामचिन्तयद् देवः प्रश्नपारविनिश्चयम् । तस्याहं हंसरूपेण समीपमगमं तदा' (११. १.३.१९) इति भगवद्वचनम् । 'हंसस्वरूप्यवददच्युत आत्मयोगं दत्तः कुमार ऋषभो भगवान् पिता नः' (११.५.१७) इति द्रमिळवचनम् । 'महिदासस्तया हंसः स्त्रीरूपो हयशीर्षवान्' (२.२७) इति निर्णये ॥ ११ ॥

मरुत्वतीपुत्रमुपेन्द्रमेमि पृश्नेः सुतं त्वामपि पृश्निगर्भम् ।
त्वां दारकाङ्गं वृकदारकं च ध्रुवे कृपालुं खलु वासुदेवम् ॥ १२ ॥

(भा.दी.) मरुत्वतीति । मरुत्वतीपुत्रं मरुत्वतीदेवीसुतम्, उपेन्द्रं उपेन्द्राख्यं त्वां उपैमि । इण् गतौ लट् । पृश्नेः पृश्न्याख्यायाः सुतम्, पृश्निगर्भं पृश्निगर्भाख्यं त्वामपि एमि शरणं गतोऽस्मि । वृकं वृकासुरं दारयतीति वृकदारकस्तम्, दारकस्य बालकस्य अङ्गं वपुर्यस्य स तथा तम् । 'यस्य शिरस्यहं हस्तं स्थापयामि (स

म्रियताम्) इत्युक्त्वाऽभिधावन्तं (वृकं) दृष्ट्वा रुद्रः स्वापराधेनैव दुद्राव । क्रमेण ब्रह्मादिलोकान् गत्वा वैकुण्ठं प्रति श्रीहरिरेव मे रक्षक इत्यागतस्य रुद्रस्य पालनार्थं ब्रह्मचारिस्वरूपो भूत्वा चाटुवचसा रुद्रमनुद्रवन्तं वृकासुरं विमोह्य वृकासुरकरं वृकासुरेणैव तच्छिरसि परीक्षार्थत्वेन स्थापयित्वा वृकासुरं संहृतवन्तमित्यर्थः, त्वां वन्दे । ध्रुवे उत्तानपादपुत्रे ध्रुवाख्यबालके कृपाळुं उच्चवैष्णवपददानेन कृपाशीलम्, वासुदेवं वासुदेवाख्यम्, ध्रुववरदानार्थं वासुदेवद्वादशाक्षरप्रतिपाद्यरूपविशेषेण गतवन्तमित्यर्थः, त्वां वन्दे खलु ॥ १२ ॥

(सं.चं.) उपेन्द्रपृश्निगर्भवृकघ्नवासुदेवरूपाण्याह– मरुत्वतीपुत्रं स्वायम्भुवमन्वन्तरीयमुपेन्द्रम् । अपूर्वमिदमनुसन्धानम् । सूचितं भागवततात्पर्ये–'तत्रोपेन्द्रेण हरिणा जितो धर्मात्मजेन च' (४.५.२६) इति । पृश्नेः सुतं पृश्निगर्भम् । तथाहि भागवते देवकीं प्रति कृष्णवचनम्–'त्वमेव पूर्वसर्गेऽभूः पृश्निः स्वायम्भुवी सति । तदाऽयं सुतपा नाम प्रजापतिरकल्मषः' (१०.४.३२), 'अहं सुतो वामभवं पृश्निगर्भ इति स्मृतः' (४१) इति । दारकाङ्गम् । अङ्गं वपुः । दारकस्येवास्य वपुरिति दारकाङ्गः । तं वटुरूपधारिणम् । वृकासुरस्य विदारकं नाशकम् । तथाहि भागवते–'वृको नामासुरः पुत्रः शकुनेः पथि नारदम् । दृष्ट्वाऽशुतोषं पप्रच्छ देवेषु त्रिषु दुर्मतिः । स आह गिरिशं देवमुपधावस्व सिद्धये' (१०.९२.१४–५), 'इत्यादिष्टस्तमसुर उपाधावत् सुयन्त्रितः' (१७), 'दैवात् स वव्रे पापीयान् वरं भूतभयावहम् । यस्ययस्य करं शीर्ष्णि धास्ये स म्रियतामिति' ।(२१), 'तं तथाव्यसनं दृष्ट्वा भगवान् व्रजिनार्दनः । दूरात् प्रत्युत्थितो भूपदारको योगमायया' (२७), 'भगवानुवाच । शाकुनेय भवान् व्यक्तं श्रान्तः किं दूरमागतः' (२९), 'शुकः । एवं भगवता पृष्टो वचसाऽमृतवर्षिणा । गतक्लमोऽब्रवीत् तस्मै यथापूर्वमनुष्ठितम् । भगवानुवाच । एवं चेत् तर्हि तद् वाक्यं वयं न श्रद्दधीमहि । यो दक्षशापात् पैशाच्यं प्राप्तः प्रेतपिशाचराट् । यदि वस्तत्र विस्रम्भो दानवेन्द्र जगद्गुरौ । तर्ह्यङ्गापि स्वशिरसि हस्तन्यासः प्रदीयताम् । यद्यसत्यं वचः शम्भोः कदाचिद् दानवर्षभ । तदैनं जह्यसद्वाचं नच वक्ताऽनृतं पुनः । इत्थं भगवतश्चित्रैर्वचोभिश्च सुपेशलैः । भिन्नधीर्विस्मितः शीर्ष्णि स्वहस्तं कुमतिर्न्यधात् । अथापतद् भिन्नशिरा वज्राहत इव क्षणात् । जयशब्दो नमःशब्दः साधुशब्दोऽभवद् भुवि' (३१.६) इति । अथ ध्रुवे कृपाळुं ध्रुववरदं वासुदेवम् । तथाहि तात्पर्ये प्रकाशसंहितावचनम् (२.७.८)–'अवतारो महाविष्णोर्वासुदेव इतीरितः । यो ध्रुवाय निजं प्रादात् स्थानमन्यानधिष्ठितम्' इति ॥ १२ ॥

विभुं मुनीनामनुशिक्षितारं मृत्युं खलानामपि सत्यसेनम् ।
त्वां तापसं[1] मोचितहस्तिमल्लं वैकुण्ठमीडे निजलोकहेतुम् ॥ १३ ॥

---

१. अत्र का.श्री. किञ्चिद् बभ्रामेव । तथाहि तद्व्याख्यानम्–**'यद्यपि तापसो मनुः परमात्मा । तस्मिन् मन्वन्तरे 'वैकुण्ठादागतो हरिः गजेन्द्रं मोचितवानिति पुराणादौ ज्ञायते । तथाऽपि हरितापसयोरैक्यज्ञापनार्थम्, 'मोचितहस्तिमलं तापसम्' इत्युक्तमिति ज्ञातव्यम् । यद्वा 'तापसं**

(भा.दी.) विभुमिति । मुनीनां अनुशिक्षितारं वैष्णवधर्माद्युपदेशेन शिक्षितवन्तम्, विभुं वेदशिरसो मुनेस्तुषितायां विभुनाम्नाऽवतीर्णं त्वां वन्दे । खलानां दुष्टानां दैत्यादीनां मृत्युं मारकम्, सत्यसेनं धर्मस्य सकाशात् सूनृतायां सत्यसेननाम्नाऽवतीर्णं त्वां वन्दे । मोचितो ग्रहान्मोचितो हस्तिमल्लो गजेन्द्रो येन स तथा तम्, तापसं हरिमेधसः सकाशात् हरिण्यां तापसनाम्नाऽवतीर्णं त्वां ईडे । ईड स्तुतौ लट् । निजो यो लोको वैकुण्ठाख्यः तस्य हेतुं कारणम्, महालक्ष्मीप्रीत्यर्थं वैकुण्ठलोककर्तारमित्यर्थः, विकुण्ठस्यापत्यं वैकुण्ठस्तम्, शुभ्राख्याद् विकुण्ठायामवतीर्णमित्यर्थः, ईडे ॥ १३ ॥

(सं.चं.) द्वितीयादिपञ्चमान्तमन्वन्तरोपेन्द्रानाह । विभुं स्वारोचिषमन्वन्तरस्योपेन्द्रम् । 'स्वारोचिषो द्वितीयस्तु मनुरग्नेः सुतोऽभवत्' (८.१.१९), 'ऋषेस्तु वेदशिरसस्तुषिता नाम पत्न्यभूत् । तस्यां जज्ञे ततो देवो विभुरित्यभिविश्रुतः' (२१) इति भागवते । अष्टाशीतिसहस्राणां मुनीनाम् । 'अष्टाशीतिसहस्राणि मुनयो ये धृतव्रताः । अन्वशिक्षन् व्रतं तस्य कौमारब्रह्मचारिणः' (२२) इति च । सत्यसेनमुत्तममन्वन्तरस्योपेन्द्रम् । खलानां यक्षराक्षसानां मृत्युम् । तथाहि भागवते–'तृतीय उत्तमो नाम प्रियव्रतसुतो मनुः' (२३), 'धर्मस्य सूनृतायां तु भगवान् पुरुषोत्तमः । सत्यसेन इति ख्यातो जातो सत्यव्रतैः सह । सोऽनृतव्रतदुःशीलानसतो यक्षराक्षसान् । भूतद्रुहो भूतगणांस्त्ववधीत् सत्यजित्स्तुतः' (२५–६) इति । ग्राहहस्तात् मोचितः हस्ती नाम मल्लो येन तं तापसं तापसमन्वन्तराधिपतिम् । स एव तत्रोपेन्द्रश्च । 'चतुर्थ उत्तमभ्राता मनुर्नाम्ना च तापसः । हरिरित्याहुतो येन गजेन्द्रो मोचितो ग्रहात्' (८.१.२७) इति च । वैकुण्ठो रैवतमन्वन्तरस्योपेन्द्रः । तमीडे स्तौमि । 'पञ्चमो रैवतो नाम मनुस्तापससोदरः' (८.५.२), 'पत्नी विकुण्ठा शुभ्रस्य वैकुण्ठैः सुरसत्तमैः । तयोः स्वकलया जज्ञे वैकुण्ठो भगवान् स्वयम् । वैकुण्ठः कल्पितो येन लोको लोकनमस्कृतः । रमया प्रार्थ्यमानेन देव्या तत्प्रियकाम्यया' (४–७) इति च ॥ १३ ॥

वन्देऽजिताख्यं मथिताम्बुराशिं त्वां सार्वभौमं बलिराज्यदं च ।
गुप्ताद्भुतं त्वामृषभं च विष्वक्सेनं हितं शक्रपदस्य शम्भोः ॥ १४ ॥

(भा.दी.) वन्दे इति । मथितोऽम्बुराशिः क्षीरसमुद्रो येन स तथा तम्, वैराजाख्यात् सम्भूत्यामवतीर्णम्, अजित इति आख्या यस्य स तथा तम्,अजितनाम्नाऽवतीर्णमित्यर्थः, त्वां वन्दे । बलेर्यद्राज्यं तद्दातीति

त्वामीडे, मोचितहस्तिमलं त्वमीडे' इति प्रत्येकमन्वये तु न क्लेशः । 'स्मृत्वा हरिस्तमरणार्थिनमप्रमेयश्चक्रायुधः पतगराजभुजाधिरूढः' इति द्वितीयस्कन्धे सप्तमाध्याये हरिर्मूलरूपेण गजेन्द्रं मोचितवानित्याशङ्क्य, अवतारप्रसङ्गे मूलरूपोक्तिरनुचितेति विवक्षितार्थे आचार्यैः प्रमाणमुक्तम्– 'हरिस्तापसनामाऽसौ जातस्तपसि वै मनुः । गजेन्द्रं मोचयामास ससर्ज च जगद् विभुः' इति ।

तथोक्तस्तम्, सार्वभौमं सार्वभौमनामानं च त्वां वन्दे । गुप्तः पालितः अद्भुतः अद्भुतनामक इन्द्रो येन स तथा तं ऋषभं ऋषभाख्यं त्वां वन्दे । शक्रस्य पदं स्थानं यस्य स तथा तस्य, इन्द्रपदयोग्यस्येत्यर्थः, शम्भोः शम्भुनामकस्य कस्यचिदुत्तमाधिकारिणः हितम्, विष्वक्सेनं च विष्वक्सेनाख्यं च त्वां वन्दे ॥ १४ ॥

(सं.चं.) वन्देऽजिताख्यमितीन्द्रवज्रा । चाक्षुषसावर्णिदक्षसावर्णिब्रह्मसावर्णिमन्वन्तराणामुपेन्द्रानाह । अजिताख्यं चाक्षुषमन्वन्तरस्योपेन्द्रम् । अमृतार्थं देवैः सह मथिताम्बुराशिम् । तथाहि भागवते–'षष्ठश्च चक्षुषः पुत्रश्चाक्षुषो नाम वै मनुः' (८.५.७) 'तत्रापि देवः सम्भूत्यां वैराजस्याभवत् सुतः । अजितो नाम भगवानंशेन जगतः पतिः । पयोऽब्धिं येन निर्मथ्य सुराणां साधिता सुधा' (९–१०) इति । वर्तमानस्य वैवस्वतमन्वन्तरस्येपेन्द्रो वामनः स्तुत इत्यष्टमस्य सावर्णिमन्वन्तरस्योपेन्द्रमाह– सार्वभौमं बलिराज्यदमिति । 'अष्टमेऽन्तर आयाते सावर्णिर्भविता मनुः' (८.११२.११) 'देवगुह्यात् सहस्वत्यां सार्वभौम इति प्रभुः । स्थानं पुरन्दराद् हृत्वा बलये दास्यतीश्वरः' (१७) इति च । नवमस्य दक्षसावर्णिमन्वन्तरस्योपेन्द्रमाह– गुप्ताद्भुतम् । गुप्तः रक्षितः अद्भुतो नाम तन्मन्वन्तरेन्द्रो येन तम् । 'नवमो दक्षसावर्णिमनुर्वरुणसम्भवः' (८.१२.१८) 'आयुष्मतोऽम्बुधारायामृषभो भगवान् किल । भविता येन सन्त्रातस्त्रिलोकीं भोक्ष्यतेऽद्भुतः' (२०) इति च । दशमस्य ब्रह्मसावर्णिमन्वन्तरस्योपेन्द्रमाह– विष्वक्सेनम् । तदा शक्रपदे स्थितस्य शम्भ्वाख्यस्येन्द्रस्य । 'दशमो ब्रह्मसावर्णिरुपश्लोकसुतो महान्' (८.१२.२१) 'विष्वक्सेनो विषूच्यां तु शम्भोः सख्यं करिष्यति' (२२) इति च ॥ १४ ॥

त्वां धर्म्मसेतुं सुतमार्य्यकस्य सुधामहूतिं[१] खलु सूनृताजम् ।
योगेश्वरं बार्हतमप्युपासे गुरुं बृहद्भानुमिह क्रियाणाम् ॥ १५ ॥

(भा.दी.) त्वामिति । आर्यकस्य आर्यकनामकस्य मुनेः सुतम्, धर्मसेतुं धर्मसेतुनामकं त्वां वन्दे । सूनृतायाः जातः सूनृताजस्तम्, सूनृतादेव्यामवतीर्णमित्यर्थः, सुधामभूतिं सुधामभूतिनामकं त्वां वन्दे खलु । बृहत्याः बृहतीदेव्याः अपत्यं पुमान् बार्हतस्तम्, योगेश्वरमपि योगेश्वराख्यमपि त्वामुपासे । इह जगति क्रियाणां सत्कर्मणां गुरुं उपदेष्टारम्, कर्मप्रवर्तकमित्यर्थः, बृहद्भानुं बृहद्भान्वाख्यं त्वामुपासे ॥ १५ ॥

(सं.चं.) धर्मसावर्णिमिरुसावर्णिदेवसावर्णीन्द्रसावर्णिमन्वन्तराणामुपेन्द्रानाह । तत्रैकादशस्य धर्मसावर्णेरन्तरस्योपेन्द्रं धर्मसेतुमुपासे । 'मनुर्वै धर्मसावर्णिरेकादशम उच्यते' (८.१२.२५) 'आर्यकस्य सुतस्तत्र

१. **'सुधामभूतिम्'** इति वि.ती.पाठः । भागवताननुगुणमेतत् । **'सुधामहूतिनामकम्'** इति वदन् का.श्री. च बभ्राम ।

धर्मसेतुरिति स्मृतः। वैधृतायां हरेरंशस्त्रिलोकीं धारयिष्यति' (२७) इति च। द्वादशस्य मन्वन्तरस्योपेन्द्रमाह– सूनृतायां सुतत्वेन जातं सुधामहूतिम्। 'सुधामभूतिम्' इति पाश्चात्यः पाठः। सुधामेति हूतिराहूतिः, आख्यानमिति यावत्, यस्य सः। सुधामाख्यमिति यावत्। तथाहि भागवते–'भविता मेरुसावर्णी राजन् द्वादशमो मनुः' (८.१२.२८) 'सुधामाख्यो हरेरंशः साधयिष्यति तन्मनोः। अन्तरं सत्यसहसः सूनृतायां सुतो विभुः' (३०) इति च। 'स्वधामाख्यो हरेरंशः' इति साम्प्रतो भागवतपाठः। तदा तु 'स्वधामहूतिम्' इत्यपि स्यात्। त्रयोदशस्य मन्वन्तरस्योपेन्द्रमाह– योगेश्वरं बृहत्यास्तनयमुपास इति। 'मनुस्त्रयोदशो भाव्यो देवसावर्णिरात्मवान्' (८.१२.३१) 'देवहोत्रस्य तनय उपहर्ता दिवस्पतेः। योगेश्वरो हरेरंशो बृहत्यां सम्भविष्यति' (३३) इति च। चरममन्वन्तरस्योपेन्द्रमाह– क्रियाणां गुरुं बृहद्भानुम्। 'मनुर्वा इन्द्रसावर्णिश्चतुर्दशम इष्यते' (८.१२.३४) 'सत्रायणस्य तनयो बृहद्भानुस्तदा हरिः। विनतायां महाराज क्रियातन्तून् वितायिता' (३६) इति च॥ १५॥

वन्दे तनूस्ते [1]बडबामुखादीर्भावांश्च विश्वप्रमुखान् द्विवर्ग्गान्।
नारायणादीनपि केशवादीनात्मादिकानप्यजितादिकांश्च[2] ॥ १६ ॥

(भा.दी.) वन्द इति। बडवायाः मुखमिव मुखं यस्य स बडवामुखः स आदिर्यासां तास्तथा ताः तनूः स्वरूपाणि च वन्दे। विश्वो विश्वाख्यः प्रमुखः आदिर्येषां ते तथा तान् विश्वविष्ण्वादिसहस्रसङ्ख्याकानित्यर्थः। भावान् अवतारान् वन्दे। द्वौ स्त्रीपुरुषलक्षणौ वर्गौ समुदायौ येषां ते तथोक्तास्तान्, स्त्रीरूपत्वपुरुषरूपत्वेनावस्थितानित्यर्थः, भावांश्च वन्दे। तथाच श्रुतिः 'स्त्रियः सतीस्ताँ उ मे पुंस आहुः' इति, 'स्त्रीरूपश्चैव पुंरूपो न नपुंसकरूपवान्' इति च। नारायण आदिर्येषां ते तथा तान्, 'नारायणो नरः शौरिः' इत्यादिशतरूपिण इत्यर्थः, भावान् वन्दे। केशव आदिर्येषां ते तथा तान्, केशवादिद्वादशरूपिण इत्यर्थः, भावान् वन्दे। आत्मा आदिर्येषां ते तथा तान् 'आत्मान्तरात्मपरमात्मज्ञानात्मेति चतूरूपिण इत्यर्थः, भावान् वन्दे। अजिता आदिर्येषां ते तथा तान्, अजिताद्यनन्तरूपिण इत्यर्थः, भावान् वन्दे॥ १६॥

(सं.चं.) वन्दे तनूरिति चेन्द्रवज्रा। इदानीं गायत्रीप्रतिपाद्यानि रूपाण्याह– बडबामुखादीस्तनूर्वन्दे। बडबामुखानि त्रीणि स्त्रीरूपाणि। वाचि गायत्र्यां पृथिव्यां च। जीवशरीरे शरीरे च द्वे पुमाकारे च। एवं

१. **'बडबामुखादीः समुद्रे विद्यमानबडबाग्निनियामकबडबामुखप्रभृतीः ते तनूः'** इति का.श्री.।

२. **'अजितादिकांश्च। 'अजितं केशवं विष्णुं हरिं सत्यं जनार्दनम्। हंसं नारायणं च' इत्यादिकांश्च'** इति का.श्री.। असङ्गतमिदं विवरणम्। **'सोऽनन्तात्माऽजितादिकः'** इत्यादिवचनविरुद्धं च।

पञ्चविधो भगवान् गायत्रीनामकः । मत्स्यादिभिरवतारैः सह षड्विधः । 'गायत्रीनामको विष्णुरेवं षड्विध उच्यते' इति च्छन्दोगोपनिषदि । मत्स्यादयः पूर्वमुक्ताः । अवशिष्टाः पञ्चतनवोऽत्र निरूपिता इति भाति । समुद्रे वडवानले सन्निहितमेकं रूपं बडवामुखनामकमित्येके । बडबामुखो नाम कश्चनर्षिरास । तस्मिन् सन्निहितं च बडबामुखनामकं रूपं स्यात् । 'नारायणो लोकहितार्थं बडबामुखो नाम पुरा महर्षिर्बभूव' (शां.प.३५१.६१) इति महाभारते । एवमादीनां सर्वेषामुपसङ्ग्रहाय 'वडवामुखादीस्तनूः' इत्याह । विश्वप्रमुखान् सहस्रं भावानवतारान् । तत्र विशेषमाह– स्त्रीपुम्भेदेन द्विवर्गानिति । तत्र पुल्लिङ्गनामवाच्यानि पुंरूपाणि । स्त्रीलिङ्गपदवाच्यानि स्त्रीरूपाणि । नपुंसकपदवाच्यान्युभयरूपाणीति । नारायणादीन् अष्टोत्तरं शतं भावा-नवतारान् । केशवादींश्चतुर्विंशतिभावान् । आत्मादींश्चतुरः । आत्मा अन्तरात्मा परमात्मा ज्ञानात्मा चेति । अजितादिकाननन्तान् ॥ १६ ॥

अपान्तरप्राज्यतमःपुरोगान्[1] भावान् भजे तेऽन्यतमांश्च मान्यान् ।
वर्ण्णाभिधेयान् बृहतीसहस्रवर्ण्णोदितान् वेदमतांस्तथाऽन्यान् ॥ १७ ॥

(भा.दी.) अपान्तरेति । अपान्तरप्राज्यतमाः[2] पुरोग आदिर्येषां ते तथा तान्, मान्यान् ब्रह्मादिपूज्यान्, अन्यतमांश्च उक्तेभ्यः अन्यांश्च ते भावान् अवतारान् भजे । वर्ण्णैरेकोनपञ्चाशद्वर्ण्णैरभिधेया वाच्यास्तान् अज आनन्द इत्यादिकान् भजे । बृहतीनां बृहतीनामिकानां च्छन्दसां यत्सहस्रं तस्य ये वर्णास्तैः उदितान् प्रतिपादितान् बृहतीच्छन्दसां सहस्रस्य वर्णाः सर्वे गणिताः षट्त्रिंशत्सहस्रपरिमिता भवन्ति । (प्रत्येकं स्वर-व्यञ्जनभेदेन द्विगुणिता द्वासप्ततिसहस्रपरिमिता भवन्ति ।)तत्र प्रत्येकमेवैकैकवर्णप्रतिपाद्यो भगवान् प्रति-शरीरं द्वासप्ततिसहस्रपरिमितासु नाडीषु द्वासप्ततिसहस्ररूपः तिष्ठतीत्यादिप्रकारेण बृहतीसहस्रवर्णोदितानित्यर्थः, भजे । तथा वेदमतान् वेदेषु प्रतिपादितान् अन्यांश्च रूपविशेषान् भजे ॥ १७ ॥

(सं.चं.) अपान्तरेति । अस्फुटार्थोऽयं पादः । अविदद्भिर्लिपिकृद्भिः सृष्टेन पाठवैयाकुल्येन सर्वं सन्देहे निमग्नम् । 'अपान्तरप्राज्यतमःपुरोगान्' इति तु सम्भावितः पाठः । अयं च सम्भावितोऽर्थः–आन्तरं प्राज्यं विपुलं च यत् तमोऽज्ञानम्, तदपगतं येन सोऽपान्तरप्राज्यतमाः । तेनापान्तरतमोनामक इत्यर्थः । तथाहि

---

१. अत्र महान् पाठकोलाहलः । **'अपान्तरप्राज्ञतमपुरोगान्'** इति क्वचित् । अर्थाननुगुणं छन्दोऽननुगुणं चैतत् । **'अपान्तरप्राग्रतमापुरोगान्'** इति, **'अपान्तरप्राज्ञतमापुरोगान्'** इति, **'अपान्तरप्राज्ञतमःपुरोगान्'** इति च क्वचित् । अर्थानवगतिमूलं सर्वमिदं प्रामादिकम् । **'अपान्तरप्राज्यतमः-पुरोगान्'** इति तु सम्भावितः पाठः ।

२. **'प्राग्रतमः'** इति **'प्राज्ञतमः'** इति च कोशेषु पठ्यते । लिपिकृत्प्रमादः । तदा हि छन्दः कुप्यति ।

हरिवंशे नारदेरिते बलिकृते हरिस्तुतौ–'अपान्तरतमा नाम जातो देवस्य वै सुतः । कृताश्च येन वेदार्थास्तेन सत्येन मोक्षय' (३.७१.७९) इति । तन्नामके मुनौ स्थितं भगवद्रूपं स्यादिति भाति । पुरोगपदेन दीर्घतमआदिगतं रूपम् । तदप्युक्तं हरिवंशे–'ऋषिर्दीर्घतमा नाम जात्यन्धो गुरुशापतः । त्वत्प्रसादाच्च चक्षुष्मान्' (८१) इति । मान्यान् पूज्यान् अत्रोदितेभ्योऽन्यतमांश्च ते भावानवतारान् भजे । अकारादि-वर्णवाच्यान् अजादीन् पञ्चाशद्भावान् । क्षकारवाच्यस्य नृसिंहस्य पूर्वमुक्तत्वात् । विशेषविवक्षया पुनर्ग्रहणेऽपि न दोषः । बृहतीसहस्रवर्णोदितान् नाडीगतान् शतसंवत्सराहोरात्रगतांश्च द्वासप्ततिसहस्राणि भावान् । वेद-प्रतिपाद्यानन्यांश्च भावान् भजे । वेदाक्षरगतान् वा भावान् ॥ १७ ॥

इच्छादिशक्तीरपि [1]मोचिकादीस्तवाणिमादीर्विमलादिकाश्च ।
अजातविद्यास्वपि जातविद्यास्वाम्नातमूर्त्तीः सकला उपासे ॥ १८ ॥

(भा.दी.) इच्छादीति । इच्छाशक्तिरादिर्यासां ता इच्छादयस्तादृश्यश्च ताः शक्तयश्च ताः, इच्छाशक्तिः क्रियाशक्तिः ज्ञानशक्तिरित्यादिका भगवच्छक्तीरित्यर्थः, उपासे चिन्तयामि । मोचिका आदिर्यासां तास्तथा मोचिकादयः ताः, सूक्ष्मा सूक्ष्मामृता ज्ञानामृताऽऽप्यायिनी व्यापिनी व्योमरूपिणी अनन्ता इत्यादिकाः शक्तीरपि उपासे । हे श्रीराम, तव अणिमा आदिर्यासां तास्तथा ताश्च, अणिमा-महिमा-गरिमा-लघिमा इत्यादीश्च शक्तीः उपासे । विमला आदिर्यासां तास्तथा ताश्च, विमला उत्कर्षिणी ज्ञाना क्रिया इत्यादिकाः शक्तीः उपासे । अपौरुषेयत्वेनाजाता या विद्याः वेदविद्यास्तास्वपि, पौरुषेयत्वेन जाता या विद्याः भारत-पुराणादिविद्यास्तास्वपि, सकलाः समस्ताः आम्नाताः प्रतिपादिता या मूर्तयस्ता अपि उपासे ॥ १८ ॥

(सं.चं.) इच्छा क्रिया ज्ञानमिति तिस्रः स्वरूपशक्तीः । इच्छा ज्ञानं क्रिया बलमिति चतस्रः शक्तय इत्येके । मोचिकादीः अष्टौ शक्तीरुपासे । 'मोचिका चैव सूक्ष्मा च तथा सूक्ष्मामृताभिधा । ज्ञानामृताऽऽप्यायिनी च व्यापिनी व्योमरूपिणी । अनन्ता चेति सम्प्रोक्ता मोचिकाद्यास्तु शक्तयः' इत्युक्ता मोचिकाद्या अष्टौ शक्तयः । 'अणिमा महिमा चैव गरिमा लघिमा तथा । प्राप्तिः प्राकाश्यमीशित्वं प्राकाम्यं चेति सिद्धयः' इत्युक्ता अणिमाद्या अष्टौ शक्तयः । 'विमलोत्कर्षिणी ज्ञाना क्रिया योगा तथैव च । प्रह्वी सत्या तथेशानाऽ-नुग्रहा चेति शक्तयः' इत्युक्ता विमलाद्या नव शक्तयः । एवमेतास्तव अजातविद्यासु अपौरुषेयीषु श्रुतिषु, जातविद्यासु पौरुषेयीषु इतिहासपुराणाद्यासु, आम्नाताः क्रियासमभिहारेण प्रतिपादिताः सकला अपि मूर्ती-

१. **'मोचिकादीस्तथाऽणिमादी–'**

रुपासे । 'ब्रह्मा त्वो वदति जातविद्याम्' इति श्रुतिः । तात्पर्योदाहृते भागवततन्त्रवचने चैतत् स्फुटम् (२.९.१६) 'इच्छाद्या मोचिकाद्याश्च अणिमाद्याश्च शक्तयः । प्रदिष्टा वासुदेवाद्या दामोदरपरास्तथा । अङ्गानि विमलाद्यास्तु प्रह्व्याद्यात्मादिका मताः । एवं षोडशभिश्चैव पञ्चभिश्च हरिः स्वयम् । चतुर्भिश्च युतो नित्यं तत्स्वरूपाश्च शक्तयः' इति ॥ १८ ॥

कालेष्वनन्तेषु तताननन्तान् देशेष्वनन्तेषु च विग्रहांस्ते ।
चित्प्राकृतार्थेषु तताननन्तेष्वेतानुपासे प्रतिवस्तु [1]पाङ्क्तान् ॥ १९ ॥

(भा.दी.) कालेष्विति । न विद्यतेऽन्तो नाशो येषां ते तथा तेषु प्रवाहतो नाशरहितेष्वित्यर्थः, कालेष्वनन्तेषु, अनन्तेषु देशेष्वपि ततान् व्याप्तान्, कालतस्ततत्वं नाम नित्यत्वम्, देशेषु ततत्वं नाम व्याप्तत्वम्, ते तव अनन्तान् विग्रहान् अवतारान् उपासे । अनन्तेषु अपरिमितेषु, चितश्चेतनास्ते च, प्राकृताः प्रकृतिकार्यभूता ये अर्थास्ते च, तेषु ततान् व्याप्तान् विग्रहान् उपासे । वस्तु वस्तु प्रति प्रतिवस्तु समस्तवस्तुषु पाङ्क्तान् नारायणादिरूपैः पृथिव्यादिषु स्थितान् व्याप्तान् ते तव एतान् श्रुतिप्रसिद्धान् विग्रहान् उपासे ॥ १९ ॥

(सं.चं.) कालेष्वितीन्द्रवज्रा । कालतो देशतः स्वरूपतश्चानन्तान् ते विग्रहानवतारान् अनन्तेषु चिदचित्पदार्थेषु ततान् प्रतिवस्तु च पाङ्क्तान् नारायणादिपञ्चरूपेणावस्थितानुपासे ॥ १९ ॥

ताम्राणि शुभ्राणि च पिङ्गलानि श्यामानि नीलानि चतुर्भुजानि ।
द्व्यष्टप्रवेष्टानि[2] च ते वपूंषि महान्ति चाणूनि च चिन्तयामि[3] ॥ २० ॥

(भा.दी.) ताम्राणीति । अहं ताम्राणि रक्तवर्णानि, शुभ्राणि श्वेतवर्णानि, पिङ्गलानि कपिलवर्णानि, श्यामानि दूर्वादळश्यामानि च, नीलानि नीलमेघवर्णानि च,चत्वारो भुजा येषां तानि तथा तानि च, द्वौ च तौ अष्टौ च द्व्यष्टौ षोडशेत्यर्थः, द्व्यष्टौ प्रवेष्टा बाहवो येषां तानि तथा तानि, 'भुजबाहू प्रवेष्टो दोः' इत्यमरः, षोडशहस्तानि चेत्यर्थः, महान्ति च महत्परिमाणवन्ति च, अणूनि च अत्यणुपरिमाणवन्ति च ते वपूंषि रूपाणि चिन्तयामि । चिती सञ्ज्ञाने लट् ॥ २० ॥

(सं.चं.) श्यामानि हरिद्वर्णानि । द्व्यष्टप्रवेष्टानि । द्विभुजानि, अष्टभुजानि, षोडशभुजानि च । महान्ति चाणूनि च । महतो महीयांसि चाणोरणीयांसि च ॥ २० ॥

---

१. '–वस्तु पांस्तान्' । 'प्रतिवस्तु पान्तीति प्रतिवस्तुपान् तान् प्रसिद्धान्' इति का.श्री. ।

२. 'द्व्यष्टप्रवेष्टानि षोडशसहस्रवन्ति । प्रवेष्टो नाम सहस्रमुच्यते' (?) इति का.श्री. ।

३. 'चिन्तयामः'

न जातु जातानि न नश्वराणि न जातु दुःखीनि[१] न दोषवन्ति ।
अनन्तसौख्यादिगुणात्मकानि वीक्षे तवैतानि वपूंषि नाथ[२] ॥ २१ ॥

(भा.दी.) न जात्विति । जातु कदाचिदपि जातानि न भवन्तीति नजातुजातानि । नोत्पन्नानि परं तु प्रादुर्भूतान्येवेत्यर्थः । नश्वराणि नाशशीलानि न भवन्तीति ननश्वराणि । दुःखमेषामस्तीति दुःखीनि, जातु कदाचिदपि दुःखीनि न भवन्तीति नजातुदुःखीनि । दोषा एषामस्तीति दोषवन्ति, दोषवन्ति न भवन्तीति नदोषवन्ति । अत्र सर्वेषां नसमासत्वान्नलोपाभावः । सौख्यं सुखमेवादिर्येषां ते तथोक्ताः, ते च ते गुणाश्च, अनन्ता ये सौख्यादिगुणास्त एव आत्मा देहो येषां तानि तथोक्तानि । हे नाथ श्रीराम, तव एतानि प्रागुक्तनारायणादिवपूंषि वीक्षे विशेषतः पश्यामि । ईक्षतेर्लट् । यद्वा हे नाथ श्रीराम, तव एतानि नारायणादि-वपूंषि जातु कदाचिदपि न जातानि किन्तु प्रादुर्भूतान्येवेत्यर्थः । न नश्वराणि । जातु न दुःखीनि । जातु न दोषवन्ति । अनन्तसौख्यादिगुणात्मकानि वीक्ष इति वा योजना ॥ २१ ॥

(सं.चं.) न जातु जातानि । भिन्नानि पदानि । नसमासो वा । वीक्षे निरन्तरं पश्यामि ॥ २१ ॥

गुणाननन्तान् भगवन्ननन्तान् प्रत्येकमप्येवमपि[३] क्रियाश्च ।
एतेषु रूपेषु[४] सुभूषणेषु प्रत्येकमीक्षे भवतः प्रसादात् ॥ २२ ॥

(भा.दी.) गुणानिति । हे भगवन् श्रीराम, भवतः प्रसादोऽनुग्रहस्तस्मात् तव गुणान् अनन्तान् अपरिमितान् वीक्षे । तान् गुणान् प्रत्येकमपि अनन्तान् वीक्षे । तव क्रियाश्च एवं अनन्ताः प्रत्येकमनन्ताश्च वीक्षे । शोभनानि भूषणानि येषां तानि तथोक्तानि तेषु एतेषु प्रागुक्तनारायणादिरूपेषु च गुणान् अनन्तान् वीक्षे । तत्रापि तान् गुणानपि अनन्तान् प्रत्येकमप्यनन्तान् वीक्षे । एतेषु रूपेषु क्रियाश्च अनन्ताः वीक्षे । ताश्च पुनः प्रत्येक-मनन्ता वीक्ष इत्यन्वयः । ईक्षतेर्लट् ॥ २२ ॥

(सं.चं.) एतेषु रूपेषु प्रत्येकमेकैकस्मिन्नपि रूपे अनन्तान् गुणान् वीक्षे । तान् प्रत्येकमप्यनन्तान् वीक्षे । अनन्ता गुणाः । तेष्वेकैकोऽपि गुणोऽनन्त इत्यर्थः । अनन्तगुणात्मकश्च । एवमनन्तरूपेष्वेकैकस्मि-न्नप्यनन्ताः क्रियाः, तास्वेकैका क्रिया चानन्तेति वीक्षे । सर्वाणि च रूपाणि सुभूषणानि वीक्षे ।

---

१. **'नजातुदुःखानि'** । पाठेऽस्मिन् नसमास एव । न भिन्नपदता । **'नजातुजातानि'** इत्यादिषु सर्वत्र । वि.ती.टीकारीत्या चैवम् ।
२. **'वपूंषि चाहम्'** ३. **'–मप्येवमथ क्रियाश्च'** ४. **'रूपेषु सभूषणेषु । 'सभूषणेषु अलङ्कारसहितेषु'** इति का.श्री. ।

सेयमनन्तदर्शनशक्तिः केवलं भवतः प्रसादात् । 'मय्यनन्तगुणेऽनन्ते गुणतोऽनन्तविग्रहे' (६.४.४८) इति भागवते । 'प्रत्येकशो गुणानां तु निःसीमत्वमुदीर्यते । अनन्तत्वं च गुणतस्ते चानन्ता हि सङ्ख्यया । अतोऽनन्तगुणो विष्णुर्गुणतोऽनन्त एवच' इति तन्त्रभागवतवचनं तात्पर्ये ॥ २२ ॥

भूमानमेनं[1] तव वीक्षमाणो नांशांशदेश्यं तव किञ्चिदीक्षे ।
मग्नांस्त्वयीक्षे महदादिदेवान् महार्ण्णवाभ्यर्ण्णगतापगाभान्[2] ॥ २३ ॥

(भा.दी.) भूमानमिति । अहं तव एनं भूमानं पूर्णत्वं वीक्षमाणः सन्, किञ्चिदपि वस्तु लोके तव अंशस्य अंश एकदेशस्तेन देश्यं सदृशम्, किञ्चिन्मात्रत्वेनापि सममित्यर्थः, नेक्षे न पश्यामि । त्वमेव तव सदृशो नान्यस्त्वत्सदृशः काप्यस्तीति भावः । यद्वा अंशांशदेश्यं एते अंशाः एते अंशांशाः इत्यादिना देश्यं विभागवत्त्वं नेक्षे । तव रूपेषु अवतारेषु गुणादिषु च सर्वत्र हीनोत्तमत्वादिविशेषं न पश्यामि । किन्तु सर्वत्रापि त्वां त्वदंशादिकमपि सकलं भूमानं परिपूर्णमेव पश्यामीत्यर्थः । महत् महत्तत्त्वं आदिर्येषां तानि महदादीनि चतुर्विंशतितत्वानि तेषां देवानभिमानिनो ब्रह्मरुद्रादीन् त्वयि मग्नान् प्रविष्टान् त्वदवयवाश्रितानित्यर्थः । ब्रह्मादीन्, महान् योऽर्णवस्तस्याभ्यर्णं मध्यम्, अन्तर्भाग इत्यर्थः, तद्गताः प्रविष्टा या आपगा नद्यः, तासामाभेव आभा कान्तिर्येषां ते तथा तान् ईक्षे । नदीनां समुद्रप्रवेशे भिन्नत्वेऽपि तुच्छत्वाद् यथा नद्यादि-व्यवहारो नास्ति तथा त्वयि ब्रह्मादयोऽपि मग्नाः आभासाः सन्तः भिन्नत्वेन त्वय्येव स्थिता अप्रधानत्वान्न दृश्यन्ते । त्वमेव सर्वोत्कृष्टतया दृश्यस इत्यर्थः ॥ २३ ॥

(सं.चं.) एनं तव भूमानं पूर्णतां वीक्षमाणोऽनुभवन् तवांशस्य योंऽशः अणुतमो भागः तत्सदृशमपि किञ्चिदन्यन्न पश्यामि । ईषदसमाप्तः अंशांशः अंशाशदेश्यः । 'ईषदसमाप्तौ कल्पप्देश्यदेशीयरः' (अ.सू.५.३.६७) इति पाणिनिः । 'स्तोकेनासम्पूर्णता ईषदसमाप्तिः' इति जयादित्यः । 'कल्पदेशीयदे-श्यादिप्रख्यप्रतिनिधी अपि । सवर्णतुलितौ शब्दौ ये च न्यूनार्थवादिनः' इति दण्डी । महदाद्यभिमानिनो ब्रह्मादिदेवान् त्वयि मग्नान् निलीनान् पश्यामि । महार्णवाभ्यर्णे गतानामापगानामाभेवाऽभा येषां तान् । आपगाभिः आभा सादृश्यं येषां तानिति वा । 'आभा प्रख्योपमाऽभिख्या प्रकारः सन्निभं निभम् । निकाशाद्याश्च साम्यार्थाः समे स्युः शब्दतः पराः' इति यादवप्रकाशः । ता यथा सपदि महार्णवे मग्ना न पृथग् लक्ष्यन्ते एवं भगवन्महिमार्णवे मग्ना ब्रह्मादयोऽपीति भावः ॥ २३ ॥

---

१. **'भूमानमेवं तव'** २. **'–भ्यर्णमगापग्राभान्'**

एवंविधायाखिलशिक्षणाय रामाय चेतोनयनक्षणाय ।
स्वामिन् पदाब्जानतरक्षणाय तुभ्यं नमः शोभनलक्षणाय[१] ॥ २४ ॥

(भा.दी.) एवमिति । हे स्वामिन् श्रीराम, एवं पूर्वोक्ता विधाः प्रकारा यस्य स तथा तस्मै, अखिलान् दुष्टान् शिक्षयतीत्यखिलशिक्षणः तस्मै, अखिलदुष्टविनाशकायेत्यर्थः । यद्वा अखिलान् साङ्ख्ययोगधर्मान् शिक्षयति लोके प्रवर्तयतीति तथा तस्मै । चेतांसि च नयनानि च तेषां क्षण उत्सवभूतस्तस्मै । 'काल-विशेषोत्सवयोः क्षणः' इत्यमरः । पदाब्जयोरानता नम्रा ये पुरुषास्तान् रक्षतीति तथोक्तस्तस्मै । शोभनानि लक्षणानि अङ्गसम्पदो यस्य स तथा तस्मै श्रीरामाय तुभ्यं नमः अस्तु ॥ २४ ॥

(सं.चं.) अखिलस्य लोकस्याखिलं शिक्षयति । अथच अखिलान् शिक्षयति सतः ज्ञानानन्दादिदानेन असतोऽज्ञानदुःखादिदानेन । चेतोनयनयोः क्षणाय उत्सवाय । शोभनानि द्वात्रिंशल्लक्षणानि यस्मिन् । पादान्तयमकम् । इन्द्रवज्रा छन्दः ॥ २४ ॥

इत्थं स गायञ्छतकोटिसङ्ख्यं[२] रामायणं भारतपञ्चरात्रे ।
सब्रह्मसूत्रानपि[३] सर्ववेदान् व्याख्यांश्च[४] सद्भ्यो रमतेऽधुनाऽपि ॥ २५ ॥

(भा.दी.) इत्थमिति । सः हनुमान् इत्थं गायन् गानं कुर्वन् सन्, शतसङ्ख्या कोटयः शतकोटयः,शतकोटिपरिमितः विस्तरः यस्य तथा तत्, शतकोटिसङ्ख्यापरिमितविस्तरात्मकमित्यर्थः, रामायणं मूलरामायणम्, भारतं पञ्चरात्रं च ते, ब्रह्मसूत्रैः सहिताः सब्रह्मसूत्रास्तान्, सर्वे च ते वेदाश्च तान्, 'सद्ब्रह्मसूत्राणि' इति क्वचित् पाठः, निर्दुष्टब्रह्मसूत्राणीत्यर्थः, सद्भ्यः देवर्ष्यादिभ्यः व्याख्यांश्च व्याख्यां कुर्वंश्च, अधुनाऽपि रमते रममाणो वर्तते ॥ २५ ॥

---

१. **'शोभनलक्षणाय परममङ्गलद्वात्रिंशल्लक्षणोपेताय'** इति का.श्री. ।

२. **'शतकोटिविस्तरम्'** इति वि.ती.पाठः स्यात् । तथैव च तात्पर्यनिर्णयपाठः । अथाप्यस्येन्द्रवज्राबद्धतया छन्दःसौहित्याय **'शतकोटिसङ्ख्यम्'** इत्येव साधुः पाठः । ३. **'सद्ब्रह्मसूत्राण्यपि'**

४. **'व्याख्याय सद्भ्यो–' । 'सब्रह्मसूत्रान् ब्रह्मसूत्रसहितान् सर्ववेदानपि व्याख्याय व्याख्यानं कृत्वा अधुनाऽपि इदानीमपि क्रीडते । यद्यपि द्वापरयुगे वेदव्यासेन ब्रह्मसूत्राणि कृतानि । नतु त्रेतायाम् । तथाऽपि त्रेतायां हयग्रीवेण वेदविभागपूर्वकं ब्रह्मसूत्राणां कृतत्वात् 'सब्रह्मसूत्रानपि सर्ववेदान्' इत्येतदुक्तम् । तदुक्तं चतुर्थाध्यायबृहदारण्यकभाष्ये–'तस्माद् वेदाः समुत्पन्ना विद्याख्या मूलिका श्रुतिः । सर्वोपनिषदश्चैव पञ्चरात्राख्यसंहिता ब्रह्मसूत्राणि वेदानां व्याख्यास्तासां विस्तराः । सर्वमेतज्जगच्चैव निःसृतं तुरगाननात्' इति । अधुना कलियुगेऽपि रमत इत्युक्त्या वेदव्यासकृतब्रह्मसूत्रमादायापि 'सब्रह्मसूत्रान्' इत्युक्तमिति ज्ञायते'** इति का.श्री. ।

(सं.चं.) इत्थमितीन्द्रवज्रा । शतकोटिश्लोकं मूलरामायणं भारतपञ्चरात्रे च गायन् । पूर्वकल्पीयं भारतम् । अष्टाविंशे द्वापरे भारतप्रणयनानन्तरमेतत्कल्पीयं च भारतम् । 'मूलरामायणं चापि शतकोटिप्रविस्तरम्' इति हि स्मरन्ति । सब्रह्मसूत्रान् सर्ववेदानपि सद्भ्यो व्याख्यान् । 'इत्थं स गायञ्छतकोटिविस्तरं रामायणं भारतपञ्चरात्रम् । वेदांश्च सर्वान् सहितब्रह्मसूत्रान् व्याचक्षाणो नित्यसुखोद्धरोऽभूत्' (९.१२२) इति निर्णये ॥ २५ ॥

श्रेष्ठात्मकाच्छ्रेष्ठसुतान्निशम्य रुद्रादिदेवा मुनिपुङ्गवाश्च ।
तत्वे विशेषान् विविधान् वदन्तः स्तुवन्ति नारायणशिष्यमेनम्[1] ॥ २६ ॥

(भा.दी.) **श्रेष्ठे**ति । रुद्र आदिर्येषां ते तथा ते च ते देवाश्च ते, मुनिपुङ्गवाश्च मुनिश्रेष्ठाश्च, श्रेष्ठ आत्मा स्वरूपं यस्य स तथा तस्मात् । बहुव्रीहौ कप् । सर्वजीवप्रधानभूतादिति वा । श्रेष्ठस्य मुख्यप्राणस्य सुतात्, श्रेष्ठश्चासौ सुतश्च तस्मादिति वा, मुख्यप्राणप्रधानकुमारादित्यर्थः, हनुमतः विविधान् नानाविधान्, तत्वं परापरतत्वं तस्मिन् विषये विशेषान् रहस्यप्रमेयाणि, निशम्य विविधान् तत्वे विशेषान् वदन्तः स्वयं शिष्येभ्यः प्रतिपादयन्तः सन्तः, नारायणशिष्यं एनं हनुमन्तं स्तुवन्ति । ष्टुञ् स्तुतौ लट् ॥ २६ ॥

(सं.चं.) सर्वजीवेभ्यः श्रेष्ठ आत्मा स्वरूपमस्येति श्रेष्ठात्मकः । अथच 'प्राणो वै ज्येष्ठश्च श्रेष्ठश्च' इति श्रुतेः श्रेष्ठात्मकः मुख्यप्राणस्वरूप इत्यर्थः । स्वयमेव स्वात्मना जात इति श्रेष्ठस्य सुतश्चायम् । श्रेष्ठ एव सन् श्रेष्ठस्य सुतोऽपि बभूव । अपिच श्रेष्ठस्य प्राणस्य सुतेषु त्रिष्वयं श्रेष्ठः प्रथमो ज्येष्ठ इत्यर्थः । तस्मात् भगवत्तत्वे विविधान् विशेषान् निशम्य स्वयं च वदन्तः । नारायणस्यैव शिष्योऽयं नान्यस्य । अन्ये सर्वेऽप्यस्य शिष्याः । 'यस्तत्प्रसादाखिलांश्च वेदान् सपञ्चरात्रान् सरहस्यसङ्ग्रहान् । वेदेतिहासांश्च पुराणयुक्तान् यथावदन्या अपि सर्वविद्याः' (३२.१७१) इति 'तस्यैव शिष्यो जगदेकभर्तुः' (१७०) इति च स्वयं भगवत्पादवचनं निर्णये ॥ २६ ॥

तत्पालिते किम्पुरुषाख्यखण्डे[2] सवल्लभाः किम्पुरुषा वसन्तः ।
सोपायना नाथमुपासते तं सराघवस्यास्य गुणान् वदन्तः ॥ २७ ॥

---

१. 'नारायणशिष्यं नारायणावताररामशिष्यम्, बदरिकाश्रमस्थनारायणशिष्यमेनं हनुमन्तं स्तुवन्ति शंसन्ति । ष्टुञ् स्तुतौ लट् । नारायणशिष्यमित्यनेन हनुमान् किम्पुरुषखण्डस्थरूपापेक्षया रूपान्तरेण बदर्यां नारायणसमीपे तिष्ठतीति सूचितम् । तदुक्तं तात्पर्यनिर्णये– 'मरुत्सुतोऽथो बदरीमवाप्य नारायणस्यैव पदं सिषेवे । समस्तशास्त्रोद्धरितं हरेर्वचो मुदा तदा श्रोत्रपुटेन संस्मरन् । वदंश्च तत्वं विबुधर्षभाणां सदा मुनीनां च सुखं ह्युवास । रामाज्ञया किम्पुरुषेषु राज्यं चकार रूपेण तथाऽपरेण' इति । यद्यप्येवं प्रतिश्लोकं निर्णयसम्मतिर्वक्तुं शक्यते । तद्विवरणरूपत्वात् सङ्ग्रहस्य । तथाऽपि बुधैरूहितुं शक्यत इति ग्रन्थगौरवभयादुपरम्यते' इति का.श्री. । २. '–षाख्यवर्षे सव–'

(भा.दी.) तदिति । तेन हनुमता पालितं रक्षितं तस्मिन्, किम्पुरुषाख्यं खण्डं तस्मिन् वसन्तः, वल्लभाभिः सहिताः सभार्या इत्यर्थः, सोपायनाः उपायनद्रव्यैः सहिताः सन्तः, किम्पुरुषाः किम्पुरुषखण्डस्थपुरुषाः, सराघवस्य श्रीरामसहितस्य अस्य हनुमतः गुणान् वदन्तः सन्तः, नाथं स्वामिनं तं हनुमन्तं उपासते सेवन्ते ॥ २७ ॥

(सं.चं.) वल्लभाभिः किन्नरीभिः सहिताः । किम्पुरुषा देवयोनिविशेषाः । 'किन्नराः स्युः किम्पुरुषा मयवोऽश्वमुखाश्च ते' इति यादवप्रकाशः । उपायनपाणयः नाथं हनुमन्तमुपासते । उपायनम् '**ಉಡುಗರೆ**' इति भाषायाम् । राघवस्यास्य च गुणान् गायन्तः ॥ २७ ॥

गान्धर्वपाण्डित्यमखण्डमत्र गन्धर्ववर्य्याः प्रतिदर्शयन्तः ।
गायन्ति गेयान् पवमानसूनोः पराक्रमान् रामजयध्वजांस्तान् ॥ २८ ॥

(भा.दी.) गान्धर्वेति । अत्र हनुमत्समीपे, गन्धर्ववर्याः तुम्बुरुप्रभृतयः, अखण्डं समस्तं सम्पूर्णं च, गान्धर्वे गन्धर्वशास्त्रे पाण्डित्यं कौशलं तत्, प्रतिदर्शयन्तः सन्तः, गेयान् गानयोग्यान्, श्रीरामस्य यो जयः शत्रुविजयलक्षणः पराक्रमः स एव ध्वजः केतुभूतः श्रेष्ठतया वर्तमानो येषां हनुमत्पराक्रमाणां ते तथोक्तास्तान्, रामदूताग्रणीरयमित्यादिप्रकारेण गाने क्रियमाणे सति श्रीरामपराक्रम एव हनुमत्पराक्रमे स्पष्टीभवतीति हेतोः हनुमत्पराक्रमाः श्रीरामजयध्वजा भवन्तीत्यर्थः, रामजयध्वजान् श्रीरामजयाख्यचिह्नोपेतानिति वा, तान् प्रसिद्धान् अत्युत्तमांश्च, पवमानसूनोः वायुपुत्रस्य हनुमतः, पराक्रमान् गायन्ति गानं कुर्वन्ति ॥ २८ ॥

(सं.चं.) गान्धर्वे गानविद्यायामखण्डं पाण्डित्यम् । रामजयघोषार्थमुपर्यारोपिता ध्वजा इव । तादृशान् हनुमतः पराक्रमान् गायन्ति । 'गन्धर्वविद्यानिपुणस्य तस्य गन्धर्ववर्यैरनुगीतकीर्तेः' इति पण्डिताचार्यवचनम् ॥ २८ ॥

चक्षाणस्तच्चक्षुषा रामरूपं मन्वानस्तन्मारुतिर्म्मानसेन ।
कर्ण्णाभ्यामाकर्ण्णयन् वक्ति वाचा भूम्नः कीर्त्तिं सर्वतो योगभोगी ॥ २९ ॥

(भा.दी.) चक्षाण इति । मारुतिः मरुत्पुत्रः हनुमान्, योगस्य भोग एव भोगः परिपूर्णता साऽस्यास्तीति योगभोगी, अणिमाद्यैश्वर्यपरिपूर्ण इत्यर्थः. तत् तादृशं श्रीरामरूपं सर्वतः चक्षुषा चक्षाणः पश्यन्, मानसं मनस्तेन श्रीरामस्य रूपं तत् मन्वानः सञ्चिन्तयन्, कर्णौ श्रोत्रे ताभ्यां भूम्नः पूर्णगुणस्य श्रीरामस्य कीर्तिं

आकर्णयन् शृण्वन्, वाचा वागिन्द्रियेण भूम्नः कीर्तिं वक्ति गायतीत्यर्थः । वचधातोर्लट् । अनेन हनुमतः सर्वेन्द्रियव्यापारोऽपि श्रीरामविषय एव नान्यविषयस्तस्मात् सर्वदाऽपि सफल इति भावो द्योतितः ॥२९॥

(सं.चं.) अथ शालिन्या मालिन्या चोपसञ्जिहीर्षति । मतता गौ च शालिनी । ननमययुता मालिनी चोत्तरपद्ये । तत् तादृशमसीमसुषमं रामरूपं चक्षाणः । मानसेन तदेव मन्वानः मत्वामत्वा ध्यायन् । एवं सर्वतः सर्वेन्द्रियैः सर्वशश्च योगभोगी । भगवति मनोयोगेनैवाऽनन्दभोगवान् ॥ २९ ॥

इति पवनसुताय [१]श्रेष्ठभक्ताय रामो हसितसितगुबन्धून् प्रेमपीयूषसिन्धून् ।
[२]भुवनजननरक्षाभङ्गलीलाप्रसङ्गान् वितरति[३] कमलायै दत्तशेषानपाङ्गान्॥ ३० ॥

इति श्रीमत्त्रिविक्रमपण्डिताचार्य्यसुत-
नारायणपण्डिताचार्य्यकृतौ
रामाङ्के सङ्ग्रहरामायण उत्तरकाण्डेऽष्टमः सर्ग्गः समाप्तः ॥
इत्युत्तरकाण्डम्

—०—

(भा.दी.) इतीति । श्रीरामः इति इत्युक्तप्रकारेण श्रेष्ठश्चासौ भक्तश्च तस्मै, स्वेष्टभक्तायेति क्वचित् पाठः, स्वस्य परमेष्टभक्तायेत्यर्थः, पवनसुताय मुख्यवायुसुताय हनुमते, कमलायै महालक्ष्म्यै दत्तेभ्य अवशेषानवशिष्टान् लक्ष्म्यै दत्वादत्वाऽप्यनन्ततया विद्यमानानित्यर्थः । हसितसितगुबन्धून्, सिताः श्वेताः गावो रश्मयो यस्य स तथोक्तः, हसितमेव मन्दहास एव सितगुश्चन्द्रः, स बन्धुर्येषां ते तथोक्तास्तान्, हसिताख्यसितगोर्बन्धुभूतानिति वा, अनुग्रहातिशयात् सञ्जातमन्दहासात्मकचन्द्रकिरणाभिवर्धितानित्यर्थः । प्रेमपीयूषसिन्धून् प्रेमाख्यामृतसमुद्रान्, परमानुग्रहाख्यमहासमुद्रानित्यर्थः, वितरति करोति । तॄ प्लवनतरणयोर्लट् । भुवनजननरक्षाभङ्गलीलाप्रसङ्गान्, भुवनानां लोकानां जननं च रक्षा च भङ्गः संहारश्च तद्विषयाः या लीलाः तासां प्रसङ्गः प्रकृष्टसम्बन्धो येषां ते तथोक्तास्तान्, अपाङ्गमात्रेण सृष्ट्यादीनि कुर्वत इत्यर्थः । (कमलायै दत्तशेषान् अपाङ्गानपि वितरति) । यद्वा श्रीरामः इति श्रेष्ठभक्ताय पवनसुताय हसितसितगुबन्धून्, प्रेमपीयूषसिन्धून् प्रेमाख्याः पीयूष-सिन्धवोऽमृतसमुद्रा येषामपाङ्गानां ते तथोक्तास्तान्, प्रेमाख्यपीयूषसमुद्रसम्मिश्रितानित्यर्थः, तादृशान् भुवन-

१. **'स्वेष्टभक्ताय'** इति, **'प्रेष्ठभक्ताय'** इति च क्वचित् ।

२. **'भुवनभवनरक्षा–'** । **'भुवनानां लोकानां भवनं जन्म, रक्षा पालनम्, भङ्गः संहारः'** इति का.श्री. ।

३. **'वितरति ददाति । विपूर्वस्तरतिर्दानार्थः । 'विश्राणनं वितरणं स्पर्शनं प्रतिपादनम्' इत्यमरोक्तेः'** इति का.श्री. ।

जननरक्षाभङ्गलीलाप्रसङ्गान् कमलायै दत्तशेषान् अपाङ्गान् वितरति करोति अभिवर्षतीत्येक एवान्वयः । अथवा श्रीरामः पवनसुताय वितरतीत्यन्वयो वाच्यः । कीदृशानित्यतस्तद्विशेषणतया हसितसितगुबन्धूनित्यादि पृथक्पृथग्योजनीयमिति । अर्थस्तु पूर्ववदेव । अयमभिप्रायः– साक्षान्मुख्यप्राणावतारभूतस्य श्रीमतो हनुमतः स्वभक्तचूडामणित्वात् स्वात्मनः परमानुग्रहोद्रेकवशात् उद्गळन्मन्दस्मिताख्याकळङ्केन्दुकोटिकान्तिभिरभिवर्धितान् साक्षान्मुख्यानुग्रहाख्यामृतरसवारिधिपूरपरीतान् सकलचराचरात्मकप्रपञ्चस्य सृष्टिस्थितिसंहारनियमनज्ञाना-ज्ञानबन्धमोक्षप्रदानाख्यलीलासमूहसङ्घट्टितान् महालक्ष्म्याः समस्तमुक्तेभ्योऽप्यतिशयिततयोत्तमत्वात् स्वभार्यात्वादिना च कारणेन प्रथमतस्तत्र संसक्तान् तदनन्तरं श्रीरामतोऽस्य हनुमत एवाशेषभक्ताग्रणीत्वात् तदनन्तरमव्यवधानेन वर्तमानान् प्रतिदिनमपि प्रवहमानानपाङ्गान् व्यतरदकरोत् वितरति करोति करिष्यति च तस्मै हनुमतेऽयं स्वामी श्रीराम इति ॥ ३० ॥

शङ्खाब्जयुक्तकरपङ्कजमम्बुजाक्षं श्रीकम्बुकण्ठसुविराजितहारराजिम् ।
बालार्कवर्णमजशङ्करपूजिताङ्घ्रिं श्रीपुण्डरीकवरदं भज पाण्डुरङ्गम् ॥

श्रीविठ्ठलस्य प्रीत्यर्थं निर्मिता यतिनाऽऽदरात् ।
भावार्थदीपिका भूयान्निखिलार्थप्रकाशिनी ॥

यतिना विश्वपतिना यत्नेन समुपार्जितान् ।
गुणहीनांश्च गृह्णन्तु गुणिनः सूक्तिसन्मणीन् ॥

जयतिजयति रामो जानकीजानिराद्यो
जयतिजयति भक्तो ह्यञ्जनासूनुरस्य ।
जयतिजयति लोकस्तत्पदासक्तचित्तो
जयतिजयति शास्त्रं तत्परं सर्वदैव ॥

श्रीमत्कविकुलतिलकश्रीमन्नारायणपण्डिताचार्यकृतसङ्ग्रहरामायणव्याख्यायां विश्वपतितीर्थकृतायां भावार्थदीपिकायामुत्तरकाण्डेऽष्टमः सर्गः[१] ॥

—०—

१. लिपिकारेण ग्रन्थान्ते निबद्धाः श्लोका एते –

विद्याभूषणतीर्थकृतटिप्पणिकामनुकृतया तद्वृत्या..................श्रीविठ्ठलाय नमः ।
दुर्मतध्वान्ततरणिं तरुणादित्यवर्चसम् । प्रभवं सर्वविद्यानां यतिं पूर्णमतिं भजे ॥

(सं.चं.) कमलायै दत्वाऽवशिष्टान् अपाङ्गान् कटाक्षान् पवनसुताय वितरति । कीदृशान्? हसितमेव सितगुश्चन्द्रः । सिता गावः किरणा अस्येति । तस्य बन्धून् । प्रीतिपूर्वेण हासेन सह कटाक्षं पातयतीत्यर्थः । हसितं यद् दृश्यते न श्रूयते । 'हसितं दृष्टदन्ते विहसितं श्रुते' इति यादवप्रकाशः । प्रेमपीयूषस्य सिन्धूनिव । प्रेमामृतसमुद्रायमाणान् । भुवनस्य जननरक्षाभङ्गाः सृष्टिस्थितिसंहाराः केवलं लीलाप्रसङ्गा येषाम् । लीलामयाः प्रसङ्गाः प्रवृत्तयः । तादृशान् कटाक्षान् स्वस्य श्रेष्ठभक्ताय भगवान् रामः सदा वितरतीति सर्वमतिमङ्गलम् ॥ ३० ॥

इमामाचार्यगोविन्दः प्रमृष्टां शब्दतोऽर्थतः ।
वितेने विमलां टीकां विनेयजनवाञ्छया ॥

अपव्याख्यानमलिने श्रीरामायणसङ्ग्रहे ।
मृष्टं मरन्दमन्वेष्टुं चञ्चरीकति मे मनः ॥

अपाणिनीयैर्विविधप्रयोगैः स्वयं पदज्ञोऽप्यथ पण्डितार्यः ।
मध्वस्य पन्थानमनुप्रपन्नः सतां समुल्लासयतीव चेतः ॥

अपाणिनीया अथ पाणिनीया इति द्विधा साधव एव शब्दाः ।
विज्ञापयन्नित्थमिदं प्रमेयं माध्वं किलाध्वानमयं पपात ॥

अनूदुर्ये केचित् स्वयमविदितार्था अपि कवे-
र्बहुप्रज्ञस्यैतां कृतिमतिमतां तत्वविदुषाम् ।

दुर्वादिमन्देहदुरन्तसन्ततिं विजित्य विष्णोः पदमाश्रितं सदा ।
अनाद्यविद्याविनिवर्तनक्षमं वन्दे सदाऽधोक्षजभास्करं विदे ॥

अञ्जनासूनुसान्निध्याद् विजयेन विराजितम् । अजितप्रीतिजनकं भजेऽहं विजयध्वजम् ॥

वादिराजं वाजिवक्त्रपदपङ्कजपूजकम् । अञ्जनाभं भजे कञ्जलोचनं कलिभञ्जनम् ॥

व्यासं सरस्वतीवास................सेवतां सताम् । सदभीष्टप्रदं सेवे सदागमनुतं सदा ॥

यः कृष्णसारथिर्जिग्ये दुर्वादिनृपसन्ततिम् । अक्षयामोघगोभिस्तु तं जयार्यं नतोऽस्म्यहम् ॥ श्रीः ॥

कल्याणाद्भुतगात्राय कामितार्थप्रदायिने । श्रीमद्वेङ्कटनाथाय श्रीनिवासाय ते नमः ॥

श्रीवेङ्कटेशः प्रीयतां । श्रीवेङ्कटेशाय नमः ।

श्रीविश्वपतियोगीन्द्रशिष्यो गोविन्दनामकः । गुरुप्रीत्यर्थमलिखदिमां व्याख्यां सुखप्रदाम् ॥

श्रीकृष्णार्पणमस्तु ॥

अपार्थां चक्रुस्ते बहुलमपपाठाञ्छ्रुतिकटून्
रटन्तस्तानेतान् लिकुचतिलकः क्षाम्यतुतमाम् ॥

इमामतिमतां सतां मतिमतां स्वभावोन्नतां
कृतां लिकुचसूनुना विबुधमण्डलीभानुना ।
कथासु जगदीशितुर्ललितसेतुबन्धायितां
मनोज्ञपदबन्धुरां सुमधुरां स्वदन्तां बुधाः ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीसङ्ग्रहरामायणटीकायां सङ्ग्रहचन्द्रिकायामुत्तरकाण्डेऽष्टमसर्गविवरणं समाप्तम् ॥

समाप्तोऽयं ग्रन्थः

[आदितः श्लोकाः– ३४२६+३०=३४५६]

[उत्तरकाण्डे श्लोकाः – ३५२]

—०—

वाल्मीकिरामायणान्तर्ग्गतमगस्त्यप्रोक्तं

आदित्यहृदयस्तोत्रम्



ॐ ॥ ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम् ।
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ॥ १ ॥

दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् ।
उपगम्याब्रवीत् राममगस्त्यो भगवानृषिः ॥ २ ॥

हृदयचन्द्रिका

सदयं लोकहृदयं वयं कुशलवोदयम् ।
जगत्त्रयं भावयन्तमादित्यहृदयं नुमः ॥

अथात आदित्यहृदयं व्याख्यास्यामः ।

कथमादित्यहृदयम् । आदित्यस्य हृदयत इत्यादित्यहृदयं स्वयं रामाख्यं परं ब्रह्म । अथचाऽदित्यस्य सवितृगतस्य भगवतो हृदयं प्रियमिति स्तोत्रं चाऽदित्यहृदयम् । स्तोत्रस्य चागस्त्य ऋषिः । अनुष्टुप् छन्दः । सवितृमण्डलमध्यवर्ती नारायणो देवता ।

तत इति मङ्गलार्थ आनन्तर्यार्थश्च । सर्वगतस्य भगवतः स्मरणान्मङ्गलार्थता । सूतेन रावणरथस्य प्रत्या-वर्तनानन्तरमिति च कथानन्तर्यं पदार्थः । पराद्रुतमपि पुनर्युद्धाय सम्मुखमुपस्थितं रावणं च दृष्ट्वा । चकारादेव रामं च दृष्ट्वा । कीदृशम्? अयुद्धपरिश्रान्तमपि परिश्रान्तमिव स्थितम् । स्वतोऽचिन्तया निश्चिन्तया स्थितमपि कथं रावणं हन्यामिति चिन्तया परीतमिव स्थितम् । रामं दृष्ट्वा । अगस्त्यो भगवानृषिः रामसमीपमेत्य तमब्रवीत् । भगः षड्गुणमयः परमात्मा अस्त्यस्य रक्षकत्वेन ज्ञातत्वेन चेति भगवान् । विज्ञातभगवद्धृदय इत्येतत् । ऋषिः सर्वज्ञः । कथं तस्य रणाङ्गणे स्थितिः? आह–दैवतैश्च । देवैश्च ऋषिभिश्च समेत्य रामरावणयो रणं रामविजयं च द्रष्टुमभिलष्याऽगतः गगनस्थितः राममुपगम्याब्रवीत् ॥ १–२ ॥

रामराम महाबाहो शृणु गुह्यं सनातनम् ।
येन सर्वानरीन् वत्स समरे विजयिष्यसि   ॥ ३ ॥

किमिति? रामराम । रावणनिग्रहणे त्वरातिशयादादरातिशयाच्च द्विराजुहाव । महाबाहविति विनाऽपि स्तोत्रजपं शत्रुक्षपणदक्षं त्वां जानामीत्याह । अयोग्येषु न प्रकाशनीयमिति गुह्यम् । सनातनं पुरातनैरप्यनुष्ठितमिति । विजयिष्यसि विजेष्यसे । न स्वार्थमिदं किन्तु लोकशिक्षार्थमिति परस्मैभाषा । भवतेशेन प्रेरिता वयमुपदेष्टुमीश्महृ इत्यनिटं सेटमाह ॥ ३ ॥

आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम् ।
जयावहं जपेन्नित्यमक्षय्यं परमं शिवम्   ॥ ४ ॥

सर्वमङ्गलमङ्गल्यं सर्वपापप्रणाशनम् ।
चिन्ताशोकप्रशमनमायुर्वर्द्धनमुत्तमम्   ॥ ५ ॥

आदिः सर्वस्यापि कारणम् । तीत्यानन्दः । यमिति ज्ञानम् । आदित्यस्य सर्वकर्तुः ज्ञानानन्दमयस्य नारायणस्य हृदयं प्रियम् । अत एव पुण्यं पवित्रम् । बाह्यान्तःशत्रुविनाशनम् । दोषानभिभवति, उत्कर्षं च गमयतीति जयावहम् । अक्षयफलकम् । परमं शिवं ज्ञानानन्दवर्धनम् । अत एव सर्वमङ्गमङ्गल्यं मङ्गलानां च मङ्गलम् । एतादृशं स्तोत्रं नित्यं जपेदित्येकान्वयः ॥ ४–५ ॥

रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम् ।
पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम्   ॥ ६ ॥

रुचिजननाय प्रथमं फलमुक्त्वाऽथ ध्येयरूपमाह । आदावादित्यगतं रूपं स्तौति–रश्मिमन्तम् । प्रजानां हर्षप्रदकिरणेषु सन्निहितम् । हृषीकेशम् । अथच रतिः शं च मिते एषामिति रश्मयो जीवाः । तेषामेष भवति नियन्ता । सूर्ये स्थित्वा प्रत्यहं समुद्यन्तम् । मुदा सहितः सन्नेव याति न कदाऽपि दुःखीति च । अथ च कृष्णरूपेऽर्जुनरथहयानां सङ्गृहीतरश्मिमिति भाविनीं कथामुपक्षिपति । कल्किरूपे च धृतस्वहयरश्मिम् । ध्यानदशायां योगिनां हृदये समुद्यन्तम् । प्रोद्यदादित्यवर्णम् । विवस्ते सर्वं जगदातपेन दिवा, तमसा नक्तमिति विवस्वान् । विवः तेजो रश्मिर्वाऽस्यास्तीति विवस्वानित्येके । न केवलं भानोः, येये जगति भासन्ते तेषां सर्वेषामपि भासोऽयमेव करोति । ज्योतिषां ज्योतिरित्येतत् । तमेतं पूजयस्व ॥६॥

अथ स्तोत्रम्

सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः ।
एष देवासुरगणान् लोकान् पाति गभस्तिभिः ॥ ७ ॥

अथ स्तोत्रमाह श्लोकैरष्टादशभिः । सर्वदेवानामन्तर्यामी ह्येषः । 'एष त आत्माऽन्तर्याम्यमृतः', 'सूर्य आत्मा जगतस्तस्थुषश्च' इत्यादेः । 'तेजस्तेजस्विनामहम्' इति तेजस्वी । रश्मिषु सन्निहितः जगद् भावयति । रश्मीन् वा जीवान् भावयति । 'सृष्टिः स्थितिश्च संहारो भावनेत्यभिधीयते' । गभस्तिभिर्जलमादाय वृष्टिद्वारा लोकान् पाति, सौरशक्तिसङ्क्रमणेन च ॥ ७ ॥

एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः ।
महेन्द्रो धनदः कालो यमः सोमो ह्यपाम्पतिः ॥ ८ ॥

'ब्रह्मणि ब्रह्मरूपोऽसौ शिवरूपी शिवे स्थितः' । स्वयमेव च विष्णुः । अन्यत्र च तत्तन्नामा तत्रतत्र गतः । स एवच तत्तच्छब्दमुख्यार्थः । गुणबृंहणाद् ब्रह्मा । सर्वस्यान्तर्विशति वेवेष्टि च सर्वमिति विष्णुः । ज्ञानानन्दमयः शिवः । तमोऽज्ञानं शत्रूंश्च स्कन्दति शोषयतीति स्कन्दः । स्कदिर् गतिशोषणयोः । ब्रह्मान्तानां प्रजानां पालनाद् विष्णुः प्रजापतिः । महनीयोऽयं महतो महान् परमेश्वरः । दैवं मानुषं च धनं ददाति योग्यानाम्, द्यति चायोग्यानाम् । कलितसम्पूर्णसद्गुणत्वात्, जगतां कालनाच्च कालः । कालेषु मृत्युदूतेषु गतश्च । षोडशकलानां चायं नियन्ता पुरुष इति च कालः । जगद्यमनाद् यमः । उत्कृष्टा मा रमा तया सहितः सोमः । उमा उत्कृष्टं ज्ञानम् । तया वा सहितः । सर्वज्ञः । सौम्यगुणत्वतश्च सोमः । अपां कर्मणां पतिः । अपां देवानां च पतिः । सर्वदेवनाम्नामुपलक्षणम् ॥ ८ ॥

पितरो वसवः साध्या ह्यश्विनौ मरुतो मनुः ।
वायुर्वह्निः प्रजाप्राण ऋतुकर्त्ता प्रभाकरः ॥ ९ ॥

न केवलमेकवचनान्तानि पदानि । अन्यान्यपि बहुरूपं भगवन्तमेव वदन्तीत्यनुसन्धेयमित्याह– पितरः । पितृषु गतानि भगवद्रूपाणि पितरः । पान्तीति पितरः । यमसोमकव्यवाहाः पितृपतयस्त्रयः । अग्निष्वात्तादयः सप्त प्रधानाः पितरः । द्रोणप्राणाद्या अष्टौ वसवः । वसन्ति सर्वत्रेति वसवः । धर्मपुत्रा द्वादश साध्या मनुमन्त्रप्रभृतयः । साधयन्ति सर्वमिति साध्याः । न श्वयत इत्यश्विनौ । 'न कर्मणा वर्धते' इत्यादेः ।

अश्वमुखौ वा । अश्ववन्तौ रामकृष्णौ चाश्विनौ । आशु वातः गच्छतः अवगच्छत इति वा । मरुत एकोनपञ्चाशत् । मरुषु मरणशीलेषु ततः । म्रियन्त एभिरिति वा मरुतः । मनवश्चतुर्दश । सर्वं मन्वत इति । चतुर्दशधा विभक्तोऽपि स्वयमेकरूप इति मनुरित्युक्तम् । तत्रापि तापसमनुः स्वयमेव बभूवेति विशिष्यैकवचनम् । वाति सर्वत्र, सर्वं सुरभीकरोतीति वायुः । प्रवहाद्या अधिभूतं सप्त वायवः । प्राणाद्या अध्यात्मं प्रजासु स्थिताः प्राणा दश । 'विराट् प्राणो दशविधः' इति भागवतम् । प्राणन्ति, प्रणयन्ति प्रणीयन्त इति वा प्राणाः । तत्तद्योग्यं तस्यतस्य प्रापयन्तीति वह्नयस्त्रयः, पञ्च वा । प्रधानाग्निरेकः, तत्पुत्राः पावकः पवमानः शुचिरिति त्रयः । तत्पुत्राः पञ्चचत्वारिंशदित्येकोनपञ्चाशद् वह्नयो वा । पञ्चानां षण्णां वा ऋतूनां कर्ता । अत एवर्तवः । द्वादशात्मा दिवाकरः । सर्वगणदेवनाम्नामुपलक्षणम् ॥ ९ ॥

आदित्यः सविता सूर्य्यः खगः पूषा गभस्तिमान् ।
सुवर्ण्णसदृशो भानुर्हिरण्यरेता दिवाकरः ॥ १० ॥

इदानीं सूर्यस्य दशभिर्नामभिः स्तौति–

आदत्त इत्यादित्यः । अदित्यां वामनत्वेन जात इत्यादित्यः । जगत् सूत सूयते वा सविता । सूरिभिरीयत इति सूर्यः । सुवति प्रेरयतीति वा । सुष्ठु ईरयतीति वा । खे गतः । अत एवाऽकाशं विष्णुपद-माहुः । हृदयाकाशगश्च । स्वयं गुणपुष्टः पूषा । जगतः पोषणाच्च पुष्णातीति । गामन्तरिक्षं भुवं च स्वसन्निधानेन बभस्ति प्रकाशयतीति गभस्तिः द्यावापृथिवीमानिनी श्रीरस्य नित्यावियोगिनीति गभस्ति-मान् । गावौ चक्षुषी बभस्तीति चक्षुर्मानी गभस्तिः सूर्यः । तत्र सन्निहितः । गां वेदवाचं बप्सतीति गभस्तयो ज्ञानिनः । ज्ञानिप्रियत्वेन गभस्तिमान् । गभस्तिषु किरणेषु सन्निधाय लोकतोषकत्वाद् गभस्ति-मान् । सुवर्णसदृशः उत्तप्तहेमसङ्काशः । सुवर्णवर्णो हेमाङ्गः । 'सर्व एव सुवर्णः' इति च । सुवर्णा वेदा नित्यत्वेन सदृशा अस्य । 'यावत् ब्रह्म विष्ठितं तावती वाक्' इति हि श्रुतिः । सूर्यचन्द्रादिषु स्थित्वा भातीति भानुः । योगिनां हृदये भातीति च । 'तमेवं भान्तमनुभाति सर्वम्' इति च । हिरण्यमयमण्डमस्य रेत इति हिरण्यरेता ब्रह्माण्डस्रष्टा । 'अप एव ससर्जाऽदौ तासु वीर्यमवासृजत् । तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्' इति हि मानवे । ज्ञानदत्वाद् दिवाकरः । छान्दसत्वान्नवाक्षरः पादः । सर्वेषां सूर्यनाम्नामुपलक्षणम् ।

दशावतारस्तावकानि चैतानि दशनामानि । वैवस्वतमन्वन्तरस्याऽदौ भव आदित्यो मत्स्यः । मन्दरं बिभ्रदमृतं सूत इति सविता कूर्मः । भूमेः स्वकक्ष्यानिक्षेपेण सुष्ठूरीकृतेः सूर्यो वराहः । खात् स्तम्भावकाशान्निर्गतः,

नतु मातुरुदरादिति खगो नरसिंहः । इन्द्राय स्वर्गसाम्राज्यं पुपोषेति पूषा वामनः । दुष्टक्षत्रियहननेन गां बभस्तीति गभस्तिः परशुः । तद्वान् भार्गवः । सुवर्णो मरतकमणिः । वर्णेन तत्सदृशः इन्द्रनीलश्यामो रामः । आ बाल्यात् लोकोत्तरमहिमाविष्करणेन विशिष्य भातीति भानुः कृष्णः । हिरण्यं हिरुक्सुखात्मकं ज्ञानम् । प्रशान्तविद्या । तद् देवेभ्यो रेचयति वितरतीति हिरण्यरेता बुद्धः । असुराणां हननेन कृतयुगारम्भाय ज्ञानं करोतीति दिवाकरः कल्की । यत्र दशभिः पदैर्भगवान् स्तूयते तत्र सर्वत्राप्येवमनुसन्धेयं भवति यथा गायत्र्याम् ॥ १० ॥

हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान् ।
तिमिरोन्मथनः शम्भुस्त्वष्टा मार्त्तण्ड अंशुमान् ॥ ११ ॥

प्रायः सवितृनामभिरेव पुनः स्तौति–हरिदश्वः । मनो हरन्तीति हरितश्चत्वारोऽश्वा यस्य रथं वहन्ति । मनोहरो गरुडोऽस्याश्वो वाहनमिति च । अनन्तार्चिः । सप्तच्छन्दोमानिन्यः सप्तयोऽस्य । छन्दांस्येव वा । 'एको अश्वो वहति सप्तनामा' इति च । मरीचयो मितरुचयो जीवाः । नियम्यत्वेन तद्वान् । 'मरीचिर्मितरुक्त्वतः' इति हि स्मरन्ति । मरीचेः कश्यपः । ततो वामन इति पितामहत्वेन मरीचिमान् । स्वतोऽनन्तमरीचिश्च । तिमिरमज्ञानमुन्मूलं मथ्नाति मोक्षदानेन । विश्वस्य शं भवत्यस्मात् । 'विश्वाक्षं विश्वशम्भुवम्' इति श्रुतिः । त्वक्षति रूपाणि पिंशतीति सङ्कर्षणात्मा त्वष्टा । 'त्वष्टा रूपाणि पिंशतु' इति श्रुतिः । दुष्टक्षत्रियान् त्रिः सप्तकृत्वस्त्वक्षति । मृते सति ब्रह्माण्डे पुनः सर्गाय पुनः प्रादुरेष्यतीति मार्तण्डः । अंशवोंऽशाः प्रतिबिम्बभूता जीवाः । बिम्बत्वेन तद्वान् । मार्तण्ड अंशुमानिति विश्लेषेण अंशुभिरंशुमतो विभिन्नत्वं नाम विश्लेशमाह 'भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन' इति यथा । यथा वा 'अः इति ब्रह्म' इति ॥ ११ ॥

हिरण्यगर्भः शिशिरस्तपनो भास्करो रविः ।
अग्निगर्भोऽदितेः पुत्रः शङ्खः शिशिरनाशनः ॥ १२ ॥

हिरण्मयं ब्रह्माण्डं यस्य गर्भे । 'तस्योदरस्थजगतः' इति ह्युक्तम् । आनन्दमयस्वरूपः । हितरमणीयस्वरूपः । सतां शिशिर इव शीतलः । असतां तापक इति तपनः । 'शिशिरः शर्वरीकरः' इति च । सोमसूर्याग्निमयेन भासा सर्वं करोति । स्वभासा सूर्यादीन् भासितान् करोति । सर्वैर्वेदैरूयते स्तूयत इति रविः । रौतीति वा रविः । 'तेने ब्रह्म हृदाय आदिकवये' इति हि भागवते । 'यो वै वेदांश्च प्रहिणोति

तस्मै' इति श्रुतिः । अग्निर्वैश्वानरः, सर्वात्ता रुद्रः, प्राणाग्रयश्च यस्य गर्भे । अदितेः पुत्रः वामनात्मा । शं सुखम् । खं ज्ञानम् । ज्ञानानन्दस्वरूपः। शाम्यतीति शङ्खः । स्वकिरणैः शिशिरं नाशयति ॥ १२ ॥

व्योमनाथस्तमोभेदी ऋग्यजुःसामपारगः ।
घनवृष्टिरपाम्मित्रो विन्ध्यवीथीप्लवङ्गमः ॥ १३ ॥

व्योम्नः श्रीतत्वस्य नाथो नारायणः । 'व्योतं जगदिदं यस्यां सा व्योम श्रीरुदाहृता' इति हि स्मरन्ति । तमोगुणस्याज्ञानस्य च भेदकः । तमसः राहोः शिरश्छेत्ता । ऋग्यजुःसामानि पारयति विनयतीति ऋग्यजुःसामपारः ब्रह्मा । 'यो वै वेदांश्च प्रहिणोतीति तस्मैक इति हि श्रुतिः । मुख्यप्राणः। हनुमांश्च । तस्मिन् गतो नरायणः । रामात्मा च । 'नानृग्वेदविनीतस्य नायजुर्वेदधारिणः । नासामवेदविदुषः शक्यमेवं प्रभाषितुम्' इति हनुमद्गुणकथनं रामायणे । स्वयमेव च सर्ववेदपारगः । 'इत्यस्या हृदयं साक्षान्नान्यो मद् वेद कश्चन' इति भागवते । 'वेदविदेव चाहम्' इति गीतासु । घना वृष्टिर्यस्मात् । 'आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः' इति स्मरणात् । घना च भक्तानामभिमतवृष्टिर्यस्मात् । अपां देवानां मित्रो मित्रम् । पुरुषरूपेणेति पुल्लिङ्गता । अपां कर्मणां मित्या मितिमनुसृत्य त्रायते च । कर्मानुगुणफल-प्रदः । विं विष्णुं ध्यायतां वीथी ज्ञानमार्गः । सुषुम्ना वा । तत्र प्लवमानः सत्वरमात्मानं गमयतीति । विन्ध्यवीथीप्लवङ्गमः । विन्ध्यवीथी गगनमार्ग इति स्फुटम् । सीतान्वेषणे विन्ध्याटवीवीथीषु चरन् प्लवङ्गमो हनुमान् । तदन्तर्यामित्वाच्च तन्नामा ॥ १३ ॥

आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः ।
कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः ॥ १४ ॥

पुनर्दशावतारं भगवन्तं स्मारयति–आतपी । आतपः सृष्ट्यर्थं ज्ञानमयं तपोऽस्यास्तीति आतपी । 'स तपोऽतप्यत' इत्यादेः । सोमासुरं संहृत्य वेदाहरणेन आतपं ज्ञानप्रकाशं ददावित्यातपी मत्स्यः । मण्डलाकृतिरिति मण्डली कूर्मः । ब्रह्माण्डमण्डलं पृष्ठे दधत् मण्डली । सर्वसंहारकत्वान्मृत्युः । विशेषतो हिरण्याक्षस्य मृत्युर्वराहः । सिंहास्यतया पिङ्गलनेत्रः पिङ्गलो नरसिंहः । देवयानगानां पिङ्गाख्यसुखदानाच्च पिङ्गलः । इन्द्राय स्वर्गराज्यं दत्वा सर्वासुरतापनो वामनः । प्रळये च सर्वतापनः । सूर्यस्थः सन्नपि दिवा सर्वतापनः । दुष्टक्षत्रविनाशेन भूमिः कं सुखं वेति यात्यनेनेति कविर्भार्गवः । विश्वो वायुर्हनुमद्रूपेणास्त्यस्य सेवक इति विश्वो रामः । विना गरुडेन श्वयति च गरुडवाहनः । विः गरुडः नागबन्धमोक्षार्थं एतमुपश्वयतीति

च विश्वो रामः । जरासन्धस्य द्वाविंशतिमक्षोहिणीः, कौरवपाण्डवानामष्टादश च नेत्रान्ततेजसैव निर्ददाहेति महातेजाः कृष्णः । राजसे क्षत्रिये शुद्धोदने जात इति रक्तो बुद्धः । 'बुद्धो नाम्ना जिनसुतः' इति भागवते । 'शुद्धोदनेत्येव जिनेति चोक्तः' इति च भगवत्पादवचनम् । असुरमोहने रक्तश्च । भक्तेषु रक्तश्च । कृतयुगप्रवर्तनेन सर्वस्य भवस्य भूतेः धर्मस्य वोद्भवः कल्की । सर्वेषां भवोद्भवौ संसारमोक्षौ येनेति च ॥ १४ ॥

नक्षत्रग्रहताराणामधिपो विश्वभावनः ।
तेजसामपि तेजस्वी द्वादशात्मन् नमोऽस्तु ते ॥ १५ ॥

नक्षत्रग्रहताराणामधिप इति वासुदेवः । तारा अश्विन्याद्याः सप्तविंशतिश्चन्द्रभार्याः । इतराणि नक्षत्राणि । द्यौः सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः । वासुदेवस्य वीर्येण विधृतानि महात्मनः' इति विष्णुसहस्रनामसु । ग्रहाणामादित्यादीनामधिप इति नायं प्रसिद्धः सूर्यः । किन्तु नारायण एवेति स्फुटमाह । विश्वं भावयति संहरतीति विश्वभावनः सङ्कर्षणः । तेजसामपि तेजस्वी प्रद्युम्नः । द्युम्नं हि तेज उच्यते । मनोबुद्धिभ्यां सह अध्यात्मं द्वादशस्विन्द्रियेषु, अधिभूतं द्वादशसु मासेषु स्थित्वा जगत् स्थापयतीति द्वादशात्माऽनिरुद्धः । केशवादिभिः सङ्कर्षणादिभिश्च द्वादशात्मा । वासुदेवद्वादशाक्षरप्रतिपाद्यश्च ॥ १५ ॥

नमः पूर्वाय गिरये पश्चिमे गिरये नमः ।
ज्योतिर्गणानां पतये दिनाधिपतये नमः ॥ १६ ॥

दोषगिरणाद् गिरिः । चतुर्षु पूर्वाय वासुदेवाय । पश्चिमे चरमे भूताय अनिरूद्धाय । द्युम्नं ज्योतिरित्युक्तम् । ज्योतिर्गणानां पतये प्रद्युम्नाय । दीङ् क्षये । दीयत इति दीनमेव दिनम् । प्रळयकालः । तस्याधिपतये संहर्त्रे सङ्कर्षणाय । यथाश्रुतोऽर्थः सर्वोऽपि ग्राह्य एव । गिरय इति तत्तद्गिर्यन्तर्यामिणे ॥ १६ ॥

जयाय जयभद्राय हर्य्यश्वाय नमोनमः ।
नमोनमः सहस्रांशो आदित्याय नमोनमः ॥ १७ ॥

स एव मूलरूपेण सह पञ्चमूर्तिरित्याह– जयाय । आदौ भवाय आदित्याय नारायणाय । संसाराज्जयो मोक्षो भद्रोऽनेनेति जयभद्रो वासुदेवः । जयापतिर्जयः सङ्कर्षणः । सहस्रमनन्ता अंशवो मयूखा अस्येति

सहस्रांशुः प्रद्युम्नः । हरिर्वायुः । तेन जीवहृदयान्न श्वयति नापगच्छतीति हर्यश्वोऽनिरुद्धः । देवानामर्थे दैत्यान् जयतीति जयः । 'ब्रह्म ह देवेभ्यो विजिग्ये' इति श्रुतिः । जयन्त्यनेनेति च जयः । भूमौ जायते, कृत्यानन्तरं याति च । सर्वाण्येतानि रामस्तुतिरूपाणि च । जयति रक्षोगणम् । जयेन भद्रो रामभद्रः । हरिर्वायुर्हनुमांश्च । स एव अश्वो वाहनमस्य । 'वरदो वायुवाहनः' । हनुमत्यारूढः सुग्रीवं जगाम । जिगाय च रावणम् । सहस्रमंशवोंऽशा अस्य । तदुक्तम्–'रामः पुरस्तात् परतोऽपि रामः रामः परं दिक्षु विदिक्षु रामः' इति । सहस्रं अनन्ताः अंशवः प्रतिबिम्बांशा अस्येति सर्वरूपसाधारणम् । आदित्यवंशोत्पन्नत्वादादित्यः ॥ १७ ॥

नम उग्राय वीराय सारङ्गाय नमोनमः ।
नमः पद्मप्रबोधाय मार्त्ताण्डाय नमोनमः ॥ १८ ॥

उग्रः सङ्कर्षणः । असतामुग्राय । उं शिवमपि ग्रसतीति च । उग्रं वीरमिति नृसिंहानुष्टुभेनोपक्रमात् उग्रो वीरो महाविष्णुर्नरसिंहश्च । विविधमीरयतीति वीरोऽनिरुद्धः । द्युम्नं ज्ञानं च । तेन सारं ज्ञानं गमयतीति सारङ्गः प्रद्युम्नः । साराङ्गत्वाच्च सारङ्गः । ज्ञानिभिः पद्यत इति पद्मो मोक्षः । तत्र प्रबोधयति वासुदेवः । 'पद्मो ब्रह्मा समुद्दिष्टः' इति स्मरणात् पद्मं चतुर्मुखमपि प्रथमं वेदबोधनेन प्रबोधयति च । सूर्ये स्थितः पद्मं च प्रबोधयति । मृते ब्रह्माण्डे यस्तिष्ठति मार्ताण्डो नारायणः सवितृमण्डलमध्यवर्ती ॥ १८ ॥

ब्रह्मेशानाच्युतेशाय सूर्य्यायाऽदित्यवर्च्चसे ।
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ॥ १९ ॥

ब्रह्मेशानाच्युतरूपाय ईशाय । 'सृष्टिस्थित्यन्तकरणीं ब्रह्मविष्णुशिवात्मिकाम् । सञ्ज्ञां स याति भगवनेक एव जनार्दनः' इति स्मरणात् । 'ब्रह्मणि ब्रह्मरूपोऽसौ शिवरूपी शिवे स्थितः' इति च । सूरे याति सन्निहितो भवतीति सूर्यः सूर्यमण्डलमध्यगः । भगवत्प्रतीकत्वेन सुष्ठूरीक्रियते सद्भिरिति च । आदित्यस्यापि वर्चो येन । सर्वभासां मूलभूतभास्वते । योगिनां हृदि भास्वते । प्रळये सर्वभक्षाय । सर्वयज्ञभोक्त्रे । शत्रुभयङ्कराय ज्ञानानन्दवपुषे नमः । बलकार्यमवतारजातं रौद्रपदविषयः । सर्वेऽवतारा मूलरूपेणाभिन्ना इति वपुष इत्याह । वपुष्मता च वपुषोऽभेद इति च । जगद् वपति संहरति चान्त इति च वपुः । वप बीजसन्ताने छेदने च ॥ १९ ॥

तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने ।
कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ॥ २० ॥

चन्द्रिकया तमोघ्नाय । आतपेन हिमघ्नाय । बहिस्तमोघ्नाय । हृद्यन्तस्तमोघ्नाय च । अग्निगताय च हिमघ्नाय । देवशत्रूणां हन्त्रे । भक्तानां कामादीनामन्तःशत्रूणामपि हन्त्रे । सतां तमोघ्नाय अज्ञाननाशनाय । असतां हिमघ्नाय निश्चयज्ञाननाशाय । भ्रातरि शत्रुघ्ने च सन्निधाय लवणहन्त्रे । अमितात्मने । 'अविकारिणे स्फुटमनन्तरूपिणे' । अपरिच्छिन्नात्मने सर्वगताय च । 'परो मात्रया तन्वा वृधान' इति श्रुतेः । कृतं पुण्यं कर्म घ्नन्तीति पापमानिनोऽन्तस्था असुराः । तान् हत्वा पुण्येन पुण्यं लोकं नयतति कृतघ्नघ्नः । भ्रातृभार्यापहरणेन कृतघ्नो वाली तं हन्तीति कृतघ्नघ्नः । सनकादिशापेन सुकृतं हत इति कृतघ्नौ जयविजयौ । असुरत्वेन जातौ तौ चतुर्भिरवतारैर्हन्तीति कृतघ्नघ्नः । अनेन ओङ्कारप्रतिपाद्यानि कृष्णरामनरसिंहवराहाख्यानि चत्वारि रूपाण्युक्तानि । देवाय लीलया जगत्सृष्ट्यादि कुर्वते । सर्वोत्तमाय । सर्वविजयिने । सर्वव्यवहारनिर्वाहकाय । द्योतमानाय । सर्ववेदस्तुत्याय । सर्वपदवाच्याय । आनन्दरूपाय । स्वतन्त्रेच्छाय । आप्तकामाय । सर्वज्ञाय सर्वगताय च । एवं देवयति दीव्यत इति च यथासम्भवमर्थविशेषा अनुसन्धेयाः । ज्योतीरूपाणां मुक्तानां पतये नमः ॥ २० ॥

तप्तचामीकराभाय वह्नये विश्वकर्म्मणे ।
नमस्तमोभिनिघ्नाय घृणये लोकसाक्षिणे ॥ २१ ॥

तप्तेति । स्फुटितहाटकप्रभाय । तत्तद्देवेभ्यो हव्यवाहनाय । जगत्कर्त्रे विश्वकर्मसूक्तप्रतिपाद्याय । 'विश्वकर्मा मनुस्त्वष्टा' इति च । तमो भिन्दन्तीति तमोभिदः ज्ञानिनो भक्ताः । तेषां निघ्नायाधीनाय । छान्दसस्तकारलोपः । 'ज्ञानी त्वात्मैव मे मतम्', इति 'अहं भक्तपराधीनः' इति च हि स्मरन्ति । घृणिः प्रकाशस्वरूपः । 'घृणिः सूर्य आदित्यः' इति श्रुतिप्रतिपाद्यः । लोकानां कर्मसाक्षिणे । 'सर्वदेवात्मको ह्येषः' इत्यारभ्य 'घृणये लोकसाक्षिणे' इत्यन्तानि अष्टोत्तरशतनामान्युदितानि भवन्तीति सम्प्रदायः ॥ २१ ॥

नाशयत्येष वै भूतं तदेव सृजति प्रभुः ।
पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ॥ २२ ॥

तदेव नाशितमेव भूतं पुनः सृजति । एतेनैतदाह—न किमपि विद्यमानं नश्यति । नाप्यविद्यमानं जायते । विद्यमानस्याकारविशेषागम एव सृष्टिः । आकारविगम एव नाश इति । स्रष्टुं पालयितुं नाशयितुं च प्रभवतीति

प्रभुः । एष पायति शोषयति । तपति दहति । वर्षति क्लेदयति । सस्यानि वर्धयति च । सर्वमेतत् सूर्यगभस्तिभिः सम्पादयति । 'आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः' । 'तापनी पाचिका चैव शोषणी च प्रकाशनी । नैव राजन् रवेः शक्तिः शक्तिर्नारायणस्य सा' इति हि स्मरन्ति ॥ २२ ॥

एष सुप्तेषु जागर्त्ति भूतेषु परिनिष्ठितः ।
एष एवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम्   ॥ २३ ॥

'य एष सुप्तेषु जागर्ति कामङ्कामं पुरुषो निर्म्ममाणः' इति श्रुतिः । स्वप्नप्रदर्शकः सुषुप्तिनियामकश्च । जाग्रद्दशायां भूतेषु परितः सवेन्द्रियेषु नियामकतया स्थितः । सर्वयज्ञभोक्ता चायं फलदाता च ॥ २३ ॥

वेदाश्च क्रतवश्चैव क्रतूनां फलमेव च ।
यानि कृत्यानि लोकेषु सर्व एष रविः प्रभुः   ॥ २४ ॥

वेदाश्च एष एव । सर्ववेदवेद्यत्वात् । सर्वेऽपि क्रतवोऽहीना एष एव । सर्वक्रतूनां भोक्तृत्वात् प्रभुत्वाच्च । क्रतूनां फलं चैष एव । एतस्मादेव । न केवलं क्रतवः । सर्वाणि कृत्यानि तत्फलानि चैतस्मादेव । सर्वकर्तृत्वात् । एवं योयः पदार्थो लोके विद्यते स सर्वोऽप्येष रविरेव । सर्वगत्वात् सर्वस्य प्रभवाप्ययात् । सर्वस्य तदधीनत्वात् । 'सर्वं समाप्नोषि ततोऽसि सर्वः' । 'एष सर्वेश्वरः । एष सर्वज्ञः । एषोऽन्तर्यामी । एषः योनिः सर्वस्य', 'यदधीना यस्य सत्ता तत् तदित्येव भण्यते' इत्यादि च । सर्वत्र रमते सर्वविलक्षणश्चेति रविः । सर्वस्मात् प्रकृष्टो भवतीति प्रभुः ॥ २४ ॥

फलश्रुतिः

एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च ।
कीर्त्तयन् पुरुषः कश्चिन्नावसीदति राघव   ॥ २५ ॥

एनमादित्यहृदयं नारायणमनेन स्तोत्रेण कीर्तयन् स्तुवन् । गुणकथनं हि कीर्तनम् । कश्चित् यःकोऽपि पुरषः साधनशरीगतजीवः पुमान् स्त्री वा । तेन सर्वाधिकारिकोऽयं स्तोत्ररजः । आपत्सु सङ्कटेषु । कृच्छ्रेषु कष्टेषु । कान्तारेषु दुर्गममार्गेषु यात्रायाम् । चोरव्याघ्रादिभिर्भयेषु च प्राप्तेषु । भवात्मकेषु भयेषु वा ।

भयहेतूनामानन्त्याद् बहुवचनम् । नावसीदति न तैर्ग्रस्तो नष्टो भवति । अशक्ततया न तैः पराजीयत इत्येतत् । भगवानेव तत्र साक्षीत्याह–राघवेति ॥ २५ ॥

पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम् ।
एतत् त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि ॥ २६ ॥

एतत् त्रिगुणितं जप्त्वा यस्त्वां पूजयति राघव तं बाह्ययुद्धेषु अन्तर्युद्धेषु ज्ञानयुद्धेषु च विजयिष्यसि विजयिनं करिष्यसि । त्वं च विजेष्यसे मन्त्रं जप्त्वैव प्राप्तविजयमिवाऽत्मानं दर्शयति ॥ २६ ॥

अस्मिन् क्षणे महाबाहो रावणं त्वं वधिष्यसि ।
एवमुक्त्वा तदाऽगस्त्यो जगाम च यथाऽऽगतम् ॥ २७ ॥

अस्मिन् क्षणे यस्मिन् क्षणे स्तोत्रमेतज्जपसि लोकशिक्षायै । वधिष्यसि हनिष्यसि । छान्दसो वधधातुरप्यस्ति । यथाऽऽगतं तथा तेनैव पथा जगाम तं देशं यत्र पूर्वं तस्थौ, युद्धदिदृक्षयाऽन्तरिक्षे ॥ २७ ॥

एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत् तदा ।
धारयामास सुप्रीतो राघवः प्रयतात्मवान् ॥ २८ ॥

आदित्यं प्रेक्ष्य जप्त्वा तु परं हर्षमवाप्तवान् ।
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्य्यवान् ॥ २९ ॥

महातेजाः स्वरूपमहसा स्वतो विशोकः सदा । अथापि तदा नष्टशोकइवाभवत् । मन्त्रं हृदि धारयामास । प्रयतात्मवान् एकाग्रमनाः । त्रिराचम्य जपात् पूर्वमन्ते च । सदा शुचिर्भूत्वा जप्त्वा धनुरादाय परं हर्षमवाप्तवान् । सर्वमिदं दर्शनभाषायामयम् ॥ २८-९ ॥

रावणं प्रेक्ष्य हृष्टात्मा युद्धाय समुपागमत् ।
सर्वयत्नेन महता वधे तस्य धृतोऽभवत् ॥ ३० ॥

सर्वयत्नेन पूर्णयत्नेन । तदपि लोकदृष्ट्या । तस्य वधे तं हन्तुं धृतोऽभवत् निर्दधार । अगस्त्यादादित्यहृदयस्वीकारानन्तरमेव रावणो हन्तव्य इति हि तस्य निर्धारः ॥ ३० ॥

अथ रविरवदन्निरीक्ष्य रामं
मुदितमनाः परमं प्रहृष्यमाणः ।
निशिचरपतिसङ्क्षयं विदित्वा
सुरगणमद्ध्यगतो वचस्त्वरेति   ॥ ३१ ॥

इति श्रीमद्वाल्मीकिरामायणे युद्धकाण्डे सप्तोत्तरशततमः सर्गः ॥

—०—

निशिचरपतिसङ्क्षयं सन्निहितं विदित्वा परमं प्रहृष्यमाणः प्रहृष्यन् । सोऽयमादित्यस्य महान् स्वार्थ इत्यात्मनेभाषा । सूर्यमण्डलान्निर्गत्य युद्धदिदृक्षयाऽऽगतसुरगणमध्यगतः, यत्रागस्त्योऽपि तस्थौ, रावणवधाय त्वर त्वरस्वेति राममवदत् । त्वरा चेयं लोकहितायेति परस्मैभाषा ॥ ३१ ॥

इममाचार्यगोविन्द आदित्यहृदयस्तवम् ।
व्याचकार परं गुह्यं विनेयजनवाञ्छया ॥

इत्याचार्यगोविन्दस्य कृतिषु आदित्यहृदयव्याख्यानं समाप्तम् ॥

—०—

परिशिष्टम् : १



नाममीमांसा

(सङ्क्षहरामायणगतानां पात्राणां नामानुक्रमणी)

अकम्पनः । रुद्रवरगुप्तः रावणभृत्यो राक्षसः ।

अगस्त्यः । दक्षिणापथवासी मुनिः ।

अङ्गदः । वालिना तारायां जातः कपिः । चन्द्रावतारभूतः ।

अतिकायः । रावणात् गन्धर्विकायां जातः । कुम्भकर्ण इति नामान्तरमस्य । लक्ष्मणेन हतः ।

अतुलः । ब्रह्मशिववरबलोऽसुरः । तपोमयः । रामेण हतः ।

अहल्या । गौतमपत्नी । इन्द्रप्रधर्षिता । रामदर्शनात् पूता पुनर्गौतमेन संससार ।

अक्षः । रावणस्य तनयः । इन्द्रजिदनुजः ।

इन्द्रजित् । मेघनाद इति नामान्तरमस्य । रावणस्य प्रथमपुत्रः ।

कत्थनः । कुबेरावतारः कपिः ।

कवन्धः । त्रिजटासुतः । दनुनामा गन्धर्वः । सुरेन्द्रमुक्तेन वज्रेण भुग्नकायो जातः ।

किङ्कराः । रावणभृत्या राक्षसाः ।

कुमुदः । जयन्तावतारः कपिः ।

कुमुदिनः । अब्जजवाक्यरक्षा असुराः । रामेण हताः ।

कुम्भकर्णः । हरेः द्वारपालकेन विजयेनाऽविष्टो हिरण्याक्षः पुनर्जातः ।

कुम्भः । कुम्भकर्णसुतः । सुग्रीवहतः ।

कुरङ्गः । वायसनेत्रावासो राक्षसः । रामेण हतश्च ।

कुशः । रामसुतः । इन्द्रावतारभूतः ।

केसरी । मरुत्सु प्रवरो हनुमत्पिता कपिः ।

कैकेयी । दशरथपत्नी । भरतजननी ।

कौसल्या । दशरथपत्नी । रामप्रसूः ।

खरः । रावणानुजो भृत्यः । दण्डके रावण-प्रतिनिधिः ।

गजः । प्राणात्मा कपिः । कुबेरजः ।

गन्धमादनः । समानवायोरंशः कपिः । कुबेरजः ।

गवयः ।व्यानात्मा कपिः । कुबेरजः ।

गवाक्षः । अपानात्मा कपिः । कुबेरजः ।

गाधी । चन्द्रवंशीयो राजा । इन्द्रावतारः । विश्वा-मित्रस्य जनकः ।

गुहः । रामभक्तो व्याधः ।

गौतमः । अहल्याभर्त्ता मुनिः । शतानन्दपिता ।

जङ्घः । शम्बूकनामा शूद्रतापसो जातः । पार्वती-वरदर्पितः । रामहतः ।

जटायुः । सूर्यसूतस्यारुणस्य तनयः । दशरथसखा । रावणेन सीतारक्षणे हतः ।

जयन्तः । इन्द्रसुतः । वायसरूपी कुरङ्गेणासुरेणा-विष्टः । रामेण निगृहीतो नष्टासुरावेशः ।

जाम्बवान् । ब्रह्मण आस्यसमुद्भवः । ऋक्षः । रोहिणीपिता । धर्मावतारः । (धातुःसुतः, ब्रह्मसुतः, ब्रह्मात्मजः, विधातृजः) ।

ताटका । सुन्दोपसन्दयोर्भार्या राक्षसी रामनिहता ।

तारः । ताराभ्राता कपिः । बृहस्पतेरवतारभूतः ।

तारा । वालिपत्नी । शच्या अवतारभूता ।

तुम्बुरुः । स्थूणाकर्णापरनामा गन्धर्वः ।

त्रिशिराः । खरसहचरः । रामेण हतः ।

त्रिशिराः । ब्रह्मवरगुप्तो राक्षसः । रावणतनयः । हनुमता हतः ।

दशरथः । सूर्यवंशजो राजा । रामस्य पिता । स्वायम्भुवमनोरंशः ।

दुर्मुखः । निरृतेरवतारभूतः कपिः ।

दुर्वासाः । रुद्रावतारभूतो मुनिः ।

दूषणः । खरसहचरो राक्षसः । रामेण हतः ।

देवतापनः । ब्रह्मवरदृप्तो रावणसचिवः । रामेण हतः ।

देवान्तकः । नरान्तकभ्राता । रावणपुत्रः । गन्धर्वकन्यायां जातः । हनुमता हतः ।

धूम्रनेत्रः । रुद्रवरादवध्यो रावणभृत्यः । हनुमता हतः ।

नरान्तकः । रावणतनयः । गन्धर्वकन्यायां जातः । अङ्गदेन हतः ।

नळः । विश्वकर्मावतारः । सेतुनिर्माता कपिः ।

निकुम्भः । कुम्भकर्णतनयः । हनुमता हतः ।

निकृतिः । कैकेय्यीं प्रविष्टा राक्षसी ।

नीलः । अग्नेरवतारभूतः कपिः ।

परशुरामः । जमदग्निपुत्रतयाऽवतीर्णो विष्णुः । क्षत्रकुलान्तकः ।

पनसः । वस्वंशभूतः कपिः ।

प्रमाथी । ब्रह्मवरगुप्तो रावणसचिवो राक्षसः । रामेण हतः ।

प्रहस्तः । रावणमन्त्री । कृष्णावतारे दुर्योधन-सचिवः पुरोचनो बभूव ।

बलिः । प्रह्लादजस्य विरोचनस्य पुत्रः । भावि-मन्वन्तरस्येन्द्रः ।

भरतः । कैकेयीपुत्रः । लक्ष्मणानुजः । प्रद्युम्न-रूपिहरिणाऽऽविष्टः । चक्रमानी ।

मकराक्षः । खरासुरस्य पुत्रः । रामेण हतः ।

मण्डोदरी । मयसुता । रावणभार्या

मत्तः । रावणस्य मातृष्वस्रीयः । पार्वतीवरदर्पितः । हनुमता हतः ।

मन्थरा । अलक्ष्मीः कलिभार्या । ब्रह्मनिदेशाद् भूमौ जाता ।

मयः । दानवशिल्पी ।

महापार्श्वः । रावणमन्त्री । सुग्रीवहतः ।

महोदरः । रावणमन्त्री । सुग्रीवहतः ।

मारीचः । ताटकायाः सुन्देन जातः पुत्रः । रावणेरितो मृगरूपधारी रामेण हतः ।

मैनाकः । पक्षवान् पर्वतः । मेनातनयः । गिरि-जायाः सोदरः । वायुरक्षितः ।

मैन्दविविदौ । कपी अश्विनौ । कृष्णावतारे स्वं धाम गतौ । विविदः इन्द्रावेशी ।

यज्ञकोपः । ब्रह्मलब्धवरो रावणानुगो राक्षसः । माल्यवतस्तनयः । रामहतः ।

युद्धोन्मत्तः । पार्वतीवरदर्पितो राणवस्य मातृष्व-स्रीयः । हनुमता हतः ।

यूपनेत्रः । रावणमन्त्री । सुग्रीवहतः ।

रामः । दशरथकौसल्याभ्यां जातः । नारायणस्य साक्षादवतारः । सीतापतिः ।

रावणः । वैकुण्ठपालेन जयेनाऽविष्टो हिरण्य-कशिपुर्द्वितीयजन्मनि रावणो बभूव ।

लवः । रामसुतः । अग्न्यवतारभूतः ।

लवणः । मधुपुत्रोऽसुरः । शत्रुघ्नहतः ।

लक्ष्मणः । दाशरथिः । सुमित्रातनयः । भरता-ग्रजः । ऊर्मिळापतिः । शेषावतारभूतः । सङ्कर्षणस्य हरेरावेशवान् ।

वज्रदंष्ट्रः । रावणसेनापतिः । अङ्गदेन हतः ।

वसिष्ठः । सूर्यवंशस्य कुलगुरुः । वेदव्यासस्य प्रपितामहः । शक्तेः पिता ।

वाली । इन्द्रावतारभूतः । तारापतिः । सुग्रीवा-ग्रजः । रामहतः ।

विभीषणः । धार्मिको रावणसोदरः । कल्पान्त-जीवी ।

विदेहः । सीताया जनकः सीरध्वजनामा विदेह-भूपतिः ।

विद्युज्जिह्वः । रावणसचिवो राक्षसः । ब्रह्मवर-दृप्तः । रामहतः ।

विराधः । तुम्बुरुः शापेन विराधत्वेन जातः ।

विरूपनेत्रः । रावणमन्त्री । सुग्रीवहतः ।

विश्वकर्मा । देवशिल्पी । लङ्काद्वारकादिनिर्माता ।

विश्वामित्रः । कुशिकपौत्रः । गाधेः पुत्रः । तपसा ब्राह्मण्यं गतः ।

वृषः । उदानात्मा कपिः । कुबेरजः ।

शकुनिः । रावणस्य सचिवः । ब्रह्मवरदृप्तः । रामेण हतः ।

शतवलिः । वस्वंशभूतः कपिः ।

शत्रुघ्नः । दशरथसूनुः । भरतानुजः । मधुरापुरी-शासकः । पाञ्चजन्यशङ्खमानी । अनिरुद्धरूपिणा हरिणाऽविष्टः ।

शबरी । शच्या शप्ता अप्सराः ।

शरभङ्गः । हरिभक्तो दण्डकारण्यवासी मुनिः । रामपुरतस्तनुं त्यक्त्वा मुक्तिमाप ।

शुकः । रावणस्य स्पशः । ब्रह्मवरदृप्तः । रामेण हतः ।

शूर्पणखा । रावणभगिनी । कालकेयस्य विद्युज्जिह्वा-ख्यस्य प्रमादवशाद्धतस्य भार्या । अत एव विधवा द्वितीयपतिमार्गणतत्परा ।

श्वेतः । मरुत्स्वन्यतमः कपिः ।

श्वेतः । अनन्नयज्ञकृत् कश्चिद् वैदर्भो राजा । रामानुग्रहेण स्वार्तिमतिक्रान्तः ।

समुद्रः । वरुणः । महाभिषक् । शन्तनुश्च । ब्रह्मणा शप्तः । गङ्गापतिः । पश्चिमदिगीशः ।

सम्पातिः । जटायोरग्रजः पतगः । अरुणस्य पुत्रः ।

सम्पाती । मरुत्स्वन्यतमात्मा कपिः ।

सारणः । रावणस्य स्पशः । ब्रह्मवरदृप्तः । रामेण हतः ।

सिंहिका । छायाग्रहा राक्षसी । राहोर्माता ।

सीता । अयोनिजा । जनकपालिता । रामपत्नी ।

सुग्रीवः । सूर्यावतारः कपिराजः । वालिसोदरः ।

सुपार्श्वः । सम्पातिसुतः पतगः ।

सुप्तघ्नः । माल्यवतस्तनयः । ब्रह्मवरदृप्तः । रामेण हतः ।

सुबाहुः । उपसुन्दतनयः । रामेण हतः ।

सुमित्रा । दशरथभार्या । लक्ष्मणशत्रुघ्नयोर्जननी ।

सुरसा । नागमाता । काश्यपजाया ।


सुराणकाः । सीतापवादहेतवो राक्षसाः । ब्रह्मवर-गुप्ताः ।

सुषेणः । वरुणावतारः कपिः ।

हनुमान् । अञ्जनातनयः । वायोः प्रथमावतारः ।



परिशिष्टम् : २



श्लोकार्द्धानुक्रमणिका

[अत्र तन्त्रशास्त्रोदितो वर्णानुक्रमोऽनुसृतः । अतोऽत्र क्षकारोऽन्ते पठ्यते ।]

उ

ऊ

ऋ

ए

ऐ

ओ

औ

क

ख

ग

घ

च

द

म

र

व

ह

क्ष

—०—